न्यायदर्शनम्

भाष्य-वार्तिक-तात्पर्यटीका-वृत्तिसहितम्

NYĀYADARŚANAM

न्यायदर्शनम्

भाष्य-वार्तिक-तात्पर्यटीका-वृत्तिसहितम्

श्रीअमरेन्द्रमोहन तर्कतीर्थेन

तथा

श्रीतारानाथ न्यायतर्कतीर्थेन

संस्कृतम्

NYĀYADARŚANAM

with Vātsyāyana's Bhāṣya, Uddyotkara's Vārttika, Vācaspati Miśra's Tātparyaṭīkā & Viśvanātha's Vṛtti

CHAPTER I, SECTION I

CRITICALLY EDITED WITH NOTES

Taranatha Nyaya-Tarkatirtha

and

CHAPTERS I-ii-V

BY

Amarendramohan Tarkatirtha

WITH AN INTRODUCTION BY

Narendra Chandra Vedantatirtha

Munshiram Manoharlal
Publishers Pvt. Ltd.

MUNSHIRAM
MANOHARLAL
Rs 500.0

Second edition 1985

First Pulished in 1936-44 by
Metropolitan Printing & Publishing
House Limited. Calcutta
in Calcutta Sanskrit Series nos. 18 and 19

Published and printed by Munshiram Manoharlal Publishers Private
Limited, Post Box 5715, 54 Rani Jhansi Road, New Delhi 110055.

न्यायदर्शन-

प्रकरण-सूची

विषयानुक्रमणी

प्रथमेऽध्याये

प्रथमाह्निके

द्वितीयाह्निके

द्वितीयेऽध्याये

प्रथमाह्निके

द्वितीयाह्निके

तृतीयेऽध्याये

प्रथमाह्निके

द्वितीयाह्निके

चतुर्थाध्याये

प्रथमाह्निके

द्वितीयाह्निके

पञ्चमाध्याये

प्रथमाह्निके

द्वितीयाह्निके

PUBLISHERS' NOTE

We have the pleasure of coming out with Part II of Akṣapada Gautama's Nayadarshan containing a critical study of Nayasutra Chapters IV-V with Bhashya, Vattika, Tatparaya, Yatika, Vritti, Notes, Introduction, Miscellaneous indices.

We have published this Part II with the above Notes and commentaries on the Text, but we have found that the Tikadars do not understand the pure Sanskrit language and as such, their notes and commentaries are bound to be incorrect and misleading. In our opinion it is better to present the reading public with the bare text than to mislead them with in-accurate notes or commentaries thereon by our present day commentators. We hope that the reading public will appreciate the step that we propose to take in future.

On going through our Part I containing Chapters I-III, we find that on page 344 a small portion of the text has been inadvertently omitted. The same has been appended to this Part II, as an Errata at the end.

Calcutta,
August—1944.

PUBLISHERS.

प्रथमखण्डे
वृत्तौ ३४४ पृष्ठान्तिमपंक्त्यनन्तरमयमंशो योजनीयः

अत्र च 'वाद' इति लक्ष्यनिर्देशः। पक्षप्रतिपक्षौ विप्रतिपत्तिकोटी। तयोः परिग्रहस्तत्साधनोद्देश्यकोक्तिप्रत्युक्तिरूपवचनसन्दर्भः। एतावन्मात्रं च कथान्तरसाधारणमत आह—'प्रमाणे'त्यादि। प्रमाणतर्काभ्यां तद्रूपेण ज्ञाताभ्याम् साधनोपालम्भौ यत्र स तथा। उभयत्रापि प्रमाणादिसद्भावे कोटिद्वयस्यापि सिद्धिः स्यादतस्तद्रूपेण ज्ञाताभ्यामिति। ज्ञानमनाहार्यं विवक्षितम्। उपालम्भो दूषणम्। जल्पादौ तु प्रमाणाभासत्वादिना ज्ञाताभ्यामपि साधनोपालम्भौ भवत इति तद्वारणम्। इत्थं च प्रमाणाभासत्वप्रकारकज्ञानविषयकरणकसाधनोपालम्भयोग्यान्यत्वे सतीत्यर्थः। तेन तादृशजल्पविशेषे नातिव्याप्तिः। तत्र च निग्रहस्थानविशेषनियमार्थं सिद्धान्तेत्यादिविशेषणद्वयम्।

अन्ये तु—तदपि लक्षणघटकमेव, तदर्थश्च तावन्मात्रनिग्रहस्थानयोग्यत्वम्, तावदतिरिक्तनिग्रहस्थानोपन्यासायोग्यत्वं वा; निग्रहस्थानं प्रतिज्ञाहान्यादिकमेकं धृत्वा तदुपन्यासायोग्यत्वमिति निष्कर्षः; तेनोक्तजल्पविशेषवारणमित्याहुः।

'सिद्धान्ताविरुद्ध' इत्यनेनापसिद्धान्तोद्भावनम्। 'पञ्चावयवोपपन्न' इत्यनेन न्यूनाधिकोद्भावनमवयवाभासस्य दृष्टान्तासिद्ध्यादेश्चोद्भावनम्। प्रमाणेत्यनेन च प्रमाणाभासत्वेन हेत्वाभासानां तर्काभासस्य चोपन्यासो नियम्यते। तथाचात्र हेत्वाभासन्यूनाधिकापसिद्धान्तरूपनिग्रहस्थानचतुष्टयोद्भावनमिति वदन्ति।

वस्तुतस्तु वादस्य वीतरागकथात्वेन तत्त्वनिर्णयस्योद्देश्यतया पुरुषदोषस्याविज्ञातार्थादेरिव न्यूनाधिकयोरपि नोद्भावनमुचितम्। अतएव पञ्चावयवावश्यकत्वं भाष्यकारो नानुमेने। हेत्वाभासाद्युद्भावनेनापि च तदैव कथाविच्छेदो यदि हेत्वन्तरेणापि साधयितुं न शक्यते, इतरथा तु तद्धेतोरेव दुष्टत्वम्। इत्थं च 'पञ्चावयवोपपन्न' इति प्रायिकत्वाभिप्रायेणेति तत्त्वम्।

वादाधिकारिणस्तु—तत्वबुभुत्सवः प्रकृतोक्तिका अविप्रलम्भका यथाकालस्फूर्त्तिका *अनपेक्षका युक्तिसिद्धप्रत्येतारः। अनुविधेयस्थेयःसभ्यपुरुषवती जनता सभा। अनुविधेयो राजादिः। स्थेयान् मध्यस्थः। सा च वादे नावश्यकी, वीतरागकथात्वादिति ॥१॥

* 'अनाक्षेपका', इति पाठान्तरम्।

PREFACE

India is peculiarly rich in philosophical speculations. From the earliest time of the Ṛgveda, Indian seers were philosophically inclined and the results of their activities are found embodied prominently in the *Puruṣasūkta*, *Devīsūkta* and the *Sūktas* attributed to the great seer Dīrghatamas. The *Puruṣasūkta* and the *Devīsūkta* contain the germ of monistic idealism while the *Sūktas* ascribed to Dīrghatamas contain the germ of dualistic realism. Thus, in course of time, six well marked schools of philosophy arose in the field. Some of these systems were based on monistic idealism, while others, on dualistic realism; but all of them were founded on the Vedas and held the Vedas as the supreme authority. These systems of philosophy are generally known as the orthodox or *āstika* systems of Indian thought. Side by side, there arose, in course of time, some other systems of thought, that questioned the authority of the Vedas. These systems of Indian philosophy are generally known as the heterodox or *nāstika* systems. It deserves to be noted that the terms *āstika* and *nāstika* are not used with reference to these systems on the ground of their recognizing or not recognizing the existence of God, the highest ruler of the universe, but the supreme authority of the Vedas and the cycle of existence. The results of the orthodox way of Indian speculations are systematized in six well known books or sūtra works of Philosophy* : Nyāyasūtra, Vaiśeṣikasūtra, Sāṅkhyasūtra, Pātañjala or Yogasūtra, Pūrvamīmāṃsāsūtra and Uttaramīmāṃsā, Vedānta or Brahmasūtra. The results of the heterodox way of Indian speculations are found in the materialistic system of Cārvāka, nihilistic systems of the Buddhists and rationalistic system of the Jains. Laterly, other

---

* The curious reader will do well to read, re-read and inwardly digest the unique article *Bhāratīyavijñān o darśaner avasthā* in the editorial columns of "Bangasree" iii, 2. 1. pp. 127—141.

minor systems of philosophy (e. g. Pāśupata, Pūrṇaprajña) also arose in the field to support either the orthodox way or the heterodox way of thinking.

The chronology of these systems is merged in dark obscurity. No one can tell the exact date about which these systems were redacted in well marked treatises. Scholars, both eastern and western, have been trying to solve this question but all their researches in this direction have been merely a guess work for want of adequate historical data. Hence, there is no other alternative left to us than to suspend judgment about it at the present stage of our knowledge.

Now to begin with our subject of discourse. The Nyāya system of Indian philosophy is a system of dualistic realism, and like all other dualistic systems it has very likely been founded on a Ṛk. ascribed to the seer Dīrghatamas. The Ṛk. in question says,—'two birds, intimate friends, take shelter in the same tree. One of them eats the sweet berries, the other without eating perches, looking on' (*Dvā suparṇā sayujā sakhāyā*, etc. *Ṛgveda*, i. 164. 20). Here, we find a reference to the supreme soul and the individual soul. This Ṛk. is the authority on dualism. Dualistic philosophers have all taken recourse to this verse to distinguish the individual soul from the supreme entity. A still more clear reference to the germ of the Nyāya system of thought is found in another Ṛk. which says,—'I saw at a distance smoke coming from burning cow-dung. Yonder, by means of this I inferred the netherlying, and spreading *agni* (fire) by which afterwards I cooked sacrificial food, etc.' (*Śakamayaṃ dhūmam*, etc. *Ṛgveda*, i. 164, 43). Here, in this verse, it is indirectly said that wherever there is smoke, there is fire, showing that there is an *invariable* concomitance (*vyāpti*) between the two.

In the Nyāya system (as also, in other Indian logical systems) a syllogistic argument is generally advanced with the proposition—'the mountain is fiery, because of smoke' (*Parvato vahnimān dhūmāt*). Now, there is a marked similarity between

this Nyāya argument and the tone of argument advanced in the Ṛgvedic hymn referred to above. The argument that the Nyāya system of philosophy is based on the Ṛgvedic hymns revealed to the great seer Dīrghatamas thus becomes stronger.

The earliest exposition of the tenets of the Nyāya school is contained in a book of aphorisms called the *Nyāyasūtra*. According to Indian tradition the *Nyāyasūtra* is ascribed to Akṣapāda Gotama. We are, inspite of all researches carried on by modern scholars, still in the dark about the age and personality of this ancient sage and philosopher.

The name of the logician is Gotama and not Gautama. Gotama and Akṣapāda are not two different men but one and the same person. The sage Dīrghatamas of the *Veda*, *Mahābhārata* and the *Matsyapurāṇa* may be rightly identified with Gotama, the author of the *Nyāyasūtra* as he can be proved as the only person possessing the name of Gotama and surname of Akṣapāda, being himself born blind but afterwards provided with the power of sight by the divine cow, as the word *akṣa* means *born blind*, *pāda* is added to it in order to indicate *honourable personage* and *tama* means *sightlessness* that was removed by the celestial cow. Akṣapāda Gotama was an inhabitant of Mithilā (modern Darbhanga district of the province of Behar and Orissa). Akṣapāda Gotama, if rightly identified with Dīrghatamas, must belong much near to the Vedic Age. The *Nyāyasūtra*, as a whole, must have been composed by Akṣapāda Gotama himself. The Buddhistic allusions in the sūtras do not presuppose interpolation and a late redaction of the main work as mere allusions do not prove that those ideas were gaining ground after Śākyasiṃha Buddha. Buddhistic religion is very old, the mention of which is made in the Vedas and the Upaniṣads themselves. Thus, as there is no clue towards the view of Śākyasiṃha to be had in the whole range of the *Nyāyasūtra*, it is rather unjustifiable to maintain that it has undergone a later redaction after the time of Śākyasiṃha Buddha and after the Mādhyamika view of the Buddhists, but it

may be that the Mādhyamika theories themselves were developed on the basis of the Nyāya theories of Akṣapāda Gotama.

It may be convincingly proved that the real name of the founder of Indian logic cannot be Gautama but Gotama, as is evident from the writings of Śrīharṣa in the *Naiṣadhacharita* [XVII. 75] and Vācaspati Miśra in the *Nyāyasūcinibandha* [the concluding ślokas] in which there is no room left for any doubt about the correct name of the logician. The views of some western speculators and of Mm. Phanibhushana about this point may be fully and justly refuted. It may also be proved that Gotama and Akṣapāda are one and the same person on the authority of ancient Indian logicians like Vātsyāyana, Uddyotakara, Vācaspati Miśra and others, who distinctly take Gotama and Akṣapāda to be identical. The assumption of the late Mm. Dr. S. C. Vidyabhushana that Medhātithi Gautama and Akṣapāda are two different thinkers on Indian logic may be questioned on very sound and reasonable grounds. Rahūgaṇa Gotama of Mm. Vindhyeswari-prasad being really Gautama, a descendant of the original Gotama cannot be Akṣapāda Gotama, the real founder of the Nyāya system, nor can Akṣapāda Ahalyāpati Gautama be the founder of Nyāya, as he is not Gotama but Gautama. Gotama, the founder of Indian logic can be identified with the sage Dīrghatamas of the *Veda*, *Mahābhārata* and the *Matsyapurāṇa*, who may be rightly proved as having the name Gotama and the surname Akṣapāda. The accounts regarding the name Akṣapāda given in the introduction of Mm. Vindhyeswari-prasad's edition of *Nyāya-vārttika* and that of Mm. Phanibhushana's edition of *Vātsyāyana-bhāṣya* can be refuted. The ślokas quoted in the name of *Devī-purāṇa* by the latter on the authority of the instructions given by Srijut Panchanana Tarkaratna may be successfully shown as un-authentic inasmuch as they are contrary to facts and inconsistent in themselves. These ślokas are not to be found in any manuscript or printed edition, including one of Srijut Panchanana Tarkaratna himself.

Akṣapāda means *a blind sage* as the word *akṣa* signifies *blind* on the authority of the Ṛgveda, *Bhātvakṣasaḥ* (='bhā tu akṣasaḥ'), i. 143. 3 (vide, Lexicon *Śabdaratnāvalī*) and the word *pāda* is added to *akṣa* to show due respect to such a great personage who founded the Nyāya system. It is rather ugly to represent the author of Nyāya as simply *Akṣa* as it is explained by the fact that Raghunātha Śiromaṇi, the author of *Dīdhiti* on Gaṅgeśa's *Tattvacintāmaṇi* is known as Kāṇabhaṭṭa, being himself blind of one eye. Praśasta, the author of *Padārthadharmasaṃgraha*, a commentary on the *Vaiśeṣikasūtra* is known as Praśasta-pāda. Thus, it appears that *pāda*, *bhaṭṭa* etc., may be added to the name of a great personage out of regard for his distinguishing merits. Now, this Dīrghatamas was born blind; he was then favoured by a divine cow who dispelled his everlasting darkness by providing him with a pair of eyes. Thus he is rightly named Gotama and Akṣapāda. Rāhugaṇa, Ahalyāpati and Medhātithi Gautama may be a descendant of this Dīrghatamas, as all of them refer to the same person and none of whom can truly be an Akṣapāda. The founder of the Indian system of logic must be one, who may be known as both Akṣapāda and Gotama and Dīrghatamas being known as such must be the real author of the system. This view is based on serious thoughts and not on assumptions. This theory will supply materials to any historian of Indian logic or philosophy for time to come. We, on our part, feel inclined to think that this view about the founder of Indian logic must be true, as it is free from bias and based on ancient authors. If Dīrghatamas be the real author of the *Nāyasūtra*, he must have lived much near to the Vedic Age as he is mentioned in the Ṛgveda itself. His *Nyāyasūtra* must also belong to the same age, as there are internal and external evidences in that respect. It is rather unreasonable to think that the *Nyāyasūtra* is not the writing of Akṣapāda Gotama himself. If the man be found out, why should his system be in obscurity? We do not see why Akṣapāda Gotama should not have composed the sūtras about the doctrine he preached. It is rather unfair to bring everything down after Śākyasiṃha Buddha simply

because we cannot conceive of the remote past. It may be shown that the *Nyāyasūtra* was composed by Akṣapāda Gotama himself, as it was impossible for him to remain satisfied by simply giving an outline of the Nyāya doctrine in the first chapter leaving out the remaining four chapters to be supplied by another hand in a later period. It may be shown from the Buddhist and Jain works that the Mādhyamika theory of the 'Void' has not given rise to the discussion of *Śūnyavāda* in the *Nyāyasūtra*, but that the theory is an old one found even in the oldest Upaniṣads of the Vedic Age; the Buddhistic religion is also of a very old date, thus disproving the allusion of it in the *Nyāyasūtra* to be a valid cause of modernity instead of antiquity of the latter. The natural conclusion therefore is that the Vedic seer Dīrghatamas and Akṣapāda Gotama, the founder of the Nyāya system are one and the same person. We shall note down the results of the researches of different scholars and deal with the subject, at greater length, in our Introduction, later on.

Akṣapāda Gotama begins his *Nyāyasūtra* with an enumeration of as many as sixteen topics: (1) instrument of knowledge (*pramāṇa*), (2) object of knowledge (*prameya*), (3) doubt (*saṃśaya*), (4) object of desire (*prayojana*), (5) illustration (*dṛṣṭānta*), (6) dogma (*siddhānta*), (7) component members or parts of a reasoning of an argument (*avayava*), (8) argument by indirect proof, supposition or reasoning by *reductio ad absurdum* (*tarka*), (9) determination of a conclusion (*nirṇaya*), (10) dialectical elicitation of truth (*vāda*), (11) dialectic of sophistic triumph (*jalpa*), (12) dialectic of sophistic refutation (*vitaṇḍā*), (13) plausible reason, fallacious reasoning or apparent argument (*hetvābhāsa*), (14) refutation by equivocation or perversion of facts (*chala*), (15) refutation by false analogy and disparity or futility of argument (*jāti*) and (16) point of defeat (*nigrahasthāna*).

It should be noted in this connection that Gotama opens his *sūtra* with an enumeration of the subjects treated in the book i. e., with a table of contents. Every item of this table of contents

like the table of contents of any other book may be reduced to one or other of the six (or seven) categories of the Vaiśeṣika. The curious reader will find such attempts made in the *Dinakarī*, etc.

There are separate editions of Akṣapāda Gotama's *Nyāya-sūtra*, Vātsyāyana's *Bhāṣya*, Uddyotakara's *Vārttika*, Vācaspati Miśra's *Tātparyaṭīkā* and Viśvanātha's *Vṛtti*, but there is hardly any critical edition of them systematically arranged together to help a comparative study. The editors, here, have tried their best to attain this desideratum.

The present edition is based on the following materials :

1. Vātsyāyana's *Bhāṣya* :

ल (*la*)—ed. Laksman Sastri, Chowkhamba, Benares.

ग (*ga*)—ed. Gangadhar Sastri, Benares.

ज (*ja*)—ed. Jaynarain Tarkapanchanan, Asiatic Society of Bengal, Calcutta.

झा (*jhā*)—ed. Ganganatha Jha, Chowkhamba, Benares.

फ (*pha*)—ed. Phanibhushana Tarkavagisha, Bangiya Sahitya Parishat, Calcutta.

B. & T.—The manuscripts, noted in his personal copy, by Prof. Vanamali Vedantatirtha, M.A., 8/4E, Nepal Bhattacharya Lane, Kalighat, Calcutta.

2. Uddyotakara's *Vārttika* :

क (*ka*)—ed. Vindhyeswari Dwivedi, Chowkhamba, Benares.

ख (*kha*)—ed. Vindhyeswari Dwivedi, Asiatic Society of Bengal, Calcutta.

3. Vācaspati Miśra's *Nyāyavārttika-Tātparyaṭikā* :

क (*ka*)—ed. Gangadhar Sastri, Benares.

ख (*kha*)—ed. Rajeswar Sastri, Chowkhamba, Benares, compared by the present editors with the available portions of the manuscript, belonging to the Asiatic Society of Bengal, Calcutta.

4. Viśvanātha's *Vṛtti* :

नि (*ni*)—ed. Nilmani Vidyalankara, Calcutta.

भ (*bha*)—ed. Bhagavat Prasad, Benares.

ल (*la*)—ed. Laksman Sastri, Chowkhamba, Benares.

The whole work is planned in two volumes :

(1) The Nyāyasūtra—chapters I—III, with Vātsyāyana's Bhāṣya, Uddyotakara's Vārttika, Vācaspati Miśra's Tātparyaṭikā, Viśvanātha's Vṛtti, Notes and Preface.

(2) The Nyāyasūtra—chapters IV-V, with Bhāṣya, Vārttika, Tātparyaṭikā, Vṛtti, Notes, Introduction, miscellaneous indices and Vācaspati Miśra's Nyāyasūcinibandha.

We shall be failing in our duty if we do not express our heartiest thanks to Dr. Amareswar Thakur of the Calcutta University and formerly General Editor of the Series, who did much for the publication of this work.

Finally, we may hope that the readers will excuse us for any imperfection they may notice and specially for misprints that have crept in.

Calcutta,
March, 1936 } Narendra Chandra Bhattacharya

न्यायसूत्रप्रणेता गोतमः

न्यायसूत्रविरचयितृनिर्णयविषयमधिकृत्यानेकैर्विद्वद्भिः स्वं स्वं मतमनुरुध्य सिद्धान्तः प्रादर्शि। तस्यैव युक्तायुक्तत्वप्रदर्शनमुखेनास्य प्रबन्धस्य प्रवृत्तिः। तत्र न्यायसूत्राणां प्रणेता कश्चनाक्षपादनामा महर्षिरित्यस्मिन् विषयेऽन्येषामिवास्माकमपि सम्मतिः। तस्यैव महर्षेरपरं नाम कुत्रचन गौतम इति प्रयुज्यते, कैश्चन पुनर्गोतम इत्युच्यते। एतद्विषये वेद-महाभारत-मत्स्यपुराणादीन्युपादाय गोतमवचनमेव प्रामाणिकं न गौतमवचनमिति वक्ष्यामः। स चाक्षपादो गोतमो वेदप्रोक्तदीर्घतमा नाम महर्षिरेव। तस्य चावासो मिथिलासु, खृष्टाब्दतः पूर्वं कालस्तस्य। तदानीं तेनर्षिणोक्तसूत्राणि विरचितानीति वेदवच्चिरन्तनान्येवैतानि। न्यायदर्शनस्याध्यायपञ्चकमध्ये प्रथम एवाध्यायोऽक्षपादमुनिविरचितो द्वितीयाद्यध्यायचतुष्टयं तु परस्तात् केनचन निर्माय संयोजितमिति मतं नैव विचारसहमिति विदितमेवास्ति विदुषाम्।

तत्र गोतमनामविषये प्रोच्यते यदक्षपादनामवशतः सूत्रप्रणेतुर्गोतमनामभागितैव, न तु गौतमनामवत्त्वमिति। अक्षपादशब्दे चाक्षेति पादेति च शब्दद्वयम्। तत्राद्यस्यार्थो जात्यन्धः (ऋग्वेद० १,१४३,३), परस्य च गौरवार्थत्वं पितृपाद गुरुपादादिवत्। जात्यन्धश्च दीर्घतमा नाम ऋषिर्वेदादितो दीर्घतमोनामतश्च लभ्यत इति तस्यैवाक्षेत्यनेन बोधः, तस्य चादरार्थमेव पादपदसम्बन्धः। यत्त्वत्र कैश्चनाक्षशब्दस्य नेत्रपरत्वं पादशब्दस्य च चरणपरत्वमुपादाय यस्य पादेऽक्षि सोऽक्षपाद इति तन्नामार्थोऽभिधीयते तदयुक्तम्, तथात्वे प्रोक्तपदे व्यधिकरणबहुव्रीहिस्वीकारापत्तेस्तत्स्वीकारेऽप्यक्षपादपदानिष्पत्तेश्च। तथा चाक्षपादो दीर्घतमाः, स च गवा देव्या प्रदत्तदृष्टिरिति गोतमशब्दाभिधेयो गोतम-गोत्रीयो महर्षिविशेष इति 'गोतम'शब्द एवात्रोचितो न तु 'गौतम' इति।

यस्तु जनकानां पुरोहितः शतानन्दो गौतमो रामायणोपवर्णितः, स बृहदारण्यके जनकपुरोहितो राहूगणो गौतम इति वचनाद्रहूगणाख्यगोतमपुत्रः, रहूगणश्च गोतमगणे दशविधानां गोत्राणां मध्ये सप्तमशाखीयः, दीर्घतमाश्च तत्र चतुर्थशाखीयः। स च पूर्वं पूर्वगणः पश्चादुत्तरगणः इत्यौत्सर्गिककल्पनावशतो रहूगणतः पूर्वकालिकोऽक्षपादश्चेति स एव न्यायसूत्रप्रणेता।

यद्यपि स्कन्दपुराणवचनतो गौतम एवाक्षपादोऽहल्यापतिश्चेत्युपलभ्यते, तथापि तस्याक्षपादत्वं तत्राप्रासङ्गिकमित्यप्रमाणम्, प्रामाण्येऽपि वा तस्याक्षपादगोत्रीयतया

तच्छब्दयुक्तत्वं जनकगोत्रीयाणां जनकशब्दवत्। एतस्याक्षपादनामदर्शनतोऽपि न्यायसूत्र-प्रणेतृत्वं वर्णयितुमशक्यम्, तथा सति ह्यक्षपादो गौतम एव न्यायसूत्र-प्रणेतेत्यापद्येत, तच्च बहुग्रन्थविरुद्धम्। स्वीक्रियते च सर्वैरक्षपादो गौतमो न्यायसूत्रप्रणेतेति।

यत्तु "सप्तमीविशेषणे बहुव्रीहा"विति पाणिनिसूत्रेणाक्षपादशब्दे व्यधिकरण-बहुव्रीहिः समर्थ्यते तदपि न सङ्गच्छते। तथा हि—"वा प्रियस्य" इत्युत्तरसूत्रे (वार्त्तिक)-विकल्पविधानात् "सप्तमीविशेषणे बहुव्रीहा"वित्यत्र पूर्वनिपातस्य नित्यता-वश्यमेवाङ्गीकार्या। तेनाक्षं पादे यस्येति विग्रहे 'पादेऽक्ष' इत्येवं पदं स्यात् न त्वक्षपाद इति। 'पद्मनाभ' इत्यादावपि व्यधिकरणबहुव्रीहिर्न पाणिनिसम्मतः। "गड्वादेः परा सप्तमी" इति सूत्रव्याख्यानावसरे तत्त्वबोधिनीकृता—"आदिशब्दः प्रकारवाची, तेन पद्मं नाभौ यस्य पद्मनाभः, ऊर्णा नाभौ यस्य ऊर्णनाभ इति सिध्यतीत्याहुः"—इत्येवं परमतमुल्लिख्य पश्चात् समासान्तप्रकरणे—"पद्माकारा नाभिरस्य इति वा, एवमूर्णनाभोऽपि ज्ञेयः" इत्येवं स्वमतमुपन्यस्तम्। अत एवाक्षं पादे यस्येति विग्रहे—अक्षपाद इत्येवं पदं कथमपि न स्यादिति सुविदितमेव सिद्धान्तकौमुदीविदाम्।

न कुत्राप्यपौरुषेयाणां वेदानां निर्माणकालः कीर्त्तितः। वेदोक्तानां मन्त्राणां ब्राह्मणानाञ्च निर्माणकालं कल्पयद्भिः प्रकटिता परप्रत्ययनेयबुद्धिता। अतएव दीर्घतमसो न्यायसूत्रे वेदब्राह्मणादिष्वपौरुषेयेषु कीर्त्तितानामर्थवादादीनां सद्भावेऽपि न कश्चिद्दोषः स्यात्।

अयमुशिजस्य पुत्रो न तूशिजः पुत्रः। मत्स्यपुराणोक्तमुपाख्यानं यथा—

४८ शाध्याये—

"अथोशिज इति ख्यात आसीद् विद्वान् ऋषिः पुरा।
पत्नी वै ममता नाम बभूवास्य महात्मनः"॥ इत्यादि

१६६ तमाध्याये—

"मरीचितनया राजन् सुरूपा नाम विश्रुता।
भार्या चाङ्गिरसो देवास्तस्याः पुत्रा दश स्मृताः॥
....
सुरूपा जनयामास ऋषीन् सर्वेश्वरानिमान्।
बृहस्पतिं गोतमञ्च संवर्त्तमृषिमुत्तमम्॥
उतथ्यं वामदेवञ्च अयस्यमुशिजन्तथा।
इत्येते ऋषयः सर्वे गोत्रकाराः प्रकीर्त्तिताः॥
....

न्यार्षेयाः प्रवराश्चैव तेषाञ्च प्रवरान् शृणु ।
अङ्गिराः सुवचोतथ्य उशिजश्च महान् ऋषिः" ॥

इत्येतेन दृश्यते—अङ्गिरसः पत्नी सुरूपा बृहस्पतिगोतमसंवर्त्तोतथ्यवामदेवायस्योशिजनामकान् पुत्रान् सुषुवे । उशिजस्य पत्नी ममता दीर्घतमसं पुत्रं प्रासोष्ट । अस्यैव दीर्घतमसः पुत्रः काक्षीवानिति प्रोक्तं मत्स्यपुराणे । ऋग्वेदे तु "याभिः सुदानू औशिजाय" इत्यादिमन्त्रे—'औशिजाय' इत्यस्य व्याख्याने—"उशिक्संज्ञा दीर्घतमसः पत्नी, तस्याः पुत्रो दीर्घश्रवा नाम कश्चिद् ऋषिः.... ....उशिजः पुत्रं स्तोतारं कक्षीवन्तमेतत्संज्ञमृषिम्"—इत्यादिकमुक्तं भाष्यकृता । न च मत्स्यपुराणे उशिजर्षेः पुत्रो दीर्घतमा इत्युच्यते चेत् श्रुतिविरोधे तस्यानादरणीयत्वमेवेति वाच्यम् । सुरूपातनयस्योशिजस्य महर्षेः पुत्रो दीर्घतमाः, तस्य पत्नी उशिक्संज्ञा काचिन्नारी कक्षीवन्तं पुत्रं सुषुवे । अत्र न विद्यते वेदपुराणयोर्विरोधशङ्कापि (ऋग्वेद० १, १५८, ६ ; महाभारत० १, १०४, ६-२२ ; मत्स्यपुराण० ४८ ३२) । वरमन्यत्र "तद् वां नरा शंस्यं पज्रियेण कक्षीवता" इत्यादिश्रुतिव्याख्याने—प्रोक्तं तावद् भाष्यकृता—"पज्राणामङ्गिरसां कुले जातेन कक्षीवता मया वां युवयोः सम्बन्धि तत् कर्म शंस्यमिति ।" अतएव अङ्गिरसः पुत्र उशिजः, तस्य पुत्रो दीर्घतमाः, दीर्घतमसः पुत्रः कक्षीवान् इति सर्वमवदातं वेदपुराणसम्मतमिति । न चैवं दीर्घतमसः स्वयं स्वदृष्टमन्त्रेषु उचथ्यपुत्रत्वेनात्मनो निर्देशो विरुध्यत इति वाच्यम्, उचथ्योशिजयोरभिन्नत्वात् । परन्तु—बृहस्पतिगोतमसंवर्त्तोतथ्यवामदेवायस्याः उशिजभ्रातरो दीर्घतमसः पितृव्या इत्युपलभ्यते मत्स्यपुराणादिषु । यदि त्वयं दीर्घतमसः पितृव्य उतथ्यो वेदमन्त्रेषु उचथ्यनाम्ना कीर्त्तितस्तदा तत्रापि न विरोधो वेदोक्तस्य कक्षीवतः पुराणे काक्षीवानिति साकारनामदर्शनात् ।

अक्षपादगोतमस्य मूलभूतगोतमत्वं माऽस्तु । मत्स्यपुराणे प्रदर्शितं दीर्घतमसो व्युत्पन्नं गोतमत्वम्,—"गोऽभ्याहते तमसि वै गोतमस्तु ततोऽभवदि"ति दर्शनात् । सुरूपातनयस्य गोतमस्य भ्रातुष्पुत्रोऽपि दीर्घतमा गोऽभ्याहते तमसि गोतमनाम्ना ख्यातो बभूव । अतस्तस्यापि मुख्यगोतमत्वं सिद्धम् । अन्येषान्तु सुरूपातनयानुजन्मनां गौतमत्वमेव ।

यदुच्यते—"गौर्वाक् तयैव तमयन् परान् गोतम उच्यते ।
गोतमान्वयजन्मेति गौतमोऽपि स चाक्षपात् ॥" इत्यादि—

तन्नोपलभ्यते मुद्रिते देवीपुराणे, न चातिप्राचीनेऽपि हस्तलिखिते ग्रन्थे। सर्वत्रैव लिपिकरप्रमादो मुद्राकरप्रमादश्चेत्यप्यश्रद्धेयम्। अतएवास्यानुपलम्भ एवाप्रामाण्यकारणमिति।

एतदप्यतिविस्मयकरमस्माकं मनसि प्रतिभाति—यदक्षशब्दस्य जात्यन्धवाचकत्वमनङ्गीकुर्वद्भिरवगिलिता वाचस्पत्यादीनामप्यतिविशालकोषाः। अभूमप्रयुक्तपादशब्देऽपि कटाक्षनिक्षेपैस्तरक्षुकुक्षावाक्षिप्तानि कातन्त्रपाणिनीयादीनि व्याकरणानि च। आदरार्थे प्रयुक्तस्य पादशब्दस्य बहुवचनप्रयोगनियमः कुत्रापि व्याकरणे नोपलभ्यते।

असमग्रदर्शिभिरादरार्थे प्रयुक्तस्य पादशब्दस्यैकवचनान्तता नैवावलोकिता। किन्तु विद्वद्भिः सदैव दृश्यते एकवचने बहुवचने च प्रयोगबाहुल्यमस्य।

यथा –"गुरून् पर्यायतो नत्वा विषमस्थलटिप्पनीम्।
कुर्वे प्रशस्तपादस्य यथामति समासतः॥"

प्रशस्तपादभाष्यविवरणम् (१ पृः)

संस्कृतसाहित्यपरिषत्प्रकाशितायां प्रशस्तपादभाष्यभूमिकायाम्—

"प्रशस्तपादस्य नामसम्बन्धी विचारः प्रवर्त्तते। .... प्रशस्तपादो वा प्रशस्तकरपादो वा प्रशस्तदेवाचार्यो वेति। .... कर-पाद-चरण-देवादिशब्दास्तु पितृपाद-गुरुपादादिशब्दवत् सम्मानविशेषद्योतका एव।"

प्रशस्तपादभाष्यभूमिका (८।९ पृः)

अक्षपाद-शब्दस्यापि न केवलमेकवचने बहुत्वेऽपि प्रयोगो दृश्यते—

तथा हि—"अक्षपादाः नैयायिकास्तेषां मते" इति—

मणिभद्रटीका षड्दर्शनसमुच्चयस्य।

अतएव, वेद-भारत-पुराणोक्तो दीर्घतमा एव न्यायदर्शनकृद् अक्षपाद-गोतम इति। विस्तरस्तु अस्मत्प्रणीते "अक्षपादगोतम"ग्रन्थे, "न्यायदर्शनेतिहास"ग्रन्थे चावगन्तव्य इति। शम्।

श्रीनरेन्द्र-चन्द्र देवशर्मा

ॐ नमः परमात्मने

भाष्य-वार्त्तिक-तात्पर्य्यटीका-वृत्तिभिः समलङ्कृतम्

न्यायदर्शनम्

वात्स्यायनभाष्यम्

प्रमाणतोऽर्थप्रतिपत्तौ प्रवृत्तिसामर्थ्यादर्थवत् प्रमाणम् ।

न्यायवार्त्तिकम्

यदक्षपादः प्रवरो मुनीनां शमाय शास्त्रं जगतो जगाद ।
कुतार्किकाज्ञाननिवृत्तिहेतुः करिष्यते तस्य मया निबन्धः ॥

प्रमाणादिपदार्थतत्त्वज्ञानान्निःश्रेयसाधिगम इत्येतच्छास्त्रस्यादिसूत्रं तस्याभिसम्बन्धवाक्यम् । प्रमाणतोऽर्थप्रतिपत्तावित्येवमादि (१) तस्यानुसन्धानवाक्यं, शास्त्रस्य पुरुषश्रेयोऽभिधायकत्वात् ।

न्यायवार्त्तिकतात्पर्य्यटीका

विश्वव्यापी विश्वशक्तिः पिनाकी विश्वेशानो विश्वकृद्विश्वमूर्त्तिः ।
विश्वज्ञाता विश्वसंहारकारी विश्वाराध्यो राधयत्वीहितं नः ॥ १ ॥

नमामि धर्मविज्ञानवैराग्यैश्वर्य्यशालिने ।
निधये वाग्विशुद्धीनामक्षपादाय तायिने (२) ॥ २ ॥

ग्रन्थव्याख्याच्छलेनैव निरस्ताखिलदूषणा ।
न्यायवार्त्तिकतात्पर्य्यटीकाऽस्माभिर्विधास्यते ॥ ३ ॥

इच्छामि किमपि पुण्यं दुस्तरकुनिबन्धपङ्कमग्नानाम् ।
उद्द्योतकरगवीनामतिजरतीनां समुद्धरणात् ॥ ४ ॥

अथ भगवताऽक्षपादेन निःश्रेयसहेतौ शास्त्रे प्रणीते, व्युत्पादिते च भगवता पक्षिलस्वामिना, किमपरमवशिष्यते यदर्थं वार्त्तिकारम्भ इति शङ्कां निराचिकीर्षुः सूत्रकारोक्तप्रयोजनानुवादपूर्वकं वार्त्तिकारम्भप्रयोजनं दर्शयति—यदक्षपाद इति ।

---

(१) 'प्रतिपत्तावित्यादि' इति तात्पर्य्यसम्मतः पाठः । (२) 'तापिने' इति क-पुस्तकपाठः । किन्तु "तायी तत्त्वाध्यवसायसंरक्षणक्षमसम्प्रदायप्रवर्त्तक" इत्यत्र परिशुद्धिव्याख्यानदृष्ट्या अर्थसङ्गतया च "तायिने" इत्येव पाठः परिगृहीतः ।

न्यायवार्त्तिकतात्पर्य्यटीका

यद्यपि भाष्यकृता कृतव्युत्पादनमेतत्तथापि दिङ्नागप्रभृतिभिरर्वाचीनैः कुहेतुसन्तमससमुत्थापनेनाच्छादितं शास्त्रं न तत्त्वनिर्णयाय पर्याप्तमित्युद्द्योतकरेण स्वनिबन्धोद्द्योतेन तदपनीयत इति प्रयोजनवाक्यमारम्भ इति। सूत्रोक्तप्रयोजनानुवादः प्रयोजनवच्छास्त्रव्युत्पादनेन स्वनिबन्धस्य प्रयोजनवत्तां प्रेक्षावत्प्रवृत्त्यङ्गं दर्शयितुं व्युत्पादनमात्रस्य काकदन्तपरीक्षाग्रन्थसाधारण्येन प्रेक्षावत्प्रवृत्त्यनङ्गत्वात्। अत्र चैकविंशतिप्रभेदभिन्नस्य (१) दुःखस्यात्यन्तिकी निवृत्तिः शमः, तस्मै। कस्य—"जगतः"। परमकारुणिको हि मुनिर्जगदेव दुःखपङ्कमग्नमुद्दिधीर्षुः शास्त्रं प्रणीतवान्। तत्र यदि कश्चिन्न प्रवर्त्तेत किमायातं शास्त्रस्य। न वाऽनधिकृतव्युत्पादनेनास्य तपोनिधेः कश्चिद्दोषः। तथा च विश्वामित्रस्त्रिशङ्कुं याजयामास, वसिष्ठश्चाधमयोनिजामक्षमालामुपयेमे। तपःप्रभाव एव हि तादृशस्तेषां यत एवंविधाः पाप्मानो विलीयन्त इति। न चास्मदादीनां मन्दतपसामयं प्रसङ्गः। न हि गजानामुदर्य्यं तेजो वटकाष्ठमशितं पचतीत्यस्मदादीनामप्युदर्य्येण तेजसा तथा भवितव्यम्। कुतार्किकैर्दिङ्नागप्रभृतिभिराहितमज्ञानं कुतार्किकाज्ञानमिति।

अविगीतशिष्टाचारपरम्पराप्राप्तः परमशिष्टेन वार्त्तिककृता कृतोऽपीष्टदेवतानमस्कारो ग्रन्थे न निवेशितः, न खल्वन्यदपि मङ्गलं शास्त्रे निवेशितम्, प्रसिद्धतरतया मङ्गलान्तरवच्छिष्या अवगमिष्यन्तीति सर्वमवदातम्।

तत्र संक्षेपतः प्रथमसूत्रमनूद्य तस्य तात्पर्य्यमाह—**प्रमाणादिपदार्थतत्त्वज्ञानान्निःश्रेयसाधिगम इत्येतच्छास्त्रस्यादिसूत्रम्। तस्य शास्त्रस्य अभिसंबन्धवाक्यम्।** आदिग्रहणेन क्रमप्राप्तस्यैव प्रथमं व्याख्यानं युक्तं न द्वितीयादेरिति दर्शितम्। अभिमतसंबन्धोऽभिसंबन्धः शास्त्रनिःश्रेयसयोर्हेतुहेतुमद्भावः, तस्येदं सूत्रं वाक्यमभिसंबन्धवाक्यम्। प्रमाणादिपदार्थतत्त्वज्ञानादित्यत्र हि तत्त्वं ज्ञायतेऽनेनेति व्युत्पत्त्या तत्त्वज्ञानं शास्त्रमुच्यते। पञ्चम्या च तस्य हेतुत्वम्। न हि विषघ्नमन्त्रवत् स्वान्वयमात्रेण तदविवक्षितार्थं निःश्रेयसहेतुरिति पदार्थतत्त्वावगमकरणतया शास्त्रमुपदिशति न तु स्वरूपेण। तेन शास्त्रस्य निःश्रेयसे कर्त्तव्ये प्रमाणादितत्त्वावगमोऽवान्तरव्यापार इत्युक्तं भवति। तथा च प्रमाणादिपदार्थतत्त्वं प्रतिपाद्यं, प्रतिपादकं च शास्त्रमिति शास्त्रप्रमाणादिपदार्थतत्त्वयोर्ज्ञाप्यज्ञापकभावः प्रमाणादिपदार्थतत्त्वज्ञाननिःश्रेयसयोः कार्य्यकारणभावलक्षणश्च संबन्धः सूचितो भवति। तदिदमभिधेयसंबन्धप्रयोजनप्रतिपादनार्थत्वं प्रथमसूत्रस्य। यत्पदार्थतत्त्वज्ञानस्य च यथा निःश्रेयसाधिगमं प्रत्युपयोगस्तथाऽग्रे निवेदयिष्यते (२)। विनिश्चिताप्तभावाश्च मुनेराप्तत्वेन तद्वाक्यात्प्रयोजनादि विनिश्चित्य प्रवर्त्स्यन्ति, आप्तत्वानिश्चये त्वर्थसन्देहात्। न खलु

(१) ६ पृ. वार्त्तिकस्य द्वितीयपङ्क्तिर्द्रष्टव्या। (२) अस्यैव सूत्रस्य वार्त्तिके "तत्र प्रमाणादिपदार्थतत्त्वज्ञानात्" इत्यादिना "प्रमाणादितत्त्वज्ञानात्" इत्यन्तेन ग्रन्थेन, स्वयञ्च (तात्पर्यटीकाकृता) "एतदुक्तं भवति" इत्यादिना।

न्यायवार्त्तिकतात्पर्य्यटीका

कृष्यादावपि निश्चितशस्याधिगमानां प्रवृत्तिः। अन्तराऽवग्रहादिना प्रतिबन्धेन फलानुत्पादस्यापि सम्भवात्। न च प्रयोजनादिसंशयाभावेऽपि संशयस्य साधकबाधकप्रमाणाभावेन न्यायप्रवृत्तेस्त्वेन तदभिधानमनर्थकमिति सांप्रतं विशेषस्मृत्यनपेक्षस्य संशयस्यानुत्पादात्। वाक्यात्तु विशेषस्मृतिरिति नानर्थक्यम्।

तदेवं प्रथमसूत्रतात्पर्य्यमुक्त्वा भाष्यस्यादिवाक्यतात्पर्य्यमाह—प्रमाणतोऽर्थप्रतिपत्तावित्यादि तस्यानुसन्धानवाक्यम्। तस्य शास्त्रस्य, निःश्रेयसाधिगमेन सह सूत्रेण घटितस्य, कुतश्चिन्निमित्ताद्विघटनाशङ्कायाम् अनु सूत्रघटनायाः पश्चात्, सन्धानं घटनम् अनुसन्धानं, तस्य वाक्यमनुसन्धानवाक्यमिति।

एवं किलात्र शङ्क्यते—यदशक्यानुष्ठानोपायोपदेशकं तदनर्थकं, यथा ज्वरहरतक्षकचूडारत्नाहरणोपदेशकं वाक्यम्। तादृशञ्चेदं शास्त्रमिति। तथा हि प्रमेयादीनां तावत्पदार्थानां तत्त्वज्ञानं प्रमाणतत्त्वज्ञानाधीनम्, न हि प्रमाणं तत्त्वेनानवधारितं बोधकत्वमात्रेण स्वगोचरावधारणायालम्, तावन्मात्रस्य तदाभाससाधारण्यात्। अपि तु बोधकत्वैकार्थसमवेतेनाव्यभिचारित्वेन। तदेव हि प्रामाण्यं तच्चाशक्यावधारणम्। तदनवधारणाच्च प्रमेयादयो दुरवधारणाः। तथा हि विज्ञानस्य तावत्प्रामाण्यं स्वतो वा निश्चीयते परतो वा? न तावत्पूर्वः कल्पः। न खलु विज्ञानमनात्मसंवेदनमात्मानमपि गृह्णाति प्रागेव तत्प्रामाण्यम्। नापि विज्ञानान्तरम्। तद्विज्ञानमित्येव गृह्णीयान्न पुनरस्याव्यभिचारित्वम्। ज्ञानत्वमात्रञ्च तदाभाससाधारणमिति न स्वतः प्रामाण्यावधारणम्। एतेन स्वसंवेदननयेऽप्यव्यभिचारग्रहणं प्रत्युक्तम्। नापि परतः। परं हि तद्गोचरं वा ज्ञानमभ्युपेयेत अर्थक्रियानिर्भासं वा ज्ञानान्तरं तद्गोचरनान्तरीयकार्थान्तरदर्शनं वा। तच्च सर्वं स्वतोऽनवधारितप्रामाण्यमाकुलं सत् कथं पूर्वं प्रवर्तकं ज्ञानमनाकुलयेत्। स्वतो वाऽस्य प्रामाण्ये किमपराद्धं प्रवर्तकज्ञानेन येन तस्मिन्नपि तन्न स्यात्। न च प्रामाण्यं ज्ञायते स्वत इत्यावेदितम्(१)। यदा च संवेदनप्रामाण्यमुक्तेन क्रमेण दुरधिगमं तदा कैव कथेन्द्रियादीनामव्यभिचारिसंवेदनकार्यव्यङ्ग्यप्रमाणभावानाम्। तदेवं दृष्टार्थाः प्राणभृद्व्यवहारा भवन्तु, संदेहादपि यथा तथा, अदृष्टार्थास्तु बहुवित्तव्ययायाससाध्या वैदिका व्यवहारा दत्तजलाञ्जलयः प्रसक्ताः, तस्मात् प्रमाणादिपदार्थतत्त्वज्ञानद्वारेण न शास्त्रं निःश्रेयसेन संबध्यत इति सेयमाशङ्का प्रामाण्यज्ञानोपायकथनेन भाष्यकृता निराकृता। तथाहि प्रमाणम् अर्थवदिति, नित्ययोगे मतुप्। नित्यता चाव्यभिचारिता। तेनार्थाव्यभिचारीत्यर्थः। इयमेव चार्थाव्यभिचारिता प्रमाणस्य, यद्देशकालान्तरावस्थान्तराविसंवादोऽर्थस्वरूपप्रकारयोस्तदुपदर्शितयोः। अत्र हेतुः प्रवृत्तिसामर्थ्यात्, समर्थप्रवृत्तिजनकत्वात्। यदि पुनरेतदर्थवन्नाभविष्यन्न समर्थां प्रवृत्तिमकरिष्यद् यथा प्रमाणाभास

(१) स्वयमेव पञ्चपङ्क्तितः पूर्व्वमेव।

न्यायवार्त्तिकम्

शास्त्रं पुनः प्रमाणादिवाचकपदसमूहो व्यूहविशिष्टः, पदं पुनर्वर्णसमूहः, पदसमूहः सूत्रं, सूत्रसमूहः प्रकरणं, प्रकरणसमूह आह्निकम्, आह्निकसमूहोऽध्यायः, पञ्चाध्यायी शास्त्रम् । तत्पदार्थाः प्रमाणादयः, तस्य शास्त्रस्य पदानामर्थाः प्रमाणादयः षोडशात्मानः । तच्छास्त्रं पुरुषश्रेयोऽभिधत्ते ।

न्यायवार्त्तिकतात्पर्य्यटीका

इति व्यतिरेकी हेतुः, अन्वयव्यतिरेकी वा, अनुमानस्य स्वतः(१) प्रमाणतयाऽन्वयस्यापि सम्भवात् । प्रवृत्तिजनकत्वं तु प्रमाणस्य न साक्षात् किं त्वर्थप्रतिपत्तिजननद्वारेणेत्याह—प्रमाणतोऽर्थप्रतिपत्ताविति । सर्वस्य चास्योपपत्तिं वार्त्तिकव्याख्यानावसरे निवेदयिष्यामः ।

स्यादेतत् । भवन्तु प्रमाणादयः शक्यज्ञानाः शास्त्रेण तु ते नाभिधीयन्त इति न निःश्रेयसेन संगतिः शास्त्रस्येत्यत आह—शास्त्रस्य पुरुषश्रेयोऽभिधायकत्वात् । यद्यपि श्रेयो दुःखनिवृत्तिमात्यन्तिकीं वक्ष्यति तथापि सोपायैव साऽत्र श्रेयःशब्देन विवक्षिता तन्मात्रस्य शास्त्राविषयत्वात् । तदयमर्थः । शास्त्रं तावदेतत् पुरुषश्रेयोऽभिधत्ते सहोपायेनेत्यनुभवसिद्धं सदशक्यानुष्ठानतयाऽपवदितव्यम् । सा चेदशक्यानुष्ठानताऽपनीता प्रमाणत इत्यादिना संहितं निःश्रेयसेन सह शास्त्रमिति । शास्त्रस्येत्यादि ग्रहणकवाक्यं विवृणोति—शास्त्रं पुनरित्यादिना उपभोगात्प्रत्ययेणेत्यन्तेन । प्रमाणादिवाचकपदग्रहणेन तल्लक्षणानि तत्परीक्षाश्चोपलक्षयति, तथा च पञ्चाध्यायी शास्त्रमित्युक्तमित्यविरोधः । पञ्चाध्यायीत्यनेन व्यूहः समूहिनामुचितानुपूर्वी । उपलक्षकपदस्वरूपमाह—पदं पुनरिति । एकस्मृतिसमारूढा वर्णा एकार्थप्रतिपादनावच्छिन्नाः समूहः । एवं स्वार्थस्मृत्यवान्तरव्यापाराणां सूत्रपदानां नानापदार्थविशिष्टैकार्थप्रत्ययैककार्यावच्छिन्नानां समूहो वेदितव्यः । एवं क्वचित्केनचिदर्थेनैकेम सूत्रवाक्यानामेकवाक्यत्वं समूहः प्रकरणम् । प्रकरणानामपि कयाचित् स्वार्थसंगत्या समूह आह्निकम् । एवं तत्र तत्र वेदितव्यम् । एताः प्रकरणाह्निकाध्यायार्थसंगतीस्तत्र तत्र लेशतो दर्शयिष्यामः ।

तदेवं शास्त्रस्वरूपं दर्शयित्वा नान्तरेण तदर्थकथनं पुरुषश्रेयोऽभिधायकत्वमस्य सिध्यतीति तदर्थं कथयति—तत्पदार्था इति । ननु प्रमाणादीनां प्रतिनरमानन्त्येन दुर्ज्ञानत्वमिति तदवस्थमेवानर्थक्यं शास्त्रस्य प्रसक्तमित्यत आह—षोडशात्मानः । आत्मा स्वभावः प्रमाणादीनां प्रमाणत्वादिसामान्यविशेष इति यावत् । एतदुक्तं भवति, आन्तर्गणिकभेदादानन्त्येऽपि सामान्यविशेषैः संगृहीता न दुर्ज्ञाना इति यतोऽस्य पदार्थाः प्रमाणादयस्तत्तस्माच्छास्त्रं पुरुषश्रेयोऽभिधत्ते ।

स्यादेतत् । प्रमाणादयः पदार्थाः प्रामाणिका अप्रामाणिका वा ? अप्रामाणिकत्वे कल्पनामात्रनिर्मिताः कथं निःश्रेयसाय कल्पन्त इति । न च षोडशात्मानः कल्पनाः कोषस्यानन्त-

(१) स्वत इति मीमांसकमताभिप्रायेणोक्तम् ।

न्यायवार्त्तिकम्

प्रत्यक्षानुमानाधिगत-(१)वस्तुतत्त्वान्वाख्यानं शास्त्रधर्मः, तस्य विषयः प्रत्यक्षानुमानानधिगतवस्तुतत्त्व आध्यात्मिकशक्तिसम्प्रयुक्तोऽन्तेवासी। पुरुषः पुनश्चतुर्धा भिद्यते प्रतिपन्नोऽप्रतिपन्नः सन्दिग्धो विपर्यस्तश्चेति। तत्र प्रतिपन्नः प्रतिपादयिता। इतरे सापेक्षाः सन्तः प्रतिपाद्याः, ते यदेन्द्रियार्थसन्निकर्षमपेक्षन्ते तदा प्रत्यक्षेण, यदा लिङ्गदर्शनस्मृत्याद्यपेक्षन्ते तदाऽनुमानेन। यदा पुनरुपदेशमपेक्षन्ते तदा शास्त्रं प्रवर्त्तते। श्रेयः पुनः सुखमहितनिवृत्तिश्च, तच्छ्रेयो भिद्यमानं द्वेधा व्यवतिष्ठते दृष्टादृष्टभेदेन। दृष्टं सुखमदृष्टमहितनिवृत्तिः। अहितनिवृत्तिरप्यात्यन्तिकी

न्यायवार्त्तिकतात्पर्य्यटीका

प्रसरत्वात्। प्रामाणिकत्वे वा प्रमाणादेव तत्सिद्धेः शास्त्रस्य वैयर्थ्यमित्यत आह—**प्रत्यक्षेति**। प्रत्यक्षानुमानाधिगतग्रहणेनाप्रामाणिकत्वं निषिद्धम्। अत एव **वस्तुतत्त्वमिति**। प्रमाणादयः पदार्था नोपमानविषया इति नोपमानमुपन्यस्तम्।

यद्यपि प्रमेयमात्माद्यपवर्गान्तलक्षणमागमिकं तथाप्यागमस्याप्तप्रणेतृकतया तत्रापि मूलभूतमनुमानं प्रत्यक्षं वास्तीति प्रत्यक्षानुमाने एव दर्शिते। नन्वेवं प्रामाणिकत्वे शास्त्रवैयर्थ्यमित्यत आह—**तस्य विषय इति**। व्यवहरमाणाभावे प्रमाणैर्लौकिका वैनयिकबुद्धिविरहिणो (२) नैतान् पदार्थान् विविञ्चते अविविक्ताश्चैते न निःश्रेयसाय कल्पन्त इत्य**नधिगतेत्युक्तम्**। आध्यात्मिकी शक्तिः शुश्रूषादिः। पुरुषेत्युक्तं तत्र विवक्षितं पुरुषविशेषं ग्रहीतुं संभाविनः पुरुषान् दर्शयति—**पुरुषः पुनरिति**। हेयं(३) दर्शयति—**तत्रेति**। उपादेयानाह—**इतर इति**। अपेक्षा जिज्ञासा। सा संदिग्धस्य तावदस्ति शिष्यस्य। विप्रतिपन्नस्य तु साक्षिणां पुरतो जल्पवितण्डाभ्यां शिष्यमाणस्य गलितेऽहंकारे संदिग्धस्य जातजिज्ञासस्य सापेक्षस्य सतः। अप्रतिपन्नस्यापि केनचित्प्रकारेण संदेहमापाद्य सापेक्षीकृतस्य प्रतिपाद्यता। तदिदमुक्त**मितरे सापेक्षाः सन्तः प्रतिपाद्या इति**। असंदिग्धोऽपि तत्त्वप्रतिपादनाय कारुणिकेन संदिग्धः कृत्वा प्रतिपाद्यत इति। तत् किं सापेक्षमधिकृत्य शास्त्रं प्रवृत्तं तथा च प्रमातॄणां न प्रमाणान्तरे प्रवृत्तिः स्यादित्यत आह—**ते यदेति**। कंचिद्विषयं जिज्ञासवो यदेन्द्रियाद्यपेक्षन्ते तदा प्रत्यक्षेण प्रतिपाद्याः। एवमुत्तरमपि योज्यम्। अयमभिसन्धिः,—न दृष्टप्रयोजनोपयोगिजिज्ञासेहापेक्षा विवक्षिता, किन्तु निःश्रेयसोपयोगिपदार्थजिज्ञासा। सा चास्मिन्नेव शास्त्रे प्रवृत्तिहेतुर्नान्यत्र, तदिदमुक्तं **यदा पुनरिति**। परमपुरुषार्थसाधनं तु जिज्ञासव इति शेषः। इहाभिमतं श्रेयो निर्द्धारयितुं श्रेयोमात्रप्रकारानाह—**श्रेयः पुनः सुखमहितनिवृत्तिश्च**। तत्राप्यवान्तरप्रकारानाह—**तच्छ्रेयः सुखं दुःखनिवृत्तिश्च भिद्यमानं द्वेधा व्यवतिष्ठते**। तदाह **दृष्टादृष्टभेदेन** न

(१) 'प्रत्यक्षानुमानानधिगत'ति खवार्त्तिकपाठः, स तु "प्रत्यक्षेति, प्रत्यक्षानुमानाधिगतग्रहणेनाप्रामाणिकत्वं निषिद्धम्" इति तात्पर्य्यटीकायाः सुसङ्गतार्थपाठविरोधान्नोपादेयः। (२) विशिष्टो नयो न्यायशास्त्रं, तज्जन्यबुद्धिविरहिण इत्यर्थः। (३) हेयम् अनुपदेश्यम्।

न्यायवार्त्तिकम्

अनात्यन्तिकी च। अनात्यन्तिकी, (१) कण्टकादेर्दुःखसाधनस्य परिहारेण। आत्यन्तिकी पुनरेकविंशतिप्रभेदभिन्नदुःखहान्या। एकविंशतिप्रभेदभिन्नं पुनर्दुःखं—शरीरं, षडिन्द्रियाणि, षड्विषयाः, षड्बुद्धयः, सुखं, दुःखञ्चेति। शरीरं दुःखायतनत्वाद्दुःखम्। इन्द्रियाणि विषया बुद्धयश्च तत्साधनभावात्। सुखं दुःखानुषङ्गात्। दुःखं स्वरूपत इति। तस्य हानिर्धर्माधर्मसाधनपरित्यागेन। अनुत्पन्नयोर्धर्माधर्मयोरनुत्पादेन उत्पन्नयोश्चोपभोगात् प्रक्षयेणेति।

न्यायवार्त्तिकतात्पर्य्यटीका

व्यासज्य, किन्तु प्रत्येकमित्याह—दृष्टं सुखं स्रक्चन्दनवनितादिभोगजन्म, अदृष्टं च सुखं स्वर्गादि। एवञ्च दुःखनिवृत्तिरपि श्रेयो दृष्टमदृष्टञ्चेति योजनीयं चकारलोपात्। अहितनिवृत्तेः श्रेयस आत्यन्तिकत्वानात्यन्तिकत्वे तद्दृष्टादृष्टस्य भेदमाह—अहितनिवृत्तिरपीति। अभिमतं श्रेयो निर्द्धारयति,—आत्यन्तिकीति। पुनरिति निर्द्धारणमेव द्योतयति। आत्यन्तिकत्वं निवृत्तेर्निवृत्तस्य पुनरनुत्पादः, स च कार्यकारणतदनुषङ्गिनिवृत्त्या लक्ष्यते। न त्वकारणं कार्य्यं जायते तदिदमुक्तम्—एकविंशतिप्रभेदभिन्नदुःखहान्येति। गौणमुख्यभेदेन चैकविंशतेः शरीरादीनां दुःखत्वप्रकारानाह—एकविंशतीति। षष्ठमिन्द्रियं मनः। तस्य विषया इच्छाद्वेषप्रयत्नाः। यद्यपि विषयः शरीरमपि तथापि अन्यथाऽस्य (२) दुःखहेतुभाव इत्याह—शरीरमिति। शरीरावच्छिन्न आत्मप्रदेशो (३) दुःखायतनमिति शरीरं दुःखायतनमुक्तम्। इन्द्रियविषयबुद्धीनां दुःखत्वोपचारे कारणमाह—इन्द्रियाणीति। तत्रेन्द्रियाणि तावद्गन्धादिविषयबोधनात्, विषया बोध्यत्वात्। बुद्धयस्तु साक्षाद् दुःखसाधनानीति दुःखत्वेनोपचर्य्यन्ते। सुखे दुःखत्वोपचारे बीजमाह—सुखमिति। साधनपारतन्त्र्यं क्षयित्वं काम इति दुःखहेतवः सकलसुखानुषङ्गिणः, तस्मात्सुखमपि दुःखानुषङ्गि। उक्तप्रकारदुःखहानिसाधनमाह—तस्य हानिरिति। संशयादितत्त्वज्ञानपरिशोधितपरमन्यायमार्गः खलु हेयोपादेयभूतद्वादशभूतप्रमेयतत्त्वपरिभावनभुवा प्रसंख्यानेन निर्मृष्टनिखिलप्रवृत्तिहेतुदोषानुषङ्गोऽप्रवर्त्तमानो न शरीरेन्द्रियादिहेतुमपूर्वधर्म्माधर्म्मप्रचयमातनोति। अनादिभवपरम्परोपात्तञ्च धर्म्माधर्म्मप्रचयमनन्तमप्यनियतविपाकसमयमपि प्रसंख्यानपरिपाकप्रभावात् परितस्तदुपभोगभागिनः कायान्निर्माय तत्फलोपभोगात्प्रक्षिणोति। अचिन्त्यसामर्थ्यातिशयो हि समाधिः। यथाऽऽहुरत्रभवन्तः पतञ्जलिपादाः "को हि योगप्रभावादृते अगस्त्य इव समुद्रं पिबति स इव च दण्डकारण्यं सृजती"ति। सेयमात्यन्तिकी दुःखनिवृत्तिः श्रेयः, तदिदमुक्तं (४) शास्त्रस्य पुरुषश्रेयोऽभिधायकत्वादिति।

स्यादेतत्। केवलस्य दुःखस्यात्यन्तिकी निवृत्तिः श्रेयः पुरुषप्रवृत्त्यङ्गम्। इयं तु

(१) अत्र क्रममुल्लङ्घ्य प्रागेव 'अनात्यन्तिकी'ति ग्रहणं सूचीकटाहन्यायेन। (२) "अन्यथा" असाधारणत्वेन विषयान्तरवैलक्षण्येन इत्यर्थः। (३) 'आत्मप्रवेश' इति क्वपुस्तकपाठः। (४) वार्त्ति—१।४ पं।

न्यायवार्त्तिकम्

पुरुषा रागादिमन्तो वीतरागाश्च। तत्र रागो विषयाभिषङ्गलक्षणः स एषामस्ति ते रागादिमन्तः। वैराग्यं पुनर्भोगानभिष्वङ्गलक्षणं तद्येषामस्ति ते वीतरागाः। प्रवृत्तेर्द्वैविध्यं पुरुषभेदानुविधानात्। तेषां पुरुषाणां प्रवृत्तयस्ताः पुरुषभेदमनुविधीयमाना उभयरूपा भवन्ति। वीतरागप्रवृत्तिरेकधा। तत्र या वीतरागाणां प्रवृत्तिः सा खल्वेकरूपा अनिष्टप्रतिषेधार्था अनिष्टं हास्याम इत्येव ते प्रवर्तन्ते, न पुनरेषां क्वचिदभिष्वङ्गोऽस्ति। रागादिमत्प्रवृत्तिस्तु द्विरूपा। ये तु रागादिमन्तस्तेषां याः प्रवृत्तयस्ता द्विविधा भवन्ति, इष्टानिष्टविषयाधिगमप्रतिषेधार्थाः। इष्टमाप्स्यामीति सक्तः प्रवर्तते। अनिष्टं हास्यामीति द्वेषान्निवर्तते। रागादिमत्प्रवृत्तेरपि द्वैविध्यं भवति समर्थाऽसमर्थभेदात्। या खलु रागादिमत्प्रवृत्तिः सा समर्थाऽसमर्था च भवति। इष्टमाप्स्यामीति प्रवर्तमानो यदा प्राप्नोति तदा समर्था, अनिष्टं हास्यामीति प्रवर्तमानो यदा जहाति तदा समर्था, यदा विपर्य्ययस्तदाऽसमर्थेति। ततः पुनः प्रवृत्तिद्वैविध्यं, प्रमाणस्यार्थवदनर्थकत्वात् (१) प्रमाणं तावदर्थपरिच्छेदकं, प्रमाणसामान्यात् प्रमाणप्रतिरूपकमपि प्रमाण-

न्यायवार्त्तिकतात्पर्य्यटीका

दुःखवत्सुखस्याप्यात्यन्तिकी निवृत्तिरिति कथं श्रेयः कथं च प्रेक्षावत्प्रवृत्त्यङ्गमित्यत आह—पुरुषा रागादिमन्त इति। यद्यपि रागादिमतां पृथग्जनानामेतन्न प्रवृत्त्यङ्गं, ते हि मधुविषसंपृक्तमप्यन्नं मधुमधुरतया आपातरमणीयं विषविषङ्गान्मारयतु मा वा मीमरदुपभुञ्जते तावद्, आपाततः सुखं को हि हस्तगतं पादगतं करोतीति विचिन्त्योपभुञ्जते, विवेकिनस्तु आयतिमालोचयन्तः स्वर्गमपि कुपितफणिफणामण्डलच्छायप्रतिममित्यपजहति। तेन मा भूदेतद्रागादिमतां प्रवृत्त्यङ्गं, विवेकिनां तु भविष्यति। अविवेकिनामपि चाप्रतिपन्नविप्रतिपन्नानां विवेकाधानोपायः पूर्वमावेदितः (२) शास्त्रप्रवृत्त्यङ्गमात्रमेव चेह विवेको वैराग्यमभिमतमिति। प्रवृत्तेर्द्वैविध्यम् ऐकरूप्यं द्वैरूप्यञ्च। पुरुषे भेदो रागवैराग्याभ्यां, प्राप्तव्यस्य सर्वस्य सुखस्य दुःखसंभेदेनानिष्टपक्षनिक्षेपादनिष्टप्रतिषेधार्थैव प्रवृत्तिर्विवेकिनामेकरूपैव। अविवेकिनान्तु प्रवृत्तिर्द्विरूपेत्युक्तम् (३)।

तदनेन प्रपञ्चेन प्रमाणतोऽर्थप्रतिपत्तावित्यादिवाक्यस्य तात्पर्यमभिधाय तदवयवं प्रवृत्तिसामर्थ्यादिति विवरीतुं भूमिमारचयति—प्रवृत्तेरपीति। दृष्टं प्रवृत्तिसामर्थ्यं हेतुः, इति रागादिमत्प्रवृत्तिसामर्थ्यमुपन्यस्तं न तु वीतरागाणाम्। न हि तत्प्रवृत्तेर्निःश्रेयसाधिगमलक्षणफलसंबन्धो दृष्टो निःश्रेयसस्यालौकिकत्वात्। प्रमाणस्यार्थवदनर्थकत्वादित्ययुक्तं प्रमाणमनर्थकमिति हि विप्रतिषिद्धमित्यत आह—प्रमाणं तावदिति। न त्वप्रमाणमप्रमाणमिति गृहीतं प्रवृत्त्यै कल्पते

---

(१) अर्थवत्त्वादनर्थकत्वाच्च इति स्फुटार्थः। (२) वार्त्ति—५।२ पं, ता ५।१० पं प्रभृतयः काश्चित् पङ्क्तयो द्रष्टव्याः। (३) अत्रैव वार्त्तिकस्य पञ्चमपङ्क्तौ।

न्यायवार्त्तिकम्

मित्युपचर्य्यते। किं पुनः प्रमाणसामान्यं प्रमाणाभासस्य ? सामान्यपरिच्छेदकत्वम्। प्रमाणेनापि सामान्यं परिच्छिद्यते प्रमाणाभासेनापि। सोऽयं प्रमाता यदा प्रमाणेनावधार्य्य प्रवर्तते तदास्य प्रवृत्तिः समर्था भवति, यदा पुनः प्रमाणाभासेनार्थमवधार्य्य प्रवर्तते तदाऽसमर्था, तस्याः पुनरर्थवत्त्वम्। प्रमाणतोऽर्थप्रतिपत्तावित्यादि भाष्यम्। परस्परापेक्षित्वादुभयासिद्धिरिति चेन्न, अनादित्वात्। यदि प्रमाणतोऽर्थप्रतिपत्तौ प्रवृत्तिसामर्थ्यम्, यदि वा प्रवृत्तिसामर्थ्यात् प्रमाणतोऽर्थप्रतिपत्तिः, किं पूर्वं किं पश्चादिति वाच्यम्। यदि तावत् प्रमाणतः पूर्वमर्थप्रतिपत्तिः, प्रवृत्तिसामर्थ्यमन्तरेण किमिति प्रतिपद्यते। अथ पूर्वं प्रवृत्तिसामर्थ्यमनवधार्य्यार्थं किमिति प्रवर्तते, तस्मात् प्रवृत्तेः प्रमाणतोऽर्थप्रतिपत्तेर्वा परापरभावो न कल्प्यत (१) इति। तच्च नैवं, कस्मात् ? अनादित्वात्। अनादिरयं संसार इति पूर्वाभ्यस्तसूत्रे (२)

न्यायवार्त्तिकतात्पर्य्यटीका

किं तर्हि ? प्रमाणमिति। न चाप्रमाणे प्रमाणमित्यभिमानो विना प्रमाणादिसाधर्म्यादिति तत्साधर्म्यं पृच्छति—किं पुनरिति। उत्तरं सामान्यपरिच्छेदकत्वं तद्विवृणोति—प्रमाणेनापीति। रजतादिज्ञानमपि पुरोवर्त्तिशुक्लभास्वरं सद्द्रव्यं परिच्छिनत्ति, शुक्तिज्ञानमपि। केवलमेकस्मिन्नेव विषये रजतसमारोपापवादाभ्यां बुद्ध्योर्बाध्यबाधकभाव इति भावः। तदेवमुभयतः प्रवृत्तिः समर्थात् प्रमाणादेव नाप्रमाणादर्थव्यभिचारिण इत्याह—सोऽयं प्रमातेति। ततश्च सिद्धः समर्थायाः प्रवृत्तेरनर्थवद्व्यतिरेक इत्यभिसन्धिः। तथा च समर्था प्रवृत्तिरनर्थवद्व्यतिरेकसंपन्नप्रमाणस्यार्थवत्त्वे हेतुरित्याह—तस्याः समर्थायाः प्रवृत्तेर्हेतोः पुनः प्रमाणस्यार्थवत्त्वमर्थाव्यभिचारित्वम्। असमर्था त्वनन्तराऽपि न संबध्यते योग्यताविरहात्। संप्रत्यादिवाक्यमाक्षेप्तुमनुवदति—प्रमाणत इति। आक्षिपति परस्परेति। समाधत्ते नेति। आक्षेपवाक्यं विभजते—यदि प्रमाणत इति। न तावदर्थप्रतिपत्तिः प्रवृत्तिहेतुरपि तु तद्विनिश्चयः। न च तन्मात्रम्, अपि तु तदर्थजातीयस्य श्रेयोहेतुतयाऽसकृदुपलभ्यमानस्यार्थस्य तज्जातीयतया श्रेयोहेतुभावानुमानसहिता विनिश्चितिः प्रवृत्तिहेतुः। सेयं श्रेयःसाधनताऽनुमानसहिता प्रमाणतोऽर्थप्रतिपत्तिः विनिश्चितिः समर्थप्रवृत्तिनिमित्तमुक्ता। न चार्थविनिश्चयः प्रामाण्यावधारणमन्तरेण। प्रामाण्यावधारणञ्च श्रेयोहेतुतानुमाननिमित्तव्याप्तिग्रहणञ्च न समर्थप्रवृत्तिं विना, न च समर्था प्रवृत्तिस्ताभ्यां विनेति परस्पराश्रयता। तदिदमुक्तं यदि पूर्वं प्रमाणतोऽर्थप्रतिपत्तिर्विनिश्चितिरपेक्षिताऽनुमानसहिता प्रवृत्तिसामर्थ्यमन्तरेण किमिति प्रतिपद्यते निश्चिनोति (३)। समाधानं विभजते—तच्च नैवमिति। यत्तावदुक्तं प्रामाण्यस्य दुरवधारणत्वादर्थविनिश्चयाभावान्न प्रवृत्तिसामर्थ्यमिति। तत्र ब्रूमः सत्यं न स्वतः

---

(१) 'कल्पत' इति खवार्त्तिकपाठः। (२) ३।१।१९ सू। (३) "निश्चिनोति" इत्यनन्तरं क-पुस्तके (नोपाय एवेति तोयमेव चेति) बन्धनीयुक्तपाठोऽधिकः परिदृश्यते।

न्यायवार्त्तिकतात्पर्य्यटीका

प्रामाण्यं शक्यावधारणम्, परतस्तु दृष्टार्थेष्वनभ्यासदशापन्नेषु प्रवृत्तिसामर्थ्यादेव तद्गम्यते। अर्थप्रतीत्यधीना तु प्रवृत्तिर्नार्थावधारणाधीना। अर्थसन्देहादपि प्रेक्षावतां प्रवृत्तिः। नो खल्वायतविनिश्चयेनापि प्रवर्तमाना अनागतफले न सन्दिहते। तदमी सन्दिहाना अपि प्रवर्त्तमानाः प्रवृत्तिसामर्थ्यात्प्रमाणस्य तत्त्वं विनिश्चित्य तज्जातीयस्यान्यस्याभ्यासदशापन्नस्य प्रवृत्तिसामर्थ्यात्प्रागेव तज्जातीयत्वेन लिङ्गेन प्रामाण्यावधारणादर्थविनिश्चयेन प्रवर्त्तन्ते। एवञ्च दृष्टार्थमन्त्रायुर्वेदप्रामाण्यं प्रवृत्तिसामर्थ्येनावधार्य्य तज्जातीयस्यादृष्टार्थस्य वेदस्य विनाऽपि प्रवृत्तिसामर्थ्यं प्रामाण्यावधारणमाप्तोक्तत्वेन निवेदयिष्यते (१)। न च फलज्ञानं परीक्ष्यते प्रेक्षावद्भिः, तस्य यादृशतादृशस्यापीष्टत्वादिष्टलक्षणत्वाच्च फलस्य तत्साधनत्वं ते परीक्षन्ते। तथा हि तोयज्ञानं पिपासोस्तेन तत्र प्रवृत्तिः, प्रवृत्तस्य तदाप्तिः, आप्तस्य पानं, पानेन चोदन्योपशान्तिरित्येतावतैव प्रमाता कृती भवति, न पुनरुदन्योपशान्तिमपि परीक्षते तस्य यादृशतादृशस्यापीष्टत्वादिति केचित्। वयन्तु ब्रूमः फलज्ञानमप्यभ्यासदशापन्नतया तज्जातीयत्वेन लिङ्गेनावधारिताव्यभिचारमेव। एवं तत्पूर्वं तत्पूर्वतरं तत्पूर्वतममिति। न च संप्रतितनस्य फलज्ञानस्य प्रामाण्यावधारणायेदानीमेव पूर्वस्य फलज्ञानस्य तज्जातीयत्वेन प्रामाण्यावधारणे सत्यनवस्थेति वाच्यम्। पूर्वतरसाधर्म्येण पूर्वस्य पूर्वमेवावधृतप्रमाणत्वात्, एवं पूर्वतमसाधर्म्येण पूर्वतरस्य, एवं तत्पूर्वसाधर्म्येण पूर्वतमस्येत्यनादितैवात्र परिहारः। एतेषु च मध्ये यत्फलज्ञानं स्वप्नाद्युपभोगतुल्यतया शङ्कितव्यभिचारं तदनभ्यासदशापन्नमतः प्रवृत्तिसामर्थ्यं तत्र प्रामाण्यावधारणाय निवेशनीयमित्यर्थः। प्रतिपत्तिप्रवृत्तिसामर्थ्ययोरनादित्वमुक्तम् (२)। अनुमानस्य तु प्रवृत्तिसामर्थ्यलिङ्गजन्मनोऽन्यस्य वा निरस्तसमस्तव्यभिचारशङ्कस्य स्वत एव प्रामाण्यमनुमेयाव्यभिचारिलिङ्गसमुत्थत्वात्। न हि लिङ्गाकारं ज्ञानं लिङ्गं विना, न च लिङ्गं लिङ्गिनं विनेति। अत एव गृहीताव्यभिचारलिङ्गसमुत्थं निष्कम्पमुत्पद्यते ज्ञानम्। प्रत्यक्षज्ञानमर्थादुत्पद्यमानमपि न गृहीताव्यभिचाराद् अपि तु सत्तामात्रेणावस्थितात्। न च कारणान्तराण्यपीन्द्रियादीनि अस्यार्थेन गृहीताव्यभिचाराणि न वाऽर्थेनाव्यभिचाराणि। शाब्दं तु ज्ञानं नार्थादुत्पद्यते तदभावे सति शब्दे भावात्। नापि लिङ्गस्येव शब्दस्यार्थाव्यभिचारः किन्तु सङ्केतग्रहणमात्रात्पदार्थप्रत्यायनेन वाक्यार्थमवगमयति शब्दः। तस्मात्प्रत्यक्षशाब्दविज्ञानयोर्न स्वतोऽव्यभिचारग्रह इति प्रवृत्तिसामर्थ्यं तज्जातीयत्वं वा लिङ्गमर्थाव्यभिचारायानुसरणीयं, ज्ञानगततज्जातीयत्वलिङ्गग्राहिणश्च ज्ञानस्य मानसप्रत्यक्षस्य तादृशस्यादृष्टव्यभिचारतया परितो निरस्तसमस्तविभ्रमाशङ्कस्य स्वतः प्रामाण्यमिति नानवस्था। एतेनोपमानं व्याख्यातम्। संवेदनस्य चार्थाव्यभिचारिताकथनेन तत्करणानामिन्द्रियादीनामपि प्रमाणत्वमुक्तं वेदितव्यम्। न ह्यव्यभिचारिज्ञानजनकत्वादन्यत्प्रामाण्यम्। न चार्थव्यभिचारिणामिन्द्रियादीनां कथमर्थाव्यभिचारिज्ञानजनकत्वमिति साम्प्रतम्, कारणस्वभावनियोगपर्य्यनुयोगयोरशक्यत्वात्। तस्मादर्थसन्देहादन-

(१) २।१।६८ सू। (२) वार्त्तिक ८ पृ. ९ पं।

न्यायवार्त्तिकम्

प्रतिपादयिष्यामः। आदिमति च संसारे एष दोषः किं पूर्वं प्रमाणतोऽर्थप्रतिपत्तिराहोस्वित् प्रवृत्तिसामर्थ्यमिति। प्रमाणप्रवृत्त्योर्वा बलाबलजिज्ञासायामुभयसामर्थ्यप्रतिपादनार्थं वाक्यम्, लोकः खलु प्रवर्त्तमानः प्रमाणेनावधार्य(१) प्रवर्त्तते, स च तथा प्रवर्त्तमानः फलमुपलभते। तत्रेदं चिन्त्यते—किं प्रमाणतोऽर्थप्रतिपत्तिः समर्था आहोस्वित् प्रवृत्तिरिति। उभयं समर्थं, तन्नान्तरीयकत्वात्(२)। तस्य फलस्य अस्य चार्थस्योपदर्शनार्थं वाक्यमिति, लोकवृत्तानुवादो वा, सर्वः

न्यायवार्त्तिकतात्पर्य्यटीका

भ्यासदशापन्नात् प्रवृत्तौ प्रमाणतोऽर्थप्रतिपत्तौ प्रवृत्तिसामर्थ्यसंभवात् प्रवृत्तिसामर्थ्यज्ञानस्य चाभ्यासदशापन्नस्य तज्जातीयत्वेन प्रामाण्यानुमानादनभ्यासदशापन्नस्य तु प्रवृत्तिसामर्थ्यानन्तरज्ञानेन प्रामाण्यानुमानादनादित्वान्नार्थप्रतिपत्तिप्रवृत्तिसामर्थ्ययोः परस्पराश्रयत्वमस्तीति। अर्थस्यापेक्षितोपायतानुमानप्रवृत्तिसामर्थ्ययोः परस्परापेक्षित्वमवशिष्यते। तत्राप्यनादितापरिहारः। उत्पन्नमात्रस्य हि बालकस्य स्तनं दृष्ट्वा प्राग्भवीयस्तज्जातीयापेक्षितानुभवजनितः संस्कार आविरस्ति, ततश्च स्मरणं, ततोऽपेक्षितोपायतानुमानं, ततः प्रवृत्तिस्ततस्तस्याः सामर्थ्यम्। एवं पूर्वस्मिन् पूर्वस्मिञ्जन्मनीत्यनादितया न बीजाङ्कुरवत् परस्परापेक्षितेति। **अर्थप्रतिपत्तिरिति।** अर्थस्यापेक्षितोपायताप्रतिपत्तिश्चेत्यर्थः। तस्मात्सर्वमवदातम्।

तदनेनोक्तप्रक्रमेण प्रमाणतोऽर्थप्रतिपत्तावित्यस्य शास्त्रानुसन्धानवाक्यत्वं तात्पर्य्यञ्च समाहितम्। इदानीमस्यैव तात्पर्य्यमाह—**प्रमाणप्रवृत्त्योर्वेति** (३)। अत्रेदमाशङ्क्यते मुनिर्हि प्रत्यक्षसंशयादिव्युत्पादनद्वारेण साक्षाच्चानेन शास्त्रेणान्वीक्षिक्या हेयोपादेयभावावस्थितद्वादशविधप्रमेयव्युत्पादकन्यायमनुमानापरनामानं निःश्रेयससिद्धये व्युत्पादयांबभूव। न च न्यायतः प्रमाणात् प्रमेयतत्त्वनिश्चयमात्रान्निःश्रेयसाधिगमोऽपि तु आद्यन्तवर्त्तिनां दशानां प्रमेयाणां दुःखसंज्ञाभावनम् आत्मनश्च याथात्म्यभावनमित्यादिभ्यः प्रवृत्तिभिरात्मतत्त्वसाक्षात्कारवैराग्यपरिपाकक्रमेणापूर्वयोर्द्धर्म्माधर्म्मयोरनुत्पादेनोत्पन्नयोश्चोपभोगात् प्रक्षयेणेति। तथा च निःश्रेयसप्राप्तेः कारणत्वात् प्रमाणान्न्यायात्प्रवृत्तिरेव बलीयसी न न्यायः। तस्मात्प्रवृत्तिरेव व्युत्पादनीया न न्यायो निःश्रेयसहेतुरपि प्रवृत्तेरन्तरङ्गत्वादिति। तत्रेदमुपतिष्ठते **प्रमाणतोऽर्थप्रतिपत्तौ** सत्यां प्रवृत्तेः सामर्थ्यं फलेनाभिसम्बन्धो न तु प्रमाणतोऽसत्यामर्थप्रतिपत्तौ। तस्मादर्थवत्प्रयोजनवत्प्रमाणमपि प्रवृत्तिवदेव। एतदुक्तं भवति यथान्तरङ्गतया प्रवृत्तिर्बलीयसी एवं मूलकारणतया प्रमाणमपि। न त्वप्रमाणात् प्रवृत्तिः फलेनाभिसम्बध्यते किन्तु प्रमाणात्। तस्मात्तुल्यमुभयमपि। तथापि प्रमाणव्युत्पादनेन प्रवृत्तिरपि व्युत्पादिता भवतीति प्रमाणस्य व्युत्पादनमेवाकारि शास्त्रे न तु

---

(१) 'प्रमाणेनार्थमवधार्य' इति ख-पु पाठः। (२) समर्थप्रमाणाविनाभावात्। (३)"प्रामाण्यप्रवृत्त्योर्व्वा" इति क-पु-पाठः। "प्रामाण्यप्रवृत्त्योर्वा" इति ख-पु-पाठः।

न्यायवार्त्तिकम्

प्रमाता प्रमाणेनार्थमवधार्य्य प्रवर्तमानः फलमुपलभत इति लोकवृत्तं तद्वाक्येनानूद्यते। हेयहानोपायाधिगन्तव्यभेदाच्चत्वार्य्यर्थपदानीति। हेयं दुःखं तद्धेतुश्च। दुःखमुक्तं (१)। हेतुरविद्यातृष्णे धर्माधर्माविति। हानं तत्त्वज्ञानम्। तत् पुनर्यथार्थावस्थितपदार्थाधिगतिस्तच्च प्रमाणम्। उपायः शास्त्रं तदप्युक्तम् (२)। अधिगन्तव्योऽपवर्गः स पुनरात्यन्तिको दुःखाभावः। एतस्मिंश्च

न्यायवार्त्तिकतात्पर्य्यटीका

प्रवृत्तेः। सामान्याभिधानं परमन्यायपरं तस्यैव प्रकृतत्वादिति प्रामाण्यज्ञानोपायप्रतिपादनपरतयाऽनुसन्धानवाक्यत्वमस्य पूर्वमुक्तं (३)। संप्रति परपर्य्यनुयोगमुखेनानुसन्धानवाक्यत्वं प्रतिपादयति—लोकवृत्तेति। तथा हि प्रमाणप्रवृत्त्युपायं प्रत्याचक्षाण एवं प्रष्टव्यो जायते किं भवान् प्रमाणेन प्रमाणज्ञानोपायं प्रत्याचष्टे अप्रमाणेन वा। यदि ब्रूयात्प्रमाणेनेति स प्रतिवक्तव्यः प्रमाणज्ञानोपायमविद्वान् कथं भवानेवमाहेति। अप्रमाणेनेति चेद् अनुज्ञया वर्त्तितव्यम्। अथ प्रमाणेनागृहीतप्रामाण्येनेति वाङ्मनसयोर्विसंवादः। तस्मादनिच्छताऽपि त्वया लोकवृत्तमनुसरणीयम्। अन्यथा न लौकिको न परीक्षक उन्मत्तवदुपेक्षणीयः स्यादिति। तदिदं लोकवृत्तमाक्षेप्तारं बोधयितुमनेन भाष्येणानूद्यते **प्रमाणतोऽर्थप्रतिपत्तौ प्रवृत्तिसामर्थ्यादर्थवत् प्रमाणं यतोऽतः सर्वः** प्रमाता प्रमाणेनावगतार्थवत्त्वेनार्थमवधार्य्य प्रवर्तमानः फलमुपलभत इति। लोकवृत्तं तत्प्रमाणत इत्यादिना वाक्येन कारणप्रदर्शनद्वारेणानूद्यते।

अस्यैव भाष्यस्य तात्पर्यान्तरं वक्तुं भूमिमारचयति—हेयहानेति। 'अर्थः'-अर्थशब्दः प्रमाणतोऽर्थप्रतिपत्तावित्यत्र स्थितः 'पदं' वाचकं येषां तानि तथा। एतद्वार्त्तिकग्रन्थस्यैतादृशं व्याख्यानं भाष्यगतस्य त्वन्यथा भविष्यति। उपायः शास्त्रमिति। शास्त्रशब्दस्तदर्थपरः अर्थस्यापि शब्दवच्छास्त्रशरीरत्वात्। अत्र च हेयहानाधिगन्तव्यपदैः प्रमाणप्रमेययोरुपादानाद्गोबलीवर्दन्यायेन संशयादिषु निग्रहस्थानान्तेषु शास्त्रपदं प्रवर्तते। तेनोपायपदेन संशयादयो निग्रहस्थानान्ता एवोक्ता इति। ग्रहणकवाक्यं विवृणोति—हेयमिति। तात्पर्य्यमाह—एतस्मिंश्चेति। चेन प्रमाणप्रमाप्रमेयप्रमातृरूपं चतुर्वर्गान्तरमपि सूचयति। तत्र हेयादिचतुर्वर्गे अर्थ्यमानतयाऽर्थपदसूचिते प्रमाणादिचतुर्वर्गे च प्रमाणस्य प्राधान्यप्रदर्शनार्थमिदं भाष्यम्। यद्यपि चतुर्वर्गाद्वयतत्त्वावगमो निःश्रेयसाधिगमहेतुस्तथाऽपि प्रमाणमेव प्रधानम्। तन्मूलत्वादितरसिद्धेः। तदिदमुक्तमर्थवदिति। अतिशायने मतुप्। हेयाद्यपेक्षया प्रमात्राद्यपेक्षया चातिशयेन प्रयोजनवत् प्रमाणम्। कस्मात्? प्रमाणतोऽर्थप्रतिपत्तौ सत्यां प्रवृत्तस्य प्रमातुस्तदितरप्रतिलम्भात्। प्रमायाश्च तत्कार्य्यत्वात्। तदिदमुक्तं **प्रवृत्तिसामर्थ्यादिति**। तदेतस्मात्

(१) वा ६।६ पं। एकविंशतिप्रभेदभिन्नं पुनर्दुःखम् इत्यादिना स्वयमेवोक्तम्। (२) वा ४।२ पं 'पञ्चाध्यायी शास्त्रम्' इति। (३) वा १ पृ: ४ पं।

न्यायवार्त्तिकम्

चतुर्वर्गं (१) प्रमाणस्य प्राधान्यप्रदर्शनार्थञ्चेति। कथं पुनरनेन वाक्येन (२) प्रमाणादिचतुर्वर्गः प्रदर्श्यत इति। प्रमाणप्रमेयाधिगतयः श्रुतिगम्याः (३), प्रमाता (४) तन्नान्तरीयकत्वात् (५)। न हि प्रमातारमन्तरेण प्रमाणं सम्भवति। तदिदं वाक्य- (६) मवयवश उपन्यस्य वर्ण्यते—तत्र प्रमाणत इति तसिर्वचनविभक्तिव्याप्तिप्रदर्शनार्थः। प्रमाणत इतीयं निमित्तपञ्चमी। अस्याभिधानं वचनव्याप्त्यर्थं विभक्तिव्याप्त्यर्थञ्च। कथं पुनः पञ्चमीव्यतिरेकेण तसिर्लभ्यते? लभ्यते (७), आद्यादावुपसंख्यानादिति। तत् किं सिद्धं भवति? वचनव्याप्त्या संप्लवो व्यवस्था च। प्रमाणेन प्रमाणाभ्यां प्रमाणैरिति संप्लवो गम्यते, प्रमाणेनैवेति व्यवस्था। विभक्तिव्याप्त्या हेतुकरणभावः। प्रमाणादर्थाधिगतिर्भवतीति हेतुत्वम्। प्रमाणेनार्थं साधयतीति साधकतमत्वात्

न्यायवार्त्तिकतात्पर्य्यटीका

प्राधान्याद्विवक्षाभेदेन त्रिवर्गाद्वयात् प्रागुद्देशः प्रमाणस्येति। एतेन यदाहुरेके यदि प्राधान्यात् प्राथम्यं तत् प्रमेयस्यैव। अथोपायत्वात्ततः संशयादीनां तेषां प्रमाणोपायत्वात्। कस्मात्? प्रमात्रादिभ्यः प्राथम्यं प्रमाणस्येति तन्निरस्तं प्रमाणोपायानामपि संशयादीनां प्रमाणाधीनत्वादिति। नन्ववगतमर्थपदतया हेयादिचतुर्वर्गो दर्शित इति। प्रमाणादिचतुर्वर्गस्तु कथं प्रदर्श्यत इति पृच्छति—कथं पुनरिति। उत्तरं प्रमाणप्रमेयाधिगतय इति।

तदेवं तात्पर्यं व्याख्याय अवयवार्थं व्याख्यातुमुपक्रमते तदिदं वाक्यमवयवश उपन्यस्य वर्ण्यते। व्याख्यायते अवयवश इति। तत्रावयवेषु व्याख्यातव्येषु प्राथम्यात् प्रमाणत इति विवृणोति तत्रेति। विभजते प्रमाणत इतीयं निमित्तपञ्चमी चेत् कस्मात् प्रमाणादिति नाभिहितमित्यत आह—"अस्य" प्रमाणत इत्येवंभूतस्याभिधानं वचनव्याप्त्यर्थं विभक्तिव्याप्त्यर्थञ्च। वचनव्याप्त्यर्थमिति मृष्यामहे न तु विभक्तिव्याप्त्यर्थमिति, पञ्चमीव्यतिरेकेण तसेरभावादित्याह—कथं पुनरिति। परिहरति—लभ्यत इति। व्याप्तेः प्रयोजनं पृच्छति—किं सिद्धमिति। उत्तरं वचनव्याप्त्या संप्लवो व्यवस्था च। तदुभयं विभजते—प्रमाणेनेति। यत्र द्वयोर्बहूनां च संप्लवः प्रमाणानां तत्रैकस्याप्यस्ति प्रतिपत्तिसाधनत्वं प्रमाणस्येति कथयितुं संप्लवावसरेऽपि प्रमाणेनेत्युक्तम्। अत एव व्यवस्थायामेवकारः प्रमाणेनैवेति। विभक्तिव्याप्तेः प्रयोजनमाह—विभक्तिव्याप्त्या हेतुकरणभावः, अवगम्यत इत्यनुषज्यते। तद्विभजते— प्रमाणादर्थाधिगतिर्भवतीति हेतुत्वं गम्यते, प्रमाणेनार्थाधिगतिर्भवतीति करणरूपार्थो गम्यत इति सम्बन्धः। कस्मात् पुनः करणार्थो गम्यत इत्यत आह—

(१) उल्लिखिते हेयहानादिरूपे, "च"कारात् प्रमाणादिरूपे च चतुर्वर्गं। (२) "प्रमाणतोऽर्थप्रतिपत्तौ" इत्येवंरूपेण आदिभाष्यवाक्येन। (३) आदिभाष्यवाक्यश्रवणमात्रगम्याः। (४) गम्य इति शेषः। (५) प्रमाणादौ स्वाविनाभावात्। (६) आदिभाष्यवाक्यम्। (७) "लभ्यत" इत्यनन्तरम् "इत्याह" इत्यधिकः पाठः क-पु।

न्यायवार्त्तिकम्

करणार्थ इति। संप्लवानुपपत्तिर्विशिष्टविषयत्वादिति चेन्न अनभ्युपगमात्। स्यान्मतिरेषा विशिष्टविषयाणि प्रमाणानि। विशेषविषयं प्रत्यक्षं, सामान्यविषयमनुमानमिति। एतच्चाधिगन्तव्यं यत् सामान्यं विशेषश्च, न च सामान्यविषयं प्रत्यक्षं न जात्वनुमानं विशेषविषयमिति। एतच्च न, अनभ्युपगमात्। न तावत् प्रमाणद्वयं प्रतिपद्यामहे, न विषयद्वयं, नाप्यसङ्करम्।

न्यायवार्त्तिकतात्पर्य्यटीका

प्रमाणेनेति। अर्थमर्थाधिगतिं साधयतीति साधकतमत्वात्। अत्र च करणभावनान्तरीयकस्य हेतुभावस्य पञ्चम्या अभिधानं प्रमाणफलयोस्तादात्म्यप्रतिषेधार्थं, भेदाधिष्ठानत्वाद्धेतुफलभावस्य न खलु परशुरेव च्छिदेति। प्रमाणप्रातिपदिकलब्धकरणत्वानुवादश्च प्रमाकारकान्तरेभ्योऽभ्यर्हितत्वेनास्य व्युत्पाद्यत्वञ्च प्राथम्यञ्च युक्तमिति दर्शयितुं संप्लवमाक्षिपति संप्लवेति। समाधत्ते नेति। आक्षेपं विभजते स्यान्मतिरिति। विशिष्टो भिन्नो विषयो येषां तानि तथा। बहुवचनमान्तर्गणिकभेदाभिप्रायम्। अर्थसामर्थ्यसमुत्थं हि प्रत्यक्षमर्थगोचरम्। स एवार्थः प्रत्यक्षगोचरो यो ज्ञानप्रतिभास-(१) मात्मनोऽन्वयव्यतिरेकावनुकारयति। न च सामान्यं निरस्तसमस्तार्थक्रियासामर्थ्यमेवं भवितुमर्हति। स्वलक्षणन्तु स्यात् तदेव परमार्थसत्। अर्थक्रियासामर्थ्यलक्षणत्वाद् वस्तुनः। एतदेवास्य स्वमसाधारणलक्षणं यद्देशतोऽननुगमेनादेशात्मकस्य परमार्थत्वं कालतोऽननुगमेन च क्षणिकत्वम्। तस्मात् स्वलक्षणविषयं प्रत्यक्षम्। न च स्वलक्षणमनुमानस्यापि गोचरः। तद्धि गृहीतप्रतिबन्धलिङ्गहेतुकं, प्रतिबन्धश्च तादात्म्यतदुत्पत्तिलक्षणः स्वलक्षणविषयोऽशक्यग्रह इति सामान्यधर्मावाश्रयते। न च सामान्यमेकमनेकदेशकालावस्थासंसर्गि भवितुमर्हति। तदिदमनादिवासनोद्भूतविकल्पाधिष्ठानं विकल्पाकारस्य वाऽलीकस्य वा स्वमनुमानगोचरोऽभ्युपेयम्। तच्च भावाभावसाधारण्याद्बाह्यसादृश्यान्नियतप्रतिभासत्वाच्चान्यव्यावृत्तिनिष्ठम्। यत् खलु भावाभावसाधारणं तदन्यव्यावृत्तिनिष्ठमेव यथाऽमूर्त्तत्वम्। तद्धि ज्ञानादौ भावे शशविषाणादौ चाभावे साधारणम्। भावाभावसाधारणश्च विकल्पगोचरोऽस्ति घटोऽस्ति नास्ति घट इति। यदि पुनरसाधारणो भावो भवेदस्तिशब्दो न युज्येत पुनरुक्तत्वात्। नास्तीत्यपि न वक्तव्यं विरोधात्। एवमभावासाधारण्येऽपि वाच्यम्। न चालीकस्य सर्वसामर्थ्यविरहिणः परमार्थसत्ता स्वलक्षणेन सादृश्यं मन्यतेऽन्यव्यावृत्तेः। न च गौरिति नियतौ बुद्धिव्यपदेशौ विनाऽश्वादिव्यावृत्तिम्। तस्मात् सामान्यमन्यव्यावृत्तिरूपमबाह्यं बाह्यभेदाग्रहाद्बाह्यत्वेनाव-

(१) "ज्ञानप्रतिभासं" ज्ञानाकारमित्यर्थः। यो यस्मिन् ज्ञाने स्वाकाराधायकः स तदाकारज्ञानस्य विषयः। एवञ्च नियमः प्रत्यक्षविषयतायामेव बोध्यः, अनुमित्यादौ अलीकादेरपि विषयत्वात्, तस्य च स्वाकारानाधायकत्वात्।

न्यायवार्त्तिकम्

किं कारणम् ? प्रमाणानि तावच्चत्वारि, विषयः सामान्यविशेषतद्वद्भेदात् (१) त्रेधा। सङ्करोऽप्येकस्य सर्वैः प्रमाणैरधिगतेरिन्द्रियवदिति। इन्द्रियं खलु अर्थप्रकाशकत्वात् प्रमाणम्। तस्य व्यवस्था सङ्करश्च। व्यवस्था गन्धादिषु, सङ्करः पृथिव्यादिषु, द्वीन्द्रियग्राह्यत्वात्। सत्तायां गुणत्वे च सार्वेन्द्रियं ज्ञानमिति। अधिगतत्वाद् वैयर्थ्यमिति चेन्न अन्यथा तदधिगतेः। स्यान्मतं यदि सङ्कीर्येरन् प्रमाणानि। नन्वेकेन प्रमाणेनाधिगतेऽर्थे द्वितीयं प्रमाणं व्यर्थमापद्येत। अधिगतञ्चार्थमधिगमयता प्रमाणेन पिष्टं पिष्टं स्यात्, न, अन्यथाधिगतेः। न ब्रूमो यथा

न्यायवार्त्तिकतात्पर्य्यटीका

गाह्यमानमनुमानं बाह्ये प्रवर्त्तयति। पारम्पर्य्येण च बाह्यप्रतिबन्धाद्बाह्यं प्रापयत् संवादकं सद् भ्रान्तमपि प्रमात्राश्रयवशात् प्रमाणम्। तदस्य न स्वलक्षणं गोचरः। प्रत्यक्षमपि न सामान्यगोचरमित्यावेदितम् (२)। न चाभ्यामन्यत् प्रमाणमस्ति। प्रमाणस्य सतोऽत्रैवान्तर्भावात्। अनन्तर्भावे वा प्रमाणत्वानुपपत्तेः। न च सामान्यविशेषाभ्यामन्यदस्ति प्रमेयान्तरं यत्रैते तत् संप्लोष्येते इत्यर्थः। समाधानवाक्यं विवृणोति—एतच्च नेति। यथा चैतत् तथा तत्र निवेदयिष्यते (३)। विशेषो व्यवच्छेदकः, स च वक्रकोटरादिरन्त्यश्च (४)। व्यवस्थासंकरोदाहरणान्याह—इन्द्रियवदिति। संप्लवममृष्यमाण आह(५) अधिगतत्वादिति। समाधत्ते नान्यथेति। आक्षेपं विभजते यदीति। स्यादेतत्। नास्ति वैयर्थ्यमधिगतीनामाशुतरविनाशितया तद्गोचराधिगत्यन्तरोत्पादं प्रति प्रमान्तरस्यार्थवत्त्वादित्यत आह—अधिगतञ्चार्थमधिगमयता प्रमाणेनेति। यद्यप्यधिगतय आशुतरविनाशिन्यस्तथाऽप्येकतरप्रमाणजनिताऽधिगतिलघुजन्मनः संस्कारादेव स्थायिनस्तदर्थस्मृतिसन्ततिसम्भवादधिगतमर्थमधिगमयता प्रमाणेन पिष्टं पिष्टं स्यात्। समाधिवाक्यं विवरीतुमनुवदति—नान्यथेति। विवृणोति न ब्रूम इति। अयमभिसन्धिः, न हि प्रमाणकारणानि प्रेक्षावन्ति, येनैवमालोचयेयुः यज्जनितमेव चास्माग्र केनचित् प्रमाणं वयमिहोदास्मह इति। नापि स्वकारणलब्धजन्मानि प्रमाणानि दर्शितोऽयमर्थोऽन्यतमेन चास्माग्र प्रमाणेन कृतमस्माभिरिति विरन्तुमर्हन्ति। प्रमातुश्चेतनत्वादयमनुयोग इति चेन्न, प्रियस्य वस्तुनोऽनेन भूयो भूयः प्रमित्सितत्वात्। अप्रमित्सितस्यापि च दुर्जनवचनादेः प्रमेयस्यानेन प्रमीयमाणत्वात्। तस्मान्न प्रमात्रभिसन्धानात् प्रमाणस्य प्रवृत्तिरप्रवृत्तिर्वाऽर्थे किं तु सामर्थ्यात्, अन्यथाऽग्निदाहादिदुःखस्याप्रत्यक्षत्वप्रसङ्गः। यत्तु प्रमाणं

(१) सामान्यं, विशेषः, तदुभयवांश्च, एतद्भेदात्त्रेधा। (२) १३ पृः ता ८ पं स्वयमावेदितम्। (३) "एतत्" समाधानवाक्यविवरणं "यथा" भवति "तथा" "तत्र" ध्रुतपाठानन्तरमेव "न तावत्" इत्यादिना "निवेदयिष्यते" वार्त्तिककृतेति बोध्यम्। (४) 'वक्राकोठरादिरन्त्यश्च' इति ख-पु पाठः। अन्त्यः पदार्थविशेष इति परिशुद्धप्रकाशः। (५) 'मीमांसक इति शेष' इति परिशु।

न्यायवार्त्तिकम्

प्रत्यक्षेणार्थोऽधिगम्यते तथानुमानादिभिरपीति। "अन्यथा" प्रत्यक्षेणेन्द्रियसम्बद्धः, इन्द्रियासम्बद्धोऽनुमानेन, संज्ञासंज्ञिसम्बन्धप्रतिपत्तिरुपमानेन, शब्दोल्लेखेनागमेनेति। विषयान्तरे व्यवस्थादर्शनाच्च। न च सर्व्वस्मिन्नर्थे संप्लवोऽस्तीति अतो न वैयर्थ्यमिति। तस्माद् व्यवस्थितमेतत्तसिर्वचनविभक्तिव्याप्तिज्ञापनार्थ इति। प्रमाणस्वरूपावधारणं कर्त्तव्यम्। किं पुनः प्रमाणस्य प्रमाणत्वम्? किञ्चोक्तं प्रमाणमिति? उपलब्धिहेतुः प्रमाणम्, उपलब्धिहेतुत्वं प्रमाणत्वम्।

न्यायवार्त्तिकतात्पर्य्यटीका

प्रमित्साधीनप्रवृत्ति तद्यदि प्रमाता न व्यापारयेत् किमायातं प्रमाणस्य, न हि तोयमपि पिपासुना न (१) पीयत इति तस्य पिपासोपशमशक्तिरपैति। तस्मात् प्रत्यक्षसामग्रीजनिता बुद्धिः प्रमा तज्जनकानि च प्रमाणानि समानविषयाण्यपि। स एव चानेन सामग्रीभेदः प्रदर्शितोऽन्यथा तु प्रत्यक्षेणेत्यादिना। यद्यपि साक्षात्कारासाक्षात्कारादिरपि प्रकारभेदोऽस्ति तथाऽप्यसौ प्रकृतानुपयोगान्नोक्तः। यदि च द्रव्यं त्वचा गृहीतमिति कृतं चक्षुषा, चक्षुषा वा गृहीतमिति कृतं त्वचेत्युच्येत न रूपविज्ञानं स्पर्शविज्ञानं वोपजायेत। तदर्थं चक्षुः त्वक्चाभ्युपेते तथा च संप्लववैयर्थ्येऽपि व्यवस्थायां न वैयर्थ्यमित्याह—विषयान्तर इति। प्रकृतमुपसंहरति—तस्मादिति।

विभक्त्यर्थं निरूप्य प्रातिपदिकार्थनिरूपणमवतारयति—प्रमाणेति। अवधार्यतेऽनेनेत्यवधारणं विचार इति। विचारणाय भावभवितारौ (२) पृच्छति—किं पुनरिति। केचिदाहुरनधिगतार्थगन्तृ प्रमाणमिति(३)। विषयसारूप्यं साकारस्य विज्ञानस्येत्यन्ये (४)। विज्ञानस्यैवानाकारस्यात्मानात्मप्रकाशनसामर्थ्यमित्यपरे (५)। उपलब्धिसाधनमिति वृद्धाः(६)। तस्माद्विप्रतिपत्तेः संशयात् प्रश्नः। भावप्रश्नव्याख्यानेन भवितृप्रश्नो व्याख्यातः। उत्तरम् उपलब्धिहेतुः प्रमाणम्। न च संशयविपर्यासरूपोपलब्धिकारणयोः प्रसङ्गः, अर्थवदित्यधिकारात्। तयोश्चोपदर्शितार्थव्यभिचारेणानर्थकत्वात्। नो खलु विकल्प्यमानं वस्त्वस्ति अर्थक्रियासु वोपयुज्यते। स्यादेतत् स्मृतिहेतोरपि प्रामाण्यप्रसङ्गः। न ह्यसौ नोपलब्धिहेतुः, न चार्थसहकारि प्रमाणमिति संस्कारस्यार्थसहकारिताविरहादप्रामाण्यमिति सांप्रतम्। नदीपूरस्य पिपीलिकाण्डसंचरणस्य चातीतानागतवर्षलिङ्गस्य शब्दस्यातीतानागतगोचरस्यार्थसहकारिताविरहिणोऽप्रमाणत्वप्रसङ्गात्। ज्ञापकत्वेन कार्यत्वेन वा कथञ्चिदर्थसम्बन्धे संस्कारस्यापि तत् समानमिति तस्यापि स्मृतिरूपोपलब्धिहेतोः प्रामाण्यं प्रसक्तम्। मैवम्। प्रमाणशब्देन तस्यापास्त-

(१) नु इति ख-पु। (२) भावो धर्म्मः प्रमाणत्वं, भविता धर्म्मी प्रमाणलक्षणमितार्थ इति परिशुद्धिप्रकाशः। (३) भाट्टाः। (४) सौत्रान्तिकाः। (५) निराकारवादिनो वैभाषिकादयः। (६) प्रमाणवृद्धाः नैयायिकादय इति भावः।

न्यायवार्त्तिकम्

यदुपलब्धिनिमित्तं तत् प्रमाणमिति। समानत्वादलक्षणमिति चेत्? यदुपलब्धिहेतुः प्रमाणं, ननु प्रमातृप्रमेययोरपि उपलब्धिहेतुत्वात् प्रमाणत्वं प्रसज्येत, विशेषो वा वक्तव्य इति। अयं विशेषः,—प्रमाणे प्रमातृप्रमेययोश्चरितार्थत्वात्, प्रमाणे प्रमाता प्रमेयञ्च चरितार्थम्। अचरितार्थं च प्रमाणम् अतस्तदेवोपलब्धिसाधनमिति। अकरणा प्रमाणोत्पत्तिरिति चेद्, यदि प्रमातृप्रमेयाभ्यां

न्यायवार्त्तिकतात्पर्य्यटीका

त्वात्। प्रमासाधनं हि प्रमाणं न च स्मृतिः प्रमा, लोकाधीनावधारणो हि शब्दार्थसम्बन्धः। लोकश्च संस्कारमात्रजन्मनः स्मृतेरन्यामुपलब्धिमर्थाव्यभिचारिणीं प्रमामाचष्टे तस्मात्तद्धेतुः प्रमाणमिति न स्मृतिहेतौ प्रसङ्गः। अनधिगतार्थगन्तृत्वञ्च धारावाहिकविज्ञानानामधिगतार्थगोचराणां लोकसिद्धप्रमाणभावानां प्रामाण्यं विहन्तीति नाद्रियामहे। न च कालभेदेनानधिगतगोचरत्वं धारावाहिकानामिति युक्तम्। परमसूक्ष्माणां कालकलादिभेदानां पिशितलोचनैरस्मादृशैरनाकलनात्। न चाद्येनैव विज्ञानेनोपदर्शितत्वादर्थस्य प्रवर्त्तितत्वात्पुरुषस्य प्रापितत्वाच्चोत्तरेषामप्रामाण्यमेव ज्ञानानामिति वाच्यम्। न हि विज्ञानस्यार्थप्रापणं प्रवर्त्तनादन्यत्, न च प्रवर्त्तनमर्थप्रदर्शनादन्यत्। तस्मादर्थप्रदर्शनमात्रव्यापारमेव ज्ञानं प्रवर्त्तकं प्रापकञ्च। प्रदर्शनं च पूर्व्ववदुत्तरेषामपि विज्ञानानामभिन्नमिति कथं पूर्व्वमेव प्रमाणं नोत्तराण्यपि। पुरुषापेक्षया तु प्रामाण्ये चन्द्रतारकादिविज्ञानस्य पुरुषानपेक्षितस्याप्रामाण्यप्रसङ्गः। न चातिदवीयस्तया तदर्थस्य हेयतया तदपि पुरुषस्यापेक्षितं, तस्योपेक्षणीयविषयत्वात्। न चोपेक्षणीयमप्यनुपादेयत्वाद्धेयमिति निवेदयिष्यते(१)। उपलब्धिहेतुश्च प्रमाणं वदता अनधिगतार्थगन्तृत्वञ्च सारूप्यं चात्मानात्मप्रकाशनशक्तिश्च प्रमाणमिति निरस्तानि भवन्ति। उपलब्धिमात्रस्यार्थाव्यभिचारिणः स्मृतेरन्यस्य प्रमाशब्देनाभिधानात्। हेतुग्रहेण सारूप्यशक्त्योः फलादभिन्नयोरपाकरणाद् हेतुहेतुमद्भावस्य तादात्म्येऽनुपपत्तेरिति। उपलब्धिहेतुत्वञ्च प्रमाणत्वम्। भवितृव्याख्यानेन भावो व्याख्यातः। तदेव ज्ञानमज्ञानं वा। उपलब्धिहेतुः प्रमाणं तस्य च भावस्तत्त्वमिति स्थितम्। तदेतदतिव्यापकत्वेनाक्षिपति—समानत्वादिति। समाधत्ते अयं विशेष इति। अयमर्थः, सर्व्वः कर्त्ता करणगोचरव्यापारो न साक्षात् फले व्याप्रियते। करणं च द्विधा सिद्धमसिद्धं, परश्वादि दारुद्वैधीभावायोद्यम्योद्यम्य दारुणि पातयन् दारु च्छिनत्तीत्युच्यते न तु साक्षात्कर्तृव्यापारगोचरो दारुद्वैधीभावः, किन्तु स्पर्शवद्वेगवतः करणीभूतस्य परशोः संयोगस्योद्यमननिपातनलक्षणस्तु कर्तृव्यापारः परशुगोचर एव। एवं स्वर्गकामोऽपि कर्त्ता न साक्षात् स्वर्गे व्याप्रियते किन्तु तत्करणं यागमसिद्धं साधयति। स्वर्गस्तु यागव्यापारादेवापूर्व्वाभिधानाच्चेतनाश्रयाद्देशकालावस्थाभेदासादितपरिणतिविशेषात्साक्षादुत्पद्यते तद्वदिहापि सिद्धमिन्द्रियादि असिद्धञ्च तत्सन्निकर्षादि व्यापारयन्नुत्पादयन्

(१) १६ पृ:, २६ पङ्क्त्यनन्तरं पङ्क्तितो्दृततात्पर्य्यं हेयप्रतिपादनद्वारा स्वयमेव निवेदयिष्यते।

न्यायवार्त्तिकम्

प्रमाणं जन्यते अकरणा तर्हि प्रमाणोत्पत्तिः प्राप्नोति ? न, इन्द्रियार्थसन्निकर्षस्य करणभावात् नाकरणा प्रमाणोत्पत्तिः, प्रमाणोत्पत्ताविन्द्रियार्थसन्निकर्षमपेक्षमाणाभ्यां प्रमातृप्रमेयाभ्यां प्रमाणं जन्यत इति नाकरणप्रमाणोत्पत्तिप्रसङ्गः। यदि तर्हि प्रमाणोत्पत्ताविन्द्रियार्थसन्निकर्षमपेक्षेते प्रमातृप्रमेये, अथ तर्हि इन्द्रियार्थसन्निकर्षोत्पत्तौ किमपेक्षेते इति ? तस्मिन्नपीन्द्रियमित्येवमनादिः कर्तृकरणभावः, यद्‌यत् पश्चाद्भवति तत्तत् पूर्वभाविनमपेक्षत इत्यनादिः कर्तृकरणभावो द्रष्टव्य इति। यदि प्रमातृप्रमेयाभ्यां सद्‌भ्यां प्रमाणं जन्यते, ततः प्रमाणमन्तरेण प्रमातृप्रमेयभावस्यासिद्धत्वात् प्रमातृत्वं प्रमेयत्वञ्चानुपपन्नमिति। कथं ? प्रमाणमिति। यथा कारकशब्दोऽयं तथा प्रमाता प्रमेयमिति। न च कारकशब्दाः क्रियामन्तरेणात्मानं लभन्त इति। न च द्रव्यमात्रं कारकं, न च क्रियामात्रमिति, कारकशब्दो हि प्रवर्तमानः क्रियासाधने क्रियाविशेषयुक्ते प्रवर्तते।

न्यायवार्त्तिकतात्पर्य्यटीका

करण एव चरितार्थः, करणं त्विन्द्रियादि तत्सन्निकर्षादि वा नान्यत्र चरितार्थमिति साक्षादुपलब्धावेव फले व्याप्रियते। प्रमेयस्य तु प्रत्यक्षादन्यत्रोपलब्धिहेतुभाव एव नास्ति, केवलं प्रमाणविषयभावमात्रेणोपयुज्यते। यत्राप्यस्य हेतुभावः प्रत्यक्षेऽभिप्रेयते तत्रापीन्द्रियसम्बन्धमात्र उपयुज्यते प्रमेयम्। इन्द्रियमेव तत्तत्सन्निकर्षादिना साक्षात् प्रमाहेतुः, तत्सिद्धमेतन्न प्रमाता साक्षात् प्रमाहेतुः कर्तृत्वात्। यो यः कर्त्ता स सर्वो न साक्षात् फलहेतुः, यथा—व्रश्चनः। यथा वा यजमानादिस्तथा, तस्मात्तथा। तथा प्रत्यक्षं प्रमेये न साक्षात् प्रमाहेतुः प्रमेयत्वात्। यद्‌यत् प्रमेयं तत्तत् सर्वं न साक्षात् प्रमाहेतुः अनुमेयादिवत्, तथा चैतत्तथा। तदिदं प्रमातृप्रमेययोः प्रमाणे चरितार्थत्वमचरितार्थत्वं प्रमाणस्य, तस्मात्तदेव फलहेतुः। प्रमातृप्रमेये तु फलोद्देशेन प्रवृत्ते इति तद्धेतू कथञ्चिदिति। चोदयति—**अकरणेति**। नाकरणः कर्त्ता प्रमाणमपि व्याप्तुमर्हतीत्यर्थः। परिहरति—**न, इन्द्रियार्थसन्निकर्षस्येति**। यदि ज्ञानं प्रमाणं तदा ज्ञानस्य प्रमाणस्योत्पत्ताविल्यर्थः। पुनश्चोदयति—**यदि तर्हीति**। परिहरति—**तस्मिन्नपीति**। चोदयति—**यदि प्रमातृप्रमेयाभ्यां सद्‌भ्यां प्रमाणमिति**। प्रमाणमन्तरेण प्रमाया अभावात् प्रमातृप्रमेययोरसिद्धिरित्यर्थः। पृच्छति—**कथमिति**। उत्तरं—**प्रमाणमितीति**। अथ स्वरूपमेव कारकं कस्मान्न भवति, तच्च क्रियासम्बन्धस्य पुरस्तादप्यस्तीत्यत आह—**न च द्रव्यमात्रमिति**। अस्तु तर्हि तदीयो व्यापारः प्रधानक्रियायां कारणं, तस्यापि प्रधानक्रियायां निमित्तत्वादित्यत आह—**न च क्रियामात्रम्**। न हि स्वरूपेण देवदत्तो व्रश्चनः, नापि तदीयो व्यापार उद्यमननिपातनादिः काष्ठाद्याश्रयः। क्व तर्हि कारकशब्दः प्रवर्त्तत इत्यत आह—**कारकशब्दो हीति**। प्रधानक्रियासाधने हेतौ अवान्तरक्रियाविशेषयुक्ते कारकशब्दः प्रवर्त्तते। द्वैधीभावो हि फलं प्रधानं व्यापारे कर्त्तुः करणगोचर उद्यमननिपातने अवान्तरव्यापारः कर्म्मणश्च दारुणः स्पर्शवद्वेगवत्तीक्ष्णतरकुठार-

न्यायवार्त्तिकम्

प्रमातृप्रमेयशब्दौ च कारकशब्दौ, तावन्तरेण क्रियां न प्रवर्तयेतामिति (१), न, पाचकादिशब्दवत् त्रिकालविषयत्वात्। न ब्रूमः क्रियासम्बन्धेनैव कारकशब्दाः प्रवर्तन्त इति, अपि तु त्रिकालविषया एते। यदि क्रियासम्बन्धनिमित्ताः स्युर्न क्रियासम्बन्धमन्तरेण प्रवर्त्तेरन्? क्रियासम्बन्धमन्तरेण तु प्रवर्तन्ते, किं पुनर्निमित्तम्? सामर्थ्यम्। तच्च त्रिष्वपि कालेष्वस्तीति। तस्मादुपपन्नं प्रमातृप्रमेयाभ्यां प्रमाणं जन्यत इति, तदुपलब्धिसाधनमिति। साधकतमत्वाद्वा न प्रसङ्गः। न चायं प्रसङ्गोऽस्ति प्रमाता च प्रमेयं चोपलब्धेर्निमित्तत्वात् प्रमाणं प्रसज्यत इति। कस्मात्? साधकतमत्वात्। साधकतमं प्रमाणं, न तु प्रमातृप्रमेये। कः खलु साधकतमार्थः? साधकतमं प्रमाणमिति केवलं वाक्यमभिधीयते नार्थ इति। भावाभावयोस्तद्वत्ता, न प्रमातरि प्रमेये वाऽसति प्रमा भवति, सति तु भवति, न पुनः सति भवत्येव।

न्यायवार्त्तिकतात्पर्यटीका

संयोग एवावान्तरव्यापारः, तेन हि दारु स्वावयवपरिस्पन्दजन्मनाऽवयवविभागं द्वैधीभावमनुभवति। तस्मादवान्तरव्यापारसम्पन्नं कारकमिति सामान्यतः प्रसाध्य प्रकृते योजयति—प्रमातृप्रमेयशब्दौ चेति। तावन्तरेण क्रियां प्रधानक्रियामित्यर्थः। परिहरति—न, पाचकादिशब्दवदिति। लोकाधीनावधारणाधीनः खल्वयं शब्दार्थसम्बन्धः, लोकश्चातीतानागतवर्त्तमानक्रियासम्बन्धमात्रविवक्षया कारकशब्दान् प्रयुङ्क्ते, पाचकमानय पक्ष्यति पाचकोऽयमपाक्षीत् पाचकोऽयं पचतीति च तुल्यवत्त्रैकाल्यविषयप्रयोगदर्शनं, तत् कस्य हेतोरपचत्यपि पाकसम्बन्धं प्रत्यस्ति स्वरूपशक्तिर्देवदत्तादाविति। द्वयी हि शक्तिः कारकाणां कार्योपजनं प्रति स्वरूपञ्च सहकारिग्रामसमवधानञ्च। तत्रासत्यपि सहकारिग्रामसमवधाने कारकशब्दानां प्रवृत्तेः, सत्यपि च स्वरूपे त्रैकाल्यव्यापिनि त्रैकाल्ययोगिकार्यासम्भवे प्रवृत्तेस्त्रैकाल्ययोगिकार्योपहितमर्य्यादमेव स्वरूपं कारकशब्दानां प्रवृत्तिनिमित्तमित्यसत्यपि प्रत्युत्पन्नप्रमाहेतुप्रमाणसम्बन्धे प्रमातृप्रमेयशब्दयोः प्रवृत्तिरिति उपपन्नं प्रमातृप्रमेयाभ्यां प्रमाणं जन्यत इति। तत् प्रमाणमुपलब्धिसाधनं साक्षात्, न प्रमातृप्रमेये इति सिद्धम्।

सत्यपि चोपलब्धिसाधनत्वे प्रमातृप्रमेययोरुपलब्धिहेतुरित्यप्रसङ्गः साधकतमासाधकतमयोः साधकतमे कार्य्यसंप्रत्ययात् सातिशयत्वेनोद्भूतत्वात्तस्येत्याह—साधकतमत्वाद्वेति। साधकतमार्थं पृच्छति—कः खल्विति। उत्तरं—प्रमाणस्य भावाभावयोः प्रमायाः कार्य्यस्य तद्वत्ता भावाभाववत्ता साधकतमार्थः। लक्ष्यलक्षणयोरभेदविवक्षया सामानाधिकरण्यं, न तु प्रमातृप्रमेयान्वयव्यतिरेकानुविधानमप्यप्रमाया अन्वयव्यतिरेकयोरित्यत आह—न प्रमातरीति। प्रमातृप्रमेयाभ्यां सह प्रमोत्पादस्यान्ययोगव्यवच्छेदेन सम्बन्धः, प्रमाणेन सह प्रमोत्पादस्यायोगान्य-

(१) अत्र 'प्रवर्त्तेता'मिति पाठः सम्यक्तया मन्यते।

न्यायवार्त्तिकम्

प्रमाणे तु सति भवन्ती भवत्येव, सोऽयमतिशयः साधकतमत्वमुच्यते। यद्वान् वा प्रमिमीते सोऽतिशयः। किंवान् प्रमिमीते? प्रमाणवान् प्रमिमीते। प्रमाणे सति प्रमिमीते, नासतीति। सतोर्वाऽकर्तृत्वं यदभावात्। यस्य चाभावात् प्रमातृप्रमेये न प्रमां कुरुतः सोऽतिशयः। संयोगवच्चरमभाविता वा, यथा वा संयोगः पश्चाद्भावी द्रव्यशक्तिर्भवति तथा प्रमाणं चरमभावि प्रमातृप्रमेययोः प्रमाशक्तिर्भवति, पश्चाद्भावोऽतिशयः। प्रतिपत्तेरानन्तर्यं वा। यद्वा प्रमाणानन्तरं प्रतिपत्तेर्जन्म, स चायमतिशय इति। असाधारणकारणता वा। प्रमाता (१) साधारणं कारणं सर्वप्रतिपत्तीनां, प्रमेयमप्यशेषपुरुषसाधारणत्वात् तथाभूतं, प्रमाणं त्वसाधारणकारणत्वात् प्रधानम्। प्राधान्याच्च साधकतमत्वेनाभिधीयत इति।

न्यायवार्त्तिकतात्पर्यटीका

योगव्यवच्छेदाभ्यामित्यतिशयः। प्रमातृप्रमेये हि प्रमाणोपक्षीणवृत्तिनी प्रमायां न व्याप्रियेते। तेनान्तरायसम्भवान्नावश्यं प्रमातृप्रमेयव्यापारे सति प्रमा भवति। प्रमाणव्यापारे तु प्रमा भवत्येवेति। कल्पान्तरमाह—यद्वान् वा प्रमिमीते सोऽतिशयः। प्रमिमीत इति स्वतन्त्रं कर्त्तारं दर्शयति—प्रतिपाद्यात् करणाद्व्यवच्छेत्तुम्। यद्वानेवेति च सावधारणम्। तत्र यद्वानिति कर्त्रन्तरं व्यवच्छिन्नं, न हि कर्त्ता कर्त्तृमान्, किन्तु प्रमाणवान्, स्वतन्त्रो ह्याश्रयः परतन्त्रेणाश्रीयते। कर्त्रधीनं हि करणमित्यावेदितम्। प्रमाता प्रमेयवानपि कचिद्भवेत् तत्तन्त्रत्वात् प्रमेयस्य, न तु प्रमेयवानेव, अनुमानादिषु प्रमेयस्यातीतत्वादिना तद्वत्ताविरहात्। न तु लिङ्गादिज्ञानवान्न कदाचिदित्यवधारणफलम्। सोऽयं विशेषः प्रमातृप्रमेयाभ्यां प्रमाणस्य। अस्यैव विशेषस्यातिशयत्वमन्वयव्यतिरेकाभ्यामादर्शयति—प्रमाणे सतीति। कल्पान्तरमाह—सतोर्वेति। पूर्वेण भावप्रधानोऽतिशयो यादृशस्य दर्शितस्तादृशस्यैवेह व्यतिरेकप्रधानोऽतिशय इति विशेषः। अकर्तृत्वमहेतुत्वमित्यर्थः। कल्पान्तरमाह—संयोगवच्चरमभाविता वा। इतिकर्त्तव्यताके(२) हि व्याप्रियमाणं करणं न तु कारणादिस्वरूपं, करणादिशब्दप्रवृत्तिनिमित्तमात्रन्तु स्वरूपं स्यादिति पूर्वमावेदितं, तच्च सिद्धमसिद्धं वा प्रमातृप्रमेयस्य पश्चादेव तथात्वेन सम्पद्यत इति चरमभावीत्युच्यते सोऽयमस्य चरमभाविताऽतिशयः। यथा तन्तूनां पटे जनयितव्ये अन्त्याः संयोगभेदा यदनन्तरं पट उत्पद्यत एवेति। कल्पान्तरमाह—प्रतिपत्तेरानन्तर्यं वा। यत एव प्रमाणं चरमभावि अत एव तदनन्तरं प्रतिपत्तेः प्रमाया भावात्। प्रतिपत्तेरानन्तर्यमेव प्रमाणस्यातिशयः। स चेति, चोऽवधारणे। इदमपि लक्ष्यलक्षणयोरभेदविवक्षयोक्तम्। कल्पान्तरमाह—असाधारणकारणता वा। चतस्रः खल्विमाः प्रत्यक्षादिप्रमितयो भिन्नबुद्धिव्यपदेशभाजोऽनुभूयन्ते। न च प्रमाता तद्भेदहेतुः, तस्य साधारण्यात्। न च प्रमेयमेकस्यापि प्रमेयस्य

(१) अत्र 'तावत्' इत्यधिकपाठः ख०पु०)

(२) "सेतिकर्त्तव्यताके" इत्येवं भवितुमुचितम् इति मन्ये।

न्यायवार्त्तिकम्

प्रमाकारणसंयोगविशेषकत्वं वा, यो वा प्रमाकारणं संयोगस्तस्य प्रमाणमनुग्रहे वर्तमानमतिशयशब्दवाच्यम्।

अर्थग्रहणं प्रमाणविषयप्रतिपत्तिनिषेधार्थम्। यतो न प्रमाणविषया प्रतिपत्तिः पुरुषमितिकर्तव्यतायां प्रयोजयति, किन्त्वर्थस्य तथाभावविषया। यदायमर्थस्य तथाभावं प्रतिपद्यते अथ प्रवर्तत इति। उपेक्षणीयविषयप्रतिषेधार्थं वा। न ह्युपेक्षणीयविषयप्रतिपत्तिः पुरुषमितिकर्तव्यतायां प्रयोजयति, किन्त्वर्थस्य सुखदुःखहेतुभावविषया। यदायमर्थस्य सुखदुःखहेतुभावं प्रतिपद्यते, अथ प्रवर्तत इति। प्रमाणाग्रहणं गम्यमानत्वादिति चेन्न, प्रमाणविशेषज्ञापनार्थत्वात्। अर्थप्रतिपत्तौ प्रवृत्तिसामर्थ्यादित्यभिधीयमाने गम्यत एवैतत् प्रमाणत इति। न हि काचित् प्रतिपत्तिः प्रमाणमन्तरेण भवति, तच्च नैवम्, प्रमाणविशेषज्ञापनार्थत्वात्। अस्त्ययं प्रमाण-

न्यायवार्त्तिकतात्पर्य्यटीका

संप्लवे सर्वप्रतिपत्तिसाधारण्यात्। प्रमाणानि तु यथायथं चतसृष्वसाधारणानीति भिन्नबुद्धिव्यपदेशनिबन्धनानि। तदिदमसाधारण्यमतिशयः, अशेषः पुरुषः प्रमाताऽत्र विवक्षितः। कल्पान्तरमाह—प्रमाकारणेति। प्रमाया असमवायिकारणं खल्वात्ममनःसंयोगः, स च सर्वप्रमासाधारणः, नासौ प्रमात्रा प्रमेयेण वा शक्यो विशेष्टुम्। तयोरपि तद्वदेव साधारण्यात्। असाधारणं तु प्रमाणं यथायथमात्ममनःसंयोगमवच्छिनत्ति। एवं सुखादिप्रमेयाणामपि मन एवासाधारणं व्यवच्छेदकं द्रष्टव्यम्। सोऽयमस्यातिशयः। अतिशयातिशयिनोरभेदविवक्षयाऽतिशयशब्दवाच्यमित्युक्तम्।

क्रमप्राप्तमर्थग्रहणं तात्पर्य्यतो व्याचष्टे—अर्थग्रहणमिति। कस्मात् पुनर्निषिध्यते प्रमाणविषया प्रतिपत्तिरित्यत आह—यतो न प्रमाणविषयेति। इतिकर्त्तव्यता अनुष्ठानं, तस्मिन्, अर्थ्यत इत्यर्थस्तोयकण्टकादिः, तथाभावोऽर्थनीयत्वम्, तच्च सुखदुःखसाधनत्वम्। सुखसाधनं खलूपादेयत्वेन दुःखसाधनं च हेयत्वेनार्थ्यते। तात्पर्य्यान्तरमाह—उपेक्षणीयेति। उपेक्षणीयविषये प्रमाणे प्रवृत्तिसामर्थ्यं नास्तीति तत्प्रतिषिध्यते। न च तदप्रमाणमिति समर्थस्यापि दृष्टप्रमाणसाधर्म्येण लिङ्गेन प्रामाण्यानुमानादिति। चोदयति—प्रमाणाग्रहणमिति। समर्थप्रवृत्तिजनिका हि प्रतिपत्तिर्नाप्रमाणाद्भवतीति अर्थादेव प्रमाणादिति गम्यत इत्यर्थः। परिहरति—न प्रमाणविशेषज्ञापनार्थत्वात्। अयमभिसन्धिः—प्रवृत्तिसामर्थ्येन हि कार्येण प्रमाणस्यार्थवत्त्वमनुमातव्यम्। न चैतत् साक्षात् प्रमाणस्य कार्य्यं, किन्त्वर्थप्रतिपत्तेः, तदनन्तरं समर्था प्रवृत्तिरुपजायते। अर्थप्रतिपत्तिस्तु प्रमाणकार्येति समर्था प्रवृत्तिः प्रमाणकार्या सती प्रमाणस्यार्थवत्त्वं प्रमापयति, तस्मादर्थगम्यमपि प्रमाणमर्थप्रतिपत्तिकरणत्वेन द्योतनीयम्। अन्यथा प्रमाणमर्थवदर्थप्रतिपत्तेः समर्थप्रवृत्तिजनकत्वादिति किं केन सङ्गतम्। प्रमाणस्य विशेषः प्रमाणाभासाद् व्यावृत्तिः, तस्य ज्ञापनं, स एवार्थो यस्य प्रमाणग्रहणस्य तत्तथोक्तम्, तस्य भावस्तत्त्वम्। तस्मादेतदुक्तं भवति—प्रमाणकार्य्याया

न्यायभाष्यम्

प्रमाणमन्तरेण नार्थप्रतिपत्तिः, नार्थप्रतिपत्तिमन्तरेण प्रवृत्तिसामर्थ्यम्। प्रमाणेन खल्वयं ज्ञाताऽर्थमुपलभ्य तमर्थमभीप्सति जिहासति वा। तस्येप्साजिहासाप्रयुक्तस्य समीहा प्रवृत्तिरित्युच्यते। सामर्थ्यं पुनरस्याः फलेनाऽभिसम्बन्धः। समीहमानस्तमर्थमभीप्सन् जिहासन् वा तमर्थमाप्नोति जहाति वा। अर्थस्तु सुखं सुखहेतुश्च, (१) दुःखं दुःखहेतुश्च।

न्यायवार्त्तिकम्

शब्दः प्रमाणे वर्तमानः, अस्ति च प्रमाणसामान्यात् प्रमाणाभासेऽपीति। तद्येह (२) प्रमाणेन प्रतिपत्तिः, सा प्रवृत्तिसामर्थ्यं प्रतिपादयति प्रमाणं, नेतरदिति। न च प्रमाणग्रहणमन्तरेण पञ्चम्यभिधानं लभ्यते, तेन च प्रयोजनम्, अतश्च प्रमाणग्रहणं कृतमिति। अर्थग्रहणेन सुखदुःखहेतुत्वेन सर्वसंग्रहोऽर्य्यमाणत्वात् (३)। सर्वः प्रमाणादिरर्थः सुखदुःखहेतुः, सर्वश्चार्य्यते, अर्य्यमाणत्वादर्थ (४) इति, न, व्याघातादविवक्षितत्वाच्च। सर्वः प्रमाणादिरर्थः सुखदुःखहेतुरिति ब्रुवता हेयादिभेदाच्चत्वार्यर्थपदानीति व्याहन्येत। न च प्रमाणादिहानं शक्यं कर्तुम्। न च प्रमाणादिहानं विवक्षितं, तस्मादव्याख्यानमेतत्। किन्तु सुखदुःखत्वेन तद्धेतुत्वेन च

न्यायवार्त्तिकतात्पर्य्यटीका

अर्थप्रतिपत्तेः प्रवृत्तिसामर्थ्यं न तदाभासकार्य्यायाः, तस्मात् प्रमाणस्यार्थवत्त्वं गम्यत इति। तदिदमुक्तं —तद्येह प्रमाणेन प्रतिपत्तिः साप्रवृत्ति सामर्थ्यं प्रतिपादयति प्रमाणम्। अयमर्थः—प्रमाणं कर्त्तृ (५), प्रवृत्तिसामर्थ्यं प्रतिपद्यमानं प्राप्नुवत्तत् प्रतिपादयति प्रापयति, प्रमाणकार्य्याऽर्थप्रतिपत्तिरिति। इदमपि प्रमाणग्रहणस्य प्रयोजनमित्याह—न च प्रमाणग्रहणमिति। एकदेशिव्याख्यानमुपन्यस्यति—सुखेति। न केवलं सुखदुःखतद्धेतुत्वादर्थ्यमानत्वाज्जायमानत्वाच्च। दूषयति—नेति। सर्वस्य सुखदुःखतद्धेतुत्वेन हेयपक्षनिक्षेपणात्। उपादेयानां प्रमाणशास्त्रापवर्गाणामभावप्रसङ्गाद्व्याघातः। अविवक्षितत्वाच्चेति। चशब्दसमुच्चितमशक्यहानत्वं हेत्वन्तरमादर्शयति—न च प्रमाणादिहानमिति। सुखदुःखतद्धेतवो हि हेयाः सन्तो हानोपायमपेक्षन्ते। न च प्रमाणादेरन्यस्तदुपायः सम्भवति। न च प्रमाणादिः स्वोच्छेदाय पर्य्याप्तः। न चास्मादपवर्गो नाधिगम्यते। तस्मान्न शक्यं प्रमाणादिना प्रमाणहानमिति। न चैतन्निःश्रेयसहेतुं शास्त्रं प्रणयतः सूत्रकारस्य तदनुवर्तिनो वा भाष्यकारस्य विवक्षितमित्याह—न च प्रमाणादिहानं विवक्षितं, तस्मादस्मद्व्याख्यानमेव शोभनमित्याह—किं त्विति। वृत्तिसामर्थ्याधान-

---

(१) 'च' नास्ति ज०पु०। (२) "तथेह" इति क०पु०। (३) 'अर्थ्यमानत्वा'दिति ख०पु०। (४) अर्थ्यते इति अर्थः, ऋ+थन्। उषि-कुषि-गार्त्तिभ्यस्थन्। उ—२।४। अर्थ्यमानत्वादर्थ इति तात्पर्य्यकारमतम्। (५) कर्त्तृ—प्रयोज्यकर्तृस्वरूपं, तथा च प्रमाणं प्रवृत्तिसामर्थ्यं प्रतिपद्यते (प्राप्नोतीत्यर्थः), प्रमाणजन्या अर्थप्रतिपत्तिस्तु तत्प्रमाणं प्रवृत्तिसामर्थ्यं प्रापयति इति स्फुटार्थः।

न्यायभाष्यम्

सोऽयं प्रमाणार्थोऽपरिसङ्ख्येयः, प्राणभृद्भेदस्याऽपरिसङ्ख्येयत्वात्। अर्थवति च प्रमाणे(१) प्रमाता प्रमेयं प्रमितिरित्यर्थवन्ति भवन्ति। कस्मात्? अन्यतमापायेऽर्थस्यानुपपत्तेः।

न्यायवार्त्तिकम्

यावतां संग्रहस्तेऽभिधीयन्ते अधिकारात्। न च संविदो ग्रहणमनधिकारात्, अकर्मत्वाच्च न संविद्वेद्या, असुखदुःखत्वाद्, अतद्धेतुत्वाच्च, नाप्यर्थ्यते फलत्वात्। सोऽयं प्रमाणार्थोऽपरिसङ्ख्येयः, इयानयं प्रमाणविषय इति न परिसङ्ख्यातुं शक्यम् आनन्त्यात्, न, उभयस्यापि परिसङ्ख्यातत्वात्। एतावानयं प्रमाणार्थो यत्सुखदुःखे तद्धेतुश्चेति। तच्चोभयं परिसङ्ख्यातम्, अतो न युक्तमानन्त्यात् न परिसङ्ख्यातुं शक्यम्। प्राणभृद्भेदस्य चापरिसङ्ख्येयत्वादपरिसंख्येयः प्रमाणार्थ इत्यसम्बन्धमुक्तमिति, न, अर्थशब्दस्य प्रयोजनवाचित्वात् प्रमाणार्थोऽपरिसङ्ख्येय इति।

न्यायवार्त्तिकतात्पर्य्यटीका

योग्यत्वमधिकारः, तस्मात् सुखदुःखतद्धेतुरूपार्थप्रतिपत्तिरेव हि समर्थां प्रवृत्तिमाधत्ते न त्वर्थमात्रप्रतिपत्तिरित्यर्थः। न केवलं व्याघाताशक्यहानत्वाविवक्षितत्वैरर्थपदेन सर्वसंग्रहोऽशक्यत्वादपि न सर्वसंग्रह इत्याह—न संविद् इति। सुखदुःखतद्धेतुतया न संविदो ग्रहणं संग्रहः, सर्वमध्यपतिताया अपि। कुतः? अनधिकारात् सुखदुःखतद्धेतुयोग्यताविरहात्। नाप्यर्थ्यमानत्वेन संग्रह इत्याह—अकर्मत्वाच्च। न तावत् सर्वा एव संविदः संविद्गोचरा मनोयोनयः संवेद्या भवितुमर्हन्ति। एकनीलविषयसंवित्परम्परामात्र एव पुरुषायुपसंहृत्तपर्य्यवसानाद् विषयान्तरसंचाराभावप्रसङ्गाच्च। तस्मादनवस्थाभयादन्ते कस्याश्चित् संविदोऽसंवेद्यतया फलमात्रत्वमभ्युपेयम्। तथा च सा नार्थ्यते। न च सुखदुःखे तद्धेतुरिति न सर्वसंग्रहः संविदोऽसंग्रहादिति।

तदेवमनुसन्धिवाक्यं व्याख्याय भाष्यव्याख्यान्तरमवतार्य्य तत्रैकदेशिव्याख्यानं दूषयितुमुपन्यस्यति।—सोऽयं प्रमाणार्थ इति। दूषयति—उभयस्यापि परिसङ्ख्यातत्वात्। अर्थस्तु सुखमित्यादिना भाष्यग्रन्थेन। कार्य्यकारणाभ्यामुभयत्वं, प्राणभृद्भेदकस्यापरिसङ्ख्येयत्वादिति हेतुः, श्वेतः प्रासादः काकस्य कार्ष्ण्यादितिवन्न प्रतिज्ञार्थेन सङ्गच्छते इत्याह—प्राणभृद्भेदस्य चेति। तदेकदेशिमतदूषणमस्मद्व्याख्याने नास्तीत्याह—नार्थशब्दस्येति। चन्दनादिविषयं प्रमाणं सुखप्रयोजनमेव, कण्टकादिविषयकं प्रमाणं दुःखोत्पादप्रयोजनमेवेत्येतदुभयं परिसङ्ख्यातुं नियन्तुमशक्यमित्यर्थः।

एवं किलात्र शङ्क्यते—सुखदुःखभावो वस्तूनां स्वाभाविको भवेन्न वा। स्वाभाविकत्वे सर्व्व एव सर्वान् प्रत्यर्थः सुख इति करभवन्मनुष्याणामपि कण्टकः सुखः स्यात्। एवं निदाघे कुङ्कुमं सुखं स्याच्चन्दनं च हेमन्ते सुखं स्यात्। एवं तृष्णज इव अपां सुहितस्यापः सुखाः प्रसज्येरन्। अस्वाभाविकत्वेऽनादिवासनावैचित्र्यलब्धजन्मपुरुषधर्मकल्पनानुपातिनः सुखदुःखादयो न प्रमाणप्रयोजनं भवितुमर्हन्तीति तत्रेदमुपतिष्ठते—सोऽयं प्रमाणार्थ इति। निवेदयिष्यते हि क्षणभङ्ग-

(१) प्रमाणे सप्रयोजने सतीत्यर्थः। यद्वा प्रमाणे अर्थाव्यभिचारिणि सतीति बोध्यम्।

न्यायवार्त्तिकम्

प्रमाणे प्रयोजनमपरिसङ्ख्येयमित्ययं वाक्यार्थः। कथं? स एवार्थः केषाञ्चित्सुखहेतुर्भवति, केषाञ्चित् दुःखहेतुरिति। अर्थवति चसमर्थे प्रमाणे, अर्थवन्ति समर्थानीति। अन्यतमत्वार्थः साधकतमार्थो द्रष्टव्यः प्रकरणात्। प्रकरणं हि चतुर्वर्गे प्रमाणं प्रधानमिति वर्ण्यते। यदि पुनर्यथा-श्रुतिवाक्यमर्थवत् स्यात्, किं प्रमाणसामर्थ्यं वर्णितं स्यात्? तस्मादयथोक्तं न्याय्यमिति।

न्यायवार्त्तिकतात्पर्य्यटीका

भङ्गाधिकारे (१) यथा स्थेमभाजामपि वस्तूनामकर्मणामपि क्रमवत्सहकारिसमवधानवशादुपजनापायधर्म्मिणः क्रमवन्तो धर्मा भवन्तीति तदिहापि। यद्यपि न जात्या सुखदुःखहेतुभावो भवति, तथाऽपि जातिदेशकालावस्थापुरुषभेदसहकारिसमवधानादुपपत्स्यते सुखदुःखहेतुभावोऽव्यवस्थयेति भावः। तत्सिद्धमेतत् प्रमाणार्थोऽनियतः अनियतप्राणभृद्भेदहेतुकत्वात्, यद्यदनियतकारणकं कार्य्यं तत्सर्वमनियतमेव यथाऽनियतकालमेघोदयनिबन्धनं वर्षं तथा चायं तस्मादनियत इति। कस्मात् पुनः प्रमात्रादिचतुर्वर्गे प्रमाणस्यैवार्थ उच्यते न प्रमात्रादीनामपीत्याशङ्कानिवारणार्थं भाष्यमनुवदन्नेव व्याचष्टे—अर्थवति च समर्थे सम्यगर्थेऽर्थाव्यभिचारिणीति यावत्। प्रमाणेऽर्थवन्ति भवन्ति समर्थानि सम्यगर्थानि प्रमात्रादीनि, अर्थस्य तु सम्यक्त्वमिदमेव यद्यादृशः प्रमाणेनोपदर्शितस्तथात्वं न पुनरन्यथाभाव इति। यदा त्वादिभाष्यवाक्येऽर्थशब्दः प्रयोजनवचनस्तदैवं व्याख्यानम्—अर्थवति च प्रयोजनवति च यत्समर्थं शक्तं प्रमाणं प्रतिपत्त्यादिक्रमेण पूर्वोक्तेन प्रयोजनं प्रति, अतः समर्थे प्रमाणे प्रमात्रादीन्यर्थवन्ति प्रयोजनवन्ति भवन्ति, यतस्तान्यपि प्रमाणवदेव समर्थानि शक्तानि प्रयोजनं प्रतीति। अत्र **हेतुरन्यतमापाय** इति। तस्यार्थं व्याचष्टे—अन्यतमत्वार्थ इति। नन्वन्यतमशब्दो बहुष्वनिर्द्धारितविशेषमेकमाह, न तु साधकतममित्यत आह—प्रकरणादिति। साधारणशब्दो हि प्रकरणाद्विशेषे वर्तते। तद्यथा शिविकावाहनप्रक्रमे पुरुषमानयेति पुरुषशब्दो विष्टौ,(२) तद्वदिहापि प्रमात्रादिपरिहाराय प्रमाणस्यार्थवत्त्वाभिधाननियमप्रक्रम इति प्रमात्रादिभ्यः प्रमाणस्य विशेषो वाच्यस्तत्रैवान्यतमशब्दो वर्तते। यद्यप्यर्थप्रतिपत्त्यव्यभिचारद्वारेण प्रमाणस्याव्यभिचारो गम्यते दृष्टे विषये, तथाऽप्यदृष्टविषये न तज्जनितप्रतिपत्त्यव्यभिचारेणाव्यभिचारः शब्दस्य प्रमाणस्य शक्यो विज्ञातुं, प्रतीत्यव्यभिचारस्य प्रमाणाव्यभिचारग्रहणमन्तरेणाशक्यज्ञानत्वात्। तस्माद्दृष्टार्थस्य मन्त्रायुर्वेदस्य प्रवृत्तिसामर्थ्यावधृतार्थाव्यभिचारस्य सामान्यादाप्तप्रणीतत्वादग्निहोत्रादिवाक्यानां प्रमाणानामव्यभिचारग्रहणपुरःसरमेव त्रिवर्गस्याव्यभिचारग्रहणं, न पुनरत्र त्रिवर्गव्यभिचारः शक्योऽन्यतः परिच्छेतुम्। अदृष्टार्थविषयस्य च चतुर्वर्गस्येहार्थवत्त्वेन प्रयोजनं दृष्टार्थे सन्देहादपि व्यवहारसिद्धेः। तदिदं चतुर्वर्गे प्रमाणस्य प्राधान्यमिति।

---

(१) अ ३, आ २, सूत्र—१० आरभ्य सप्तदशसूत्रपर्यन्तं क्षणभङ्गभङ्गाधिकारः। (२) विष्टिः दण्डाकृष्टः कर्मकरः। परिशु० २०६।७ पं०।

न्यायभाष्यम्

तत्र यस्येप्साजिहासाप्रयुक्तस्य प्रवृत्तिः स प्रमाता, स येनाऽर्थं प्रमिणोति तत्प्रमाणं, योऽर्थः प्रमीयते तत् प्रमेयं, यद् अर्थविज्ञानं सा प्रमितिः, चतसृषु चैवंविधास्वर्थतत्त्वं परिसमाप्यते ।

किं पुनस्तत्त्वम् ? सतश्च सद्भावोऽसतश्चाऽसद्भावः । सत्सदिति गृह्यमाणं

न्यायवार्त्तिकम्

प्रमाता स्वतन्त्रः । किं पुनः स्वातन्त्र्यम् ? कारकफलोपभोक्तृत्वं, यस्मात् कारकाणां फलेनायमभिसम्बध्यते । तत् समवायो वा । यद्वा अशेषकारकनिष्पाद्यायाः क्रियायाः पुरुष आश्रयो भवति तत् प्रयोक्तृत्वमितराप्रयोज्यता वा । यद्वा परिदृष्टसामर्थ्यानि कारकचक्राणि प्रयुङ्क्ते तैश्च न प्रयुज्यते । तत्त्वपरिसमाप्तिर्विनियोगयोग्यता उपेक्ष्यता वा, याऽसावविसंवादिता साऽवधारितस्यार्थस्य विनियोगयोग्यता सुखसाधनं वा दुःखसाधनं वाऽयमर्थ इति ज्ञात्वा विनियोगः समाप्तिस्तत्प्राप्तिस्तत्प्रतिषेधश्च । यद्वा न सुखसाधनं न दुःखसाधनमित्युपेक्षेति । किं पुनस्तत् ? सदसती तत् ।

न्यायवार्त्तिकतात्पर्य्यटीका

चतुर्वर्गविभागपरे भाष्ये प्रमाता प्रथमं दर्शितः, तत्रास्य लक्षणमाह—प्रमाता स्वतन्त्र इति । स्वातन्त्र्यं पृच्छति—किं पुनः स्वातन्त्र्यं यस्याभिसम्बन्धात् स्वतन्त्र इति । तत्र भाष्यकृता प्रमातृत्वोपलक्षितो न लक्षितः, न खल्वीप्साजिहासयोर्वा प्रवृत्तौ वा स्वातन्त्र्यं प्रमातृत्वम्, अपि तु प्रमायामीप्सादिस्वातन्त्र्येण तु तदुत्तरभाविना प्रमायां स्वातन्त्र्यं पूर्वकालभाव्युपलक्षितम् । तेन तच्चरितमनुवर्तमानो वार्तिककृदुपलक्षणान्तरं कृत्वोत्तरकालभाव्याह—कारकफलोपभोक्तृत्वं । न हि सर्वः कर्त्ता समस्तकारकजन्यसुखादि वौदनादि वा भुङ्क्ते ऋत्विक्पाचकादिषु च व्यभिचारात् । कारकस्य तु सतः कर्तृत्वोत्तरकालभाविनी फलभोक्तृता कर्तृत्वनान्तरीयकतया (१) तदुपलक्षयति, यजमानस्य राज्ञश्च प्रैषादिना तत्तद्व्यापारकर्तृत्वात् । यथाऽऽहुरत्रभवन्तः (२) । "तदभिसन्धिपूर्वकं प्रेषणमध्येषणं वा युक्तं तत्सर्वं पच्यर्थ" इति । स्वातन्त्र्यलक्षणमाह—तत्समवायो वा । कारकाभिधानेन सन्निधापितां क्रियां तदिति सर्वनाम्ना परामृशति । यस्य हि व्यापारं प्राधान्येन धातुराख्यातप्रत्ययो वाऽभिधत्ते स स्वतन्त्रः कर्त्ता । तथा हि विक्रियन्तीत्यत्र तण्डुलादयः (३) कर्त्तारः, पचतीत्यत्र देवदत्तादयः, तत्कस्य हेतोः ? एकत्र तन्दुलादेर्व्यापार उपात्तोऽपरत्र देवदत्तादेरिति । प्राधान्येन चाशेषकारकनिर्वर्त्त्यत्वं प्रधानक्रियाया इति ।

---

(१) आदर्शे 'कर्त्तृत्वं नान्तरीयकतया' इति पाठः । (२) महाभाष्यकाराः । (महाभाष्—३।१।२६) । (३) 'तन्दुलादयः' इति क-पु-पाठः ।

न्यायभाष्यम्

यथाभूतमविपरीतं तत्त्वं भवति। असच्चाऽसदिति गृह्यमाणं यथाभूतमविपरीतं तत्त्वं भवति।

न्यायवार्त्तिकम्

तस्य भावस्तत्त्वमित्यत्र तद्वाच्यं यस्य भाव इति। सदसती तत्, प्रमाणविषयत्वेनाधिकारात्। सदसती प्रमाणविषयावित्यधिकृतम् तस्मात् सदसती तदिति। तद्भावः सदसत्त्वं, सदसतोः प्रमाणविषयता तत्प्रतिषेधश्च, तयोः खलु सदसतोर्भावो द्विरूपः, विधीयमानः प्रतिषिध्यमानश्च। यदेकत्र विधीयते तदन्यत्र प्रतिषिध्यते, तद्यथा—गन्धवती पृथिवी, अगन्धा आप इति। प्रमाणविषयत्वात्

न्यायवार्त्तिकतात्पर्य्यटीका

अवान्तरे व्यापारभेदेऽपि प्रधानक्रियोद्देशेन समस्तकारकप्रवृत्तेरिति। पुरुष इति प्रकृतक्रियापेक्षं, प्रमायाः पुरुषाश्रयत्वादिति। लक्षणान्तरमाह—तत्प्रयोक्तृत्वमितराप्रयोज्यता वा। तस्य चेतनस्य सर्वकारकाणि प्रति प्रयोक्तृत्वं, तैश्च कारकैरप्रयोज्यता वा। अचेतनस्य तु भाक्तं कर्तृत्वं, न स्वाभाविकमिति भावः। परिसमाप्तिपदार्थं व्याचष्टे, तत्त्वपरिसमाप्तिरिति। तत्त्वं हि प्रमाणव्याप्यत्वं प्रमाणव्यापारविषयत्वं, तच्च हानोपादानोपेक्षाभिः पर्य्यवस्यति, पर्य्यवसानं समाप्तिः। विनियोज्यतेति वक्तव्ये योग्यताग्रहणमीप्सितेऽपि दृष्टे कुतश्चित्प्रतिबन्धात् पुरुषेणानुपात्ते मा भूत्तत्त्वपरिसमाप्तिरिति। यद्यपि हि तत्पुरुषेणानुपात्तं तथाऽप्युपादानयोग्यताप्रदर्शनादस्ति तत्त्वपरिसमाप्तिरिति। तत्प्रतिषेधश्चेत्यत्र तच्छब्देन हानोपादानलक्षणं विनियोगं परामृशति।

किं पुनस्तत्त्वमित्यादि भाष्यं व्याचिख्यासुस्त्वप्रत्ययप्रकृतेस्तदोऽर्थं पृच्छति—किं पुनरिति। उत्तरं सदसती इति। प्रश्नं विभजते—तस्य भावस्तत्त्वमिति। उत्तरं विभजते—सदसती तत्। अथ कस्मात् प्रकृतिपुरुषौ वा (१) पञ्चस्कन्धा वा (२) परं ब्रह्माद्वैतं वा (३) जीवाजीवास्रवादयो वा सप्त(४)पृथिव्यापस्तेजो वायुरिति (५) चत्वारि भूतानीत्यादीनि न तदो वाच्यानि भवन्तीत्यत आह—प्रमाणविषयत्वेनाधिकारात्। सूत्रभाष्यवाक्यतद्विवरणेषु प्रमाणं प्रमाणविषयश्चाधिकृतम्। न च सांख्यादिसिद्धान्तभेदानुपातिनोऽर्थाः प्रमाणविषयाः। यथा चैतत्तथा तथा तत्रैव (६) निवेदयिष्यते। उपसंहरति—तस्मादिति।

प्रकृत्यर्थं व्याख्याय प्रत्ययार्थं व्याचष्टे—तद्भाव इति, सदसतोर्यथासंख्यं, विधायकप्रमाणविषयता सतो भावः, तत्प्रतिषेधश्चासतो भावः। सदिति विधायकप्रमाणविषयतां परामृशति, तत्प्रतिषेधेन च प्रतिषेधकं प्रमाणमुपस्थापितम्, तेन प्रतिषेधकप्रमाण-

(१) सांख्यमतम्। (२) बौद्धमतम्। पञ्चस्कन्धाः- रूपसंज्ञासंस्कारवेदनाविज्ञानात्मकाः। (३) वेदान्तमतम्। (४) आर्हतमतम्। जीवाजीवास्रवसंवरनिर्ज्जरबन्धमोक्षाः सप्त। (५) चार्व्वाकमतम्। (६) १।१।९ सूत्रव्याख्यायाम्।

न्यायभाष्यम्

कथमुत्तरस्य प्रमाणेनोपलब्धिरिति ? सत्युपलभ्यमाने तदनुपलब्धेः प्रदीपवत् । यथा दर्शकेन दीपेन दृश्ये गृह्यमाणे तदिव यन्न गृह्यते, तन्नास्ति । यद्यभविष्यदिदमिव व्यज्ञास्यत, विज्ञानाभावान्नास्तीति । एवं प्रमाणेन सति गृह्यमाणे तदिव यन्न गृह्यते,

न्यायवार्त्तिकम्

सदसद्भावाविशेषप्रसङ्ग इति चेन्न, अनैकान्तात्, तत्र भवेदेषा बुद्धिर्यदि प्रमाणेन सदसती गम्येते, ततः प्रमाणविषयत्वादुभयोरविशेषः प्राप्तः, तच्च न, अनैकान्तात्, सर्व्वमिदं गोघटादि द्रव्यजातं प्रमाणगम्यं भेदवच्च तस्मादनेकान्तोऽयमिति। स्वतन्त्रपरतन्त्रोपलब्ध्यनुपलब्धिकारणभावाच्च विशेषः, सत् खलु प्रमाणस्यासम्बन्धं (१) स्वतन्त्रं भवति, असत्तु परतन्त्रं प्रतिषेधमुखेन प्रतिपद्यते । प्रदीपवदिति, यथा प्रदीपोऽपवरकादिस्थितं घटादिकमर्थं प्रतिपादयति, तद्वदसदपि प्रतिपादयति । न ह्यसत्प्रतिपत्तौ उपायान्तरमास्थीयते । दृश्यमाने हि घटादिकेऽर्थे नानेन समानजातीयं

न्यायवार्त्तिकतात्पर्य्यटीका

विषयत्वमेव प्रतिषेध इत्यनेनोक्तं भवति । एतद्विभजते—तयोः खल्विति । शङ्कते—प्रमाणविषयत्वादिति । सर्व्वसामर्थ्यविरहेण त्वसत् सतो व्यावर्त्तते । यदि चासदपि प्रमाणविषयः, तर्हि नासमर्थं, तथा च सदसतोरभेद इत्यर्थः । निराकरोति—नानैकान्तात् । न वयमसामर्थ्येनासतो भेदमाचक्ष्महे येनैवमुपालभ्येमहीति भावः । शङ्कां विभजते—तत्र भवेदिति । निराकरणं विभजते—तच्च नेति । गवादि चेतनम्, अचेतनं घटादीति । यदि सदसती समर्थे कुतस्तर्हि तयोर्भेद इत्यत आह—स्वतन्त्रेति । असदुपलब्धिरेव सदुपलब्धेरन्याऽनुपलब्धिः । ननु संयोगविभागादिषु सत्स्वपि परतन्त्रोपलब्धिकारणत्वमस्ति, तेषां संयुज्यमानवियुज्यमानाधारनिरूपणाधीनत्वादित्यत आह—प्रतिषेधमुखेन प्रतिपद्यते प्रतीयते । सतां केषांचित्पारतन्त्र्येऽपि न निषेध्यनिषेधाधिकरणपारतन्त्र्यमित्यर्थः ।

संप्रति सदुपलम्भकस्य प्रमाणस्यासदुपलम्भकत्वं प्रतिपादयिष्यता भाष्यकारेण प्रदीपो दृष्टान्त उपन्यस्तः, स तु साध्यसमः, तस्यापि प्रमाणसामग्रीनिवेशादिति शङ्कमानोऽत्यन्तलोकप्रसिद्धतयाऽस्य दृष्टान्तत्वं समर्थयति—प्रदीपवदिति । गोपालाङ्गना अपि हि किमत्रास्ति स्तेनोऽस्मद्धनं वा अपवरकं न वेति सन्दिहानाः प्रदीपमुपादाय समन्तादवलोक्यापवरकमस्तीहास्मद्धनं नास्ति स्तेन इति सममेव निश्चिन्वन्ति, न तु स्तेनाभावनिश्चयायोपायान्तरमुपाददते, तेनाऽऽगोपालम् आ च पण्डितरूपेभ्यः सिद्धः प्रदीपो दृष्टान्तः तदिदमुक्तम् । न ह्यसत्प्रतिपत्ता(२)वुपायान्तर-

(१) 'प्रमाणस्यालम्बनम्' इति ख-पाठः । (२) 'न ह्येतत्प्रतिपत्ता'विति क-पाठः ।

न्यायभाष्यम्

तन्नास्ति। यद्यभविष्यदिदमिव व्यज्ञास्यत, विज्ञानाभावान्नास्तीति। तदेवं सतः प्रकाशकं प्रमाणमसदपि प्रकाशयतीति।

न्यायवार्त्तिकम्

दृश्यान्तरमस्ति, यद्यभविष्यदिदमिवाद्रक्ष्यत, न च दृश्यते, तस्माद्दर्शनाभावान्नास्तीति गम्यते। एवं प्रमाणेनापि सति प्रमीयमाणे, नानेन समानजातीयं प्रमेयान्तरमस्ति, यद्यभविष्यदिदमिवामास्यत, न च प्रमीयते, तस्मान्मानाभावान्नास्तीति। तदेवं सतः प्रकाशकं प्रमाणमसदपि प्रकाशयति। तत्र स्वातन्त्र्येणासद्भेदा न प्रकाशन्त इति नोच्यन्ते। चतुर्वर्गानन्तर्भावाद्वा

न्यायवार्त्तिकतात्पर्य्यटीका

मास्थीयते लोकेन। अनाश्रयणे हेतुमाह—दीपेन दृश्यमाने हि घटादिकेऽर्थे स्वतन्त्रे नानेन समानजातीयं तुल्योपलम्भयोग्यं दृश्यान्तरमस्ति। नीलपीतौ हि परस्पराभाववन्तौ, तेन नीलनिषेधे नावश्यं पीतविधिः। भावाभावौ तु परस्पराभावात्मानौ, नो खलु अभावाभावो नाम कश्चिदन्यो भावद्वयात्, नापि भावोऽन्योऽभावात्। तेन समानजातीयं दृश्यान्तरं निषेधत् दृश्यान्तरभावमेव (१) विधत्ते प्रदीपः। तदेवं प्रदीपोपायस्य प्रतिपत्तुः प्रतीतिक्रममुक्त्वा परीक्षकाणामुपपत्तिक्रममाह—यद्यभविष्यदिति। यदि कश्चिदाशङ्केत दृश्यतामभावः प्रदीपे भावोऽपि भविष्यतीति। तत्रैष परीक्षकाणां तर्क उपतिष्ठते—यद्यभविष्यदिति। तदेवं लौकिकपरीक्षकसम्मतमुपपाद्य दार्ष्टान्तिके योजयति—एवं प्रमाणेनापि इन्द्रियादिना सति प्रमीयमाण इति। पूर्ववद्व्याख्येयम्। उपसंहरति—तदेवमिति। सर्वं चैतदुपपादयिष्यते—ननु यदि सदसती प्रमाणविषयौ कस्मात्सद्भेदा इवासद्भेदा अपि सूत्रकृता नोच्यन्त इत्यत आह—तत्र, तेषु सदसद्भेदेषु मध्ये, स्वातन्त्र्येण असद्भेदा न प्रकाशन्त इति नोच्यन्ते। निषेध्यनिषेधाधिकरणाधीननिरूपणत्वादसद्भेदानां भावभेदतन्त्रं प्रकाशनमिति भावभेदकथनेनैव अभावभेदा अपि

वृत्तिः

वपुर्लीलालक्ष्मीजितमदनकोटिर्व्रजवधू-जनानामानन्दं कमपि कमनीयं विरचयन्।
स कोऽपि प्रेमाणं प्रथयतु मनोमन्दिरचर स्त्रिलोकीलोकानां सजलजलदश्यामलतनुः॥ १॥

संयुक्तां युक्तरूपामभिनवनिहितालक्तकारक्तभासा
सन्ध्यापीयूषभानोरतिरुचिरतरां चूर्णयन्तीमभिख्याम्।
मानव्यामोकनम्रत्रिपुरहरशिरोरम्यभूषाविशेषं
भूयो भव्यं विधातुं चरणनखरुचं भावयामो भवान्याः॥ २॥

---

(१) "निषेधत्" इत्यत्र "निषेधन्" इति "दृश्यान्तरभावम्" इत्यत्र "दृश्यान्तराभावम्" इति च पाठो भवितुमुचित इति मन्ये।

न्यायभाष्यम्

सच्च खलु षोडशधा व्यूढम् (१) उपदेक्ष्यते। तासां खल्वासां सद्विधानाम्—

सू—प्रमाणप्रमेयसंशयप्रयोजनदृष्टान्तसिद्धान्तावयवतर्कनिर्णयवादजल्पवितण्डाहेत्वाभासच्छलजातिनिग्रहस्थानानां तत्त्वज्ञानान्निःश्रेयसाधिगमः ॥ १ ॥

न्यायवार्त्तिकम्

भावप्रपञ्चवदभावप्रपञ्चोऽप्युद्दिष्टो वेदितव्य इति। भावोपदेशादभावप्रपञ्च उद्दिष्टो (२) भवतीति अतश्च नोच्यन्त इति।

सच्च खलु षोडशधा व्यूढमुपदेक्ष्यत इति। व्यूहः संक्षेपः। त एते सद्भेदा इति सूत्रम्।

न्यायवार्त्तिकतात्पर्य्यटीका

गम्यन्त इति नोक्ता इत्यर्थः। अथ वा कथिता एव येषां तत्त्वज्ञानं निःश्रेयसोपयोगि, ये तु न तथा, न तेषां प्रपञ्चः अनुपयुक्तभावप्रपञ्च इव वक्तव्य इत्याह—"चतुर्वर्गानन्तर्भावाद्वा भावप्रपञ्चवद्भावप्रपञ्च इति। निःश्रेयसस्यानुपयोगिनि भावप्रपञ्चे यथा चतुर्वर्गानन्तर्भावः, एवमभावप्रपञ्चेऽपीति। अथ निःश्रेयसोपयोगाभावः कुतोऽवगन्तव्य इत्यत आह—भावोपदेशादेवाभाव उपदिष्टो भवतीति। द्विविधं प्रमाणं भावोऽभावश्च, यथा कारणाभावेन कार्याभावज्ञानं, यतो द्वितीयसूत्रसमुत्थानम्। प्रमेयेषु अपवर्ग एव मूर्द्धाभिषिक्तः, एवं प्रयोजनादिष्वपीति तत्र तत्रोहनीयमिति। उपसंहरति—अतश्चेति। तदेवं तात्पर्य्यं व्याख्याय अवयवार्थं व्याख्यातुं भाष्यं पठति—सच्च (३) खलु षोडशधा व्यूढमुपदेक्ष्यत इति। अत्र प्रथमे कल्पे चशब्दोऽवधारणे, खलुशब्दः स्पष्टावधारणे, सद्धि षोडशधा व्यूढमुपदेक्ष्यते नासत् तस्य सदधीनप्रकाशत्वादिति। द्वितीये तु कल्पे पारमार्थिके चः समुच्चये, खलुरवधारणे, सति षोडशधैवोपदेक्ष्यमाणेऽसदप्युपदेक्ष्यत

वृत्तिः

यदीयतर्ककिरणैरान्तरध्वान्तसन्ततिम्। सन्तस्तरन्ति भास्वन्तमक्षपादं नमामि तम् ॥३॥

अद्वैतं गुरुधर्मयोरिव लसत्क्ष्मामण्डलीमण्डनं रूपं किञ्चन पौरुषं गिर इव प्रागल्भ्यसम्पादकम्। दाने कर्णमिवावतीर्णमपरं दीने दयादक्षिणं तातं विश्वविसारिचारुयशसं विद्यानिवासं नुमः ॥४॥

अलसमतिरपीदं विस्तृतं न्यायशास्त्रं विरहितबहुयत्नो लीलया वेत्तु विज्ञः।
इति विनिहितचेताः कौशलं कर्त्तुकामो गुरुचरणरजोऽहं कर्णधारीकरोमि ॥ ५ ॥

---

(१) व्यूढं संक्षिप्तम्। (२) भावोपदेशादेवाभाव उपदिष्टो भवतीति तात्पर्य्यधृतपाठः। (३) 'सत्' इति क-पु-पाठः।

न्यायभाष्यम्

निर्देशे यथावचनं विग्रहः। चार्थे द्वन्द्वसमासः(१)। प्रमाणादीनां तत्त्वमिति शैषिकी षष्ठी।

न्यायवार्त्तिकम्

सर्वपदार्थप्रधानः समासो द्वन्द्व इति किमुक्तं भवति? सर्व एते प्रमाणादयो विशेष्या इति। अन्यथा हि समासान्तरपरिग्रहाद्विशेषणत्वेनोपयुक्तानां प्रमाणादीनामविशेष्यता स्यात्। **यथावचनं विग्रहः।** यदेव निर्देशे वचनभेदोपादाने प्रयोजनं तदिहापि द्रष्टव्यम्। **प्रमाणादीनां तत्त्वमिति शैषिकी षष्ठी।** कः पुनः शेषः? कारकाणामविवक्षा शेष इति। यत्र न कारकं कारकार्थो वा विवक्ष्यते—स शेषः, तद्यथा ब्राह्मणस्य कमण्डलुरिति। तत्त्वस्य प्रमाणादिभ्योऽन्यानन्यत्वे (२) दोषः। यदि तावत् प्रमाणादिव्यतिरिक्तं तत्त्वं न प्रमाणाद्यधिगमान्निःश्रेयसाधिगम इति प्राप्तम्। किं कारणं? तत्त्वविशेषणत्वेनोपादानात्, राजपुरुषा-

न्यायवार्त्तिकतात्पर्य्यटीका

इत्यर्थः। प्रकृतिं व्याचष्टे व्यूह इति। सूत्रस्य सप्रपञ्चं तात्पर्य्यं व्याख्याय अवयवार्थं व्याचिख्यासुना भाष्यकारेण **तासां खल्वासां सद्विधानामिति** भाष्येण सूत्रमवतार्य्य पठितं, तस्य वार्त्तिककृत्तात्पर्य्यमाह—**त एते सद्भेदा इति सूत्रम्**, त एते प्रमाणादयः सद्भेदा निःश्रेयसोपयोगिनो न गङ्गावालुकादयः, तस्मात्सन्तः प्रमाणादयः षोडशधा लक्षिताः परीक्षिताश्च, न गङ्गावालुकादयः सन्तोऽपि निःश्रेयसानुपयोगादिति भावः। द्वन्द्वस्वरूपमाह—**सर्वपदेति**। द्वन्द्वपरिग्रहे तात्पर्य्यमन्वयव्यतिरेकाभ्यामादर्शयति **सर्व एत इति**। बहुव्रीहिकर्मधारययोरसम्भवात् षष्ठीसमासपरिग्रहे निग्रहस्थानस्यान्त्यपदार्थस्य प्राधान्ये विवक्षितार्थहानिप्रसङ्ग इत्यर्थः। निर्देशे यथावचनं विग्रह इत्यस्य भाष्यस्य तात्पर्य्यमाह—**यथावचनमिति**। अन्योऽन्यनिरपेक्षाणां प्रत्येकं प्रमाहेतुभावः प्रमाणानामिति हि बहुवचनप्रयोजनम्। प्रमेयेषु तु यद्यपि प्रमेयता वास्तवी प्रत्येकमस्ति तथाऽप्यपवर्गहेतुभावेन प्रमेयता समुदाये समाप्यते, न तु प्रत्येकम्, आत्मादीना-

वृत्तिः

विद्यानिवाससूनोः कृतिरेषा विश्वनाथस्य। विदुषामतिसूक्ष्मधियाममत्सराणां मुदे भवतु ॥६॥

प्रयोजनमनभिसन्धाय प्रेक्षावन्तो न प्रवर्तन्ते, अतः प्रथमं प्रयोजनमभिधानीयम्।

---

(१) 'सर्व्वपदार्थप्रधानः समासो द्वन्द्व' इति वार्त्तिकतात्पर्य्ययोरभिमतः पाठः। "चार्थे द्वन्द्वः" इति वि-ढि-पाठः। "चार्थे द्वन्द्वः समासः" ज-पु-पाठः। (२) अन्यत्वे अनन्यत्वे च इत्यर्थः।

न्यायवार्त्तिकम्

नयनक्रियावदिति । अथाऽभेदः ? तत्त्वग्रहणानर्थक्यं, यदि प्रमाणादिव्यतिरिक्तं तत्त्वं न प्रतिपद्यसे, एवं तर्हि तत्त्वग्रहणमनर्थकं सम्पद्यते, न, उभयथाऽप्यदोषादित्येके । यदि तावत् प्रमाणादिव्यतिरिक्तं तत्त्वं स्यात्, तस्यास्वतन्त्रत्वात् प्रमाणादयोऽपि गम्यन्त इति कुण्डे बदरवृत्तिवदिति । यथा कुण्डे बदराणां वृत्तिरिति भावे देशिते भावस्यास्वतन्त्रत्वात् कुण्डे बदराणि वर्तन्त इत्युक्तं भवति, तथेहापि तत्त्वज्ञानान्निःश्रेयसाधिगम इति प्रमाणादीनां ग्रहणं भावस्यास्वतन्त्रत्वादिति । अभेदेऽपीषुस्थितिवत्तद्भावप्रतिषेधो नार्थान्तरमिति न प्रमाणादिमात्रमुच्यते अपि त्वर्थान्तरं प्रतिषिध्यते । यथेषोः स्थितिरिति नेषुमात्रं स्थितिः, अपि तु गतिमदर्थान्तरं न भवतीति, तन्न, अनर्थान्तर-

न्यायवार्त्तिकतात्पर्य्यटीका

मन्यतमस्याप्यतत्त्वज्ञाने संसारानिवृत्तेरिति हि निर्देशे वचनभेदस्य प्रयोजनं, तदेव चोद्देशेऽपि, तयोरेकवाक्यत्वादिति भावः । प्रमाणादीनामिति विभक्त्यर्थव्याख्यानपरं भाष्यं पठित्वा पृच्छति—कः पुनरिति । उत्तरं कारकाणामिति, तद्विभजते—यत्रेति । कारकार्थः प्रधानक्रिया, यदुद्देशेन सर्वकारकप्रवृत्तिः । कारकग्रहणेन च तन्नान्तरीयकतया प्रधानक्रियाऽप्यानीतेति विवरणे साऽपि दर्शिता । यद्यपि स्वस्वामिभावादावपि सम्बन्धे अन्तर्गतक्रियाकारकसम्बन्धोऽस्ति सम्बन्धमात्रस्य क्रियागर्भत्वान्नान्तरीयकत्वाच्च कारकस्य, तथाऽप्यसौ न विवक्ष्यते सम्बन्धमात्रमेव तु विवक्ष्यत इत्यर्थः । अत्र चोदयति—तत्त्वस्येति । षष्ठी चानर्थिका अव्यतिरेके तदनुपपत्तेरित्यपि द्रष्टव्यम् । तत्रानियमवाद्येकदेशी परिहरति—न, उभयथाऽपीति । भावस्य भवित्रधीननिरूपणत्वाद् भावनिरूपणमेव भवितृनिरूपणमाक्षिपति । अभेदेऽपीति, इषुस्थित्या यथा तद्भाव-

वृत्तिः

तथा चाहुः—

सिद्धार्थं सिद्धसम्बन्धं श्रोतुं श्रोता प्रवर्तते । शास्त्रादौ तेन वक्तव्यः सम्बन्धः सप्रयोजनः ॥ इति ।

सिद्धः—ज्ञातः अर्थः—प्रयोजनं यस्य तत् तथा, एवं सिद्धसम्बन्धमित्यपि, अतस्तत्प्रतिपादनाय भगवानक्षपादः प्रथमं सूत्रयति—[**प्रमाणेत्यादि**]

अत्र तत्त्वज्ञाननिःश्रेयसयोः शास्त्रतत्त्वज्ञानयोश्च हेतुहेतुमद्भावः, प्रमाणादितत्त्वज्ञानयोर्विषयविषयिभावः, प्रमाणादिशास्त्रयोः प्रतिपाद्यप्रतिपादकभावः, शास्त्रनिःश्रेयसयोश्च प्रयोज्यप्रयोजकभावः सम्बन्धः । तत्त्वं ज्ञायतेऽनेनेति व्युत्पत्त्या तत्त्वज्ञानं शास्त्रं, तथा च शास्त्रनिःश्रेयसयोरपि तत्त्वज्ञानद्वारकहेतुहेतुमद्भाव एव सम्बन्ध इति सम्प्रदायविदः ।

न्यायभाष्यम्

तत्त्वस्य ज्ञानं निःश्रेयसस्याऽधिगम इति कर्मणि षष्ठ्यौ। त (१) एतावन्तो

न्यायवार्त्तिकम्

त्वासिद्धेः। तत्त्वज्ञानान्निःश्रेयसाधिगम इति तत्त्वं ज्ञायमानं कर्म सम्पद्यते निःश्रेयसमधिगम्यमानं कर्म भवतीति। किं पुनस्तत्त्वं, किं वा निःश्रेयसमिति? तत्त्वं पदार्थानां

न्यायवार्त्तिकतात्पर्य्यटीका

प्रतिषेधयोर्भावो (२) धर्म्मो गतिः, तस्य प्रतिषेधः स्थितिः तिष्ठतेर्गतिनिवृत्त्यर्थत्वात्। एवमत्रापि न प्रमाणप्रमेयादिमात्रमुच्यते तत्त्वग्रहणेनापि त्वर्थान्तरं तेष्वेव यत् समारोपितं रूपमन्यथात्वमिति यावत् तत् प्रतिषिध्यते। "गतिमदि"ति भावप्रधानो निर्द्देशः, यथा "द्व्येकयोर्द्विवचनैकवचने" इति द्वित्वैकत्वयोरिति, संख्येयविवक्षायां द्व्येकेष्विति स्यात्। तेन गतिमत्त्वमर्थान्तरमिषोर्न भवति। सत्यस्मिन्नर्थे इषोः स्थितिरिति वाक्यं प्रसज्यत इत्यर्थः। तदेतदेकदेशिमतमर्थान्तरत्वनियमवादी दूषयति—तन्ने'ति। प्रमाणादिभ्योऽनर्थान्तरस्य तत्त्वस्य इषोरनर्थान्तरस्य प्रवृत्त्यभावस्य चासिद्धेः। यथा च भावातिरिक्तोऽभावस्तथा क्षणभङ्गभङ्गाधिकारे (३) निवेदयिष्यते।

वृत्तिः

अत्र च सर्वपदार्थप्रधानो द्वन्द्वः समासः। यद्यपि भेदे द्वन्द्वविधानादत्र च बहूनां पदार्थानामभेदान्न द्वन्द्वसम्भवः, तथापि पदार्थतावच्छेदकभेदादेव द्वन्द्व इति न दोष इत्यन्यत्र (४) विस्तरः।

तत्र च 'निर्देशे यथावचनं विग्रहः' इति यथाश्रुतभाष्यानुसारिणः—प्रमाणानि च प्रमेयं च संशयश्च प्रयोजनं च दृष्टान्तश्च सिद्धान्तश्च अवयवाश्च तर्कश्च निर्णयश्च वादश्च जल्पश्च वितण्डा च हेत्वाभासाश्च छलं च जातयश्च निग्रहस्थानानि चेति विग्रहं वर्णयन्ति।

सम्प्रदायविदस्तु—भाष्यस्थवचनपदेन क्वचित् सौत्रं, क्वचिदार्थं च वचनं गृह्यते। तत्र प्रमाणे प्रमेये च सौत्रं वचनं गृह्यते सप्रयोजनत्वात्, तच्च वक्ष्यते। (५) न तु दृष्टान्तादावेकवचनं सप्रयोजनम्, तथा च दृष्टान्ते द्विवचनम्, अन्वयिव्यतिरेकिभेदेन दृष्टान्तद्वैविध्यस्य वक्ष्यमाणत्वात्। संशये सिद्धान्ते छले च बहुवचनम्, संशये छले च त्रैविध्यस्य, सिद्धान्ते चातुर्विध्यस्य वक्ष्यमाणत्वात्। अन्यथा जातिनिग्रहस्थानयोर्बहुवचनं तत्राऽपि (६) व्याहन्येत, एकवचनस्यैव लक्षणसूत्रे सत्त्वादिति वदन्ति।

---

(१) ज-पु "त" नास्ति। (२) "तद्भावप्रतिषेधः। इषोर्भावो" इत्येवं पाठ एव भवितुमुचित इति सुधीभिश्चिन्त्याम्। (३) ३।२।१० सूत्रात् १७ सूत्रपर्य्यन्तसन्दर्भमध्ये। (४) सिद्धान्तमुक्तावल्यादौ। (५) १।१।९ सूत्रवृत्तौ स्वयमेव वक्ष्यते। (६) तथापि इति ख।

न्यायभाष्यम्

विद्यमानार्था, येषा-(१) मविपरीतज्ञानार्थमिहोपदेशः। सोऽयमनवयवेन (२) तन्त्रार्थ उद्दिष्टो वेदितव्यः। आत्मादेः खलु प्रमेयस्य तत्त्वज्ञानान्निःश्रेयसाधिगमः।

न्यायवार्त्तिकम्

यथावस्थितात्मप्रत्ययोत्पत्तिनिमित्तत्वं, यो यथावस्थितः पदार्थः, स तथाभूतप्रत्ययोत्पत्तिनिमित्तं भवति यत्, तत् तत्त्वम्। निःश्रेयसं पुनर्दृष्टादृष्टभेदाद्द्वेधा भवति। तत्र प्रमाणादिपदार्थतत्त्व-

न्यायवार्त्तिकतात्पर्यटीका

प्रमाणाद्यतिरिक्तं च तत्त्वमनन्तरमेव दर्शयिष्यति (३) इति। तत्त्वस्य ज्ञानमित्यादि भाष्यं व्याचष्टे—तत्त्वं ज्ञायमानमिति। उभयं पृच्छति—किं पुनरिति। तत्त्वप्रश्नस्योत्तरम् तत्त्वमिति। निमित्तत्वं शक्तिः प्रमाणादीनां, सा च द्वयी—स्वरूपलक्षणा सहकारिसाकल्यलक्षणा च।

वृत्तिः

नव्यास्तु—सर्वत्र प्रथमोपस्थितैकवचनेनैव विग्रहः। न ह्यत्र बहुवचनेनैव प्रमाणादीनां चतुष्ट्वं (४) परिच्छिद्यते, किन्तु (५) अग्रिमविभागेन, न ह्येकद्वित्रधवखदिरादौ धवश्च खदिरश्च पलाशश्चेति न विगृह्यते। अत एव प्रयोजनस्यैकवचनान्तत्वे तद्विभागाकरणेऽपि सुखदुःखाभावतत्साधनभेदेन तस्य बहुत्वं न विरुध्यत इति प्राहुः।

अत्र च निःश्रेयसे सिद्धे पटादिवत् तत्प्राप्तये न प्रयत्नान्तर(६)मपेक्षितमिति प्रतिपादनायाधिगमपदम्।

ननु प्रमाणादयः पदार्था इति शब्दात्, प्रथमसूत्रादेव वा तत्त्वज्ञानं स्यादिति चेन्न, तेषां विशिष्य ज्ञानं हि तत्त्वज्ञानं, तच्चोद्देशलक्षणपरीक्षाप्रकाशकाच्छास्त्रादेव। शास्त्रं हि विशिष्टानुपूर्वीका पञ्चाध्यायी। अध्यायस्तु—आह्निकसमूहः। आह्निकं तु—तादृशप्रकरणसमूहः। प्रकरणं तु—तादृशसूत्रसमूहः। सूत्रं तु—तादृशवाक्यसमूहः। वाक्यं तु—तादृशपदसमूह इति वदन्ति। अत्र समूहशब्देनानेकत्वं विवक्षितं, तेनाध्यायादेराह्निकादिद्वयाद्यात्मकत्वेऽपि न क्षतिः।

अत्र च यद्यपि मोक्षजनकज्ञानविषयत्वेन प्रमेयमेवादौ निरूपयितुमर्हं, तथापि प्रमाणस्य सकलपदार्थव्यवस्थापकत्वेन प्राधान्यात् प्रथममुद्देशः, ततोऽवसरतो बुभुत्सितप्रमेयस्य, ततश्च पदार्थव्यवस्थापनस्य न्यायाधीनतया न्याये निरूपणीयेऽभ्यर्हितयोर्न्यायपूर्वाङ्गयोः संशयप्रयोजनयोः, तत्राऽप्यभ्यर्हिततया संशयस्य प्रथमम्।

(१) "एषाम्" इति ज-फ। (२) अनवयवेन—सम्पूर्णतया। "अन्यावयवेन" इति जयनारायणव्याख्या। (३) वार्त्तिककारः ३१पृष्ठस्थ-"तत्त्वं पदार्थानाम्" इत्यादिना दर्शयिष्यति। (४) 'बहुत्वम्' इति आ। (५) 'किं नाम' इति ल। (६) उत्पादकप्रयत्नातिरिक्तः प्रयत्न इत्यर्थः।

न्यायभाष्यम्

तच्चैतदुत्तरसूत्रेणा-(१)ऽनूद्यत इति । हेयं, तस्य निर्वर्तकं, हानमात्यन्तिकं, तस्योपायोऽधिगन्तव्य इत्येतानि चत्वार्य्यर्थपदानि(२) सम्यग् बुद्ध्वा निःश्रेयसमधिगच्छति ।

न्यायवार्त्तिकम्

ज्ञानान्निःश्रेयसं दृष्टम् । न हि कश्चित्पदार्थो ज्ञायमानो हानोपादानोपेक्षाबुद्धिनिमित्तं न भवतीति, एवं च कृत्वा सर्वे पदार्था ज्ञेयतयोपक्षिप्यन्त इति । परन्तु निःश्रेयसमात्मादेस्तत्त्वज्ञानाद्भवति । दृष्टं प्रमाणादिपरिज्ञानात्, अदृष्टं पुनरात्मादेः प्रमेयस्य परिज्ञानादिति न प्रमाणमस्ति । न नास्ति, अर्थस्य तथाभावात् । अर्थ एवायं तथाभूतो यद् आत्मादेः प्रमेयस्य तत्त्वज्ञानान्निःश्रेयसमधिगम्यते । यदा ह्ययमात्मादि प्रमेयं विपर्ययेणाध्यवसितो भवति, अथ संसारं नातिवर्तत इति । एनञ्चार्थं द्वितीयसूत्रे प्रतिपादयिष्यामः । यदि पुनः प्रमाणादिपदार्थतत्त्वज्ञानान्निःश्रेयसं स्यात्

न्यायवार्त्तिकतात्पर्य्यटीका

अतीन्द्रियस्य सामर्थ्यस्य नैयायिकैरनभ्युपेतत्वात् । शक्तेश्च भावत्वेन भवितृनिरूपणाधीननिरूपणत्वाद् भवितुरपि निरूपणं भवतीत्युक्तम् ।

अभिमतं निःश्रेयसं ग्रहीतुं निःश्रेयसद्वैविध्यमाह—**निःश्रेयसं पुनरिति ।** तत्रादृष्टं निःश्रेयसं ग्रहीतुं दृष्टमतिप्रसङ्गापादनेन दूषयति—**एवं च कृत्वेति ।** सूत्रकाराभिमतं निःश्रेयसमाह—**परन्त्विति ।** एतदुक्तं भवति, यद्यपि निःश्रेयसपदमभिमतमात्रवाचि प्रमाणादितत्त्वज्ञानस्य दृष्टमपि निःश्रेयसं भवतीति, तस्यैव ततः साक्षादुत्पत्तेः । तथाऽप्यात्मादिवाचकप्रमेयपदसमभिव्याहाराददृष्टमेव निःश्रेयसमभिप्रेतं सूत्रकारस्य, तत्र च प्रमाणादितत्त्वज्ञानस्यापि पारम्पर्य्येण हेतुभावोऽस्त्येवेति । चोदयति—**दृष्टमिति ।** दृष्टे दर्शनमेव प्रमाणम्, अदृष्टन्तु निःश्रेयसमप्रामाणिकं दर्शनाभावादित्यर्थः । परिहरति—**न नास्ति, अर्थस्य तथाभावात् ।** अर्थ आत्मादिस्तस्य आगमानुमानसहकारिणा कारणभावेन कार्य्याभावानुमानमेवात्रार्थे प्रमाणमिति

वृत्तिः

न च निर्णीतेऽपि मननविधानान्न संशयस्य न्यायाङ्गत्वमिति वाच्यम्, आहार्यसंशयोपगमात् (३) ।

यद्यपि प्रयोजनं न न्यायाङ्गम्, अपि तु तज्ज्ञानं, तथापि तदेव निरूपणीयं, न तु ज्ञाननिरूपणापेक्षेति ।

---

(१) १।१।२। सूत्रेण । (२) अर्थपदानि—पदार्थान् इति केचित् । 'पुरुषार्थस्थानानी'ति तात्पर्यटीका, पुरुषार्थप्रयोजकानीति तदर्थः । (३) पक्षतायां संशयपक्षताकल्पे जगदीशपादैः स्पष्टमेवाहार्य्यसंशयः प्रदर्शितः । आहार्य्यञ्च विरोधिज्ञानकालीनेच्छाप्रयोज्यज्ञानमिति संक्षेपतो बोध्यम् ।

न्यायभाष्यम्

तत्र संशयादीनां पृथग्वचनमनर्थकम्—संशयादयो यथासम्भवं प्रमाणेषु प्रमेयेषु चान्तर्भवन्तो न व्यतिरिच्यन्त इति ? सत्यमेतत्, इमास्तु (१) चतस्रो विद्याः पृथक्-

न्यायवार्त्तिकम्

न मोक्षमाणा मोक्षाय घटेरन्, न हि कस्यचित् क्वचिच्च तत्त्वज्ञानं नास्तीति। तस्मादात्माद्येव प्रमेयं मुमुक्षुणा ज्ञेयमिति। पृथगुपदेशाच्च। यदि प्रमाणाद्येव प्रमेयं स्यात् तस्य च परिज्ञानान्निःश्रेयसं भवेत्, नात्मादि प्रमेयं पृथगुपदिष्टं स्यात्। प्रमेयार्थावधारणार्थायां (२) चोत्तरसूत्रप्रक्रियायां प्रमेयस्य विहितत्वादाद्येन सूत्रेण अकुशलः सूत्रकारः स्यात्। तच्चैतदुत्तरसूत्रेणानूद्यत इति भाष्यम्। हेयहानोपायाधिगन्तव्यभेदाच्चत्वार्यर्थपदानि सम्यग्बुद्ध्वा निःश्रेयसमधिगच्छतीति। हेयं दुःखं, तस्य निर्वर्तकमविद्यातृष्णे धर्म्माधर्म्माविति। हानं तत्त्वज्ञानं, तस्योपायः शास्त्रम्, अधिगन्तव्यो मोक्षः, एतानि चत्वार्यर्थपदानि सर्वास्वध्यात्मविद्यासु

न्यायवार्त्तिकतात्पर्य्यटीका

भावः। ये तु वैयात्यान्मन्येरन् न पदार्थतत्त्वज्ञानमात्रमेव परनिःश्रेयसहेतुरिति। यथाऽऽहुः—एको भावस्तत्त्वतो येन दृष्टः सर्वे भावास्तत्त्वतस्तेन दृष्टा इति, (३) तान् प्रत्याह—यदि पुनरिति। न हि भावानां तत्त्वमन्यत् प्रत्यक्षविषयीकृताद्रूपादिति भावः। मोक्षमाणा इति, सनि 'मुचोऽकर्मकस्य गुणो वे'ति गुणाभ्यासलोपौ। न केवलं वस्तुवृत्तिः, सूत्रकारस्यापि सम्मतमेतदित्याह—पृथगुपदेशाच्च प्रमेयस्य प्रमाणादिभ्यः। यदि च यत्किञ्चित्प्रमेयतत्त्वपरिज्ञानान्निःश्रेयसस्य परस्य प्राप्तिः, किमर्थमात्मादिसूत्रेण द्वादशैव प्रमेयाणि नाधिकानि न न्यूनानि चेत्यवधार्य्यन्ते सूत्रकारेण ? तस्मात्तदेतत्साक्षादुपयोगिनिःश्रेयसे न पदार्थमात्रमित्याह—प्रमेयावधारणार्थायां चोत्तरसूत्रप्रक्रियायामकुशलः सूत्रकारः स्यात्। कुतः ? प्रमेयस्य विहितत्वात् आद्येन सूत्रेणेति। तस्माद् यद्युपपत्तिः यदि व सूत्रकाराभिमतमुभयथा प्रमेयतत्त्वपरिज्ञानं परस्य निःश्रेयसस्य हेतुः, तदनेन आत्मादेरिति भाष्यं व्याख्यातम्।

अथ किं तत्त्वज्ञानस्यात्मादिविषयस्यादृष्ट एव कोऽपि सामर्थ्यातिशयो, यतः परनिःश्रेयसोत्पादः ? मैवं, किं तर्हि ? दृष्टयैव द्वारेत्याह भाष्यकारः तच्चैतदिति,—निःश्रेयस-

वृत्तिः

परप्रत्यायने दृष्टान्तस्य मूलत्वादनन्तरं दृष्टान्तस्य, दृष्टान्तमूलको न्यायः सिद्धान्तविषय इत्यतोऽनन्तरं सिद्धान्तस्य, ततश्चावसरतः सिद्धान्ताधीनस्य पञ्चावयवरूपस्य न्यायस्य, ततश्चैककार्यकारितया (४) न्यायसहकारिणस्तर्कस्य, ततश्च तर्कजन्यतया निर्णयस्य, ततश्च

(१) "इमास्तु" इत्यनन्तरं "धर्म्मार्थकाममोक्षाणां क्रमेण बोधिकाः" इति टि-पाठः। (२) प्रमेयावधारणार्थायाम्, इति तात्पर्य्यधृतपाठः। (३) अस्मिन् श्लोकार्द्धे 'तत्त्वतो—तत्त्वतम्' इत्यत्र 'सर्व्वथा सर्व्वथा' इति स्याद्वादमञ्जर्यां पाठः। (४) एकार्थतया इति क्व।

न्यायभाष्यम्

प्रस्थानाः(१) प्राणभृतामनुग्रहायोपदिश्यन्ते, यासां चतुर्थीयमान्वीक्षिकी न्यायविद्या। तस्याः पृथक्प्रस्थानाः(२) संशयादयः पदार्थाः। तेषां पृथग्वचनमन्तरेणाऽध्यात्मविद्यामात्रमियं स्यात्, यथोपनिषदः। तस्मात् संशयादिभिः पदार्थैः पृथक् प्रस्थाप्यते(३)। तत्र नानुपलब्धे न निर्णीतेऽर्थे न्यायः प्रवर्तते, किं तर्हि? संशयितेऽर्थे। यथोक्तं— 'विमृश्य पक्षप्रतिपक्षाभ्यामर्थावधारणं निर्णयः' (अ० १, आ० १, सू० ४१) इति। विमर्शः—संशयः। पक्षप्रतिपक्षौ—न्यायप्रवृत्तिः। अर्थावधारणं—निर्णयस्तत्त्वज्ञानमिति। स च "अयं किंस्विदि"ति वस्तुविमर्शमात्रमनवधारणं ज्ञानं संशयः, प्रमेयेऽन्तर्भवन्नेवमर्थं (३) पृथगुच्यते।

न्यायवार्त्तिकम्

सर्वाचार्यैर्वर्ण्यन्त इति। संशयाद्यग्रहणं पृथक्। प्रमेयान्तर्भावादिति चेन्न, विद्याप्रस्थानभेदज्ञापनार्थत्वादिति। संशयादयः प्रमेयेऽन्तर्भवन्तीति पृथक् ते न वक्तव्याः, न, विद्याप्रस्थानभेदज्ञापनार्थत्वात्। चतस्र इमा विद्या भवन्ति, ताश्च पृथक्प्रस्थानाः। अग्निहोत्रहवनादिप्रस्थाना त्रयी। हलशकटादिप्रस्थाना वार्ता। स्वाम्यमात्यभेदानुविधायिनी दण्डनीतिः। संशयादिभेदानुविधायिनी आन्वीक्षिकी। तस्याः संशयादिप्रस्थानमन्तरेणात्म-

न्यायवार्त्तिकतात्पर्य्यटीका

हेतुभावाभिधानस्य अनु पश्चात्, उद्यते अनूद्यते। तत्त्वज्ञानोत्पादे हि साक्षात्तद्विषयमिथ्याज्ञानादिनिवृत्तिक्रमेणापवर्गोत्पाद इति द्वितीयसूत्रेनानूद्यते। तदेतद्भाष्यं तच्चैतदित्याद्यधिगच्छतीत्यन्तमनूद्य व्याचष्टे—हेयमिति। मिथ्याज्ञानमात्मादिषु प्रमेयेषु अविद्या, तन्मूलं तृष्णा। उपलक्षणञ्चैतत्, द्वेषोऽपि द्रष्टव्यः। तन्मूलौ च धर्माधर्मौ, तदेतद्धेयम्। हानं तत्त्वज्ञानं हीयते ह्यनेन तत्सर्व्वं, तस्य प्रमाणस्य। उपायः शास्त्रम्, अधिगन्तव्यो मोक्षः। एवमवयवान् विभज्य तात्पर्य्यमाह—एतानीति। एतानि चत्वार्य्यर्थपदानि पुरुषार्थस्थानानि, न केवलं हेयाधिगन्तव्यभेदेन द्वादशविधं प्रमेयं दर्शयतः तद्विषयतत्त्वज्ञानाय च सोपकरणन्यायाभिधानप्रमाणव्युत्पादकं शास्त्रं प्रणयतः सूत्रकारस्य सम्मतमपि तु सर्व्वेषामेवाध्यात्मविदामाचार्य्याणामिति भाष्यतात्पर्य्यमित्यर्थः। तत्र संशयादीनां पृथग्वचनमनर्थकमित्यादिचोद्यभाष्यं व्याचष्टे—संशयाद्यग्रहणमिति। परिहारभाष्यं व्याचष्टे—न विद्येति। चोद्यं विवृणोति—संशयादय इति। परिहारं विवृणोति—न विद्येति। प्रस्थानं व्यापारः। तेषां पृथग्वचनमित्यादिभाष्यं व्याचष्टे—तस्याः संशयादीति। न च वाच्यमस्तु

(१) विलक्षणव्यापारसम्पन्नाः। (२) असाधारण्येन प्रतिपाद्याः। (३) न्यायविद्या विलक्षणप्रकारा क्रियते।

न्यायवार्त्तिकम्

विद्यामात्रमियं स्यात्। ततः किं स्यात्? अध्यात्मविद्यामात्रत्वादुपनिषद्विद्यावत् त्रय्यामेवान्तर्भाव इति चतुष्ट्वं निवर्तते, तस्मात् पृथग् गृह्यन्त इति। तत्र संशयस्तावद्वस्तुस्वरूपानवधारणात्मकः प्रत्ययः। अनवधारणात्मकश्च प्रत्ययश्चेति व्याहन्यते? न व्याघातः, स्वरूपावधारणात्। स्वरूपमस्यावधार्यते अस्ति मे संशयज्ञानमिति। वस्तुस्वरूपं तु नानेन परिच्छिद्यते। तदुभयमनवधारणात्मकश्च प्रत्ययश्चेति। स कथं न्यायस्याङ्गं भवतीति। यस्मान्नानुपलब्धे न निर्णीते न्यायः प्रवर्तते। उपलब्धोऽनिर्णीतश्चेति व्याहतम्। यद्युपलब्धो नानिर्णीतः, अथानिर्णीतो नोपलब्धः, उपलब्धोऽनिर्णीतश्चेति व्याहतम्। नास्ति व्याघातः, सामान्येनोपलब्धो विशेषतोऽनिर्णीत इति। एवमपि यथोपलब्धस्तथाऽनिर्णीत इति व्याघातानिवृत्तिः? नानिवृत्तिः,

न्यायवार्त्तिकतात्पर्य्यटीका

विद्यात्रयमेव, कृतमान्वीक्षिक्या विद्ययेति, एतस्या एव समस्तविद्यावदातीकरणहेतुत्वात्। यथा वक्ष्यति (१) प्रदीपः सर्व्वविद्यानामिति। स चायं किं स्विदिति वस्तुविमर्शमात्रम् अनवधारणज्ञानं संशय इति भाष्यं, तद् व्याचष्टे तत्र तेषु संशयादिषु, संशयस्तावदिति ज्ञानमवधारणं प्रत्ययश्चेति पर्य्याय इति मन्वानश्चोदयति—अनवधारणात्मक इति। न ज्ञानमात्र (२) पर्य्यायोऽवधारणशब्दः, अपि तु तद्विशेषनिश्चयवचनः किं स्विदिति दोलायमानस्योभयकोटिस्पृशः प्रत्ययस्यार्थेऽनवधारणात्मकस्यापि प्रत्यात्ममानसेन प्रत्यक्षेणावधार्यमाणत्वादिति। परिहरति—न व्याघात इति। तत् तस्मात् उभयमिति। तत्र नानुपलब्धे इत्यादिभाष्यमवतारयितुं—पृच्छति स कथं न्यायस्येति। यदि न्यायस्याङ्गं संशयो भवेत् सोऽपि व्युत्पाद्येतेति भावः। उत्तरं यस्मादिति। एतदाक्षिपति—उपलब्ध इति। पञ्चरूपश्चतूरूपो वा हेतुर्न्यायः। प्रतिज्ञाद्यवयवसमूहो वा न्यायः। नीयते प्राप्यते विवक्षितार्थसिद्धिरनेनेति। तस्याश्च यो विषय उपलब्ध उच्यमानो निर्णीत एव वक्तव्यः। सन्दिग्धे हि तस्मिन् हेतुः सन्दिग्धाश्रयतयाऽसिद्धः स्यात्। यथेह नग-निकुञ्जे मयूरः केकायितापातादिति। तदापातसन्देहे अतोऽयमनिर्णीतश्चेन्नोपलब्धः ततश्चोपलब्धश्च न निर्णीतश्चेति व्याहतमित्यर्थः। परिहरति—नास्ति व्याघात इति। सामान्यतः

वृत्तिः

निर्णयानुकूलत्वाद् वादस्य, जल्पस्याऽपि वादकार्यकारित्वादनन्तरं जल्पस्य, ततश्च विजयरूपैककार्यानुकूलतया वितण्डायाः, कथात्रयस्याऽपि दूषणसापेक्षतयाऽनन्तरं दूषणेषु निरूपणीयेषु वादे देशनीयत्वरूपोत्कर्षवत्त्वाद्धेतुवदाभासमानत्वाच्चाऽऽदौ हेत्वाभासानां, ततश्च हेत्वाभासोपजीवनेन छलस्य, स्वव्याघातकत्वेनात्यन्तासदुत्तरत्वात्ततो जातेः, कथावसानत्वेनार्थाद् अनन्तरं निग्रहस्थानानामिति।

---

(१) भाष्यकारः। (२) तात्पर्य्ये ३४ पृ: २४ पं तत्त्वे तदितानन्तरं "निःश्रेयस" इत्यारभ्य एतत् पृष्ठस्य १३ पं "न ज्ञानमात्र" इत्येतत्पर्य्यन्तः पाठः आदर्शे नास्ति, एसियाटिकसोसाइटि परिशुद्धिदृष्ट्या अस्माभिः समुद्धृतः।

न्यायभाष्यम्

अथ प्रयोजनम्—येन प्रयुक्तः प्रवर्तते, तत् प्रयोजनम् । यमर्थमभीप्सन् जिहासन् वा

न्यायवार्त्तिकम्

यथा तथेति व्यपदेशात् । सर्वथा निर्णीते यथा निर्णीतस्तथोपलब्ध इत्यनर्थकं स्यात्, तस्मात् सामान्यत उपलब्धो विशेषतोऽनिर्णीत इति । स चायं संशय एवम्भूतः प्रमेयेऽन्तर्भूत एवमर्थं पृथगुच्यते ।

अथ प्रयोजनम् । किं पुनः प्रयोजनमिति ? येन प्रयुक्तः प्रवर्तते तत् प्रयोजनमिति लौकिकोऽयमर्थः । केन प्रयुज्यते ? धर्मार्थकाममोक्षैरिति केचित् । वयं तु पश्यामः सुखदुःखाप्तिहानिभ्यां प्रयुज्यत इति । सुखदुःखसाधनभावात्तु सर्वेऽर्थाश्चेतनं प्रयोजयन्तीति ।

न्यायवार्त्तिकतात्पर्य्यटीका

पर्वतमात्रमुपलब्धं निर्णीतं तद्विशेषस्तु वह्निमत्त्वादिरनिर्णीत इति । पुनश्चोदयति—**एवमपीति** । उपलब्धो निर्णीत इति हि सामानाधिकरण्यात् समानविषयत्वं दर्शयति तथा च व्याघातः । सामान्यविशेषयोर्भेदेन तु व्याघातं परिहरन् सामानाधिकरण्यं न समर्थयस इति भावः । परिहरति—**यथा तथेति व्यपदेशादिति** । सामान्यविशेषयोः सामानाधिकरण्यात् । य एव सामान्यतो निर्णीतः, स एव विशेषतोऽनिर्णीतोऽपि सम्भवतीति न व्याघात इत्यर्थः । **एवमर्थं** न्यायप्रवृत्त्यर्थमसन्दिग्धे न्यायप्रवृत्तेरनुपपत्तेः । न हि प्रत्यक्षेण करिणि दृष्टेऽपि चीत्कारेण तमनुमिन्वते प्रेक्षावन्त इति ।

प्रयोजनस्वरूपप्रतिपादनपूर्वं प्रयोजनपदोपादानप्रयोजनप्रदर्शनार्थं भाष्यमनुभाषते **अथ प्रयोजनं**, व्याख्यातुं पृच्छति,—**किं पुनरिति** । उत्तरं **येनेति** । स्फुटतरमेवैतदित्यर्थः । पुनः पृच्छति,—**केनेति** । एकदेशिमतेनोत्तरमाह—**धर्म्मेति** । तत्र काम इतीच्छामात्रं वोच्यते कामिनीविषयो वा राग इति ? पूर्वस्मिन् कल्पे काम इत्येवास्तु कृतं धर्म्मादिभिः सर्वेषामेव काम्यत्वात् । उत्तरस्मिन्नव्याप्तिः, सरक(२)मृगयादीनां काम्यानामसंग्रहात् । धर्म्ममोक्षयोरपि नास्तिकान् प्रत्यप्रवर्त्तकत्वात् । तस्मादयुक्तमेतदिति मन्वान आह—**वयं तु पश्याम इति** । सुखस्याप्त्या दुःखस्य हान्या विषयेण विषयिणं प्रत्ययमुपलक्षयति । असत्योरकारणत्वात्, सत्योर्वा (३) अनर्थकत्वात् प्रवृत्तेरिति । तथापि सुखदुःखाप्तिहान्योरेव कर्तुः प्रवृत्तिप्रसङ्गो न तत्साधने, न ह्यन्यद्विजानाति इच्छति च करोति चान्यदिति घटते अतिप्रसङ्गात् । न च फलं पुरुषप्रवृत्तिगोचरः । तत्साधनं तु तद्गोचरः । तत्साधनत्वविज्ञानात् । तत्साधन एव प्रवर्त्तते तन्नातिप्रसङ्ग इति चेद् हन्त तर्हि तत्साधनत्वज्ञानमेव प्रवर्तयति न फलज्ञानं, ज्ञानेच्छा-

---

(१) "न्यायविद्यायाः पृथक् प्रस्थानत्वप्रयोजकतया न्यायप्रवृत्तेर्मूलतया च" इत्यर्थः । (२) सरकं सुरापानम् । (३) सतोर्व्वा इति सप्तमी । सुखाप्तौ दुःखहानौ च सत्याम् इत्यर्थः ।

न्यायभाष्यम्

कर्माऽरभते, तेनाऽनेन सर्वे प्राणिनः सर्वाणि कर्माणि सर्वाश्च विद्या व्याप्ताः, तदाश्रयश्च(१) न्यायः प्रवर्तते। कः पुनरयं न्यायः? प्रमाणैरर्थपरीक्षणं न्यायः।

न्यायवार्त्तिकम्

तदिदं प्रयोजनं न्यायस्याश्रयः। क आश्रयार्थः? आधारार्थस्तावन्न भवति। उपकारकत्वमाश्रयार्थः, तन्मूलत्वात् परीक्षाविधेः। प्रयोजने सति परीक्ष्यत इति प्रयोजनं परीक्षां प्रवर्तयतीति। का पुनरियं परीक्षा? न्यायः। कः पुनरयं न्यायः? प्रमाणैरर्थपरीक्षणं न्यायः। किमुक्तं भवति? समस्तप्रमाणव्यापारादर्थाधिगतिर्न्याय इति। नैकैकं प्रमाणमर्थपरिच्छेदहेतुभावेन व्यवतिष्ठमानं न्याय इत्युच्यते, किन्तु समस्तानि। सोऽयं विप्रतिपन्नपुरुषप्रतिपादकत्वात्

न्यायवार्त्तिकतात्पर्य्यटीका

प्रवृत्तीनां कार्य्यकारणभूतानां सामानाधिकरण्येन संप्रतिपत्तेरित्यभिप्रायेणाह—**सुखदुःखसाधनभावात्तु सर्वेऽर्थाश्चेतनं प्रयोजयन्तीति।** तुशब्दः फलाद्व्यवच्छिनत्ति। अत्रापि विषयेण प्रत्ययमुपलक्षयति। एतदुक्तं भवति तोयमुपलभ्य तज्जातीयस्यापेक्षितसाधनतां दृष्टचरीमनुस्मरति, अथ तज्जातीयतया लिङ्गेन दृश्यमानस्यापेक्षितसाधनभावमनुमिमीते, अनुमाय च पिपासुः प्रवर्त्तते, तेनोपायताज्ञानस्य साक्षात्पुरुषप्रवृत्तिहेतुत्वम्। फलज्ञानस्य त्वीप्सिततमस्योद्देश्यतयेति सर्वं सुन्दरम्। तदाश्रयश्च न्यायः प्रवर्त्तत इति भाष्यं व्याचष्टे—**तदिदं प्रयोजनं न्यायस्येति।** आक्षिपति—**क** इति। समाधत्ते—**उपकारकत्वमिति।** यथा राजाश्रितः पण्डित इति। उपकारकत्वमेव दर्शयति—**तन्मूलत्वादिति।** विधिः प्रवृत्तिः। न जातु निष्प्रयोजने काकदन्तादावारभन्ते परीक्षां प्रेक्षावन्त इत्यर्थः। आक्षिपति—**का पुनरिति।** न्यायाश्रयत्वं प्रयोजनस्य प्रतिज्ञाय परीक्षाश्रयत्वसमर्थनमसङ्गतमिति भावः। उत्तरम् **न्यायः,** तस्मान्नासङ्गतम् इत्यर्थः। नन्वेवमपि नीयते प्राप्यते विवक्षितार्थसिद्धिरनेनेति व्युत्पत्त्या प्रत्यक्षादि प्रत्येकं न्यायः। न चैतत् प्रत्येकं प्रयोजनमाश्रयते। अजिहासितानुपादित्सितानामप्यजिज्ञासितानामर्थानां प्रत्यक्षादिगोचरत्वदर्शनादित्याक्षिपति—**कः पुनरयं न्यायः।** समाधत्ते—**प्रमाणैरिति।** प्रत्यक्षादिप्रमाणमूलाः प्रतिज्ञादयः पञ्चावयवाः **प्रमाणानि, तैरर्थस्य** लिङ्गस्य परीक्षा **परीक्षणम्।** परीक्षितं तु लिङ्गं पञ्चावयवोपपन्नमनुमेयप्रत्ययफलं भावयत्येव न त्वनुमेयार्थपरीक्षा। तस्य सन्दिग्धत्वेऽपि स्वरूपेण परीक्षानास्पदत्वादिति। नन्ववयवैश्चेदर्थपरीक्षणं न तर्हि प्रमाणैः कार्य्यकारणयोरभेदाभावादित्यत आह—**किमुक्तं भवतीति।** न साक्षात्प्रतिज्ञादयोऽवयवा अर्थपरीक्षायामुपयुज्यन्ते,अपि तु स्वकारणतत्प्रमाणसूचनेन। तस्मात् प्रमाणानामवान्तरव्यापारः प्रतिज्ञादय

(१) तत् प्रयोजनं, आश्रय उपकारको यस्य तथाभूतः, प्रयोजनोपकृत इत्यर्थः।

न्यायभाष्यम्

प्रत्यक्षागमाश्रितमनुमानम्, सा(१)ऽन्वीक्षा। प्रत्यक्षागमाभ्यामीक्षितस्याऽन्वीक्षणमन्वीक्षा। तया प्रवर्त्तत इत्यान्वीक्षिकी—न्यायविद्या—न्यायशास्त्रम्। यत् पुनरनुमानं प्रत्यक्षागमविरुद्धं न्यायाभासः स(२) इति।

न्यायवार्त्तिकम्

परमो न्याय इति वक्ष्यामः (३)। प्रत्यक्षागमाश्रितमनुमानम्। प्रत्यक्षागमाश्रितमिति प्रत्यक्षागमाविरोधि। यदिहानुमानाधिगतोऽर्थः प्रत्यक्षागमाभ्यामनुसन्धीयते, अथ स्फुटतरः प्रत्ययो भवति। यत्र पुनरेतानि प्रमाणानि इतरेतराप्रतिसंहितानि व्यावृत्तानि प्रयुज्यन्ते न्यायविप्लवोऽसौ लाभपूजाख्यातिकामैस्तीर्थप्रतिरूपकः प्रवादी वर्ण्यते। यत्पुनरनुमानं प्रत्यक्षागमविरोधि स न्यायाभास इति। प्रत्यक्षविरुद्धं तावद् वह्निरनुष्णः कृतकत्वाद् घटादि-

न्यायवार्त्तिकतात्पर्य्यटीका

इत्युपपन्नं प्रमाणैरर्थपरीक्षणं तदिदमुक्तं समस्तप्रमाणव्यापारादिति। (इति) (४) तस्मान्नैकैकं प्रमाणमिति। समस्तप्रमाणोपकरणत्वादेव चास्य परमत्वमित्याह—सोऽयमिति। पञ्चावयवोपपन्नतया च प्रत्यक्षागमाश्रितत्वं न तद्विरोध इति। तत्प्रदर्शनार्थं भाष्यमनुभाष्य तात्पर्य्यं व्याचष्टे—प्रत्यक्षागमेति। कथं पुनरनेन भाष्येण एतदुच्यत इत्यत आह—यदिहाऽनुमानेति। यत्पुनरनुमानमित्यादि भाष्यं व्याचष्टे—यत्र पुनरिति। यत्र विरोधस्तत्र प्रमाणमूलानामवयवानां प्रतिज्ञादीनामितरेतरप्रतिसन्धानमेकवाक्यता नास्ति। प्रमाणविरोधेन योग्यताविरहिणां तत्पदार्थानां पारमार्थिकान्वयाभावादिति। तीर्थं दर्शनं, तस्य प्रतिरूपकः अदर्शनमेव दर्शनं प्रतिरूपयति दर्शनमिव दर्शयतीति यावत्। स खलु तादृशः पञ्चावयवप्रयोगो लाभपूजाख्यातिकामैः पण्डितव्यञ्जनैरुपवर्ण्यमानः न प्रत्ययाय, प्रागेव त्वपवर्गायेत्यर्थः। तदेवं समुदायतो भाष्यं व्याख्यायावयवविभागाय पठति—यत्पुनरनुमानमिति। प्रत्यक्षविरोधोदाहरणमाह—अनुष्णोऽग्निरवयवी(५) कृतकत्वाद् घटवद् इति। अत्र चोदयति—कः पुनरिति। इदमत्राकूतम्—रूपत्रयसम्पन्नमेतत्कृतकत्वं न वा। न चेत् तत एव तर्हि तदनुमानाभासत्वमिति कृतं प्रत्यक्षविरोधेन। अथान्वयव्यतिरेकपक्षधर्म्मतासम्पन्नमपि बाधितविषयतयैतदप्रमाणम्? तदयुक्तम्, रूपत्रयसम्पत्त्यां खल्वेतत् स्वसाध्येनाविनाभूतं भवति, न च बाधाविनाभावयोः सह सम्भवः। बाधायामपक्षधर्म्मो भवेत्, अनैकान्तिकश्च हेतुः। जिज्ञासितधर्म्मणो धर्म्मिणः पक्ष्यमाणत्वेन पक्षत्वं, न पुनः प्रत्यक्षावधृतसाध्यधर्म्मविरुद्धस्य। तस्याजिज्ञासितत्वेनापक्षतया तद्धर्म्मस्य पक्षधर्मत्वं न चैकान्तिकम्। साध्यधर्म्मिण्येव

---

(१) टिपु "सा" नास्ति। (२) प्रताचागमेत्यनन्तरं "विरोधि स न्यायाभासः।" इति वार्त्तिके। (३) १।१।३२—३८ सूत्र। (४) चत्र आदर्शे—"इति" इत्यधिकः पाठः, स एवास्माभिर्बन्धनीमध्ये धृतः।" (५) परमाणुना भागासिद्धता माभूदिति आह—अग्निरवयवीति।

न्यायवार्त्तिकम्

वत् (१)। कः पुनरस्यानुमानस्य विरोधः ? अनुमानाविषये प्रयोगः। नायमनुमानस्य विषये प्रयोगः। नायमनुमानस्य विषयः, यस्मिन् विषये एतत् प्रयुज्यते स प्रत्यक्षेणापहृत इति।

न्यायवार्त्तिकतात्पर्य्यटीका

प्रत्यक्षोपस्थापितसाध्यधर्म्मविरुद्धधर्म्मवति दर्शनेन व्यभिचारात्। न च सपक्षासपक्षावेवान्वय-व्यतिरेकगम्याविनाभावदर्शनविषयौ न पक्ष इति साम्प्रतम्। यदि हि पक्षं विहाय बहिरेव सपक्षा-सपक्षयोरविनाभावो गम्येत, तदा बहिर्व्याप्तिमात्रबलेन पक्षधर्म्मोऽपि हेतुर्न पक्षे साध्यं साधयेत्। असिद्धा हि तत्र स्वसाध्येन व्याप्तिः। तदेतत् षण्डकमुद्वाह्य मुग्धायाः पुत्रप्रार्थनमिव। तस्मादन्तर्बहिर्वा सर्वोपसंहारेणाविनाभावोऽवगन्तव्यः। एवं च सिद्धः पक्षेऽपि व्यभिचारः साधनधर्म्मस्येत्यनैकान्तिकत्वम्। तथा च रूपत्रयसम्पन्नो हेतुर्बाधितविषयश्चेत्यसम्भवः। तस्मात् सूक्तं कः पुनरस्यानुमानस्य रूपत्रयसम्पन्नस्य विरोधः। न ह्यस्ति सम्भवो रूपत्रयसम्पन्नं विरुद्धं चेत्यर्थः। तत्र समाधिमाह— अनुमानाविषये प्रयोगः। वक्ष्यते (२) ह्यनुमानाधिकारे यथाऽनौपाधिकः सम्बन्धो हेतु-साध्ययोरनुमानाङ्गं, न तु कार्य्यकारणभावादिरव्यापकत्वादतिप्रसङ्गाच्चेति। स चैवं प्रवर्त्तते, यो यः कृतकः स सर्वोऽनुष्णो यथा घटादिरिति। न च वह्नेरिव धूमसम्बन्धे आर्द्रेन्धनसंयोगः गुर्वन्ते-वासिनोः साहचर्य्ये स्वाध्यायाध्ययनमुपाधिः कृतकत्वानुष्णत्वयोः सम्बन्धे उपलभ्यते। सोऽयं शङ्कितः समारोपितो वा प्रयत्नेन पुनः पुनरन्विष्यमाणोऽनुपलभ्यमानस्तत्र तत्र घटादावुपाधिर्ना-स्तीति प्रत्यक्षेण, यद्यभविष्यद् घटादिवदेव व्यज्ञास्यत विज्ञानाभावान्नास्त्येवेति तर्कसहायेन निश्चीयते। सोऽयं रूपेणेव रसस्य, श्वस्तनेनेव सवितुरुदयेनाद्यतनस्य तदुदयस्य,समुद्रवृद्धेव चन्द्रोदयस्य समान-कालस्य, कृतकत्वस्यानुष्णत्वेन स्वाभाविक औत्सर्गिकः सम्बन्धः सामान्येन यो यः कृतकः स सर्वोऽनुष्ण इत्यवधारितो न तु निर्विभज्य (३) तेजोवयविनि। न हि सर्वोपसंहारवती व्याप्तिरेकदेशविषया भवितुमर्हति। एकदेशविषयत्वे यत्रैव न दर्शिता तेनैवानैकान्तिकत्वमा-शङ्केत। तथा च तत्र तत्रैकदेशे प्रत्येकं व्याप्तिप्रदर्शनमशक्यम् आनन्त्यात्। तस्मात् सर्वोपसंहारेणैव तदुपदर्शनं तदिह कृतकत्वमौत्सर्गिकसामान्यविषयव्याप्तिस्मरणसध्रीचीनं पक्षधर्म्मतावशाद्विशेषे तेजोऽवयविनि साधयितुमनुष्णतोन्मुखं यन्न साधयेत् तत्र किं प्रत्यक्षेणापहृतविषयत्वाद् आहो स्विदनैकान्तिकत्वात्? न तावदनैकान्तिकत्वं प्रागेव सामान्यतोऽनौपाधिकसम्बन्धावधारणात्। तेजोऽवयविनि कृतकत्वस्य दर्शनादनैकान्तिकमपक्षधर्म्मो वा कृतकत्वमिति चेन्न अनुमानेन सामान्यतोऽवधृतव्याप्तिना तस्यानौष्ण्यसाधनात्। प्रत्यक्षेण तेजोऽवयविन औष्ण्यग्रहणेन तस्य कृतकत्वस्य हेतोर्वृत्तावुत्पन्नमपि व्याप्तिविज्ञानं बाध्यते। ततश्चानैकान्तिकत्वादप्रवृत्तिरनुमानस्येति

---

(१) अनुष्णोऽग्निरवयवीकृतकत्वाद्घटवत् इति तात्पर्य्यसम्मतपाठः। (२) १।१।५ सूत्रव्याख्यानावसरे।
(३) निर्विभज्य विशेषतो ज्ञात्वा, तेजोऽवयविनि सम्बन्धोऽवधारित इत्यर्थः। परिशु--२६१। पृ० २ पं।

न्यायवार्त्तिकम्

अपरे पुनरश्रावणः शब्द इति प्रत्यक्षविरोधं वर्णयन्ति, तैस्तु न प्रत्यक्षस्य विषयो ज्ञातो नानुमानस्य विषय इति। किं कारणम्? इन्द्रियवृत्तीनामतीन्द्रियत्वात्, श्रावणत्वं चेन्द्रियवृत्तिः सा कथं प्रत्यक्षा भवति। आगमविरुद्धं शुचि नरशिरःकपालं प्राण्यङ्गत्वाच्छङ्खशुक्तिवदिति। कथमिदमागमविरुद्धम्? शुचि नरशिरःकपालमिति ब्रुवता शुच्यर्थो वाच्यः, किमुक्तं भवति शुचीति। यदि स्प्रष्टुः प्रत्यवायाभावः, स कस्येति वाच्यम्। यद्यात्मन इति ब्रूयात् तदागमार्थानुष्ठानतात्पर्य्येणावस्थानादेवमेतत् (१)। अथ त्रयीविदामिति ब्रूयात्, त्रय्यभ्युपगमाद्विरोध

न्यायवार्त्तिकतात्पर्य्यटीका

चेन्न, अनुमानप्रवृत्तिविषयसाध्यधर्म्मिणि हेतोर्व्यभिचारानुद्भावनात्। अन्यथा तद्गतसाध्यधर्म्मसन्देहे तत्रोपलभ्यमानः साधनधर्म्मः सन्दिग्धव्यतिरेकित्वादनैकान्तिकः स्यात्, सन्दिग्धसाध्यधर्म्मे दृष्टान्त इव साधनधर्म्मः। तथा चानुमानमात्रमुच्छिद्येत प्रत्यक्षेण साध्यधर्म्मविपर्य्ययसाधनात्। तेजोऽवयविनोऽनुष्णत्वेनासाध्यत्वम्, तथा चानैकान्तिकत्वमपक्षधर्म्मता वेति चेत्, तर्हि प्रत्यक्षेण साध्यविपर्य्ययसाधनं बाधनमित्यनर्थान्तरम्। तदिदमुक्तं यस्मिन् विषये तेजसोऽनुष्णत्वे एतत् प्रयुक्तं (२) स प्रत्यक्षेणापहृत इति। एवं चानुमाने दूषिते कृतमपक्षधर्म्मत्वव्यभिचाराभ्यां तदुपजीविभ्यामिति भावः।

यत्पुनर्दिङ्नागेन प्रत्यक्षविरुद्धमनुमानमुदाहृतं तदुपन्यस्यति—अपरे पुनरिति। अश्रावणः शब्दः कृतकत्वाद् घटादिवदिति ब्रुवाणः शब्दस्वरूपमेवापलपति। न हि श्रवणेन्द्रियादन्यदस्ति शब्दग्रहणकारणम्। न चागृह्यमाणः शब्दस्तद्व्यवहारगोचरः। तस्मादेवंवादिनोऽभिप्रायव्यासमसत्त्वं शब्दस्य, तथा च प्रत्यक्षविरोध इति भावः। दूषयति—तैस्त्विति। सविशेषणे हि विधिनिषेधौ विशेषणमुपसंक्रामत इत्युत्सर्गः। क्वचित्पुनर्विशिष्टविधानमपि भवत्यगतित्वात्, तद्यथा लोहितोष्णीषा ऋत्विजः प्रचरन्ति सति विभवे न जीर्णमलवद्वासाः स्नातकः स्यादिति। तद्वदिहापि अश्रावणः शब्द इति श्रुतिवाक्ययोः (३) सामर्थ्यात् श्रावणत्वविशेषणोपसंक्रान्तो निषेधो न विशेष्येण शब्देन सह सम्बध्यते, नापि श्रावणत्वनिषेधार्थः शब्दनिषेधो वाद्यभिप्रायव्यासः। वचनार्थाविरोधिनोऽर्थस्यार्थगम्यत्वान्न तद्विरोधिनः श्रावणत्वस्य निषेधस्य चाधिकरणं शब्द इति न शब्दाभावे तन्निषेधोऽवकल्पते न चाभावस्तुच्छ इति च तृतीय उपपादयिष्यते। न च श्रावणत्वं प्रत्यक्षगोचरः। तद्धि शब्दश्रोत्रयोः सम्बन्धः, कृत्तद्धितसमासेषु सम्बन्धाभिधानं त्वतल्भ्यामिति कात्यायनीयवचनात्। न च प्रत्यक्षाप्रत्यक्षवृत्तिः सम्बन्धः प्रत्यक्षः, तस्मात् श्रावणत्वमप्रत्यक्षमिति नात्र प्रत्यक्षविरोधस्तदिदमुक्तम् इन्द्रियवृत्तीनामतीन्द्रिय-

(१) तदा स्वागमार्थतात्पर्य्यावस्थानात् कापालिकस्यैवमेतत् इति तात्पर्य्यपाठः। (२) एतत् प्रयुज्यते इति वार्त्तिकपाठः। (३) नञा समसितश्रावणपदश्रवणं श्रुतिः, विशेषणविशेष्यभावावस्थितः पदसमूहो वाक्यम्, तयोः सामर्थ्यात्। प०।

न्यायवार्त्तिकम्

इति वाच्यम् । शुचि नरशिरःकपालमिति कोऽर्थः ? विशेषविधानमेतत् । विशेषविधानं हि शेषनिषेधविषयं यदि शुचि नरशिरःकपालमिति, किमशुचीति वाच्यम् । अथ सर्वमेव शुचीति, दृष्टान्तो नास्ति सर्वस्य पक्षीकृतत्वादिति । अथानुमानविरुद्धं कस्मादनुमानं न भवति ?

न्यायवार्त्तिकतात्पर्य्यटीका

त्वादिति । वृत्तिः स्वार्थे सम्बन्ध इत्यर्थः । आगमविरुद्धमुदाहरति—शुचीति । मन्वादिभिर्नरास्थिस्पर्शप्रतिषेधात् स्पर्शे च प्रायश्चित्तोपदेशादशुचित्वं नरशिरःकपालादीनामिति । कापालिक आक्षिपति—कथमिदमिति । नास्माकं वेदस्तन्मूलाश्च स्मृतयः प्रमाणमित्यभिप्रायः । उत्तरम्—शुचि नरशिरःकपालमिति ब्रुवता श्रुतिस्मृतीतिहासपुराणानपेक्षेणानुमानमात्रसहायेनात्र वस्तुनि त्वया शुचिरूपोऽर्थो वक्तव्यः । किमुक्तं भवति शुचीति यदि उच्येत स्प्रष्टुः प्रत्यवायाभावः । सिद्धान्ती पृच्छति—स कस्येति । यद्यात्मन इति ब्रूयात् कापालिकः । अविगीता हि व्यवहारपरम्पराऽस्माकं कापालिकानां नरशिरःकपालस्पर्शतदवस्थितान्नपानोपयोगलक्षणा दाक्षिणात्यानामिवाह्नि नैवुकादि (१) लक्षणा क्रिया श्रेयस्करी, तस्मादस्माकमप्रत्यवायकरतया शुचि नरशिरःकपालमित्यर्थः । तत्र सोपहासमुत्तरमाह—तदा स्वागमार्थतात्पर्य्यावस्थानात् कापालिकस्यैवमेतत् । श्रुतिस्मृतीतिहासपुराणलक्षणागमविहितमर्थमाचरतां तन्निषिद्धं च परिहरतां दाक्षिणात्यानामाह्नि नैवुकाद्यनुष्ठानमनादि अद्य यावदनुवर्त्तमानमविगीतमागममूलतामनुमापयत्यात्मनः श्रेयोहेतुभावेन, न खल्वागमानपेक्षः सहस्रेणाप्यनुमानैरिममर्थमवगन्तुमर्हति, कापालिकानां त्वागमविहितमकुर्वतां, कुर्व्वतां च तन्निषिद्धमर्थं प्रयत्नेन अनादिरपि व्यवहारः शाक्यमल्लकादीनामिव न वेदानुमाने मूलमिति भावः । अथ त्रयीविदां नरशिरःकपालमप्रत्यवायहेतुरिति ब्रूयात् तदा त्रय्या वक्ष्यमाणेन न्यायेन प्रामाण्योपगमादागमविरोधः, तदीयस्पर्शस्य त्रय्यां निषेधेन प्रत्यवायहेतुत्वनिश्चयात् । अपि चागमानपेक्षोऽनुमानेन शौचं नरशिरःकपाले व्यवस्थापयन् प्रष्टव्यो जायते—शुचि नरशिरःकपालमिति कोऽर्थः । ननु य एव वाक्यात् प्रतीयते स एवार्थः, तत् किं पृच्छात इत्यत आह—विशेषस्य नरशिरःकपालस्य शौचविधानमेतत् । किमित्यत आह—विशेषविधानं च शेषे प्रतिषेधविषयं (२) लोके दृष्टम्, यथा दक्षिणेन चक्षुषा पश्यतीति उक्ते वामेन नेति गम्यते । तदिह यदि शुचि नरशिरःकपालं किमन्यदशुचि इति त्वया वक्तव्यम् । न हि नरोच्चारादीनामशुचित्वे प्रमाणमन्यदस्त्यागमात् । आगमप्रामाण्यं च न मन्यसे इति भावः । अथ त्रयीविद्वेषादनुमानपक्षपातिना त्वया सर्वमेव नारं विट्कपालादि शौचपक्षे निक्षिप्यत इत्याह—अथ सर्वमेव शुचि ।

---

(१) गोमयमयीं देवतां दूर्वादिभिरभ्यर्च्य ज्ञातिवकल्पनम् आह्नि नैवुकमित्येके । मङ्गलवारे दधिमन्थनमित्यन्ये । प्रतिदिनं तण्डुलमुष्टिं मासमेकं भाण्डे निक्षिप्य घृतेन तेनापूपमेकं कृत्वा देवतापूजनमित्यपरे इति परिशुद्धिप्रकाशः । २७९।१८ पं । (२) "विशेषविधानं हि शेषनिषेधविषयम्" इति वार्त्तिकपाठः ।

न्यायवार्त्तिकम्

एकस्मिन्ननुमानद्वयसमावेशस्यासम्भवात् (१) न विरोधः। न ह्यन्वयव्यतिरेकसम्पन्ने अनुमाने एकस्मिन्नर्थे समाविशतः, तस्मान्नानुमानविरुद्धम्। प्रत्यक्षविरोध्यपि तर्हि न प्राप्नोति? न न प्राप्नोति, अन्वयव्यतिरेकसम्पन्नस्य प्रत्यक्षेण बाधितत्वात्। अथोपमानविरुद्धं कस्मान्न भवति? नोपमान-

न्यायवार्त्तिकतात्पर्य्यटीका

परिहरति—दृष्टान्तो नास्ति। कुतः? सर्वस्य पक्षीकृतत्वात्। चोदयति—अथानुमानविरुद्धं कस्मादनुमानं न भवतीति। न खलु प्रमाणत्वे प्रत्यक्षागमाभ्यामनुमानस्य कश्चिद्विशेषः, येन तौ बाधकौ न त्वनुमानमिति भावः। परिहरति—एकस्मिन्ननुमानद्वयसमावेशाभावात्। अयमभिसन्धिः—यत्तावदनुमानं पूर्वप्रवृत्तं तेन बाधितविषयं तदबलवत् पश्चादनुमानं न स्वकार्य्याय पर्य्याप्तम्, यथोक्तमश्रावणः शब्दः कृतकत्वाद् घटादिवदित्यस्यानुमानविरोध इति। लब्धरूपं हि वस्तु किञ्चित् क्वचिन्निषिध्यते न तु ज्ञानाकारालीकादिरिति तृतीये निवेदयिष्यते। तदिह श्रावणत्वं शब्दस्य निषिध्यता श्रवणमिन्द्रियं तद्ग्राह्यत्वं च वस्तुनी अनुमातव्ये शब्दोपलम्भलक्षणेन कार्य्येण। तथा चैतेनैवानुमानेनापहृतविषयमश्रावणत्वानुमानं चरममन्वयव्यतिरेकसम्पन्नमपि न स्वोचितं कार्य्यं जनयति। एवं तनुभुवनादीनां न कर्त्तेश्वरोऽशरीरित्वान्मुक्तात्मवत् प्रयोजना-भावादित्याद्यपीश्वरधर्म्मिग्राहिमूलानुमानेनापहृतविषयतया न्यायाभासं वेदितव्यम्। तस्मात् परस्परानपेक्षसमानकालप्रवृत्तिसमर्थानुमानद्वयसमावेशाभावाभिप्रायमेतदुक्तम्। न ह्यनयोरन्यतर-द्बाध्यं बाधकं वा सम्भवति किन्तु मिथः सत्प्रतिपक्षतया न प्रमां कुरुतः। कस्मात् पुनर्न समावेशो-ऽनुमानयोः? असमावेशे वा कुतः सत्प्रतिपक्षता? इत्यत आह—न ह्यन्वयव्यतिरेकसम्पन्नयो-रिति। (२) इहान्वयव्यतिरेकग्रहणेन समानबलयोरन्वयव्यतिरेकपक्षधर्म्मत्वासत्प्रतिपक्षत्वान्युप-लक्षितानि। एतैः सम्पन्नयोर्यदि समावेश एकस्मिन् विषये भवेत्तत एकतरस्य बाध्यत्वं बाधकत्वं वा गम्येतापि, न त्वेतदस्ति, असत्प्रतिपक्षतासंपत्तेरभावादिति। उपसंहरति,—तस्मान्नानुमान-विरुद्धम् अनुमानं तुल्यबलम्, अपि तु सत्प्रतिपक्षमित्यर्थः। प्रत्यक्षमप्यनुमेयविरुद्धसाधनादनु-मानस्य प्रतिपक्ष इति सत्प्रतिपक्षतयाऽन्वयव्यतिरेकादिसम्पन्नस्याऽनुमानस्य प्रत्यक्षेण तद्विरुद्धार्थो-पसंहारिणा न समावेश इति न बाधकाभाव इत्यभिप्रायेण चोदयति—प्रत्यक्षविरोध्यपीति। परिहरति—न नेति। तुल्यबलौ हि मिथः प्रतिपक्षौ भवतो न तु दुर्बलोत्तमबलौ, न हि भवति तरक्षुः प्रतिपक्षो हरिणशावकस्य, किन्तु समरकण्डूनिघ्नविषाणकोटिसमुल्लिखितगण्डशैलस्य विपिनमहिषस्य। तस्मात् पूर्वभावि प्रत्यक्षमनन्यथासिद्धं सदसत्प्रतिपक्षमनुमानं समानविषयसमा-

(१) "समावेशाभावात्" इति तात्पर्य्यपाठः। (२) "-सम्पन्ने" इति वार्त्तिकपाठः।

न्यायभाष्यम्

तत्र वादजल्पौ सप्रयोजनौ। वितण्डा तु परीक्ष्यते। वितण्डया प्रवर्तमानो वैतण्डिकः। स प्रयोजनमनुयुक्तो यदि प्रतिपद्यते सोऽस्य पक्षः सोऽस्य सिद्धान्त इति, वैतण्डिकत्वं जहाति। अथ न प्रतिपद्यते नायं लौकिको न परीक्षक इत्यापद्यते। अथापि परपक्षप्रतिषेधज्ञापनं (१) प्रयोजनं ब्रवीति, एतदपि तादृगेव यो ज्ञापयति यो जानाति येन ज्ञाप्यते यच्च ज्ञाप्यते एतच्च (२) प्रतिपद्यते यदि, तदा वैतण्डिकत्वं जहाति। अथ न प्रतिपद्यते, परपक्षप्रतिषेधज्ञापनं प्रयोजनमित्येतदस्य वाक्यमनर्थकं भवति। वाक्यसमूहश्च स्थापनाहीनो वितण्डा, तस्य यद्यभिधेयं प्रतिपद्यते, सोऽस्य पक्षः स्थापनीयो भवति। अथ न प्रतिपद्यते, प्रलापमात्रमनर्थकं भवति, वितण्डात्वं निवर्तत इति।

अथ दृष्टान्तः प्रत्यक्षविषयोऽर्थः, यत्र लौकिकपरीक्षकाणां दर्शनं न व्याहन्यते।

न्यायवार्त्तिकम्

विरुद्धम्, पूर्वप्रमाणविरोधानुविधानात्। उपमानविरोधः पूर्वप्रमाणानुविधायी, आगमाहितसंस्कारस्मृत्यपेक्षं च सारूप्यज्ञानमुपमानमिति वक्ष्यामः (३)। प्रत्यक्षागमयोर्विरोधादुक्तं तदिति।

तत्र वादजल्पौ सप्रयोजनाविति भाष्यम्। तस्य कुत उत्थानम्? तेनानेन प्रयोजनेन सर्वे प्राणिनः सर्वाणि कर्माणि सर्वाश्च विद्या व्याप्ता इति, तत्र वादजल्पौ किंप्रयोजनाविति युक्तो विचार इत्याह—तत्र वादजल्पौ सप्रयोजनाविति। तस्मिन् न्यायाभास इति॥

न्यायवार्त्तिकतात्पर्य्यटीका

वेशाद्बाधत इति युक्तमित्यर्थः। चोदयति—अथोपमानविरुद्धमनुमानं कस्मान्न भवति। गोसदृशो गवय इत्यारण्यकस्य वाक्यं श्रुत्वा यदा नागरिको वनं गतो गोसदृशं पिण्डमुपलभते तदाऽस्य वाक्यार्थानुभवाऽऽहितसंस्कारप्रबोधजनिततत्स्मृत्यपेक्षं गोसदृशज्ञानमुपमानं पुरोऽवस्थितस्य पिण्डस्य गवयशब्दवाच्यत्वे प्रमाणम्। तत्र यदि कश्चित् प्रमाणयेन्नैष पिण्डो गवयशब्दवाच्यः गोपिण्डसादृश्याद् गोपिण्डान्तरवदिति तदिदमनुमानमुपमानेन बाधितविषयमस्त्वित्यर्थः। संप्रतिपत्तिरुत्तरम्, नोपमानं (४) न भवतीति अनुषज्यते। अस्ति चेत् कस्मान्नोक्तमित्यत आह—पूर्वप्रमाणविरोधानुविधानान्नोक्तमिति शेषः। तद्दर्शयति—उपमानविरोध इति। स्वफलद्वारा शब्दं प्रमाणं दर्शयति—आगमेति। स्वफलद्वारैव प्रत्यक्षं प्रमाणं दर्शयति—

(१) "ज्ञानम्" इति आ-टि-पाठः। (२) अत्र "ज्ञाप्यते" "एतच्च" इति अव्यवहितं पदद्वयं फ-आ-पु० नास्ति। "येन ज्ञाप्यते" इति ज० नास्ति। (३) १।१।६ सू०। (४) "नोपमान"मित्यत्र "नोपमानविरुद्धम्" इत्येव पाठ इति मन्ये, वार्त्तिके तथा दर्शनात्।

न्यायभाष्यम्

स च प्रमेयम् । तस्य पृथग्वचनं च तदाश्रयावनुमानागमौ, तस्मिन् सति स्यातामनुमानागमौ असति च न स्याताम् । तदाश्रया च न्यायप्रवृत्तिः । दृष्टान्तविरोधेन च परपक्षप्रतिषेधो वचनीयो भवति, दृष्टान्तसमाधिना च स्वपक्षः साधनीयो भवति । नास्तिकश्च दृष्टान्तमभ्युपगच्छन्नास्तिकत्वं जहाति । अनभ्युपगच्छन् किंसाधनः परमुपालभेतेति । निरुक्तेन च दृष्टान्तेन (१) शक्यमभिधातुं 'साध्यसाधर्म्यात् तद्धर्मभावी दृष्टान्त उदाहरणम्' (अ० १ आ० १ सू० ३६) । 'तद्विपर्य्ययाद्विपरीतम्' (२) (अ० १ आ० १ सू० ३७) इति ।

न्यायवार्त्तिकम्

वितण्डा तु परीक्ष्यते सप्रयोजना निष्प्रयोजना वेति । एके तावद्वर्णयन्ति निष्प्रयोजना, दूषणमात्रत्वात् । तच्च नैवम्, न दूषणमात्रं वितण्डा, किन्त्वभ्युपेत्य पक्षं यो न स्थापयति स वैतण्डिक उच्यते । अथ पक्षमपि न प्रतिपद्यते, उन्मत्तवदुपेक्षणीयः स्यात् । अथ परपक्ष-

न्यायवार्त्तिकतात्पर्य्यटीका

सारूप्यज्ञानमिति । उपसंहरति—प्रत्यक्षागमयोर्विरोधाभिधानादुक्तं तत्, उपमानमिति ।

भाष्यमनुभाष्याक्षिपति—तत्र वादजल्पाविति । प्रयोजनस्वरूपोपयोगाभिधानानन्तरं दृष्टान्तपदे व्याख्यातव्ये तदुल्लङ्घनेन वादजल्पयोः कोऽवसर इत्यर्थः । अवसरमाह—तेनानेनेति । प्रयोजनव्याख्याङ्गमेवेदं न वादजल्पव्याख्याङ्गमित्यस्त्यवसर इति । 'तत्र'शब्दार्थं व्याचष्टे—तस्मिन्न्यायाभासे इति । वादजल्पकथयोर्हि न द्वयोर्वादिप्रतिवादिनोः साधने समीचीने सम्भवतः, वस्तुनि विरुद्धधर्म्मद्वयसमवायाभावात् । तस्माद् द्वयोरेकस्य न्याय एकस्य तु न्यायाभास इति वादजल्पाभ्यां विविच्यते । न्यायाभास इति तु सन्निधानादुक्तम्, सन्निहितार्थत्वात् सर्वनाम्न इति ।

वितण्डा तु परीक्ष्यते सप्रयोजना निष्प्रयोजना वेति । 'तु'-शब्दः प्रसिद्धप्रयोजनाभ्यां वादजल्पाभ्यां व्यवच्छिनत्ति । प्रतिपक्षस्थापनाहीना हि वितण्डोच्यते, तत्र स्थापनाहीनत्वात् प्रतिपक्षहीनेति प्रतीयते न खलु स्थाप्यसम्भवः । तथा वितण्ड्यते व्याहन्यतेऽनया प्रतिपक्षसाधनमिति व्युत्पत्त्या परपक्षोपघातेन पारिशेष्यात् स्वपक्षसिद्धिरस्याः प्रयोजनं प्रतीयते । तदेवं सन्दिग्धप्रयोजना सती वितण्डा परीक्ष्यते प्रयोजनवती न वेति । तत्र यदि निष्प्रयोजना ततो न सर्वा विद्याः सर्वाणि कर्म्माणि तन्मुखेन च सर्वे प्राणिनः प्रयोजनेन व्याप्ताः, वितण्डाया एव कर्म्मरूपाया विद्यारूपाया वा निष्प्रयोजनत्वात् । अथ तु प्रयोजनवती तत उपपन्ना प्रयोजनव्याप्तिः ।

(१) "निरुक्तं च दृष्टान्तं" इति वि-टि-पाठः । "निरुक्ते न दृष्टान्तेन" इति ज-भा । (२) सूत्रपाठस्तु—"तद्विपर्ययाद्वा विपरीतम्" इति ।

न्यायभाष्यम्

अस्त्ययमित्यनुज्ञायमानोऽर्थः सिद्धान्तः। स च प्रमेयम्। तस्य पृथग्वचनं सत्सु सिद्धान्तभेदेषु वादजल्पवितण्डाः प्रवर्तन्ते, नातोऽन्यथेति।

न्यायवार्त्तिकम्

प्रतिषेधज्ञापनं प्रयोजनमिति, तादृगेवैतत्। एतस्मिन्नपि चतुर्वर्गं चेत् प्रतिपद्यते सोऽस्य पक्षः। चतुर्वर्गो (१) भाष्य उक्तः। अथ न प्रतिपद्यते पूर्ववदुपेक्षणीयः। प्रतिपक्षस्थापनाहीनं च वाक्यं वितण्डेत्युच्यते। तस्य यद्यर्थं प्रतिपद्यते सोऽस्य पक्षः। अथ न प्रतिपद्यते पूर्ववद्दोष इत्युक्तं प्रयोजनमिति॥ प्रत्यक्षविषयोऽर्थो दृष्टान्तः। किमुक्तं भवति? लौकिकपरीक्षकाणां दर्शना-

न्यायवार्त्तिकतात्पर्य्यटीका

किं तावत्प्राप्तम्? केचिद् ब्रुवते निष्प्रयोजना वितण्डेति। स्थापनाहीनतया तावत् स्थाप्यः पक्षो नास्ति। अवयवव्युत्पत्त्याऽपि परसाधनविघातः प्रतीयते न च तावन्मात्रेण स्वपक्षसिद्धिरस्ति। न हि पर्वतनितम्बवर्त्तिधूमे असिद्धत्वादिना दूषिते वह्नेस्तत्राभावो निश्चीयते। तदिद-मुक्तम् दूषणमात्रत्वादिति। तमिमं निष्प्रयोजनवितण्डावादिनं प्रत्याह—तच्च नैवमिति। परसाधनदूषणेनास्य स्वपक्षः सिध्यतु मा वा सैत्सीत् स तु स्वपक्षसिद्धैव प्रयोजनेन परसाधन-माहन्तीति भावः। तदनेन स प्रयोजनमनुयुक्त इति भाष्यं व्याख्यातम्। अथ न प्रतिपद्यत इत्यादि भाष्यं व्याचष्टे—अथ पक्षमपीति। अथापीत्यादि भाष्यं व्याचष्टे—अथ परपक्षेति। नास्तिको हि सदसदुभयानुभयरूपतया न विचारं सहन्त इति प्रमेयाणि सर्वथा दूषयति। तदयं पर-पक्षप्रतिषेधमात्रप्रयुक्तः प्रवर्त्तते। न त्वस्यास्ति पक्षोऽनवस्थापनात्तयोरपि प्रमेयपक्षपातिदूष्यत्वा-दित्यर्थः। एतदपीत्यादि व्याचष्टे तादृगेवैतत्। एतद्विभजते—एतस्मिन्नपि पक्षे चतुर्वर्गं चेत् प्रतिपद्यते सोऽस्य पक्षः। प्रतिपत्तिरभ्युपगमः। यद्यपि स्थाप्य एव पक्षस्तथाऽपि तन्नान्त-रीयकतया अभ्युपगममात्रेण चतुर्वर्गोऽपि पक्ष उक्तः। कश्चतुर्वर्ग इत्यत आह—चतुर्वर्ग इति। एष साधनवादी ज्ञापयति। अहो वैतण्डिकोऽजनि अनेन पञ्चावयववाक्येन इदं साध्यं ज्ञाप्यत इति चतुर्वर्गः। तत्प्रतीत्या खलु वैतण्डिकस्य परपक्षप्रतिषेधः प्रयोजनं सिध्यति। तथा च न निष्प्रयोजनोऽयं वैतण्डिक इत्यर्थः। द्वितीयं पक्षं दूषयति—अथ न प्रतिपद्यत इति। चतुर्वर्गनान्तरीयकं स्वदूषणमपि प्रतिपद्यत इत्युन्मत्तवदुपेक्षणीय इत्यर्थः। अपरमपि नास्तिक-वैतण्डिकं प्रति दोषमाह—प्रतिपक्षेति। असिद्धविरुद्धादिदोषो वाक्यस्य वैतण्डिकप्रयुक्तस्यार्थः, तं यदि प्रतिपद्यते सोऽस्य पक्षः। अथ असिद्धविरुद्धादीनां सद्भावाभ्युपगमे प्रमेयपक्षपातिनां

(१) ज्ञातृ-ज्ञापक-ज्ञाप्य-ज्ञापनसाधनप्रमाणादिरूपश्चतुर्वर्गः, "यो ज्ञापयति यो जानाति" इत्यादिना ४४ पृष्ठस्थ-भाष्यग्रन्थे न उक्तः।

न्यायभाष्यम्

साधनीयार्थस्य यावति शब्दसमूहे सिद्धिः परिसमाप्यते तस्य पञ्चावयवाः प्रतिज्ञादयः, समूहमपेक्ष्याऽवयवा उच्यन्ते ।

न्यायवार्त्तिकम्

विघातहेतुरिति । एवं चात्मादिव्याप्तिरिति । दर्शनाविघातहेतुत्वेन दृष्टान्ते वर्ण्यमाने आत्मादि व्याप्तं भवति । प्रत्यक्षादिविषयतायां चात्मादि त्यक्तं भवति । ततश्चोदाहरणसूत्रं व्याहन्येत । सोऽयं दृष्टान्तः प्रमेयम् उपलब्धिविषयत्वात् । तस्य पृथगुपदेशो न्यायस्य तन्मूलत्वात् । सति तस्मिन्ननुमानागमौ स्याताम्, असति तु न स्यातामिति । पूर्वं प्रत्यक्षदृष्टमर्थमनुमिमते । पूर्वं ज्ञातं वार्थं परस्मै आचक्षते । नास्तिकस्य च व्याघातोऽभ्युपगमेऽनभ्युपगमे वा, तदुक्तं भाष्य इति ॥ अभ्युपगमव्यवस्था सिद्धान्तः । अभ्युपगम इदमित्थम्भूतं वेति (१) ।

न्यायवार्त्तिकतात्पर्य्यटीका

प्रमेयमात्रविचारासहत्वाभ्युपगमो विघटत इति स्ववाक्याभिहितमेव असिद्धविरुद्धादि न प्रतिपद्यते पूर्ववद्दोषः नायं लौकिको न परीक्षक इति । तस्माद्वितण्डाऽपि प्रयोजनवती नाव्यापकं प्रयोजनमिति सिद्धम् । सोऽयं सर्व्वः प्रसक्तानुप्रसक्तवादः प्रयोजनव्याख्यानार्थमित्याह—उक्तं प्रयोजनम् ।

दृष्टान्तपदव्याख्यानपरं भाष्यमनुभाषते—प्रत्यक्षविषय इति । आक्षिपति—किमुक्तं भवतीति । न तावद् यो यः प्रत्यक्षविषयः स सर्वो दृष्टान्तः, अदृष्टान्तस्यापि प्रत्यक्षविषयत्वात् । नापि यो दृष्टान्तः स सर्वः प्रत्यक्षविषयः, आगमादिविषयस्यापि दृष्टान्तत्वात् । तस्मादयुक्तमेतदित्याक्षेप इति । तत्समाधानभाष्यं यत्रेत्यादि, तद् व्याचष्टे—लौकिकपरीक्षकाणां दर्शनाविघातहेतुरिति । एतच्च क्वचिल्लौकिकपरीक्षकाणां क्वचिल्लौकिकानां क्वचित् परीक्षकाणामिति मन्तव्यम् । अन्यथा यदप्रसिद्धं लौकिकानां केवलं पण्डितरूपवेदनीयं परमाण्वादि तस्य न दृष्टान्तता स्यात् । अत्र च यो दृष्टान्तः स एवं, न तु य एवं स दृष्टान्त इति द्रष्टव्यम् । एवम्भूतव्याख्यानस्य प्रयोजनं दर्शयति—एवं चेति । एतद्विभजते—दर्शनाविघातेति । न केवलं प्रमेयविरोधः सूत्रविरोधश्चेत्याह—ततश्चोदाहरणसूत्रं व्याहन्येत । यत् तेषु तेषु शास्त्रप्रदेशेष्वतीन्द्रियोदाहरणसूत्रं सिद्धान्ते पूर्व्वपक्षे वा यथा "मन्त्रायुर्व्वेदप्रामाण्यवद्" "अणुश्यामतानित्यत्ववद्"एवमादि,(२) तद् व्याहन्यते । न तूदाहरणलक्षणसूत्रम्, तद्धि प्रत्यक्षविषयदृष्टान्तत्वेऽप्युपपद्यते । तस्माद्भाष्ये प्रत्यक्षवचनं दृष्टान्तविषयप्रमाणदार्ढ्यं लक्षयति । प्रत्यक्षमूलत्वाद्वा प्रत्यक्षो दृष्टान्तः, अन्यथाऽनवस्थाप्रसङ्ग इति । सोऽयं दृष्टान्तः प्रमेयेऽन्तर्भवन्नेवमर्थं पृथगुच्यत इत्याह—सोऽयमिति । न्यायस्य पञ्चावयवात्मकस्य वचनसमूहस्य दृष्टान्तो मूलमतस्तस्य पृथगुपदेशः । अतश्चास्य पृथगुपदेशो यत् सति तस्मिन्निति

(१) "चेति" इति तात्पर्य्यसम्मतपाठः । (२) २।१।६८, ५।१।६७ ।

न्यायभाष्यम्

तेषु प्रमाणसमवायः, आगमः प्रतिज्ञा। हेतुरनुमानम।

न्यायवार्त्तिकम्

इदमिति सामान्यतः, इत्थम्भूतमिति विशेषतः, तस्य व्यवस्था इदं सांख्येष्विदं योगेष्विति। सर्वतन्त्रसिद्धान्तस्तर्हि न सिद्धान्तोऽव्यवस्थानात्, न ह्ययं क्वचिद्व्यवतिष्ठत इति। तच्च न, योऽयं सर्व्वैरभ्युपगम इयमेव व्यवस्था, तस्य प्रमेयेऽन्तर्भूतस्य पृथग्वचनं वादादिविषयत्वात्। सिद्धान्तभेदे हि वादजल्पवितण्डाः प्रवर्तन्ते इति। अथावयवा वाक्यैकदेशाः। किं पुनर्वाक्यम्? पूर्वपद-

न्यायवार्त्तिकतात्पर्य्यटीका

अनुमाननिमित्तत्वमाह—पूर्वं प्रत्यक्तेति। दृष्टान्तधर्म्मिणि दृढतरप्रमाणावधारितमित्यर्थः। शाब्द-मूलतां दृष्टान्तस्य दर्शयति—पूर्वं ज्ञातं चार्थमिति। सम्बन्धग्रहणविषयोऽर्थो दृष्टान्तः, दृष्टान्तः सम्बन्धग्रहणं च शाब्दज्ञानस्यापि निमित्तं प्रथमश्राविणः शब्दार्थज्ञानाभावात्। तस्मादस्ति शाब्देऽपि दृष्टान्तस्योपयोग इति। अपरं पृथगुपादानप्रयोजनमाह—नास्तिकस्येति। अप्रपञ्चने हेतुमाह—तदुक्तं भाष्य इति।

सिद्धान्तपदविवरणभाष्यं व्याचष्टे—अभ्युपगमेति। तद्विभजते—अभ्युपगम इदमित्थम्भूतं चेति। तद्विभजते—इदमितीति। इदमिति हि धर्म्मिविषयसिद्धान्तं दर्शयति, धर्म्मी सर्व्वतन्त्रसिद्धान्तविषयः। इत्थमिति प्रतितन्त्राधिकरणाभ्युपगमसिद्धान्तविषयं दर्शयति, व्यवस्थायामुपलक्षणतया प्रतितन्त्रसिद्धान्तमात्रमुदाहरति—इदं सांख्येष्विति। उपलक्षणता-मुदाहरणस्याजानानश्चोदयति—सर्वतन्त्रेति। परिहरति—योऽयमिति। अभ्युपगम-व्यवस्थितिरनभ्युपगमाद् व्यवच्छिनत्ति। न तु पुरुषविशेषे व्यवस्थापयतीत्यभिप्रायः। अस्यापि (१) प्रमेयान्तर्भूतस्यापि सतः पृथगुपादानप्रयोजनमाह—तस्य प्रमेये इति। तत्र सर्व्वतन्त्रसिद्धान्तसिद्धस्तावद्विप्रतिपन्नानामपि वादिनां धर्म्मी तस्य सर्व्वतन्त्रसिद्धान्त-सिद्धस्य विशेषेषु प्रतितन्त्रसिद्धान्ताः प्रवर्त्तन्ते। तथा हि यदि घटो नाम न सर्व्वतन्त्र-सिद्धान्तसिद्धः किमाश्रया अवयवी वा परमाणुसमूहो वा ज्ञानाकारो वा प्रधानपरिणामो वा ब्रह्मपरिणामो वा तद्विवर्तो वेति प्रतितन्त्रसिद्धान्ताः प्रवर्त्तन्ते, कथं च प्रतितन्त्रसिद्धान्ताश्रया वादजल्पवितण्डाः प्रवर्त्तन्ते, किमाश्रयश्च न्यायः स्यात्। तथा यद्यधिकरणसिद्धान्तो न भवेत् कथं साध्यसामान्यव्याप्तं साधनसामान्यमिति साधनविशेषात् साध्यविशेषो गम्येत, तस्मादस्ति प्रमेयस्यापि सिद्धान्तस्य पृथगुपादानप्रयोजनम्। अभ्युपगमसिद्धान्तमुपरिष्टाद्विचारयिष्यति (२) वार्त्तिककारोऽतस्तत्प्रयोजनमस्माभिर्नोक्तमिति।

क्रमप्राप्तानवयवानाह—अथावयवाः। ननु यथा तन्तवः पटस्य समवायिकारणं किन्तथैवैते-

(१) वार्त्तिके "अस्यापि" इति नास्ति। (२) १।१।३१ सू०।

न्यायवार्त्तिकम्

स्मृत्यपेक्षोऽन्त्यपदप्रत्ययः स्मृत्यनुग्रहेण प्रतिसन्धीयमानो विशेषप्रतिपत्तिहेतुर्वाक्यम्। तस्य भागा एकदेशा इति। ते कियन्तः? यावद्भिः सिद्धिः परिसमाप्यत इति। का पुनरियं सिद्धिः? पदार्थस्य तथाता। का परिसमाप्तिः? विशेषप्रत्ययः। ते समाख्याशब्दैरभिधीयन्ते प्रतिज्ञादय इति। तत्र आगमः प्रतिज्ञेति न युक्तम्, आगमस्य तत्त्वव्यवच्छेदकत्वात् प्रतिज्ञार्थस्य च प्रति-

न्यायवार्त्तिकतात्पर्य्यटीका

प्रतिज्ञादयो वाक्यस्य। नो खलु गगनगुणा वर्णाः समवायिकारणतां प्रतिपद्यन्त इत्याह—वाक्यैकदेशा इति। अवयवा इव अवयवाः, न पुनः समवायिकारणम्। यथा ह्यवयवाः समुदायिन एकस्मिन्नवयविनि कार्य्यं धारयितव्ये, एवमेकस्मिन् विवक्षितार्थे प्रतिज्ञादयोऽवयवा वाक्यस्य समुदायस्य समुदायिन इति। ननु वर्णानामाशुतरविनाशिनां क्रमवतामेककालताभावे समुदायाभावात् कुतस्तत्समुदायो वाक्यं कुतश्चैकदेशतेत्याशयवानाक्षिपति—किं पुनर्वाक्यम्? उत्तरम्—पूर्वपदस्मृत्यपेक्षोऽन्त्यपदप्रत्ययः स्मृत्यनुग्रहेण प्रतिसन्धीयमानो विशेषप्रतिपत्तिहेतुर्वाक्यम्। विशिष्यत इति विशेषः पदार्थ एकः, क्रिया वा कारकं वा प्रातिपदिकार्थो वा पदार्थान्तरविशिष्टो वाक्यार्थः। यथा सोमेन यजेत गोदोहनेन पशुकामस्य, यस्य पिता पितामहो वा सोमं न पिबति स व्रात्य इति तस्य विशेषस्यैकस्य प्रतिपत्तिहेतुः। तदेवं समूहनिबन्धनं पदानामेककार्य्यत्वं सूचयति। को विशेषप्रतिपत्तिहेतुरित्यत उक्तम् अन्त्यपदप्रत्ययः। अन्त्यं विशेष्यं विशेषणपूर्वत्वात् तस्य पदं, न च तदविदितं सत्तामात्रेण चक्षुरादिवद्विशेष्यं प्रतिपादयतीत्युक्तं प्रत्यय इति। प्रतीयमानं विशेष्यवाचि पदं विशेष्यं बोधयति, प्रतीतिश्च नानुभवः, अपि तु स्मृतिः। न हि क्रमवद्वर्णसमुदायः पदश्रवणेन्द्रियजनितानुभवगोचरः सम्भवति, सम्भवन्ति तु प्रत्येकं वर्णाः। न च ते प्रत्येकं पदं, न च पूर्ववर्णस्मृतिनिचयसहितोऽन्त्यवर्णानुभवः श्रोत्रज इति युक्तम्, स्मृतीनां स्वकार्य्यसंस्कारविरोधिनीनामसहभावात्। विनश्यदविनश्यदवस्थयोरुपान्त्यान्त्यवर्णस्मृत्यनुभवयोस्तु स्यात, न चैतावताऽर्थप्रत्ययः, पूर्ववर्णस्मृतीनां तिरोभावात्। न च पूर्वपूर्वानुभवजनितसंस्कारसहकारिणः श्रवणादेव लब्धजन्मनः प्रत्ययस्यैकस्याध्यस्ततत्स्मृत्यनुभवरूपवैचित्र्यस्य सदसद्वर्णावगाहिनो विषयभावमापन्ना वर्णा अर्थधियमादधतीति सांप्रतं, सम्बन्धसंवेदनाहितसंस्कारोद्बोधसमयजन्मना स्वजातेन संस्कारेण सम्बन्धस्मृत्युत्पत्तिसमये विनाशात् पदार्थावबोधकत्वानुपपत्तेः। तस्मात् स्मृतिरेव प्रत्ययः। अत एवाध्ययनसमये गुरु-मुखाद्-गृहीतो वेदराशिर्वेदाङ्गोपाङ्गज्ञानसंस्कृतेन स्मर्यमाण एव तस्यार्थं बोधयति। एवं च यदा पदार्थप्रत्यायन एव पदानुभवो न कारणं, तदा वाक्यार्थज्ञाने नानापदार्थस्मरणाकाङ्क्षायोग्यतासन्निधानावधारणादिव्यवहिते कैव कथेति। यदि तर्हि विशेष्यपदमेव स्मर्य्यमाणं विशिष्टमर्थमवगमयति कृतं पदान्तरैस्तत एव वाक्यार्थप्रतिपत्तेरित्यत उक्तम्—पूर्वपदस्मृत्यपेक्षः। पूर्वं विशेषणं

न्यायवार्त्तिकम्

पाद्यत्वात्। आगमाधिगतस्य प्रतिपाद्यत्वाद् आगमः प्रतिज्ञेति न दोषः, य एवार्थ आगमेनाधिगतस्तमेव परस्मा आचष्ट इत्यागमः प्रतिज्ञेत्युच्यते। एवं लिङ्गदर्शनमात्रे हेतूपचारात्

न्यायवार्त्तिकतात्पर्य्यटीका

तत्पूर्वकत्वाद् विशिष्टप्रतीतेस्तस्य पदं स्मर्य्यमाणपूर्वपदापेक्षः। यद्यपि स्मरणानि सह न सम्भवन्ति, तथाप्येकस्मृतिसमारूढानि पदानि निरन्तरसमस्तस्मृतिसमारूढानि वा परस्परापेक्षाणि। तथा च स्मर्य्यमाणं विशेष्यपदं विशेषणपदापेक्षं विशिष्टमवगमयति। स्यादेतत् पदमाला चेत् स्मर्य्यमाणा वाक्यार्थबोधिनी, कृतं पदार्थबोधनेन, कृतञ्च पदतदर्थसंबन्धबोधनेनेत्यत उक्तम्—स्मृत्यनुग्रहेणेति। प्रत्येकं याः पदेभ्यः पदार्थस्मृतयस्तदनुग्रहेण। एतदुक्तं भवति यद्यपि वाक्यार्थबोधनाय पदमाला प्रवृत्ता, तथाऽपि पदार्थस्मृतीरवान्तरव्यापारभूता अपेक्षते काष्ठानीव पाकप्रवृत्तानि ज्वलनमवान्तरव्यापारम्। न च पदान्यगृहीतसङ्केतानि पदार्थान् स्मारयन्ति इत्युपपन्ना पदार्थस्मृतिसम्बन्धसंवेदनयोरपेक्षेति। यदि पदार्थस्मृत्यपेक्षा पदमाला वाक्यार्थबोधिनी, हन्त दश दाडिमानि षडपूपा भवन्तीत्येवमादीनामपि वाक्यार्थबोधकत्वं स्यादित्यत आह—प्रतिसन्धीयमानः। प्रतिपदं सन्धानं पठनं प्रतिसन्धानम्। तच्च स्वार्थद्वारेणाकाङ्क्षायोग्यतासन्निधानं, न च दशदाडिमादिवाक्येषु तदस्तीति न ततो वाक्यार्थबोध इत्यर्थः। तदेवमेकस्मृतिसमारोहेण एकार्थावच्छेदेन पदानां समूहो वाक्यं, तस्य भागा एकदेशा इति। यावतीत्यादि भाष्यमवतारयति—ते कियन्तः। भाष्यव्याख्यानेनोत्तरं—यावद्भिरिति। पृच्छति—केति। न हि समासेर्निष्पत्तेरन्या सिद्धिरस्तीत्यभिप्रायः। उत्तरम्—पदार्थस्येति। धर्म्मिणः सिषाधयिषितधर्म्मविशिष्टत्वं वास्तवमित्यर्थः। समाप्तिं पृच्छति—केति। उत्तरं—विशेषेति। वास्तवो धर्म्मः सिद्धिस्तद्गोचरस्तु निश्चयः पुरुषधर्म्मो निष्पत्तिरिति विशेष इत्यर्थः। कियद्भिः किमभिधानैश्च भागैः सिद्धिः परिसमाप्यते इत्याशङ्क्य भाष्यकृतोक्तम्—तस्य पञ्चेति। तद् व्याचष्टे—समाख्येति। भाष्यमनुभाष्याक्षिपति—तत्रागम इति। न ह्यागमवत् प्रतिज्ञावचनं निश्चायकं हेतुवचनादिवैयर्थ्यात्। निष्पादितक्रिये कर्म्मणि साधनस्य साधनन्यायातिपातादिति समाधत्ते—आगमाधिगतस्येति। आत्मादिप्रमेयप्रतिपादनोद्देशेन हि शास्त्रमेतत् प्रवृत्तं, तन्नान्तरीयकतया न्यायं व्युत्पादयत्, तमेव व्युत्पादयेद् यश्चात्मादेः प्रमेयस्य साक्षान्निश्चायकः, तत्प्रतिपादकागमप्रामाण्यनिश्चायको वा। तस्य च न्यायविशेषस्याद्योऽवयवः प्रतिज्ञा। आगमार्थविषया साक्षात्, तद्विषयागमप्रामाण्यप्रतिपादकस्य च परंपरया। तस्मादागमः प्रतिज्ञा। आगमोपचारस्य प्रयोजनमिदं पदार्थसंवादेनागमेनानुगृह्यते, न्यायः सप्रयोजनश्च भवति, आगमार्थज्ञानस्य निःश्रेयसहेतुभावेन निरूढत्वात्। तस्माद् यद्यपि न न्यायमात्रवर्त्तिनी प्रतिज्ञा-

न्यायभाष्यम्

उदाहरणं प्रत्यक्षम् । उपनयनमुपमानम् ।

न्यायवार्त्तिकम्

हेतुरनुमानमिति । यत्तु द्वितीयं लिङ्गदर्शनं तत्सम्बन्धस्मृतिव्यक्तिहेतुभावाद्धेतुरित्युच्यते । स्मृतिविषयस्य प्रत्यक्षतः पुनरुपदर्शनादुदाहरणं प्रत्यक्षं यस्मात् पूर्वानुभूतमर्थं स्मरति स्मृतं च विषयमुदाहरणत्वेनादत्ते । तेन पूर्वानुभवप्रसिद्धमनुविधीयमानं प्रत्यक्षमिव प्रत्यक्षमिति । कः पुनरुपमानार्थः ? अविप्रतिपत्तिः, यथा प्रत्यक्षे न विप्रतिपद्यते एवमुदाहरणेऽपीति । यथा तथेत्युपमानैकदेशे उपमानोपचारादुपमानमुपनय (१) इति । उपमानं खलु यथा तथेत्युपदेशोपयोगे सति

न्यायवार्त्तिकतात्पर्य्यटीका

ऽऽगमस्तथाऽपि प्रकृतन्यायाभिप्रायेण द्रष्टव्यम् । तथा चागमानुसन्धानेन प्रतिज्ञायाः कल्पितविषयत्वमपि निराकृतं वेदितव्यम् । यदाहुरेके सर्वोऽयमनुमानानुमेयव्यवहारो बुद्ध्यारूढेनैव धर्मधर्म्मिभावेन न बहिः सदसत्त्वमपेक्षत इति । तथाऽनुमानस्य न्यायानुग्राहकत्वं हेतुवचनस्यानुमानत्वोपचारेण भाष्यकारेणोक्तम्—हेतुरनुमानमिति । तत् खलु हेतुवचनमनुमानप्रतिपादकं विषयतयाऽनुमानेनानुग्रहीतव्यं, न च लिङ्गदर्शनमात्रमनुमेयप्रतिपत्तिहेतुरपि तु सम्बन्धस्मृतिसहकारि, न च हेतुवचनमात्रात् तत्सहकारिताऽवगम्यते । तस्मान्न लिङ्गवचनमनुमानप्रतिपादकमिति कथमनुमानत्वोपचार इत्यत आह—एवं लिङ्गदर्शनमात्रे । दृश्यमाने लिङ्गरूपे सम्बन्धस्मृतिरहिते । हेतूपचाराद् अनुमानत्वोपचारात् । हेतुरनुमानमित्युक्तं भाष्यकृता । तदेव विभजते—यत्तु द्वितीयं लिङ्गदर्शनम् । सम्बन्धग्रहणसमये लिङ्गदर्शनं प्रथमं, तदपेक्षया लिङ्गदर्शनं साध्यधर्म्मिणि द्वितीयम्, तत्सम्बन्धस्मृतिव्यक्तिहेतुभावात् । स्मर्य्यतेऽनेनेति स्मृतिः संस्कारः, तस्य व्यक्तिः कार्य्याभिमुखीकरणं, तत्र हेतुभावात् । क्वचित्पाठः—सम्बन्धस्मृतिहेतुव्यक्तिहेतुभावात्, स तु सुगम एव । अतो हेतुरित्युच्यते । एतदुक्तं भवति, यत्तु द्वितीयलिङ्गदर्शनं शुद्धमप्यापाततः सम्बन्धस्मृतिहेतुभावात् सम्बन्धस्मृतिसहकार्य्येव, तथा चानुमानम् । एवं च तत् प्रतिपादकस्य वचस उपपन्नोऽनुमानत्वोपचार इति सिद्धम् । एवं च वास्तवेन लिङ्गेन सम्बन्धात् तद्वचनस्य बुद्धिविकल्पितलिङ्गविषयत्वं परास्तं वेदितव्यम् । एवमन्येष्वप्यवयवेषु वक्ष्यमाणेष्वेतदेव प्रयोजनं योजनीयमिति । उदाहरणं प्रत्यक्षमिति भाष्यम्, तद् व्याचष्टे—स्मृतिविषयस्येति । यत्र प्रत्यक्षविषये पूर्वं व्याप्तिर्गृहीता तस्य स्मृतिरिति स्मृतिविषयस्य प्रत्यक्षतः पुनरुपदर्शनादविप्रतिपत्त्या पुनः स्मरणात् तत्स्मारकं वचनमुदाहरणं प्रत्यक्षम्, मूलभूतप्रत्यक्षप्रमाणसमुत्थत्वादिति । कः पुनरुपमानार्थ इति । प्रत्यक्षमिव प्रत्यक्षमित्यत्रेवकारे तत्रोपमार्थः क इत्यर्थः । एतदेव विभजते—यस्मादिति । (२)

(१) भाष्ये तु "उपनयनमुपमान"मिति पाठः । (२) अत्र वार्त्तिके "यस्मा"दिति न दृश्यते ।

न्यायभाष्यम्

सर्वेषामेकार्थसमवाये सामर्थ्यप्रदर्शनं निगमनमिति। सोऽयं परमो न्याय इति। एतेन (१) वादजल्पवितण्डाः प्रवर्तन्ते नातोऽन्यथेति।

न्यायवार्त्तिकम्

प्रत्यक्षागमस्मृतिपूर्वकं सारूप्यज्ञानमुपमानमिति तत्रोपमानैकदेशे उपमानमित्युपचरन्ति। सर्वेषामेकार्थसमवाये सामर्थ्यप्रदर्शनं निगमनमिति। कः पुनरेकार्थसमवायः? एकवाक्याध्यारोपः। किं पुनः सामर्थ्यम्? इतरेतरसम्प्रत्यायितार्थापेक्षित्वम्। एतच्च वक्ष्याम इति। निगम्यन्तेऽनेन प्रतिज्ञादय एकार्थेन सम्बध्यन्त इति। सोऽयं परमो न्याय इति। कः पुनः परमार्थः? विप्रतिपन्नपुरुषप्रतिपादकत्वम्। एकैकशः प्रमाणानि प्रवृत्तानि न विप्रतिपन्नं पुरुषं प्रतिपादयन्ति,

न्यायवार्त्तिकतात्पर्य्यटीका

उपमानमुपनय इति भाष्यम्, तद्व्याचष्टे—यथा तथेत्युपमानैकदेश इति। उपनयो हि तथा चैतदिति प्रवर्त्तमान उदाहरणस्थं यथाशब्दार्थमपेक्षत इति यथा तथेति प्रवर्त्तत इति। किं पुनरुपमानं यस्यायमेकदेश इत्यत आह—उपमानं यथा गौस्तथा गवय इत्युपदेशोपयोगि, उपयोगस्तदर्थविषयोऽनुभवः, तस्मिन् सति पश्चाद्वनं गतो नागरः प्रत्यक्षेणादृष्टपूर्वं पिण्डं पश्यति, स्मरति चोपदेशार्थम्, पिण्डस्य च पुरोवर्तिनः स्मर्यमाणेन गवा सादृश्यं प्रत्यक्षेणैव पश्यति। तदेवम्भूतं सारूप्यज्ञानं गवयशब्दवाच्योऽयं पिण्ड इति प्रतीतिहेतुरुपमानम्। तदेतस्योपमानस्योपदेशार्थस्मरणगवयपिण्डगोसारूप्याप्रत्यक्षरूपस्यैकदेशे सारूप्ये यो यथातथाभावः स उपनयेऽप्यस्तीत्येतावतोपमानत्वोपचार उपनय इत्यर्थः। सोऽयं सर्वप्रमाणनिवेशेन परमो न्यायः स्तूयते। निगमनव्याख्यानभाष्यमनुभाष्याक्षिपति—कः पुनरिति। न खल्ववयवानां प्रमाणानां वा वाक्ये समवायसम्बन्धः सम्भवतीत्यर्थः। उत्तरम्—एकवाक्येति। अध्यारोपो बुद्ध्या प्रतिसन्धानम्। सामर्थ्यं पृच्छति—किं पुनरिति। उत्तरम्—इतरेतरेति। सामर्थ्यं हि पदानां धर्म्मः। इह तु विभज्यमानानामवयवानां तन्मूलानां प्रमाणानां साकाङ्क्षत्वमेव धर्म्मः सामर्थ्यम्, तदत्र समस्तलिङ्गरूपसंपन्नलिङ्गप्रतिपादनमेकं प्रयोजनं विभज्यमानसाकाङ्क्षत्वं वाऽस्तीति सिद्धमेकवाक्यत्वमवयवानामिति। निगमनपदं व्युत्पादयति—निगम्यन्त इति। सोऽयमिति भाष्यमनुभाष्य पृच्छति—कः पुनः परमशब्दस्यार्थ इति। उत्तरम्—विप्रतिपन्नपुरुषप्रतिपादकत्वं पञ्चावयववाक्यस्य परमत्वमिति। तदेव व्यतिरेकमुखेण प्रतिपादयति—एकैकश इति। यद्यपि लोकप्रत्यक्षादीनामेकैकशोऽपि विप्रतिपन्नपुरुषप्रतिपादकत्वं तत्र तत्रोपलभ्यते, तथाऽपि यदेतद्वेदप्रामाण्यमात्मादिप्रतिपादनं च निःश्रेयसोपयोगि, न तत् पञ्चावयववाक्यादेतच्छास्त्रोपदिष्टोपकरणाद्विना

(१) पञ्चावयवात्मकन्यायेन।

न्यायभाष्यम्

तदाश्रया च तत्त्वव्यवस्था। ते चैतेऽवयवाः शब्दविशेषाः सन्तः प्रमेयेऽन्तर्भूता एवमर्थं(१) पृथगुच्यन्त इति।

तर्को न प्रमाणसंगृहीतो, न प्रमाणान्तरं, प्रमाणानामनुग्राहकस्तत्त्वज्ञानाय कल्पते। तस्योदाहरणम्--किमिदं जन्म कृतकेन हेतुना निर्वर्त्यते, आहोस्विदकृतकेन, अथ

न्यायवार्त्तिकम्

वाक्यभावापन्नानि पुनर्विप्रतिपन्नम्, अतोऽयं परम इति। किं पुनरवयवाः प्रमाणान्तरमुत तेष्वन्तर्भवन्तीति ? किं चातः ? यदि प्रमाणान्तरम्, परिसंख्यानमयुक्तम्, अथ तेष्वेवान्तर्भवन्ति, पृथगभिधानानर्थक्यमवयवानामिति। न प्रमाणान्तरमिति ब्रूमः। संहतानामेतेषां वाक्यपरतन्त्राणां विप्रतिपन्नपुरुषप्रतिपादकत्वेन पृथगुपादानमिति। त एतेऽवयवाः पृथग्भवन्तो वादजल्पवितण्डानां प्रवृत्तिहेतवो भवन्ति। तत्त्वव्यवस्थायाश्चाश्रया भवन्तीति। क आश्रयार्थः ? विशेषप्रतिपादकत्वमिति।

तर्को न प्रमाणसंगृहीतः, न प्रमाणान्तरमपरिच्छेदकत्वात्। प्रमाणं परिच्छेदकं, न तर्कः। तस्मान्न प्रमाणं, न प्रमाणान्तरमप्यत एव। प्रमाणविषयविभागात्तु

न्यायवार्त्तिकतात्पर्य्यटीका

सिध्यतीत्यनेनाभिप्रायेण द्रष्टव्यम्। अवयवानां पृथगभिधानमाक्षेप्तुं विकल्पयति—किं पुनरवयवा इति। विकल्पप्रयोजनं पृच्छति—किं चातः। उत्तरम्—यदि प्रमाणान्तरमिति। समाधत्ते—न प्रमाणान्तरमिति। प्रयोजनान्तरमाह—त एते इति। यत एव वादादिप्रवृत्तिहेतवोऽत एव तत्त्वव्यवस्थायाश्चाश्रया भवन्ति। पृच्छति—किमिति (२)। न हि कुण्डमिव बदराणि तत्त्वव्यवस्थाऽवयवानाश्रयतीत्यर्थः। उत्तरम्—विशेषप्रतिपादकत्वम्। धर्म्मिविशिष्टो धर्म्मो विशेषः, विशिष्यत इति व्युत्पत्त्या तत्प्रतिपादकत्वमवयवानां तत्त्वव्यवस्थाश्रयत्वमित्यर्थः।

क्रमप्राप्ततर्कपदव्याख्यानाय भाष्यमनुभाषते—तर्को न प्रमाणसंगृहीतः। प्रमाणपदेन हि चत्वारि प्रमाणानि संगृहीतानि, न चैतेष्वन्यतमस्तर्क इत्यर्थः। अस्तु तर्हि प्रमाणपदसंगृहीतेभ्यः प्रमाणेभ्यः प्रमाणान्तरमसंगृहीतं प्रमाणपदेन प्रमेयपदेन वा संगृहीताः संशयादयः प्रमेया इत्यत आह—न प्रमाणान्तरम्। भाष्यमनुभाष्य हेतुमाह—अपरिच्छेदकत्वात्, अनिश्चायकत्वात्। तदेव व्यतिरेकमुखेण तद्दर्शयति—प्रमाणमिति। स्यादेतत्। अपरिच्छेद-

(१) न्यायरूपतया वादादीनां प्रवर्त्तकत्वेन तत्त्वव्यवस्थाप्रयोजकत्वेन च। (२) अत्र वार्त्तिके "किम्" इति पाठो नास्ति, किन्तु "क आश्रयार्थः" इत्येवमस्ति।

न्यायभाष्यम्

आकस्मिकमिति ? (१) एवमविज्ञातेऽर्थे कारणोपपत्त्या ऊहः (२) प्रवर्त्तते—यदि कृतकेन हेतुना निर्वर्त्यते, हेतूच्छेदादुपपन्नोऽयं जन्मोच्छेदः। अथाऽकृतकेन हेतुना, ततो हेतूच्छेदस्याऽशक्यत्वादनुपपन्नो (३) जन्मोच्छेदः। अथाऽकस्मिकम्, अतोऽकस्मान्निर्वर्त्यमानं न पुनर्निवर्त्स्यतीति(४) निवृत्तिकारणं नोपपद्यते, तेन जन्मानुच्छेद इति। एतस्मिंस्तर्कविषये कर्मनिमित्तं जन्मेति प्रमाणानि प्रवर्त्तमानानि तर्केणाऽनुगृह्यन्ते, (५)

न्यायवार्त्तिकम्

प्रमाणानामनुग्राहकः। यः प्रमाणानां विषयस्तं विभजते। कः पुनर्विभागः ? युक्तायुक्तविचारः, इदं युक्तमिदमयुक्तमिति। यत्तत्र युक्तं भवति तदनुजानाति न त्ववधारयति। अनवधारणात् प्रमाणान्तरं न भवति। तस्योदाहरणं भाष्ये कर्मनिमित्तं जन्मेति। कथं पुनः

न्यायवार्त्तिकतात्पर्य्यटीका

कत्वमसिद्धं तर्कज्ञानस्य संशयादिवद् गुणत्वेनात्मलिङ्गत्वात्। अन्यथा त्वकिंचित्करत्वादुपादानवैयर्थ्यमित्यत आह—प्रमाणविषयविभागात्त्विति। न हि वयं गुणत्वेनोत्पत्तिमत्त्वेन वा रूपेणानिश्चायकत्वं तर्कस्याचक्ष्महे, किन्तु प्रमाणविषयविभागहेतुतया, न चैवमस्याकिंचित्करत्वमित्यर्थः। पृच्छति—कः पुनरिति। उत्तरम्—युक्तायुक्तेति। इदं युक्तमिदमयुक्तमिति—इतिकारेण युक्तायुक्तविषयं तर्कज्ञानं परामृषति। तदनेन तर्कस्य स्वरूपं दर्शितं तस्य व्यापारमाह—यत्तत्र युक्तं भवति, सम्भवति तदनुजानाति न त्ववधारयति तर्कः। एतदुक्तं भवति प्रमाणं तत्त्वावधारणाय प्रयुक्तं करणतयेतिकर्तव्यतामपेक्षते। तर्कश्च प्रमाणविषययुक्तायुक्तविचारात्मा प्रमाणं युक्ते तत्त्वे प्रवर्तमानमनुजानन् प्रमाणमनुगृह्णाति। तदनुगृहीतं प्रमाणं तत्त्वनिर्णयाय पर्य्याप्तम्। न च प्रमाणविषये चेत्तर्कः प्रवर्त्तते कृतमस्य प्रमाणानुज्ञया नन्वयमेव निश्चायकः कस्मान्न भवतीति सांप्रतं, तस्य प्रसङ्गतया पारतन्त्र्येण स्वयमसाधनत्वात्। अस्ति हि प्रसङ्गो न प्रसङ्गो हेतुः। तथा हि प्रत्यक्षमेव तावद्भूतले प्रवर्त्तमानं तद्विशेषणतया घटाभावेऽपि प्रवर्त्तमानं यद्यत्राभविष्यद् घटो भूतलमिवाद्रक्ष्यत तेन सह तुल्यदर्शनयोग्यत्वात्, न च दृश्यते तस्मान्नास्तीति, तेन तर्केणानुज्ञायमानं घटाभावविशिष्टभूतले प्रवर्त्तते केवलमेवेदं भूतलं नेह घट इति। एवं स्वर्गकामो यजेतेति शब्दोऽपि प्रवर्त्तमानः परमाप्तस्य भगवत ईश्वरस्य नियोगो नास्वर्गफलायां यागभावनायामेवकल्पत इति समानपदेनोपात्तोऽपि दुःखतया धात्वर्थः साध्य इति न युक्तं, भिन्नपदोपात्तोऽपि पुरुषविशेषणमपि स्वर्ग एव भावनाफलं युक्त इति तर्केणानुज्ञायमानः प्रवर्त्तते। न च यद्यभविष्यद् घट इति वा यद्यभविष्यद्धात्वर्थः साध्य इति वा क्रियातिपत्तिरस्ति यदाश्रयानिष्टप्रसङ्गेनायुक्तत्व-

(१) "अथ आकस्मिकमिति" इति ल-पु नास्ति। (२) मानसज्ञानविशेषः। (३) "अयम्" इत्यधिकः पाठः ज-आ। (४) "निवर्त्स्यति" इति भापाठः। (५) सबलानि क्रियन्ते।

न्यायभाष्यम्

तत्त्वज्ञानविषयस्य विभागात् तत्त्वज्ञानाय कल्पते तर्क इति। सोऽयमित्थम्भूतस्तर्कः प्रमाणसहितो वादे साधनायोपालम्भाय(१) चाऽर्थस्य (२) भवतीत्येवमर्थं पृथगुच्यते प्रमेयान्तर्भूतोऽपीति।

न्यायवार्त्तिकम्

कर्मनिमित्तं जन्म ? भेदवत्त्वात्। कः पुनर्भेदः ? सुगतिर्दुर्गतिश्चेति। सुगतौ देवो मनुष्य इति। मनुष्यत्वे पुमानितर इति। पुंस्त्वे ब्राह्मणोऽन्य इति। ब्राह्मणत्वे पट्विन्द्रियो मृद्विन्द्रिय इति। पट्विन्द्रियतायामुच्चाभिजनो नीचाभिजन इति। उच्चाभिजनतायां सकलो निष्कल इति। साकल्ये विद्वान् मूर्ख इति। विद्वत्तायां समाश्वासी परित्रस्त इति। समाश्वासे वशी परायत्त इति। दुर्गतावपि तिर्यङ्-नारक इति। नारकत्वेऽपि कूटशाल्मल्यामयःकुम्भ्यामिति। तिर्यक्तायां गौरितर इति। सोऽयं भेदोऽनेकमवस्थितमनित्यमेकद्रव्यं प्रत्यात्मनियतं निमित्तमन्तरेण न युक्तः। किं कारणम् ? पृथिव्या-

न्यायवार्त्तिकतात्पर्य्यटीका

मितरथा च युक्तत्वं यत्तर्केण निश्चीयते। तस्मान्न प्रमाणम्। निश्चयाय तु प्रवर्त्तमानं प्रमाणं तद्विषयविवेकेणानुगृह्णन्नितिकर्त्तव्यतात्वेनोपयुज्यत इति। यथोक्तम्—

मीमांसासंज्ञकस्तर्कः सर्व्ववेदसमुद्भवः। सोऽतो वेदो रुमाप्राप्तकाष्ठादिलवणात्मवत् (३)॥

पूजितविचारवचनो हि मीमांसाशब्दोऽयुक्तप्रतिषेधेन युक्ताभ्यनुज्ञानं तर्कः प्रमाणेतिकर्त्तव्यतात्वेन च प्रमाणाद्भेदाद् भेद उक्तः। सोऽतो वेद इति। अङ्गाङ्गिनोरभेदविवक्षया इतिकर्त्तव्यतात्वं चास्य साक्षाद् दर्शितम्।

धर्म्मे प्रमीयमाणे हि वेदेन करणात्मना। इतिकर्त्तव्यताभागं मीमांसा पूरयिष्यति॥

इति सर्व्वमवदातम्। तस्योदाहरणं भाष्ये कर्म्मेति। कर्म्म कारणमपूर्व्वं धर्म्माधर्म्माविति यावत्, कार्य्यं कारणत्वोपचारात्। एतदुपपादनाय पृच्छति—कथं पुनरिति। निकायविशिष्टाभि-रपूर्व्वाभिः शरीरेन्द्रियबुद्धिवेदनाभिरभिसम्बन्धो जन्म तस्य कथं कर्म्मनिमित्ततेत्यर्थः। अत्र प्रमाण-मनुमानमाह—भेदवत्त्वात्, विचित्रत्वाद् इत्यर्थः। पृच्छति—कः पुनरिति। भेदमाह—सुगतिरिति। प्रमाणमुक्त्वा तस्येतिकर्त्तव्यताभूतं तर्कमवतारयति—सोऽयं भेद इति। यद्येकं निमित्तं स्याद्वैचित्र्यं न भवेत्। न ह्यभिन्नात् कारणात् कार्य्यवैचित्र्यमुपपद्यते तस्याकस्मिकत्वप्रसङ्गात्। अत उक्तम्—अनेकमिति। नन्वनेकं यागादिब्रह्महत्यादिक्रिया-रूपं कारणमस्तु कृतमपूर्व्वैरित्यत उक्तम्—अवस्थितम्। यागादिका तु क्रिया आशुतर-विनाशिनी न चिरभाविने स्वर्गाय कल्पत इति। अवस्थितं चेद् यागाद्याहितमपूर्वः, धर्म्मो-

(१) (प्रतिपक्षीयस्यार्थस्य) खण्डनाय। (२) "वार्थस्य" इति ज-आपाठः। (३) रुमा लवणाकरः।

न्यायभाष्यम्

निर्णयस्तत्त्वज्ञानं प्रमाणानां फलं, तदवसानो वादः, तस्य पालनार्थं जल्पवितण्डे। तावेतौ तर्कनिर्णयौ लोकयात्रां वहत इति। सोऽयं निर्णयः प्रमेयान्तर्भूत एवमर्थं पृथगुद्दिष्ट इति।

न्यायवार्त्तिकम्

दीनां सर्वपुरुषसाधारण्यात्, पृथिव्यादिगतस्य च नियमहेतोरभावात्, सर्वं सर्वात्मकं प्रसज्येत। दृष्टश्च नियमभेदः, तस्मात् कर्म नियामकमिति। सोऽयमित्थम्भूतस्तर्क उपलब्धिविषयत्वात् प्रमेयम्।

निर्णयस्तत्त्वज्ञानं प्रमाणानां फलम्। कदा पुनर्निर्णयः प्रमाणानां फलमिति? यदा वस्त्वन्तरपरिच्छेदहेतुत्वेन नोपादीयते तदा फलं, यदा तेन परिच्छिनत्ति तदा प्रमाणमिति न व्यवतिष्ठते प्रमाणफलभावः। एतच्च वक्ष्यामः—"प्रमेयता च तुलाप्रामाण्यवत्" (१)

न्यायवार्त्तिकतात्पर्य्यटीका

ऽस्तीति सदैव सुखिना भाव्यम्। एवमधर्म्मोऽस्तीति सर्वदैव दुःखिना भाव्यमिति सुखदुःखयोः कादाचित्कत्वं व्याहन्येत। न ह्यवस्थितात् कारणादनवस्थितं कार्य्यम् इत्यत उक्तम्—अनित्यं तद्व्यवस्थानं, न नित्यतां ब्रूमः, किन्तु तावदनेन स्थातव्यं यावदन्त्यसुखदुःखविज्ञानं जनयति अथ नश्यति इति। ननु भिन्नानि सन्त्वपूर्वाणि, तथापि सर्वाणि सर्वात्मसमवेतानि। यथाऽवयवी स्वावयवेषु। तथा च सर्वसाधारण्यान्नोक्तवैचित्र्योत्पाद इत्यत उक्तम्—एकद्रव्यम्। एकद्रव्यं चेदस्तु सर्वसाधारणे पृथिव्यादौ यत्र कुत्रचित्। तथाऽपि वैचित्र्यानुपपत्तिरित्यत उक्तम्—प्रत्यात्मनियतम। अथ पृथिव्याद्येव कारणं जन्मवैचित्र्ये कस्मान्न भवतीत्याशयवान् पृच्छति—किं कारणं, कस्मात्कारणादित्यर्थः। उत्तरम्—पृथिव्यादीनामिति। मा भूत, पृथिव्यादिगतं किञ्चिद्भविष्यतीत्यत आह—पृथिव्यादिगतस्येति। भाष्योक्तप्रमेयत्वे तर्कस्य हेतुमाह—उपलब्धिविषयत्वादिति।

तर्कानन्तरं निर्णय उद्दिष्टस्तर्कहेतुकत्वात्। तस्य स्वरूपमाह—निर्णयस्तत्त्वज्ञानमिति। यद्येवमिन्द्रियापातजन्मप्रत्यक्षज्ञानमपि तत्त्वज्ञानमिति निर्णयः स्यादित्यत आह—प्रमाणानामिति। अनेन पञ्चावयववाक्यमुपलक्षयति, तत्र सतर्काणां प्रमाणानां समवायात्। परमार्थतस्तु तर्कपूर्व्वकस्तत्त्वनिश्चयो विनिर्णय इति। प्रत्यक्षादीनामपि तर्कसहायानां निर्णयः फलमिति। स्यादेतत्। धूमादिगोचरेण तत्त्वनिर्णयेन वह्न्यादावनुमीयमाने प्रमाणमेव निर्णयो न फलमित्याशयवान् पृच्छति—कदा पुनरिति। विदिताभिप्रायस्योत्तरं—यदेति। संकलय्य तर्कनिर्णयव्युत्पादनस्य

(१) २।१।१६ सूत्रम्।

न्यायभाष्यम्

वादः खलु नानाप्रवक्तृकः प्रत्यधिकरणसाधनोऽन्यतराधिकरणनिर्णयावसानो

न्यायवार्त्तिकम्

इत्येतस्मिन् सूत्रे निमित्तद्वयसमावेशादेकं वस्तु द्विशब्दवाच्यमिति। तावेतौ तर्कनिर्णयौ लोकयात्रामुद्वहत इति। बुद्ध्वा बुद्ध्वा लोकः प्रवर्त्तमानस्तर्कनिर्णयाभ्यां हेयं जहाति उपादेयं चोपादत्ते। अस्यान्तर्भावः प्रमाणेषु प्रमेयेषु वा। यदा फलं तदा प्रमेयं, यदा तेन परिच्छिनत्ति तदा प्रमाणमिति।

वादो नानाप्रवक्तृक इति। सिद्धान्तभेदानुविधानान्नानाप्रवक्तृक इति। प्रत्यधिकरणसाधनोऽन्यतराधिकरणनिर्णयावसान इति। अधिकरणमधिकरणं प्रति प्रत्यधिकरणम् अस्य साधनमिति। किमुक्तं भवति? उभाभ्यां साधनं वक्तव्यमिति। अन्यतरस्मिन्नधिकरणे

न्यायवार्त्तिकतात्पर्य्यटीका

प्रयोजनमाह—तावेताविति। परीक्षकोऽत्र लोकशब्देनोच्यते, तदितरस्य तर्कासम्भवात्। बुद्ध्वेति, परीक्ष्य निर्णयं कृत्वेत्यर्थः। शेषं निगदव्याख्यातम्।

निर्णयानन्तरं वादव्याख्यानार्थं भाष्यं वादः खल्विति। तदनुभाष्योपपत्तिमाह—वाद इति। नाना प्रवक्तारो यस्मिन् स तथा, एकस्यापि शास्त्रकर्त्तुः पूर्वपक्षोत्तरपक्षसाधनदूषणप्रतिपादको वचनसमूहो वादः स्यादिति नानाप्रवक्तृक इत्युक्तम्। सिद्धान्तभेदानुविधानेन द्वावपि स्वसिद्धान्तानुरूपं साधनं दूषणं चाहतुरिति। प्रत्यधिकरणेत्यादि भाष्यमनुभाष्याचष्टे—प्रत्यधिकरणम् अस्य साधनम्। अधिक्रियत इत्यधिकरणं साध्यम्, तदधिकृत्य साधनप्रवृत्तेः, प्रत्यधिकरणं साधनम्, यस्मिन् वादे स तथोक्तः। तस्यैवार्थं निष्कष्टुं पृच्छति—किमुक्तं भवति? निष्कर्षति—उभाभ्यां वादिप्रतिवादिभ्यां स्वस्वसाध्ये साधनं वक्तव्यम्। तथा च नानाप्रवक्तृकत्वेन

वृत्तिः

अत्र च प्रमेयान्तःपातिबुद्धिरूपस्याऽपि संशयादेः, निरनुयोज्यानुयोगरूपनिग्रहस्थानान्तःपातिनोश्छलजात्योश्च प्रकारभेदेन प्रतिपादनं शिष्यबुद्धिवैशद्यार्थमस्तु, निग्रहस्थानान्तःपातिनां हेत्वाभासानां पृथगभिधानप्रयोजनं तु जानाति भगवानक्षपाद एव।

भाष्ये तु 'वादे देशनीयतया हेत्वाभासानां पृथगुपन्यासः' इत्युक्तम्। अत्र वार्त्तिकम्—'यदि वादे देशनीयत्वात् पृथगभिधानम्, तदा न्यूनाधिकापसिद्धान्तानां वादे देशनीयत्वात् पृथगभिधानं स्यात्, यदि पृथगभिधानाद्वादे देशनीयत्वम्, तदा संशयादीनामपि वादे देशनीयत्वं स्यात्, तस्मादान्वीक्षिकीत्रयीवार्त्तादण्डनीतिरूपविद्याप्रस्थानप्रभेद-

न्यायभाष्यम्

वाक्यसमूहः। पृथगुद्दिष्ट उपलक्षणार्थम् (१)। उपलक्षितेन व्यवहारस्तत्त्वज्ञानाय भवतीति। तद्विशेषौ जल्पवितण्डे तत्त्वाध्यवसायसंरक्षणार्थमित्युक्तम (अ० ४ आ० २ सू० ५०)।

न्यायवार्त्तिकम्

निर्णयः। एतच्च (२) वक्ष्यामः (३)। सोऽयं किंरूपो वादः? वाक्यसमूह इत्याह। ननु च प्रमाणतर्कसाधनोपालम्भ इति श्रूयते, प्रमाणानि च ज्ञानात्मकानि "इन्द्रियार्थसन्निकर्षोत्पन्नं ज्ञान" मित्येवमादिना प्रक्रमेण प्रमाणानि ज्ञानात्मकानीत्युक्तम्, तर्कश्चोहः, स चोहो ज्ञानात्मक एव, तस्माद्वाक्यसमूहो वाद इत्ययुक्तम्? न, प्रमाणतर्कसाधनोपालम्भस्यान्यथा व्याख्यानात्। तच्च सूत्रं वर्णयिष्यन्तो वक्ष्यामः (४)।

तद्विशेषौ जल्पवितण्डे इति। कः पुनर्विशेषः? अङ्गाधिक्यमङ्गहानिश्चेति। छलजाति-

न्यायवार्त्तिकतात्पर्य्यटीका

तुल्यत्वेऽपि वादस्य वितण्डायाः प्रत्यधिकरणसाधनत्वेन भेदः सिद्धो भवति। वितण्डायाः प्रतिपक्षस्थापनाहीनत्वेन प्रत्यधिकरणसाधनत्वाभावात्। तथापि जल्पाद्भेदो वादस्य, अस्ति हि जल्पस्य प्रत्यधिकरणसाधनवत्त्वं च नानाप्रवक्तृकत्वं चेत्यत आह—अन्यतरस्मिन्नधिकरणे निर्णय इति। वादे हि तावद् ब्रूते यावदन्यतरस्मिन् पक्षे निर्णयो न जातः। तत्त्वबुभुत्सोर्वादिनो-र्वादेऽधिकारात्। जल्पे तु पुरुषशक्तिपरीक्षालक्षणेऽप्रतिभादिनाऽपि पराजयोपपत्तेर्नावश्यं तत्त्व-निर्णयः। तस्मादन्यतरनिर्णयावसानत्वेन जल्पाद्भेदो वादस्येति सिद्धम्। यथा चैतत्तथा चोपरिष्टात्प्रतिपादयिष्यत इत्याह—तच्चेति। तस्य स्वरूपं पृच्छति—सोऽयमिति। उत्तरं—वाक्येति। चोदयति—ननु चेति। वाक्यसमूहश्च ज्ञानं चेति प्रतिषिद्धमेतदित्यर्थः। परिहरति—नेति। साधनोपालम्भग्रहणस्य शब्दविषयत्वादविरोध इत्यर्थः। युगपदेव जल्प-वितण्डे व्याचष्टे—तद्विशेषाविति। विशेष्येते भिद्येते इति विशेषौ, तस्माद्वादाद्विशेषौ

वृत्तिः

ज्ञापनार्थं संशयादेर्हेत्वाभासस्य पृथग्वचनम् इति, तदप्यसत्, निग्रहस्थानान्तर्गतत्वेनैव तन्निरूपणेन प्रस्थानभेदसम्भवात्।

वयं तु—हेत्वाभासानां न निग्रहस्थानत्वम्, तथा सति सर्वत्र हेत्वाभाससत्त्वात् सर्वस्यैव निगृहीतत्वापत्तेः, तस्माद्धेत्वाभासप्रयोगो निग्रहस्थानम्, तद्विभाजकसूत्रस्थहेत्वाभासपदं च

(१) परिज्ञानार्थम्। (२) "तच्च" इति तात्पर्य्यधृतपाठः। (३) १।२।१ सूत्रव्याख्यानावसरे। (४) १।२।१ सूत्रवार्त्तिकं द्रष्टव्यम्।

न्यायभाष्यम्

निग्रहस्थानेभ्यः पृथगुद्दिष्टा हेत्वाभासा वादे चोदनीया भविष्यन्तीति।

न्यायवार्त्तिकम्

निग्रहस्थानप्रयोगादधिको जल्पः। स प्रतिपक्षस्थापनाहीनस्तु वितण्डा। एतावता विशेषेण कथामार्गभेद इति। विषयभेदाच्च (१) भेदः, शिष्यादिविषयो वादः, शिष्यमाणविषये जल्पवितण्डे इति।

अन्यतमलिङ्गधर्म्मानुविधानेन प्रवर्त्तमाना अहेतवः सन्तो हेतुवदाभासन्त इति हेत्वाभासाः। ते च निग्रहस्थानम्। निग्रहस्थानप्राप्तानां पुनरेषां पृथगुपदेशो वादे देशनीयत्वादिति (२) भाष्यम्। यस्मात् किलैते वादे देश्यन्ते अतः पृथगुपदिश्यन्ते। न, उभयथाप्यसम्बन्धात्। न वादे

न्यायवार्त्तिकतात्पर्य्यटीका

भिन्नौ। भाष्यमनुभाष्य पृच्छति—कः पुनर्विशेषः? यद्योगाद्विशिष्टे वादाजल्पवितण्डे इत्यर्थः। उत्तरम्—अङ्गाधिक्यमङ्गहानिश्च यथासंख्यम्। तदेव दर्शयति—छलेति। तत्किमिदानीं संशयादिभिरिवात्यन्तवैरूप्यं वादेन जल्पवितण्डयोः? नेत्याह—एतावता विशेषेण कथामार्गभेद इति। एतावानेव विशेषो, न सर्वथा, कथात्वेन संशयादिव्यावृत्तेन सामान्यविशेषेण त्रयाणामप्यभेदादित्यर्थः। अपरमपि भेदहेतुमाह—विषयभेदाच्चेति। तद्विभजते—शिष्यादीति। शिष्यमाणोऽत्यन्तविपर्य्यस्तः दुर्ज्ञानावलेपदुर्विदग्ध इति यावत्। न त्वेवंभूतः शिष्यादिर्विपर्यस्तोऽप्यनवलिप्तत्वादिति भावः।

क्रमप्राप्तानां हेत्वाभासानां स्वरूपमाह—अन्यतमेति। पञ्चसु चतुर्षु वा लिङ्गरूपेष्वन्यतमलिङ्गं धर्म्ममेकं द्वयं त्रयं वा अनुविदधाना अहेतवो हेतुवदवभासन्त इति हेत्वाभासा उक्ताः। निग्रहस्थानेभ्य इति भाष्यमवतारयितुमाह—ते च निग्रहस्थानमिति। अवतारयति—

वृत्तिः

तत्प्रयोगपरम्, तत्र च प्रयोगस्य न लक्षणमपेक्षणीयम्, अपि तु हेत्वाभासानामित्यत उक्तं 'हेत्वाभासाश्च यथोक्ताः (३) (अ० ५ आ० २ सू० २५) इति चरमसूत्रम्। न च हेत्वाभासस्याऽवच्छेदक (४) प्रवेशादेव (५) पृथङ्निरूपणापेक्षेति वाच्यम्। तथा सति प्रमाणतर्कसाधनोपालम्भ इति वादाद्यवच्छेदकप्रमाणादेरपि पृथङ्निरूपणापत्तेरिति (६) युक्तमुत्पश्यामः।

---

(१) "भेदाद् वा" इति तात्पर्य्यधृतपाठः। (२) भाष्ये तु "वादे चोदनीया भविष्यन्तीति" इति पाठः। (३) १।२।४ सूत्रे यथा कथितास्तथेति बोध्यम्। (४) "हेत्वाभासत्वावच्छेदके"ति आ। (५) अत्र ल-पुस्तके "प्रवेशादेव" इतस्मात् परं "न" इत्यधिकपाठो वर्त्तते। (६) "पृथङ्निरूपणानापत्ते"रिति ल।

न्यायवार्त्तिकम्

देशनीयत्वं पृथगुपदेशाविनाभावि, पृथगुपदेशो वा वादे देशनीयत्वाविनाभावीति। यदि तावद् यः पृथगुपदिश्यते स वादे देश्यत इति, सर्वे पदार्था वादे देशनीयाः प्रसज्यन्त इति। किं कारणम्? सर्वे पृथगुपदिष्टा इति। अथ वादे देश्यन्ते ते पृथगुपदिश्यन्त इति, तदपि न, अनेकान्तात्। न तावन्निग्रहस्थानेभ्यो न्यूनाधिकयोः पृथगुपदेशोऽथ च देश्येते वादे, तस्माद्वादे देशनीयत्वादेषां पृथगुपदेश इति यत्किञ्चिदेतत्। एतदेव तु न्याय्यं पृथगुपदेशप्रयोजनं विद्याप्रस्थानभेदज्ञापनार्थत्वादिति। अथ कस्मान्निग्रहस्थानभावापन्नानां हेत्वाभासानां पृथगुपदेश इति? प्रमाणसामान्यात् पृथगुपदेश इति। अथ कस्माद्वादे देश्यन्ते? प्रमाणसामान्यात्। प्रमाणानि वादे

न्यायवार्त्तिकतात्पर्य्यटीका

निग्रहस्थानेति। अवतार्य्य दूषयितुमेकदेशिमतेन व्याचष्टे—**यस्मात् किलैते इति।** किलशब्दोऽयमरुचौ। तदेकदेशिव्याख्यानं दूषयति—**न, उभयथाप्यसम्बन्धात्।** किं ये ये निग्रहस्थानेभ्यः पृथगुद्दिश्यन्ते ते सर्वे वादे चोद्यन्ते? अथ ये ये वादे चोद्यन्ते ते सर्वे पृथगुद्दिश्यन्ते? उभयथाऽप्यनैकान्तिकत्वात्, नाविनाभावलक्षणः सम्बन्ध इत्यर्थः। तदेतद्विभजते—**न वादे चोदनीयत्व** (१) **मिति।** कुत उभयथाप्यविनाभावाभाव इत्यत आह—**यदि तावदिति।** तस्मान्नाविनाभूतो हेतुर्वादे चोदनीयत्वं वा पृथगुपदेशो वा भाष्यकारेणोक्त इत्युपसंहरति—**तस्मादिति।** वादे देशनीयत्वादित्युपलक्षणम्, पृथगुपदेशादित्यपि द्रष्टव्यम्। तदेतदेकदेशिमतं दूषयित्वा स्वमतेन भाष्यं व्याचष्टे—**एतदेव तु न्याय्यमिति।** निग्रहस्थानेभ्यो हेत्वाभासानां पृथगुपदेशे प्रयोजनं यद्भाष्याक्षरेभ्यः साक्षात्प्रतीयते सामान्योपदेशेन विशेष उपदिष्टे विशेषोपदेशः प्रयोजनाधिक्यं सूचयति। एतावानेव सूत्रकृतो व्यापारो यत्सूत्रणं नाम। तत्र निग्रहस्थानविशेषाणां हेत्वाभासानां स्वरूपं वादस्य च तत्त्वनिर्णयावसानत्वमालोच्य वादे देशनीया भविष्यन्ति निग्रहस्थानत्वेन हेत्वाभासा नाप्रतिभादय इति प्रयोजनं वर्णयाञ्चकार भाष्यकारः। स्यादेतत्। वादे भवन्तु देशनीया हेत्वाभासाः, मा भूवन्नप्रतिभादयः किमेवमपीत्यत आह—**विद्याप्रस्थानभेदज्ञापनार्थत्वात्।** वादजल्पवितण्डा विद्याः परम्परया निःश्रेयसोपयोगात्। तासां प्रस्थानं व्यापारः, तस्य भेदः, तज्ज्ञापनार्थत्वात्। अत एव **जल्पवितण्डयोस्त्वित्याह** (२)। **चोदयति—**

वृत्तिः

अत्र केचित्—सूत्रादौ मङ्गलाकरणेन मङ्गलं न प्रामाणिकमित्यत्र सूत्रकृतां तात्पर्य्यं वर्णयन्ति, तदसत्, कृतस्याऽप्यनिबन्धनसम्भवात्, विघ्नाभावनिर्णयेनाऽकरणसम्भवाच्च।

---

(१) "देशनीयत्वमि"ति वार्त्तिके। (२) ६२ पृ:—भाष्यस्य प्रथमपंक्तौ—"जल्पवितण्डयोस्तु निग्रहस्थानानि" इति।

न्यायवार्त्तिकम्

ऽभिधीयन्ते, प्रमाणसामान्यं च हेत्वाभासेऽस्तीति। अतः प्रमाणसामान्याद्वादेऽभिधीयन्त इति। अथ वादे निग्रहस्थानानि कानिचित् सन्ति कानिचिन्नेति किमयं पदार्थानां नियोगः, अथ तथाभूतानामन्वाख्यानमिति ? किं चातः, यदि तावन्नियोग एवं भवतैवं मा भवतेति, एवं पदार्थाननुयुञ्जानो भवानुपेक्षणीयः। अथ स्वरूपत एवावस्थिताः पदार्थास्ताननुजानाति भवान्, कस्मान्निग्रहस्थानानि कानिचिद्वादे भवन्ति कानिचिन्नेति वक्तव्यम्, न, लक्षणपरतन्त्रत्वादर्थतथाभावस्येति ब्रूमः। न पदार्था वक्तृनियोगमनुविधीयन्ते। यथा तु भवन्ति तथाभूता एवार्था अन्वाख्यायन्ते। सोऽयं लक्षणपरतन्त्रत्वमाचक्षाणो नाभ्याख्येयः पदार्था भवता नियुज्यन्त इति, वादस्य शिष्यादिविषयत्वात्। न च शिष्यादिभिः सह वादं कुर्वाणेनापि अप्रतिभादिदेशना कार्य्या, तावदस्याभिधेयं यावदसौ बोधितो भवतीति। प्रमाणप्रतिरूपकत्वाद्धेत्वाभासानामविरोध

न्यायवार्त्तिकतात्पर्य्यटीका

अथ कस्मादिति। यदि वादे हेत्वाभासाः प्रयुज्येरन् ततो निग्रहस्थानत्वेन चोद्येरन्, न तु तेषामस्ति प्रयोगोऽप्रमाणत्वात् प्रमाणतर्कसाधनोपालम्भत्वाच्च वादस्य, तस्मान्निग्रहस्थानमात्रत्वं हेत्वाभासानां तथा चापृथगुपदेशः, निग्रहस्थानोपदेशेनैव लब्धत्वादित्यर्थः। परिहरति— प्रमाणसामान्यादिति। न खलु हेत्वाभासान् तद्बुद्ध्या प्रयुञ्जाते वादिप्रतिवादिनौ, अपि तु हेतुबुद्ध्या। तथा चास्ति तेषां वादे प्रयोग इति वादे निग्रहस्थानत्वेन हेत्वाभासाश्चोद्यन्तां नाप्रतिभादीनीत्यर्थवान् पृथगुपदेशः। तदेतद्विकल्प्याक्षिपति—वादे कानिचिदिति। समाधत्ते— न, लक्षणपरतन्त्रत्वादर्थतथाभावस्येति ब्रूमः। लक्ष्यत इति लक्षणं समानासमानजातीयव्यावृत्तं रूपं वादस्य च निग्रहस्थानानाञ्च। तदधीनो हि तेषां तथाभावो व्यवस्था कानिचिदेव निग्रहस्थानानि वादे न तु सर्व्वाणीति सामान्यतोऽभिधाय तदेव लक्षणपरतन्त्रत्वमभिमते विशेषे योजयति—वादस्येति। उक्तमाक्षिपति—प्रमाणप्रतिरूपकत्वादिति। निश्चितौ हि वादं

वृत्तिः

वयं तु 'प्रमाणं प्राणनिलयः' (१)—इति भगवन्नामगणान्तःपातिप्रमाणशब्दस्योच्चारणमेव मङ्गलमिति ब्रूमः।

अत्र चोद्देशलक्षणपरीक्षाणां पूर्वपूर्वसापेक्षतया प्रथममुद्देशोऽनन्तरं लक्षणं प्रसङ्गाच्छलपरीक्षेति सोद्देशपदार्थलक्षणच्छलपरीक्षा प्रथमाध्यायार्थः। तत्र च सपरिकरन्यायलक्षणं प्रथमाह्निकार्थः। तत्र च सप्रयोजनाभिधेयप्रतिपादकं प्रथमद्वितीयसूत्राभ्यामेकं प्रकरणम्,

(१) "प्रमाणं प्राणनिलयः प्राणभृत् प्राणजीवनः, तत्त्वं तत्त्वविदेकात्मा जन्ममृत्युजरातिगः"। इति महाभा० अनुशाप० विष्णुसहस्रनामस्तोत्रे ११६ श्लोकः।

न्यायभाष्यम्

जल्पवितण्डयोस्तु निग्रहस्थानानीति (१) ।

न्यायवार्त्तिकम्

इति । किं कारणम् ? भ्रान्तेः पुरुषधर्मत्वात्, पुरुषधर्म एव भ्रान्तिरिति । सोऽयं भ्रान्त्या प्रमाणं ब्रुवन् प्रमाणाभासमपि ब्रूते अतोऽस्य निग्रह इति । कः पुनः शिष्याचार्य्ययोर्निग्रहः ? विवक्षितार्थाप्रतिपादकत्वम् । न्यूनाधिकापसिद्धान्तानां वादे कथमवतारः ? प्रमाणसामान्यादेव । न्यूनस्यापि प्रमाणसामान्यमधिकस्यापि । अवयवविहीनताऽवयवाधिक्यं वाक्यस्य भ्रान्त्या भवतीत्यस्यावतारः । जल्पवितण्डयोस्तु निग्रहस्थानानीति, विजिगीषुभिर्जल्पवितण्डाभ्यां प्रत्यवस्थेयम् । तस्य यथासम्भवं निग्रहस्थानानि वक्तव्यानीति नोपेक्षणीयः ।

न्यायवार्त्तिकतात्पर्य्यटीका

कुरुतः, निश्चयश्च प्रमाणफलमिति कुतोऽप्रमाणस्यावकाशः । उत्तरं—**भ्रान्तेरिति** । न निश्चयः सर्व्वः प्रमाणमूलोऽप्रमाणमूलस्यापि तस्य दर्शनात्, अन्यथा विपर्य्ययादप्रवृत्तिप्रसङ्गात् । वादिनोश्चाभ्रान्तत्वे वस्तुनो विरुद्धधर्म्मद्वयसमालिङ्गितत्वमेकदा स्यादिति भावः । पृच्छति—**कः पुनः शिष्येति** ? उपास्योपासकयोः परस्परोपालम्भनं न सम्भवतीत्यर्थः । उत्तरं—**विवक्षितार्थाप्रतिपादकत्वमेव** खलीकार इति । हेत्वाभासानां च पृथक्करणं न वादे तावन्मात्रावधारणार्थमपि तु यस्मिन्ननुद्भाविते‌ऽपि निग्रहस्थाने तत्त्वप्रतिपत्तिव्याघातो भवति तस्य सर्व्वस्य संग्रहार्थम् । एवं न्यूनाधिकापसिद्धान्ता अपि संगृहीता भवन्ति, तत्र पृच्छति—**न्यूनाधिकेति** । उत्तरं—**प्रमाणेति** । जल्पवितण्डयोस्त्विति भाष्यमनुभाष्योपपादयति—**जल्पवितण्डयोस्त्विति** ।

वृत्तिः

ततः प्रमाणलक्षणप्रकरणम्, ततः प्रमेयलक्षणप्रकरणम्, ततो न्यायपूर्वाङ्गप्रकरणम्, ततो न्यायाश्रयसिद्धान्तप्रकरणम्, ततो न्यायस्वरूपप्रकरणम्, ततो न्यायोत्तराङ्गप्रकरणमिति प्रथमाह्निके सप्त प्रकरणानि ।

श्रवणादनु पश्चादीक्षा अन्वीक्षा मननम्(२), तन्निर्वाहिका सेयमान्वीक्षिकी न्यायतर्कादिशब्दैरपि व्यवह्रियते । तथा च—

'न्यायो मीमांसा धर्मशास्त्राणि' इति श्रुतिः ।

'पुराणन्यायमीमांसा' इत्यादिः स्मृतिः ।

'मीमांसान्यायतर्काश्च(३) उपाङ्गः परिकीर्त्तितः' इति पुराणम् ।

---

(१) जल्पे वितण्डायाञ्च यथासम्भवं सर्व्वाण्येव निग्रहस्थानानि प्रयोज्यानीत्यर्थः । (२) "उन्नयनम्" इति आ-नि-व० । (३) "तर्कश्च" इति आ-नि-व० ।

न्यायभाष्यम्

छलजातिनिग्रहस्थानानां पृथगुपदेश उपलक्षणार्थमिति (१)। उपलक्षितानां स्ववाक्ये परिवर्जनम्, छलजातिनिग्रहस्थानानां परवाक्ये पर्य्यनुयोगः (२)। जातेश्च परेण प्रयुज्यमानायाः सुलभः समाधिः, स्वयं च सुकरः प्रयोग इति।

न्यायवार्त्तिकम्

छलजातिनिग्रहस्थानानां स्ववाक्ये परिवर्ज्जनम्, परवाक्ये पर्य्यनुयोगः, परिज्ञानार्थमेव केवलम्, छलजातिनिग्रहस्थानानि, स्वयं न प्रयोक्तव्यानि। जातेश्च स्वयं सुकरः प्रयोग इति न, व्याघातात्, स्ववाक्ये परिवर्ज्जनं सुकरश्च प्रयोग इति व्याहतम्, यदि सुकरः प्रयोगो न स्ववाक्ये परिवर्ज्जनम्, अथ स्ववाक्ये परिवर्जनं न सुकरः प्रयोग इति व्याघातः। न व्याघातः, प्रश्नापाकरणार्थत्वात्। स्वयं च सुकरः प्रयोग इति किमुक्तं भवति? परेण जातौ प्रयुक्तायां प्राश्निकान् ब्रवीति जातिरनेन प्रयुक्तेति। त एनं पर्य्यनुयुञ्जीरन्? कथं जातिः कतमा जातिः? अतो जात्यभिज्ञः शक्नोति वक्तुमेवं जातिरियं जातिरिति, एवं च सुकरः प्रयोग इति। तस्मादेते संशयादयः पदार्थाः प्रमाणे प्रमेये चान्तर्भवन्तो विद्याप्रस्थानभेदज्ञापनार्थं पृथगुपदिष्टाः।

न्यायवार्त्तिकतात्पर्य्यटीका

साहंकारो हि विजिगीषुरप्रतिभादिभिरपि निग्रहस्थानैस्तिरस्कृतो गलिताहंकारस्तत्त्वबुभुत्सुतां नीतः पश्चाद्वादेन व्युत्पाद्यत इत्यर्थः। छलजातिनिग्रहस्थानानां पृथगुपदेशप्रयोजनपरं भाष्यमनुभाषते—छलेति। उपलक्षणार्थ इति भाष्यावयवार्थं व्याचष्टे—परिज्ञानार्थमपि केवलं(३)परिज्ञानस्य च फलमुक्तम् स्ववाक्ये परिवर्ज्जनमप्रयोगः परवाक्ये चोद्भावनमिति। चोदयति—छलजातिनिग्रहस्थानानीति। अत्र हि वाक्ये परिवर्ज्जनमुक्त्वा पुनः स्वयं प्रयोजनयुक्तः(४) कस्मात्? व्याघातात्। एतद्विभजते—स्ववाक्य इति। परिहरति—न व्याघातः, कुतः? प्रश्नापाकरणार्थत्वात्। एतद्विभजते—स्वयं च सुकरः प्रयोग इति। अनेन भाष्येण किमुक्तं भवति? परेण प्रतिवादिना जातौ प्रयुक्तायां यदि प्राश्निकान् सभ्यान् ब्रवीति जातिरनेन प्रतिवादिना प्रयुक्तेति ते प्राश्निका एनं पर्य्यनुयुञ्जीरन् हे वादिन् कथं केन प्रकारेण

वृत्तिः

'त्रैविद्येभ्यस्त्रयीं विद्यां दण्डनीतिं च शाश्वतीम्।
आन्वीक्षिकीं चाऽऽत्मविद्यां वार्तारम्भांश्च लोकतः'॥ इति मनुः।
तथा—
'यस्तर्केणाऽनुसन्धत्ते स धर्मं वेद नेतरः' इत्यादि।

---

(१) "उपलक्षणार्थः" इति फ-पुस्तकपाठः। (२) उद्भावनमित्यर्थः। (३) "परिज्ञानार्थमेव केवलम्" इति पाठः सुष्ठुतया मन्यते वार्त्तिकसंवादात्। (४) "प्रयोगकथनमयुक्तम्" इत्येवं पाठो भवितुमुचित इति मन्ये।

न्यायभाष्यम्

सेयमान्वीक्षिकी प्रमाणादिभिः पदार्थैर्विभज्यमाना(१)—

प्रदीपः सर्वविद्यानामुपायः सर्वकर्मणाम् ।
आश्रयः सर्वधर्माणां विद्योद्देशे(२) प्रकीर्त्तिता(३) ॥

न्यायवार्त्तिकम्

सेयमान्वीक्षिकी न्यायविद्या प्रमाणादिभिः पदार्थैर्विभज्यमाना प्रदीपः सर्व्वविद्यानां भवति, प्रकाशकत्वात् प्रदीपवत् । प्रमाणादिप्रतिपादितमर्थमितरा विद्याः प्रतिपद्यन्त इति । किमितरासु विद्यासु प्रमाणादीनि न सन्ति ? न सन्तीत्याह । कथं न सन्ति ? अनधिकारात् । न ता विद्याः प्रमाणादिपरिज्ञानेनाधिक्रियन्ते इति प्रमाणादिप्रकाशिते त्वर्थे ताः

न्यायवार्त्तिकतात्पर्य्यटीका

जातिः चतुर्विंशत्यां जातिषु कतमा जातिः । सोऽयं प्राश्निकानां प्रश्नः, तदपाकरणार्थं स्वयं सुकरः प्रयोग इत्यर्थः । प्रकृतमुपसंहरति—तस्मादेत इति ।

सूत्रकारेण शास्त्रस्यात्यन्तिकदुःखोपरमरूपनिःश्रेयसाधिगमः प्रयोजनमुक्तम् । भाष्यकारस्तु नास्त्येव तत् प्रेक्षावतां प्रयोजनं यत्रान्वीक्षिकी न निमित्तं भवतीत्याह—सेयमान्वीक्षिकीति । तदेतद्भाष्यं व्याचष्टे—सेयमान्वीक्षिकी न्यायविद्या । यद्यपीतरा विद्याः प्रामाणिकमेवार्थमभिनिविशन्ते तथाप्येतद्विद्याप्रतिपाद्यमेव प्रमाणाद्युपजीव्य स्वे स्वे व्युत्पाद्येऽर्थतत्त्वे प्रवर्त्तन्ते न तु प्रमाणाद्यपि व्युत्पादयन्ति । यथा प्रत्यक्षाद्युपजीव्य प्रवर्त्तमानमनुमानं न प्रत्यक्षादिविषयमपि(४) तदानीमेव गोचरयति । तदनेन विद्योपकरणग्रहणेन व्यापार आन्वीक्षिक्या दर्शितः । संप्रति विद्यानां यानि कर्म्माणि प्रतिपाद्यानि सामाग्निहोत्रकृष्यादीनि तत्राप्यान्वीक्षिक्युपाय इत्याह—उपायः सर्व्वकर्म्मणां विद्याव्युत्पाद्यानाम्, न तु हालिकमृगयादिकर्म्मणामपि, न हि विद्यापदेभ्यो यावन्मात्रावगतिः तावन्मात्रेण प्रेक्षावतां परितोषः । मा भूत् "आदित्यो वै यूप" इत्यादिभ्यः आदित्यादीनां यूपादिता, तस्मात् संशयपरीक्षाप्रमाणविनिवेशद्वारेण तदर्थतत्त्वमवधार्य्य तत्र त्रयी

वृत्तिः

मोक्षधर्मे—

"तत्रोपनिषदं तावत् (५) परिशेषञ्च (६) पार्थिव ।
मथ्नामि मनसा तात दृष्ट्वा चाऽऽन्वीक्षिकीं पराम्" ॥ इति ।

उपनिषदर्थश्चाऽऽन्वीक्षिक्यनुसारी ग्राह्य इत्युक्तमिति ॥ १ ॥

(१) विद्यान्तराद् विलक्षणीक्रियमाणा । (२) विद्यापरिगणनस्थले । (३) "परीक्षिता" इति न्यायमञ्जरी, १ आ० ११ पृ० । (४) प्रत्यक्षादिरूपं विषयं प्रत्यक्षादिविषयम् इत्यर्थः । (५) "तात" इति आ० । (६) "परिशेषन्तु" इति आ० ।

न्यायभाष्यम्

तदिदं तत्त्वज्ञानं निःश्रेयसाधिगमार्थं यथाविद्यं वेदितव्यम्। इह त्वध्यात्मविद्यायामात्मादि(१)ज्ञानं तत्त्वज्ञानम्। निःश्रेयसाधिगमोऽपवर्गप्राप्तिः॥ १॥

न्यायवार्त्तिकम्

प्रवर्त्तन्त इति। उपायः सर्वकर्मणामिति। प्रकाशितानां करणादुपायः, यस्मात् प्रमाणादिप्रकाशितमर्थमितरा विद्याः कुर्वन्ति। आश्रयः सर्वधर्माणामिति। सर्वविद्योपकारकत्वादाश्रयः। सर्वासां विद्यानामियमुपकरोति, उपकारित्वादाश्रयो राजभृत्यवदिति।

तदिदं तत्त्वज्ञानं निःश्रेयसाधिगमश्च यथाविद्यं वेदितव्यमिति। सर्वासु विद्यासु तत्त्वज्ञानमस्ति निःश्रेयसाधिगमश्चेति। त्रय्यां तावत् किं तत्त्वज्ञानं कश्च निःश्रेयसाधिगम इति?

न्यायवार्त्तिकतात्पर्य्यटीका

विनिवेशनीया। एवं दण्डनीतिवार्त्तयोरप्यवगन्तव्यम्। यस्मादान्वीक्षिकीपरिशोधितप्रमाणप्रकाशितं सामादि इतरा विद्याः कुर्व्वन्ति विषयमिति शेषः। अपि च द्रव्यगुणकर्म्मणामभिमतानभिमतोपायतापरिज्ञापनेन यथास्वं सर्व्वा विद्याः प्रेक्षावतः प्रवर्त्तयन्ति निवर्त्तयन्ति च। तत्र किमविशेषेण साध्यसाधनेतिकर्त्तव्यतासु प्रवर्त्तयन्ति आहोस्वित् साधनेतिकर्त्तव्यतामात्रे। तत्र यदि साध्यांशोऽपि प्रवर्त्तनागोचरः तदा श्येनादिसाध्यायाः हिंसाया विहितत्वेन नानर्थत्वम्। अथ साध्यं रागतः प्राप्तमनूद्य साधनेतिकर्त्तव्यते एव विधीयेते ततः श्येनादिसाध्याया हिंसाया अविहितत्वेन न हिंस्यात् सर्वा भूतानीति प्रतिषेधादनर्थत्वम्। तदिह साध्यांशेऽप्रवर्त्तनमान्वीक्षिकीगम्यम्। एवमनुष्ठानगताः प्रयोजकत्वाप्रयोजकत्वादयः आन्वीक्षिकीगम्या एव वार्त्तादिष्वपि तदेवमान्वीक्षिकीमाश्रयन्ते सर्वविद्या इत्याह—**आश्रयः सर्वधर्म्माणाम्**, सर्वासां विद्यानां पुरुषप्रवर्त्तना धर्म्मास्तेषामाश्रयः। वार्त्तिककारस्तु धर्म्मद्वारेण विद्यानामेवाश्रय इति व्याचष्टे—**सर्वविद्योपकारकत्वादाश्रयः, सर्वासां विद्यानामियमुपकरोति।** विद्यया प्रवर्त्तनायां कर्त्तव्यायामियं सहकारितया उपकरोतीत्यर्थः। स्यादेतद्, व्युत्पाद्याश्चेत् प्रमाणादयः सर्वविद्योपयोगिनः, न तर्ह्यात्यन्तिकी दुःखनिवृत्तिरान्वीक्षिक्याः फलं निःश्रेयसपदादवगम्येत, व्युत्पाद्यस्वभावालोचनया हि तद्गम्येत, स च विद्यान्तरसाधारण इति विद्यान्तराधिगम्येन निःश्रेयसेन संकरप्रसङ्ग इत्यत आह—**तदिदं तत्त्वज्ञानं निःश्रेयसाधिगमश्च यथाविद्यं वेदितव्यम्।** विद्यान्तराणि तावद्यत्तत्त्वज्ञानं कुर्वन्ति इति तत्स्वभावालोचनया हि तत्तद्विद्यासाध्ये एव निःश्रेयसभेदे उपयुज्यन्ते, नान्यत्र, इह तु प्रमाणादि यद्यपि साधारणं तथाप्यात्माद्यसाधारणात्मादिरूप(२)प्रमेयसमभिव्याहृतं सदभिमत एव निःश्रेयसे अवतिष्ठत इति। विशुद्धेनार्ज्ज-

(१) "आत्मादितत्त्वज्ञानं निःश्रेयसाधिगमः" इति ज-ग-भा०। "आत्मादितत्त्वज्ञानं तत्त्वज्ञानम्" इति ल-भा०। (२) "तथाप्यात्मादिरूप" इतीत्थं पाठः समुचितः।

न्यायवार्त्तिकम्

तत्त्वज्ञानं तावदग्निहोत्रादिसाधनानां स्वागतादिपरिज्ञानमनुपहतादिपरिज्ञानं च। निःश्रेयसाधिगमोऽपि स्वर्गप्राप्तिः, तथा ह्यत्र स्वर्गः फलं श्रूयत इति। अथ वार्तायां किं तत्त्वज्ञानं कश्च निःश्रेयसाधिगम इति? भूम्यादिपरिज्ञानं तत्त्वज्ञानम्, भूमिः कण्टकाद्यनुपहतेत्येतत्तत्त्वज्ञानम्। कृष्याद्यधिगमश्च निःश्रेयसमिति, तत्फलत्वात्। दण्डनीत्यां किं तत्त्वज्ञानं कश्च निःश्रेयसाधिगम इति? सामदानदण्डभेदानां यथाकालं यथादेशं यथाशक्ति विनियोगस्तत्त्वज्ञानम्, निःश्रेयसं पृथिवीजय इति। इह त्वध्यात्मविद्यायामात्मज्ञानं (१) तत्त्वज्ञानम्, निःश्रेयसाधिगमोऽपवर्गप्राप्तिरिति। यत् पुनः प्रमाणादितत्त्वज्ञानान्निःश्रेयसं न तद्विवक्षितम्। मदमानादिनिमित्तत्वाद्वादादिपरिज्ञानस्य नाभिसम्बन्धो निःश्रेयसेनेति केचित्। न चानभिसम्बद्धं प्रतिपादयतीत्ययुक्तमुक्तं प्रमाणादितत्त्वज्ञानान्निःश्रेयसमिति, न, सूत्रार्थापरिज्ञानात्। सूत्रार्थं न व्यज्ञासीर्य देवं प्रत्यपत्थाः। क एवं सूत्रार्थं वर्णयति प्रमाणादिपदार्थतत्त्वज्ञानान्निःश्रेयसमिति। अपि तु यत्परिज्ञानान्निःश्रेयसं तदुत्तरसूत्रे (२) वक्ष्यामः। उक्तं (३) चात्मादेः प्रमेयस्य तत्त्वज्ञानान्निःश्रेयसाधिगम इति। यच्चेदमुच्यते मदमानादिनिमित्तं वादादय इति, एतच्च न, असति भावात् सति चाभावात्। असति वादादिज्ञाने रागादयः सनकादीनां (४) भवन्ति, सति च तत्त्वविदां न भवन्ति, तस्मान्न वादादिपरिज्ञानं रागादीनां निमित्तमिति ॥१॥

न्यायवार्त्तिकतात्पर्य्यटीका

नेन होमसाधनस्य द्रव्यस्य प्राप्तिः स्वागतम्। आदिग्रहणेन क्रमप्राप्ताङ्गग्रामसाकल्यं गृह्यते, श्वमार्जारादिभिरनुपघातोऽनुपहतत्वम्। आदिग्रहणाद्विशुद्धोऽभिसन्धिरिति। शेषमतिरोहितम्। वादादीनां (५) निग्रहस्थानान्तानामुद्देशः पराभिभवोपायत्वान्मदमानादिहेतुत्वेन निःश्रेयसपरिपन्थीति मन्वानश्चोदयति—मदमानादीति। परिहरति—न सूत्रार्थापरिज्ञानात्। नायं सूत्रार्थः, सर्वेषां तत्त्वज्ञानं साक्षान्निःश्रेयसोपयोगि, किं त्वात्मादितत्त्वज्ञानम्। तदितरेषां पारंपर्य्येण। तत्र जल्पादीनां पराहंकारप्रशमनमवान्तरव्यापार इति न निःश्रेयसपरिपन्थिता किं त्वानुकूल्यमित्यर्थः। मदमानादिहेतुत्वं च हेतुरसिद्ध इत्याह—यच्चेदमिति। उपसंहरति—तस्मान्न निमित्तं वादादिपरिज्ञानं रागादीनामिति। इति सूत्रसमाप्तौ ॥१॥

---

(१) "आत्मादिज्ञानम्" इति तु भाष्ये। (२) १।१।२ सूत्रे, १।१।९ सूत्रे च। (३) १।१।१ सूत्रभाष्ये उक्तम्। (४) सनको मदादिप्रधानो दासविशेषः। (५) "वादादीनामिति अतद्गुणसंविज्ञानो बहुव्रीहिः, वादस्य पराभिभवार्थमप्रवृत्तेः" इति मुद्रितपरिशुद्धे:—३६२ पृ०।

न्यायभाष्यम्

तत् खलु (१) निःश्रेयसं किं तत्त्वज्ञानानन्तरमेव भवति? नेत्युच्यते। किं तर्हि? तत्त्वज्ञानात्—(२)

न्यायवार्त्तिकम्

न तत्त्वपरिज्ञानादपवर्ग उभयथा दोषात्। यदि तत्त्वज्ञानानन्तरमेवापवर्गः स्यात्तद्वतामव स्थानं न स्यात्। तद्वतां चावस्थानं दृष्टम्, कुतः? शास्त्रसम्प्रदायाऽविच्छेदात्, सम्प्रदायो नाम शिष्योपाध्यायसम्बन्धस्याविच्छेदेन शास्त्रप्राप्तिः। यदि तत्त्वज्ञानादपवर्गः स्यात् शास्त्रसम्प्रदायो विच्छिद्येत, यस्य यदा तत्त्वज्ञानं वृत्तं स तदैवापवृक्त (३) इति। अथोत्पन्नतत्त्वज्ञानोऽवतिष्ठते, न तत्त्वज्ञानं कारणम्, सत्यभावात्। सत्यपि तत्त्वज्ञाने यस्याभावान्नापवृज्यते सोऽन्योऽर्थ इति। कारणं हि तद्भवति, यस्मिन् सति यद्भवति यस्मिंश्चासति यन्न भवति। अनधिगतार्थपूर्वं वा शास्त्रं स्यात्। अथ तत्त्वज्ञानानन्तरमपवर्गं वातपुत्रीयं (४) शास्त्रं स्यात्, न तत्त्वदृक्पूर्वकमिति। न, निःश्रेयसस्य परापरभेदात् (५)।

न्यायवार्त्तिकतात्पर्य्यटीका

तदेवं प्रथमसूत्रेण शास्त्रस्याभिधेयप्रयोजनसम्बन्धान् दर्शयता पदार्थाः प्रमाणादय उद्दिष्टाः, तेषां च लक्षणमुक्त्वा तत्परीक्षा वर्त्तयिष्यते अपरीक्ष्य तत्त्वनिर्णयायोगात्। न चानिर्णीतप्रयोजनसम्बन्धानां लक्षणपरीक्षयोरवकाशः। न च प्रयोजनसम्बन्धनिर्णयः परीक्षां विनेति तत्परीक्षार्थं द्वितीयं सूत्रम्। तत्र प्रयोजनाभिधानस्य द्वैविध्यात् संशयः। द्विविधं हि प्रयोजनाभिधानं ग्रन्थकृतां दृष्टं समीचीनमसमीचीनम्, यथा वार्तिकादिप्रयोजनाभिधानम् आयुर्वेदादिप्रयोजनाभिधानं च। तस्मादभिधानसामान्यादयथादर्शनाच्च संशयः। तत्र उत्सूत्रेण प्रयोजनाभिसम्बन्धप्रतिपादनपरं पूर्वपक्षभाष्यं तत् खलु (६) निःश्रेयसमित्यादि, तद्विभजते—न तत्त्वपरिज्ञानात्। कुतः? उभयथा दोषात्। तदत्यन्तविमोक्षलक्षणोऽपवर्गो निःश्रेयसम्, तच्चेत्तत्त्वज्ञानानन्तरम्, संप्रदायोच्छेदो वातपुत्रीयं वा शास्त्रं स्यात्। तस्मान्न तत्त्वज्ञानानन्तरं निःश्रेयसम्। तथा सति प्रमाणादितत्त्वज्ञानान्निःश्रेयसाधिगम इति मिथ्या। न चान्यन्निःश्रेयसमित्यभिसन्धिः पूर्वपक्षवादिन इति। अत्रेदं सिद्धान्तसूत्रमुपतिष्ठते—दुःखजन्मेति। तस्य तात्पर्य्यमभिधायावतारयति—न प्रयोजनानभिसम्बन्धः। कुतः? निःश्रेयसस्य परापरभावात्। चतस्रो हि प्रतिपत्तयः प्रमेये आत्मादौ। प्रथमा तावदागमाद्, यामाचक्षते श्रवणमिति। द्वितीया तु श्रुतस्य परीक्षा न्यायेनैवावस्थापनं, यामाहुर्मननमिति। सा चान्वी-

---

(१) "तच्च खलु वै" इति फ-पु-पाठः। (२) तत्त्वज्ञानादितिहेतुः ६९ पृष्ठस्थसूत्रघटकेन "अपाये" इत्यनेन सम्बद्धः। (३) "अपवर्गंप्राप्त" इत्यर्थः। (४) महाधूर्त्तरचितम्। (५) "परापरभावात्" इति ता-पाठः। (६) "तच्च खलु वै" इति क-पु-पाठः।

न्यायवार्त्तिकम्

यत्तावदपरं निःश्रेयसं तत् तत्त्वज्ञानानन्तरमेव भवति। तथा चोक्तम्—जीवन्नेव

न्यायवार्त्तिकतात्पर्य्यटीका

क्षिक्यामायतते (१)। आन्वीक्षिकी च संशयादितत्त्वज्ञापनं प्रमाणतत्त्वज्ञापनायोपादत्ते, प्रमाणतत्त्वज्ञापनं च हेयोपादेयभेदव्यवस्थितप्रमेयतत्त्वपरिज्ञापनाय। तत्राप्याद्यन्तवर्जितदशवर्गज्ञापनेनाद्यन्तयोरेवात्मापवर्गयोरुपादेययोस्तत्त्वज्ञानस्योपकरोति, न चायमान्वीक्षिकीविद्यावधृतप्रमेयतत्त्वोऽपि परितुष्यति पूर्ववदेवात्मादिगतविपर्य्ययवासनानुवृत्तेः। नो खलु दिङ्मूढः सहस्रेणाप्यनुमानैर्विपर्य्ययसंस्कारमपनयति। तत्त्वसाक्षात्कारस्तु विपर्य्ययसाक्षात्कारं निवर्त्तयति, तज्जनिता च वासना विपर्य्ययवासनामिति लोकसिद्धम्। तस्मादात्मादिसाक्षात्कारवतीं चतुर्थीं प्रमामशेषतद्गोचरवासनाविपर्य्यासशमनीमर्थयमानेनादरनैरन्तर्य्याभ्यां ध्यानार्चितादिशब्दवाच्या तज्जा या प्रतीतिः साक्षात्कारफला दीर्घकालमुपासनीया। अथ परिनिष्पन्नध्यानोपायः साक्षात्कारवतीं प्रतिपद्य चतुर्थीं प्रतीतिं निर्मुक्तसकलक्लेशजालोऽप्रवर्त्तमानो धर्म्माधर्म्मसाधनेषु निरुद्धानागतधर्म्माधर्म्मप्रबन्धोत्पादो भूतेन्द्रियविजयी प्रज्ञाज्योतिर्जीवन्नेव मुक्त इत्युच्यते। न चैवमवस्थो वीतरागोऽपि सहसैव देहादिभिर्वियुज्यते। प्रागुपात्तस्य धर्म्माधर्म्मप्रचयस्य भुज्यमानस्य वाऽभुक्तस्य (२) वाऽक्षीयमाणत्वात्। न च प्रायश्चित्तेनेवात्मज्ञानेनादत्तफलान्येव कर्म्माणि क्षीयन्ते इति युक्तम्, नाभुक्तं क्षीयते कर्म्मेति स्मृतेः। अन्त्यसुखदुःखसंविज्ञानविरोधस्य कर्म्मणामवधारणात्। औत्सर्गिकस्य क्वचित् प्रायश्चित्तादौ विशेषवचनेनापवादात्। क्षीयन्ते चास्य कर्म्माणीति श्रुतेः। योगर्द्धिवशाद् युगपदुत्पादितानेकविधदेहोपभोगेनाप्युपपत्तेः। "तावदेवास्य चिरं यावन्न विमोक्ष्येऽथ संपत्स्ये" इति(३) वा भुक्तोपभुज्यमानफलकर्म्मप्रक्षयावधित्वप्रदर्शकम्। योगर्द्धिवशाद्नियतनियतविपाकफलान्यपि दीर्घकालफलान्यपि कर्म्माणि पिण्डीकृत्य भूतेन्द्रियविजयितया युगपदेव भुङ्क्ते, अचिन्त्यो हि समाधिप्रभाव इत्युक्तम्। न चाचिन्त्यप्रभावत्वाद्विनैवोपभोगं कर्म्माशयान् प्रक्षयिष्यतीति युक्तम्, दृष्टानुसारेण कथंचिदुपपत्तौ अत्यन्तादृष्टकल्पनाया अयोगात्। तस्मादुत्पन्नतत्त्वसाक्षात्कारस्य दोषाभावात् प्रवृत्त्युपरमे योऽनागतापूर्वानुत्पादस्तदपरं निःश्रेयसम्, तच्च तत्त्वसाक्षात्कारानन्तरं भवति। ईदृशश्च मुनिस्तत्त्वज्ञानवान् शास्त्रप्रणेतेति न वातपुत्रीयं शास्त्रम्। परं तु निःश्रेयसं समाधिप्रभवसंपदा युगपदुपभोगेनोपात्तकर्म्माशयस्य क्षयात् सर्वदुःखोपरम इत्युपपन्नं निःश्रेयसद्वैविध्यमिति भावः। तदेतद्दर्शयति—यत्तावदिति। तत्त्वसाक्षात्कारस्तत्त्वज्ञानम्, संहर्षः सुखम्, आयासो दुःखम्, तत्रानागताभ्यां तावद् प्रवृत्त्यभावाद् अनुत्पादादेवमुत्पत्तेर्विद्यमानकारणे अपि सुखदुःखे असक्तोऽद्विषंश्च भुञ्जानो न सुखदुःखतयाऽनुमन्यते, न ह्यस्ति सम्भवो न तत्र तृप्यति तच्च तस्य सुखम्, न द्वेष्टि तच्च तस्य दुःखमिति। स्यादेतत (?) भवत्वेतदपर-

(१) आयता भवतीतार्थः। (२) अदत्तफलकस्य इतार्थः। (३) छान्दोग्ये—६।१४।२।

(सू)—दुःखजन्मप्रवृत्तिदोषमिथ्याज्ञानानामुत्तरोत्तरापाये तदनन्तरापायादपवर्गः (१) ॥ २ ॥

न्यायवार्त्तिकम्

हि विद्वान् संहर्षायासाभ्यां विमुच्यत इति। अयं शास्त्रार्थ इति। परं च (२) निःश्रेयसं तत्त्वज्ञानात् क्रमेण भवति।

क्रमप्रतिपादनार्थं चेदं सूत्रं दुःखजन्मप्रवृत्तिदोषमिथ्याज्ञानानामित्येवमादि। एतत्सम्बन्धेनैवार्थवत्।

न्यायवार्त्तिकतात्पर्य्यटीका

निःश्रेयसं प्रकृते तु किमायातमित्यत आह—अयं शास्त्रार्थः। अर्थशब्दो निमित्ते, अपरं निःश्रेयसं शास्त्रनिमित्तमिति। अथापरनिःश्रेयसोत्पादसमय एव परनिःश्रेयसमपि कस्मान्न भवतीत्यत आह—परं तु निःश्रेयसं तत्त्वज्ञानात् क्रमेण भवति। नो खलु इत्यत्र तत्त्वसाक्षात्कारः वासनाविपर्य्यासज्ञानतत्कार्य्यदोषतत्कार्य्यप्रवृत्तीनां निवृत्त्यै प्रयतते, कारणनिवृत्त्यैवाप्रयत्नलब्धत्वात् कार्य्यनिवृत्तेः। न हि कफोद्भवज्वरप्रशमनाय कफनिवृत्तौ सत्यां प्रयत्नान्तरमातिष्ठते, तत एव तत्सिद्धेः। परं तु निःश्रेयसं न तावद्भवति यावदुपभोगादुपात्तकर्म्माशयप्रचयो न क्षीयते, तस्मात्तत्त्वसाक्षात्काराधानप्रयत्नात्परस्तदुपभोगप्रयत्नश्चास्थेयः, तथा च न तुल्यकाल उत्पादः परापरयोर्निःश्रेयसयोः। तदिदमुक्तं—क्रमेणेति। तदेवमर्थगतिं परिशोध्य सूत्रमवतारयति—क्रमेति। यद्यप्यपरस्मिन्नपि निःश्रेयसे मिथ्याज्ञानदोषप्रवृत्तीनामपि समुच्छेदक्रमोऽस्ति, तथाऽपि जन्मदुःखोच्छेदक्रमो नास्ति, पूर्व्वोपात्तकर्म्माशयप्रचयस्य तादवस्थ्यात। तस्माज्जन्मदुःखोच्छेदक्रमसमभिव्याहृतो मिथ्याज्ञानाद्युच्छेदक्रमः परस्यैव निःश्रेयसस्य शास्त्रप्रयोजनस्य, तत्प्रतिपादनमर्थः प्रयोजनं यस्य तत्तथोक्तम्। इदं चावान्तरप्रयोजनम्, प्रधानप्रयोजनमग्रे (३) वक्ष्यति।

अत्र केचिद् योगविभागमिच्छन्ति। कारणोच्छेदात् कार्य्योच्छेदोऽभिमतो, न चासौ दुःखादीनां मिथ्याज्ञानान्तानामदर्शिते कार्य्यकारणभावे सिध्यति, तस्माद् दुःखजन्मप्रवृत्तिदोषमिथ्याज्ञानानामित्येको योगः। अत्र किल समासादेषामितरेतरयोगोऽवगम्यते, स च योग्यतया कार्य्यकारणभावः। कार्य्येण कारणं युक्तं कारणेन च कार्य्यमिति। अतः सिद्धे कारणभावे उत्तरोत्तरापाये तदनन्तरा-

वृत्तिः

ननु तत्त्वज्ञानस्य न साक्षादेव निश्रेःयसहेतुत्वम्, (४)। निःश्रेयसं तावद्द्विविधम्—परापरभेदात्। तत्राऽपरं जीवन्मुक्तिलक्षणं तत्त्वज्ञानानन्तरमेव, तदप्यवधारितात्मतत्त्वस्य नैरन्तर्याभ्यासापहृतमिथ्याज्ञानस्य प्रारब्धं कर्म उपभुञ्जानस्य।

---

(१) "भावादपवर्ग" इति ग-पु-पाठः। (२) "परं तु" इति ता-पाठः। (३) दुःखजन्मेत्यादि सूत्रपाठोल्लेखानन्तरमेव वार्त्तिककार "एतत्सम्बन्धेनैवार्थवत्" इत्यग्रतया वक्ष्यति। (४) अत ल-पुस्तके "तत्त्वज्ञानिनाम प्यनवस्थितिदर्शनादतः क्रमाकाङ्क्षायामाह—दुःखजन्मप्रवृत्तिदोषमिथ्याज्ञानानामुत्तरोत्तरापाये तदनन्तरापायादपवर्गः। अत वार्त्तिकम्" इत्यधिकपाठः।

न्यायभाष्यम्

तत्रात्माद्यपवर्गपर्यन्त(१) प्रमेये मिथ्याज्ञानमनेकप्रकारकं वर्त्तते।

न्यायवार्त्तिकम्

पदार्थस्तु वक्तव्यः, तत्रात्माद्यपवर्गपर्य्यन्तं प्रमेयं ज्ञेयम्, तत्र मिथ्याज्ञानमनेकप्रकारकं वर्त्तते। को वृत्त्यर्थः? (२) विषयार्थः (३)। तत्रायं भेदः—

न्यायवार्त्तिकतात्पर्य्यटीका

पाया(४)दपवर्ग इत्यनेन योगेन कारणोच्छेदक्रमेण कार्य्योच्छेदक्रमप्रतिपादनेनापवर्गः प्रतिपाद्यते। अत्र चोत्तरत्वं पाठापेक्षया कारणस्य, तदनन्तरत्वं च कार्य्यस्याव्यवहितादिपाठापेक्षया। मिथ्याज्ञाने कारणे तत्कार्य्या दोषाः। एवं शेषेष्वपि योज्यम्। तमेतं सूत्रविभागममृष्यमाणो वार्त्तिककृदाह—इदं सूत्रम्। एकवचनेन भेदं व्यावर्त्तयति। न हि समुच्छेदक्रमप्रतिपादनेनापवर्गपरतयैकवाक्यत्वे सम्भवति वाक्यभेदो न्याय्यः। एकनिवृत्त्या अन्यनिवृत्त्यैव कार्य्यकारणभाव आक्षिप्त इति नासौ सूत्रकारेण दर्शनीयः, न ह्यर्थाक्षिप्तं सूत्रकारा दर्शयन्ति। तदिदं सूत्रग्रहणप्रयोजनम्। तथा हि—

स्वल्पाक्षरमसन्दिग्धं सारवद्विश्वतोमुखम्।
अस्तोभमनवद्यञ्च सूत्रं सूत्रविदो विदुः॥ इति।

अस्तोभमनधिकम्, अर्थलभ्यप्रदर्शने त्वधिकं भवेदिति। तत्सूचनात्तु सूत्रं स्यात्। तथा ह्याहुः—

लघूनि सूचितार्थानि स्वल्पाक्षरपदानि च।
सर्व्वतः सारभूतानि सूत्राण्याहुर्मनीषिणः॥ इति।

इतरेतरयोगेनापि कार्य्यकारणभावः सूचनीय एवं वरमेकनिवृत्त्याऽन्यनिवृत्त्यैव सूच्यताम् एकवाक्यतानुरोधायेति परमतात्पर्य्यमाह—एतत्सम्बन्धेनैव। शास्त्रस्य निःश्रेयसाधिगमलक्षणेन प्रयोजनेन यः सम्बन्धः पूर्वमाक्षिप्तस्तत्समाधानेन अर्थवद् एतत् सूत्रम्। सम्बन्धपदेन विषयवाचिना विषयिसम्बन्धिनं लक्षयति। तदेवं सूत्रतात्पर्य्यं व्याख्यायावयवव्याख्यानमवतारयति—पदार्थस्त्विति। यद्यपि सामभेदादौ हलशकटादौ च मिथ्याज्ञानमनेकप्रकारं भवति, तथाऽपि न तत्संसारहेतुरपि त्वात्मादिद्वादशविधप्रमेयविशेषविषयमिति सूत्रस्थं मिथ्याज्ञानं विशेष्टुमाह—तत्रात्मेति। तदेतेन आत्माद्यपवर्गपर्य्यन्त इत्यादि भाष्यमवतारितम्। तदेतदाक्षिपति—को वृत्तिशब्दार्थः। न खलु यथा कुण्डे बदरं पटे शौक्ल्यमेवं प्रमेये मिथ्याज्ञानं वर्त्तते, तस्य ज्ञातृसमवेतत्वादित्यर्थः। उत्तरम्—विषयशब्दार्थः। यावदुक्तं भवति प्रमेयविषयं मिथ्याज्ञानमिति तावदुक्तं भवति प्रमेये वर्त्तत

वृत्तिः

परं तु क्रमेण, तत्र क्रमप्रतिपादनायेदं सूत्रमिति। दुःखादीनां मध्ये यदुत्तरोत्तरम्, तेषामपाये तदनन्तरस्य—तत्सन्निहितस्य पूर्वपूर्वस्याऽपायादपवर्गः। प्रयोज-

(१) "पर्य्यन्तम्" इति ल-भा-पु-पाठः। "पर्य्यन्त" इति १८२२ खृःलिखिते क्वचित् पुस्तके। (२) "वृत्तिशब्दार्थ" इति ता-पाठः। (४) "विषयशब्दार्थ" इति ता-पाठः। (४) "भावा-" इति क-पु-पाठः।

न्यायभाष्यम्

आत्मनि तावन्नास्तीति, अनात्मनि आत्मेति दुःखे सुखमिति अनित्ये नित्यमिति

न्यायवार्त्तिकम्

तत्रात्मनि तावन्नास्तीति। आत्मा तावदस्तित्वेन प्रमाणसामर्थ्यादधिगतः। अस्तित्वेनाधिगते नास्तीति विज्ञानं मिथ्याप्रत्ययः। तस्यानुपपत्तिः, सदसतोः सारूप्याभावादिति चेत्, न, प्रमाणगम्यतोपपत्तेः। न हि सदसती सरूपे यतोऽसत्साम्यादसद्धर्मारोपेणात्मनि मिथ्याप्रत्ययः स्यादिति। तच्च नैवम्, प्रमाणगम्यतोपपत्तेः। सदसतोः प्रमाणगम्यत्वं सारूप्यम्, क्रियागुणव्यपदेशस्तद्रहितता च विशेषः। सोऽयमसद्धर्मान् सत्यात्मन्यारोप्य विपर्येति(१) नास्त्यात्मेति।

न्यायवार्त्तिकतात्पर्य्यटीका

इति। विषयत्वं चाग्रे निवेदयिष्यते। अनेकप्रकारमित्युक्तम् (२), तदाह—तत्रायं भेदः। तत्रात्मनि तावत् प्रधाने प्रमेये नास्तीति। कथं पुनरेतन्मिथ्याज्ञानमित्यत आह—आत्मा-तावदिति। अत्र शङ्कते—तस्यानुपपत्तिः। कुतः ? सदसतोः सारूप्याभावादिति चेत् ? सर्व्वत्र हि रजतोदकादिभ्रमे शुक्तिरजतयोर्वा मरुमरीचिकासलिलयोर्वा सारूप्यमेव निमित्तं प्रतीमः। न हि जातु रूपं रसादिषु हस्तिनं वा मशकादिष्वारोपयन्ति। असदृशेऽपि श्वेते पीतभ्रमः, मधुरे च तिक्तभ्रमः, पीतः शङ्खस्तिक्तो गुड इति च दृश्यत इति चेत्, न, तत्रापि सारूप्यसम्भवात्। तथा हि बहिर्निर्गच्छदत्यच्छनयनरश्मिसंपृक्तपित्तपीतिमानमाश्रयरहितम्, शङ्खं च दोषाच्छादितसितिमानमनुभवन् पीतगुणस्य च तदसम्बन्धमननुभवन्नसम्बन्धाग्रहेण पीतचिरबिल्वादिसामानाधिकरण्येन सारूप्यात् शङ्खः पीत इति विपर्य्यस्यति। एवं त्वगिन्द्रियोपनीतं गुडमननुभूयमानमाधुर्य्यमनुभवन् रसनाग्रवर्त्तिनश्च पित्तस्य तिक्तत्वमनुभवन् तदाश्रयं च तिक्तमननुभवन् सम्बन्धाग्रहसारूप्यात्तिक्तनिम्बसामानाधिकरण्येन तिक्तो गुड इति विपर्य्यस्यति, अतिशीघ्रतया चैष क्रमो न लक्ष्यते। न च ब्रूमो यत्र सारूप्यं तत्र विभ्रम इति, येनातिप्रसक्तिश्चोद्येत। अपि तु यत्र भ्रमस्तत्रावश्यं कथंचित् सारूप्यमिति। एवं द्विचन्द्रदिङ्मोहालातचक्रादिष्वपि कथंचित् सारूप्यमूहनीयम्। न च सदसतोरत्यन्तविलक्षणयोः सारूप्यमस्ति, तत् कथमात्मनि नास्तिताऽऽरोप इत्याक्षेपः। समाधत्ते—न, प्रमाणगम्यतोपपत्तेः। आक्षेपं विभजते—न हि सदसती इति। समाधानं विभजते—तच्च नैवमिति। यदि सदसतोः समानत्वं नास्ति, तर्हि भेदः, तथा

वृत्तिः

कत्वं प्रयोज्यत्वं वा (३) पञ्चम्यर्थः। दण्डाभावाद् घटाभाव इतिवत् स्वरूपसम्बन्धविशेष एव तत्। तदयमर्थः—'तत्त्वज्ञानेन विरोधितयाऽपहृते मिथ्याज्ञाने, कारणाभावाच्च

(१) तात्पर्य्ये तु "समारोप्यासत्तया विपर्य्यस्यति" इति। (२) वार्त्तिके "मिथ्याज्ञानमनेकप्रकारकं वर्त्तते" इति। (३) प्रयोजकत्वं यदि पञ्चम्यर्थः, तर्हि स्वनिरूपितप्रयोज्यतावत्त्वसम्बन्धेनैव तस्य प्रयोज्ये अन्वयो वाच्यः, स च सम्बन्धो वृत्त्यनियामकः, तथाच वृत्त्यनियामकसम्बन्धावच्छिन्नप्रतियोगिताकाभावानभ्युपगमे नञ् समभिव्याहारस्थले असङ्गतिः स्यादिति प्रयोज्यत्वं वेति।

न्यायवार्त्तिकम्

एवमनात्मनि शरीरे आत्मेति। किं पुनरनात्मनः शरीरादेरात्मना साधर्म्यम्, यत एतद्भवति अनात्मन्यात्मेति? अहङ्कारविषयत्वं सारूप्यम्। इच्छाद्याधारानाधारतेति विशेषः। यथैवात्मा अहङ्कारस्य विषयस्तथा शरीरादयोऽपि। कथं पुनः शरीरेऽहङ्कारः? शरीरवाचकशब्दसामानाधिकरण्यात् शरीरेऽहङ्कारो गौरोऽहमित्यादि। इच्छाद्याधार आत्मा न शरीरादय इति विशेषः। एतच्चोपरिष्टाद्वक्ष्यामः (१)। सोऽयमात्मधर्मान् इच्छादीन् शरीरादिष्वध्यारोप्य विपर्य्येति अहमेत इति। एवं सामान्यविशेषपरिज्ञाने सति तद्विपरीतधर्माध्यारोपेण विपर्य्ययः सर्वत्र भवति। कः पुनरयं विपर्य्ययः? अतस्मिंस्तदिति प्रत्ययः। शेषं भाष्ये।

न्यायवार्त्तिकतात्पर्य्यटीका

च कस्य कुत्रारोप इत्यत आह—क्रियागुणेति। सोऽयमसद्धर्म्मान् क्रियागुणरहितत्वादीन्, सत्यात्मनि समारोप्यासत्तया विपर्य्यस्यति नास्त्यात्मेति, न त्वात्मानं सर्व्वतोऽभ्यर्हिततमम्, पश्यंस्तत्रासौ स्निह्यति स्नेहात्तदुपकाराय घटते। एवं तत्परिपन्थिनं द्वेष्टि द्वेषाच्च तदपकाराय घटते, ततः कर्म्माशयमातनोति ततो जन्म ततश्च दुःखमिति। एवमात्मनस्तादृशस्य मा भूत् तत्त्वज्ञानम्, अस्तु नास्तितासमारोप एव तावद् यतो न प्रवर्त्तते। यथाऽऽहुः—

सुखी भवेयं दुःखी वा मा भूवमिति तृष्यतः।
यैवाहमिति धीः सैव सहजं तत्त्वदर्शनम्॥

अत्रोच्यते—यद्यपि रागादिनिवृत्तिहेतुर्नैरात्म्यदर्शनम्, तथाऽपि नास्ति कर्म्म नास्ति कर्म्मफलमिति दृष्टेः परमं निदानम्, एवं प्रेत्यभावाभावज्ञानस्य च। तथा च दुःखहेतोर्हेयवर्गस्याभावान्न तद्धानायानेन घटितव्यम्, न चाघटमानो ह्ययं हातुमर्हति, सोऽयं वृश्चिकभिया पलायमान आशीविषमुखे निपतितः, सेयमास्तिक्यायात्मास्तितोपासनीया अभ्यर्हितत्वादात्मनोऽत्यन्तदुःखनिवृत्तावुपयुज्यते। अयमेव चास्योपकारो यदात्यन्तिकदुःखशमनम्। सुखाधाने त्वस्य तदनुषङ्गिदुःखाधानादपकारप्रसङ्गात्। न हि जातु कश्चिच्चेतनः सुखमाप्स्यामीति मधुविषसंपृक्तमन्नमुपभुङ्क्ते। तस्मान्नैरात्म्यदृष्टिः प्रयत्ने नोच्छेत्तव्या प्रेक्षावतेति सिद्धम्। अपरमपि मिथ्यादर्शनं संसारहेतुमाह—एवमनात्मनीति। पृच्छति—किं पुनरिति। उत्तरम्—अहंकारेति। विशेषमाह—इच्छादीति। पुनः पृच्छति—कथं पुनरिति? उत्तरम्—शरीरेति। उपसंहरति—एवमिति। सामान्यधर्म्मोऽहंकारास्पदत्वम्, विशेषधर्म्मं इच्छाद्याधारता तां खल्वयं शरीरादिष्वारोप्य तत एवाहमिति शरीरादिष्वात्मभावमारोपयति। एवं सिद्धं कृत्वा विपर्य्ययं सर्व्वमुक्तम्। संप्रति सन्दिहानो विपर्य्ययस्वरूपं पृच्छति—कः पुनरयं विपर्य्ययः? परीक्षकाणां विप्रतिपत्तेः संशयः। केचित्तु (२) स्वाकारं बाह्यत्वविषयं ज्ञानं विपर्य्यय इत्याचक्षते। अन्ये (३) असद्विषयं ज्ञानम्। अन्ये(४)त्वनिर्वचनीयज्ञानम्। अपरे(५)त्वग्रहणमेव। अन्यथाख्यातिरिति वृद्धाः (६)। उत्तरम्—अतस्मिंस्तदिति प्रत्ययः। इदमत्राकूतम्—

(१) ३।२।१८, ४।१।१२ प्रभृति सूत्रभाष्यव्याख्यानावसरे। (२) आत्मख्यातिस्वीकारिणो विज्ञानवादिनो बौद्धाः। (३) शून्यवादिनो बौद्धाः। (४) वेदान्तिकाः। (५) साङ्ख्याः प्राभाकराश्च। (६) नैयायिकाः।

न्यायवार्त्तिकतात्पर्य्यटीका

न तावत् स्वाकारं रजतादि बाह्यतयाऽऽलम्बन्ते विभ्रमाः। तथा हि ज्ञानाकारत्वं रजतादेरनुभवाद्-व्यवस्थाप्यते अनुमानाद्वा ? अनुभवोऽपि रजतप्रत्ययो वा बाधकप्रत्ययो वा स्यात् ? न तावद्रजत-प्रत्ययः। स ह्रीदमनहंकारास्पदं रजतमादर्शयति न चान्तरम् अहमिति तदा स्यात्। प्रतिपत्तुः प्रत्ययादव्यतिरेकात्। भ्रान्तं ज्ञानं स्वाकारमेव बाह्यतयाऽऽलम्बते तथा चानहंकारास्पदमस्य विषयो ज्ञानाकारोऽपि ज्ञानाकारता पुनरस्य बाधकज्ञानप्रवेदनीयेति चेत्, हन्त चक्षुषी निमील्य वैज्ञानिक-पक्षपातं परित्यज्यालोचयतु भवान् किं पुरोवर्त्तिद्रव्याकारतामात्रं प्रतिषेधति रजतस्याहोस्वित् ज्ञानाकारतामप्यस्योपदर्शयति बाधकप्रत्ययः। तत्र ज्ञानाकारतोपदर्शनं व्यापारं बाधकप्रत्ययस्य ब्रुवाणः श्लाघनीयप्रज्ञो देवानां प्रियः। पुरोवर्त्तित्वनिषेधादर्थाज्ज्ञानाकारतासिद्धिरिति चेत्, न त्वस्या (१) तन्निषेधो वणिग्वीथ्यादावुपलब्धस्य रजतस्य व्यवस्थापने हेतुः। आन्तरत्वं त्वनुपलब्धचरं (२) कुतस्त्यम्। न चानुमानमत्र प्रभवतीति चतुर्थे (३) निवेदयिष्यते।

सन्तु तर्हि बाधकप्रत्ययानुरोधाद् असत्प्रकाशनशीला एव मिथ्याप्रत्ययाः। तथा हि बाधकं विज्ञानं नेदं रजतमिति रजतज्ञानगोचरस्यासत्त्वं गृह्णाति। न चासतो विषयभावो नोपपद्यते, न हि विषयत्वं नाम कारणत्वं येनासति न स्यात्, किन्तु स्वकारणाधीनः सामर्थ्यातिशयः, स तादृशो ज्ञानस्य, येन सन्तमिवासन्तमपि गोचरयति। न च विषयसामर्थ्यमत्रोपयुज्यते, ज्ञानस्य सामर्थ्य-मात्रादेव तद्भावसिद्धेः। अत एवासत्प्रकाशनसामर्थ्यमेव मिथ्याज्ञानानामविद्यात्वमनिर्वचनीयत्वं केचिदास्थिषत। अत्रेदमालोचनीयम्—किमेतन्मिथ्याज्ञानमसत् सदात्मना गृह्णातीत्यसद्विषय-मुपेयते ? आहोस्वित् सदेव सदन्तरात्मना गृह्णाति, सतश्च सदन्तरात्मनाऽसत्त्वादसद्विषयमुच्यते ? न तावत्पूर्वः कल्पः, रजतात्मना चेदसदालम्बेत न सतीं शुक्तिकाम्, कस्मात् पुनरयं शुक्तौ रजतार्थी प्रवर्त्तते न पुना रजताभावे ? कस्माच्चेदं पुरोवर्ति द्रव्यमङ्गुल्या निर्दिश्य तस्य रजतत्वं निषेधति नेदं रजतमिति, यदि तत्र न प्रसञ्जितं रजतत्वं पूर्वविज्ञानेन। अथ शुक्तिरेव रजतात्मनाऽसतीति तदाकारतया तामालम्बमानं मिथ्याज्ञानमसदालम्बनमुच्यते, तत्रानुज्ञया वर्त्तामहे। न खलु अन्यथाख्यातिवादिनोऽपि सदन्तरं सदन्तरात्मना सदभ्युपगच्छन्ति, तथा सत्यन्यथेत्येव न स्यात्। यथाऽऽहुः अन्यथाख्यातिवादिनः—तस्माद्यदन्यथा प्रति-पद्यते तन्निरालम्बज्ञानमसदालम्बनं च तदिति। न च रजतात्मना पुरोवर्त्तिनो द्रव्यस्यानिर्वचनी-यता, मिथ्याज्ञानसमये सत्त्वेन बाधकसमये चासत्त्वेन निर्वचनीयत्वात्। न चैवम्भूतस्यासतः प्रथा नोपपद्यते, तस्य सदसद्भ्यामुपाख्येयत्वात्। यः पुनरद्वैतवादिनां प्रपञ्चो वैनाशिकानां वा सामान्यादिर्नो बहिः, किं त्वलीकम्, तद्विषयं च ज्ञानं मिथ्याज्ञानमित्यपि न सम्भवति, तस्य सर्वोपाख्यारहितस्य केनचित् सारूप्याभावात्, तत्कारणकत्वाच्च भ्रान्तेः। कारणाभावे

(१) "त्वस्या" इत्यंशः ख-पुस्तके नास्ति। (२) "त्वस्यानुपलब्धचरम्" इति परिशुद्धिधृतपाठः। (३) ४।२।३५ सूत्रटीकायाम्।

न्यायवार्त्तिकतात्पर्य्यटीका

कार्य्याभावस्य सुलभत्वात्। तस्मात् प्रपञ्चश्च सामान्यादि वस्तुसती नासमीचीनविज्ञानगोचरौ, तद्बाधश्चोपरिष्टादपाकरिष्यते (१)। तस्मान्नानिर्वचनीयख्यातिरपि। स्यादेतत्, अन्यदन्यथा प्रकाशत इति संविद्विरुद्धम्, न तावत् सद्भावमात्रेणालम्बनत्वम्, तन्मात्रस्य सर्वप्रत्ययसाधारण्येन सर्वेऽर्थाः सर्वप्रत्ययविषया इति सर्वसर्वज्ञतापत्तेः। न च कारणत्वेनालम्बनत्वम्, रूपादिविज्ञानानां रूपादिवच्चक्षुराद्यपि कारणमिति चक्षुराद्यालम्बनत्वप्रसङ्गात्। अतीतानागतविषयत्वं च विज्ञानस्य न स्याद् अतीतानागतयोरसत्त्वेनाकारणत्वात्। तस्मात् प्रतिभासमानमालम्बनम्। तथा च रजतप्रतिभासः शुक्तिकालम्बनमिति दुर्घटम्। अपि च चक्षुरादीनां समीचीनज्ञानोपजननसामर्थ्यमिति कथमेभ्यो मिथ्याज्ञानं भवितुमर्हति। न हि श्यामाकबीजं परिकर्म्मसहस्रेणापि कलमाङ्कुराय कल्पते। दोषसहाया लोचनादयो मिथ्याप्रत्ययमादधत इति चेत्, न, दोषा हि कारणानां सामर्थ्यं निघ्नन्ति, न पुनः कार्य्यान्तरजननसामर्थ्यमादधति, न खलु भृष्टकुटजबीजं न्यग्रोधधानायै (२) कल्पते, किन्तु न करोति कुटजबीजं कुटजधानाम्। अपि च स्वगोचरे व्यभिचारे विज्ञानानां सर्वत्रानाश्वासप्रसङ्गः। तस्मात् सर्वमेव विज्ञानं समीचीनमास्थेयम्। तथा हि रजतमिदमिति द्वे ज्ञाने स्मृत्यनुभवरूपे, तत्रेदमिति पुरोवर्त्तिद्रव्यमात्रग्रहणम्, दोषवशात् तद्गतशुक्तिकात्वसामान्यविशेषस्याग्रहणात्, तावन्मात्रं च गृहीतं सदृशतया संस्कारोद्बोधक्रमेण रजते स्मृतिं जनयति, सा च गृहीतग्रहणस्वभावाऽपि दोषाद् गृहीततांशप्रमोषेण ग्रहणमात्रमवतिष्ठते। तथा च रजतस्मृतेः पुरोवर्त्तिमात्रग्रहणस्य च मिथः स्वरूपतश्च विषयतश्च भेदाग्रहणात् सन्निहितरजतविषयविज्ञानसारूप्येण इदं रजतमिति भिन्ने अपि ग्रहणस्मरणे अभेदव्यवहारं सामानाधिकरण्यव्यपदेशं च प्रवर्त्तयतः। क्वचित् पुनर्ग्रहणे एव मिथोऽगृहीतभेदे। यथा पीतः शङ्ख इति। अत्र बहिर्निर्गच्छन्नयनरश्मिवर्त्तिनः पित्तद्रव्यस्य काचस्येवातिस्वच्छस्य पीतत्वं च गृह्यते, पित्तं तु न गृह्यते, शङ्खोऽपि दोषवशाद् गुणरहितः स्वरूपमात्रेण गृह्यते। तदनयोर्गुणगुणिनोरसंसर्गाग्रहात्सारूप्यात् पीतचिरबिल्वप्रत्ययाविशेषेणाभेदव्यवहारः सामानाधिकरण्यव्यपदेशश्च भेदाग्रहप्रसञ्जिताभेदव्यवहारव्यवधानाच्च नेदं रजतमिति विवेकप्रत्ययस्य बाधकत्वमप्युपपद्यते तदुपपत्तौ च भ्रान्तित्वमपि लोकप्रसिद्धं सिद्धं भवति। तस्माद् यथार्थाः सर्वेऽपि भ्रमाः प्रत्ययत्वात् पटप्रत्ययवदिति प्राप्तम्, एवं प्राप्तेऽभिधीयते—अस्ति तावद्रजतार्थिनो रजतमिति ज्ञाने सति पुरोवर्त्तिद्रव्यप्रवृत्तिः सामानाधिकरण्यव्यपदेशश्चेति सार्वजनीनम्। तत् किं ग्रहणस्मरणयोस्तद्गोचरयोश्च भेदाग्रहाद्भवतु आहोस्विदभेदग्रहात्? न तावच्चेतनोऽज्ञानात् प्रवर्त्तते अपि तु ज्ञानात्। पुरोवर्तिवस्तुग्रहणरजतज्ञानादगृहीतभेदं स्वस्वरूपतो विषयतो वा रजतार्थिनं पुरोवर्तिद्रव्ये प्रवर्त्तयतीति चेत्, हन्त भोः किमेतावता पुरोवर्त्तिवस्तुगोचरं ज्ञानं रजतगोचरं भवति? आहोस्वित्तन्मात्रगोचरमेव? यदि रजतगोचरं पुरोवर्त्ति

(१) ४।२।३३—३५ सूत्रवार्त्तिकं द्रष्टव्यम्। (२) धानायै अङ्कुराय।

न्यायवार्त्तिकतात्पर्य्यटीका

रजततयाऽगृह्णात्, कथं नान्यथाख्यातिः? अथ तन्मात्रगोचरम्, को भेदाग्रहस्योपयोगः? न हि वृक्षमात्रदर्शनं निश्चयेन शिंशपार्थिनं प्रवर्त्तयति, न हि तत्र शिंशपाज्ञानमस्ति, अस्तित्विह रजतविज्ञानमगृहीतभेदमिदमिति ज्ञानेनेति चेत्? ननु रजतविज्ञानं पुरोवर्तिद्रव्ये न वर्त्तते पुरोवर्त्तिज्ञानं च न रजत इति तत्र पुरोवर्त्तिनि प्रवर्त्तते न रजतार्थी, एवं रजतार्थी यत्र क्वचन प्रवर्त्तेत न नियमेन पुरोवर्त्तिद्रव्ये, न हि तेन तत्र रजतत्वमवगतमिति। अथेदं रजतमिति द्वे ज्ञाने भेदाग्रहादिदं रजतमित्येकज्ञानसदृशे तदुचितं व्यवहारं प्रवर्त्तयतः, यद्येवं तद्रजतमियं शुक्तिरिति भेदावभासिविज्ञानव्यवहारमपि कस्मान्न प्रवर्त्तयतः? यथैव हि भेदाग्रहादभेदज्ञानसादृश्यम्, एवमभेदाग्रहाद्भिन्नविज्ञानसादृश्यमपि। सोऽयमुभयतो भेदाभेदग्रहसारूप्यात् प्रवृत्तिनिवृत्तिभ्यां युगपदाकृष्यमाणः प्रतिपत्ता कष्टां दशामावेशितः प्रज्ञाशालिभिरतिव्याख्यया।

स्यादेतत्। विपर्य्ययज्ञानोत्पादेऽपि शुक्तिरजतयोर्भेदाग्रहेऽस्य व्यापार आस्थेयः, अन्यथा गृहीतभेदानामपि विपर्य्ययोत्पादप्रसङ्गात्। तथा च शक्यं तत्रापि वक्तुम्—यथा भेदाग्रहाद्विपर्य्ययज्ञानोत्पाद एवमभेदाग्रहात् कस्मान्न समीचीनज्ञानोत्पाद इति, तत्र यस्तव परिहारः, सोऽस्माकं व्यवहारव्यपदेशयोर्भविष्यति। यथाऽऽहुः अख्यातिवादिनः—येषामपि विपरीतख्यातिस्तेषामप्यज्ञानवासनानिबन्धनो भ्रम इति, मैवम्, ज्ञानहेतूनामज्ञातरूपकार्य्यसम्बन्धानां चक्षुरादीनां दर्शनात्, चेतनव्यवहाराणां त्वबुद्धिपूर्वकाणामप्रतीतेः। बुद्धिपूर्वकत्वे तु विवेकाग्रह उपयुज्यते न व्यवहारव्यपदेशयोरिति युक्तमुत्पश्यामः। यद्यविवेकाग्रहोऽपि तत्परिपन्थी विद्यते इति कुतोऽन्यतरनिबन्धनो व्यवहारः। तस्मात् समारोप एव भेदाग्रह इति सिद्धमेतद्विवादाध्यासितं रजतादिविज्ञानं पुरोवर्तिवस्तुविषयम्, रजतार्थिनस्तत्र नियमेन प्रवर्त्तकत्वात्। यद्यदर्थिनं नियमेन यत्र प्रवर्त्तयति तद्विज्ञानं तद्विषयम्, यथोभयसिद्धं समीचीनरजतज्ञानम्, तथा चैतद् न तथा चैतत्तस्मात् तथा। यच्चोक्तमनवभासमाना शुक्तिका नालम्बनमिति, तत्र किं शुक्तिकात्वस्य रजतमिति ज्ञानं प्रत्यनालम्बनत्वं साध्यते? आहोस्विद् द्रव्यमात्रस्य सितभास्वरस्य पुरोवर्त्तिनः? तत्र पूर्वस्मिन् कल्पे सिद्धसाधनम् उत्तरस्मिन्नवभासमानत्वमसिद्धम्, इदमिति पुरोवर्तिनो द्रव्यस्याङ्गुल्या निर्देशात्। दृष्टं च दुष्टानामपि कारणानामौत्सर्गिककार्य्यप्रतिबन्धेन कार्य्यान्तरोत्पादकत्वम्, तद्यथा—वेत्रबीजानां दावाग्निदग्धानां कदलीप्रकाण्डजनकत्वम्, भस्मकदुष्टस्य चौदर्य्यस्य तेजसो बहुतरान्नपानपाचकत्वम्। नेदं रजतमिति च प्रत्यक्षबाधकप्रत्ययादपहतविषयम्, प्रत्ययत्वेन विभ्रमाणां यथार्थत्वानुमानं नोदेतुमर्हति। यथा च प्रमाणाभासव्यभिचारेऽपि प्रमाणे आश्वासः,

वृत्तिः

निवृत्ते रागद्वेषात्मके दोषे, तदभावाच्च प्रवृत्तेर्धर्माधर्मात्मिकाया अनुत्पत्तौ, तदभावाच्च जन्मनो विशिष्टशरीरसम्बन्धस्याऽभावात् दुःखाभावादपवर्गः।

न्यायभाष्यम्

अत्राणे त्राणमिति, सभये निर्भयमिति, जुगुप्सिते अभिमतमिति, हातव्ये अप्रतिहातव्यमिति, प्रवृत्तौ नास्ति कर्म, नास्ति कर्मफलमिति, दोषेषु नायं दोषनिमित्तः संसार इति, प्रेत्यभावे नास्ति जन्तुर्जीवो वा सत्त्व आत्मा वा, यः प्रेयात्, प्रेत्य च भवेदिति, अनिमित्तं जन्म, अनिमित्तो जन्मोपरम इत्यादिमान् प्रेत्यभावः, अनन्तश्चेति, नैमित्तिकः सन्नकर्मनिमित्तः प्रेत्यभाव इति, देहेन्द्रियबुद्धिवेदनासन्तानोच्छेदप्रतिसन्धानाभ्यां निरात्मकः प्रेत्यभाव इति। अपवर्गे भीष्मः(१) खल्वयं(२) सर्वकार्य्योपरमः, सर्वविप्रयोगेऽपवर्गे बहु च(३) भद्रकं लुप्यत इति कथं बुद्धिमान् सर्वसुखोच्छेदमचैतन्यममुमपवर्गं रोचयेदिति।

एतस्मान्मिथ्याज्ञानादनुकूलेषु रागः, प्रतिकूलेषु द्वेषः। रागद्वेषाधिकाराच्चाऽसत्ये-(४)र्ष्यामायालोभादयो दोषा भवन्ति। दोषैः प्रयुक्तः शरीरेण प्रवर्त्तमानो हिंसास्तेयप्रतिषिद्धमैथुनान्याचरति, वाचाऽनृतपरुषसूचनाऽसम्बद्धानि, मनसा परद्रोहं परद्रव्याभीप्सां नास्तिक्यं चेति। सेयं पापात्मिका प्रवृत्तिरधर्माय।

अथ शुभा—शरीरेण दानं परित्राणं परिचरणं च, वाचा सत्यं हितं प्रियं स्वाध्यायं चेति, मनसा दयामस्पृहां श्रद्धां चेति। सेयं धर्माय।

अत्र प्रवृत्तिसाधनौ(५) धर्माधर्मौ प्रवृत्तिशब्देनोक्तौ, यथाऽन्नसाधनाः प्राणाः 'अन्नं वै प्राणिनः प्राणा' इति।

न्यायवार्त्तिकतात्पर्य्यटीका

तथा प्रमाणतोऽर्थप्रतिपत्तावित्यत्रोपदर्शितम्। दिङ्मात्रमत्र दर्शितम्, प्रपञ्चस्तत्त्वसमीक्षायामस्माभिः कृत इत्युपरम्यते।

तदेवमात्मनि मिथ्याज्ञानं व्याख्याय शरीरादिष्वेकादशसु मिथ्याज्ञानं भाष्य एव दर्शितम्, तत्तु स्पष्टत्वान्नोपपादितमस्माभिरित्याशयवानाह (६) शेषमिति। तत्र शरीरादिषु मनःपर्य्यन्तेषु यथायोगं मिथ्याज्ञानं दुःखे सुखमित्यादिना प्रतिपत्तव्यमित्यन्तेन (७) भाष्येणोक्तम्। प्रवृत्त्यादिषु श्लक्ष्णग्राहिकयोक्तम्—प्रवृत्तावित्यादिना रोचयेदित्यन्तेन भाष्येण। एवं मिथ्याज्ञानस्य स्वरूपं दर्शयित्वा मिथ्याज्ञानदोषप्रवृत्तिजन्मदुःखानां कार्य्यकारणभावो दोषादीनां स्वरूपं चोक्तम्—

---

(१) "अपवर्गो भीष्मः"। ज-आ। (२) "स खल्वयं"। ज-आ-ग-पादटीका। (३) ल-पुस्तके "च" नास्ति। (४) "असत्ये"ति स्थले "असूये"ति ज-झा-आ-वि-टि। (५) प्रवृत्तिः साधनं ययोस्तौ, प्रवृत्तिजन्यौ इत्यर्थः। "यथा अन्नसाधनाः प्राणाः" इति वक्ष्यमाणस्थलेऽपि अनयैव रीत्या अर्थो बोध्यः। (६) ७२पृ:—वार्त्तिककार आह—शेषमिति। (७) अत्र "अप्रतिहातव्यमित्यन्तेन" इत्येवं पाठे सत्येव भाष्यग्रन्थेन सङ्गतिः सम्भवतीति सुधीभिर्विभावनीयम्।

न्यायभाष्यम्

सेयं प्रवृत्तिः(१) कुत्सितस्याऽभिपूजितस्य च जन्मनः कारणम्। जन्म पुनः शरीरेन्द्रियबुद्धीनां निकायविशिष्टः प्रादुर्भावः, तस्मिन् सति दुःखम्। तत्पुनः प्रतिकूलवेदनीयं बाधना पीडा ताप इति। त(२) इमे मिथ्याज्ञानादयो दुःखान्ता धर्मा अविच्छेदेनैव(३) प्रवर्तमानाः संसार इति।

न्यायवार्त्तिकम्

त इमे दुःखादयो मिथ्याज्ञानपर्य्यवसाना अविच्छेदेन प्रवर्त्तमानाः संसार इति। कः पुनरयं संसारः? दुःखादीनां कार्य्यकारणभावः। स चानादिः, पूर्वापरकालानियमात्। न च शक्यं वक्तुं पूर्वं दुःखादयः पश्चान्मिथ्याज्ञानोत्पत्तिरिति, पूर्वं वा मिथ्याज्ञानं पश्चाद् दुःखादय

न्यायवार्त्तिकतात्पर्य्यटीका

एतस्मादित्यादिना ताप इत्यन्तेन भाष्येण। संप्रति मिथ्याज्ञानाद्युच्छेदादपवर्ग इति वक्ष्यति, (४) तच्चायुक्तम्, सत्यपि तदुच्छेदे संसारतादवस्थ्यात्। न ह्यन्योच्छेदेऽन्यस्योच्छेदः। तथा च नापवर्ग इति वक्ष्यमाणमर्थमुपपादयितुमुक्तं भाष्यकृता त इमे मिथ्याज्ञानादय इति। तद्वार्त्तिककारो व्याचष्टे—त इमे दुःखादय इति। भाष्यकारोक्तक्रमाद्विपरीतक्रमाभिधानं वार्त्तिककृत एवं सूत्रकारोक्तक्रमाद्विपरीतक्रमाभिधानं भाष्यकृतो दुःखादीनां मिथ्याज्ञानपूर्वकत्वेन मिथ्याज्ञानस्य दुःखादिपूर्वकत्वेनानादित्वं दर्शयितुम्। पृच्छति—कः पुनरिति। यद्येत एव संसारस्तर्हि सूत्रकारः प्रमेयसूत्रे कस्माद् दुःखादिभ्यः पृथक् प्रेत्यभावं संसारापरनामानमुपादत्ते? तस्मादेभ्योऽन्य एव संसार इति भावः। उत्तरम्—दुःखादीनामिति, नैषां स्वरूपमपि तु कार्य्यकारणभाव इत्यर्थः। क्रमव्यतिक्रमे तात्पर्य्यमाह—स चानादिरिति। अत्र हेतुमाह—पूर्वापरेति। दुःखजन्मप्रवृत्तिदोषा विषयः, ते न तावन्मिथ्याज्ञानस्य कारणम्, एवमसति जन्मनि मिथ्याज्ञानस्यानुत्पत्तेरविषयोऽपि जन्म मिथ्याज्ञानस्य कारणम्। एवं विना प्रवृत्तिं जन्माभावाज् जन्मद्वारेण प्रवृत्तेरपि मिथ्याज्ञानकारणत्वम्। प्रवृत्तिद्वारेण च दोषाणां तथा, मिथ्याज्ञानाद् दोषाः, दोषेभ्यः प्रवृत्तिः, प्रवृत्तेर्जन्म, जन्मनो दुःखम्। यद्यपि प्रवृत्तिरेव साक्षाद् दुःखहेतुस्तथाऽप्यनायतनस्य तस्यानुत्पत्तेरन्तरा जन्म करोति। अथ सैव दुःखमिति। अनादित्वाच्च नान्योन्याश्रयत्वं चक्रकं वा बीजाङ्कुरसन्तानयोरिव। संप्रति बीजापाय इव तज्जन्याङ्कुरप्रवाहनिवृत्तिर्मिथ्याज्ञानापाये तज्जन्यप्रवृत्तिजन्मदुःखमिथ्याज्ञानादिप्रवाहनिवृत्तिः कारणनिवृत्तौ कार्य्यनिवृत्तेरिति

(१) "प्रवृत्तिः" ज-आ नास्ति। (२) "त" ज नास्ति। (३) वि-टि-पु "एव" नास्ति। (४) "यदा तु तत्त्वज्ञानान्मिथ्याज्ञानमपैति" इत्यादिना "निःश्रेयसमिति" इत्यन्तेन ग्रन्थेन भाष्यकारो वक्ष्यति।

न्यायभाष्यम्

यदा तु तत्त्वज्ञानान्मिथ्याज्ञानमपैति, तदा मिथ्याज्ञानापाये दोषा अपयन्ति, दोषापाये

न्यायवार्त्तिकम्

इति न शक्यं वक्तुमिति। यदा तु तत्त्वज्ञानान्मिथ्याज्ञानमपैति। कथमपायः ? समानविषये तयोर्विरोधात्। यस्मान्मिथ्याज्ञानं तत्त्वज्ञानं च एकस्मिन् विषये विरुध्येते, वस्तुनो द्वैरूप्यासम्भवात्। न ह्येकं वस्तु द्विरूपं भवति। तस्मान्मिथ्याज्ञानं तत्त्वज्ञानेन निवर्त्यत इति। कथं पुनः पूर्वोत्पन्नं मिथ्याज्ञानं पश्चादुत्पद्यमानेन तत्त्वज्ञानेन निवर्त्यते ? मिथ्याज्ञानस्याऽसहायत्वात्, मिथ्याज्ञानमसहायमतो निवर्त्यते। सम्यग्ज्ञानस्य च विषयः

न्यायवार्त्तिकतात्पर्य्यटीका

कथनपरं भाष्यमनुभाष्याक्षिपति—यदा तु तत्त्वज्ञानादिति। अपायोऽपि तत्त्वज्ञानान्मिथ्याज्ञानस्य स्वरूपतो वा विषयतो वा फलतो वा स्यात् ? न तावत् स्वरूपतः, तस्याशुतरविनाशिनः संस्काराद्वा ज्ञानान्तराद्वा अपायस्य तत्त्वज्ञानसाधारण्येन तस्यापि बाध्यत्वप्रसङ्गात्। नापि विषयतः, न हि शुक्तिकाज्ञानं रजतज्ञानस्य रजतविषयतामपहर्त्तुमुत्सहते, जातं हि तद्रजतं विषयीकृत्य। यथाऽऽहुः—गृहीत्वाऽर्थं गताश्चौराः कस्तानाच्छेत्तुमर्हतीति। नापि फलमपहरति, उपदर्शितो हि तेनार्थः प्रवर्त्तितश्च तत्र पुरुषः। तदिदमुक्तम्—कथमपाय इति। उत्तरं—समानविषय इति। यस्मिन्नेव हि पुरोवर्त्तिनि द्रव्ये पूर्वेण रजतत्वमासञ्जितमत्रैवोत्तरं तद्विरुद्धशुक्तिकात्वं धर्म्ममुपनयति। तथा च पूर्वज्ञानस्य मिथ्यात्वमदर्शयत्तज्जनितां प्रवृत्तिं विघटयत् फलमस्यापहरतीति भावः। न तु समानविषयतामात्रेण विरोधः, मा भूदेकस्मिन्नात्मनि नित्यत्वविभुत्वज्ञानयोर्विरोध इत्यत आह—यस्मादिति। तत्त्वमिथ्यात्वकथनेन मिथो विरुद्धधर्मप्रसञ्जनं सूचयति। नित्यत्वविभुत्वज्ञानयोस्तु समानविषययोरप्यविरुद्धधर्म्मोपस्थापकतया तत्त्वज्ञानत्वादित्यर्थः। कस्माद्विरोध इत्यत आह—वस्तुन इति। परस्पराभावधर्म्मिणोरेकत्र समवाये नेदं स्वाभाविकं नानात्वं क्वचिदपीत्यद्वैतप्रसङ्ग इति भावः। उपसंहरति—तस्मादिति। अत्र देशयति—कथं पुनरिति। प्रथममुत्पन्नं मिथ्याज्ञानमनुपजातविरोधि, तेनापहृतविषयं पश्चात्तनं तत्त्वज्ञानमुदेतुमेव नोत्सहते प्रागेव तु मिथ्याज्ञानं बाधितुमिति भावः। उत्तरं—मिथ्याज्ञानस्येति। तत्र हि प्रथममुपजातेनानुपजातविरोधिना ज्ञानेनोत्तरं बाध्यते, यत्र पूर्वापेक्षमुत्तर-

वृत्तिः।

यद्यपि ज्ञानिनोऽपि रागादयस्तिष्ठन्ति, तथाऽप्युत्कटरागाद्यभावे तात्पर्य्यम्।

यद्यपि दोषाणां न धर्मादिजनकत्वम्, तथाऽपि तत्तद्दोषाणां तत्तद्धर्मादिहेतुत्वाद्दोषापाये धर्माद्यपायः।

न्यायवार्त्तिकम्

सहायो भवति। कस्मात्? तथात्वेनावस्थानात्, तथाभूतोऽसौ विषयो यथा तत्र तत्त्वज्ञानमिति। प्रमाणान्तरानुग्रहाच्च आगमानुमानादिप्रमाणं तत्त्वज्ञानस्य सहायो भवति। यदा ह्ययमनुमानागमयोः प्रतिसंहितयोर्विषयं भावयति(१) समाहितोऽनन्यमनाश्चिन्तयति ततोऽस्य विपच्यमाने ध्याने विविक्तायां ध्यानभावनायां तस्मिन्नर्थे तत्त्वप्रतिबोधि ज्ञानं प्रत्यक्षमुत्पद्यत इति। सोऽयमागमानुमानप्रत्यक्षाणां विषयं प्रतिपद्यमानस्तत्त्वमेतदिति प्रतिपद्यते। तत्त्वप्रतिपत्तेरस्य

न्यायवार्त्तिकतात्पर्य्यटीका

मुपजायते। तत् खलु पूर्वविरोधे न जायते। अजातं सत् कथं पूर्वं बाधेत, यथा प्रत्यक्षादिविरुद्धमनुमानम्। इह तु द्वे अपि ज्ञाने दोषोपहतेन्द्रियार्थसन्निकर्षजन्मनी परस्परानपेक्षे, तत्र पूर्वमनुपजातविरोधित्वात् किं बाधताम्, अनागतस्याप्राप्तत्वेन बाधितुमशक्यत्वात्, स्वकारणबलादासाद्यमानजनेश्चोत्पत्तिविरोधस्याशक्यत्वात्। तदेवमुत्पन्नमुत्तरमुपजातविरोधितया पूर्वबाधात्मकं सन्नानुपमृद्य पूर्वमुत्पन्नं भवतीति पूर्वं बाधते। तत्तु न पूर्वेण नाप्यन्येन केनचिदिति भवत्यर्थसहायम्। अर्थासहायं च मिथ्याज्ञानम्, तदनेन बाध्यत्वाबाध्यत्वे मिथ्याज्ञानतत्त्वज्ञानयोरुपलक्ष्येते। तदिदमन्यैरप्युक्तम्—

पूर्वात्परबलीयस्त्वं तत्र नाम प्रतीयताम्।
अन्योन्यनिरपेक्षाणां यत्र जन्म धियां भवेत्॥ इति।

तथा चानुपजातविरोधित्वमत्र बाध्यत्वे हेतुः, उपजातविरोधित्वं च बाधकत्व इति। यदुपलक्षणार्थं ससहायत्वाभिधानं तज्जिज्ञासुः पृच्छति—कस्मात्? उत्तरम्—तथात्वेनेति। अनेनाबाध्यत्वं तत्त्वज्ञानस्योक्तमिति। न केवलमबाध्यत्वं दृढमूलत्वमपि तत्त्वज्ञानस्येत्याह—प्रमाणान्तरानुग्रहाच्च। अन्तरशब्दो विशेषवचनः। आत्मादितत्त्वज्ञानं हि फलं प्रमाणविशेषैरागमानुमानप्रत्यक्षैरनुगृह्यते, तस्माद् दृढमूलत्वात्तदपि तत्त्वज्ञानं मिथ्याज्ञानं निवर्त्तयतीत्यर्थः। तदेव विभजते—आगमेति। एतदेव स्फोरयति—यदा हीति। आगमजेन हि ज्ञानेन प्रमेयं गृहीत्वा शास्त्रीयेण च न्यायविज्ञानेनानुमानापरनाम्ना व्यवस्थाप्य भावयतो यदात्मनः सन्निकर्षाद्योगजधर्म्मसहायादुत्पद्यते तत्त्वविषयसाक्षात्कारः प्रत्यक्षफलम्, तत्र त्रयाणामपि प्रमाणानां प्रतिसन्धानमस्तीति दृढमूलत्वात् तेन मिथ्याज्ञानं बाध्यते। विषयं विभावयतीति व्याचष्टे—समाहित इति। समाहितत्वेन चेतसो धारणां दर्शयति। अनन्यमना इति प्रत्याहारम्, चिन्तयतीति तत्त्वविषयबुद्धिधाराविपच्यमानत्वम्। ध्यानस्य तत्त्वज्ञानस्य स्फुटतरारम्भावस्था ध्यानजनितभावना संस्कारो ध्यानभावना, तस्या विवेको मिथ्याज्ञानवासनायाः। पूर्वं हि मिथ्याज्ञानवासना तत्त्वज्ञानवासना यावत्यासीत् अथाभ्यासवशात् तुल्यबलाऽभवत् अथेयमेव बलीयसी तत्त्वज्ञानवासनासंभिन्ना मिथ्याज्ञानवासनया सहानुवर्त्तते, संप्रति तु तत्त्वज्ञानवासना या अत्यन्तबलीयसी समूलकाषं कषित्वा मिथ्याज्ञानवासनाया भवति विविक्ता तत्त्वज्ञानवासना (२) तस्यामित्यर्थः। नन्वनेन

(१) "विभावयती"ति तात्पर्य्यं। (२) अत्र पुनः "तत्त्वज्ञानवासना"पदम् अधिकमिति मन्यते।

न्यायभाष्यम्

प्रवृत्तिरपैति, प्रवृत्त्यपाये जन्माऽपैति, जन्मापाये दुःखमपैति, दुःखापाये च आत्यन्तिकोऽपवर्गो निःश्रेयसमिति ।

न्यायवार्त्तिकम्

मिथ्याज्ञानं निवर्त्तत इति । निवृत्ते च मिथ्याज्ञाने न पुनस्तद्विषयं मिथ्याज्ञानमुत्पद्यत इति विरोधादित्युक्तम् । कः पुनर्विरोधः? सहासम्भवः । मिथ्याज्ञानाभावे रागादयोऽपयन्तीति कार्य्यकारणभावादेव । कारणं मिथ्याज्ञानं कार्य्याः रागादयः । न च कारणं विना कार्य्यं भवितुमर्हति । ये तावदनुत्पन्ना रागादयस्ते कारणाभावान्माभूवन् । ये तूत्पन्नास्ते कथम्? तेषामपि वैराग्यान्निवृत्तिः । किं पुनर्वैराग्यम्? भोगानभिष्वङ्गलक्षणमित्युक्तम् । असक्तिश्च सक्तिं बाधते । तत्पुनर्वैराग्यं कथं भवति? तत्त्वज्ञानाद्विषयदोषदर्शनादिति । दोषाभावे प्रवृत्त्यभावः ।

न्यायवार्त्तिकतात्पर्यटीका

क्रमेण निवर्त्ततां मिथ्याज्ञानम्, निवृत्तं तु साक्षात्कारसमयेऽपि कस्मात् पुनः स्ववासनावशान्न जायते? न खलु मिथ्याज्ञानवासना अनादिकालप्रवृत्ता आदिमता तत्त्वज्ञानेन तद्वासनया शक्या निवर्त्तयितुमित्यत आह—निवृत्ते चेति । तावदेव पुंसां बुद्धयोऽस्थिराः भ्राम्यन्ति स्वोचितसंस्कारजाः, न यावत्तत्त्वविवेचनया यावद्भूतमर्थं साक्षात् कुर्वन्ति । अथ साक्षात्कृते तत्र स्थिरपदा भवन्ति, क्षिण्वन्ति च सवासनान्मिथ्याप्रत्ययान् । भूतार्थपक्षपातो हि बुद्धेः स्वभावः । यदाहुर्बाह्या अपि---

निरुपद्रवभूतार्थस्वभावस्य विपर्य्ययैः ।
न बाधो यत्नवत्त्वेऽपि बुद्धेस्तत्पक्षपाततः ॥ इति ।

तस्माद् मिथ्याज्ञानस्य न तु पुनरुत्पाद इति । उक्तमेवार्थं स्मृतिदार्ढ्याय पृच्छति—कः पुनरिति । उक्तं स्मारयितुमुत्तरं—सहेति । भवतु मिथ्याज्ञानस्य निवृत्तिः सवासनस्य, ततोऽपि किम्? इत्यत आह—मिथ्याज्ञानेति । अत्र पृच्छति—ये तावदिति । उत्तरं—तेषामपीति । वैराग्यस्वरूपं पृच्छति—किं पुनरिति । रागाभावो वैराग्यम्, न च तस्मादेव रागादीनामभाव इति भावः । उत्तरम्—भोगानभिष्वङ्गलक्षणमित्युक्तम् । विषयदोषपरिभावनापरिपाकात् खलु विषयपरित्यागेच्छा भवति, तया विरोधिगुणेन विषयतृष्णा तत्परिपन्थिनि विद्वेषश्च तदधिकरणाश्चेर्ष्यादयो निवर्त्तन्ते । असक्तिर्विषयपरित्यागेच्छा, वशितया च स्वयमुपनतेषु विषयेषु माध्यस्थ्यदर्शनम् ।

वृत्तिः

वस्तुतो विनाऽपीच्छां गङ्गाजलसंयोगादिना(१) धर्मादिसम्भवाद् व्यभिचारः, तस्मान्मिथ्याज्ञानवासनैवाऽत्र दोषः, तस्याश्च मिथ्याज्ञाननाशात् तत्कालीनतत्त्वज्ञानवासनातो वा नाश इत्यपि वदन्ति ।

---

(१) "संयोगादितो" इति आ-पाठः ।

न्यायवार्त्तिकम्

यदाऽस्य सम्यग्ज्ञानवतो दोषा अपयन्ति अथ दोषाभावे प्रवृत्तिर्निवर्त्तत इति। का पुनरियं प्रवृत्तिः? धर्माधर्मौ, जन्मसाधनत्वात्। नास्मिन् सूत्रे क्रिया प्रवृत्तिशब्देनोच्यते, अपि तु धर्माधर्मौ, तत्साधनभावात्। जन्मसाधनं धर्माधर्मौ, न प्रवृत्तिः, क्रियायाः क्षणिकत्वात्। धर्माधर्मयोस्तु प्रवृत्तिशब्दः प्रवृत्तिसाधनत्वादिति। यौ तावदनागतौ धर्माधर्मौ तयोर्दोषाभावादभावो युक्तः। यौ तौ वर्त्तमानौ तयोर्न युक्तः। किं कारणम्? निर्दोषस्यापि भावात्, निर्दोषोऽप्ययमवतिष्ठते धर्माधर्मयोश्च फलं भुङ्क्ते इति। न। अनागतयोः साधनाभावेनेष्टत्वात्। न ब्रूमो यौ वर्त्तमानौ धर्माधर्मौ तौ दोषाभावान्न भवत इति, अपि तु यावनागतौ तौ कारणाभावान्नोत्पद्येते इति। वर्त्तमानयोः पुनः कार्य्यावसानात् प्रक्षयः, यौ तौ वर्त्तमानौ धर्माधर्मौ तयोर्यदावसानिकं कार्य्यं तेन व्यावृत्तिः। प्रवृत्त्यभावे जन्मापायः, अत्रापि धर्माधर्मयोर्व्यावृत्तयोर्यदन्यच्छरीरं तन्न भवति, न पुनर्वर्त्तमानं न भवतीति। अथ वर्त्तमानस्य कथं निवृत्तिः? संस्कारक्षयात्, यावदस्य स्थितिहेतुः संस्कारो धर्माधर्मसमाख्यातोऽवतिष्ठते तावदवतिष्ठते इति। जन्माभावे दुःखाभाव इति निरायतनस्यानुत्पत्तेः, न हि निरायतनं दुःखमुत्पत्तुमर्हति। एतच्च तदाहुः—यावदात्मनि धर्माधर्मौ तावदायुः शरीरमिन्द्रियं विषयाश्चेति। सोऽयं मिथ्याज्ञानादिकलापेन(१) सर्वतो वियुक्तो विमुक्त इत्युच्यते॥

न्यायवार्त्तिकतात्पर्य्यटीका

दोषाभावे किं भवतीत्यत आह—दोषाभावे इति। पृच्छति—का पुनरियमिति। यदि हि जन्मनः प्रवृत्तिः कारणं स्यात् ततो जन्मनिवृत्त्यै तन्निवृत्तिरर्थ्येत। न पुनरसौ क्षणिका सती आमुष्मिकाय जन्मने कल्पते, अतः किमर्थं निवर्त्त्येत इति भावः। विदिताभिप्राय उत्तरमाह—धर्म्माधर्म्मौ। कस्मात् पुनरुपचारः? इत्यत आह—जन्मसाध्यत्वात्(२)। एतद्विभजते—नास्मिन्निति। उपचारप्रयोजनं दर्शयित्वा निमित्तमाह—धर्म्माधर्म्मयोस्त्विति। वर्त्तमानानागतयोरविशेषेण दोषापायान्निवृत्तिरुक्तेति भ्रान्त्या देशयति—यौ तावदनागताविति। परिहरति—न, अनागतयोरिति। अनागताभिप्रायेणैतदित्यर्थः। यद्येवं वर्त्तमानयोः कुतः प्रक्षय इत्यत आह—वर्त्तमानयोरिति। अस्तु प्रवृत्तेरभावस्ततः किम्? इत्यत आह—प्रवृत्त्यभाव इति। उक्तं विवेकमिहापि योजयति—अत्रापीति। वर्त्तमाननिवृत्तिहेतुं पृच्छति—अथेति। उत्तरं—संस्कारेति। श्रुतिः—तावदेवास्य चिरं यावन्न विमोक्ष्येऽथ संपत्स्ये इति। किं जन्माभावे सिध्यतीत्यत आह—जन्माभाव इति। अत्रैव वृद्धसंप्रतिपत्तिमाह—एतच्च तदाहुरिति। तदेतच्चेति योजना। प्राणनस्य कालभेदावच्छेद आयुः। स्यादेतत्, महाप्रलयेऽपि मिथ्याज्ञानादिना दुःखान्तेनास्ति वियोग

(१) "मिथ्याज्ञानादिना" इति ता-पाठः। (२) "जन्मसाधनत्वा"दिति वार्त्तिकपाठः।

न्यायभाष्यम्

तत्त्वज्ञानं तु खलु मिथ्याज्ञानविपर्ययेण व्याख्यातम। आत्मनि—तावदस्तीति, अनात्मनि—अनात्मेति, एवं दुःखे अनित्ये अत्राणे सभये जुगुप्सिते हातव्ये च यथाविषयं वेदितव्यम्, प्रवृत्तौ—अस्ति कर्म्म, अस्ति कर्मफलमिति, दोषेषु—दोषनिमित्तोऽयं संसार इति, प्रेत्यभावे खलु—अस्ति जन्तुर्जीवः सत्त्वः आत्मा वा, यः प्रेत्य भवेदिति, निमित्तवज्जन्म, निमित्तवान् जन्मोपरम इत्यनादिः प्रेत्यभावोऽपवर्गान्त इति, नैमित्तिकः सन् प्रेत्यभावः प्रवृत्तिनिमित्त इति, सात्मकः सन् देहेन्द्रियबुद्धिवेदनासन्तानोच्छेदप्रतिसन्धानाभ्यां प्रवर्त्तत इति, अपवर्गे(१) शान्तः खल्वयं सर्वविप्रयोगः सर्वोपरमोऽपवर्गः, बहु च कृच्छ्रं घोरं पापकं लुप्यत इति कथं बुद्धिमान् सर्वदुःखोच्छेदं सर्वदुःखासंविद(२)

न्यायवार्त्तिकम्

तत्त्वज्ञानं तु खलु मिथ्याज्ञानविपर्य्ययेण व्याख्यातम्। स्वरूपतस्तु यथाव्यवस्थितपदार्थाधिगतिरित्युच्यते। कस्मात पुनरयं ज्ञाता सुखदुःखे जहाति? न पुनः सुखमादाय दुःखं जहातीति?। विवेकहानस्याशक्यत्वात्। न हि विवेकहानं शक्यं कर्तुम्, अतः सुखमुपभोक्तुकामेन दुःखमपि भोक्तव्यम्। दुःखं वा जिहासता सुखमपि हातव्यम्, सविषान्न-

न्यायवार्त्तिकतात्पर्य्यटीका

इति तत्रापि मुक्तिप्रसङ्ग इत्यत आह—सोऽयं मिथ्याज्ञानादिनेति। सर्व्वत इति। तृतीयार्थे तसिः सर्व्वेणेति। न च प्रलयावस्थायां सर्व्वेण वियोगः, कर्म्माविद्यावासनयोरविनाशात्। मुक्तौ तु तयोरपि विनाशः। कर्म्मवासना सर्व्वकार्य्याणामुत्पादिकाऽवस्थापिका च, तन्निवृत्तौ शरीरादिवत् तत्त्वज्ञानसंस्कारस्यापि प्रलय इत्यशेषविशेषगुणविमुक्तो मुक्त इत्युच्यत इति सिद्धम्।

स्यादेतत्, तत्त्वज्ञानात् मिथ्याज्ञानाभाव इत्युक्तम्। किं पुनस्तत्त्वज्ञानमित्यत उक्तं भाष्यकृता—तत्त्वज्ञानं त्विति। तदनुभाष्य सर्व्वेषां ज्ञानानां भाष्योक्तानामनुगतमेकं स्वरूपमाह—स्वरूपतस्त्विति। चोदयति—कस्मादिति। नो खल्वयं प्रेक्षावतां समाचारो यद् दुःखभिया सुखपरित्याग इति, अपि तु सुखं दुःखाद्विभियोपाददते दुःखं च वर्जयन्ति। न हि मृगाः सन्तीति शालयो नोप्यन्ते, भिक्षुकाः सन्तीति स्थाल्यो नाधिश्रीयन्त इति। उत्तरम्—विवेकहानस्येति। यद्यपि सुखदुःखे भिन्ने, तथाप्यनित्यत्वकृतकत्ववत् परस्परानुषक्ते इति न खलु सुखस्य केवलस्योपादानं दुःखस्य वा केवलस्य परिवर्ज्जनं शक्यमित्यर्थः। कः पुनरयमनु-

(१) "अपवर्गः" ज-आ। (२) "संविदपवर्गम्" वि-टि-ज।

न्यायभाष्यम्

मपवर्गं न रोचयेदिति, तद्यथा मधुविषसम्पृक्तान्नमनादेयमिति, एवं सुखं दुःखानुषक्तमनादेयमिति ॥ २ ॥

त्रिविधा चाऽस्य शास्त्रस्य प्रवृत्तिः,—उद्देशो लक्षणं परीक्षा चेति। तत्र

न्यायवार्त्तिकम्

वदिति। सुखं दुःखानुषक्तमनादेयमिति। अनुषङ्गोऽविनाभावः, यत्रैकं तत्रेतरदिति। समाननिमित्तता वानुषङ्गः, यान्येव सुखसाधनानि तान्येव दुःखसाधनानीति। समानाधारता वाऽनुषङ्गः, यत्र सुखं तत्र दुःखमिति। समानोपलभ्यता वानुषङ्गः, येन सुखमुपलभ्यते तेन दुःखमपीति ॥ २ ॥

त्रिविधा चास्य शास्त्रस्य प्रवृत्तिरिति भाष्यम्। प्रवृत्तेस्त्रैविध्यं कुतः? अर्थस्य तथा-

न्यायवार्त्तिकतात्पर्य्यटीका

षङ्गो यतो विवेकहानमशक्यमित्यत आह—अनुषङ्गोऽविनाभावः। ततस्वरूपमाह—यत्रैकं सुखं वा दुःखं वा, तत्रेतरत् सुखं वा दुःखं वा(१)। तदनेनानित्यत्वकृतकत्वयोरिव सुखदुःखयोरविनाभावो दर्शितः, न चाविनाभावो विना सम्बन्धादिति तत्सिद्धये सम्बन्धविकल्पानाह—समाननिमित्तता वा अनुषङ्गोऽविनाभावः, वाशब्दश्च वक्ष्यमाणसम्बन्धान्तरापेक्षया। अत्र च शरीराद्यपेक्षया समाननिमित्तता, न तु धर्म्माधर्म्मापेक्षया, तयोरसाधारण्यादिति मन्तव्यम्। तयोरविनाभावसिद्ध्यर्थं सम्बन्धान्तरमाह—समानाधारता वा। अपरं सम्बन्धान्तरमाह—समानोपलभ्यता वा। मनोगोचरत्वमुभयोः, ततश्च सिद्धोऽविनाभावापरनामाऽनुषङ्ग इति। यत्रैकं तत्रेतरदिति वा—यत्र यस्मिन्निमित्ते सतीति, वा यत्राधार इति वा यत्रोपलब्धिसाधने सतीति व्याख्येयम्। इति सूत्रसमाप्तिं सूचयति ॥ २ ॥

तदेवं प्रमाणादिपदार्थतत्त्वज्ञानस्य निःश्रेयससम्बन्ध उक्तः परीक्षितश्च। तत्रैतत् स्यात्—स्वपदेभ्यः प्रमाणादयः पदार्थास्तत्त्वतो ज्ञाता यथार्थं मिथ्याज्ञाननिवृत्तिक्रमेणापवर्गे उपयोक्ष्यन्ते, कृतमुपरितनेन प्रबन्धेन इत्यत उक्तं भाष्यकृता—त्रिविधा चास्येति। न नामधेयमात्रात् प्रमाणादीनां तत्त्वज्ञानं

वृत्तिः

यद्यपि दुःखापायान्नाऽपवर्गः, किन्तु स एव सः, तथाप्यभेद एव तत्र पञ्चम्यर्थः। अपवर्गपदं वा तद्व्यवहारपरम्। अनन्तरपदेन जन्मान्तरमेव परामृश्यत इति तु न व्याख्यानम्, दुःखपदवैयर्थ्यापत्तेः। दुःखानुत्पत्तेश्चरमदुःखध्वंसप्रयोजकत्वं कल्प्यत इत्याशयेनेदमित्यपि कश्चित् ॥ २ ॥

इति न्यायसूत्रवृत्तौ सप्रयोजनाभिधेयप्रकरणम् ॥ १ ॥

(१) "तत्रेतरत्—दुःखं वा सुखं वा" इत्येवं पाठ एव भवितुमुचितः।

न्यायभाष्यम्

नामधेयेन पदार्थमात्रस्याऽभिधानमुद्देशः। तत्रोद्दिष्टस्य तत्त्व(१)व्यवच्छेदको धर्म्मो लक्षणम्। लक्षितस्य यथालक्षणमुपपद्यते न वेति प्रमाणैरवधारणं परीक्षा। तत्रो-

न्यायवार्त्तिकम्

भावात्। नामी पदार्था वक्त्रा त्रेधा व्यवस्थाप्यन्ते एवं भवतेति, किन्त्वर्थ एवायं तथाभूतो येन त्रेधा भवतीति। नामधेयेन पदार्थमात्राभिधानमुद्देश इत्ययुक्तम्, घ्राणादिसूत्रव्याघातात्। "घ्राणरसनचक्षुस्त्वक्श्रोत्राणीन्द्रियाणी"ति लक्षणमुक्तम् (२), न चेदं नामधेयेनोद्देशमात्राद्भिद्यते। मात्रग्रहणसामर्थ्यादप्रसङ्गः पदार्थमात्राभिधानमित्युक्तम्। न च घ्राणादीनां पदार्थाभिधानमात्रत्वं

न्यायवार्त्तिकतात्पर्य्यटीका

भवति, अपि तु लक्षणपरीक्षाभ्याम्, इत्यस्ति प्रबन्धस्योत्तरस्योपयोग इति भाष्यार्थः। तदेतद्भाष्यमनुभाष्य पृच्छति—प्रवृत्तेरिति। यदि पुरुषकल्पनामात्रात् त्रैविध्यमथानन्त्यमेव कस्मान्न भवति, सर्व्वत्र तस्य सुलभत्वादिति भावः। उत्तरम्—अर्थस्य तथाभावात्। अर्थस्य प्रयोजनस्य साक्षाच्छास्त्रकार्य्यस्य तत्त्वज्ञानलक्षणस्य तथैव त्रिविधतयैव शास्त्रप्रवृत्त्या भावात्। तथा हि—लक्षणं नाम व्यतिरेकिहेतुवचनम्, तद्धि समानासमानजातीयेभ्यो विभिद्य लक्षणं व्यवस्थापयति, न चास्य धर्म्मि(३)दर्शनमन्तरेण पक्षधर्म्मता सिध्यतीति तदुपदर्शनाय नामधेयमात्रेण धर्म्मिणामुद्देशः। यद्यपि च प्रतिलक्षणमुद्दिष्टा एव धर्म्मिणः, तथाऽपि शास्त्राभिसम्बन्धपरादपि वाक्यात् समधिगम्यन्त इत्युद्देशोऽप्युक्तः। न चापरीक्षितो हेतुर्व्यतिरेकी चतूरूपो भवतीति परीक्षाऽप्यवश्यं कर्तव्या, तस्मात्तत्त्वज्ञानस्यार्थस्य तथाभावात् त्रैविध्यमिति, तदेव विभजते—नामी पदार्था इति। किं त्विति। अर्थः तत्त्वज्ञानं तथाभूतं येनार्थेन हेतुना शास्त्रस्य प्रवृत्तिस्त्रेधा भवति। उद्देशस्वरूपप्रतिपादनपरं भाष्यमनुभाष्याक्षिपति—नामधेयेनेति। परिहरति—मात्रग्रहणसामर्थ्यादिति। यद्यपि प्रमाणादिशब्दा अपि कारकशब्दा एव, तथाऽप्युद्देशसमये तदर्थानां सदपि कारकत्वमविवक्षितम्, अपि तु प्रातिपदिकार्थमात्रम्। घ्राणादिसूत्रे तु लक्षणपरे कारकत्वं विवक्षितम्, अन्यथा लक्षणत्वायोगादित्यदोषः। अत्र यद्यपि सूत्रकारेण संशयप्रमाणप्रमेयेषु परीक्षा साक्षात् कृता, न प्रयोजनादिषु, तथाऽपि तत्करणादेव प्रयोजनादिपरीक्षाऽपि सूचिता सूत्रकारेणेति त्रिविधेत्युक्तम्। अत एव भाष्यकारः सर्व्वत्रैव परीक्षामावर्त्तयत्। स्यादेतत्। विभागपरमेतत् सूत्रमिति वक्ष्यति, न च विभागो न्यूनाधिकसंख्याव्यवच्छेदार्थं एकं किंचिदुपसंग्राहकमन्तरेण, न च प्रमाणत्वादन्यत्तदुपसंग्राहकम्, न चेदमलक्षितमुपसंगृह्णाति न चैतत् सूत्रमस्य लक्षणपरम्, विभागपरत्वादिति शङ्कानिराकरणपरं भाष्यं तत्रोद्दिष्टस्येति, तस्यार्थः—यद्यपि विभागपर-

(१) "अतत्त्व" इति वि-ज-चा। (२) १।१।१२ सूत्रं द्रष्टव्यम्। (३) चादर्शे तु "धर्म्म" इति।

न्यायभाष्यम्

द्दिष्टस्य प्रविभक्तस्य लक्षणमुच्यते, यथा—प्रमाणानां प्रमेयस्य च। उद्दिष्टस्य लक्षितस्य च विभागवचनम्, यथा—छलस्य 'वचनविघातोऽर्थविकल्पोपपत्त्या च्छलम्', 'तत्त्रिविधम्' (१।२।१०-११) इति। अथोद्दिष्टस्य विभागवचनम्—

(सू)—प्रत्यक्षानुमानोपमानशब्दाः प्रमाणानि ॥ ३ ॥

न्यायवार्त्तिकम्

कारकशब्दत्वात्, कारकशब्दा एते प्रमाणादीति, तस्मान्नोद्देशप्रसङ्गः। उद्दिष्टस्य विभागो द्वेधा भवति—लक्षितस्यालक्षितस्य। लक्षितस्य छलादेः, अलक्षितस्य प्रमाणादेरिति। अथोद्दिष्टविभागद्वारेण सूत्रम्—प्रत्यक्षानुमानोपमानशब्दाः प्रमाणानीति।

सूत्रार्थो निगदेनैव व्याख्यातः। उद्दिष्टविभागानर्थक्यम्, व्याघातात्। त्रिविधा चास्य शास्त्रस्य प्रवृत्तिरित्युक्तम्, उद्दिष्टविभागश्च न त्रिविधायां शास्त्रप्रवृत्तावन्तर्भवतीति। तस्मादुद्दिष्टविभागो न युक्तः। न, उद्दिष्टविभागस्योद्देश एवान्तर्भावात्। उद्दिष्टविभाग उद्देश एवान्त-

न्यायवार्त्तिकतात्पर्य्यटीका

मेतत् सूत्रम्, तथाऽपि प्रमाणपदसमभिव्याहृतं सत् सामर्थ्यात् प्रमाणत्वमपि लक्षयतीति। तथा हि—प्रमीयतेऽनेनेत्यस्य वाक्यस्यार्थे प्रमाणपदप्रयोगः, प्रमा च स्मृतेरन्या अर्थाव्यभिचारी स्वतन्त्रः परिच्छेदः। तस्माद्विभागपरादपि सूत्रात् प्रतीयमानं प्रमाणसामान्यलक्षणमपेक्षितं संगृहीतमिति प्रमाणत्वोपगृहीतानां प्रत्यक्षादीनां युक्तो विभागः। तथा च विभागपरत्वेन साक्षात् सामान्यलक्षणानभिधानाद् विभक्तस्य लक्षणमुच्यत इत्युक्तम्, तच्चेह। विशेषलक्षणमिन्द्रियार्थेत्यादि। तदेतद्भाष्यं व्याचष्टे—उद्दिष्टस्येति। लक्षणालक्षणमात्रविवक्षया लक्षितस्यालक्षितस्येत्युक्तम्। तत्स्थले सामान्यतः प्रमाणेषु प्रमेयेषु विशेषत इति गमयितव्यम्।। अत्र भाष्यम्—अथोद्दिष्टस्य विभागवचनमिति। अस्यार्थः—उच्यतेऽनेनेति वचनं सूत्रं विभागस्य। अथेति त्रिविधप्रवृत्तिव्युत्पादनानन्तरं विभ[illegible]र्भा प्रतिपादनम्। न च विवेकः स्वरूपत उपयुज्यतइत्यत आह—अथोद्दिष्टविभागद्वारेणेति। नात्र विभागमात्रं विवक्षितमपि तु तद्द्वारेण न्यूनाधिकसंख्याव्यवच्छेदस्तत्त्वज्ञानाङ्गमित्यर्थः। अव्याख्याने हेतुमाह—सूत्रेति। चोदयति—उद्दिष्टविभागानर्थक्यम्। त्रिविधा चास्य शास्त्रस्य प्रवृत्तिरित्यस्यानर्थक्यम्। अनर्थमर्थविपर्य्ययं कारयति कीर्त्तयतीत्यनर्थकं तस्य भावस्तत्त्वम्, कस्मात्? व्याघातात्। व्याघातमेव स्फोरयति—त्रिविधा चास्य शास्त्रस्येति। परिहरति—नोद्दिष्टेति। परस्परं विभक्ताः नामधेय-

न्यायभाष्यम्

अक्षस्याऽक्षस्य प्रतिविषयं वृत्तिः प्रत्यक्षम। वृत्तिस्तु—सन्निकर्षः, ज्ञानं वा।

न्यायवार्त्तिकम्

भवतीति। कस्मात्? लक्षणसामान्यात्। समानं लक्षणं नामधेयेन पदार्थाभिधानमुद्देश इति। किं पुनर्विभागेन प्रयोजनम्? नियमः। यदि प्रत्यक्षानुमानोपमानशब्दाः प्रमाणानीति विभागो न क्रियेत, नियमो न गम्यते चत्वार्य्येव प्रमाणानीति। लक्षणतश्चतुष्ट्वाधिगतिरिति चेत्? न, लक्षणस्येतरव्यवच्छेदहेतुत्वात्। स्यादेषा बुद्धिः लक्षणतः प्रमाणचतुष्ट्वं गम्यत इति, यस्माच्चतुर्णां लक्षणमुक्तमिति। न, लक्षणस्येतरव्यवच्छेदहेतुत्वात्। लक्षणं खलु लक्ष्यं समानासमान-जातीयेभ्यो व्यवच्छिनत्ति, नियमं तु न शक्नोति कर्तुम् अन्यार्थत्वादिति। अन्यासम्भवस्य ततोऽन-धिगतेः। न हि लक्षणतोऽन्यासम्भवोऽधिगम्यते। ततश्चतुर्णामनभिधाने चतुर्णां लक्षणोपदेशात् संशयः स्यात्—किं विद्यमानानि न लक्षितानि आहोस्विदविद्यमानानीति। तस्मात् संशय-निवृत्त्यर्थं युक्तो विभागोद्देश इति।

अक्षस्याक्षस्य प्रतिविषयं वृत्तिः प्रत्यक्षमिति। अयं च सूत्रविवक्षायामव्ययीभावः समासः। अन्यथा तु वस्तुनिर्देशो न समासः, समासे हि अक्षस्येति षष्ठी न श्रूयेत। कः पुनरयं समासः? प्रादिसमासोऽयं द्रष्टव्यः प्रतिगतमक्षं प्रत्यक्षमिति, यथा—

न्यायवार्त्तिकतात्पर्य्यटीका

मात्रेणोद्दिश्यन्ते इत्युद्देशेऽन्तर्भावात्। तेनायमर्थो भवति सामान्येनोद्दिष्टस्य विभागवचनं विशेषेणोद्देश इति। विभागप्रयोजनं पृच्छति—**किं पुनरिति।** उत्तरम्—**नियमः।** तद्विभजते—**यदीति।** पुनश्चोदयति—**लक्षणत इति।** प्रमाणलक्षणप्रवृत्तो यच्चत्वार्य्येव लक्षयति तत एवाधिगम्यते न न्यूनाधिकानि प्रमाणानीत्यर्थः। परिहरति—**लक्षणस्येति।** आक्षेपं विभजते—**स्यादेषेति।** परिहारं विभजते—**न, लक्षणस्येति।** अन्यपरमपि वाक्यं तदेवार्थलभ्यं स्वीकरोति यत्तेनापेक्षितम्, तदेव चापेक्षितं येन विना तदर्थो नोपपद्यते, न च प्रत्यक्षादीनां समानासमानजातीयस्य व्यवच्छेदे पञ्चमाद्यभाव उपयुज्यते लक्षणकरणप्रवृत्तस्य क्वचिदकरणं न तदभावे प्रमाणम्, सतोऽप्यनुपयोगेनाकरणोपपत्तेः। तदेतदाह—**अन्यासंभव-स्येति।** विभागोद्देशस्य पुनरनन्यपरत्वादन्याभावनिश्चयो भवतीत्युपसंहरति—**तस्मादिति।**

अक्षस्याक्षस्येति भाष्यमनुभाष्य तात्पर्य्यमाह—**अयं च सूत्रविवक्षायामिति।** अक्षमक्षं प्रति वर्त्तत इति विगृह्याव्ययीभावे कृते सर्वेन्द्रियावरोधो भवति। ननु यदीदृशो विग्रहः कस्मात् पुनर्भाष्यकारेणाऽक्षस्याक्षस्येति विगृह्यत इत्यत आह—**अन्यथा तु वस्तुनिर्देश इति।** अर्थमात्रमनेन प्रतिपाद्यते न पुनः समास इत्यर्थः। अथ कस्मात् समास एव तेन विग्रहेण न

न्यायभाष्यम्

यदा सन्निकर्षस्तदा ज्ञानं प्रमितिः, यदा ज्ञानम्, तदा हानोपादानोपेक्षाबुद्धयः फलम् ।

न्यायवार्त्तिकतात्पर्य्यटीका

प्रतिपाद्यत इत्यत आह—समासे हि अक्षस्येति षष्ठी न श्रूयेतेति । यदि सूत्रगतस्य प्रत्यक्ष-पदस्याव्ययीभावः समासोऽन्यत्र पुनरस्य कः समास इति पृच्छति—कः पुनरिति ? उत्तरम्—प्रादिसमास इति । तथा हि—प्राप्तापन्नालंपूर्वगतिसमासेषु परवल्लिङ्गताप्रतिषेधादभिधेयलिङ्गो-पादानात् प्रत्यक्षोऽर्थः प्रत्यक्षा बुद्धिः प्रत्यक्षं ज्ञानमित्यभिधेयलिङ्गता सिद्धा भवति । क्वचित् पाठः समासे हि प्रत्यक्षस्येति षष्ठी न श्रूयत इति । सूत्रविवक्षयाऽव्ययीभाव इत्युक्तम्, तत्र शङ्कते—कस्मात्पुनः सूत्रविवक्षयेत्युच्यते, यावता सर्वत्रैव कस्मादव्ययीभावो न भवतीति । तत्रेदमुपतिष्ठते—समासे हि अव्ययीभावसमासे हि, सर्वत्र प्रत्यक्षस्येति षष्ठी न श्रूयेतेति । व्युत्पत्तिनिमित्तमात्रं चेदं प्रत्यक्षशब्दस्य, न प्रवृत्तिनिमित्तम् । तस्मान्नेन्द्रियगतैर्गुणसामान्यादिभि-र्व्यभिचारः, प्रवृत्तिहेतुस्त्वर्थसाक्षात्कारिज्ञानजनकत्वम्, तन्निमित्तः खल्वयं प्रत्यक्षशब्दस्तत्र तत्र लौकिकपरीक्षकैः प्रयुज्यते । मयूरशब्दो मयूरत्वसामान्यनिबन्धनः कासुचिदेव पतत्रिव्यक्तिषु वर्त्तमानः, मह्यां रौतीत्यन्वाख्यायते । तदिदं प्रत्यक्षमुद्दिष्टमपि सत् प्रमाणतदाभाससंकीर्णमिति तद्विवेकाय लक्षणमुपयुज्यते । यदि तूद्देशपदं तद्विवेचयेत् कृतं तर्हि लक्षणप्रयत्नेन । विग्रहवाक्य-गता च वृत्तिर्भाष्यकृता व्याख्याता । वृत्तिस्तु सन्निकर्षो ज्ञानं वा । वृत्तिरिति हि व्यापारः । स तु व्यापार उच्यते यः कारकैः फले जनयितव्ये चरमभावी धर्म्मभेदः फलोत्पादानुकूलोऽपेक्ष्यते, यथा पटे जनयितव्ये तन्तुभिश्चरमभाविनः संयोगभेदाः, स्वर्गे जनयितव्ये यागेनापूर्वमात्मधर्म्मः, तथेहापि इन्द्रियादिना प्रमाणेन प्रमायां फले प्रवृत्तेन तदुत्पादनानुकूलः सन्निकर्षो ज्ञानं वा चरम-भावी धर्म्मभेदोऽपेक्ष्यत इति भवति व्यापारः, स एव वृत्तिरित्याख्यायते । व्यवस्थां दर्शयति—यदा सन्निकर्षो व्यापार इन्द्रियादेः प्रमाणस्य तदा ज्ञानमालोचनं वा सविकल्पकं वा साक्षात्कारिज्ञानं प्रमितिः फलम्, उभयस्यापीन्द्रियव्यापारात् सन्निकर्षापराभिधानादुत्पत्तेः । न चान्तरालिकेन निर्विकल्पकेनेन्द्रियव्यापारविच्छेद इति प्रत्यक्षव्याख्यानावसरे निवेदयिष्यते । यदा ज्ञानमालोचनं वा विकल्पो वा व्यापार इन्द्रियादीनां तदा हानोपादानोपेक्षाबुद्धयः फलम् । तत्रोपादेयमिदं सलिलमिति बुद्धिरनागतोपादानविशिष्टं सलिलमालम्बमाना न साक्षात्कारवती, सलिलमात्रसाक्षात्कारस्तु स्यात् । न च तन्मात्रमस्य फलमपि तूपादेयता सा च परोक्षा अनागतत्वात् । तस्मादुपादीयतेऽनेनेत्युपादानम्, उपादानं चासौ बुद्धिश्चेत्युपादानबुद्धिः, तत्तोयालोचनमथ तोयविकल्पोऽथ च तज्जातीये दृष्टचरपिपासोपशमनहेतुभावस्य स्मृतिबीज-

न्यायभाष्यम्

अनुमानं—मितेन लिङ्गेन लिङ्गिनो(१)ऽर्थस्य पश्चान्मानमनुमानम् ।

न्यायवार्त्तिकम्

उपगतो गोभिः "उपगु"रिति । एवमनुमानादिषु द्रष्टव्यम्, मितेन लिङ्गेन लिङ्गिनोऽर्थस्य पश्चान्मानमनुमानमिति न युक्तम्, फलाभावात् । एतस्मिन् व्याख्यानेऽफलमनु-

न्यायवार्त्तिकतात्पर्य्यटीका

संस्कारोद्बोधः, अथ तस्य स्मरणम्, अथ लिङ्गपरामर्शः तज्जातीयं चेदमिति, तदिदं लिङ्गपरामर्शविज्ञानं साक्षात्कारवत् । लिङ्गे विनश्यदवस्थव्याप्तिस्मरणसहकारिदृश्यमानस्य सलिलस्य पिपासोपशमनहेतुतया अनुमानमुखेनोपादानबुद्धिरुच्यते । अनुमिमानः स्वरूपं तथाभावं तदुपादित्सुः समीहमानस्तदुपादत्ते । न च व्याप्तिस्मृतिविच्छिन्नमालोचनं वा विकल्पो वा न लिङ्गपरामर्शज्ञानहेतुरिति वाच्यम्, तदुद्बोधितसंस्कारद्वारेण व्याप्तिस्मरणे परामर्शे च तस्य तदानीमसतोऽपि कारणत्वात् । न च खलु कृषिकर्म्म शस्याधिगमसमये समस्ति, न च यागादिकं स्वर्गाद्युत्पत्तिसमये, न च त्रिवृत्कषायपानं विरेकसमये । आन्तरालिककार्य्यपरंपरया तु तत्तत्कार्य्यसाधनत्वं सर्वत्र समानम् । स्यादेतत्, का पुनरियं पिपासोपशमनशक्तिस्तोयस्य, याऽनुमानगोचरः ? न तावन्मीमांसाकवदतीन्द्रिया शक्तिरस्माभिरभ्युपेयते, किन्तु कारणानां स्वरूपं वा सहकारिसाकल्यं वा । तत्र स्वरूपं हेतूनां प्रत्यक्षमेव, सहकारिणां प्रत्यक्षाप्रत्यक्षाणां साकल्यं कार्य्यसमुत्पादव्यञ्जनीयम्, न तु तत्तोयरूपमात्रदर्शनाच्छक्यानुमानम्, तत्किमपरमवशिष्यते यदनुमानस्य गोचर इति ? अत्रोच्यते—न वयमतीन्द्रियं सामर्थ्यमातिष्ठामहे, नापि सहकारिसाकल्यानुमानम्, किन्तु स्वरूपस्य कार्य्यसंबन्धिताम् । न चेयं स्वरूपमेव, इहस्थस्येव नारिकेलद्वीपादागतस्यापि बहिर्दर्शनमात्राद् ग्राहकत्वावगमप्रसङ्गात् । तस्मात् कार्य्योपहितं स्वरूपमनुमेयम् । इदमेव चास्य कार्य्योपधानं यत्कार्य्योत्पादात् पूर्वमवश्यं भावः आनन्तर्य्यनियमः । न च तज्जातीयस्य दृष्टचरस्य तथाभावदर्शनेऽपि दृश्यमानस्य तोयस्य तद् दृष्टं भवति येन तत्र स्मर्य्येत । न खलूज्जयिन्यामुपलब्धस्य सौधस्य पाटलिपुत्रे स्मरन्त्यभ्रान्ताः । उपादानेन हानं व्याख्यातम् । न चोपेक्षाऽनुपादानतया हानपक्षे निःक्षिप्ता, अहानतयोपादानपक्षनिःक्षेपप्रसङ्गात् । उपादानप्रयत्नाप्रसवहेतुतया नोपादानमिति चेत, किमियं हानप्रयत्नमपि प्रसूते यतो हानं स्यात् । तस्माद् या नोभयप्रयत्नप्रसवहेतुः सा उपेक्षाबुद्धिस्तृतीया लोकप्रसिद्धेति सिद्धम् । प्रत्यक्षपदव्युत्पत्तिं दर्शयित्वाऽनुमानादिपदेष्वपि व्युत्पत्तिं दर्शयति—एवमनुमानादिष्वपि इति । तत्रेदमनुमानव्युत्पत्तिपरं भाष्यं मितेन लिङ्गेन लिङ्गिनोऽर्थस्य पश्चान्मानमनुमानमिति । मितिर्मानं तथा च लिङ्गदर्शनोद्बोधितसंस्कारजा स्मृतिर्विभिन्ना, तस्याः मितेरन्यत्वेन लोकसिद्धत्वात् । मितेनेत्य-

(१) 'लिङ्गिन' इति ल-ज-ग-पुस्तकेषु नास्ति ।

न्यायवार्त्तिकम्

मानमिति । किं कारणम् ? अर्थस्य मितत्वात् । नैष दोषः । मितेन लिङ्गेन अर्थस्य पश्चान्मानं भवति यत इत्यर्थः । भवतु वाऽयमर्थो लैङ्गिकी प्रतिपत्तिरनुमानमिति । ननु च फलाभावो दोष उक्तः ? न दोषः, हानोपादानोपेक्षाबुद्धीनां फलत्वात् । सर्वं च प्रमाणं स्वविषयं प्रति भावसाधनम्, प्रमितिः प्रमाणमिति । विषयान्तरं प्रति करणसाधनम्, प्रमीयतेऽनेनेति प्रमाणम् । यदि भावसाधनः प्रमाणशब्दः, किं फलम्, विषयस्याधिगतत्वात् ? उक्तं

न्यायवार्त्तिकतात्पर्य्यटीका

ज्ञानसन्देहविपर्य्यासा लिङ्गविषया निरस्ता भवन्ति । तथाऽपि मितेनार्थस्य ज्ञानं शब्देऽप्यस्तीत्यत (१) उक्तं—**लिङ्गेनेति** । अपक्षधर्म्मतां निवर्त्तयति—**लिङ्गिन इति** । धर्म्मिणः प्रत्यक्षगोचरत्वात् कृतमनुमानेनेत्यत उक्तम्—**अर्थस्येति** । अर्थ्यते प्रार्थ्यते इत्यर्थः, न हि धर्म्मी स्वरूपेणार्थ्यते, किन्तु जिज्ञासितधर्म्मविशिष्ट इत्यर्थः । पश्चादित्यनुशब्दस्य व्याख्या । तदेतद्भाष्यमनुभाष्य आक्षिपति—**मितेति** । कस्मादयुक्तम् इत्यत आह—**फलाभावादिति** । एतद्विभजते—**एतस्मिन्निति** । अनुमानज्ञानस्य फलावस्थायामेवार्थो मित इति मेयं नावशिष्यते यत्रैतत् सिद्धं सत्प्रमाणं भवेदित्यर्थः । तत्र फलविशेषपक्षमास्थी(२) 'यत' इत्यध्याहृत्य समाधत्ते—**नैष दोष इति** । अनध्याहारेणाप्यदोष इति समाधानान्तरमाह—**भवतु वेति** । पूर्वोक्तदोषं स्मारयति—**ननु चेति** । परिहरति—**न दोष इति** । अथ कस्माद्धानादिविषयं प्रमाणमुच्यते, न स्वगोचरं प्रति ? इत्यत आह—**सर्वं च प्रमाणमिति** । यद्यपि वह्निविज्ञानस्यानुमानस्य सतो हेयत्वादिकं विषयः, तत्रैव तस्य प्रामाण्यात् । अथ प्रमाणफलयोर्भिन्नविषयत्वेन विप्रतिपत्त्या प्रमाणफलभावायोगात् । न हि पनसविषयेण परशुना खदिरे द्वैधीभावो भवति । तथाऽपि फलान्तरानपेक्षमुत्पत्तावेव विज्ञाने यत्प्रकाशते स तस्य विषयः । तत्र तु न प्रमाणम्, फलान्तराजनकत्वात्, अपि तु फलमेवेत्यर्थः । विषयान्तरं प्रति तत्प्रमाणमित्याह—**विषयान्तरमिति** । देशयति—**यदीति** । भावसाधनश्चेत् प्रमाणशब्दः फलमस्यार्थो न तु फलं स्वविषये करणम्, तज्ज्ञानस्य तज्जनकेनैव कृतत्वात् । न च स्वविषयादन्यदस्य विषयान्तरं सम्भवति, अतिप्रसङ्गादिति भावः ।

वृत्तिः

अथ यथोद्देशं लक्षणस्याऽपेक्षितत्वात् प्रथमोद्दिष्टं प्रमाणं लक्षयति विभजते च—**प्रत्यक्षेत्यादि** । अत्र तद्वति तत्प्रकारकत्वरूप-प्रकर्ष-विशिष्टज्ञानं प्रशब्दविशिष्टेन माधातुना प्रत्याय्यते, तत्करणत्वं प्रमाणत्वम् । ज्ञानं चाऽत्राऽनुभवो विवक्षितः, तेन

(१) 'शब्दे तथाप्यस्ती'ति क-पुस्तकपा०. । (२) "आस्थी" आस्थावानित्यर्थः ।

न्यायभाष्यम्

उपमानं—सामीप्यज्ञानं(१)—यथा गौरेवं गवय इति । सामीप्यं(२) तु सामान्ययोगः । शब्दः—शब्द्यतेऽनेनार्थ इत्यभिधीयते ज्ञाप्यते ।

न्यायवार्त्तिकम्

फलं हानादिबुद्धय इति । ज्ञाते सद्भावात् । ज्ञाते खल्वर्थे त्रिधा बुद्धिर्भवति हेयो वोपादेयो वोपेक्षणीयो वेति । केचित्तु सन्निकर्षमेव प्रत्यक्षं वर्णयन्ति, न तन्न्याय्यम्, प्रमाणाभावात् । सन्निकर्ष एव प्रमाणमिति न प्रमाणमस्ति । उभयं तु युक्तम्, परिच्छेदकत्वात् । उभयं परिच्छेदकं सन्निकर्षो ज्ञानं च । एकान्तवादिनस्तु दोष इति ।

सामीप्यमानमुपमानमिति न युक्तम्, उपमानस्यान्यथाव्याख्यानात् । समाख्यासम्बन्धप्रतिपत्तिरुपमानार्थ इत्युक्तम्, (३) इदानीं तूच्यते सामीप्यमानमुपमानमिति व्याघातः ? नास्ति व्याघातः, सामीप्यमानेन समाख्यासम्बन्धप्रतिपत्तेरिष्टत्वात् । यस्मादयमुपयुक्तोपमानो गोदर्शी आगमप्रत्ययाहितस्मृतिपूर्वकं गवा सादृश्यं प्रत्यक्षेण प्रतिपद्य अस्य गवयशब्दः संज्ञेति संज्ञासंज्ञिसम्बन्धं प्रतिपद्यते, तस्मान्न व्याघात इति ।

शब्दविषया प्रतिपत्तिः शाब्दप्रमाणम्, फलं तदेव ।

न्यायवार्त्तिकतात्पर्य्यटीका

परिहरति—उक्तं फलमिति । यद्यपि यत्र फलं सोऽस्यौत्पत्तिको विषयः, तथाऽपि यन्नानेन प्रमाणेन सता हानादिबुद्धयो जनयितव्याः सोऽपि व्यापारेण विषय इति भावः । फलत्व एव हेतुमाह—ज्ञात इति । परोक्षार्थावगाहितया हेयादिबुद्धयः प्रत्यक्षफलं न भवन्ति, भवन्ति त्वनुमानस्येति । नियमवादिनां मतमुपन्यस्य दूषयति—केचित् त्विति । अनियमं रोचयमान आह—उभयं त्विति ।

अनुमानशब्दवत् फलेन निर्वचनीयत्वमुपमानशब्दस्येति मन्वान आक्षिपति—सामीप्येति । समाधत्ते—नास्ति व्याघात इति । नेयमुपमानशब्दस्य फलेन निरुक्तिः, अपि तु प्रमाणेन निरुक्तिरिति न व्याघात इत्यर्थः ।

शब्दविषया प्रतिपत्तिः शाब्दं प्रमाणम् । यत् खलु चैत्र गां बधानेति वाक्यमिदमित्यनुसन्धानात्मकं स्मार्त्तं ज्ञानमुपजायते, तत्पदार्थस्मरणसहकारिविशिष्टार्थविषयं विज्ञानं प्रसूते, तच्छाब्दं

वृत्तिः

स्मृतिकरणे नाऽतिव्याप्तिः । लक्षितानां प्रमाणानां विभागः—प्रत्यक्षानुमानोपमानशब्दा इति । विभागस्योद्देश एवाऽन्तर्भूतत्वादयं विशेषोद्देशः । प्रत्येकलक्षणं तु वक्ष्यते ॥ ३ ॥

इति त्रिसूत्रीवृत्तिः समाप्ता ॥

(१) "सामीप्यमानम्" इति वार्त्तिकसम्मतपाठः । "सारूप्यज्ञानम्" ज-भा० । (२) "सारूप्यम्" ज-भा० ।
(३) १।१।६ सू-भाष्ये ।

न्यायभाष्यम्

उपलब्धिसाधनानि प्रमाणानीति समाख्यानिर्वचनसामर्थ्यात् बोद्धव्यम्। प्रमीयतेऽनेनेति करणार्थाभिधानो हि प्रमाणशब्दः। तद्विशेषसमाख्याया अपि तथैव व्याख्यानम्।

किं पुनः प्रमाणानि प्रमेयमभिसंप्लवन्ते? अथ प्रतिप्रमेयं(१) व्यवतिष्ठन्त इति?

न्यायवार्त्तिकम्

केचित्तु क्रमप्रयोजनं वर्णयन्ति—आदौ प्रत्यक्षग्रहणं प्राधान्यात्। तदनन्तरमनुमानं तत्पूर्वकत्वात्। तदनन्तरमुपमानं तत्साधर्म्यात्। अन्ते शब्दो महाविषयत्वात्। तच्चायुक्तमित्यपरे मन्यन्ते, क्रमाभिधानस्य न्यायप्राप्तत्वात्। न्यायप्राप्तं क्रमाभिधानं क्रमवृत्तित्वाद्वाच इति। महाविषयत्वाच्च शब्दस्यादावभिधानप्रसङ्ग इति। एतच्चायुक्तम्। क्रमवृत्तित्वाद्वाचोऽयुगपदभिधानं युक्तम्, पूर्वापराभिधाने तु न साधनमेतत्। तस्मादन्यो न्यायो वक्तव्यः। स चायं न्यायः—प्रत्यक्षं पूर्वं प्राधान्यादिति। महाविषयत्वादादौ शब्दोपदेश इति न, उभयं महाविषयं शब्दः प्रत्यक्षं च। कथमिति? प्रत्यक्षेणापि सामान्यविशेषतद्वतां ग्रहणम्, शब्देनापि। तत्र किं शब्दस्यादावुपदेशो भवतु आहोस्वित् प्रत्यक्षस्येति? प्रत्यक्षस्येति युक्तम्। किं कारणम्? सर्वप्रमाणानां प्रत्यक्षपूर्वकत्वादिति।

किं पुनरेतानि प्रमाणानि संप्लवन्ते? अथ प्रतिप्रमेयं व्यवतिष्ठन्त इति? उभयथा दर्शनम्, तच्च प्रमाणत इत्यत्रैव(२) दर्शितम्।

न्यायवार्त्तिकतात्पर्य्यटीका

प्रमाणम्। प्रमाणमुक्त्वा फलमस्याह—फलं तदेव। यदा ह्येतत् प्रमाणं तदा वाक्यार्थविज्ञानं फलम्, यदाऽनुमानवद् वाक्यार्थविज्ञानं प्रमाणं तदा हानोपादानादिबुद्धयः फलमित्यर्थः।

अत्र प्रत्यक्षादीनां क्रमोद्देशप्रयोजनं प्रत्येकदेशिमतमुपन्यस्यति—केचित्त्विति। प्रत्यक्षपरा हि प्रमाणान्तरजन्याः प्रमितय इति प्रत्यक्षस्य प्राधान्यम्। यद्यपि किञ्चिदनुमानमनुमानपूर्वकमपि, तथाऽपि प्रायेण प्रत्यक्षपूर्वकम्। उपमानं तु प्रत्यक्षपूर्वकमपि शब्दपूर्वकमेवेत्यस्यानुमानादपकर्षः। स्मरणसहकारिताऽनुमानसादृश्यमुपमानस्यास्तीति अनुमानानन्तरमुद्देशः। अल्पज्ञानाधीनं च बहुज्ञानमित्यल्पविषयप्रत्यक्षाद्युद्देशेभ्यः परो बहुविषयशब्दोद्देश इति। तदेतदेकदेशिमतमेकदेश्यन्तरमतेन दूषयति—तच्चायुक्तमित्यपर इति। अक्लिष्टो हि प्रथमं महाविषयमेव दुरवधारणत्वान्निरूपयति, अल्पविषयं तु क्लिष्टोऽपि शक्तो निरूपयितुम्, अतो महाविषयत्वं प्राथम्यः, एव हेतु; न चरमत्व इत्यर्थः। अनन्तरमतं दूषयति—एतच्चेति। एतावता क्रममात्रं भवेन्न तु तद्विशेषनियम इत्यर्थः। संप्रति विमर्षपूर्वं स्वाभिमतं क्रमनियम(३)हेतुमवधारयन्नेव पूर्वैकदेशिमतमपाकरोति तस्मादन्य

(१) "प्रमेयम्" इति ज-ल-ग-श्रा। (२) "प्रमाणतोऽर्थ प्रतिपत्तौ" इत्यादिभाष्यव्याख्यानावसरे वार्त्तिककृता स्वयमेव १२ पृः ६ पङ्क्तितः कियता ग्रन्थेन दर्शितम्। (३) आदर्शे—'क्रममनियम' इत्येवं पाठः।

न्यायभाष्यम्

उभयथा दर्शनम, 'अस्त्यात्मा'इत्याप्तोपदेशात्प्रतीयते, तत्राऽनुमानम—'इच्छाद्वेष-प्रयत्नसुखदुःखज्ञानान्यात्मनो लिङ्गम (१।१।१०)' इति, प्रत्यक्षं—युञ्जानस्य योगसमाधि-जमात्ममनसोः संयोगविशेषादात्मा प्रत्यक्ष इति। अग्निराप्तोपदेशात्प्रतीयते 'अत्राऽग्निः' इति, प्रत्यासीदता धूमदर्शनेनानुमीयते, प्रत्यासन्नेन च प्रत्यक्षत उपलभ्यते। व्यवस्था पुनः—'अग्निहोत्रं जुहुयात् स्वर्गकामः' इति, लौकिकस्य स्वर्गे न लिङ्गदर्शनम्, न प्रत्यक्षम्। स्तनयित्नुशब्दे श्रूयमाणे शब्दहेतोरनुमानम्, तत्र न प्रत्यक्षम्, नागमः। पाणौ प्रत्यक्षत उपलभ्यमाने नानुमानम्, नागम इति।

सा चेयं प्रमितिः प्रत्यक्षपरा। जिज्ञासितमर्थमाप्तोपदेशात्प्रतिपद्यमानो लिङ्गदर्शनेनापि

न्यायवार्त्तिकम्

सेयं प्रमितिः (१) प्रत्यक्षपरेति। प्रत्यक्षेणाधिगतेऽर्थे आकाङ्क्षाभावात् तत्परा। यथायं लौकिकोऽमुत्राग्निरित्याप्तोपदेशादग्निं प्रत्याहितप्रत्ययस्तं देशं गच्छति। प्रत्यासीदन् पुनर्धूमविशेषणं

न्यायवार्त्तिकतात्पर्य्यटीका

इति। विमर्षनिमित्तां विप्रतिपत्तिमाह—प्रत्यक्षं पूर्वं प्राधान्यादित्येकः, महाविषयत्वाच्चाद्यो शब्दोपदेश इत्यपरः। तत्र महाविषयत्वमनैकान्तिकं सन्नागमस्यैव पूर्वोपदेशं गमयतीत्याह—उभयमिति। पृच्छति—कथमिति। उत्तरं—प्रत्यक्षेणापीति। महाविषयत्वलक्षण-साधारणधर्म्मदर्शननिमित्तं सहेतु(२)माह—तत्रेति। अभिमतेन हेतुना क्रमविशेषनियम-मवतारयति—प्रत्यक्षस्येतीति। यद्यपि प्रमितेः प्रत्यक्षपरत्वेन प्रत्यक्षस्य प्राधान्यं तथाऽपि शास्त्रे व्युत्पाद्यत्वेनानुमानस्यापि तदस्तीति साधारणतया न हेतुरिति भावः। स्यादेतद् व्यवस्थितविषयं प्रत्यक्षं नानुमानविषये प्रवर्त्तते, न चानुमानमगृहीतसम्बन्धमुदेति। न च सम्बन्धग्रहः सम्बन्धिग्रहणमन्तरेण, न चानुमानविषये सामान्यरूपे सम्बन्धिनि प्रत्यक्षं प्रवर्त्तते, अनुमानान्तरेण ग्रहणेऽनवस्था, तस्मात् कारणाभावान्नानुमानमस्ति। एतेन शाब्दोपमाने अपि परास्ते, तयोरपि सम्बन्धसंवेदनाधीनजन्मत्वात्। तस्मान्नाप्रत्यक्षं प्रमाण-मिति विभागवचनमनुपपन्नमिति शङ्कामपनेतुं विमर्षपूर्व्वकं विचारयति स्म भाष्यकारः किं पुनः प्रमाणानीति। तदेतद्भाष्यमनुभाष्याव्याख्याने हेतुमाह—किं पुनरेतानीति।

सा चेयं प्रमितिः प्रत्यक्षपरेति भाष्यम्, तदनुभाष्य हेतुमाह—सेयमिति। आकांक्षाभावप्रति-पादनाय प्रतीतिस्वरूपं क्रमं चाह—यथाऽयमिति। आहित उत्पादितः प्रत्ययो निश्चयो यस्य, संसर्गोपधानं(?) धर्म्मिं प्रति सत्तया सन्दिग्धेन हि निश्चयाय प्रवर्त्तितव्यमेव, निश्चितस्तु(३) विनिश्चयाय

(१) भाष्यतात्पर्य्ययोः "सा चेयं प्रमितिः" इति पाठः। (२) 'सन्देह' इति पाठो भवितुमुचितः।
(३) आदर्शे—'प्रवर्त्तितव्यमेवानिश्चितस्तु' इतीदं पाठः।

न्यायभाष्यम्

बुभुत्सते, लिङ्गदर्शनानुमितं च प्रत्यक्षतो दिदृक्षते, उपलब्धेऽर्थे जिज्ञासा निवर्त्तते। पूर्वोक्तमुदाहरणम 'अग्निः' इति। प्रमातुः (१) प्रमाणानां सम्भवोऽभिसंप्लवः, असम्भवो व्यवस्थेति(२) ॥ ३ ॥

इति त्रिसूत्रीभाष्यम्।

अथ विभक्तानां लक्षणवचनमिति (३)।

इन्द्रियार्थसन्निकर्षोत्पन्नं ज्ञानमव्यपदेश्यमव्यभिचारि व्यवसायात्मकं प्रत्यक्षम् ॥ ४ ॥

इन्द्रियस्यार्थेन सन्निकर्षादुत्पद्यते यज्ज्ञानं तत् प्रत्यक्षम्।

न्यायवार्त्तिकम्

धूमाङ्गत्वेन व्यवस्थितं हुतभुजं प्रतिपद्यते। आसन्नतरस्त्विदानीमिन्द्रियार्थसन्निकर्षादग्निप्रत्ययं करोति तदा निराकाङ्क्षो भवतीत्यतः प्रधानं प्रत्यक्षमिति। यत्र संप्लवस्तत्रैवम्। यत्र पुनर्व्यवस्था तत्र गुणप्रधानता न चिन्त्यत इति ॥ ३ ॥

इति त्रिसूत्रीवार्त्तिकम् ॥

अथ विभक्तानां लक्षणवचनमिति। तत्र प्रत्यक्षलक्षणमुच्यते इन्द्रियार्थसन्निकर्षोत्पन्नमित्यादि सूत्रम्—

सूत्रार्थः समानासमानजातीयविशेषकत्वम्। अथ पदानामर्थः कः इन्द्रियार्थसन्निकर्षोत्पन्न-

न्यायवार्त्तिकतात्पर्य्यटीका

प्रमाणान्तरे प्रवर्त्तमानस्तदभ्यर्हिततरं मन्यते। धूमाङ्गत्वेनेति। अङ्गत्वं व्यापकत्वम्। व्याप्यं पुनर्व्याप्तिक्रियायां कर्म्मत्वेन प्रधानम्। तदनेन धूमव्यापकत्वोपधानेन धूमाद्गम्यमानो वह्निः परोक्ष इति दर्शितम्। अनुपहितप्रकाशस्तु प्रत्यक्षेणाव्यवहितवह्निस्वरूपप्रकाशः, स हि साक्षात्कार इति। तावदयं प्रमाता साकाङ्क्षो यावदुपधानव्यवहितं स्वरूपमुपलभ्यते। उपधानानपेक्षस्तु प्रत्यक्षेणाव्यवहितं साक्षाद् वह्निं विषयीकृत्य निराकाङ्क्षो भवति। धूमाङ्गत्वेन धूमविशेषणत्वेनेति केचित्। तत्तु प्रकृतानुपयोगितयाऽयुक्तमिति। उपसंहरति—अतः प्रधानमिति। सोऽयं गुणप्रधानभावो भेदाश्रयो व्यवस्थायां नास्ति, व्यवस्थितानां प्रत्येकमेकत्वात्। तस्माद् व्यवस्थाया गुणप्रधानभावो न चिन्त्यत इति। इति सूत्रसमाप्तौ ॥ ३ ॥

इति न्यायत्रिसूत्रीतात्पर्य्यटीका समाप्ता।

प्रत्यक्षादिप्रमाणविशेषलक्षणानामर्थाक्षिप्तसामान्यलक्षणविभागोद्देशहेतुत्वेन तदनन्तराभिधान-

---

(१) "प्रमातुः" इत्यनन्तरं "प्रमातव्येऽर्थे" इत्यधिकम् ज-ग-आ०। (२) सम्पूर्व्वकस्य भूधातोः समवायार्थकतया अत्र सम्भवः समवायः, असम्भवस्तदभावः, एककाल: सत्त्वमित्यर्थः। सङ्करोऽभिसंप्लवः, असङ्करो व्यवस्थेति वि-टि-ज-आ-भा०। (३) "वचन"शब्दः ल-भा-पु नास्ति।

न्यायभाष्यम्

न तर्हीदानीमिदं भवति, आत्मा मनसा संयुज्यते, मन इन्द्रियेण, इन्द्रियमर्थेनेति ?

न्यायवार्त्तिकम्

मिति ? इन्द्रियेणार्थस्य सन्निकर्षाद्युत्पद्यते ज्ञानं तत्प्रत्यक्षमिति । इन्द्रियाणि पुनर्वक्ष्यमाणानि (१) । अर्थश्च (२) । सन्निकर्षः पुनः षोढा भिद्यते । संयोगः, संयुक्तसमवायः,

न्यायवार्त्तिकतात्पर्य्यटीका

मित्याह—अथ विभक्तानामिति । तत्र तेषु मध्ये प्राथम्यात् प्रत्यक्षलक्षणम् । इन्द्रियार्थसन्निकर्षोत्पन्नमित्यादि सूत्रम् । अस्य तात्पर्य्यमाह—सूत्रार्थः सूत्रप्रयोजनम् । समानासमानजातीयविशेषकत्वम् । समानजातीयमनुमानादि, असमानजातीयं प्रत्यक्षाभासप्रमेयादि, तेभ्यो विशेषकत्वं विशेषस्तदस्य सूत्रस्य प्रयोजनम् । यः खलु कुतश्चिद् व्यामोहात् समानासमानजातीयव्यावृत्तं तद्रूपं न शक्नोति ग्रहीतुम्, सोऽनेन लक्षणेन बोध्यते—एवं लक्षणकं प्रत्यक्षमिति । तस्मात् सामान्यतः सिद्धविविक्तप्रत्यक्षमात्रानुवादेन लक्षणविधानपरमिदं सूत्रम् । इतस्त्ववगतलक्षणस्तेनैव विविच्य प्रत्यक्षतत्त्वं गृह्णातीति समानासमानजातीयव्यवच्छेदः सूत्रार्थ उक्त इति । अत्र च 'यत' इत्यध्याहृत्य यत्तदोर्नित्याभिसम्बन्धात् तत्प्रत्यक्षमिति प्रमाणवाचि प्रत्यक्षपदं योजनीयम् । एवं च ज्ञानप्रामाण्यमतेऽपि यत्तद्विशेष्यज्ञानप्रत्यक्षफलं लिङ्गपरामर्शो वा तदपीन्द्रियार्थसन्निकर्षोत्पन्नत्वाद्युपेतत्वेन भवति प्रमाणविशेषणमिति नाव्यापकत्वं लक्षणस्येति । सूत्रपदार्थं पृच्छति—अथेति । उत्तरम्—इन्द्रियेति । सन्निकर्षग्रहणलभ्यं प्रकारभेदं परिसंचष्टे—सन्निकर्षः पुनरिति । पुनः शब्देन संयोगसमवायपदोपादानाद् व्यवच्छिनत्ति । संयोगपदोपादाने हि न समवायो लभ्यते, समवायपदोपादाने वा न संयोगः । सन्निकर्षपदोपादाने त्वभिमतलाभः । अर्थग्रहणेनार्थ्यमानतया ज्ञेयस्वरूपयोग्यता दर्शिता, न चासावण्वाकाशादीनामस्तीति सत्यपि संयोगादौ नासावर्थसन्निकर्ष इति तद्व्युदासः । उत्पन्नग्रहणेन च सन्निकर्षस्योत्पादकत्वं सूचितम्, ततः सत्यप्यर्थस्वरूपयोग्यत्वे संयुक्तसंयोगादेरनुत्पादकस्य सन्निकर्षस्य व्युदासः । अन्यथा कुड्यादिसंयुक्तेनेन्द्रियेण कुड्यादि-

वृत्तिः

अथ विभक्तानि यथाक्रमं लक्षयितुमारभते—**इन्द्रियार्थेत्यादि** ।

अत्र प्रतिगतमक्षं प्रत्यक्षमिति योगादिन्द्रियवाचकत्वात् प्रत्यक्षशब्दस्य, प्रस्तुतत्वाच्च करणलक्षणस्य, प्रमितिलक्षणं यद्यप्यनुचितम्, तथाऽपि यत इत्यध्याहारेण प्रत्यक्षप्रमाकरणलक्षणे वाच्ये तदेकदेशप्रमास्वरूपे ज्ञाते तत्करणत्वं सुज्ञेयमित्याशयेन वा सङ्गमनीयम् ।

---

(१) १।१।१२ सू० । (२) १।१।१४ सू० ।

न्यायवार्त्तिकम्

संयुक्तसमवेतसमवायः, समवायः, समवेतसमवायः, विशेषणविशेष्यभावश्चेति। तत्र चक्षुरिन्द्रियम्, रूपवान् घटादिरर्थः। तेन सन्निकर्षः संयोगः, तयोर्द्रव्यस्वभावत्वात्। अद्रव्येण च तद्गतरूपादिना संयुक्तसमवायः, यस्माच्चक्षुषा संयुक्ते द्रव्ये रूपादि वर्त्तत इति। वृत्तिस्तु समवायः। रूपादिवृत्तिना सामान्येन संयुक्तसमवेतसमवायः। सन्निकर्षः। एवं घ्राणादिषु गन्धवदादिद्रव्येण संयोगः। तत्समवेतेषु गन्धादिषु संयुक्तसमवायः। तद्वर्तिषु च सामान्यादिषु संयुक्तसमवेतसमवायः। शब्दे समवायः। अयं खलु शब्दः संयोगविभागयोनिराद्यः। तत्र कतमः शब्दः संयोगयोनिः कतमश्च विभागयोनिरिति? आकाशगुणत्वात् शब्दस्याकाशवृत्तिः

न्यायवार्त्तिकतात्पर्य्यटीका

व्यवहितस्य तत्संयुक्तस्य पटादेस्तत्समवेतस्य च रूपादेरपि ग्रहणप्रसङ्गः। न चैतावता त्रिविध एव सन्निकर्षः संयोगः संयुक्तसमवायः समवायश्चेति सांप्रतम्। स्वतन्त्रव्याघातादनुभव-व्याघाताच्च। ये हि गुणकर्म्माश्रयं सामान्यातिरिक्तं सादृश्यमर्थान्तरं रोचयन्ते, तेषां कथं रूपादि-भेदानामन्योन्यस्य सादृश्यं प्रत्यक्षं भवेत्? न हि तदिन्द्रियेण संयुक्तम्। नापीन्द्रियसंयुक्त-समवेतम्। तस्माच्चतुर्थः संयुक्तसमवेतसमवायोऽभ्युपगन्तव्यः, इतरथा स्वतन्त्रव्याघात इति। अनुभवव्याघातश्च, अनुभूयन्ते हि रूपत्वगन्धत्वादयः सामान्यविशेषा अनुगताः, तासु व्यक्तिषु परस्परव्यावृत्तिमतीषु एते नानुभूयेरन् असति सन्निकर्षान्तरे। यदि तु वैयात्याद् ब्रूयान्नानुभूयन्त एवेति, तदा प्रतिवक्तव्यं कुतस्त्योऽयमनन्तासु रूपगन्धादिव्यक्तिषु रूपमिति वा गन्ध इति वा व्यपदेशभेदः। चाक्षुषत्वाद्युपाधिनिबन्धन इति चेद् न, अननुसंहितोपाधेरुपहितप्रत्ययायोगात्। न खल्वननुसंहितदण्डश्चैत्रं दण्डीति व्यपदिशति। न चेन्द्रियाण्यतीन्द्रियाणीन्द्रियदर्शनविषयभाव-मनुभवन्ति। तस्मादस्तीन्द्रियेण रूपत्वादिसामान्यानुभवो यन्निबन्धनाः कासुचिदेव व्यक्तिषु केचिदेव व्यपदेशभेदा इति सिद्धं सन्निकर्षान्तरम्। विशेषणभावेन च संयुक्तविशेषणं समवेत-विशेषणं च संगृहीतम्। यस्येन्द्रियेण यादृशः सन्निकर्षः तादृशं तत्र दर्शयति—तत्र चक्षुरिति। शब्दस्याकाशगुणत्वम्, कर्णशष्कुल्यवच्छिन्नस्य नभोभागस्य श्रोत्रत्वम्, आद्यस्यैव शब्दस्य संयोग-विभागयोनिजत्वम्, सन्तानेन श्रोत्रे समुत्पादः समवाय इत्यादि द्वितीये(१) निपुणतरमुपपादयिष्यते। अवयवावयविनौ गुणगुणिनौ क्रियाक्रियावन्तौ जातिजातिमन्तौ च मिथः सम्बद्धावनुभूयेते नान्यथा,

वृत्तिः

आत्ममनःसंयोगजन्यसुखादिवारणाय—ज्ञानमिति। यद्यपि तज्जन्यत्वाज्ज्ञानमात्रेऽति-व्याप्तिः, ईश्वरप्रत्यक्षे चाऽव्याप्तिः, तथाऽपि साक्षात्करोमीत्यनुव्यवसायसिद्ध-साक्षात्त्वजात्य-वच्छिन्ने 'ज्ञानम्' इत्यन्तस्य तात्पर्यम्।

---

(१) २।२।३५ सू-भाष्यादिकं द्रष्टव्यम्।

न्यायवार्त्तिकतात्पर्य्यटीका

तन्तुषु पट इति शुक्लः पट इति पटः स्पन्दत इति च पटो द्रव्यमिति च बुद्धिव्यपदेशौ स्याताम्। शुक्लः पट इत्यादि सामानाधिकरण्यज्ञानं न हि सम्बन्धज्ञानमिति चेत्, किं पुनरिदं सामानाधिकरण्यम्? तादात्म्यमिति चेत्, न, द्वितीयबुद्धिव्यपदेशयोः (१) पौनरुक्त्यात् (२)। अपौनरुक्त्यं चाभिमन्यन्ते प्रतिपत्तारः, येनान्यतरदुपलभ्यान्यद्बुभुत्सन्ते। न चैकं वस्तु द्व्यात्मकमिति युक्तम्, भेदाधिष्ठानस्य तन्नान्तरीयकस्य द्वित्वस्यैकात्मनि विरोधेनासंभवात्। तस्माद्भिन्ने एव वस्तुनी संबद्धे सामानाधिकरण्येन प्रतीयेते, असंबन्धे गौरश्च इतिवत्तदनुपपत्तेः। संबन्धेऽपि कुण्डे दधीतिवद्वैयधिकरण्यप्रसङ्ग इति चेन्न, शब्दवृत्तिभेदेन संबन्धाभेदेऽपि सामानाधिकरण्यवैयधिकरण्यव्यवस्थापनात्। न हि जातु दधिशब्दः कुण्डे वर्त्तते कुण्डशब्दो वा दध्नि। वर्त्तते तु सुरभिमधुरशुक्लादिशब्दा अभिधेयं निमित्तीकृत्य(३) पटादिषु, एवं पटादिशब्दा अपि जात्यादि निमित्तीकृत्य द्रव्ये प्रवर्त्तन्त इति सामानाधिकरण्यम्, तेन सामानाधिकरण्येऽपि प्रवृत्तिनिमित्तानां नैकात्म्यं परस्परम्, नापि द्रव्येण, किं तु तैस्तैरन्वितमेकं द्रव्यं प्रतीयते। शब्दानां तु तत्रैकस्मिन् प्रवृत्तेस्तद्वाच्यानामैकात्म्यभ्रमः। अयुतसिद्ध्या (४) तु कुण्डे दधीतिवन्न स्फुटतरो विवेकप्रकाशः। तदेवमस्ति संबद्धानुभवः, न चासौ संबन्धानुभवं विनेति संबन्धोऽनुभूयते, स चायुतसिद्ध्यादिसंपत्त्या समवायः, न चास्यान्यः समवायोऽनवस्थानात्। न चेन्द्रियेणास्य संयोगोऽद्रव्यत्वात्। न चासंबद्धस्य ग्रहणम्, इन्द्रियाणां प्राप्यकारित्वसमर्थनात्। तस्माद्विशेषणविशेष्यभावः परिशिष्यते। नन्वयं विशेषणविशेष्यभावोऽन्यत्र संबन्धान्तरपूर्व्वको दृष्टः। तत्किमत्र संबन्धान्तरं कल्प्यताम्? तथा चानवस्थेत्युक्तम्, न चेन्द्रियासंबद्धस्य ग्रहणम्, तस्माद्विना संबन्धान्तरं विशेषणविशेष्यभाव एषितव्य इति सिद्धम्। एवमभावेऽपि यदिन्द्रियसंयुक्तं वा यदिन्द्रियसंबद्धं वा यथा भूतले घटो नास्तीति वा नास्त्यकारे अनुदात्तस्वर इति वा, तस्य संयुक्तस्य वा विशेषणभावेन, समवेतस्य विशेषणभावेन चेन्द्रियप्रत्यासत्त्या ग्रहणम्। न च भूतलादिरूपमेव घटाभावो नार्थान्तरमिति सांप्रतम्, सत्यपि घटादौ भूतलस्य भावात्। न च कैवल्यं तस्य धर्म्मो घटभावविरोधी घटाभावादन्यः। न च दृश्ये घटादौ भूतलोपलम्भः कैवल्यमभावव्यवहारहेतु(५)रिति युक्तम्। एवं हि घटसंसृष्टभूतलग्रहोऽपि कैवल्यमिति घटाभावव्यवहारं प्रवर्त्तयेत्। न ह्यदृश्यो घटस्तदानीं दृश्यमानः। दृश्ये अनुपलभ्यमान इति तु विशेषणे किमपराद्धमुपलभ्याभावेन, यदपाकरणायोपलम्भाभावोऽभ्युपेयते। तस्मात्सदिवासदपि तत्त्वमभ्युपेयम्। तच्च प्रत्यक्षमिन्द्रियव्यापारे सति

---

(१) "शुक्लः पटः" इति पूर्व्वोक्तबुद्धिव्यपदेशयोः। (२) ननु शब्दमात्रधर्म्मस्य पौनरुक्त्यस्य बुद्धावसम्भवात् "बुद्धिव्यपदेशयोः पौनरुक्त्यात्" इति कथनमसङ्गतमिति चेन्न, पूर्व्वापेक्षया अन्यूनानतिरिक्तार्थकत्वमेव पौनरुक्त्यमित्येवं समाधाने दोषाभावात्। (३) अत्र ख-पुस्तके "द्रव्येषु" इत्यधिक-पाठः। (४) उभयोरपि सम्बन्धिनोः परस्परपरिहारेण पृथगाश्रयाश्रयित्वं युतसिद्धिः, तदभावोऽयुतसिद्धिः, तया। (५) "अभावः व्यवहारहेतुः" इति क-पु।

न्यायवार्त्तिकम्

संयोगः कारणं गुणकर्मस्वारब्धव्येषु सापेक्ष इति सापेक्षो न निरपेक्ष इति। किमपेक्षते ? भेर्याकाशसंयोगः तावत् शब्दस्य कारणम्, तस्यानुग्राहको भेरीदण्डसंयोगो दण्डगतवेगापेक्ष इति। यदि पुनर्भेरीदण्डसंयोग एव शब्दस्य कारणं स्यात्, व्यधिकरणः संयोगः शब्दकारणमिति सर्वत्रोत्पत्तिप्रसङ्गः। विभागाच्छब्दः—वंशदलविभागानुगृहीताद् वंशदलाकाशविभागाच्छब्द इति। स उत्पन्नः शब्दः सर्वदिक्कानि शब्दान्तराणि करोति, तान्यपि प्रत्येकं शब्दान्तराणि तावत्, यावत् कर्णशष्कुलीमत्याकाशदेश इति। यः कर्णशष्कुलीमत्याकाशदेशे समवैति, स समवायादुपलभ्यते। तद्गतेषु च सामान्येषु समवेतसमवायात्। समवाये चाभावे च विशेषणविशेष्यभावादिति। सोऽयं सन्निकर्षशब्दः संयोगसमवायविशेषणविशेष्यभावव्यापकत्वादुपात्त इति। सोऽयं सन्निकर्षः प्रत्यक्षस्य कारणं भवतीति लक्षणत्वेनोच्यते। यदीन्द्रियार्थसन्निकर्षः प्रत्यक्षस्य

न्यायवार्त्तिकतात्पर्य्यटीका

तत्प्रत्ययात्। न च प्रतियोगिस्मरणव्यवहित इन्द्रियार्थसन्निकर्षो नालमभावधियमुपजनयितुमिति सांप्रतमित्यग्रे (१) दर्शयिष्यामः। सविकल्पकस्य प्रत्यक्षत्वसिद्धौ यथा शब्दस्मरण-पूर्वगृहीतपिण्डानुसन्धानादयो नेन्द्रियव्यापारं व्यवदधतीति। न च शब्दस्मरणादीनाम् अनुयोगिता, भूतलविकल्पकं प्रत्यङ्गत्वात्, स्वाङ्गमव्यवधायकमिति न्यायात्, घटस्य तु प्रतियोगितेति सांप्रतम्। कस्य पुनः प्रतियोगी घटः ? तदभावस्येति चेद् भवतु, घटाभावानुभवस्य तु घटस्मरणं हेतुरिति न प्रतियोगि किं तु अनुयोग्येव। ननु स्वरूपमात्रं दृष्टं वेश्माद्यर्थं स्मरन्नेव बहिर्निर्गतश्चैत्रो यदा पृच्छयते केनचिद्—यस्य तव गृहे तदा किमासीन्मैत्र इति, स चैत्रः प्रतियोगिस्मरणविरहात्पूर्वमप्रतिपन्नमैत्राभावोऽपि तत्प्रश्नजनितमैत्रस्मृतिः क्षणं ध्यात्वा तदभावमवगम्याह—मित्र तत्र नासीन्मैत्र इति, तदियमसतीन्द्रियार्थसन्निकर्षेऽभावबुद्धिर्भवन्ती प्रत्यक्षाद्यतिरिक्तमभावाख्यं प्रमाणं व्यवस्थापयतीति। नैतत्, संयुक्तविशेषणलक्षणेन मनःसन्निकर्षेण स्मर्तव्यस्य स्मरणाभावं मैत्रस्य गृहीत्वा तेन लिङ्गेन तदभावस्य तदानीमनुमानात्। तथा हि तद्गृहं तदा मैत्राभाववत्, ज्ञानार्हस्य मैत्रस्याज्ञाने गृहस्य ज्ञायमानत्वात्। यद् यस्य ज्ञानार्हस्याज्ञाने ज्ञायते तत्तदभाववत्, यथा घटाभाववद्भूतलम्, तथा च गेहम्, तस्मात्तथा। न च यत्कदाचिदानुमानिकं तेनेन्द्रियगम्येन न भवितव्यम्, प्रमाणसंप्लवव्यवस्थापनात्। तत् सिद्धं विशेषणभावादभावस्येन्द्रियप्रमेयतेति। संयोगसमवायपदपरिहारेण सन्निकर्षपदोपादानस्य प्रयोजनमाह—सोऽयं सन्निकर्षशब्द इति।

तदनेन प्रबन्धेनेन्द्रियस्यार्थेन सन्निकर्षाद् यदुत्पद्यते ज्ञानं तत्प्रत्यक्षमिति भाष्यं व्याख्यातम्। संप्रति न तर्हीति चोद्यभाष्यं व्याचष्टे—यदीन्द्रियार्थेति। प्रत्यक्षज्ञानकारणाभिधान-

(१) ११८।९ पं।

न्यायभाष्यम्

नेदं कारणावधारणम्—एतावत्प्रत्यक्षे कारणमिति(१), किं तु विशिष्टकारणवचनमिति। यत्प्रत्यक्षज्ञानस्य विशिष्टकारणं तदुच्यते, यत्तु समानमनुमानादिज्ञानस्य, न तन्निवर्त्तत(२) इति।

मनसस्तर्हीन्द्रियेण संयोगो वक्तव्यः?

न्यायवार्त्तिकम्

कारणत्वादुपदिश्यते, अत्यल्पमिदमुच्यते, अन्यान्यपि बहूनि सन्ति तान्यपि वक्तव्यानि। तद्यथा—आत्ममनःसंयोगः, इन्द्रियमनःसंयोगः, विषयप्रकाशसंयोगः, विषयस्थं रूपम्, विषयसंयोगिस्थं च, महत्त्वम्, अनेकद्रव्यवत्त्वम्, उपलब्धिफलः संस्कार इति। कस्मात्? तद्भावे भावात् तदभावे चाभावादिति। तद्यदि कारणभावादिन्द्रियार्थसन्निकर्षग्रहणमेतान्यपि कारणानि वक्तव्यानि। न वक्तव्यानि। नेदं कारणावधारणार्थं सूत्रम्, अपि तु समानासमानजातीयविशेषणार्थम्। यत् प्रत्यक्षस्यासाधारणं कारणं तदभिधीयते, न पुनः साधारणं कारणं निवर्त्यत इति(३)। इन्द्रियमनःसंयोगस्तर्ह्यसाधारणत्वादुपसंख्येयः, न ह्ययमनुमानादिज्ञानानां कारणं भवति। न, अनेनैव तस्योक्तत्वात्। इन्द्रियार्थसन्निकर्षग्रहणेनेन्द्रियमनःसंयोग उक्तो वेदितव्यः। किं

न्यायवार्त्तिकतात्पर्य्यटीका

प्रवृत्तस्तदेकदेशं वदन्नकुशलः सूत्रकारः स्यादित्यर्थः। कारणान्तराणि दर्शयति—तद्यथेति। विषयसंयोगि चक्षुरालोकश्च, तत्स्थं रूपम्, आत्मीयेन हि रूपेणालोकचक्षुषी द्रव्यं दर्शयत इति स्थितिः। महत्त्वं वाऽनेकद्रव्यवत्त्वं वा, अनेकद्रव्या अवयवास्तद्वत्त्वमवयविनो महत एव न द्व्यणुकस्य, तस्मादन्योन्यनिरपेक्षत्वं महत्त्वानेकद्रव्यवत्त्वयोरिति विकल्प एव न्याय्य इति। सत्यप्येवं-लक्षणकत्वे चक्षुरवयविनस्तैजसस्य न चाक्षुषत्वमित्यत उक्तम्—उपलब्धिफलः संस्कार इति। धर्म्माधर्म्मनिमित्त उद्भवसमाख्यातः संस्कार उपलब्धिफलः, न चासौ चक्षुषि, तस्याद्दृष्टवशे-नानुद्भूतरूपस्पर्शत्वादित्यर्थः। परिहरति—न वक्तव्यानीति। प्रत्यक्षलक्षणप्रवृत्तो हि सूत्रकार-स्तदेव ब्रूयात् यदस्यासाधारणम्, न तु सदपि साधारणमस्य कारणम्, न हि तत्तस्य लक्षणमतिव्याप्ते-रित्यर्थः। तदनेन नेदमित्यादिभाष्यं व्याख्यातम्। असाधारणं कारणं चेत्प्रत्यक्षलक्षणायोपादेयं हन्तान्यदप्यस्यासाधारणमस्ति कारणमिति तदप्युपादेयमिति देशयति—इन्द्रियमनःसंयोग-स्तर्हीति। तदनेन मनसस्तर्हीत्यस्य भाष्यस्यार्थ उक्तो वेदितव्यः। परिहरति—न, अनेनैव। इन्द्रियार्थसन्निकर्षेणैव। तस्येन्द्रियमनःसन्निकर्षस्योक्तत्वात्। एतदुक्तिसाध्यं यत्तत्तेनैव कृतम्, यत् साध्यं त्विन्द्रियमनःसन्निकर्षो न शक्नोति साधयितुम्। न च सुखज्ञाने मानसे अस्तीन्द्रिय-

(१) 'प्रत्यक्षकारण'मिति वि-टि। (२) वार्त्तिके "निवर्त्यते" इति। (३) 'यत् प्रत्यक्षज्ञानस्य' इत्यारभ्य 'तन्निवर्त्तत इति' इत्यन्तस्य भाष्यस्य व्याख्यानपरमिदं वार्त्तिकम्।

न्यायवार्त्तिकम्

कारणम् ? उभयोरसाधारणत्वात्। न च यावदसाधारणं कारणं तावत् सर्वमभिधातव्यमित्यर्थः। अपि त्वन्यतरेणापि भिद्यत इति अन्यतरोपादानम्, इन्द्रियार्थसन्निकर्षग्रहणं वा, विशेषकत्वात्। यदिन्द्रियार्थसन्निकर्षादुपजायते विज्ञानं तस्यान्यतरद्विशेषकं भवति। इन्द्रियमर्थो वा तद्विशेषकम्, तेन व्यपदेशात्, यस्मादिदं ज्ञानमिन्द्रियेण वा व्यपदिश्यते, अर्थेन वा, रूपविज्ञानमिति चक्षुर्विज्ञानमिति वा। न पुनरिन्द्रियमनःसंयोगेन व्यपदिश्यते। न हि भवति रूपालम्बने ज्ञाने मनोज्ञानमिति। यदा त्वात्ममनःसंयोगान्मानस्यो बुद्धयः प्रवर्तन्ते, तदात्मना व्यपदिश्यन्ते मनसा च। यच्चासाधारणं तद्व्यपदेशभाग् भवति, तद्यथा—ऋत्वादिकारणसन्निधानात् प्रादुर्भवन्नङ्कुरो नर्त्वादिभिर्व्यपदिश्यते, अपि त्वसाधारणेन बीजेन व्यपदिश्यते यवाङ्कुर इति, तथेहापीत्यदोषः। इन्द्रियमनःसंयोगस्य वाऽग्रहणम् भेदेऽभेदात्। यस्मात् प्रत्यक्षज्ञानभेदे इन्द्रियमनःसंयोगो न भिद्यत इति।

न्यायवार्त्तिकतात्पर्य्यटीका

मनःसन्निकर्षः, इन्द्रियार्थसन्निकर्षस्तु सर्व्वव्यापकः। वक्ष्यति(१)हि मनस इन्द्रियत्वम्, सुखादेश्चार्थत्वं सिद्धमेवेति। संप्रति व्यापकत्वमभ्युपेत्य परीहारान्तरमाह—इन्द्रियार्थेति। यद्यपीन्द्रियमनःसन्निकर्षेऽपीन्द्रियमस्ति प्रत्यक्षज्ञानस्य विशेषकमिन्द्रियेण व्यपदेशाद् इन्द्रियज्ञानमिति, तथाऽपि मनसा व्यपदेशाभावान्मनसस्तत्राविशेषकत्वम्। इन्द्रियार्थसन्निकर्षे तूभयमपि विशेषकम्, उभाभ्यां प्रत्यक्षज्ञानस्य व्यपदेशात, इत्ययमस्मेन्द्रियमनःसन्निकर्षाद्विशेष इति। चोदयति—यदा त्विति। तुशब्दः पूर्वपक्षं व्यावर्तयति। युञ्जानस्य हि योगिनो यदात्ममनःसंयोगादात्मनि बुद्धयो भवन्ति ताः खल्वात्मना व्यपदिश्यन्ते आत्मबुद्धय इति। मनसा च व्यपदिश्यन्ते मनोबुद्धय इति। तस्मादुभाभ्यां व्यपदेशादुभयोर्विशेषकत्वमितीन्द्रियार्थसन्निकर्षवदात्ममनःसन्निकर्षो वक्तव्य इत्यर्थः। परिहरति—यच्चेति, चोऽवधारणे। यदेवासाधारणं तद्व्यपदेशभाग्भवति, कारणत्वेन तेन व्यपदिश्यत इत्यर्थः। परिहरति (२) एतदुक्तं भवति—यथा चक्षुषा इन्द्रियत्वेन ज्ञानं व्यपदिश्यते चाक्षुषमिति, तथा मनसाऽपीन्द्रियेण व्यपदिश्यते ज्ञानं मानसमिति। एवं यथा रूपेणार्थेन व्यपदिश्यते ज्ञानं रूपज्ञानमिति, तथा आत्मनाऽप्यर्थेन व्यपदिश्यते आत्मज्ञानमिति। तत्र चासाधारणत्वमेव तयोः। यत्र त्विन्द्रियान्तरमेवासाधारणम्, लिङ्गादि वा, तत्रात्मा नार्थोऽपि तु प्रमातैव। तथा रूपादिज्ञानेऽनुमानादिज्ञाने वा न तत्र ज्ञानं मानसमिति वा आत्मज्ञानमिति वा व्यपदेशः, स कस्य हेतोः? तयोः साधारण्यात्। आत्ममनःसन्निकर्षस्त्विन्द्रियार्थसन्निकर्षेण संगृहीतो न त्विन्द्रियार्थसन्निकर्षस्यैव संग्राहकोऽव्यापकत्वादिति। एकदेशिनः परीहारमुपन्यस्यति—इन्द्रियमनःसंयोगस्य वाऽग्रहणं भेदेऽभेदात्। यदा हि

(१) "मनसश्चेन्द्रियभावात्" इत्यादि। १।१।४ सू-भाष्यशेषांशो द्रष्टव्यः। (२) "परिहरति" इति ख-पु नास्ति।

न्यायभाष्यम्

भिद्यमानस्य प्रत्यक्षज्ञानस्य नायं भिद्यत इति समानत्वान्नोक्त इति।

न्यायवार्त्तिकम्

यद्यभेदादग्रहणं इन्द्रियार्थसन्निकर्षस्यापि तर्ह्यग्रहणम् एकेन्द्रियग्राह्येषु अभेदादिति प्राप्तं यथा शुक्लो गौर्गच्छतीति ?। न वक्तव्यम् (१), उक्तोत्तरत्वात्। उक्तोत्तरमेतत्—नेदं 'कारणावधारणार्थं सूत्र'मिति। अनभ्युपगमाच्च। इन्द्रियमनःसंयोगस्य चाऽग्रहणं समानत्वात्। केन समानत्वादिति वाच्यम्। आत्ममनःसंयोगेन समानत्वात्। किं पुनस्तत् ? व्यपदेशाभाव इत्युक्तम्, अतीन्द्रियाधारता वा सामान्यम्। यथाऽऽत्ममनःसंयोगोऽतीन्द्रियाधार एवमिन्द्रिय-

न्यायवार्त्तिकतात्पर्य्यटीका

नगरयोषितः कुतूहलात् प्रणिहितमनसो विकसितनिःस्पन्दनयनोत्पलाः सौधमालागवाक्षकैरवनिवर्ति सबलवाहनमतिचिरप्रोषितपरावृत्तं गोपुरेण निविशमानमालोकयन्ति, तदा खल्वासामेकेनैवेन्द्रियमनःसंयोगेन क्रमवदनेकेन्द्रियार्थसन्निकर्षसहकारिणा भिन्नक्रमवन्ति हास्तिकाश्वीयादिप्रत्यक्षज्ञानानि जायन्ते। तदिदमाह—यस्मादिति। देशयति—यदीति। यदा हि मन्दं गच्छति गवि दूरतः संयुक्तसमवायेनेन्द्रियार्थसन्निकर्षेण शुक्लो गौरित्यज्ञासीत्, अथ प्रत्यासीदन् गच्छतीत्यपि विजानाति तेनैव संयुक्तसमवायेन सन्निकर्षेण, तेन प्रत्यक्षज्ञानस्य शुक्ल इति च गच्छतीति च भेदेऽपीन्द्रियार्थसन्निकर्षो न भिद्यते। तस्मादिन्द्रियार्थसन्निकर्षे तुल्यत्वादिन्द्रियमनःसंयोगोऽपि तत्र वक्तव्य इत्यर्थः। परिहरति—न वक्तव्यः। कुतः—उक्तोत्तरत्वादिति। तद्विभजते—उक्तेति। ननु भवतूक्तमुत्तरं भेदेऽभेदादित्यस्याक्षेपः समाधातव्य इत्यत आह—अनभ्युपगमाच्च। एकदेशिमतमस्माभिर्नाभ्युपेयते, तस्मान्न समाधेयमित्यर्थः। तत्किमिदानीं भिद्यमानस्य प्रत्यक्षज्ञानस्य नायं भिद्यते इति समानत्वान्नोक्त इति भाष्यमनुपपन्नमेव नेत्याह—इन्द्रियमनःसंयोगस्य चाग्रहणं समानत्वात्। पृच्छति—केनेति। उत्तरम्—आत्ममन इति। पुनः पृच्छति—किं पुनः समानत्वम् ? उत्तरम्—व्यपदेशाभाव इत्युक्तम्। तेन भाष्यस्यायमर्थः प्रत्यक्षज्ञानस्य रूपज्ञानस्य, रूपज्ञानमिति वा चक्षुर्विज्ञानमिति वा व्यपदेशेन भिद्यमानस्यात्ममनःसंयोग इव अयम् इन्द्रियमनःसंयोगो न भिद्यते। एवं हि स भिद्यते, यदि स्वसंबन्धिवाचकेन व्यपदेशेन स्वमन्यतो व्यावर्त्यते, न विशेषणेन विशिष्टं विशेष्यं ज्ञानमप्यन्यतो व्यावर्त्तयेत्। न त्वस्तीन्द्रियमनःसन्निकर्षाधाराभ्यामिन्द्रियमनोभ्यां प्रत्येकमस्य व्यपदेशो यथेन्द्रियार्थसन्निकर्षाधाराभ्यामिन्द्रियार्थाभ्यां व्यपदेशो रूपज्ञानमिति चक्षुर्ज्ञानमिति वा। तस्माद्व्यपदेशाभाव आत्ममनःसन्निकर्षेण साम्यमिन्द्रियमनःसन्निकर्षस्य, तस्मात्समानत्वान्नोक्त इति। प्रकारान्तरं समानत्वे

(१) "न वक्तव्य" इति तात्पर्य्यं।

न्यायवार्त्तिकम्

मनःसंयोगोऽपीति । विषयावृत्तित्वं वा । यथाऽऽत्ममनःसंयोगो विषयावृत्तिः तथेन्द्रियमनःसंयोगोऽपीति । मनोवृत्तित्वं वा । यथा वाऽऽत्ममनःसंयोगो मनोवृत्तिरेवमिन्द्रियमनःसंयोगोऽपीति । तस्मादिन्द्रियमनःसंयोगस्याऽऽत्ममनःसंयोगेन सामान्या(१)दन्यतराभिधानेन वा चरितार्थत्वादनभिधानमिति ।

इन्द्रियार्थसन्निकर्षोत्पन्नमित्ययुक्तम्, इन्द्रियस्याप्राप्यकारित्वात् । अप्राप्यकारिणी चक्षुःश्रोत्रे इत्येके । तत्र च न्यायं ब्रुवते—अप्राप्यकारि चक्षुः सान्तरग्रहणात् पृथुतरग्रहणाच्चेति । सान्तरस्यार्थस्य विप्रकृष्टदेशावस्थितस्य ग्रहणं दृष्टम्, न च चक्षुषस्तेनार्थेन प्राप्तिरस्ति, भूतविशेषस्येन्द्रियभावात् । य एवायं कृष्णसारलक्षणो भूतविशेषः स बाह्यभूतविशेषप्रसादानुगृहीतस्तत्तृष्णापूर्वककर्मापेक्षः चक्षुरित्युच्यते । तथा चोक्तम्—"रूपोपलब्धिसंवर्तकेन कर्मणा तत्तृष्णापूर्वकेण चक्षुरभिनिर्वृत्तमतो रूपोपलब्धेः कारणं भवतीति" । एवं शेषेषु । न च भूत-

न्यायवार्त्तिकतात्पर्य्यटीका

दर्शयति—अतीन्द्रियाधारता वेति । लक्षणं हि प्रसिद्धं भवति यथा धूमो वह्नेः । न चातीन्द्रियद्रव्याधारसन्निकर्षस्तथा प्रसिद्धो यथेन्द्रियार्थसन्निकर्षोऽर्थस्य संबन्धिन एकस्य प्रसिद्धत्वात्, इन्द्रियमनसोस्तु द्वयोरतीन्द्रियत्वात् । आत्मा तु यद्यपि युञ्जानस्य शरीराद्यतिरिक्तः प्रत्यक्षः तथाप्यस्मदादीनां न तथेत्यतीन्द्रिय उक्तः तदनेनातीन्द्रियाधारत्वं स्वरूपेणोक्तम् । तदेवं विषयावृत्तित्वमनोवृत्तित्वाभ्यामतीन्द्रियाधारत्वं सामान्यमाह—विषयावृत्तित्वं वेति । उपसंहरति—तस्मादिति । समानत्वादिति भाष्योक्तो हेतुः, चरितार्थत्वादिति स्वोक्तः । आक्षिपति—इन्द्रियार्थसन्निकर्षोत्पन्नमित्ययुक्तमिति । सान्तरग्रहणादिति हेतुं विभजते—विप्रकृष्टेति । ननु नार्थो विप्रकृष्टः, चक्षुषस्तत्र प्राप्तेरित्यत आह—न च चक्षुष इति । कस्मादित्यत आह—भूतविशेषस्येति । बाह्यो भूतविशेष आलोकः, तस्य प्रसाद इन्द्रियाव्यवधायकत्वम्, कुड्यादिभ्यो विशेषः यः खलु काचाभ्रपटलादिषु स्वच्छेषु समस्ति । स्यादेतत् । अस्ति कृष्णसारलक्षणो भूतविशेषः प्रसन्नान्धस्यापि, अतस्तस्यापि रूपोपलब्धिः स्यादित्यत आह—तत्तृष्णापूर्वकेति । रूपोपभोगतृष्णा हि तत्साधनं कृष्णसारमपि विषयीकरोति । एतदुक्तं भवति—भूतविशेषः कर्म्मापेक्षो रूपं च चक्षाणश्चक्षुरित्युच्यते । कर्म्मक्षयात् तु प्रसन्नान्धस्य न रूपं चष्ट इति न चक्षुः । अस्तु गोलकमेव चक्षुः किमेतावतापीत्यत आह—न चेति । विच्छिन्नं गोलकमर्थादनुभूयत इत्यर्थः ।

वृत्तिः

यद्वा इन्द्रियार्थसन्निकर्षोत्पन्नमिति सावधारणम्—इन्द्रियार्थसन्निकर्षातिरिक्तादनुत्पन्नम्, अतिरिक्तं चाऽत्र ज्ञानम्, तेन ज्ञानाकरणकमित्यर्थः । भ्रमवारकम् अव्यभिचारि,

(१) "समानत्वात्" इति ता-पाठः ।

न्यायवार्त्तिकम्

विशेषानुगृहीतस्य गोलकस्य प्राप्तिर्विषयेणास्ति। तस्मात् सान्तरग्रहणादप्राप्यकारीति। अपरे तु सान्तरग्रहणं हेतुं वर्णयन्ति। न हि प्राप्यकारिषु घ्राणादिषु सान्तर इति ग्रहणं दृष्टम्, दृष्टं तु चक्षुषि। पृथुतरग्रहणाच्च। राष्ट्रवनादिरूपं च महदुपलभ्यते। न चाक्ष्णोस्तथा पृथ्ववभास इति युक्तम्। दिग्देशव्यपदेशाच्च। यदि प्राप्यकारि चक्षुर्भवेत् दिग्देशव्यपदेशो न स्यात्। न हि प्राप्यकारिषु घ्राणादिषु तद्भवति। सन्निकृष्टविप्रकृष्टयोस्तुल्यकालग्रहणाच्च। यत् खलु गतिमद्भवति तत्तां गतिमभिन्दत् सन्निकृष्टमाशु प्राप्नोति विप्रकृष्टं चिरेण। शाखाचन्द्रमसो-

न्यायवार्त्तिकतात्पर्य्यटीका

तदेवं वस्तुनः सान्तरस्य ग्रहणमप्राप्यकारित्वे हेतुरुक्तम्। केचित् तु सान्तरम् इति ग्रहणविशेषणं हेतुं कुर्व्वन्ति तन्मतमुपन्यस्यति—अपरे त्विति। साध्यविपर्ययादस्य व्यतिरेकं दर्शयति—न हि प्राप्यकारिष्विति। पक्षधर्म्मतामाह—दृष्टं त्विति। यच्चोक्त(१)मप्राप्यकारित्वेसाधनं पृथुतरग्रहणादिति, तद्विभजते—पृथुतरेति। द्वयाश्रयो हि संयोगोऽल्पमेव संयोगिनमनुरुध्यते न महान्तम्। न जातु रथादिसंयोगा नभो व्यश्नुवते, मा भूत् सर्वत्र रथादीनां तत्संयोगादीनां चोपलब्धिः तेन यावन्मात्रं राष्ट्रवनादेर्गोलकेन व्याप्तं तावन्मात्रस्य ग्रहणप्रसङ्गः। हेत्वन्तरं चाह—दिगिति। अस्यापि व्यतिरेकमुखेन गमकत्वं दर्शयति—यदि प्राप्यकारीति। अपरमपि हेतुमाह—सन्निकृष्टेति। यद्यपि गतिक्षणानां प्रत्येकं स्वाश्रयस्य देशान्तरविभागसंयोगोपजननं प्रति क्षिप्रतायामविशेषः, स्वाश्रयप्रत्यासत्तौ वा विशेषस्तथाऽप्याचापादानविभागाद् आ च प्रापणीय-देशप्राप्तेरन्तरालवर्त्ती यावान् गतिक्षणप्रचयः पूर्व्वापरीभूतो गतिरिह विवक्षितस्तस्य सान्तरत्वं मन्दत्वं विलम्बः। नैरन्तर्यं पाटवं क्षिप्रता। तामिमां गतिमभिन्दद् नैरन्तर्य्येण कुर्वदपि सन्निकृष्टमाशु प्राप्नोति, न विप्रकृष्टेन तुल्यकालम्, किन्तु विप्रकृष्टं चिरेणेति। यथोक्तं दिङ्नागेन—

सान्तरग्रहणं न स्यात् प्राप्तौ ज्ञानेऽधिकस्य च।

बहिर्वर्तित्वादिन्द्रियस्योपपन्नं सान्तरग्रहणमिति चेद् अत उक्तम्—"अधिष्ठानाद्बहिर्नाक्षं" किं त्वधिष्ठानदेश एवेन्द्रियम्। कुतः? "तच्चिकित्सादियोगतः"।

सत्यपि च बहिर्भावे न शक्तिर्विषयेक्षणे(२)।
यदि च स्यात्तदा पश्येदप्युन्मील्य निमीलनाद्॥

यदि च स्यादुन्मील्य निमीलितनयनोऽपि रूपं पश्येत्, उन्मीलनादस्ति बहिरिन्द्रियमिति।

वृत्तिः

भ्रमभिन्नमित्यर्थः। इदं चांशिकभ्रमस्यालक्ष्यत्वे, तल्लक्ष्यत्वे तु तद्वति तत्प्रकारत्वम्, निर्विकल्पस्य लक्ष्यत्वे तदभाववति तदप्रकारकत्वमित्यर्थः।

---

(१) वार्त्तिके—१०१।६ पं द्रष्टव्यम्। (२) आदर्शे तु—"सत्यपि च बहिर्भावेन शक्तिविषये क्षणे।" इत्याकारः पाठः।

न्यायवार्त्तिकम्

स्तुल्यकालग्रहणं दृष्टम्, तस्मादप्राप्यकारीति। यत् तावत् सान्तरग्रहणादिति, तदयुक्तं विकल्पानुपपत्तेः। सान्तरग्रहणमिति कोऽर्थः? किं तावत्सान्तरस्याप्राप्तस्य ग्रहणमित्ययमर्थः, आहोस्वित् सहान्तरेण ग्रहणं सान्तरग्रहणमिति? अस्तु तावत् पूर्वः पक्षः अप्राप्तस्य ग्रहणं सान्तरग्रहणमिति। नन्वयं प्रतिज्ञार्थ एव, ततश्च हेत्वभावः। किं कारणम्? हेत्वर्थस्य प्रतिज्ञार्थेनाऽऽक्षिप्तत्वात्। एतदुक्तं भवति—अप्राप्यकारि चक्षुः, अप्राप्यग्रहणादिति न प्रतिज्ञार्थाद्भिद्यते (१)। अथ ब्रूषे सहान्तरेण ग्रहणमिति। किं तदन्तरं नाम, यच्चक्षुषा विषयेण सहोपलभ्यते इति? किमाकाशमभावो द्रव्यान्तरं वा? यद्याकाशम्, तन्न चक्षुषो विषयः। न ह्याकाशं चक्षुषा गृह्यते अरूपित्वाद् वाय्वादिवत्। अथ रूपवद्द्रव्यमन्तरशब्दवाच्यम्, तस्य व्यवधायकत्वात् तेन सह ग्रहणमनुपपन्नम्। अथाभावोऽन्तरशब्दवाच्यः? स स्वतन्त्रश्चक्षुर्विषयो न भवतीति तेन सहोपलब्धावनैकान्तिकम्। न चान्या गतिरस्ति। तस्माच्छून्यमभिधानं सान्तरग्रहणा-

न्यायवार्त्तिकतात्पर्य्यटीका

तद्वार्त्तिककारः सान्तरग्रहणादिति हेतुं विकल्प्य दूषयति—यत्तावदिति। सान्तरता खल्वप्राप्तिसाहचर्य्यादप्राप्तिं लक्षयति—हेत्वर्थस्य प्रतिज्ञार्थेनाक्षिप्तत्वादभेदेन। तदुक्तं—प्रतिज्ञार्थान्न भिद्यत इति। हेतुप्रतिज्ञापदवाच्यत्वेन भेदमुपचर्य्याक्षेप्याक्षेपकभावो द्रष्टव्यः। तस्य व्यवधायकत्वादिति। रूपवतोऽप्रसादस्वभावस्य कुड्यादेरित्यर्थः। यत्तु प्रसादस्वभावं तेजः तन्न गृह्यते, किं तु तस्य रूपमात्रं विस्फारिताक्षेण दृश्यते। तदाश्रयं च द्रव्यं साधयिष्यते। न च गुणो द्रव्यस्यान्तरम्। मा भूद्गन्धादिभिरन्तरं द्रव्यस्य, मा न भूतां च निरन्तरे द्रव्ये, स्वगुणाभ्यामन्तरितत्वात्। न चापातजन्मालोचनं वा विकल्पो वा द्रव्यानुमानं प्रतीक्षते येन रूपज्ञानानुमितं द्रव्यमिन्द्रियार्थयोर्द्रव्ययोरन्तरं स्यात्। अपि च रूपमात्रमगृह्यमाणे द्रव्ये स्वतन्त्रं गन्धादिवद् गृह्यमाणं कथमन्तरा स्वाश्रयमनुमापयेत्? आकाशादीनामाश्रयाणामग्रहणात्। तस्माद्विविक्तावयवतेजोऽवयविद्रव्याप्रत्यक्षत्वसमारोपमात्रेण दूषणं वक्ष्यमाणं त्वन्यथासिद्धत्वदूषणं पारमार्थिकं द्रष्टव्यम्। अथाभावोऽन्तरशब्दवाच्य इति, नास्माकं मूर्तद्रव्याभावादन्यदाकाशमस्तीति भावः। दूषयति—स स्वतन्त्रश्चक्षुर्विषयो न भवति। इन्द्रियं चार्थं चान्तराऽभावो ग्राह्यः, तेन सहार्थस्य ग्रहणं सान्तरग्रहणम्, न चेन्द्रियार्थयोर्मध्ये कस्यचित् संयुक्तस्य वा समवेतस्य वा ग्रहणमस्ति, यत्तन्त्रोऽयमभावो गृह्यते इति भावः। स्यादेतन्मा भूदान्तरालिकं संयुक्तं समवेतं वा, विशेष्यं गृह्यमाणमेव तु रूपादि विशेष्यमिति तत्तन्त्रोऽयमभावस्तद्विशेषणत्वेन निरूपयिष्यते, ततश्च सान्तरग्रहणमुपपत्स्यत इत्यत आह—तेन सहोपलब्धाविति। प्रतीयते हि

(१) 'प्रतिज्ञार्थान्न भिद्यते' इति तात्पर्य्यसम्मतपाठः।

न्यायवार्त्तिकम्

दिति। यैरपि विद्व्यस्यमानैः सान्तरग्रहणादित्यस्य सान्तर इति ग्रहणमित्येतद्व्याख्यानं क्रियते, तदप्ययुक्तम्, सान्तर इति ग्रहणस्यान्यनिमित्तत्वात्। अन्यथैतत् सान्तर इति ग्रहणं भवति, शरीरावधिनिमित्तत्वात्। शरीरमवधिं कृत्वा सान्तरनिरन्तरे भवतः, न पुनरिन्द्रियप्राप्त्यप्राप्तिनिमित्ते भवतः। यत्र शरीरमिन्द्रियं चोभयमर्थेन सम्बध्यते तत्र निरन्तर इति ग्रहणं भवति। यत्र पुनरिन्द्रियमात्रं सम्बध्यते तत्र सान्तर इति। तस्मात् सान्तर इति ग्रहणस्यान्यनिमित्तत्वान्न सान्तरमिति ग्रहणादप्राप्यकारिता सिद्ध्यतीति। यदपि पृथुतरग्रहणादिति, तदप्ययुक्तम्, सम्बन्धमात्रेण महदण्वोर्ग्रहणात्। सम्बन्धमात्रेणैव महति वाऽणौ वा विषयभेदानुविधायी प्रत्यय उपजायते, तस्माद्देश्यमेतदपीति। यत्पुनरेतदुक्तं (१) दिग्देशव्यपदेशादिति,

न्यायवार्त्तिकतात्पर्य्यटीका

त्वगादिभिरपीन्द्रियैः प्राप्यकारिभिरौष्ण्याभावविशेषणं शिशिरतरं पाथः, न चेन्द्रियाणामत्राप्राप्यकारिता, तस्मादनैकान्तिकम्। अन्वयाभ्युपगमेनैतदुक्तम्। अन्वयाभावे तु विरुद्धमिति भावः। न च तैजसं रूपमन्तरम्, येन सान्तरग्रहणं स्यादित्याह—न चान्या गतिरिति। यथा चैतत्तथोपपादितमधस्तात्। ये तु सान्तर इति ग्रहणमिति हेतुमाहुस्तान् प्रति दूषणमाह—यैरपीति। अन्यथासिद्धत्वे हेतुमाह—शरीरेति। शरीरावच्छिन्नाः खल्वात्मानः शरीरायतनाः शरीरमेवात्मानमभिमन्यमाना अर्थाननुभवन्ति। तत्र य एव शरीरासंबद्ध इत्यनुभूयते तमेव सान्तर इति मन्यते। इन्द्रियसंबन्धो भवतु, मा वा भूत्, शरीरसंबन्धेन तस्य स्पर्शादौ न सान्तरत्वाभिमान इत्यर्थः। हेत्वन्तरं दूषयति—यदपीति। संबन्धमात्रेणेति। मात्रग्रहणं संबन्धचतुष्टयव्याप्त्यर्थम्। तद्यथा—इन्द्रियेणार्थस्य संबन्धः, इन्द्रियावयवैरर्थस्य, अर्थावयवैरिन्द्रियस्य, इन्द्रियावयवैरर्थावयवानाम्, न चैतन्निर्य्यता विना पृथ्वग्रतां भवतीति पृथ्वग्रता सूचिता। यथा वर्त्तिदेशे पिण्डितमपि तेजः प्रसर्प्पत्प्रासादोदरं व्याप्नोति। तत्कस्य हेतोः? पृथ्वग्रत्वादिति। स्वभावतः प्रसरदपि न स्वपरिमाणानुविधायिनं प्रत्ययमाधत्ते, किन्तु विषयभेदानुविधायिनम्। विषयनिरूपणाधीननिरूपणा हि प्रत्यया नेन्द्रियनिरूपणाधीननिरूपणाः। तदिदमुक्तं विषयभेदानुविधायी प्रत्यय इति। अपरमपि हेतुं दूषयति—यत्पुनरिति। देहमर्थं चान्तरावस्थितस्य पृथिव्यादेः संयुक्तसंयोगाल्पीयस्त्वं भूयस्त्वं चापेक्षमाणस्येति। खगानां चोपर्युपरि संचरतां दूरान्तिकभावो बहुलतमालोकावयवभागानां संयुक्तसंयोगाल्पत्वभूयस्त्वाभ्यामवगन्तव्यः। स च तादृगालोकावयवो प्रत्यक्षोऽन्यथा न रूपमात्रेण तदनुमानं शक्यमित्युक्तम्। न च खगानामुपर्युपरि संचरतां दूरान्तिकप्रत्ययः स्यात्, न च पतति पतत्रिणीह प्राप्तो नेहेति भवेत्, तस्मादन्यथासिद्धेरेव सहान्तरेण ग्रहणादितिवदत्रापि दूषणमिति द्रष्टव्यम्।

---

(१) १०२ पृ; ४पंक्तौ स्वयमेवोक्तम्

न्यायवार्त्तिकम्

तदपि शरीरावधिनिमित्तत्वात् प्रत्युक्तम्। यत्रेन्द्रियं शरीरं चार्थेन सम्बध्यते तत्र दिग्देशव्यपदेशो न भवति, दूरान्तिकानुविधानं वा। यत्र त्विन्द्रियमेव केवलं सम्बध्यते तत्र शरीरमवधिं कृत्वा संयुक्तसंयोगाल्पीयस्त्वं भूयस्त्वं वाऽपेक्षमाणस्य दिग्देशप्रत्ययाः सन्निकृष्टविप्रकृष्टप्रत्ययाश्च भवन्ति। यत्पुनरेतत् शाखाचन्द्रमसोः तुल्यकालग्रहणादिति, तदपि न, अनभ्युपगमात्। को हि स्वस्थात्मा शाखाचन्द्रमसोस्तुल्यकालग्रहणं प्रतिपद्यते। कालभेदाग्रहणान्मिथ्याप्रत्यय एष उत्पलदलशतव्यतिभेदवदिति। कथं पुनरवगम्यते कालभेदाग्रहणनिमित्त एष युगपत्प्रत्ययो न पुनरेककाल एव? इदमनुमानम् आवरणानुपपत्तेरिति। यद्यप्राप्यकारि चक्षुर्भवति, न कुड्यकटादेरावरणस्य सामर्थ्यमस्तीत्यावरणानुपपत्तिः स्यात्। न च व्यवहितार्थोपलब्धिरस्ति। तस्मान्नाप्राप्यकारीति। दूरान्तिकानुविधानं चानुपलब्ध्युपलब्ध्योर्न स्यात्, अप्राप्य चक्षुरर्थं गृह्णातीति यदिदमस्य दूरे अग्रहणमन्तिके च ग्रहणमुभयमेतन्न स्यात्।

न्यायवार्त्तिकतात्पर्य्यटीका

अपरमपि हेतुं दूषयति—यत्पुनरिति। युगपद्ग्रहणमसिद्धम्, तदभिमानस्त्वन्यथासिद्धः, अचिन्त्यो हि तेजसो लाघवातिशयेन वेगातिशयो यदुदयगिरिशिखरमारोहत्येव मार्तण्डमण्डले भवनोदरेष्वालोक इत्यभिमानो लौकिकानाम्। तादृशं चाक्षुषमपि तेज इति क्रमेणापि गच्छद् युगपत्तत्र तत्र प्राप्तमिति लक्ष्यते। न चैकस्मादेव कर्म्मणो युगपद् दूरान्तिकसंयोगा भवन्तीति युक्तम्। तद्धि स्वकार्य्यं जनयितव्ये स्वाश्रयप्रत्यासत्तिमपेक्षते। अन्यथा मथुरास्थस्य देवदत्तस्य कर्म्म पाटलिपुत्रेण देवदत्तं योजयेत्। वेगाख्यसंस्कारजमपि कर्म्म न सहसा शरमन्तरालदेशेन च लक्ष्येण च योजयति। तस्मान्मिथ्यैव यौगपद्याभिमान इति। चोदयति—कथं पुनरिति। अस्ति हि शाखाचन्द्रमसोर्ग्रहणे यौगपद्याभिमानः, न चायमसति बाधके मिथ्येति वक्तुं शक्यः, सोऽयमबाधितो बोधयत्यप्राप्यकारितां चक्षुष इत्यर्थः। परिहरति—इदमिति। इन्द्रियं यद्यगत्वाऽनागतमर्थं गृह्णीयात् किमस्य कुड्यकटाद्यावरणमपकुर्य्यात्, येन तदावृतं न गृह्णीयात्। गतौ तु स्पर्शवता प्रसादरहितेन सैवास्य प्रतिबद्धेति न प्राप्नोति विषयम्, अप्राप्तं च न गृह्णातीति। प्रयोगस्तु—चक्षुःश्रोत्रे प्राप्य स्वविषये कार्य्यं कुरुतः, जनकत्वे सति तदप्राप्तावजनकत्वात्। यज्जनकं सद् यदप्राप्तौ यन्न जनयति तत् तत्प्राप्तावेव तज्जनयति, यथा कुम्भजनको मृदामप्राप्तावकुर्वन् कुम्भं तत्प्राप्तावेव करोति, तथा चैतत्तस्मात्तथेति। युक्त्यन्तरमाह—दूरान्तिकानुविधानमिति। दूरे नोपलभ्यते अन्तिके चोपलभ्यते अप्राप्तेरविशेषेण दूरेऽप्युपलम्भः स्यात्, अनुपलम्भे वा अन्तिकेऽपि स स्यात्। प्राप्तौ तु दूरं गच्छत् प्रक्षीणं सत् प्राप्तमर्थं न गृह्णाति अतैजसम्, तैजसमप्यभिभूतं न गृह्णाति, यथोल्काप्रकाशं मध्यन्दिने। अनभिभूतं तु मार्त्तण्डमण्डलं गृह्णात्येवेति। चोदयति—

न्यायवार्त्तिकम्

दृष्टं तु, तस्मान्नाप्राप्यकारीति। विषयीभावादिति चेन्न, सम्बन्धमन्तरेण विषयीभावानभ्युपगमात्। अथापीदं स्यात् यः चक्षुषोर्विषयीभवत्यर्थः स उपलभ्यते। यस्तु न भवति नासावुपलभ्यते इति। न च व्यवहितानां दूरावस्थितानां वाऽर्थानां चक्षुषो विषयीभावोऽस्ति, तस्मान्न ते गृह्यन्त इति। तच्च नैवम्, सम्बन्धमन्तरेण विषयीभावानभ्युपगमात्। कः सम्बन्धव्यतिरेकेण विषयीभावः? केवलं भवतः संज्ञामात्रं भिद्यते नार्थ इति। मयोच्यते सम्बन्ध इति, भवताऽभिधीयते विषयीभाव इति, न कश्चित् विशेष इति। अथ प्राप्यकारित्वे चक्षुषः किं प्रमाणम्? इन्द्रियत्वमेव। प्राप्यकारि चक्षुरिन्द्रियत्वात् घ्राणादिवत्। घ्राणादीन्द्रियं प्राप्यकारि दृष्टं तथा च चक्षुस्तस्मात् प्राप्यकारीति। अथ पुनर्न किञ्चिदिन्द्रियं प्राप्यकारि प्रतिपद्यते, तदा सर्वाणि पक्षीकृत्य करणत्वादिति वाच्यम्। करणं वा स्यादिति प्राप्यकारि दृष्टम्, तथा चेन्द्रियाणि, तस्मात् प्राप्यकारीणीति। अथ पुनर्वैयात्यात् सर्वानेवार्थानप्राप्यकारिणः प्रतिपद्यते, तदा कथम्? सोऽपि दृष्टसामर्थ्यानां कारणानां सर्वत्र कार्य्या-

न्यायवार्त्तिकतात्पर्य्यटीका

विषयीभावादिति। योग्यो हि तादृश इन्द्रियक्षणः स्वकारणादुपजातः परिणतो वाऽर्थक्षणश्च, ययोरप्राप्तयोरेव ग्रहणग्राह्यभावः, व्यवहितविप्रकृष्टौ च न तौ तादृशौ, तत्किमप्रतीयमानप्राप्तिकल्पनयेत्यर्थः। परिहरति—**तच्च नैवमिति।** निषेत्स्येते हि क्षणभङ्गपरिणामौ भावानाम्, तेन स्थेमभाजां भावानां स्वरूपयोग्यता वा महत्त्वादिर्विषयीभावः सहकारिसाकल्यं वा ज्ञानोपजननं प्रति परिशिष्यते। तत्र स्वरूपयोग्यतामात्रं चेदास्थीयेत, तदा यदेवाव्यवहितं सन्निहितं सदजनयद्विज्ञानं विप्रकृष्टमपि व्यवहितमपि तदेवेति तथैव तेन ज्ञानं जनयितव्यम्। अस्ति हि तस्य तदाऽपि स्वरूपयोग्यतेति, सहकारिसाकल्यं तु प्राप्तिरेव, तस्मान्न संबन्धमन्तरेण विषयीभाव इति सूक्तम्। सन्दिग्धः पृच्छति—**अथ प्राप्यकारित्व इति।** अयमभिसन्धिः—कुलालादौ प्राप्यकारिणि दृष्टं यथा विप्रकृष्टो व्यवहितश्च न करोतीति, अप्राप्यकारिणि चायस्कान्तादौ दृष्टं यथा विप्रकृष्टो व्यवहितश्च लौहं मणिमाकर्षति, तस्मात्तत्र प्रमाणं वक्तव्यमिति, उत्तरम्—**इन्द्रियत्वमेव** प्रमाणम्, तदेव पञ्चावयवोपपन्नमाह—**प्राप्यकारीति।** यदि तु कश्चित् दृष्टान्तस्य साध्यविकलत्वमुद्भावयेत् त्वगादीनामप्राप्यकारित्वादिति, तं प्रत्याह—**अथ न किञ्चिदिति** (१)। पृच्छति—**अथेति।** योग्यतयैव हि कारणानि स्वकार्य्यं कुर्वन्ति, प्राप्तिस्तु स्वरूपयोग्यताप्रयुक्तां व्याप्तिमुपजीवति, न त्वस्याः स्वाभाविकं व्यापकत्वमिति भावः। उत्तरम्—**सोऽपीति।** सहकारिसाकल्यं तावन्न प्राप्तेरतिरिच्यत इत्युक्तम्। केवलं स्वरूपयोग्यता वक्तव्या। सा च व्यस्तानामप्यस्तीति यत्र तत्र

(१) अत्र वार्त्तिके "पुनः" इत्यधिकपाठः।

न्यायवार्त्तिकम्

नुत्पत्त्या प्रत्यवस्थेयः। यदि खल्वेतानि कारणानि परस्परप्राप्त्यनपेक्षाणि स्वयमनुपजातशक्तिकानि कार्यमारभन्त इति कस्मात् कार्यं सर्वत्र न भवतीति वक्तव्यम्, अतो न कारणमप्राप्य कार्यस्तीति। अनेकदण्डचक्राद्युदाहरणं लोक इति। तस्माद् व्यवस्थितमेतदिन्द्रियार्थसन्निकर्षोत्पन्नं ज्ञानमिति ॥

अथ ज्ञानग्रहणं किमर्थम्? सुखादिव्यवच्छेदार्थम्। इन्द्रियार्थसन्निकर्षात् सुखदुःखे अपि

न्यायवार्त्तिकतात्पर्य्यटीका

व्यवस्थितेभ्योऽपि कार्य्योत्पादप्रसङ्गः। अयस्कान्तमणेरपि चक्षुष इव वृत्तिभेद एषितव्यः, अन्यथा व्यवधानविप्रकर्षयोरपि लौहाकर्षणप्रसङ्गात्। न च व्यवधानविप्रकर्षाभावसहितो लौहमाकर्षति, व्यवधानविप्रकर्षयोस्तु तदभावाभावेन न भवतीति सांप्रतम्, प्राप्तेरेव तत्र तत्र कार्य्योत्पादं प्रति उपयोगस्यावेदितत्वात्। योग्यतामात्रस्य चोपाधेरपाकृतत्वात्। यथा च द्रव्यातिरिक्तस्तद्धर्म्मः प्राप्तिस्तथा निवेदयिष्यते। तस्मात्सर्वमवदातम्। उपसंहरति—तस्मादिति। यदपि कृष्णसारानुग्रहोपघाताभ्यां दर्शनादर्शनादिति (?), तत्रोच्यते—तदधिष्ठानानुग्रहोपघाताभ्यां तस्यानुग्रहोपघातौ, यथा कूष्माण्डलतासेचनच्छेदनाभ्यां तत्फलस्यानुग्रहोपघातौ, अत एव हि निर्गताऽप्यच्छिन्नमूला चक्षुःसंततिः कार्याय समर्था न छिन्नमूलेति सिद्धम्।

पृच्छति—अथ ज्ञानेति। प्रत्यक्षसमाख्यातलक्ष्यानुवादेन लक्षणे विधीयमाने ज्ञायत एवैतज्ज्ञानमिति, लोके साक्षात्कारिज्ञानहेतोः प्रत्यक्षत्वादिति भावः। उत्तरम्—सुखादिव्युदासार्थम्(१)। तदेव हि लक्षणवाक्यमुच्यते, यस्य लक्ष्यानपेक्षोऽतिव्याप्त्यव्याप्तिव्युदासो लक्षणपदेभ्य एव प्रतीयते। लक्ष्यानुरोधेन तु लक्षणव्यवस्थापनेऽन्योन्याश्रयत्वमगतिर्वेति (२) भावः। सुखादीनां विज्ञानाभिन्नहेतुजत्वेन विज्ञानत्वादशक्यं व्यावर्त्तनमिति चेत्, न, अभिन्नहेतुजत्वासिद्धेः। न खलु यैव चन्दनस्पर्शज्ञानस्योत्पत्तौ सामग्री सैव सुखस्यापीति, अस्ति हि शीतार्त्तस्यापि चन्दनेन्द्रियसंयोगात् शीतस्पर्शज्ञानमिति तद्वदेवास्य सुखमपि भवेत्। अवान्तरसामग्रीभेदेऽपीन्द्रियार्थमनस्कारजत्वाज् ज्ञानजातीयत्वमिति चेत्, न, किञ्चित्कारणाभेदेऽपि कार्य्यभेदस्यानाकस्मिकत्वोपपत्तेः। तदर्थत्वाच्च कारणभेदानुसरणप्रयासस्य। न चोपादानाभेदादभेद इति युक्तम्, भिन्नानामपि ज्ञानानामेकसमनन्तरप्रत्ययोपादानत्वस्य भवद्भिरभ्युपगतत्वात्। अपि चोपादानाभेदश्च कुतश्चित्कारणभेदात् कार्य्यभेदश्चेति को विरोधः। अत एवास्माकमभेदेऽप्युपादानस्य पिठरस्यौष्ण्यापराख्यस्य च वह्निसंयोगस्य पूर्वरूपादिप्रध्वंसानां कारणानां भेदाद् भिन्नजातीया

(१) "व्यवच्छेदार्थम्" इति वार्त्तिकपाठः। (२) ननु लक्ष्यं यदि लक्षणान्तरेण व्यवस्थापितं स्यात् तर्हि कथमन्योन्याश्रय इत्यत आह "अगतिर्वा" इति, लक्ष्यानपेक्षलक्षणान्तरेणैव लक्ष्यव्यवस्थापने लक्ष्यसापेक्षलक्षणस्य प्रयोजनमेव न स्यादिति भावः।

न्यायवार्त्तिकतात्पर्य्यटीका

जायन्ते गन्धरूपरसस्पर्शा इति सिद्धान्तः। तस्मादर्थप्रवणेभ्यो ज्ञानेभ्यस्तदप्रवणतया भिन्नजातीयाः सुखादयो यथास्वमनुकूलवेदनीयत्वादिभिर्लक्षणैरन्योन्यमपि भेदवन्तस्तीव्रसंवेगितया प्रमित्सानपेक्ष-मानसप्रत्यक्षवेदनीया इति रमणीयम्। स्यादेतत्, असत्यपीन्द्रियार्थसन्निकर्षे ज्ञानमात्रादेव सुखदुःखयोः स्वप्रान्तिके दर्शनात् यत्रापीन्द्रियार्थसन्निकर्षस्तत्रापि ज्ञानमस्तीति तदेव सुखदुःखयोः कारणं क्लृप्तसामर्थ्यात्, इन्द्रियार्थसन्निकर्षस्य तु ज्ञानमात्रोपयोगादन्यथासिद्धौ भावाभावाविति। तदयुक्तम्, स्वप्रान्तिके सुखदुःखोत्पादस्यासिद्धेस्तज्ज्ञानस्यार्थज्ञानस्येव मिथ्यात्वात्। यथा हि तत्र कामिनीस्मृतिविपर्यास एवमुपलब्धचरतज्जन्मसुखस्मरणविपर्य्यासः। सुखदुःखबुद्धुत्पाद एव वाऽत्र धर्म्माधर्म्मोपयोगो न तु सुखदुःखोत्पादे। न चासतीन्द्रियार्थसन्निकर्षे ज्ञानमन्यन्मनोरथादि वा तादृशं सुखभेदं विधत्ते यादृशो विषयोपभोगजन्मा, सतीन्द्रियार्थसन्निकर्षे ज्ञानमात्रमेव तस्य हेतुः, ज्ञानहेतुस्तु सन्निकर्ष इत्युक्तमिति चेत्, न, विषयासन्निधाने विषयस्मृतिमतस्तादृशस्य सुखभेदस्यानुत्पादादित्युक्तमेव। विषयसाक्षात्कारस्तदुत्पादहेतुर्न विषयज्ञानमात्रमिति चेत्, हन्तेश्वरस्याप्यस्ति तत्रभवतो योगर्द्धिसंपन्नानां च महाधियां समस्तवस्तुसाक्षात्कार इति तेषामपि सुखदुःखोत्पादप्रचयः प्रसज्येत असत्यां प्रतिपक्षधारणायाम्। तस्मादिन्द्रियार्थसन्निकर्षोऽपि सुखदुःखोत्पादहेतुरेषितव्यः, स च सत्यप्यर्थसाक्षात्कारे नास्ति सिद्धानामिति न तेषां सुखदुःखोत्पादः। अपि च चरमभावि कारणं गृहीत्वा पूर्वभाविनामकारणत्वापादने तन्त्वादीनामपि पटादीन् प्रत्यकारणत्वप्रसङ्गः। संयोगभेदादेव तादृशपटोत्पत्तेः, तन्त्वादीनां च संयोगभेद एवोपयोगात्, तत्सहितस्य तु तत्कारणत्वे सन्निकर्षस्याप्यालोचनसहितस्येति समानम्। यथाऽऽहुः पदार्थविदः (१)—'स्रगाद्यभिप्रेतविषयसान्निध्ये सतीष्टोपलब्धीन्द्रियार्थसन्निकर्षधर्म्मव्यपेक्षादात्ममनसोः संयोगात् यदनुग्रहाभिष्वङ्गनयनादिप्रसादजनकमुत्पद्यते तत्सुख'मिति। तस्मात् सुष्ठूक्तं सुखादिनिवृत्त्यर्थं ज्ञानग्रहणमिति। इह द्वयी प्रत्यक्षजातिरविकल्पिका सविकल्पिका चेति। तत्रोभयी इन्द्रियार्थसन्निकर्षोत्पन्नं ज्ञानमव्यभिचारीति लक्षणेन संगृहीताऽपि स्वशब्देनोपात्ता, तत्र विप्रतिपत्तेस्तत्राविकल्पिकायाः पदमव्यपदेश्यमिति सविकल्पिकायाश्च व्यवसायात्मकमिति। तत्र व्यपदेशो विशेषणमुपलक्षणं वा नामजात्यादि, तत्कर्म्म व्यपदेश्यं विशेष्यमिति यावत्। तद्यथा डित्थोऽयं गौरयं शुक्लोऽयं कमण्डलुमानयं गच्छत्ययमिति सर्वं हि सविकल्पकं विशेषणविशेष्यभावेन वस्तुषु प्रवर्त्तते। अविद्यमानं व्यपदेश्यं यस्मिंस्तदव्यपदेश्यं जात्यादिस्वरूपावगाहि, न तु जात्यादीनां मिथो विशेषणविशेष्यभावावगाहीति यावत्। तत्र नामरहितमविकल्पकं नास्तीति ये विप्रति-

---

(१) "पदार्थविदः" प्रशस्तपादाचार्य्याः, वैशेषिकभाष्ये सुखलक्षणे आहुः।

न्यायभाष्यम्

यावदर्थं वै नामधेयशब्दास्तैरर्थसम्प्रत्ययः, अर्थसम्प्रत्ययाच्च व्यवहारः। तत्रेदमिन्द्रियार्थसन्निकर्षादुत्पन्नमर्थज्ञानं 'रूपम' इति वा, 'रसः' इत्येवं वा भवति, रूपरसशब्दाश्च विषयनामधेयम्। तेन व्यपदिश्यते ज्ञानं—रूपमिति जानीते, रस इति जानीते। नामधेयशब्देन व्यपदिश्यमानं सत् शाब्दं प्रसज्यते, अत आह—अव्यपदेश्यमिति।

न्यायवार्त्तिकतात्पर्य्यटीका

पद्यन्ते तन्मतमपाचिकीर्षुरुपन्यस्यति भाष्यकारः **यावदर्थं वै नामधेयशब्दाः**। सर्व्वेऽर्थाः सर्व्वथा सर्व्वदा सर्व्वत्र नामधेयान्विताः। नास्ति सोऽर्थो यः कदाचित् क्वचित् कथंचिद् नामधेयेन वियुज्यते। तदनेन नामधेयतादात्म्यमर्थानां प्रतिजानीते। अत्र हेतुमाह—**तैरर्थसंप्रत्यय** इति। अर्था हि प्रतीयमाना नामधेयैरुपेतास्तत्सामानाधिकरण्येनावगम्यन्ते गौरित्यर्थोऽश्व इत्यर्थ इति। न चोपायतया सामानाधिकरण्यं घटते। न हि चक्षुरादिसामानाधिकरण्यं रूपाद्यनुभवति। नापि ज्ञायमान उपाय उपेयसामानाधिकरण्यमनुभवति। न हि भवति धूमोऽयं वह्निरिति किं तु धूमोऽयं धूमत्वाद्वह्निमानिति। अपि चाऽशब्दोपायेऽनुमेयादौ न शब्दसंभेदेनाधिगमो भवेत्, अस्ति तु। तस्मात्तैर्नामधेयैः सह समानाधिकरणस्यार्थस्य प्रत्ययो यत इति। तस्मान्नामधेयात्मानोऽर्थाः। किं च गवादिषु वृक्षादिषु च शब्दापकर्षे अर्थप्रत्ययापकर्षात् तदुत्कर्षे त्वर्थप्रत्ययोत्कर्षात् प्रत्ययस्य च प्रत्येतव्योत्कर्षाधीनोत्कर्षत्वान्नामधेयोत्कर्षेणार्थोत्कर्षोऽर्थस्य तादात्म्यं कथयति, तदिदं समः प्रयोजनं **संप्रत्यय** इति समधिकः प्रत्यय इत्यर्थः। अस्त्यर्थसंप्रत्ययो नामधेयसामानाधिकरण्येन, न त्वेतावता नामधेयात्मता सिध्यति, अस्ति हि पुरोवर्तिसामानाधिकरण्येन रजतप्रत्ययो न चैतावता शुक्ती रजतात्मिका भवतीत्यत आह—**अर्थसंप्रत्ययाच्च व्यवहारः**। ततश्चाविसंवादात् प्रमाणं सन्नामधेयतादात्म्यं साधयत्यर्थानामित्यर्थः। तदेवं सामान्यतोऽर्थानां नामधेयतादात्म्यं व्युत्पाद्य प्रकृते योजयति। **तत्रेदमिन्द्रियार्थसन्निकर्षादुत्पन्नं विषयज्ञानं**(१) **रूपमिति वा रस इति वा,** एवं रूपाद्यर्थसामानाधिकरण्येन भवति। भवतु किमेतावताऽपीत्यत आह—**रूपरसशब्दाश्च विषयनामधेयं** किमेतावतापीत्यत आह—**तेन व्यपदिश्यते ज्ञानम्**। उक्तमपि व्यपदेशं सव्याख्यानमाह—**रूपमिति जानीते रस इति जानीत** इति। तथा चार्थानां नामधेयात्मकत्वात्तद्गोचरमालोचनमपि नामधेयगोचरमित्यर्थवन्नामधेयेन व्यपदिश्यमानं शाब्दं प्रसज्यत इति। न शब्दप्रमाणकतया शाब्दम्, अपि तु शब्दे जातं शाब्दम्, शब्दश्चास्य विषयत्वेन जनकोऽर्थतादा-

---

(१) भाष्ये "अर्थ ज्ञानम्" इति पाठः।

न्यायभाष्यम्

यदिदमनुपयुक्ते शब्दार्थसम्बन्धेऽर्थज्ञानम्, न तत् (१) नामधेयशब्देन व्यपदिश्यते, गृहीतेऽपि च शब्दार्थसम्बन्धेऽस्यार्थस्यायं शब्दो नामधेयमिति। यदा तु सोऽर्थो

न्यायवार्त्तिकतात्पर्य्यटीका

स्यात्। तथा च नाविकल्पं शब्दरहितमस्तीति तात्पर्य्यार्थः। तथा चाहुः—

न सोऽस्ति प्रत्ययो लोके यः शब्दानुगमादृते।
अनुविद्धमिव ज्ञानं सर्वं शब्देन गम्यते॥

बालमूकादीनामपि विज्ञानं शब्दानुव्याधवदेवानादिशब्दभावनावशात्। यदवोचत्—

आद्यः करणविन्यासः प्राणस्योर्द्ध्वं समीरणम्।
स्थानानामभिघातश्च न विना शब्दभावनाम्॥ इति

तदस्य निराकरणं लक्षणगतेनालोचनज्ञानावरोधार्थेनाव्यपदेश्यपदेन सूचितम्। इति। परीक्षापर्वणि वचनार्हमपि सुभाषितरुचितया तद्विलम्बमसहमानो भाष्यकारो लक्षणावसर एवाह। अत एवाह— **अव्यपदेश्यमितीति।** तेन सूचितेऽप्यर्थे अव्यपदेश्यपदं योजयति—**यदिदमनुपयुक्ते शब्दार्थसंबन्धे अर्थज्ञानं तन्न नामधेयेन (२) व्यपदिश्यते।** अयमभिसन्धिः—सामानाधिकरण्येन शब्दात्मकत्वं रूपादीनामभिधीयमानं शब्दब्रह्मात्मत्वं वोच्येत श्रूयमाणगौरित्यादिपदभेदात्मत्वं वा? न तावदाद्यः कल्पः। न खल्वस्मदादिसमस्तदर्शनपथातिवृत्तेन शब्दब्रह्मणा रूपादीनामस्ति सामानाधिकरण्यप्रतीतिर्लौकिकानां श्रूयमाणशब्दसामानाधिकरण्येन तु तादात्म्यप्रसाधने अनुपयुक्तशब्दसंबन्धस्य बालमूकादेः रूपादिज्ञानेषु नास्ति श्रूयमाणशब्दगन्धोऽपि, प्रागेव तु तत्सामानाधिकरण्यम्, न तु तेषामपि प्राग्भवीयशब्दभावनानुगमेन तत्सामानाधिकरण्यमिति सांप्रतम्। न खलु रूपाद्यात्मनः शब्दस्य रूपादिवैशद्येनावैशद्यं संभवति। युगपद्वैशद्यावैशद्यरूपविरुद्धधर्म्मयोगेन भेदप्रसङ्गात्। वैशद्ये तु व्युत्पन्नवदव्युत्पन्नोऽपि शब्दैर्व्यवहरेत्। न तु संबन्धग्रहणमपेक्षेत। न च तादात्म्यादन्यद्वाचकत्वं शब्दानां यत्र संबन्धग्रहापेक्षा भवेत्। न च तादात्म्येऽपि कल्पितभेदानां वाच्यवाचकभावः। तथा सति न सामानाधिकरण्यं स्यात्। न ह्यस्ति संभवो भेदकल्पना च सामानाधिकरण्यप्रथा चेति। तस्मादव्युत्पन्नानामस्ति शब्दरहितं रूपादिषु निर्विकल्पकं प्रत्यक्षमिति। न केवलमव्युत्पन्नानाम्, व्युत्पन्नानामप्यस्तीत्याह— **गृहीतेऽपि च शब्दार्थसंबन्ध इति।** अर्द्धोक्त एव सामानाधिकरण्यनिरासाय संबन्धग्रहणस्वरूपमाह—**अस्यार्थस्य** सास्नादिमद्व्यक्तेरयं गकाराद्योकारो **नामधेयमिति।** इतिकरणो ज्ञानपरामर्शप्रधानः। तथा च यो डित्थो नानादेशकालावस्थासंसृष्टः पिण्डभेदः सोऽयमिति सन्निहितदेशकाल इत्यर्थः। न त्वयं पिण्डो डित्थशब्द इति प्रत्ययः। औत्सर्गिकं हि शब्दानामर्थपरत्वं क्वचित्पुनरित्यादिभिः शब्दैस्तदपोद्यते। यत्रापि

(१) "न तत्" इत्यत्र "तत्" इति ज-ग। "तन्न" इति वि। (२) भाष्ये "नामधेयशब्देन" इति पाठः।

न्यायभाष्यम्

गृह्यते, तदा तत् पूर्व्वस्मादर्थज्ञानात् न विशिष्यते, तदर्थविज्ञानं तादृगेव भवति। तस्य त्वर्थज्ञानस्याऽन्यः समाख्याशब्दो नास्तीति, येन प्रतीयमानं व्यवहाराय कल्पेत(१)। न चाऽप्रतीयमानेन व्यवहारः। तस्माज् ज्ञेयस्यार्थस्य (२) संज्ञाशब्देनेति-करणयुक्तेन निर्दिश्यते—रूपमिति ज्ञानम्, रस इति ज्ञानमिति। तदेवमर्थज्ञानकाले स न समाख्याशब्दो व्याप्रियते, व्यवहारकाले तु व्याप्रियते। तस्मादशाब्दमर्थज्ञान-मिन्द्रियार्थसन्निकर्षोत्पन्नमिति।

न्यायवार्त्तिकम्

भवतः, तद् व्युदासार्थमाह—ज्ञानमिति। **तच्चेन्द्रियार्थसन्निकर्षोत्पन्नं ज्ञानं विषयनामधेये-नाभिधीयत इति भाष्यम् (३)।** तत्प्रतिषेधार्थमाह—**अव्यपदेश्यमिति।** यदिदमनुपयुक्तशब्दार्थ-सम्बन्धस्य विषयभेदानुविधायि विज्ञानं तत्प्रत्यक्षम्, कृतशब्दार्थसम्बन्धस्यापि तदुत्पत्तिकाले

न्यायवार्त्तिकतात्पर्य्यटीका

संबन्धप्रतिपादनमभेदेन डित्थ इति, तत्रापि शब्दो वाच्यपरो न स्वपरः। यथा गौर्वाहीक इति लक्ष्यमाणगुणयोगपरः। न च तन्मात्रे वाहीकस्य गोत्वं संभवति। तस्माद्भिन्नयोरेव शब्दार्थयोः संबन्धग्रहात्तन्मूलत्वाच्च शब्दव्यवहारस्य न शब्दपुरःसरमपि ज्ञानं सामानाधिकरण्य-मात्मनोऽर्थस्यावगमयति। यत्तु शब्दानुपायेऽपि ज्ञाने शब्दः पूर्वं संभवति तदगृहीत-सङ्केतस्य प्रथममिन्द्रियार्थसन्निकर्षादालोचनेन शब्दसंसर्गरहितेनालोचितेऽर्थमात्रे तस्यार्थस्य शब्दभेदेन संबन्धात् शब्दविषयः संस्कारः प्रबोध्यते, स प्रबुद्धः शब्दस्मृतिं जनयति। तेन व्युत्पन्नस्य निर्विकल्पकात् पराञ्चः प्रत्ययाः शब्दानुपाया अपि शब्दपुरःसरा जायन्ते। यथाऽऽहुः—

यत्संज्ञास्मरणं तत्र न तदप्यन्यहेतुकम्।
पिण्ड एव हि दृष्टः सन् संज्ञां स्मारयितुं क्षमः॥

तस्माद् व्युत्पन्नस्यापि नामधेयस्मरणाय पूर्वमेषितव्यो विनैव नामधेयमर्थप्रत्ययः। तदिद-मुक्तं **गृहीतेऽपि च शब्दार्थसंबन्धे अस्यार्थस्यायं शब्दो नामधेयमिति।** यदा तु सोऽर्थो गृह्यते नामधेयरहितो नामधेयस्मरणात् पूर्वमविकल्पकेन, तदा पूर्वस्मादव्युत्पन्नावस्थाया-मर्थज्ञानान्न विशिष्यत इति। यतो न विशिष्यते तस्मान्न तदर्थज्ञानं तादृगेव भवति। ननु परप्रतिपादनादिलक्षणव्यवहाराय स्वरूपेण ज्ञाने व्यपदेष्टव्ये यदर्थव्यपदेशेन व्यपदिश्यते तदव-गच्छामः अर्थव्यपदेशाकारमिति। कथं चार्थाकारं भवति, यद्यर्थव्यपदेशयोर्नाभेदस्तस्मात् पुनरपि तादात्म्यं प्रसक्तमित्यत आह—**तस्य त्विति।** अर्थाकारमेव तु ज्ञानमपदिश्यते अन्यथा-ऽशक्यत्वादित्यर्थः। **प्रतीयमानं परेण।** उपसंहरति—**तस्मादिति।**

तदेवमर्थज्ञानकाले न समाख्याशब्दो व्याप्रियते, प्रतीयमानतया व्यवहारकाले परप्रत्यायनकाले

---

(१) "कल्पते" इति ल-पु पाठः। "तस्य" इत्यादिः "कल्पेत" इत्यन्तः पाठो ग-मूले न निवेशितः, पादटीकायान्तु धृतः। (२) "तस्माज्ज्ञेयस्य" इति ज-ग-आ०। (३) "इति भाष्यम्" इत्यनेन भाष्यस्थपाठ एव आनुपूर्व्या गृहीत इति तु न मन्तव्यम्, भाष्ये एतादृगानुपूर्वीकपाठाभावात्, अतः भाष्योक्तिमर्मकथनमेतद् बोद्धव्यम्।

न्यायभाष्यम्

ग्रीष्मे मरीचयो भौमेनोष्मणा संसृष्टाः स्पन्दमाना दूरस्थस्य चक्षुषा सन्निकृष्यन्ते,

न्यायवार्त्तिकम्

तादृगेव। अपरे त्वव्यपदेश्यमित्यनेनानुमानं निराकुर्वन्ति। तच्च नैवम्। कस्मात्? इन्द्रियार्थसन्निकर्षोत्पन्नमिति वचनात्। न ह्यनुमेयस्येन्द्रियेण सन्निकर्षादनुमानं भवति, अतो न प्रसङ्गोऽनुमान इति। ग्रीष्मे मरीचय इति भाष्यम्। तत्प्रतिषेधार्थमिदमुच्यते—अव्यभिचारीति। किमिदं व्यभिचारीति?

न्यायवार्त्तिकतात्पर्य्यटीका

तु व्याप्रियते कारणतया, तदनेन गोपालाविपालादीनां संज्ञानिवेशनं तासु तासु व्यक्तिषु व्यवहारोत्कर्षहेतुः नार्थोत्कर्षहेतुरित्यपि सूचितं भवति। तस्मादविकल्पप्रत्यक्षावबोधार्थेनाव्यपदेश्यपदेनास्यैवाविकल्पकस्य शब्दार्थव्याधरहितता सूचितेत्याशयवानुपसंहरति—तस्मादिति। तदेतद्भाष्यं वार्तिककारः तात्पर्य्यतो व्याचष्टे—तच्चेन्द्रियार्थेति, विषयभेदानुविधायि ज्ञानमिति शब्दात्मतामपाकरोति। चाक्षुषं हि रूपज्ञानं रूप एव नियतं न शब्दे प्रवर्त्तते। एवं श्रौत्रमपि शब्द एव नियतं न रूपादौ प्रवर्त्तते। यदि पुनरिदं शब्दात्मकं रूपादि भवेत् श्रोत्रजं ज्ञानं शब्दग्राहीति रूपादावपि प्रवर्त्तेत। अप्रवर्त्तमानं वा विधुरयति रूपादीनां शब्दात्मताम्। अपि च श्रूयमाणशब्दात्मत्वे रूपादीनाम्, तेषामपि श्रवणग्राह्यत्वमित्यन्धोऽपि रूपं गृह्णीयात्। अस्ति हि तस्य श्रोत्रं च शब्दज्ञानं च। एवं बधिरोऽपि शब्दं गृह्णीयात्। अस्ति हि तस्य लोचनं च रूपज्ञानं च। अशब्दोऽभाव इति च विवक्षितविपरीतापत्तिः शब्दाभावस्यार्थस्य शब्दत्वात्, अशब्दत्वे वा स एवार्थः शब्दाद् भिन्नः प्रसज्येत, एवमभावोऽप्यर्थ इति शब्दः स्यात्। तथा च नाभावः, शब्दस्य सत्त्वात्, तथा चार्थानुविधायि ज्ञानं न भवेत्, अस्ति च, तस्मान्न शब्दात्मानोऽर्था इति। तदुत्पत्तिकाल इति प्राथम्येन शब्दानुव्याधं व्यावर्तयति। एकदेशिव्याख्यानमाह—अपरे त्विति। इन्द्रियार्थसन्निकर्षेण हि लिङ्गेन यदिन्द्रियगतिज्ञानं तदपि प्रत्यक्षलक्षणोपेतमिति प्रत्यक्षं प्रसज्यत इति तन्निराकरणायाव्यपदेश्यपदम्। अपदेशो हेतुवचनम्, तदेव तदाभासेभ्यो विशिष्टं व्यपदेशः। तस्य कार्य्यं हेतुप्रत्यायनद्वारा अनुमेयज्ञानं व्यपदेश्यम्, न व्यपदेश्यमव्यपदेश्यमलिङ्गोद्भवमित्यनुमानं व्यावर्त्तितमित्यर्थः। तदेकदेशिमतं दूषयति—तच्च नैवमिति। नन्विन्द्रियगतिज्ञानमपीन्द्रियार्थसन्निकर्षाल्लिङ्गादुत्पन्नमित्यत आह—न ह्यनुमेयस्येति। नैतदिन्द्रियार्थसन्निकर्षादुपजायते, किं तु तज्ज्ञानात्। अत एवातीतेऽपि धूमादौ लिङ्गे तत्स्मरणमात्रादेवानुमेयज्ञानं भवति। न च सन्निकर्षपदस्य मुख्यत्वे संभवति ज्ञानलक्षणा युक्तेति भावः। उपसंहरति—अत इति। इमं च वार्तिकग्रन्थमबुध्यमाना इन्द्रियगतिज्ञाननिवृत्त्यर्थमिन्द्रियविषयेष्विति पदं सूत्रेऽध्याहरन्तीति।

क्रमप्राप्तस्याव्यभिचारिपदस्य तात्पर्यं ब्रुवाणो भाष्यस्यापि तात्पर्यमाह—ग्रीष्मे मरीचय

न्यायभाष्यम्

तत्रेन्द्रियार्थसन्निकर्षादुदकमिति ज्ञानमुत्पद्यते, तच्च प्रत्यक्षं प्रसज्यत इत्यत आह—अव्यभिचारीति। यदतस्मिंस्तदिति तद्व्यभिचारि, यत्तु तस्मिंस्तदिति तदव्यभिचारि प्रत्यक्षमिति।

न्यायवार्त्तिकम्

यदतस्मिंस्तदिति भवति। किं पुनरत्र व्यभिचारि, किमर्थः? आहो ज्ञानमिति? एके तावद्वर्णयन्ति—

न्यायवार्त्तिकतात्पर्य्यटीका

इतीति। यद्यपि सामान्यलक्षणेनैव व्यभिचारिणो निरस्ताः प्रत्ययास्तदपेक्षं च विशेषलक्षणम्, अन्यथाऽनुमानादिपदेष्वप्यव्यभिचारिपदमुपादेयं स्यात्, तथाऽपि सिद्धे सत्यारम्भो नियमार्थः, द्वयी हि प्रमाणानां गतिः—किञ्चित् सत्तामात्रेण प्रमासाधनं यथा प्रत्यक्षम्। न हि चक्षुरादीनां ग्रहणं प्रमायामुपयुज्यते अपि तु सत्तैव। अनुमानादीनि तु स्वज्ञानेन प्रमासाधनानि, न खल्वगृहीतं लिङ्गं वा शब्दो वाऽऽगमसहितं सादृश्यं वा यथाविषयमादधाति प्रमाम्। तत्रानुमानस्य प्रमोपजननात् प्रागेवार्थाव्यभिचारग्रहणमपेक्ष्यते नान्यथा, ततः प्रमा सिध्यतीति। शब्दादौ तु यद्यपि प्रमोपजननं प्रति नार्थाव्यभिचारग्रहापेक्षा, तथाऽपि शक्यमतिरोहितार्थमन्त्रमध्यपतितस्य द्रागित्येव प्रतीयमानार्थस्यापि "सृण्येव(१) जर्भरी तुर्फरीतू" इत्येवमादेर्मन्त्रस्याप्तप्रणेतृकतया सामान्यतोऽर्थाव्यभिचारित्वं ग्रहीतुम्। औत्सर्गिकं हि शब्दानामर्थपरत्वम्, अत एव निगमनिरुक्तव्याकरणसहायास्ततोऽर्थमवधारयन्ति। एवं यथा मुद्गस्तथा मुद्गपर्णीति आप्तवाक्यश्रवणादेव मुद्गसादृश्यज्ञानस्यानुपजनितफलस्यापि शक्यं तदर्थाव्यभिचारित्वं निश्चेतुम्। प्रत्यक्षस्य तु प्रमाणस्यात्यन्तपरोक्षस्योपलम्भ एव प्रमोपजननात् प्राग् दुर्लभः, प्रागेव तु तस्य अर्थाव्यभिचारित्वम्। यद्यपि च संवेदनप्रामाण्यपक्षेऽपि तत्संवेदनं मनसा सुलभम्, तथापि न तन्मात्रं प्रमाणम्, अपि त्वसाधारणेन्द्रियार्थसन्निकर्षसहायमिति तत्सहायस्य तस्य परोक्षत्वमेव, तेन प्रत्यक्षस्य प्रमाणस्य फलाव्यभिचारेणैवाव्यभिचारज्ञानम्. न स्वरूपतः, इत्यतः प्रमाणान्तरेभ्यो व्यावृत्तमसाधारणं प्रत्यक्षस्य रूपमापयितुमव्यभिचारिपदोपादानम्। अथवा प्रत्यक्षाव्यभिचार एवानुमानाद्यव्यभिचारे कारणम्। न ह्यस्ति संभवोऽव्यभिचरितप्रत्यक्षगृहीतपक्षधर्मताकं तर्कसहायप्रत्यक्षगृहीताविनाभावं वाऽनुमानं व्यभिचरतीति। यत्तु बाधितविषयं सत्प्रतिपक्षितं चानुमानम्, तदपि यद्यपि प्रथमं व्याप्तिग्रहणदोषेण न खण्डितम्, तत्र खण्डनोत्तरकालं सोऽपि प्रतीयते। तथा च व्याप्तिग्राहि प्रत्यक्षं तत्रापि व्यभिचरत्येव। एवमागमोऽपि साक्षात् क्वचित्पारम्पर्य्येण प्रत्यक्षपूर्वकस्तद्व्यभिचारेणैव व्यभिचरति। आगमव्यभिचारेण चोपमानव्यभिचारो व्याख्यातः।

(१) "सृह्णेव" इति ख-पुस्तकपाठः।

न्यायवार्त्तिकम्

अर्थस्य व्यभिचारः, अर्थस्तु तथा न भवतीति, तद्व्यभिचारात् तद्विषयं ज्ञानमपि व्यभिचारीत्युच्यते इति। तच्च नैवम्। कस्मात्? अर्थस्य तथाभावात्। यत्तदुदकादिज्ञानमुपजायते मरीचिषु स्पन्दमानेषु, न तत्रार्थो व्यभिचरतीति; न हि ते न मरीचयो न वा स्पन्दन्ते, किन्तु ज्ञानं व्यभिचरति, अतस्मिंस्तदिति भावादिति। न हि तत्रोदकमस्ति। तांस्तु मरीचीन् इन्द्रियोपघातदोषादिन्द्रियेणालोच्य विपर्येति इति ज्ञानस्य व्यभिचारो नार्थस्येति।

न्यायवार्त्तिकतात्पर्य्यटीका

तदेवं प्रत्यक्षाव्यभिचारेण प्रमाणानामव्यभिचारोऽस्तीति प्रत्यक्षस्यैव विशेषणमव्यभिचारिपदं चकार, नेतरेषां प्रमाणानाम्। न ह्यस्ति संभवस्तन्मूलं प्रत्यक्षमव्यभिचारि तानि च व्यभिचारीणीति। सोऽयं विशेषः प्रमाणान्तरेभ्यः प्रत्यक्षस्य। यथाऽऽह मीमांसावार्त्तिककारः—

प्रत्यक्षाव्यभिचारेण स्वलक्षणबलेन च।
प्रसिद्धाव्यभिचारित्वान्नानुमानं परीक्ष्यते॥ इति।

तस्मात् सुष्ठूक्तं ग्रीष्मे मरीचय इति भाष्यम्, तत्प्रतिषेधार्थमिदमुच्यते—अव्यभिचारीति। पृच्छति—किमिदमिति। उत्तरम्—यदतस्मिन्निति। एतच्चोपपादितं द्वितीयसूत्रे। पुनः पृच्छति—किं पुनरत्रेति। एकदेशिमतेनोत्तरम्—एके तावदिति, तदेतद् दूषयति—तच्च नैवमिति। पृच्छति—कस्मात्? उत्तरम्—अर्थस्येति। तदेव स्फोरयति—यत्तदिति। अत्र च न निर्विकल्पकं भ्रान्तं किन्तु सविकल्पकमित्याह—तांस्तु मरीचीनिति। इन्द्रियेणालोच्य मरीचीन् उच्चावचमुच्चलतो निर्विकल्पकेन गृहीत्वा पश्चात्तत्रोपघातदोषाद्विपर्य्येति, सविकल्पकोऽस्य प्रत्ययो भ्रान्तो जायते, तस्माद्विज्ञानस्य व्यभिचारो नार्थस्येति। यथाऽऽहुर्निरुक्तकाराः "नैष स्थाणोरपराधो यदेनमन्धो न पश्यति, पुरुषापराधः स भवति"। अव्यभिचारिपदेनैव संशयज्ञानमपि परास्तम्। नो खलु संशयज्ञानं विकल्प्यमानवस्तुगोचरं तद्रूपं वस्तु प्रापयति, अप्रापयच्चोपदर्शितं कथं संवादकम्, असंवादकं च कथमव्यभिचारि? तस्मादव्यभिचारिपदेनैव संशयज्ञाने निरस्ते सविकल्पकप्रत्यक्षावरोधार्थमुपादीयमानं व्यवसायात्मकपदं संशयज्ञानप्रत्यक्षतया करण(१)मन्वाचिनोति। तद्यथा—एधानाहर्तुमरण्यं गच्छ शाकमप्यानेष्यसीति शाकानयनमन्वाचीयते, न तु तदेवास्य प्रेषितुर्विधित्सितम्, तथेहापीति। व्यवसायात्मकपदं साक्षात्सविकल्पकस्य वाचकम्, तथा हि व्यवसायो विनिश्चयो विकल्प इत्यनर्थान्तरम्, स एवात्मा रूपं यस्य तत्सविकल्पकं प्रत्यक्षम्। तदेतदतिस्फुटत्वात् शिष्यैर्गम्यत एवेति भाष्यवार्त्तिककाराभ्यामव्याख्यातम्। अस्माभिः—

त्रिलोचनगुरून्नीतमार्गानुगमनोन्मुखैः।
यथामानं यथावस्तु व्याख्यातमिदमीदृशम्॥

(१) 'प्रत्यक्षतया वारण-' इत्येवं पाठो भवितुमुचितः प्रतिभाति।

न्यायवार्त्तिकतात्पर्य्यटीका

स्यादेतत्, न व्यवसायात्मकं प्रत्यक्षं भवितुमर्हति। अभिलापसंसर्गायोग्यप्रतिभासं हि तत्। न चेन्द्रियार्थाभ्यां लब्धजन्म विज्ञानमर्थावभासं शक्यमभिलापेन योजयितुम्। न ह्यर्थे शब्दाः सन्ति,(१) अर्थात्मानो वा, तथा सत्यव्युत्पन्नस्यापि व्युत्पन्नवद्व्यवहारः स्यादित्युक्तम्। न चाभिलापोऽर्थासंस्पर्शी संवेदनधर्म्मः, अर्थेषु तन्नियोजनात्, तस्मादर्थादुपजायमानं ज्ञानमर्थमेवादर्शयेन्नाभिलापम्। न हि रूपाज्जायमानं(२) प्रत्यक्षं रससहितमेतदादर्शयति। तस्मादभिलापसंसर्गानपेक्षमभिलापसंसर्गिणमादर्शयद्विकल्पविज्ञानं विकल्पवासनोत्थापितमनियतार्थग्राहि मानसमात्मीयमुपेक्षालक्षणं व्यापारं तिरस्कृत्यानुभवप्रभवतयाऽनुभवव्यापारं दर्शनं पुरस्कृत्य वर्त्तमानमनुभवतयाऽभिमन्यन्ते प्रतिपत्तारः। तत्सिद्धमेतत्—यदर्थसामर्थ्यलब्धजन्म न तच्छब्दकल्पनानुगतम्, यथा निर्विकल्पकम्, अर्थजन्मानश्च विवादाध्यासिता विकल्पा इति प्रसङ्गसाधनविरुद्धव्याप्तोपलब्धिः। शब्दकल्पनानुगतत्वस्य हि प्रतिषेध्यस्य विरुद्धं तदननुगतत्वम्, तेनार्थसामर्थ्यजत्वं व्याप्तम्, तस्योपलब्धिस्तदननुगतत्वमुपस्थापयन्ती तदनुगतत्वं विरुणद्धीति। अथैषां प्रत्ययानां प्रत्यक्षमभिलापानुगतत्वमशक्यापह्नवम्। हन्त भोः नार्थसामर्थ्यजत्वमिति प्रसङ्गविपर्य्ययः, तथा हि यदभिलापकल्पनानुगतं न तदर्थसामर्थ्यजं यथेश्वरप्रधानादिविकल्पविज्ञानम्, तथा चैते विवादाध्यासिता विकल्पा इति व्यापकविरुद्धोपलब्धिः। निषेध्यमर्थसामर्थ्यजत्वं तदभिलापकल्पनाननुगतत्वेन व्याप्तं तद्विरुद्धं च तदनुगतत्वमिति। न च संदिग्धव्यतिरेकिता, अर्थसामर्थ्येन हि तदुत्पद्यमानम् अर्थरूपमनुकुर्याद् न शब्दरूपम्। न ह्यर्थे शब्दाः सन्ति तदात्मानो वेत्युक्तम्। असंबद्धरूपानुकारे तु विज्ञानस्य सर्वरूपानुकारेण सर्वसर्वज्ञतापत्तिरिति। संकेतवशाच्छब्दानामर्थसंबन्धेनार्थोपलब्धौ तत्स्मरणात् तत्संसृष्टवेदनमिति चेत्, य एव (३) तर्हि कृतसंकेताः तदेव स्मारयेदेतान्, तत्रैव च ते कृतसंकेता यदनुगतं सामान्यम्, न च तद्दृष्टं किन्तु स्वलक्षणं दर्शनगोचरः, तदेव हि परमार्थसतः विज्ञानस्य कारणम्, न तु सामान्यम्, सर्वसामर्थ्यरहितं हि तद् अलीकत्वात्। तस्माद्यद् दृष्टं न तेन शब्दानां संबन्धः, येन तु संबन्धो न तद्दृष्टम्। अपि च दृष्टस्य शब्दवाच्यत्वे दर्शनादिव वह्निरुष्ण इति वाक्यादपि प्रतीयेत, तथा च शब्दादपि तस्मिन् प्रतीते शीतापनोदनप्रसङ्गः। सामान्यविषयौ लिङ्गशब्दौ वस्तुभूतसामान्यवच्च स्वलक्षणं तादृशं च तद्दर्शनकारणमिति निर्विकल्पकेन प्रथमाक्षसन्निपातजन्मना जातिमद्वस्तुवेदनात्तत्रोपलब्धे च न संबन्धस्य शब्दस्य स्मरणम्, तथा च तच्छब्दाभिधेयजातिविशिष्टद्रव्यावगाहीन्द्रियार्थसन्निकर्षजन्मविकल्पप्रत्ययो गौरयमित्येवमाकारो जायत इति चेत्, यथाऽऽहुर्निरुक्तकाराः—निर्विकल्पकबोधेन द्व्यात्मकस्यापि वस्तुनो ग्रहणम्। तथा—

(१) ननु वाच्यत्वादिसम्बन्धेन शब्दा अर्थे सन्त्येव, तत् कथं "न ह्यर्थे" इत्यादिकं सङ्गच्छते? सत्यम्, संयोगसमवायादिना न सन्तीत्यभिप्रायः। तथा च "संयोगेन समवायेन कार्य्यतया वेति शेषः" इति परिशुद्धिः ५७३।६ प०। (२) "ज्ञायमानम्" इति क-पुस्तके। (३) 'यत्रैव' इति पाठः समीचीनः प्रतिभाति।

न्यायवार्त्तिकतात्पर्य्यटीका

ततः परं पुनर्वस्तु धर्म्मैर्जात्यादिभिर्यया ।
बुद्ध्याऽवसीयते साऽपि प्रत्यक्षत्वेन संमता ॥ इति ।

तन्न, पिण्डविवेकेन जात्यादेरविकल्पकेनाग्रहणात्। न हि जातिजातिमन्तौ क्रियाक्रियावन्तौ गुणगुणिनौ तत्समवायो वा विवेकेन चकासति, न च विवेकेनाप्रतिभासमानाः शक्या मिथो योजयितुं क्षीरोदकवदतद्वेदिना। तस्मादेकमविभागं स्वलक्षणमनादिविकल्पवासनासमारोपितजात्यादिभेदं तथा तथा विकल्प्यत इति युक्तमुत्पश्यामः। अपि च परमार्थसद्वस्तुद्वयवेदनेऽपि कुतो विशेषणविशेष्यभावः ? न ह्यङ्गुल्याद्येकविज्ञानविषयौ मिथो विशेषणविशेष्यभावमापद्येते। विशेषणं खलूपकारकम्, उपकार्य्यं च विशेष्यम्, नान्यथा तयोस्तद्भावः। न चैकविज्ञानसमारूढयोर्ज्ञाप्यज्ञापकभावः कार्य्यकारणभावो वा संभवी, समानकालयोस्तयोरुभयोरपि पौर्वापर्य्यनियमात्। अपि च वस्तुनिवेशे जात्यादीनामुपाधीनामेकस्य वस्तुनः सत्त्वं च द्रव्यत्वं च पार्थिवत्वं च वृक्षत्वं च शिंशपात्वं चोपाधय इति दूरादेकोपाधिविशिष्टग्रहे सर्वोपाधिविशिष्टग्रहप्रसङ्गः, तथा ह्याधाराधेयभाव उपकारगर्भो भवति। पतनधर्म्मणो हि बदरस्य कुण्डमधरं प्रत्यासन्नमपतनधर्म्मकं बदरं विदधदाधारः, तद्वदिहापि द्रव्येण जात्यादीनामुपकर्त्तव्यम्, न च शक्त्यन्तरैरुपकरोति, शक्त्यन्तरोपकारेऽपि शक्त्यन्तरकल्पनायामनवस्थापातात्। तस्मात् स्वभाव एव स्वकारणाधीनजन्मा द्रव्यस्य स तादृशो येन बहूनामुपाधीनामुपकरोतीति वाच्यम्। तथा च सत्त्वोपकारसमर्थे तस्मिन् द्रव्ये गृह्यमाणे द्रव्यत्वादावपि स एवास्य स्वभाव इति तत्स्वभावावच्छिन्नाः सत्त्वविकल्पकेन परमार्थसद्द्रव्यावगाहिना सर्व एव द्रव्यत्वपार्थिवत्ववृक्षत्वशिंशपात्वादयो विषयीकृता इति विकल्पान्तराणामानर्थक्यम्। यदाह—

यस्यापि नानोपाधेर्धीर्ग्राहिकाऽर्थस्य भेदिनः।
नानोपाध्युपकाराङ्गशक्त्यभिन्नात्मनो ग्रहे।
सर्वात्मनोपकार्य्यस्य को भेदः स्यादनिश्चितः॥
एकोपकारके ग्राह्ये नोपकारास्ततोऽपरे।
दृष्टे तस्मिन्नदृष्टेऽपि तद्ग्रहे सकलग्रहः॥ इति।

अस्माकं तु अनादिविकल्पवासनोपादाना विकल्पा यच्च गृह्णन्ति यच्चाध्यवस्यन्ति तयोरुभयोरप्यन्यनिवृत्तिरूपतया अवस्तुत्वान्न मनागपि परमार्थसद्वस्तु गाहते, पारंपर्य्येण तु वस्तुप्रतिबन्धात्तत्र प्रवर्त्तयन्तः प्रापयन्तश्च न विसंवादयन्ति लोकम्, अतो वस्तुस्वभावाविनिवेशाद्विकल्पानां न पौनरुक्त्यमस्ति। अपि चालोचिते वस्तुनीन्द्रियेण तदनन्तरोत्पन्नं शब्दस्मरणव्यवहितव्यापारमिन्द्रियमर्थश्च न सविकल्पिकामपि धियमुपजनयितुमर्हतः। यथाऽऽह—

अर्थोपयोगेऽपि पुनः स्मार्त्तं शब्दानुयोजनम्।
अक्षधीर्य्यद्यपेक्षेत सोऽर्थो व्यवहितो भवेत्॥

न च यदेवालोचनमजीजनदिन्द्रियं तदेव स्मरणसहकारि विकल्पप्रत्ययमाधत्ते, न च स्मृतिर्व्यव-

न्यायवार्त्तिकतात्पर्य्यटीका

धायिका, स्वाङ्गमव्यवधायकमिति न्यायात्। यतो "यः प्रागजनको बुद्धेरुपयोगाविशेषतः स पश्चादपि" इति। नो खल्वतीतं भवति गोचरोऽक्षस्येति, न चागोचरे सहस्रेणाप्युपायैरेतत् प्रवर्त्तयितुमर्हतीति। न च स्मृतिरतीतविषयाऽननुभूतपूर्वं (१) वर्त्तमानं गोचरयितुमर्हति। तद्गोचरत्वे चान्धानामपि रूपसाक्षात्कारप्रसङ्गः, यथाऽऽह—"तेन स्यादक्षापायेऽपि नेत्रधी"रिति। तदेवं नामजातिगुणकर्म्मकल्पना च प्रत्यक्षत्वेन परास्ता। द्रव्यकल्पनाऽपि दण्डीति—

विशेषणं विशेष्यं च संबन्धं लौकिकीं स्थितिम्।
गृहीत्वा सङ्कलय्यैतत् (२) तथा प्रत्येति नान्यथा॥

न चैतावन्तं व्यापारकलापं विचारकनिर्वर्त्तनीयमिन्द्रियज्ञानं सहते, तस्य सन्निहितविषयबलेनोत्पत्तेरविचारकत्वादिति। गुणक्रियावतां चैतन्न संभवत्येव, रूपविवेकसंबन्धयोरप्रतिभासने घटनायोगात् क्षीरोदवत्तद्भेदनेत्युक्तम्। तस्मान्न तद्विकल्पं प्रत्यक्षमिति। अत्रोच्यते—यत्तावदुक्तमर्थसामर्थ्यजत्वाभिलापसंसर्गायोग्यप्रतिभासत्वयोर्विरोध इति, तत्र ब्रूमः स्याद्विरोधो यदि स्वलक्षणमेवार्थः, न त्वेतदस्ति। उपपादयिष्यते च परमार्थसज्जात्यादिमन्तमर्थं स्थेमभाजमभिलापसंसर्गयोग्यम्, तेन तज्जनितं ज्ञानमर्थसामर्थ्यजं चाभिलापसंसर्गायोग्यप्रतिभासं चेति न विरोधः। तथा च प्रसङ्गसाधनस्य संदिग्धव्यतिरेकिता। न च द्रव्याद्यभिन्नं जात्यादि भिन्नं कल्पयन्तो विकल्पा नार्थसामर्थ्यजन्मान इति सांप्रतम्, द्रव्यादपि हि भेदः साधयिष्यते (३) तेषाम्। यथा च भेदेऽपि तेषां तद्वाचकानां सामानाधिकरण्यं तथोपपादितमधस्तात्। (४) न च भिन्नेन शब्देन डित्थोऽयमित्यभेदकल्पनादर्थस्य विकल्पानामनर्थजत्वमिति युक्तम्। उक्तमेतद् अव्यपदेश्यपदव्याख्यानावसरे यथा न शब्दाभेदेनार्थयोरेकेन्द्रियग्राह्यता, किन्तु प्रथममालोचितोऽर्थः सामान्यविशेषवान् सङ्केतसमयवर्त्तिनीमात्मनोऽवस्थां स्मारयन् तत्कालभाविनं शब्दमपि स्मारयत्यवर्ज्जनीयतया, न त्विन्द्रियज विकल्पोत्पादं प्रत्युपयोगः कश्चिच्छब्दस्मरणस्य। अन्यथा बालमूकादीनां नेन्द्रियजः स्याद्विकल्पः, शब्दस्मरणाभावात्। सङ्केतसमयवर्त्यवस्थास्मरणं तूपयुज्यते, वस्तुनस्तदानीन्तनेदानीन्तनावस्थाभेदवत एकस्येन्द्रियजेन विकल्पेनाकलनात्। शब्दस्तु संपातायातो न निवेशयत्यात्मानमिन्द्रियजे विकल्पे। यथाऽऽह—

देवदत्तादिशब्देन हृदयस्थेन यः स्मृतः।
चक्षुषाऽपि स एवायं पिण्डः संप्रति दृश्यते॥

अनेन हि पिण्डस्य पूर्व्वापरावस्थावर्त्तिनीमेकतामिन्द्रियजविकल्पगोचरत्वेन दर्शयति, न तु शब्दनिवेशनमपि। तथाऽऽह—

(१) आदर्शे—"अननुभूतपूर्वं" इति। (२) "सकलय्यैतत्" इति न्यायमञ्जरी। (३) २।२।१० सूत्र-वार्त्तिके। (४) ९६।१० पं स्वयमेवोपपादितम्।

न्यायवार्त्तिकतात्पर्य्यटीका

संज्ञा हि स्मर्य्यमाणाऽपि प्रत्यक्षं तु न बाधते ।
संज्ञिनः सा तटस्था हि न रूपाच्छादनक्षमा ॥

नार्थेन्द्रियव्यापारं व्यवधत्त इत्यर्थः । न च प्रागवस्थास्मरणसापेक्षतया नेन्द्रियार्थसन्निकर्षः कारणं विकल्पस्येति सांप्रतम्, यतो "न किञ्चिदेकमेकस्याः सामग्र्याः सर्वसम्भव" इति भवन्तोऽप्याहुः । अन्यथाऽऽलोकमनस्कारसापेक्षमर्थेन्द्रियं निर्विकल्पकमपि न जनयेत् । यत्तु प्रथमं नाजीजनत्तत् स्मरणसहकारिविरहात् । न हि नाजीजनत्कुशूलस्थं बीजमङ्कुरमिति न समवहितक्षित्यादिसहकारिग्राममप्यस्याजनकं भवति । न च जनकत्वाजनकत्वलक्षणो विरुद्धधर्म्मसंसर्गो भेदहेतुरित्युपपादयिष्यते क्षणभङ्गभङ्गे (१) । स्यादेतत्, अतीतावस्था नेन्द्रियगोचरस्तस्य वर्त्तमानार्थे नियमात् । न च वर्त्तमानोऽर्थः स्मरणगोचरः, स्मरणस्यानुभवजनितसंस्कारोद्बोधजन्मनः पूर्वानुभवगोचरं प्रति नियमात्, तस्माद्भिन्नविषयतया नेन्द्रियसहकारिता स्मरणस्य, न हि रूपविषयाः सहस्रमपि नयनप्रदीपादयः शब्दविषयस्य श्रवसः सहकारितामापद्यन्त इति । तत्किं भवतां यत्र गन्धबुद्ध्यनन्तरं चाक्षुषरूपविज्ञानं तत्र गन्धज्ञानम्, न समनन्तरप्रत्ययः ? तत्रापि चक्षूरूपविषयं न गन्धविषयस्य ज्ञानस्य सहकारि भवितुमर्हतीति, भिन्नविषयत्वादेव । अथान्वयव्यतिरेकनिबन्धनः कार्य्यकारणभावो न समानविषयत्वमनुविधीयत इत्युच्येत, तदस्माकमपि समानम् । नन्वतीतावस्थाविशिष्टत्वमस्य नेन्द्रियसन्निकृष्टमिति कथं प्रत्यक्षम् ? तत् किं यदिन्द्रियसंबद्धं तत् प्रत्यक्षम् ? तथा सत्याकाशपरमाण्वादयोऽपि तत्संयुक्ता इति तेऽपि प्रत्यक्षाः प्रसज्येरन् । तस्माद् यदेवेन्द्रियजस्य ज्ञानस्य गोचरस्तत्प्रत्यक्षम्, न न (२) त्विन्द्रियसंबद्धम् । नन्वसंबन्धे इन्द्रियं कथं तत्र ज्ञानं जनयति ? तद्वा ज्ञानं कथं प्रत्यक्षम् ? प्रत्यक्षं चेत् कथमिन्द्रियार्थसन्निकर्षोत्पन्नमिति लक्षणं प्रत्यक्षं व्याप्नोति, अस्यैव प्रत्यक्षस्य लक्षणेनाव्यापनात् ? मा भूदर्थस्य पूर्वकालवर्त्तितेन्द्रियगोचरः, तथाऽपि स्मरणसहकारिणा संस्कारसहकारिणा वेन्द्रियेण यज्जनितं ज्ञानं तेन तद्विषयीक्रियत एव । न च यत्स्मरणसहकारिणेन्द्रियार्थसन्निकर्षेणोपजनितं तदिन्द्रियार्थसन्निकर्षेणोत्पन्नं न भवति । तथा च नाव्यापकमस्य लक्षणम् । ननु पूर्वापरावस्थाविषयं परामर्शज्ञानं कथमेकम्, विषयभेदात् पारोक्ष्यापारोक्ष्यलक्षणविरुद्धधर्म्मसंसर्गाच्च ? तथा हि तदिति परोक्षम्, इदमिति साक्षात्कारः, न च विरुद्धधर्म्मसंसर्गेऽप्येकत्वम्, त्रैलोक्यस्यैक्यप्रसङ्गात् । विषयभेदश्च पूर्वदेशकालपरदेशकालसंबन्धयोरेकस्य विरोधात् । यथा ह्येकस्मिन् पद्मरागमणौ गृह्यमाणे तदभावो व्यवच्छिद्यते यदि पुनर्न व्यवच्छिद्येत तदाऽभावो न परिच्छिद्येत, तस्य स्वाभावव्यवच्छेदरूपत्वात् । तदभावाविनाभाविनश्च ये पुष्परागादय इति तेऽपि सर्वे व्यवच्छिन्ना भवन्ति । यदि पुनर्न व्यवच्छिद्येरन् स एव पुष्परागाद्यात्मेति तदविनाभावी पद्मरागाभाव इति स एव तदैव पद्मरागाभावः पद्मरागश्च स्यादिति दुर्घटमापद्येत । एवं तस्यैव

(१) ३।२।१०—१७ सूत्रपर्य्यन्तभागे । (२) अत्र एको 'न'कारः अधिक इति मन्ये ।

न्यायवार्त्तिकतात्पर्य्यटीका

पूर्वदेशकालसंबन्धे गृह्यमाणे तदभावव्यवच्छेदक्रमेण परदेशकालसंबन्धो व्यवच्छिन्नः पूर्वदेशकालसंबन्धाभावाव्यभिचारी, तथा च न परदेशकालसंबन्धस्वभावः। तथाऽपि यद्यसौ तद्देशकालसंबन्धादन्यस्वभावो भवेत्, तथा सति स एव भवेन्न भवेच्चेति दुर्घटमापद्येत। तस्मात्पूर्वदेशकालसंबन्धादन्योऽपरदेशकालसंबन्ध इति सिद्धो विषयभेद इति। अत्रोच्यते—यदि पारोक्ष्यापारोक्ष्यधर्म्मभेदात् पूर्वापरावस्थापरामर्शज्ञानं भिद्येत, हन्त भोस्तदित्यपि विकल्पो भिद्येत। सोऽपि हि परोक्षश्चापरोक्षश्च विकल्पोऽविकल्पश्च अर्थे परोक्षो विकल्पश्च स्वात्मनि त्वविकल्पः अपरोक्षश्च। तस्माद्विषयभेदादविरोध इति को विरोधः? योऽपि कालदेशसंबन्धभेदेन विषयभेद उक्तः, सोऽप्ययुक्तः, यतो युक्तं यत् पद्मरागस्वरूपग्रहे तदभावो व्यवच्छिद्यत इति, स्वाभावव्यवच्छेदात्मकत्वेन भावानां तदव्यवच्छेदे स्वरूपाग्रहणप्रसङ्गात्। कस्मात् पुनः पुष्परागादयो व्यवच्छिद्यन्ते? पद्मरागाभावाविनाभावादिति चेत्, अथैतदभावाविनाभावज्ञानं कुतस्त्यम्? तयोः कदाचिदपि तादात्म्यं नानुपलभ्यं तेन तत्र तदभावाविनाभावः, (१) तथा च पूर्वापरदेशकालसंबद्धस्तादात्म्येनानुभूयमान इन्द्रियजेन विकल्पेन पद्मरागो न भिन्नो भवितुमर्हति। तस्मात् पूर्वापरदेशकालौ तत्संबन्धौ वा कामं भिद्येयाताम्, परस्पराभावाविनाभावात् तयोरेकदाऽपि तादात्म्येनाप्रतिभासनात्। न तु तदालिङ्गितस्वभावः पद्मरागमणिः, तस्य ताभ्यामन्यत्वात्। न चान्यभेदोऽन्यभेदमापादयति अतिप्रसङ्गात्। न चेन्द्रियार्थसन्निकर्षाभावेऽपि पूर्वापरावस्थापरामर्शात्मनो विकल्पस्य भावादनिन्द्रियजत्वमिति साम्प्रतम्, तथा सत्यविकल्पकमपि कामातुरस्य कामिनीं भावयतस्तद्विषयमिन्द्रियार्थसन्निकर्षं विनाऽपि दृष्टमिति नीलाद्यनुभवात्मानोऽप्यविकल्पका अनिन्द्रियजाः प्रसज्येरन्। यदि तु नीलाद्यनुभवानां कामिन्यनुभवात् कथंचिद्विशेषं ब्रूयात्, तदाऽस्माकमप्यनिन्द्रियजेभ्यो विकल्पेभ्य उत्प्रेक्षाव्यापारेभ्योऽस्तीन्द्रियजानां दर्शनव्यापाराणां भेदः। न च विकल्पगतो दर्शनव्यापारोऽनुभूयमानः सति संभवे निर्विकल्पकोपाधिरिति युक्तम्, सर्वा एव हीन्द्रियजा वृत्तयो विकल्पिका अविकल्पिका वा धारावाहिन्योऽहमहमिकया परस्परानपेक्षा एकमर्थमवगाहमाना उदयन्ते व्ययन्ते च, न त्वमूषामन्योन्यमनुगम्यानुगन्तृतामीक्षामहे, तस्मा-(२) दिन्द्रियार्थसन्निकर्षलब्धजन्मानो विकल्पा दर्शनव्यापारा नाना इति युक्तमुत्पश्यामः। न च शब्दप्रत्यक्षयोर्वस्तुगोचरत्वे सत्यपि प्रत्ययाभेदः, कारणभेदेन पारोक्ष्यापारोक्ष्यभेदोपपत्तेः। न च वह्निसंयोगजन्मा शीतापनोदो वह्निज्ञानाद्भवितुमर्हति, न चैकेनोपाधिना सत्त्वेन विशिष्टे तस्मिन् गृहीते उपाध्यन्तरविशिष्टतद्ग्रहप्रसङ्गः, स्वभावो हि द्रव्यस्योपाधिभिर्विशिष्यते, न तूपाधयो वा तैर्विशिष्टत्वं वा तस्य स्वभावः। न च यत् स्वभावसंबन्धि स स्वभावः, तथा सत्यसंबन्धित्वमेव,

---

(१) "तादात्म्येनानुपलम्भादिति चेत् यत्र तर्हि तादात्म्यमुपलभ्यते न तत्रा(द)प्यभावाविनाभाव;" इति ख-पु-पाठः। (२) आदर्शे "कस्मा-" इति पाठः।

न्यायवार्त्तिकतात्पर्यटीका

न हि तदेव तेन संबध्यते। अपि च रूपज्ञानं विषयग्रहणधर्म्मं नानापरमाणुविषयं न परमाणुस्वभावः। तत्स्वभावत्वे वा तेषां सर्वान्प्रत्यविशेषात् सर्व्वैरेव ते परमाणवो विदिताः स्युः। न चासंबद्धा एव स्वज्ञानेन रूपपरमाणवो विषयास्तस्येति वाच्यम्, असंबद्धस्य विषयत्वेऽतिप्रसङ्गात्। स्वभाव एवार्थज्ञानयोः संबन्धो यदर्थो विषयो ज्ञानं च विषयीति चेत्, हन्तोपाध्युपाधिमतोरपि स्वभाव एव संबन्धोऽस्तु, तथाऽपि विज्ञानार्थवन्न स्वरूपाभेदः। क्षणभङ्गपरिणामनिराकरणे (१) तु स्वभावातिरिक्तं संबन्धमुपपादयिष्यामः। तस्मान्नैकोपाध्यन्वितग्रहे सकलोपाध्यन्वितप्रत्ययप्रसङ्गः। यच्चैकविज्ञानगोचरयोर्न विशेषणविशेष्यभाव इति, तत्र ब्रूमः—भिन्नज्ञानगोचरत्वेऽपि नासौ संभवति। न हि विशेषणज्ञानं विशेष्याविषयं विशेष्यमवच्छेत्तुमर्हतीति। एवं विशेष्यज्ञानमपि विशेषणाविषयकं न स्वविषयमवच्छिन्द्यात्, तयोः परस्परवार्त्तानभिज्ञत्वात्। ताभ्यां वासना, ततो मानसप्रत्ययो विशेषणविशेष्याकार उत्पद्यते, न त्वस्ति वास्तवो विशेषणविशेष्यभाव इति चेत्, अस्तु तावद् वास्तवावास्तवचिन्ता, करिष्यते हीयमुपरिष्टात्। यस्तु भवतामस्य मानसत्वे प्रयासः, स वरमिन्द्रियजत्व एव भवतु, तथा सति दर्शनव्यापारत्वमस्य साक्षात् समर्थितं भवति। इतरथा हि निर्विकल्पकोपधानं कल्प्येत। नन्वविचारकमिन्द्रियज्ञानं कथं विशेषणविशेष्यादि सकलं समाकलयेत्। हन्त भोः किं मानसमपि ज्ञानमाकलयितुमर्हति ? संकलयति मनसस्तत्कारणस्य सर्वविषयत्वादिति चेत्, यदि पूर्वकं (?) विज्ञानं मनः, कथं तस्य सर्वविषयता ? अस्माकं तु मनः सर्वविषयमपि अचेतनतया न विचारकम्, तस्मादात्मैव सकलज्ञानतज्जनितवासनाधारः स्मर्ता च प्रतिसंधाता च। यदाह—

आत्मन्येव स्थितं ज्ञानं स हि बोद्धाऽवगम्यते।
स्मरणे चास्य सामर्थ्यं संधानादौ च विद्यते॥

स खल्विन्द्रियार्थसन्निकर्षादालोच्य जातिमन्तं संमुग्धमर्थमुद्बुद्धसंस्कारसमुपजातपूर्वपिण्डानुस्मृतिसहायः प्रागेव चक्षुषा विकल्पयति—गौरयमिति। यथाऽऽह—

करणं चेन्द्रियं बुद्धेः कर्त्ता चात्मा स चेतनः।
स च स्मृतिसमर्थत्वात् सर्वार्थान् कल्पयिष्यति॥

वृत्तिः

तस्य विभागः अव्यपदेश्यं व्यवसायात्मकमिति। निर्विकल्पकं सविकल्पकं चेति द्विविधं प्रत्यक्षमित्यर्थः॥ ४॥ (२)

---

(१) ३।२।१० सूत्रादारभ्य द्रष्टव्यम्। (२) अत्र लपुस्तके "सविकल्पकञ्च संस्कारोद्भवत्वतदनुभवत्वाभ्यां विभजते—(संस्कारोद्भवा प्रतिज्ञा)" इत्येवमधिकपाठः।

न्यायभाष्यम्

दूराच्चक्षुषा ह्ययमर्थं पश्यन्नावधारयति धूम इति वा रेणुरिति वा। तदेतदिन्द्रियार्थसन्निकर्षोत्पन्नमनवधारणज्ञानं प्रत्यक्षं प्रसज्यत इत्यत आह—व्यवसायात्मकमिति। न चैतन्मन्तव्यम् (१)—आत्ममनःसन्निकर्षजमेवाऽनवधारणज्ञानमिति। चक्षुषा

न्यायवार्त्तिकम्

दूराच्चक्षुषाऽर्थं पश्यन्नावधारयतीति भाष्यम्। तद्व्युदासार्थमाह—व्यवसायात्मकमिति। न, संशयस्यानिन्द्रियार्थसन्निकर्षपूर्वकत्वात्। न हीन्द्रियार्थसन्निकर्षात् संशयज्ञानं भवति, किन्तु मानसः प्रत्ययः। संशीतिः संशय इति। तच्च नैवम्। संशयस्योभयनिमित्तत्वात्।

न्यायवार्त्तिकतात्पर्य्यटीका

तेनैकविज्ञानवेद्यत्वे यद्यपि ज्ञाप्यज्ञापकभाव उपकार्य्योपकारकभावो नास्ति, तथाऽपि तदर्थालोचनानुगतस्मरणयोर्विशेषणविशेष्यभावावगाहि विज्ञानं प्रत्युत्पादकत्वमेवोपकारकत्वमस्ति। अर्थौ हि रूपरूपिभावेन स्थितावपि नापातजन्मना ज्ञानेन तथा गृहीतौ, अपि तु स्वरूपमात्रेण, न हि यावदस्ति तावद् ग्रहीतव्यम्, तेन तदेकदेशग्रहणेऽपि नाप्रमाणता। सविकल्पकं तूक्तसामग्रीजन्म जात्यादिरूपतया द्रव्यं च रूपितया कल्पयेत्। पश्चाज्जायमानमपीन्द्रियार्थसन्निकर्षप्रभवतया प्रत्यक्षं भवत्येव। अक्रमस्यापि क्रमवत्सहकारिभेदसमवधानवशात् क्रमेण कार्य्यकरणमुपपादयिष्यते (२)। तत्सिद्धमेतद्विवादाध्यासिता विकल्पाः स्वगोचरे प्रत्यक्षा अव्यभिचारित्वे सतीन्द्रियार्थसन्निकर्षजत्वात्। यो य एवंभूतः सर्वः प्रत्यक्षो यथाऽऽलोचनम्, तथा चैतत्तस्मात्तथेति। तस्मात् सविकल्पकप्रत्यक्षावरोधार्थं व्यवसायात्मकपदमिति सिद्धम्। तदस्य सविकल्पकप्रत्यक्षावरोधार्थस्यान्वाचीयमानो व्यवच्छेदः तद्व्यवच्छेद्यप्रतिपादनार्थं भाष्यमनुभाष्यान्वाचीयमानमेव व्यवसायात्मकपदस्यार्थमाह—दूराच्चक्षुषेति। न चैतन्मन्तव्यमिति भाष्यं व्याचिख्यासुर्देशयति—न, (३) संशयस्येति। ननु सतीन्द्रियार्थसन्निकर्षे पुरोवर्तिनि द्रव्ये धूम इति वा रेणुरिति वा ज्ञानमुत्पद्यमानं कथमनिन्द्रियजमित्यत आह—न हीति। कस्मान्मानस इत्यत आह—संशीतिरिति। संपूर्वो हि शीङ् भावप्रत्ययान्तो विशेषापेक्षे विमर्षे वर्त्तते, स चैकाधिकरणे स्मर्य्यमाणौ मिथो विरुद्धौ धर्म्मावारोपयन् यत्तत्रावधारयति। तथा चाधिकरणमात्रसमर्पणमिन्द्रियव्यापारः, मनसा तु स्मरणसहकारिणैव पुरुषः संशेते। अत एव विस्फारिताक्षः सौदामिनीसंपातात् सकृदालोच्य कं चित्सामान्यवन्तं धर्मिणं समन्धकारे सन्दिग्धे, तस्मान्मानस एवैष संशयो न त्विन्द्रियज इत्यर्थः। तदेतत् परिहरन्

(१) "तच्चैतन्मन्तव्यम्" इति वि-ज-आ। (२) ३।२।१७ सूत्रतात्पर्य्ये। (३) अत्र "न" इति क-पुस्तके नास्ति।

न्यायभाष्यम्

ह्ययमर्थं पश्यन्नावधारयति, यथा(१) चेन्द्रियेणोपलब्धमर्थं मनसोपलभते, एवमिन्द्रियेणाऽनवधारयन्मनसा नावधारयति। यच्च (२) तदिन्द्रियानवधारणपूर्वकं मनसाऽनवधारणं तद्विशेषापेक्षं विमर्शमात्रं संशयः, न पूर्वमिति। सर्वत्र प्रत्यक्षविषये ज्ञातुरिन्द्रियेण

न्यायवार्त्तिकम्

उभयन्तु संशयस्य निमित्तम् आत्मान्तःकरणसंयोग इन्द्रियार्थसन्निकर्षश्चेति। तत्र यदिन्द्रियार्थसन्निकर्षानवधारणपूर्वकं मनसाऽनवधारणं तदिह सम्बध्यते। तस्य हीन्द्रियार्थसन्निकर्षः कारणम्। पूर्वं तु न सम्बध्यते, यदात्मान्तःकरणसंयोगाद्भवतीति। तस्मादस्ति विषयो विशेषणस्येति युक्तं व्यवसायात्मकमिति।

न्यायवार्त्तिकतात्पर्य्यटीका

नचे (३) त्यादि भाष्यं व्याचष्टे—तच्च नैवम्। कस्मात्संशयस्येति? उभयं त्विति। तु शब्दो मनोमात्रनिमित्तत्वं व्यवच्छिनत्ति। तदनेन चक्षुषा हीत्यादि भाष्यं व्याख्यातम्। पश्यन् समानधर्म्माणं धर्म्मिणं नावधारयति। विशेषतः सन्दिग्धे तस्मिन्नित्यर्थः। इन्द्रियेणोपलब्धं सन्निकृष्टं सन्निकर्षपूर्वकत्वादुपलब्धे मनसोपलभते जानीते चक्षुःसहायेनेत्यर्थः। अत्र भाष्यं यच्च तदिन्द्रियानवधारणपूर्वकं मनसाऽनवधारणं तद्विशेषापेक्षं विमर्शमात्रं संशयः, न पूर्वमिति। अनवधारणशब्दोऽयं संशयज्ञाने, दर्शनात्, सत्यपीन्द्रियार्थव्यापारे संशयो नेन्द्रियज इति देशकोऽभिमन्यते। तदनयोः संशयज्ञानयोर्म्मध्ये यत्तदिन्द्रियानवधारणपूर्वकमिन्द्रियार्थसन्निकर्षपूर्वकं मनसाऽनवधारणं संशयज्ञानमित्यर्थः। न पूर्वम्, यदुपरतेन्द्रियव्यापारस्य संशयज्ञानं दृष्टान्ततया हृदि स्थितं शङ्कितुरित्यर्थः। तदेतद्भाष्यं व्याचष्टे—तत्र यदिन्द्रियार्थेति। इन्द्रियार्थसन्निकर्षश्चासावनवधारणं चेति कर्म्मधारयः, तत्पूर्वकं मनसाऽनवधारणं संशयज्ञानमित्यर्थः। ननु स्मरणव्यवहितव्यापारमस्य कारणं नेन्द्रियमित्यत आह—तस्य हीति। उपपादितमेतदधस्ताद् (४) यथा स्मरणं नेन्द्रियव्यापारं व्यवधत्त इति। पूर्वं त्विति, दृष्टान्ततया पूर्वत्वम्। स्यादेतत्, मन एवेन्द्रियानपेक्षं बाह्ये प्रवर्त्तत इत्यभ्युपेयम्, अन्यथा घटमहं जानामीति ज्ञानमनिमित्तं स्यात्। न तावदिन्द्रियजम्, आन्तरे ज्ञाने चक्षुरादीनामप्रवृत्तेः। नाप्यनुमानादिष्वन्तर्भवति, लिङ्गाद्यभावात्। तस्मान्मानसमेवेदम्। यदि च घटादौ बाह्ये न मनः प्रवर्त्तते, कथं घटमिति भवेत्? जानामीत्येव स्यात्। न चार्थनिरूपणमन्तरेण ज्ञानरूपनिरूपणम्, तस्माद्बाह्याभ्यन्तरविषयं मनस्तथा च सर्व एव संशयो मानस इत्याशङ्क्याह भाष्यकारः—सर्वत्र प्रत्यक्षविषय इति। यद्यप्ययमीदृशोऽनुव्यवसायो मानसस्तथाऽप्यन्धबधिरादीनामभावात्तत्पूर्व्वं व्यवसायोत्पत्तौ चक्षुराद्यपेक्षणीयम्,

(१) "तथा" ज-श्रा। (२) 'यच्च' इति ल-भा-पु- पाठः। (३) "तच्च त्यादि" इति क-पु-पाठः। (४) ११८ पृ: तात्पर्य्यस्य २० पंक्तौ।

न्यायभाष्यम्

व्यवसायः, पश्चान्मनसाऽनुव्यवसायः, (१) उपहतेन्द्रियाणामनुव्यवसायाभावादिति।

आत्मादिषु सुखादिषु च प्रत्यक्षलक्षणं वक्तव्यम्, अनिन्द्रियार्थसन्निकर्षजं हि तदिति? इन्द्रियस्य वै सतो मनस इन्द्रियेभ्यः पृथगुपदेशो धर्मभेदात्, भौतिका-

न्यायवार्त्तिकम्

इन्द्रियार्थसन्निकर्षोत्पन्नमित्येवमादिलक्षणमात्मादिषु सुखादिषु च नास्ति, मनसोऽनिन्द्रियत्वादव्यापकमेतत् प्रत्यक्षलक्षणमिति। कथं पुनरिन्द्रियं मनो न भवति? इन्द्रियसूत्रेऽपठितत्वात्। परिपठितानि घ्राणादीनीन्द्रियाणि, न च तेषु मनः पठितम्, तस्मान्मनो नेन्द्रियम्। पृथक् चानभिधानान्नास्ति मनस इन्द्रियत्वे प्रमाणम्, ततश्च नेन्द्रियं मनः। न चैवं प्रत्यक्षाः सुखादयो भविष्यन्तीति। प्रत्यक्षाश्चैते, नानुमानिकाः, लिङ्गाभावात्। न हि लिङ्गमन्तरेणानुमेयार्थो गम्यते। नाप्यन्यत् प्रमाणं प्रतिपादकमस्ति सुखादीनाम्। न च तेषामनुमेयत्वम्। न चान्या गतिरस्ति। तस्मात्कर्त्तव्यं सुखादीनां प्रत्यक्षेण ग्रहणोपसंख्यानमिति। कश्चैवमाह—न प्रत्यक्षाः सुखादय इति? इन्द्रियार्थसन्निकर्षजन्यप्रत्यक्षवाद्याह—नैष दोषः, मनस इन्द्रियत्वादिन्द्रियार्थसन्निकर्षोत्पन्नं सुखादिज्ञानमिति। यत्तु सूत्रे-

न्यायवार्त्तिकतात्पर्य्यटीका

अन्यथा अन्धबधिराद्यभावप्रसङ्गः। तथा च संशयज्ञानोत्पादेऽपीन्द्रियार्थसन्निकर्षोऽपेक्षणीय इत्यर्थः। तदिदं तस्य हीत्यादिना वार्त्तिकेन व्याख्यातम्। अव्यापकत्वेन लक्षणाक्षेपपरं भाष्यमात्मादिष्वित्यादि, तद् व्याचष्टे—इन्द्रियार्थेति। देशयति—कथं पुनरिति। परिहरति—इन्द्रियेति। मा भूदिन्द्रियसूत्रे पाठः, तद्धि बाह्येन्द्रियलक्षणम्, आन्तरं च मन इत्यत आह—पृथक् चेति। न च सुखादौ प्रमाणान्तरमस्ति, तस्मात्पारिशेष्यात् सिद्धं प्रत्यक्षत्वमित्याह—प्रत्यक्षाश्चेति। ननु नैते प्रमेयाः स्वसंवेदनसिद्धत्वात्, तत्किमत्र प्रमेयार्थेन प्रमाणेनेत्यत आह—न च तेषामिति। ननूक्तं स्वसंवेदनतया न प्रमाकर्म्मभाव एषामित्यत आह—न चान्या गतिरिति। संवेदनत्वेन हि तेषां स्वसंवेदनता, न चैते संवेदनमित्युक्तमधस्तादिति (२) भावः। आक्षेपमुपसंहरति— तस्मादिति। भाष्ये चात्मादिषु सुखादिष्विति नित्यानित्याभिप्रायं वर्गद्वयम्, आत्म-सुखत्व-दुःखत्वादयो नित्याः, अनित्याश्च सुखदुःखादय इति। तदिदमुक्तं दिङ्नागेन—"न सुखादि प्रमेयं वा मनो वाऽस्तीन्द्रियान्तरम्"। न च तत्सम्भवति, घ्राणादिसूत्रेण विभागपरेण निषेधादिति भावः। समाधिभाष्यमिन्द्रियस्य वै सत इति। तद्व्याचिख्यासुर्गूढाभिप्रायः पृच्छति—कश्चैवमिति। आक्षेप्तुरुत्तरम्—इन्द्रियार्थेति। समाधाता आह—नैष दोष इति। आक्षेप्तुरनुशयबीजमुद्घाट्य दूषयति—यत्तु सूत्र इति। नेदं विभागपरं घ्राणादिसूत्रम्, अपि तु लक्षण-

(१) "पश्चा"दित्यादि"व्यवसाया"न्तपाठः फ-पु-नास्ति। (२) १०७ पृ: तात्पर्य्यस्य १२ पङ्क्तितः द्रष्टव्यम्।

न्यायभाष्यम्

नीन्द्रियाणि नियतविषयाणि, सगुणानां चैषामिन्द्रियभाव इति, मनस्त्वभौतिकं सर्वविषयं च, नाऽस्य सगुणस्येन्द्रियभाव इति। सति चेन्द्रियार्थसन्निकर्षे सन्निधि-

न्यायवार्त्तिकम्

ऽनभिधानं तद्वैधर्म्यात्। किं तद्वैधर्म्यम्? सर्वविषयत्वासर्वविषयत्वे। सर्वविषयं मनोऽसर्वविषयाणीतराणि। सर्वविषयं तु मनः, स्मृतिकारणसंयोगाधारत्वाद् आत्मवत्, सुखग्राहकसंयोगाधिकरणत्वात् समस्तेन्द्रियाधिष्ठातृत्वाच्च आत्मवत्। भौतिकाभौतिकत्वं तु न, विरोधात्। न हि भौतिकं मनो नाप्यभौतिकमिति। कार्यधर्मावेतौ भौतिकत्वमभौतिकत्वं च, न च कार्यं मनः, तस्मान्न भौतिकं नाप्यभौतिकमिति। श्रोत्रे चासम्भवः यदि भौतिकत्वाभौतिकत्वलक्षणाद्वैधर्म्यादपरिपाठः सूत्रे मनसः, श्रोत्रमपि सूत्रे न पठितव्यं तर्हि, न हि श्रोत्रं भौतिकं नाप्यभौतिकमिति। स्वार्थे प्रत्ययविधानमिति चेत्, न। प्रत्ययवैयर्थ्यात्। स्यादेषा बुद्धिः स्वार्थिक एष प्रत्ययो भूतमेव भौतिकमिति। तच्च न। प्रत्ययवैयर्थ्यात्। न हि भौतिकमित्यनेन कश्चित्तद्धितार्थो लभ्यते, तस्माद् व्यर्थमेतत् स्वार्थे प्रत्ययविधानमिति। यत्पुनरेतत् पृथगभिधानं नास्तीति। न नास्ति, युगपज्ज्ञानानुपपत्तेरिति। "युगपज्ज्ञानानुत्पत्तिर्मनसो लिङ्ग"मित्युच्यते। तेन च प्रतिपादितमेतन्मनसः करणत्वमिति।

न्यायवार्त्तिकतात्पर्य्यटीका

परम्, तत्र चेन्द्रियमपि मनो न लक्षितम्, वैधर्म्यादित्यर्थः। वैधर्म्यमाह—वैधर्म्यमिति। तत्र प्रमाणयति—सर्वविषयं त्विति। वैधर्म्यान्तरं दूषयति—भौतिकेति। कार्यस्य हि विशेषौ भौतिकत्वाभौतिकत्वे, भूतकार्य्यं भौतिकम्, यद्भूतकार्य्यं न भवति तद्भौतिकं न भवति। भूतकार्य्यत्वप्रतिषेधश्च तदन्यकार्य्यत्वं गमयति, विशेषनिषेधस्य शेषाभ्यनुज्ञानहेतुत्वात्। इतरथा त्वकार्य्यमेवोच्येत न त्वभौतिकमिति। तस्मादकार्य्यस्य मनसोऽभौतिकत्वं कार्य्यधर्म्मो विरुद्धमित्यर्थः। अपि च वैधर्म्यान्मनोवत् श्रोत्रमपि न वक्तव्यमित्याह—श्रोत्रे चेति। शङ्कते—स्वार्थ इति। भूतानि हि घ्राणादीनि श्रोत्रान्तानि मनस्तु न भूतमिति वैधर्म्यमित्यर्थः। निराकरोति—तच्च नेति। दर्शयिष्यति हि वार्त्तिककारो (१) यथा स्वार्थिको न कश्चिदपि प्रत्यय इत्यर्थः। आक्षेपहेतुमनुभाषते—यत्पुनरिति। दूषयति—तन्नास्तीति(२)। तदनेन सति चेन्द्रियार्थसन्निकर्षे इत्यादि भाष्यं व्याख्यातम्। यच्चापरं वैधर्म्यं घ्राणादिभ्यो मनस उक्तं भाष्यकारेण (३) तत्सिंहावलोकितेन

(१) अस्मिन्नेव पृष्ठे 'प्रत्ययवैयर्थ्यात्' इति ग्रन्थेन। (२) वार्त्तिके—'न नास्ति' इति पाठः। (३) भाष्ये अत्रैव १मपङ्क्तौ "सगुणानां चैषा" मित्यादिना ग्रन्थेन उक्तम्।

न्यायवार्त्तिकम्

सगुणानामिन्द्रियभावो वैधर्म्यमित्येतदप्ययुक्तम्, श्रोत्रानभिधानप्रसङ्गादेव। तस्मात् सर्वविषयत्वासर्वविषयत्वमेव वैधर्म्यमित्येतदेव ज्यायः। तन्त्रान्तरसमाचाराच्च। तन्त्रान्तरे मन इन्द्रियमिति पठ्यते। तच्चेह न प्रतिषिध्यते। अप्रतिषेधादुपात्तं तदिति न, शेषाभिधानवैयर्थ्यात्। शेषाण्यपीन्द्रियाणि तैः परिपठितानि तस्मात् तान्यपि न वक्तव्यानि यद्यप्रतिषेधादुपादानं स्यादिति। न, तन्त्रयुक्त्यनवबोधात्। न भवता तन्त्रयुक्तिः परिज्ञायते। परमतमप्रतिषिद्धमनुमतमिति हि तन्त्रयुक्तिः। न च यस्य स्वमतपरिग्रहो नास्ति, तस्य स्वमतं परमतं वा भिद्यते। भवता च परमतानुरोधेन सर्वं स्वमतं निवार्यत इति। तन्निवारणात् स्वमतं परमतमित्येतदेव न स्यात्। तस्मादस्ति मन इन्द्रियं चेति। तदुपपन्नमिन्द्रियार्थसन्निकर्षोत्पन्नं सुखादिज्ञानमिति व्यापकं लक्षणम्।

समस्तमसमस्तं चेति सन्देहः। किमिदं प्रत्यक्षलक्षणं समस्तमाहो असमस्तमिति सन्देहः, कुतः? उभयथा दर्शनात् समस्तं लक्षणं भवति व्यस्तं च। "इच्छाप्रयत्नद्वेष(१)सुखदुःखज्ञानान्यात्मनो लिङ्ग"मिति व्यस्तलक्षणम्, एकशः प्रतिपादकत्वात्। तथा "समानानेकधर्म्मोपपत्ते"रित्येवमादि व्यस्तम्। समस्तं पुनः वचनविघातोऽर्थविकल्पोपपत्त्या छलमिति। समस्तेनानेन छलं लक्ष्यते। "प्रसिद्धसाधर्म्यात् साध्यसाधनमुपमान"मिति च। लक्षणं चेदमतः सन्देहः—किं समस्तमुतासमस्तमिति? समस्तमित्याह। यस्मादेकशोऽनुमानसुखशाब्दविपर्ययसंशय-

न्यायवार्त्तिकतात्पर्य्यटीका

दूषयति—सगुणानामिति। घ्राणादीनि यथा स्वस्वगुणेन गन्धादिना बाह्यं गन्धादि बोधयन्ति नैवं स्वगुणेन शब्देन श्रोत्रं बाह्यं शब्दं बोधयति, तन्मनोवत् श्रोत्रमपि घ्राणादिसूत्रे न पठितव्यमित्यर्थः। भाष्योक्तेषु मध्येऽभिमतं वैधर्म्यमुपसंहरति—तस्मादिति। भूतत्वाभूतत्वलक्षणं वैधर्म्यं न भौतिकत्वाभौतिकत्वग्रहणेन शक्यमित्यवधारणाभिप्रायः, ननु युगपज्ज्ञानानुत्पत्तेर्ज्ञानकारणं मनोऽस्तीत्यवगम्यते, न पुनरस्येन्द्रियत्वमपि, तद्भावानवगमे च नेन्द्रियार्थसन्निकर्षजं सुखादिज्ञानं शक्यं वक्तुमित्यत आह—तन्त्रान्तरेति। तन्त्यते व्युत्पाद्यते अनेन तत्त्वमिति तन्त्रं शास्त्रम् तदनेन मनसश्चेत्यादि भाष्यं व्याख्यातम्, तद्दूषितं दिङ्नागेन "अनिषेधादुपात्तं चेदन्येन्द्रियरुतं वृथा," तद्दूषयितुमुपन्यस्यति—न शेषेति। तद्दूषयति—न तन्त्रयुक्तीति। सर्वस्य तन्त्रान्तरे लोके च सिद्धत्वादवक्तव्यतायां स्वमतमिति नास्ति। वचनलिङ्गं हि मतज्ञानं न चाननुमते निषेधमात्रं शक्यं कर्त्तुम्, अभावस्य भावनिरूपणाधीननिरूपणत्वादिति भावः। सिद्धमर्थमुपसंहरति—तस्मादिति। प्रकृतमुपसंहरति—तदिति। तदेवं लक्षणपदानि व्याख्याय विमृशति—समस्तमिति। अभिमतमाह—समस्तमित्याह भाष्यकारः। हेतुमाह—यस्मादिति। इन्द्रियार्थसन्निकर्षोत्पन्नं ज्ञानमव्यभिचारीति हि प्रत्यक्षलक्षणमनवयवेन समानासमानजातीयव्यावृत्तं

(१) 'इच्छाद्वेषप्रयत्न' इति अस्मदुपलब्धसूत्रपाठः।

न्यायवार्त्तिकम्

ज्ञानानि निवर्त्यन्त इति। यदीन्द्रियार्थसन्निकर्षोत्पन्नमित्याद्येकशः पदमभिधीयते, योऽयमेकेन पदेनार्थः संगृहीतः स प्रत्यक्षः स्यादिति तेन पूर्वोक्तानामनुमानादीनां प्रत्यक्षत्वप्रसङ्गः स्यादिति। एवं द्वयोः पदयोः उपादाने पदद्वयोपात्तस्य प्रत्यक्षत्वप्रसङ्गः। एवं त्रयाणां पदानाम् उपादाने तैरुपात्तस्य प्रत्यक्षत्वप्रसङ्गः। एवं चतुर्णाम् पदानाम् उपादाने तैरुपात्तस्य प्रत्यक्षत्वप्रसङ्गः। तस्मादेकद्वित्रिचतुष्पदपर्युदासात् पञ्चपदपरिग्रहेण त्रिंशत्कोटीर्व्युदस्य समस्तं लक्षणमित्युच्यते। तत्रैकपदपरिग्रहेण तावत्पञ्च कोटयः, द्विपदपरिग्रहेण दश, त्रिपदपरिग्रहेणापि दशैव, चतुष्पदपरिग्रहेण पञ्च। एकत्रिंशत्तमी पुनः समस्तपरिग्रहेणोपात्तेति। कस्मात्?

न्यायवार्त्तिकतात्पर्य्यटीका

शक्यमेव लक्षयितुम्। नो खल्वयमसावश्व इति ज्ञानमिन्द्रियजं शब्दजं संभवति। तद्धि द्रव्यगोचरं वा भवेद्, वाच्यत्वगोचरं वा, वाच्यत्वविशिष्टद्रव्यगोचरं वा। तत्र द्रव्यमैन्द्रियकमेव न शाब्दमित्यशक्यं तज्ज्ञानं व्यवच्छेत्तुमनभिमतं च। वाच्यत्वगोचरं तु ज्ञानं शाब्दमेव अन्यथा ह्यश्रुतशब्दोऽप्यारण्यकोऽश्वमेवेन्द्रियसन्निकर्षादश्वशब्दवाच्य इति गृह्णीयात्। वाच्यत्वविशिष्टद्रव्यज्ञानमपि शाब्दमेव, वह्निविशिष्टधूमज्ञानमिवानुमानिकम्, अन्यथा तदप्यैन्द्रियकमिति न तन्निराकरणाय मानान्तरमास्थेयम्। अथ न वाच्यत्वं नाम मीमांसकानामिव किं चिदतीन्द्रियम्, अपि तु संकेतमात्रमेव स्यादिदं प्रत्येतव्यमिति। तथाऽपि तव्यार्थः शब्द एव। अथाऽयमप्यैन्द्रियक एव, तत्र गुरूपदिष्टा गाथा पठितव्या—

शब्दजत्वेन शाब्दं चेत् प्रत्यक्षं चाक्षजन्मतः।
स्पष्टग्रहणरूपत्वाद् युक्तमैन्द्रियकं हि तत्॥ इति।

तस्मान्नोभयजं ज्ञानं यद्वारणायाव्यपदेश्यपदम्। कैश्चिदुक्तं व्यवसायात्मकपदेन संशयज्ञानप्रत्यक्षत्वनिराकरणमन्वाचितमिति संशयेत्युक्तम्। अन्वयं दर्शयित्वा व्यतिरेकमाह—यदीति। उपसंहरति—तस्मादिति। हेयास्त्रिंशत्कोटीर्गणयति—तत्रेति। द्विपदपरिग्रहेण दश,—इन्द्रियार्थसन्निकर्षोत्पन्नपदं ध्रुवं कृत्वा ज्ञानाद्येकैकपदसंबन्धेन चतस्रः कोटयः, ज्ञानं च ध्रुवं कृत्वा अव्यपदेश्याद्येकैकपदसंबन्धेन तिस्रः, एवमव्यपदेश्यपदं ध्रुवं कृत्वाऽव्यभिचार्य्याद्येकैकपदसंबन्धेन द्वे कोटी, अव्यभिचारिपदं ध्रुवं कृत्वा व्यवसायात्मकसंबन्धेन कोटिरेका। त्रिपदपरिग्रहेणापि दशैव,—इन्द्रियार्थसन्निकर्षोत्पन्नं ज्ञानमिति ध्रुवं कृत्वाऽव्यपदेश्याद्येकैकपदसंबन्धेन तिस्रः कोटयः; ज्ञानमव्यपदेश्यमिति ध्रुवं कृत्वाऽव्यभिचार्य्यादिपदसंबन्धेन द्वे कोटी, अव्यभिचार्य्यव्यपदेश्यपदयोस्तु व्यवसायात्मकपदसंबन्धे कोटिरेका, इन्द्रियार्थसन्निकर्षाव्यपदेश्यपदध्रौव्ये चाव्यभिचार्य्याद्येकैकपदसंबन्धे कोटिद्वियम्, अव्यभिचारिव्यवसायात्मकपदयोस्तु ध्रुवयोरिन्द्रियार्थसन्निकर्षोत्पन्नपदेन ज्ञानपदेन च प्रत्येकं संबन्धे कोटिद्वियम्, इति त्रिपदपरिग्रहेण दश कोटयः। चतुष्पदपरिग्रहेण पञ्च,—इन्द्रियार्थसन्निकर्षोत्पन्नं ज्ञानमव्यपदेश्यमिति ध्रुवं कृत्वा अव्यभिचार्य्याद्य-

न्यायवार्त्तिकम्

विशेषविधिप्रतिषेधयोः शेषप्रतिषेधविध्यभ्यनुज्ञाविषयत्वात्। अयं खलु विशेषविधिः प्रवर्त्तमानः शेषं प्रतिषेधति, यथा दक्षिणेनाक्ष्णा पश्यतीति। विशेषप्रतिषेधश्च शेषाभ्यनुज्ञाविषयो भवति, यथा वामेनाक्ष्णा न पश्यतीति। तथेहाप्येकदेशाभ्युपगमे शेषप्रतिषेधः, शेषविधानं वा गम्यत इति व्यवस्थितं प्रत्यक्षमिति।

अपरे पुनर्वर्णयन्ति—ततोऽर्थाद्विज्ञानं प्रत्यक्षमिति, तन्न, ततोऽर्थादिति, यस्यार्थस्य यद्विज्ञानं व्यपदिश्यते यदि तत एव तद्भवति नार्थान्तरात्, भवति तत् प्रत्यक्षम्। एतेनानुमानादिज्ञानमपक्षिप्तं भवति, न हि तत एव तद्भवति। किं तर्हि? ततश्चान्यतश्च तद्भवति। तत्र तावदर्थग्रहणं न कर्त्तव्यमिति (१)। ततो विज्ञानमित्युच्यमाने गम्यत एव तदर्थादिति। अवधारणार्थोऽर्थशब्द इति चेत्, स्यान्मतिरेषाऽवधारणार्थोऽर्थशब्दो भविष्यतीति, यदुक्तं

न्यायवार्त्तिकतात्पर्य्यटीका

कैकपदसंबन्धे द्वे कोटी, अव्यपदेश्यपदं त्यक्त्वा परकोटिः, ज्ञानपदं त्यक्त्वा चापरा, इन्द्रियार्थसन्निकर्षोत्पन्नपदं त्यक्त्वा तु पञ्चमी। पृच्छति—कस्मात्पञ्चपदपरिग्रहेणैकत्रिंशत्तमकोटिपरिग्रहेणेतराः कोटयो व्यवच्छिद्यन्ते? न ह्यत्र तद्व्यवच्छेदवाचकः कश्चिदस्ति शब्द इत्यर्थः। उत्तरम्—विशेषेति। विशेषविधानप्रस्तावे शेषनिषेधोपन्यासो दृष्टान्तलाभाय, एकदेशाभ्युपगम एकत्रिंशत्कोटिषु एकत्रिंशत्तमी कोटिरेकदेश इत्यर्थः। शेषविधानं वेति, वाशब्द इवार्थः।

तदेवं प्रत्यक्षलक्षणं समर्थ्य वासुबन्धवं(२) तावत्प्रत्यक्षलक्षणं विकल्पयितुमुपन्यस्यति—अपरे पुनरिति। लक्षणं व्याचष्टे—ततोऽर्थादिति। यत्तदोर्नित्याभिसंबन्धाद् यस्यार्थस्य यद्विज्ञानं व्यपदिश्यते यदि तत एव तद्भवति, नार्थान्तरात्, व्यपदेश्यमानं शुक्तिज्ञानं न प्रत्यक्षम्, व्यपदेशासंबन्धिनोऽर्थान्तरात् शुक्तिरूपाज्जायमानं रजतेन व्यपदिश्यमानं शुक्तिज्ञानं न प्रत्यक्षम्, व्यपदेशकानुत्पत्तेः, व्यपदेशकरजतस्य तत्राभावात्। एतस्य प्रत्यक्षाभासस्य व्यावृत्तिः सुप्रसिद्धेति तामुपेक्ष्यानुमानव्यावृत्तिमाह—एतेनेति। कुतः? न हि तत एव व्यपदेशकादेव वह्नेः, तद् विज्ञानमनुमानं भवति। किन्तु यत्र वह्निरस्ति तत्र ततश्च, यत्र तु दृष्टमात्र एव वह्नेरुपरमादुपरतो धूमस्तत्रान्यतश्च तद्भवति स्मर्य्यमाणाद्धूमादसति तद्व्यपदेशके वह्नौ, ततोऽर्थादित्यत्रार्थविशेषणं तत इति। तत्संगतश्च "एव"कारोऽयोगव्यवच्छेदे वर्त्तते, यथा चैत्रो धनुर्द्धर एवेति। तेन यत्रैव तदयोगः तदप्रत्यक्षमित्यर्थः। तदेतल्लक्षणं दूषयति—अत्रार्थग्रहणमनर्थकम्। न हि ज्ञानव्यपदेश आत्मना वा इन्द्रियेण वा संभवति। शङ्कते—अवधारणार्थ इति, अयोगव्यवच्छेदेनैतदवधारणम्, विशेषणसंगतश्चैवकारोऽयोगं व्यवच्छिनत्ति। असति चार्थपदे कस्येदं विशेषणमिति

(१) "अत्रार्थग्रहणमनर्थकम्" इति तात्पर्य्य। (२) वसुबन्धुसम्मतमित्यर्थः।

न्यायवार्त्तिकम्

भवति तत एवेति, तदुक्तं भवति ततोऽर्थादिति। तन्न युक्तम्, एकपदस्यावधारणार्थस्य दृष्टत्वात्, अब्भक्ष (१) इति यथा। एतेनानुमानादिव्युदासोऽपि प्रत्युक्तः। यत् पुनरेतत् संवृत्तिज्ञानमनेनापक्षिप्तमिति, तदेतन्न बुध्यामहे कथं तदपक्षिप्तमिति। यदि ब्रूषे रूपादिभ्य उत्पन्नं ज्ञानं घटस्य व्यपदिश्यते न ततो भविष्यतीत्यपक्षिप्तम्, तन्न युक्तम्। न हि रूपादिभ्य उत्पन्नं ज्ञानं घटस्य व्यपदिश्यते। रूपादिभ्य उत्पन्नं रूपादीनां घटादिभ्य उत्पन्नं ज्ञानं घटस्येति न प्रसङ्गः। अथाप्येवं मनोरथो न रूपादिभ्यो व्यतिरिक्ताः पटादय इति, मनोमोदकोपभोगमात्रमेतत्। यथा तद्व्यतिरिक्ता घटादयः तथोपरिष्टाद्वक्ष्यामः (२)। सर्वं च स्वविषयाद् विज्ञानं भवतीति? ततो ग्रहणमनर्थकमिति। ननु च मिथ्याज्ञानमतस्मादपि भवति, न ह्यतस्मात्तद्भवतीति।

न्यायवार्त्तिकतात्पर्य्यटीका

विशेषणसंगतो नैवकारोऽयोगं व्यवच्छिन्द्यादिति भावः। निराकरोति—तन्नेति। तत इति सर्वनाम्नः सन्निहितविशेष्यापेक्षत्वात्। अन्यथाऽभिधानापर्य्यवसानाद् यस्य तद्व्यपदिश्यत इति व्यपदेशसंबन्धी विशेष्यः प्राप्यत एवेति सिध्यत्येव विशेषणत्वम्। अभ्युपेत्य त्ववधारणमात्रेऽप्यस्ति दोष इति मन्यमानेनाब्भक्ष इत्युदाहृतम्। अन्यव्यवच्छेदे तदर्थं हि तदेवान्यद्व्यवच्छिद्यते यद्विरोधि, न पुनरन्यमात्रम्, यथाऽऽहुः—"नियमस्तद्विरोधाच्च कल्पते नाविरोधिन" इति।

स्यादेतत्—'तत' इत्युच्यमाने यतस्ततः स्यात्, तथा चानुमानाद्यपि लिङ्गज्ञानादेस्तत उपजायत इति प्रत्यक्षं प्रसज्येतेति तन्निवृत्त्यर्थमर्थादिति वक्तव्यम्, न हि तदर्थाज्जायते, अपि तु प्रत्यक्षमेव, इत्यत आह—एतेनेति। यस्य तद्व्यपदिश्यत इत्यपेक्ष्य 'ततः' शब्दसामर्थ्येनानुमानादिव्युदासोऽपि प्रत्युक्तः। यच्च ततःशब्दस्य व्यावर्त्यान्तरमुक्तं तदपि दूषयति—यत्पुनरेतदिति। यदि यस्य व्यपदिश्यते ज्ञानं तत् प्रत्यक्षं ततो घट इत्यपि ज्ञानं प्रत्यक्षं प्रसज्येत, तदपि घटस्य व्यपदिश्यते, न तु ततो घटाद्भवति, तस्य विचारासहतया परमार्थसत्त्वाभावेन संप्रति सतो विज्ञानं प्रति कारणत्वाभावात्। तेन तन्निवारणार्थं तत इत्युक्तम्। तदेतन्न बुध्यामहे कथमपक्षिप्तमिति। शङ्कते—यदीति। रूपादिपरमाणव एव निरन्तरोत्पादाः परमार्थसन्तो भिन्नाः स्वविज्ञानस्याविकल्पस्य जनकाः तेषां तु नानात्वं स्वेन रूपेण संवृण्वती निर्विकल्पकपृष्ठभाविनी घट इति विकल्पिका बुद्धिस्तानेव रूपादीनेकोदकाहरणादिक्रियाकारिणो भेदिन इव दर्शयन्ती संवृत्तिरित्युच्यते। निराकरोति—न हि रूपादिभ्य इति। अनुशयबीजमुद्घाटयति—अथापीति। निराकरोति—मनोमोदकेति। भवन्तु व्यतिरिक्ताः किमेतावताऽपीत्यत आह—सर्वं चेति। यत्संवृत्तित्वेन भवतामभिमतं ज्ञानं यच्चाविकल्पकं तत्सर्वं विषयाद्भवतीति। तस्मात्ततं ग्रहणं संवृत्तिनिवृत्त्यर्थमनर्थकम्।

(१) "अब्भक्ष" इति आदर्शे पाठः। (२) १।१।१४ सूत्रवार्त्तिकं द्रष्टव्यम्।

न्यायभाष्यम्

मसन्निधिं चास्य युगपज्ज्ञानानुत्पत्तिकारणं वक्ष्यामः (१।१।१६) इति। मनसश्चेन्द्रियभावान्न (१) वाच्यं लक्षणान्तरमिति। तन्त्रान्तरसमाचाराच्चैतत्प्रत्येतव्यमिति। परमतमप्रतिषिद्धमनुमतमिति हि तन्त्रयुक्तिः। व्याख्यातं प्रत्यक्षम् ॥ ४ ॥

न्यायवार्त्तिकम्

किं तर्हि? अतस्मिंस्तद्भवतीति। न भवता मिथ्याज्ञानमपि व्यज्ञायि। ततो ग्रहणमर्थग्रहणं चान्तरेण विज्ञानमात्रमवशिष्यते। तथा च न लक्षणमुक्तं स्यात्, सर्वं च ज्ञानं प्रत्यक्षं स्यात्। यद्यप्येतत् सूत्रं यथाश्रुति भवति, तथापि ग्राह्यग्राहकज्ञानयोरयुगपद्भावाज्ज्ञानम् अप्रत्यक्षं स्यात्। नाशोत्पादौ सममिति चेत्, तच्च न, उदाहरणाभावात्। न हि समं नाशोत्पादे किञ्चिदुदाहरणमस्ति। विनष्टश्चार्थः प्रत्यक्ष इति स्यात्। तुल्यमिति चेत्—

न्यायवार्त्तिकतात्पर्य्यटीका

मा भूत् संवृत्तिनिवृत्त्यर्थम्, मिथ्याज्ञाननिवृत्त्यर्थं भविष्यतीति देशयति—ननु च मिथ्याज्ञानमतस्मादपि भवति, यथा पुरोवर्त्तिद्रव्यमिदमिति व्यपदिश्यते रजतमिति च, न तु शुक्तिरिति, तेन यद्यपि सामान्यरूपेण तस्य व्यपदिश्यते ज्ञानम्, ततश्च तद्भवति, तथाऽपि येन विशेषरूपेण तस्य व्यपदिश्यते न ततस्तद्भवतीत्यतस्मादपीत्युक्तम्। तस्मात्तत एव यद्भवति तत्प्रमितिः, न त्वेवं मिथ्याज्ञानम्, तद्धि ततश्चाततश्च भवतीत्यर्थः। परिहरति—न ह्यतस्मादारोपितादूपात् तत्रासतस्तन्मिथ्याज्ञानं भवति, किन्तु ततो भवति। यस्य सामान्यरूपस्य व्यपदिश्यत इदमिति तत एव। समारोपितं तु रजतमस्य विषयो दृश्यमानाकारतया तदिदमुक्तमतस्मिंस्तद्भवतीति। एवं लक्ष्यपदमात्रावशेषाल्लक्षणाभाव इत्याह—ततो ग्रहणमिति। तथा चातिव्याप्तिरित्याह—तथा चेति। अभ्युपेत्य दूषणान्तरमाह—यद्यप्येतदिति। यतो भवति ज्ञानं स ग्राह्योऽर्थः कारणम्, ग्राहकं च ज्ञानं कार्य्यम्, तयोरयुगपद्भावात्, वर्त्तमानाभं ज्ञानमतीते मिथ्येति न प्रत्यक्षं स्यात्। तत्समानकालयोस्तु कार्य्यकारणभावाभावात्। ततोऽर्थादिति नास्तीति भावः। शङ्कते—नाशोत्पादाविति। क्षणिकत्वाद्भावानां कारणस्य नाशः कार्य्यस्योत्पाद इत्येकः कालः, तथाऽपि कारणस्य ग्राह्यता भिन्नकालस्यापि, स्वसदृशज्ञानजननमेव हि तस्य तज्ज्ञानं प्रति ग्राह्यत्वम्, नान्यत्। यथाऽऽह—

> भिन्नकालं कथं ग्राह्यमिति चेद् ग्राह्यतां विदुः।
> हेतुत्वमेव तद्युक्तं ज्ञानाकारार्प्पणक्षमम् ॥ इति।

न चैतावता मिथ्यात्वम्, अर्थाहितस्य नीलाकारस्य ज्ञानवर्तिनो वर्त्तमानत्वादिति भावः। निराकरोति—तच्च नेति। पूर्वापरकालकलाविकललक्षणा क्षणिकता न क्वचिदपि। विद्युज्ज्वालादेरप्याशु-

(१) अतं कः "तत्" शब्दः ग-ल-भा-अधिकः।

न्यायवार्त्तिकम्

स्यान्मतिर्भवतां युगपदवस्थाने किमुदाहरणमिति, तच्च नैवम्, उक्तोत्तरत्वात्। उक्तोत्तरमेतत् स्फाटिकादिसूत्र (१) इति।

अपरे तु मन्यन्ते प्रत्यक्षं कल्पनापोढमिति (२)। अथ केयं कल्पना? नामजातियोजनेति। यत् किल न नाम्नाऽभिधीयते न च जात्यादिभिर्व्यपदिश्यते विषयस्वरूपानुविधायि परिच्छेदकमात्मसंवेद्यं तत् प्रत्यक्षमिति। ते इदं प्रष्टव्याः—अथ प्रत्यक्षशब्देन कोऽर्थोऽभिधीयते इति? यदि प्रत्यक्षम्? कथमवाच्यम्। अथ न प्रत्यक्षम्? अवाचकस्तर्हि प्रत्यक्षशब्दः। अथ प्रत्यक्षशब्देन सामान्यमुच्यत इति, एतदपि सामान्यं किं प्रत्यक्षव्यतिरेक्याहोस्विदव्यति-

न्यायवार्त्तिकतात्पर्य्यटीका

विनाशिनो द्वित्रादिक्षणावस्थानादित्यर्थः। पूर्वोक्तश्चानुयोगस्तदवस्थ एवेत्याह—विनष्टश्चेति। अनहंकारास्पदमश्वेतादिरूपं विज्ञानाद्भिन्नं नीलाद्यनुभूयते, न तु विज्ञानात्मकम्। तथा च यदि विच्छेदग्रहो मिथ्या, तथा सति ज्ञानमेतस्मिन् मिथ्येति कथं प्रत्यक्षम्। सम्यग्ज्ञानभेदस्य तथाभावात्। न चार्थाहिताकारवेदनमर्थवेदनम्, भाक्तत्वप्रसङ्गात्। न च गौणमुख्यलक्षणा गिरां गतयो ज्ञानेषु शक्या नियोजयितुम्, भिन्नप्रस्थानत्वात्। तस्मान्निराकारं ज्ञानमर्थमात्मनो भिन्नं गोचरयतीति वाच्यम्। स चेत्कारणं विनष्टस्य प्रत्यक्षतेति स्यात्, तथा च वर्त्तमानाभमवर्त्तमानं गोचरयतीति मिथ्यात्वमप्रत्यक्षत्वं च स्यादिति भावः। यौगपद्येऽपि नास्त्युदाहरणम्, सर्वस्य क्षणिकपक्षनिक्षेपादिति देशयति—तुल्यमिति चेत्। निराकरोति—तच्चेति।

संप्रति दिङ्नागस्य लक्षणमुपन्यस्यति—अपर इति। दूषयितुं कल्पनास्वरूपं पृच्छति—अथ केयमिति। लक्षणवादिन उत्तरम्—नामेति। यदृच्छाशब्देषु हि नाम्ना विशिष्टोऽर्थ उच्यते डित्थेति। जातिशब्देषु जात्या गौरयमिति। गुणशब्देषु गुणेन शुक्ल इति। क्रियाशब्देषु क्रियया पाचक इति। द्रव्यशब्देषु द्रव्येण (ज्ञानत्वं) दण्डीति (३), सेयं कल्पना यत्र ज्ञाने नास्त्यर्थतः स्वरूपतो वा, तत् कल्पनयाऽपोढं तत्प्रत्यक्षम्, तदिदमाह—यत् किल न नाम्नाऽभिधीयते अर्थतः स्वरूपतश्च, न जात्यादिभिर्व्यपदिश्यते। अव्यभिचाराय विषयकारणत्वमाह—विषयस्वरूपानुविधायीति। प्रमाणत्वमाह—परिच्छेदकं व्यवस्थापकम्। ज्ञानतामस्य दर्शयति—आत्मसंवेद्यं स्वसंवेदनादेव तस्य कल्पनाहितत्वमपि। यथाऽऽहं प्रत्यक्षं कल्पनापोढं प्रत्यक्षेणैव सिध्यती'ति। तत्प्रत्यक्षमिति। तदेतल्लक्ष्यलक्षणपदतत्समुदायव्यापारनिरूपणेन दूषयति—त इदमिति। अथ नेति। विकल्पयोनयो हि शब्दास्तद्गोचरमभिनिविशन्ते, यद्विकल्पा

---

(१) ३।२।९ सू०। (२) "प्रत्यक्षं कल्पनापोढं नामजात्याद्यसंयुतम्" इति प्रमाणसमुच्चयप्रथमपरिच्छेदे दिङ्नागाः। (३) उद्धृतनटतीयपंक्तेः 'यदृच्छाशब्देषु' इत्यारभ्य'दण्डी'तिपर्य्यन्तः पाठः प्रमाणसमुच्चये १म परिच्छेदे दिङ्नागस्य तृतीयसूत्रवृत्तौ दृश्यते, किन्तु तत्र 'ज्ञानत्वम्' इति नास्ति, अर्थसङ्गतौ चास्य नोपयोगः, अत एतद् बन्धनीमध्ये स्थापितम्।

न्यायवार्त्तिकम्

रेकीति ? यदि प्रत्यक्षव्यतिरेकि ? न प्रत्यक्षमुक्तम् । अथाव्यतिरेकि ? कथं नोक्तम् । कल्पनापोढशब्देनापि यदि प्रत्यक्षमुच्यते तदा व्याघातः । अथ नोच्यते, तथापि कल्पनापोढवचनं व्यर्थम्, प्रत्यक्षं कल्पनापोढमिति च वाक्यम् । अथास्य वाक्यस्य कोऽर्थः ? यदि प्रत्यक्षम् ? व्याघातः । कथम् ? प्रत्यक्षं कल्पनापोढमिति चानेन वाक्येनाभिधीयते । न चाभिधेयमिति कोऽन्यो भदन्ताद्वक्तुमर्हति । अथ न प्रत्यक्षमस्यार्थः, वर्णोच्चारणमात्रं तर्ह्येतद्वाक्यं प्रत्यक्षं कल्पनापोढमिति । अनित्यादिशब्दविषयत्वाच्च न सर्वथाऽवाच्यम् । अनित्यं प्रत्यक्षं दुःखशून्यमनात्मकं च प्रत्यक्षमित्येषां चेच्छब्दानां विषयतामुपयाति, कथमवाच्यम् । अथ नोपैति ? सर्वं संस्कृतमनित्यमित्येतत्तथागतेन नाख्यातव्यम् । अथ स्वरूपतो न व्यपदेश्यमित्येष कल्पनापोढशब्दार्थः ? सर्वेऽर्थाः तर्हि प्रत्यक्षाः प्राप्नुवन्ति । किं कारणम् ? न हि कश्चित् सुशिक्षितोऽपि पदार्थानां स्वरूपं निर्देष्टुं शक्नोति, असामयिकत्वात् । सर्वस्य च वस्तुनो द्वावाकारौ सामान्याकारो विशेषाकारश्च । तत्र वस्तु सामान्येनैवाकारेणाभिधीयते, न विशेषाकारेण । विशेषानभिधानान्नोक्तं भवति । न हि मनुष्यशब्दस्य ब्राह्मणो न वाच्यः । ये तु तस्यासाधारणधर्माः पुरुषान्तरव्यावृत्तप्रत्ययहेतवो न च तैः सहानभिधानान्नोक्तो भवति । एवं ज्ञानमपि सामान्यविशेषाकारवत्, तस्य विशेषाकारेण नाभिधानम्, सामान्याकारेण त्वभिधानमेव । यदि च विशेषाकारेणानभिधानम्, यत् तल्लक्षणं प्रत्यक्षस्य, न केवलं प्रत्यक्षस्य, त्रैलोक्यस्यैतल्लक्षणमिति, एवं प्रत्यक्षलक्षणं नोक्तं स्यात । अथ कल्पनापोढशब्देन प्रत्यक्षस्य स्वरूपमभिधीयते ?

न्यायवार्त्तिकतात्पर्य्यटीका

गृह्णन्ति, यच्चाध्यवस्यति तदुभयमप्यन्यव्यावृत्तिरूपमवस्तु, तस्मान्नाविकल्पकं ज्ञानं तद्गोचरं वा परमार्थसद् गोचरयन्ति विकल्पाः शब्दाश्चेत्ययमभिसन्धिः । अपि चास्य वाच्यत्वे भवदभ्युपगतप्रामाण्यागमविरोध इत्याह—अनित्यादीति । शङ्कते—अथेति । स्वमसाधारणं रूपं व्यावृत्तमिति यावत् । निराकरोति—सर्वेऽर्था इति । न हि यथा सम्यग्ज्ञानमधिकृत्य प्रत्यक्षादिलक्षणं कृतं कीर्तिना (१), तथा दिङ्नागेन येनाधिकाराज्ज्ञाने व्यवतिष्ठेत कल्पनापोढमिति भावः । ननु यदि स्वरूपतो नाभिधीयते, नाभिधेयं तर्हि वस्तु प्रसज्येत । तथा चाऽवास्तवः स्यात् शाब्दो व्यवहार इत्यत आह—सर्वस्य चेति । सामान्यविशेषतद्वद्भेदाद् वस्तुत्रयम्, तत्र तद्वद्वस्त्वधिकृत्योक्तम्—द्वावाकाराविति । सामान्येनैवाकारेणाभिधीयते सामान्यान्वितमित्यर्थः । ब्राह्मण इति । मनुष्यत्वजातिमानित्यर्थः । विशेषमाकारमभिप्रेत्य स्वरूपतो न व्यपदेश्यमित्युक्तं न तु सर्वथेति भावः । प्रकृते योजयति—एवमिति । आशङ्क्य पूर्वोक्तमतिप्रसङ्गं स्मारयति—यदिदं चेति(२) ।

(१) "धर्म्मकीर्त्तिना" । (२) "यदि चेति" वार्त्तिकपाठः ।

(सू)—अथ तत्पूर्वकं त्रिविधमनुमानं पूर्ववच्छेषवत्सामान्यतो दृष्टं च ॥ ५ ॥

न्यायवार्त्तिकम्

एवमप्यनिवृत्तो व्याघातः स्वरूपं चानभिधेयम् इत्यनेन शब्देनाभिधीयत इति। अथानेन शब्देन नैव किञ्चिदभिधीयते। किमस्य शब्दस्योच्चारणसामर्थ्यं प्रत्यक्षं कल्पनापोढमिति? अप्रतिपादकत्वान्मूकस्वप्नसदृशमेतत्। एवं यथा यथेदं लक्षणं विचार्यते, तथा तथा न्यायं न सहत इति। "सत्संप्रयोगे पुरुषस्येन्द्रियाणां बुद्धिजन्म तत् प्रत्यक्ष"मिति (१), एतदपि संशयाद्युत्पत्तिनिमित्तत्वादलक्षणमिति। तथा चोक्तं प्रत्यक्षसूत्रं वर्णयद्भिरिति, एतेन प्रत्यक्षमिन्द्रियार्थसन्निकर्षमनःप्रकाशविशेषेषु सत्स्विति प्रत्युक्तम्। तथा श्रोत्रादिवृत्तिरिति। किं कारणम्? पञ्चपदपरिग्रहेण प्रत्यक्षलक्षणमुक्तम्, यत्रान्यतर(२)पदपरिग्रहो नास्ति तत्प्रत्यक्षाभासमिति। एवमनेन न्यायेन यान्यप्यनुक्तानि लक्षणानि तान्येतस्माल्लक्षणान्न भिद्यमानानि न लक्षणानीति। व्याख्यातं प्रत्यक्षलक्षणमिति ॥ ४ ॥

अथ तत्पूर्वकं त्रिविधमनुमानमिति। अथेत्यानन्तर्ये। अनुमानविशेषणार्थं सूत्रं

न्यायवार्त्तिकतात्पर्य्यटीका

अथाश्वकर्णादिशब्दवदव्युत्पन्नः कल्पनापोढशब्दः प्रत्यक्षस्वरूपस्य वाचक इति शङ्कते—अथेति। निराकरोति—एवमपीति। भवतु कल्पनापोढशब्दोऽव्युत्पन्नो मा वा भूत्, अवाच्यं तु प्रत्यक्षमेषितव्यम्, अन्यथा विकल्पस्य प्रत्यक्षत्वप्रसङ्गात्। तथा च व्याघात इत्यर्थः।

जैमिनिप्रत्यक्षलक्षणं दूषयति—सत्संप्रयोग इति। यथाश्रुतस्यातिव्याप्तिः संशब्देनापि प्रयोगस्य समीचीनता प्रतिपाद्यते। सा च मिथ्याप्रत्ययेऽपि तुल्या। व्यत्ययेऽपि बुद्ध्या बोध्यस्योपस्थापनात् तद् इति बोध्यं परामृशति। अस्ति च मिथ्याज्ञानेऽपि बोध्येन संबन्ध इन्द्रियाणाम्, बोध्यं हि पुरोवर्त्ति द्रव्यम्। अथ यथा बोध्यं तादृशो नास्ति संबन्ध इन्द्रियाणाम्, रजतत्वस्य प्रकारस्यासन्निधानात्। हन्ताव्यापकत्वं लक्षणदोषः। प्रत्यभिज्ञायां तत्ताप्रकारस्य इन्द्रियेणासंबन्धात्। अपि च प्राभाकरे दर्शने अनुमानादिज्ञानमात्मनि प्रत्यक्षं न भवेत्, न हि तत् सत्संप्रयोगजम्। तस्मादेतदपि परिभावनीयं सूरिभिरिति। वार्षगण्यस्यापि लक्षणमयुक्तमित्याह—श्रोत्रादिवृत्तिरिति। पञ्चानां खल्विन्द्रियाणामर्थाकारेण परिणतानामालोचनमात्रं वृत्तिरिष्यते, सा च संशयादिव्यापकत्वादलक्षणमिति। तत्सिद्धमिन्द्रियार्थसन्निकर्षोत्पन्नमित्येतदेव लक्षणमिति।

प्रत्यक्षलक्षणं समाप्तम् ॥ ४ ॥

प्रत्यक्षलक्षणानन्तरमनुमानलक्षणपरं सूत्रं पठति—**अथ तत्पूर्वकं त्रिविधमनुमानमिति।**

---

(१) पूर्व्वमीमांसायाम्—१।१।४ सू०। (२) "यत्रान्यतम" इत्येवं पाठः समुचितः।

न्यायवार्त्तिकम्

तत्पूर्वकमिति। अनेन समानासमानजातीयेभ्योऽनुमानं व्यवच्छिद्यत इति। तानि ते तत् पूर्वं यस्य तदिदं तत्पूर्वकम्। यदा तानीति विग्रहः तदा समस्तप्रमाणाभिसम्बन्धात् सर्वप्रमाण-पूर्वकत्वमनुमानस्य वर्णितं भवति। पारम्पर्येण पुनस्तत् प्रत्यक्ष एव व्यवतिष्ठत इति तत्पूर्वकत्व-

न्यायवार्त्तिकतात्पर्य्यटीका

अत्रानुमानमिति सिद्धवत् प्रमाणविशेषरूपलक्ष्यानुवाद एव "नाप्रत्यक्षं प्रमाण"मित्य-प्रामाण्यमनुमानस्य सुदूरं प्रतिक्षिपति। दृष्टप्रामाण्याप्रामाण्यविज्ञानव्यक्तिसाधर्म्येण हि कासां-चिद्व्यक्तीनां प्रामाण्यमप्रामाण्यं वा विदधीत। दृष्टसाधर्म्यं चानुमानमेवेति कथं तेनैव तस्या-प्रामाण्यम्। अपि चानुमानमप्रमाणमिति वाक्यप्रयोगोऽज्ञं विप्रतिपन्नं सन्दिग्धं वा पुरुषं प्रत्यर्थवान्, न च परपुरुषवर्त्तिनो देहधर्म्मा अपि सन्देहाज्ञानविपर्य्यासा गौरत्वादिवत् प्रत्यक्षा वीक्ष्यन्ते, न च तद्वचनात् प्रतीयन्ते, वचनस्यापि प्रत्यक्षादन्यस्याप्रामाण्योपगमात्। पुरुषविशेष-मनधिकृत्य तु वचनमनर्थकं प्रयुञ्जानो नायं लौकिको न परीक्षकः इत्युन्मत्तवदनवधेयवचनः स्यात्, परिशिष्टं तु परीक्षापर्वणि निवेदयिष्यते (१)। तस्मादकामेनापि प्रमाणमनुमानमुपेतव्यमिति। लक्ष्यं प्रमाणभेदमनुमानमनूद्य तत्पूर्वकमिति लक्षणं विधत्ते। अथेत्यानन्तर्य्ये उक्तं प्रत्यक्षमनु-मानस्य हेतुः, इदानीमनुमानं हेतुमद्व्युत्पाद्यत इत्यर्थः। लक्षणसूत्रतात्पर्य्यमाह—अनुमानेति। तदेव स्फुटयति—अनेनेति। समानजातीयानि प्रमाणतया प्रत्यक्षादीनि, असमानजातीयानि चानु-मानाभासादीनि, यथा क्षणिकत्वादिषु सत्त्वादीनि। स्यादेतदतिव्यापकमेतत्तत्पूर्वकत्वम्, तदिति हि प्रत्यक्षं परामृशत्यानन्तर्य्यात्। तथा च प्रत्यक्षपूर्वकत्वमनुमानस्येवागमस्मृतिसंशयविपर्य्या-सानामप्यस्तीति तान्यप्यनुमानं प्रसज्येरन्। अनुमानादिपूर्वकं चानुमानं न प्रत्यक्षपूर्वकमिति नानुमानं स्यादनुमानलक्षणेनाव्यापनात्। तस्मादव्याप्त्यतिव्याप्तिभ्यामलक्षणमेतदित्यत आह—तत्पूर्वकमिति। तत्पूर्वकमित्यावृत्त्या विग्रहत्रयप्रदर्शनम्। तत्र प्रथमे विग्रहे तानीत्यनन्तरं सूत्रमुलङ्घ्य विभागसूत्रगताः प्रत्यक्षादयः संबन्धनीयाः, योग्यत्वात्। यथाऽऽहुः "यस्य येना-भिसंबन्धो दूरस्थस्यापि तस्य स" इति। तदनेन लक्षणस्याव्याप्तिः परिहृता। तदिदमाह—यदा तानीति। नन्वेवं प्रत्यक्षपूर्वकमिति भाष्यविरोध इत्यत आह—पारम्पर्य्येणेति। पारं-पर्य्येण हि प्रत्यक्षपूर्वकत्वमुक्तं भाष्यकृता, तस्मान्न विरोध इति। अतिव्याप्तिनिरासाय द्वितीयं

वृत्तिः

अनुमानं लक्षयति, विभजते च—(अथ तत्पूर्व्वकमिति)।

आनन्तर्यवाचकोऽथशब्दो हेतुहेतुमद्भावसङ्गतिसूचनाय। तत्पूर्वकं—प्रत्यक्षपूर्वकम्,

---

(१) २।१।३७ सूत्रस्य भाष्यवार्त्तिकादौ।

न्यायवार्त्तिकम्

मुक्तं भवति। यदाऽपि विवेकात् ते पूर्वे यस्येति, ते द्वे प्रत्यक्षे पूर्वे यस्य प्रत्यक्षस्य तदिदं तत्पूर्वकं प्रत्यक्षमिति। ते च द्वे प्रत्यक्षे। लिङ्गलिङ्गिसम्बन्धदर्शनमाद्यं प्रत्यक्षम्, लिङ्गदर्शनं द्वितीयम्। बुभुत्सावतो द्वितीयाल्लिङ्गदर्शनात् संस्काराभिव्यक्त्युत्तरकालं स्मृतिः, स्मृत्यनन्तरं च पुनर्लिङ्गदर्शनमयं धूम इति।

न्यायवार्त्तिकतात्पर्यटीका

विग्रहं विवृणोति यदाऽपीति। ते इति विग्रहे अनन्तरसूत्रगतमेव प्रत्यक्षपदं संबध्यते। तथा च द्वे प्रत्यक्षे पूर्वे यस्य प्रत्यक्षस्य लिङ्गपरामर्शज्ञानस्य प्रत्यक्षफलस्य, तदिदं तत्पूर्वकं प्रत्यक्षम्, तत्तु स्वविषये प्रत्यक्षमप्यनुमेयार्थप्रत्ययं कुर्वदनुमानम्। तदिदं तदित्युच्यते। अत्रापि प्रत्यक्षग्रहणमुपलक्षणार्थम्, अनुमाने इत्याद्यपि द्रष्टव्यम्। स्यादेतत्, संबन्धग्रहणसमये यदेतत्तदर्थगोचरं प्रत्यक्षं प्रथममथ तदर्थविषये द्वितीये प्रत्यक्षे सति या तत्पदविषया स्मृतिरुत्पद्यते साऽपि प्रत्यक्षद्वयपूर्वा। एवं लिङ्गालिङ्गिसंबन्धस्मृतिरपि प्रत्यक्षद्वयपूर्वेति तदवस्थैवातिव्याप्तिरित्याशयवान् पृच्छति—कतरे द्वे (१) इति। उत्तरम्—लिङ्गेति। सर्वसन्देहेष्विदमुपतिष्ठते। व्याख्यानतो विशेषप्रतिपत्तिर्न हि सन्देहादलक्षणमिति भावः। न च द्वितीयलिङ्गदर्शनं व्याप्तिस्मरणसमये विनश्यदवस्थमप्यस्ति, व्याप्तिसंस्कारोद्बोधसमयजन्मना स्वजनितेन संस्कारेणास्य व्याप्तिस्मरणसमये विनाशात्। विनश्यदवस्थस्य द्वितीयलिङ्गदर्शनस्य व्याप्तिस्मरणेन सह यौगपद्येऽपि तयोः परस्परवार्त्तानभिज्ञतया मिथो घटनायोगात्। न चात्मा तु घटयिष्यतीति युक्तम्। वृत्त्या खल्वयं घटयेत्, न स्वरूपतः, तस्मादुभाभ्यामुत्पन्नं परामर्शज्ञानमिन्द्रियार्थसन्निकर्षजं तृतीयं प्रत्यक्षमेषितव्यम्। लिङ्गलिङ्गिसंबन्धदर्शनमाद्यं प्रत्यक्षमित्यत्र संबन्धपदेनानुमानाङ्गं संबन्धं विवक्षन् परोक्तान् संबन्धविकल्पाननुमानानङ्गभूतान् प्रतिक्षिपति,—प्रत्यक्षमिति च तस्य प्रमाणमाह। तथा हि केचिदविनाभावं तादात्म्यतदुत्पत्तिनिबन्धनमनुमानाङ्गमाहुः। द्विविधो ह्यर्थः प्रत्यक्षश्च परोक्षश्च, तत्र यो बुद्धौ साक्षादात्मीयं रूपं निवेशयति स प्रत्यक्षः। स हि स्वविषयाया बुद्धेः जनक इति तमन्तरेण बुद्धिरात्मानमनासादयन्ती तस्य सत्तां निश्चापयतीति युक्तम्। परोक्षस्तु बुद्धौ साक्षात्स्वरूपोपधानसामर्थ्यरहितोऽयुक्तप्रतिपत्तिरेव। न चान्यदर्शनेऽन्यकल्पना युक्ता, अतिप्रसङ्गात्। नान्तरीयकतया त्वन्योऽप्यन्यं गमयेत्। स हि प्रतिबद्धस्वभावो यथाविधः सिद्धस्तथाविधसन्निधानं सूचयति, स च प्रतिबन्धो न दर्शनमात्रादवसेयः, तथा सति स श्यामो मैत्रतनयत्वात् परिदृश्यमानमैत्रतनयस्तोमवदित्यप्यनुमानं स्यात्। इहापि हि स्तो दर्शनादर्शने। तस्मात्तादात्म्यतदुत्पत्तिनिबन्धन एव प्रतिबन्धः। यदाह—

---

(१) "कतरे द्वे" इति वार्त्तिके नास्ति, किन्तु "ते च द्वे प्रत्यक्षे" इति पाठस्तत्र दृश्यते।

न्यायवार्त्तिकतात्पर्य्यटीका

कार्य्यकारणभावाद्वा स्वभावाद्वा नियामकात् ।
अविनाभावनियमोऽदर्शनान्न न दर्शनात् ॥

तथा च लिङ्गविकल्पं विना न लिङ्गिविकल्पः, न लिङ्गविकल्पो लिङ्गानुभवं विना, न लिङ्गानुभवो लिङ्गं विना, न च लिङ्गं विना लिङ्गिनमिति लिङ्गिस्वलक्षणाप्रतिभास्यपि पारंपर्य्येण तत्प्रतिबन्धात्तत्रापि संवादकोऽनुमानविकल्प इति । कार्य्यकारणभावश्चेदम्—अस्मिन्सति भवति सत्स्वपि तदन्येष्वस्मिन्नसति न भवत्येवमाकारो नान्वयव्यतिरेकाभ्यामतिरिच्यते, तौ च प्रत्यक्षपृष्ठभाविना विकल्पेनावसीयेते । तथा हि सत्यग्नौ धूम इति प्रत्यक्षमेव विकल्पानुगत-व्यापारमध्यवस्यति । असति चाग्नौ न धूम इत्यपि प्रत्यक्षमेव । न ह्यग्निधूमानुपलम्भावन्याव-तस्तद्विविक्तवस्तूपलम्भात् नाप्यनयोर्व्यतिरेकोऽन्यस्तद्विविक्ताद्वस्तुनः । एवं तादात्म्यमपि विपर्य्यये बाधकप्रमाणोपपत्त्या निश्चेतव्यम् । यथा सत्त्वस्य क्षणिकतया सह तादात्म्यं विपक्षेऽक्षणिके क्रमाक्रमयोर्व्यापकयोरनुपलम्भान्निश्चीयते, तस्मात्तादात्म्यतदुत्पत्तिभ्यामेव प्रतिबन्धो नान्यत इति । अत्रोच्यते—सत्यं यत्किञ्चित् क्वचिद् दृष्टं तस्य यत्र प्रतिबन्धः तद्विदस्तस्य तद्गमकं तत्रेत्यनु-जानीमः । स एव तु प्रतिबन्धो न तावत्तदुत्पत्त्या सम्भवति । का पुनरियं तदुत्पत्तिर्धूमस्य ? किं वह्न्यनन्तरं भावः सः ? तादृशोऽस्ति रासभस्यापि तत्प्रतिबद्धोऽपि धूमः स्यात् । अथ तदनन्तरमेव भावः, न च रासभानन्तरं भवन्नपि तदनन्तरमेव भवति, तस्मिन्सत्यप्यसत्यग्नौ तद-भावात् । असत्यपि तस्मिन्सत्यार्द्रेन्धनवति वह्नौ तद्भावात् । अथ यद्यपि धूमस्य वह्निभावानु-विधानं तत्रोपलब्धं तथाऽपि देशान्तरादिषु तद्भावोऽस्य कुतस्त्यः ? तथा हि भूयो भूयो रासभे दृष्टे धूमो दृष्टस्तदभावे चादृष्टो न स तत्कार्य्यः । तज्जातीयस्यैव धूमस्य रासभं विना सति वह्नौ भावादेवं सत्यप्यग्नौ पिशाचेन जनितो धूमः क्वचिद्देशादौ तज्जातीय एव रासभवद्वह्न्यभावेऽपि पिशाचादेव भविष्यतीत्यवश्यं शङ्कया भाव्यं नियामकमपश्यताम् । न च सति भावमात्रं नियामकम्, तस्य रासभादिष्वविशेषात् । तदनन्तरमेवेति चावधारणस्य च शङ्कायामभावात् । अवधारणेन तु शङ्कापनयने परस्पराश्रयप्रसङ्गात् । स्यादेतत्, यो यो धूमो दृष्टः स सर्वस्तावदार्द्रेन्धन-सहितवह्न्यनन्तरमेव न पिशाचानन्तरम्, स च कादाचित्कतया निमित्तमपेक्षमाणो यदनन्तरमेव गम्यते तदेवाप्रतीतव्यभिचारं निमित्तं करोति, न तु प्रतीतव्यभिचारं रासभादि, नापि सर्वथाऽनुप-लब्धपूर्वपिशाचादिः, यदि न तन्निमित्तं कस्माद्विनाऽपि वह्निं क्वचिद्धूमो नोपलभ्यते । अथासौ सर्वथा वह्निसहितः, तथा सत्यार्द्रेन्धनवत् कथं वन्हिरपि न कारणम् ? कारणं चेत् कथं तमन्तरेण धूमभावशङ्का ? अकारणस्य हि कार्य्यस्य नित्यं सत्त्वमसत्त्वं वा स्यादनपेक्षत्वान्न कादाचित्कत्वम् । नाप्यनेकं कारणमकारणत्वप्रसङ्गादेव । वह्न्यनन्तरमेव भाव इति हि धूमस्य वह्निकार्य्यत्वम् । स चेद् वह्न्यस्यनन्तरं नवकारार्थः स्यादिति न वह्नेः कार्य्यम् । एवमन्यस्यापि न कार्य्यं

न्यायवार्त्तिकतात्पर्य्यटीका

न ह्यन्यानन्तरमेव भवति, वह्नेरप्यनन्तरं भावात्, ततश्चाहेतुको धूमः स्यात्। तथा च कादाचित्कत्वव्याहतिः। सत्यम्, तत्कार्य्यत्वसिद्धौ स्यादेवम्, तदेव तु तदनन्तरमेव भाव इत्येवंरूपं नास्ति। यद्यपि विना वह्निं नोपलब्धो धूमो यद्यपि च पिशाचानन्तरं नोपलभ्यते, तेषामनुपलब्धेः, तथाऽपि पिशाचकार्य्य एव धूमस्तत्र तत्र वह्निः कुतश्चित्स्वहेतोरुपनिपतितो रासभ इव न धूमस्य जनकस्तेन तदभावेऽपि तज्जातीय एव कारणभेदजन्मा कदाचित्कादाचित्को धूमः स्यादित्यनिवृत्तिरेव शङ्कायाः। न च दृष्टसम्भवे नादृष्टं कल्पयितुं युक्तमिति शक्यं भवद्भिर्वक्तुम्, अनुपलब्धिलक्षणप्राप्तस्याशक्यनिराकरणत्वात्। न चानुपलब्ध्यन्तराण्यपि तन्निषेधे प्रभवन्ति। तस्मादनन्तरमेवेत्यवधारणाभावान्नैवं कार्य्यकारणभावावधारणं युक्तम्। न च यदन्यसहितानन्तरमुपलब्धं तत्तदन्यरहितात्तस्माद्भवद् भिन्नजातीयं भवति उक्तं हि रासभसहिताद् वह्नेर्यादृशो धूमस्तादृश एव तद्विरहिताद्वह्नेरिति। तस्मादेवंविधा शङ्कापिशाची स्वनिवारकं तदुत्पत्तिनिश्चयमास्कन्दती न शक्या निवारयितुम्। अपि चास्तु तदुत्पत्तिनिश्चयः तथाऽपि कस्मात्कारणमन्तरेण न कार्य्यं भवति। तथा च सत्यनपेक्षतया कादाचित्कत्वविहतिरिति चेद्, यथाऽऽह—

नित्यं सत्त्वमसत्त्वं वा हेतोरस्यानपेक्षणात्।
अपेक्षातो हि भावानां कादाचित्कत्वसम्भवः॥ इति।

अस्तु तर्हि संबन्धः स्वाभाविकतया अन्यानपेक्षोऽव्यभिचारी गमकत्वाङ्गम्। स च यो वा स वा भवतु, कृतं कार्य्यकारणभावावधारणायासेन। यथा चैतत्तथाऽग्रे(१)दर्शयिष्यामः।

अपि च कार्य्यात् कारणमनुमीयमानं ततः पूर्वमेवानुमीयेत न तु वर्त्तमानकालम्, न हि हेतुसत्ता कार्य्यकाला कार्य्योत्पादाङ्गमपि तु तत्पूर्वकाला। न हि नदीपूरभेदः स्वसत्तासमयवर्ति वर्षं गमयत्यपि तु तत्पूर्वकालम्। तत्कालं तु न तस्य कारणमत एव साधकबाधकप्रमाणाभावेन तत्कालवर्तिनि वर्षे सन्दिहाना न तदर्थिनः प्रवर्त्तन्ते। एवं धूमादप्यग्निस्तत्पूर्वकाल एवानुमीयेत न तु वर्त्तमानकालः, तथा च सति न तदर्थिनस्तत्र निःशङ्कं प्रवर्त्तेरन्। अपि च रसादन्यद्रूपं रससमानकालमनुमिमतेऽनुमातारः, न चानयोरस्ति कार्य्यकारणभावः तादात्म्यं वा। यद्युच्येत तत् पूर्वेभ्यो रूपरसगन्धस्पर्शक्षणेभ्यो रसक्षणो जायते, स स्वकारणं पूर्वरूपक्षणमनुमापयन् यादृशा तेन जनितस्तादृशमेवानुमापयति, स चानुमापकरसक्षणसमानकालरूपक्षणान्तरजनक एव स्वकारणमिति तादृशमेव गमयति, तथा च कार्य्यसमानकालरूपानुमानसिद्धिः। एतेन धूमानुमानं व्याख्यातम्। यथाऽऽह—

(१) १३८ पृ: २६ पं "तस्माद् यो वा स वा", इतोत आरभ्य १३९ पृ: ४ पं "अनुमानाङ्गम्" इतान्तभागे।

न्यायवार्त्तिकतात्पर्य्यटीका

एकसामग्र्यधीनस्य रूपादेरसतो गतिः ।
हेतुधर्म्मानुमानेन धूमेन्धनविकारवत् ॥ इति ।

अत्रोच्यते । योऽयं गमकरससमानकालो रूपक्षणः, स किं तज्जनकस्य रूपक्षणस्य स्वभाव उत तत्स्वभावावच्छेदकोऽस्वभावभूतः ? न तावत् स्वभावः, एकस्मिन्नभिन्ने जन्यजनकभावानुपपत्तेः, तस्य भेदाश्रयत्वात् । तदस्वभावभूतः कथं तदनुमाननिवेशी ? तदवच्छेदकत्वादिति चेत, ननु नैतावताऽप्यस्य कारणभाव इति कथं कार्य्यं हेतोर्गम्येत । विशिष्टेन कारण-स्वभावेनास्वभावोऽप्यसावाक्षिप्यते विशेषणतयेति चेत, नन्वाक्षिप्यते ज्ञाप्यत इत्यनर्थान्तरम्, सा किं कारणानुमितिः प्रागप्यनुमितिसमये पश्चाद्वा ? न तावत् प्राक् न हि सत्तामात्रेण कारणं तद्गमयत्यतिप्रसङ्गात् । किन्तु स्वज्ञानेन । न च कार्य्यमस्य गमकम्, अकारणत्वादित्युक्तम् । अत एवानुमितिसमयेऽप्यगमकम् स्वज्ञानेन गमकत्वात, उभयोश्च ज्ञानयोः सह भवतोः सव्येतरविषाण-वत् कार्य्यकारणभावाभावात् । तथा च रसात्कार्य्यात्तत्कारणं रूपमनुमातव्यम्, ततश्चानुमिता-द्रूपात् कारणात्तत्कार्य्यं रससमानकालं रूपमनुमातव्यम्, तथा च कारणात् कार्य्यानुमानं तादात्म्य-तदुत्पत्तिभ्यामभूदिति नाभ्यामेव प्रतिबन्धसिद्धिः । लौकिकानां चैतद्रसाद्रूपानुमानम्, न चैते पिशितचक्षुषः क्षणानामन्योन्यभेदमध्यवस्यन्ति । न चानध्यवस्यन्तः प्रवृत्तिरूपोत्पादकसामर्थ्यं रसहेतुं रूपमनुमातुमुत्सहन्ते । न च स्वलक्षणानुरोधेन लक्ष्यस्यान्यथाकरणं युक्तं परीक्षकाणाम्, अतिपतितलोकमर्यादानां तेषां तत्त्वानुपपत्तेः । यथाऽऽहुः—

"सिद्धानुगममात्रं च कर्त्तुं युक्तं परीक्षकैः ।
न सर्वलोकसिद्धस्य लक्षणेन निवर्त्तनम्" ॥ इति ।

अपि चाद्यतनस्य सवितुरुदयस्य ह्यस्तनेन सवितुरुदयेन, चन्द्रोदयस्य च समानकालस्य समुद्रवृद्ध्या, मध्यनक्षत्रदृष्ट्या चाष्टमास्तमयोदयस्य, न कार्य्यकारणभावस्तादात्म्यं वा, अथ च दृष्टो गम्यगमक-भावः । अपि च तादात्म्ये कथं गम्यगमकभावः, न हि तदेव कर्म्म कर्तृ चेति युक्तम्, तस्य भेदाश्रयत्वात् । यद्यपि च वृक्षत्वशिंशपात्वे परमार्थतो न भिन्ने तथाऽपि भेदान्तरप्रतिक्षेपा-प्रतिक्षेपाभ्यां कल्पितभेदकयोर्गम्यगमकभाव इति चेन्न, वास्तवमेव वृक्षत्वशिंशपात्वयो-र्भेदमुपपादयिष्यामः (१) । अपि च काल्पनिकमपि रूपं विचार्य्यमाणं न यथा भिन्नमेवम-

वृत्तिः

प्रत्यक्षं—प्रत्यक्षविशेषो व्याप्त्यादिविषयकः, तेन व्याप्तिविशिष्टपक्षधर्मताज्ञानजन्यत्वं लभ्यते । अनुमानम्—अनुमितिः । यत इत्यध्याहारेण च करणलक्षणम् ।

(१) पञ्चषपंक्त्यनन्तरमेव "यथा हि सामानाधिकरण्यम्" इत्यादिना उपपादनमवधेयम् ।

न्यायवार्त्तिकतात्पर्य्यटीका

भिन्नमपि न भवति, वस्तुनोऽपि तुच्छत्वप्रसङ्गात्। काल्पनिकस्यावास्तवत्वेन तत्त्वानुपपत्तेः। तस्मात् कल्पनारूढयोर्न्न वस्तुतादात्म्यम्, नापि परस्परम्, तथा सति द्रव्यपार्थिववृक्षशिंशपादिविकल्पानां शब्दानां च पर्य्यायत्वप्रसङ्गात्। स्यादेतत्। कल्पना भेदविरहिणां भेदमुल्लिखन्त्यपि परस्परमेषामभेदमवगाहते, सामानाधिकरण्याकारत्वात, अभेदानुल्लेखे तदनुपपत्तेः। तथा च तादात्म्यं सिद्धमिति। तदयुक्तम्, यथा हि सामानाधिकरण्यं न भावानामभेदसाधकम्, जात्यादिशब्दा हि जात्यादीन् निमित्तीकृत्य द्रव्ये वर्त्तन्ते। तच्चाधिकरणमेकमिति सामानाधिकरण्यमश्नुवते। न पुनर्जात्यादीन्यपि मिथो मिश्रयन्ति। शब्दसमानविषयाणां विकल्पानामपीयमेव गतिः। तस्माद्यत्र गम्यगमकभावो न तत्र तादात्म्यम्, यत्र तादात्म्यं न तत्र गम्यगमकभाव इति सिद्धम्। यत्तु विदितशिंशपाव्यवहारमविदितवृक्षव्यवहारमुच्चायां शिंशपायां वृक्षशब्दः प्रयुक्तः, तस्मादुच्चत्वमेव वृक्षशब्दप्रवृत्तिनिमित्तमिति मन्यमानं मूढं प्रति शिंशपात्वेन वृक्षव्यवहारमात्रं साध्यते, वामनायामपि शिंशपायां वृक्ष इति व्यवहर्त्तव्यम्, शिंशपामात्रानुबन्धित्वाद्वृक्षत्वस्येति। तत्रापि चेद् व्यवहारः साध्यः शिंशपाया भिन्न इति, न तादात्म्यम्। व्यवहारयोग्यता चेत् सा शिंशपाया अभिन्नेति न गम्यगमकभावः। व्यावृत्तिभेदे चोक्तम्। तस्मात्तादात्म्यतदुत्पत्तिभ्यां प्रतिबन्ध इति मनोरथमात्रम्, यच्च वैशेषिकैः (१) चतुष्प्रकारः संबन्ध उच्यते "अस्येदं कार्य्यं कारणं संबन्ध्येकार्थसमवायि विरोधि चेति लैङ्गिक"मिति। अत्रापि संबन्धिपदेनैव सर्वोपसंग्रहात् शेषाभिधानं व्यर्थम्। न च संबन्धिपदोपात्तस्यातिप्रसक्तिः शेषपदैर्निवार्य्यते। तथा सति शेषपदान्येव सन्तु कृतं संबन्धिपदेन, तेभ्य एव संबन्धिभेदानामधिगतेः, न चैवं चातुर्विध्यं संबन्धस्यानुमानाङ्गस्य, तच्चेष्यते, तथा च संबन्धिपदस्य सर्वमात्रावरोधेऽतिव्याप्तिः। अपि च भूतं वर्षमभूतस्य वाय्वभ्रसंयोगस्य कथं विरोधि, तद्धि तदनुकूलमेव। एवमभूतमपि वर्षं भूतस्य वाय्वभ्रसंयोगस्याप्रतिकूलम्। एवं भूतो नकुलजयो न भूतस्य सर्पपराजयस्य विरोधी, नाप्यभूतोऽसावभूतस्य विरोधी, येषां पुनर्विरोधः तेषामन्यतमदन्यतमस्य न लिङ्गमपि तु प्रतिक्षेपकमेव, एतेनैव—

"मात्रानिमित्तसंयोगिविरोधिसहचारिभिः।
स्वस्वामिबध्यघाताद्यैः सांख्यानां सप्तधाऽनुमा॥

इत्यपि पराकृतं वेदितव्यम्। तस्माद् यो वा स वाऽस्तु संबन्धः केवलं यस्यासौ स्वाभाविको नियतः स एव गमको गम्यश्चेतरः संबन्धीति युज्यते। तथा हि धूमादीनां वह्न्यादिसंबन्धः स्वाभाविकः, न तु वह्न्यादीनां धूमादिभिः। ते हि विनाऽपि धूमादिभिरुपलभ्यन्ते,

---

(१) काशीमुद्रितवैशेषिकसूत्रपुस्तके तु "अस्येदं कार्य्यं कारणं संयोगि विरोधि समवायि चेति लैङ्गिकम्" इति ९।२।१ सूत्रं दृश्यते।

न्यायवार्त्तिकतात्पर्य्यटीका

यदा त्वार्द्रेन्धनादिसंबन्धमनुभवन्ति, तदा धूमादिभिः सह संबध्यन्ते। तस्माद् वह्न्यादीनामार्द्रेन्धनाद्युपाधिकृतः संबन्धो न स्वाभाविकः ततो न नियतः। स्वाभाविकस्तु धूमादीनां वह्न्यादिसंबन्ध उपाधेरनुपलभ्यमानत्वात्। क्वचिद् व्यभिचारस्यादर्शनादनुपलभ्यमानस्यापि कल्पनानुपपत्तेः। अतो नियतः संबन्धोऽनुमानाङ्गम्। न चादृश्यमानोऽपि दर्शनानर्हतया साधकबाधकप्रमाणाभावेन सन्दिह्यमान उपाधिः स्वाभाविकत्वं प्रतिबध्नातीति साम्प्रतम्। अवश्यं शङ्कया भवितव्यं नियामकाभावादिति दत्तावकाशा खल्वियं प्रमाणमर्य्यादातिक्रमेण शङ्कापिशाची लब्धप्रसरा न क्वचिन्नास्तीति नायं क्वचित् प्रवर्त्तेत, सर्वत्रैव कस्यचित् कथञ्चिदनर्थस्य शङ्कास्पदत्वात्। अनर्थशङ्कायाश्च प्रेक्षावतां निवृत्त्यङ्गत्वात्। अन्ततः स्निग्धान्नपानोपयोगेष्वपि मरणादिदर्शनात्। तस्मात्प्रामाणिकलोकयात्रामनुपालयता यथादर्शनं शङ्कनीयम्, न त्वदृष्टपूर्वमपि, विशेषस्मृत्यपेक्षो हि संशयो नास्मृतेर्भवति न च स्मृतिरननुभूतचरे भवितुमर्हति। तस्मादुपाधिं प्रयत्नेनान्विष्यन्तोऽनुपलभमाना नास्तीत्यवगम्य स्वाभाविकत्वं सम्बन्धस्य निश्चिनुमः। स्यादेतत्, अन्येनान्यस्य सहकारेण चेत् स्वाभाविकः सम्बन्धो भवेत्, सर्वं सर्वेण स्वभावतः सम्बध्येत। तथा च सर्वं सर्वस्माद्गम्येत। अथान्यस्य चेद् अन्यत् कार्यं, कस्मात्सर्वं सर्वस्य न भवति? अन्यत्वाविशेषात्। ततश्च स एवातिप्रसङ्गः। यद्युच्येत न भावस्वभावाः पर्य्यनुयोज्याः, तस्मादन्यत्वाविशेषेऽपि किञ्चिदेव कारणं कार्य्यञ्च किञ्चिदिति। नन्वेष स्वभावानामनुयोगो भिन्नानामकार्य्यकारणभूतानामपि स्वभावप्रतिबन्धे तुल्य एव, तस्माद् यत्किञ्चिदेतत्। कः पुनः प्रमाणेन स्वाभाविकः सम्बन्धो गृह्यते? प्रत्यक्षं सम्बन्धिषु प्रत्यक्षेण। यदाह—लिङ्गलिङ्गिसंबन्धदर्शनमाद्यमिति। यदा तावत्प्रथमं वह्निधूमयोः सहार्द्रेन्धनयोः संबन्धं पश्यति तदा द्वयोरपि किं स्वाभाविकः संबन्ध औपाधिको वा? अथ धूमस्यौपाधिको वह्नेः स्वाभाविकः वह्नेस्त्वौपाधिको धूमस्य स्वाभाविक इति न शक्यं निर्द्धारयितुम्। तत्र वह्नेरनार्द्रेन्धनस्य विना धूममयोगोलकादौ दर्शनाद् आर्द्रेन्धनोपाधि(१)रस्य धूमेन संबन्धो न तु स्वाभाविक इति निश्चीयते। धूमविशेषस्य (२) तु विना वह्निमनुपलम्भाद् उपाधिभेदस्य चादृश्यमानस्य कल्पनायां प्रमाणाभावाद् विशेषस्मृत्यपेक्षस्य (३) च संशयस्यानुपलब्धपूर्वे अनुत्पादाद् उत्पादे चाऽतिप्रसङ्गात् प्रेक्षा-

---

(१) आर्द्रेन्धनकारणक इत्यर्थः। (२) अविच्छिन्नमूलकत्वादिविशिष्टस्य धूमस्येत्यर्थः। (३) "विशेषस्मृत्यपेक्षस्य" कोटिद्वयोपस्थित्यधीनस्य, "संशयस्य," "अनुपलब्धपूर्व्वे" इत्यत्र सप्तम्यर्थो विषयत्वम्, तथाच पूर्व्वानुपस्थितम् उपाधिरूपं पदार्थं विषयीकृत्येत्यर्थः, "अनुत्पादा"दित्यनेन सम्बन्धः। ननु उपाधेरनुपस्थितावपि तत्संशयोत्पादे को दोष इत्यत आह "उत्पादे चे"त्यादि। "अतिप्रसङ्गात्" धूमनिष्ठे वह्निसम्बन्धेऽपि औपाधिकत्वसन्देहेन अस्वाभाविकत्वधिया धूमे वह्निव्यभिचारसंशयप्रसङ्गात्, "प्रेक्षावत्प्रवृत्त्युच्छेदात्" विवेकिनामनुमानप्रवृत्त्यभावापत्तेरित्यर्थः।

न्यायवार्त्तिकम्

तदिदमन्तिमं प्रत्यक्षं पूर्वाभ्यां प्रत्यक्षाभ्यां स्मृत्या चानुगृह्यमाणं परामर्शरूपमनुमानं भवति। कः पुनरनुमानार्थः? अनुमीयतेऽनेनेति करणार्थः। किं पुनरस्य फलम्? अग्निविषया प्रतिपत्तिः। कथं पुनरन्यविषयं करणम् अन्यविषयां क्रियां करोति? (१) शाल्यादिविषयस्य मुषलादेः करणस्य श्यामाकेऽभिहतिर्भवति। न अनियमादिति। यद्विषयं करणं

न्यायवार्त्तिकतात्पर्यटीका

वत्प्रवृत्त्युच्छेदात् स्वाभाविकः संबन्धोऽवधार्य्यते। तदिदमवधारणं न मानसम्, अनपेक्षस्य मनसो बाह्यप्रवृत्तावन्धबधिराद्यभावप्रसङ्गात्। भूयोदर्शनसापेक्षस्य च प्रवृत्तौ प्रमाणान्तरापातात्, न हि मनो निमित्तमित्येव मानसं प्रत्यक्षं भवति। तथा सति न किञ्चिदमानसम्, प्रत्यक्षमात्रस्य मनोनिमित्तत्वात्। तत्तदसाधारणकारणापेक्षया च तत्प्रमाणव्यपदेशे त्वत्रापि भूयोदर्शनमसाधारणमिति प्रमाणान्तरं जातम्। तस्मादभिजातमणिभेदतत्त्ववद्भूयोदर्शनजनितसंस्कारसहितमिन्द्रियमेव धूमादीनां वह्न्यादिभिः स्वाभाविकसंबन्धग्राहीति युक्तमुत्पश्यामः। एवं मानान्तरविदितसंबन्धिषु मानान्तराण्येव यथास्वं भूयोदर्शनसहायानि स्वाभाविकसंबन्धग्रहणे प्रमाणान्युन्नेतव्यानि, स्वभावतश्च प्रतिबद्धा हेतवः स्वसाध्येन, यदि साध्यमन्तरेण भवेयुः, स्वभावादेव प्रच्यवेरन्निति तर्कसहायैरनिरस्तसाध्यव्यतिरेकवृत्तिसन्देहा यत्र दृष्टास्तत्र स्वसाध्यमुपस्थापयन्त्येव। न च श्यामादिषु मैत्रतनयादीनां स्वाभाविकप्रतिबन्धसम्भवः, अन्नपानपरिणतिभेदस्योपाधेः श्यामताया मैत्रतनयसंबन्धं प्रति विद्यमानत्वेन मैत्रतनयत्वस्यागमकत्वात्। एतेन पक्कान्यस्य वृक्षस्याग्रवर्त्तीनि फलानि एतद्वृक्षप्रभवत्वात् पतितफलवदित्यादयोऽप्यौपाधिकसम्बन्धा व्याख्याताः। तस्मात्सर्वमवदातम्।

नन्वन्तिमप्रत्यक्षमतीताभ्यां प्रत्यक्षाभ्यां कथमनुगृह्यत इत्यत आह—स्मृत्या चेति। चो हेत्वर्थे। यद्यपि स्वरूपतो लिङ्गदर्शने अतीते, तथाऽपि तज्जनिता स्मृतिरनुगृह्णाति यस्मादतस्ताभ्यामनुगृह्यते। अनुग्रहश्च करणमेव। सम्बन्धस्मृतिसहकारिणेन्द्रियेण स्वसाध्याविनाभूतलिङ्गविज्ञानं यदुपजन्यते तत्परामर्श इत्याख्यायते, तथाभूतलिङ्गगोचर एव चतुर्थो वाक्यावयव उपनय इत्याख्यायते। अत्र पृच्छति—कः पुनरिति। अनुमानशब्दस्यार्थो न तावदनुमितिः। न खलु लिङ्गपरामर्शोऽनुमितिः, प्रत्यक्षफलत्वात्। तस्मादनुमीयते अनेनेति करणार्थो वक्तव्यः। स च लिङ्गविषयः क्रिया च लिङ्गिविषयेति(२) विषये वैषम्यान्न क्रियाकारणभाव इति भावः। उत्तरम्—अनुमीयत इति। तेनैवाभिप्रायेण पृच्छति—किं पुनरिति। उत्तरम्—अग्नीति। प्रष्टा स्वाभिप्रायमुद्घाटयति—कथं पुनरन्यविषयमिति। एकदेशिन उत्तरम्—नानियमादिति। वृक्षो-

(१) शाल्यादीत्यस्मात् प्राक् "न हि" इत्यस्यापेक्षा, अथवा "भवति" इत्यनन्तरं प्रश्नबोधकचिह्नयोगेन काकुस्वरवशादपि नञर्थप्रतिपत्तिसम्भवेन ग्रन्थार्थसङ्गतिः स्यादिति बोध्यम्। (२) आदर्शे—"लिङ्गविषयेति" इति पाठः।

न्यायवार्त्तिकम्

तद्विषया क्रियेति न नियमोऽस्ति। दृष्टा हि वृक्षादिविषयस्य छेदनस्यावयवे क्रियेति। वृक्षः छिद्यते अवयवे क्रियेति। क्वचित् पुनर्यद्विषयं करणं तद्विषयैव क्रिया। तद्यथा तण्डुलाः पच्यन्ते पाकस्तेष्वेव। क्वचित् पुनरात्मैव भवति कर्ता करणम्, क्रिया तस्यैव, तद्यथा वृक्षस्तिष्ठतीति। वृक्ष आत्मना तिष्ठति। किमुक्तं भवत्यात्मनैवेति? यस्मादयं स्वस्थितौ करणान्तरं न प्रयुङ्क्ते। एवमन्यविषयस्य करणस्यान्यविषया क्रियेति। क्वचित् पुनर्यद्विषयं प्रमाणं तद्विषयैव क्रिया, यदा स एवार्थः प्रमीयते इति। किं पुनस्तस्य प्रमीयते? प्रमितत्वात्। प्रमीयते, हेयत्वेनोपादेयत्वेनोपेक्षणीयत्वेन वाऽवगम्यत इति। तन्न। प्रमाण-फलयोर्विषयभेदानभ्युपगमात्। यदा पुनस्तत्पूर्वं यस्य तदिदं तत्पूर्वकमिति, तदा भेदस्याविव-

न्यायवार्त्तिकतात्पर्य्यटीका

देशेन प्रवर्तितः परशुः कर्त्रा न तदवयवोद्देशेन, तस्माद् वृक्षविषयः परशुर्न तदवयवविषयः। द्वैधीभावश्चावयवेषु, न वृक्षे, तस्य ततो विनाशादिति भावः। क्वचित्पुनर्यद्विषयमिति। औष्ण्यापेक्षो वह्निसंयोगः करणं तण्डुलेषु रूपादिपरावृत्तिरूपः पाकः तेष्वेव तण्डुलेन पिठरं लक्षयति। न केवलं समानविषयत्वानियमः कर्त्तुः करणं भिन्नमित्यपि नियमो नास्तीत्य-नियमाभिधानप्रसङ्गेनाह—क्वचित्पुनरिति। स्थितिः स्वावयवेषु समवायो वा प्रदेशविशेषे संयोगो वा। एवमनियमं दृष्टान्त उक्त्वा दार्ष्टान्तिके योजयति—एवमन्यविषयस्येति। धूम-विषयस्य प्रमाणस्याग्निविषया क्रिया प्रमितिः। यदाऽग्निविषयमेव ज्ञानं प्रमाणं तत्राह—क्वचित्पुनरिति। आक्षिपति—किं पुनरिति। अत्र हेतुमाह—प्रमितत्वात्। उत्तरम्—प्रमीयते हेयत्वेनेति। अनियमवादिन एकदेशिनो मतं नियमवादी दूषयति—तन्नेति। हेतुमाह—प्रमाणफलयोरिति। यद्यन्यविषयं करणमन्यविषया क्रिया भवेत् ततश्छेदने खदिरं प्राप्ते पनसादावपि च्छिदा स्यादित्यतिप्रसङ्गः स्यात्। यद्यपि वृक्षोद्देशेन कर्त्रा परशुः प्रयुक्तस्तथाऽप्ययं वृक्षमिव तदवयवानपि प्राप्त इति तद्विषयो भवति, तेन तदवयवद्वैधीभावमुखेन वृक्षविषयामपि द्वैधीभावक्रियां जनयतीति न वैयधिकरण्यं करणफलयोः। एवं यद्यपि लिङ्गविषयं प्रत्यक्षफलतया लिङ्गज्ञानम्, तदनुबद्धस्य तस्य मानसप्रत्यक्षगोचरत्वात्। लिङ्गनिरूपणमन्तरेण तदनिरूपणात्। न तु लिङ्गज्ञानं लिङ्गिनं विना न निरूप्यते, तस्मात्प्रतिपत्त्यनुबन्धितया विषयो न लिङ्गज्ञानस्य लिङ्गी, किन्तु लिङ्गमेव, तथाऽपि लिङ्गिविषयप्रतिपत्तिजनकत्वाल्लिङ्गज्ञानं भवति लिङ्गिविषयम्। न

वृत्तिः

अथवा करणलक्षणमेवेदम्, तत्र अनुमानमिति करणल्युटा अनुमितिकरणमिति समाख्याबलादेव लब्धम्।

न्यायभाष्यम्

तत्पूर्वकमित्यनेन लिङ्गलिङ्गिनोः सम्बन्धदर्शनं लिङ्गदर्शनं चाऽभिसम्बध्यते।

न्यायवार्त्तिकम्

क्षितत्वात् लिङ्गलिङ्गिसम्बन्धदर्शनानन्तरलिङ्ग(१)दर्शनसम्बन्धस्मृतिभिर्लिङ्गपरामर्शो विशिष्यते, तस्य तत्पूर्वकत्वात्। किं पुनस्तैरनुमीयते ? शेषोऽर्थ इति। अनुमानमित्यत्र किं कारकम् ? भावः करणं वा। यदा भावस्तदा हानादिबुद्धयः फलम्। यदा करणं तदा शेषवस्तुपरिच्छेदः फलमिति।

लिङ्गलिङ्गिसम्बन्धस्मृतिर्लिङ्गदर्शनं वा इति सन्देहः। एके तावद्वर्णयन्ति लिङ्गलिङ्गि-

न्यायवार्त्तिकतात्पर्य्यटीका

चातिप्रसङ्गः, स्वाभाविकसम्बन्धशालित्वाल्लिङ्गस्य लिङ्गिनि, तस्माद् द्विविधो विषयभावः प्रतिपत्त्यनुबन्धितया प्रतिपाद्यतया च, तत्र पूर्वः फलस्य, उत्तरस्तु प्रमाणस्येति तद्विवेकः। तस्मात्सुष्ठूक्तम्—प्रमाणफलयोर्विषयभेदानभ्युपगमादिति। स्थितौ तु भेदो दर्शयिष्यते(२)कर्त्तुः करणस्येति। तदेवं तानि ते इति विग्रहद्वयं परस्परापेक्षमुपपाद्य तानि तदिति विग्रहद्वयं परस्परापेक्षमुपपादयति—यदा पुनरिति। लिङ्गलिङ्गिसंबन्धदर्शनं च अनन्तरलिङ्गदर्शनं च तत्स्मृति(३)श्चेति विग्रहः। अत्रापि सर्वसन्देहेष्विदमुपतिष्ठते, व्याख्यानतो विशेषप्रतिपत्तिर्न हि सन्देहादलक्षणमिति भावः। ननु यदि प्रमाणफलयोरेकविषयत्वं तर्हि परामर्शज्ञानविषयीकृत एवार्थो विषयीकर्त्तव्यो नान्यः, स च प्रत्यक्षप्रमाणविषय एवेति कृतमनुमानेनेत्याशयवान् पृच्छति—किं पुनरिति। तैर्विशिष्टेन लिङ्गपरामर्शेनेत्यर्थः। उत्तरम्—शेषोऽर्थः। प्रत्यक्षप्रमिताल्लिङ्गादन्यो लिङ्गी तद्विषयत्वं च लिङ्गपरामर्शस्योक्तमिति। पृच्छति—अनुमानमित्यत्र किं कारकम्। अनुमीयतेऽनेनेति करणकारकमेव युक्तं तस्यैव लिङ्गदर्शनद्वयस्मृतिपूर्वकत्वात्, न त्वनुमितिरनुमानं प्रमाणव्यापारत्वेनातन्निमित्तत्वात् करणकारकादन्यत्वाद् अतत्पूर्वकत्वाच्चेति भावः। उत्तरम्—भावः करणं वा। नन्वुक्तं न भावः कारकमित्यत आह—यदेति। न द्रव्यादीनामेव करणत्वम्, अपि तु व्यापारस्यापि, अन्यथा कर्मनामधेयेषूद्भिदादिशब्देषु न करणविभक्तिः श्रूयेत—उद्भिदा यजेत, दर्शपौर्णमासाभ्यां यजेतेत्यादि। संभवति तस्यापि सिद्धस्य फलभावनायां निमित्तत्वम्। एवं वह्निप्रमायाः सिद्धायाः संभवति हानादिबुद्धिनिमित्तभावः। एतस्मिंश्च कल्पे तत्पूर्वकमित्यत्र यदा हानादिसंबन्धावधारणसमये प्रथमं ज्ञानं वह्नित्वस्य लिङ्गस्य दर्शनम्, अथानुमानिकं द्वितीयम्, अथ सम्बन्धस्य स्मृतिरिति त्रयमेकीकृत्य परामर्ष्टव्यम्, तत्पूर्वको हि तथा चायमनुमीयमानो वह्निरिति लिङ्गपरामर्शः। तस्माद् दाहपाककारित्वादुपादेयो वह्निरिति ज्ञानमनुमानस्य फलम्, ततश्च तत्पूर्वकत्वमपि सिद्धं भवतीति भावः। करणकारकपक्षे फलमाह—यदा करणमिति।

(१) आदर्शे तु "-नन्तरं लिङ्ग-" इत्येवं सानुस्वारः पाठः। (२) २।१।१६ सूत्रवार्त्तिके। (३) वार्त्तिके—"सम्बन्धस्मृतिभि"रिति पाठः।

न्यायवार्त्तिकम्

सम्बन्धस्मृतिरनुमानमिति इतरैर्लिङ्गलिङ्गिसम्बन्धदर्शनादिभिरनुगृह्यमाणा। अपरे तु मन्यन्ते लिङ्गपरामर्शोऽनुमानमिति। वयं तु पश्यामः—सर्वमनुमानम्, अनुमितेस्तन्नान्तरीयकत्वात्। प्रधानोपसर्जनताविवक्षायां लिङ्गपरामर्श इति न्याय्यम्। कः पुनरत्र न्यायः? आनन्तर्यप्रतिपत्तिः। यस्माल्लिङ्गपरामर्शादनन्तरं शेषार्थप्रतिपत्तिरिति, तस्माल्लिङ्गपरामर्शो न्याय्य इति। स्मृतिर्न प्रधानम्। किं कारणम्? स्मृत्यनन्तरमप्रतिपत्तेः। न हि भवति यत्र धूममद्राक्षं तत्राग्निमद्राक्षमिति। एतस्याश्च स्मृतेरनन्तरं तस्मादग्निरिति शेषार्थग्रह इति युक्तं वक्तुम्। तस्मात् स्मृत्यनुगृहीतो लिङ्गपरामर्शोऽभीष्टार्थप्रतिपादको भवतीति। एवं चोपनयस्यार्थवत्ता। यदि चायं स्मृत्यनुगृहीतो लिङ्गपरामर्शोऽनुमानं भवति, एवं सत्युपनयोऽर्थवानिति। एवं च सति वाक्याङ्गत्वमुपनयस्योक्तं भवति। तस्माद् व्यवस्थितमेतत् तत्पूर्वकमनुमानमिति। यदि प्रत्यक्षपूर्वकमनुमानं संस्कारे निर्णये च प्रसङ्ग इति, प्रत्यक्षपूर्वको भावनाख्यः स्मृतिहेतुः संस्कारः निर्णयश्च प्रत्यक्षपूर्वकत्वादनुमानं प्रसज्यत इति। नैष दोषो विज्ञानस्याधिकृतत्वात्, इन्द्रियार्थसन्निकर्षोत्पन्नं ज्ञानमिति ज्ञानाधिकारो वर्तत इति तेन न संस्कारेऽतिप्रसङ्गः। निर्णये

न्यायवार्त्तिकतात्पर्यटीका

अत्र विमृशति—लिङ्गेति। तत्पूर्वकत्वानुमितिनिमित्तत्वसमानधर्मदर्शनात्संशयः। अत्राचार्यदेशीयमतमाह—एके तावदिति। सत्स्वपीतरेषु स्मृतेरभावादनुमितेरनुत्पादेन स्मृतिरेवानुमानम्, इतरे तदनुग्राहका इत्यर्थः। मतान्तरमाह—अपर इति। सत्स्वपीतरेषु लिङ्गपरामर्शं विनाऽनुमितेरनुत्पादाल्लिङ्गपरामर्श एवानुमानमितरैरनुगृहीत इत्यर्थः। स्वमतमाह—वयं त्विति। अन्वयव्यतिरेकाभ्यामशक्यो गुणप्रधानभावो विवेक्तुम्, तयोः सर्वत्र तुल्यत्वादिति भावः। तत्किमिदानीं नास्ति गुणप्रधानभाव इत्यत आह—प्रधानेति। नान्वयव्यतिरेकात्तत्रभवतो न न्यायान्तरमिति भावः। पृच्छति—कः पुनरत्रेति। उत्तरमाह—आनन्तर्येति। नेहास्ति तिरोहितं किञ्चित्। अतिव्याप्तिं चोदयति—यदीति। ननु भवतु प्रत्यक्षद्वयपूर्वकः संस्कारोऽनुमानं तेनापि शेषोऽनुमास्यत इत्यत आह—स्मृतिहेतुर्नानुमितिहेतुरित्यर्थः। परिहरति—नैष दोष इति। विशिष्टज्ञानं विज्ञानं विशेषश्च स्मृतेरन्यत्वं न हीन्द्रियार्थसन्निकर्षोत्पन्नं ज्ञानं स्मृतिः। तस्याः संस्कारमात्रप्रभवतयाऽन्यस्मादनुत्पत्तेः। तेन च ज्ञानेन स्वकारणं विशेषितम्, प्रत्यक्षसूत्रे यत इत्यध्याहारात्। तस्मादिहापि स्वकारणविशेषकं स्मृतेरन्यद्विज्ञानमधिकृतम्। न च संस्कारः प्रत्यक्षपूर्वोऽपि तादृशज्ञानकारणमिति न तस्य प्रसङ्ग इत्यर्थः। निर्णयेऽनुपजनितफले प्रसङ्गं निवारयति—निर्णय इति। विभागसूत्राक्षिप्तप्रमाणसामान्यलक्षणपूर्वकं विशेषप्रमाणलक्षणं तदपेक्षं प्रवर्तमानं नानुपजनितफलेऽप्रमाणे निर्णयमात्रे प्रवर्त्तितुमर्हति, जनितफलस्तु निर्णयः प्रमाणमेवेति भावः।

न्यायवार्त्तिकम्

तूभयथा, कदाचित् प्रमाणं कदाचित् फलम्। स्वविषयपरिच्छेदकत्वात् प्रमाणमिति।

त्रिविधमिति। अन्वयी व्यतिरेकी अन्वयव्यतिरेकी चेति। तत्रान्वयव्यतिरेकी विवक्षिततज्जातीयोपपत्तौ विपक्षावृत्तिः, यथा अनित्यः शब्दः सामान्यविशेषवत्त्वे सत्यस्मदादिबाह्यकरणप्रत्यक्षत्वाद् घटवदिति। अन्वयी विवक्षिततज्जातीयवृत्तित्वे सति विपक्षहीनः

न्यायवार्त्तिकतात्पर्य्यटीका

स्वविषयपरिच्छेदकत्वात् फलं परिच्छेद एव परिच्छेदकः, स्वार्थिकः प्रत्ययः। त्रिविधमिति सूत्रावयवमर्थगौरवाद्वार्त्तिककार उद्भाष्यं व्याचष्टे—त्रिविधमितीति। अन्वयव्यतिरेकिणं लक्षयति—तत्रेति। विवक्षितोपपत्तिः पक्षधर्मता, तज्जातीयोपपत्तिरन्वयः, विपक्षावृत्तिर्व्यतिरेकः। अन्वयिमात्राद्व्यतिरेकिमात्राच्च व्यावृत्तो अन्वयव्यतिरेकी दर्शनीय इति हेतुत्रयसाधारणे अबाधितविषयत्वासत्प्रतिपक्षत्वे सती अपि रूपे न दर्शिते। विवक्षितप्रत्ययमन्तरेण चान्वयव्यतिरेकयोस्तज्जातीयातज्जातीयवृत्तिव्यावृत्त्योरशक्यप्रतीतित्वाद्विवक्षितोपादानम्, तत्प्रसङ्गेन च तद्धर्मता हेतुत्रयसमानाऽपि दर्शिता। तस्योदाहरणमाह—यथेति। प्रत्यक्षत्वादिति हेतुरात्मनि नित्येऽस्तीत्यत उक्तम्—बाह्यकरणेति। तथाऽपि सामान्यविशेषे घटत्वादौ व्यभिचार इत्यत उक्तम्—सामान्यविशेषवत्त्व(१)इति। तथाऽपि परमाणुभिर्बाह्यप्रत्यक्षैर्योगिनां व्यभिचार इत्यत उक्तम्—अस्मदादीति। तथा चायं नित्येभ्य आकाशादिभ्यो घटादिषु चानित्येष्वन्वित इति भवत्यन्वयव्यतिरेकी। अन्वयिनं लक्षयत्यन्वयीति। विपक्षहीन इति। विपक्षाभावेन ततो व्यतिरेकाभावं दर्शयति। सद्भ्यामभावो निरूप्यते नैकेन सतेत्युक्तं (२) तेन हेतोर्यतो विपक्षान्निवृत्तिः स एव नास्तीति कुतो निवर्त्तताम्। पक्षादन्यस्य सर्वस्यैव सपक्षत्वात्। न निवर्तत इति चेदस्तु हेतोस्तत्र वृत्तिरवृत्तिनिषेधरूपत्वाद्वृत्तेरिति चेत्, यस्याभावाधिकरणत्वमपि न भवति, निरुपाख्यस्य तस्य भावाधिकरणत्वशङ्केति सुभाषितम्। न खलु मुमूर्षोस्तोयाभ्यवहारेऽसमर्थस्य शष्कुलीभक्षणं शङ्कते चेतनः। तत्किमिदानीं भावाभावौ न परस्पराभावात्मानौ यदेकनिषेधेनान्यविधिः स्यात्? सत्यम्, यत्रैकतर एतयोर्निषिध्यते व्यतिरेको निषिध्यते विधीयते वा, तत्र तदितरविधिनिषेधोऽवश्यं भवेत्। न त्विह परमार्थतः कस्यचिन्निषेधः। न चात्र निरुपाख्यो हेतोर्व्यतिरेको निषिध्यते न निरुपाख्यो निषेधाधिकरणमिति। न च वचः स्वचरितविरुद्धं न चैतत्तत्त्वतो निरुपाख्ये हेतोर्व्यतिरेकं व्यासेधामो नाप्यन्वयं विदध्मः, नो खलु अयं सकलप्रतिपत्त्यभाजनं क्वचिदप्युपयुज्यते। उपयोगे वा निरुपाख्यो न भवेत्। कस्तर्हि न निरुपाख्यहेतोर्व्यतिरेक इत्यस्य वचनस्यार्थः। अथ निरुपाख्ये हेतोर्व्यतिरेक इत्यस्य भवद्भाषितस्य कोऽर्थः, अहृदयवाचामहृदया एव प्रतिवाचो

(१) आदर्शे 'सामान्यविशेषवत्' इति। (२) २७ पृ: २० पं "निषेध्यनिषेधाधिकरणाधीने"त्यादिना ग्रन्थेन स्वयमेवोक्तम्।

न्यायवार्त्तिकम्

यथा सर्व्वानित्यत्ववादिनामनित्यः शब्दः कृतकत्वादिति। अस्य हि विपक्षो नास्ति। व्यतिरेकी विवक्षितव्यापकत्वे सति सपक्षाभावे सति विपक्षावृत्तिः, यथा नेदं जीवच्छरीरं निरात्मकं अप्राणादिमत्त्वप्रसङ्गादिति। अथवा त्रिविधमिति, पूर्ववच्छेषवत् सामान्यतोदृष्टं चेति। पूर्वं साध्यम्, तद् व्याप्त्या यस्यास्तीति तत् पूर्ववत्। साध्यतज्जातीयः शेषः, तद्यस्यास्तीति तत्

न्यायवार्त्तिकतात्पर्य्यटीका

भवन्ति। यक्षानुरूपो बलिरिति हि लौकिकानामाभाणकः। न चात्यन्तादृष्टपूर्वाणां कल्पनाजालगोचरत्वमिति चोपपादितमन्यथाख्यातिनिरूपणावसरे (१)। कल्पितगोचरश्च व्यतिरेकोऽपि काल्पनिक इति नानुमानाङ्गं भवति। स्वाभाविकरूपसम्पन्नं हि प्रमाणं तत्त्वज्ञानरूपफलाय कल्पते, न कल्पितरूपसम्पदा, तस्याः सर्वत्र सुलभत्वादिति। तत्त्वविषयत्वं चानुमानस्योपपादयिष्यते, तस्मादनुपाख्ये विपक्षे हेतोर्व्यतिरेकनिवृत्तौ वा व्यतिरेके वा सहृदयानां मूकतैवोचिता। न चैतावता हेतोरगमकत्वम्, न हि व्यतिरेकोऽस्तीत्येव गमको भवति, मा भूदसाधारणस्यापि गमकत्वम्, किन्तु स्वसाध्येन सह स्वाभाविकसंबन्धशालितया, सा चान्वयव्यतिरेकाभ्यामिवान्वयमात्रेणाप्युपाधिरहितेन शक्या ज्ञातुमिति कृतं व्यतिरेकेण। विपक्षसंभवे तु तत्रापि वृत्तिशङ्कानिराकरणाय व्यतिरेकग्रहणमुपासनीयमिति सर्वमवदातम्।

उदाहरणमाह—यथेति। स्वमते त्वभिधेयो विशेषः प्रमेयत्वात् सामान्यवत्, परमाण्वाकाशादयः कस्यचित्प्रत्यक्षाः प्रमेयत्वाद् घटवदित्यादयो द्रष्टव्याः, विश्वस्यैव सदसद्भेदभिन्नस्य यथास्वं पक्षसपक्षयोरन्तर्भावेण विपक्षाभावादिति। व्यतिरेकिणं लक्षयति—व्यतिरेकीति। तमिमं व्यतिरेकिणं हेत्ववयवलक्षण(२) व्याख्यानावसरे वार्त्तिककृद् दर्शयिष्यतीति नेहोपपादितः। तदेवं त्रिविधमित्यवच्छिद्य (३) व्युत्पाद्य सम्प्रति पूर्ववदित्यादिना एकवाक्यतया व्याचष्टे—अथवा त्रिविधमिति। तिसृष्वपि विधासु साध्यवचनस्य पूर्वमुपपादनात् पूर्वं साध्यं तद्यस्यास्त्यधिकरणतया तत्पूर्ववत्। तथाऽप्यनित्याः परमाणवो गन्धवत्त्वाद् घटवदित्यपि हेतुः स्यात्, अस्ति साध्यं तस्यापि, पार्थिवानामप्यणूनामनित्यत्वेन सिषाधयिषितत्वादित्यत आह—व्याप्त्येति। अस्ति गन्धवत्त्वस्य साध्यं न तु व्याप्त्या, पृथिवीमात्रवृत्तितया चतुर्षु परमाणुषु तदभावात्। साध्यस्योप-

वृत्तिः

तच्च व्याप्तिज्ञानं प्रत्यक्षपूर्वकं—सहचारप्रत्यक्षपूर्वकम्। विभजते—त्रिविधमिति। पूर्वं—कारणम्, तद्वत्—तल्लिङ्गकम्, यथा मेघोन्नतिविशेषेण वृष्ट्यनुमानम्। शेषः

(१) १।१।२ सूत्रव्याख्याने। (२) १।१।३५ सू०। (३) 'विशिष्येतार्थः'।

न्यायभाष्यम्

लिङ्गलिङ्गिनोः सम्बन्धद्वयोर्दर्शनेन लिङ्गस्मृतिरभिसम्बध्यते। स्मृत्या लिङ्गदर्शनेन चाऽप्रत्यक्षोऽर्थोऽनुमीयते।

पूर्ववदिति—यत्र कारणेन कार्यमनुमीयते, यथा मेघोन्नत्या भविष्यति वृष्टिरिति।

न्यायवार्त्तिकम्

शेषवत्। पूर्ववन्नाम साध्यव्यापकम्, शेषवदिति समानेऽस्ति, सामान्यतश्चादृष्टम्। च-शब्दात् प्रत्यक्षागमाविरुद्धं चेत्येवं चतुर्लक्षणं पञ्चलक्षणमनुमानमिति।

अथवा त्रिविधमिति। पूर्ववच्छेषवत् सामान्यतोदृष्टं चेति। तत्र पूर्ववन्नाम यत्र कारणेन कार्यमनुमीयत इति भाष्यम्। किं पुनरिदमुक्तं भवति कारणेन कार्यमनुमीयत इति? यदि तावदयमर्थः कारणदर्शनात् कार्यास्तित्वं प्रतिपद्यत इति, तन्नास्ति, न हि कारणं गृहीत्वा स्वस्थात्मा कश्चित् कार्यं प्रतिपद्यत इति तथा च व्याहतं भवतीति। अथ पुनरेवमनुमीयते यत्र कारणं तत्र कार्यमिति, एतदपि नास्ति, कार्यकारणयोर्भिन्नदेशत्वात्। तन्तवः स्वावयवेषु

न्यायवार्त्तिकतात्पर्य्यटीका

युक्तत्वात् ततोऽन्यस्तज्जातीयः शेषः साध्यसामान्येन समान इति यावत्। तदिदमाह—साध्यतज्जातीय इति। पदानि विभज्यार्थमाह—पूर्ववन्नामेति। सामान्यतोऽदृष्टमिति नञमन्तर्भाव्य व्याचष्टे—सामान्यतश्चेति। तथा च, बाधितविषयं प्रकरणसमं चानुमानं स्यादित्यत आह—च-शब्दादिति। वार्तिकस्थ-च-शब्देनासत्प्रतिपक्षत्वमपि सूचितम्। तेन सूत्रस्थेनाबाधितत्वमसत्प्रतिपक्षत्वमपि रूपद्वयं समुच्चितमित्युक्तं भवति। नन्वेवं त्रिविधोऽपि हेतुः पञ्चलक्षणः स्यादित्यत आह—एवमिति। एतदुक्तं भवति अबाधितविषयमसत्प्रतिपक्षं पूर्ववदिति ध्रुवं कृत्वा शेषवदित्येका विधा, सामान्यतोदृष्टमिति द्वितीया, शेषवत्सामान्यतोदृष्टमिति तृतीया, तदेवं त्रिविधमनुमानम्। तत्र चतुर्लक्षणं द्वयम्। एकं पञ्चलक्षणमिति।

तदेवं स्वमतेन सूत्रं व्याख्याय भाष्यकृन्मतेन व्याचष्टे—अथ वेति। आक्षेप्तुं स्वरूपतो व्याचष्टे—तत्रेति। पूर्वं कारणं कार्यात्, तद् यस्यास्ति विषयतया परामर्शज्ञानस्यानुमानस्य तत्पूर्ववदित्यर्थः। विकल्प्याक्षिपति—यदि तावदिति। सर्वत्रानुमानप्रसङ्गादिति भावः। अतिप्रसङ्गभिया कल्पान्तरमातिष्ठते—अथ पुनरिति। दूषयति—एतदपीति। दूषणान्तरं समु-

वृत्तिः

कार्यम्, तल्लिङ्गकं शेषवत्, यथा नदीवृद्ध्या वृष्ट्यनुमानम्। सामान्यतोदृष्टं—कार्यकारणभिन्नलिङ्गकम्, यथा पृथिवीत्वेन द्रव्यत्वानुमानम्।

न्यायवार्त्तिकम्

अंशुषु, पटः तन्तुष्विति। कारणदर्शनाच्च कार्यमनुमीयते इति ब्रुवाणोऽनुमानमुद्रां भिनत्ति। का पुनरियमनुमानमुद्रा? नानुपलब्धे न निर्णीते न्यायः प्रवर्तत इति। यदि कारणदर्शनात् कार्यमनुमीयते अनुपलब्धेऽर्थे न्यायः प्रवर्तत इति स्यात्, तथा च व्याहतं स्यात्। नानभ्युपगमात्। क एवमाह कारणदर्शनात् कार्यास्तित्वं प्रतिपद्यत इति। को वा ब्रवीति यत्र कारणं तत्र कार्यमिति। कार्यं तु कारणविशेषणत्वेनोपयुक्तं गुणभूतमनुमीयत इति सूत्रार्थः। तथा च न मुद्राभेद इति। एवं शेषवदादिष्वपि द्रष्टव्यम्। अत्रापि कारणं कार्यस्याङ्गभूतमनुमीयत इति। कथं पुनः शेषशब्देन कार्यमुच्यते? द्वयोरनुमानभावेनोपक्षिप्तयोः कारणस्योपयोगाद् अनुपयुक्तं कार्यमिति कार्यं शेषशब्दवाच्यम्। उदाहरणम्—मेघोन्नत्या भविष्यति वृष्टिरिति कारणेन कार्यानुमानम्। कथं पुनरस्य प्रयोगः? वृष्टिमन्त एते मेघाः गम्भीर-

न्यायवार्त्तिकतात्पर्य्यटीका

चिनोति—कारणदर्शनाच्चेति। नासिद्धाश्रयो हेतुर्गमक इति भावः। परिहरति—नेति। द्वयमपि नाभ्युपेयत इत्यर्थः। किं तर्ह्यभ्युपेयत इत्यत आह—कार्यं त्विति। एनं प्रकारमन्यत्राप्यतिदिशति—एवमिति। पृच्छति—कथमिति। उत्तरम्—द्वयोरिति। पूर्वशब्देन कारणाभिधायिना प्रतिसंबन्धितया कार्यमप्युपक्षिप्तमतो द्वयोरप्युपक्षिप्तयोः कारणस्योपयोगादनुमानभावेनेति योजना। उदाहरणमाह—उदाहरणमिति। यद्यपि कारणमात्रं व्यभिचरति कार्योत्पादम्, तथाऽपि यादृशं न व्यभिचरति तत्र निपुणेन प्रतिपत्त्रा भवितव्यम्। अन्यथा धूममात्रमपि वह्निमत्तां व्यभिचरतीति न धूमविशेषो गमको भवेत्। रसाद्रूपानुमाने तु वैनाशिकानामापादितं कारणात् कार्यानुमानमस्माभिः। अपि चान्त्यतन्तुसंयोगानन्तरं पटो जायते तत्रापि शक्यं कारणात्कार्यानुमानम्। यदा खल्वयमन्यत एवोद्बुद्धसंस्कारो व्याप्तिस्मृतिमान् अविचलेष्वितरेषु तन्तुषु अत्यन्तानुत्पन्नायां क्रियायामिन्द्रियसन्निकर्षात् प्रथममेव परामृशति—तथा चेयमिति, तदैव क्रियातो विभाग इत्येकः कालः, अथ यदा विभागात् पूर्वसंयोगनाशस्तदा परामर्शादवश्यंभाविपटविशिष्टेयं क्रियेत्यनुमानोत्पाद इत्येकः कालः, अथान्त्यस्य तन्तोः तन्तुसंयोगोऽथ पटोत्पादोऽतस्तत्र रूपाद्युत्पादः, अथ प्रत्यक्षदर्शनमित्यनुमानोत्पादस्य परस्ताच्चतुर्थे क्षणे प्रत्यक्षम्। यदि तु क्रियोत्पादानन्तरमालोचनमिष्यते तथाऽपि तृतीये क्षणे प्रत्यक्षस्योत्पादान्नानवसरमनुमानम्। अपि च

वृत्तिः

अथवा पूर्वम्—अन्वयः, तद्वत् केवलान्वयीत्यर्थः, यथा अभिधेयं प्रमेयत्वादित्यादि। शेषः—व्यतिरेकः, तद्वत् केवलव्यतिरेकीत्यर्थः, यथा पृथिवीतरेभ्यो भिद्यते गन्धवत्त्वादित्यादि। सामान्यतोदृष्टम्—अन्वयव्यतिरेकि, यथा वह्निमान् धूमादित्यादि ॥ ५ ॥

न्यायभाष्यम्

शेषवत्तत्—यत्र कार्येण कारणमनुमीयते, पूर्वोदकविपरीतमुदकं नद्याः पूर्णत्वं शीघ्रत्वञ्च दृष्ट्वा स्रोतसोऽनुमीयते भूता वृष्टिरिति। सामान्यतोदृष्टम्—व्रज्यापूर्वकमन्यत्र

न्यायवार्त्तिकम्

ध्वानवत्त्वे सति बहुलबलाकावत्त्वे सति अचिरप्रभावत्त्वे सति उन्नतिमत्त्वात् वृष्टिमन्मेघवदिति। नद्याः पूर्णत्वं शेषवदुदाहरणम्। कथं पुनरेतन्नदीपूरो नद्यां वर्तमान उपरि वृष्टिमद्देशमनुमापयति, व्यधिकरणत्वात्? नैवोपरि वृष्टिमद्देशानुमानं नदीपूरः। किं तर्हि? नद्या एवोपरि वृष्टिमद्देशसम्बन्धित्वमनुमीयते नदीधर्मेण। उपरि वृष्टिमद्देशसम्बन्धिनी नदी स्रोतःशीघ्रत्वे सति पूर्णफलकाष्ठादिवहनवत्त्वे सति पूर्णत्वात् पूर्णवृष्टिमन्नदीवदिति। भविष्यति, भूता वेति कालस्याविवक्षितत्वात् यः कश्चित् काल उपादेय इति॥

सामान्यतोदृष्टं नाम अकार्याकारणीभूतेन (१) यत्राविनाभाविना विशेषणेन विशेष्यमाणो

न्यायवार्त्तिकतात्पर्य्यटीका

बधिरो मुरजमुखमभिहत्य स्वकारणाभिघातादेव स्वकारणात् तत्कार्यं शब्दं निःशङ्कमनुमिमीते। एवमन्यान्यपि कारणात्कार्यानुमानान्यूहनीयानि। शेषवदुदाहरणमाह—नद्या इति। चोदयति—कथं पुनरिति। परिहरति—नेति। अनुमीयतेऽनेनेत्यनुमानं नदीपूरः, न तु वृष्टिरनुमीयमाना पूरविशेषान्नातीता शक्याऽनुमातुम्, अनुमानसमये तदत्ययस्याशक्यनिश्चयत्वात्। नापि च वर्त्तमाना तदत्ययस्यापि तदानीं संभवात्। एवं भविष्यन्त्यपि साधकबाधकप्रमाणाभावेन सन्दिग्धैव। तस्मात्त्रैकाल्याशक्यनिश्चयत्वादनुपपन्नमनुमानमित्यत आह—भविष्यतीति। कारणस्य कार्य्यात् पूर्व्वकालता शक्या निश्चेतुम्, कार्येण लिङ्गेन तु न, अतीतत्वादिति सन्देहः क्षतिमावहति। यः कश्चिदिति योग्याभिप्रायम्, स च कार्यस्य पुरस्तात्ततो निश्चयव्याप्त इत्यर्थः।

सामान्यतोदृष्टोदाहरणं भाष्यकारीयं दुरवबोधम्, शेषवदुदाहरणान्तर्गतं च। अत्रापि कार्येण सवितुर्देशान्तरप्राप्त्या तत्कारणस्य व्रज्याया अनुमानात्। न चैतावताऽनुमानस्य त्रैविध्यं भवति, उदाहरणमात्रस्यानन्त्येनानन्त्यप्रसङ्गात्। तस्माद्भाष्यकारव्याख्यानमरोचयमानो वार्त्तिककारोऽन्यथा व्याख्यायोदाहरणान्तरमाह—सामान्यतोदृष्टं नामेति। साध्यधर्माविनाभाविना विशेषणेन साध्यधर्मेण विशिष्यमाणो धर्मी गम्यते गमकत्वेन, हेतुविशिष्टो हि धर्मी गमकः, जिज्ञासितधर्म्मविशिष्टश्च गम्यः। यथाऽऽहुः—

स एव चोभयात्माऽयं गम्यो गमक इष्यते।
असिद्धेनैकदेशेन गम्यः सिद्धेन बोधकः॥ इति।

(१) 'अकार्य्यकारणभूतेन' इति तात्पर्य्यधृतपाठः।

न्यायभाष्यम्

दृष्टस्याऽन्यत्र दर्शनमिति, तथा चाऽऽदित्यस्य, तस्मादस्त्यप्रत्यक्षाऽप्यादित्यस्य व्रज्येति।

न्यायवार्त्तिकम्

धर्मी गम्यते तत् सामान्यतोदृष्टम्, यथा बलाकया सलिलानुमानम्। कथं पुनर्बलाकया सलिलानुमानम्? यावानस्य देशो बलाकयाऽजहद्वृत्तित्वेन प्रसिद्धो भवति तावन्तमन्तर्भाव्य वृक्षादिकमर्थं पक्षीकृत्य बलाकावत्त्वेन साधयति।

अपरे तु(१) मन्यन्ते—सामान्यतोदृष्टम् आदित्यस्य गत्यनुमानमिति। तन्न बुद्ध्यामहे कथमनुमीयते? यदि तावद् गतिमानादित्य इति अस्य गतिरनुमीयते, तत्केन प्रतिपद्यते? न ह्यादित्यस्य गतेश्च किञ्चित् सम्बन्धि लिङ्गमस्ति, न चासम्बद्धोऽर्थोऽनुमातुं शक्यत इति सर्वं सर्वेणानुमीयेतेति। अथ देशान्तरप्राप्तिर्लिङ्गमिति? तन्न, अदृष्टत्वात्। न हि सवितुः कश्चिद्देशान्तरप्राप्तिं पश्यति। देशान्तरं खल्वाकाशादि दिग्देशो वा। उभयं चाप्रत्यक्षम्। न चान्या गतिरस्ति। तस्माद्देशान्तरप्राप्तिदर्शनमयुक्तम्। सर्वत्र खल्वयमादित्यस्य मण्डलमेव केवलमुपलभते। न च वस्तुमात्रदर्शनादनुमानं युक्तम्। अपि च केनचित् प्रकारेण आदित्यस्य गतिः शक्या द्रष्टुम्, उपलब्धिलक्षणप्राप्तत्वात्। न पुनर्देशान्तरप्राप्तिर्नित्यातीन्द्रियत्वात्। न हि कदाचित् प्रत्यक्षाप्रत्यक्षवृत्तिः संयोगो भवति प्रत्यक्षः। अथ देवदत्तस्य देशान्तरप्राप्तिदर्शनेनादित्यस्य गत्यनुमानं सामान्यतोदृष्टमिति मन्यसे, न केवलमादित्यस्य, सर्वार्थानां गत्यनुमाने हि भवानपि गच्छतीत्येवं किमिति नानुमीयते। नैवेद(२)मादित्यगत्यनुमानं साक्षात्। किं तर्हि? देशान्तरप्राप्तिमनुमाय तया गत्यनुमानमित्यदोषः। देशान्तरप्राप्तिमानादित्यः द्रव्यत्वे

न्यायवार्त्तिकतात्पर्य्यटीका

अविनाभावित्वं स्वभावप्रतिबद्धत्वं सर्वेषामेव हेतूनां सामान्यतोऽत्र धर्मधर्मिणोरभेदविवक्षया हेतुरेव सामान्यमुक्तः। सामान्येनाविनाभाविना हेतुना लक्षितं दृष्टं धर्मिरूपमनुमानं सामान्यतोदृष्टमनुमानम्। तृतीयायास्तसिः। तदेतत्पूर्ववच्छेषवतोरपि प्रापकं तत्पदसन्निधानात् गोबलीवर्दन्यायेन ते परित्यज्यान्यत्र निविशते। तदिदमुक्तम्—अकार्यकारणभूतेनेति। उदाहरणमाह—यथा बलाकयेति। भाष्यकारीयमुदाहरणमुपन्यस्याक्षिपति—अपरे पुनरिति। तदिति गतिमानिति परामृशति—उपलब्धिलक्षणप्राप्तत्वादिति। कर्म्मणो हि महत्त्वरूपविशेषैकार्थसमवाय उपलब्धिलक्षणप्राप्तिः प्रत्यक्षोपलब्धियोग्यता। समाधत्ते—नैवमिति। देशान्तरप्राप्तिमानादित्यः द्रव्यत्वे सति क्षयवृद्धिप्रत्ययाविषयत्वे च सति प्राङ्मुखोपलभ्यत्वे च

(१) 'अपरे पुनः' इति तात्पर्य्यधृतपाठः। (२) "नैव"मिति तात्पर्य्यधृतपाठः।

न्यायवार्त्तिकम्

सति क्षयवृद्धिप्रत्ययाविषयत्वे च प्राङ्मुखोपलभ्यत्वे च तदभिमुखदेशसम्बन्धादनुत्पन्नपादविहारस्य परिवृत्य तत्प्रत्ययविषयत्वात्। मण्यादावेतत्सर्वमस्ति स च देशान्तरप्राप्तिमान्, एवं चादित्यः,तस्माद्देशान्तरप्राप्तिमानिति। अनया देशान्तरप्राप्त्या अनुमितया गतिरनुमीयते इति। देशान्तरप्राप्तिमत्त्वे वाऽनुमानम्—देशान्तरप्राप्तिमानादित्यः अचलचक्षुषो व्यवधानानुपपत्तौ दृष्टस्य पुनर्दर्शनाविषयत्वात् देवदत्तवदिति। एके तावद् दिक्प्रत्यक्षत्वेऽनुमानं ब्रुवते—प्रत्यक्षा दिक् अङ्गुल्या व्यपदेशाच्चन्द्रवदिति, तच्च न, अरूपित्वात्। अरूपा दिक् कथं बाह्यकरणप्रत्यक्षा भविष्यति ? कथं तर्हि अङ्गुल्या व्यपदेशः ? दिग्देशसम्बन्धिषु वृक्षादिषु दिग्व्यपदेशात्। ये दिग्देशसम्बन्धिनो वृक्षादयस्तान् दिगित्युपचरन्ति, आदित्येन सहोपलब्धेः। प्राचीत्ययं शब्दः

न्यायवार्त्तिकतात्पर्य्यटीका

तदभिमुखदेशसंबन्धादनुत्पन्नपादविहारस्य परिवृत्य तत्प्रत्ययविषयत्वात्, मण्यादिवत्। तत्प्रत्ययविषयत्वादित्युच्यमाने पुरःस्थितेन स्थाणुना व्यभिचारः, सोऽपि हि प्रत्यभिज्ञाविषयो भवति तत्रैव स्थितः, तन्निवृत्त्यर्थं परिवृत्येत्युक्तम्। तथाऽपि गुणादिभिर्व्यभिचारः, तन्निवृत्त्यर्थं द्रव्यत्वे सतीत्युक्तम्। तथाऽपि प्रदीपादिभिर्व्यभिचारस्तन्निवृत्त्यर्थं क्षयवृद्धिप्रत्ययाविषयत्वे सतीति विशेषणम्। तथाऽपि पृष्ठतोऽवस्थितया स्थूणया व्यभिचारस्तन्निवृत्त्यर्थं प्राङ्मुखोपलभ्यत्वे सतीति विशेषणम्। उपलभ्यता चोपलब्धिकर्म्मता। सा चेहातीता विवक्षिताऽन्यथा पूर्वापरजलधिवेलावगाहिना तुहिनशैलेन व्यभिचारः। यद्यप्ययमपि परावृत्य तत्प्रत्ययवतोऽतिपतितोपलब्धिकर्म्मभावस्तथाऽपि तदा नरान्तरस्योपलभ्यः, मार्तण्डमण्डलं त्वस्ताचलचूडावलम्बि न प्राच्यां कस्यचिदुपलम्भगोचर इति वैषम्यम्, तथाऽपि यदि द्रष्टैव पुरोऽवस्थितस्य पश्चिमाभिमुखस्य प्रासादस्य स्वयमुपनिपत्य पृष्ठतो भवति, तदोक्तलक्षणस्य हेतोरस्ति व्यभिचारः, तन्निवृत्त्यर्थमनुत्पन्नपादविहारस्येति विशेषणम्। तदभिमुखदेशसंबन्धादिति ल्यब्लोपे पञ्चमी। स्वाभिमुखदेशमुद्दिश्यानुत्पन्नः पादविहारो यस्य स तथोक्तः। तमुद्दिश्य खल्वयं पद्भ्यां संचरमाणः प्रासादस्य पृष्ठतो भवतीति भावः। देशान्तरप्राप्तौ साधनान्तरमाह—देशान्तरेति। सत्यविनाश इति च द्रष्टव्यम् (१)। ये त्विमामनुमानपरंपरामामृष्यमाणा दिशः प्रत्यक्षतामिच्छन्ति, विप्रतिपन्नं चानुमानेन बोधयन्ति, तन्मतमुपन्यस्य दूषयति—तच्च नेति। अरूपमात्मसुखाद्यपि प्रत्यक्षमिति शङ्कमानेन बाह्यकरणेत्युक्तम्। पृच्छति—कथं तर्हीति। उत्तरम्--दिग्देशेति। अन्यथासिद्धतया अङ्गुल्या निर्देशस्य दिक्प्रत्यक्षत्वेन न स्वाभाविकः संबन्ध इत्यर्थः। स्यादेतत्।

---

(१) ननु प्रथमदर्शनानन्तरं यस्य द्रव्यस्य नाशः तस्मिन् पुनर्दर्शनविषयत्वाभावेन हेतुसत्त्वात्, साध्यस्य च देशान्तरप्राप्तिरूपस्य तत्राभावाद् व्यभिचार इत्याशङ्कापरिहारायाह—"सत्यविनाशे" इति, तथाच हेतुशरीरे अविनाशे सति इति दलप्रवेशेनैव तत्र व्यभिचारासम्भव इति बोध्यम्।

न्यायवार्त्तिकम्

आदित्यसम्बन्धविशिष्टदिग्देशे वर्तते। तेनाद्येनादित्यदर्शनेन सह वृक्षादीनुपलभन्ते, तान् प्राचीत्युपचरन्ति, उपचर्य चाङ्गुल्या व्यपदिशन्ति।

अथवा त्रिविधमिति लिङ्गस्य प्रसिद्धसदसन्दिग्धतामाह। प्रसिद्धमिति पक्षे व्यापकम्, सदिति सजातीयेऽस्ति, असन्दिग्धमिति सजातीयाविनाभावि। अथवा त्रिविधमिति नियमार्थम्, अनेकधा भिन्नस्यानुमानस्य त्रिविधेन पूर्ववदादिना संग्रह इति नियमं दर्शयति। कथमनेकधा भिन्नमिति? अन्वयव्यतिरेकि द्विधा सजातीये सदेव सदसच्च। अन्वय्यपि द्विधैव। एवं व्यतिरेक्येकरूपम्, सपक्षाभावात्। तदिदं पञ्चधा भिन्नमनुमानं कालभेदेन पञ्चदशधा भवति। तदपि पुनः पुरुषभेदानुविधानात् षष्टिभेदं भवति। तस्य त्वान्तर्गणिकोऽनन्तभेद इति। सोऽयमनुमानभेदः एवंभिन्नस्त्रिविधमित्यनेन सङ्गृहीत इत्यतो नियमार्थं त्रिविधग्रहणमिति।

न्यायवार्त्तिकतात्पर्य्यटीका

अप्रत्यक्षायां दिशि दिग्देशसंबन्धिधि वर्त्ततदेव कुत इत्यत आह—आदित्येनेति। तद्विभजते—प्राचीत्ययमिति। तत्पुनरिदं प्रत्यक्षम् आ चोदयात् आ चास्तमयाद्देशाद्देशान्तरं संचरणं मार्तण्डमण्डलस्य, अनाकलित(?)द्रव्यत्वे सतीत्यादिदण्डकानुमानानामिन्द्रियव्यापारानन्तरमुपजायमानत्वात्। तत्र मा भूवन्नाकाशदिगादयः प्रत्यक्षाः, तथाऽपि परितो निष्पतदतिविशदमयूखजालमध्यवर्तिनो हेलिमण्डलस्य त एव मयूखभागभेदाः देशान्तर इति तेषां प्रत्यक्षाणां प्रत्यक्षेण सवितृमण्डलेन संयोगविभागाः प्रत्यक्षा भविष्यन्तीति युक्तम्। इदं त्वतिस्फुटतया नाभिधाय शिष्यव्युत्पादनायाक्षुण्णं मार्गान्तरं दर्शितमिति मन्तव्यम्। तदेवं रूपेण स्पर्शानुमानम्, शिंशपात्वेन श्रुतेन वृक्षत्वानुमानमित्यादि सामान्यतोदृष्टेन संगृहीतं वेदितव्यम्।

स्वमतेन व्याख्यान्तरमाह—अथ वा त्रिविधमिति। तद्विभजते—प्रसिद्धमिति। पक्षैकदेशे सदपि सिद्धम्, पक्षव्यापकं तु प्रकर्षेण सिद्धमित्यर्थः। यद्यप्यविनाभावः पञ्चसु चतुर्षु वा रूपेषु लिङ्गस्य समाप्यत इत्यविनाभावेनैव सर्वाणि लिङ्गरूपाणि संगृह्यन्ते, तथापीह प्रसिद्धसच्छब्दाभ्यां द्वयोः संग्रहे गोबलीवर्दन्यायेन तत्परित्यज्य विपक्षव्यतिरेकासत्प्रतिपक्षत्वाबाधितविषयत्वानि संगृह्णाति। अत्रापि यथासंभवं चतुर्णां पञ्चानां वा रूपाणां लिङ्गसंबन्धः। तदनेन प्रबन्धेनानुमानवादिनां स्वरूपसंख्याफलविप्रतिपत्तयो निराकृताः। अत्र तत्पूर्वकमिति स्वरूपविप्रतिपत्तिः, अनुमानमिति समाख्यानिर्वचनसामर्थ्यात्फलविप्रतिपत्तिः। त्रिविधमिति न्यूनाधिकसंख्याव्यवच्छेदेन संख्याविप्रतिपत्तिर्निराकृता। संप्रत्यान्तर्गणिकभेदानामानन्त्यादनुमानस्याशक्यलक्षणत्वमिति यदि कश्चिदनुमन्येत तन्निराकरणाय त्रैविध्यमनुमानस्योच्यत इति त्रिविधपदस्य तात्पर्यान्तरमाह—अथ वेति। त्रिविधत्वेन यतो नियतमतः शक्यलक्षणमित्यर्थः। अनित्यः शब्दः कृतकत्वादिति सपक्षे सदेव। अनित्यः शब्दोऽस्मदादिप्रयत्नानान्तरीयकत्वादिति सपक्षे सदसत्। तदिदमन्वयव्यतिरेकि द्विविधम्।

न्यायभाष्यम्

अथवा पूर्ववदिति—यत्र यथापूर्वं प्रत्यक्षभूतयोरन्यतरदर्शनेनाऽन्यतरस्याऽनुमानम्,

न्यायवार्त्तिकम्

पूर्ववदित्युक्तं किं पुनरत्र पूर्ववत्, किं कार्यम्, उत कारणम् ? यदि पूर्वमस्यास्तीति पूर्ववत्, कार्यं पूर्ववत् प्राप्नोति। ततश्च कारणेन कार्यानुमानमिति व्याघातः। पूर्वमस्यास्तीति पूर्ववदिति ब्रूमो न पुनः कार्यम्। किं तर्हि ? ज्ञानम्, ज्ञानस्य पूर्वं विषयः। तदिदं पूर्ववदिति, तेन कार्यानुमानमिति। एवं शेषवदादिष्वपि तद्विषयाणि ज्ञानानीत्युक्तं भवति। अथवा पूर्ववदिति

न्यायवार्त्तिकतात्पर्य्यटीका

एवमन्वय्यपि द्वेधा, तत्र सपक्षे सदेव यथा परमाण्वादयः कस्यचित्प्रत्यक्षाः प्रमेयत्वाद् घटवदिति। तथा सपक्षे सदसद्यथा तत्रैव साध्ये सत्त्वाद् घटादिवदिति। कालभेदः त्रैकाल्यम्। प्रतिपन्नोऽप्रतिपन्नः संदिग्धो विपर्य्यस्तश्चेति पुरुषभेदः। पूर्वं सिद्धवत्पूर्ववदित्यनूद्य तस्योदाहरणमुक्तम्, संप्रति प्रश्नपूर्वकं तदर्थाभासनिराकरणेन तात्त्विकमस्यार्थमाह—पूर्ववदित्युक्तमिति, भाष्यव्याख्यान इत्यर्थः। पूर्ववदित्यस्य व्याख्यानं शेषवदित्यत्रापि योजयति सामान्यतोदृष्टे च ज्ञानमतिदिशति—एवं शेषवदादिष्विति। अथ वा पूर्ववदिति भाष्यम्। तस्यार्थः—पूर्वेण तुल्यं वर्त्तत इति पूर्ववत्। क्रियातुल्यतायां च वतिरिति क्रियातुल्यता दर्शिता। अत्रेति(१)। पूर्वमन्यतरदर्शनेन सह यत्रान्यतरदर्शनं दृष्टान्तधर्मिणि, यथापूर्वं प्रत्यक्षभूतयोरिति प्रमाणमात्रोपलक्षणम्। एवं साध्यधर्म्मिणि अन्यतरधर्म्मदर्शनेन साधनधर्म्मदर्शनेनान्यतरस्य साध्यधर्म्मस्यानुमानमनुमितिदर्शनमिति भवति क्रियातुल्यता। तदेतद्भाष्यमनुभाष्य व्याचष्टे—अथ वेति। अत्र दिङ्नागेन धूमादग्निरूपधर्मान्तरानुमानम् अग्निदेशयोः संबन्धानुमानं च दूषयित्वाऽग्निविशिष्टदेशानुमानं समर्थितम्। तथा चाह—

"केचिद्धर्मान्तरं मेयं लिङ्गस्याव्यभिचारतः।
संबन्धं केचिदिच्छन्ति सिद्धत्वाद्धर्म्मधर्मिणोः॥
लिङ्गं धर्मे प्रसिद्धं चेत्किमन्यत्तेन मीयते।
अथ धर्मिणि तस्यैव किमर्थं नानुमेयता॥
संबन्धेऽपि द्वयं नास्ति षष्ठी श्रूयेत तद्वति।
अवाच्योऽनुगृहीतत्वान्न चासौ लिङ्गसंगतः"॥

न हि संबन्धधर्म्मतया लिङ्गं प्रमीयते, अपि तु देशसंगतमित्यर्थः।

"लिङ्गस्याव्यभिचारस्तु धर्म्मेणान्यत्र दृश्यते।
तत्र प्रसिद्धं तद्युक्तं धर्म्मिणं गमयिष्यति"॥ इति।

---

(१) "यत्र" इति पाठो भाष्यवार्त्तिकयोर्न दृश्यते, भाष्ये तु "यत्र" इति पाठः।

न्यायवार्त्तिकम्

वतिप्रत्यय एषः, यथा पूर्वं प्रत्यक्षेण दृष्टोऽर्थः तथानुमानेनापि तमेवार्थं प्रतिपद्यत इति पूर्ववद् दृष्टो भवति ।

अन्ये पुनरन्यथा वर्णयन्ति । यथा तेनैव धूमेनाग्निं प्रतिपद्यत इति । किं पुनरनेन धूमेन प्रतिपद्यत इति ? किमग्निम्, उत देशम्, उत सत्ताम्, उताग्निमन्तं देशम् ? तत्र न तावदग्निं प्रतिपद्यते, धर्मधर्मिभावानुपपत्तेः । नाग्निर्धूमस्य धर्मः, न वाग्निधर्मो धूमः, प्रतीतत्वाच्चाग्नेर्नानुमेयत्वमस्ति । एतेन सत्ता देशश्च व्याख्यातः, अग्निसत्तायाः प्रतीतत्वाद् देशस्य चेति । अग्निमान् देश इति चेन्न, धूमस्यातद्धर्मत्वात् । अथापीदं स्यात् अग्निमान् देशो धूमेनानुमीयते । तच्च नैवम् । कस्मात् ? अतद्धर्म्मत्वात् । न हि धूमोऽग्निमतो देशस्य धर्म्मः । न चाग्नेर्देशमात्रसम्बन्धो न प्रतीतः । अयमग्निमानिति चेत् न, तस्यादृष्टत्वात् । देशविशेषोऽग्निमत्तयाऽनुमीयते न देशमात्रम्, न, तस्यादृष्टत्वात् । न ह्ययं देशविशेषं पश्यति, केवलं तु शून्यमभिधानमुच्चारयति अयं देशोऽग्निमानिति । न च धूममात्रमग्निप्रतिपादकम्, धूममात्रं(१) वाऽयं पश्यति, अतो देशविशेषो नानुमेयः । अविनाभावेन प्रतिपादयतीति चेत्, अथापीदं स्याद् अविनाभावोऽग्निधूमयोरस्तो धूमदर्शनादग्निं प्रतिपद्यत इति । तन्न, विकल्पानुपपत्तेः । अग्निधूमयोरविनाभाव इति कोऽर्थः ? किं कार्य-

न्यायवार्त्तिकतात्पर्य्यटीका

तत्र दिङ्नागदूषितान् कल्पान् अन्यांश्च विकल्पान् दिङ्नागसमर्थितं च कल्पमुपन्यस्य दूषयति—अन्ये पुनरिति । धर्मधर्मिभावानुपपत्तेरिति । धर्मेण हि धर्मी प्रतिपत्तव्यो नान्यथा, अतिप्रसक्तेरिति भावः । देशस्य च स्वरूपेणेत्यर्थः । शङ्कते—अथापीदमिति । निराकरोति—तच्च नैवमिति । यः कश्चिद्वा देशोऽग्निमान् साध्यो धूमवान् वा देशभेदः, तत्र पूर्वस्मिन् कल्पे निराकरणमाह—अतद्धर्मत्वादिति । यः कश्चिदग्निमत्तया देशः साध्यते न तस्यावश्यं धूमो धर्म्म इत्यर्थः । न चैतत् साध्यं सिद्धत्वादित्याह—न चाग्नेरिति । द्वितीयं कल्पमाशङ्कते—अयमिति । निराकरोति—न, तस्येति । शङ्कां विभजते—देशेति । निराकरणं विभजते—न ह्ययमिति । न ह्ययमेवंवादी दिङ्नागो धूमाधारं देशविशेषं पश्यति । न ह्यस्य मते पर्वतो नाम कश्चिदवयवी यदाधारो धूम उपलभ्येत, किन्तु परमाणवः परमसूक्ष्मा अतीन्द्रियाः पर्वतः, एवं धूमोऽपि तादृश एव । यथा वक्ष्यति "सर्वाग्रहणमवयव्यसिद्धे"रिति(२) । येषामपि देशभेदोऽवयवी दर्शनार्हः तेषामपि वियद्वर्तिनीं धूमलेखामभ्रंलिहामुपलभ्यानुपलब्धदेशानां नानुमानसंभव इति भावः । शङ्कते—अविनाभावेनेति । तदेव विभजते—अथापीति । निराकरोति—

(१) आदर्शे—'धूममात्र' इति पाठः । (२) २।१।३४ सू० ।

न्यायवार्त्तिकम्

कारणभावः, उतैकार्थसमवायः, तत्सम्बन्धमात्रं वा ? अस्तु तावत् पूर्वः कार्यकारणभाव इति, तन्न, अतद्वृत्तित्वात् । न हि धूमोऽग्नौ वर्तते नाप्यग्निर्धूमे, स्वकारणवृत्तित्वात् । अतो न कार्यकारणभावः । नैकार्थसमवायोऽपि, ताभ्यामन्यस्यानारम्भात् । न हि भिन्नजातीयाभ्यां द्रव्यमारभ्यते । न च तावन्यत्र वर्तेते स्वकारणवृत्तित्वादित्युक्तम् । सम्बन्धमात्रं तत्र वर्तत इति ? तदप्यनुमातुं न शक्यत इति । कथम् ? यदि तावदयं कुरुते अस्ति सम्बन्धोऽग्नि-धूमयोरिति, तन्न, अप्रतीतत्वात् । अनग्निकस्यापि धूमस्य दर्शनान्न सम्बन्धानुमानम् । रूपस्पर्शवत् साहचर्यं भविष्यति ? न, उभयोर्व्यभिचारित्वात् । अनग्निर्धूमो दृष्टोऽधूमश्चाग्निरिति उभयं व्यभिचारि, तस्मान्न साहचर्यमिति । यत्र धूमस्तत्र वह्निरित्यनेनैव प्रत्युक्तम् । न चान्या गतिरिति । तस्मान्न धूमेन वह्निरनुमीयते । लोकविरोध इति चेत् यदि धूमेनाग्नेरनुमानं न भवेत् ननु लोको विरुद्ध्यत इति चेत्, नास्ति विरोधः, धूमविशेषेणाग्निविशेषणस्य धूमस्य

न्यायवार्त्तिकतात्पर्य्यटीका

तन्नेति । विकल्पयति—अग्निधूमयोरिति । कार्य्यकारणभावमालम्बते—अस्त्विति । दूषयति—तन्नेति, धूमेन हि वह्निरस्तीत्यनुमीयते, न च कार्यसत्ता निमित्तकारणसत्तया व्याप्ता । न हि यदा यत्र वा पटस्तदा तत्र वा कुविन्दः । नाप्यसमवायिकारणसत्तया, न हि यदा यदा संयोगस्तदा कर्म । तस्मात् समवायिकारणाविनाभावः कार्यस्य वक्तव्यः, तत्रेदं दूषणमतद्वृत्तित्वादिति । एकार्थसमवायमविनाभावं दूषयति—नैकेति । एकार्थसमवाय इति हि द्वेधा, एकस्यार्थस्य समवाय एकत्रार्थे समवाय इति, तत्र प्रथमं कल्पं दूषयति—ताभ्यामिति । यदि हि वह्निधूमाभ्यामेको-ऽर्थः कश्चिदारभ्येत ततोऽसौ तयोः समवेयात्, न त्वेतदस्तीत्यर्थः । द्वितीयं कल्पं दूषयति—न च तावितिति । तत् किमसंबद्धावेव वह्निधूमौ, तथा च प्रतीतिविरोध इत्यत आह—संबन्ध-मात्रमिति । संयोग इत्यर्थः । तदेव तर्ह्यवधार्य्यतामित्यत आह—तदपीति । पृच्छति—कथमिति । उत्तरम्—यदि तावदिति । कुरुते प्रयोगम्(१) । अस्ति संबन्धोऽग्निधूमयोर्धूमादिति । दूषयति—तन्नाप्रतीतत्वात् । तदनेनानैकान्तिकत्वं दर्शयति । संबन्धान्तरमाशङ्कते—रूपस्पर्श-वदिति । न हि बौद्धसिद्धान्ते द्रव्यं नाम किञ्चिदस्ति यत्र रूपस्पर्शौ समवेतौ, किं त्वेक-सामग्र्यधीनतया नियतसाहचर्यौ, तथा वह्निधूमावपि इत्यर्थः । दूषयति—नोभयोरिति । उभय-साहचर्य्यनिराकरणेन यत्र धूमस्तत्राग्निरित्यपि पराकृतम्, तस्यापि साहचर्य्यविशेषत्वादित्याह—यत्र धूम इति । गत्यन्तराभावादुपसंहरति—न चेति । शङ्कते—लोक इति । निराकरोति—नास्तीति । यत्र तावत् पर्वतनितम्बवर्तिनी धूमलेखा सततमुद्गच्छन्ती दृश्यते, तत्रासौ देश एव

(१) 'कुरुते' इति वार्त्तिकोक्तक्रियायाः कर्म्मपदं पूरयति—प्रयोगमिति ।

न्यायभाष्यम्

ऽप्रत्यक्षस्याऽनुमानम्, यथा धूमेनाऽग्निरिति। शेषवन्नाम परिशेषः, स च प्रसक्तप्रतिषेधेऽन्यत्राऽप्रसङ्गाच्छिष्यमाणे सम्प्रत्ययः, यथा सदनित्यमेवमादिना (१) द्रव्यगुणकर्मणामविशेषेण सामान्यविशेषसमवायेभ्यो विभक्तस्य (२) शब्दस्य, तस्मिन् द्रव्यकर्मगुणसंशये, न द्रव्यम्, एकद्रव्यत्वात्, न कर्म, शब्दान्तरहेतुत्वात्, यस्तु शिष्यते सोऽयमिति

न्यायवार्त्तिकम्

प्रतिपाद्यत्वात्। कथं पुनरयमग्निर्धूमविशेषणं भवति? यदा गुणभूतो भवति। अनुमेयोऽग्निमानयं धूम इति। धूमविशेषेणासाधारणेनानुमीयत इति। उभयं हि तदा प्रत्यक्षं धूमश्च तद्गताश्च सातत्यसंहत्यूर्द्ध्वगतिस्वभावादयो धर्मा इति। ते चैते धूमधर्मा धूमवृत्तयोऽप्रसिद्धं धूमधर्ममनुमापयन्ति। सर्वस्यानुमेयस्य वस्तुनो धर्मी प्रतिपादकश्च धर्मः प्रसिद्धो भवति। यथा—शब्दस्यात्मसत्ता प्रसिद्धा कृतकत्वं च धर्मः, त्वनित्यत्वलक्षणोऽप्रसिद्ध इति। तद्विशेषणोऽयमनुमीयत इति।

शेषवन्नाम परिशेष इति भाष्यम्। न कर्म शब्दः शब्दान्तरहेतुत्वादित्युभयव्यावृत्तेरसाधारणम्, न हि शब्दान्तरहेतुत्वं कर्मणि नाकर्मणीति। न, अन्यार्थत्वात्, शब्दान्तरहेतुत्वमित्यस्य समानजातीयारम्भकत्वादित्यर्थः। तथा च न दोषः।

न्यायवार्त्तिकतात्पर्य्यटीका

तद्विशिष्टोऽनुमीयते इति लोकप्रसिद्धमेवेति किमत्र वक्तव्यम्। यत्र तु भूयिष्ठतया तस्य धूमस्य दूरत्वेन देशो न लक्ष्यते, धूम एव त्वभ्रंलिहो लिम्पन्निवाभ्रमण्डलमवलोक्यते, तत्र देशानुमानप्रयासालसतया दृश्यमानो धूमविशेष एवाग्निमत्तया साध्यते धूमत्वैकार्थसमवायिभिः तद्गतैः संतत्यूर्द्ध्वगमनादिभिरित्याह—धूमविशेषेणेति। विशिष्यतेऽनेनेति विशेषः संतत्यूर्द्ध्वगमनादिः, तेन धूममात्राद्वह्निव्यभिचारिणो वह्न्यविनाभावी धूमो विशेष्यत इत्यर्थः। शेषमतिरोहितार्थम्।

शेषवन्नाम परिशेषः, द्रव्यत्वकर्म्मत्वयोः शब्दे निराकार्य्यत्वेनोपयुक्तत्वात्ताभ्यामन्यद् गुणत्वं शेषः, स यस्यानुमानस्य प्रतिपाद्यतया, तच्छेषवत्, तत्र न द्रव्यं शब्दः एकद्रव्यत्वात्। द्विविधमेव हि द्रव्यमद्रव्यमनेकद्रव्यं च। अद्रव्यं परमाण्वादि, अनेकद्रव्यं च घटादि। शब्दस्त्वेकद्रव्यं तस्मान्न द्रव्यं रूपादिवत्। न कर्म्म, शब्दान्तरहेतुत्वादिति। तदेतद्भाष्यमाक्षिपति—न कर्मेति। परिहरति—नेति। अन्यमस्यार्थं दर्शयति—समानजातीयारम्भकत्वादिति। यत् समानजातीयारम्भकं न तत् कर्म्म, यथा रूपादय इति। कार्यत्वात्तावच्छब्दः समवायिकारणवान्। तत्र च पृथिव्यादिनिषेधान्नभोऽस्य समवायिकारणम् (३)। न चैष नभोव्यापकः सर्वत्रोप-

(१) "इतीवमादिना" इति त्रि-टि-ज-आ-फ०। (२) "निभक्तस्य" इति ज-ग आ-फ०। (३) आदर्शे—'नभोऽप्यसमवायिकारणम्' इति।

न्यायभाष्यम्

शब्दस्य गुणत्वप्रतिपत्तिः। सामान्यतोदृष्टं नाम—यत्राऽप्रत्यक्षे लिङ्गलिङ्गिनोः सम्बन्धे केनचिदर्थेन लिङ्गस्य सामान्यादप्रत्यक्षो लिङ्गी गम्यते, यथेच्छादिभिरात्मा,इच्छादयो

न्यायवार्त्तिकम्

सामान्यतोदृष्टं नाम यत्राप्रत्यक्षे लिङ्गलिङ्गिनोरिति भाष्यम्। लिङ्गलिङ्गिनोः सम्बन्धोऽप्रत्यक्ष इति किं यदाऽनुमीयते तदा अप्रत्यक्ष आहो न कदाचित्प्रत्यक्षः? यदि यदाऽनुमीयते तदाऽप्रत्यक्षः, सर्वमनुमानमेवमिति विशेषणमनर्थकम्। अथ न कदाचित् प्रत्यक्षः, कथं तर्ह्यनुमानमत्र प्रवर्त्तते? व्याहतं च भवति नानुपलब्धे न निर्णीत इति। न, विशेषणभूतस्याप्रत्यक्षस्य सर्वदाऽनुमेयत्वात्। यदितरधर्मदर्शनाद् धर्मिणोऽधिगतिसाधनं तत्सामान्यतो दृष्टम्, यथा इच्छादिभिरात्मा,

न्यायवार्त्तिकतात्पर्य्यटीका

लम्भप्रसङ्गात्। तस्मादव्यापकः, कर्णशष्कुल्युपसन्निहितं च नभः श्रोत्रम्, ताल्वादिसंयोगोपधानेन च नभःप्रदेशे शब्दः समवेतः प्राप्यकारि च श्रोत्रं न च वक्तृवक्त्रावरुद्धनभःप्रदेशं प्राप्नोति, न चाद्रव्यं शब्दो गत्वा श्रोत्रेण संबध्यते, तस्माद्वीचीतरङ्गरीत्या स्वदेशानन्तरदेशे शब्दान्तरारम्भणपरंपरया श्रोत्रदेशोत्पन्नं शब्दं गृह्णातीति सिद्धं सजातीयारम्भकत्वादिति। इदं तु परिशेषस्योदाहरणं नादरणीयम्। व्यतिरेकिणो हि नामान्तरमिदं परिशेष इति। एष पुनरन्वयव्यतिरेकी द्रव्यकर्मान्यत्वे सति सदाद्यभेदस्य सपक्षे रूपादौ सत्त्वाद्विपक्षे सामान्यादावभावात्। तस्मादात्मतन्त्रतासाधनमिच्छादीनां परिशेषोदाहरणं द्रष्टव्यम्। तच्चानन्तरमेव वक्ष्यतीति(१)।

सामान्यतोदृष्टं नामेत्यादिभाष्यमनुभाष्याक्षिपति—सामान्यत इति। कथं तर्ह्यनुमानमत्र प्रवर्त्तत इति। नित्यपरोक्षेण सह कस्यचिल्लिङ्गस्य संबन्धादर्शनादित्यर्थः। व्याहतं चेति। स खल्वत्यन्तापरिदृष्टः स्वरूपतो वा साध्येत दृष्टधर्मिविशेषणतया वा? तत्र पूर्वस्मिन् कल्पे नानुपलब्ध इति व्याघातः, उत्तरस्मिन् संदिग्ध इति, विशेषस्मृत्यपेक्षो हि संशयो नात्यन्तानुपलब्धधर्म्मवत्तायां क्वचिद्भवितुमर्हति। न खलु ससमरसवत्तया केचिद् द्रव्ये संशेरत इति भावः। समाधत्ते—न विशेषणभूतस्येति। न तावत् स्वरूपेणानुमीयते येन नानुपलब्ध इति व्याहन्येत, किन्तु दृष्टस्य धर्मिणो विशेषणतया। न चैवं सर्वानुमानाविशेषः। साध्यधर्मिण्यस्मदादिभिः कदाचिदपि प्रत्यक्षेणानुपलम्भात्। तज्जातीयेन तु दृष्टान्तधर्मिणोर्दृष्टेन प्रत्यक्षतो वा मानान्तराद्वा साधनधर्म्मस्य स्वाभाविकप्रतिबन्धग्रहसंभवादित्यर्थः। उदाहरणमाह—यथेच्छादिभिरात्मा।

(१) १५७ पृष्ठे—"आत्मतन्त्रता परिशेषात्" इत्यादिना ग्रन्थेन वार्त्तिककारो वक्ष्यति।

न्यायभाष्यम्

गुणाः, गुणाश्च द्रव्यसंस्थानाः, तद्यदेषां स्थानं स आत्मेति।

विभागवचनादेव त्रिविधमिति सिद्धे त्रिविधवचनं महतो महाविषयस्य न्यायस्य लघीयसा सूत्रेणोपदेशात् परं वाक्यलाघवं मन्यमानस्यान्यस्मिन् वाक्यलाघवेऽनादरः। तथा चाऽय(१)मित्थं भूतेन वाक्यविकल्पेन प्रवृत्तः सिद्धान्ते च्छले शब्दादिषु च बहुलं समाचारः शास्त्र इति।

न्यायवार्त्तिकम्

इच्छादयः खलु धर्मिणो भवन्ति। आत्मा च विशेषणं गुणभूत इति। इच्छादीनां गुणत्वं प्रतीतो धर्मः। तेन धर्मेणात्मगुणविशिष्टानेव इच्छादीननुमिमीते। परतन्त्रा इच्छादयो गुणत्वात्, रूपवत्। पारतन्त्र्यप्रतिपत्तिरस्मादनुमानात्, आत्मतन्त्रता तु कुतः? आत्मतन्त्रता परिशेषात् आत्मसंवेद्यत्वात् बाह्यकरणाप्रत्यक्षत्वाच्च। न पृथिव्यादिषु, पृथिव्यादिगुणाः आत्मपरात्मप्रत्यक्षाः बाह्यकरण-प्रत्यक्षाश्च आत्माऽबाह्यकरणप्रत्यक्षाश्चेच्छादयः तस्मान्न पृथिव्यादिष्वाकाशान्तेषु, न दिक्काल-मनःसु, तद्गुणानां तद्वदतीन्द्रियत्वात्। न च द्रव्यान्तरं शिष्यते। आत्मा शेषः। तस्मात् तत्तन्त्र इति।

न्यायवार्त्तिकतात्पर्यटीका

तदेव विभजते—इच्छादयः खलु धर्मिणो भवन्ति मानसप्रत्यक्षदृष्टाः, तेषाम् आत्मा विशेषणं कुतः? गुणभूतोऽवच्छेदकतया यतस्तस्मादात्मविशिष्टा इच्छादयः साध्या इत्युक्तं भवति। साधनधर्म्मं तद्वर्त्तिनं दर्शयति—इच्छादीनां गुणत्वमिति। ननूक्तमनुपलब्धचरेण साध्यधर्म्मेण न संदेहविषयत्वमनुपलब्धचरश्चात्मेति कथं तद्विशिष्टा इच्छादयो न्यायविषया इति शङ्कामुररीकृत्य प्रयोगं सूचयति—परतन्त्रा इति। मा तत्र सैत्सीदात्मा, पारतन्त्र्यमात्रं तु सिद्धमित्यर्थः। तेन सामान्यतोदृष्टस्य पारतन्त्र्यमात्रविषयता, न च पारतन्त्र्यमिच्छादीनामनुमेयात्मवादिनां कदा-चिदप्यस्मदादिप्रत्यक्षगोचरः परस्य तदाश्रयस्य नित्यपरोक्षत्वादिति। तदेवं सामान्यतोदृष्टमुदा-हृत्य परिशेषोदाहरणं पारमार्थिकं प्रश्नपूर्वकमादर्शयति—पारतन्त्र्येति। इच्छादीनां हि बाधकैरपनीते द्रव्याष्टकगुणत्वे गुणत्वमेव व्यतिरेकी हेतुरात्मपारतन्त्र्ये प्रमाणम्। यद्यपि चायं स्वरूपेणात्मा न प्रसिद्धस्तथाऽपि द्रव्याष्टकव्यतिरेकादिशब्दैरदूरविप्रकर्षेण परामृष्टः शक्नोति विशेष्टुं धर्मिणि च न्यायप्रवृत्त्यङ्गं संशयमापादयितुमिति निरवद्यम्। अत्र भाष्यं विभागवचनादेव त्रिविधमिति सिद्ध इति, तस्यार्थस्त्रिविधमिति विभागवचनादेव त्रिविधे पूर्ववदादौ सिद्धे किमर्थं पूर्ववदाद्युपादानं सूत्रेणेति। तत्र समाधानं त्रिविधवचनं त्रिविधस्य पूर्ववदादेर्वचनमुक्तिः। महतस्त्रिविधस्य, महाविषयस्यातीतानागतवर्त्तमानविषयस्य, लघीयसा सूत्रेण तत्पूर्वक-मित्येतावतैवोपदेशे परं वाक्यलाघवं मन्यमानस्यान्यस्मिन् वाक्यलाघवेऽनादरः सूत्रकार-

(१) "चायमस्त्वंभूतेन" इति फ०।

न्यायभाष्यम्

सद्विषयं च प्रत्यक्षं सदसद्विषयं चानुमानम्। कस्मात्?। त्रैकाल्यग्रहणात्—

न्यायवार्त्तिकम्

सद्विषयं च प्रत्यक्षं सदसद्विषयं चानुमानमिति भाष्यम्। किं तावद्धर्मिणमभिप्रेत्यार्थभेद उत धर्ममिति? यदि तावद्धर्मिणमभिप्रेत्य, न कदाचिदसद्विषयमनुमानम्। न ह्यनुपलब्धसामान्ये अर्थे अनुमानं प्रवर्तत इत्युक्तम्, न चासतः सामान्यदर्शनमस्ति। अथ धर्ममभिप्रेत्य ब्रूषे? धर्मा अपि त्रिविधा भवन्ति। विधीयमानाः, प्रतिषिध्यमानाः, स्वतन्त्राश्चेति। तत्र विधीयमानो धर्मः पृथिव्यां गन्धवत्त्वम्, प्रतिषिध्यमानोऽपृथिव्यां गन्धवत्त्वम्, स्वतन्त्रः समवायिनां समवाय इति। कथं पुनः स्वतन्त्रः? समवायान्तराभावात्। यद्धि यत्र वर्तते तद् वृत्त्या वर्तते। न च समवायस्य वृत्तिरस्ति। अथ समवायान्तरं स्यात् समवायस्य, तस्यापि समवायान्तरकल्पनायामनवस्था स्यात्, व्यवस्थायामाद्य एव व्यवस्था। किमिदं श्रद्धधानेन प्रतिपत्तव्यमनाश्रितः समवाय इति आहोस्विन्न्यायो वाऽप्यस्ति? न सन्देहः, अस्त्येव न्यायः, पञ्चपदार्थवृत्ति-

न्यायवार्त्तिकतात्पर्य्यटीका

स्येति शिष्यान् व्युत्पिपादयिषोः। अत्र निदर्शनम् तथा चायम् अस्य समाचारः इत्थंभूतेन वाक्यविकल्पेन वैचित्र्येण प्रवृत्त इति योजना, एवं तावल्लक्षणभेदादनुमानं भिन्नं प्रत्यक्षाद्दर्शितम्, भाष्यकारस्तु विषयभेदादपि भेदमाह—सद्विषयं च प्रत्यक्षं सदसद्विषयं चानुमानम्। चो विषयभेदं समुच्चिनोति। सदिति वर्त्तमानम्। असदित्यतीतानागते। प्रत्यक्षं हि लौकिकं वर्त्तमानविषयमेव। अनुमानं तु त्रैकाल्यविषयम्, यद्यपि प्रत्यक्षमप्यतीतानागतयोः संप्रति निषेध्ययोर्निषेधे वर्त्तमानमसद्विषयं तथाऽपि न निषेध्ययोः प्रवर्त्तत इत्येतावतैव सद्विषयमुक्तम्। अनुमानं तु तयोरपि प्रवर्त्तत इत्येतावता असद्विषयमुक्तम्। तदेतदाक्षिपति—सद्विषयं चेति। न ह्यनुपलब्धसामान्य इति, सामान्यत उपलब्धो विशेषतश्चानिर्णीतो धर्मो न्यायप्रवृत्तावधिक्रियते, न त्वनुपलब्धसामान्य इत्यर्थः। न चासतः स्वतन्त्रस्य सामान्यदर्शनमस्तीति। द्वितीयं कल्पमाशङ्कते—अथेति। एतद्दूषयितुं धर्म्मत्रैविध्यमाह—धर्म्मा इति। तद्विभजते—तत्रेति। पृच्छति—कथं पुनरिति। यदि हि स्वतन्त्रः समवायो न तर्हि कस्यचिद्विशेषणं तथा च न विशेषणतया गृह्येतेति भावः। उत्तरम्—समवायान्तराभावात्। न विशेषणत्वं स्वातन्त्र्येण निराकुर्म्मः, किन्तु वृत्तिमस्येत्यर्थः। कस्मात् पुनरस्य न समवायान्तरमभ्युपेयत इत्यत आह—अथेति। पृच्छति—किमिदमिति। अनवस्थाप्रसङ्गो हि नाम तर्को नैष प्रमाणमन्तरेण निर्णयाय पर्याप्त इत्यर्थः। उत्तरम्—न संदेहः। किं त्वस्त्येव न्यायः। तमाह—पञ्चेति। अयं पञ्चपदार्थवृत्तिशब्दो बहुव्रीहिणा

न्यायवार्त्तिकम्

शब्दविषयत्वात् (१) परमाणुवद्, अनाश्रितः समवाय इति न्यायः, व्यापकत्वे सतीह बुद्धिनिमित्तत्वाद् आत्मवत्। यदि पुनराश्रितः समवायः स्यात् ततः किं स्यात्? कार्यमनाधारं स्यात्। कथमिति? पूर्वं तावत्कार्यमात्मानं लभते पश्चात् कारणेषु समवायेन वर्तत इति प्राग् वृत्तेरनाश्रितं प्राप्नोति। समवायश्च कार्यकारणयोर्वर्तत इति वृत्तिरस्य वाच्या, न हि वर्तमानं किञ्चित् अवृत्तिमद् दृष्टम्। प्राप्तित्वात् संयोगवद्वर्तत इति चेत् न, व्याघातात्। प्राप्तिः संयोगो वर्तत इति किमयं प्राप्तिधर्मः आहोस्वित् कार्यधर्म इति। वयं च ब्रूमः कार्यधर्मो न प्राप्तिधर्म इति। तथा कार्यान्तराण्यपि प्राप्तिमन्ति सन्तीति। यदि पुनरियं वृत्तिः प्राप्तिधर्मोऽभविष्यत् प्राप्तेरपि प्राप्त्यन्तरमभविष्यदित्यनवस्थादोषः, प्राप्तेर्वृत्तिमत्त्वात्। न चैतामनवस्थां कश्चिच्छक्तः प्रतिपादयितुम्, प्रमाणाभावादिति। समवायश्च समवायान्तरेण वर्तते इति ब्रुवाणः शास्त्रं बाधते

न्यायवार्त्तिकतात्पर्यटीका

परमाणौ वर्त्तते, षष्ठीसमासेन च समवाये (२)। न च कथञ्चिच्छब्दाभेदमात्रमनुमानाङ्गम्, मा भूद् गोशब्दसाम्येन वागादीनामपि विषाणित्वमित्यपरितोषान्न्यायान्तरमाह—अनाश्रितः समवाय इति। इह बुद्धिनिमित्तत्वं कारणत्वम्। संयोगेनानैकान्तो मा भूदित्यत उक्तम्—व्यापकत्वे सतीति। सत्युपलब्धिकारणान्तरसद्भावे सर्वत्रोपलभ्यता व्यापकत्वम्। तच्चेह प्रत्ययकारणत्वमात्मनि च समवाये चाविलक्षणमिति। न्यायेतिकर्तव्यतां तर्कं पृच्छति—यदि पुनरिति। उत्तरम्—कार्यमिति। उक्तमनवस्थाप्रसङ्गमवतारयितुमनाधारत्वप्रसङ्ग उक्तः। स्यादेतत्, भवतु वृत्तेः प्रागनाश्रितं कार्यं पश्चात् समवैष्यति, तुरीसंयुक्तेभ्य इव तन्तुभ्य उत्पद्य पटः पश्चात्तुर्य्या, इत्यत आह—समवायश्चेति। अनवस्थाप्रसङ्गः पूर्वोक्त इत्यर्थः। शङ्कते—प्राप्तित्वादिति। प्रमाणसत्त्वात् प्राप्तसमवायस्य वृत्तिर्न शक्या अनवस्थाभिया परित्यक्तुमित्यर्थः। विमर्शपूर्वकं शङ्कां निराकरोति—किमिति। संयोगे प्राप्तित्वस्य निवृत्त्या स्वाभाविकः संबन्धः कार्यत्वस्योपाधेः तत्प्रयोजकस्य विद्यमानत्वादित्यर्थः। अथ प्राप्तिधर्म्मोऽपि कस्मान्न भवतीत्यत आह—यदि पुनरियमिति। नन्वियमनवस्था कस्माद् बीजाङ्कुरादिष्विवेहापि नाभ्युपेयत इत्यत आह—न चैतामनवस्थामिति। अनिदंप्रथमेष्वनादित्वाच्छक्या प्रतिपादयितुमनवस्था प्रमाणेन, न त्विदंप्रथमेष्वादिमत्त्वेन तस्याशक्यनिश्चयत्वात्। तदिदमुक्तम्—प्रमाणाभावादिति। शास्त्रविरोधश्च समवायान्तराभ्युपगम इत्याह—

(१) "पञ्चपदार्थवृत्तिः" इत्येवं शब्देन प्रतिपाद्यत्वादित्यर्थः। (२) "पञ्चपदार्थवृत्तिः" इति शब्दात् पञ्चानां पदार्थानां द्रव्यगुणकर्म्मसामान्यविशेषरूपाणां वृत्तिः सम्बन्धो यत्रेति बहुव्रीहिणा परमाणोर्लाभः, पञ्चानां पदार्थानां वृत्तिः इत्येवं षष्ठीतत्पुरुषेण च समवायस्य लाभ इति नैकसमासतात्पर्येण समवायपरमाण्वोर्द्वयोः प्रतीतिः सम्भवतीति निरुक्तदृष्टान्तमूलानुमितिर्नोपपद्यते इत्यभिप्रायः।

न्यायवार्त्तिकम्

"तत्त्वं भावेन व्याख्यात"मिति (१)। सम्बन्धिनिवृत्तौ सम्बन्धोऽवतिष्ठते इति न प्रमाणमस्ति। न नास्ति, ख्यातिनिमित्तानां निवृत्तेः, ख्यातिनिमित्तान्यस्य निवर्तन्ते। न समवायः, अकृतत्वात्। अकृतकः समवाय इति च कार्यस्याधारवत्त्वेनानुमीयते। यद्ययं कृतकः स्यात् कार्येण सहोपादानादनाश्रितं कार्यं स्यात्। अथ कार्यात् पूर्वं भवतीति ? तथापि कस्येति वाच्यम्। अथ पश्चाद् भवतीति ? कार्यानाधारतादोषस्तदवस्थः। तस्मात् स्वतन्त्रः समवाय इति सिद्धम्। तत्र प्रतिषिध्यमानधर्मविषयमनुमानम् असद्विषयं न पुनर्विधीयमानस्वतन्त्र-

न्यायवार्त्तिकतात्पर्य्यटीका

समवायश्चेति। तत्त्वमेकत्वं समवायस्य, भावेन सत्तया, व्याख्यातमिति शास्त्रमाह, तदनेकत्वमुपपादयता बाध्येतेत्यर्थः। चोदयति—संबन्धिनिवृत्ताविति। तथा च विनश्यति, विनष्टे च तस्मिन् यो दृश्यते स ततोऽन्य उत्पन्न इति सिद्धं समवायस्य नानात्वमिति। परिहरति—न नास्तीति। ख्यातिरुपलब्धिः। कस्मात्(२) ? अकृतकत्वात्। अकृतकत्वमेव कुत इत्यत आह—अकृतक इति। कार्यं स्वोपादानेनाकृतकसंबन्धवद् आधारवत्त्वादिति व्यतिरेकी हेतुः। व्यतिरेकाव्यभिचारमाह—यद्ययमिति। उत्पद्यमानः खल्वयं समवायः सह कार्य्येण, न कार्यस्य, न हि सहोत्पन्नौ रूपस्पर्शौ मिथः संबध्येते, एकार्थसमवायस्तयोः, सोऽपि नास्ति, सन्नप्यसौ न (३) कार्य्यमाधारवत् करोति, तस्मात् सहेत्यादि, कार्य्यमनाधारं स्यादित्यर्थः। शङ्कते—अथेति, कार्य्यात् पूर्वमुत्पन्नः समवायः पश्चादुत्पद्यमानं कार्यमुपादानाधारकं करिष्यति कार्यहेतुबलादित्यर्थः। निराकरोति—तथाऽपीति। त्रिभ्यो हि कारणेभ्यः कार्यं भावरूपं जायते। कार्यकारणसमवायस्य च कार्यकारणे समवायिकारणे वक्तव्ये, कार्यात् प्रागजातस्य च समवायस्य न कार्य्यं कारणम्। न च निमित्तकारणमात्रादस्य जन्मेति सांप्रतम्, भावोत्पादस्य सर्वत्र कारणत्रयपूर्वकत्वनियमात्। तस्मात् समवायस्य समवाय्य-समवायिकारणाभावान्न कार्यात् प्रागुत्पाद इति सूक्तम्—तथाऽपि कस्येति वाच्यमिति। शङ्कते—अथेति। दूषयति—कार्य्येति। न च पटतुरीसंयोगवत्समवायस्य पश्चात्कार्यकारणसमवाय इति युक्तम्। संयोगजस्य संयोगस्य कारणत्रयसंभवादस्य तु समवायान्तरमन्तरेण कारणत्रया-योगात्, अन्यथाऽनवस्थाप्रसङ्गादिति भावः। उपसंहरति—तस्मादिति। ततश्च न ज्ञायते किमभिप्रेत्यासद्विषयमित्युक्तमित्याक्षेप इति। समाधत्ते—तत्र प्रतिषिध्यमानेति। अतीतानागते

---

(१) "तत्त्वं भावेन" इति वैशेषिकदर्शने ७।२।२८ सू०। "व्याख्यातम्" इति तु तत्पूर्व्वसूत्रानुवृत्त्या परिगृहीतम्। (२) वार्त्तिके "न समवायः" इत्यत्रत्तम्, तस्य हेतुमवतारयितुमयं प्रश्नः। (३) 'सन्नप्यसौ न' इत्यनन्तरं 'कार्य्यमाधारवत्' इत्यादिः 'पश्चादुत्पद्यमानम्'इत्यन्तः पाठः क-पुस्तके नास्ति।

न्यायभाष्यम्

त्रिकालयुक्ता अर्था अनुमानेन गृह्यन्ते, भविष्यतीत्यनुमीयते, भवतीति, चाभूदिति च, असच्च खल्वतीतमनागतं चेति ॥ ५ ॥

न्यायवार्त्तिकम्

विषयम्। भवतीत्यसद्विषयमिति चेत् भवति जायत इत्येकोऽर्थः, न, जायमानार्थानभ्युपगमात्। भवति विद्यत इति। एवं तावद् व्यवस्थितमेतत् तत्पूर्वकमनुमानमिति।

अपरे तु ब्रुवते नान्तरीयकार्थदर्शनं तद्विदोऽनुमानमिति। अस्यार्थः—योऽर्थो यमर्थमन्तरेण न भवति स नान्तरीयकः, नान्तरीयकश्चासावर्थश्चेति नान्तरीयकार्थः, तस्य दर्शनं तद्विदोऽनुमानम्, यस्तं वेद तन्नान्तरीयकोऽयमिति। अत्रार्थग्रहणमतिरिच्यते, न हि नान्तरीयकः स्यान्नार्थ इति। नान्तरीयकार्थ इति च समासपदमेतत्, तत्र यदि षष्ठीसमासो नान्तरीयकस्यार्थ इति, नान्तरीयकं तावत् कृतकत्वम्, तस्यार्थो धर्मः, प्रयोजनं वा ? यदि धर्मः कृतकत्वस्यार्थः, सत्त्वमेयत्वाभिधेयत्वाद्यनुमानं प्राप्तम्। अथ प्रयोजनम्, अनित्यत्वप्रतिपत्तिर्हेतुः प्राप्तः। अथ बहुव्रीहिः नान्तरीयकोऽर्थो यस्येति, तत्रापि कृतकत्वं नान्तरीयकम्, तद्यस्य स हेतुः प्राप्तः। तच्च कृतकत्वं घटादेः, शब्दस्यानित्यत्वस्य वा ? यदि घटादेः, घटादिर्हेतुः प्राप्तोऽनित्यः शब्दो घटादिति। अथ शब्दस्य, शब्दो हेतुः प्राप्तः अनित्यः शब्दः शब्दात्। अथानित्यत्वस्य साधनभावेन कृतकत्वं धर्मः, तथाऽप्यनित्यः शब्दोऽनित्यत्वादिति प्राप्नोति, अनित्यत्वस्यार्थः कृतकत्वमिति। सर्वथा कृतकत्वमनित्यत्वे न हेतुः। अथ सामानाधिकरण्यं नान्तरीयकश्चासावर्थश्चेति, तथाऽप्यसमर्थः

न्यायवार्त्तिकतात्पर्य्यटीका

संप्रति प्रतिषिध्यमाने तद्विषयमनुमानमसद्विषयमुक्तम्। तन्निषेधस्तु भवतु प्रत्यक्षगोचरः, तथाऽपि सिद्धो विषयभेद इत्यर्थः। अत्र चैष धर्म्मत्रैविध्यक्रमः द्वेधा तावद् विधीयमानः, प्रतिषिध्यमानश्च, विधीयमानश्च द्वेधा—परतन्त्रः, स्वतन्त्रश्चेति। स्वतन्त्रस्य धर्मत्वं विशेषणत्वमात्रविवक्षया द्रष्टव्यम्। ननु विधीयमानोऽप्यसन् प्रत्यक्षश्च क्वचिद्, यथा व्याप्रियमाणे कुलाले जायमानो घटः, विस्फारिताक्षो हि तदा घटो भवतीति प्रत्येति। न चासौ तदा सन्, सतो भवनं प्रत्यकर्तृत्वात् गगनवदिति शङ्कते—भवतीति। निराकरोति—न, जायमानेति। जायमानस्यार्थस्य विधिविषयस्य सत्तयाऽसत्तया वाऽनभ्युपगमात्। निषेधविषयतया तु तस्यासत्त्वमभ्युपेयत एव। कस्तर्हि भवति-शब्दस्यार्थ इत्यत आह—भवतीति। घटो जायत इति तु लौकिकः प्रयोगो घटशब्दं घटार्थेषु तदवयवेषूपचर्य्य तेषां च सिद्धतया कर्तृत्वादुपपादनीय इति। उपसंहरति—एवं तावदिति। स्वलक्षणं समाधाय परेषामनुमानलक्षणं दूषयितुमुपन्यस्यति—अपरे त्विति। तस्यार्थमाह—अस्यार्थ इति। दूषयति—अत्रेति। यथासंभवं समास

न्यायवार्त्तिकम्

समासः, विशेषणविशेष्यनियमासम्भवात्। उभयपदव्यभिचारे सति समानाधिकरणो भवति नीलोत्पलवत्। नीलशब्दस्याप्यनेकार्थवृत्तित्वात् उत्पलशब्दस्यापि तथाभावात सामानाधिकरण्यं भवति। न पुनरिह नान्तरीयक इत्युक्ते अस्ति व्यभिचारोऽर्थोऽनर्थ इति, यतोऽर्थग्रहणं समर्थं स्यादिति। एकपदव्यभिचारेऽपि दृष्टं सामानाधिकरण्यम्, यथा पृथिवी द्रव्यम्? अत्रापि उभयपदव्यभिचारः, प्रधानाङ्गभावभेदेन द्रव्यशब्देन द्रव्यमुच्यते, द्रव्यत्वं च। पृथिवीशब्देनापि प्रधानाङ्गविवक्षायां द्रव्यमुच्यते पृथिवी पृथिवीत्वं चेति उभयपदव्यभिचारात् पृथिवी द्रव्यमिति युक्तमुक्तम्। इदं पुनर्न युक्तं नान्तरीयकार्थदर्शनमिति। कस्मात्? अर्थप्रत्यायनार्थत्वाच्च प्रयोगस्य, अर्थप्रत्यायनार्थं हि शब्दप्रयोगमिच्छन्ति। नान्तरीयकमित्युक्ते अर्थो गम्यते, अतो न युक्तोऽर्थशब्द इति। तद्विद इति च न युक्तम्, नैवान्यथा नान्तरीयक इति। न हि नारिकेल-

न्यायवार्त्तिकतात्पर्य्यटीका

विकल्प्य दूषयति—नान्तरीयकार्थ इति चेति। सत्त्वं विधिविषयज्ञानगम्यत्वं न तु सामान्यम्, सत्त्वादिभिरनित्यत्वनान्तरीयककृतकत्वधर्मैरनित्यत्वानुमानं स्यात्, न च शक्यम्, तेषामाकाशादिषु नित्येषु व्यभिचारादित्यर्थः। तथाऽप्यसमर्थः समास इति। पूर्वमर्थातिरेकमात्रं दूषणमुक्तम्, संप्रति त्वर्थातिरेकेण हेतुना विशेषणसमासानुपपत्तिरित्यपौनरुक्त्यम्। 'विशेषणं विशेष्येण बहुलमि'त्यत्र विशेषणपदोपादानमात्रेण विशेष्यपदोपादानमात्रेण वान्यतरस्यार्थात्प्राप्तेरुभयपदोपादानस्यैतत्प्रयोजनम्—यत्रोभयोः प्रत्येकं व्यभिचारः समुदाये त्वव्यभिचारस्तत्र समासो यथा स्यादिति, स चात्र नास्तीति समासानुपपत्तिरित्यर्थः। सामर्थ्यं प्रयोजनाभिसंबन्धः। चोदयति—एकपदेति। परिहरति—अत्रापीति। प्रधानं व्यक्तिर्विशेष्यत्वात्, अङ्गं जातिर्विशेषणत्वात्। पृथिवीत्युक्ते भवति संशयः—किं पृथिवीत्वं सामान्यमस्य विवक्षितं यथा पशुना यजेतेति, किं वा तद्विशेष्यं द्रव्यम्, यथा ग्रहं संमार्ष्टीति, अत्रेदमुपतिष्ठते द्रव्यमिति। तद्धि पृथिवीत्वात् सामान्यविशेषात् पृथिवीं व्यवच्छिनत्ति, एवं द्रव्यमित्युक्ते द्रव्यत्वसामान्यं व्यक्तिर्वेति विमर्षे पृथिवीत्येतदुपतिष्ठते, न द्रव्यत्वसामान्यम्, किन्तु पृथिवी। न च द्रव्यत्वपृथिवीत्वयोः सामानाधिकरण्यमस्ति, न हि भवति पृथिवीत्वं द्रव्यत्वमिति, तस्मात्सामानाधिकरण्यसंभवात् प्रधानैकव्यक्तिलाभः। इह त्वर्थो नान्तरीयकत्वं व्यभिचरति, नान्तरीयकत्वं नार्थम्, न ह्यस्ति संभवो नान्तरीयकश्च स्यान्न चार्थ इति, नान्तरीयकशब्दवाच्यस्यानभिधेयत्वासंभवात्। वस्तुवचनेऽप्यर्थशब्दस्य लक्ष्यासंभवाद् अविषयं लक्षणम्, न हि दिङ्नागमते किञ्चिदस्ति वस्तु यन्नान्तरीयकं सद्धेतुर्भवति। यथाऽऽह—"सर्वोयमनुमानानुमेयभावो बुद्ध्यारूढेन धर्मधर्मिभावेन न बहिः सदसत्त्वमपेक्षत" इति। अव्यापकं च, न हि वस्त्वेव नान्तरीयकमसतोऽपि नान्तरीयकत्वादिति भावः। दूषणान्तरमाह—तद्विद इति चेति। नान्तरीयकदर्शनमित्युच्यमाने शब्दसामर्थ्यादेव लभ्यते

न्यायवार्त्तिकम्

द्वीपवासिनो धूमदर्शने नान्तरीयकमिति ज्ञानमस्ति। अतस्तद्विद इत्यपि न वक्तव्यम्। एतेन तादृगविनाभावि धर्मोपदर्शनं हेतुरिति प्रत्युक्तम्। कोऽतिदेशार्थः? यथा नान्तरीयकार्थदर्शने-ऽर्थग्रहणमयुक्तं तथा धर्मग्रहणमपीति। उदाहरणं तु यथा धूमोऽग्नेरिति। एतच्च न सम्भवतीत्य-नेकधा वर्णितम्। अपरे तु मन्यन्ते—

"अनुमेयेऽथ तत्तुल्ये सद्भावो नास्तिताऽसति।"

इत्यनुमानम्। एतेनानुमेयैकदेशवृत्तेरपि सङ्गृहीतत्वादलक्षणम्। यथाऽनित्याः परमाणवो गन्धवत्त्वाद् घटवत्। अनुमेये सद्भाव इत्यभिधानादप्रसङ्गः, नाप्रसङ्गः, एकदेशवृत्तेस्तद्धर्मत्वाद् विपक्षैकदेशवृत्तिवत्। यथा विपक्षैकदेशे वर्त्तमानो न विपक्षे नास्ति, एवं पक्षैकदेशे वर्तमानो न पक्षे नास्तीत्येतद्व्युदासे यत्नः कर्तव्यः। न कर्त्तव्योऽवधारणान्निवृत्तेः। अनुमेये सद्भाव इत्यवधारणे द्वे। किमनुमेय एव सद्भावोऽथानुमेये सद्भाव एव। किं पुनरनेन पूर्वेणावधारणेन क्रियते किमसम्भवो निवर्त्यते अथ सम्भवो ज्ञाप्यते, उभयथापि नावधारणार्थो, विनापि तदधिगतेर्विनाप्यव-धारणेनायमर्थो गम्यते अनुमेये सद्भावोऽसद्भावो नेति। न चैकदेशवृत्तिर्निराकृत इत्यवधारणं

न्यायवार्त्तिकतात्पर्य्यटीका

नान्तरीयकत्वविशिष्टार्थदर्शनम्, सति संभवे शब्दार्थपरित्यागाभावात्। अतस्त्रिविधलिङ्गदर्शनसिद्धेः किमपरमवशिष्यते यदवबोधाय तद्विद इत्युपादीयत इत्यर्थः। एतदेव व्यतिरेकमुखेन निरूपयति—न हीति। एतल्लक्षणदूषणं लक्षणान्तरेऽप्यतिदिशति—एतेनेति। पृच्छति—क इति। न ह्यस्मिन् लक्षणे तद्विद इत्यस्ति, येन तदतिरिच्यते इति भावः। उत्तरम्—यथेति। तेषामुदाहरणं दूषयति—उदाहरणमिति। तदनेन दिङ्नागस्य लक्षणं दूषयित्वा अन्येषां लक्षणं दूषितम्।

संप्रति दिङ्नागस्य स्वकीयलक्षणप्रपञ्चार्थं वाक्यमनुमेयेऽथ तत्तुल्य इत्याद्युपन्यस्य दूषयति—अपरे त्विति। अनन्तरलक्षणकारमपेक्ष्यापर इत्युक्तम्। देशयति—अनुमेय इति। न हि योऽनुमेये संश्चासंश्च स शक्यः सन्निति वक्तुमित्यर्थः। समाधत्ते--नाप्रसङ्ग इति। यद्येवं स्याद् यो विपक्षे द्वेधा स विपक्षावृत्तिरिति हेतुरेव स्यान्न सव्यभिचार इत्यर्थः। पुनश्चोदयति—न कर्त्तव्य इति। कुतः अवधारणान्निवृत्तेः। अनुमेये सद्भाव एवेत्यवधारणेनानुमेये सद्भावस्य नियतत्वात् कुतः पक्षैकदेशवृत्तेः प्रसङ्ग इति भावः। एतन्निराकर्तुं यथासंभवं विकल्पयति—अनुमेय इति। तत्र पूर्वकल्पस्य तात्पर्यं विकल्पयति—किं पुनरनेनेति। असंभवोऽत्यन्तासंभवो निराक्रियते, यथा नीलं सरोजं भवत्येव, नात्यन्तं न भवतीति। न तु नीलमेव सरोजं नानीलमिति, नापि सरोजमेव नीलं नान्यदिति। अथ संभव इति। अन्वयपरो न व्यतिरेकपर इत्यर्थः। एतद्विकल्पद्वयं दूषयति—उभयथाऽपीति। दूषणान्तरं चाह—न चैकदेश-वृत्तिरिति। न ह्यत्यन्तायोगव्यवच्छेदेनायोगो व्यवच्छिन्नो भवति, नापि संभवमात्रविधा-

न्यायवार्त्तिकम्

व्यर्थम् उत्तरपदबाधा च। अथोत्तरमवधारणमवगम्यते तस्य व्याप्तिरर्थः तथाप्यनुमेयमवधारितं व्याप्त्या न धर्मो, यत एव करणं ततोऽन्यत्रावधारणमिति। सम्भवव्याप्त्या चानुमेयं नियतम्, व्याप्त्यतिव्याप्तिभ्यां च सम्भवः प्रसृतः। द्वौ राशी शिष्यमाणौ तत्तुल्यो विपरीतश्च। तत्र नास्तितासतीत्यनेन विपरीतान्निवर्त्यताम्, तत्तुल्ये सद्भाव इति किमर्थमारभ्यते? न ह्यनेनाप्राप्तं किञ्चित् प्राप्यते। तत्तुल्ये च सम्भवमात्रं विवक्षितमिति। सम्भवमात्रं च व्याप्त्यतिव्याप्तिभ्यामनियतेन सम्भवेन लभ्यते। अथ तत्तुल्ये सद्भाव, इत्येतदप्यवधारणार्थमारभ्यते, किं पुनरत्रावधार्यते? किं तत्तुल्य एव सद्भावः, तत्तुल्ये सद्भाव एवेति। यदि तत्तुल्ये एव सद्भाव इति सद्भावोऽवधारितः। तदा पूर्वोत्तरपदे बाधिते भवतः। न हि भवति देवदत्तमेव

न्यायवार्त्तिकतात्पर्य्यटीका

मेनासंभवो व्यवच्छिन्नो भवति। ततश्चायोगाव्यवच्छेदादेकदेशवृत्तिरनुमानाभासो न व्यवच्छिन्न इत्यर्थः। स्यादेतद्, विशेष्यसंगतोऽयमेवकारोऽनुमेय एव संभवति यथा पार्थ एव धनुर्धर इति। न चायमन्ययोगव्यवच्छेदो विनैवकारं लभ्यते, तस्मान्न व्यर्थमवधारणमित्यत आह—उत्तरपदबाधा च। न ह्यस्ति सम्भवोऽनुमेय एवास्ति न तुल्ये(१) चेति, तस्मात्तत्तुल्य इत्यस्य बाधा। च-कारो नैकदेशवृत्तिर्निराकृत इति दूषणं समुच्चिनोति। अनुमेय एव सद्भावपक्षं यथासंभवं दूषयित्वा अनुमेये सद्भाव एवेति द्वितीयं पक्षं दूषयितुमुपन्यस्यति—अथोत्तरमिति। तस्य प्रयोजनं दर्शयति—तस्य व्याप्तिरर्थः। सद्भाव एवेति किल विशेषणसङ्गतमवधारणमयोगं व्यवच्छिन्दत् व्याप्तिं दर्शयति, तथा च व्याप्तिरस्यार्थ इत्यर्थः। दूषयति—तथाऽप्यनुमेयमवधारितं संभवस्य व्याप्त्या न धर्म्मः सद्भावः (२)। हेतुमाह—यत एव करणं ततोऽन्यत्रावधारणमिति। मा बधारि सद्भावोऽवधार्य्यतां चानुमेयम्, किमेतावताऽपीत्यत आह—संभवव्याप्त्या चेति। अनुमेयं खल्ववधारितं सद्धेतुसंभवं परित्यज्य नान्यत्र वर्त्तते, ततश्चानुमेयं हेतुसम्भवव्याप्त्याऽवधारितं भवति, हेतुसंभवस्त्वनवधारितः सर्व्वत्रैव तत्तुल्ये च विपक्षे च प्रसृतः, स च कश्चित्तुल्यविपक्षौ व्याप्नोति, कश्चित्तदेकदेशवृत्तिः, तदस्य हेतुसंभवस्य विपक्षेऽपि प्रसक्तस्य प्रतिषेधाय युक्तमसति नास्तीति। तत्तुल्ये तु प्रसक्तमप्रतिषिद्धमनुमतमेवेति तत्तुल्ये सद्भाव इति व्यर्थमित्यर्थः। स्यादेतत्, तुल्ये हेतुसद्भावसिद्धावपि तत्तुल्ये व्याप्त्या हेतोः सद्भावो भवत्वित्येतदर्थं तत्तुल्ये सद्भाव इति वचनमित्यत आह—तत्तुल्ये चेति। यदि पुनर्व्याप्तिर्विवक्ष्यते कृतकत्वे साध्ये प्रयत्नानन्तरीयकत्वं न हेतुः स्यात्, न ह्ययं सपक्षव्यापक इति भावः। देशयति—अथ तत्तुल्य इति। दूषयितुं विकल्पयति—किं पुनरत्रेति। पूर्वस्य विरोधाद्बाधनम्, उत्तरस्य पौनरुक्त्यादिति। पूर्वपदेन सह विरोधे निदर्शनमाह—न हि भवतीति। अनुमेयसद्भाव इत्य-

(१) "न तुल्ये" इत्यत्र "तत्तुल्ये" इति पाठः समुचितः प्रतिभाति। (२) "सद्भेदे" इति ख पु-पाठः।

न्यायवार्त्तिकम्

भोजय यज्ञदत्तं च, तथेहापि तत्तुल्य एव सद्भावः अनुमेये चेत्युन्मत्तवाक्यम्। अथ तत्तुल्ये सद्भाव एव, तत्तुल्यैकदेशवृत्तेरहेतुत्वं यस्तज्जातीयस्यैकदेशवृत्तिः प्रयत्नानन्तरीयकत्वादिस्ते, न स हेतुरिति

न्यायवार्त्तिकतात्पर्य्यटीका

नेनानुमेयव्यक्तौ हेतोर्लब्धायां तत्तुल्य एव सद्भाव इति समुच्चीयमानावधारणं विपक्षमात्राद्वृत्तिं व्यवच्छिनत्ति, न तु अनुमेयात्।

नरं च नारायणमेव चादौ स्वतः सुतौ द्वौ जनयां बभूव।

इति यथेति चेदत आह—तथेहापीति। समुच्चीयमानावधारणे हि तत्तुल्येन यथाऽन्ययोगव्यवच्छेदेनैवकारः संबध्यते तथा अनुमेयेनापि संबध्येत, तथा चानुमेयैकदेशवृत्तिरपि हेतुः स्यात्, न खलु नरं च नारायणमेवेति निपातो नारायणेन सहान्ययोगव्यवच्छेदेन संबध्यते, नरेण चायोगव्यवच्छेदेनेति भावः। अथावधारणस्यावैचित्र्येण संबन्धमिच्छताऽनुमेये यथा अयोगव्यवच्छेदस्तथा तत्तुल्ये अयोगव्यवच्छेदेन संबन्ध उच्येतेति शङ्कते—अथ तत्तुल्य इति। निराकरोति—तत्तुल्ये इति। एतदेव स्फोरयति—इति ते (१), तव दर्शने, न च यस्यानुमेये सद्भाव एवेत्यनूद्य तस्य तत्तुल्य एव सत्त्वमिति विधातुं शक्यम्। न ह्यनूद्यमानं शक्यं विशेष्टुम्, तथा सति तद्विशेषणाय प्रयत्नान्तरास्थाने सति वाक्यभेदप्रसङ्गात्। यथा "यस्योभयं हविरार्त्तिमार्च्छेदैन्द्रं पञ्चशरावमोदनं निर्वपेदि"ति। तत्र हि यद्यपि स्वरूपेणार्त्तेरशक्यप्रतिपत्तित्वेन हविषा विशेषणं मृग्यते, तथापि न शक्यं हविरुभयत्वेन विशेष्टुं विना यत्नादिति वाक्यभेदभिया प्रतीयमानमप्युभयत्वमविवक्षितम्, एवमत्रानुमेयइत्यविवक्षितम्। अथ तद्विवक्षयैव वाक्यभेदमुपेत्य पश्चाद्वाक्यैकवाक्यतयाऽभिमतार्थसिद्धिरास्थीयते। न च विरोधाद्वाक्ययोरेकवाक्यताविरहः। तत्तुल्य एवेत्यन्ययोगव्यच्छेदस्य विपक्षमात्रविषयत्वेनाप्युपपत्तौ विरोधासिद्धेः। तस्मादन्यापोहार्थत्वेन पदानां विरोधो वक्तव्यः। तथा हि अनुमेये सद्भाव इत्यत्रानुमेय एव नाननुमेये, सद्भाव एव नासद्भाव इति पदार्थः। तथा च तत्तुल्यविपक्षयोर्हेतोरभावो दर्शितः। एवं तत्तुल्ये सद्भाव इत्यत्रापि तत्तुल्य एव नातत्तुल्ये, सद्भाव एव नासद्भाव इति पदार्थः। तथा चानुमेयेऽसद्भाव इत्युक्तं भवति। न चानुमेयतत्तुल्यपदार्थयोः परस्परपरीहारवतोः समुच्चयसम्भवः। द्वयोरपि विपक्षमात्रव्यावृत्तिपरत्वात् परस्परसमुच्चयसद्भाव इति चेन्न, अवृक्षोऽगौ (२) रित्यनयोरपि हस्त्यादिनिवृत्तिमात्रपरत्वेनाभिन्नार्थयोः सामानाधिकरण्यप्रसङ्गात्, तस्माद्विरोधात् समुच्चीयमानावधारणं न युक्तमिति। न च समुच्चीयमानावधारणं दिङ्नागो मेने, यदेवमूचे वैशेषिकलक्षणदूषणावसरे—यदि रूपमेव चाक्षुषं ततो न द्रव्यं चाक्षुषं स्यात्, तथा च महदनेकद्रव्यसमवायाद्रूपाच्चोपलब्धिरिति द्रव्यचाक्षुषत्वाभिधानं व्याहन्येतेति। अत्र हि पूर्ववद्द्रव्यसहितरूपमेव चाक्षुषं न गन्धरसादीति शक्यं समुच्चीय-

(१) "इति ते" इति वार्त्तिके न दृश्यते, किन्तु "प्रयत्नानन्तरीयकत्वादिस्ते" इत्यत्र केवलं "ते" इत्यस्ति।
(२) "चेत् नावृक्षो गौ-" इति ख—पु, वयन्त्वत्र चेन्न, "वृक्षो गौ-" एतादृशपाठमेव सम्यक् तया मन्यामहे।

न्यायवार्त्तिकम्

प्राप्तम्। असति नास्तितेति चासम्प्रधार्य प्रोक्तं यदसतत्स्वरूपमेव तन्नास्ति। न ह्यसदाधारो भवति यतस्तत्प्रतिषेधः स्यात्। एतदप्यवधारणार्थमारभ्यते? किमवधार्यते? नास्तितैव असत्येव वेति? यदि तावन्नास्तितैव, असतीति व्यर्थम्, अनुक्तेऽपि तदधिगतेः। अनुक्तेऽप्येतद्गम्यते-ऽसति नास्तीति। अथ पुनरसत्येव नास्तिता? गौर्विषाणित्वादित्ययमपि हेतुः प्राप्नोति। एवं ह्यसत्येव नास्ति, न पुनर्नास्त्येव। यदप्येकद्विपदपर्युदासेन सप्तिकासम्भवे षट्प्रतिषेधमुक्त्वा त्रिलक्षणो हेतुरभिधीयते एतदपि द्विपदयुक्तयोरन्वयिनोर्हेतुत्वात् द्विपदयुक्तस्य च व्यतिरेकिण एकस्य हेतुत्वादयुक्तम्, अनभ्युपगतनित्यपक्षस्य कृतकत्वप्रयत्नानान्तरीयकत्वे द्विपदयुक्ते एव विपक्षा-भावाद्धेतू भवतः। व्यतिरेक्यपि तत्तुल्यासम्भवात् द्विपदयुक्तश्च भवति हेतुश्चेति, यथा नेदं

न्यायवार्त्तिकतात्पर्य्यटीका

मानावधारणम्, तस्मात् समुच्चीयमानावधारणाभिधानं कीर्त्तेः (१) स्वातन्त्र्येण, तच्चायुक्तमिति (२) कृतं विस्तरेण।

असति नास्तितेति दूषयति—असतीति। कस्मात्? यदसत् तत्तुच्छं स्वमेव नास्ति, तन्न सदिति शक्यं व्यवहर्तुम् असदिति वा, भवतु, तथापि कस्मात्तस्मिन् हेतो-र्न व्यावृत्तिर्भवतीत्यत आह—न ह्यसदिति। यथा चैतत्तथाऽन्वयिहेतूपादानावसरेऽस्माभि-रुक्तम् (३)। स्वरूपेण दूषयित्वा एतद्गतमवधारणं दूषयिष्यन्ननूद्य विकल्पयति—किमवधार्यत इति। प्रथमं कल्पं दूषयति—यदि तावदिति। तत्तुल्य एव सद्भाव इत्यनेन गम्यते इत्यर्थः। द्वितीयं कल्पं दूषयति—अथ पुनरिति। गौरयं विषाणित्वादित्ययं हेतुर्विपक्ष एव नास्ति, पक्षसपक्षव्यापकत्वात्। न तु नास्त्येव, विपक्षैकदेशे महिषादौ वृत्तेः। अतो विपक्ष एव नास्ति इत्ययमपि हेतुः स्यात्। तदेवमवयवार्थं दूषयित्वा समुदायार्थं दूषयितु-मुपन्यस्यति—यदप्येकद्विपदपर्युदासेनेति। तत्रैकपदपर्युदासेन त्रयः पक्षाः, द्विपदपर्युदासेऽपि त्रय इति षट्कम्, तत्पर्युदासेन सप्तिकापरिग्रहः। यथाऽनुमेये सद्भाव इत्युच्यमाने (४) विपक्ष-वृत्तेरपक्षधर्म्मस्य च हेतुत्वं स्यात्, यथा नित्यः शब्दः चाक्षुषत्वात् सामान्यवदिति। नास्तिता सतीत्युच्यमाने योऽपक्षधर्मस्तुल्ये नास्ति स हेतुः स्यात् यथा (५) नित्यः शब्दोऽसत्त्वात्। अनुमेये तत्तुल्ये चेत्युच्यमाने अनित्यः शब्दः प्रमेयत्वादिति विपक्षवृत्तिर्हेतुः स्यात्। अनुमेयेष्व-सति च नास्तीत्युच्यमाने नित्यः शब्दो जातिमत्त्वे (६) श्रावणत्वाद् इत्ययं तत्तुल्यहीनोऽपि हेतुः स्यात्, तत्तुल्येऽस्ति असति च नास्तीत्येतावत्युच्यमानेऽनित्याः परमाणवः कृतकत्वादित्यय-

(१) 'कीर्त्तिः' इति ख। (२) 'तच्चोपयुक्तम्' इति ख। (३) १४४ पृ: २० पंक्तितो द्रष्टव्यम्। (४) "सद्भाव इत्युच्यमाने" इत्यनन्तरं ख-पुस्तके—"यस्य तत्तुल्ये नास्तिता विपक्षे च वृत्तिः सोऽपि हेतुः स्यात्, यथा—नित्यः शब्दः कृतकत्वादिति। तत्तुल्येऽसतीत्युच्यमाने" इत्यधिकः पाठः। (५) "यथा" इत्यत्र "तथापि" इति क-पु पाठः। (६) अत्र "सति" इति पूरणीयम्।

न्यायवार्त्तिकम्

निरात्मकं जीवच्छरीरम् अप्राणित्वप्रसङ्गात्। अतोऽव्यापकत्वादलक्षणमेतदिति। एतेन सम्बन्धादेकस्मात् प्रत्यक्षाच्छेषसिद्धिरनुमानमिति लक्षणं प्रत्युक्तम्। कथमिति? न ह्येकस्मात् प्रत्यक्षादनुमानं भवति। अथापि सम्बन्धादेकस्मात् प्रत्यक्षादिति, एतदपि नैव, न ह्ययं तदा सम्बन्धं पश्यति यदाऽनुमिमीत इति। अथ पूर्वं दृष्टमिति? तथाप्यनुपलब्धलिङ्गस्यानुमानं (१) प्रसज्येत। न चान्या गतिरस्ति। रूपेण च स्पर्शानुमाने स्वदृष्टिव्याकोपः। न ह्ययं रूपस्पर्शयोः सम्बन्धमुपलभते। अथैकार्थसमवायः सम्बन्ध इति? सोऽपि स्वदर्शनव्याघातादयुक्त इति। न हि रूपस्पर्शावेकस्मिन्नर्थे वर्तेते। यत्र रूपं तत्र स्पर्श इति एतदपि नास्ति। न क्वचिद्रूपं स्पर्शो

न्यायवार्त्तिकतात्पर्य्यटीका

मपक्षधर्मो हेतुः स्यात्, तदेतत् सर्वं मा भूदिति समुदायोपादानप्रयोजनम्। तदेतद्दूषयति एतदपीति। सपक्षव्याप्त्यव्याप्तिभ्यां द्विरूपयुक्तस्यान्वयिनो द्वित्वम्।

संप्रति सांख्यीयमनुमानलक्षणं दूषयति—एतेनेति। सम्बन्धोऽविनाभावः साधनस्य साध्येन, तस्मात् प्रत्यक्षाद् दृढतरप्रमाणावधारितात्। तथाऽपि यत्राविनाभूते लिङ्गे भवत एकस्मिन् धर्मिणि विरुद्धाव्यभिचारिणी, तयोरपि हेतुत्वं प्रसज्येतेत्यत उक्तम्—एकस्मादिति। शेषस्य अनुमेयस्य सिद्धिः। अनुपपन्नत्वमात्रसाम्येनोक्तमेतेन न प्रयुक्तमिति (२)। अनुपपत्तिं पृच्छति—कथमिति। यथासम्भवमनुपपत्तिमाह—न हीति। यदि प्रत्यक्षशब्दो ज्ञानवचनः ज्ञानं चैकत्वेन विशिष्यते, तदैतद् दूषणम्। अथ सम्बन्धविशेषणमेकस्मादिति, प्रत्यक्षशब्दस्तु ज्ञेये न तु ज्ञाने, तदेतदुपन्यस्य दूषयति—अथापि संबन्धादिति। शङ्कते—अथेति। संबन्धस्य प्रत्यक्षतोक्ता पूर्वम्, न त्वनुमितिकाल इत्यर्थः। दूषयति—तथाप्युपलब्धसंबन्धस्य पूर्वमनुमानकाले चानुपलब्धलिङ्गस्यानुमानं प्रसज्येतेति। स्यादेतत्, संबध्यत इति व्युत्पत्त्या संबन्धो लिङ्गम्, तेनाविनाभूताद्धेतोः प्रत्यक्षादनुमेयसिद्धिरिति। तथा च गृहीताविनाभावाल्लिङ्गात् सम्प्रति प्रत्यक्षादित्युपपन्नमित्यत आह—न चान्या गतिरिति। अत्रापि व्याख्याने एकस्मादिति व्यर्थम्, तथा हि अन्वयव्यतिरेकमात्रसंपत्तिरविनाभाव उच्यते सर्वरूपसंपत्तिर्वा, तत्र प्रथमे कल्पे मा भूद्विरुद्धाव्यभिचारी, बाधितविषयस्तु हेतुः स्यात्। द्वितीये तु कल्पे न सर्व्वरूपसम्पन्नो हेतुर्विरुद्धाव्यभिचारी भवतीत्येकस्मादित्यतिरिच्यते। तस्मात्सूक्तं न चान्या गतिरस्तीति। अव्यापकत्वं लक्षणदोषमाह—रूपेण चेति। न तावदनयोस्तादात्म्यम्, भिन्नेन्द्रियग्राह्यत्वाद्भिन्नबुद्धिबोध्यत्वाच्च। न चातदात्मनोस्तयोः संबन्धः कश्चिदुपलभ्यते। न च प्रति-

(१) "तथापि" इत्यनन्तरम् "उपलब्धसम्बन्धस्य पूर्व्वमनुमानकाले च" इत्यधिकः पाठस्तात्पर्य्यटीकायाम्, स च "तथापि" शब्दस्य व्याख्यात्मक इति मन्ये। (२) "प्रत्युक्तम्" इति वार्त्तिकपाठः, तस्य तात्पर्य्यमाह "न प्रयुक्तम्" इति।

न्यायभाष्यम्

अथोपमानम्—

(सू)—प्रसिद्धसाधर्म्यात् साध्यसाधनमुपमानम् ॥ ६ ॥

प्रज्ञातेन सामान्यात् प्रज्ञापनीयस्य प्रज्ञापनमुपमानमिति। यथा गौरेवं गवय इति।

न्यायवार्त्तिकम्

वा। परस्पराधाराधेयत्वेन स्यादिति चेत्, परस्पराधाराधेयभावेऽपि (१) न रूपं स्पर्शो न स्पर्शो रूप इति। एतेन सप्तविधः सम्बन्ध इति प्रत्युक्तम्। न हि कार्यकारणभावादीनां सम्बन्धानां रूपस्पर्शयोरन्यतरः सम्बन्ध इति रूपेण स्पर्शानुमानं युक्तमित्यतोऽव्यापकत्वादलक्षणमिति निश्चितमनुमानम् ॥ ५ ॥

अथोपमानम्। सूत्रार्थः पूर्ववत्। प्रसिद्धसाधर्म्यादिति, प्रसिद्धं साधर्म्यं यस्य, प्रसिद्धेन वा

न्यायवार्त्तिकतात्पर्य्यटीका

क्षणपरिणामवादे कुण्डबदरादीनामपि कश्चिदस्ति संबन्ध इत्यपि द्रष्टव्यम्। शङ्कते—अथेति। निराकरोति—सोऽपीति। न हि सांख्यानां बौद्धानां वा राद्धान्तेऽस्ति संबन्धः समवायो नाम, नापि तदाश्रयो द्रव्यम्, अतः स्वदर्शनव्याघात इत्यर्थः। यद्युच्येत प्राधानिकत्वाद्रूपादीनां प्रधानमेकमाश्रयः, तथा च यत्र रूपं तत्र स्पर्श इत्यत आह—यत्र रूपमिति। कुतः? न क्वचिदिति। न हि प्रधानमाधारः कार्याणाम्, अपि तु प्रधानात्मकत्वमेषामिष्यते, तथा च यत्र तत्रेत्यनुपपत्तिः। न च तादात्म्यमित्युक्तम्। न च भेदाभेदावेकत्र संभवतो विरोधादिति भावः। शङ्कते—परस्परेति। यथा ह्यासन्दिकाङ्गानि भिन्नान्यनौत्तराधर्य्यव्यवस्थितान्यपि (२) परस्पराश्रयतया न पतन्ति, एवं रूपस्पर्शावपि परस्पराश्रयावित्यर्थः। निराकरोति—परस्पराधारभावेऽप्यन्यत्रासन्दिकाङ्गादौ, नासौ रूपस्पर्शयोः, कुतः? न रूपं स्पर्शो न च स्पर्शो रूप इति। परस्परसंयोगप्रतिबध्यगुरुत्वान्यासन्दिकाङ्गानि न पतन्त्यवस्थितानि परस्पराधारत्वेनापदिश्यन्ते। रूपस्पर्शादीनां तु स्थितिर्न परस्परहेतुका, अपि तु भोगापवर्गलक्षणपुरुषार्थहेतुकेति भावः। एतेन साङ्ख्यानां सप्तविधः सम्बन्धः प्रत्युक्तः। शेषं सुबोधम् ॥ ५ ॥

विभागसूत्रेऽनुमानानन्तरमुपमानस्योद्देशाद्यथोद्देशं च लक्षणादनुमानलक्षणानन्तरमुपमानलक्षणमाह—अथोपमानमिति भाष्यम्। सूत्रं पठति—

प्रसिद्धसाधर्म्यात् साध्यसाधनमुपमानम् ॥ अत्रापि यत इत्यध्याहार्यम्। सिद्धिः साधनम्। तदेतद्भाष्यकारेण व्याख्यातम् "प्रज्ञातेन" प्रसिद्धेन। गवा साधर्म्यात् सामान्या-

---

(१) "परस्पराधारभावेऽपि" इति तात्पर्य्यपाठः। (२) "आसन्दिका" आसनविशेषः, तस्याः "अङ्गानि" वंशवेत्रादीनि, "अनौत्तराधर्य्यव्यवस्थितान्यपि" उपर्य्यधोभावेन अनवस्थितान्यपीत्यर्थः।

न्यायभाष्यम्

किं पुनरत्रोपमानेन क्रियते ? यदा खल्वयं गवा समानधर्मं प्रतिपद्यते तदा प्रत्यक्षत-स्तमर्थं प्रतिपद्यत इति, समाख्यासम्बन्धप्रतिपत्तिरुपमानार्थ इत्याह। यथा

न्यायवार्त्तिकम्

साधर्म्यं यस्य, सोऽयं प्रसिद्धसाधर्म्यो गवयः, तस्मात् साध्यसाधनमिति। समाख्यासम्बन्ध-प्रतिपत्तिरुपमानार्थः। किमुक्तं भवति ? आगमाहितसंस्कारस्मृत्यपेक्षं सारूप्यज्ञानमुपमानम्।

न्यायवार्त्तिकतात्पर्य्यटीका

गवयस्य। साधर्म्यं च सामान्यमभिदधता न सामान्यातिरिक्तं सादृश्यं नामार्थान्तरमस्तीत्युक्तं भवतीति। साधर्म्यं चाप्रसिद्धं न साध्यसाधनायालमिति साधर्म्यप्रसिद्धिरपि द्रष्टव्या। सा च यथा गौस्तथा गवय इत्याप्तवाक्यात्। तदिदमुक्तम्—यथा गौरिति। साध्यसाधनपदव्याख्यानं—प्रज्ञापनीयस्य गवयशब्दवाच्यतयां प्रत्यक्षदृश्यमानगोसादृश्यस्य गवयत्वसामान्यविशेषवतः पिण्डस्य प्रज्ञापनमुपमानम्। पिण्डस्य हि गवयशब्दवाच्यतां पुरुषोऽतिदेशवाक्यस्मरण-सहकारिणः प्रत्यक्षाद्गवयगताद्गोसादृश्यात् प्रजानन् तेन प्रज्ञाप्यत इति प्रमाणव्यापारः प्रज्ञापनमुक्त-मिति। अत्र वार्तिककारः प्रथमं तावत् सूत्रतात्पर्यमाह—सूत्रार्थः पूर्ववत्। समानासमान-जातीयव्यवच्छेद इत्यर्थः। साध्यसाधनमित्युच्यमाने प्रत्यक्षादिसाधने सुखादिसाधने घटे प्रसङ्गः। अत उक्तं प्रसिद्धसाधर्म्यादिति। यद्यपि प्रसिद्धसाधर्म्यमुपमानमित्युच्यमाने प्रमाणविशेषाभिधा-न्युपमानपदसामानाधिकरण्यात् कारकत्वलाभस्तथापि तदाभासनिराकरणाय साध्यसाधनपदो-पादानम्, तेनोपमानाभासमपाकृतं भवति। अवयवार्थं विभजते—प्रसिद्धेति। वार्तिककारेण बहुव्रीहिद्वयसंभवो दर्शितः, न तु तृतीयासमासो भाष्यकारीयो निरस्तः। भाष्यकारेण हि संज्ञितया गवयप्रतिपत्तिः फलं साध्यसाधनपदवाच्यमुक्ता, आक्षिप्तप्रयोज्यव्यापारत्वात्। प्रयोजकव्यापारस्य प्रज्ञापनस्य पश्चान्निष्कृष्याभिधानं कृतम्—समाख्यासम्बन्धप्रतिपत्तिरुपमानार्थ इति। एत-देव साध्यसाधनपदार्थतया वार्तिककारो व्याचष्टे—समाख्यासंबन्धप्रतिपत्तिरुपमानार्थः फलम्। साध्यपदेन समाख्यासंबन्ध उच्यते तस्य साधनं सिद्धिः प्रतिपत्तिरिति। ननु प्रतिपद्यतामयं गोसादृश्ययुक्तं गवयम्, समाख्यासंबन्धप्रतिपत्तिस्तु कुतस्त्या ? न हि यो यत्सदृशं यं प्रतिपद्यते

वृत्तिः

उपमानं लक्षयति—(प्रसिद्धेति)। प्रसिद्धस्य—पूर्वप्रमितस्य गवादेः साधर्म्यात्—सादृश्यात्, तज्ज्ञानात्, साध्यस्य गवयादिपदवाच्यत्वस्य, साधनं सिद्धिः ; उपमानम् उपमितिः। यत इत्यध्याहारेण च करणलक्षणम्। अथ वा साध्यसाधन-

न्यायभाष्यम्

गौरेवं गवय इत्युपमाने प्रयुक्ते गवा समानधर्म(१)मर्थमिन्द्रियार्थसन्निकर्षादुपलभमानो-(२)ऽस्य गवयशब्दः संज्ञेति संज्ञासंज्ञिसम्बन्धं प्रतिपद्यत इति। यथा मुद्ग स्तथा मुद्ग-

न्यायवार्त्तिकम्

यदा ह्यनेन श्रुतं भवति यथा गौरेवं गवय इति, प्रसिद्धे गोगवयसाधर्म्ये पुनर्गवा साधर्म्यं पश्यतोऽस्य भवत्ययं गवय इति समाख्यासम्बन्धप्रतिपत्तिः।

न्यायवार्त्तिकतात्पर्य्यटीका

स तस्य समाख्यामप्यवगच्छतीत्याशयवान् पृच्छति—किमुक्तं भवति। उत्तरम्—आगमेति। आगमानुभवाहितात् संस्कारात् स्मृतिः। एतदुक्तं भवति, न केवलं सारूप्यज्ञानं समाख्या-संबन्धप्रतिपत्तिहेतुः, अपि त्वागमार्थस्मृत्यपेक्षमिति। नन्वसत्यागमानुभवे कुतः स्मृतिरित्यत आह—यदा ह्यनेनेति। प्रसिद्धसाधर्म्यादित्यत्र प्रसिद्धिरुभयी श्रुतिमयी प्रत्यक्षमयी च। श्रुति-मयी यथा गौरेवं गवय इति, प्रत्यक्षमयी च यथा गोसादृश्यविशिष्टोऽयमीदृशः पिण्ड इति। तत्र प्रत्यक्षमयी प्रसिद्धिरागमाहितस्मृत्यपेक्षा समाख्यासंबन्धप्रतिपत्तिहेतुः। यद्यपि यथा गौरेवं गवय इत्येतस्मादपि गोसदृशस्य गवयशब्दः समाख्येति शक्यमवगन्तुम्, न खलु प्रत्यक्ष एव संज्ञाकर्म, समानजातीयव्यवच्छिन्ने हि तद्भवति, तच्च यदि मानान्तरेणापि तथाऽवगम्यते संज्ञाकर्म निवारयेत्, गोसादृश्येन चोपलक्षितः पिण्डो य इति सर्वनाम्ना परामृष्टः शक्यो घटादिभ्योऽसमानजातीयेभ्यो महिषादिभ्यश्च समानजातीयेभ्यो व्यवच्छिन्नोऽवगन्तुं गवयः, तथापि यावदयमसौ गवय इति साक्षात् प्रतीते संबन्धिनि संज्ञां न निवेशयति तावदयं परिप्लुतमतिः प्रमाता कश्चित् खलु द्रक्ष्यामि तादृशं पिण्डं यत्र गवयसंज्ञां प्रतिपत्स्य इति प्रमोत्सुक एवोदीक्षते। न चासौ वाक्यमात्रसहायोऽप्रत्यक्षीकृतगोसदृशगवयपिण्डमसौ (३) गवयाख्य इति प्रतिपत्तुमर्हति, न च वाक्यं विना प्रत्यक्षमात्रात्, तस्मादागमप्रत्यक्षा-भ्यामन्यदेवेदमागमस्मृतिसहितं सादृश्यज्ञानमुपमानाख्यं प्रमाणमास्थेयम्। ननु यदोदीच्येन क्रमेलकं निन्दतोक्तं धिक्करभमतिदीर्घवक्रग्रीवं लम्बोष्ठं कठोरतीक्ष्णकण्टकाशिनं कुत्सितावयव-सन्निवेशमपसदं पशूनामिति, तदुपश्रुत्य दाक्षिणात्य उत्तरापथं गतस्तादृशं वस्तूपलभ्य नूनमसौ

वृत्तिः

मिति करणल्युटा करणलक्षणमेवेदम्। अत्र च वैधर्म्योपमितिमपि मन्यन्ते टीकाकृतः। (४)यथाऽतिदीर्घग्रीवत्वादिपश्वन्तरवैधर्म्यज्ञानादुष्ट्रे करभपदवाच्यताग्रहः। एवमन्योऽप्युप-

---

(१) "-धर्माणम्" इति फ०। (२) "उपलभमान" इति वि०। (३) "गोसदृशे पिण्डोयमसौ" इति ख-पु-पाठः। (४) "यथा च" इति नि-व०।

न्यायभाष्यम्

पर्णी, यथा माषस्तथा माषपर्णीत्युपमाने प्रयुक्ते उपमानात् संज्ञासंज्ञिसम्बन्धं प्रतिपद्यमानस्तामोषधीं भैषज्यायाऽऽहरति ।

न्यायवार्त्तिकतात्पर्य्यटीका

करभ इत्यवैति, तत्कतमदेतेषु प्रमाणम् ? न तावदुपमानम्, साधर्म्याभावात् । नापि पञ्चमं प्रमाणमुपगम्यते । यद्युच्येत निन्दापरं वाक्यं करभस्य तादृशत्वे न प्रमाणम्, न ह्यन्यपराच्छब्दादन्यस्यावगम इति । यत्र तर्हि तादृक्त्वे पर्यवस्यति वाक्यं तत्र का गतिः । अथ तत्रापि तादृक् करभ आगमावगतः प्रत्यक्षेण प्रत्यभिज्ञायते, करभशब्दवाच्यता च तस्य तत्पुर्वं तादृक्करभपरत्वेऽप्यागमस्य प्रयोगमात्रादवगता अनुमानात् । यो हि यत्र प्रयुज्यते शब्दोऽसति वृत्त्यन्तरे स तस्य वाचको यथा गोशब्दो गोत्वे, प्रयुक्तश्चायं तादृशि, तस्मात्तस्य वाचक इति । यदिदं प्रागेव प्रयोगानुमितं वाचकत्वमस्य, प्रत्यक्षसमये केवलं स्मर्यत इति । समानमेतदपवादवाक्येऽपि, तत्रापि वाक्यादवगतसाधर्म्यवान् पिण्डः प्रत्यक्षेण प्रत्यभिज्ञायते, प्रयोगानुमितं च गवयशब्दवाच्यत्वं स्मर्यते, इति न फलान्तरमवशिष्यते यत्रोपमानं प्रमाणान्तरमिति । अत्रोच्यते—न तावदाकाशादिशब्दवदेष गवयशब्दः साक्षात् पिण्डस्य वाचकः, किन्तु गवयत्वं निमित्तीकृत्य पिण्डे वर्तत इति परमार्थः । न च यथा गौरेवं गवय इति वाक्याद्गवयत्वमवगतं न ह्यनवगतसंबन्धं गवयपदमवधारयति, ततस्तदवगमात् संबन्धवेदने परस्पराश्रयप्रसङ्गः । न च गोसादृश्येनोपलक्ष्यते । न खल्वनुपलब्धचरेण गवयत्वेन गोसादृश्यं संबद्धं दृष्टम्, न चादृष्टसंबन्धमुपलक्षकम् । न हि पुरुषेणादृष्टसंबन्धो दण्डः पुरुषमुपलक्षयितुमर्हति । तस्मात् सम्बन्धिनो गवयत्वस्य सर्वथाऽनुपलब्धेः कुतो वाक्याद्वाऽनुमानाद्वा वाच्यवाचकसम्बन्धावगमः ? कुतस्तराञ्च सम्बन्धस्मृतिः ? गवयत्वसामान्यविशेषवति च पिण्डे प्रत्यक्षे युक्तः सम्बन्धावगमः, सम्बन्धिनो गवयत्वस्य प्रत्यक्षत्वात् । तथापि किं गवयत्वजातिमान् पिण्डो वाच्यः न चादृष्टगोसादृश्यवानिति कुतो विनिगमनेति चेद् वाक्यार्थस्मरणसहकारि गवयत्वजातिमतः पिण्डस्य गोसादृश्यदर्शनमेव तर्कसहायं गवयत्वाभिधाने प्रमाणम्, तर्कश्च गोसादृश्यविशिष्टपिण्डाभिधाने कल्पनागौरवप्रसङ्गः । तथा हि सादृश्यविशिष्टपिण्डाभिधाने, नाप्रतीतं सादृश्यं पिण्डं विशिनष्टीति तत्प्रतिपत्तव्यम् । न च शब्दादन्यतस्तदवगम इति शब्दस्य तत्र वाचकत्वं कल्पनीयम् । न

वृत्तिः

मानस्य विषय इति भाष्यम् । तथा च (२) मुद्गपर्णीसदृशी ओषधी विषं हन्तीत्यतिदेशवाक्यार्थे ज्ञाते, मुद्गपर्णीसादृश्यज्ञाने जाते इयमोषधी विषहरणीत्युपमित्या विषयीक्रियत इत्यादि ॥ ६ ॥

(२) व-नि-पु० "च" नास्ति ।

न्यायभाष्यम्

एवमन्योऽप्युपमानस्य लोके विषयो (१) बुभुत्सितव्य इति ॥ ६ ॥

न्यायवार्त्तिकम्

प्रत्यक्षागमाभ्यां नोपमानं भिद्यते। कथमिति? यदा तावुभौ गोगवयौ प्रत्यक्षेण पश्यति तदा ह्ययमनेन सरूप इति प्रत्यक्षतः प्रतिपद्यते। यदाऽपि शृणोति यथा गौरेवं गवय इति, तदाऽस्य शृण्वत एव बुद्धिरुपजायते, केचिद् गोधर्मा गवयेऽन्वयिन उपलभ्यन्ते, केचिद् व्यतिरेकिण इति। अन्यथा हि यथा तथेत्येव न स्यात्। भूयस्तु सारूप्यं गवा गवयस्य इत्येवं प्रतिपद्यते। तस्मान्नोपमानं प्रत्यक्षागमाभ्यां भिद्यत इति। गवा गवयसादृश्यं प्रतिपद्यते गवयसत्तां वेति,

न्यायवार्त्तिकतात्पर्य्यटीका

चाविशिष्टं सादृश्यं पिण्डविशेष एव गवयपदमवस्थापयितुमर्हति, यस्य कस्यचिद् येन केनचित् सादृश्यादिति तदपि गवा विशेषणीयम्। न चान्यतो गोत्वस्यापि प्रतीतिरिति तदपि गवयपदे-नाभिधातव्यमिति कल्पनागौरवम्, गवयत्वजातिमत्पिण्डाभिधाने तु लाघवमिति तदनुजानाति। साधर्म्यग्रहणं च धर्ममात्रोपलक्षणमिति करभसंज्ञाप्रतिपत्तिरप्युपमानफलमिति नाव्याप्तिः। नापि पञ्चमप्रमाणाभ्युपगमः। अतएव बहून्युदाहरणान्युक्त्वाऽप्याह स्म भगवान् भाष्यकारः—एवमन्योऽप्युपमानस्य लोके विषयो बुभुत्सितव्य इति। तस्मात्सर्वं चतुरस्रम्।

तदीदृशमुपमानफलमविद्वान् सादृश्यज्ञानं सादृश्यविशिष्टज्ञानं वोपमानफलमिति भ्रान्तो भदन्तो दिङ्नाग आक्षिपति—प्रत्यक्षेति। पृच्छति—कथमिति। उत्तरम्—यदा ताविति। उपलक्षणं चैतत् उभौ प्रत्यक्षेण पश्यतीति। यदापि गवयमेकं प्रत्यक्षेण पश्यति, स्मरति च गाम्, तदापि गोसादृश्यं गवयस्य प्रत्यक्षमेव, गोस्थ(२)मप्रत्यक्षम् अप्रत्यक्षत्वाद् गोरिति चेत्, हन्त भोः किम-भिमतं सादृश्यमायुष्मतां यदप्रत्यक्षायां गवि न प्रत्यक्षम्? सामान्यबाहुल्यं जात्यन्तरवर्ति जात्यन्तरस्य, यथाऽऽहुः (३)—

सामान्यान्येव भूयांसि गुणावयवकर्मणाम्।
भिन्नप्रधानसामान्यव्यक्तं सादृश्यमुच्यते॥ इति

चेत्, तत्किमिदानीं कर्णत्वादि(४)-सामान्यं गोगवयगतकर्णादिभेदेन भिन्नमित्यपि वक्तुमध्य-वसितोऽसि। तस्माद्यथा कालाक्ष्यां गवि गोत्वमीक्षितवतः स्वस्तिमत्यां प्रत्यभिज्ञायमानं तदित्यवगतं भवति तथेहापीति न फलातिरेकः। तस्मान्न सादृश्यप्रतीतिफलमुपमानं प्रत्यक्षाद्वाक्याद्वा व्यतिरिच्यत इति सूक्तम्। भदन्तभ्रान्तिमुद्घाटयति—गवेति। गवयसत्तां सादृश्यविशिष्टमित्यर्थः (५)। अर्थतत्त्वमुक्तं स्मारयति—गवयेति। उपसंहरति—

(१) 'लोकविषयो' इति वि०। (२) गवि स्था स्थितिर्यस्य इति व्युत्पत्त्या गोस्थमिति, तथाच न मत्वविधिः, गोगतो गवयसादृश्यमिति तत्पर्य्यवसितार्थः। (३) 'यथाहुः' इति क-पु नास्ति। (४) 'कर्मत्वादि' इति क-पु०। (५) सादृश्यविशिष्टं गवयमिति बोध्यम्।

न्यायभाष्यम्

अथ शब्दः—

(सू)—आप्तोपदेशः शब्दः ॥ ७ ॥

आप्तः खलु साक्षात्कृतधर्मा यथादृष्टस्याऽर्थस्य चिख्यापयिषया प्रयुक्त उपदेष्टा ।

न्यायवार्त्तिकम्

अहो प्रमाणाभिज्ञता भदन्तस्य । गवा गवयसारूप्यप्रतिपत्तेस्तु संज्ञासंज्ञिसम्बन्धं प्रतिपद्यत इति सूत्रार्थः । तस्मादपरिज्ञाय सूत्रार्थं यत्किञ्चिदुच्यते ॥ ६ ॥

अथ शब्दः । आप्तोपदेश इति ॥ न शब्दमात्रमिति सूत्रार्थः । आप्तः खलु साक्षात्कृतधर्मा ।

न्यायवार्त्तिकतात्पर्य्यटीका

तस्मादिति । प्रयोगस्तु—प्रत्यक्षादिभ्यः प्रमाणान्तरमुपमानम्, तज्जन्यप्रमाविलक्षणप्रमाजनकत्वात् । यदि न तेभ्यो विलक्षणमभविष्यद् न तद्विलक्षणां प्रमामकरिष्यत्, यथा तान्येव, न चैतत्तथा, तस्मात्तथेति । ६ ॥

अथ शब्द इति भाष्यम् । उपमानानन्तरं शब्दोद्देशादुपमानलक्षणानन्तरं शब्दस्य लक्षणमित्यर्थः । लक्षणसूत्रं पठति—आप्तोपदेशः शब्दः । अत्र शब्द इति लक्ष्यपदम् । आप्तोपदेश इति लक्षणम् । उपदिश्यतेऽनेनेत्युपदेशो वाक्यज्ञानं तदर्थज्ञानं वाभिधीयते, तत्र वाक्यज्ञानप्रामाण्यपक्षे तदर्थज्ञानं फलम्, पदार्थस्मृत्यादयस्त्वान्तरालिका इतिकर्तव्यता । तदर्थज्ञानप्रामाण्यपक्षे तु हानादिबुद्धिः फलम् । यद्यपि विधिरुपदेशः प्रवर्तनमित्यनर्थान्तरम्, यद्यपि चायं नियोज्यप्रयोजने प्रवृत्तिनिवृत्ती विदधदाज्ञाध्येषणाभ्यामतिरिच्यते, ते हि नियोक्तृप्रयोजने प्रवृत्तिनिवृत्ती विधत्तः, तथापि भूतार्थपरोपनिषदादिशब्दव्यापकत्वात् परप्रयोजनवद्वचनमात्रविवक्षयोपदेशपदं व्याख्येयम् । यद्यपि "सदेव सौम्येदमग्र आसीद्" इत्यादि वचनं क्वचिन्न प्रवर्तयति कुतश्चिद्वा न निवर्तयति पुरुषम्, तथापि पुरुषश्रेयोऽभिधत्त इत्युपदेश इत्युच्यते । तथाप्यतिव्याप्तिः, चैत्यवन्दनादिवाक्यानामप्येवं लक्षणत्वादत उक्तम्—आप्तेति । आप्तानामृष्यार्य्यम्लेच्छानामुपदेशः शब्दो न त्वनाप्तानां मायामोहनिर्मितानां बुद्धर्षभादीनां प्रमाणविरुद्धक्षणिकसर्वधर्मनैरात्म्यवादिनामिति । तदेवाह वार्तिककारः—न शब्दमात्रमिति सूत्रार्थः ।

सूत्रस्थाप्तलक्षणपरं भाष्यम्—आप्तः खलु साक्षात्कृतधर्मा । दृढेन प्रमाणेनावधारिताः साक्षात्कृता धर्माः पदार्था हिताहितप्राप्तिपरिहारार्थो येन स तथोक्तः । तथापि तत्त्वं विद्वानकारुणिकतया विपरीतोपदेशोऽनिवारितः ? चिख्यापयिषेत्यक्तपाभ्यासकारिते

न्यायभाष्यम्

साक्षात्करणमर्थस्याऽऽप्तिः, तया (१) प्रवर्तत (२) इत्याप्तः। ऋष्यार्यम्लेच्छानां

न्यायवार्त्तिकम्

साक्षात् करणमर्थस्याप्तिः तया सह वर्तत (३) इत्याप्तः। स्वर्गापूर्वदेवतादिषूपदेशो न प्राप्नोति अतीन्द्रियत्वात्, यदि साक्षात्करणमर्थस्याप्तिः, स्वर्गापूर्वदेवतादीन् न कश्चित् पश्यतीति तत्प्रतिपादको व्यवहारो न स्यात्, तस्मादाप्तश्चासावुपदेशश्चेति युक्तं, नाप्तस्योपदेश इति। नैष दोषः। न ब्रूमोऽस्मदादीनां प्रत्यक्षाः स्वर्गादय इति। अपि तु यस्य प्रत्यक्षाः तस्योपदेश इति।

कः पुनरत्र न्यायः स्वर्गादयः कस्यचित् प्रत्यक्षा इति? ब्रूमः, सामान्यविशेषवत्त्वात्, आश्रितत्वात् कस्यचित् प्रत्यक्षा इति। यदाश्रितं तत्कस्यचित् प्रत्यक्षमिति। परार्थत्वात्—यत् परार्थं तदपि कस्यचित्प्रत्यक्षमिति। वस्तुत्वादागमविषयत्वात्—यद्वस्तु यच्च कथ्यते

न्यायवार्त्तिकतात्पर्य्यटीका

निराकृते इति। प्रयुक्त उत्पादितप्रयत्न इत्यलसत्वम्। तथापि स्थानकरणपाटवाभावेन वर्णनिष्पादनासामर्थ्येनाप्तः प्रसज्येतेत्यत आह—उपदेष्टा। स्थानकरणपाटववानित्यर्थः।

आप्त इति प्रकृतिप्रत्ययसमुदायात् प्रकृतिं निष्कृष्य तदर्थमाह—साक्षात्करणमिति। अनेन चोक्तस्वरूपसंपदुपलक्षिता। प्रत्ययार्थमाह—तयेति। आप्तलक्षणस्य व्यापकत्वमाह—ऋषीति। दर्शनादृषिः साक्षात्कृतत्रैकाल्यवृत्तिप्रमेयमात्रः, आराद् यातः पातकेभ्य इत्यार्य्यो मध्यलोकः, म्लेच्छाः प्रसिद्धाः। म्लेच्छा अपि हि प्रतिपथमवस्थिताः पान्थानामपहृतसर्वस्वा मार्गाख्याने हेतुदर्शनशून्या भवन्त्याप्ता इति। तदनेन—"आप्तं दोषक्षयं विदुः" इति परेषामाप्तलक्षणमव्यापकमुक्तं भवति। तदेतद्भाष्यमाक्षेप्तुमनुभाषते—आप्तः खल्विति। आक्षिपति—स्वर्गेति। आक्षेप्ता भाष्यमाक्षिप्य सूत्रं समाधत्ते—आप्तः, आप्तो युक्त इति यावत्। अपौरुषेयो वैदिक उपदेशः स्वर्गापूर्वदेवताविषयः स्वतः प्रामाण्ये सिद्धे निर्दोषतया युक्त उपपन्नः, लौकिकश्चार्यम्लेच्छानां प्रमाणान्तरमूलो युक्तः, मानान्तराभावे तु नाप्तोऽयुक्त इत्यर्थः। समाधत्ते—न ब्रूम इति। पौरुषेयत्वं वेदानां द्वितीयाध्याय उपपादयिष्यते(४)। तस्मात् पुरुषस्यैवाप्तोपदेश इति साधु व्याख्यानं भाष्यकारीयमिति भावः।

पृच्छति—कः पुनरिति। अस्ति स्वर्गादीनामप्रत्यक्षत्वे न्यायः—योगिप्रत्यक्षं न स्वर्गादिविषयः प्रत्यक्षत्वादस्मदादिप्रत्यक्षवदिति भावः। उत्तरम्—ब्रूमो न्यायम्। तमाह—सामान्यविशेष-

वृत्तिः

शब्दं लक्षयति—(आप्तोपदेश इति)। शब्द इति लक्ष्यकथनम्, तदर्थः प्रमाणशब्द इति। आप्तोपदेश इति लक्षणम्। आप्तः—प्रकृतवाक्यार्थ-

(१) "तथा" इति वि०। (२) "वर्त्तत" इति भा०। (३) "तया प्रवर्त्तत" इति भाष्ये। (४) वार्त्तिककृता "मन्त्रायुर्वेद"तादिद्वितीयाध्यायप्रथमाह्निकचरमसूत्रस्य व्याख्याने उपपादयिष्यते।

न्यायवार्त्तिकम्

तत् कस्यचित्प्रत्यक्षं भवति, यथा घटादि। अनित्यत्वात् कस्यचित्प्रत्यक्षा इति। असिद्धमपूर्वस्यानित्यत्वम्? न प्रायणानुपपत्तेः। यदि धर्माधर्मौ नित्यौ भवतः कस्य प्रक्षयात्प्रायणमिति। यदि पुनरनित्यौ, विपच्यमानयोरुपभोगात् प्रक्षये सति विपच्यमानकर्माशयान्तराभावात् पूर्वशरीरात् प्रच्यवनं मनसः, उत्तरशरीरे सम्प्राप्तिश्चेति जन्ममरणे स्तः, तस्मान्न नित्याविति। नित्ये वाऽपूर्वे परिकल्पिते तस्य साधारणता असाधारणता वा वक्तव्या। यदि साधारणता, सर्वप्राणिसाधारणोऽभ्युदयः स्यात्, न वाऽन्यन्नियामकमस्ति, क्रियालोपश्चेति। नित्यत्वे व्यञ्जकभेदान्नोभयदोषः, नित्यत्वे साधारणत्वे वा अदृष्टस्य न साधारणोऽभ्युदयो नापि क्रियाविलोप इति। कस्मात्? व्यञ्जकभेदात्, नित्यमप्यपूर्वं योऽभिव्यनक्ति तस्य फलम्, अभिव्यक्त्यर्था क्रियेति, अतो न क्रियालोप इति। येन यदभिव्यज्यते तस्यैव तत् फलदातृ भवतीति दृष्टम्। न दृष्टम्। न हि देवदत्तप्रकाशितं घटं यज्ञदत्तो न पश्यति। नित्यस्य वाऽपूर्वस्य काऽभिव्यक्तिः? किमुपलब्धिः, अथ फलप्रदानसामर्थ्यम्, आहोस्विदावरणापगमः? यद्युपलब्धिः सा नास्ति। न हि कदाचिदप्ययमपूर्वं पश्यति, अतीन्द्रियत्वात्। अथ फलप्रदानसामर्थ्यमभिव्यक्तिः, फलप्रदानसामर्थ्यं किमपूर्वम् अथापूर्वधर्म इति? यद्यपूर्वम्, न हि किञ्चित्कृतम्। अथापूर्वधर्मः, तद्व्यतिरेकेणाप्यन्यदपूर्वमित्यत्र किं प्रमाणम्? वयं तु पश्यामः—यतः फलं तदपूर्वमिति। अथावरणापगमोऽभिव्यक्तिः? किमस्यावरणमिति वक्तव्यम्, न ह्यतीन्द्रियाणामर्थानामावरणसम्भवासम्भवौ

न्यायवार्त्तिकतात्पर्य्यटीका

त्वात्(१) कस्यचित् प्रत्यक्षा इति। अत्र यावति पक्षे यो हेतुः सिद्धस्तस्य तन्मात्रं पक्षीकार्यम्। योगजे च प्रत्यक्षे सिद्धे तत्साधकादेव प्रमाणात् तस्य स्वर्गादिविषयत्वमपि सिद्धमिति धर्मिग्राहकप्रमाणविरुद्धं मीमांसकानामनुमानं नोदेतुमप्युत्सहते प्रागेव तद्बाधितुम्, असिद्धे तु योगजे प्रत्यक्ष आश्रयासिद्धो हेतुराभासः, अस्माकं तु सम्यञ्चो बहवश्च न्याया इति भावः। अनित्यत्वं हेतुमाक्षिपति—**असिद्धमिति।** परिहरति—**नेति। नित्ये वाऽपूर्व इति।** अथ त्रयः कल्पाः किमेकमपूर्वं सर्वपुरुषसाधारणम्, आहो असाधारणम्? यदा त्वसाधारणं तदापि किं प्रतिपुरुषमेकैकमसाधारणम् आहो प्रतिपुरुषमनेकमिति? तत्र प्रथमं कल्पं दूषयति—**यदि साधारणेति। न हि कदाचिदप्ययमपूर्वं पश्यति** लौकिकः पुरुषः, योगिनस्त्वनभिव्यक्तमपि पश्यन्तीति भावः।

वृत्तिः

यथार्थज्ञानवान्, तस्योपदेश इत्यर्थः। प्रकृतवाक्यार्थयथार्थज्ञानप्रयुक्तः शब्द इति फलितार्थः। अथ वा आप्तः—यथार्थः उपदेशः—शाब्दबोधो यस्मात् (२)।

(१) वार्त्तिके "आश्रितत्वात्" इत्यधिकपाठः। (२) "यस्मा"दित्यनन्तरं "तत्" इत्यधिकपाठः नि०।

न्यायभाष्यम्

समानं लक्षणम्। तथा च सर्वेषां व्यवहाराः प्रवर्त्तन्त इति। एवमेभिः प्रमाणैर्देव-मनुष्यतिरश्चां व्यवहाराः प्रकल्पन्ते, (१) नाऽतोऽन्यथेति ॥ ७ ॥

न्यायवार्त्तिकम्

चिन्त्येते। एतेन प्रतिपुरुषं नित्यत्वं प्रतिषिद्धं वेदितव्यम्। कथमिति? तत्रापि क्रियाविलोप-दोषः व्यञ्जकस्य चासामर्थ्यमिति। उत्कर्षार्था च प्रवृत्तिरयुक्ता नित्यस्याभेद्यत्वादिति। व्यञ्जक-भेदानुविधानाद्भेद इति चेत्, न। एकस्मिन्नदृष्टत्वात्। अथापीदं स्यात् एकमप्यपूर्वं व्यञ्जकभेदानु-विधानाद्भिन्नमिव भवति तद्भेदादुत्कर्षापकर्षौ भवत इति। एतदपि नास्ति। एकस्मिन्नदृष्ट-त्वात्। न ह्येकं किञ्चिद्व्यञ्जकभेदानुविधायि दृष्टं यत एवं स्यादिति। ननु च खड्गादिभेदा-न्मुखभेदः तदनुविधानाद् दृष्टः, न दृष्ट इति ब्रूमः। किं पुनस्तद् यदि न दृष्टम्? मिथ्या प्रत्ययः स इति ब्रूमः। भिन्नमिव तत्, न पुनर्भिन्नमेव, एकस्यानेकरूपस्यासम्भवात्। न ह्येकमनेकरूपं सम्भवति। तस्मादपूर्वस्यैकत्वं वा हातव्यं उत्कर्षापकर्षहेतुत्वं वेति। प्रतिपुरुषमनेकं नित्यं वेति—अथाऽयं पक्ष आश्रीयते प्रतिपुरुषमनेकत्वं नित्यत्वं वाऽपूर्वस्य, अनिवृत्तो व्याघातः, प्रायणानुपपत्तिप्रसङ्गदोषः क्रियाविलोपश्च न व्यावर्तते। अभिव्यक्तिस्तु फलं ददातीति किं यदा-ऽभिव्यक्तिस्तदा फलं ददाति, उत क्रियानिवृत्त्युत्तरकालमिति? यदाऽभिव्यक्तिस्तदा फलं ददाति तन्न दृष्टम्, न ह्यश्वमेधक्रियानन्तरमेव स्वर्गप्राप्तिर्भवति। अथोत्तरकालम्? असती क्रिया व्यञ्जिका,

न्यायवार्त्तिकतात्पर्य्यटीका

द्वितीयं कल्पं दूषयति—**एतेन प्रतिपुरुषमिति**। उत्कर्ष आधिक्यमवयवोपचय इति यावत्। शङ्कते—**व्यञ्जकेति**। एकमपि व्यञ्जकभेदादुत्कर्षवन्निष्कर्षवद्दृष्टम्, यथा महति दर्पणे महन्मुखं, तदेव कनी-निकायामण्विति। **न दृष्ट इति ब्रूम इति**। शङ्किता पृच्छति—**किं पुनस्तत् यदि न दृष्टम्,** तद्यदि भेदेन तद् दृष्टं दृष्टिर्नास्ति, किम्पुनस्तत् यद्भेदेन भेददर्शनमिव भासते। समाधाता स्वाभि-प्रायमाह—**मिथ्या प्रत्यय इति**। न भेददर्शनमपजानीमहे किन्तु पारमार्थिकं भेदम्, न च कल्पितोऽपूर्वभेदः पारमार्थिकाय कार्यायालमिति भावः। उत्कर्षापकर्षकर्तृत्वं कर्मण इति शेषः। तृतीयं कल्पमातिष्ठते—**प्रतिपुरुषमनेकमिति**। दूषयति—**अनिवृत्त इति**। **अथोत्तरकालमिति**।

वृत्तिः

शाब्दत्वं च जातिविशेषः। तथा च यथार्थशाब्दज्ञानकरणत्वमर्थः। अत्र च विशेष्या-वृत्त्यप्रकारकत्व-तद्वति तत्प्रकारकत्वादिप्रमालक्षणानामेकं लक्षणे परं च लक्ष्यतावच्छेदके निवेशनीयमतो नाऽभेदः ॥ ७ ॥

(१) 'प्रकल्प्यन्ते' इति ज०।

न्यायवार्त्तिकम्

तथा चानुगृह्यमाणं ददातीति चित्रम्, न हि किञ्चिदपूर्वं नाभिव्यक्तमिति सर्वं सर्वदा फलदातृ स्यादिति। अथापि स्वपक्षरिरक्षयिषया क्रियानित्यत्वमपि प्रतिपद्येथा एवमप्यनिवृत्तो व्याघातः क्रियाविलोपादिक इति। तदेवं यथा यथा अपूर्वस्य नित्यत्वं प्रतिपद्यते तथोपपत्तिं न सहत इति।

आप्तोपदेश इति किमाप्तानामविसंवादित्वं वा प्रतिपाद्यते आहोस्विदर्थस्य तथाभाव इति? यद्याप्तानामविसंवादित्वं प्रतिपाद्यते, तदनुमानात्। अथार्थस्य तथाभावः, सोऽपि प्रत्यक्षेण।

न्यायवार्त्तिकतात्पर्य्यटीका

अश्वमेधक्रियया तावदपूर्वं स्वकाल एवाभिव्यक्तं फलदानाभिमुखीकृतम्, अभिव्यञ्जकसमानकालत्वादभिव्यक्तेः, प्रदीपादिषु दर्शनात्। तथापि फलं तावन्न दत्ते यावत् क्रिया न निवर्त्तते, निवृत्तायां तु फलं दत्त इत्यर्थः। दूषयति—असतीति। तत् खलु पूर्वं सदपि फलं नाकार्षीच्चरमभाविन्याः क्रियायाः, तज्जन्याया वाभिव्यक्तेः, अनुत्पादात्। उत्पन्नायां तु क्रियायामभिव्यक्तौ वा कस्मान्न करोति। न हि क्रियाविनाशस्य क्वचिदुपयोगः। तस्मादकामेनापि त्वया सत्या एव क्रियाया व्यञ्जकत्वमनुग्राहकत्वं चाङ्गीकर्त्तव्यम्, तच्चैतदुभयमपि चित्रमित्यर्थः। अपि च साऽसती चेत्क्रियाऽभिव्यनक्ति, तथा सति असत्तायाः सर्वत्र सुलभत्वान्न किञ्चिदपूर्वं नाभिव्यक्तमिति क्रियाविलोपः प्रयत्नविलोप इत्यर्थः।

अत्र शब्दं प्रमाणान्तरमसहमानो दिङ्नागस्तल्लक्षणं विकल्प्याक्षिपति—आप्तोपदेश इति। अन्यस्मादन्यस्य निश्चयो न तावदसम्बन्धादतिप्रसङ्गात्। न च शब्दोऽर्थात्मनाप्यर्थकार्यः, विनाप्यर्थं पुरुषविवक्षामात्रादेव तदुत्पादात्। तस्मान्न साक्षाच्छब्दादर्थनिश्चयः, विवक्षाकार्यतया तु विवक्षां गमयेत्। सा चार्थाभिप्रायपूर्वा, अभिप्रायश्च कश्चिन्मनोमात्रयोनिरपरस्तु प्रमाणमूलः, तत्र यः प्रमाणनिश्चितमर्थं विवक्षति यथाविवक्षमुच्चारयति स आप्तः, तस्य वचनात् कार्यात् कारणं विवक्षा अनुमीयते, तस्याश्च कारणमर्थज्ञानम्, ततश्चार्थज्ञानस्यार्थकार्यत्वादिति प्रमाणगतिः। तत्राप्तोपदेश इत्यत्रोपदेशक्रियया उपदेष्टार उपस्थापिताः, ते च प्रायेण विसंवादका दृष्टा इत्याप्तग्रहणेन तेषामविसंवादित्वम्, ततश्चोपदेशादर्थनिश्चयो भवत्वित्येतदर्थं यद्युच्यते इत्याह—यद्याप्तानामिति, उपदेष्टॄणामित्यर्थः। इमं कल्पं दूषयति—तदनुमानात्। अविसंवादित्वमुपदेष्टुरानुमानिकम्, तादृशस्य वचनमर्थनिश्चये अनुमानमेव। तथा हि यद् यन्निर्दोषसत्त्वीयं वचनं तत्सर्वमर्थवद्, यथा बुद्धस्य क्षणिकनैरात्म्यादिविषय उपदेशः, तथा चायं विवादाध्यासित उपदेश इति। यथोक्तं भदन्तेन आप्तवाक्याविसंवादसामान्यादनुमानतेति। द्वितीयं कल्पमातिष्ठते—अथार्थस्य तथाभावः। अत्र हि उपदिश्यत इत्युपदेशोऽर्थ उच्यत इति आप्त्युपदेशो(१) यस्मात्स तथोक्तः। एतदुक्तं भवति यस्माच्छब्दादवगम्यार्थं प्रवर्तमानः प्राप्नोति

(१) "आप्त उपदेशो" इतीत्थं पाठः समुचित इति मन्ये।

न्यायवार्त्तिकम्

यदा ह्ययमर्थं प्रत्यक्षेणोपलभते तदा तथाभावमर्थस्य प्रतिपद्यत इति। तन्न, सूत्रार्थापरिज्ञानात्। नायं सूत्रार्थः आप्तोपदेशः शब्द इति, अपि त्विन्द्रियसम्बद्धासम्बद्धेष्वर्थेषु या शब्दोल्लेखेन प्रतिपत्तिः साऽऽगमार्थः। तस्मादसम्बद्धोऽयं विकल्पः ॥ ७ ॥

न्यायवार्त्तिकतात्पर्य्यटीका

तमेवार्थम्, स आप्तोपदेशः शब्दः प्रमाणम्। एवं शब्देन योऽर्थो दर्शितस्तस्याप्त्या तथाता दर्शिता, तदिदमुक्तमर्थस्य तथाभाव इति। दूषयति—सोऽपीति। तदेव स्फुटयति—यदा हीति। आप्त्या हि तथात्वं विनिश्चिन्वन् अर्थस्य नाप्रतिपन्नतया निश्चेतुमर्हति, प्रतिपत्तिश्च प्रायेण प्रत्यक्षेणेति प्रत्यक्षत इत्युक्तम्। तमिममाक्षेपमपाकरोति—तन्नेति। नासत्वसहायः शब्दोऽर्थं बोधयतीति सूत्रार्थः। नापि शब्दार्थप्राप्त्या शब्दार्थतथात्वमिति। कस्तर्हीत्यत आह—अपि त्विति। इन्द्रियसम्बद्धासम्बद्धेष्विति दृष्टादृष्टेष्वित्यर्थः। यथोक्तम्—स द्विविधो दृष्टादृष्टभेदादिति(१)। एतदुक्तं भवति नाप्तत्वहेतुकमविसंवादित्वमनेन सूत्रेणागमार्थतया प्रतिपाद्यते, नाप्त्यर्थतथात्वमागमार्थतया प्रतिपाद्यते, नाप्यागमः प्रत्यक्षानुमानाभ्यां न भिद्यते, किन्तु उपदेशः शब्द इत्युक्तम्। उपदेश इति च कारकपदम्, उपदिश्यते ज्ञाप्यते प्रयोजनवानर्थोऽनेनेति। तथापि वातिकाद्युपदेशोऽपि शब्दः स्यादित्यत उक्तम्—आप्तेति। नोपदेशपदादेवागमस्य वाक्यार्थप्रतिपत्तिफलमुक्तम्, तदिदमुक्तम्—या शब्दोल्लेखेन पदार्थस्मरणावान्तरव्यापाराच्छब्दादेवार्थं प्रत्येमीत्यनेनोल्लेखेन प्रतिपत्तिरागमार्थः (२)फलमिति। आप्तत्वं चागमस्यार्थं प्रत्याययित्वा स्वस्याव्यभिचारित्वम्, न च यतः प्रामाण्यमवगम्यते ततः प्रमेयमपि, तथा च सति प्रामाण्यज्ञानहेतोरनुमानादेव प्रत्यक्षादिप्रमेयावगतिरिति प्रत्यक्षादीनामप्रामाण्यप्रसङ्गः। तस्मिंश्चासति कस्यानुमानमपि प्रामाण्यमवधारयेत्। न चाप्तवाक्यं कार्य्यं स्ववक्तृज्ञानानुमानद्वारेणार्थेऽप्यनुमानमेव त्वर्थस्य प्रत्यायकमिति साम्प्रतम्। यदि हि नार्थं प्रत्याययेज्ज्ञानमात्रमनुमापयेत्, तथा च नार्थविशेषसिद्धिः। न च ज्ञानस्यार्थादन्योऽस्ति कश्चिद्विशेषः तस्माद्वक्तृज्ञानविशेषणाय पूर्वं शब्दादेव केवलाद्वाक्यार्थज्ञानमेषितव्यम्। एवञ्च कृतं वक्तृज्ञानानुमानेनार्थप्रतिपत्त्यर्थेन केवलं प्रामाण्यज्ञानाय तदुपयोग इति। न चाविनाभाव एव सम्बन्धो येन शब्दार्थयोरसम्बन्धेन गम्यगमकत्वं न स्यात्। अस्ति साङ्केतिकः सम्बन्धोऽनयोरिति वक्ष्यते (३)। न चाविनाभावः प्रत्यायनाङ्गम्, चक्षुरादयो नीलादिभेदव्यभिचारिणोऽपि दृष्टास्तत्प्रतिपादका इत्युक्तम्। तस्मात् पदानि कृतसङ्केतानि स्वार्थं स्मारयित्वा आकाङ्क्षायोग्यतासत्तिसध्रीचीनानि अदृष्टपूर्वं वाक्यार्थं बोधयन्ति, न सङ्गतिग्रहणमपि प्रतीक्षन्त इति दूरेऽनुमानाद्भवन्ति। यथा त्वेतत्तथोद्देशे (४) लेशत उक्तम्, उपपादितं च तत्त्वबिन्दौ। तस्मात्सर्वमवदातम् ॥ ७ ॥

(१) एतत्तु अव्यवहितपरवर्त्ति सूत्रम्, तत्र तु "दृष्टादृष्टार्थत्वात्" इति पाठभेदः। (२) "प्रतिपत्तिः साऽऽगमार्थ" इति वार्त्तिकपाठः। (३) २।१।५२ सूत्रटीकायाम्। (४) ९ पृ: २४ पं।

(सू)—स द्विविधो दृष्टादृष्टार्थत्वात् ॥ ८ ॥

न्यायभाष्यम्

यस्येह दृश्यतेऽर्थः स दृष्टार्थः। यस्याऽमुत्र प्रतीयते सोऽदृष्टार्थः। एवमृषिलौकिकवाक्यानां विभाग इति। किमर्थं पुनरिदमुच्यते? स न मन्येत दृष्टार्थ एवाऽऽप्तोपदेशः प्रमाणम्, अर्थस्याऽवधारणादिति, अदृष्टार्थोऽपि प्रमाणमर्थस्याऽनुमानादिति ॥ ८ ॥

इति प्रमाणभाष्यम्।

न्यायवार्त्तिकम्

स द्विविध इति नियमार्थम्। अनेकधा भिन्न आगमः प्रत्यक्षानुमानविषयतायामेव व्यवतिष्ठते इति। वक्तृभेदेन वा द्वैविध्यं दृष्टादृष्टार्थप्रवक्तृकत्वात्। प्रत्यक्षत उपलब्धार्थः दृष्टार्थः। अनुमानोपलब्धार्थोऽदृष्टार्थः। ऋष्यार्यम्लेच्छानामेतत् समानं लक्षणमिति(१)। सर्वेषामागमेन व्यवहारदर्शनादनियमः। एवं चत्वार्येतानि प्रमाणानि यैर्देवमनुष्यतिरश्चां व्यवहारः कल्प्यत इति ॥ ८ ॥

इति प्रमाणवार्त्तिकम् ॥

न्यायवार्त्तिकतात्पर्य्यटीका

स द्विविधो दृष्टादृष्टार्थत्वादिति सूत्रस्य तात्पर्यमाह—नियमार्थम्। तद्विभजते—अनेकधेति। दृष्टादृष्टार्थत्वादिति भाष्यमतेन व्याचष्टे—प्रत्यक्षेति। आप्तप्रणीतत्वलिङ्गानुमितप्रामाण्यशब्दैकविषयस्वर्गयागादिसम्बन्धादीनामनुमानविषयता। तथाऽऽह भाष्यकारः—यस्यामुत्र प्रतीयते सोऽदृष्टार्थ इति। अदृष्टार्थोऽपि प्रमाणमर्थस्यानुमानादिति, न दृष्टोऽर्थो यस्यागमस्य स तथा, एवमितरोऽपीति। तदेव भाष्यमतेन व्याख्याय स्वमतेन व्याचष्टे--वक्तृभेदेनेति। दृष्टोऽर्थो येन स दृष्टार्थः प्रवक्ता, एवमदृष्टोऽनुमितोऽर्थो येन स तथा, ऋषयोऽस्मदादयश्च (२)। अनुमितार्था अस्मदादय एवेति। एवमपि शब्दद्वैविध्यसाधने मा भूदपक्षधर्मतेति प्रवक्तृपदेन पूरयति—दृष्टादृष्टार्थ-

वृत्तिः

विभजते—(स द्विविध इति)। सः—प्रमाणशब्दः। शब्दतदुपजीविप्रमाणातिरिक्तप्रमाणगम्यार्थको दृष्टार्थकः। शब्दतदुपजीविप्रमाणमात्रगम्यार्थकोऽदृष्टार्थकः। तथा च दृष्टार्थकत्वादृष्टार्थकत्वभेदात् प्रमाणशब्दस्य द्वैविध्यमित्यर्थः ॥ ८ ॥

समाप्तं प्रमाणलक्षणप्रकरणम् ॥ २ ॥

---

(१) समममूतभाष्य एवं ग्रन्थोऽस्ति, अत केवलम् "एतत्" इत्याधिकम्। (२) "दृष्टार्था ऋषयोऽस्मदादयश्च" इतीयं पाठो भवितुमुचित इति मन्ये।

न्यायभाष्यम्

किं पुनरनेन प्रमाणेनाऽर्थजातं प्रमातव्यमिति ?—

(सू)—आत्मशरीरेन्द्रियार्थबुद्धिमनःप्रवृत्तिदोषप्रेत्यभावफलदुःखापवर्गास्तु प्रमेयम् ॥ ९ ॥

न्यायवार्त्तिकम्

किं पुनः***(१) प्रमेयविशेषविषयत्वात् नायं प्रमेयविशेषः प्रमेयमात्रस्य प्रमाणलक्षणोद्देशेन बोधितत्वात् प्रमेयविशेषावधारणा न सिध्यति, तत् प्रमेयं यदनेन यथावत्परिज्ञायमानमपवर्गाय। अपरिज्ञायमानश्चासावात्मेति। एतदर्थप्रकाशनायात्मादिसूत्रम्। अयमेव च सूत्रार्थ इति। अत्रापि (समान) (?) यथावचनं विग्रहः उभयावधारणप्राप्तावन्यतरावधारणे

न्यायवार्त्तिकतात्पर्य्यटीका

प्रवक्तृकत्वादिति। अदृष्टार्थः प्रवक्ता यस्यागमस्य स तथोक्तः। अस्यार्थं सविग्रहं करोति—प्रत्यत्तत इति। शेषं सुबोधम्। न सामान्यतोदृष्टानां वाक्यानां प्रामाण्यम्। स इति (२) विप्रकृष्टो नास्तिकः परामृष्यत इति भाष्ययोजनिका। परिशिष्टं तु परीक्षापर्वणि(३)निवेदयिष्यते ॥८॥

इति प्रमाणटीका।

इह प्रमेयं हेयोपादेयभावेनावस्थितं मुमुक्षुणा प्रतिपित्सितम्, तच्च परीक्षितस्वप्रमाणविशेषाधीनप्रतिपत्ति, लक्षणं चास्य प्रमाणविशेषः। न चावान्तरप्रमाणसामान्यप्रत्यक्षादिलक्षणमन्तरेणात्मादिप्रमाणावतारः कर्तुं शक्यः, तस्य प्रत्यक्षादिसामान्यविशेषत्वात्, अतः प्रत्यक्षादिलक्षणानन्तरं तदवतारः। अपरीक्षितं च न तत्त्वनिर्णयाय पर्य्याप्तमिति परीक्षा विधायिष्यते (४)। तत्परिकरश्च संशयादय इति युक्तं तेषां पश्चाल्लक्षणम्। तदिह प्रमेयलक्षणाय तद्विभागोद्देशसूत्रमवतारयितुं भाष्यकारः पृच्छति स्म—किं पुनरनेन प्रमाणेनेति। जात्यभिप्रायमेकवचनम्, प्रकृते प्रमेये यथायथं प्रमाणानामुपयोगात्, तदेतद्भाष्यमनूद्य वार्तिककार आक्षिपति—किं पुनरिति। प्रमेयनान्तरीयकत्वं प्रमाणानां सामर्थ्यम्। समाधत्ते—नेति। प्रत्यक्षादिलक्षणसामर्थ्यात् प्रमेयमात्रं सिद्धम्, विशिष्टं तु प्रमेयमद्यापि न सिध्यतीति तदर्थं प्रश्नः। स च विशेषो यथावदिति न (५) दर्शित इति अयमेव च सूत्रार्थ इति। येषां तत्त्वज्ञानातत्त्वज्ञानाभ्यामपवर्गसंसारौ भवतः,

---

(१) आदर्शपुस्तकसम्पादकैरव एवमेव तारकाचिह्नयोगेन ग्रन्थमुद्रणं कृतम्, परन्तु पादटीकायामावेदितं यत्—तेषामादर्शेषु कुत्रापि एतदंशः पतितः, कुत्रापि च खण्डित इति। (२) एतत्सूत्रभाष्ये "स न मन्येत" इत्यादि ग्रन्थः, तद्घटकं "स" इति पदं परामृष्टं "स" इति इत्यनेन। (३) २।१।५२ सूत्रादारभ्य कतिपयसूत्रपर्य्यन्तं शब्दपरीक्षापर्व्व। (४) तृतीयाध्यायादारभ्य चतुर्थाध्यायस्य प्रथमाह्निकपर्य्यन्तग्रन्थेन। (५) "क" वार्त्तिके ६२ पृः पादटीकारूपेणोद्धृते तात्पर्य्यपाठे "न"कारो नास्ति।

न्यायवार्त्तिकम्

दोषः। किं पुनरत्राऽवधार्यते—किमात्माद्येव प्रमेयम् अथ प्रमेयमेवात्मादीति। यद्यात्माद्येव प्रमेयम्, दिगादीनां सामान्यविशेषसमवायानां सूत्रेऽनभिधानादव्यापकम्। अथ पुनः प्रमेयमेवात्मादि तथा च "प्रमेया च तुलाप्रामाण्यवदि"ति (१) व्याघातः। तत्र सुवर्णादि द्रव्यपरिच्छेदसाधनत्वात् परिच्छेद्यत्वाच्च प्रमाणप्रमेयशब्दाभिलाप्यम्। लोकविरोधश्च एकस्यानेककारकवाच्यत्वात् वृक्षस्तिष्ठतीति। यथा तत्रैकं वृक्षाख्यं वस्त्वनेकेन कारकशब्देनोच्यते तस्य तस्य निमित्तस्य सन्निपातात्। एवं प्रमेयं प्रमाणमिति, न, सूत्रार्थापरिज्ञानात्। आत्माद्येव प्रमेयं यथावत् परिच्छिद्यमानमपवृत्तये भवतीत्ययं सूत्रार्थो, न प्रमेयान्तरनिराकरणार्थः सूत्रारम्भः। प्रमेयमेवात्मादीति न दोषः। किमुक्तं भवतीति? मुमुक्षुणा प्रमेयमेवात्मादि बोद्धव्यमेव। नास्य प्रमेयत्वं विधीयते, नान्यस्य च प्रमेयत्वं निराक्रियते, अपि तु मुमुक्षुणा बोद्धव्यमेवैतदित्यनूद्यते, तस्मादुभयमवधार्यते। न च यथोक्तदोषः। उपेत्य ब्रूमो दिगाद्यप्यत्रैव लभ्यते उपपत्तिसामर्थ्यात्। का पुनरुपपत्तिः? प्रवृत्तेर्विंशतिभेदात् तत्संस्कारकत्वेऽपि न दिगादयोऽपि लभ्यन्ते, सामान्यविशेषसमवायाश्च विशेषणविशेष्यभावेन, आत्मादयो विज्ञेयत्वेनोपदिष्टाः तेषां चेतरेतरव्यवच्छेदकभावेन सामान्यविशेषसमवाया विशेषणं कृतं सूत्रे इति। न पुनरिदं प्रमेयावधारणार्थं सूत्रम्, न तु प्रमेयविशेषावधारणार्थम्, प्रमेयमात्राव-

न्यायवार्त्तिकतात्पर्यटीका

त एत एव न न्यूना नाधिका इत्यर्थः। प्रथमसूत्रव्यवस्थामतिदिशति—अत्रापीति। उक्तमर्थमनाकलयन्नाक्षिपति—उभयेति। दिगादीनामिति। द्रव्येषु दिक्कालपरमाणूनामनभिधानात्। वृक्षस्तिष्ठतीति। इतिशब्द आद्यर्थे, तेन वृक्षं पश्यति, वृक्षेण चन्द्रमसं पश्यतीत्यादयो वेदितव्याः। समाधत्ते—न, सूत्रार्थापरिज्ञानादिति। न प्रमेयपदं प्रमेयमात्रे वर्त्तते किन्तु यत्तत्त्वतो ज्ञायमानमपवर्गसाधनं तस्मिन्, तच्चात्माद्येव नान्यदिति युक्तोऽन्ययोगव्यवच्छेद इत्यर्थः। अयोगव्यवच्छेदेऽपि न दोष इत्याह—प्रमेयमेवेति। नन्वस्मिन् पक्षे न कदाचिदपि प्रमाणता स्यादित्यस्ति दोष इत्यत आह—किमुक्तं भवतीति। नास्य पुरुषमात्रं प्रति प्रमेयत्वं विधीयते, अपि तु मोक्षमाणशिष्यं प्रति विधीयते। अनूद्यत इति, प्रमाणान्तरमूलकत्वेन विधानदार्ढ्यं दर्शयति। उपसंहरति–तस्मादिति। कौशलमात्रमात्मनः ख्यापयितुमभ्युपेत्य समाधानान्तरमाह—उपेत्येति। प्रवृत्तिसंस्कारकत्वमस्ति दिक्कालयोः, "प्राङ्मुखोऽन्नानि भुञ्जीत" "प्राचीनप्रवणे वैश्वदेवेन यजेत" "पौर्णमास्यां पौर्णमास्या यजेत" "अमावास्यायाममावास्यया यजेते"ति श्रवणात्। कौशलमात्रमिदं न तु समाधानमित्याह—न पुनरिदमिति। विहितविधानादिति। प्रमाणविधान-

---

(१) २।१।१६ सूत्रम्। केषुचित् पुस्तकेषु "प्रमेयता च तुलाप्रामाण्यवत्" इत्येवं पाठभेदः।

न्यायभाष्यम्

तत्राऽऽत्मा सर्वस्य द्रष्टा सर्वस्य भोक्ता सर्व्वज्ञः(१) सर्वानुभावी। तस्य भोगायतनं शरीरम्। भोगसाधनानीन्द्रियाणि। भोक्तव्या इन्द्रियार्थाः। भोगो बुद्धिः। सर्वार्थोपलब्धौ नेन्द्रियाणि प्रभवन्तीति सर्वविषयमन्तःकरणं मनः। शरीरेन्द्रियार्थबुद्धिसुख(२)वेदनानां निर्वृत्तिकारणं प्रवृत्तिः, (३)दोषाश्च। नाऽस्येदं शरीरमपूर्वमनुत्तरं च, पूर्वशरीराणामादिर्नास्ति, उत्तरेषामपवर्गोऽन्त(४) इति प्रेत्यभावः। ससाधनसुखदुःखोपभोगः फलम्। दुःखमिति नेदमनुकूलवेदनीयस्य सुखस्य प्रतीतेः प्रत्याख्यानम्। किं तर्हि? जन्मन एवेदं ससुखसाधनस्य दुःखानुषङ्गात् दुःखेनाऽविप्रयोगाद्विविधबाधना-

न्यायवार्त्तिकम्

धारणार्थं च प्रवृत्तौ विहितविधानादकुशलः सूत्रकारः स्यात्। आद्येन वा सूत्रेण प्रमेयं विहितमिति पुनर्विधानादुन्मत्तवाक्यमिदं स्यात् एनं चार्थमेवार्थकं सूत्रकारः 'तु' शब्दमाह।

न्यायवार्त्तिकतात्पर्य्यटीका

सामर्थ्येन विहितमित्यर्थः। न केवलं प्रमाणविधानाक्षिप्तम्, अपित्वाद्यसूत्रगतप्रमेयपदादपि लब्धमित्याह—आद्येन वेति। एतस्मिन्नर्थे सूत्रकारस्यानुमतिमाह—एनं चार्थमिति। भाष्यम्—सर्वस्य सुखदुःखसाधनस्य द्रष्टा, सर्वस्य सुखदुःखस्य भोक्ता, यतः सुखदुःखसाधनं सर्वम्, सर्वं च सुखदुःखं जानाति, अतः सर्वज्ञः। न चाप्राप्तान्येतानि जानातीत्यत आह—सर्वानुभावी, अनुभवः प्राप्तिः। तदेतद्वैराग्योत्पादायोक्तम्, एवमुत्तरत्रापि बोद्धव्यम्। आत्मन्ययं विशेषो यदनेन रूपेण हेयः, केवलेन चोपादेयः। शरीरादीनि तु हेयान्येव। अपवर्ग उपादेय एवेति। अविद्यमानं पूर्वं शरीरं यस्य तद् अपूर्वं शरीरम्, तन्निषेधति—नास्येदमिति? प्रमेयतत्त्वमविदुष आत्मनः अविद्यमानमुत्तरं शरीरं यस्य तद् अनुत्तरम्, तदपि निषिद्धं चेत्यनुकर्षणात्। ननु यथा पूर्वेषां शरीराणामनादितेत्येवमुत्तरेषामप्यनन्तता, तथा च मोक्षमाणानां प्रवृत्तयः तदर्थानि शास्त्राणि चानर्थकानि प्रसज्येरन्नित्यत आह—उत्तरेषामिति, प्रमेयतत्त्वावगमादित्यर्थः। ननु सुखेऽप्युद्देष्टव्ये दुःखमात्रोद्देशः किं सुखं प्रत्याचष्टे? तथा चानुभवविरोध इत्यत आह—नेदमिति।

वृत्तिः

प्रमेयं विभजते, लक्षयति च—(आत्मशरीरेति)। अत्र तुशब्दः पुनरर्थे। तथा चैतेषां पुनः प्रमेयत्वम्, न तु प्रमाविषयत्वेन संयोगादीनामपि। प्रमेयशब्दो हि वादादिशब्दवत् परिभाषाविशेषेण द्वादशसु प्रवर्त्तते। तत्र च प्रकृष्टं मेयं प्रमेय-

(१) "सर्व्वज्ञ" इति ल पु नास्ति। (२) "दुःख" इत्यधिकम् आ-वि-टि०। (३) "प्रवृत्तिदोषाश्च" इति आ०। (४) "अपवर्गान्त" इति ग०।

न्यायभाष्यम्

योगाद् दुःखमिति समाधिभावनमुपदिश्यते। समाहितो भावयति, भावयन्निर्विद्यते, निर्विण्णस्य वैराग्यम्, विरक्तस्याऽपवर्ग इति। जन्ममरणप्रबन्धोच्छेदः सर्वदुःखप्रहाणमपवर्ग इति। अस्त्यन्यदपि द्रव्यगुणकर्मसामान्यविशेषसमवायाः प्रमेयम्, तद्भेदेन चाऽपरिसङ्ख्येयम्; अस्य तु तत्त्वज्ञानादपवर्गो मिथ्याज्ञानात् संसार इत्यत एतदुपदिष्टं विशेषेणेति॥ ९॥

न्यायवार्त्तिकम्

अन्यदपि प्रमेयमस्ति, यस्य तु तत्त्वज्ञानान्निःश्रेयसं तदिदं प्रमेयमिति "तु" शब्देन ज्ञापयति। सुखं पुनः कस्मादत्र नोक्तम्? किमभावादन्यत उपलब्धेर्वा, न तावदभावात्, प्रत्यात्मवेदनीयत्वात्, प्रत्यात्ममेव वेदनीयं सुखमुपलभ्यमानं न शक्यं नास्तीति वक्तुम्। न चान्यत उपलब्धिः, अस्मादेव। अनभिधानं तु वैराग्यज्ञापनार्थम्। कथम्? नायं मोक्षमाणः सर्वं दुःखं भावयेदिति तस्य दुःखभावनार्थः सुखस्यानपदेशः। सर्वं दुःखं भावयतस्त्रैलोक्यस्यानभिरतिसंज्ञा भवति। तां चोपासीनस्य त्रैलोक्यविषया तृष्णा विच्छिद्यते। तृष्णा नाम पुनर्भवप्रार्थना। साऽस्य सर्वं दुःखमिति भावयतो न भवति, न हि कश्चिद् दुःखं प्रार्थयते। तृष्णाप्रहाणाद्यानि

न्यायवार्त्तिकतात्पर्यटीका

तदेतद्भाष्यं वार्त्तिककार आक्षेपसमाधानाभ्यां व्याचष्टे—सुखं पुनरिति। न चान्यत आत्मादिपदात्, उपलब्धिः, अस्मादेव आत्मादिभ्यो भेदेन प्रत्यात्ममुपलभ्यमानत्वादेव, निर्विद्यत इत्यस्य व्याख्यानम्—अनभिरतिसंज्ञेति, उपेक्षाबुद्धिः। निर्विण्णस्य वैराग्यमित्यस्य

वृत्तिः

मिति योगार्थः। प्रकर्षश्च संसारहेतुमिथ्याज्ञानविषयत्वं(१), मोक्षहेतुधीविषयत्वं वा। रूढ्या च तावदन्यान्यत्वमर्थः। लक्षणमपि तदेव। प्रमेयं किमित्याकाङ्क्षायामात्मादयो दर्शिता इत्यतो वचनभेदेऽपि नाऽनन्वयः। वेदाः प्रमाणमित्यादावप्येवम्। अन्यथा आत्मसूत्रे विगतिः स्यात्। तथा च वक्ष्यते (२)।

प्रमेयत्वेनैक्यमिति प्रतिपादनाय अन्यतमाज्ञानेऽपि नापवर्ग इति प्रतिपादनाय वा प्रमेयमित्येकवचनमित्यन्ये। तच्चिन्त्यम् (३)।

---

(१) मिथ्याज्ञानविषयत्वस्य प्रकर्षरूपतास्वीकारो न सर्वजनरुचिकर इति कल्पान्तरमाह—मोक्षहेत्वित्यादि। (२) १।१।१० सूत्रस्य वृत्तौ। (३) अत्रेदं चिन्ताबीजं यत् प्रमेयत्वेनैक्यप्रतिपादनायैव यद्येकवचनं तर्हि "प्रत्यक्षानुमानोपमानशब्दाः प्रमाणानि" इत्यत्र प्रमाणत्वेनैक्यप्रतिपादनाय प्रमाणशब्दोत्तरमपि तथा प्रसङ्गः। "अन्यतमाज्ञानेऽपि नापवर्गः" इत्येतत्प्रतिपादकत्वञ्च एकवचनस्य कष्टकल्पनालभ्यमिति।

न्यायभाष्यम्

तत्राऽऽत्मा तावत्प्रत्यक्षतो न गृह्यते। स किमाप्तोपदेशमात्रादेव प्रतिपद्यत इति? (१) नेत्युच्यते। अनुमानाच्च प्रतिपत्तव्य इति। कथम्?

(सू)—इच्छाद्वेषप्रयत्नसुखदुःखज्ञानान्यात्मनो लिङ्गमिति॥१०॥

न्यायवार्त्तिकम्

पुनर्भवसाधनानि, तानि नोपादत्ते। तदनुपादानादनागतौ धर्माधर्मौ न भवतः। यावप्युत्पन्नौ तावप्युपभोगात् क्षयं गच्छतः। सोऽयं धर्माधर्मलक्षणस्य संसारबीजस्य उच्छेदादपवृज्यते न पुनर्जायत इति, अस्यार्थस्य प्रदर्शनार्थं सुखानभिधानमिति ॥ ९ ॥

आत्मनः समानासमानजातीयविशेषणार्थं सूत्रम्—इच्छेति॥ आगमस्यानुमानेन प्रतिसन्धानार्थं वा। आगमेन प्रतिपन्न आत्मा, तस्यानुमानेन प्रतिसन्धानार्थम्। प्रमाणसंप्लवस्योदाहरणार्थं वा। यत्तदवोचाम प्रमाणानि संप्लवन्ते इति, तस्यायं विषयः।

न्यायवार्त्तिकतात्पर्य्यटीका

व्याख्यानं तां चोपासीनस्य, तथैव विरोधिगुणेन तृष्णा विच्छिद्यते सुखानभिधानेन दुःखपक्षनिक्षेपं सूचयति। तथा च सुखेऽस्य वैराग्यं भवतीति तात्पर्य्यार्थः ॥ ९ ॥

अपवर्गस्यात्मार्थत्वेन प्रमेयेष्वात्मनः प्राधान्यात् प्रथममात्मलक्षणसूत्रमिच्छेत्यादि, तदवतारार्थं भाष्यम्—तत्रात्मेति। अहमिति ज्ञानं गौराद्याकारं शरीरावभासनं न शक्यं घटादिज्ञानवद् द्रागात्मनि प्रमाणयितुमित्यभिप्रायः, परदेहवर्त्यात्माभिप्रायं वा। तदत्र वार्त्तिककारः सूत्रतात्पर्य्यमाह—समानेति। समानजातीयं शरीरादि, असमानजातीयं प्रमाणसंशयादि। सत्येवास्मिन् प्रयोजने प्रयोजनान्तरमन्वाचिनोति—आगमस्येति। ततश्चाप्तोक्तत्वानुमानसिद्धमपि प्रामाण्यं शब्दस्यानेन तदर्थसंवादकेनानुमानेन दृढतरं भवतीत्यर्थः। प्रयोजनान्तरं चान्वाचिनोति—प्रमाणसंप्लवस्येति। द्वावपि वा शब्दौ चार्थेऽन्वाचये द्रष्टव्यौ। तदनेन वार्त्तिकेन अनुमानाच्च प्रतिपत्तव्य इति भाष्यं व्याख्यातम्। इच्छाया आत्मलिङ्गत्वकथनपरं भाष्यं

वृत्तिः

अत्राऽपि आत्मा च शरीरं च इन्द्रियाणि चाऽर्थाश्च बुद्धिश्च मनश्च प्रवृत्तिश्च दोषाश्च प्रेत्यभावश्च फलं च दुःखं चाऽपवर्गश्चेति यथावचनं विग्रहं वर्णयन्ति। अत्र प्राधान्यात् कारणरूपप्रमेय(२)षट्कमभिधाय कार्यरूपप्रमेयषट्कमभिहितम्। तत्र पूर्वपूर्वस्य प्राधान्यात् प्रथममुद्देश इति वदन्ति ॥ ९ ॥

(१) आ-पु "इति" नास्ति। (२) नि-आ-व पु "प्रमेय" इति नास्ति।

न्यायभाष्यम्

यज्जातीयस्याऽर्थस्य सन्निकर्षात् सुखमात्मोपलब्धवान्, तज्जातीयमेवाऽर्थं पश्यन्नु-पादातुमिच्छति, सेयमादातुमिच्छा एकस्यानेकार्थदर्शिनो दर्शनप्रतिसन्धानाद्भवति (१) लिङ्गमात्मनः। नियतविषये हि बुद्धिभेदमात्रे न सम्भवति, देहान्तरवदिति। एवमेकस्या-

न्यायवार्त्तिकम्

यज्जातीयस्याऽर्थस्य सन्निकर्षादिति भाष्यम्। तत्रेच्छादीनां प्रतिसन्धानमात्मा-स्तित्वप्रतिपादकम्। तत्रेदं विचार्यते—कथमिच्छादि अनुपलभ्यमानमात्मानं गमयति? स्मृत्या सहैकविषयभावात्, यस्मादेवेच्छादयः स्मृत्या सहैकविषया भवन्ति तस्मादेककर्तृकत्वं प्रतिपादयन्ति। न हि नानाकर्तृकाणां नानाविषयाणां नानानिमित्तानां च प्रतिसन्धानमस्ति।

न्यायवार्त्तिकतात्पर्य्यटीका

यज्जातीयस्येति। यजातीयस्येति व्याप्तिस्मृतिकथनम्, तज्जातीयं पश्यन्निति पक्षधर्मोपनयः। तस्मादयं सुखहेतुरित्यनुमायादातुमिच्छति, सेयमिच्छेदृशी व्याप्तिग्रहणतत्स्मरणपक्षधर्मताग्रहणानु-मानेच्छादीनामेककर्तृकत्वं सूचयति, भेदे प्रतिसन्धानाभावेन तदनुपपत्तेः, तदिदमुक्तम्—एकस्येति। यश्चासावेकोऽनुभविता च स्मर्त्ता चानुमाता चैषिता च स आत्मा, न च शरीरमेवं भवितुमर्हति, तस्य बाल्यकौमारयौवनवार्द्धकभेदेनाऽन्यत्वात्। नेन्द्रियम्, इन्द्रियान्तरगृहीत इन्द्रियान्तरेणा-प्रतिसन्धानप्रसङ्गात् यमहमद्राक्षं तं स्पृशामीति। नापि मनः, तस्य करणत्वेनैवानुमानात्। वक्ष्यति ह्येतत्सर्वं "ज्ञातुर्ज्ञानसाधनोपपत्तेरि"त्यत्र सूत्रे (२)।

स्यादेतत्। असत्यप्यात्मनि ज्ञातरि सत्यपि च बुद्ध्यादीनां भेदे तत्सन्तानाभेदेन प्रतिसन्धानव्यवस्थोपपत्स्यत इत्यत आह—नियतविषये इति। नियतविषय इति बुद्धिभेदस्य प्रतिसन्धानमपाकरोति, मात्रग्रहणेन च सन्तानं सन्तानिव्यतिरिक्तमपाकरोति, तदभ्युपगमे वा स एवात्मेति सिद्धं नः समीहितम्। तदेतद्भाष्यमनुभाष्य वार्तिककारस्तात्पर्य्य-मस्याह—यज्जातीयस्येति। तत्र विचारमारभते—तत्रेति। पूर्वपक्षमाह—कथमिच्छादीति। परिहरति—स्मृत्येति। नन्वेकविषयाणां स्मृत्यादीनां नानाकर्तृकत्वे को विरोध इत्यत आह—

वृत्तिः

तत्र प्रथमोद्दिष्टमात्मानं लक्षयति—(इच्छाद्वेषेत्यादि)। अत्र चाऽऽत्मनः प्रत्यक्षत्वाल्लिङ्गकथनमसङ्गतम्। न च शरीरातिरिक्तात्मव्युत्पादनार्थं तदिति वाच्यम्,

(१) 'भवन्ति' इति टि०। 'भवन्ती' इति ख-ग-भा०। (२) ३।१।१७ सूत्रभाष्ये इति बोध्यम्।

न्यायवार्त्तिकम्

न हि रूपरसगन्धस्पर्शप्रत्ययाः प्रतिसन्धीयन्ते । न हि भवति यद्रूपमद्राक्षं सोऽयं स्पर्श इति । नापि भवति यत् स्पर्शमस्पार्क्षं तद्रूपं पश्यामीति । नापि देवदत्तदृष्टे यज्ञदत्तप्रतिसन्धानं दृष्टम् । न हि भवति देवदत्तो यमद्राक्षीत् यज्ञदत्तस्तमद्राक्षमिति(१) । किं कारणम् ? बुद्धिभेदानां प्रतिनियतविषयत्वादिति । प्रतिनियतविषया इतरेतरव्यावृत्तिरूपा नैरात्म्यवादिनो न भवन्तीति न युक्तं प्रतिसन्धानम्, तस्माद् यः प्रतिसन्धाता स आत्मेति ।

कार्यकारणभावात् प्रतिसन्धानमिति चेत्, अथापि मन्येथा नैककर्तृकत्वात् प्रतिसन्धानम्, किं तर्हि ? कार्यकारणभावात्, पूर्वपूर्वबुद्धिविशेषादुत्तरमुत्तरं बुद्ध्यन्तरं पूर्वबुद्धिशक्त्यनुविधानात् सकलाहितशक्तिकलापमुत्पद्यते, अतो नानात्वेऽपि बुद्धीनां कार्यकारणभावात् प्रतिसन्धानं बीजादिवदिति, तद्यथा शालिगुटिकाद्यनन्तरमङ्कुरः प्रादुर्भवति, तस्य शालिशक्त्यनुविधानं तत्पूर्वकतया व्यवतिष्ठते, अनन्तरं महाभूतैरनुगृह्यमाणमुत्तरशालिबीजं जनयति न यवबीजम्, अतत्पूर्वकत्वात्, तथेहाप्येकसान्तानिकीनां बुद्धीनां कार्यकारणव्यवस्थानात् प्रतिसन्धानम्, अतत्पूर्वकत्वात् न सन्तानान्तरबुद्धीनाम्, न पुनरेककर्तृकत्वात् प्रतिसन्धानमदर्शनात्, तदिदं प्रतिसन्धानमन्यथा भवन्नात्मनः सत्तां प्रतिपादयितुं शक्नोति । न, नानात्वस्याबाधनात्, कार्यकारणभावात् प्रतिसन्धानं ब्रुवन् न नानात्वं बाधते । किं कारणम् ? कार्यकारणभावः खलु नानात्वाधिष्ठानः, उभयपक्षसम्प्रतिपन्ने च नानात्वे न प्रतिसन्धानं दृष्टम् । कस्मात् ? अन्येनानुभूतस्यान्येनास्मरणात् । न चास्मृतं

न्यायवार्त्तिकतात्पर्य्यटीका

न हीति । नानाविषयत्व उदाहरणमाह—न हि रूपेति । नानानिमित्तत्व उदाहरणमाह—नापि भवतीति । यत् यस्मान्निमित्तात् त्वगिन्द्रियात् स्पर्शमहमस्पार्क्षं तत् तस्मान्निमित्ताच्चक्षुषो रूपं पश्यामीति । नानाकर्तृकत्व उदाहरणमाह—न हि भवति देवदत्त इति । तदेतत्किल प्रतिसन्धानं कर्तृभेदाद्देवदत्तयज्ञदत्तादेर्व्यतिरेकबलेनैककर्तृत्वं साधयतीत्युक्तम्, तदेतदनुपपन्नं भिन्नकर्तृकाद्व्यतिरेकस्योपाधिसम्भवेन स्वाभाविकप्रतिबन्धज्ञानवैकल्यात् । अस्ति हि देवदत्तयज्ञदत्तविज्ञानानां भिन्नकर्तृकत्वमकार्यकारणभावश्च, तत्र किमकार्य्यकारणभावात् प्रतिसन्धानस्य व्यतिरेक उत भिन्नकर्तृकत्वादिति सन्दिग्धव्यतिरेकत्वादसाधनाङ्गं प्रतिसन्धानमित्याशयवांश्चोदयति—कार्य्यकारणभावादिति । तदिदमुक्तम्—तदिदं प्रतिसन्धानमन्यथा भवदिति । गूढाभिप्रायः

वृत्तिः

अग्रिमपरीक्षावैयर्थ्यापत्तेः (२), लक्षणाकथनेन न्यूनत्वं चेति चेन्न(३) । लिङ्ग(४)पदस्य लक्षणार्थत्वात् । न च लिङ्गमित्येकवचनेन मिलितानां लक्षणत्वं प्रतीयते, तच्चाऽयुक्तम्,

(१) अत्र "यज्ञदत्त" इत्यनन्तरम् "अहमि"त्यध्याहार्य्यम् । (२) ३।१।४ सूत्रेण यत् शरीरातिरिक्तात्मसाधनं तद्वैयर्थ्यापत्तेरित्यर्थः । (३) "चेत्" इत्यस्मात् परं "न" नास्ति नि-पु० । (४) "तल्लिङ्ग" इति क-श्रा-त० ।

न्यायभाष्यम्

ऽनेकार्थदर्शिनो दर्शनप्रतिसन्धानात् दुःखहेतौ द्वेषः, यज्जातीयोऽस्यार्थः (१) सुखहेतुः प्रसिद्धस्तज्जातीयमर्थं पश्यन्नादातुं प्रयतते(२) एकमनेकार्थदर्शिनं दर्शनप्रतिसन्धातार-(३) मन्तरेण न स्यात्। नियतविषये बुद्धिमात्रे(४) न सम्भवति, देहान्तरवदिति। एतेन दुःखहेतौ प्रयत्नो व्याख्यातः। सुखदुःखस्मृत्या चाऽयं तत् साधनमाददानः सुखमुपलभते दुःखमुपलभते, सुखदुःखे वेदयते। पूर्वोक्त एव हेतुः। बुभुत्समानः खल्वयं विमृशति किं स्विदिति, विमृशंश्च(५) जानीते इदमिति, तदिदं ज्ञानं बुभुत्साविमर्शाभ्यामभिन्नकर्तृकं गृह्यमाणमात्मलिङ्गम्। पूर्वोक्त एव हेतुरिति। तत्र देहान्तरवदिति विभज्यते यथाऽनात्मवादिनो देहान्तरेषु नियतविषया बुद्धिभेदा न प्रतिसन्धीयन्ते

न्यायवार्त्तिकम्

प्रतिसन्धातुं शक्नोति। अकार्यकारणभावेऽनुपपत्तेः। न ब्रूमः कार्यकारणभावे दृष्टं प्रतिसन्धानम्, अपि त्वकार्यकारणभावे न दृष्टमिति अतत्पूर्वकत्वादित्युक्तम्। तस्मादयथार्थोऽयमुपालम्भ इति। तदयुक्तम्, विवादकारणाव्यतिरेकादिति। एवं ब्रुवाणो भवान् न कारणमतिरेचयति। मयोक्तं नानात्वे न दृष्टमिति। त्वं न ब्रूषेऽकार्यकारणभावान्नानात्वे न दृष्टमिति अनैकान्तिकत्वान्न विवादकारणमतिरिच्यते। तुल्यं भवतोऽपि, नानात्वेऽदर्शनादिति ब्रुवता न विवादकारणमतिरेचितं भवति। अभ्युपगमादनुत्तरं तुल्यमिति ब्रुवताऽभ्युपगतं भवति। नासाधनात्—न मया कार्यकारणभावात् प्रतिसन्धानं साध्यते अपि त्वन्यथैव तद्भवतीति हेतोरसिद्धार्थतादोषोऽभिधीयत इति, न, हेत्वर्थापरिज्ञानात्। न भवता हेतुरूपं विशेषतो व्यज्ञायि, केवलं हेतुसामान्यात्

न्यायवार्त्तिकतात्पर्य्यटीका

परिहरति—नानात्वस्येति। चोदक आह—अकार्य्येति। गूढाभिप्राय एव परिहारवाद्याह—तदयुक्तमिति। अनैकान्तिकत्वं सन्दिग्धव्यतिरेकिता। चोदक आह—तुल्यं भवतोऽपीति। सिद्धान्ती गूढाभिप्राय एवाह—अभ्युपगमादिति। चोदक आह—नासाधनादिति। असिद्धार्थताऽन्यथासिद्धार्थता हेतोर्हेतुवचनस्येत्यर्थः। संप्रति समाधाता स्वाभिप्रायमाविष्करोति—न, हेत्वर्थापरिज्ञानात्। तदेतद्विभजते—न भवतेति। कः पुनरसौ हेतुविशेष इत्यत

(१) 'यस्यार्थ' इति ज०। (२) 'प्रयत्न' इति ल०। अतःपरं "सोऽयं प्रयत्न" इत्यधिकं भा०। (३) 'प्रतिसन्धानम्' इति वि०। (४) 'बुद्धिभेदमात्रे' इति ज०। (५) ज-आ-पु "च" नास्ति। "तु" इति वि-टि०।

न्यायभाष्यम्

तथैकदेहविषया अपि न प्रतिसन्धीयेरन्, अविशेषात्। सोऽयमेकसत्त्वस्य समाचारः स्वयंदृष्टस्य स्मरणम्, नाऽन्यदृष्टस्य, नाऽदृष्टस्येति(१)। एवं खलु नानासत्त्वानां समाचारोऽन्यदृष्टमन्यो(२) न स्मरती(३)ति। तदेतदुभयमशक्यमनात्मवादिना व्यवस्थापयितुमित्येवमुपपन्नमस्त्यात्मेति ॥ १० ॥

न्यायवार्त्तिकम्

अन्यथैव भवतीति हेतुदोषोऽभ्यधायि। विशेषितं चैतत् प्रतिसन्धानम्, स्मृत्या सह पूर्वापरप्रत्ययैकविषयत्वेन प्रतिसन्धानम्, सा च स्मृतिर्भवत्पक्षेऽनुपपन्ना। कस्मात्? अन्येनानुभूतस्यान्येनास्मरणात्। न ह्यन्येनानुभूतस्यान्येन स्मरणम्, न ह्यन्येनानुभूतमन्यः स्मरति, अस्ति च

न्यायवार्त्तिकतात्पर्य्यटीका

आह—विशेषितं चैतत्प्रतिसंधानम्, तत्कथयति—स्मृत्या सह पूर्वापरप्रत्ययोरेकविषयत्वं (४)प्रतिसंधानम्, यज्जातीयं सुखहेतुचन्दनवनितादि सुखहेतु प्रतीतं स्मरामि, तज्जातीयमिमं प्रत्येमीति प्रतिसंधानम्। तदनेन शालिबीजाङ्कुरस्य परंपरया शालिबीजान्तरजननलक्षणात्प्रतिसंधानात् कार्य्यकारणभावनियताद्व्यवच्छिनत्ति। नन्वियं पूर्वापरप्रत्ययसंहतिः स्मृतिरपि कार्य्यकारणभावादेवोपपत्स्यते कृतमेकेन कर्त्रेत्यत आह—सा च स्मृतिर्भवत्पक्षेऽनुपपन्ना। पृच्छति—कस्मात्। उत्तरम्—अन्येन निमित्तेन अनुभूतस्य अन्येन निमित्तेनास्मरणात्। न हि भवति येनैव चक्षुषा घटमद्राक्षं तेनैव त्वगिन्द्रियेण तं स्पृशामीति। निमित्तभेदे प्रतिसंधानाभावमुक्त्वा विषयभेदेऽप्याह—न ह्यन्येन स्वभावेन घटत्वादिनाऽनुभूतस्यान्येन वृक्षत्वादिना स्मरणम्, न हि भवति यमहं घटमद्राक्षं सोऽयं वृक्ष इति। कर्तृभेदे प्रतिसंधानाभावमाह—न ह्यन्येन देवदत्तेनानुभूतमन्यो यज्ञदत्तः स्मरति, न हि भवति योऽहं देवदत्तोऽद्राक्षं सोऽहं यज्ञदत्तः स्मरामीति। न चेदं सत्यपि भेदे कार्य्यकारणभावात् प्रतिसंधानं भवितुमर्हति, न हि यत्र स्फुटतरः कार्य्यकारणभावः तन्तुपटयोर्घटकपालयोर्वा दृश्यते तत्र प्रतिसंधानं भवति ये तन्तवः स एव पट इति वा,

वृत्तिः

वैयर्थ्यादिति वाच्यम्। किं लक्षणमित्याकाङ्क्षायामिच्छादीनामभिधानात् मिलितं लक्षणमिति प्रत्यायकाभावात्। तथा च प्रत्येकमेव लक्षणम्। अत्र **ज्ञानेच्छाप्रयत्ना**नामात्ममात्रस्य लक्षणत्वम्, **सुखदुःखद्वेषाणां** संसारिणो लक्षणत्वमिति(५) ॥ १० ॥

---

(१) "नाऽदृष्टस्य" इति ज-आ-पु नास्ति। (२) "मन्ये" इति ज-आ०। (३) "स्मरन्ति" इति ज-आ०।
(४) 'पूर्वापरप्रत्ययैकविषयत्वेन" इति वार्त्तिकपाठः। (५) "लक्षणत्वादिति" ल०।

न्यायवार्त्तिकम्

स्मृतिः, तस्मात् यस्मिन् पक्षे स्मृतिः सम्भवति तत्र प्रतिसन्धानमिति न्याय्यम्(१)। भवानस्मान् स्मृत्यनुपपत्या भावयति, न हि नः पक्षे स्मृतिर्न सम्भवति। कथमिति ? कार्यकारणभावादेव यत्कायचित्तसन्ताने स्मृतिरनुभवो वोत्पद्येते (२) स कायचित्तसन्तानः स्मर्ता चानुभविता च

न्यायवार्त्तिकतात्पर्य्यटीका

यो घटक्षणः स एव कपालक्षण इति वा। वस्तुतः कार्य्यकारणभूतानामगृहीतभेदानां प्रतिसंधान-हेतुभावः, सभागेषु क्षणेषु तथा दर्शनादिति चेत् तन्न, आमलकफलस्यैकस्यापनये तत्रैव स्थाने आमलकान्तरावस्थापने भवति प्रतिसंधानम्, न च तयोरामलकयोरस्ति कार्य्यकारणभावः। पूर्वा-परप्रत्यययोः स्मृत्या सहैकविषयत्वं कर्त्तरि कार्य्यकारणभावनिबन्धनं न कर्म्मणीति चेत्? हन्त नैरात्म्यसाक्षात्कारसात्मीभावेऽप्यस्ति विज्ञानानां कार्य्यकारणभाव इति तन्निबन्धनं प्रतिसंधानं पूर्ववदेव प्रसज्येत। सैव चात्मदृष्टिर्दोषाणां निदानं परममिति व्यर्थो नैरात्म्यसाक्षात्कारसात्मी-भावप्रयासः। अथासदपि प्रतिसंधानं कार्य्यवशादाह तथागतो नट इव रामत्वमात्मनः, यदि तत्कार्य्यकारणभावनिबन्धनम्, कथमसत्कार्य्यं कथमाहार्य्यम्। अथ कार्यकारणभावोऽप्यवस्तु-सन् कल्पनामात्रनिबन्धनः, स तर्हि तादृशः शालिबीजस्योत्पादं वास्तवं न नियन्तुमर्हति, न जातु कल्पितवह्निभावो माणवको दहनपाकयोरुपयुज्यते। न च प्रत्ययानां भेदाग्रहात् प्रति-संधानमिति सांप्रतम्, प्रवृत्तिविज्ञानानां रूपादिविषयाणां भेदेन पृथग्जनैरपि प्रतीयमानत्वात्। आलयविज्ञानस्य च प्रवृत्तिविज्ञानातिरिक्तस्यानुपलब्धेः(३)। अहमिति च सत्त्वदृष्टेः क्षणिकत्व-निराकृतावसति बाधके स्थिरवस्तुविषयत्वात्। तस्मात् स्मृत्या सह पूर्वापरप्रत्यययोरेक-विषयत्वलक्षणस्य प्रतिसंधानस्यानेककर्तृकत्वाद् व्यतिरेको निरुपाधिरेककर्तृकत्वं साधयति, स चैकः कर्त्ता शरीरेन्द्रियबुद्धिभ्यो भिन्न आत्मेति सिद्धम्। तदनेनाशयेनोक्तम्—अस्ति च स्मृति-रुक्तरूपा। तस्माद् यस्मिन् पक्षे स्मृतिः सम्भवति तत्र प्रतिसन्धानं न्याय्यमिति। स च कर्त्रेकत्वपक्ष इति भावः। आशयमविद्वान् पुनः परः प्रत्यवतिष्ठते—भवानिति। पर एवैकग्रन्थे-नाह—कथमिति, कथं न सम्भवतीत्यर्थः। स्यादेतत्, योगिचित्तमपि सर्वज्ञस्य चेतस आल-म्बनप्रत्यय इति तस्यापि योगिचित्तेन प्रतिसन्धानं स्यादित्यत आह—यत्कायेति। एतदुक्तं

(१) "प्रतिसन्धानं न्याय्यमिति" इति तात्पर्य्यं। (२) "वोत्पद्येते" इत्यत्र "वा"कारः चकारार्थकः, अत एव क्रियायां द्विवचनप्रयोगः। (३) "अयं घट इत्यादिज्ञानं प्रवृत्तिविज्ञानम्, अहं जानामीत्यादिज्ञानम् आलय-विज्ञानम्, क्षणिकविज्ञानवादिनां बौद्धानां मते तादृशम् अहं ज्ञानमेवात्मा, स्वमते तु "अहं" पदार्थस्यात्मनः सुखादिविशेषगुणयोगं विना प्रत्यक्षाभावात् तथाविधस्य आलयविज्ञानस्य अवश्यम् आत्मव्यतिरिक्तपदार्थ-विषयकत्वमपि स्वीकार्य्यमिति तत्र तादृक् पदार्थगोचरप्रवृत्तिसाधनत्वेन प्रवृत्तिविज्ञानत्वमप्यवश्यं पर्य्यवस्यतीति प्रवृत्तिविज्ञानातिरिक्तालयविज्ञानस्यानुपलब्धिः"।

न्यायवार्त्तिकम्

भवति। न, अस्थिरत्वाद् बुद्धीनाम्। स्थिरं हि वासकेन वास्यमानं दृष्टं न च बुद्धीनां स्थिरत्वमस्ति, असम्बन्धाच्च—असम्बद्धं च वासकेन वास्यमानं दृष्टम्, न च वासकेन सम्बन्धो बुद्धीनामस्ति। शक्तिविशिष्टचित्तोत्पादो वासनेति चेद् अथाप्येवं कल्प्येत पूर्वचित्तसहजाच्चेतनाविशेषात् पूर्वशक्तिविशिष्टं चित्तमुत्पद्यते सोऽस्य शक्तिविशिष्टचित्तोत्पादो वासनेत्युच्यते। अत्रोक्तमस्थिरत्वाद्वासकेनासम्बन्धाच्चेति।

यश्चासौ चेतनाविशेषः पूर्वचित्तसहभावी स नापि वर्त्तमाने चेतस्युपकारं करोति नाप्यनागते। कथमिति? वर्तमानं तावदविकार्यं यथाभूतं जायते तथाभूतमेव नश्यति, अनागते सोऽपि न सम्बध्यते न चासम्बद्धं वासयतीत्युक्तम्। तस्मात् कार्यकारणभावात्

न्यायवार्त्तिकतात्पर्य्यटीका

भवति उपादानोपादेयभावेनावस्थितः चित्तप्रवाहः सन्तानः, न च योगिचित्तमुपादानं सर्वज्ञस्य चेतसः, आलम्बनप्रत्ययो हि तदिति। कायग्रहणं च एकसन्तानोपलक्षणपरम्, तेन जन्मान्तरेऽपि स्मृतिरुपपन्नेति। तमिममस्मदभिप्रायानभिज्ञं परमन्यथापि बोधयितुं विभवाम इति सिद्धान्त्यन्यथा स्मृत्यनुपपत्तिमाह—नअस्थिरत्वात् बुद्धीनाम्। न ह्यजातानन्वयध्वस्तयोरस्ति कश्चिद् विशेष इति पूर्वोत्पन्नोऽनुभवः काञ्चन वासनामाधाय प्रध्वंसते, यया कालान्तरे स्मृतिराधीयत इत्यभ्युपगन्तव्यम्। न चास्थिरा बुद्धिः शक्या वासयितुम्, इत्यात्मा स्थिरोऽभ्युपेय इत्यर्थः। युक्त्यन्तरमाह—असंबन्धाच्चेति, न च बुद्धीनामसमानकालानामस्ति संबन्ध इत्यर्थः। पुनः परः प्रत्यवतिष्ठते—शक्तीति। नास्माकं क्षणिकवस्तुवादिनामस्ति तज्जगति यदवस्थितं वासकेन वास्यमानं दृष्टमिति भावः। ननु तथाऽप्यसमानकालतया संबन्धरहितमशक्यं वासयितुमिति ग्रहणकवाक्यविवरणव्याजेनापाकरोति—अथापीति। पूर्वचित्तं प्रवृत्तिविज्ञानं यत्तत् षड्विधम्, पञ्च रूपादिज्ञानान्यविकल्पकानि, षष्ठं च विकल्पविज्ञानम्, तेन सह जातः समानकालः चेतनाविशेषस्तदालयविज्ञानमित्युच्यते। अहंकारास्पदं स्मृतिशक्तिः, सा च न शक्तात्तज्ज्ञानादतिरिच्यते, तेन कथञ्चिद्भेदविवक्षया शक्तिविशिष्टमित्युच्यते। सिद्धान्तवाद्याह—अत्रोक्तमिति। उपपादयिष्यते (१) हि भावानां सर्वजनप्रतीतिसिद्धा स्थिरता क्षणभङ्गनिराकरणेन, तथा च स्थिरस्य संबद्धस्य च वस्त्रादेर्मृगमदादिना वास्यत्वं दृष्टमिति नास्थिरेऽसंबद्धे च भवितुमर्हतीत्यर्थः।

स्यादेतत्, अस्थिरयोरपि ज्ञानयोः समानकालतयाऽस्ति संबन्ध इति कस्मादन्यतरचित्तवासितमन्यतरच्चित्तं स्मृतिं नाधत्त इत्यत आह—यश्चासाविति। वक्ष्यमाणापेक्षोऽपिशब्दः। ननु वर्त्तमाने चेतसि मा कार्षीदुपकारम् अनागते तु करिष्यतीत्यत आह—नापीति। पृच्छति—कथमिति। उत्तरम्—वर्त्तमानं तावदिति। प्रकृतमुपसंहरति—तस्मादिति। इतोऽप्य-

(१) ३ अ० २ आ०।

न्यायवार्त्तिकम्

स्मृतिरित्यशिक्षितो वासनमिति (?)। इतश्च न भवत्पक्षे स्मृतिः, भावस्य भवित्रपेक्षत्वात्। सर्वो हि भावो भवितारमपेक्षते क्रियात्वादुत्पत्तिवदिति। स्मृतेश्च भविता कर्म वा भवेत् कर्त्ता वा, तण्डुलानां पाचक इति कर्मणि, देवदत्तस्य गतिरिति कर्त्तरि। तत् न तावत्कर्मण्यसतोऽपि सम्भवात्। यदाऽविद्यमानं स्मरति तदाऽनाधारा स्मृतिः प्राप्नोति। अथ कर्त्राधारा सा, तदाऽस्मत्पक्षे प्रयुक्ता न भवत्पक्षे। कस्मात्? कर्त्तुरनभ्युपगमात्। न हि भवन्तः कर्त्तारं स्मृत्यर्थकं प्रतिपद्यन्त इति। अनाधारैव स्मृतिरिति यदाऽयं पक्षो भवति तदाऽनुमानं नास्ति, कार्यस्यानाधारस्यादर्शनादिति। कार्यं सर्वमाधारवत् दृष्टं रूपादि, तच्च स्मृतिः, तस्मादाधारवती। कार्यकारणयोर्भावभवितृव्यवहारः, कार्यक्षणो भावः कारणक्षणो भवितेति। एवं च किमन्येन भवित्रा कल्पितेनेति। तच्च न, कालभेदात् कार्यकारणयोर्भिन्नकालत्वादाश्रयाश्रितभावानुपपत्तेः कुण्डबदरादिवदिति। अथापीदं स्यात् उत्पत्तिर्भावः उत्पत्ता भवितेति स्मृतिरप्युत्पद्यते यस्मात् तस्या अप्युत्पत्तिर्भावो भविष्यति स्मृतिरप्युत्पत्त्री भवितेति। तच्च न, विरोधादनभ्युपगमाच्च। यदि स्मृतिव्यतिरिक्तोत्पत्तिः, व्याहतं भवति, स्वरूपं च वक्तव्यम्, न हि भवन्त उत्पत्तिमद्व्यतिरेकेणोत्पत्तिं मन्यन्ते। व्यतिरिक्तां चोत्पत्तिं मन्यमानेन भवता तस्याः स्वरूपं वक्तव्यम्। स्वरूपं च निरूप्यमाणं तन्त्रं बाधते। कथमिति? उत्पत्तिः स्वकारणसत्तासम्बन्धः, सत्ता वा स्वकारणसम्बन्धविशिष्टा, उभयं च तन्त्रेणाभ्युपगतमिति विरोधः। अथ स्मृत्यव्यतिरिक्तोत्पत्तिपूर्वकम्? किं क्व वर्त्तत इति शून्यमभिधानम्। उत्पत्तिर्भाव

न्यायवार्त्तिकतात्पर्य्यटीका

सत्यात्मनि विज्ञानमात्रात्कार्य्यकारणभावात्स्मृतिर्नोत्पद्यत इत्याह—इतश्चेति। कस्मात्? भावस्य भवित्रपेक्षत्वात्, भाव उत्पत्तिमान् धर्म्मः, भविता धर्म्मी पाको विक्लित्तिः संयोगभेदः, स च तण्डुलावयवसमवेतोऽप्यवयवावयविनोरभेदोपचारात्तण्डुलानामित्युक्तम्। गतिः परिस्पन्दो देवदत्ते कर्त्तरीति सिद्धान्ती क्षणिकतावादिनमुत्थाप्याक्षणिकत्वाभिप्रायेण दूषयति—अनाधारैवेति। पूर्वपक्षी क्षणिकत्वाभिप्रायेणाह—कार्य्येति। सिद्धान्तवाद्यक्षणिकत्वाभिप्रायेण परिहरति—तच्च नेति। समानकालयोराधाराधेयभावो दृष्टो यथा कुण्डबदरयोः स्थिरमेव हि कुण्डं स्थिरस्यैव बदरस्य गुरुत्वेन पततो गुरुत्वं प्रतिबध्नदधःपतनं निवारयदाधारो भवति। यद्युच्येत न स्मृतिर्भावः किन्तु भवित्री, उत्पत्तिरस्या भावः, न तु भवितुर्भवित्रन्तरापेक्षा युक्ता, अनवस्थापातादिति शङ्कते—अथापीदमिति। निराकरोति—तच्च नेति। विरोधादिति विवृणोति—यदीति। कस्माद्व्याहतमित्यत आह—स्वरूपं चेति। चो हेत्वर्थे, स्वरूपमुत्पत्तेरुच्यमानं स्वतन्त्रं बाधते यतः तस्माद्विरोध इत्यर्थः। अनभ्युपगमादिति विवृणोति—न हि भवन्त इति। विरोधादिति स्फोरयति—व्यतिरिक्तां चेति। तन्त्रं शास्त्रम्। शङ्कते—अथेति। तथा च न विरोधो नाप्यभ्युपगम

न्यायवार्त्तिकम्

उत्पन्नी स्मृतिरिति। यदा चोत्पत्तिः स्मृतेर्भावत्वेन विवक्षिता भवति तदेवं वक्तुं न्याय्यम्। यदा तु स्मृतिर्भावस्तदा भविन्ना भवितव्यम्। कस्मात्? भावस्य भवित्रपेक्षत्वादित्युक्तम् (१) तस्मात् कथञ्च न भवत्पक्षे स्मृतिः सम्भवतीति स्मृतिमन्तरेण न प्रतिसन्धानमस्तीति। अस्ति चेदं प्रतिसन्धानम्, तस्माद् यत्कर्तृकमेतत् सोऽर्थोऽन्य एक आत्मेति।

अथवाऽन्वयेनान्यः सूत्रार्थोऽभिधीयते इति। देवदत्तस्य रूपरसस्पर्शप्रत्ययाः एकानेकनिमित्तकाः स्मृत्या सह मयेति प्रतिसन्धानात् कृतसङ्केतानां वृद्धानामेकस्मिन् नर्तकीभ्रूक्षेपे युगपदनेकप्रत्ययवत्। यथा नानाकर्तृकाणां कृतसङ्केतानां नानाभूताः प्रत्यया निमित्तस्य भ्रूक्षेपस्यैकत्वात् प्रतिसन्धीयन्ते, तथेहापि नानाविषया निमित्तस्य एकत्वात् प्रतिसन्धास्यन्ते, यत्तन्निमित्तं स आत्मेति। अथवेच्छाद्वेषप्रयत्नसुखदुःखज्ञानान्यात्मनो लिङ्गमित्यन्यथा वर्णयन्ति। गुणा इच्छादयः, गुणाः परतन्त्रा भवन्तीति न्यायः, गुणत्वं पारिशेष्यात्। न सामान्य-

न्यायवार्त्तिकतात्पर्य्यटीका

इत्यर्थः। निराकरोति—किं क्वेति। अभिधानस्वरूपमाह—उत्पत्तिरिति। अपि चोत्पत्तेर्भावत्वेऽपि न स्मृतेर्न भावः, भावत्वस्य कार्यमात्रानुबन्धित्वात्, स्मृतेश्च कार्य्यत्वात्। न चानवस्था, नित्ये व्यवस्थानात्। तथा च स्मृतेर्भावस्य भविता आत्मैव नित्यः परिशिष्यत इत्याशयवानाह—यदा चोत्पत्तिरिति। प्रकृतमुपसंहरति—तस्मादिति। तत्र सिद्धमेतत्—स्मृतिः पूर्वापरप्रत्ययाभ्यामेककर्तृका, उभाभ्यां सहैकविषयत्वेन प्रतिसन्धीयमानत्वात्। या पुनर्नाभ्यामेककर्तृका सा न तथा प्रतिसन्धीयते, यथा देवदत्तस्य स्मृतिर्यज्ञदत्तप्रत्ययाभ्याम्, न त्वियं न तथा, तस्मात्तथेति।

तदेवं व्यतिरेकिसमर्थनं कृत्वाऽन्वयव्यतिरेकिणमत्रार्थे प्रमाणयति—अथ वेति। अनेकग्रहणमनेकनिमित्तप्रतिषेधशङ्कानिरासार्थं येन प्रागनुभूता रूपादयस्तेनैव गन्ध उपलभ्यत इति खलु मयेति स्मृत्या मम प्रतिसन्धानं तस्माद्भरतमताभ्यासेनाभिनये ये कृतसङ्केतास्तेषाम्, यच्चोक्तं परैः—

"नर्त्तकीभ्रूलताक्षेपो न ह्येकः पारमार्थिकः।
परमाणुसमूहत्वादेकत्वं तस्य कल्पितम्॥" इति।

तत्राह—भ्रूक्षेपस्य एकत्वात्। न भ्रूः परमाणुसमूहोऽपि तु अवयवि द्रव्यमेकम्, तद्गतं च रेचितमपि क्रियैकैव। भवतु वा परमाणुसमूह एव भ्रूक्षेपः, तथाऽपि समूहस्य समूहिभ्योऽनन्यत्वात् परमाणव एव, तेषां च प्रत्येकमेकता, अनेकभरतमतनिपुणप्रतिपत्तृसाधारणता च। अस्ति च तेषामपि स्वगोचरो विकल्पोत्पादनपरंपरया मयेति प्रतिसन्धानहेतुभाव इति यत्किञ्चिदेकत्वं तस्य कल्पितमिति। तदेवं प्रतिसन्धानद्वारेणेच्छादीनामात्मलिङ्गत्वमुक्त्वा सम्प्रति गुणतया लिङ्गतां वार्तिककृदाह—अथ वेति। गुणत्वेनेच्छादीनां पारतन्त्र्यं रूपादिवत्साधनीयम्, तच्चानित्यत्वेनैव

(१) स्वयमेव १९१ पृष्ठे १ पंक्तौ उक्तम्।

न्यायभाष्यम्

तस्य भोगाधिष्ठानम्—

(सू)—चेष्टेन्द्रियार्थाश्रयः शरीरम् ॥ ११ ॥

कथं चेष्टाश्रयः ? ईप्सितं जिहासितं वाऽर्थ(१)मधिकृत्येप्साजिहासाप्रयुक्तस्य

न्यायवार्त्तिकम्

विशेषसमवायाः, अनित्यत्वात् । न द्रव्यं कर्म वा व्यापकद्रव्यसमवायात् शब्दवदित्यादि-सामान्यतोदृष्टमित्येतस्मिन्ननुमानं व्यवस्थितम् । एतेनानित्यत्वात् पारतन्त्र्यमिच्छादीनां कार्यत्वाच्च रूपादिवदित्युक्तम् । अयावद्द्रव्यभावित्वेन शरीरगुणत्वप्रतिषेधः (२), तत्प्रतिषेधा-च्चात्मगुणत्वमिति परिशेषात् सिद्ध आत्मेति ॥ १० ॥

चेष्टेन्द्रियार्थाश्रयः शरीरमिति । का पुनरियं चेष्टा ? हिताहितप्राप्तिपरिहारार्थः स्पन्दः ।

न्यायवार्त्तिकतात्पर्य्यटीका

सामान्यविशेषसमवायेभ्यो व्यावर्तकेन सिद्धम्, न ह्यनित्यो भावो द्रव्यात् स्वतन्त्रो भवति । तस्माद् गुणत्वसाधकादेव हेतोः पारतन्त्र्यसिद्धेः कृतं गुणत्वेन पारतन्त्र्यसाधकेनेति हृदि निधाय वार्तिककारस्तदपि पूर्वमुक्तमिति सिद्धेन पारतन्त्र्येण गुणत्वमपि साधयति । न चैतदनित्यस्य पारतन्त्र्यं द्रव्येण सिध्यति, द्रव्यकर्म्मणोरप्यनित्ययोः पारतन्त्र्यात् । तस्मादनित्यत्वसिद्धेन द्रव्यपार-तन्त्र्येण द्रव्यकर्म्मभ्यां विवेचयति—न द्रव्यं कर्म्म वेच्छादयः, व्यापकद्रव्यसमवायात् शब्दवदित्यादि, यद्यप्यनित्यत्वेन द्रव्यसमवायमात्रं सिध्यति, तथाऽपि द्रव्यकल्पनमात्रेणैवोपपत्तौ तदवयवकल्पनायां प्रमाणाभावेन तद् द्रव्यमनवयवं तावत् सिद्धम् । अनवयवद्रव्यं द्वेधा—व्यापक-मणु च । न तावदणु, तत्र तत्रेच्छादीनामुपलब्धेः । क्वचिदन्यतरकर्म्मणा क्वचित् स्वभावतस्तत्संयोगोप-पत्तौ तद्गतिकल्पनायां प्रमाणाभावात् सिद्धमस्य व्यापकत्वम्, तदेतदादिग्रहणव्याख्यानम् । तदनया वक्रोक्त्या नित्यत्वं परममहत्त्वं चाऽऽत्मनो दर्शितमिति । एतच्च सामान्यतोदृष्टमनुमानं सूत्रयता सर्वं वर्णितमित्याह—सामान्यत इति । यत्पूर्वं हृदि स्थितमिच्छादीनां पारतन्त्र्ये साध्येऽनित्यत्वहेतु-कानुमानम्, तदुद्घाटयति कार्य्यत्वमपि हेतुं समुच्चिनोति—एतेनेति । नन्वस्तु द्रव्यपारतन्त्र्यं तथाऽपि शरीरपारतन्त्र्यमस्तु, कृतमनुपलब्धचरेणात्मना ?—इत्यत आह—अयावदिति । सर्वपुरुष-साधारण्यप्रसङ्गाच्च न पृथिव्यादिगुणाः, तदुत्पत्तौ करणत्वेन कल्पनाच्च नाकर्त्तुर्मनसः, तस्माद्दृष्ट-द्रव्यातिरिक्तं द्रव्यान्तरम्, तत्रेच्छादयः, स चात्मेति सिद्धमित्याह—तत्प्रतिषेधादिति ॥ १० ॥

आत्मानं लक्षयित्वाऽऽत्मनो दुःखनिदानानामिन्द्रियादीनां सर्वेषां साक्षात्पारंपर्य्येण शरीर-माश्रित्य तन्निदानत्वमिति तदेवास्य दुःखमूलकारणमित्यनन्तरं शरीरं लक्षयितुं सूत्रम्—चेष्टेत्यादि ।

(१) "चाऽर्थम्" इति भा० । (२) आदर्शे—"शरीरे गुणत्वप्रतिषेधः" इत्येवं पाठः ।

न्यायभाष्यम्

तदुपायानुष्ठानलक्षणा समीहा चेष्टा, सा यत्र वर्त्तते तच्छरीरम्। कथमिन्द्रियाश्रयः? यस्याऽनुग्रहेणाऽनुगृहीतानि उपघाते चोपहतानि स्वविषयेषु साध्वसाधुषु वर्तन्ते स

न्यायवार्त्तिकम्

सुखसाधनोपलब्धौ तदीप्साप्रयुक्तस्य यः परिस्पन्दः सा चेष्टेति गम्यते। एवं दुःखसाधनोपलब्धौ तज्जिहासानुष्ठानलक्षणः परिस्पन्द इति। कथमिन्द्रियाणां शरीरमाश्रयः, स्वकारणवृत्तित्वादवृत्तित्वाच्च? यानि तावत्कार्याणीन्द्रियाणि तानि स्वकारणवृत्तीनि। यदकार्यं तदवृत्ति। घ्राणादीनि

न्यायवार्त्तिकतात्पर्य्यटीका

तदवताराय भाष्यम्—तस्येति, तस्येत्यात्मानं परामृशति। भोगः सुखदुःखसंवित्, तदधिष्ठानं शरीरम्, तदनेन सर्वस्यास्यानर्थसंभारस्य परमनिदानं शरीरमतस्तदेवेन्द्रियादिभ्यः पूर्वं लक्षणीयमित्युक्तम्। अत्र चेष्टाश्रयत्वेनेन्द्रियाश्रयत्वेनार्थाश्रयत्वेन च प्रत्येकं समानजातीयेभ्य आत्मेन्द्रियादिभ्योऽसमानजातीयेभ्यः प्रमाणसंशयादिभ्यः शरीरं व्यवच्छिद्यते। कथं चेष्टाश्रय इति भाष्यम्, तस्यार्थं व्याचष्टे—का पुनरिति। चेष्टा व्यापारः, स चातिव्यापकतया अव्यापकतया च न लक्षणम्, वृक्षादिषु भावात्, अभावाच्च पाषाणमध्यवर्तिमण्डूकादिशरीरे इति भावः। अत्रोत्तरभाष्यम्—ईप्सितमित्यादि, तद्व्याचष्टे—हिताहितेति। प्रयुक्तस्य उत्पादितप्रयत्नस्य, न व्यापारमात्रं चेष्टाऽभिमता, अपि तु विशिष्टो व्यापारः, स च न वृक्षादिष्वस्तीति नातिव्यापकता। यद्यपि च दारुयन्त्रादिष्वीदृशो व्यापारोऽस्ति तथापि मूर्त्तान्तराप्रयोगे (१) सतीति विशेषणान्न व्यभिचारः, तेषां शरीरे मूर्त्तेन प्रयोगात्। शरीरस्य मूर्त्तान्तराप्रयुक्तस्य ईदृशव्यापाराश्रयत्वम्, पाषाणमध्यवर्तिनश्च मण्डूकदेहस्य तद्व्यापारायोगेऽपि तद्योग्यत्वात्, पाटिते पाषाणे तादृशस्य तद्व्यापारस्य दर्शनादिति भावः। कथमिन्द्रियाश्रय इति भाष्यं व्याचष्टे—कथमिति

वृत्तिः

क्रमप्राप्तं शरीरं लक्षयति—(चेष्टेन्द्रियेत्यादि)। अत्र चेष्टादिमिलिताश्रयत्वं(२) न लक्षणम्, वैयर्थ्यात्, अपि त्वाश्रयपदस्य प्रत्येकमन्वयात् चेष्टाश्रयत्वादिलक्षणत्रये तात्पर्यम्। चेष्टात्वं च प्रयत्नजन्यतावच्छेदको जातिविशेषः। न च शरीरा-

---

(१) ननु "इतराप्रयोगे सति" इत्येवं विशेषणेनैव व्यभिचारवारणसम्भवे मूर्त्तत्वोपादानं व्यर्थमिति चेन्न, इतरपदेनाव लक्ष्यीभूतशरीरव्यतिरिक्ताभिप्रायेण प्रकृते लक्ष्ये इच्छादिप्रयुक्ततया इतराप्रयोगाभावादव्याप्तिः प्रसज्येत, इति तद्वारणार्थं तस्य सार्थक्यात्, स्वयमपि एतत्मूलटीकायाः शेषभागे 'मूर्त्तान्तराप्रयोगे सति' इत्यादिना सार्थक्यान्तरप्रदर्शनाच्च। (२) "चेष्टादीनां मिलितानामाश्रयत्वमि"ति का·श्रा·व०।

न्यायभाष्यम्

एषामाश्रयः तच्छरीरम्। कथमर्थाश्रयः? यस्मिन्नायतने इन्द्रियार्थसन्निकर्षादुत्पन्नयोः

न्यायवार्त्तिकम्

त्वक्पर्यन्तानि कार्याणि, श्रोत्रमनसी त्वकार्ये। न च घ्राणादिमनःपर्यन्तमिन्द्रियं शरीरवृत्ति, तस्मादयुक्तमिन्द्रियाश्रयः शरीरमिति। शरीरानुविधानमिन्द्रियाश्रयत्वं ब्रूमः, न पुनराधाराधेयभावेनेन्द्रियाणि शरीरे वर्तन्त इति। अपि तु शरीरस्योपघातानुविधानमिन्द्रियाश्रयत्वस्यार्थः। शरीरानुग्रहेणानुगृह्यन्ते, तदुपघाते चोपहन्यन्ते इत्ययमाश्रयार्थः, तस्मादयथार्थ आक्षेप इति। एतेनार्थानामाश्रयार्थ उक्तो वेदितव्यः। किं कारणम्? न हि गन्धादयोऽर्थाः शरीरवृत्तयः। यत्तु तेषां कार्यं सुखदुःखोपलब्धिनिमित्तत्वम्, तन्नासति शरीरे भवतीति शरीराश्रया उच्यन्ते। यथा ग्रामीणा ग्रामण्यमाश्रिता इति। कथं पुनरेते चेष्टादयः सामान्यशब्दाः सन्तो विशेषवृत्तयो भवन्तीति? सामान्यशब्दानामपि विशेषवृत्तित्वम् सामर्थ्यात्, सामर्थ्यं प्रकरणादि, ब्राह्मणान् भोजयेति यथाऽशेषब्राह्मणभोजनस्याशक्यत्वात् विशेषेण सन्निधीयमानं प्रकरणापन्नं ब्राह्मणविशेषमाह, एवं चेष्टादिशब्दानामपि सामर्थ्याद्विशेषेऽवस्थानम्। सामर्थ्यं च लोकतस्तदधिगतिः प्रमाणासम्भवो वा। लोकतस्तावत् चेष्टाशब्दं न क्रियामात्रे प्रयुङ्क्ते किन्तु विशेष इति। यथा

न्यायवार्त्तिकतात्पर्य्यटीका

संयोगितया त्विन्द्रियाश्रयत्वे घटादीनामपि शरीरत्वप्रसङ्गः, तेषामपीन्द्रियसंयोगित्वादिति भावः। यस्येत्यादिपरिहारभाष्यं व्याचष्टे—शरीरेति। एतेनेति। तदवृत्तित्वेनानुपपत्त्याऽर्थानामन्यन्यादृश आश्रयार्थो व्याख्येयः। यद्यपि गन्धादयो विषया न स्वरूपेण शरीरमाश्रयन्ते तथाऽपि यत्तेषां सुखाद्युपलम्भहेतुत्वं कार्य्यं प्रयोजनं तदर्थमाश्रयन्ते इत्यर्थः। तदनेन यस्मिन्नित्यादिभाष्यं व्याख्यातम्। चोदयति—कथं पुनरिति। परिहरति—सामान्येति। विशेषेण बुभुत्सितत्वादिना प्रकरणापन्नं नियन्त्रितं सामर्थ्यम्। प्रकरणादीत्यादिपदसंगृहीतमपरमपि सामर्थ्यशब्दार्थमाह—सामर्थ्यं चेति। अपरमप्याह—प्रमाणेति। अत्र प्रथमे पक्षे चेष्टाशब्दो व्यापार-

वृत्तिः

वयवेऽतिव्याप्तिः, अन्त्यावयवित्वेन विशेषणात्। न च निष्क्रिय(१)शरीरेऽव्याप्तिः(२), तादृशे मानाभावात्। अत एव वाऽऽह(३) इन्द्रियार्थाश्रय(४) इति। इन्द्रियाश्रयत्वं च अवच्छेदकताख्यस्वरूपसम्बन्धविशेषेण, चक्षुष्मान् देवदत्तोऽयमित्यादिप्रतीतेः। अर्थाश्रयत्वमित्यत्रार्थशब्दो न रूपादिपरः, तदाश्रयत्वस्य घटादावतिव्याप्तेः, किन्तु सुखदुःखान्यतर-

---

(१) "विनष्ट"ताधिकपाठः ल-पु०। (२) "अतिव्याप्तिरिति" आ-पु प्रामादिकः पाठः। (३) "अत एवाह" इति का-आ-नि-व०। (४) "इन्द्रियाश्रय" इति का-आ-नि-व०।

न्यायभाष्यम्

सुखदुःखयोः प्रतिसंवेदनं प्रवर्तते स एषामाश्रयः, तच्छरीरमिति ॥ ११ ॥

न्यायवार्त्तिकम्

स्पन्दते, सर्पति, धावतीति । यथैते स्पन्दादिशब्दाः क्रियावाचकाः सन्तः क्रियाविशेषेष्ववतिष्ठन्ते तथा चायं चेष्टाशब्दः । सामान्यवाच्यपि प्रमाणासम्भवात् क्रियाविशेषे वर्तते, न क्रियामात्राधारस्य शरीरव्यक्तिहेतुत्वं सम्भवतीति । एवं च घटादिष्वप्रसङ्गः । यैरप्यत्राद्यादिपदप्रयोगे

न्यायवार्त्तिकतात्पर्य्यटीका

विशेषे स्पन्दादिवन्मुख्यार्थः, तदेतत् लोकस्तावदित्यादिना तथा चायं चेष्टाशब्द इत्यन्तेन दर्शितम् । प्रमाणासंभवो वेति द्वितीयं पक्षं विवृणोति—सामान्यवाच्यपीति । अपिरभ्युपगमे, प्रमाणासंभवोऽनुपपत्तिः, सा तु "न क्रियामात्रे" इत्यनेन दर्शिता(१) । एवं चेष्टापदव्याख्यानेन, घटादिषु न शरीरत्वप्रसङ्गः । एवं भाष्यानुसारेण स्वमतेन प्रत्येकं चेष्टाश्रयत्वादिशरीरलक्षणं वर्णयित्वा समस्तमेवेदं शरीरलक्षणमिति ये वर्णयन्ति तन्मतमपाकरोति—यैरपीति । यदि आद्यपदं लक्षणं चेष्टाश्रय इति, तदा घटेन व्यभिचारः, तदर्थं द्वितीयपदोपादानम् इन्द्रियाश्रय इति, इन्द्रियसंयोगीत्यर्थः । तथापि तेनैव व्यभिचारः, घटादीनामपि प्राप्यकारित्वेनेन्द्रियाणामिन्द्रियसंयोगित्वादत आह—अर्थाश्रय इति, एवमपि व्यभिचारस्तदवस्थ एव, घटादीनामपि रूपाद्यर्थसमवायेनार्थाश्रयत्वात् । अथ समवायाभिप्रायेणाश्रयत्वम्, तथाऽपि न समवाय इन्द्रियाणां शरीरे । घ्राणस्य पार्थिवत्वेन समवायो न विरुद्ध इति चेन्न, तस्य शरीरावयवसमवायित्वेन शरीरासमवायात् । यदि नासिकाग्रमेव घ्राणम्, अथ तदाधारमतीन्द्रियम्, तथाऽपि न तत्समवेतं शरीरम्, प्रत्यक्षाप्रत्यक्षवृत्तेर्वायुवनस्पतिसंयोगवदप्रत्यक्षत्वप्रसङ्गाद्देहस्य । अपि च यदा चेष्टेन्द्रियार्थस्य समवायेन शरीरत्वम्, हन्त भो इन्द्रियसमवायिकारणेषु परमाणुषु समस्तमेतदस्तीति

वृत्तिः

परः । अत एव भाष्यम् 'यस्मिन्नायतने सुखदुःखयोः प्रतिसंवेदनं प्रवर्त्तते स एषामाश्रयस्तच्छरीरम्'इति । वस्तुतस्तु अन्यतराश्रयत्वमपि न लक्षणम्, किन्तु सुखाश्रयत्वम्, दुःखाश्रयत्वं चेति लक्षणद्वये तात्पर्यम् । शरीरस्य तदाश्रयत्वमवच्छेदकतासम्बन्धेन । हस्तादेरलक्ष्यत्वे त्वन्त्यावयवित्वेन विशेषणीयम् । स्वर्गिशरीरे, नारकिशरीरे, वृक्षादौ च(२)सुखदुःखस्वीकारान्नाऽव्याप्तिः(३) । न च तच्छून्यखण्ड(४)शरीरेऽव्याप्तिः, सुखाद्याश्रयवृत्ति-

---

(१) किञ्चित्पूर्व्वमेव वार्त्तिककारेण दर्शिता । (२) नि पु "च" नास्ति । (३) नातिव्याप्तिरिति आ-पु प्रामादिकः पाठः । (४) "खण्ड" इति नि-पु० ।

न्यायभाष्यम्

भोगसाधनानि पुनः—

(सू)—घ्राणरसनचक्षुस्त्वक्श्रोत्राणीन्द्रियाणि भूतेभ्यः ॥१२॥

जिघ्रत्यनेनेति(१) घ्राणं गन्धं गृह्णातीति। रसयत्यनेनेति रसनं रसं गृह्णातीति। चष्टेऽनेनेति चक्षू रूपं पश्यतीति। (२)त्वक्स्थानमिन्द्रियं त्वक्। तदुपचारः

न्यायवार्त्तिकम्

घटादिष्वप्रसङ्ग(३)इति देश्यं क्रियते तदप्यनेन व्याख्यानेन प्रत्युक्तम्। सति तु प्रसङ्गे समस्तपदप्रयोगेऽपि न परमाणुषु प्रसङ्गो वार्य्यत इति। यथा त्वस्माभिर्वर्णितं तथा न क्वचिदपि शरीरादन्यत्र वर्तत इति ॥ ११ ॥

घ्राणरसनचक्षुस्त्वक्श्रोत्राणीन्द्रियाणि भूतेभ्य इति सूत्रम्। लक्षणसूत्राणि समाना-

न्यायवार्त्तिकतात्पर्य्यटीका

तेषामपि शरीरत्वप्रसङ्ग इत्याह—समस्तेति। स्यादेतत्, भवन्मतेऽपि चक्षुरादिभिरिन्द्रियैर्व्यभिचारः, तेषामपि यथोक्तव्यापाराधारत्वादत आह—यथा त्विति। मूर्त्तान्तराप्रयोगे सतीति विशेषितम्, चक्षुरादयस्तून्मीलनान्मूर्त्तेन शरीरेण प्रयुज्यन्त इति न प्रसङ्गः। श्रोत्रं तु चेष्टाधार एव न भवति। तदेतदुक्तलक्षणं शरीरं भावयन्निर्विद्यत इति सिद्धम् ॥ ११ ॥

इन्द्रियस्योपनायकत्वेनार्थादिभ्यो विशेषादिन्द्रियाणामर्थादिभ्यः पूर्वं लक्षणम्, न च विशेषलक्षणमकृते सामान्यलक्षणे शक्यमिति भाष्यकारः प्रथममिन्द्रियाणां सामान्यलक्षणं निर्वेदोपयुक्तमाह—भोगसाधनानीति। अनेन यच्छरीरसंयुक्तं सत् कारकदोषव्यतिरिक्तं साक्षात्प्रतीतिसाधनं तदिन्द्रियमिति सामान्यलक्षणं सूचितम्। साक्षात्प्रतीतिसाधनमिन्द्रियमिति वक्तव्ये भोगसाधनाभिधानं निर्वेदोपयोगीति। पारंपर्य्येण च भोगसाधनत्वं घ्राणादीनाम्, साक्षान्मनस एव तत्साधनत्वात्। सुखदुःखसाक्षात्कारस्य भोगत्वात्।

घ्राण—भ्यः(४)॥ अत्रेन्द्रियाणीति लक्ष्यनिर्देशः, घ्राणादीनीत्यर्थः। तेषां पञ्चानां पञ्चैव

वृत्तिः

द्रव्यत्वव्याप्यजातिमत्त्वस्य विवक्षितत्वात्। तादृशजातिश्च मनुष्यत्वचैत्रत्वादिः। कल्पभेदेन नरसिंहशरीराणां भेदान्नरसिंहत्वजातिमादाय नरसिंहशरीरे लक्षणसमन्वय इति ॥११॥

---

(१) "जिघ्रत्यनेन" इति ग-ल-आ-भा०। (२) "स्पृशत्यनेनेति स्पर्शनम्" इत्यधिकपाठः आ-भा-ज०। (३) अत्र 'घटादिष्वतिप्रसङ्गः' इत्येवमेव पाठो भवितुमुचितः प्रतिभाति। (४) टीकाकृद्भिः संक्षेपार्थं सूत्रस्याद्यन्तांशलेखश्चैत्या अनया रीत्या पाठः परिगृहीतः, एवमन्यत्रापि बोध्यम्।

न्यायभाष्यम्

स्थानादिति। शृणोत्यनेनेति श्रोत्रं शब्दं गृह्णातीति। एवं समाख्यानिर्वचनसामर्थ्याद्बोध्यं स्वविषयग्रहणलक्षणानीन्द्रियाणीति।

न्यायवार्त्तिकम्

समानजातीयविशेषणार्थानि सर्वाणीति सूत्रार्थो द्रष्टव्यः। उद्देशसामान्याल्लक्षणाभिधानम्, नामधेयेन पदार्थाभिधानमात्रमुद्देश इत्युद्देशलक्षणमुक्तम्(१)इदं च तथाभूतं तस्मादलक्षणमिति। नेदं तथा, करणभावात् स्वविषयग्रहणलक्षणत्वमिन्द्रियाणाम्, करणस्वभावकानीन्द्रियाणीति तेषामतीन्द्रियाणां यत् स्वविषयग्रहणं तेन लक्ष्यन्त इति स्वविषयग्रहणलक्षणत्वं वेदितव्यम्, असाधारणत्वादिति।

न्यायवार्त्तिकतात्पर्य्यटीका

लक्षणानीति कथयति—लक्षणसूत्राणीति। आपाततः सूत्रम्, विचार्य्यमाणानि च सूत्राणीत्यर्थः। समानजातीयं घ्राणादेरसनादि, प्रतिनियतविषयत्वात्। असमानजातीयं तु मनआदि सर्वविषयमिति। जिघ्रतीत्यादिभाष्यनिराकरणीयशङ्कामाह—उद्देशेति, प्रमाणाद्युद्देशेन साम्यादित्यर्थः। लक्षणं हि विधेयम्, लक्ष्यं चोद्देश्यम्, ज्ञातं चोद्दिश्यतेऽज्ञातं च विधीयत इति। न चैकस्य युगपज्ज्ञानाज्ञाने संभवतः, नापि लक्ष्यलक्षणत्वे इति भावः। परिहरति—नेदं तथा यथोद्देश इत्यर्थः। कस्मात्? करणभावात् स्वविषयग्रहणलक्षणत्वं यतो घ्राणादीनाम्। एतदुक्तं भवति—इन्द्रियाणामतीन्द्रियत्वात्सर्वदा स्वस्वविषयोपलब्धिकरणत्वेनैवानुमातव्यानि, तस्मात् स्वस्वविषयोपलब्धिसाधनत्वमेव समानासमानजातीयव्यवच्छेदकतया लक्षणम्, तदेकार्थसमवायि घ्राणत्वादि लक्ष्यम्। अत्र च घ्राणादिशब्दाः पङ्कजादिपदवदवयवार्थं निमित्तीकृत्य क्वचित् क्वचित् सामान्यविशेषे वर्त्तन्ते, अवयवार्थस्य प्रतीयमानस्यासति बाधके परित्यागायोगात्। अश्वकर्णादौ वृक्षविशेषवाचके वाजिकर्णायोगेन बाधकेनावयवार्थपरित्यागात्। अवयवार्थयोगेऽपि गन्धाद्युपलब्धिसाधने सन्निकर्षादौ घ्राणादिशब्दाप्रयोगात् अवयवार्थान्वितं घ्राणत्वाद्येव घ्राणादिशब्दप्रवृत्तिनिमित्तम्, तथा च घ्राणादिपदमेव घ्राणत्वादिपरं लक्ष्यनिर्देशः, तच्च "इन्द्रियाणी"त्यनेन सूचितम्, तदेव त्ववयवार्थपरं लक्षणनिर्देशो घ्राणेति। न च सन्निकर्षेण गन्धोपलब्धिसाधनेन च व्यभिचारः, इन्द्रियसामान्यलक्षणयुक्तस्य गन्धोपलब्धिसाधनत्वं(२)न सन्निकर्षस्यास्ति, तदनेन जिघ्रतीत्यादि स्वविषयग्रहणलक्षणानि इत्यन्तं भाष्यं व्याख्यातम्। निर्वचनग्रहणेन पदप्रवृत्तिनिमित्तमात्र-

वृत्तिः

इन्द्रियं विभजते लक्षयति च— (घ्राणरसनेत्यादि)। यद्यपि मनसोऽपीन्द्रियत्वमस्त्येव, तथाऽपि घ्राणेत्यादेरुपलक्षणपरत्वान्न दोषः। वस्तुतस्तु 'इन्द्रियाणि'-

(१) ८४ पृष्ठे भाष्ये वार्त्तिके च उक्तम्। (२) "इन्द्रियसामान्यलक्षणयुक्तस्य" इतात्र षष्ठ्यर्थो निष्ठत्वम्, तथाच इन्द्रियसामान्यलक्षणयुक्तनिष्ठं यद् गन्धोपलब्धिसाधनत्वम्, तत् "सन्निकर्षस्य" सन्निकर्षे नास्तीत्यर्थः।

न्यायभाष्यम्

भूतेभ्य इति। नाना(१)प्रकृतीनामेषां सतां विषयनियमः, नैकप्रकृतीनाम्। सति च विषयनियमे स्वविषयग्रहणलक्षणत्वं भवतीति॥ १२॥

न्यायवार्त्तिकम्

भूतेभ्य इति पृथिव्यादिकारणोपदेशो नियमार्थः। कः पुनरयं नियमः? भूतगुणविशेष ग्रहणसाधनत्वम्, न सर्वमिन्द्रियं सर्वभूतगुणविशेषं गृह्णातीति। अपि तु यज्जातीयमिन्द्रियं भवति तस्य यो गुणविशेष इतरेतरभूतव्यवच्छेदहेतुर्गन्धादिः स तेनैवेन्द्रियेण गृह्यत इत्ययं नियमः।

न्यायवार्त्तिकतात्पर्य्यटीका

मुच्यते, तेन त्वक्पदमपि संगृहीतं भवति। तस्यापि त्वक्स्थाने इन्द्रिये स्पर्शोपलब्धिसाधने एवोपचार इति।

भूतेभ्य इति सूत्रावयवतात्पर्यपरं भाष्यं भूतेभ्य इति, नानाप्रकृतीनामित्यादि, तद्वार्त्तिककारो व्याचष्टे—भूतेभ्य इति। पृथिव्यादीति। पृच्छति—कः पुनरिति। उत्तरम्—भूतगुणविशेषग्रहणसाधनत्वम्, घ्राणेनैव पृथिव्या यो गुणविशेषो गन्धः स गृह्यते, न रसनादिना। एवं रसनेनैवापां यो माधुर्यं गुणविशेषः स गृह्यते, एवं चक्षुषैव शुक्लभास्वरं रूपं तेजस इति, एवं त्वचैवानुष्णाशीतस्पर्शोऽपाकजो वायोः, एवं श्रवणेनैव शब्दो नभस इति नियमः। अत्र च प्रयोगः—गन्धोपलब्धिः करणसाध्या क्रियात्वात् छिदिक्रियावदिति। एवं सा तदन्यक्रियाकरणातिरिक्तकरणनिष्पाद्या तदन्वयव्यतिरेकाननुविधाने सति कार्य्यत्वात्, या क्रिया यत्करणान्वयव्यतिरेकाननुविधाने सति कार्य्या, सा सर्वा तत्क्रियाकरणातिरिक्तकरणनिष्पाद्या, यथा पटादिक्रिया घटादिक्रियाकरणदण्डाद्यतिरिक्त-करणनिष्पाद्या, तथा चेयम्, तस्मात्तथा। तच्च करणं चक्षुराद्यतिरिक्तं घ्राणम्, तद् द्रव्यम्, संयोगाधारत्वात्, तच्च पार्थिवम्, द्रव्यत्वे सति रूपादिषु मध्ये गन्धस्यैव व्यञ्जकत्वात् पार्थिवान्तरवत्। एवं रसनादिष्वपि योज्यम्। तदिदमुक्तं यज्जातीयमिन्द्रियं पार्थिवं पाथसीयं वा भवति, तस्य पृथिव्याः पाथसो(२) यो गुणविशेषो गन्धो वा मधुर एव वा रसभेदः, तेन पृथिवी अब्वाय्वादिभ्यः, आपो वा पृथिव्यादिभ्यो व्यवच्छिद्यन्ते, इतरेतरभूतव्यवच्छेदहेतुः

वृत्तिः

इत्यस्य बहिरिन्द्रियाणीत्यर्थः। तेन 'भूतेभ्यः' इत्यस्य नाऽसङ्गतिः। अत्र चैतानि इन्द्रियाणीति वदता घ्राणाद्यन्यान्यत्वं लक्षणमिति सूचितम्।

---

(१) ग-पु "नाना" नास्ति। (२) अत्रैको "वा"कारः अपेक्ष्यते, पूर्व्वापरक्रमानुरोधात्।

न्यायवार्त्तिकम्

ऐकात्म्ये पुनरयं नियमो न स्यात्। यदि पुनरिन्द्रियाण्येकात्मकानि एककारणकानि स्युः कारण-स्वभावानुविधानादैकात्म्याद्विषयव्यवस्था न स्यात्, सर्वं सर्वार्थमेकं वा सर्वार्थमिति स्यात्। एककारणानामपि स्वभावभेदो रूपादिवदिति चेत्—अथ मन्येथाः दृष्ट एककारणानां पाकज-रूपादीनां स्वभावभेदः। कतमत् पुनरेकं कारणं रूपादीनाम्? अग्निसंयोग इति न, सिद्धान्ता-परिज्ञानात्। न ब्रूमोऽग्निसंयोगादेकस्माद्रूपादय इति, अपि तु पूर्वरूपादिविशेषापेक्षात्, यद्द्रव्यं पच्यतेऽग्निसंयोगेन, तस्य ये पूर्वरूपादयस्तेषां यः स्वगतो विशेषः(१)तमपेक्षमाणोऽग्निसंयोग उत्तरान् रूपादीन् विशिष्टानारभते। एवं च कृत्वा परमाणोः पक्वतरतमादिभेदः। तस्मान्नैककारणपूर्वका रूपादय इति न किञ्चिदप्येककारणकं कार्यं दृष्टमिति। सर्वं हि कार्यं प्रादुर्भवत् समवाय्य-समवायिनिमित्तकारणेभ्यो भवतीति। एकं कर्म्म संयोगविभागकारणं दृष्टमिति चेन्न, अनभ्युप-गमात्। स्यान्मतिर्ननु च दृष्टं कर्म्म संयोगविभागकारणकमिति, न, अनभ्युपगमात्। नैत-दभ्युपगच्छामो निरपेक्षं कर्म संयोगविभागयोः कारणमिति, यदि तर्हि कर्मापि सापेक्षं संयोग-विभागौ करोति, कर्मलक्षणहानिः। यन्निरपेक्षं संयोगविभागकारणं तत् कर्म्मेत्युक्तं तद्धीयेत, लक्षणहानेश्च न कर्म्म, ततश्च संयोगविभागौ न कर्म्म पूर्वकाविति। नैष दोषः। न ब्रूमो निरपेक्षं

न्यायवार्त्तिकतात्पर्य्यटीका

स तेनैवेन्द्रियेण गृह्यते, नान्येनेति। न चैवं रसना अपामिव पृथिव्या अपि रसभेदं गृह्णातीति पार्थिवी भवति, तथात्वे तया गन्धोऽप्युपलभ्येत। येन "तेनैवेन्द्रियेणे"ति नियमो गुणविशेष-मवधारयति, न त्विन्द्रियमिति। अत्र च कर्णशष्कुलीसंयोगोपाधिना श्रोत्रस्य नभसः कथ-ञ्चिद् भेदं विवक्षित्वा भूतेभ्य इति पञ्चम्यर्थो व्याख्यातः। अनेन खल्वाहङ्कारिकाणीन्द्रियाणि इति यदाहुः सांख्यास्तन्निराकृतम्। निराकरणहेतुमाह—ऐकात्म्य इति श्लिष्टं पदम्, सांख्यानां किल राद्धान्ते कारणात्मकं कार्य्यम्, तच्च कारणमिन्द्रियाणामहङ्कार एक इत्यैकात्म्यमेककारणकत्वम् तथा चैकात्म्यमेकत्वं घ्राणादीनामित्यनियमः स्यादिति। तदेतद्विभजते—यदि पुनरिति। शङ्कते—एकेति। विभजते—अथेति। एकः पाक्य एकोऽग्निसंयोगः एकं चौष्ण्यमित्यर्थः। निराकरोति—न ब्रूम इति। यद्यप्यौष्ण्यं निमित्तं साधारणम्, तथापि गन्धाद्युत्पत्तौ पूर्वगन्धादि-ध्वंसानां भेदादुत्पन्नं कार्य्यनानात्वमिति। तदिदमुक्तं ये पूर्वे रूपादयः तेषां स्वगतो विशेषः

वृत्तिः

प्रत्यक्षजनकतावच्छेदकतया इन्द्रियत्वमखण्डोपाधिरूपमित्यन्ये। घ्राणत्वादिकं जातिविशेषरूपम्। कर्णशष्कुल्यवच्छिन्नं नभः श्रोत्रम्।

(१) "ये पूर्वे रूपादयः तेषां स्वगतो विशेषः" इति तात्पर्य्यं।

न्यायभाष्यम्

कानि पुनरिन्द्रियकारणानि ?

पृथिव्यापस्तेजो वायुराकाशमिति भूतानि ॥ १३ ॥

संज्ञाशब्दैः पृथगुपदेशो भूतानां विभक्तानां (१) सुवचं कार्यं भविष्यतीति ॥ १३ ॥

न्यायवार्त्तिकम्

कर्म कारणमिति न किञ्चिदपेक्षत इति। अपि तु चरमभाविनिमित्तान्तरं नापेक्षत इत्ययं निरपेक्षार्थः। यथा द्रव्यजातं समानजातीयद्रव्यं संयोगं च चरमभाविनमपेक्षमाणं द्रव्यमारभते, नैवं कर्मजातीयं पश्चाद्भाविनिमित्तमपेक्षते, अपि तु कर्म सत्, संयोगविभागावारभते, तस्मान्न कर्मलक्षणहानिः, न चैकपूर्वकत्वं संयोगविभागयोरिति ॥ १२ ॥

न्यायवार्त्तिकतात्पर्य्यटीका

प्रध्वंस इत्यर्थः। अथ रूपत्वादिसामान्यमेव कस्मात् न स्वगतो विशेष इत्यत आह—**एवं च कृत्वेति**। रूपत्वादिसामान्यानां तादवस्थ्ये न पक्वतरतमादिभेदः, प्रध्वंसानां तु स्तोकभूयस्त्वं निःशेषत्वे नोपपद्यत इति भावः। पुनः शङ्कते—**एकं कर्म्मेति**। निराकरोति—**नेति**। समवायिकारणं स्वात्मप्रत्यासत्तिं वाऽपेक्षत इति भावः। शङ्कते—**यदि तर्हीति**। लक्षणहानिस्तथा च लक्ष्यहानिरित्यर्थः। निराकरोति—**चरमभाविनिमित्तान्तरं** भावरूपमित्यर्थः। संयोगाभावं तूत्तरसंयोगजननायापेक्षत एव। उपसंहरति—**तस्मादिति** ॥ १२ ॥

इन्द्रियप्रकृतित्वं तु भूतलक्षणं वेदितव्यम् ॥ १३ ॥

वृत्तिः

घ्राणादीनि किंप्रकृतिकानीत्याकाङ्क्षायामाह—**भूतेभ्य इति**। तेनेन्द्रियाणामहङ्कारप्रकृतिकत्वं नेति मन्तव्यम्। व्युत्पादयिष्यते चेदं **तृतीयाध्याये** (२)।

अत्र घ्राणादीनां चतुर्णां पृथिव्यादिजन्यत्वं सम्भवति, श्रोत्रस्य कर्णशष्कुल्यवच्छिन्नाकाशस्य कर्णशष्कुल्या जन्यत्वादेव जन्यत्वव्यपदेशः।

अथ वा अभिन्नानीति पूरयित्वा भूताभिन्नानीति व्याख्येयम्। घ्राणादीत्यस्योपलक्षणपरत्वे तु भूतेभ्य इति बहिरिन्द्रियपरम् (३) ॥ १२ ॥

---

(१) 'विभक्तानाम्' इति·ल-पु नास्ति। (२) ३।१।३५ सूत्रवृत्तौ। (३) घ्राणादीत्यस्य उपलक्षणपरत्वे 'भूतेभ्यः' इत्यंशस्य भूतप्रकृतिकानीति भूताभिन्नानीति वा अर्थकरणे द्वयोरेव पक्षयोरसङ्गतिः, घ्राणादिषु मनसोऽपि संगृहीतत्वेन तत्र भूतप्रकृतिकत्वस्य भूताभेदस्य चासम्भवात्, अत उपलक्षणपक्षे 'भूतेभ्यः' इत्यंशस्यार्थं योजयितुमाह—घ्राणादीत्यादि। तथाच 'भूतेभ्यः' इत्यनेन सर्व्वेषामिन्द्रियाणां भूतप्रकृतिकत्वं भूताभिन्नत्वं वा न निरूप्यते, किन्तु बहिरिन्द्रियाणामेवेति इन्द्रियोद्देशावसरे मनस उपलक्षणावश्यकत्वेऽपि नासङ्गतिरिति भावः।

न्यायभाष्यम्

इमे तु खलु—

गन्धरसरूपस्पर्शशब्दाः पृथिव्यादिगुणास्तदर्थाः ॥१४॥

पृथिव्यादीनां यथाविनियोगं गुणा इन्द्रियाणां यथाक्रममर्था विषया इति ॥ १४ ॥

न्यायवार्त्तिकम्

गन्धरसरूपस्पर्शशब्दाः पृथिव्यादिगुणास्तदर्था इत्येतत् सूत्रम्। पृथिव्यादिगुणा इत्येतस्मिन् पदेऽनेकः समासः सम्भवति। कथमिति? पृथिव्यादीनां गुणा इति षष्ठीसमासः,

न्यायवार्त्तिकतात्पर्य्यटीका

क्रमप्राप्तमर्थलक्षणमवतारयति भाष्यकारः—इमे त्विति। तु-शब्देनार्थमात्राद् व्यवच्छिनत्ति। येषामिन्द्रियविषयत्वेन भाव्यमानानां निःश्रेयससाधकत्वम्, मिथ्याज्ञानविषयीकृतानान्तु संसारनिमित्तता, त इमे इत्यर्थः।

गन्ध—र्थाः (सू. १४)॥ अत्र चोद्देशक्रमस्मारिता अर्था लक्ष्यतया प्रतिपत्तव्याः, तेषां च लक्षणं तदर्था इति। तदित्यनन्तरलक्षितानीन्द्रियाणि परामृशति, तेषामिन्द्रियाणामर्थाः। इन्द्रियैरर्यमाणत्वमर्थानां लक्षणम्। एतावतैव लक्षणे पर्य्यवसिते सुहृद्भावेन विभागाभिधानं पृथिव्यादिगुणा इति। पृथिव्यप्तेजांसि च गुणाश्च धर्म्माः संख्याकर्म्मादयः। विभागेऽप्येतावताऽवगते गन्धाद्यभिधानं सुहृद्भावेनेन्द्रियविषयनियमज्ञापनार्थम्। पृथिव्यादीनामिति। भाष्यं न षष्ठीसमासज्ञापनार्थम्, अपि त्वर्थाभिधानमात्रम्। यथाविनियोगमिति। यथाक्रमं पृथिव्यादिष्वनिलान्तेषु गन्धादयः स्पर्शान्ताः चतुस्त्रिद्व्येकनियमेन विनियुक्ताः, शब्दश्चाकाश एवेत्यर्थः। तदर्था इति लक्षणपदं व्याचष्टे—इन्द्रियाणामिति। येन क्रमेण घ्राणादय इन्द्रियसूत्रे पठिताः, येन चेह गन्धादयः, तदनतिक्रमेणेत्यर्थः। अत्र वार्त्तिककारः पृथिव्यादिगुणा इत्यत्रानेकसमासप्रतिभासनात् संशयं कृत्वा द्वन्द्वसमासमवधारयति—पृथिव्यादिगुणा इति। षष्ठीसमासे-

वृत्तिः

भूतान्येव कानीत्याकाङ्क्षायामाह—(पृथिव्याप इत्यादि)।

आरम्भे परस्परानपेक्षत्वसूचनायाऽसमासकरणम्। भूतत्वं तु बहिरिन्द्रियग्रहणयोग्य(१)विशेषगुणवत्त्वम्। पृथिवीत्वादयस्तु जातिविशेषा इति ॥ १३ ॥

क्रमप्राप्तमर्थं विभजते लक्षयति च—(गन्धरसेत्यादि)।

वैशेषिकाणां द्रव्यगुणकर्मस्वर्थशब्दाभिधेयत्वमतः पञ्चानां गन्धादीनामेव कथं तत्त्व-

(१) 'ग्रहणायोग्येति' नि पु-पाठः।

न्यायवार्त्तिकम्

पृथिव्यादीनि च गुणाश्चेति द्वन्द्वः, पृथिव्यादयो गुणा येषामिति बहुव्रीहिः, एवमनेकसमासोपपत्तेः संशयः किमत्र तत्त्वमिति? द्वन्द्वः समास इति तत्त्वम्। षष्ठीसमासस्तावन्न, पृथिव्यादीनामनिन्द्रियार्थत्वप्रसङ्गात्। यदि पृथिव्यादीनां गुणा इति षष्ठीसमासः स्यात्, पृथिव्यादीनां गन्धादिगुणविशेषणत्वेनोपयुक्तानामिन्द्रियार्थत्वं न स्यात् विशेषणवैयर्थ्यं च स्यादिति। गन्धरसरूपस्पर्शशब्दा इत्युक्ते पृथिव्यादिगुणा गम्यन्ते ततश्च पृथिव्यादिग्रहणं व्यर्थम्। न हि गन्धादीनां द्वैराश्यमस्ति पृथिव्यादिगुणत्वं चान्यगुणत्वं च यतो विशेषणमर्थवत् स्यात्, तस्मान्न षष्ठीसमासः। गुणिनामसिद्धेर्न बहुव्रीहिः पृथिव्यादयो गुणा येषां, के ते गुणिनो येषां पृथिव्यादयो गुणाः। न च पृथिव्यादीनां गुणत्वं शक्यं प्रतिपादयितुम्। न चान्यथा बहुव्रीहिः। प्रायेणायं समानाधिकरणपूर्वो भवति यथा चित्रगुरिति, गोमत्तायां प्रसिद्धायां चित्रगुणसम्बन्धे सुप्रसिद्धे गवां चित्रगुरिति बहुव्रीहिः, न पुनरिह गुणी प्रसिद्धः। नापि पृथिव्यादीनां गुणत्वं प्रसिद्धम्। विशेषणत्वाद् गुणाः पृथिव्यादय इति स्यात्, तन्न, सर्वो गुण एव स्यादेतस्यां कल्पनायाम्, न हि कस्यचित् कश्चित् विशेषणं विशेष्यो वा न भवतीति सर्वगुणत्वप्रसङ्गः, तस्माद्बहुव्रीहिरपि न। उभयसमासप्रतिषेधादन्यसमासाभावाच्च द्वन्द्वः। यस्मात् षष्ठीतत्पुरुषबहुव्रीही प्रतिषिद्धौ समासान्तरं च न सम्भवतीति शिष्यमाणश्च द्वन्द्वः, तस्मात् द्वन्द्वः समास इति। न द्वन्द्वः समासः, शास्त्रयुक्त्योरभावात्। यद्ययं द्वन्द्वो भवति शास्त्रं युक्तिर्वा पृथिव्यादीनामिन्द्रियार्थत्वे वक्तव्या इति, न, उभयस्याऽप्युपपत्तेरिति। उभयं पृथिव्यादीनाम् इन्द्रियार्थत्वे शास्त्रं युक्तिश्च सम्भवति। शास्त्रं तावत् दर्शनस्पर्शनाभ्यामेकार्थग्रहणादिति।

न्यायवार्त्तिकतात्पर्य्यटीका

नाभिन्नार्थत्वात् सप्तमीसमासो न दर्शितः। ननु कण्ठेकाल इतिवद्वैयधिकरण्येऽपि बहुव्रीहिर्भविष्यति पृथिव्यादीनां गुणा येभ्यो गन्धादिभ्यस्ते तथा। तथा हि परमाणुगता गन्धादयोऽवयविनि गन्धाद्यारभन्ते, नभोगतश्च शब्दो नभसि समानजातीयं शब्दमित्यत आह— न चान्यथेति। ज्ञापकवशात् क्वचिद् व्यधिकरणानां बहुव्रीहिः, ज्ञापककृतं च न सर्वत्र, न च गन्धादीनां पृथिव्यादिगुणहेतुत्वप्रतिपादनं क्वचिन्निर्वेदायोपयुज्यत इति भावः। अन्यसमासः कर्म्मधारयादिः। द्वन्द्वमवधारितमाक्षिपति—न द्वन्द्व इति। समाधत्ते—न, उभयस्यापीति।

वृत्तिः

मित्याशङ्कानिरासाय तदर्था इत्युक्तम् (१)। तेषामिन्द्रियाणामर्थाः—विषयाः, उद्दिष्टा अपि त एवेत्याशयः। इत्थं च तदर्थत्वं लक्षणमिति मन्तव्यम्। तच्छब्देन बहि-

(१) "तदितुरक्तम्" इति ल।

न्यायवार्त्तिकम्

युक्तिरपि दर्शनस्पर्शनयोरेकविषयत्वेन प्रतिसन्धानम्, यमहमद्राक्षं तं स्पृशामीति दृष्टिस्पर्शैकविषया युक्तिः। शास्त्रमप्यस्मिन् पक्षे सम्भवतीति। ऐन्द्रियकत्वाभिधानाच्च सामान्यस्येति। तस्मात् सिद्धं पृथिव्यादीनि च गुणाश्चेति द्वन्द्वः समास इति। पृथिव्यादिग्रहणेन पृथिव्यप्तेजांसि बाह्यकरणग्राह्याण्यपदिश्यन्ते, गुणग्रहणेन च सर्व आश्रितो गुण इति सङ्ख्यापरिमाणपृथक्त्वसंयोगविभागपरत्वापरत्वस्नेहवेगकर्मसामान्यविशेषाः, अनाश्रितश्च समवायस्तद्धर्मत्वाद् गुण इति। गन्धरसरूपस्पर्शशब्दास्तर्हि पृथङ् न वक्तव्याः, गुणग्रहणेन ग्रहणात्। पृथिव्यादिगुणास्तदर्था इति सूत्रे वक्तव्यम्, लघु चैवं भवतीति स एवार्थः सेत्स्यतीति, न कर्तव्यम्। गन्धरसरूपस्पर्शशब्दानां पृथगभिधानमिन्द्रियविशेषनियमज्ञापनार्थम्। इन्द्रियाणि गन्धरसरूपस्पर्शशब्देषु तत्सामान्येषु नियतानि अन्यत्रानियतानि। तत्र पृथिव्यप्तेजांसि द्वीन्द्रियग्राह्याणि, शेषश्च गुणराशिः, सत्तागुणत्वे च सर्वेन्द्रियग्राह्ये, समवायोऽभावश्च तथा।

दर्शनस्पर्शनाभ्यामेकार्थग्रहणादित्येतदमृष्यमाणः पर आह—स्पर्शग्रहणमेव स्पर्शनेन, रूपग्रहणमेव चक्षुषेति। स पर्य्यनुयोज्यः—अथ रूपस्पर्शौ चक्षुःस्पर्शनाभ्यां गृह्येते इति कथमवगम्यते ? यस्माच्चक्षुःस्पर्शनाभ्यां तद्विशिष्टः प्रत्ययो भवति। अनास्पदस्तर्हि प्रतिषेधः, घटादावपि तद्विशिष्टप्रत्ययदर्शनात्। घटादिकमप्यर्थं दर्शनस्पर्शनाभ्यामुपलभमानश्च तद्विशिष्टं घटादिकमर्थं प्रतिपद्यते। तस्मादसम्प्रधारितः प्रतिषेध इति। रूपादिभ्यस्तथा सन्निविष्टेभ्यो घटादिप्रत्यय इति चेत् यदिदं भवताऽपदिश्यते दर्शनस्पर्शनाभ्यामयं घटं प्रतिपद्यत

न्यायवार्त्तिकतात्पर्य्यटीका

पृथिव्यादिग्रहणेनेति। यद्यादिशब्देन वाय्वादयो गृह्येरन्, तदर्था इति लक्षणमव्यापकं स्यात्, तेषां बाह्येन्द्रियार्थत्वाभावादित्यर्थः। **गुणग्रहणेन सर्व** इति आश्रितानाश्रिताभिप्रायम्, गुणशब्दस्य धर्म्मवचनत्वात्। विशेषस्तु रेखोपरेखादिः, न त्वन्त्यः, तस्यातीन्द्रियत्वात्। एतेषां च यथायोगं मिथ्याज्ञानसम्यग्ज्ञानविषयाणां रागवैराग्यहेतुत्वमूहनीयम्। चोदयति—गन्धेति। परिहरति—न कर्तव्यं लघुसूत्रम्, गन्धादीनां पृथगभिधानं कर्त्तव्यमित्यर्थः। नियममाह—इन्द्रियाणीति। तत्रेत्यनियतेषु मध्ये, पृथिव्यप्तेजांसि द्वीन्द्रिय(१) ग्राह्याणि, शेषश्च गुणराशिः संख्यादिर्विशेषान्तो द्वीन्द्रियग्राह्य इत्यर्थः। तथा, सर्वेन्द्रियग्राह्य इत्यर्थः।

अत्र बौद्धमुत्थापयति—दर्शनस्पर्शनाभ्यामिति। तस्य पर्य्यनुयोगमाह—स इति। स्वसंवेदनेन मानसेन वा रूपाद्यालम्बनप्रत्ययो रूपादिविशिष्टो यथाऽनुभूयते एवं रूपाद्यतिरिक्तघटादिविशिष्टोऽनुभूयत इत्यर्थः। अत्र पर आह—रूपादिभ्यस्तथा सन्निविष्टेभ्य इति, तथेत्याकारं निर्दिशति।

(१) क-पुस्तके "इन्द्रिय" इति पाठः।

न्यायवार्त्तिकम्

इति, मिथ्यैतत्। रूपादय एव तेन तेनाकारेण सन्निविशन्ते, तानयमुपलब्धा तथाकारान् प्रतिपद्यमानो घट इति प्रपद्यते, न पुना रूपादिव्यतिरिक्ता घटादय इति। न, आकारार्थानभिधानात्—अतथाभूतस्य तथाभूतेन सामान्यमाकारशब्दस्याभिधेयम्। तद्यथा स्थाण्वाकारः पुमानित्यपुरुषस्य स्थाणोराकारः, पुरुषेण यत् सामान्यं स आकारशब्दस्यार्थः स्थाणुपुरुषप्रसिद्धौ सत्यां भवतीति। न पुनर्भवतां घटाकारा रूपादय इति रूपादिषु घटाकारबीजं किञ्चिदस्ति। तस्मात् घटाकारा रूपादय इति यत्किञ्चिदेतदिति। रूपादिमात्रे च घटादिबुद्ध्यभावः, यस्य रूपादिमात्रं घटादयः तस्य तेषां समानत्वात्, यास्ता(१) बुद्धयो विविक्ता गौरश्वो घट इति, ता न प्राप्नुवन्ति, रूपादिगतस्य बुद्धिनियामकस्य विशेषस्य हेतोरभावात्। संस्थानभेदाद् भेदप्रत्यय इति चेत्, केनचित् संस्थानविशेषेणावतिष्ठमाना रूपादयः संस्थानभेदानुविधानाद् घटादिबुद्धिहेतवो भवन्तीति। नैतदस्ति, संस्थानस्यान्यत्वेऽनन्यत्वे संज्ञाभेदमात्रत्वात्

न्यायवार्त्तिकतात्पर्य्यटीका

सन्निवेशो व्यवस्थानम्। रूपादिपरमाणव एव तेन तेनाकारेणोत्पन्ना एकयोदकाहरणक्रियया व्यवच्छिन्ना घटादय इत्युच्यन्ते, अनुरञ्जनादिकया तु रूपादिव्यपदेशः। यथाह घट इत्यपि च रूपादय एवैकार्थक्रियाकारिणस्तथा व्यपदिश्यन्त इति। निराकरोति—न आकारार्थेति। तथार्थस्य यथापदार्थेन नित्याभिसम्बन्धात् यथा घटस्तथा सन्निविष्टा रूपादय इत्यर्थो गम्यते, तेन घटाकारेण घटसादृश्येनेत्ययमर्थः, तथा च दूषणमिति। दूषणान्तरमाह—रूपादिमात्रे चेति। न तावद्रूपादिक्षण एको घटः, क्षणान्तरे तत्प्रयोगाभावप्रसङ्गात्, तस्माद्रूपादिमात्रमविवक्षितम्, तथा सत्येतद्दूषणमित्यर्थः। शङ्कते—संस्थानभेदादिति। यथासंस्थाना रूपादयोऽर्था अनुभूयन्ते, तथा

वृत्तिः

रिन्द्रियाणि परामृश्यन्ते। तथा चैकैक(२)बहिरिन्द्रियमात्रग्राह्यविशेषगुणत्वमर्थत्वम्(३), बहिरिन्द्रियद्वयाग्राह्यबहिरिन्द्रियग्राह्यगुणत्वं(४) वा तदर्थः। पृथिव्यादिगुणा इति

---

(१) 'यातामा' इति ख-पु-पाठः। (२) 'चैक' इति व-का-आ॰। (३) अत्र 'अर्थत्वं' यदि विशेषगुणत्वमात्रमुच्यते तर्हि सुखादावतिव्याप्तिः स्यात्, अत एकैकेत्यादि ग्राह्यपर्यन्तं विशेषणम्, एकैकमात्रबहिरिन्द्रियग्राह्यत्वं तदर्थः, अत्र बहिःपदेन सुखादावतिव्याप्तेर्वारणम्। एकैकमात्रेत्यनुपादाने स्नेहादावतिव्याप्तिः, तत्र चक्षुस्त्वगिति बहिरिन्द्रियद्वयग्राह्यविशेषगुणत्वसत्त्वात्, अतस्तद्वारणार्थं तदुपादानम्। अत्र मात्रपदेन एकैकबहिरिन्द्रियव्यतिरिक्तग्राह्यत्वस्याभावपर्यन्तो यः पर्य्यवसितार्थो लभ्यते स तु अभावद्वयघटितत्वेन गौरवग्रस्त इति तदपेक्षया लाघवादाह—बहिरिन्द्रियद्वयेत्यादि। अत्र वृत्तौ "अर्थत्वम्" इति नि-व-का-आ पुस्तकेषु नास्ति। (४) 'बहिरिन्द्रियग्राह्यबहिरिन्द्रियाग्राह्यगुणत्व'मिति व-का-आ॰।

न्यायवार्त्तिकम्

व्यर्थाभिधानप्रसङ्गाच्च। यदि संस्थानं रूपादिभ्योऽन्यत्, द्रव्यं(१) तदिति संज्ञाभेदमात्रम्। अथानन्यत्तथापि रूपादीनां संस्थानभेदानुविधानात् घटादिप्रत्यया इति व्यर्थमभिधानम्। घटादि-प्रत्यया मिथ्याप्रत्यया इति चेत्—स न मन्यते घटादिप्रत्ययाः सम्यक्प्रत्यया इति, किन्तु शब्दवासनावशान्मिथ्याप्रत्यया भवन्तीति। तदयुक्तम्। मिथ्याप्रत्ययानां सम्यक्प्रत्ययानु-कारित्वात्—यत्र ते मिथ्याप्रत्यया लोके भवन्ति सर्वत्र ते सम्यक्प्रत्ययाऽनुकारिणो भवन्ति, न पुनर्घटादिप्रत्ययानां मिथ्याप्रत्ययत्वेन कल्पितानां बीजमस्ति। न चैते निर्बीजाः प्रादुर्भवन्ति, तस्मान्न मिथ्याप्रत्यया इति। मिथ्याप्रत्ययाश्चैत इत्यव्यतिरेके प्रमाणोपपत्तौ सत्यां सिध्यति, न चाव्यतिरेकप्रतिपादकं प्रमाणमस्ति। न नास्ति, तद्ग्रहे तद्बुद्ध्यभावात्, यद् यस्मादनर्थान्तरं भवति तद्ग्रहे तस्याग्रहो दृष्टः, तद् यथा(२)—यूषस्य पङ्क्तेश्च, यच्च यतोऽर्थान्तरं भवति तद्ग्रहे तस्य ग्रहो दृष्टः, तद् यथा—रूपाद्यग्रहे बालग्रह इति। नायं हेतुरनैकान्तिकत्वात्, ये घटादि-भावमापन्नाः पृथिव्यादयस्तेषां पृथिव्यां संगृह्यमाणायामर्थान्तरभूतानामबादीनामग्रहणम्। अथ चार्थान्तरभूता अबादयो न दर्शनविषयभाजो भवन्ति, तस्मादनेकान्तः। अथ न चत्वारि महा-भूतानि तथा सन्निविष्टानीति पक्षस्तथापि रूपं चत्वारि महाभूतानीति वचनं व्याहन्यते। अथ ब्रूषे नैव नो रूपादिव्यतिरिक्ताः पृथिव्यादय इति? तथाप्यस्य वाक्यस्यायमर्थो भवति रूपादयो रूपमिति, ततश्च कामेऽष्टद्रव्यकोऽणुरिति व्याहन्येत। अथ पृथिव्यादीनां सङ्घातमात्रे रूपादि-

न्यायवार्त्तिकतात्पर्य्यटीका

सन्निविष्टेभ्यो घटादिप्रत्यया इत्यर्थः। निराकरोति—नैतदिति। अन्यत्वे तदेवावयवीति संज्ञाभेदमात्रम्। अनन्यत्वे व्यर्थाभिधानम्। शङ्कते—घटादिप्रत्यया इति। एकानेक-विचारासहत्वाद् असन्त एव घटादयोऽनादिविकल्पवासनाजनितविकल्पप्रत्ययप्रतिभासमानाः। शब्दशब्देन विकल्पमुपलक्षयति—शब्दवासनावशादिति। निराकरोति—तदयुक्तमिति। बीजं मिथ्याप्रत्ययस्य सम्यक्प्रत्ययविषयोऽर्थः, तस्य क्वचिदभ्युपगमेऽभिमतार्थहानमित्यर्थः। यस्तु भिन्नलोकमर्य्यादतया ब्रूते आदिमान् मिथ्याप्रत्ययः सम्यग्ज्ञानं निमित्तीकरोति, अयं पुनरनादिः पूर्वपूर्वमिथ्याप्रत्ययजन्मा मिथ्याप्रत्ययप्रवाहः, कृतमत्र सम्यग्ज्ञानेनेति, तं प्रत्याह—मिथ्याप्रत्ययाश्चैत इति। रूपादिव्यतिरेके अवयविन इत्यर्थः। परस्त्वव्यतिरेके प्रमाणमाह—न नास्तीति। न हि मांसतोयातिरिक्तः कश्चिद्यूषो नाम, नापि तृणराजतरुव्यतिरिक्ता पङ्क्तिर्नाम। दूषयति—नायं हेतुरिति। ये घटादिभावमापन्ना भवतां दर्शने इति, कामे-ऽष्टद्रव्यकोऽणुरशब्दः रूपधातुररूपधातुः कामधातुरिति त्रैधातुकं जगत्, तत्र कामधातुस्वरूपमुक्तम्,

(१) "अन्यद्रव्यम्" इति ख-पु०। (२) "तद् यथा" इत्यत्र "तथा" इति ख-पु०।

न्यायवार्त्तिकम्

व्यवहारः ? तथापि न रूपं पृथिव्यादयो वस्तुतः सन्ति। कथमिति ? पृथिव्यादीनां सङ्घातो रूपं पृथिव्यादयश्च रूपादिसङ्घात इति संहन्यमानस्याभावान्न सङ्घातोऽस्ति, सर्वः सङ्घातः संहन्यमानतन्त्रो दृष्ट इति सर्वथा न व्याघातान्मुच्यते।

तदग्रहे तद्बुद्ध्यभावादिति(१) तच्छब्दार्थानुसृतावसम्बद्धार्थम्। यदा तच्छब्दस्यार्थोऽनुस्रियते तदा तदग्रहे तस्यैवाग्रह इति प्राप्तम्, तच्चासम्बद्धार्थम्, यदा पृथिव्यादि रूपादिविशेषणं साध्यते तदा तदग्रहे तद्बुद्ध्यभावादित्यस्य हेतोः(२) पृथिव्यादिविशेषणानां रूपादीनां तच्छब्देनानभिसम्बन्धात्। एतेन पृथिव्यादिविशेषणा रूपादयः प्रत्युक्ताः। अत्रापि रूपाद्यग्रहे रूपादि-

न्यायवार्त्तिकतात्पर्य्यटीका

कामे कामधातौ,अष्टद्रव्यकोऽणुः—रूपरसगन्धस्पर्शा इति चत्वारि द्रव्याणि, पृथिव्यप्तेजोवायु(३)रिति चत्वारि, द्रव्यशब्दो वस्तुवचनः, तेषामष्टद्रव्यकोऽणुरित्यागमः। सोऽयं रूपाद्यतिरिक्तपृथिव्याद्यनभ्युपगमे बाध्येत। अथ वैयात्यादुच्यते—पृथिव्यादीनामिति, ततश्च सांवृतत्वेनाष्टसंख्यासिद्धेर्नागमविरोध इति भावः। उत्तरम्—**तथाऽपी**ति। मा भूवन् वस्तुतः, उभयेऽपि सांवृता भविष्यन्तीत्यत आह—**संहन्यमानस्ये**ति। यो हि यत्तन्त्रः स तदभावमभ्युपगम्याशक्याभ्युपगमः, न खलु संयुज्यमानानामभावे संयोगः शक्याभ्युपगम इत्यर्थः। न च संवृतिः, सा हि पररूपं स्वरूपेण संवृणोति, संहन्यमानाभावे च न संघातो न संहन्यमाना इति किमनया स्वरूपेणाव्रियेतेति भावः।

तदेवं—**तदग्रहे तद्बुद्ध्यभावा**दित्यस्य व्याघातदोषं दर्शयित्वा स्वसामर्थ्यालोचने न विवक्षितलिङ्गाभिधायिता, किन्त्वसंबद्धार्थता हेतुवचनस्येत्याह—**तदग्रहे** इति। एवं किलात्राभिमतम्—पृथिव्यादयो रूपादिभ्योऽभिन्ना, रूपाद्यग्रहे पृथिव्यादिबुद्ध्यभावादिति। तन्न तदेतदग्रहे (४) तद्बुद्ध्यभावादित्यनेन न शक्यं वक्तुम्, तदग्रह इत्यत्र तच्छब्दः प्रधानपरामर्शी, पृथिव्यादयश्च धर्मितया प्रधानमिति त एव परामर्ष्टव्याः। तथा च पृथिव्याद्यग्रहे

वृत्तिः

लक्ष्यनिर्देशः। ते के गुणा इत्याकाङ्क्षायां गन्धेत्यादि। पृथिव्यादीनां गुणा इति षष्ठीसमासो भाष्यसम्मतः(५), तेन गुणगुणिनोरभेदो नेति सूचितम् ॥ १४ ॥

---

(१) २०६ पृष्ठस्थवार्त्तिकस्यैव ८मपंक्तौ "तदग्रहे तद्बुद्ध्यभावात्" इति। (२) "हेतोः" इत्यनन्तरं ख-पुस्तके—"पृथिव्याद्यग्रहे पृथिव्यादिबुद्ध्यभावादिति हेत्वर्थः प्राप्नोति, किं कारणम्?" इत्यधिकः पाठः। (३) 'वायवः' इत्येवं बहुवचनान्तःपाठः समीचीनः, अथवा—पृथिव्यप्तेजःसहकृतो वायुरिति मध्यपदलोपिसमासमाश्रित्य निरुक्तपाठ एव कथञ्चित् समाधेयः। (४) "तदेतदग्रहे" इत्यत्र "तदग्रहे" इति पाठः सङ्गतः, पूर्व्वापरसामञ्जस्यानुरोधात्। (५) "भाष्यादिसम्मत" इति ल-ब-आ०।

न्यायवार्त्तिकम्

बुद्ध्यभावादिति हेत्वर्थः प्राप्नोति, तच्छब्दस्य प्रधानसम्बन्धित्वात्। एवं रूपादिमात्रं पृथिवी, पृथिवीमात्रं रूपादय इति पृथिव्येव रूपादयो रूपादय एव पृथिवीति पूर्ववत् प्रसङ्गः। सर्वत्र प्रतिज्ञापदयोर्व्याघातो वचनभेदात्, पृथिवीत्येकवचनं रूपादय इति बहुवचनम्, वचनभेदानुविधानं च यत्र, तत्रार्थभेदः, तद् यथा नक्षत्राणि शशीति। अस्ति चात्रापि वचनभेदः तस्मादत्राप्यर्थभेदेन भवितव्यम्। नन्वेकस्मिन्नर्थे वचनभेदो दृष्टस्तद् यथा चत्वार आश्रमाश्चातुराश्रम्यमिति। तन्नानभ्युपगमात्, नायं वचनभेदः क्वचिदेकत्वे दृष्टः, चातुराश्रम्यमिति चतुर्णामाश्रमाणां समानं धर्मसाधनत्वमभिधीयते। एतेन षडेव गुणाः षाड्गुण्यं विशेष एव वैशेषिकमिति प्रत्युक्तम्। तदग्रहे तद्बुद्ध्यभावादिति चासिद्धोऽप्ययं हेतुः। कथमसिद्धः? रूपाद्यग्रहे द्रव्यग्रहात्,—

न्यायवार्त्तिकतात्पर्य्यटीका

पृथिव्यादिबुद्ध्यभावादिति स्यात्। तथा च प्रतिज्ञातस्तेषां रूपाद्यभेदो न सिध्येदित्यसंबद्धम्। अथ रूपादयः पक्षीक्रियन्ते, तथाऽपि रूपाद्यग्रहे रूपादिबुद्ध्यभावादिति स्यात्, तथापि न प्रतिज्ञातार्थसिद्धिरित्यसंबद्धार्थमित्यर्थः। एवं शब्दान्तरेणापि प्रतिज्ञाप्रयोगे तुल्यः प्रसङ्ग इत्याह—**एवं रूपादिमात्रमिति**। प्रतिज्ञादोषमाह—**सर्वत्र चेति**(१)। नानात्वैकार्थसंबन्धनियताया बहुत्वसंख्याया अभेदैकार्थनियतैकत्वसंख्यया सामानाधिकरण्यविरोध इत्यर्थः। तदेतदनैकान्तिकमिति चोदयति—**नन्विति**। निराकरोति—**तन्नानभ्युपगमादिति**। समानं धर्म्मसाधनम्—यमाः पञ्च, नियमाः पञ्च, ब्रह्मचारिगृहस्थवानप्रस्थयतीनामविशेषेणैव दश धर्मसाधनम्, तेषां धर्म्मसाधनत्वमेकं **चातुराश्रम्यमिति** प्रकृतिगतविभक्तिराह। आश्रमप्रकृतिगता तु विभक्तिः प्रकृत्यर्थसमवेतामेव बहुत्वसंख्यामाह, समानार्थानामपि प्रकृतीनां रूपभेदेन तत्परस्य प्रत्ययस्य सामर्थ्यभेदात्। यथा अप्तोयशब्दयोस्तुल्यार्थत्वेऽपि तोयशब्दात्परा विभक्तिस्तोयानीति तोयसमवेतामेव बहुत्वसंख्यामाह। आप इति न तोयगताम्, अपि तु तत्संबद्धगताम्, तत्संबद्धाश्च तदवयवास्तद्गतरूपादयो वा बहव इत्येकस्यामपि पाथःकणिकायां बहुवचनोपपत्तिराप इति। न च सोरस्ताडं क्रन्दतोऽपि लोकस्य निवृत्तेर्नैवमिति सांप्रतम्। लोको हि दृष्टव्यवहारमात्रप्रयोजनो न विवेचयति, परीक्षकास्तु तदनुसारिणो विवेचयन्त्येव। अन्यथा हि प्रत्यक्षादिलक्षणप्रणयनवैयर्थ्यप्रसङ्गः। एतेन दाराः षण्णगरीत्यादयो व्याख्याताः। षाड्गुण्यमपि षण्णां गुणानामेकं राजप्रयोजनसाधकत्वम्, वैशेषिकमित्यत्रापि विशेषाणां समानासमानजातीयव्यवच्छेदकत्वमेकमुच्यत इति गमयितव्यम्। हेतुदोषमाह—**असिद्धोऽपीति**। स्फटिकस्य धवलं रूपम्, तच्च नीलद्रव्यानुषङ्गादभिभूतं न प्रतीयते, स्फटिकश्च प्रतीयते, न च नीलस्य स्फटिकलक्षणस्योत्पत्तिरिति तृतीये निवेदयिष्यते, (२) तस्मादसिद्धो हेतुरित्यर्थः। दृष्टान्तश्च साध्यविकल इत्याह—

(१) वार्त्तिके "च" नास्ति। (२) ३।२।८ सूत्रवार्त्तिके।

न्यायवार्त्तिकम्

यस्मान्नीलाद्युपधानभेदानुविधायिनः स्फटिकमणे रूपानुपलब्धौ स्फटिक इति प्रत्ययो दृष्टः। योऽप्ययं दृष्टान्तो यूषवत् पङ्क्तिवच्चेति तन्न भवता यूषो व्यज्ञायि न पङ्क्तिः। यूषो हि नाम उत्पन्नपाकजानां द्रव्याणां कालविशेषानुग्रहे सति द्रव्यान्तरसंपृक्तानां पाकजोत्पत्तौ यः संयोगः स यूष इति, स चार्थान्तरवदित्यसिद्धो दृष्टान्तः। एतेन पानक(१)काञ्जिकविरेका(२)वक्षारादयः प्रत्युक्ताः। पङ्क्तिरप्येकदिग्देशसम्बन्धिषु परस्पर(३)प्रत्यासत्त्यनुगृहीतेषु अवधारितानवधारितेयत्तेषु भिन्नभिन्नजातीयेष्वाधारेषु वर्तमाना बहुत्वसङ्ख्यैवोच्यते। एवमनियतदिग्देशसम्बन्धिषु गजतुरगस्यन्दनेषु परस्परप्रत्यासत्त्यनुगृहीतेषु(४) अवधारितानवधारितेयत्तेषु वर्तमाना बहुत्व-सङ्ख्यैव सेनेत्युच्यते। एवं जातिविशिष्टपुरुषोपग्रहेण वर्तमाना परिषत्। प्रव्रजितविशेषोप-ग्रहेण वर्तमाना सङ्घः। एवं यथासम्भवं पूगवनयूथब्राह्मणगणशब्दा अपि द्रष्टव्याः। एवम-नियतदिग्देशसम्बन्धिष्वनाद्यन्तेषु मध्यशून्येषु वर्तमाना कुण्डलकं बहुत्वसंख्यैवेति। तस्मात् पङ्क्तिरनर्थान्तरमित्यसिद्धो दृष्टान्तः। अथार्थान्तरे किं प्रमाणमिति? उपलभ्यस्य समस्तैरुप-

न्यायवार्त्तिकतात्पर्य्यटीका

योऽप्ययमिति। उत्पन्नपाकजानां तैले सर्पिषि वा भृष्ट(५)मांसपिण्डावयवानाम्, द्रव्यान्तरेण तोयेन संयुक्तानां (६) पाकजोत्पत्तौ सत्याम्, न चासौ सहसेत्युक्तम्—कालविशेषानुग्रहे सतीति। स च संयोगभेद एव तोयमांसयोः, न त्ववयवी, विजातीययोरनारम्भकत्वात्। नापि यूषजातीयं तोयसंयोगि द्रव्यं क्षीरजातीयमिवेति युक्तम्। तोयविरहे काठिन्येऽपि क्षीरबुद्धिव्यप-देशयोस्तादवस्थ्यात्। इह तु काठिन्ये न यूषबुद्धिव्यपदेशाविति संबन्धभेद एव तोयमांसयोर्यूष इति न्याय्यम्, स चानुभवसिद्धः संयोगिव्यतिरिक्तः। एवं बहुत्वसंख्या संख्येयातिरिक्ताऽनुभव-सिद्धैवेति। एवं तत्र तत्र व्याख्येयम्। अनाद्यन्तेष्वनारब्धावयविष्विति द्रष्टव्यम्। न च परकीयसाधनदोषोद्भावनमात्रात् स्वपक्षसिद्धिरिति सिद्धान्तिनं साधनं पृच्छति—अथ रूपादिभ्यो-ऽर्थान्तरे द्रव्ये किं प्रमाणमिति। यतोऽयं परो रूपादिभ्योऽर्थान्तरं द्रव्यं प्रत्यक्षेण विद्वानपि स्वसिद्धान्ताभ्यासाहितव्यामोहापस्मारो न तथा व्यवहरति, अतोऽनेनानुमानेन स व्यवहार्य्यते। अस्ति हि सर्वेषामेव लौकिकपरीक्षकाणां ब्राह्मणस्य कमण्डलुरितिवत् चन्दनस्य रूपादय इति व्यपदेशः। तत्र च परो रूपाद्युपलम्भमभ्युपगच्छति चन्दनोपलम्भमपि, अन्यथा तद्बुद्ध्यभावात् इत्येतावन्मात्रे वक्तव्ये कथमाह—"तदग्रह" इति, तेनाधिगच्छामो रूपादिग्रहेऽस्य चन्दनबुद्धि-रभिमतेति। न चासौ मनोमात्रयोनिः स्मार्त्तीति न्याय्यम्, उपपादितमेतस्याः सविकल्पिकाया

(१) "पाक-" इति ख-पु०। (२) "विविका" इति ख०। (३) "परापर-" इति ख०। (४) "परप्रत्या-सत्त्युपगृहीतेषु" इति ख०। (५) "पिष्ट-" इति क-पु पाठः। (६) "संपृक्तानाम्" इति वार्त्तिके।

न्यायवार्त्तिकम्

लभ्यैर्व्यपदेशः, यदिदं चन्दनमुपलभ्यते तस्य श्वेतं रूपं तिक्तो रसः पटुर्गन्धः शीतः स्पर्श इति। यश्चायं प्रत्यक्षस्य प्रत्यक्षेण व्यपदेशः सोऽर्थान्तरे दृष्टो यथा ब्राह्मणस्य कमण्डलुरिति। न खल्वयमेवं(१) प्रतिपद्यते—यदिदं श्वेतं रूपं तदनुमीयमानरसगन्धस्पर्शानामिति। सेनावनादिभिरनेकान्त इति चेत्—अथापि स्याद् बुद्धिः दृष्टोऽनर्थान्तरेऽपि व्यपदेशः सेनाया हस्ती, काननस्य वृक्ष इति? न, असिद्धत्वात्, असिद्धमेतद् अनर्थान्तरत्वं सेनायाः काननस्य च। यथा च तदर्थान्तरं सेना काननं वा तदुक्तमिति(२)। तदसत्त्वमिति चेत्—अथाप्येवं कल्प्येत—सङ्ख्यैव तावन्नास्ति कुतोऽर्थान्तरभाव इति? नैवम्(३)। संख्या नास्तीति ब्रुवता एकानेकप्रत्ययानां विधीयमानं प्रतिषिध्यमानं वा निमित्तमुपादेयम्। कस्मात्? एकानेकप्रत्ययानामप्रत्याख्येयत्वात्, विशिष्टाश्च प्रत्यया भवन्तो न निमित्तप्रत्याख्यानेन भवितुमर्हन्ति। किं कारणम्? कुम्भप्रत्ययनिमित्तान्यनिमित्तक(४) एकानेकप्रत्ययः कुम्भप्रत्ययविलक्षणत्वात् नीलादिप्रत्ययवत्(५), तस्माद् यत्तत्प्रत्ययनिमित्तं सा सङ्ख्येति। तत्प्रत्ययविषयनिमित्तप्रत्यय-

न्यायवार्त्तिकतात्पर्य्यटीका

इन्द्रियजन्यत्वं व्यवसायात्मकपदव्याख्यानावसरे(६)। द्रव्यबाधकप्रमाणानि च परीक्षापर्वणि(७) निराकरिष्यन्ते। तस्मात्सिद्धमुपलभ्यत्वं चन्दनस्य व्यपदेश्यस्य, सोऽयं चन्दनो विवादगोचरेभ्यो रूपादिभ्यो भिन्नः, स्वयमुपलभ्यस्य च समस्तैरुपलभ्यैर्व्यपदिश्यमानत्वात्। प्रधानमपि सांख्यैर्व्यपदिश्यते प्रधानस्य रूपादय इति, तन्निवृत्त्यर्थमुपलभ्यस्येति। प्रधानं तु काल्पनिकं नोपलभ्यते, तथाऽपि रूपादीनां मूलकारणं प्रधानमित्यस्ति सांख्यानां व्यपदेशोऽत उक्तमुपलभ्यैरिति। तथाऽपि रूपादीनां परस्परभिन्नानामन्योन्यं व्यपदेश्यव्यपदेशकभाव उपपत्स्यत इत्युक्तम्—समस्तैरिति। अतः समस्तेभ्यो व्यपदेशकेभ्यश्चन्दनं भिन्नं भवति। उपलभ्यस्योपलभ्येनेति वक्तव्ये प्रत्यक्षस्य प्रत्यक्षेणेति वचनं रूपावगमसमयेऽनुमेयेभ्यो रसादिभ्य एकान्ततो व्यपदेशं व्यावर्त्तयितुम्, न त्वस्यानुमान उपयोग इति। अस्यानैकान्तिकत्वमुद्भाव्य निराकरोति—सेनावनादिभिरिति। संख्यायाम् असत्त्वमाशङ्क्य निराकरोति—तदसत्त्वमिति चेदिति। विधीयमानं प्रतिषिध्यमानमिति यथासंख्यं निषेधस्य विध्यधीननिरूपणतया निषेध्यमेकत्वमङ्गीकार्य्यम्, तच्च संख्येत्यर्थः। ननु सन्त्वमी प्रत्ययाः, ते तु द्रव्यमात्रनिबन्धना भविष्यन्ति, कृतं सङ्ख्ययेत्यत आह—विशिष्टाश्चेति। न द्रव्यातिरिक्तनिमित्तप्रत्याख्यानेन

(१) "न खल्वेवम्" इति ख०। (२) कतिपयपंक्तिभ्यः प्राग्—"सेनेत्वाच्यते" इत्यादिना उक्तम्। (३) "नैव" इति ख-पु०। (४) "कुम्भप्रत्ययान्यनिमित्तक-" इति ख०। (५) "नीलप्रत्ययवत्" इति ख०। (६) १।१।४ सूत्रटीकायाम्। (७) तृतीयाध्याये।

न्यायवार्त्तिकम्

व्यतिरेकेण ततोऽन्यस्य तद्विशिष्टप्रत्ययस्योत्पत्तौ (१) निमित्तान्तराकाङ्क्षित्वं दृष्टम्। तद्यथा वस्त्रचर्मकम्बलेषु वस्त्रचर्मकम्बलप्रत्ययास्तेभ्य एव (२) भवन्ति। तेषु तु योऽन्यो नीलमिति प्रत्ययः स निमित्तान्तराद्भवन् दृष्टः, तथा च घटादिष्वपि घटादिविषयनिमित्तव्यतिरेकभाजः तत्र एकादिप्रत्ययाः (३), तस्मात्तैरपि निमित्तान्तराद्भवितव्यम्। यन्निमित्तं ते सङ्ख्येयत्व इति। महत्पुष्पितशब्दाभ्यां सामानाधिकरण्यान्न सङ्ख्या सेना वनं वा भवितुमर्हति, यदि सङ्ख्या सेना वनं वा, महती सेना पुष्पितं वनमिति न (४)प्राप्नोति, न सङ्ख्यायां महत्त्वमस्ति न पुष्पयोग इति। नैष दोषः। महती सेनेति किमुच्यते? तानेव गजादीन् सङ्ख्याधारा-(५) नवधारितानवधारितेयत्तान् स्थान्यङ्गान्तरोपचये सति महती सेनेति व्यपदिशन्ति(६)। तत्रैवं स्थानिषु(७) गजादिषु(८) महच्छब्दवाच्येष्वपचयोपचयकरणात् बहुत्वसङ्ख्या महतीत्युच्यते। पुष्पितमित्यत्रापि पुष्पसम्बन्धिषु वृक्षेषु पुष्पसम्बन्धेनैकार्थसमवायमनुभवन्ती बहुत्वसङ्ख्यैवाभिधीयते, यथा मधुरो रसः, तिक्तो गुडश्चेति। अत एव व्यपदेशात् सङ्ख्यादीनामप्यर्थान्तरभावः। असति दर्शनान्न हेतुः, यथा गर्त्तश्छिद्रमिति। न, अपरिज्ञानात्—गर्तो हि नाम

न्यायवार्त्तिकतात्पर्य्यटीका

इत्यर्थः। प्रयोगान्तरमाह—तत्प्रत्ययविषयनिमित्तप्रत्ययव्यतिरेकेणेति। घटप्रत्ययस्य विषयश्च निमित्तम्, घटप्रत्ययश्च तद्व्यतिरेकेणेति, तद्विशिष्टसंख्यादिप्रत्ययस्य निमित्तान्तराकाङ्क्षित्वात्, तत्किमर्थमत उक्तम्—उत्पत्ताविति। चर्मणि द्वीपिनं हन्तीतिवद् घटादिविषयनिमित्तव्यतिरेकभाज इत्यत्रापि प्रत्ययग्रहणं कर्त्तव्यम्। चोदयति—महत्पुष्पितेति। न संख्याया गुणस्य परिमाणपुष्पयोगसंभव इत्यर्थः। परिहरति—नैष दोष इति। स्थानशब्देन तिष्ठतीति व्युत्पत्त्या संख्योच्यते, सा येषामस्ति ते गजवाजिपदातिप्रभृतयः स्थानिनः प्रत्येकं महान्तः, तत्र ते क्वचिच्छतमेव, क्वचित् पुनस्तज्जातीयस्थान्यङ्गान्तरसन्निधाने सत्युपचिताः सहस्रं भवन्ति। तेन बहुत्वसंख्योपचयोपकरणात्तदेकार्थसमवेतमहत्त्वोपचारान्महती सेनेत्युच्यते। न चैतावता यत्र शतं गजादयः यत्र च सहस्रम्, तयोः सेनयोर्महत्त्वाविशेषः, उपचयापचयोपकरणत्वेन विशेषितत्वात्। एवं पुष्पितवनादयो द्रष्टव्याः। प्रत्ययभेदाद् द्रव्यादिभ्यः संख्याया भेदमुक्त्वा व्यपदेशभेदादप्याह—अत एवेति।

---

(१) "निमित्तान्तराकाङ्क्षित्वाद् यः प्रत्ययविषयनिमित्तप्रत्ययव्यतिरेकेण प्रत्ययो भवति तस्य" इत्यधिकपाठः ख-पुस्तके। (२) "तेभ्य एव" इत्यत्र "त एव" इति ख०। (३) "घटादिष्वपि" इत्यनन्तरं ख-पुस्तके "घटाविषयनिमित्तव्यतिरेकभाक् तत्र कादिप्रत्यया:" इत्यधिकपाठः। (४) "इति न" इत्यंशः ख-पु नास्ति। (५) "धारा" इत्यंशः ख-पु नास्ति, किन्तु "सङ्ख्यानवधारिता" इत्येवं पाठः। (६) "व्यपदिशन्ति" इत्यत्र "अपदिशन्ति" इति ख०। (७) "संस्थानिषु" इति ख०। (८) ख-पुस्तके "गजादिषु" इति नास्ति।

न्यायवार्त्तिकम्

रूपादिमद्भिः सावयवैरारब्धकार्यैर्मध्यशून्यैः संस्थानविशेषोपहितमाकाशमिति। एतेन छिद्रं व्याख्यातम्। एकस्मिन्नपि दर्शनात् व्यपदेशादर्थान्तरभावो(१) न युक्तः, तद् यथा खदिरस्य स्थाणुरिति। बहुषु चाऽसंयुक्तेषु(२) दर्शनात्, तद् यथा प्रासादानां मालेति। संयुक्तेषु चाऽसजातीयेषु(३) दर्शनात् त्रिवृत्पृथिव्युदकतेजसां विरेक(४) इति। यत्तावदेकस्मिन्नपि दर्शनादिति, तदयुक्तम्, खदिरशब्दस्य जातिविशिष्टद्रव्यवाचित्वात्, खदिरशब्देन जातिविशिष्टं द्रव्यमुच्यते, स्थाणुशब्देनापि संस्थानविशेषोऽभिधीयते, संस्थानविशेषश्च प्रचयाख्यः संयोगः। स चार्थान्तरमिति। एतेन सर्पकुण्डलकम्, प्रतिमायाः शरीरम्, सुवर्णस्याङ्गुरीयकम्, शिलापुत्रकस्य शरीरम्, इत्यादिकं भेदवाचकमित्युक्तं भवति। प्रासादानां माला पंक्तिवद् द्रष्टव्या। संयोगो विरेक(५) इत्युक्तमेतत्। गुणसमुदायव्यतिरेकेणाग्रहणादिति चेत—अथापि मन्येथाः(६) यदि रूपादिव्यतिरिक्तं द्रव्यं स्यात् तद्रूपादीनन्तरेण पृथगुपलभ्येत, न तूपलभ्यते, तस्मान्नास्ति। अग्रहणस्य द्विनिमित्तत्वादनेकान्तः, किमिदमग्रहणं ग्राह्यस्याभावादाहो ग्रहे हेत्वभावादिति सन्दिह्यते। ग्राह्याभावादिति चेत्, प्रतिज्ञार्थेन हेत्वर्थस्याक्षेपादयुक्तो हेतुः। ग्रहणाभावादिति चेत्, न व्यतिरेकप्रतिषेधः। यश्च तदग्रहे तद्बुद्ध्यभावादिति हेतोर्दोषः, सोऽस्यापि द्रष्टव्य

न्यायवार्त्तिकतात्पर्य्यटीका

स्थाणुशब्देनापीति। मूर्त्तानां समानदेशत्वाभावान्न पर्वसु खदिरश्च स्थाणुश्च समवेतौ। न चावस्थितसंयोगेभ्यस्तरुविनाशापेक्षेभ्यः स्थाणोरुत्पत्तिरिति युक्तम्। यस्य द्रव्यस्य यावत्संयोग-प्रचयोऽसमवायिकारणं स तावानुत्पन्नमात्र एव तज्जनकः, तस्य च क्षेपायोगात्। तस्मात् पर्वणां संस्थानविशेष एव स्थाणुरिति गमयितव्यम्। अथावस्थितसंयोगानां द्रव्यनाशापेक्षाणां जनकत्वम्, ततः संयोगप्रचयपदेन स्थाणुत्वसामान्यविशेषवद् द्रव्यमुपलक्षणीयम्, तच्च खादिर-तरोर्भिन्नमिति। प्रतिमाया महारजतमय्या अवयविन्याः शरीरं संस्थानमेव, एवं शिलापुत्रक-स्यावयविनः संस्थानमेव शरीरम्। शङ्कते—गुणसमुदायेति। अतादात्म्येनाग्रहणं व्यति-रेकेणाग्रहणम्, पृथक्शब्दोऽप्यतादात्म्यमेव ब्रूते। दूषयति—अग्रहणस्येति। सतामपि वस्तूनामनुपलम्भो यथा मूलकीलकादीनां प्रमाणाभावेन, शशविषाणादीनां चानुपलम्भो ग्राह्या-भावेन, तस्माद्व्यतिरेकाग्रहणमात्रं हेतुरनेकान्त इति। शङ्कते—ग्राह्याभावादिति चेद्, ग्राह्या-भावे सत्यग्रहणादिति हेतुः, न त्वग्रहणमात्रमित्यर्थः। दूषयति—प्रतिज्ञार्थेनेति। प्रतिज्ञार्थ-स्यासिद्धत्वेन तद्विशिष्टो हेतुरसिद्ध इत्यर्थः। शङ्कते—ग्रहणेति, ग्रहणंप्रमाणम्। निराकरोति—

---

(१) "अर्थान्तराभाव" इति ख०। (२) "वाऽसंयुक्तेषु" इति ख०। (३) "वाऽसजातीयेषु" इति ख०। (४) "वृतताव्युदकतेजांसि विवेक" इति ख०। (५) "संयोगे विवेक" इति ख०। (६) "अथानुमन्येथाः" इति ख०।

न्यायभाष्यम्

अचेतनस्य करणस्य बुद्धेर्ज्ञानं वृत्तिः चेतनस्याकर्तुरुपलब्धिरिति युक्तिविरुद्धमर्थं प्रत्याचक्षाणक इवेदमाह—

(सू)—बुद्धिरुपलब्धिर्ज्ञानमित्यनर्थान्तरम् ॥ १५ ॥

नाचेतनस्य करणस्य बुद्धेर्ज्ञानं भवितुमर्हति, तद्धि चेतनं स्यात्, एकश्चायं चेतनो

न्यायवार्त्तिकम्

इति। सोऽयमनन्यत्ववादो यथा यथा विचार्यते तथा तथा(१) स्पष्टमन्यत्वं प्रतिपादयति, प्रमाणानामेकत्रोपपत्तेः एकत्र चानुपपत्तेरिति। तस्माद् व्यवस्थितमेतत् पृथिव्यादीनि गुणाश्चेति द्वन्द्वः समासः ॥ १४ ॥

अथ बुद्धेरवसरप्राप्ताया लक्षणापदेशद्वारेण सूत्रम्—बुद्धिरुपलब्धिरित्यादि एतैः पर्यायशब्दैर्योऽभिधीयते पदार्थः सा बुद्धिरिति। पर्यायशब्दाः कथं लक्षणम्? व्यवच्छेदहेतुत्वात्। सर्वं हि लक्षणमितर(२)पदार्थव्यवच्छेदकम्, एतैश्च पर्यायशब्दैर्नान्यः पदार्थोऽभिधीयत इत्य-

न्यायवार्त्तिकतात्पर्य्यटीका

न प्रमाणाभावमात्राद् व्यतिरेकप्रतिषेधः, यस्तु योग्यप्रमाणाभावादिति विशेषहेतुः, तं प्रत्याह—यश्च तदग्रह इति। असिद्धता हेतुदोषः। दर्शनस्पर्शनाभ्यामेकार्थप्रतिसन्धानमेव रूपादिव्यतिरिक्तग्रहणमितो गुणसमुदायव्यतिरेकेणाग्रहणमित्यसिद्धो हेतुरिति।—एकत्र अन्यत्वे, प्रमाणानामुपपत्तेः, एकत्र अनन्यत्वे, प्रमाणानामनुपपत्तेरिति। प्रकृतमुपसंहरति—तस्मादिति ॥१४॥

आत्मादीनां बुद्धिहेतूनां लक्षणस्यानन्तरं हेतुमती बुद्धिर्लक्षणीयेत्याह वार्त्तिककारः—अथ बुद्धेरवसरप्राप्ताया इति। लक्षणं तावत्प्रकृतत्वादपदेष्टव्यमेव, तदपदेशद्वारेणान्यदपि किञ्चित् सूचनीयम्, अत एवोक्तं—सूत्रमिति। अन्यच्च सांख्यमतनिराकरणम्। यथोक्तं भाष्यकारेण—अचेतनस्य करणस्य बुद्धेरिति। इवकारेण नेदं प्रत्याख्यानपरम्, अपि तु लक्षणपरादयमर्थः प्रतीयमानोऽपेक्षितश्च नोपेक्षणीय इत्युक्तं भवति।

बुद्धि—रम् (सू, १५) ॥ सूत्रतात्पर्य्यमाह—एतैरिति। पृच्छति—कथमिति। समानासमानजातीयव्यवच्छेदकं हि लक्षणमव्यभिचारितया, पर्य्यायशब्दाश्च संकेतमात्राधीनप्रवृत्तयः क्व नाम न संभवन्ति, तस्मान्नैते लक्षणमिति भावः। उत्तरम्—व्यवच्छेदेति। ननु व्यभिचार-

वृत्तिः

बुद्धिं लक्षयितुमाह—(बुद्धिरित्यादि)।

अनर्थान्तरम्—समानार्थकम्, न तु साङ्ख्यानामिव बुद्धितत्त्वस्य(३) महत्तत्त्वापर-

(१) "तदा तदा" इति ख०। (२) "इतरेतर" इति ख०। (३) "बुद्धिसत्त्वस्य" इति व०।

न्यायभाष्यम्

देहेन्द्रियसंघातव्यतिरिक्त इति। प्रमेयलक्षणार्थस्य वाक्यस्यान्यार्थप्रकाशनमुपपत्तिसामर्थ्यादिति ॥ १५ ॥

न्यायवार्त्तिकम्

साधारणत्वाल्लक्षणम्। उपपत्तिसामर्थ्यात् पर्यायशब्दाभिधानाद् बुद्धिवृत्तेर्निराकरणम्। य आहुः—'बुद्धेर्ज्ञानं वृत्तिरात्मन उपलब्धिवृत्तिरिति' तन्निराकरणार्थं समानार्था एते शब्दा इति बुद्धिवृत्तिः पृथङ्निराकृता भवति। का पुनरत्रोपपत्तिर्भवति? आत्मोपलभते बुद्धिर्जानीत इति ब्रुवाण उभयोश्चैतन्यं प्रतिपद्यते, उभयचैतन्ये च प्रत्ययव्यवस्थानुमानं न (१)स्यात्। यदि

न्यायवार्त्तिकतात्पर्य्यटीका

संभवेन व्यवच्छेदकत्वमयुक्तमत आह—एतैश्चेति। संकेतो हि द्वेधा, सार्वजनीनो यथा गौरिति गोजातीयस्य वाचकः, प्रादेशिकश्च यथा चैत्र इति पुरुषभेदस्य। तत्र सार्वजनीनः शक्नोति व्यवच्छेदबुद्धिं भावयितुम्, तद्विवक्षयैवोक्तम्—एतैश्चेति। उपपत्तिसामर्थ्यादिति भाष्यावयवं व्याचष्टे—पर्य्यायेति। अत्रेतनस्येत्यादि भाष्यम्, तद्व्याचष्टे—य आहुर्बुद्धेरिति। बुद्धिः किल त्रैगुण्यविकारः, त्रैगुण्यं चाचेतनमित्यचेतनं केवलमिन्द्रियप्रणालिकयाऽर्थाकारेण परिणमते, चितिशक्तिश्चापरिणामिनी नित्यचैतन्यस्वभावा, तस्याः सन्निधानादयस्कान्तमणिकल्पा बुद्धिस्तत्प्रतिबिम्बोद्ग्राहितया चैतन्यरूपतामापन्नेवार्थाकारपरिणताऽर्थं चेतयते, तेन योऽसौ नीलाकारः परिणामो बुद्धेः, स ज्ञानलक्षणा वृत्तिरित्युच्यते। आत्मप्रतिबिम्बस्य तु बुद्धिसंक्रान्तस्य यो बुद्ध्याकारनीलसंबन्धः स आत्मनो व्यापार इवोपलब्धिरात्मनो वृत्तिरित्याख्यायते, तदिदं बुद्धितत्त्वं जडप्रकृतितया इन्दुमण्डलमिव स्वयमप्रकाशं चैतन्यमार्त्तण्डमण्डलच्छायापत्त्या प्रकाशते, प्रकाशयति चार्थानिति। तन्निराकरणाय पर्य्यायोपन्यासः। नात्मवृत्तेरुपलब्धेरन्याऽस्ति बुद्धिः, नापि बुद्धिवृत्तिर्ज्ञानमन्यदिति। अयमभिसन्धिः—न तावद्बुद्धेरात्मच्छायापत्तिरिन्दाविव मार्त्तण्डमण्डलतेजःसंक्रान्तिः पारमार्थिकी, चितेरपरिणामितया संक्रमायोगात्। तस्माद् भ्रान्तिः, सा च न तावद्बुद्धेः, तस्या अचैतन्यात्। नाप्यात्मनः, तस्यावृत्तिकत्वात्, तथात्वे परिणामापत्तेः। तस्मात्कृपणधनमिवात्मचैतन्यं न स्वपरोपकारीति बुद्धेः स्वाभाविकं चैतन्यमास्थेयम्, तथाच उभयचैतन्ये दूषणमुक्तम्(२)। प्रत्ययव्यवस्थया यदेककर्तृकत्वानुमानं तन्न स्यादित्यर्थः। अथ

वृत्तिः

पर्यायस्य परिणामविशेषो ज्ञानम्। यथा चैतत्तथा वक्ष्यते। तथा च बुद्ध्यादिपदवाच्यत्वमनुभवसिद्धज्ञानत्वजातिरेव वा लक्षणमिति भावः ॥ १५ ॥

---

(१) "न" इति ख-पु नास्ति। (२) "उभयचैतन्ये च" इत्यादिना वार्त्तिके उक्तम्।

न्यायभाष्यम्

स्मृत्यनुमानागमसंशयप्रतिभास्वप्नज्ञानोहाः सुखादिप्रत्यक्षमिच्छादयश्च मनसो लिङ्गानि। तेषु सत्स्वयमपि—

(सू)—युगपज्ज्ञानानुत्पत्तिर्मनसो लिङ्गम् ॥ १६ ॥

अनिन्द्रियनिमित्ताः स्मृत्यादयः करणान्तरनिमित्ता भवितुमर्हन्तीति। युगपच्च

न्यायवार्त्तिकम्

बुद्धिश्चेतना आत्मा चेतनो न बुद्ध्यावसितानर्थानात्मोपलभेत(१)। किं कारणम्? चेतनान्तरोपलब्धानां(२) चेतनान्तरस्याप्रतिपत्तेः। अस्ति च प्रतिपत्तिः, तस्मादेकश्चेतन इति। बुद्धिवृत्त्यविशिष्टायां च ज्ञातृवृत्तौ कल्पितायामात्मनः स्वरूपं वक्तव्यम्। बुद्धिरध्यवस्यत्यात्मा चेतयत इति चेत्—अथापीदं स्यात् यथा बुद्धिरर्थानध्यवस्यति तथाऽऽत्माऽधिदेशमधिकालं चोपलभत इति। अध्यवस्यत्युपलभत इति पर्यायशब्दौ। न च पर्यायशब्दैः पदार्थनानात्वं युक्तम् यथा ध्वनिर्नाद इति। अन्यथा हि ध्वनिर्नाद इत्यत्रापि नानात्वं स्यात्। अथात्मा चेतयते बुद्धिर्ज्ञापयतीति चेत्(३)? अद्धा बुद्ध्या जानीते पुरुषो न बुद्धिः, बुद्धिर्ज्ञापयतीति, बुद्धिर्ज्ञानसाधनं भवतीति ॥ १९ ॥

स्मृत्यनुमानागमसंशयप्रतिभास्वप्नज्ञानोहा इति भाष्यम्। एते स्मृत्यादयो मनसो लिङ्गं भवन्ति। किमेत एव? न(४)। किं तर्हि? इयं च युगपज्ज्ञानानुत्पत्तिर्मनसो लिङ्गम्।

यस्मादिन्द्रियार्थसन्निकर्षे सत्यपि युगपज्ज्ञानानि न(५) सम्भवन्ति, अतो गम्यते—

न्यायवार्त्तिकतात्पर्य्यटीका

द्वयोश्चेतनयोरेका वृत्तिर्भेदाग्रहो वा, तेनैककर्तृकत्वाभिमान इत्यत आह—बुद्धिवृत्त्यविशिष्टायामिति। बुद्धिर्ज्ञानसाधनमिति। बुद्ध्यतेऽनेनेति व्युत्पत्त्या मन उच्यते, गन्धादिविषयतया सुखदुःखविषयतया चेयं बुद्धिर्भाव्यमाना निर्वेदाय कल्पत इति ॥ १९ ॥

भाष्यकारः क्रमप्राप्तं मनोलक्षणसूत्रमवतारयन्नुत्सूत्रमन्यान्यपि लक्षणान्याह—स्मृतीत्यादि। सुखादिप्रत्यक्षमित्यादिशब्देन विषयतयेच्छादयः संगृहीताः। इच्छादय इत्यादिशब्देन कार्य्यतया सुखादयः संगृहीताः। युग—ङ्गम् (सू०, १६) ॥

अनिन्द्रियनिमित्ता अबाह्येन्द्रियनिमित्ता इत्यर्थः। स्मृतीत्यादिभाष्यस्य वार्त्तिककारस्तात्-

(१) "लभते" इति ख०। (२) "चेतनोपलब्धानाम्" इति ग०। (३) "चेत्" इति ख-पु नास्ति। (४) ख-पु "न" नास्ति। (५) "न" इति ख-पु नास्ति।

न्यायभाष्यम्

खलु घ्राणादीनां गन्धादीनां च सन्निकर्षेषु सत्सु युगपज्ज्ञानानि (१) नोत्पद्यन्ते, तेनानुमीयते, अस्ति तत्तदिन्द्रिय(२)संयोगि सहकारि निमित्तान्तरमव्यापि, यस्यासन्निधेर्नोत्पद्यते

न्यायवार्त्तिकम्

अस्ति तदिन्द्रिय(३)संयोग(४)सहकारि निमित्तान्तरमव्यापि, यस्य सन्निधानासन्निधानानुविधानात् ज्ञानस्योत्पत्त्यनुत्पत्ती भवत इति। कुतः? कारणवैकल्ये कार्यप्रतिबन्धादिति सूत्रार्थः।

कथं पुनः स्मृत्यादयो मनसो लिङ्गं भवन्त्यन्यत्र(५) वर्तमाना इति? न ब्रूमः स्मृत्यादयो मनोवृत्तित्वान्मनसो लिङ्गं भवन्ति। अपि तु गन्धादिक्रियान्यत्वे सति क्रियात्वात् करणान्तरप्रयोजकत्वम्, या गन्धादिभ्योऽन्या क्रिया सा करणान्तरप्रयोज्या दृष्टा, यथा रथादिक्रिया। क्रिया चेयं स्मृत्यादिका तस्मादियमपि करणान्तरं प्रयोजयति। सुखादयो वा गन्धादिभ्योऽन्यत्वे(६) सति विषयत्वाच्चक्षुरादिव्यतिरिक्तकरणान्तरप्रयोजका रथादिवदिति। तद्यथा रथादयो विषयाः चक्षुरादिव्यतिरिक्तं करणं वास्यादि(७) प्रयोजयन्ति, विषयाश्च सुखादयः, तस्मात्तैरपि करणान्तरं प्रयोजयितव्यमिति। अथायुगपज्ज्ञानोत्पत्तिर्ज्ञानधर्मः सा कथं मनोलिङ्गं भवति? अथासम्बद्धमपि लिङ्गमिष्यते? सर्वं सर्वस्य लिङ्गं स्यात्, अस्त्यात्मा काकस्य कार्ष्ण्यादित्येतदपि स्यात्, न त्वेवं भवति। तस्मान्नासम्बद्धं लिङ्गं सम्भवति(८)। असम्बद्धमपि लिङ्गं भवतीत्येके—यथा प्रत्यग्रशरावदर्शनं कुलालावृत्ति कुलालसद्भावं गमयति भ्रान्तिमच्चक्रदर्शनं

न्यायवार्त्तिकतात्पर्य्यटीका

पर्य्यमाह—स्मृतीति। अनिन्द्रियेत्यादि(९) भाष्यं व्याचष्टे—यस्मादिति। इन्द्रियगतरूपादिव्यावृत्त्यर्थमुक्तमिन्द्रियसंयोगीति। तथाप्याकाशादीनां मनस्त्वं मा भूदत उक्तम्—सहकारीति। तथाप्यालोकस्य मा भूदत उक्तम्—निमित्तान्तरमिति। तथाप्यात्मनो मा भूदत उक्तम्—अव्यापीति।

आक्षिप्य भाष्यं समाधत्ते—कथं पुनरिति। चक्षुरादिभ्योऽनुत्पत्तौ सत्यां क्रियात्वात्। अत्र च य आत्मनो विशेषगुणास्ते सर्वे इन्द्रियजन्मानो यथा गन्धादिप्रत्ययाः, तथा च विवादाध्यासिताः स्मृत्यादयः, तस्मात्तेऽपीन्द्रियजन्मानः, एवं च संस्कारादिषु न करणत्व-

वृत्तिः

मनो लक्षयति—(युगपज्ज्ञानेत्यादि)।

युगपत्—एककाले, एकात्मनीति पूरणीयम्। ज्ञानानामनुत्पत्तिर्यतः स एव धर्मो

(१) "युगपज्ज्ञानानि" इति अ–ग०। (२) "तदिन्द्रिय" इति वि–टि०। (३) "तत्तदिन्द्रिय" इति भाष्ये। (४) अत्र "संयोगि" इत्येवं पाठः सुष्ठुतरः, भाष्यतात्पर्य्याभ्यां तथा प्रतीतेः। (५) "भवन्त्यत्र" इति ख०। (६) "सुखादयो रागान्यत्वे" इति ख०। (७) "वास्या स्यादिति" इति ख०। (८) "लिङ्गं सम्भवति" इत्यत्र "लिङ्गमिति" इति ख०। (९) आदर्शे—"अनेनेन्द्रियत्यादि" इति पाठः।

न्यायभाष्यम्

ज्ञानं सन्निधेश्चोत्पद्यत इति। मनःसंयोगानपेक्षस्य हीन्द्रियार्थसन्निकर्षस्य ज्ञानहेतुत्वे युगपदुत्पद्येरन् ज्ञानानीति ॥ १६ ॥

न्यायवार्त्तिकम्

चेति, तन्न, नैवात्र कुलालसद्भावो बोद्धव्यः किन्तु देश एवाविदूरकुलालवत्त्वेन साध्यः, तस्य प्रत्यग्रशरावत्वं धर्मः भ्रान्तिमच्चक्रवत्त्वेनापि (१)देशोऽविदूरकुलालवत्त्वेन साध्यते, तस्मान्नासम्बद्धमनुमानं क्वचिदिति। युगपज्ज्ञानानुत्पत्तिस्तर्हि कथं मनसाऽसम्बद्धा मनोलिङ्गं भवति। युगपज्ज्ञानोत्पत्तेरेव पक्षीकरणान्नासम्बद्धम्। कथमिति? रूपादिग्रहणानि चक्षुरादिव्यतिरेकेणाधिष्ठायकान्तरापेक्षाणि अयुगपदुत्पत्तेः। तद् यथा अनेकशिल्पपर्यवदातस्य पुरुषस्य (२) अनेकं वास्यादि युगपत् सन्निधानेनोपस्थितं हस्ताद्यधिष्ठायकापेक्षं न युगपदनेकरथादिक्रियां निर्वर्तयति, तथा चक्षुरादि न युगपदनेकं ज्ञानं करोति, तस्मात्तदप्यधिष्ठायकान्तरमपेक्षत इति। इन्द्रियाणि वा पक्षीकृत्य वक्तव्यम्। कथमिति? चक्षुरादीन्द्रियम् आत्मप्रवृत्ता (३) वधिष्ठायकान्तरापेक्षम्, अयुगपत् प्रवृत्तेः वास्यादिवदिति। यदि तर्हि चक्षुरादीन्द्रियं मनःसन्निधानापेक्षमर्थानामयुगपद्ग्राहि, य एकेन्द्रियग्राह्यास्तेषु कथमयुगपद्ग्रहणम्? न हि तत्रासन्निहितं मन इति। सम्बन्धिभेदादिति चेत्, युगपत्सम्बन्धिषु कथम्? भवतु तावन्नीलादिभेदेषु एकेन्द्रियविषयेषु इन्द्रियविषय(४)सम्बन्धिभेदादयुगपद्ग्रहणम्, अथ ये युगपत् सम्बध्यन्ते तेषु कथं शुक्लो गौर्गच्छतीति प्रत्यया न (५) युगपत् प्राप्नुवन्ति? बुभुत्साभेदादयुगपद्ग्रहणमित्येके—एके तावद् ब्रुवते सम्बद्धोऽप्यर्थोऽबुभुत्सितत्वान्न गृह्यत इति, तन्न, मनोनिवृत्ति (६) प्रसङ्गात्—एवं तर्हि मनः परित्याज्यम् यदि बुभुत्साभेदादयुगपद्ग्रहणानि भवन्ति। अन्यत्रापि बुभुत्साभेदो(७) न दण्डवारित इति मन इदानीमनर्थकं परित्याज्यम्। सत्यां च बुभुत्सायामयुगपद्ग्रहणे न्यायोऽन्योऽवधारणीयः, तस्मादन्य-

न्यायवार्त्तिकतात्पर्य्यटीका

प्रसङ्ग इति। सौत्रं हेतुमाक्षिप्य समाधत्ते—अथायुगपदिति। संबन्धिभेदादिति। यदा तस्यैव मनःसंयुक्तस्येन्द्रियस्य क्रमेण नीलादयोऽर्थाः संबध्यन्ते तदा तत्क्रमात् क्रम इत्यर्थः।

वृत्तिः

ज्ञानकरणाणुत्वं मनसो लिङ्गं—लक्षणमित्यर्थः। तथा हि चक्षुरादिषु विषयसम्बद्धेष्वपि यस्याऽसन्निधाना(८)देकं न ज्ञानं जनयति, तत्सम्बन्धा(९)दपरं च ज्ञानं जनयति, तदेव

---

(१) "चक्रत्वेनापि" इति ख०। (२) "पुरुषस्य" इति ख नास्ति। (३) "प्रयुक्ता" इति ख०। (४) "एकेन्द्रियविषयेषु इन्द्रियविषय" इति ख-पु नास्ति। (५) "न" इति ख-पु नास्ति। (६) "मनोवृत्ति" इति ख०। (७) "अन्यत्राबुभुत्साभेद" इति ख०। (८) "यस्याऽऽसत्त्वाभावादिति" आ-त्र०। (९) "यत् सम्बन्धादि"ति आ।

न्यायभाष्यम्

क्रमप्राप्ता तु—

(सू)—प्रवृत्तिर्वाग्बुद्धिशरीरारम्भः (१) ॥ १७ ॥

मनोऽत्र बुद्धिरित्यभिप्रेतम्, बुध्यतेऽनेनेति बुद्धिः। सोऽयमारम्भः शरीरेण वाचा मनसा च पुण्यः पापश्च दशविधः। तदेतत्कृतभाष्यं द्वितीयसूत्र इति ॥ १७ ॥

न्यायवार्त्तिकम्

निमित्तमयुगपद्ग्रहणमिति। किं पुनर्निमित्तम्? करणत्वम्, यथैवायं करणधर्मो नानधिष्ठितं करणं प्रवर्त्तत इति, तथा सम्बद्धस्याप्यनेकक्रियाकारित्वं नास्ति, न हि किञ्चित्(२) करणं सम्बद्धमपि सदेकदाऽनेकां क्रियां(३) शक्नोति कर्तुम्। यदि पुनरात्मैवाधिष्ठाता भवेत् तथाप्यात्मनो युगपदनेकेन्द्रियसम्बद्धस्यानिषेधादयुगपज्ज्ञानोत्पत्तौ न्यायोऽन्योऽवधार्य्यः। स च नान्तरेण मन इति सिद्धं मनः ॥ १६ ॥

प्रवृत्तिर्वाग्बुद्धिशरीरारम्भ इति। शरीरेण मनसा वाचा च। सेयं प्रवृत्तिः प्रत्येकं

न्यायवार्त्तिकतात्पर्य्यटीका

बुभुत्साक्रमं गृहीत्वा सिद्धान्तेऽपि मनःपरित्यागो मा भूदत उक्तम्—सत्यां बुभुत्सायामयुगपद्ग्रहण इति। न हि किंचित्करणं संबद्धमपि सकृदिति स्यात्, यद्येवं धारावाहिकज्ञानोत्पत्तिर्न स्यात्, द्वितीयादिज्ञानेष्वपि सैव सामग्रीति सकृदेव यावत् कर्त्तव्यकरणात् समर्थस्य क्षेपायोगात्। क्षेपयोगे वा पश्चादपि न जनयेत्, अविशेषात्। न च कर्तुरप्ययं क्रमकारिताधर्मः, स ह्यनेककरणाधिष्ठानेन युगपन्नानाकार्य्याणि करोति, युगपन्माणवको गच्छति, पठति, वहति चाऽऽचार्य्यस्य कमण्डलुमिति, तस्मात् सर्वमवदातम्। तदिदमपि मनः स्मृत्यादिसाधनतया भाव्यमानं निर्वेदाय कल्पत इति सिद्धम् ॥ १६ ॥

क्रमप्राप्ता त्विति भाष्यम्। प्रवृत्तिलक्षणमवतारयितुं मनसोऽपि प्रवृत्तिर्दर्शनीया, न चाप्रतिपादिते मनसि शक्या दर्शयितुमिति मनसोऽनन्तरत्वं प्रवृत्तेरित्यर्थः।

वृत्तिः

चाणु निखिलज्ञानजनकं सुखादिसाक्षात्कारासाधारणकारणम्, तदेकमेव लाघवात् सिद्धं मन इत्यर्थः। एवमव्याख्याने च लक्षणप्रकरणे प्रमाणोपन्यासोऽसङ्गतः स्यादिति।

अन्ये तु सति धर्मिणि लक्षणचिन्तेत्यतो मनःसाधनाय 'युगपत्'—इति सूत्रम्। इत्थञ्च मनःसिद्धौ निःस्पर्शाणुत्वादिकं लक्षणं सुकरमित्याशय इति वदन्ति ॥ १६ ॥

---

(१) ज-ग-आ-पा-ल-पुस्तकेषु "इति" इत्यधिकम्। (२) "किञ्चित्" इति ख-पु नास्ति। (३) अत्र ख-पुस्तके—"भिन्नाम्" इत्यधिक पाठः।

न्यायवार्त्तिकम्

दशविधा पुण्या पापा च। पुण्या—कायेन परित्राणं परिचरणं दानमिति। वाचा सत्यं हितं प्रियं स्वाध्यायश्च इति। मनसा दया स्पृहा श्रद्धा चेति। विपर्ययेण पापा दशविधैव। क्षणिकत्वात् प्रवृत्तेर्जन्मकारणत्वानुपपत्तिः, सेयं प्रवृत्तिः क्षणिका सती जन्मकारणमिति न युक्तम्, ततश्च द्वितीयसूत्रव्याघातः। न, प्रवृत्तिफले प्रवृत्त्युपचारात्। प्रवृत्तिफले धर्माधर्मौ अस्मिन् (१) सूत्रे प्रवृत्तिरित्युच्यते। कस्मात्? तत्साधनत्वात् अन्नं वै प्राणिनः प्राणा इति यथा (२)॥ १७॥

न्यायवार्त्तिकतात्पर्य्यटीका

प्रवृ—म्भः (सू० १७)॥ आरम्भः प्रवृत्तिः, सा द्विधा ज्ञानहेतुः क्रियाहेतुश्च। तत्र या ज्ञानोत्पादद्वारेण पुण्यपापहेतुः सा वाक्प्रवृत्तिः, वागिति च ज्ञापकहेतूपलक्षणम्, तेन मनसा इष्टदेवताद्यनुचिन्तनं चक्षुरादिभिः साध्वसाधुदर्शनादिसूचितं भवति। क्रियाहेतुर्द्वयी कायनिमित्ता मनोनिमित्ता चेति। तदेतद्वार्त्तिककारो विभजते—शरीरेणेति। ननु प्रवृत्तेर्जन्महेतुत्वमुक्तं द्वितीयसूत्रे,न चेयं क्षणिका सती आमुष्मिकं जन्म साधयितुमर्हति, तस्माद् द्वितीयसूत्रव्याघात इति चोदयति—क्षणिकत्वादिति। परिहरति—नेति॥ १७॥

वृत्तिः

प्रवृत्तिं लक्षयति विभजते च—(प्रवृत्तिरित्यादि)।

अत्र च प्रवृत्तित्वं रागजन्यतावच्छेदको जातिविशेषः, स एव लक्षणम्। ईश्वरकृतेरपि लक्ष्यत्वे यत्नत्वमेव तथा, जीवनयोनियत्ने निवृत्तौ च मानाभावात्। तत्सद्भावेऽपि प्रवृत्तित्वं नित्ययत्नसाधारणं तद्व्यावृत्तं वा तथा, द्वन्द्वानन्तरश्रुतारम्भपदस्य प्रत्येकमन्वयाद्वागारम्भादिभेदेन त्रिविधा प्रवृत्तिः। बुद्धिशब्देनात्र मनोऽभिप्रेतम् इति भाष्यम्(३)। शरीरशब्दश्च चेष्टावत्त्वेन हस्तादिसाधारणः। तथा वचनानुकूलो यत्नो वागारम्भः, वचनाननुकूलः शरीरगोचरो यत्नश्चेष्टानुकूलयत्नो वा शरीरारम्भः, एतद्द्वयभिन्नो यत्नो बुद्ध्यारम्भः, स च ध्यानदयादेवदर्शनाद्यनुकूलः पर्यवस्यति।

प्राञ्चस्तु सामान्यविशेषलक्षणेष्वदृष्ट(४)जनकत्वं निवेशयन्ति। इयं च कारणरूपा प्रवृत्तिः, कार्यरूपा तु धर्माधर्मात्मिकेति॥ १७॥

---

(१) "प्रवृत्तिफलं धर्म्माधर्म्मौ धर्मिणः" (?) इति ख०। (२) "यथा" इति ख-पु नास्ति। (३) "भाष्यम्" इति व-आ-पु-नास्ति। (४) "लक्षणे चादृष्ट" इति व०।

न्यायभाष्यम्

(सू)—प्रवर्त्तनालक्षणा दोषाः ॥ १८ ॥

प्रवर्तना प्रवृत्तिहेतुत्वम्, ज्ञातारं हि रागादयः प्रवर्तयन्ति पुण्ये पापे वा। यत्र मिथ्याज्ञानं तत्र रागद्वेषाविति। प्रत्यात्मवेदनीया हीमे दोषाः कस्माल्लक्षणतो निर्दिश्यन्त इति ? कर्मलक्षणाः खलु रक्तद्विष्टमूढाः, रक्तो हि तत्कर्म कुरुते येन कर्मणा सुखं दुःखं वा लभते(१), तथा द्विष्टस्तथा मूढ इति(२)। रागद्वेषमोहा इत्युच्यमाने बहु नोक्तं भवतीति ॥ १८ ॥

न्यायवार्त्तिकम्

प्रवर्तनालक्षणा दोषाः। का पुनरियं प्रवर्तना ? ययाऽवशः प्रवर्तते। तं प्रवर्तमानं रागादयः प्रवर्त्तयन्तीति। सेयं प्रवृत्तिहेतुत्वात् प्रवर्तनेत्युच्यते यथा कारणा हारणेति। सा पुनरियं प्रवर्तना कथं गम्यते ? प्रत्यात्मं प्रत्यक्षा, परशरीरे त्वानुमानिकी, आत्मवदिति।

न्यायवार्त्तिकतात्पर्य्यटीका

प्रयोज्यव्यापारपूर्वकत्वेन प्रयोजकव्यापारनिरूपणात् प्रवृत्त्यनन्तरं दोषलक्षणम्। प्रव—षाः (सू० १८)॥ रागद्वेषौ हि मोहप्रभवौ पुरुषं प्रवर्त्तमानं प्रवर्त्तयतः, तयोर्धर्मः प्रवर्त्तना, सा च मोहैकार्थसमवायः, तावद्धि अयं रागादिवशः स्पन्दते यावदस्य मोहो वर्तत इति। प्रत्यात्मवेदनीया इति चोद्यभाष्यम्, तस्यार्थः—लक्षणं खल्वनुमानम्, न च प्रत्यात्मवेदनीयेषु समानासमानजातीयव्यावृत्तेषु स्फुटतरेषु तद् युक्तमिति भावः। परिहारभाष्यम्—कर्म्मलक्षणा इति। तस्यार्थः स्वरूपतः स्फुटत्वेऽपि न निर्वेदविषयतया स्फुटता, तथा चेह प्रयोजनम्, प्रवर्त्तनावत्त्वेन चैते निर्वेदविषयाः, सा च प्रवृत्त्या कार्य्येण लक्ष्यत इति कर्म्मलक्षणा इत्युक्तम्। यतः कर्म्मणा प्रवृत्त्या प्रवर्त्तकरागादियुक्ताः पुरुषा लक्ष्यन्ते, अतो रागादीनां प्रवर्त्तनावत्त्वमपि लक्षितं भवति। बहु नोक्तं भवतीति स्वरूपमात्रं रागादीनामुक्तं भवति, न तु प्रवर्त्तनावत्त्वमपि तेषामित्यर्थः। तदेतत्सर्वं वार्त्तिककारः प्रश्नपूर्वकं व्याचष्टे—का पुनरिति। अवशोऽस्वतन्त्रः। सा पुनरियं प्रवर्त्तना

वृत्तिः

दोषं लक्षयति—(प्रवर्त्तनेत्यादि)।

दोषा इति बहुवचनं रागद्वेषमोहात्मकलक्ष्यत्रयज्ञापनाय। प्रवर्त्तना—प्रवृत्तिजनकत्वम्, तदेव लक्षणं येषाम्। यद्यपीदं शरीरादृष्टेश्वरेच्छादावतिव्याप्तम्, तथापि लौकिकमानस(३)-

(१) "भजते" इति ज-भा०। (२) "इति" शब्दात् परं "दोषाः" इत्यधिकं ज-भा०। (३) "मानस" इति व-भा-पु नास्ति।

न्यायभाष्यम्

(सू)—पुनरुत्पत्तिः प्रेत्यभावः ॥ १६ ॥

उत्पन्नस्य क्वचित्सत्त्वनिकाये मृत्वा या पुनरुत्पत्तिः स प्रेत्यभावः। उत्पन्नस्य—सम्बद्धस्य। सम्बन्धस्तु देहेन्द्रियमनोबुद्धिवेदनाभिः। पुनरुत्पत्तिः—पुनर्देहादिभिः सम्बन्धः। पुनरित्यभ्यासाभिधानं यत्र क्वचित्प्राणभृन्निकाये वर्त्तमानः

न्यायवार्त्तिकम्

यथा आत्माऽहङ्कारविषयत्वेनावतिष्ठमानः प्रत्यात्मं प्रत्यक्षो भवति। न हीयमहङ्कारबुद्धिरानुमानिकी, नागमिकी। कथं नानुमानिकी ? लिङ्गाभावात्। कथं नौपदेशिकी ? अनुपदिष्टार्थप्रतिपत्तेः। तस्माद्रूपादिवत् प्रत्यात्ममात्मा प्रत्यक्ष इति। प्रवृत्तिनिवृत्त्यनुमेयस्तु परशरीर इति ॥ १८ ॥

पुनरुत्पत्तिः प्रेत्यभावः। पूर्वोपात्तशरीरादिपरित्यागादन्यशरीरोपसंक्रान्तिः स प्रेत्यभाव इति। पुनर्ग्रहणं संसारानादित्वज्ञापनार्थम्। पुनः पुनर्जन्ममरणे भवत इत्यनादित्वं संसारस्य दर्शयति। कः पुनरयं संसारः ? दुःखादीनां मिथ्याज्ञानपर्यन्तानामविच्छेदेन यः कार्यकारणभावः स संसार इति। स चानादिः पूर्वापरकालनियमाभावात्। यदि पूर्वं दुःखम्,

न्यायवार्त्तिकतात्पर्य्यटीका

प्रवर्त्तकानां दोषाणां व्यापारः कथं गम्यते ? दोषा हि गम्यन्ते न तु तेषां प्रवृत्तिहेतुत्वमपीत्यर्थः। उत्तरम्—प्रत्यात्ममिति। स्वपरात्मनोर्यथासंख्यं प्रत्यक्षानुमानाभ्याम्, मोहैकार्थसमवायो हि रागादीनां मानसप्रत्यक्षवेदनीय इत्यर्थः ॥ १८ ॥

उद्देशक्रमप्राप्तं प्रेत्यभावं लक्षयति—पुन—वः (सू० १६) ॥ सत्त्वनिकायः प्राणिनिकायः। नन्वात्मनो नोत्पत्तिः संभवति नित्यत्वादित्यत आह भाष्यकारः—उत्पन्नस्य संबद्धस्येति। तदेतद्वार्त्तिककारो व्याचष्टे—पूर्वेति। पुनर्ग्रहणमिति पुनरित्यभ्यासमाह, तथा चानादिता

वृत्तिः

प्रत्यक्षविषयत्वे(१)सतीति विशेषणीयम्। यागादिगोचरप्रमावारणाय प्रमान्यत्वे(२) सतीति विशेषयन्ति ॥ १८ ॥

प्रेत्यभावं लक्षयति—(पुनरुत्पत्तिरित्यादि)।

प्रेत्य—मृत्वा भावः—जननं प्रेत्यभावः। तत्र पुनरित्यनेनाभ्यासकथनात् प्रागुत्पत्तिस्ततो मरणं तत उत्पत्तिरिति प्रेत्यभावोऽयमनादिरपवर्गान्तः। एतज्ज्ञानं च

(१) "सविषयत्वे" इति आ-च०। (२) "प्रमाजन्यत्वे" इति आ०।

न्यायभाष्यम्

पूर्वोपात्तान् देहादीन् जहाति तत्प्रैति । यत् तत्रान्यत्र वा देहादीनन्यानुपादत्ते तद्भवति । प्रेत्यभावः—मृत्वा पुनर्जन्म, सोऽयं जन्ममरणप्रबन्धाभ्यासोऽनादिरपवर्गान्तः प्रेत्यभावो वेदितव्य इति ॥ १९ ॥

(सू)—प्रवृत्तिदोषजनितोऽर्थः फलम् ॥ २० ॥

सुखदुःखसंवेदनं फलम् । सुखविपाकं कर्म दुःखविपाकं च । तत्पुनर्देहेन्द्रियविषयबुद्धिषु सतीषु(१)भवतीति सह देहादिभिः फलमभिप्रेतम् । तथा हि

न्यायवार्त्तिकम्

तज्जन्मना विना न युक्तम् । अथ पूर्वं जन्म, तदा धर्माधर्मावन्तरेण न युक्तम् । अथ पूर्वं धर्माधर्मौ, तावपि विना रागद्वेषाभ्यां न युक्तौ । अथ पूर्वं रागद्वेषौ, न मिथ्याज्ञानादृते तयोः प्रादुर्भाव इति । मिथ्याज्ञानं तर्ह्यादिः ? तदपि शरीरादीनन्तरेण न युक्तम् । सोऽयं दुःखादीनां मिथ्याज्ञानपर्यन्तानां कार्यकारणभावोऽविच्छिन्नः संसार इति आजरञ्जरीभाव इति चोच्यते । सोऽयं संसारः किमात्मन आहो मनस इति ? यदि क्रियामधिकृत्योच्यते तदा मनसः, तद्धि संसरति । अथोपभोगमधिकृत्योच्यते तदाऽऽत्मनः, स हि सुखदुःखे उपभुङ्क्त इति ॥ १९ ॥

प्रवृत्तिदोषजनितोऽर्थः फलम् । शरीरादिजन्यं सर्वं फलम्, धर्माधर्मप्रवर्तकत्वात् ।

न्यायवार्त्तिकतात्पर्यटीका

सूचिता भवति । तदेतद्वार्त्तिकजातं द्वितीयसूत्रे कृतव्याख्यानम् । पूर्वाभ्यस्तसूत्रे (२) चायमर्थ उपपादयिष्यते । आजरञ्जरीभाव इत्यागमभाषयाऽस्यार्थस्यागमिकत्वं सूचयति । क्रियामित्युपसर्पणमपसर्पणं चेत्यर्थः ॥ १९ ॥

यद्यपि शरीरेन्द्रियबुद्धिसुखदुःखभोगातिरिक्तं गौणमुख्यभिन्नं फलं नास्ति, ते च यथायोगं पूर्वं लक्षिताः, तेन च रूपेण निर्वेदोपयोगिनः, तथाऽपि प्रवृत्तिदोषजनितत्वेनापि रूपेणामी निर्वेदोपयोगिन इति तेन रूपेण लक्ष्यन्ते—प्रवृ—लम् (सू० २०) ॥ अत्र च प्रवृत्तिजनित इति वक्तव्ये

वृत्तिः

वैराग्य उपयुज्यते, तेन(३) न प्रेत्येति व्यर्थम् । तदीयमरणं च तदीयजीवनादृष्टनाशः, तदीयचरमप्राणसंयोगध्वंसः, तदीयप्राणध्वंसो वा । तदीयोत्पत्तिस्तु तदीयविजातीयशरीराद्यप्राणसंयोग इति ॥ १९ ॥

---

(१) "सतीषु" इति भा नास्ति । (२) ३।१।१९ सूत्रे । (३) "इति" इति भा-व० ।

न्यायभाष्यम्

प्रवृत्तिदोषजनितोऽर्थः फलमेतत्सर्वं भवति। तदेतत्फलमुपात्तमुपात्तं(१)हेयम्, त्यक्तं त्यक्त(२)मुपादेयमिति नाऽस्य हानोपादानयोर्निष्ठा पर्यवसानं वाऽस्ति, स खल्वयं फलस्य हानोपादानस्रोतसोह्यते लोक इति ॥ २० ॥

न्यायवार्त्तिकम्

मुख्यकल्पनायां सुखदुःखोपभोग एव, तदवसानात्। यस्माद्धर्माधर्मयोः सुखदुःखोपभोग आवसानिकं(३) फलम्, तस्य तु नान्तरेण शरीरादीन् सम्भव(४) इति कृत्वा शरीरादीन् धर्माधर्मावारभ्य सुखदुःखोपभोगं कुरुत इति। सोऽयं फलशब्दः सुखदुःखोपभोगे मुख्यः, शरीरे गौण इति। २० ॥

न्यायवार्त्तिकतात्पर्य्यटीका

दोषग्रहणं न केवलं प्रवृत्तिं प्रति दोषाणां हेतुभावः, अपि तु प्रवृत्तिकार्ये सुखदुःखे अपि प्रति, इति दर्शनार्थम्। दोषसलिलावसिक्तायां खलु आत्मभूमौ धर्म्माधर्म्मबीजे सुखदुःखे जनयतः नान्यथा। न चास्ति संभवो न तत्र हृष्यति तच्च तस्य सुखम्, न च तद् द्वेष्टि तच्च तस्य दुःखमिति। सूत्रे अर्थग्रहणं गौणमुख्यफलावरोधार्थम्, भाष्ये च—निष्ठा समाप्तिः, सा च प्रलयेऽप्यस्तीत्यत उक्तम्—पर्यवसानमिति। अवसानमात्रमस्ति, न पुनः परितः, पुनरपि सर्गहानोपादानयोर्भावादित्यर्थः। सुबोधं वार्त्तिकम् ॥ २० ॥

वृत्तिः

फलं लक्षयति— (प्रवृत्तिदोषेत्यादि) ।

अत्र च मुख्यं फलं सुखदुःखोपभोगः, तथा च भाष्यम्—'सुखदुःखसंवेदनं फलम्'। तत्र च धर्माधर्मात्मकप्रवृत्तेः प्रयोजकत्वात्तत्र दोषस्य हेतुत्वात् प्रवृत्तिदोषजनित इत्युक्तम्। लक्षणं तु सुखदुःखान्यतरसाक्षात्कार इति। गौणं फलं तु शरीरादिकं सर्वमेव। तथा च भाष्यम्—'तत्पुनर्देहेन्द्रियबुद्धिषु सतीषु भवतीति सह देहेन्द्रियादिभिः फलमभिप्रेतम्, तथाहि प्रवृत्तिदोषजनितोऽर्थः फलमेतत्सर्वं भवति' इति। इत्थं च जन्यत्वमेव फलत्वम्; प्रवृत्तिदोषजनित इति तु निर्वेदोपयोगादुक्तम् ॥ २० ॥

---

(१) ज-पु "उपात्तम्" इति पदं सकृदस्ति। (२) "त्यक्तं त्यक्तम्" इत्यत्र "त्यक्तत्यक्तम्" इति ज०। (३) "आवसायिकम्" इति ख०। (४) "शरीरादीनसम्भव" इति ख।

न्यायभाष्यम्

अथैतदेव—

(सू)—बाधनालक्षणं दुःखम् (१) ॥ २१ ॥

बाधना पीडा ताप इति। तयाऽनुविद्धमनुषक्तमविनिर्भागेन वर्त्तमानं दुःखयोगाद् दुःखमिति। सोऽयं सर्वं दुःखेनानुविद्धमिति(२)पश्यन् दुःखं जिहासुर्जन्मनि दुःखदर्शी निर्विद्यते, निर्विण्णो विरज्यते, विरक्तो विमुच्यते ॥ २१ ॥

न्यायवार्त्तिकम्

बाधनालक्षणं दुःखम्। एतदेव शरीरादिबाधनानुषङ्गाद् दुःखमित्युच्यते। स्वभावतस्तु दुःखमेव दुःखम्, लक्षणशब्दोऽनुषङ्गार्थः, सर्वमिदं शरीरादि दुःखानुषक्तमिति। अत्र शरीरं दुःखस्य निमित्तम्, निमित्तार्थोऽनुषङ्गः। इन्द्रियाणि विषया बुद्धय इति साधनं साधनार्थोऽनुषङ्गः। सुखं दुःखाविनाभावि, अत्राप्यविनाभावोऽनुषङ्गः स्वरूपतस्तु दुःखं दुःखमिति। सर्वं स्वरूपतो दुःखमिति केचित्। न, प्रत्यक्षविरोधात्। न हि प्रत्यक्षं सुखं शक्यं प्रत्याख्यातुम्। दुःखविकल्प इति चेत्—अथापीदं स्यात् दुःखविकल्प एव सुखमिति, न पुनः स्वरूपतोऽस्तीति। न, विकल्पे नञ्प्रयोगासंभवात्, (३)नहि विकल्पे नञ् प्रवर्तमानो(४)दृष्टः, न हि ब्राह्मणविशेषे भवत्यब्राह्मण इति। एवं दुःखविशेषेऽदुःखमिति न स्यात्। यदि च सुखं(५) न स्याद्धर्मवैयर्थ्यम्। किं कारणम्? सुखसाधनं धर्म इति, सुखं च नास्तीति व्यर्थो धर्मः, दुःखप्रतिषेधः फलमस्येति न युक्तम्, धर्मस्याभावफलत्वप्रसङ्गात्, अभावफलो धर्म

न्यायवार्त्तिकतात्पर्य्यटीका

नानुक्ते शरीरादौ तेषां दुःखत्वं शक्यं लक्षयितुमिति तल्लक्षणेभ्यः परमिदं दुःखलक्षणम्—बाध—खम् (सू० २१) ॥ अत्र च बाधनेति बाधनाविषयां बुद्धिं लक्षयति, तेन बाधना च तदनुषङ्गिणश्च शरीरादयो गौणमुख्यभावेन लक्षिता भवन्ति। सैव हि बाधनाबुद्धिर्दुःखे मुख्या, शरीरादौ गौणीति। अलमेभिरिति प्रत्ययो निर्वेदः, वशितया योगिनः स्वयमुपलभन्ते, स्वयमुपनतेषु विषयेषु औदासीन्यमुपेक्षाबुद्धिर्वैराग्यम्, लक्षणशब्द इति वार्त्तिकम्। अनुषङ्गश्च संबन्धः, स च बाधनायां विषयविषयिभावः शरीरादिषूक्तः। केचिद्विरक्तम्मन्या मन्यन्ते न दुःखं नामास्ति स्वरूपत इति, तान्निराचिकीर्षुराह—स्वरूपतस्तु दुःखमिति। विकल्पो विशेषः। अभावफलत्वप्रसङ्गादिति। यद्यप्युपात्तदुरितक्षयहेतवोऽपि धर्म्माः सन्ति, तथाऽप्यधिकोत्कर्षशालित्वादि-

---

(१) अत्र "इति" इत्यधिकं भा-वि-टि०। (२) "दुःखेन नु विद्धं बहन्तम्" इति ज-भा०। (३) "नञ्प्रयोगाभावात्" इति ख०। (४) 'न विकल्पो न नञवर्त्तमानो" इति ख०। (५) "खम्" इति ख०।

न्यायभाष्यम्

यत्र तु निष्ठा यत्र तु पर्यवसानं सोऽयम् (१)—

(सू)—तदत्यन्तविमोक्षोऽपवर्गः ॥२२॥

तेन—दुःखेन जन्मना अत्यन्तं विमुक्तिरपवर्गः। कथम्? उपात्तस्य जन्मनो हानम्, अन्यस्य चाऽनुपादानम्। एतामवस्थामपर्यन्तामपवर्गं वेदयन्तेऽपवर्गविदः। तदभयमजरममृत्युपदं ब्रह्म क्षेमप्राप्तिरिति।

न्यायवार्त्तिकम्

इति। प्रवृत्तिद्वैतं च लोके दृष्टं तन्न स्यात्, हितमाप्स्यामीत्येकः प्रवर्तते, अनिष्टं हास्यामीत्यपरः प्रवर्त्तते, हितस्याभावात् प्रवृत्तिद्वैतं च न स्यात्। दुःखभावनोपदेशो न स्यात्, प्रतिपक्षासम्भवात्। सक्त्यभावश्च(२), न हि कश्चिद् दुःखे सज्यत इति। तस्मान्न मुख्यतः (३)सर्वं दुःखम्, दुःखभावनोपदेशेन च दुःखमित्युच्यते ॥ २१ ॥

तदत्यन्तविमोक्षोऽपवर्ग इति। तेन शरीरादिना दुःखान्तेनाऽऽत्यन्तिको वियोग इति।

न्यायवार्त्तिकतात्पर्य्यटीका

फलानां दर्शपौर्णमासादीनां सहस्रसंवत्सरपर्यन्तानां विधायकेभ्यो वचनेभ्यो भावफल एव धर्म्मो गम्यते, भावस्यैवोत्कर्षशालित्वादिति ॥ २१ ॥

क्रमप्राप्तमपवर्गलक्षणमवतारयति भाष्यकारः—यत्र त्विति।

तद्—र्गः (सू० २२)॥ 'तत्' इति अनन्तरं गौणमुख्यभेदभिन्नं दुःखं परामृशतीत्याह भाष्यकारः—तेन दुःखेनेति। मुख्यमेव दुःखमिति भ्रमो मा भूदत आह—जन्मनेति। अनेन जायमाना दुःखशब्देन सर्वे शरीरादय उच्यन्त इत्युक्तं भवति। अभयमिति पुनःसंसारभयाभावमाह, "अभयं च ब्रह्म" इति असकृदभयश्रुतेः। ये तु ब्रह्मैव नामरूपप्रपञ्चात्मना परिणमत इत्याहुः तान् प्रत्याह—अजरमिति। सर्वात्मना परिणाम एकदेशेन वा? पूर्वस्मिन् कल्पे सर्वात्मना

वृत्तिः

दुःखं लक्षयति—(बाधनेत्यादि)।

बाधना—पीडा तदेव लक्षणं स्वरूपं यस्य। तथा चाऽनुभवसिद्धदुःखत्वजातिरेव लक्षणम्। शरीरेन्द्रियार्थेषु दुःखसाधनत्वात् सुखे च दुःखानुषङ्गाद् दुःखव्यवहारो गौण इति। अत एवाग्रिमसूत्रे तत्पदेन मुख्य(४)दुःखपरामर्शः ॥ २१ ॥

---

(१) "यत्र तु निष्ठा सोऽयं यत्र तु पर्य्यवसानम्" इति ज०। (२) "स ह्यभाव" इति ख०। (३) "मुख्यः" इति ख०। (४) "सुख" इति व०।

न्यायभाष्यम्

नित्यं सुखमात्मनो महत्त्ववन्मोक्षे व्यज्यते, तेनाऽभिव्यक्तेनाऽत्यन्तं विमुक्तः सुखी भवतीति केचिन्मन्यन्ते। तेषां प्रमाणाभावादनुपपत्तिः। न प्रत्यक्षं नानुमानं नागमो वा विद्यते नित्यं सुखमात्मनो महत्त्ववन्मोक्षेऽभिव्यज्यत इति।

नित्यस्याभिव्यक्तिः—संवेदनम्, तस्य हेतुवचनम् (१)। नित्यस्याभिव्यक्तिः—संवेदनम्—ज्ञानमिति, तस्य हेतुर्वाच्यो यतस्तदुत्पद्यत इति।

न्यायवार्त्तिकम्

आत्यन्तिकी सुखाभिव्यक्तिरित्येके(२)—एके त्वात्यन्तिकीं सुखाभिव्यक्तिं मुक्तिं ब्रुवते, तन्न, प्रमाणासम्भवात्। मुक्तस्यात्मनो नित्यं सुखमिति न प्रमाणमस्ति। न नास्ति, नियामकत्वादिति चेत्, अनेककारणनिष्पन्नसुखस्यात्मनि समवायो नियामकमन्तरेण न युक्तः, तस्मादात्मनि नित्यं सुखमस्ति, येनेदं सुखं नियम्यमानमात्मानमाश्रयत इति चेत्, न; सर्वोत्पत्तिमत्प्रसङ्गात् सुखवदात्मनि दुःखमपि नित्यं कल्पयितव्यं इच्छादयश्चेति। अनैकान्तिकता वा। अभिव्यक्त्यर्थानभिधानाच्च। नित्यं सुखमभिव्यज्यत इति कोऽभि-

न्यायवार्त्तिकतात्पर्य्यटीका

ब्रह्मणोऽन्यथात्वाद् विनाशप्रसङ्गः। एकदेशपरिणामे तु सावयवत्वेन घटादिवदनित्यत्वप्रसङ्ग इति सूक्तमजरमिति। वैनाशिकाः प्राहुः प्रदीपस्येव निर्वाणं मोक्षः तस्य चेतस इति, तान् प्रत्याह—अमृत्युपदमिति। एतदुपपादयिष्यते (३) वार्त्तिककारः। तदेतद्भाष्यं वार्त्तिककारो व्याचष्टे—तेनेति। आत्यन्तिकग्रहणं महाप्रलयावस्थानिवृत्त्यर्थम्।

अत्र भाष्यं नित्यं सुखमात्मन इत्यादि, तस्यार्थः—"विज्ञानमानन्दं ब्रह्मे"ति सामानाधिकरण्यश्रुतेः ब्रह्मस्वभावं सुखम्, तथा च ब्रह्मणो नित्यत्वात् तदपि नित्यमित्यर्थः। आत्मन इति षष्ठी राहोः शिर इतिवन्मन्तव्या। तदेतद्भाष्यं व्याचष्टे—आत्यन्तिकीति। तेषामित्यादि भाष्यं व्याचष्टे—तन्नेति। अत्रानुमानमुपन्यस्यातिप्रसङ्गेन निराकरोति—नेति। अथात्मनि दुःखमेकं नित्यं नेच्छति तत्राह—अनैकान्तिकता वा। नित्यस्याभिव्यक्तिरित्यादिभाष्यं व्याचष्टे—

वृत्तिः

अपवर्गं लक्षयति—(तदत्यन्तेत्यादि)।

तस्य—दुःखस्य, अत्यन्तविमोक्षः—स्वसमानाधिकरणदुःखासमानकालीनो ध्वंसः।

---

(१) 'नित्यस्य' इत्यारभ्य 'वचनम्' इत्यन्तः पाठो ज-पु-नास्ति। (२) भाट्टाः। (३) एतत्सूत्रवार्त्तिकस्यैव शेषांशे "चित्तं विमुच्यते इत्यन्ये" इत्यादिना "न चित्तस्यापवर्गः सिध्यति" इत्यन्तेन सन्दर्भेण।

न्यायभाष्यम्

सुखवन्नित्यमिति चेत् ? संसारस्थस्य मुक्तेनाऽविशेषः। यथा मुक्तः सुखेन तत्संवेदनेन (१) च सन्नित्येनोपपन्नस्तथा संसारस्थोऽपि प्रसज्यत इति, उभयस्य नित्यत्वात्।

न्यायवार्त्तिकम्

व्यक्त्यर्थः ? ज्ञानमिति चेत् नित्यमनित्यं वेति कल्पनानुपपत्तिः। अनित्यमिति चेत् कारणं वक्तव्यम्। आत्ममनःसंयोगो वा कारणं तस्यापेक्षाकारणं वक्तव्यम्। यदि मन्यसे आत्ममनः-संयोगो ज्ञानस्य कारणम्, तस्य तदपेक्षाकारणं वक्तव्यम्। न हि द्रव्यगुणकर्मस्वारब्धव्येषु (२) संयोगो निरपेक्षं कारणमिति। आत्ममनःसंयोगः सुखापेक्षः कारणमिति (३)चेन्न,कैवल्यविरोधात्। अथ मन्यसे आत्ममनःसंयोगो नित्यमात्मनि व्यवस्थितं सुखमपेक्षमाणो ज्ञानकारणं भवतीति, तन्न युक्तम्, कैवल्यविरोधात्। यथाऽयमात्ममनःसंयोगो विषयमात्रमपेक्षमाणो निमित्तान्तरनिरपेक्षः सुखज्ञानं करोति, एवं रूपादीनपि विषयानपेक्षमाणः (४) तद्विषयाणि ज्ञानानि कुर्य्यात्। ततश्च कैवल्यं निवर्त्तते, सर्वानर्थानयमात्मा लभत इति। नित्योपलब्धिप्रसङ्गाच्चेति। योगजधर्मानुगृहीतो (५) नित्ये सुखे ज्ञानं करिष्यतीति चेत्, न युक्तम्, तत्क्षये तदभावात्। यदा योगजो धर्मः क्षीणो

न्यायवार्त्तिकतात्पर्यटीका

नित्यमिति। अयमभिसन्धिः—सुखं तावदात्मनो गुणो नात्मा। उपपादितो(६)हि गुणगुणिनो-र्भेदः, एवं विज्ञानमप्यात्मगुणः, न ह्युदयव्ययवतीभ्यो ज्ञानव्यक्तिभ्योऽनुदयव्ययधर्मा भवितु-मर्हत्यभिन्न आत्मा। न चात्मैव ज्ञानस्वभावः तद्विषयोपधानेनोदयव्ययधर्मेव भविष्यतीति सांप्रतम्, घटमहं जानामीति मानस्यां बुद्धौ त्रयाणामपि ज्ञानज्ञेयज्ञातृणां भेदेनानुव्यवसायात्। विषय-तज्ज्ञानभेदेऽपि ज्ञातुरेकत्वेन प्रतिसन्धीयमानत्वात्। न चैतदसति बाधके भेदज्ञानं भ्रान्तमिति युक्तम्। न चागन्तुकज्ञानातिरिक्तं स्वाभाविकमात्मनि चैतन्यमनुभूयते। न चात्मैव तत्स्वभावः, सुषुप्तत्वानुपपत्तेः। अचेतयन्नेव हि सुषुप्त इत्युच्यते। न च तदा विषयशून्यं स्वनिष्ठमात्म-चैतन्यमित्युक्तम्, तदवस्थाभेदस्य सुषुप्तोत्थितेन स्वप्रान्तिकस्येव स्मरणप्रसङ्गात्। सुखं च न ज्ञानजातीयमित्युपपादितं प्रत्यक्षसूत्रे। न च किञ्चिदपि स्वयंप्रकाशमिति चतुर्थे निवेदयिष्यते। (७) तदेवं व्यवस्थिते दूषणं भाष्यवार्त्तिकोक्तं द्रष्टव्यं यथाऽयमात्ममनःसंयोग (८) इति। संसारा-वस्थायां तावदयमात्ममनःसंयोगो (९) धर्मं निमित्तमपेक्षमाणः सुखज्ञानमकार्षीत्। यदि तु मुक्त्य-

(१) "अतत्संवेदनेन" इति टि०। (२) "आरब्धेषु" इति ख०। (३) "कारणम्" इति ख-पु नास्ति। (४) "रूपादीनामपि विषयानपेक्षमाणम्" इति ख०। (५) "गृहीते" इति ख०। (६) २०९ पृ:—तात्पर्य्यस्य दशम-पंक्तितः कतिपयपंक्तिभिः। (७) ४।२।३४ सूत्रवार्त्तिके। (८)-(९) आदर्शे उभयत्रैव "आत्मनः संयोग" इति पाठः।

न्यायभाष्यम्

अभ्यनुज्ञाने च धर्माधर्मफलेन साहचर्यं यौगपद्यं गृह्येत। यदिदमुत्पत्तिस्थानेषु धर्माधर्मफलं सुखं दुःखं वा संवेद्यते पर्यायेण, तस्य च नित्य(१)संवेदनस्य च सहभावो यौगपद्यं गृह्येत, न सुखाभावो (२)नानभिव्यक्तिरस्ति, उभयस्य नित्यत्वात्।

अनित्यत्वे हेतुवचनम्। अथ मोक्षे नित्यस्य सुखस्य संवेदनमनित्यम्? यत उत्पद्यते स हेतुर्वाच्यः।

आत्ममनःसंयोगस्य निमित्तान्तरसहितस्य हेतुत्वम्। आत्ममनःसंयोगो हेतुरिति चेत्? एवमपि तस्य सहकारि निमित्तान्तरं वचनीयमिति।

धर्मस्य कारणवचनम्। यदि धर्मो निमित्तान्तरम्? तस्य हेतुर्वाच्यो यतः उत्पद्यत इति।

योगसमाधिजस्य कार्यावसायविरोधात्प्रक्षये(३)संवेदननिवृत्तिः। यदि योग-

न्यायवार्त्तिकम्

भवति तदास्य किमनुग्राहकमिति वाच्यम्। योगजधर्मो न क्षीयते इति चेत् न युक्तम्, उत्पत्तिधर्मकस्य सर्वस्यानित्यत्वात्, सर्वमुत्पत्तिधर्मकमनित्यं दृष्टमिति। नित्योऽसौ योगसमाधिजो धर्म इति चेत्, योगजसमाधिजश्च नित्यश्चेति व्याहतम्। नित्यं ज्ञानमिति चेन्न, सुखवत् प्रमाणाभावात्, मुक्तसंसारस्थयोरविशेषप्रसङ्गाच्च। सुखदुःखसंवेदनपर्यायश्च न स्यात्, नित्यमयं सुखमुपलभेत

न्यायवार्त्तिकतात्पर्य्यटीका

वस्थायां तदनपेक्ष एव सुखज्ञानं करोति, हन्त रूपादिज्ञानेषु इन्द्रियान्तराण्यपि नापेक्षेतेति भावः। शङ्कते—योगजेति। न वयं विषयमात्रापेक्षां ब्रूमो येन रूपादिष्वपि ज्ञानमुत्पादयेत्, अपि तु संसारावस्थायां यत् सुखज्ञानायानेनापेक्षितं तदपेक्षते, धर्मश्च तदा तेनापेक्षित इति मुक्त्यवस्थायामपि धर्ममेवापेक्षते, एतावान् विशेषो यदयं योगज इति। तथा च न रूपादिज्ञानप्रसङ्ग इति। शङ्कते—नित्योऽसाविति। निराकरोति—योगेति। ननु त्वन्मते यथा सुखसंवेदनं जिज्ञासितम् एवम्

वृत्तिः

तस्य च जन्मापायादेव सम्भव इत्याशयेन 'दुःखेन जन्मनाऽत्यन्तविमुक्तिरपवर्गः' इति भाष्यम्। दुःखेन—दुःखानुषक्तेनेत्यर्थः (४) ॥ २२ ॥

॥ प्रमेयलक्षणप्रकरणं समाप्तम् ॥

---

(१) "नितंर स" इति ग०। "नितान्" इति वि-टि०। (२) "सुखाभावे" इति त्रि०। (३) "प्रलये" इति ज-ग-भा०। (४) "दुःखानुसङ्गिनेतार्थः" इति भा-व०।

न्यायभाष्यम्

समाधिजो धर्मो हेतुः ? तस्य कार्यावसायविरोधात् प्रक्षये(१)संवेदनमत्यन्तं निवर्तते(२)।

असंवेदने चाऽविद्यमानेनाऽविशेषः(३)। यदि धर्मक्षयात्संवेदनोपरमो नित्यं सुखं न संवेद्यत इति ? किं(४) विद्यमानं न संवेद्यते, अथाविद्यमानमिति नानुमानं विशिष्टेऽस्तीति।

अप्रक्षयश्च धर्मस्य निरनुमानमुत्पत्तिधर्मकत्वात्। योगसमाधिजो धर्मो न क्षीयत इति नास्त्यनुमानम्। उत्पत्तिधर्मकमनित्यमिति विपर्ययस्य त्वनुमानम्। यस्य तु संवेदनोपरमो नास्ति तेन संवेदन(५)हेतुर्नित्य इत्यनुमेयम्।

नित्ये च मुक्तसंसारस्थयोरविशेष इत्युक्तम्। यथा मुक्तस्य नित्यं सुखं तत्संवेदनहेतुश्च, संवेदनस्य तूपरमो नास्ति, कारणस्य नित्यत्वात्, तथा संसारस्थस्यापीति। एवं च (६) सति धर्माधर्मफलेन सुखदुःखसंवेदनेन साहचर्यं गृह्येतेति।

शरीरादिसम्बन्धः प्रतिबन्धहेतुरिति चेत् ? न, शरीरादीनामुपभोगार्थत्वात्

न्यायवार्त्तिकम्

ततश्च मोक्षार्थः प्रयासो व्यर्थः स्यात्। न चायं सुखं जिहासति, विवेकहानस्याशक्यत्वात्। दुःखं जिहासमानः सुखमपि जिहासति। न चायं कदाचिद् दुःखमुपलभत इति कस्य हानार्थं प्रवर्त्तते। शरीरादिप्रतिबन्धादप्रसङ्ग इति चेत्, नित्यं सुखमुपलभत इति नास्ति प्रसङ्गः, यस्माच्छरीरादयो नित्यसुखस्योपलब्धेः प्रतिबन्धका भवन्तीति। न, शरीरादीनामुपभोगार्थत्वात्, नित्यं शरीरादि(७)प्रसङ्गाच्च। यथा मुक्तस्य नित्यं सुखं कल्प्यते एवं शरीरादयोऽपि नित्याः कल्पयितव्याः, एवमस्य कैवल्यं(८)साधीयो भवति। शरीरादीनां नित्यत्वं दृष्टविरुद्धमशक्यं

न्यायवार्त्तिकतात्पर्य्यटीका

अस्मन्मतेऽपि सुखसंवेदनहानाय घटिष्यत इत्यत आह—न चायं सुखमिति। अस्मन्मते हि दुःखहानायैव तदनुषक्तं सुखं जिहासितम्, नित्यं तु सुखं सर्वदुःखविनिर्मुक्तं सन्न दुःखहानाय जिहासितं भवतीत्यर्थः। न केवलमानुकूल्यात्प्रतिबन्धकत्वं नास्ति शरीरादीनाम्, प्रत्युत मुक्त्यवस्थायामपि

---

(१) "प्रलये" इति फ-ग-चा०। (२) "निवर्त्तेत" फ-वि-भा०। "निवर्त्तयति" इति ज-चा-ग०। (३) "मानेनाविशेष" इत्यत्र "मानाविशेष" इति ज०। (४) "किम्" इति वि-टि नास्ति। (५) "संवेदनेन" इति ज-चा०। (६) चा-पु "च" नास्ति। (७) "नित्यशरीरादि" इति ख०। (८) "वैकल्यम्" इति ख०।

न्यायभाष्यम्

विपर्ययस्य चाननुमानात्। स्यान्मतम्—संसारावस्थस्य शरीरादिसम्बन्धो नित्य-सुखसंवेदनहेतोः प्रतिबन्धकः, तेनाविशेषो नास्तीति। एतच्चायुक्तम्, शरीरादयः उपभोगार्थास्ते भोगप्रतिबन्धं करिष्यन्तीत्यनुपपन्नम्; न चास्त्यनुमानमशरीरस्यात्मनो भोगः कश्चिदस्तीति।

न्यायवार्त्तिकम्

कल्पयितुमिति चेत्, न, सुखस्यापि तर्ह्यस्मदादेर्दृष्टविरुद्धं(१)नित्यत्वमशक्यं कल्पयितुम्, प्रमाणाभावादित्युक्तम्, तच्च नास्ति। कस्मात्? इष्टार्थाधिगमार्थत्वात्। इहायं लोकः प्रवर्त्तमान इष्टाधिगमार्थं प्रवर्त्तते, प्रवर्त्तन्ते च मोक्षमाणाः, तेषामपीष्टाधिगमार्थया प्रवृत्त्या भवितव्यम्, सेयं प्रवृत्तिर्नित्यसुखेऽर्थवती नान्यथेति। न, प्रवृत्तिद्वैतदर्शनात्। द्वे प्रवृत्ती लोके दृष्टे इष्टाधिगमार्थाऽनिष्टहानार्था च। तत्रेदं पारिव्राज्यं किमिष्टाधिगमार्थमाहोऽनिष्टहानार्थमिति सन्दिह्यते, आगमादिति चेत्—आगमादेतद्गम्यते मुक्तस्यात्मनो नित्यं सुखमिति मुक्तः सुखी भवतीति श्रूयते। आगमोऽप्येवं विचारणीयः—किमयं नित्येन सुखेन योगमाह, उत दुःखेनात्यन्तिकवियोग-माहेति। दृष्टश्च दुःखाभावेऽपि सुखशब्दप्रयोगो बहुधा लोक इति। एवं च ज्वरादिवियोगे लौकिका व्याचक्षाणा भवन्ति सुखिनः संवृत्ताः स्म इति। यदि पुनरयं सञ्चक्षाणको मोक्षे नित्यं सुखमिति सुखरागेण प्रवर्त्तते, न मुच्येत। कस्मात्? रागस्य बन्धनसमाज्ञानात्, बन्धनसमाज्ञातो राग इति। यद्यपि द्वेषात् प्रवर्त्तते दुःखं हास्यामीति, तथापि न मुच्येत, द्वेषस्य बन्धन-

न्यायवार्त्तिकतात्पर्य्यटीका

कल्पनीया (२)इत्याह—नित्यं शरीरादिति। सिद्धान्तिनो वचनमनुभाष्य देशयति—प्रमाणाभावादित्युक्तं तच्च नेति। शास्त्रेण हि मोक्षसाधने लोकः प्रवर्त्तनीयः, अप्रवर्त्तमानश्च प्रवर्त्तनीयः, इष्टार्थी च प्रवर्त्तते तत्साधने, सुखं चेष्टमिति सुखात्मको मोक्ष इत्यर्थः। सेयं लोकप्रवृत्तिरनैकान्तिकत्वेन संशयहेतुरिति परिहरति—न, प्रवृत्तीति। स्यादेतद् मुख्यासंभवेन गौणमाश्रीयते, सुखशब्दश्च सुखे मुख्यः, भाक्तस्तु दुःखनिवृत्तौ, तस्मान्नित्यानन्द एव मोक्ष इत्यत आह—यदि पुनरिति। संचक्षाणकः संख्यानप्रवृत्तो योगी, धर्माधर्मौ तावदात्मनि पारमार्थिकौ, न त्वविद्याकल्पितौ, तौ च वीतरागेणासक्तेन सता शक्यौ भोगेन क्षेतुम्, न सक्तेन, स हि सक्तस्तेषु तेषु विषयेषु उपात्तमुपात्तं भुञ्जानस्त्यक्तं त्यक्तं चोपाददानः संसारान्न मुच्यते, तस्मादयं रागो बन्धनमिति समाज्ञातः, तन्निबन्धना च प्रवृत्तिः परिहर्त्तव्या, अन्यथा तु नित्यसुखावधारणजनितेयं तृष्णापिशाची

१ (१) "तर्ह्यस्मदादेरदृष्टविरुद्धम्" इति ख०। (२) "कल्पनीयता" इति पाठो भवितुमुचितः।

न्यायभाष्यम्

इष्टाधिगमार्था प्रवृत्तिरिति चेत् ? न, अनिष्टोपरमार्थत्वात्। इदमनुमानम्(१)—इष्टाधिगमार्थो मोक्षोपदेशः प्रवृत्तिश्च मुमुक्षूणाम्, (२)नोभयमनर्थकमिति। एतच्चायुक्तम्, अनिष्टोपरमार्थो मोक्षोपदेशः प्रवृत्तिश्च मुमुक्षूणामिति(३)। नेष्टमनिष्टेनाननुविद्धं सम्भवतीति इष्टमप्यनिष्टं सम्पद्यते, अनिष्टहानाय घटमान इष्टमपि जहाति, विवेकहानस्याशक्यत्वादिति।

दृष्टातिक्रमश्च देहादिषु तुल्यः। यथा दृष्टमनित्यं सुखं परित्यज्य नित्यं सुखं कामयते, एवं देहेन्द्रियबुद्धीरनित्या दृष्टा अतिक्रम्य मुक्तस्य नित्या देहेन्द्रियबुद्धयः कल्पयितव्याः, साधीयश्चैवं मुक्तस्य चैकात्म्यं कल्पितं भवतीति।

उपपत्तिविरुद्धमिति चेत् ? समानम्(४)। देहादीनां नित्यत्वं प्रमाणविरुद्धं कल्पयितुमशक्यमिति ? समानं(५) सुखस्यापि नित्यत्वं(६) प्रमाणविरुद्धं कल्पयितुमशक्यमिति।

आत्यन्तिके च संसारदुःखाभावे सुखवचनादागमेऽपि(७) सत्यविरोधः। यद्यपि

न्यायवार्त्तिकम्

समाज्ञानादिति, रागद्वेषौ हि बन्धनमिति, न, अप्रतिकूलत्वात्। अप्रतिकूलं दुःखहानं भवति, न पुनरयं दुःखं द्वेष्टि अद्विषंश्चायं प्रवर्त्तमानोऽप्रतिकूलं दुःखहानमधिगच्छतीति।

न्यायवार्त्तिकतात्पर्य्यटीका

लब्धप्रसरा विषयसुखेष्वपि प्रत्यासन्नेषु पुरुषं प्रवर्त्तयन्ती मोक्षमस्य सुदूरं प्रतिक्षिपेदिति मनागपि प्रसरोऽस्या न दातव्यः। तस्मान्नित्यानन्दप्रतिपादकश्रुतिरात्यन्तिके दुःखवियोगे भाक्तीति युक्तमिति भावः। चोदयति—यद्यपीति। रागवद् द्वेषस्यापि प्रसरो न दातव्यः, तस्य च त्वया प्रसरो दत्त इति तुल्यो दोष इति। परिहरति—न, अप्रतिकूलत्वात्। यथा नित्यसुखोपादानं मोक्षप्रतिकूलया सक्त्या प्रतिकूलं नैवमात्यन्तिकदुःखहानं द्वेषानुषक्तम्, द्वेषः क्रोधो मन्युरित्यनर्थान्तरम्, ज्वलनात्मको हि स भवति, नैवं वैराग्यम्, अलंप्रत्ययो हि स इत्यप्रतिकूलं दुःखहानमित्यर्थः।

---

(१) "इदमनुमानम्" इति ज नास्ति। (२) अत्र "इति" इत्यधिकं ज-पु०। (३) "नोभयमनर्थकमिति" इत्यारभ्य—"मुमुक्षूणामिति" एतत्पर्य्यन्तः पाठो ज-आ-पु नास्ति। (४) "समानाम्" इति वि-टि०। (५) "समानाम्" इति टि०। (६) "नित्यत्वम्" इति ल-पु नास्ति। (७) टि-पु० "अपि" नास्ति।

न्यायभाष्यम्

(१)कश्चिदागमः स्यात् मुक्तस्यात्यन्तिकं सुखमिति ? सुखशब्द आत्यन्तिके दुःखाभावे प्रयुक्त इत्येवमुपपद्यते, दृष्टो हि दुःखाभावे(२) सुखशब्दप्रयोगो बहुलं लोक इति।

नित्यसुखरागस्याप्रहाणे मोक्षाधिगमाभावः, रागस्य बन्धनसमाज्ञानात्। यद्ययं मोक्षो(३) नित्यं सुखमभिव्यज्यत इति, नित्यसुखरागेण मोक्षाय घटमानो न मोक्षमधिगच्छेत्(४), नाधिगन्तुमर्हतीति। बन्धनसमाज्ञातो हि रागः। न च बन्धने सत्यपि कश्चिन्मुक्त इत्युपपद्यत इति।

प्रहीण(५)-नित्यसुखरागस्याप्रतिकूलत्वम्। अथास्य नित्यसुखरागः प्रहीयते, तस्मिन् प्रहीणे नास्य नित्यसुखरागः प्रतिकूलो भवति ? यद्येवम्, मुक्तस्य नित्यं सुखं भवति, अथाऽपि न भवति, नास्योभयोः पक्षयोर्मोक्षाधिगमो विकल्प्यते(६) इति ॥ २२ ॥

न्यायवार्त्तिकम्

चित्तं विमुच्यत इत्यन्ये, रागादीनां तत्र सामर्थ्यात्। यस्माद्रागादिवशं चित्तमालम्बनान्तरं(७)गत्यन्तरेषूत्पद्यते, न पुनरात्मनि रागादीनां सामर्थ्यमस्ति। न, अयत्नतः(८)तत्सिद्धेः। ये

न्यायवार्त्तिकतात्पर्य्यटीका

तदनेन नित्यं सुखमात्मनो व्यज्यते मोक्ष इत्यादि तस्मिन् प्रहीणे नास्य नित्यसुखरागः प्रतिकूलो भवतीत्येवमन्तं भाष्यजातं व्याख्यातं बोद्धव्यम्। यद्येवमित्यादेर्भाष्यस्यायमर्थः—एवं वैराग्येण मोक्षमाणस्य प्रवृत्तौ सत्याम्, प्रसक्तस्य (९) यदि नित्यं सुखं भवति कामं भवतु, मा भूत् उभयोरपि पक्षयोर्वीतरागप्रवृत्तौ न मोक्षाधिगमो विकल्प्यते, न संन्दिग्धो भवतीत्यर्थः।

वैनाशिकानां मोक्षमुपन्यस्यति—चित्तं मुच्यत(१०)इति। संसारी हि मुच्यते। रागादयस्तद्धेतवः। न चात्मनि नित्ये रागादयः संसारं कर्त्तुमुत्सहन्ते, नित्यस्याविकार्य्यत्वेन तादवस्थ्यादुपनेयाऽपनेयाभावात्। यथाऽऽहुः—

वर्षातपाभ्यां किं व्योम्नश्चर्मण्यस्ति तयोः फलम्।
चर्मोपमश्चेत् सोऽनित्यः ख-तुल्यश्चेदसत्फलः॥

चित्तं तु कार्य्यं रागादिवशात्संसारी तद्वियोगाच्च मुच्यत इति युक्तमित्यर्थः। देवमनुष्यादि-

(१) "यद्यपि" इत्यनन्तरम्—"च" अधिकः दि-टि-भा०। (२) "दुःखादेरभावे" इति ख-ग-भा०। (३) "मोक्षे" इति ज-फ-भा-ग०। (४) "अधिगच्छतु" इति टि०। (५) "प्रहाणे" इति ख०। (६) "विकल्प" इति ल-फ०। (७) ख-पु अनुस्वारो नास्ति। (८) "अयने" इति ख। (९) "प्रसक्तस्य" इत्यत्र "मुक्तस्य" इति पाठः समुचितः। (१०) "विमुच्यत" इति वार्त्तिके।

न्यायभाष्यम्

स्थानवत एव तर्हि संशयस्य लक्षणं वाच्यमिति तदुच्यते—

न्यायवार्त्तिकम्

चित्तस्यानुत्पादनं निरोधं वाऽपवर्गमिच्छन्ति तेषामयत्नतः(१)सिद्धो मोक्षः। किं कारणम्? जन्मनो विनाशार्थत्वात्, जातं विनष्टमित्ययत्नसिद्धमेतदिति(२)सन्ततेरनुत्पादोऽपवर्ग इति चेत्, न; तस्याशक्यत्वात्। सन्ततेरनुत्पादो(३) न शक्यते कर्तुम्। कार्यकारणभावप्रवाहस्य सन्ततिभावात्। अनागतानुत्पादः क्रियत इति चेत्, अनागतानुत्पादस्य विद्यमानत्वात् किं क्रियत इति सर्वथा न चित्तस्यापवर्गः सिध्यतीति। कस्य तर्ह्यपवर्गः? योऽपवृज्यते। कोऽपवृज्यते? आत्मा। अथ काऽपवृक्तिः? दुःखादिभिर्वियोग इति॥ २२॥

प्रमेयानन्तरं प्राप्तिः संशयस्य, स्थानवतो लक्षणवचनमिति या प्रमेयानन्तरं क्रमप्राप्तिः साऽभिधीयते—

न्यायवार्त्तिकतात्पर्य्यटीका

जातिर्गतिस्तत्रोत्पत्तिः। तदेतद्दूषयति—न, अयत्नत इति। क्षणिकत्वाच्चित्तस्य, जन्म विनाशप्रयोजनमेव, जन्मानन्तरमेव विनाश इति क्षणस्याभेद्यत्वेनोपनेयापनेयाभावात्। स्वरसभङ्गित्वाच्च वैयर्थ्यमित्यर्थः। शङ्कते—सन्ततेरिति। अनादिः खलु कार्य्यकारणप्रवाहरूपा बुद्धीनां सन्ततिः, स चात्मसाक्षात्कारोन्मूलितसवासनक्लेशजालस्य निवर्त्तते, निवृत्तिश्चेयमेव तस्या यत्तत्सन्तानवर्त्तिनश्चेतसोऽनागतस्यानुत्पाद इति भावः। निराकरोति—न, तस्याशक्यत्वात्। उत्पन्नस्यानुत्पादो न शक्यः, नापि सन्ताननिवृत्तिः शक्या कर्त्तुम्, अन्त्यक्षणानुपपत्तेः। स ह्यन्त्यक्षणः किंचिदारभते न वा? आरम्भे नान्त्य इति न कार्यकारणप्रवाहनिवृत्तिः, प्रवाहश्च सन्तान इति न सन्ताननिवृत्तिः। अनारम्भे तस्यासामर्थ्येनासत्त्वात्ततः पूर्वे सर्व एव क्षणा असन्तः स्युरिति कस्योच्छेद इति भावः। शङ्कते—अनागतानुत्पाद इति। तथा सत्यनागतानुत्पादलक्षणार्थक्रियाकारित्वादन्त्यक्षणोपपत्तिरिति भावः। निराकरोति—अनागतेति। प्रागभावस्यानादित्वादिति भावः। पृच्छति—तर्हि कस्येति(४)। नित्यस्यानुपकार्य्यत्वादुपनेयापनेयाभाव इति भावः। उत्तरम्—य इति। यथा चाक्षणिकस्यैवोपकार्यत्वं तथा क्षणभङ्गभङ्गे उपपादयिष्यत इति सिद्धम्॥ २२॥

संशयलक्षणावतारपरं भाष्यं स्थानवत एव तर्हीति। तस्यार्थः—स्थानं क्रमः तद्वत एव तर्हि, इदानीमिति क्वचित् पाठः। स्थानवत एव तर्हीति तर्हि तदानीमुद्देशसमये, क्रमवतः

(१) "अयने" इति ख०। (२) "विनश्यदयने सिद्धम्" इति ख०। (३) "सन्ततेरुत्पादो" इति ख०। (४) "कस्य तर्हि" इति वार्त्तिके।

(सू)—समानानेकधर्मोपपत्तेर्विप्रतिपत्तेरुपलब्ध्यनुपलब्ध्यव्यवस्थातश्च विशेषापेक्षो विमर्शः संशयः ॥ २३ ॥

न्यायभाष्यम्

समानधर्मोपपत्तेर्विशेषापेक्षो विमर्शः संशय इति। स्थाणुपुरुषयोः समानं धर्ममारोहपरिणाहौ पश्यन् पूर्वदृष्टं च तयोर्विशेषं बुभुत्समानः किंस्विदित्यन्यतरं नावधारयति, तदनवधारणं ज्ञानं संशयः। समानमनयोर्धर्ममुपलभे विशेषमन्यतरस्य

न्यायवार्त्तिकम्

समानानेकधर्मोपपत्तेरिति सूत्रम्। तत्र समानधर्मोपपत्तेरनेकधर्मोपपत्तेर्विप्रतिपत्तेश्च(१) त्रिविध एव संशय इतरपदविशेषणाद् भवतीति सूत्रार्थः। तत्र विषयस्वरूपानवधारणात्मकः प्रत्ययः संशयः(२)समानधर्मादिभ्य उत्पन्नो विषयस्य(३)विशेषं नावधारयति यः स संशय इत्युच्यते। प्रत्ययोऽनवधारणात्मकश्चेति व्याहतम्? प्रत्ययस्यैतत् प्रत्ययत्वं यद्विषयावधारणा-

न्यायवार्त्तिकतात्पर्य्यटीका

संशयस्य प्रमेयानन्तरमुद्दिष्टस्य, प्रमेयलक्षणानन्तरं स्थानं क्रमो लक्षणस्येत्यर्थः। तदेतद्वार्त्तिककारो व्याचष्टे—प्रमेयेति। एतदेव स्फुटयति—येति। स्थानं क्रमग्रहणेन व्याख्यातं मत्वर्थश्च प्राप्तिग्रहणेन।

समा—यः (सू० २३)॥ अत्र च विमर्शः संशय इति संशयसामान्यलक्षणम्, तत्र च संशय इति लक्ष्यनिर्देशो विमर्श इति लक्षणपदम्। एकस्मिन् धर्मिणि विरोधिनानार्थावमर्शो विमर्शः—किंस्विदिति ज्ञानम्। तदनेनासमानजातीयेभ्यः प्रमाणादिभ्यः समानजातीयेभ्यश्च विपर्य्ययादिभ्यः संशयो निवर्तितो भवति समानेत्यादीनि तु त्रीणि विशेषलक्षणानि। तेषु विमर्शः संशय इत्यनुवर्तनीयम्। अत्र विशिष्टोऽवमर्शो विमर्शविशिष्टः संशयो लक्ष्यपदम्, समानधर्मोपपत्तेरनेकधर्मोपपत्तेर्विप्रतिपत्तेरिति त्रीणि प्रत्येकं शेषैः पदैरुपेतानि लक्षणानीति, तदेतदाह वार्त्तिककारः—तत्र समानेति। त्रिविध एवेति ये पञ्चविधमाचक्षते ते निराकृताः। तदनव-

वृत्तिः

क्रमप्राप्तं संशयं लक्षयति—(समानेत्यादि)।

संशय इति लक्ष्यनिर्देशः। विमर्श इत्यत्र विशब्दो विरोधार्थः, मृशिर्ज्ञानार्थः,

(१) ख-पु०—"संशय" इत्यधिकम्। (२) "सूत्रार्थः" इत्यनन्तरं ख-पुस्तके—"तत्र" इत्यादिकः "संशय" इत्यन्तः पाठो नास्ति। (३) ख-पु०—"विषयस्य" इति वारद्वयमस्ति।

न्यायवार्त्तिकम्

त्मकत्वं(१)न चेदयं(२)विषयस्वरूपमवधारयति प्रत्ययत्वं तर्हि व्याहतं भवति। न, स्वरूपप्रत्यायनात् स्वरूपमस्य(३)प्रतीयते, न पुनरयं विषयस्वरूपमवधारयति, अतश्च संशयः, प्रतीयत इति प्रत्यय इति उच्यते।

समानशब्दः साधारणार्थः समानस्य धर्मस्योपपत्तेरिति साधारणस्येति यावत्। किं पुनरत्र साधारणम्, किं गुण आहो सामान्यमिति? यदि गुणः स न साधारणः। कस्मात्? एकद्रव्यवृत्तित्वात् परिमाणस्य, एकद्रव्यवृत्ति परिमाणं तत् कथं साधारणं भविष्यतीति। सामान्यमपि न युक्तम्, द्रव्यावृत्तित्वात् न ह्यूर्द्ध्वत्वं द्रव्ये वर्त्तते, किन्तु गुणे परिमाणे(४),न ह्यूर्द्ध्वत्वं परिमाणे वर्त्तमानं सामान्यं द्रव्ये संशयं कर्त्तुमुत्सहते। कस्मात्? गुणस्यावधारितत्वात् यद्वृत्ति सामान्यं सोर्थोऽवधारित इति। न, साधारणार्थस्यान्यथा व्याख्यानात्। न ब्रूमो गुणः साधारण इति। नापि सामान्यम् अपि तु सादृश्यार्थः, यावदहमर्थौ पूर्वमद्राक्षं तयोर्यो धर्मः ऊर्द्ध्वत्वलक्षणो वर्त्तते तेन धर्मेण सदृशोऽयं धर्म उपलभ्यत(५)इति।

न्यायवार्त्तिकतात्पर्य्यटीका

धारणं ज्ञानं संशय इति संशयसामान्यलक्षणपरं भाष्यं व्याचष्टे—तत्र विषयस्वरूपेति। प्रत्ययोऽनवधारणात्मकश्चेति। आक्षेपपरिहारौ प्रथमसूत्र एव व्याख्यातौ(६)। प्रत्ययशब्दस्य निश्चयवचनत्वमभ्युपेत्य व्याख्यानं प्रतीयते इति। परमार्थतस्तु प्रत्ययशब्दो ज्ञानपर्य्यायः। ज्ञानत्वं तु सामान्यं संशयादिष्वप्यस्तीति न विरोध इति।

समानधर्मोपपत्तेरिति व्याचष्टे—समानेति। विकल्प्याक्षिपति—किं पुनरिति। कस्मादिति। मा कार्षीद् द्रव्ये संशयम्, गुण एव कस्मान्न करोतीति प्रश्नार्थः। समाधत्ते—न, साधारणेति। यादृशं संख्याप्रचयपरिमाणभेदयोगि परिमाणं स्थाणुपुरुषयोः, तादृशमस्यापि पुरोवर्त्तिनो द्रव्यस्य परिमाणम्, तस्मात्सदृशपरिमाणधर्मस्य धर्मिणः उपपत्तिरित्यर्थः। महत्त्वदीर्घत्वसामान्यवद्धर्मयोगस्तु सन्नपि न संशयकारणम्। असादृश्ये तद्योगेऽपि संशयाभावादिति भावः। स्यादेतत्, उपपत्तिः सत्ता, न च सदृशो धर्मः सत्तामात्रेण संशये हेतुः, अपि तूपलब्धः। न चोपलब्धेर्वाचकमत्रास्ति

वृत्तिः

एकस्मिन् धर्मिणीति पूरणीयम्। तेनैकस्मिन् धर्मिणि विरोधेन भावाभावप्रकारज्ञानं संशयः।

---

(१) "प्रत्ययस्यैतत् यदिदं विषयावधारणात्मकत्वम्" इति ख०। (२) "न चेदम्" इति ख०। (३) "स्वरूपस्य" इति ख०। (४) "परिमाणे" इति ख-पु० नास्ति। (५) "उपलभत" इति ख०। (६) ३६ पृष्ठे—वार्त्तिकस्य तृतीयपंक्तौ तात्पर्य्यस्य च चतुर्थपंक्तौ द्रष्टव्यम्।

न्यायवार्त्तिकम्

तस्य उपपत्तिरध्यवसायः। यदुक्तं भवति सदृशस्य धर्मस्योपलब्धेस्तदुक्तं भवति समानस्य धर्मस्योपपत्तेरिति। कस्मात् पुनरेवं नोच्यते समानधर्मोपलब्धेरिति? अनुक्तमपि यस्माद् गम्यते, गम्यमानस्याभिधानं व्यर्थम्। केन पुनरेतद् गम्यते इति विशेषापेक्ष इति वचनेन। कथम्? विशेषस्यापेक्षा आकाङ्क्षा सा चानुपलभ्यमानविशेषे युक्ता। यदि चायं विशेषं न पश्यति विशेषानुपलब्धेर्गम्यत एव सामान्यं पश्यतीति। अथ पुनरयं न सामान्यं न विशेषं पश्येत्तदा विशेषापेक्ष इति व्यर्थं वचनं स्यात्, एतेन सामर्थ्येन गम्यते सामान्यमुपलभत इति। अथ वोपलब्धिपर्याय एवोपपत्तिशब्द इति। उपपत्तिः प्रमाणगम्यता सा चोपलब्धिः। यः पुनरनुपलभ्यमानसद्भावो धर्मः सोऽविद्यमानवद्भवतीति। का पुनर्विद्यमानस्याविद्यमानेन समानता? प्रमाणानालम्बनत्वम्। अविद्यमानमपि प्रमाणस्यालम्बनं स्वतन्त्रं न भवति, तदप्यनुपलब्धिलक्षणं

न्यायवार्त्तिकतात्पर्य्यटीका

पदमित्यत आह—तस्योपपत्तिरध्यवसाय इति। यद्यप्ययमुपपत्तिशब्दः सत्तावचनस्तत्परश्च, तथाऽपि पदान्तरसमभिव्याहारादवगम्यते सत्तामात्राभिधानेऽपि तदुपलब्धिर्विवक्षितेति। विषयविषयिणोरभेदविवक्षया सामानाधिकरण्यमुपपत्तिरुपलब्धिरिति। पृच्छति—कस्मादिति। अस्मदायत्ते हि शब्दप्रयोगे किमित्यवाचकं प्रयोक्ष्यामह इत्यर्थः। उत्तरम्—अनुक्तमपीति। विशेषापेक्ष इति विशेषस्यापेक्षोच्यते। अपेक्षाशब्दश्च यद्यपीच्छायां वर्त्तते तथापीह जिघृक्षायां वाक्यसामर्थ्यात्। न च सा संशयस्य हेतुः, तस्याः संशये सति भावात्। तस्माद्विशेषापेक्षया जिघृक्षालक्षणयेह विशेषयोः पुरोवर्तिनोस्तु सादृश्यात्स्मरणे सत्यग्रहणं लक्षणीयम्, यथा गङ्गाशब्दस्तीरं स्वसंबद्धमेव लक्षयति न तु तीरमात्रम्, एवं बुभुत्सयाऽपि स्मर्यमाणमेवागृह्यमाणं संबद्धं लक्षणीयं न त्वगृह्यमाणमात्रम्। अनेनैवाभिप्रायेण वक्ष्यति भाष्यकारः—(१) विशेषस्मृत्यपेक्ष इति। तस्माद्विशेषग्रहणप्रतिषेधात् सामान्यज्ञानमभ्यनुज्ञातं भवतीति भावः। परिहारान्तरमाह—अथ वेति। स्यादेतत्, उपपत्तिशब्दः सत्तावचनश्चोपलब्धिवचनश्च, तथा च विनिगमनायां को हेतुरित्यत आह—यः पुनरिति। नन्वभावः प्रमाणालम्बन उक्तस्तत्कथं न विरोध इत्यत उक्तम्—स्वतन्त्रमिति। अथ वा सत्तावाचकोऽप्ययमुपपत्तिशब्दः स्वाभिधेयविषयामुपलब्धिं

वृत्तिः

तत्र कारणमुखेन विशेषलक्षणान्याह—यसमानेत्यादि। उपपत्तिः—ज्ञानम्, तथा च समानस्य—विरुद्धकोटिद्वयसाधारणधर्मस्य ज्ञानादित्यर्थः। अनेकधर्मः—असाधारण-

(१) एतत्सूत्रभाष्यस्यैव शेषपंक्तौ।

न्यायवार्त्तिकम्

प्राप्त(१)मिति। विषयशब्देन वा विषयिणं प्रत्याह(२), समानधर्मोपपत्तिशब्देन वा विषयी प्रत्ययो विधीयते। लौकिकं वा न्यायमनेन वाक्येनावरुणद्धीति, यथा लोके वक्तारो भवन्ति धूमेनाग्निरनुमीयत इति। न च वाक्ये दर्शनशब्दः श्रूयते। अर्थप्रत्यायकत्वात् वाक्ये दर्शनशब्द-मनुजानाति धूमं दृष्ट्वाऽथाग्निरनुमीयते इति।

अव्यवच्छेदहेतोरिति वक्तव्यम्—यदिदं समानधर्मोपपत्तेरिति पदम् एतस्मिन्नव्यवच्छेदहेतोः(३) समानस्य धर्मस्योपपत्तेरिति वक्तव्यम्। न हि केवला समानधर्मोपपत्तिः संशयकारणमन्यथा कृतकत्वादिनाऽपि संशयः स्यात्, समानं हि कृतकत्वं सर्वानित्यानामिति, व्यवच्छेदहेतुत्वान्न भवति। न, समानार्थापरिज्ञानात्। व्यवच्छेदहेतुश्च भवति समानश्च धर्म इति न युज्यते, व्यव-च्छेदहेतुर्नाम विवक्षिततज्जातीयवृत्तित्वे सति यो विजातीयावृत्तिः(४) स व्यवच्छेदहेतुः, तस्य च समानार्थता नास्ति। समानो हि धर्मो यो विवक्षिततज्जातीयवृत्तित्वे सति अन्यजातीयवृत्तिः। तस्मादव्यवच्छेदहेतोरिति न वक्तव्यम्।

सोऽयं साधारणो धर्म उपलभ्यमानः संशयहेतुः। किं केवल इति? न केवलः। किं

न्यायवार्त्तिकतात्पर्य्यटीका

लक्षयतीत्याह—विषयशब्देनेति। न चेयमलौकिकी लक्षणेत्याह—लौकिकमिति। यथा धूमो न सत्तामात्रेण हेतुस्तथोक्तं प्रागिति।

एकदेशिनामुपसंख्यानमुपन्यस्यति—अव्यवच्छेदेति। ते हि मन्यन्ते व्यवच्छेदहेतुरपि धर्मः समानो भवति, यथा कृतकत्वं साध्यधर्मिणि शब्दे दृष्टान्तधर्मिणि च घटादौ समानमिति, न चासौ नित्यत्वसंशयहेतुः अपि त्वनित्यत्वस्यायोगं साध्यधर्मिणि व्यवच्छिनत्ति, तस्मादव्यवच्छेदहेतोरिति वक्तव्यमित्यर्थः। तदेतद् वक्तव्यं दूषयति—न समानेति। समानो हि धर्मः प्रतिसंबन्धिन-मपेक्षते—केनेति, संशयपदेन च स्वविषयोपस्थापकेन परस्परविरोधिनावुपस्थितौ तेन ताभ्यां समान इति गम्यते। तेन विवक्षिततज्जातीयवृत्तित्वे सति अन्यजातीयवृत्तिरेव गम्यते, न चैवं कृतकत्वम्, तस्मान्न वक्तव्यमव्यवच्छेदहेतोरिति। समानशब्दार्थः सादृश्यं तत्र नास्तीत्यर्थः।

वृत्तिः

धर्मः, तज्ज्ञानादित्यर्थः। (५)साधारणधर्मवद्धर्मिज्ञानजन्योऽसाधारणधर्मवद्धर्मिज्ञानजन्य-

(१) "लक्षणप्राप्त" इति ख०। (२) "प्रत्याह" इत्यत्र "प्रत्यायमाह" इति कस्यापि हस्तलिखितपरिशोधनं दृश्यते, तत् सम्यगेवेति मन्यामहे। (३) "पदमेतन्न व्यवच्छेदहेतोः" इति ख०। (४) "विजातीयवृत्तिः" इति ख०। (५) "तथाच" इत्यधिकम्, आ-व०।

न्यायवार्त्तिकम्

र्हि ? उपलब्ध्यनुपलब्ध्यव्यवस्थातश्च। यदि चोपलब्ध्यनुपलब्धी न व्यवस्थिते भवत इति। किमेतावन्मात्रं साधनमिति ? नेत्युच्यते। यदि विशेषाकाङ्क्षा भवति समानधर्ममुपलभते। उपलब्ध्यनुपलब्धी न व्यवतिष्ठेते इदन्तया वाऽनिदन्तया वा। विशेषाकाङ्क्षायां च सत्यामर्थसन्देहो भवतीति।

किमिदं समस्तं कारणमसमस्तं वा? समस्तमिति ब्रूमः। यदि समानधर्मोपपत्तेरिति केवलमुच्येत उपलब्धविशेषस्यापि सामान्यत उपलब्धिरस्तीति तस्याऽपि संशयः स्यादिति। यदि पुनरुपलब्ध्यनुपलब्ध्यव्यवस्थातश्च संशय इत्येतावदुच्येत अनुपलब्धसामान्यस्यापि क्वचिदुपलब्ध्यनुपलब्ध्यव्यवस्थाऽस्तीति संशयः स्यात् इति। विशेषापेक्ष इत्येतावति चोच्यमानेऽनुपलब्धसामान्यस्यापि क्वचिद्विशेषस्मृतिरस्तीति संशयः स्यात्। एवं समानधर्मोपपत्तेरुपलब्ध्यनुपलब्ध्यव्यवस्थातश्चेति पदद्वयेऽपि नौयानप्रेङ्खादिगतस्य न भवति संशयः। एवमुपलब्ध्यनुपलब्ध्यव्यवस्थातो

न्यायवार्त्तिकतात्पर्य्यटीका

अत्रैवोपलब्धीस्यादिपदद्वयं शङ्कापूर्वकं योजयति—सोऽयं साधारण इति। उपलब्ध्यनुपलब्धी न व्यवतिष्ठेते इति शिरःपाण्यादीनामुपलब्धिर्वक्रकोटरादेरनुपलब्धिः पुरुषस्य साधकं प्रमाणम्, तद्विरुद्धशिरःपाण्यादेरनुपलब्धिवक्रकोटरादेरुपलब्धिः पुरुषस्य बाधकप्रमाणम्, तद्धि पुरुष एवायमिति वा इदंतया व्यवतिष्ठते, इदंतानिषेधेन वा नायं पुरुष इति नेदंतया व्यवतिष्ठते, तदभावो व्यवस्था। तदनेन साधकबाधकप्रमाणाभावो दर्शितः। विशेषाकाङ्क्षायां चेति विशेषस्मृतिर्दर्शिता।

विमर्षपूर्वकं समस्तमित्यवधारयति—किमिदमिति। तत्रैकपदपरिग्रहे दोषमाह—यदि समानेति। विशेषः शिरःपाण्यादिः, विशिष्यते ह्यनेन पुरुषः स्थाणोरिति अनुपलब्धसामान्यस्यापि क्वचिदुपलब्ध्यनुपलब्ध्यव्यवस्थाऽस्तीति। यथा सप्तमे रसे दशमे द्रव्ये। न हि तत्र साधकं बाधकं वाऽस्ति प्रमाणानां च संशयः। विशेषापेक्ष इत्येतावतीति, तद् यथा हस्तिनं दृष्ट्वा तत्संबन्धिनौ स्थूणाहस्तिपकौ स्मरति न च तत्र सन्दिग्धे, द्विपदपरिग्रहे (१) दोषमाह—एवं समानेति। नौदोलाद्यारूढो हि गच्छन् विदूरे आरोहपरिणाहवद्वस्तुदर्शने सत्यपि च साधकबाधकप्रमाणाभावे विशेषस्मृत्यभावान्नग इति वा नाग इति

वृत्तिः

श्चेत्यर्थः। विप्रतिपत्तिः—विरुद्धकोटिद्वयोपस्थापकः शब्दः, तस्मादित्यर्थः। यद्यपि शब्दस्य न संशायकत्वम्, तथापि शब्दात्कोटिद्वयोपस्थितौ मानसः संशय इति वदन्ति।

(१) "एकद्विपदपरिग्रहे" इति क-पु-पाठः।

न्यायवार्त्तिकम्

विशेषापेक्ष इति पदद्वयेऽभिधीयमाने(१)ऽत्यन्तानुपलब्धेऽर्थे संशयः स्यात्। समानधर्मोपपत्तेर्विशेषापेक्ष इति चोच्यमाने सामान्यधर्मदर्शने सत्यपि विशेषाकाङ्क्षायां च सत्यामुपलब्ध्यनुपलब्ध्योर्व्यवस्थानान्न भवति संशयः। एवं च(२) यदाऽयं द्रष्टा दृष्टपूर्वं(३) सामान्यविशेषवन्तमर्थमुपलभते तत्र चोपलब्ध्यनुपलब्धी व्यवस्थिते भवतः। सोऽयं द्रष्टा तस्मात् स्थानात् यदाऽपैति, ततोऽस्यापगमाद्विषयविप्रकर्षान्निमित्ताद्दल्पविषया विशेषा नाभासन्ते, महाविषयं सामान्यमवभासते, उपलब्ध्यनुपलब्धी पुनर्व्यवतिष्ठेते, विशेषार्थस्मृतिश्च नास्ति(४), न च सन्दिह्यते, तस्मादेकद्विपदपर्युदासेन समस्तं लक्षणमुच्यत इति। समानधर्मोपपत्तेरुपलब्ध्यनुपलब्ध्यव्यवस्थातश्च विशेषापेक्ष इति चैकपदपर्युदासः कृतः। समानधर्मोपपत्तेरुपलब्ध्यनुपलब्ध्यव्यवस्थातश्च समानधर्मोपपत्तेर्विशेषापेक्ष इति च उपलब्ध्यनुपलब्ध्यव्यवस्थातो विशेषापेक्ष इति च द्विपदपर्युदासः कृतः समस्तपदपरिग्रहेण। यस्मात् समानधर्मोपपत्तेरुपलब्ध्यनुपलब्ध्यव्यवस्थातश्च विशेषापेक्षो विमर्शः संशय इत्याह। तेन ज्ञापयति समस्तमेतल्लक्षणमिति। विमर्श इति नानार्थावमर्शनं विमर्शः। उभावर्थौ मृशतीव संशीतिः संशय इति भावसाधनम्, करणसाधनं वा संशेते(५)ऽनेनात्मा तुष्ट

न्यायवार्त्तिकतात्पर्य्यटीका

वा न सन्दिग्धे, एवमुपलब्ध्यनुपलब्ध्यव्यवस्थातो विशेषापेक्ष इति च पदद्वये विधीयमानेऽन्यतः स्मर्यमाणाद्विशेषात्सदृशधर्मवति धर्मिण्यनुपलभ्यमाने संशयः स्यात्, अस्ति हि तदा विशेषस्मृतिः साधकबाधकप्रमाणाभावश्च, न खल्वनुपलभ्यमाने समानधर्म्मे धर्म्मिणि तद्गता वक्रकोटराद्यो वा शिरःपाण्यादयो वा शक्यग्रहा इति। यदाऽयं द्रष्टेति। यदा खल्वयं द्रष्टा प्रतिपरु(६)-रङ्कुरोद्भेदपुलकिताभिर्मन्दमलयमारुतान्दोलनललितलास्यशालिनीभिः शाखाभिर्मधुमदमुदितमधुपमालागुञ्जितवल्लकीवाद्यमनोहराभिर्मत्तपुंस्कोकिलकलविपञ्च्यमानपञ्चमाभिरारब्धसङ्गीतकं सहकारतरुमालोक्याथ विदूरवर्त्ती कुञ्जरसदृशधर्मवन्तमनुभवति, तदाऽस्यास्ति समानधर्मोपलब्धिः; अस्ति च करि-तरु-रूपविशेषस्मृतिः, न तु साधकबाधकप्रमाणाभाव इति न संशेते। कतिपयव्यक्त्याश्रयत्वं सहकारत्वादेर्विशेषस्याल्पविषयत्वम् आरोहपरिणाहादेस्तु बहुव्यापित्वं महाविषयत्वं नानार्थावमर्षणं च विरुद्धार्थावमर्षणम्, तदनेन स्थाणुपुरुषयोरित्यादि भाष्यं व्याख्यातम्। पश्यन्नित्युपपत्तिविवरणम्, विशेषं बुभुत्समान इति 'विशेषापेक्ष' इत्यस्य विवरणम्, किं स्विदिति 'विमर्ष'विवरणम्। स्यादेतत्—संशयोत्तरकाला बुभुत्सेति, कथं बुभुत्समानः संशेत इत्यत उक्तं भाष्यकृता—समानमनयोरिति। विशेषापेक्षाशब्देनेच्छावाचिनाऽगृह्यमाणविशेषस्मरणं लक्षितमिति भावः। सेयं साधकबाधकप्रमाणानुपपत्तौ सत्यां समानधर्मोपलब्धिर्विनश्यदवस्था विशेष-

---

(१) "विधीयमाने" इति ख०। (२) "एवं च" इति ख-ग-नास्ति। (३) "दृष्टपूर्व्वम्" इत्यत्र "पूर्व्वम्" इति ख०। (४) "विशेषानुस्मृतिर्नास्ति" इति ख०। (५) "संशय्यते" इति ख०। (६) "परुस्" शब्दः पर्ववाचकः, ('पाँब्' इति यस्य वङ्गभाषायां प्रसिद्धिः)।

न्यायभाष्यम्

नोपलभ इत्येषा बुद्धिः अपेक्षा—संशयस्य प्रवर्त्तिका वर्त्तते, तेन विशेषापेक्षो विमर्शः संशयः।

अनेकधर्मोपपत्तेरिति। समानजातीयमसमानजातीयं चाऽनेकम्। तस्यानेकस्य

न्यायवार्त्तिकम्

इव भवति। क उपमार्थः ? अर्थानवधारणमुपमानार्थः। एतेनानेकधर्मोपपत्तेर्विप्रतिपत्तेश्चेति व्याख्यातम्। कोऽतिदेशार्थः ? यथाऽऽद्यपक्षे त्रिपदपरिग्रहेण एकद्विपदपर्युदासः कृतः तथानन्तरयोरपि द्रष्टव्यमिति।

अनेकधर्मोपपत्तेः संशय इति—अनेकस्यानेकश्च धर्म इति केचित्, अनेकस्य धर्मोऽनेकधर्मः अनेकस्य द्रव्यगुणकर्मलक्षणस्य संयोगजत्वं धर्मः, अनेकश्च धर्मः संयोगजत्वनिर्गुणत्वनिष्क्रियत्वक्षणिकत्वानि शब्दे, तदेवमनेकधर्मोपपत्तेः संशय इति केचित्, तदयुक्तम्, समानधर्मोपपत्तेरित्यत्र चरितार्थत्वात्। समानधर्मोपपत्तेरित्यनेनैव यश्चैकोऽनेकवृत्तिः यश्चानेक एकवृत्तिः स लभ्यत इति चरितार्थत्वात्। न पुनरनेकधर्माभिधानेन प्रयोजनमस्तीति। अथानेकधर्मशब्दस्य कोऽर्थः ? असाधारणो धर्मः। कथं पुनरसाधारणो धर्मोऽनेकधर्म इत्यनेन समासपदेनाभिधीयते ? समानासमानजातीयविशेषकत्वात्, समानजातीयमसमानजातीयं चानेकम्, तस्माद्विशेषो—

न्यायवार्त्तिकतात्पर्य्यटीका

स्मृत्या सहाविनश्यदवस्था एकस्मिन् क्षणे सती संशयज्ञानस्य हेतुरिति सिद्धम्। त्रिपदपरिग्रहमनेकधर्मोपपत्तेर्विप्रतिपत्तेरित्यत्रापि योजयति—एतेनेति। द्वे द्वित्वेनैकीकृत्याद्यानन्तरयोरिति द्रष्टव्यम्।

अनेकधर्मोपपत्तेरित्यत्र भाष्यकृतो व्याख्यां ग्रहीतुमेकदेशिव्याख्यानमुपन्यस्य दूषयति—अनेकेति। शब्दो हि संयोगजः, संयोगजत्वं हि कार्य्ये द्रव्ये गुणे च रूपादौ शरीरादिक्रियायां चास्तीति द्रव्यगुणकर्मणां समानम्, तस्मादनेकस्य धर्मश्चरितार्थः। एवं शब्दगतोऽनेकोऽपि धर्मः समानतयैव द्रव्यत्वादिसन्देहहेतुः त्रिषु, संयोगजत्वं साधारणं सत्त्वादिना निर्विभक्तस्य, निर्गुणत्वं गुणकर्म्मणोः। एवं क्षणिकत्वं द्रव्यगुणकर्म्मणामिति समानधर्म्मोपपत्त्या गतार्थमित्यर्थः। पृच्छति—अथेति। भाष्यकृद्व्याख्ययोत्तरम्—असाधारण इति। पुनः पृच्छति—कथमिति। समासपदशब्देन तदेकदेशोऽनेकशब्दो लक्ष्यते, समासगतेनानेकशब्देनेत्यर्थः। उत्तरम्—

वृत्तिः

उपलब्धेः—ज्ञानस्य, अनुपलब्धेः—व्यतिरेकज्ञानस्य, याऽव्यवस्था—सद्विषयत्वानिर्धारणम्, प्रामाण्यसंशय इति फलितोऽर्थः।

न्यायवार्त्तिकम्

विशेषको धर्म्मः अनेकस्माद्विशेषोऽनेकधर्म इति तस्य चानेकस्य धर्मो यथास्वं सोऽयमनेकधर्म इति। एकानेकप्रत्ययहेतुर्वा धर्मोऽनेकधर्मः, यत एष(१)प्रत्ययो भवतीदमेकमिदमनेकमिति। तत्रैकप्रत्ययहेतुरभेदः अनेकप्रत्ययहेतुर्वा धर्मो विशेषः, यथा शब्दस्य विभागजत्वम्, सामान्यविशेषसमवायेभ्यः शब्दस्य सदादिना विशेषेण निर्भक्तस्य, तस्मिंस्तु द्रव्यं गुणः कर्म वेति विभागजत्वात्

न्यायवार्त्तिकतात्पर्य्यटीका

समानेति। एतदुक्तं भवति यतोऽनेकस्मात्समानासमानजातीयादेष स्वाश्रयं व्यावर्त्तयति, अतोऽनेकापादानकव्यावृत्तिहेतुत्वाल्लक्षणयाऽनेक इत्युच्यते। तदनेन समानजातीयमसमानजातीयं चानेकमिति भाष्यं तस्माद्विशेष इत्यध्याहृत्य व्याख्यातम्। अध्याहृतविशेषपदविवरणं विशेषको धर्म इति। संबन्धसामान्यविवक्षया षष्ठी तस्यानेकस्येति। लक्षणाबीजान्तरमाह—तस्य चानेकस्येति। निवर्त्त्यनिवर्त्तकसंबन्धेनानेकशब्देन धर्म्मो लक्ष्यत इत्यर्थः। तदनेन विनैवाध्याहारं समानजातीयमसमानजातीयं चानेकम्, तस्य धर्म्मो निवर्त्तकतयेति व्याख्यातम्। न त्वत्र समासभ्रान्तिः कर्त्तव्या, दर्शयिष्यति बहुव्रीहिमिहैव (२) वार्त्तिककारः। तदनेन लक्षणाबीजद्वयोपन्यासेनासाधारणो धर्म इति ग्रहणकवाक्यं व्याख्यातम्। प्रकारान्तरेणानेकधर्म्मपदं व्याचष्टे—एकानेकेति। एकं चानेकं च तदुभयमनेकं तदेतस्यानेकस्य प्रत्ययहेतुर्धर्म्मोऽनेकधर्म्मः भेदाभेदप्रत्ययहेतुरित्यर्थः। विभागजत्वं विभागजानां शब्दानामन्योन्यस्याभेदप्रत्ययहेतुः तदितरेभ्यश्च भेदप्रत्ययहेतुरिति तदिदमाह—यतो विभागजन्यत्वादेष प्रत्ययो भवतीदं विभागजं शब्दजातमेकम्, इदं च ततोऽन्यदनेकं भिन्नम्, तत्र य एवैकप्रत्ययहेतुर्धर्म्मोऽभेदप्रत्ययहेतुः, स एवानेकप्रत्ययहेतुर्द्धर्मोऽनेकधर्म्मो भेदप्रत्ययहेतुर्विशेषः। जात्यभिप्रायं चैकवचनम्, सदादिर्हि धर्म्मो द्रव्यगुणकर्म्मणामभेदप्रत्ययहेतुः, सामान्यादिभ्यश्च शब्दं निर्विभजति, तदिदमाह—यतः सदादेरेष प्रत्ययो भवतीदमेकं यतश्च विभागजत्वादेष प्रत्ययो भवतीदमनेकमिति तस्मात्सिद्धमेकं चानेकञ्च, अनेकमिति तत्प्रत्ययहेतुरुपचारेणानेक इति। तदिदमुक्तभाष्यं व्याख्यातम्। अत्रोदाहरणमाह—यथेति। द्रव्यादिकोटित्रयविशेषे संशयप्रदर्शनार्थमुक्तम् सामान्यविशेषसमवायेभ्य इति। "सदनित्यं द्रव्यवत्कार्य्यं कारणं सामान्यविशेषवदिति द्रव्यगुणकर्मणामविशेषः" (३) तेनानेन सदादिना, निर्विभक्तस्य (४) पृथक्कृतस्येत्यर्थः।

स्यादेतत्, यद् येन सहचरितं दृष्टं तत् क्वचिद्दृश्यमानं तत्स्मारयत्तद्विरुद्धेनापि संबन्धादनिश्चाययत्संशयहेतुर्भवति, यथा समानो धर्म्मः। असाधारणस्तु धर्म्मो विभागजत्वं न ऋते शब्दात्

(१) "एव" इति ख०। (२) २५२ पृष्ठस्थवार्त्तिकस्य १८ पंक्तौ। (३) वैशेषिकदर्शने—१।१।८ सूत्रम्। (४) वार्त्तिके "निर्भक्तस्य" इति।

न्यायवार्त्तिकम्

संशयः। न हि किञ्चित् द्रव्यगुणकर्मणामन्यतमं विभागाज्जायमानं दृष्टम्, सर्वत्रासम्भवात्, विभागजत्वं संशयं करोति सर्वतो व्यावृत्तेरिति। ननु च विभागजो विभागो विद्यते गुणः? सत्यम्, अनभ्युपगतविभागजविभागस्यैतदेवं भवति। यः पुनरभ्युपगतविभागजविभागः तस्यायं

न्यायवार्त्तिकतात्पर्य्यटीका

क्वचित्पृथिव्यादौ वा उत्क्षेपणादौ गन्धादौ वा दृष्ट इति कथं स्मारयेत्, अस्मारयन् वा कथं संशयं जनयेत्। तस्मात् कोऽयं भवेदित्यतो धर्मादिति जिज्ञासामात्रमुत्पादयेत्, न त्वयं वाऽयं वेति संशयमित्यत आह—न हीति। कस्मान्न दृष्टमित्यत आह—**सर्वत्रासंभवात्।** न हि द्रव्यादेर्विभागतो जन्म संभवति, तदन्वयव्यतिरेकाननुविधानादित्यर्थः। नन्वत एवोक्तं न संशयहेतुरित्यत आह—**विभागजत्वं संशयं करोति सर्वतो व्यावृत्तेरिति।** अयमर्थः—यद्यपि विभागजत्वं न द्रव्यादौ क्वचिद्दृष्टम्, तथाऽपि तद्व्यतिरेकः प्रत्येकं द्रव्यादौ दृष्ट इति विभागजत्वेन सदाद्यविशेषवान् शब्दो द्रव्यकर्मभ्यां व्यावर्त्तमानः किं गुणः, गुणकर्म्मभ्यां व्यावर्त्तमानः किं द्रव्यम्, गुणद्रव्याभ्यां व्यावर्त्तमानः किं कर्मेति व्यतिरेकमुखेण तत्तत् स्मारयन् असाधारणो धर्म्मो भवति संशयकारणमिति। देशयति—**ननु चेति।** अयमभिसन्धिः वंशे पाट्यमाने वंशदलयोः क्रिया, ततस्तयोर्मिथो विभागः, ततो वंशदलावरुद्धनभोभागविभागः, सोऽयं विभागजो विभागो न वंशदलकर्म्मजः, अवयवक्रिया हि तदवरुद्धनभोभागविभागजनिका द्रव्यारम्भकसंयोगाप्रतिद्वन्द्विविभागजनकत्वेन व्याप्ता विकसत्कमलकुट्मले दृष्टा, न हि तत्र मुकुलिताद् विकासि कमलमन्यत्, आकुञ्चितप्रसारिताङ्गुलिकरतलवत् तत्त्वेन प्रत्यभिज्ञायमानत्वात्। वंशदलक्रियाऽपि चेत्तादृशी नूनमनयाऽपि द्रव्यारम्भकसंयोगाप्रतिद्वन्द्विविभागजनिकया भवितव्यम्, तथा च द्रव्यं कार्य्यमपि न नश्येत्, तस्मान्नानया वंशदलाकाशविभागो जनयितव्यः, न चान्यदस्य कारणं संभवति। तस्माद्वंशदलक्रियाजनितो दलयोर्विभागः कार्य्यैकार्थसमवेतः तदवरुद्धाकाशप्रदेशविभागस्यासमवायिकारणमेषितव्यः, एवं च गुणः शब्दो विभागजत्वाद् विभागजविभागवदिति विभागजत्वं गुणत्वनिश्चयहेतुरिति सिद्धं भवति। परिहरति—**अनभ्युपगतविभागजविभागस्य एतद्विभागजत्वमेवं संशयकारणं भवति।** अनभ्युपगमबीजं च कुतः पुनरेतदेवमवगतं पद्मपत्रावयवक्रिया विभागद्वयजनिकेति, विभागद्वयक्रमकल्पनायां प्रमाणाभावादिति चेद्, हन्त वंशदलयोरपि तुल्यम्। ननूक्तं द्रव्यारम्भकसंयोगाप्रतिद्वन्द्विविभागजनकं स्यात्

वृत्तिः

अन्ये तु **उपलब्ध्यव्यवस्था**—प्रामाण्यसंशयः; **अनुपलब्धिः**—उपलब्धिविरोधि भ्रमत्वम्, **तदव्यवस्था**—तत्संशय इत्याहुः।

न्यायवार्त्तिकम्

निर्णयहेतुः गुणः शब्दो विभागजत्वात् विभागजविभागवदिति। अस्तु वा तस्यापि विभागज-विभागासमवायिकारणकत्वात् विभागजविभागासमवायिकारणकः शब्दो नान्यः पदार्थ इति। तदेवं विभागजत्वं विभागजविभागासमवायिकारणत्वं नर्ते(१) शब्दाद्भवतीति सर्वतो व्यावृत्तः

न्यायवार्त्तिकतात्पर्य्यटीका

कर्म्म, ततश्च द्रव्यनाशो न स्यादिति। अथ विपर्य्ययः कस्मान्न भवतीति वंशदलद्वयक्रियैव विभाग-द्वयजनिका, पद्मपत्रावयवक्रिया त्ववयवविभागजनिका, तदवयवाकाशविभागस्त्ववयवविभागजन्मा। यदि च पद्मपत्रावयवक्रिया उभयजनिका भवेत्, वंशदलक्रियैव द्रव्यारम्भकसंयोगप्रतिद्वन्द्विनं विभागं जनयेदिति। न चान्यतरत्र विभागविषययौगपद्यनिश्चयक्रमप्रमाणाभावश्च तुल्यः, तस्मात्पद्मपत्रावयव-क्रियाविभागजनकत्वसन्देहादशक्यनिश्चयो व्याप्यव्यापकभावः। क्रियावैलक्षण्यात्तु स्वहेतुवैलक्षण्य-जन्मनः कार्यस्य विभागस्य वैलक्षण्यं स्यात्, यदेको द्रव्यारम्भकसंयोगप्रतिद्वन्द्वी, अप्रतिद्वन्द्वी चेतरः, तथाऽपि चैतद्वैलक्षण्यं क्रियाया अभ्युपगन्तव्यं यदेका विभागमेकं जनयति, अन्या तु विभागद्वय-मिति। तस्मादेतदुदाहरणबलेन न विभागजविभागसिद्धिः। यस्त्वङ्गुलिकर्मानन्तरमङ्गुलि-तरुविभागो हस्ततरुविभागः शरीरतरुविभागश्च दृश्यते, तत्राङ्गुलितरुविभागमङ्गुल्याश्रया क्रिया करोतु, हस्ततरुविभागन्तु न शक्ता जनयितुम्, तस्याः स्वाश्रयसमवायात्, स्वाश्रयसमवेतकार्य्य-जनने च क्रियायाः सामर्थ्यावधारणात्। तस्माद्धस्तादितरुविभागः क्रियातोऽसंभवन्नङ्गुलितरु-विभागमेव कार्य्यैकार्थसमवायलक्षणप्रत्यासत्त्या निमित्तीकरोतीति विभागजविभागसिद्धिं मन्यते, तं प्रत्याह—यः पुनरिति। अस्तु वा विभागजो विभागः, तथाऽपि विभागजत्वमीदृशम-साधारणमेवेत्यत आह—अस्तु वेति। अस्तु तस्याभ्युपगतविभागजविभागस्यापि विभागजत्वम-साधारणं विशिष्टम्, तदेव दर्शयति—विभागजेति। पाट्यमाने हि वंशे शब्दोत्पत्तौ वंशदलयो-र्विभागो निमित्तकारणम्, वंशदलावरुद्धाकाशविभागस्त्वस्यासमवायिकारणम्, न तु भेर्य्याकाश-संयोगवद् वंशदलाकाशसंयोगोऽसमवायिकारणं भवितुमर्हति। तथा हि प्रयोगः—योऽयं वंशदलविभागनिमित्तः शब्दः, स निमित्तसमानजातीयासमवायिकारणजन्यः, तदसाधारण-निमित्तजन्यत्वात्, यो यः शब्दो यदसाधारणनिमित्तजन्मा, स सर्वस्तज्जातीयासमवायिकारणजन्यः, यथा भेरीदण्डसंयोगनिमित्तः शब्दो भेर्य्याकाशसंयोगासमवायिकारणकः, तथा चायं, तस्मात्तथा। तदेवं वंशदलविभागलब्धजन्मना वंशदलाकाशविभागेनासमवायिकारणेन जनितः शब्दः।

वृत्तिः

वस्तुतस्तु प्रामाण्यसंशयस्य न संशयहेतुत्वम्, किन्तु अगृहीताप्रामाण्यकज्ञानस्य विरोधि-तया सति प्रामाण्यसंशये तज्ज्ञानस्याऽविरोधितया साधारणधर्मदर्शनादित एव संशयोत्पत्ति-

(१) "न ते" इति ख०। "नर्ते" इतात न + ऋते इति सन्धिविश्लेषः।

न्यायभाष्यम्

धर्मोपपत्तेः—विशेषस्योभयथा दृष्टत्वात्। समानजातीयेभ्योऽसमानजातीयेभ्यश्चाऽर्था विशिष्यन्ते, गन्धवत्त्वात्पृथिवी अबादिभ्यो विशिष्यते गुणकर्मभ्यश्च। अस्ति च शब्दे विभागजन्यत्वं विशेषः। तस्मिन् द्रव्यं गुणः कर्म वेति सन्देहः, विशेषस्योभयथा दृष्ट-

न्यायवार्त्तिकम्

संशयहेतुः। तुल्यजातीयेष्वर्थान्तरभूतेषु विशेषस्योभयथा दृष्टत्वादिति। समानधर्मोपयोगाद्वाऽसमानानेकधर्मो भवति। यद्वा द्वयस्यापि संशयकारणत्वेनोपनीतस्य समानधर्मस्यासमानस्य च समानस्य धर्मस्योपयोगादनुपयुक्तोऽसमानः सोऽनेकशब्दस्य विषयविशेष इति।

न्यायवार्त्तिकतात्पर्य्यटीका

तदेवं विभागजविभागासमवायिकारणकत्वं शब्दस्य, तदपि यद्यप्यङ्गुल्याकाशविभागजहस्ताकाशविभागासमवायिकारणे कायाकाशविभागेऽस्ति, तथाऽपि कारणमात्रविभागजविभागासमवायिकारणकत्वादिति हेतुर्भाष्यकारेण विभागजत्वादित्यनेन(१) सूचितः। न चाङ्गुल्याकाशविभागपूर्वकः कायाकाशविभाग एवम्, स हि कारणाकारणविभागपूर्वको न तु कारणमात्रविभागपूर्वकः, तदिदमुक्तम् विभागजविभागासमवायिकारणकः शब्दो नान्यः पदार्थ इति। ननु सहचरितो दृष्टः स्मारयन् विशेषसंशयहेतुर्भवति, न तु यो व्यावृत्तः, तेनासाहचर्य्यादिति शङ्कामपनेतुं भाष्यकारीयमुत्तरमाह—तुल्यजातीयेष्विति। यद्यपि व्यतिरेकमुखेणासाधारणः शक्तः स्मारयितुम्, तथाऽपि भाष्योक्तमप्युक्तम्, यत् खलु सदादिरूपसंपन्नं विशेषवत्तत्समानजातीयेभ्योऽसमानजातीयेभ्यश्च व्यावृत्तम्, यथा पृथिवी द्रव्यम्। अबादिभ्यश्च द्रव्यान्तरेभ्यो गुणकर्म्मभ्यश्च विजातीयेभ्यो गन्धवत्त्वेन व्यावृत्तं द्रव्यजातीयम्, एवं रूपत्वेन रूपं गुणः, उत्क्षेपणत्वेनोत्क्षेपणं कर्म, तथाविधः शब्दः सदादिरूपसम्पन्नो विभागजत्वेन समानासमानजातीयेभ्यो विशिष्यते, तस्माद्भवति द्रव्यं गुणः कर्म्म वेति संशय इति। पूर्वव्याख्यानतोऽनेकशब्देनासाधारणधर्मो लक्ष्यत इत्युक्तम्, संप्रति समानशब्दपर्य्यालोचनयाऽप्यनेकशब्दोऽसाधारणे वर्त्तते लक्षणयैवेत्याह—समानधर्मस्य संशयकारणत्वेनोपयोगाद्वेति। समानं हि प्रतियोगितयाऽसमानं बुद्धौ सन्निधापयति, तत्र द्वयस्यापि समानशब्देन श्रुत्यर्थाभ्यामुपात्तस्य समानधर्मस्यासमानस्य च समानस्य

वृत्तिः

रिति(२)। उपलब्धीत्यादिकं तादृशस्थले संशयो भवतीत्येतावन्मात्रपरम्। चकारो व्याप्यसंशयस्य व्यापकसंशयहेतुत्वं समुच्चिनोतीति वदन्ति।

---

(१) अस्मादुपलब्धभाष्येषु—"विभागजन्यत्वम्" इति पाठः। (२) "संशयोत्पत्तेरिति" ल०।

न्यायवार्त्तिकम्

कस्मात् पुनरेवमेव नोच्यते समानासमानधर्मोपपत्तेरिति ? नैवं शक्यमभिधातुम् अनेकस्माद् व्यावृत्तो यो धर्म इति अयं विग्रहो न लभ्यते, लाघवं वा प्रयोजनमेकाक्षरापचयात् लाघवं प्रयोजनमाश्रित्यैवमभिधानं वा। यद्यनेकधर्मार्थोऽसाधारणार्थः असाधारणश्च धर्मः संशयकारणमिति, नेदं निरात्मकं जीवच्छरीरम् अप्राणादिमत्त्वप्रसङ्गादित्ययमप्यसाधारणत्वात् संशयहेतुः(१) प्राप्तः। नैष दोषः, यथैव साधारणो धर्मः संशयहेतुरिति नान्वयिनः साधारणत्वे सति संशयहेतुत्वं भवति, अन्वयव्यभिचारात्। एवं व्यतिरेकिणोऽपि सत्यसाधारणत्वे(२) विपर्ययसम्बन्धस्याव्यभिचाराद्धेतुभाव इति। तस्मान्नैकवृत्तित्वमनेकवृत्तित्वं संशयकारणत्वे निर्णयहेतुत्वे वा हेतुः। किं तर्हि ? साधारणासाधारणत्वे सति व्यभिचाराव्यभिचारौ संशयनिर्णयहेतू। यो व्यभिचारी स संशयहेतुः, योऽव्यभिचारी स निर्णयहेतुरिति। यदि तर्ह्युभयोर्व्यभिचारित्वात् संशयहेतुत्वम्, ननु समानधर्मोपपत्तेरित्यनेनैव गतमेतत्, गतार्थत्वात् न संशयहेतुत्वेन पृथग् उपादेयमिति ? सत्यम्, न व्यभिचारितामन्तरेणान्यत् संशयकारणमपि तु व्यभिचारितायां सत्यां विधीयमानव्यभिचारः प्रतिषिध्यमानव्यभिचारश्चेति भेदः, समानधर्मोपपत्तेरित्यनेन विधीयमानव्यभिचार उपदिश्यते, विभागजत्वादित्यनेन प्रतिषिध्यमानव्यभिचार इति। एतावता पृथगभिधानम्।

नञः पर्युदासविषयत्वादव्यभिचारिधर्मद्वयोपनिपातोऽनेकधर्म इति केचित्—एके त्वनेकधर्म

न्यायवार्त्तिकतात्पर्य्यटीका

संशयकारणत्वेनोपयोगादिति योजना। पृच्छति—कस्मादिति। अस्मदायत्ते शब्दप्रयोगे किमित्यवाचकं प्रयोक्ष्यामह इति भावः। उत्तरम्—नैवमिति। असाधारणो हि धर्मो व्यतिरेकमुखेण संशयहेतुः, स चानेकस्माद् व्यावृत्त्या सिध्यति, सा च लाक्षणिकानेकपदाधीना नाऽसमानपदाल्लभ्यत इति प्रयोजनवल्लाक्षणिकपदोपादानम्। लक्षणैव चेयमनेकस्माद् व्यावृत्तोऽनेकधर्म इति विग्रहेण निर्वर्ण्यत इति। अभ्युच्चयमात्रमाह—लाघवं वेति। असाधारणस्य संशयकारणत्वे व्यावृत्तिः प्रयोजिकेति मन्वानश्चोदयति—यद्यनेकेति। परिहरति—नैष दोष इति। व्यभिचाराव्यभिचारौ हि संशयनिर्णययोः प्रयोजकौ, नान्वयव्यतिरेकमात्रमित्यर्थः। चोदयति—यदि तर्हीति। सपक्षासपक्षसाधारण्यं हि हेतोर्व्यभिचारः, स चेत्संशयस्य कारणम्, हन्त समानधर्मोपपत्तिरेव सर्वत्र संशयकारणमिति कृतमनेकग्रहणेनेत्यर्थः। परिहरति—सत्यमिति। सत्यं सपक्षासपक्षसाधारण्यं हि हेतोर्व्यभिचारः, स च संशयस्य प्रयोजकः तथाऽप्येकस्यान्वयः साधारणोऽपरस्य व्यतिरेक इत्येतावतोभयोपादानमित्यर्थः।

(१) "संशयहेतुः" इति ख०। (२) अतः परं "विपर्य्यय" इतारभ्य "साधारणासाधारणत्वे" इत्यन्तः पाठः ख-पु० नास्ति।

न्यायवार्त्तिकम्

इत्यन्यथा व्याचक्षते—एकस्मादन्योऽनेकधर्म इति। एवं च विरुद्धाव्यभिचारिधर्मद्वयोपनिपातो लभ्यते, यं प्रति तर्कमाहुः स च संशयहेतुः, यथा श्रावणत्वकृतकत्वे शब्दस्येति। तदयुक्तम्, असम्भवात्। न ह्यव्यभिचारिणौ विरुद्धावेकस्मिन्नर्थे धर्मौ सम्भवतः, वस्तुनो द्वैरूप्यासम्भवात्, यद्युभावव्यभिचारिणौ स्याताम् एकं वस्तु द्व्यात्मकं भवेत्। न चैतदस्ति तस्मान्नोभावव्यभिचारिणाविति। न चायं प्रयोगो युक्तः। कथमिति? यदि तावदेवं प्रयुङ्क्ते यथा प्राक्तनो (१) हेतुः तथाऽयमपीति। प्रसिद्धेन व्यपदेशा भवन्तीति सिद्धं पूर्वस्य हेतुत्वम्(२)। विरुद्धार्थप्रतिपत्तिबाधितत्वादुत्तरस्यानभिधानम्। अथैवं क्रियते यथेदं द्वितीयमनुमानं न भवति तथा प्राक्तनमपीति। एवमपि प्रतिपन्नद्वितीयानुमानस्यासाधकत्वम्। अथ विरुद्धधर्मावेकत्र सम्भवत इति सम्भवान्न विरुद्धौ। कश्च विरुद्धार्थः? किं सहासम्भवः, आहो विरुद्धार्थसाधकत्वम्, अथ स्वरूपमिति? यदि सहासम्भवः, स नास्ति, दर्शनात्। अथ विरुद्धार्थसाधकत्वं विरोधः, तदपि न युक्तम्, वस्तुनो द्व्यात्मकत्वासम्भवात्। यदि विरुद्धार्थसाधकत्वमनयोर्धर्मयोर्भवेत्, एकं वस्तु द्व्यात्मकमापद्येत। अथ स्वरूपमनयोर्विरुद्धमिति न किञ्चिद्बाधितं भवति, यस्मात् कृतकत्वं न श्रावणत्वं श्रावणत्वं वा न कृतकत्वं तस्मान्न संशय इति। उपेत्य वा विरोधं यदि विरुद्धाभ्यां कृतकत्वश्रावणत्वाभ्यां शब्दे संशयः क्रियते, स विशेषदर्शनादुपजातः कस्य दर्शनान्निवर्तते। न हि विशेषदर्शने सति विशेषाकाङ्क्षा भवति यथोपलब्धसामान्यस्य विशेषाकाङ्क्षा भवति। प्रत्यक्षतो निवर्तिष्यत इति चेत्, न, योऽनुमानाभ्यां सन्निपतिताभ्यामर्थे संशयः, स प्रत्यक्षान्निवर्तिष्यत इति, तन्न युक्तम्, प्रत्यक्षाविषयत्वात्, नायमर्थः प्रत्यक्षस्य विषय इति किं शब्दो नित्योऽनित्यो (३) वेति। आगमान्निवर्तिष्यत इति चेत्, न, आगमस्य च विचार्य-

न्यायवार्त्तिकतात्पर्य्यटीका

एवमनेकधर्मोपपत्तेरिति स्वमते व्याख्याय परमतव्याख्यानं दूषयितुमुपन्यस्यति—अन्य इति। नित्यः शब्दः श्रावणत्वात् शब्दत्ववदित्येकः पञ्चरूपोपपन्नोऽव्यभिचारी हेतुः, अनित्यः शब्दः कृतकत्वाद् घटवदित्यपरः पञ्चरूपोपपन्नोऽव्यभिचारी हेतुरिति। तद्दूषयति—तदयुक्तमिति। न ह्यव्यभिचारिणौ पञ्चरूपोपपन्नावित्यर्थः। न चायं प्रतिवादिनः प्रयोगोऽपि युक्तः, विरुद्धशब्दस्यार्थो विरुद्धार्थ इति, स्वरूपमनयोर्विरुद्धं परस्पराभाववदित्यर्थः। विशेषदर्शनादुपजात इति। संशयस्य हि विशेषादर्शनं जनकम्, विशेषदर्शनं च निवर्तकमिति, स चेत् त्वन्मते निवर्तकादुत्पद्येत, अव्यभिचारिहेतुजनिताद्विशेषदर्शनान्नास्य निवृत्तिः स्यादित्यर्थः। न च यदा निवर्तकमस्यास्ति तदा जनकमपीत्याह—न हि विशेषदर्शने सतीति।

स्यादेतत् प्रत्यक्षमेव स एवायं गकार इत्याकारं प्रत्यभिज्ञासमाज्ञातं शब्दस्य स्थेमानमाकलयत्,

(१) ख-पु०—"प्रयुक्तनो" इत्येवं पाठः। (२) "सर्व्वस्याहेतुत्वम्" इति ख०। (३) "शब्दोऽनित्यो" इति ख०।

न्यायवार्त्तिकम्

माणत्वात्, आगम एवायं विचार्यते किं शब्दो नित्योऽथानित्य इति। न चायं प्रत्यक्षविषयो नागमविषयः अनुमानोपमानाभ्यां(१) च नायं परिच्छेत्तुं शक्यते सोऽयमनिवर्त्यः संशयः प्राप्तः। भवतु किं नो बाध्यते ? कथं न बाध्यते, यदा वस्त्वन्तरपरिच्छेदकमनुमानं न भवति, यथाऽनित्या बुद्धिः कृतकत्वादिति, इदं खलु कृतकत्वं शब्दे दृष्टम्, स चानवधारितस्वभावो नित्योऽनित्य इति। तत्र चोपलभ्यमानं कृतकत्वमन्यत्र बुद्ध्यादौ संशयहेतुरिति सर्वमनुमानमनित्यत्वसाधकं न स्यात्। सर्वं चानुमानमयं न्यायो बाधत इति। यश्च न्यायोऽनुमानमूलमुच्छिनत्ति

न्यायवार्त्तिकतात्पर्य्यटीका

तावत्कालं स्थिरं चैनं कः पश्चान्नाशयिष्यतीति नित्यत्वं परिच्छेत्स्यतीत्यत आह—**नायमर्थः प्रत्यक्षस्य विषयः**। तदेव हि प्रत्यक्षं संशयस्य निवर्तकं यदनन्यथासिद्धम्, यथौष्ण्यग्राहि वह्नेः। इदं तु सादृश्येनापि संभवात्स्वयं सन्दिग्धं सन्न संशयोच्छेदायालमित्यर्थः। मा भूत्प्रत्यक्षस्य विषयः, भवति त्वागमस्य, नो खलु क्षणिकः शब्दोऽर्थप्रत्यायने समर्थः, तस्यान्वयव्यतिरेककालानवस्थायिनोऽशक्यसमयत्वेनार्थप्रतिपत्तेरनुपपत्तेः। तस्माद् यद्यपि साक्षान्नित्योऽयमित्यागमो नाभिधत्ते, तथाऽपि विदितसंगतेरर्थप्रत्ययं कुर्वन्नात्मनो नित्यतामाक्षिपन्नित्यताविषयो भवति, यथाऽऽहुः—"नित्यस्तु स्याद्दर्शनस्य परार्थत्वात्" इत्यत आह—**नागमविषयः**। यद्यपि वर्णव्यक्तयः क्षणिकाः, तथाऽपि स्वस्वसामान्यविशेष'गत्वा'द्युपहिता गवादिव्यक्तय इव गोत्वाद्युपधानाः शक्यसंकेता इति न नित्यतामाक्षिपत्यागम इत्यर्थः। **भवतु किं नो बाध्यत इति**। न खलु चन्द्रमसः परभागे हरिणसदसद्भावसन्देहः शक्यः कदाचिदप्युच्छेत्तुमस्मदादीनामित्यर्थः। **कथं न बाध्यत इति**। सन्दिग्धनित्यानित्यभावे शब्दे कृतकत्वं दृष्टमिति नानित्यत्वेन स्वभावतः प्रतिबद्धम्, तथा च न बुद्ध्यादीनामनित्यत्वं साधयितुमर्हतीत्यर्थः। **सर्वमिति**। कृतकत्वं प्रयत्नानन्तरीयकत्वप्रत्ययभेदभेदित्वादित्यर्थः (२)। **सर्वं चानुमानमिति**। यदि च पञ्चरूपो-

वृत्तिः

विशेषापेक्षः—कोटिस्मरणसापेक्षः। वस्तुतस्तु संशयस्य धारावाहिकत्वं स्यादत आह—**विशेषेति**, **विशेषं** विशेषदर्शनम्, **अपेक्षते** निवर्त्तकत्वेन। तथाच, विशेषदर्शननिवर्त्यत्वकथनमुखेन विशेषादर्शनजन्यः संशय इत्युक्तम् ॥ २३ ॥

---

(१) "अनुमानाभ्याम्" इति ख०। (२) "कृतकत्व-प्रयत्नानन्तरीयकत्व-प्रत्ययभेदभेदित्वादीत्यर्थः" इत्येवात्र पाठो भवितुमुचितः, तथाहि "सर्व्वमिति" इत्यनेनोपात्ते वार्त्तिकपाठे यः "सर्व्व"शब्दः तदर्थविवरणायैव कृतकत्वादित्रयस्य प्रदर्शनसम्भवाद् ग्रन्थसङ्गतिः। आदर्शानुरूपतया उपरि गृहीतस्तु पाठश्चिन्त्यः।

न्यायवार्त्तिकम्

नासौ न्यायविदा युक्तोऽभिधातुम् (१)। नित्यासम्भवात् नायमस्मान्न्यायो बाधते, यस्य नित्यं किञ्चिदस्ति तस्य विरुद्धाव्यभिचारी भवति। अस्माकं तु पक्षे नित्यं किञ्चिन्नास्तीति। न, बाधापरिज्ञानात्, न भवता बाधविषयोऽवलोकितः, किन्तु नित्यमस्माकं नास्तीति एतावन्मात्रमवलोक्य परपक्षे दोषोऽभिधीयते इति भवतामपि पक्षे विरुद्धाव्यभिचारी कृतावकाशः, कथम्? सप्रतिघं विज्ञानं सत्त्वाद्रूपवदित्येकः, अप्रतिघं विज्ञानं नीरूपत्वा(२)द्वेदनावदित्यपरः। तदेवमव्यभिचारिधर्मद्वयोपनिपातान्न सप्रतिघं नाप्रतिघं सिद्ध्येत्, तस्मादप्यन्यायोऽयं विरुद्धयोश्च धर्मयोः सन्निपाताच्छब्दे संशय इति। धर्मयोः सातत्यादभिलापानुपपत्तिः नायमतद्धर्मा कदाचिदपि शब्द उपलभ्यते सततं तु तद्धर्मैव भवति श्रावणः कृतकश्चेति अभिलापो न स्यात् नित्योऽनित्यो वेति। न हि कदाचिदयं द्रष्टा एकस्मिन् वस्तुनि स्थाणुपुरुषधर्मावुपलभमानः शङ्कुयाद्वक्तुं स्थाणुर्वा पुरुषो वेति। नैवं भविष्यतीति। व्याहतमुच्यते। ननु च भवताऽभिधीयते नित्य इति, मयाप्यभिधीयते अनित्य इति, कथं नाभिलप्यते, सोऽयं विरुद्धाव्यभिचारी न्यायो विचार्यमाणः सर्वथाऽनुमानं बाधत इति अलमनेन। अथ कृतकत्वश्रावणत्वे सहिते (३) हेतू भवत इति? तथापि कृतकत्वश्रावणत्वे सहिते न विभागजत्वादन्यत्रासम्भवाच्च संशयहेतू भवतः, सोऽयमस्माद्भिद्यते यथैव विभागजत्वसन्यावृत्तित्वादसाधारणं शब्दे संशयं करोति तथा कृतकत्वश्रावणत्वे अपि शब्दवृत्तित्वादन्यत्रासम्भवाच्च संशयहेतू भवतः सोऽयमसाधारण एव न धर्मान्तरमतः तद्ग्रहणेनैवायं सङ्गृहीत इति तस्मादेकस्मादन्यो धर्मो-

न्यायवार्त्तिकतात्पर्यटीका

ऽपि हेतुः, संशयकारणं सर्वमनुमानमेवमिति सर्वमप्रमाणं स्यादित्यर्थः। वैनाशिकाः प्राहुर्नित्यासंभवादिति। न, बाधापरिज्ञानादिति, बाधविषयापरिज्ञानादित्यर्थः। स्वदेशे परोत्पत्तिप्रतिबन्धकत्वं सप्रतिघत्वम्, सौत्रान्तिकमते हि रूपं सप्रतिघमिष्यते मूर्त्तं च, नित्य एवेति अनित्य एवेति वाऽभिलापो नोपपद्येत, स्थाणुरेवेति वा पुरुष एवेति वाऽभिलापः। चोदयति—नैवं भविष्यतीति, मा भूदभिलाप इत्यर्थः। परिहरति—व्याहतमिति। स एवैकग्रन्थेनाह—ननु चेति। तदेवं पञ्चरूपोपपन्नयोर्हेत्वोरेकत्र समावेशाभावः उक्तः। यदि पुनरसत्प्रतिपक्षत्वरूपरहितयोरेकत्र संभवोऽङ्गीक्रियते, तथा च संशयहेतुत्वमित्यभिप्रायेण शङ्कते—अथ कृतकत्वेति। निराकरोति—तथाऽपीति। प्रत्येकं सत्प्रतिपक्षत्वम्, मिलितयोस्त्वसाधारणत्वम्, तादृशोऽन्यत्रादर्शनादित्यर्थः। तत्किमिदानीं सत्प्रतिपक्षतया कृतकत्वमसाधनमेव

---

(१) "नासौ न्यायविदा युक्तोऽभिधातुम्" इत्यत्र "नायं न्यायो बाधितुं युक्त" इति ख०। (२) "स्वरूपत्वा-" इति ख०। (३) अत्र "सम्भूय" इति क-पुस्तके अधिकः पाठः।

न्यायभाष्यम्

त्वात्। किं द्रव्यस्य सतो गुणकर्मभ्यो विशेषः, आहोस्विद्गुणस्य सत इति, अथ कर्मणः सत इति ? विशेषापेक्षा—अन्यतमस्य व्यवस्थापकं धर्मं नोपलभ इति बुद्धिरिति।

विप्रतिपत्तेरिति। व्याहतमेकार्थदर्शनं विप्रतिपत्तिः, व्याघातः—विरोधोऽसहभाव इति। अस्त्यात्मेत्येकं दर्शनम्, नास्त्यात्मेत्यपरम्, न च सद्भावासद्भावौ सहैकत्र सम्भवतः, न चान्यतरसाधको हेतुरुपलभ्यते, तत्र तत्त्वानवधारणं संशय इति।

उपलब्ध्यव्यवस्थातः खल्वपि सच्चोदक(१)मुपलभ्यते तडागादिषु, मरीचिषु चाऽविद्यमानमुदकमिति, अतः क्वचिदुपलभ्यमाने तत्त्वव्यवस्थापकस्य प्रमाणस्यानुपलब्धेः किं सदुपलभ्यतेऽथासदिति संशयो भवति।

अनुपलब्ध्यव्यवस्थातः। सच्च नोपलभ्यते मूलकीलकोदकादि, असच्चानुत्पन्नं

न्यायवार्त्तिकम्

ऽनेकधर्म इति न (२) वक्तव्यमिति। यदा पुनरेवम्भूतौ धर्मावेकस्य वस्तुनो भवतः तदोपलब्ध्रा तस्य वस्तुनः किं प्रतिपत्तव्यमिति ? तदा तयोरेव धर्मयोः सामर्थ्याधिगतौ यत्नः कर्तव्यः, नोभावेतौ साधने, कतरोऽत्र साधनं कतरश्च न साधनमिति सामर्थ्याधिगमे यत्नः करणीय इति। यत्नश्च क्रियमाणोऽनित्यत्वसाधनेष्वेवावतिष्ठत इति। कुतः ? नित्यत्वस्य प्रमाणबाधितत्वात्। तच्चोपरिष्टाद्वक्ष्यामः (३)। तदेवं व्यवस्थितमेतत् अनेकधर्मोपपत्तेरसाधारणात् धर्मात् संशय इति।

विप्रतिपत्तेः संशय इति व्याहतार्थप्रवादो विप्रतिपत्तिशब्दस्यार्थो व्याहतार्थप्रवादविषयत्व-

न्यायवार्त्तिकतात्पर्यटीका

शब्दानित्यत्वे, यथा च बहु व्याहतं स्यादित्याशयवान् पृच्छति—यदा पुनरेवंभूताविति। उत्तरम्—तदा तयोरिति। ननु कृतकत्वस्य साध्यत्वात् श्रावणत्वस्य च सिद्धत्वात् प्रथमभाविना नित्यानुमानेन सिद्धाङ्गकेनापहतविषयं चरमभाविसाध्याङ्गकमनित्यानुमानमेव बाध्यतामित्यत आह—यत्नश्च क्रियमाण इति। सिद्धमपि श्रावणत्वमनुनासिकत्वाद्यनित्यधर्मसाधारणतया सव्यभिचारं सन्नित्यत्वस्य साधनं न भवितुमर्हतीति। कृतकत्वस्य तु पाञ्चरूप्यम् (४), नित्यत्वस्य च प्रमाणबाधनमुपपादयिष्यत इत्यर्थः (५)।

विप्रतिपत्तेरित्यस्य व्याख्यानम्—विप्रतिपत्तेरिति। यद्यपि विरुद्धा प्रतिपत्तिर्ज्ञानं विप्रतिपत्तिः तथाऽपि तस्या वादिप्रतिवादिगताया अत्यन्तपरोक्षत्वात् संशयकारणत्वानुपपत्तेः स्वकार्यं प्रवादं

---

(१) "सच्चोदक-" इति वि-टि०। (२) "न" इति ख-पु नास्ति। (३) २।२।२२ सूत्रवार्त्तिके—"अनित्यः शब्दो गुणत्वे सति" इत्यादिना। (४) पक्षसत्त्वादिपञ्चरूपोपपन्नत्वमव्याहतमिति शेषः। (५) वार्त्तिककृता २।२।२२ सूत्रव्याख्याने।

न्यायभाष्यम्

निरुद्धं वा, ततः क्वचिदनुपलभ्यमाने संशयः, किं सन्नोपलभ्यते उताऽसदिति(१) संशयो भवति। विशेषापेक्षा पूर्ववत्।

पूर्वः समानोऽनेकश्च धर्मो ज्ञेयस्थः, उपलब्ध्यनुपलब्धी पुनर्ज्ञातृस्थे(२), एतावता

न्यायवार्त्तिकम्

मुपलभमानस्योपलब्ध्यनुपलब्ध्योश्चाव्यवस्थाने सति तद्गतविशेषानुस्मृतौ च सत्यां संशयो भवतीति। तत्र समानोऽनेकश्च धर्मो ज्ञेयस्थः, उपलब्ध्यनुपलब्धी पुनर्ज्ञातृस्थे इति भाष्यम्। तत्रोपलब्ध्यनुपलब्धोस्तावत् पृथक् संशयकारणत्वं न भवतीति चर्चितमेतत्। समानोऽनेकश्च धर्मो ज्ञेयस्थ इत्येतदपि न बुद्ध्यामहे। किमत्र धर्मः संशयकारणमथ ज्ञानमिति? न धर्मः संशयकारणमित्यनेकधा समर्थितम्। समानानेकधर्मज्ञानं तु संशयकारणं तच्च ज्ञातरि वर्तत इति नास्ति भेदः। समानानेकधर्मयोस्तु पृथगभिधाने उक्तं प्रयोजनम्, विधीयमानप्रतिषिध्यमानधर्मभेदादिति। विप्रतिपत्तेरित्ययं वक्तृगतः संशयहेतुः। केऽत्र सम्यक्प्रतिपन्नाः के मिथ्येति श्रोतुः सन्देहो भवति एतावता भेदेन पृथगभिधानम्। समानधर्मः सर्व एवायमिति चेत् समानधर्मोपपत्तेरनेकधर्मोपपत्तेर्विप्रतिपत्तेश्चेति(३) सर्व एवायं समानधर्म एवाऽभिधीयते, तस्माद्वैयर्थ्यात्

न्यायवार्त्तिकतात्पर्य्यटीका

लक्षयतीत्यर्थः, अत्र भाष्यकार उपलब्ध्यव्यवस्थाया अनुपलब्ध्यव्यवस्थायाश्च पृथक् संशयकारणत्वं मत्वा समानधर्मोपपत्तेरित्यनेन गतार्थतां परिहरन्नाह स्म—पूर्वः समानोऽनेकश्चेत्यादि। तदुपन्यस्य वार्त्तिककारो दूषयति—तत्रेति। नो खलु समानानेकधर्मोपलब्धौ सत्याम्, सत्यां च विशेषस्मृतौ, साधकबाधकप्रमाणासद्भावे संशयो भवतीत्युक्तम्, तस्मान्नोपलब्ध्यनुपलब्ध्यव्यवस्थे पृथक् संशयकारणे इति। विशेषमपि दूषयति—समान इति। ननु यदि नास्ति भेदः, तत्किमिदानीं सर्वेषां ज्ञातृस्थत्वाविशेषेण त्रयाणामपि संशयकारणानां समानानेकविप्रतिपत्तीनामभेदः, तथा च पृथगुपादानवैयर्थ्यमित्यत आह—समानानेकधर्मयोरिति। पुनश्चोदयति—समानधर्मः सर्व एवायमिति। अयमभिसन्धिः असाधारणो ह्यदृष्टपूर्वः क्वचिदपि न संशयं कर्त्तुमुत्सहते, यत् पुनरसाधारणवत्त्वं संशयहेतुत्वेनोपवर्णितं भाष्यकृता तत् समानमेव, न त्वसाधारणम्, यथाऽऽहुः—

अन्योऽसाधारणो धर्मस्तद्वत्ताऽन्या च दृश्यते।
सर्वसाधारणी सा चेदिष्टा संशयकारणम्।
ततः साधारणस्यैव सिद्धा संशयहेतुता॥

---

(१) "उतासन्निति" फ-ग०। (२) "ज्ञातृगते" इति फ-ग०। (३) "समानधर्मोपपत्तेर्विशेषापेक्षो विमर्शश्च प्रतिपत्तेश्चेति" इति ख०।

न्यायवार्त्तिकम्

पृथगनेकधर्मोपपत्तेर्विप्रतिपत्तेश्च इति न प्रयोजनमस्ति। अत एवं कर्तव्यम्—समानधर्मोपपत्ते-र्विशेषापेक्षो विमर्शः संशय इति, न, सूत्रार्थापरिज्ञानात्, सूत्रार्थमपरिज्ञायैवैतच्चोद्यते। यथा च भेदः समानानेकधर्मोपपत्तेर्विप्रतिपत्तेश्चेति तथा वर्णितम्।

अपरे पुनः समानधर्मोपपत्त्यादिभिः पदैः पृथक् पञ्चविधं संशयं वर्णयन्ति—समानधर्मोपपत्ते-र्विशेषापेक्षो विमर्शः संशय इति, एवं शेषेषु पदेषु। तन्न युक्तम्, उपलब्ध्यनुपलब्ध्यव्यवस्थायाः पूर्वपदविशेषणत्वात्, समानधर्मोपपत्तौ सत्यामुपलब्ध्यनुपलब्ध्यव्यवस्थायां च सत्यां विशेषापेक्षो विमर्शः संशय इति सूत्रार्थः। एवमनेकधर्मोपपत्तेर्विप्रतिपत्तेश्चेति वाच्यम्। तस्मान्नोपलब्ध्यनुप-लब्ध्यव्यवस्था पृथक् संशयकारणमिति। उपलब्ध्यनुपलब्ध्योर्द्वैविध्यात्(१) संशयो न युक्तः, कुतः? लोकविरोधात्—उपलब्ध्यो(२)र्द्वैविध्यात् संशयो भवतीति ब्रुवाणो लोकं बाधते। कथमिति? यत्किञ्चिदर्थमुपलभते सर्वत्रास्य संशयेन(३) भवितव्यम्। किं कारणम्? उपलभ्यमानं द्वेधा भवति। उपलब्ध्योर्द्वैविध्यात्तु यः संशयो भवति तस्य कुतो निवृत्तिः? विशेषदर्शनान्निवर्त्तते इति चेत् विशेषेष्वप्येवम्—य एते विशेषा उपलभ्यन्ते किमेते सन्त आहोऽसन्त इति यावद् याव-

न्यायवार्त्तिकतात्पर्यटीका

यच्च वार्त्तिककारेण सर्वव्यावृत्त्याऽसाधारणस्य संशयकारणत्वमुक्तम्, तत्रापि तदभावस्य साधारणस्य संशयहेतुत्वम्, किमायातमसाधारणस्य? यथाऽऽहुः—

सर्वतोऽस्य निवृत्तत्वादभावात् संशयो यदि।
अनन्यवृत्तिरूपस्य ततोऽसाधारणस्य किम्॥ इति।

विप्रतिपत्तिरपि विरुद्धहेतुद्वयसमुत्था एकस्मिन् संशयकारणम्, विरुद्धहेतुद्वयसमावेशश्चासाधारण एव, स च साधारणे निविशत इति सूक्तम् सर्वं एवायं समानधर्म एवाभिधीयत इति। परिहरति—न सूत्रार्थापरिज्ञानादिति। न वयं सर्वत्र साधारणमपजानीमहे अन्वयव्यतिरेक-व्यभिचारवक्तृगतत्वभेदमात्रमाद्रियमाणाः कारणभेदेन त्रिविधं संशयमाचक्ष्महे इत्यर्थः।

वार्त्तिककारो भाष्यकारमतमुपन्यस्य दूषयति—अपरे पुनरिति। साधकबाधकप्रमाणाभाव-रहितं त्रयमपि न संशयकारणमुक्तमित्यर्थः। अपि चैतयोः पृथक् संशयकारणत्वेऽतिप्रसङ्गान्निश्चय-पूर्वं न प्रवर्त्तेत लोकः, तथा च लोकविरोध इति दर्शयति—उपलब्ध्यनुपलब्ध्योर्द्वैविध्याच्चेति। न चास्य क्वचिदाश्वासो निःशङ्कता, न चानभ्यासदशापन्ने उपलब्ध्यनुपलब्ध्यव्यवस्थायाः संशय इति वाच्यम्, अनभ्यासदशापन्ने हि दूराद् वह्निज्ञाने उपलब्ध्यव्यवस्थाया अपि न नागो नगो वेति संशयः,

(१) अत्र—"च" इति तात्पर्यटीकायामधिकं दृश्यते। (२) "उपलब्ध्यनुपलब्ध्योः" इति ख०। (३) "संशयो न" इति ख०।

न्यायवार्त्तिकम्

दुपलभ्यते सर्वत्रोपलब्धिद्वैविध्यात् संशय इत्यनिवर्त्यः संशयः। एवमनुपलब्धिद्वैविध्येऽपि वक्तव्यम्। न चास्य क्वचित् समाश्वासः स्यात्। यदाऽयमपवरकादौ सर्पादीनुपलभते तदा सर्पवत् तद्वेश्म उतासर्पवदिति संशयः, अयमपि संशयोऽनिवर्त्त्य एवेति सर्वत्राश्वासो न स्यात्। येषां च पञ्चविधः संशय इति सूत्रार्थः तैरप्यस्य कारणकृतो भेदो वक्तव्यः स्वभावकृतो वा। तद्यदि कारणकृतः? न पञ्चविधः, अनेकरूपः संशय इति प्राप्तम्। अथ स्वभावभेदात्? न,(१) स्वभावभेदस्यासम्भवादेकरूपः संशयः, संशीतिः संशय इति। तस्मात् पञ्चविधः संशय इति न सूत्रार्थः।

समानधर्मग्रहणान्न संशयो धर्मिविषयत्वात्—यदिदमुच्यते समानधर्मोपपत्तेः संशय इति, तदयुक्तम्, धर्मिविषयत्वात्। न हि समाने धर्मे उपलब्धे धर्मिणि संशयो (न) (२) युक्तः, धर्मधर्मिणोर्भेदात्। न हि गवि दृष्टे अश्वे संशयः (धर्मिणश्चादृष्टत्वात् नानुपलब्धे न निर्णीतेऽर्थे संशयो भवतीति च व्याघातः। धर्मधर्मिभावात् संशय इत्येके तावत् परिहारं ब्रुवते—धर्मे दृष्टे धर्मिणि संशयः धर्मधर्मिभावात्(३)। न पुनर्गवि दृष्टे अश्वे संशयो भवति) (४)धर्मधर्मिभावानुपपत्तेः, न, नानात्वानिवृत्तेः, न हि धर्मधर्मिभावेन नानात्वं निवर्तते। अथ धर्मधर्मिभावो नियामकः? इच्छादिसूत्रं तर्हि व्याहन्यते। कथमिति? इच्छादयः प्रतिसन्धानादात्मानं गमयन्तीति सूत्रार्थः। अत्र परः प्रत्यवस्थितः कार्यकारणभावात् प्रतिसन्धानमिति नानात्वस्याबाधनादित्यनेन निवर्तेत। इह पुनर्भवता धर्मधर्मिभावादिति पुनर्ब्रुवता नानात्वमेव धर्मधर्मिभावनियामकमुच्यत इति शक्नुयात् परोऽपि वक्तुं कार्यकारणभावो नियामक इति। तस्मादपव्याख्यानमेतत् धर्मधर्मिभावात् संशय इति। अथ समानधर्मोपलब्धेरन्यस्मिन्ननुपलब्धे(५) धर्मिणि संशयो भवतीति कः परिहारः?। अयं परिहारः, बहुव्रीहिः समासोऽतो धर्मिणोऽभिधानम्—समानधर्मोपपत्तेरित्यनेन पदेन बहुव्रीहिसमासे धर्म्येव व्यपदिश्यते। कथम्?

न्यायवार्त्तिकतात्पर्य्यटीका

किन्तु किंशुककुसुमनिचयो वा उषर्बुधो वेति, अत्र समानधर्मोपपत्तिरेव कारणमितरसहिता। एवमयोग्यानुपलब्धिमात्रादपि न संशयो विना समानधर्मादिदर्शनमित्युक्तम्। विकल्प्य दूषणान्तरमाह—येषां चेति। सामग्रीभेदेन भेदे त्रैविध्यं संशयस्य सामग्रीनिवेशिकारणभेदेन तु न पञ्चविधः, अपि त्वनेकविध इत्यर्थः।

समानानेकधर्मोपपत्तेरित्यत्र षष्ठीतत्पुरुषं मत्वाऽऽक्षिपति—समानधर्मग्रहणादिति।

---

(१) "न' इति ख-पु० नास्ति। (२) अत्र "न"कारो निरर्थक इति बन्धनीमध्ये स्थापितः। (३) "धर्मधर्मिभावानुपपत्तेः" इति ख०। (४) बन्धनीमध्यस्थः पाठः प्रमादादापतित इति प्रतिभाति। (५) "अनुपलब्धे" इत्यत्र "उपलब्धे" इति ख०।

न्यायवार्त्तिकम्

समानो धर्मो यस्य स भवति समानधर्मा, समानधर्मण उपपत्तिः समानधर्मोपपत्तिः। किमुक्तं भवति? समानधर्मवतो धर्मिणो दर्शनादिति।

विशेषापेक्षो विमर्शः संशय इति विशेषापेक्षो विशेषस्मृत्यपेक्ष इति। अथ सा विशेषस्मृतिः किंविशेषविषया? किं संशयविषयविशेषविषया (१)उतान्यविषयेति? योऽसौ संशयस्य विषयः तं समानधर्माणमुपलभते तस्यायं विशेषाननुस्मरति उतान्यस्येति। यदि तावत् तस्य? तन्न युक्तम्, तद्विशेषाणां क्वचिदननुभूतत्वात्। योऽर्थः पूर्वमुपलब्धविशेषः तद्गतान् विशेषाननुस्मरतीति युक्तम्, तद्विशेषाणामनुभूतत्वात्, यदा पुनरयमनुपलब्धपूर्वविशेषः सामान्यत उपलभ्यमानः सन्दिह्यते तत्र विशेषानुस्मृतिः, कथम्? तद्विशेषाणामननुभूतत्वादिति, न, सामान्यवचनत्वात्। विशेषापेक्ष इति सामान्यवचनं पुनरनेनावधार्यते तस्य वाऽन्यस्य वेति। यदा तद्गता विशेषाः सुस्मूर्षिता भवन्ति तदाऽनुभूतेषु विशेषविषया स्मृतिः, यदा त्वनुपलब्धपूर्वेऽर्थे संशयः तदा सादृश्यादन्यगतान् विशेषान् सुस्मूर्षत इति। एवं तावद्व्यवस्थितं त्रिविधः संशय इति।

अनेन च संशयलक्षणेन यान्यविरुद्धानि संशयलक्षणानि तान्यपि संगृहीतानि। यथा काश्यपीयम्(२) "सामान्यप्रत्यक्षात् विशेषाप्रत्यक्षात् विशेषस्मृतेश्च संशय" इति। अस्यार्थः सामान्यप्रत्यक्षादिति सामान्यवतः प्रत्यक्षाद्धर्मिण इति, न पुनरयं पदार्थः सामान्यस्य(३) प्रत्यक्षादिति। विशेषाप्रत्यक्षत्वमव्यवस्थितविशेषत्वं नास्मिन् विशेषा व्यवस्थिता इति, विशेषस्मृतेश्च संशय इति समानम्। कथं पुनरनेन सूत्रेणासाधारणोऽपि लभ्यत इति? लभ्यते, व्यभिचरितत्वात्, व्यभिचारि साधारणम्, तच्चासाधारणेऽपि व्यभिचारित्वमस्तीति लभ्यते। अनेकधर्मोपपत्तिस्तर्हि पृथङ् न पठितव्या, अन्वयव्यतिरेकभेदविवक्षायां पृथगभिधानं पुनः संशयकारणभेदविवक्षयेति। ये त्वत्र विशेषाप्रत्यक्षाद्विशेषस्मृतेश्चेति(४)पदयोः पौनरुक्त्यं वर्णयन्ति—

न्यायवार्त्तिकतात्पर्य्यटीका

बहुव्रीहिं मत्वा समाधत्ते—अयं परिहार इति। अथेति। कश्चासौ विशेषश्चेति किंविशेषः अनुपलब्धपूर्वो विशेषोऽस्य इत्यर्थः। उपलब्धपूर्वायां व्यक्तौ संशये तद्गता विशेषाः सुस्मूर्षिताः तज्जातीयव्यक्त्यन्तरसंशये त्वन्यगतास्ते सामान्यद्वारेणोपलब्धा एवेति—सामान्यप्रत्यक्षादिति। सामान्यवानेव सामान्यः यथा "सामान्योऽयं धर्मसेतुर्नृपाणामि"ति। सामान्यश्चासौ प्रत्यक्षश्चेति धर्मी तथोक्तः, अव्यवस्थितविशेषत्वं साधकबाधकप्रमाणाभाव इत्यर्थः।

---

(१) "किं संशयविषयविशेषविषया" इति ख-पु० नास्ति। (२) कणादकृतं २।२।१७ सूत्रम्। (३) "सामान्यवतः" इत्यनन्तरम्—"प्रत्यक्षा"दित्यारभ्य 'सामान्यस्य' इत्यन्तः पाठः ख पु० नास्ति। (४) "विशेषास्मृते"रिति ख०।

न्यायवार्त्तिकम्

सामान्यप्रत्यक्षाद्विशेषस्मृतेश्च संशय इत्यभिधीयमाने किल गम्यत एतद्विशेषाप्रत्यक्षादिति, न हि कश्चिद्विशेषान् प्रत्यक्षान् स्मरति। तन्न, सूत्रार्थापरिज्ञानात्। नायं सूत्रार्थः विशेषाणामप्रत्यक्षत्वमिति। अपि त्वव्यवस्थितविशेषवत्त्वम्, नास्मिन् विशेषा व्यवस्थिता (१)इत्यतो नायं दोष इति।

अन्ये तु संशयलक्षणमन्यथा व्याचक्षते—साधर्म्यदर्शनाद्विशेषोपलिप्सोर्विमर्शः संशय इति। तैरपि साधर्म्यस्यावधारितत्वात् संशयस्य विषयो वक्तव्यः। धर्मीति चेत्(२), ननूक्तः संशयस्य विषयो धर्मी ?। सत्यमुक्तो न पुनर्युक्तः। कथं न युक्तः ? यदि तावद्धर्मव्यतिरिक्तं धर्मिणमभ्युपैति, व्याहतं भवति। धर्मधर्मिणोश्च नानात्वाभ्युपगमे धर्मस्यावधृतत्वात् धर्मिणश्चादृष्टत्वात् न संशयः, न ह्यन्यस्मिन् दृष्टेऽन्यत्र संशयो भवति। अथाप्यस्मद्दिशा साधर्म्याभिधानेन धर्म्येवोच्येत ? तन्न युक्तम्, सधर्मणो भावः साधर्म्यम्, साधर्म्यमिति च भावाभिधानेन धर्मोऽभिधीयते, न धर्मी, न च युक्तोऽन्यस्य दर्शनादन्यत्र संशय इति। अथार्थान्तरभावं नाभ्युपैति ? तथापि साधर्म्यस्यावधृतत्वात् क्व संशय इति। यदि चायं धर्मिणं नोपलभते, कस्यायं विशेषमुपलिप्सेत ? न हि साधर्म्यस्य विशेषाः सम्भवन्तीति। अथ सामान्यवतो विशेषा इति ? तन्न, तस्यादृष्टत्वादित्युक्तम्। न सामान्यस्य विशेषाः सन्तीति सामान्यवतो विशेषा भवन्तीत्येवं ब्रुवता सामान्यविशेषतद्वतां भेदोऽनुज्ञातो भवति व्यर्थञ्चाभिधानं न सामान्यस्य विशेषास्तद्वतो विशेषा इति। उपलब्ध्यनुपलब्धिव्यवस्थाने च साधर्म्यदर्शने सत्यपि

न्यायवार्त्तिकतात्पर्य्यटीका

बौद्धाभिमतं संशयलक्षणमुपन्यस्यति—अन्ये त्विति। गूढाभिप्रायो दूषयति—तैरपीति। अविदिताभिप्रायः शङ्कते—धर्मी चेदिति। दूषणवादी स्वाभिप्रायमुद्घाटयति—यदि तावदिति। बौद्धानां हि राद्धान्ते न रूपादिधर्माश्रयः कश्चिदस्ति धर्मी, ततश्च सिद्धान्तव्याकोपः। यदि त्वाह भवतु राद्धान्तव्याकोपो न हि शास्त्राश्रयो वाद इति, तत्रापि दोषान्तरमाह—धर्मधर्मिणोश्चेति। अथाप्यस्मद्दिशेति। समानानेकधर्मपदवद्बहुव्रीहिरित्यर्थः। सामान्यशब्दो हि भवितरि दृष्टो यथा "सामान्यार्थसमुत्थाने विभागस्तु समः स्मृतः" इति भावः। व्यर्थं चाभिधानमिति। सामान्यविशेषतद्वदभ्युपगमेऽपि तद्वतोऽश्रवणात् साधर्म्यस्य सामान्यस्य विशेषा इति गम्येत, न च सामान्यस्य विशेषा इति विरुद्धार्थमभिधानं स्यादित्यर्थः। वैशेषिकलक्षणे हि विशेषाप्रत्यक्षादित्यनेन साधकबाधकप्रमाणाभावो दर्शितः, इह त्वसौ वक्तव्यः, तस्मान्न्यूनं बौद्धलक्षणमित्याह—उपलब्धीत्यादि। यदि च साधर्म्य-

(१) "विशेषा व्यवस्थिता" इत्यत्र "विशेषाप्रत्यक्षत्वम्" इति ख०। (२) "धर्मी चेत्" इति तात्पर्य्य।

न्यायभाष्यम्

विशेषेण पुनर्वचनम्। समानधर्माधिगमात्समानधर्मोपपत्तेर्विशेषस्मृत्यपेक्षो विमर्श इति ॥ २३ ॥

न्यायवार्त्तिकम्

विशेषोपलिप्सायां च न संशयो भवतीति उपलब्ध्यनुपलब्ध्यव्यवस्थात इति वक्तव्यम् अनेकधर्मदर्शनादिति च।

समानानेकधर्मोपपत्तेरित्येवमादिवाक्यं संशयलक्षणम्, तद्विचार्यते—किन्तावदयं कारणोपदेश आहो संशयस्वरूपावधारणमिति ? यदि कारणनिर्देशः ? अत्यल्पमिदमुच्यते समानानेकधर्मादिभ्य इति, अन्यान्यपि संशयकारणानि, तान्युपसंख्येयानि। यथाऽऽत्ममनःसंयोग आन्तरस्य, आत्ममनःसन्निकर्षः इन्द्रियार्थसन्निकर्षो बाह्यस्येति। अथ स्वरूपावधारणम् ? कारणनिर्देशोऽनर्थकः, संशीतिः संशय इति वक्तव्यम्। अस्तु तावत् कारणावधारणम्। ननूक्तं कारणान्तरमप्युपसंख्येयमिति ? न, नेदं कारणावधारणार्थम्, अपि त्वसाधारणकारणनिर्देशोऽयम्। तस्मादिन्द्रियार्थसन्निकर्षादीनामप्रसङ्गः। कुतः(१) ? प्रत्यक्षसाधारणत्वात्। स्वरूपनिर्देशो वा भवतु—इदमेवास्य स्वरूपं समानधर्मादिभ्यो जन्मेति। सोऽयमेवम्भूतः संशयो विचाराङ्ग-

न्यायवार्त्तिकतात्पर्य्यटीका

दर्शनादित्यनेनान्वयमात्रव्यभिचारोऽभिमतो बौद्धेन, ततोऽनेकधर्मदर्शनादिति वक्तव्यमिति। तदेवं सामान्यलक्षणमेकं त्रीणि च विशेषलक्षणानीति स्थितम्।

तदेतानि चत्वारि लक्षणानि पुञ्जीकृत्य विचारयति—**समानेति**। यदि तावत्संशयसामान्यलक्षणे स्थिते त्रीणि विशेषलक्षणानि, ततः संशयत्वेनोपगृहीतानां त्रयाणां परस्परव्यवच्छेदकमात्रं लक्षणं वक्तव्यम्, ततः समानानेकधर्मोपपत्तेर्विप्रतिपत्तेरित्येतावन्मात्रं वक्तव्यम्, कृतमत्र शेषेण, तन्मात्रादेव परस्परव्यवच्छेदसिद्धेः। तस्मात् परस्परव्यवच्छेदमनपेक्ष्य संशयकारणकथनपरमेतत् सूत्रम्, तथा चान्यान्यपि संशयकारणानि सन्तीति तान्यपि वक्तव्यानि। यदा खल्वयमात्मनः शमादौ संशेते—किमहं चन्दनवनितादिसन्निधाने रज्ये विरज्ये वेति, सोऽयमस्यात्मनः सन्निकर्षजन्मा संशयः आन्तरस्य शमादेर्विषयस्येति समाधत्ते—**अस्तु तावदिति**। यद्यपि तावन्मात्रेण समानजातीयव्यवच्छेदसिद्धिः तथाऽपि विजातीयव्यावर्त्तनाय सामान्यलक्षणमनुवर्त्तनीयम्, तथा च प्रतिपत्तिगौरवं स्यादिति तल्लाघवाय शेषापेक्षा युक्ता। आत्मनः सन्निकर्षादयस्त्वत्यन्तसाधारणा विजातीयव्यवच्छेदायापि नालमिति नोपात्ता इति भावः। एवं संशयकारणावधारणादर्थात् संशयभेदावधारणमित्युक्तम्, संप्रति कारणविशेषेण संशयस्वरूपमेवोच्यत इत्याह—**स्वरूपनिर्देशो वेति**। विप्रतिपन्नोऽपि

(१) "कुतः" इति ख-पु० नास्ति।

न्यायभाष्यम्

स्थानवतां लक्षण(१)मिति समानम् ।

(सू)—यमर्थमधिकृत्य प्रवर्तते तत्प्रयोजनम् ॥ २४ ॥

यमर्थमाप्तव्यं हातव्यं वा व्यवसाय(२) तदाप्तिहानोपायमनुतिष्ठति, प्रयोजनं तद्वेदितव्यम्, प्रवृत्तिहेतुत्वात् । इममर्थ(३)माप्स्यामि हास्यामि वेति व्यवसायोऽर्थस्याधिकारः, एवं व्यवसीयमानोऽर्थोऽधिक्रियत इति ॥ २४ ॥

न्यायवार्त्तिकम्

तयोपादीयते । संशयवद्विपर्ययोऽपि विचाराङ्गम्, सोऽपि पदार्थत्वेन वक्तव्यः ? सत्यमसौ पदार्थो न तु विचाराङ्गमित्यतो नाभिधेयः । कथं न विचाराङ्गम् ? यथा सन्दिग्धस्तद्विशेषप्रतिपत्तये यतते नैवं विपर्यस्त इति, इत्यतो न्यायविधानङ्गत्वात् नाभिधीयते ॥ २३ ॥

यमर्थमधिकृत्य प्रवर्तते तत् प्रयोजनम् । यमर्थमधिकृत्येति व्यवसायोऽधिकारः(४) । कस्य

न्यायवार्त्तिकतात्पर्य्यटीका

पुरुषः सन्दिग्धवत्प्रतिपाद्य एवेति मन्वानश्चोदयति—संशयवदिति । विप्रतिपन्नो न शिष्यः, किन्तु जल्पवितण्डाभ्यां शिष्यतां नीत्वा सन्दिग्ध एव प्रतिपाद्यत—इत्यभिप्रायेण परिहरति—सत्यमिति ॥ २३ ॥

उद्देशक्रमप्राप्तस्य प्रयोजनस्य लक्षणम्—यम···नम् (सू, २४) ॥

अत्रार्थशब्दो गौणमुख्यप्रयोजनावरोधार्थः । तत्र मुख्यं सुखदुःखप्राप्तिपरिहारौ, गौणं तु तत्साधनम् । अत्र भाष्यं—यमर्थमित्यादि । अत्राधिकृत्येत्यस्य व्याख्यानम्—व्यवसाय निश्चित्येत्यर्थः । ससाधनौ च सुखदुःखप्राप्तिपरिहारावर्थः, न च सुखदुःखप्राप्तिपरिहारौ स्वरूपेण प्रवृत्तिनिवृत्तिगोचराविति तदुपायप्रवृत्त्यैव चेतनप्रवृत्तिगोचरावितिं दर्शयति—तदाप्तिहानोपायमनुतिष्ठतीति । प्रवृत्तिहेतुत्वादिति । यद्यपि सुखदुःखाप्तिहाने तदुपायाश्च सन्ति तथाऽपि सामान्येन ज्ञायमानानीच्छाद्युपहारमुखेण प्रवृत्तिहेतवः । ननु सूत्रेऽधिकृत्येत्यस्ति भाष्ये व्यवसायेति तत् कुतो न विरोध इत्यत आह—व्यवसायोऽर्थस्याधिकार इत्यादि । तदेतद्वार्त्तिककारो व्याचष्टे—यमर्थमधिकृत्येति, व्यवसायेति । पृच्छति—कस्येति ? सुखदुःखाप्तिपरिहारयोर्व्यवसाय-

वृत्तिः

क्रमप्राप्तं प्रयोजनं लक्षयति—(यमर्थमित्यादि) ।

अधिकृत्य——उद्दिश्य । तथा च प्रवृत्तिहेतिवच्छाविषयत्वं तत्त्वम् । विषयत्वं

(१) "लक्षणवचन" इति ज० । (२) "अध्यवसाय" इति ज·आ·ग० । (३) "इदमर्थं" इति फ० ।
(४) "व्यवसायोऽर्थस्याधिकारः" इति भाष्यं ।

न्यायवार्त्तिकम्

व्यवसायः ? सुखदुःखसाधनानाम्। इदं सुखसाधनमिति ज्ञात्वा सुखाप्तये(१) प्रयतते, इदं दुःखसाधन(२)मिति चाधिगम्य दुःखहानायेति। सुखदुःखयोरवाप्तिहानाभ्यामयं लोकः प्रयुज्यत इति सुखदुःखाप्तिहानी प्रयोजनमिति। अनेन च प्रयोजनेन सर्वेऽर्थाः संगृहीता भवन्तीति। एतस्मिंश्च सूत्रार्थे परस्य दोषविवक्षया चोद्यमानस्य वक्तुमशक्तस्य व्याहारो लौकिकोऽयमर्थः प्रयुज्यतेऽनेनेति प्रयोजनमिति। न चानेन न्यायस्य किञ्चित् क्रियत इति न्यायाङ्गभावो नास्तीति। यत्तावल्लौकिकोऽयमर्थ इति, एतत् नर्ते(३) प्रकृष्टतार्किकादन्यो वक्तुमर्हति—अयमेव च पदार्थो लौकिको न प्रमाणादय इति। कश्चासौ लौकिक इति ? यदि प्रमाणोपपन्न इत्ययमर्थः, अतिदोषोऽयम्, प्रमाणोपपन्नं न वक्तव्यमिति। अथान्यो लौकिकशब्दार्थः ? तन्न बुध्यामहे कथमन्य इति। यदपि प्रयोजनं न्यायस्याङ्गं न भवतीति, तदयुक्तम्, या खलु निष्प्रयोजना चिन्ता सा न न्यायाङ्गमिति। परीक्षाविधेस्तु प्रधानाङ्गं प्रयोजनमेव, तन्मूलत्वात् परीक्षाविधेरिति॥ २४॥

न्यायवार्त्तिकतात्पर्यटीका

स्तत्रैव प्रवर्तयेत्, न चानयोः प्रवृत्तियोग्यता, न चान्यनिश्चयोऽन्यत्र प्रवर्त्तयति, अतिप्रसङ्गादिति भावः। उत्तरं—सुखदुःखसाधनानामिति। ततश्च प्रतीतिप्रवृत्त्योः संप्रतिपत्तिरित्यर्थः। सर्वव्यापितामस्य दर्शयति—अनेन प्रयोजनेनेति। वितण्डाया अपि प्रयोजनमुक्तं प्रथमसूत्रे। चोद्यमानस्य प्रवर्त्तमानस्येत्यर्थः। शङ्कते—यदीति। लोक्यतेऽनेनेति लोकः प्रमाणम्, तदन्वितस्तदुपपन्नः, न च प्रमाणमीदृशम्, अनवस्थाप्रसङ्गादिति भावः। निराकरोति—अतिदोषोऽयमिति। यथा च प्रमाणस्य प्रमाणोपपन्नताऽनवस्था तथा द्वितीये (४) निवेदयिष्यते। न च प्रसिद्धतरतया न प्रयोजनं लक्षणीयमिति युक्तम्, कथमस्य प्रयुक्तौ साधनत्वं क्व च प्रयोजयति कथं च व्यापकमिति सर्वस्य परीक्षकवेदनीयत्वात्। अथान्य इति। अप्रामाणिको लौकिक इति, यथा वटे वटे वैश्रवण इति। निराकरोति—तन्न बुध्यामह इति। प्रयोजनस्य प्रामाणिकत्वादित्यर्थः। यदप्युक्तं न्यायस्याङ्गं प्रयोजनं (५) न भवति तस्मान्न वक्तव्यमिति, तन्न युक्तम् (६)। या खलु निष्प्रयोजनेति, न ब्रूमः प्रयोजनं न्यायस्याङ्गमित्यपि, मुख्यं प्रयोजनमेव हि तन्न स्याद् यद्ते पुरुषादन्यार्थमिति, प्रयोजनवांस्तु न्यायो

वृत्तिः

साध्यताख्यविषयताविशेषः, तेन(७) सुखत्वादिवारणम्। प्रवृत्तिहेत्विति स्वरूपकथनम्। तक्षकचूडामणिसुमेर्वादिप्राप्तिवारकं तदिति केचित्।

---

(१) "दुःखाप्तये" इति क०। (२) "सुखसाधन" इति ख०। (३) "न ऋते" इति पदविश्लेषः। (४) २।१।१८ सूत्रतात्पर्ये। (५) "प्रयोजनं न्यायस्याङ्गम्" इति वार्त्तिके। (६) "तदयुक्तम्" इति वार्त्तिके। (७) "ज्ञान" इत्यधिकम्, का० व०।

(सू)—लौकिकपरीक्षकाणां यस्मिन्नर्थे बुद्धिसाम्यं स दृष्टान्तः ॥ २५ ॥

न्यायभाष्यम्

लोकसामान्य(१)मनतीता लौकिका नैसर्गिकं वैनयिकं बुद्ध्यतिशयमप्राप्ताः। तद्विपरीताः परीक्षकाः। तर्केण प्रमाणैरर्थं परीक्षितुमर्हन्तीति। यथा

न्यायवार्त्तिकम्

लौकिकपरीक्षकाणामिति सूत्रम्। बुद्धिसाम्यविषयो दृष्टान्त इति सूत्रार्थः। एवं चाका-

न्यायवार्त्तिकतात्पर्यटीका

निष्प्रयोजनां तद्गतां चिन्तामङ्गीकरोति, फलवत्सन्निधावफलं तदङ्गमिति न्यायात्। तस्मादनङ्गमपि प्रयोजनं परीक्षाया मूलं स्वर्ग इव सेतिकर्त्तव्यताकस्य यागाद्यनुष्ठानस्येति सिद्धम्॥ २४ ॥

क्रमप्राप्तं दृष्टान्तं लक्षयति—

लौकि—न्तः (सू, २५)॥ दृष्टान्त इति लक्ष्यनिर्देशः, शेषं लक्षणम्। साध्यसाधर्म्यात्तद्धर्मभावित्वेनार्थ्यते तथा साध्यवैधर्म्यादतद्धर्मभावित्वेनार्थ्यते यः सोऽर्थस्तस्मिन्, तथा च नातिव्याप्तिः (२)। उदाहरणसूत्रा(३)च्चेदृशविशेषप्रतिलम्भः। लोकसामान्यं किं तदित्यत आह—नैसर्गिकमिति। शास्त्रपरिशीलनलब्धजन्मा बुद्ध्यतिशयो वैनयिकः तद्रहिता लौकिकाः प्रतिपाद्या इति यावत्। तद्विपरीतास्तदुभयसम्पन्नाश्च परीक्षकाः प्रतिपादका इति यावत्, कथाबहुत्वाच्च बहुवचनम्। तदनेन वादिप्रतिवादिनौ दर्शितौ, तयोर्बुद्धिसाम्यं व्याचष्टे—

वृत्तिः

अत्र च निरुपाधीच्छाविषयत्वात् सुखदुःखाभावयोर्मुख्यं प्रयोजनत्वम्। तदुपायस्य तु तदिच्छाधीनेच्छाविषयत्वाद्गौणं प्रयोजनत्वमिति ॥ २४ ॥

---

(१) "लोकसाम्य-" इति ल० ग० आ० ज०। (२) "लौकिकपरीक्षकाणा"मित्यादिसूत्रवाक्यस्य यथाश्रुतार्थमात्रमेव चेत् लक्षणम्, तर्हि लौकिकपरीक्षकोभयसिद्धानामपि पदार्थानां मध्ये कस्य कुत्र दृष्टान्तता स्यादिति नियन्त्रणं न शक्यते कर्त्तुम्, तथा च पर्वतादौ धूमादिहेतुकवह्न्याद्यनुमाने घटादेरपि दृष्टान्ततापत्तिरूपातिव्याप्तिः सम्भवः, अतः "साध्यसाधर्म्या"दित्यादिना "अर्थ" पदार्थं विशिष्य तद्घटितत्वेन लक्षणस्यापि तत्तत्प्रकृतसाध्यादिनियन्त्रितभावं सम्पाद्य निरुक्तातिव्याप्तेः परीहारं दर्शयति—"तथाच नातिव्याप्ति"रिति। अत्र "साध्यसाधर्म्यादि"ति "तथा साध्यवैधर्म्यादिति च दलद्वयं क्रमेणान्वयिव्यतिरेकिरूपयोर्द्विविधदृष्टान्तयोः संग्रहार्थमिति बोध्यम्। (३) १।१।३६ सू०।

न्यायभाष्यम्

यमर्थं लौकिका बुध्यन्ते तथा परीक्षका अपि, सोऽर्थो दृष्टान्तः। दृष्टान्तविरोधेन (१) हि प्रतिपक्षाः प्रतिषेद्धव्या भवन्तीति, दृष्टान्तसमाधिना च स्वपक्षाः स्थापनीया भवन्तीति, अवयवेषु चोदाहरणाय कल्पत(२) इति ॥ २५ ॥

न्यायवार्त्तिकम्

शाद्यवरोधः(३) इति। यदि पुनरेवमवधार्यते लौकिकानां परीक्षकाणां च यो विषयः स दृष्टान्त इत्यलौकिकार्थो न दृष्टान्तः स्यादाकाशादिरिति। उदाहरणत्वेन तु लौकिकपरीक्षकविषयस्याभिधानं(४) न तु लौकिकपरीक्षकाणामेवेति।

सोऽयं दृष्टान्तः सारूप्यव्युत्पत्त्यर्थो वा स्यादसिद्धसाधनार्थो वा? यदि तावत् सारूप्यव्युत्पत्त्यर्थस्तदा नोपमानाद्भिद्यते। अथासिद्धसाधनार्थो नोदाहरणाद्भिद्यते। यद्युपमानं प्रमाणेऽन्तर्भावः। अथोदाहरणमवयव इति न पृथक् दृष्टान्तोऽस्तीति। इदं तूत्तरमप्रतिसमाधेयमिति पश्यामः, कस्मात्? त्रयस्याप्यपरिज्ञानात्। एवं ब्रुवता न दृष्टान्तो नोदाहरणं नोपमानं विज्ञातमिति। सारूप्यव्युत्पत्त्यर्थं तावदुपमानं न भवतीति वर्णितम्, दृष्टान्तः सारूप्यव्युत्पत्त्यर्थः, असिद्धसाधनार्थो वेति दृष्टान्तो न भवति। उदाहरणार्थमुदाहरणं वर्णयन्तो वक्ष्याम इति ॥ २९ ॥

न्यायवार्त्तिकतात्पर्यटीका

यथा यमर्थमिति। लक्षणप्रयोजनमाह—दृष्टान्तविरोधेनेति। दृष्टान्तस्य विरोधो विरुद्धत्वं साध्यविकल्पत्वादि। प्रतिपक्षा इति प्रतिपक्षासाधनानि, समाधिरभूतदोषारोपस्य प्रतिषेधः। लक्षितश्च दृष्टान्त उदाहरणलक्षणाय कल्पते, घटत इति भाष्यम्। अत्र वार्त्तिककारो लौकिकपरीक्षकस्वरूपमविवक्षितमिति मन्वान आह—बुद्धिसाम्येति। अविवक्षाप्रयोजनमन्वयव्यतिरेकाभ्यामाह—एवं चेति। परेषां दृष्टान्तलक्षणाक्षेपमुपन्यस्य दूषयति—सोऽयं दृष्टान्त इति। दृष्टान्तस्य प्रयोजनमाह—दृष्टान्तः सारूप्यव्युत्पत्त्यर्थः। यथाऽऽक्षेपम्प्रोक्तं तत्तदक्षरमनूद्य दूषयति—असिद्धसाधनार्थो वेति। न खल्वसिद्धः साध्येन साधनस्याविनाभावो दृष्टान्तेन साध्यत इत्यर्थः ॥ २९ ॥

वृत्तिः

क्रमप्राप्तं (५) दृष्टान्तं लक्षयति—(लौकिकेत्यादि)।

लौकिकः—अप्राप्तशास्त्रपरिशीलनजन्यबुद्धिप्रकर्षः, प्रतिपाद्य इति फलितार्थः।

---

(१) "दृष्टान्ताविरोधेन" इति आ०। (२) "कल्पन्त" इति आ०। (३) "आकाशाद्यवबोध" इति ख०। (४) "विषयस्याभिधानात्" इति ख०। (५) ल पु०—"क्रमप्राप्तम्" इति नास्ति।

न्यायभाष्यम्

अथ सिद्धान्तः, इदमित्थम्भूतञ्चेत्यभ्यनुज्ञायमानमर्थजातं सिद्धम्, सिद्धस्य संस्थितिः सिद्धान्तः, संस्थितिरित्थम्भावव्यवस्था धर्मनियमः।

स खल्वयम्—

(सू)—तन्त्राधिकरणाभ्युपगमसंस्थितिः सिद्धान्तः ॥ २६ ॥

न्यायवार्त्तिकम्

इदमित्थम्भूतं चेति भाष्यम्। इदमिति सामान्यतोऽवगममाह। इत्थम्भूतं चेति विशेषतः(१)। एतदुक्तम्भवति—सामान्यविशेषवदर्थाभ्यनुज्ञा सिद्धान्त इति। अस्यार्थस्य प्रदर्शनार्थं सूत्रम्—तन्त्राधिकरणाभ्युपगमसंस्थितिः सिद्धान्त इति।

न्यायवार्त्तिकतात्पर्यटीका

अत्र भाष्यकारः सिद्धान्तसामान्यलक्षणसूत्रमपठित्वैव तात्पर्यं व्याचष्टे—अथ सिद्धान्त इत्यादिना। तत्रेदमित्थंभूतमिति वार्त्तिककारो व्याचष्टे—इदमिति सामान्यत इति। भाष्ये तु संस्थितिरित्थंभावव्यवस्थेति सामान्योपक्रमस्याभ्युपगमस्य प्रमाणतो विशेषपर्यन्तता-परिसमाप्तिः संस्थितिरित्यर्थः। अत्रैवार्थे सूत्रमित्याह वार्त्तिककारः—अस्यार्थस्येति।

वृत्तिः

परीक्षकः—शास्त्रपरिशीलनप्राप्तबुद्धिप्रकर्षः, प्रतिपादक इति फलितार्थः। तथा च प्रतिपाद्यप्रतिपादकयोरिति पर्यवसन्नम्। 'बहुवचनं कथाबहुत्वमपेक्ष्य'—इति टीका(२)। वस्तुतो लौकिकयोः परीक्षकयोर्वेत्यर्थाद्युक्तमेव बहुवचनम्। बुद्धिसाम्यमिति(३)। बुद्धेः साध्यसाधनोभयवत्त्वविषयिण्याः,—तदभावविषयिण्या वा, साम्यम्, अविरोधो यस्मिन्नर्थे स दृष्टान्तः। वादिप्रतिवादिनोः साध्यसाधनोभयवत्त्वप्रकारकतदभाववत्त्व(४)-प्रकारकान्यतरनिश्चयविषयो दृष्टान्त इति पर्यवसितोऽर्थः ॥ २५ ॥

क्रमप्राप्तं सिद्धान्तं लक्षयति—(तन्त्राधिकरणेत्यादि)।

तन्त्रं शास्त्रं तदेवाधिकरणं ज्ञापकतया यस्य तादृशो(५)योऽभ्युपगमस्तस्य समीचीनतयाऽसंशयरूपतया स्थितिः, तथा च शास्त्रितार्थनिश्चयः सिद्धान्तः। अत्र च 'अभ्युपगम्यमानोऽर्थः सिद्धान्त' इति भाष्यम्। 'अभ्युपगमः सिद्धान्त' इति वार्त्तिकटीके। न चात्र

---

(१) "विशेषः" इति क०। (२) तात्पर्यटीकायाम् "कथाबहुत्वाच्च बहुवचनम्" इति। (३) '२-' चिह्नात् परः '३'-चिह्नपूर्ववर्त्ती पाठः आ० व० नास्ति। (४) "भाववत्त्व" इत्यत्र "भावद्वय" इति आ० व०। (५) "तादृशस्य" इति आ० व०।

न्यायभाष्यम्

तन्त्रार्थसंस्थितिः तन्त्रसंस्थितिः, तन्त्रमितरेतराभिसम्बद्धस्यार्थसमूहस्योपदेशः शास्त्रम्। अधिकरणानुषक्तार्थ(१)संस्थितिरधिकरणसंस्थितिः, अभ्युपगमसंस्थितिरनवधारितार्थपरिग्रहः, तद्विशेषपरीक्षणायाभ्युपगमसिद्धान्तः।

तन्त्रभेदात्तु खलु

(सू)—स चतुर्विधः (२) सर्वतन्त्रप्रतितन्त्राधिकरणाभ्युपगमसंस्थित्यर्थान्तरभावात् ॥ २७ ॥

न्यायवार्त्तिकम्

किं पुनरिदं सूत्रं लक्षणार्थमाहो विभागार्थमिति। किं चातः? यदि लक्षणार्थं तन्त्राधिकरणग्रहणं न कर्तव्यम्, एतावद्वक्तव्यमभ्युपगमव्यवस्था सिद्धान्त इति। अथ विभागार्थम्? सर्वतन्त्रग्रहणं कर्तव्यम्, प्रतिज्ञादिवत्। यथा प्रतिज्ञाहेतूदाहरणोपनयनिगमनान्यवयवा इति समस्ताभिधानम्, एवं सर्वतन्त्रप्रतितन्त्राधिकरणाभ्युपगमसंस्थितिरिति वक्तव्यम्। लक्षणार्थं च सूत्रान्तरं वक्तव्यम् ॥ २६ ॥

न्यायवार्त्तिकतात्पर्यटीका

तन्त्रा—न्तः (सू, २६) ॥ सूत्रार्थमाक्षिपति—किं पुनरिति। लक्षणार्थं चेति, सामान्यलक्षणार्थम्, न खलु सामान्यलक्षणमन्तरेण शक्यो विभाग इत्युक्तम् ॥ २६ ॥

वृत्तिः

विरोधः शङ्क्यः, आचार्यैः परिहृतत्वात्। तथा च त्रिसूत्रीनिबन्धः 'अर्थाभ्युपगमयोर्गुणप्रधानभावस्य विवक्षातन्त्रत्वादर्थाभ्युपगमोऽभ्युपगम्यमानो वाऽर्थः सिद्धान्तः'। तेन सूत्रभाष्यवार्त्तिकटीकासु न विरोधः।

अत्र च भाष्यानुसारात् सर्वतन्त्रप्रतितन्त्राधिकरणाभ्युपगमसिद्धान्तान्यतमः सिद्धान्त इति सूत्रार्थ इति तु न युक्तम्, अग्रिमसूत्रानुत्थानापत्तेः।

तन्त्रसिद्धान्तत्वेन द्वयमनुगमय्य तन्त्राधिकरणाभ्युपगमान्यतमः सिद्धान्त इति कश्चित् ॥ २६ ॥

---

(१) "-नुषङ्गार्था" इति फ० ग०। "-नुषक्तार्था" इति ज० आ०। (२) "स चतुर्विध" इति सूत्रांशः ख-फा-ग-आ-ज-पुस्तकेषु भाष्यपाठरूपेण परिगृहीतः, किन्तु सूत्रकारस्यैव "अर्थान्तरभावात्" इति हेतुनिर्देशस्य साध्यनिर्देशमन्तरेणासङ्गतेः, १।१।५म सूत्रभाष्यस्य "विभागवचनादेव" इत्यादितः—"तथा चाऽयमित्थम्भूतेन वाक्यविकल्पेन प्रवृत्तः सिद्धान्ते छले शब्दादिषु च बहुलं समाचारः शास्त्रे" इत्येतावत्पर्यन्तपाठार्थपर्यालोचनेन भाष्यकारस्याप्येतादृशसूत्रपाठे सम्मतिबोधात्, न्यायसूचीनिबन्धे वाचस्पतिमिश्रैरपि एतदंशस्य सूत्रपाठरूपेण गृहीतत्वाच्च सूत्रपाठतैवास्य समीचीना प्रतिभाति। यद्यपि वार्त्तिकपाठधारणे विश्वनाथवृत्तिव्याख्याने च पर्यालोच्यमाने पुनस्तदंशस्य भाष्यपाठतैव प्रतीयते इति पाठावधारणं प्रति महदसौकर्यम्, तथापि प्राचीनतमानां भाष्यकाराणां १।१।५म सूत्रभाष्यीयनिरुक्तपाठार्थबलमेव प्राधान्येनावलम्ब्य सूत्रपाठतया सम्पादनमस्माभिरादृतम्।

न्यायभाष्यम्

तत्रैताश्चतस्रः संस्थितयो(१)ऽर्थान्तरभूताः ॥ २७ ॥

न्यायवार्त्तिकम्

सर्वतन्त्रप्रतितन्त्राभ्युपगमसंस्थित्यर्थान्तरभावा(२)दित्यस्य सूत्रस्यार्थो(३)ऽन्यो वक्तव्यः। अथेदं विभागार्थम्? तथापि पूर्वसूत्रं परित्यज्यताम्। अथ विभक्तानां पुनर्विभागः? त्रिविधा चास्य शास्त्रस्य प्रवृत्तिरिति व्याहतम्। विभागश्च नियमार्थः, विभक्तानां विभागः किमर्थः?। यदि नियमार्थः आद्येन सूत्रेण कृतत्वान्न प्रयोजनमस्तीति। तस्मात् पूर्वमुत्तरं वा सूत्रमनार्षमिति। नाऽनार्षम्, आद्यस्य लक्षणार्थत्वादुत्तरस्य विभागार्थत्वादिति। विभागश्च नियमार्थ इत्युक्तम्। एतेन अनेकधा भिन्नस्य सिद्धान्तस्य चतुर्धा संग्रह इति नियमं दर्शयति। अथाऽऽद्यं सूत्रं कथम्? लक्षणार्थमिति। तन्त्राधिकरणानामर्थानामभ्युपगम इति सूत्रार्थः। तन्त्रमधिकरणं येषामर्थानां भवति ते तन्त्राधिकरणाः, तेषामभ्युपगमसंस्थितिरित्थम्भावव्यवस्था धर्मनियमः (४) सिद्धान्तो भवतीति। किमुक्तम्भवति? योऽर्थो न शास्त्रितः तस्याभ्युपगमो न सिद्धान्त इति ॥ २७ ॥

न्यायवार्त्तिकतात्पर्यटीका

(५) समाधत्ते—नाऽनार्षमिति। लक्षणार्थत्वं सामान्यलक्षणार्थत्वम्। तन्त्र्यन्ते व्युत्पाद्यन्ते प्रमेयाण्यनेनेति तन्त्रं प्रमाणं तदेवाधिकरणमाश्रयो ज्ञापकत्वेन येषामर्थानां ते तथोक्ताः। अशास्त्रितः (६) अप्रामाणिक इत्यर्थः। आभिमानिकं च (७) प्रामाणिकत्वम्, तेन सिद्धान्तभेदिनामर्थानां सर्वेषां न प्रामाणिकत्वप्रसङ्गः। तदेव भाष्यकारेण व्याख्याय सामान्यलक्षणं पठितम्, एवं व्याख्यानपूर्वकमेव विभागसूत्रं पठति—तन्त्रार्थसंस्थितिरिति। तन्त्रग्रहणेन च

वृत्तिः

विभजते—(स चतुर्विध इत्यादि)।

(स चतुर्विध इति शेषः(८))। सर्वतन्त्रादिसंस्थितीनामर्थान्तरभावाद्भेदादित्यर्थः ॥२७॥

---

(१) "स्थितयो" इति आ०। (२) "स चतुर्विधः" इति सूत्रांशो वार्त्तिककृता परित्यक्तः, एतेनानुमीयते यद् वार्त्तिककृन्मते एतदंशो भाष्यान्तर्गत एवेति। (३) "सूत्रार्थो" इति आदर्शे पाठः। (४) पूर्वसूत्रभाष्यस्यायं पाठो व्याख्याप्रसङ्गादत्रोपात्तः। (५) न च सूत्रोल्लेखादिकमकृत्वा अकाण्ड एव कथं "समाधत्ते" इत्यादिकथनम् इति वाच्यम्, पूर्वसूत्रव्याख्यातः अपृथग्भावेनैव वार्त्तिककृत्तात्पर्यकृद्भ्यामेतत्सूत्रव्याख्यायाः सम्पादितत्वात्, आदर्शे मुद्रणमपि तथैव दृश्यते, अस्माभिस्तु प्रतिसूत्रं विभज्य निर्देशशैल्या एवं सम्पादितम्। (६) वार्त्तिके—"न शास्त्रितः" इति पाठः। (७) अत्र "च"कारस्थाने "न" इत्येवं पाठ एव समुचितः प्रतिभाति अर्थसङ्गत्यनुरोधात्। (८) "स चतुर्विधः" इतंग्रशस्य सूत्रादौ गृहीतत्वादत्रायं बन्धनीचिह्ननिवेशः।

न्यायभाष्यम्

तासाम्—

(सू)—सर्वतन्त्राविरुद्धस्तन्त्रेऽधिकृतोऽर्थः सर्वतन्त्र-सिद्धान्तः ॥ २८ ॥

यथा घ्राणादीनीन्द्रियाणि गन्धादय इन्द्रियार्थाः पृथिव्यादीनि भूतानि प्रमाणैरर्थस्य ग्रहणमिति ॥ २८ ॥

न्यायवार्त्तिकम्

सर्वेषां सम्प्रतिपत्तिविषयः सर्वतन्त्रसिद्धान्त इति। यथा प्रमाणानि प्रमेयसाधनानि।

न दृष्टान्तात् सर्वतन्त्रसिद्धान्तो भिद्यते तत्राप्यविप्रतिपत्तिरिहापीति ? भिद्यत इत्याह, दृष्टान्तो हि वादिप्रतिवादिभ्यामेव निश्चितः, न पुनरेवं(१) सर्वतन्त्रसिद्धान्त इति। अनुमानागमयोराश्रयो दृष्टान्तो नैवं सर्वतन्त्रसिद्धान्त इति। यद्यनुमानागमयोराश्रयो दृष्टान्त इति प्रत्यक्षेऽपि प्रसङ्गः, प्रत्यक्षमप्यनुमानागमयोराश्रयः, तत्कारणत्वात्। यः प्रत्यक्षविषयः सोऽर्थो दृष्टान्तोऽधिगतोऽर्थः कथ्यत इत्यनुमानागमयोराश्रयः, अधिगमसाधनं तु प्रत्यक्षम्, तस्मान्न प्रत्यक्षे प्रसङ्गः ॥ २८ ॥

न्यायवार्त्तिकतात्पर्यटीका

सर्वतन्त्रप्रतितन्त्रयोरुपादानम्, तयोरपि तन्त्रत्वात्। तदिदमुक्तं—तन्त्रभेदास्त्विति। अनवधारितार्थपरिग्रह इति, साक्षाच्छास्त्रे नोपात्तो यथा मनस इन्द्रियभाव इति ॥ २७ ॥

सर्व—न्तः (सू , २८) ॥ यद्यपि घ्राणादिषु भौतिकत्वाभौतिकत्वादौ विप्रतिपत्तयस्तथाऽपि इन्द्रियत्वे नास्ति विप्रतिपत्तिरिति। तदेतद्वार्त्तिककारो व्याचष्टे—सर्वेषामिति। अत्र चोदयति—न दृष्टान्तादिति। परिहरति—भिद्यत इति। न चैवं सर्वतन्त्रसिद्धान्तः ; तस्य सर्वैरेव निश्चितत्वादिति। अनुमानागमयोरिति। संबन्धग्रहणाश्रयावनुमानागमौ, यत्र च संबन्धग्रहः स दृष्टान्त इत्यर्थः ॥ २८ ॥

वृत्तिः

सर्वतन्त्रसिद्धान्तं लक्षयति—(सर्वतन्त्राविरुद्ध इत्यादि)।

सर्वतन्त्राविरुद्धः सर्वशास्त्राभ्युपगत इति बहवः। वस्तुतो यथाश्रुत एवार्थः अन्यथा तन्त्रेऽधिकृत इत्यस्य वैयर्थ्यापत्तेः। अत एव च जात्यादेरसदुत्तरत्वमपि सर्वतन्त्रसिद्धान्तः।

न च तन्त्रेऽधिकृत इति स्पष्टार्थं लक्षणे तु न देयमेवेति वाच्यम्। मनस इन्द्रियत्वस्य(२) सर्वतन्त्रसिद्धान्ततापत्तेः।

नव्यास्तु सूत्रस्योपलक्षणमात्रत्वाद्वादिप्रतिवाद्युभयाभ्युपगतः कथानुकूलोऽर्थः स इति वदन्ति ॥ २८ ॥

(१) "न चैवम्" इति तात्पर्यं। (२) "इन्द्रियत्वस्यापि" इति आ-व०।

(सू)—समानतन्त्रसिद्धः(१) परतन्त्रासिद्धः प्रतितन्त्र-सिद्धान्तः ॥ २९ ॥

न्यायभाष्यम्

यथा नासत आत्मलाभः, न सत आत्महानम्, निरतिशयाश्चेतनाः देहेन्द्रियमनःसु विषयेषु तत्तत्कारणेषु (२) च विशेष इति साङ्ख्यानाम्, पुरुषकर्मादिनिमित्तो भूतसर्गः कर्महेतवो दोषाः प्रवृत्तिश्च, स्वगुणविशिष्टाश्चेतनाः, असदुत्पद्यते उत्पन्नं निरुध्यत इति योगानाम् ॥ २९ ॥

(सू)—यत्सिद्धावन्यप्रकरणसिद्धिः सोऽधिकरणसिद्धान्तः ॥३०॥

यस्यार्थस्य सिद्धावन्येऽर्था अनुषज्यन्ते, न तैर्विना सोऽर्थः सिध्यति तेऽर्था यदधि-

न्यायवार्त्तिकम्

सामान्यविशेषतद्वतां नियमेनाभ्युपगमः प्रतितन्त्रसिद्धान्त इति। यथा भौतिकानीन्द्रियाणीति योगानाम्(३), अभौतिकानीति सांख्यानामिति ॥ २९ ॥

न्यायवार्त्तिकतात्पर्यटीका

समा—न्तः (सू, २९) ॥ समानशब्द एकपर्यायः। नैयायिकानां हि समानं तन्त्रं न्यायशास्त्रम्, परतन्त्रं च सांख्यादिशास्त्रम्। चेतना आत्मनः, निरतिशया अपरिणामिनो न केनचिद्धर्मेणोपजनापायधर्मेण युज्यन्ते। प्राकृतेषु च तत्कारणेषु महदहङ्कारपञ्चतन्मात्रभूतसूक्ष्मेषु विशेषोऽतिशय इत्यर्थः। तदेतत् सूत्रं वार्त्तिककृद्व्याचष्टे—सामान्येति। योगानामेव, सांख्यानामेवेति नियमः ॥ २९ ॥

यत्—न्तः (सू, ३०) ॥ यस्यार्थस्य साध्यस्य वा हेतोर्वा सिद्धौ इति विषयसप्तमी, न तु निमित्तसप्तमी, द्वयोर्ज्ञानयोर्निमित्तनैमित्तिकत्वायोगात्। तेन यस्मिन्नर्थे ज्ञायमाने तदनुषङ्गिणोऽर्थास्तदन्तर्भावेन ज्ञायन्ते सोऽर्थः साक्षादधिक्रियमाणस्तदनुषङ्गिणां चाऽऽधारः तदाश्रयत्वात्तत्सिद्धेः,

वृत्तिः

प्रतितन्त्रसिद्धान्तं लक्षयति—(समानतन्त्रेत्यादि)।

समानशब्द एकार्थस्तेनैकतन्त्रसिद्ध इत्यर्थः स्वतन्त्रसिद्ध इति पर्यवसितोऽर्थः। तथाच वादिप्रतिवाद्येकतरमात्राभ्युपगतस्तदेकतरस्य प्रतितन्त्रसिद्धान्त इति फलितार्थः यथा मीमांसकानां शब्दनित्यत्वम् ॥ २९ ॥

(१) "समानतन्त्रासिद्ध" इति ग०। (२) "तत्तत्कारणे" इति फ-ग०। आ-वि-टि-पुस्तकेषु अयमंशो नास्ति। (३) नैयायिकानामित्यर्थः।

न्यायभाष्यम्

ष्ठानः सोऽधिकरणसिद्धान्तः, यथा देहेन्द्रियव्यतिरिक्तो(१) ज्ञाता 'दर्शनस्पर्शनाभ्यामेकार्थग्रहणादि'ति (२) अत्रानुषङ्गिणोऽर्था इन्द्रियनानात्वं नियतविषयाणीन्द्रियाणि स्वविषयग्रहणलिङ्गानि ज्ञातुर्ज्ञानसाधनानि, गन्धादिगुणव्यतिरिक्तं द्रव्यं गुणाधिकरणमनियत(३)विषयाश्चेतना इति पूर्वार्थसिद्धावेतेऽर्थाः सिध्यन्ति न तैर्विना सोऽर्थः सम्भवतीति ॥ ३० ॥

न्यायवार्त्तिकम्

वाक्यार्थसिद्धौ तदनुषङ्गी योऽर्थः सोऽधिकरणसिद्धान्त इति। तस्योदाहरणं भाष्ये, यथा इन्द्रियव्यतिरिक्तो(४)ज्ञाता दर्शनस्पर्शनाभ्यामेकार्थग्रहणादिति ॥ ३० ॥

न्यायवार्त्तिकतात्पर्यटीका

स पक्षो वा भवतु हेतुर्वा तेन रूपेणाऽधिकरणसिद्धान्तः। पक्षस्तावद्—विवादाध्यासितमुपलब्धिमत्कारणमुत्पत्तिमत्त्वाद् वस्त्रादिवदिति। अत्र हि पृथिव्यादिगतेनोत्पत्तिमत्त्वेनोपलब्धिमत्पूर्वकत्वं तद्गतं साध्यमानं स्वसिद्धान्तर्गतानुषङ्गिसर्वज्ञत्वाद्युपेतमेव सिध्यति, नान्यथेह्योपलब्धिमत्पूर्वकत्वसिद्धिरिति। भाष्ये हेतुः प्रतिसन्धानं सिध्यत् अनुषङ्ग्यर्थान्तरान्वितं सिध्यतीत्युदाहृतम्, तदेतत्सर्वावरोधार्थं वार्त्तिककृदाह—वाक्यार्थेति। हेतुरीदृशः पक्षश्च वाक्यार्थ इत्यर्थः। पूर्वोऽर्थो यः साक्षादधिकृतः तस्य सिद्धावन्तर्गत इति भाष्यार्थः ॥ ३० ॥

वृत्तिः

अधिकरणसिद्धान्तं लक्षयति—(यत्सिद्धावित्यादि)।

यस्यार्थस्य सिद्धौ जायमानायामेव अन्यप्रकरणस्य प्रस्तुतस्य सिद्धिर्भवति सोऽधिकरणसिद्धान्त इत्यर्थः, यथाऽनन्तद्व्यणुकादिकं(५) पक्षीकृत्योपादानगोचरज्ञान(६)-चिकीर्षाकृतिमजन्यत्वे साध्यमाने सर्वज्ञत्वमीश्वरस्य। एवं हेतुबलादपि, यथा 'दर्शनस्पर्शनाभ्यामेकार्थग्रहणादि'न्द्रियादिव्यतिरिक्त आत्मनि साधिते इन्द्रियनानात्वम्। तथा च यदर्थसिद्धिं विना योऽर्थः शब्दादनुमानाद्वा न सिध्यति, सोऽधिकरणसिद्धान्त इति तत्र तत्र विशिष्यैव लक्षणं कार्यम्(७)।

वस्तुतस्तु शब्दत्वमनुमानत्वं चाविवक्षितं प्रमाणमात्रमपेक्षितम्। अत एव प्रत्यक्षेण

---

(१) "देहेन्द्रिय" इत्यत्र देहशब्दः फ-पु० नास्ति। (२) ३।१।१ सूत्रम्। अत्र "ग्रहणादिति" इत्यत्र "ग्रहणादिभिः" इति ग०। (३) "करणं नियत" इत्येवं ज-पु० पाठः। (४) "देहेन्द्रियव्यतिरिक्तो" इति भाष्ये। (५) "यथा तद्द्व्यणुकादिकम्" इति आ-व०। (६) "गोचरापरोक्षज्ञान" इति आ-व०। (७) "तत्र तत्र" इत्यत आरभ्य "कार्यम्" इत्यन्तः पाठः आ-व-पु० नास्ति।

(सू)—अपरीक्षिताभ्युपगमात्तद्विशेषपरीक्षणमभ्युपगमसिद्धान्तः ॥ ३१ ॥

न्यायभाष्यम्

यत्र किञ्चिदर्थजातमपरीक्षित(१)मभ्युपगम्यते, अस्तु(२) द्रव्यं शब्दः स तु नित्योऽथानित्य इति ? द्रव्यस्य सतो नित्यताऽनित्यता वा तद्विशेषः परीक्ष्यते, सोऽभ्युपगमसिद्धान्तः स्वबुद्ध्यतिशयचिख्यापयिषया परबुद्ध्यवज्ञानाच्च प्रवर्तत इति ॥ ३१ ॥

न्यायवार्त्तिकम्

अपरीक्षिताभ्युपगमादिति सूत्रम् । अपरीक्षितोऽसूत्रित इति । योऽर्थः सूत्रेषु नोपनिबद्धः शास्त्रे चाभ्युपगतः सोऽभ्युपगमसिद्धान्त इति । यथा नैयायिकानां मन इन्द्रियमिति । वैशेषिकाणां नैयायिकानां च श्रोत्रमाकाशमिति ।

अपरीक्षितः शास्त्रानभ्युपगतः स्वबुद्ध्यतिशयचिख्यापयिषया परबुद्ध्यवज्ञानाच्च

न्यायवार्त्तिकतात्पर्यटीका

अथाभ्युपगमसिद्धान्तलक्षणसूत्रम्—अप—न्तः (सू, ३१) ॥ तद्वार्त्तिककारो व्याचष्टे—अपरीक्षितोऽसूत्रित इति, सूत्रितस्य प्रायेण परीक्षासम्बन्धात् मनसो हीन्द्रियत्वेनासूत्रितस्यापि इन्द्रियत्वाभ्युपगमः प्रमाणाधिकरणो यतः तस्मादयमभ्युपगमसिद्धान्तः । सूत्रं चैवं योजनीयम्, असूत्रिताभ्युपगमाद्धेतोर्यतस्तद्विशेषपरीक्षणं क्रियते तस्माद्विशेषपरीक्षणाज् ज्ञायतेऽसूत्रितमप्यभ्युपगतं सूत्रकारेण । सोऽयमस्याभ्युपगमोऽभ्युपगमसिद्धान्तः ।

एवं स्वमतेन सूत्रं व्याख्याय भाष्यकारव्याख्यानं दूषयति—शास्त्रानभ्युपगत इति ।

वृत्तिः

स्थूलत्वसाधनानन्तरमुक्तमात्मतत्त्वविवेके 'सोऽयमधिकरणसिद्धान्तन्यायेन स्थूलत्वसिद्धौ क्षणभङ्गभङ्ग' इति ।

तत्र 'वाक्यार्थसिद्धौ तदनुषङ्गी योऽर्थः(३) सोऽधिकरणसिद्धान्त' इति वार्त्तिकफक्किकां लिखित्वा येन केनापि प्रमाणेन वाक्यार्थसिद्धौ जन्यमानायां योऽर्थः सिध्यति स तथेत्यर्थः' इति व्याख्यातं दीधितिकृता । एवं 'हेतुरीदृशः पक्षश्च वाक्यार्थ' इति टीकावचने चोपलक्षणमेतदित्युक्तम्(४) ।

यत्तु जनकीभूतव्यापकताज्ञाने व्यापककोटावविषयः प्रकृतानुमित्या व्यापककोटौ विषयीभूतः शाब्दजनकपदार्थज्ञानाविषयत्वे सति शाब्दविषयश्चेतिद्वयमधिकरणसिद्धान्त इति, तन्न, इन्द्रियनानात्वादौ भाष्याद्युदाहृतेऽव्याप्तेरिति ॥ ३० ॥

---

(१) "अपरीक्षितम्" इति आ-पु० नास्ति । (२) "अस्ति" इति ल-भा-आ० । (३) "योऽर्थः" इत्यत्र "यो यः" इति आ-व-पु० पाठः । (४) "तत्र तत्र विशिष्यैव लक्षणं कार्यम्" इत्यधिकः पाठः आ-व० ।

न्यायवार्त्तिकम्

प्रवर्त्तत इति न युक्तम्। कुतः? परावज्ञानस्यायुक्तत्वात्। यदि तावत् परस्यासामर्थ्यं बुद्ध्वा नायं समर्थ इति प्रवर्त्तते तदाऽनेन न परः प्रतिपादितो भवति, किन्तु विप्रतिपादितः। यश्चाज्ञः किं तस्य प्रतिपादयितव्यम्। अथ परिज्ञातसामर्थ्यं पुरुषमवजानाति? तदपि न। अतिशयबुद्धिमतोऽवज्ञानस्यायुक्तत्वात्। तस्मान्नायं सूत्रार्थोऽशास्त्रिताभ्युपगमः सिद्धान्त इति।

सर्व एवायं पक्षः स्वमुखेनार्थापत्त्या वा विधीयत इति किमनेनातिविस्तृतेनेति केचित्। पक्षपर्याय एव सिद्धान्त इत्यपरे। पक्षस्य किलायं पर्यायः सिद्धान्त इति। सिद्धान्तः पक्ष(१)पर्यायोऽयमिति न बुद्ध्यामहे। सिद्धान्त इत्युपपन्नप्रमाणकोऽयमर्थः तत्प्रत्ययादभ्युपगमः पक्ष इत्यन्यतरवादिविप्रतिपन्नस्यान्यतरं प्रति कर्मतया वस्तुनो यदुपादानं स पक्षः, यश्च कारक-शब्दो यश्च वस्तुशब्दो नैतौ पर्यायौ, अन्यथा परशुश्छेदनमिति। परशुरिति कदा अभिधीयते? यदा पुरुषव्यापारनिरपेक्षं वस्तु सन्निधीयमानतयाऽवतिष्ठते, छेदनमिति च यदोद्यम्योद्यम्य दारुणि निपात्यते, तावेतौ छेदनपरशुशब्दौ वस्तुनः क्रियासम्बन्धापेक्षौ(२) प्रवर्त्तेते इति। तथा सर्व एव कारकशब्दा न द्रव्यमात्रे न वा क्रियामात्रे प्रवर्तन्ते। किन्तर्हि? क्रियासाधने

न्यायवार्त्तिकतात्पर्यटीका

प्रमाणीकृतेन शास्त्रेणाननुज्ञातः प्रमाणानधीन इत्यर्थः। प्रमाणतन्त्राभ्युपगमसंस्थितिरिति हि सिद्धान्तसामान्यलक्षणम्, न च प्रमाणानधीनाभ्युपगमस्तदन्वेतीति नायमीदृशोऽभ्युपगमसिद्धान्तो भवितुमर्हतीति हृदि निधायायुक्तताऽपि दर्शिता। अज्ञं प्रत्यसदाचारत्वात् प्रामाणिकं च पुरुषं प्रत्यशक्यत्वादिति (३)—बुद्धिमतोऽवज्ञानस्यायुक्तत्वादशक्यत्वा(४)दित्यर्थः। सर्व एवायं पक्ष इति। सर्वतन्त्रप्रतितन्त्रसिद्धान्तौ तावत्साक्षादभ्युपगम्यमानौ स्वमुखेनैव पक्षतयाऽभिधीयेते, अधिकरणाभ्युपगमौ तु साक्षादनभ्युपगम्यमानावप्यर्थादभ्युपगन्तव्याविति अर्थापत्त्या पक्षावित्यर्थः। ननु यद्युपपन्नः प्रमाणतयाऽभ्युपगमसिद्धान्तस्तर्हि सिद्धान्तभेदिना-मर्थानां प्रामाणिकत्वेन विरुद्धधर्मसमालिङ्गिता भावाः प्रसज्येरन्नित्यत आह—तत्प्रत्ययात्, तस्य प्रमाणोपपन्नकर्मत्वस्य प्रत्ययादभिमानादित्यर्थः। पक्ष इति, पचि व्यक्तीकरण इत्यस्माद् व्युत्पन्नम्, कर्मतया व्यज्यमानतया वा उपादानं स्वार्थस्य पक्ष इति पदम्, उपादीयते

वृत्तिः

अभ्युपगमसिद्धान्तं लक्षयति—(अपरीक्षितेति)।

अपरीक्षितस्य साक्षादसूत्रितस्य विशेषपरीक्षणं विशेषधर्मकथनम्। अभ्युपगमा-

---

(१) "पक्ष" इति ख-पु० नास्ति। (२) "क्रियासम्बन्धासम्बन्धापेक्षौ" इति ख-पु० पाठः। (३) "इति बुद्धिमतः" इत्यत्र "अतिबुद्धिमतः" इत्येवं पाठः समीचीनः प्रतिभाति, तथा हि वार्त्तिकस्य "अतिशयबुद्धिमतः" इत्यंशेन संवादसम्भवात्। (४) "-दशक्यत्वा-" इति क० नास्ति।

न्यायवार्त्तिकम्

क्रियाविशेषयुक्त इति। कारकशब्दश्च पक्षो न सिद्धान्तः, स कथं पर्यायो भविष्यतीति। सर्वतन्त्रसिद्धान्तश्च पक्षपर्याय इति, अहो पर्यायशब्देषु कौशलं भदन्तस्य, पक्षो विचारणाया-मिष्टोऽर्थ इति चाभिधीयते अविचारणीयश्चार्थः पक्षेऽन्तर्भवतीति चित्रम्। अथ पुनः सर्व-तन्त्रसिद्धान्तं नैव प्रतिपद्यते तेनापि सर्वतन्त्रसिद्धान्तं निह्नुवानेन तदसत्त्वप्रतिपादको न्यायो-ऽभिधेयः, यश्चासौ न्यायाभ्युपगमः स सर्वतन्त्रसिद्धान्त इति व्याहतं सर्वतन्त्रसिद्धान्तो नास्तीति। अथ न्यायमपि न प्रतिपद्यते, अनिवृत्तो व्याघातः वचनेऽवचने च, यदि ताव-न्न्यायोऽस्तीति ब्रवीति प्रतिपादयति च नास्ति चेति व्याहतम्। अथ ब्रवीति न(१) अवचनेऽस्यार्थो न सिध्यति। तस्मात् सर्वतन्त्रसिद्धान्तो नास्तीति सम्भ्रमव्याकृतम्। इदं च तावत् भवान् प्रष्टव्यो जायते किं पक्षः सिद्धान्तसामान्यं भवति, अथ संग्रहः पक्षशब्देन सिद्धान्तस्य, अथ सिद्धान्तस्य पक्षशब्दः पर्याय इति? तद्यदि तावत् सिद्धान्तसामान्यं तन्नास्त्यव्यापकत्वात्। न हि पक्षः सर्वतन्त्रसिद्धान्तं व्याप्नोति असाध्यत्वात्। यथा सत्ता द्रव्यगुणकर्माणि व्याप्नोति व्यापकत्वात् सामान्यं भवति, न चैवं पक्ष इति पर्यायशब्दोऽपि न भवतीत्युक्तम्। यदि च पक्षः सिद्धान्तपर्यायः सर्वतन्त्रसिद्धान्तः साध्यो जायते। सर्वतन्त्र-सिद्धान्तः साध्यश्चेति व्याघातः। अर्थापत्तितोऽधिकरणसिद्धान्तस्याभेद इति चेत्—अथापि (२)

न्यायवार्त्तिकतात्पर्यटीका

ऽनेनेति व्युत्पत्त्या क्रियासाधन इति प्रधानक्रियासाधने, क्रियाविशेषयुक्त इति अवान्तर-व्यापारयुक्ते, तेन हि प्रधानक्रियायां कारकाणां वैचित्र्यं भवतीति। यश्चासौ न्यायस्याभ्युपगमं इति। यावदभ्युपगतं न्याय्यसाधनं न्याय इति, तावदभ्युपगतं भवति प्रमेयसाधनं प्रमाणमिति, न च धर्मिण्यनभ्युपगते तदाश्रयोऽभ्युपगतो भवति। तस्मादुभयथाऽपि सर्वतन्त्रसिद्धान्तानप-ह्नुव इत्यर्थः। अथ संग्रहः पक्षशब्देनेति, यथा दण्डिशब्देन दण्डसंबन्धोपहितसीमानः समानासमानजातीयाः सर्वे संगृह्यन्ते, तथा पक्षशब्देनापीत्यर्थः। अयं तु कल्पः सर्वतन्त्र-सिद्धान्ताव्यापकत्वकथनेनैवार्थादपाकृत इति न पृथग् निराकृतः। पक्षशब्दो हि व्यज्यमानत्वो-पाधिनिबन्धनप्रवृत्तिः, न च व्यज्यमानत्वमस्ति निसर्गव्यक्ते सर्वतन्त्रसिद्धान्त इति भावः।

वृत्तिः

दिति ज्ञापकत्वे पञ्चमी, अभ्युपगमज्ञापकमित्यर्थः। विशेषपरीक्षया ज्ञायते सूत्रकृतो-ऽभ्युपगतमिदमिति। तथा च साक्षादसूत्रिताभ्युपगमोऽभ्युपगमसिद्धान्तः यथा मनस इन्द्रियत्वमिति ॥ ३१ ॥

समाप्तं न्यायाश्रयसिद्धान्तलक्षणप्रकरणम्।

---

(१) ख-पु०—"न" इति नास्ति। (२) अत्र ख-पु० "न"कारः अधिकः।

न्यायभाष्यम्

अथावयवाः—

(सू)—प्रतिज्ञाहेतूदाहरणोपनयनिगमनान्यवयवाः ॥ ३२ ॥

दशावयवानेके नैयायिका वाक्ये सञ्चक्षते, जिज्ञासा संशयः शक्यप्राप्तिः प्रयोजनं संशयव्युदास इति, ते कस्मान्नोच्यन्त इति । तत्राप्रतीयमानेऽर्थे प्रत्ययार्थस्य प्रवर्तिका

न्यायवार्त्तिकम्

मन्येथाः अर्थापत्तितोऽधिकरणसिद्धान्तो न भिद्यते, वाक्यार्थप्रतिपत्तौ तद्विपरीतवाक्यार्थप्रतिपत्तिरर्थापत्तिर्वाक्यानुषङ्गी योऽर्थः सोऽधिकरणसिद्धान्त इति ॥ ३१ ॥

प्रतिज्ञाहेतूदाहरणोपनयनिगमनान्यवयवाः । अवयवानां विभागोद्देशार्थं सूत्रम् । विभागोद्देशश्च नियमार्थः । किं नियन्तव्यम् ? दशावयवं त्र्यवयवं च वाक्यम्, एके तावद्ब्रुवते

न्यायवार्त्तिकतात्पर्यटीका

वाक्यार्थप्रतिपत्ताविति । पीनो देवदत्तो दिवा न भुङ्क्ते इत्यस्य दिवाभोजननिषेधोऽर्थः, तस्मात्तद्विपरीतरात्रिभोजनविधिरर्थापत्तिर्लोकसिद्धा, सा च न यथा प्रमाणान्तरफलं तथा द्वितीये निवेदयिष्यते (१) । तदनेन प्रबन्धेन भदन्तदिङ्नागोदितानि दूषणानि निराकृतानि ॥ ३१ ॥

प्रति—वाः (सूः ३२) ॥ वार्त्तिककारः सूत्रतात्पर्यमाह—अवयवानामिति । नन्ववयवसामान्यलक्षणमन्तरेणाशक्यो विभागोद्देशः, तद्विशेषलक्षणं च, न चेदं सामान्यलक्षणं विभागपरत्वादित्यत आह—सूत्रम् । विभागपरमप्येतदर्थादवयवसामान्यलक्षणं सूचयतीति सूत्रम् । अन्यपरादपि वाक्यात् प्रतीयमानोऽर्थोऽपेक्षितः स्वीक्रियत एवेति शाब्दाः । तत्रावयवपदादेव सामान्यलक्षणमवगम्यते । अवयवत्वेनैकवाक्यता दर्शिता, सा च पदानां परस्परासंप्रत्यायितापेक्षितसंबन्धयोग्यार्थप्रत्ययेन भवति, तस्मात्तथाविधार्थप्रत्यायनमेव प्रतिज्ञादीनामवयवसामान्यलक्षणं सिद्धमिति सूत्रमित्यनेन दर्शितं वार्त्तिककृतेति । विभागोद्देशतात्पर्यमाह—विभागेति । त्र्यवयवग्रहणमुपलक्षणार्थम्, द्व्यवयवमित्यपि द्रष्टव्यम् । अत्र भाष्यं तत्राप्रतीयमान इति,—सामान्येनावगतधर्मिणि विशेषेणाग्निमत्त्वादिना सन्दिग्धे, अग्निमत्त्वादितत्त्वावधारणं प्रत्ययः, तस्याऽर्थः

वृत्तिः

क्रमप्राप्तानवयवान् लक्षयितुं विभजते—(प्रतिज्ञेति) ।

अनेन विभागेन प्रतिज्ञाद्यन्यतमत्वमवयवत्वमिति लक्षणं सूचितम् ।

अत्र प्रतिज्ञादीनां पञ्चानामवयवत्वकथनाद्दशावयववादो व्युदस्त इति मन्तव्यम् ।

---

(१) स्वयमेव २।२।६ सूत्रटीकायाम् ।

न्यायभाष्यम्

जिज्ञासा। अप्रतीयमानमर्थं कस्माज्जिज्ञासते? तं तत्त्वतो ज्ञातं हास्यामि वोपादास्य उपेक्षिष्ये वेति। ता एता(१) हानोपादानोपेक्षाबुद्धयस्तत्त्वज्ञानस्यार्थः, स्तदर्थमयं जिज्ञासते। सा खल्वियमसाधनमर्थस्येति। जिज्ञासाधिष्ठानं संशयश्च व्याहतधर्मोपसङ्घातात् तत्त्वज्ञाने(२) प्रत्यासन्नः, व्याहतयोर्हि धर्मयोरन्यतरत्तत्त्वं भवितुमर्हतीति। स पृथगुपदिष्टोऽप्यसाधनमर्थस्येति। प्रमातुः प्रमाणानि प्रमेयाधिगमार्थानि, सा शक्यप्राप्तिर्न साधकस्य वाक्यस्य भागेन युज्यते प्रतिज्ञादिवदिति। प्रयोजनं तत्त्वावधारणमर्थसाधकस्य वाक्यस्य फलं नैकदेश इति। संशयव्युदासः प्रतिपक्षोपवर्णनं तत्प्रतिषेधेन(१) तत्त्वज्ञानाभ्यनुज्ञानार्थम्,(२) न त्वयं साधकवाक्यैकदेश इति। प्रकरणे

न्यायवार्त्तिकम्

दशावयवं वाक्यम्, अपरे त्र्यवयवमिति, उभयनियमज्ञापनार्थः प्रतिज्ञादीनां विभागोद्देश इति। कथं पुनर्जिज्ञासादयोऽवयवा न भवन्ति? पराप्रतिपादकत्वात्। परप्रतिपादका ये वाक्याङ्गभूता इतरेतराप्रत्यायितेनार्थेनार्थवन्तो वाक्याङ्गतामुपयान्ति तेऽवयवाः। वाक्याङ्गत्वमवयवार्थः। किं पुनर्वाक्यम्? यस्य प्रतिज्ञादिभिरुपकृतस्य विशेषावस्थापनमर्थः तद्वाक्यम्, वाक्यार्थं संहत्यैते पञ्च निष्पादयन्तीत्यवयवा इत्युच्यन्ते, न पुनर्जिज्ञासादयः परप्रतिपादका इत्यतो न वाक्यस्यावयवा

न्यायवार्त्तिकतात्पर्यटीका

प्रयोजनं हानोपादानोपेक्षाबुद्धयः, अस्य प्रवर्त्तिका उत्पादिका जिज्ञासा प्रत्ययसाधनानुसरणद्वारेण प्रत्यासत्तिः संशयतत्त्वज्ञानयोर्विशेषगता, न तु स्वरूपगता, संशयानन्तरया जिज्ञासया संशयस्य व्यवधानात्। शक्यं प्रमेयं तस्मिन् प्राप्तिः शक्तता प्रमाणानां प्रमातुश्च, सा च स्वरूपसहकारिभ्यां द्वेधा, तामिमां भाष्यकारोऽनया वाचोभङ्ग्या दर्शयति—प्रमातुः प्रमाणानीति। प्रतिज्ञादिवदिति वैधर्म्यदृष्टान्तः। प्रतिपक्षोपवर्णनमिति। यदि शब्दो नित्यः स्यान्न स्यात्कृतक इति अनित्यत्वस्य नित्यत्वं प्रतिपक्षः, तस्मिन् हेत्वभाववर्णनं न चायमकृतक इति, तदुपवर्णनप्रतिषेधे सति तत्त्वज्ञानाभ्यनुज्ञानार्थम्, तत्त्वं(३) ज्ञायतेऽनेनेति तत्त्वज्ञानं प्रमाणं तदभ्यनुज्ञानार्थं संशयव्युदास(४)स्तर्कापरनामा, व्युदस्यते ह्यनेन प्रमाणाभ्यनुज्ञानद्वारेण प्रमाणेतिकर्त्तव्यताभूतेन संशय इति। तदेतद्भाष्यजातं प्रश्नपूर्वकं वार्तिककृद्व्याचष्टे—कथं पुनरिति। न पुनर्जिज्ञासादयः परप्रतिपादकाः शब्दादवगताः सन्तः। अथ मा भूवन् परप्रति-

वृत्तिः

ते च यथा दर्शिता भाष्ये 'जिज्ञासा संशयः शक्यप्राप्तिः प्रयोजनं संशयव्युदासश्च' इति। एते प्रतिज्ञादिसहिता दश। व्याख्याताश्चैते तात्पर्यटीकायां प्रयोजनहानादिबुद्धयः,

---

(१) "तावता" इति आ०। (२) "क्व ज्ञाने" इति ग०। (३) क-पु०—"तत्त्वम्" इति नास्ति।
(४) भाष्यपाठव्युत्क्रमेणात्र "संशयव्युदास" इति पाठधारणं व्याख्यानावसरे अन्वयानुरोधादिति बोध्यम्।

न्यायभाष्यम्

तु जिज्ञासादयः समर्था अवधारणीयार्थोपकारात्(३)। तत्त्वार्थसाधक(४)भावात्तु प्रतिज्ञादयः साधकवाक्यस्य भागा एकदेशा अवयवा इति ॥ ३२ ॥

न्यायवार्त्तिकम्

इति। निश्चितत्वाच्च—निश्चितश्च साधयिता भवति। न तस्य जिज्ञासासंशयौ स्तः। प्रयोजनमपि साधनादेव गम्यते। शक्यप्राप्तिश्चेति—न ह्यशक्यमप्रयोजकं वा कश्चित् साधयतीति तस्मात् प्रयोजनशक्यप्राप्ती अपि न वाक्यावयवौ। प्रकरणे तु जिज्ञासादयः समर्था इति भाष्यम्। प्रकरणमेते उत्थापयन्तीति। न हि जिज्ञासादीनन्तरेण प्रकरणस्योत्थानमस्तीति प्रकरणोत्थापका नावयवाः(५) जिज्ञासादय इति। परप्रतिपादकत्वात्तु प्रतिज्ञादीनामयमधिकार इति ते उपदिश्यन्ते। अवयवमपि वाक्यं यथा न भवति तथोपनयनिगमनयोरर्थान्तरभावं वर्णयन्तो वक्ष्यामः(६) ॥ ३२ ॥

न्यायवार्त्तिकतात्पर्यटीका

पादकाः स्वप्रतिपादका एव कस्मान्न भवन्तीत्यत आह—निश्चितत्वाच्चेति। साधनादेव गम्यते प्राप्तं च ज्ञायत इत्यर्थः। शक्यप्राप्तिश्च ज्ञायत इत्यर्थः। तत् किं सर्वथैवानङ्गं जिज्ञासादय इत्यत उक्तं भाष्यकृता प्रकरणे तु जिज्ञासादयः समर्था इति। तदनुभाष्य व्याचष्टे—प्रकरणे त्विति। प्रकरणं कथाप्रवृत्तिः, तदुत्थापका जिज्ञासादयोऽवयवा अङ्गमित्यर्थः। ते च जिज्ञासादय उत्पन्नाः प्रकरणस्योत्थापकाः स्वरूपेण, न पुनः स्वज्ञानेन, येन स्वशब्दप्रतिपाद्याः सन्तः प्रकरणेऽप्यङ्गं भवेयुः, यथा प्रतिज्ञादयः स्वज्ञानेन स्वार्थान् प्रतिपादयन्तः। तस्मात्सर्वथैव जिज्ञासादिवाचकपदप्रयोगोऽनर्थक इति भावः। अत एवाह—परप्रतिपादकत्वादिति। "तु" शब्दो जिज्ञासादिभ्यो व्यवच्छिनत्ति। अवयवमपीत्यपिना ह्यवयवप्रतिषेधं समुच्चिनोति। उपनयनिगमनयोरित्यत्र प्रतिज्ञाया अपीति द्रष्टव्यम् ॥ ३२ ॥

वृत्तिः

तत्प्रवर्त्तिका जिज्ञासा, तज्जनकः संशयः, शक्यप्राप्तिः प्रमाणानां ज्ञानजननसामर्थ्यम्, संशयव्युदासस्तर्कः। अयमेवार्थो निबन्धे निष्टङ्कितः।

---

(१) "तत्प्रतिषेधे" इति ग-भा०। (२) "तत्त्वाभ्यनुज्ञानार्थम्" इति फ-ल-ग-भा०। (३) ज-पु०—"अवधारणीयार्थोपकारा" इत्येवं पाठः। (४) "तत्त्वसाधक" इति ग-फ०। "अयं साधक" इति ज-भा०। "तत्र साधक" इति टि०। (५) "नावयवा" इत्यत्र "अवयवा" इति ख०। (६) १।१।३९ सूत्रवार्त्तिके।

न्यायभाष्यम्

तेषां तु यथाविभक्तानाम्—

(सू)—साध्यनिर्देशः प्रतिज्ञा ॥ ३३ ॥

प्रज्ञापनीयेन धर्मेण धर्मिणो विशिष्टस्य परिग्रहवचनं प्रतिज्ञा(१) साध्यनिर्देशः अनित्यः शब्द इति ॥ ३३ ॥

न्यायवार्त्तिकम्

तेषां त्ववयवत्वेन सामान्येन संगृहीतानामितरेतरविशेषकं लक्षणमुच्यत इति । साध्यनिर्देशः प्रतिज्ञेति । तत्र—प्रज्ञापनीयधर्मविशिष्टो धर्मी साध्यस्तस्य निर्देशः—प्रतिज्ञा परिग्रहवचनम् । उदाहरणम्—अनित्यः शब्द इति ।

सिद्धत्वाद्धर्मिणो न साध्यतेति केचित्—धर्मी किल धर्मलक्षणः सिद्ध एव, सिद्धश्च साध्यो न भवति । नैष दोषः, प्रज्ञापनीयधर्मविशिष्टस्येति वचनात् । न ब्रूमो धर्मिमात्रं साध्यमपि तु प्रज्ञापनीयधर्मविशिष्टो धर्मीति । यदि प्रज्ञापनीयः ? न विशेषणम्, अथ विशेषणम् ? न प्रज्ञापनीयः, नासिद्धं विशेषणं भवतीति सिद्धेनायं विशिष्यते न साध्येनेति । सत्यमप्रज्ञातं विशेषणं न भवतीति, प्रज्ञातं त्विदमनित्यत्वं घटे शब्दस्य साध्यमिति । एवं तर्हि शब्दस्यानित्यत्वं साध्यं न शब्द इति ? शब्दस्येति विशेषणान्न दोषः—शब्दस्येति ब्रुवता नानित्यत्वमात्रं साध्यत्वेनानुज्ञायते न धर्मिमात्रम् । किं तर्हि ? धर्मिणः शब्दस्य प्रज्ञातस्यानित्यत्वस्यान्यधर्मत्वेन (२) योऽयं विशेषणविशेष्यभाव इतरेतरनियामकत्वेन नियमः स साध्यः स चोभयाश्रयो भवति । उभयाश्रयत्वे सति किमुक्तम्भवति ? धर्मी विशेषणं धर्मो वा विशेषणमिति शब्दस्यानित्यत्वमनित्यत्वस्य वा शब्द इति ? धर्मी विशिष्यत इति युक्तम्, सामान्यतोऽधिगतत्वाद्विशेषतोऽनधिगतत्वाच्च विशेषप्रतिपादकत्वाच्चानुमानस्य । न च पुनर्धर्मस्य सामान्या-

न्यायवार्त्तिकतात्पर्यटीका

साध्य—ज्ञा (सू, ३३) ॥ परिगृह्यतेऽनेनेति परिग्रहः स च वचनं चेति **परिग्रहवचनम्** । उदाहरणमनित्यः शब्द इति, तदाक्षिप्य वार्त्तिककारः समाधत्ते—सिद्धत्वादिति । अग्निमानेव नातद्वान् नास्याग्निनेदानीमयोगः । स च पर्वतेऽग्निमति साध्यमाने विशेषणविशेष्ययोः परस्पर-

वृत्तिः

जिज्ञासा विप्रतिपत्तिरिति कश्चित् ।

एतेषां च न न्यायावयवत्वं न्यायाघटकत्वात्, न वा न्यायजन्यबोधानुकूलत्वेनैवावयवत्वमतिप्रसङ्गात्(१)प्रयोजनाव्याप्तेश्च ॥ ३२ ॥

---

(१) "प्रतिज्ञा" इति वि० टि० नास्ति । (२) "प्रज्ञातस्य नितात्वस्याधर्मत्वेन" इति ख० ।
(३) "बोधानुकूलत्वेनैवावयवत्वम् एकदेशस्यापि तत्त्वप्रसङ्गात्" इति आ-व० ।

न्यायवार्त्तिकम्

धिगमोऽस्ति। न नास्ति, किमयं धर्मः शब्दस्य उतान्यस्य ? घटस्येति (१), एवं तर्हि शब्देऽनित्यत्वमित्ययमर्थः साध्यः, तस्य च न कृतकत्वादियोग इति युक्तम्, प्रज्ञापनीयधर्मविशिष्टो धर्मी साध्यः तस्य निर्देशः प्रतिज्ञा।

उभयावधारणप्राप्तावन्यतरावधारणे च दोषः, यदि साध्यनिर्देशः प्रतिज्ञेति प्रतिज्ञालक्षणं ततः पूर्वोत्तरे द्वे अवधारणे न कल्प्येते। कथम् ? साध्यनिर्देश एव प्रतिज्ञेति प्रतिज्ञाऽवधृता, न साध्यनिर्देशः, प्रतिज्ञाऽन्यथा नास्ति, साध्यनिर्देशोऽन्यथाऽप्यस्तीति प्राप्तम्। ततश्च साध्यनिर्देशो न प्रतिज्ञाऽवधृताऽतो न साध्यनिर्देशो लक्षणम्, (२) व्यतिरेकित्वादिति। अथ साध्यनिर्देशः प्रतिज्ञैवेति साध्यनिर्देशोऽवधृतः, न च प्रतिज्ञा, साध्यनिर्देशोऽन्यथा नास्ति, प्रतिज्ञाऽन्यथाऽप्यस्तीति(३) ? एवमपि साध्यनिर्देशो न प्रतिज्ञालक्षणम् अव्यापकत्वात्। यदपि व्यतिरेकि तदप्यलक्षणम्, यथा विषाणित्वं गोः। यदप्यव्यापकं तदप्यलक्षणं (४) यथा गन्धवत्त्वं द्रव्यस्य। अथ पूर्वोत्तरेऽवधारणे न क्रियेते, तथापि किल वाक्यमनर्थकं भवति, न चान्या गतिरस्ति, तस्मात् साध्यनिर्देशः प्रतिज्ञेति न युक्तम्।

सर्वस्मिन् वाक्येऽवधारणमिति (५) तु न बुद्ध्यामहे—तद्यथा—गोपालकेन मार्गेऽपदिष्टे एष पन्थाः स्रुघ्नं गच्छतीति नावधारणस्य विषयं पश्यामः, अवधारणस्य तु विषयः सामान्यश्रुतौ नियमः—येन वाक्येन समानश्रुत्याऽनेकार्थो गम्यते तत्रातिप्रसक्तावतिप्रसङ्गनिराकरणार्थमवधारण-

न्यायवार्त्तिकतात्पर्य्यटीका

संबन्धलक्षणो नियमोऽर्थात् सिध्यति, न तु साक्षादयोगव्यवच्छेद एव साध्यः, लिङ्गस्यान्यापोहविषयत्वानभ्युपगमात्। तस्य निर्देश इति निर्दिश्यतेऽनेनेति हि प्रतिज्ञावाक्यमुच्यते।

अत्रान्यव्यवच्छेदं वाक्यार्थं मन्वानो भदन्तः प्रतिज्ञालक्षणमतिव्याप्त्यव्याप्तिभ्यामाक्षिपति—उभयेति। उभयोरवधारणयोः प्राप्तौ संशये किमिदमवधार्यते किं चेदमिति प्रसक्तावित्यर्थः। प्रतिज्ञाऽवधृतेति, यत एवकरणं ततोऽन्यत्रावधारणमिति हि शाब्दा इति भावः। व्यतिरेकित्वादिति, व्यभिचारित्वादित्यर्थः। समाधत्ते—सर्वस्मिन् वाक्य इति। संसर्गो वाक्यार्थ इत्युत्सर्गः, क्वचित्पुनरन्यव्यवच्छेदोऽपीति। सामान्यश्रुतौ नियम इति। यथेन्द्रियार्थसन्नि-

वृत्तिः

प्रतिज्ञां लक्षयति—(साध्यनिर्देश इति)।

साधनीयस्यार्थस्य यो निर्देशः स प्रतिज्ञा। साधनीयश्च वह्निमत्त्वादिना पर्वतादिः,

(१) "घटस्य" इति ख-पु० नास्ति। (२) "ततः पूर्वोत्तरे" इत्यत आरभ्य—"लक्षणम्" इत्यन्तः पाठः ख-पु० नास्ति। (३) "प्रतिज्ञाऽन्यथाप्यस्तीति" इत्यंशः ख-पु० नास्ति। (४) "तदप्यलक्षणम्" इत्यंशः क-पु० नास्ति। (५) "असाधारणम्" इति ख०।

न्यायवार्त्तिकम्

मिति, न पुनः साध्यनिर्देशः प्रतिज्ञेत्युक्ते क्वचित् प्रसङ्गोऽस्ति यन्निराकरणायावधारणं क्रियेत। सर्वत्र च सावधारणं कुर्वाणो लोकं बाधत इति। यत्र च विशेषणस्यावकाशस्तत्रावधारणस्यापीति नायं दोषः पूर्वोत्तरेऽवधारणे न कल्प्येते इति। ननु साध्यनिर्देशः प्रतिज्ञेत्युक्ते साध्ययोर्हेतुदृष्टान्तयोरपि प्रसङ्गो यथा नित्यः शब्दश्चाक्षुषत्वात्, नित्यः शब्दोऽस्पर्शत्वाद् बुद्धिवच्चेति। न, सूत्रार्थापरिज्ञानात्। साध्यनिर्देशः प्रतिज्ञेति प्रज्ञापनीयधर्मविशिष्टस्य धर्मिणः परिग्रहवचनम्। न च चाक्षुषत्वं प्रज्ञापनीयधर्मविशिष्टस्य धर्मिणः परिग्रहवचनम् अपि तु धर्मनिर्देशोऽयं चाक्षुषत्वादिति। तथा बुद्धेर्नित्यत्वमपि। अथ पुनः साध्यनिर्देशग्रहणादसाध्यनिर्देशनिवृत्तिः—साध्यनिर्देशग्रहणात् किलासाध्यनिर्देशो निवर्त्यते। असाध्यं च द्वेधा सिद्धमनुपपद्यमानसाधनं च। तत्र साध्यनिर्देश इत्यनेन वचनेनोभयं निवर्त्यते सिद्धमनुपपद्यमानसाधनं च। तत्रानुपपद्यमान(१)साधनं शब्दा(२)-ऽचाक्षुषत्वं बुद्धिनित्यत्वं च। तस्मान्न तत्र प्रसङ्गः। अथ (३) पुनः कृतकत्वाद्यन्यतरपक्षसिद्धं

न्यायवार्त्तिकतात्पर्य्यटीका

कर्षोत्पन्नमित्युक्ते ज्ञानं सुखादि च सामान्येन प्राप्तम्, तत्र ज्ञानग्रहणं न विधायकम्, प्राप्तत्वादतः सुखादिव्यवच्छेदफलं विज्ञायते, यदि त्वस्मद्दर्शनमतिक्रम्य सर्वत्रावधारणं करोति, ततोऽस्य लोकविरोध इत्याह—सर्वत्र चेति। तत् किं लोके न क्वचिदवधारणमित्यत्राह—यत्र चेति। चोदयति—ननु चेति(४)। सिद्धप्रतिक्षेपः साध्यशब्दस्यार्थ इत्यभिप्रायः। परिहरति—न, सूत्रार्थेति। सर्वसन्देहेष्विदमुपतिष्ठते व्याख्यानतोऽर्थप्रतिपत्तिरिति भावः। चोदकः स्वाभिप्रायमुद्घाटयति—अथ पुनरिति। असाध्यनिर्देशः सिद्धनिर्देशः तस्य निवृत्तिः साध्यशब्दादवगम्यते, न तु प्रज्ञापनीयोऽर्थ इत्यर्थः। परिहरति—असाध्यं चेति। भवेदेतद्यदि सिद्धमात्रमसाध्यं स्यादपि त्वनुपपद्यमानं साधनं सिद्धिर्यस्य तदप्यसाध्यम्, तथा चासिद्धस्य चाक्षुषत्वादेर्निवृत्तिरित्यर्थः। पुनश्चोदयति—अथ पुनरिति। न कृतकत्वादि साध्यं नाप्यनुपपद्यमान-

वृत्तिः

तथा च पक्षतावच्छेदकविशिष्टपक्षे साध्यतावच्छेदकविशिष्टवैशिष्ट्यबोधकः शब्द इत्यर्थः। निगमनवारणाय च साध्यांशे साध्यतावच्छेदकातिरिक्ताप्रकारकत्वं (५) वाच्यम्, तदर्थश्च साध्यतावच्छेदकप्रकारताविलक्षणप्रकारताशून्यत्वम्, तेन प्रमेयवतः साध्यत्वे नाप्रसिद्धिः। उदासीनवाक्यवारणाय च न्यायान्तर्गतत्वेन विशेषणीयम्। न्यायत्वं च धातुत्वादि-

---

(१) "तत्रानुपलभ्यमान" इति ख०। (२) "शब्दा" इति ख-पु० नास्ति। (३) "अथ" इत्यत्र "न" इति ख०। (४) वार्त्तिके "च"कारो नास्ति। (५) "-रिक्तप्रकारकत्वम्" इति व०।

न्यायवार्त्तिकम्

साध्यतयाप्युपाददीत (१) तदा कृतकत्वादेः साध्यनिर्देशस्य प्रतिज्ञात्वं प्राप्तमिति। नैष दोषः। विकल्पानुपपत्तेः, यदि तावदेवं (२) ब्रवीति कृतकत्वं साध्यमिति ? तदा सूत्रार्थापरिज्ञानादिति परिहारः। अथ कृतकः शब्द इत्येतत् साध्यमित्येवं प्रत्यवतिष्ठते, तदाभ्युपगम एव दोषत्वेन दर्शित इति न किञ्चिद् बाध्यते। यच्चेदमुच्यते—असाध्यनिर्देशनिवृत्तिद्वारेण साध्यनिर्देशः प्रतिज्ञेत्युच्यत इति, तद्विधीयमानप्रतिषिध्यमानशब्दार्थाभ्युपगमान्नियमो न युक्तः—क्वचिद्वाक्ये विधीयमानोऽर्थोऽभिधीयते, क्वचित् प्रतिषिध्यमान इति, एकान्तवादिनस्तु दोषः, यथा (३) च न प्रतिषिध्यमान एव पदार्थो भवति तथोपरिष्टाद्वक्ष्याम इति। साध्यनिर्देश इति च प्रतिज्ञायां साध्ययोर्हेतुदृष्टान्तयोः प्रसङ्ग इति। न प्रसङ्गः, सिद्धान्तविशेषणत्वात् साध्यशब्दस्य, सिद्धान्तविशेषणोऽयं साध्यशब्दः न साध्यमात्रम्, तथा च कः प्रसङ्गो हेतुदृष्टान्तयोः, सिद्धान्तश्चानन्तरोक्त्या साध्यशब्दस्य विशेषणं भवति सिद्धान्तानन्तरमवयवाभिधानात् (४)। यद्यनन्तरोक्त्या सिद्धान्तो विशेषणं तन्निर्देशः प्रतिज्ञेति कार्यम् ? न, सर्वतन्त्रसिद्धान्तनिराकरणार्थत्वात्। यदि तन्निर्देशः प्रतिज्ञेत्युच्यते सर्वतन्त्रसिद्धान्तोऽपि प्रकृतत्वात् तच्छब्देनानुकृष्येतेति तन्निर्देशोऽपि प्रतिज्ञेति स्यात्, अतः साध्यग्रहणेन साध्यसिद्धान्तः सम्बध्यते, न सर्वतन्त्रसिद्धान्त इति सामर्थ्यात् सर्वतन्त्रसिद्धान्तनिराकरणमिति। यद्यप्ययं सामान्यशब्दः तन्निर्देशः प्रतिज्ञेति, तथापि सामर्थ्यात् सर्वतन्त्रसिद्धान्तो निराक्रियते, सर्वतन्त्रसिद्धान्तस्यासाध्यत्वात्, इतरस्य च प्रतितन्त्रादेरवस्थायां

न्यायवार्त्तिकतात्पर्य्यटीका

साधनम्, नापि कृतकत्वादि पराङ्गत्वेनोपात्तं येनाप्रज्ञापनीयं स्यादित्यर्थः। परिहरति—नैष दोष इति। प्रज्ञापनीयेन धर्मेण धर्मिणो विशिष्टस्य परिग्रहवचनमिति सूत्रार्थः; न पुनर्धर्ममात्रपरिग्रहवचनमिति। अभ्युपगम्य व्यवच्छेदं शब्दार्थमेतदुक्तम्, परमार्थतस्त्वनियमः क्वचित् संसर्गः क्वचिद् व्यवच्छेद इत्यत आह—यच्चेदमिति। इतोऽपि नासिद्धयोर्हेतुदृष्टान्तयोः प्रसङ्ग इत्याह—साध्यनिर्देश इति च प्रतिज्ञायामिति। प्रमाणतन्त्रः खल्वभ्युपगमः सिद्धान्तः, न च चाक्षुषत्वादिषु प्रमाणमूलता, तदभिमानोऽपि बाधकादपाकृत इति। ननु यदि सर्वतन्त्रसिद्धान्तातिरिक्तानां सिद्धान्तान्तराणां साध्यत्वं तर्हि साध्येनैव चरितार्थत्वादपार्थकं पृथगभि-

वृत्तिः

वत्परिभाषाविशेषविषयत्वं तत्तदानुपूर्वीकपदकदम्बत्वादिकं वा, तथा च (५) न्यायान्तर्गतत्वे

---

(१) "साध्यतयाऽप्युपाददीत" इत्यत्र "साध्यतयोपनीयत" इति ख०। (२) "तावत्" इति ख०। (३) "तथा" इति ख०। (४) "सिद्धान्तोऽनन्तरमवधारितत्वात्" इति ख०। (५) "न्यायत्वं च" इत्यारभ्य "तथा च" इत्यन्तः पाठः आ-व-पु० नास्ति।

न्यायवार्त्तिकम्

साध्यत्वादिति। उदाहरणम् ब्राह्मणान् भोजयेति अशेषब्राह्मणभोजनस्याशक्यत्वात् सामर्थ्यान्नियम इति। यदि सामर्थ्यमास्थीयते समस्तस्यानभिधानम्, तन्निर्देशः प्रतिज्ञेत्येतदपि न कर्तव्यम्, प्रतिज्ञा (१) प्रतिज्ञेति वक्तव्यम्, सामर्थ्यतो नियमो गम्यत इति। मा वोचः, किन्नो बाध्यत इति? कथं न बाध्यते, यदभ्युपगतं तन्निवर्तते तन्निर्देशः प्रतिज्ञेति। जिज्ञासादिविशेषणाद्वा न प्रसङ्गः साध्यनिर्देशः प्रतिज्ञेति। जिज्ञासादिभिः प्रकरणोत्थापनावयवैर्विशेषितमिदं वाक्यं साध्यनिर्देशः प्रतिज्ञेति। यस्मिन्नर्थे जिज्ञासादयः सोऽर्थः साध्य इति तस्य निर्देशः प्रतिज्ञेति। तथा च हेतुदृष्टान्तयोः कः प्रसङ्गः। अर्हत्यर्थे वा कृत्याभिधानम्—साध्यनिर्देशः प्रतिज्ञेत्यर्हत्यर्थे कृत्यः, साधनमर्हतीति साध्यः, तस्य निर्देशः प्रतिज्ञा। न च हेतुदृष्टान्तौ साधनार्हावतो न प्रसङ्गः।

कर्मकरणयोर्धर्मभेदाद्वा अन्यः कर्मधर्मोऽन्यश्च करणधर्म इति, "कर्तुरीप्सिततमं कर्म"ति कर्मधर्मः, साधकतमं करणमिति करणधर्मः (२)। न चेतरस्य धर्म इतरधर्मो भवितुमर्हतीति। कर्मनिर्देशश्चायं साध्यनिर्देशः प्रतिज्ञेति करणनिर्देशश्चाक्षुषत्वादिति, अतोऽपि न प्रसङ्गः। साध्यासिद्धसिद्धभेदाद्वा,—अन्यत् साध्यमन्यत् सिद्धमन्यच्चासिद्धमिति। साध्यमन्यतरपक्षसिद्धमन्यतरं प्रति कर्मतया यदुपादीयते। उभयपक्षासम्प्रतिपन्नमसिद्धम्। उभयपक्षसम्प्रतिपन्नं सिद्धमिति। तेन यथा सिद्धमित्युक्ते न साध्ये नासिद्धे च

न्यायवार्त्तिकतात्पर्यटीका

धानमेतेषाम्, अत उक्तमवस्थायामिति, विमत्यवस्थायाम्, सर्वतन्त्रे तु विमतिरशक्येत्युक्तम्। परिहारान्तरमाह—जिज्ञासादीति। विभागसूत्रेण प्रकरणोत्थानहेतवो वाक्यावयवतया निराकार्यतया जिज्ञासादयो बुद्धिस्थीकृतास्तेन यत्र जिज्ञासादयः स साध्यः, न च चाक्षुषत्वादिषु प्रमाणबाधितेषु सन्त्येत इत्यर्थः। परिहारान्तरमाह—अर्हत्यर्थ इति।

अपरमपि परिहारमाह—कर्मकरणयोर्वेति। एवं तावद् व्युत्पत्त्यादिपर्यालोचनया साध्यशब्दस्य न हेतुदृष्टान्तयोः प्रसङ्ग इत्युक्तम्, संप्रति लोक एवातिस्फुटास्तिस्रो विधा अर्थानाम्, कृतमत्र सूक्ष्मानुसरणेनेत्याह—साध्याऽसिद्धसिद्धभेदादिति। अन्यतरासिद्धयोर्हेतुदृष्टान्तयोः प्रसङ्गो मा

वृत्तिः

सति प्रकृतपक्षतावच्छेदकावच्छिन्नपक्षकप्रकृतसाध्यतावच्छेदकावच्छिन्नसाध्यविषयताविलक्षणविषयताकबोधाजनकत्वे सति प्रकृतपक्षे प्रकृतसाध्यबोधजनकत्वं तत्।

प्रतिज्ञात्वावयवत्वादिकं परिभाषाविषयत्वरूपं तत्तद्व्यक्तित्वरूपं वेत्यपि वदन्ति ॥३३॥

(१) "प्रतिज्ञा" इति ख-पु० नास्ति। (२) "साधकतमं करणमिति करणधर्मः" इति ख-पु० नास्ति।

न्यायवार्त्तिकम्

प्रसङ्गः, तथा साध्यमित्युक्ते नासिद्धे सिद्धे च प्रसङ्गः। अथाप्रसक्तमपि देश्यते, सर्वेऽर्थाः सिद्धा अपि प्रतिज्ञात्वेन देशनीया भवन्ति। अथवा साध्यनिर्देशः प्रतिज्ञेति प्रतिज्ञाद्यवयवविषयो योऽर्थः स साध्यः—यः प्रतिज्ञादीनामवयवानां विषयो धर्मो प्रसिद्धधर्मविशिष्टः स धर्मान्तराधिकरणत्वेन साध्यते, तथा च (१) हेतुदृष्टान्तयोः कः (२) प्रसङ्गः।

न चेदयं प्रसङ्गोऽस्ति तस्मादिष्टग्रहणमनर्थकम्, साध्यनिर्देशः प्रतिज्ञेति किल साध्यस्येष्टग्रहणेनाविशेषितत्वात्। साध्ययोर्हेतुदृष्टान्तयोः प्रसङ्ग इति मन्यमानैः कैश्चिदन्यथा पक्षलक्षणानि क्रियन्ते, तद्यथा—पक्षो यः साधयितुमिष्ट इति। अत्रेष्टग्रहणं तावदनर्थकं साध्यपदेन हेतुदृष्टान्ताभासोक्तेर्निराकृतत्वात् तन्निराकरणार्थमिष्टग्रहणमित्ययुक्तम्। कर्मग्रहणाच्चावाप्तमेतदिष्टमीप्सितमिति चानर्थान्तरम्। अथाप्यनिष्टपक्षव्युदासार्थमिष्टग्रहणं क्रियते अर्थतः किलास्य नेष्टं भवति यत् स्ववचनादिना विरुध्यत इति, यथाऽवाचकाः शब्दा इति, अवाचकत्वं च शब्दानां प्रतिज्ञायते शब्दा एवार्थप्रत्यायनायोच्चार्यन्त इति व्याहतम्। अनुष्णोऽग्निरिति प्रत्यक्षविरोधः।

अश्रावणः शब्द इति प्रत्यक्षविरोधं केचिद्वर्णयन्ति। तदयुक्तम्। इन्द्रियवृत्तीनामती-

न्यायवार्त्तिकतात्पर्य्यटीका

भूदिति कर्मतया ते उपादीयन्त इत्युक्तम्। उभयपक्षेति, पक्षशब्दो बहुवचनः, संप्रतिपन्नमुभयोर्वर्गयोरित्यर्थः। परिहारान्तरमाह—अथ वेति। अवयवानामेतत्प्रकरणम्, तेषां च प्रधानैकार्थप्रत्यायनेनैकवाक्यतामापन्नानामवयवभावः, यत्प्रत्यायनोद्देशेन ते प्रवर्त्तन्ते तत् प्रधानम्, धर्मी च सिषाधयिषितधर्मविशिष्टः, तथा न च साक्षात्तत्प्रत्यायनाय ते विभवन्तीति तदर्थं साधने व्याप्रियन्ते, तेन सिषाधयिषितधर्मविशिष्टो धर्मी तेषां प्रधानं विषयः(३), प्रधानं च प्रथमं बुद्धौ विपरिवर्त्तत इति साध्यशब्देन स एवोच्यते, न तु हेतुदृष्टान्तावप्रधाने इत्यर्थः।

तदेवमदुष्टमस्मल्लक्षणमिति यदस्मल्लक्षणमनेन दोषेण भङ्क्त्वा भदन्तेनान्यथा लक्षणं प्रणीतम्, तदेव दुष्टमित्याह—न चेदयमिति। ननु यत्र साध्यपदमस्ति भवतु तत्रेष्टग्रहणमनर्थकम्, न त्वस्मिंस्तदस्तीति कथमिष्टग्रहणमनर्थकमित्यत आह—कर्मग्रहणाच्चेति। मा भूत् साध्यपदम्, अस्ति तु पक्षपदम्, तदपि हि पच्यमानं व्यज्यमानं साध्यमेवाह—तच्च कर्म चेप्सितमिति(४), प्राप्तुमिष्टमित्यर्थः। चोदयति—अथाप्यनिष्टेति। नन्वनिष्टः पक्ष इति विप्रतिसिद्धमित्यत उक्तम् अर्थतः किलेति। वस्तुव्यवस्थापनाय प्रवृत्तस्य तादृशं नेष्टमित्यर्थः।

बौद्धपक्षमुपन्यस्यन्नेव मध्ये तदभिमतं किञ्चिन्निराकरोति—अश्रावण इति। कृतव्याख्यानमेतत्-

(१) "तथा च" इत्यत्र "न तथा" इति ख०। (२) "कः" इति ख-पु० नास्ति। (३) क-पु० "विशिष्टश्च धर्मी तेषां प्रधानं विषयश्च" इति पाठः। (४) वार्त्तिके "तच्च कर्म च" इत्यंशो नास्ति, किन्तु "एतदिष्टमीप्सितम्" इति पाठो दृश्यते।

न्यायवार्त्तिकम्

न्द्रियत्वात्—इन्द्रियवृत्तयोऽतीन्द्रिया इदमनेनेन्द्रियेण गृह्यते नेदमनेनेति न कस्यचित् प्रत्यक्षमस्ति किन्तु तद्भावाभावानुविधानात्। रूपादिज्ञानैरिन्द्रियवृत्तयोऽनुमीयन्ते तस्मान्नेदमुदाहरणम्। उदाहरणन्त्वनुष्णोऽग्निरिति युक्तम्। आगमविरुद्धमपि वैशेषिकस्य नित्यः शब्द इति, यथा इदमपि नागमविरुद्धमिति पश्यामः। न हि वैशेषिकेण शब्दानित्यत्वमागमतः प्रतिपन्नम्, अपि त्वनुमानात् कारणतो विकारात् (१) इत्येवमादेः, एतदप्यनुमानविरुद्धमेव। अथ सूत्रकारवचनात् प्रतिपन्नम् इत्यागमविरोधः ? ननु च नित्यो घट इत्ययमप्यागमविरोधः प्राप्तः, तस्माद् ब्राह्मणेन सुरा पेयेत्यागमविरोधः। प्रसिद्धिविरुद्धं तु न बुध्यामहे कोऽयं प्रसिद्धिविरोध इति ? प्रसिद्धिः प्रत्यक्षादीनां प्रमाणानामन्यतमेनार्थप्रतिपत्तिः यथा अचन्द्रः शशीति। तस्मात् पूर्वप्रमाणविरोध एवान्तर्भवतीति न प्रसिद्धिविरोधाभिधाने पृथक् प्रयोजनं पश्यामः। शक्यं तु प्रतिपत्तुं सर्व एवायं प्रसिद्धिविरोध इति। एतदर्थनिराकरणार्थमिष्टग्रहणं पठन्ति।

एतच्च सर्वं न युक्तमिति पश्यामः। कथम् ? स्वार्थापवादादिदोषाणां प्रतिज्ञादोषत्वेनाभ्युप-

न्यायवार्त्तिकतात्पर्य्यटीका

प्रथमसूत्रे(२)। अपि त्वनुमानतः कारणतो विकारादेः, (३) न हि व्यङ्ग्यं व्यञ्जकं कारणमनुविधत्ते। नो खलु महति प्रदीपे घटो महानल्पे वाऽल्प इति, महति तु कारणे महान् शब्द इति। तस्मात्कारणतो विकारात् कार्यः शब्दो, यथा महद्भिः स्थूलपिण्डैरारब्धोऽवयवी महानिति। तदनेन प्रत्ययभेदभेदित्वं हेतुरुपलक्षितो भवति। आदिशब्देन सतः शब्दस्याभिव्यक्तौ दोषादित्येवमादयो ग्राह्याः। दोषश्च दर्भेध्मादिवदुपयुक्तानामृचां निरिष्टिकत्वेन पुनरुपयोगः, कार्यत्वे पुनरन्यत्वेन निरिष्टिकत्वमित्यर्थः। यद्यप्यागमोऽपि शब्दानित्यत्वेऽस्ति यथा 'सोमं राजानमसृजत ततस्त्रयो वेदा असृज्यन्ते'ति, तथाऽपि "नासदासीन्नो सदासीदाम्नाय एव खल्वयमग्र आसीदि"ति नित्यत्वेऽप्यागमदर्शनादनिश्चयादनुमानस्यैवात्र प्रामाण्यम्, तथा चानुमानविरोध इति। प्रसिद्धिविरोधं तु न बुध्यामहे प्रमाणविरोधाद्भेदेन। अबोधमाह—कोऽयं प्रसिद्धिविरोध इति। एकग्रन्थेनाह—प्रसिद्धिः प्रत्यक्षादीनामिति। अचन्द्रः शशीति, यदि चन्द्रे शशिशब्दवाच्यत्वं निषिध्यते, तदा लोकव्यवहारावगतान्वयव्यतिरेकप्रभवानुमानविरोधः। अथ विकल्पज्ञानगोचरत्वनिषेधः, ततो भवतः स्वसंवेदनप्रत्यक्षविरोधः अस्माकं तु मानसप्रत्यक्षविरोध इति सर्वथा न प्रमाणादन्या प्रसिद्धिरिति। तदेवं बौद्धपक्षमुपन्यस्य तदुक्तान्युदाहरणानि दूषयित्वा बौद्धपक्षमुपसंहरति—एतदर्थेति।

तदेतद्दूषयति—एतच्चेति। वस्तु हि यादृशं स्वकारणादुत्पन्नं तादृशमेव तत्, न तस्यान्यथा

---

(१) "कारणतोऽधिकारात्" इति ख०। (२) ४१ पृष्ठे—"यत् पुनर्दिङ्नागेन" इत्यादिभिः कतिपयपंक्तिभिः। (३) वार्त्तिके तु—"अपि त्वनुमानात् कारणतो विकारात्" इत्यत्र पाठः।

न्यायवार्त्तिकम्

गमात् सर्व एते स्वार्थापवादादिदोषाः प्रतिज्ञादोषत्वेन सम्भवन्ति, न पक्षदोषत्वेन। कथमिति ? अर्थस्य तादवस्थ्यात्—यथाभूतोऽर्थोऽभिधीयमानः तथाभूत एवानभिधीयमान इति। वचनमपि तर्ह्येवमेवेति चेत् (१) ? वचनेऽप्येते दोषा मा भूवन्। सत्यममी नार्थदोषाः, न वचनदोषाः, किन्तु पुरुषदोषाः, ये हि कर्तृदोषास्ते क्रियाद्वारेण उद्भाव्यन्ते इति क्रियायां कर्तृदोषमुपचर्य दुष्टा क्रियेत्युच्यते एवं वक्तृदोषान् वचने उपचर्य दुष्टं वचनमित्युच्यते। मुख्यतस्तु नार्थे दोषो (२) न वचन इति। अर्थस्य स्वक्रियासामर्थ्यात् सर्वोऽर्थः स्वस्यां स्वस्यां क्रियायां समर्थः स तु स्वक्रियाव्यतिरेकेण क्रियान्तरे विनियुज्यमानः कर्तुरेवाकौशलं प्रकाशयति। एवं वचनमपि स्वस्मिन्नर्थे समर्थं विषयान्तरे तु प्रयुज्यमानं वक्तुः संमोहं प्रकटयति।

प्रतिज्ञायाः पक्षविषयत्वात् प्रतिज्ञादोषाः पक्षदोषा इत्युच्यन्ते। नैतद्युक्तम्, हेत्वादिदोषाणामपि पक्षदोषत्वप्रसङ्गात्। एवं सति हेत्वादयोऽपि पक्षविषया (३) इति कृत्वा हेत्वादिदोषा अपि पक्षदोषा भवन्तु, ततश्च दूषणं पक्षदोषा इति वक्तव्यम्, न पुनर्दूषणानि न्यूनतावयवोत्तरदोषाक्षेपभावोद्भावनानीति। अथ वाच्यवाचकभावेन नियमो भविष्यतीति न साध्यसाधनभावेनेति ? नैतद् युक्तम्, प्रमाणाभावादिति साधनविषयत्वेनावतिष्ठते पक्षो वचनविषयत्वेन च,

न्यायवार्त्तिकतात्पर्य्यटीका

भाव इति न तत्र दोषो निविशते, तद्विषयाणि पदान्यपि प्रत्येकमदुष्टान्येव, या पुनः पौरुषेयी दृष्टमन्यत्रार्थमन्यत्र समारोप्य भ्रान्त्या वा परविप्रलम्भाय वा प्रतिज्ञादिरूपेण वाक्यक्रिया, सा स्ववचनविरोधादिशालिनी दुष्टा, तद्द्वारेण पुरुषो निगृह्यते नार्थो न पदानीति। स्वार्थापवादः स्ववचनविरोधः कर्तृदोषो भ्रमो वा विप्रलम्भो वा क्रियायामुपचर्यते। न च क्रियाया भ्रमो वा विप्रलम्भो वा, तयोरभिप्रायभेदतया पुरुषधर्मत्वात् क्रियाया वस्तुबाधनात् पुरुषाभिप्रायावगतिरिति क्रियाद्वारेणेत्युक्तम्।

चोदयति—प्रतिज्ञाया इति। तदेतदतिप्रसङ्गेन दूषयति—नैतद् युक्तं हेत्वादीति। न पुनर्दूषणानि न्यूनतावयवोत्तर(४)दोषाक्षेपभावोद्भावनानीति त्रैरूप्यसंपन्नो हेतुः पूर्णः, स त्रिषु रूपेष्वन्यतमेन रूपेण रहितो न्यूनोऽसिद्धो वा विरुद्धोऽनैकान्तिको वा भवतीति सोऽयं न्यूनतादोषो हेतोः। अवयवदोषश्च प्रतिज्ञादोषः स्ववचनविरोधादिः, हेतुदोषोऽसिद्धत्वादिः, एवमुदाहरणदोषः साध्याविकलत्वादिः, उत्तरदोषो जातिः प्राप्त्यप्राप्तिसमादिः, तस्याक्षेप उपादानं स्वीकार इति यावत्। भावोऽप्रतिभादिः, स हि

(१) "चेत्" इति ख-पु० नास्ति। (२) "वस्तुतस्तु पक्षदोषो नार्थे" इति ख०। (३) "पक्षविशेषा" इति ख०। (४) आदर्शस्थः "न्यूनतावयवान्तर" इत्येवं पाठः प्रामादिकः, उपजीव्ये वार्त्तिके तादृक्पाठाभावात्, तात्पर्ये च द्वित्रपंक्त्यनन्तरम् "उत्तरदोषो जातिः" इत्येवं व्याख्यानग्रन्थेन स्फुटमेव प्रकृतपाठस्य प्रतिपादनात्।

न्यायवार्त्तिकम्

तत्र वाच्यवाचकभावनियमाद्वचनदोषाः पक्षे भवन्तु, मा भूवन् साध्यसाधकभावात्। साधनदोषाः पक्षदोषा इति न प्रमाणमस्ति। वचनदोषाश्च पक्ष उपचर्यन्ते। न हि सम्भवे सत्युपचारो लभ्यते। तद्यथा मञ्चाः क्रोशन्तीति क्रोशनक्रियाया मञ्चेऽसम्भवात् लौकिकप्रयुक्तवाक्यान्वाख्यानं (१) कुर्वता मञ्चस्थाः पुरुषा इति स्थानिषु पुरुषेषु मञ्चशब्दमारोप्य प्रमाणासम्भवेनोपचारः क्रियते मञ्चाः क्रोशन्तीति। न पुनः प्रतिज्ञादिदोषाः प्रतिज्ञायां न सम्भवन्ति यतस्तत्रासम्भवन्तोऽवश्यमन्वाख्येयतया व्यवस्थिताः पक्षे उपचर्येरन्निति। आकस्मिकं च मुख्यार्थव्यतिक्रमं कुर्वाणेन यदुक्तं नैयायिकेहेतुप्रतिषेधेनाऽऽकस्मिको मुख्यार्थव्यतिक्रमो लभ्यते इति, तद्व्याहन्येत। अथेष्टग्रहणेन लौकिकोऽर्थोऽभिधीयते इष्टमभिप्रेतमिष्टमपि मे मतमिति। अयमप्यर्थः साधनादेव गम्यते न हि कश्चिदनिष्टं साधयति। योऽप्यनिष्टभयात् साधयति तस्याप्यनिष्टनिवृत्तिरिष्टेति नानिष्टं साधयति तस्मादिष्टग्रहणमनर्थकम्। एवं विचारणायामिष्टोऽर्थः पक्ष इत्यत्रापीष्टग्रहणमनर्थकम्। का चेयं विचारणा? यदि साधनदूषणप्रयोगः, तत्रानेकार्थसन्निपाते न ज्ञायते कथमिष्टमिति? किं साध्यत्वेन साधनत्वेन दूषणत्वेन दूष्यत्वेन वेति। अथ संशयो विचारणा? तद्यथा आत्मनोऽस्तित्वनास्तित्वविचारणायामिति, आत्मनोऽस्तित्व-

न्यायवार्त्तिकतात्पर्य्यटीका

वादिनो वा प्रतिवादिनो वाऽभिप्रायः, तस्योद्भावनानि दूषणानीति। न हि संभवे सत्युपचार इति। प्रतिज्ञागता हि दोषा यदि तद्गतत्वेनोद्भाव्यमाना न वादिनो निग्रहमापादयेयुः, ततस्तत्र निष्प्रयोजनत्वेनासंभवात् पक्ष एव उपचर्येरन्, पारयन्ति तु प्रतिज्ञागतानि दूषणानि निग्रहीतुं वादिनमिति। सोऽयं प्रतिज्ञादोषाणां प्रतिज्ञायां संभव इति। कस्मात् पुनर्मञ्चस्था इत्येव न प्रयुज्यत इत्यत उक्तं लौकिकप्रयुक्तवाक्यार्थान्वाख्यानम्(२), नानादिर्लोकप्रयोगो नियोज्यः पर्यनुयोज्यो वेत्यर्थः। स्यादेतत्, इष्टग्रहणमनक्षरारूढमप्यभिप्रायव्याप्तं साध्यं यथा स्यादित्येवमर्थं यथा परार्थाश्चक्षुरादय इति। अत्र हि परार्थमात्रमक्षरारूढम्, न च तन्मात्रं साध्यम् अपि त्वात्मपारार्थ्यं तच्च नोच्चारयति मा भूदनन्वयो हेतुः संघातत्वादिति तस्मात्तदवरोधायेष्टग्रहणमित्याह—अथेष्टग्रहणेनेति। परिहरति—अयमप्यर्थः साधनादेव गम्यते। अयमभिसन्धिः वचनलिङ्गा हि वक्तुरभिप्राया भवन्ति, यत्परं च वचनं स वचनार्थः, तात्पर्यं चास्य क्वचिद्वाच्ये क्वचिल्लक्ष्य इति सर्व एवासौ वचनार्थः। यस्तु नैवंविधः कथमसौ वाद्यभिप्रायव्याप्त इत्यवगन्तव्यम्। न च क्वचिदपि पक्षः प्रतिज्ञापदवाच्यस्तस्य वाक्यार्थत्वेन लक्ष्यत्वादेवेति। अनिष्टनिवृत्तिरिष्टेति। तत्साधनमनिष्यमाणमपि तदानीमिष्टमेव, अन्यथा तत्र प्रयत्नानुत्पत्तेरिच्छापूर्वकत्वात्तस्येति। अथ संशयो विचारणेति। ततश्च संशयविषय-

(१) "लौकिकवाक्याख्यानम्" इति ख०। (२) "वाक्यान्वाख्यानम्" इति वार्त्तिके।

न्यायवार्त्तिकम्

नास्तित्वसंशय इति यावदुक्तं भवति तावदिदमुक्तं भवति आत्मनोऽस्तित्वनास्तित्वविचारणायामिति संशयो विचारणापदस्य नार्थः न विचारणा संशयपदस्य। विचारणा हि नाम संशयोत्तरकालभाविनी साधनदूषणप्रयोगरूपा अन्यतराधिकरणनिर्णयावसाना, सा न संशय इति। संशयः पुनरनवधारणात्मकः प्रत्यय इति। न च वादे संशयो भवति, तयोर्निश्चितत्वात्, निश्चितौ हि वादं(१) कुरुत इति। एतेन "साध्यत्वेनेप्सितः पक्ष" इति प्रत्युक्तम्। ईप्सितग्रहणस्यानिष्टनिराकरणार्थत्वात् 'विरुद्धार्थानिराकृत" इति न वक्तव्यम्। पक्षो यः साधयितुमिष्ट इत्यत्रेष्टग्रहणेनानिष्टपक्षनिराकरणमितीहापीप्सितग्रहणादनिष्टपक्षनिरास इत्युत्तरकारिकार्द्धं न कर्तव्यं(२) विरुद्धार्थानिराकृत इति। अथ विरुद्धार्थानिराकृत इत्यनेनानिष्टाः पक्षदोषा निराक्रियन्त ? ईप्सितग्रहणं तर्हि व्यर्थम्। अथोभयमीप्सितग्रहणं विरुद्धार्थानिराकृत इति च पक्षदोषाणां निराकर्तृ, तथाऽपि(३)पक्षो यः साधयितुमिष्ट इत्यत्रापि विरुद्धार्थानिराकृत इति कर्त्तव्यम्। सर्वथैते पक्षलक्षणे विचार्यमाणे एकस्य न्यूनत्वमेकस्याधिक्यं ख्यापयत इति। स्वयं साध्यत्वेनेप्सित इति च स्वयंग्रहणं न कर्त्तव्यम्। किं कारणम् ? कर्मणः कर्त्रपेक्षत्वात्, यथा कर्त्ता वृक्षं छिनत्तीत्युक्ते स्वयमिति गम्यते न ह्यन्यस्य च्छेद्यमन्यश्छिनत्ति। एवं यस्य साध्यं स एव साधयितेति स्वयमिति गम्यते। सोऽयं परस्याक्षराधिक्यदोषानविविच्य स्ववचनप्रयोगेषु संमूढ इति। यदपि वादविधानटीकायां साधयतीति शब्दस्य स्वयं परेण च तुल्यत्वात् स्वयमिति विशेषणम्, साधयतीति किलायं शब्दः प्रयोज्ये प्रयोक्तरि च तुल्यरूपो भवतीति, सत्यम्, तुल्यरूप एष शब्दो न पुनः साधारणप्रयोगे प्रयोजनं पश्यामः। अत एवं वक्तव्यम्—पक्षो यः साधयितुमिष्ट इति। तत्त्वभाक्तयोश्च तत्त्वसम्प्रतिपत्तेः प्रयोक्तर्यसम्प्रतिपत्तेः, यद्यप्ययं तुल्यरूपः शब्द-

न्यायवार्त्तिकतात्पर्य्यटीका

इष्यमाणो जिज्ञास्यमानश्च साध्य एव भवति, न साधनादिरित्यर्थः। स्थानान्तरीयं च भदन्तस्य लक्षणम्—

"साध्यत्वेनेप्सितः पक्षो विरुद्धार्थानिराकृतः"

इति दूषयति एतेनेति। अत्रापि साध्यपदादूर्द्ध्वं वृथाऽक्षरचतुष्टयमिति। तथा "पक्षो यः साधयितुमिष्ट" इत्यत्रापि च सुबन्धुलक्षणे विरुद्धार्थानिराकृतग्रहणं कर्त्तव्यम्। एतदुक्तं भवति —न केवलमस्माकमेतद्विरुद्धार्थानिराकृतपदमनर्थकं प्रतिभाति, समानतीर्थानामपि तथा विभाति, यतस्तैर्नोपात्तमिति। अत एवं वक्तव्यं पक्षो यः साधयितुमिष्ट इति। यद्यप्यत्रापि प्रयोज्य-

(१) "विवादं" इति ख। (२) "कारिकार्द्धं न वक्तव्य" इति ख। (३) "तथापि" इत्यत्र "तं वा" इति ख।

न्यायवार्त्तिकम्

स्तथापि प्रयोज्य एव सम्भवति साधयतीति, न प्रयोक्तरि, भाक्तत्वात्, प्रयोज्ये चाङ्गत्वात्। तुमुनश्च समानकर्तृकेषु नियमात्, साधयितुमिति तुमुनः प्रयोगोऽयम्, स चाऽयं समानकर्तृकेष्वेव दृष्टः, तद्यथा स्नातुं गच्छामीति। न पुनरनुन्मत्त एवं ब्रूयात् स्वयं स्नातुं यामीति, तथेहापि। यद्यपि साधयतिशब्दस्तुल्यरूपस्तथापि तुमुना विशेषितत्वात् प्रयोक्तर्यनतिप्रसङ्गः। यदपि स्वयं शब्देन शास्त्रानपेक्षमभ्युपगमं दर्शयतीति, अत्रोक्तम्। किमुक्तम्? परावज्ञानस्यायुक्तत्वादित्येवमादि। किं पुनः शास्त्रं यदनपेक्षमभ्युपगमं दर्शयति? ननु शास्त्रं प्रत्यक्षागमाभ्यामविरुद्धम्, आगमस्तदनपेक्षमभ्युपगमं दर्शयतीति ब्रुवताऽप्रमाणक(१)मर्थमभ्युपैतीत्युक्तम्। यश्चाप्रमाणकोऽभ्युपगमो नासावभ्युपगन्तुं स्वस्थात्मना युक्तः, नापि प्रतिपादयितुं युक्त इति। यद्यपि वादविधौ साध्याभिधानं प्रतिज्ञेति प्रतिज्ञालक्षणमुक्तं तदप्युभयथा दोषान्न युक्तम्। कथमिति? यदि तावत् पूर्वप्रकृतपक्षमपेक्षमाणेनेदमुच्यते साध्याभिधानं प्रतिज्ञेति, तदा साध्यग्रहणानर्थक्यम्। प्रकृतः पक्षस्तच्छब्देनाभिसम्भन्त्स्यत इति तदभिधानं प्रतिज्ञेति वक्तव्यम्। अथ पक्षानपेक्षं स्वतन्त्रमेतल्लक्षणम्, तथापि यो नैयायिकप्रतिज्ञायां दोष उक्तः स इह प्रसक्तः, यस्तु तत्रभवता परीहारः क्रियते, ममापि स एव परीहारो भविष्यतीति न वक्तव्यम्। मयानभ्युपगमात्

न्यायवार्त्तिकतात्पर्य्यटीका

प्रयोजकव्यापारयोः 'साधयितुमि'ति समानं तथाऽपि तुमुना य एव साधयिता वादी स एवैषितेत्युक्तं भवति। न पुनर्वादिनो नियोक्ता साधयिता वादी चैषितेति। एषितृत्वं च वादिनो ध्रुवं कृत्वैतदुच्यते, यदा पुनरेषितृत्वमपि प्रयोजके संचार्यते तदा स्वयंग्रहणेनाप्यप्रतीकार इत्यभिप्रायः। तत्त्वभाक्तयोश्चेति। सिद्धः साध्यस्य प्रयोजकः कर्ता, स हि सिध्यन्तं साध्यं साधयति वादी, तस्मिन्नियं साधना समवेता। यस्तु तस्यापि प्रयोजकस्तृतीयस्थानपतितो न तस्मिन् साधना समवैतीति। यः कारयति स करोत्येवेति कथञ्चिदस्य भक्त्या कर्तृत्वं तच्चायुक्तं सति मुख्ये कर्त्तरीत्यभिप्रायः। आङ्गस्यं मुख्यत्वं पूर्वाभिप्रायस्थितमुद्घाटयति—तुमुनश्चेति। अत्रोक्तं भाष्यकारीयाभ्युपगमसिद्धान्तनिराकरणावसरेऽप्रमाणकमर्थमिति। यस्तावच्छास्त्राविरुद्धोऽर्थः प्रमाणसिद्धः स शास्त्रीय एव, शास्त्राभ्युपेतप्रमाणसिद्धत्वात्, तं व्युत्पादयन् न शास्त्रं बाधते। यस्तु प्रमाणीकृतवैशेषिकतन्त्रः शब्दनित्यत्वं साधयति सोऽनवधेयवचनः न हेत्वभिधानं यावत् परिषत्प्रतिवादिभ्यां नीयते, अपि तु प्रतिज्ञोच्चारणानन्तरमेव निगृह्यते। यस्तु वैशेषिकतन्त्राध्ययनमात्राद्वैशेषिकत्वमात्मनो दर्शयित्वा शब्दनित्यतां प्रतिजानीते नासौ प्रमाणीकृतवैशेषिकतन्त्र इति न निगृह्यते। यश्चाप्रमाणकोऽभ्युपगम इति। अभ्युपगम्यत इत्यभ्युपगमः, तदभिधानं प्रतिज्ञेति

(१) "अप्रमाणैक" इति ख।

(सू)—उदाहरणसाधर्म्यात्साध्यसाधनं हेतुः ॥ ३४ ॥

न्यायभाष्यम्

उदाहरणेन सामान्यात् साध्यस्य धर्मस्य साधनं प्रज्ञापनं हेतुः, (१) साध्ये

न्यायवार्त्तिकम्

भवता चाभ्युपगतत्वात्, यथा नाम कश्चित्परं ब्रूयात् माता तव बन्धकी स्त्रीत्वादिति स तस्योत्तरं ब्रूयात्। न बन्धकीत्वे स्त्रीत्वं हेतुः, किन्तु स्वपुरुषव्यतिरेकेण पुरुषान्तरसम्बन्ध इति। स्त्रीत्वाद् बन्धकीत्वं ब्रुवाणस्य मातुर्बन्धकीत्वमपरिहार्यम्। अथ परपुरुषसम्बन्धं हेतुमभ्युपेयात् स्त्रीत्वाद् बन्धकीत्वं व्याहतमिति, तथा भवतोऽपि व्याघातः साध्ययोर्हेतुदृष्टान्तयोः निर्देशं प्रतिज्ञा प्राप्नोतीति, तस्मादपेतसर्वदोषमिदं वाक्यं साध्यनिर्देशः प्रतिज्ञेति ॥ ३३ ॥

हेतोरवसरप्राप्तस्य लक्षणापदेशद्वारेणोदाहरणसाधर्म्यादिति सूत्रम्। उदाहरणेन साधर्म्य-

न्यायवार्त्तिकतात्पर्य्यटीका

वक्तऽप्रमिति। साध्यग्रहणात्तद्ग्रहणस्य लाघवादित्यर्थः। यस्तु तत्रभवता नैयायिकेनेति। प्रकृतमुपसंहरति—तस्मादपेतेति ॥ ३३ ॥

अवान्तरसंगतिं प्रदर्शयन् प्रतिज्ञावचनस्य साधनाङ्गत्वमपि दर्शयति—हेतोरवसरप्राप्तस्येति। प्रतिज्ञानन्तरं हेतुवचनस्यावसरः। तथा हि परप्रत्ययनाय वचनमुच्चारयन्ति प्रेक्षावन्तः, तदेव च परे बोधयितव्या यद् बुभुत्सन्ते; तथा सत्यनेनापेक्षिताभिधानात् परो बोधितो भवति। नो खल्वाम्रान् पृष्टः कोविदानाचक्षाणः प्रष्टुरवधेयवचनो भवति। अनवधेयवचनस्य कथं प्रतिपादको नाम। यथा च माठर समिधमाहरेति गुरुणा प्रेषित एषोऽहमाहरामीत्यनुक्त्वा तदर्थं यदाऽयं गृहं प्रविशति तदाऽस्मै कुप्यति गुरुः—आः शिष्यापसद छान्दसवत्तर (?) माठर मामवधीरयसीति ब्रुवाणः। एवमनित्यं शब्दं बुभुत्समानायाऽनित्यः शब्द इत्यनुक्त्वा यदेव किंचिदुच्यते कृतकत्वादिति वा यत्कृतकं तदनित्यमिति वा कृतकश्च शब्द इति वा तत्सर्वमस्यानपेक्षितमापाततोऽसंबद्धाभिधानम्, तथा चानवहितो न बोद्धुमर्हतीति। यत्कृतकं तत्सर्वमनित्यम्, यथा घटः, कृतकश्च शब्दः, इति वचनमर्थसामर्थ्येनैवापेक्षितशब्दानित्यत्वनिश्चायकमित्यवधानमत्रेति चेन्न, परस्पराश्रयत्वप्रसङ्गात्। अवधाने सत्यतोऽर्थनिश्चयस्तस्माच्चावधानमिति। न च परिषत्प्रतिवादिनौ प्रमाणीकृतवादिनौ यदेतद्वचनमनुसन्धाय प्रयतिष्येते, तथा च सति न हेत्वाद्यपेक्षेताम्, तद्वचनादेव तदर्थनिश्चयात्। अनित्यः शब्द इति त्वपेक्षित उक्ते कुत इत्यपेक्षायां कृतकत्वादिति हेतुरुपतिष्ठते। सोऽयं पञ्चावयवप्रयोगे च तल्लक्षणे च प्रतिज्ञानन्तरकाल एवावसरो हेतोः, तदेवं हेतोरवसरप्राप्तस्य सामान्यलक्षणापदेशद्वारेण तद्विशेषलक्षणम्—

उदा—तुः (सू० ३४) ॥ श्रुत्यर्थाभ्यामुभयलक्षणसूचनात्सूत्रम्। अत्र च हेतुरिति लक्ष्य-

(१) "प्रज्ञापनहेतुः" इति आ।

न्यायभाष्यम्

प्रतिसन्धाय धर्म(१)मुदाहरणे च प्रतिसन्धाय तस्य साधनतावचनं हेतुः उत्पत्ति-

न्यायवार्त्तिकम्

मुदाहरणसाधर्म्यम्। किं पुनरुदाहरणम्? वक्ष्यमाणकम्, तेन साधर्म्यं समानधर्मता, यो धर्मः साध्ये भवति तथाभूत एवोदाहरणेऽपीति, न पुनः स एव, अन्यधर्मस्यान्यत्रावृत्तेः, न ह्यन्यस्य धर्मोऽन्यत्र वर्त्तते, किन्तु तत्तुल्यः स एवेत्युच्यते(२) इति।

यदि पुनः साधर्म्यं हेतुरित्येतावन्मात्रमुच्येत भवत्येवं विवक्षितार्थसिद्धिः, अनिष्टप्रतिषेधस्तु

न्यायवार्त्तिकतात्पर्य्यटीका

निर्देशः। स च विभागोद्देशे वाक्यावयव इति वचनरूपः। तस्य सामान्यलक्षणं साध्यसाधनं साध्यतेऽनेनेति व्युत्पत्त्या यद्यपि पारार्थ्यापन्नं कृतकत्वादिकमर्थमाह, तथाऽपि तस्य वचनात्मक-हेतुसामानाधिकरण्यानुपपत्तेर्विषयि कृतकत्वादित्यादिकं वचनमुपलक्षयति। यदि च वचनं हेतुरित्युच्येत तत्साध्येन समभिव्याहृतं प्रतिज्ञा स्यात्। अथ वचनमित्येतावदुच्येत तदाऽति-व्याप्तिः स्यात्। उपचारे तु न क्वचित्प्रसङ्गः, उपनयादपि साधनं न पराङ्गतया गम्यते, किन्तु प्रातिपदिकार्थप्रधानतया स्वनिष्ठमिति न तत्रापि प्रसङ्गः। हेत्वाभासाश्च न साधनमिति साधनपदेनैव निराकृताः। न्यायवाक्यावयवत्वेन च नान्यशब्दे प्रसङ्गः। तदेवं समानासमान-जातीयव्यवच्छेदकत्वं सिद्धं सामान्यलक्षणस्य। इदं चार्थम्, श्रौतं तु विशेषलक्षणम्। हेतुरिति यद्यपि सामान्यपदम्, तथाऽपि प्रकरणादन्वयव्यतिरेकिहेतुपरं द्रष्टव्यम्। तेन हेतुरिति लक्ष्यनिर्देशः, परिशिष्टं तु लक्षणम्, तदेतद्भाष्यकृद्व्याचष्टे—उदाहरणेनेति। साधर्म्यपदव्याख्यानं सामान्या-दिति। साध्यसाधनपदव्याख्यानं साध्यस्य धर्मस्येति। साध्यस्येति धर्मिमात्रे बुद्धिर्मा भूदत उक्तं धर्मस्येति। धर्मसहितस्य धर्मिण इत्यर्थः। तदेव स्फुटयति—साध्ये प्रतिसन्धायेति। उदाहरणे साधर्म्यात्साध्यस्येत्यनेनान्वयपक्षधर्मत्वे अन्वयव्यतिरेकपक्षधर्मत्वानि च दर्शितानि। साध्यसाधनमित्यत्र च साध्यग्रहणेनाबाधितविषयत्वासत्प्रतिपक्षत्वे सूचिते, तद्विपरीतस्य साधना-नर्हत्वादिति। तदेतद्वार्त्तिककारो व्याचष्टे—उदाहरणेनेति। यो धर्मो धूमादिः साध्ये भवति, स तथाभूत एवोदाहरणेऽपीति उदाह्रियत इत्युदाहरणं दृष्टान्तधर्मी तस्मिन्, न पुनः स एव, कुतः? अन्यधर्मस्येति। यदि तर्हि नान्यस्य धर्मोऽन्यत्र वर्त्तते, कथं तर्हि समानता, सा हि तत्त्वान्यत्वविरोधिनीत्यत आह—किं तु तत्तुल्यः स एवोच्यते, यथा तानेव शालीन् भुञ्ज्महे तानेव तित्तिरीनिति। तदनेन "सामान्यादि"ति भाष्यं व्याख्यातम्।

उदाहरणग्रहणप्रयोजनमाह—यदि पुनरिति। साधर्म्यमात्रं हि विरुद्धे चासाधारणे सव्यभि-

(१) "धर्मम्" इत्यत्र "धर्मान्" इति वि० टि०। (२) तात्पर्या—"स एवोच्यते" इति।

न्यायवार्त्तिकम्

न स्यात्, साधर्म्यमात्रं हेतुरित्यतोऽनिष्टप्रतिषेधार्थमुदाहरणसाधर्म्य(१)ग्रहणम्। उदाहरणसाधर्म्यग्रहणादनुदाहरणसाधर्म्यमर्थान्निराकृतं भवति। अवधारणेन वा निराक्रियते उदाहरणेनैव साधर्म्यं न पुनरनुदाहरणेनापि साधर्म्यमेव न(२) पुनर्वैधर्म्यमपीति। कस्य पुनरुदाहरणेन साधर्म्यम्? कस्यान्यस्य पुनः स्यात्, साध्यस्य, प्रकृतत्वात् प्रत्यासत्तेश्च,—प्रकृतं प्रत्यासन्नं च साध्यं तस्मादुदाहरणसाधर्म्यं साध्यस्य। अत्रापि च साध्येन साधर्म्यमिति साधर्म्यमेवेत्यवधार्यते। किं पुनरनेनावधारणेन लभ्यते? साध्यैकदेशवृत्तिरहेतुरिति लभ्यते। सोऽयं हेतुः साध्योदाहरणाभ्यां प्रतिसंहितः। किं पुनरस्य प्रतिसन्धानम्? साध्ये व्यापकत्वम्, उदाहरणे चासम्भवः। एवं द्विलक्षणस्त्रिलक्षणश्च हेतुर्लभ्यते उदाहरणेनैव साधर्म्यमित्येवं ब्रुवताऽनभ्युपगतविपक्षस्याप्युदाहरणेनैव साधर्म्यमिति द्विलक्षणोऽपि हेतुर्भवतीत्युक्तम्। यदा पुनर्विपक्षमभ्युपैति तदाप्युदाहरणेनैव साधर्म्यं(३) नानुदाहरणेनेति त्रिलक्षणो हेतुरित्युक्तं भवति। तदेवं द्वावप्यन्वयव्यतिरेकिणौ यथा वैशेषिकस्यानित्यः शब्दः कृतकत्वात् सामान्यविशेषवतोऽस्मदादिबाह्यकरणप्रत्यक्षविषयत्वाद्वेति(४)। द्वावन्वयिनौ यथा सर्वानित्यतावादिनः अनित्यः शब्दः प्रमेयत्वात् अमूर्तत्वाच्च। तदेवमन्वयव्यतिरेकिभेदवानन्वयभेदवांश्चतुःप्रकारो हेतुरित्युक्तं भवति। तदेवं हेतुस्वरूपावधारणाद्धेत्वाभासा निराकृता भवन्ति। तत्रोदाहरणेनैव साधर्म्यमित्यनेन विपर्ययहेतोरनैकान्तिकस्य च निराकरणम्। साधर्म्यमेवोदाहरणेनेत्यनेनावधारणेन साध्यावृत्तिः साध्यैकदेशवृत्तिश्च निराकृत इति। तत्र तावद्विपर्ययहेतुरश्वो विषाणित्वाद् गौर्विषाणित्वादित्यनैकान्तिकः, साध्यावृत्तिश्चाक्षुषत्वादनित्यः शब्द इति। साध्यैकदेशवृत्तिरनित्याः परमाणवो गन्धवत्त्वादिति। स्वरूपतस्तर्ह्यनैकान्तिकादि ग्रहणं न कर्त्तव्यम्। यद्यनेन

न्यायवार्त्तिकतात्पर्य्यटीका

चारे चास्ति, तेषामपि वचनं हेतुः स्यात्, तेषामपि यथास्वं साधारणत्वादित्यनिष्टमित्यर्थः। ननु तथाऽपि सव्यभिचारेऽप्युदाहरणसाधर्म्यमिति कथं निवर्त्येत इत्यत आह—उदाहरणेति। विशिष्टविधानस्य शेषनिषेधोऽर्थसिद्ध इत्यर्थः। पक्षान्तरमाह—अवधारणेन वेति। साधर्म्यादित्यतो विशेषेण सर्वसाधर्म्यप्राप्तावुदाहरणसाधर्म्यमपि प्राप्तमेवेति विधानानर्थक्यं परिसंख्यायकं सदवधारणार्थमेव भवति,तदवद्योतनाय च एवकार इत्यर्थः। साधर्म्यमेवेत्यत्र साध्यपदं योजनीयम्, तेन साध्यैकदेशासिद्धमपाकरिष्यति। पृच्छति—कस्य पुनरिति। उत्तरम्—कस्यान्यस्येति। अत्रैव हेतुद्वयमाह—प्रकृतत्वात् प्रत्यासत्तेश्च। साध्यं खल्वत्र प्रकृतं प्रधानम्, तदुद्देशेनावयवानां प्रवृत्तेः, साध्यसाधनमिति च पदेन सन्निधापितमिति तदेव द्वितीयमवधारणं स्फुटीकरोति—अत्रापि चेति। साध्ये प्रतिसंधायेति भाष्यार्थमाह—साध्योदाहरणाभ्यामिति। द्वाविति। सपक्षव्यापकाव्यापकावित्यर्थः। अनैकान्तिकस्य चेति। साधारणस्य वा असाधारणस्य

(१) "साधर्म्य" इति ख-पु० नास्ति। (२) "न" इति ख-पु० नास्ति। (३) "साधर्म्यात्" इति ख।
(४) "प्रत्यक्षाद्वेति" इति ख।

न्यायवार्त्तिकम्

हेतुलक्षणेन एवं भाव्यमानेनार्थादनैकान्तिकहेत्वादयो निराक्रियन्ते, नन्वनैकान्तिकः सव्यभिचार इत्येवमादिसूत्रानारम्भः। नातिप्रसक्तस्य नियमार्थत्वात् अनेकधा हेत्वाभासा भिन्ना इति तेषां नियमज्ञापनार्थमनैकान्तिकादिग्रहणमिति।

उदाहरणसाधर्म्याच्च किमन्यत् साध्यसाधनमित्येके। न किलोदाहरणसाधर्म्यव्यतिरेकेण साध्यसाधनमस्तीत्यत एवं सूत्रं कर्त्तव्यं "उदाहरणसाधर्म्यं हेतुरि"ति। अथ पुनः साध्यसाधन-शब्दोपादानमुदाहरणसाधर्म्यविशेषणार्थम्, एवमपि पञ्चम्यपदेशोऽनर्थक इति। न हि भवति नीलादुत्पलमिति। अन्ये तु पञ्चम्यपदेशानर्थक्यमन्यथा वर्णयन्ति। अर्थान्तरे दृष्टत्वादिहानर्थक इति। अर्थान्तरे किल पञ्चमी दृष्टा यथा ग्रामादिति। न पुनरिहोदाहरणसाधर्म्यव्यतिरेकेण

न्यायवार्त्तिकतात्पर्य्यटीका

वेत्यर्थः। एवं भाव्यमानेनेति, परिभाव्यमानेन। नातिप्रसक्तस्येति परिसंख्यायकं हेत्वाभास-लक्षणं न विधायकमित्यर्थः।

एतत्किल हेतुलक्षणं भदन्तो दूषयांबभूव—साधनं यदि साधर्म्यं न वाक्यांशः, न ह्यर्थः पञ्चावयववाक्यस्यावयवः। न पञ्चमी, यदि साधनसाधर्म्ययोरत्यन्ताभेदो यदि वा सामान्यविशेष-भावेन कथंचिद्भेद उभयथाऽपि न पञ्चमी, साधनसामानाधिकरण्येन प्रथमाप्रसङ्गात्। अत्यन्ताभेदे चैकतरपदाप्रयोगात्। वाक्यं चेत्ततः पञ्चम्युपपद्यते, साधनं हि वाक्यरूपं साधर्म्यादर्थादुत्थितं यतः तद्विशेष्यं स्यात्। न हि वाक्यमेवार्थादुत्थितम्, अपि तु विवक्षाद्यपीति (१) न विशेष्यं कुतः साधनत्वादसम्भवः। अर्थसमुत्थानामपि ज्ञानविवक्षादीनामप्रसङ्गोऽसाधनत्वादिति न, तत्रापि द्वेधा दोषात्, साक्षात् साधनम्? पारंपर्येण वा? यदि पारंपर्येण वक्तृज्ञानम्, तर्हि साक्षात्साधर्म्य-समुत्थं पारंपर्येण च श्रोतुः साध्यविज्ञानसाधनं हेतुः स्यात्। अथ साक्षात्साधनम्, तर्हि श्रोतृज्ञानं पारंपर्येण साधर्म्यसमुत्थं साक्षात्साधनं हेतुः स्यात्। प्रकृते त्वन्यसम्भवः, यदि तु पञ्चावयव-वाक्यस्य प्रकृतत्वाज्ज्ञानादिव्यवच्छेदः, तथाऽप्यन्यसंभवः, उपनयस्यापि साधर्म्यसमुत्थत्वात्। स्वलक्षणेन बाधा चेत्, न, विकल्पादिसंभवात्। तस्मात् षष्ठ्यस्तु, तत्रापि विशेषणमनर्थकम्, साधर्म्यस्य हेतुरित्येतावन्मात्रं वक्तव्यमिति। तदेतद्दिङ्नागदूषणमुपन्यस्यति—उदाहरणसाधर्म्या-च्चेति। यद्यर्थात्मकं साधर्म्यमेव साधनमुच्यते तदैतद् दूषणमित्यर्थः। यदि पुनरर्थात्मकस्य साधर्म्यस्यार्थात्मकमेव साधनं सामान्यमुच्यते तत्राह—अथ पुनरिति। तदिदमुक्तं भदन्तेन—न पञ्चमी। अन्ये त्वेतदन्यथा व्याचक्षत इत्याह—अन्ये त्विति। विशेषातिरिक्तं न सामान्यं नाम किंचिदस्ति, तस्य कल्पनामात्रत्वात् भेदस्य वस्त्वधिष्ठानत्वादित्यभिप्रायः। दोषान्तर-

(१) "विपक्षाद्यपीति" इति ख।

न्यायवार्त्तिकम्

साध्यस्य साधनमस्तीत्यतः पञ्चम्यपदेशोऽनर्थक इति। साध्यसाधनविशिष्टे चोदाहरणे साधर्म्यं हेतुत्वेन ब्रुवाणो नाभिधेयो हेतुरित्युक्तं भवति। तथा च साध्यनिर्देशः प्रतिज्ञेति व्याहतं भवति। न चाभिधानाभिधेयात्मकः समुदायो दृष्ट इति नैवोभयेषामवयवत्वम्। तत्र त्वेष दोषो न परिहारान्तरं प्रयोजयति, तेनैवापाकृतत्वाद् उदाहरणसाधर्म्यात् साध्यसाधनवचनं हेतुरित्येवं व्याचक्षाणेन समस्त एव दोषोऽपाकृतो भवतीति। अतो न परिहारान्तरं प्रयोजयति। साधर्म्यस्य व्यभिचार्यव्यभिचारित्वाद् विशेषणयोगो न तद्वचनस्यापकारकत्वात्, यत्तत्प्रकारवत्तद्विशेष्यते, साधर्म्ये चैतदस्ति न च वचसीति। वचसः कारकत्वं न भवतीति न बुद्ध्यामहे यथैवार्थः प्रकारवान् तथा वचनमपीति। अर्थस्तावत् कथं प्रकारवान्? उभयथाभावात्—यस्मादयमर्थ उभयथा भवति नित्योऽनित्यः मूर्तोऽमूर्तश्च। वचनमपि तद्वुभयथा भवतीति तुल्यं नित्यानित्यमूर्ताऽमूर्त-शब्दाभिधेयमिति। दृष्टश्च शब्दे विशेषणयोगः यथा किमयमाह गौरित्ययमाह, इतिपरतया शब्दः शब्दान्तराद् व्यवच्छिद्यते। स्वयं वचनविशेषकाणि बहूनि वाक्यानि प्रयुक्तानि। तद्यथा स्वपरपक्षयोः सिद्धासिद्ध्यर्थं वचनं वाद इति। अथ वचनं नैवंविधमिति सिद्धासिद्ध्यर्थं वचनं वाद इत्येवमादि व्याहतम्। सोऽयं सूक्ष्मेक्षिकया परस्य दोषानभिदधानो लोकादप्यपभ्रष्ट इति। यदप्यर्थान्तरे दृष्टत्वादित्यनर्थकः पञ्चम्यपदेश इति? एवं ब्रुवाणः स्वसिद्धान्तं बाधते, न हि भवन्तः सेनावनादीन्यर्थान्तरभूतानि प्रतिपद्यन्ते। अथ च पञ्चम्यपदेशो भवति वनादयं वृक्ष

न्यायवार्त्तिकतात्पर्य्यटीका

माह—साध्यसाधनेति। यदा हि साध्यसाधनं नामोदाहरणसाधर्म्यादतिरिक्तं नास्ति, किन्तु शब्दमात्रमवशिष्यते, तदोदाहरणसाधर्म्यमनेनाभिधेयत्वेन विशेषणीयम्, तथा च साध्यनिर्देशः प्रतिज्ञेत्यनेन विरोधः, अनेन ह्यवयवः शब्दात्मकः प्रतिज्ञा लक्ष्यते, हेत्वादिसमुदायापेक्षया चावयवो भवति, न चाभिधानाभिधेयात्मकः समुदायो दृष्ट इति। तस्मात्समुदायाभावा-न्नोभयेषामवयवत्वम्, तदिदमुक्तं न वाक्यांश इति। तदेतल्लक्षणं व्याचक्षाणैरस्माभिः परिहृत-मिति न परिहारान्तरं प्रयोजयतीत्याह—तत्र त्विति। उक्तं यथा हेतुपदसन्निधौ साधनपदं हेतुपदे प्रवर्त्तते न चोपनये प्रसङ्गः, तस्य प्रातिपदिकार्थमात्रप्रधानत्वेन हेतुभावाप्रकाशकत्वात्। अत्र चोदयति—साधर्म्यस्येति, साधर्म्यस्य लिङ्गस्य कृतकत्वादित्यादिहेतुपदवाच्यस्य व्यभि-चार्यव्यभिचारित्वयोगादुदाहरणविशेषणयोगो न पुनः साध्यसाधनपदवाच्यस्य कृतकत्वादित्यादे-र्हेतुवचनस्येत्यर्थः। तदुक्तं भदन्तेन तत्रापि विशेषणमनर्थकं वचनेऽपीत्यर्थः। तदेतद्दूषयति—वचस इति। वचनमपि दर्शनभेदेनोभयथाऽपि भवति, यथा मीमांसकानां नित्यं वचनम्, वैशेषिकाणामनित्यमिति, केषांचिदमूर्त्तः शब्दः केषांचिन्मूर्त्त इति, यथाऽऽहुः—"वायुरापद्यते शब्दतामि"ति। तथा प्रातिस्विकमपि भेदं सर्वेषामेव शब्दानामितिकरणो दर्शयतीत्याह—दृष्टश्चेति।

न्यायभाष्यम्

धर्मकत्वादिति। उत्पत्तिधर्मकमनित्यं दृष्टमिति ॥ ३४ ॥

न्यायवार्त्तिकम्

आनीतः सेनातोऽश्व इति। दृष्टश्च तन्त्रान्तरे पञ्चम्यपदेशोऽनर्थान्तरे सन्धिविग्रहाभ्यां षाड्गुण्यं सम्पद्यते इति। अनभ्युपगतार्थान्तरविपक्षस्य च हेतुर्विपक्षाद्विशेष इति पञ्चम्या अर्थान्तरवाचकत्वं कुतः यदप्युदाहरणसाधर्म्यस्येति वक्तव्यं नोदाहरणसाधर्म्यादिति। तदपि न, विवक्षातः कारकशब्दप्रयोगात्,—यदा साधर्म्यमभिधीयमानतया विवक्षितं भवति उदाहरणसाधर्म्यस्येति युक्तम्। यदा तूदाहरणसाधर्म्यस्य निमित्तभावो वचनेऽपि विवक्षितस्तदोदाहरणसाधर्म्यादिति निमित्तपञ्चमी युक्ता। कथं पुनरुदाहरणसाधर्म्यस्य निमित्तभावः? सति भावात्; यस्मादुदाहरणसाधर्म्यं बुद्ध्वा विवक्षाप्रयत्नवायूदीरणताल्वाद्यभिघातादयः शब्दस्य निमित्तं भवन्ति अतः पारम्पर्येणोदाहरणसाधर्म्यमपि निमित्तमिति। तस्मात् पञ्चम्यभिधानमेव ज्यायः।

उदाहरणमनित्यः शब्द उत्पत्तिधर्मकत्वात्, उत्पत्तिधर्मकमनित्यं स्थाल्यादि दृष्टमिति। किं पुनरनित्यं नाम? यस्याऽनित्यत्वं तदनित्यम्। अथानित्यत्वं किम्? उभयान्तावच्छिन्न-

न्यायवार्त्तिकतात्पर्य्यटीका

स्वचरितविरोधमाह—स्वयमिति। अनभ्युपगतेति। अनभ्युपगतोऽर्थान्तरं विपक्षो यस्य हेतोरनित्यत्वे साध्ये कृतकत्वादेः स तथोक्तः। यदभ्युपगतं भदन्तेन तस्मात् षष्ठ्यस्त्विवति तद्दूषयति—यदपीति। विवक्षातः कारकशब्दप्रयोगादिति। कारकत्वेन संबन्धित्वमुपलक्षितं क्रियाकारकगर्भत्वात् संबन्धित्वस्य, न तु पञ्चमी वा षष्ठी वा कारकविभक्तिरिति। अत्र भाष्यकारेण शुद्धं हेतुवचनमुदाहृतम्—उत्पत्तिधर्मकत्वादिति। तस्य चोदाहरणसाधर्म्यसमुत्थत्वज्ञापनायोदाहरणमपि दर्शितमुत्पत्तिधर्मकमनित्यं दृष्टमिति।

अत्र भाष्यकारेण शुद्धं हेतुवचनमुदाहृतं तत्प्रतिज्ञापदेन पूरयित्वा वार्तिककार आह—उदाहरणमिति। अत्र पृच्छति—किं पुनरिति। सतो विनाशोऽनित्यत्वम्, तद्योगो वा, तच्चोभयमयुक्तम्, न हि सदसतोः कश्चिदस्ति संबन्धः, असमानकालत्वात्, ततश्चानित्यः शब्द इति सामानाधिकरण्यं न स्यादिति। अपि च शब्दस्य भूत्वा यदभवनम्, न तदेव पिठरस्य, न चाभवनत्वं नामास्ति सामान्यम्, येन दृष्टान्तो न साध्यविकलः स्यात्। न च सामान्यातिरिक्तं सादृश्यं वस्त्वन्तरं दृष्टमिष्टं वा, तस्मान्मृषाशेषमनित्यत्वं साध्यमिति भावः। गूढधिय उत्तरम्—यस्याऽनित्यत्वमस्ति तदनित्यम्। स्वाभिप्रायेण पृच्छति—अथेति। उत्तरवाद्यभिप्रायमुद्घाटयति—उभयान्तेति। अपरान्तेति वक्तव्ये उभयान्तग्रहणेन पूर्वान्तनिवेशनं हेतोरुत्पत्तिमत्त्वस्यात्यन्तिकीं प्रत्यासत्तिमविनाभावोपयोगिनीं दर्शयितुमिति। अवच्छेदकत्वं चोपलक्षणत्वम्

न्यायवार्त्तिकम्

वस्तुसत्तासम्बन्धः सत्ता वा तद्विशेषणा। अथोत्पत्तिधर्मकं किम्? उत्पत्तिर्धर्मो यस्य स उत्पत्तिधर्मा, उत्पत्तिधर्मैवोत्पत्तिधर्मकः। का पुनरियमुत्पत्तिः? असद्विशेषणस्य सतोऽत्यन्तमभावभावप्रतिषेधः,—यदसद्विशेषणं सद्भवति तत्पूर्वं नासीत् पश्चाद्भवतीति गम्यते, तस्यात्यन्तमभावोऽत्यन्तञ्च भाव इति प्रतिषेधो यः स उत्पत्तिशब्दार्थः, सत्ता वैवंविशेषणा। वाक्यार्थाभ्यनुज्ञानाच्च पदार्थोऽभ्यनुज्ञातो भवति, यो वाक्यस्यार्थोऽभूत्वा भवतीति स पदस्यार्थ उत्पद्यत इति। सा उत्पत्तिर्धर्मो यस्य स भवत्युत्पत्तिधर्मक इति ॥ ३४ ॥

न्यायवार्त्तिकतात्पर्यटीका

न विशेषणत्वम्, तच्चापरान्तस्य भिन्नकालस्य सम्बन्धस्यापि विरोधितया बुद्धिस्थस्य सम्भवति। तथा च यैवापरान्तावच्छिन्नस्य सत्ता पिठरस्य, सैवापरान्तावच्छिन्नशब्दस्यापि। एवं सत्तासमवायोऽपि तद्विधयोः पिठरशब्दयोः समानः। विरोधिभावः पश्चाद्भावश्चाभावमात्रात् प्रध्वंसस्य विशेषः। पृच्छति—अथोत्पत्तीति। न तावदुत्पन्नस्योत्पत्तिर्धर्मः, तदाऽप्युत्पद्यत इति प्रत्ययप्रसङ्गात्। नाप्यनुत्पन्नस्य, असतो धर्मित्वायोगादिति भावः। गूढधिय उत्तरम्—उत्पत्तिरिति। उक्ताभिप्रायवान् पृच्छति—का पुनरिति। उत्तरम्—असद्विशेषणस्य सतोऽत्यन्तमभावभावप्रतिषेधः। असदिति प्रागभावमाह, विशेषणत्वं च प्रागभावस्य उपलक्षणत्वम्, तच्च भिन्नकालस्यापि बुद्धिस्थतामात्रेणोक्तम्, तेनासद्विशेषणस्य सत इत्येतावतैव पूर्वान्तपरिच्छिन्नस्य सत्तासम्बन्धः सत्ता वा तद्विशेषणोत्पत्तिर्दर्शिता। यश्चेहशस्तस्य गगनवन्नात्यन्तमसंभवः, गगनकुसुमवद्वा नात्यन्ताभाव इति स्वरूपमुक्तमुत्पत्तिमुपलक्षयितुम्, उपलक्षणोपलक्ष्ययोश्चाभेदविवक्षया सामानाधिकरण्यम्। न चैवं लब्धोत्पत्तिनि वस्तुन्युत्पद्यत इति प्रसङ्गः, लभ्यमानोत्पत्तितदवयवेषु तदुत्पादनानुकूलव्यापारावेशलब्धपूर्वापरीभावेषु तत्प्रयोगस्य लोके दर्शनात्। तस्मात् पूर्वान्तावच्छिन्नवस्तुसत्तया तत्सम्बन्धेन वा तस्यैव वस्तुनोऽपरान्तावच्छिन्नता तत्संबन्धो वा ज्ञाप्यत इति सर्वं रमणीयम्। ननु भाष्यकृदभूत्वा भावित्वमित्यस्य वाक्यस्यार्थमुत्पत्तिं वक्ष्यति, त्वं पुनरसद्विशेषणस्य सतोऽत्यन्तमभावप्रतिषेध इत्यस्य वाक्यस्यार्थमुत्पत्तिम्, तत् कुतो न विरोध इत्यत आह—वाक्यार्थेति। य एवार्थो भाष्यकारेणोत्पत्तिशब्दार्थतयाऽभ्यनुज्ञातोऽङ्गीकृतः स एवास्माभिरपि, नात्यन्तमभावप्रतिषेधस्योत्पत्तिः, अपि त्वसद्विशेषस्य सतः सत्ता वा तत्संबन्धो वेत्युक्त(१)मित्यर्थः ॥ ३४ ॥

वृत्तिः

क्रमप्राप्तं हेतुं लक्षयति विभजते च सूत्राभ्याम्—(उदाहरणेति, तथेति च)।

(१) अनतिपूर्वमेव वार्त्तिके "उभयान्तावच्छिन्न" इत्यादिना उक्तम्।

न्यायभाष्यम्

किमेतावद्धेतुलक्षणमिति ? नेत्युच्यते। किं तर्हि ?

(सू)—तथा वैधर्म्यात् ॥ ३५ ॥

उदाहरणवैधर्म्याच्च साध्यसाधनं हेतुः। कथम् ? अनित्यः शब्दः उत्पत्तिधर्मकत्वात्, अनुत्पत्तिधर्मकं नित्यं यथा आत्मादिद्रव्यमिति ॥ ३५ ॥

न्यायवार्त्तिकम्

किमेतावद्धेतुलक्षणमिति ? नेत्युच्यते। किं तर्हि ? तथा वैधर्म्यात्। अत्रापि उदाहरणवैधर्म्यादित्युदाहरणेनैव वैधर्म्यं नानुदाहरणेनेति, वैधर्म्यमेवोदाहरणेन, न (१)साधर्म्यमपीति। उदाहरणमनित्यः शब्दः उत्पत्तिधर्मकत्वात् अनुत्पत्तिधर्मकं नित्यं दृष्टम् (२) आत्मादिद्रव्यमिति भाष्यम्। एतत्तु (३) न समञ्जसमिति पश्यामः प्रयोगमात्रभेदात्, प्रयोगमात्रं हि भिद्यते नार्थ इति। न च प्रयोगमात्रभेदाद्वस्त्वन्तरं भवितुमर्हतीति। उदाहरणमात्रभेदाच्च—उदाहरणमात्रं केवलं भिद्यते आत्मा घट इति। यदि चोदाहरणभेदाद्भेदो भवति "तथा वैधर्म्याद्" इति न पठितव्यम्। किं कारणम् ? उदाहरणभेदादेव भेदो गम्यते। उदाहरणसूत्रं च भेदकमस्ति "तद्विपर्ययाद्वा विपरीतमि"ति। तस्माच्चेदमुदाहरणं न्याय्यमिति।

न्यायवार्त्तिकतात्पर्यटीका

सूत्रान्तरमवतारयति—किमेतावदिति।

तथा—त् (सू० ३५) ॥ अत्र यदि वैधर्म्यादित्युच्यते ततः सकलकेसरादिमत्पदार्थपक्षीकरणेनाश्वत्वं यदा विषाणित्वेन साध्यते तस्यास्ति पक्षवैधर्म्यमिति हेतुः स्यादित्यत आह—उदाहरणेन वैधर्म्यमिति, विपक्षेणेत्यर्थः। तथाऽपि यदा शरीरमात्रं पक्षीकृत्य सात्मकत्वं साध्यते प्राणादिमत्त्वेन, तदाऽस्ति तस्योदाहरणेन वैधर्म्यमिति सोऽपि हेतुः स्यादित्यत आह—एवेति। न चैतावता सपक्षत्वप्रसङ्गः, सपक्षस्याभावात्। अवधारणस्य व्याप्त्या पक्षसत्त्वेनोपपत्तेरिति। तथाऽपि अन्वयव्यतिरेकिणो हेतोरनैकान्तिकस्य च विपक्षैकदेशव्यापिनः संग्रहः स्यात्, यथा अनित्यः शब्दः उत्पत्तिधर्मकत्वाद् अनित्यो मूर्त्तत्वादित्यत आह—वैधर्म्यमेवोदाहरणेनेति, विपक्षोदाहरणेनेत्यर्थः। भाष्यकारीयमुदाहरणं निगदेनोपन्यस्यति—अनित्यः शब्द इति। नित्यमनुत्पत्तिधर्मकं दृष्टमिति योजना। तदेतद्दूषयति—एतच्चेति। मा भूत्प्रयोगमात्रभेदाद् भेदः, उदाहरणभेदाद् भेदो भविष्यतीत्यत आह—उदाहरणमात्रभेदाच्चेति।

वृत्तिः

अत्र साध्यसाधनं हेतुरिति सामान्यलक्षणम्। साध्यसाधनं—साध्यसिद्ध्यनुकूल-

(१) ख-पु० "न" नास्ति। (२) "दृष्टम्" इत्यत्र "यथा" इति भाष्ये। (३) "एतच्च" इति तात्पर्य।

न्यायवार्त्तिकम्

उदाहरणं तु नेदं निरात्मकं जीवच्छरीरं अप्राणादिमत्त्वप्रसङ्गादिति। यदुभयपक्षसम्प्रतिपन्नमप्राणादिमत् तत्सर्वं निरात्मकं दृष्टम्। न चेदमप्राणादिमद्भवति, तस्मान्नेदं निरात्मकमिति। सोऽयमवीतः परपक्षप्रतिषेधार्थ एव भवति। तावेतौ वीतावीतहेतू लक्षणाभ्यां पृथगभिहिताविति। तत्र स्वरूपेणार्थपरिच्छेदकत्वं वीतधर्मः, अवीतः पुनः परपक्षप्रतिषेधेनैव प्रवर्त्तत इति। एकस्य विधीयमानोऽर्थ इतरस्य प्रतिषिध्यमानः। कथं पुनरयमवीतोऽर्थपरिच्छेदक इति? अथ योऽभ्यनुज्ञातोऽर्थपरिच्छेदकः स कथम्? वीतो(१)ऽन्वयादिति चेत्? वीतो हेतुरन्वयेन प्रतिपादयति। अथ प्रमेयत्वं कस्मान्न हेतुः यद्यन्वयस्यैतत् सामर्थ्यम्? व्यभिचारात् प्रमेयत्वं न हेतुः? न तर्ह्यन्वयः प्रतिपादकः, अपि त्वव्यभिचारः। यदि चाव्यभिचाराद्धेतुरर्थं प्रतिपादयति तदा अदेश्यमेतत् कथमवीतः प्रतिपादक इति, अवीतस्यापि व्यतिरेकाव्यभिचारित्वात् प्रतिपादकत्वमिति। कथम्? यावदप्राणादिमत् तत् सर्वं निरात्मकं दृष्टमिति, अप्राणादिमत्त्वं च

न्यायवार्त्तिकतात्पर्यटीका

तदेतद्भाष्यकारीयमुदाहरणं दूषयित्वा स्वकीयमुदाहरणमाह—उदाहरणं त्विति। प्राणादिना च स्वकारणं प्रयत्नाद्युपलक्षयति—यदुभयपक्षसंप्रतिपन्नं निरात्मकं तत् सर्वमप्राणादिमद् दृष्टमिति विपर्ययेण योजना। प्राणादिकारणेच्छारहितं यदित्यर्थः। तस्मान्नेदमिति। नेच्छादिसमवायिकारणरहितम्। यश्चासौ इच्छादिसमवायिकारणं पृथिव्यादिविलक्षणो द्रव्याणां नवमः, स आत्मेत्युच्यत इत्यर्थः। अन्वयिव्यतिरेकिणोस्तद्व्यतिरेकिणश्च तन्त्रान्तरसिद्धेन नाम्ना तन्त्रान्तरसिद्धान्तं दर्शयति—सोऽयमवीत इति। विविधेन प्रकारेण इतः प्राप्तो वीतः, पक्षव्यापकत्वे सति सपक्षव्याप्त्याऽव्याप्त्या च, तस्मादन्योऽवीत इति। गूढाभिसंधिः पृच्छति—कथं पुनरिति। गूढाभिसंधेरुत्तरम्—अथ योऽभ्यनुज्ञात इति। यथा वीतस्यार्थपरिच्छेदकत्वं तथैवावीतस्येत्यर्थः। प्रष्टा स्वाभिप्रायमुद्घाटयति—वीतोऽन्वयादिति। गृहीताविनाभावो हि हेतुः साध्येन तस्य परिच्छेदकः, स च दृष्टान्तधर्मिणि हेतुसाध्यधर्मयोर्दर्शने सत्यविनाभावो दृष्टो भवति। न च सात्मकत्वं क्वचिद् दृष्टं तत् कथं तेनाविनाभावदर्शनं प्राणादिमत्त्वस्य, दर्शने च नावीतः किन्तु वीत एवेत्यर्थः। उत्तरवादी प्रष्टारं पृच्छति—अथ प्रमेयत्वमिति। प्रष्टा आह—व्यभिचारादिति। उत्तरवाद्याह—न तर्ह्यन्वय इति।

वृत्तिः

ज्ञापकत्वबोधक इत्यर्थः। तथा च साध्यतावच्छेदकावच्छिन्नसाध्यान्वितज्ञापकत्वबोधकः साध्यान्वितस्वार्थबोधकोऽवयव इति फलितार्थः।

(१) ख-पु० "वीत" इति नास्ति।

न्यायवार्त्तिकम्

जीवच्छरीरान्निवर्त्तते, तस्मात्तदव्यभिचारि निरात्मकत्वमपि निवर्त्स्यतीति। अथ पुनरप्राणादिमत्त्वनिवृत्तिरेव प्रतिपाद्यते न पुनर्निरात्मकत्वस्य? न युक्तमेवं भवितुम्। किं कारणम्? पक्ष एवं सति व्यभिचारो दर्शितः स्यात् पक्षव्यभिचारोपदर्शने सति शक्यं वक्तुम्। अन्वयिनि तु हेतौ शब्दे नित्यत्वमस्तु सति कृतकत्व इति। तस्माद्यथान्वयिनोऽन्वयसम्बन्धाव्यभिचारः प्रतिपादकः तथा व्यतिरेकिणोऽपि व्यतिरेकव्यभिचार इति। एतेन यथा वीत(१)हेतोरव्यभिचारिण एकस्य धर्मस्य दर्शनादितरधर्मानुमानमेवमवीत(२)हेतावपि एकधर्मनिवृत्तिदर्शनादितरधर्मनिवृत्त्यनुमानमिति। सर्वात्मकत्वप्रसङ्ग इति चेत् न, विकल्पानुपपत्तेः।

यद्येकधर्मनिवृत्तिदर्शनादितरधर्मनिवृत्तिरनुमीयते, तन्निवृत्त्या च सात्मकत्वं सिध्यतीति मन्यसे, एवं च सर्वात्मकं शरीरं प्राप्नोति। किं कारणम्? अप्राणादिनिवृत्तेरडित्थादिनिवृत्तिप्रतिपादकत्वात्,

न्यायवार्त्तिकतात्पर्यटीका

स एवैकग्रन्थेनाह—यदि चेति। तदेवमुत्तरवादिना स्वाभिप्राय उद्घाटिते(३) पृच्छति—कथमव्यभिचारित्वं व्यतिरेकिण इति। अव्यभिचारमाह—यावदिति। अत्रापि यावन्निरात्मकं तत्सर्वम् अप्राणादिमद्(४)दृष्टमिति व्यत्यासेन योजना, साध्यविपर्ययस्य व्याप्यत्वाद्, व्यापकनिवृत्तौ च व्याप्यं निवर्त्तते, यथा वृक्षत्वनिवृत्तौ शिंशपात्वमारादुपलभ्यमानादेकशिलामयादचलप्रदेशादित्यर्थः। यदि पुनरेवमुच्यते निवर्त्ततामप्राणादिमत्त्वं जीवच्छरीरात्, प्राणादिमत्त्वस्य प्रमाणत उपलब्धेः, मा निवर्त्तिष्ट नैरात्म्यम्, तस्माद्व्यभिचारादहेतुत्वमित्याशङ्कते—अथ पुनरिति। निराकरोति—न युक्तमिति। किं जीवच्छरीरे साध्ये नैरात्म्यनिश्चयाद् व्यभिचार उत तत्सन्देहात्? यदि निश्चयात्, कृतं व्यभिचारेण, बाधितविषयत्वेनैव हेतोरपाकरणात्। अथ सन्देहात्, तथा सत्यन्वयिनोऽप्यहेतुत्वे सर्वानुमानोच्छेदप्रसङ्ग इत्यर्थः। शङ्कते—सर्वात्मकत्वप्रसङ्ग इति चेत्। निराकरोति—न, विकल्पानुपपत्तेः।

शङ्कावाक्यं विभजते—यदीति। न तावदयमात्मा नाम प्रमाणेन क्वचिदुपलब्धः, यस्य प्रतिषेधो नैरात्म्यमवगम्येत, तदुपलम्भे वा कृतमनया कुसृष्ट्या। तस्मात् कल्पयित्वाऽऽत्मानमप्रामाणिकं तत्प्रतिषेधस्य घटादावप्राणादिमत्त्वेन व्याप्तिं गृहीत्वा जीवच्छरीरे व्यापकस्याप्राणादिमत्त्वस्य निवृत्त्या नैरात्म्यस्य व्याप्यस्य निवृत्तेरात्माऽवगन्तव्यः। एवं च सति कल्पनाकोषस्यापरिमेयत्वाद् यद् यदेव कल्प्यते तत्तदभावस्य घटादौ सुलभत्वाद् अप्राणादिमत्त्वेन व्याप्तिर्जीवच्छरीरेऽप्राणादिमत्त्वस्य व्यापकस्य निवृत्तेरात्मसद्भाववत् सकलकाल्पनिकडित्थादिमत्त्वप्रसङ्ग इत्यर्थः। निरा-

(१) "अवीत" इति ख०। (२) "अवीत" इत्यत्र "वीत" इति ख०। (३) क-पु० "स्वाभिप्रायमुद्घाटितः" इति पाठः। (४) "अप्रमाणादिमद्" इति क०।

न्यायवार्त्तिकम्

नेदमडित्थवच्छरीरमप्राणादि(१)मत्त्वप्रसङ्गादेवमडित्थादिप्रतिषेधोऽपि वक्तव्य इति। तच्च नैवम्, विकल्पानुपपत्तेः। इदं तावत् भवान् पृष्टो व्याचष्टाम्—किमवधारितकार्यस्वभावः पदार्थो डित्थशब्दवाच्य आहो नेति। यद्यवधारितकार्यस्वभावः, संज्ञाभेदमात्रमात्मा स इति। अथानवधारितकार्यस्वभावः, तस्य व्यावृत्तिरशक्या प्रतिपादयितुम्। व्यावृत्तिप्रधानं चेदं वाक्यम्। तस्मादवीतहेतोरर्थमबुद्ध्वा सर्वात्मकता देश्यत इति।

न्यायवार्त्तिकतात्पर्यटीका

करणवाक्यं विभजते—तच्च नैवम्, कस्माद्? विकल्पानुपपत्तेः। विकल्पयति—किमिति। अयमर्थः प्राणादयो हीच्छान्वयव्यतिरेकानुविधायिभावाभावतया इच्छादिकार्याः, अक्षणिकत्वे च व्यवस्थिते कार्यं समवायिकारणापेक्षमितीच्छादीनां समवायिकारणेन भाव्यमिति कार्यत्वाद् घटादिवत्, शरीरेन्द्रियादीनां च समवायिकारणत्वनिषेधे सति यदिच्छादीनां समवायिकारणं परिशिष्यते तद् द्रव्यमात्मेति क्षेत्रज्ञ इति चाऽऽख्यायते, तदस्य विशेषतोऽनवगतस्यापीच्छादिसमवायिकारणतया सामान्यरूपेणावधारितस्य शक्यः प्राणादिरहितेषु घटादिष्वभावः प्रतिपत्तुम्, निरात्मकशब्देनापि चायमेवार्थ उच्यते, अनेन प्राणादिलक्षणकार्याभावेन घटादौ नैरात्म्यलक्षणकारणाभावस्य व्याप्तिरवधारिता, सोऽयं जीवच्छरीरे कार्यस्य अभावो व्यापको निवर्तमानः स्वव्याप्यं तत्कारणाभावमादाय निवर्तत इति सिद्धं जीवच्छरीरे प्राणकारणम्, स चात्मेति। यदि च डित्थादयोऽपि तथा, तदात्मनो नामान्तराणि नार्थान्तराणि नामानि च लोकतन्त्राणि। अवधारितं कार्यं प्राणादुपलक्षितमिच्छादि यस्य सोऽवधारितकार्यः स एव स्वभावो यस्य तथोक्तः। एतदुक्तं भवति सामान्यतस्तावदिच्छादीनां कार्यत्वेनान्वयव्यतिरेकिणा हेतुना समवायिकारणवत्त्वमनुमितम्, उभयसिद्धश्च घटादाविच्छादिकारणाभावः। येऽपि हि नैरात्म्यवादिनो बुद्धिं वा भूतपरिणामभेदं वा इच्छादिकारणमाचक्षते, तेऽपि घटादौ न तदातिष्ठन्ते। तस्मादुभयसिद्धनैरात्म्या घटादयः, तेषु चेच्छादिकार्याभावेन नैरात्म्यं व्याप्तम्, सोऽयं जीवच्छरीरे कार्याभावो व्यावर्त्तमानः कारणाभावं व्यावर्तयति। न च कार्येणैव कारणमनुमीयतां जीवच्छरीरे, किं व्यतिरेकिणा, ऋजुमार्गेण सिध्यन्तं को नु वक्रेण साधयेदिति वाच्यम्, कारणमात्रस्य ततः सिद्धेरित्युक्तम्। परिशेषाद्विशेषसिद्धिरिति चेत् स एव व्यतिरेकीत्युक्तम्। यदि हि पृथिव्यादिसमवायिकारणा इच्छादयो भवेयुः घटादिष्वपि प्रसज्येरन्। तस्माद् घटादिष्विच्छादिकार्यनिवृत्त्या द्रव्याष्टकातिरिक्तकारणनिवृत्तिर्व्याप्ता

वृत्तिः

तस्य द्वैविध्यमाह—उदाहरणसाधर्म्यात् तथा वैधर्म्यादिति। साधर्म्यमन्वयः वैधर्म्यं व्यतिरेकः तादृशव्याप्तिरिति फलितार्थः। उदाहरणसाधर्म्यमुदाहरणबोध्यान्वय-

---

(१) "शरीरमप्राणादि" इत्यत्र "शरीरं प्राणादि" इति ख०।

न्यायवार्त्तिकम्

यदि तर्ह्यसाधारणो धर्मो हेतुर्नित्या पृथिवी गन्धवत्त्वादित्यादयो हेतवः प्राप्नुवन्ति, न, हेत्वर्थापरिज्ञानात्,—सत्यमसाधारणो वैधर्म्यं हेतुः न पुनर्वैधर्म्यं व्यभिचारि गन्धवत्त्वं च नित्यानित्यव्यभिचारि, तस्मादन्वयिनो व्यतिरेकिणश्च नान्वयव्यतिरेकौ हेतुभावनिमित्तम् किन्त्वन्वयव्यतिरेकयोरव्यभिचार इति। यः पुनरसाधारणो धर्मः पक्ष एव केवलं यस्य तत्तुल्यविपक्षौ न स्तः स कस्मान्न हेतुः यथा सर्वं नित्यं सत्त्वात्। सत्यमयमसाधारणो न तु व्यावृत्तः, अव्यावृत्तेरहेतुरिति। एतेन यः पक्षैकदेशवृत्तिरविद्यमानसपक्षविपक्षः स न हेतुरित्युक्तं भवति यथा सर्वं

न्यायवार्त्तिकतात्पर्यटीका

दृष्टेतीच्छादयः शरीरे दृश्यमाना व्यापिकां स्वनिवृत्तिं निवर्त्तयन्तो व्याप्यद्रव्याष्टकातिरिक्तकारणाभावनिवृत्तिमुखेन नवमं द्रव्यं साधयन्ति। न चैषां बुद्धिरेव समवायिकारणम्, द्रव्यस्यैव समवायिकारणत्वनियमाद् बुद्धेश्चाद्रव्यत्वात्। यथा च भूतानां परिणतिभेदो न कारणं तथा तृतीय उपपादयिष्यते (१)। व्यतिरेकमुखेणापि प्राणादेः सात्मकत्वेनान्वयसिद्धौ न केवलव्यतिरेकीति चेद्, न स्वाभाविकं साध्येन प्रतिबन्धमन्वयव्यतिरेकिणं व्यासेधामः, किन्तु सपक्षाभावेन विधिमुखेनास्य प्रतिबन्धं निराकुर्मः। एतावतैव चान्वयिनो भिद्यते। न च पक्ष एव सपक्षः, जिज्ञासितविशेषस्य ज्ञातविशेषादन्यत्वात्। शरीरादिषु च सत्सु नैरात्म्यनिषेध एवात्मसद्भावः असन्निषेधस्य सद्भावलक्षणत्वात्। सपक्षाभावस्तु नैरात्म्येनाप्यव्यपदेश्य इति कथं नैरात्म्यनिषेधेन व्यपदिश्यतामसतोऽधिकरणत्वायोगादित्युक्तम्। एतेन परैर्यदुक्तम्—

सपक्षाव्यतिरेकी चेद् भवेद्धेतुरतोऽन्वयी।
नान्वयव्यतिरेकी चेदनैरात्म्यं न सात्मकम्॥

तदनेन निराकृतम्। एतच्चास्माभिरन्वयिहेतुसमर्थनेन स्फुटीकृतम् (२)। तस्मात् सर्वमवदातम्।

विपक्षव्यतिरेकिमात्रेण व्यतिरेकिणो गमकत्वं मत्वा चोदयति—यदि तर्हीति। परिहरति—न हेत्वर्थापरिज्ञानादिति। न वैधर्म्यमात्रेण गमकत्वम्, अपि त्वव्यभिचारिणा, स चात्राव्यभिचारो नास्तीत्यर्थः। ननु मा भूद् गन्धवत्त्वं हेतुर्व्यतिरेकव्यभिचाराद् अनित्यादिवन्नित्यादप्यस्य व्यभिचारात्। यस्य पक्ष एव केवलं न तु सपक्षविपक्षौ, न तस्य व्यतिरेकव्यभिचारोऽस्तीति स कस्मान्न हेतुरिति चोदयति—यः पुनरिति। परिहरति—सत्यमिति। व्यतिरेक-

वृत्तिः

व्याप्तिस्ततोऽन्वयी हेतुर्ज्ञातव्यः। उदाहरणेति स्पष्टार्थम्। तथा च ज्ञातान्वयव्याप्तिक-

(१) ३।२।३८ सूत्रस्य भाष्यवार्त्तिकतात्पर्यटीका द्रष्टव्या। (२) १।१।५ सूत्रव्याख्यावसरे।

न्यायवार्त्तिकम्

नित्यममूर्त्तत्वादिति। यः पक्षैकदेशे वर्तते अविद्यमानसपक्षो विपक्षाच्च निवर्तते यथाऽनभ्युपगतनित्यपक्षस्य नित्ये वाङ्मनसे श्रावणत्वादिति स कस्मान्न हेतुः? अयमपि न हेतुः, सूत्रार्थेनापोदितत्वात्, सूत्रार्थस्तथा वैधर्म्यादिति। अत्र च वैधर्म्यमुदाहरणेनैव, वैधर्म्यमेव चोदाहरणेन, न पुनरिदं वैधर्म्यमेव, तस्मान्न प्रसङ्गः। एवमनयोर्वीतावीतहेत्वोः पृथगर्थप्रतिपादकत्वस्याऽऽकुमारं (१) प्रसिद्धेः, यदुक्तं वीतावीतौ न पृथक् प्रतिपत्तिहेतू इति तत्संमूढेनोक्तम्।

हेतुर्विपक्षाद्विशेष इत्यन्ये,—अन्ये त्वन्यथा लक्षणं व्याचक्षते—हेतुर्विपक्षाद्विशेष इति। यदि पुनरेतावन्मात्रमुच्यते हेतुर्विशेष इति? किं स्यात्, विशेषमात्रं हेतुः स्यात् साधर्म्यमात्रनिराकरणं च स्यात् साधर्म्यमात्रनिराकरणे विशेषमात्रपरिग्रहे च इष्टानिष्टसङ्ग्रह इति। अतोऽनिष्टहेतुनिराक्रियार्थं विपक्षग्रहणम्, विपक्षाद् योविशेषः स हेतुः। विपक्षाद्विशेषो हेतुरित्येतावति चोच्यमाने विपक्षाद्विशेषमात्रस्य हेतुत्वं स चानेकभेदः, तन्निवृत्त्यर्थं विपक्षादेवेत्यवधार्यते। अवधारणे चैतस्मिन्

न्यायवार्त्तिकतात्पर्यटीका

धर्मोऽव्यभिचारो नासति व्यतिरेके सम्भवति, असतोऽधिकरणत्वायोगादित्युक्तत्वादिति। प्रत्युदाहरणान्तरं दर्शयति—एतेनेति। एतेन विपक्षाभावात् ततो व्यावृत्त्यभावेनेत्यर्थः। चोदयति—यः पक्षैकदेश इति। यदि हि पक्षैकदेशवृत्तिरपि विपक्षाभावाद् न व्यतिरेकी हेतुः तर्हि यस्य पक्षैकदेशवृत्तेरपि सतो विपक्षानिवृत्तिरस्ति स हेतुः प्रसज्येत, अस्ति खल्वस्योदाहरणवैधर्म्यमेवेति व्यतिरेकिहेतुलक्षणमित्यभिप्रायः। परिहरति—अयमपि न हेतुः, कस्मात्? सूत्रार्थेनापोदितत्वात्। तं सूत्रपाठपूर्वकं दर्शयति—सूत्रार्थ इति। अत्र च येन पक्षैकदेशवृत्तेर्व्यतिरेक्याभासनिराकरणं तदवधारणं प्रथमं दर्शितम्। उदाहरणेनैव वैधर्म्यं नानुदाहरणेन पक्षेणापि, अस्य तु पक्षेणापि इति व्यतिरेक्यपि न हेतुः, न पुनर्वैधर्म्यमेवेति सूत्रार्थः। तथा सति सव्यभिचारमात्रस्य निवृत्तिः स्याद् न तु पक्षैकदेशवृत्तेरित्यर्थः।

सम्प्रति हेतुलक्षणमुपन्यस्य दूषयति—हेतुर्विपक्षाद्विशेष इत्यन्ये। एतद्व्याचष्टे—अन्ये त्विति। साधर्म्यमात्रनिराकरण इति। यस्य कस्यचित् साधर्म्यस्य निराकरणे, विपक्षसाधर्म्यनिराकरणे तावदिष्टसंग्रहः। यदा तु सपक्षादिसाधर्म्यनिराकरणम्, तदाऽनिष्टस्य विरुद्धत्वादेः संग्रहः। उपलक्षणं चैतद्—इष्टानिष्टसंग्रह इति, इष्टपरित्याग इत्यादि द्रष्टव्यम्।

वृत्तिः

हेतुबोधको हेत्ववयवः अज्ञातव्यतिरेकव्याप्तिकहेतुबोधको हेत्ववयव इति फलितार्थः। एवमप्रतीतान्वयव्याप्तिक(२)हेतुबोधको हेत्ववयवो व्यतिरेकी हेतुरिति।

---

(१) "प्रतिपादकत्वमाकुमारम्" इति ख०। (२) "अप्रतीतान्वयव्यतिरेकव्याप्तिक" इति घा०।

न्यायवार्त्तिकम्

विपक्षैकदेशवृत्तिरेकोऽनुषज्यते गौर्विषाणित्वात्, स हि विपक्षादेव विशेष इति नायमनेनावधारणेन निराक्रियत इति तन्निराक्रियायै (१) द्वितीयमवधारणं (२) विशेष एव च विपक्षान्न त्वयं विशेष एव, विपक्षैकदेशवृत्तित्वात् सामान्यमपि। तदेवमाभ्यामवधारणाभ्यामन्वयव्यतिरेकी त्रिलक्षणो हेतुर्लभ्यत इति।

सत्यमेकस्त्रिलक्षणो हेतुर्लभ्यते समानपक्षैकदेशवृत्तिश्च एकस्त्रिलक्षण एव निराक्रियत इति। कथमिति ? आद्येनावधारणेन विपक्षादेव यो विशेषः स हेतुरिति ब्रुवता यस्तुल्यैकदेशवृत्तिः स विवर्तितो भवति। न ह्ययं विपक्षादेव विशेषः किन्तु सपक्षैकदेशादपीति। विपक्षैकदेशवृत्तिप्रतिषेधात् समानपक्षाद् यो विशेष एव स न (३) हेतुरित्युक्तम्भवति, यथाऽश्वोऽयं विषाणित्वात् न पुनरयम्। *प्रयत्नानन्तरीयकत्वादिर्विशेष एव न भवति, अपि तु पक्षैकदेशवृत्तित्वात् सामान्यमपीति। यद्येवं विपक्षादेव यो विशेषः स हेतुरित्येतदवधारणं बाधितं भवति। न चायं *(४) प्रयत्नानन्तरीयकत्वादिर्विपक्षादेव विशेषः, किन्तु तत्तुल्यैकदेशादपि। अथाश्रूयमाणेनार्थेनावधारणेऽर्थवती।

न्यायवार्त्तिकतात्पर्यटीका

स चानेकभेद इति। सपक्षादपि विशेषे सति विपक्षाद्विशेषः पक्षादपि विशेषे सति विपक्षाद्विशेषः विपक्षमात्राद्विशेष इति प्रकाराः। अत्र पूर्वयोः प्रकारयोर्यथाक्रममसाधारणस्यासिद्धस्य च हेतुत्वप्रसङ्ग इति तन्निवृत्त्यर्थं विपक्षादेवेत्यवधार्यते। द्वितीयमवधारणमवतारयितुमाह—अवधारणे चेति। विपक्षादेवेत्यनेनावधारणेन विशेषोऽवधारितः, न विपक्षः, स चायं विशेषे चाविशेषे च प्रसृत इति विपक्षैकदेशवृत्तेरपि पक्षसपक्षसाधारणस्य हेतुत्वप्रसङ्ग इति तन्निवृत्त्यर्थं द्वितीयमवधारणं विशेष एवेति। उपसंहरति—तदेवमिति।

तदेतदव्यापकत्वेन दूषयति—सत्यमेक इति। अत्र चोदयति—विपक्षैकदेशवृत्तिप्रतिषेधादिति। विशेष एवेत्यवधारणे विपक्षैकदेशवृत्तिः गौरियं विषाणित्वादिति हेतुत्वेन प्रतिषिद्धः। तस्मादेतस्मिन्नवधारणे सत्येव विपक्षादेवेत्यवधारणीयम्, तथा च विपक्षादेव यो विशेष एव स हेतुः, सपक्षात्तु यो विशेष एव स न हेतुरित्युक्तं भवति। तथा च अश्वोऽयं विषाणित्वादिति सपक्षाद्विशेष एवेति हेतुत्वेन प्रतिषिद्धो भवति। यस्तु सपक्षैकदेशवृत्तिः प्रयत्नानन्तरीयकत्वादिः स सपक्षाद्विशेष एव न भवति, अपि तु सामान्यमपीति। तस्य हेतुत्वमवधारितमिति हेतुरेवासावित्यर्थः। परिहरति—यद्येवमिति। यदि सपक्षादपि यो विशेषः सपक्षैकदेशवृत्तिः प्रयत्नानन्तरीयकत्वादिर्हेतुः एवं विपक्षादेवेत्यवधारणं बाधितं भवति।

---

(१) "तन्निवृत्तौ" इति ख०। (२) "द्वितीयमसाधारणम्" इति ख०। (३) ख-पु० "न" नास्ति।
(४) तारकाचिह्नद्वयमध्यवर्ती पाठः ख-पु० नास्ति।

न्यायवार्त्तिकम्

एवञ्च सति तुल्यैकदेशवृत्तिवत् साध्यैकदेशवृत्तेरपि हेतुत्वप्रसङ्गः, येनैव सामर्थ्येन तत्तुल्यैकदेशवृत्तिर्लभ्यते तेनैव सामर्थ्येनानुमेयैकदेशवृत्तिरपि हेतुः प्राप्तः, यथाऽनित्याः (१) परमाणवो गन्धवत्त्वादिति। ते एतेऽवधारणे यदि तावद्यथाश्रुते भवतस्तत इष्टः प्रयत्नानन्तरीयकत्वादिर्न हेतुः। अथान्यथा श्रूयते अन्यथा प्रकल्प्यते अभिप्रेतार्थसिद्ध्यर्थम्, तथाप्यभिप्रेतप्राप्तिवदनिष्टोऽपि गन्धवत्त्वादिर्लभ्यते इति उभयं च लक्षणदोषः अभिप्रेतहानिरनिष्टप्रसङ्गश्च। नैष दोषः, वृत्तौ विशेषितत्वात्—अनिष्टस्य गन्धवत्त्वादेः प्राप्तिरित्यदोषः (२) यस्माद् वृत्तावाह यो धर्मः पक्षस्येति अनेन चाक्षुषत्वादिः पक्षासम्भवी निराक्रियते, पक्षैकदेशवृत्तिस्तु कथम्? न ह्यसौ पक्षधर्मो न भवति, तथा विपक्षैकदेशवृत्तिर्न विपक्षस्य न धर्म (३) इति, तस्मादन्यथा निराकरणे यत्नः कर्तव्य इति। न कर्तव्योऽवधारणान्निवृत्तेः—अवधारणादेकदेशवृत्तिर्निवर्त्तिष्यते। किं पुनरवधार्यते, किं धर्म एव पक्षस्य उत पक्षस्यैव धर्म इति? अस्तु तावद्धर्म एव पक्षस्येति, किं पुनरस्यावधारणस्य सामर्थ्यम्? किमनेन सम्भवो ज्ञाप्यते, उतासम्भवो व्यावर्त्यते?

न्यायवार्त्तिकतात्पर्य्यटीका

शङ्कते—अथेति। न विपक्षादेवेत्येतन्मात्रमवधार्यते येन सपक्षैकदेशवृत्तिः प्रयत्नानन्तरीयकत्वादिर्न हेतुः स्यादपि तु यो विशेष एव स हेतुरिति प्राप्ते विपक्षादेवेति नियम्यते, तेन साधारणस्य विशेषस्य विपक्षवृत्तेर्हेतुत्वं प्रतिषिद्धं भवति, यथाऽश्वोऽयं विषाणित्वादिति। यः पुनर्विशेषश्चाविशेषश्च सपक्षे हेतुः तस्य हेतुत्वेऽपि न विपक्षादेवेति बाधितं भवति। यद्यपि चैवं सति सपक्षैकदेशवृत्तेर्हेतुत्वं न श्रुतम्, तथाऽपि विपक्षादेवेत्यनेनावधारणेनानिषिद्धमनुमतमेव। तेन चाश्रुतेनार्थेनार्थवती अवधारणे इत्यर्थः। निराकरोति—एवं चेति। यथा तत्तुल्यैकदेशवृत्तेरविहितमपि हेतुत्वमनिषेधादनुमतमेवं पक्षैकदेशवृत्तेरपीति सोऽपि हेतुः स्यादित्यर्थः। पुनः प्रत्यवतिष्ठते नैष दोष इति। पक्षधर्मत्वे सति विशेष एवेति नियमे कुतः पक्षैकदेशवृत्तेः प्राप्तिः अपक्षधर्मत्वात्तस्येत्यर्थः। परिहरति—यो धर्मःपक्षस्येत्यनेनेति। पर आह—न कर्तव्य इति। दूषयितुमवधारणं विकल्पयति—किं पुनरिति। प्रथमकल्पं गृह्णाति—अस्तु तावदिति। एतमपि दूषयितुं विकल्पयति—किं पुनरस्येति। सामर्थ्यं प्रयोजनाभिसम्बन्धः, सम्भवज्ञापनपक्षेऽज्ञापन-

वृत्तिः

इत्थमेव (४) प्रतीतान्वयव्यतिरेकव्याप्तिकहेतुबोधको हेत्ववयवोऽन्वयव्यतिरेकीत्यपि सूचितमिति वदन्ति ३४-३५ ॥

(१) "यथा नित्याः" इति ख०। (२) "प्राप्तिरित्यतो दोषः" इति ख०। (३) "विपक्षस्य न धर्म्मः" इत्यत्र "पक्षस्य धर्म्मः" इति ख०। (४) "अयमेव" इति ल०।

न्यायवार्त्तिकम्

उभयथापि नावधारणस्य सामर्थ्यमस्ति, सम्भवज्ञप्तेरसम्भवनिवृत्तेश्चावधारणमन्तरेणाप्यवगतेः। न चैकदेशवृत्तिर्निराक्रियत इति व्यर्थमवधारणम्। अथ पुनर्व्याप्तिरस्यावधारणस्यार्थः धर्म एव पक्षस्येति, न पुनरधर्मोऽपि, यः पुनः पक्षैकदेशवृत्तिरसावधर्मोऽपि। सत्यमनेनैकदेशवृत्तिर्निराक्रियत इति। एतस्मिन्नप्येकं सन्दिग्धत इदमन्यत् प्रच्यवते। भवत्येकदेशवृत्तिनिराकरणं सपक्षे सिद्धे एतत्पदं किमर्थमारभ्यत इति। कथं पुनरिदमनारभ्यं यस्माद् व्याप्त्यर्थेनावधारणेन चरितार्थत्वात्। धर्म एव पक्षस्येति पक्षो नियतो, धर्मोऽनियतः तस्यानियतस्य व्याप्त्यतिव्याप्तिभ्यां (१) तत्तुल्यविपक्षगतिः तत्र विपक्षे नास्तीति प्रसक्तस्य प्रतिषेधो भवतु (२) सपक्षे सिद्ध इत्येतत्पदं मा भूत्। अथ पुनरिदमवधारणमन्यथा क्रियते पक्षस्यैवेति, एवमप्यनन्तरे द्वे अपि पदे 'सपक्षे सिद्धो विपक्षे नास्तीति' च बाधिते भवतः। कथम्? सपक्षे सिद्ध इत्येतदवधारणार्थबाधितं पक्षस्यैव धर्मः सपक्षे सिद्ध इति। न हि लोक एवंप्रकाराणि वाक्यानि प्रवर्तन्ते देवदत्तमेव भोजय यज्ञदत्तं च। उत्तरं तु पदं विपक्षे नास्तीति गम्यमानत्वादकार्यम्। केन गम्यमानत्वादिति? अवधारणेन, पक्षस्यैव धर्मः सामान्यस्येति गम्यत एव इति विपक्षे नास्तीत्येतन्न कर्तव्यमिति। न च पक्षैकदेशवृत्तिर्निराक्रियत इति यदर्थमवधारणं स एवार्थो हीयत इति। अथ पुनः सपक्षे सिद्ध इत्येतदपि पदमवधारणार्थमेवारभ्यते सपक्ष एव सिद्धः सिद्ध एव सपक्ष इति। किं पुनरस्मिन् पदेऽवधारणेन (३) लभ्यते? यदि सम्भवः सोऽनवधारितोऽपि गम्यते सपक्षे सिद्धः। अथ व्याप्तिः तज्जातीयस्यैकदेशवृत्तिरहेतुरिति प्राप्तम्। अथ सपक्ष एव सिद्ध इति तथापि पूर्वोत्तरे पदे व्याहते भवतः, पक्षस्य धर्मो विपक्षे नास्तीति अवधारणार्थ(४)बाधितत्वात् पूर्वमनारभ्यं गम्यमानत्वादुत्तरमपि। अथ विपक्षे नास्तीत्येतदप्यवधारणार्थमेवेति। अत्रापि किमवधार्यते विपक्ष एव नास्तीति नास्त्येव विपक्ष इति। यदि विपक्ष एव नास्ति तदा गौर्विषाणित्वादिति हेतुः प्राप्तः स हि विपक्ष एव नास्तीति। अथ विपक्षे नास्त्येवेति न

न्यायवार्त्तिकतात्पर्य्यटीका

निवृत्तिः प्रयोजनम्। असम्भवनिवृत्तिपक्षे त्वत्यन्तायोगव्यावृत्तिः फलम्। यथा नीलं सरोजं भवत्येवेति। विकल्प्य दूषयति—उभयथाऽपीति। युक्त्यन्तरमाह—न चेति। अत्यन्तायोगो निषिद्धो भवति न त्वयोग इत्यर्थः। शङ्कते—अथेति। विशेषणसंगतो ह्येवकारोऽयोगं व्यवच्छिनत्ति यथा चैत्रो धनुर्द्धर एवेति, हेतुविशेषणं चेदपक्षधर्म एवेति। तस्मात् सिद्धं पक्षैकदेशे वृत्तेर्निराकरणमित्यर्थः। निराकरोति—सत्यमिति। शेषमनुमानसूत्रे व्याख्यातप्रायमिति नेह व्याख्यातम्।

(१) "व्याप्त्यव्याप्तिभ्याम्" इति ख०। (२) "प्रसक्तस्य प्रतिषेधो भवतु" इत्यंशः ख-पु० नास्ति।
(३) "पदेनावधारणेन" इति ख०। (४) "अधारणार्थ-" इति क०।

न्यायवार्त्तिकम्

पुनर्मध्यमस्य पदस्यानारम्भः (१) तत्र पूर्वपदं व्याप्त्यर्थमुत्तरपदं विपक्षैकदेशवृत्तिप्रतिषेधार्थम्। अथ सपक्षे सिद्ध इत्येतत्पदं किमर्थमारभ्यत इति। यदि सम्भवार्थं व्याप्त्यर्थेनाद्यावधारणेन सम्भवो लभ्यत इति व्यर्थम्। तदेतस्मिन् लक्षणे सद्वृत्त्या विचार्यमाणेऽनिष्टहेतूपनिपातो वा इष्टहेतुपरित्यागो वाऽभिप्रेतग्रस्तहानिर्वेति दोषाः।

हेतुर्विपक्षाद्विशेष इति च यदा सौत्रान्तिकपक्षमाश्रित्य लक्षणं विचार्यते, तदा विपक्षासम्भवाद्धेतुर्विपक्षाद्विशेष इति विपक्षार्थो वक्तव्यः, न ह्यसति (२) विपक्षार्थं पश्याम इति। न चासति पञ्चम्याः प्रयोगः सम्भवति (३) इति विपक्षे नास्तीति सप्तम्यर्थो वक्तव्यः, विपक्षासम्भवे सति पक्षतज्जातीयव्यापकत्वात् कृतकत्वादेर्विशेषोऽर्थश्चिन्त्यः। कृतकत्वादिति साधारणत्वात् सामान्यं (४) न विशेष इति। तदेतल्लक्षणं स्वसिद्धान्तेनासङ्गतत्वादलक्षणमिति। यदपि हेतुवार्त्तिकं ब्रुवाणेनोक्तम्(५) सप्तिकासम्भवे षट्प्रतिषेधादेकद्विपदपर्युदासेन त्रिलक्षणो हेतुरिति। एतदप्ययुक्तम्, द्विपदलक्षणयुक्तयोर्हेतुत्वात् तत्र किल सप्तिका सम्भवति, पक्षस्यैव धर्मः समान एव सिद्धः विपक्ष एव नास्ति। पक्षस्य धर्मः समाने च सिद्धः पक्षस्य धर्मो विपक्षे नास्ति। समान एव च सिद्धः विपक्षे नास्ति, पक्षस्य धर्मः समाने च सिद्धो विपक्षे च नास्तीति। तदेवं सप्तिका-

न्यायवार्त्तिकतात्पर्य्यटीका

हेतुर्विपक्षाद्विशेष इति च सौत्रान्तिकपक्षमिति। यदा त्वनित्यत्वहेतौ लक्ष्ये लक्षणं विचार्यत इति विपक्षशब्दार्थो वाच्यः। ननु नित्यो विपक्ष इत्यत आह—न ह्यसतीति। न हि निरुपाख्यमाख्यायत इत्यर्थः। न चास्यापादानत्वं नाप्यधिकरणत्वं येन पञ्चमी वा सप्तमी वा प्रसज्येतेत्याह—न चासतीति। न चासतो विपक्षाद्व्यावृत्त्यभावेन विशेषोऽपीत्याह—विपक्षासम्भवे सतीति। पक्षस्यैवेति। अत्र चैवकारास्त्रयः पदान्तरानपेक्षत्वं सूचयन्ति। पक्षस्यैव धर्म इति हेतुलक्षणेऽसाधारण एव हेतुः स्यात्। समान एव सिद्ध इति। हेतुलक्षणे अश्वस्य विषाणित्वे साध्ये गोत्वादिर्हेतुः स्यात्। विपक्ष एव नास्तीत्युच्यमाने अनित्यः शब्दः प्रमेयत्वादित्यपि हेतुः स्यात्, तस्मात् त्रयः पक्षा हेयाः। तथा च पक्षस्य धर्मः समाने च सिद्ध इत्यत्र सव्यभिचारो हेतुः स्यात्। पक्षस्य धर्मो विपक्षे च नास्तीत्युच्यमानेऽसाधारणो हेतुः स्यात्। समाने च सिद्धो विपक्षे नास्तीत्युच्यमाने अनित्यः परमाणुः कृत-

(१) "पदस्यानारम्भः" इति क०। (२) "न चासति" इति क०। (३) अत्र ख-पु०—"विपक्षादिति पञ्चमीविषयो वाच्यः, असति विपक्षे नाधिकरणार्थः सम्भवति" इत्यधिकः पाठः। (४) "तदा साधारणत्वमसामान्यम्" इति ख०। (५) महाभाष्ये "गोनर्दीयस्त्वाह" इत्यत्र यथा महाभाष्यकारः पतञ्जलिः स्वस्यैव नामान्तरेण "गोनर्दीय" इत्यनेन स्वमेव बोधयामास, अत्रापि तथा "हेतुवार्त्तिकं ब्रुवाणेन" इत्युक्त्या वार्त्तिककारः स्वमेव बोधयति।

न्यायवार्त्तिकम्

सम्भवे सति षट्प्रतिषेधमुक्त्वा यदयं त्रिपदपरिग्रहेण त्रिलक्षणस्य हेतुतां शास्ति तेनैकद्विपदपर्युदासं ज्ञापयतीति। तच्च नैवम्। द्विलक्षणयुक्तयोर्हेतुत्वादिति, अनभ्युपगताऽनित्यपक्षस्य(१) कृतकत्वादित्ययं द्वाभ्यां लक्षणाभ्यां युज्यते प्रयत्नानन्तरीयकत्वादिति चानयोर्हेतुभावो न स्यात्। यश्चायं व्यतिरेकी हेतुः नेदं निरात्मकं जीवच्छरीरम् अप्राणादिमत्त्वप्रसङ्गादित्येवमादिः स न हेतुः स्यात् द्विपदयोगादिति। तस्माद्धेतुर्विपक्षाद्विशेष इत्येतल्लक्षणं विचार्यमाणमनभिमतं वा हेतुमापादयति इष्टं वा बाधते ग्रन्थं वा निराकरोति शास्त्रं बाधत इति।

"तत्र यः सन् सजातीये द्वेधा चासंस्तदत्यये" इत्यन्ये। अनेन(२)—सन् सजातीये द्वेधा चासंस्तदत्यय इत्यसपक्षे नास्ति। एतावता च किल लक्षणेन त्रिलक्षणो हेतुर्लभ्यत इति

न्यायवार्त्तिकतात्पर्य्यटीका

कत्वादिति हेतुः स्यादिति त्रयः। सप्तममभिमतं पक्षमाह—पत्तस्येति। शेषं सुबोधम्।

अत्र दिङ्नागेन—

सपक्षे सन्नसन् द्वेधा पक्षधर्मः पुनस्त्रिधा।
प्रत्येकमसपक्षे च सदसद्द्विविधत्वतः॥

इति। न च पक्षधर्मान् हेतुतदाभासान् दर्शयित्वा—

तत्र यः सन् सजातीये द्वेधा चासंस्तदत्यये।
स हेतुर्विपरीतोऽस्माद्विरुद्धोऽन्यस्त्वनिश्चितः॥

इति हेतुतदाभासविवेको दर्शितः। तस्यार्थः—यः पक्षधर्मः स सपक्षे सन्नसन् द्वेधा इति, स पुनरसपक्षे सदसद्द्विविधत्वतः प्रत्येकं त्रिधा भवतीति। पक्षधर्मः सपक्षे सन् विपक्षे सदसद्द्विविधत्वतस्त्रिधा। पक्षधर्मः सपक्षे द्वेधा विपक्षे सदसद्द्विविधत्वतस्त्रिधेति। अत्रोदाहरणम्—

प्रमेयकृतकानित्यकृतश्रावणयत्नजाः।
अनित्ययत्नजास्पर्शानित्यत्वादिषु ते नव॥

नित्यत्वादिषु साध्येषु प्रमेयत्वादयो नव हेतुतदाभासाः, तेषां यथासंख्यं नित्यत्वादीति साध्यान्युदाहरन्ति—

नित्यानित्यप्रयत्नोत्थमध्यमत्रिकशाश्वताः।
अयत्नानित्यनित्याश्च प्रमेयत्वादिसाधनाः॥

तदेतेषु हेतुतदाभासेषु हेतुर्निर्द्धारितो येन तदुपन्यस्य वार्त्तिककारो व्याचष्टे—तत्र य इति।

---

(१) "नित्यपक्षस्य" इति ख०। (२) "इत्यन्ये। अनेन" इत्यत्र "इति। अन्यनेन" इत्येवं क-पु० पाठः। खपुस्तके तु—"अनेन" इति नास्ति।

न्यायवार्त्तिकम्

यथाश्रुति न लभ्यते। यदि तावदेतल्लक्षणं यथाश्रुति भवति पक्षे(१) विद्यत इति केनैतल्लभ्यत इति। ननु चोक्तं, हेतुः तदाभासो वा प्रायः पक्षधर्म एव भवति। उक्तमेतन्न पुनरनेन पक्षधर्मो हेतुरिति लभ्यते, किं त्वपक्षधर्मो न हेतुः न हेत्वाभास इति। अथाप्यर्थतो लभ्येतापक्षधर्मो हेतुर्न हेतुर्न हेत्वाभास इत्ययं यदि वाक्यार्थो भवति अर्थाद् गम्यते हेतुर्हेत्वाभासश्च पक्षधर्म इति। सत्यमर्थात् पक्षधर्मो गम्यते न तु व्यापको(२)नियतो लभ्यत इति। अपक्षधर्मनिवृत्तिमात्रत्वेन च सम्भवमात्रं लभ्यत इति। तच्च द्वेधा व्यापकमव्यापकं च। तत्राव्यापकोऽनिष्टो हेतुः प्राप्तः। न प्राप्तः, पक्षधर्म एवेत्यभिधानाद् यः पक्षस्य धर्म एव स हेतुः प्राप्तः, न त्वयं पक्षधर्म एव एकदेशवृत्तित्वादिति। न, अवधारणस्यान्यार्थत्वात्—अन्यार्थमवधारणं भवन्तः कल्पयन्ति। किमर्थम्? हेतुहेत्वाभासनियमज्ञापनार्थम्। तदवधारणमन्यार्थं सत् कथमव्यापकं निवर्तयिष्यति।

अथोभयकारि भवत्यव्यापकनिवृत्त्यर्थं हेतुहेत्वाभासनियमज्ञापनार्थं च, तथापि सन् सजातीये द्वेधा चेत्यकरणीयम्। कथम्, व्याप्त्यर्थेनावधारणेन पक्षोऽपि नियतो धर्मश्च नियत इति। अनियतस्य व्याप्त्यव्याप्तिभ्यां धर्मस्य द्वौ राशी शिष्यमाणौ सजातीयस्तदत्ययश्च तत्रातिप्रसक्तेरसंस्तदत्यय इति युक्तम्(३)। सन् सजातीय इति किमर्थम्। यदि सम्भवार्थं तन्न, अनियमात्—व्याप्त्यव्याप्त्योः सम्भवो गम्यत इति किमनेन सन् सजातीय इति। द्वेधा चेति सर्वथा न वक्तव्यम्। इदं तावद् गम्यमानत्वात् सन् सजातीय इति न कर्तव्यम्। सच्छब्देन

न्यायवार्त्तिकतात्पर्यटीका

तदेतद्दूषयति—यथाश्रुतीति। "तत्र यः सन् सजातीये द्वेधा चासंस्तदत्ययः" इत्येतावन्मात्रान्न लभ्यत इत्यर्थः। चोदयति—ननु चोक्तमिति। उक्तं दिङ्नागेन—

साध्यधर्मो यतो हेतुस्तदाभासश्च भूयसा॥ इति।

तदेतत् परिहरति—उक्तमेतदिति। न पुनः पक्षधर्म एवेत्यर्थः। अवधारणमबुद्ध्वा शङ्कते—अथापीति। अवधारणार्थालाभेनोत्तरमाह—सत्यमर्थादिति। ननु पक्षधर्मत्वनिवृत्त्यैव पक्षाव्यापकत्वं गम्यते, न ह्यव्यापको भवत्यपक्षधर्मनिवृत्तिमान् इत्यत आह—अपक्षधर्मनिवृत्तिमात्रत्वेन चेति। अत्यन्तनिवृत्तिनिषेधेन वृत्तिमात्रं स्यात् नैकान्तिकी वृत्तिरित्यर्थः। चोदयति—न प्राप्त इति। परिहरति—न, अवधारणस्येति। हेतुहेत्वाभासावेव पक्षधर्मो नान्य इति नियमज्ञापनार्थमवधारणमिष्टं भवद्भिरित्यर्थः।

शङ्कते—अथोभयेति। निराकरोति—तथाऽपि सन् सजातीय इति। तदेतत् पूर्वमेव

(१) "विपक्षे" इति ख०। (२) "व्यापके" इति ख०। (३) "युक्तम्" इति ख-पु० नास्ति।

न्यायवार्त्तिकम्

व्याप्त्यव्याप्त्योः सामान्येनाभिधानाद्द्वेधा चेति प्रमत्तवाक्यम्। अथ मन्येत सन् सजातीय इत्यवधारणार्थमारभ्यत इति? अवधारणाऽर्थो युक्त आरम्भः अवधारणं न युक्तम्। कथमिति? यदि तावदेवमवधार्यते सन्नेव सजातीय इति, प्रयत्नानन्तरीयकत्वादिस्ते न हेतुः, यस्मात् प्रयत्नानन्तरीयकत्वादिः सन्नसन्नपि द्विधा चेति एतदवधारणार्थबाधितम्। न हि भवति ब्राह्मणमेव भोजय क्षत्रियं चेति। अथ सजातीय एव सन्नित्यवधार्यते तथापि पूर्वोत्तरे बाधिते भवतः। कथम्? एकमवधारणार्थबाधितम् एकं गम्यमानत्वात्। अथ पुनर्द्वेधा चेत्यवधारणार्थम्? अत्रापि किमवधार्यते किं सजातीय एव द्विधा द्विधैव सजातीय इति। यदि तावत् सजातीय एव द्विधा नान्यत्र पक्षे(१) तदत्यये तद् द्विधेत्युक्तं भवति। यद्येवं सन् सजातीय इति न कर्तव्यम्, प्राप्त्यर्थेनावधारणेनाऽऽद्यपदे(२) सजातीये सम्भवस्योक्तत्वात्। द्विधा चेत्यन्यपदे(३) द्विधा निवृत्तिपरत्वात्, द्विधा चेत्यभिधानात् सम्भवो गम्यत इति सन् सजातीय इति सर्वथा न वक्तव्यम्। सजातीय एव द्विधा चेत्यनेनैवावधारणेन पक्षवृत्ति(४)र्लभ्यत इति धर्म एव पक्षस्येति व्याप्त्यर्थमवधारणमयुक्तम्। अथ माभूत् सर्वपदावधारणव्याघात इति नावधारणम्, तथापि मध्यमे द्वे पदे अपि न कर्तव्ये। सोऽयं गृह(५)प्रवेशाक्षितारकानिर्गमन्याय इति। अथ पुनर्द्विधैव सजातीय इति। तथापि कृतकत्वादिर्न हेतुः, न ह्यसौ सजातीये द्विधैव। त्रिलक्षणं च हेतुं ब्रुवाणेन

न्यायवार्त्तिकतात्पर्य्यटीका

व्याख्यातप्रायम्। द्वेधा चेति सर्वथा न वक्तव्यमिति। सन् सजातीय इत्यस्योपादानेऽनुपादाने चेत्यर्थः। सन् सजातीय इति नोपादातव्यमिति यदुक्तं तत्र शङ्कते—अथ मन्येतेति, निराकरोति—अवधारणेति, यद्यवधारणं युज्येत अवधारणार्थो युक्त आरम्भः, तदेव त्वयुक्तमित्यर्थः। आद्ये पद इति, पक्षस्य धर्म इत्यस्मिन् पद इत्यर्थः। अन्यपदे इति। अन्ये पदे ययोः पक्षधर्मत्वविपक्षासत्त्वयोस्ते तथोक्ते। तत्र द्वैविध्यं निराक्रियत इति। सन् सजातीय इति सर्वथेति? सजातीये द्वेधा चेति पदोपादानेऽनुपादाने चेत्यर्थः। सजातीय एव द्वेधेत्यनेनैवेति। हेतुतदाभासयोरौत्सर्गिके पक्षधर्मत्वे स्थित इति भावः। शङ्कते—अथ माभूदिति सजातीय एव द्वेधेति नावधारणमित्यर्थः। निराकरोति—तथाऽपीति। सन् सजातीये द्वेधेति मध्यमपदे इत्यर्थः। तदेवं सजातीये एव द्वेधेत्यवधारणं दूषितम्, संप्रति द्वितीयमवधारणं शङ्कते—अथ पुनरिति। निराकरोति—तथाऽपीति। तथापि पक्षैकदेशवृत्तिरपि हेतुः प्रसक्तः, यदि च तदत्यय एवेति नावधार्येत ततोऽनैकान्तिकोऽपि हेतुः स्यादिति दोषः।

(१) ख-पु० "न" इत्यधिकम्। (२) "आद्ये पदे" इति तात्पर्यं। (३) ख-पु०—एकारो नास्ति। क-पुस्तके तु—"अन्यपदं" इत्येवं पाठो दृश्यते। (४) "पक्षव्याप्ति-" इति ख०। (५) "गडु" इति ख०।

न्यायवार्त्तिकम्

स्वसिद्धान्तोपात्तयोर्द्विपदयुक्तयोरहेतुत्वमिति प्राप्तम्। व्यतिरेकी च न हेतुरिति प्राप्तम्। नैव हेतुरिति चेत् कुत(१)स्तस्य हेतुत्वे यत्न इत्यनुत्तरम्। अथ पुनरवधारणानि न क्रियन्ते तथापि पक्षैकदेशवृत्तिरनैकान्तिकश्चानुषक्त इति।

एतेन "ग्राह्यधर्मस्तदंशेन व्याप्तो हेतुरि"ति प्रत्युक्तम्। अनेनाव्यापकादिर्लभ्यत इति उक्तोत्तरमेतदपीति। असंस्तदत्यय इत्येतदपि विपक्षे नास्तीत्यनेन समानमिति।

तादृगविनाभाविधर्मोपदर्शनं हेतुरित्यपरे, तादृशा विना न भवतीत्यनेन किल द्वयं लभ्यते—विपक्षासत्त्वं तादृशसत्त्वं च, उपदर्शनग्रहणेन किल पक्षे सत्त्वं लभ्यत इत्येवं त्रिलक्षणप्रविभावितात्मा पक्षो लभ्यत इति। यत्तावत्तादृगविनाभाविग्रहणाद्विपक्षेऽसत्त्वं तादृक्सत्त्वं च लभ्यत इति तत् न युक्तम्। तादृशा विना न भवतीति एतस्माद्विपक्षेऽसत्त्वं गम्यते तादृशे तु सम्भव इत्येतदेव कुतः? न ह्ययं नियमो यो विपक्षे नास्ति सोऽवश्यं तज्जातीयेऽस्तीति। एवं च श्रावणत्वाद्यपि हेतुः प्राप्तः, श्रावणत्वाद्यपि तादृशा विना न भवतीति। भवतु तावत्तादृगविनाभाविग्रहणे तत्तज्जातीये सम्भवः स पुनः पक्षे सम्भवतीत्येतत् कुतः। ननूपदर्शनग्रहणादेतल्लभ्यते? न तल्लभ्यते, उपदर्शनग्रहणस्याभिधानार्थत्वाद् उपदर्शनग्रहणमभिधानार्थम्। उपदर्श्यतेऽनेनेति न पुनरस्यैतत् सामर्थ्यमस्ति पक्षेऽन्यत्र चेति। क्व पुनरन्यत्र स्यात्? यत्र सम्भवः, क्व चास्य सम्भवः? तज्जातीये। तस्मादेतदुक्तम्भवति तज्जातीयाविनाभाविनः तज्जातीय एवाभिधानं हेतुरिति। एवं च ते चाक्षुषत्वं हेतु-

न्यायवार्त्तिकतात्पर्य्यटीका

दिङ्नागस्यैव प्रदेशान्तरहेतुलक्षणम्—ग्राह्यधर्मः पक्षधर्मः, तदंशेन तस्यैव पक्षस्यांशेन साध्यधर्मसामान्येन, व्याप्तो हेतुरिति। तदेव तद्धेतुलक्षणमुपन्यस्यास्मिन् पूर्वोक्तं दोषमतिदिशति—एतेनेति। अतिदेशमेव स्फुटयति—अव्यापकादिरिति। यथाश्रुतलक्षणे पक्षाव्यापकस्य हेतुत्वं तदंशेऽतिव्याप्तम् इत्यस्य विवरणालोचनेन सपक्षसत्त्वं विपक्षाच्च व्यावृत्तिरित्यर्थः। तथा च पूर्वोक्तदोषप्रसङ्ग इत्यर्थः। सिंहावलोकितन्यायेन दूषयति—असंस्तदत्यय इतीति।

अन्येषां हेतुलक्षणं दूषयितुमुपन्यस्यति—तादृगिति। तदेतद् व्याचष्टे—तादृशेति। किलकारोऽरुचौ। पक्षधर्म इति च हेतोरभिधानम्, तेन त्रिलक्षणप्रविभागात्मा(२)हेतुरित्यर्थः। दूषयति—यत्तावदिति। श्रावणत्वाद्यपीति, तदुक्ताऽसाधारण इत्यर्थः। यस्तु तादृशा विनाभावीति विपक्षे सत्ताप्रतिषेधात् पक्षे सत्त्वं गम्यते विशेषनिषेधस्य शेषाभ्यनुज्ञाविषयत्वादिति मन्येत तं प्रत्याह—भवतु तावदिति। एकदेशाभ्यनुज्ञानेऽपि विशेषनिषेधस्योपपत्तेर्न समस्ताभ्यनुज्ञाने प्रमाणमस्तीति भावः। चोदयति—ननूपदर्शनग्रहणादिति। परिहरति—न तल्लभ्यत इति।

(१) "कृत" इति ख०। (२) वार्त्तिके "त्रिलक्षणप्रविभावितात्मा" इति पाठः।

न्यायवार्त्तिकम्

र्भवति। न हि चाक्षुषत्वमनित्यत्वेन विनाभावि। उपेत्य वा भवतु तादृगविनाभाविनो धर्मस्य पक्ष उपदर्शनमिति। तथापि पक्षैकदेशवृत्तिं केन निराकरोषि? उपदर्शनग्रहणेनेति चेत्, न, तस्य सम्भवमात्रज्ञापनार्थत्वात्—अथ मन्येत उपदर्शनग्रहणेन व्याप्तिर्लभ्यत इति न युक्तम्, उपदर्शनग्रहणस्य सम्भवमात्रज्ञापनार्थत्वात्। उपदर्शनग्रहणेन सम्भवमात्रं ज्ञाप्यते, पक्षे स पुनर्व्यापक इति न युक्तम्। अथात्रापि केनचिन्न्यायेनावधारणानि क्रियेरन् तान्यव्यापकहेतु-निराकरणेऽसमर्थानीति पूर्ववत् प्रसङ्गः।

यत्त्विदमुदाहरणमेतस्मिन् प्रयत्नानन्तरीयकत्वादिरनित्यत्वस्याग्नेर्धूम इति। तत्र धूम-स्तावदग्नेरप्रतिपादक इत्युक्तम्। प्रयत्नानन्तरीयकत्वमप्यहेतुः, कुतः? प्रयत्नानन्तरीयकत्वस्य पक्षावृत्तित्वात्, न हि प्रयत्नानन्तरीयकत्वं शब्दधर्मः, न हि कश्चिच्छब्दः प्रयत्नानन्तरीयकोऽस्ति, संयोगविभागयोनित्वाच्छब्दस्य। अथ पारम्पर्यक्रमेण प्रयत्नः शब्दकारणम्, पारम्पर्येण सर्वेऽर्थाः शब्दकारणमिति विशेषणमयुक्तं प्रयत्नानन्तरीयकत्वादिति, अनित्यः शब्दो यतस्तदुत्पत्तेरिति वक्तव्यम्। यच्चेदं प्रयत्नानन्तरीयकत्वं शब्दस्यानित्यत्वे कारणं भावाभिधानेनोच्यते किं पुनस्तत्? किं जन्म उतोपलब्धिरिति? यदि तावज्जन्म, तन्नैव समर्थमिति प्रयत्नानन्तरीयकत्व-ग्रहणं व्यर्थम्, न हि भवत्यनित्यः शब्दो देवदत्तकृतकत्वादिति। अत एवं वक्तव्यं जन्म-वत्त्वादिति। यदि चेदं जन्म व्यभिचारि भवेत्, ततः प्रयत्नानन्तरीयकत्वग्रहणमर्थवत्। किं कारणम्? व्यभिचारिणि विशेषणान्यर्थवन्ति भवन्ति। अथोपलब्धिः प्रयत्नानन्तरीयक-त्वादित्यनेन भावाभिधानेनोच्यते एवमप्युपलब्धेरेव सामर्थ्यमस्तीति व्यर्थं विशेषणम्। न ह्युप-लभ्यमानं द्वेधा भवति नित्यमनित्यं प्रयत्नानन्तरीयकमन्यथा चेति(१)। अथ ब्रूषे प्रयत्नानन्तर-

न्यायवार्त्तिकतात्पर्य्यटीका

न हि चाक्षुषत्वमिति। बौद्धानां रूपत्वादिजातेर्नित्याया अभावाद् न चाक्षुषत्वमनित्यत्वेन विना भवतीत्यर्थः। यस्तु मन्येत विशेषनिषेधस्य शेषमात्राभ्यनुज्ञाहेतुत्वेनागृह्यमाणविशेषत्वात् पक्षसत्ताभ्यनुज्ञानं तथा चोपदर्शनपदेन पक्षे हेतोः सत्तोपदर्शनं भवतीति तं प्रत्याह—उपेत्य वेति। सुबोधम्।

तदेवं लक्षणं दूषयित्वा तदुदाहरणं दूषयति—यत्त्विदमिति। एतस्मिन् हेतुलक्षण इत्यर्थः। प्रयत्नानन्तरीयकत्वं प्रयत्नकारणकत्वम्, तत् साक्षात्पारंपर्येण वा, तत्र प्रथमे कल्पे दूषणमाह—प्रयत्नानन्तरीयकत्वस्येति। द्वितीयकल्पमाशङ्क्य दूषयति—अथेति। प्रयत्नग्रहणमपार्थकमित्यर्थः, भावप्रत्ययवाच्यं विकल्प्य दूषयति—यच्चेदमिति। एवमप्युपलब्धेरेवेति। न हि बौद्धराद्धान्ते

(१) तात्पर्य॰ "प्रयत्नानन्तरमन्यथा चेति" इति पाठः।

न्यायवार्त्तिकम्

मुपलभ्यमानं घटत्वं नित्यमिति, त्वयैवैतद्व्यभिचारितमिति शब्दानित्यत्वानुमितौ प्रयत्नानन्तरीयकत्वं न हेतुः, अव्यापकं च प्रयत्नानन्तरीयकत्वम्, शब्दराशेः पक्षीकृतत्वात्। अथ शब्दविशेषं पक्षीकृत्योच्यते, तत्राप्याद्य एव प्रयत्नानन्तरीयकत्वं सम्भवति, न द्वितीयादिष्विति अव्यापकत्वमनिवृत्तम्। अथ यः प्रयत्नानन्तरीयकः सोऽनित्य इति तथाप्यन्यो हेतुर्वक्तव्यः। हेतोः पक्षविशेषणत्वेनोपात्तत्वात्। यदप्युक्तमप्रयत्नानन्तरीयकस्य त्रयी गतिरिति किञ्चिन्नित्यमाकाशाद्येकेषाम्, किञ्चिदनित्यं विद्युदादि, किञ्चिदसदेवाकाशकुसुमादि। इदं महानैयायिकत्वं महावादित्वं च यत्तावदसदप्रयत्नानन्तरीयकं च किञ्चिच्चेति चित्रम्। नित्यं तु किञ्चिद्भवति न पुनरप्रयत्नानन्तरीयकत्वम्। न ह्याकाशं न प्रयत्नानन्तरीयकमिति शक्यं वक्तुम्, अप्रयत्नानन्तरीयकस्य जन्मविशेषितत्वात्, न चाकाशस्य जन्मास्ति, तस्मान्न प्रयत्नानन्तरीयकं नाप्यप्रयत्नानन्तरीयकमाकाशमिति। एतेनाभावो व्याख्यातः—अभावेऽप्येवमेवेति। तदेवमेतानि न हेतुलक्षणानि सम्भवन्तीदमेवार्षं हेतुलक्षणं न्याय्यमिति ॥ ३५ ॥

न्यायवार्त्तिकतात्पर्य्यटीका

किञ्चिदुपलभ्यमानं नित्यमस्ति येनोपलब्धिर्विशेष्येत इत्यर्थः। प्रयत्नानन्तरमन्यथा चेति। यद्यावदुपलब्धिकर्म तत्सर्वं प्रयत्नादेव पुरुषव्यापारादेवोपलभ्यते नान्यथेत्यर्थः। शङ्कते—अथेति। अस्माकं नैयायिकानामिति भावः। उत्तरम्—त्वयैवेति(१)। अस्मद्दर्शनं चेदास्थाय त्वया बौद्धेनोच्यते ततः प्रयत्नग्रहणेनाप्यनैकान्तिकत्वं तदवस्थमेवेत्यर्थः। अव्यापकं चेति। न हि दवदहनाभिघातप्रस्फुटद्वेणुदलविभागजन्मा ठात्कारोऽस्मदादिप्रयत्नसाध्य इत्यर्थः। शङ्कते—अथेति। वर्णात्मकमित्यर्थः। निराकरोति—तत्रापीति। पारम्पर्येणापि प्रथम एव वर्णः प्रयत्नानन्तरीयकः, न द्वितीयादयः। अतिपारम्पर्याश्रयणे त्वतिप्रसङ्गः, प्रायेण तस्य तत्र तत्र सुलभत्वादिति। शङ्कते—अथ य इति। विशेषः प्रयत्नानन्तरीयकत्वं धर्मिविशेषणम्, प्रयत्नानन्तरीयकत्वं सामान्यं च हेतुरित्यर्थः। निराकरोति—तथाऽप्यन्य इति। न हि भवतामस्माकमिव विशेषातिरिक्तमस्ति वस्तु, सामान्यं सद् यो हेतुः स्यात्। न च कल्पनारोपितं हेतुः सम्यग्ज्ञानस्य भवितुमर्हति, न चात्यन्तासतः कल्पनाऽपि संभवतीति भावः। तदेवमुदाहरणं दूषयित्वा प्रसङ्गेन परेषामुदाहरणविचारं दूषयति—यदप्युक्तमिति। यत् खलु सर्वसामर्थ्यरहितं तदाश्रितानाश्रितभावाभावधर्मवन्न भवतीत्यर्थः। नित्यं तु किंचिद्भवतीति। तस्य धर्मयोगः संभवत्येव, न त्वस्याप्यप्रयत्नानन्तरीयकत्वं त्वप्रत्ययाभिधेयं हि जन्म प्रयत्नेन प्रयत्नादन्येन वा विशेषणीयम्। यस्य तु जन्मैव नास्ति तस्य तद्विशेषणं दूरोत्सारितमित्यर्थः। एतेनाभाव

(१) आदर्श "यैवेति" इति पाठः, स तु न सङ्गच्छते, वार्त्तिके तादृक्पाठाभावात्।

(सू०)—साध्यसाधर्म्यात्तद्धर्मभावी दृष्टान्त उदाहरणम् ॥३६॥

न्यायभाष्यम्

साध्येन साधर्म्यं समानधर्मता। साध्यसाधर्म्यात् कारणात्तद्धर्मभावी

न्यायवार्त्तिकम्

साध्यसाधर्म्यात् तद्धर्मभावी दृष्टान्त उदाहरणमिति सूत्रम्। अस्योदाहरणोपलक्षणमर्थः। साध्यस्य साधर्म्यं साध्येन समानधर्मता। अत्रापि साध्येनैव साधर्म्यं न पुनरसाध्येनापि,

न्यायवार्त्तिकतात्पर्य्यटीका

इति। नैयायिकाभिमतोऽप्यभावो व्याख्यातः, तस्यापि हि प्रागसतः स्वकारणे न समवाय इति जन्म नास्तीति न तद्विशेषणयोग इत्यर्थः। प्रकृतमुपसंहरति—तदेवमिति। ३५ ॥

हेतावुक्ते नाव्याप्तोऽसौ साध्यधर्मेण हेतुभावे व्यवतिष्ठते(१), न च व्याप्तिप्रदर्शनमुदाहरणमन्तरेणेति हेतुलक्षणानन्तरं क्रमप्राप्तमुदाहरणलक्षणमाह—

साध्य--रणम् (सू०३६) ॥ सूत्रमित्युदाहरणसामान्यलक्षणमप्यनेन सूचितमिति दर्शितम्। अस्य तात्पर्यमाह—अस्येति। दृष्टान्तोऽर्थरूपो(२) नोदाहरणस्य वचनात्मकस्य स्वरूपतो लक्षणं सम्भवति, तस्मात् स्वाभिधायकवचनोपलक्षकत्वेन लक्षणत्वं सामानाधिकरण्यं च भजत इत्यभिसन्धिनोक्तमुदाहरणोपलक्षणमिति। अनेन च समानजातीयेभ्यः प्रतिज्ञादिभ्योऽसमानजातीयेभ्यश्च प्रमाणादिभ्य उदाहरणं व्यवच्छिन्नं भवति। साध्येन साधर्म्यमित्यादि भाष्यम्, तस्यार्थः 'साध्येन' धर्मिणा शब्देन, 'साधर्म्यं' दृष्टान्तस्य स्थाल्यादेः कृतकत्वम्, तद्धि नित्यत्वेन साध्ये च शब्दे दृष्टान्ते च स्थाल्यादौ समानम्, तस्मात् कारणात् प्रयोजकात्, तद्धर्मभावी तस्यैव साध्यस्य शब्दस्य, धर्मो धर्मान्तरम्, येन विशिष्टः शब्दः सिषाधयिषितोऽनित्यत्वेन, तदनित्यत्वं तद्धर्मः, स एव भावस्तद्भावः, सोऽस्यास्तीति तद्धर्मभावी स्थाल्यादिरनित्यत्वधर्मवानिति यावत्। तेन तादृशा दृष्टान्तेनोपलक्षितं तद्विषयं वचनमुदाहरणमिति। तत्र वार्तिककारः सूत्रपदं व्याचक्षाण एव फलतो भाष्यं व्याचष्टे—साध्येति। उदाहरणसाधर्म्यादित्यस्य व्याख्यानं साध्यसाधर्म्यादित्यत्रापि योजयति—अत्रापीति। साध्यशब्देनैव कृतकत्वं

वृत्तिः

क्रमप्राप्तमुदाहरणं लक्षयति—(साध्यसाधर्म्येति)।

दृष्टान्त उदाहरणमिति लक्षणम्। दृष्टान्तो दृष्टान्तवचनं दृष्टान्तकथनयोग्यावयव

---

(१) हेतावित्यादि। अत्र भावे सप्तमी, तथा च हेतौ उक्ते सति उदाहरणलक्षणमाह इत्यन्वयः। "असौ" हेतुः "साध्यधर्मेण" वह्न्यादिना "अव्याप्तः" तन्निरूपितव्याप्तिरहितः सन् "हेतुभावे न व्यवतिष्ठते" इति समुदितान्वयपर्यवसितार्थः। (२) "दृष्टान्तानुरूपो" इति क०।

न्यायवार्त्तिकम्

साधर्म्यमेव साध्येन न(१) पुनर्वैधर्म्यमपि, यस्मात् साध्यसाधर्म्यात् तद्धर्मभावी भवति। किं कुतश्चित् साध्यसाधर्म्यात् तद्धर्मभावी न भवति? न भवत्यपि, यथा अमूर्त्तत्वादेः कर्मणः, तस्मात् साध्यसाधर्म्याद्यत्र तद्धर्मो भवति स भवति तद्धर्मभावी, सोऽयं दृष्टान्तः साध्यसाधर्म्यात् तद्धर्मभावित्वेन विशेषणेन युज्यमान उदाहरणं भवति, उदाह्रियतेऽनेन धर्मयोः साध्यसाधनभावः इत्युदाहरणम्।

न्यायवार्त्तिकतात्पर्य्यटीका

साधर्म्यं दृष्टान्तस्य, नासाध्येन विपक्षेणाकाशादिना नित्येन, ततो हि कृतकत्वं व्यावृत्तमिति, तथा च सव्यभिचारो व्यवच्छिन्नो भवति। साधर्म्यमेवेति भागासिद्धो व्यवच्छिन्नः। यस्मात् साध्यसाधर्म्यात्(२) तद्धर्मभावी भवतीत्येतत् सोऽयं दृष्टान्त उदाहरणमिति यावद्वाक्यं न समाप्यते तावदर्द्धोक्त एव पृच्छति—किं कुतश्चिदिति। अवधारणद्वययोगिनः साध्यसाधर्म्याद्दृष्टान्तोऽवश्यमेव तद्धर्मभावी भवतीति गतार्थं तद्धर्मभावीत्येतदिति भावः। उत्तरम्—न भवत्यपीति। यथा नित्ये शब्दे साध्ये, अमूर्त्तत्वादेः साध्येन शब्देन कर्मणः साधर्म्यात् कर्म न तद्धर्मभावि भवति नित्यं न भवतीत्यर्थः। साध्येनैवेत्यवधारणेनैवैतदुदाहरणं प्रत्युक्तमिति। शिष्योपाध्यायश्यामत्वमैत्रतनयत्वादयोऽत्रोपाधिकसम्बन्धा उदाहार्याः। हेतुलक्षणे तु सामान्यलक्षणापेक्षं विशेषलक्षणमिति नातिव्याप्तिः। अत्र साध्यसाधर्म्यग्रहणेन साधनविकलमनुदाहरणं भवतीत्युक्तं भवति। यथा नित्यः शब्दोऽमूर्त्तत्वात् परमाणुवदिति तद्धर्मभावीत्यनेन साध्यविकलं परास्तम्, यथा नित्यः शब्दो मूर्तत्वात् कर्मवदिति। एतेनोभयविकलमपि परिहृतम्, यथा नित्यः शब्दोऽमूर्त्तत्वात् घटवत्। पञ्चम्युपादानेन च साध्यसाधर्म्यप्रयुक्तं तद्धर्मभावित्वं यत्र वचने प्रदर्श्यते तदेवोदाहरणं नान्यदिति दर्शितं भवति। प्रयोजकत्वं च साध्यसाधर्म्यस्य हेतोः स्वाभाविकः सम्बन्धो व्याप्यत्वमिति यावत्। प्रयोज्यत्वं च साध्यसाधर्म्यस्य व्यापकत्वमिति यावत्। तेनाप्रदर्शितान्वयविपरीतप्रदर्शितान्वययोरनुदाहरणत्वमुक्तं भवतीति, तद्यथा अनित्यः शब्दः उत्पत्तिमत्त्वात् पटवदिति। यो योऽनित्यः स स उत्पत्तिमान् यथा घट इति। समाख्यानिर्वचनसामर्थ्यात् सामान्यलक्षणमप्यनेन सूचितमित्याशयवता भाष्यकृता समाख्यानिरुक्तिः कृता(३) तां वार्त्तिककारो दर्शयति—उदाह्रियतेऽनेनेति।

वृत्तिः

इत्यर्थः, तेन दृष्टान्तस्य सामयिकत्वेनासार्वत्रिकत्वेऽपि न क्षतिः। योग्यतावच्छेदकत्व-

(१) ख-पु० "न" इति नास्ति। (२) क-पु० "साध्यसाधर्म्यम्" इति पाठः। (३) एतत् सूत्रभाष्यस्यैव शेषांशे "उदाह्रियते अनेन" इत्यादिना।

न्यायभाष्यम्

दृष्टान्त इति। तस्य धर्मस्तद्धर्मः, तस्य—साध्यस्य। साध्यं च द्विविधं धर्मिविशिष्टो वा धर्मः शब्दस्यानित्यत्वम्, धर्मविशिष्टो वा धर्मी अनित्यः शब्द इति। इहोत्तरं तद्ग्रहणेन गृह्यत इति। कस्मात्? पृथग्धर्मवचनात्। तस्य धर्मस्तद्धर्मस्तस्य भावस्तद्धर्मभावः स यस्मिन् दृष्टान्ते वर्तते स दृष्टान्तः साध्यसाधर्म्यादुत्पत्तिधर्मकत्वा(१)त्तद्धर्मभावी भवति, स चोदाहरणमिष्यते। तत्र यदुत्पद्यते तदुत्पत्तिधर्मकम्। तच्च भूत्वा न भवति आत्मानं जहाति निरुध्यत इत्यनित्यम्। एवमुत्पत्तिधर्मकत्वं साधनमनित्यत्वं साध्यम्।

न्यायवार्त्तिकम्

ननु च करणकारकपरिग्रहाद्वचनमुदाहरणं दृष्टान्तश्चार्थो न चानयोः सामानाधिकरण्यं युज्यते, न हि विषाणादिमदित्यभिधानं गवा समानाधिकरणं भवति। नैष दोषः वचनविशेषणत्वेन दृष्टान्तस्योपादानान्न स्वतन्त्रो दृष्टान्त उदाहरणम्। किन्तु साध्यसाधर्म्यात् तद्धर्मभावित्वे सति अभिधीयमान इति। तद्धर्मभावी—तस्य धर्मः तद्धर्मः, तस्येति साध्यस्य। साध्यञ्च द्वेधा भवति धर्मो धर्मी च। एकदा धर्मो विशेषणत्वेनान्यदा धर्मी विशेषणत्वेनेति तस्येति धर्मिग्रहणं युक्तम्, न, पृथग् धर्मस्य ग्रहणात्, यस्माद्धर्मिणो धर्मा उत्पत्तिधर्मकत्वादयः न धर्मस्य, धर्मे च साध्ये उदाहरण(२)साधर्म्यादिति व्याघातः, न हि धर्मस्योदाहरणेन किञ्चित् साधर्म्यं किन्तु धर्मिणः,

न्यायवार्त्तिकतात्पर्य्यटीका

चोदयति—ननु चेति। परिहरति—नैष दोष इति। वचनस्य विशेषणत्वेनोपलक्षणत्वेनेत्यर्थः। अभिधीयमान इति चाभिधानोपलक्षणपरं नाभिधेयपरम्, असामानाधिकरण्यदोषस्य तादवस्थ्यात्। तद्धर्मभावीति सूत्रावयवव्याख्यानपरं भाष्यम्—तस्य धर्म इत्यादि। अत्र चोत्तरमिति पाठाभिप्रायं (३) तदेतद्भाष्यमनुभाष्य व्याचष्टे—तस्य धर्म इति। तस्य धर्मस्तद्धर्म इति हि धर्मस्य संबन्धित्वेन पृथग्वचनम्। न च धर्म एव धर्मस्य, नापि धर्मान्तरं धर्मस्य, किं तु धर्मिण इत्यर्थः। भाष्यकारीयामनुपपत्तिमुक्त्वा वार्त्तिककारः स्वकीयामप्याह—धर्मे च

वृत्तिः

वयवार्थानन्वितार्थकावयवत्वम्। तच्च द्विविधम् अन्वयिव्यतिरेकिभेदात्। तत्रान्वय्युदाहरणं लक्षयति साध्यसाधर्म्यात्तद्धर्मभावीति। अन्वय्युदाहरणमिति शेषः।

---

(१) "-दुत्पत्तिधर्मकत्वा-" इत्यंशः ल, झा, ग, ... आ० पुस्तकेषु नास्ति। (२) "धर्मो च साध्यमुदाहरणे" इति क-पु० पाठः। (३) पाठाभिप्रायमिति—भाष्ये "धर्मिविशिष्टो वा धर्मः धर्मविशिष्टो वा धर्मी" इत्येवं यः साध्यस्य द्विधा पाठः कृतः, तदनुसारेण यदुत्तरं धर्मविशिष्टधर्मिरूपम्, तदभिप्रायकमित्यर्थः।

न्यायभाष्यम्

सोऽयमेकस्मिन् द्वयोर्धर्मयोः साध्यसाधनभावः साधर्म्याद्व्यवस्थित उपलभ्यते, तं दृष्टान्त उपलभमानः शब्देऽप्यनुमिनोति—शब्दोऽप्युत्पत्तिधर्मकत्वादनित्यः स्थाल्यादिवदिति, उदाह्रियतेऽनेन(१) धर्मयोः साध्यसाधनभाव इत्युदाहरणम् ॥ ३६ ॥

(सू०)—तद्विपर्ययाद्वा विपरीतम् ॥ ३७ ॥

दृष्टान्त उदाहरणमिति प्रकृतम्। साध्यवैधर्म्यादतद्धर्मभावी(२) दृष्टान्त उदाहरणमिति। अनित्यः शब्द उत्पत्तिधर्मकत्वात् अनुत्पत्तिधर्मकं नित्यमात्मादि, सोऽयमात्मादिर्दृष्टान्तः साध्यवैधर्म्यादनुत्पत्तिधर्मकत्वादतद्धर्मभावी—योऽसौ साध्यस्य

न्यायवार्त्तिकम्

साध्यसाधर्म्यं चोदाहरणस्य धर्म्यंश एव, साध्ये चोपसंहारो धर्मिण्येव, तस्माद्धर्मी साध्य इति। तस्य धर्मिणः साध्यस्य यो धर्मः साध्यः, स यस्मिन् दृष्टान्ते भवति विद्यते, स दृष्टान्त उदाहरणम्। उदाहरणं स्थाल्यादिद्रव्यमिति तदुत्पत्तिधर्मकं चानित्यं दृष्टमिति ॥ ३६ ॥

तद्विपर्ययाद्वा विपरीतम्। साध्यवैधर्म्यादतद्धर्मभावी दृष्टान्त उदाहरणमिति। उदाहरणमवीतहेतौ द्रष्टव्यमिति।

न्यायवार्त्तिकतात्पर्य्यटीका

साध्य इति। अनेन हेतूदाहरणोपनयलक्षणैर्व्याघात उक्तः। भाष्यं साध्यसाधर्म्यादुत्पत्तिधर्मकत्वादिति, तद्व्याचष्टे—तस्य धर्मिण इति। तद्धर्मभावी भवतीति, तदनुपपन्नम्, न हि कृतकत्वात् स्थाल्यादेरनित्यत्वं भवति जायते बीजादिवाङ्कुर इत्यत उक्तं—भवति विद्यते ॥३६॥

वैधर्म्योदाहरणस्य लक्षणम्—तद्वि—तम् (सू, ३७) ॥ अनुवृत्तेन पूरयित्वा सव्याख्यानसूत्रं पठति—साध्यवैधर्म्यादतद्धर्मभावी दृष्टान्त उदाहरणमिति। सात्मकतया साध्येन जीवच्छरीरेण वधर्म्याद् घटादेर्दृष्टान्तस्य सात्मकत्वसाधर्म्यविरहादिति यावत्। तस्य साध्यस्य जीवच्छरीरस्य धर्मः प्राणादिमत्त्वं तद्धर्मः, स एव भावस्तद्धर्मभावः, सोऽस्यास्तीति तद्धर्मभावी,

वृत्तिः

परे तु सम्पूर्णं सूत्रमन्वय्युदाहरणलक्षणमेव, सामान्यलक्षणन्तूह्यमित्याहुः।

साध्यसाधर्म्यात् साध्यसहचरितधर्मात् प्रकृतसाधनादित्यर्थः। तं साध्यरूपं धर्मं भावयति,तथा च साधनवत्ताप्रयुक्तसाध्यवत्तानुभावकोऽवयवः साध्यसाधनव्याप्त्युपदर्शकोदाहरणमिति यावत् ॥३६॥

---

(१) "तेन" इति फ, ज, आ, ग०। (२) "साध्यवैधर्म्यात्तद्धर्मभावी" इति आ०।

न्यायभाष्यम्

धर्मोऽनित्यत्वं स तस्मिन् न भवतीति। अत्रात्मादौ दृष्टान्त उत्पत्तिधर्मकत्वस्याऽभावादनित्यत्वं न भवतीति उपलभमानः शब्दे विपर्ययमनुमिनोति उत्पत्तिधर्मकत्वस्य भावादनित्यः शब्द इति। साधर्म्योक्तस्य हेतोः साध्यसाधर्म्यात्तद्धर्मभावी दृष्टान्त उदाहरणम्। वैधर्म्योक्तस्य हेतोः साध्यवैधर्म्यादतद्धर्मभावी दृष्टान्त उदाहरणम्।

न्यायवार्त्तिकम्

अन्ये तु साध्यसाधर्म्यात् तद्धर्मभावित्वं दृष्टान्तस्येति सूत्रं पठन्ति। तेषां त्वयमभिप्रायः—दृष्टान्तोदाहरणयोर्मा भूदैक्यमिति। किं पुनस्तद्धर्मभावित्वं साध्यसाधनाभ्यां योगः, साध्यसाधनयोगे च तद्धर्मभावी भवति, अतो भावाभिधानेन साध्यसाधनाभ्यां योगोऽभिधीयत इति। एतच्च सूत्रमपरे दूषयन्ति। अस्माकन्तु नायं सूत्रपाठः, तस्मान्नायं दोष इति। एतस्मिन्नपि पाठे

न्यायवार्त्तिकतात्पर्य्यटीका

न तद्धर्मभावी अतद्धर्मभावी प्राणादिरहितो घटादिरिति यावत्। एतदुक्तं भवति यत्र घटादौ साध्यधर्माभावप्रयुक्तः साधनधर्माभावः स घटादिर्वैधर्म्यदृष्टान्तः तद्विषयः शब्द उदाहरणमिति। सूत्रस्थश्च वाशब्दः समुच्चये वेदितव्यः। व्यतिरेकविषयत्वाद्वैधर्म्योदाहरणस्येति। अत्र भाष्यकारेणान्वयव्यतिरेकी पूर्वसूत्रोदाहृतोऽत्राप्युदाहृतः, साधनधर्माभावप्रयुक्तत्वं च साध्यधर्माभावस्योक्तं तच्चायुक्तम्, अन्वयव्यतिरेकिणि हेतौ सत्यपि वैधर्म्ये साधर्म्योदाहरणमेवोचितम्, तत्र तत्पूर्वकत्वाद् वैधर्म्यप्रतीतेः। ऋजुमार्गेण सिध्यतोऽर्थस्य वक्रेण साधनायोगात्। व्याप्यव्यापकभावश्च यादृशो भावयोस्तदभावयोस्तद्विपरीतो बोद्धव्यः, अन्यथा सपक्षैकदेशवर्त्ती न हेतुः स्यादिति मन्यमानो वार्त्तिककार आह—उदाहरणमवीतहेताविति। तच्चास्माभिः सूत्रं योजयद्भिरुक्तमिति।

अत्राचार्यदेशीयानामनार्षसूत्रपाठदूषणं नास्माकमार्षसूत्रपाठेऽस्तीति प्रतिपिपादयिषुराचार्यदेशीयानां पाठमभिप्रायं चाह—अन्ये त्विति। आर्षे हि पाठे सामानाधिकरण्याद्दृष्टान्तस्यार्थरूपस्य शब्दरूपेणोदाहरणेनैक्यं स्यात्। यदा तु दृष्टान्तस्योदाहरणमिति पाठः, तदा नायं दोषः, दूषणं चापरेषाम्, यथा न दृष्टान्तस्योदाहरणेन सामानाधिकरण्यम्, एवं भावित्वस्याप्यर्थरूपस्य स्वविषयवचनोपलक्षणत्वेन तु सामानाधिकरण्यं दृष्टान्तेऽपि तुल्यम्, तस्मादार्षमेवास्त्विवति।

वृत्तिः

व्यतिरेक्युदाहरणं लक्षयति—(तद्विपर्ययाद्वेति)।

(१) तद्विपर्ययात्, साध्यसाधनव्यतिरेकव्याप्तिप्रदर्शनात्। तथा च साध्य-

---

(१) ल-पु०—"तद्विपर्ययात्" इतातः प्राक् "व्यतिरेक्युदाहरणम्" इत्यधिकम्

न्यायभाष्यम्

पूर्वस्मिन् दृष्टान्ते यौ तौ धर्मौ साध्यसाधनभूतौ पश्यति साध्येऽपि तयोः साध्यसाधनभावमनुमिनोति। उत्तरस्मिन् दृष्टान्ते तयो(१)धर्मयोरेकस्याभावादितरस्याभावं पश्यति तयोरेकस्य भावादितरस्य भावं (२)साध्येऽनुमिनोतीति। तदेतद्धेत्वाभासेषु

न्यायवार्त्तिकम्

किल भाविग्रहणमनर्थकम्। कस्मात्? सर्वावयवानां साध्यधर्मभावित्वात्। यस्मात् किल सर्वावयवाः साध्यधर्मभाविनो भवन्ति भावयन्ति गमयन्तीति नायं सूत्रार्थ इति।

अन्ये तु तद्धर्मभावीत्येतत्पदमन्यथा निराकुर्वन्ति—तद्धर्मभावी भवन्नुष्णभोजिन्यायेन वा भवेत्? दण्डिन्यायेन वा भवेत्? तद्यदि तावदुष्णभोजिन्यायेन उष्णं भोक्तुं शीलमस्येत्युष्णभोजी तद्धर्मं वा भावयितुं शीलमस्येति तद्धर्मभावी। अत्रापि भावयितुं गमयितुं यावदुक्तं स्यादिति नायं सूत्रार्थ इति न किञ्चिदेतत्। दण्डिन्यायस्तु दण्डो यस्यास्तीति स दण्डी तद्धर्मभावो यस्यास्ति स भवति तद्धर्मभावी। अत्र भाविग्रहणमनर्थकं तद्धर्मभावीति। कथमिति? तद्धर्मश्चासौ भावश्चेति तद्धर्मभावः स यस्यास्ति स भवति तद्धर्मभावी। एवं सति विशेष्यविशेषणभावानुपपत्तेः तद्धर्मभावीति युक्तम्। न हि तद्धर्मश्च स्यादभावश्च स्याद् यतो विशेषणविशेष्यभावः समर्थितः स्यादिति। अतस्तद्धर्मीति किल वक्तव्यम्। न वक्तव्यम्। तद्धर्माणामुभयथा भावात्, उभयथा भवन्ति धर्मा विधीयमानाः प्रतिषिध्यमानाश्च। तत्रान्वयिनि विधीयमानधर्मवान् दृष्टान्त उदाहरणम्, यथा स्थाल्यामुत्पत्तिधर्मकत्वमनित्यत्वं च विद्यमानौ धर्माविति। तस्मात्तद्धर्मश्चासौ भावश्चेति युक्तं सामानाधिकरण्यम्। यत् पुनरेतत्तद्धर्मीति वक्तव्यम्, एतदपि न

न्यायवार्त्तिकतात्पर्य्यटीका

आर्षेऽपि पाठे परोक्तं दूषणमुपन्यस्यति—एतस्मिन्नपीति। उपहासे किलकारः। ण्यन्ताद्भवतेस्ताच्छील्ये णिनिना भावीति व्युत्पन्नः, तथा च तद्धर्मकारित्वमर्थः। न च ज्ञापनाद् अन्या क्रिया संभवतीति गमकत्वम्, तच्च सर्वेषामवयवानामभिन्नमिति साधारणत्वान्न वक्तव्यमित्यर्थः। तदेतदभ्युपगमेनैव परिहरति—नायमिति।

अन्ये तु तद्धर्मभावीत्येतद्विकल्प्य दूषयन्तीत्याह—अन्ये त्विति। तत्र प्रथमकल्पे दूषणमाहुः—तद् यद्यीति। नायं सूत्रार्थः सर्वावयवसाधारण्यादिति तस्मान्न किञ्चिदेतत् तद्धर्मं भावयितुं शीलमस्येति। द्वितीयकल्पे दूषणमाहुः—दण्डिन्याय इति। संभवे व्यभिचारे च विशेषणमर्थवद् न संभवमात्र इत्यर्थः। तदेतत् परेषां दूषणं दण्डिन्यायमालम्ब्य परिहरति—न वक्तव्यमिति।

वृत्तिः

साधनव्यतिरेकव्याप्त्युपदर्शकोदाहरणं(३) व्यतिरेक्युदाहरणं यथा जीवच्छरीरं सात्मकं

---

(१) "ययो"रिति ज, फ, श्रा, ग०। (२) "तयोरेकतरस्याभावादितरस्याभावम्" इति ल, ज, ग, श्रा, भा०। (३) "व्याप्त्या प्रदर्शकोदाहरणम्" इति व०।

न्यायभाष्यम्

न सम्भवतीत्यहेतवो हेत्वाभासाः। तदिदं हेतूदाहरणयोः सामर्थ्यं (१) परमसूक्ष्मं दुःखबोधं पण्डितरूपवेदनीय(२)मिति ॥ ३७ ॥

न्यायवार्त्तिकम्

परिज्ञातम्। न हि बहुव्रीहौ पुनर्मत्वर्थीयो लभ्यत इति। अथावश्यं वयं शिक्षयितव्याः, नत एव च तद्धर्मेति वक्तव्यमिति। सन्ति चैवंवादिनो येषां कृतकत्वानित्यत्वेऽभाव इति। तन्निराकरणार्थं चेदं वक्तव्यं तद्धर्मश्चासौ भावश्चेति।

तदेतस्मिन्नवयवत्रये एवं लक्षणेनोपपादिते तेषां त्रयो दुर्विहिता(३) इति। अनेन वाक्येन महानैयायिकत्वमात्मनः ख्यापितं भवति।

तथा सिद्धो दृष्टान्त इत्यन्ये। कः पुनरस्यार्थः? यथा साध्यः साधयितुमिष्टस्तथाऽयमसिद्धोऽनित्यत्वेन यथा च स एव साध्यो(४) विशिष्टः प्रत्ययभेदभेदित्वेन, तथा यः सिद्धः स दृष्टान्तः साध्यसाधनवानिति। अत्र विस्फूर्जताऽपि स्वसिद्धान्तमत्यजता कृतकत्वानित्यत्वयोर्न शक्यः सम्बन्धो दर्शयितुम्, कृतकत्वानित्यत्वयोः कालभेदाद्वस्तुव्यवधानाच्च (५)। अन्यदा कृतकत्वमन्यदा चानित्यत्वमिति। यदा च वस्तु न तदा प्राक्प्रध्वंसाभावौ स्त इति। एतेन तयोः सम्बन्धिनिदर्शनं दृष्टान्त इति प्रत्युक्तम्।

"साध्येनानुगमो हेतोः साध्याभावे च नास्तिता" इति च ॥ ३७ ॥

न्यायवार्त्तिकतात्पर्यटीका

सम्भवव्यभिचाराभ्यां समर्थं विशेषणमित्यर्थः। न बहुव्रीहाविति। अन्यपदार्थविवक्षयैवेनिराश्रीयते, सा च बहुव्रीहिणैव लभ्यत इति कृतमत्रेनिनेत्यर्थः। सुहृद्भावेन चेद् अत एवाह—अथावश्यमिति। प्रयोजनान्तरं भावग्रहणस्यान्वाचिनोति—सन्तीति।

अत्र सुबन्धुना(६) प्रतिज्ञादयस्त्रयोऽवयवा दुर्विहिता अक्षपादलक्षणेत्युक्तम्, तद्दूषयति—तदेतस्मिन्निति। तदेवमुदाहरणलक्षणमुपपाद्य परेषां लक्षणं दूषयितुमुपन्यस्य व्याचष्टे—तथा सिद्ध इति। यथा च स एव साध्यो विशिष्टः प्रत्ययभेदभेदित्वेनेति, प्रत्ययः कारणम्, तदेतत् साध्यसाधनवत्त्वं दृष्टान्तस्य बौद्धराद्धान्तेऽव्यापकम्, स्थाल्यादौ दृष्टान्ते कृतकत्वानित्यत्वरूपसाध्यसाधनवत्त्ववैकल्यात्, प्रागभावो हि स्थाल्याः कृतकत्वं प्रध्वंसाभावश्चानित्यता राद्धान्ते बौद्धानाम्, न चैवमुभयं स्थाल्यामस्ति, तस्याः स्वाभावविरोधित्वादिति दूषयति—अत्र विस्फूर्जताऽपीति। एतेनेति, अव्यापकत्वेन। निदर्श्यतेऽस्मिन्ननेन चेति निदर्शनम्, साध्येनानुगमो हेतोः साध्याभावे च नास्तितेति च प्रत्युक्तम्, कृतकत्वानित्यत्वयोः स्थाल्यामसंभवदर्शनादव्यापकत्वेन।

वृत्तिः

प्राणादिमत्त्वाद्, यन्नैवं तन्नैवं यथा घट इति। वाकारः प्रयोगमपेक्ष्य। तथा चान्वय्युदाहरणं व्यतिरेक्युदाहरणं वा प्रयोक्तव्यमित्यर्थः ॥ ३७ ॥

---

(१) "साधर्म्यम्" इति झा०। (२) पण्डितैकरूपवेदनीय" इति ज०। (३) "दुर्विभावा" इति ख०। (४) "स एव साध्यो" इत्यंशः ख-पुस्तके नास्ति। (५) "व्यवधानाच्च"त्यत्र "साधनाच्च"-इति ख०। (६) "वसुबन्धुना" इति ख०।

(सू०)—उदाहरणापेक्षस्तथेत्युपसंहारो न तथेति वा साध्यस्योपनयः ॥ ३८ ॥

न्यायभाष्यम्

उदाहरणापेक्षः उदाहरणतन्त्र उदाहरणवशः। वशः सामर्थ्यम्। साध्यसाधर्म्ययुक्ते उदाहरणे स्थाल्यादि द्रव्यमुत्पत्तिधर्मकमनित्यं दृष्टम्, तथा शब्द

न्यायवार्त्तिकम्

उदाहरणापेक्षस्तथेत्युपसंहारो न तथेति वा साध्यस्योपनयः। एवञ्चायं कृतक इति। यथा तथेति प्रतिबिम्बनार्थम्। किं पुनरत्र प्रतिबिम्बनम्? दृष्टान्तगतस्य धर्मस्या-

न्यायवार्त्तिकतात्पर्यटीका

अस्मद्दाह्यान्ते यथा तयोः स्थाल्यादौ संभवः तथोक्तं हेतुलक्षणसूत्र इति। भाष्ये पण्डितरूपवेदनीयमिति, प्रशस्तपण्डितवेदनीयमित्यर्थः ॥ ३७ ॥

स्वप्रतिपत्तौ व्याप्तिस्मरणानन्तरं तथा चायं न तथेति वा परामर्शं ज्ञानोत्पादाद् उदाहरणवचनस्य च व्याप्तिप्रतिपादकत्वात् परामर्शज्ञाने हेतोरुपनयस्योदाहरणपूर्वकत्वनियमाद् उदाहरणानन्तरमुपनयं लक्षयति—

उदा—यः (सू० ३८)॥ अपेक्षापदं भाष्यकृद् व्याचष्टे—उदाहरणतन्त्र इति उदाहरणवशः, वश्यत(१)इति वशः वशिन उदाहरणस्य वश्य इत्यर्थः। एतदेव कर्मणो भावं निष्कृष्य विवृणोति वशः सामर्थ्यं वश्येन उदाहरणस्य फलेन उपनयेनाभिसंबन्ध इत्यर्थः। तथात्वातथात्वयोर्विषयं विभजते—साध्यसाधर्म्ययुक्त इति। ननु हेतोरुपसंहार उपनयो न साध्यस्य, तथा चानुपपन्नः साध्यस्योपसंहार इत्यत उक्तम्—साध्यस्य शब्दस्योत्पत्तिधर्मकत्वमिति उदाहरणसिद्धव्याप्तिहेतुमत्तया साध्यमुपसंह्रियते न स्वरूपेणेत्यर्थः। अत्राप्युदाहरणापेक्ष उपसंहार उपनय इति सामान्यलक्षणम्। तथा न तथेति चेति (२), सामान्यलक्षणापेक्षे विशेषलक्षणे इति बोद्धव्यम्। अत्र केचिदाहुः हेतुवचनादेव सोदाहरणात् साध्यसिद्धेरसाधनाङ्गमुपनय इति तन्निराकर्त्तुमाह वार्त्तिककारः—यथा तथेति प्रतिबिम्बनार्थम्। तदेतत् प्रश्नपूर्वकं विभजते—किं पुनरिति।

वृत्तिः

क्रमप्राप्तमुपनयं लक्षयति—(उदाहरणापेक्षेति)।

साध्यस्य पक्षस्योदाहरणापेक्ष–उदाहरणानुसारी य उपसंहार उपन्यासः प्रकृतोदा-

(१) वशधातोः कर्मणि "वश्यते" इत्येवंरूपस्य भवितुमशक्यत्वात् अत्र "उश्यते" इत्येवं पाठ एव सङ्गतः। (२) वार्त्तिके—"तथेत्युपसंहारो न तथेति वा" इति पाठः।

न्यायभाष्यम्

उत्पत्तिधर्मक इति साध्यस्य शब्दस्योत्पत्तिधर्मकत्वमुपसंह्रियते। साध्यवधर्म्ययुक्ते पुनरुदाहरणे आत्मादि द्रव्यमनुत्पत्तिधर्मकं नित्यं दृष्टम्, न च तथा शब्द इति, अनुत्पत्तिधर्मकत्वस्योपसंहारप्रतिषेधेनोत्पत्तिधर्मकत्वमुपसंह्रियते। तदिदमुपसंहार-द्वैतमुदाहरणद्वैताद्भवति। उपसंह्रियतेऽनेनेति चोपसंहारो वेदितव्य इति ॥ ३८ ॥

न्यायवार्त्तिकम्

व्यभिचारित्वे सिद्धे तेन साध्यगतस्य तुल्यधर्मता, एवञ्चायं कृतक इति। साध्ये वा सम्भव उपनयार्थः। ननु च कृतकत्वादित्यनेन सम्भव उक्तः? नोक्तः(१) साध्यसाधनभाव-निर्देशात्—साध्यसाधनभावमात्रनिर्देशः कृतः(२) कृतकत्वादनित्यः शब्दो भवति। तत् पुनः शब्दे कृतकत्वमस्ति नास्तीत्युपनयेन सम्भवो गम्यते अस्ति च शब्दे कृतकत्वमिति। स यदा साधर्म्येणोदाहरणं तदा तथेति, यदा वैधर्म्येण तदा न तथेति ॥ ३८ ॥

न्यायवार्त्तिकतात्पर्य्यटीका

तदनेन व्युत्पन्नाव्युत्पन्नतया परेषामनियतप्रतिसाधनत्वात् स्वप्रतिपत्त्यनुसारेण परो बोधयितव्यः, व्याप्तिस्मरणानन्तरोत्पन्नलिङ्गपरामर्शपूर्वकश्च स्वयमनुमेयार्थप्रत्यय इति तथैव परे बोध्यन्ते, तथा च परामर्शज्ञानहेतोरुपनयस्य सिद्धमर्थवत्त्वम्। न च यथा लिङ्गपरामर्शज्ञानान्वयव्यतिरेकानुविधान-मनुमेयज्ञानस्य, तथा दधिभक्षणाद्यनुविधानमपि, येनातिप्रसङ्गश्चोद्येतेति। प्रयोजनान्तरमुपनयस्याह—साध्ये वा संभव इति। चोदयति—ननु चेति। यद्यपि साधनतया कृतकत्वमुक्तं प्रति-ज्ञानन्तरं प्रतिपत्त्रा साधनस्यैवापेक्षितत्वात्, तथापि तन्नासिद्धं तत्र साधनत्वेन व्यवतिष्ठत इति स्वसिद्धिमाक्षिपति सामर्थ्यादिति भावः। परिहरति—नोक्त इति। यत्परः शब्दः स शब्दार्थ इति शाब्दाः। साधनत्वपरश्च कृतकत्वादिति सामर्थ्यात्, आक्षेपे तूदाहरणमपि न प्रयोक्तव्यम्। अत्रापि साधनत्वसामर्थ्यादाक्षेपाद् अव्याप्तस्य साधनत्वायोगात् तद्विधस्यापि प्रमेयत्वादेः शब्द-नित्यत्वादौ साधनत्वभ्रमेण प्रयोगोऽसिद्धोऽपि तुल्य इति व्याप्तिप्रदर्शनार्थोदाहरणप्रयोगवद्धेतोः सिद्धत्वप्रतिपादनाय उपनयस्यापि प्रयोग इति रमणीयम् ॥ ३८ ॥

वृत्तिः

हरणोपदर्शितव्याप्तिविशिष्टहेतुविशिष्टपक्षविषयक(३)-बोधजनको न्यायावयव इत्यर्थः। निगम-नन्तु हेतुविशिष्टत्वेन न पक्षबोधकम्, किन्तु पक्षवृत्तिहेतुबोधकमिति तद्व्युदासः।

अत्र चान्वयव्यतिरेकव्याप्त्योरन्यतरत्वादिनाऽनुगमः कार्यः, उदाहरणोपदर्शितेति तु परिचायकमात्रमिति तु न वाच्यम्, उदाहरणविपरीतव्याप्त्युपदर्शकोपनयवारकत्वात्। वस्तुतोऽवयवपदेनैव तद्व्युदासः।

---

(१) "नोक्तः" इति ख-पु० नास्ति। (२) "कृतकः" इति ख०। (३) "हेतुविशिष्टपक्षविषयक-" इतांशः ल-पु० नास्ति।

न्यायभाष्यम्

द्विविधस्य पुनर्हेतोर्द्विविधस्य चोदाहरणस्योपसंहारद्वैते च समानम्—

(सू)—हेत्वपदेशात् प्रतिज्ञायाः पुनर्वचनं निगमनम् ॥३९॥

साधर्म्योक्ते वा वैधर्म्योक्ते वा यथोदाहरणमुपसंह्रियते, तस्मादुत्पत्तिधर्मकत्वाद् अनित्यः शब्द इति निगमनम्—निगम्यन्ते अनेनेति प्रतिज्ञाहेतूदाहरणोपनया एकत्रेति निगमनम्। निगम्यन्ते—समर्थ्यन्ते—सम्बध्यन्ते। तत्र साधर्म्योक्ते तावद्धेतौ वाक्यमनित्यः शब्द इति प्रतिज्ञा। उत्पत्तिधर्मकत्वादिति हेतुः। उत्पत्तिधर्मकं स्थाल्यादि द्रव्यमनित्यमित्युदाहरणम्। तथा चोत्पत्तिधर्मकः शब्द इत्युपनयः। तस्मादुत्पत्तिधर्मकत्वादनित्यः शब्द इति निगमनम्। वैधर्म्योक्तेऽपि अनित्यः शब्द

न्यायवार्त्तिकतात्पर्य्यटीका

निगमनलक्षणावतारपरं भाष्यं द्विविधस्य पुनरिति। साधर्म्येण वैधर्म्येण द्विविधानामपि हेतूदाहरणोपनयानां समानं निगमनलक्षणमित्यर्थः।

हेत्व—नम् (सू० ३९)॥ तस्मादिति। हेत्वपदेशात्तद्धेतुकमनित्यः शब्द इति प्रतिज्ञायाः पुनर्वचनम्। (१) यद्यपि च सिद्धनिर्देशो निगमनं साध्यनिर्देशश्च प्रतिज्ञा तथाऽपि यस्यैव प्रतिज्ञायां साध्यत्वमासीत् तस्यैव निगमने सिद्धत्वमित्यवस्थावन्तमेकमाश्रित्य समानविषयतया निगमनं प्रतिज्ञेत्युपचर्यते, तथा च पुनर्वचनमप्युपपन्नम्। तदेतद्भाष्यकारो व्याचष्टे—साधर्म्योक्त इति। व्युत्पादयति—निगम्यन्त इति। साधर्म्यवैधर्म्ययोः प्रतिज्ञातः प्रभृति निगमनान्तं प्रयोगमाह—तत्रेति। तच्च प्रथमसूत्रवदेव यथास्वमवयवेषु प्रमाणानां परम-

वृत्तिः

स चोपनयो द्विविधोऽन्वयिव्यतिरेकिभेदात्। तथेति साध्यस्योपसंहारोऽन्वय्युपनयः, न तथेति साध्यस्योपसंहारो व्यतिरेक्युपनयः।

अत्र च तथाशब्दप्रयोगावश्यकत्वे न तात्पर्यम्, किन्तु व्याप्तिविशिष्टवत्त्वबोधे (२), तथा च वह्निव्याप्यधूमवांश्चायमिति वा तथाचायमिति वोपन्यासः, एवं व्यतिरेकिण्यपि वह्न्यभावव्यापकीभूताभावप्रतियोगिधूमवांश्चायमिति वा न तथेति वोपन्यासः॥ ३८॥

---

(१) ननु निगमनान्तर्गते पक्षधर्मिकसाध्यवत्त्वबोधोपयोगिवाक्यभागे प्रतिज्ञात्वाभावात् निगमनलक्षणे "प्रतिज्ञायाः पुनर्वचनम्" इति कथं सङ्गच्छते ? सत्यम्, तत्र मुख्यतः प्रतिज्ञात्वाभावेऽपि प्रतिपाद्यार्थसाजात्यादिना औपचारिकं प्रतिज्ञात्वमभ्युपेत्य तथाकथनसङ्गतिरिति स्फुटीकरोति यद्यपीत्यादिना। (२) "व्याप्तिविशिष्टबोधे" इति ल०।

न्यायभाष्यम्

उत्पत्तिधर्मकत्वात्, अनुत्पत्तिधर्मकमात्मादि द्रव्यं नित्यं दृष्टम्, न च तथाऽनुत्पत्तिधर्मकः शब्दः तस्मादुत्पत्तिधर्मकत्वादनित्यः शब्द इति।

अवयवसमुदाये च वाक्ये सम्भूयेतरेतराभिसम्बन्धात् प्रमाणान्यर्थान् साधयन्तीति। सम्भवस्तावत् शब्दविषया प्रतिज्ञा, आप्तोपदेशस्य प्रत्यक्षानुमानाभ्यां प्रतिसन्धानादनृषेश्च स्वातन्त्र्यानुपपत्तेः। अनुमानं हेतुः, उदाहरणे सादृश्य(१)प्रतिपत्तेः। तच्चोदाहरण(२)भाष्ये व्याख्यातम्। प्रत्यक्षविषयमुदाहरणं दृष्टेनादृष्टसिद्धेः। उपमानमुपनयः तथेत्युपसंहारात्, न च तथेति वोपमानधर्मप्रतिषेधे विपरीतधर्मोपसंहारसिद्धेः। सर्वेषामेकार्थप्रतिपत्तौ सामर्थ्यप्रदर्शनं निगमनमिति।

इतरेतराभिसम्बन्धोऽपि—असत्यां प्रतिज्ञायामनाश्रया हेत्वादयो न प्रवर्त्तेरन्।

न्यायवार्त्तिकतात्पर्य्यटीका

न्यायं स्तोतुं संभवमाह—अवयवसमुदाये चेति। आप्तोपदेशस्येति, "सदेव सौम्येदमग्र आसीदि"त्यादेराप्तोपदेशस्य प्रत्यक्षानुमानाभ्यां प्रतिसंधानात्। ननु कस्मात् प्रतिज्ञैवाप्तोपदेशो न भवति, कृतमस्या आगमान्तरविषयत्वेनेत्यत आह—अनृषेश्चेति। अनुमानं हेतुः। स्यादेतद् द्वितीयं लिङ्गदर्शनं हेतुः, न च तदनुमानम्, तृतीयस्योपनयविषयस्य लिङ्गदर्शनस्य तथाभावादित्यत आह—उदाहरण इति। उदाहरणे दृष्टान्तधर्मिणि, साध्यसाधनयोः प्रतिबन्धं(३) सादृश्यं सम्यग् दृष्ट्वा लिङ्गस्य प्रतीतेः। एतदुक्तं भवति—यद्यपि त्रयाणामपि लिङ्गदर्शनानां सस्मृतीनामनुमानत्वम्, तथाऽपि तदेकदेशे मध्यमेऽपि लिङ्गदर्शने समुदायोपचारादनुमानव्यपदेश इति। प्रत्यक्षविषयमुदाहरणम्, कस्मात्? दृष्टेनोदाहरणे प्रतिबन्धेन अदृष्टे साध्यधर्मिण्यनुमेयस्य सिद्धेः। यदि पुनर्न मूलं प्रत्यक्षमास्थीयेत, अव्यवस्थाया नादृष्टं सिध्येदिति भावः। निगमनप्रयोजनं प्रतिपादयति—सर्वेषामिति। प्रतिज्ञादीनामुपनयान्तानामेकोऽर्थः स्वभावप्रतिबद्धं लिङ्गं वा अनुमेयं वा, तस्य प्रतिपत्तिः, तस्यां सामर्थ्यप्रदर्शनं निगमनमिति, तदनेनैकार्थत्वं दर्शितम्। द्विविधं हि प्रयोजनम्, तत्रावान्तरं स्वभावप्रतिबद्धं लिङ्गप्रतीतिः, परमं च साध्यप्रतीतिरिति।

संप्रति विभागे साकाङ्क्षत्वं दर्शयति—इतरेतराभिसंबन्ध इति। अभिसंबन्धेन फलेना-

वृत्तिः

निगमनं लक्षयति—(हेत्वपदेशादिति)। हेतोः व्याप्तिविशिष्टपक्षधर्मस्य

(१) "संदृश्य" इति ज, फ, आ०। (२) "तचोदाहरणम्" इति ज, आ, ग०। (३) "प्रतिसम्बन्धम्" इति ख०।

न्यायभाष्यम्

असति हेतौ कस्य साधनभावः प्रदर्श्येत। उदाहरणे साध्ये च कस्योपसंहारः स्यात् कस्य चापदेशात् प्रतिज्ञायाः पुनर्वचनं निगमनं स्यादिति। असत्युदाहरणे केन साधर्म्यं वैधर्म्यं वा साध्यसाधनमुपादीयेत, कस्य वा साधर्म्यवशादुपसंहारः प्रवर्त्तेत। उपनयं चान्तरेण साध्येऽनुपसंहृतः साधको धर्मो नार्थं साधयेत्। निगमनाभावे चानभिव्यक्त(१)सम्बन्धानां प्रतिज्ञादीनामेकार्थेन प्रवर्तनं तथेति प्रतिपादनं कस्येति।

अथावयवार्थः—साध्यस्य धर्मस्य धर्मिणा सम्बन्धोपादानं प्रतिज्ञार्थः। उदाहरणेन समानस्य विपरीतस्य वा साध्यस्य(२) धर्मस्य साधकभाववचनं हेत्वर्थः। धर्मयोः साध्यसाधनभावप्रदर्शनमेकत्रोदाहरणार्थः। साधनभूतस्य धर्मस्य साध्येन धर्मेण सामानाधिकरण्योपपादनमुपनयार्थः। उदाहरणस्थयोर्द्धर्मयोः साध्यसाधनभावोपपत्तौ साध्ये विपरीतप्रसङ्गप्रतिषेधार्थं निगमनम्। न चैतस्यां हेतूदाहरणपरिशुद्धौ सत्यां साधर्म्यवैधर्म्याभ्यां प्रत्यवस्थानस्य विकल्पाज्जातिनिग्रहस्थानबहुत्वं प्रक्रमते। अव्यवस्थाप्य(३) खलु धर्मयोः(४) साध्यसाधनभावमुदाहरणे जातिवादी प्रत्यवतिष्ठते। व्यवस्थिते तु खलु धर्मयोः साध्यसाधनभावे दृष्टान्तस्थे गृह्यमाणे

न्यायवार्त्तिकतात्पर्य्यटीका

काङ्क्षामुपलक्षयति—असत्यामिति। प्रधानं हि प्रतिज्ञापदं तदुत्तरकालं हि साधनाकाङ्क्षायां प्रतिज्ञामाश्रित्य हेतुपदं प्रवर्तते, न पुनः प्रथममेव हेत्वपेक्षेति हेतुलक्षणेऽस्माभिः प्रतिपादितमिति। हेतुपदविरहे आकाङ्क्षां दर्शयति—असति हेताविति। उदाहरणाभावेऽप्यपेक्षामाह—असत्युदाहरण इति। उपनयाभावेऽप्यपेक्षामाह—उपनयं चान्तरेणेति। निगमनाभावेऽप्यपेक्षामाह—निगमनाभावे चेति। अवयवानां प्रातिस्विकं प्रयोजनमुक्तमपि शिष्यहिततया भाष्यकारः प्रतिपादयति—अथेति। पञ्चावयवप्रतिपादनप्रयत्नस्य प्रयोजनं दर्शयति—न चैतस्यामिति। कथं पुनः प्रक्रमत इत्यत आह—अव्यवस्थाप्येति। व्यवस्थापिते न जातेरवसर इत्याह—व्यवस्थिते हीति(५)।

वृत्तिः

अपदेशः कथनम्, **प्रतिज्ञायाः** प्रतिज्ञातार्थस्य साध्यविशिष्टपक्षस्य **वचनं निगमनम्**। तथा च व्याप्तपक्षधर्महेतुकथनपूर्वकसाध्यविशिष्टपक्षप्रदर्शकः व्याप्तपक्षधर्महेतुज्ञाप्यसाध्य-

(१) "निगमनाभावेनानभिव्यक्त" इति ग०। (२) 'साध्यस्य' इति टि नास्ति। (३) "अव्यवस्थाऽय" इति वि०। (४) "धर्मयोः" इति ज-पु० नास्ति। (५) "व्यवस्थिते तु" इति भाष्ये।

न्यायभाष्यम्

साधनभूतस्य धर्मस्य हेतुत्वेनोपादानं न साधर्म्यमात्रस्य न (१) वैधर्म्यमात्रस्य वेति ॥ ३९ ॥

न्यायवार्त्तिकम्

हेत्वपदेशात् प्रतिज्ञायाः पुनर्वचनं निगमनम् । प्रतिज्ञायाः पुनर्वचनमिति, प्रतिज्ञाविषयस्यार्थस्याशेषप्रमाणोपपत्तौ साध्यविपरीतप्रसङ्गप्रतिषेधार्थं यत् पुनरभिधानं तत् निगमनमिति । एतस्मिन् सूत्रार्थे परस्यावकाशो नास्तीति । अभ्युपेत्य तद्दोषनिराचिकीर्षया वाक्यमुपक्षिप्यते—

"उपनयनिगमने (२) नावयवान्तरे अर्थाविशेषात्" । इति

इदं तावद्वाक्यं यथाश्रुति न केनचिदर्थेन सम्बध्यते । अथ हेतूपनयावेकत्वेन पक्षीकृत्यार्थाविशेषादिति हेतुः ? स विपक्षवृत्तित्वाद्विपर्ययहेतुरर्थाविशेषस्यैकत्वेऽदर्शनादिति नानात्वे च

न्यायवार्त्तिकतात्पर्य्यटीका

अत्र केचिदाहुः निगमनमसाधनाङ्गम्, कथं? प्रतिज्ञया गतार्थत्वादिति, तन्मतमपाकर्तुं वार्त्तिककारः सप्रयोजनं निगमनं दर्शयति—प्रतिज्ञाविषयस्यार्थस्येति । चतुर्भिः खल्ववयवैर्हेतोस्त्रीणि रूपाणि द्वे वा प्रतिपादिते, न त्वबाधितविषयत्वासत्प्रतिपक्षितत्वे । पञ्चसु वा चतुर्षु वा रूपेषु हेतोरविनाभावः परिसमाप्यते, तस्मादबाधितत्वासत्प्रतिपक्षितत्वरूपद्वयसंसूचनाय निगमनम्, तदिदमुक्तम्—विपरीतप्रसङ्गप्रतिषेधार्थमिति। बाधने प्रतिपक्षे वा साध्यविपरीतप्रसङ्गः स्यादिति । सोऽयं प्रतिज्ञाविषयार्थस्य अशेषप्रमाणमूलावयवोपपत्तौ सत्यां प्रतिज्ञेयस्यार्थस्य सिद्धतया पुनर्वचनेन निगमनेन प्रतिषिध्यते, न च प्रतिज्ञावचनादेव तत्सिद्धिः, तस्य साध्यपरत्वात् । न चान्यपरादप्याक्षेपात् सिद्धिः, हेत्वादिप्रयोगवैयर्थ्यप्रसङ्गात्, प्रतिज्ञात एव सर्वाक्षेपसंभवात् । तस्माद् रूपद्वयप्रतिपादनार्थं निगमनम्, यथा च त्रैरूप्यातिरिक्तमेतद्रूपद्वयं तथोपपादितमस्माभिः प्रथमसूत्रे । हेत्वाभासेषु च शेषं दर्शयिष्यत इति । एतस्मिन् सूत्रार्थे परस्य प्रतिज्ञायां निगमनं गतार्थं मन्यमानस्यावकाशो नास्ति । यस्तु मन्येत न हेतोरविनाभावसिद्धिमन्तरेण सिद्धनिर्देशो निगमनं भवति, न च पाञ्चरूप्यं विनाऽविनाभावसिद्धिः, निगमनात्तु तत्सिद्धौ न सिद्धनिर्देशो निगमनम्, अपि तु तदपि साध्यनिर्देश एवेति तं प्रत्युपेत्य तद्दोषनिराचिकीर्षया परेषां वाक्यमुपक्षिप्यते । परेषां वाक्यं पठति—उपनयनिगमने त्विति । दूषयति—इदं तावदिति । यथाश्रुति निगमनोपनययोरभेदं साधयति, अर्थगतं चाविशेषं हेतुमाह—तच्चैतदालोकतमसोरैक्यं काकस्य कार्ष्ण्यादिवदापतितम् । शङ्कते—अथ हेतूपनयाविति, उपलक्षणं चैतत्, प्रतिज्ञानिगमने इत्यपि द्रष्टव्यम् । अर्थाविशेषादिति अविशिष्टार्थत्वादित्युन्नेतव्यम्, तथा च संबन्ध इति शङ्कितुरभिप्रायः ।

---

(१) "न" इति आ-पु० नास्ति । (२) अत्र तात्पर्यं "तु" शब्दः अधिकः ।

न्यायवार्त्तिकम्

दर्शनादिति। यथा बहूनां घटानामेकोऽर्थो जलाहरणादि(१)र्न चैकत्वमिति। अथैकप्रयोजनकत्वेन पक्षीकृत्य ब्रूयादेकत्वमेकप्रयोजनत्वमिति? तथापि हेतुर्नास्ति, प्रतिज्ञार्थेनाक्षिप्तत्वात् हेतूपनययोरेकार्थत्वमिति प्रतिज्ञार्थः। अर्थाविशेषादिति हेत्वर्थोऽपि स एव। अन्यश्च हेत्वर्थः, अन्यश्चोपनयार्थ इत्यसिद्धोऽप्ययं हेतुः, तद्वर्णितम्।

"पक्षधर्मत्वसम्बन्धसाध्योक्तेरन्यवर्जनम्"।

इत्येतदनेनैव प्रत्युक्तम्। यदपि 'यथा तथेत्युपसंहारे कृते तथेत्यनेन शब्देन सर्वसामान्यं वा कृतकत्वसामान्यं वाऽभिधीयते? कृतकत्वविशेषो वा? सर्वसामान्यं तावन्न युक्तम्, तथेति व्यपदेशाशक्यत्वादिति। कृतकत्वविशेषोऽपि न युक्तः, अन्यथा शब्दस्य कृतकत्वात्। परिशेषात् कृतकत्वसामान्यम्, तच्च हेतुनैवोक्तमिति', तदप्ययुक्तम्, उपनयस्योपमानार्थत्वात्—उपमानार्थ उपनय इति, तच्चोपमानं न सर्वथा साध्यसाधनभावमाश्रित्य प्रवर्तत इति

न्यायवार्त्तिकतात्पर्य्यटीका

अत्रापि दोषमाह—स विपक्षेति। पुनः शङ्कते—अथैकप्रयोजनत्वेनेति। निराकरोति—तथापीति। सिध्यत्येकप्रयोजनत्वे साध्ये हेतोरविरोधो, हेतुस्तु न प्रतिज्ञार्थादतिरिच्यत इत्यर्थः। तद्वर्णितमिति। अन्यश्च हेत्वर्थोऽन्यश्चोपनयार्थ इत्येतद्वर्णितमित्यर्थः। एतेनोपनयनिगमनप्रयोजनाभिधानेन ये त्र्यवयवं वाक्यमाहुस्तन्मतमपास्तमित्याह—पक्षधर्मत्वेति। यच्च परैरुपनये दूषणं विकल्प्याभ्यधायि तत्तावदुपन्यस्यति—यदपि यथा तथेति। सर्वसामान्ययोगे हि तदेव स्यान्न तु तथेति। अन्यथा शब्दस्य कृतकत्वादिति, न हि यथा घटः कृतकः तथा शब्दोऽपि कृतकः, घटशब्दयोरभेदप्रसङ्गादित्यर्थः। तस्मात् सामान्यप्रतिषेधे विशेषप्रतिषेधे च कृतकत्वसामान्यं परिशिष्यते, तस्य च यथातथाभावयोरभावात् कृतकत्वादित्येव स्यात्, तथा च न हेतोर्व्यतिरेक उपनयः स्यादित्याह—परिशेषादिति। तदेतत् परेषां दूषणं निराकरोति—तदप्ययुक्तमिति। यथा तथेति वाक्यमुपमानैकदेशमुपमानमुपचारात्, उपमानमर्थो यस्य सोऽयमुपमानार्थ उपनयः, तस्य भावस्तत्त्वं तस्मात्, तच्चोपमानं न सर्वथा साध्यसाधनभावमाश्रित्य प्रवर्तते, साध्ये शब्दे साधनस्य कृतकत्वस्य स्थालीगतस्य यः सर्वथाभावः स्थालीत्वाद्येकार्थसमवायः,

वृत्तिः

विशिष्टपक्षबोधकस्तादृशसाध्यबोधको वा न्यायावयवो निगमनमिति। अस्य त्वन्वयव्यतिरेकिभेदान्न भेद इत्याशयः।

व्यतिरेकिणि तु तस्मान्न तथेत्येवाकार इत्यपरे ॥ ३९ ॥

---

(१) "ऽर्थो जलाहरणादि" इत्यत्र "ऽर्थोऽद्धारणादि" इति खपु० पाठः।

न्यायभाष्यम्

अत (१) ऊर्ध्वं तर्को लक्षणीय इति अथेदमुच्यते—

(सू)—अविज्ञाततत्त्वेऽर्थे कारणोपपत्तितस्तत्त्वज्ञानार्थमूहस्तर्कः ॥ ४० ॥

अविज्ञायमानतत्त्वेऽर्थे जिज्ञासा तावज्जायते जानीयेममर्थमिति। अथ

न्यायवार्त्तिकम्

यत्किञ्चिदेतत्। कृतकत्वसामान्यं तु शब्दसन्निधावभिधीयत इति चित्रमिदम्। कृतकत्वं खलु शब्द(२)सन्निधावभिधीयत इति शब्देन च विशिष्यमाणं कथं सामान्यं भविष्यति। तस्मात् सामान्यविशेषवान् हेतुरिति गतार्थत्वान्नोपनय इत्यनेन प्रत्युक्तम्। यदप्युक्तं यथा तथेत्युपमानमेतत्, उपमानं चोपनयो न दृष्टान्त इति एतेन निगमनं प्रत्युक्तम्। ते एते वीतावीतवाक्ये स्वतन्त्रे पञ्चावयवे न पुनरेकमन्वयि व्यतिरेकि चेति ॥ ३९ ॥

न्यायवार्त्तिकतात्पर्य्यटीका

तमाश्रित्य न प्रवर्तते, तथा च शब्दस्थाल्योरभेदप्रसङ्गाद्यथा तथेत्येव न स्यात्। तस्मात् स्थालीस्थप्रकारान्तरव्युदासेन कृतकत्वसामान्यमात्रसाधारण्येन यथा तथेत्युपमानोपपत्तिरित्यर्थः। नन्वेवमपि कृतकत्वसामान्यमात्रं शब्दे स्यान्न तु यथातथाभावः, तथा च न हेतोरतिरेक इत्युक्तमत आह—कृतकत्वसामान्यं त्विति। न हि जातु शाबलेयसन्निधौ गोत्वसामान्यमात्रं भवति, अपि तु विशेषसहितम्, तथा च यथाभाव उपपन्न इत्यर्थः। एतेन यत्परैरुपनयस्य दृष्टान्तादभिन्नत्वं वर्णितम्, तदपि परास्तमित्याह—गतार्थत्वादिति। अनेनोपमानसमानत्ववर्णनेन एतदेव विभजते—यदप्युक्तमिति। व्याप्तिप्रदर्शनविषयो दृष्टान्तः दृष्टव्याप्तिकस्य हेतोः साध्यधर्मिण्युपसंहार उपनय इति महान् भेद इत्यर्थः। एतेन निगमनं प्रतिज्ञायाः समानाभिधेयत्वेऽपि प्रतिज्ञार्थत्वेन प्रत्युक्तम्(३), प्रतिज्ञायाः साध्यपरत्वाद् निगमनस्य विपरीतशङ्कानिवृत्तिपरत्वादिति प्रयोजनभेदसामान्यमात्रविवक्षया एतेनेत्युक्तम्। अत्र भाष्यकारेणैकस्मिन्नन्वयव्यतिरेकिण्येव वीतावीतवाक्ये पञ्चावयवे उदाहृते, तत्र कदाचिद् भ्रान्तिः स्यादेकोदाहरणतया द्वे अपि वाक्ये परस्परापेक्षे एवेति, तन्निराकरणायाह—ते एते इति। न पुनरन्वयि व्यतिरेकि चेत्येकं वाक्यमित्यर्थः ॥ ३९ ॥

अत्र भाष्यं तर्कलक्षणावतारपरम् अत ऊर्ध्वमिति। उद्देशक्रमानुसारेण।

अवि—तर्कः (सू० ४०)॥ तर्कप्रवृत्तिक्रममाह—अविज्ञायमानतत्त्वेऽर्थ इति। यद्यपि

---

(१) "इत" इति ज०। (२) "खलु शब्द" इत्यत्र "खलशब्द" इति ख०। (३) आदर्शे "प्रयुक्तम्" इति पाठः।

न्यायभाष्यम्

जिज्ञासितस्य वस्तुनो व्याहतौ (१) धर्मौ विभागेन विमृशति—किंस्विदित्थम् आहोस्विन्नेत्थमिति(२)। विमृश्यमानयोर्धर्मयोरेकं कारणोपपत्त्याऽनुजानाति, सम्भवत्यस्मिन् कारणं प्रमाणं हेतुरिति कारणोपपत्त्या स्यादेवमेतन्नेतरदिति।

तत्र निदर्शनम्—योऽयं ज्ञाता ज्ञातव्यमर्थं जानीते तं तत्त्वतो(३) जानीयेति जिज्ञासा (४)। स किमुत्पत्तिधर्मकः (५) अथानुत्पत्तिधर्मक इति विमर्शः। विमृश्यमानेऽविज्ञाततत्त्वेऽर्थे यस्य धर्मस्याभ्यनुज्ञाकारणमुपपद्यते तमनुजानाति। यद्ययमनुत्पत्तिधर्मकः, ततः स्वकृतस्य कर्मणः फलमनुभवति ज्ञाता, दुःख-जन्म-प्रवृत्ति-दोष-मिथ्याज्ञानानामुत्तरमुत्तरं पूर्वस्य पूर्वस्य कारणम्, उत्तरोत्तरापाये तदनन्तरापायादपवर्ग(६) इति स्यातां संसारा-

न्यायवार्त्तिकतात्पर्यटीका

संशयस्य पश्चादेव जिज्ञासा भवति तथाऽपि जिज्ञासायाः परस्तादपि संशयो भवति, स चात्र विवक्षितस्तर्कप्रवृत्त्यङ्गत्वात्; तर्केण हि प्रसङ्गापरनाम्ना द्वयोः पक्षयोरेकतरन्निषेधेनैकतरः प्रमाणविषयतयाऽभ्यनुज्ञातव्य इति विषयप्रत्यासत्त्या तर्कप्रवृत्तिं प्रत्यङ्गता संशयस्येति। कारणोपपत्त्येति व्याचष्टे—संभवत्यस्मिन् कारणं प्रमाणमिति। अत्र च कारणव्याख्यानं प्रमाणमिति, उपपत्तिव्याख्यानं संभवतीति, अनुज्ञाव्याख्यानम् एवमेतन्नेतरदिति। एतदुक्तं भवति—यस्मिन् विषये प्रमाणं प्रवर्तितुमुद्यतं तद्विपर्ययाशङ्कायां न तावत् प्रवर्त्तते, न यावदनिष्टापत्त्या विपर्ययाशङ्काऽपनीयते, तदपनय एव च स्वविषये प्रमाणसंभव इति चोपपत्तिरिति व्याख्यायते। तथा प्रमाणस्योपपत्त्या इतिकर्त्तव्यतया प्रमाणस्याभ्यनुज्ञातस्य विशोधिते विषये प्रमाणमप्रत्यूहं प्रवर्त्तते। न चोपपत्तिरेवास्तु निश्चयहेतुः कृतं प्रमाणेनेति वक्तव्यम्, उपपत्तेः स्वतन्त्राया आश्रयासिद्धतया स्वतो निश्चयायोगात्। तदुपपादितं प्रथमसूत्र(७)इति। उदाहरणमाह—निदर्शनमिति। स्वकृतस्य कर्मण इत्यादिना पूर्वस्य कारणमित्यन्तेन संसारो दर्शितः, उत्तरेत्यादिनाऽपवर्ग

वृत्तिः

क्रमप्राप्तं तर्कं लक्षयति—(अविज्ञातेति)।

तर्क इति लक्ष्यनिर्देशः। कारणोपपत्तित ऊह इति लक्षणम्। अविज्ञाततत्त्वेऽर्थे तत्त्वज्ञानार्थमिति प्रयोजनकथनम्। 'कारणं' व्याप्यम्, तस्योपपत्तिरारोपः, तस्माद् य ऊह

(१) "व्याहतौ" इति भा०। (२) "किंस्विदित्येवमाहोस्विन्नैवमिति" इति फ०। (३) "तं च भो" इति ज-भा-ग०। (४) "जिज्ञासते" इति ल-भा०। (५) "अथे"ति क्वचिन्न दृश्यते। (६) "भावादपवर्ग" इति ल-भा-ग-भा-ज०। (७) ५४ पृष्ठ तात्पर्यटीका द्रष्टव्या।

न्यायभाष्यम्

पवर्गौ। उत्पत्तिधर्मके ज्ञातरि पुनर्न स्यालाम्। उत्पन्नः खलु ज्ञाता देहेन्द्रिय-बुद्धि-वेदनाभिः सम्बध्यत इति नास्येदं स्वकृतस्य कर्मणः फलमुत्पन्नश्च भूत्वा न भवतीति तस्याविद्यमानस्य निरुद्धस्य वा स्वकृतकर्मणः फलोपभोगो नास्ति। तदेवमेकस्यानेक-शरीरयोगः शरीर(१)वियोगश्चात्यन्तं न स्यादिति यत्र कारणमनुपपद्यमानं पश्यति तन्नानुजानाति (२)। सोऽयमेवंलक्षण ऊहस्तर्क इत्युच्यते।

कथं पुनरयं तत्त्वज्ञानार्थो न तत्त्वज्ञानमेवेति ? अनवधारणात्। अनुजानात्ययमेक-तरं धर्मं कारणोपपत्त्या, न त्ववधारयति न व्यवस्यति न निश्चिनोति एवमेवेदमिति। कथं तत्त्वज्ञानार्थ इति ? तत्त्वज्ञानविषयाभ्यनुज्ञालक्षणानुग्रह(३)भावितात् प्रसन्ना(४)-दनन्तरप्रमाणसामर्थ्यात् तत्त्वज्ञानमुत्पद्यत इत्येवं तत्त्वज्ञानार्थ इति।

सोऽयं तर्कः प्रमाणानि प्रतिसन्दधानः प्रमाणाभ्यनुज्ञानात् प्रमाणसहितो

न्यायवार्त्तिकतात्पर्यटीका

इत्यन्तेनापवर्गः। तेन संसारापवर्गाविच्छन्तौ वादिप्रतिवादिनौ प्रति आत्मनित्यत्वविषयं प्रमाणं वर्त्तमानमनेन तर्केणानुगृह्यत इति प्रमाणविषयविपर्ययाननुज्ञैव प्रमाणविषयाभ्यनुज्ञा, अनिष्ट-प्रसज्यविपर्ययस्यैव(५) साक्षान्निवर्त्तनात्। अत एव भाष्ये उपसंहारः—यत्र कारणमनुप-पद्यमानं पश्यति तन्नानुजानातीति।

ननु यदि तर्क एवमेतन्नेतरदित्येवमाकारः, कथं पुनरयं तत्त्वज्ञानार्थो न तु तत्त्वज्ञानमेवेति देशयति—कथं पुनरिति। परिहरति—अनवधारणादिति। पर्यायैर्निश्चयादत्यन्तभेद उक्तः। भावितात् चिन्तितात्, अत एव प्रसन्नात् निर्मलादिति। प्रमाणस्य सामर्थ्यादिति तर्कस्य स्वातन्त्र्यमपाकरोति। स्यादेतत्—यदि न तर्कस्तत्त्वनिश्चयसाधनमपि तु प्रमाणमेव, हन्त भोः किमर्थं तर्हि वादे प्रमाणतर्कसाधनेत्युक्तमित्यत आह—सोऽयं तर्क इति। व्यत्ययभिप्रायेण प्रमाणानीति। प्रमाणविषयविपर्ययाशङ्काविघटितानि प्रमाणानि प्रतिसंदधान इत्यर्थः।

वृत्तिः

आरोपः अर्थाद्व्यापकस्य। तथा च व्यापकाभाववत्त्वेन निर्णीते व्याप्यस्याहार्यारोपाद् यो व्यापकस्याऽऽहार्यारोपः स तर्कः। यथा निर्वह्नित्वारोपान्निर्धूमत्वारोपः—निर्वह्निः स्यात् निर्धूमः स्यादिति। ह्रदो निर्वह्निः स्यात् निर्धूमः स्यादित्यादिवारणाय व्यापकाभाववत्त्वेन निर्णीत

(१) "शरीरादि-" इति ज०। (२) "तन्नानुजानाति" इति ज०। (३) "लक्षणादूहाद" इति वि-टि-फ०। "-लक्षणानुग्रहोद-" इति भ ज-आ०। (४) "अप्रसन्ना-" इति टि०। (५) आदर्शे—"अनिष्टप्रसक्ता-विपर्ययस्यैव" इति।

न्यायभाष्यम्

वादेऽपदिष्ट (१) इति अविज्ञाततत्त्वमनुजानाति। यथा सोऽर्थो भवति तस्य तथाभावः(२)तत्त्वम्, अविपर्ययो याथातथ्यम् ॥ ४० ॥

न्यायवार्त्तिकम्

अविज्ञाततत्त्वेऽर्थे कारणोपपत्तितस्तत्त्वज्ञानार्थमूहस्तर्क इति सूत्रम्। अस्यार्थः पूर्ववत्। अविज्ञाततत्त्वेऽर्थे इति। यथा सोऽर्थो भवति सोऽस्य तथाभावस्तत्त्वम्, एतस्मिन् 'अविज्ञाते' सामान्यतो ज्ञाते। कुतः पुनरेतत् सामान्यतोऽवगतमिति ? अविज्ञाततत्त्वेऽर्थे इत्यभिज्ञानात्; यस्मादयमाह—अविज्ञाततत्त्व इति, तेन ज्ञापयति—सामान्यमवगतमिति। यदि पुनः सामान्यमपि नाधिगतं स्यात् न ब्रूयादविज्ञाततत्त्व इति, अविज्ञात इत्येवं ब्रूयादिति।

अविज्ञाततत्त्व इति समासोऽयम्, न चार्थो गम्यते किमविज्ञातं तत्त्वं येन उताविज्ञातं तत्त्वं यस्येति। कश्चात्र विशेषः ? यद्यविज्ञातं तत्त्वं येन सोऽयमविज्ञाततत्त्वः परिच्छेत्ता, तस्मिन्नविज्ञाततत्त्वे परिच्छेत्तरि तदवगमार्थमूहस्तर्क इति प्राप्नोति। अथाविज्ञातं तत्त्वं यस्य तदविज्ञाततत्त्वं तस्मिन्नविज्ञाततत्त्व इति; षष्ठीविग्रहेण युक्तमेतत्। विशेषहेत्वभावान्नार्थाधिगमः, नात्र विशेषहेतुरिति किमयं तृतीयाविग्रहेण समास उत षष्ठीविग्रहेणेति। युक्तम्, अर्थग्रहणसामर्थ्यात्,

न्यायवार्त्तिकतात्पर्यटीका

वार्तिककारः सूत्रतात्पर्यमाह—अस्येति। समानजातीयात् संशयादेरसमानजातीयाच्चेच्छादेर्व्यवच्छिद्यते। यद्यपि संशयजिज्ञासे अप्यविज्ञाततत्त्वेऽर्थे प्रवर्तेते, तथाऽपि न कारणोपपत्तित इति तयोर्व्यवच्छेदः। तत्त्वं व्याचष्टे—यथेति। समानासमानजातीयव्यवच्छिन्नमविपरीतं रूपं तत्त्वमित्यर्थः। चोदयति—कुतः पुनरिति, न हि सामान्यज्ञानविधायकं पदमत्रास्तीत्यर्थः। परिहरति—अविज्ञातेति। विशेषनिषेधः शेषाभ्यनुज्ञाहेतुरित्यर्थः। विमृशति—अविज्ञाततत्त्व इति समासोऽयमिति। अवधारयति—षष्ठीविग्रहेणेति। युक्तम् उपपन्नम्, तृतीयाविग्रहेण त्वनुपपन्नमित्यर्थः। संशयबाधाह—विशेषहेत्वभावादिति। युक्तमिति प्रतिज्ञामात्रेणोच्यते न त्वत्र

वृत्तिः

इति। निर्वह्निः स्यात् अद्रव्यं स्यादित्यादिवारणाय व्याप्यस्येति। तद्व्याप्यारोपाधीनस्तदारोप इत्यर्थलाभाय व्यापकेति। न चानुमानादितोऽर्थसिद्धेस्तर्को व्यर्थ इति वाच्यम्, अप्रयोजकत्वादिशङ्काकलङ्कितेन हेतुनाऽर्थस्य साधयितुमशक्यत्वात्। तदेतदुक्तम्—अविज्ञाततत्त्वेऽर्थे तत्त्वज्ञानार्थमिति, तत्त्वनिर्णयार्थमित्यर्थः। यत्र नाप्रयोजकत्वाद्याशङ्का तत्र तर्को नापेक्ष्यत एवेति भावः।

---

(१) "उपदिष्ट" इति ज-आ०। (२) "यथाभाव" इति ल-ज-आ-ग०।

न्यायवार्त्तिकम्

तस्मादविज्ञाततत्त्वेऽर्थ इति, अर्थश्चार्यमाणत्वात् कर्म, तेन ज्ञापयति—षष्ठीसमासोऽयं न तृतीयाविग्रह इति। अर्थग्रहणमन्तरेणापि सामान्यतोऽवगतेरविज्ञातं तत्त्वं यस्येत्यनुक्तेऽप्यर्थे गम्यत एवैतदर्थ इति। एवमपि समासे सन्देहतादवस्थ्यम्। मा भूत् समासो वाक्यमेवास्तु अविज्ञातं तत्त्वमस्येति। भवत्येवाभीष्टार्थप्राप्तिः, लाघवार्थं तु समासकरणम्। अनुक्तेऽप्यर्थे सामर्थ्याद् गम्यते अविज्ञातं तत्त्वमस्येति। अत्रोक्तं सन्देह एवं स्यादिति समस्तानभिधानप्रसङ्गाच्च। यदि च सामर्थ्यमाश्रित्यार्थग्रहणं प्रतिषिध्यते तदेवं युक्तमूहस्तर्क इति, सामर्थ्यतः शेषं गम्यत इति, तस्मादर्थग्रहणं ज्ञातृनिराकरणार्थमिति।

अविज्ञाततत्त्व इति (१)न वक्तव्यम्, गम्यमानत्वात्, कारणोपपत्तितस्तत्त्वज्ञानार्थमूहस्तर्क इत्युक्ते गम्यते एतत् अविज्ञातं तत्त्वमस्येति। अत्र तावदुक्तं समस्तानभिधानप्रसङ्गादिति। मा भूत् समस्ताभिधानम्, किं नो बाध्यते ? न, बुद्धिधर्मनिराकरणार्थत्वात्; उभयथा खल्वयमूहो

न्यायवार्त्तिकतात्पर्यटीका

हेतुरभिधीयत इत्यर्थः। युक्तत्वे हेतुमाह—युक्तम्(२) अर्थग्रहणसामर्थ्यादिति। अन्वश्चोदयति—अर्थग्रहणमन्तरेणापीति। ज्ञेयेन हि ज्ञानं निरूप्यते, न ज्ञात्रा, तस्य साधारण्यादिति सामर्थ्यमित्यर्थः। गूढाभिसन्धिः परिहरति—एवमपीति। तस्याभिसन्धिभेदमुररीकृत्य चोदयति—मा भूत् समास इति। उत्तरवाद्याह—भवत्येवेति। नाद्याप्यनेन स्वाभिप्रायो दर्शित इति मत्वा पुनश्चोदयति—अनुक्तेऽपीति। उक्तपरिहारपूर्वं स्वाभिप्रायमुद्घाटयति—अत्रोक्तमिति। समस्तानभिधानप्रसङ्गाच्चेति स्वाभिप्रायोद्घाटनम्। एतदुक्तं भवति—सामर्थ्यप्राप्तस्यानभिधानेऽतिप्रसङ्ग इति न सामर्थ्यमाश्रित्य लक्षणे संशयो निराकरणीय इति तन्निराकरणार्थमर्थग्रहणं कर्त्तव्यमिति।

अत्र चोदयति—अविज्ञाततत्त्व इति न वक्तव्यमिति। न हि तत्त्वे ज्ञाते तत्त्वज्ञानार्थिता भवति तस्माद्गम्यते अविज्ञाततत्त्व इति भावः। गूढाभिसन्धिरुक्तं परिहारं स्मारयति—अत्र तावदुक्तमिति। अविदिताभिप्रायश्चोदक आह—मा भूदिति, अस्तूहस्तर्क इत्येतावदेवेत्यर्थः। उत्तरवादी स्वाभिप्रायमुद्घाटयति—न बुद्धिधर्मेति। यद्यपि नास्माकं राद्धान्ते शुश्रूषादयो

वृत्तिः

परे तु ऊह इत्येव लक्षणम्। ऊहत्वं च मानसत्वव्याप्यो जातिविशेषः, तर्कयामीत्यनुभवसिद्धः। तर्कः किं स्वत एव निर्णायकः परम्परया वेत्यत आह—कारणेति। कारणस्य व्याप्तिज्ञानादेरुपपादनद्वारेत्यर्थः। तथा च धूमो यदि वह्निव्यभिचारी स्याद् वह्निजन्यो न

(१) अत "न वक्तव्यम्" इतारभ्य "समस्तानभिधानप्रसङ्गादिति" इतान्तः पाठः ख-पु० नास्ति।
(२) हेतौ वक्तव्ये युक्तमिति प्रतिज्ञावाक्यमत्र लेखकप्रमादात् सम्पातादा आयातमिति प्रतिभाति।

न्यायवार्त्तिकम्

भवति विज्ञाततत्त्वेऽविज्ञाततत्त्वे च, तत्र तावद्विज्ञाततत्त्व ऊहः शुश्रूषा-श्रवण-धारण-विज्ञानो-हापोहतत्त्वाभिनिवेशा बुद्धिधर्मा इति तत्त्वमवधृतं विजानाति विज्ञातमूहत इति। किमुक्तम्भवति? योऽसावर्थः पूर्वमनेन विज्ञातस्तमेवोहत इति पूर्वानुभूतपरिच्छेदक ऊह इत्युच्यते न त्वयं तर्कः। यः पुनरविज्ञाततत्त्वेऽर्थे ऊहः स तर्कः।

षष्ठ्यभिधानमधिकरणार्थासम्भवादविज्ञाततत्त्वस्यार्थस्येति वक्तव्यम्, अविज्ञाततत्त्वोऽर्थो ज्ञायमानः कर्म भवति कर्मणि च षष्ठ्येव ज्यायसी यथा घटस्य विज्ञानमिति। न, विभक्ति-व्यत्ययात्। षष्ठीस्थल एवैषा सप्तमी द्रष्टव्या, यथाऽन्यत्र—

"इषावयुगपत् संयोगविशेषाः कर्मान्यत्वे हेतवः"(१)

इति। व्यत्ययः कस्मात्? यदि व्यत्ययेन कश्चिदर्थो लभ्यते युक्तो व्यत्ययः, यथा तस्मिन्नेव

न्यायवार्त्तिकतात्पर्यटीका

बुद्धिगुणा बुद्धितत्त्वस्यैवाभावात्, तथाऽप्यात्मगुणा अपि सांख्याभिप्रायेण बुद्धिगुणा उक्ताः। एतदुक्तं भवति—यद्यूहस्तर्क इत्येतावदुच्येत, यदि वा तत्त्वज्ञानार्थमूहस्तर्क इत्येतावन्मात्रम्, ततो विज्ञाततत्त्वेऽपि यदूहः पूर्वानुभूतपरिच्छेदात्मा जायते पुनस्तत्त्वज्ञानार्थं सोऽपि तर्कः स्यात्, तस्मादविज्ञाततत्त्व इति वक्तव्यमित्यर्थः। यद्यपि कारणोपपत्तित इत्येतस्मादप्ययमर्थो गम्यत एव, तथाऽपि कारणोपपत्तेरेवंरूपत्वं नाविज्ञाततत्त्वग्रहणमन्तरेण भवति। तथा हि अधिगतपरिच्छेदात्मा-ऽप्यूहः कारणस्योपपत्त्या संभवेन ज्ञायते, कारणासंभवे कार्यस्यासत्त्वात्; न त्वसावविज्ञाततत्त्व इति ततो व्यवच्छेदः। तथा च सति प्रमाणमपि तर्कः स्यादत उक्तं कारणोपपत्तित इति। उक्ते सति प्रयोजनानुसरणम्, न त्विह लाघवादरः सूत्रकारस्येति मन्तव्यम्।

चोदयति—षष्ठ्यभिधानमिति। परिहरति—न विभक्तिव्यत्ययादिति। यथाऽन्यत्र कणभुजः सूत्रे। विप्रतिपन्नः पृच्छति—कस्मात्। प्रष्टैवैकग्रन्थेनाह—यदि व्यत्ययेनेति।

वृत्तिः

स्यादित्यनेन व्यभिचारशङ्कानिरासे निरङ्कुशेन व्याप्तिज्ञानेनानुमितिरिति परम्परयैवास्योपयोग इत्याहुः।

स चायं पञ्चविधः, आत्माश्रयान्योन्याश्रय-चक्रकानवस्था-तदन्यबाधितार्थप्रसङ्गभेदात्। स्वस्य स्वापेक्षित्वेऽनिष्टप्रसङ्ग आत्माश्रयः, स चोत्पत्ति-स्थिति-ज्ञप्तिद्वारा त्रेधा। यथा—यद्ययं घट एतद्घटजन्यः स्यात् तदा एतद्घटानधिकरणक्षणोत्तरवर्त्ती न स्यात्; यद्ययं घट एतद्घट-

(१) वैशेषिकदर्शने ५।१।१६ सूत्रम्।

न्यायवार्त्तिकम्

"इषावयुगपत् संयोगविशेषा" इति अधिकरणार्थः, इषोरपि येऽवयवास्तेषामपि संयोगविशेषास्तेऽपि कर्मान्यत्वे हेतव इति। न पुनरिह व्यत्ययेन फलं पश्यामः, तस्मादयुक्तो विभक्तिव्यत्यय इति। न, युक्तः(१), सामान्याधिगतस्य विशेषज्ञापनार्थम्, यस्यैव सामान्यमधिगतं तद्वर्त्तिनो विशेषा अप्यवगन्तव्या इति। ते च विशेषाः संयोगिनः समवायिनश्च भवन्तीति।

कारणोपपत्तितः प्रमाणोपपत्तितः(२)। उपपत्तिः सम्भवः। सम्भवति अस्मिन् अर्थे प्रमाणमिति (३)भवेदयमर्थ इति। उदाहरणम्—योऽयं ज्ञाता ज्ञातव्यमर्थं जानाति(४) तं तत्त्वतो जानीयेति(५) किमुत्पत्तिधर्मकोऽथानुत्पत्तिधर्मक इति। एकतरमनुजानातीति(६) भाष्यम्। अनुत्पत्तिधर्मकेणानेन भवितव्यमिति य ऊहः स तर्क इति। नन्वेतत् तत्त्वज्ञानमेव, किमुच्यते तत्त्वज्ञानार्थमिति। नेदं तत्त्वज्ञानमनवधारणात् न ह्ययमवधारयति एवमेवेति, किं त्वनुत्पत्तिधर्मकेण ज्ञात्रा भवितव्यमिति प्रमाणविषयमनुजानाति। कथं पुनरयं तत्त्वज्ञानार्थं भवति? प्रमाणविषयविवेचनात्(७)। प्रमाणविषयमनेन विविनक्ति अयमर्थो युक्त इति। प्रमाणानि पुनः प्रवर्त्तमानानि तर्कविविक्तमर्थं तथाभूतमवगमयन्तीति(८)।

ऊहः संशयनिर्णयाभ्यां न भिद्यत इति केचित्। अयं किलोहः संशयो वा स्यान्निर्णयो वा(९)? यदि संशय(१०)स्तदा तेन सङ्गृहीतत्वात् पृथक् न पठितव्यः। अथ निर्णयस्तदा तेन सङ्गृहीत इति। अपरे त्वनुमानं तर्क इत्याहुः। हेतुस्तर्को न्यायोऽन्वीक्षा इत्यनुमानमाख्यायत इति। अपरे त्वनुमानमेव तर्कं युक्त्यपेक्षं वर्णयन्ति।

न्यायवार्त्तिकतात्पर्यटीका

परिहरति—न, युक्त (११) इति, सामान्येनाधिगतस्य विशेषेण ज्ञापनार्थम्। नित्यत्वादयो विशेषाः समवायिनः, वह्न्यादयश्च धूमादिसंयोगिन इति। शेषं सुगमम्।

देशयति—ऊहः संशयनिर्णयाभ्यामिति। केचित् सिद्धान्तैकदेशिनः, अनुमानं तर्क इत्याहुः।

वृत्तिः

वृत्तिः स्याद् एतद्घटव्याप्यो न स्यात्; यद्ययं घट एतद्घटज्ञानाभिन्नः स्याज् ज्ञानसामग्रीजन्यः स्यात्, एतद्घटभिन्नः स्यादिति वा सर्वत्रापाद्यम्। तदपेक्षापेक्षित्वनिबन्धनोऽनिष्टप्रसङ्गोऽन्योन्याश्रयः। सोऽपि पूर्ववत् त्रेधा। तदपेक्षापेक्षापेक्षित्वनिबन्धनोऽनिष्टप्रसङ्गश्चक्रकम्। चतुःकक्षादावपि स्वस्य स्वापेक्षापेक्षापेक्षित्वसत्त्वात् नाधिक्यम्। अस्यापि पूर्ववत् त्रैविध्यम्।

---

(१) "न न युक्तः" इति ख। (२) अत्र ख-पु० "च"कारः अधिकः। (३) स्यादेवमित्यादिभाष्यव्याख्यानमिदम्। (४) भाष्ये "जानीते" इति बहुपुस्तकसंवादी पाठो गृहीतः। (५) "जानीयेयमिति" इति ख। (६) 'अनुजानात्ययमेकतरमि'ति पाठस्तु मुद्रितबहुपुस्तकानुसारितया मूले गृहीतः। "एक उभयं जानातीति" इति ख। (७) "प्रमाणविषयाविवेचनात्" इति ख। (८) "अवगमयन्ति" इत्यत्र "अवगच्छन्ति" इति ख। (९) "स्यान्निर्णयो वा" इति ख-पु० नास्ति। (१०) "संग्रह-" इति ख। (११) ख-तात्पर्ये "न न युक्तः" इति पाठः।

न्यायवार्त्तिकम्

यत्तावन्निर्णयसंशयाभ्यां नोहो भिद्यत इति, तन्न, प्रत्ययस्वरूपानवबोधात्। अविज्ञाततत्त्वेऽर्थे भवतीति सामान्येनाक्षिप्तो भवान्। सत्यमविज्ञाततत्त्वे भवतीति, न पुनः प्रत्ययस्वरूपं व्यज्ञायि भवता। अनवधारणात्मकः प्रत्ययः संशयः किंस्विदिति, अवधारणात्मकः प्रत्यय एवमिदमिति निर्णयः। अयन्तु संशयात्(१) प्रच्युतः कारणोपपत्तिसामर्थ्यात्, संशये(२) कारणोपपत्तिरस्ति। निर्णयं चाप्राप्तो विशेषादर्शनात्; विशेषदर्शनान्निर्णयो भवति न चास्मिन् विशेषदर्शनमस्ति। एतेनानुमानं तर्क इत्येतदपि प्रत्युक्तम्, विशेषादर्शनादिति। किं पुनरस्य स्वरूपम्? भवेदित्येष प्रत्यय इत्येतस्य स्वरूपमिति। यैरप्यनुमानं युक्त्यपेक्षं तर्क इत्युच्यते तैरप्यनुमानात् तर्कभेदः स्वयमुक्तः। युक्तिः प्रमाणोपपत्तिः, प्रमाणोपपत्तिमपेक्षमाणो यः प्रत्ययः स तर्क इति केवलं संज्ञाभेदमात्रम्। अथ न प्रमाणोपपत्तिर्युक्तिः, अनुमानं युक्त्यपेक्षमित्यपेक्षासामर्थ्यं वक्तव्यम्। स्वविषयाधिगमे चानुमानं किमपेक्षते।

न्यायवार्त्तिकतात्पर्यटीका

अन्ये त्वनुमानमेव युक्त्यपेक्षं विपर्ययेऽनिष्टप्रसङ्गापेक्षं तर्क इति वर्णयन्ति।

तत्र प्रथमचोदकं प्रत्याह—यत्तावदिति। आक्षिप्त आक्षिप्तहृदयः, न तु तर्कप्रत्ययस्वरूपं चेतयत इत्यर्थः। विशेषदर्शनादिति, विशेषदर्शनान्निश्चयः प्रमाणेन भवति, न तर्केण, तदनुज्ञानमात्रत्वात् तर्कस्येत्यर्थः। चोदकं निराकृत्य सिद्धान्तैकदेशिनं निराकरोति—एतेनेति। यदि संशयात् प्रच्युतो निर्णयं चाप्राप्तस्तर्हि तस्य स्वरूपं वक्तव्यमिति पृच्छति—किं पुनरिति। उत्तरम्—भवेदिति, प्रमाणविषयाभ्यनुज्ञेत्यर्थः। द्वितीयमेकदेशिनं निराकरोति—यैरपीति। युक्तिर्हि प्रमाणोपपत्तिस्तज्जन्मा च प्रत्ययस्तर्क एव, स चानुमानमिति त्वयोच्यते, अस्माभिस्तु तर्क इति संज्ञाभेदमात्रमित्यर्थः। शङ्कते—अथेति। निराकरोति—अनुमानमिति। प्रमाणोपपत्त्यतिरिक्ताया युक्तेरनिरूपणाद् युक्त्यर्थो वक्तव्यः, न ह्यपेक्षणीयमन्तरेणापेक्षा शक्या निरूपयितुमिति भावः। ननु

वृत्तिः

अव्यवस्थितपरम्परारोपाधीनानिष्टप्रसङ्गोऽनवस्था। यथा—यदि घटत्वं घटजन्यत्वव्याप्यं स्यात् कपालसमवेतत्वव्याप्यं न स्यात्। तदन्यबाधितार्थप्रसङ्गस्तु—धूमो यदि वह्निव्यभिचारी स्याद् वह्निजन्यो न स्यादित्यादिः। प्रथमोपस्थितत्वोत्सर्ग-विनिगमनाविरह-लाघव-गौरवादिकं तु प्रसङ्गानात्मकत्वान्न तर्कः, किन्तु प्रमाणसहकारित्वरूपसाधर्म्यात्तथा व्यवहार इति सङ्क्षेपः॥ ४०॥

---

(१) अत्र क-पु० "निर्णयात्" इत्यधिकः पाठः। (२) ख-पु०—"कारणोपपत्तिसामर्थ्यात् संशये" इत्यंशो नास्ति।

न्यायवार्त्तिकम्

अथेतरप्रमाणापेक्षा युक्तिरित्युच्यते, एवमप्यनुग्रहार्थो (१) वक्तव्यः—कथं प्रत्यक्षागमाभ्यामनुमानमनुगृह्णात इति। अथानुमानस्य प्रत्यक्षागमैकविषयत्वम्, तत्रापि कः (२)तर्कः ? त्रीण्येतानि प्रमाणविषयतया प्रतिसंहितानीति। भवेत्, अवधारणप्रत्ययौ भिन्ननिमित्तौ विशेषवत्त्वात् प्रत्यक्षानुमानप्रत्ययवत्। अनुमानं तर्कः लिङ्गलिङ्गिसम्बन्धस्मृत्यपेक्षत्वात् अनुमानवत्। न, तर्कस्वरूपानवबोधात्; नैव लिङ्गलिङ्गिसम्बन्धस्मृत्यपेक्षस्तर्कः। कथमिति ? द्वयस्यानधिगतेः। यत्र द्वयमधिगम्यते धर्मी साधनधर्मश्च तत्रानुमानं प्रवर्तते, यत्र पुनर्द्धर्मिमात्राधिगतिर्न लिङ्गाधिगतिरस्ति स तर्कविषयः (३) इति। तस्मात् लिङ्गलिङ्गिसम्बन्धस्मृत्यपेक्षत्वमनुपपन्नम्। अनुमानं धर्मिगतधर्मोपलब्धौ प्रवर्तते न पुनस्तर्कः, तर्कस्त्वन्यगतधर्मदर्शनेनापि प्रवर्तते यथा भवितव्यमत्र (४) पुरुषेणेति, यथाऽस्मिन् देशेऽश्वा वाह्यन्त इति अश्ववाहनं न(५) पुरुषधर्मः, सोऽयमन्यगतधर्मोपपत्त्या स्थाणुव्यवच्छेदमात्रमूह इति। सोऽयं तर्कः प्रमाणानि सन्धत्त इति प्रमाणसहितो वादेऽपदिष्टः, न पुनरयं प्रमाणमपरिच्छेदकत्वादिति (६) ॥४०॥

न्यायवार्त्तिकतात्पर्यटीका

यदेव किञ्चित् स्वविषयाधिगमेऽनुमानमपेक्षते सैवापेक्षणीया युक्तिरनुमानस्य भविष्यतीत्यत आह—स्वविषयाधिगमे चेति।

शङ्कते—अथेति। निराकरोति—एवमिति। यद्युत्पत्तौ प्रत्यक्षागमापेक्षमनुमानम्, न वक्तव्यं युक्त्यपेक्षमिति, सर्वस्यानुमानस्य तथाभावेऽव्यभिचारेण विशेषणायोगादिति भावः। पुनः शङ्कते—अथानुमानस्येति। निराकरोति—तत्रापीति। एवमपि तर्को नार्थान्तरं स्यादनुमानभेदस्य चेदृशस्य प्रमाण एवान्तर्भाव इति भावः। उक्तमर्थं प्रमाणयति—भवेदिति। प्रत्ययोऽवधारणप्रत्ययश्चेत्यर्थः। चोदयति—अनुमानमिति। विपर्ययोऽनिष्टप्रसङ्गो व्यतिरेकि लिङ्गं तच्चागृहीतसंबन्धं लिङ्गिनि न प्रवर्त्तत इति लिङ्गलिङ्गिसंबन्धस्मृत्यपेक्षत्वादप्राणादिमत्त्वप्रसङ्गादितिवदनुमानमेवेत्यर्थः। परिहरति—न तर्केति। युक्तं व्यतिरेकिणि जीवच्छरीरे धर्मिणि प्राणादिमत्त्वस्य साधनधर्मस्य दर्शनात्, ननु 'यद्युत्पत्तिमान् आत्माऽभविष्यत् न संसारापवर्गावुपपत्स्येताम्' इत्यत्राऽऽत्मनि धर्मिणि साधनधर्म उत्पत्तिरस्ति यद्दर्शनतः संस्कारोद्बोधे सति लिङ्गलिङ्गिसंबन्धस्मृतिर्भवेदित्यर्थः। न केवलं प्रसङ्गसाधनं साध्यधर्मिण्यसिद्धम्, अपि त्वन्यगत एव प्रसङ्गहेतुः, न त्वनुमानमन्यगताद्धर्मात् प्रवर्त्तते, तस्मादनुमानादस्य स्फुटो भेद इत्याह—अनुमानं चेति (७)। भाष्यव्याख्यानं सोऽयमिति ॥ ४० ॥

---

(१) "एवमप्यर्थग्रहार्थो" इति ख। (२) ख-पु० "कः" इति नास्ति। (३) "सत्कर्मविशेषे" इति ख। (४) "भवितव्यमत्र" इत्यत्र "भवितव्यमनेन" इति ख। (५) ख-पु० "न" नास्ति। (६) "प्रमाणपरिच्छेदकत्वादिति" इति ख। (७) वार्त्तिके "च" नास्ति। क-तात्पर्ये—"अनुमानं चेत्" इति पाठः।

न्यायभाष्यम्

एतस्मिंश्च तर्कविषये—

(सू०) विमृश्य पक्षप्रतिपक्षाभ्यामर्थावधारणं निर्णयः ॥४१॥

स्थापना साधनम्, प्रतिषेध उपालम्भः। तौ साधनोपालम्भौ पक्षप्रतिपक्षाश्रयौ व्यतिषक्तावनुबन्धेन प्रवर्त्तमानौ पक्षप्रतिपक्षावित्युच्येते। तयोरन्यतरस्य निवृत्तिरेकतरस्यावस्थानमवश्यम्भावि, यस्यावस्थानं तस्यार्थावधारणं(१) निर्णयः।

नेदं पक्षप्रतिपक्षाभ्यामर्थावधारणं सम्भवतीति—एको हि प्रतिज्ञातमर्थं (२)हेतुतः स्थापयति प्रतिषिद्धं चोद्धरति द्वितीयस्य। द्वितीयेन स्थापनाहेतुः प्रतिषिध्यते

न्यायवार्त्तिकतात्पर्यटीका

नैतन्निर्णयमात्रस्य लक्षणमपि तु परीक्षाप्रयोजनस्य, स च निर्णयो विमर्शानन्तरोत्पन्नतर्कसहायप्रमाणनिबन्धनस्तर्कविषय एवेति निर्णयभेदलक्षणमिति नाव्यापकं तल्लक्षणमिति दर्शयितुं भाष्यकारो निर्णयलक्षणमवतारयति—एतस्मिन् [च] तर्कविषये।

अत्र पक्षप्रतिपक्षयोः कर्मतया (३) न निर्णयसाधनत्वमित्यनुपपत्त्या साधनोपालम्भौ वादसूत्रगतौ लक्षणीयाविति तावेव तावद्भाष्यकृद् विभजते—स्थापना साधनम्, प्रतिषेधः साधनस्य उपालम्भः। लक्षणानिबन्धनं संबन्धमाह—तौ साधनोपालम्भाविति। यद्यप्युपालम्भो न प्रतिपक्षाश्रितः तथाऽपि तदुद्देशेन प्रवृत्तस्तदाश्रित इत्युच्यते। मुख्यपदोपादानोल्लङ्घनेन लाक्षणिकपदोपादानलभ्यं प्रयोजनमाह—व्यतिषक्ताविति। अर्थग्रहणसामर्थ्यलभ्यमेकतरनिर्णयावसानत्वमाह—अनुबन्धेन प्रवर्त्तमानाविति। एतच्च वार्त्तिके स्फुटीभविष्यति(४) तमेव साधनोपालम्भयोः परस्परानुबन्धं दर्शयति—तयोरन्यतरस्येति। यस्य साधनस्य वा उपालम्भस्य वाऽवस्थानं तस्य साधनस्य वा उपालम्भस्य वा योऽर्थः पक्षः प्रतिपक्षो वा तस्यावधारणमित्यर्थः। अत्र पक्षप्रतिपक्षप्रयोगाद् वादे संशयोऽस्तीति भ्रान्त्या चोदयति—नेदमिति। एक इति वादी, प्रतिज्ञातमर्थं हेतुतः स्थापयति। द्वितीयस्य प्रतिवादिनः, प्रतिषिद्धं प्रतिषेधं वाद्युक्तस्य हेतोर्दूषणमिति यावत्; उद्धरति दूषणाभासीकरोति। द्वितीयेन तु

वृत्तिः

क्रमप्राप्तं निर्णयं लक्षयति—(विमृश्येति)। विमृश्य सन्दिह्य।

---

(१) अत्र फ-पुस्तकपाठो गृहीतः। 'तस्यावधारण'मिति पाठान्तरम्। (२) ग-पुस्तके—अत्र "तम्" इत्यधिकम्। (३) ३३२-पृष्ठे वार्त्तिके इदं स्फुटीभविष्यति। (४) ३३३-पृष्ठस्थवार्त्तिकस्य २य-पंक्तौ "श्रुतिसामर्थ्यादन्यतर" इत्यादिना वाक्येन।

न्यायभाष्यम्

तस्यैव प्रतिषेधहेतुश्चोद्ध्रियते स निवर्त्तते। तस्य निवृत्तौ योऽवतिष्ठते तेनार्थावधारणं निर्णयः।

उभाभ्यामेवार्थावधारणमित्याह। कया युक्त्या? एकस्य सम्भवो द्वितीयस्यासम्भवः। तावेतौ सम्भवासम्भवौ विमर्शं सह निवर्त्तयतः—(१) उभयसम्भवे उभयासम्भवे (२) वाऽनिवृत्तो विमर्श इति। विमृश्येति विमर्शं कृत्वा। सोऽयं विमर्शः पक्षप्रतिपक्षाववद्योत्य न्यायं प्रवर्तयतीत्युपादीयत इति। एतच्च विरुद्धयोरेकधर्मिस्थयोर्बोद्धव्यम्। यत्र तु धर्मिसामान्यगतौ विरुद्धौ धर्मौ हेतुतः सम्भवतः तत्र समुच्चयः, हेतुतोऽर्थस्य तथाभावोपपत्तेः। यथा—क्रियावद् द्रव्यमिति लक्षणवचने यस्य द्रव्यस्य क्रियायोगो हेतुतः सम्भवति तत् क्रियावत्, यस्य न सम्भवति तदक्रियमिति। एकधर्मिस्थयोश्च विरुद्धयोर्धर्मयोरयुगपद्भाविनोः कालविकल्पः। यथा—तदेव द्रव्यं क्रियायुक्तं क्रियावत्, अनुत्पन्नोपरतक्रियं पुनरक्रियमिति।

न चायं निर्णये नियमो विमृश्यैव पक्षप्रतिपक्षाभ्यामर्थावधारणं निर्णय इति, किं त्विन्द्रियार्थसन्निकर्षोत्पन्न(३)प्रत्यक्षेऽर्थावधारणं निर्णय इति, परीक्षाविषये तु विमृश्य पक्षप्रतिपक्षाभ्यामर्थावधारणं निर्णयः। वादे शास्त्रे (४)च विमर्शवर्जम्॥ ४१॥

इति वात्स्यायनीये न्यायभाष्ये प्रथमाध्यायस्य प्रथमाह्निकम्।

न्यायवार्त्तिकतात्पर्यटीका

प्रतिवादिना वाद्युक्तस्य हेतोः स्थापनाहेतुत्वं प्रतिषिध्यते। तस्यैव वादिनः प्रतिवाद्युक्तदूषणप्रतिषेधहेतुश्च प्रतिवादिनैवोद्ध्रियते। स वादिनो वा प्रतिवादिनो वा हेतुश्चोपालम्भश्च निवर्त्तते, तस्मिन्निवृत्ते योऽवतिष्ठते एकः, तेनार्थनिर्णयः, न द्वाभ्याम्। तस्मादयुक्तं पक्षप्रतिपक्षाभ्यामिति। न तावत् संशयविषये निर्णये वादिप्रतिवादिनौ स्तः तयोर्निश्चितयोरेव प्रवृत्तेः।

अभ्युपेत्य परिहरति—उभाभ्यामिति। वादिनः साधनस्य संभवः प्रतिवादिन उपालम्भस्यासंभवः, एवं प्रतिवादिनः साधनस्य संभवो वादिन उपालम्भस्यासंभव इति। विमृश्येति विमर्शं कृत्वेति। अनुपादेयोऽपि विमर्शः कार्यत्वात्कृतिव्याप्य उक्तः। विमृश्येतिपदोपादानस्य प्रयोजनमाह—सोऽयमिति। अवद्योत्य नियमेन विषयीकृत्येत्यर्थः। एकधर्मिस्थयोरित्यस्य व्यतिरेकमाह—यथा क्रियेति। विरुद्धयोरित्यस्य कालभेदेन व्यतिरेकमाह—एकधर्मिस्थयोश्चेति। न निर्णयमात्रस्येदं लक्षणमपि तु परीक्षाविषयस्येत्याह—न चायं निर्णय इति।

(१) उभयसम्भव इति, उभयोः वादिप्रतिवादिसम्बन्धिनोः साधनयोरुपालम्भयोर्वा सम्भव इत्यर्थः। एवमसम्भव इत्यत्रापि बोध्यम्। (२) "त्वनिवृत्तो" ग०। (३) "-कर्षोत्पन्न" इत्यत्र "कर्षत्वत" इति ग०। (४) "शास्त्रे वादे" इति ल-ग-श्रा-भा०।

न्यायवार्त्तिकम्

एतस्मिन् तर्कविषये। "विमृश्य पक्षप्रतिपक्षाभ्यामर्थावधारणं निर्णय" इति सूत्रम्। सम्बन्धोऽर्थश्च पूर्ववदिति। विमृश्येति विमर्शं कृत्वा। पक्षाच्च प्रतिपक्षाच्च (१) पक्षप्रतिपक्षाभ्याम्, पक्षशब्देन पक्षविषयं साधनमुच्यते प्रतिपक्षशब्देन पक्षविषयस्य साधनस्योपालम्भः, ताभ्यां साधनोपालम्भाभ्यां यदर्थावधारणं स निर्णय इति।

क्व पुनरयं नियमः? किं तावन्निर्णये? आहोस्वित् पक्षप्रतिपक्षाभ्याम्? अथ विमृश्यैवेति? यदि विमृश्य पक्षप्रतिपक्षाभ्यामेव निर्णय इति निर्णये नियमः, इन्द्रियार्थसन्निकर्षोत्पन्नं ज्ञानमित्यस्य व्याघातः। एतेन विमृश्यैवेति प्रत्युक्तम्। अथ पक्षप्रतिपक्षाभ्यां निर्णय एव, उभयाश्रयो

न्यायवार्त्तिकतात्पर्यटीका

अर्थावधारणं निर्णय इति एतावन्मात्रं लक्षणम् इन्द्रियार्थसन्निकर्षोत्पन्नप्रत्यक्षे भवतीति योजना। हृदि व्यवस्थितमभ्युपगममुद्घाटयति—वादे शास्त्रे चेति। न हि ज्योतिष्टोमादीनां स्वर्गादिसंबन्धनिर्णये आगमेन कर्त्तव्ये विमर्शोऽस्ति, नापि वादजल्पवितण्डासु विमर्शः, निश्चितयोरेव वादिनोस्तत्र प्रवृत्तेरित्यर्थः।

वार्त्तिकम्—सम्बन्धोऽर्थश्च पूर्ववत्। सम्बन्ध उद्देशक्रमेण तर्कानन्तर्यलक्षणः, अर्थश्च प्रयोजनम्, समानासमानजातीयव्यावृत्तिरित्यर्थः। शेषं भाष्यव्याख्यानेन गतम्। ननु भवतु पक्षशब्दलक्षितस्य साधनस्य निर्णयं प्रति कारणत्वम्, प्रतिपक्षलक्षितस्य तु तद्दूषणस्य न साक्षात्साधकत्वमित्यत आह—पक्षाच्चेति, हेतुत्वं पारम्पर्येणेत्यर्थः। पक्षप्रतिपक्षाभ्यामिति, साधनदूषणाभ्यामित्यर्थः।

लक्षणमाचिक्षिप्सुर्विकल्पयति—क्व पुनरयमिति। अत्र पक्षप्रतिपक्षाभ्यामेवेति प्रथमः कल्पः, तदा हि यत एवकारकरणं ततोऽन्यत्रावधारणमिति निर्णये नियमो भवेत्। निर्णय एवेति द्वितीयः कल्पः, तदा हि पक्षप्रतिपक्षाभ्यामित्यत्र नियमः। विमृश्यैवेति तृतीयः, तदाऽपि निर्णये नियमः। तत्र प्रथमं कल्पमाक्षिपति—यदि विमृश्येति। एतस्मिन् किल कल्पे निर्णयः पक्षप्रतिपक्षविमर्शातिलङ्घनेनान्यत्र न प्रवर्त्तत इति प्रत्यक्षं प्रमाणं निर्णयफलं न स्यात्; न हि तत्र पक्षप्रतिपक्षौ नापि विमर्श इति प्रत्यक्षलक्षणं बाध्यते इत्यर्थः। तृतीयकल्पमाक्षिपति—एतेनेति, व्याघातेनेत्यर्थः। द्वितीयकल्पे दूषणमाह—अथ पक्षेति। तदा निर्णयस्यानियमात् पक्षप्रतिपक्षौ

वृत्तिः

पक्षप्रतिपक्षाभ्यां साधनोपालम्भाभ्याम्। उपालम्भः परपक्षदूषणम्। अर्थस्यावधारणं

(१) "पक्षाच्च प्रतिपक्षाच्च" इत्यंशः क-पु० नास्ति, ख-पुस्तके तु "पक्षान्यप्रतिपक्षाच्च" इत्येवं पाठः, तात्पर्ये पुनः—"पक्षाच्चेति" इत्येवं पाठधारणं दृश्यते, अतः सर्वथा सङ्गत्यनुरोधेनास्माभिरेवं पाठः परिगृहीतः।

न्यायवार्त्तिकम्

निर्णयः प्राप्नोति । (१) तर्कविषये नियमो नान्यत्र,—योऽयं तर्कस्य विषय एतस्मिन् तर्कविषये विमृश्य पक्षप्रतिपक्षाभ्यामेव निर्णयो भवति, न (२) पक्षप्रतिपक्षाभ्यामेव निर्णयो विमृश्यैवेति सामान्यनिर्णयलक्षणमेतत् । कुतोऽयं नियमस्तर्कविषय इति ? तर्कस्यानन्तरोद्देशात् तर्कविषय इति नियमः । अन्यथाऽपि निर्णयस्य भावान्न निर्णय इति । अथ निर्णयस्य किं लक्षणम् ? अर्थपरिच्छेदः अवधारणं निर्णय इति । सोऽयं निर्णयः प्रमाणविषये भवन्नेकशः प्रमाणैः क्रियते संहत्य च, तर्कविषये संहत्य, अन्यत्रैकश इति । वादे शास्त्रे च विमर्शवर्ज—वादे पक्षप्रतिपक्षाभ्यामेव, न शास्त्रे वादे [वादे शास्त्रे ?] वा विमर्शोऽस्ति उभयोर्निश्चितत्वात् शास्त्राभ्युपगतपदार्थस्य निश्चितत्वाच्च ।

पक्षप्रतिपक्षशब्देन साधनोपालम्भयोर्ग्रहणमित्ययुक्तं प्रमाणाभावात्—पक्षप्रतिपक्षशब्देन साधनोपालम्भावुच्येते इति किं प्रमाणम् ? कस्मात् पुनर्यथाश्रुतं(३) न भवति ? पक्षप्रतिपक्षयोः कर्मत्वात् ; न च कर्मार्थपरिच्छेदकं परिच्छेद्यत्वात् । तस्मात् पक्षप्रतिपक्षशब्देन परिच्छेदकयोः साधनोपालम्भयोर्ग्रहणम् , तयोरकर्मकत्वात् [र्मत्वात् ?] । तयोरेव कस्मान्न ग्रहणम् ? एवं च वक्तव्यम् (४) विमृश्य साधनोपालम्भाभ्यामर्थावधारणं निर्णय इति । एवं सति विस्पष्टोऽर्थो(५) भवति । न च लाघवकृतः कश्चिद्विशेष इति, न ; एकविषयज्ञापनार्थत्वात्—यद्विषयौ साधनोपालम्भौ तद्विषयो निर्णयः, अन्यथा हि साधनोपालम्भाभ्यां निर्णय इत्युक्ते न ज्ञायते क्व पुनर्निर्णय इति । पक्षप्रतिपक्षशब्दाभ्यां च साधनोपालम्भयोर्ग्रहणं तद्विषयस्य चेति । अर्थग्रहणं तर्हि न कर्तव्यम्, गम्य-

न्यायवार्त्तिकतात्पर्यटीका

तदभावश्चेति तदुभयम् , तदाश्रयः निर्णयः प्राप्नोति, तथा चाव्यापकं लक्षणमित्यर्थः । प्रथमं कल्पमालम्ब्य समाधत्ते—तर्कविषय इति । न निर्णयमात्रस्येदं लक्षणमपि तु निर्णयविशेषस्येत्यर्थः । निर्णय इति निर्णयमात्रमित्यर्थः । अथ निर्णयस्य किमिति, निर्णयसामान्यस्येत्यर्थः । एकशः प्रमाणैरिति, प्रत्यक्षादिभिः । संहत्य च प्रमाणैरिति, साधनदूषणसमाधानैरित्यर्थः । पक्षप्रतिपक्षाभ्यामेव वादे निर्णयो न तु विमर्शः, शास्त्रे तु निर्णय एव न तु शास्त्रातिरिक्तं साधनान्तरमाश्रीयत इत्यर्थः ।

वृत्तिः

तदभावाप्रकारकं तत्प्रकारकं (६) ज्ञानम् । यद्यप्येतावदेव निर्णयसामान्यलक्षणं

(१) इतःपूर्वं क-पुस्तके "तर्कविषय एव नियमो नान्यत्र योऽयं तर्कस्य विषय एतस्मिन्" इत्यधिकम् । (२) ख-पु० "न" नास्ति । (३) "-र्यथाश्रुति" ख । (४) "उक्तम्" इति क । (५) "स्वविशिष्टोऽर्थो" इति ख । (६) "तत्प्रकारकम्" इति नास्ति ल-आ-पु० ।

न्यायवार्त्तिकम्

मानत्वात्। केन? (१), विमृश्य पक्षप्रतिपक्षाभ्यामेवावधारणमित्युक्ते गम्यतेऽर्थस्येति, तस्मादर्थग्रहणं न कर्त्तव्यम्। (२) न न कर्त्तव्यम्, श्रुतिसामर्थ्यादन्यतरनिर्णयज्ञापनार्थं गम्यमानार्थग्रहणं यत् करोति तेन ज्ञापयत्यन्यतरस्मिन् पक्षे निर्णय इति। पक्षप्रतिपक्षाभ्यामर्थावधारणमित्ययुक्तम्; एकस्मादधिगतेः (३)। नेदं पक्षप्रतिपक्षाभ्यां सहिताभ्यामवधारणम्, किं तर्हि? एकस्माद् योऽवतिष्ठत इति। उभाभ्यामेवेत्याह। कथमिति? उभयनिवृत्तावनिवृत्तो हि विमर्शः उभयावस्थाने चानिवृत्त इति; यदा त्वेकोऽवतिष्ठत एको निवर्तत इति तदा निर्णय इति। अतः संहत्य पक्षप्रतिपक्षौ निर्णयहेतू इति। एतस्मिन् विषये कदा निर्णयो भवति? किं प्रथमे, उत द्वितीये, उत तृतीये इति। सर्वत्र भवति अर्थस्य तथाभावात्। अथवा तृतीय इति युक्तम्। कथमिति? एकस्तावत् साधनेन पक्षमवस्थापयति, द्वितीयः साधनं दृष्ट्वा निवर्त्तते, साधनाभासं वा बुद्ध्वा साधनदोषोद्भिावयिषया प्रवर्त्तते, तस्मिन् [तं ?]निवर्त्य साधनं ब्रूते। प्रथम इदानीं निश्चितं साधनमिति यदि मन्यते, न प्रवर्तते। अथ दूषणाभासमिति बुध्यते, तदुद्भावनार्थं प्रवर्त्तते। तन्निवृत्तौ द्वितीयपक्षसाधनमपि निवर्त्तते। किं कारणम्? प्रथमपक्षसाधनस्य निर्दोषत्वात्, निर्दोषे च प्रथमपक्षसाधने न द्वितीयस्यावकाश इति निवर्तते(४) द्वितीयः पक्ष इति, यत्रावतिष्ठते (५) तस्मिन्निर्णयः। सोऽयं निर्णयः सम्भवासम्भवाभ्यां पक्षप्रतिपक्षयोः संहत्य क्रियते।

निर्णयोऽनुमानमेवेति केचित्—केचिद्वर्णयन्ति निर्णयोऽनुमानमेव न पदार्थान्तरमिति,

न्यायवार्त्तिकतात्पर्यटीका

पक्षप्रतिपक्षशब्दाभ्यामिति, लक्षणायां हि येन लक्ष्यते तदवच्छेदकतया तदपि बुद्धौ सन्निधीयते, ततश्च तेन नियमो भवति लक्ष्यमाणस्य, यथा गङ्गायां घोष इति गङ्गासंबन्ध्येव तीरं घोषेणान्वीयते, न त्वकूपारतीरमपीति। चोदयति—अर्थेति। परिहरति—न नेति। अर्थग्रहणे क्रियमाणे काल्पनिकत्वं प्रतिषिध्यते, न चाकल्पितं विरुद्धधर्मवदित्येकतरनिर्णयः। नेदं पक्षप्रतिपक्षाभ्यामित्यादि चोद्यभाष्यं व्याचष्टे—पक्षप्रतिपक्षाभ्यामिति। उभाभ्यामिति परिहारभाष्यं व्याचष्टे—उभाभ्यामेवेत्याहेति। पृच्छति—एतस्मिन्निति। प्रथमं साधनं, द्वितीयं दूषणं, तृतीयं समाधानम्। उत्तरम्—सर्वत्र, कदाचित्प्रथमे कदाचिद् द्वितीये कदाचित्तृतीय इत्यर्थः। अवश्यं तु तृतीय इत्याह—अथ वेति। उभयत्र कल्पे प्रश्नः—कथमिति। उत्तरम्—एकस्तावदिति।

निर्णयोऽनुमानमेवेति केचित्। तथा हि तृतीयलिङ्गदर्शनं प्रत्यक्षफलं निर्णयः, तदेव

(१) अतः परं ख-पुस्तके 'गम्यमानत्वात्' इत्यधिकम्। (२) "न न कर्त्तव्यम्" इति ख-पु० नास्ति। (३) "कस्मात्? अधिगतेः" इति क। (४) ख-पु० "न" इत्यधिकम्। (५) "सोऽवावतिष्ठते" क।

न्यायवार्त्तिकम्

न; लिङ्गलिङ्गिसम्बन्धस्मृत्यपेक्षत्वा(१)दनुमानस्य, निर्णये च तदभावः प्रमाणफलत्वात्, प्रमाणमनुमानं प्रमाणफलं तु निर्णयः। निर्णयः स्वविषय एव, अनुमानं तु स्वविषयेऽन्यत्र च। यथा धूमदर्शनं धूमपरिच्छेदे नानुमानम् अपि तु निर्णय इति। यदा च परिच्छिनत्ति धूमेन तदाऽनुमीयतेऽनेनेत्यनुमानम् अग्निपरिच्छेदः फलम्। यदा च भावसाधनामाश्रित्योच्यतेऽनुमानं निर्णय इति तदाऽभ्यनुज्ञया वर्तितव्यम्। यदा तु करणसाधनमाश्रित्योच्यतेऽनुमानं निर्णय इति, तदा प्रतिषेधो वक्तव्यः कार्यकारणयोर्भेदात्—कारणमनुमानं कार्यं निर्णयः, तस्मान्नानुमानं निर्णय इति ॥ ४१ ॥

इति—औद्द्योतकरे न्यायवार्त्तिके प्रथमस्याध्यायस्याऽऽद्यमाह्निकम्।

न्यायवार्त्तिकतात्पर्यटीका

चानुमानमतो निर्णयो नानुमानादतिरिच्यत इत्यर्थः। परिहरति—न लिङ्गलिङ्गीति। यदि निर्णयमात्रमनुमानमुच्येत, तदा न तस्य सर्वस्य लिङ्गलिङ्गिसंबन्धस्मृत्यपेक्षत्वमिति। यदि तु लिङ्गपरामर्शो निर्णयस्तस्य चास्ति लिङ्गलिङ्गिसंबन्धापेक्षित्वमिति तत्राह—प्रमाणफलत्वात्। सामान्यव्याप्तो विशेषः सामान्यनिवृत्तौ(२) निवर्त्तते, शिंशपात्वमिव वृक्षत्वनिवृत्तौ। न च [तत्]फले प्रमितिरूपे निर्णये, प्रमाकरणत्वं (३) फले नास्तीति नानुमानत्वं तद्विशेष इत्यर्थः। इतश्चानुमानान्निर्णयो भिद्यत इत्याह—निर्णयः स्वविषय एवेति। न हि निर्णयो निर्णयत्वेन प्रतिपत्त्यनुबन्धिभूताद्विषयादन्यत्र, अनुमानं तु तत्र चान्यत्र च, यथाऽनुमेयोऽग्निरेव हेयत्वादिभिः (४) परिच्छिद्यते अग्निज्ञानेनानुमानेन, यदा तु धमज्ञानेनाग्निरनुमीयते तदाऽन्यत्रेति गमयितव्यम्। शेषमतिरोहितम् ॥ ४१ ॥

इति मिश्रश्रीवाचस्पतिविरचितायां न्यायवार्तिकतात्पर्यटीकायां
प्रथमस्याध्यायस्य प्रथमाह्निकम्।

वृत्तिः

तथापि विमृश्येत्यादिकं जल्पवितण्डास्थलीयनिर्णयमधिकृत्य। तदुक्तं भाष्ये 'शास्त्रे वादे च विमर्शवर्जम्' इति। एवं प्रत्यक्षतः शब्दाच्च निर्णये न विमर्श-पक्ष-प्रतिपक्षापेक्षेति ॥ ४१ ॥

न्यायोत्तराङ्गप्रकरणं समाप्तम् ॥ ० ॥

इति श्रीविश्वनाथभट्टाचार्यकृतायां न्यायसूत्रवृत्तौ प्रथमाध्यायस्य प्रथममाह्निकम् ॥

---

(१) "सम्बन्धापेक्षत्वा-" इति ख। (२) "सामान्यवृत्तौ" इति क-तात्पर्ये। (३) "प्रमाणकरणत्वं" इत्यादर्शपुस्तकपाठः, हस्तलिखितपाठस्तु गृहीतः। (४) "हेत्वादिभिः" इत्यादर्शे पाठः।

द्वितीयाह्निकम्

न्यायभाष्यम्

तिस्रः कथा भवन्ति—वादो जल्पो वितण्डा चेति। तासाम्—

(सू०) प्रमाणतर्कसाधनोपालम्भः सिद्धान्ताविरुद्धः पञ्चावयवोपपन्नः पक्षप्रतिपक्षपरिग्रहो वादः ॥ १ ॥

एकाधिकरणस्थौ विरुद्धौ धर्मौ पक्षप्रतिपक्षौ प्रत्यनीकभावात्, अस्त्यात्मा नास्त्या-

न्यायवार्त्तिकम्

तिस्रः कथा भवन्ति—वादो जल्पो वितण्डेति। नायं कथानियमः। किं तर्हि ? विचारवस्तुनियमः, यद्वस्तु विचार्यते तत् त्रेधा विचार्यते। तत्र विचारः—वादो जल्पो वितण्डेति। तत्र गुर्वादिभिः सह वादः। विजिगीषुणा सह जल्पवितण्डे। तत्र यथोद्देशं लक्षणापदेश इति वादस्य लक्षणमुच्यते। तत्र—प्रमाणतर्कसाधनोपालम्भो वाद इति सूत्रम्।

न्यायवार्त्तिकतात्पर्यटीका

नितान्तदक्षिणश्लक्ष्णधियो गृह्णन्त्वमत्सराः।
वाचस्पतिगिरामत्र तत्त्वानि विबुधा इव ॥

उद्देशक्रमप्राप्तं वादलक्षणसूत्रमवतारयितुं भाष्यम्—तिस्रः कथा भवन्तीति। तदयुक्तम्, बृहत्कथादीनां तिसृषु कथास्वनन्तर्भावात्। न च सामान्यलक्षणाभिधानमन्तरेण विशेषलक्षणावतारोऽस्ति, वादादयश्च कथाविशेषा इत्यत आह वार्त्तिककारः—तिस्रः कथा भवन्तीति। नायं कथामात्रनियमो येन बृहत्कथादीनामकथात्वं स्यात्, अपि तु यन्नानाप्रवक्तृके विचारे वसति तद्विचारवस्तु, विचार[वस्तु]विषया वाक्यसंदृब्धिः कथेति यावत्। तस्यां कथायामेष नियमः—तिस्र एवेति। तथा च नानाप्रवक्तृकविचारविषया वाक्यसंदृब्धिः कथेति सामान्यलक्षणं पक्षप्रतिपक्षपरिग्रह इति सूत्रावयवेन सूचितमित्येतदप्यर्थादुक्तं भवतीति द्रष्टव्यम्। यद्वस्तु विचार्यत इत्यर्थाभिधानमात्रं न तु विचारवस्त्वित्यस्य विवरणम्। वादादिष्वधिकारिणः पुरुषानाह—तत्र गुर्वादिभिरिति। वादलक्षणस्याऽऽनन्तर्ये हेतुमाह—तत्र यथोद्देशमिति। सूत्रमिति, सामान्यलक्षणमप्यनेन सूच्यत इत्युक्तं भवति। एकाधिकरणस्थावित्यादिभाष्यं प्रश्न-

वृत्तिः

प्रथमाह्निकेन सपरिकरे न्याये लक्षिते वादादिलक्षणाय द्वितीयाह्निकारम्भः।

न्यायभाष्यम्

त्मेति। नानाधिकरणस्थौ(१) विरुद्धौ न पक्षप्रतिपक्षौ, यथा—नित्य आत्मा अनित्या बुद्धिरिति। परिग्रहोऽभ्युपगमव्यवस्था। सोऽयं पक्षप्रतिपक्षपरिग्रहो वादः। तस्य विशेषणं प्रमाणतर्कसाधनोपालम्भः(२), प्रमाणैस्तर्केण च साधनमुपालम्भश्चास्मिन् क्रियत इति। साधनं स्थापना। उपालम्भः प्रतिषेधः। तौ साधनोपालम्भौ

न्यायवार्त्तिकम्

तत्र वादः—पक्षप्रतिपक्षपरिग्रहः। कौ पुनरेतौ पक्षप्रतिपक्षौ ? वस्तुधर्मावेकाधिकरणौ—विरुद्धावेककालावनवसितौ। वस्तुधर्माविति वस्तुविशेषौ—वस्तुनः सामान्येनाधिगतत्वात् विशेषतोऽनधिगतत्वाच्च विशेषावगमनिमित्तो विचारः;तस्माद्वस्तुधर्मौ विशेषौ ; एकाधिकरणौ(३), नानाधिकरणौ विचारं न प्रयोजयतः(४) उभयोः प्रमाणोपपत्तेः। तद् यथा—अनित्या बुद्धिर्नित्य आत्मेति। अविरुद्धावप्येवम्। यौ विरुद्धौ तौ विचारं प्रयोजयतो नाविरुद्धाविति, तद् यथा क्रियावद् द्रव्यं गुणवच्चेति। एककालाविति(५) भिन्नकालयोर्न विचारप्रयोजकत्वं प्रमाणोपपत्तेः, यथा क्रियावद् द्रव्यं निष्क्रियं चेति कालभेदे सति। अनवसिताविति—अनिश्चितौ विचारं प्रयोजयतो नावसिताविति, निर्णयोत्तरकालं विचाराभावात्। तावेतौ विरुद्धावेवंविशेषणौ धर्मौ पक्षप्रतिपक्षौ, तयोः परिग्रह इत्थम्भावनियमः, एवंधर्माऽयं धर्मी नैवंधर्मेति। सोऽयं पक्षप्रतिपक्षपरिग्रहो वादः। अस्य च कथामार्गत्रयेऽपि समानत्वात् विशेषणार्थं—प्रमाणतर्कसाधनोपालम्भ इति। प्रमाणैस्तर्केण च साधनमुपालम्भश्च 'अस्मिन् क्रियत इति'—अस्मिन् भवतीति।

न्यायवार्त्तिकतात्पर्यटीका

पूर्वकं व्याचष्टे—काविति। वस्तुधर्माविति विभजते—वस्तुधर्मावितीति। धर्मशब्दो विशेषे, तदनवसायाद्वस्तुनः सामान्यतोऽवसाय उक्तो भवति। तदिदमाह—वस्तुनः सामान्येनेति। अविरुद्धावप्येवं न विचारं प्रयोजयत इत्यर्थः। प्रमाणतर्कसाधनोपालम्भपदस्य तात्पर्यमाह—अस्येति। अनेन तस्य विशेषणमित्यादिभाष्यं व्याख्यातम्। यद्यपि वितण्डायामपि पक्षप्रतिपक्षपरिग्रहोऽस्ति, तथाऽपि प्रतिपक्षसाधनं नास्ति तस्याः साधनहीनत्वात्। यद्यपि च जल्पेऽपि पक्षप्रतिपक्षसाधनमस्ति, तथाऽपि न प्रमाणमूलैरवयवैस्तर्केण च साधनोपालम्भाविति जल्पवितण्डाभ्यां प्रमाणतर्कसाधनोपालम्भग्रहणेन व्यवच्छेदः, यथा चैतत् तथोपरिष्टा-

---

(१) "नानाधिकरणौ" इति आ-ग०। (२) "प्रमाणतर्कसाधनः प्रमाणतर्कोपालम्भः" इत्यधिकं भा०। (३) "वस्तुधर्मावविशेषावेकाधिकरणौ" इति ख। (४) "विचारमप्रयोजयतः" इति ख। (५) "एककालाविति" इत्यत्र "तत्र कालाविति" ख. अतःपरं "भिन्नकालयो"रित्यारभ्य "नावसिताविति" इत्यन्तः पाठः ख-पुस्तके नास्ति।

न्यायवार्त्तिकम्

अस्मिन्निति सप्तमीनिर्देशो विषयज्ञापनार्थः । 'अस्मिन्' विचारे ।

कथं पुनस्तर्केण साधनमुपालम्भश्च अप्रमाणत्वात्, प्रमाणानुग्राहकत्वात् न प्रमाणसंगृहीतस्तर्को न प्रमाणान्तरमित्युक्तम्(क)। सोऽयमप्रमाणात्मकः सन् कथं सिद्ध्युपालम्भयोः कारणं भविष्यति ? न ब्रूमस्तर्कः सिद्ध्युपालब्ध्योः कारणम् अपि तु (१)प्रमाणविषयविवेचनात् तर्कः प्रमाणान्यनुगृह्णातीति तर्कविविक्तं विषयं प्रमाणानि प्रवर्तमानानि परिच्छिन्दन्ति । सोऽयं प्रमाणानामनुग्राहकत्वात् प्रमाणसहितो वादेऽपदिष्ट इति । साधनमुपालम्भश्चास्मिन् भवतीति, किं तावत् सिद्धिः साधनमुपालम्भनमुपालम्भः, अथ साध्यतेऽनेनेति साधनम् उपालभ्यते अनेनेत्युपालम्भः ? यदि तावद्भावसाधनौ साधनोपालम्भशब्दौ, तदा प्रमाणैस्तर्केण च न युक्तौ, प्रमाणानां तर्कस्य च पराप्रतिपादकत्वात् प्रमाणान्यात्मप्रतिपत्तिसाधनानि, परप्रतिपादनार्थश्चायं विचारः, तस्मान्न प्रमाणैस्तर्केण च सिद्ध्युपालब्धी भवतः । अथ करणसाधनौ, तथाऽपि पञ्चावयवोपपन्न इति पृथग् न पठितव्यम् । किं कारणम् ? प्रमाणतर्कसाधनोपालम्भ इति करणसाधनेन पदेनावयवार्थस्योक्तत्वात् । न ; अन्यार्थत्वात् - पञ्चावयवोपपन्न इत्यस्यान्योऽर्थः, तथा च वक्ष्यामः । अथैतौ साधनोपालम्भशब्दौ भावसाधनौ किंविषयौ प्रमाणैस्तर्केण च क्रियेते ? ननूक्तं (२)पक्षप्रतिपक्षविषयाविति—पक्षविषयं साधनम्, प्रतिपक्षविषय उपालम्भः । सत्यमुक्तम्, न पुनर्युक्तमुक्तम् । का पुनर्युक्तिहानिरत्र ? उपालम्भस्य प्रतिपक्षाविषयत्वात्, प्रमाणतर्कसाधना सिद्धिः पक्षस्य भवतु, न पुनरुपालम्भस्य प्रतिपक्षो विषयः । न ब्रूमः प्रतिपक्षविषय उपालम्भ इति, किन्तु साधनविषयः, प्रतिपक्षस्य यत् साधनं तद्विषय उपालम्भ इति । कथं पुनः प्रतिपक्षसन्निधावुपदिश्यमान उपालम्भशब्दः प्रतिपक्षव्यतिरेकेण साधनेन सम्बध्यते, सामर्थ्याद

न्यायवार्त्तिकतात्पर्यटीका

दुपपादयिष्यते । आक्षिपति—कथं पुनस्तर्केणेति । समाधत्ते—न ब्रूम इति । तर्कस्येतिकर्त्तव्यतारूपस्य प्रमाणानुग्राहकतया प्रमाणमूला अवयवास्तर्कमूला अपि भवन्ति, तथा च तर्कस्यापि साधनोपालम्भहेतुभावः सिद्धो भवतीत्यर्थः । विकल्प्याऽऽक्षिपति—साधनमुपालम्भश्चास्मिन्निति । परं प्रति हि सिद्ध्युपालब्धी विवक्षिते, न च ते प्रमाणतर्काभ्याम्, तयोः स्वप्रतिपत्तिहेतुत्वात् । अवयवार्थस्य अवयवशब्दार्थस्येत्यर्थः । उभयथाऽभिमतत्वेऽपि करणसाधनपक्षं कुक्षीकृत्य तावत् समाधत्ते—न अन्यार्थत्वादिति, अन्यप्रयोजनत्वादित्यर्थः । यदा तु भावसाधनौ तदा पृच्छति—अथैताविति । विप्रतिपन्नस्य प्रश्नः :—न प्रतिपक्षविषय उपालम्भो नापि तत्साधनविषयः, तयो-

---

(१) "प्रमाविषय-" इति ख । (२) "पञ्चविषयाविति" इति ख ।

(क) "तर्को न प्रमाणसंगृहीतः" इति भाष्यम् (पृ० ५३ पं० ३) ।

न्यायवार्त्तिकम्

असामर्थ्याच्च, यदुपालम्भयोग्यं तदुपालभ्यते, न च प्रतिपक्ष उपालम्भयोग्यः। कथमिति ? उपालभ्यमानस्य चानुपालभ्यमानस्य च वस्तुनस्तथाभावात्; तथाभूतमेव वस्तूपालभ्यमानं तथाभूतमेवानुपालभ्यमानम्। साधनेऽपि तर्हि तुल्यम्, साधनमपि करणं तदपि स्वरूपं न कदाचिज्जहाति, तस्मात् साधनस्याप्युपालम्भो न युक्त इति। (१)एवमेतत् नोपालम्भः करणे, न कर्मणि, कर्मणः स्वविषये सामर्थ्यात्—सर्वं कर्म स्वविषये समर्थम्, करणमप्येवं तस्य तु विषयान्तरे न सामर्थ्यमस्ति। यच्च विषयान्तरेऽसमर्थं न तेन कर्मणः करणस्य वा वैगुण्यम्। कस्य तर्ह्ययमुपालम्भः ? यो निगृह्यते। कश्च निगृह्यते ? पुरुषः। अप्रतिपत्तिविप्रतिपत्ती पुरुषस्य, न कर्मणो न करणस्य। सोऽयं प्रतिपादयिताऽसमर्थयोः कर्मकरणयोरुपादानान्निगृह्यते, प्रतिपत्ताऽपि यथाभिहितपदार्थाप्रतिपत्त्या। सोऽयं पुरुषधर्मो वचनद्वारेणोद्भाव्यत इति वचन उपचर्य पुरुषधर्मं वचनमुपालभ्यत इति। कथं पुनरयमर्थः सूत्रपदेन लभ्यते ? लभ्यत इत्याह। कथम् ? प्रमाणतर्कसाधनः प्रमाणैस्तर्केण च साधनस्योपालम्भः (क)प्रमाणतर्कसाधनश्च प्रमाणतर्कसाधनोपालम्भश्च प्रमाणतर्कसाधनोपालम्भः, एकस्य साधनशब्दस्य गम्यमानार्थत्वाल्लोपः, यथोष्ट्रमुखीति।

न्यायवार्त्तिकतात्पर्यटीका

वस्तुनोः स्वकारणादुत्पन्नयोः सदा तद्रूपत्वेन पुरुषधर्मोपालम्भानास्पदत्वादित्याक्षेपार्थः। समाधत्ते—एवमेतदिति। धर्मी धर्मविशिष्टः पक्षः प्रतिपक्षो वा कर्म, तस्य विषयः—तस्य धर्मिणो वास्तवं तादृशत्वमतादृशत्वं वा, करणस्य तु कर्मैव विषयः। तत्र कर्मकरणे समर्थे एव, नासमर्थे। अन्यविषये तु पुरुषस्ते नियुञ्जानोऽसमर्थीकरोति। सोऽयं पुरुषस्यापराधो न कर्मकरणयोः। यथाकाशे निशातमसिं व्यापारयतः पुरुषस्यापराधो नाऽऽकाशस्य शब्दे समर्थस्य, असेर्वा निशातस्य दारुणि समर्थस्य। तस्मादौपचारिकः साधनस्योपालम्भो न मुख्यः, मुख्यस्तु पुरुषस्यैव, वचनद्वारेण तूद्भाव्यते पुरुषस्येति। वचन उपचर्यते न तु पक्षे पक्षद्वारेणानुद्भावनादिति सिद्धम्। यथाऽयमर्थः सूत्रपदेभ्यो लभ्यते तथा प्रश्नपूर्वकं दर्शयति—कथं पुनरिति।

यदुक्तं प्रमाणतर्कसाधनोपालम्भग्रहणं वादस्य जल्पवितण्डाभ्यां विशेषणार्थमिति, तत्र

---

(१) "एवमनुपालम्भः करणे" ख।

(क) इदमिहावधेयम्—प्रमाणतर्कसाधनश्च प्रमाणतर्कसाधनोपालम्भश्चेति अर्थकथनमात्रम्, विग्रहवाक्यं तु साधनं च उपालम्भश्चेति साधनोपालम्भौ, अतोपालम्भपदं साधनोपालम्भपरम्, अत एवोक्तम्—गम्यमानार्थत्वात् लोप इति। ततः प्रमाणतर्कैः साधनोपालम्भौ यत्रेति बहुव्रीहिणा द्वन्द्वात् परं पूर्वं वा यः श्रूयते स प्रत्येकमभिसम्बध्यते इति न्यायादुक्तार्थलाभ इति।

न्यायभाष्यम्

उभयोरपि पक्षयोर्व्यतिषक्तावनुबद्धौ (१)च यावदेको निवृत्त एकतरो व्यवस्थित इति निवृत्तस्योपालम्भो व्यवस्थितस्य साधनमिति ।

जल्पे निग्रहस्थानविनियोगाद् वादे तत्प्रतिषेधः। प्रतिषेधे कस्यचिदभ्यनुज्ञानार्थं

न्यायवार्त्तिकम्

अथ प्रमाणतर्कसाधनोपालम्भ इत्यनेन पदेन जल्पवितण्डाभ्यां कथं वादो विशिष्यते ? नन्विदं पक्षप्रतिपक्षपरिग्रहवत् त्रयाणामपि समानं भवति । न समानम् (२)—वादे प्रमाणतर्कसाधनोपालम्भस्य नियतत्वात् प्रमाणतर्कसाधनोपालम्भ एव वादः, छलादिसाधनोपालम्भे (३)जल्पवितण्डे । यथा विषाणित्वं गवि गवये च समानमपि (४)संवृत्तकण्ठतया सास्नादिमत्तया च विशिष्यमाणमुभौ गो-गवयौ विशिनष्टि तथा प्रमाणतर्कसाधनोपालम्भ इति ।

छलजातिनिग्रहस्थानसाधनोपालम्भो जल्प इत्यभिधानाद्वादे निग्रहस्थानप्रतिषेधो विशेषविधानात् । ततश्चानुपालम्भो वाद इति ? प्रमाणतर्कसाधनोपालम्भ इत्यभिधानाद् वादेऽपि निग्रहस्थानानीत्यदोषः । उपालम्भग्रहणात् समस्तनिग्रहस्थानप्रसक्तौ संज्ञाभेदमात्रम्—यद्युपालम्भग्रहणाद् वादे निग्रहस्थानानि विद्यन्ते इति मन्यसे ननु संज्ञाभेदमात्रं जल्पाद्वादस्य न विशेषः,

न्यायवार्त्तिकतात्पर्यटीका

प्रकारं पृच्छति—अथेति । प्रष्टैवाऽऽह नन्विदमपीति । उत्तरम्—न समानमिति । नियममाह—प्रमाणतर्कसाधनोपालम्भ एव वादः । एवकारेण च्छलादिसाधनोपालम्भत्वं वादस्य व्यवच्छिद्यते, तथा च जल्पवितण्डाभ्यां व्यवच्छेदः । एतदुक्तं भवति—तर्कानुगृहीतप्रमाणमूला अवयवाः परमार्थतो भवन्तु मा भूवन् वादिप्रतिवादिनोस्त्वभिप्रायो भवति प्रमाणमूला अवयवा इति । एतावतैव प्रमाणतर्कसाधनोपालम्भता वादस्य, वीतरागकथात्वेन तत्त्वनिर्णयावसानत्वात् । जल्पवितण्डयोस्त्वप्रमाणमूलत्वं विदुषाऽपि प्रतिवादिना छलादिभिः प्रत्यवस्थेयमेकान्तपराजयाद् वरं संशयोऽस्त्विवतीच्छता जिगीषुणा । यथा चास्य शास्त्रे व्युत्पादनं नासदर्शं यथा चैवमाचारस्तथा जल्पलक्षणे वक्ष्यामः ।

जल्पे निग्रहस्थानविनियोगादिति भाष्यम् । तदनुपपन्नम्, उपालम्भग्रहणादेव वादेऽपि निग्रहस्थानस्य लब्धत्वादित्यत आह वार्तिककारः—छलजातीति । असत्युपालम्भग्रहण इत्यर्थः । चोदयति—समस्तेति । यद्युपालम्भग्रहणस्य निग्रहस्थानविधानं प्रयोजनम्, हन्त भो न

(१) "च" नास्ति ग । (२) अतः परम् "वादे प्रमाणम्" इत्यधिकम्, ख । (३) "जल्पवितण्डे वं" इति ख । (४) "संहत-" इति क ।

न्यायभाष्यम्

सिद्धान्ताविरुद्ध इति वचनम्। 'सिद्धान्तमभ्युपेत्य तद्विरोधी विरुद्ध' (अ० १ आ० २ सू० 6) इति हेत्वाभासस्य निग्रहस्थानस्याभ्यनुज्ञा वादे। पञ्चावयवोपपन्न इति

न्यायवार्त्तिकम्

तत्रापि निग्रहस्थानानीहापीति? न, उत्तरयोर्नियमार्थत्वात्—यस्मादेवोपालम्भशब्देन समस्तानि निग्रहस्थानानि लभ्यन्ते (१) अत एव नियमार्थे उत्तरे पदे आरभ्येते सिद्धान्ताविरुद्धः पञ्चावयवोपपन्नश्चेति। सिद्धान्ताविरुद्ध इत्यनेन किल पदेन विरुद्धो हेत्वाभासो लभ्यते, तन्न, अन्यतोऽधिगतेः—(२)अन्यत एवायं लभ्यते। पञ्चावयवोपपन्न इति पञ्चग्रहणात् न्यूनाधिके लभ्येते, अवयवग्रहणात् तदाभासा लभ्यन्त इति लभ्यमानस्यार्थस्य पुनरभिधाने पिष्टं पिष्टं स्यात् तस्मान्नायमर्थः। अथ किमिदं पदं सिद्धान्ताविरुद्ध इत्यनर्थकमेव? नानर्थकम् अपसिद्धान्तावरोधात्,—

"सिद्धान्तमभ्युपेत्यानियमात् कथाप्रसङ्गोऽपसिद्धान्तः"

इति, सोऽनेनावरुध्यते, तस्मान्नानर्थकम्। कस्मात् पुनरयं नियमो वादे अवयवाभासोऽपसिद्धान्तश्च निग्रहस्थानमिति; गुर्वादिभिः सह वादोपदेशान्नियमः—यस्मादयं तत्त्वबुभुत्सुर्गुर्वादिभिः सह त्रिविधं फलमाकाङ्क्षन् वादं करोति ततोऽस्य (३)तत्त्वबुभुत्सावतस्तावत्साधनं

न्यायवार्त्तिकतात्पर्यटीका

जल्पाद् वादस्य विशेषः, कृतं चोत्तराभ्यां पदाभ्यामित्यर्थः। परिहरति—नोत्तरयोरिति। नियमः परिसंख्या, तदनेन कस्यचिदनुज्ञानार्थमिति भाष्यं व्याख्यातम्। सिद्धान्ताविरुद्ध इत्यत्र भाष्यव्याख्यामुपन्यस्य दूषयति—सिद्धान्ताविरुद्ध इत्यनेन किलेति। भाष्यमते दूषिते पृष्ट्वा स्वमतेन व्याचष्टे—अथ किमिदं पदमिति। पृच्छति—कस्मात् पुनरिति। उत्तरम्—गुर्वादिभिरिति। न खल्वप्रतिभाद्युद्भावनं तत्त्वप्रतिपत्तावुपयुज्यते, अधिकं तु न यद्यपि तत्त्वप्रतिपत्तिं साक्षाद् व्याहन्ति तथाऽपि तत्प्रयोजनानुसरणे परः प्रतिपत्ता समाकुलितबुद्धिर्न तत्त्वं प्रतिपत्तुमर्हतीत्यधिकस्यापि तत्त्वप्रतिपत्तिविघातहेतुत्वमिति। तत्त्वबुभुत्सुरिति जिगीषुतां निराकरोति, न हि गुर्वादिभिर्जिगीषासम्भवः। त्रिविधं फलमिति।

वृत्तिः

छलपरीक्षा च प्रसङ्गाद्भविष्यति। तथा च छलपरीक्षासहितवादादिलक्षणं द्वितीयाह्निकार्थः। तत्र चत्वारि प्रकरणानि। आदौ कथाप्रकरणम्, ततो हेत्वाभासप्रकरणम्,

(१) "अत एवानियमार्थे" ख। (२) "अन्य एवायं" इति ख। (३) 'ततोऽस्य बुभुत्सावता' इति ख।

न्यायभाष्यम्

'हीनमन्यतमेनाप्यवयवेन न्यूनम्' 'हेतूदाहरणाधिकमधिकम्' (अ० ५ आ० २ सू० १२।१३) इति चैतयोरभ्यनुज्ञानार्थमिति। (क)अवयवेषु प्रमाणतर्कान्तर्भावे पृथक् प्रमाणतर्कग्रहणं साधनोपालम्भव्यतिषङ्गज्ञापनार्थम्। अन्यथोभावपि पक्षौ (१)स्थापना-

न्यायवार्त्तिकम्

वक्तव्यं यावदनेन ज्ञातव्यमप्रतिद्वन्द्वित्वात्। प्रतिद्वन्द्विना सह न वादः, किन्तु जल्पः; तत्र समस्तनिग्रहस्थानप्रयोग इति युक्तम्। प्रमाणतर्कसाधनोपालम्भ इत्यभिधानात् उभयोः सिद्ध्यसिद्धिप्रसङ्गः—यदि प्रमाणतर्कसाधनोपालम्भो वाद उभयोर्वादिप्रतिवादिनोः प्रमाणतर्क-साधनोपालम्भाभिधानेऽधिकार (२) इत्युभयपक्षसिद्ध्यसिद्धिप्रसङ्गः। नैष दोषः, अप्रतिज्ञानात्—नेदं प्रतिज्ञायते उभयोर्वादिनोः प्रमाणानि सन्तीति, अपि तूभाभ्यां साधनं वक्तव्यमेतन्नियम्यते न पुनः साधनमेवैतद् भवतीति, दूषणमप्येवम्।

न्यायवार्त्तिकतात्पर्यटीका

अनधिगततत्त्वावबोधः संशयनिवृत्तिरध्यवसिताभ्यनुज्ञानमिति फलानि त्रीणि। प्रतिद्वन्द्विनि तु न वादः, अपि तु जल्पवितण्डे। चोदयति—प्रमाणतर्केति। पारमार्थिकात् तर्कसहितात् प्रमाणा-देकस्मिन् विषये साधनोपालम्भयोः सम्भवे विरुद्धधर्मालिङ्गितमेकदा वस्तु प्रसज्यत इत्यर्थः। परिहरति—नैष दोष इति। वादेऽभिप्रायो नियम्यते वादिप्रतिवादिनोः, प्रामाणिकधिया साधनोपालम्भौ ताभ्यां प्रयोक्तव्यौ, नाप्रामाणिकधिया जल्पवितण्डयोरिव; न पुनर्वस्तु नियम्यत इति। तथा च वादे बुद्धिपूर्वं छलादिप्रयोगे तदुद्भावनमपि सम्भवति, तावदेव चोद्भाव्यं यावत्यनुद्भाविते तत्त्वप्रतिपत्तिव्याघातः, यस्मिंस्त्वनुद्भावितेऽपि न तत्त्वप्रतिपत्तेर्व्याघातः, तत्र प्रयुक्तमपि नोद्भावनीयम्। एतच्च पञ्चमेऽध्याये निपुणतरमुप-पादयिष्यते। साधनोक्तं प्रकारं दूषणेऽप्यतिदिशति—दूषणमप्येवम्। पूर्वस्मिन् प्रयोजने स्थिते भाष्यकारः प्रयोजनान्तरमन्वाचिनोति—अवयवेष्विति। न हि पञ्चावयवोपपन्नं प्रमाणं तदनु-ग्राहकं च तर्कमन्तरेण भवतीति पञ्चावयवोपपन्नत्वादेव प्रमाणतर्कप्रतिलम्भे साधनोपालम्भयो-र्व्यतिषङ्गज्ञापनायावश्यं साधनोपालम्भग्रहणं तावत् कर्तव्यम्, अन्यथैकः सुस्थानस्थित एव शब्दस्यानित्यत्वं प्रति पञ्चावयवोपपन्नं वाक्यं प्रयुङ्क्ते, अपरोऽपि तादृशः शब्दनित्यतां प्रति तादृशमेव वाक्यं प्रयुङ्क्त इति सोऽपि वादः प्रसज्येत। साधनोपालम्भविशेषणाय च प्रमाण-

(१) "स्थापनहेतुना प्रवृत्तौ" इति ग-फ। (२) "नाधिकार" इति ख।

(क) "अवयवसमुदाये च वाक्ये सम्भूयेतरेतराभिसम्बन्धात् प्रमाणान्यर्थं साधयन्तीति" भाष्यम् (पृ० ३१६ पं० ३)।

न्यायभाष्यम्

प्रवृत्तौ वाद इति स्यात्। अन्तरेणापि चावयवसम्बन्धं प्रमाणान्यर्थं साधयन्तीति दृष्टम्, तेनापि कल्पेन साधनोपालम्भौ वादे भवत इति ज्ञापयति। 'छलजातिनिग्रहस्थान-साधनोपालम्भो जल्प इति वचनाद्विनिग्रहो जल्प इति मा विज्ञायि, छलजातिनिग्रह-स्थानसाधनोपालम्भ एव जल्पः प्रमाणतर्कसाधनोपालम्भो वाद एवेति मा विज्ञायी-त्येवमर्थं पृथक् प्रमाणतर्कग्रहणमिति ॥ १ ॥

न्यायवार्त्तिकम्

अपरे तु स्वपरपक्षयोः सिद्ध्यसिद्ध्यर्थं वचनं वाद इति वादलक्षणं वर्णयन्ति। अत्र च पक्ष-विशेषणार्थमुपात्तयोः (१)स्वपरशब्दयोरनुपपत्तिर्विकल्पानुपपत्तेः समासासम्भवाच्च। एतौ खलु स्वपरशब्दौ परिग्रहवर्जनार्थौ वा स्याताम्? साधनीयदूषणीयार्थौ वा? पूर्वोत्तरपक्षार्थ-व्यवस्थापकौ वा? पक्षप्रतिपक्षावद्योतकौ वा? प्रथमद्वितीयपक्षाभिधायकौ वा? एकस्य

न्यायवार्त्तिकतात्पर्यटीका

तर्कग्रहणं कर्तव्यमिति भावः। प्रयोजनान्तरमन्वाचिनोति—अन्तरेणापि चेति। वादः पञ्चा-वयवोपपन्न इत्येकः कल्पः, (२)प्रमाणतर्कसाधनोपालम्भ इति द्वितीय इत्यर्थः। प्रयोजना-न्तरमन्वाचिनोति—छलजातीति। विनिग्रहो जल्पो मा विज्ञायि, वादगतनिग्रहस्थानरहितो मा विज्ञायीत्यर्थः। तद्विज्ञाने कीदृशोऽर्थो भवतीत्यत आह—छलजातिनिग्रहस्थानेति। वादगतो निग्रहो न जल्पे जल्पगतश्च निग्रहो न वाद इति मा विज्ञायि, इष्यते हि वादगतो निग्रहो जल्पे, सोऽयमिष्टोऽर्थो ग्रन्थाधिक्यात् प्रमाणतर्कग्रहणाल्लभ्यत इत्यर्थः।

तदेवं स्वाभिमतं वादलक्षणं व्याख्याय (३)वासुबन्धवं लक्षणं दूषयितुमुपन्यस्यति—अपरे त्विति। स्वपक्षस्य सिद्धिः परपक्षस्य चासिद्धिः तदर्थं वचनं वाद इत्यर्थः। दूषयति—अत्र चेति। प्रथमं हेतुं विभजते—एताविति। पूर्वः पक्षोऽयुक्तः, पक्ष उत्तरस्तु युक्त इत्यर्थः। एकस्य वा शब्दस्य

वृत्तिः

छलप्रकरणम्, दोषलक्षणप्रकरणं चेति। अत्र च कथासामान्यस्यायं विशेषो वादादिः। तथा च त्रिभिः सूत्रैरेकं प्रकरणम्, अन्यथैकसूत्रस्य प्रकरणत्वाभावादसङ्गतिः स्यादित्याशये-नोक्तं भाष्यकृता 'तिस्रः खलु कथा भवन्ति वादो जल्पो वितण्डा च' इति।

---

(१) "स्वपरपक्षयो-" इति ख। (२) "प्रमाणतर्कोपसाधनोपलम्भ" इति क। (३) 'सौबन्धवं' क।

न्यायवार्त्तिकम्

वाऽनेकविशेषणाभिसम्बन्धिनोऽनेकशब्दाभिधानमिति ? तत्र परिग्रहपरिवर्जनार्थता तावदनुपपन्ना, किमोऽर्थासम्भवात् । न परिग्रहार्थतायां किमोऽर्थः सम्भवति, 'कस्यायं स्वो भविष्यति कश्च स्वार्थ' इति स्वीकरणं परिग्रहार्थः, यस्य स्वीकारो भवति तस्य स्व इति । तदेव चिन्त्यते किं तत् स्वीकरणमिति । ममेति प्रत्ययोत्पत्तिकारणभावाभावौ स्वपरशब्दार्थः । निर्दिष्टः स्वार्थो(१) न पुनरस्य स्वार्थः(१*), न हि शास्त्रकारस्य स्वः परो वा सम्भवति यदर्थमिदं स्यादिति । यच्च यस्य स्वं भवति(२) तत्तस्य सिद्धार्थं कञ्चिदुपकारं करोति(२*), न पुनः स्वामिनः पक्षेण कश्चिदुपकारः क्रियते ; तस्मात् परिग्रहवर्जनार्थौ तावत् स्वपरशब्दौ न भवतः । साधनीयदूषणीयार्थौ स्वपरशब्दाविति चेत् ; अथापीदं स्यात् साधनीयः स्वपक्षो दूषणीयः परपक्ष इति । अहो शब्दार्थकौशलम्, साधनीयः साध्यः स्यात्, साधनीयः स्वपक्ष इति कुत एतत् ? लक्षणं चैतत् पक्षस्य साधयितुमिष्टः पक्ष इति साधनीयशब्देनापि तदेवोच्यते, व्यवच्छेदार्थं चेदमुच्यते स्वपक्षः परपक्ष इति । परपक्षाच्चायं स्वशब्देन (३)व्यवच्छेद्यमानो न समानार्थं शक्नोति वक्तुम्, व्यर्थं वा वशेषणम् । सामान्यशब्दा अपि विशेषे वर्तन्त

न्यायवार्त्तिकतात्पर्यटीका

धर्मिणोऽनेकनित्यानित्यविशेषणाभिसम्बन्धिनः पुरुषाभिसन्धिभेदाद् अनेकशब्दाभिधानम्, स्वपरशब्दाभिधानमित्यर्थः । तदेव चिन्त्यते किं तत्स्वीकरणमिति न तावद्गोमिधनादिष्विव स्वोचितार्थक्रियासु यथेष्टविनियोगयोग्यत्वं स्वत्वमर्जनापादितमनित्यत्वादिना प्रतिज्ञाते शब्दादौ सम्भवतीत्यर्थः । चोदयति—ममेति, (ममेति)प्रत्ययोत्पत्तिकारणत्वं स्वत्वमकारणत्वमस्वत्वमिति । दूषयति—निर्दिष्ट इति । यथेष्टविनियोगयोग्यमेव ममेति प्रत्ययकारणं नान्यत् । न चैतन्नित्यत्वादिना प्रतिज्ञाते शब्देऽस्ति शास्त्रकारस्येत्यर्थः । अपि चोपकारकत्वेन व्याप्तं स्वत्वं गोघटादिषु तथा दर्शनात्, पक्षान्निवर्तमानमुपकारकत्वं स्वत्वमपि स्वव्याप्यं निवर्तयति वृक्षत्वमिव शिंशपात्वमित्याह—यच्च यस्येति । द्वितीयं कल्पमाशङ्कते—साधनीयेति । निराकरोति—अहो शब्दार्थेति । विशेष्यपदादनतिरिक्तार्थं विशेषणपदमित्यर्थः । अपि चेदं विशेषणपदं सामान्यतः प्रसृतं विशेषेऽवस्थापयति न वा ? अवस्थापयति चेत् न साधनीयमात्रार्थता स्वशब्दस्य, न चेत् विशेषणं व्यर्थमित्याह—व्यवच्छेदार्थमिति । ननु च विशेष्यशब्दो विशेषणयोगाद्विशेषे वर्तमानोऽपि सामान्यशब्द एव, ततश्च शक्नोति समानमर्थं वक्तुमिति देशयति—सामान्यशब्दा

वृत्तिः

तत्र तत्त्वनिर्णयविजयान्यतरस्वरूपयोग्यन्यायानुगतवचनसन्दर्भः कथा । लौकिक-

(१) "नरस्य स्वम्" ख । (२) "तत्तस्यासिद्धार्थं किञ्चिदुपकरोति" इति ख । (३) "व्यवच्छेद्यमानेन समानमर्थं" इति ख ।

न्यायवार्त्तिकम्

इति इष्टमेतत्(१)। न ते सामान्यशब्दा ये विशेषेषु वर्तन्त इति। किन्तु प्रकरणादिभेदानुविधायिनो विशेषशब्दा एव। अपि च साधनीयः पक्षः स्वपक्षः, दूषणीयः पक्षः परपक्षः। तदेतदपि न बुध्यामहे साधनीयशब्दस्य पक्षविषयत्वात् साधनीयः पक्षः स्वो भवतु, दूषणं तु न कदाचित् परपक्षेण सम्बध्यते, परपक्षस्य तादवस्थ्यात्। अथ दूषणस्य को विषयः? कस्यचित् स्थापना विषय इति किञ्चिद् दूषणं स्वपरपक्षाभ्यामसम्बद्धमेव। कतमद् दूषणं स्थापनया सम्बध्यते? का चेयं स्थापनेति? स्थापना नाम पञ्चावयवं पक्षसाधकं वाक्यम्, वाक्यदोषो दूषणम्, तद्वाक्यं न्यूनमधिकं च भवति अवयवाभासोपपन्नञ्च, तदुद्भावनं दूषणम् एतत् स्थापनया सम्बध्यते, तद्विषयत्वात्। शेषं तु दूषणं न स्थापनया न स्वपरपक्षाभ्यां सम्बद्धम् उत्तरदोष आक्षेपभावाश्चेति। सत्यं न साक्षात् पक्षस्य दूषणेनाभिसम्बन्धः स्थापनानिवृत्तिद्वारेण तु प्रवर्तमानं दूषणं न पक्षं निवर्तयति स्थापनानिवृत्तेः परपक्षं दूषयतीत्युच्यते? उपचरितशब्दप्रयोगो लक्षणेऽनुपपन्नः, लक्षणस्य तत्त्वविषयत्वात्, तत्त्वव्यवच्छेदकं लक्षणम्, न पुनरुपचरितशब्दप्रयोगेण व्यवस्थाऽस्ति। यदि च पारम्पर्येण प्रवृत्त्या प्रवर्तमानं दूषणं परपक्षं निवर्तयति (२)तदेवं युक्तं कर्त्तुं परपक्षसिद्ध्यर्थं वचनं वाद इति। एवमभिधीयमाने किं भविष्यतीति? लघु च सूत्रं भवतीत्युभयोश्च साधनदूषणयोः पारम्पर्येण परपक्षासिद्ध्यर्थतेति। अथ मा भूदुभयत्र

न्यायवार्त्तिकतात्पर्यटीका

अपीति। परिहरति—न ते सामान्यशब्दा इति। अपि च साधनीयः पक्ष इति, विरुद्धोपदर्शनेन स्फुटा प्रतीतिर्भवतीति अयुक्तप्रतिपादनार्थं युक्तस्याप्युपन्यास इति। यदि न पक्षेण दूषणं संबध्यते कस्तर्हि तस्य विषय इति शङ्कते—अथ दूषणस्येति। उत्तरम्—कस्यचिदिति। उत्तरदोषः जात्युद्भावनम्। आक्षिप्यन्त इत्याक्षेपाः। के ते भावाः? अप्रतिभाविक्षेपादयः। नैते स्वपरपक्षाभ्यां संबध्यन्ते नापि स्थापनयेति। चोदयति—सत्यमिति। परिहरति—उपचरितेति। "नर्ते प्रयोजनादिष्टं मुख्यशब्दार्थलङ्घनम्" इति गाथा भवतामित्यर्थः। अपि चोपचारश्चेल्लक्षणे वरमेवं क्रियतां लक्षणं लाघवायेत्याह—यदि चेति। शङ्कते—अथेति। निराकरोति—

वृत्तिः

विवादवारणाय न्यायेत्यादि। यत्रैकेन न्यायः प्रयुक्तोऽपरेण तु मतपरिग्रहोऽपि न कृतस्तद्वारणायाऽऽद्यं विशेषणमिति।

कथाऽधिकारिणस्तु तत्त्वनिर्णयविजयान्यतराभिलाषिणः सर्वजनसिद्धानुभवानपलापिनः श्रवणादिपटवोऽकलहकारिणः कथौपयिकव्यापारसमर्था इति।

तत्र वादं लक्षयति सूत्रकारः—(प्रमाणतर्केति)।

---

(१) 'इताइष्टमेतत्' इति ख। (२) 'तदेवं वक्तुं कर्त्तु' इति ख।

न्यायवार्त्तिकम्

पारम्पर्यमिति स्वरूपत एवं वक्तव्यम्—पक्षस्थापनयोः सिद्धासिद्धार्थं वचनं वाद इति। एवं हि विस्पष्टता लक्षणस्य यथाविषयं चाभिसम्बन्ध इति। (१) स्थापनयाऽपि न सर्वं दूषणं सम्बध्यत इति दोषतादवस्थ्यम्; (२) न दोषतादवस्थ्यं कस्यचित् सम्भवात्—किञ्चिद् दूषणं स्थापनया सम्बध्यत इति सामान्याभिधानेऽपि सामर्थ्यान्नियमः। तस्मादिदमनुपपन्नं साधनीयदूषणीयार्थौ स्वपरशब्दाविति। स्वपरशब्दौ पूर्वोत्तरपक्षार्थौ भविष्यत इति—यदुक्तं भवति पूर्वोत्तरपक्षाविति (३) तदुक्तं भवति स्वपरपक्षाविति। न युक्तमेतदपीति, साधनदूषणयोर्नियमाभ्युपगमात्—"ते साधनदूषणै"रित्येतस्मिन् सूत्रे साधनदूषणयोर्नियमाभिधानं स्वपक्षसाधनं परपक्षे दूषणमिति। एतस्मिंश्च नियमे (४) उत्तरपक्षविषयं दूषणं प्राप्नोति तेनोत्तरपक्षवादी स्वमेव पक्षं दूषयतीति प्राप्तम्। स्वपक्षश्चोत्तर(क)पक्षवादिनः पूर्वपक्षादन्य इति स्वपरशब्दाभ्यां पूर्वोत्तरपक्षयोरभिधानमिति न पदार्थो न परिभाषा न च रूढिः (५)। एतेन पक्षप्रतिपक्षार्थता प्रथमद्वितीयपक्षार्थता च व्याख्याता। एक एवायं पक्ष इति विशेषणद्वययोगात् साध्यतया दूष्यतया च विशेष्यमाणः स्वपरशब्दवाच्य इति? युक्तमेतत्, द्विवचनं तु न युक्तम्—एकस्यानेकविशेषण-

न्यायवार्त्तिकतात्पर्यटीका

(६) स्वरूपत इति, मुख्यत इत्यर्थः। चोदयति—स्थापनयाऽपीति। परिहरति—न दोषेति। ननु न दूषणमात्रं संबध्यते असिद्धार्थमिति च दूषणमात्राभिधानम्, तत् कुतो विशेषप्रतिलम्भ इत्यत आह—सामान्याभिधानेऽपीति। तृतीयं कल्पं दूषयितुमुपन्यस्यति—स्वपरशब्दाविति। एतदपि (७) सूत्रान्तरेण दूषयति—न युक्तमेतदपीति। ते साधनदूषणैः स्वपरशब्दाः संबध्यन्त इति सूत्रे हि नियमेन स्वपक्षे साधनं परपक्षे दूषणमुक्तम्, तथा चोत्तरपक्षो दूषणीय एवेति उत्तरपक्षवादिनाऽपि दूषणीयम्। एवं पूर्वपक्षोऽपि साधनीय एवेति उत्तरपक्षवादिनाऽपि साधनीयो न दूषणीयः स्यादित्यर्थः। अपि चायुक्तस्य पूर्वस्य पक्षस्य साधनं युक्तस्य चोत्तरपक्षस्य दूषणमिति विपरीतप्रसङ्ग इत्याह—स्वपक्षश्चोत्तरपक्षवादिनः पूर्वपक्षात् अयुक्तपक्षात् अन्यः युक्त इत्यर्थः। न पदार्थः नावयवार्थ इत्यर्थः। एतेन सूत्रान्तरनियमाभिधानव्याघातेनेत्यर्थः। व्याख्याता निराकार्यत्वेन। षष्ठं कल्पं दूषयितुमुपन्यस्यति—एक एवायमिति। दूषयति—युक्तमेतत्। एकस्यानेकं विशेषणम्।

---

(१) "स्थापनाऽपि न पूर्वम्" इति ख। (२) "न दोषतादवस्थाम्" इत्यंशः ख-पु० नास्ति। (३) "तदुक्तं भवति स्वपरपक्षाविति" इत्यंशः ख-पु० नास्ति। (४) "उत्तरविषयम्" इति ख। (५) "न परिभाषा न च रूढिः" इत्यत्र "न परिभावने रूढिः" इति ख। (६) आदर्शयोः "स्वरूप" इति। (७) "तन्त्रान्तरविरोधेन" इति ख।

(क) मुद्रितवार्त्तिकपुस्तकयोस्त्यक्तमपि 'पक्ष'पदं तात्पर्यानुसारेण निवेशितम्।

न्यायवार्त्तिकम्

प्रोगो न प्रतिषिध्यते द्विवचनं तु न भवतीति ब्रूमः। न ह्येकस्यानेकविशेषणाभिसम्बन्धे सति द्विवचनबहुवचने भवतः। न हि देवदत्तं छत्रदण्डाभ्यां सम्बद्धं समुपलभ्य वक्तारो भवन्ति छत्रिदण्डिनावागताविति। तदेवं विकल्पानुपपत्तेः स्वपरशब्दानुपपत्तिः।

समासासम्भवाच्च—स्वपरपक्ष इति समासपदमेतत्, तत्र तावद्विशेषणविशेष्यस्वरूपानवगतेर्न षष्ठीसमासः। यत्र पुनः षष्ठी समस्यते तत्र विशेषणं विशेष्यात् पृथगवधार्यते, यथा राजपुरुष इति। भेदाच्च—यत्र च विशेषणविशेष्यभावो भवति तत्र भेदो दृष्टो राजपुरुषवदेव। असत्यपि भेदे दृष्ट इति चेत्—असत्यपि भेदे दृष्टः षष्ठीसमासः, तद् यथा सेनापतिः पानकाङ्गमिति। तच्च न, अनभ्युपगमात्। को हि सुस्थात्मा पानकशब्दार्थमङ्गेभ्यो नार्थान्तरं प्रतिपद्यते, सेनां च सैनिकेभ्य इति। यथा च सेनादीन्यर्थान्तरभूतानि तथोक्तं गुणगुणिवाद इति। अथ मन्यसे स्वार्थः स्वशब्दस्यार्थः साधनीयोऽर्थश्च पक्षशब्दस्येति, तन्न, अपोदितत्वात्। यथा स्वार्थवाचकः शब्दो न भवति तथोक्तम्, तस्मान्न षष्ठीसमासः। एतेन कर्मधारयः प्रत्युक्तः स्वश्चासौ पक्षश्चेति, विशेषणस्वरूपासिद्धेर्भेदाभावाच्च। एतेन बहुव्रीहिरपि प्रत्युक्तः, साधयितृविषयं च साधनं प्राप्नोति अतो न बहुव्रीहिः।

ननु च (१)साधनीयार्थता स्वार्थः पक्षविशेषणत्वेन सम्भवति ? न सम्भवति पर्यायत्वात्। साधनीयः पक्ष इति पर्याय एव, न च पर्यायशब्दैः समानाधिकरणो बहुव्रीहिः सम्भवति।

न्यायवार्त्तिकतात्पर्यटीका

द्वितीयं हेतुमुपन्यस्तं व्याख्यातुं स्मारयति—समासेति। न केवलं विशेष्यात् पृथक् स्वार्थो विशेषणं नावधार्यते, अपि त्वन्यस्मादपि न भिद्यत इत्याशयवानाह—भेदाच्चेति। चोदयति—असत्यपि भेद इति। न केवलं पत्युर्विशेष्यात् सेना न भिद्यतेऽपि तु ततोऽन्येभ्योऽपि हास्तिकाश्वीयरथपदातिभ्य इति। एवं पानकमपि न केवलं तदङ्गेभ्यो जीरकादिभ्यः अपि त्वन्येभ्योऽपि फलसलिलादिभ्य इति। परिहरति—तच्च नेति। उक्तं प्रस्मृत्य शङ्कते—अथ मन्यसे स्वार्थ इति। उक्तस्मारणेन निराकरोति—तन्नेति। एतेन कर्मधारयबहुव्रीही अपीत्याह—एतेनेति। अपि च स्वः पक्षो यस्य साधयितुः स तथोक्तः, तथा च साधयितृविषयं स्यादित्याह—साधयितृविषयं चेति।

ननु मा भूद् यथेष्टविनियोगयोग्यार्थता स्वशब्दस्य, साधनीयार्थता तु भविष्यति, तथा च समासोपपत्तिरिति चोदयति—ननु चेति। षष्ठीसमासपक्षोक्तं दोषं स्मारयति—न सम्भवतीति।

(१) "साधनीयता" इति ख।

न्यायवार्त्तिकम्

न हि भवति (१) वृक्षतरुं छिनत्तीति। विरोधाच्च—यदि तावदयं पक्षशब्दः स्वपक्षाद्भिद्यते परपक्षवचनं प्रतिज्ञेति व्याघातः। किं कारणम्? प्रतिज्ञायाः स्वपक्षविषयत्वात्। अथाभिन्नः, तथाऽपीदं न प्राप्नोति स्वपरपक्षयोः सिद्ध्यसिद्ध्यर्थं वचनं वाद इति। न चान्यः समासः सम्भवति, न चेदं वाक्यम्। तस्मात् स्वपरपक्षयोरित्यसारम्।

आस्तां तावत् स्वपरशब्दार्थौ विशेषणविशेष्यभावश्च स्वपरशब्दयोः। अथ समासः कस्मान्न क्रियते स्वपरपक्षसिद्ध्यसिद्ध्यर्थं वचनं वाद इति। किमेवं कृते भवति? स एवार्थो लाघवं च।

अत्र केचित् परिहारं ब्रुवते—यदि किल समासः क्रियते उभयाश्रिते सिद्ध्यसिद्धी भवतः। न, दोषतादवस्थ्यात्—नायं (२) दोषोऽसमासकरणेन परिह्रियते। कथमिति? (३)(क) स्वपक्षसिद्ध्यसिद्ध्यर्थं वचनं परपक्षसिद्ध्यसिद्ध्यर्थं स्वपरपक्षयोः सिद्ध्यसिद्ध्यर्थमिति। न असामर्थ्यात्—न ह्ययं समासः समर्थः स्वपक्षसिद्ध्यसिद्ध्यर्थमिति। कस्मात्? व्याहतत्वात्—यदि सिद्ध्यर्थं यतते असिद्ध्यर्थमिति व्याघातः, यद्यसिद्ध्यर्थं यतते सिद्ध्यर्थमिति व्याघातः। यद्यसामर्थ्यान्न समासः, (४)समासेऽपि तर्ह्यसामर्थ्यात् नोभयपक्षसिद्ध्यसिद्धिप्रसङ्गः।

एकवचनबहुवचनप्रसङ्ग इत्यन्ये—यदि किल समासः क्रियेत समासोऽनभिव्यक्तवचनभेदः, तस्माद्वचनभेद(५)व्यक्तिनिमित्तोऽसमासः। कथं नाम? स्वपरपक्षयोः सिद्ध्यसिद्ध्यर्थं वचनं

न्यायवार्त्तिकतात्पर्यटीका

अपि च साक्षात्स्वपक्षस्य भेदे सूत्रान्तरव्याघातोऽभेदे वा एतस्य व्याघात इत्याह—**विरोधाच्चेति**।

अपि च वाक्यसमासयोः समासो ज्यायान् लाघवादित्याह—**आस्तां तावदिति**। **न ह्ययं (ख) समर्थः समास** इति, सिद्ध्यसिद्ध्यर्थमित्ययं समासः स्वपक्षपरपक्षयोः प्रत्येकं न सम्बन्धार्थ इत्यर्थात् कस्यचित् सिद्धिः कस्यचिदसिद्धिरित्यर्थः। परिहरति—**यद्यसामर्थ्यान्न समासः** सिद्ध्यसिद्ध्यर्थमिति। **समासेऽपि तर्हीति**, स्वपक्षपरपक्षसिद्ध्यसिद्ध्यर्थमिति समासेऽपीत्यर्थः।

एकवचनबहुवचनप्रसङ्गोऽपि नास्त्यसामर्थ्यादिति चोद्यसमाधानाभ्यां दर्शयति—**एकवचनेति**। अनित्यत्वेऽपि समासविधेः समास एव विग्रहाज् ज्यायानिति चोद्यसमाधानाभ्यां दर्शयति—

(१) "वृक्षस्तरुं" इति ख। (२) "दोषः समासकरणेन" इति ख। (३) "स्वपक्षसिद्ध्यसिद्ध्यर्थं परपक्षसिद्ध्यर्थं स्वपरपक्षयोः सिद्ध्यर्थमिति" ख। (४) "समासोऽपि" इति ख। (५) "व्यक्तनिमित्तासमासः" इति ख।

(क) समासासमासपक्षयोस्तुल्यतां दर्शयति—स्वपक्षेति। तत्र स्वपरपक्षयोरित्यादि असमासपक्षस्वरूपप्रदर्शनपरमिति बोध्यम्। (ख) वार्त्तिकपाठो व्युत्क्रमेण गृहीतः।

न्यायवार्त्तिकम्

वादः स्यात्, न स्वपरपक्षाणां न स्वपरपक्षस्येति । न, असम्भवात्—एकस्य तावत् सिद्ध्यसिद्ध्यर्थं वचनं नैवास्ति, स्वपरपक्षाणां साधनमनुमानमेकमिति कथाऽप्येषा नास्त्यतोऽस्थाने आशङ्का ।

अनित्यः समासविधिरित्यपरे—अपरे समासविधेरनित्यतां वर्णयन्त एवमाहुः नायमवश्यं विधिः सर्वत्र समास इति । क्वचित् समासः क्वचिच्च वाक्यम्, यथा च राज्ञः पुरुषः राजपुरुष इति च समासः । यदि उभयप्राप्तिरसमासः कस्मात्—अनित्यः समासविधिरित्येवं ब्रुवतोक्तं भवति प्राप्तमुभयम्, अथोभयप्राप्तौ कस्मादसमास इति । समासः कस्मादित्यनिवृत्तोऽनुयोगः ? नानिवृत्तो लाघवार्थत्वात्—समासे लाघवमसमासे गौरवम् । अनुगत्यर्थं च शब्दानामुपादानमिति गुर्वभिधाने प्रयोजनं वाच्यम् । वर्णे गुरुलाघवानभ्युपगम इति चेत् नायं परिहारोऽनुयोगस्यानिवृत्तेः—वर्णे गुरुलाघवानुयोगं न प्रतिपद्यामह इति चेत् न निवर्ततेऽनुयोगः कस्मादिति । शास्त्रत्वेन च (१)वादविधानमभ्युपगम्यते, न च वर्णे गुरुलाघवमाश्रीयत इति न युक्तम् ।

सिद्ध्यसिद्ध्यर्थमित्येतदपि न युक्तम् । कस्मात् ? द्वेधाऽनुपपत्तेः—अयं (२)खलु सिद्धिशब्दः कल्प्यमानो द्वेधा कल्प्येत व्यक्तावुत्पत्तौ वा । तत्र तावदुत्पत्तौ युज्यते प्रतिज्ञादिकस्य साधनस्य (३)साधनभावहानिप्रसङ्गात्—नहि प्रतिज्ञादिसाधनेन वस्तूत्पाद्यते, किं तु विद्यमानप्रकाशकत्वं साधनार्थः, स हीयते सिद्धावुत्पत्तौ कल्पितायामिति । व्यक्ताविति चेत् ? न ; अधिकरणाधारत्वात्,—अथ मन्यसे (४)सिद्धिर्व्यक्तिः नोत्पत्तिः, युक्तमेतत् ; उत्तरं तु व्याहतं भवति अधिकरणप्रत्यायनं सिद्ध्यसिद्धी इति । ये चैते अधिकरणप्रत्यायनलक्षणे सिद्ध्यसिद्धी ते अधिकरणे वर्तमाने

न्यायवार्त्तिकतात्पर्यटीका

अनित्य इति । भवतु गौरवमपि को दोष इत्यत आह—अनुगत्यर्थं चेति । लघुनोपायेनाऽऽशु सिद्धौ गुर्वभिधानमनर्थकम् । यथाहुः—

अर्के चेन्मधु विन्देत किमर्थं पर्वतं व्रजेत् ।
इष्टस्यार्थस्य संसिद्धौ को विद्वान् यत्नमाचरेत् ॥ इति ।

अनर्थकप्रयोगश्चानपेक्षितः शिष्यैरिति तेषामशासनान्न शास्त्रं स्यात्, तदिदमुक्तम्—शास्त्रत्वेनेति ।

सिद्ध्यसिद्ध्यर्थमित्येतदपि दूषयति—सिद्ध्यसिद्ध्यर्थमित्येतदपि न युक्तमिति । तत्र तावदिति, तदिति तयोर्मध्य इत्यर्थः । अधिकरणप्रत्यायनमिति, प्राश्निकप्रत्यायनमित्यर्थः । कुतो व्याहतमित्यत आह—ये चैते इति, चो यस्मादर्थे, अधिकरणे वर्त्तेते पक्षस्येति

---

(१) "वादाभिधानम्" इति ख । (२) "खलसिद्धिशब्दः" इति ख । (३) "साधनहानि-" इति ख । (४) "सिद्ध्यसिद्धि-" इति ख ।

न्यायवार्त्तिकम्

कथं (१)पक्षस्य भवत इति षष्ठ्यर्थो वाच्यः। नायं दुर्वचस्तद्विषयत्वात्—तयोः सिद्ध्यसिद्ध्योः पक्षो विषयः, अतस्तद्विषयत्वात्तस्येति। न युक्तमेतत्। ये ते सिद्ध्यसिद्धी पक्षविषये, ते किं तावत् पक्षे सिद्धे उतासिद्धे? यदि तावत् सिद्धे, नाधिकरणप्रत्यायनं सिद्धिः। किं तर्हि? यतस्तत्प्रत्यायनं सा सिद्धिः। कुतश्च तद्भवति? अर्थस्य तथाभावात्—यस्मात् सोऽर्थस्तथा भवति। कथं तथा भवति? यथा प्रमाणैरभिसम्बद्ध इति,—यत् प्रमाणैरविसंवादित्वं स तथाभावः। अथासिद्धे पक्षेऽधिकरणप्रत्यायनं भवति? साधनप्रयोगात् प्रागधिकरणप्रत्यायनमस्तीति वादवैयर्थ्यं स्यात्। पक्षस्य सिद्धिरधिकरणप्रत्यायनम् असिद्धिस्तु कथम्? नहि परपक्षासिद्धिर्दूषणेन क्रियत इत्युक्तम्। स्थापनानिवृत्तेरुपचार इति चेत्—स्यान्मतिः दूषणं प्रयुज्यमानं साक्षात् स्थापनां निवर्तयति, स्थापनानिवृत्तेस्तु परपक्षनिवृत्तिरुपचर्यत इति। न, प्रयोजनाभावात्,—नहि (२)प्रयोजनमन्तरेण मुख्यार्थव्यतिक्रमो लभ्यते, अपि तु प्रमाणासम्भवेनोपचारो मञ्चाः क्रोशन्तीति

न्यायवार्त्तिकतात्पर्यटीका

व्याहतमित्यर्थः। चोदयति—नायमिति। सिद्धिर्ज्ञानं तस्य पक्षो विषयः, आश्रयास्तु प्राश्निका इत्यर्थः। विकल्प्य दूषयति—न युक्तमेतदिति। न तावज् ज्ञानं पक्षविषयं प्राश्निकाधिकरणं चेति बौद्धराद्धान्ते सम्भवति, ज्ञानस्यानाधारत्वात् विषयिविषयभावस्यातात्त्विकत्वात्। तस्मादन्या सिद्धिः, तत्रेदमुपतिष्ठते—किं तर्हीति। सिद्धियोगात् सिद्धः पक्षो भवति, प्रमाणयोगश्च सिद्धिः, सैवार्थस्य तथा, तस्यास्तु प्राश्निकानां प्रतीतिर्भवति, तस्मान्न प्राश्निकप्रतीतिः पक्षस्यासिद्धिरिति विरोधः। यस्मात् सोऽर्थस्तथा भवति तस्मात्तथाभावादधिकरणप्रत्यायनं भवतीति द्वितीयं कल्पमाशङ्कते—अथासिद्ध इति। यावत् पक्षविषयं साधनं न प्रयुज्यते तावदधिकरणप्रत्यायनं ततः साधनप्रयोगात् प्रागधिकरणप्रत्यायनमस्तीति वादवैयर्थ्यं साधनदूषणप्रयोगोऽनर्थकः। दूषणान्तरमाह—पक्षस्येति। न प्रयोजनमन्तरेणेदानीन्तनानामस्मदादीनां मुख्यार्थशब्दस्यातिक्रमोऽवाचकपदप्रयोगेण लभ्यते इत्यर्थः। यथाहुः "अस्मदायत्ते शब्दप्रयोगे किमित्यवाचकं प्रयोक्ष्यामहे" इति। स्यादेतत्, मञ्चस्थाः क्रोशन्तीति वक्तव्ये विनाऽपि प्रयोजनं मञ्चाः क्रोशन्तीत्युपचारो दृष्ट इत्यत आह—अपि तु प्रमाणासम्भवेनेति, प्रमाणसंभवेनापि त्विति योजना। नन्विहापि विनाऽपि प्रयोजनं

(१) "सपक्षस्य" इति ख। (२) "प्रयोजनव्यतिक्रमेण" इति क।

न्यायवार्त्तिकम्

यथा। (क)लोकप्रयुक्तशब्दार्थवत् उपचारः लोकगत्या शब्दार्थः, न चेदं लौकिकं वाक्यं स्वपरपक्षयोः सिद्ध्यसिद्ध्यर्थं वचनं वादः।

अपरे तु प्रतिज्ञातार्थाज्ञापनं पक्षस्यासिद्धिं वर्णयन्ति। (१)तद् यद्यधिकरणविषयम्, न निवर्तते प्रसङ्गः। कथम्? पक्षस्यासिद्धिरिति सिद्धिवत्प्रसङ्गः। तस्मात् सिद्ध्यसिद्धी पक्षधर्माविव यत एतद् भवति सिद्धः पक्षोऽसिद्धश्चेति। एवं सति द्रष्टृस्थे (२)सिद्ध्यसिद्धी इति व्याघातः—यदि सिद्ध्यसिद्धी पक्षधर्मौ द्रष्टृस्थे सिद्ध्यसिद्धी इति व्याहतं भवति। अथ मा भूद्व्याघात इति द्रष्टृस्थे एव ते? तथाऽपि पक्षस्य व्यक्त्यव्यक्ती सिद्ध्यसिद्धी इति व्याहतं भवति। अथ तथाऽतथाते पदार्थस्य सिद्ध्यसिद्धी? तथाऽप्यधिकरणप्रत्यायनं सिद्ध्यसिद्धी इति व्याहतं भवति। के पुनरेते

न्यायवार्त्तिकतात्पर्यटीका

प्रमाणासम्भवमात्रेणोपचारो मञ्चाः क्रोशन्तीतिवद्भविष्यतीत्यत आह—लोकप्रयुक्तशब्दार्थवत् उपचारोऽपि लौकिको न प्रयोजनाभावेन शक्योऽपवदितुं न लोकः पर्यनुयोज्यो यतः, इदानीं तु न अस्मदादिप्रयोगः प्रयोजनाभावेन शक्यः पर्यनुयोक्तुमित्याशयेनाऽऽह—न चेदं लौकिकमिति।

अपरे त्विति। न दूषणविषयत्वमसिद्धिर्येन न पक्षेण संबध्येत, अपि त्वज्ञानम्, तच्च पक्षविषयमेवेति न मुख्यार्थलङ्घनमित्यर्थः। अत्रापि पूर्वोक्तं प्रसङ्गमाह—तद् यदीति। तस्मात्पक्षस्येतीच्छता सिद्ध्यसिद्धिज्ञानाज्ञाने पक्षधर्मावेवाभ्युपगन्तव्ये। यतः तयोः पक्षधर्मत्वात् एतद्भवति सिद्धः पक्षोऽसिद्धः पक्ष इति। अस्तु तर्ह्येवमित्यत आह—एवं सतीति। न द्रष्टाधारता ज्ञानस्य विषयता च बौद्धराद्धान्ते सम्भवतीति भावः। शङ्कते—अथ मा भूदिति। अस्ति खल्वालयज्ञानं यदुपाश्रित्य (३) षडपि प्रवृत्तिज्ञानानि जायन्ते। तस्मादालयप्रत्ययो द्रष्टा तत्स्थे एव सिद्ध्यसिद्धी। ननु पक्षस्य तद्विषयत्वात् तस्यापीति चेत् कः पुनरयं विषयभावः। तत्कारणत्वमिति चेत् चक्षुरादीनामपि ज्ञानकारणानां विषयत्वप्रसङ्गः, असतश्चाकारणस्याविषयत्वप्रसङ्गः। ज्ञानप्रकाश्यत्वं विषयत्वमिति चेत्, न; ज्ञानेनार्थे प्रकाशाजननात्। तस्माज्ज्ञानस्य तदसमवायिनः तदविषयस्य द्रष्टृस्थतैवेति सिद्धम्। निराकरोति—तथाऽपीति। पुनः शङ्कते—अथ तथाऽतथाते इति, (ख) प्रमाणयोग इत्यर्थः। निराकरोति—तथाऽपीति।

---

(१) 'तद्यधिकरणविषयम्' इति ख। (२) 'सिद्ध्यसिद्धी इति'' इति ख-पु० नास्ति। (३) ''षड्'' इति क-तात्पर्यपुस्तके नास्ति।

(क) अवादर्शपुस्तकयोः ''लोकप्रयुक्तशब्दविषयश्चोपचारः'' इति पाठः। तात्पर्यानुसारी पाठस्तु गृहीतः। (ख) अत्र ''प्रमाणयोगायोगौ'' इति पाठः समीचीनतया प्रतिभाति।

न्यायवार्त्तिकम्

व्यक्तयव्यक्ती ? वस्तुधर्मावभिधानप्रत्ययहेतू, यत एव तावभिधानप्रत्ययौ व्यक्तोऽव्यक्तश्चेति भवतः, ते व्यक्तयव्यक्ती इति । अर्थशब्दानुपपत्तिर्विकल्पानुपपत्तेः—अर्थशब्दः खलु प्रवर्तमानस्त्रेधा प्रवर्तते उद्देशप्रयोजनाभिधेयविषयत्वेन । उद्देशे तावदर्थशब्दो यथा ब्राह्मणार्थं भक्तमिति । एवं चतुर्विध(१)वाक्यासङ्ग्रहः । प्रयोजनेऽर्थशब्दः किमर्थमागतोऽसीति । अभिधेयेऽर्थशब्दो यथा गौरित्यभिधानस्य कोऽर्थ इति । तन्न तावदुद्देशे सम्भवति, युक्तायुक्तत्वेनेति विशेषितत्वात् स्वपक्षस्य युक्तत्वेन परपक्षस्यायुक्तत्वेनेत्येवं विशेषिते (२) कुत उद्देशशब्दार्थः । न ह्ययं युक्तायुक्तशब्दो दूषणाभासे साधनाभासे वा सम्भवति साधनयोगो युक्तता दूषणयोगोऽयुक्ततेति । अथ पुनः पदार्थस्य तथात्वातथात्वे युक्तायुक्तत्वे—युक्तत्वं तथाभावोऽयुक्तत्वमतथाभाव इति, तथाऽपि उभयोः कर्मतयोपादानाद् युक्तत्वेनाधिकरणप्रत्यायनमयुक्तत्वेन वेति व्याघातः, नहि प्रत्याय्यं प्रत्यायनं भवतीति । अथ प्रयोजनेऽर्थशब्दः, तथाऽपि साधनदूषणाभासवादिनोऽवादिता स्यात् । किं कारणम् ? साधनदूषणाभासयोः सिद्ध्यसिद्ध्यप्रयोजनत्वात्—नहि साधनदूषणाभासयोः सिद्ध्यसिद्धी प्रयोजनम् । एवं च तद्वादी अवादी स्यात् तथा चावादी निगृह्यत इति दोषः ।

न्यायवार्त्तिकतात्पर्यटीका

तत्त्वं जिज्ञासुः पृच्छति—के पुनरेते इति । सुहृद्भावेनोत्तरमाह—वस्तुधर्माविति । यद्यपि प्रमाणयोगायोगौ प्रमेयस्य प्रमातुश्च, साधनासंबन्धे कर्तृत्वानुपपत्तेः ; तथाऽपि प्रमेयस्य प्राधान्यात् तत्रैवाभिधानप्रत्ययाविति प्रमेयधर्मावुच्येते व्यक्तयव्यक्ती, न तु प्रमातृधर्माविति । सिद्धार्थमित्यर्थशब्दानुपपत्तिः । कस्मात् ? विकल्पानुपपत्तेः । विकल्पमाह—अर्थशब्दः खल्विति । इह सूत्रे धननिमित्तादिवचनताऽर्थशब्दस्य न सम्भवतीति त्रयमवशिष्यत इति त्रेधा प्रवर्त्तत इत्युक्तम् । साधनं साधनाभासो दूषणं दूषणाभास इति चतुर्विधं वाक्यम् । प्रथमकल्पमपाकरोति —तन्न तावदिति, तदिति तेषु मध्य इत्यर्थः । ग्रन्थान्तरेण युक्तायुक्तत्वेन विशेषणाच्चतुर्विधवाक्यसङ्ग्रहार्थो ह्युद्देशे अर्थशब्दो व्याख्यातः । न च युक्तायुक्तविशेषणे चतुर्विधवाक्यसंग्रहो भवति साधनाभाससम्बन्धिनः पक्षस्य युक्तत्वाभावाद् दूषणाभाससंबन्धिनश्च प्रतिपक्षस्यायुक्तत्वाभावादित्यर्थः । अथ न साधनादियोगोऽपि तु साध्यधर्म एव साधनानपेक्षो युक्तायुक्तत्वमिति शङ्कते—अथ पुनरिति । निराकरोति—तथाऽपीति । कुतो व्याघात इत्यत आह—नहीति । यदि प्रत्यायनं सिद्धिः प्रतीतिः, तथाऽपि सा प्रत्याय्यं न सम्भवति ; अथ करणम्, तथाऽपि कर्म करणं न सम्भवतीति व्याघात इत्यर्थः । द्वितीयं कल्पमाशङ्क्य निराकरोति—अथ प्रयोजन इति । प्रयोजनं कार्यम्, तन्न कारणाभासाद्भवितुमर्हति । न हि वह्निरिति गृहीतः खद्योतो

(१) "-वाक्यं संग्रहः" इति ख । (२) "कुत" इति ख-पु० नास्ति ।

न्यायवार्त्तिकम्

अथाभिधेयेऽर्थशब्दप्रयोगः, अभिधानस्वभावानवधृतेरिति—अयुक्तमेतदपि, नहि ग्रन्थकारभाष्यकाराभ्यां विशेषितमेवंप्रकारमभिधानं सिद्ध्यसिद्ध्योर्वाचकमिति। ननु विशेषितम्, येन सिद्ध्यसिद्धी अभिधीयेते तत्तयोर्वाचकमिति। सत्यमुक्तम्, एवं तु सिद्ध्यसिद्धी इत्येतेऽभिधाने वादः प्राप्तः। न चान्योऽर्थशब्दस्यार्थ इति, तस्मादर्थशब्दोऽप्ययुक्त इति। सिद्ध्यसिद्ध्यर्थं (क) च वचनं वाद इति ब्रुवाणेन पूर्वमुत्तरं वा नाऽऽलोचितम्। नैयायिकेहेतुप्रतिषेधेन विशेष्यं वचनमित्यभ्युपगमसिद्धम् इदं (१)पुनः सूत्रं समस्तं वचनविशेषणार्थमिति व्याघातः। तदेवमेतानि सूत्रपदानि विचार्यमाणानि स्वतन्त्रव्याघातकानीति लोकं च बाधन्त इति। एवं तावत् सौत्राणि पदानि स्वेन (२) न्यायेनासम्बद्धानि। यथा च वृत्तिपदानि असम्बद्धानि तथेदमुच्यते। स्वस्य पक्षस्येति स्वार्थासिद्धेरयुक्तम्—स्वार्थश्च प्रतिषिद्धः, (३) अतोऽयुक्तं स्वस्य पक्षस्येति। यदपि षष्ठीसप्तमीद्विवचनयोस्तुल्यरूपत्वात् षष्ठीत्वज्ञापनार्थं स्वस्य पक्षस्येति तदप्ययुक्तम्, अधिकरणार्थासम्भवात्—नहि पक्षव्यतिरेकेण पक्षे किञ्चित् साध्यं सम्भवति। तस्मादप्रसक्तः सप्तम्यर्थः, तदप्रसक्तौ विशेषणानर्थक्यमिति।

(४)युक्तायुक्तत्वाऽनुपपत्तिश्च विकल्पानुपपत्तेः—युक्तायुक्तत्वे खलु साधनदूषणे वा स्याताम्, साधनदूषणाभ्यां वा योगः, पदार्थस्य वा (५) तथाताऽतथाते इति। तन्न तावत् साधनदूषणे

न्यायवार्त्तिकतात्पर्यटीका

दहति पचति वेत्यर्थः। तृतीयं कल्पमाशङ्क्य निराकरोति—अथाभिधेय इति। ग्रन्थकारः सूत्रकारः। एवं त्विति, एवं सति सिद्धिशब्दोऽसिद्धिशब्दश्च वादः स्यात्। ननु धननिमित्तादयोऽप्यर्थशब्दवाच्याः सन्ति ते कस्मादिह न गृह्यन्त इत्यत आह—(ख) तत्र, सूत्रे। न चान्योऽर्थशब्दस्य विषयः सम्भवति, न हि सिद्धिर्धनं वा स्वपरपक्षयोः साधनं वा निवृत्तिर्वा सम्भवतीत्यर्थः। अपि च वचनविशेषपक्षे स्वशास्त्रव्याघात इत्याह—सिद्ध्यसिद्ध्यर्थं च वचनं वाद इति ब्रुवाणेनेति। नैयायिकेहेतुदूषणं पूर्वमिदं सूत्रमुत्तरम्। उपसंहरति—तदेवमिति। "तन्त्र" शास्त्रम्। लोकं च बाधन्त इति, अवाचकपदप्रयोगात् साधनदूषणाभासवादिनश्च वादित्वेन लोकसिद्धस्यावादित्वापादनात् सिद्ध्यसिद्धिशब्दयोश्च वादत्वापादनादित्यर्थः। सूत्रं दूषयित्वा वृत्तिं दूषयति—यथा चेति। स्वस्य पक्षस्येति, स्वस्याऽऽत्मीयपक्षस्य। न हि पक्षव्यतिरेकेण पक्षाधारं साध्यं ज्ञानमन्यद्वा सिद्धिशब्दाभिधेयं सम्भवति, ज्ञानस्य पुरुषाधारतयाऽनाधार-

---

(१) 'पुनः सूत्रमिति समस्तवचन-' इति ख। (२) "न्यायेनासमर्थानि" इति ख। (३) "अतोऽर्थम्" इति ख। (४) "युक्तायुक्तत्वं" इति ख। (५) "तथातथा चेति" इति ख।

(क) आदर्शयोः 'च'कारो नास्ति तात्पर्यानुसारेण तु गृहीतः। (ख) वार्त्तिके "तत्र" इति पाठो न दृश्यते।

न्यायवार्त्तिकम्

युक्तायुक्तत्वे। कस्मात्? साधनदूषणयोः पृथगभिधानात्—'ते साधनदूषणे'रिति पृथगुक्ते साधनदूषणे, युक्तायुक्तशब्दाभ्यां च साधनदूषणयोरभिधानमिति 'ते साधनदूषणे'रिति (१)सूत्रमनुच्चार्यं चरितार्थत्वादिति। अथ मन्यसे तयोरेव युक्तायुक्तयोर्विशेषणार्थं 'ते साधनदूषणे'रिति, न; प्रथमाभिधानप्रसङ्गात्—यदि युक्तायुक्तत्वविशेषणार्थं 'ते साधनदूषणे'रिति सूत्रम्, प्रथमैव न्याय्या—ते साधनदूषणानीति। न हि विशेषणविशेष्यभावे भवति नीलमुत्पलैरिति। योग इति चेत्—अथ साधनदूषणाभ्यां योगो युक्तत्वायुक्तत्वे इत्येवं चेन्मन्यसे, तन्न; अनिर्देशात्—(२)न साधनदूषणाभ्यां योगो निर्दिष्ट एवंविध इति, अनिर्देशादयुक्तमेतत्। साधनेन योग इति च कदा भवति, यदाऽसौ निर्णीतः पदार्थः, तदा च न साधनार्थः कश्चिदस्तीति न युक्तायुक्तत्वेनाधिकरणप्रत्यायनमिति व्याघातात्, अतो न युक्तो योगः। (३)अथ पदार्थस्य तथातातथाते युक्तायुक्तत्वे? तदपि न, करणार्थस्यासम्भवात्—ये तथात्वातथात्वलक्षणे युक्तायुक्तत्वे ते व्यवच्छेद्ये न तु व्यवच्छेदस्य साधने। तस्मात् करणार्थो नास्त्यतो युक्तायुक्तत्वस्येति युक्तं वक्तुमिति।

न्यायवार्त्तिकतात्पर्यटीका

तथा वा पक्षाधारत्वानुपपत्तेः, पक्षस्य तु भवेत् केनचित् संबन्धेन धाद्दशताद्दशेनेत्यर्थः। 'ते साधनदूषणे'रित्यत्र पृथगुक्ते साधनदूषणे। (४)(क)युक्तायुक्तार्थाभ्यां ते युक्तायुक्तत्वे। साधनदूषणैरिति, न हि कर्म करणं भवतीत्यर्थः। अपि च युक्तायुक्तार्थाभ्यामभेदे साधनदूषणपदमनर्थकं ते इत्यनेनैव युक्तायुक्तत्वावमर्षिणा गतार्थत्वादित्याह—युक्तायुक्तशब्दाभ्यां चेति। अथ न पर्यायता, अपि तु सामान्यविशेषभावः युक्तायुक्तत्वे सामान्यम्, साधनदूषणे च विशेष इति शङ्कते—अथ मन्यस इति। निराकरोति—न प्रथमेति। उभयव्यभिचारे विशेषणविशेष्यभावे कामचारादुत्पलैरित्युक्तम्। द्वितीयं कल्पमाशङ्क्य दूषयति—योग इति चेदिति। न खलु योगो नाम बौद्धानां साध्यसाधनवृत्तिर्दूष्यदूषणवृत्तिर्वा कश्चिदस्तीत्यर्थः। अपि च सांवृतोऽपि योगः साध्यसाधनज्ञानाधीननिरूपणतया नानिरूपिते साध्ये निरूपितो भवति, निरूपणं च निर्णय इति योगनिरूपणात् प्राक् साध्यनिर्णयात्कृतं योगनिरूपणेन साध्यनिर्णयार्थेनेति। युक्तायुक्तत्वेन करणेनाधिकरणप्रत्यायनमिति व्याघात इत्याह—साधनेनेति। भवति ज्ञायते। तृतीयं कल्पमाशङ्क्य निराकरोति—अथ पदार्थस्येति। युक्तायुक्तत्वेनाधिकरणप्रत्यायनमिति युक्तायुक्तत्वयोः करणत्वं दर्शितम्, तत् तथात्वातथात्वपक्षे न संभवति, कर्मत्वात्। तदिदमुक्तं—ते व्यवच्छेद्ये परिच्छेद्ये न तु व्यवच्छेदस्य परिच्छेदस्य साधने इति।

---

(१) 'सूत्रमुच्चार्यम्' इति ख। (२) 'न' इति ख पु० नास्ति। (३) 'अथ पदार्थस्य' इत्यत्र 'अपदार्थस्य' इति ख। (४) 'युक्तायुक्तताभ्यां' इति ख-तात्पर्यपाठः।

(क) युक्तायुक्तशब्दाभ्यामिति वार्त्तिकस्य अभिप्रायप्रकाशकविशेषणं युक्तायुक्तार्थाभ्यामिति। इदं तात्पर्यं 'युक्तायुक्तशब्दाभ्यां च' इत्यतः परं पठितम्, प्रमादादत्र मुद्रितमिति सम्भाव्यते। सैवास्य 'ते' इत्यस्य विवरणं युक्तायुक्तत्वे इति।

न्यायवार्त्तिकम्

अधिकरणप्रत्यायनमिति च न युक्तम्, शास्त्रसम्बन्धासङ्गतत्वात्—(१)शास्त्रसम्बन्धं कुर्वाणेनोक्तं सन्देहविपर्ययप्रतिषेधार्थः शास्त्रस्याऽऽरम्भ इति, एतन्निरपेक्षेणेदमुच्यते अधिकरणप्रत्यायनं सिद्धासिद्धी इति । न च प्राश्निकेषु संशयविपर्ययौ स्तः परिच्छेदकत्वात् । तस्मान्न प्राश्निकाः प्रत्याय्या इति । यच्चोक्तं प्राश्निकप्रत्यायनादेव वादिप्रत्यायनं कृतं भविष्यतीति । (२)तत्प्रत्यायनाद्वादिप्रत्यायनं भविष्यतीति किं कारणम् ? प्रतिवादी किल स्वपक्षरागात् सन्तमप्यर्थं न प्रतिपद्यते । सन्तमप्यर्थं न प्रतिपद्यते इति व्याहतमुच्यते , कथं चान्यथा प्रतिपन्नः सन्नित्यभिधीयते ? अथ प्रतिपद्यमानोऽपि परस्य न कामकारं ददाति, तथाऽपि न प्रतिपद्यत इति व्याहतमुच्यते । यच्च प्राश्निकप्रत्यायनात् तत्प्रत्यायनमिति, तदपि न, प्रतीतेः कारणभेदात्—प्राश्निकप्रतीतेरन्यानि कारणानि, अन्यानि प्रतिवादिप्रतीतेरिति । न चान्यविषयस्य करणस्यान्यत्र (३) क्रियेति । नियमाभावाच्च—न चायं नियमः प्राश्निकप्रत्यायनार्थ एव वादः, प्राश्निकानन्तरेणापि गुर्वादिभिः सह वादो दृष्ट इति । यदा तु नायं तत्त्वबुभुत्सुर्लाभपूजाख्यातिकामो वादमारभते तदा प्राश्निकैः प्रयोजनमस्तीति, सत्यमस्ति प्रयोजनम्, वादस्तु न भवतीति । न, त्रैविध्यानभ्युपगमात्—एक एवायं कथामार्गः, तस्य प्रयोजनं तत्त्वावबोधो लाभादयश्च । न, प्रतिषेधात्—(४) प्रतिषिद्धः स्तुतिमानलाभलिप्सोर्वादः । यदपीदमुच्यते न त्रैविध्यानभ्युपगमादिति, नानभ्युपगमायत्तः

न्यायवार्त्तिकतात्पर्यटीका

अधिकरणप्रत्यायनमिति दूषयति—अधिकरणेति । शास्त्रसंबन्धः प्रयोजनेनेति । चोदयति—प्राश्निकप्रत्यायनादिति । कश्चिच्चोदकः पृच्छति—तत्प्रत्यायनादिति । चोदकस्योत्तरम्—प्रतिवादी किलेति । सिद्धान्त्याह—सन्तमप्यर्थं न प्रतिपद्यत इति । न खल्वाध्यात्मिकशक्तिसम्पन्नः समाहितः समग्रसाधनप्रयोगे सति सन्तमर्थं न प्रतिपद्यत इति संभवतीत्यर्थः । तथाविधेनापि चेत् प्रतिपत्त्रा सोऽर्थोऽन्यथा प्रतिपन्नः कथमसौ तथा सन्नित्यभिधीयत इत्याह—कथं चेति । शङ्कते—अथ जिगीषुतया प्रतिपद्यमानोऽपीति । कामकारोऽनुज्ञा । निराकरोति—तथाऽपीति । न प्रतिपद्यते प्रतिपद्यमान इति व्याहतम् । न चायमनुज्ञानिषेधो न प्रतिपद्यत इति वादे वीतरागकथात्वाज्जिगीषाया अभावादिति भावः । यच्च प्राश्निकप्रत्यायनादिति । अन्यदीयेन करणेनान्यः प्रतिपद्यत इति सुभाषितम् । अन्यविषयस्येति अन्याश्रितस्येत्यर्थः । न चायं नियम इति, न वादे प्राश्निकानामुपादानं दैवागतानां तु न वर्जनमित्यर्थः । वादस्य जल्पवितण्डाभ्यामभेदमभिप्रेत्य चोदयति—यदा तु नायमिति । आशयस्थितमर्थमनभ्युपगच्छन् परिहरति —सत्यमिति । अभिप्रायं दर्शयति—न त्रैविध्येति ।

---

(१) 'शास्त्रं सम्बन्धम्' इति ख। (२) 'तत्प्रत्यायनाद्वादिप्रत्यायनं भविष्यतीति' इति ख-पु० नास्ति। (३) 'अन्यत्र' इति ख-पुस्तके नास्ति। (४) 'प्रसिद्ध' इति ख।

न्यायवार्त्तिकम्

पदार्थसद्भावः, अपि तु सद्भावे सत्यभ्युपगम इति। यथा च त्रैविध्यं कथामार्गस्य तथा लक्षणभेदात्(१)। वादात् जल्पवितण्डयोर्भेदमुपपादयिष्यामः(क)। तस्मादज्ञात्वा विशेषमुच्यते त्रैविध्यानभ्युपगमादिति। यच्चोक्तं पक्षासिद्धिविषयं प्रत्यायनं पक्षसिद्धिशब्देनोपचरितम्, यथा शून्यताविषयः समाधिः शून्यतेति। न कामत उपचारो लभ्यते अपि तु प्रमाणासम्भवेन, लोकप्रयुक्तशब्दान्वाख्यानमुपचारः, उक्तं च नोपचरितशब्दप्रयोगो लक्षणे उपपन्न इति। तदर्थं वचनमित्येतदपि किल चतुर्विधवाक्यज्ञापनार्थमुक्तम्, साधनं साधनाभासो दूषणं दूषणाभासश्च सम्पत्स्यत इति, तदयुक्तम्, युक्तायुक्तत्वेनेति विशेषितत्वात्—एवं विशेषिते एतस्मिन् कुतश्चतुर्विधवाक्यसंग्रह इति। अधिकरणं पुनर्यौ वादिप्रतिवादिभ्यामधिकृत इत्यधिकरणार्थो वक्तव्यः, न हि वादे (२)प्राश्निकाधारं किञ्चिदस्तीति। प्रत्यायनाधारत्वादधिकरणमिति चेत् नोक्तोत्तरत्वात्—(३)उक्तोत्तरमेतत्, पक्षविषयं प्रत्यायनं न प्राश्निकविषयमिति। तस्मिन् सति भावादिति चेत्, न ; अन्यथाऽपि दर्शनात्—अन्यथाऽपि गुर्वादिभिः सह दृष्टो वाद इति। तद्वादे परीक्षा का कस्य क्वेति वक्तव्यम्, साधनदूषणप्रयोगः पक्षस्थापनाविषयो वाद इति, तस्य परीक्षा साधनदूषणतदाभासपरिज्ञानम्, तदर्थमधिकार (४)उभयोः, तस्मिन्निति सप्तम्यर्थो

न्यायवार्त्तिकतात्पर्यटीका

दूषयति—न (ख) भवद्भिरेव प्रतिषेधादिति। त्रैविध्यानभ्युपगमादिति दूषयति—यदपीति। यच्चोक्तं वृत्तौ पक्षसिद्धिविषयम् एतदपि दूषयितुमुपन्यस्यति—यच्चोक्तमिति। न कामतः विना प्रयोजनमिति। विनाऽपि प्रयोजनं प्रमाणासंभवेनापीति योजना। सूत्रोक्तं दूषणं वृत्तावाह—तदर्थं वचनं सिद्ध्यसिद्ध्यर्थमित्यर्थः। अधिकरणं दूषयति—अधिकरणमिति। न हि प्राश्निकाधारमिति। प्राश्निका एव तावद्वादे न सन्ति, अभ्युपेत्य उक्तमिति। शङ्कते—प्रत्यायनाधारत्वादिति। सिद्धिः प्रत्यायनं तदाधाराः प्राश्निका इत्यर्थः। निराकरोति—नेति। शङ्कते—तस्मिन्निति। दैवमिलिते प्राश्निके सतीत्यर्थः। निराकरोति—नेति। न हि दैवमिलितं कारणम्, मा भूद्गर्दभोऽपि धूमस्य कारणमिति भावः। चोदयति (ग)यदि प्राश्निका न सन्ति तद्वाद इति। तयोर्वादिप्रतिवादिनोर्वादस्य (५)परीक्षा का कस्य च तयोः वादस्य क्व चासौ परीक्षा, प्राश्निकाभावे हि वादतत्परीक्षातदधिकरणानामज्ञानमित्यर्थः। परिहरति—साधनेति। वीतरागौ हि वादिप्रतिवादि-

---

(१) 'लक्षणभेदाद् वा' इति ख। (२) 'प्राश्निकार्थम्' इति ख। (३) 'उक्तोत्तरमेतत्' इति ख पु० नास्ति। (४) 'उभयोः' इति ख पु० नास्ति। (५) 'परीक्षका' इति क।

(क) उपपादितोऽयमर्थो जल्पलक्षणसूत्रीयवार्त्तिके 'सोऽयं पक्षप्रतिपक्षपरिग्रह' इत्यादिना। (ख) भवद्भिरिति प्रतिषेधकर्त्तुः पूरणं कृतम्। (ग) तद्वादे इति वार्त्तिके तदित्यस्य आकाङ्क्षानिवृत्तये यदि प्राश्निका न सन्ति इति तात्पर्यकृता पूरितम्। क-चिह्नितवार्त्तिकग्रन्थसम्पादकास्तु वार्त्तिके अधिकमपेक्षितमिति मन्यन्ते।

(सू०)—यथोक्तोपपन्नश्छलजातिनिग्रहस्थानसाधनोपालम्भो जल्पः ॥ २ ॥

न्यायभाष्यम्

(भा०) यथोक्तोपपन्न इति, प्रमाणतर्कसाधनोपालम्भः सिद्धान्ताविरुद्धः पञ्चावयवोपपन्नः पक्षप्रतिपक्षपरिग्रहः। छलजातिनिग्रहस्थानसाधनोपालम्भ इति, छलजातिनिग्रहस्थानैः साधनमुपालम्भश्चास्मिन् क्रियत इति एवंविशेषणो जल्पः।

न्यायवार्त्तिकम्

नास्ति। यदपि प्राश्निकप्रतिवादिनोः प्रियाप्रियवचसि वादप्रसङ्ग इति चोद्यं कृत्वा (१)प्रतिसमाधानमुक्तम्, तत्सिद्ध्यसिद्धिभ्यां साक्षात् पारम्पर्येणासम्बन्धाद् युक्तायुक्तविशेषणाच्चासम्बद्धमुत्तरेण त्वसङ्गतपदार्थाभिधायिनो दत्तः स्वहस्तः पूर्वापरयोरसम्बन्धादिति। यदि त्वसङ्गतस्याप्युत्तरं वाच्यं तत एवं वक्तव्यं न सूत्रार्थापरिज्ञानादिति। तदेतत्सूत्रं विचार्यमाणं सह वार्तिकं न युक्त्या सङ्गच्छत इति यथान्यायमेवास्तु ॥ १ ॥

यथोक्तोपपन्नश्छलजातिनिग्रहस्थानसाधनोपालम्भो जल्पः। समस्तं वादलक्षणं

न्यायवार्त्तिकतात्पर्यटीका

नात्रैव वादस्वरूपज्ञानं तत्परीक्षां च कर्तुं शक्नुतः, तत्किमत्र प्राश्निकैः। साधनप्रयोगः पक्षविषयः, दूषणप्रयोगः स्थापनाविषयः इति वादस्वरूपम्, साधनदूषणतदाभासानां परितो ज्ञानं परीक्षा, तदर्थं तस्मिन् वादेऽधिकारो वीतरागयोरेव वादिनोः, तदिदं क्वेति विप्रश्नस्योत्तरमिति। तस्मात् सप्तम्यर्थोऽधिकरणार्थः पराभिमतः प्राश्निक इति यावत्, स नास्ति वादिप्रतिवादिनोरेव वीतरागयोः कथासमासेरित्यर्थः। यदपि वृत्तौ चोदितं यदि सिद्ध्यसिद्ध्यर्थं वचनं वादस्तदा प्राश्निकप्रतिवादिनोः प्रियाप्रियवचसि रथ्यावादे प्रसङ्ग इति तदप्यतिनिर्बीजमित्याह—यदपीति। न हि प्रियाप्रियवचसः साक्षात्पारम्पर्येण वा सिद्ध्यसिद्ध्यर्थता, नापि साधनदूषणयुक्तायुक्तत्वविशेषणसंबन्धः, तस्मादेवंवादी नोत्तरार्हः, न ह्युन्मत्ताय कश्चिदनुन्मत्त उत्तरमाह, ब्रुवाणो वा सोऽप्युन्मत्तः स्यात्, तदिदमुक्तम्—दत्तः स्वहस्त इति। पूर्वं सिद्ध्यसिद्ध्यर्थमिति, अपरं युक्तायुक्तत्वमिति, उभयोरप्यनेन चोद्येनासंबन्धात्। यदि त्ववश्यमुत्तरं वाच्यम्, ततो वरमेवं वक्तव्यमित्याह—यदि त्विति। सेयं सूक्ष्मेक्षिका परैरिह कृतेति तन्निर्बन्धेन वार्त्तिककृताऽपि कृतेति ॥१॥

उद्देशक्रमानुरोधेन वादलक्षणानन्तरं जल्पं लक्षयति—

यथो˚ ˚ल्पः (सू० २)॥ अत्रापि समानजातीयाभ्यां वादवितण्डाभ्यामसमानजातीयेभ्यः प्रमाणादिभ्यो व्यवच्छेदः सूत्रार्थः।

(१) 'प्रतिसाधनमुक्तम्' इति ख।

न्यायवार्त्तिकम्

छलजातिनिग्रहस्थानसाधनोपालम्भश्च जल्प इति। यथोक्तोपपन्न इति न युक्तम्, जल्पे निग्रहस्थाननियमस्यानभ्युपगमात्, यद्येवमुच्येत (१)प्रमाणतर्कसाधनोपालम्भः सिद्धान्ताविरुद्धः पञ्चावयवोपपन्नः पक्षप्रतिपक्षपरिग्रहः (२)छलजातिनिग्रहस्थानसाधनोपालम्भो जल्प इति, न युक्तमेवं भवितुम्। सिद्धान्ताविरुद्धः पञ्चावयवोपपन्न इति च पदयोरुपालम्भश्रवणात् समस्तनिग्रहस्थानप्रसक्तौ नियमार्थत्वात्—नियमार्थे एते पदे सिद्धान्ताविरुद्धः पञ्चावयवोपपन्न इति, जल्पे च नियन्तव्यं न किञ्चिदस्ति। तस्मान्नियमार्थे एते पदे नातिदेष्टव्ये इत्यतो न वक्तव्यं यथोक्तोपपन्न इति। नैष दोषः, (३)सम्भवादतिदेशात्—(४)यदत्र सम्बध्यते तदतिदिश्यते। किञ्च सम्बध्यते? प्रमाणतर्कसाधनोपालम्भ इत्येतत्।

न्यायवार्त्तिकतात्पर्यटीका

यथोक्तोपपन्नपदार्थं व्याचष्टे—समस्तमिति। चोदयति—यथोक्तोपपन्न इति न युक्तमिति। निग्रहस्थाननियमस्य प्रमाणतर्कसाधनोपालम्भाभिप्रायनियमस्य च जल्पेऽभावाद् भावे वा वादजल्पयोरभेदप्रसङ्गाद् वादलक्षणस्य जल्पव्यापकत्वेन (क)व्यभिचारप्रसङ्गाद् यथोक्तोपपन्न इत्ययुक्तमित्यर्थः। परिहरति—नैष दोष इति। उक्तमात्रमिह संभवाद् योग्यतासंभवाद् गृह्यते न त्वनुक्तोऽर्थलभ्यो नियमः। न ह्यसौ सूत्रपदश्रवणमात्रात् प्रतीयते, अपि तु तदर्थे प्रतीते तस्यान्यतः सिद्धौ सत्यां नियम्यत इति प्रमाणतर्कसाधनोपालम्भ इत्येतदतिदिश्यत इति उक्तमात्रोपलक्षणपरम्। तेन प्रमाणतर्कसाधनोपालम्भः पञ्चावयवोपपन्नः सिद्धान्ताविरुद्धः पक्षप्रतिपक्षपरिग्रह इत्येतस्य वादपदलक्ष्यवर्जं समस्तस्य लक्षणस्यातिदेशः,

वृत्तिः

(वृ०) जल्पं लक्षयति—(यथोक्तोपपन्नेत्यादि)।

यथोक्तेषु यदुपपन्नं तेनोपपन्न इत्यर्थः। मध्यमपदलोपी समासः। तथा च प्रमाणतर्कसाधनोपालम्भः पक्षप्रतिपक्षपरिग्रह इत्यस्य योग्यतया परामर्शः, अन्यथा जल्पस्य वादविशेषत्वापत्तिः। प्रमाणतर्काभ्यां तद्रूपेण ज्ञाताभ्याम्, न तु ज्ञानेऽनाहार्यत्वं विवक्षितम् (५)आरोपितप्रमाणभावेनापि जल्पस्य निर्वाहात्। यद्यपि छलादिभिरुपालम्भ एव न तु साधनम्, तथाऽपि साधनस्य परकीयानुमानस्योपालम्भो यत्रेत्यर्थान्न दोषः। परपक्षदूषणे सति स्वपक्षसिद्धिरित्यतः साधने तदुपयोग इत्यन्ये।

---

(१) 'स न तर्कसाधनोपालम्भः' इति ख। (२) 'छलजातिनिग्रहस्थानोपालम्भो' इति ख। (३) 'सम्भवतोऽतिदेशात्' इत्यादर्शपुस्तकयोः पाठः। (४) 'यच' इति ख। (५) 'आरोपितप्रमाणाभावेनाऽऽभासेऽपि' इति आ-व०।

(क) जल्पे वादलक्षणात्मकहेतुसत्त्वे न तत्र जल्पेतरभेदात्मकसाध्यासत्त्वाद् व्यभिचार इत्यर्थः।

न्यायभाष्यम्

न खलु वै छलजातिनिग्रहस्थानैः साधनं कस्यचिदर्थस्य सम्भवति, प्रतिषेधार्थतैवैषां सामान्यलक्षणे विशेषलक्षणे च श्रूयते—'वचनविघातोऽर्थविकल्पोपपत्त्या छलम्' इति 'साधर्म्यवैधर्म्याभ्यां प्रत्यवस्थानं जातिः' 'विप्रतिपत्तिरप्रतिपत्तिश्च निग्रह-

न्यायवार्त्तिकम्

तस्माद् यथोक्तोपपन्न इति लक्षणमात्रस्यातिदेशः—यथाऽन्यत्र 'अनेकद्रव्यसमवायाद्रूपविशेषाच्च रूपोपलब्धि'रिति 'अनेन रसगन्धस्पर्शेषु ज्ञानं व्याख्यात'मिति(क) न स्वरूपविशेषोऽतिदिश्यत इति, अपि त्वनेकद्रव्यसमवायमात्रं स्वगतो विशेषः सामर्थ्यात्; तथेहापि यत् समर्थं तदतिदिश्यते, समर्थं च लक्षणम्, तस्मात तदतिदिश्यते। न नियमार्थे पदे, नियन्तव्यस्याभावात्।

अथवा यथोक्तोपपन्नेनोपपन्नो यथोक्तोपपन्नोपपन्न इति प्राप्ते गम्यमानत्वादेकस्योपपन्नशब्दस्य लोपः यथा गोरथ इति। केन पुनरयं गम्यत इति? उक्तं सामर्थ्येनेति। न हि नियमार्थयोः पदयोर्जल्पे सम्भवः, तस्मान्न ते अतिदिश्येते इति। भाष्यमिदानीं कथम्? न, सूत्रपाठानुक्रमज्ञापनार्थत्वाद्भाष्यस्य, एतस्मिन् सूत्रे यदुपपन्नं लक्षणत्वेन तदतिदिश्यत इति। छलजातिनिग्रहस्थानैर्न कस्यचित् साधनमुपालम्भो वा युक्तः, अयुक्तोत्तरत्वात्—छलं तावत् न

न्यायवार्त्तिकतात्पर्यटीका

नियमस्त्वार्थो न संबध्यत इति सिद्धम्। लक्षणमात्रस्येति उक्तमात्रस्य, नार्थस्य नापि लक्ष्यपदस्येत्यर्थः। अत्रैव दृष्टान्तमाह—यथाऽन्यत्र वैशेषिकतन्त्रे इति। न नियमार्थे पदे इत्युपलक्षणम्, न प्रमाणतर्कसाधनोपालम्भपदलभ्येऽभिप्रायनियम इत्यपि द्रष्टव्यम्।

पक्षान्तरमाह—अथवेति। यथा गोभिर्युक्तो रथो गोरथ इति युक्तपदलोप इति। न नियमार्थयोरिति एतदप्युपलक्षणं पूर्ववदेव। इह वादलक्षणं पठता भाष्यकारेण नियमोऽप्यतिदिष्ट इति मन्वानश्चोदयति—भाष्यमिदानीमिति। परिहरति—न सूत्रेति। जल्पलक्षणानुकूलो यः पाठक्रमस्ततोऽर्थस्वरूपमात्रं प्रतीयते न त्वार्थोऽर्थ इत्यर्थः। यदुपपन्नम् उक्तमात्रमित्यर्थः। तत्र भाष्यकारेण छलादीनां निषेधार्थतया साधनाङ्गभावमाक्षिप्य परपक्षविघातेन स्वपक्षरक्षणादङ्गभाव इति दर्शितम्, तदेतद्वार्त्तिककार आक्षिपति—छलजातिनिग्रहस्थानैरिति। तत् किं निग्रहस्थानान्यप्ययुक्तानि न चैतच्छक्यमित्यत आह—छलं तावदिति। छलजात्यो-

वृत्तिः

उभयपक्षस्थापनावत्त्वेन च विशेषणीयमतो वितण्डायां नातिव्याप्तिः। स प्रतिपक्षस्थापनाहीन इत्युत्तरसूत्रात् प्रकृते उभयपक्षस्थापनावत्त्वलाभः। स्थापनावत्त्वादेव च पञ्चावयवनियमोऽपि लभ्यते इति वदन्ति।

(क) वैशेषिकदर्शने चतुर्थेऽध्याये प्रथमाह्निकस्याष्टमनवमसूत्रे एते। अत्र द्वितीयसूत्रे 'अनेने'त्यत्र 'तेने'ति पाठभेदः।

न्यायभाष्यम्

स्थानम्' (अ० १ आ० २ सू० १०।१८।१६) इति। विशेषलक्षणेष्वपि यथास्वमिति। न चैतद्विजानीयात् प्रतिषेधार्थतयैवार्थं साधयन्तीति, छलजातिनिग्रहस्थानोपालम्भो जल्प इत्येवमप्युच्यमाने विज्ञायत एतदिति।

प्रमाणैः साधनोपालम्भयो(१)श्छलजातिनिग्रहस्थानानामङ्गभावः (२)स्वपक्षरक्षणार्थत्वात्। (३)न स्वतन्त्राणां साधनभावः—यत्तत्प्रमाणैरर्थस्य साधनं तत्र छलजातिनिग्रहस्थानानामङ्गभावो (४)रक्षणार्थत्वात्। तानि हि प्रयुज्यमानानि परपक्ष-

न्यायवार्त्तिकम्

साधनोपालम्भायालम्, कस्मात्? अयुक्तोत्तरत्वात, अयुक्तमुत्तरं छलम्, तन्न साधनोपालम्भायेति, एवं जातिः। अङ्गभाव इति चेत्,—अथापीदं स्यात् यत्तत् प्रमाणतर्कैः साधनं यो वा उपालम्भः तस्यैतानि प्रयुज्यमानानि छलजातिनिग्रहस्थानानि रक्षणार्थत्वादङ्गं भवन्तीति, एतदप्युक्तोत्तरत्वादनुपपन्नम्। किमर्थं तर्हि प्रयोगः—यद्येतानि छलजातिनिग्रहस्थानानि साधनोपालम्भयोर्न साधनमङ्गं वा किमर्थमेतेषामुपपादनमिति? साधनविघातार्थम्—साधनं

न्यायवार्त्तिकतात्पर्यटीका

राक्षिप्तयोः सम्पातायातानि निग्रहस्थानानीत्यभिप्रायः। भाष्योक्तं समाधिमाशङ्कते—अङ्गभाव इति। निराकरोति—एतदपीति। न हि सहस्रेणाप्यन्धैः पाटच्चरेभ्यो गृहं रक्ष्यत इत्यर्थः। एवमाक्षिप्ते पार्श्वस्थः पृच्छति किमर्थं तर्हीति। सिद्धान्तिन उत्तरं साधनेति। वादे तावद्

वृत्तिः

अत्र च छलादिभिः सर्वैरुपालम्भो न (५)विशेषणमव्याप्तेः अपि तु तद्योग्यतैव। योग्यतावच्छेदकं तु वादभिन्नकथात्वमेव। तत्र चोक्तवादत्वावच्छिन्नभेदस्तत्तद्वादभेदो वा विशेषणमिति।

छलेत्यादिना विजिगीषुकथात्वं बोध्यते। विजिगीषुर्हि छलादिकं करोति तथा चोभयपक्षस्थापनावती विजिगीषुकथा जल्प इत्यर्थ इत्यपि वदन्ति।

अत्र चायं क्रमः—वादिना स्वपक्षसाधनं प्रयुज्य नायं हेत्वाभासस्तल्लक्षणायोगादिति सामान्यतः, नायमसिद्ध इत्यादिविशेषतो वा (६)स्वपक्षदूषण उद्धृते प्रतिवादिना स्वस्याज्ञानादिनिरासाय परोक्तमनूद्य अनुक्तग्राह्याणामज्ञानाननुभाषणाप्रतिभानामसम्भवा-

(१) 'श्छलजातीनामङ्गभाव' इति आ ग०। 'छलादीनामङ्ग-' इति टि। (२) 'स्वपक्ष' इति नास्ति आ-पु०। (३) 'न स्वतन्त्राणाम्' इत्यारभ्य—'रक्षणार्थत्वात्' इत्यन्तः पाठो नास्ति वि-टि०। (४) 'स्वपक्षम्' इत्यधिकः पाठः भा-पु०। (५) 'विशेषणाय व्याप्ति' इति आ-व-पु०। (६) 'स्वपक्षदूषण उद्धृते' इति नास्ति आ-व-पु०।

न्यायभाष्यम्

विघातेन स्वपक्षं रक्षन्ति। तथा चोक्तं 'तत्त्वाध्यवसायसंरक्षणार्थं जल्पवितण्डे बीजप्ररोहसंरक्षणार्थं कण्टकशाखावरणवत्' (अ० ४ आ० २ सू० ५) इति। यश्चासौ प्रमाणैः प्रतिपक्षस्योपालम्भस्तस्य चैतानि प्रयुज्यमानानि प्रतिषेधविघातात् सहकारीणि भवन्ति। तदेवमङ्गीभूतानां छलादीनामुपादानं जल्पे, न स्वतन्त्राणां साधनभावः। उपालम्भे तु स्वातन्त्र्यमप्यस्तीति ॥ २ ॥

न्यायवार्त्तिकम्

विहनिष्यामीति अनया धियाऽपहृतः प्रवर्तते। यत्र चैतानि छलजातिनिग्रहस्थानानि प्रयुज्यन्ते न स वादः—न पुनरेतदभिधीयते छलजातिनिग्रहस्थानानि साधनमङ्गानि वेति, साधुसाधनोपादाने च परेणाऽऽकुलितबुद्धिः (१)छलादीनि प्रयुङ्क्ते कदाचिच्छलादिभिराकुलीकृतस्य पराजयोऽपि स्यात्, न पुनरेतानि तत्त्वबुभुत्सुना वक्तव्यानि, किं तु विजिगीषुणेति। सोऽयं पक्षप्रतिपक्षपरिग्रहश्छलजातिनिग्रहस्थानप्रयोगाप्रयोगाभ्यां भिद्यमानो वादो जल्पो वितण्डा च भवति।

न्यायवार्त्तिकतात्पर्यटीका

यद्यपि न साधनविघातसमर्थानि, तथाऽपि तेषां तत्त्वमविद्वान् एभिरस्य साधनं विहनिष्यामीत्यनया बुद्ध्या अपहृतः व्यामोहितः। तस्माद्वादे भ्रमेणोपादानमेषामित्यर्थः। यत्र त्वेषां तत्त्वं विद्वान् प्रवर्तते न स वादः, किं तु जल्पो वितण्डा वेत्याह—यत्र चैतानीति। ननु जल्पवितण्डयोः प्रयोगात् साधनमङ्गं वा स्यादत आह—न पुनरिति। ननु न यदि साधनमङ्गं वा, कस्मात्तर्हि जल्पवितण्डयोरेषां प्रयोग इत्यत आह—साधुसाधनोपादाने वेति। साधुसाधनो-

वृत्तिः

देवालाभे उच्यमानग्राह्याणामप्राप्तकालार्थान्तरनिरर्थकापार्थकानामलाभे, उक्तग्राह्याणां प्रतिज्ञाहानि-प्रतिज्ञान्तर-प्रतिज्ञाविरोध-प्रतिज्ञासन्न्यास-हेत्वन्तराविज्ञातार्थ-विक्षेप-मतानुज्ञान्यूनाधिक-पुनरुक्त-निरनुयोज्यानुयोगापसिद्धान्तानामलाभे, पर्यनुयोज्योपेक्षणस्य मध्यस्थोद्भाव्यत्वादेवानुपन्यासार्हतया यथासम्भवं हेत्वाभासैः (क)परोक्तं दूषयित्वा स्वपक्ष उपन्यसनीयः, ततो वादिना तृतीयकक्षाश्रितेन परोक्तमनूद्य स्वपक्षदूषणमुद्धृत्यानुक्तग्राह्योच्यमानग्राह्यहेत्वाभासातिरिक्तोक्तग्राह्याणामलाभे हेत्वाभासेन यथासम्भवं प्रतिवादिनः स्थापना दूषणीया, अन्यथा क्रमविपर्यासेऽप्राप्तकालम्, अनवसरे दूषणोद्भावने च निरनुयोज्यानुयोगः—यथा त्यक्ष्यसि चेत् प्रतिज्ञाहानिः विशेषयसि चेत् हेत्वन्तरमित्यादि प्रतिज्ञाहान्यादिवद् हेत्वाभासानामुक्तग्राह्यत्वाविशेषेऽपि अर्थदोषत्वेनाप्रधानत्वाच्चरममनुसन्धानमिति ॥ २ ॥

---

(१) 'छलवादी नियुङ्क्ते' इति ख।

(क) 'परोक्तम्' इतारभ्य '-सम्भवादेवालाभे' इतान्तं पाठं परित्यज्य तत्स्थाने 'परोक्त- सम्भवादेव लाभ' इत्येवं पाठः परिगृहीतः आ-पुस्तके।

(सू०)—स प्रतिपक्षस्थापनाहीनो वितण्डा ॥ ३ ॥

न्यायभाष्यम्

(भा०) स जल्पो वितण्डा भवति। किंविशेषणः? प्रतिपक्षस्थापनया हीनः। यौ तौ समानाधिकरणौ विरुद्धौ धर्मौ (१) पक्षावित्युक्तं तयोरेकतरं वैतण्डिको न स्थापयतीति परपक्षप्रतिषेधेनैव प्रवर्त्तत इति।

न्यायवार्त्तिकम्

अत्रापि विरुद्धौ धर्मावेकाधिकरणस्थाविति समानम्। विरुद्धयोर्धर्मयोरेकाधिकरणत्वानुपपत्तिरुभयस्वभावासम्भवात्—यदि विरुद्धावेकाधिकरणौ धर्मौ भवतः तदैकं वस्तूभयस्वभावं प्राप्तम्, न चैतदस्ति, तस्मान्न विरुद्धौ धर्मावेकाधिकरणाविति। न, अध्यारोपितस्वरूपधर्मप्रतिपत्त्या तदुपपत्तेः—एकस्तत्र धर्मः स्वरूपतः, एकस्तत्राध्यारोपितस्वरूपप्रवृत्तिः, तस्मादुभयधर्मा धर्मीति युक्तम्। एकधर्मिस्थौ विरुद्धार्थावित्येतदपि न बुध्यामहे, को विरुद्धार्थ इति। न, स्वरूपविपर्ययोपपत्तेः—स्वरूपमात्रविपर्ययो विरोधः, न पुनर्बाधा वध्यघातकभावो वेति ॥२॥

स प्रतिपक्षस्थापनाहीनो वितण्डा। प्रतिपक्षस्थापनाहीन इति यावदुक्तम्भवति द्वितीयपक्षवादी वैतण्डिको न कञ्चित् पक्षं स्थापयतीति।

न्यायवार्त्तिकतात्पर्यटीका

पादाने वादिना कृते परेण प्रतिवादिना जिगीषुणाकुलितबुद्धिर्द्राक् पारमार्थिकमुत्तरमप्रतिपद्यमानश्छलादीनि प्रयुङ्क्ते। किमर्थमित्यत आह—कदाचिदिति, यथाकथंचित् प्रयोगेण। तदनेन प्रकारेण तत्त्वसंरक्षणार्थत्वात् सदाचारः, न च शास्त्रकाराणां छलादिव्युत्पादनमसदृशम्, न च घटपटाद्यभिधानप्रसङ्गः, वाग्युद्धे तेषामप्रसङ्गादिति। (क) न बाधेति नैकेनापरं तदैवापोद्यत इत्यर्थः। शेषं सुगमम् ॥ २ ॥

उद्देशक्रमानुरोधेन जल्पानन्तरं वितण्डालक्षणमाह—

स० ण्डा (सू० ३)। पूर्ववादिपक्षापेक्षया प्रतिवादिन आत्मीय एव पक्षः प्रतिपक्षः, तस्य स्थापना साधनं (२) तया हीनः, तदनेन जल्पाद् व्यवच्छिनत्ति। तदेतदाह भाष्यकारः—स जल्प इति। तयोरेकतरं प्रतिवादी आत्मीयं पक्षं न स्थापयतीति। परपक्षप्रतिषेधेनेति तत्स्थापनाप्रतिषेधेनेत्यर्थः। स्यादेतद्—यथा प्रतिवादिनः पक्षो वादिपक्षापेक्षया प्रतिपक्षः एवं वादिपक्षोऽपि प्रतिवादिपक्षापेक्षया प्रतिपक्ष इत्युभयपक्षस्थापनाहीना वितण्डेति स्यादत आह वार्तिककारः—प्रतिपक्षस्थापनाहीन इति। प्रथमपक्षवादिनो हि स्थापनाया अभावे किं वैतण्डिक

(१) "पक्षावित्युक्तौ" इति टि। (२) 'यत्तया' इत्यादर्शपुस्तकयोः पाठः।

(क) "न पुनर्बाधा" इति वा० अंके पाठः।

न्यायभाष्यम्

अस्तु तर्हि स प्रतिपक्षहीनो वितण्डा ? यद्वै खलु तत्परप्रतिषेधलक्षणं वाक्यं स वैतण्डिकस्य पक्षः, (१) न त्वसौ साध्यं कञ्चिदर्थं प्रतिज्ञाय स्थापयतीति। तस्माद् यथान्यासमेवास्त्विति ॥ ३ ॥

न्यायवार्त्तिकम्

अपरे तु ब्रुवते—दूषणमात्रं वितण्डेति, दूषणमात्रमिति मात्रशब्दप्रयोगाद् वैतण्डिकस्य पक्षोऽपि नास्तीति। (२) अयुक्तं चैतत् चतुर्वर्गस्याभ्युपगमात्—दूषणमभ्युपगच्छन् दूष्यमभ्युपैति अयथार्थावबोधं प्रतिपद्यते प्रतिपादयितारं प्रतिपत्तारं च ; दूषणमात्राभ्युपगमे सति सर्वमेतन्न स्यात्। दूषणमात्राभ्युपगमाच्छेषमर्थतोऽवगम्यत इति ? वितण्डा वितण्डेत्येव वक्तव्यम्, यया वितण्ड्यते सा

न्यायवार्त्तिकतात्पर्यटीका

(३) आहन्ति ? न च पक्षः शक्य आहन्तुम्। तस्मात् प्रथमपक्षवादिनोऽस्ति स्थापनेति द्वितीय एव पक्षः स्थापनाहीन इति सामर्थ्याद् युक्तमिति। अत्र चोद्यभाष्यम् अस्तु तर्हीति। स्थापनाया अभावे स्थाप्यः पक्षो नास्ति, न ह्यन्यथा पक्षस्य पक्षत्वमिति भावः। परिहरति—यद्वै खलु तदिति। वैतण्डिकोऽपि हि वादी पारिशेष्यात् मत्पक्षः सेत्स्यतीति बुद्ध्या स्वपक्षमस्थापयन् परपक्षस्थापनामाहन्ति, तस्मात् परपक्षप्रतिषेधलक्षणं वाक्यम् अस्य पक्षः परपक्षनिषेधेन पारिशेष्यात् पक्षसिद्धिहेतुत्वादुपचारतः। तस्मादस्ति वैतण्डिकस्य पक्षः, न तु परपक्षप्रतिषेधादन्या स्थापना ; तेनास्य पक्षोऽस्ति नास्ति तु पक्षस्थापना। तदिदमुक्तम्—न कञ्चिदर्थं प्रतिज्ञाय स्थापयतीति। पक्षत्वं तु तद्योग्यतामात्रेण न तु स्थाप्यमानतयेति।

अस्तु तर्हीति भाष्यार्थमाह वार्त्तिककारः अपरे त्विति। तस्मात् प्रतिपक्षहीनो वितण्डेति वक्तव्यमित्यर्थः। परिहरति—अयुक्तं चैतदिति। न तावदस्थाप्यमानस्यापि स्थापनार्हतालक्षणा पक्षता न युज्यते, तस्मान्न वैतण्डिको दूषणादन्यत् किञ्चिदभ्युपगच्छतीति, (क) अनभ्युपगमात् पक्षोऽस्य नास्तीति वक्तव्यम्। तथा च चतुर्वर्गाभ्युपगमे विरोधोऽनभ्युपगमे वा नायं लौकिको न परीक्षक इति प्रसङ्ग इति भावः। (ख) प्रतिपादयितुरयथार्थावबोधं प्रतिपत्तारं

वृत्तिः

(वृ०) वितण्डां क्रमप्राप्तां लक्षयति—(स प्रतिपक्षेति)।

---

(१) "न" इत्यत्र "तन्" इति वि। (२) 'युक्तञ्चैतत् चतुर्थस्याभ्युपगमात्' इति ख। (३) अत्र "आहेति" इति क-पुस्तके पाठः।

(क) अनभ्युपगमादिति पक्षस्यापीत्यध्याहृतेनान्वयः। वक्तव्यमित्यत्र न वक्तव्यमिति वा पाठः। (ख) अत्र 'प्रतिपादयितु'रिति दर्शनेन वार्त्तिके 'प्रतिपादयितार'मित्यत्र 'प्रतिपादयितु'रिति पाठः टीकाकृत्सम्मत इति प्रतीयते। तथा च चतुर्वर्गः स्पष्टः। वार्त्तिके प्रतिपादयितारमित्यस्य सम्यक्त्वे दूषणं विहाय प्रकारान्तरेण वा चतुर्वर्ग उपपादनीयः।

न्यायभाष्यम्

(भा०) हेतुलक्षणाभावादहेतवो हेतुसामान्याद्धेतुवदाभासमानाः। त इमे—

(सू०)—सव्यभिचार-विरुद्ध-प्रकरणसम-साध्यसम-कालातीता हेत्वाभासाः ॥ ४ ॥

न्यायवार्त्तिकम्

वितण्डेत्यनुगतार्थया सञ्ज्ञयैव परप्रतिपत्तिविघातः क्रियत इति। तस्मात् यथान्यासमेवास्तु न्याय्यम् ॥३॥

हेतुलक्षणाभावादहेतवो हेतुसामान्याद्धेतुवदाभासमानाः, त इमे—

सव्यभिचार-विरुद्ध-प्रकरणसम-साध्यसमातीतकाला(क) हेत्वाभासाः। किं पुनर्हेतुभिरहेतूनां सामान्यं येन हेतुवदाभासन्त इति? प्रतिज्ञानन्तरं प्रयोगः सामान्यम्—यथैव हेतवः प्रतिज्ञानन्तरं प्रयुज्यन्ते एवं हेत्वाभासा अपीत्येव सामान्यम्। अन्यतमलिङ्गधर्मानु-

न्यायवार्त्तिकतात्पर्यटीका

वाऽऽत्मानमित्यर्थः। यस्तु मन्यते चतुर्वर्गाभ्युपगमेऽपि दूषणमात्रं वितण्डेत्येव वक्तव्यं लाघवायेति, तन्मतमुपन्यस्यातिप्रसङ्गापादनेन दूषयति—दूषणमात्रेति। समाख्यानिर्वचनसामर्थ्यादेव गम्यत इत्यर्थः। उपसंहरति—तस्मादिति। तदनेनार्थतो यद्वै खल्वित्यादि भाष्यं व्याख्यातम् ॥ ३ ॥

उद्देशक्रमानुरोधेन वितण्डानन्तरं हेत्वाभासेषु लक्षयितव्येष्वर्थाक्षिप्तसामान्यलक्षणमेषां विभागोद्देशपरं सूत्रम्—

सव्य० साः (सू० ४)। तद्व्याख्यानपरं भाष्यं समाख्यानिरुक्तिवशेन सामान्यलक्षणप्रतिपादकं वार्त्तिककारः पठति—हेतुलक्षणाभावादिति। पृच्छति—किं पुनरिति। न ह्यन्यस्यान्यत्वमात्रेण साधर्म्यम्, मा भूत्सर्वस्य सर्वसाधर्म्यमिति भावः। उत्तरं—प्रतिज्ञेति।

वृत्तिः

यद्यपि तच्छब्देन जल्पो न परामष्टुं शक्यते, जल्पस्य स्थापनाद्वयवतः प्रतिपक्षस्थापनाहीनत्वस्य विरुद्धत्वात्, तथाऽपि स्थापनाद्वयवत्त्वं विहाय जल्पैकदेशः परामृश्यते। प्रतिपक्षः द्वितीयपक्षः तथा च प्रतिपक्षस्थापनाहीना विजिगीषुकथा वितण्डेति। न च स्वस्य स्थापनीयाभावात् कथमियं कथा प्रवर्ततामिति वाच्यम्, परपक्षखण्डनेन जयस्यैवोद्देश्यत्वात्।

परे तु परपक्षखण्डनेनैव स्वपक्षस्यार्थादेव सिद्धेस्तत्साधनाभावेऽपि न प्रवृत्त्यनुपपत्तिरिति वदन्ति ॥ ३ ॥

समाप्तं कथाप्रकरणम्।

(क) "अतीतकाला" इत्यत्र 'कालातीता' इति सूत्रपाठः।

न्यायवार्त्तिकम्

विधानं वा—यद्वा यत्साधनस्य लिङ्गस्य त्रैविध्यं तदेकतमधर्मानुविधानम्, द्विलक्षणस्यान्यतरधर्मानुविधानं वा विवक्षितम्। साधकासाधकत्वे तु विशेषः, हेतोः साधकत्वं धर्मः, असाधकत्वं हेत्वाभासस्य। किं पुनस्तत्? समस्तलक्षणोपपत्तिरसमस्तलक्षणोपपत्तिश्च। कः पुनरस्य सूत्रस्यार्थः? विभागोद्देशो नियमार्थ इत्युक्तम् (क)। किं पुनर्विभागोद्देशेन नियन्तव्यम्? अनेकधा प्रसृतस्य हेतुहेत्वाभासस्य विस्तरः सङ्क्षेपश्च इति।

कियता पुनर्भेदेनायं हेतुहेत्वाभासः प्रसृत इति? काल-पुरुष-वस्तुभेदानुविधानेनापरिसंख्येयः, सामान्यतः साध्यवस्तूपग्रहेण हेतुहेत्वाभासभेदः प्रपञ्च्यमानः षट्सप्ततिशतम्। तत्र साध्यव्यापकधर्मभेदः षोडशधा। साध्यैकदेशवृत्तिधर्मोऽप्येवम्। एवं साध्यावृत्तिधर्मभेद इति। विशेषणविशेष्यासिद्धिभेदाच्चतुःषष्टिः। एवं समर्थासमर्थविशेषणविशेष्यभेदादिति।

तत्र साध्यव्यापकधर्मभेदानां षोडशानामुदाहरणानि। तत्र—

१। साध्यतज्जातीयान्यव्यापकः—प्रमेयत्वान्नित्योऽनित्यो वेति।

२। साध्यतज्जातीयव्यापको विपक्षैकदेशवृत्तिः—गौरयं विषाणित्वात्।

३। साध्यतज्जातीयव्यापको विपक्षावृत्तिः—अनित्यः शब्द उत्पत्तिधर्मकत्वात्।

४। साध्यव्यापकस्तज्जातीयावृत्तिर्विपक्षव्यापकः—नित्यः शब्द उत्पत्तिधर्मकत्वात्।

५। साध्यव्यापकस्तज्जातीयावृत्तिर्विपक्षैकदेशवृत्तिः—नित्यः शब्दः सामान्यविशेषवत्त्वे सत्यस्मदादिबाह्यकरणप्रत्यक्षत्वाद् द्व्यणुकवत्।

न्यायवार्त्तिकतात्पर्यटीका

प्रयोगगतं सामान्यमुक्त्वा प्रयोज्यगतमाह—अन्यतमेति। अबाधितविषयत्वासत्प्रतिपक्षितत्वे सती अप्यविवक्षित्वा त्रैलक्षण्यद्वैलक्षण्याभिधानं द्रष्टव्यम्। शेषमतिरोहितम्।

षट्सप्ततं शतं गणयति—तत्र साध्यव्यापकेति। एतस्यां त्रिषोडश्यां साध्यव्यापकसाध्यैकदेशवृत्तिधर्मभेदात् षोडशीद्वयं विशेषणविशेष्यासिद्धिभेदाच्चतुःषष्टिः। एवं समर्थासमर्थविशेषणभेदाच्चतुःषष्टिः। तदेतच्चतुःषष्टिद्वयमष्टाविंशतिकं शतं पूर्वया त्रिषोडश्या सह षट्सप्ततं शतम्। साध्यव्यापकानां धर्मविशेषाणामुदाहरणान्याह—तत्रेति। विपक्षव्याप्त्यव्याप्तिभ्यां प्रथमद्वितीयौ साधारणौ, तृतीयोऽन्वयव्यतिरेकी साध्यतज्जातीयव्यापको हेतुरेव। विपक्षव्याप्त्यव्याप्तिभ्यां

वृत्तिः

(वृ०)— क्रमप्राप्तान् हेत्वाभासान् लक्षयति विभजते च—(सव्यभिचारेति)। न चात्र लक्षणं न प्रतीयत इति वाच्यम्, हेत्वाभासशब्दस्य हेतुवदाभास-

(क) उक्तमिदं ३६ पृष्ठस्थवार्त्तिकस्य द्वितीयपंक्तौ।

न्यायवार्त्तिकम्

६। साध्यव्यापकस्तज्जातीयविपक्षावृत्ति (क) र्यथा—नित्यः शब्दः सामान्यविशेषवत्त्वे सति श्रावणत्वात् घटादिवत्।

७। साध्यव्यापकस्तज्जातीयैकदेशवृत्तिर्विपक्षव्यापकश्च—अगौरयं विषाणित्वात्।

८। साध्यव्यापकस्तज्जातीयविपक्षैकदेशवृत्तिः—नित्यः शब्दोऽस्पर्शवत्त्वात्।

९। साध्यव्यापकस्तज्जातीयैकदेशवृत्तिर्विपक्षावृत्तिः—अनित्यः शब्दः सामान्यविशेषवतोऽस्मदादिबाह्यकरणप्रत्यक्षत्वात्। सामान्यविशेषवत इति सामान्यविशेषसमवायानां निराकरणम्, अस्मदादिप्रत्यक्षत्वादिति परमाणूनाम्, बाह्यकरणप्रत्यक्षत्वादित्यात्मनः।

१०। साध्यतज्जातीयव्यापकोऽविद्यमानविपक्षः सिद्धान्तभेदेनैकान्तवादिनः—अनित्यः शब्द उत्पत्तिधर्मकत्वात्।

११। साध्यव्यापकस्तज्जातीयैकदेशवृत्तिरविद्यमानविपक्षः—अनित्यः शब्दो बाह्येन्द्रियप्रत्यक्षत्वात्।

१२। साध्यव्यापकस्तज्जातीयावृत्तिरविद्यमानविपक्षः—अनित्यः शब्दः श्रावणत्वात्।

१३। साध्यव्यापकोऽविद्यमानसजातीयो विपक्षव्यापकः—नित्यः शब्द उत्पत्तिधर्मकत्वात्।

१४। साध्यव्यापकोऽविद्यमानसजातीयो विपक्षैकदेशवृत्तिः—नित्यः शब्दो बाह्येन्द्रियप्रत्यक्षत्वात्।

१५। साध्यव्यापकोऽविद्यमानसजातीयो विपक्षावृत्तिः—नेदं निरात्मकं जीवच्छरीरम् (१) अनिन्द्रियाधिष्ठानत्वप्रसङ्गात्।

१६। पक्षव्यापकोऽविद्यमानसपक्षविपक्षः—सर्वं नित्यं प्रमेयत्वात्।

त एते पक्षव्यापकाः षोडश। एषां पञ्च हेतवः, शेषा हेत्वाभासाः, तत्रान्वयव्यतिरेकिणौ द्वौ विपक्षावृत्ती तृतीयनवमौ, एकान्तवादिनोऽन्वयिनावेव दशमैकादशौ, व्यतिरेकी पञ्चदश इति।

न्यायवार्त्तिकतात्पर्यटीका

चतुर्थपञ्चमौ विरुद्धौ हेत्वाभासौ। यत्र विपक्षे न वृत्तिस्तं दर्शयति—द्व्यणुकवदिति। (ख) षष्ठोऽविद्यमानसपक्षविपक्षोऽसाधारणः, अत एव घटादिवदिति। सप्तमाष्टमावसपक्षव्याप्त्यव्याप्तिभ्यां साधारणौ। नवमः सपक्षैकदेशवृत्तिरन्वयव्यतिरेकी हेतुरेव। दशमैकादशौ सपक्षव्याप्त्यव्याप्तिभ्यामन्वयिनौ हेतू। द्वादशस्तु अविद्यमानविपक्षोऽसाधारणः। त्रयोदशचतुर्दशौ त्वविद्यमानसपक्षौ विपक्षव्याप्त्यव्याप्तिभ्यां विरुद्धौ। पञ्चदशोऽपि व्यतिरेकी हेतुरेव। षोडशस्तु अविद्यमानविपक्षोऽसाधारणः।

---

(१) 'अनिन्द्रियाधिष्ठानकत्वप्रसङ्गात्' ख।

(क) तज्जातीयश्च विपक्षश्चेति द्वन्द्वः, तत्रावृत्तिरित्यर्थः। (ख) अत्र "षष्ठोऽविद्यमानः सपक्षविपक्षयोरसाधारणः" इति युक्तः पाठः।

न्यायवार्त्तिकम्

अथ साध्यैकदेशवृत्तयः—

१। साध्यैकदेशवृत्तिस्तज्जातीयविपक्षव्यापकः——पृथिव्यप्तेजोवाय्वाकाशानि अनित्यानि अगन्धवत्त्वादिति।

२। साध्यैकदेशवृत्तिस्तज्जातीयव्यापको विपक्षैकदेशवृत्तिश्च—सामान्यविशेषवदस्मदादि-बाह्यकरणप्रत्यक्षे वाङ्मनसे अनित्यत्वात्।

३। साध्यैकदेशवृत्तिस्तज्जातीयव्यापको विपक्षावृत्तिः—अनित्ये वाङ्मनसे उत्पत्तिधर्म-कत्वात्।

४। साध्यैकदेशवृत्तिस्तज्जातीयावृत्तिर्विपक्षव्यापकः—नित्ये वाङ्मनसे उत्पत्तिधर्मकत्वात्।

५। साध्यैकदेशवृत्तिस्तज्जातीयावृत्तिर्विपक्षैकदेशवृत्तिः—सामान्यविशेषवदस्मदादिबाह्यकरण-प्रत्यक्षे वाङ्मनसे नित्यत्वात्।

६। साध्यैकदेशवृत्तिस्तज्जातीयविपक्षावृत्तिः—अनित्यः शब्दो विभागजविभागासमवायि-कारणकत्वात्।

७। साध्यतज्जातीयैकदेशवृत्तिर्विपक्षव्यापकः—अनित्याः परमाणवोऽगन्धवत्त्वात्।

८। साध्यतज्जातीयविपक्षैकदेशवृत्तिः—अनित्ये वाङ्मनसे अमूर्तत्वात्।

९। साध्यतज्जातीयैकदेशवृत्तिर्विपक्षावृत्तिः—अनित्ये वाङ्मनसे सामान्यवतोऽस्मदादि-बाह्यकरणप्रत्यक्षत्वात्।

१०। साध्यैकदेशवृत्तिस्तज्जातीयव्यापकोऽविद्यमानविपक्षः सिद्धान्तभेदाश्रयेण—अनित्ये रूपविज्ञाने अमूर्तत्वात् वेदनादिवत् (१)।

११। (२) साध्यतज्जातीयैकदेशवृत्तिरविद्यमानविपक्षः—अनित्ये चक्षुर्विज्ञाने (३) अमूर्त-त्वात् रूपादिवदिति।

न्यायवार्त्तिकतात्पर्यटीका

यदि बाह्यकरणप्रत्यक्षे वाङ्मनसे इति साध्येत तदा नानित्यत्वं सपक्षव्यापकं स्यात्, सामान्ये बाह्यकरणप्रत्यक्षेऽभावात्, अतः साध्यधर्मं विशिनष्टि सामान्यविशेषवदिति। अनित्ये रूप-विज्ञाने अमूर्त्तत्वादिति, रूपविज्ञानस्कन्धातिरिक्तानां वेदनासंज्ञासंस्कारस्कन्धानामनित्यतया सपक्षाणां व्यापकममूर्तत्वमिति। तज्जातीयैकदेशवृत्तित्वममूर्तत्वस्य दर्शयितुं यत्र न वर्त्तते तत्पुरःसरमुदाहरणं रूपादिवदिति।

वृत्तिः

मानार्थकत्वेनैव तत्सूचनात्। सूचनाद्धि सूत्रम्, तथा हि पक्षसत्त्व-सपक्षसत्त्व-विपक्षासत्त्वा-बाधितत्वासत्प्रतिपक्षितत्वोपपन्नो हेतुर्गमकः, तद्वदाभासत इत्यत्र वत्यर्थः (४) तद्भिन्नत्वम्,

(१) अतःपरं क-पुस्तके (साध्यतज्जातीयैकदेशवृत्तिरविद्यमानविपक्षः—अनित्ये शब्दमनसी श्रावणत्वात् १०।) इत्येवम् अधिकं मुद्रितम्। (२) 'साध्यैकदेशावृत्तिरविद्यमानसजातिः' इति प्रामादिकः पाठः। (३) 'मूर्त्तत्वात्' इति क। (४) 'तद्भिन्नत्वे सति तद्धर्मवत्त्वम्' इति आ-च०।

न्यायवार्त्तिकम्

१२। साध्यैकदेशवृत्तिस्तज्जातीयावृत्तिरविद्यमानविपक्षः—अनित्ये (१)शब्दनभसी श्रावणत्वात्।

१३। साध्यैकदेशवृत्तिरविद्यमानसजातिर्विपक्षव्यापकः—(२)नित्ये वाङ्मनसे उत्पत्तिधर्मकत्वात्।

१४। साध्यैकदेशवृत्तिरविद्यमानसजातिर्विपक्षैकदेशावृत्तिश्च—(३)नित्ये चक्षुर्विज्ञाने मूर्तत्वात्।

१५। साध्यैकदेशवृत्तिरविद्यमानसजातिर्विपक्षावृत्तिश्च—नेदं निरात्मकं शरीरमनिन्द्रियाधिष्ठानत्वप्रसङ्गात्।

१६। साध्यैकदेशवृत्तिरविद्यमानसपक्षविपक्षः—सर्वमनित्यं मूर्तत्वादिति।

एते च साध्यैकदेशवृत्तयः षोडश यथोक्ताः सर्वे हेत्वाभासाः।

अथ साध्यावृत्तयः—

१। साध्यावृत्तिस्तज्जातीयविपक्षव्यापकः—अनित्या पृथिवी अगन्धवत्त्वात्।

२। साध्यावृत्तिस्तज्जातीयव्यापको विपक्षैकदेशवृत्तिश्च—अनित्यः शब्दोऽश्रावणत्वात्।

३। साध्यावृत्तिस्तज्जातीयव्यापको विपक्षावृत्तिः—अर्थः शब्दः अश्रोत्रग्राह्यसामान्यवत्त्वात्।

४। साध्यतज्जातीयावृत्तिर्विपक्षव्यापकः—अर्थः शब्दः असामान्यवत्त्वात्।

५। साध्यतज्जातीयावृत्ति(४)र्विपक्षवृत्तिश्च—कारणवान् शब्दोऽनर्थत्वात्।

६। साध्यतज्जातीयविपक्षावृत्तिः—नित्यः शब्दोऽसत्त्वात्।

७। साध्यावृत्तिस्तज्जातीयैकदेशवृत्तिर्विपक्षव्यापकः—अस्पर्शः शब्दो द्रव्यत्वात्।

८। साध्यावृत्तिस्तज्जातीयविपक्षैकदेशवृत्तिः—कारणवान् शब्दो मूर्तत्वात्।

९। साध्यावृत्तिस्तज्जातीयैकदेशवृत्तिर्विपक्षावृत्तिः—आश्रयवान् शब्दश्चाक्षुषत्वात्, औलूक्यपक्षे।

न्यायवार्त्तिकतात्पर्यटीका

अनित्यः शब्दोऽश्रावणत्वादिति नित्ये शब्दत्वे न वर्तते। अर्थः शब्द इति, शब्दो धर्मी, अर्थ इति साध्यो धर्मः, द्रव्यगुणकर्मणामन्यतम इत्यर्थः। यद्यश्रोत्रग्राह्यत्वादित्युच्येत ततः सामान्यादिष्वनर्थेषु विपक्षेष्वपि वर्तेत, अत उक्तम् अश्रोत्रग्राह्यसामान्यवत्त्वादिति, अश्रोत्रग्राह्यं च तत् सामान्यवच्चेति विग्रहः। ननु चाक्षुषत्वं न विपक्षावृत्ति समवायस्यानाश्रितस्य चाक्षुषत्वादत

वृत्तिः

तथा न पञ्चरूपोपपन्नत्वाभावे सति तद्रूपेण भासमान इति फलितार्थः। तत्र च लक्षणं

(१) 'शब्दमनसी' इति ख। (२) 'अनित्ये' इति ख। (३) 'नित्ये' इत्यत्र 'अनित्ये' इति क।
(४) 'विपक्षार्हत्तिश्च' इति ख।

न्यायवार्त्तिकम्

१० । साध्यावृत्तिस्तज्जातीयव्यापकोऽविद्यमानविपक्षः सिद्धान्तभेदाश्रयेण—अनित्यः शब्दोऽश्रावणत्वात् ।

११ । साध्यावृत्तिस्तज्जातीयैकदेशवृत्तिरविद्यमानविपक्षः—अनित्यः शब्दो मूर्त्तत्वात् ।

१२ । साध्यतज्जातीयावृत्तिरविद्यमानविपक्षः—अनित्यः शब्दोऽसत्त्वात् ।

१३ । साध्यावृत्तिरविद्यमानसजातिर्विपक्षव्यापकः—नित्यः शब्दोऽश्रावणत्वात् ।

१४ । साध्यावृत्तिरविद्यमानसजातिर्विपक्षैकदेशवृत्तिः—नित्यः शब्दो मूर्त्तत्वात् ।

१५ । साध्यावृत्तिरविद्यमानसजातिर्विपक्षावृत्तिः—नित्यः शब्दोऽसत्त्वात् ।

१६ । (१) साध्यावृत्तिरविद्यमानसजातिविपक्षः—अनित्यं सर्वमसत्त्वात् ।

त एते षोडश साध्यावृत्तयो हेत्वाभासाः । विशेषणविशेष्यासिद्धिभेदाच्चतुःषष्टिर्भवन्तीत्युक्तम्, तत्कथम् ? व्यापकाव्यापकविशेषणयोगात्—य एव साध्यव्यापकाः षोडश ये च पक्षैकदेशवृत्तयस्ते विशेषणविशेष्यासिद्धिभेदेन चतुःषष्टिर्भवन्तीति ।

तत्र व्यापकानां तावदुदाहरणानि—अनित्यः शब्दोऽनभिधेयत्वे सति प्रमेयत्वात्, विशेषणासिद्धः । प्रमेयत्वे सत्यनभिधेयत्वादिति विशेष्यासिद्धः । एवं सर्वेषु साध्यव्यापकेषु विशेषणविशेष्यासिद्धभेदो द्रष्टव्यः, तान्येव चोदाहरणानि । साध्यैकदेशवृत्तीनां तूदाहरणम्—पृथिव्यप्तेजोवाय्वाकाशान्यनित्यानि अनभिधेयत्वे सति अगन्धवत्त्वात्, विशेषणासिद्धः । अगन्धवत्त्वे सत्यनभिधेयत्वादिति विशेष्यासिद्धः । एवं सर्वेषु साध्यैकदेशवृत्तिषु । एवमसमर्थविशेषणासमर्थविशेष्याश्चतुःषष्टिरेव द्रष्टव्याः । यथा—अनित्यः शब्दः कृतकत्वे सति प्रमेयत्वात् प्रमेयत्वे सति कृतकत्वादिति । एवं शेषेषूदाहरणेषु । एवं सन्दिग्धविशेषणविशेष्यभेदा अपि द्रष्टव्याः । यथा

न्यायवार्त्तिकतात्पर्यटीका

उक्तम् औलूक्यपक्षे इति । सिद्धान्तभेद इति, सौत्रान्तिकानामित्यर्थः । असमर्थविशेष्यस्योदाहरणं—कृतकत्वे सति प्रमेयत्वादिति । असमर्थविशेषणस्योदाहरणं—प्रमेयत्वे सति कृतकत्वादिति । निरपेक्षं खलु कृतकत्वमनित्यत्वे साध्ये समर्थम्, प्रमेयत्वं त्वन्यापेक्षमसमर्थमित्यर्थः । तदेवं त्रिषोडश्या प्रकृत्याऽष्टचत्वारिंशद्भवन्ति हेत्वाभासाः, व्यापकाव्यापकभेदेन तु

वृत्तिः

सत्यन्तम्, तस्यैव दूषकतायामुपयोगात् । न चासाधकतायां पक्षसत्त्वाद्येकैकाभावस्यैव गमकत्वसम्भवेऽधिकवैयर्थ्यम्, एतेन (२) पञ्चान्यतमत्वं लक्षणमित्यपि प्रत्युक्तमिति वाच्यम्, (३) पञ्चान्यतमत्वावच्छिन्नाभावस्य पक्षसत्त्वाभावाद्यघटितत्वेन वैयर्थ्याभावात् ।

---

(१) 'साध्यावृत्तिरविद्यमानसमानविपक्षः' इत्यादर्शपुस्तकयोः पाठः । (२) 'पञ्चान्यत्वम्' इति आ०व० । (३) 'पञ्चत्वावच्छिन्नाभावस्य' इति आ-व० ।

न्यायवार्त्तिकम्

मयूरशब्दोऽयं षड्जादिमत्त्वे सति अवर्णात्मकत्वात्, अवर्णात्मकत्वे सति षड्जादिमत्त्वात्। त एते उभयपक्षसम्प्रतिपन्ना विद्यमानसाध्यधर्मा उदाहृता इति। एवमन्यतरासिद्धा इति व्यापकाव्यापकभेदेन द्वात्रिंशकं शतम्। ते च पुनर्व्यधिकरणसन्दिग्धासमर्थविशेषणविशेष्यभेदेन द्वानवतं शतम्। एवमप्रसिद्धाश्रयोभयान्यतरपक्षाप्रसिद्धा द्वात्रिंशकं शतम्, ते च पुनः पूर्ववदेव द्वानवतं शतम्, यथाऽग्निमान् देशो धूमवत्त्वात्, अस्ति चाऽऽत्मा इच्छादिगुणत्वात्। असमर्थाव्यापकासिद्धविशेषणानामुदाहरणम्—अनित्यः शब्दः प्रयत्नानन्तरीयकत्वे सति कृतकत्वात्।

न्यायवार्त्तिकतात्पर्यटीका

द्विषोडशी यदा विशेषणविशेष्यासिद्धा चोभयसम्प्रतिपन्नयाऽसमर्थविशेषणविशेष्यतया च उभयसम्प्रतिपन्नया संदिग्धविशेषणविशेष्यतया च उभयसम्प्रतिपन्नया विक्रियते तदा चतुःषष्टित्रयेण द्वानवतं शतं भवति। वाद्यसिद्धप्रतिवाद्यसिद्धतया उभयान्यतरसंदिग्धतया च चतुःषष्टिद्वयेनाष्टाविंशकं शतमपरम्। तदिदम् अन्यतरासिद्धा इत्यनेन वार्तिककृता सूचितम्, द्वाभ्यामूना त्रिंशद् द्वात्रिंशदिति कथंचिद्व्युत्पत्त्या। ते पुन(१)र्व्यापकाव्यापका व्यधिकरण-विशेषणविशेष्य-व्यधिकरणसंदिग्धविशेषणविशेष्य-व्यधिकरणासमर्थविशेषणविशेष्यभेदेन चतुःषष्टि-त्रयेण द्वानवतं शतमपरम्। एवमप्रसिद्धाश्रयविशेषण(२)विशेष्या उभयान्यतरपक्षाप्रसिद्धाऽष्टा-विंशकं शतम्। अत्रापि द्वात्रिंशकमिति पूर्ववद् व्याख्येयम्। अन्यतरमात्रमत्र विवक्षितं न तु वादि-प्रतिवादिभेदः। ते पुनरसिद्धाश्रयाः पूर्ववद्भेदेन व्यधिकरणविशेषणविशेष्य-संदिग्धविशेषणविशेष्या-समर्थविशेषणविशेष्यभेदेन चतुःषष्टित्रये सति द्वानवतं शतम्। तदेवमनन्तराभ्यां द्वानवतशताभ्यां शतत्रयं चतुरशीतं यत्तदेवाष्टाचत्वारिंशकशताभ्यां द्वानवतेन शतेन संपिण्डितं द्वात्रिंशदुत्तराष्टशती विकारभूता भवति, अष्टाचत्वारिंशत् प्रकृतयः पश्चान्निवेशनीया इति। उभयाप्रसिद्धाश्रयविशेष्य-मुदाहरति—यथाऽग्निमान् देशो धूमवत्त्वात्। उक्तं हि प्राग् यथा न देशोऽग्निमत्तया साध्योऽपि तु धूमविशेष एवेति। अन्यतरप्रसिद्धाश्रयोदाहरणमाह—अस्ति चाऽऽत्मा इच्छादिगुणत्वादिति। आश्रयासिद्धविशेषणादयोऽप्यूहनीयाः। असमर्थाव्यापकासिद्धविशेषणानामुदाहरणम्। असमर्थाश्च तेऽव्यापकाश्च व्यधिकरणतयाऽसिद्धाश्चेति विग्रहः। अनित्यः शब्दः प्रयत्ना-नन्तरीयकत्वे सति कृतकत्वादिति, कृतकत्वस्यैव विशेष्यस्य सामर्थ्यादसमर्थमनित्यत्वे प्रयत्नानन्तरीयकत्वम्, अव्यापकं च स्तनयित्नुशब्दानामव्यापकत्वाद्, व्यधिकरणतयाऽसिद्धं

वृत्तिः

वस्तुतस्तु पृथिवीतरेभ्यो भिद्यते स्पर्शवत्त्वात्प्रमेयमाकाशादित्यादौ सपक्षाद्यप्रसिद्धेर्न तस्य लक्षणत्वे तात्पर्यम्। परन्तु विपक्षासत्त्वसपक्षसत्त्वाभ्यामव्यभिचरितसामानाधिकरण्यं

(१) '-व्यापकव्यधि-' क। (२) '-विशेष्यते। उभया-' क।

न्यायवार्त्तिकम्

अव्यापकासमर्थविशेष्याणामुदाहरणम्—अनित्यः शब्दः (१) प्रत्ययभेदभेदित्वेनोपलभ्यमानत्वात्। व्यधिकरणविशेष्याणामुदाहरणम्—अस्ति प्रधानं भेदानामन्वयदर्शनात्। व्यधिकरणविशेषणानामुदाहरणम्—रूपादिशब्दाश्चन्दनशब्दादत्यन्ताभिन्नार्थाः समुदायसमुदाय्यसम्भवे सति तेन व्यपदेशात्। एतदेव व्यधिकरणविशेषणविशेष्यस्योदाहरणं विपर्ययेण।

(२) अन्यथासिद्धोदाहरणम्—अन्येषामभ्यासान्नित्यः शब्दः। सन्दिग्धाप्रसिद्धविशेषणाना-

न्यायवार्त्तिकतात्पर्यटीका

च कोष्ठवायुताल्वादिक्रियाया एव प्रयत्नानन्तरीयकत्वं न त्वाद्यस्यापि शब्दस्य प्रागेव तु श्रोत्रसमवायिन इति। कृतकत्वे सति प्रयत्नानन्तरीयकत्वादिति चासमर्थाव्यापकासिद्धविशेष्याणामुदाहरणं द्रष्टव्यम्। वैभवेन त्वसिद्धतावर्जमुदाहरति— अव्यापकासमर्थविशेष्याणामुदाहरणम् अनित्यः शब्दः प्रत्ययभेदभेदित्वेनोपलभ्यमानत्वाद्। उपलभ्यमानत्वं नित्येऽप्यस्तीति व्यभिचारादसमर्थम्। कारणभेदभेदित्वमेव तु विशेषणं समर्थमव्यभिचारादिति। केवल-व्यधिकरणविशेष्याणामुदाहरणम् अस्ति प्रधानं (क)भेदानां गोघटादीनां सुखदुःखमोहात्मकत्वेनान्वयदर्शनादिति। अन्वयदर्शनं भेदाधिकरणतया न प्रधानाधिकरणमिति, व्यधिकरणमिति व्यधिकरणं विशेष्यम्। केवल-व्यधिकरणविशेषणानामुदाहरणम्—रूपरसगन्धस्पर्शशब्दाश्चन्दनशब्दादत्यन्तं भिन्नार्थाः, समुदाय(३)समुदाय्यसम्भवे सति रूपादीनामर्थानां रूपादिशब्दानां च तेन चन्दनशब्देन व्यपदिश्यमानत्वात्। चन्दनस्य रूपादय इति समुदायसमुदाय्यसंभवो रूपादिषु व्यपदेशश्च रूपादिशब्देष्विति व्यधिकरणं विशेषणमित्यर्थः। तदनेन प्रपञ्चेन द्वात्रिंशदुत्तराऽष्टशती दर्शिता।

संप्रति द्वानवतशतयुग्मान्तरं दर्शयितुमुदाहरणमाह—अन्यथासिद्धोदाहरणं (ख) नित्यः शब्दोऽभ्यासात्। सेयं क्रियाऽभ्यावृत्तिर्यथा शब्दानित्यत्वेऽप्युपपद्यते तथा द्वितीये दर्शयिष्यते। सिंहावलोकितन्यायेन व्यधिकरणविशेष्यं संदिग्धविषेषणमुदाहरति—संदिग्धाप्रसिद्धेति। विशेषणशब्दः तन्त्रेण विशेषणे विशेष्ये च कर्मकरणसाधनतया प्रयुक्तो वर्तते

वृत्तिः

फलितार्थः। (४)पक्षसत्त्वसहितस्य चैतस्य विरोधित्वं त्रिभिर्लब्धम्, तेन व्याप्तिविशिष्टपक्षधर्मताविरोधित्वम्, चरमयोस्त्वनुमितिविरोधिरूपानवच्छिन्नत्वार्थकयोरभावादनुमितिविरोधित्वम्, तेनानुमितितत्कारणज्ञानान्यतरविरोधित्वं पर्यवस्यति ॥ ४ ॥

---

(१) "प्रत्ययभेदभेदित्वे सत्युपलभ्यमानत्वात्" इत्यादर्शपुस्तकपाठः। (२) 'अन्यथाविरुद्धोदाहरणम्' इति ख। (३) '-समुदाय्यसद्भावे' इत्यादर्शपुस्तकपाठः। (४) "पक्षसहितस्य" इति ल।

(क) आदर्शपुस्तकयोः भेदादीनामिति पाठः। (ख) वार्त्तिके तु—"अन्येषामभ्यासान्नित्यः शब्दः" इत्येवं पाठः।

न्यायवार्त्तिकम्

मुदाहरणम् यथा सन्दिह्यमान(१)धूमादिभावेऽग्निमान् देशो धूमवत्त्वे सति प्रकाशकत्वात्। विपर्ययेण सन्दिग्धविशेष्या वक्तव्याः। एवं सन्दिग्धाप्रसिद्धाप्रसिद्धा उभयान्यतरासिद्धा व्यापका-व्यापकभेदेन चतुःषष्टिर्भवन्तीति। ते च पुनः पूर्ववद्भेदेन शतत्रयं चतुरशीतम्। एवमन्यथा-सिद्धभेदो द्रष्टव्यः। एवं विरुद्धविशेषणविरुद्धविशेष्याश्च सर्वत्र द्रष्टव्या इति। एषां तूदाहरणानि हेत्वाभासवार्त्तिके द्रष्टव्यानि स्वयं चाभ्यूह्यानि। (२)त एते हेतवो हेत्वाभासाश्चासङ्कीर्णविशेषण-विशेष्यभेदेन द्वे सहस्रे द्वात्रिंशके। असिद्धादिसमुच्चयेमानन्तो भेद इति। साध्याबृत्तयस्त्वसत्त्वान्न

न्यायवार्त्तिकतात्पर्यटीका

तेन संदिग्धं विशेषणम् अप्रसिद्धं व्यधिकरणतया विशेष्यं येषां तेषामुदाहरणमित्यर्थः। यथा संदिह्यमानधूमादिभावेऽग्निमान् देशो धूमवत्त्वे सति प्रकाशकत्वात्, धूमवत्त्वं विशेषणं संदिग्धम्, प्रकाशकत्वं च विशेष्यं व्यधिकरणम्, तत् खलु वह्नेर्धर्मो न देशस्येति। अप्रसिद्धविशेषण-संदिग्धविशेष्याणामुदाहरणं दर्शयति—विपर्ययेणेति। अप्रसिद्धेत्यपि द्रष्टव्यम्, अग्निमान् देशः प्रकाशकत्वे सति धूमवत्त्वादिति। संप्रति द्वानवतशतयुग्मान्तरं दर्शयितुं भूमिरचनां करोति एवमिति। ये (क)संदिग्धासिद्धा (३)व्यापकाव्यापकभेदेन द्वात्रिंशत् त एवोभयान्यतरासिद्धा चतुःषष्टिर्भवन्ति। ततः किमित्यत आह—ते चतुःषष्टितामापन्नाः। पूर्ववद्भेदेन व्यधिकरणविशेषण-विशेष्य-संदिग्धविशेषणविशेष्यासमर्थविशेषणविशेष्यभेदेन तावच्चतुःषष्टित्रयमित्येकं द्वानवतं शतम्, अपरं चाश्रयासिद्धव्यधिकरणविशेषणविशेष्य-संदिग्धासमर्थविशेषणविशेष्यभेदेन द्वानवतं शतम्, तदिदं चतुरशीतं शतत्रयं संदिग्धासिद्धमाश्रित्य। अपरमपि द्वानवतशतयुग्मान्तरमन्यथासिद्ध-माश्रित्याऽऽह—एवमन्यथासिद्धभेदो द्रष्टव्यः। अन्यथासिद्धभेदोऽपि हि व्यधिकरणविशेषण-विशेष्यसंदिग्धासमर्थविशेषणविशेष्यभेदाच्चतुःषष्टित्रयमिति। पुनश्च स एवान्यथासिद्ध आश्रयासिद्ध-व्यधिकरणविशेषणविशेष्य-संदिग्धासमर्थविशेषणविशेष्यभेदाच्चतुःषष्टित्रयमिति द्वानवतशतयुग्मेन शतत्रयं चतुरशीतम्। अपरमपि द्वानवतशतयुग्ममाह—एवं विरुद्धविशेषणविरुद्धविशेष्याश्चेति। विरुद्धविशेष्या अपि हि व्यधिकरणविशेषणविशेष्यसंदिग्धासमर्थविशेषणविशेष्यभेदाच्चाऽऽश्रया-सिद्धव्यधिकरणविशेषणविशेष्य-संदिग्धासमर्थविशेषणविशेष्यभेदाच्च शतत्रयं चतुरशीतम्। तदेव-मेभिस्त्रिभिश्चतुरशीतैः शतत्रयैर्द्विपञ्चाशच्छतोत्तरं सहस्रमेकम्, द्वात्रिंशदुत्तरयाऽष्टशत्या सहस्रमेकं चतुरशीतिसहिता च नवशती, तदेवं प्रकृतिभूताष्टचत्वारिंशत्प्रक्षेपेण संपिण्डितं (४)द्वात्रिंशे द्वे सहस्रे भवत इति।

---

(१) "धूमादिभावो" इति आदर्शपुस्तकपाठः। (२) "त एतेऽहेतवो" इति ख। (३) "व्यापक-भेदेन" इति ग। (४) "द्वे सहस्रे द्वात्रिंशके" इति वार्त्तिके पाठः।

(क) एतेन वार्त्तिके सन्दिग्धाप्रसिद्धाप्रसिद्धा इति पाठः प्रामादिकः सम्भाव्यते।

न्यायभाष्यम्

तेषाम्—

न्यायवार्त्तिकम्

विशेषणयोगिन इत्यतो नाभिधीयन्ते। त एते विद्यमानसाध्यव्यापकाव्यापकधर्माः (१)प्रपञ्चत उक्ताः। तत्र मुख्यासिद्धभेदाः षोडश, (क)त एते पक्षावृत्तयः। अनैकान्तिकास्त्वसङ्कीर्णा मुख्यतः षडेव। साध्यव्यापकवर्गे विरुद्धाश्चत्वार एव। तस्मिन् अन्तिमस्तु पक्षमात्रधर्मत्वादनुपसंहार्यैव, शेषा हेत्वाभासाः। (२)तेऽसिद्धानैकान्तिकविरुद्धा अव्यापकासिद्धभेदेन सङ्कीर्णा उदाहरणेषु स्वयमूह्या इति।

केचित्तु विरुद्धाव्यभिचारिणमनैकान्तिकं वर्णयन्ति। तन्न असत्त्वात्—नायमस्तीत्युक्तम्। उपेत्य तस्य पञ्चविंशतिधा भेदं पञ्चानां हेतूनां (३)सरूपासरूपप्रतिबन्धात् पञ्च पञ्चका भवन्तीति। तेषां तु सर्वेषां नोदाहरणानि सन्तीति नोदाह्रियन्ते। त एते हेत्वाभासाः सङ्क्षेपेणैतावता भेदेन भेदवन्तः तेषां संग्रहार्थं हेत्वाभासानां विभागोद्देशार्थं सूत्रम्। लक्षणत एव पञ्चत्वं गम्यत इति चेत्—यान्येतानि पञ्च हेत्वाभासानां लक्षणसूत्राणि तैरेव पञ्चत्वं गम्यत इति नियमार्थं सूत्रमनर्थकम्। नानर्थकं लक्षणस्येतरेतरव्यवच्छेदकत्वात्—व्यवच्छेदकं लक्षणं न पुनर्नियमार्थम्, न हि नियमो लक्षणेन गम्यत इति ॥ ४ ॥

न्यायवार्त्तिकतात्पर्यटीका

तन्न असत्त्वादिति। पञ्चानां चतुर्णां वा रूपाणां संपत्तिरव्यभिचारः स चैकस्मिन् विषये विरुद्धयोर्न सम्भवति, अन्ततोऽसत्प्रतिपक्षस्यैव रूपस्याभावादित्यर्थः। पञ्चानां हेतूनामिति। सपक्षव्याप्त्यव्याप्तिभ्यामन्वयी द्वेधा, व्यतिरेक्येकः, अन्वयव्यतिरेक्यपि सपक्षव्याप्त्यव्याप्तिभ्यां द्वेधेति पञ्च हेतवः, पञ्चानां हेतूनां सरूपासरूपप्रतिबन्धात् पञ्च पञ्चका भवन्ति। सरूपः अन्वयिनोऽन्वयी, व्यतिरेकिणो व्यतिरेकी, अन्वयव्यतिरेकिणोऽन्वयव्यतिरेकी। असरूपश्चान्वय्यादेर्व्यतिरेक्यादिः, तेन प्रतिबन्धः। एतदुक्तं भवति अन्वय्यादावेकैकस्मिन् सरूपासरूपाः पञ्च हेतवः प्रतिबन्धका इति पञ्चभिः पञ्चकैः पञ्चविंशतिर्विरुद्धाव्यभिचारिण इति। चोदयति—लक्षणत एवेति। परिहरति—नानर्थकमिति। यत्परो हि शब्दस्तत्रासौ प्रमाणम्, समानासमानजातीयव्यवच्छेदकं च लक्षणसूत्रमिति तत्रैव प्रमाणम्, न त्वियत्तायाम् अतत्परत्वात्; न चासावार्थी सतोऽप्यनुपयोगाद् अलक्ष्यमाणत्वोपपत्तेः प्रमेयान्तरवदिति ॥ ४ ॥

तदेवमर्थाक्षिप्तसामान्यलक्षणं विभागं दर्शयित्वा विशेषलक्षणमवतारयति भाष्यकारः—तेषां हेत्वाभासानां मध्ये—

---

(१) "प्रपञ्च उक्तः" इति ख। (२) "तेऽसिद्धानैकान्तिका विरुद्धाव्यापकप्रसिद्धाव्यापकभेदेन" इति ख। (३) आदर्शपुस्तकद्वये—"सरूपासरूपप्रतिसन्धानात्" इति पाठः।

(क) क-वार्त्तिके 'ये (ते)' इत्येवं मुद्रितम्।

(सू०)—अनैकान्तिकः सव्यभिचारः ॥ ५ ॥

न्यायभाष्यम्

व्यभिचार एकत्राव्यवस्थितिः। सह व्यभिचारेण वर्त्तते इति सव्यभि-

न्यायवार्त्तिकम्

तेषाम् अनैकान्तिकः सव्यभिचारः। एकस्मिन्नन्ते नियत ऐकान्तिकः विपर्ययादनैकान्तिकः। कः पुनरयं व्यभिचारः ? साध्यतज्जातीयान्यवृत्तित्वम्—यत् खलु साध्यतज्जातीयवृत्तित्वे सति अन्यत्र वर्तते तद्व्यभिचारि, तद्वृत्तित्वं व्यभिचारः। सर्वोऽयं पदार्थभेदोऽन्तद्वयेऽवतिष्ठते अन्यत्र प्रमेयात्, नित्यश्चानित्यश्च व्यापकश्चाव्यापकश्च इत्येवमादिः। तत्र यो हेतुरुपात्त उभावन्तावाश्रित्य प्रवर्तते सोऽनैकान्तिकः।

न्यायवार्त्तिकतात्पर्यटीका

अनै—रः (सू० ५)। अत्र चानैकान्तिकसव्यभिचारशब्दौ पर्यायौ पुरुषभेदापेक्षया लक्ष्यलक्षणत्वेनावस्थितौ। यस्यानैकान्तिकपदार्थोऽप्रसिद्धः प्रसिद्धश्च सव्यभिचारपदार्थः तं प्रत्यनैकान्त इति लक्ष्यनिर्देशः सव्यभिचार इति लक्षणम्, यस्य तु सव्यभिचारपदार्थोऽप्रसिद्धः प्रसिद्धश्चानैकान्तिकपदार्थस्तं प्रति सव्यभिचार इति लक्ष्यनिर्देशः, अनैकान्तिक इति लक्षणम्। तत्र सव्यभिचार इति लक्षणपदं कक्षीकृत्याऽऽह भाष्यकारः—व्यभिचार एकत्राव्यवस्थितिः। एतदुक्तं भवति सव्यभिचारपदं निर्वचनसामर्थ्याल्लक्षणपदमिति। अनैकान्तिकपदलक्षणपक्षे भाष्यकारोक्तम्(क) अनित्यत्वमेकोऽन्त इत्यादि। तद्वार्त्तिककारः पर्युदासाभिप्रायेण व्याचष्टे—एकस्मिन्नन्ते नियत ऐकान्तिक इति। न हेतुरैकान्तिको येन तदन्यत्वेन हेत्वाभाससंग्रहादेकजातीयत्वेन हेत्वाभासानां विभागसूत्रविरोधः स्यात्, किन्त्वेकस्मिन्नन्ते यो नियतः स ऐकान्तिकस्तद्विपर्ययादनैकान्तिकोऽनियतः, (१)अनित्यत्वे नित्यत्वे चान्वयेन व्यतिरेकेण वोभयपक्षगामीति यावत्। न चैवंभूता विरुद्धादयो हेत्वाभासा इत्यभिप्रायः। तदेवमनैकान्तिकः सव्यभिचार इति स्थिते पृच्छति—कः पुनरिति। उत्तरम्—साध्यतज्जातीयेति। अवगतम् एव व्यभिचार इति, अनैकान्तिकपदवाच्यत्वमस्य कथमित्यत आह—सर्वोऽयमिति। प्रमेयपदार्थस्य तु सर्वव्यापिनो नान्तो व्यतिरेकोऽस्तीत्यत उक्तम् अन्यत्र प्रमेयादिति।

वृत्तिः

सव्यभिचारं लक्षयति—(अनैकान्तिकेति)।

एकस्य साध्यस्य तदभावस्य (२)वा योऽन्तः सहचारः अव्यभिचरितसहचार(३)

(१) 'अनित्यत्वे' इति क-पुस्तके नास्ति। (२) "च" इति ल०। (३) अत्र "सोऽन्तःसहचारोऽव्यभिचरितसहचार" इति आ-व-पुस्तकयोरधिकः पाठः।

(क) भाष्ये तु—"अनित्यत्वमथैकोऽन्तः" इति पाठः।

न्यायभाष्यम्

चारः। निदर्शनम्—नित्यः शब्दोऽस्पर्शत्वात्, स्पर्शवान् कुम्भोऽनित्यो दृष्टः न च

न्यायवार्त्तिकम्

अनैकान्तिक इति, किं पुनरयं पर्युदास उत प्रसज्यप्रतिषेध इति? किं चातः? यदि पर्युदासः सर्वानैकान्तिकता—ऐकान्तिकादन्योऽनैकान्तिक इति ब्रुवतां भवतां सर्वोऽनैकान्तिकः प्राप्तः, एवं चैको हेत्वाभास इति प्राप्तम्। अथ प्रसज्यप्रतिषेधः? तथाप्यैकान्तिकाभावोऽनैकान्तिक इति प्राप्तम्—तस्य व्यभिचारोऽर्थो नास्तीति अयुक्तोऽनैकान्तिको हेत्वाभासः। नायं पर्युदासपक्षः किन्तु प्रसज्यप्रतिषेधः। प्रसज्यप्रतिषेधोऽभाव इति चेत् नाभावो धर्मविशेषकत्वात्—धर्मोऽयं विशिष्यते (१)य एकान्ते सन्नियतो धर्म इति न भवति, न पुनरभावः—अभावे विशेषणविशेष्यासम्भवान्नाभाव (२)एकान्तसन्नियतो नानैकान्तिकः सन्नियतः। कथम्? अब्राह्मणवदिति—यथा अब्राह्मणशब्दः प्रसज्यप्रतिषेधविषयत्वेन प्रवर्तमानो यदुत्तरपदं तत्प्रतिषेधतीति न पुनरभावं प्रतिपादयति तथेहापीत्यदोषः।

उदाहरणम्—नित्यः शब्दः अस्पर्शत्वात्, शब्दस्यास्पर्शत्वमिति षष्ठ्या भेदः प्रदर्श्यते।

न्यायवार्त्तिकतात्पर्यटीका

अत्र बौद्धैर्यद्विकल्प्य दूषणमुक्तं तदुपन्यस्यति—अनैकान्तिक इति। किं पुनरयमिति। ऐकान्तिको हेतुस्ततोऽन्यः सर्व एव हेत्वाभास इत्यर्थः। द्वितीयं पक्षं दूषयति—अथ प्रसज्येति। तथाऽपि हेतोरभावोऽनैकान्तिको न चासौ सव्यभिचारः भावधर्मौ हि व्यभिचाराव्यभिचारौ नाभावे सर्वोपाख्याविरहिणि युज्येते इत्यर्थः। तदेतच्छाक्यदूषणं निराकरोति—नायं पर्युदासपक्ष इति। पर्युदासपक्षस्तावदस्माकमभिमत उपपन्नतरश्च, केवलमयं प्रसज्यप्रतिषेधवल्लभस्तमादाय सर्वं दूषयतीति तमेवाङ्गीकृत्य सर्वत्र ब्रूम इत्याशयवतः समाधानम्, न पुनरब्राह्मणादावपि वार्त्तिककारस्य प्रसज्यप्रतिषेधोऽभिमतः, किन्तु पर्युदास एवेति। अभ्युपेत्य तु तत्रापि प्रसज्यप्रतिषेधाभिधानम्, न हि प्रसज्यप्रतिषेधस्तुच्छोऽपि तु कस्यचिद्वस्तुनोऽभावेन विशिष्टं किञ्चिदेव वस्त्वित्यर्थः।

अत्र भाष्यं—निदर्शनं नित्यः शब्दोऽस्पर्शत्वादिति। वैधर्म्यं दृष्टान्तमाह—स्पर्शवानिति।

वृत्तिः

इत्याशयः, स चात्र व्याप्तिग्राहकः तथाचैकमात्रव्याप्तिग्राहकसहचारवानैकान्तिकस्तदन्योऽनैकान्तिकः।

---

(१) "य एते" इति ख। (२) "एकान्तः सन्नियतो" इति ख।

न्यायभाष्यम्

तथा स्पर्शवान् शब्दस्तस्मादस्पर्शत्वान्नित्यः शब्द इति। दृष्टान्ते स्पर्शवत्त्वमनित्यत्वं च धर्मौ न साध्यसाधनभूतौ (१)गृह्येते स्पर्शवांश्चाणुर्नित्यश्चेति। आत्मादौ च

न्यायवार्त्तिकम्

किं पुनस्तत्? स्पर्शानाश्रयस्य स्वात्मसत्तानुभवोऽस्पर्शत्वम् स्पर्शानाधारस्य सत्तासम्बन्धो वा, उभयं च शब्दव्यतिरिक्तमित्यर्थवती षष्ठी। कुतः पुनरेतत्? तद्भावे भावात् तदभावेऽभावादिति—यत् खलु स्पर्शवत् सत्तामनुभवति न तत्रास्पर्शशब्दः (२)प्रयुज्यत इति यच्चासत् तत्रापि न प्रयुज्यते यदस्पर्शं सत्तानुभावि तत्र प्रयुज्यत इति। वाक्यार्थाभ्यनुज्ञानाच्च पदार्थाभ्यनुज्ञा-स्पर्शानाधारस्य वस्तुनः सत्तासम्बन्ध इति यो वाक्यार्थः स एव(३) अस्पर्शत्वशब्दस्यार्थः। अतिदेशानुपपत्तिरनुक्तत्वादिति चेत्—अनैकान्तिकः सव्यभिचार इति न क्वचिदनैकान्तिक उक्तः इहानैकान्तिकग्रहणात् सव्यभिचारो गम्येत, अतो न युक्तमनैकान्तिकः सव्यभिचार इति। नेद-मयुक्तम्, लोकतस्तदधिगतेः—यत् पुनर्लोकतो न गम्यते तत्र शास्त्रमर्थवत्, यत् पुनर्लोकत एव गम्यते तत्रोपदेशोऽनर्थकः, लोकतश्चैतद्गम्यते उभयान्तसन्नियतोऽनैकान्तिक इति। यदि च यल्लोकतो गम्यते तदनुक्तमिति मन्यसे दुःखादीन्यपि देशयितव्यानि किमिदं दुःखमिति, तस्मात्

न्यायवार्त्तिकतात्पर्यटीका

अनित्यः कुम्भः स्पर्शवान् दृष्ट इति योजना। वैधर्म्ये व्याप्यव्यापकवैपरीत्यादिति वैधर्म्यव्यभि-चारमाह—दृष्टान्ते स्पर्शवत्त्वमनित्यत्वं च धर्मौ न साध्यसाधनभूतौ गृह्येते। न हि यदनित्यं तत्सर्वं स्पर्शवद् बुद्ध्यादिभिर्व्यभिचारात्। साधर्म्येऽप्येष व्यभिचारो वक्ष्यत इतीह नोक्तम्। ननु च मा भून्नित्यत्वं साध्यम् अस्पर्शत्वमेवास्तु नित्यत्वस्य साध्यमित्यत आह—स्पर्शवांश्चाणुर्नित्यश्चेति। तथाऽपि यदस्पर्शवन्न भवति तन्नित्यमपि न भवतीति वैधर्म्यं व्यभिचरति, स्पर्शवतोऽप्यणोर्नित्यत्वादित्यर्थः। साधर्म्यव्यभिचारमाह—आत्मादौ चेति

अत्र वार्तिककारोऽस्पर्शवत्त्वस्य हेतोः प्रश्नपूर्वकं स्वरूपं निष्कर्षति—किं पुनस्तत् अस्पर्शत्वं शब्दाद्भिन्नमित्यर्थः। सत्ताविशेषणो वा समवायः, समवायविशेषणा वा सत्ता, अन्वयव्यतिरेकाभ्या-मित्यर्थः। वाक्यार्थे च पदप्रयोगोऽस्पर्श इति (क)श्रोत्रियपदवदित्याह—वाक्यार्थ इति। अनैकान्तिक इति लक्षणपक्षे चोदयति—अतिदेशेति। यदि हि क्वचिच्छास्त्रप्रदेशे अनैकान्तिकः कथितस्तद्देशातिलङ्घनेनात्रातिदिश्यमानो विदितरूप इह सव्यभिचारं लक्षयेत्, न त्वस्य शास्त्र-प्रदेशे क्वचिदपि कीर्त्तनमस्तीत्यर्थः। परिहरति—नेदमिति, लोकप्रसिद्धत्वेनोक्तप्रायमित्यर्थः।

(१) "दृश्येते" इति ख०। (२) "प्रसज्यत" इति ख। (३) "अस्पर्शवत्त्वशब्दस्यार्थः" इत्यादर्शपुस्तकयोः पाठः।

(क) एकां शाखां सकल्पां वा षड्भिरङ्गैरधीत्य च।
षट्कर्मनिरतो विप्रः श्रोत्रियो नाम धर्मवित्॥ इति।

न्यायभाष्यम्

दृष्टान्ते 'उदाहरणसाधर्म्यात् साध्यसाधनं हेतुः' (अ० १ आ० १ सू० ३४) इति अस्पर्शत्वादिति हेतुर्नित्यत्वं व्यभिचरति, अस्पर्शा बुद्धिरनित्या चेति। एवं द्विविधेऽपि दृष्टान्ते व्यभिचारात् साध्यसाधनभावो नास्तीति लक्षणाभावादहेतुरिति।

(१)नित्यत्वमप्येकोऽन्तः अनित्यत्वमप्येकोऽन्तः एकस्मिन्नन्ते विद्यत इति ऐकान्तिकः (२)विपर्ययादनैकान्तिकः (३)उभयान्तव्यापकत्वादिति ॥ ५ ॥

न्यायवार्त्तिकम्

पेलवमेतदिति। अव्यापकत्वादलक्षणमेतदिति चेत्—अथापीदं स्यादनैकान्तिकलक्षणेन न सर्वोऽनैकान्तिको व्याप्यते यथा असाधारणमिति। न अनेनैव संग्रहात्। कथमिति? व्यावृत्तिद्वारेणाभिधीयमानोऽयमुभयान्तव्यावृत्तेरनैकान्तिक इति।

अपरे पुनः प्रकरणसममनैकान्तिक एवान्तर्भावयन्ति। कथमिति? अनित्य आत्मा शरीरादन्यत्वादिति शरीरादप्यन्यन्नित्यमनित्यं च दृष्टमतोऽनैकान्तिक इति। तैस्तु न लक्षणव्यभिचारोऽवगतो नोदाहरणव्यभिचार इति--अनैकान्तिकः सव्यभिचार इत्येतल्लक्षणं व्यभिचारिणः, यदि चानेन प्रकरणसमसंग्रहो भवति प्राप्तस्तर्हि लक्षणस्य व्यभिचारः, न पुनरुदाहरणव्यभिचारोऽनैकान्तिकलक्षणव्यभिचार इति। (क) लक्षणस्य तूभयं दोषः लक्ष्याव्याप्तिरलक्ष्यव्याप्तिश्चेति (ख) वक्ष्यमाणकं च प्रकरणसमस्य लक्षणमीक्षितव्यम् ॥ ५ ॥

न्यायवार्त्तिकतात्पर्यटीका

(४)अन्वयेनैवोभयान्तसन्नियतोऽनैकान्तिक इति मन्वानः शङ्कते—अव्यापकत्वादिति। परिहरति—व्यावृत्तीति। क्वचिदन्वयस्योभयान्तसंनियतता क्वचिद् व्यतिरेकस्येत्यर्थः। एकेषां मतमुपन्यस्यति—अपरे त्विति। दूषयति—तैस्त्विति। नोदाहरणे व्यभिचाराल्लक्षणव्यभिचारो भवति अन्यत्वात्। नो खलूदाहरणमाद्रियन्ते परीक्षकाः, किन्तु लक्षणमित्यर्थः ॥ ५ ॥

वृत्तिः

स च साधारणोऽसाधारणोऽनुपसंहारी चेति त्रिविधः। साधारणः (५)साध्यवदन्यवृत्तिः यथा शब्दो नित्यः निःस्पर्शत्वात्। न च विरुद्धसाङ्कर्यदोषः, उपधेयसङ्करेऽप्युपाधेरसङ्करात्। असाधारणः सपक्षविपक्षव्यावृत्तः, सपक्षः साध्यवत्त्वनिश्चयविषयः,

---

(१) "नित्यत्वमप्येक" इत्यारभ्य "व्यापकत्वात्" इत्यन्तभागः टि-पु० नास्ति। (२) "विपर्ययादनैकान्तिक" इति ग-पु० नास्ति। (३) "उभयत्र" इति आ०। (४) "अन्वयेनैवोभयान्तान्नियतो-" इति क (५) "साध्यवत्तदन्यवृत्तिः" इति आ-व।

(क) अत्र "न"कारस्यार्थसङ्गतिर्नास्ति इत्यादर्शे दृष्टः 'न लक्षणस्य तूभयम्' इत्याकारः परित्यक्तः।

(ख) 'वक्ष्यमाणक'मित्यत्र ककारः किमर्थक इत्यनुसन्धेयम्।

(सू०)—सिद्धान्तमभ्युपेत्य तद्विरोधी विरुद्धः ॥ ६ ॥

न्यायभाष्यम्

तं विरुणद्धीति तद्विरोधी अभ्युपेतं सिद्धान्तं व्याहन्तीति । यथा सोऽयं विकारो

न्यायवार्त्तिकम्

सिद्धान्तमभ्युपेत्य तद्विरोधी विरुद्ध इति । कोऽस्य सूत्रस्यार्थः ? अभ्युपगतार्थविरोधी विरुद्धः । एवं च सर्वानुक्तविरुद्धसंग्रहः--यावान् कश्चन विरुद्धभेदः सर्वोऽसावनेन संगृहीत इति, यस्मादभ्युपगतं बाधते अभ्युपगतेन बाध्यते । नन्वेवमेको हेत्वाभासो विरुद्धः प्राप्नोति ? सत्यमेक एव हेत्वाभासो विरुद्धस्तस्य तु सामान्येन विरुद्धत्वेन संगृहीतस्य पञ्चधोपदेशः यथा प्रमेयमित्यनेन षोडश पदार्था इति । पृथगभिधानं तर्हि विरुद्धस्य न कर्तव्यम् ?

न्यायवार्त्तिकतात्पर्यटीका

सिद्धा—द्धः (सू० ६) । पृच्छति—कोऽस्य सूत्रस्येति । न खलु हेतुरचेतनः सिद्धान्तमभ्युपगच्छति, यश्चाभ्युपगच्छति चेतनो नासावन्यतमेन हेतुलक्षणेन युज्यते इति न हेत्वाभासः, न च पक्षः सिद्धान्त इति तद्विरोधी न विरुद्धः स्यादिति भावः । उत्तरम्—अभ्युपगतार्थविरोधी विरुद्धः । हेतुद्वारेण पुरुषस्याभ्युपगमो हेतावुपचरितः, अभ्युपगममात्रविवक्षया सिद्धान्तशब्दः प्रयुक्तो न पुनः सिद्धान्त एवेह विवक्षितः, तेन पक्षोऽभ्युपगमविषय इति तद्विरोधी हेत्वाभासः संगृहीतो भवति । विशेषविरुद्धस्य च न हेत्वाभासतेत्युक्तं भवति । न हि विशेषोऽभ्युपगमस्य विषयः, न खल्वयं प्रतिज्ञापदगोचरः, किन्तु प्रतिज्ञार्थस्य सिद्ध्यनुषङ्गीति नाभ्युपगमगोचर इति भावः । ईदृशस्य सूत्रव्याख्यानस्य फलमाह—एवं चेति । ईदृशं व्याख्यानमन्तरेणानुक्तस्य विरुद्धस्येत्यर्थः । अभ्युपगतेन बाध्यत इति, स्वरूपेण हेतुत्वेनेत्यर्थः । तदनेन तं विरुणद्धीत्यादिभाष्यं व्याख्यातम् । चोदयति—नन्वेवमिति । यदि हेतुत्वबाधाद्विरुद्धो हेतुः सव्यभिचारादयोऽपि विरुद्धाः, तेषामपि हेतुत्वं बाधितम्, अबाधे वा न हेत्वाभासा इति भावः । परिहरति—सत्यमेक एवेति । तादृशाविरुद्धत्वेन तुल्यत्वेऽप्यवान्तरभेदविवक्षया पञ्चत्वम्, यथा प्रमाणादीनां प्रमेयत्वेन तुल्यत्वेऽपि प्रमाणप्रमेयादीनामवान्तरभेदविवक्षया षोडशत्वम्,

वृत्तिः

यथा शब्दो नित्यः शब्दत्वादित्यादौ । अनुपसंहारी च केवलान्वयिधर्मावच्छिन्नपक्षकः, यथा सर्वं नित्यं मेयत्वादित्यादि । अत्र च साध्यसन्देहाद् व्याप्तिग्रहो न भवतीत्याशयः ।

नव्यास्तु असाधारणः साध्यवदवृत्तिः, एतस्य साध्यसहचारग्रहप्रतिबन्धेन व्याप्तिग्रहप्रतिबन्धो दूषकताबीजम् । अनुपसंहारी च केवलान्वयिसाध्यकः, तस्य चात्यन्ताभावाप्रतियोगिसाध्यकत्वरूपस्य ज्ञानाद्व्यतिरेकव्याप्तिग्रहप्रतिबन्धो दूषकताबीजमित्याहुः ॥ ५ ॥

न्यायभाष्यम्

व्यक्तेरपैति नित्यत्वप्रतिषेधात्—(१)न नित्यो विकार उपपद्यते अपेतोऽपि विकारोऽस्ति विनाशप्रतिषेधात्। सोऽयं नित्यत्वप्रतिषेधादिति।(१)* हेतुर्व्यक्तेरपेतोऽपि विकारोऽस्तीत्यनेन स्वसिद्धान्तेन विरुध्यते। कथम्? व्यक्तिरात्मलाभः। अपायः प्रच्युतिः। यद्यात्मलाभात् प्रच्युतो विकारोऽस्ति नित्यत्वप्रतिषेधो नोपपद्यते। यद् व्यक्तेरपेतस्यापि विकारस्यास्तित्वं तत् खलु नित्यत्वमिति। नित्यत्वप्रतिषेधो

न्यायवार्त्तिकम्

न न कर्तव्यम्, सामान्यतोऽधिगतस्य विशेषज्ञापनार्थम्, यथा प्रमेयस्यैव। तत्रानैकान्तिकादिर्हेत्वाभासो द्विरूपोऽनैकान्तिकादिर्विरुद्धश्च। एतस्मिंस्तु विरुद्धतैवेत्यसाधारणतया तृणोलपादिन्यायेन निष्कृष्याभिधीयते। तस्मादनैकान्तिकादिषु निमित्तद्वयसमावेशात् संज्ञाद्वयसमावेशः विवक्षिततज्जातीयान्यवृत्तित्वेनानैकान्तिकत्वं हेतुविषयस्वरूपबाधारूपेण तु विरुद्धः। एवं सर्वत्र। उदाहरणम् (क)"तदेतत् त्रैलोक्यं व्यक्तेरपैति नित्यत्वप्रतिषेधात्, अपेतमप्यस्ति

न्यायवार्त्तिकतात्पर्यटीका

यथा वा तृणविशेष एव "असाधारणतया" तृणोलपतया व्याख्यायते एवं विरुद्धविशेष एवासावनैकान्तिकादिर्विरुद्धानैकान्तिकादिपदवाच्य इत्यर्थः। अत्रोदाहरणभाष्यम्—यथा सोऽयं विकार इति। महदहङ्कार-पञ्चतन्मात्रैकादशेन्द्रिय(ख)भूतसूक्ष्म-महाभूतानि विकारः, तस्य व्यक्तिः धर्म-लक्षणावस्थापरिणामः, तस्मादपाय इति। अत्र हेतुः नित्यत्वप्रतिषेधादिति। तस्य व्याख्यानम्—न नित्यो विकार उपपद्यत इति। अपेतोऽपि विकारोऽस्ति विनाशप्रतिषेधात्। सोऽयं नित्यत्वप्रतिषेधादिति हेतुर्व्यक्तेरपेतोऽपि विकारोऽस्तीत्यनेन स्वसिद्धान्तेन विरुध्यते। एतदेव प्रश्नपूर्वकं विभजते—कथमित्यादिना। विरोधस्य द्व्याश्रयत्वात् सिद्धान्तेन विरुध्यत इत्यभिसंधाय सिद्धान्तं व्याहन्तीत्युक्तमित्यर्थः। तदेतद्भाष्यं व्याचष्टे—उदाहरणमिति। ननु नित्यत्वप्रतिषेधादिति हेतुर्विनाशप्रतिषेधेन सिद्धान्तेन विरुध्यत इत्येवं ब्रुवाणः शास्त्रविरोधमापादयति, तथा च कालात्ययापदिष्टो हेत्वाभासो न विरुद्ध इत्यत आह—

वृत्तिः

क्रमप्राप्तं विरुद्धं लक्षयति—(सिद्धान्तेति)।

अत्र च सिद्धान्तं साध्यम्, प्रतिज्ञायां हि(२) सिद्धस्यान्ते साध्यमभिधीयते। तथा च

---

(१) "अपेतोऽप्यस्ति विनाशप्रतिषेधात्। न नित्यो विकार उपपद्यते इत्येवम्" इति ल-झा-ग-श्रा-पुस्तकेषु पाठः। (२) 'पञ्चस्य' इत्यधिकम्—श्रा।

(क) "तदेतत् त्रैलोक्यं व्यक्तेरपैति, कस्मात्? नित्यत्वप्रतिषेधात्, अपेतमप्यस्ति विनाशप्रतिषेधात्" इति योगसूत्रभाष्यम् (विभूतिपादे, १३श सूत्रे) न्यायभाष्ये तु अक्षरगतो विशेष इति।

(ख) अत्र भूतसूक्ष्मपदं पञ्चतन्मात्रपदस्य व्याख्यानरूपं प्रमादाद् ग्रन्थमध्येऽन्तर्भूतमिति प्रतिभाति।

न्यायभाष्यम्

नाम विकारस्याऽऽत्मलाभात् प्रच्युतेरुपपत्तिः। यदात्मलाभात् प्रच्यवते तदनित्यं दृष्टम्, यदस्ति न तदात्मलाभात् प्रच्यवते। अस्तित्वं चाऽऽत्मलाभात् प्रच्युतिरिति च विरुद्धावेतौ धर्मौ न सह सम्भवत इति। सोऽयं हेतुर्यं सिद्धान्तमाश्रित्य प्रवर्त्तते तमेव व्याहन्तीति ॥ ६ ॥

न्यायवार्त्तिकम्

विनाशप्रतिषेधात्"। विनाशप्रतिषेधादित्यनेन नित्यमभ्यनुज्ञातं नित्यत्वप्रतिषेधादित्यनेन प्रतिषिद्धम्। एते ते वाक्ये परस्परार्थबाधिते तयोश्च परस्परार्थबाधा विरोधः।

प्रतिज्ञाहेत्वोर्वा विरोधः—यो वा प्रतिज्ञाहेत्वोर्विरोधः स विरुद्धो हेत्वाभासः। ननु प्रतिज्ञाविरोधः पृथगुपदिष्टो निग्रहस्थाने, पृथक् क हेत्वाभासः, तस्मान्न प्रतिज्ञाहेत्वोर्विरोधो वक्तव्य इति; नैष दोषः उभयाश्रितत्वाद्विरोधस्य विवक्षातोऽन्यतरनिर्देशः—प्रतिज्ञाहेत्वोर्विरोध इति प्रतिज्ञाहेतू आश्रित्य उभयाश्रितो भवति, तत्र यदा प्रतिज्ञया विरोधो विवक्षितस्तदा प्रतिज्ञाविरोध

न्यायवार्त्तिकतात्पर्यटीका

एते ते वाक्ये परस्परार्थबाधिते इति। दृढतरप्रमाणबाधितो हि हेतुः कालात्ययापदिष्टो भवति, यथा ब्राह्मणेन सुरा पेया द्रवद्रव्यत्वात् क्षीरवदिति हेतुः

गौडी पैष्टी च माध्वी च विज्ञेया त्रिविधा सुरा।
यथैवैका तथा सर्वा न पेया ब्रह्मवादिभिः॥

इत्यादिभिरागमैरतिदृढैर्बाधितः कालात्ययापदिष्टतया हेत्वाभासो भवति। प्रकृते वाक्ये परस्परविरुद्धार्थतया न प्रतिष्ठां लभेते, न पुनरन्यतरदन्यतरेण शक्यं बाधितुं द्वयोस्तुल्यबलत्वात्। तस्मान्नायं कालात्ययापदिष्ट इत्यर्थः।

व्याख्यान्तरमाह—प्रतिज्ञाहेत्वोर्वा विरोध इति। सोऽयं विकारो व्यक्तेरपैतीति प्रतिज्ञा नित्यत्वप्रतिषेधादिति हेतुना विरुध्यते। व्यक्तिमात्रादपैति न तु विनश्यतीति हि प्रतिज्ञार्थः अपेतोऽप्यस्ति विनाशप्रतिषेधादित्यनेन व्याख्यातः। तथा च व्यक्तेरपैतीत्यनेन विकारस्य नित्यत्वं प्रतिज्ञातं नित्यत्वप्रतिषेधादित्यनेन हेतुना विरुद्धं भवति। स्वसिद्धान्तेनेति स्वपक्षेणेत्यर्थः। अत्र ऽर्थे सुगमं भाष्यम्। अत्र वार्त्तिककारश्चोदयति—ननु प्रतिज्ञाविरोध इति। प्रतिज्ञाहेत्वोर्विरोध इत्यर्थः। परिहरति—नैष दोष इति। प्रतिज्ञाश्रितत्वं विरोधस्य विवक्षित्वा

वृत्तिः

साध्यमभ्युपेत्य उद्दिश्य प्रयुक्तस्तद्विरोधी साध्याभावव्याप्त इति फलितार्थः, यथा वह्निमान् ह्रदत्वादिति। एतस्य साध्याभावानुमितिसामग्रीत्वेन साध्यानुमितिप्रतिबन्धो

(सू०)—यस्मात् प्रकरणचिन्ता स निर्णयार्थमपदिष्टः प्रकरणसमः ॥ ७ ॥

न्यायभाष्यम्

विमर्शाधिष्ठानौ पक्षप्रतिपक्षावुभावनवसितौ प्रकरणम्, तस्य चिन्ता विमर्शात्प्रभृति

न्यायवार्त्तिकम्

इत्युच्यते, यदा प्रतिज्ञाया हेतुविरोधो हेतोर्वा प्रतिज्ञाविरोधकत्वं तदा विरुद्धो हेतुरिति, अतः प्रतिज्ञाविरोधो हेतुविरोधो वेत्यदोषः। हेतुविरोधोदाहरणम्—नित्यः शब्द उत्पत्तिधर्मकत्वात्, प्रतिज्ञाविरोधस्योदाहरणम्—नास्त्यात्मेति। प्रतिज्ञाहेतुविरोधोदाहरणम्–(क) गुणव्यतिरिक्तं द्रव्यम् अर्थान्तरस्यानुपलब्धेः। हेतुविरोधोदाहरणम्—नास्त्येको भावः समूहे भावशब्दप्रयोगादिति, समूह इति ब्रुवाणेनैकोऽभ्युपगतो भावो भवति, एकसमुच्चयो हि समूह इति ॥ ६ ॥

यस्मात् प्रकरणचिन्ता स निर्णयार्थमपदिष्टः प्रकरणसमः। कस्मात् प्रकरणचिन्ता ?

न्यायवार्त्तिकतात्पर्यटीका

निग्रहस्थानेषु प्रतिज्ञाविरोधस्योपादानम्, हेत्वाश्रितत्वं तु तस्यैव विरोधस्य विवक्षित्वा हेत्वाभासेऽन्तर्भाव इति। यदा प्रतिज्ञाया हेतुविरोध इति हेतोरप्यन्यतरासिद्धतया प्रतिज्ञातुल्यत्वाभिप्रायम्। यदि हेतुरुभयसिद्धो भवति तदा हेतोर्वा प्रतिज्ञाविरोधकत्वमिति। उपसंहरति—अत इति। (ख)हेतोर्विरोधोदाहरणम्, विरोधकत्वं विरोधः। शब्दस्योत्पत्तिधर्मकत्वं प्रमाणविनिश्चितं नित्यत्वप्रतिज्ञां बाधत इत्यर्थः। प्रसङ्गाद्धेत्वाभासातिरिक्तस्य प्रतिज्ञापदयोर्विरोधस्य निग्रहस्थानस्योदाहरणमाह—प्रतिज्ञाविरोधस्येति। तृतीयेऽध्याये (ग)चैष विरोध उपपादयिष्यते। हेतोरन्यतरासिद्धतया समानबलयोः प्रतिज्ञाहेत्वोर्विरोधोदाहरणं गुणेति। हेतुविरोधोदाहरणं नास्त्येको भाव इति। उत्पत्तिमत्त्वं ह्यन्यतरासिद्धमपि शक्यसाधनमिति प्रतिज्ञार्थं व्याहन्ति, समूहे भावशब्दप्रयोगादिति उभयसिद्धमेव प्रतिज्ञार्थं व्याहन्तीत्येतावता भेद इत्यर्थः ॥ ६ ॥

यस्मा—मः (सू० ७)। प्रकरणशब्दार्थमाह भाष्यकारः—विमर्शाधिष्ठानाविति।

वृत्तिः

दूषकताबीजम्। न च सत्प्रतिपक्षाविशेषः, तत्र हेत्वन्तरं साध्याभावसाधकमिह तु हेतुरेव साध्याभावसाधकः साध्यसाधकत्वेन त्वयोपन्यस्त इत्यशक्तिविशेषोन्नायकत्वेन विशेषात् ॥६॥

(क) प्रयोगोऽयं पञ्चमाध्यायस्य द्वितीयाह्निके चतुर्थसूत्रभाष्ये द्रष्टव्यः।

(ख) "हेतुविरोधोदाहरणम्" इति वार्तिके।

(ग) एष इति नास्त्यात्मेति प्रतिज्ञासम्बन्धीय इत्यर्थः। उपपादितोऽयं 'दर्शनस्पर्शनाभ्यामेकार्थग्रहणा'दिति प्रथमाह्निकप्रथमसूत्रोत्थापकवार्त्तिके।

न्यायभाष्यम्

प्राङ् निर्णयाद् यत्समीक्षणम्, सा जिज्ञासा यत्कृता स निर्णयार्थं प्रयुक्त उभयपक्षसाम्यात् प्रकरणमनतिवर्तमानः प्रकरणसमो निर्णयाय न प्रकल्पते।

प्रज्ञापनं तु अनित्यः शब्दो नित्यधर्मानुपलब्धेरिति, अनुपलभ्यमाननित्यधर्मकमनित्यं दृष्टं स्थाल्यादि। (१)नित्यः शब्दो वाऽनित्यधर्मानुपलब्धेः अनुपलभ्यमानानित्यधर्मकं नित्यं दृष्टमाकाशादि।

यत्र समानो धर्मः संशयकारणं हेतुत्वेनोपादीयते स संशयसमः सव्यभिचार एव।

न्यायवार्त्तिकम्

तत्त्वानुपलब्धेः,—यस्मादुपलब्धतत्त्वेऽर्थे निवर्तते चिन्ता तस्मात् सामान्येनाधिगतस्य या विशेषतोऽनुपलब्धिः सा प्रकरणचिन्तां प्रयोजयति। उदाहरणम्—नित्यः शब्दोऽनित्यधर्मानुप-

न्यायवार्त्तिकतात्पर्यटीका

विमर्शः संशयः, तस्य विषयौ। अनवसितौ अनिर्णीतौ, तादृशयोरेव पक्षप्रतिपक्षशब्दवाच्यत्वात्, प्रक्रियते साध्यत्वेनाधिक्रियते इति व्युत्पत्त्या प्रकरणम्। चिन्तापदं व्याचष्टे—तस्य प्रकरणस्य चिन्ता विमर्शात्प्रभृति प्राग् निर्णयात् समीक्षणम् आलोचनं जिज्ञासा। सा खलु तत्त्वानुपलब्ध्या कृता; नैव खल्वयं नित्यधर्मान्नित्यत्वाविनाभाविनोऽनित्यधर्मान् वा अनित्यत्वाविनाभाविन उपलभमानस्तत्र संदिग्धे (क)तच्च जिज्ञासते। सैव नित्यधर्मानुपलब्धिरनित्यधर्मानुपलब्धिर्वा विविक्ताभिसन्धितया वादिनां निर्णयायापदिश्यमाना प्रकरणसमो हेत्वाभासः। कुतः? उभयपक्षसाम्यात्, यथा नित्यत्वपक्षेऽनित्यधर्मानुपलब्धिरेवमनित्यपक्षेऽपि नित्यधर्मानुपलब्धिः। सेयं तत्त्वानुपलब्धिमात्रविवक्षयोभयपक्षसमा, प्रकरणसमा (ख) तु यथा प्रकरणमनिश्चायकमेवमियमपीत्यर्थः। व्युत्पत्तिमात्रं चैतत् प्रकरणसमपदस्य, प्रवृत्तिनिमित्तन्तु सत्प्रतिपक्षत्वम्, अन्यथाऽनैकान्तिकस्यापि प्रकरणसमत्वप्रसङ्गादिति। प्रज्ञापनं प्रज्ञाप्यतेऽनेनेति व्युत्पत्त्या निदर्शनमुक्तम्।

अनैकान्तिकत्वशङ्कां सत्प्रतिपक्षस्य व्यवच्छिनत्ति। यत्र समान इति, संशयेन समः

वृत्तिः

क्रमप्राप्तं प्रकरणसमं लक्षयति—(यस्मादिति)।

स हेतुः स्वसाध्यस्य परसाध्याभावस्य वा निर्णयार्थमपदिष्टः (२) प्रकरणसम उच्यते। स च क इत्याकाङ्क्षायामाह—यस्मात्प्रकरणचिन्तेति। 'प्रकरणं पक्षप्रतिपक्षौ'

(१) "नित्यः शब्दो" इत्यारभ्य "आकाशादि" इत्यन्तः पाठः भा-फ-ग-आ-पुस्तकेषु नास्ति। (२) अत्र "प्रयुक्त" इत्यधिकम् आ-व०।

(क) तदिति सन्दिग्धमित्यर्थः 'तदा' इति क-तात्पर्यपाठः। (ख) अत्र 'तु'कारो निरर्थक इति तच्छून्य एव पाठो युक्तः।

न्यायभाष्यम्

या तु विमर्शस्य विशेषापेक्षिता उभयपक्षविशेषानुपलब्धिश्च सा प्रकरणं प्रवर्त्तयति। (१)यथा शब्दे नित्यधर्मो नोपलभ्यते एवमनित्यधर्मोऽपि। सेयमुभयपक्षविशेषानुपलब्धिः

न्यायवार्त्तिकम्

लब्धेः, अत एव प्रकरणमित्यतो न हेतुः। नन्वयं साध्याविशिष्ट एव यथा शब्दस्य नित्यत्वं साध्यं तथाऽनित्यधर्मानुपलब्धिरपीति ; नाविशिष्टः तस्यैव प्रकरणप्रवृत्तिहेतोर्धर्मस्य हेतुत्वेनोपादानात्—यत्र साध्येन समानो धर्मो हेतुत्वेनोपादीयते स साध्याविशिष्टः, यत्र पुनः प्रकरणप्रवृत्तिहेतुरेव स प्रकरणसमः।

ये तु संशयहेतुत्वात् प्रकरणसमानैकान्तिकयोरभेदं वर्णयन्ति तेषां प्रत्यक्षानैकान्तिकप्रकरणसमानामभेदः प्राप्नोति प्रत्यक्षमपि संशयकारणमिति। समूहः संशयस्य कारणमित्यतो

न्यायवार्त्तिकतात्पर्यटीका

अनिश्चायकत्वादिति। एतदुक्तं भवति न हि नित्यधर्मानुपलब्धिरुभयसिद्धे नित्येऽस्ति येन सव्यभिचारो भवेत्, नाप्यनित्यधर्मानुपलब्धिरुभयसम्मतेऽनित्येऽस्ति येन सव्यभिचारो भवेत्, अपि तु परस्परमनयोः सत्प्रतिपक्षतयैव हेत्वाभासत्वमिति। यस्मात्प्रकरणचिन्तेत्युक्तं सूत्रकृता, अत्र यस्मादर्थं प्रश्नपूर्वकं दर्शयति वार्त्तिककारः—कस्मादिति। कारणत्वं तत्त्वानुपलब्धेर्व्यतिरेकेण दर्शयति—यस्मादिति। अत एवेति तत्त्वानुपलब्धेरित्यर्थः। चोदयति—नन्वयमिति। पक्षप्रतिपक्षौ हि प्रकरणं तौ च साध्यौ ताभ्यां च समः साध्यसमः। तथा च साध्यसमाद् हेत्वाभासान्न पृथग् निर्देशः प्रकरणसमस्येत्यर्थः। परिहरति—नाविशिष्ट इति। यद्यपि प्रकरणसमशब्दो व्युत्पत्त्या साध्याविशिष्टेन समानार्थः, तथाऽपि प्रवृत्तिनिमित्तमस्य सत्प्रतिपक्षत्वम्। न च तत्त्वानुपलब्धिः स्वयमसिद्धा सा ह्युपलम्भाभावेन सुलभेति भावः।

परमतमनुभाष्यातिप्रसङ्गापादनेन दूषयति—ये तु संशयहेतुत्वादिति। चोदयति—समूह इति। यस्मिन् सति भवत्येव तत् कारणम्, समूहे सति च भवत्येवेति नैकैकस्मिन्, तस्मान्नैकैकं कारणमिति भावः। परिहरति—समूहः कारणमिति। न ह्यकारणानां समूहः

वृत्तिः

इति भाष्यम्। साध्यतदभाववन्ताविति तदर्थः। तथा च निर्णयार्थं प्रयुक्तो हेतुर्यत्र निर्णयं जनयितुमशक्तस्तुल्यबलेन परेण प्रतिबन्धात्, किन्तु धर्मिणः साध्यवत्त्वं तदभाववत्त्वं वेति 'चिन्तां' जिज्ञासां प्रवर्तयति, स प्रकरणसमः। यद्वा प्रकृष्टं करणं लिङ्गं परामर्शो वा, को हेतुरनयोः साधकः एतयोः कः परामर्शः प्रमेति वा यत्र जिज्ञासा भवतीत्यर्थः। यस्मादित्यादि तु वस्तुस्थितिमात्रम्।

---

(१) "यथा शब्दे" इत्यत आरभ्य "प्रवर्त्तयति" इत्यन्तभागो वि-पु० नास्ति।

न्यायभाष्यम्

प्रकरणचिन्तां प्रवर्त्तयति। कथम्? विपर्यये हि प्रकरणनिवृत्तेः—यदि नित्यधर्मः शब्दे गृह्येत न स्यात् प्रकरणम्, यदि वा अनित्यधर्मो गृह्येत एवमपि निवर्त्तेत प्रकरणम्। सोऽयं हेतुरुभौ पक्षौ प्रवर्त्तयन्नन्यतरस्य निर्णयाय न प्रकल्पते॥ ७॥

न्यायवार्त्तिकम्

न प्रत्यक्षे प्रसङ्गः—सामान्यदर्शनं विशेषाव्यवस्था विशेषस्मृतिश्च (क)समूह इति संशयस्य कारणम्, नैकं प्रत्यक्षमतो न (१)प्रत्यक्षे प्रसङ्गः। समूहः कारणमित्यभिधानादप्रतिषेधः—समूहः कारणमित्येवं ब्रुवता न प्रत्यक्षस्य संशयकारणत्वं प्रतिषिद्धं भवति,तस्मात् प्रसङ्गस्तदवस्थ एवेति।

उभयधर्मानुपलब्धावन्यतरधर्मोपादानं प्रकरणसमार्थः—यत्र खलूभयविशेषानुपलब्धिस्तत्रान्यतरविशेषस्योपादानं यत्प्रकरणापनोदाय स प्रकरणसमो हेत्वाभासः, उभयविशेषानुपलब्धेरभिधानाशक्यत्वात्—न ह्युभयविशेषाऽनुपलब्धिः शक्या दर्शयितुम्। शरीरादन्यत्वं तु न सूत्रार्थः—

न्यायवार्त्तिकतात्पर्यटीका

कारणं भवितुमर्हति अतिप्रसङ्गात्। न च समूहिवैलक्षण्यमन्तरेणाजानतः समूहस्य वैलक्षण्यम्, तस्मात्समूहिन एवान्योन्यसमवधानवन्तः कारणम्, तथा च प्रत्यक्षस्योपपन्नं संशयकारणत्वम्। न च यस्मिन् सति भवत्येव तत् कारणम् अपि तु यस्मिन् सत्येव न त्वसतीति क्षणभङ्गभङ्गे वक्ष्याम इति।

ननूभयधर्मानुपलब्धिरुभयपक्षसाधारणीति सव्यभिचार एवेत्यत आह—उभयधर्मानुपलब्धाविति। नोभयधर्मानुपलब्धिर्हेतुः, अपि तु एकधर्मानुपलब्धिः, न चासौ साधारणी, किं तु सत्प्रतिपक्षेत्यर्थः। उभयविशेषानुपलब्धेः प्रकरणसमत्वेन अभिधानाशक्यत्वात् प्रकरणसमस्योदाहरणान्तरं दूषयति—शरीरादन्यत्वं त्विति। परेषां किलोदाहरणं नित्य आत्मा शरीरादन्यत्वाद् आकाशवदिति। अत्र शरीरादन्यत्वमुपलभमानो यदा 'तत्त्वं' नित्यत्वमात्मनः प्रत्येति न हि तदा जिज्ञासितं नित्यत्वं प्रवर्तते। यदा तु 'तत्त्वं' नित्यत्वं नोपलभते शरीरादन्यत्वमुपलभमानोऽपि तदा प्रवर्तते। तस्मादन्वयव्यतिरेकाभ्यां तत्त्वानुपलब्धिरेव प्रकरणचिन्ताप्रवर्त्तिका न शरीरादन्यत्वम्, तस्मान्नैतत् प्रकरणसमस्योदाहरणम्, अपि तु तत्त्वानुपलब्धि-

वृत्तिः

लक्षणं तु तुल्यबलविरोधिपरामर्शकालीनपरामर्शविषयत्वम्, स्वसाध्यपरामर्शकालीनतुल्यबलविरोधिपरामर्शो वा। विरोधिपरामर्शस्य स्वहेतुनिष्ठत्वमेकज्ञानविषयत्वसम्बन्धेन, अन्यथा हेतोर्दुष्टत्वं न स्यात्। अयं च दशाविशेषे दोष इत्यतः सद्धेतोरपि विरोधिपरामर्शकाले दुष्टत्वमिष्टमेवेत्यवधेयम्॥ ७॥

---

(१) आदर्शपुस्तके 'प्रत्यक्षप्रसङ्ग' इति पाठः।

(क) 'समूह इति' इत्यत्र 'इति समूहः' इति पाठो मौलिकतया प्रतिभाति।

(सू०)—साध्याविशिष्टः साध्यत्वात् साध्यसमः ॥ ८ ॥

न्यायभाष्यम्

द्रव्यं छायेति साध्यम्, गतिमत्त्वादिति हेतुः साध्येनाविशिष्टः साधनीयत्वात्

न्यायवार्त्तिकम्

न ह्ययं शरीरादन्यत्वमुपलभमानोऽपि यदा तत्त्वमुपलभते तदा प्रवर्तत इति, यदा तत्त्वं नोपलभते शरीरादन्यत्वमुपलभमानोऽपि तदा प्रवर्तत इति। शरीरादन्यत्वं चानैकान्तिकम्, अतश्च न सूत्रार्थः ॥ ७ ॥

साध्याविशिष्टः साध्यत्वात् साध्यसमः। साध्येनाविशिष्टो यः साधनधर्मः साध्यवत्

न्यायवार्त्तिकतात्पर्यटीका

रेव। इतश्चैतन्न प्रकरणसमस्योदाहरणमित्याह—शरीरादन्यत्वं चानैकान्तिकम्। उपसंहरति—अतो न सूत्रार्थः न सूत्रविषयः। एवमन्यान्यपि सत्प्रतिपक्षोदाहरणान्यूहनीयानि ॥ ७ ॥

साध्या—मः (सू० ८)। अत्र साध्यसम इति लक्ष्यनिर्देशः, साध्याविशिष्ट इति लक्षणम्। तदनेन स्वरूपासिद्धैकदेशासिद्धाश्रयासिद्धान्यथासिद्धानां संग्रहः, तेषामसिद्धत्वेन साध्याविशिष्टत्वात्। अत्र चासिद्धः साध्यसम इति वक्तव्ये साध्याविशिष्टग्रहणमन्यतरासिद्धस्यापि सिद्धेः प्रागहेतुत्वज्ञापनार्थम्, अन्यथाऽत्यन्तासिद्ध एव साध्यसमो नान्यतरासिद्धः तस्य कदाचित् सिद्धेरिति भ्रान्तिः स्यात्, साध्याविशिष्टेन तु सोऽपि गृह्यत इति। नन्वेवं साध्याविशिष्टत्वेनान्यतरासिद्ध एव स्यान्नेतरे, तेषामसिद्धत्वेन साध्याविशेषाभावादित्यत उक्तम्—साध्यत्वादिति। यदि हि साध्यं नासिद्धं भवेत् साध्यत्वादेव च्यवेत, न खलु सिद्धं साध्यते। तस्मात् साध्यत्वादसिद्धता, सा च कस्यचित् सर्वदा, (क)कादाचित्की कस्यचिदिति सर्वेषामविशिष्टत्वमिति नाव्याप्तिः। नापि साध्यत्वस्यातिप्रसक्त्याऽतिव्याप्तिः हेत्वाभाससामान्यलक्षणापेक्षित्वात्तद्विशेषलक्षणस्येति सूत्रार्थः।

साधनीयत्वादिति च भाष्यगतं न साध्यत्वादित्यस्य व्याख्यानम्, अपि तु गतिमत्त्वस्यासिद्धत्वपरम्।

वृत्तिः

क्रमप्राप्तं साध्यसमं लक्षयति—(साध्येति)।

साध्येन वह्न्यादिनाऽविशिष्टः, कुत इत्यत आह—साध्यत्वादिति, साधनीयत्वादित्यर्थः। यथा हि साध्यं साधनीयं तथा हेतुरपि चेत् साध्यसम इत्युच्यते। अत एवासिद्ध इति व्यवह्रियते।

(क) "कादाचित्की न कस्यचि"दित्यादर्शपुस्तकपाठः प्रामादिकः।

न्यायभाष्यम्

साध्यसमः। (१) अयमप्यसिद्धत्वात् साध्यवत्प्रज्ञापयितव्यः। साध्यं तावदेतत् किं पुरुषवच्छायाऽपि गच्छति आहो स्विद् आवरकद्रव्ये संसर्पति आवरणसन्तानाद्-

न्यायवार्त्तिकम्

प्रज्ञापयितव्यः स साध्यसमो हेत्वाभासः। तस्योदाहरणम्—द्रव्यं छाया गतिमत्त्वादिति। यथैव द्रव्यत्वं छायायाः साध्यं तथा गतिमत्त्वमपीति। गतिमत्त्वं देशान्तरदर्शनादिति चेत्—अथापीदं स्यात् गतिमतीयं छाया देशान्तरे दर्शनादिति, यत् खलु देशान्तरेषूपलभ्यते तद् गतिमत् यथा कुम्भः, तथा छाया, तस्माद् गतिमतीति। नाश्रयासिद्धत्वात्,—एवमप्याश्रयासिद्धो हेतुः, सति द्रव्यभावे छायाया देशान्तरे दर्शनं समर्थं स्यात् द्रव्यभावस्त्वसिद्धः, तस्मादाश्रया-सिद्धो हेतुः।

न्यायवार्त्तिकतात्पर्यटीका

अत्र वार्तिककारः सूत्रार्थं व्याचष्टे—साध्येनाविशिष्टो य इति। साध्येन व्यभिचारो मा भूदित्यत आह—साधनधर्म इति। हेत्वाभाससामान्यलक्षणयोगे सति एतल्लक्षणमिति न व्यभि-चार इति भावः। अत्र भाष्यकारेण स्वरूपासिद्धाश्रयासिद्धान्यथासिद्धानां साधारणमुदाहरणमुक्तं—द्रव्यं छाया गतिमत्त्वादिति। तद्विभजते वार्तिककारः—द्रव्यं छायेति। अत्र स्वरूपासिद्धतां तावदाह—यथैवेति। आश्रयासिद्धतामवतारयितुं गतिमत्त्वं छायायाः पञ्चावयवेन वाक्येन साधयति—गतिमत्त्वमिति। आश्रयासिद्धमाह—नाश्रयासिद्धत्वादिति। सत्या एव च्छायाया देशान्तरे दर्शनाद् योऽस्या गतिमत्त्वमनुमिनोति तं प्रत्याश्रयासिद्धं देशान्तरे दर्शनम्, तदाश्रया-सिद्धत्वात्। तदिदमुक्तं—सति द्रव्यभाव इति, सति सत्त्व इत्यर्थः। न तावच्छाया सामान्य-विशेषसमवायान्तर्भूता अनित्यत्वात्तस्याः। नापि कर्म, संयोगविभागासमवायिकारणत्वाभावात्। न गुणो द्रव्यासमवायात्। न मनोदिक्कालगुणः, तद्गुणानामप्रत्यक्षत्वात्। नाप्यात्मगुणो बाह्येन्द्रियप्रत्यक्षत्वात्। नापि नभोनभस्वतोः, तद्गुणानामचाक्षुषत्वात्। नापि तेजसः, तद्-विरोधित्वात् तत्सहचरितगुणान्तरानुपलब्धेश्च। अत एव न पृथिवीपाथसोरपि। अपि च तद्-गुणश्चाक्षुषो नालोकमन्तरेण शक्यग्रहः, छाया तु तमन्तरेण गृह्यते, तस्मिंस्तु सति न गृह्यते, इति दुर्घटम्। नापि द्रव्यम्, तद्धि पृथिव्यादीनामन्यतममेव भवेदन्यद्वा दशमम्। न तावदन्यतमम्,

वृत्तिः

अयं चाश्रयासिद्धि-स्वरूपासिद्धि-व्याप्यत्वासिद्धिभेदात् त्रिविधः। आश्रयासिद्धिश्च पक्षे पक्षतावच्छेदकाभावः, यथा काञ्चनमयः पर्वतो वह्निमानित्यादौ। स्वरूपासिद्धिश्च पक्षे हेतुतावच्छेदकावच्छिन्नस्याभावः, यथा ह्रदो द्रव्यं धूमादित्यादौ। व्याप्यत्वासिद्धि

(१) अत्र टि-आ-पु० "कथम्" इत्यधिकम्।

न्यायभाष्यम्

सन्निधिसन्तानोऽयं तेजसो गृह्यत इति। सर्पता खलु द्रव्येण(१) यो यस्तेजोभाग आव्रियते तस्य (२) तस्यासंन्निधिरेवाविच्छिन्नो गृह्यत इति। आवरणं तु प्राप्ति-प्रतिषेधः ॥ ८ ॥

न्यायवार्त्तिकम्

(क) अभ्युपेत्य देशान्तरे दर्शनं तस्यान्यथासिद्धेरसिद्धेः—यत्तु देशान्तरे दर्शनं छायायास्तदन्यथा भवति, अन्यथा भवन् नार्थं साधयति। कथमन्यथा? आवरणसन्तानादसन्निधिसन्तानस्तेजस इति। आवरके द्रव्ये सर्पति तेजसोऽसन्निधिविशिष्टं द्रव्यं यदुपलभ्यते तत्तु छायेत्युच्यते। सोऽयमसिद्धस्त्रेधा भवति—प्रज्ञापनीयधर्मसमान आश्रयासिद्धः अन्यथासिद्धश्चेति।

न्यायवार्त्तिकतात्पर्यटीका

तद्गुणानामनुपलब्धेः, नाप्यन्यद् रूपवदिति युज्यते तस्याद्रव्यस्य प्रत्यक्षत्वानुपपत्तेः, अस्पर्शवत्त्वादनारम्भकत्वेनानेकद्रव्यत्वाभावात्। तस्माद्भाऽभाव एव च्छाया न तु सतीति सिद्धम्।

यस्तु मन्यते मा भूच्छाया सती भवतु भाऽभावः तथाऽपि नाऽऽश्रयासिद्धता देशान्तरदर्शनस्य भाऽभावाश्रयत्वादेवेति तं प्रत्यभ्युपेत्यान्यथासिद्धतया साध्यसमत्वमापादयति—अभ्युपेत्येति। स्वाभाविको हि सम्बन्धो हेतोः साध्येन सह्यानुमानाङ्गं नौपाधिक इति विवेचितमनुमानलक्षणे (ख)। तदयमन्यथासिद्ध औपाधिकसम्बन्धो भवति हेत्वाभासः। सेयं हेतोरसिद्धिर्द्विधा स्वरूपतो हेतुत्वेन च। स्वरूपतोऽपि द्वेधा, स्वत आश्रयासिद्ध्या च। न चैतावता सव्यभिचारादीनामपि हेतुत्वासिद्धेरसिद्ध एवान्तर्भावः सव्यभिचारत्वादिविशेषणेन तेषामतो भेदात्, अन्यथासिद्धस्य तु तद्विशेषणत्वायोगिनो हेतुत्वासिद्धिमात्रेण साध्यसमेऽन्तर्भाव इति सर्वमवदातम्। संकलयति—सोऽयमिति। त एतेऽसिद्धभेदा उदाहरणभेदेष्वपि द्रष्टव्याः,

वृत्तिः

श्चाव्यभिचरितसामानाधिकरण्यस्याभावः। न च स्वरूपासिद्धेरेव सूत्राल्लक्ष्यत्वप्रतीतेरितरयोर्न लक्ष्यत्वमिति वाच्यम्, हेतुरितिपदं ह्यत्र पूरणीयम्, हेतुपदं च गमकहेतोर्व्याप्तिविशिष्टपक्षधर्मस्य वाचकम्। व्याप्तिविशिष्टपक्षधर्म इत्येव वा पूर्यताम्। तथा च तस्य किञ्चिदंशसाध्यत्वेनैव साध्यसमत्वम्।

---

(१) ल-भा-पुस्तकयोरत्र "ज्ञानात्" इत्यधिकम्। (२) "तस्यासन्निधिरविच्छिन्नो" इति वि-टि०।

(क) क-ख-वार्त्तिकपुस्तकयोः 'उपेत्य' इति पाठः।

(ख) १२९ पत्रे विवेचितमिदम्।

न्यायवार्त्तिकम्

नित्यः शब्दोऽस्पर्शवत्त्वादित्येतत् नोदाहरणम्, न ह्यस्पर्शत्वं शब्दस्य ज्ञापनीयं नाश्रयासिद्धं नान्यथासिद्धमिति। (१)यथा त्वस्माभिः सूत्रं वर्णितं (क) यथा चोदाहृतं तथाऽयमसम्बद्धो दोषः, न सूत्रार्थो विज्ञातो नाक्षरार्थो न हेत्वाभासो न दृष्टान्ताभास इति ॥ ८ ॥

न्यायवार्त्तिकतात्पर्यटीका

यथा नित्यः शब्दः चाक्षुषत्वादिति अयमसिद्धः। तनुभुवनादीनामकर्तेश्वरोऽशरीरत्वादित्याश्रयासिद्धः। स श्यामो मैत्रतनयत्वात् परिदृश्यमानमैत्रतनयस्तोमवदित्यन्यथासिद्धः, अन्नपानपरिणतिभेदनिबन्धनत्वाद्रूपभेदस्यान्यथासिद्धत्वमिति। अयमप्यसिद्धत्वादिति भाष्ये अपिशब्देनाऽऽश्रयस्य च्छायायाः सत्त्वेनासिद्धिः सूचिता।

अत्र भदन्तेनेदं साध्यसमलक्षणमुदाहरणान्तरं कल्पयित्वा दूषितम्। इदं किलास्योदाहरणं नित्यः शब्दोऽस्पर्शत्वाद् बुद्धिवत्। तदेतत् त्रिधाऽप्यसिद्धं न भवतीति दूषयित्वा भदन्तेन शङ्कितम् "अथ साध्येनाविशिष्टो दृष्टान्तो यस्मिन् स साध्याविशिष्टो हेत्वाभास इति बुद्धेर्दृष्टान्तस्य नित्यत्वेनासिद्धत्वा"दित्याशङ्क्य (ख) बहुव्रीह्यभावेन दूषितम्। तदेतत् सर्वमनभ्युपगमेन वार्त्तिककारो दूषयति—नित्यः शब्द इति। यद्येतत् नोदाहरणं किमुदाहरणं को वा सूत्रार्थ इत्यत आह—यथा त्वस्माभिरिति। "अयं" भदन्तोक्तः दोष (ग) इत्यर्थः। कस्मादित्यत आह—भदन्तेन सूत्रार्थो न विज्ञातः, न हि सव्यभिचारोऽनेन लक्ष्यते येन सव्यभिचारमस्पर्शवत्त्वमस्योदाहरणं स्यात्, किं तु साध्यसमः; नापि व्यधिकरणबहुव्रीहिदूषणेनाक्षरार्थो ज्ञातः। नापि बुद्धिवदिति दृष्टान्ताभासमेव हेत्वाभासं कुर्वता हेत्वाभासदृष्टान्ताभासौ ज्ञातौ भदन्तेनेत्यर्थः ॥ ८ ॥

वृत्तिः

अत एव साध्ये साध्यतावच्छेदकाभावः साधने साधनतावच्छेदकाभावश्च व्याप्यत्वासिद्धिः। यथा पक्षतावच्छेदकाभावपक्षतावच्छेदकवद्भेदादेरन्यतमत्वेनाश्रयासिद्धित्वम्, यथा च पक्षे हेत्वभावहेतुमद्भेदादेरन्यतमत्वेन स्वरूपासिद्धित्वम्, तथा साध्यतावच्छेदकाभावादेरन्यतमत्वेन व्याप्यत्वासिद्धित्वम्। त्रितयान्यतमत्वं चाऽसिद्धिसामान्यलक्षणम्।

नीलधूमत्वादेरपि व्याप्यत्वासिद्धावन्तर्भावं वदन्ति, तेषामयमाशयः—व्याप्तिर्हि साध्यसम्बन्धितावच्छेदकरूपा, गुरुधर्मश्च साध्यसम्बन्धितानवच्छेदकः, अतो नीलधूमत्वादेः साध्यसम्बन्धितानवच्छेदकत्वान्न व्याप्तिस्वरूपत्वम्। तथा च साध्यतावच्छेदकाभावादिरिव साधनतावच्छेदके व्याप्यतानवच्छेदकत्वमपि भवति व्याप्यत्वासिद्धिरिति ॥ ८ ॥

---

(१) "यथा चास्माभिः" इत्यादर्शयोः पाठः।

(क) 'तथा' इत्यादर्शपुस्तकपाठः। (ख) बहुव्रीह्यभावेनेति बहुव्रीहिपक्षेऽपि लक्षणासम्भवेनेत्यर्थः। अत्र भदन्तेनेत्यतः दूषितमित्यन्तग्रन्थे दूषि-शङ्कधात्वोरसकृत् प्रयोगात् लिपिकरप्रमादः सम्भाव्यते। (ग) 'इत्यन्वयः' इति सम्भाव्यते।

(सू०)—कालात्ययापदिष्टः कालातीतः ॥ ९ ॥

न्यायभाष्यम्

कालात्ययेन युक्तो यस्यार्थै(१)कदेशोऽपदिश्यमानस्य स कालात्ययापदिष्टः कालातीत इत्युच्यते। निदर्शनम्—नित्यः शब्दः संयोगव्यङ्ग्यत्वाद् रूपवत्।

न्यायवार्त्तिकम्

कालात्ययापदिष्टः कालातीतः। यस्यापदिश्यमानस्य कालात्ययेनैकदेशो युज्यते स एकदेशात्ययात् कालात्ययापदिष्टः कालातीत इत्युच्यते। उदाहरणम्—नित्यः शब्दः संयोग-

न्यायवार्त्तिकतात्पर्यटीका

काला—तः (सू० ९)॥ अत्र कालातीत इति लक्ष्यनिर्देशः कालात्ययापदिष्ट इति लक्षणम्। हेतोरपदेशस्य हि साध्यसन्देहविशिष्टः कालः। यथाहुः—"नानुपलब्धे न निर्णीते न्यायः प्रवर्त्तते, अपि तु संदिग्धे" इति। परेऽप्याहुः—"संदिग्धे हेतुवचना"दिति। यत्र च प्रत्यक्षानुमानागमविरोधः—अनुष्णोऽग्निर्द्रव्यत्वादिति, अश्रावणः शब्दो गुणत्वादिति (क) च, शुचि नरशिरःकपालं प्राण्यङ्गत्वादिति च, स सर्वः प्रमाणतो विपरीतनिर्णयेन सन्देहविशिष्टं कालमतिपततीति सोऽयं कालस्यात्ययेनापदिश्यमानः कालातीत इति। तथा चोदाहृतं "यत्तु प्रत्यक्षागमविरुद्धं न्यायाभासः सः" इत्यत्र वार्त्तिककृता। बाधाविनाभावयोः सहासंभव इति चात्र बौद्धानामाक्षेपोऽस्माभिः समाहितः(ख)। एवं व्यवस्थिते भाष्यकारः सूत्रं स्वपरमतश्लिष्टं व्याचष्टे—कालात्ययेन संशयकालात्ययेन युक्तो यस्यार्थैकदेशः, धर्मविशिष्टो हि धर्मी हेतोरपदिश्यमानस्यार्थः, स ह्यर्थ्यते हेतुना, तस्यैकदेशः साध्यधर्मः, स हि धर्मिणि बलवता प्रमाणेन तद्विपरीतधर्मनिर्णयं कुर्वता संशयकालमतिपातितः, स तादृशो हेतुः कालात्ययापदिष्टः कालातीत इति स्वमतेनास्यार्थः। अत्र च पूर्वमेवोदाहृतमिति पौनरुक्त्यान्नोदाहृतम्। परमते तु कालात्ययेन युक्तो यस्य हेतोरनुरूप (ग) एकदेशो हेतुविशेषणमिति यावत् स कालात्ययापदिष्ट इति योजना। परमतेनैव निदर्शनमाह—निदर्शनमिति। नित्यत्वं चात्रावस्थानमात्रमभिमत-

वृत्तिः

क्रमप्राप्तमतीतकालं लक्षयति—(कालात्ययेति)

अतीतकालस्य समानार्थकत्वात् कालातीत(२)शब्देनोक्तः। कालस्य साधनकालस्य अत्ययेऽभावेऽपदिष्टः प्रयुक्तो हेतुः। एतेन साध्याभाव(३)प्रमा लक्षणार्थ इति सूचितम्,

---

(१) "यदर्थस्यै-" इति भा०, "यस्यार्थस्यै-" इति ग०। (२) "शब्देनोक्तम्" इति ल०। (३) "-प्रमाण-" इति व०।

(क) 'च'कारोऽयं निष्प्रयोजनः। (ख) ३९ पृ० भाष्यवार्त्तिकतात्पर्यटीका द्रष्टव्या:। (ग) अनुरूप इत्यत्र अपदिष्ट इति पाठः सम्भाव्यते।

न्यायभाष्यम्

प्रागूर्ध्वं च व्यक्तेरवस्थितं रूपं प्रदीपघटसंयोगेन व्यज्यते, तथा च शब्दोऽप्यवस्थितो भेरीदण्डसंयोगेन व्यज्यते दारुपरशुसंयोगेन वा, तस्मात् संयोगव्यङ्ग्यत्वान्नित्यः शब्द इति ; अयमहेतुः कालात्ययापदेशात्। व्यञ्जकस्य संयोगस्य (१)कालं न व्यङ्ग्यस्य रूपस्य व्यक्तिरत्येति। सति (२)प्रदीपसंयोगे रूपस्य ग्रहणं भवति, (३)न निवृत्ते संयोगे रूपं गृह्यते। निवृत्ते दारुपरशुसंयोगे दूरस्थेन शब्दः श्रूयते विभागकाले। सेयं शब्दस्य व्यक्तिः संयोगकालमत्येतीति न (४)संयोगनिर्मिता भवति। कस्मात्? कारणाभावाद्धि कार्याभाव इति। एवमुदाहरणसाधर्म्यस्याभावादसाधनमयं हेतुर्हेत्वाभास इति।

न्यायवार्त्तिकम्

व्यङ्ग्यत्वाद् इति। उपलब्धिकाले संयोगो नास्ति, सोऽयं संयोगो हेतुविशेषणत्वेनोपात्त उपलब्धिकालमत्येति यदोपलभ्यते तदा संयोगो नास्ति दारुवश्चने दारुपरशुसंयोगनिवृत्तौ शब्दोपलब्धिरिति। नन्वयमनैकान्तिक एव संयोगव्यङ्ग्यत्वादिति—अनित्यमपि संयोगेन व्यज्यमानं दृष्टम्, यथा घट इति। (५)न, संयोग(६)व्यङ्ग्यत्वेनावस्थानस्य साध्यत्वात्—न ब्रूमो नित्यः शब्द इति, अपि त्ववतिष्ठते शब्द इति प्रतिज्ञार्थः, तथा च संयोगव्यङ्ग्यत्वादित्ययं हेतुर्नानैकान्तिकः। न ह्यनवस्थितं किञ्चित् संयोगेन व्यज्यमानं दृष्टमिति।

न्यायवार्त्तिकतात्पर्यटीका

मिति, अन्यथा घटादिभिरालोकसंयोगव्यङ्ग्यैर्व्यभिचारः। तदेतत् पञ्चावयवं वाक्यमुपन्यस्य संयोगव्यङ्ग्यत्वस्य हेतोरेकदेशस्य विशेषणस्य संयोगस्य व्यक्तिकालात्ययेन हेत्वाभासतामाह—अयमहेतुरिति। स पुनरयमसिद्धविशेषणतया हेत्वाभासः साध्यसम एवेति न पृथग्वाच्य इति स्थूलतया एष दोषो भाष्यकारेण नोद्भावितः। यत्पुनर्भदन्तेन कालातीतस्य व्याख्यानं कृतं—प्रतिज्ञानन्तरं हि हेतोः कालः, तमतीत्य हेतुः पश्चादपदिश्यमानः कालातीतो भवति, तद् यथा—अनित्यः शब्दो घटादिवदित्युक्ते कस्मादित्यनुयुक्तो ब्रूते कृतकत्वादिति स कालातीत इति। तेन चैवं दूषितं—किं निराकाङ्क्षे वादिन्येष प्रतिवादिनः प्रश्नः, आहो साकाङ्क्षे? यदि निराकाङ्क्षे, तदा न्यूनमेवास्य निग्रहस्थानम्, न हेत्वाभासस्तस्याप्रयोगात्। प्रयुक्तो हि हेतुस्तदाभासो वा स्यात् नाप्रयुक्तः। अथ साकाङ्क्ष एव वादिनि प्रतिवादिनः प्रश्नस्तथाऽपि पश्चादप्यसौ हेतुः प्रयुक्तो हेतुरेव, न ह्यसौ तदा न स्वसाध्याविनाभूतोऽपक्षधर्मो वेति ; तस्मान्न कालातीतो

(१) "कालम्" इति ट-पु० नास्ति। (२) "प्रदीपघटसंयोगे" इति भा०। (३) "न" इति नास्ति ग०। (४) "संयोगनिमित्ता" इति टि०। (५) ख-पु०—"न" नास्ति। (६) "-व्यङ्ग्यत्वेनानवस्थानस्य" इति ख०।

न्यायभाष्यम्

अवयवविपर्यासवचनं तु न सूत्रार्थः। कस्मात्?

'यस्य येनार्थसम्बन्धो दूरस्थस्यापि तस्य सः।
अर्थतो ह्यसमर्थानामानन्तर्यमकारणम्' ॥

इत्येतद्वचनाद् विपर्यासेनोक्तो हेतुरुदाहरणसाधर्म्यात्तथा वैधर्म्यात् (१)साध्यसाधनं हेतुलक्षणं न जहाति। (क)अजहद्धेतुलक्षणं न हेत्वाभासो भवतीति।

'अवयवविपर्यासवचनमप्राप्तकालम्' (अ० ५, आ० २, सू० ११) इति निग्रहस्थानमुक्तम्, तदेवेदं पुनरुच्यत इति, अतस्तन्न सूत्रार्थः ॥ ९ ॥

न्यायवार्त्तिकम्

अवयवविपर्यासवचनमपि(२) न सूत्रार्थः सामर्थ्यात्—न हि पश्चादभिधीयमानो हेतुरुदाहरणसाधर्म्यादित्येतद्धेतुलक्षणं जहाति, अजहद्धेतुलक्षणं न हेत्वाभासो भवितुमर्हतीति। अवयवविपर्यासवचनमप्राप्तकालमिति निग्रहस्थानमुक्तम्, तदेव पुनरुच्यत इति।

समीकृतेऽभिधानान्निग्रहस्थानमिति चेत्—अथ मन्यसे यस्मात् समीकृते (३)पक्षे पश्चादभिधीयते ततो न निग्रहस्थानमिति; केन समीकृत इति वक्तव्यम्। यदि हेत्वनभिधानेन समीकृतः

न्यायवार्त्तिकतात्पर्यटीका

नामास्ति हेत्वाभास इति। तदेतद् भदन्तदूषणमेतद्व्याख्यानानभ्युपगमेन परिहरति—अवयवविपर्यासवचनं त्विति। अनभ्युपगमहेतुं पृच्छति—कस्मादिति। उत्तरम्—यस्येति। अर्थेन सामर्थ्येन संबन्धः अर्थसंबन्धः। अपि च पौनरुक्त्यादपि नाभ्युपगम्यत इत्याह—अवयवेति।

यस्यापदिश्यमानस्येत्यादि—पुनरुच्यते इत्यन्तं वार्त्तिकं भाष्यव्याख्यानेनैव व्याख्यातम्। शङ्कते—समीकृतेऽभिधानादिति। अयमर्थः नैतदप्राप्तकालेन निग्रहस्थानेन पुनरुक्तम् अपि तु हेत्वाभास एव। स ह्यवयवविपर्यास उच्यते यत्रैकग्रन्थेनैव वादी प्रतिज्ञोदाहरणादि प्रयुज्य पश्चाद्धेतुं प्रयुङ्क्ते, एष तु प्रतिज्ञोदाहरणे प्रयुज्य विरतः प्रतिवादिनाऽनुयुक्तः पश्चाद् हेतुं प्रयुङ्क्ते। तस्माद् न्यूनतादूषणेन पक्षे समीकृते पक्षमात्रतां नीते सिद्धावस्थातः प्रच्याविते पश्चादभिधानाद्धेतोरेष कालातीतो हेत्वाभासः, न पुनरप्राप्तकालम्। निग्रहस्थानमिति

वृत्तिः

साध्याभावनिर्णये सति साधनासम्भवात्। अयमेव बाधितसाध्यक इति गीयते, यथा वह्निरनुष्णः कृतकत्वादित्यादौ। न च बाधे आवश्यकस्य व्यभिचारस्वरूपासिद्ध्यन्यतरस्यैव

(१) "तत्साधनम् इति ग०, "साधनम्" इति अ०। (२) "वचनन्तु" इति भाष्ये। (३) क-पुस्तके 'पक्षे' इति नास्ति।

(क) हेतुलक्षणमजहदित्यन्वयः।

न्यायभाष्यम्

(१)अथ छलम्—

(सू०)—वचनविघातोऽर्थविकल्पोपपत्त्या छलम् ॥ १० ॥

(भा०) न सामान्यलक्षणे छलं शक्यमुदाहर्तुम्, विभागे तूदाहरणानि ॥ १० ॥

न्यायवार्त्तिकम्

किमत्र हेतोरसामर्थ्यम् ? एतदस्यासामर्थ्यं यदयं पश्चादभिधीयत इति। नैतद्धेतोरसामर्थ्यं यदयं पश्चादभिधीयत इति, अपि तु वक्तुरिति। न हि स्वतन्त्रो हेतुः साधनमपि तु (क) साधयितृतन्त्रः, तस्मान्न हेतुदोषः सामर्थ्याच्चेत्युक्तम्। तस्मादवयवविपर्यासवचनं न सूत्रार्थो न समीकृताभिधानमिति ॥ ९ ॥

वचनविघातोऽर्थविकल्पोपपत्त्या छलम्। वचनविघातो यः क्रियते सामान्यशब्दस्य विशेषानेकसम्बन्धित्वे सति अविवक्षिताध्यारोपेण, छलं तद्वेदितव्यम् ॥ १० ॥

न्यायवार्त्तिकतात्पर्यटीका

चेदिति निराकरोति—यदीति। हेत्वनभिधानेन न्यूनतया समीकृतः पक्षः किमत्र हेतोरसामर्थ्यम् ? न ह्यन्यदोषेणान्यो युज्यत इत्यर्थः। शङ्किता ब्रूते—एतदस्येति। निराकरोति—नैतदिति। न्यूनतया निगृहीतो यदि पश्चादभिधानेन निग्रहीतव्यः ततो वाद्येव निगृह्यतां न त्वयं पश्चादभिहित इति समर्थः शक्यो हेतुर्निग्रहीतुमिति नायं समीकृताभिहितत्वेनापि हेत्वाभास इत्यर्थः। उभयनिराकरणमुपसंहरति—तस्मादिति ॥ ९ ॥

उद्देशक्रमानुरोधेन लक्षणक्रमस्य हेत्वाभासानन्तरं (२) छलस्योद्देशाच्छललक्षणस्यापि हेत्वाभासलक्षणानन्तर्यमाह भाष्यकारः—अथ छलम्।

वच—लम् (सू० १०)। यथा वक्तुरभिमतोऽर्थः ततो विरुद्धः अर्थः तस्य विकल्पः कल्पना, सैवोपपत्तिः, तया। अथ लक्षणान्तरवच्छलस्य सामान्यलक्षणे कस्मादुदाहरणं न दीयत इत्यत आह—न सामान्यलक्षणे इति। सामान्यविशेषवत् सर्वमुदाहरणम्, निर्विशेषस्य सामान्यस्यासत्त्वेन केवलस्य सामान्यस्योदाहरणमशक्यमित्यर्थः। विभागे त्विति, विभज्यत इति विभागो विशेषलक्षणं तस्मिन् उदाहरणानि ॥ १० ॥

वृत्तिः

दोषत्वमुचितमिति वाच्यम्, तदप्रतिसन्धानेन बाधस्य दोषत्वावश्यकत्वात्, उपधेयसङ्करेऽप्युपाधेरसङ्करात्, उत्पत्तिकालावच्छिन्नो घटो गन्धवान् शिखरावच्छिन्नः पर्वतो वह्निमानित्यादावसङ्कराच्च साध्याभाववत्पक्षतावच्छेदकावच्छिन्नत्वस्य तत्र सत्त्वात्।

---

(१) झा-पु०—"अथ छलम्" इत्यंशो नास्ति। (२) 'छलस्योद्देशा-' क०।

(क) आदर्शपुस्तकयोः "साधयितृतन्त्रत्वान्न" इति पाठः प्रामादिकः।

न्यायभाष्यम्

विभागश्च—

(सू०)—तत् त्रिविधं वाक्छलं सामान्यच्छलमुपचारच्छलं चेति ॥ ११ ॥

(भा०) तेषाम्—

(सू०)—अविशेषाभिहितेऽर्थे वक्तुरभिप्रायादर्थान्तर-कल्पना वाक्छलम् ॥ १२ ॥

(भा०) नवकम्बलोऽयं माणवक इति प्रयोगः। अत्र नवः कम्बलोऽस्येति वक्तुरभिप्रायः। विग्रहे तु विशेषः, न समासे। तत्रायं छलवादी वक्तुरभिप्रायादविवक्षितमन्यमर्थं

न्यायवार्त्तिकम्

तत्त्रिविधमिति नियमार्थं पूर्ववत् अनेकधा भिन्नं छलं संगृह्यत इति ॥ ११ ॥

न्यायवार्त्तिकतात्पर्यटीका

छलसामान्यलक्षणमभिधाय तद्विशेषलक्षणान्यभिधातुं प्रथमं तावन्न्यूनाधिकसंख्याव्यवच्छेदार्थं विभागमवतारयति—विभागश्चेति। विभज्यतेऽनेनेति विभागः सूत्रमुच्यते ॥ ११ ॥

तत्र च विशेषलक्षणमवतारयति—तेषाम् छलानां मध्ये वाक्छलं लक्ष्यते—

अवि—लम् (सू० १२)। नवः कम्बलो यस्येति एकत्र विग्रहः नव कम्बला अस्येति अपरत्रेति विग्रहे विशेषः। वाक्छलशब्दार्थं व्युत्पादयति—

वृत्तिः

परे तु घटः सकर्तृकः कार्यत्वादित्यादौ यत्र लाघवोपनीतमेकमात्रकर्तृकत्वं भासत इत्युच्यते तत्र तदभावोऽसङ्कीर्णमुदाहरणमिति वदन्ति ॥ ९ ॥

हेत्वाभासप्रकरणं समाप्तम् ॥

क्रमप्राप्तं छलं लक्षयति—(वचनेति)।

अर्थस्य वाद्यभिमतस्य यो विकल्पो विरुद्धः कल्पोऽर्थान्तरकल्पनेति यावत्, तदुपपत्त्या युक्तिविशेषेण यो वचनस्य वाद्युक्तस्य विघातो दूषणम्, तच्छलमित्यर्थः। वक्तृतात्पर्याविषयार्थकल्पनेन दूषणाभिधानमिति फलितम्।

तात्पर्याविषयत्वं विशेष्ये विशेषणे संसर्गे वा। यथा नेपालादागतोऽयं नवकम्बलवत्त्वादित्यत्र नवसङ्ख्यापरत्वकल्पनयाऽसिद्ध्यभिधानम्। सर्वं प्रमेयं धर्मत्वादित्यत्र पुण्यत्वार्थकल्पनया भागासिद्ध्यभिधानम्। वह्निमान् धूमादित्यत्र धूमावयवे व्यभिचाराभिधानम् ॥ १० ॥

लक्षितं छलं विभजते—(तत्त्रिविधमिति) ॥ ११ ॥

न्यायभाष्यम्

नव कम्बला अस्येति तावदभिहितं भवतेति कल्पयति, कल्पयित्वा चासम्भवेन प्रतिषेधति एकोऽस्य कम्बलः कुतो नव कम्बला इति। तदिदं सामान्यशब्दे वाचि छलं वाक्छलमिति।

अस्य प्रत्यवस्थानम् - सामान्यशब्दस्यानेकार्थत्वेऽन्यतराभिधानकल्पनायां विशेषवचनम्। नवकम्बल इत्यनेकार्थाभिधानम्, नवः कम्बलोऽस्येति नव कम्बला अस्येति। एतस्मिन् प्रयुक्ते येयं कल्पना नव कम्बला अस्येत्येतद्भवताऽभिहितं तच्च न सम्भवतीति, एतस्यामन्यतराभिधानकल्पनायां विशेषो वक्तव्यः। यस्माद्विशेषो(१)ऽर्थविशेषेषु विज्ञायतेऽयमर्थोऽनेनाभिहित इति। स च विशेषो नास्ति। तस्मान्मिथ्याभियोगमात्रमेतदिति।

प्रसिद्धश्च लोके शब्दार्थसम्बन्धोऽभिधानाभिधेयनियमनियोगः। अस्याभिधानस्यायमर्थोऽभिधेय इति समानः सामान्यशब्दस्य, विशेषो विशिष्टशब्दस्य। प्रयुक्तपूर्वाश्चेमे शब्दा अर्थे प्रयुज्यन्ते नाप्रयुक्तपूर्वाः। प्रयोगश्चार्थसम्प्रत्ययार्थः। अर्थप्रत्ययाच्च व्यवहार

न्यायवार्त्तिकतात्पर्यटीका

वाचि निमित्ते छलं वाक्छलमिति। नवकम्बल इति उभयत्रापि समानायां वाचि निमित्तभूतायामित्यर्थः। तदेतच्छलं पराजयावस्थायां जल्पे प्रयोक्तव्यमित्युक्तम्। परवाक्ये पर्यनुयोगोऽस्येति चोक्तम्। तदत्र यथा पर्यनुयोगस्तथा दर्शयति शिष्यहिततया भाष्यकारः—अस्य प्रत्यवस्थानमिति, उभयार्थभानेऽसंभवदर्थकल्पनमयुक्तमित्यर्थः।

अथ प्रयोक्ताऽपि कथं साधारणेन शब्देनार्थविशेषं बोधयति ? अबोधयंश्च कथं प्रतिपादको नाम ? इत्यत आह—प्रसिद्धश्चेति। सम्बन्धस्वरूपमाह—अभिधानाभिधेययोर्यो नियमः (क)अयमेव शब्दोऽस्यैवार्थस्येति, तत्र यः पुरुषस्य नियोगः अस्मादयमेव बोद्धव्य इत्येवमाकारः। किमतो यद्येवमत आह—प्रयुक्तपूर्वाश्चेति। तथाऽपि किमित्यत आह—प्रयोगश्चेति। तामिमां भूमिरचनां प्रकृते योजयति—तत्रैवमर्थगत्यर्थ इति। एतदुक्तं भवति—

वृत्तिः

तत्र वाक्छलं लक्षयति—(अविशेषेति)।

यत्र शक्यार्थद्वये सम्भवति एकार्थनिर्णायकविशेषाभावादनभिप्रेतशक्यार्थकल्पनेन

---

(१) भा पु०—"अर्थविशेषेषु" इति नास्ति।

(क) "अयमेवार्थोऽस्य शब्दस्य, अयं शब्दोऽस्यैवार्थस्य" इति पाठे स्पष्टोऽर्थः। क-तात्पर्यं तु "अयमेवार्थोऽस्य शब्दोऽस्यैवार्थस्ये"ति पाठो गृहीतः।

न्यायभाष्यम्

इति। तत्रैवमर्थगत्यर्थे शब्दप्रयोगे सामर्थ्यात् सामान्यशब्दस्य प्रयोगनियमः। अजां ग्रामं नय सर्पिराहर ब्राह्मणं भोजयेति सामान्यशब्दाः सन्तोऽर्थावयवेषु प्रयुज्यन्ते सामर्थ्यात्, यत्रार्थक्रिया(१)चोदना सम्भवति तत्र प्रवर्त्तन्ते नार्थसामान्ये, क्रिया देशना(२)सम्भवात्। एवमयं सामान्यशब्दो नवकम्बल इति योऽर्थः सम्भवति नवः कम्बलोऽस्येति तत्र प्रवर्तते, यस्तु न सम्भवति नव कम्बला अस्येति तत्र न प्रवर्त्तते। सोऽयमनुपपद्यमानार्थकल्पनया (३) परवाक्योपालम्भो न कल्पत इति ॥ १२ ॥

न्यायवार्त्तिकम्

अविशेषाभिहितेऽर्थे इति सूत्रम्। अविशेषाभिहितम् सामान्यश्रुति वाक्यं पदं वा अविशेषाभिहितमित्युच्यते। वाक्यं सामान्यश्रुति यथा नवकम्बलोऽयमिति। पदं सामान्यश्रुति यथा अश्वोऽश्व इति। अविशेषशब्दानभिधानं प्रयोगाभावात्—न ह्यविशेषशब्देन कस्यचिदभिधानं सम्भवति, न चास्य प्रयोगो युक्त इति, वाक्यं च सर्वमुच्चरद्विशेषमेव प्रत्याययतीति सामान्य-

न्यायवार्त्तिकतात्पर्यटीका

न संकेतकरणावस्थायां वृद्धव्यवहारे वा कश्चिच्छब्दः कञ्चिदर्थं शृङ्गग्राहिकया बोधयति, अपि तु सामान्यद्वारेणार्थप्रकरणादिसहकारी विशेषे वर्त्तते। तस्मान्नैष प्रतिपादयितुरपराधो यदेष विशेषशब्दैर्विशेषान्न प्रतिपादयति, किन्तु संकेतस्यापराधो यो विशेषमपहाय सामान्ये शब्दानां वर्त्तते। तस्माद् यथासंकेतं बोधयन्नापराध्यः प्रयोक्तेति सिद्धम्। सामर्थ्यमेव दर्शयति—यत्रार्थक्रियाचोदनेति।

स्यादेतत्—अविशेषाभिहितेऽर्थ इति न युक्तम्, न हि नवकम्बल इति पदं प्रकरणादिनिरपेक्षं कञ्चिदर्थमविशेषेणाभिधत्ते गवादिशब्दवत्। न हि संख्याविशेषे च नवीनत्वे चास्ति कश्चित् सामान्यविशेषो बाहुलेयादिष्विव गोत्वं यमभिदधीतेत्यत आह वार्त्तिककारः—सामान्यश्रुतीति। अभिहितिः अभिहितम् उच्चारणमिति यावत्। समानः शब्दो नार्थे सामान्यमित्यर्थः। अश्व इति नामपदमश्वत्वस्य वाचकम्, आख्यातपदं यदा कस्यचिदभिमुखं प्रयुज्यते अश्व इति, तदा वृद्धिं गतोऽसीति प्रतीयते। चोदयति—अविशेषेति। समानो हि शब्दोऽभिधेये संशयमाधत्ते न

वृत्तिः

दूषणाभिधानं तद् वाक्छलम्। (४) लक्षणन्तु शक्त्या एकार्थशाब्दबोधतात्पर्यकशब्दस्य

---

(१) "देशना" इति ल०। (२) "क्रियादेशना सम्भवेत्" इति भा०। (३) "परवाक्योपालम्भस्ते" इति ल-ग-भा०। (४) अत्र "लक्षणन्तु" इति ल-पु० नास्ति।

(सू०)—सम्भवतोऽर्थस्यातिसामान्ययोगादसम्भूतार्थकल्पना सामान्यच्छलम् ॥ १३ ॥

न्यायभाष्यम्

अहो खल्वसौ ब्राह्मणो विद्याचरणसम्पन्न इत्युक्ते कश्चिदाह सम्भवति ब्राह्मणे

न्यायवार्त्तिकम्

प्रत्यायनमयुक्तम् ; न, प्रकरणादीनन्तरेण श्रुतिमात्रात्तदुपपत्तेः—यदा प्रकरणादिनिरपेक्षं वाक्यमुच्चार्यते श्वेतो धावतीति, तदा (१)वाक्यश्रुतिसामान्यात् श्रोतुः सम्मोहः, सम्मोहे सत्यविवक्षितमर्थमध्यारोप्य प्रतिषेधति । एवं पदेऽपीति । अर्थग्रहणं शब्दनिराकरणाय, अर्थविषयं छलं न शब्दविषयमिति ; न ह्ययं प्रतिषेद्धुं शक्नोति नायं नवकम्बलशब्द इति । तस्य प्रत्यवस्थानम्—ज्ञात्वाऽज्ञात्वा वा प्रयोगात् प्रतिषेधानुपपत्तिः—यदि तावन्नवकम्बलस्यार्थं बुद्ध्वा नायं नवकम्बल इति प्रत्यवतिष्ठते तदाऽर्थान्तरमाह अन्यद् बुध्यतेऽन्यत् प्रतिषिध्यत इति । अथ पुनर्नैव नवकम्बलस्यार्थं बुध्यते तथाऽप्यज्ञानमिति ॥ १२ ॥

न्यायवार्त्तिकतात्पर्यटीका

स्वर्थमभिधत्त इत्यर्थः । परिहरति—न प्रकरणादीति । श्वेतो धावतीति, सारमेयो द्रुततरं याति, श्वित्री निर्णेनेक्तीत्यर्थः । अर्थ इत्यस्य प्रयोजनमाह—अर्थग्रहणमिति । अविशेषश्रुतौ शब्दे सति अर्थे अर्थान्तरकल्पना न शब्द इत्यर्थः । अस्य प्रत्यवस्थानमित्यादि भाष्यं व्याचष्टे—तस्येति । सुगमम् ॥ १२ ॥

संभव—लम् (सू० १३) । संभवतोऽर्थस्य ब्राह्मणविशेषस्य (क)विद्याचरणसंपदा, (२) विद्याचरणसंपदस्त्येति यत्सामान्यं ब्राह्मणत्वं व्रात्ये ब्राह्मणे, तस्य ब्राह्मणत्वस्यातिसामान्यस्य योगादसंभूतार्थकल्पनया यः प्रतिषेधः तत् सामान्यच्छलम् । अहो (ख)खल्वयं

वृत्तिः

(३)शक्त्याऽर्थान्तरतात्पर्यकत्वकल्पनया दूषणाभिधानम् । यथा नेपालादागतोऽयं नवकम्बलवत्त्वादित्युक्ते कुतोऽस्य नवसङ्ख्याकाः कम्बला इति । गौर्विषाणीत्युक्ते (४)कुतो-बाणस्य विषाणम् । गजो विषाणीत्युक्ते कुतो गजस्य शृङ्गम् । श्वेतो धावतीति (५)श्वेतरूपवदभिप्रायेणोक्ते श्वा इतो न धावतीत्य(६)भिधानमित्यादिकमूह्यम् ॥१२॥

---

(१) "वाक्यं श्रुति-" इति क । (२) "विद्याचरणं सम्पदन्वेति" इति क-तात्पर्यपाठः । (३) "शक्त्यार्थान्तर" इति ब । (४) आ-ब पुस्तकयोः—"कुतो बाणस्य विषाणम्, गजो विषाणीत्युक्ते" इत्यंशो नास्ति । (५) "श्वेतरूपवदभिप्रायेणोक्तश्वेतो" इति ब । (६) "अभिधान"मित्यत्र "अधावन"मिति आ० ।

(क) "विद्याचरणसम्पदे"ति विशेषणे तृतीया । (ख) "खल्वसौ" इति भाष्ये ।

न्यायभाष्यम्

विद्याचरणसम्पदिति। अस्य वचनस्य विघातोऽर्थविकल्पोपपत्त्याऽसम्भूतार्थकल्पनया क्रियते—यदि ब्राह्मणे विद्याचरणसम्पत् सम्भवति व्रात्येऽपि सम्भवेत्, व्रात्योऽपि ब्राह्मणः, सोऽप्यस्तु विद्याचरणसम्पन्न इति। यद्विवक्षितमर्थमाप्नोति चात्येति च तदतिसामान्यम्। यथा ब्राह्मणत्वं विद्याचरणसम्पदं क्वचिदाप्नोति क्वचिदत्येति। सामान्यनिमित्तं छलं सामान्यच्छलमिति।

अस्य च प्रत्यवस्थानम्—अविवक्षितहेतुकस्य विषयानुवादः प्रशंसार्थत्वाद् वाक्यस्य; तदत्रासम्भूतार्थकल्पनानुपपत्तिः। यथा सम्भवन्त्यस्मिन् क्षेत्रे शालय इति अनिराकृतमविवक्षितं च बीजजन्म, प्रवृत्तिविषयस्तु क्षेत्रं प्रशस्यते; सोऽयं क्षेत्रानुवादः नास्मिन् शालयो विधीयन्त इति; बीजात्तु शालिनिर्वृत्तिः सती न विवक्षिता। एवं सम्भवति ब्राह्मणे विद्याचरणसम्पदिति सम्पद्विषयो ब्राह्मणत्वं न सम्पद्धेतुः। न चात्र हेतुर्विवक्षितः। विषयानुवादस्त्वयं प्रशंसार्थत्वाद् वाक्यस्य, सति ब्राह्मणत्वे सम्पद्धेतुः समर्थ इति। विषयं च प्रशंसता वाक्येन यथाहेतुतः फलनिर्वृत्तिर्न प्रत्याख्यायते। तदेवं सति वचनविघातोऽसम्भूतार्थकल्पनया नोपपद्यत इति॥ १३॥

न्यायवार्त्तिकम्

सम्भवतोऽर्थस्यातिसामान्ययोगादसम्भूतार्थकल्पना सामान्यच्छलम्। सामान्यस्य विवक्षितार्थातिक्रमः अतिसामान्यम्। उदाहरणम्—विद्याचरणसम्पन्नो ब्राह्मण इति। (क)परन्तु ब्राह्मण्यं विद्याचरणसम्पन्नत्वे हेतुरिति कृत्वा प्रत्यवतिष्ठते, स्तुत्यर्थे वाक्येऽन्यथाकारं प्रत्यवस्थानम्। उभयथा दोषो बुद्ध्वाऽबुद्ध्वा वेति॥ १३॥

न्यायवार्त्तिकतात्पर्यटीका

ब्राह्मणो विद्याचरणसंपन्न इति हि स्तुत्यर्थं वाक्यमभ्यनुजानतोक्तं संभवति ब्राह्मणे विद्याचरणसंपदिति, तदपि वाक्यं स्तुत्यर्थमेव, न त्वस्य ब्राह्मणत्वाद्धेतोर्विद्याचरणसंपद्विवक्षितेति। तत्र परो हेतुत्वमस्याविवक्षितमारोप्य वचनं विहन्तीति तदिदं सामान्यच्छलमिति। विषयानुवाद इति, संपद्विषयस्य ब्राह्मणत्वस्यानुवाद इत्यर्थः। कस्य? अविवक्षितहेतुकस्य पुंसः। तदेतद् वार्त्तिककारो व्याचष्टे—सामान्यस्येति, विवक्षितार्थमतिगतं सामान्यमित्यर्थः॥ १३॥

वृत्तिः

सामान्यच्छलं लक्षयति—(सम्भवत इति)।

सामान्यविशिष्टसम्भवदर्थाभिप्रायेणोक्तस्य 'अतिसामान्ययोगादसम्भव(१)दर्थकल्पनया'

(१) "-दर्थकल-" इति व०।

(क) "परन्तु" इति पाठो युक्तः।

(सू०)—धर्मविकल्पनिर्देशेऽर्थसद्भावप्रतिषेध उपचारच्छलम् ॥ १४ ॥

न्यायभाष्यम्

अभिधानस्य धर्मो यथार्थप्रयोगः, धर्मविकल्पोऽन्यत्र दृष्टस्यान्यत्र प्रयोगः, तस्य निर्देशे धर्मविकल्पनिर्देशे। यथा मञ्चाः क्रोशन्तीति अर्थसद्भावेन प्रतिषेधः,

न्यायवार्त्तिकतात्पर्यटीका

धर्म—लम् (सू० १४) ॥ (क)शब्दस्य धर्मः प्रयोगः, तस्य विकल्पो द्वैविध्यम्। (१)द्विविधः प्रयोगः प्रधानो भाक्तश्च। तत्रापि प्रधान औत्सर्गिकः, तस्य तु क्वचिदपवादाद् भाक्तो भवति। तदेतदाह भाष्यकारः—अभिधानस्य शब्दस्य (२)यथार्थप्रयोगो धर्मः औत्सर्गिकः, तत्किमयमेव ? नेत्याह—(३)तस्य च विकल्पो द्वैविध्यम्, कोऽसौ द्वितीय इत्यत आह—(४) उत्सर्गस्य तु कुतश्चिदपवादाद् अन्यत्र दृष्टस्यान्यत्र प्रयोगः। तदेवं व्यवस्थिते धर्मविकल्पेन निर्देशे वाक्ये निर्दिश्यतेऽनेनेति व्युत्पत्त्या। तत्र भाक्तविवक्षायां मञ्चाः क्रोशन्तीति,

वृत्तिः

दूषणाभिधानं सामान्यच्छलम्। यथा ब्राह्मणोऽयं विद्याचरणसम्पन्न इत्युक्ते ब्राह्मणत्वेन विद्याचरणसम्पदं साधयतीति कल्पयित्वा परो वदति कुतो ब्राह्मणत्वेन विद्याचरणसम्पत्, (५) व्रात्ये व्यभिचारात् ॥ १३ ॥

---

(१) आदर्शपुस्तकयोः इतःपूर्वं 'तस्य च' इति पठितम्। (२) 'यथार्थं' प्रयोग' इत्यादर्शपुस्तकयोः पाठः। (३) आदर्शपुस्तकयोः 'तस्य च' इति नास्ति। (४) "उत्सर्गस्य क्वचित्" इति ख-तात्पर्यपाठः। (५) "वात्ये" इति व०।

(क) उपचारच्छलं व्याख्यातुं सूत्रस्थधर्मपदस्य सम्बन्धिपदं पूरयित्वाऽऽह—शब्दस्येति। उक्तं द्वैविध्यमुपपादयति—द्विविधः प्रयोग इति। प्राधान्यभाक्तत्वयोर्विषयं विभजते—तत्रापि प्रधान इति। यथार्थप्रयोगो धर्म इति भाष्यगते पदे व्युत्क्रम्य गृहीते। यथार्थं प्रयोगो यद्यौत्सर्गिक एक एव तदा उपचारच्छलमेव न सम्भवतीति तदुपपादनार्थं पृच्छति—तत् किमिति। औत्सर्गिक एक एव प्रयोगः किमिति प्रश्नः। समाधत्ते—नेत्याहेति। भाष्यगतं धर्मविकल्प इति व्याचष्टे—तस्य चेति। धर्मपदस्य पूर्वं व्याख्यातत्वात् तदपहायैव तच्छब्देन धर्मस्य परामर्शः। उक्ते द्वैविध्ये औत्सर्गिकः प्रथम इत्युक्तप्रायमितोऽतः पारिशेष्याद् भाक्तं मनसिकृत्य पृच्छति—कोऽसाविति। अत्र तात्पर्यटीकायां 'द्विविध' इत्यतः पूर्वम् आदर्शपुस्तकयोर्मुद्रितोऽपि 'तस्य च' इत्यंशः 'नेत्याह' इत्यतः परं पठितुमुचित इति मुद्राकृत्प्रमादबुद्ध्या स्थानान्तरे गृहीतः।

न्यायभाष्यम्

मञ्चस्थाः पुरुषाः क्रोशन्ति (१)न तु मञ्चाः क्रोशन्ति ।

का पुनरत्रार्थविकल्पोपपत्तिः ? अन्यथा प्रयुक्तस्यान्यथाऽर्थकल्पनम्, भक्त्या प्रयोगे प्राधान्येन कल्पनम् उपचारविषयं छलमुपचारच्छलम्। उपचारो नीतार्थः सहचरणादिनिमित्तेन, अतद्भावे तद्वदभिधानमुपचार इति ।

अत्र समाधिः—(२)प्रसिद्धे प्रयोगे वक्तुर्यथाभिप्रायं शब्दार्थयोरभ्यनुज्ञा प्रतिषेधो वा न च्छन्दतः। प्रधानभूतस्य शब्दस्य भाक्तस्य च गुणभूतस्य प्रयोग उभयोर्लोकसिद्धः। सिद्धे प्रयोगे यथा वक्तुरभिप्रायस्तथा शब्दार्थावनुज्ञेयौ प्रतिषेध्यौ वा न च्छन्दतः। यदि वक्ता प्रधानशब्दं प्रयुङ्क्ते यथाभूतस्याभ्यनुज्ञा प्रतिषेधो वा, न च्छन्दतः। अथ गुणभूतम्, तदा गुणभूतस्य। यत्र तु वक्ता गुणभूतं शब्दं प्रयुङ्क्ते प्रधानभूतमभिप्रेत्य परः प्रतिषेधति, स्वमनीषया प्रतिषेधोऽसौ भवति न परोपालम्भ इति ॥ १४ ॥

न्यायवार्त्तिकम्

धर्मविकल्पनिर्देश इति सूत्रम्। धर्मविकल्पनिर्देशशब्देनाभिधानधर्मो द्वेधाऽभिधीयते

न्यायवार्त्तिकतात्पर्यटीका

अत्रार्थसद्भावेन प्रतिषेधः। तमेवार्थसद्भावमाह—मञ्चस्थाः पुरुषाः क्रोशन्ति न तु मञ्चाः क्रोशन्तीति। वार्त्तिकमते त्वर्थसद्भावस्यैव प्रतिषेध इति व्याख्येयम्। ननु यद्यन्यत्र दृष्टस्यान्यत्र प्रयोगः, हन्त सर्वं सर्वत्र प्रयुज्येतेत्यत आह—उपचारो नीतार्थः, प्रापितार्थः। सहचरणादिना निमित्तेनेति, अन्यत्र दृष्टस्याप्यन्यत्र प्रयोगः संबन्धादेव भवतीति नातिप्रसङ्ग इत्यर्थः। न च्छन्दतः न छद्मनेत्यर्थः। ननु यदि भाक्ततयाऽप्युपपत्तिर्न किंचिज्जल्पाकभाषितं दुष्टं स्यात्, सर्वस्यैव यथाकथंचिद्भाक्तत्वेनोपपत्तेरित्यत आह—प्रधानभूतस्येति। भाक्तस्येत्येतावति वक्तव्ये प्रधानग्रहणं सिद्धतया दृष्टान्तलाभाय। लोकसिद्ध एवोपचारः कर्त्तव्यो नापूर्वो विना प्रयोजनम्, लोकसिद्धश्चायमुपचारो मञ्चाः क्रोशन्तीत्यर्थः।

सूत्रव्याख्यानपरं वार्त्तिकं धर्मविकल्पनिर्देशशब्देन सूत्रस्थेन। अभिधानं प्रयोगः शब्दस्य

वृत्तिः

उपचारच्छलं लक्षयति—(धर्मविकल्पेति)।

(३) 'धर्मः' शब्दस्यार्थेन सम्बन्धः। तस्य विकल्पः विविधः कल्पः शक्तिलक्षणान्यतररूपः। तथा च शक्तिलक्षणयोरेकतरवृत्त्या प्रयुक्ते शब्दे तदपरवृत्त्या यः प्रति-

(१) "न तु मञ्चाः क्रोशन्ति" इत्यंशः फ-पु० नास्ति। (२) 'सिद्धे' इति भा-वि-टि। (३) "धर्मःशब्दस्यार्थेन" इति व०।

(सू०)—वाक्छलमेवोपचारच्छलं तदविशेषात् ॥ १५ ॥

न्यायभाष्यम्

न वाक्छलादुपचारच्छलं भिद्यते तस्याप्यर्थान्तरकल्पनाया अविशेषात्। इहापि स्थान्यर्थो गुणशब्दः प्रधानशब्दः स्थानार्थ इति कल्पयित्वा प्रतिषिध्यत इति ॥ १५ ॥

न्यायवार्त्तिकम्

प्रधानं भाक्तश्च। मञ्चा इति काष्ठसंघातेषु प्रधानं मञ्चशब्दः, क्रोशनक्रियाया असम्भवमीक्षित्वा स्थानिषु पुरुषेषु भाक्तः। सोऽयमभिधानाभिधेय(१)व्यवहार एवं व्यवतिष्ठते। य एतस्मिन्नन्यथाकारप्रतिषेधः तदुपचारच्छलमिति। अस्यापि पूर्ववत् प्रतिषेधो ज्ञात्वाऽज्ञात्वा वेति ॥१४॥

वाक्छलमेवोपचारच्छलमिति सूत्रम्। एकत्वम् अविशेषात्। कोऽविशेषः? इहाप्यर्थान्तरकल्पना तत्रापीति ॥ १५ ॥

न्यायवार्त्तिकतात्पर्यटीका

धर्मो भवन् द्विधाऽभिधीयते। द्वैविध्यमाह—प्रधानमिति। सोऽयमभिधानाभिधेयव्यवहार इति, अभिधानं शब्दः अभिधेयो गम्यः, स च क्वचिद्वाच्यः क्वचिद्भाक्त इति सुबोधम् ॥ १४ ॥

परीक्षापर्वणः सन्निधानात्तदर्थं लक्षणपर्वण्यपि (क) योग्यायै सूत्रकारश्छललक्षणं परीक्षते—

वाक्छ—त् (सू० १५) ॥ स्थान्यर्थो गुणशब्दो यो वस्तुतः (२)स एव प्रधानशब्दः स्थानार्थ इति कल्पयित्वेति योजना। यथा वाक्छले नवीनार्थो नवशब्दः संख्याभेदे कल्पितस्तथेहापीति पूर्वपक्षः ॥ १५ ॥

वृत्तिः

षेधः, स उपचारच्छलम्। यथा मञ्चाः क्रोशन्ति नीलो घट इत्यादौ मञ्चस्था एव क्रोशन्ति न तु मञ्चाः, एवं घटस्य कथं नीलरूपाभेदः। एवमहं नित्य इति शक्त्या प्रयुक्तेऽमुकस्मादुत्पन्नस्त्वं कथं नित्य इति प्रतिषेधोऽप्युचारच्छलम्।

वाद्यभिप्रेतार्थस्यादूषणेन छलस्यासदुत्तरत्वम्। न च श्लिष्टलाक्षणिकप्रयोगाद्वादिन एवापराधः स्यादिति वाच्यम् तत्तदर्थबोधकतया प्रसिद्धस्य शब्दस्य प्रयोगे वादिनोऽनपराधात्, अन्यथा पर्वतो वह्निमानित्युक्तेऽपर्वतोऽयं कथं वह्निमानित्यादिदूषणेनानुमानाद्युच्छेदः स्यात् ॥ १४ ॥

---

(१) "प्रकार" इति ख०। (२) "स स्थानार्थः प्रधानशब्द एव इति" क-पु०।

(क) योग्या अभ्यासः प्रयोगश्चेति यावत्।

(सू०)—न तदर्थान्तरभावात् ॥ १६ ॥

न्यायभाष्यम्

न वाक्छलमेवोपचारच्छलम्, तस्यार्थसद्भावप्रतिषेधस्यार्थान्तरभावात्। कुतः? अर्थान्तरकल्पनातः। अन्या ह्यर्थान्तरकल्पना, अन्योऽर्थसद्भावप्रतिषेध इति ॥ १६ ॥

न्यायवार्त्तिकम्

न तदर्थान्तरभावात्। अविशेषादित्यस्य हेतोरनेन सूत्रेणासिद्धतामुद्भावयति। कथमसिद्धिः? एकत्र वस्तुसद्भावः प्रतिषिध्यते—नैव क्रोशारो मञ्चा इति, एकत्र वस्त्वभ्यनुज्ञाय—कम्बलयोगमभ्युपगम्य कम्बलस्यानेकता धर्मः प्रतिषिध्यत इति। यत्र धर्मः प्रतिषिध्यते (क)यत्र धर्मी। सोऽयमतिमहान् विशेषः ॥ १६ ॥

न्यायवार्त्तिकतात्पर्यटीका

सिद्धान्तसूत्रम्—

न त—त् (सू० १६) ॥ तस्य उपचारच्छले अर्थसद्भावप्रतिषेधस्य अर्थान्तरकल्पनातः वाक्छलादित्यर्थः। सूत्रतात्पर्यमाह वार्तिककारः—अविशेषादित्यस्येति, विधेयं वस्तु, मञ्चाः क्रोशन्तीत्यत्र क्रोशनं विधीयते, मञ्चा इति त्वनूद्यते। अत एव "गुणे त्वन्याय्यकल्पने"ति मञ्चा इत्येतदप्रधानमनूद्यतया भाक्तम्, न तु क्रोशन्तीति "न विधौ परः शब्दार्थ" इति न्यायात्। तदिह विधीयमानं क्रोशनमेव वस्तु प्रतिषिध्यते, नैव मञ्चाः क्रोशन्तीति च्छलवाक्येन। नवकम्बलो देवदत्त इति वाक्ये तु देवदत्तमनूद्य नवत्वविशिष्टः कम्बलो विधीयते। तत्र न विधेयस्य वस्तुनः कम्बलस्य सद्भावः प्रतिषिध्यते, किं तु तदेकदेशस्यानेकतायाः इति महान् भेद इति सिद्धान्तः ॥ १६ ॥

वृत्तिः

प्रसङ्गाच्छलं परीक्षितुं पूर्वपक्षयति—(वाक्छलमिति)।

(१) शब्दस्यार्थान्तरकल्पनाऽविशेषाद् वाक्छलमेवोपचारच्छलं स्यादिति छलस्य द्वित्वमेव, न तु त्रित्वमिति शङ्कार्थः ॥ १५ ॥

समाधत्ते—(न तदर्थेति)।

उपचारच्छलस्य वाक्छलाभेदो न, तयोरर्थान्तरभावाद् भिन्नत्वाद् भिन्नतया प्रमाणसिद्धत्वादिति फलितार्थः। पूर्वोक्तभेदकधर्मेण भेदसम्भवेऽपि यत्किञ्चिद्धर्मेणाभेदे सामान्यधर्मेणाभेदस्य सर्वत्र सम्भवाद्विभागः कुत्रापि न स्यादिति ॥ १६ ॥

(१) अत्र ल-पु०—"वाक्छलमेवोपचारच्छलं तदविशेषाच्छब्दस्यार्थान्तरकल्पनाऽविशेषात्" इत्यधिकः पाठः।

(क) 'यत्र' इत्यत्र तत्रेति पाठो युक्तः। तथाच यत्र कम्बलस्य धर्मिणः धर्मः नवत्वसंख्या प्रतिषिध्यते तत्र धर्मी कम्बलम् अनुज्ञायते इत्यर्थः।

(सू०)—अविशेषे वा किञ्चित्साधर्म्यादेकच्छलप्रसङ्गः ॥१७॥

न्यायभाष्यम्

छलस्य द्वित्वमभ्यनुज्ञाय त्रित्वं प्रतिषिध्यते किञ्चित्साधर्म्यात्। यथा चायं हेतुस्त्रित्वं प्रतिषेधति तथा द्वित्वमप्यभ्यनुज्ञातं प्रतिषेधति, विद्यते हि किञ्चित्साधर्म्यं द्वयोरपीति। अथ द्वित्वं किञ्चित्साधर्म्यान्न निवर्त्तते, त्रित्वमपि न निवर्त्स्यति ॥१७॥

(भा०) (१)छललक्षणादूर्ध्वम्—

(सू०)—साधर्म्यवैधर्म्याभ्यां प्रत्यवस्थानं जातिः ॥ १८ ॥

प्रयुक्ते हि हेतौ यः प्रसङ्गो जायते स जातिः। स च प्रसङ्गः

न्यायवार्त्तिकम्

(२) अथ मन्यते किं नोऽनेन विशेषेण, इहाप्यर्थान्तरकल्पना तत्रापीति—

अविशेषे वा किञ्चित्साधर्म्यादेकच्छलप्रसङ्गः। कोऽस्य सूत्रस्यार्थः? विरोधः—द्वित्वमभ्यनुज्ञायमानं निवर्तयति। कतमेन पुनर्न्यायेन द्वित्वमभ्यनुज्ञायमानम्? 'वाक्छलमेवोपचारच्छलम्' तयोरेकत्वं ब्रुवता सामान्यच्छलमन्यदित्यभ्यनुज्ञातं भवति। विशेषणानर्थक्यं वा—यदि सर्वं (३) छलमेकमेवेत्यभ्युपगमः 'वाक्छलमेवोपचारच्छलं तदविशेषा'दिति व्यर्थं विशेषणम्। कथमेकत्वप्रसङ्गः? किञ्चित्साधर्म्याद् यद्यनर्थान्तरकल्पना, अविशेषादेकत्वम्—सर्वच्छलमेकं प्राप्नोति किञ्चित्साधर्म्यादिति। किं पुनस्तत्? वचनविघातः अर्थविकल्पोपपत्तिश्च, तत् (४) सर्वस्मिंश्छल इति ॥ १७ ॥

न्यायवार्त्तिकतात्पर्यटीका

अवि—ङ्गः (सू० १७) ॥ किंचित्साधर्म्यात् त्रित्वाभावे द्वित्वस्याप्यभ्युपगतस्याभावप्रसङ्गः। ओमिति ब्रुवतो वस्तुत्वेन समस्तभेदोच्छेदप्रसङ्गः। भाष्यवार्त्तिके अतिरोहितार्थे ॥१७॥

उद्देशक्रमानुरोधेन जातिलक्षणक्रममाह भाष्यकारः—छललक्षणादूर्ध्वम्—

साध—तिः (सू० १८) ॥ प्रतीपमवस्थानं प्रत्यवस्थानम्, तथा सति छलस्य सम्यग्दूषणस्य च जातित्वप्रसङ्गोऽत उक्तं साधर्म्यवैधर्म्याभ्यामिति। न च च्छले साधर्म्यवैधर्म्ये स्तः, न च सम्यग्दूषणं साधर्म्यवैधर्म्यमात्रात् अपि तु (क) प्रयोगादिति प्रयुक्ते हेतौ तदा-

वृत्तिः

विपक्षे बाधकमभिप्रेत्याऽऽह—(अविशेष इति)।

---

(१) "अत ऊर्ध्वम्" इति ल-भा-श्रा-ग०। (२) "कथं मन्यसे किं तेऽनेन" इति ख। (३) "छलमेवेत्यभ्युपगमः" इति ख। (४) "तस्मिंश्छल" इति ख।

(क) अत्र 'प्रयोजकात्' इत्यादर्शपुस्तकपाठः प्रमादकृत इति परित्यक्तः।

न्यायभाष्यम्

साधर्म्यवैधर्म्याभ्यां प्रत्यवस्थानमुपालम्भः प्रतिषेध इति। 'उदाहरणसाधर्म्यात् साध्यसाधनं हेतु'रित्यस्योदाहरणवैधर्म्येण प्रत्यवस्थानम्, 'उदाहरणवैधर्म्यात् साध्यसाधनं हेतु'रित्यस्योदाहरणसाधर्म्येण प्रत्यवस्थानम्, प्रत्यनीकभावात्। जायमानोऽर्थो जातिरिति ॥ १८ ॥

न्यायवार्त्तिकम्

साधर्म्यवैधर्म्याभ्यां प्रत्यवस्थानं जातिः। साधर्म्येण प्रत्यवस्थानं वैधर्म्येण प्रत्यवस्थानं जातिरिति। प्रथमपक्षानुयोगं दर्शयति स्थापनायां सत्यां प्रतीपमवस्थानं प्रत्यवस्थानं प्रतिपक्षवदिति। सूत्रार्थस्तु यथाश्रुति, न पुनरुदाहरणसाधर्म्येण उदाहरणवैधर्म्येण वेति। किमर्थमिदमुच्यते? व्यापकार्थम्—यदि यथाश्रुति सूत्रार्थो भवति तदा सर्वजातयो व्याप्यन्ते येन केनचित् साधर्म्यं येन केनचिद्वैधर्म्यमिति। लक्षणे जातीनामव्यापकत्वं तु दोषः। भाष्ये उदाहरणसाधर्म्यमुदाहरणवैधर्म्यं चोदाहरणार्थमिति, यथा चोदाहरणेन एवमनुदाहरणेनापीति ॥१८॥

न्यायवार्त्तिकतात्पर्यटीका

भासे वा यः प्रसङ्गो जायते स जातिरिति। जल्पे हि वेदप्रामाण्यं विद्वांसं प्रति कुहेतुना यदा नास्तिकैरधिक्षिप्यते सदुत्तरं चास्य यदा सहसा न प्रतिभाति तदेश्वराणां (क) जनाधाराणां मा भूद्वेदाप्रामाण्यबुद्धिरिति जात्याऽपि प्रत्यवस्थेयम्, अन्यथेश्वरचरितानुवर्त्तिनीनां प्रजानां विप्लवो भवेदिति। क्वचित् पुनरबुद्धिपूर्वमेव हेतौ हेत्वाभासे वा जातिप्रयोगः संभवति। जायमानोऽर्थ इति जातिपदव्युत्पत्तिनिमित्तं दर्शितम्। तदेतद्वार्त्तिककारो व्याचष्टे—साधर्म्येणेति। यथा पक्षे सति प्रतिपक्ष एवं स्थापनायां सत्यां प्रत्यवस्थानमिति। सूत्रार्थस्तु यथाश्रुति, न पुनरुदाहरणसाधर्म्येण यथाभाष्यं बोद्धव्यः। यद्येवम्, भाष्यं तर्हि कथमित्यत आह—उदाहरणार्थमिति। एवं वैधर्म्येण वेत्येतदपि। 'यथाश्रुति' न पुनर्यथाभाष्यमुदाहरणार्थं तदित्यर्थः। अस्य व्याख्यानस्य गुणाभिधानेन प्रश्नपूर्वकं प्रपञ्चमाह—किमर्थमिदमिति ॥ १८ ॥

वृत्तिः

यत्किञ्चिद्धर्मादविशेषे किञ्चित्साधर्म्यात् छलत्वादिरूपात् छलस्यैक्यं स्यान्न तु त्वदभिमतं द्वित्वमपीति भावः ॥ १७ ॥

समाप्तं छलप्रकरणम् ॥

क्रमप्राप्तां जातिं लक्षयति—(साधर्म्येति)।

साधर्म्यवैधर्म्याभ्यामिति सावधारणो निर्देशः, तेन व्याप्तिनिरपेक्षाभ्यां साधर्म्यवैधर्म्याभ्यां प्रत्यवस्थानं दूषणाभिधानं जातिरित्यर्थः।

(क) इदं ख-पुस्तके नास्ति, किन्तु चतुर्थाध्याय-द्वितीयाह्निकान्तिमसूत्रे 'ईश्वराणां जनाधाराणा'मिति दृश्यते।

(सू०)—विप्रतिपत्तिरप्रतिपत्तिश्च निग्रहस्थानम् ॥ १९ ॥

न्यायभाष्यम्

विपरीता वा कुत्सिता वा प्रतिपत्तिर्विप्रतिपत्तिः। विप्रतिपद्यमानः पराजयं प्राप्नोति। निग्रहस्थानं खलु पराजयप्राप्तिः। अप्रतिपत्तिस्त्वारम्भविषये (१)अनारम्भः। परेण स्थापितं वा न प्रतिषेधति प्रतिषेधं वा नोद्धरति। असमासाच्च नैते एव निग्रहस्थाने इति ॥ १९ ॥

न्यायवार्त्तिकम्

विप्रतिपत्तिरप्रतिपत्तिश्च निग्रहस्थानम्। अन्यथा स्थितस्यान्यथाऽभिहितस्य अप्रतिपत्तिर्विप्रतिपत्तिश्च स्वपरार्थोत्तरा(२)संवित्तिरप्रतिपत्तिः। समर्थे साधने निग्रहस्थानप्राप्तौ कथमप्रतिपत्तिः विप्रतिपत्तिः—यदाऽयं साधयिता समर्थेन साधनेनोपात्तेन परेण जात्यादिभिराकुलीकृतः

न्यायवार्त्तिकतात्पर्यटीका

विप्र—नम् (सू० १९)॥ सूक्ष्मविषया प्रतिपत्तिर्विपरीता। स्थूलविषया च कुत्सिता, कथमसौ निग्रहस्थानमित्यत आह—विप्रतिपद्यमान इति। अप्रतिपत्तिमाह—आरम्भविषय इति। लाघवाय विप्रतिपत्त्यप्रतिपत्ती इति वक्तव्ये कस्मादसमासकरणमित्यत आह—असमासाच्चेति। विप्रतिपत्त्यप्रतिपत्तिभ्यामन्यदपि हेतूदाहरणाधिकं नाम जल्पे निग्रहस्थानमस्ति तदपि ग्रन्थाधिक्येनावरुध्यत इत्यर्थः। आरम्भविषये अनारम्भ इत्यादि भाष्यम्, तद् व्याचष्टे—स्वपरार्थोत्तरासंवित्तिरिति। द्वेधा खल्वारम्भविषयेऽनारम्भो भवति—दूष्यं वा परोक्तं साधनं प्रतिषेधहेतुं वा न प्रतिपद्यते, सेयं परार्थोत्तरासंप्रतिपत्तिः उत्तरग्रहणं साधनमप्युपलक्षयति। स्वार्थोत्तराप्रतिपत्तिस्तु साधनप्रतिषेधहेतू परकीयौ प्रतिपद्य तत् प्रतिषेद्धुं स्वकीयमुत्तरं न प्रतिपद्यत इत्यर्थः। चोदयति—स्वयं प्रयुक्ते वस्तुतः समर्थे साधने कथम् अप्रति-

वृत्तिः

यद्यप्युभाभ्यां प्रत्यवस्थानस्य प्रत्येकप्रत्यवस्थानेऽव्याप्तिः, एकप्रत्यवस्थानस्य लक्षणत्वेऽपरप्रत्यवस्थानेऽव्याप्तिः, नवाऽन्यतरप्रत्यवस्थानं नियतं सर्वत्र जातावभावात्, तथाऽपि व्याप्तिनिरपेक्षतया दूषणाभिधानमित्येव वाच्यम्। तेन सन्दर्भेण दूषणासमर्थत्वं स्वव्याघातकत्वं वा दर्शितम्। तथाच छलादिभिन्नदूषणासमर्थमुत्तरं स्वव्याघातकमुत्तरं वा जातिरिति सूचितम्।

साधर्म्यसमादिचतुर्विंशत्यन्यान्यत्वं तदर्थं इत्यपि वदन्ति ॥ १८ ॥

---

(१) "ऽप्यप्रारम्भ" इति ख-झा-आ-ग०। (२) "संप्रतिपत्तिरप्रतिपत्तिः" इति ख।

किं पुनर्दृष्टान्तवज्जातिनिग्रहस्थानयोरभेदोऽथ सिद्धान्तवद्भेद इत्यत आह—

(सू०)—तद्विकल्पाज्जातिनिग्रहस्थानबहुत्वम् ॥ २० ॥

न्यायभाष्यम्

तस्य साधर्म्यवैधर्म्याभ्यां प्रत्यवस्थानस्य विकल्पाज्जातिबहुत्वम्, तयोश्च (१)विप्रतिपत्त्यप्रतिपत्त्योर्विकल्पान्निग्रहस्थानबहुत्वम्। नाना कल्पो विकल्पः, विविधो वा कल्पो विकल्पः। तत्र अननुभाषणम् अज्ञानम् अप्रतिभा विक्षेपो मतानुज्ञा पर्यनुयोज्योपेक्षणमित्यप्रतिपत्तिर्निग्रहस्थानम्। शेषस्तु विप्रतिपत्तिरिति।

न्यायवार्त्तिकम्

(२) उत्तरं न प्रतिपद्यते तदा कथमप्रतिपत्तिः कथं वा विप्रतिपत्तिरिति ? तदाऽपि साधनस्यैव सामर्थ्यापरिज्ञानादसमर्थमेतत् साधनमित्यप्रतिपत्तिर्विप्रतिपत्तिरिति ॥ १९ ॥

ता एता जातयः कियत्यो भवन्ति कियन्ति वा निग्रहस्थानानि इत्यवधारणार्थमाह—

तद्विकल्पाज्जातिनिग्रहस्थानबहुत्वम् इति। साधर्म्यवैधर्म्याभ्यां प्रत्यवस्थानस्य विकल्पात् तयोश्च विप्रतिपत्त्यप्रतिपत्त्योर्विकल्पाद् बह्व्यो जातयो बहूनि निग्रहस्थानानि भवन्ति। कतमा

न्यायवार्त्तिकतात्पर्यटीका

पत्तिर्विप्रतिपत्तिः, वेति द्रष्टव्यम्। परिहरति—तदाऽपीति। समर्थसाधनज्ञानं साधनप्रतिपत्तिर्न साधनमात्रज्ञानमित्यर्थः ॥ १९ ॥

सूत्रान्तरमवतारयितुं भाष्यकार आह—किं पुनरिति। यद्यपि साधर्म्यवैधर्म्याभ्यां दृष्टान्तस्यापि भेदस्तथाऽपि लक्षणाभेदाभिप्रायेणाभेद उक्तः।

तद्वि—त्वम् (सू० २०) ॥ नाना कल्प इति स्वरूपतः, विविध इति प्रकारतः।

वृत्तिः

क्रमप्राप्तं निग्रहस्थानं लक्षयति—(विप्रतिपत्तिरिति)।

निग्रहस्य खलीकारस्य स्थानं (३) ज्ञापकं निग्रहस्थानम्। तच्च विप्रतिपत्तिरप्रतिपत्तिश्च। विप्रतिपत्तिर्विरुद्धा प्रतिपत्तिः। अप्रतिपत्तिः प्रकृताज्ञानम्। यद्यप्येतदन्यतरत् परनिष्ठं नोद्भावयितुमर्हं प्रतिज्ञाहान्यादेर्निग्रहस्थानत्वानुपपत्तिश्च तथाऽपि विप्रतिपत्त्यप्रतिपत्त्यन्यतरोन्नायकधर्मवत्त्वं तदर्थः।

उद्देश्यानुगुणसम्यग्ज्ञानाभावलिङ्गत्वं प्रतिज्ञाहान्याद्यन्यतमत्वं वा लक्षणमित्यपि वदन्ति ॥ १९ ॥

---

(१) "विप्रतिपत्त्यो" इति ग०। (२) "ज्ञानं प्रतिपद्यते" इति ख। (३) "ज्ञापकं निग्रहस्थानम्" इति भा-पु० नास्ति।

न्यायभाष्यम्

इमे प्रमाणादयः पदार्था उद्दिष्टाः, (१)यथोद्देशं लक्षिताः, यथालक्षणं परीक्षिष्यन्त इति त्रिविधा चाऽस्य शास्त्रस्य प्रवृत्तिर्वेदितव्येति ॥ २० ॥

इति वात्स्यायनीये न्यायभाष्ये प्रथमाध्यायस्य द्वितीयमाह्निकम् ।

समाप्तश्चायं प्रथमोऽध्यायः ॥ १ ॥

न्यायवार्त्तिकम्

जातयः साधर्म्यप्रत्यवस्थानात् कतमाश्च वैधर्म्यप्रत्यवस्थानात् कतमानि निग्रहस्थानानि विप्रतिपत्तिविकल्पात् कतमानि वाऽप्रतिपत्तिविकल्पाद् भवन्तीति प्रतियोगं विशेषलक्षणेषूत्प्रेक्षणीयानीति । एते प्रमाणादयः पदार्था उद्दिष्टा लक्षिताश्च । यथोद्देशं च यथालक्षणं च परीक्षा वर्त्तिष्यत इति ॥

तन्त्रप्रतिज्ञा संसारस्तन्निवृत्तिश्च संविदा ।

उद्देशो लक्षणं चैव तत्त्वानामिह कीर्तितम् ॥ २० ॥

इति—औद्योतकरे न्यायसूत्रवार्त्तिके प्रथमाध्याये द्वितीयमाह्निकम् ।

समाप्तश्चायं प्रथमोऽध्यायः ॥ १ ॥

न्यायवार्त्तिकतात्पर्यटीका

यथालक्षणमिति यथास्वरूपमित्यर्थः । अध्यायार्थं संक्षिप्याह वार्त्तिककारः—

तन्त्रप्रतिज्ञेति । तन्त्रस्य शास्त्रस्य प्रतिज्ञा प्रमाणादितत्त्वज्ञानान्निःश्रेयसाधिगम इति सूत्रम्, शास्त्रमेव हि तत्त्वज्ञानमिति । संसारः दुःखजन्मप्रवृत्तिदोषमिथ्याज्ञानानामिति, 'तन्निवृत्तिश्च संविदा' उत्तरोत्तरापाये तदनन्तराभावादपवर्ग इति । तस्माद् यः प्रमाणादिसूत्रेणोद्देशः, तत्परिकरो द्वितीयं सूत्रम्, द्वाभ्यामुद्देशः । शेषं सुबोधमिति ॥ २० ॥

इति मिश्रश्रीवाचस्पतिविरचितायां न्यायवार्तिकतात्पर्यटीकायां प्रथमस्याध्यायस्य द्वितीयमाह्निकम् ।

समाप्तश्चायं प्रथमोऽध्यायः ॥ १ ॥

वृत्तिः

जातिनिग्रहस्थानयोर्विभागो नास्तीति भ्रमो मा भूदित्यत आह—(तद्विकल्पादित्यादि) । तद्विकल्पात् साधर्म्यादिना प्रत्यवस्थानस्य विप्रतिपत्त्यादुयन्नायकव्यापारस्य च विकल्पाद्

(१) "यथोद्देशम्" इति ख-भा-पुस्तकयोर्नास्ति ।

वृत्तिः

भेदात् नानाप्रकारत्वादिति यावत् । इत्थं च तयोर्बहुत्वेऽपि प्रमाणादिपरीक्षाविषयकशिष्य-जिज्ञासया प्रतिबन्धान्नेदानीं तद्विभागः क्रियते इति भावः ॥ २० ॥

समाप्तं पुरुषाशक्तिलिङ्गदोषसामान्यलक्षणप्रकरणम्
प्रथमाध्यायस्य द्वितीयमाह्निकं च ।

इति श्रीविश्वनाथन्यायपञ्चाननभट्टाचार्यकृतन्यायसूत्रवृत्तौ
प्रथमाध्यायवृत्तिः समाप्ता ॥ १ ॥

प्रथमाध्याये १ आह्निके सूत्राणि ४१ । २ आह्निके सूत्राणि २० ।
मिलित्वा सूत्राणि ६१ ।

——:o:——

न्यायदर्शनम्

द्वितीयोऽध्यायः

प्रथमाह्निकम्

—:0:—

न्यायवार्त्तिकम्

त्रिविधा चास्य शास्त्रस्य प्रवृत्तिः उद्देशो लक्षणं परीक्षा चेत्युक्तम्(क)। तत्रोद्देशलक्षणे पूर्वाध्याय एव व्याख्याते, परीक्षा वर्त्तिष्यत इति। तत्र यथोद्देशस्तथा लक्षणं तथा परीक्षेति स्थानवतां परीक्षावचनमिति पूर्वं प्रमाणमुद्दिष्टं लक्षितं च, पूर्वमेव तत्परीक्ष्यत इत्यवसरप्राप्तानि तानि विलङ्घ्य संशयः परीक्ष्यते। किमर्थं क्रमभेदः? परीक्षाङ्गत्वात् पूर्वं संशयः परीक्ष्यते। तथा चोक्तम्—"विमृश्य पक्षप्रतिपक्षाभ्यामर्थावधारणं निर्णयः।" ननु चोक्तम्(ख)नायं निर्णये नियमो विमृश्य पक्षप्रतिपक्षाभ्यां सर्वत्र निर्णय इति, वादे पक्षप्रतिपक्षाभ्यामेव, शास्त्रे च विमर्शवर्जमिति। शास्त्रे चायं विचारः, तस्मान्न संशयपूर्वक इति; संशयपूर्वको हि विचारस्तर्कविषय एव, नायं तर्कविषय इति। सत्यम्, न निर्णये नियमः; विचारे हि नियमः, निर्णय एवं चान्यथा च, विचारः संशयपूर्वक

न्यायवार्त्तिकतात्पर्यटीका

अत ऊर्ध्वं प्रमाणादिपरीक्षेत्यादिभाष्यनिराकरणीयामाशङ्कामाह वार्त्तिककारः—त्रिविधा चास्येति। 'स्थानवतां' क्रमवताम्, परीक्षावचनमिति, प्रमाणमेव परीक्ष्यत इति युक्तमिति। किमत्राऽऽदौ प्रमाणं न परीक्षितं किं तु संशय एव परीक्ष्यत इत्याह—तानि विलङ्घ्येति। सोऽयं क्रमभेदः कुत इति (ग)भाष्यार्थमाह—परीक्षाङ्गत्वादिति। उद्देशक्रमानुरोधेन हि प्रमाणं पूर्वं लक्षितं न तु लक्षणे संशयस्यास्ति कश्चिदुपयोगः, परीक्षा तु सर्वा विमर्शकरणिकेति परीक्षापर्वणि सर्वथाऽऽर्थक्रमेण संशयस्य पूर्वभावः, यथा अग्निहोत्रं जुहोति यवागूं पचतीत्यत्राग्निहोत्रात्प्राग्भावो यवागूपाकस्य, तस्याग्निहोत्रसाधनत्वात्। संशयलक्षणं चात्र परीक्ष्यते न संशय इति नानवस्थाऽपि। देशयति—ननु चोक्तमिति। शास्त्रगता त्वियं परीक्षा, सा च न विमर्शपूर्वेत्यार्थक्रमाभावान्नोद्देशक्रमो बाधनीय इत्यर्थः। परिहरति—सत्यम्, न निर्णये नियम इति। न निर्णयः सर्वः

(क) ८३पृष्ठे भाष्यस्य तृतीयपङ्क्तिर्द्रष्टव्या।

(ख) १।१।४१ सूत्रभाष्ये एतादृशार्थकं वाक्यं द्रष्टव्यम्।

(ग) अत ऊर्ध्वमित्यादिभाष्यप्रतिपाद्यसंशयपरीक्षाप्राथम्ये बीजमिति भावः।

न्यायभाष्यम्

अत ऊर्ध्वं प्रमाणादिपरीक्षा। सा च 'विमृश्य पक्षप्रतिपक्षाभ्यामर्थावधारणं निर्णयः' (१ अ० १ आ० ४१ सू०) इत्यग्रे विमर्श एव परीक्ष्यते—

(सू०)—समानानेकधर्माध्यवसायादन्यतरधर्माध्यवसायाद्वा न संशयः ॥ १ ॥

समानस्य धर्मस्याध्यवसायात्संशयो न धर्ममात्रात्। अथ वा समानमनयोर्धर्म-

न्यायवार्त्तिकम्

एव। यदप्युक्तं वादे शास्त्रे च विमर्शवर्जमिति, वादिप्रतिवादिनावधिकृत्य तदुक्तम्। शास्त्राभ्युपगमे च वादिप्रतिवादिनोर्न संशयः, उभयोर्निश्चितत्वात्। शास्त्रे च न संशयः, निश्चितस्य वस्तुनः शास्त्राभ्युपगमेनाभ्युपगमात्। तत्र वादिप्रतिवादिनौ तावद्विचारयतः—किं नित्यसाधनं बलीयः आहोऽनित्यसाधनमिति। शास्त्रेऽपि च विचारः साधनसामर्थ्यासामर्थ्यपरिज्ञानार्थम्, तत्र संशय इति। तस्मात् संशयपूर्वक एव विचारः तन्मूलकत्वात् परीक्षाविधेः संशयः पूर्वं परीक्ष्यत(क) इति। तत्र संशयो वस्तुस्वरूपानवधारणात्मकः प्रत्ययः। निरुक्तिव्याघात इति चेत्—अनवधारणात्मकश्च प्रत्ययश्चेति व्याहतम्; न, प्रत्ययस्य स्वरूपानवधारणात्—अव्यवच्छेदात्मकत्वं स्वरूपमस्य परिच्छिद्यते, न पुनरनेन विषयस्वरूपमवधार्यत इति। सोऽयं संशयः समानधर्मोपपत्ते-(१)रित्येवमादिभ्यः, तस्याक्षेपः—

समानानेकधर्माध्यवसायादित्येवमादि सूत्रम्। तस्य यथाश्रुत्युत्थानमिति। समानस्य

न्यायवार्त्तिकतात्पर्यटीका

संशयपूर्वः, विचारः सर्व एव संशयपूर्वः, शास्त्रवादयोश्चास्ति विचार इति तेनापि संशयपूर्वेण भवितव्यम्। शिष्ययोश्च वादिप्रतिवादिनोः शास्त्रे विमर्शाभावो न शिष्यमाणयोः, तस्मादस्ति शास्त्रेऽपि विमर्शपूर्वो विचार इति सिद्धम्। संशीतिरिति संशयस्य निरुक्तम्, नावधारयतीत्यर्थः।

(समाना—यः) ननु यथा लक्षणार्थः पूर्वनिरूपितस्तथा निर्बीजः पूर्वपक्ष इत्यत आह—तस्य यथाश्रुतीति, परीक्षासाध्यो ह्यर्थस्तत्र व्याख्यानेन लक्षणपदेभ्यः साक्षादेव गम्यत इत्यर्थः।

वृत्तिः

प्रमाणैः प्रथितैर्दोर्भिर्विवादेषु परीक्षितैः।
हरिं द्वितीयमध्यायं भासमानमहं भजे ॥ १ ॥

अथ प्रमाणादिषु लक्षितेषु परीक्षणीयेषु संशयं विना परीक्षाया असम्भवादादौ संशय

(क) 'अयं विमर्श एव परीक्ष्यते' इति भाष्यमर्थतोऽत्र धृतम्।

(१) "-रित्येवमादिर्यः" इति ख।

न्यायभाष्यम्

मुपलभ इति धर्मधर्मिग्रहणे संशयाभाव इति। अथवा समानधर्माध्यवसायादर्थान्तरभूते धर्मिणि संशयोऽनुपपन्नः, न जातु रूपस्यार्थान्तरभूतस्याध्यवसायादर्थान्तरभूते स्पर्शे संशय इति। अथ वा न अध्यवसायाद् अर्थावधारणाद् अनवधारणज्ञानं संशय उपपद्यते कार्यकारणयोः सारूप्याभावादिति। एतेनानेकधर्माध्यवसायादिति व्याख्यातम्। अन्यतरधर्माध्यवसायाच्च संशयो न भवति, ततो ह्यन्यतरावधारणमेवेति ॥ १ ॥

न्यायवार्त्तिकम्

धर्मस्य (क)अध्यवसायात् संशयो न समानधर्ममात्रादुपलभ्यमानो धर्मः संशयहेतुरिति (ख)धर्म-(१) धर्मिग्रहणे वा संशयाभाव इति। (ग)समानमनयोर्धर्म(२)मुपलभ इति धर्मधर्मिग्रहणे क्व संशय इति। (घ)धर्मिणो(३)ऽर्थान्तरभावाद्वा न संशयः, न ह्यन्यस्मिन्नुपलब्धेऽन्यत्र संशय इति। (ङ)अथवा न समानधर्माध्यवसायः संशयस्य कारणं व्यवच्छेदात्मकत्वात् संशये च तदभावादिति। एतेनानेकधर्माध्यवसायादिति व्याख्यातम्। अधिगतानधिगतयोर्न संशयः, अधिगते

न्यायवार्त्तिकतात्पर्यटीका

समानमनयोरिति साक्षात्कारं दर्शयति। न हि साक्षात् स्थाणुपुरुषावुपलभमानः समानं चानयोर्धर्मं कश्चित्संदिग्ध इत्यर्थः। व्यवच्छेदात्मकत्वादिति, न निश्चयोऽनिश्चयस्य जनकः कारणानु-

वृत्तिः

एव परीक्षणीयः शिष्यजिज्ञासानुरोधात् सूचीकटाहन्यायाच्च। अतः संशयपरीक्षायाः प्रमाणादिपरीक्षोपयोगित्वात् प्रमाणपरीक्षैवाध्यायार्थ इति वदन्ति।

वस्तुतस्तु छलस्य परीक्षितत्वात् तृतीयचतुर्थयोः प्रमेयस्य पञ्चमे च जातेः परीक्षिष्यमाणत्वात् तदतिरिक्तयावत्पदार्थपरीक्षैवाध्यायार्थः प्रयोजनादिपरीक्षाया अप्यत्रैवाति-

---

(१) '-धर्मिग्रहणेन वा' इति ख। (२) '-मुपलभते' इति ख। (३) 'अर्थान्तरभावत्वात्' इति ख।

(क) अध्यवसायात् संशय इति। पूर्वपक्षिभिरपि समानादिधर्माध्यवसायस्य संशयं प्रति हेतुत्वाभ्युपगमात् संशये तज्जन्यत्वाभावकथनासम्भवेन अध्यवसायात् संशयः इति सूत्रे पूरयित्वा पूर्वपक्षमाह न समान धर्मेति, संशयः समानधर्ममात्रजन्यो नेत्यर्थः।

(ख) द्वितीयविकल्पगतः 'धर्मधर्मिग्रहणे वे'त्यंशोऽत्र प्रमादादापतित इति सम्भाव्यते भाष्ये तथाऽदर्शनात्।

(ग) अध्याहारमन्तरेणैव व्याचष्टे समानमिति। समानधर्माध्यवसायो यदि समानमनयोर्धर्ममुपलभ इत्याकारकस्तदा धर्मिणोर्विवेकेन ज्ञानान्न संशय इत्यर्थः।

(घ) अध्यवसायस्याकारविशेषमुपेत्यैव संशयाभावमुपपादयति धर्मिण इति। यस्योपलब्धिस्तद्धर्मिक एव संशयो युक्त इत्याशङ्कितुरभिप्रायः।

(ङ) तृतीयविकल्पेऽपि अध्याहारापेक्षणादाह अथवा न समानेति। उपादानोपादेययोरिव निमित्तकारणतत्कार्ययोरपि सारूप्यमस्तीति निश्चयसंशययोर्वैलक्षण्येन न कार्यकारणभाव इत्याशयः इत्यर्थः।

न्यायवार्त्तिकम्

वस्तुनि संशयो न युक्तः, निर्णीतत्वात् ; नानधिगते, अदृष्टत्वात् । न समानधर्माध्यवसायात् एव संशयः, सत्यप्यभावात्—सत्यपि समानधर्माध्यवसाये न दृष्टः संशयः, यथा कृतकत्वाच्छब्दे । (क)न समानधर्माध्यवसायादेव संशयोऽन्यथाऽपि भावात्—अन्यथाऽपि दृष्टः संशयः यथा विरुद्धाव्यभिचारिधर्मद्वयसन्निपाते । तत्त्वानुपलब्धेश्च संशयः यथा प्रकरणसमे । एकवृत्तित्वाच्च न समानः—एकवृत्तिरयं धर्मो न चैकवृत्तिः समानो भवितुमर्हतीति ॥ १ ॥

न्यायवार्त्तिकतात्पर्यटीका

रूपत्वात् कार्यस्येत्यर्थः । न समानधर्माध्यवसायादेवेति संशयलक्षणोक्तकारणमात्रोपलक्षणपरम् । एकवृत्तित्वाच्चेति । न हि यावेवारोहपरिणाहौ स्थाणोस्तावेव पुरुषस्येत्यर्थः ॥ १ ॥

वृत्तिः

देशेन करिष्यमाणत्वात् । तत्र विभागसापेक्षप्रमाणपरीक्षातिरिक्तोक्तयावत्पदार्थपरीक्षा प्रथमाह्निकार्थः । तत्र च नव प्रकरणानि । तत्रादौ संशयपरीक्षाप्रकरणम् । अन्यानि (१) यथासम्भवं वक्ष्यन्ते ।

तत्र संशयपरीक्षणाय पूर्वपक्षसूत्रम्—(समानानेकेति) ।

अत्र सूत्रकृता संशयस्याप्रदर्शनात् संशयपरीक्षायां संशयो नाङ्गमनवस्थाभयादित्याशयं सूत्रकृतो वर्णयन्ति, तदसत् ; न ह्यत्र संशयस्वरूपं परीक्ष्यते येनानवस्था स्यात्, अपि तु लक्षणसूत्रोक्तं संशयकारणम् । तथा च संशयः समानधर्मदर्शनादिजन्यो न वेति संशयः सम्भवत्येव । परन्तु सूत्रकृतो निर्णयसत्त्वात् पूर्वपक्षनिरासमात्रस्यापेक्षणात् संशयो न दर्शितः । एवमेव प्रमाणादिपरीक्षायामपि । अत एवाऽभिहितं भाष्ये 'शास्त्रे वादे च विमर्शवर्जम्' इति ।

तत्र समानादिधर्मदर्शनात् न संशयः प्रत्येकं व्यभिचारात् । अन्यतरत्वेनानुगतीकृततद्दर्शनादपि न संशयः, न हि स्थाणुधर्मसमानधर्मोऽयं पुरुषधर्मसमानधर्मोऽयमिति वा जानन् स्थाणुर्न वेति सन्दिग्धे, समानत्वस्य भेदगर्भत्वाद् भिन्नधर्मत्वेन ज्ञाते तद्भेदग्रहस्यैव सम्भवात् ।

यद्वा समानानेकधर्मोपपत्तेरिति लक्षणसूत्रे उपपत्तिपदं स्वरूपपरमिति भ्रान्तस्येयं शङ्का । तथा चायमर्थः, न संशयः समानधर्मादितः ; स्वरूपसत इति शेषः ; यतः समानधर्मादेरध्यवसायादन्यतरत्वेनानुगतीकृततदध्यवसायाद्वा संशयः, अन्यथा संशयस्य सार्वत्रिकत्वापत्तेः ॥ १ ॥

---

(१) "यथायथम्" इति श्रा० ।

(क) चतुर्थविकल्प सूत्र धर्मान्तस्य वैयर्थ्यमाशङ्क्य वार्त्तिककारः समानानेकधर्मोपपत्तेरित्यादिसूत्रस्य सावधारणे तात्पर्यमिति भ्रमात् पूर्वपक्ष इत्याह न समानधर्माध्यवसायादेवेत्यादि ।

(सू०)—विप्रतिपत्त्यव्यवस्थाध्यवसायाच्च ॥ २ ॥

न्यायभाष्यम्

न विप्रतिपत्तिमात्रादव्यवस्थामात्राद्वा संशयः। किं तर्हि? विप्रतिपत्तिमुपलभमानस्य संशयः। एवमव्यवस्थायामपीति। अथवाऽस्त्यात्मेत्येके नास्त्यात्मेत्यपरे मन्यन्त इत्युपलब्धेः कथं संशयः स्यादिति। तथोपलब्धिरव्यवस्थिता अनुपलब्धिश्चाव्यवस्थितेति विभागेनाध्यवसिते संशयो नोपपद्यते इति ॥ २ ॥

(सू०)—विप्रतिपत्तौ च सम्प्रतिपत्तेः ॥ ३ ॥

न्यायभाष्यम्

यां च विप्रतिपत्तिं भवान् संशयहेतुं मन्यते सा सम्प्रतिपत्तिः, सा हि द्वयोः प्रत्यनीकधर्मविषया। तत्र यदि विप्रतिपत्तेः संशयः, सम्प्रतिपत्तेरेव संशय इति ॥ ३ ॥

न्यायवार्त्तिकम्

विप्रतिपत्त्यव्यवस्थाध्यवसायाच्च ॥ (१) विप्रतिपत्त्यव्यवस्थाध्यवसायात् संशयो न विप्रतिपत्तिमात्रादव्यवस्थामात्राद्वा ॥ २ ॥

विप्रतिपत्तौ च सम्प्रतिपत्तेः । न विप्रतिपत्तिरस्तीति सूत्रार्थः। (क) एतेन विप्रतिपत्त्यव्यवस्थाध्यवसायादिति प्रत्युक्तम् ॥ ३ ॥

न्यायवार्त्तिकतात्पर्यटीका

विप्र—च्च (सू० २) ॥ (ख)

विप्र—त्तेः (सू० ३) ॥ विप्रतिपत्तौ च संप्रतिपत्तेरिति, (ग) न स्वरूपविरोधाद्विप्रतिपत्तिरस्तीत्यर्थः ॥ ३ ॥

वृत्तिः

विप्रतिपत्त्यादिजन्यसंशयत्रयं प्रतिक्षिपति—(विप्रतिपत्तीति)।

न संशय इत्यनुवर्तते। विप्रतिपत्तेः उपलब्ध्यव्यवस्थाया अनुपलब्ध्यव्यवस्थायाश्च न संशयजनकत्वम्, प्रत्येकं व्यभिचारादित्यर्थः।

यद्वा स्वरूपसद्विप्रतिपत्त्यादितो न संशयः किन्तु तदध्यवसायादित्यर्थः ॥ २ ॥

विप्रतिपत्तिजसंशयमात्रप्रतिक्षेपाय सूत्रान्तरम्—(विप्रतिपत्ताविति)।

विप्रतिपत्तौ न संशयहेतुत्वम्, सम्प्रतिपत्तेः निश्चयात्; वादिनोर्मध्यस्थस्य च निश्चयसत्त्वात्, सति च निश्चये संशयायोगादिति भावः ॥ ३ ॥

---

(१) 'विप्रतिपन्ने व्यवस्था-' इति ख।

(क) 'एतेन विप्रतिपत्त्यव्यवस्थाध्यवसायादिति प्रत्युक्तम्' इत्यंशः क-वार्त्तिकपुस्तके 'विप्रतिपत्तौ'त्यादिद्वितीयसूत्रवार्त्तिकस्य प्रारम्भे मुद्रितः।(ख) द्वितीयसूत्रे तात्पर्यटीका नास्ति। (ग) क-तात्पर्ये स्वरूपविरोधादिति नञ्शून्यः पाठः।

(सू०)—अव्यवस्थात्मनि व्यवस्थितत्वाच्चाव्यवस्थायाः ॥४॥

न्यायभाष्यम्

न संशयः। यदि तावदियमव्यवस्था आत्मनि एव व्यवस्थिता, व्यवस्थानाद्-व्यवस्था न भवतीत्यनुपपन्नः संशयः। (१) अथ अव्यवस्थाऽऽत्मनि न व्यवस्थिता, एवमतादात्म्यादव्यवस्था न भवतीति संशयाभाव इति ॥ ४ ॥

(सू०)—तथाऽत्यन्तसंशयस्तद्धर्मसातत्योपपत्तेः ॥ ५ ॥

(भा०) येन कल्पेन भवान् समानधर्मोपपत्तेः संशय इति मन्यते, तेन खल्वत्यन्त-संशयः प्रसज्यते। समानधर्मोपपत्तेरनुच्छेदात् संशयानुच्छेदः। न ह्ययमतद्धर्मा धर्मी विमृश्यमाणो गृह्यते, सततं तु तद्धर्मा भवतीति ॥ ५ ॥

न्यायवार्त्तिकम्

अव्यवस्थाऽऽत्मनि व्यवस्थितत्वाच्चाव्यवस्थायाः। नाव्यवस्था विद्यत इति सूत्रार्थः ॥४॥

तथाऽत्यन्तसंशयस्तद्धर्मसातत्योपपत्तेः। समानधर्मादीनां सातत्यान्नित्यः संशय इति सूत्रार्थः ॥ ५ ॥

न्यायवार्त्तिकतात्पर्यटीका

अव्य—याः (सू० ४) ॥ (क)

तथा—त्तेः (सू० ५) ॥ तथाऽत्यन्तसंशय (ख) इति तत्पदान्तरेण समानधर्मोप-पत्त्यादेर्विशेषणमपश्यतः पूर्वपक्षः ॥ ५ ॥

वृत्तिः

उपलब्ध्यनुपलब्ध्यव्यवस्थातः संशयद्वयनिरासाय सूत्रम्—(अव्यवस्थाऽऽत्मनीति)।

उपलब्ध्यव्यवस्थाया अनुपलब्ध्यव्यवस्थायाश्च संशयजनकत्वं तदा स्यात् यदि स्वस्मिन्नप्यव्यवस्थितत्वं स्यात्, न त्वेवम्। तथा च स्वात्मनि व्यवस्थितायास्तस्याः कथ-मन्यत्राव्यवस्थात्वमित्यर्थः ॥ ४ ॥

ननु अव्यवस्था प्रामाण्यसंशयस्तस्य च न स्वसंशयरूपत्वम्, संशयस्य विषय-विशेषघटितत्वात् तस्य चान्यसंशयजनकत्वं न विरुद्धम्, अतो दूषणान्तरमाह—(तथाऽत्यन्तेति)।

"तथा" तथा सति अव्यवस्थाया हेतुत्वे सति। तथाशब्दोऽयं न सूत्रान्तर्गतोऽपि तु भाष्यस्थ इत्यन्ये। 'अत्यन्तसंशयः' संशयानुच्छेदः स्यात् 'तद्धर्मस्य' तज्जनकस्य ज्ञानत्वादि-साधारणधर्मदर्शनस्य 'सातत्योपपत्तेः' सर्वदा सम्भवात्। अथ ज्ञानत्वादिसाधारणधर्मदर्शनेऽपि

(१) "अथ व्यवस्था" इति ग०।

(क) चतुर्थसूत्रे तात्पर्यटीका नोपलभ्यते। (ख) अत्र इत्येतत् पदान्तरेण इत्येव पाठो न वेति विचार-णीयम्। तदर्थं च २३६ पत्रे वार्त्तिकतात्पर्यटीके द्रष्टव्ये।

न्यायभाष्यम्

अस्य प्रतिषेधप्रपञ्चस्य सङ्क्षेपेणोद्धारः—

(सू०)—यथोक्ताध्यवसायादेव तद्विशेषापेक्षात् संशये नासंशयो नात्यन्तसंशयो वा ॥ ६ ॥

(१) न संशयानुत्पत्तिः संशयानुच्छेदश्च प्रसज्यते । कथम्? यत्तावत् समानधर्माध्यवसायः संशयहेतुः न समानधर्ममात्रमिति, एवमेतत् । कस्मादेवं नोच्यते इति? विशेषापेक्ष इति वचनात् तत्सिद्धेः—विशेषस्यापेक्षा आकाङ्क्षा, सा चानुपलभ्यमाने विशेषे समर्था, न चोक्तं समानधर्मापेक्ष इति । समाने च धर्मे कथमाकाङ्क्षा न भवेद् यद्ययं प्रत्यक्षः स्यात् । एतेन सामर्थ्येन विज्ञायते समानधर्माध्यवसायादिति ।

उपपत्तिवचनाद्वा—समानधर्मोपपत्तेरित्युच्यते न चान्या सद्भावसंवेदनादृते समानधर्मोपपत्तिरस्ति । अनुपलभ्यमानसद्भावो हि समानो धर्मोऽविद्यमानवद् भवतीति ।

विषयशब्देन वा विषयिणः प्रत्ययस्याभिधानम्—यथा लोके धूमेनाग्निरनुमीयत इत्युक्ते धूमदर्शनेनाग्निरनुमीयत इति ज्ञायते । कथम्? दृष्ट्वा हि धूममथाग्निमनुमिनोति (२)नादृष्ट्वेति; न च वाक्ये दर्शनशब्दः श्रूयते, अनुजानाति च वाक्यस्यार्थप्रत्यायकत्वम्; तेन मन्यामहे विषयशब्देन विषयिणः प्रत्ययस्याभिधानं बोद्धाऽनुजानाति । एवमिहापि समानधर्मशब्देन समानधर्माध्यवसायमाहेति ।

न्यायवार्त्तिकम्

अस्योत्तरम्—

यथोक्ताध्यवसायादेव तद्विशेषापेक्षात् संशये नासंशयो नात्यन्तसंशयो वा ।

न, सूत्रार्थापरिज्ञानादिति सूत्रार्थः । यत्पुनरेतद्धर्मधर्मिग्रहणे संशयाभाव इति, तन्न;

न्यायवार्त्तिकतात्पर्यटीका

सिद्धान्तमाह—अस्योत्तरमिति ।

यथो—वा (सू० ६) ॥ यदि निर्विशेषणं समानधर्मोपपत्त्यादि संशयकारणमुच्येत ततः

वृत्तिः

कारणान्तरविलम्बान्न सर्वत्र प्रामाण्यसंशय इति यदि ब्रूयात् तदा तस्यैव विषयसंशयेऽपि हेतुत्वमस्त्विति किं प्रामाण्यसंशयस्य साधारणधर्मदर्शनादेर्वा संशयहेतुत्वेनेति भावः ॥ ५ ॥

---

(१) 'संशयानुत्पत्तिः संशयानुच्छेदश्च न प्रसज्यते' इति ल०, "न संशयानुपपत्तिः"—इति भा० "संशयानुच्छेद एव प्रसज्यते" इति ग० । (२) "नादृष्टे" इति ल०, "नादृष्ट्वा" इति भा० ।

न्यायभाष्यम्

यथोहित्वा समानमनयोर्धर्ममुपलभ (१) इति धर्मधर्मिग्रहणे संशयाभाव इति, पूर्वदृष्टविषयमेतत्। यावहमर्थौ पूर्वमद्राक्षं तयोः समानं धर्ममुपलभे विशेषं नोपलभ इति, कथं नु विशेषं पश्येयं येनान्यतरमवधारयेयमिति। न चैतत् समानधर्मोपलब्धौ धर्मधर्मिग्रहणमात्रेण निवर्तत इति।

यच्चोक्तं नार्थान्तराध्यवसायादन्यत्र संशय इति, यो ह्यर्थान्तराध्यवसायमात्रं संशयहेतुमुपाददीत स एवं वाच्य इति।

यत्पुनरेतत् कार्यकारणयोः सारूप्याभावादिति, कारणस्य भावाभावयोः कार्यस्य

न्यायवार्त्तिकम्

अपरिज्ञानात्—न ब्रूमो योऽसौ धर्म्युपलभ्यते तस्य धर्ममुपलभ इति अपि तु यौ मया पूर्व स्थाणुपुरुषावुपलब्धौ तयोरयं समानो धर्म उपलभ्यत इति। एतेनैकवृत्तित्वादिति परिहृतम्।

यत्पुनरेतत् नार्थान्तराध्यवसायादन्यत्र संशय इति, न, अनभ्युपगमात्। अपरे न अर्थान्तरभावमात्रं मया संशयहेतुत्वेनोपादीयते (२) किं त्वर्थान्तरविशेषः। कः पुनरयं विशेषः ? धर्मधर्मिभावः—धर्म उपलब्धे धर्मिणि संशय इति परिहारं मन्यन्ते। न पुना रूपस्पर्शयोर्धर्मधर्मिभाव इति। अयं च न परिहार इति(क) पश्यामः। किं कारणम् ? अर्थान्तरभावस्यानिवृत्तेः—यथैव रूपस्पर्शयोरर्थान्तरभावस्तथा धर्मधर्मिणोरपीति न युक्तोऽर्थान्तरदर्शनादर्थान्तरे संशयः। अत्रापि तदेवोत्तरम्—नानभ्युपगमादिति। न ब्रूमोऽर्थान्तरदर्शनादर्थान्तरे धर्मिणि सन्देहः, अपि तु समानधर्मादिविशिष्टधर्मिदर्शना(३)दविशेषवति धर्मिण्येव संशय इति।

यदप्येतत् सारूप्याभावादिति, विशेषानवधारणमुभयोः सारूप्यम्—यथैव समानधर्मदर्शनेन

न्यायवार्त्तिकतात्पर्यटीका

पश्चादकरणात्पूर्वमपि न कुर्यादित्यसंशयः, पूर्वं वा करणात्पश्चादपि कुर्यादित्यत्यन्तसंशयः ; न त्वसौ निर्विशेषणः संशयकारणमिति नासंशयो नात्यन्तसंशय इत्यर्थः। (ख) यथोहित्वेति भाष्ये यदप्युक्तमित्यर्थः।

एतेनेति, समानपदप्रयोगेण। सदृशार्थो हि समानशब्द इति पूर्वं व्याख्यातम् (ग)। यदप्येतत् सारूप्याभावात् अध्यवसायसंशययोः कार्यकारणयोरिति। विशेषानवधारणमुभयोः समानमित्यर्थः। भाष्यकारेण तु यत्सारूप्यमुक्तं तत्तथा न बोद्धव्यम्। यदि हि कार्यकारणयो-

वृत्तिः

सिद्धान्तमाह—(यथोक्तेति)।

यथोक्ताध्यवसायात् साधारणादिधर्मदर्शनात् तस्य पुरुषत्वादेः यो विशेषः इतर-

(१) "उपलभते" इति ग-भा०।

(२) "किं त्वर्थान्तरं विशेषः" इति क। (३) 'दर्शनात् विशेषवति' इति क-पुस्तके पाठः।

(क) अतः परमादर्शे (तच्च न) इत्येवं मुद्रितोऽंशः 'अयं च ने'त्यत्र आशङ्कितः पाठ इत्यनुमीयते।

(ख) यथोहित्वेत्यादिग्रन्थः सप्तमसूत्रीयतात्पर्ये "समाधेय" इत्यनन्तरमादर्शे मुद्रितोऽपि षष्ठसूत्रीयभाष्यग्रन्थस्य तत्र व्याख्यानमयुक्तं लेखकप्रमाद एव च तत्र हेतुरित्यवधार्य अस्माभिरिह गृहीतः।

(ग) २३५ पृः वार्त्तिकतात्पर्यटीकै द्रष्टव्ये।

न्यायभाष्यम्

भावाभावौ कार्यकारणयोः सारूप्यम्। यस्योत्पादाद् यदुत्पद्यते यस्य चानुत्पादाद् यन्नोत्पद्यते तत्कारणं कार्यमितरदित्येतत्सारूप्यम्, अस्ति च संशयकारणे संशये चैतदिति। एतेनानेकधर्माध्यवसायादिति प्रतिषेधः परिहृत इति।

यत्पुनरेतदुक्तं 'विप्रतिपत्त्यव्यवस्थाध्यवसायाच्च न संशय' इति, पृथक्प्रवादयो-

न्यायवार्त्तिकम्

विशेषो नावधार्यत इति तथा संशयेनापीति। कारणसद्भावात् कार्यसद्भाव इति न सारूप्यनिर्देशोऽयम्, अपि तु कार्यकारणधर्मनिर्देशः। तथा च कार्यान्तरेष्वप्येतदस्तीति। न हि किञ्चित् कार्यं कारणसद्भावमन्तरेण सम्भवतीति। एतेनानेकधर्माध्यवसायादिति प्रतिषेधः परिहृतः। य एव समानधर्माध्यवसाये परिहारः स एवानेकधर्माध्यवसायेऽपीति।

(क)यत् पुनरेतदधिगतानधिगतयोरभावादिति, तन्न, अपरिज्ञानादिति—न ब्रूमोऽन्यस्मिन्नधिगतेऽन्यत्र संशय इति, अपि तु सामान्यतोऽधिगते धर्मिणि विशेषानवधारणात्मकः प्रत्ययः संशय इति। यत् पुनरेतत् सत्यप्यभावादिति, न समानार्थापरिज्ञानात्—न हि कृतकत्वं समानो धर्मः, अन्यथा समानधर्मस्याभिधानात्—समानो धर्म इति विवक्षिततज्जातीयान्यवृत्तिर्यः स समानो न पुनः कृतकत्वमेवम्। यत् पुनरेतत् न समानधर्माध्यवसायादेवान्यथाऽपि दर्शनादिति, तन्न; प्रतिषेधादनवधारणाच्च—विरुद्धाव्यभिचारिधर्माध्यवसायात् संशय इति प्रतिषिद्धमेतत् अनवधारणेनैव तत्त्वानुपलब्धेरिति प्रत्युक्तम्। न चैतदवधार्यते समानधर्मदर्शनादेव नान्यस्मादिति अन्यस्मादपि संशयोऽनेकधर्माध्यवसायादित्युक्तम्।

विप्रतिपत्त्यव्यवस्थाध्यवसायादेवेत्यनेनैव प्रत्युक्तम्। नैवं ब्रूमो विप्रतिपत्तिमात्रादव्यव-

न्यायवार्त्तिकतात्पर्यटीका

उत्पत्तिः सारूप्यं तदतिव्यापकं चाव्यापकं च नित्यानामपि कारणत्वात्। तस्मात् सारूप्यशब्दो न सारूप्यस्य निर्देशः, अपि तु कार्यकारणधर्मान्वयव्यतिरेकपर इत्याह—कारणसद्भावादिति। अनवधारणेनैव तत्त्वानुपलब्धेरिति प्रत्युक्तम्। सत्प्रतिपक्षयोरपि मिलितयोरन्यत्रादर्शनेनासाधारण एवान्तर्भावात्, एकैकविवक्षया तु हेत्वाभासान्तरत्वमिति

वृत्तिः

व्यावर्तको धर्मः तस्य (१)अपगता ईक्षा ईक्षणं ततः विशेषादर्शनादित्यर्थः। तथा च विशेषादर्शनसहितसाधारणधर्मदर्शनादितः संशये स्वीकृते न कारणाभावादसंशयो न वा यत्किञ्चित्कारणसत्त्वादत्यन्तसंशय इत्यर्थः। साधारणधर्मदर्शनादेश्च संशयविशेषे जनक-

(१) "अपगत ईच" इति वा।

(क) प्रथमसूत्रे स्वीया आशङ्काः परिहरति यत् पुनरित्यादिना।

न्यायभाष्यम्

व्याहतमर्थमुपलभे विशेषं च न जानामि नोपलभे येनान्यतरमवधारयेयम्, तत्कोऽत्र विशेषः स्याद् येनैकतरमवधारयेयमिति संशयो विप्रतिपत्ति(१)जनितोऽयं न शक्यो (२)विप्रतिपत्तिसम्प्रतिपत्तिमात्रेण निवर्त्तयितुमिति। एवमुपलब्ध्यनुपलब्ध्यव्यवस्थाकृते संशये वेदितव्यमिति।

यत्पुनरेतत् विप्रतिपत्तौ च सम्प्रतिपत्तेरिति, (३)विप्रतिपत्तिशब्दस्य योऽर्थः तदध्यवसायो विशेषापेक्षः संशयहेतुस्तस्य च समाख्यान्तरेण न निवृत्तिः। समानेऽधिकरणे व्याहतार्थौ प्रवादौ विप्रतिपत्तिशब्दस्यार्थः तदध्यवसायश्च विशेषापेक्षः संशयहेतुः। न चास्य (४)सम्प्रतिपत्तिशब्दे समाख्यान्तरे योज्यमाने संशयहेतुत्वं निवर्त्तते। तदिदमकृतबुद्धिसम्मोहनमिति।

यत्पुनः 'अव्यवस्थात्मनि (५)व्यवस्थितत्वाच्चाव्यवस्थाया' इति, संशयहेतोरर्थस्याप्रतिषेधादव्यवस्थाभ्यनुज्ञानाच्च निमित्तान्तरेण शब्दान्तरकल्पना व्यर्था। शब्दान्तर-

न्यायवार्त्तिकम्

स्थामात्रात् वा संशय इति। न चाव्यवस्थातः संशय उपलब्ध्यनुपलब्ध्यव्यवस्थायाः पूर्वपदविशेषणत्वात्—पूर्वपदविशेषणमुपलब्ध्यनुपलब्धी न स्वतन्त्रे संशयकारणम्, तच्च सूत्र एवोक्तमिति।

यत्पुनरेतत् विप्रतिपत्तौ च सम्प्रतिपत्तेरिति, न संज्ञान्यथात्वादर्थस्यान्यथात्वम्—यस्माद्विप्रतिपत्तिशब्दार्थस्य निमित्तान्तरसन्निपाते सम्प्रतिपत्तिरिति नाम कृतं न तावता विप्रतिपत्तिर्नास्ति, विप्रतिपत्तेस्तु तथाभावात् संशयहेतुत्वमिति।

यत्पुनरेतद् "अव्यवस्थाऽऽत्मनि व्यवस्थितत्वाच्चाव्यवस्थाया" नाव्यवस्थास्तीति तदपि

न्यायवार्त्तिकतात्पर्यटीका

भावः। न चाव्यवस्थातः संशय इति। नासौ पृथक्कारणमपि तु समानधर्मोपपत्त्यादिपरिकरतयेत्यर्थः। यत्पुनरेतद्विप्रतिपत्ताविति। विषयापेक्षया विप्रतिपत्तिः स्वरूपापेक्षया संप्रतिपत्तिरिति। एवमव्यवस्थायामपि द्रष्टव्यम्॥ ६॥

वृत्तिः

त्वात् संशयत्वावच्छिन्नं प्रति व्यभिचारेऽपि न क्षतिः, विप्रतिपत्तौ च वादिवाक्याभ्यां मध्यस्थस्यैव संशयोपगमात्।

---

(१) "-जनितोऽर्थो" वि·टि·भा०। (२) "विप्रतिपत्तिसंशयमात्रेण" इति ग०। (३) "शब्दस्यार्थ" इति ख०। (४) "सम्प्रतिपत्तिशब्दे" इति ख-ग-पु० नास्ति। (५) "व्यवस्थितत्वाद् व्यवस्थाया" इति ग०।

न्यायभाष्यम्

कल्पना(१)ऽव्यवस्था खलु अव्यवस्था न भवत्यव्यवस्थात्मनि व्यवस्थितत्वादिति। नानयोरुपलब्ध्यनुपलब्ध्योः सदसद्विषयत्वं (२)विशेषापेक्षं संशयहेतुर्न भवतीति प्रतिषिध्यते यावता चाऽव्यवस्थात्मनि व्यवस्थिता न तावताऽऽत्मानं जहाति, तावता ह्यनुज्ञाताऽव्यवस्था। एवमियं क्रियमाणाऽपि शब्दान्तरकल्पना नार्थान्तरं साधयतीति।

यत्पुनरेतत् 'तथाऽत्यन्तसंशयस्तद्धर्मसातत्योपपत्तेः' इति, नायं समानधर्मादिभ्य एव संशयः। किं तर्हि ? तद्विषयाध्यवसायाद् विशेषस्मृतिसहितादित्यतो नात्यन्त-संशय इति।

अन्यतरधर्माध्यवसायाद्वा न संशय इति, तन्न युक्तम्; विशेषापेक्षो विमर्शः संशय इति वचनात्। विशेषश्चान्यतरधर्मो न तस्मिन्नध्यवसीयमाने विशेषापेक्षा सम्भवतीति ॥ ६ ॥

न्यायवार्त्तिकम्

न; व्याघातात्—अव्यवस्था नास्त्यव्यवस्थात्मनि च (३) व्यवस्थितेति व्याघातः। न च निमित्तान्तरसन्निपातेनार्थस्य संज्ञान्तरकरणमर्थतथाभावं बाधते, यथाभूत एवार्थः संज्ञान्तरकरणे तथाभूत एवाकरणेऽपीति।

यत्पुनरेतत् "तथात्यन्तसंशयस्तद्धर्मसातत्योपपत्तेरिति, तदपि न, सूत्रार्थापरिज्ञानादित्युक्तम्। नायं समानधर्मादिभ्य एव संशयः, किं तु तद्विषयाध्यवसायादुपलब्ध्यनुपलब्ध्य(४)व्यवस्थाने च सति विशेषस्मृतिसहितात्, एवं च सति (५) नासंशयोऽपि नात्यन्तसंशयः।

अन्यतरधर्माध्यवसायादिति न युक्तम्; नैतस्मात् संशय इति—न हि कदाचिदन्यतरधर्मा-ध्यवसाये सति संशयः अन्यतरधर्माध्यवसायस्य निर्णयहेतुत्वादिति ॥ ६ ॥

वृत्तिः

यच्चोक्तं समानधर्मदर्शनात्, कथं संशयः समानत्वस्य भेदगर्भत्वादिति, तदपि न, नहि समानधर्मत्वेन तज्ज्ञानं हेतुः, अपि तु उभयसहचरितधर्मवत्त्वज्ञानं तथेत्युक्तदोषा-भावात् ॥ ६ ॥

(१) "अव्यवस्था खलु अव्यवस्था" इति ल० "व्यवस्था खलु व्यवस्था" इति ग० "अव्यवस्था खलु व्यवस्था' इति ज-भा०। (२) "विशेषापेक्षः" इति ग, भा। (३) "व्यवस्थितत्वाच्च" ख। (४) "व्यवस्थापने" क। (५) ख-पुस्तके 'नासंशयः' इत्य'पि'कारशून्यः पाठः।

(सू०)—यत्र संशयस्तत्रैवमुत्तरोत्तरप्रसङ्गः ॥ ७ ॥

न्यायभाष्यम्

यत्र यत्र संशयपूर्विका परीक्षा शास्त्रे कथायां वा, तत्र तत्रैवं संशये परेण प्रतिषिद्धे समाधिर्वाच्य इति। अतः सर्वपरीक्षाव्यापित्वात् प्रथमं संशयः परीक्षित इति ॥ ७ ॥

न्यायवार्त्तिकम्

यत्र संशयस्तत्रैवमुत्तरोत्तरप्रसङ्गः। कोऽस्य सूत्रस्यार्थः? स्वयं न संशयः प्रतिषेद्धव्यः, परेण तु संशये प्रतिषिद्धे परमुत्तरं वाच्यमिति शिष्यं शिक्षयति ॥ ७ ॥

(इति संशयपरीक्षा)

न्यायवार्त्तिकतात्पर्यटीका

यत्र—ङ्गः (सू० ७) ॥ कोऽस्य सूत्रस्येति तात्पर्यप्रश्नः। उत्तरम्—स्वयमिति। संशयपूर्वकत्वात् सर्वपरीक्षाणां परिचिक्षिषमाणेन संशयाक्षेपहेतुभिर्न प्रतिषेद्धव्योऽपि तु परैरेवमाक्षिप्तः संशय उक्तैः समाधानहेतुभिः समाधेयः (क)। शास्त्रे कथायां वा (१) वादलक्षणायामित्यर्थः ॥ ७ ॥

वृत्तिः

सम्प्रति संशयपरीक्षयैव परेषां पदार्थानां परीक्षामतिदिशन्नाह—(यत्रेति)।

एवम् उक्तरीत्या (२) उत्तरोत्तरेषु प्रयोजनादिषु प्रसङ्गः प्रकृष्टः सङ्गः परीक्षायाः सम्बन्धो बोद्धव्यः। तत् किं प्रयोजनमपि परीक्षणीयम्? नेत्याह—यत्र संशय इति। यदि तल्लक्षणार्थसंशयस्तदा तदपि परीक्षणीयम्।

अथवा उत्तरोत्तरम् उक्तिप्रत्युक्तिरूपं तत्प्रसङ्गः तद्रूपा परीक्षा संशयितेऽर्थे कर्तव्येत्यर्थः ॥ ७ ॥

॥ समाप्तं संशयपरीक्षाप्रकरणम् ॥

---

(१) आदर्शपुस्तकयोः "शास्त्रकथायाम्" इति पाठः। (२) "उत्तरोत्तरेषां प्रयोजनादिप्रसङ्गः" इति आ०।

(क) अतःपरमादर्शपुस्तकयोः 'यथोद्दिष्टेति भाष्ये, यदप्युक्तमित्यर्थः'। इति मुद्रितोऽंशः मुद्राप्रमादादस्थानपतित इति ४१४-पृष्ठे सन्निवेशितः।

न्यायभाष्यम्

अथ प्रमाणपरीक्षा—

(सू०)—प्रत्यक्षादीनामप्रामाण्यं त्रैकाल्यासिद्धेः ॥ ८ ॥

(भा०) प्रत्यक्षादीनां प्रमाणत्वं नास्ति त्रैकाल्यासिद्धेः पूर्वापरसहभावानुपपत्तेरित्यर्थः(१) ॥ ८ ॥

न्यायवार्त्तिकम्

अथेदानीमवसरप्राप्तानि प्रमाणानि परीक्ष्यन्ते इति। किं पुनरेषां परीक्ष्यम्? आदौ तावत् सम्भवः—किं प्रमाणानि सन्त्युत न सन्तीति, सदसतोः सामान्यात् प्रमेयत्वाद्विशेषादर्शनाच्च संशयः।

व्युदस्य संशयं परः पक्षपरिग्रहेण प्रत्यवतिष्ठते—

प्रत्यक्षादीनामप्रामाण्यं त्रैकाल्यासिद्धेरिति। अस्यार्थः त्रिष्वपि कालेषु प्रमाणानि नार्थं साधयन्तीति ॥ ८ ॥

न्यायवार्त्तिकतात्पर्यटीका

अथ प्रमाणपरीक्षेत्यादि भाष्यम्।

प्रत्य—द्धेः (सू० ८) ॥ आर्थेन हि क्रमेण संशयपरीक्षायामुक्तेनोद्देशक्रमो बाधितः, प्रमाणादिषु तु तद्बाधकारणाभावादुद्देशक्रमानुरोधेन प्रमेयादिभ्यः प्राक् प्रमाणान्येव (२) परीक्षितव्यानि। तत्रापि प्रथमं प्रमाणसामान्यलक्षणपरीक्षा, तत्पूर्वकत्वाद्विशेषलक्षणानाम्, तत्र सामान्यलक्षणम् उपलब्धिसाधनं प्रमाणमिति, तच्चोपलब्धिसाधनत्वं प्रत्यक्षादीनामेवेति प्रत्यक्षादीनामिति उक्तम्।

तदेतदाह वार्तिककारः—अथेदानीमिति। परीक्षणीयं पृच्छति—किं पुनरेषामिति। सर्वैरेव वादिभिः स्वसिद्धान्तव्यवस्थापनाय प्रमाणान्यभ्युपगन्तव्यानि, तदभावे तद्व्यवस्थानुपपत्तेः। यस्य तु स्वपक्ष एव नास्ति नासौ लौकिको न परीक्षक इत्युन्मत्तवदुपेक्षणीयः। तस्मात् सर्वप्राणभृत्सिद्धेर्न प्रमाणसामान्यं परीक्षणीयमिति भावः। उत्तरम्—आदौ तावत्संभव इति। न परीक्षा संशयमन्तरेणेति संशयबीजमाह—सदसतोरिति। पूर्वपक्षमाह—व्युदस्य संशयमिति। अयमत्र पूर्वपक्षिणो माध्यमिकस्याभिसन्धिः—यद्यपि मम विश्वविचारासहत्ववादिनः प्रमाणं नाम न किञ्चिदस्ति विचारसहम्, तथाऽपि लोकसिद्धान्येव प्रमाणानि तैरेव प्रमाणैः पर्यालोच्यमानानि विचारं न सहन्ते। सोऽयं प्रमाणानामपराधो यानि स्वविरोधेन विलीयन्ते न ममापराध इति ॥ ८ ॥

वृत्तिः

इदानीमवसरतः प्रमाणसामान्यपरीक्षणाय पूर्वपक्षयति—(प्रत्यक्षेति)।

कालत्रयेऽपि प्रमाणात् प्रमायाः सिद्धेर्वक्तुमशक्यत्वात् प्रत्यक्षादीनां न प्रामाण्यमित्यर्थः ॥ ८ ॥

---

(१) "अर्थः" इति फ-ज-ग-पु० नास्ति। (२) "परीक्षितानि" इति क।

न्यायभाष्यम्

अस्य सामान्यवचनस्यार्थविभागः—

(सू०)—पूर्वं हि प्रमाणसिद्धौ नेन्द्रियार्थसन्निकर्षात् प्रत्यक्षोत्पत्तिः ॥ ९ ॥

(भा०) गन्धादिविषयं ज्ञानं प्रत्यक्षम्, तद् यदि पूर्वम्, पश्चाद्गन्धादीनां सिद्धिः, नेदं गन्धादिसन्निकर्षादुत्पद्यत इति ॥ ९ ॥

(सू०)—पश्चात्सिद्धौ न प्रमाणेभ्यः प्रमेयसिद्धिः ॥ १० ॥

(भा०) असति प्रमाणे केन प्रमीयमाणोऽर्थः प्रमेयः स्यात् प्रमाणेन खलु प्रमीयमाणोऽर्थः प्रमेयमित्येतत्सिध्यति ॥ १० ॥

न्यायवार्त्तिकम्

पूर्वं हि प्रमाणसिद्धाविति सूत्रम् । नेन्द्रियार्थसन्निकर्षात् प्रत्यक्षं ज्ञानमुत्पद्यत इति सूत्रार्थे व्याघातो दोषः, यदि पूर्वं ज्ञानं नेन्द्रियार्थसन्निकर्षस्तस्य कारणमिति यदुक्तमिन्द्रियार्थसन्निकर्षोत्पन्नमिति तद्व्याहन्यते ॥ ९ ॥

पश्चात् सिद्धाविति सूत्रम् । न प्रमाणनिमित्ता प्रमेयसंज्ञेति व्याघातः, न प्रमाणमन्तरेण प्रमेयमात्मानं लभत इति न प्रमाणायत्ता प्रमेयसिद्धिः ॥ १० ॥

न्यायवार्त्तिकतात्पर्यटीका

पूर्वं—त्तिः (सू० ९) ॥ ज्ञानं हि प्रमाणं तद्योगात्प्रमेयमिति चार्थ इति च भवति । तद् यदि प्रमाणं पूर्वं प्रमेयादर्थादुत्पद्यते ततः प्रमाणात् पूर्वं नासावर्थ इति इन्द्रियार्थेत्यादिसूत्रव्याघातः ॥९॥

अथ पूर्वं प्रमेयं पश्चात् प्रमाणं तत्राऽऽह—पश्चादिति । यद्यपि स्वरूपं न प्रमाणाधीनं तथाऽपि तस्य प्रमेयत्वं तदधीनं तदपि चेत्प्रमाणात्पूर्वं न प्रमाणयोगनिबन्धनं स्यादित्यर्थः । तदिदमुक्तम्—प्रमेयसंज्ञेति ॥ १० ॥

वृत्तिः

त्रिसूत्र्या त्रैकाल्यासिद्धत्वं व्युत्पादयति—(पूर्वं हीति) ।

प्रमाणस्य पूर्वत्वं तावन्न सम्भवति, 'हि' यतः प्रमायाः पूर्वं प्रमाणसिद्धौ प्रमाणसत्त्वे इन्द्रियार्थसन्निकर्षात् प्रत्यक्षं सिध्यतीति न स्यात् प्रत्यक्षप्रमाणतः पूर्वमेव प्रमायाः सत्त्वात्, प्रमाणत्वं हि प्रमाकरणत्वम्, पूर्वं प्रमाया अभावे प्रमाकरणत्वमपि कथं स्यात् अतः पूर्वमेव प्रमायाः सिद्धिरुपेयेति कथम् इन्द्रियार्थसन्निकर्षात् इन्द्रियार्थसन्निकर्षादितः प्रत्यक्षोत्पत्तिः प्रत्यक्षाद्युत्पत्तिः ।

परे तु प्रत्यक्षं प्रति करणत्वे खण्डिते तद्रीत्या करणान्तरमपि खण्डनीयमित्याशयं सूत्रकृतो वर्णयन्ति ।

(सू०)—युगपत्सिद्धौ प्रत्यर्थनियतत्वात् क्रमवृत्तित्वाभावो बुद्धीनाम् ॥ ११ ॥

न्यायभाष्यम्

यदि प्रमाणं प्रमेयं च युगपद्भवतः, एवमपि गन्धादिष्विन्द्रियार्थेषु ज्ञानानि प्रत्यर्थनियतानि युगपत्सम्भवन्तीति ज्ञानानां प्रत्यर्थनियतत्वात् क्रमवृत्तित्वाभावः। या इमा बुद्धयः क्रमेणार्थेषु वर्त्तन्ते तासां क्रमवृत्तित्वं न सम्भवतीति। व्याघातश्च 'युगपज् ज्ञानानुत्पत्तिर्मनसो लिङ्गम्' (१ अ० १ आ० १६ सू०) इति। एतावांश्च प्रमाणप्रमेययोः सद्भावविषयः स चानुपपन्न इति। तस्मात् प्रत्यक्षादीनां प्रमाणत्वं न सम्भवतीति।

अस्य समाधिः—उपलब्धिहेतोरुपलब्धिविषयस्य चार्थस्य पूर्वापरसहभावानियमाद्

न्यायवार्त्तिकम्

युगपत्सिद्धाविति सूत्रम्। इन्द्रियार्थानां बुद्धीनां च सन्निपाते सति युगपद्भाव इति क्रमवृत्तित्वं दृष्टं न स्यादिति व्याघातो दोषः युगपज् ज्ञानानुत्पत्तिरिति च उक्तं तद् व्याहन्यते।

अत्र समाधिः। उपलब्धिहेतोरुपलब्धिविषयस्य चार्थस्य पूर्वापरसहभावानियमादिति (१)वाक्यस्यासिद्धतोद्भावनमर्थः।

प्रत्यक्षादीनामप्रामाण्यमिति च प्रतिज्ञापदयोर्व्याघातः—प्रत्यक्षादीनि नार्थं साधयन्ती-

न्यायवार्त्तिकतात्पर्यटीका

युग—नाम् (सू० ११) ॥ यौगपद्ये दृष्टव्याघातः सूत्रव्याघातश्च। प्रयोगस्तु—प्रत्यक्षादयो न प्रमाणत्वेन व्यवहर्तव्याः, कालत्रयेऽप्यर्थाप्रतिपादकत्वात्, यदेवं न तत्प्रमाणत्वेन व्यवह्रियते यथा शशविषाणम्, तथा चैतत् तस्मात्तथेति। एवं पूर्वपक्षिते सिद्धान्तमाह—अत्र समाधिरिति। उपलब्धिहेतोरित्यादिभाष्यस्य कालत्रयेऽप्यर्थाप्रतिपादकत्वादिति हेतोरसिद्धतोद्भावनमर्थः।

स्वयं वार्तिककारोऽस्यानुमानस्य दूषणमाह—प्रत्यक्षादीनामप्रामाण्यमिति चेति।

वृत्तिः

प्रमाणस्य प्रमावैशिष्ट्याभावे प्रमाणमिति ज्ञातेऽपि प्रमावैशिष्ट्यसंशयः स्यादिति भावः ॥ ९ ॥

(पश्चादिति)।

प्रमाणस्य प्रमातः पश्चात् सिद्धौ विषयस्य प्रमेयत्वं प्रमाणात् पूर्वमेव सिद्धमिति न प्रमाणतः प्रमाया उत्पत्तिः प्रमेयस्य च ज्ञप्तिरिति ॥ १० ॥

---

(१) 'वाक्यस्यासिद्धार्थतोद्भावनम्' क।

न्यायवार्त्तिकम्

त्ययमर्थः, अयं च (१)व्याहतः। कथमिति? प्रत्यक्षादीनि च नार्थं साधयन्ति इति च यथेदं वस्तु नोपलभ्यत इति। इदं च नोपलभ्यते च इति व्याघातः, एवं प्रत्यक्षादीनि च नार्थं साधयन्तीति च। कथं चान्यथा प्रत्यक्षादीनि। न (२)ह्येते प्रत्यक्षादिशब्दा (३)अर्थासाधकत्वेन कृतार्था भवन्तीति।

धर्मप्रतिषेधाच्च प्रत्यक्षाद्यभ्युपगमः—प्रत्यक्षादीनामप्रामाण्यमित्येवं ब्रुवता न प्रत्यक्षादीनि प्रतिषिद्धानि, अपि तु प्रमाणत्वं धर्म इति। अथ भावस्यास्वतन्त्रत्वात् तान्यपि प्रतिषिद्धानि—प्रत्यक्षादीनामप्रामाण्यमिति भावाभिधानमेतत्, अस्वतन्त्रश्च भाव इति भावप्रतिषेधात् तद्वतां प्रतिषेध इति; एवमप्यनिवृत्तो व्याघातः—प्रत्यक्षादीनामभावः प्रतिपाद्यः प्रत्यक्षादीनि च न सन्तीति केनाभावं प्रतिपादयसि? न च प्रत्यक्षाद्यभावेऽन्यः प्रतिपादनोपायः कश्चिदस्ति।

विशेषप्रतिषेधाच्च प्रमाणान्तराभ्यनुज्ञा—प्रत्यक्षादीनामप्रामाण्यमित्येवं ब्रुवता प्रत्यक्षादिव्यतिरेकि प्रमाणमभ्यनुज्ञातं भवति, व्यर्थं वा विशेषणं प्रत्यक्षादीनामप्रामाण्यमिति। अथ न प्रमाणान्तरमभ्यनुज्ञायते, किमस्य विशेषणस्य सामर्थ्यं प्रत्यक्षादीनि न प्रमाणानीति, नैव प्रमाणानि सन्तीत्येवं वक्तव्यमिति। एतदपि व्याहतं प्रमाणानि नैव सन्ति प्रतिपादयसि चेति।

न्यायवार्त्तिकतात्पर्यटीका

लब्धात्मकं खल्वनुमानं प्रत्यक्षादीनां प्रमाणानामप्रामाण्यमापादयेत्, न च लब्धात्मकम्, तस्य तु प्रतिज्ञाविरोधेनाऽऽत्मलाभ एव नास्तीति कथं तेषामप्रामाण्यमापादयितुमर्हतीति भावः। यदि प्रमाणानि नार्थं साधयन्ति प्रत्यक्षादीनीत्येव न स्यात्, न खलु तानि प्रमाणतोऽसिद्धानि प्रत्यक्षादीनीत्येव भवन्तीत्यर्थः। न चैतेषामर्थसाधनत्वं सामान्यविशेषाभिधायिप्रत्यक्षादिपदगोचरताऽपीत्याह—कथं चान्यथेति।

अपि च प्रामाण्यनिषेधे न प्रमाणानां प्रत्यक्षादीनामसत्त्वम्, न ह्यकमण्डलुर्माणवक इत्यनेन माणवकः प्रतिषिध्यते, किं तर्हि? तस्य कमण्डलुयोगो धर्मः; ततश्च प्रमाणानामसत्त्वं पूर्वपक्षिणोऽभिमतं न स्यादित्याह—धर्मप्रतिषेधाच्चेति। शङ्कते—अथ भावस्यास्वतन्त्रत्वादिति। निराकरोति—एवमपीति।

वृत्तिः

(युगपदिति)।

इदं च सूत्रद्वयमनुमानाद्यभिप्रायेण चक्षुःश्रोत्रादेः प्रमानन्तरं प्रमासमकालं वा सत्त्वस्येष्टत्वादुत्पत्तेः शङ्कितुमप्यशक्यत्वात्। तदयमर्थः—प्रमाणप्रमेययोर्युगपत्सत्त्वे युगपदुत्पत्तौ बुद्धीनामर्थविशेषनियतत्वाद् यत् क्रमवृत्तित्वं तन्न स्यात्, पदज्ञानं हि शब्दविषयकं श्रावणप्रत्यक्षरूपम्, शाब्दबोधश्च पदार्थविषयकः परोक्षरूपो विजातीय इत्यनयोर्न यौगपद्यं

(१) 'व्याघातः' क। (२) "ह्येते" इति ख-पु० नास्ति। (३) "अर्थसाधकमन्तरेण" इति ख।

न्यायभाष्यम्

यथादर्शनं विभागवचनम्। क्वचिदुपलब्धिहेतुः पूर्वम्, पश्चादुपलब्धिविषयः, यथाऽऽदित्यस्य प्रकाश उत्पद्यमानानाम्। क्वचित्पूर्वमुपलब्धिविषयः पश्चादुपलब्धिहेतुः, यथाऽवस्थितानां प्रदीपः। क्वचिदुपलब्धिहेतुरुपलब्धिविषयश्च सह भवतः, यथा धूमेनाग्नेर्ग्रहणमिति। उपलब्धिहेतुश्च प्रमाणं प्रमेयं तूपलब्धिविषयः। एवं प्रमाणप्रमेययोः पूर्वापरसहभावेऽनियते यथाऽर्थो दृश्यते तथा विभज्य वचनीय इति तत्रैकान्तेन प्रतिषेधानुपपत्तिः, सामान्येन खलु विभज्य प्रतिषेध उक्त इति।

समाख्याहेतोस्त्रैकाल्ययोगात्तथाभूता समाख्या। यत्पुनरिदं (१)पश्चात् सिद्धावसति प्रमाणे प्रमेयं न सिध्यति, प्रमाणेन प्रमीयमाणोऽर्थः प्रमेयमिति विज्ञायत इति। प्रमाण-

न्यायवार्त्तिकम्

यदपि तत्प्रमाणान्तरमभ्यनुज्ञायते तत्रापि त्रैकाल्यासिद्धेरित्ययमनुषक्तो हेतुः। यच्च त्रिष्वपि कालेषु न प्रतिपादयति कथं तस्य प्रमाणत्वमित्यनिवृत्तो व्याघातः। अथ धर्मप्रतिषेध एवायम्? तथाऽपि यानि प्रामाण्यव्यतिरिक्तानि प्रत्यक्षादीन्यभ्यनुज्ञायन्ते राजपुरुषप्रतिषेधन्यायेन कस्तेषां स्वभाव इत्यनिवृत्तोऽनुयोगो व्याघातश्च। अर्थान्तरानभ्युपगमे षष्ठ्यास्तद्धितस्य चार्थो वक्तव्यः—यदि प्रत्यक्षादिव्यतिरिक्तं न प्रामाण्यमस्ति प्रत्यक्षादीनामिति षष्ठ्यर्थः कः? ततोऽवश्यं विधीयमानः प्रतिषिध्यमानो वा धर्मोऽभ्युपेयः, तदभ्युपगमे च प्रत्यक्षादीनां पृथक् स्वरूपं वक्तव्यमित्यनिवृत्तो व्याघातः। एतेन तद्धितार्थो व्याख्यातः। यश्चायं हेतुस्त्रैकाल्यासिद्धेरिति अयमपि व्यधिकरणस्त्रैकाल्यविषयत्वात्—त्रिकालस्य भावस्त्रैकाल्यं तस्यासिद्धिरिति न प्रमाणधर्मः। अथायमर्थस्त्रिष्वपि कालेषु न प्रमाणान्यर्थं साधयन्तीति, तथाऽपि हेत्वर्थो नास्ति प्रतिज्ञार्थेनाक्षिप्तत्वात्—य एव प्रतिज्ञार्थो न प्रमाणान्यर्थं साधयन्तीति स एव हेत्वर्थस्त्रिषु कालेषु नार्थं साधयन्तीति(क)।

यत्पुनरेतत् प्रमाणेन प्रमीयमाणोऽर्थः प्रमेयमिदमिति भवतीति समाख्याहेतोस्त्रैकाल्य-

न्यायवार्त्तिकतात्पर्यटीका

प्रतिषिध्यमान इतिमात्रे वक्तव्ये विधीयमान इति दृष्टान्तार्थम्। एतेन तद्धितार्थ इति, प्रामाण्यपदार्थ इत्यर्थः। यथाश्रुतश्च हेतुर्व्यधिकरण इत्याह—यश्चायं हेतुरिति।

यत्पुनरित्यादिभाष्यं व्याचष्टे—यत्पुनरेतत् प्रमाणेनेति।

---

(१) 'पश्चात् सिद्धे सति च प्रमाणे' इति ज-ग०।

(क) तथाच सिद्धसाधनं स्फुटमिति भावः।

न्यायभाष्यम्

मित्येतस्याः समाख्याया उपलब्धिहेतुत्वं निमित्तम्, तस्य त्रैकाल्ययोगः। उपलब्धिमकार्षीत्, उपलब्धिं करोति, उपलब्धिं करिष्यतीति समाख्याहेतोस्त्रैकाल्ययोगात् समाख्या तथाभूता प्रमितोऽनेनार्थः प्रमीयते प्रमास्यत इति प्रमाणम्; प्रमितम्, प्रमीयते, प्रमास्यते इति च प्रमेयम्। एवं सति भविष्यत्यस्मिन् हेतुत उपलब्धिः, प्रमास्यतेऽयमर्थः प्रमेयमिदमित्येतत् सर्वं भवतीति। त्रैकाल्यानभ्यनुज्ञाने च व्यवहारानुपपत्तिः। यश्चैवं नाभ्यनुजानीयात् तस्य पाचकमानय पक्ष्यति लावकमानय लविष्यतीति व्यवहारो नोपपद्यत इति।

'प्रत्यक्षादीनामप्रामाण्यं त्रैकाल्यासिद्धे'रित्येवमादि वाक्यं प्रमाणप्रतिषेधः। तत्रायं प्रष्टव्यः, अथानेन प्रतिषेधेन भवता किं क्रियत इति? किं सम्भवो निवर्त्यते अथा-

न्यायवार्त्तिकम्

योगादप्रतिषेधः, प्रमाणं प्रमेयमिति चास्याः समाख्याया निमित्तं त्रिकालयोगि, प्रमास्यते प्रमीयते प्रामायि वाऽनेन इति प्रमाणम्, प्रमास्यते प्रमीयते प्रामायि वेति प्रमेयम्। (क)एवं च सति प्रमास्यते अयमर्थः भविष्यत्यस्मिन् हेतुरुपलब्धेरिति प्रमेयमिदमिति सिध्यति। अनभ्यनुज्ञाने व्यवहारानुपपत्तिरिति विरोधो दोषः। यस्तु त्रैकालिकं प्रमाणप्रमेयव्यवहारं न प्रतिपद्यते तस्य पाचकमानयेत्यादिव्यवहारो विरुध्यत इति।

"प्रत्यक्षादीनामप्रामाण्यं त्रैकाल्यासिद्धे"रित्येवमादि वाक्यं प्रमाणप्रतिषेधः। अथानेन प्रत्यक्षादीनां किं क्रियते, किं सम्भवो निवर्त्यते अथासम्भवो ज्ञाप्यते। किञ्चातः? यदि

न्यायवार्त्तिकतात्पर्यटीका

संभवः प्रत्यक्षादीनां निवर्त्यत इति, प्रत्यक्षादीनामभावे (१) कारकं हेतुवचनमित्यर्थः।

वृत्तिः

सम्भवति, कार्यकारण(२)भावबलात् क्रमिकत्वेनैव सिद्धेः। अत एवैकमेव ज्ञानमुभयविषयकमित्यपि नाऽऽशङ्कनीयम्, सङ्करप्रसङ्गाच्च। एवं व्याप्तिज्ञानानुमित्यादावपि द्रष्टव्यम्।

परे तु प्रमाणप्रमेययोर्न युगपत्सिद्धिः न युगपज्ज्ञानम्, बुद्धीनामर्थविशेषनियतत्वात् क्रमवृत्तित्वं तथा सति न स्यात्। तथाहि चक्षुषो ज्ञानमनुमित्यादिरूपं घटादेश्च प्रत्यक्षादिरूपम्, न चानयोर्यौगपद्यं सम्भवतीत्यर्थ इत्याहुः॥ ११॥

---

(१) 'कारकहेतुवचनम्' इति ख। (२) "-भाववत्त्वात्" इति आ०।

(क) भाष्ये पूर्ववाक्ययोर्व्युत्क्रमेण पाठः हेतुतः उपलब्धिरिति विशेषश्च द्रष्टव्यौ।

न्यायभाष्यम्

सम्भवो ज्ञाप्यते इति। तद् यदि सम्भवो निवर्त्यते सति सम्भवे प्रत्यक्षादीनां प्रतिषेधानुपपत्तिः। अथासम्भवो ज्ञाप्यते, (१)प्रमाणलक्षणं प्राप्तस्तर्हि प्रतिषेधः प्रमाणासम्भवस्योपलब्धिहेतुत्वादिति ॥ ११ ॥

किं चातः ?

(सू०)—त्रैकाल्यासिद्धेः प्रतिषेधानुपपत्तिः ॥ १२ ॥

अस्य तु विभागः। पूर्वं हि प्रतिषेधसिद्धावसति प्रतिषेध्ये (२)किमनेन प्रतिषिध्यते पश्चात्सिद्धौ (क)प्रतिषेध्यासिद्धिः प्रतिषेधाभावादिति। युगपत्सिद्धौ प्रतिषेध्यसिद्ध्यभ्यनु-

न्यायवार्त्तिकम्

तावत् सम्भवो निवर्त्यते, तन्न युक्तं व्याघातात् प्रतिषेधार्थापरिज्ञानाच्च—सम्भवो निवर्त्यत इत्येवं ब्रुवाणेन प्रमाणान्यभ्युपगतानि भवन्ति (ख)न ह्यसतो निवृत्तिर्भवतीति। न च प्रतिषेधस्यैतत्सामर्थ्यं यद्विद्यमानं पदार्थमन्यथा कुर्यात्। ज्ञापकत्वाच्च न सम्भवनिवृत्तिः—ज्ञापकोऽयं प्रतिषेधो न सम्भवनिवर्त्तक इति। अथासम्भवो ज्ञाप्यत इति, प्रमाणलक्षणप्राप्तस्तर्हि प्रतिषेधः (ग)अतो व्याघात इति—प्रमाणानि नार्थं साधयन्तीति प्रतिषेधस्य प्रमाणलक्षणाभ्यनुज्ञानादिति ॥ ११ ॥

एवं च

त्रैकाल्यासिद्धेः प्रतिषेधानुपपत्तिरिति। अयमपि प्रतिषेधस्त्रिष्वपि कालेषु नोपपन्न इत्ययं सूत्रार्थः। 'त्रैकाल्यासिद्धेः प्रतिषेधानुपपत्ति'रित्येवमभिदधानेनाभ्युपगतं भवति प्रत्यक्षादीनामप्रामाण्यं त्रैकाल्यासिद्धेरिति ; नैष दोषः, तस्य स्ववचनव्याघातदेशनात्—

न्यायवार्त्तिकतात्पर्यटीका

(घ) न ह्यसतो निवृत्तिरिति। नासन् घटो मुद्गरप्रहारेण निवर्त्यत इत्यर्थः। असंभवं प्रत्यक्षादीनां सिद्धमेव ज्ञापयतीत्याह—असम्भवो ज्ञाप्यते ॥ ११ ॥

त्रैका—त्तिः (सू० १२)॥ देशयति—त्रैकाल्यासिद्धेः प्रतिषेधानुपपत्तिरित्येवमभिदधानेनेति। परिहरति—नैष दोष इति। त्वद्वचनं त्वदभ्युपगमविरुद्धम् अस्माकं तु

(१) 'प्रमाणलक्षणप्राप्तः' इति ग-ल०। (२) 'किं प्रतिषिध्यते' ग-ल-झा०।

(क) प्रतिषेध्यासिद्धिरिति भावप्रधानो निर्देशः, तथाच प्रतिषेधवाक्याभावात् प्रतिषेध्यत्वेनाभिमतस्य प्रत्यक्षादीनां प्रामाण्यस्य प्रतिषेध्यत्वासिद्धिरित्यर्थः। प्रतिषेध्यसिद्धिरिति पाठश्चेत् 'पूर्वं प्रतिषेधाभावात् प्रत्यक्षादीनां प्रामाण्यस्य सिद्धिरेव निरूढेति उत्तरवर्त्ती प्रतिषेधोऽनर्थक इति स्फुटोऽर्थो भवतीति बोध्यम्।

(ख) 'न ह्यसता'मिति बहुवचनान्तः पाठः क-ख-पुस्तकयोः, एकवचनान्तस्तु तात्पर्यानुसारितया गृहीतः।

(ग) 'अतो व्याघातः' इत्यादिः 'अभ्यनुज्ञानादिति' इत्यन्तो ग्रन्थः १२श-सूत्रवार्त्तिकस्य 'सूत्रार्थः' इत्यतः परं मुद्रितोऽपि अर्थसङ्गत्यनुरोधादिह गृहीतः। तथाच भवदुक्तं प्रतिषेधवाक्यमेव अर्थोपलब्धिहेतुत्वात् प्रमाणीभूतमिति दूरापेता प्रामाण्यानभ्युपगमकथेति भावः।

(घ) 'ने'त्यादि'रित्यर्थ' इत्यन्तो ग्रन्थः 'अथासम्भवो ज्ञाप्यते' इत्यतः परम् आदर्शपुस्तकयोर्मुद्रितः।

न्यायभाष्यम्

ज्ञानादनर्थकः प्रतिषेध इति। प्रतिषेधलक्षणे च वाक्येऽनुपपद्यमाने सिद्धं प्रत्यक्षादीनां प्रमाणत्वमिति ॥ १२ ॥

न्यायवार्त्तिकम्

स्ववचनव्याघातो मया देश्यते नाभ्युपगम्यते। कथमिति? यत् खलु त्रिष्वपि कालेषु न साधकं तदसाधनमिति ब्रुवता प्रतिषेधस्यासाधकत्वं स्ववाचैवाभ्युपगतं भवति, यथा कश्चित् स्वाङ्गुलिज्वालया परं दिधक्षुः, स च परं दहेद्वा न वा, स्वाङ्गुलिदाहं तावदनुभवति।

यश्चायं प्रतिषेधः प्रत्यक्षादीनि नार्थं साधयन्तीति किमयं प्रत्यक्षादीनां सामर्थ्यप्रतिषेध उत सत्ताप्रतिषेध इति। यदि सामर्थ्यप्रतिषेधः, न प्रत्यक्षादीनि प्रतिषिद्धानि, तेषां च सामर्थ्यप्रतिषेधात् प्रत्यक्षादीनां स्वरूपं वक्तव्यमिति पूर्ववत्प्रसङ्गः। अथ सत्ताप्रतिषेधः, तत्रापि कथं न सन्तीति। किं सामान्यतोऽथ विशेषत इति। यदि सामान्यतः, प्रत्यक्षादिग्रहणं व्यर्थम्, एवं वक्तव्यम्—न प्रमाणानि सन्तीति। न च धर्मिणां प्रतिषेधे कश्चिन्न्याय इति। अथ विशेषप्रतिषेधः, तथाऽपि प्रमाणान्तराभ्युपगमः। न ह्यनभ्युपगतसामान्यस्य विशेषप्रतिषेधोऽवकाशं लभत इति।

प्रत्यक्षादीनामप्रामाण्यं त्रैकाल्यासिद्धेः प्रत्यक्षादीनां प्रामाण्यं त्रैकाल्यसिद्धेरिति च वाक्ययोरेकार्थता वा स्यात् भिन्नार्थता वा? यद्येकार्थता, प्रत्यक्षादीनां प्रामाण्यं त्रैकाल्यासिद्धेरित्येवमेव वक्तव्यम्। अभिन्नार्थे च एते वाक्ये इति कुतः प्रतिपत्तिरिति, यदि प्रमाणतः, अनिवृत्तो व्याघातः; अथान्यतः, तत् प्रमाणमिति संज्ञाभेदमात्रम्। अथ भिन्नार्थे, तत् केनावगतं त्रैकाल्यासिद्धेः त्रैकाल्यसिद्धेरिति चानयोर्वाक्ययोर्भिन्नोऽर्थ इति। प्रत्यक्षादीनि न सन्तीति(१)

न्यायवार्त्तिकतात्पर्यटीका

नैतद्वचनं नाभ्युपगमविरुद्धमित्यर्थः। न च धर्मिणां प्रतिषेधे कश्चिन्न्याय इति। नानुमानं धर्मिप्रतिषेधे प्रभवति आश्रयासिद्धत्वाद्धेतोरित्यर्थः।

अपि च प्रमाणमात्रमधिक्षिपतः प्रत्यक्षादीनामप्रामाण्यमिति प्रत्यक्षादीनां प्रामाण्यमिति च वाक्ययोरर्थभेदाभेदौ विचारं न सहेते इत्याह—प्रत्यक्षादीनामप्रामाण्यमिति। एवमेव

वृत्तिः

सिद्धान्तसूत्रम्—(त्रैकाल्येति)।

यदि त्रैकाल्यासिद्ध्या प्रमाणात् प्रमेयसिद्धिर्नोपेयते तदा तद्रीत्या त्वदीयः प्रतिषेधोऽप्यनुपपन्न इति जात्युत्तरमेतदिति भावः ॥ १२ ॥

(१) अतः परं क-पुस्तके 'च'कारोऽधिकः।

न्यायभाष्यम्

कथम् ?

(सू०)—सर्वप्रमाणप्रतिषेधाच्च प्रतिषेधानुपपत्तिः ॥ १३ ॥

त्रैकाल्यासिद्धेरित्यस्य हेतोर्व्युदाहरणमुपादीयते हेत्वर्थस्य साधकत्वं दृष्टान्ते

न्यायवार्त्तिकम्

नास्तिना समानाधिकरणः प्रत्यक्षादिशब्दश्च न प्रत्यक्षादीनामभावं शक्नोति वक्तुम्। न ह्ययं(क) नास्तिना समानाधिकरणो घटादिशब्दो घटाभावं प्रतिपादयति, अपि तु गेहघटसंयोगं वा कालविशेषं वा घटस्य सामर्थ्यं वा प्रतिषेधति। एवमनेनापि प्रमाणसमानाधिकरणेन नास्तिना प्रमाणानां नाभावः शक्यः प्रतिपादयितुम्, अपि त्वनेनापि तन्त्रान्तराभ्युपगतानां प्रतिषेधः स्यात् सामर्थ्यप्रतिषेधो वा कालविशेषप्रतिषेधो वेति सर्वथा प्रमाणानि अभ्युपगतानि भवन्ति। तानि चाभ्युपगतान्यनेन प्रतिषेधेन प्रतिषिध्यन्त इति व्याघातः। प्रमाणानां वाऽसत्त्वं प्रतिपाद्यमानं कथं कस्य प्रतिपाद्यते ? कश्च प्रतिपादयिता ? अप्रतिपन्नः प्रतिपाद्यत इति, प्रतिपन्नश्च प्रतिपादयतीति। केन प्रतिपन्नः ? यदि प्रमाणेन, व्याघातः, प्रमाणानभ्युपगमात्। अथान्यथा, न दृष्टान्तोऽस्ति। प्रतिपाद्यप्रतिपादकयोश्च भेदाभ्युपगमे व्याघातः—यदि प्रतिपाद्यं प्रतिपादयितारं च भेदेन प्रतिपद्यसे भेदप्रतिपादकप्रमाणाभ्युपगमाद् व्याघातः। अथ भेदं न प्रतिपद्यसे ? क किं प्रतिपाद्यत इत्यनिवृत्तो व्याघातः। प्रमाणानि न सन्तीति प्रतिजानानः पर्यनुयोज्यः कथं न सन्तीति, यदि प्रमाणं ब्रवीति, व्याहतम्। अथ न ब्रवीति, अर्थो नास्य सिध्यति। तदेवमेतद्वाक्यं यावद् यावद्विचार्यते तावत् तावत् प्रलीयत इति ॥ १२ ॥

न्यायवार्त्तिकतात्पर्यटीका

वक्तव्यमिति, नञोरप्रयोगेण लाघवात्। (ख) घटस्य सामर्थ्यं वेति, यदा सत्येव घटे तस्यासामर्थ्यं विवक्षित्वोच्यते नास्ति घट इति, नोदकाहरणसमर्थ इति तदा गम्यते। तन्त्रान्तराभ्युपगतानां प्रतिषेध इति। तन्त्रान्तरे यादृशं प्रमाणमभ्युपेयते तादृशप्रतिषेधे अन्यादृशस्याभ्युपगमो भवति, यथा प्रधानं नास्तीति जगत्कारणस्य सुखदुःखमोहात्मकत्वं प्रधानत्वं तत्प्रतिषिध्यते, न पुनर्जगत्कारणम्; तस्यान्यादृशस्याभ्युपगमादिति। कथमिति प्रमाणाक्षेपः। कस्येति प्रतिपाद्याक्षेपः। कश्चेति प्रतिपादकाक्षेपः। प्रतिपाद्याक्षेपं विभजते—अप्रतिपन्न इति। प्रतिपादकाक्षेपं विभजते—प्रतिपन्नश्चेति। क प्रतिपाद्ये किं प्रतिपाद्यत इति ॥ १२ ॥

(क) अयमिति ईदृश इत्यर्थः।

(ख) आदर्शपुस्तकयोः 'सोऽसाधर्म्यं वेति' इति पाठः प्रामादिकः।

न्यायभाष्यम्

दर्शयितव्यमिति, न च तर्हि प्रत्यक्षादीनामप्रामाण्यम्। अथ प्रत्यक्षादीनामप्रामाण्यम्, उपादीयमानमप्युदाहरणं नार्थं साधयिष्यतीति सोऽयं सर्वप्रमाणव्याहतो हेतुरहेतुः; 'सिद्धान्तमभ्युपेत्य तद्विरोधी विरुद्धः' (१ अ० २ आ० ६ सू०) इति। वाक्यार्थो ह्यस्य सिद्धान्तः। स च वाक्यार्थः प्रत्यक्षादीनि नार्थं साधयन्तीति इदं चावयवाना-मुपादानमर्थस्य साधनायेति। अथ नोपादीयते (१)अप्रदर्शितं हेत्वर्थस्य (२)दृष्टान्तेन साधकत्वमिति निषेधो नोपपद्यते हेतुत्वासिद्धेरिति ॥ १३ ॥

न्यायवार्त्तिकम्

सर्वप्रमाणप्रतिषेधाच्च प्रतिषेधानुपपत्तिः। त्रैकाल्यासिद्धेरित्यस्य हेतोरुदाहरण-मुपादीयते न वा? यद्युपादीयते, व्याघातो भवति प्रत्यक्षादीनां चाप्रामाण्याभ्युपगमा-दुपादीयमानमपि नार्थं साधयतीति; अथ साधयति, व्याघातः। "अथ नोपादीयते, अप्रदर्शितं हेत्वर्थस्य साधकत्व"मिति—अप्रदर्शितदृष्टान्तो हेतुर्न साधक इति। सोऽयं हेतुः सर्वैः प्रमाणै-र्विप्रतिषिद्धो विरुद्धो भवति, "सिद्धान्तमभ्युपेत्य तद्विरोधी विरुद्ध" इति। वाक्यार्थो ह्यस्य सिद्धान्तः, स च वाक्यार्थः प्रमाणानि नार्थं साधयन्तीति, इदं च प्रमाणानामुपादानमर्थसाधनाय "प्रत्यक्षादीनामप्रामाण्यं त्रैकाल्यासिद्धे"रिति। बुद्धि-विवक्षा-प्रयत्न-वायूदीरण-ताल्वभिघातौष्ठ-प्रस्पन्दादीनि अवर्जयन् बुद्ध्या वाक्यमुच्चारयसि, स्थाणुकण्टकसर्पादीन् परिहरन् पादविहरणादीनि करोषि, ते एते वाक्यप्रवृत्ती प्रमाणप्रतिषेधान्न सम्भवत इति ॥ १३ ॥

न्यायवार्त्तिकतात्पर्यटीका

सर्व—त्तिः (सू० १३) ॥ यद्युपादीयते उदाहरणम्, तत् प्रमाणेनानवधारितं न शक्य-मुपादातुमिति भावः। न केवलमशक्यं व्यर्थं चेत्याह—प्रत्यक्षादीनां चेति। सर्वैः प्रमाणैरिति, उदाहरणादिविषयैः प्रमाणैः विप्रतिषिद्धो विरुद्धो भवति, बाधितविषयतया प्रमाणाभासो भवतीत्यर्थः। (क)विरुद्धं चेत्याह—सिद्धान्तमभ्युपेत्येति। प्रमाणानामित्यन्वयव्याभिप्रायम्। अवर्जयन्निति वर्जनविरुद्धमुपादानमुच्यते, उपाददान इत्यर्थः ॥ १३ ॥

वृत्तिः

किञ्च सर्वप्रमाणप्रतिषेधे प्रतिषेधकं प्रमाणमपि नाभ्युपगन्तव्यम्। तथा च कथं प्रतिषेधसिद्धिरित्याह—(सर्वप्रमाणेति) ॥ १३ ॥

(१) 'अप्रदर्शितहेत्वर्थस्य' ल-ग-ज-भा०। (२) 'दृष्टान्ते न' ल-भा०।

(क) साधनं विरुद्धमिति तल्लक्षणमाहेत्यर्थः।

(सू०)—तत्प्रामाण्ये वा न सर्वप्रमाणविप्रतिषेधः ॥ १४ ॥

न्यायभाष्यम्

प्रतिषेधलक्षणे स्ववाक्ये तेषामवयवाश्रितानां प्रत्यक्षादीनां प्रामाण्येऽभ्यनुज्ञायमाने परवाक्येऽप्यवयवाश्रितानां प्रामाण्यं प्रसज्यते अविशेषादिति। एवं च न सर्वाणि प्रमाणानि प्रतिषिध्यन्त इति। विप्रतिषेध इति वीत्ययमुपसर्गः सम्प्रतिपत्त्यर्थे, न व्याघातेऽर्थाभावादिति ॥ १४ ॥

न्यायवार्त्तिकम्

तत्प्रामाण्ये वा सर्वप्रमाणविप्रतिषेधः। अथ स्ववाक्याश्रितप्रमाणव्यतिरेकेण प्रमाणानि प्रतिषिध्यन्ते, एवं सति न सर्वं प्रमाणं प्रतिषिद्धं भवति, यश्च न्यायः स्ववाक्याश्रितप्रमाणाभ्युपगमे स एवान्याश्रितप्रमाणाभ्युपगमेऽपीति। वीत्ययमुपसर्गो विशेषप्रतिषेधे, न व्याघाते इति। किमुक्तं भवति? कानिचित्प्रमाणानि प्रतिषिध्यन्ते कानिचिदभ्यनुज्ञायन्त इति। यानि

न्यायवार्त्तिकतात्पर्यटीका

तत्प्रा—धः (सू० १४) ॥ तत्प्रमाण्ये वेति। अस्यार्थः—यदि माध्यमिको ब्रूयात् प्रत्यक्षादीनामप्रामाण्यं त्रैकाल्यासिद्धेरिति, स्ववाक्यावयवाश्रितानि प्रमाणानि यथालोक प्रतीति सिद्धानि, तैरविचारितसिद्धैरितरेषां प्रामाण्यं प्रतिषिध्यत इति; तत्रेदमुच्यते—'तत्प्रामाण्ये वा' अवयवाश्रितप्रत्यक्षादिप्रामाण्ये 'न सर्वप्रमाणविप्रतिषेधः' अवयवाश्रितानामेव प्रामाण्याभ्युपगमात्। किं पुनरिदमविचारितसिद्धत्वम्? किं विचारासहत्वम् आहो सर्वजनसिद्धतया सन्देहानास्पदत्वम्? तत्र पूर्वस्मिन् कल्पे विचारासहत्वेन स्वयं दुःस्थितेनान्येषां प्रामाण्यं बाध्यत इति सुभाषितम्। तस्मादुत्तरः कल्पः, तथा च न सर्वाप्रामाण्यम्, तस्यैव प्रामाण्यात्।

अत्र भाष्यम्—वीत्ययमुपसर्गः संप्रतिपत्त्यर्थे, प्रतिषेधशब्दार्थमनुजानाति (क)विशेषमभिदधत्, न तु तद्व्यतिरिक्तार्थः, न व्याघातवचन इत्यर्थः। तदिदमुक्तम्—न व्याघाते। कस्मात्? अर्थाभावात्। स्ववाक्यावयवाश्रितानां हि प्रमाणानां प्रामाण्ये सर्वप्रमाणप्रतिषेधव्याघातः पूर्वमुक्तः, तत्प्रतिषेधः पूर्वेण विरुध्यते (ख)अशक्यश्चेति अर्थाभाव इत्यर्थः।

तदेतद्वार्तिककारो व्याचष्टे—वीत्ययमुपसर्गो विशेषप्रतिषेधे। यावदुक्तं भवति विशेषेण सर्वेषु प्रमाणेषु प्रतिषेध इति तावदुक्तं भवति विप्रतिषेध इति, प्रतिषेधशब्दार्थाभ्यनुज्ञानत्वाद्विशब्दस्य। तेन 'न सर्वप्रमाणविप्रतिषेध' इत्यनेन 'वि'पदसहितेन किमुक्तं भवति? इदमुक्तं

(क) आदर्शपुस्तकयोः "विशेषमभिदधातु" इति पाठः।

(ख) अशक्यश्चेति तत्प्रतिषेध इत्यनेन सम्बध्यते। तथाच सर्वप्रमाणप्रतिषेधव्याघातस्य प्रतिषेधः प्रमाणयितुमशक्य इति अर्थाभावादित्यनेनोक्तमिति तात्पर्यकृतो भावः। आदर्शग्रन्थयोः स्थूलाक्षरैर्धृतोऽप्ययमंशो भाष्ये न दृश्यत इति सूक्ष्माक्षरैर्मुद्रितः।

(सू०)—त्रैकाल्याप्रतिषेधश्च शब्दादातोद्यसिद्धिवत् तत्सिद्धेः ॥ १५ ॥

न्यायभाष्यम्

किमर्थं पुनरिदमुच्यते ? पूर्वोक्तनिबन्धनार्थम्। यत्तावत् पूर्वोक्तमुपलब्धिहेतोरुपलब्धिविषयस्य चार्थस्य पूर्वापरसहभावानियमाद् यथादर्शनं विभागवचनमिति, तदितः समुत्थानं यथा विज्ञायेत। अनियमदर्शी खल्वयमृषिर्नियमेन प्रतिषेधं प्रत्याचष्टे—त्रैकाल्यस्य चायुक्तः प्रतिषेध इति। तत्रैकां विधामुदाहरति शब्दादातोद्यसिद्धिव-

न्यायवार्त्तिकम्

स्ववाक्याश्रितानि तान्यभ्यनुज्ञायन्ते, यानि परवाक्याश्रितानि तानि प्रतिषिध्यन्त इति। यच्चेदं वाक्यं "प्रत्यक्षादीनामप्रामाण्यं त्रैकाल्यासिद्धे"रिति किमिदं प्रमाणस्वरूपमथ नेति। यदि प्रमाणस्वरूपम्, तदा व्याघातः। अथ न, तथाऽपि नानेन कश्चिदर्थः प्रतिपाद्यत इति व्यर्थम् ॥ १४ ॥

त्रैकाल्याप्रतिषेधश्च शब्दादातोद्यसिद्धिवदिति (क) सूत्रम्। यत् तत् पूर्वमुक्तमुपलब्धिहेतोरुपलब्धिविषयस्य चार्थस्य पूर्वापरसहभावानियमाद् यथादर्शनं विभागवचनमिति

न्यायवार्त्तिकतात्पर्यटीका

भवति—कानिचिदिति। अवयवाश्रितानि प्रमाणानि विचार्य समुदायं विचारयति—यच्चेति ॥ १४ ॥

तदिदं सूत्रकारेण त्रैकाल्यासिद्धेरित्यनुयोगस्य प्रतिषेधेऽपि (ख)साम्यादप्रमाणविरोधश्चापादितः, संप्रत्यसिद्धतोद्भावनपरं सूत्रं पठति—

त्रैका—द्धेः (सू० १५)। तत्पाठमाक्षिपति—किमर्थमिति। स्वातन्त्र्येण चेदस्य सूत्रस्यार्थः पूर्वमुक्तः कृतं सूत्रपाठेनेत्यर्थः। परिहरति—पूर्वोक्तेति। न तदस्माभिरुत्सूत्रमुक्तमपि तु सूत्रार्थ एवेति ज्ञापनार्थं सूत्रपाठोऽस्माकमित्यर्थः। नियमेन यः प्रतिषेधः पूर्वमेव वा पश्चादेव वा सहैव वेति तं प्रतिषेधति—अनियमेति। खलुशब्दोऽयं यस्मादर्थे, यस्मादनियमदर्शी ऋषिः।

वृत्तिः

यदि च प्रतिषेधकं प्रमाणमुपेयते तदा कथं सर्वप्रमाणप्रतिषेधः इत्याह—(तत्प्रामाण्ये इति) ॥ १४ ॥

(क) एतेन 'तत्सिद्धेः' इत्यंश एतन्मते सूत्रानन्तर्गत इति सम्भाव्यते।

(ख) अत्र 'साम्यादप्रामाण्यं विरोधश्च' इति "साम्य प्रमाणविरोधश्च" इति वा पाठो भवितुमर्हतीति चिन्त्यम्।

न्यायभाष्यम्

दिति। यथा पश्चात्सिद्धेन शब्देन पूर्वसिद्धमातोद्यमनुमीयते, साध्यं (क)चाऽऽतोद्यं साधनं च शब्दः, अन्तर्हिते ह्यातोद्ये स्वनतोऽनुमानं भवतीति वीणा वाद्यते वेणुः पूर्यते इति स्वनविशेषेण आतोद्यविशेषं प्रतिपद्यते ; तथा पूर्वसिद्धमुपलब्धिविषयं पश्चात्सिद्धेनोपलब्धिहेतुना प्रतिपद्यते इति। निदर्शनार्थत्वाच्चास्य शेषयोर्विधयोर्यथोक्तमुदाहरणं वेदितव्यमिति।

कस्मात् पुनरिह तन्नोच्यते ? पूर्वोक्तमुपपाद्यत इति। सर्वथा तावदयमर्थः प्रकाशयितव्यः, स इह वा प्रकाश्येत तत्र वा, न कश्चिद्विशेष इति ॥ १५ ॥

न्यायवार्त्तिकम्

(ख)तदुत्थानज्ञापनार्थः सूत्रपाठ इति। कस्मात् पुनस्तत्रैवेदं सूत्रं नोक्तमिति ? अविशेषात्—तत्र वाऽभिधीयते इह वा न कश्चिद्विशेष इति, सर्वथा तावदयमर्थः प्रकाशयितव्य इति। एकां च विधामुदाहरति—शब्दादातोद्यसिद्धिवदिति। शेषयोस्तु विधयोर्यथोक्ते उदाहरणे वेदितव्ये। (ग)"यथा पूर्वसिद्धमातोद्यं पश्चात् सिद्धेन शब्देनानुमीयते वीणा वाद्यते वेणुः पूर्यते इति", योऽसौ वीणावेणुशब्दयोरसाधारणो धर्मः वीणादिनिमित्तकत्वम्, तदुपलभमानः शब्दस्य वीणाशब्दो वेणुशब्द इति प्रतिपद्यते पूर्वसिद्धमातोद्यं पश्चात् सिद्धः शब्द इति। सहभावस्योदा-

न्यायवार्त्तिकतात्पर्यटीका

वार्त्तिकम्,—तदुत्थानज्ञापनार्थः सूत्रपाठ इति। देशयति—पाठक्रममतिलंघ्य (घ)कस्मात् तत्रैवेदमिति। अत्रैव तद्भाष्यं कस्मान्नोक्तमिति च द्रष्टव्यम्। परिहरति—अविशेषादिति। अथ शब्दः श्रोत्रविवरे समवेतः कथमातोद्यमसंबद्धं गमयतीत्यत आह—योऽसौ वीणावेणु-

वृत्तिः

ननु मन्मते वस्तुसिद्धिर्नापेक्षिता विश्वस्य शून्यत्वात्, प्रमाणप्रमेयभावोऽपि न वास्तविकः, त्वन्मते च त्रैकाल्यासिद्धिरुक्तैवेत्यतस्तदुद्धरति—(त्रैकाल्याप्रतिषेधश्चेति)।

त्रैकाल्यो यः प्रतिषेध उक्तः स न सम्भवति। कुत इत्यत आह—शब्दादिति। यथा शब्दात् पश्चाद्भाविनः पूर्वसिद्धस्यातोद्यस्य मुरजादेः सिद्धिः ज्ञप्तिः, यथा वा पूर्वसिद्धात्

(क) 'ततं वीणादिकं वाद्यमानद्धं मुरजादिकम्। वंश्यादिकं तु शुषिरं कांस्यतालादिकं घनम्। चतुर्विधमिदं वाद्यं वादित्रातोद्यनामकम्' इत्यमरः।

(ख) अत्र तात्पर्यसम्मतः पाठो गृहीतः। आदर्शग्रन्थयोस्तु 'तदुत्थानज्ञापनार्थमतः सूत्रान्तरस्योत्थानमिति' इति पाठभेदः।

(ग) अत्र भाष्यवार्त्तिकयोरक्षरविसंवादो द्रष्टव्यः।

(घ) वार्त्तिकगतः 'पुनः'शब्दो न गृहीत इति बोध्यम्।

न्यायभाष्यम्

प्रमाणं प्रमेयमिति च समाख्या समावेशेन वर्त्तते समाख्यानिमित्तवशात्। समाख्यानिमित्तं तूपलब्धिसाधनं प्रमाणम् उपलब्धिविषयश्च प्रमेयमिति। यदा च उपलब्धिविषयः क्वचिदुपलब्धिसाधनं भवति तदा प्रमाणं प्रमेयमिति चैकोऽर्थोऽभिधीयते। अस्यार्थस्यावद्योतनार्थमिदमुच्यते—

न्यायवार्त्तिकम्

हरणम्—धूमदर्शनादग्निं धूमविशेषणं प्रतिपद्यते। पूर्वसिद्ध उपलब्धिहेतुरादित्यः पश्चात् सिद्धानां प्रकाशक इति ॥१५॥

'प्रमाणं प्रमेयमिति चेयं समाख्या समावेशेन भवति, समाख्यानिमित्तवशात्' 'समावेशः' अनियमः। 'समाख्यानिमित्तवशात्' समाख्यानिमित्ततन्त्रत्वादिति। प्रमाणप्रमेयसंज्ञयो-

न्यायवार्त्तिकतात्पर्यटीका

शब्दयोरिति। अयं शब्दो धर्मी, वीणाङ्गुलिसंयोगजशब्दपूर्व इति साध्यो धर्मः, तन्निमित्तासाधारणधर्मवत्त्वात्, पूर्वोपलब्धवीणानिमित्तध्वनिवदिति। तदिदमुक्तम्—वीणानिमित्तकत्वमिति। धूमदर्शनादिति। संयोगिना हि वह्निना विशिष्टो (क)धूमोऽनुमीयते न कारणेन, अस्तीति वर्त्तमानावभासानुपपत्तेरिति ॥ १५ ॥

यत्पुनराक्षिप्यते यदनियतं न तत्परमार्थसत्, यथा रज्ज्वामारोपितं सर्पत्वम्, तामेव हि रज्जुं तदैव कश्चित्सर्प इति कल्पयति कश्चिद्धारेति; स एव कदाचित्सर्प इति कल्पयित्वा पश्चाद्धारेति कल्पयति, तथा च प्रमाणप्रमेयभावस्तस्मान्न परमार्थसन्निति। अत्रेदमुत्तरसूत्रम्—

प्रमेया च तुला प्रामाण्यवदिति (सू० १६) ॥ तद्योजनिकां करोति—प्रमाणं प्रमेयमिति नेयमिति। अयमभिसंधिः—क्षणभङ्गपरिणामनिरासे सति स्वकारणादुत्पन्नं स्थिरं वस्तु तत्तद्-

वृत्तिः

सूर्यादुत्तरकालीनवस्तुप्रकाशनम्, यथा वा वह्निसमकालीनाद् धूमाद् वह्निसिद्धिस्तथाऽत्रापि। प्रमा सर्वत्र प्रमाणादुत्तरभाविन्येव, प्रमाणस्य चक्षुरादेः प्रमातः पूर्वभावित्वमस्त्येव, पूर्वं प्रमावैशिष्ट्यं तु तस्य नोपेयते, यदा कदाचित् प्रमासम्बन्धेनैव प्रमाणत्वसम्भवात्, यदा कदाचित् पाकसम्बन्धेनैव पाचकमानयेत्यादिवदिति भावः।

अत्र चकारान्तं न सूत्रान्तर्गतमिति तत्त्वालोके। वस्तुतष्टीकादिस्वरसात् सूत्रान्तर्गतमेव ॥ १५ ॥

(क) अयं ग्रन्थो लिपिकृत्प्रमादादस्फुटार्थः।

(सू०)—(१)प्रमेया च तुलाप्रामाण्यवत् ॥ १६ ॥

न्यायभाष्यम्

गुरुत्वपरिमाणज्ञानसाधनं तुला प्रमाणम्, ज्ञानविषयो गुरु द्रव्यं (२)सुवर्णादि प्रमेयम्। यदा (२)*सुवर्णादिना तुलान्तरं व्यवस्थाप्यते तदा तुलान्तरप्रतिपत्तौ सुवर्णादि प्रमाणं तुलान्तरं प्रमेयमिति। एवमनवयवेन तन्त्रार्थ उद्दिष्टो वेदितव्यः। आत्मा तावदुपलब्धिविषयत्वात् प्रमेये परिपठितः, उपलब्धौ स्वातन्त्र्यात् प्रमाता। बुद्धिरुपलब्धिसाधनत्वात् प्रमाणम्, उपलब्धिविषयत्वात् प्रमेयम्; उभयाभावात् तु प्रमितिः। एव-(३)मर्थविशेषे समाख्यासमावेशो योज्यः। तथा च कारकशब्दा निमित्तवशात्

न्यायवार्त्तिकम्

निमित्तमुपलब्धिहेतुत्वमुपलब्धिविषयत्वं च। यदा पुनरेकं वस्त्वनेकनिमित्तसम्बन्धि भवति तदा कथम्? तदा निमित्ततन्त्रत्वात् समाख्यायास्तद्वस्तु अनेकेन निमित्तेन (क)सम्बन्धेन सति अनेकशब्दाभिलाप्यम्। अस्य चार्थस्य ज्ञापनार्थं सूत्रम्—

प्रमेयता च तुलाप्रामाण्यवदिति। किमुक्तं भवति? यथा गुरुत्वपरिमाणज्ञानसाधनं तुलाद्रव्यं समाहारगुरुत्वस्येयत्तापरिच्छेदनिमित्तत्वात् प्रमाणम्, सुवर्णादिना च परिच्छिद्यमानेयत्तैषा तुलेति परिच्छेदविषयत्वेन व्यवतिष्ठमाना प्रमेयम्। (४)उदाहरणमात्रं चैतत्। "एवमनवयवेन तन्त्रार्थो वेदितव्यः।" यथा च प्रमाणप्रमेयसमाख्ये तथा कारकशब्दाः सर्वे निमित्तसमावेश-

न्यायवार्त्तिकतात्पर्यटीका

वस्त्वन्तरसन्निधानात्तत्तद्धर्मयोगे सति तत्तद्बुद्धिव्यपदेशमनुभवति। समावेशं दर्शयितुं पृच्छति—यदा पुनरिति। उत्तरम्—तदा निमित्तेति। अस्य चार्थस्य ज्ञापनार्थं सूत्रम्—

प्रमेया च तुलाप्रामाण्यवदिति। न केवलं प्रमाणं समाहारगुरुत्वे तुला, यदा पुनरस्यां संदेहो भवति प्रामाण्यं प्रति, तदा सिद्धप्रमाणभावेन तुलान्तरेण यत्परीक्षितं सुवर्णादि तेन प्रमेया च तुलाप्रामाण्यवत्। यथा प्रामाण्ये तुला प्रमेया च तथाऽन्यदपि सर्वं प्रमाणं प्रामाण्ये प्रमेयमित्यर्थः। तदेतद्भाष्यकृदाह—एवमनवयवेन कार्त्स्न्येन, तन्त्रार्थः शास्त्रार्थ इति। क्वचित् प्रमातृत्व-प्रमेयत्व-प्रमाणत्वादीनां समावेशः, यथात्मनि। स हि प्रमाता, प्रमीयमाणश्च प्रमेयम्, तेन तु प्रमितेन तद्गतगुणान्तरानुमाने प्रमाणम्। क्वचित्पुनः प्रमाणत्वप्रमेयत्वफलत्वानां समावेशः, यथा बुद्धौ; क्वचित्पुनः प्रमाणत्वप्रमेयत्वयोः, यथा संशयादौ। सेयं समावेशस्य तन्त्रार्थव्याप्तिरिति।

तथा च कारकशब्दा इति। अत्र पूरयित्वा व्याचष्टे वार्त्तिककारः—यथा च प्रमाणेति।

---

(१) "प्रमेयता" इति पाठो मुद्रितवार्त्तिके दृश्यते। ज-आदर्शे च स एव गृहीतः। (२) "सुवर्णादि प्रमेयम्। यदा" इत्यंश: टि-पु० नास्ति। (३) "-मर्थशेषे" इति वि, टि। (४) "उदाहरणं चैतत्" इति ख०।

(क) "सम्बन्धे सति" इति पाठो युक्तः सम्भाव्यते।

न्यायभाष्यम्

समावेशेन वर्त्तन्त इति। वृक्षस्तिष्ठतीति (१)स्वस्थितौ स्वातन्त्र्यात् कर्त्ता। वृक्षं

न्यायवार्त्तिकम्

नियमेन वर्तन्ते, तथा च लौकिकमुदाहरणम्। एकमनेकेन कारकशब्देनाभिधीयते 'वृक्षस्तिष्ठतीति स्वस्थितौ स्वातन्त्र्यात् कर्ता'। किं पुनर्वृक्षस्य स्वस्थितौ स्वातन्त्र्यम्? कारकान्तरानपेक्षत्वम्। न हि वृक्षस्तिष्ठन् स्वस्थितौ कारकान्तरं प्रयुङ्क्त इति। यदाऽयं स्थितिशब्दो गतिनिषेधवचनो भवति तदैवम्, यदाऽप्यस्तेरभिधायकः तदाऽप्यस्तेर्व्यक्तिनिमित्तत्वेनावतिष्ठमानोऽस्ति व्यनक्तीति कर्तेत्युच्यते। यदा तु गेहसम्बन्धाद्यभिधायको भवति (क) अस्तिशब्दः, यथा गेहे देवदत्तस्तिष्ठतीति प्रतिनिर्दिष्टोऽस्तीति गम्यते तदा न सत्तामाह न गतिप्रतिषेधम्, अपि तु

न्यायवार्त्तिकतात्पर्यटीका

यावन्ति यत्र निमित्तानि तावतां तत्र नैमित्तिकानां प्रवृत्तेरवश्यंभावो नियमः। स्वस्थितौ वृक्षः स्वातन्त्र्यात् कर्तेति भाष्यम्। तत्र स्वातन्त्र्यं पृच्छति वार्त्तिककारः—किं पुनः स्वातन्त्र्यमिति। इतरकारकाप्रयोज्यत्वं(ख) प्रयोजकत्वं च कारकान्तराणां कर्तुः स्वातन्त्र्यमुक्तम्, इह तु कारकान्तराणामभावात्तादृशं स्वातन्त्र्यं नास्तीति भावः। उत्तरम्—कारकान्तरानपेक्षत्वम्, कारकान्तरापेक्षस्य हि प्रयोजकतया कथंचित्स्वातन्त्र्यं विवक्ष्यते, तदनपेक्षस्य नितरां स्वातन्त्र्यमित्यर्थः। यदाऽयं स्थितिशब्दो गतिप्रतिषेधवचन इति। यावदुक्तं भवति न गच्छतीति तदुक्तं भवति तिष्ठतीति। अत्र च निषेधस्य निषेध्याधीननिरूपणतया तदुपाधिः पूर्वापरीभावो न तु स्वरूपेण निषेधस्य पूर्वापरीभावसंभव इति। यदाऽप्यस्तेरभिधायक इति सत्तासामान्याभिधायक इत्यर्थः। अस्ति व्यनक्तीति वृक्षस्य हि महत्त्वे सति रूपवत्त्वे सति सत्तासमवाय एव सत्ताव्यञ्जकत्वम्, तत्र चानपेक्ष

वृत्तिः

नन्वनियतत्वादेव प्रमाणप्रमेयव्यवहारो न पारमार्थिकः, रज्जौ सर्पादिव्यवहारवदित्याशङ्कायामाह—(प्रमेयता चेति)।

यथाहि तुलायाः सुवर्णादिगुरुत्वेयत्तापरिच्छेदकत्वात् प्रमाणव्यवहारः तुलान्तरेण च तदीयगुरुत्वेयत्ता(२)परिच्छेदेन प्रमेयव्यवहारस्तथा निमित्तद्वयसमावेशादिन्द्रियादेरपि प्रमाणप्रमेयव्यवहार इति।

---

(१) "स्वस्थितौ" इति वि-टि-पु०-नास्ति। (२) "-परिच्छेदे च" इति आ०।

(क) अत्र 'स्थितिशब्दः' इति युक्तः पाठ इति ख-वार्त्तिकसम्पादकाः।

(ख) अतः परम् क-चिह्निततात्पर्यग्रन्थे (स: प्रयोजकोऽयं न कारकान्तराणाम्) तत्प्रयोजकत्वं इत्येवं मुद्रितम्।

न्यायवार्त्तिकम्

गेहसम्बन्धम् ; तदाऽपि देवदत्तगेहसम्बन्धानुभवक्रिया, तस्यामपि न कारकान्तराणि प्रयुङ्क्त इति स्वतन्त्रो भवति। (क)यदा स्वयमभग्नवचनः स्थितिशब्दः, तिष्ठति वृक्षो न भग्न इति ; तदाऽपि स्वस्थितौ न कारकान्तराणि प्रयुङ्क्त इति स्वतन्त्रो भवति ; समुदायैकदेशं वा स्वस्थितौ (ख)प्रयुङ्क्ते—वृक्षो मूलैस्तिष्ठतीति, प्रासादः स्तम्भैर्ध्रियत इति ।

पूर्वापरप्रत्ययैकविषयता वा स्थितिः—यद्वस्तु प्राक् सिद्धं पुनर्निमित्तान्तरसन्निधाने सति उपलभ्यते यत् तस्यानेकायुगपत्कालप्रत्ययविषयत्वं सा स्थितिः ; तस्यां स्थितावस्य यत् सहकारि साधनं चक्षुरादि, तत् करणमिति। चक्रभ्रान्तिप्रदीपप्रत्ययवन्मिथ्याप्रत्ययः स इति चेत्, न ; प्रमाणाभावात्—अथ मन्यसे नैवैकं किञ्चिद् वस्त्वयुगपत्कालानेकप्रत्ययविषयो भवति। यदि न भवति, कथं तर्हि स एवायं वृक्षस्तिष्ठतीति प्रत्ययः ? न हि कदाचिदाद्येन दर्शनेन स एवायं वृक्षस्तिष्ठतीति प्रत्ययो भवति। दृष्टोऽन्यत्वेऽपि स्थितिप्रत्ययः, चक्रं भ्रमत्तिष्ठतीति प्रदीपो ज्वलंस्तिष्ठतीति। अनवस्थितेषु नानाभूतेषु चक्रभ्रान्तिप्रदीपादिषु य एते तद्भावप्रत्यया अतस्मिंस्तदिति मिथ्याप्रत्यया एते। यथा चैते मिथ्याप्रत्यया एवं वृक्षादिस्थितिष्वपीति, न ; प्रमाणा-

न्यायवार्त्तिकतात्पर्यटीका

इत्यर्थः। गेहसंबन्धानुभवः गेहसंबन्धप्राप्तिः समवायः, तद्विषया क्रिया गतिविधारकः प्रयत्नस्तेन हि स तिष्ठति। घटो गृहेऽस्तीति त्वौपचारिकः प्रयोगः। यदाऽप्ययमभग्नवचन इति। अत्रापि निषेध्यस्य पूर्वापरीभावोपाधिरेव निषेधस्य तथाभावः। अथवा तिष्ठतीत्यत्रापि कयाचिद्विवक्षया कारकान्तरापेक्षाऽस्तु तथाऽपि तत्प्रयोजकत्वेनैव स्वातन्त्र्यमित्याह—समुदायेति। अवयवानां समूहः समुदायस्तदेकदेशोऽवयव इति। ध्रियत इति कर्त्तरि लकारः।

प्रत्यभिज्ञानविषयता वा स्थितिः, तस्यां सत्यामपि काराकान्तरापेक्षायां प्रयोजकतया स्वातन्त्र्यमित्याह—पूर्वापरेति। अनेके पर्यायवन्तः प्रत्ययाः प्राक्, अनु तत्ताश्रयस्य धर्मिणः पुनरनुभवः, अथ स्मृतिः, अथ प्रतिसंधानमिति। वैनाशिको देशयति—चक्रेति। यदेव दण्डसंयोगेन चक्रभ्रमणं तदेवेदमुपरतेऽपि दण्डसंयोगे इत्यर्थः। परिहरति—न प्रमाणेति। नासति बलवति बाधके प्रमाणे प्रत्यभिज्ञानस्य शक्यं मिथ्यात्वम्, ज्वालादिषु तु तदस्तीत्यर्थः। (ग) न च समस्तप्रतिसन्धानप्रत्ययमिथ्यात्वे मिथ्याप्रतिसन्धानप्रत्ययो भवितुमर्हति बीजादित्याह—

(क) "यदाऽप्ययमभग्नवचन" इति तात्पर्ये।

(ख) 'इह सर्वत्र प्रपूर्वो युजिरपेक्षार्थः' इति स्फुटमेव।

(ग) अत्र 'नच समस्तप्रतिसन्धानप्रत्ययो मिथ्या भवितुमर्हति बीजाभावात्' इति पाठः समीचीनतया प्रतिभाति।

न्यायवार्त्तिकम्

भावात्—नहि भवता प्रमाणं किञ्चिद् वृक्षादीनां नानात्वप्रतिपादकमभिधीयते। मिथ्याप्रत्ययाश्च सम्यक्प्रत्ययानुसारेण भवन्तीति क्वामी सम्यक्प्रत्यया भवन्तीति वक्तव्यम्। अथ भवतः कालान्तरावस्थाने किं प्रमाणम्? उक्तं प्रमाणम्—रूप-रस-स्पर्शप्रत्ययानामेकानेकप्रत्ययनिमित्तत्वं प्रतिसन्धानादिति ; कार्यस्याऽऽधारत्वेन वा कारणस्य कार्यकालानुभवनमिति। यद् यस्याऽऽधारो भवति तत् तस्य सद्भावकालमनुभवति, यथा क्षीरस्य कुण्डम्, कारणं च कार्याधिकरणमतस्तेनापि कार्यकालोऽनुभवनीय इति। अनाधारमेवेति चेत्—अथ मन्यसे प्रतीत्य कारणं कार्यमुत्पद्यते इति क्व किं वर्तत इति ; (क) तन्न, दृष्टान्ताभावात्—नहि कश्चिदुभयपक्षसम्प्रतिपन्नो दृष्टान्तः कार्यमनाधारमस्तीति। (ख)कार्यमाधारवदित्यत्रापि न दृष्टान्तोऽस्तीति समानम्। समानमित्यनुत्तरमभ्युपगमात्—अभ्युपगतं तावद्भवता नास्मत्पक्षे दृष्टान्तोऽस्ति, किं तु भवत्पक्षेऽपि नास्तीति। विरोध इति चेत्—अथ मन्यसे न मयाऽभ्युपगम्यते दृष्टान्ताभावः किं तु भवत्पक्षे विरोधो दृश्यते। कथमिति? योऽनुपपद्यमानदृष्टान्तः स पक्षोऽसाधीयानित्येवं ब्रुवाणः स्वसिद्धान्तं बाधते। (ग) तन्न, अपरिज्ञानात्—न भवताऽस्मत्पक्षो व्यज्ञायि न स्वपक्षः। अस्मत्पक्षे तावत् कार्यमाधारवदितिए तत्प्रसिद्धम्, भवत्पक्षेऽपि रूपादयः कार्याश्चाऽऽधारवन्तश्चेत्यभ्युपगमविरोधः, भूतभौतिकसमुदायो द्रव्यमिति। यदि रूपादीननाश्रितान् मन्यसे कोऽस्य

न्यायवार्त्तिकतात्पर्यटीका

मिथ्याप्रत्ययाश्चेति। वैनाशिकः पृच्छति—अथ भवत इति। एवं ब्रुवाणः प्रत्यक्षमप्रमाणयन्न शक्यस्तेन बोधयितुमित्यनुमानं प्रमाणमाह—उक्तं प्रमाणम्(घ) आत्मलक्षणे रूपेति। अनुमानान्तरमाह—कार्यस्येति। कार्यकालानुभवनं कार्यकालप्राप्तिः। वैनाशिकः शङ्कते—अनाधारमिति। प्रतीत्येति पूर्वभावं विकृत्येत्यर्थः। दूषयति—तन्नेति। आधेयस्याधारसमानकालत्वमनुभवसिद्धम्, तेनाऽऽधारेण कारणेन कार्यकालं स्थातव्यम्। अनाधारत्वं तु कार्यस्य नानुभवगोचरः, अपि तु युक्त्या साध्यम्, सा च दृष्टान्ताभावादनुपपन्ना। न च विप्रतिपत्तिमात्रादनुभवः शक्योऽपवदितुम्, क्षणभङ्गसाधनानि च निराकरिष्यन्ते। यदि हि रूपादीनामाधारवत्त्वं निषिध्यते ततोऽस्याभ्युपगमविरोधो भवति, भूतानि पृथिव्यादीनि भौतिका रूपादय इति।

वृत्तिः

यद्वा प्रमाणता प्रमेयता च प्रमावैशिष्ट्यादिति यत्प्रागाशङ्कितं तत्राऽऽह—प्रमेयता

(क) 'तन्न, दृष्टान्ताभावा'दिति 'अनाधारमेवे'ति चेदित्याक्षेपे समाधानम्।

(ख) अत्रैव पुनराक्षिपति कार्यमिति।

(ग) 'तन्नापरिज्ञाना'दिति 'विरोध इति चे'दित्यत्र समाधानम्।

(घ) १८६-पृष्ठे 'नहि रूपरसगन्धस्पर्शप्रत्ययाः प्रतिसन्धीयन्ते' इत्यादिग्रन्थो द्रष्टव्यः।

न्यायभाष्यम्

पश्यतीति दर्शनेनाऽऽप्तुमिष्यमाणतमत्वात् कर्म। वृक्षेण चन्द्रमसं ज्ञापयतीति ज्ञापकस्य

न्यायवार्त्तिकम्

तद्धितस्यार्थो भौतिका रूपादय इति। यच्चोक्तं 'मणिः प्रभाया आश्रयस्तद्वृत्तिस्थितिविकारानुविधानात्, कुण्डं बदराणामाश्रयस्तद्वशेनापातात्, तैलस्य तिल आश्रयस्तद्वशेनास्पन्दना'दित्येवमादि तद् व्याहन्यते। अनाश्रिताश्च रूपादयः स्वतन्त्रा एकमुपनिबन्धनं वस्त्वन्तरमन्तरेण तिलमुद्गमाषादिवद्विभज्येरन्, न तु विभज्यन्ते, तस्मात् परतन्त्रा इति। तस्माद् व्यवस्थितमेतत् स्मृत्या सह पूर्वापरप्रत्ययैकविषयता वा स्थितिरिति।

(क) दर्शनेनाप्तुमिष्यमाणत्वाद् वृक्षः कर्म। कर्मणि कः कारकार्थः? क्रियाविषयत्वम्। यत् खलु क्रियाया विषयभावेन व्यवतिष्ठते तत् कर्म। एतेन कर्मलक्षणेन (ख) "तथा युक्तं चानीप्सितम्" इति संगृहीतम्।

आनन्तर्यप्रतिपत्तिः करणस्य साधकतमत्वार्थः। वृक्षेण चन्द्रमसं ज्ञापयतीति वृक्षं गृहीत्वाऽनन्तरं चन्द्रमसं प्रतिपद्यत इति वृक्षः करणकारकशब्दवाच्यः।

न्यायवार्त्तिकतात्पर्यटीका

अभ्युपगमान्तरविरोधमाह—यच्चोक्तं भवद्भिरिति। न केवलं रूपादीनामाश्रितत्वं भवद्भिरभ्युपगतमुपपन्नं चेत्याह—(१)अनाश्रिताश्चेति।

पृच्छति—कर्मणि कः कारकार्थः, कारकशब्दार्थः। क्रियानिमित्तं हि कारकम्, यत्पुनः क्रियाया एव व्याप्यं न तत् क्रियानिमित्तमिति न कारकम्, अकारकं च कथं कर्म, कारकाधिकारित्वात् कर्मसंज्ञाया इति भावः। उत्तरम्—क्रियाविषयत्वमिति। अनात्मसमवेतक्रियाफलशालित्वं क्रियाविषयत्वं कर्मत्वम्। देवदत्तसमवेतया हि क्रियया दर्शनलक्षणया वृक्षविषयोऽनुभवो जन्यते, इदमेव चानुभवस्यार्थविषयत्वं यदर्थाधीननिरूपणत्वमित्युक्तं प्रमाणलक्षण इति। तेन क्रियाविषयस्य क्रियातः प्राग्भावाद् युक्तं कारकत्वम्। एवं च विकार्यप्राप्ययोरुपपन्नः कर्मभावः; निर्वर्त्यस्य तु पटादेर्यद्यपि क्रियायाः प्राग्भावो नास्ति तथाऽपि तदवयवानां तन्तूनां प्राग्भावस्तेषां तादर्थ्येन पटत्वे उपचारात् पटं करोतीति युक्तः प्रयोगः। तथा हि सहचरणादिसूत्रे वक्ष्यति (ग)कटार्थेषु वीरणेष्विति। एतेन कर्मलक्षणेनाहिं लङ्घयति ग्रामं गच्छन् वृक्षमूलान्युपसर्पतीत्यादयोऽपि संगृहीता वेदितव्याः। नगरं गच्छति चैत्र इत्यत्र यथा प्राप्तिर्नगरसमवेता एवं चैत्रसमवेताऽपीति चैत्रस्यापि क्रियाजनितफलशालिनो मा भूत् कर्मत्वमित्यत उक्तमनात्मसमवेतेति।

(१) मुद्रितपुस्तकयोः 'अनाश्रितत्वाच्च' इति पाठो दृश्यते।

(क) भाष्ये तु "दर्शनेनाऽऽप्तुमिष्यमाणतमत्वात्" इति पाठः।

(ख) पाणिनीये १।४।५० अङ्कितं सूत्रमेतत्।

(ग) २।२।६२ सूत्रभाष्ये "कटार्थेषु" इत्यादि वक्ष्यति।

न्यायभाष्यम्

साधकतमत्वात् करणम्। वृक्षायोदकमासिञ्चतीति आसिच्यमानेनोदकेन वृक्षमभिप्रैतीति सम्प्रदानम्। वृक्षात् पर्णं पततीति 'ध्रुवमपायेऽपादान'मित्यपादानम्। वृक्षे वयांसि सन्तीति 'आधारोऽधिकरण'मित्यधिकरणम्। एवं च सति न द्रव्यमात्रं कारकम्, न क्रियामात्रम्। किं तर्हि? क्रियासाधनं क्रियाविशेषयुक्तं कारकम्। (१)यत्क्रियासाधनं (२)स्वतन्त्रं स कर्ता, न द्रव्यमात्रं न क्रियामात्रम्। क्रियया व्याप्तु-

न्यायवार्त्तिकम्

कर्मणाप्तुमभीष्टं सम्प्रदानम्—यद्वस्तु कर्मणा प्राप्तुमभिप्रेतं भवति तत् सम्प्रदानसंज्ञकम्। वृक्षायोदकमासिञ्चतीति आसिच्यमानमुदकं कर्म, तेन कर्मणोदकेन वृक्षं प्राप्नोतीति वृक्षः सम्प्रदानं भवतीति।

अपगच्छत्यवतिष्ठते यत् तदपादानम्, यथा वृक्षात् पर्णं पततीति वृक्षोऽपादानसंज्ञकः। यत् पतति तदपगच्छति तस्मिन्नपगच्छति अवतिष्ठते वृक्ष इति।

धृतिहेतुरधिकरणम्—यस्मिन् यदाधेयं तदाधेयस्य यद् धृतिहेतुस्तदधिकरणम्। वृक्षे वयांसीति वृक्षसम्बन्धो वयसां गुरुत्वप्रतिबन्धे कारणमिति वृक्षोऽधिकरणशब्दवाच्यः। 'एवं च सति न द्रव्यमात्रं कारकं न क्रियामात्रम्'। किमुक्तं भवति? नायं कारकशब्दः क्रियामात्रे वर्तते न द्रव्यमात्रे, नहि द्रव्यं शुद्धमुपलभमानः कारकशब्दं प्रयुङ्क्ते नापि क्रियां केवलाम्, अपि तु यदा क्रियाद्रव्यसम्बन्धमुपलभते तदा सामान्येन कारकशब्देनाभिधत्ते कारकमिति। सामान्यं च कारकाणां क्रियानिमित्तत्वम्। अविवक्षिते विशेषे क्रियानिमित्तत्वे केवले विवक्षिते कारकमिति

न्यायवार्त्तिकतात्पर्यटीका

आत्मविषयेऽपि च मानसप्रत्यक्षे यद्यप्यात्मनो न कर्मता तथाऽपि ज्ञानक्रिया सकर्मिकैवाऽऽत्मधर्मस्याऽऽत्मव्यतिरिक्तस्य कस्यचित् कर्मणोऽवभासनादिति सर्वमवदातम्।

वृक्षः संप्रदानं भवतीति। पाणिनीयलक्षणानुरोधेन लौकिकप्रयोगानुरोधाच्च संप्रदानमिति, नेयमन्वर्थसंज्ञेति भावः। गुरुत्वप्रतिबन्धे कारणमिति प्रकृतोदाहरणाभिप्रायम्। तथा च गुणादीनामप्याधेयत्वाधिगतेर्द्रव्यादिभिराधेयभावः सिद्धो भवति। तेन न द्रव्यस्वभावः कारकमिति यदुक्तं माध्यमिकेन तदस्माकमभिमतमेव, काल्पनिकं तु कारकं न मृष्यामह इत्यनेनाभिसंधिना भाष्यकारेणोक्तम्—एवं च सतीति। न क्रियामात्रमिति, नावान्तरक्रियामात्रम्। (क) यत्प्रधानक्रियासाधनमवान्तरक्रियाविशेषयुक्तमिति। तदेतदनुभाष्य वार्तिककारो व्याचष्टे—एवं च सतीति। तदनेन कारकसामान्यमुक्तम्। विशेषलक्षणपरं भाष्यं यत् क्रियासाधनं

(१) "यः क्रियासाधनम्" इति टि०।

(२) "स्वतन्त्रः" इति ल।

(क) यत् प्रधानक्रियेत्यादि क्रियासाधनमित्यादिभाष्यग्रन्थस्य व्याख्यानम्।

न्यायभाष्यम्

मिष्यमाणतमं कर्म, न द्रव्यमात्रं न क्रियामात्रम्। एवं साधकतमादिष्वपि। एवं च (१) कारकान्वाख्यानं यथैव उपपत्तित एवं लक्षणतः। कारकान्वाख्यानमपि (२) न द्रव्यमात्रे न क्रियायां वा (२*)। किं तर्हि? (३) क्रियासाधने क्रियाविशेषयुक्त इति। कारकशब्दश्चायं प्रमाणं प्रमेयमिति, स च कारकधर्मं न हातुमर्हति॥ १६॥

न्यायवार्त्तिकम्

शब्दः प्रवर्तते, यदा तु विशेषो विवक्षितस्तदा स्वसाधारणेन कारकधर्मेणेतरव्यावृत्तेन स्वातन्त्र्यादिना विशेषेण विशिष्यमाणं वस्तु कर्ता कर्म करणमिति व्यपदिश्यते। सर्वस्य च कारकस्य स्वक्रियानिमित्तः कर्तृव्यपदेशः प्रधानक्रियासव्यपेक्षस्तु कारकशब्दप्रयोगः। एवं च शास्त्रं—(क) "कारके" जनके, निर्वर्तके। कस्याः? क्रियाया इति तथा व्यपदेशः। तस्मान्नेदं स्वक्रियामात्रमपेक्ष्योक्तम्, किन्तु प्रधानक्रियाम्। तस्यामेव प्रधानक्रियायां किञ्चिदारादुपकारकं किञ्चिदासन्नोपकारकमिति किञ्चित् कथञ्चिदुपकरोति तदपेक्षाश्च कर्त्रादिशब्दा इति तदुक्तं पुरस्तात्।

यदि क्रियासम्बन्धनिमित्तकः कारकशब्दप्रयोगः पचत्येव पाचकशब्दः प्रवर्तेत नापाक्षीत् पाचकः पक्ष्यतीति पाचक इति? न, शक्तेस्त्रिकालावस्थानात्—शक्तिस्त्रिष्वपि कालेष्ववतिष्ठते, शक्त्यपेक्षश्चातीतानागतयोः कारकशब्दव्यपदेशः पचत्यपाक्षीत् पक्ष्यतीति। (ख) शक्तेस्त्रिकालावस्थानात् त्रैकाल्यव्यक्तिरयुक्ता, यथैव द्रव्यं त्रिकालयोगि तथा शक्तिरपीति—यथा द्रव्ये त्रैकाल्यं न व्यज्यते तथा शक्तावपीति अपचत्यपि पचतीति स्यात् पक्ष्यति पाचकोऽपाक्षीत् पाचक

न्यायवार्त्तिकतात्पर्यटीका

स्वतन्त्रमिति। तद्व्याचष्टे—यदा तु विशेष इति। स्यादेतत् क्रियासाधनमित्येतावदेवास्तु क्रियाविशेषयुक्तमिति वा, कृतमुभयोपादानेनेत्यत आह—सर्वस्य च कारकस्येति। यद्यवान्तरक्रियामात्रमुच्यते ततस्तस्मिन् सर्वस्य कर्तृत्वात् कारकवैचित्र्यं न स्यात्, प्रधानक्रियामात्रोपादाने च तत्र सर्वेषामवान्तरव्यापारमन्तरेण वैचित्र्यायोगादत उभयोपादानं प्रयोजनवदिति। एवं लक्षणत इति भाष्यं व्याचष्टे—एवं च शास्त्रमिति।

देशयति—यदीति। परिहरति—न, शक्तेरिति। पुनर्देशयति—शक्तेरिति। परिहरति—

---

(१) "कारकार्थान्वाख्यानम्" फ०। (२) "न द्रव्यमात्रेण न क्रियया वा" इति ल-ग-भा-श्रा०। (३) "क्रियासाधने" इति टि-पु० नास्ति।

(क) 'कारके' इति पाणिनीयं सूत्रम् (१।४।२३) अत्र भाष्यम् करोति क्रियां निर्वर्तयतीति।

(ख) 'यथा द्रव्ये त्रैकाल्यं न व्यज्यते' इति ग्रन्थकृतः स्वपदवर्णने नञ्दर्शनात् तात्पर्यटीकायां च 'पुनर्देशयति' इत्युक्तेः पूर्वपक्षग्रन्थतया परिज्ञानादत्र 'शक्तेस्त्रिकालानवस्थानात् त्रैकाल्यव्यक्तिरयुक्ता, यथैव द्रव्यं त्रिकालायोगि' इति पाठः समीचीनतया प्रतिभाति।

न्यायभाष्यम्

अस्ति भोः कारकशब्दानां (१) निमित्तवशात् समावेशः। प्रत्यक्षादीनि च प्रमाणानि उपलब्धिहेतुत्वात्, प्रमेयं चोपलब्धिविषयत्वात्। संवेद्यानि च प्रत्यक्षादीनि प्रमाणानि, प्रत्यक्षेणोपलभे अनुमानेनोपलभे उपमानेनोपलभे आगमेनोपलभे। प्रत्यक्षं मे ज्ञानम् आनुमानिकं मे ज्ञानम् औपमानिकं मे ज्ञानम् आगमिकं मे ज्ञानमिति विशेषा गृह्यन्ते। लक्षणतश्च ज्ञाप्यमानानि ज्ञायन्ते विशेषेणेन्द्रियार्थसन्निकर्षोत्पन्नं ज्ञानमित्येवमादिना।

न्यायवार्त्तिकम्

इति च न स्यात्। नैष दोषः, क्रियासम्बन्धस्य शक्तिव्यक्तिहेतुत्वात्—क्रियेत्यनेन शब्देन धात्वर्थोऽभिधीयते तस्य यत् प्रधानसाधनं स कर्ता। सोऽयं कर्ता यदा क्रियया सम्बध्यते तदा शक्तिं व्यनक्ति। का पुनरियं शक्तिः? क्रियाकर्तृव्यतिरिक्तः कर्तृधर्मः। सामर्थ्यमुपायपरिज्ञानं च क्रियासम्बन्धेन व्यवतिष्ठते। यदोपायविज्ञानसामर्थ्यक्रियासम्बन्धास्तदा मुख्यतः कारकशब्दः प्रवर्तते पचति पाचक इति, यदा तु क्रियासम्बन्धमन्तरेणोपायपरिज्ञानसामर्थ्यमात्रोपादानेऽन्यतमवैकल्यात् पाचकशब्दः प्रवर्तते तदोपचारतः अपाक्षीत् पाचकः पक्ष्यति पाचक इति। कारकशब्दश्चायं प्रमाणं प्रमेयमिति। कुतः? क्रियाविशेषयोगात्—यथैवामी पाचकादिशब्दाः क्रियाविशेषयोगे सति प्रवर्तन्ते तथा प्रमाणप्रमेयशब्दावपीति ॥ १६ ॥

(क) "अस्ति भोः कारकशब्दानां निमित्तसमावेशान्नियमः; प्रत्यक्षादीनि प्रमाणानि, संवेद्य-मानानि च प्रमेयमुपलब्धिविषयत्वात्"। तत्रेदं चिन्त्यते—किमेतानि प्रत्यक्षादीनि

न्यायवार्त्तिकतात्पर्यटीका

नैष दोष इति। ननु बुद्ध्यादयोऽपि शक्तिव्यक्तिहेतवः, न चैते क्रियारूपाः किं तु गुणरूपा इत्यत उक्तम्—क्रियेत्यनेनेति। सामर्थ्यं बलम्। दुर्बलो हि जानन्नप्युपायं न व्यापारयति, यथा पाणिना कुण्ठः कुठारम्, तेन शक्तिक्रियासंबन्धयोः कारकशब्दो मुख्यः शक्तिमात्रे तु गौण इति। प्रकृते योजयति—कारकशब्दश्चायमिति ॥ १६ ॥

संप्रति प्रकारान्तरेण प्रमाणान्याक्षिप्य समाधीयन्ते—अस्ति भोः कारकशब्दानामिति। अत्रैते कल्पा उपप्लवन्ते—किं प्रत्यक्षादीनामुपलब्धिः ससाधना निःसाधना वा? यदाऽपि

वृत्तिः

चेति। यथा कदाचिद्गुरुत्वेयत्तापरिच्छेदकत्वात् तुलायाः प्रमाणत्वव्यवहारस्तथेन्द्रियघटादेरपि प्रमाणप्रमेयव्यवहार इति ॥ १६ ॥

---

(१) 'निमित्तसमावेशात्' ल०।

(क) एतत्प्रतीके भाष्यपाठापेक्षया किञ्चिदानुपूर्वीवैलक्षण्यं दृश्यते।

न्यायभाष्यम्

सेयमुपलब्धिः प्रत्यक्षादिविषया किं प्रमाणान्तरतः (१) अथान्तरेण प्रमाणान्तरमसाधनेति ? कश्चात्र विशेषः ?

(सू०)—प्रमाणतः सिद्धेः प्रमाणानां प्रमाणान्तरसिद्धिप्रसङ्गः ॥ १७ ॥

यदि प्रत्यक्षादीनि प्रमाणेनोपलभ्यन्ते, येन प्रमाणेनोपलभ्यन्ते तत्प्रमाणान्तर-

न्यायवार्त्तिकम्

स्वोपलब्धौ प्रत्यक्षादिव्यतिरिक्तं प्रमाणान्तरं (२) प्रयोजयन्ति, अथ निःसाधनैव प्रमाणोपलब्धिरिति । किं चातः ?

न्यायवार्त्तिकतात्पर्यटीका

ससाधना तदाऽपि किमेभिरेव प्रत्यक्षादिभिराहो प्रमाणान्तरेण ? यदाऽप्येभिस्तदाऽपि किं तयैव प्रत्यक्षव्यक्त्या, अथैका व्यक्तिर्व्यक्त्यन्तरेणेति । तत्र प्रमाणान्तराभ्युपगमे विभागसूत्रव्याघातः अनवस्थापातश्च । तत्र प्रत्यक्षादिभिः प्रत्यक्षाद्यन्तराणां ग्रहणे अनवस्थापातः, तयैव व्यक्त्या तु ग्रहणे आत्मनि वृत्तिविरोधः, न हि तयैवासिधारया सैवासिधारा छिद्यते ; तस्मादसाधना प्रमाणोपलब्धिः। एवं चेत् कृतं प्रमेयसाधनैः प्रमाणैः प्रमाणवदसाधनैवास्तु प्रमेयोपलब्धिरिति पूर्वः पक्षः। नासाधना प्रमाणसिद्धिर्नापि प्रत्यक्षादिव्यतिरिक्तप्रमाणाभ्युपगमो येन विभागसूत्रव्याघातः स्यात् । नापि च तयैव व्यक्त्या तस्या एव ग्रहणमुपेयते येनाऽऽत्मनि वृत्तिविरोधो भवेत्; अपि तु प्रत्यक्षादिजातीयेन प्रत्यक्षादिजातीयस्य ग्रहणमातिष्ठामहे । न चानवस्था, अस्ति किञ्चित्प्रमाणं यत्स्वज्ञानेनान्यधीहेतुः, यथा धूमादिः ; किञ्चित्पुनरज्ञातमेव बुद्धिसाधनं यथा चक्षुरादि । तत्र पूर्वं स्वज्ञाने चक्षुराद्यपेक्षम्, चक्षुरादि तु ज्ञानानपेक्षमेव ज्ञानसाधनमिति काऽनवस्था । बुभुत्सया च तदपि शक्यज्ञानम्, सा च कदाचिदेव क्वचिदिति नानवस्था । न च प्रामाण्यं प्रमाणानामप्रतीतं न (क) वृत्त्यङ्गमिति तदर्थं प्रमाणान्तरापेक्षायामनवस्थेति वाच्यम्, दृष्टार्थे संशयादपि प्रवृत्तौ सत्यां प्रवृत्तिसामर्थ्येन तस्य सुज्ञानत्वात् ; अदृष्टार्थेषु प्रवृत्तिसामर्थ्यावधृतप्रामाण्यप्रमाणसाधर्म्येण तस्य शक्यज्ञानत्वादिति दर्शितं प्रथमे सूत्रे । तस्मात् प्रत्यक्षादिभिः प्रत्यक्षादीनामुपलब्धिर्न चानवस्थेति सिद्धान्तः। भाष्ये भो इत्यामन्त्रणे । कुतः पुनरुपलब्धिहेतुत्वमत आह—संवेद्यानि चेति । चो हेतौ । उपलब्धिविषयत्वं कुत इत्यत आह—प्रत्यक्षं मे ज्ञानमिति ।

प्रमा—ङ्गः (सू० १७) ॥

(१) "-ऽर्थान्तरेण" इति वि, टि। (२) अतः परमादर्शवार्त्तिकद्वये "(प्रसिद्धेर्यदि प्रमाणं साधनं प्रमाणान्तरं प्राप्नोति)" इत्येवमधिकं मुद्रितम् ।

(क) वृत्त्यङ्गमिति प्रवृत्त्यङ्गमित्यर्थः ।

न्यायभाष्यम्

मस्तीति प्रमाणान्तरसद्भावः प्रसज्यत इति अनवस्थामाह तस्याप्यन्येन (१) तस्याप्यन्येनेति। न चानवस्था शक्याऽनुज्ञातुमनुपपत्तेरिति ॥ १७ ॥

अस्तु तर्हि प्रमाणान्तरमन्तरेण निःसाधनेति ?—

(सू०)—तद्विनिवृत्तेर्वा प्रमाणसिद्धिवत् प्रमेयसिद्धिः ॥१८॥

यदि प्रत्यक्षाद्युपलब्धौ प्रमाणान्तरं निवर्त्तते (२) आत्माद्युपलब्धावपि प्रमाणान्तरं निवर्त्स्यत्यविशेषात् ॥ १८ ॥

न्यायवार्त्तिकम्

प्रमाणतः सिद्धेः प्रमाणानां प्रमाणान्तरसिद्धिप्रसङ्गः। प्रमाणविषयायाः सिद्धेर्यदि प्रमाणं साधनम्, प्रमाणान्तरं प्राप्नोति ; प्रत्यक्षादीनां साध्यत्वान्न साध्यं साधनं भवतीति ॥ १७ ॥

अथ प्रमाणान्तरमन्तरेण निःसाधनैव प्रमाणेषूपलब्धिः ?

तद्विनिवृत्तेर्वा प्रमाणसिद्धिवत् प्रमेयसिद्धिः। यथा प्रमाणानि स्वोपलब्धौ निवर्तन्ते एवं प्रमेयसिद्धावपि ॥ १८ ॥

न्यायवार्त्तिकतात्पर्यटीका

तद्वि—द्धिः (सू० १८) (क) ॥

वृत्तिः

अनवस्थया प्रत्यवस्थानपरं पूर्वपक्षसूत्रम्—(प्रमाणत इति)।

प्रमाणानां प्रमाणतः सिद्धेः स्वीकारे प्रमाणान्तरस्वीकारः स्यात्। तथाहि—प्रमाणस्य तावन्न स्वतः सिद्धिरात्माश्रयापत्तेः, अतः प्रमाणान्तरं स्वीकार्यम्, तयोश्च परस्परसाधकत्वेऽन्योन्याश्रयापत्तिरतस्तत्रापि प्रमाणान्तरमङ्गीकार्यमित्येवमनवस्थेति भावः ॥ १७ ॥

ननु प्रमाणसिद्धिः प्रमाणं विनैव स्यादित्यत्राऽऽह—(तद्विनिवृत्तीति) ।

यदि च (ख) प्रमाणविनिवृत्तितः प्रमाणव्यतिरेकात् प्रमाणसिद्धिः स्वीक्रियते तदा

---

(१) "अस्याप्यनेन तस्याप्यन्येनेति" इति टि०। (२) "आत्माद्युपलब्धावपि" इति फ-ग०।

(क) १८-श-सूत्रस्य तात्पर्यटीका पूर्वमेव गतार्थेति पृथक् नोपलभ्यते।

(ख) वृत्तिग्रन्थदर्शनेन 'तद्विनिवृत्तितो वा प्रमाणसिद्धिवत् तत्सिद्धिः' इति विश्वनाथसम्मतः पाठः प्रतीयते।

न्यायभाष्यम्

एवं च सर्वप्रमाणविलोप इत्यत आह—

(सू०)—(१)न प्रदीपप्रकाशसिद्धिवत्तत्सिद्धेः ॥ १९ ॥

यथा प्रदीपप्रकाशः प्रत्यक्षाङ्गत्वाद् दृश्यदर्शने प्रमाणम्, स च प्रत्यक्षान्तरेण चक्षुषः सन्निकर्षेण गृह्यते; (२)प्रदीपभावाभावयोर्दर्शनस्य (३)तथाभावाद्दर्शनहेतुरनुमीयते, तमसि प्रदीपमुपाददीथा इत्याप्तोपदेशेनापि प्रतिपद्यते; एवं प्रत्यक्षादीनां यथादर्शनं प्रत्यक्षादिभिरेवोपलब्धिः। इन्द्रियाणि तावत् स्वविषयग्रहणेनैवानुमीयन्ते। अर्थाः प्रत्यक्षतो गृह्यन्ते। इन्द्रियार्थसन्निकर्षास्त्वावरणेन लिङ्गेनानुमीयन्ते।

न्यायवार्त्तिकम्

अस्योत्तरम्—

न प्रदीपप्रकाशसिद्धिवत् तत्सिद्धेरिति। प्रदीपप्रकाशो घटाद्युपलब्धिसाधनस्याङ्गत्वात् प्रमाणम्, स च प्रत्यक्षादिभिरेवोपलभ्यते; नासावात्मोपलब्धौ प्रत्यक्षादिव्यतिरेकि प्रमाणं प्रयोजयति (क)तैरेव उपलभ्यते(ख) तथा प्रमाणान्यपि प्रत्यक्षादिभिरेवोपलप्स्यन्ते इति दृष्टान्तमात्रमेतत्। कोऽत्र न्याय इति? अयं न्याय उच्यते प्रत्यक्षादीनि स्वोपलब्धौ प्रमाणान्तराप्रयोजकानि परिच्छेदसाधनत्वात् प्रदीपवत्—यथा प्रदीपः परिच्छेदसाधनं स्वोपलब्धौ न प्रमाणान्तरं (ग)प्रयोजयतीति तथा प्रमाणानि, तस्मात् तान्यपि प्रमाणान्तराप्रयोजकानीति सिद्धम्। सामान्यविशेषवत्त्वाच्च—यत् सामान्यविशेषवत् तत् स्वोपलब्धौ न प्रत्यक्षादिव्यतिरेकि प्रमाणं

न्यायवार्त्तिकतात्पर्यटीका

न प्र—द्धेः (सू० १९)॥ प्रदीपभावाभावयोर्दर्शनस्य तथाभावात्।

वृत्तिः

तद्वदेव तत्सिद्धिः प्रमेयसिद्धिः स्वीक्रियताम्, किं प्रमाणाङ्गीकारेण। तथा च अव्यवस्थितमेव जगत् स्यादिति शून्यतायां पर्यवसानमिति भावः॥ १८ ॥

सिद्धान्तसूत्रम्—(न प्रदीपप्रकाशवत् तत्सिद्धेरिति)।

यथाहि प्रदीपालोकाद् घटादिप्रकाशस्तथा प्रमाणानां प्रमेयप्रकाशकत्वम्, अन्यथा प्रदीपस्य घटप्रकाशकत्वम्, प्रदीपप्रकाशकं चक्षुः, तज्ज्ञापकमन्यदित्यनवस्था(४)पातात्

---

(१) "न प्रदीपप्रकाशवत् तत्सिद्धेः" इति आ०। (२) "प्रदीप-" इति टि० पु० नास्ति। (३) "तथाभावाद्दर्शन-" इति टि०। (४) "-पातात्" इत्यत्र "-भयात्" इति आ०।

(क) अत्र 'तैरेव उपलभ्यते' इति सम्पातायातं सम्भाव्यते।

(ख) 'तथे'ति दर्शनात् पूर्ववाक्ये यथेत्यर्थतोऽनुसन्धेयम्।

(ग) अत्र 'प्रयोजयतीति प्रमाणानि, तथा तान्यपि' इत्यानुपूर्वी सम्यक्तया प्रतिभाति।

न्यायभाष्यम्

इन्द्रियार्थसन्निकर्षोत्पन्नं ज्ञानमात्ममनसोः संयोगविशेषादात्मसमवायाच्च सुखादिवद् गृह्यते। एवं (१)प्रमाणविशेषो विभज्य (२)वचनीयः। यथा च दृश्यः सन् प्रदीपप्रकाशो दृश्यान्तराणां दर्शनहेतुरिति दृश्यदर्शनव्यवस्थां लभते, एवं प्रमेयं सत्किञ्चिदर्थजातमुपलब्धिहेतुत्वात् प्रमाणप्रमेयव्यवस्थां लभते। सेयं प्रत्यक्षादिभिरेव प्रत्यक्षादीनां यथादर्शनमुपलब्धिर्न प्रमाणान्तरतः, न च प्रमाणमन्तरेण निःसाधनेति।

तेनैव तस्याग्रहणमिति चेत्, न; अर्थभेदस्य लक्षणसामान्यात्—प्रत्यक्षादीनां प्रत्यक्षादिभिरेव ग्रहणमित्ययुक्तम्, अन्येन ह्यन्यस्य ग्रहणं दृष्टमिति। न, अर्थभेदस्य लक्षणसामान्यात्—प्रत्यक्षलक्षणेनानेकोऽर्थः संगृहीतस्तत्र केनचित् कस्यचिद् ग्रहणमित्यदोषः। एवमनुमानादिष्वपीति। यथोद्धृतेनोदकेनाऽऽशयस्थस्य ग्रहणमिति।

न्यायवार्त्तिकम्

प्रयोजयति यथा प्रदीप इति। संवेद्यत्वात्—यत् संवेद्यं तत् प्रत्यक्षादिव्यतिरेकिप्रमाणान्तराप्रयोजकं यथा प्रदीप इति। आश्रितत्वात् करणत्वादित्येवमादि प्रदीपवदिन्द्रियादयोऽपि प्रत्यक्षाङ्गत्वात् प्रत्यक्षादिव्यतिरिक्तप्रमाणान्तराप्रयोजका इति समानम्।

तेनैव तस्याग्रहणमिति चेत्—अथ मन्यसे प्रत्यक्षादिभिः प्रत्यक्षादीनामुपलब्धौ तेनैव तदेव गृह्यत इति प्राप्तम्, न चैतदस्ति, न हि साध्यं साधनं भवतीति। नैष दोषः, अर्थभेदस्य लक्षणसामान्यात् प्रमाणलक्षणेनानेकोऽर्थः संगृहीतः, तत्र केनचित्कस्यचिद् ग्रहणमित्यदोषः। यथोद्धृतेनोदकेनाऽऽशयस्थस्य—यथोद्धृतमुदकं गृहीत्वा आशयस्थमप्येवंभूतमिति प्रतिपद्यत इति, न पुनरेवमभिधीयते तेनैव तस्य ग्रहणम् अपि तु तथाभूतेन तथाभूतस्य। न चायमेकान्तः न तेनैव तस्य ग्रहणं भवतीति, भवत्यपि कदाचिद् यथात्मनि स एव ज्ञाता ज्ञेयो भवति, यदात्मानं जानीत इति।

वृत्तिः

प्रदीपोऽपि न घटप्रकाशकः स्यात्। यदि च घटप्रत्यक्षे (३)तत्तत्प्रकाशानां नापेक्षेति नानवस्थेत्युच्यते ? तदा प्रकृतेऽपि तुल्यम्, नहि प्रमाणात् प्रमेयसिद्धौ प्रमाणसिद्धिरपेक्षिता। यदा च प्रमाणसिद्धिरपेक्षिता तदा तत्रापि प्रमाणमपेक्ष्यताम्, तच्चानुमानादिकमेवेति न प्रमाणान्तरकल्पना, न वाऽनवस्था, सर्वत्र प्रमाणसिद्धेरनपेक्षितत्वात्, क्वचिद्बीजाङ्कुरवत्तदपेक्षाऽपि न क्षतिकरीति भावः।

(१) "प्रमाणशेष" इति वि-टि०। (२) "नयनीय" इति टि०। (३) "तत्तत्प्रकाशकानाम्" इति आ०।

न्यायभाष्यम्

ज्ञातृमनसोश्च दर्शनात्—अहं सुखी अहं दुःखी चेति तेनैव ज्ञात्रा तस्यैव ग्रहणं दृश्यते। 'युगपज्ज्ञानानुत्पत्तिर्मनसो लिङ्गम्' (१ अ० १ आ० १६ सू०) इति च तेनैव मनसा तस्यैवानुमानं दृश्यते, ज्ञातुर्ज्ञेयस्य चाभेदो ग्रहणस्य (१)ग्राह्यस्य चाभेद इति।

निमित्तभेदोऽत्रेति चेत् समानम्—न निमित्तान्तरेण विना ज्ञाता आत्मानं जानीते, न च निमित्तान्तरेण विना मनसा मनो गृह्यत इति समानमेतत्, प्रत्यक्षादिभिः प्रत्यक्षादीनां ग्रहणमित्यत्राप्यर्थभेदो (२)न गृह्यत इति।

प्रत्यक्षादीनां चाविषयस्यानुपपत्तेः—यदि स्यात् किंचिदर्थजातं प्रत्यक्षादीनामविषयः यत्प्रत्यक्षादिभिर्न शक्यं ग्रहीतुम्, तस्य ग्रहणाय प्रमाणान्तरमुपादीयेत, तत्तु न शक्यं केनचिदुपपादयितुमिति। प्रत्यक्षादीनां यथादर्शनमेवेदं सच्चासच्च सर्वं विषय इति ॥ १९ ॥

न्यायवार्त्तिकम्

निमित्तभेदोऽत्रेति चेत्—अथ मन्यसे यदाऽयमात्मा ज्ञाता तदाऽन्यन्निमित्तम्, यदा ज्ञेयस्तदाऽन्यदिति समानम्, यथैव ज्ञाता सुखादिसम्बन्धापेक्षस्तद्विशेषणमात्मानं प्रतिपद्यते अहं सुखी अहं दुःखी चेति, तथा प्रमाणमपि प्रमाणविषयत्वेनावतिष्ठमानं प्रमेयमिति।

प्रत्यक्षादीनां चाविषयस्यानुपपत्तेः—यदि कश्चिद्विषयः प्रत्यक्षाद्यविषयः स्यात् प्रतिपद्येमहि प्रत्यक्षादिव्यतिरिक्तं प्रमाणम्, स च न शक्यः केनचित् प्रतिपादयितुम्। सर्वमिदं सच्चासच्च प्रत्यक्षादीनामेव विषयः, तस्मात् प्रत्यक्षादिभिरेवोपलभ्यते इति ॥ १९ ॥

न्यायवार्त्तिकतात्पर्यटीका

ज्ञातृमनसोश्च दर्शनादिति भाष्यम्। तद्व्याचष्टे वार्त्तिककारः—न चायमेकान्त इति। ज्ञाता ज्ञेय इति सकर्माभिप्रायम्, न (क)ह्यन्यस्य समवेता ज्ञानक्रिया येनाऽऽत्मनः कर्मता स्यात्, अपि तु ज्ञातृस्थैव ; परसमवेतफलशालि हि कर्मेत्युक्तम्। तस्मात् सुखादीनामात्मधर्माणामत्र कर्मता, आत्मनस्तु प्रकाशमानता, तत्र विवक्षया ज्ञेयत्वाभिधानम्। मनस्तु यद्यपि स्वज्ञानं प्रति करणं कर्म च तथाऽपि न स्वात्मनि वृत्तिविरोधः। यदि हि (३)ज्ञातं करणं भवेत्तदात्माश्रयदोषप्रसङ्गः। स्वसत्तया च ज्ञानं प्रति करणम्; अन्यच्चास्य

---

(१) "ग्राहकस्य" इति ल-ग-भा०। (२) "न" इति आ-पु० नास्ति। (३) "ज्ञानं" इति क-तात्पर्यपाठः।

(क) अन्यस्येति अन्यवेत्यर्थः।

(सू०)—(१)क्वचिन्निवृत्तिदर्शनादनिवृत्तिदर्शनाच्च क्वचिदनेकान्तः ॥ २० ॥

न्यायभाष्यम्

(क)केचित्तु दृष्टान्तमपरिगृहीतं हेतुना विशेषहेतुमन्तरेण साध्यसाधनायोपाददते ; यथा प्रदीपप्रकाशः प्रदीपान्तरप्रकाशमन्तरेण गृह्यते तथा प्रमाणानि प्रमाणान्तरमन्तरेण गृह्यन्त इति । स चायम्—

यथा चायं प्रसङ्गो निवृत्तिदर्शनात् प्रमाणसाधनायोपादीयते एवं प्रमेयसाधनायाप्युपादेयो(२)ऽविशेषहेतुत्वात्—यथा च स्थाल्यादिरूपग्रहणे प्रदीपप्रकाशः प्रमेय-

न्यायवार्त्तिकम्

अपरे तु हेतुविशेषपरिग्रहमन्तरेण दृष्टान्तमात्रं प्रदीपप्रकाशसूत्रेणोपाददते, यथा किल प्रदीपप्रकाशः प्रदीपान्तरप्रकाशमन्तरेण गृह्यते तथा प्रमाणान्यपि प्रमाणान्तरमन्तरेण ग्रहीष्यन्त इति तान् प्रतीदमुच्यते—

न्यायवार्त्तिकतात्पर्यटीका

ज्ञानमन्या सत्ता, न च तत्समवेता ज्ञानक्रिया, किं त्वात्मसमवेता । तस्माज् ज्ञेयत्वं ज्ञानसाधनत्वं च मनसो न दोषमर्हतीति ॥ १९ ॥

ये तु—प्रदीपप्रकाशो यथा न प्रकाशान्तरमपेक्षते एवं प्रमाणान्यपि प्रमाणान्तरमनपेक्षमाणान्यपि सन्ति भविष्यन्तीत्याचार्यदेशीया मन्यन्ते, तान् प्रत्याह—

क्वचि—न्तः (सू २०) ॥ यथाऽयं प्रसङ्गः प्रमाणानामनपेक्षत्वप्रसङ्गः, प्रदीपे प्रदीपान्तरानपेक्षया प्रकाशकत्वदर्शनात् प्रमाणान्तरानपेक्षाण्येवाऽऽलोकवत्प्रमाणानि सेत्स्यन्ति एवमर्थमुपादीयते प्रसङ्गः, प्रमेयाण्यप्यनपेक्षाण्येव सेत्स्यन्तीत्येवमर्थमप्युपादेयः, तथा च प्रमाणाभाव इत्यर्थः । तदेवं प्रदीपदृष्टान्ताश्रयणेन प्रमाणाभावप्रसङ्गमुक्त्वा स्थाल्यादिदृष्टान्तोपादाने तु प्रमाणस्यापि प्रमाणान्तरापेक्षेत्याह—यथा च स्थाल्यादिरूपग्रहण इति ।

वृत्तिः

प्रदीपस्य (३)प्रकाशान्तरं विना प्रकाशकत्ववत् प्रमाणानामपि प्रमाणमन्तरेणैव प्रमेयप्रकाशकत्वमिति सूत्रार्थं केचन मन्यन्ते, तान् प्रत्याह भाष्यकारः—

'क्वचिन्निवृत्तिदर्शनादनिवृत्तिदर्शनाच्च क्वचिदनेकान्तः' ।

---

(१) 'क्वचित्तु निवृत्ति-' इति न्यायसूचीनिबन्धसम्मतः पाठः । (२) "विशेषहेत्वभाववत्" इति टि० । (३) "प्रदीपान्तरम्" इति भा० ।

(क) केचित्त्विति । विंशसूत्रतया मुद्रितं 'क्वचिन्निवृत्तिदर्शनादनिवृत्तिदर्शनाच्च क्वचिदनेकान्तः' इत्येतत् वृत्तिकृन्मते न सूत्रं किन्तु भाष्यमेव । तदनुसारेण 'केचित्तु' इत्यादितः (४४९ पत्रे मुद्रितः) । 'अनवस्थामुपाददीतेति' इत्यन्तो ग्रन्थः बहुषु पुस्तकेषु १९ सूत्रीयभाष्यरूपेण मुद्रितः । 'अस्माभिस्तु' न्यायसूचीनिबन्धानुसारेणैवं विभागः कृतः । ततश्चेतः प्रभृति भाष्यादिगृहीतसूत्रसंख्यावृत्तीति सूत्रसंख्ययोर्विसंवाद इति बोध्यम् ।

न्यायभाष्यम्

साधनायोपादीयते, एवं प्रमाणसाधनायाप्युपादेयो विशेषहेत्वभावात्, सोऽयं(१) विशेषहेतुपरिग्रहमन्तरेण दृष्टान्त एकस्मिन् पक्षे उपादेयो न प्रतिपक्ष इत्यनेकान्तः। एकस्मिंश्च पक्षे दृष्टान्त(२) इत्यनेकान्तो विशेषहेत्वभावादिति१*।

न्यायवार्त्तिकम्

क्वचिन्निवृत्तिदर्शनादनिवृत्तिदर्शनाच्च क्वचिदनैकान्तः। यथा प्रदीपप्रकाशस्तथा प्रमाणानि न पुनर्यथा स्थाल्यादिरूपं तथा प्रमाणानीति कोऽत्र नियमहेतुः, स्थाल्यादिरूपप्रकाशने च प्रदीपप्रकाशो न निवर्तते कस्मादेवं न प्रमाणानीति। अयं च प्रदीपप्रकाशदृष्टान्तः प्रमाणपक्षे

न्यायवार्त्तिकतात्पर्यटीका

तदेतद्भाष्यं व्याचष्टे वार्तिककारः—यथा प्रदीपप्रकाशः सजातीयानपेक्षः तथा प्रमाणानि सजातीयानपेक्षाणि, न पुनर्यथा स्थाल्यादिरूपं प्रमाणापेक्षं तथा प्रमाणानि अपि प्रमाणापेक्षाणीति। कस्मात्पुनः स्थाल्यादिरूपं प्रमाणापेक्षमित्यत आह—स्थाल्यादिरूपप्रकाशने चेति। प्रदीपप्रकाशस्तत्र प्रमाणमिति लोकसिद्धमित्यर्थः। कस्मादेवं स्थालीरूपवत् न प्रमाणानि; तान्यपि प्रमाणान्तरेण प्रकाश्यन्तामित्यर्थः। तदनेन प्रदीपदृष्टान्तेन निरपेक्षत्वं न तु स्थाल्यादिदृष्टान्तेन सापेक्षत्वमित्यत्र नियमहेतुर्नास्तीत्युक्तम्। नियमान्तरहेत्वभावमाह—अयं च प्रदीपप्रकाशदृष्टान्त इति। यथा हि प्रमाणानि प्रदीपदृष्टान्तेन निरपेक्षाणि

वृत्तिः

क्वचित् प्रदीपादौ प्रमाणान्तरस्य निवृत्तिदर्शनात्, क्वचिद् घटादौ प्रमाणान्तरानिवृत्तिदर्शनात् प्रमाणान्तरापेक्षादर्शनात् त्वदीयो हेतुः अनेकान्तः अनियतः। तथाच प्रदीपदृष्टान्तात् प्रमाणान्तरापेक्षानिवृत्तिः साध्यते, घटदृष्टान्तेन प्रमाणान्तरापेक्षैव किं न साध्यते ? तथाच दृष्टान्तसमा जातिरियमिति भावः।

त्वद्व्याख्याने कथं नानेकान्त इत्यत्राऽऽह भाष्यकारः—

'विशेषहेतुपरिग्रहे सत्युपसंहाराभ्यनुज्ञानादप्रतिषेधः'।

मन्मते विशेषहेतोः व्याप्तिपक्षधर्मताश्रयस्य परिग्रहे सत्युपसंहारस्य साध्यसाधनस्याभ्यनुज्ञानादुक्तानेकान्तात्मकः प्रतिषेधो न भवति ॥ १९ ॥

समाप्तं प्रमाणसामान्यपरीक्षाप्रकरणम् ॥

---

(१) अयमंशः टि-पु० नास्ति। (२) अतःपरम् "उपादेयो न प्रतिपक्षे दृष्टान्तः" इति न-ज-भा-पु० अधिकम्।

न्यायभाष्यम्

विशेषहेतुपरिग्रहे सति उपसंहाराभ्यनुज्ञानादप्रतिषेधः—विशेषहेतुपरिगृहीतस्तु दृष्टान्त एकस्मिन् पक्षे उपसंह्रियमाणो (१)न शक्योऽननुज्ञातुम्। एवं च सत्यनेकान्त इत्ययं प्रतिषेधो न भवति।

प्रत्यक्षादीनां प्रत्यक्षादिभिरुपलब्धावनवस्थेति चेद् (२) न संविद्विषयनिमित्तानामुपलब्ध्या व्यवहारोपपत्तेः—प्रत्यक्षेणार्थमुपलभे, अनुमानेनार्थमुपलभे, उपमानेनार्थमुपलभे, आगमेनार्थमुपलभे इति, प्रत्यक्षं मे ज्ञानम्, आनुमानिकं मे ज्ञानम्, औपमानिकं मे ज्ञानम्, आगमिकं मे ज्ञानमिति संविद्विषयं संविन्निमित्तं चोपलभमानस्य धर्मार्थसुखापवर्गप्रयोजनस्तत्प्रत्यनीकपरिवर्जनप्रयोजनश्च व्यवहार उपपद्यते, सोऽयं

न्यायवार्त्तिकम्

भवतु मा भूत् प्रमेयपक्ष इति तत्रापि नियमहेतुर्वक्तव्यः, प्रदीपप्रकाशो दृष्टान्तो भवतु मा भूत् स्थाल्यादिदृष्टान्त इत्यत्रापि नियमहेतुर्वक्तव्यः। सोऽयमुभयथाऽनेकान्तो (क) विशेषहेतुमन्तरेण दृष्टान्तः प्रसक्तः।

विशेषहेतुपरिग्रहे सत्युपसंहाराभ्यनुज्ञानादप्रतिषेधः। यदि पुनरयं प्रदीपप्रकाशो दृष्टान्तो विशेषहेतुना(ख) प्रकाशकत्वादिना संगृहीतः, तत एकस्मिन् पक्षेऽभ्यनुज्ञायमानो न शक्यः प्रतिषेद्धुमित्यनेकान्त इत्ययं दोषो न भवति।

(ग) प्रत्यक्षादीनां प्रत्यक्षादिभिरुपलब्धावनवस्था स्यादिति चेत्—यदि प्रत्यक्षादीनि प्रत्यक्षादिभिरुपलभ्यन्ते तान्यप्यन्यैस्तान्यप्यन्यैरित्यनवस्था, अनवस्थायां चाऽऽद्यप्रमाणाधिगमो न स्यात्। अथ व्यवस्थाऽस्ति, आद्यप्रमाणाधिगतिरप्रमाणा प्रसज्येत। नैष दोषः।

न्यायवार्त्तिकतात्पर्यटीका

एवं तेनैव दृष्टान्तेन कस्मान्न प्रमेयाण्यपि, ततश्च प्रमाणाभावप्रसङ्गः। न हि प्रमाणानामेव प्रदीपो दृष्टान्तो न प्रमेयाणामिति नियमहेतुरस्ति। तदनेन 'यथा प्रसङ्गः' इति भाष्यं व्याख्यातम्। 'प्रदीपप्रकाशो दृष्टान्तो भवतु' इत्यनेनायमेव दृष्टान्तो नायमिति नियमो निराकृतः, पूर्वेण तु प्रदीपदृष्टान्तेन निरपेक्षत्वमेव न तु स्थालीदृष्टान्तेन सापेक्षत्वमित्ययं नियमो निराकृत इति न पुनरुक्तम्। प्रकाशकत्वादिना तु हेतुना संगृहीतः (घ) प्रदीपदृष्टान्तो भवतीति नियमः शक्यो वक्तुम्, केवलं प्रकाशकत्वं सजातीयान्तरानपेक्षत्वे साध्ये विकल्पनीयम्; किमत्यन्तसजातीयमाहो सजातीयमात्रम्? यद्यत्यन्तसजातीयम्, ततः सिद्धसाधनम्; न हि चक्षुरादि प्रमाणं स्वग्रहणे चक्षुराद्यन्तरमपेक्षते। अथ कथंचित्सजातीयम्, तदपेक्षत्वमालोकस्याप्यस्ति तस्यापि चक्षुराद्यपेक्षत्वात्, ततश्च साध्यहीनो दृष्टान्तः। विरुद्धश्च हेतुः विषयज्ञान-

(१) "न शक्यो ज्ञातुम्" इति ग-ज-भा०। (२) "नासंविद्विषय-" इति टि०।

(क) हेतुमन्तरेणादृष्टान्तः प्रसक्तः ग-भाष्यसम्पादकधृतं पाठान्तरम्। (ख) 'प्रकाशत्वादिना' इति क-ख-वार्त्तिकपुस्तकयोः पाठः। (ग) प्रत्यक्षादीनामिति भाष्यं विभक्तुं खण्डशो गृह्णाति प्रत्यक्षादीनामिति। (घ) अत्र 'प्रदीपप्रकाशो दृष्टान्तो' इति सम्यक् पाठः सम्भाव्यते।

न्यायभाष्यम्

तावत्येव निवर्त्तते। न चास्ति व्यवहारान्तर(क)मनवस्थासाधनीयं येन प्रयुक्तोऽनवस्थामुपाददीतेति ॥ २० ॥

सामान्येन प्रमाणानि परीक्ष्य विशेषेण परीक्ष्यन्ते। तत्र—

प्रत्यक्षलक्षणानुपपत्तिरसमग्रवचनात् ॥ २१ ॥

आत्ममनःसन्निकर्षो हि कारणान्तरं नोक्तमिति ॥ २१ ॥

न्यायवार्त्तिकम्

(ख)संवित्तिविषयनिमित्तानामुपलब्ध्या व्यवहारसिद्धेः—संवित्तिविषयं संवित्तिनिमित्तं चोपलभमानस्य। संवित्तेर्विषयं प्रमेयम्, संवित्तिनिमित्तं प्रमाणम्, प्रमाणप्रमेययोरुपलब्धौ सर्वो व्यवहारः सिध्यति धर्मार्थसुखापवर्गप्रयोजनस्तत्प्रत्यनीकपरिवर्जनप्रयोजनश्च, न त्वनवस्थासाधनीयं किञ्चित् प्रयोजनमस्ति,—येनायं प्रयुक्तोऽनवस्थामुपाददीत। तस्मात् प्रत्यक्षादिभिः प्रत्यक्षादीनामुपलब्धिः, न चानवस्थेति ॥ २० ॥

(इति सामान्येन प्रमाणपरीक्षा)

एवं तावत् सामान्यतः समधिगतमेतत्—सन्ति प्रमाणानि प्रमेयसाधनानि। अथेदानीं सामान्यतोऽधिगतानां विशेषपरीक्षा। तत्र प्रत्यक्षमादावुक्तं तत्परीक्ष्यत इति।

प्रत्यक्षलक्षणानुपपत्तिरसमग्रवचनात्। यदिदं भवता प्रत्यक्षलक्षणमुच्यते इन्द्रियार्थसन्निकर्षोत्पन्नमिति, तदसमग्रम्। कस्मात्? अन्यान्यपि प्रत्यक्षस्य कारणानि सन्ति, तानि

न्यायवार्त्तिकतात्पर्यटीका

मपि विषयज्ञानेन (ग)न गृह्यते, किन्तु ज्ञानविषयेण ज्ञानेनेति नात्यन्तसजातीयमिति। तदनेनाभिप्रायेण वार्त्तिककृतोक्तम्—अनेकान्त इत्ययं दोषो न भवति, दोषान्तरं तु भवतीत्यर्थः। इतरग्रन्थस्तु सिद्धान्तं दर्शयद्भिरस्माभिरुपपादितार्थ इति न व्याख्यातः। येनानवस्थामुपाददीतेति सोपहासम् ॥ २० ॥

प्रत्य—त् (सू० २१) ॥ प्रत्यक्षलक्षणं (घ)चानेन सूत्रेणोच्यते प्रत्यक्षस्वरूपं वा। न तावत् प्रत्यक्षकारणमित्याह—यदिदं भवता प्रत्यक्षलक्षणमुच्यत इति प्रत्यक्षकारणमित्यर्थः।

वृत्तिः

प्रमाणसामान्यपरीक्षानन्तरं प्रमाणविशेषेषु परीक्षणीयेषु प्रथमोद्दिष्टं प्रत्यक्षं परीक्षणीयम्, तत्र च फलद्वारकमेव लक्षणं पूर्वमुक्तम्, अतः फललक्षणं यथाश्रुतमाक्षिपति—(प्रत्यक्षेति)।

(क) अनवस्थासाधनीयमिति करणे अनीयः, अनवस्थासाधनमित्यर्थः। (ख) भाष्यग्रन्थोऽत्र किञ्चित् परिवर्त्य गृहीतः। (ग) क-चिह्निततात्पर्ये 'न' इति नास्ति। (घ) अत्र चकारो वार्थे।

न्यायभाष्यम्

न चासंयुक्ते द्रव्ये संयोगजन्यस्य (१) गुणस्योत्पत्तिरिति ज्ञानोत्पत्तिदर्शना-

न्यायवार्त्तिकम्

नोक्तानि, यथात्ममनःसंयोग इत्येवमादीनि। अथेन्द्रियार्थसन्निकर्षोत्पन्नमित्येतल्लक्षण-मिति ? लक्षणमप्येतन्न भवति। कस्मात् ? उत्पत्तिकारणापदेशात्—इन्द्रियार्थसन्निकर्षोत्पन्नमित्येतत् कारणमपदिश्यते, न च कारणापदेशो वस्तुनो लक्षणम्। नहि घटादेः कार्यस्य मृत्पिण्डादिक्रमोत्पत्तिस्तल्लक्षणमिति। न, उभयथाऽप्यदोषः—यदि कारणम्, तथाऽपि न दोषः ; अथ लक्षणम्, तथाऽपि न दोषः। कथम् ? कारणपक्षे तावदुक्तं भवति—नेदं कारणावधारणार्थं सूत्रम्, अपि तु प्रत्यक्षस्य प्रमाणस्य यदसाधारणमनुमानादिव्यवच्छेदकं तदुक्तमिति नाऽऽत्ममनःसंयोगादिषु प्रसङ्गः। इन्द्रियमनःसंयोगस्तर्ह्युपसंख्येयः—यद्यसाधारणत्वादिन्द्रियार्थसन्निकर्षस्य ग्रहणं नन्वेतस्मादेवेन्द्रियमनःसन्निकर्षोऽप्युपसंख्येय इति ? उक्तमत्रापि, न यावदसाधारणं तत्सर्वं वक्तव्यम्, अपि त्वन्यतरग्रहणेनापि विशेषितमेतत्। लक्षणपक्षेऽपि न दोषः, असाधारणत्वादिन्द्रियार्थसन्निकर्षस्य—इन्द्रियार्थसन्निकर्षः प्रत्यक्षोत्पादकत्वात् कारणं च समानासमानजातीयेभ्यो विशेषकत्वात् लक्षणं चेति ॥ २१ ॥

न्यायवार्त्तिकतात्पर्यटीका

(क) कारणे सति (२) कार्यं लक्ष्यते ज्ञानमिति(२)*। द्वितीयकल्पं शङ्कते—अथेति। सिद्धान्तवाद्याह—नोभयथाऽपीति। लक्षणपक्ष एव सिद्धान्तोऽभिमतः, कारणपक्षाभ्युपगमः प्रौढिवादेन द्रष्टव्यः। सकलप्रत्यक्षव्यापकमसाधारणं कारणमवधार्यते। न हीदृशमन्यत् कारणमात्ममनःसंयोगो वा इन्द्रियमनःसंयोगो वा प्रत्यक्षस्यास्ति पूर्वस्य साधारणत्वाद् उत्तरस्य चाव्यापकत्वादिति (ख)। समाधानान्तरमाह—अर्थतो वेत्यादिना मनःसन्निकर्षोऽपि कारणमित्यन्तेन। तदेवं सिद्धान्तसारमुक्तम्। २१ ॥

नाऽऽत्ममनसोरित्यादिसूत्रमपठित्वैव भाष्यकारो व्याचष्टे—न चासंयुक्ते द्रव्य इति।

वृत्तिः

प्रत्यक्षस्य यत् लक्षणम् इन्द्रियार्थसन्निकर्षोत्पन्नत्वं तन्नोपपद्यते असमग्रवचनात्। अयमर्थः—प्रत्यक्षस्य कारणघटितं लक्षणमभिहितम्, तत्र कारणकलापघटितायाः सामग्र्या विनिवेशनमतिव्याप्तिनिरासकम्, तच्च नाभिहितम्, असमग्रमिन्द्रियार्थसन्निकर्षजन्यत्वमात्रमभिहितम्, आत्ममनःसंयोगेन्द्रियमनःसंयोगादिकन्तु नाभिहितम्, तथा चाऽऽत्ममनःसंयोगरूपेन्द्रियार्थसंयोगजन्यतयाऽनुमित्यादावतिव्याप्तिरित्यर्थः ॥ २० ॥

---

(१) 'गुणस्योत्पत्तिदर्शनात्' इति टि० पु० पाठः। (२) 'कार्यं ज्ञानं लक्षयति ज्ञान इति' इति क-तात्पर्यग्रन्थपाठः।

(क) ननु इन्द्रियार्थसन्निकर्षेत्यादिसूत्रं यदि कारणप्रदर्शनपरं तदा ज्ञानपदमव कुत इत्यत आह कारणे सतीति। (ख) इन्द्रियमनःसंयोगस्याव्यापकत्वं मानसप्रत्यक्षात्मभविषेति बोध्यम्।

न्यायभाष्यम्

दात्ममनःसन्निकर्षः कारणम्। (१) मनःसन्निकर्षानपेक्षस्य चेन्द्रियार्थसन्निकर्षस्य ज्ञानकारणत्वे युगपदुत्पद्येरन् बुद्धय इति मनःसन्निकर्षोऽपि कारणम्। तदिदं सूत्रं पुरस्तात् कृतभाष्यम्।

(सू०)—नाऽऽत्ममनसोः सन्निकर्षाभावे प्रत्यक्षोत्पत्तिः ॥२२॥

आत्ममनसोः सन्निकर्षाभावे नोत्पद्यते प्रत्यक्षमिन्द्रियार्थसन्निकर्षाभाववदिति ॥२२॥

न्यायवार्त्तिकम्

अर्थतो वाऽभिधानम् आत्ममनःसंयोगस्य इन्द्रियमनःसंयोगस्य च। कथमिति ? ज्ञानोत्पत्तिदर्शनात्; नासंयुक्ते द्रव्ये संयोगजस्य गुणस्योत्पत्तिरिति। मनःसंयोगानपेक्षं चेदिन्द्रियं प्रवर्तते (क)इति युगपदनेकोपलब्धिः स्यात्, न च भवति; अतो मनःसन्निकर्षोऽपि कारणमिति। तदिदं सूत्रमुक्तभाष्यम्।

नाऽऽत्ममनसोः सन्निकर्षाभावे प्रत्यक्षोत्पत्तिरिति।

आत्ममनसोः सन्निकर्षाभावे नोत्पद्यते (ख)बुद्धिरिन्द्रियार्थसन्निकर्षाभाववदिति। न, उक्तोत्तरत्वात्—उक्तोत्तरमेतदिति; नेदं कारणावधारणार्थं सूत्रमपि तु विशिष्टकारणवचनमिति ॥ २२ ॥

न्यायवार्त्तिकतात्पर्यटीका

सर्वं हि कारणजातं कार्योपजननाय परस्परसमवधानमपेक्षते, अन्यथा यत्र तत्र स्थितेभ्योऽपि कारणेभ्यः कार्यमुपजायेत; तदात्मनाऽपि मनःसंबद्धेन कार्यं जनयितव्यम्, संबन्धश्चाऽऽत्ममनसोः संयोग एव, भवतु वा संयोगजं ज्ञानम्। अथेन्द्रियात्मसंयोगजं कस्मान्न भवति, कृतं मनःसंयोगेनेत्यत आह—मनःसन्निकर्षेति। तस्मादात्ममनःसन्निकर्षोऽपि वक्तव्य इति पूर्वपक्षः। तदिदं नाऽऽत्ममनसोः सन्निकर्षेत्यादिसूत्रपाठस्य पुरस्तात्कृतभाष्यम्।

तदेतद्वार्तिककारो भाष्यमनुभाष्य पूर्वपक्षसूत्रं पठति—

नाऽऽत्मेत्तिः (सू० २२)॥ सूत्रार्थमाह—आत्ममनसोरिति। पूर्वपक्षस्य क्षणमप्यवस्थानमसहमानो वार्तिककारः प्रतिषेधमस्योक्तं स्मारयति—न, उक्तेति ॥ २२ ॥

वृत्तिः

नन्वात्ममनोयोगादेः कारणत्वमेव नास्तीत्याशङ्कायामाह—(नाऽऽत्मेति)।

शरीरावच्छिन्नस्याऽऽत्मनो मनसा यः सन्निकर्षस्तदभावे न प्रत्यक्षोत्पत्तिर्यतोऽत आत्म-

(१) 'मनःसन्निकर्षा' इत्यादिः 'कारणम्' इत्यन्तः टि० पुस्तके नास्ति।

(क) 'तर्हि' इत्यस्य स्थाने मुद्राप्रमादेन 'इति' पदमागतं सम्भाव्यते।

(ख) भाष्ये प्रत्यक्षमिति विशेषः।

न्यायभाष्यम्

सति चेन्द्रियार्थसन्निकर्षे ज्ञानोत्पत्तिदर्शनात् कारणभावं ब्रुवतः (१)—

(सू०)—दिग्देशकालाकाशेष्वप्येवं प्रसङ्गः ॥ २३ ॥

दिगादिषु सत्सु ज्ञानभावात्तान्यपि कारणानीति? अकारणभावेऽपि ज्ञानोत्पत्तिर्दिगादि-सन्निधेरवर्जनीयत्वात्—यदाऽप्यकारणं दिगादीनि ज्ञानोत्पत्तौ, तदाऽपि सत्सु दिगा-

न्यायवार्त्तिकम्

ये च (क) सति भावात् कारणभावं वर्णयन्ति यस्मात् किलेन्द्रियार्थसन्निकर्षे सति ज्ञानं भवति तस्मादिन्द्रियार्थसन्निकर्षः कारणमिति, तेषाम्—

दिग्देशकालाकाशेष्वप्येवं प्रसङ्गः। दिग्देशकालाकाशेषु सत्स्वपि ज्ञानं भवति, सति भावात् तान्यपि कारणमिति प्राप्तम्। कतमेन पुनर्न्यायेन दिगाद्यकारणम्? सामर्थ्यानुपलब्धेः—नहि ज्ञानोत्पत्तौ दिगादेः सामर्थ्यमुपलभ्यते, तस्मादकारणम्। सन्निधिमात्रादिति चेत्—अथ मन्यसे दिगादिः सन्निधिमात्रेण ज्ञानोत्पत्तेः कारणमिति? तदयुक्तम्, सन्निधेरवर्जनीयत्वात्—नित्यं दिगादि व्यापकं चेति नित्यत्वाद् व्यापकत्वाच्च न शक्यः सन्निधिः परिवर्जयितुमिति तत्र कारणभावे हेतुर्वक्तव्यः। नहि सन्निधिमात्रं हेतुत्वे कारणम्। कथम्? रूपोपलब्धेस्तेजःस्पर्श-सद्भाववदिति—यथा रूपोपलब्धौ तेजसो रूपविशेषो हेतुः न पुनस्तेजःस्पर्शः सन्निधिमात्रेण

न्यायवार्त्तिकतात्पर्यटीका

तदेवं द्वाभ्यां सूत्राभ्यां पूर्वपक्षिते सति भावमात्रेण इन्द्रियार्थसन्निकर्षादीनामनेन कारणत्व-मुक्तमिति मन्यमानः पार्श्वस्थः प्रत्यवतिष्ठते—सति चेन्द्रियार्थेति।

दिग्दे—ङ्गः (सू० २३)॥ न "सति" भावमात्रेण कारणत्वम्, आकाशादीनामपि कारणत्व-प्रसङ्गात्; तादृशश्चाऽऽत्ममनःसंयोग इन्द्रियात्मसंयोगश्चेति न कारणं युक्तमित्यर्थः। दूषयति—अकारणभावेऽपीति। नान्वयमात्रात् कारणत्वनिश्चयोऽपि त्वन्वयव्यतिरेकाभ्याम्; न च दिगादावस्ति व्यतिरेकः। नित्यत्वविभुत्वाभ्यामवर्जनीयः सन्निधिः, सेन्द्रियशरीरवर्त्यात्ममनः-संयोगस्त्वन्वयव्यतिरेकावधृतसामर्थ्यः, सुप्तस्य ज्ञानानुत्पादात्। इन्द्रियार्थसन्निकर्षे त्वसति विप्रकृष्टे व्यवहिते च ज्ञानं न जायते। इन्द्रियमनःसन्निकर्षाभावे तु नायुगपज् ज्ञानानि भवन्ति। तस्मान्नाकाशादिभिरतिप्रसङ्ग इति।

वृत्तिः

मनःसंयोगस्य कारणत्वमावश्यकम्। प्रत्यक्षोत्पत्तिरिति प्रकृतम् (२)ज्ञानोत्पत्तिरिति विवक्षितम्॥ २१ ॥

नन्वेवं दिगादीनामपि कारणत्वं स्यादित्याशङ्कते—(दिग्देशेति)।

---

(१) 'ब्रुवते' इति ग०। (२) "ज्ञानमिति" इति नी=जी।

(क) सति भावादित्यस्य कार्योत्पत्तेः प्राक् सत्तामात्रं मित्यर्थः।

न्यायभाष्यम्

दिषु ज्ञानेन भवितव्यम्, न हि दिगादीनां सन्निधिः शक्यः परिवर्जयितुमिति। तत्र कारणभावे हेतुवचनम्, एतस्माद्धेतोर्दिगादीनि ज्ञानकारणानीति ॥ २३ ॥

आत्ममनःसन्निकर्षस्तर्ह्युपसङ्ख्येय इति। तत्रेदमुच्यते—

(सू०)—ज्ञानलिङ्गत्वादात्मनो नानवरोधः (क) ॥ २४ ॥

न्यायवार्त्तिकम्

सामर्थ्यादर्शनात्; रूपस्य पुनर्दृष्टं सामर्थ्यं तद्भावाभावानुविधानादुपलब्धेः—यस्माद् यत्र रूपं भवति तत्रोपलब्धिः, यत्र न भवति न तत्रोपलभ्यते, तस्माद्रूपमेवोपलब्धेः कारणं न स्पर्श इति। यथा चान्द्रमसं रूपं विना तेजःस्पर्शेनौष्ण्येन (ख)प्रकाशयति, (ग)अपवरकादिस्थितं (घ)चौष्ण्यं विना रूपेण न प्रकाशयति, एवमात्मेन्द्रियमनोऽर्थसन्निकर्षेभ्यो ज्ञानं भवन्न दिगादिभ्यो भवति सन्निधिमात्रत्वात्, इतरेषां च सामर्थ्यदर्शनादिति ॥ २३ ॥

यद्येवम्—'आत्ममनःसंयोगस्तर्ह्युपसंख्येयः', नोपसंख्येयो गम्यमानत्वात्। केन गम्यमानत्वात्?

न्यायवार्त्तिकतात्पर्यटीका

तदेतद्वार्तिककारो व्याचष्टे—ये च सति भावात् कारणभावं वर्णयन्ति पूर्वपक्षिणश्च सिद्धान्तिनो वा, असति न भवतीति (ङ) वादागतो व्यतिरेको न तु प्रयोजकः, तान् प्रति पार्श्वस्थो ब्रूते (च) तेषां दिग्देशेति। यथा चान्द्रमसं रूपमिति। यद्यपि तत्रापि तेजस्यौष्ण्यमस्ति तथाऽप्यत्यन्ताभिभवेन स्वोचितार्थक्रियानुपयोगादसत्कल्पत्वमित्यर्थः ॥ २३ ॥

एवं पार्श्वस्थे निरस्ते पूर्वपक्षी ब्रूते—यद्येवमिति। सिद्धान्त्याह—नोपसंख्येय इति।

वृत्तिः

यथाकथञ्चित् पौर्वापर्यस्य तत्रापि सत्त्वात्, तेषामन्यथासिद्धिश्चेत् प्रकृतेऽप्येवम् ॥२२॥

(क) त्रयोविंशचतुर्विंशसूत्रयोर्महर्षिकृतत्वं केचिन्नाभ्युपगच्छन्ति। अनवरोधः असंग्रहः। नावरोध इति केचित् पठन्ति।

(ख) प्रकाशयति प्रकाशते उपलब्धिविषयो भवतीत्यर्थः। काशतिः 'धातवो हन्तिभासार्था अकितो वा चुरादयः' इत्यनेन वैकल्पिकश्चुरादिपाठः।

(ग) अपवरको गर्भगृहम्।

(घ) तथाभूतम् औष्ण्यं कर्तृ रूपेण विना रूपं न प्रकाशयतीत्यर्थः, प्रत्यक्षे विषयस्य हेतुत्वमनेन दर्शितम्।

(ङ) कलाऽऽदर्शपुस्तकयोः 'वादागन्तव्यारेको' इति मुद्रितपाठः प्रामादिकः। क-पुस्तकसम्पादकास्तु "वाक्यगतव्यतिरेक इति युक्तः पाठः" इति वदन्ति। ख-पुस्तकसम्पादकास्तु 'अयं पाठोऽसंलग्नः' इत्यलिखन्। वयं तु—सति भावादिति वादात् सावधारणात् सत्येव भावदित्येवं रूपादागतः असति न भवतीत्येवंरूपो व्यतिरेकस्तु न कारणतायाः प्रयोजक इति वर्णयन्ति इत्यर्थलाभाय एवं पाठं यथार्थं मन्यामहे।

(च) 'तेषा'मिति वार्त्तिकम् 'दिग्देशे'ति तद्भूतः सूत्रांशः।

न्यायभाष्यम्

ज्ञानमात्मलिङ्गं तद्गुणत्वात्। न चासंयुक्ते द्रव्ये संयोगजस्य गुणस्योत्पत्तिरस्तीति ॥ २४ ॥

न्यायवार्त्तिकम्

ज्ञानलिङ्गत्वादात्मनो नानवरोधः। ज्ञानमात्मलिङ्गमित्युक्तम्। तेनाऽऽत्ममनःसंयोगोऽनुक्तोऽप्यनुमेयः। कथं पुनर्ज्ञानमात्मलिङ्गम्? तद्गुणत्वात्। गुणभावासिद्धिरिति चेत्— अथ मन्यसे गुणभाव एव ज्ञानस्यासिद्धः कुत आत्मगुणत्वं सेत्स्यतीति, न; आत्मसमवायात् सुखादिवदिति—नहि द्रव्यं कर्म वात्मनि समवैति, तस्मान्न द्रव्यं न कर्म, आत्मनि तु समवायो ज्ञानस्य सुखादिवत्; तस्मादात्मगुणः। न पृथिव्यादिगुणः स्वसंवेद्यत्वात्— यत् प्रत्यक्षं स्वसंवेद्यं न तत् पृथिव्यादिगुणः यथा सुखादि, यच्च प्रत्यक्षं स्वपरसंवेद्यं तत पृथिव्यादिगुणः यथा रूपादि, न चैवं ज्ञानं तस्मादात्मगुण इति। उक्तं चात्र। किमुक्तम्? न यावत् प्रत्यक्षस्य कारणं तावत् सर्वं वक्तव्यमिति ॥ २४ ॥

न्यायवार्त्तिकतात्पर्यटीका

ज्ञान—धः (सू० २४)॥ अत्र ज्ञानस्याऽऽत्मलिङ्गत्वमुच्यते ज्ञानं तावत्कार्यमनित्यत्वाद् घटवत्। क्वचित् समवेतं (क)कार्यत्वाद् घटवत्। न च तत् पृथिव्याद्याश्रितं मानसप्रत्यक्षत्वात्, यत् पुनः पृथिव्याद्याश्रितं तत् प्रत्यक्षान्तरवेद्यमप्रत्यक्षमेव वा; न च तथा ज्ञानम्, (ख)तस्मात् द्रव्याष्टकातिरिक्ताश्रितम्, तदाश्रयश्च द्रव्यजातीयः समवायिकारणत्वादाकाशवत्। तस्य च विभुत्वमात्मलक्षणेऽस्माभिरुक्तम्। अतो गुणजातीयं ज्ञानं कार्यत्वे सति विभुद्रव्यसमवायात्, शब्दवत्। एवं व्यवस्थिते प्रश्नोत्तरे वार्त्तिकगते व्याख्यातव्ये। आत्मसमवायादिति, कार्यत्वे सति विभुद्रव्यसमवायादित्यर्थः। विभुद्रव्यसमवाय एवासिद्ध इति वदत आह—न पृथिव्यादिगुणः स्वसंवेद्यत्वात्, मानसप्रत्यक्षवेद्यत्वादित्यर्थः। (ग) स्वपरसंवेद्यं प्रत्यक्षान्तरवेद्यं द्रष्टव्यम्, अन्यथा पृथिव्यादिगुणेन द्वित्वादिना व्यभिचारः स्यादिति। तस्माज् ज्ञानलिङ्ग आत्मा न त्वसावसंयुक्तो ज्ञानं जनयति तस्य सदातनत्वे सदा ज्ञानोत्पादप्रसङ्गात्। तस्मात् संयोगभेदं कादाचित्कमपेक्षत इत्यर्थात् सिद्ध आत्ममनःसंयोग इति न सूत्रकृतोक्तः। प्रौढिवादितयैव समाधिरिति दर्शयितुमुक्तमेव परमसमाधिं स्मारयति—उक्तं चात्रेति ॥ २४ ॥

वृत्तिः

अत्रोत्तरमभिधातुमाह—(ज्ञानेति)

(१)आत्मनो नानवरोधः असंग्रहः कारणत्वेनेति न। कुतः? ज्ञानलिङ्गत्वात् ज्ञानं

(१) "आत्मनोऽनवरोध" इति आ०।

(क) ध्वंसवारणाय भावत्वे सतीति द्रष्टव्यम्।

(ख) तस्मादिति पदं लिपिप्रमादादादर्शपुस्तकयोर्न मुद्रितमिति सम्भावनया पूरितम्।

(ग) आदर्शयो: 'स्वपरसंबद्ध'मिति पाठ: प्रामादिक:।

(सू०)—तदयौगपद्यलिङ्गत्वाच्च न मनसः ॥ २५ ॥

न्यायभाष्यम्

अनवरोध (१)इति वर्त्तते। युगपज् ज्ञानानुत्पत्तिर्मनसो लिङ्गमित्युच्यमाने सिध्यत्येव मनःसन्निकर्षापेक्ष इन्द्रियार्थसन्निकर्षो ज्ञानकारणमिति ॥ २५ ॥

न्यायवार्त्तिकम्

अथेन्द्रियमनःसन्निकर्षः कस्मान्नाभिधीयते ?

तदयौगपद्यलिङ्गत्वाच्च न मनसः। युगपज् ज्ञानानुत्पत्तिर्मनसो लिङ्गमित्युक्तम्, तेन मनसोऽप्यवरोध इति ? न ; युगपदनुत्पत्तिसूत्रस्यान्यार्थत्वात्—यदिदमुच्यते युगपज्ज्ञानानुत्पत्तिर्मनसो लिङ्गमित्यनेन ज्ञानकारणं मन इति, तदयुक्तम्; अन्यार्थत्वात्—अन्यार्थं सूत्रम्, न पुनस्तेन ज्ञानकारणत्वं मनसोऽभिधीयते (क) गम्यते। नहि ज्ञानं स्वतन्त्रम्, अन्यार्थस्यापि तदर्थप्रकाशकत्वमुपपत्तिसामर्थ्यात्—यद्यपि तस्मिन् सूत्रे मनसो ज्ञानकारणत्वं न साक्षादुक्तम्—तथाऽप्युपपत्तिसामर्थ्याज् ज्ञानकारणं मन इति गम्यते। नहि ज्ञानं स्वतन्त्रं न चक्षुरादि स्वतन्त्रमिति ॥ २५ ॥

न्यायवार्त्तिकतात्पर्यटीका

तद्—सः (सू० २५) ॥ अन्यार्थमिति प्रमेयभूतमनःस्वरूपप्रतिपादनार्थम्। अन्यार्थस्यापि तदर्थप्रकाशकत्वम्। उपपत्तिर्लिङ्गम्। ईदृशं हि तल्लिङ्गं यदन्यार्थमपि मनसो ज्ञानकारणत्वं प्रतिपादयतीति। न हि ज्ञानं स्वतन्त्रं येन स्वकारणं मनो नापेक्षेत, नापि चक्षुरादि स्वतन्त्रं ज्ञानजनने येन मनो ज्ञानकारणं न स्यादित्याह—न चक्षुरादीति। तस्मादर्थप्राप्तत्वादात्ममनःसंयोग इन्द्रियमनःसंयोगश्च नोक्तौ सूत्रकारेण ॥ २५ ॥

वृत्तिः

लिङ्गं यस्य तत्तथा, ज्ञानं हि भावकार्यं समवायिकारणं साधयति, तच्च परिशेषादात्मैव। दिगादीनाञ्च कारणत्वे न मानमिति भावः। इत्थञ्च समवायिकारणस्याऽऽत्मनो मनसा संयोगोऽसमवायिकारणमित्यप्यर्थात् सिद्धम् ॥ २३ ॥

आत्मशरीरादिसंयोगस्य कुतो नासमवायिकारणत्वमित्यतो मनसः प्राधान्ये युक्तिमाह—(तदयौगपद्येति)।

नानवरोध इत्यनुवर्तते। इन्द्रियमनोयोगद्वारा ज्ञानायौगपद्यनियामकत्वात् मनसोऽपि हेतुत्वमावश्यकमिति(२) शरीरात्ममनोयोगादेश्च न तन्नियामकत्वमिति भावः। इत्थं चाऽऽत्ममनःसंयोगस्यासमवायिकारणत्वं युक्तम् ॥ २४ ॥

---

(१) 'इत्यनुवर्त्तते' क०। (२) "शरीरमनोयोगादेश्च" इति ख०।

(क) 'गम्यते' इति 'अभिधीयते' इत्यस्य विवरणम्, वार्त्तिकान्तर्भावस्तस्य लिपिप्रमादकृत इति सम्भाव्यते।

(सू०)—प्रत्यक्षनिमित्तत्वाच्चेन्द्रियार्थयोः सन्निकर्षस्य स्वशब्देन वचनम् ॥ २६ ॥

न्यायभाष्यम्

प्रत्यक्षानुमानोपमानशब्दानां निमित्तमात्ममनःसन्निकर्षः, प्रत्यक्षस्यैवेन्द्रियार्थसन्निकर्ष इत्यसमानः, असमानत्वात्तस्य ग्रहणम् ॥ २६ ॥

न्यायवार्त्तिकम्

अथ कस्मादिन्द्रियार्थसन्निकर्षोऽभिधीयते कथं च नाऽऽत्ममनःसन्निकर्षोऽभिधीयते इन्द्रियमनःसन्निकर्षो वेति ?

प्रत्यक्षनिमित्तत्वाच्चेन्द्रियार्थयोः सन्निकर्षस्य स्वशब्देन वचनम्। इन्द्रियार्थसन्निकर्षः प्रत्यक्षस्यैव निमित्तम्; आत्ममनःसन्निकर्षः प्रत्यक्षस्य चान्यस्य चेति। इन्द्रियार्थसन्निकर्षेण समानत्वादिन्द्रियमनःसंयोगो वक्तव्यः—यदि साधारणत्वादात्ममनःसन्निकर्षो नाभिधीयते, इन्द्रियमनःसंयोगोऽसाधारणत्वादिन्द्रियार्थसन्निकर्षवद्वक्तव्य इति ? नेदं कारणावधारणार्थमित्युक्तम्। न यावदसाधारणं सर्वं तद्वक्तव्यम्, अपि तु न साधारणं वक्तव्यमित्ययं सूत्रार्थः ॥ २६ ॥

न्यायवार्त्तिकतात्पर्यटीका

देशयति—अथ कस्मादिति। इन्द्रियार्थसन्निकर्षेऽप्यर्थतः प्राप्तिरविशिष्टेति भावः।

प्रत्य—नम् (सू० २६) ॥ परिहरति—प्रत्यक्षेति। सर्वानभिधाने हि प्रत्यक्षं न लक्षितं स्यादिति तल्लक्षणाय किंचिद्वक्तव्यम्। तत्रेन्द्रियार्थसन्निकर्ष एव वक्तव्यः समस्तप्रत्यक्षव्यापकत्वात् नेतरावव्यापकत्वादतिव्यापकत्वाच्चेति परमः समाधिः ॥ २६ ॥

वृत्तिः

सिद्धान्तसूत्रम्—(प्रत्यक्षेति)

प्रत्यक्षनिमित्तत्वात् प्रत्यक्षासाधारणकारणत्वात्। अयमर्थः प्रत्यक्षसूत्रे इन्द्रियार्थसन्निकर्षाभिधानं हि न कारणाभिधित्सया, येनाऽऽत्ममनोयोगाद्यनभिधानेन न्यूनत्वम्, अपि तु लक्षणाभिप्रायेण। तत्र च सामग्रीघटितस्येवासाधारणकारणघटितस्यापि लक्षणस्य सुवचत्वादिन्द्रियार्थसन्निकर्षस्य चासाधारणत्वात् (क)पृथग्वचनम्—आत्ममनःसंयोगादिसाधारणकारणाद् व्यवच्छिद्य लक्षणघटकतया वचनं युक्तम्।

अयं भावः—इन्द्रियार्थसन्निकर्षत्वावच्छिन्नकारणताप्रतियोगिककार्यताशालित्वस्य

(क) एतेन वृत्तिकारमते सूत्रे 'स्वशब्देन' इत्यत्र 'पृथक्' इति पाठः प्रतीयते।

(सू०)—सुप्तव्यासक्तमनसां चेन्द्रियार्थयोः सन्निकर्ष-निमित्तत्वात् ॥ २७ ॥

न्यायभाष्यम्

इन्द्रियार्थसन्निकर्षस्य ग्रहणं नाऽऽत्ममनसोः सन्निकर्षस्येति। एकदा खल्वयं प्रबोधकालं प्रणिधाय सुप्तः प्रणिधानवशात् प्रबुध्यते। यदा तु तीव्रौ ध्वनिस्पर्शौ प्रबोधकारणं भवतस्तदा प्रसुप्तस्येन्द्रियसन्निकर्षनिमित्तं प्रबोधज्ञानमुत्पद्यते। तत्र न ज्ञातुर्मनसश्च सन्निकर्षस्य प्राधान्यं भवति। किं तर्हि? इन्द्रियार्थयोः सन्निकर्षस्य। न ह्यात्मा जिज्ञासमानः प्रयत्नेन मनस्तदा प्रेरयतीति।

एकदा खल्वयं विषयान्तरासक्तमनाः सङ्कल्पवशाद्विषयान्तरं जिज्ञासमानः प्रयत्न-प्रेरितेन मनसा इन्द्रियं संयोज्य तद्विषयान्तरं जानीते। यदा तु खल्वस्य निःसङ्कल्पस्य (१)निर्जिज्ञासस्य च व्यासक्तमनसो बाह्यविषयोपनिपातनाज् ज्ञानमुत्पद्यते तदेन्द्रियार्थ-

न्यायवार्त्तिकम्

सुप्तव्यासक्तमनसां चेन्द्रियार्थयोः सन्निकर्षनिमित्तत्वात्। इन्द्रियार्थसन्निकर्षस्य प्राधान्यपरमिदं सूत्रम्। शेषं भाष्ये ॥ २७ ॥

न्यायवार्त्तिकतात्पर्यटीका

सुप्त—त् (सू० २७) ॥ ज्ञानोत्पत्तेरिति सूत्रशेषः। प्रणिधाय संकल्प्य प्रदोषे सुप्तोऽर्द्धरात्रे मयोत्थातव्यमिति सोऽर्धरात्र एवावबुध्यते। प्रबोधज्ञानमिति, प्रबोधे निद्राविच्छेदे सति द्रव्यस्पर्शस्य संज्ञानं (क)प्रबोधज्ञानम् इत्यर्थः। सुप्तमनसामिति व्याख्याय व्यासक्तमनसा-मिति व्याचष्टे—एकदा खल्वयं विषयान्तरेति ॥ २७ ॥

वृत्तिः

इन्द्रियत्वावच्छिन्नकारणताप्रतियोगिककार्यताशालित्वस्य वा लक्षणस्य सम्यक्त्वे कृतमात्म-मनोयोगाद्यनुप्रवेशेनेति। परिष्कृतं चेदमधस्तात्।

इदं न सूत्रम्, किन्तु भाष्यमिति केचित् ॥ २५ ॥

समाधानन्तरमाह—(सुप्तेति)।

ज्ञानस्येति शेषः। सुप्तानां व्यासक्तमनसां च घनगर्जितादिना श्रोत्रसन्निकर्षात् वह्न्यादिना त्वक्सन्निकर्षाच्च प्रागेव ज्ञानोत्पत्तेरिन्द्रियार्थसन्निकर्षस्य प्राधान्यम्, (२)अतस्तद्घटितमेव लक्षणं युक्तमिति भावः ॥ २६ ॥

---

(१) 'निर्जिज्ञासमानस्य' इति टि-पु० पाठः। (२) 'अत' इत्यादिकः 'भाव' इत्यन्तो ग्रन्थः आ-पु० नास्ति।

(क) व्याख्येयं 'प्रबोधज्ञानम्' इति पदमत्र लिपिप्रमादात् पुनरागतम्।

न्यायभाष्यम्

सन्निकर्षस्य प्राधान्यम्। न ह्यसौ जिज्ञासमानः प्रयत्नेन मनः प्रेरयतीति। प्राधान्याच्चेन्द्रियार्थसन्निकर्षस्य ग्रहणं कार्यं गुणत्वाद् नाऽऽत्ममनसोः सन्निकर्षस्येति॥ २७॥

(१)प्राधान्ये च हेत्वन्तरम्—

(सू०)—तैश्चापदेशो ज्ञानविशेषाणाम्॥ २८॥

(भा०) तैरिन्द्रियैरर्थैश्च व्यपदिश्यन्ते ज्ञानविशेषाः। कथम्? घ्राणेन जिघ्रति, चक्षुषा पश्यति, रसनया रसयतीति, घ्राणविज्ञानं चक्षुर्विज्ञानं (२)रसनाविज्ञानं गन्धविज्ञानं रूपविज्ञानं रसविज्ञानमिति च। इन्द्रियविषयविशेषाच्च पञ्चधा बुद्धिर्भवति। अतः प्राधान्यमिन्द्रियार्थसन्निकर्षस्येति॥ २८॥

न्यायवार्त्तिकम्

प्राधान्ये च हेत्वन्तरम्—

तैश्चापदेशो ज्ञानविशेषाणाम्। यस्मादिदं प्रत्यक्षज्ञानमुत्पद्यमानं विषयेण कारणेन वा व्यपदिश्यते। यच्चासाधारणं तेन व्यपदेशो दृष्टः यथा शाल्यङ्कुर इति॥ २८॥

न्यायवार्त्तिकतात्पर्यटीका

प्राधान्ये च हेत्वन्तरम्—

तैश्चा—णाम् (सू० २८)॥ इन्द्रियैर्व्यपदेशं विग्रहसमासाभ्यां ज्ञानस्य दर्शयति—घ्राणेति। (क) इन्द्रियविषयसंख्यानुरोधात्तज्ज्ञानस्य तद्व्यपदेश इत्याह—इन्द्रियेति।

वार्त्तिकं यच्चासाधारणं तेनेति। दिगादिरप्युपाधिकल्पितेन प्राचीत्वादिना कार्यं विशेषयन्नसाधारणमेवेत्यभिप्रायः॥ २८॥

वृत्तिः

युक्त्यन्तरमाह—(तैश्चापदेश इति)।

ज्ञानविशेषाणां तैः इन्द्रियार्थसन्निकर्षैः अपदेशो विशेषणं व्यावृत्तिः। आत्ममनोयोगादिकं हि न व्यावर्त्तकम्, तज्जन्यत्वस्य ज्ञानान्तरसाधारण्यात्। एवमिन्द्रियमनोयोगजन्यत्वमपि न लक्षणम्, मानसेऽव्याप्तेः।

परे तु तैः इन्द्रियैर्ज्ञानविशेषाणां प्रत्यक्षविशेषाणामपदेशो भाषणं यतस्तेनेन्द्रियार्थसन्निकर्षस्य प्राधान्यम्, भाषन्ते हि चाक्षुषं प्रत्यक्षं रासनं प्रत्यक्षमितीत्याहुः।

---

(१) "प्राधान्ये तु" इति वि-पु० पाठः। (२) "रसनाविज्ञानम्" इति ल-ग० पुस्तकयोर्नास्ति।

(क) अत्र 'इन्द्रियविषयसमाख्यानुरोधादि'ति पाठः सम्यक्तया प्रतिभाति।

न्यायभाष्यम्

यदुक्तमिन्द्रियार्थसन्निकर्षग्रहणं कार्यम्, नाऽऽत्ममनसोः सन्निकर्षस्येति, कस्मात्? सुप्तव्यासक्तमनसामिन्द्रियार्थयोः सन्निकर्षस्य ज्ञाननिमित्तत्वादिति। सोऽयम्—

(सू०)—व्याहतत्वादहेतुः ॥ २९ ॥

(भा०) यदि तावत् क्वचिदात्ममनसोः सन्निकर्षस्य ज्ञानकारणत्वं नेष्यते, तदा 'युगपज्ज्ञानानुत्पत्तिर्मनसो लिङ्ग'मिति व्याहन्येत। (१) नेदानीं मनसः सन्निकर्षमिन्द्रि-

न्यायवार्त्तिकम्

व्याहतत्वादहेतुः। व्याहतत्वादित्यनेन त्रिसूत्रीं प्रत्याचष्टे। "प्रत्यक्षनिमित्तत्वादिन्द्रियार्थयोः सन्निकर्षस्य, सुप्तव्यासक्तमनसां च इन्द्रियार्थयोः सन्निकर्षनिमित्तत्वात्, तैश्चापदेशो ज्ञानविशेषाणा"मिति इयं किल त्रिसूत्री आत्ममनःसन्निकर्षस्य ज्ञानकारणत्वं प्रतिषेधतीति व्याहतमिदं भवति "ज्ञानलिङ्गत्वादात्मनो नानवरोधः, तदयौगपद्यलिङ्गत्वाच्च न मनस" इति।

न्यायवार्त्तिकतात्पर्यटीका

अनेन प्रबन्धेनेन्द्रियार्थसन्निकर्ष एव कारणं ज्ञानस्य न त्वात्ममनःसन्निकर्ष इन्द्रियमनःसन्निकर्षो वा ज्ञानकारणमनेनोक्तमिति मन्वानो देशयति—

व्याह—तुः (सू० २९) ॥ (क)व्याहतत्वादिति पूर्वपक्षसूत्रम्। अस्य तात्पर्यमाह वार्त्तिककारः—अनेनेति। नन्वियं त्रिसूत्री इन्द्रियार्थसन्निकर्षस्य प्राधान्यमाह न पुनः संयोगान्तरस्य कारणत्वं प्रत्याचष्ट इत्यत आह—इयं किलेति। कारणत्वं प्रतिषिध्यत इत्यभिमानः पूर्वपक्षिण

वृत्तिः

नव्यास्तु प्रत्यक्षविशेषाणाम् इन्द्रियैरपदेशो यतोऽतश्चाक्षुषादिघटितविशेषलक्षणान्यपि सम्भवन्ति। चाक्षुषवृत्त्यनुमितित्ववृत्तिजातिमत्त्वादीनि लक्षणान्तराण्यपि द्रष्टव्यामीत्याशयं वर्णयन्ति ॥ २७ ॥

इन्द्रियार्थसन्निकर्षो न हेतुरन्वयव्यभिचारादित्याशयेन शङ्कते—(व्याहतत्वादिति)। गीतश्रवणादिकाले चक्षुर्घटसंयोगादौ विद्यमानेऽपि चाक्षुषादेर्व्याहतत्वादिन्द्रियार्थसंयोगो न हेतुरित्यर्थः ॥ २८ ॥

---

(१) 'तदानीं' ग०।

(क) 'व्याहतत्वादिति' इतः प्रभृति ४६० पत्रे 'व्याख्यातमिति' इत्यन्तो ग्रन्थः आदर्शपुस्तकयोः 'नार्थविशेषे'ति सूत्रीयतात्पर्यटीकायां 'भूतमूलत्वाणामिति' इत्यतः परं मुद्रितोऽपि सङ्गत्यनुरोधादिह गृहीतः।

न्यायभाष्यम्

यार्थसन्निकर्षोऽपेक्षते। मनःसंयोगानपेक्षायां च युगपज्ज्ञानोत्पत्तिप्रसङ्गः। अथ मा भूद् व्याघात इति सर्वविज्ञानानामात्ममनसोः सन्निकर्षः कारणमिष्यते, तदवस्थमेवेदं भवति; ज्ञानकारणत्वाद्आत्ममनसोः सन्निकर्षस्य ग्रहणं कार्यमिति ॥ २९ ॥

(सू०)—नार्थविशेषप्राबल्यात् ॥ ३० ॥

(भा०) नास्ति व्याघातः, न ह्यात्ममनःसन्निकर्षस्य ज्ञानकारणत्वं व्यभिचरति। इन्द्रियार्थसन्निकर्षस्य प्राधान्यमुपादीयते। अर्थविशेषप्राबल्याद्धि सुप्तव्यासक्तमनसां ज्ञानोत्पत्तिरेकदा भवति। अर्थविशेषः कश्चिदेवेन्द्रियार्थः, तस्य प्राबल्यं तीव्रतापटुते। तच्चार्थविशेषप्राबल्यमिन्द्रियार्थसन्निकर्षविषयं नाऽऽत्ममनसोः सन्निकर्षविषयम्, तस्मादिन्द्रियार्थसन्निकर्षः प्रधानमिति।

न्यायवार्त्तिकम्

'मनःसंयोगानपेक्षायां युगपज्ज्ञानोत्पत्तिप्रसङ्ग' इति दृष्टव्याघातः। 'अथ मा भूद्व्याघात' इति। ज्ञानमात्ममनःसन्निकर्षादुत्पद्यते, देश्यावस्थमेवैतत्—कस्मादात्ममनःसंयोगो नाभिधीयते। अत्रोक्तम्। किमुक्तम्? नेदं कारणावधारणार्थं सूत्रम्, अपि तु विशिष्टकारणवचनमिति ॥ २९ ॥

याऽपीयं त्रिसूत्री प्रत्यक्षनिमित्तत्वाच्चेन्द्रियार्थयोः सन्निकर्षस्येत्येवमादिः, इयमपि—

नार्थविशेषप्राबल्यात्। नानया त्रिसूत्र्या आत्ममनःसन्निकर्षस्य कारणभावः प्रतिषिध्यते, अपि तु प्राधान्यमिन्द्रियार्थसन्निकर्षस्योपपाद्यते। प्राधान्यं चोपपादयन्त्या नात्ममनःसंयोगः प्रतिषिद्धो भवति। मनसि क्रियाकारणाभिधानम्? सुप्तव्यासक्तमनसा-

न्यायवार्त्तिकतात्पर्यटीका

इत्यर्थः। दृष्टव्याघात इति, अयौगपद्यं दृष्टं तस्य व्याघात इत्यर्थः। शेषं तु भाष्यव्याख्यया व्याख्यातमिति ॥ २९ ॥

परिहारसूत्रम्—

नार्थ—त् (सू० ३०)॥ अनेनेन्द्रियार्थसन्निकर्षस्य प्राधान्यमात्रमुच्यते, न त्वात्ममनः-

वृत्तिः

समाधत्ते—(नार्थेति)।

अर्थविशेषस्य गीतादेः प्राबल्याद् बुभुत्सितत्वाद् गीतादिश्रवणम्। तथा च गीतशुश्रूषादेश्चाक्षुषादिप्रतिबन्धकत्वात् प्रतिबन्धकाभावस्य च (१)कार्यजनकत्वात् तत्सहकारेण चेन्द्रियार्थसन्निकर्षस्य हेतुत्वमित्यतः पूर्वपक्षो न युक्त इति।

---

(१) "कार्योर्जकत्वात्" इति ख०।

न्यायभाष्यम्

असति प्रणिधाने सङ्कल्पे चासति सुप्तव्यासक्तमनसां यदिन्द्रियार्थसन्निकर्षादुत्पद्यते ज्ञानम्, तत्र मनःसंयोगोऽपि कारणमिति मनसि क्रियाकारणं वाच्यमिति।

यथैव ज्ञातुः खल्वयमिच्छाजनितः (१)प्रयत्नो मनसः प्रेरक आत्मगुणः, एवमात्मनि गुणान्तरं सर्वस्य साधकं (क)प्रवृत्तिदोषजनितमस्ति, येन प्रेरितं मन इन्द्रियेण सम्बध्यते। तेन ह्यप्रेर्यमाणे मनसि संयोगाभावाज् ज्ञानानुत्पत्तौ सर्वार्थताऽस्य निवर्त्तते। एषितव्यं चास्य गुणान्तरस्य द्रव्य-गुण-कर्मकारणत्वम्, अन्यथा हि चतुर्विधानामणूनां भूतसूक्ष्माणां मनसां च ततोऽन्यस्य क्रियाहेतोरसम्भवात् शरीरेन्द्रियविषयाणामनुत्पत्तिप्रसङ्गः॥ ३०॥

न्यायवार्त्तिकम्

मिन्द्रियार्थयोः सन्निकर्षनिमित्तत्वादित्यभिधानेनाऽऽत्ममनःसंयोगोऽपि कारणमित्युक्तम्। तत्र मनसि क्रियाकारणं वाच्यमिति। अथ सुखदुःखोपभोगस्यादृष्टनिमित्तत्वाददृष्टं कारणम्—यथैवाऽऽत्मनि गुणान्तरमिच्छाजनितं प्रयत्नलक्षणं क्रियाहेतुस्तथात्मनि संस्कारो धर्माधर्मसमाख्यातो वर्तते, तेन प्रेरितं मनः संयुज्यते विभज्यते वा, तेन ह्यप्रेर्यमाणे मनसि ततोऽन्यस्य क्रियाहेतोरभावात् सर्वार्थता तस्य निवर्तेत। नहि धर्माधर्मावन्तरेण मनसि कश्चिदन्यः क्रियाहेतुरादौ सम्भवतीत्यतोऽदृष्टं कारणमिति॥ ३०॥

इति प्रत्यक्षलक्षणपरीक्षा।

न्यायवार्त्तिकतात्पर्यटीका

संयोगस्येन्द्रियमनःसंयोगस्य वाऽकारणत्वमुच्यत इति न व्याघात इत्यर्थः। पृच्छति—असति संकल्पे प्रणिधाने चेति। (२)यत्नः प्रणिधानम्, संकल्प इच्छा। उत्तरम्—यथैवेति। नन्वस्य जात्यायुर्भोगनिमित्तत्वमवगतं न तु मनःप्रेरकत्वमपीत्यत आह—तेन ह्यप्रेर्यमाणे मनसीति। भोगो ह्यदृष्टस्य प्रधानं प्रयोजनं तन्नान्तरीयकतया जन्मायुषी आक्षिपति। स्वसंबन्धिसुखदुःखसाक्षात्कारश्च भोगः तदायतनं च शरीरम्। अप्राप्तं च मनो न तत्र भोगं च भोगविषयौ सुखदुःखे च तयोः कारणं च ज्ञानं जनयितुमर्हति (ख)नूनं तत्प्राप्तिहेतोर्मनःकर्मणः कारणमदृष्टं वक्तव्यम्, अन्यथाऽस्य सर्वद्रव्यगुणकर्मकारणता न स्यात्। मा भूत्सर्वार्थतेत्यत आह—एषितव्यं चास्येति। अणूनां विशेषणं भूतसूक्ष्माणामिति॥ ३०॥

---

(१) 'प्रयत्नो' इति ल-ग-ज०। (२) 'प्रयुक्तम्' इति क०।

(क) प्रवृत्तिः कर्म, दोषः रागादिः। (ख) 'इति' पदमत्रार्थतोऽवगन्तव्यम्।

(सू०)—प्रत्यक्षमनुमानमेकदेशग्रहणादुपलब्धेः ॥ ३१ ॥

न्यायभाष्यम्

यदिदमिन्द्रियार्थसन्निकर्षादुत्पद्यते ज्ञानं वृक्ष इति, एतत् किल प्रत्यक्षम्, तत् खल्वनुमानमेव। कस्मात्? एकदेशग्रहणाद् वृक्षस्योपलब्धेः। अर्वाग्भागमयं गृहीत्वा वृक्षमुपलभते। न चैकदेशो वृक्षः। तत्र यथा धूमं गृहीत्वा वह्निमनुमिनोति तादृगेव (१)तद्भवति।

न्यायवार्त्तिकम्

एवं तावत् प्रत्यक्षलक्षणं समाहितम्। अतः परमिदानीं प्रत्यक्षस्यानुमानेऽन्तर्भावं कुर्वाण इदमाह—

प्रत्यक्षमनुमानमेकदेशग्रहणादुपलब्धेः। यदिदमिन्द्रियार्थसन्निकर्षादुत्पद्यते ज्ञानम् अयं वृक्ष इति, एतत् किल प्रत्यक्षम्, तदनुमानमेव। कस्मात्? एकदेशग्रहणाद् वृक्षोपलब्धेः—एकदेशमयं गृहीत्वा वृक्षमुपलभते, न चैकदेशो वृक्षः। तत्र यथाऽन्यस्य दर्शनादन्यप्रतिपत्तिरनुमानम्, एवमेकदेशग्रहणाद् वृक्षप्रतिपत्तिरनुमानमिति—यथा धूमं गृहीत्वाऽग्निप्रतिपत्तिरेवमेकदेशं गृहीत्वा वृक्षप्रतिपत्तिरिति।

न्यायवार्त्तिकतात्पर्यटीका

अतः परमिदानीमिति। न ह्यवयवी नाम कश्चिदर्थान्तरभूतोऽवयवेभ्योऽस्ति अपि त्ववयवा एव परमार्थसन्तः। तेषु च कतिपयानवयवान् गृहीत्वा तत्सहचरितानवयवाननुमाय प्रतिसंधानजेयं वृक्षबुद्धिस्तानेवावयवानालम्बमानाऽनुमानमिति प्रत्यक्षस्यानुमानेऽन्तर्भावाद्विभागसूत्रेण न्यूनाधिकसंख्याव्यवच्छेदो नोपपद्यत इत्यर्थः।

वृत्तिः

परे तु इन्द्रियार्थसन्निकर्षस्य हेतुत्वमित्यत इन्द्रियमनोयोगादेरहेतुत्वमिति भ्रान्तः शङ्कते—व्याहतत्वाद् अहेतुः। इन्द्रियार्थसन्निकर्षस्यैव हेतुत्वमित्यत्र यो हेतुरुक्तः, स न युक्तः। कुतः? व्याहतत्वात्, इन्द्रियमनोयोगादेर्हेतुताया अभ्युपगमात् तद्व्याघातापत्तेः। भ्रमं खण्डयति—नार्थविशेषप्राबल्यात्। नास्ति व्याघातः। कुतः? अर्थविशेषस्य इन्द्रियार्थस्य प्राबल्यात् प्राधान्यात्। तथा चेन्द्रियार्थसन्निकर्षप्राधान्यार्थं हि पूर्वमुक्तम्, न तु तदितरनिषेधार्थमिति ॥ २९ ॥

ननु सति प्रत्यक्षस्य प्रमाणान्तरत्वे तल्लक्षणपरीक्षा सङ्गच्छते, तदेव तु नास्तीत्याशङ्कते—(प्रत्यक्षेति)।

---

(१) 'तद्' इति क-पु० नास्ति।

न्यायभाष्यम्

किं पुनर्गृह्यमाणादेकदेशाद् अर्थान्तरमनुमेयं मन्यसे ? अवयवसमूहपक्षे अवयवान्तराणि (१)द्रव्यान्तरोत्पत्तिपक्षे तानि चावयवी चेति। अवयवसमूहपक्षे तावदेकदेशग्रहणाद् वृक्षबुद्धेरभावः, नागृह्यमाणमेकदेशान्तरं वृक्षो गृह्यमाणैकदेशवदिति।

न्यायवार्त्तिकम्

न, यथासम्भवं विकल्पानुपपत्तेः—एकदेशग्रहणादर्थान्तरं प्रतिपद्यत इति किं तदर्थान्तरम्, यदेकदेशग्रहणात् प्रतिपद्यत इति। अवयवसमूहपक्षे तावदवयवान्तराणि, द्रव्यान्तरोत्पत्तिपक्षे तानि च (क) अवयवीति चेन्न—यदि तावदवयवसमूहमात्रं वृक्षमधिकृत्योच्यते, एतस्मिन् पक्षे गृह्यमाणावयवव्यतिरेकेण यान्यगृह्यमाणान्यवयवान्तराणि स वृक्षः। अथ द्रव्यान्तरोत्पत्तिपक्ष आश्रीयते, तथाऽप्यर्वाग्भागव्यवहितानि अवयवान्तराणि, अर्थान्तरं च स वृक्ष इति। किं पुनरत्रैकदेशग्रहणादयं प्रतिपद्यते ? किमवयवान्तराणि उत द्रव्यान्तरमिति। अवयवसमूहपक्षे तावद् वृक्षबुद्धेरभावः, परभागस्यावृक्षत्वात् अर्वाग्भागवत्—यथैवायमर्वाग्भागो न वृक्ष एवं मध्यपरभागावपि न वृक्षः। सेयमवयवसमूहपक्षे(ख) वृक्षबुद्धिरुत्पद्यमाना निर्विषया। अर्वाग्भागः परभागो मध्यभाग इत्येतच्च नास्ति। कथम् ? भाग इत्येतदवयवस्यैतन्नाम, यः पुनरर्थान्तरमवयविनं न प्रतिपद्यते तस्यावयव इति निरभिधेयं वाक्यम्, अवयवश्च परभागोऽर्वाग्भागः स चावयविप्रत्याख्याने न युक्त इति। अथैकदेशो भाग इत्युच्यते, कोऽयमेकदेशः ? एकदेशो ह्यवयविन आधारः, अवयविनं च प्रत्याचक्षाणेन एकदेशोऽपि प्रत्याख्यातः। अथाकार्यकारणभूतानां परस्परप्रत्यासत्त्युपग्रहेणैकदेशावस्थानमवयवार्थः, अहो शब्दार्थकौशलम्—अकार्यकारणभूताश्च

न्यायवार्त्तिकतात्पर्यटीका

निराकरोति—न यथासंभवं विकल्पानुपपत्तेः। एकदेशो ह्यवयविन आधार इति, एकश्चासौ देशश्चेत्येकदेशः, देशश्चाऽऽधारो न चाऽऽधेयोऽस्त्यवयवीति कथमाधार इत्यर्थः। अहो शब्दार्थकौशलमिति, शब्देऽर्थे वा कौशलमित्यर्थः। अर्थे तावदकौशलमाह—अकार्येति। कार्यस्यैकस्य कारणानां तदेकं कार्यं कर्तुं परस्परप्रत्यासत्तिर्भवति, यथा मृद्दण्ड-चक्र-सूत्राणां घटे जनयितव्ये प्रत्यासत्तिः। कार्याणां चैकसामग्रीजन्मनां परस्परप्रत्यासत्तिः,

वृत्तिः

प्रत्यक्षत्वेनाभिमतं वृक्षादिज्ञानम् अनुमानम् अनुमितिः, एकदेशस्य पुरो-

(१) 'द्रव्योत्पत्तिपक्षे इति ग०।

(क) 'अवयवी चेति' भाष्यगतचकारो वार्त्तिके त्यक्तः।

(ख) अतः परमादर्शपुस्तकयोः (ऽत्र च) इत्याकारेण मुद्रितः पाठो दृश्यते।

न्यायभाष्यम्

अथैकदेशग्रहणादेकदेशान्तरानुमाने समुदायप्रतिसन्धानात् तत्र वृक्षबुद्धिः ? न तर्हि

न्यायवार्त्तिकम्

परस्परप्रत्यासत्त्युपग्रहेण च वर्तन्त इति। न च परस्परोपकारं कुर्वन्त्यवयवाश्चाभिधीयन्त इति चित्रम्।

अपरे त्वर्वाग्भागदर्शनेन परभागानुमानं कृत्वा प्रतिसन्धानप्रत्ययजामवृक्षे वृक्षबुद्धिमध्यवस्यन्ति। एतस्मिन् पक्षे वृक्षबुद्धेरभाव एव। कथम् ? अर्वाग्भागस्य परभागस्य चावृक्षत्वात्। न चावृक्षप्रतिसन्धानजा वृक्षबुद्धिरुत्पत्तुमर्हति। न चैतस्मिन् पक्षेऽनुमानं भवति। अर्वाग्भागमयं गृहीत्वा परभागमनुमिमीते इति नानुमानस्य विषयो ज्ञातः। कथं न ज्ञातः ? यदि तावदेवमनुमिमीते वृक्षोऽयमर्वाग्भागवत्त्वात्; कतमोऽसौ वृक्षः, यस्यार्वाग्भागवत्त्वं धर्मः, अनभ्युपगतार्थान्तरावयविनोऽर्वाग्भागमात्रं प्रत्यक्षम्। न च धर्मिण्यनुपलब्धेऽनुमानं प्रवर्त्तते। न चायं जात्वपि धर्मिणमुपलभते अविद्यमानत्वेनाभ्युपगमात्। न चानुमानम्, अनुमाने एवंविधस्य प्रतिसन्धानस्याभावात्—न ह्यनुमाने एवंविधं प्रतिसन्धानमस्ति, नायमनुमाता पूर्वमनुपलभ्याग्निं धूमविशेषणं प्रतिपद्य प्रतिसन्धत्ते अयं धूमोऽयं चाग्निरिति। न च प्रतिसन्धायानुमिमीते अग्निनाऽत्र भवितव्यमिति। किं कारणम् ? वैयर्थ्यात्—व्यर्थमनुमानमेतस्यामवस्थायामग्नेर्विशेषणभूतस्य प्रतीतत्वात्। तस्मान्नानुमाने प्रतिसन्धानमस्ति। प्रतिसन्धायापि च न समुदाये प्रतिसन्धानं न च वृक्षे—न ह्ययमेकदेशदर्शनात् समुदायं प्रतिपद्यते न वृक्षम्, किन्तु शेषं समुदायिनमेव। किं कारणम् ? समुदायिव्यतिरेकेण समुदायस्यानभ्युपगमात्—

न्यायवार्त्तिकतात्पर्यटीका

यथा रूपरसगन्धस्पर्शानाम्; कार्यकारणयोर्वा, यथा अग्निधूमयोः; येषां तु न कार्यकारणभावो नैककार्यत्वं वा नैककारणत्वं वा तेषां कुतो नियमवती प्रत्यासत्तिरित्यर्थः। शब्दाकौशलमाह—न च परस्परेति। अवयविनं दधदवयवान्तरमवयवान्तरमपेक्षते, ततश्चावयवाः परस्परोपकारिणो भवन्ति। अवयव्यभावे तु न परस्परोपकारिणः, कथमवयवा इत्यर्थः।

न चावृक्षप्रतिसंधानजेति। स्वस्तिमतीं हि गां गृहीत्वा कालाक्ष्यां गवि गौरिति प्रतिसंधानं दृष्टं न त्वश्वं गृहीत्वाऽश्वान्तरे गौरिति प्रतिसंधानं दृष्टम्। तत्कस्य हेतोः ? तयोरगोत्वात्। एवमर्वाग्भागपरभागाणामवृक्षत्वाद् वृक्ष इति प्रतिसंधानं न भवेदित्यर्थः। यद्युच्येत मा भूद वृक्षरूपधर्मिग्रहः पूर्वमर्वाग्भागं धर्मिणं वृक्षविशेषमनुमाय प्रतिसंधास्यतीत्यत आह—न चानुमानम्। कस्मादित्यत आह—अनुमान इति। नायमनुमाता पूर्वमनुपलभ्याग्निमनुमानेन च धूमविशेषणमग्निं प्रतिपद्य प्रतिसंधत्ते अयं धूमोऽयं चाग्निरिति। अथ पूर्वं प्रतिसंधानं पश्चादनुमानमित्यत आह—न च प्रतिसंधायेति, प्रतिसंधानसमय एवाग्नेरवगतत्वाद्भवितव्यमत्राग्निनेति व्यर्थमनुमानं स्यादित्यर्थः। अभ्युपेत्याऽऽह—प्रतिसंधायापि चेति।

न्यायवार्त्तिकम्

न हि भवन्तः समुदायिव्यतिरिक्तं समुदायं प्रतिपद्यन्ते इति। न चासन् समुदायोऽनुमातुं शक्यः।

किं चार्वाग्भागमयं गृहीत्वा किमन्यदनुमिमीते ? अयमर्वाग्भागः परभागवान् इति न युक्तमनुमातुम्, अर्वाग्भागस्य परभागवत्त्वासम्भवात्। न ह्यर्वाग्भागः परभागवान् भागस्य भागवत्त्वासम्भवात्, न हि भागस्यापरभागो विद्यत इति। अथ भागं भागवन्तं प्रतिपद्यसे, न स भागो भागवान्, भाग्येवासौ; भागिविषयं चानुमानमित्ययुक्तमुभयस्य प्रत्यक्षत्वात्—उभयं ह्यत्र प्रत्यक्षम्—अर्वाग्भागो भागी च। अत्रार्वाग्भागवत्त्वेन भागिनः परभागानुमानमस्मत्पक्षे युक्तम्, भवत्पक्षे तु भागमात्रदर्शनान्न युक्तमिति। यच्च तदर्वाग्भागदर्शनम् न तस्य लिङ्गलिङ्गिसम्बन्धस्मृत्यनुग्रहोऽस्ति, सम्बद्धयोश्चार्वाग्भागपरभागयोरदृष्टत्वात्—न ह्ययं द्रष्टा अर्वाग्भागपरभागयोः सम्बन्धं पश्यति, नार्वाग्भागपरभागौ सम्बद्धौ, न चानुभवमन्तरेण स्मृतिः, न च स्मृतिमन्तरेण लिङ्गदर्शनं केवलमनुमानम्(१)। कथं पुनरयमर्वाग्भागपरभागौ सम्बद्धौ न पश्यति ? नित्यमर्वाग्भागेन परभागस्य(२) व्यवधानात्—नित्यमर्वाग्भागमेव केवलमुपलभते, परभागं तु न कथञ्चन, अर्वाग्भागव्यवहितत्वात्। सत्यं नोभयोरुपलब्धिरस्ति, उभौ च सम्बद्धौ। सत्यं सम्बद्धौ, अनुमानं त्वशक्यम् उभयोरदर्शनात्। अर्वाग्भागपरभागयोश्च धर्मधर्मिभावानुपपत्तेर्नानुमानम्—यत्र खल्वनुमानं भवति तत्र धर्मिणो धर्मप्रसिद्धौ धर्मान्तरविषयमनुमानम्, न पुनरर्वाग्भागस्य परभागो धर्मः, परभागस्य चार्वाग्भागः, ततश्च नानुमानम्।

न्यायवार्त्तिकतात्पर्यटीका

किं चार्वाग्भागमयमिति। स भागवान् भागो न भवति किं तु भाग्येव। कस्मान्न पश्यतीत्यत आह—नार्वाग्भापरभागौ संबद्धौ। एकावयविसमवायेन हि परस्परसंबद्धौ स्यातान्, न चावयव्यस्ति, न चापि संयुक्तौ संयोगस्यावयविनिरासमार्गेण निरस्तत्वादित्यर्थः। पृच्छति—कथं पुनरिति। उत्तरम्—नित्यमर्वाग्भागेनेति। संबन्धस्तावन्नास्तीत्युक्तमेव, तमभ्युपगम्य तूत्तरम्—सत्यं संबद्धौ, सत्यपि संबन्धे अशक्यग्रहोऽसावित्यर्थः। सत्यं संबद्धावित्ययमभ्युपगमवाद एव।

वृत्तिः

भागस्य (३)ग्रहणाद् ग्रहणानन्तरम् उपलब्धेः, तथाचैकदेशग्रहणात्मकलिङ्गज्ञानजन्यत्वाद् वृक्षादिज्ञानमनुमितिरित्यर्थः ॥ ३० ॥

---

(१) 'अनुमानं स' इति ख-वार्त्तिके पाठः। (२) अतः परं ख-वार्त्तिके 'च'कारोऽधिकः।

(३) 'ग्रहणात्' इति भा-पु० नास्ति।

न्यायवार्त्तिकम्

यच्चेदमुच्यते प्रतिसन्धानप्रत्ययजा वृक्षबुद्धिरिति, तदयुक्तम्; वृक्षस्यासिद्धत्वेनाभ्युपगमात् न प्रतिसन्धानम्—प्रतिसन्धानं हि नाम पूर्वप्रत्ययानुरञ्जितः प्रत्ययः पिण्डान्तरे भवति। यथा रूपं च मयोपलब्धं रसश्चेति। भवत्पक्षे पुनरर्वाग्भागं गृहीत्वा परभागमनुमायार्वाग्भागपरभागावित्येतावान् प्रतिसन्धानप्रत्ययो युक्तः, वृक्षबुद्धिस्तु कुतः ? न तावदर्वाग्भागो वृक्षो न परभाग इति। अर्वाग्भागपरभागयोश्चावृक्षभूतयोर्या वृक्षबुद्धिः सा अतस्मिंस्तदिति प्रत्ययो नानुमानाद्भवितुमर्हतीति। प्रमाणस्य यथाभूतार्थपरिच्छेदकत्वात्। यश्चायमतस्मिंस्तदिति प्रत्ययः स प्रधानानुकारेण भवतीति वृक्षबुद्धिः प्रधानं वक्तव्यम्, न ह्यगृहीतसामान्यस्यानध्यारोपिततद्विपरीतधर्मस्य वा अतस्मिंस्तदिति प्रत्ययो भवति, प्रधानं च नास्ति वृक्षस्यानभ्युपगमात्। तस्मान्नानुमानप्रतिसन्धानाद् वृक्षबुद्धिः।

एतेनार्वाग्भागपरभागप्रत्ययाः अपि प्रत्युक्ताः। अनभ्युपगतान्त्यावयविनश्चार्वाग्भागः परभाग इत्येतदपि नास्ति। कस्मात् ? महतो द्रव्यस्योपलब्धिलक्षणप्राप्तस्य परभागव्यवधायकस्यैतन्नाम अर्वाग्भाग इति, तथाभूतस्य च व्यवहितस्य परभाग इति। न च भवता किञ्चिद् द्रव्यमवयविभूतं प्रतिपद्यते यदर्वाग्भागपरभागशब्दवाच्यं स्यादिति। परमाणुषु तथासन्निविष्टेष्वर्वाग्भागपरभागवृक्षादिप्रत्यया इति चेत्—अथ मन्यसे नास्माभिरवयविद्रव्याणि कानिचित् प्रतिपद्यन्ते, किन्तु तेष्वेव परमाणुषु परस्परप्रत्यासत्त्युपसंग्रहेण संस्थानविशेषावस्थितेषु एते शब्दाः प्रवर्तन्ते अर्वाग्भाग (क)इति परभाग इति वृक्ष इति च। न, तथाशब्दस्यार्थानभिधानात्—

न्यायवार्त्तिकतात्पर्यटीका

यच्चेदमुच्यते प्रतिसंधानप्रत्ययजेति। पूर्वं सत्यपि वृक्षे अवयवानामवृक्षत्वान्नावयवे प्रतिसंधानजा वृक्षबुद्धिरित्युक्तम्, संप्रति तु वृक्षस्यासत्त्वेन नावयवे वृक्ष इति प्रतिसंधानमित्यपौनरुक्त्यम्। रूपं च मयोपलब्धं रसश्चेति, य एवोपलब्धा रसप्रत्ययोपरञ्जितः स एव रूपप्रत्ययोपरञ्जित इत्यर्थः। प्रमाणस्य यथाभूतार्थपरिच्छेदकत्वादिति। यथा भ्रान्तमप्यनुमानमर्थसंबन्धेन प्रमाणमिति न भवति तथा प्रथमेऽध्याये दर्शितम्। प्रधानानुकारेण (ख) भ्रान्तिरिति विपरीतख्यातौ सत्याम्, सा चोपपादिता प्रथमाध्याये।

न, तथाशब्दस्यार्थानभिधानादिति। कः पुनरयं तथाशब्दार्थः। परमाणूनां रूपं वा

(क) अयम् 'इति'शब्द आदर्शपुस्तकयोः 'वृक्ष इति च' इत्यतः परं स्थितः, अर्थानुरोधाच्च एवं पाठः कल्पितः।

(ख) 'स प्रधानानुकारेण' इति वार्त्तिकगत-तत्पदस्यार्थो भ्रान्तिरिति।

न्यायभाष्यम्

वृक्षबुद्धिरनुमानमेवं सति भवितुमर्हतीति। द्रव्यान्तरोत्पत्तिपक्षे नावयव्यनुमेयः, (१)अस्यैकदेशसम्बद्धस्याग्रहणात्(२) ग्रहणे चाविशेषादनुमेयत्वाभावः। तस्माद् वृक्षबुद्धिरनुमानं न भवति ॥ ३१ ॥

न्यायवार्त्तिकम्

तथासन्निविष्टेषु तथाभिधानं प्रवर्तते पूर्वप्रसिद्धौ सत्याम्; न च परमाणुषु पूर्वापरादिशब्दप्रवृत्तेर्बीजमस्ति (क)। यथाप्रसिद्धे गवि गवयस्तथारूप इति। एवं तावदवयवसमूहपक्षे वृक्षबुद्धेरभाव इत्युक्तम्।

'द्रव्यान्तरोत्पत्तिपक्षे तु नावयव्यनुमेयः' प्रत्यक्षत्वादर्वाग्भागवदिति। यथैवायमर्वाग्भागमिन्द्रियसम्बद्धं प्रत्यक्षत उपलभते तथा वृक्षमपीति नानुमेयो वृक्षः। अथेन्द्रियसम्बद्धमपि वृक्षमनुमेयमेव प्रतिपद्यते, वृक्षवदर्वाग्भागोऽप्यनुमेयः स्यात्, तथा च व्याहतं भवति अर्वाग्भागमयं गृहीत्वा वृक्षं प्रतिपद्यत इति। सर्वमेवानुमानमित्येतस्मिन् पक्षेऽनुमानाभावः प्रत्यक्षतोऽनवगतत्वाद्धर्मिणः, न धर्मिणि प्रत्यक्षतोऽनधिगतेऽनुमानं प्रवर्तते। यदप्यतीन्द्रियेष्वर्थेष्वनुमानमुक्तम्, तन्नास्ति न ह्यतीन्द्रियार्थोऽनुमातुं शक्यः। कथमिति ? धर्मिणोऽनधिगतत्वादित्युक्तम्। कः पुनः सामान्यतोदृष्टस्य प्रत्यक्षपूर्वकानुमानाद्विशेषः, यदि सर्वं प्रत्यक्षपूर्वकमेवानुमानमिति। अयं विशेषः—प्रत्यक्षपूर्वकं त्रिकप्रसिद्धौ प्रवर्तते साध्यसाधनधर्म्युपलब्धौ—यत्रायं साध्यं साधनं च धर्मिणं च पूर्वं गृहीत्वा पुनर्धर्मधर्मिदर्शनेन धर्मान्तरमनुमिमीते तत् प्रत्यक्षपूर्वकम्,

न्यायवार्त्तिकतात्पर्यटीका

नैरन्तर्यं वा संयोगभेदो वा उत्पादभेदो वा। यदि रूपमात्रम्, तद् घटादिष्वपीति वृक्षबुद्धिः स्यात्। अथ रूपभेदः, क्षणान्तरेणावृक्षः स्यात्, न हि तत्पूर्वं रूपम्। अथ नैरन्तर्यम्, तद् घटादिष्वप्यस्ति; न वा क्वचिदपि (ख) गन्धरसरूपस्पर्शपरमाणुव्यवधानात्। न संयोगो भवद्भिरास्थीयत इति कुतस्तद्भेदः। उत्पादभेदोऽपि परमाणूनां रूपमेव, न हि परमाणुव्यतिरिक्तः कश्चिदस्ति तेषामुत्पादः; रूपं च पूर्वं विकल्पितम्। यदि हि क्वचिदवयवसन्निवेशो वास्तवः पूर्वापरभागादिशब्दप्रवृत्तिहेतुरुपलब्धः स्यात् ततस्तथाशब्दार्थः प्रतीयेत; न तु भवतां क्वचिदेष वास्तवः, वस्तुसतां परमाणूनामभागत्वादित्यर्थः। सामान्यतो दृष्टे धर्मिविषयकमपि प्रत्यक्षं नास्तीति भ्रान्तः पृच्छति—सामान्यतोदृष्टस्येति। उत्तरम्—अयं विशेष इति, द्विकस्य प्रत्यक्षेण प्रसिद्धौ सामान्यतोदृष्टं प्रवर्त्तते त्रिकस्य तु प्रत्यक्षेण प्रसिद्धौ प्रत्यक्षतोदृष्टमिति विशेषः।

---

(१) 'अस्यैकदेशसम्बन्धस्य' ग०। (२) अतः परं ख-पुस्तके 'एकदेशसम्बन्धस्य' इत्यधिकं दृश्यते।

(क) 'यथाप्रसिद्धे गवि गवयस्तथारूप इत्यंशो' 'बीजमस्ति' इत्यनन्तरमादर्शपुस्तकयोर्मुद्रितोऽपि अर्थानुरोधादिह गृहीतः। क-चिह्नितादर्शे तु 'यथा' इत्यत्र 'तथा' इति मुद्रितम्। (ख) पूर्वपक्षिणो मते गन्धादिपरमाणूनां परस्परमत्यन्तवैलक्षण्याद् गन्धरूपरसादीनां नैकत्र समावेश इत्यभिप्रायः।

न्यायभाष्यम्

एकदेशग्रहणमाश्रित्य प्रत्यक्षस्यानुमानत्वमुपपाद्यते। तच्च—

(सू०)—न, प्रत्यक्षेण यावत्तावदप्युपलम्भात् ॥ ३२ ॥

(भा०) न प्रत्यक्षमनुमानम्, कस्मात्? प्रत्यक्षेणैवोपलम्भात्। यत् तदेकदेशग्रहणमाश्रीयते प्रत्यक्षेणासावुपलम्भः। न चोपलम्भो निर्विषयोऽस्ति। यावच्चार्थजातं तस्य विषयस्तावदभ्यनुज्ञायमानं प्रत्यक्षव्यवस्थापकं भवति।

किं पुनस्ततोऽन्यदर्थजातम्, अवयवी समुदायो वा? न चैकदेशग्रहणमनुमानं भावयितुं शक्यं हेत्वभावादिति।

न्यायवार्त्तिकम्

यत् पुनः साधनधर्मं धर्मिणं चोपलभ्यात्यन्तपरोक्षं धर्मान्तरमनुमिमीते तत् सामान्यतोदृष्टमिति। भवत्पक्षे तु न सामान्यतोदृष्टादनुमानाद् वृक्षबुद्धिः न प्रत्यक्षपूर्वकात्, धर्मिणोऽनभ्युपगमात् प्रत्यक्षप्रतिषेधाच्चेति ॥ ३१ ॥

विरुद्धश्चायं हेतुरेकदेशग्रहणाद् वृक्षोपलब्धेरिति। कथमिति?

न प्रत्यक्षेण यावत् तावदप्युपलम्भात्। प्रत्यक्षमनुमानमित्येवं ब्रुवता प्रत्यक्षमपह्नूयते

न्यायवार्त्तिकतात्पर्यटीका

सर्वस्याप्रत्यक्षत्वाद् वृक्षबुद्धिर्न (क) प्रत्यक्षतोदृष्टादनुमानात् नापि सामान्यतोदृष्टादित्याह—भवत्पक्षे त्विति ॥ ३१ ॥

न, प्र—त् (सू० ३२) ॥ न प्रत्यक्षस्यानुमानता। कुतः? यावदेकदेशभूतस्यार्थजातस्य ग्रहणम् 'एकदेशग्रहणादुपलब्धे'रित्यत्र हेताविष्यते तावदपि प्रत्यक्षेण, अन्यथैकदेशग्रहणाभावेनानुमानानुदयात्, अनुमानान्तरेण वा तद्ग्रहणे अनवस्थापातात्; अतस्तावतोऽर्थजातस्य प्रत्यक्षेणोपलम्भात् तावत्प्रत्यक्षमनुमानमिति प्रतिज्ञा हेतुना (ख)एकदेशग्रहणादुपलब्धेरित्यनेन बाधिता, एकदेशग्रहणस्य प्रत्यक्षेणानभ्युपगमे वा प्रमाणान्तरस्य तत्रानुपपत्तेरसिद्धो हेतुः, सेयमुभयतस्पाशा रज्जुरित्यर्थः। अनुमानेनैकदेशग्रहणान्नासिद्धो हेतुरित्यत आह भाष्यकारः—न चैकदेशग्रहणमिति। अनुमितिः अनुमानम्, भावयितुं कर्तुम्। अनवस्थाप्रसङ्गेन हेत्वभावादिति।

तदेतत्सूत्रं वार्त्तिककारो व्याचष्टे—विरुद्धश्चायमिति। नन्वेकदेशप्रत्यक्षत्वेऽपि तन्मात्रं

वृत्तिः

वृक्षादिप्रत्यक्षनिषेधेऽपि न प्रत्यक्षमात्रनिषेधस्तदेकदेशप्रत्यक्षस्याभ्युपगमादिति समाधत्ते—(न प्रत्यक्षेणेति)।

(क) अत्राऽऽदर्शपुस्तकयोः 'प्रत्यक्षतोदृष्टादनुमानादपि सामान्यतोदृष्टा'दिति पाठो ग्रन्थकर्त्तुर्लिपिशैलीरचार्थ 'न'कारयोगेण परिवर्त्तितः। (ख) 'एकदेशग्रहणानुपलब्धे'रिति आदर्शपुस्तकयोः पाठः प्रामादिकः।

न्यायभाष्यम्

अन्यथाऽपि च प्रत्यक्षस्य नानुमानत्वप्रसङ्गस्तत्पूर्वकत्वात्—प्रत्यक्षपूर्वकमनुमानम्, सम्बद्धावग्निधूमौ प्रत्यक्षतो दृष्टवतो धूमप्रत्यक्षदर्शनादग्नावनुमानं भवति। यच्च सम्बद्धयोर्लिङ्गलिङ्गिनोः प्रत्यक्षम्, यच्च लिङ्गमात्रप्रत्यक्षग्रहणम्, नैतदन्तरेणानुमानस्य प्रवृत्तिरस्ति ; न त्वेतदनुमानमिन्द्रियार्थसन्निकर्षजत्वात्। न चानुमेयस्येन्द्रियेण सन्निकर्षादनुमानं भवति। सोऽयं प्रत्यक्षानुमानयोर्लक्षणभेदो महानाश्रयितव्य इति।

न्यायवार्त्तिकम्

प्रत्यक्षापह्नवाच्च यदेकदेशग्रहणं प्रत्यक्षं तद्ग्राहतं भवति। कथमिति ?। यत्तदेकदेशग्रहणं भवता आश्रीयते प्रत्यक्षं तत्, तावताऽपि च प्रत्यक्षस्य लक्षणं सिध्यति। न चैवं प्रतिज्ञायते सर्वं प्रत्यक्षस्य विषयः किन्तु यावदिन्द्रियार्थसन्निकर्षादुपलभ्यते तावत् प्रत्यक्षस्य विषय इति।

'अन्यथाऽपि' न प्रत्यक्षमनुमानमप्रकारवत्त्वात्—प्रकारवदनुमानम्, अप्रकारवत् प्रत्यक्षमुक्तमनुमानसूत्रं वर्णयद्भिरिति। त्रिकालविषयत्वाच्चानुमानं न प्रत्यक्षम्—त्रिकालविषयमनुमानम्, न त्वेवं प्रत्यक्षमिति। लिङ्गलिङ्गिसम्बन्धस्मृत्यनुग्रहापेक्षत्वाच्च नानुमानं प्रत्यक्षम्—लिङ्गपरामर्शज्ञानस्य लिङ्गलिङ्गिसम्बन्धस्मृत्यनुग्रहोऽस्ति, न चैवं प्रत्यक्षस्य, तस्मान्न प्रत्यक्षमनुमानम्। इतश्च प्रत्यक्षस्य नानुमानत्वप्रसङ्गः तत्पूर्वकत्वात्—प्रत्यक्षपूर्वकमनुमानम्, न तु प्रत्यक्षम्, अयं चानयोर्विशेष इति। इन्द्रियसम्बन्धाच्च—नेन्द्रियस्यानुमेयेनार्थेन सम्बन्धादुत्पद्यते ज्ञानं यत् तदनुमानमित्युच्यते। सोऽयं प्रमाणदृष्टः प्रत्यक्षानुमानयोरेकत्वमासञ्जयता भेदः प्रत्याख्यायत इति।

न्यायवार्त्तिकतात्पर्यटीका

प्रत्यक्षं न तु सर्वं प्रत्यक्षं स्यादित्यत आह—न चैवं प्रतिज्ञायते सर्वमिति। अप्रकारवदिति। अनुमानस्य हि त्रयः प्रकारा यादृशा न तादृशाः प्रत्यक्षस्येति। त्रिकालविषयत्वाच्चेति. अनेन परोक्षार्थत्वं सूचयत्यनुमानस्य, प्रत्यक्षं त्वपरोक्षार्थविषयम्, तस्मादपि भेद इत्यर्थः। लिङ्गपरामर्शज्ञानस्य प्रत्यक्षफलस्यापि प्रमाणस्य सतो लिङ्गलिङ्गिसंबन्धस्मृत्यनुग्रहोऽस्त्युत्पत्तौ न त्वेवं प्रत्यक्षस्य प्रमाणस्य (क) अत उत्पत्तौ वा कार्ये वा लिङ्गलिङ्गिसम्बन्धस्मृत्यपेक्षेत्यर्थः।

अन्यथाऽपि चेत्यादि भाष्यं व्याचष्टे—इतश्चेति। न त्वेतदनुमानमित्यादिभाष्यार्थमाह—इन्द्रियेति। इन्द्रियसम्बन्धाच्चार्थस्य प्रत्यक्षमुत्पद्यते न त्वनुमानमेवमित्यर्थः।

वृत्तिः

प्रत्यक्षमनुमानमिति न, प्रत्यक्षत्वावच्छेदेनानुमितित्वं नेत्यर्थः। 'यावत्तावदप्युपलम्भात्' यावत्तावतोऽपि यस्य कस्यचिद् भागस्य 'प्रत्यक्षेण' इन्द्रियेण 'उपलम्भात्' उपलम्भस्य त्वयाऽप्यभ्युपगमात्। वृक्षादिप्रत्यक्षनिषेधो न प्रत्यक्षमात्रनिषेधस्तदेकदेश-

---

(क) 'अत' इत्यत्र 'असौ'ति पाठः समीचीनतया प्रतिभाति।

न्यायभाष्यम्

(क) न चैकदेशोपलब्धिरवयविसद्भावात्। न चैकदेशोपलब्धिमात्रम्। किं तर्हि? एकदेशोपलब्धिः तत्सहचरितावयव्युपलब्धिश्च। कस्मात्? अवयविसद्भावात्। अस्ति ह्ययमेकदेशव्यतिरिक्तोऽवयवी तस्यावयवस्थानस्योपलब्धिकारणप्राप्तस्यैकदेशोपलब्धावनुपलब्धिरनुपपन्नेति।

अकृत्स्नग्रहणादिति चेत्, न कारणतोऽन्यस्यैकदेशस्याभावात्—न चावयवाः

न्यायवार्त्तिकम्

न चैकदेशोपलब्धिरवयविसद्भावात्। यदिदं भवताऽभिधीयते एकदेशग्रहणादयं वृक्षः प्रतिपद्यत इति, तदनुपपन्नम्; यस्मादेकदेशोपलब्धिश्च तत्सहचरितावयव्युपलब्धिश्च। न हीन्द्रियेण सन्निकृष्यमाण एकदेशे तत्सहचरितोऽवयवी न सन्निकृष्टः, तेन यथैकदेशः सन्निकर्षादुपलभ्यते एवमवयव्यपि सन्निकर्षादुपलभ्यत इति। कस्मात्? अवयविसद्भावात्—अस्ति ह्ययमेकदेशव्यतिरिक्तोऽवयवी, तस्यावयवस्थानस्योपलब्धिलक्षणप्राप्तस्यैकदेशोपलब्धावनुपलब्धिरनुपपन्ना। किं कारणम्? महदनेकद्रव्य-रूपाण्युपलब्धिकारणानि, तान्येकदेशवदेकदेशिन्यपि विद्यन्ते, तस्मादेकदेश उपलभ्यते नैकदेशीत्ययुक्तम्।

न्यायवार्त्तिकतात्पर्यटीका

अपि चावयविनोऽसत्त्वं मन्यमानेन त्वयैकदेशमात्रोपलब्ध्या वृक्षबुद्धेरनुमानत्वमुक्तम्, न त्वियमेकदेशमात्रोपलब्धिरपि तु तस्य तत्सहचरितस्य चावयविन उपलब्धिलक्षणप्राप्तस्य (ख) सिद्धेरित्याह—न चैकदेशोपलब्धिरिति। तदेतद्भाष्यमनुभाष्य वार्त्तिककारो व्याचष्टे—न चेति।

अत्र देश्यभाष्यम्—अकृत्स्नग्रहणादिति चेत्। उत्तरभाष्यम्—न कारणत इति। देश्यविवरणम्—न चावयवा इति। एकदेशग्रहणनिवृत्त्यर्थं हि त्वयाऽवयविग्रहणमास्थीयते, न चैतावता कृत्स्नग्रहणसंभवो यत एकदेशग्रहणनिवृत्तिः स्यात्। न ह्यवयविग्रहणे कृत्स्ना अप्यवयवा गृहीता भवन्ति, नाप्यवयवी, तस्यार्वाग्भागस्य ग्रहणेऽपि मध्यमपरभागस्थस्याग्रहणादिति देश्यभाष्यार्थः।

वृत्तिः

प्रत्यक्षस्य, वादिनाऽभ्युपगमादित्यर्थः। इदमुपलक्षणम्, शब्दगन्धादिप्रत्यक्षस्यावारणान्न प्रत्यक्षमात्रनिषेध इत्यपि बोध्यम् ॥ ३१ ॥

(क) न चैकदेशोपलब्धिरवयविसद्भावादिति सूत्रं न्यायसूचीनिबन्धे न पठितम्। तात्पर्यटीकायामपि भाष्यत्वेनैवेदं परिगृहीतम्। न्यायतत्त्वालोके तु 'अवयविसद्भावादिति सूत्रेण'त्युक्त्या न चैकदेशोपलब्धि'-रित्यंशस्य सूत्रान्तर्गतत्वं प्रतीयते। वृत्तिकृन्मते तु सूत्रमेतदिति तत्र सूत्रसंख्यावृद्धिः। अस्माभिस्तु तात्पर्यटीकाकारमतमेव परिगृहीतम्। विस्तरस्तु वङ्गीयसाहित्यपरिषदा प्रकाशितस्य न्यायदर्शनस्य द्वितीयखण्डे १५० अङ्कितपत्रे द्रष्टव्यः। (ख) अत्र 'सिद्धि'रिति प्रथमान्तपाठो युक्तः।

न्यायभाष्यम्

कृत्स्ना गृह्यन्ते अवयवैरेवावयवान्तरव्यवधानात्, नावयवी कृत्स्नो गृह्यत इति, नायं गृह्यमाणेष्ववयवेषु परिसमाप्त इति, सेयमेकदेशोपलब्धिरनिवृत्तैवेति।

कृत्स्नमिति वै खल्वशेषतायां सत्यां भवति, अकृत्स्नमिति शेषे सति, तच्चैतदवयवेषु बहुष्वस्ति अव्यवधाने ग्रहणाद् व्यवधाने चाग्रहणादिति। अङ्ग तु

न्यायवार्त्तिकम्

नावयविन उपलब्धिर्युक्ता, कस्मात्? विकल्पानुपपत्तेः—अयं खल्ववयवेषु वर्तमान एकस्मिन् कार्त्स्न्येन वा वर्तते एकदेशेन वा? यद्येकस्मिन् कार्त्स्न्येन वर्तते, शेषावयववैयर्थ्यम्; नहि शेषैरवयवैः किञ्चनावयविनः क्रियते। एकद्रव्यश्चासाववयवी भवन् नोपलभ्येत। किं कारणम्? महदनेकद्रव्यवत्त्वस्योपलब्धिकारणत्वात्। न चास्य विनाशः प्राप्नोति कारणद्रव्यविभागासम्भवात्—न ह्येकस्य विभागः सम्भवति। न चैकेनारभ्यमाणस्य महत्त्वं युक्तं कारणबहुत्व-महत्त्व-प्रचयासम्भवात्। तस्मान्नैकस्मिन् कार्त्स्न्येन वर्तत इति। नाप्येकदेशेन, न ह्यस्य कारणव्यतिरेकेण अन्ये एकदेशाः सम्भवन्ति। सोऽयमेकदेशोपलब्धाववयव्युपलभ्यमानो न (१)कृत्स्न उपलभ्यते, 'सेयमेकदेशोपलब्धिरनिवृत्तैवेति'। अथोपलभ्यमानोऽवयवी कथमुपलभ्येत? यदि गृह्यमाणेष्ववयवेषु, कृत्स्नः परिसमाप्तः स्यात्। न चायं गृह्यमाणेषु परिसमाप्तः शेषावयववैयर्थ्यप्रसङ्गादित्युक्तम्। अशेषावयवोपलब्धिरपि नास्ति मध्यभागपरभागयोरर्वाग्भागेन व्यवधानात्। तेनावयविनो न ग्रहणविकल्पः सम्भवति नापि वृत्तिविकल्पः।

न्यायवार्त्तिकतात्पर्यटीका

तदेतद्भाष्यं वार्त्तिककारो व्याचष्टे—नावयविन उपलब्धिरिति। यत् खलु बहुषु वर्त्तते तत् प्रत्येकं समष्ट्या वा यथा कलविङ्ककण्ठगुणः, एकदेशेन वा यथा स्रक्सूत्रं कुसुमेषु। न च कृत्स्नैकदेशाभ्यां प्रकारान्तरमस्ति, अनयोरन्यतरनिषेधस्यान्यतरविधिनान्तरीयकत्वाद् नित्यत्वानित्यत्ववदिति। न चैकत्र कृत्स्नसमाप्तावन्यत्र तस्यैव संभव इति तथा सति कृत्स्नसमाप्तेरभावात्(क)। तस्माद् योऽवयवान्तरे दृश्यते नासाववयवी तथा चावयवा एवेति प्राप्तमित्यपि द्रष्टव्यम्। न ह्यस्य कारणव्यतिरेकेणेति। यदि ह्येकदेशान्तराण्यस्य स्युः ततस्तेष्वपि वृत्तावेकदेशान्तरकल्पनायामनवस्थाप्रसङ्ग इत्यर्थः। पूर्वपक्षवाद्येव प्रश्नपूर्वकं क्रियातिपत्तिमाह—अथोपलभ्यमान इति।

उत्तरभाष्यविवरणपरं भाष्यम्—कृत्स्नमिति वै खल्वित्यादि। तदेकग्रन्थतया अङ्ग तु भवानित्यादिसंबोधनोपक्रमं भाष्यं व्यवस्थितम्।

(१) 'कृत्स्ने' इति क-वार्त्तिकपाठः।

(क) अत्र पञ्चम्यर्थान्वयानुपपत्त्या अभाव इति प्रथमान्तपाठो युक्तः।

न्यायभाष्यम्

भवान् पृष्टो व्याचष्टां गृह्यमाणस्यावयविनः किमगृहीतं (१)मन्यते? येनैकदेशोपलब्धिः स्यादिति। न ह्यस्य कारणेभ्योऽन्ये एकदेशा भवन्तीति (क)तत्रावयववृत्तं

न्यायवार्त्तिकम्

एकस्मिन् कृत्स्नैकदेशशब्दासम्भवादप्रश्नः—किमवयव्येकदेशेन वर्तते अथ कृत्स्नेनैव वर्तत इति न युक्तः प्रश्नः—नावयवी कृत्स्नो नैकदेशः। कृत्स्नमिति खल्वनेकस्याशेषस्याभिधानम्। एकदेश इति चानेकत्वे सति कस्यचिदभिधानम्। ताविमौ कृत्स्नैकदेशशब्दावेकस्मिन्ननुपपन्नौ। कथं तर्ह्यवयवेष्ववयवी वर्तत इति? आश्रयाश्रयिभावेन—आश्रितोऽवयवी आश्रया अवयवा इति। का पुनरियं वाचोयुक्तिः नैकदेशेन (ख)वर्तते न च कार्त्स्न्येन वर्तते अथ च वर्तत इति? यद्

न्यायवार्त्तिकतात्पर्यटीका

तदेतद्वार्त्तिककारो व्याचष्टे—**एकस्मिन्निति**। अयमभिसन्धिः। यत्तावत् कुसुमेष्वेकदेशेन वर्त्तमानं दृष्टमिति तदनुपपन्नम्। यदि कुसुमेषु सूत्रावयवा वर्तन्ते किमायातमवयविनः सूत्रस्य, न ह्यन्यस्मिन् वर्तमाने अन्यद् वर्तत इत्युक्तम्। न चावयविनोऽभावे भवत्येतदपि सूत्रमवयव्यवयवैर्वर्तत इति। अथ मा भूत् सूत्रं नामावयवि एकदेशास्तु कुसुमे वर्तन्त इति ब्रूमः। तथा च सति नैकमनेकत्रैकदेशेन वर्तते किं त्वनेकमनेकत्रेति। तथा च कुसुमपरमाणावेकस्मिन् सूत्रपरमाणुरेको वर्तत इत्युक्तं भवति। न च वृत्तिरपि परमाणुभ्यामतिरिच्यते यतो भवति वर्तत इति। तस्मान्निरन्तरोत्पाद एव परमाण्वोर्वृत्तिरिति व्यवहर्तव्यो न पुनः परमाणुस्वरूपातिरिक्ता काचिद् वृत्तिरस्ति वस्तुसती। एतेन कलविङ्ककण्ठगुणवत्प्रत्येकं कृत्स्नपरिसमाप्तिर्वृत्तिरित्यपि व्याख्यातम्। तथा च वृत्तेरभावादेकदेशेन वा कार्त्स्न्येन वा वर्तत इति रिक्तं वचः। यथालोकप्रत्ययं तु वृत्तेरभ्युपगमे सूत्रं कुसुमेषु नैकदेशेन वर्तते किन्तु तदेकदेशाः सूत्रं च कुसुमेषु वर्तत इति लौकिकोऽनुभवः। तत्र सूत्रस्य वृत्तिः कुसुमेषु नैकदेशेन वा नापि कार्त्स्न्येन किं तु स्वरूपतः, एवमवयवेष्ववयविनः स्वरूपत एव। इयांस्तु विशेषो यत्सूत्रस्य कुसुमेषु वृत्तिं प्रति सन्ति भागा अपीति सूत्ररूपं च भागाश्च कुसुमेषु वर्तन्त इति, अवयविनस्तु स्वावयवेषु वृत्तिं प्रति नावयवान्तराणि सन्तीति रूपमात्रेण तत्र वर्त्ततेऽवयवीति। तस्मान्न किंचित् क्वचित् कार्त्स्न्येन एकदेशेन वा वर्त्तमानं दृष्टमिति तयोर्वृत्तिं प्रति व्यापकत्वमसिद्धम्, रूपस्यैव (२)व्यापकत्वमिति, तच्चावयविन्यप्यस्तीति व्यापकानुपलब्धेरसिद्धेर्नावयविनोऽवयवेषु वृत्तिनिवृत्तिरिति सिद्धम्। यथा च कृत्स्नैकदेशशब्दौ नावयविरूपे वर्त्तेते तथोक्तं वार्त्तिककृतेति। **नैकदेशेन वर्तते न च**

---

(१) 'मन्यसे' इति ल-ग भा०। (२) 'न गमकत्वम्' इति क-तात्पर्यपाठः।

(क) अवयवावृत्तमितत्र आधेयतापरपर्यायवृत्तिशब्दसमानार्थो वृत्तशब्द इति 'नापि वृत्तिविकल्प' इति वार्त्तिकदर्शनेनावगम्यते। वृत्तशब्दः स्वभावे प्रसिद्ध इत्यवयववृत्तमवयवस्वभाव इत्यपि केचिद् व्याचक्षते। 'तत्रावयविवृत्तम्' इति फ-पु-पाठः।

(ख) आदर्शपुस्तकयोः 'वर्त्तते इति च न कार्त्स्न्येन' इत्येवं मुद्रणं प्रामादिकम्।

न्यायभाष्यम्

नोपपद्यत इति। इदं तस्य वृत्तम्—येषामिन्द्रियसन्निकर्षाद् ग्रहणमवयवानां तैः सह गृह्यते, येषामवयवानां व्यवधानादग्रहणं तैः सह न गृह्यते। न चैतत्कृतोऽस्ति भेद इति।

न्यायवार्त्तिकम्

यथाभूतं तत्तथा निर्दिश्यते इत्येषैव वाचोयुक्तिः। कृत्स्नैकदेशशब्दौ नावयविनि स्तः, तस्यैकत्वादित्युक्तम्। तस्मादाश्रयाश्रितधर्मिनिर्देशमात्रमवयव्यवयवेषु वर्तत इति। का पुनरियं वृत्तिः? एकस्यानेकत्राऽऽश्रयाश्रितभावलक्षणा प्राप्तिः।

अपि चैकोऽनेकत्र वर्तत इति प्रतिजानानो नानुयोक्तव्यः। कस्मात्? उभयेन व्याघातात्—एकमनेकत्र वर्तत इति ब्रुवाणः किमेकदेशेन वर्तते उत सर्वात्मना इति नानुयोक्तव्यः। कस्मात्? उभयेन व्याघातात्, यदि एकमनेकत्र वर्तमानं प्रत्यवयवं सर्वात्मना वर्तते, नैकमनेकत्र वर्त्तते, अनेकमनेकत्र वर्तत इत्यापन्नम्। एवं चानुयोगेऽधिकरणव्याघातः। अथैकमनेकत्र वर्तमानं प्रत्यवयवमेकदेशेन वर्तते, तथाऽपि नैकमनेकत्र वर्तत इति प्राप्तम्, अनेकमनेकत्र वर्तत इत्यापन्नम्। ये च तत्र एकदेशाः प्रत्येकमवयवेषु वर्तन्ते तेऽवयविन इति प्राप्तम्। एतस्मिन् पक्षे नैकमनेकत्र वर्तते। किं तर्हि? अनेकमनेकत्रेति। अथ प्रत्येकं परिसमाप्त्या वर्तत इति अयमर्थः, अनेकमनेकत्र वर्तत इति, तथाऽप्यनुयोगाधिकरणं निवर्तत इति—य एव खल्वयमर्थोऽनेकमनेकत्र वर्तते स एवार्थः

न्यायवार्त्तिकतात्पर्यटीका

कात्स्न्येन वर्तते अथ च वर्त्तत इति। एषा(क)वाचोयुक्तिः यद् यथाभूतं वस्तु तत्तथा निर्दिश्यत इहेति योजना।

उभयेन व्याघातादिति। एकस्यानेकवृत्तेः एकदेशेन कात्स्न्येन च व्याघात इत्यर्थः। स एव हि धर्मो विकल्प्यते यो विकल्प्यमानो धर्मिणं न बाधते; यथा शब्दो नित्योऽनित्यो वेति। यो ह्यधिकरणं धर्मिणमेव बाधते नासौ धर्मविकल्पो न्याय्यः, आश्रयासिद्ध्या तस्यानुपपत्तेरिति।

यस्तु मन्यते यत् सत् तत्सर्वमनवयवम्, यथा विज्ञानम्, सच्चेदं नीलाद्यनुभवावसितमिति स्वभावहेतुः, सत्तामात्रव्यापित्वाद् (ख)अनवयवत्वस्य। (१)तथा हि एकस्य सत्त्वं विरुद्धधर्मासंसर्गेण व्याप्तम्, तद्विरुद्धश्च विरुद्धधर्मसंसर्गो नीलादीनां सावयवत्वे प्रसजन् स्वविरुद्धं विरुद्धधर्मासंसर्गं निवर्त्तयंस्तद्व्याप्तं सत्त्वमपि निवर्तयति। तथा हि पाण्यादिकम्पे तत्स्थानोऽवयव्यपि कम्पत इति तस्य जङ्घादिष्वप्यवयवेष्वविशेषावस्थानस्याप्यवयविनः कम्प उपलभ्येत

---

(१) 'यथा' इति क-तात्पर्यपाठः।

(क) वार्त्तिकस्य 'एव' शब्दोऽत्र परित्यक्तः।

(ख) आदर्शपुस्तकयोः 'अनवयविलस्य' इति पाठो मुद्राप्रमादकृतः।

न्यायवार्त्तिकम्

प्रत्येकं परिसमाप्त्या वर्तत इति सर्वथाऽनुयोगाधिकरणं निवर्तते इति, अनुयोगस्याधिकरणबाधकत्वात्—अयं खलु अनुयोगः क्रियमाणोऽधिकरणं बाधते। अतो धर्मविकल्पभावेन न वर्तते। नायं विकल्पः क्वचिदाश्रयवान् इत्यतो नानुयोक्तव्य इति। एवं सर्वेष्वनेकद्रव्यवृत्तिषु संख्या-पृथक्त्व-संयोग-विभाग-सामान्यादिष्वनुयोगाधिकरणव्यावृत्तिदोषो वक्तव्यः।

ग्रहणाग्रहणभेदाद्भेदोऽवयववदिति चेत् ?—यथा गृह्यमाणानामगृह्यमाणानां चावयवानां भेदः तथाऽवयविनोपि गृह्यमाणागृह्यमाणावयवाश्रितस्य भेदः प्राप्तः ततश्च नैकोऽवयवी ; न भेदः एकस्मिन्नपि दर्शनात्—एकस्मिन्नपि गृह्यमाणे ग्रहणमग्रहणं च दृष्टं देवदत्तादिवदिति। यथा

न्यायवार्त्तिकतात्पर्यटीका

न चोपलभ्यते ; तस्मात् स एव तदानीं कम्पते न कम्पत इति विरुद्धधर्मसंसर्गः। अथावयवेषु कम्पमानेष्वपि नावयवी तत्समवेतः कम्पते, ततश्चलाचलयोर्वस्त्रोदकवद् युतसिद्धिप्रसङ्गः। एकस्यावयवस्याऽऽवरणे तत्तदवस्थानोऽवयव्यावृत इति अवयवान्तरस्थानस्याप्यावरणप्रसङ्गः अभेदात् ; न वाऽस्य क्वचिदप्यावरणमित्यविकलो दृश्येत। अवयवस्याऽऽवरणं नावयविनस्तस्यान्यत्वात्। न ह्यन्यस्याऽऽवरणे अन्यदावृतं भवत्यतिप्रसङ्गादिति चेत्—न, अर्धावरणेऽप्यनावृतत्वादवयविनः प्राग्वदविकलग्रहणप्रसङ्गः। अवयवदर्शनद्वारेणावयविदर्शनाददृष्टावयवस्यावयविनोऽप्रतिपत्तिरिति चेत्—न, विकल्पासहत्वात्। किं सर्वावयवदर्शनद्वारेणावयविनः प्रतिपत्तिरुत कतिपयावयवदर्शनद्वारेण ? पूर्वस्मिन् कल्पे नावयवी कदाचिदपि दृश्येत। न ह्यसर्ववित्सर्वावयवोपलम्भक्षमः अर्वाग्भागेन मध्यपरभागयोर्व्यवधानात्। कतिपयावयवदर्शने तु तदभिव्यक्तावल्पावयवदर्शनेऽपि बह्ववयवदर्शनवत् स्थूलोपलम्भप्रसङ्गः। रक्ते चैकस्मिन्नवयवे तत्स्थानोऽवयव्यपि रक्त इति अवयवान्तरेऽपि तस्याभेदाद्रागोपलम्भप्रसङ्गः। अवयवमात्ररागे वा तत्स्थानस्यावयविनो रूपमरक्तं दृश्येत सोऽयं विरुद्धधर्मसंसर्ग इति। तदनेनाभिप्रायेण वार्तिककारो ग्रहणाग्रहणलक्षणेन विरुद्धधर्मसंसर्गेण सर्वानेव विरुद्धधर्मसंसर्गानुपलक्षयति—ग्रहणाग्रहणेति। निराकारोति—न भेद इति। इदं तावदत्र वक्तव्यम्—यद्यनुभूतावसितं नीलमनवयवत्वेन साध्यते (क) ततः सिद्धसाधनम्। नो खलु रूपविशेषो नीलादि-

वृत्तिः

यदपि वृक्षादिज्ञानस्यानुमितित्वमिति, तदपि दूषयति—न चैकदेशोपलब्धिरवयविसद्भावात् (ख)।

न च न वेत्यर्थः। न वैकदेशस्यैवोपलब्धिरित्यपि युक्तम्, अवयविसद्भावात्।

(क) अनुमितिविधेयधर्मविशिष्टः पक्ष एवात्र साध्यमित्याशयः। नवीनमते नीलेऽनवयवत्वं साध्यते इत्यर्थः।

(ख) वृत्तिकृन्मते इदं सूत्रमिति ३२श संख्यकत्वेनास्य गणना कृता, ततश्चेतः प्रभृति भाष्यवृत्त्योः सूत्रसंख्यासंवादो बोध्यः।

न्यायवार्त्तिकम्

देवदत्तादिः केनचित् सह गृह्यते केनचिच्च सह न गृह्यते न तावता तस्य भेदः, तथाऽवयविनोऽपीत्यदोषः। गृहीतत्वाच्च—यदिदं भवताऽभिधीयते एकदेशग्रहणादेतस्य ग्रहणमेकदेशाग्रहणाच्चाग्रहणमिति, अयमनास्पदो विकल्पः, अवयविनो गृहीतत्वात्। एकदेशसहचरितोऽवयवी गृहीतः, किमस्यागृहीतं येनास्य ग्रहणाग्रहणविकल्प आस्पदवान् भवेत्। मध्यभागपरभागौ न गृहीताविति चेत्, न; तयोरवयविनोऽन्यत्वात्—अन्योऽवयवी अन्यौ मध्यभागपरभागाविति अवयविनोऽन्यत्वादवयविनो मध्यभागपरभागौ न गृह्येते इति। किं कारणम्? ग्रहणहेत्वभावात्—

न्यायवार्त्तिकतात्पर्यटीका

रस्माकमपि सावयवो गुणत्वात। (क) तदाश्रयो घट इति चेत्? ननु घट इत्यपि च रूपरसगन्धस्पर्शा एवार्थक्रियाकारिणस्तथा व्यपदिश्यन्ते ते च गुणत्वेन निरवयवा एव न तु तदाश्रयोऽस्ति इत्थं नाम। अथ परसिद्धं द्रव्यं रूपाद्याश्रयं पक्षीकृत्य परसिद्धेनैव तस्य सत्त्वेनानवयवत्वं साधयति (ख)सोऽयमसिद्धं सिद्धेन साधयन् महानैयायिकत्वमात्मनो दर्शयति। न हि स्वयमप्रतीतौ (ग)साध्यधर्मिणौ परप्रत्यायनाय कल्पेते। यथाहुः—

योऽपि तावत्परासिद्धः स्वयं सिद्धोऽभिधीयते।
भवेत्तत्र प्रतीकारः स्वतोऽसिद्धे तु का क्रिया॥ इति।

न च प्रसङ्गसाधनेऽप्येतद्भवितुमर्हति। न च सावयवत्वेन (घ) विरोधाभावात्। न चैकस्य विरुद्धधर्मो बाधकं प्रमाणम्। न तावदेकस्यावयविनो ग्रहणाग्रहणे, अवयवावरणेऽपि तस्य कतिपयावयवावस्थानस्य ग्रहणादेव। न च बह्ववयवस्थानस्य ग्रहण इव कतिपयावयवस्थानस्य ग्रहणे तादृशस्थौल्यानवभासादनवभासोऽवयविन इति सांप्रतम्; परिमाणभेदो हि स्थौल्यमवयविधर्मः, न च तस्य तादृशस्यानवभासेऽवयवी नावभासितो भवति, तस्य ततोऽन्यत्वात्। तस्मादिन्द्रियसन्निकर्षमात्रादवयविनो ग्रहणम्। इन्द्रियेणार्थस्य इन्द्रियावयवैरर्थस्य इन्द्रियेणार्थावयवानाम् इन्द्रियावयवैरर्थावयवानां सन्निकर्षात् परिमाणभेदग्रहणमिति सामग्रीभेदादवयवितत्परिमाणभेदयोर्ग्रहणाग्रहणे उपपद्येते। एतेनार्वाग्भागसहितस्य ग्रहणेऽपि न मध्यभागपरभागसहितस्याग्रहणं कथंचिद्विरोधमावहतीत्युक्तं भवति। न वाऽवयवकम्पेऽप्यवयविनः कम्पो येनावयवान्तरेऽपि कम्पप्रसङ्गः, भिन्नत्वादवयवावयविनोः। तथा सति युतसिद्धिप्रसङ्ग इति चेत्; का पुनरियं युतसिद्धिः? किं भेदोऽवयवावयविनोः, आहोस्विदसंबद्धस्य विद्यमानत्वम्।

(क) पुनश्चोदयति तदाश्रय इति, नीलाश्रयो घटः अनवयवत्वेन साध्यते चेत् न सिद्धसाधनमिति भावः।

(ख) 'सोऽयमसिद्धमसिद्धेन' इति पाठः सम्यक् प्रतिभाति। स्वमते असिद्धं पक्षम् असिद्धेन नैयायिकसम्मतसत्त्वेन हेतुना साधयन् साध्यधर्मविशिष्टत्वेन ज्ञापयन्नित्यर्थः।

(ग) साध्यधर्मिणाविति, साध्यं पक्षः धर्मी हेतुः धर्मौऽनुमितिविधेयभूतो ज्ञाप्यतयाऽस्यास्तीति व्युत्पत्तेरिति बोध्यम्।

(घ) विरोधाभावादित्यत्र विरोधादिति पाठः समीचीनतया प्रतिभाति।

न्यायवार्त्तिकतात्पर्यटीका

यदि भेदः, सोऽस्माभिरिष्यत एव। अथासंबद्धस्य विद्यमानत्वम्, तत् सत्यपि पृथग्गतिमत्त्वे नावयविनोऽस्ति, जातः संबद्धश्चेत्येकः कालः। तथा हि नावयवी अवयवासंबद्धोऽस्ति। न हि जातिमान् जात्यसंबद्धोऽस्ति। न गुणकर्मणी द्रव्यासंबद्धे स्तः। न च विशेषो द्रव्यासंबद्ध इति।

ये त्वप्राप्तिसंयोगौ युतसिद्धिमाहुस्तैरवयवावयविनोरसंयोगे हेतुर्वक्तव्यः। अयुतसिद्धिरिति चेत्—न, तस्या एवासंयोगेन बुभुत्सनादिति। रक्तारक्तत्वं च नावयविन एकस्य, तस्यारक्तत्वादेव; तत्संयोगिनस्तु (क) महारजनस्य रक्तत्वात् तस्य च पटादरक्तादन्यत्वात्। पटो रक्त इति तु भ्रमः, न त्वनेन विभ्रमेण सर्वत्र भवितव्यं तस्य महारजनसंयोगनिमित्तत्वात्, तस्य च पटवृत्तित्वात्, पटस्य च सर्वत्राविशेषात्। पटस्य क्वचिदसंयोगे संयुक्तासंयुक्तभेदप्रसङ्गः। न हि स एव तदैव तत्रैव भवति न भवति चेति युज्यते। तस्मात् संयुक्तात् पटादन्योऽसंयुक्तः पट इति प्राप्तम्। अत्रोच्यते—एषा तावत् प्रमेयगतिः, भावाभावौ परस्परविरहात्मानौ; भावनिवृत्तिरेवाभावः अभावनिवृत्तिरेव भावः, न तु भावाभावाभ्यामन्या तयोर्निवृत्तिः। तेन नैतयोः कदाचिदपि परस्परात्मत्वं भवितुमर्हति अदर्शनात्। एवमनयोराश्रयैकत्वनानात्वे अपि यथादर्शनं व्यवस्थापनीये, यथा तस्यैव श्वैत्यस्य यदा प्रासादे सद्भावस्तदैवाभावः काक इति। एवं य एव कुम्भः श्यामः स एव पश्चादग्निसंयोगादश्यामः, यः पुनरस्य परिमाणभेदो न सति कुम्भे विनश्यति तत्र किमुच्यतां (१)परिमाणावस्थापत्तावपि न नश्यतीति। एवं प्रमेयवैचित्र्यं दर्शनवैचित्र्यव्यवस्थापितं यथाऽभ्युपेयते तथा तस्यैव संयोगस्य तस्मिन्नेकदा भावाभावौ व्यवस्थापनीयौ तथैव दर्शनादिति। न हि दृश्यमानस्य दृश्यमानान्तरवैधर्म्येण रूपमुपलभ्यमानं शक्यमपाकर्तुम्, मा भूद् दृश्यमानवैधर्म्येण दृश्यमानरूपान्तरापाकरणमविशेषात्। तस्माद्दर्शनानुरोधात् प्रमेयवैचित्र्यसिद्धेरुपपन्नः संयोगशब्दबुद्ध्यादीनां तत्रैव तदानीमभावो भावश्चेति। अत एवैषामव्याप्यवृत्तित्वमास्थीयते। रूपादीनां तु न दृष्टस्तत्रैव तदानीमभावो भावश्चेति तेषां व्याप्यवृत्तीनां भावाभावौ युगपदेकत्र विरुद्धाविति सिद्धं रक्तारक्तयोरेकत्राविरोधः सह दर्शनादिति।

यत्पुनर्यदनेकवृत्ति तन्नाना अनेकवृत्तिश्चावयव्यभ्युपगत इति प्रसङ्गसाधनं स्वभावहेतुः। नानात्वाभावादनेकवृत्तित्वाभाव इति प्रसङ्गविपर्ययो व्यापकानुपलब्धिरिति। तत्र ब्रूमः—एकत्वानेकवृत्तित्वयोरविरोधेन नानात्वस्य व्यापकत्वासिद्धेर्न प्रसङ्गो नापि विपर्यय इति। यथैव नीले परिच्छिद्यमाने तदभावो व्यवच्छिद्यते अन्यथा न नीलं परिच्छिन्नं स्यात्, एवं तदभावाविनाभावि पीतमपि नीलपरिच्छेदकं प्रत्यक्षं व्यवच्छिनत्ति, तथैकावयवसंसर्गे अवयविनः परिच्छिद्यमाने तदभावो व्यवच्छिद्यते तदभावाविनाभूताश्चावयवान्तरसंसर्गा इति तेऽपि व्यवच्छेत्तव्याः, तदव्यवच्छेदे तदभावो न व्यवच्छिद्येतेति स एव तदानीमेव तत्र भवेन्न भवेद्वेति दुर्घटमापद्येत।

(१) 'परिमाणावस्थावत्ताऽपि' क।

(क) 'स्यात् कुसुम्भं वह्निशिखं महारजनमित्यपि' इत्यमरः।

न्यायभाष्यम्

समुदाय्यशेषता वा समुदायो वृक्षः स्यात् तत्प्राप्तिर्वा, उभयथा ग्रहणाभावः। मूल-स्कन्ध-शाखा-पलाशादीनामशेषता वा समुदायो वृक्ष इति स्यात् प्राप्तिर्वा समुदायिनामिति, उभयथा समुदायभूतस्य वृक्षस्य ग्रहणं नोपपद्यत इति। अवयवैस्तावदवयवान्तरस्य व्यवधानादशेषग्रहणं नोपपद्यते। प्राप्तिग्रहणमपि नोपपद्यते प्राप्तिमतामग्रहणात्। सेयमेकदेशग्रहणसहचरिता वृक्षबुद्धिर्द्रव्यान्तरोत्पत्तौ कल्पते न समुदयमात्रे इति ॥ ३२ ॥

न्यायवार्त्तिकम्

यथाऽर्वाग्भागेन सहावयविन इन्द्रियप्राप्तिरुपलब्धिनिमित्तमस्ति नैवं मध्यभागपरभागाभ्यां सह। तस्मादर्वाग्भागेन सहोपलभ्यते न मध्यभागपरभागाभ्यामिति। अवयवसमूहपक्षे तु सर्वथा वृक्षबुद्धेरभावः। कथम्? मूलस्कन्धशाखापलाशानां समूहो वा वृक्षः स्यात् प्राप्तिर्वा समुदायिनाम्, उभयथा च वृक्षबुद्धेरभावः। अवयवैरवयवान्तरव्यवधानादशेषग्रहणं नास्ति, प्राप्तिग्रहणं चायुक्तं प्राप्तिमतामग्रहणात्। न हि प्राप्तिमत्स्वगृह्यमाणे प्राप्तिग्रहणमस्ति, भवति हि इदमनेन संयुक्तमिति। सेयमेकदेशग्रहणसहचरिता वृक्षबुद्धिर्द्रव्यान्तरोत्पत्तिपक्षे कल्पते न समुदायमात्रे इति ॥ ३२ ॥

(इति प्रत्यक्षस्यानुमानत्वपरीक्षा)

न्यायवार्त्तिकतात्पर्यटीका

सोऽयमेकत्वानेकवृत्तित्वयोर्विरोध इति चेत्, हन्त भावपरिच्छेदे तदभावो व्यवच्छिद्यत इति युक्तम्, भावपरिच्छेदलक्षणत्वात् तदभावव्यवच्छेदस्य। न हि भावादन्यस्तव भावाभावो नाम। भावान्तराणि तु कस्माद्व्यवच्छिद्यन्ते? तदभावाविनाभावादिति चेत्—कुतः पुनरयं भावान्तराणां भावाभावाविनाभावः? पीतादिभावतादात्म्येन कदाचिदपि नीलस्य भावस्यानुपलम्भादिति चेत्—यत्र तर्ह्येकावयववृत्तेरप्येकस्यावयवान्तरेषु वर्त्तमानस्य तादात्म्यं दृश्यते न तत्रैकावयवसंसृष्टाभावाविनाभावोऽवयवान्तरसंसृष्टस्य। तस्मान्नैकत्वनानावृत्तित्वयोर्विरोधः। अपि च एकं विज्ञानमनेकै रूपचक्षुरालोकमनस्कारैः कथं संबध्यते (क) संबध्यमानं वा कथमेकम्? न वास्तवः कश्चित् कार्यकारणभावो नामास्ति संबन्धः, प्रतीत्यसमुत्पादमात्रं तदिति चेत्? अथ कस्माद्रूपाद्येव प्रतीत्य रूपज्ञानं जायते न पुना रसाद्यपि? स्वभाव एव तादृशो यतस्तानेव प्रतीत्य जायते न पुना (ख)रसादीनिति चेत्—हन्त भोः स्वभावान् भिन्नान् प्रतीत्य कथमेको भावो जायते। को विरोधः, न हि कार्यकारणयोस्तादात्म्यं येन कारणस्वभावानुरोधः कार्यस्य भवेदिति चेत्—तत्किमवयवावयविनोरप्यभेदः, समवायस्य वा ताभ्याम्; येनावयवभेदेऽवयविनो वा समवायस्य वाऽभेदो भवेदिति समः समाधिः। तस्माद् यद् यदवयविनि प्रमाणं वक्ष्यामः तत्तदसति बाधकेऽप्रत्यूहमवयविनमवस्थापयिष्यतीति सिद्धम्। यः पुनर्मन्यते अवयवसमुदाय एवावयवीति, तं प्रत्याह भाष्यकारः—समुदाय्यशेषतेत्यादि। सुगमम्।

(क) अत्राऽऽदर्शपुस्तकयोर्दृश्यमानः 'सम्बध्यमानं वा न वास्तवः कश्चित् कार्यकारणभावो नामास्ति सम्बन्धः। प्रतीत्य कथमेकम्। समुत्पादमात्रं तदिति' इति पाठः प्रामादिकः, तत्र स्वबुद्ध्या एवं योजितम्।

(ख) 'रासभादीन्' इत्यादर्शपुस्तकयोः पाठः, औचित्यादेव शोधितम्।

(सू०)—साध्यत्वादवयविनि सन्देहः ॥ ३३ ॥

न्यायभाष्यम्

यदुक्तमवयविसद्भावादिति, अयमहेतुः साध्यत्वात्। साध्यं तावदेतत् कारणेभ्यो द्रव्यान्तरमुत्पद्यत इति, अनुपपादितमेतत्। एवं च सति विप्रतिपत्तिमात्रं भवति विप्रतिपत्तेश्चावयविनि संशय इति ॥ ३३ ॥

न्यायवार्त्तिकम्

साध्यत्वादवयविनि सन्देहः। कारणेभ्यो द्रव्यान्तरमुत्पद्यत इति साध्यमेतत्। किं पुनरत्र साध्यम्? किमव्यतिरेकोऽथावयवीति। यद्यवयवी, न लिङ्गमस्ति धर्मिणि विप्रतिपत्तेः। नहि धर्मिणि विप्रतिपद्यमानः कुतश्चिदभ्यनुज्ञां लब्धुमर्हति। न च धर्मिणि विप्रतिपत्तेर्बीजमस्ति सादृश्याभावात्। नहि सादृश्यमन्तरेण विप्रतिपत्तेर्बीजमस्ति। किं कारणम्?

न्यायवार्त्तिकतात्पर्यटीका

साध्य-हः (सू० ३३)॥ न परं प्रत्यसिद्धत्वमेवावयविनः साध्यत्वम्। स खल्वेवं मेने संविन्निष्ठा हि विषयव्यवस्थितिः। स एव संविदा व्यवस्थाप्यते यस्तस्या विषयः। स एव विषयो य आकारमस्यामर्पयति। न च निरन्तरोत्पन्नरूपादिपरमाण्वतिरिक्तमवयव्याकारं बिभ्रतीं संविदमीक्षामहे किं तु निरन्तरोत्पन्नरूपादिपरमाण्वाकाराम्। स्थौल्यं च न यद्यपि परमाणूनां प्रत्येकमस्ति तथाऽपि प्रतिभासधर्मो बहुत्वादिवन्न पुनरवयविनमेकमवस्थापयितुमर्हति। यदाहुः सोऽयममूल्यदानक्रयी स्वाकारं च ज्ञाने समर्पयति प्रत्यक्षतां च स्वीकर्तुमिच्छत्यवयवीति। तदेवं परं प्रत्यवयविनोऽसिद्धेर्विप्रतिपत्तिः। ततः साधकबाधकप्रमाणाभावे सति संशय इत्यर्थः। न साध्यत्वं स्वरूपेण संशयहेतुरिति मत्वा भाष्यकृदाह—एवं च सतीति। परासिद्धत्वे सतीत्यर्थः।

साध्यत्वादिति यथाश्रुतं सूत्रं गृहीत्वा वार्त्तिककारो विकल्प्याऽऽक्षिपति—किं पुनरत्रेति। (क)कुतश्चिद् हेतोः तस्य धर्मिणः अभ्यनुज्ञानम् अङ्गीकारम् अर्हति सर्वस्यैव हेतोराश्रयासिद्धेरिति

वृत्तिः

यतो ह्यवयव्यस्ति अतस्तदवयवप्रत्यक्षकालेऽवयविनोऽपि प्रत्यक्षं न व्याहतम्, तेनापि सह चक्षुःसंयोगादिसत्त्वादिति भावः ॥ ३२ ॥

समाप्तं प्रत्यक्षपरीक्षाप्रकरणम् ॥ ३ ॥

अवयविसद्भावादिति हेतुसाधनायोपोद्घातसङ्गत्याऽवयविप्रकरणमारभते—(साध्यत्वादिति)

(क) अत्र वार्त्तिकगतं 'नह्री'ति 'लब्धु'मिति च न गृहीते, 'अभ्यनुज्ञा'मित्यत्र च 'अभ्यनुज्ञानम्' विशेषः।

न्यायवार्त्तिकम्

विप्रतिपत्तिर्नाम विपरीता प्रतिपत्तिः। तस्याश्च कारणं समानधर्मोपलब्धावनवगतविशेषस्य तद्विपरीतधर्माध्यारोपः। न चानभ्युपगतावयविनोऽवयविनि सादृश्यं किञ्चिदस्ति। नापि तद्विपरीतधर्माध्यारोपः। तस्मान्न विप्रतिपत्तिः। अथाव्यतिरेकः साध्यः, तत्राव्यतिरेकप्रतिपादकं प्रमाणं वक्तव्यम्। न ह्यप्रामाणिकी काचित् प्रतिपत्तिरस्ति। इदं प्रमाणमर्थान्तरानवयवत्वम्—अर्थान्तरमर्थान्तरस्यावयवो न भवति, यथा न गौरश्वस्यावयवः, अवयवाश्च तन्तवोऽवयवी च पटः, तस्मान्नासौ तेभ्योऽर्थान्तरमिति।

इदं तावद् यथाश्रुति वाक्यं हेतुहीनम्। न ह्यत्र हेतुरस्तीति। ननु चोपनयेन व्यज्यमानो हेतुरवयवत्वमस्ति, नार्थान्तरं पटात्तन्तवः तदवयवत्वादिति; न, व्याघातात्। अनर्थान्तरभावे नावयवत्वं सिध्यति तन्तूनामिति। किं कारणम्? अवयव्यपेक्षत्वात्—अवयव्यपेक्षोऽवयवः, न चावयविप्रत्याख्यानेऽवयवत्वे किञ्चिद्बीजमस्ति। अर्थान्तरे च दर्शनाद् विरुद्धः स्यात्, दृष्टोऽवयवोऽर्थान्तरभावे नानर्थान्तरभाव इति। यथा तन्तवो(१)ऽवयवा घटादर्थान्तरमिति। षष्ठीविशेषणादप्रसङ्ग इति चेत्?—पटस्यावयवा इत्युक्ते घटादिषु कः प्रसङ्गः? नन्वत्रोक्तम्। किम्? व्याघातादिति। न ह्यनर्थान्तरभावे अवयवोऽस्ति, न च षष्ठी। न च तन्तुस्तन्तोरवयवः, नापि षष्ठ्यर्थः, तन्तोस्तन्तुरवयव इति। उत्पन्नस्याऽवयवत्वं तन्तूनाम्, तस्य नान्वयो न व्यतिरेक इति असाधारणत्वादहेतुः। अनर्थान्तरं पटात् तन्तव इति च तन्तून् पक्षीकृत्य तदवयवत्वादिति ब्रुवाणस्तन्तूनां तन्त्ववयवत्वं ब्रवीति। एतच्च विरुद्धम्, न तन्तवस्तन्तूनामवयवा इति। अथ पटः पक्षीक्रियते, तथाऽपि व्यधिकरणो हेतुः अवयवत्वस्य तन्तुधर्मत्वात्—

न्यायवार्त्तिकतात्पर्यटीका

भावः। अथाव्यतिरेक इति, सत्येव धर्मिणि तस्यावयवेभ्योऽभेदो धर्मः साध्य इत्यर्थः। अवयव्यपेक्षत्वादिति। पटमपेक्ष्य हि तन्तवोऽवयवा भवन्ति नो खलु रण्डाकरण्डावस्थितास्तन्तवोऽवयवा उच्यन्त इति। न च षष्ठीति। पटस्यावयवास्तन्तव इति न षष्ठी। तथा च पटस्येति विशेषणाभावे अवयवत्वमात्रं हेतुः स्यात स च विरुद्ध इत्यर्थः। अनर्थान्तरभावे नावयवत्वमित्यस्योदाहरणम्—न च तन्तुस्तन्तोरिति। षष्ठ्यर्थाभावे तूत्तरमुदाहरणमिति। तन्तूनां तन्त्ववयवत्वं ब्रवीतीति, तच्छब्दस्य प्रधानपरामर्शकत्वादित्यर्थः। अवयव-

वृत्तिः

अत्र चावयविनि सन्देहः साध्यत्वादिति यथाश्रुतार्थो न सङ्गच्छते वह्न्यादौ व्यभिचारात्। तस्मादयमर्थः—अवयविनि साध्यत्वाद् असिद्धत्वात् सन्देहोऽवयविसद्भावादित्युक्तहेतोः, तथा च सन्दिग्धासिद्धो हेतुरित्यर्थः।

---

(१) 'अवयवा' इति ख-पुस्तके नास्ति।

न्यायवार्त्तिकम्

तन्तुधर्मोऽवयवत्वम्, न पटधर्म इति। अवयवशब्दस्य च कारणविशेषवाचकत्वात् असत्यवयविनि व्याघातः। यद्यवयविनमर्थान्तरं न प्रतिपद्यसे कस्य तन्तवः कारणम्? नहि कारणमात्मानं निर्वर्तयतीति।

नैव हि नः किञ्चिन्निर्वर्त्यमस्ति, त एव तन्तवः संस्थानविशेषावस्थिताः पटाख्यां लभन्त इति अपटाख्यास्तन्तवः पटशब्देनाभिधीयन्त इत्युक्तं भवति। एतच्च विरुद्धम्, मुख्यासम्भवात्। नहि तन्तूनामपटानां पटेन किञ्चित्सामान्यमस्ति। न चासति सामान्ये मिथ्याप्रत्ययस्य बीजमस्तीत्युक्तम्। यच्चेदमुच्यते संस्थानविशेषावस्थानमिति, किं तदर्थान्तरभूतमाहो नेति? यद्यर्थान्तरभूतम्, किं तदिति वक्तव्यम्। अथ नोच्यते? शून्यं तर्हि इदं वाक्यं "संस्थानविशेषावस्थान"मिति। अस्माकं तु संस्थानविशेषः संयोगः स चार्थान्तरम्।

नानभ्युपगमात्—न मयाऽर्थान्तरं संयोगः प्रतिपाद्यते अन्यासंयोगादिति। अन्यदन्यस्य संयोगो न भवति, यथा गौरश्वस्य न संयोगः, अङ्गुल्योस्तु संयोगस्तस्मान्नार्थान्तरमिति। न, उक्तोत्तरत्वात्—उक्तोत्तरमेतत्। किमिति? अर्थान्तरानर्थान्तरयोर्व्यावृत्तेः संयोगोऽसाधारणः,

न्यायवार्त्तिकतात्पर्यटीका

शब्दस्य चेति। पूर्वं कारणमविवक्षित्वा अवयवशब्दस्य परापरशब्दवत् संबन्धिशब्दतामात्रं गृहीत्वोक्तम्, संप्रति कारणत्वं विवक्षित्वोच्यत इत्यपौनरुक्त्यम्।

देशयति—नैव हीति। असत् क्रियमाणं निर्वर्त्यम्, न चास्माकं सत्कार्यवादिनां तदस्तीत्यर्थः। दूषयति—एतच्चेति। न हि पटाकारप्रत्ययस्तन्तुमात्रालम्बनो रण्डाकरण्डावस्थितेष्वपि तन्तुषु प्रसङ्गात्, न च तन्तुपरिमाणभेदालम्बनः तस्य पूर्वमपि सत्त्वात्, असत्त्वे वा सत्कार्यवादव्याहतिप्रसङ्गात् तस्यैवासत उत्पत्तेः। (क)तस्मात्तन्तुष्वपटेषु पट इत्यकामेनापि मिथ्याप्रत्यय इति वक्तव्यम्, तथा च दूषणमिति।

वृत्तिः

तत्र च द्रव्यत्वं स्पर्शवत्त्वं वाऽणुत्वव्याप्यं न वेत्यादयो विप्रतिपत्तयः। तत्र च सकम्पत्वाकम्पत्व-रक्तत्वारक्तत्वावृतत्वानावृतत्वादिलक्षणविरुद्धधर्माध्यासादेकोऽवयवी न सम्भवति। तथाहि—शाखावच्छेदेन कम्पः, मूलावच्छेदेन तदभाव उपलभ्यते। न चैकस्मिन्नेव द्रव्ये एकदैव विरुद्धधर्मद्वयसमावेशः सम्भवति। तस्मादवयवा एव तथाभूताः, न त्वन्योऽवयवी, मानाभावात्। एवं महारजनरक्तैकदेशस्यांशुकस्य दशावच्छेदेनारक्तत्वोपलम्भात्, एवमावृतपृष्ठादेरनावृतत्वोपलम्भादवसेयमिति बौद्धानां पूर्वपक्षः।

(क) अत्राऽऽदर्शपुस्तकयोः "तस्मात्तन्तुष्वपटेषु पट" इति पाठस्य प्रामादिकत्वबुद्ध्या एवं संशोधितम्।

न्यायवार्त्तिकम्

प्रतिज्ञैकदेशश्च नार्थान्तरं संयोगः संयोगत्वादिति। विशेषणभावाच्चार्थान्तरं संयोगः—संयुक्ते द्रव्ये आहरेत्युक्ते ययोर्द्रव्ययोः संयोगं पश्यति ते इतरेभ्यो विशिष्य (क) संयुक्ते आहरति। न विशेषणस्यान्यथासिद्धत्वात्—यदिदं भवताऽभिधीयते संयुक्ते द्रव्ये आहरेति विशेषणभावादर्थान्तरं संयोग इति, तदन्यथा सम्भवति। कथम्? प्रत्यासत्तौ प्रतीघातावसानायां संयोगव्यवहारः—तावद् द्रव्याणि प्रत्यासीदन्ति यावत् प्रतिहतानि भवन्ति, तस्मिन् प्रतिघाते संयोगव्यवहारो नार्थान्तर इति। (ख) अनभ्युपगतार्थान्तरसंयोगेन प्रत्यासत्तिप्रतिघातौ वक्तव्यौ। तत्र संयुक्तसंयोगाल्पीयस्त्वं प्रत्यासत्तिः, मूर्त्तस्पर्शवद्द्रव्यसंयोगः प्रतीघातः। यः पुनः संयोगं न प्रतिपद्यते तेन प्रत्यासत्तेः प्रतिघातस्य चार्थो वक्तव्य इति। यदि चार्थान्तरं संयोगो न स्यात् क्षेत्रोदकबीजाग्नीन्धनादीनि सर्वत्रावस्थितानि सर्वत्राङ्कुरपाकादिकार्यं कुर्युः तान्येव तानीति। तस्माद् यस्तैरपेक्ष्यते सोऽर्थोऽन्यः, तस्मिन् संयोग इति संज्ञेति। क्षेत्रोदकबीजाग्नीन्धनानि अङ्कुरपाकादिकार्योत्पत्तौ सापेक्षाणि सर्वदा तत्कार्यानारम्भाद्दण्डादिवत्—यथा दण्डाद्यनेकं कारणं संयोगादिनिमित्तान्तरापेक्षं (ग) सर्वदा न घटपटादिकार्यं करोति तथा बीजाद्यपि, तस्मात् तदपि सापेक्षमिति।

यत्त्वत्र परेणोच्यते—

"कार्योत्पत्तिर्विना तेन शब्दायस्कान्तकर्मव"दिति। अस्यार्थः—यथा किल शब्दः शब्दान्तरमारभमाणो विना संयोगमारभते, यथाऽयस्कान्तोऽयः समाकर्षति विना संयोगेन, यथा कर्म संयोगविभागौ करोति विना संयोगेन, तथाऽन्याऽपि कार्योत्पत्तिर्विना संयोगेन भविष्यतीति।

न हेत्वर्थापरिज्ञानात्—न ब्रूमः, अस्ति संयोगः कार्योत्पत्तेः, अपि तु क्षेत्रोदकबीजाग्नीन्धनानि सापेक्षाणीति। यदि च निरपेक्षं किञ्चित्कारणं सर्वदाऽऽरम्भकं स्यात् भवेदनैकान्तिको हेतुः, तत्तु न केनचिच्छक्यं प्रतिपादयितुम्, शब्दः शब्दान्तरमारभमाणः स्वकारणपरिच्छिन्नाकाशदेशप्रत्यासत्त्यपेक्ष आरभते शब्दस्याव्यापकत्वात्। अयस्कान्तोऽप्ययः समाकर्षति स्वाश्रयप्रत्यासत्त्यपेक्ष एव। यदि च निरपेक्ष आकर्षेत् न क्वचिदयांस्यवतिष्ठेरन् तस्मान्न निरपेक्ष इति। कर्मापि स्वाश्रयप्रत्यासत्त्याभिमुख्यापेक्षं संयोगं करोति, न निरपेक्षं कर्म, न प्रतिलोममिति। यद्यनपेक्षं संयोगं कुर्यात् पाण्ड्यमथुरासम्बन्धिनि देवदत्ते उत्पन्नं कर्म तक्षशिलासम्बन्धिनि यज्ञदत्ते संयोगं कुर्यात्। न त्विदमस्ति। न चेदं प्रतिज्ञायते सर्वस्य कारणं संयोगः, अपि तु सापेक्षमारभत

न्यायवार्त्तिकतात्पर्यटीका

प्रतिज्ञैकदेशश्चेति, संयोगमात्रपक्षीकरण इत्यर्थः। तान्येव तानीति तान्येव प्रत्यासन्नानि, क्षणभङ्गपरिणामप्रतिक्षेपादित्यर्थः। यथा दण्डाद्यनेकं कारणमिति, दण्डवेमाद्यनेकं कारणं घटपटादीनां कार्याणाम्। संयोगादिनिमित्तान्तरापेक्षमिति, संयोग आदिर्येषां निमित्तान्तराणां

(क) 'संयुक्ते' इत्येतदत्र मुद्राप्रमादादागतमिति सम्भाव्यते। (ख) सिद्धान्ती दूषयति अनभ्युपगतेति।
(ग) सर्वदेति संयोगाभावदशायामिति तु हृदयम्।

न्यायवार्त्तिकम्

इति। सूत्रव्याघात इति चेत्—अथ मनुषे यदि सापेक्षं कर्म संयोगं करोति ननु पारमर्षं सूत्रं व्याहन्येत—

"एकद्रव्यमगुणं संयोगविभागयोरनपेक्षकारणं कर्मेति"(१)।

न व्याघातः, सूत्रार्थापरिज्ञानात्—न भवता सूत्रार्थो व्यज्ञायि। नायं सूत्रार्थः निरपेक्षं कर्म संयोगविभागकारणमित्याश्रयाद्यपि नापेक्षते इति, अपि तु चरमभाविनिमित्तान्तरं नापेक्षत इति सूत्रार्थः। यथा द्रव्यमुत्पन्नं चरमभाविनं संयोगमपेक्षमाणं पश्चादारभते, यथा वा संयोगो गुणकर्मस्वारब्धव्येषु पश्चाद्भाविसंस्कारप्रयत्नादृष्टाख्यं निमित्तमपेक्षते, यथा वा कारणेषु वर्तमाना रूपादयः कार्यरूपादिष्वारब्धव्येषु द्रव्योत्पत्तिमपेक्षन्ते उत्पाद्यस्याऽऽधारभावात्—यदुत्पाद्यं द्रव्यं तत्तेषामाधार इति, न तु कर्म(क) पश्चाद्भाविनिमित्तमपेक्षत इत्यनपेक्षत्वं कर्मणः शास्त्र उक्तम्; न पुनः कर्माश्रयाद्यपि नापेक्षत इति। संयोगे सापेक्षत्वप्रसङ्ग इति चेत्—यदि पश्चाद्भाविनिमित्तान्तरानपेक्षत्वं कर्मणो निरपेक्षत्वार्थः, अपि तर्हि संयोगे कर्तव्ये कर्म सापेक्षं प्राप्नोति विभागापेक्षित्वात्; न हि विभागमन्तरेण कर्म संयोगं करोति। तस्माद्विभागापेक्षित्वं कर्मणः प्रसक्तम्, ततश्च तदवस्थः सूत्रव्याघातदोषः। न सन्देहात्—किं विभागापेक्षेण कर्मणा संयोगो जन्यते, उत प्रतिबन्धकं विभागेन निवर्त्यत इति सन्दिह्यते। वयं तु ब्रूमः—विभाग उत्पन्नः पूर्वसंयोगनिवृत्तिं करोति, निवृत्ते संयोगे कर्म प्रतिबन्धकापगमात् संयोगं करोति। यथा गुरुत्वं निरपेक्षं कर्मकारणमित्युद्दिष्टं शास्त्रे, अथ च वृन्तफलविभागान्निवृत्ते वृन्तफलसंयोगे गुरुत्वं लब्धवृत्ति (सच्च) पतनकर्म करोति, तथा कर्मापीत्यदोषः। यथा वा संयोगः साधारणकार्यद्रव्यसंयोगविनाशोत्तरकालं द्रव्यान्तरारम्भे निरपेक्षः कारणमिति न विभागापेक्षो द्रव्यमारभते तथा कर्म संयोगमारभमाणं न विभागमपेक्षत इति, अतोऽपि न सूत्रव्याघातः।

न्यायवार्त्तिकतात्पर्यटीका

कुम्भकारकुविन्दादीनां तानि निमित्तान्तराणि। अतद्गुणसंविज्ञानो बहुव्रीहिः यथा चित्रगुरिति। तेन साध्यस्यैव दृष्टान्ततेति न दोषः। विमृश्यावधारयति—वयं तु ब्रूमो विभाग उत्पन्न इति, संयोगोऽनपेक्षकर्मकारणकः कर्मकार्यत्वाद्विभागवदिति स्थिते प्रतिबन्धकापगममात्रं विभागेन क्रियत इति सिध्यति। यथा वा संयोगः साधारणकार्यद्रव्येति। यदा हि पटः पाट्यते तदा येषामवयवानामवस्थितानां संयोगानां पटाख्यं साधारणं कार्यं तस्य साधारणस्य कार्यद्रव्यस्य पटस्य च तदसमवायिकारणानां च संयोगानां केषाञ्चिद्विनाशोत्तरकालमर्द्धपटारम्भे तेषामनपेक्षाणां कारणत्वं विभागस्तु कर्मजन्यस्तत्र कतिपयसंयोगविनाशद्वारेण साधारणपटादिकार्यविनाशमात्रे व्याप्रियते न तु विभागापेक्षा। अर्द्धपटे जनयितव्ये संयोगः कारणमित्यर्थः।

---

(१) काणादसूत्रमिदम् १ अ० १ आ० १७ सू०।

(क) अत्र 'तथे'त्यर्थतो बोध्यम्।

न्यायवार्त्तिकम्

यदप्युक्तम्—कर्म विना संयोगेन संयोगं करोति, तदपि न ; व्याघातात्—न संयोगोऽस्ति कर्म च संयोगं करोतीति व्याहतम्। न ह्यसति संयोगे वाक्यमेतदर्थवत्तायां व्यवतिष्ठत इति। अथवा (१)ऽनेन व्याघातः—गतिविभागसंयोगाश्च प्रतिषिध्यन्ते, अथ च कर्म संयोगं करोतीति व्याहतम्। अथ मनुषे—परमतव्यपेक्षयोक्तः संयोगविभागकर्मणां प्रतिषेधः नास्माभिः संयोगविभागकर्माण्यभ्युपगम्यन्ते इति, एवमप्यनिवृत्तो व्याघातः—यानि तानि परमताभ्युपगतानि संयोगविभागकर्माणि तानि भवता कथं प्रतिपद्यन्ते ? यदि प्रमाणतः, कथं पराभ्युपगतानि। अथ प्रमाणमन्तरेण, कथं प्रतिपद्यसे ? न हि प्रमाणमन्तरेण काचित् प्रतिपत्तिर्युक्तेति। अथ (२)नैव प्रतिपद्यसे, व्याहतं तर्ह्येतद्भवति परपक्षप्रसिद्धानि संयोगविभागकर्माणीति। अथ मनुषे यानि भवताऽभ्युपगम्यन्ते संयोगविभागकर्माणि, तानि न सन्ति, न पुनः संयोगविभागकर्मप्रतिषेधः। कथम् ? देशान्तरे विरलद्रव्योत्पादे गतिव्यवहारः—यः सन्तानो विरलो देशान्तरेषूत्पद्यते तत्र गतिव्यवहारः, निरन्तरोत्पादे संयोगव्यवहारः, ये वस्तुनी निरन्तरमुत्पद्येते तयोर्यो निरन्तरोत्पादः स संयोगः ; संयोगविपर्ययाद्विभागः। अत्र तावदुक्तं वृक्षस्थितिं भावयद्भिः—न प्रमाणाभावादिति, न हि क्षणिकत्वे प्रमाणमस्तीति।

सान्तरनिरन्तरबुद्ध्योश्च निमित्तं वक्तव्यम्—यदि संयोगं विभागं निमित्तान्तरं न प्रतिपद्यसे सान्तरमिति बुद्धेर्निरन्तरमिति च बुद्धेर्भेदहेतुर्वक्तव्यः। नहि निमित्तभेदमन्तरेण बुद्धीनां भेदो दृष्टो रूपादिवदिति। या चेयमचलति चलतीति बुद्धिर्या असंयुक्ते संयुक्तमिति अविभक्ते विभक्तमिति च (३)सा च प्रधानमन्तरेण न भवति। सर्वा एता मिथ्याबुद्धयः प्रधानानुकारेण भवन्तीति प्रधानं व्यक्तव्यम्। नहि निष्प्रधानं भाक्तं दृष्टं स्थाणुपुरुषवदिति—यथा स्थाणौ सति पुरुषे स्थाणुरिति बुद्धिः, पुरुषे वा सति स्थाणौ पुरुषबुद्धिरिति। यदि चार्थान्तरं संयोगो न स्यात् कुण्डलीत्यस्या बुद्धेः किञ्चिन्निमित्तमवश्यं विधीयमानं प्रतिषिध्यमानं वा निमित्तान्तरमुपादेयम्। न तावत् कुण्डलनिमित्ता नापि देवदत्तनिमित्ता, न च भवता निमित्तान्तरं प्रतिपाद्यते, निमित्तान्तरं चान्तरेण यथा कथञ्चिद्व्यवस्थिताभ्यां देवदत्तकुण्डलाभ्यां कुण्डलीति बुद्ध्या भवितव्यम्। तस्मादवश्यं विधीयमानं प्रतिषिध्यमानं वा निमित्तान्तरमभ्युपगन्तव्यम्।

न्यायवार्त्तिकतात्पर्यटीका

न हि प्रमाणमन्तरेणेति, मिथ्याज्ञानमपि प्रमाणपूर्वकं सम्यग्ज्ञानपूर्वकत्वाद्विपरीतख्यातेरित्यर्थः। **वृक्षस्थितिं भावयद्भिः** पूर्वापरप्रत्ययैकविषयस्य वृक्षस्य स्थितिं स्थिरतां भावयद्भिरित्यर्थः।

---

(१) 'तेन' इति क-वार्त्तिकपाठः। (२) 'नेवं' इति ख-वार्त्तिकपाठः। (३) 'सार्वप्रधानम्' इति ख-पुस्तकपाठः।

न्यायवार्त्तिकम्

यदि प्रतिषिध्यमानम्, यदन्यत्र भवति तदन्यत्र प्रतिषिध्यत इति प्रतिषिध्यमानस्य विषयो वक्तव्यः। तस्मान्न कथञ्चन संयोगः प्रतिषेद्धुं शक्यते। इहबुद्धिनिमित्तत्वाच्च—इयमिहबुद्धिः प्रवर्तमाना नर्ते सम्बन्धात् प्रवर्तते यथेह कुण्डे बदराणीति, नेयं बदरमात्रनिमित्ता न कुण्डमात्रनिमित्तेति यदस्या निमित्तं स संयोग इति। इहेति बुद्धिर्यदि संयोगाद्(क)अनियमो न प्राप्नोति? यदि संयोगादिहबुद्धिर्भवति असति संयोग इहबुद्धिर्न स्यात्—यथा सन्तीह वने तिलकाः, सन्तीह वने किंशुका इति। दूराच्चान्तरमपश्यतां किंकृतेहबुद्धिः? नहि तत्रास्ति संयोग इति। न, इह बुद्धेरुभयनिमित्तत्वात्—उभयमिहबुद्धेर्निमित्तं संयोगो विभागादर्शनं च। तत्रैका मुख्या, एका भाक्ती। या संयोगात् सा तत्त्वबुद्धिरिति, या विभागादर्शनात् सा भाक्तीति। या चेयं भाक्ती सा प्रधानसामान्यदर्शनादुपजायते, न प्रधानं प्रत्याचष्टे। नहि प्रधानप्रत्याख्यानेन भाक्ती बुद्धिर्भवितुमर्हतीति। भाक्त्य एव सर्वा भविष्यन्तीति न युक्तं प्रधानापेक्षित्वाद्वित्युक्तम्। यदपीदमुच्यते विना संयोगेनेहबुद्धिर्दृष्टा यथा सन्तीह वने तिलकाः, सन्तीह वने किंशुका इति, तत्र सम्प्रधार्यं किं सम्बन्धो नास्ति उत संयोगो नास्ति। वयं तु ब्रूमः संयोगो नास्ति न तु सम्बन्धः, सम्बद्धं हि वनं तिलकादिभिरिति।

किं पुनरिदं वनं नाम? नेदं दुर्वचम्। उक्तमेतद् बहुत्वसंख्या सविशेषणेति। ऊर्ध्वावस्थिते च द्रव्ये संयुक्तबुद्धौ सत्यामिहबुद्धिः कस्मान्न भवति? तयोरेव द्रव्ययोस्तस्मिन् संयोगे सति न भवतीति। किम्भूतो नियमः? न अपरिज्ञानात्—संयोगमन्तरेण निर्निमित्ता इहबुद्धिर्न भवतीति ब्रूमः, न पुनर्भवत्येवेहबुद्धिः सति संयोग इति। न चोत्तराधरानपेक्षेण संयोगेनेहबुद्धिः न क्रियत इति तत्पूर्विका न भवति। यत्पुनरेतत् असति सम्बन्धे अस्य द्रव्यस्येह समवाय इतीहबुद्धिर्न प्राप्नोति, यथेह तन्तुषु पट इति बुद्धेः समवायो निमित्तम्; न पुनः समवायस्य समवायोऽस्ति, इह समवाय इति न स्यात्? अत्रोक्तम्। किमुक्तम्? मिथ्याप्रत्यय एवैष इति। किं पुनः समवायवद्भिर्द्रव्यैः समवायस्य सामान्यम्, यदपेक्षया स मिथ्याप्रत्ययः प्रवर्तते? भेदादर्शनम्,—यानि समवायवन्ति न तेषां भेदो दृश्यते समवाये चैतदस्तीति युक्तो मिथ्याप्रत्ययः। वाक्यधर्मभेदाच्चानियमः—न चैकस्मिन् वाक्ये यो धर्मः स वाक्यान्तरेऽपि भवतीति; यथा राज्ञः पुरुषो गच्छतीति त्रीणि पदानि, त्रीण्यपि स्वेन स्वेनार्थेनार्थवन्ति भवन्तीति उदकस्य भावो भवतीति नैतद्वाक्यसामान्याद्(ख)अस्मिन्नपि वाक्ये त्रीण्यपि पदानि

न्यायवार्त्तिकतात्पर्यटीका

भेदादर्शनमिति आकारिभेदादर्शनम्, यथा घटपटावाकारिणौ भेदेन दृश्येते नैवमवयवा-

(क) अत्र 'अनियमः प्राप्नोति' इत्यर्थः काकाऽधिगन्तव्यः। 'अनियमः' नियमाभावः संयोगस्य व्यतिरेके व्यभिचारेण व्यापकत्वभङ्गरूपः, स एव 'असति संयोग' इत्यनेन दर्शितः। (ख) आदर्शपुस्तकयोः—'एकस्मिन्नपि' इति पाठो मुद्राप्रमादकृत इति बुद्ध्या परित्यज्यैवं शोधितः।

न्यायवार्त्तिकम्

पृथगर्थवन्ति भवितुमर्हन्ति। कः पुनरस्य वाक्यस्यार्थः उदकस्य भावो भवतीति। यावदुक्तं भवति—उदकं भवति, तावदुक्तं भवति उदकस्य भावो भवतीति। (क)एवमन्यान्यपि वाक्यानि कुण्डे बदराणां वृत्तिरिति यथा वृत्तौ दर्शितायां वृत्तिमत्सु बदरेषु सम्प्रत्ययः—एतदुक्तम्भवति कुण्डे बदराणि वर्त्तन्त इति (१) तथेह द्रव्ये द्रव्यस्य समवाय इति ब्रुवाणेनोक्तं भवति अत्र द्रव्ये द्रव्यं वर्तत इति। तस्मादज्ञात्वा (२) वाक्यविभागमुच्यते अस्य द्रव्यस्येह समवायोऽसति निमित्त इति। तस्मादुपपन्नमर्थान्तरं संयोग इति। उपपत्तौ च न संस्थानविशेषेणावस्थितास्तन्तवः पटबुद्धेः कारणं भवन्तीति।

अपरे पुनरन्यथा अर्थान्तरानवयवत्वादित्येतद्वाक्यं वर्णयन्ति अवयवावयविभावादिति। एतत्तु तैः कुतो लभ्यते? न ह्ययमर्थोऽर्थान्तरानवयवत्वादित्येतस्मिन् वाक्ये श्रूयते। उपनयेन लभ्यत इत्याह—यस्मादयमुपनयः अवयवास्तन्तवोऽवयवी पट इति, उपनयेनावयवावयवित्वादिति हेतुर्लभ्यते। सत्यं लभ्यते, विरुद्धस्तु भवति। न हि तन्तवः स्वात्मनोऽवयवाश्चावयवी च, न पटः आत्मनोऽवयवोऽवयवी चेति। किं कारणम्? अवयवावयविशब्दयोः सम्बन्धिशब्दत्वात्—सम्बन्धिशब्दावेतौ अवयवोऽवयवी च। न चान्यतरप्रत्याख्यानेन सम्बन्धिशब्दप्रवृत्तिरस्ति। तस्मादयमपि न सूत्रार्थः।

दृष्टोऽनर्थान्तरेऽपि प्रदेशप्रदेशिव्यवहारः यथा आकाशस्य प्रदेश इति। न, उक्तोत्तरत्वात्—उक्तोत्तरमेतत्—अन्योऽवयवार्थोऽन्यश्च प्रदेशार्थ इति। कोऽवयवार्थः? कारणविशेषाभिधानमवयव इति, आधाराभिधानं प्रदेशः प्रदिश्यते अस्मिन्निति। न चाऽऽकाशं क्वचित् प्रदिश्यते न चाऽऽकाशस्य किञ्चित्कारणमस्ति। तस्मान्न कारणार्थो नाऽऽधारार्थ इति। सोऽयमाकाशे प्रदेशशब्दः प्रदेशवद्द्रव्यसामान्याद् द्रष्टव्यः। किं पुनः प्रदेशवता द्रव्येण सामान्यम्? संयोगस्याव्याप्य-

न्यायवार्त्तिकतात्पर्यटीका

वयविनौ नापि समवायसमवायिनावित्यर्थः। यस्मादयमुपनयः अवयवाश्च तन्तवोऽवयवी च पट इति; पूर्वमवयवाश्चेत्येतावन्मात्रं हेतूकृतं संप्रति त्ववयवावयविनावित्यपौनरुक्त्यम्।

अन्योऽवयवार्थ इति, अवयविनोऽन्योऽवयवशब्दार्थ इत्यर्थः। प्रदेशिनोऽन्यः

वृत्तिः

अत्र च बौद्धानां पूर्वपक्षसूत्राणि वार्त्तिककृता लिखितानि तानि च विस्तरभयान्न लिख्यन्ते ॥ ३३ ॥

---

(१) 'तथेह च' इति ख-वार्त्तिकपाठः। (२) 'वाक्यार्थं विभागम्' इति ख-वार्त्तिकपाठः।

(क) एवमन्यान्यपि वाक्यानि, यथा कुण्डे बदराणां वृत्तिरिति वृत्तौ दर्शितायाम् इति मनोरमः पाठः।

न्यायवार्त्तिकम्

वृत्तित्वम्। एनं चार्थमुपरिष्टाद्वक्ष्याम इति। तत्प्रदेशात्मकत्वादिति चेत्—अथ मन्यसे अयमन्यो हेतुरवयविनोऽनर्थान्तरत्वसाधकः तत्प्रदेशात्मकत्वम्। कोऽस्यार्थः? अनर्थान्तरं पटात्तन्तवः तत्प्रदेशव्यपदेशविषयत्वादिति—ये यस्य प्रदेशत्वेन व्यपदिश्यन्ते ते तस्याऽऽत्मानो भवन्ति, यथा आकाशस्य प्रदेशाः, पटस्य च प्रदेशत्वेन व्यपदिश्यन्ते तन्तवस्तस्मात् पटात्मानस्तन्तव इति। इदं तावद् यथाश्रुति वाक्यं पूर्ववद्धेतुहीनम्; तत्प्रदेशात्मकत्वस्यार्थान्तरानर्थान्तरयोरदर्शनाद-साधारणः, प्रदेशशब्दस्य कारणपर्यायत्वाद्विरुद्धः, तत्प्रदेशव्यपदेशविषयत्वस्य तन्तुभिरसम्बन्धा-दसिद्धः। योऽप्ययं दृष्टान्त आकाशस्य प्रदेश इति सोऽप्यसिद्धः। कथमिति? आकाशस्य प्रदेश इति संयोगस्याव्याप्यवृत्तित्वमुच्यते। न च संयोगस्याव्याप्यवृत्तित्वमात्रमाकाशम्, तस्मादसिद्धो दृष्टान्तः।

द्रव्यान्तरेभ्यो द्रव्यान्तरानिष्पत्तेर्नान्योऽवयव्यवयवेभ्यः—न किल द्रव्यान्तरेभ्यो द्रव्यान्तर-मुत्पद्यमानं दृष्टम्, न च गो-हस्त्यश्वेभ्यः पुरुष उत्पद्यते; तन्तुभ्यस्तूत्पद्यते पटः, तस्मान्नासौ तेभ्योऽर्थान्तरमिति। अस्यापि पूर्ववद्धेतुन्यूनता। उपनयेन व्यज्यमानस्तेभ्यस्तूत्पत्तेरिति हेतुः। अयमप्यर्थान्तरानर्थान्तरयोर्व्यावृत्तेरसाधारणः। अर्थान्तराच्च तुर्यादेरर्थान्तरस्य पटस्योत्पत्ति-दर्शनाद् विरुद्धः। पटपक्षीकरणे असम्बद्धार्थः न पटः पटादुत्पद्यत इति। अथ तच्छब्देन तन्तवः सम्बध्यन्ते, तन्तुभ्यः पट उत्पद्यत इति, तथाऽपि विरुद्धः न तन्तुस्तन्तुभ्यो भवति पटस्तु भवति।

नान्योऽवयव्यवयवेभ्योऽवयव्यन्तरावयवानामवयव्यन्तरार्थान्तरभावात्—इह येऽवयविनो-ऽर्थान्तरं भवन्ति तेऽवयव्यन्तरावयवा भवन्ति यथा चक्रादयो रथावयवा इति तेऽर्थान्तरं पटात्। यदि च तन्तवोऽपि पटादर्थान्तरं स्युः तेऽपि पटव्यतिरेकेणावयव्यन्तरावयवाः स्युः। न च ते तद्व्यतिरेकेणावयव्यन्तरावयवास्तस्मान्नार्थान्तरमिति। वाक्यमात्रे हेतुन्यूनता असाधारणता च दोषः। (क) हेतुस्तद्व्यतिरेकेणान्यानवयवत्वात् न तन्तवस्तन्तूनामवयवा इति विरुद्धः।

न्यायवार्त्तिकतात्पर्यटीका

प्रदेशशब्दार्थ इत्यर्थः। (ख)तत्प्रदेशशब्दस्य व्यपदेशविषयत्वस्येति। तन्तवो हि पक्षीकृताः प्रधानमिति तदिति सर्वनाम्ना हेतुगतेन परामर्ष्टव्याः। तथा च तन्तुप्रदेशस्य व्यपदेशविषयत्वं न तन्तूनामित्यसिद्धो हेतुरित्यर्थः।

तेभ्यस्तूत्पत्तेरिति कल्पितस्य हेतोर्विवरणं तन्तुभ्यस्तूत्पद्यते पट इति।

(क) तद्व्यतिरेकेणान्यानवयवत्वादिति हेतुर्विरुद्ध इति योजना।

(ख) तत्प्रदेशव्यपदेशविषयत्वस्येति वार्त्तिकमवार्थतो धृतमिति बोध्यम्।

न्यायवार्त्तिकम्

अर्थान्तरप्रत्याख्यानाच्चावयवोऽवयवीत्येतन्न स्यात्। यदपीदमुच्यते येऽवयवा अवयविनोऽर्थान्तरं भवन्ति ते तद्व्यतिरेकेणान्यावयवा भवन्ति यथा चक्रादय इति। न, उभयेन व्याघातात्—चक्रादयोऽवयवा इति ब्रुवताऽभ्युपगतमर्थान्तरं भवति। अनभ्युपगमे वा कोऽस्य वाक्यस्यार्थः चक्रादयो रथावयवा इति। ये च चक्रादयो रथावयवत्वेनाभ्युपगम्यन्ते तेऽप्यर्थान्तरप्रतिषेधान्न रथस्य नाप्यन्यस्यावयवा इति उच्छिन्नोऽवयवावयविशब्दस्य विषयः, तस्मादहेतुरयम्।

नान्योऽवयव्यवयवेभ्यो द्रव्यान्तरोत्पत्तिदेशव्यवच्छेदात्—यदुभयसम्प्रतिपन्नमर्थान्तरत्वेन तत् तस्माद्भिन्नदेशमुत्पद्यमानं दृष्टम्, यथा गौरश्वात्, न तु तन्तुभ्यो भिन्नदेशः पट उत्पद्यते तस्मान्नासौ तेभ्योऽर्थान्तरमिति। अत्रापि हेतुन्यूनता चासाधारणता च पूर्ववदिति। तद्देशोत्पत्तेरिति हेतुः न तन्तुस्तन्तुदेश उत्पद्यत इति विरुद्धः। उत्पत्तिप्रत्याख्यानं वा पटप्रतिषेधात्—यदि तन्तुभ्यः पटो नोत्पद्यते, क उत्पत्तिशब्दस्यार्थः, न तन्तुरुत्पद्यते न पट इति उत्पत्तिदेशव्यवच्छेदादित्युत्पत्तिशब्दस्यार्थो वक्तव्य इति। स च निरूप्यमाणो व्यक्त्यादिधर्मभेदेनापूर्वं जन्माहेति विरुद्धः।

नान्योऽवयव्यवयवेभ्यः, अवयवान्तरावयविनोऽवयवान्तरार्थान्तरभावात्—इह योऽवयवान्तराणामवयवी भवति सोऽवयवान्तरेभ्योऽर्थान्तरं भवति, यथा चक्रादिभ्यो घटः। चक्रादिभ्योऽवयवेभ्योऽर्थान्तरं घट इति चक्राद्यवयवव्यतिरेकेणावयवान्तराणामवयवी भवति, न तु पटस्तन्तुव्यतिरेकेणावयवान्तराणामवयवी भवति, तस्मान्नासौ तन्तुभ्योऽर्थान्तरम् (क)। तत्राप्यसाधारणता हेतुन्यूनता च पूर्ववत्। अवयवान्तराणामवयवीति ब्रुवता अवयव्यर्थान्तरभूतोऽभ्यनुज्ञातो भवति शून्यं वा वाक्यम्। अथ नाभ्यनुज्ञायते, कोऽस्य वाक्यस्यार्थः अवयवान्तराणामवयवीति। न ह्यवयविप्रत्याख्यानादेतद्वाक्यमर्थवत्तायां शक्यं व्यवस्थापयितुम्। तद्व्यतिरेकेणान्यानवयवित्वं हेतुरस्यापि प्रसङ्गः पूर्ववत्।

न्यायवार्त्तिकतात्पर्यटीका

उभयेन व्याघातादिति। अभ्युपगमेनानभ्युपगमेनेत्यर्थः। द्रव्यान्तरेति। द्रव्यान्तरोत्पत्तिदेशावच्छेदो व्यवच्छेदः, यथा पटोत्पत्तिदेशादन्यो घटोत्पत्तिदेश इत्यर्थः। व्यक्त्यादिधर्मभेदेनेति, आदिग्रहणेनाविर्भावसंस्थानादय उच्यन्ते ते च कारणव्यापारात् पूर्वं नाऽऽसन्निति जन्माऽपि तेषामपूर्वमित्यर्थः।

यथा चक्रादिभ्यो रथावयवेभ्य इत्यर्थः।

(क) अत्रायमाशयः—अवयवान्तरार्थान्तरत्वं व्याप्यम्, तद्व्यतिरेकेण अवयवान्तरावयवित्वं च व्यापकम् तदिह व्यापकं तत्व्यतिरेकेण अवयवान्तरावयवित्वं निवर्त्तमानं तद्व्याप्यमवयवान्तरार्थान्तरमपि निवर्त्तं तीति।

न्यायवार्त्तिकम्

नान्योऽवयव्यवयवेभ्यः सत्यन्यकर्तुरर्थान्तरभावात्—इह ये यस्मिन् सत्यन्यत् कुर्वन्ति ते तस्मादर्थान्तरं भवन्ति यथा कटात् तन्तवः, (क) सति कटेऽर्थान्तरं पटं कुर्वन्तीति कटादर्थान्तरं भवन्ति, न पुनः सति पटे तन्तवो द्रव्यान्तरं कुर्वन्ति तस्मात् ते नार्थान्तरमिति। (ख)अस्यापि हेत्वर्थः सत्यन्याकरणात्। अस्याप्यसाधारणता च पूर्ववत्। सति कटे तन्तवः पटं कुर्वन्तीति ब्रूषे न चार्थान्तरमिति व्याहतम्। नहि तन्तव आत्मानं कुर्वन्ति। पटमप्यर्थान्तराभावात् न कुर्वन्तीति चेत् क्रियाविषयोच्छेदः—न तन्तव आत्मानं कुर्वन्तीति नार्थान्तरं कुर्वन्तीति क्रियाविषय उच्छिन्नो भवतीति।

नान्योऽवयव्यवयवेभ्यः स्वात्मसंयोगव्यतिरेकभाव्यवयव्यन्यत्वात्—इह ये यस्मादर्थान्तरं भवन्ति ते आत्मसंयोगव्यतिरेकेण भवन्ति, तद् यथा तन्तुसंयोगव्यतिरेकेण कटो भवति, न च तन्तुसंयोगव्यतिरेकेण पटो भवति तस्मान्नासौ तेभ्योऽर्थान्तरम्। अस्यापि हेत्वर्थस्तन्तुसंयोगेभ्यस्तदुत्पत्तिरिति, अस्याप्यसाधारणता हेतुन्यूनता च पूर्ववदेव। तन्तुसंयोगेभ्यस्तदुत्पत्तिरिति ब्रुवता तन्तुव्यतिरिक्तः संयोगश्चावयवी चाभ्युपगतो भवति।

नान्योऽवयव्यवयवेभ्यो द्रव्यान्तरगुणानां द्रव्यान्तरगुणाकारणत्वे अगुणत्वप्रसङ्गात्—न किल द्रव्यान्तरगुणानां द्रव्यान्तरगुणेभ्यो दृष्ट उत्पादः। यथा न गोगुणेभ्योऽश्वगुणानाम्। तन्तुगुणेभ्यस्तु पटगुणानामुत्पत्तिस्तस्मान्नासौ तेभ्योऽर्थान्तरमिति। सोऽयमपन्यायो वर्तते। कोऽत्रापन्यायः ? तन्तुगुणेभ्यः पटगुणानामुत्पत्तिं प्रतिपद्यसे न चार्थान्तरं पट इति। न च तन्तुगुणेभ्यस्तन्तुगुणानामुत्पत्तिरिति तन्तुगुणेभ्यस्तद्गुणोत्पत्तिरिति हेतुर्विरुद्धः।

नान्योऽवयव्यवयवेभ्योऽप्रत्यक्षत्वप्रसङ्गात्—प्रत्यक्षाप्रत्यक्षवृत्तिरवयव्यप्रत्यक्षः स्यात् यद्यवयव्यर्थान्तरं स्यात्; यथा गर्भमातृसंयोगः प्रत्यक्षाप्रत्यक्षवृत्तिर्न प्रत्यक्षः, प्रत्यक्षस्त्ववयवी, तस्मान्नासौ तेभ्योऽर्थान्तरम्। प्रत्यक्षत्वादेव नार्थान्तरमिति विरुद्धो हेतुः। गर्भमातृसंयोगश्चाप्रत्यक्ष इति किमयं (ग)प्रत्यक्षाप्रत्यक्षाभ्यामारम्भादप्रत्यक्षः, उत प्रत्यक्षाप्रत्यक्षवृत्तित्वादप्रत्यक्ष इति। यद्याद्यः, हिमवत्परमाणुकमप्रत्यक्षं प्राप्नोति तस्य ह्येक एव प्रत्यक्ष एक एवाप्रत्यक्ष

न्यायवार्त्तिकतात्पर्यटीका

हिमवत्परमाणुकमिति। परमाणुग्रहणं सूक्ष्मद्रव्योपलक्षणार्थम्, न पुनः परमाणोर्द्व्यणुकादन्यत्रारम्भसंभवः। न च विवादाध्यासितः परमाणुर्न महद्द्रव्यमारभते परमाणुत्वाद् द्व्यणुकारम्भकपरमाणुवत्। अमहत्त्वाच्च न हिमवत्परमाणुकं प्रत्यक्षं स्यात्। तस्माद्धिमवद्धिमबिन्दुभ्यां संसर्गिभ्यां संयोगादवयविद्रव्यमारभ्यते महत्त्वं चास्यावयवमहत्त्वादुत्पद्यते। तथा

(क) अत्र 'तन्तवः' इति कर्त्तृपदं पूरणीयम्। (ख) अस्यापि प्रयोगस्येत्यर्थः। (ग) 'प्रत्यक्षाप्रत्यक्षाणां संयोगस्याप्रत्यक्षत्वात् पञ्चात्मकं न विद्यते' इति काणादसूत्रम् (अ० ४, आ० २, सू० २)।

न्यायवार्त्तिकम्

इति । अथ द्वितीयः, भावोऽप्रत्यक्षः (१) स्यात् स हि प्रत्यक्षाप्रत्यक्षवृत्तिरिति । न चायं पक्षोऽस्ति अवयवानामप्रत्यक्षत्वे अवयवी न प्रत्यक्ष इति । उक्तञ्चात्र । किमुक्तम् ? (क)येषामिन्द्रियार्थसन्निकर्षोऽस्ति अवयवानां तैः सहावयवी गृह्यते, येषां नास्ति तैः सह न गृह्यते । (२)न च तत्कृतोऽस्ति भेदः । अवयवानामप्रत्यक्षत्वादवयविनोऽप्रत्यक्षत्वं ब्रुवतः सर्वमतीन्द्रियं प्राप्नोति, न हि कस्यचिद् मध्यभागपरभागौ ज्ञायेते इति । सोऽयं प्रत्यक्षविषय उच्छिन्नो भवति ।

प्रत्यक्षत्वादिति च ब्रुवाणेन अवयवातिरिक्तोऽवयव्यभ्युपगतो भवति परमाणूनामतीन्द्रियत्वात् । न हि परमाणवः कदाचिदुपलभ्यन्ते । (ख) न परमाणवोऽतीन्द्रिया रूपादिमतामतीन्द्रियत्वनिवृत्तेः—न हि रूपादिमत् किञ्चिदतीन्द्रियमस्ति । दृष्टं च रूपादिमदैन्द्रियकं घटादि । (ग)ऐन्द्रियकाः परमाणव इति कोऽर्थः ? किन्तावदिन्द्रियकरणप्रत्यक्षा उत इन्द्रियसम्बद्धा इति । किं चातः ? यदीन्द्रियकरणप्रत्यक्षा ऐन्द्रियका इति, तन्न युक्तम् ; न हीन्द्रियमन्यस्यान्यथाऽर्थं प्रकाशयति अन्यथाऽन्यस्य, इन्द्रियवृत्तीनाम् (३)अविकल्पत्वात् । भवतां चेत् परमाणव ऐन्द्रियका अस्मदादीनामप्यैन्द्रियकाः स्युः । अथेन्द्रियसम्बद्धा ऐन्द्रियका इति, तस्मिन् न विरोधः । न हि परमाणव इन्द्रियेण न सम्बध्यन्त इति । तस्मादिन्द्रियसन्निकर्षे सत्यपि महत्त्वाभावान्न परमाणव उपलभ्यन्त इति ।

कथं पुनरवगम्यते महत्त्वमप्युपलम्भे रूपवत्कारणमिति ? भावाभावयोस्तद्वत्त्वात्—यस्मात् सति महत्त्वे रूपे चोपलब्धिर्भवति असति च न भवति, तस्मादुभयं कारणमिति । यत्त्वत्रोक्तं

न्यायवार्त्तिकतात्पर्यटीका

च चाक्षुषत्वमस्य भवति । एवं तोयदविमुक्तोदबिन्दूदधिसंयोगाद् द्रव्यान्तरोत्पत्तिः प्रतिपत्तव्या । भावोऽप्रत्यक्षः स्यादिति, 'भावः' सत्ता । ननु यथा संयोगः संयोगिद्वयनिरूपणाधीननिरूपणः तयोरेकस्यैवाप्रत्यक्षत्वे न प्रत्यक्ष एवमवयवाप्रत्यक्षत्वे नावयवी प्रत्यक्षः स्यादित्यत आह—न चायं पक्ष इति । संसृज्यमाननिरूपणाधीननिरूपणो हि संसर्गो (४)युक्तः, यत्तदनिरूपणे न निरूप्यत इति, न त्ववयवी अवयवनिरूपणाधीनो यत्तेष्वनिरूपितेषु न निरूप्यत इति, त्र्यणुकस्यावयवाग्रहणेऽपि ग्रहणात्, एवं विदूरवर्त्तिनो हस्तिवनस्पत्यादेरवयवाग्रहणेऽपि ग्रहणादिति भावः । **न च तत्कृतोऽस्ति भेद** इति, न ग्रहणाग्रहणकृतो भेद इत्यर्थः ।

न हीन्द्रियम् अन्यस्य सांख्यस्य **अन्यथा** सूक्ष्मत्वेन **अर्थं प्रकाशयति । अन्यस्य** नैयायिकस्य **अन्यथा** स्थौल्येन **अविकल्पत्वाद्** ऐकरूप्येणावस्थानादिति ।

(१) आदर्शपुस्तकयोः 'स्यात्' इत्यत्र 'प्राप्नोति' इति पाठः । (२) 'न चैतत्कृतः' इत्यादर्शपुस्तकयोः पाठः । (३) 'अविकल्पितत्वात्' क-ख । (४) आदर्शपुस्तकयोः 'युक्तम्' इति पाठः ।

(क) ४७३ अङ्कितपत्रे भाष्यं द्रष्टव्यम् । (ख) चोदयति न परमाणव इति । (ग) विकल्पा दूषयति ऐन्द्रियका इति ।

न्यायवार्त्तिकम्

(क)तेजःस्पर्शवदिति सति तेजःस्पर्शे उपलब्धिर्भवति असति च न भवति। न च तेजःस्पर्शोऽपि रूपवद् द्रव्योपलब्धेः कारणमिति, तन्न; व्यभिचारात्—व्यभिचारात् स्पर्श उपलब्धेरकारणम्, न पुना रूपमहत्त्वे क्वचिद् व्यभिचरतः। तस्माद् रूपमहत्त्वे एवोपलब्धेः कारणमिति। अयञ्चार्थः सूत्रकारेण सूत्रद्वयेनोक्तः—"अद्रव्यद्रव्यत्वात् परमाणावनुपलब्धिः, रूपसंस्काराभावाद्वायोरनुपलब्धि"रिति(ख)। रूपसंस्कारो रूपसमवाय इति सूत्रार्थः। अथ पुनः स्पर्शस्यापि रूपमहत्त्ववदव्यभिचारः, कस्मात् स्पर्शो न कारणमिति वक्तव्यम्। समवधार्य चैतद्भवताऽभिधीयते स्पर्शवदेतत् स्यादिति। येन प्रमाणेनावधृतमेतत् स्पर्शो न कारणमिति, मयाऽपि तत एवाकारणत्वम्। अथाकारणत्वप्रतिपादकं न प्रमाणमस्ति, को ह्यस्य वाक्यस्यार्थः स्पर्शवदेतत् स्यादिति। तद्भावभावित्वं च व्यभिचारयता कार्यकारणभाव उच्छिन्नो भवति। इदमस्य कारणम् इदमस्य कार्यमिति परेण पर्यनुयुक्तस्तद्भावभावित्वव्यतिरेकेणान्येन (१)न प्रतिपादयसि अतो(१*) विरोधादनुत्तरमेतत्।

यत्पुनरेतद् अतीन्द्रियसंयोगातीन्द्रियत्वादिति—अतीन्द्रिययोः किलात्ममनसोः संयोगो ह्यतीन्द्रियो दृष्ट इति यदि च परमाणवोऽतीन्द्रियाः स्युः तत्कार्यमप्यतीन्द्रियं स्यात्, ऐन्द्रियकं च दृष्टम्, तस्मादैन्द्रियका इति; सोऽयं दृष्टान्तप्रयोगः, अतीन्द्रियसंयोगातीन्द्रियत्वादिति दृष्टान्तप्रयोगमात्रे च हेतुन्यूनता। योऽप्यत्र कथञ्चिद्धेतुर्लभ्यते नातीन्द्रियकार्यं महाभूतादि व्यक्तम् ऐन्द्रियकत्वाद् घटादिवदिति—घटाद्यैन्द्रियकमैन्द्रियककार्यं दृष्टं तथाच महाभूतादि व्यक्तमैन्द्रियकम्, तस्मात्तदप्यैन्द्रियककार्यमिति। अयमपि प्रत्यक्षप्रमाणविरोधाद्विरुद्धः, अनुष्णोऽग्निः कृतकत्वादिति यथा।

एके तु वातायनच्छिद्रदृश्यं त्रुटिं परमाणुं वर्णयन्ति। तन्न युक्तम्; तस्य भेद्यत्वात्—अभेद्यः परमाणुर्भिद्यते त्रुटिरिति। कथमवगम्यते भिद्यते (२)त्रसरेणुरिति? द्रव्यत्वे सत्य-

न्यायवार्त्तिकतात्पर्यटीका

प्रत्यक्षप्रमाणविरोधादिति। महाभूतानां हि मूलकारणं परमाणवः परमसूक्ष्माः (३)तेषामप्रत्यक्षत्वं मानसानुव्यवसायगम्यं परमसूक्ष्मविषयं मे प्रत्यक्षमिति, तदभावश्चात्मनि संयुक्तविशेषणेन मनःसन्निकर्षेण प्रत्यक्षविरोध इत्यर्थः।

एके त्विति। यमेव हि त्र्यणुकं दृश्यं भवन्तो दृश्यावयवमाचक्षते तमेव वयं परमाणुमाचक्ष्महे न हि तदवयवकल्पनायामस्ति प्रमाणमिति भावः। कथमवगम्यते भिद्यते

---

(१) 'तस्य प्रतिपादयतो' इति क-वार्त्तिकपाठः। (२) आदर्शपुस्तकयोः 'त्रुटि'रिति पाठः। (३) 'तेषामप्रत्यक्षत्वे' इति ख।

(क) दूषणग्रन्थे स्पर्शपदमात्रोपादानात् पूर्वपक्षे तेजःपदप्रयोजनं चिन्त्यम्।

(ख) पण्डितवर्यश्रीमत्पञ्चाननतर्करत्नसम्पादिते वैशेषिकदर्शने तु चतुर्थाध्यायस्य प्रथमाह्निके षष्ठसूत्रं 'महत्यनेकद्रव्यवत्त्वात् रूपाच्चोपलब्धिः' सप्तमसूत्रम्—'सत्यपि द्रव्यत्वे महत्त्वे रूपसंस्काराभावाद् वायोरनुपलब्धिः' अष्टमसूत्रं च 'अनेकद्रव्यसमवायाद् रूपविशेषाच्च रूपोपलब्धिः' इत्याकारेण मुद्रितम्।

न्यायवार्त्तिकम्

स्मदादिबाह्यकरणप्रत्यक्षत्वाद् घटवदिति। कथं चान्यथा अभेद्यः परमाणुरित्युच्यते। अनित्यत्वाच्च न परमाणुः(क) सामान्यविशेषवतोऽस्मदादिबाह्यकरणप्रत्यक्षत्वाच्च। तस्मान्नैन्द्रियकाः परमाणव इति तेषामतीन्द्रियत्वात्। यत्प्रत्यक्षं तदन्यदिति विरुद्धो हेतुः।

संहतानामुत्पत्तिनिरोधात् नासंहतः परमाणुरस्तीत्यपरे—अपरे तु संहतं परमाणुं वर्णयन्ति संहता एव ह्युत्पद्यन्ते निरुध्यन्ते च, असंहतास्तु परमाणवो न सन्त्येवेति। तदयुक्तम्, संहतार्थस्यानुक्तत्वात्—असंहताः परमाणवो न सन्तीति ब्रुवता संहतशब्दार्थो वक्तव्यः। संघातो हि नाम बहूनामकार्यकारणभूतानां संयुक्तानामवस्थानम्। न चासंहतप्रतिषेधे संहतस्य निमित्तमस्ति संहन्यमानतन्त्रत्वात्—नित्यमयं संघातः संहन्यमानतन्त्रो भवति। न चासंहतप्रतिषेधे संहन्यमानमस्ति। तस्मान्नासंहतोऽस्तीति विरोधान्न किञ्चिदेतत्। एकप्रतिषेधादनेकाभ्युपगमवदिति। यथा नाम कश्चिन्मुग्ध एकप्रतिषेधादनेकमभ्युपेयात् तस्य चैकप्रतिषेधादनेकं निवर्तेत एकसमुदायत्वादनेकस्य, तथाविधमिदं भवतीति।

इतश्च नान्योऽवयव्यवयवेभ्यः संयोगाप्राप्त्यभावात्—यत् खलु यस्मादर्थान्तरं भवति तस्य तेन संयोगो भवत्यप्राप्तिर्वा, यथा गवाऽश्वस्य ; न पुनस्तन्तुभिः पटस्य संयोगो न चाप्राप्तिस्तस्मान्नासौ तेभ्योऽर्थान्तरमिति। (ख) अवयविनः पक्षीकरणे संयोगविभागाभावस्य संयोगविभागविषयत्वादसम्बद्धम्(ग)। अथासंयोगित्वाविभागित्वे (घ) हेतुभूते, ते (१)असिद्धे—संयुज्यते

न्यायवार्त्तिकतात्पर्यटीका

त्रसरेणुरिति, अङ्गुल्यग्राभ्यां मृद्यमानस्यास्यादर्शनं सूक्ष्मतयाऽप्युपपद्यते। जालसूर्यमरीचिस्थमेव तद्रजः कथञ्चिदुपलभ्यते नान्यथेति भावः। द्रव्यत्वे सतीति सामान्यसमवायौ निवर्त्तयति। बाह्येत्यात्मानं निवर्त्तयति। अनित्यत्वाच्चेति। अनन्तावयवत्वेन मेरुसर्षपयोरभिन्नपरिमाणत्वप्रसङ्गात् महाभूतमूलकारणमनवयवं कल्पनीयम्, न च द्रव्यमनवयवं विनश्यति आकाशादिवदिति नित्याः परमाणवस्त्रसरेणवस्त्वनित्या इति न परमाणुः। अनित्यत्वमेव कुत इत्यत आह—सामान्यविशेषवत इति।

संहतानामिति। रूपादीनां संघातः परमाणुरिति। न चासंहतप्रतिषेध इति, अप्रतिषेधे वा त एवासंहताः परमाणव इति भावः।

---

(१) 'तथाऽसिद्धेः' इति क।

(क) न परमाणुरिति साध्यम्, पक्षश्च त्रसरेणुरित्यूहनीयम्। (ख) अत्र प्रतिषेधसूचकं 'अयुक्तं' इति 'न' इति वा आदर्शपुस्तकयोर्नोपलभ्यते। (ग) 'असम्बद्धं साधनमिति शेषः। 'संयोगविभागविषयत्वात्' संयोगविभागप्रतियोगिकत्वात्'। तथाच केवलान्वयित्वेन व्याप्तिरूपसम्बन्धशून्यम्, तथाच व्यभिचारः। (घ) पूर्वत्र संयोगविभागात्यन्ताभावस्य हेतुत्वमिह तु संयोगिविभागिभिन्नत्वस्येति पूर्वत्र हेतुरेकः इह तु हेतुद्वयमिति वा विशेषः।

न्यायवार्त्तिकम्

चायं विभज्यते चेति। अथ स्वावयवेनासंयोगित्वात्(क), सोऽप्यनुपसंहार्यः नास्यान्वयो न व्यतिरेक इति। अथापि सर्पकुण्डलकाद्युदाहरणं स्यात्—सर्पकुण्डलकादि किल स्वकारणेनासंयोगि न चार्थान्तरमिति, तदसिद्धम्। यथा चार्थान्तरं सर्पकुण्डलकादि तथोक्तं पुरस्तात्। यदपि स्वकारणेनासंयोगीति ; तत्र चिन्त्यम्, किं गुणत्वात् स्वकारणेनासंयोगि अथानर्थान्तरभावादिति। वयन्तु ब्रूमो गुणत्वात्, न अनर्थान्तरभावात्। गुणश्च सर्पकुण्डलकः संयोगः, स चार्थान्तरमिति प्रतिपादितमेतत्। अर्थान्तरभावे च दर्शनाद्विरुद्धः—सत्त्वरजस्तमांसि भवतां पक्षे मिथोऽर्थान्तरभूतानि, तेषां च न संयोगो नाप्राप्तिरिति—प्रधानपुरुषयोर्न संयोगो नाप्राप्तिरुभयोर्व्यापकत्वाद्विरुद्धः।

नान्योऽवयव्यवयवेभ्यो गुरुत्वान्तरकार्याग्रहणात्। गुरुत्वान्तरकार्याग्रहणादित्येतन्न कथञ्चिदपि पक्षेण सम्बध्यते। क्व नान्योऽवयव्यवयवेभ्यः, क्व च गुरुत्वान्तरकार्याग्रहणम्। गुरुत्वान्तरकार्याग्रहणाद् गुरुत्वान्तरकार्यं न स्यात्, न गुरुत्वं न गुरुत्वान्तरं नावयवी। नोदकप्रतिषेधात् कमण्डलोः कपालानां वा प्रतिषेधो युक्तः।

एके तु गुरुत्वान्तरकार्याग्रहणादित्यनेन गुणान्तरारम्भं प्रतिषेधन्ति उदाहरणमात्रार्थत्वाद् गुरुत्वान्तरारम्भप्रतिषेधस्य। कथमिति? न कार्यं कारणरूपादिपूर्वकरूपादिमत् गुरुत्वान्तरवत्त्वप्रसङ्गात्—यदि कारणगता रूपादयः कार्ये रूपादीन्यारभेरन् अपि तर्हि कारणगतान्यपि गुरुत्वानि कार्ये गुरुत्वान्तरमारभेरन्, ततश्च गुरुत्वान्तरवत् कार्यमुपलभ्येत, न चोपलभ्यते, तस्मान्न कारण(१)रूपादिपूर्वकरूपादिमत्कार्यमिति। सत्यमुपपादितः पक्षधर्मः स तु प्रत्यक्षविरोधान्न किञ्चित्। कथमिति? अभ्युपेत्य कार्यं रूपादयः कार्ये प्रतिषिध्यन्ते, कार्याभ्युपगमाच्च प्रतिषेध्यमभ्यनुज्ञातं भवति। कारणरूपादयश्च कार्यरूपादीन् नारभन्ते इति ब्रुवतः कार्य-

न्यायवार्त्तिकतात्पर्यटीका

संयुज्यते चायं विभज्यते च अयमवयव्यन्तरेणेति। **न व्यतिरेक इति।** यथा भिन्नात् संयोगप्राप्त्यभावो व्यावृत्त एवमभिन्नादपि। न हि स एव तन्तुस्तेनैव तन्तुना प्राप्यत इत्यर्थः। सर्पकुण्डलोदाहरणे अन्वयी हेतुरित्यर्थः। सत्त्वरजस्तमसां न संयोगः किन्तु तेषां स्वाभाविकः स कोऽपि परिणतिभेदो यतः संभूयकारित्वमित्यर्थः।

गुरुत्वान्तरकार्याग्रहणादिति। अवयवगुरुत्वाद् गुरुत्वान्तरमवयविनः, तस्य यत्कार्यमवनतिविशेषस्तस्याग्रहणादित्यर्थः। **सत्यमुपपादितः पक्षधर्म इति।** कार्याग्रहणेन कार्याभावस्ततः कारणस्य गुरुत्वस्याभाव इत्यर्थः। **प्रतिषेध्यं** कार्यगतरूपादि, तद् **अभ्यनुज्ञातं**

(१) '-रूपादिमत्पूर्वक-' वा।

(क) स्वावयवेनासंयोगित्वादित्येवं हेतुरिति शेषः।

न्यायवार्त्तिकम्

सगुणं स्यात्, न त्विदमगुणं दृश्यते, ततश्च विरोधादयमहेतुः। अथ कार्यं नैवास्ति, न कार्यं कारणरूपादिपूर्वकरूपादिमदित्यनर्थकम्। न हि कमण्डलोरभावे अनुदकः कमण्डलुरिति युक्तं वक्तुम्। एतेन कार्ये रूपादिप्रतिपत्तिः प्रत्युक्ता। यश्चायं हेतुः गुरुत्वान्तरवत्त्वप्रसङ्गादिति, अयमप्यभ्युपगमान्न किञ्चित्—नाभ्युपगम एव (१)निषेध्यत्वेन देश्यते। (क) यदि तर्हि गुरुत्वान्तरवत् कार्यद्रव्यं रूपाद्यन्तरवच्च ततो गुरुत्वान्तरकार्यमुपलभ्येत यथा रूपाद्यन्तरकार्यम्, न तूपलभ्यते। न हि तुलायां विभक्तपिण्डद्वयोपन्यासवत् सम्बद्धयोरपि कार्यभेदं पश्यामः, तस्माद्विभक्तयोरिव संयुक्तयोरपि नास्ति द्रव्यान्तरारम्भ इति।

केचित्तु न गुरुत्वान्तरवत्कार्यद्रव्यवती तुलेति पक्षयित्वाऽवनमनविशेषाभावादिति हेतुं ब्रुवते। सोऽयं व्यधिकरणः अवनमनविशेषाभावस्यातुलाधर्मत्वात्—न ह्यवनमनविशेषाभावस्तुलाधर्म इति। एवं तु युक्तमुत्पश्यामः—अवनमनविशेषानाधारत्वान्न गुरुत्वान्तरवत्कार्यद्रव्यवती तुलेति। असिद्धस्तावदयं हेतुरवनमनविशेषानाधारत्वस्यातुलावृत्तित्वात्, न तद्वृत्तानुपलब्धेः। अयमप्यनैकान्तिकत्वादहेतुः गुरुत्वान्तरवद्द्रव्यसन्निपाते सत्यवनमनविशेषानाधारत्वस्य दृष्टत्वात्, यथा गुरुत्ववति द्रव्ये उन्मीयमाने त्रुटिभूते रजसि गुरुत्ववति (ख)सन्निपतित इति। महागुरुत्वे चोन्मीयमाने गुरुत्वमात्रोपहितानामवनमनविशेषं न करोति। समहीनाधिकप्रसङ्ग इति चेत्—यदि तावत् कारणगुरुत्वैः समं कार्यगुरुत्वं यावद् द्विपलाभ्यामसम्बद्धेऽवनमनं द्विस्तावत्सम्बन्धे सति स्यात्।

न्यायवार्त्तिकतात्पर्यटीका

भवतीति। तथाऽपि कुतः प्रत्यक्षविरोध इत्यत आह—कारणरूपाद्य इति। चो हेतौ। एतेन कार्ये रूपादिप्रतिपत्तिः प्रत्युक्ता। (ग)निषेध्यत्वेनेति। यदा हि कार्यमेव रूपादि नास्ति तदा कस्मात्तत्र रूपादिप्रतिपत्तिः प्रतिषिध्यते इत्यर्थः। यथा रूपाद्यन्तरकार्यमिति। अवयविगतानां रूपादीनां कार्यं रूपसंस्कारादवयविनश्चाक्षुषता, (घ) एवं दृश्यतेति। उपन्यासः स्थापनम्।

यद्यप्ययमवनमनविशेषाभावस्तुलाव्यधिकरणः (ङ) तथाऽपि न शाब्दी तुलासंबन्धिताऽस्य प्रतीयते किं त्ववनमनविशेषसंबन्धितेत्येतावतोक्तं सोऽयमिति। असिद्धस्तावदित्येकदेशिनो दूषणम्। तदेतदेकदेशिदूषणं दूषयति—न तद्वृत्तानुपलब्धेः। परमार्थदूषणमाह—अयमपीति। गुरुत्वमात्रोपहितानाम् अणूनाम् अवनमनविशेषं न करोति तुला।

---

(१) आदर्शपुस्तकयोः 'निषेध्यत्वेन' इत्यत्र 'दोषत्वेन' इति पाठः।

(क) 'यदि तर्हीं'त्यादिः 'नास्ति द्रव्यान्तरारम्भ इति' इत्यन्तो ग्रन्थः 'गुरुत्वान्तरवत्त्वप्रसङ्गा'दित्यस्य विवरणरूपः अयमप्यभ्युपगमादित्यादिः 'देश्यते' इत्यन्तो ग्रन्थश्च दूषणग्रन्थतया 'द्रव्यान्तरारम्भ इति' इत्यनन्तरमेव पठितुं युक्तः। अनयोः स्थानविपर्यये लिपिकृत्प्रमाद एव हेतुः, इत्यञ्च तात्पर्यटीकाग्रन्थस्याप्यत्र स्थानविपर्यय इति सम्भाव्यते। व्यक्तमेतत् घ-टिप्पन्याम्। (ख) "स निपतित" इति क। इतिशब्दोऽत्र सम्पातायातः। तथाच सन्निपतिते महागुरुत्वे इति समीचीनम्। (ग) अत्र 'निषेध्यत्वेनेति' इति लिपिकृत्प्रमादादागतमिति सम्भाव्यते। अन्यत् घ-टिप्पन्यां द्रष्टव्यम्। (घ) अत्र 'एवं निषेध्यत्वेन न देश्यते' इति पाठः समीचीनः सम्भाव्यते। एवमिति अभ्युपगम्यमानं गुरुत्वान्तरकार्यमित्यर्थः। (ङ) शाब्दी इत्यनेन बाधमुद्रया प्रतिबन्धादप्रतीतिरिति सूचितम्। 'न तथापि त शाब्दी' इति ख-पुस्तके पाठः।

न्यायवार्त्तिकम्

अथ कारणगुरुत्वाधिकं कार्यगुरुत्वम्, तथाऽप्यधिकं प्रसज्येत। अथ कारणगुरुत्वाद्धीनं कार्यगुरुत्वम्, तथाऽपि विशेषो गृह्येत, न त्विदमस्ति, तस्मान्न कार्यगुरुत्वमस्ति। न, कार्यकारणगुरुत्वेयत्तानवधारणात्—यद्येतदवधारितं स्यात् एतावत् कारणगुरुत्वमेतावत् कार्यगुरुत्वमिति, तदैतद् युज्यते वक्तुं समाधिकहीनकार्यप्रसङ्ग इति, तत्त्वनवधारितम् इयत्कारणे गुरुत्वम् इयत्कार्ये गुरुत्वमिति। यदि (१)न कार्यकारणगुरुत्वमवधारितं योऽयं प्रत्ययस्तुलयोन्मीयमाने द्रव्ये द्विपलं पञ्चपलमिति न प्राप्नोति। न न प्राप्नोति द्रव्यसमाहारगुरुत्वावधारणात्—यदिदं भवता मन्यते द्विपलं पञ्चपलमिति नात्र कार्यकारणगुरुत्वे अवधार्येते, किं त्वा चरमादा च(२)परमाणोर्द्रव्यसमाहार उन्मीयते। तत्र मनुष्यधर्मणो न युक्तं वक्तुमियत् कारणगुरुत्वमियत् कार्यगुरुत्वमिति। न च समाहारः कारणमपि त्वनारब्धकार्यं चरमद्रव्यं कारणमिति।

केचित्त्वारभ्यारभन्त इति प्रतिपद्यन्ते, तान् प्रतीदमुच्यते—न पूर्वोत्तरकार्यद्रव्ये (३)समानकालदेशे मूर्तत्वात् घटादिवदिति। शेषस्त्वारभ्यारम्भकविचारो (४)नाप्रस्तुतत्वान्निराक्रियते। निरनुमानं तर्हि कार्यगुरुत्वं यदि गुरुत्वान्तरवद्द्रव्योपचये सति कार्यभेदो न गृह्यते कथं प्रतिपद्येत इति। क एवमाह कार्यगुरुत्वं न गृह्यत इति। यदि गृह्यते, किं तत्? पतनम्। न हि कार्यगुरुत्वमन्तरेण कार्यपातेऽन्यो हेतुरस्ति, तस्माद् गुरुत्वान्तरवत् कार्यमिति। एतेन तुलावनतिविशेषाग्रहान्न कार्यगौरवमिति प्रत्युक्तम्। अथ मन्यसे कारणगुरुत्वेनैव कार्यं पात्यते न कार्यगुरुत्वमस्ति अतः कार्यपातस्यान्यनिमित्तत्वान्न सिध्यति गुरुत्वान्तरवत् कार्यमिति। न, कार्यकारणयोरसंयोगात्—यत्र गुरुत्वमाश्रयान्तरपाते हेतुर्भवति तत्र संयोग उपकरणम्, यथा तुलापटलकगुरुत्ववद्द्रव्यसंयोग इति; न तु कार्यकारणयोः संयोगोऽयुतसिद्धत्वात्—युतसिद्धिरसम्बद्धस्य विद्यमानता, न पुनः कार्यं कारणासम्बद्धं विद्यते जातः सम्बद्धश्चेत्येकः कालः, तस्मान्न कार्यकारणे

न्यायवार्त्तिकतात्पर्यटीका

द्रव्यसमाहार इति कार्यकारणद्रव्यसमाहारः, मृत्कण-मृच्चूर्ण-शर्करा-कपाल-कुम्भसमाहार इत्यर्थः। ननु समाहारः कुम्भस्य कारणं तच्च ज्ञातेयद्गुरुत्वमेवेत्यत आह—न चेति।

ये त्वाहुः—सर्वो मृत्कणादिः कुम्भपर्यवसानः कार्यसमूहः परमाणुष्वेव समवैति ते हि मृत्कणादिकमारभ्य मृच्चूर्णान्यारभन्त इति, प्रसङ्गात्तन्मतमपाकर्त्तुमुपन्यस्यति—केचित्त्विति। निराकरोति—तान् प्रतीदमिति।

---

(१) 'कार्यकारणगुरुत्वे नावधार्येते' इति पाठान्तरमादर्शपुस्तकयोर्ध्व तम्।

(२) 'परमाणोश्चाद्रव्य-' इति क-वार्त्तिकपाठः।

(३) 'समानदेशे' इति ख। (४) '-ऽप्रस्तुतत्वान्न क्रियते' क।

न्यायवार्त्तिकम्

संयुक्ते। समवायोपकरणं गुरुत्वं पातयिष्यतीति चेत्, न ; असङ्कीर्तनाद् विरोधाच्च। अथ मन्यसे सत्यं न कार्यकारणयोः संयोगोऽस्ति, अस्ति च समवायः, समवायो गुरुत्वापेक्षः कार्यं पातयिष्यतीति न सिध्यति कार्यगुरुत्वम्। न ; असङ्कीर्तनात्—न समवायः क्रियाहेतुत्वेन क्वचिदपि सङ्कीर्तितः सूत्रकारेण यथा संयोगः, "नोदनाभिघातसंयुक्तसंयोगाच्च पृथिव्यां कर्मेति" (क)। न केवलमसङ्कीर्तनादेव, विरोधाच्च। यदि समवायः क्रियाहेतुः स्यात् कारणरूपादयोऽपि कार्येणैकार्थसमवायात् पतेयुः। पतन्तु रूपादयोऽपि, किन्नो बाध्यत इति चेत्, न; गुरुत्वस्यापि पातप्रसङ्गात्—यथा रूपादयः कार्यद्रव्यमनुपतन्ति तथा गुरुत्वमप्यनुपतेत्। गुरुत्वं चानुपतत् कुतः पततीति वक्तव्यम्, न तु गुरुत्वस्य गुरुत्वान्तरं पातहेतुरस्ति। तस्मान्न गुरुत्वं पतति न रूपादयः पतन्तीति। यदि रूपादयो न पतन्ति द्रव्ये पतति तिष्ठेयुरित्यद्रव्या रूपादयः स्युः द्रव्यं च रूपादिहीनमुपलभ्येत। अथ द्रव्ये पतति पतन्ति, क्रियावन्तो रूपादयः प्राप्नुवन्ति। अथ न तिष्ठन्ति न पतन्ति, सोऽयं युक्तिविरोधोऽवश्यं भवताऽभ्युपगन्तव्यः पतति पतन्ति तिष्ठन्ति वेति। वेद पुनर्भवान् युक्तायुक्तयोर्नानाकारणम्। वेद्मीति परः—युक्तं प्रमितमयुक्तमप्रमितम्। अयुक्तं तर्हीदं पतति पतन्ति (१)तिष्ठति तिष्ठन्तीति वा। तच्चोक्तम्—गुरुत्वस्य गुरुत्वान्तरप्रसङ्गाद् रूपादिशून्यस्य द्रव्यस्यादर्शनात् अद्रव्याणां च रूपादीनामदर्शनादिति। यच्च पतति गच्छति वा तत्प्राप्तं जहाति अप्राप्तं चाप्नोति, न पुना रूपादयः प्राप्तं जहत्यप्राप्तं वा प्राप्नुवन्ति। रूपादयोऽप्राप्तं न प्राप्नुवन्तीति न युक्तम्—भवति हीदं द्रव्ययोः प्राप्तयो रूपे अपि प्राप्ते इति।

न्यायवार्त्तिकतात्पर्यटीका

गुरुत्वमनुपतदिति। न च यथा प्रदीपाधीनप्रकाशा घटादयः, न तु प्रदीपः प्रदीपाधीनप्रकाशः तस्य स्वमहिमनिषिद्धतमोऽनुषङ्गत्वात्, एवं गुरुत्वाधीनपाता घटादयः, गुरुत्वं तु स्वस्य चान्येषां च गुरुत्वान्तरानपेक्षं पतनहेतुरिति वक्तव्यम्, न हि प्रदीपेन स्वात्मनि प्रकाशयितव्ये किंचिदन्यत् क्रियते यादृशा घटादयः स्वप्रकाशोत्पादे तादृशः प्रदीपोऽपि। चक्षुषः पुनरयं स्वभावभेदो येन घटादौ प्रकाशयितव्ये प्रदीपमपेक्षते न तु प्रदीपे प्रकाशयितव्ये प्रदीपान्तरमिति। तस्मान्न प्रदीपस्य स्वात्मनि कर्मकरणभावः। गुरुत्वं तु द्रव्यगतस्य पतनकर्मणः करणम्, तेन हि द्रव्यं पात्यते, स्वगतस्य तु पतनकर्मणः करणत्वे तदेव कर्म करणं चेति स्वात्मनि वृत्तिविरोधः। आत्मनस्तु स्वात्मनि प्रकाशयितव्ये कर्तृत्वमेव न कर्मत्वमित्युपपादितमिति। तस्माद् गुणादयो (ख)विवादाधिकरणा न पतन्ति अद्रव्यजातीयत्वाद् गुरुत्ववदिति सिद्धम्। सिद्धान्त्याह—

(१) 'तिष्ठति' इति ख-पु० नास्ति।

(क) वैशेषिकसू० अ० ५ आ० २ सू० १।

(ख) अत्राधिकरणशब्दस्य पुंस्त्वं प्रयत्नेनोपपादनीयम्।

न्यायवार्त्तिकम्

न, सन्देहात्—किमयं प्राप्तिप्रत्ययः प्राप्तिनिमित्त आहो अप्राप्तेरदर्शननिमित्त इति सन्दिह्यते। वयन्तु ब्रूमः अप्राप्तेरदर्शननिमित्त इति। नहि द्रव्ययोः प्राप्तयो रूपयोरप्राप्तिं पश्यति। द्रव्ययोरप्येवमेवेति चेत्—अथ मन्यसे यथा रूपयोः प्राप्तिप्रत्ययोऽप्राप्तेरदर्शननिमित्तः एवं द्रव्ययोरप्राप्त्यदर्शननिमित्तो भवति न प्राप्तिनिमित्त इति। नैष दोषः; प्रत्ययद्वैतस्यानेकनिमित्तत्वात्—न खलु प्रत्ययद्वैतमेकनिमित्तं दृष्टम्, तद्यथा चित्रगतासु प्रतिकृतिषु क्रोधभयपरिहारेऽपि क्रुद्धभीतप्रत्यया भवन्ति न तावता पुरुषेष्वपि क्रोधभयाभावे क्रुद्धभीतप्रत्ययाः प्रादुर्भवितुमर्हन्तीति। एवमयं प्राप्तिप्रत्ययः क्वचित् संयोगनिमित्तः क्वचिदप्राप्त्यदर्शननिमित्त इति। तस्माद्व्यवस्थितं न गुरुत्वं पतति न रूपादयः पतन्तीति।

अपरे तु कार्यगुरुत्वेन कारणगुरुत्वं प्रतिबद्धं ब्रुवते। कार्यगुरुत्वैः किल कारणगुरुत्वानि प्रतिबद्धानि, अतोऽवनतिविशेषो न भवति। एतत्तु न युक्तमिति पश्यामः। कुतः? कार्यकारणयोः पातदर्शनात्—यदि कार्ये पतति कारणमवतिष्ठेत प्रतिपद्येमहि कार्यगुरुत्वेन कारणगुरुत्वं प्रतिबद्धमिति, न त्विदमस्ति, अतोऽयुक्तमेतत्। अनाधारत्वप्रसङ्गाच्च—यदि कार्यगुरुत्वेन कारणगुरुत्वं प्रतिबद्धं न (१)कारणं क्रियामारभेत, कार्ये पतति न कारणं पतेदिति कार्यमनाधारं स्यात्। एतेन कार्यगुरुत्वेन कारणगुरुत्वविनाशोऽपि व्याख्यातः। विभक्तानां च पातो न स्यादित्यधिकम्—यदि कार्यगुरुत्वेन कारणगुरुत्वं विनाशयेत कार्यद्रव्यविनाशात् कारणानां विभक्तानां पातो न स्यात्। गुरुत्वमेव च न स्याद् यदि कार्यगुरुत्वेन कारणगुरुत्वं विनाशयेत—अपि तर्हि न क्वचिद् गुरुत्वं स्यात्, नहि कस्यचित् परमाणोरतीतं कार्यं नास्ति, अतोऽगुरवः परमाणवः स्युः; परमाणुषु च गुरुत्वाभावात् कार्यगुरुत्वं कुत उत्पद्येत। तस्मादप्रतिषेधोऽयं कार्यगुरुत्वैः कारणगुरुत्वानां विनाशप्रतिबन्धाविति। अतः पूर्व एव प्रतिषेधो नानैकान्तादिति कार्यकारणगुरुत्वानवधारणाच्च। तदेवमवयविनोऽसत्त्वाव्यतिरेकप्रतिपादकं न प्रमाणमस्तीत्यतः साध्यत्वादवयविनि सन्देह इत्ययुक्तम्।

अतश्च साध्यत्वादवयविनि सन्देह इति न युक्तम्, असङ्कीर्तनात्—नहि साध्यत्वं संशयहेतुरिति कीर्तितं क्वचिदपि, अतो न भवति साध्यत्वात् संशयः। क एवमाह साध्यत्वात् संशयः? अपि तु साध्यत्वाद्विप्रतिपत्तिः विप्रतिपत्तेः संशय इति। साध्यत्वकार्यायां विप्रतिपत्तौ साध्यत्वमध्यारोप्योक्तं—साध्यत्वादवयविनि सन्देह इति ॥ ३३ ॥

न्यायवार्त्तिकतात्पर्यटीका

वेद पुनरिति। कारणं प्रमाणम्। रूपादयो न संयोगरूपप्राप्तिमन्तः गुणत्वात् संयोगवदित्यप्राप्तेः रूपादिषु निश्चयात्तददर्शननिमित्तो रूपादिषु प्राप्तिभ्रमः द्रव्येषु प्राप्तिप्रत्ययः पारमार्थिक एवेति विनिश्चयः। तदनेनाभिप्रायेणोपसंहरति—तस्माद् व्यवस्थितमिति। शेषमतिरोहितार्थम्॥ ३३ ॥

---

(१) 'कारणक्रियामारभेत' क, 'कारणे क्रियामारभेत्' ख।

(सू०)—सर्वाग्रहणमवयव्यसिद्धेः ॥ ३४ ॥

न्यायभाष्यम्

यद्यवयवी नास्ति सर्वस्य ग्रहणं नोपपद्यते। किं तत्सर्वम्? द्रव्यगुणकर्मसामान्यविशेषसमवायाः। कथं कृत्वा? परमाणुसमवस्थानं तावद् दर्शनविषयो न भवत्यतीन्द्रियत्वादणूनाम्, द्रव्यान्तर(१)ञ्चावयविभूतं दर्शनविषयो नास्ति, दर्शनविषयस्थाश्चेमे द्रव्यादयो गृह्यन्ते (२)ते निरधिष्ठाना न गृह्येरन्। (३)गृह्यन्ते तु कुम्भोऽयं श्याम एको महान् संयुक्तः स्पन्दते अस्ति मृन्मयश्चेति, सन्ति चेमे गुणादयो धर्मा इति। तेन सर्वस्य ग्रहणात् पश्यामोऽस्ति द्रव्यान्तरभूतोऽवयवीति ॥ ३४ ॥

न्यायवार्त्तिकम्

संशयापाकरणार्थं सूत्रम्—

सर्वाग्रहणमवयव्यसिद्धेरिति। सर्वेषामर्थानामग्रहणं प्रसज्येत यद्यवयवी अर्थान्तरभूतोऽवयवेभ्यो नास्ति इति। कथमिति? परमाणवस्तावद् दर्शनविषयभावं नाऽऽपद्यन्ते अतीन्द्रियत्वादित्युक्तम्। अवयविद्रव्याणि च भवद्भिर्न प्रतिपद्यन्ते, तदनभ्युपगमे च योऽयं द्रव्यप्रत्ययः कुम्भ इति, गुणप्रत्ययश्च श्याम इति, क्रियाप्रत्ययश्चलतीति, सामान्यप्रत्ययोऽस्तीति, विशेषप्रत्ययः कलश इति, समवायप्रत्यय इह घटे रूपादय इति, तथाऽन्येऽपि प्रत्यया एको महान् संयुक्तो विभक्तः पृथक् परोऽपर इति च न स्युः। अस्ति च सर्वस्य ग्रहणं द्रव्यगुणकर्मादिप्रपञ्चस्य, तेन सर्वस्य ग्रहणात् पश्यामोऽवयवातिरिक्तोऽस्त्यवयवीति।

अथवा सर्वाग्रहणमिति सर्वैः प्रमाणैरग्रहणम्। कथम्? प्रत्यक्षस्य वर्तमानमहद्विषयत्वात्—यद्वर्तमानं यन् महच्च तद् बाह्यकरणप्रत्यक्षम्, घटाद्यवयविप्रत्याख्याने च न बाह्यकरणप्रत्यक्षविषयोऽस्ति, तस्याभावादनुमानादेरप्यभावः, सेयं सर्वप्रमाणनिवृत्तिः। उपलभ्यन्ते चार्थाः प्रत्यक्षादिभिः

न्यायवार्त्तिकतात्पर्यटीका

सर्वा—द्धेः (सू० ३४)॥ स्यादेतत्—यथाऽवयविनं नाभ्युपैति परः एवं गुणकर्माण्यपि।

वृत्तिः

सिद्धान्तसूत्रम्—(सर्वेति)

अवयविनोऽसिद्धौ तद्गुणकर्मादीनां सर्वेषामग्रहणम्। तथा च सकम्पाकम्पत्वरक्तारक्तत्वादिकमपि न सुग्रहं परमाणुगतत्वात्, प्रत्यक्षे महत्त्वस्य हेतुत्वात् ॥ ३४ ॥

---

(१) 'च' इति नास्ति ग०। (२) 'तेन निरधिष्ठाना' इति ल-फ-ग-ज०। (३) 'गृह्यते च कुम्भो-' टि०।

(सू०)—धारणाकर्षणोपपत्तेश्च ॥ ३५ ॥

न्यायभाष्यम्

अवयव्यर्थान्तरभूत इति ।

सङ्ग्रहकारिते वै धारणाकर्षणे । संग्रहो नाम संयोगसहचरितं गुणान्तरं स्नेहद्रवत्वकारितम्, अपां संयोगादामे कुम्भे, अग्निसंयोगात् (१)पक्वे । यदि त्ववयविकारिते अभविष्यतां पांशुराशिप्रभृतिष्वप्यज्ञास्येताम् । द्रव्यान्तरानुत्पत्तौ च तृणोपलकाष्ठादिषु जतुसंगृहीतेष्वपि नाभविष्यतामिति ।

न्यायवार्त्तिकम्

प्रमाणैः, तैः सर्वैर्ग्रहणात् पश्यामोऽस्त्यवयवीति । तदिदं सूत्रमवयव्यनभ्युपगमे विरोधप्रदर्शनपरम् । सोऽयं सर्वाकारो विरोधो लोकपरिदृष्टप्रत्ययोच्छेद इति ॥ ३४ ॥

धारणाकर्षणोपपत्तेश्च । अवयव्यर्थान्तरभूत इति चार्थः । किमिदं धारणं नाम ? एकदेशग्रहणसाहचर्ये सत्यवयविनो देशान्तरप्राप्तिप्रतिषेधो धारणम् । यदाऽयमवयविन एकदेशं गृह्णाति तदैकदेशग्रहणेन सहावयविनमपि गृह्णाति । तेन च ग्रहणेन यदवयविनो देशान्तरप्राप्तिनिराकरणं तद्धारणम् । आकर्षणं नाम एकदेशग्रहणसाहचर्येण यदवयविनो देशान्तरप्रापणं पूर्ववत् । कुत एतत् ? लोकतः—लोकः खलु धारणाकर्षणे एवं प्रयुङ्क्ते इति । ते एते धारणाकर्षणे अवयविनं साधयतः । कथमिति ? निरवयवे चावयवे चादर्शनात्—नहि धारणाकर्षणे निरवयवे अवयवे च दृष्टे, दृष्टे च धारणाकर्षणे, तस्मादवयविधर्माविति ।

यत्त्वत्रोक्तं संग्रहकारिते धारणाकर्षणे नावयविकारिते पांशुराशिप्रभृतिष्वभावात् तृणोपल-

न्यायवार्त्तिकतात्पर्यटीका

तत् कथमयं प्रसङ्गः परस्य सर्वाग्रहणमित्यत आह—तदिदं सूत्रमिति । योऽपि हि तावद् गुणकर्मादि नेच्छति सोऽपि न तत्प्रत्ययमपह्नुते, अस्ति लौकिकपरीक्षकाणामवयविद्रव्यगुणकर्मादिप्रत्ययः, सोऽयमशक्यापह्नवः । तस्य च प्रत्यक्षत्वमुपपादितं प्रत्यक्षलक्षणे । अवयविद्रव्यबाधकानि च प्रमाणानि अधस्तान्निराकृतानि । सोऽयमसति बाधके स्वयं च गुणादिभिश्च सहोपलभ्यमानो न शक्यो निराकर्त्तुमित्यधिकरणार्थः ॥ ३४ ॥

धार—श्च (सू० ३५) ॥ ते एते धारणाकर्षणे गोघटादिकमुपलभ्यमानमवयविनं साधयतः । कुतः ? निरवयवे विज्ञानाकाशादौ अवयवे च परमाणौ चादर्शनात् । इदमेवं प्रयोगमारोहति । योऽयं दृश्यमानो गोघटादिरवयवी परमाणुसमूहभावेन विवादाध्यासितः नासावनवयवी धारणाकर्षणानुपपत्तिप्रसङ्गात् । यो योऽनवयवी तत्र तत्र धारणाकर्षणे न भवतः, यथा विज्ञानादौ । न चायं गोघटादिस्तथा, तस्मान्नानवयवीति ।

(१) 'सक्ते' इति टि० ।

न्यायभाष्यम्

अथावयविनं प्रत्याचक्षाणको मा भूत् प्रत्यक्षलोप इत्यणुसञ्चयं दर्शनविषयं प्रतिजानानः किमनुयोक्तव्य इति। एकमिदं द्रव्यमित्येकबुद्धेर्विषयं पर्यनुयोज्यः—किमेकबुद्धिरभिन्नार्थविषयेति आहोस्वित् (१)भिन्नार्थविषयेति। अभिन्नार्थविषयेति

न्यायवार्त्तिकम्

काष्ठादिषु जतुसंगृहीतेषु च दर्शनादिति, तन्न, अनवधारणात्। न ब्रूमः सर्वस्मिन्नवयविनि धारणाकर्षणे भवतः, अपि त्वन्यत्र न भवतः। न च विरोधः, अवयविष्वेव दर्शनात्—यानि तृणोपलकाष्ठानि जतुसंगृहीतान्याकृष्यन्ते (क)धार्यन्ते च अवयविन एव ते। यदि च निरवयवे चावयवे च धारणाकर्षणे स्यातां स्याद्विरोधः। यदिदमुच्यते संग्रहकारिते ते इति, न; विशेषहेत्वभावात्—संग्रहकारिते धारणाकर्षणे नावयविकारिते इति न च भवता विशेषहेतुरपदिश्यते इति। पांशुराशिप्रभृतिषु च कस्मात् संग्रहो नास्तीति वाच्यम्। य एवात्र संग्रहाभावे भवतो हेतुः स एवावयविनो विद्यमानस्य धारणाकर्षणयोरभाव इति। कः पुनरसौ? उक्तोऽसावेकदेशगृहीतस्य तत्सहचरितस्य सम्बन्धविशेष इति। स च पांशुराशिप्रभृतिषु नास्ति। तस्मान्न तत्र धारणाकर्षणे इति सोऽयं व्यतिरेकी हेतुः।

अथेदानीमन्वयिनो हेतोः प्रयोगमुपन्यसिष्यन्निदमाह—"अथावयविनं प्रत्याचक्षाणको मा

न्यायवार्त्तिकतात्पर्यटीका

न विरोध इति, व्यभिचारलक्षणो दोषो विरोधः। अवयविन एव ते प्रत्येकमिति, परमाणुसमूहे तु प्रत्येकमपि न परमाणवोऽवयविन इत्यर्थः। विशेषहेत्वभावादिति। एवं हि विशेषहेतुः स्याद् यद्यवयविनमन्तरेण क्वचिद्विज्ञानाकाशादौ संग्रहश्चोक्तलक्षणो धारणाकर्षणहेतुता वाऽस्य दृष्टा स्यात्, न चासौ दृश्यते ; काष्ठतृणोपलादयः प्रत्येकमवयविन एवेत्यर्थः। स्यादेतत्—अवयवित्वेन तुल्यत्वेऽपि कस्मादेकत्र धारणाकर्षणे नान्यत्रेत्यत आह—पांशुराशीति। समूहमात्रत्वेन तुल्यत्वेऽपि यथा कश्चिद्विशेषे हेतुरेवमवयवित्वेन तुल्यत्वेऽपीति समानमित्यर्थः। तत्सहचरितस्य संबन्धविशेषः स्नेहद्रवत्वकारित इति। तस्माद्भाष्यकारस्य सूत्रदूषणं परमतेन द्रष्टव्यम्।

वृत्तिः

हेत्वन्तरमाह—(धारणेति)

अवयवेभ्योऽवयव्यतिरिच्यते तथा सति धारणाकर्षणयोरुपपत्तेः, अन्यथा परमाणुपुञ्जत्वे चैकदेशधारणेन सकलधारणमेकदेशाकर्षणेन सकलाकर्षणं च न स्यादित्यर्थः॥ ३५॥

---

(१) 'नानार्थवि-' ज०।

(क) आदर्शपुस्तकयोः 'धार्यन्ते चेति अवयविन एवैते' इति पाठ एवं शोधितः।

न्यायभाष्यम्

चेत्—अर्थान्तरानुज्ञानादवयविसिद्धिः। नानार्थविषयेति चेत्—भिन्नेष्वेकदर्शनानुपपत्तिः, अनेकस्मिन्नेक इति व्याहता बुद्धिर्न दृश्यत इति ॥ ३५ ॥

(सू०)—सेनावनवद् ग्रहणमिति चेन्नातीन्द्रियत्वादणूनाम् ॥३६॥

यथा सेनाङ्गेषु (१)वनाङ्गेषु च दूरादगृह्यमाणपृथक्त्वेष्वेकमिदमित्युपपद्यते बुद्धिः (२)एवमणुषु सञ्चितेष्वगृह्यमाणपृथक्त्वेष्वेकमिदमित्युपपद्यते बुद्धिरिति। यथा गृह्यमाणपृथक्त्वानां (३)सेनावनाङ्गानामारात् कारणान्तरतः पृथक्त्वस्याग्रहणम्,

न्यायवार्त्तिकम्

भूत् प्रत्यक्षलोप इति अणुसञ्चयं दर्शनविषयं प्रतिजानानः किमनुयोक्तव्य इति। एकबुद्धेर्विषयं पर्यनुयोज्यः'' येयं बुद्धिरेकमिदं द्रव्यमिति किमियं नानाविषया उताभिन्नविषयेति। यदि नानाविषया, बहुष्वदर्शनादयुक्ता—न च बहुष्वेकमिदमिति युक्तः प्रत्ययः। अथाभिन्नार्थविषया, योऽसावेकबुद्धेर्विषयः सोऽवयवीति। एकानेकबुद्धी भिन्नविषये विशेषवत्त्वाद् रूपादिविषयबुद्धिवदिति। अथवा एकानेकबुद्धी भिन्नविषये समुच्चितासमुच्चितविषयत्वात् इदमिति यथा इदं चेदं चेति यथा ॥ ३९ ॥

सेनावनवद् ग्रहणमिति चेन्नातीन्द्रियत्वादणूनामिति। सेनावनवद् ग्रहणमिति चेत्—अथ मन्यसे असत्यर्थान्तरभावेऽसति चैकानेकविभेदे (क)च दृष्टो बुद्धिविशेषः—अन्या सेनाबुद्धिः अन्या गजादिबुद्धय इति, तथाऽन्याः खदिरादिबुद्धयः, अन्या च वनबुद्धिरिति। न च तावता सेना वनं चार्थान्तरम्। तस्मादनैकान्तिकत्वादहेतुः।

न्यायवार्त्तिकतात्पर्यटीका

अथेदानीमन्वयिन इति, अन्वयव्यतिरेकिण इति। पटोऽयमित्येकविषया बुद्धिरेकबुद्धिः, तन्तव इति नानाविषया बुद्धिरनेकबुद्धिः। समुच्चितासमुच्चितविषयत्वादिति, असमुच्चितविषयत्वादेकबुद्धेः समुच्चितविषयत्वादनेकबुद्धेरिति ॥ ३९ ॥

आशङ्कात इतरसूत्रम्—

सेना—नाम् (सू० ३६) ॥ तथोक्तमिति, बहुत्वसंख्यैव सेना वनं चेति। यस्तु मन्यते—सेना वनमिति व्यपदेशाय तज्जनिताय वा विज्ञानाय बहुत्वसंख्या कथंचित्कारणं संभवति,

वृत्तिः

इदमवद्यम्—नौकाकर्षणेन नौकास्थाकर्षणवत्, (४) कुण्डधारणेन कुण्डस्थदधिधारणस्योपपत्तेर्विजातीयसंयोगबलेनैवावयवावयविभावाभावेऽप्युपपत्तेः, अतः पूर्वोक्तां युक्तिमेव

(१) 'वनाङ्गेषु' इति टि-पु० नास्ति। (२) 'एवं परमाणुषु' ज०। (३) 'खलु सेना-' इति ज०। (४) 'कुण्डलधा-' ल०।

(क) 'च'कारोऽयं लिपिप्रमादादागतः सम्भाव्यते।

न्यायभाष्यम्

यथा गृह्यमाणजातीनां पलाश इति वा खदिर इति वा नाऽऽराज्जातिग्रहणं भवति। यथा गृह्यमाणप्रस्पन्दानां नाऽऽरात् स्पन्दग्रहणम्, गृह्यमाणे चार्थजाते पृथक्त्वस्याग्रहणादेकमिति भाक्तः प्रत्ययो भवति, न त्वणूनां गृह्यमाणपृथक्त्वानां कारणतः पृथक्त्वस्याग्रहणाद् भाक्त एकप्रत्ययः, अतीन्द्रियत्वादणूनामिति।

न्यायवार्त्तिकम्

इदं तावत् सूत्रं साधनपक्षे दृष्टान्तमात्रार्थत्वादसम्बद्धम्, अनैकान्तिकीकरणपक्षे तु न, असिद्धत्वात्। (१) केन सेनावनयोरनर्थान्तरभावोऽभ्युपगम्यते। यथा च सेनावनान्यर्थान्तरभूतानि तथोक्तम्। अभेदप्रत्ययस्य चानेकनिमित्तत्वान्न युक्तम्—अस्त्ययमभेदप्रत्ययोऽभिन्न एव, अस्ति च भिन्ने उपलभ्यमाने भेदस्यादर्शनात्। अभिन्ने तावदेकप्रत्ययः (क)यदेकमुभयपक्षसम्प्रतिपत्त्या व्यवस्थितम्। एकं नास्तीत्यनेकप्रत्ययो व्याहतः, एकसमुच्चयो ह्यनेकमिति। अनेकस्मिन्नुपलभ्यमानेऽपि भेदस्यादर्शनादभेदप्रत्ययः। भेदस्यादर्शनमारान्निमित्ताद् यथा सेनावनादिषु। यानि तानि (ख)सेनावनाङ्गानि हस्त्यादीनि तान्येकश उपलभ्यमानपृथक्त्वानि आरान्निमित्ताद्भेदं नोपलम्भयन्ति, भेदानुपलब्धेर्भिन्ने वस्तुन्यभिन्नप्रत्ययः। न च परमाणवः केनचिदुपलभ्यन्ते। कस्मात्? अतीन्द्रियत्वादणूनामिति।

अतीन्द्रियाः परमाणव इति प्रतिपादितमेतत्। यश्चैन्द्रियकः पदार्थः स उपलभ्यमानपृथक्त्व आरात् पृथक्त्वस्याग्रहणे अभेदप्रत्ययनिमित्तं भवति। यथा उपलभ्यमानजातीयानामाराज्जातिग्रहणम्, उपलभ्यमानप्रस्पन्दानां च नाऽऽरात् प्रस्पन्दग्रहणमिति। गृह्यमाणाग्रहणस्य

न्यायवार्त्तिकतात्पर्यटीका

यस्त्वयमैन्द्रियकः प्रत्ययः प्रत्येकमगृहीतैकत्वेषु वृक्षेष्वनुत्पन्नापेक्षाबुद्धेर्द्रागित्येकघनवनावगाही (ग) जायते तत्र कारणाभावेन बहुत्वस्यानुत्पादान्न बहुत्वसंख्यालम्बन इति न (घ)परितुष्यति तं प्रत्याह—अभेदप्रत्ययस्य चेति, उपलभ्यमानरूपेष्वेव कुतश्चिन्निमित्तादनुपलभ्यमानपृथक्त्वेषु मिथ्याऽभेदबुद्धिर्भवति, न पुनः सर्वथाऽनुपलभ्यमानेष्विति तात्पर्यार्थः। यस्तु नोभयपक्षसंप्रतिपन्नमस्ति जगति किंचिदेकमिति मन्यते तं प्रत्याह—एकं नास्तीति। स्यादेतत्—दूरात् काष्ठलोष्टतृणपाषाणादयः प्रत्येकं पृथक्कृता नोपलभ्यन्ते, समुदायस्तु तेषां दृश्यते, न च ते द्रव्यान्तरमारभन्ते विजातीयत्वात्; तथा मा भूवन् परमाणवः प्रत्येकं दृश्याः समूहस्तु तेषां द्रक्ष्यते विनैव कार्यान्तरारम्भमित्यत आह—गृह्यमाणाग्रहणस्य चेति। तेषामेवागृह्यमाणानामपि

(१) 'न केन' इति ख-पुस्तकपाठः।

(क) तत्र अभिन्ने इति पूर्ववाक्ये तत्पदस्याऽऽर्थत्वाद् यत्पदान्वयी बोध्यः। (ख) 'हस्त्यश्वरथपादातं सेनाङ्गं स्याच्चतुष्टयम्' इत्यमरः। (ग) एकघनवनावगाहीति एकमिदं घनं वनमित्याकारक इत्यर्थः (घ) मन्यतेः परितुष्यतेश्चैक एव कर्त्ता य इति।

न्यायवार्त्तिकम्

चान्यनिमित्तत्वात्—यच्चेदं गृह्यमाणस्य पदार्थस्याग्रहणं तदन्यनिमित्तं दृष्टम्, यथा तेषामेव सेनावनाङ्गानाम्, न तु परमाणवो गृह्यन्ते तेषामतीन्द्रियत्वात्। तस्मान्न तेषामन्यनिमित्तमग्रहणमिति।

अनुपजातविशेषाणां च बुद्धिभेदाहेतुत्वाद्विरोधः—यस्य परमाणवो घटादिबुद्धिहेतवो भवन्ति स चेदं प्रष्टव्यः किं परमाणव उपजातविशेषा बुद्धिभेदं कुर्वन्ति उतानुपजातविशेषा इति। किं चातः ? यद्युपजातविशेषाः, योऽसौ विशेषः सोऽवयवीति प्राप्तम्; अथानुपजातविशेषाः, त एवातीन्द्रिया ऐन्द्रियकाश्चेति महान् विरोधः। विशेषः संयोगः परमाणूनाम्, ते परस्परप्रत्यासत्तौ

न्यायवार्त्तिकतात्पर्यटीका

मिलितानां दर्शनं (क) ये स्वरूपेण ग्रहणयोग्या निमित्तान्तरात्तु न गृह्यन्ते; परमाणवस्तु परमसूक्ष्मतया न स्वरूपेण ग्रहणार्हा इति मिलिता अपि न ग्रहीतव्या एव। न जातु मिलिता अपि पवनसमूहा भवन्ति चाक्षुषाः। रूपवन्महत्त्वमपि भावानां स्वरूपयोग्यता ग्रहणं प्रतीति भावः।

(ख)अथानुपजातविशेषा इति। ततश्च त एवैन्द्रियका अनैन्द्रियकाश्चेति महान् विरोधः।

अत्रान्तरे आह स्म— को वा विरोधो बहवः संजातातिशयाः पृथक्।
भवेयुः कारणं बुद्धेर्यदि नामेन्द्रियादिवत्॥ इति।

एतदपि वार्तिककृतैव यद्युपजातविशेषा इति वदता परास्तम्। न खलु स्थैर्यसिद्धौ भावानामवयविद्रव्योत्पादमन्तरेणास्त्यन्योऽतिशयः परमाणूनाम्। (ग)न च यमागन्तुकमासाद्य परमाणवोऽवयविनं जनयन्ति तेनैव स्थूलबुद्धिम्, कृतमवयविनेति सांप्रतम्; यदाभासा हि बुद्धिस्तद्रूपा आलम्बनप्रत्ययः, न चेयं परस्परव्यावृत्तपरमसूक्ष्मपरमाण्वालम्बना, तथा सति स्थूलभेदात् तदेकमिति न स्यात्। न चैष प्रत्ययो विकल्पः, स्पष्टप्रतिभासत्वात्, न वा विकल्पोपाधिरस्य विशदता, निर्विकल्पकेनापि तस्या ग्रहणात्। न च प्रतिभासधर्मः स्थौल्यम्, नानादिग्देशस्थितस्य निरन्तरस्यैकेन विज्ञानेन ग्रहणं स्थौल्यम्; तत् खल्वीदृशत्वं परमाणूनां प्रतिभाससमयभावीति प्रतिभासधर्म इत्युच्यते। तथा चैष समीचीन एवानुभवः—न हि ते न परमाणवः, न च न निरन्तरोत्पन्नाः, न च न दिग्देशभिन्नाः, न चैकस्मिन् विज्ञाने न चकासति। तस्मात् कस्यात्रान्यथात्वम्।

(क) अत्राऽऽदर्शपुस्तकयोः 'येन रूपेण ग्रहणयोग्यता निमित्तान्तरात्तु न गृह्यन्ते' इति पाठः लिपिप्रमादकृत इति धिया एवं शोधितः।

(ख) वार्त्तिके अक्षरविपर्ययो द्रष्टव्यः। अत्र मुद्रिततात्पर्यपुस्तकयोः 'ततश्च त एवेन्द्रियका अनैन्द्रियकाश्चेति महान् विरोधः। अत्रान्तरे वार्त्तिककार आह स्म। **को वा विरोधो** बहवः संजातातिशयाः पृथग्भवेयुः कारणं बुद्धेर्यदि नामेन्द्रियादिवत् इति। एतदपि वार्त्तिककृतैव अथानुपजातविशेषा इति वदता परास्तम्' इति ग्रन्थाकार उपलभ्यते। उपरिष्टात् मुद्रिताकारस्तु स्वबुद्ध्या कल्पितः।

(ग) आदर्शपुस्तकयोः 'नचायमागन्तुक'मिति मुद्रणस्य प्रामादिकत्वधिया शोधितमिदम्।

न्यायभाष्यम्

इदमेव च परीक्ष्यते किमेकप्रत्ययोऽणुसञ्चयविषय आहोस्वित् नेति, अणुसञ्चय एव सेनावनाङ्गानि । न च परीक्ष्यमाणमुदाहरणमिति युक्तं साध्यत्वादिति ।

दृष्टमिति चेन्न तद्विषयस्य परीक्षोपपत्तेः । यदपि (१)मन्येत दृष्टमिदं सेनावनाङ्गानां पृथक्त्वस्याग्रहणादभेदेनैकमिति ग्रहणम्, (२)नच दृष्टं शक्यं प्रत्याख्यातुमिति, (३) तच्च नैवम्, तद्विषयस्य परीक्षोपपत्तेः—दर्शनविषय एवायं परीक्ष्यते योऽयमेकमिति प्रत्ययो दृश्यते, स परीक्ष्यते किं द्रव्यान्तरविषयो वा अथाणुसञ्चयविषय इति । अत्र दर्शनमन्यतरस्य साधकं न भवति । नानाभावे चाणूनां पृथक्त्वस्याग्रहणादभेदेनैकमिति ग्रहणम् अतस्मिंस्तदिति प्रत्ययः, यथा स्थाणौ पुरुष इति । ततः

न्यायवार्त्तिकम्

सत्यां संयोगोपकरणा उपलप्स्यन्त इति, न ; अतीन्द्रियत्वादणूनां—नातीन्द्रियाणां संयोगः प्रत्यक्षो भवितुमर्हति । भवति हीदमनेन संयुक्तमिति । तस्मान्न संयोगो विशेषः ।

न्यायवार्त्तिकतात्पर्यटीका

यथाह—न च तद्दर्शनं भ्रान्तं नानावस्तुग्रहात् (४) स्वतः ।
सांवृतग्रहणं नान्यन्न च वस्तुग्रहो भ्रमः ॥ इति ।

अत्र तावत्तिलतण्डुलवद् गन्धरूपरसस्पर्शपरमाणुभिरन्तरिततया नैरन्तर्यमेषां नास्ति । तस्मादन्तरालाग्रहणे दूरादेकघनवनप्रत्ययवदयं मिथ्याप्रत्ययो रूपादिपरमाणूनां सान्तरत्वाद् अनेकत्वाच्च । न चासति बाधके मिथ्येति युक्तम् । उक्तश्च बाधकाभावः । स्थेमा च भावानामुपपादयिष्यते । तस्माद्युक्तमेतदपीति ।

इदमेव परीक्ष्यत इति भाष्यम् । सर्वत्रावयविनमपह्नुवानस्य अतीन्द्रियं वाऽणुसंचयमात्रमिच्छतः सेनावनाङ्गानामपि (क) करिकुसुम्भादीनामतीन्द्रियाणुसंचयमात्रत्वाद् दृष्टान्ताभाव इति तात्पर्यार्थः ।

शङ्कते—दृष्टमिति चेत् । सेनावनाङ्गानि तावद् दृष्टतया न शक्यान्यपह्नोतुमिति सिद्धं निदर्शनमित्यर्थः । निराकरोति—(५)तच्च नैवमिति । यदि दृष्टमप्रत्याख्येयमवयव्यपि दृष्ट इति

वृत्तिः

साधीयसीं मन्यमानस्तत्र परोक्तं समाधानमाशङ्क्य दूषयति—(सेनावनादिवदिति(ख))

---

(१) 'मन्यते' ज-भा० । (२) 'नच शक्यं' ल० । (३) 'तच्च तन्नैवं' फ० । (४) 'यतः' इति ख-पु० धृतपाठान्तरम् । (५) 'तच्च तन्नैवम्' 'इति फ० ।

(क) करी सेनाङ्गम्, कुसुम्भो वृक्षः वनाङ्गमिति बोध्यम् । (ख) सूत्रे आदिपदं वृत्तिकृत्सम्मतम् ।

न्यायभाष्यम्

किम्? अतस्मिंस्तदिति प्रत्ययस्य प्रधानापेक्षित्वात् प्रधानसिद्धिः। स्थाणौ पुरुष इति प्रत्ययस्य किं प्रधानम्? योऽसौ पुरुषे पुरुषप्रत्ययः, तस्मिन् सति पुरुष-सामान्यग्रहणात् स्थाणौ पुरुषोऽयमिति। एवं नानाभूतेष्वेकमिति (१)सामान्यग्रहणात् प्रधाने सति भवितुमर्हति। प्रधानं च सर्वस्याग्रहणादिति नोपपद्यते। तस्मादभिन्न एवायमभेदप्रत्यय एकमिति।

न्यायवार्त्तिकम्

यश्चायमनेकस्मिन्नेकप्रत्ययः स मिथ्याप्रत्ययः। मिथ्याप्रत्ययनिमित्तं च सामान्यदर्शनं विशेषानुपलब्धिः अविद्यमानविशेषदर्शनद्वारेणाध्यारोपिततद्विपरीतधर्मता। न चातीन्द्रियत्वा-दणूनां सामान्यदर्शनमस्ति, तदभावे कुतो विशेषादर्शनम्, सामान्यदर्शने विशेषादर्शने वाऽसति न तद्विपरीतधर्माध्यारोपः। न च निमित्तमन्तरेण नैमित्तिकस्य मिथ्याप्रत्ययस्य प्रादुर्भावो युक्त इति।

एतेन भाक्त औपमिकश्च प्रत्ययो व्याख्यातः। भक्तिर्नाम अतथाभूतस्य तथाभाविभिः सामान्यम्, उभयेन भज्यत इति भक्तिः; यथा वाहीकस्य मन्दामन्तःसंज्ञामुपादाय वाहीको गौरिति, न तदतीन्द्रियत्वात् परमाणूनामस्ति। उपमानप्रत्ययोऽपि न युक्तः अतद्भाविन-स्तद्भाविभिरसामान्यात्—यस्यातथाभूतस्य तथाभाविभिः सामान्यं तत्रोपमानप्रत्ययो युक्तः यथा सिंहो माणवक इति, सिंह इव सिंहः। किं पुनरत्रोपमीयते? शौर्यम्, न तु परमाणूनामती-न्द्रियत्वान्मिथ्याप्रत्ययानां निमित्तमस्तीति। मिथ्याप्रत्यया अप्येते न भवन्ति प्रधानाभावात्।

न्यायवार्त्तिकतात्पर्यटीका

सोऽपि न प्रत्याख्येयः। अथायं परीक्ष्य प्रत्याख्यायते सेनावनाद्यान्यपि प्रत्याख्येयानीति दृष्टान्ताभावः साध्यसमत्वादिति भाष्यार्थः।

वार्त्तिकम्—यश्चायमनेकस्मिन्निति। अविद्यमानो विशेषः शुक्तौ रजतत्वम्, तस्य दर्शनं वणिग्वीथ्यादौ, तस्य द्वारं संस्कारः, तेनाध्यारोपितः (क)स्मारितः तदविपरीतधर्मो रजतत्वं येन सामान्यदर्शनेन तत्तथोक्तं तस्य भावः तत्ता सामान्यदर्शनस्येति।

तिरोभूतभेदमुपमानमेव भाक्तम्, भेदोल्लेखेन (२)जायमान(३)मौपमिकमिति विवेकः। (ख)संज्ञा-ज्ञानमौपमिकोदाहरणम्—यथा सिंहो माणवक इति। नन्वेतदपि तिरोभूतभेदतया भाक्तमेवेत्यत आह—सिंह इव सिंहः। अयमर्थः। सिंहशब्दात् (ग)उपमानादाचारे सर्वप्रातिपदिकेभ्यः क्विबिति

(१) 'प्रामाण्यग्रहणात्' ज-ग०। (२) 'जायमानम्' इति ख। (३) 'औपमिकमि'ति क-तात्पर्ये नास्ति।

(क) अत्राऽऽदर्शपुस्तकयोः 'शुक्तिविपरीतधर्मो' इति पाठः। क-तात्पर्यपुस्तके एवं प्राचीनपुस्तकपाठान्तरं च समीचीनतया गृहीतम्। (ख) ख-तात्पर्ये (संज्ञाज्ञानमौपमिकोदाहरणम्') इत्येवमर्द्धकुण्डलीवेष्टनेन मुद्रितम्। 'उदाहरणम्' इत्येतन्मात्रं तु समीचीनं सम्भाव्यते। (ग) "उपमानादाचारे" इति पाणिनीयं सूत्रम् (३।१।१०)। 'सर्वप्रातिपदिकेभ्यः क्विब् वा वक्तव्यः' इति वार्त्तिकसूत्रम् (३।१।११)।

न्यायभाष्यम्

इन्द्रियान्तरविषयेष्वभेदप्रत्ययः प्रधानमिति चेद् न विशेषहेत्वभावाद् दृष्टान्ताव्यवस्था—श्रोत्रादिविषयेषु शब्दादिष्वभिन्नेष्वेकप्रत्ययः प्रधानमनेकस्मिन्नेकप्रत्ययस्येति। एवं च सति दृष्टान्तोपादानं न व्यवतिष्ठते विशेषहेत्वभावात्। अणुषु सञ्चितेष्वेकप्रत्ययः किमतस्मिंस्तदिति प्रत्ययः स्थाणौ पुरुषप्रत्ययवत्, अथार्थस्य तथाभावात्तस्मिंस्तदिति प्रत्ययः यथा शब्दस्यैकत्वादेकः शब्द इति विशेषहेतुपरिग्रहणमन्तरेण दृष्टान्तौ संशयमापादयत इति। कुम्भवत्सञ्चयमात्रं गन्धादयोऽपीत्यनु-

न्यायवार्त्तिकम्

इन्द्रियान्तरविषयेष्वभेदप्रत्ययः प्रधानमिति चेत्—अथ मन्यसे श्रोत्रादिविषयेष्वेकत्वादिप्रत्ययाः प्रधानं भवन्ति, तदभावे तु मिथ्याप्रत्यया इति; विशेषहेत्वभावाद् दृष्टान्ताव्यवस्था—एवं सति दृष्टान्तोपादानं न व्यवतिष्ठते। तस्मिंस्तदिति प्रत्ययः अतस्मिंस्तदिति च प्रत्ययः। अस्ति चायं परमाणुषु सञ्चितेषु तदिति प्रत्ययः स च किमतस्मिंस्तदिति आहोस्विन्नेति सन्दिह्यते। शब्दादिष्वेकप्रत्ययः प्रधानम्, घटादिषु त्वेकप्रत्ययो मिथ्याप्रत्यय इति ब्रुवाणो घटादीनभ्युपैति। न ह्यनभ्युपगतेषु घटादिषु शब्दादिसामान्यमेकप्रत्ययबीजं घटस्यास्ति। अथ मन्यसे नास्माभिर्घटादयोऽप्यभ्युपगम्यन्ते, किन्तु परमाणूनां सञ्चितानां शब्देन सामान्यादेकप्रत्ययोत्पत्तिनिमित्तत्वमिति। अत्रोक्तम्—नातीन्द्रियत्वादणूनामिति। यांश्च शब्दादीन् प्रधानप्रत्ययनिमित्तत्वेन भवान् प्रतिपद्यते तेऽपि सञ्चिता एव, सञ्चितत्वात् तेष्वप्ययमेकप्रत्ययो न युक्तः। शब्दादिषु चैकप्रत्ययः समुच्चयनिवृत्तिनिमित्त एकत्ववद्द्रव्यसामान्याद् भाक्तः—यान्येकत्ववन्ति द्रव्याणि तेषां समुच्चयनिवृत्तिर्धर्मः, अस्ति च

न्यायवार्त्तिकतात्पर्यटीका

क्विबन्तात् कर्त्तरि अचि कृते सिंहशब्द उपमानार्थो भवति। नानाभावे चाणूनामित्यादिभाष्यं व्याचष्टे—मिथ्याप्रत्यया अपीति। तदभावे तु प्रधानाभावे तु घटादौ मिथ्याप्रत्यया इति। परमाणुषु संचितेष्विति, येषामपि घटोऽवयवी तैरपि परमाणुसंचयोऽभ्युपेयः येषामप्यवयवी नास्ति तैरपि परमाणुसञ्चय उपेयः, सोऽयमुभयसंमतः सञ्चय इत्यर्थः। तेऽपि संचिता एवेति, वैभाषिकाः खलु (क)वात्सीपुत्रा भूतभौतिकसमूहात् (१) पटादीनपि शब्दादीनिच्छन्ति, अतस्तेषां मते शब्दादयोऽपि सञ्चिता एवेत्यर्थः। अपि चास्मन्मतेऽपि शब्दादीनां न मुख्यमेकत्वं संख्याया गुणस्य गुणेषु शब्दादिष्वभावात् अपि तु भाक्तमेवेत्यत आह—शब्दादिषु चैक-

वृत्तिः

अतिदूरस्थैकमनुष्यैकवृक्षादेरप्रत्यक्षत्वेऽपि सेनावनादिप्रत्यक्षवदेकस्य परमाणो-

(१) "पटादपि" इति क-तात्पर्यपाठः।

(क) वात्सीपुत्रा वैभाषिकसम्प्रदायेऽवान्तरसम्प्रदायप्रवर्त्तकविशेषाः।

न्यायवार्त्तिकम्

शब्दादिषु समुच्चयनिवृत्तिः, तेनैकत्ववद्द्रव्यसामान्याच्छब्दादिष्वेकप्रत्ययो भाक्तः। सर्वत्र समुच्चयनिवृत्तिनिमित्त एवेति चेत न द्वे इत्यत्रैकानेकगतौ सन्देहो न स्यात्—यदि सर्वत्रायं समुच्चयनिवृत्तिनिमित्त एवैकप्रत्ययो भवति न द्वे इत्यत्र किमेकमनेकमिति द्विप्रतिषेधसामान्यात् सन्देहो न स्यात्। सति च सन्देहे एकमिति नियमार्थम्, यतो नियमस्तदेकत्वम्, यतस्त्रयादिप्रत्ययास्ते त्रित्वादय इति। एवं द्वित्वादिप्रत्यया अपि शब्दादिषु समुच्चयनिमित्ता द्रष्टव्याः। कस्मात्? द्वित्वादिमद्द्रव्यसामान्यात्—द्वित्वादिमता द्रव्येण शब्दादीनां समुच्चयः समानः। सर्वत्र समुच्चयादेवेति चेत् नैकमित्यत्र सामान्यगतौ न संशयः स्यात्—यदि समुच्चयनिमित्तत्वाद् द्व्यादिप्रत्यया भवन्ति नैकमिति प्रतिषेधे द्वे त्रीणीति सामान्यगतौ न संशयः स्यात्। तस्माद् यतो व्यवस्था ते द्वित्वादय इति।

न्यायवार्त्तिकतात्पर्यटीका

प्रत्यय इति। शङ्कते—सर्वत्रेति। निराकरोति—न द्वे इत्यत्रेति, समुच्चयनिवृत्तिमात्रमेव चेदेकत्वं द्वित्वनिषेधेन समुच्चयो निवर्तत इति तन्निवृत्तिमात्रमेकत्वमेवेति एकमनेकं वेति संशयो न स्यात्। न च तत्रोत्तरमेकमेवेति नियमार्थं भवेदिति। गतौ प्राप्तौ। शङ्कते—सर्वत्रेति। निराकरोति—नैकमित्यत्रेति। अयमभिसन्धिः। द्वित्वादीनामभावे समुच्चयमात्रं स्यात्, न तु समुच्चयानामवान्तरभेदः। तथा च नैकमित्यसमुच्चयसहितैकत्वसमुच्चयः प्राप्त एवेति न संशयः स्यात्।

इदं त्विह वक्तव्यम्। शब्दादौ द्वित्वाद्यभावे कथं द्वित्वादिप्रयोगः? भाक्त इति चेत् किं भक्तिनिमित्तम्? समुच्चयमात्रं चेत् कुतो द्वाविति नियमः। समुच्चयविशेषादिति चेद् नन्वस्य नास्त्याजानतो भेद इत्युक्तम्। न चेह द्वित्वमस्ति यद्विशिष्यात्। तथा चाकामेनापि समुच्चयानामवान्तरभेदः स्वाभाविको वक्तव्यः। तथा च स एवास्तु संशयविषयः कृतं द्रव्ये द्वित्वादिनेति। तस्मात् संविदेव भगवती वस्तूपगमे नः शरणं समुच्चयादिविलक्षणं द्वित्वाद्यवगाहमाना व्यवस्थापिका द्वित्वादीनाम्। तदनुसरणप्रकारश्च युक्तिबहुलतया वार्तिककृता कृत इति मन्तव्यम्।

यः पुनरनुभूयमानमेकत्वं द्वित्वादींश्चानुभूयमानान्न प्रतिपद्यते तस्य खल्वनुभवमपह्नुवानस्य

वृत्तिः

रप्रत्यक्षत्वेऽपि (१)तत्समूहरूपघटादेः प्रत्यक्षं स्यादिति (२)चेद् ब्रूषे, तदपि न, अणूना-

(१) 'तत्समूहघटादेः' ल०।

(२) 'चेन्न तदपि अणूनां' भ०।

न्यायभाष्यम्

दाहरणं गन्धादय इति। एवं परिमाण-संयोग-स्पन्द-जाति-विशेष(१)प्रत्ययानप्यनुयोक्तव्यः, तेषु चैवं प्रसङ्ग इति।

एकत्वबुद्धिस्तस्मिंस्तदिति प्रत्यय इति विशेषहेतुर्महदिति प्रत्ययेन सामानाधिकरण्यात्—एकमिदं महच्चेति एकविषयौ प्रत्ययौ समानाधिकरणौ भवतः तेन विज्ञायते यन्महत् तदेकमिति। अणुसमूहातिशयग्रहणं महत्प्रत्यय इति चेत् सोऽयममहत्सु अणुषु महत्प्रत्ययोऽतस्मिंस्तदिति प्रत्ययो भवतीति। किं चातः? अतस्मिंस्तदिति (२)प्रत्ययस्य प्रधानापेक्षित्वात् प्रधानसिद्धिरिति भवितव्यं महत्येव महत्(२)*-प्रत्ययेनेति।

न्यायवार्त्तिकम्

यः पुनरेकत्वं द्वित्वादींश्च न प्रतिपद्यते तस्य न समुच्चयो न समुच्चयनिवृत्तिः—अनभ्युपगतैकत्वस्य कस्य समुच्चयः अनभ्युपगतद्वित्वस्य च कस्य प्रतिषेधः। एकद्वित्वादींश्चार्थान्तरभूतानन भ्युपगच्छत एकं शतम् एकं द्वित्वमित्येकप्रत्ययो न स्यात्। भेदाग्रहाच्च शब्दादिष्वेकप्रत्ययः—यस्माच्छब्दादिषु भेदो न गृह्यते उपलभ्यमानेष्वतस्तेषु अभेदप्रत्ययः, न पुनः परमाणुष्वभेदग्रहणस्य निमित्तमस्त्यतीन्द्रियत्वादणूनामित्युक्तम्। उदाहरणमात्रत्वाच्चैकप्रत्ययपर्यनुयोगस्यैकप्रत्ययवदनेकप्रत्ययमप्यनुयोक्तव्यः—योऽवयविनमर्थान्तरं न प्रतिपद्यते तस्य यथैकप्रत्ययोऽनुपपन्नस्तथाऽनेकप्रत्यया अपि न प्राप्नुवन्ति। यथा चैकानेकप्रत्ययान् एवं घटादिप्रत्ययान् पर्यनुयोज्य इति। एवं परिमाण-संयोग-प्रस्पन्द-जाति-विशेषप्रत्ययानपि पर्यनुयोज्यः तेषु चैवं प्रसङ्गः—यद्यवयविनमर्थान्तरं न प्रतिपद्यसे महदिति संयुक्त इति (क)वाऽश्वो गच्छतीति प्रत्यया न प्राप्नुवन्ति, न ह्यतीन्द्रियेषु परमाणुषु एते प्रत्यया युज्यन्त इति।

किमेते एकादिप्रत्यया अणुसञ्चयमात्रे आहोस्विदर्थान्तरभाव इति सन्दिह्यते। सन्देहे सति विशेषहेतुर्वक्तव्य इति। अयं विशेषहेतुः महत्प्रत्ययसामानाधिकरण्यादेकप्रत्ययो महति भवति। यः खलु यत्समानाधिकरणः प्रत्ययो दृष्टः स तद्धर्मयुक्तो भवति, यथा—नीलमुत्पलमिति उभयधर्मयोगिनि नीलोत्पलप्रत्ययः प्रवर्तते। अस्ति च महत्प्रत्ययसामानाधिकरण्यमेकप्रत्ययस्य, तस्मा-

न्यायवार्त्तिकतात्पर्यटीका

निर्मर्यादतयैकत्वाधारोऽपि नास्तीति कस्य समुच्चयो द्वित्वादिः स्यात्। समुच्चयाभावेऽपि कस्याभाव एकत्वं स्यादित्याह—यः पुनरिति। अपि च एकत्वादीन् मुख्याननभ्युपगच्छतोऽयमपि भाक्तः प्रयोगो न स्यादित्याह—(ख)एकत्वं द्वित्वादींश्चेति।

भाष्यमनुभाष्य व्याचष्टे—तेषु चैवमिति।

---

(१) '-प्रत्यया अप्यनुयोक्तव्या' इति ज०। (२) अयमंशः वि-पु० नास्ति।

(क) 'वा' शब्दः 'प्रत्ययाः' इत्यतः पूर्वं पठितुमुचितः।

(ख) आदर्शपुस्तकयोः 'एकत्वद्वित्वादींश्चे'ति पाठः।

न्यायभाष्यम्

(१)अणुः शब्दो महानिति च व्यवसायात् प्रधानसिद्धिरिति चेद् न मन्दतीव्रताग्रहणमियत्तानवधारणात्—यथा द्रव्ये अणुः शब्दोऽल्पो मन्द इत्येतस्य ग्रहणं महान् शब्दः पटुस्तीव्र इत्येतस्य ग्रहणम्। कस्मात्? इयत्तानवधारणात्। न ह्ययं महान् शब्द इति व्यवस्यन्नियानयमित्यवधारयति, यथा बदरामलकविल्वादीनि।

न्यायवार्त्तिकम्

न्महत्येकप्रत्ययः। अणुसमूहेऽतिशयग्रहणमिति चेत्—अथ मन्यसे नास्माभिरर्थान्तरभूतोऽवयव्यभ्युपगम्यते, अपि त्वणुसमूहमुपलभ्याणुसमूहान्तरेऽतिशयं गृह्णतो महत्प्रत्ययो भवति, सोऽयमतस्मिंस्तदिति प्रत्यय इति पूर्ववत्प्रसङ्ग इति—अमहत्स्वणुष्वमहत्सु चाणुसमूहेषु योऽयं महत्प्रत्ययः सोऽतस्मिंस्तदिति मिथ्याप्रत्ययः, मिथ्याप्रत्ययाश्च प्रधानमन्तरेण न भवन्तीति पूर्ववदेव प्रसङ्गः।

अणुः शब्दो महानिति व्यवसायात् प्रधानसिद्धिरिति चेत्—अथ मन्यसे महान् शब्दोऽणुः शब्द इति शब्दे दृष्टो महदणुप्रत्ययः प्रधानमन्यत्र महदणुप्रत्ययस्येति। न च मन्दतीव्रताग्रहणमियत्तानवधारणात्—न शब्दे महत्त्वं नाणुत्वं गुणत्वात्। अणुमहत्प्रत्ययस्तर्हि शब्देन प्राप्नोति? न न प्राप्नोति, अन्यनिमित्तत्वात्। किं निमित्तम्? मन्दता तीव्रता च। कस्मात्? इयत्तानवधारणात्—न ह्ययं महान् शब्द इति व्यवस्यन्नियानित्यवधारयति। यथा (क) कुवलामलकविल्वान्यवधारयन् कुवलादामलकं महद् आमलकाच्च महद् विल्वम्, तानि चेयत्तया परिच्छिनत्ति इयत्परिमाणमेतदिति, न पुनः शब्देषु एतदस्ति, शब्देष्वपि पूर्वावधृतं शब्दमुपलभ्य तस्माच्छब्दादयं महानणुर्वेति अवधार्यते नावधारणं प्रतिषिध्यते।

इदन्तु चिन्त्यते। योऽयं शब्देऽणुमहत्प्रत्ययः किमयं परिमाणयोगादुतान्यस्मान्निमित्तादिति। अन्यस्मान्निमित्तादिति युक्तम्, गुणस्य गुणान्तरसम्बन्धानुपलब्धेः—न हि गुणस्य गुणान्तरसम्बन्धो दृष्टः यतः परिमाणसम्बन्धोऽपि गम्येत। महत्प्रत्ययादेव गुणवान् शब्दो द्रव्यवदिति चेत्—यथाऽयं महत्प्रत्ययो द्रव्येषु भवन्महत्परिमाणयोगाद्भवति, शब्देऽपि चायं महत्प्रत्ययो भवति, अतो महत्प्रत्ययविषयत्वान्महत्परिमाणयुक्तः शब्द इति। न, अनैकान्तात्

न्यायवार्त्तिकतात्पर्यटीका

इयत्ताऽनवधारणादिति। प्रत्यक्षपरिमाणविषयमियत्तावधारणम्, परममहतां त्वप्रत्यक्षपरिमाणानां सत्यपीयत्तानवधारणे नापरिमाणता, द्रव्यत्वेन व्योमादीनां परिमाणानुमानादिति।

(१) 'अणुशब्दो' ज०।

(क) कुवलं बदरमेदः।

न्यायभाष्यम्

संयुक्ते इमे इति च (१)द्वित्वसमानाश्रयप्राप्तिग्रहणम्—द्वौ समुदायावाश्रयः संयोगस्येति चेत् कोऽयं समुदायः? प्राप्तिरनेकस्यानेका वा प्राप्तिरेकस्य समुदाय इति चेत् प्राप्तेरग्रहणं प्राप्त्याश्रितायाः। संयुक्ते इमे वस्तुनी इति नात्र द्वे प्राप्ती संयुक्ते गृह्येते।

अनेकसमूहः समुदाय इति चेद् न द्वित्वेन समानाधिकरणस्य ग्रहणात्। द्वाविमौ संयुक्तावर्थाविति ग्रहणे सति नानेकसमूहाश्रयः संयोगो गृह्यते। न च द्वयोरण्वो-र्ग्रहणमस्ति। तस्मान्महती द्वित्वाश्रयभूते द्रव्ये संयोगस्य स्थानमिति।

न्यायवार्त्तिकम्

—महत्प्रत्ययविषयत्वे सत्यपि महत्परिमाणयोगो न दृष्टः, यथा महत्परिमाण इति। द्रव्ये तर्हि महत्प्रत्ययः कथम्—यदि तावन्महत्प्रत्ययविषयत्वे सत्यपि महत्परिमाणयोगं न प्रति-पद्यसे महत्परिमाणयुक्तं द्रव्यमित्येतत् कथम्? न महत्प्रत्ययविषयत्वात् महत्परिमाणयुक्तं द्रव्यम्, अपि तु महत्परिमाणयोगे सति महत्प्रत्ययो द्रव्य इति। महत्परिमाणयोगस्तु द्रव्यस्य विशेष-प्रत्ययानामनाकस्मिकत्वेन। यदि विशेषप्रत्ययानामनाकस्मिकत्वेन महत्परिमाणयोगो द्रव्ये, शब्देऽप्येवम्, शब्दस्य महत्प्रत्ययोऽस्ति तेनापि नाकस्माद्भवितव्यम्। कश्चैवमाह शब्देऽप्यय-माकस्मिक इति। किन्निमित्तः? मन्दतीव्रतानिमित्तः—मन्दता तीव्रता च शब्दधर्मः अतोऽणु-महत्प्रत्ययः शब्दे इति। का पुनरियं मन्दता तीव्रता च? अणुद्रव्यसामान्यात् सामान्य-प्रत्ययविषयत्वं मन्दता (क)महद्द्रव्यसामान्याच्च(२) सामान्यप्रत्ययविषयत्वं तीव्रता पाटवमिति।

संयुक्ते इति द्वित्वसमानाश्रयं प्राप्तिग्रहणमवयविनः प्रतिपादकम्। कथमिति? संयुक्तमह-त्प्रत्ययावेकविषयौ प्रतिसन्धानान्नीलोत्पलादिप्रत्ययवत्—यथा च नीलमुत्पलं चेति प्रतिसन्धीय-मानौ प्रत्ययावेकविषयौ भवतः तथा संयुक्ते महती इति च प्रतिसन्धानमस्ति। तस्मात् प्रति-सन्धानादेकविषयाविति। एतेनैकं महच्चलति खदिर इति प्रत्यया व्याख्याताः।

न्यायवार्त्तिकतात्पर्यटीका

यथा महत्परिमाण इति। कुवलपरिमाणादामलकपरिमाणं महदिति लौकिका व्यप-दिशन्ति, यथा कुवलादामलकं महदिति। न च परिमाणस्य परिमाणयोगः अनवस्थाप्रसङ्गादिति। तस्माद्भाक्तोऽयं व्यपदेशो महत्त्वे महदिति। तस्मिन् तच्छब्दो भाक्तमहच्छब्दवान् गुणत्वान्-महत्त्ववत् गुणत्वं च शब्दस्यानुमानलक्षणे प्रसाधितम्। भाक्तं च मुख्यपूर्वकमिति क्वचिन्मुख्येन महत्त्वेन भवितव्यं तच्चासति बाधके द्रव्ये मुख्यमिति सिद्धम्। न महत्प्रत्यय-विषयत्वादिति, न तन्मात्राद् अपि त्वबाधितादनन्यथासिद्धादिति। तदेवाऽऽह—अपि त्वित्यादि।

(१) 'द्वित्वसमानाश्रयं प्राप्ति-' ज-वि०। (२) अत्र 'असामान्यप्रत्ययविषयत्वं' इति पाठान्तरं क्वचिद्दृष्टम्। (क) महाद्रव्यीति वक्तव्ये महद्द्रव्येत्युक्तिः शिष्टप्रयोगाणामुपपादनीया।

न्यायभाष्यम्

प्रत्यासत्तिः (१)प्रतीघातावसाना संयोगो नार्थान्तरमिति चेत् नार्थान्तरहेतुत्वात् संयोगस्य। शब्दरूपादिस्पन्दानां हेतुः संयोगः। न च द्रव्ययोर्गुणान्तरोपजननमन्तरेण शब्दे रूपादिषु (२)स्पन्दे च कारणत्वं गृह्यते, तस्माद् गुणान्तरम्। प्रत्ययविषयश्चार्थान्तरं तत्प्रतिषेधो वा, कुण्डली गुरुरकुण्डलश्छात्र इति। संयोगबुद्धेश्च यद्यर्थान्तरं न विषयः अर्थान्तरप्रतिषेधस्तर्हि विषयः, तत्र प्रतिषिध्यमानवचनम्—संयुक्ते द्रव्ये इति यदर्थान्तरमन्यत्र दृष्टमिह प्रतिषिध्यते तद्वक्तव्यमिति। (३)द्वयोर्महतोराश्रितस्य ग्रहणान्नाण्वाश्रय इति।

न्यायवार्त्तिकम्

समुदायद्वयापेक्ष इति चेत्—अथ मन्यसे द्वौ समुदायावाश्रित्य संयुक्तमहत्प्रत्ययौ भवतः, तथैकादिमहत्प्रत्यया (४) अप्येकसमुदायापेक्षा इति चेत्, न; विकल्पानुपपत्तेः। समुदायापेक्षाः संयुक्तमहदादिप्रत्यया इति कोऽयं समुदायः ? किमनेकः समुदाय्युतानेकस्य प्राप्तिरिति। अनेकस्य प्राप्तिः समुदाय इति चेत्, प्राप्ती प्राप्ते इति प्रत्ययः स्याद् इति। किं कारणम् ? समुदायस्य प्राप्तित्वेनाभ्युपगमात्। इमे वस्तुनी संयुक्ते इति च न स्यात्, प्राप्ती प्राप्ते इति च स्यात्। समुदायश्च समुदायान्तरप्राप्तावेकीभूत इति प्राप्तिप्रत्ययो न स्यात् समुदायस्यैकत्वात्। अथानेकः समुदायी समुदायः, द्वित्वेन सामानाधिकरण्यं न स्यात्—संयुक्ते इमे वस्तुनी इति द्वित्वसमानाधिकरणः प्रत्ययो न स्यात्। तस्मान्महती द्वित्वाश्रयभूते द्रव्ये संयोगसंस्थानमिति। न संयोगोऽस्तीति चेत् ? उक्तमत्र यथा अर्थान्तरं संयोग इति।

न्यायवार्त्तिकतात्पर्यटीका

अनेनानन्यथासिद्धिर्द्रव्ये महत्प्रत्ययस्य दर्शिता। तथैकादिमहत्प्रत्यया इति, समुदायमेकमाश्रित्येति शेषः। समुदायश्च समुदायान्तरप्राप्ताविति। यदा हि भिन्ना अपि समुदायिनः प्राप्त्या एकीकृता एकः समुदायः तदा समुदायान्तरमपि समुदायान्तरेण प्राप्तमेकः समुदायः, न चैकस्याऽऽत्मना प्राप्तिरस्ति। न हि तदेवाङ्गुल्यग्रं तेनैवाङ्गुल्यग्रेण प्राप्यते। ततश्च द्वयोः समुदाययोः प्राप्तिरित्ययुक्तमित्यर्थः।

वृत्तिः

मतीन्द्रियत्वात्। प्रत्यक्षे च महत्त्वस्य हेतुत्वात् तत्सत्त्वात् सेनावनादिप्रत्यक्षं युज्यते, न त्वणूनां महत्त्वाभावादिति भावः ॥ ३६ ॥

समासमवयविपरीक्षाप्रकरणम् ॥ ४ ॥

---

(१) 'प्रतीघा तावता' इति ज०। (२) 'स्पर्शे' इति ज०। (३) 'द्रव्ययो-' इति टि०। (४) 'एकादिसमुदायापेक्षा' इति क०-ख०-वार्त्तिकपुस्तकधृतपाठान्तरम्।

न्यायभाष्यम्

जातिविशेषस्य प्रत्ययानुवृत्तिलिङ्गस्याप्रत्याख्यानम् , प्रत्याख्याने वा प्रत्ययव्यवस्थानुपपत्तिः। व्यधिकरणस्यानभिव्यक्तेरधिकरणवचनम्। अणुसमवस्थानं विषय इति चेत् प्राप्ताप्राप्तसामर्थ्यवचनम्—किमप्राप्ते अणुसमवस्थाने तदाश्रयो जातिविशेषो गृह्यते अथ प्राप्ते इति। अप्राप्ते ग्रहणमिति चेत् व्यवहितस्याणुसमवस्थानस्याप्युपलब्धिप्रसङ्गः, (१)व्यवहितेऽणुसमवस्थाने तदाश्रयो जातिविशेषो गृह्येत। प्राप्ते ग्रहणमिति

न्यायवार्त्तिकम्

इदं चावयवसमुदायवादी प्रष्टव्यः—योऽयं गौरश्वः पुरुष इति जातिनिमित्तः प्रत्ययः, स क्व भवतीति। नैव जातिरस्ति कुतो जातिनिमित्तः प्रत्ययो भविष्यतीति। जातिविशेषस्य प्रत्ययानुवृत्तिलिङ्गस्याप्रत्याख्यानम्—न जातिविशेषमन्तरेण प्रत्ययानुवृत्तेर्निमित्तमस्ति। न च निर्निमित्तः प्रत्ययो नामाऽऽस्थातुमर्हति, अस्ति चायमनुवृत्तः प्रत्ययः इमानि कुण्डलानीति, अस्ति च व्यावृत्तः प्रत्ययो नेमानि कुण्डलानीति; तस्माज्जातिविशेषो न प्रत्याख्येयः। व्यधिकरणस्यानभिव्यक्तेरधिकरणवचनम्—न चायं जातिविशेषो व्यधिकरणो व्यज्यत इत्यधिकरणमवश्यं वक्तव्यम्। अणुसमवस्थानमधिकरणमिति चेत्—अथ मन्यसे परमाणव एव केनचित्समवस्थानेनावतिष्ठमानास्तां तां जातिं व्यञ्जयन्त्यतो नावयवी सिध्यतीति। तत्र तावदुक्तम्—समवस्थानं संयोगोऽप्यर्थान्तरमिति। यच्च तत्समवस्थानं जातिविशेषं व्यनक्तीति मन्यसे, किं तच्चक्षुषा

न्यायवार्त्तिकतात्पर्यटीका

चोदयति—नैव जातिरस्तीति। अयमभिसन्धिः—न सामान्यं नाम वस्तुसद् यस्याश्रयो वस्तुभूतोऽनुस्रियते। तथा हि तत् पिण्डे वा वर्त्तेत सर्वत्र वा। यदि सर्वत्र, सर्व एव गावः प्रसज्येरन्। यथा हि शाबलेयादयो गोत्वाभिसम्बन्धाद् गाव एवं विश्वमेव तत्सम्बद्धमिति गौः प्रसज्येत। अथ केषुचिदेव पिण्डेषु वर्तते, तदा (क)वक्तव्यं यदा क्वचिद्देशे पिण्डो जायते तदा (ख) कुतस्त्यं पुनरस्य गोत्वमिति। न तावत्तत्रापि पिण्डोत्पादात् पूर्वमासीत् नापि पिण्डान्तरादागतं तस्य निष्क्रियत्वात् पिण्डान्तरस्यागप्रसङ्गाच्च। न च पिण्डे जायमाने जायते अनित्यत्वापत्तेः। पिण्डान्तरस्य च गोत्वाजन्माजन्मस्वरूपविरुद्धधर्माध्यासेन भेदे सत्यसामान्यत्वप्रसङ्गः। तदितो महाव्यसनाद्बिभ्यता सांवृतमेव सामान्यमास्थेयं न पारमार्थिकमिति। परिहरति—जातिविशेषस्येति। प्रत्ययानुवृत्तिर्यद्यपि प्रत्यक्षा तथाऽपि विप्रतिपन्नं प्रति सैव

---

(१) 'ते व्यवहिते' इति ल०, 'अव्यवहिते' ज०।

(क) 'वक्तव्यं ततो यदा' इत्यादर्शपुस्तकयोः पाठः। उपरि मुद्रिताकारस्तु शोधितः।

(ख) अतः परमादर्शपुस्तकयोर्दृश्यमानं 'वक्तव्यं' इत्यक्षरत्रयं प्रमादान्मुद्रितमिति मत्वा परित्यक्तम्।

न्यायभाष्यम्

चेत् मध्यपरभागयोरप्राप्तावनभिव्यक्तिः। यावत्प्राप्तं भवति तावत्यभिव्यक्तिरिति चेत् तावतोऽधिकरणत्वमणुसमवस्थानस्य। यावति प्राप्ते जातिविशेषो गृह्यते तावदस्याधिकरणमिति प्राप्तं भवति। तत्रैकसमुदाये प्रतीयमानेऽर्थभेदः। एवं च सति योऽयमणुसमुदायो वृक्ष इति प्रतीयते तत्र वृक्षबहुत्वं प्रतीयेत, यत्र यत्र ह्यणुसमुदायस्य भागे वृक्षत्वं गृह्यते स स वृक्ष इति। तस्मात् समुदिताणुसमवस्थानस्यार्थान्तरस्य जातिविशेषाभिव्यक्ति(क)विषयत्वादवयव्यर्थान्तरभूत इति ॥ ३६ ॥

न्यायवार्त्तिकम्

प्राप्तं व्यनक्त्याहोस्विदप्राप्तमिति। प्राप्तं व्यनक्तीति चेत् मध्यभागपरभागयोरप्राप्तत्वादनभिव्यक्तिः—स यदि प्राप्ते समवस्थाने जातिविशेषो व्यज्यते मध्यभागपरभागयोरर्वाग्भागव्यवधानादप्राप्तावनभिव्यक्तिः। यावत्प्राप्तं तावति अभिव्यक्तिरिति चेत् न, तावतोऽधिकरणत्वम्—अथ मन्यसे यावच्चक्षुषा समवस्थानं प्राप्तं तावति भवति जातिव्यक्तिः, तावदेव तर्ह्यधिकरणं जातेः प्राप्तम्। एवं सति प्रतीयमानभेदः—योऽयं वृक्ष इति समुदायः प्रतीयते तस्य वृक्षस्य भेदः प्राप्नोति। किं कारणम्? यावति यावति जातिर्व्यज्यते स स वृक्ष इति प्राप्नोति। ततश्चैको वृक्षोऽनेक इति प्रतीयेत इत्येकप्रत्ययो न स्यात्। अर्वाग्भागस्य चावृक्षत्वात् न क्वचिद्वृक्षत्वमिति वृक्षबुद्धेर्विषयो वक्तव्यः। तस्मात् समुदिताणुस्थानार्थान्तरस्य जातिविशेषाभिव्यक्तिहेतुत्वादवयव्यर्थान्तरभूत इति। समुदिता अणवः स्थानं यस्य सोऽयं समुदिताणुस्थानः समुदिताणुस्थानश्चासावर्थान्तरं च तस्य जातिविशेषव्यक्तिहेतुत्वं नाणूनामिति सिध्यत्यवयव्यर्थान्तरभूतः।

न्यायवार्त्तिकतात्पर्यटीका

लिङ्गमुच्यते। सन्ति हि केचिद्भावा ये सहावस्थानेऽपि परस्परमसंबद्धाः, यथा समानकाला गन्धरसरूपस्पर्शाः, विज्ञानानि च बहूनि परेषां समानकालान्यप्यसंसर्गीणि, दिक्कालाकाशात्मानश्च सहावस्थाना अपि परस्परासंसर्गिणो वैशेषिकाणाम्; तथा सामान्यमपि सर्वासंबद्धमपि सर्वैः सहावतिष्ठते, यास्त्वस्य व्यक्तयस्ताभिः परं संबध्यन्ते। तथा च यत्र जायन्ते व्यक्तयस्तत्रासंबद्धावपि स्तः सामान्यसमवायाविति। तासां जन्मैव सामान्यसमवायावच्छेदः। स च स्वकारणादननुयोज्य इति वस्तुगतिं प्रामाणिकीं विद्वांसो नास्माद्दूषणाद्बिभ्यतीति। बाधकान्तराणि चास्यावयविव्याख्यानेन प्रत्याख्यातानि। तावदेव तर्ह्यधिकरणं जातेः प्राप्तमिति। ये ये वृक्षत्वादिजातिमनपेक्षा व्यञ्जयन्ति ते ते परस्परं वृक्षादिव्यक्तितया भिद्यन्ते। यथा किंशुकाशोकचम्पकादयो भिन्नास्तरवस्तथाऽर्वाग्भागमध्यभागापरभागा अपि भिन्नास्तस्य स्युः। अवयविनि तु जायमाने नायं दोषः, तस्य सर्वावयवसाधारण्येन प्रत्यभिज्ञाय

(क) विषयो देशः अधिकरणमिति यावत्। 'नीवृज्जनपदौ देशविषयौ तूपवर्त्तनम्' इत्यमरः।

न्यायवार्त्तिकम्

अनभ्युपगतार्थान्तरावयविना परमाणुशब्दस्यार्थो वक्तव्यः। परमाणुशब्दस्य परमापकर्ष-वाचित्वात् न ह्यसति महति न चासत्यणौ परमाणुरिति विशेषणं युक्तम्। परिमाणप्रकर्षयोगे सति परमाणुरिति विशेषणमर्थवत्, असत्यनर्थकमिति। स चायं परिमाणप्रकर्षयोगः सत्यवयविनि सिध्यतीति।

सत्त्वरजस्तमसां सर्वापकृष्टः संघातः परमाणुरिति कस्यचिद्दर्शनम्। तन्न युक्तमिति पश्यामः, व्याघातात्—सर्वापकृष्टः संघातश्चेति व्याहतम्, न हि संहन्यमानमन्तरेण संघातः सम्भवति।

अर्थान्तरं पटात्तन्तवः तद्धेतुत्वात् तुर्यादिवदिति। तुर्यादिपटकारणमर्थान्तरमिति दृष्टम्, तथा च तन्तवः, तस्मादर्थान्तरमिति। सामर्थ्यभेदाद् विषागदवत्, भिन्नप्रत्ययविषयत्वाद् रूपस्पर्शवत्। तन्तुपटरूपे भिन्नकारणे विशेषवत्त्वाद् रूपस्पर्शवत्।

एके तु भिन्नरूपत्वादित्येवं हेतुं कृत्वा परमाणुना प्रत्यवतिष्ठन्ते—एकस्मिन्नपि परमाणौ रूपभेदो दृष्टः रक्तः श्याम इति च। स त्वेवं प्रत्यवस्थेयः—न हेत्वर्थापरिज्ञानात्—न ब्रूमो भिन्नरूपत्वादन्योऽवयव्यवयवेभ्यः, अपि तु तन्तुपटरूपे भिन्नकारणे इति पक्षयित्वा विशेषवत्त्वादिति हेतुं ब्रूमः। तथा चायमप्रतिषेधः। बहुग्रन्थविस्तारिणी त्वेषा कथेत्युपरम्यते ॥ ३६ ॥

(इत्यवयविपरीक्षा)

न्यायवार्त्तिकतात्पर्यटीका

-मानत्वात्। न चैवमवयविनोऽपि तावन्तः स्युरिति वाच्यम्, तस्यैकस्य सर्वावयवसाधारण्येन प्रत्यभिज्ञायमानत्वात्, अवयवान्तरस्य तु नावयवान्तरे प्रत्यभिज्ञानमिति तेषां वृक्षव्यक्ति-हेतुत्वे वृक्षानेकत्वप्रसङ्ग इति।

सर्वापकृष्टः संघातश्चेति, व्याघातः संहन्यमानापेक्षयाऽनपकर्षादित्यर्थः। सांख्यमवयवेभ्यो-ऽनर्थान्तरमवयविनं मन्यमानं प्रति प्रयोगमाह—अर्थान्तरमिति। (क)प्रावरणसामर्थ्यं पटस्य, तन्तूनां तु पटोत्पादनसामर्थ्यम्। तन्तुपटरूपे इति, तन्तूनां नीलपीतलोहितादिरूपं पटस्य तु चित्रम्, तत्र नीलादीनां समवायिकारणं तन्तवः चित्रस्य तु पटः। एवं तन्तुपटयोः सावर्ण्येऽपि कश्चिद्विशेष उन्नेयः। विशेषवत्त्वं च वैयधिकरण्येन प्रतीयमानत्वम्, तेन च भिन्नकारणत्वम्, (ख)भिन्नसमवायिकारणत्वं साध्यत इति न सिद्धसाधनं नाप्यनैकान्तिकत्वमिति।

ये तु पक्षहेतू अन्यथाकारं गृहीत्वा दूषयांबभूवुः तन्मतमुपन्यस्य दूषयति—एके त्विति ॥३६॥

(क) सामर्थ्यभेदादिति दृष्टान्तरं दृष्टान्तेन विवृणोति प्रावरणेति।

(ख) तन्तुपटरूपे भिन्नकारणे इति वार्त्तिकप्रयोगे भिन्नकारणत्वं व्याचष्टे भिन्नसमवायीति।

न्यायभाष्यम्

परीक्षितं प्रत्यक्षम्। अनुमानमिदानीं परीक्ष्यते—

(सू०)—रोधोपघातसादृश्येभ्यो व्यभिचारादनुमानमप्रमाणम् ॥ ३७ ॥

अप्रमाणमिति एकदाऽप्यर्थस्य न प्रतिपादकमिति। रोधादपि नदी पूर्णा गृह्यते, तदा चोपरिष्टाद् वृष्टो देव इति मिथ्यानुमानम्। नीडोपघातादपि पिपीलिकाण्डसञ्चारो भवति, तदा च भविष्यति वृष्टिरिति मिथ्यानुमानमिति। पुरुषोऽपि मयूरवाशितमनुकरोति तदाऽपि शब्दसादृश्यान्मिथ्यानुमानं भवति ॥ ३७ ॥

न्यायवार्त्तिकम्

परम्परया परीक्षितं प्रत्यक्षम्, अथेदानीमवसरप्राप्तमनुमानं परीक्ष्यते। किमिदमनुमानम्? उक्तं तत्पूर्वकमनुमानमिति। अत्र च पूर्ववदादेरुदाहरणानि—नदीपूरः, पिपीलिकाण्डसञ्चरणम्, मयूरवाशितमिति। एतदुदाहरणव्यभिचारद्वारकं सूत्रम्—

रोधोपघातसादृश्येभ्यो व्यभिचारादनुमानमप्रमाणम् इति। तत्र रोधो नाम (१)अपां स्पन्दमानानां (२)द्रवत्वप्रतिबन्धहेतुः, उपघातः पिपीलिकागृहोपद्रवः, सादृश्यं मयूरशब्दपुरुषशब्दयोः समानप्रत्ययकर्तृत्वम्, एभ्यो व्यभिचारादनुमानमप्रमाणमिति। शेषं भाष्ये।

यत्तावदनुमानमप्रमाणमित्युक्तं तदयुक्तम्, प्रतिज्ञापदयोर्व्याघातात्—अनुमानमिति सम्बन्धस्यातीन्द्रियार्थसाधकस्यैतन्नाम, अप्रमाणमिति तस्य प्रतिषेधः। सोऽयं प्रतिज्ञापदयोर्व्याघातः अनुज्ञातप्रतिषिद्धयोरेकत्वानुपपत्तिः(क) प्रतिज्ञाहेत्वोश्च विरोधः—अनुमानमप्रमाणमिति

न्यायवार्त्तिकतात्पर्यटीका

अनुमानमिदानीमिति भाष्यम्। अत्रेदानींपदार्थमाह वार्तिककारः—अथेदानीमवसरप्राप्तमिति। उद्देशक्रम एव लक्षणपरीक्षयोः संबन्ध इत्यर्थः।

रोधो—णम् (सू० ३७)॥ अप्रमाणपदस्य व्याख्यानभाष्यम् एकदाऽपीति। प्रतिपादकं निश्चायकम्। लक्ष्यपरत्वाल्लक्षणस्य लक्षणयुक्तस्य लक्ष्यस्य व्यभिचारादप्रमाणत्वेन लक्षणमेव दूषितं भवतीत्यर्थः।

वार्तिकम्—पूर्ववदादेरुदाहरणानीति। अत्र च नदीपूरमयूरवाशिते शेषवत उदाहरणे। पिपीलिकाण्डसञ्चरणं चाचिरमुत्पत्स्यमानस्य वर्षस्य न कार्यम्, न ह्यनागतं कारणं भवति पूर्वोत्पन्नस्य। न च नासावक्रत्वादयोऽप्यनागतेन मरणेन क्रियन्ते, तथा सति पुत्रोऽपि पितुः

---

(१) 'अपां स्पन्दमानानाम्' इति ख-पुस्तके नास्ति। 'अपां स्पन्दमानाना'मिति पाठान्तरं क्वचिद् दृष्टम्।

(२) 'द्रवत्वप्रतिबन्धहेतुः' इति ख।

(क) एकत्वानुपपत्तेरिति पञ्चम्यन्तपाठकल्पना तु शोभना।

न्यायवार्त्तिकम्

प्रतिज्ञा रोधोपघातसादृश्येभ्यो व्यभिचारादिति हेतुः। यद् व्यभिचारि तदप्रमाणमिति, यथा गोसिद्धौ विषाणित्वम्। सोऽयं हेतुः प्रतिज्ञां व्याहन्ति प्रतिज्ञा च हेतुमिति। यच्चेदमुच्यते अनुमानमप्रमाणमिति, तत्किमनुमानमात्रस्याप्रमाणत्वमुतानुमानविशेषस्येति। किं चातः? यद्यनुमानमात्रमप्रमाणमिति पक्षः, हेतोरेकदेशवृत्तित्वादव्यापकत्वम्—समस्तमनुमानं (१)पक्षीकृतम्, न सर्वस्मिन्ननुमाने व्यभिचारोऽस्ति। न हि व्यभिचारस्याप्रमाणत्वसाधकस्य व्यभिचारः (२)प्रतिपादयितुं शक्यः। (३)न हि व्यभिचारस्य व्यभिचारे किञ्चित् प्रमाणमस्तीत्यव्यापकत्वादहेतुः। अथ यद् व्यभिचारि तदप्रमाणमिति ब्रूषे, प्रतिज्ञाविशेषणत्वाद्धेतोर्हेत्वन्तरं (४)वचनीयम्। सिद्धसाधनं चैतत् यद् व्यभिचारि तत् प्रमाणं न भवति ॥ ३७ ॥

न्यायवार्त्तिकतात्पर्यटीका

कारणं स्यादिति सर्वमवदातम्। कार्यकारणभावव्यवस्थापनं लौकिकं भवेत्। नियमवान् खलु प्राग्भावः कारणत्वस्य व्यवस्थापको नियमवांश्च पश्चाद्भावः कार्यत्वस्य व्यवस्थापकः, नासावक्रत्वादयो मरणस्य यत्कारणं तस्य पूर्वकार्याणीति प्रत्यासत्त्याऽनया मरणमनुमापयन्ति। न च पिपीलिकाण्डसञ्चरणं वर्षस्य कारणमनुपलब्धसामर्थ्यात्, असत्यपि तस्मिन् वर्षस्योत्पत्तेः। वर्षमूलकारणस्य तु महाभूतसंक्षोभस्य पिपीलिकाण्डसञ्चरणं पूर्वकार्यम्। क्लथ्यमानाः खलु पिपीलिका भौमेनोष्मणा स्वान्यण्डानि भूमिष्ठान्युपरिष्टान्नयन्ति। तस्मात् पिपीलिकाण्डसञ्चारेण वर्षकारणमनुमाय यदि वर्षकारणात् कार्यं वर्षमनुमिमते अनुमातारः तदा पूर्ववदुदाहरणम्। अथ कार्यकारणभावमबुद्ध्वैव, तदा कार्यकारणभावाभावेन सामान्यतोदृष्टस्योदाहरणमिति मन्तव्यम्। उदाहरणव्यभिचारद्वारकमिति, लक्ष्यदूषणद्वारेण लक्षणस्य दूषणमित्यर्थः। न हि व्यभिचारलक्षणस्यानुमानाप्रामाण्यप्रतिपादकस्यानुमानस्य व्यभिचारे किञ्चित् प्रमाणमस्तीति ॥ ३७ ॥

वृत्तिः

अवसरेण क्रमप्राप्तमनुमानं परीक्षितुं पूर्वपक्षयति—(रोधोपघातेति)

अनुमानस्य त्रैविध्यं पूर्वमुक्तम्। तत्र त्रिविधस्याप्रामाण्ये साधितेऽनुमानमप्रमाणमर्थात्सिद्धमित्याशयेनेदम्।

अनुमानम् अनुमानत्वेनाभिमतं न प्रमाणं (५)प्रमितिकरणत्वव्यभिचारि व्यभिचारिहेतुकत्वात्। तत्र त्रिविधे व्यभिचारं दर्शयति—रोधेत्यादिना। नदीवृद्ध्या पिपीलिकाण्डसञ्चारेण मयूररुतेन च वृष्ट्यनुमानम्, तत्र त्रिविधमुदाहरणं न सम्भवति

(१) 'पचितम्' ख। (२) 'प्रतिपादयितुं' इति ख-पु० नास्ति। (३) 'नहि व्यभिचारेऽव्यभिचारस्य' ख। (४) 'रचनीयम्' ख। (५) 'प्रमितिकरणं व्यभि-' इति भ०।

(सू०)—नैकदेशत्राससादृश्येभ्योऽर्थान्तरभावात् ॥ ३८ ॥

न्यायभाष्यम्

नायमनुमानव्यभिचारः, अननुमाने तु खल्वयमनुमानाभिमानः। कथम्? नाविशिष्टो लिङ्गं भवितुमर्हति। पूर्वोदकविशिष्टं खलु वर्षोदकं शीघ्रतरत्वं स्रोतसो बहुतर(१)फेनफलपर्णकाष्ठादिवहनं चोपलभमानः पूर्णत्वेन नद्या उपरि वृष्टो देव इत्यनुमिनोति नोदकवृद्धिमात्रेण। पिपीलिकाप्रायस्याण्डसञ्चारे भविष्यति वृष्टिरित्यनुमीयते न कासाञ्चिदिति। नेदं मयूरवाशितं तत्सदृशोऽयं शब्द इति विशेषापरिज्ञानान्मिथ्यानुमानमिति। यस्तु (२)सदृशाद् विशिष्टाच्छब्दाद्विशिष्टमयूरवाशितं गृह्णाति तस्य विशिष्टोऽर्थो गृह्यमाणो लिङ्गम्, यथा सर्पादीनामिति। सोऽयमनुमातुरपराधो नानुमानस्य, योऽर्थविशेषेणानुमेयमर्थमविशिष्टार्थदर्शनेन बुभुत्सत इति ॥ ३८ ॥

न्यायवार्त्तिकम्

यान्यप्येतान्युदाहरणानि भवता व्यभिचारीणीत्युच्यन्ते तेष्वपि व्यभिचारो नास्तीत्यसिद्धतोद्भावनद्वारकं सूत्रम्—

नैकदेशत्राससादृश्येभ्योऽर्थान्तरभावात्। यत्तावत् रोधादपि नदीपूरो भवतीति, नात्र नदीपूरमात्रेण उपरि वृष्टिमद्देशसम्बन्धित्वं नद्याः साध्यते, अपि तु (३)पूरविशेषेण, तस्य च व्यभिचारोऽसिद्धः(३*)। उपघातात् पिपीलिकाण्डसञ्चारमात्रस्य च व्यभिचारो न सञ्चरणविशेषस्य।

न्यायवार्त्तिकतात्पर्यटीका

भाष्ये पिपीलिकाप्रायस्येति। प्रायशब्दः प्रबन्धार्थः ॥ ३८ ॥

वृत्तिः

नदीरोधाधीननदीवृद्ध्या आश्रयोपघाताधीनपिपीलिकाण्डसञ्चारेण मनुष्यकर्तृकमयूररुतसदृशरुतेन व्यभिचारात्। पिपीलिकाण्डसञ्चारस्य वृष्टिहेतुत्वाभिप्रायेणेदम्।

अथवा लक्षणसूत्रे पूर्ववत् पूर्वकालीनसाध्यानुमापकम्, शेषवत् उत्तरकालीनसाध्यानुमापकं सामान्यतोदृष्टं विद्यमानसाध्यस्यानुमापकम् इत्यर्थ इत्याशयः। एतेन त्रैकालिकसाध्यानुमापकत्वं (४)न सम्भवति।

परे तु—पिपीलिकाण्डसञ्चारेणात्यन्तोष्मानुमानम्, ततश्च महाभूतक्षोभानुमानं तस्य च वृष्टिहेतुत्वात् तेन वृष्ट्यनुमानमिति—वदन्ति।

एवमन्यत्रापि व्यभिचारशङ्कासम्भवादव्यभिचारनिश्चयस्यानुमितिहेतोरेव दुर्लभत्वात् प्रामाण्यं न सम्भवतीत्याशयः ॥ ३७ ॥

---

(१) 'फेनफलपर्णकाष्ठादिबहुलं' इति ज०। (२) 'सदृशात्' इति ल-ग-भ-पु० नास्ति। (३) 'पूरविशेषे वा तस्याव्यभिचारादसिद्धः' ख। (४) भ-पु० 'सम्भवती'ति नकारशून्यः पाठः।

न्यायभाष्यम्

त्रिकालविषयमनुमानं त्रैकाल्यग्रहणादित्युक्तम्। अत्र च—

(सू०)—वर्त्तमानाभावः पततः पतितपतितव्यकालोपपत्तेः॥३९॥

वृन्तात् प्रच्युतस्य फलस्य भूमौ प्रत्यासीदतो यदूर्ध्वं स पतितोऽध्वा तत्संयुक्तः कालः पतितकालः, योऽधस्तात् स पतितव्योऽध्वा, तत्संयुक्तः कालः पतितव्यकालः। नेदानीं तृतीयोऽध्वा विद्यते यत्र पततीति वर्त्तमानः कालो गृह्येत। तस्माद् वर्त्तमानः कालो न विद्यत इति(क) ॥ ३९ ॥

न्यायवार्त्तिकम्

कः पुनरसौ विशेषः? अवित्रस्तानां भूयसीनां भूयःसु स्थानेष्वपि (१)पिपीलिकाण्डभूयस्त्वेनोर्ध्व-सञ्चारणं यत् तदनागतवृष्ट्यविनाभावि। शब्दव्यभिचारोऽपि नास्ति—यस्मान्न शब्दमात्रमनुमानं मयूरास्तित्वे, न चात्र मयूरः साध्यते, अपि तु शब्दगताद् विशेषात् (२)षड्जादेः शब्द एव (३)मयूरगुणविशिष्टोऽनुमीयते, एवं हि व्यभिचारो नास्तीत्यसिद्धो हेतुः ॥ ३८ ॥

(इत्यनुमानपरीक्षा)

त्रिकालविषयमनुमानं त्रैकाल्यग्रहणादित्युक्तम्। तत्र तावत् काल एव नास्तीति केचित्। तच्च न; प्रमाणाभावात्—न हि कालासत्त्वे प्रमाणमस्तीति। ननु चानुपलब्धिः कालासत्त्वं प्रतिपादयति, न प्रतिपादयति व्यभिचारात्—त्रिकारणेयमनुपलब्धिः, तत्रानुपलब्ध्या कारण-

न्यायवार्त्तिकतात्पर्यटीका

तदेवम् (ख)अनुमानलक्षणपरीक्षाद्वारेणानुमानलक्षणं परीक्ष्य संप्रत्यनुमानविषयपरीक्षयाऽनु-मानपरीक्षामवतारयति भाष्यकारः—त्रिकालविषयमिति।

वर्त्त—त्तेः (सू० ३९)॥ तत्र वार्त्तिककारः सत्यां कालस्य सिद्धौ वर्त्तमानत्वं परीक्ष्यते स एवापरीक्षितोऽयापि न सिध्यतीति कालस्वरूपं परीक्षते—तत्र तावदिति। त्रिकारणेय-

वृत्तिः

समाधत्ते—(नैकदेशेति)

अनुमानाप्रामाण्यं न युक्तमेकदेशरोधजनदीवृद्धेः त्रासजपिपीलिकाण्डसञ्चारात् मयूररुतसदृशरुताच लिङ्गीभूतानां नदीवृद्ध्यादीनां भिन्नत्वात् (ग)न दोषः। न च सर्वत्र व्यभिचारशङ्का, सत्यां तस्यां तर्केण तदपनयनान्न दोष इत्याशयः ॥ ३८ ॥

समाप्तमनुमानपरीक्षाप्रकरणम् ॥ ५ ॥

---

(१) 'पिपीलिकापिण्डभूयस्त्वेन' ख। (२) 'षड्जनुषङ्गादेः' ख। (३) 'मयूरविशिष्टो-' ख।

(क) 'अपर आहुः नास्ति वर्त्तमानः कालः' इति पा० ३।२।१२३ सूत्रे महाभाष्यम्।

(ख) 'अनुमानलक्ष्यपरीक्षाद्वारेणानुमानलक्षणं परीक्ष्य' इति पाठः समीचीनतया प्रतिभाति।

(ग) 'न दोषः' इत्ययमंशोऽत्र प्रमादान्मुद्रित इति सम्भाव्यते।

न्यायवार्त्तिकम्

वैकल्यं गम्येत, उपलभ्यमेव नास्तीत्येतदेव कुतः? अथोपलभ्यमानस्याभावादनुपलब्धिरित्ययं प्रतिज्ञार्थः, तथा च हेतुर्नास्ति, प्रतिज्ञार्थेनाऽऽक्षिप्तत्वात्—आक्षिप्तो हेतुः प्रतिज्ञार्थेनेति। न चासति धर्मिणि धर्मः सम्भवति आश्रयाभावात्। अथ धर्मोऽपि नास्ति, साधनार्थो हीयते—न ह्यसतः साधनार्थं पश्यामः।

परापरादिप्रत्ययानां च सनिमित्तत्वात् कालप्रतिषेधो न युक्तः—यश्च कालं न प्रतिपद्यते तेन परापरादिप्रत्ययानां निमित्तं वक्तव्यम्। न ह्यसति निमित्ते नैमित्तिकान् विशेषवतः प्रत्ययान् पश्यामो रूपादिप्रत्ययवदिति। कालैकत्वात् प्रत्ययभेदानुपपत्तिरिति चेत्—अथ मन्यसे कालैकत्वे सति न युक्तः परापरादिप्रत्ययभेदः, नाभिन्नं निमित्तं भिन्नं कार्यं करोतीति; न, सापेक्षत्वात्

न्यायवार्त्तिकतात्पर्यटीका

मिति कारणान्तरवैकल्यं विषयस्यायोग्यत्वमभावो वा विषयस्येति त्रीण्यनुपलब्धिकारणानीति। अथ धर्मोऽपि नास्तीति। भावरूपो हि हेतुरभावाधिकरणो न भवति, अभावरूपस्य त्वभावाधिकरणत्वाविरोध इत्यर्थः। परिहरति—साधनार्थो हीयते। न हि पराभिमतोऽभावः सर्वसामर्थ्यरहितः साधनं कस्यचिद्भवति, अस्मदभिमतस्त्वभावः परतन्त्रो भावाधिकरण एव मानधिकरणो नाप्यभावाधिकरण इत्यर्थः।

एवं कालस्य बाधकप्रमाणाभावमुक्त्वा साधकं प्रमाणमाह—परापरादीति। स्वयं विद्यमानयोरनियतदिग्देशयोः समानदिक्कयोर्वा देशतः सन्निकृष्टविप्रकृष्टयोर्वा विप्रकृष्टसन्निकृष्टयोर्वा युवस्थविरयोरेकस्मिन् शरीरावस्थाभेदानुमितातीतसूर्योदयास्तमयरूपक्रियाप्रचयबहुत्वान्तरितजन्मनि स्थविरे युवानं शरीरावस्थाभेदानुमितातीतसूर्योदयास्तमयरूपक्रियाप्रचयाल्पत्वान्तरितजन्मानमवधिं कृत्वा विप्रकृष्टा बुद्धिरुत्पद्यते, तामपेक्ष्य बहुतरसवित्रुदयास्तमयविशिष्टेन कालप्रदेशेन योगाद् वर्षीयसि परत्वस्योत्पत्तिः एवं वर्षीयांसमवधिं कृत्वा यवीयसि सन्निकृष्टा बुद्धिरुत्पद्यते (क)तामपेक्ष्याल्पतरदिनकरोदयास्तमयाल्पत्वान्तरितजन्मानमवधिं कृत्वा विप्रकृष्टा बुद्धिरुत्पद्यते तामपेक्ष्य बहुतरसवित्रुदयास्तमयप्रचयविशिष्टेन कालप्रदेशेन योगाद् यवीयस्यपरत्वस्योत्पत्तिः, तयोश्च कालपिण्डसंयोगयोः प्रत्यक्षत्वं न लोकसिद्धम्। ते एते परत्वापरत्वे कालपिण्डसंयोगादुत्पद्यमाने कालकारणविशिष्टमात्मानं कार्यतया गमयतः। सूर्योदयास्तमयक्रियाप्रचयाल्पत्वबहुत्वविशिष्टात् पिण्डादेव परत्वापरत्वे भविष्यतः कृतमत्र द्रव्यान्तरेण कालेनेति चेत्, न; सवितृसमवेतायाः क्रियायाः पिण्डेनासंबन्धात्। संयुक्तसमवायस्त्वस्याः संबन्धः कालेन सर्वगतेनास्यास्ति। (ख) न वाकाशं सर्वगतमपि परापरव्यतिकरं प्रत्ययकल्पते अस्य स्वरूपेणाभेदात्।

(क) 'तामपेक्ष्याल्पतरे'त्यादि'कालप्रदेशेन योगा'दित्यन्तो ग्रन्थः लिपिकृत्प्रमाददुष्टः, तत्र 'तामपेक्ष्याल्पतरसवितुरुदयास्तमयविशिष्टेन कालप्रदेशेन योगात्' इत्येतावन्मात्रपाठः समीचीनः सम्भाव्यते।

(ख) अत्र कल्पान्तरस्यानुक्ततया वाशब्दार्थासङ्गतेः 'न चाऽऽकाश'मिति पाठः समीचीनतया सम्भाव्यते।

न्यायवार्त्तिकम्

पित्रादिप्रत्ययभेदवदिति—यथैकस्मिन् पुरुषे अनेकसम्बन्धभेदानुविधायिन्यभिन्ने पिता पुत्रो भ्रातेति प्रत्यया भवन्ति तद्वदेकः कालः कार्यकारणविशेषापेक्षः परापरादिप्रत्ययहेतुरिति ।

(इति कालपरीक्षा)

न्यायवार्त्तिकतात्पर्यटीका

अपि वाऽऽकाशात्मानौ न परापरव्यतिकरकारणम् असाधारणगुणयोगित्वात् पृथिव्यादिवत् । तस्मात् परापरव्यतिकरकारणे कल्पनीये । ते च द्रव्यमपारतन्त्र्याद् आकाशवत्, ते दिक्काला उच्येते । एवं यौगपद्यायौगपद्य-चिर-क्षिप्रप्रत्यया अपि काललिङ्गम् । न ह्येते क्रियायां तत्कारकेषु वा भवितुमर्हन्ति तेषु सत्स्वपि कादाचित्कत्वात् । नन्वयं कालोऽपि नित्य इति तस्मिन् सत्यप्येते कादाचित्काः कथं (क) कालकारणम् अपि ? यद्युच्येत—एकसूर्यपरिस्पन्दावच्छिन्नकालसम्बन्धिन्यः (ख) क्रियाः युगपदनेकसूर्यपरिस्पन्दावच्छिन्नकालसम्बन्धिन्यः क्रियाः क्रमवत्योऽयौगपद्यप्रत्ययगोचरः, एवं बहुतरानेकसूर्यपरिस्पन्दावच्छिन्नकालसम्बन्धिनी क्रिया चिरप्रत्ययगोचरः, अल्पतरानेकसूर्यपरिस्पन्दावच्छिन्नकालसम्बन्धिनी क्रिया क्षिप्रप्रत्ययगोचर इति ; कृतं तर्हि सूर्यपरिस्पन्दस्य कालावच्छेदेन, नन्वयं साक्षादेव क्रियामवच्छेत्स्यतीति, तथा च युगपदादिप्रत्यया भविष्यन्तीति तन्न ; सूर्यपरिस्पन्दस्य क्रियाभिः सम्बन्धाभावेन तदवच्छेदकत्वानुपपत्तेः, न वाकाशादिसम्बन्धद्वारमस्य तदवच्छेदकत्वम् । तथा हि नाऽऽकाशादयः क्रियायौगपद्यादिप्रत्ययनिमित्तम् असाधारणगुणयोगित्वाद् घटवत् । एवं यौगपद्यादिप्रत्यया न दिक्कारणकाः दिग्देशनियमानपेक्षणात् कालपिण्डसंयोगजपरत्वापरत्ववदिति । तस्मात् सूर्यपरिस्पन्दस्य देवदत्तादिपरिस्पन्दस्य चास्ति कालेन सर्वगतेन संयुक्तसमवायलक्षणः संबन्धः, एतया च द्वारा परिस्पन्दयोरप्यस्ति सम्बन्ध इति । कालसम्बन्धानपेक्षमेव च सूर्यपरिस्पन्दावच्छिन्नस्य देवदत्तादिपरिस्पन्दस्य ग्रहणमुपपद्यते । यथा दण्डीति शब्दाद्दण्डावच्छिन्नं पुरुषं प्रतीत्य तदन्यथानुपपत्त्या पश्चाद् दण्डपुरुषयोः संयोगभेदोऽवगम्यते न तु सम्बन्धज्ञानपुरःसरं दण्डिविज्ञानम् एवं परत्वापरत्वे अपि कालपिण्डसंयोगनिबन्धने गृहीत्वा कालोऽनुमीयते न तु कालज्ञानपुरःसरं तज्ज्ञानम् ; तत्सिद्धमरूपतया कालोऽप्रत्यक्षः परत्वापरत्वाद्यनुमेयश्चेति । तस्मात् सूक्तम्—परादिप्रत्ययानां चेति । कार्यकारणविशेषापेक्ष इति । कार्यस्य परापरादेः

वृत्तिः

अनुमानस्य त्रिकालविषयत्वमभिमतम्, तन्न युक्तम्, वर्तमानाभावेन तदधीनज्ञानयोरतीतानागतयोरभावेन कालत्रयात्मकविषयाभावात् इत्याशयेन वर्तमानपरीक्षाप्रकरणमारभमाणो वर्तमानमाक्षिपति—(वर्तमानेति)

(क) अत्राऽऽदर्शपुस्तकसम्पादकैः क्वचित् पुस्तके दृष्टः 'कालकारणा' इति पाठः सम्यक्तया प्रतिभाति ।

(ख) अत्र 'क्रियाः यौगपद्यप्रत्ययगोचरः, अनेकसूर्य'त्यादिपाठो युक्तः ।

(सू०)—तयोरप्यभावो वर्त्तमानाभावे तदपेक्षत्वात् ॥ ४० ॥

न्यायभाष्यम्

नाध्वव्यङ्ग्यः कालः। किं तर्हि? क्रियाव्यङ्ग्यः पततीति। यदा पतनक्रिया (१)व्युपरता भवति (२)स कालः पतितकालः। यदोत्पत्स्यते स पतितव्यकालः।

न्यायवार्त्तिकम्

एवमुपपादितः कालः। तस्योपपन्नस्य वर्तमानकालप्रतिषेधार्थं सूत्रम्—

वर्तमानाभावः पततः पतितपतितव्यकालोपपत्तेः। वृन्तात् प्रच्युतस्य फलस्य भूमिं प्रत्यासीदतो यदूर्ध्वं फलमवधिं कृत्वा यावद्वृन्तमिति स पतितोऽध्वा। यदधस्तात् फलमवधिं कृत्वा (क)यावद्भूमिरिति स पतितव्योऽध्वा। नेदानीं तृतीयोऽध्वा विद्यते यत्र पततीति स्यात्। न चाध्वानमन्तरेण कालव्यक्तिहेतुरस्ति। तस्माद् वर्तमानः कालो नास्तीति। न, विरोधात्—वर्तमानः कालो नास्तीति ब्रुवन्नभ्युपगतौ कालौ बाधते ॥ ३९ ॥

(३)एतदर्थज्ञापनार्थं सूत्रम्—

तयोरप्यभावो वर्तमानाभावे तदपेक्षत्वात्। वर्तमानसापेक्षावितरौ कालौ, यस्य वर्तमानो नास्ति तस्य वर्तमानानभ्युपगमेऽभ्युपगतयोः कालयोरभाव इति। न चायं कालोऽध्वव्यङ्ग्यः। किं तर्हि? क्रियाव्यङ्ग्यः पततीति। यदा द्रव्यं क्रियासम्बद्धमुपलभते सोऽ॰

न्यायवार्त्तिकतात्पर्यटीका

प्रत्ययस्य च यः कारणविशेषो बहुतराल्पतरातीततपनपरिस्पन्दावच्छिन्नकालपिण्डसंयोगः तदपेक्षः काल एकोऽपि परापरादिप्रत्ययहेतुः परापरत्वलक्षणगुणोत्पादनद्वारेणेति वर्त्तते कारकव्यङ्ग्यः कालः, तस्य निष्पन्नतया व्यक्तिसाधनत्वोपपत्तेः; न तु क्रियाव्यङ्ग्यः, तस्याः साध्यतया असिद्धत्वाद्व्यक्तिं प्रति हेतुभावाभावात्। तथा चातीतानागतमात्रदर्शनाद्वर्त्तमानाभावेन न त्रैकाल्यविषयमनुमानं तयोश्च पितापुत्रवत्परत्वापरत्ववद् ह्रस्वदीर्घवच्च परस्परापेक्षा सिद्धिरन्तरेणापि वर्त्तमानं कालमिति पूर्वः पक्षः ॥ ३९ ॥

तयो—त्वात् (सू० ४०) ॥ नातीतादिरूपता कालस्य कारकव्यङ्ग्या तयोस्तादवस्थ्यात्, अपि तु क्रियाव्यङ्ग्या; तां खलूररीकृत्य प्रवर्त्तमानानयमतीतानागतवर्त्तमानान् प्रतिपद्यते नान्यथा। यदा खल्वयं पुरुषः फलं प्रवर्त्तमानपतनक्रियाविशिष्टं प्रतिपद्यते तदा व्यपदिशति

वृत्तिः

वर्तमानाभावः अतीतानागतभिन्ने कालत्वाभावः। व्युत्पादयति—पतत इति। पततः फलादेर्वृक्षावधिकः कश्चन देशः पतिताध्वा, भूम्यवधिकः कश्चन पतितव्याध्वा, न तु वर्तमानस्य प्रसङ्गोऽपीति भावः॥ ३९ ॥

---

(१) '-व्युपरमो' वि-टि। (२) 'तत्कालः' वि-टि। (३) 'एतदनुज्ञापनार्थम्' ख।

(क) 'यावद् भूमिम्' इति युक्तः पाठः।

न्यायभाष्यम्

यदा द्रव्ये (१)वर्त्तमाना क्रिया गृह्यते स वर्त्तमानः कालः। यदि चायं द्रव्ये वर्तमानं पतनं न गृह्णाति कस्योपरममुत्पत्स्यमानतां वा प्रतिपद्यते। पतितः काल इति भूता क्रिया, पतितव्यः काल इति चोत्पत्स्यमाना क्रिया, उभयोः कालयोः क्रियाहीनं द्रव्यम्; अधः पततीति क्रियासम्बद्धम्। सोऽयं क्रियाद्रव्ययोः सम्बन्धं गृह्णातीति(२) वर्त्तमानः कालः, तदाश्रयौ चेतरौ कालौ तदभावे न स्यातामिति ॥ ४० ॥

न्यायवार्त्तिकम्

सम्बन्धविशिष्टः कालो वर्तमान उच्यते। क्रियासम्बन्धातिक्रमादतीतः। यदा तु क्रियाकारणान्याभिमुख्येनावस्थितान्यप्रतिबद्धशक्तिकानि, तदा भविष्यति क्रियेत्यनागतः काल इति। यदि चायं वर्तमानां क्रियां न प्रतिपद्यते कस्मादतीतामनागतां च प्रतिपद्यते। न कालोऽतीतः न फलमतीतम्, कालस्य सर्वदा वर्तमानत्वात् फलस्य चापतत् पतति पतिष्यतीति क्रियाविशेषणत्वेन प्रत्ययविशेषविषयत्वात् क्रियायां सम्भवो न फले इति। तस्मात् क्रिया कालाभिव्यक्तिनिमित्तम्, नाध्वा गन्तव्यस्य तादवस्थ्यात्—योऽसौ गन्तव्यो देशः स यथाभूत एवानुत्पन्नक्रिये फले तथाभूत एवोत्पन्नक्रिय इत्यभेदान्नाध्वा कालव्यक्तिहेतुः ॥ ४० ॥

न्यायवार्त्तिकतात्पर्यटीका

पतति फलमिति। तन्मूले चास्यातीतानागतत्वे अपतत् फलं पतिष्यतीति। न च वर्तमानपतनमसिद्धं येन न कालं व्यञ्ज्यात्(क) तदसत्त्वे कस्येदं कारणं गुरुत्वं कस्य च फलं कारकं कस्य च (ख)फलं भूमिसंयोगः कार्यः। न च परत्वापरत्वादीनामपि सिद्धिः परस्परापेक्षा। किं तर्हि? सन्निकृष्टबुद्ध्यपेक्षमपरत्वम्, विप्रकृष्टबुद्ध्यपेक्षं परत्वम्, पूर्वसंख्यावच्छिन्नता च संयुक्तसंयोगानां सन्निकर्षः, परसंख्यावच्छिन्नता च विप्रकर्षः। एवं ह्रस्वत्वदीर्घत्वे अपि परिमाणभेदौ न परस्परापेक्षौ। पितापुत्रौ च प्रमाणप्रमेयव्याख्यया व्याख्यातौ। तस्मादतीतानागतयोर्वर्त्तमानापेक्षत्वाद् वर्तमानस्य च तदनपेक्षत्वादस्ति त्रैकाल्यमिति सिद्धान्तः ॥ ४० ॥

वृत्तिः

समाधत्ते—(तयोरिति)

वर्तमानाभावे तयोरतीतानागतयोरप्यभावः स्यात् तयोस्तदपेक्षत्वात्। वर्तमानध्वंसप्रतियोगित्वं ह्यतीतत्वम्, वर्तमानप्रागभावप्रतियोगित्वम्(३)अनागतत्वमिति भावः ॥ ४० ॥

---

(१) 'वर्तमाने' ज०। (२) 'इति' पदं टि-पु० नास्ति। (३) भ-पु० 'हि' पदमत्राधिकम्।

(क) अतः परमादर्शपुस्तकयोः (तदद्वयोस्तादवस्थ्यात् अपि तु क्रियाव्यङ्ग्यता) इत्याकारेण मुद्रितः पाठः क-पुस्तकसम्पादकैः पुस्तकविशेषेऽनुपलब्धः, अस्माभिरपि असङ्गतिभीतैः परित्यक्तः। (ख) 'फलभूमिसंयोगः कार्यम्' इति पाठकल्पनं तु समीचीनम्।

न्यायभाष्यम्

अथापि—

(सू०)—नातीतानागतयोरितरेतरापेक्षा सिद्धिः ॥ ४१ ॥

(१)यद्यतीतानागतावितरेतरापेक्षौ सिध्येतां प्रतिपद्येमहि वर्त्तमानविलोपम्। नातीतापेक्षाऽनागतसिद्धिः नाप्यनागतापेक्षाऽतीतसिद्धिः। कया युक्त्या? केन कल्पेनातीतः कथ(२)मतीतापेक्षाऽनागतसिद्धिः, केन च कल्पेनानागत इति नैतच्छक्यं निर्वक्तुमव्याकरणीयमेतद्वर्तमानलोप इति। यच्च मन्येत ह्रस्वदीर्घयोः स्थलनिम्नयोश्छायातपयोश्च यथेतरेतरापेक्षया सिद्धिरेव(२*)मतीतानागतयोरिति, तन्नोपपद्यते विशेषहेत्वभावात्। दृष्टान्तवत्प्रतिदृष्टान्तोऽपि प्रसज्यते, यथा रूपस्पर्शौ गन्धरसौ नेतरेतरापेक्षौ

न्यायवार्त्तिकम्

अथ मन्यसे वर्तमानकालानभ्युपगमेऽप्यतीतानागतावितरेतरापेक्षौ सेत्स्येते (क), एतत्प्रतिषेधार्थं सूत्रम्—

नातीतानागतयोरितरेतरापेक्षा सिद्धिरिति। न ह्यतीतानागतावितरेतरापेक्षौ सिध्यतः। कथमिति? वर्तमानाभावे किमतीतं कथं चेति किमनागतं कथं चेति न शक्यते वक्तुम्, अव्याकरणीयमेतद्वर्तमानलोप इति। विशेषप्रतिषेधाच्च वर्तमानोऽभ्युपगतः—

न्यायवार्त्तिकतात्पर्यटीका

भाष्यम्—अथापीति कस्मादतीतानागतावितरेतरापेक्षौ न भवतः कृतं वर्तमानेनेति शङ्कां सूचयति। तन्निराकरणाय सूत्रम्—

नाती—द्धिः (सू० ४१) ॥ परस्परापेक्षसिद्धेर्हि वर्तमानाभावः, सैव तु नास्तीति सूत्रार्थः। कया युक्त्येति प्रश्नः। उत्तरम्—केन कल्पेन प्रकारेण अतीतः। तदनेन वर्तमानाभावे अतीतस्वरूपाक्षेपः कृतः। ह्रस्वदीर्घत्वादीनां परस्परापेक्षसिद्धित्वमङ्गीकृत्याऽऽह—तन्नोपपद्यते विशेषहेत्वभावादिति। परमार्थतस्तु न चेतरेतरापेक्षा ह्रस्वदीर्घत्वादीनामपि सिद्धिरिति।

वृत्तिः

ननु तयोः परस्परापेक्षयैव सिद्धेर्न वर्तमानापेक्षेत्यत आह—(नातीतेति)। अन्योन्याश्रयादिति भावः ॥ ४१ ॥

---

(१) अत्र 'अथापि' इत्यधिकम् ल०। (२) 'अतीते'त्यादि'रेव'मित्यन्तोऽ'शः ज-पु० नास्ति। (३) 'कालोपपत्तिरिति' इति क-ख।

(क) अत्राऽऽत्मनेपदं प्रयत्नेनोपपादनीयम्। (ख) भाष्ये च-कारो नोपलभ्यते।

न्यायभाष्यम्

सिध्यतः एवमतीतानागताविति नेतरेतरापेक्षा कस्यचित्सिद्धिरिति। यस्मादेकाभावेऽन्यतराभावादुभयाभावः—यद्येकस्यान्यतरापेक्षा सिद्धिरन्यतरस्येदानीं किमपेक्षा? यद्यन्यतरस्यैकापेक्षा सिद्धिरेकस्येदानीं किमपेक्षा? एवमेकस्याभावे अन्यतरन्न सिध्यतीत्युभयाभावः प्रसज्यते ॥ ४१ ॥

अर्थसद्भावव्यङ्ग्यश्चायं वर्त्तमानः कालः, विद्यते द्रव्यं विद्यते गुणः विद्यते कर्मेति। यस्य चायं नास्ति, तस्य—

(सू०)—वर्त्तमानाभावे सर्वाग्रहणं प्रत्यक्षानुपपत्तेः ॥ ४२ ॥

प्रत्यक्षमिन्द्रियार्थसन्निकर्षजम्, न चाविद्यमानमसदिन्द्रियेण सन्निकृष्यते। न चायं विद्यमानं सत् किञ्चिदनुजानाति। प्रत्यक्षनिमित्तं प्रत्यक्षविषयः प्रत्यक्षज्ञानं सर्वं नोपपद्यते, प्रत्यक्षानुपपत्तौ तत्पूर्वकत्वाद् अनुमानागमयोरनुपपत्तिः। सर्वप्रमाणविलोपे सर्वग्रहणं न भवतीति ॥ ४२ ॥

न्यायवार्त्तिकम्

यस्मादयं विशेषप्रतिषेधः पततः पतितपतितव्यकालोपपत्तेरिति (३)। नच वर्तमानकालानभ्युपगमे पतत इति पदस्यार्थोऽस्ति। न चैतत्पदार्थानभ्युपगमे पतत इति युक्तं वक्तुम्। सोऽयं व्याघातः—वर्तमानश्च नास्ति पतत इति च प्रयोगः। न (ख) चेतरेतरापेक्षया कस्यचित् सिद्धिरिति। यस्मादेकाभावेऽन्यतराभावाद् द्वयाभावः—यदीतरेतरापेक्षया सिद्धिः स्यात् यावदितरत् नास्ति तावदितरत् नास्तीत्युभयोरभावः ॥ ४१ ॥

अर्थसद्भावव्यङ्ग्यश्च वर्तमानकालः—विद्यते द्रव्यं विद्यते गुणो विद्यते कर्मेति यस्य चायं नास्ति तस्य—

वर्तमानाभावे सर्वाग्रहणं प्रत्यक्षानुपपत्तेः। सूत्रार्थो विरोधः। कथं पुनर्वर्तमानाभावे

न्यायवार्त्तिकतात्पर्यटीका

स्वकीयां युक्तिं वार्तिककार आह—न च वर्तमानकालानभ्युपगमे पतत इतीति ॥ ४१ ॥

वक्ष्यमाणसूत्रावतारपरं भाष्यम्—अर्थसद्भावव्यङ्ग्यश्चायमिति। अस्यार्थः। न केवलं पतनादिक्रियाव्यङ्ग्यो वर्तमानः कालः, अपि त्वर्थसद्भावोऽर्थस्य सत्ता अस्तिक्रियेति यावत्, तया व्यङ्ग्यः कालः। एतदुक्तं भवति—पतनादयः क्रियाः वर्तमानेष्वपयान्त्युपयन्ति च, अस्तिक्रिया तु सर्ववर्तमानव्यापिनी। तदेवमस्तिक्रियाविशिष्टस्य वर्तमानस्याभावे सर्वाग्रहणं प्रत्यक्षानुपपत्तेः।

वर्त्त—त्तेः (सू० ४२) ॥ न चाविद्यमानं तस्य विवरणम् असदिति। न चायं वर्तमानाभाववादी विद्यमानं सत् किंचिदनुजानाति।

अत्र वार्तिककारः पृच्छति—कथं पुनरिति। न हि सर्वं प्रत्यक्षं वर्तमानविषयमतीताना-

न्यायभाष्यम्

उभयथा च वर्त्तमानः कालो गृह्यते क्वचिदर्थसद्भावव्यङ्ग्यः यथा (१)अस्ति द्रव्यमिति। क्वचित् क्रियासन्तानव्यङ्ग्यः यथा पचति छिनत्तीति। नानाविधा चैकार्था क्रिया क्रियासन्तानः क्रियाभ्यासश्च। नानाविधा चैकार्था क्रिया पचतीति स्थाल्यधिश्रयणमुदकासेचनं तण्डुलावपनमेधोऽपसर्पणमग्न्यभिज्वालनं दर्वीघट्टनं मण्डस्रावणमधोऽवतारणमिति। छिनत्तीति क्रियाभ्यास उद्यम्योद्यम्य परशुं दारुणि निपातयन् छिनत्तीत्युच्यते।

न्यायवार्त्तिकम्

प्रत्यक्षानुपपत्तिः? यस्माद् इदं प्रत्यक्षं वर्तमानाधारं कार्यत्वात् क्षीरवदिति—यत्कार्यं तद्वर्तमानाधारं दृष्टं यथा क्षीरम्, कार्यं च प्रत्यक्षम्, तस्माद्वर्तमानाधारमिति वर्तमानकालानभ्युपगमादनाधारं प्रत्यक्षं प्राप्नोति, अनाधारं च कार्यं नास्तीति प्रत्यक्षानुपपत्तिः, प्रत्यक्षानुपपत्तेश्च सर्वप्रमाणलोपः। सर्वप्रमाणलोपे च सर्वस्य ग्रहणं न स्यात्। अस्ति च सर्वस्य ग्रहणम्, सर्वस्य ग्रहणात् पश्यामोऽस्ति वर्त्तमानः प्रत्यक्षनिमित्तं प्रत्यक्षविषयः प्रत्यक्षं चेति सोऽयं वर्तमानः काल इति ॥४२॥

उपपन्नश्च सन् द्वेधा विभिद्यते, क्वचित् क्रियामात्रव्यङ्ग्यः क्वचित् क्रियासन्तानव्यङ्ग्यः। क्रियामात्रव्यङ्ग्यः विद्यते द्रव्यमिति। क्वचित् क्रियासन्तानव्यङ्ग्यः पचति छिनत्तीति। क्रियासन्तानोऽपि द्वेधा भवति एकाकारक्रियो नानाकारक्रियश्चेति। एकाकारक्रियः छिनत्तीति। तत्र ह्युद्यम्योद्यम्य

न्यायवार्त्तिकतात्पर्यटीका

गतयोरपि योगिप्रत्यक्षत्वादिति भावः। उत्तरम्—यस्मादिति। नातीतानागतविषयतया प्रत्यक्षानुपपत्तिं ब्रूमः अपि त्वतीतानागताधारतयेत्यर्थः। भाष्यमपि वर्तमानाभावे प्रत्यक्षनिमित्तं सन्निकर्षः अस्मदादिप्रत्यक्षविषयः विद्यमानो घटादिः प्रत्यक्षं प्रमाणमनाधारं सत्सर्वं नोपपद्यत इति द्रष्टव्यम् ॥ ४२ ॥

अत्र भाष्यम्—उभयथा वर्तमानो गृह्यत इति। तदवतार्य व्याचष्टे वार्तिककारः—उपपन्नश्च

वृत्तिः

तयोरप्यभावे का क्षतिः? अतो युक्त्यन्तरमाह—(वर्तमानेति)।

वर्तमानाभावे प्रत्यक्षं नोपपद्यते प्रत्यक्षस्य वर्तमानविषयत्वात्। अत एवाऽऽहुः—

'सम्बद्धं वर्तमानं च गृह्यते चक्षुरादिना' इति।

प्रत्यक्षाभावे च सर्वमेव ग्रहणं ज्ञानं न स्यात् प्रत्यक्षमूलकत्वादितरज्ञानानामिति भावः ॥ ४२ ॥

(१) 'द्रव्यं' इति ल-ज-झा०।

न्यायभाष्यम्

यच्चेदं पच्यमानं छिद्यमानं च तत्क्रियमाणम्, तस्मिन् (१)क्रियमाणे—

(सू०)—कृतताकर्त्तव्यतोपपत्तेस्तूभयथा ग्रहणम् ॥ ४३ ॥

क्रियासन्तानोऽनारब्धश्चिकीर्षितोऽनागतः कालः पक्ष्यतीति। प्रयोजनावसानः

न्यायवार्त्तिकम्

निपातनक्रिया एकाकारा। नानाकारक्रियश्च सन्तानः—पचतीति। तत्र ह्यनेका क्रिया अनेकाकारा—तद् यथा एधोपसर्पणमग्न्यभिज्वालनं स्थाल्यधिश्रयणमुदकासेचनं (क) तण्डुलपचनं दर्वीघट्टनं मण्डस्रावणमवतारणमिति। स ह्येवम्भूतः क्रियासन्तानः पचतीत्यनेनैकशब्देनाभिधीयते, क्रियासन्तानस्य ह्यत्राविच्छेदो विवक्षितो नानारम्भो नोपरम इति। (२) सन्तानारम्भविवक्षायां पक्ष्यतीति, उपरमविवक्षायामपाक्षीदिति।

न्यायवार्त्तिकतात्पर्यटीका

सन् द्वेधा भिद्यत इति। क्वचित् क्रियामात्रव्यङ्ग्यः, (ख)यथा अस्तीति। क्वचित् क्रियासंतानव्यङ्ग्यः (ग)पचति छिनत्तीति। अत्र हि पूर्वापरीभावः प्रतीयते। न च प्रतिक्षणमपवर्गवतः कर्मण एकस्य पाकस्य वा छेदनस्य वा पूर्वापरीभाव इति कर्मसन्तानस्त्वास्थेयः; सोऽपि चैकमुपसंग्राहकमन्तरेण न भवत्यत उक्तं भाष्यकृता—एकार्था क्रिया क्रियासन्तान इति, एकप्रयोजनावच्छिन्नेत्यर्थः। अत्र चाधिश्रयणादयो भवन्तु पच्यर्थाः। यथाह महाभाष्यकारः—तदभिसन्धिपूर्वकं प्रेषणमध्येषणं वा युक्तं तत्सर्वं पच्यर्थ इति। रूपादिपरावृत्तिमात्रार्थत्वं वाऽस्य पचेः, आख्यातार्थः सर्वोऽयमध्येषणादिर्भवतु भावनाभिधानः, नोभयथाऽपि काचिदस्ति दर्शनक्षतिः। अनागताद् व्यवच्छिनत्ति—नानारम्भ इति, अनारम्भः अननुष्ठानं न विवक्षितम्, यथा पक्ष्यतीत्यत्रेत्यर्थः। अतीताद् व्यवच्छिनत्ति—नोपरमः विवक्षित इति, यथा अपाक्षीदित्यत्रेत्यर्थः। सन्तानारम्भविवक्षायामिति, आरम्भोऽत्र चिकीर्षाऽभिधीयत इति न विरोधः।

वृत्तिः

ननु यदि वर्तमानध्वंसप्रतियोगित्वमतीतत्वम्, वर्तमानप्रागभावप्रतियोगित्वं च भविष्यत्त्वम्, तदा वर्तमान एव घटे कथं श्याम आसीद्रक्तो भविष्यतीति धीरत आह—(कृततेति)।

---

(१) 'क्रियमाणे च' इति वि०। (२) 'सन्तानानारम्भ विवक्षायां' इति ख।

(क) तण्डुलपचनं तण्डुलानां विक्लित्तिस्तेन नाऽऽत्माश्रयः। भाष्ये तु तण्डुलावपनमिति पाठः। (ख) वार्तिके विद्यते द्रव्यमिति विशेषः। (ग) आदर्शपुस्तकयोः 'पचती'त्यत्र 'पतती'तिपाठभेद उत्तरग्रन्थवार्तिकादिपर्यालोचनया परित्यक्तः। (घ) आदर्शपुस्तकयोः 'न तत् क्रियमाण'मिति पाठः। तत्र नकारः प्रामादिक इति त्यक्तः।

न्यायभाष्यम्

क्रियासन्तानोपरमः अतीतः कालः अपाक्षीदिति। आरब्धक्रियासन्तानो वर्त्तमानः कालः पचतीति। तत्र या (१)उपरता सा कृतता। या चिकीर्षिता सा कर्तव्यता। या विद्यमाना सा क्रियमाणता। तदेवं क्रियासन्तानस्थस्त्रैकाल्यसमाहारः पचति पच्यत इति वर्त्तमानग्रहणेन गृह्यते, क्रियासन्तानस्य ह्यत्राविच्छेदो(२)ऽभिधीयते नाऽऽरम्भो नोपरम इति। सोऽयमुभयथा वर्त्तमानो गृह्यते अपवृक्तो व्यपवृक्तश्च अतीतानागताभ्याम्। स्थितिव्यङ्ग्यः—विद्यते द्रव्यमिति। क्रियासन्तानाविच्छेदाभिधायी च त्रैकाल्यान्वितः—पचति छिनत्तीति। अन्यश्च प्रत्यासत्तिप्रभृतेरर्थस्य विवक्षायां तदभिधायी बहुप्रकारो लोकेषु उत्प्रेक्षितव्यः। तस्मादस्ति वर्त्तमानः काल इति ॥ ४३ ॥

न्यायवार्त्तिकम्

यच्चेदं छिद्यमानं तत् क्रियमाणम्, तस्मिन् क्रियमाणे—

कृतताकर्त्तव्यतोपपत्तेस्तूभयथा ग्रहणम्। कस्य? वर्त्तमानस्य। कथम्? उभयथा, केवलस्य व्यपवृक्तस्यातीतानागताभ्याम्, सम्पृक्तस्य च ताभ्यामिति। क्व पुनर्व्यपवृक्तस्य? विद्यते द्रव्यमित्यत्र हि केवलः शुद्धो वर्त्तमानोऽभिधीयते। पचति छिनत्तीत्यत्र सम्पृक्तः। कथम्? काश्चिदत्र क्रिया व्यतीताः काश्चिदनागताः एका च वर्त्तमाना इति। अन्यश्च लोके प्रत्यासत्ति-

न्यायवार्त्तिकतात्पर्यटीका

तदेवं वर्तमानं क्रियासद्भावमुक्त्वा तत्संबन्धव्यङ्ग्यां कारकस्य वर्तमानतामाह—यच्चेदं छिद्यमानमिति। (व) तत् क्रियमाणं वर्तमानक्रियासम्बन्धेन वर्तमानं न तु स्वरूपत इत्यर्थः। तस्य च कारकस्य वर्तमानक्रियासम्बन्धमतीतानागतानपेक्षमपेक्ष्यातीतानागतत्वे, क्रियायाः कारकस्यापि व्यक्तिः तद्भावव्यक्तिः, तद्धेतुकं च द्वैविध्यमिति प्रतिपादनपरं सूत्रमवतारयति तस्मिन् क्रियमाणे—

कृत—णम् (सू ४३)॥ भाष्यम्—आरब्धः अभीष्टफलीरीकरणेन क्रियासन्तानः पचतीति। वक्ष्यमाणासंपृक्ततोपयोगितया क्रियासन्तानस्वरूपमाह—तत्रेति, (क) क्रियासन्ताने। (ख)ननु विद्यत इत्यत्रापि पूर्वापरीभावावगमादतीतानागताभ्यां संपृक्त एवेत्यत आह वार्तिककारः—अत्र हि केवल इति। शब्दमाहात्म्यात् संपर्को न वास्तवः, वास्तवं तु वर्तमानत्वमत एवाऽऽह—केवलः शुद्ध इति। पर्यायाभिधानमात्यन्तिकं संपर्काभावं दर्शयति। यदि कश्चिन्मुख्यं वर्तमानत्वं नाभ्युपेयते ततस्तत्पूर्वको भाक्तोऽपि वर्त्तमानप्रयोगोऽपि न स्यादित्यत आह—अन्यश्च लोक इति ॥ ४३ ॥

---

(१) 'उपरता क्रिया' इति टि०। (२) 'विधीयते' इति ज-ग-ल-भा०।

(क) 'क्रियासन्तानो' इति क-पुस्तक-पाठः प्रामादिकः। (ख) 'न तु' इत्यादर्शपुस्तकपाठोऽर्थासङ्गत्या परित्यक्तः।

(सू०)—अत्यन्तप्रायैकदेशसाधर्म्यादुपमानासिद्धिः ॥ ४४ ॥

न्यायभाष्यम्

अत्यन्तसाधर्म्यादुपमानं न सिध्यति। न चैवं भवति यथा गौरेवं

न्यायवार्त्तिकम्

प्रभृतेरर्थस्य विवक्षायामनेकप्रकारो वर्त्तमानस्य प्रयोगः। कदाचिदयं वर्त्तमानमतीते प्रयुङ्क्ते, आगतः सन् ब्रवीति एष आगच्छामीति। कदाचिदनागते प्रयुङ्क्ते, यथा स्थितः सन् ब्रवीति एष आगच्छामीति। एवमन्येषु प्रयोगेषूत्प्रेक्षितव्यमिति ॥ ४३ ॥

इति वर्त्तमानपरीक्षा।

अथेदानीमुपमानमवसरप्राप्तं परीक्ष्यते। किं पुनरुपमानम्? प्रसिद्धसाधर्म्यात् साध्यसाधनमित्युक्तम्। तस्याऽऽक्षेपः—

अत्यन्तप्रायैकदेशसाधर्म्यादुपमानासिद्धिरिति। नात्यन्तसाधर्म्यादुपमानं भवति यथा गौरेवं गौरिति। भूयःसाधर्म्यादपि नोपमानं सिध्यति, न हि भवति यथा गौरेवं महिष इति। एकदेशसाधर्म्यादपि न भवति, यथा मेरुस्तथा सर्षप इति। न-चान्या गतिरस्ति तस्मान्नोपमानं सिध्यति।

अत्यन्तादिसाधर्म्यादुपमानप्रतिषेधान्नोपमानप्रतिषेधः—यदत्यन्तप्रायैकदेशसाधर्म्यादुपमानं तत् प्रतिषिध्यते, तेन सूत्रेण न पुनरुपमानमात्रस्य प्रतिषेधः। एवं सत्यन्यथोपमानम्, तत्स्वरूपं वक्तव्यम्। अथ नैवान्यथोपमानस्य स्वरूपमस्तीति मन्यसे कथं तर्हीदं वाक्यम् अत्यन्त-

न्यायवार्त्तिकतात्पर्यटीका

अत्य—द्धिः (सू० ४४) ॥ यथा गौरेवं गवय इत्यतिदेशवाक्यार्थस्मृतिसहकारि सारूप्यदर्शनं साध्यस्य गवयोऽयमिति संज्ञासंज्ञिसम्बन्धस्य साधनमुपमानम्, तच्चेदं नोपपद्यते विकल्पानुपपत्तेः। किं यथा गौरेवं (१) गवय इति गवाऽत्यन्तसाधर्म्यं विवक्षितम्, तथा सति गवान्तरमेव गवयः स्यात्। तदिदमाह भाष्यकारः—न चैवं भवति यथा गौरेवं गौरिति। चो यस्मादर्थे। (क) तस्माद् यथा गौरेवं गवय इति वाक्यस्यार्थो भवति यथा गौरेवं गौरिति। गवा प्रायसाधर्म्यादपि गवयोपमानं न सिध्यति महिषस्यापि गवा प्रायसाधर्म्यस्य विद्यमानत्वेन तस्यापि

वृत्तिः

वर्तमानस्यापि घटादेः श्यामरक्तरूपादीनां कृतताकर्तव्यतयोरतीतताभविष्यत्तयोरुपपत्तेः घटादेरप्यतीतानागतत्वेन व्यवहारः परम्परासम्बन्धादित्यर्थः ॥ ४३ ॥

समाप्तं वर्तमानपरीक्षाप्रकरणम् ॥ ६ ॥

---

(१) 'गवय' इति ख-पुस्तके नास्ति।

(क) तस्मादित्यादि गौरेवं गौरित्यन्तग्रन्थे तस्मादित्यस्यार्थासङ्गतेः 'यथा गौरेवं गवय इति वाक्यस्यार्थो यथा गौरेवं गौरिति यस्मान्न भवति' इति पाठो यथार्थतया प्रतिभाति। यथाश्रुतस्यैव सम्यक्त्वे तु तस्मादित्यस्य तथा सतीत्यर्थः।

न्यायभाष्यम्

गौरिति । प्रायःसाधर्म्यादुपमानं न सिध्यति, न हि भवति यथाऽनड्वानेवं महिष इति । एकदेशसाधर्म्यादुपमानं न सिध्यति, न हि सर्वेण सर्वमुपमीयत इति ॥ ४४ ॥

(सू०)- प्रसिद्धसाधर्म्यादुपमानसिद्धेर्यथोक्तदोषानुपपत्तिः ॥४५॥

न साधर्म्यस्य कृत्स्नप्रायाल्पभावमाश्रित्योपमानं प्रवर्त्तते । किं तर्हि ?

न्यायवार्त्तिकम्

प्रायैकदेशसाधर्म्यादुपमानासिद्धिरिति । अनभ्युपगच्छता ह्युपमानमेवं वक्तव्यम् उपमानं न प्रमाणमर्थाप्रतिपादकत्वादिति ॥ ४४ ॥

प्रसिद्धसाधर्म्यादुपमानसिद्धेर्यथोक्तदोषानुपपत्तिः । प्रसिद्धसाधर्म्यस्य (क) वैधर्म्यस्य चोपमानहेतुत्वादप्रतिषेधः—योऽयं भवता प्रतिषेधः क्रियते अत्यन्तादिसाधर्म्यादुपमानं न सिध्यतीति अयमनुपपन्नोऽनभ्युपगमात् । कः खल्वेवमाह अत्यन्तादिसाधर्म्यादुपमानमिति, अपि तु प्रसिद्धसाधर्म्यादुपमानम्, साध्यसाधनभावमाश्रित्य ; तथा चायमप्रतिषेधः । सर्वथा-

न्यायवार्त्तिकतात्पर्यटीका

गवयाभिधानप्रसङ्गात् । तदिदमाह—न हि भवति यथाऽनड्वानेवं महिष इतीति । यथाऽनड्वानेवं गवय इत्यस्य (ख) वाक्यस्यार्थो यथाऽनड्वानेवं महिष इति यस्मान्न भवति । एकदेशसामर्थ्यादुपमानं न भवति एकदेशोपमानस्यैवानुपपत्तेरतिप्रसङ्गात् । तदिदमाह—न हि सर्वेण सर्वमुपमीयते ; तथा सति सुमेरोरपि सर्षपेणोपमानप्रसङ्गात् ॥ ४४ ॥

प्रसि—त्तिः (सू० ४५) ॥ प्रकरणाद्यपेक्षं हि वाक्यं स्वार्थं प्रतिपादयति न केवलम् । तद्वशाच्च क्वचिदत्यन्तसाधर्म्यं प्रतीयते क्वचिद्भूयःसाधर्म्यं क्वचिदेकदेशसाधर्म्यम् । तदिह प्रतीतमहिषादिकं पुरुषं प्रति यथा गौरेवं गवय इति वाक्यमुच्चार्यते तदा महिषादिपरिहाराय भूयःसाधर्म्यं विवक्षितमित्यवगतं वाक्यार्थं स्मरन् महिषादिषु वने गोसाधर्म्यं पश्यन्नपि न गवयसंज्ञां निवेशयति, अपि तु साधर्म्यवति गवय एव तां निवेशयति । यस्त्वप्रतीतमहिषादिस्तं प्रति-

वृत्तिः

अथावसरेण क्रमप्राप्तमुपमानं परीक्षितुं पूर्वपक्षयति—(अत्यन्तेति) ।

प्रसिद्धसाधर्म्यादुपमानमुक्तम् , तन्न युक्तम् , यतः साधर्म्यमात्यन्तिकं प्रायिकमैकदेशिकं वा न सम्भवति । नहि आत्यन्तिकसाधर्म्येण गौरिव गौरित्युपमानं प्रवर्तते, न वा प्रायिकसाधर्म्येण गौरिव महिष इति, न वा यत्किञ्चित्साधर्म्येण मेरुरिव सर्षप इति । साधर्म्यस्य चोपलक्षणत्वाद्वैधर्म्योपमानमप्येवं खण्डनीयम् ॥ ४४ ॥

(क) सौत्रं साधर्म्यपदमुपलक्षणतया व्याचष्टे वैधर्म्यस्य चेति ।

(ख) वाक्यस्यार्थः सादृश्यम्, तच्च यथैवंपदाभ्यामुपस्थाप्यते । एवं च महिषोपस्थापकपदाभावेन यथाऽनड्वानेवं गवय इति वाक्याद् यथानड्वानेवं महिष इति बोधापत्तिः कथमित्याशङ्काया नावसरः, प्रायसाधर्म्यण तथाविधवाक्यप्रयोगस्यैवाऽऽपत्तिविषयत्वादिति ध्येयम् ।

न्यायभाष्यम्

प्रसिद्धसाधर्म्यात् साध्यसाधनभावमाश्रित्य प्रवर्त्तते। यत्र चैतदस्ति न तत्रोपमानं प्रतिषेद्धुं शक्यम्। तस्माद् यथोक्तदोषो नोपपद्यत इति ॥ ४५ ॥

अस्तु तर्ह्युपमानमनुमानम्—

(सू०)—प्रत्यक्षेणाप्रत्यक्षसिद्धेः ॥ ४६ ॥

यथा धूमेन प्रत्यक्षेणाप्रत्यक्षस्य वह्नेर्ग्रहणमनुमानम्, एवं गवा प्रत्यक्षेणाप्रत्यक्षस्य गवयस्य ग्रहणमिति नेदमनुमानाद्विशिष्यते ॥ ४६ ॥

न्यायवार्त्तिकम्

भावाच्चात्यन्तसाधर्म्यादप्युपमानं सिध्यति, तत्क्रिययैव तत्क्रियोपमीयते। यथा "रामरावणयोर्युद्धं रामरावणयोरिवे"ति। भूयःसाधर्म्येणापि भवति—यदा गोर्बलप्रकर्षजिज्ञासा भवति तदा भूयःसाधर्म्येणोपमानं यथा महिषस्तथा गौरिति। एकदेशसाधर्म्यादपि भवति यदा तु सन्मात्रं जिज्ञासानिमित्तं भवति, मेरोः सत्ता किंरूपेति; यथा सर्षपस्य तथा मेरोः। तस्मादप्रतिषेधोऽयमिति ॥ ४५ ॥

अस्तु तर्ह्युपमानमनुमानम्—

प्रत्यक्षेणाप्रत्यक्षसिद्धेः। यथा प्रत्यक्षेण धूमधर्मेणोर्ध्वगत्यादिनाऽप्रत्यक्षो (क)धूमधर्मो-

न्यायवार्त्तिकतात्पर्यटीका

एतद्वाक्यमुपमानं न भवत्येवेति परमार्थः। यथा च प्रकरणादिवशादत्यन्तप्रायैकदेशसाधर्म्य-माश्रित्यातिदेशवाक्यानि प्रवर्त्तन्ते तथा चोक्तं वार्तिककृता।

न साधर्म्यस्येत्यादि भाष्यं नियमं निषेधति। न साधर्म्यस्य कृत्स्नभावमेव वाऽल्प-भावमेव वा आश्रित्यातिदेशवाक्यं प्रवर्त्तते। किं तर्हि ? प्रसिद्धसाधर्म्याद् हेतोः साध्यसाधन-भावम् आश्रित्य उद्दिश्येति। एतदुक्तं भवति। न नियमः, किं तु क्वचित् किंचित् साधर्म्य-माश्रित्यातिदेशवाक्यं प्रवर्त्तते तच्च प्रकरणाद्युन्नेयमिति। अनभ्युपगमादिति च वार्त्तिकं नियमाभि-प्रायमेव। तत्क्रिययैव तत्क्रियान्तरमित्यर्थः ॥ ४५ ॥

प्रत्य—द्धेः (सू० ४६) ॥ यथा गौरेवं गवय इति हि वाक्यं प्रत्यक्षेण गवा गवयप्रत्यक्षं प्रतिपादयति। न खलु श्रुतवाक्योऽपि यदा प्रत्यक्षेण गवयं पश्यति तदा वाक्यार्थाधि-

वृत्तिः

समाधत्ते—(प्रसिद्धेति)

प्रसिद्धं प्रकर्षेण महिषादिव्यावृत्त्या सिद्धं ज्ञातं यत् साधर्म्यं तज्ज्ञानस्योपमितिकरणत्वान्न दोषः। साधर्म्यं च प्रकरणाद्यनुसारात् क्वचित् किञ्चिदिति ॥ ४५ ॥

(क) 'धूमधर्मा' इति पाठः सम्भाव्यते।

न्यायभाष्यम्

विशिष्यत इत्याह । कया युक्त्या ?

(सू०)—नाप्रत्यक्षे गवये प्रमाणार्थमुपमानस्य पश्यामः(क) ॥४७॥

यदा ह्ययमुपयुक्तोपमानो गोदर्शी गवयसमानमर्थं पश्यति तदाऽयं गवय इत्यस्य संज्ञाशब्दस्य व्यवस्थां प्रतिपद्यते (१)न चैवमनुमानमिति । परार्थं चोपमानम्—यस्य ह्युपमानमप्रसिद्धं तदर्थं प्रसिद्धोभयेन क्रियत इति परार्थमुपमानमिति चेत्; न,

न्यायवार्त्तिकम्

ऽग्निरनुमीयते तथा प्रत्यक्षेण गवाऽप्रत्यक्षस्य गवयस्य प्रतिपत्तिरित्यप्रत्यक्षार्थप्रतिपादकत्वादुपमानमनुमानमिति । न, अपरिज्ञानात्—न भवतोपमानलक्षणं व्यज्ञायि ॥ ४६ ॥

नाप्रत्यक्षे गवये प्रमाणार्थमुपमानस्य पश्याम इति । नचाप्रत्यक्षे गवये उपमानार्थं

न्यायवार्त्तिकतात्पर्यटीका

गमादधिकं किञ्चित् प्रतिपद्यते । संज्ञासंज्ञिसम्बन्धोऽप्यनेन वाक्यादेवावगतः । तस्मात् प्रत्यक्षेण गवा प्रत्यक्षस्य गवयस्य गवयसंज्ञाविशिष्टस्य प्रतीतेरुपमानस्यानुमानतेति पूर्वः पक्षः ॥ ४६ ॥

सिद्धान्तस्तु—

नाप्र—मः (सू० ४७) ॥ गवयत्वं हि संज्ञि, न च तद् यथा गौरेवं गवय इति वाक्यात् प्रतीयते; अपि तु कस्यचिद्गवा सादृश्यम्, न च वाक्यगतो गवयशब्दस्तस्य वाचकः तथा तदानीमगृहीतसङ्गतित्वात् । न च सादृश्यं संज्ञि । तस्मात् प्रत्यक्ष एव गवये गवयत्वस्य प्रत्यक्षत्वात् संज्ञासंज्ञिसम्बन्धपरिच्छेदः प्रमाणार्थः । उपपादितं चैतदुपमानलक्षणे । तस्मादप्रत्यक्षो गवयः प्रत्यक्षेण गवा प्रतीयत इति सिद्धमित्यर्थः ।

पूर्वपक्षवाद्याह—परार्थमुपमानमिति चेत् मन्यसे सिद्धान्तवादिन्, तत् न अस्ति । कुतः ?

वृत्तिः

अनुमानेन चरितार्थं नोपमानं मानान्तरम् इति वैशेषिकमतमाशङ्कते—(प्रत्यक्षेणेति) प्रत्यक्षेण गोसादृश्यविशेषेण अप्रत्यक्षस्य गवयपदवाच्यत्वस्य अनुमितेर्नोपमानं मानान्तरमिति ॥ ४६ ॥

अत्रोत्तरयति—(नाप्रत्यक्ष इति)

अप्रत्यक्षे व्याप्यवत्तया अप्रत्यक्षे, अनुमानत्वेन प्रमाणार्थं (२)प्रमाणप्रयोजनम्

---

(१) 'न चेदम्' इति ल-झा० । (२) 'प्रमाप्रयोजनम्' इति भ० ।

(क) 'पश्याम इति' इत्येवम् इतिशब्दान्तं सूत्रं ल-ग-ज-झा-पुस्तकेषु क-ख-वार्त्तिकयोश्च मुद्रितं दृश्यते । तात्पर्यटीका-न्यायसूचीनिबन्ध-वृत्तिप्रभृतिष्वदर्शनादस्माभिस्तदुपेक्षितम् ।

न्यायभाष्यम्

स्वयमध्यवसायात्—भवति च भोः स्वयमध्यवसायः यथा गौरेवं गवय इति। नाध्यवसायः प्रतिषिध्यते (१)उपमानं तु तन्न भवति 'प्रसिद्धसाधर्म्यात् साध्यसाधनमुपमानम्'। न च यस्योभयं प्रसिद्धं तं प्रति साध्यसाधनभावो विद्यत इति ॥ ४७ ॥

अथापि—

(सू०)—तथेत्युपसंहारादुपमानसिद्धेर्नाविशेषः ॥ ४८ ॥

तथेति समानधर्मोपसंहारादुपमानं सिध्यति नानुमानम्। अयं चानयोर्विशेष इति ॥ ४८ ॥

न्यायवार्त्तिकम्

पश्यामः। अथ प्रत्यक्षे गवये क उपमानार्थः? याऽसौ संज्ञासंज्ञिसम्बन्धप्रतिपत्तिः स उपमानार्थः। एवं च नोपमानमागमो न प्रत्यक्षम्, न ह्ययमागमात् प्रत्यक्षाद्वाऽयं गवय इति (२)प्रतिपद्यते ॥ ४७ ॥

तथेत्युपसंहारादुपमानसिद्धेर्नाविशेषः। परार्थत्वाच्च—परार्थं चोपमानं भवति। न हि यथा गौरेवं गवय इत्येतदागममन्तरेण सारूप्यमात्रपरिज्ञानमुपमानम्। न ह्यागममात्रं सारूप्यपरिज्ञानमन्तरेणोपमानं भवितुमर्हति। न चैवमनुमानम्। तस्माद् यथा लिङ्गलिङ्गिसम्बन्ध-

न्यायवार्त्तिकतात्पर्यटीका

स्वयम् अपि अध्यवसायात्। एवं हि परार्थं स्याद् यथा गौरेवं गवय इति वाक्यं यदि परस्यैवाध्यवसायं जनयेत्, यावतोच्चारयितुरप्यध्यवसायं जनयति तस्मात् स्वार्थमपीत्यर्थः। एतदेव दर्शयति भाष्यकारः—भवति भोः स्वयम् अप्युच्चारयितुर्वाक्याद् अध्यवसाय इति। सिद्धान्तवाद्याह—नाध्यवसाय उच्चारयितुः प्रतिषिध्यते, उपमानम् उच्चारयितारं प्रति न भवति। कुत इत्यत आह—प्रसिद्धसाधर्म्यादिति ॥ ४७ ॥

तथे—षः (सू० ४८) ॥ वार्त्तिकं तु परार्थत्वेनानुमानादुपमानभेदमाह—परार्थत्वाच्चेति। ननु प्रत्यक्षं सारूप्यज्ञानमुपमानम्, न चैतत्परार्थमित्यत आह—न हि (३)यथा गौरिति।

वृत्तिः

उपमानस्य न पश्याम इत्यर्थः। अथवा गवये गवयवृत्तौ अप्रत्यक्षे गवयपदवाच्यत्वे उपमानस्य प्रमाणार्थं प्रमाम् उपमानजन्यां प्रमाम् अनुमानत्वेन न पश्याम इत्यर्थः, व्याप्तिज्ञानाभावादिति भावः ॥ ४७ ॥

---

(१) 'उपमाने तु' ज०। (२) 'संप्रतिपद्यते' इति ख। (३) अत्र 'यथार्थ'ेति क-पुस्तकपाठः प्रामादिकः।

न्यायवार्त्तिकम्

स्मृत्यनुग्रहे सति लिङ्गपरामर्शोऽनुमानम्, तच्च प्रत्यक्षम्, तथागमाहितसंस्कारस्मृत्यपेक्षं सारूप्यप्रत्यक्षमुपमानमिति ।

प्रतिपत्तिभेदाच्च—नानुमानमेवं भवति यथा धूमस्तथाऽग्निरिति, अस्त्युपमाने यथा गौरेवं गवय इति । यत्र प्रतिपत्तिभेदस्तत्प्रमाणान्तरम् , यथा प्रत्यक्षादनुमानम् ; अपूर्वानधिगमादुपमानं (क)न भवतीत्यनेन प्रत्युक्तम् ॥ ४८ ॥

(इत्युपमानपरीक्षा)

अथावसरप्राप्तः शब्दः परीक्ष्यते । कः पुनरयं शब्दः ? आप्तोपदेशः शब्द इत्युक्तम् । तस्याऽऽक्षेपः—न शब्दः प्रमाणम् । सत्यप्यप्रमितेः (ख)यस्माद् विद्यमानोऽप्ययं शब्दोऽश्रूयमाणो न प्रतिपत्तिहेतुः, प्रतिपत्तिहेतुश्च प्रमाणमिति । विषयाभावाच्च—न प्रत्यक्षानुमानव्यतिरेकी विषयः शब्दस्यास्ति, न चाविषयं प्रमाणमिति । अविज्ञानात्मकत्वाच्च न प्रमाणम् ,—यद् यत् प्रमाणं तत् तद्विज्ञानात्मकम् यथा प्रत्यक्षम् ; अविज्ञानात्मकं च न प्रमाणं घटादिवदेव । बाह्यकरण-

न्यायवार्त्तिकतात्पर्यटीका

अस्तु तर्हि वाक्यमेवेत्यत आह—न ह्यागमेति । भिन्नयोरप्यनुमानोपमानयोरेतावन्मात्रेण (ग)साध्यमित्युपसंहारव्याजेनाऽऽह—तस्माद् यथेति । अतिरोहितमितरत् ॥ ४८ ॥

अत्र हि सूत्रकारेण प्रथममनुमानान्तर्गतिः परीक्षिता । न चापरीक्षितप्रमाणभावस्य सा युक्तेति वार्तिककारः प्रथममस्य प्रमाणभावमेव परीक्षते—तस्याऽऽक्षेपः—न शब्दः प्रमाणमिति । यस्मिन् सति प्रमा भवत्येव, न न भवति, तत् प्रमाणं साधकतमस्य करणत्वात् । सत्यपि तु शब्दे प्रमा न भवतीति तस्य साधकत्वं विघटयति—विषयाभावाच्चेति । प्रामाण्यं हि विषयवत्तया व्याप्तम्, सा शब्दान्निवर्तमाना प्रामाण्यमपि निवर्तयति वृक्षतेव निवर्तमाना स्वव्याप्तं शिंशपात्वम् । द्विविधश्च विषयः प्रत्यक्षः परोक्षश्च । तत्र पूर्वः प्रत्यक्षस्य प्रमाणस्य विषयः ।

वृत्तिः

ननु व्याप्तिज्ञाननियमः कल्प्यतामित्याशयेन युक्त्यन्तरमाह—(तथेत्युपेति) ।

अनुमानादुपमानस्य नाविशेषः, तथेत्युपसंहारात् । यथा गौस्तथा गवय इति ज्ञानात्, उपमानसिद्धेः उपमानाधीनसिद्धेरुपमितेः । तथा च व्याप्तिज्ञानानपेक्षसादृश्यज्ञानाधीनोपमितिरित्यनुभवसिद्धम् । किञ्च नानुमिनोमि किन्तूपमिनोमीत्यनुव्यवसायसिद्धोपमितिर्नापलपितुं शक्यत इत्याशयः ॥ ४८ ॥

समाप्तमुपमानप्रामाण्यपरीक्षाप्रकरणम् ॥ ७ ॥

(क) अत्र 'प्रमाण'मिति पदमपेक्षणीयं सम्भाव्यते । तथाच अगृहीतग्राहकत्वं प्रमाणानां विशेषो धर्मो नावास्तीति हृदयम् । (ख) अत्राऽऽदर्शपुस्तकयोः 'सत्यप्यप्रसिद्धे'रिति पाठ उत्तरग्रन्थानुसारेण शोधितः । (ग) 'साध्यमि'त्यत्र 'साधर्म्यमि'ति पाठः सम्भाव्यते ।

न्यायवार्त्तिकम्

प्रत्यक्षत्वाच्च घटादिवदेव न प्रमाणम्। आत्मन्यसमवायाद् न घटादिवदेव प्रमाणम्। आकाश-गुणत्वाच्च संख्यादिवन्न प्रमाणम्।

यत् तावत् सत्यप्यप्रमितेरिति, तन्न ; असिद्धत्वात्—(१)न हि कदाचिच्छब्द उपलभ्यमानो न प्रमाणं भवति (क)अनुपलभ्यमानो भवतीति नासौ प्रमाणम् (१*)। प्रमाणं हि नाम येन प्रमीयते। कदा च तेन प्रमीयते? यदोपलभ्यते। यत् पुनरेतद् विषयाभावादिति। क एवमाह प्रत्यक्षानुमानव्यतिरेकी विषयो नास्तीति, असिद्धो हेतुः। यथा प्रत्यक्षादिभ्यो भेद-स्तथोक्तम्। यत्पुनरेतद् अविज्ञानात्मकत्वाद् बाह्यकरणप्रत्यक्षत्वाद् आत्मन्यसमवायाच्चेति, तन्न ; अनेकान्तात् प्रदीपवत्। प्रदीप एतत् सर्वमस्ति प्रमाणं च प्रदीपः प्रत्यक्षाङ्गत्वादित्युक्तम्। तस्मादनैकान्तिकत्वादहेतव एवेति। यत् पुनरेतदाकाशगुणत्वादिति; अयमप्यनैकान्तिक एव— यथा आकाशे यत् परिमाणं तन्महत्प्रत्ययकर्तृत्वात् प्रमाणं भवति। तस्मादाकाशगुणत्वादित्यय-मप्यहेतुः।

अनुमानं शब्दः स्मृत्यपेक्षत्वात्—यस्य स्मृत्यपेक्षित्वं तदनुमानम्, स्मृत्यपेक्षश्च शब्दोऽर्थ-प्रत्यायने, तस्मादनुमानम्। त्रिकालविषयत्वाच्च—त्रिकालविषयमनुमानम्, तथा च शब्दः तस्मादनुमानम्। अन्वयव्यतिरेकोपपत्तेश्च—यदन्वयव्यतिरेकि तदनुमानम् यथा धूमविशेष-दर्शनमग्निमत्प्रतीतौ, तथा च शब्दोऽन्वयव्यतिरेकाभ्यामेवार्थं प्रतिपादयति तस्मादनुमानम्।

न्यायवार्त्तिकतात्पर्यटीका

अप्रत्यक्षश्चाविनाभूताल्लिङ्गादवगन्तव्यः। तदनपेक्षणे असम्बन्धाविशेषात् सर्वं सर्वस्माद्गम्येत। तथा च सर्वः परोक्षार्थप्रत्ययोऽनुमानव्याप्तः। न च प्रत्यक्षपरोक्षाभ्यामन्यो राशिरस्ति तस्माद्विषया-भावादपि न शब्दप्रामाण्यमिति।

यत्तावत् सत्य(ख)प्रमितेरिति ; तन्न, असिद्धत्वादिति। न शब्दमात्रं प्रमाणमपि तु गृहीतः स्मर्यमाणसम्बन्धश्च। न चेदृशे शब्दे सति प्रमा न भवति। यादृशे तु सति प्रमा न भवति नासौ प्रमाणमित्यर्थः। तन्महत्प्रत्ययकर्तृत्वादिति। महत्त्वपरिमाणं हि महतो विशेषणम्, (ग)तन्न ज्ञातं विशेष्ये महति प्रमाणम्।

---

(१) 'न हि कदाचिच्च उपलभ्यमानोऽप्रमाणं भवत्यनुपलभ्यमानो न भवतीति नासौ प्रमाणम्' इति ख-वार्त्तिकपाठः।

(क) अत्र 'यत्त्वनुपलभ्यमानो भवति नासौ प्रमाणमिति' इत्येवं पाठो यथार्थतया सम्भाव्यते।

(ख) वार्त्तिकगतः अपिशब्दो नात्र गृहीतः।

(ग) तन्न त्यत्र तच्चेति पाठः समीचीनतया प्रतिभाति। विशेषणं परिमाणं ज्ञानस्वरूपव्यापारेण आकाशं महदिति प्रत्यये कारणमिति तत् प्रमाणमिति भावः।

न्यायभाष्यम्

(सू०)—शब्दोऽनुमानमर्थस्यानुपलब्धेरनुमेयत्वात् ॥ ४९ ॥

शब्दोऽनुमानम्, न प्रमाणान्तरम्। कस्मात्? शब्दार्थस्यानुमेयत्वात्। कथमनुमेयत्वम्? प्रत्यक्षतोऽनुपलब्धेः। यथाऽनुपलभ्यमानो लिङ्गी मितेन लिङ्गेन पश्चान्मीयत इति अनुमानम्। एवं मितेन शब्देन पश्चान्मीयते (१)अर्थोऽनुपलभ्यमान इत्यनुमानं शब्दः ॥ ४९ ॥

इतश्चानुमानं शब्दः—

(सू०)—उपलब्धेरद्विप्रवृत्तित्वात् ॥ ५० ॥

प्रमाणान्तरभावे द्विप्रवृत्तिरुपलब्धिः, अन्यथा ह्युपलब्धिरनुमाने अन्यथोपमाने (२)तद्व्याख्यातम्। शब्दानुमानयोस्तूपलब्धिरद्विप्रवृत्तिः यथाऽनुमाने प्रवर्तते तथा शब्देऽपि। विशेषाभावादनुमानं शब्द इति ॥ ५० ॥

न्यायवार्त्तिकम्

शब्दोऽनुमानमर्थस्यानुपलब्धेरनुमेयत्वात्। इतश्चानुमानं शब्दोऽर्थस्यानुपलब्धेः प्रत्यक्षेणानुपलभ्यमानार्थविषयत्वादिति सूत्रार्थः ॥ ४९ ॥

इतश्चानुमानम्—

उपलब्धेरद्विप्रवृत्तित्वात्। प्रमाणान्तरभावे (३)उपलब्धिभेदो दृष्टः यथा

न्यायवार्त्तिकतात्पर्यटीका

तदेवं सिद्धप्रमाणभावस्य शब्दस्यानुमानादभेदं परीक्षमाणः पूर्वपक्षयति—अनुमानं शब्द इति।

शब्दो—त्वात् (सू० ४९) ॥ यज्ज्ञानं प्रत्यक्षेणानुपलभ्यमानार्थविषयं प्रत्यक्षस्य पश्चादुपजायते तदनुमानम्, यथाऽग्निमद्धूमज्ञानं तथा च शब्दज्ञानं तस्मादनुमानमित्यर्थः ॥ ४९ ॥

वृत्तिः

क्रमप्राप्तं शब्दं परीक्षितुं पूर्वपक्षयति—(शब्दोऽनुमानमिति)

शब्दोऽनुमानमित्यस्य शाब्दबोधोऽनुमितिरिति पर्यवसितार्थः। तथाच शब्दो लिङ्गविधयाऽनुमितिकरणम् अर्थस्य शब्दप्रतिपाद्यस्यानुपलब्धेरप्रत्यक्षत्वादनुमेयत्वादिति। तथा च शाब्दज्ञानमनुमितिरप्रत्यक्षविषयत्वात्, प्रत्यक्षभिन्नत्वाद्वेत्यत्र तात्पर्यम् ॥ ४९ ॥

हेत्वन्तरमाह—(उपलब्धेरिति)

उपलब्धेः शाब्दबोधत्वेनाभिमताया अनुमितित्वेनाभिमतायाश्च अद्विप्रवृत्तित्वात्

(१) 'अर्थोऽयमनुप-' ज-वि-टि०। (२) 'तद्व्याख्यानम्' ज०। (३) 'उपलब्धि(हेतौ)भेदः' इति ख०।

(सू०)—सम्बन्धाच्च ॥ ५१ ॥

न्यायभाष्यम्

शब्दोऽनुमान(१)मिति वर्तते। सम्बद्धयोश्च शब्दार्थयोः सम्बन्धप्रसिद्धौ शब्दोपलब्धेरर्थग्रहणं यथा सम्बद्धयोर्लिङ्गलिङ्गिनोः सम्बन्धप्रतीतौ लिङ्गोपलब्धौ लिङ्गिग्रहणमिति ॥ ५१ ॥

न्यायवार्त्तिकम्

प्रत्यक्षेऽनुमाने च। अन्यथा हि प्रत्यक्षे उपलब्धिरन्यथाऽनुमाने, न त्वेवं शब्दे इति। तस्मान्न प्रमाणान्तरम् ॥ ५० ॥

सम्बन्धाच्च। सम्बद्धार्थप्रतिपादकत्वाच्चेति सूत्रार्थः। सम्बद्धार्थप्रतिपादकमनुमानं तथा च शब्द इति ॥ ५१ ॥

यत्तावत् स्मृत्यपेक्षत्वादनुमानं शब्द इति, तन्न; अनेकान्तात्। अनुमानेऽपि स्मृत्यपेक्षित्वमस्ति (क) यथा संशये यथा तर्के यथोपमान इति। एतेन त्रिकालविषयत्वं प्रत्युक्तम्। यत् पुनरेतदन्वयव्यतिरेकोपपत्तेरिति, अन्वयव्यतिरेकोपपत्तिः प्रत्यक्षेऽपि—यथा यत्र घटस्तत्र

न्यायवार्त्तिकतात्पर्यटीका

उप—त्वात् (सू० ५०)॥ अद्विप्रवृत्तिकत्वं प्रकारभेदरहितत्वं प्रत्यक्षानुमाने तु परोक्षापरोक्षावगाहितया प्रकारभेदवती इत्यर्थः ॥ ५० ॥

सम्ब—च्च (सू० ५१)॥ (ख)

सिद्धान्तस्वरूपमुपक्रमते—यत्तावदिति। एतेन संशयादिषु व्यभिचारेण। तेऽपि हि त्रिकालविषया इति। अन्वयव्यतिरेकोपपत्तिमात्रं प्रत्यक्षेऽप्यस्ति। प्रत्यायनाङ्गान्वयव्यतिरेकज्ञानं तु अन्यादृशं शब्दे अन्यादृशं त्वनुमाने। तद्धि पक्षधर्मतापेक्षमनुमाने शब्दे तु तदनपेक्षमित्यत्र सूत्रं भवति—

वृत्तिः

अद्विप्रकारत्वात्। अनुमितित्वं शाब्दत्वं च न जातिद्वयं शब्दस्य लिङ्गविधया बोधकत्वाल्लिङ्गान्तरजज्ञानवद्विजातीयत्वाभावात् ॥ ५० ॥

हेत्वन्तरमाह—(सम्बन्धाच्चेति)

सम्बन्धात् नियतसम्बन्धाज् ज्ञायमानादिति शेषः। शब्दो हि व्याप्तिग्रहणसापेक्षो बोधयति। तेन शाब्दबोधोऽनुमितिरिति भावः ॥ ५१ ॥

(१) '-मित्यनुवर्तते' इति फ०।

(क) अत्र यथाशब्दत्रयस्थाने तथेति पाठो यथार्थतया प्रतिभाति, सहचारप्रदर्शने उभयपक्षसिद्धतया अनुमानस्य दृष्टान्ततायाः संशयादेश्च उपमेयताया युक्तत्वादिति ध्येयम्।

(ख) द्वितीयाध्यायस्य प्रथमाह्निके एकपञ्चाशत्तमसूत्रस्य तात्पर्यटीका नोपलभ्यते।

न्यायभाष्यम्

यत्तावदर्थस्यानुमेयत्वादिति तन्न—

(सू०)—आप्तोपदेशसामर्थ्याच्छब्दादर्थसम्प्रत्ययः (१) ॥५२॥

स्वर्गः अप्सरसः उत्तराः कुरवः सप्त द्वीपाः समुद्रो लोकसन्निवेश इत्येवमादेरप्रत्यक्षस्यार्थस्य न शब्दमात्रात् प्रत्ययः, किं तर्हि ? आप्तैरयमुक्तः शब्द इत्यतः सम्प्रत्ययः, विपर्ययेण सम्प्रत्ययाभावात्; न त्वेवमनुमानमिति।

न्यायवार्त्तिकम्

घटज्ञानम्, यत्र नास्ति तत्र तदभाव इति। यत् पुनरेतदनुपलभ्यमानार्थविषयत्वादिति, सत्यम्; अनुपलभ्यमानार्थविषयमनुमानम्, न पुनः स्वर्गापूर्वदेवताद्यर्थेषु लौकिकस्य प्रत्यक्षमनुमानं वा। अपि तु—

आप्तोपदेशसामर्थ्याच्छब्दादर्थे सम्प्रत्ययः। न ह्ययं शब्दमात्रात् स्वर्गादीन् प्रतिपद्यते।

न्यायवार्त्तिकतात्पर्यटीका

आप्तो—यः (सू० ५२) ॥ यो ह्यत्यन्तादृष्टपूर्वः स्वर्गापूर्वदेवतादिः स वाक्यार्थरूपः। तथाहि—

यन्न दुःखेन संभिन्नं न च ग्रस्तमनन्तरम्।
अभिलाषोपनीतं च तत्सुखं स्वःपदास्पदम् ॥ इति।

स्वर्गो वाक्यार्थः। एवमपूर्वमपि; तत् खलु स्वर्गनरकादिहेतुः पुरुषविशेषगुणः कालान्तरस्थायी स्वकार्यविरोधीति वाक्यार्थ एव। एवं देवताऽपि। साऽपि हि सूक्तहविर्भागिनी (क) सहस्राक्षाद्युपेतदेहादिमती वाक्यार्थ एव। नैवैष शब्दादृते अस्मदादिप्रत्यक्षादिगोचरः। न चागृहीतं लिङ्गमस्मिन् प्रवर्तितुमर्हति। न चागृहीते सम्बन्धिनि शक्यग्रहः सम्बन्धः। पदं तु यद्यपि पदार्थसङ्गतिसंवेदनमपेक्षते (ख)यद्यपि पदार्थ एव पदार्थान्तरविशिष्टो वाक्यार्थः। येऽपि वाक्यार्थे स्वर्गादौ पदार्थस्मरणद्वारेण प्रवर्तमानं सङ्गतिग्रहानपेक्षमेव स्वर्गरूपवाक्यार्थं कुर्वन्ति, स्वलोकसिद्धं सुखजातीयमुद्दिश्य लोके सिद्धैरेव दुःखाद्यसंभेदैर्विशिष्टं स्वर्गपदवाच्यं प्रतिपादयन्ति, नापदार्थं वाक्यार्थं कुर्वन्ति वाक्यार्थे च पदवचनं स्वर्ग इति यथा (ग)श्रोत्रियश्छन्दोऽधीत इति (घ)यथा चक्षुरादयो रूपादिष्वगृहीतसङ्गतयः प्रवर्तन्ते एवं पदार्थसङ्गतिग्रहापेक्षाण्यपि पदानि वाक्यार्थबोधने न सङ्गतिग्रहमपेक्षन्ते, कार्यव्यङ्ग्यत्वात् प्रमाणभावस्य सङ्गतिग्रहापेक्षेभ्योऽपि

---

(१) '-दर्थे सम्प्रत्ययः' इति वि०।

(क) इन्द्रियवाचकोऽक्षशब्दोऽत्र चक्षुःपरः। सहस्राक्ष्याद्युपेतेति वा पाठः। (ख) पूर्ववाक्ये यद्यपीति दर्शनादत्र 'तथाऽपी'ति पाठो युक्तः। (ग) ओंकारपूर्विकास्तिस्रः सावित्रीर्यश्च विन्दति। चरितब्रह्मचर्यश्च स वै श्रोत्रिय उच्यते॥ इति शब्दसारः। (घ) यथा च चक्षुरादय इति पाठः सम्भाव्यते।

न्यायवार्त्तिकतात्पर्यटीका

च पदभेदेभ्यो वाक्यार्थावबोधकार्यदर्शनात्। तस्मान्न पदं तदर्थो वा वाक्यार्थावबोधे लिङ्गं तत्र सम्बन्धग्रहानपेक्षत्वाद् रूपादिबोधे चक्षुरादिवत्।

स्यादेतत्। मा भूत्प्रत्यक्षतोदृष्टमनुमानं वाक्यार्थे, सामान्यतोदृष्टं भविष्यति। यद्यपि च वाक्यार्थे साध्ये पदानामपक्षधर्मत्वं यद्यपि च पदस्मारिताः पदार्था व्यभिचारिणः तथा अप्याकाङ्क्षायोग्यतासत्तिविशेषणाः पदार्थाः संसर्गे लिङ्गं भविष्यन्ति। तथा हि यत्र दुःखेनेत्यादिभिः पदैः स्मारिताः पदार्थाः गुणप्रधानभावेनावस्थिताः संसर्गवन्तः आकाङ्क्षायोग्यतासत्तिमत्त्वे सति पदैः स्मारितत्वाद् गामभ्याजेति पदस्मारितपदार्थवत्। संसर्गस्य च संसृज्यमाना एव विशेषो न पुनराजानतोऽस्ति कश्चिद्विशेषः। संसृज्यमानाश्च पदैरेव स्मारिता इति संसर्गविशेषप्रतिलम्भः। स एव च वाक्यार्थ इति सिद्धमानुमानिको वाक्यार्थ इति। गामभ्याजेत्यत्र पदार्थानां संसर्गवत्त्वं च वाक्यश्रवणसमनन्तरप्रयोज्यवृद्धप्रवृत्त्यनुमितपदार्थसंसर्गप्रत्ययादवगतम्। तदेतदचतुरस्रम्, पदानामेव पदार्थस्मरणावान्तरव्यापाराणां वाक्यार्थप्रमां प्रति करणतया प्रमाणत्वात् तेषां चापक्षधर्मतया लिङ्गत्वानुपपत्तेः।

यदि तु पदानि पदार्थमात्रपर्यवसितवृत्तीनि न वाक्यार्थप्रत्ययपराणि स्युः ततो न पदार्थानामाकाङ्क्षा अस्तीति वाक्यार्थप्रत्ययो न भवेत्। न खल्वाकाङ्क्षां विना सन्निधियोग्यताभ्यामेव पदार्थाः संसृज्यन्ते, यथा अयमेति पुत्रो राज्ञः पुरुषोऽपसार्यतामित्यत्र पुत्रसम्बन्धेन निराकाङ्क्षो राजा न पुरुषेण संबध्यते। न च पदानां वाक्यार्थप्रत्ययपरत्वमन्तरेण तत्स्मारितानां पदार्थानामाकाङ्क्षाऽस्ति। न हि यद् येन विना न भवति तत् तदाकाङ्क्षति, येन कारकं क्रियामपेक्षेत द्रव्यं वा गुणम्; तथा सति पटो भवतीति वाक्यं न निराकाङ्क्षं स्यात्। पटस्य द्रव्यस्य गुणाकाङ्क्षित्वात्। (क)तस्माद् रक्तः पटो भवतीत्यस्यैकदेशः पटो भवतीति साकाङ्क्षत्वादप्रमाणम्, एवं (१)पटो भवतीत्यपि वाक्यं साकाङ्क्षं स्यात्, न चैवमस्ति। पटो भवतीति हि वाक्यं यं कञ्चिद् गुणं गृहीत्वा अनाकाङ्क्षं प्रमाणमेव, यदा पुना रक्तः पटो भवतीत्यस्यैकदेशो, यं कञ्चिद् गुणमाक्षिप्य निराकाङ्क्षः एवं विभागे सति निराकाङ्क्षत्वेन वाक्यभेदः स्यात्। रक्त इत्यपि च वाक्यं यं कञ्चिद् गुणिनं क्रियां च कांचिदाक्षिप्य निर्वृणुयात। न च विशेषदर्शने सति नाऽऽक्षेप इति युक्तम्, एकवाक्यतायां सत्यां विशेषदर्शने अनाक्षेपः, अनाक्षेपे च सत्येकवाक्यतेत्यन्योन्याश्रयापत्तेः। तस्माद्वाक्यार्थप्रतिपादनपरसमभिव्याहृतपदकदम्बस्मारितत्वेनापर्यवसानमेव पदार्थानामाकाङ्क्षेति युक्तमुत्पश्यामः। तथा च पटो भवतीत्येतावन्मात्रं निराकाङ्क्षं यं कञ्चिद् गुणमाक्षिप्य निर्वृणोति, रक्तः पटो भवतीत्यत्र तु रक्तपदस्यापि समभिव्याहारात् पटादिसंसर्गपरत्वमिति पटादिसंसर्ग-

(१) 'पटो भवतीत्यपि वाक्यं साकाङ्क्षं स्यात् न चैवमस्ति' इत्यंशः ख-तात्पर्ये नास्ति।
(क) तस्माद् रक्त इत्यादौ अन्योन्याश्रयापात्तेरित्यन्ते ग्रन्थे मुद्राप्रमादः सम्भाव्यते।

न्यायभाष्यम्

यत्पुनरुपलब्धेरद्विप्रवृत्तित्वादिति, अयमेव शब्दानुमानयोरुपलब्धेः प्रवृत्तिभेदः; तत्र विशेषे सत्यहेतुर्विशेषाभावादिति ।

न्यायवार्त्तिकम्

किन्तु पुरुषविशेषाभिहितत्वेन प्रमाणत्वं प्रतिपद्य तथाभूताच्छब्दात् स्वर्गादीन् प्रतिपद्यते । न चैवमनुमाने, तस्मान्नानुमानं शब्द इति । (क) एवं चोल्लिखिता प्रतिपत्तिः शब्दान्नानुमानादिति । एतेनाद्विप्रवृत्तित्वं व्याख्यातम् ।

न्यायवार्त्तिकतात्पर्यटीका

मन्तरेण रक्तत्वमपर्यवस्यत् पटादयश्च रक्तत्वसंसर्गं विनाऽपर्यवस्यन्तः परस्परसम्बन्धा भवन्तीति सिध्यत्येकवाक्यता । तस्मात्पदान्येव पदार्थस्मरणद्वारेण तत्संसर्गं लक्षयन्ति वाक्यार्थे प्रमाणम्, तेषां चापक्षधर्मतया न लिङ्गत्वम् ।

स्यादेतत्—अयं पदकदम्बकविशेषः स्मारितपदार्थसंसर्गवान् आकाङ्क्षादिमत्त्वे सति पदकदम्बत्वाद् गामभ्याजेतिपदावलीवदिति नापक्षधर्मता, मैवम्, अन्योन्याश्रयापत्तेः । कर्मकारकं हि पटादन्यद्वस्तुतः सिद्धं ज्ञानलक्षणाय फलाय कल्पते । यथा अग्निमत्ता धूमस्य पर्वतस्य वा अग्निसंयोगः, न त्वग्निज्ञानजनकत्वं तद्वत्ता । फलव्यङ्ग्यं हि तन्नानुपजाते फले कल्पते । तथा च फलोपजनने सत्यग्निमत्ता तद्वत्तायां तु कर्मणि फलोपजननमित्यन्योन्याश्रयापत्तिः । न हि फलकर्मणोरैक्यम् । न हि वृक्ष एव च्छिदा भवति । तदिह संसर्गवत्त्वं पदानां तज्ज्ञानजनकत्वं नानुमानसाध्यं भवितुमर्हति । न ह्यग्निज्ञानजनकत्वं धूमस्यानुमानसाध्यमित्युक्तम् । स्मृतिजनकत्वमप्येषां वाक्यार्थप्रत्यायनाय कल्पितं न संबन्धान्तरं व्यनक्तीति । तत्सिद्धमेतत् न पदानि वाक्यार्थबोधे लिङ्गम् अपक्षधर्मत्वान्मनोवदिति ।

अपि च लौकिक एवार्थः परीक्षकैरनुगम्यते न तु स्वकृतलक्षणानुरोधेनालौकिकमास्थीयते । न च क्लेशेन कयाचित्प्रणाड्या पक्षधर्मतां कल्पयित्वा लोकः पदेभ्यो वाक्यार्थमवगच्छति अपि तु स्वतन्त्रेभ्य एव तेभ्य इति सिद्धः शब्दस्य प्रमाणस्यानुमानाद्भेदः । आप्तोक्तत्वं तु स्वर्गादिप्रतिपादकस्याऽऽगमस्य प्रामाण्ये लिङ्गमेव, न चैतावता तदर्थ आनुमानिको भवति । न हि प्रवृत्तिसामर्थ्यानुमितप्रामाण्यस्य प्रत्यक्षस्य विषयो भवत्यानुमानिकः । अर्थविषयं हि प्रमाणं प्रामाण्यविषये च प्रवृत्तिसामर्थ्याप्तोक्तत्वे इति । एवं व्यवस्थिते अभ्युच्चयमात्रतया भाष्यवार्त्तिककाराभ्यामाप्तोक्तत्वाश्रयत्वानाश्रयत्वे शब्दानुमानभेदहेतुतयोपन्यस्ते इति मन्तव्यम् । एतेन प्रवृत्तिभेदकथनेन अद्विप्रवृत्तिकत्वं व्याख्यातम् निराकार्यतया ।

(क) ख-पुस्तकपाठोऽत्र गृहीतः । क-पुस्तकसम्पादकास्तु 'एवं (शब्दं) चोल्लिखन्ती' इत्याकारेण मुद्रापयामासुः ।

न्यायभाष्यम्

यत्पुनरिदं सम्बन्धाच्चेति, अस्ति च शब्दार्थयोः सम्बन्धोऽनुज्ञातः, अस्ति च प्रतिषिद्धः। अस्येदमिति षष्ठीविशिष्टस्य (१)वाक्यस्यार्थविशेषोऽनुज्ञातः, प्राप्तिलक्षणस्तु शब्दार्थयोः सम्बन्धः प्रतिषिद्धः। कस्मात्? प्रमाणतोऽनुपलब्धेः(क)—प्रत्यक्षतस्तावच्छब्दार्थप्राप्तेर्नोपलब्धिरतीन्द्रियत्वात्। येनेन्द्रियेण गृह्यते शब्दस्तस्य विषयभावमतिवृत्तोऽर्थो न गृह्यते। अस्ति चातीन्द्रियविषयभूतोऽप्यर्थः (२)समानेन चेन्द्रियेण गृह्यमाणयोः प्राप्तिर्गृह्यत इति ॥ ५२ ॥

न्यायवार्त्तिकम्

यत् पुनरेतत् सम्बन्धाच्चेति, अस्ति शब्दार्थयोः सम्बन्धोऽनुज्ञातोऽस्ति च प्रतिषिद्ध इति। वाच्यवाचकभावलक्षणः सम्बन्धोऽनुज्ञातः—अस्य शब्दस्यायमर्थो वाच्य इति। यः पुनरयं स्वाभाविकः शब्दार्थयोः सम्बन्ध इति कैश्चिदभ्युपगम्यते स प्रतिषिद्ध इति। न स्वाभाविकः शब्दार्थयोः सम्बन्धोऽस्ति। कथम्?

'प्रमाणतोऽनुपलब्धेः'—तत्र प्रत्यक्षेण तावच्छब्दार्थस्यानुपलब्धिरतीन्द्रियविषयत्वात्। यस्माच्छब्दस्यातीन्द्रियोऽप्यर्थो विषयस्तस्मान्न प्रत्यक्षेणोपलब्धिरिति ॥ ५२ ॥

न्यायवार्त्तिकतात्पर्यटीका

सम्बन्धात्प्रतिपत्तेरनुमानं शब्द इति यदुक्तं पूर्वपक्षिणा तदनुभाष्य दूषयति—यत्पुनरेतदिति। अस्येदमिति षष्ठीविशिष्टस्येति भाष्यम्। तस्य व्याख्यानम्—वाच्यवाचकभाव इति। स्वाभाविको हि शब्दार्थयोः संबन्धस्तथा स्यात् तादात्म्यलक्षणो वा प्रत्याय्यप्रत्यायकभावो वा प्राप्तिलक्षणो वा। तत्राव्यपदेश्यपदेन प्रत्यक्षलक्षणस्थेन तादात्म्यमपाकृतम्। शब्दार्थयोः प्राप्तिनिराकरणहेतुना चोपरिष्टादौत्पत्तिकः प्रत्याय्यप्रत्यायकभावो निराकरिष्यते। तेन प्राप्तिं निराकरोति भाष्यकारः—प्राप्तिलक्षणस्त्विति। (ख) एकेन्द्रियग्राह्येभ्यो(३)हि प्राप्तिः प्रत्यक्षा यथाऽङ्गुल्योः न तु शब्दार्थयोरेकेन्द्रियग्राह्यता तस्मान्नानयोः प्राप्तिः प्रत्यक्षगम्या वायुवनस्पत्योरिवेत्यर्थः। ननु शब्दस्यार्थः समानेन्द्रियग्राह्य एव, तत्कथं (ग) येनेन्द्रियेण गृह्यते शब्दस्तस्य विषयभाव(घ)मतीतोऽर्थ इति, अत आह—अस्ति चातीन्द्रियविषयभूतोऽपीति। शब्दग्राहकेन्द्रियमतिपतित इन्द्रियमात्रमतिपतितश्चातीन्द्रियः, स च विषयभूतश्चेति कर्मधारयः।

तदेतद् यस्माच्छब्दस्येति वार्त्तिकेन व्याख्यातम् ॥ ५२ ॥

वृत्तिः

सिद्धान्तसूत्रम्—(आप्तोपदेशेति)

आप्तस्य भ्रमादिशून्यस्य य उपदेशः शब्दस्तत्र यत् सामर्थ्यम् आकाङ्क्षायोग्यतादिमत्त्वं

(१) 'वाक्यार्थस्याविशेषो-' इति टि०। (२) 'समानेनैवेन्द्रियेण' इति टि०। (३) '-ऽप्राप्तिः' इति क।

(क) इदं ज-पुस्तके वार्त्तिके च सूत्राकारेण मुद्रितम्। (ख) अत्र सुबर्थश्चिन्तनीयः। (ग) क-ख-पुस्तकयोः 'नेन्द्रियेणे'ति पाठः प्रामादिकः। (घ) 'अतीत' इति अतिवृत्त इति भाष्यमर्थतो धृतम्।

(सू०)—पूरणप्रदाहपाटनानुपलब्धेश्च सम्बन्धाभावः ॥५३॥

न्यायभाष्यम्

प्राप्तिलक्षणे च गृह्यमाणे सम्बन्धे शब्दार्थयोः शब्दान्तिके वाऽर्थः स्यात्, अर्थान्तिके वा शब्दः स्यात्, उभयं वोभयत्र । अथ (१)खलूभयम् ?

स्थानकरणाभावादिति चार्थः । न चायमनुमानतोऽप्युपलभ्यते शब्दान्तिकेऽर्थ इति । एतस्मिन् (२)पक्षेऽप्यास्यस्थानकरणोच्चारणीयः शब्दस्तदन्तिकेऽर्थ इति अन्नाग्न्यसिशब्दोच्चारणे पूरणप्रदाहपाटनानि गृह्येरन्, न च गृह्यन्ते; अग्रहणात् नानुमेयः प्राप्तिलक्षणः सम्बन्धः ।

न्यायवार्त्तिकम्

अनुमानेनोपलप्स्यत इति चेत् (क)नानुमानेन विकल्पानुपपत्तेः । शब्दो वाऽर्थदेशमुपसम्पद्यते अर्थो वा शब्ददेशम्, उभयं वा । पूरणप्रदाहपाटनानुपलब्धेः ।

पूरणप्रदाहपाटनानुपलब्धेश्च सम्बन्धाभावः । आस्यैकदेशस्थानकरणोच्चारणीयः शब्द इति अन्नाग्न्यसिशब्दोच्चारणे पूरण-प्रदाह-पाटनानि गृह्येरन् । मूर्त्तिमान् महान् पदार्थो मोदकादिर्गवादिवदागच्छन्नुपलभ्येत । ततश्च लोकव्यवहार उच्छिद्येत । अथ शब्दोऽर्थान्तिकमुपसम्पद्यते, तस्याप्यनुपपत्तिर्व्याघातात्—नित्यः शब्दः सन्तानवृत्त्या चागच्छतीति व्याहतम् । अथ नाऽऽगच्छत्यर्थदेश एव भवतीति, नित्यश्च भवति चेत्यनिवृत्तो व्याघातः । स्थानकरणप्रयत्ना-

न्यायवार्त्तिकतात्पर्यटीका

प्राप्तिलक्षणे चेत्यादि भाष्यं व्याचष्टे—नानुमानेनापीति (ख) । उपसंपद्यते प्राप्नोति, गच्छतीति यावत् ।

पूर—वः (सू ५३) ॥ आगच्छन्नुपलभ्येत मोदकादिः, न चोपलभ्यते तस्मान्नाऽऽगच्छति शब्ददेशमर्थः । ततश्च अस्मिन् पक्षे शब्देन लोकव्यवहार उच्छिद्यते । अथ शब्द इति । न तावत् गुणस्य शब्दस्य गतिरुपपद्यते, तस्मात्संतानवृत्त्या (ग)शब्दोऽर्थदेशमागच्छतीति वाच्यम्, तथा च नित्यत्वव्याहतिरित्यर्थः । शङ्कते—अथ नाऽऽगच्छतीति । भवति विद्यत इत्यर्थः । अभूत्वा भवनं भवत्यर्थ इति मत्वा निराकरोति—नित्यश्च भवति चेतीति । शङ्किता स्वाभिप्रायमाह—

वृत्तिः

ततः । अथवा आप्तं प्राप्तं यदुपदेशसामर्थ्यम् आकाङ्क्षादिमत्त्वं ततः तत्सहकारात् । सावधारणश्चायं निर्देशः, तेन व्याप्तिनिरपेक्षादाकाङ्क्षादिज्ञानादर्थे सम्प्रत्ययः शाब्दबोधः

---

(१) 'खल्वयम्' इति ल-ज-ग-झा० । (२) '-पक्षेऽप्यस्य स्थान-' इति ग-ज-फ० ।

(क) अत्र 'अनुमानेन' इत्येतत् अन्वयिपदान्तराभावेन मुद्राप्रमादागतमिव सम्भाव्यते । तथा सति तात्पर्यटीकायामपि 'नानुमानेनापीत्य'त्र अनुमानेनापेति इति पाठो युक्तः । (ख) अपिशब्दो वार्त्तिके न दृश्यते । (ग) आदर्शपुस्तकयोः 'शब्दोऽयं देशमि'ति पाठो मुद्राप्रमादकृतः ।

न्यायभाष्यम्

अर्थान्तिके शब्द इति स्थानकरणासम्भवाद् अनुच्चारणम्—स्थानं कण्ठादयः, करणं प्रयत्नविशेषः, तस्यार्थान्तिकेऽनुपपत्तिरिति। उभयप्रतिषेधाच्च नोभयम्। तस्मान्न शब्देनार्थः प्राप्त इति ॥ ५३ ॥

न्यायवार्त्तिकम्

सम्भवाच्चार्थदेशे न भवति। अथ न गच्छति न भवति तत्र व्यज्यते, एको विततत्यावस्थित इति चेत् न, सर्वार्थोपलब्धिप्रसङ्गात्। यदि सर्वशब्दा एव विततत्यावस्थिताश्च (१)स्थानकरणादिनिमित्तसन्निधाने सति व्यज्यन्त इति मन्यसे, सर्वार्थानामुपलब्धिः प्राप्ता ; यदेकस्य व्यञ्जकं तच्छब्दान्तराणामपीति। विततत्यावस्थितश्च शब्दो व्यक्त इति स्वविषयं व्याप्यावस्थाने सति यत्र क्वचनावस्थितानां (२)गोशब्दाभिव्यक्तौ ककुदादिमदर्थप्रत्यायनं स्यात्। (३)सामान्यवदेतत् स्यात्—यथा सामान्यं स्वविषयं व्याप्यावस्थितं (४)न च सर्वत्रोपलभ्यते तथा शब्दोऽपि स्वविषयं व्याप्यावस्थित इति नियमो भविष्यति ? न युक्तमेवं भवितुम्, सामान्यस्याऽऽश्रयोपलब्धिर्व्यक्तिहेतुः, न च पुनः शब्दस्याऽऽश्रयोपलब्धिरस्ति, न च वाच्ये वृत्तिः, तस्मादसमो दृष्टान्तः। यदि च वाच्यार्थवृत्तिः शब्दः स्यात् वाच्योपलब्धावकृतसमयेनापि प्रतिपद्येत यथा सामान्यमकृतसमयोऽपि प्रतिपद्यते इति। तस्मान्नानुमानादपि प्रतिपद्यते।

न्यायवार्त्तिकतात्पर्यटीका

अथ (क) न गच्छतीति। निराकरोति—**न सर्वार्थेति**। न हि समानदेशाः समानेन्द्रियग्राह्याः प्रतिनियतव्यञ्जकव्यङ्ग्या दृष्टा इत्यभिप्रायः। **सामान्यस्याऽऽश्रयोपलब्धिर्व्यक्तिहेतुः (ख)न पुनः शब्दस्याऽऽश्रयोपलब्धिरस्ति** यतः शब्दो व्यज्येत, प्रत्युत शब्देनैवाऽऽश्रयो व्यञ्जनीयः स्यात्। तथा चार्थाश्रितः शब्दस्ताल्वादिभिरप्राप्तैः सर्वान् प्रति व्यक्त इत्युक्तदोषापत्तिः न च शब्दस्यार्थे वृत्तिरनुभवगोचर इत्याह—**न च वाच्ये वृत्तिः**।

वृत्तिः

सम्भवतीति नानुमानान्तर्भावः शब्दस्येत्यर्थः, शब्दादमुमर्थं प्रत्येमि न त्वनुमिनोमीत्यनुभवादिति भावः ॥ ५२ ॥

शब्दार्थयोः सम्बन्धाभाव इत्यप्याह—(पूरणेति)

शब्देन सहार्थस्य सम्बन्धाभावः व्याप्त्यभावः। हेतुमाह—पूरणेति। यदि शब्दस्यार्थेन व्याप्तिः स्यात् तदा अन्नाग्न्यसिशब्दैर्मुखपूरण-मुखदाह-मुखपाटनानि स्युः, शब्दस्य व्याप्यस्य सत्त्वेनान्नादेरर्थस्यापि सत्त्वात् ॥ ५३ ॥

---

(१) 'स्थानकरणादि (निमित्त) सन्निधाने' इत्येवं क-वार्तिके मुद्रितम्। (२) 'गोशब्दोऽभिव्यक्तौ' इति ख। (३) 'सामान्यवदेतत् स्यात्' इति ख-पुस्तके नास्ति। (४) 'स च सर्वत्रे'ति ख-पुस्तकपाठः।

(क) क-ख-तात्पर्ययोः 'नाऽऽगच्छती'ति प्रासङ्गिकम्। (ख) वार्त्तिके 'न च पुनरि'ति विशेषः।

(सू०)—शब्दार्थव्यवस्थानादप्रतिषेधः ॥ ५४ ॥

न्यायभाष्यम्

(१)शब्दार्थप्रत्ययस्य व्यवस्थादर्शनादनुमीयते अस्ति शब्दार्थसम्बन्धो व्यवस्थाकारणम्। असम्बन्धे हि शब्दमात्रादर्थमात्रे प्रत्ययप्रसङ्गः। तस्मादप्रतिषेधः सम्बन्धस्येति ॥ ५४ ॥

न्यायवार्त्तिकम्

इतश्च स्वाश्रयादन्येनापि न सम्बन्धी शब्दः गुणत्वात्; अन्येन गवादिना शब्दं प्रति समवायोऽपि नास्ति शब्दस्याऽऽकाशवृत्तित्वात्। नापि शब्दार्थयोरेकार्थसमवायः(क), ताभ्यामेकस्यानारम्भात्। उपमानात् प्रतिपत्स्यत इति चेत् न, उपमानास्यापि नायं विषयः। आगमात् प्रतिपत्स्यत इति चेत, स एवात्र विचार्यते, किं शब्दार्थौ सम्बद्धावाहोस्विदसम्बद्धाविति।

यदिदं भवताऽभिधीयते स्मृत्याद्यपेक्षत्वादनुमानसाधर्म्यादनुमानं शब्द इति, तस्मादेव नानुमानम्, न हि तेनैव तस्य साधर्म्यमिति। अथ स्मृत्यादिसाधर्म्याच्छब्दानुमानयोरेकत्वमेव ? तर्ह्येकं प्रमाणं प्राप्नोते, अस्ति ह्यर्थपरिच्छेदकत्वं सर्वप्रमाणानां साधर्म्यमिति। भवत्वेकं प्रमाणं किन्नो बाध्यत इति ? कथं न बाध्यत इति, यदभीष्टं तन्निवर्त्तते। किमभीष्टम् ? प्रत्यक्षानुमाने भिन्ने इति। अथ सामान्यमाश्रित्याभेदो देश्यते तदोपेक्षया वर्त्तितव्यम्, सामान्यमाश्रित्याभेदो विशेषमाश्रित्य भेद इति न किञ्चिद्बाधितम्। न चानुमानं शब्दः स्वपरात्मप्रत्ययायकत्वात्। यत् स्वपरात्मप्रत्यायकं तदनुमानं न भवति यथा प्रदीपः—प्रदीपो येनापि क्रियते तस्याप्युपलब्धिसाधनं भवति अन्यस्यापि। शब्दोऽप्येवं तस्मान्नानुमानमिति।

शब्दार्थव्यवस्थानादप्रतिषेधः(ख)। यदि शब्दार्थावसम्बद्धौ स्याताम्, शब्दार्थप्रत्ययव्यवस्था न स्यात्। शब्दः सम्बद्धोऽर्थं प्रतिपादयति प्रत्ययनियमहेतुत्वात् प्रदीपवत्—यः प्रत्ययनियमहेतुः स सम्बद्धोऽर्थप्रत्यायको दृष्टः यथा प्रदीपः, शब्दश्चैवंधर्मा, तस्माच्छब्दोऽपि सम्बद्धोऽर्थप्रत्यायक इति। यद्वा प्रत्ययः पक्षीकर्तव्यः सम्बद्धाभ्यां शब्दार्थाभ्यां वस्तुप्रत्ययो भवतीति नियमात् कुण्डलीति प्रत्ययवदिति ॥ ९४ ॥

न्यायवार्त्तिकतात्पर्यटीका

आगमात् प्रतिपत्स्यत इति, निरुक्तादिरागमः। उत्तरम्—(२)स एवात्रेति। निरुक्तादीनामर्थसंबन्धे (३)सिद्धे प्रतिपादकत्वं भवेत्। स एव तु विचार्यत इत्यर्थः ॥ ९३ ॥

पूर्वपक्षवाद्याह—

शब्दा—धः (सू ५४) ॥

---

(१) 'शब्दार्थप्रत्ययस्य' इति ज० ग० फ०। (२) 'स एवायमिति' इत्यादर्शपुस्तकयोः पाठः। (३) 'सिद्धे' इति ख-तात्पर्ये नास्ति।

(क) एकार्थसमवायोऽत्र एकस्यार्थस्य समवाय इति व्युत्पत्त्या समवायिद्वयनिरूपितसमवायपरः, यथा घटस्यैकार्थस्य कपालद्वये। अत उत्तरं पठति ताभ्यामिति। एकस्मिन्नर्थे समवाय इति व्युत्पत्तिलभ्यसम्बन्धविशेषपरत्वे तु तयोरेकेनानारम्भादित्युत्तरं भवेदिति ध्येयम्।

(ख) ख-वार्त्तिके शब्दार्थव्यवस्थानदर्शनादप्रतिषेधः इति दृश्यते।

न्यायभाष्यम्

अत्र समाधिः—

(सू०)—न सामयिकत्वाच्छब्दार्थसम्प्रत्ययस्य ॥ ५५ ॥

(१)न सम्बन्धकारितं शब्दार्थव्यवस्थानम्। किं तर्हि? समयकारितम्। यत्तद्वोचाम अस्येदमिति षष्ठीविशिष्टस्य वाक्यस्यार्थविशेषोऽनुज्ञातः शब्दार्थयोः सम्बन्ध इति (२)समयं तम् अवोचाम इति। कः पुनरयं समयः? अस्य शब्दस्येदमर्थजातमभिधेयमिति अभिधानाभिधेयनियमनियोगः। तस्मिन्नुपयुक्ते शब्दादर्थसम्प्रत्ययो भवति। विपर्यये हि शब्दश्रवणेऽपि प्रत्ययाभावः। सम्बन्धवादिनोऽपि चायमवर्जनीय इति।

न्यायवार्त्तिकम्

न सामयिकत्वाच्छब्दार्थसम्प्रत्ययस्य। न सम्बन्धकारितं शब्दार्थव्यवस्थानम्। किं तर्हि? समयकारितम्। कः पुनरयं समयः? अभिधानाभिधेयनियमनियोगः, समययुक्ते शब्दार्थ-

न्यायवार्त्तिकतात्पर्यटीका

सिद्धान्तवाद्याह—

न सा—स्य (सू ५५)॥ न सामयिकत्वादिति।

अभिधानाभिधेयनियमनियोग इति। अभिधानाभिधेययोर्नियमो गोशब्दस्य सास्नादिमानेवार्थ एवमश्वशब्दस्य केशरादिमानेवेति, तस्मिन् नियोगः बोद्धव्य इति भगवतः परमेश्वरस्य सर्गादौ, सोऽयं समय इति अयमर्थः। तस्मिन् उपयुक्ते ज्ञाते शब्दार्थव्यवस्था भवति। संबन्धवादिनोऽपि चायमवर्जनीय इति। येऽपि मीमांसका वैयाकरणा वा स्वाभाविकं शब्दार्थयोः संबन्धमास्थिषत तेषामपि नैव सत्तामात्रेण गमकोऽपि तु ज्ञातः सन्, विज्ञाने चायमस्य वाचक इति वाऽस्मादयं बोद्धव्य इति वा संकेत एवोपायः। वृद्धव्यवहारोऽपि गवादिशब्दानां देवदत्तादिशब्दवत् संकेतपूर्व एव। तद्वरमस्तु संकेत एव कृतमत्र स्वाभाविकेन संबन्धेन तन्मात्रादेव प्रयोगप्रतिपत्तिव्यवहाराणामुपपत्तेरित्यर्थः।

नन्वयं समयः केषांचित् पदानामसति स्वाभाविकेऽर्थैः संबन्धे न कर्तुं शक्यः, निर्दिश्य ह्यर्थं ब्रूयादयमस्माद्बोद्धव्य इति। न च निर्देशोऽसति स्वाभाविके संबन्धे

वृत्तिः

तत्किं शब्दोऽसम्बद्धमेवार्थं प्रत्याययति, तथा सत्यतिप्रसङ्ग इत्याशङ्कते—(शब्दार्थेति) 'अप्रतिषेधः' शब्दार्थयोः सम्बन्धप्रतिषेधो न, शब्दार्थयोः सम्बन्धस्य व्यवस्थितत्वात्, कश्चिदेव हि शब्दः कञ्चिदेवार्थं बोधयति न सर्वः सर्वमिति। इत्थं च सम्बन्धेऽङ्गीकृते तेन सम्बन्धेन व्याप्तिरप्यावश्यकी, स च सम्बन्धो न मुखपूरणादिनियामक इति भावः॥ ५४॥

---

(१) 'असम्बन्धकारितं' इति वि०। (२) 'समयं तदवोचाम' इति ज० ग० फ०।

न्यायभाष्यम्

प्रयुज्यमानग्रहणाच्च समयोपयोगो लौकिकानाम्। (१)समयपरिपालनार्थं चेदं पद-

न्यायवार्त्तिकम्

व्यवस्था भवतीति। (क) कश्चित् (२)च सम्बन्धोऽनुज्ञात इति (३)यदवोचाम (४)समयं तदवोचाम इति। सेयं शब्दार्थव्यवस्थाऽन्यथाऽपि भवतीत्यहेतुः। अयं च वाच्यवाचकभाव-लक्षणः सम्बन्धः स्वाभाविकशब्दार्थसम्बन्धवादिनाऽप्यनुज्ञेयः। न हि स्वाभाविकसम्बन्ध-

न्यायवार्त्तिकतात्पर्यटीका

केषांचिच्छब्दानां सिध्यति। संकेताधीने तु वाचकत्वे सर्वेषामकृतसमयत्वात् किं केन निर्दिश्येत। तस्मात्संकेतकरणमेव स्वाभाविकसंबन्धं प्रतिपादयति शब्दानामित्यत आह—प्रयुज्यमानग्रहणाच्चेति। परमेश्वरेण हि यः सृष्ट्यादौ गवादिशब्दानामर्थे संकेतः कृतः, सोऽधुना वृद्धव्यवहारे प्रयुज्यमानानां शब्दानामविदितसंगतिभिरपि बालैः शक्यो ग्रहीतुम्। तथा हि वृद्धवचनानन्तरं तच्छ्राविणो वृद्धान्तरस्य प्रवृत्तिनिवृत्तिभयशोकहर्षादिप्रतिपत्तेस्तद्धेतुं प्रत्ययमनुमिमीते बालः। तस्य च सत्स्वप्यन्येष्वर्थेषु भूतस्य अभूतस्य वा श्रवणसमनन्तरं च भवतो वाक्यश्रवणहेतुतामवगच्छति तदवयवानां च पदानामावापोद्वापभेदेन तदर्थप्रत्ययोपजनापाय-दर्शनात्तेषु तेष्वर्थेषु तेषां तेषां पदानां वाचकत्वं कल्पयति। एवं पदावयवेषु प्रकृतादिष्वपि द्रष्टव्यम्। सोऽयं वृद्धव्यवहारः साम्प्रतिकानां संकेतग्रहोपायः, सर्गादिभुवां तु महर्षिदेवतादीनां परमेश्वरानु-ग्रहाद्धर्मज्ञानवैराग्यैश्वर्यातिशयसंपन्नानां परमेश्वरेण सुकर एव संकेतः कर्तुम्। तद्व्यवहाराच्चा-स्मदादीनामपि सुग्रहः संकेतः(ख)। संकेतग्रहो न संबन्धस्मृतिमपेक्षते आप्तपरम्परात एव ततो निःशङ्कव्यवहारोपपत्तेः, अत एवाऽऽह भाष्यकारः—लौकिकानामिति। स्यादेतत्। यदि शब्दानां सांकेतिकसंबन्धो न स्वाभाविकः कृतं तर्हि साध्वसाधुविभागपरेण व्याकरणेन, स्वाभाविकं हि यस्य वाचकत्वं स साधुरसाधुश्चेतरः, सामयिकत्वे तु सर्व एव साधवोऽसाधवो वेत्यत आह—समयपरिपालनार्थं चेदमिति, पारमेश्वरसमयपरिपालनार्थमित्यर्थः। तथा च येषां पदानां येनार्थेन परमेश्वरेण कृतः समयः तानि तत्र साधूनि असाधूनीतरत्रेति विभागाय व्याकरण-

वृत्तिः

उत्तरयति—(न सामयिकत्वादिति)

मन्मतेऽपि शब्दार्थयोरव्यवस्था न, 'शब्दाधीनस्यार्थसम्प्रत्ययस्य सामयिकत्वात् शक्ति-

---

(१) 'समयपालनार्थं' ख-ग-ज-झा०। (२) 'च' कारः ख-पुस्तके नास्ति। (३) 'यदवोचाम' इति ख। (४) 'समयं तदवोचाम' इति ख-पुस्तके न दृश्यते।

(क) 'कश्चित् च' इत्यत्र 'अस्ति च' इति पाठ एव प्रकृतः, भाष्ये तथा दर्शनात्। भाष्यवाक्यमत्र आनुपूर्वीव्यतिक्रमेणोद्धृतमिति सम्भाव्यते। ४३९, ५४३ पत्रयोर्भाष्यं द्रष्टव्यम्। (ख) अतः परमादर्शपुस्तकयोः (तद्व्यवहारपरम्परागतश्चास्मदादीनामपि) इति चिह्नितः पाठो वर्त्तते; तत्र तद्व्यवहारपरम्परातश्च इति यथार्थः पाठः स च महर्षिदेवतादीनां व्यवहारादस्मदादेः संकेतग्रहानुपपत्त्या तद्व्यवहारादित्यस्य व्याख्यानपरा टिप्पणी, अस्मदादीनामपीति च द्विरुक्तम्, प्रमादादयमंशष्टीकायामन्तर्भावित इति परित्यक्तः।

न्यायभाष्यम्

लक्षणाया वाचोऽन्वाख्यानं व्याकरणम् वाक्यलक्षणाया (१,क)वाचोऽर्थलक्षणम्, पदसमूहो वाक्यमर्थपरिसमाप्ताविति। तदेवं प्राप्तिलक्षणस्य शब्दार्थसम्बन्धस्या(२)र्थ-तुषोऽपि अनुमानहेतुर्न भवतीति ॥ ५५ ॥

न्यायवार्त्तिकम्

वादिनोऽनुपयुक्तशब्दार्थसम्बन्धस्य शब्दग्रहणाद्विशेषप्रत्ययो भवति। स पुनः समयः कुतः प्रत्येतव्यः? पदज्ञानाल्लोकतश्चेति। तदिदं समयशास्त्रं शब्दस्याविलोपार्थं प्रणीतम्। लोकतश्च समयो बोद्धव्यः मात्रादींस्तेषु तेष्वर्थेषु तांस्तान् शब्दान् प्रयुञ्जानानुपलभ्य सोऽपि तथैव शिक्षितस्तांस्तानेव शब्दांस्तेषु तेष्वर्थेषु प्रयुङ्क्ते न पुनरेनं लिपिमिव कश्चित् शिक्षयतीति ॥५५॥

न्यायवार्त्तिकतात्पर्यटीका

मर्थवदिति सिद्धम्। अर्थरूपस्तुषो लेशोऽर्थतुषः स नास्ति, केवलं परैः प्राप्तिलक्षणः सम्बन्धः कल्पित इत्यर्थः। तथा च स्वाभाविकसम्बन्धाभावादनुमानाभेदायाविनाभावसिद्ध्यर्थं स्वाभाविक-सम्बन्धाभिधानमयुक्तमिति सिद्धम्।

वार्त्तिकम्—स पुनः समयः कुतः इति। यदि केचनापि शब्दाः (ख)न प्रसिद्धसंबन्धास्ततो ऽशक्यप्रतीतिः समय इति भावः। उत्तरम्—पदज्ञानात्। पदं ज्ञायते व्युत्पाद्यते अनेनेति व्युत्पत्त्या व्याकरणादित्यर्थः। ननु सर्वेषां शब्दानामविदितसङ्गतिः कथं व्याकरणादपि शब्दमात्रात् समयं प्रतिपद्यते इत्यत आह—लोकतश्चेति। वृद्धव्यवहारावधृतसमयो व्याकरणात्साध्वसाधु-विभागं च प्रतिपद्यत इत्यर्थः। तदेतद्विभजते—तदिदं शास्त्रमिति।

वृत्तिः

ग्रहाधीनत्वात्, शक्तिरूपसम्बन्धेन च न व्याप्तिस्तस्या वृत्तिनियामकसम्बन्धाधीनत्वादिति भावः ॥ ५५ ॥

---

(१) 'वाचोऽर्थो लक्षणम्' इति ल०-ग-ज-झा०। (२) '-र्थजुषः' ज-ग।

(क) 'समयज्ञानार्थं चेदं पदलक्षणाया वाचोऽन्वाख्यानं व्याकरणं वाक्यलक्षणाया वाचोऽर्थ-लक्षणम्' इति लघु वैयाकरणसिद्धान्तमञ्जूषा। (ख) 'न'कारोऽयं क-तात्पर्ये न दृश्यते। ख-तात्पर्ये तु 'यदि न केचनापि शब्दा न प्रसिद्धसम्बन्धा इति पाठः। मुद्रित आकारस्तु शोधितः।

(सू०)—जातिविशेषे चानियमात् ॥ ५६ ॥

न्यायभाष्यम्

सामयिकः शब्दादर्थसम्प्रत्ययो न स्वाभाविकः। ऋष्यार्यम्लेच्छानां यथाकामं शब्दविनियोगोऽर्थप्रत्यायनाय प्रवर्त्तते। स्वाभाविके हि शब्दस्यार्थप्रत्यायकत्वे यथाकामं न स्याद् यथा तैजसस्य प्रकाशस्य रूपप्रत्ययहेतुत्वं न जातिविशेषे व्यभिचरतीति ॥ ५६ ॥

न्यायवार्त्तिकम्

जातिविशेषे चानियमात्। न स्वाभाविकः शब्दार्थयोः सम्बन्धः। यदि स्वाभाविकः शब्दार्थसम्बन्धोऽभविष्यन्न जातिविशेषे शब्दार्थव्यवस्थाऽभविष्यत्। अस्ति तु (क)यथाकामं प्रयोगः—जातिविशेषे यथाकामं प्रयोगो दृष्टः नतु स्वाभाविकेन सम्बन्धेन सम्बद्धानां जातिविशेषे व्यभिचारो दृष्टः। न हि प्रदीपोऽस्माकमन्यथा प्रकाशयत्यन्यथा जातिविशेष इति। जातिविशेषशब्देन पुनर्देशोऽभिधीयत इति ॥ ५६ ॥

(इति शब्दस्यानुमानाद्भेदः।)

न्यायवार्त्तिकतात्पर्यटीका

एवं तावद्दृष्टेनैव समयेनोभयसिद्धेन शब्दार्थव्यवस्थापनस्योपपत्तेर्नात्यन्तापरिदृश्यमानस्वाभाविकसम्बन्धकल्पना युक्तेत्युक्तम् ॥ ५५ ॥

सम्प्रत्यनुपपन्नोऽप्ययं स्वाभाविकः सम्बन्ध इत्याह—

जाति—मात् (सू० ५६) ॥ स्वाभाविको हि सम्बन्धः कस्यचिच्छब्दस्य केनचिदर्थेनास्ति न सर्वस्य सर्वेण, तथा सति शब्दार्थव्यवस्था न स्यात्। एवं च तर्हि न ऋष्यार्यम्लेच्छानां नियमः स्यात्। तथा हि यवशब्द आर्यैर्दीर्घशूके पदार्थे प्रयुज्यते ते हि यवशब्दाद्दीर्घशूकं पदार्थं प्रतिपद्यन्ते। म्लेच्छास्तु प्रियङ्गौ प्रयुञ्जते ते हि ततः प्रियङ्गुं प्रतिपद्यन्ते, एवं त्रिवृतशब्दमृषयः (ख)स्तोत्रीयानवके प्रयुञ्जते, आर्यास्तु लताविशेषे; सोऽयमनियमो न स्यात्स्वाभाविके संबन्धे। न हि स्वाभाविकसंबद्ध आलोको रूपेण सहस्रेणापि शिल्पिभी रसादिसंबद्धः शक्यः कर्त्तुं यतस्ततो रसादयो गम्येरन्। नापि तत्र संकेतेन स्वाभाविकः संबन्धो व्यज्यते, सदेव हि व्यज्यते नासत्। नो खलु यत्र घटा नास्ति तत्र तं प्रदीपः शक्तो व्यङ्क्तुम्। सोऽयमनियमः सामयिकत्वे उपपद्यते पुरुषेच्छाधीनत्वात् तस्याश्चानियमात्। (१)न तु स्वाभाविकेन इति। न च वाच्यं सर्व एव शब्दाः सर्वैरेवार्थैः स्वभावतः संबद्धाः संकेतेन तु नियम्यन्त इति प्रमाणाभावात् जातिभेदेन चार्थभेदप्रत्ययस्य संकेतभेदादप्युपपत्तिरिति।

नन्वार्यदेशवर्त्तिनां म्लेच्छानामार्यव्यवहारनिश्चितसंकेतानां नानियम इत्यत आह वार्त्तिककारः—जातिविशेषशब्देनेति ॥ ५६ ॥

---

(१) 'न तु स्वाभाविकत्व' इति क।

(क) यथाकाममित्यत्र 'जातिविशेषे' इति—पाठान्तरं क्वचिद् दृष्टम्। (ख) स्तोत्रीया ऋगविशेषाः 'उपास्मै गायताम्' इत्यादयः, तन्नवकमित्यर्थः।

न्यायभाष्यम्

पुत्रकामेष्टिहवनाभ्यासेषु—

(सू०)—तदप्रामाण्यमनृतव्याघातपुनरुक्तदोषेभ्यः ॥ ५७ ॥

तस्येति शब्दविशेषमेवाधिकुरुते भगवान् ऋषिः। शब्दस्य प्रमाणत्वं न सम्भवति। कस्मात्? अनृतदोषात्—पुत्रकामेष्टौ "पुत्रकामः पुत्रेष्ट्या यजेत" इति; नेष्टौ संस्थितायां पुत्रजन्म दृश्यते। दृष्टार्थस्य वाक्यस्यानृतत्वाद् अदृष्टार्थमपि वाक्यम् "अग्निहोत्रं जुहुयात् स्वर्गकाम" इत्याद्यनृतमिति(१) ज्ञायते।

न्यायवार्त्तिकम्

तदप्रामाण्यमनृतव्याघातपुनरुक्तदोषेभ्यः इति सूत्रम्। तदित्यधिकृतशब्दाभिधाना-च्छब्दविशेषाधिकारः—यस्मात् प्राप्तमपि प्रकरणेन शब्दं तच्छब्देन पुनरभिधत्ते तत्र ज्ञापयति शब्दविशेषं प्रतीयं चिन्ता न तु शब्दमात्रं प्रति। (क)अन्यथैवं वक्तव्यम्—अप्रमाणं शब्दोऽनृत-व्याघातपुनरुक्तदोषेभ्य इति। अप्रामाण्यमर्थस्याप्रत्यायकत्वम्, अनृतत्वमयथार्थाभिधानम्, व्याघातः पदयोर्वाक्ययोर्वा सहासम्भवः, पुनरुक्तं पूर्वाभिहितार्थाभिधानम्। उदाहरणानि भाष्ये।

न्यायवार्त्तिकतात्पर्यटीका

अनुमानान्तर्भावे कदाचिदर्थाविनाभावाद्भवेच्छब्दस्य प्रामाण्यम्, तद्बहिर्भावे तु सुलभमस्या-प्रामाण्यमिति मत्वा अनुमानभेदाभिधानानन्तरमप्रामाण्यमाह पूर्वपक्षी—

तद—भ्यः (सू० ५७)॥ तस्येत्यादिभाष्यम्, तद्वार्त्तिककारो व्याचष्टे—तदित्यधि-कृतशब्दाभिधानादिति। शास्त्रे ह्यस्मिन्निःश्रेयसाधिगमपरे तन्नान्तरीयकतया वेदप्रामाण्य-व्युत्पादनमधिकृतमित्यधिकृतः शब्दो वेद इत्यर्थः। स्यादेतत्—अनृतत्वमप्रामाण्यमिति पर्यायः, तथा च प्रतिज्ञार्थ एव हेतुरित्यत आह—अप्रामाण्यमर्थस्याप्रत्यायकत्वम्। अर्थस्येत्य-विपरीतस्येत्यर्थः। पुत्रकामेष्टिकारीर्यादयो हि ऐहिकफला नाऽऽमुष्मिकफलाः, ऐहिकत्वेनैव तत्फलस्य चेतनेन काम्यमानत्वात् एतच्छरीरोपभोगयोग्यत्वाच्च। विरुद्धार्थोपस्थापकत्वेन (ख) सहासंभवो वाक्ययोर्वा पदयोर्वेति। अत्र भाष्यकारेणोदितहोमादिविधिवाक्यानां निन्दाभिर्व्याघात

वृत्तिः

(जातिविशेषे इति)

शब्दस्यार्थेन सह न स्वाभाविकः सम्बन्धः, जातिविशेषेऽनियमात् शब्दस्यानियतार्थकत्वदर्शनात्। आर्या हि यवशब्दाद्दीर्घशूकविशेषं प्रतियन्ति, म्लेच्छास्तु कङ्गुमिति। नियमे तु सर्वः सर्वं प्रतीयात्। आपाततश्चेदम्, नानाशक्तावपि यत्र यस्य शक्तिग्रह-स्तस्य तदर्थोपस्थितेः ॥ ५६ ॥

---

(१) 'विज्ञायते' इति टि०।

(क) 'प्रति' इत्येतत् क-ख-पुस्तकयोरदृष्टमपि पुस्तकान्तर उपलभ्यते। (ख) अत्र वार्त्तिकं व्युत्क्रम्य गृहीतम्, 'वा' कारस्त्वेकोऽधिक इति बोध्यम्।

न्यायभाष्यम्

विहितव्याघातदोषाच्च, हवने "उदिते होतव्यम् अनुदिते होतव्यम् समयाध्युषिते होतव्यम्" इति विधाय विहितं व्याहन्ति—"श्यावोऽस्याऽऽहुतिमभ्यवहरति य (क)उदिते जुहोति, शबलोऽस्याऽऽहुतिमभ्यवहरति यो(ख)ऽनुदिते जुहोति, (ग) श्यावशबलौ (१)वाऽस्याऽऽहुतिमभ्यवहरतो यः (घ)समयाध्युषिते जुहोति"। व्याघाताच्चान्यतरन्मिथ्येति।

न्यायवार्त्तिकम्

तत्रानृतत्वे हेतुः फलादर्शनम्। अग्निहोत्रं जुहुयादिति विधिवाक्यम्, अस्य व्याघातः कालासम्भवेन उदितानुदितसमयाध्युषितप्रतिषेधः, न चान्यः कालो विद्यते यत्राग्निहोत्रहवनं स्यात्। उदितानुदितसमयाध्युषितवाक्यानां वा परस्परविरोधः। प्रथमोत्तमयोश्चिरभिधाने पुनरुक्तम्।

न्यायवार्त्तिकतात्पर्यटीका

इत्युक्तम्। अधिकविवक्षया वार्तिककार आह—अग्निहोत्रमिति, होमकालानामुदितादीनां निन्दया प्रतिषेधात्। ननु मध्याह्नापराह्णसायाह्ना भविष्यन्ति होमस्य काला इत्यत आह—न चान्य इति, तेषामपि सर्वेषामुदितकालत्वादित्यर्थः। यस्तु—उदयानन्तर एव काल उदितकाल इत्युच्यते, तथा चान्योऽस्ति काल इति उक्ते व्याघाते न तुष्यति तं प्रत्यन्यथा व्याघातमाह—उदितानुदितेति। अग्निहोत्रं जुहोतीत्युत्पत्तिवाक्येन विहिते अग्निहोत्रनाम्नि होमे तदनुवादेनैकं

वृत्तिः

शब्दस्य दृष्टादृष्टार्थकत्वेन द्वैविध्यमुक्तम्, तत्र चादृष्टार्थकशब्दस्य वेदस्य प्रामाण्यं परीक्षितुं पूर्वपक्षयति—(तदप्रामाण्यमिति)

तस्य दृष्टार्थकव्यतिरिक्तशब्दस्य वेदस्य अप्रामाण्यम्। कुतः? अनृतत्वादिदोषात्।

---

(१) 'वा'शब्दः ल-पुस्तके नास्ति।

(क) रेखामात्रोदिते सूर्ये रश्मिभिः परिदृश्यते।
उदितं तं विजानीयात् तत्र होमं प्रकल्पयेत्॥

(ख) 'उदयात् पूर्वमरुणकिरणवान् प्रविरलतारकोऽनुदितकालः' इति कुल्लूकभट्टः।

अन्यच्च— रात्रेः षोडशमे भागे ग्रहनक्षत्रभूषिते।
अनुदितं विजानीयात् तत्र होमं प्रकल्पयेत्॥ इति।

(ग) द्वौ श्वानौ श्यामशबलौ वैवस्वतकुलोद्भवौ।
ताभ्यां बलिं प्रयच्छामि स्यातामेतावहिंसकौ॥ इति वायुपुराणे १३८।३१।

(घ) 'समयाध्युषितशब्देन समुदायेनैव भीषणः काल उच्यते' इति मेधातिथिः। 'सूर्यनक्षत्रवर्जितकालः समयाध्युषितशब्देनोच्यते' इति कुल्लूकभट्टः।

प्रभातसमये जाते नष्टे नक्षत्रमण्डले।
रविर्यावन्न दृश्येत समयाध्युषितं विदुः॥

न्यायभाष्यम्

पुनरुक्तदोषाच्च, अभ्यासे देश्यमाने "त्रिः प्रथमामन्वाह त्रिरुत्तमाम्" इति पुनरुक्तदोषो भवति। पुनरुक्तं च प्रमत्तवाक्यमिति। तस्माद् अप्रमाणं शब्दोऽनृतव्याघातपुनरुक्तदोषेभ्य इति ॥ ५७ ॥

न्यायवार्त्तिकम्

उदाहरणं भाष्ये। दृष्टान्तत्वेनैतानि वाक्यान्युपन्यस्य एककर्तृकत्वेन(क) शेषवाक्यानामप्रमाणत्वमिति। अग्निहोत्रादिवाक्यानां वा प्रमाणत्वप्रतिषेधो वैदिकत्वेन तदन्यवाक्यवत्। पुनरुक्ततायां पूर्वमुत्तरं वा न वाच्यमेकेन प्रतीयमानत्वात् ॥ ५७ ॥

न्यायवार्त्तिकतात्पर्यटीका

वाक्यमुदितं कालं विधत्ते (१) अन्यच्चानुदितकालमपरं च समयाध्युषितकालम्। न चैक एव होमस्तदा तदा शक्यः कर्तुम्। न च कालगुणानुरोधेन प्रधानहोमस्याऽऽवृत्तिरिति युक्तम्। न चोदितादिवाक्ये होमस्याभ्यासः श्रूयते। तस्मात् परस्परव्याघातादप्रामाण्यमेव साधीय इति। नन्वेतेऽनृतत्वादयः सर्ववेदवाक्याव्यापिन इति भागासिद्धतया हेत्वाभासता इत्यत आह—दृष्टान्तत्वेनेति। अयमत्र प्रयोगः। पुत्रकामेष्टिहवनाभ्यासवाक्यानि अप्रमाणम् अनृतत्वादिभ्यः क्षणिकवाक्यवदिति। एवं शेषाणि वेदवाक्यानि अप्रमाणं वेदवाक्यत्वात् पुत्रकामेष्टिवाक्यवदिति। पर्युदासं साध्यमुक्त्वा तेनैव हेतुना प्रसज्यप्रतिषेधसाध्यमाह—अग्निहोत्रादिवाक्यानां वेति। तदन्यवाक्यं पुत्रकामेष्ट्यादि ॥ ५७ ॥

वृत्तिः

तत्र च पुत्रेष्टिकारीर्यादौ क्वचित्फलानुत्पत्तिदर्शनादनृतत्वम्। व्याघातः पूर्वापरविरोधः, यथा "उदिते जुहोति, अनुदिते जुहोति, समयाध्युषिते जुहोति। श्यावोऽस्याऽऽहुतिमभ्यवहरति य उदिते जुहोति, शबलोऽस्याऽऽहुतिमभ्यवहरति योऽनुदिते जुहोति, श्यावशबलावस्याऽऽहुतिमभ्यवहरतो यः समयाध्युषिते जुहोति"। अत्र च उदितादिवाक्यानां निन्दानुमितानिष्टसाधनताबोधकवाक्यविरोधः। पौनरुक्त्यादप्रामाण्यम्, यथा "त्रिःप्रथमामन्वाह त्रिरुत्तमामन्वाह" इत्यत्र (ख)उत्तमत्वस्य प्रथमत्वपर्यवसानात् त्रिःकथनेन पौनरुक्त्यम्। एतेषामप्रामाण्ये तद्दृष्टान्तेन तदेककर्तृत्वेन तदेकजातीयत्वेन वा सर्ववेदाप्रामाण्यं साधनीयमिति भावः ॥ ५७ ॥

---

(१) 'अन्यथा' क।

(क) शेषवाक्यानाम् अप्रमाणत्वम् अनुमेयमिति अध्याहारेणान्वयः। तथाच उपन्यस्येति यपो नानुपपत्तिः। (ख) उत्तमत्वस्येति। अनेकस्या ऋचस्त्रिः कथनं सप्रयोजनमिति तदर्थं त्रिः प्रथमामिति वा त्रिरुत्तमामिति वा वक्तव्यम्, उभयोपादानाच्च पौनरुक्त्यमिति पूर्वपक्षो वृत्तिकृत्सम्मतः, भाष्ये तु प्रथमोत्तमयोर्भेदः पूर्वपक्षिसम्मतः त्रिः कथनादेव पौनरुक्त्यमिति विशेषः।

(सू०)—न कर्मकर्तृसाधनवैगुण्यात् ॥ ५८ ॥

न्यायभाष्यम्

नानृतदोषः पुत्रकामेष्टौ। कस्मात्? कर्म-कर्तृ-साधनवैगुण्यात्। इष्ट्या पितरौ संयुज्यमानौ पुत्रं जनयत इति। (१) इष्टेः करणं साधनम्, पितरौ कर्त्तारौ, संयोगः कर्म, त्रयाणां गुणयोगात् पुत्रजन्म, (२) वैगुण्याद्विपर्ययः। इष्ट्याश्रयं तावत्कर्मवैगुण्यं समीहाभ्रेषः, कर्तृवैगुण्यम् अविद्वान् प्रयोक्ता कपूयाचरणश्च।

न्यायवार्त्तिकम्

न कर्मकर्तृसाधनवैगुण्यात्। यत्तावदनृतत्वादप्रमाणानि वेदवाक्यानि फलादर्शनादिति? तदत्र सम्प्रधार्यम्। किं फलादर्शनं वेदवाक्यानामप्रमाणत्वादाहो कर्मकर्तृसाधनवैगुण्यादिति। वयं तु (३) ब्रूमः कर्मकर्तृसाधनवैगुण्यादिति, फलादर्शनात् तु कारणानामसामर्थ्यं गम्यते। इष्टेः (ख)करणसाधनत्वेनाविरोधः—न चेयमिष्टिर्मया साक्षात् पुत्रकारणत्वेनाभ्युपगम्यते,

न्यायवार्त्तिकतात्पर्यटीका

एवं पूर्वपक्षमुक्त्वा सिद्धान्तमुपक्रममाणः प्रथमं तावदनृतत्वं दूषयति—

न क–ण्यात् (सू० ५८)॥ फलादर्शनमन्यथाऽप्युपपद्यमानं नानृतत्वं साधयति, ततश्चासिद्धमनृतत्वं हेतुरित्यर्थः। स्यादेतत् इष्टेश्चोदितत्वादनपेक्षेयं (क)साधयति पुत्रकारणमिति किमस्याः कर्मकर्तृवैगुण्यं करिष्यतीत्यत आह—इष्टेः करणसाधनत्वेनेति। दृष्टसहकार्यदृष्टं कारणम्, न केवलम्; ततो दृष्टवैगुण्यादुपपन्नमभवनं फलस्येत्यर्थः। अपेक्षणीयं कर्त्तारमाह—पितराविति। करणमाह—इष्ट्येति। क्रियामाह—संयुज्यमानाविति। इष्ट्याश्रयं तावदिति भाष्यम्। "समीहा" तदङ्गसमिदादिकर्मानुष्ठानं तस्या "भ्रेषो" भ्रंशोऽननुष्ठानमिति यावत्। अविद्वान्प्रयोक्तेति, विदुषो ह्यधिकारः सामर्थ्यात्। अत एव स्त्रीशूद्रतिरश्चामसमर्थानामनधिकारः। विद्वानपि यदि द्विजातिकर्महानिहेतुं कर्म ब्रह्महत्यादि कृतवान् तत्कृतमपि कर्म फलाय न

वृत्तिः

सिद्धान्तसूत्रम्—(न कर्मेति)

न वेदाप्रामाण्यम्, कर्मकर्तृसाधनवैगुण्यात् फलाभावोपपत्तेः। कर्मणः क्रियाया वैगुण्यम्

---

(१) 'इष्टिः' ल-ग-भा०। (२) अयमंशः टि-पुस्तके नास्ति। (३) 'ब्रूमः न कर्म-' ख।

(क) अत्र 'साधयति पुत्रकारण'मिति पदयोरेकं टीकाकृदुक्तमपरञ्च तद्व्याख्यानं प्रमादाद् ग्रन्थेऽन्तर्भूतमिति सम्भाव्यते। अत एव ख-पुस्तके (साधयति) इति सचिह्नं मुद्रितम्। (ख) 'कारणसाधनत्वाच्चाविरोधः' इति क, 'करणसाधनत्वाद्वा विरोधः' इति ख०। स्वपदवर्णनानुसारेण 'कारणसाधनत्वेन' इत्येव पाठः सम्भाव्यते। मुद्रिताकारस्तु तात्पर्यानुयायी।

न्यायभाष्यम्

साधन(२*)वैगुण्यं हविरसंस्कृतमुपहतमिति, मन्त्रा न्यूनाधिकाः स्वरवर्णहीना इति, दक्षिणा दुरागता हीना निन्दिता चेति। अथोपजनाश्रयं कर्मवैगुण्यं मिथ्यासम्प्रयोगः, कर्तृवैगुण्यं योनिव्यापदो बीजोपघातश्चेति। साधनवैगुण्यम् इष्टावभिहितम्। लोके च "अग्निकामो दारुणी मथ्नीयात्" इति विधिवाक्यम्, तत्र कर्मवैगुण्यं मिथ्याभिमन्थनम्, कर्तृवैगुण्यं प्रज्ञाप्रयत्नतः प्रमादः, साधनवैगुण्यम् आर्द्रं सुषिरं दार्विति, तत्र फलं न निष्पद्यत इति नानृतदोषः, गुणयोगेन फलनिष्पत्तिदर्शनात्। न चेदं लौकिकाद्भिद्यते 'पुत्रकामः पुत्रेष्ट्या यजेत" इति ॥ ५८ ॥

न्यायवार्त्तिकम्

अपि तु पितराविष्ट्या संप्रयुज्यमानौ पुत्रं जनयत इति। तत्र न ज्ञायते किं पित्रोरसाद्गुण्यात् पुत्रजन्म न भवति, आहोस्विदिष्टेरसाद्गुण्यादिति। मन्त्राश्चेष्टिसाधत्वेन प्रयुज्यमाना इष्ट्यङ्गं भवन्ति। तत्रापि न ज्ञायते किमिष्टिर्मन्त्राणां वैगुण्यान्न सम्पन्ना आहो दर्भेन्धनादेः कारणस्य वैगुण्यादिति—यथैव (१) मन्त्राणां न्यूनाधिकभावेन प्रयुज्यमानानामिष्टिर्न निर्वर्त्तते तथा दर्भेध्मादेरपि साधनस्य वैगुण्यादिति।

न केवलं साधनवैगुण्यादेवेष्टेरनभिनिर्वृत्तिः, तथेष्टेः साधयितुः कर्मणश्चासाद्गुण्यादिति। उपेत्येष्टिसम्पदं न केवलैवेष्टिः कारणमित्युक्तम्। तत्र पुत्रजन्मादर्शनेन न युक्तं मनुष्यधर्मणो वक्तुम्—मन्त्राणामसामर्थ्यात् पुत्रानुत्पत्तिरिति। उभयथा दृष्टत्वात् सन्देह इति

न्यायवार्त्तिकतात्पर्यटीका

कल्पते कर्तृत्वे वैगुण्यादिति दर्शयति—कपूयेति। कपूयं निन्दितं कर्म, (ख)आचरतीत्याचरणः पुरुषः। हविः असंस्कृतम् अपूतमप्रोक्षितं वा। उपहतं श्वमार्जारादिभिः। मन्त्रा न्यूनाः क्रमविशेषेण। दक्षिणा दुरागता दौत्यद्यूतोत्कोचादेर्दुष्टादुपायादागतेत्यर्थः। (ग)अन्वाहार्यमिह दक्षिणा। सा ततो न्यूना वा दीयते यावत्या पुरुषो न तृप्यति। स च पुरुषाहारो (घ)जरत्वरत्वेनापाक्यतया निन्दितः। मिथ्यासंप्रयोगः पुरुषायितादि, मातरि योनिव्यापदो नानाविधाः (ङ)पुत्रजनप्रतिबन्धहेतवः। लोहितरेतसो बीजस्योपघात उपहतत्वम्, यतः पुत्रजन्म न भवति। मिथ्याभिमन्थनं यतो नाग्निर्जायते।

कर्मवैगुण्यकर्तृवैगुण्ये आह वार्त्तिककारः—तथेष्टेः साधयितुरिति। मन्त्राणामसामर्थ्या-

---

(१) 'न्यूनाधिकभावे' इति ख०।

(क) प्रयुज्यमानानां मन्त्राणां न्यूनाधिकभावेनेत्यन्वयः। न्यूनाधिकभावेन प्रयुज्यमानानामित्यन्वये तु वैषम्यादिति सम्बन्धनीयम्। (ख) अत्र 'आचरतीति कपूयाचरण' इति पाठः शोभनः।

(ग) यच्च श्राद्धं कर्मणामादौ या चान्ते दक्षिणा भवेत्।
अमावास्यां द्वितीयं यदन्वाहार्यं विदुर्बुधाः॥ इति कर्मप्रदीपः।

(घ) अत्र जरत्तरत्वेनेति पाठः सम्भाव्यते। (ङ) जनशब्दोऽत्र जन्मार्थः 'पुत्रजननप्रतिबन्धहेतव' इति वा पाठः।

न्यायवार्त्तिकम्

चेत्; न, अभ्युपेतहानेः—अथ मन्यसे त्रिकारणं पुत्रजन्म, तत्रान्यतरकारणवैकल्यात् पुत्रो न भवतीति कारणवैकल्यं गम्यते; तत्र यथैव पित्रोर्वैगुण्यात् पुत्रानुत्पत्तिस्तथा मन्त्राणामप्रमाणत्वादिति सन्दिह्यते। नाभ्युपेतहानेः—पूर्वं भवताऽभ्यधायि वेदोऽप्रमाणमिति, अधुना त्वभिधीयते सन्दिग्धं प्रमाणत्वमिति, एवं ब्रुवता पूर्वो वादस्त्यक्तो भवति। समानमिति चेत्—अथ मन्यसे समानमेतद्भवतोऽपि किं पित्रोर्वैगुण्यात् पुत्राजन्म वेदवाक्यानामप्रामाण्याद्वेति सन्दिह्यते। नासाधनात्—न मयैतत् साध्यते वेदवाक्यानि प्रमाणमप्रमाणं वेति, भवता तु साध्यते। तत्र मया भवतः साधनान्यतरवैकल्यात् (१) पुत्रजन्म न भवतीति सन्दिग्धो हेतुरुपदिश्यते। तत्सहकारित्वाच्चोपदेशो दारुमथनवदिति नेयमिष्टिः साक्षात्कारणत्वेन पुत्रजन्मन उपदिश्यते, अपि तु 'पुत्रकाम इष्टिं कुर्वीत' इति, यथा अग्निकामो दारुणी मथ्नीयादित्युपदेशः तत्र कर्तृकर्मणोर्वैगुण्यादग्निर्न भवतीति नोपदेशवैयर्थ्यं तथेहापीत्यदोषः। सामस्त्ये फलनिष्पत्तिदर्शनाच्च—यत्र समस्तानि कारणानि तत्र फलाभिनिर्वृत्तिर्दृष्टेत्यदोषः। यच्चेदं वाक्यं "तदप्रामाण्यमनृतव्याघातपुनरुक्तदोषेभ्य" इति, तदपि वेदवाक्यस्य पक्षीकृतत्वादव्यापकम्(क)। अथ यान्येवंधर्मकाणि वाक्यानि तानि पक्षीक्रियन्ते, तेष्वप्येषां धर्माणां विशेषणत्वेनोपयुक्तत्वादप्रामाण्यप्रतिपादको हेतुर्वक्तव्यः। अनृतत्वादप्रामाण्यमिति चेत्? किमिदमनृतत्वं नाम?

न्यायवार्त्तिकतात्पर्यटीका

दिति। मन्त्रादिसाधनानां पुत्रकामेष्ट्यादीनां कर्मणामित्यर्थः। ननु यदि निरपेक्षा नेष्टिः साधनं(ख) तास्तर्ह्यनपेक्षमाणौ पितरावेव सम्यक् संयुज्यमानौ पुत्रस्य जनकौ, कृतमत्र पुत्रकामेष्ट्या; अत एव म्लेच्छादीनामपि पुत्रजन्मोपपद्यत इत्यत आह—तत्सहकारित्वादिति। नान्वयव्यतिरेकगम्यमिष्टेः सहकारित्वम् अपि त्वागमगम्यम्, म्लेच्छादीनां पुत्रजन्म जन्मान्तरीयादृष्टवशादित्यागमप्रामाण्यादनुसरणीयम्। दृश्यमानकर्मकर्तृवैगुण्ये च फलानुत्पादोऽदृष्टमपेक्षणीयं सूचयति। तदनेन पुत्रकामेष्ट्यादीनामनियतफलत्वमपि सूचितं भवति। तथा कर्मान्तरप्रतिबन्धेन कर्मकर्तृसाधनावैगुण्येऽपि फलानुत्पादः समर्थितो भवति। ऐहिकफलेषु तु कारीर्यादिषु साधनवैगुण्यं परिहारः। (२)अनृतत्वादप्रामाण्यमिति चेदिति। धर्मिविशेषणत्वेनोपयुक्तानामपि पक्षान्निष्कृष्याभि-

वृत्तिः

अयथाविधित्वादि। कर्तुर्वैगुण्यम् अविद्वत्त्वादि, साधनस्य हविरादेर्वैगुण्यम् अप्रोक्षितत्वादि। यथोक्तकर्मणः फलाभावे ह्यनृतत्वम्, न चैवमस्तीति भावः॥ ५८॥

---

(१) 'पुत्राजन्म' इति क०। (२) 'अनृतत्वादप्रामाण्यमिति चेत्' क-ख०।

(क) वेदवाक्यमात्रस्य पक्षत्वेन तदेकदेशे अनृतत्वाद्यसिद्धेर्भागासिद्धिरिति भावः। (ख) 'तां तर्हि' इति युक्तम्।

(सू०)—अभ्युपेत्य कालभेदे दोषवचनात् ॥ ५९ ॥

न्यायभाष्यम्

न व्याघातो हवन इत्यनुवर्त्तते। योऽभ्युपगतं हवनकालं भिनत्ति ततोऽन्यत्र जुहोति (१)तत्रायमभ्युपगतकालभेदे दोष उच्यते "श्यावोऽस्याऽऽहुतिमभ्यवहरति य उदिते जुहोति"। तदिदं विधिभ्रेषे निन्दावचनमिति ॥ ५९ ॥

न्यायवार्त्तिकम्

(२)यद्ययथार्थाभिधानम्, (३)नन्वयमेव प्रतिज्ञार्थोऽप्रमाणमिति। (४)अनृतत्वं चासिद्ध-(५)मित्युक्तमेतत् ॥ ५८ ॥

यत् पुनरेतत्—व्याघातदोषादिति—

अभ्युपेत्य कालभेदे दोषवचनात् न व्याघातः। अग्न्याधानकाल एवायं नियमपरिग्रहः—'उदिते होतव्यमनुदिते होतव्यं समयाध्युषिते होतव्यमि'ति। सोऽयमभ्युपेत्य कालं यदाऽतिक्रामति तदाऽभ्युपेतकालातिक्रमान्निन्द्यते निन्दावचनेन। न च व्याघातः उभयप्रतिषेधानभिधानात् नेदमन्यथा—यदि पुनरेतदुभयप्रतिषेधाभिधानं स्यात् भवेदयं प्रसङ्गो व्याघात इति, न पुनरेतानि प्रतिषेधवाक्यानि उदिते होतव्यमित्येवमादीनि, तस्मादप्रसङ्गोऽयमिति। अथ पुनरेतानि वाक्यानि होमविधेः प्रतिषेधकानि स्युः, तदोदितादिग्रहणं व्यर्थम्; एवं हि वक्तव्यम्—अग्निहोत्रं जुहुयादिति यद्वाक्यं तन्न कर्तव्यमिति। एवं च सङ्गतार्थता—यथैतद् व्याख्यानमेवं पूर्वोत्तरे वाक्ये

न्यायवार्त्तिकतात्पर्यटीका

धानं न दोषावहमिति भावः। उत्तरम्—किमिदमिति। नन्वर्थाप्रतिपादकत्वं (६)प्रतिज्ञातम् एतदेवानृतत्वं च हेतुरिति (क)प्रतिज्ञाहेत्वोरर्थाभेद इत्यत आह—अनृतत्वं चेति ॥५८॥

अभ्यु—नात् (सू० ५९) ॥ यत्पुनरुक्तम् (ख) उदिते होतव्यमित्यादीनामेव परस्परव्याघात इति तत्राऽऽह—उभयेति। त्रिषु कालविधिपरेषु वाक्येष्वेकैकेनैव वाक्येनोभयोभयवाक्यार्थप्रतिषेधानभिधानात् नान्यथा नाप्रामाण्यमित्यर्थः। यद्यपि चैको होमः समुच्चयेन तदा न शक्यः कर्तुं तथाऽपि विकल्पेन करिष्यते बहुलं हि विकल्पो लोकेऽप्युपलभ्यते। वस्तु हि व्यवस्थितं न विकल्प्यते अनुष्ठाने चानागतोत्पाद्ये विधि-प्रतिषेध-विकल्पानामविरोधः

(१) 'तस्यायम्' इति टि०। (२) 'यद्ययथाऽतथाभूतार्थाभिधानम्' ख। (३) 'न त्वयमेव' ख।
(४) 'अनृतत्वं वा' इत्यादर्शयोः पाठः। (५) '-मित्ययुक्तमेतत्' ख। (६) 'प्रतिज्ञा तदेवानृतत्वं' क।
(क) अत्र प्रतिज्ञाहेत्वोरर्थभेद इति पाठः समीचीनः। (ख) ५४८ अङ्कितपत्रे वार्त्तिकं द्रष्टव्यम्।

(सू०)—अनुवादोपपत्तेश्च ॥ ६० ॥

न्यायभाष्यम्

पुनरुक्तदोषोऽभ्यासे नेति प्रकृतम्। अनर्थकोऽभ्यासः पुनरुक्तम्, अर्थवानभ्यासोऽनुवादः। योऽयमभ्यासः "त्रिः प्रथमामन्वाह त्रिरुत्तमाम्" (तै० स० २य-काण्डे ५म प्र०) इत्यनुवाद उपपद्यते अर्थवत्त्वात्। त्रिर्वचनेन हि प्रथमोत्तमयोः पञ्च-

न्यायवार्त्तिकम्

सङ्गते भवतः हवनमनूद्य कालविशेषविधानादिति। एवमेतत् न पुनर्यथाऽस्माभिर्व्याघातोऽभिधीयत इति नियमहेतुर्वक्तव्यः। इदमेवोदितादिवाक्यं नियमहेतुः। कथमिति ? इदं (१) पुनर्वाक्यं कामतो वा (२) प्रकल्प्येत अभिहितं वाऽनद्यत इति। अभिहितानुवादो न्याय्यः, तत्र हि प्रमाणानामविसंवादादिति न व्याघात इति ॥ ५९ ॥

यत्पुनरेतत्—पुनरुक्तदोषात्

अनुवादोपपत्तेश्च। न पुनरुक्तदोषः अनुवादोपपत्तेः। पुनरुक्तं नाम तस्यैवार्थस्यानङ्गीकृत-विशेषस्य सतः पुनर्वचनम्,अनुवादस्तु पुनःश्रुतिसामर्थ्यादङ्गीकृतविशेषस्यार्थस्य वादः। एवं

न्यायवार्त्तिकतात्पर्यटीका

स्वरूपानिष्पत्तेरिति। वाक्यार्थो न कर्त्तव्य इति वाक्यं तन्न (३)कर्त्तव्यमित्यस्यार्थः। कामतो वा प्रकल्प्येतेति। परस्परव्याहतार्थं प्रकल्प्येतेत्यर्थः। अभिहितं वेति, यदनेन वाक्येन स्वसामर्थ्येनाभिहितं तद्वा परीक्षकैरवधृत्यानूद्यते इदमनेन वाक्येनाभिहितमिति। निर्द्धारयति—अभिहितेति। विहितानुवादो वेति क्वचित्पाठः, विहितो होमस्तस्यानुवादः कालविशेषविधानायेति। विहितानुवाद एव न्याय्यः कालविशेषविधानाय न तु कालान्तरप्रतिषेधोऽर्थः कल्प्यत इत्यर्थः ॥ ५९ ॥

अनु—श्च (सू० ६०) ॥ एकादश सामिधेन्य उत्पत्तौ पठितास्तासां प्रथमोत्तमयोस्त्रिर्वचनं (क) पञ्चदशावरत्वं मन्त्रस्य प्रयोजनवतः साधयत्सप्रयोजनमिति ॥

वृत्तिः

व्याघातं परिहरति—(अभ्युपेत्येति)

न व्याघात इति शेषः। अग्न्याधानकाले उदितहोमादिकमभ्युपेत्य स्वीकृत्य अनुदितहोमादिकरणे पूर्वोक्तदोषकथनान्न व्याघात इत्यर्थः ॥ ५९ ॥

---

(१) 'पुनर्वाक्यं (तावद्वक्तव्यम्)' इति क-वार्त्तिके मुद्रितम्। (२) आदर्शयोः'प्र'शब्दो नास्ति। (३) 'कर्त्तव्यमित्यर्थः'क।

(क) अत्र क्वचिन्मुद्रितं पञ्चदशारत्वमित्ययुक्तः पाठः। व० सा० प० प्र० न्यायदर्शने २यखण्डे ३२४ म० पत्रं द्रष्टव्यम्।

न्यायभाष्यम्

दशत्वं सामिधेनीनां भवति (क)। तथा च मन्त्राभिवादः "इदमहं भ्रातृव्यं पञ्चदशावरेण (१) वाग्वज्रेणावबाधे योऽस्मान् द्वेष्टि यं च वयं द्विष्म" इति (ख) पञ्चदश (ग) सामिधेनी (२) वज्रमन्त्रोऽभिवदति तदभ्यासमन्तरेण न स्यादिति ॥ ६० ॥

न्यायवार्त्तिकम्

सति यथोक्तो न दोषः। उदाहरणं भाष्ये। पुत्रकामेष्टिवाक्यानि प्रमा वेदैकदेशत्वात् "भूमिरावपनं मह"दिति वाक्यवत्। इतश्च पदादिनियमात् "द्वादश मासाः संवत्सर" इति वाक्यवत्। इतश्च कर्तृविशेषाभिहितत्वात् "अग्निर्हिमस्य भेषज" मिति वाक्यवत् ॥ ६० ॥

न्यायवार्त्तिकतात्पर्यटीका

तदेवं वेदाप्रामाण्यहेतूनुद्धृत्य प्रामाण्यसंभवहेतुः सूत्रकारेण वक्तव्य इति पूर्वं वार्त्तिककारः स्वत एव तावत्प्रामाण्यसंभवहेतूनाह—पुत्रकामेष्टीति ॥ ६० ॥

वृत्तिः

पौनरुक्त्यं परिहरति—(अनुवादोपेति)

चः पुनरर्थे। अनुवादोपपत्तेः पुनर्न पौनरुक्त्यम्। निष्प्रयोजनत्वे हि पौनरुक्त्य दोषः, उक्तस्थले तु अनुवादस्योपपत्तेः प्रयोजनस्य सम्भवाद्। एकादशसामिधेनीनां

---

(१) 'वाग्वज्रेणापबाधे' इति फ०, 'वाग्वज्रेण मबाधे' इति टि, 'वज्रेण बाधे' ल-ग-ज० भा०।

(२) '-वज्र' मन्त्रो' ल-भा-ज०।

(क) अयमर्थः 'अभ्यासेन तु संख्यापूरणं सामिधेनीष्वभ्यासप्रकृतित्वात्' (जै० सू० २७, ५ पा, १० अ०) इत्यत्र शबरस्वामिभिरप्युक्तः। तथाच 'प्रकृतौ अभ्यासेन संख्या पूरिता त्रिःप्रथमामन्वाह त्रिरुत्तमामिति। कथम्? पञ्चदशसामिधेन्य इति श्रुतिः, एकादश च समाम्नाताः, तत्राभ्यासेनाऽऽगमेन वा संख्यायां पूरयितव्यायामभ्यास उक्तः—'त्रिःप्रथमामन्वाह त्रिरुत्तमामिति। अनेन नियमेन—प्रथमोत्तरयोरभ्यासः कर्त्तव्य इति। यावत्कृत्वस्तयोरभ्यासे क्रियमाणे पञ्चदशसंख्या पूर्यते तावत्कृत्वोऽभ्यसितव्यमित्येतदभिप्रायं त्रित्वम्' इति भाष्यम्।

(ख) पञ्चदशेति। 'ताः पञ्चदश सामिधेन्यः सम्पद्यन्ते। पञ्चदशो वै वज्रो वीर्यं वज्रो वीर्यमेवैतत् सामिधेनीरभिसम्पादयति तस्मादेतास्वनूच्यमानासु यं द्विष्यात् तमङ्गुष्ठाभ्यामवबाधेत इदमहममुमवबाध इति तदेनमेतेन वज्रेणावबाधते' इति शतपथब्राह्मणम् [१ का० ३ अ० ५ ब्रा०]।

(ग) सामिधेनीति। 'समिन्धे सामिधेनीभिर्होता तस्मात् सामिधेन्यो नाम' इति शतपथब्राह्मणम् १ का० ३ अ० ५ ब्रा०। 'होता च सामिधेनीभिः 'प्रवोवाजा' इत्यादिभिर्ऋग्भिरग्निं समिन्धे, अतः समिन्धनसाधनत्वात् तासामपि सामिधेन्य इति नाम निष्पन्नम्' इति सायणाचार्याः।

'समिधामाधाने षेण्यण्' इति कात्यायनीयवार्त्तिकसूत्रव्याख्याने तत्त्वबोधिनीकारैरपि 'यया ऋचा समिदाधीयते सा सामिधेनीत्यर्थः। प्रवोवाजा अभिद्यव' इत्याद्याः 'आजुहोता दुवस्यत:' इत्यन्ताः सामिधेन्य इति व्यवह्रियन्ते इति व्युत्पादितम्।

(सू०) वाक्यविभागस्य चार्थग्रहणात् ॥ ६१ ॥

न्यायभाष्यम्

प्रमाणं शब्दो यथा लोके ॥ ६१ ॥

विभागश्च ब्राह्मणवाक्यानां त्रिविधः—

(सू०) विध्यर्थवादानुवादवचनविनियोगात् ॥ ६२ ॥

(भा०) त्रिधा खलु ब्राह्मणवाक्यानि विनियुक्तानि—विधिवचनान्यर्थवादवचनान्यनुवादवचनानीति ॥ ६२ ॥

न्यायवार्त्तिकम्

वाक्यविभागस्य चार्थग्रहणात् । समस्तानि वा वेदवाक्यानि पक्षीकृत्याभिधीयन्ते—प्रमाणं वेदाग्वाक्यानि अर्थविभागवत्त्वात् मन्वादिवाक्यवत्—यथा मन्वादिवाक्यान्यर्थविभागवन्ति, अर्थविभागवत्त्वे सति प्रामाण्यम्, तथा च वेदवाक्यान्यर्थविभागवन्ति तस्मात् प्रमाणमिति ॥ ६१ ॥

विभागश्च त्रिविधो भवति—

विध्यर्थवादानुवादवचनविनियोगात् । त्रिधा खलु ब्राह्मणवाक्यानि भवन्ति—विधिवचनानि, अनुवादवचनानि, अर्थवादवचनानि च ॥ ६२ ॥

न्यायवार्त्तिकतात्पर्यटीका

वाक्य—णात् (सू० ६१) । सौत्रं हेतुमवतारयति—समस्तानीति ॥ ६१ ॥

विध्य—गात् (सू० ६२) (क) ।

वृत्तिः

प्रथमोत्तमयोस्त्रिरभिधाने हि पञ्चदशत्वं सम्भवति । तथा च पञ्चदशत्वं श्रूयते (ख)"इममहं भ्रातृव्यं पञ्चदशावरेण वाग्वज्रेण (ग)च बाधे, योऽस्मान् द्वेष्टि यञ्च वयं द्विष्मः" इति ॥ ६० ॥

अनुवादस्य सार्थकत्वं लोकसिद्धमित्याह—(वाक्येति)

वाक्यविभागस्य अनुवादत्वेन विभक्तवाक्यस्य अर्थग्रहणात् प्रयोजनस्वीकारात्, शिष्टैरिति शेषः । शिष्टा हि विधायकानुवादकभेदेन वाक्यं विभज्यानुवादकस्यापि सप्रयोजनत्वं मन्यन्ते, वेदेऽप्येवमिति भावः ॥ ६१ ॥

वेदे वाक्यविभागं दर्शयति—(विध्यर्थेति)

मन्त्रब्राह्मणभेदाद् द्विविधो वेदः, तत्र ब्राह्मणस्यायं विभागः, विधिवचनत्वेनार्थवादवचनत्वेनानुवादवचनत्वेन च वेदस्य विनियोगाद् विभजनात् ।

(क) द्वाषष्टितमसूत्रस्य तात्पर्यटीका नोपलभ्यते । (ख) भाष्ये तु 'इदमह'मिति पाठभेदः । (ग) भाष्ये 'च'कारो नास्ति ।

न्यायभाष्यम्

तत्र—

(सू०)—विधिर्विधायकः ॥ ६३ ॥

यद्वाक्यं विधायकं चोदकं स विधिः। विधिस्तु नियोगोऽनुज्ञा वा। यथा "अग्निहोत्रं जुहुयात् स्वर्गकामः" इत्यादि ॥ ६३ ॥

न्यायवार्त्तिकम्

तत्र—

विधिर्विधायकः। यद्वाक्यं विधायकं देशकं स विधिः।

न्यायवार्त्तिकतात्पर्यटीका

विधिर्विधायकः (सू० ६३)॥ तस्य व्याख्यानं यद्वाक्यमिति। चोदकं प्रवर्त्तकम्। अत्र चाऽऽरोग्यकामः पथ्यमश्नीयादित्याद्युपदेशश्रवणसमनन्तरं पथ्याशने प्रवर्त्तमानं प्रयोज्यवृद्धमुपलभ्य बालस्तस्य प्रवृत्तिहेतुं प्रत्ययमनुमिमीते—अस्य प्रवृत्तिः प्रवर्त्तकप्रत्ययपूर्विका स्वतन्त्रप्रवृत्तित्वात् मत्प्रवृत्तिवत्; स चायमनुमाता व्युत्पित्सुः स्वात्मसिद्धमेव प्रवर्त्तकज्ञानमनुमिनोति नादृष्टपूर्वम्। न हि स्वात्मनि पूर्वसिद्धे प्रवृत्तिहेतौ दृष्टे संभवत्यदृष्टकल्पना न्याय्या। न चैष शब्दतद्व्यापारपुरुषाशयनिरुपाधिप्रवर्तकमात्रापूर्वप्रत्ययानात्मनि प्रवर्तकानवगतवान्, येन तेषु प्रवर्तकत्वशङ्काऽप्यवतरेत्। स्तन्यपानादिविषयककार्यप्रत्ययोऽस्य प्रवर्तक इति चेत् किं पुनरेतत्कार्यमिति। पुरुषप्रयत्नः कृतिस्तद्व्याप्यत्वमिति चेत् ननु कृतिरिति मानसी प्रवृत्तिः, तदुपहितं कार्यं प्रवृत्तिविषयः प्रवृत्तिफलं वा फलोद्देशेन पुरुषप्रवृत्तेः, तदवगमः प्रवृत्तिहेतुः। प्रवृत्त्यवगतिस्तर्हि प्रवृत्तिहेतुरित्युक्तं भवति। (क) न चाननुविधेयोऽश्रद्धेयः, न वाऽननुविधेयनियोगेष्वस्माकं व्युत्पन्नानां नास्ति प्रवृत्त्यवगमः, न चास्मात्प्रवर्त्तामहि। अपि चेयं प्रवृत्तिः प्रयत्नापरनामा इच्छाद्वेषयोनिरसति कारणे न स्वज्ञानमात्रादुदेतुमर्हति। न चेच्छाद्वेषावेव प्रवृत्तिहेतू (१)लिङादिगोचराविति सांप्रतम्, तत् खलु (२)लिङादिगोचरोऽभ्युपेयः यत् स्वज्ञानेन प्रवर्त्तयति न तु स्वसत्तया, शब्दस्य ज्ञापकत्वादनुत्पादकत्वाच्च। न चेच्छाद्वेषौ स्वज्ञानेन प्रवर्त्तयतो यतः प्रवृत्तिं प्रति ज्ञानाय शब्दमपेक्षेयाताम्, अपि तु सत्तया; तस्मात्तदेव लिङादेर्ज्ञाप्यम्। सत्यम्, ज्ञानमिच्छाद्वेषौ प्रसूते, तत्र फलं निसर्गसुन्दरतया ज्ञातमात्मनीच्छां प्रसूते, एवं तदुपायोऽपि तत्तया ज्ञातः फलसंबन्धादात्मनीच्छाम्; तस्माद् द्वयमदशिष्यते फलं तदुपायो वा। तत्र फलस्य यद्यपि स्वत एवेच्छादिविषयत्वं तथाऽपि तद्विषयेच्छा न तत्र प्रवर्त्तयितुमर्हति तस्यायोग्यत्वेन प्रवृत्ति-

वृत्तिः

अथवा विनियोगाद् भेदाद्। तथा च विध्यादिभेदाद् ब्राह्मणभागस्त्रिधेति शेषः ॥ ६२ ॥

---

(१) 'लिङ्गादि' इति क। (२) 'लिङ्गादि' इति क।

(क) ख-तात्पर्ये (नचा ननु विधेयोऽश्रद्धेय:)। इति सचिह्नं मुद्रितम्, क-पुस्तके तु 'नानुविधेय' इति पाठः।

न्यायवार्त्तिकतात्पर्यटीका

विषयत्वानुपपत्तेः। न च फलगोचरेच्छा (क)अन्यच्च तदुपाये स्वकार्यं प्रयत्नं जनयितुमर्हति (ख) इच्छाप्रयत्नयोरेकविषयतया कार्यकारणयोः संप्रतिपत्तेः। न च तत्सम्बन्धात्तदुपायो नेष्यते येन फलेच्छाया एवोपायविषयप्रयत्नप्रसवहेतुत्वं कल्प्येत। यथाहुः—

अन्यदिच्छत्यन्यत्करोतीति विप्रतिषिद्धमिति।

तस्मादिष्यमाणमपि फलं प्रवृत्तिविषयत्वाभावान्नाऽऽत्मनि स्वज्ञानेन प्रवर्तकं तदुपायस्तु प्रवृत्तिविषयत्वादिष्यमाणत्वाच्च स्वज्ञानेन प्रवर्त्तक इति युक्तमुत्पश्यामः। बालानां तु स्तन्यादावपेक्षितोपायताज्ञानं प्राग्भवीयव्याप्तिग्रहणजनितसंस्कारानुवृत्तिवशादुत्पन्नव्याप्तिस्मरणानां तज्जातीयत्वलिङ्गज्ञानजमनुमानमेव। एतच्च 'पूर्वाभ्यस्तस्मृत्यनुबन्धात्'-(सू० १८, आ१, अ३) इत्यत्रोपपादयिष्यते। अत एव प्रयोजनलक्षणं व्याचक्षाणेनोक्तं वार्त्तिककृता—

(ग) इदं सुखसाधनमिति बुद्ध्वा सुखावाप्तये यतते इदं दुःखसाधनमिति चावगम्य दुःखहानायेति। तस्मादपेक्षितोपायता प्रवर्त्तना स्वात्मनि सिद्धा वृद्धस्यापि प्रवृत्तिहेतुरित्यवगच्छति व्युत्पित्सुर्बालः। सा च लिङादिश्रवणसमनन्तरमुपजायमाना लिङाद्यर्थ इति निश्चिनोति। न चापेक्षितोपायतामात्रं प्रवृत्तिहेतुः भवति हि यजमाननिर्वर्तिता कारीरी कृषीबलानामपेक्षितोपायो न चैतेऽस्यां प्रवर्त्तन्ते तस्याः सिद्धत्वात्। तस्मात् कर्त्तुरपेक्षितोपायता प्रवृत्तिहेतुरित्यास्थेयम्। न च सिद्धे कर्तृताऽस्ति। यथाह भगवान् जैमिनिः—

'शास्त्रफलं प्रयोक्तरि तल्लक्षणत्वात्' इति, लोके च क्रियैवापेक्षितोपायः शब्दार्थ इति तदनुसारेण 'अग्निहोत्रं जुहुयात् स्वर्गकाम' इत्यादयोऽपि वैदिका उपदेशाः क्रियामेवापेक्षितोपायमभिदधति। सा चेयमाशुतरविनाशिन्यप्यवान्तरापूर्वव्यापारा सती चिरभाविनेऽपि फलाय कल्पते कृषिरिव निदाघसमयजन्मा हेमन्तसमयभाविने शस्यायेति नापूर्वस्यात्रापेक्षितोपायत्वं कल्पयितव्यम्। भवतु वा तदेवापेक्षितोपायप्रवृत्तिहेतुः, तथापि कर्त्तुरपेक्षितोपायतालक्षणसमानोपाधिर्विधिशब्दस्तदेकोपाधिसंबन्धात् क्वचित्क्रियायां क्वचिदपूर्वे प्रवर्तत इति न काचिद्दर्शनक्षतिः। तदेवमुपदेशे नियोज्यप्रयोजनकर्मणि व्युत्पन्नस्तानेव शब्दान् नियोक्तुं प्रयोजनकर्मण्याज्ञादौ प्रयुज्यमानानुपलभ्याध्येषणानुज्ञावाचकत्वमप्यवगच्छति। अग्निहोत्रादिवाक्यानां तु नियोज्यप्रयोजनकर्मवाचिनामुपदेशत्वमेव। तस्माद् यद्यप्याज्ञा-

वृत्तिः

तत्र विधिलक्षणमाह—(विधिरिति)

इष्टसाधनताबोधकप्रत्ययसमभिव्याहृतं वाक्यं विधिः(घ)। "अग्निहोत्रं जुहुयात् स्वर्गकामः" इति ॥ ६३ ॥

(क) 'अन्यत्र' इति पाठो युक्तः। (ख) 'इति प्रयत्नयो'रित्यादर्शपुस्तकयोः पाठः प्रामादिकः। (ग) २५७ पत्रे मुद्रितमिदम् अक्षरभेदस्तु तत्र वर्त्तते इति द्रष्टव्यम्। (घ) मीमांसकास्तु उत्पत्तिविधिरधिकारविधिर्विनियोगविधिः प्रयोगविधिरिति विधेश्चातुर्विध्यमभ्युपगच्छन्ति।

(सू०) स्तुतिर्निन्दा परकृतिः पुराकल्प इत्यर्थवादः ॥६४॥

न्यायभाष्यम्

विधेः फलवादलक्षणा या प्रशंसा सा स्तुतिः (१) सम्प्रत्ययार्था, स्तूयमानं श्रद्दधीतेति, प्रवर्तिका च, फलश्रवणात् प्रवर्त्तते—"सर्वजिता वै देवाः सर्वमजयन् सर्वस्याप्त्यै सर्वस्य जित्यै सर्वमेवैतेनाऽऽप्नोति सर्वं जयति" इत्येवमादि। (ताण्ड्य-ब्राह्मणम् १६।७।२) अनिष्टफलवादो निन्दा (२) वर्जनार्था निन्दितं न समाचरेदिति

न्यायवार्त्तिकम्

विधिस्तु नियोगोऽनुज्ञा वा—यद्वाक्यं विधत्ते इदं कुर्यादिति स नियोगः। अनुज्ञा तु—यत् कर्त्तारमनुजानाति तदनुज्ञावाक्यम्, यथाऽग्निहोत्रवाक्यमेवैतत् साधनावाप्तिप्रवृत्ति-पूर्वकत्वमनुजानाति ॥ ६३ ॥

स्तुतिर्निन्दा परकृतिः पुराकल्प इत्यर्थवादः। एषामुदाहरणानि भाष्ये ॥ ६४ ॥

न्यायवार्त्तिकतात्पर्यटीका

ध्येषणामन्त्रणोपदेशाः सर्वे विधयस्तथाऽपीहोपदेशो विधिरभिमतः। तस्मात् सुष्ठूक्तम्—यद्वाक्यं विधायकमिति, कर्त्रपेक्षितोपायताज्ञापकमित्यर्थः।

विधिस्तु नियोगोऽनुज्ञा वेति भाष्यमनुभाष्य व्याचष्टे—विधिस्त्विति। यदेतद् अग्निहोत्रं जुहुयात् स्वर्गकाम इति वाक्यमप्रवृत्तप्रवर्त्तकलक्षणं कर्त्रपेक्षितोपायतां ज्ञापयद्विधिः तदेव तत्साधन-द्रव्याद्यवाप्तिप्रवृत्तिमनुजानाति। एतदुक्तं भवति—ये हि द्रव्यार्जननियमविधयः 'ब्राह्मणस्य प्रतिग्रहादि'इत्येवमादयः ते च रागतो धनार्जने प्रवृत्तानां ब्राह्मणानां लौकिकानेकोपायप्रयुक्तौ सत्यां नियमपराः पुरुषार्थाः न क्रत्वर्थाः, क्रतुविधयस्तु धनसाधनास्तेऽनूदिताः पर्यवस्यन्तोऽपि न धनार्जनं तन्नियमं वा प्रयुञ्जते पुरुषार्थत्वेनैव तस्य प्रयुक्तत्वात्, केवलमनुजानन्ति। तस्मात् तदेवाग्निहोत्रादिवाक्यमप्राप्तेऽग्निहोत्रादौ विधिरन्यतः प्राप्ते तत्साधनेऽनुज्ञेति सिद्धम्। समुच्चये वाशब्दः ॥ ६३ ॥

स्तुति—दः (सू० ६४)॥ स्तुतेरुपयोगद्वयं प्रवृत्त्या धर्मे कर्त्तव्ये विधिना प्रवृत्तौ कर्त्तव्यायां च सहकारिता। प्रशस्तमिति ज्ञात्वा प्रवर्त्तमानाः पुमांसः प्रवर्त्तन्तेतराम्, सा च प्रवृत्तिः श्राद्धस्य धर्मं प्रसूते नाश्राद्धस्य। तथा च श्रूयते—यदेव विद्यया करोति श्रद्धयोपनिषदा तदेवास्य वीर्यवत्तरं भवतीति। तत्र प्रवृत्तेः कार्ये सहकारितामाह—स्तूयमानमिति। विधेः कार्ये सहकारितामाह—प्रवर्तिका चेति।

वृत्तिः

अर्थवादः अर्थस्य प्रयोजनस्य वदनम्, विध्यर्थप्रशंसापरं वचनमित्यर्थः।

(१) 'सम्प्रत्ययार्थं' इति ज-ग०, 'सम्प्रदायार्थान्' इति टि। (२) 'वर्जनार्थम्' इति ज-ग०।

न्यायभाष्यम्

स एष वाव प्रथमो यज्ञो (१) यज्ञानां यज्ज्योतिष्टोमो य एतेनानिष्ट्वा(२)ऽन्येन यजते (क)गर्त्तपत्यमेव तज्जीयते वा प्रमीयते वा इत्येवमादि ।

अन्यकर्तृकस्य व्याहतस्य विधेर्वादः परकृतिः "हुत्वा वपामेवाग्रेऽभिघारयन्ति अथ पृषदाज्यं तदुह चरकाध्वर्यवः पृषदाज्यमेवाग्रेऽभिघारयन्ति अग्नेः प्राणाः पृषदाज्यस्तोममित्येवमभिदधति" इत्येवमादि ।

ऐतिह्यसमाचरितो विधिः पुराकल्प इति । "तस्माद्वा एतेन ब्राह्मणा बहिष्पवमानं सामस्तोममस्तौषन् योने यज्ञं प्रतनवामहे इत्येवमादि ।

कथं परकृतिपुराकल्पावर्थवादाविति ? स्तुतिनिन्दावाक्येनाभिसम्बन्धाद् विध्याश्रयस्य(३) कस्यचिदर्थस्य द्योतनाद् (४)अर्थवाद इति ॥ ६४ ॥

न्यायवार्त्तिकतात्पर्यटीका

कथं परकृतिपुराकल्पावर्थवादाविति । चरकाध्वर्युपुरुषसंबन्धश्रवणाद् वपाहोमपृषदाज्याभिघारणयोः क्रमभेदस्याप्राप्तस्य पुरुषविशेषधर्मतया विधायकं परकृतिवाक्यम्, तथा बहिष्पवमानसामस्तोममन्त्रसंबन्धस्य पूर्वकालपुरुषसंबन्धितया श्रवणादिदानींतनपुरुषधर्मतया विधायकं पुराकल्पवाक्यं कस्मान्न भवतीति भावः । उत्तरम्—स्तुतिनिन्दावाक्येन कस्यचिद्विधेः शेषभूतेन (ख) संबन्धादिति । न तावदेतेषु वाक्येषु सिद्धाभिधायिषु विधिश्रुतिरस्ति । तत्र किमश्रूयमाणो विधिः कल्प्यतामाहो प्रतीतेन विधिनैकवाक्यतेति । तत्र कल्पनालाघवात् प्रतीतेन विधिनैकवाक्यतैव ज्यायसी । पूर्वपक्षे विधिकल्पना तदेकवाक्यताकल्पनमिति द्वयं कल्पनीयम्, उत्तरस्मिंस्तु एकवाक्यतामात्रमिति भावः । स्फुटतरस्तुतिनिन्दाप्रतीत्यभावाच्च परकृतिपुराकल्पयोः स्तुतिनिन्दाभ्यां भेदेनोपन्यास इति ॥ ६४ ॥

वृत्तिः

अर्थवादो हि स्तुत्यादिद्वारा विध्यर्थं शीघ्रप्रवृत्तये प्रशंसति । तत्र स्तुत्यादिभेदादर्थवादं विभजते—(ग) (स्तुतिरिति) ।

---

(१) फ-पुस्तके 'यज्ञानां (यज् ज्योतिष्टोमो)' इत्येवं मुद्रितम् । (२) '-ऽथान्येन' इति फ० । (३) 'कस्य कस्यचिद्' इति ज० । (४) 'अर्थवादाविति' इति क० ।

(क) अत्र ल-ग-ज-झा-पुस्तकेषु मुद्रितः 'गर्त्तं पतत्ययमेवैतज्जीर्यते वा प्रमीयते वा' इति पाठः परित्यक्तः, तद्बीजं फ-पुस्तके द्वितीयखण्डे ३३० पत्रे द्रष्टव्यम् ।

(ख) भाष्ये अभिपदमधिकम् ।

(ग) मीमांसकास्तु—

विरोधे गुणवादः स्यादनुवादोऽवधारिते । भूतार्थवादस्तद्धानेरर्थवादस्त्रिधा मतः ॥

इत्युक्तरीत्याऽर्थवादस्य त्रैविध्यमिच्छन्ति ।

(सू०)—विधिविहितस्यानुवचनमनुवादः ॥ ६५ ॥

न्यायभाष्यम्

विध्यनुवचनं चानुवादो विहितानुवचनं च। पूर्वः शब्दानुवादोऽपरोऽर्थानुवादः। यथा पुनरुक्तं द्विविधमेवमनुवादोऽपि। किमर्थं पुनर्विहितमनूद्यते? अधिकारार्थम्; विहितमधिकृत्य स्तुतिर्बोध्यते निन्दा वा, विधिशेषो वा(१)ऽभिधीयते।

न्यायवार्त्तिकम्

विधिविहितस्यानुवचनमनुवादः। विध्यनुवचनं चानुवादो विधिविहितानुवचनं च।

न्यायवार्त्तिकतात्पर्यटीका

विधि—दः (सू० ६५)॥ विहितमधिकृत्य स्तुतिर्वोच्यते निन्दा वेति। यथा "अश्वमेधेन यजेते"ति विधेरर्थवादः "योऽश्वमेधेन (२)यजत" इति। किमर्थम्? स्तोतुम्; "तरति मृत्युं तरति पाप्मानमि"ति स्तुतिः। 'उदिते होतव्य'मित्यस्य विधेरर्थवादः (क) 'य उदिते जुहोती'ति। किमर्थम्? निन्दितुम्; (ख) श्यावोऽस्याऽऽहुतिमभ्यवहरतीति निन्दा। प्रयोजनान्तरमाह—विधिशेषो वाऽभिधीयत इति। यथा 'यदाग्नेयोऽष्टाकपालो भवती'त्यादिभिरुत्पत्तिवाक्यैः षडाग्नेयादयो यागाः पौर्णमास्यमावास्याकालसंबन्धा विहिताः, ते च विधय इष्टाभ्युपायतारूपाः स्ववाक्ये चेष्टमनासादयन्तः सापेक्षाः, एवमाघाराद्युत्पत्तिविधयोऽपि कालविशेषासंबन्धा इष्टापेक्षा एव। तत्र 'य एवं विद्वान्पौर्णमासीं यजते य एवं विद्वानमावास्यां यजत'इति कालविशेषसंबन्धेनोत्पन्नानामाग्नेयादीनामनुवादः। किमर्थम्? 'यदाग्नेयोऽष्टाकपाल' इत्याद्युत्पत्तिविध्यपेक्षितेष्टसंबन्धनियमार्थम्, 'दर्शपौर्णमासाभ्यां स्वर्गकामो यजेते'ति षण्णामेवाऽऽग्नेयादीनां कालविशेषसंबन्धोत्पन्नानूदितानां फलसंबन्धो यथा स्याद्‌ (ग) मा भूदाघारादीनां कालासंबन्धे-

वृत्तिः

स्तुतिः साक्षाद्विध्यर्थस्य प्रशंसार्थकं वाक्यम्। यथा "सर्वजिता वै देवाः। सर्वमजयन् सर्वस्याऽऽप्त्यै सर्वस्य जित्यै सर्वमेवैतेनाऽऽप्नोति सर्वं जयति" इत्यादि। अनिष्टबोधनद्वारा विध्यर्थप्रवर्तकं निन्दा। "एष वाव प्रथमो यज्ञो यज्ञानां यज्ज्योतिष्टोमो य एतेनानिष्ट्वाऽन्येन यजते स (घ) गर्ते पतत्ययमेवैतज्जीर्यते प्र वा मीयते" इत्यादि। पुरुषविशेषनिष्ठमिथोविरुद्धकथनं परकृतिः। यथा "हुत्वा वपामेवाग्रेऽभिघारयन्त्यथ पृषदाज्यं तदुह चरकाध्वर्यवः पृषदाज्यमेवाग्रेऽभिघारयन्त्यग्नेः प्राणाः पृषदाज्यमित्यभिदधति" इत्यादि। ऐतिह्य-

---

(१) 'विधीयते' इति ग। (२) 'यजेते' इति ख।

(क) आदर्शपुस्तकयोः 'यदुदिते' इति मुद्राप्रमादकृतः पाठः ५८-सूत्रीयभाष्यानुसारेण शोधितः। (ख) आदर्शपुस्तकयोः 'श्यावो वा अस्याऽऽहुतिम्' इति मुद्राप्रमादकृतः पाठः शोधितः। (ग) पूर्ववाक्ये 'यथा' शब्ददर्शनादत्र 'तथे'ति अर्थादवगन्तव्यम्। (घ) 'गर्तंपत्यमेव तज्जीयते' इति युक्तः पाठः।

न्यायभाष्यम्

विहितानन्तरार्थोऽपि चानुवादो भवति। एवमन्यदप्युत्प्रेक्षणीयम्।

लोकेऽपि च विधिरर्थवादोऽनुवाद इति च त्रिविधं वाक्यम्। ओदनं पचेदिति विधिवाक्यम्। अर्थवादवाक्यम्—आयुर्वर्चो बलं सुखं प्रतिभानं चान्ने प्रतिष्ठितम्। अनुवादः—पचतु पचतु भवानित्यभ्यासः, क्षिप्रं पच्यतामिति वा; अङ्ग पच्यतामित्यध्येषणार्थम्, पच्यतामेवेति (१) चावधारणार्थम्।

यथा लौकिके वाक्ये विभागेनार्थग्रहणात्प्रमाणत्वम् एवं वेदवाक्यानामपि विभागेनार्थग्रहणात्प्रमाणत्वं भवितुमर्हतीति ॥ ६५ ॥

न्यायवार्त्तिकम्

पूर्वः शब्दानुवादः (क) परोऽर्थानुवादः, यथा पुनरुक्तं द्विविधम्, शब्दपुनरुक्तमर्थपुनरुक्तं च। शब्दपुनरुक्तम्—अनित्योऽनित्य इति। अर्थपुनरुक्तम्—अनित्यो निरोधधर्मक इति ॥ ६५ ॥

न्यायवार्त्तिकतात्पर्यटीका

नोत्पन्नानामित्येवमर्थम्। अत आघारादयः 'फलवत्सन्निधावफलं तदङ्ग'मिति दर्शपौर्णमासाङ्गतयाऽवतिष्ठन्त इति सिद्धं भवति। सोऽयं फलसम्बन्धनियमो विधिशेषः तदर्थमनुवाद इत्यर्थः। एवम् 'अग्निहोत्रं जुहोती'ति विहितो होमोऽनूद्यते। किमर्थम्? दध्यादिगुणविशेषविधानार्थम्,'दध्ना जुहोति पयसा जुहोतीत्यादिषु। सोऽयं गुणविधिर्विधिशेष इति। प्रयोजनान्तरमनुवादस्याऽऽह—विहितानन्तरार्थ इति। यथा सोमो विहितो (२) दर्शपौर्णमासौ च, तयोरानन्तर्यं विधातुमुभयानुवादः 'दर्शपौर्णमासाभ्यामिष्ट्वा सोमेन यजेते'ति, एव'मध्वर्युर्गृहपतिं दीक्षयित्वा ब्रह्माणं दीक्षयती'ति। (ख) विभागेऽर्थग्रहणात् प्रामाण्यं भवितुमर्हतीति, प्रामाण्यं भवतीत्यर्थः ॥६५॥

वृत्तिः

समाचरिततया कीर्तनं पुराकल्पः। यथा "तस्माद्वा एतेन पुरा ब्राह्मणा बहिष्पवमानसामस्तोममस्तौषन् यज्ञं प्रतनवामहे" इत्यादि ॥ ६४ ॥

अनुवादलक्षणमाह—(विधीति)

प्राप्तस्य अनु पश्चात् कथनं सप्रयोजनम् अनुवाद इति सामान्यलक्षणम्, तद्विशेषो विधिविहितस्येति; विध्यनुवादो विहितानुवादश्चेत्यर्थः। अयम् अर्थवादानुवादविभागो विधिसमभिव्याहृतवाक्यानाम्, । तेन भूतार्थवादरूपाणां वेदान्तवाक्यानामपरिग्रहान्न न्यूनता ॥ ६५ ॥

---

(१) 'चाऽवधारणार्थम्' इति क। (२) ख-पुस्तके 'दर्शपौर्णमासौ च तयोरानन्तर्यं' विधातुमुभयानुवादः' इति न दृश्यते।

(क) भाष्ये अपर इति विशेषः। (ख) भाष्ये 'विभागेनार्थग्रहणाद्' इति बहुपुस्तकसंवादी पाठः।

(सू०)—नानुवादपुनरुक्तयोर्विशेषः शब्दाभ्यासोपपत्तेः ॥६६॥

न्यायभाष्यम्

पुनरुक्तमसाधु साधुरनुवाद इति अयं विशेषो नोपपद्यते। कस्मात्? उभयत्र हि प्रतीतार्थः शब्दोऽभ्यस्यते चरितार्थस्य शब्दस्याभ्यासादुभयमसाध्विति ॥६६॥

(सू०)—शीघ्रतरगमनोपदेशवदभ्यासान्नाविशेषः ॥ ६७ ॥

न्यायभाष्यम्

नानुवादपुनरुक्तयोरविशेषः। कस्मात्? अर्थवतोऽभ्यासस्यानुवादभावात्। अर्थवानभ्यासोऽनुवादः, शीघ्रतरगमनोपदेशवत्। शीघ्रं शीघ्रं गम्यतामिति क्रियाति-

न्यायवार्त्तिकम्

नानुवादपुनरुक्तयोर्विशेषः शब्दाभ्यासोपपत्तेः। कोऽस्य सूत्रस्यार्थः? प्रतीतार्थशब्दाभ्यासोऽनुवादपुनरुक्तयोः साम्यम्। पुनरुक्तेऽपि प्रतीतार्थः शब्दोऽभ्यस्यते, अनुवादेऽप्येवम्, अतः प्रतीतार्थशब्दाभ्यासादुभयमसाध्विति ॥ ६६ ॥

शीघ्रतरगमनोपदेशवदभ्यासान्नाविशेषः इति। यथा शीघ्रं गम्यतां शीघ्रतरं गम्यतामिति तरपा क्रियातिशयो गम्यते तथाऽनुवादलक्षणेनाप्यभ्यासेन क्रियातिशयोऽभिधीयत इति। अस्य प्रयोगः—अर्थवाननुवादलक्षणोऽभ्यासः प्रत्ययविशेषहेतुत्वात् शीघ्रतरगमनोपदेशवदिति। यथा शीघ्रशब्दाच्छीघ्रतरशब्दः प्रयुज्यमानः प्रत्ययविशेषहेतुत्वान्न पुनरुक्तदोषं लभते तथाऽनुवादलक्षणोऽप्यभ्यासः प्रत्ययविशेषहेतुत्वान्न पुनरुक्तदोषं लप्स्यत इति।

न्यायवार्त्तिकतात्पर्यटीका

नानु—त्तेः (सू० ६६) ॥ भाष्योक्तमनुवादस्य प्रयोजनमविदुषः पूर्वः पक्षः ॥ ६६ ॥

शीघ्र—षः (सू० ६७) ॥ वार्तिकम् यथेति। यथा शीघ्रं गम्यतामित्युक्ते शीघ्रतरं गम्यतामिति न पुनरुक्तम्, तरपः क्रियातिशयप्रतीतेः, एवं शीघ्रं शीघ्रं गम्यतामित्यभ्यासात् क्रियातिशयप्रतीतेः सकृदुच्चरितादनवगतेः क्रियातिशयस्य प्रयोजनवानभ्यासः। क्रियाविशेषणातिशयोऽपि क्रियातिशय एवेत्यर्थः। अवगतं तावच्छीघ्रं शीघ्रं गम्यतामित्यत्राभ्यासातिशयप्रतीतेरनु-

वृत्तिः

शङ्कते—(नानुवादेति)

'शब्दस्य' बोधितार्थकशब्दस्य योऽभ्यासः पुनः प्रयोगः तस्य 'उपपत्तेः' सत्त्वाद् अनुवादः पुनरुक्तान्न भिद्यते इत्यर्थः ॥ ६६ ॥

समाधत्ते—(शीघ्रतरेति)

अनुवादस्य पुनरुक्तात् नाविशेषः अभ्यासाद् अभ्यासस्य सप्रयोजनत्वात्। तत्र

न्यायभाष्यम्

शयोऽभ्यासेनैवोच्यते। उदाहरणार्थं चेदम्। (१)एवमन्योऽप्यभ्यासः पचति पचतीति क्रियानुपरमः। ग्रामो ग्रामो रमणीय इति व्याप्तिः। परि परि त्रिगर्तेभ्यो वृष्टो देव इति परिवर्जनम्। अध्यधि कुड्यं निषण्णमिति सामीप्यम्। (क) तिक्तं तिक्तम् इति प्रकारः। एवमनुवादस्य स्तुति-निन्दा-शेष-विधिष्वधिकारार्थता (२)विहितानन्तरार्थता चेति ॥ ६७ ॥

किं पुनः प्रतिषेधहेतूद्धारादेव शब्दस्य प्रमाणत्वं (३)सिध्यति ? न, अतश्च(३*)—

न्यायवार्त्तिकम्

कः पुनरसौ विशेषो भवतीति वक्तव्यः, तदुच्यते—आद्ये पचतुशब्दप्रयोगे पाको निर्वर्तनीय इति पक्तुः प्रत्ययो भवति, द्वितीयात् तु पचतुशब्दादवधारणप्रत्ययो भवति, मयैव पक्तव्यमिति ; सातत्य-प्रत्ययो वा भवति सततं मया पक्तव्यमिति ; अध्येषणप्रत्ययो वा भवति मामेवायमधिकुरुत इति, आशुप्रत्ययो वा भवति आशु मया पक्तव्यमिति। एवं श्रोतुः—यथा च श्रोतुस्तथा वक्तुरप्येते एव प्रत्यया भवन्तीति। पुनरुक्ते तु न कश्चिद्विशेषो गम्यत इति महान् विशेषः पुनरुक्तानुवादयोः। एवमन्योऽप्यनुवादस्य प्रयोगो वाक्ये बोद्धव्य इति ॥ ६७ ॥

किं पुनः प्रतिषेधहेतूद्धारादेव प्रमाणता वेदवाक्यानां सिद्धा ? न। (४) किं कारणम् ? न साधनमन्तरेण सिद्धिरस्तीति। कुतस्तर्हि ? प्रमाणतः। किं तत् प्रमाणम् ? अर्थविभाग-वत्त्वम्—

न्यायवार्त्तिकतात्पर्यटीका

वादस्य विशेषः, पचति पचतीत्यादौ को विशेष इत्याह—कः पुनरसौ विशेषः यः पचति पचतीत्यादौ भवतीति। न च वक्तुरन्यथा प्रत्ययः श्रोतुश्चान्यथा येन विप्रतिपत्तेः श्रोतुः प्रत्ययो भ्रान्त इति कल्प्येतेत्याह—यथा च श्रोतुरिति। एवमन्योऽपीति। यथा ग्रामो ग्रामो रमणीय इत्यादिरिति ॥ ६७ ॥

अनन्तरसूत्रावतारणपरं भाष्यं किं पुनः प्रतिषेधेति। तदनुभाष्य व्याचष्टे—किं पुनरिति। उत्तरम्—नेति। पृच्छति—किं कारणम्। उत्तरम्—न साधनमन्तरेणेति। पुनः पृच्छति—

वृत्तिः

दृष्टान्तमाह—शीघ्रेति। यथा लोके गम्यतामित्युक्त्वा पुनर्गम्यतां गम्यताम् इत्यादिक-मविलम्बादिबोधार्थमुच्यते तथा प्रकृतेऽपीति ॥ ६७ ॥

---

(१) 'एवमन्योऽप्यभ्यासः' इति फ०। (२) 'विहितार्थता च' इति ज०, 'विहितार्थस्यानुवाद' इति टि०। (३) 'न सिध्यति' इति ज०, 'न' इति नास्ति ल-भा-ग०। (४) 'न किं' इति क-वार्त्तिकपाठः।

(क) अत्र 'तिक्ततिक्त'मिति पाठो गुरुभिः परिगृहीतः। तद्बीजं व० सा० प० प्रकाशिते न्यायदर्शने २य-खण्डे ३४३ पत्रे द्रष्टव्यम्।

(सू०)—मन्त्रायुर्वेदप्रामाण्यवच्च तत्प्रामाण्यमाप्तप्रामाण्यात् ॥६८

न्यायभाष्यम्

किं पुनरायुर्वेदस्य प्रामाण्यम्? यत्तदायुर्वेदेनोपदिश्यते इदं कृत्वेष्टमधिगच्छति इदं वर्जयित्वाऽनिष्टं जहाति, तस्यानुष्ठीयमानस्य तथाभावः सत्यार्थताऽविपर्ययः। मन्त्रपदानां च विषभूताशनिप्रतिषेधार्थानां प्रयोगेऽर्थस्य तथाभाव एतत्प्रामाण्यम्। किंकृतमेतत्? आप्तप्रामाण्यकृतम्। किं पुनराप्तानां प्रामाण्यम्? साक्षात्कृतधर्मता भूतदया

न्यायवार्त्तिकम्

मन्त्रायुर्वेदप्रामाण्यवच्च तत्प्रामाण्यमाप्तप्रामाण्यात्। चशब्दः पूर्वहेत्वनुकर्षणार्थः। यथा मन्त्रायुर्वेदवाक्यानि पुरुषविशेषाभिहितत्वात् प्रमाणं तथा वेदवाक्यानीति पुरुषविशेषाभिहितत्वं हेतुः। किमायुर्वेदस्य प्रामाण्यं यत् तदायुर्वेदेनोपदिश्यते इदं कृत्वेष्टमधिगच्छति इदं(क) कृत्वाऽनिष्टं जहाति, तस्यानुष्ठीयमानस्य तथाभावोऽविपर्ययः, एतत् प्रामाण्यम्। किंकृतमेतत्? आप्तप्रामाण्यकृतम्। किं पुनराप्तानां प्रमाणत्वम्? साक्षात्कृतधर्मता—यं ते पदार्थमुपदिशन्ति स तैः साक्षात्कृतो भवतीति। भूतदया च—यस्मै चोपदिशन्ति तं प्रत्यनुकम्पा भवति। (१) यथापरिज्ञातार्थचिख्यापयिषा चास्य भवति। एतेन त्रिविधेन विशेषणेन विशिष्टो वक्ता आप्तः। तेन य उपदेशः क्रियते स प्रमाणमिति।

न्यायवार्त्तिकतात्पर्यटीका

कुतस्तर्हाति। उत्तरम्—प्रमाणतः। पृच्छति—(ख)तत्किं प्रमाणम्। तत्र तावद्वेदप्रामाण्यसंभावनायां प्रमाणमाह—अर्थविभागवत्त्वम्; न त्वेतद्वेदप्रामाण्ये प्रमाणं (२)बुद्धादिप्रणीतेनागमेनार्थविभागवता अनैकान्तिकत्वात्। वेदप्रामाण्यप्रमाणं तु सूत्रोक्तम्—

मन्त्रा—ण्यात् (सू० ६८)॥ चशब्दः पूर्वहेत्वनुकर्षणार्थ इति। पूर्वस्य प्रामाण्यसंभावनाहेतोरर्थविभागवत्त्वस्यानुकर्षणार्थः। संभावितो हि पक्षो हेतुना साध्यते न त्वसंभावितः। यथाहुः—

संभावितः प्रतिज्ञायां पक्षः साध्येत हेतुना।
न तस्य हेतुभिस्त्राणमुत्पतन्नेव यो हतः॥ इति।

सूत्रं व्याचष्टे—यथा मन्त्रायुर्वेदवाक्यानीति। पुरुषस्य भगवतो वेदकारकस्य विशेषः प्रत्यक्षीकृतहेयोपादेयता तद्धेतुभूता भूतदया यथार्थचिख्यापयिषा च करणपाटवं चेति; विशिष्यते ह्यनेनैव पुरुषः पुरुषान्तरेभ्योऽनाप्तेभ्य इति। त्रिविधेन विशेषणेनेत्युपलक्षणं करणपाटवमपि द्रष्टव्यम्।

---

(१) 'यथार्थपरिज्ञानार्थं चिख्यापयिषा चास्य' ख०। (२) 'बुद्धाबुद्धादि'—ख।

(क) कृत्वेत्यत्र भाष्ये वर्जयित्वेति विशेषः। एवमत्र अन्येऽपि विशेषा द्रष्टव्याः।

(ख) 'किं तत्' इति व्युत्क्रमस्तु वार्त्तिकानुसारी मनोरमः।

न्यायभाष्यम्

यथाभूतार्थचिख्यापयिषेति। आप्ताः खलु साक्षात्कृतधर्माणः इदं हातव्यमिदमस्य हानिहेतुरिदमस्याधिगन्तव्यमिदमस्याधिगमहेतुः इति भूतान्यनुकम्पन्ते। तेषां खलु

न्यायवार्त्तिकतात्पर्यटीका

एतदत्राऽऽकूतम्—अनन्तान्तर्गणिकसुखदुःखभेदवन्तः प्राणभृद्भेदा दृश्यन्ते न चैषां वैचित्र्यं स्वाभाविकमिति तृतीये निवेदयिष्यते। न च दृष्टकारणमात्रनिबन्धनम्, तस्य दृष्टव्यभिचारत्वात्। तस्माद् दृष्टसहायमदृष्टमस्य वैचित्र्यस्य कारणम्, तच्चापूर्वमिति च धर्माधर्माविति चाऽऽख्यायते। तच्च कस्यचित्प्रत्यक्षं मन्वादेरित्युपपादितम्। तनुभुवनादिलक्षणस्य कार्यस्य कर्ता तन्निर्माणसमर्थः समस्तवस्तुतत्त्वज्ञः क्लेशकर्मविपाकाशयापरामृष्टः परमकारुणिकस्तनुभुवनादेरेव कार्यादनुमीयत इति चतुर्थ उपपादयिष्यते। सोऽयमात्मीयहिताहितप्राप्तिपरिहारोपायानविदुषः प्राणिनः पश्यन् प्रत्युतानेकविधदुःखदहनदह्यमानानवलोकयन् कथं न तप्येत तप्यमानो वा (क)हिताहितप्राप्तिपरिहारोपायतत्त्वं विद्वान् कथं नोपदिशेत् अन्यथोपदिशेद्वा। तस्मादनेन परमकारुणिकेन पृथिव्यादि सृष्ट्वा (ख)प्रजाश्चतुर्विधास्ताभ्यो हिताहितप्राप्तिपरिहारोपाय उपदेष्टव्यः। न ह्ययमनुपदिश्य स्थातुमर्हति। प्रजानां पितृकल्पस्य चास्योपदेशो देवर्षिमनुष्यगोचरश्चातुर्वर्ण्येन चातुराश्रम्येण चाऽऽदराद् ग्राह्यः, धार्यश्च हिताहितप्राप्तिपरिहारोपायानुष्ठानाय। तस्माद् यो वर्णाश्रमाचारव्यवस्थापक आगमो महाजनपरिगृहीतः स तत्प्रणीत आप्तोक्तत्वात् प्रमाणं मन्त्रायुर्वेदवाक्यवदिति संप्रसाध्यते। कतमोऽसावागम आप्तोक्तः, किं शाक्यभिक्षुकदिगम्बरसंसारमोचकादीनामागमाः किं वा वेदा इति। तत्र शाक्याद्यागमानां (ग) बुद्धर्षभादयः प्रणेतार इति स्फुटतरमस्ति स्मरणं न तूक्तलक्षण ईश्वरस्तेषां कर्त्तेति। न चैते शौद्धोदनिप्रभृतयः तनुभुवनादीनां कर्त्तारो येन सर्वज्ञा इति निश्चीयेरन्, तदुपायानुष्ठानेन तु संभाव्येतैषां सर्वज्ञता। न च संभावनामात्रेण तत्प्रणीतेष्वागमेष्वाश्वासः प्रेक्षावतां भवितुमर्हति। न चैतेषामागमा वर्णाश्रमाचारव्यवस्थाहेतवः। नो खलु निषेकाद्याः क्रियाः श्मशानान्ताः प्रजानामेते विदधति। न हि प्रमाणीकृतबौद्धाद्यागमा अपि लोकयात्रायां श्रुतिस्मृतीतिहासपुराणनिरपेक्षागममात्रेण प्रवर्त्तन्ते, अपि तु तेऽपि सांवृतमेतदिति ब्रुवाणा लोकयात्रायां श्रुत्यादीनेवानुसरन्ति। तस्माद्भवतु वेदेषु जगन्निर्मातृकर्तृकत्वस्मृतिः मा वा भूत्, त एव त्वीश्वरप्रणीता इति पश्यामः। न ह्येते चैत्यवन्दनादिवाक्यवदन्यकर्तृकाः स्मर्यन्ते, न चान्य आगमो लोकयात्रामुद्वहन् महाजनपरिगृहीत ईश्वरप्रणीततया स्मर्यमाणो दृश्यते, न चेश्वरोऽनुपदिशन्नवस्थातुमर्हतीत्युक्तम्; तत् पारिशेष्याद्वेदा एव सकललोकयात्रामुद्वहन्तो हिताहितप्राप्तिपरिहारोपायमुपदिशन्त ईश्वरप्रणीता इत्यवगच्छामः। तथा ह्येत एव त्रैवर्णिकैर्यथावत् प्रयत्नेन गृह्यन्ते धार्यन्ते च। तदर्थपालनायां च महर्षिपरम्पराभिरङ्गोपाङ्गेतिहासपुराणधर्मशास्त्राणि प्रणीतानि। बुद्धादिवाक्यानि तु न लोकयात्रामुद्वहन्ति, न

(क) 'हिताहितपरिहारोपायतत्त्वम्' इत्यादर्शपुस्तकयोः पाठः शोधितः। (ख) 'प्रजाय चतुर्विधाः' इति च-शब्दोऽत्रानुसन्धेयः। (ग) बुद्धः प्रसिद्धः, ऋषभः आर्हतसम्प्रदायप्रवर्त्तकः।

न्यायभाष्यम्

वै प्राणभृतां स्वयमनवबुध्यमानानां नान्यदुपदेशादवबोधकारणमस्ति। न चानवबोधे समीहा वर्जनं वा, न वाऽकृत्वा स्वस्तिभावः, नाप्यस्यान्य उपकारकोऽप्यस्ति। हन्त वयमेभ्यो यथादर्शनं यथाभूतमुपदिशामः त इमे श्रुत्वा प्रतिपद्यमाना हेयं हास्यन्त्यधिगन्तव्यमेवाधिगमिष्यन्ति इति। एवमाप्तोपदेशः एतेन त्रिविधेनाप्तप्रामाण्येन परिगृहीतोऽनुष्ठीयमानोऽर्थस्य साधको भवति; (१)एवमाप्तोपदेशः प्रमाणम्(१*)। एवमाप्ताः प्रमाणम्।

दृष्टार्थेनाऽऽप्तोपदेशेनाऽऽयुर्वेदेनादृष्टार्थो वेदभागोऽनुमातव्यः प्रमाणमिति आप्तप्रामाण्यस्य हेतोः समानत्वादिति। अस्यापि चैकदेशो "ग्रामकामो यजेत" इत्येवमादिर्दृष्टार्थः, तेनानुमातव्यमिति।

लोके च भूयानुपदेशाश्रयो व्यवहारः। लौकिकस्याप्युपदेष्टुरुपदेष्टव्यार्थ

न्यायवार्त्तिकम्

(२) दृष्टार्थवाक्याविसंवादेन वा शेषानुमानं—यद्वाक्यं दृष्टार्थं (क) यथा "ग्रामकामो यजेते"त्येवमादि, तेन वा शेषानुमानं प्रमाणमिति।

न्यायवार्त्तिकतात्पर्यटीका

च तत्र लौकिकानामविगानम्, न च विगायतां सांवृतमित्युक्तत्वाऽपि तदर्थानुष्ठानम्। तस्माद् विगानात् कैश्चिदेव म्लेच्छादिभिर्मनुष्यापसदैः पशुप्रायैः परिग्रहान्नैतेषामाप्तोक्तत्वसंभवः। न चैतेषां मन्वादिवाक्यवद्वेदमूलकतया प्रामाण्यमिति सांप्रतम्, अध्येत्रध्यापयित्रनुष्ठातृकर्तृसामान्यस्य वेदमूलकत्वानुमानलिङ्गस्य स्मृतिवेदयोरिव बुद्धादिवाक्येष्वभावात्, तत्सर्वज्ञत्वसंदेहेन चानुभवमूलकत्वानिश्चयात्; 'मन्त्रायुर्वेदेषु प्रवृत्तिसामर्थ्यानुमितप्रामाण्येषु वैदिकशान्तिकपौष्टिकादिकर्माभ्यनुज्ञानात् रसायनादिक्रियारम्भे च वेदविहितचान्द्रायणादिप्रायश्चित्तोपदेशादायुर्वेदेनाप्याप्तप्रणीतेन वेदानां प्रामाण्यमभ्युपेयते। तत्सिद्धमाप्तप्रणीता वेदाः प्रमाणमिति। अभ्युच्चयमात्रं तु कारीर्यादिषु संवाद इति।

वृत्तिः

एवमप्रामाण्यसाधकं निरस्य प्रामाण्यं साधयति—(मन्त्रायुर्वेदवदिति)।

'आप्तस्य' वेदकर्तुः, 'प्रामाण्यात्' यथार्थोपदेशकत्वात्, वेदस्य तदुक्तत्वमर्थाल्लब्धम्,

---

(१) अयमंशः ज-टि-पुस्तकयोर्नास्ति। (२) 'दृष्टवाक्याविसंवादेन चाशेषानुमानं' ख०।

(क) 'यथा वा' इत्यादर्शपुस्तकयोः पाठः। अवत्यो 'वा'शब्दोऽर्थासङ्गतेः संग्रहवाक्यानुसारेण 'तेन' इत्यतः परं योजितः। दृष्टार्थकं वाक्यमधिकृत्य—"ननु न कदाचिदपि कर्मसमनन्तरमेव फलमुपलब्धमिति तदनृतत्वमेव, तददर्शनकारणं न कारणवैगुण्यमिति तदयुक्तम् अविगुणायां कारीर्यां प्रयुक्तायां सद्य एव वृष्टेर्दर्शनात्' इति प्रक्रम्य तथा अस्मत्पितामह एव ग्रामकामः सांग्रहणीं कृतवान् स इष्टिसमाप्तिसमनन्तरमेव गौरमूलकं ग्राममवाप' इत्युक्तं न्यायमञ्जर्याम्।

न्यायभाष्यम्

(१)ज्ञानेन परानुजिघृक्षया यथाभूतार्थचिख्यापयिषया च प्रामाण्यम्, तत्परिग्रहादाप्तोपदेशः प्रमाणमिति।

द्रष्टृ-प्रवक्तृसामान्याच्चानुमानम्। य एवाप्ता वेदार्थानां द्रष्टारः प्रवक्तारश्च त एवाऽऽयुर्वेदप्रभृतीनाम् इत्यायुर्वेदप्रामाण्यवद्वेदप्रामाण्यमनुमातव्यमिति।

नित्यत्वाद् वेदवाक्यानां प्रमाणत्वे तत्प्रामाण्यमाप्तप्रामाण्यादित्ययुक्तम्। शब्दस्य वाचकत्वादर्थप्रतिपत्तौ प्रमाणत्वं न नित्यत्वात्। नित्यत्वे हि सर्वस्य सर्वेण वचनाच्छब्दार्थव्यवस्थानुपपत्तिः। (२) नानित्यत्वे वाचकत्वमिति चेद् न, लौकिकेष्वदर्शनात्। तेऽपि नित्या इति चेद् न, अनाप्तोपदेशादर्थविसंवादोऽनुपपन्नः।(२*) नित्यत्वाद्धि

न्यायवार्त्तिकम्

लौकिकमपि वाक्यमनेनैव त्रिप्रकारेण विशेषणेन विशिष्टस्य वक्तुः प्रमाणं भवति। अस्य प्रयोगः—प्रमाणं वेदवाक्यानि वक्तृविशेषाभिहितत्वात् मन्त्रायुर्वेदवाक्यवदिति।

एककर्तृकत्वेन वा मन्त्रायुर्वेदवाक्यानि पक्षीकृत्यालौकिकविषयप्रतिपादकत्वेन वैधर्म्यहेतुर्वक्तव्यः।

पौरुषेयत्वमसिद्धं नित्यत्वादिति चेत्—अथ मन्यसे नित्यानि वेदवाक्यानि, नित्यत्वाच्चैषां प्रामाण्यम्, तस्मात् पौरुषेयत्वमसिद्धम्। न, असिद्धत्वात्—सिद्धे नित्यत्वे एतद् युक्तम्, तत्तु न

न्यायवार्त्तिकतात्पर्यटीका

एतदेवाभिप्रेत्य वार्त्तिककारः प्रयोगमाह—अस्य प्रयोगः—प्रमाणं वेदवाक्यानीति।

प्रयोगान्तरमाह—एककर्तृकत्वेनेति। मन्त्रायुर्वेदवाक्यानि सर्वज्ञकर्तृकाणि महाजनपरिग्रहे सति अलौकिकार्थप्रतिपादकत्वात्। यानि तु न सर्वज्ञपूर्वकाणि तानि नैवंरूपाणि यथा (क)वातपुत्रीयवाक्यानीति व्यतिरेकी हेतुः। यथा च बुद्धादिवाक्यान्यलौकिकान्यपि न महाजनपरिगृहीतानि तथोक्तमनन्तरमेव। मन्त्रायुर्वेदवाक्यानां च सत्यपि प्रवृत्तिसामर्थ्ये तासां तासामौषधीनां तत्संयोगभेदानां च (ख) तत्तदक्षरावापोद्धारभेदस्य च नासर्वज्ञः सहस्रेणापि पुरुषायुषैः शक्तः कर्त्तुं प्रथममन्वयव्यतिरेकौ, न चानिदंप्रथमता तत्परिहारः सर्गादौ तदसंभवात्। सृष्टिमहाप्रलयौ चानुमानागमाभ्यामुपपादयिष्येते इति सर्वं रमणीयम्। तदेवं सर्वज्ञपूर्वकत्वे सति सिद्धमाप्तोक्तत्वेन मन्त्रायुर्वेदप्रामाण्यमोदनार्थो पचेदिति लौकिकवाक्यवदिति।

वृत्तिः

तेन हेतुना वेदस्य प्रामाण्यमनुमेयम्। तत्र दृष्टान्तमाह—मन्त्रायुर्वेदप्रामाण्यवदिति।

---

(१) '-ज्ञानपरानु-' ज० ग०। (२) अयमंशः टि-पुस्तके नास्ति।

(क) वातपुत्रीपुत्रो वातपुत्राद् भिन्नो नवेत्यनुसन्धेयम्। (ख) 'तत्तदक्षरावापोद्धारभेदस्य' इत्येव पाठो नवेति चिन्तनीयम्।

न्यायभाष्यम्

शब्दः प्रमाणमिति। अनित्यः स इति चेत्? अविशेषवचनम्। अनाप्तोपदेशो लौकिको न नित्य इति कारणं वाच्यमिति। यथायोगं चार्थस्य प्रत्यायनाद् नामधेयशब्दानां लोके प्रामाण्यं नित्यत्वात् प्रामाण्यानुपपत्तिः। यत्रार्थे नामधेयशब्दो नियुज्यते लोके (१)तस्य नियोगसामर्थ्यात् प्रत्यायको भवति, न नित्यत्वात्। मन्वन्तरयुगान्तरेषु

न्यायवार्त्तिकम्

सिद्धमतो न युक्तमेतत्। यदि न नित्यानि कथं प्रमाणम्? प्रमेयप्रतिपादकत्वात् प्रमाणम्, न नित्यत्वात्।

केचित्तु ब्रुवते न किञ्चिन्नित्यं प्रमाणमस्तीति प्रमाणत्वादेवानित्यानीति। तत्तु न सम्यगिति पश्यामः, नित्यमपि प्रमाणं यथा मनः आत्मा च। प्रमाणशब्दस्य समुदायवाचित्वात्—अयं खलु प्रमाणशब्दः समुदाये वर्तते। तत्र नित्यमनित्यं चानेकं समुदायि प्रमाणस्याङ्गत्वात् प्रमाणमित्युच्यते यथा प्रदीपः एवं च नित्यमपि प्रमाणमस्तीति। यदा च परमाण्वादि नित्यमितरवस्तुसाधकत्वेनोपादीयते तदा परमाण्वादेर्नित्यस्य प्रमाणभावात् 'प्रमाणत्वादनित्य' इत्ययं नैकान्तो भवतीत्यनुत्तरमेतत्।

तस्माद् युक्तमर्थविभागवत्त्वादनित्यत्वं लौकिकवाक्यवदिति—यथा अर्थविभागवन्ति लौकिकवाक्यानि तथा च वेदवाक्यानि तस्मान्न नित्यानीति। लौकिकान्यपि नित्यानीति चेत्—अथ

न्यायवार्त्तिकतात्पर्यटीका

यदि न नित्यानि कथं प्रमाणम्, अनित्यत्वे हि पुरुषाणां विचित्राभिसन्धित्वेन भ्रमशङ्का, न च शक्याऽपाकर्त्तुम्। तस्मादपौरुषेयत्वमेव पुरुषाश्रयान् दोषानपाकुर्वद् वेदप्रामाण्यव्यवस्थापकमिति भावः। उत्तरम्—प्रतिपादकत्वादिति, आप्तोक्तत्वेनानित्यस्यापि निश्चायकत्वादित्यर्थः।

केचित्त्विति। प्रमालक्षणामर्थक्रियां कुर्वत् प्रमाणम्, न च नित्यस्यार्थक्रियाऽस्ति तस्मान्न प्रमाणमित्यर्थः। निराकरोति—तत्तु न सम्यगिति पश्याम इति। यथा च नित्यस्याप्यर्थक्रियासंभवस्तथा तृतीये वक्ष्याम इति भावः। आत्मा चेति प्रमाहेतुतामात्रविवक्षया, न तु करणत्वाभिप्रायम्। प्रमाणशब्दस्येति अत्रापि न करणत्वविवक्षया किं तु प्रमाहेतुमात्रविवक्षयेति द्रष्टव्यम्। इतरवस्तुसाधकत्वेनेति। इतरस्य परमाणुगतस्यैव मूर्त्तत्वादेः साधकत्वेनेत्यर्थः।

वृत्तिः

मन्त्रो विषादिनाशकः, आयुर्वेदभागश्च (२)वेदस्थ एव; तत्र संवादेन प्रामाण्यग्रहात् तद्दृष्टान्तेन वेदत्वावच्छेदेन प्रामाण्यमनुमेयम्।

---

(१) 'तत्र' इति ग०। (२) 'वेदस्य' इति ल०।

न्यायभाष्यम्

चातीतानागतेषु सम्प्रदायाभ्यासप्रयोगाविच्छेदो वेदानां नित्यत्वम्, आप्तप्रामाण्याच्च प्रामाण्यम्; लौकिकेषु शब्देषु चैतत् समानमिति ॥ ६८ ॥

इति वात्स्यायनीये न्यायभाष्ये द्वितीयाध्यायस्याऽऽद्यमाह्निकम् ।

न्यायवार्त्तिकम्

मन्यसे यान्यप्येतानि लौकिकवाक्यानि अर्थविभागवन्ति तान्यपि नित्यानीति; अर्थविभागो न स्यात्—योऽयमर्थविभागो लौकिकवाक्ये स न स्यात्, दृष्टस्तु। तान्यनित्यानीति चेत्, विशेषहेतुर्वक्तव्यः—तुल्ये चार्थविभागवत्त्वे तुल्ये चार्थप्रतिपादकत्वे लौकिकान्यनित्यानि वैदिकानि नित्यानीति विशेषहेतुर्वक्तव्यः। तुल्यं भवतोऽपि अनित्यत्वे विशेषहेतुर्वक्तव्य इति।

उक्तोऽर्थविभागवत्त्वं हेतुः। इतश्च, वर्णवत्त्वाद्—वर्णवन्ति लौकिकवाक्यानि अनित्यानि, तथा च वेदवाक्यानि, तस्मात् तान्यप्यनित्यानि। इतश्च, सामान्यविशेषवत्त्वे सति श्रोत्रग्राह्यत्वात् लौकिकवाक्यवत्। इतश्च, पदवत्त्वात् लौकिकवाक्यवत्। दर्शनस्य परार्थत्वादिति चेत्—अथ मन्यसे दर्शनं परार्थम्, दर्शनशब्द उच्चारणार्थः, उच्चारणं परप्रतिपादनार्थम्, न हि कश्चिदात्मप्रतिपत्तये शब्दमुच्चारयति, यदि चायं नित्यो भवति शब्दादर्थप्रत्ययो युक्तः, अथानित्य उत्पन्नप्रध्वंसी ततोऽस्य श्रोतुर्नित्यमपूर्वः श्रोत्रविषयमेति, न चापूर्वश्रवणात् प्रतिपत्तिर्युक्ता, न हि नारिकेलद्वीपवासिनोऽप्रसिद्धगोश्रवणात् ककुदादिमदर्थप्रतिपत्तिर्भवति, तथा चानित्यवादिनः सर्वे शब्दाः तथा, तस्मादस्यापि शब्दात् प्रत्ययनियमो न प्राप्त इति। न अनेकान्तात्—क्षणविध्वंसिषु प्रदीपादिषु अपूर्वस्य प्रत्यायनं दृष्टमिति? नोदाहरणवैधर्म्यात् प्रदीपो नाख्यातः प्रकाशनीयार्थसम्बन्धात् प्रकाशनीयार्थसम्प्रतिपत्तिं करोति न पुनरनाख्यातः शब्द इति। कः पुनरेवमाह अनाख्यातः शब्दः प्रतिपादयति इति? सम्बन्धस्यादर्शनादाख्यानमनुपपन्नम्। उक्तमेतद् यथा न शब्दार्थयोः प्राप्तिलक्षणः सम्बन्धोऽस्तीति। वाच्यवाचकभावलक्षणस्तु पौरुषेयः सम्बन्धः स च कृतक इति। स च संसारानादित्वात् लोकतोऽवगम्यते। ये तु संसारमादिमन्तं वर्णयन्ति त एवमुपालभ्याः। अथ योऽयमभिलापो नित्या(१)वर्णा इति, स कथम्? सम्प्रदायस्याविच्छेदात्—तान्येव वेदवाक्यानि मन्वन्तरचतुर्युगान्तरेषु सम्प्रदायाभ्यासाविच्छेदेन प्रवर्तन्ते, तदपेक्षया लौकिकाः शब्दान् प्रयुञ्जते नित्या वेदा इति, यथा नित्याः पर्वताः नित्याः सरित इति,

न्यायवार्त्तिकतात्पर्यटीका

तदेवमेकदेशिमतमपाकृत्य स्वमतमाह—तस्मादिति। स च संसारानादित्वादिति। यद्यपि वर्णपदवाक्यानि प्रत्युच्चारणमन्यानि तथाऽपि गत्वादिसामान्यावच्छिन्नानां गकारादीनां तत्समूहानां च वाक्यानां शक्यो गोत्वादिसामान्यावच्छिन्नाभिः शाबलेयादिव्यक्तिभिरेव सङ्केतो

(१) 'वर्णा (वेदा)' इत्येवं क-पुस्तके मुद्रितम्।

न्यायवार्त्तिकम्

तन्मन्वादिवाक्येषु समानम्। कुत एवं सम्प्रदायाविच्छेदात् नित्यत्वं न पुनर्नित्यत्वादेव? अनित्यत्वोक्तप्रमाणाविघातात्—यानि मयाऽनित्यत्वे प्रमाणान्युपन्यस्तानि तानि न विहन्यन्ते, तेषामविघातादनित्यत्वे सति सम्प्रदायाविच्छेदात् नित्यत्वोपचार इति ॥ ६८ ॥

इति—औद्द्योतकरे न्यायवार्त्तिके द्वितीयस्या-
ध्यायस्याऽऽद्यमाह्निकम् ॥

न्यायवार्त्तिकतात्पर्यटीका

ग्रहीतुमिति भावः। मन्वन्तरेति। महाप्रलये त्वीश्वरेण वेदान् प्रणीय सृष्ट्यादौ संप्रदायः प्रवर्त्यत एवेति भावः। शेषं भाष्यं वार्त्तिकं चातिरोहितार्थमिति ॥ ६८ ॥

इति मिश्रश्रीवाचस्पतिविरचितायां न्यायवार्त्तिकतात्पर्यटीकायां
द्वितीयाध्यायस्याऽऽद्यमाह्निकम् ॥

वृत्तिः

आप्तं गृहीतं प्रामाण्यं यत्र स वेदस्तादृशेन वेदत्वेन प्रामाण्यमनुमेयमिति केचित् ॥ ६८ ॥

समाप्तं शब्दविशेषपरीक्षाप्रकरणम् ॥ ८ ॥

इति श्रीविश्वनाथन्यायपञ्चाननभट्टाचार्यकृतायां न्यायसूत्रवृत्तौ
विभागपरीक्षानिरपेक्षसाङ्गप्रमाणपरीक्षणं नाम
द्वितीयाध्यायस्याऽऽद्यमाह्निकम्।

अथ द्वितीयाध्यायस्य द्वितीयमाह्निकम्

न्यायभाष्यम्

अयथार्थः प्रमाणोद्देश इति मत्वाह—

(सू०)—न चतुष्ट्वमैतिह्यार्थापत्तिसम्भवाभावप्रामाण्यात् ॥ १ ॥

न चत्वार्येव प्रमाणानि। किं तर्हि? ऐतिह्यमर्थापत्तिः सम्भवोऽभाव इत्येतान्यपि

न्यायवार्त्तिकम्

प्रत्यक्षानुमानोपमानशब्दाः प्रमाणानीति सूत्रम्। तस्याऽऽक्षेपः—

न चतुष्ट्वमैतिह्यार्थापत्तिसम्भवाभावप्रामाण्यात्। अस्यार्थः—अयथार्थोऽयं प्रमाणोद्देश इति। 'न चत्वार्येव प्रमाणानि' ऐतिह्यार्थापत्तिसम्भवाभावा अपि प्रमाणानीति। संशयव्युदासार्थं वा ऐतिह्यादय उपदिश्य प्रतिषिध्यन्ते—प्रत्यक्षादीनि च प्रमाणानि ऐतिह्यादीनि (क)चेति (१)केचित् मन्यन्ते, तत्र श्रोतुः संशयः स्यात् किं विद्यमाना ऐतिह्यादयो नोक्ता अथाविद्यमाना इति। विधिन्यूनतापरिहारार्थं वा प्रकरणम्। विद्यमानान्यैतिह्यादीनि नोक्ता-

न्यायवार्त्तिकतात्पर्यटीका

अयथार्थ इति भाष्यम्। प्रमाणानां विभागोद्देशो यः सोऽयथार्थः। तदेतद्वार्त्तिककारो व्याचष्टे—प्रत्यक्षेति।

न च—ण्यात् (सू० १)॥ एवं विभ्रान्तस्याऽऽक्षेप इति भाष्यमतेन सूत्रं व्याख्याय प्रकारान्तरेणापि व्याचष्टे—संशयव्युदासार्थं वा प्रकरणम्, सूत्रं तु संशयार्थम्। 'न चतुष्ट्व' निश्चेतुं शक्यम्। कस्मात्? ऐतिह्यार्थापत्तिसंभवाभावप्रामाण्यात् परैरभ्युपगतादस्माकं संशयादिति सूत्रार्थः। तात्पर्यान्तरमाह—विधीति। विभागोद्देशोऽधिकनिषेधपर इति पूर्वपक्षे अयथार्थः प्रमाणोद्देश इति पूर्वं व्याख्यातम्, संप्रति तु प्रत्यक्षादिविधिपरोऽसावारम्भः प्रत्यक्षानुमानोपमानशब्दाः

वृत्तिः

अथ विभागसापेक्षप्रमाणपरीक्षणम्, तदेव चाऽऽह्निकार्थः। चत्वारि चात्र प्रकरणानि, तत्राऽऽदौ चतुष्ट्वपरीक्षाप्रकरणम्। अन्यानि च तत्र तत्र वक्ष्यन्ते। तत्राऽऽक्षेपसूत्रम्—

(न चतुष्ट्वमिति)

प्रमाणानां न चतुष्ट्वम्। प्रमाणत्वं नोक्तचतुष्कान्यतमत्वव्याप्यम् उक्तान्यवृत्तित्वात्।

---

(१) 'केचि'दिति ख-पुस्तके नास्ति।

(क) 'च'कारद्वयमुभयोः पक्षयोस्तुल्यतां द्योतयति।

न्यायभाष्यम्

प्रमाणानि, (१)तानि कस्मान्नोक्तानि। इतिहोचुरित्यनिर्दिष्टप्रवक्तृकं प्रवाद-पारम्पर्यम् (क)ऐतिह्यम्। अर्थादापत्तिरर्थापत्तिः। आपत्तिः प्राप्तिः प्रसङ्गः। (२)यत्राभिधीयमानेऽर्थे योऽन्योऽर्थः प्रसज्यते सोऽर्थापत्तिः। यथा मेघेष्वसत्सु वृष्टिर्न

न्यायवार्त्तिकम्

नीति विधिवाक्यहीनं (३) शास्त्रं स्यात्। दोषवतां दोषानभिधानाद् दोषहीनं वा शास्त्रं स्यात् इत्यत उद्दिश्य निवर्त्त्यन्ते—दोषवन्त ऐतिह्यादय इत्यतो नाभिधीयन्त इति। दोषस्तर्हि वक्तव्यः, अथ दोषो नाभिधीयते दोषहीनं शास्त्रमिति तत्परिहारार्थं प्रकरणमुपक्षिप्यते। प्रत्यक्षादिष्वन्तर्भावप्रदर्शनार्थं वा—ऐतिह्यादीनि प्रत्यक्षादिष्वन्तर्भावयितुं ये यत्रान्तर्भवन्ति तत्र तेषां प्रदर्शनार्थं प्रकरणमिति। सिद्धत्वादनारम्भः—नन्वयमर्थश्चत्वार्येव प्रमाणानीत्यस्मि-न्नेव विभागोद्देशसूत्रे सिद्ध इति सिद्धत्वात् पुनरनारम्भ इति? न, अवधारणप्रयोजनस्य (ख)इतः सिद्धेः—येन न्यायेन चत्वार्येव प्रमाणानीत्येतदवस्थाप्यते स न्याय इह प्रकरणे वर्ण्यत इति तस्मादारभ्यमेवेति।

किमिदमैतिह्यं नाम? अनिर्दिष्टवक्तृकं प्रवादपारम्पर्यम्, 'इतिहोचुः' वृद्धाः कथयन्तीति। अर्थादापत्तिरर्थापत्तिः—आपत्तिः—प्राप्तिः प्रसङ्गः। यस्मिन् वाक्ये विधीयमानादर्थादन्योऽर्थ

न्यायवार्त्तिकतात्पर्यटीका

प्रमाणानीति, अधिकनिषेधस्त्वर्थलभ्य इति पक्षमभिप्रेत्योक्तमित्यपौनरुक्त्यम्। तात्पर्यान्तरमाह—दोषवतामिति। तात्पर्यान्तरमाह—प्रत्यक्षादिष्विति। अन्तर्भावपरात् प्रकरणात् अर्थाद्विभागो-द्देशस्य यथार्थता सिध्यतीत्यर्थः। देशयति—सिद्धत्वादिति। न हि यावत्सूच्यते सूत्रकारेण तावदवश्यमुपपादनीयं भाष्यकारादिभिरपि तदुपपादनसिद्धेरिति भावः। परिहरति—न, अवधारणप्रयोजनस्य प्रमाणान्तरनिरासस्येति। यत्सूचनमात्रादनुक्तमपि लभ्यते तत्सूत्रकारेण नोच्यते। यच्च सूचितमपि तिरोहितमिव तत् सूत्रकारेणोद्घाटनीयमेव। न हि

वृत्तिः

तत्रान्यवृत्तित्वं व्युत्पादयति—ऐतिह्येत्यादि। ऐतिह्यम् इतिहोचुरित्यनेन प्रकारेण यदुच्यते, तद्धि अनिर्दिष्टप्रवक्तृकं परम्परागतं वाक्यम्, यथा इह वटे यक्ष इत्यादि। तस्य

---

(१) 'तानि कस्मान्नोक्तानि' इति नास्ति फ०। (२) 'यथाऽभिधीयमाने' इति ग०।

(३) 'शब्दशास्त्रम्' इति ख-पुस्तकपाठः।

(क) 'पारम्पर्योपदेशे स्यादैतिह्यमितिहाव्ययमि'त्यमरः। 'इतिहेति निपातसमुदायः प्रवादवाची। इतिहेव ऐतिह्यं प्रवादः। 'अनन्तावसथेतिहभेषजाञ्ञ्यः' इति स्वार्थे ञ्यः। अस्यानिर्दिष्टेत्यादि लक्षणम्। इतिहोचुरिति स्वरूपप्रदर्शनम्'' इति तार्किकरक्षाटीकायां मल्लिनाथः।

(ख) 'इतश्च' इति ख-पुस्तकपाठः, तत्र 'च'कारोऽवधारणे बोध्यः।

न्यायभाष्यम्

भवतीति। किमत्र प्रसज्यते ? सत्सु भवतीति। सम्भवो नामाविनाभाविनोऽर्थस्य सत्ताग्रहणादन्यस्य सत्ताग्रहणम्। यथा (क)द्रोणस्य सत्ताग्रहणादाढकस्य सत्ताग्रहणम्, आढकस्य (१)सत्ताग्रहणात् प्रस्थस्येति। अभावो (२, ख)विरोध्यभूतं भूतस्य, अविद्यमानं (३)वर्षकर्म विद्यमानस्य वाय्वभ्रसंयोगस्य प्रतिपादकम्, विधारके हि वाय्वभ्रसंयोगे गुरुत्वादपां पतनकर्म न (ग)भवतीति ॥ १ ॥

न्यायवार्त्तिकम्

आपद्यते साऽर्थापत्तिः—यथाऽसत्सु मेघेषु वृष्टिर्न भवतीति। किमत्रार्थादापद्यते ? सत्सु भवतीति। सम्भवो नामाविनाभाववर्त्तिनोऽर्थस्य (घ)ग्रहणादन्यसत्ताविज्ञानम्—यथा द्रोणस्य ग्रहणादाढकस्य सत्तेति। अभावो नाम प्रत्यनीकस्य ग्रहणात् तद्विरोधिनो ग्रहणम्—यथा विधारके वाय्वभ्रसंयोगे सति गुरुत्वप्रतिबन्धादपां पातः प्रतिषिद्धः, तदपामपातेन विरोधिनं वाय्वभ्रसंयोगं प्रतिपद्यते इति ॥ १ ॥

न्यायवार्त्तिकतात्पर्यटीका

तत्रास्ति निश्चयोऽस्मदभिमतमेव वदन्ति भाष्यकारादयो मान्यदिति भावः। किमत्रार्थादापद्यत इति प्रश्नः। उत्तरम्—सत्सु भवतीति। प्रत्यनीकस्य ग्रहणादिति। अपां पातप्रत्यनीकस्य उपात्तस्य ग्रहणात् तद्विरोधिनः पातविरोधिनः वाय्वभ्रसंयोगस्य 'ग्रहणम्', तदिदं किलाभावाख्यं प्रमाणम्, प्रमीयते मेघोदयेऽपि वत्तोयपाताभावेन वाय्वभ्रसंयोग इति ॥ १ ॥

वृत्तिः

चाऽऽप्तोक्तत्वानिश्चयान्न शब्देऽन्तर्भाव इति भावः। अर्थापत्तिः अनुपपद्यमानेनार्थेनोपपादककल्पनम्, यथा वृष्ट्या मेघज्ञानम्, वृष्ट्या सह मेघस्य वैयधिकरण्यान्न व्याप्तिरिति नानुमानेऽन्तर्भावः। सम्भवो भूयःसहचाराधीनज्ञानम्, यथा सम्भवति ब्राह्मणे विद्या, सम्भवति सहस्रे शतम्, अत्र च व्याप्तिर्नापेक्षितेत्याशयः। अभावस्तु विरोध्यभावज्ञानाधीनविरोध्यन्तरकल्पनम्, यथा नकुलाभावज्ञानेन नकुलविरोधिनो व्यालस्य कल्पनम्, अत्रापि व्याप्तिर्नापेक्षितेत्याशयः।

अथ वा कारणाभावादिना कार्याभावादिज्ञानमभावः, भावनिष्ठव्याप्तिरेवानुमानाङ्गमित्याशयः ॥ १ ॥

---

(१) 'ग्रहणात्' इति ल-ग-भा०। (२) 'विरोधी अभूतं भूतस्य' इति ज-ग-ल-भा०। (३) 'च यत् कर्म' इति वि०।

(क) "अष्टमुष्टिर्भवेत् कुञ्चिः कुञ्चयोऽष्टौ तु पुष्कलम्। पुष्कलानि च चत्वारि आढकः परिकीर्त्तितः ॥ चतुराढको भवेद् द्रोण इत्येतन्मानलक्षणम् ॥" अन्यच्च—"चत्वारः कुडवाः प्रस्थश्चतुःप्रस्थमथाऽऽढकम्। अष्टाढको भवेद् द्रोणः—" इति। (ख) 'विरोध्यभूतं भूतस्य' इति वैशेषिकसूत्रम् (३।१।११)। (ग) 'अपां संयोगाभावे गुरुत्वात् पतनम्' इति काणादसूत्रम् (अ० ५, आ० २, सूत्र० ३), अस्य व्यतिरेकोऽत्र प्रदर्शित इति। (घ) भाष्ये सत्ताग्रहणादिति विशेषः।

न्यायभाष्यम्

सत्यम् एतानि प्रमाणानि, न तु प्रमाणान्तराणि। प्रमाणान्तरं च मन्यमानेन प्रतिषेध उच्यते। सोऽयम्—

(सू०)—शब्द ऐतिह्यानर्थान्तरभावादनुमानेऽर्थापत्तिसम्भवाभावानर्थान्तरभावाच्चाप्रतिषेधः (क) ॥ २ ॥

अनुपपन्नः प्रतिषेधः। कथम्? "आप्तोपदेशः शब्दः" इति। न च शब्दलक्षणमैतिह्याद् व्यावर्तते; सोऽयं भेदः सामान्यात् संगृह्यत इति। प्रत्यक्षेणाप्रत्यक्षस्य

न्यायवार्त्तिकम्

तान्येतान्यैतिह्यादीनि एवम्भूतानीति लक्षणाभेदादेतेष्वेवान्तर्भवन्ति इति न पृथगुच्यन्ते। विषयाभावाच्च—(ख)न प्रत्यक्षादिप्रमाणव्यतिरेकेण विषया ऐतिह्यादीनां सम्भवन्त्यतश्च न प्रमाणान्तराणि। अथ प्रयोजनभेदाद् भिद्यन्त इति मन्यसे, एवं तर्ह्यष्टत्वं निवर्तते—यदभ्युपगतं प्रमाणाष्टत्वं तन्निवर्तते प्रयोजनभेदात् प्रमाणभेदमभ्युपगच्छत इति। एककरणश्च प्रयोजनभेदो दृष्ट इत्यनेकान्तः। यथैकं चक्षुरनेकनीलादिभिन्नरूपग्रहणप्रयोजनमिति। इन्द्रियानेकत्वं वा—अथ प्रयोजनभेदाद्भेदं मन्यसे, एकमिन्द्रियमनेकं प्राप्नोति। अथ विषयसामान्याव्यतिरेकादेकमिन्द्रियम्? न युक्तस्तर्हि प्रतिषेधः 'न चतुष्ट्वमैतिह्यार्थापत्तिसम्भवाभावप्रामाण्या'दिति। यद्येतानि प्रमाणानि न प्रमाणान्तराणि क्व तर्ह्यन्तर्भवन्तीति वक्तव्यम्। अन्तर्भावप्रदर्शनार्थं सूत्रम्—शब्द ऐतिह्यानर्थान्तरभावादनुमानेऽर्थापत्तिसम्भवाभावानर्थान्तरभावाच्चाप्रतिषेधः।

न्यायवार्त्तिकतात्पर्यटीका

सिद्धान्तमाह—तान्येतानीति। ननु भविष्यत्यसौ विषय उक्तलक्षणानामगोचरः प्रमाणानाम्, प्रवर्त्स्यन्ति च तत्रैतिह्यादीनि प्रमाणान्तराणीत्यत आह—विषयाभावाच्चेति। चोदयति—अथ प्रयोजनभेदादिति। तदेतदतिप्रसङ्गापादनेन दूषयति—एवं तर्ह्यष्टत्वमिति। न तावत् सन्ति तादृशः प्रयोजनसामान्यविशेषाः यैः प्रयोजनवन्ति प्रमाणानि परस्परतो व्यावर्त्तयेयुः, अपि तु भेदमात्राद्व्यावर्त्तयन्तीति वक्तव्यम्। तथा चातिप्रसङ्गेनाष्टत्वसंख्याव्यावृत्तिरित्यर्थः। अथ विषयसामान्येति। रूपत्वादिकं विषयसामान्यं तस्य स्वस्वव्यक्तिष्वव्यतिरेक एकत्वं तस्मादित्यर्थः। निराकरोति—न युक्तस्तर्हीति। निरुपाधानस्वरूपमेकं व्यापकत्वान्वितत्वसंज्ञित्वोपधानाश्रय इति चत्वारो विषयसामान्यविशेषा इति चतुष्ट्वप्रतिषेधो (ग)न युक्त इत्यर्थः। यद्येतानीति। यद्यैतिह्यादीनि प्रमाणानि क्व प्रत्यक्षादौ किमैतिह्याद्यन्तर्भवतीति वक्तव्यम्।

(क) वरदराजस्तु अभावस्य प्रत्यक्षादिष्वपि यथासम्भवमन्तर्भावो महर्षिसम्मत इति मन्यते। तार्किकरक्षा ९७ पत्रं द्रष्टव्यम्।

(ख) अत्र 'न प्रत्यक्षादिप्रमाणविषयव्यतिरेकेण' इति युक्तम्। मुद्रणदोषाद् 'विषय'शब्दः स्खलित इति सम्भाव्यते। (ग) क-ख-तात्पर्ययोः 'न युक्तमित्यर्थः' इति पाठः प्रामादिकः।

न्यायभाष्यम्

(१)सम्बद्धस्य प्रतिपत्तिरनुमानम्। तथा चार्थापत्तिसम्भवाभावाः। वाक्यार्थसम्प्रत्ययेनानभिहितस्यार्थस्य प्रत्यनीकभावाद् ग्रहणमर्थापत्तिरनुमानमेव। अविनाभाव-

न्यायवार्त्तिकम्

शब्द ऐतिह्यमन्तर्भवति समानलक्षणत्वान्न शब्दलक्षणमैतिह्यान्निवर्त्तते सोऽयं भेदः सामान्येन संगृहीतः। अनुमानेऽर्थापत्तिसम्भवाभावानामन्तर्भावः समानलक्षणत्वात्। कथमर्थापत्तिरनुमानेन संगृह्यते ? द्वयोरेकतरप्रतिषेधस्य द्वितीयाभ्यनुज्ञाविषयत्वात्—यत्र यत्र द्वयोर्वस्तुनोरेकतरद् वस्तु प्रतिषिध्यते तत्र तत्र द्वितीयाभ्यनुज्ञा दृष्टा यथा दिवा न भुङ्क्ते इत्यभिधानाद् रात्रौ भुङ्क्ते इति गम्यते।

एके तु ब्रुवते—नेयमर्थापत्तिर्दिवा न भुङ्क्ते इति। अत्र (२)किलावधारणद्वयं दिवा न भुङ्क्ते

न्यायवार्त्तिकतात्पर्यटीका

अप्रमाणस्य प्रमाणान्तर्भावो न भवतीति प्रमाणानीत्युक्तम्। यत् खल्वनिर्दिष्टप्रवक्तृकं प्रवादपारम्पर्यमैतिह्यं तस्य चेदाप्तः कर्त्ता नावधारितः ततस्तत्प्रमाणमेव न भवतीति यदीत्युक्तम्।

शब्द—धः (सू० २)॥ अथाक्षरपरम्परेत्यवगतं (क)तत्राऽऽप्तोपदेश इति शब्दलक्षणान्नातिवर्त्तते तदिदमुक्तम्—समानलक्षणत्वादिति। पृच्छति—कथमर्थापत्तिरिति, असत्सु मेघेषु वृष्टिर्न भवति सत्सु भवतीति सेयमर्थापत्तिः कथमनुमानेन संगृह्यते। उत्तरम्—द्वयोरिति। अत्रोदाहरणमाह—यत्र यत्रेति।

उदाहरणस्य साध्यविकलत्वमुदाहरति—एके त्विति। यदि दिवैव न भुङ्क्त इति कालविशेषप्रतिषेधो निश्चीयते ततो रात्रौ भुङ्क्त इति कालान्तरविधानं गम्यते न तु कालविशेषनिषेध-

वृत्तिः

सिद्धान्तसूत्रम्—(शब्द इति)

न प्रमाणचतुष्ट्वस्य प्रतिषेधः शब्दे ऐतिह्यस्यानर्थान्तरभावाद् अन्तर्भावात् सामान्यत आप्तोक्तत्वज्ञानसम्भवात्। वस्तुत आप्तोक्तत्वज्ञानं न शाब्दे कारणम्, किं त्वाकाङ्क्षादिज्ञानम्, योग्यताप्रमाधीना च शाब्दप्रमेति। अर्थापत्त्यादेरनुमानेऽन्तर्भावः। उप-

(१) 'सम्बन्धस्य' इति टि०। (२) 'किं त्ववधा-' इति ख०।

(क) 'तत्राऽऽप्तोपदेश इति शब्दलक्षणं नातिवर्त्तते' इति पाठः समीचीनतया प्रतिभाति।

न्यायभाष्यम्

वृत्त्या च सम्बद्धयोः समुदायसमुदायिनोः समुदायेनेतरस्य ग्रहणं सम्भवः, तदप्यनुमानमेव। अस्मिन् सतीदं नोपपद्यत इति विरोधित्वे प्रसिद्धे कार्यानुत्पत्त्या कारणस्य प्रतिबन्धकमनुमीयते। सोऽयं यथार्थ एव प्रमाणोद्देश इति ॥ २ ॥

न्यायवार्त्तिकम्

एव, दिवैव न भुङ्क्ते इति च, उभयप्राप्तौ न वक्तव्यं रात्रौ भुङ्क्ते इति। एतत् तु न सम्यगसम्भवात्—दिवा न भुङ्क्ते एव इत्ययमर्थोऽसम्भवेन निराकृतः। (१)न हि कश्चिद् दिवा भुङ्क्ते एव(१*) भुञ्जानोऽपि तावन्न भुङ्क्त एव किं पुनरभुञ्जान इति। तस्मादसम्भवेनार्थस्य निराकृतत्वात् कालप्रतिषेधोऽनेन दिवा न भुङ्क्त इति। अन्यथाऽनर्थकं स्यात्(२)क्रियान्तरप्रतिषेधनिवृत्तेरसम्भवेन निराकृतत्वात् कालप्रतिषेधस्यानभ्युपगमात् अनर्थकं वाक्यम्। भवत्वनर्थकं किं नो बाध्यते? यदभ्युपगतं तन्निवर्तते। किं चाभ्युपगतम्? क्रियान्तरप्रतिषेधः (३)न कालप्रतिषेध इति। (४)न चेदमनर्थकम्। तस्माद् द्वयोरेकतरप्रतिषेधे द्वितीयाभ्यनुज्ञानादनुमान-

न्यायवार्त्तिकतात्पर्यटीका

निश्चयः,(क)अपि तु दिवा भुङ्क्त एव नेति भोजनादिक्रियाया याऽन्या आसनादिक्रिया तन्निषेधनिषेधेन रात्रिभोजनाक्षेपादिति। दिवैव न भुङ्क्त इत्यस्यैकस्य प्राप्तौ भवेद्रात्रौ भुङ्क्ते इति क्रियान्तरनिषेधाः, निषेधस्य च प्राप्तौ न वक्तव्यं रात्रौ भुङ्क्त इत्यर्थः। तदेतद् दूषयति—एतत्तु न सम्यगिति। (ख) प्राप्तिपूर्वका हि प्रतिषेधा भवन्ति। न चेह भुञ्जानस्याभुञ्जानस्य वा क्रियान्तराभावः प्रसक्तो येनासौ प्रतिषिध्यते भुङ्क्त एव नेति। न हि कश्चिद् (ग) भुङ्क्त एव (घ) न भुञ्जानो न वीक्षते, अन्ततोऽस्त्यादेरपि क्रियाया भावात्। व्यापृतः कदाचिन्न व्यापारान्तरं कुर्यादपि, किं पुनरव्यापृतः; स हि व्यापारान्तराण्यव्यासक्तः करोत्येवेत्यर्थः। उपसंहरति—तस्मादिति। कालप्रतिषेधः दिवैव भुङ्क्त इत्यस्य प्रतिषेध इत्यर्थः। क्रियान्तरप्रतिषेधनिवृत्तेरसंभवेन निराकृतत्वाद् अप्राप्तत्वान्न प्रतिषेध इति भावः। क्रियान्तरप्रतिषेध इति,

---

(१) 'न कश्चिद् दिवा भुङ्क्त एव' इति ख०। 'न हि कश्चिद् दिवा न भुङ्क्ते एव' इति क०। (२) 'क्रियान्तरनिवृत्तेरसम्भवेन' इति ख०। (३) 'यत्र कालप्रतिषेधः' इति ख०। (४) 'न चेदनर्थकम्' इति क०।

(क) अत्र 'अपि त्वि'ति दर्शनाद् 'गम्यते' इत्यत्रान्वययोग्यं प्रथमान्तपदमाकाङ्क्षितम्। तथाच "अपि तु 'दिवा भुङ्क्ते एव ने'ति भोजनादिक्रियाया याऽन्या आसनादिक्रिया तन्निषेधनिषेधः, तेन रात्रिभोजनाक्षेपादिति, 'दिवैव न भुङ्क्त' इत्यस्यैकस्य प्राप्तौ भवेद् रात्रौ भुङ्क्ते इति, क्रियान्तरनिषेधनिषेधस्य च प्राप्तौ न वक्तव्यं रात्रौ भुङ्क्त इत्यर्थः" इति पाठो युक्त इत्यनुमीयते। अत्र भोजनादीत्यत्र आदिपदं कुत आगतमिति चिन्तनीयम्। (ख) 'प्राप्तिपूर्विका' इत्यादर्शपुस्तकयोः पाठः। (ग) अत्र वार्त्तिकमतं 'दिवे'ति परित्यक्तम्। (घ) न भुञ्जान इति, भुञ्जानो न वीक्षत इति नेत्यर्थः।

न्यायभाष्यम्

सत्यमेतानि प्रमाणानि न तु प्रमाणान्तराणीत्युक्तम्, अत्रार्थापत्तेः प्रमाणभावाभ्यनुज्ञा नोपपद्यते। तथा हीयम्—

(सू०)—अर्थापत्तिरप्रमाणमनैकान्तिकत्वात्॥ ३ ॥

असत्सु मेघेषु वृष्टिर्न भवतीति सत्सु भवतीत्येतदर्थादापद्यते, सत्स्वपि चैकदा न भवति। सेयमर्थापत्तिरप्रमाणमिति ॥ ३ ॥

न्यायवार्त्तिकम्

मेवार्थापत्तिः। कतमदेवानुमानम्? सामान्यतोदृष्टम्। एतेन सम्भवाभावौ व्याख्यातौ। सम्भवोऽनुमानम्, अभावोऽप्यनुमानमेव। तच्च वर्णितम्। अनयोरपि सामान्यतोदृष्ट एवान्तर्भाव इति। तदेवमन्तर्भावात् (१) पृथगनुपदेश इति ॥ २ ॥

सत्यमेतानि प्रमाणानि न तु प्रमाणान्तराणीत्युक्तम्, तत्रार्थापत्तेः प्रमाणभावाभ्यनुज्ञा नोपपद्यते। तथाहि इयम्—

अर्थापत्तिरप्रमाणमनैकान्तिकत्वात्। येयं भवताऽर्थापत्तिः प्रमाणत्वेन प्रतिपाद्यते सा न प्रमाणम्, अप्रमाणमिति नार्थस्यैकदाऽपि प्रतिपादिका। यथा मेघेष्वसत्सु वृष्टिर्न भवतीति अर्थादापन्नं सत्सु भवतीति, सत्स्वप्येकदा न भवतीति अनैकान्तिकी। अर्थापत्तिमात्रस्य पक्षीकरणेऽनैकान्तिकत्वमव्यापकम्—यदि तावदर्थापत्तिमात्रं पक्षयसि ततोऽर्थापत्तेरनैकान्तिकत्वमशक्यम्। अथानैकान्तिकी या सा पक्षीक्रियते, तदाऽभ्युपगमः, वयमपि ब्रूमोऽनैकान्तिक्यप्रमाणमिति।

न्यायवार्त्तिकतात्पर्यटीका

अन्तरशब्दो विशेषवचनः, तेन भोजनक्रियाया यदन्तरं विशेषः क्रियान्तररहितत्वं भुङ्क्त एव तस्य प्रतिषेध इत्यर्थः। सामान्यतो दृष्टमिति, यत्र न कार्यकारणयोर्गम्यगमकभावः, तत्सामान्यतोदृष्टमिति ॥ २ ॥

सत्यमेतानीति भाष्यम्। तस्यार्थः—सत्यमेतान्यैतिह्यादीनि प्रमाणानि न तु प्रमाणान्तरं नैव प्रमाणान्तरमनुमानादिभ्य इत्युक्तम्; न तु प्रमाणत्वमेवामीषां न मृष्यामह इति भावः।

अर्था—त्वात् (सू० ३) ॥ वार्त्तिकम् अर्थापत्तिमात्रस्येति। दिवा न भुङ्क्ते इत्यादेरर्थापत्तेरैकान्तिकत्वादिति ॥ ३ ॥

वृत्तिः

पादकक्ल्पनं हि विना व्याप्तिज्ञानं न सम्भवति वृष्टित्वादावपि मेघजन्यत्वव्याप्तिरस्त्येव। सम्भवोऽपि व्याप्तिमूलकत्वादनुमानम्, व्याप्त्यनपेक्षित्वे च व्यभिचारादप्रमाणम्। एवमभावो व्याप्तिसापेक्षोऽनुमानम्, अभावनिष्ठव्याप्तेश्चानुमानाङ्गत्वे न विरोध इति भावः ॥ २ ॥

---

(१) 'पृथगनुद्देश इति मन्यसे तानि प्रमाणानि' इति ख-पुस्तके मुद्रितम्।

न्यायभाष्यम्

नानैकान्तिकत्वमर्थापत्तेः—

(सू०)—अनर्थापत्तावर्थापत्त्यभिमानात् ॥ ४ ॥

असति कारणे कार्यं नोत्पद्यत इति वाक्यात् प्रत्यनीकभूतोऽर्थः सति कारणे कार्यमुत्पद्यते इत्यर्थादापद्यते। अभावस्य हि (१)भावः प्रत्यनीक इति। सोऽयं कार्योत्पादः सति कारणेऽर्थादापद्यमानो न कारणस्य सत्तां व्यभिचरति। न खल्वसति कारणे कार्यमुत्पद्यते तस्मान्नानैकान्तिकी।

यत्तु सति कारणे निमित्तप्रतिबन्धात् कार्यं नोत्पद्यते इति, (२)कारणधर्मोऽसौ न त्वर्थापत्तेः प्रमेयम्। किं तर्ह्यस्याः प्रमेयम्? सति कारणे कार्यमुत्पद्यते इति(२*) योऽसौ कार्योत्पादः कारणस्य सत्तां न व्यभिचरति तदस्याः प्रमेयम्। एवं तु

न्यायवार्त्तिकम्

हेतुश्च नास्ति हेतोः प्रतिज्ञाविशेषणत्वात्—यदनैकान्तिकं तदप्रमाणमिति प्रतिज्ञा तत्र हेतुर्नास्ति, न चायमर्थः साध्य इति हेत्वभावः। व्याघातश्चाभ्युपगमाद् याऽनैकान्तिक्यर्थापत्तिः सा प्रमाणं न भवतीति ब्रुवता ऐकान्तिकी सा प्रमाणमित्यभ्युपगतं भवति। अनर्थकं चेदमभिधानम्—याऽनैकान्तिक्यर्थापत्तिः सा न प्रमाणमिति ॥ ३ ॥

यामपि भवानर्थापत्तिं मन्यते साऽपि नानैकान्तिकी—

अनर्थापत्तावर्थापत्त्यभिमानात्। नेयमर्थापत्तिरनैकान्तिकी, अर्थापत्तिश्च सत्सु मेघेषु वृष्टिर्भवतीति, सेयमनैकान्तिकी कथम्—न सत्सु भवत्येवेति अपि तु सत्सु भवतीति, यत्तु सत्सु मेघेषु वृष्टिर्न भवतीति कारणप्रतिबन्धोऽसौ, न तदर्थापत्तेः प्रमेयम्; किं त्वस्याः प्रमेयं कारणे सति कार्यं

न्यायवार्त्तिकतात्पर्यटीका

स्वमतेन दूषयित्वा सौत्रं दूषणमाह—यामपि भवानिति।

अन—नात् (सू० ४) ॥ न सत्सु मेघेषु वृष्टिर्भवत्येवेत्यर्थः, येन व्यभिचारो दृश्येत, अपि तु असत्सु न भवतीति; तथा च न व्यभिचार इत्यर्थः ॥ ४ ॥

वृत्तिः

सत्यर्थापत्तेः प्रामाण्ये बहिर्भावान्तर्भावचिन्ता, तदेव तु नास्तीति तटस्थः शङ्कते—(अर्थापत्तिरिति)

असति मेघे वृष्टिर्न भवतीत्यनेन सति मेघे वृष्टिर्भवतीत्यर्थापत्तिविषयः, तत्र च न प्रामाण्यं सत्यपि मेघे वृष्ट्यभावाद् अनैकान्तिकत्वात् ॥ ३ ॥

---

(१) 'वाक्यात् प्रत्यनीकः' इति ग। (२) अयमंशः टि-पुस्तके नास्ति।

न्यायभाष्यम्

सत्यनर्थापत्तावर्थापत्त्यभिमानं कृत्वा प्रतिषेध उच्यते इति। दृष्टश्च कारणधर्मो न शक्यः प्रत्याख्यातुमिति ॥ ४ ॥

(सू०)—प्रतिषेधाप्रामाण्यं चानैकान्तिकत्वात् ॥ ५ ॥

अर्थापत्तिर्न प्रमाणम् अनैकान्तिकत्वादिति वाक्यं प्रतिषेधः। तेनानेनार्थापत्तेः प्रमाणत्वं प्रतिषिध्यते न सद्भावः, एवमनैकान्तिको भवति। अनैकान्तिकत्वादप्रमाणेनानेन न कश्चिदर्थः प्रतिषिध्यते इति ॥ ५ ॥

न्यायवार्त्तिकम्

भवतीति, सेयमनैकान्तिकी कथं स्यात्। यद्यसत्यपि कारणे कार्यमुत्पद्यते (क) तत्तु न दृष्टमिति न कदाचिदनैकान्तिकत्वम् ॥ ४ ॥

प्रतिषेधाप्रामाण्यं चानैकान्तिकत्वात्। योऽयं भवता प्रतिषेधः क्रियते अर्थापत्तिर्न प्रमाणम् अनैकान्तिकत्वात्, अयमप्यनैकान्तिकः सत्ताऽप्रतिषेधात्—नानेन प्रतिषेधेनार्थापत्तेः सत्ता प्रति-

न्यायवार्त्तिकतात्पर्यटीका

यदि तु यत्र विषयेऽर्थापत्तिरैकान्तिकी ततो विषयान्तरं कल्पयित्वाऽनैकान्तिकं देश्येत ततो यः प्रतिषेधविषयः प्रामाण्यमर्थापत्तेः ततो विषयान्तरमर्थापत्तेः सत्त्वं प्रतिषेधविषयं कल्पयित्वा प्रतिषेधस्याप्रामाण्यं शक्नुमो वक्तुम्। तथा च प्रतिषेधाप्रामाण्यान्नार्थापत्तेरप्रामाण्यमित्याह—

प्रति—त्वात् (सू० ५) ॥ एवं ह्यैकान्तिकः प्रतिषेधः स्याद् यद्यर्थापत्तेः प्रामाण्यं सत्तां च प्रतिषेधति, न तु सत्त्वं प्रतिषेद्धुमर्हत्यनैकान्तिकत्वात्। न हि यदनैकान्तिकं तत् सर्वं नास्ति

वृत्तिः

समाधत्ते—(अनर्थेति)

अर्थापत्तेर्नानैकान्तिकत्वमिति शेषः। असत्सु मेघेषु न वृष्टिरित्यनेन सति मेघे वृष्टिरिति, तत्र च वृष्ट्या मेघज्ञानमभिमतं यत्र च मेघेन वृष्टिज्ञानं तत्रानर्थापत्तावर्थापत्तिभ्रमः। न चैतावता प्रामाण्यविरोधः, व्याप्त्यादिभ्रमाद् भ्रमानुमितिदर्शनाद् अनुमानस्याप्यप्रामाण्यापत्तेः।

'नानैकान्तिकत्वमर्थापत्तेः' इति भाष्यस्यावतरणिकां सूत्रादौ केचिल्लिखन्ति ॥ ४ ॥

प्रतिबन्धिमप्याह—(प्रतिषेधेति)

त्वदुक्तरीत्या त्वदीयप्रतिषेधस्याप्यप्रामाण्यं स्यादनैकान्तिकत्वाद् यत्र कुत्रचिदनैकान्तिकत्वस्य प्रतिषेधासाधकत्वाद् अनैकान्तिकत्वात् ॥ ५ ॥

(क) ह्यऽनैकान्तिकी स्यादिति शेषः।

न्यायभाष्यम्

अथ मन्यसे नियतविषयेष्वर्थेषु स्वविषये व्यभिचारो भवति, न च प्रतिषेधस्य सद्भावो विषयः ? एवं तर्हि—

(सू०)—तत्प्रामाण्ये वा नार्थापत्त्यप्रामाण्यम् ॥ ६ ॥

अर्थापत्तेरपि कार्योत्पादेन कारणसत्ताया (१)अव्यभिचारो विषयः। न च कारणधर्मो निमित्तप्रतिबन्धात् कार्यानुत्पादकत्वमिति ॥ ६ ॥

न्यायवार्त्तिकम्

षिध्यते। कथं न सत्ताप्रतिषेधः ? यस्मादर्थापत्तेर्विशेषः प्रतिषिध्यते नार्थापत्तिमात्रं तेन सत्ताऽप्रतिषेधादनैकान्तिको भवति ॥ ५ ॥

अथ मन्यसे न प्रतिषेधस्य सत्त्वं विषयः किं तु प्रमाणत्वम्, सोऽयं प्रतिषेधः स्वविषये प्रवर्तमानो नानैकान्तिको भवितुमर्हतीति ; अनैकान्तिको हि नाम स ज्ञेयो यः स्वविषयतज्जातीयान्यवृत्तिः, न चानैकान्तिकत्वं प्रामाण्यप्रतिषेधेऽस्ति, तस्मान्नानैकान्तिकः प्रतिषेध इति—

तत्प्रामाण्ये वा नार्थापत्त्यप्रामाण्यम्। यदि स्वविषयतज्जातीयान्यवृत्तिरनैकान्तिक इति मन्यसे ? अर्थापत्तिरपि तर्ह्यनैकान्तिकी न भवति, न ह्यसति कारणे कार्यमुत्पद्यमानं दृष्टमिति। तदिदं सूत्रं व्याघातदेशनार्थम्। यदुक्तं भवता स्वविषयादन्यत्र वर्तमानमनैकान्तिकं भवति अर्थापत्तिश्चानैकान्तिकीति व्याहतम्। अज्ञानं वा—अथाबुद्ध्वानैकान्तिकव्यवहारमिदमुच्यते

न्यायवार्त्तिकतात्पर्यटीका

प्रमेयत्वादीनां नित्यत्वसाधने अनैकान्तिकानां सत्त्वात्। यस्मादर्थापत्तेर्विशेष इति अर्थापत्तेर्विशेषः प्रामाण्यं न ह्यर्थापत्तिमात्रं सत्तेति ॥ ५ ॥

न चानैकान्तिकत्वं प्रमाणत्वप्रतिषेधेऽस्तीति यदि मन्यते पूर्वपक्षी एवं तर्हि—

तत्प्रा—ण्यम् (सू० ६) ॥ (क) विप्रतिपत्तिरप्रतिपत्तिर्वा निग्रहस्थानमिति वदत इत्यर्थः।

याऽपि मीमांसाभाष्यकृताऽर्थापत्तिरुदाहृता (ख) जीवतश्चैत्रस्य गेहाभावदर्शनेन बहिर्भाव-

वृत्तिः

अथ यत्र कुत्रचिदनैकान्तिकत्वं न दोषाय, किन्तु स्वविषय इति यदि, तदाऽर्थापत्तेरपि नाप्रामाण्यमित्याह—(तत्प्रामाण्य इति)

---

(१) 'व्यभिचारो' इति टि०।

(क) अथाबुद्ध्वेत्यादिवार्तिकं विभजते विप्रतिपत्तिरिति।

(ख) तथाच "अर्थापत्तिरपि 'दृष्टः श्रुतो वाऽर्थोऽन्यथा नोपपद्यते' इत्यर्थकल्पना। यथा जीवति देवदत्ते गृहाभावदर्शनेन बहिर्भावस्यादृष्टस्य कल्पना" इति शबरस्वामिपादाः (जै० सू० ५, भाष्यम्, अ० १, पा० १)

न्यायभाष्यम्

अभावस्य तर्हि प्रमाणभावाऽभ्यनुज्ञा नोपपद्यते। कथमिति ?

(सू०)—नाभावप्रामाण्यं प्रमेयासिद्धेः ॥ ७ ॥

अभावस्य भूयसि प्रमेये लोकसिद्धे (१,क)वैयात्यादुच्यते नाभावप्रामाण्यं प्रमेयासिद्धेरिति ॥ ७ ॥

न्यायवार्त्तिकम्

अर्थापत्तिरप्रमाणमनैकान्तिकत्वादिति, तत्रोपेक्षया वर्तितव्यं नोन्मत्तवाक्यानि प्रतिसन्धेयानीति ॥ ६ ॥

न्यायवार्त्तिकतात्पर्यटीका

स्यादृष्टस्य कल्पनेति, तदप्यनुमानमेव। यदा खलु सन्नेकत्र नास्ति तदाऽन्यत्रास्ति यदा वाऽव्यापक एकत्रास्ति तदाऽन्यत्र नास्ति, सोऽयं स्वशरीर एव व्याप्तिग्रहः सुकरः। तथा च सतो गेहाभावदर्शनेन लिङ्गेन बहिर्भावदर्शनमनुमानम्, न च तस्य सत्त्वेन गेहाभावः शक्योऽपह्नोतुं येनासिद्धो गेहाभावो न हेतुः स्यात्; गेहाभावेन वा सत्त्वमपह्नूयेत येन सत्त्वमेवानुपपद्यमानं न स्वात्मानं बहिरवस्थापयेत्। तथा हि सत्त्वमात्रं वा विरुध्यते चैत्रस्य गेहाभावेन गेहसत्त्वं वा चैत्रस्य, न तावद् यत्र क्वचन सत्त्वस्यास्ति विरोधो गेहे असत्तया समानविषयत्वाभावात्। देशसामान्येन गृहविशेषाक्षेपोऽपि पाक्षिक इति समानविषयतया विरोध इति चेत्—न; प्रमाणविनिश्चितस्य सांशयिकेन प्रतिक्षेपायोगात्। नापि प्रमाणविनिश्चितोऽभाव एव पाक्षिकं तस्य गृहसत्त्वं प्रतिक्षिपन् सत्त्वमपि प्रतिक्षेप्तुं सांशयिकत्वं वाऽपनेतुमर्हतीति युक्तम्, गृहावच्छिन्नाभावेन गृहसत्त्वं विरुद्धत्वात् प्रतिषिध्यते न तु सत्त्वमात्रं तत्र तस्यौदासीन्यात्। तस्माद् गृहाभावेन सिद्धेन सतो बहिर्भावोऽनुमीयत इति युक्तम्। एतेन विरुद्धयोः प्रमाणयोरविरोधापादनं विषयव्यवस्थया अर्थापत्तिविषयः परास्तः, अवच्छिन्नानवच्छिन्नयोरविरोधात्। तस्माद् नानुमानात् प्रमाणात् प्रमाणान्तरमर्थापत्तिरिति स्थितम् ॥ ६ ॥

वृत्तिः

अनैकान्तिकत्वस्य स्वविषये साधकत्वाद् यदि स्वहेतोः प्रामाण्य मन्यसे, तदाऽर्थापत्तेरपि स्वविषये प्रामाण्यमिति ॥ ६ ॥

अभावस्य न प्रमाणेष्वन्तर्भाव इति तटस्थः शङ्कते—(नाभावेति)

अभावनामकं प्रमाणं तदा स्याद् यदि तस्य प्रमेयं सिध्येत्, तदेव तु नास्ति। अभावस्य तुच्छत्वान्न तत्र प्रमाणप्रवृत्तिरिति भावः ॥ ७ ॥

---

(१) 'वैजात्या-' ज०।

(क) वियातो धृष्टः, तद्भावो वैयात्यम्। 'धृष्टे धृष्णग् वियातश्च' इत्यमरः। 'वैयात्यं सुरतेष्विव' इति माघे (२।४)।

न्यायभाष्यम्

अथायमर्थबहुत्वादर्थैकदेश उदाह्रियते—

(सू०)—लक्षितेष्वलक्षणलक्षितत्वादलक्षितानां तत्प्रमेयसिद्धेः(१) ॥ ८ ॥

न्यायवार्त्तिकम्

नाभावप्रामाण्यं प्रमेयासिद्धेः। नाभावः प्रमाणं विषयाभावात्—यदविषयं तदप्रमाणम्, यथा गोशब्दोऽश्वप्रतिपादने, तथा चाभावस्तस्मादप्रमाणम्।

कश्चैवमाहाभावः प्रमाणम्, अपि त्वभावविषया प्रतिपत्तिः प्रमाणम्, तया प्रमीयत इति। कः पुनरस्या (क)विषयः? भाव इत्युक्तम् ॥ ७ ॥

न्यायवार्त्तिकतात्पर्यटीका

नाभा—द्धेः (सू० ७) ॥ नाभावज्ञानं प्रमाणम्। कस्मात्? प्रमेयस्याभावस्यासिद्धेः; नो खलु सर्वोपाख्यारहितं प्रमाणज्ञानविषयभावमनुभवति, केवलं काल्पनिकोऽयमभावव्यवहारो लौकिकानामिति पूर्वपक्षः।

सिद्धान्तमाह—अभावस्य भूयसीति। सर्वजनीनाभावप्रत्ययव्यवहारौ न काल्पनिकौ भवितुमर्हतः। न च कल्पनाऽपि सर्वोपाख्यारहितं गोचरयितुमर्हतीत्युक्तं विपरीतख्यातिसाधनावसरे। क्षणभङ्गभङ्गावसरे च तस्योपाख्येयत्वमुपपादयिष्यते। तस्मादस्य प्रामाण्याद् युक्तः प्रमाणान्तर्भावः।

तदेतत् सर्वं वार्तिककारो व्याचष्टे—नाभावः प्रमाणमिति।

यथोक्तं दूषयति—कश्चैवमाहेति। अभावो हि प्रमेयमुच्यते, न तत्स्वरूपेण प्रमाणमपि तु तद्विषया प्रतिपत्तिः। सा च प्रत्यक्षफलमुपादानादिबुद्धौ प्रमाणं यथा अग्रे तथा वक्ष्यते। वर्षाभावप्रत्ययस्तु वाय्वभ्रसंयोगेऽनुमानमुक्तम् ॥ ७ ॥

---

(१) '-सिद्धिः' इति भा०।

(क) 'अस्याः' अभावप्रतिपत्तेः, 'विषयः' फलीभूतज्ञानविषयः, प्रमेयम् इत्यर्थः। अत्राऽऽदर्शपुस्तकयोः 'विषयोऽभाव' इति पाठश्चिन्त्यः, 'न चतुष्ट्व'मित्यादिसूत्रभाष्ये अभावप्रमाणस्य भावरूपो वाय्वभ्रसंयोगः प्रमेयमित्युक्तत्वात्। अथ भावस्यापि अभावप्रमाणं प्रति प्रमेयत्वे सूत्रे 'प्रमेयासिद्धे'रिति सङ्गतमिति चेन्न, प्रमाणत्वेनाभ्युपगतस्याभावप्रमाज्ञानस्य विषयो योऽभावस्तस्यासिद्धेरिति तदर्थात्। तथाच भावातिरिक्ताभावस्थापनमेव परीक्षार्थ इति बोध्यम्। व्यक्तीभविष्यति चेदं तात्पर्यटीकायाम्। एतेन मीमांसकसम्मतोऽनुपलब्ध्यपरनामा अभावोऽत्र प्रमाणान्तरत्वेनाऽऽशङ्क्य खण्डित इति शङ्का निरस्ता।

न्यायभाष्यम्

(१)तस्याभावस्य सिध्यति प्रमेयम्। कथम्? लक्षितेषु वासःसु अनुपादेयेषु उपादेयानामलक्षितानामलक्षणलक्षितत्वाद् लक्षणाभावेन (२)लक्षितत्वादिति(१*)। उभयसन्निधावलक्षितानि वासांस्यानयेति प्रयुक्तो येषु वासःसु लक्षणानि न भवन्ति तानि लक्षणाभावेन प्रतिपद्यते, प्रतिपद्य चाऽऽनयति, प्रतिपत्तिहेतुश्च प्रमाणमिति ॥८॥

(सू०)—असत्यर्थे नाभाव इति चेन्नान्यलक्षणोपपत्तेः ॥९॥

यत्र भूत्वा किञ्चिन्न भवति तत्र तस्याभाव उपपद्यते। (३)न चालक्षितेषु वासःसु (३*) लक्षणानि (४)भूत्वा न भवन्ति, तस्मात्तेषु (५)लक्षणाभावोऽ-

न्यायवार्त्तिकम्

तत्रानेकधा भिन्नस्याभावप्रपञ्चस्योदाहरणार्थं सूत्रम्—

लक्षितेष्वलक्षणलक्षितत्वादलक्षितानां तत्प्रमेयसिद्धेः। अलक्षितानि वासांस्यानयेति प्रयुक्तः उभयसन्निधौ येषु वासःसु लक्षणानि न पश्यति तानि लक्षणाभावेनैव प्रतिपद्यते, प्रेषणसम्प्रतिपत्त्योरेकविषयत्वात्, प्रतिपद्य चाऽऽनयति प्रतिपत्तिहेतुश्च प्रमाणम्। तस्मात् सिध्यत्यभावस्य प्रमेयम् ॥ ८ ॥

असत्यर्थे नाभाव इति चेन्नान्यलक्षणोपपत्तेः। असत्यर्थे नाभाव इति चेत्? अथ मन्यसे यत्र यद्भवति तत्र तस्याभावः, न चालक्षितेषु वासःसु लक्षणानि भवन्ति, तस्मान्न

न्यायवार्त्तिकतात्पर्यटीका

लक्षि—द्धेः (सू० ८) ॥ प्रतिपद्य चाऽऽनयतीति लक्षणाभावेन विशेषणेनावच्छिन्नान्यानेतव्यत्वेन प्रतिपद्याऽऽनयति। एतदुक्तं भवति—लक्षणाभावज्ञानं विशिष्टे वाससि प्रत्ययं जनयत् साधकतमत्वात् प्रमाणं भवति ॥ ८ ॥

अस—त्तेः (सू० ९) ॥ भावाधीननिरूपणत्वात् प्राप्तिपूर्वकत्वाच्च प्रध्वंस एवाभावः, तस्य

वृत्तिः

सिद्धान्तसूत्रम्—(लक्षितेष्विति)

तस्य अभावप्रमाणस्य प्रमेयसिद्धिः, भावप्रधानो निर्देशः। किं तत्प्रमेयमित्यत्राऽऽह—लक्षितेष्विति। लक्षितेषु घटादिषु सत्सु अलक्षितानां तत्प्रमेयत्वसिद्धिः। अलक्षितानां कथं प्रमेयत्वमत आह—अलक्षणलक्षितत्वादिति। यद्यप्यभावस्य गुणकर्मादिभिर्लक्षणं न सम्भवति, तथाप्यलक्षणेनैव तल्लक्षितं भवति। अनीलमानयेत्युक्ते नीलाभावो हि इतरव्यावर्तकतया लक्षणम् अतोऽभावो नाप्रामाणिक इति भावः ॥ ८ ॥

---

(१) अयमंशः ठि-पुस्तके नास्ति। (२) 'लक्षितत्वात्' फ०। (३) 'अलक्षितेषु च वासःसु' इति ग-ज-फ०। (४) 'न भूत्वा न भवन्ति' फ० 'भूत्वा न न भवन्ति' भा०। (५) अयमंशः वि-पुस्तके नास्ति।

न्यायभाष्यम्

नुपपन्न इति। नान्यलक्षणोपपत्तेः—यथाऽयमन्येषु वासःसु (५*)लक्षणानामुपपत्तिं पश्यति नैवमलक्षितेषु। सोऽयं लक्षणाभावं पश्यन्नभावेनार्थं प्रतिपद्यते इति ॥ ९ ॥

न्यायवार्त्तिकम्

तत्र न भवन्तीति ; न अपरिज्ञानात्—न भवताऽस्मदभिप्रायोऽबोधि ; न ब्रूमो यत्र यन्नभवति तत्र तन्न भवतीति, अपि तु लक्षितानि वासांस्युपलभमान इतराणि लक्षणाभावविशिष्टानि प्रतिपद्यत इति। अयथार्थोऽयमुपालम्भः प्रयुज्यत इति अत उक्तार्थं सूत्रम्—नान्यलक्षणोपपत्तेरिति ॥ ९ ॥

न्यायवार्त्तिकतात्पर्यटीका

भावपूर्वकत्वात्, नान्योऽस्त्यभाव इति मन्वानस्य पूर्वपक्षः। नापरिज्ञानादिति। प्रत्यक्षं हि प्रमाणं प्रमेयाभावं व्यवस्थापयति, तच्च प्रध्वंसवत् प्रागभावेऽपि तुल्यम्। प्रतियन्ति हि लौकिका (क)दध्नि क्षीराभावमिव क्षीरे दध्यभावम्। ननु सूत्रम् अन्येषु वासःसु (ख)लक्षणानां भावरूपाम् उपपत्तिं सद्भावमाह न त्वभावोपलब्धिं (ग)ब्रूते तत्कुतो न विरोध इत्यत आह—अत उक्तार्थं सूत्रमिति, व्यतिरेकमुखेन सूत्रस्योक्तोऽर्थः। अत एवाऽऽह भाष्यकारः—नैवमलक्षितेष्विति। लक्षणादर्शनेन हि लक्षणाभावदर्शनमुपलक्षितम् ॥ ९ ॥

वृत्तिः

आक्षिप्य समाधत्ते—(असत्यर्थ इति)

असति प्रतियोगिन्यभावो वक्तुं न शक्यते। सति च प्रतियोगिनि कथं तदभाव इति चेत्? न, अन्यत्र लक्षणेन सत्त्वेन अर्थात् प्रतियोगिन उपपत्तेः अभावोपपत्तेः। नहि तत्रैव प्रतियोगिनः सत्त्वमपेक्षितम् ॥ ९ ॥

(क) दध्नि क्षीराभावमिवेति, दध्नि सति क्षीरसमवायिवृत्तिक्षीरध्वंसमिवेत्यर्थः। तेन क्षीरासमवायितया दध्नि क्षीरध्वंसस्यासत्त्वेऽपि न दोषः, न वा दध्नि क्षीराभावस्यात्यन्ताभावरूपतया पूर्ववाक्योक्तध्वंसोदाहरणासङ्गतिः। नापि 'नास्त्यन्योऽभाव' इति मन्वानस्य पूर्वपक्षिणो मते अत्यन्ताभावस्यापि असिद्धत्वेन तस्य दृष्टान्तत्वे विरोधः। क्षीरे दध्यभावमित्यत्र प्रागभावः स्पष्टः। न चैतावता प्रागभाव एव प्रमाणोक्त्या अत्यन्ताभावोऽनभिमत इति भमितव्यम्, अभावप्रमाणोदाहरणे वर्षकर्माभावस्य प्रागभावरूपस्यैव प्रकृतत्वेन तन्मात्रे प्रमाणोक्तौ दोषाभावादिति ध्येयम्। (ख) अत्राऽऽदर्शपुस्तकयोः 'लक्षणाभावरूपाणामुपपत्तिं' इति प्रामादिकः पाठः शोधितः। (ग) आदर्शपुस्तकयोः 'ब्रूषे' इति पाठः।

(सू०)—तत्सिद्धेरलक्षितेष्वहेतुः ॥ १० ॥

न्यायभाष्यम्

तेषु वासःसु लक्षितेषु सिद्धिर्विद्यमानता येषां भवति न तेषामभावो लक्षणानाम्। यानि च लक्षितेषु विद्यन्ते लक्षणानि (१)तेषामलक्षितेष्वभाव इत्यहेतुः। यानि खलु भवन्ति तेषामभावो व्याहत इति ॥ १० ॥

(सू०)—न (२)लक्षणावस्थितापेक्षसिद्धेः ॥ ११ ॥

न ब्रूमो यानि लक्षणानि भवन्ति तेषामभाव इति, किं तु (३)केषुचिल्लक्षणान्यवस्थितानि (४)अनवस्थितानि केषुचित्, अपेक्षमाणो येषु लक्षणानां भावं न पश्यति तानि लक्षणाभावेन प्रतिपद्यत इति ॥ ११ ॥

न्यायवार्त्तिकम्

तत्सिद्धेरलक्षितेष्वहेतुः। यानि तानि लक्षितेषु वासःसु लक्षणानि (५)तानि न कस्यचिन्न सन्तीति, यानि च सन्ति तेषामभावो व्याहतः। अत्रोक्तं नापरिज्ञानादिति ॥ १० ॥

अस्य चार्थस्य ज्ञापनार्थं सूत्रम्—

न लक्षणावस्थितापेक्षसिद्धेः। न ब्रूमो यानि भवन्ति तेषां तत्रैवाभाव इति, अपि तु केषुचिल्लक्षणान्यवस्थितान्यपेक्ष्य येषु तानि न भवन्ति तानि लक्षणाभावेन प्रतिपद्यत इति ॥ ११ ॥

न्यायवार्त्तिकतात्पर्यटीका

तत्सि—तुः (सू० १०) ॥ यानि तानि लक्षितेष्विति। न कस्यचित् लक्षितस्य न सन्ति, यानि च सन्ति तेषामभावो व्याहतः। एतदुक्तं भवति, यत्र लक्षणानि सन्ति तत्र तेषामभावो व्याहतः, यत्र च न सन्ति तत्राप्यभावोऽनुपपन्नः तस्य भावाधीननिरूपणस्य तदभावेऽशक्यनिरूपणत्वादिति। परिहरति—नापरिज्ञानादिति। भावज्ञानाधीननिरूपणो भवत्यभावो न तु भावाधीननिरूपणः, प्रागभावोऽपि च शक्यो भविष्यद्भावज्ञानेनान्यत्रावस्थितभावज्ञानेन वा निरूपयितुमिति न प्रागभावाभाव इत्यर्थः ॥ १० ॥

न ल—द्धेः (सू० ११) ॥ (क)

वृत्तिः

शङ्कते—(तत्सिद्धेरिति)

लक्षितेषु लक्षणस्य तत्सिद्धेः व्यावर्त्तकत्वसिद्धेः, अलक्षितेषु अभावेषु अहेतुः अहेतुत्वं व्यावृत्त्यहेतुत्वम् अभावस्य लक्षणाभावात्; निःस्वरूपस्य न व्यावर्तकत्वमिति भावः ॥ १० ॥

---

(१) 'तेषामलक्षितेषु भावः' इति टि०। (२) 'लक्षणावस्थितापेक्षासिद्धेः' इति ग-ल-भा०। (३) 'केषुचिल्लक्षणान्यपेक्षमाणो' इति टि०। (४) 'अनवस्था।नि' ज०। (५) 'तानि कस्यचिन्न सन्तीति' ख।

(क) ११श-सूत्रस्य तात्पर्यटीका नोपलभ्यते।

(सू०)—प्रागुत्पत्तेरभावोपपत्तेश्च ॥ १२ ॥

न्यायभाष्यम्

अभावद्वैतं खलु भवति प्राक् चोत्पत्तेरविद्यमानता, उत्पन्नस्य चाऽऽत्मनो हाना-द्विद्यमानता। तत्रालक्षितेषु वासःसु प्रागुत्पत्तेरविद्यमानतालक्षणो लक्षणानामभावो नेतर इति ॥ १२ ॥

न्यायवार्त्तिकम्

(प्रमाणचतुष्ट्वपरीक्षा)

प्रागुत्पत्तेरभावोपपत्तेश्च। अभावद्वैतं खलु भवति प्रागुत्पत्तेरविद्यमानता ऊर्ध्वं च विनाशादविद्यमानतेति। तत्र योऽयं विनाशादभावो लक्षणानाम् अलक्षितेषु वासःसु सोऽनुपपन्नो नेतर इति। "असत्यर्थे नाभावः" "तत्सिद्धेरलक्षितेष्वहेतु"रिति उभे अप्येते छलसूत्रे। छल-स्योक्तमुत्तरं ज्ञात्वाऽज्ञात्वा वा (१)ऽसम्बन्धत्वमज्ञानं वेति तस्मादप्रयोज्यं छलमिति ॥ १२ ॥

न्यायवार्त्तिकतात्पर्यटीका

प्रागु—श्च (सू० १२) ॥ अभावद्वैतमिति प्रकृतापेक्षम्, प्रकृतं प्रध्वंसमात्रवादिनं प्रति प्रागभावप्रतिपादनम्। परमार्थतस्तु प्रथममभावे द्वैतं तादात्म्याभावः संसर्गाभावश्चेति। संसर्गाभावोऽपि प्राक्प्रध्वंसात्यन्ताभावभेदेन त्रिविध इति चतस्रो विधा अभावस्येति। "असत्यर्थे नाभावः" "तत्सिद्धेरलक्षितेष्वहेतु"रिति (क)चोभे अप्येते छलसूत्रे इति। यो योऽभावः स (ख)सर्वः सत्यर्थे भवति यथा प्रध्वंसः, न च तथा लक्षणाभाव इति सामान्यच्छलम्। तत्सिद्धेरिति तु वाक्छलम्, (ग) यानि लक्षणानि भवन्ति कथं तान्येव न भवन्तीति हि तस्यार्थः ॥ १२ ॥

वृत्तिः

समाधत्ते—(न लक्षणेति)

पूर्वपक्षो न युक्तः प्रतियोगिनो लक्षणस्य यदवस्थितम् अवस्थानं तस्यापेक्षा यत्र तादृश-सिद्धेः। अयमर्थः—प्रतियोगिस्वरूपज्ञानादेवाभावस्वरूपनिरूपणसम्भवान्नाभावलक्षणा-पेक्षेति भावः ॥ ११ ॥

(प्रागुत्पत्तेरिति)

प्रमेयसिद्धिरिति मण्डूकप्लुत्याऽनुवर्तते। प्रतियोगिन उत्पत्तेः प्राग् अभावस्योपपत्ते-

---

(१) '-ऽसम्बन्धमज्ञातं वा' इति ख०।

(क) वार्त्तिके चकारो न दृश्यते। (ख) अत्र सर्व इत्यनेन अतिसामान्ययोगो दर्शितः। तथाहि ध्वंसरूपोऽभावः प्रतियोगिनः कदाचित् प्रसिद्धौ तदधिकरणे भवतीति सम्भवन्नर्थः, तस्य प्रतियोगिनि स्वाधिकरणे विद्यमान एव तत्र वृत्तित्वमभावमात्रस्येति अतिसामान्ययोगादसम्भवदर्थकल्पनया व्याघात उक्त इति सामान्यच्छलमिति भावः। (ग) यानीति। लक्षणानि भवन्तीति धर्मिविशेषमनिदिश्योक्तम्, लक्षणानि यत्र भवन्ति तत्रैव न भवन्तीति तु वक्तुरनभिप्रेतमर्थान्तरमत्र कल्पितमिति वाक्छलमिति भावः।

न्यायभाष्यम्

"आप्तोपदेशः शब्द" इति प्रमाणभावे विशेषणं ब्रुवता नानाप्रकारः शब्द इति ज्ञाप्यते। तस्मिन् सामान्येन विचारः—किं नित्योऽथानित्य इति।

(क) विमर्शहेत्वनुयोगे च विप्रतिपत्तेः संशयः। आकाशगुणः शब्दो (१)विभुर्नित्योऽभिव्यक्तिधर्मक इत्येके।

न्यायवार्त्तिकम्

"आप्तोपदेशः शब्द" इति प्रमाणभावे विशेषणं ब्रुवता नानाप्रकारः शब्द इति ज्ञाप्यते। कथम्? नासति भेदे विशेषणमर्थवत् न चानर्थकं विशेषणं युक्तमिति—युक्तो नानाभूतः शब्दो विशेषणसामर्थ्यादिति। तस्मिन् सामान्येन विचारः नित्योऽनित्यो वा। 'विचारः' परीक्षा।

विमर्शहेत्वनुयोगे च विप्रतिपत्तेः संशयः। विप्रतिपत्तिशब्दस्योक्तोऽर्थः। तत्र आकाशगुणः शब्दः महत्त्ववदभिव्यक्तिधर्मेत्येके—एके तावद् ब्रुवते नित्यः शब्द इति, अविनश्यदाधारैकद्रव्याकाशगुणत्वात्—यदविनश्यदाधारैकद्रव्यमाकाशगुणश्च तन्नित्यं दृष्टम्, यथा

न्यायवार्त्तिकतात्पर्यटीका

तदेवं शब्दपरीक्षां प्रस्तुत्य तस्य प्रामाण्यं परीक्ष्य विभागोद्देशः परीक्षितः। संप्रति शब्दपरीक्षाशेषं वर्तयन्नाह—आप्तोपदेशः शब्द इति। संशयकारणं विप्रतिपत्तिं दर्शयन् जरन्मीमांसकानां मतमाह—आकाशगुणः शब्द इति। अभिघातप्रेरितेन हि वायुना यावद्वेगमभिप्रतिष्ठमानेन कर्णशष्कुल्यवच्छिन्ननभोभागसमवेतः नित्यः शब्दो व्यज्यत इति। तदेतद्वार्त्तिककारो व्याचष्टे—एके तावदिति। अविनश्यदाधारमपि संयोगाद्यनित्यमित्यत आह—एकद्रव्यमिति। तथाऽपि पार्थिवाणुगतै रूपादिभिरनैकान्तिकमत आह—आकाशगुणश्चेति। एकद्रव्यत्वे

वृत्तिः

रुपलम्भाद् घटो भविष्यतीत्यादिप्रागभावविषयकप्रत्यक्षस्य सार्वलौकित्वादिति भावः। चकारेण ध्वंसादेरपि प्रत्यक्षसिद्धत्वं समुच्चीयते।

चेष्टाया निर्व्यापारत्वेन न प्रामाण्यम्। वस्तुतो लिप्यादिवत् साङ्केतिकत्वात् तस्या अप्यनुमाने शब्दे वाऽन्तर्भाव इति ॥ १२ ॥

समाप्तं प्रमाणचतुष्ट्वप्रकरणम् ॥ १ ॥

(क) इदं सूत्रमिति केचित्।

(१) 'विभुत्वान्नित्यः' इति टि०।

न्यायभाष्यम्

गन्धादिसहवृत्तिर्द्रव्येषु सन्निविष्टो गन्धादिवदवस्थितोऽभिव्यक्तिधर्मक इत्यपरे।

आकाशगुणः शब्द उत्पत्तिनिरोधधर्मको बुद्धिवदित्यपरे।

महाभूतसंक्षोभजः शब्दोऽनाश्रित उत्पत्तिधर्मको निरोधधर्मक इत्यन्ये। अतः संशयः किमत्र तत्त्वमिति।

न्यायवार्त्तिकम्

आकाशमहत्त्वम्, तथा शब्दस्तस्मान्नित्य इति। सोऽयं नित्यः सन्नभिव्यक्तिधर्मा तस्याभिव्यञ्जकाः संयोगविभागनादा इति।

गन्धादिसहवृत्तिर्द्रव्येषु सन्निविष्टो गन्धादिवदवस्थितोऽभिव्यक्तिधर्मेत्यपरे—अपरे पुनर्ब्रुवते गन्धादिभिः सह सन्निविष्टः शब्दो गन्धादिवदेवाभिव्यज्यते तस्याभिव्यञ्जका भूतविशेषाभिघाता इति।

आकाशगुणः शब्द उत्पत्तिनिरोधधर्मेति चान्ये—अन्ये पुनर्वर्णयन्ति अनित्यः शब्द आकाशगुण उत्पत्तिनिरोधधर्मक इति।

महाभूतसंक्षोभजः शब्दोऽनाश्रित उत्पत्तिनिरोधधर्मेति चापरे। अतः संशयः किमत्र तत्त्वमिति।

अनित्य इत्येतत् तत्त्वम्। किमिदमनित्यत्वं नाम? यतोऽनित्य इति भवति। किं पुनस्तत्? प्राक्प्रध्वंसाभावावित्येके—एके तावद्वर्णयन्ति यस्य प्राक्प्रध्वंसाभावौ स्तः तदनित्यमिति। नासम्बन्धात्—न हि प्राक्प्रध्वंसाभावाभ्यां भावः सम्बध्यत इति। अनुत्पन्नविनष्टयोश्च प्रसङ्गात्—यदि च प्राक्प्रध्वंसाभावावनित्यतेति मन्यसे अनुत्पन्ने वस्तुनि प्रागभावोऽस्ति

न्यायवार्त्तिकतात्पर्यटीका

सत्याकाशगुणत्वादित्येतावताऽभिमतसिद्धेरविनश्यदाधारत्वं तत्प्रपञ्चार्थं वेदितव्यम्। संयोगविभागनादा इति। भेरीदण्डसंयोगप्रेरितो वायुः कर्णशष्कुलीमन्तमाकाशं प्राप्तः शब्दस्य व्यञ्जकः, एवं वंशदलविभागप्रेरितो वायुः शब्दस्य व्यञ्जक इति द्रष्टव्यम्। संयोगविभागौ पारम्पर्येण नादस्तु साक्षादिति।

सांख्यीयमतमाह—गन्धादिसहवृत्तिरिति। पञ्चतन्मात्रोत्पन्न(क)भूतसूक्ष्मसमुदायारब्धपृथिव्यादिविकारो गोघटादिवृत्तिः शब्दो योग्यदेशस्थ आहंकारिकतया व्यापकं विषयदेशस्थं श्रोत्रेन्द्रियं विकुर्वन्नवस्थित एव गृह्यते। तदेतदाह—अपरे पुनरिति। भूतविशेषाभिघाता इति, भेरीदण्डाभिघाता इत्यर्थः।

वैशेषिकमतमाह—आकाशगुण इति।

बौद्धराद्धान्तमाह—महाभूतसंक्षोभज इति।

नासंबन्धादिति। यदा भावोऽस्ति तदा (ख)प्राक्प्रध्वंसाभावान्नानित्यत्वम्। अनुत्पन्न-

(क) अत्र भूतसूक्ष्मसमुदायारब्धेति पञ्चतन्मात्रोत्पन्नेत्यस्य विवरणं कथमपि टीकायामन्तर्भूतमिति सम्भाव्यते। (ख) अत्र प्राक्प्रध्वंसाभावाभावादिति युक्तः पाठः।

न्यायवार्त्तिकम्

ऊर्ध्वं च वस्तुनः प्रध्वंसाभावोऽस्तीति (क)असति प्राक्प्रध्वंसाभावेऽनिमित्ततोऽनित्यप्रत्ययः स्यात्। अनित्यस्य भावोऽनित्यतेति प्राक्प्रध्वंसाभावयोरभावत्वाद्भावशब्देनानभिधानम्—अनित्यं नाम (ख)यस्य नास्त्यत्यन्तं भावः, तस्यानित्यस्य यो भावः साऽनित्यता, प्राक्प्रध्वंसाभावौ च भावप्रतिषेधौ, न चाभावो भावाभिधानेन (१)वक्तुं युक्तः। तस्मान्न प्राक्प्रध्वंसाभावावनित्यतेति। षष्ठ्यर्थश्च नास्ति—"तस्य भावस्त्वतलावि"ति तस्येति धर्म्यपदिश्यते भाव इति धर्मिणो धर्मः; न चाभावो धर्मः, न च धर्मकाले तच्छब्दवाच्यो धर्मी विद्यते न चाविद्यमानस्य षष्ठ्या योग इति। अथ यद्भवति तत्प्राङ् न भवति ऊर्ध्वं च न भवतीति मन्यसे, एवमपि न किञ्चित् प्रतिषिद्धम्, वयमपि ब्रूमः यत् प्राङ् न भवति तदूर्ध्वं न भवतीति, षष्ठ्यर्थस्तु पूर्ववन्नास्ति। घटस्य प्रागभावो घटस्य प्रध्वंसाभाव इति एतत् कथम्? नात्र षष्ठ्या सम्बन्धोऽभिधीयते अपि तु प्रागिदं वस्तु नाऽऽसीत्(२) पश्चाज्जातमित्यर्थः, ऊर्ध्वं च विनाशादिदं वस्तु न भविष्यतीति अनित्यमित्युच्यते तस्य च भावोऽनित्यतेति। वर्तमाने चासम्भवात्—यदि

न्यायवार्त्तिकतात्पर्यटीका

विनष्टयोश्च प्रसङ्गादिति। न तावत्प्राक्प्रध्वंसाभावयोः सहभावोऽस्ति तस्मात् प्रत्येकमेव (३)तावदनित्यत्वम्; तथा चानुत्पन्ने वस्तुनि नष्टे वाऽनित्यत्वप्रसङ्गः। नचेदं दृष्टमिष्टं वा भावधर्मत्वेनानित्यत्वस्य प्रतीतेरनित्यो घट इति। (ग)न केवलमनित्यत्वस्य भाव इति परमस्मिन् पक्षे न युज्यते षष्ठ्यर्थश्च नास्ति। कस्माद् भावस्याभावो धर्मो (घ)न भवतीत्यत आह—न च धर्मकाल इति। चो हेत्वर्थे। शङ्कते—अथेति। भवन्नेव हि यस्मात् प्राग् न भवति पश्चाच्च तस्मात्तस्याभाव इति षष्ठ्युपपत्तिरित्यर्थः। उत्तरम्—एवमपीति। सत्यं भवन्नेव न भवतीति न त्वेतावताऽस्याभावसंबन्धो भिन्नकालत्वात्। तस्मान्नास्मदुक्तं किंचिद् प्रतिषिद्धमित्यर्थः। लोकविरोधमुद्भावयति—घटस्य प्रागभाव इति। असंबन्धे षष्ठीप्रयोगोऽयं भाक्तः भावाधीननिरूपणत्वं च भक्तिरित्यर्थः। अपि च वर्तमानवस्तु नित्यमित्युच्यते तस्य भावो नित्यता भवतु किमेतावताऽपीत्यत आह—वर्त्तमाने चेति।

---

(१) वक्तुमित्यतः पूर्वं क-ख-वार्त्तिकयोः '(अभिधातु)' इति सचिह्नं मुद्रितं वर्त्तते। (२) अत्रादर्शपुस्तकयोः '(नास्ति)' इति वेष्टितो भागो मुद्रितः। (३) 'तावन्नित्यत्वम्' इति क०।

(क) असतीति। अयम्भावः—वस्तुनः सत्त्वदशायां प्रागभावप्रध्वंसयोरसत्त्वे न विषयरूपनिमित्ताभावेन अनित्य इति प्रत्ययोऽहेतुकः स्यादिति। तादृशः प्रत्ययो नोत्पद्येत भ्रमो वा स्यादिति तु फलितम्। अनिमित्तत इति प्रथमायास्तसिल्। (ख) 'यस्य नास्ति नित्यत्वं भावः' इति पाठो यथार्थो न वेति चिन्त्यम्। (ग) अत्र 'न केवलमनित्यस्य भाव' इति पाठो युक्तः, 'तस्यानित्यस्य यो भाव' इति वार्त्तिकानुसारात्। तथाच अस्मिन् पक्षे अनित्यस्य भाव इति केवलं न युज्यते इति न। 'परं' किन्तु षष्ठ्यर्थोऽपि न युज्यते इति समुदायार्थः। 'केवलं' 'परम्' इत्यनयोरेकं सम्पातायातमिति तु हृदयम्। (घ) 'न भवतीत्याह' इति यथार्थः पाठोऽनुमीयते।

न्यायवार्त्तिकम्

च प्राक्प्रध्वंसाभावावनित्यतेति मन्यसे वर्तमाने वस्तुनि न प्रागभावो न प्रध्वंसाभाव इति अनित्य इत्यभिलापो(क) न स्यात्। (ख)पाठकादिशब्दवदिति चेत्—अथ मन्यसे यथाऽमी पाठकादिशब्दास्त्रिकालविषयास्तथाऽयमनित्यशब्दस्त्रिकालविषयो भविष्यतीति; न, (१)ण्वुलस्त्रिकालविषयत्वात्—(२)ण्वुल्प्रत्ययस्त्रिकालविषयो दृष्टः, पाठको भवति पाठको भविष्यति पाठकोऽभूदिति। (ग) त्यपस्त्रिकालविषयत्वमिति चेत्—अथ मन्यसे त्यपोऽपि त्रिकालविषयत्वमिति; तच्च न, अदर्शनात्। न ह्यसत्यनित्ये अनित्य इति प्रयोगं पश्यामः। तस्मात् त्यपस्त्रिकालविषयत्वमयुक्तमिति। अतो न प्रागभावप्रध्वंसाभावावनित्यतेति।

विनाशहेतुभाव इत्यन्ये—अन्ये पुनर्ब्रुवते विनाशहेतोरस्तित्वमनित्यतेति। एतत्तु न युक्तम्, असति भावात्—प्राग् विनाशहेतुभावात् अनित्यप्रत्ययो दृष्टः अनुपजातकपालविभागेषु घटादिषु। यदि विनाशहेतुभावोऽनित्यता स्याद्वर्त्तमानेषु घटादिषु न स्यात्। न ह्यसति ज्वरे ज्वरितप्रत्ययो दृष्टः। विनाशहेतुभावाच्च विनाशहेतुरस्तीति युक्तः प्रत्ययो नानित्य इति। न हि गोत्वादश्वप्रत्ययो भवतीति। अथ मन्यसे यस्य विनाशहेतुरस्ति तद्विनाशवत्, यद् यद् विनाशवत् तदनित्यमिति, एतदपि न बुद्ध्यामहे यस्य विनाशे हेतुरस्ति तद्विनाशवदिति, किन्तु यस्य विनाशहेतुरस्ति तद्विनाशहेतुमदिति युक्तं वक्तुम्। न चान्येन योगादन्यनिमित्तः प्रत्ययो युक्तः, न हि दण्डयोगात् कुण्डलीति भवति। विनाशवच्छरीरमिति प्रयोगदर्शनाद् युक्तमिति चेत्—अथ मन्यसे विनाशवच्छरीरमिति दृष्टः प्रयोगः, न चासति सम्बन्धे प्रयोगो भवितुमर्हति; न, मतुपोऽसत्स्वदर्शनात्—नायं मतुप् क्वचिदप्यसत्सु दृष्टः, न ह्यसता कुण्डलेन कुण्डलीति भवति। न चासता विनाशेन सम्बन्धोऽस्ति तद्विनाशवच्छरीरमित्ययुक्तः प्रयोगः। दृष्ट इति चेत्—अथ मन्यसे दृष्टोऽयं प्रयोगो विनाश्येतच्छरीरमेतेऽध्रुवा विषया इति; न, उपचारात्—विनाशीत्युपचारेण प्रयोगः, (३)विनाशोऽस्यावश्यन्तया भविष्यति इति। अध्रुवा विषया इत्यनित्यतैवोच्यते, तस्मान्न विनाशहेतुभावोऽनित्यता।

न्यायवार्त्तिकतात्पर्यटीका

विनाशोऽस्यावश्यंतया भविष्यतीति अवश्यंभाविनो विनाशस्य सन्निधानेन संबन्धमुपचर्य मतुपः प्रयोग इत्यर्थः।

---

(१) 'स्थूल' ख। (२) 'स्थूलः प्रयोगः' ख। (३) 'विनाशो यस्यावश्यन्तया' इति क०।

(क) अभिलाप इति। 'नासम्बन्धात्' 'अनुत्पन्नविनष्टयोश्च प्रसङ्गात्' इत्यत्र अनित्यप्रत्ययस्याऽलीकत्वोक्त्या फलतोऽनुपपत्तिरुक्ता, इह तु तद्व्यवहारानुपपत्तिरित्यपौनरुक्त्यमिति ध्येयम्। (ख) ख-पुस्तके तु 'पाठक'पदस्थाने सर्वत्र 'पाचक'ेति मुद्रितम्। (ग) "त्यब् नेर्ध्रुवे" इति पा० वा० ४।२।१०४सू०।

न्यायवार्त्तिकम्

उपलब्धिलक्षणप्राप्तस्य अत्यन्ततिरोभावोऽनित्यतेत्यन्ये—अन्ये पुनरनित्यताशब्दार्थमन्यथा वर्णयन्ति। यदुपलब्धिलक्षणप्राप्तं वस्तु तेनैवाऽऽत्मनाऽत्यन्तं नोपलभ्यते तिरोभूतं तदनित्यमित्युच्यते। एतत्तु शून्यमभिधानम्, उपलब्धिलक्षणप्राप्तमत्यन्ततिरोभूतं नोपलभ्यत इति ब्रुवाणः सिद्धान्तं बाधते। न हि (१)किञ्चिद्वस्त्वत्यन्तं नोपलभ्यत इति सिद्धान्तः। अनुपजातविशेषस्य च वस्तुनस्तिरोभावो न युक्त इत्यनेकधा वर्णितम्। तस्मादियमनित्यता न युक्ता।

ये पुनर्वर्णयन्ति—स एव भावोऽभूत्वा भवन् भूत्वा चाभवन्ननित्य इत्युच्यते, सा चावस्था भावप्रत्ययेनानित्यतेत्यभिधीयते, एतत् तु न युक्तम्, स्वार्थे भावप्रत्ययस्यादर्शनात्—न हि कश्चित् स्वार्थे भावप्रत्ययो दृष्टः। विनयादिवदिति चेत् ? न ; अनभ्युपगमात्—ननु च "विनयादिभ्यष्ठक्" (पा० ५।४।३४) इति स्वार्थे प्रत्ययो दृष्टः विनय एव वैनयिकमिति ; न, अनभ्युपगमात्—नायं स्वार्थे प्रत्ययोऽपितु विनयेन योगो वैनयिकमित्युच्यते। एवं सर्वत्र द्रष्टव्यम्। अनुपलभ्यमान-

न्यायवार्त्तिकतात्पर्यटीका

उपलब्धिलक्षणप्राप्तस्येति। न हि सतो विनाशोऽस्ति येनासंबन्धो भावस्य देश्येत किंतु यथा सत आविर्भावो जन्म एवं सत एवात्यन्ततिरोभावो विनाश इति अनित्यतेति चाख्यायते, तिरोभावस्य च सता सह समानकालतया संबन्ध उपपद्यत इति भावः। तिरोभावश्च घटादिनाऽपि संभवतीत्युपलब्धिलक्षणप्राप्तस्येत्युक्तम्। तदेतत्सांख्यीयं मतं दूषयति—**एतत्तु शून्यमभिधानमिति**। प्रधानविकारत्वाद्विश्वस्य विकारस्य च प्रकृतेरनन्यत्वात् प्राधानिकस्य कस्यचिदुपलम्भान्नास्त्येव तद्वस्तु यदत्यन्तं नोपलभ्यत इति सांख्यसिद्धान्तः तं बाधत इत्यर्थः। अपि च यथा सतो न विनाशः एवमसतोऽपि जन्म नास्ति, तथा चानुपजातविशेषस्य वस्तुनस्तिरोभावो न युक्तः, विशेषोपजनने च कथं (क) सत उत्पत्तिर्विशेषस्यैव प्रागसत्त्वात् सत्त्वे वा प्रागप्यनुपलब्धिप्रसङ्ग इति।

ये पुनरिति। अनित्य एवानित्यता स्वार्थिकस्तल्प्रत्यय इत्यर्थः। दूषयति—**एतत्तु न युक्तम्**। पाणिनेरपि स्मृतिः प्रमाणाविरोधिनी तत्त्वव्यवस्थाहेतुर्न तद्विरोधिन्यपि। अस्ति च ठगादीनां स्वार्थिकत्वे प्रमाणविरोधः, तथा हि प्रकृतिप्रत्यययोः समभिव्याहारो न स्यात्। न खल्वेकार्थयोः समभिव्याहारो दृष्टः, न हि भवति वृक्षः शिंशपा इतिवद् वृक्षस्तरुरिति प्रयोगः। कथं तर्ह्येको द्वौ बहव इति चेत् ; न, लिङ्गविशेषव्यक्त्यर्थत्वाद् विभक्तिप्रयोगस्य। एवं यावकादिष्वपि विरुद्धजात्यन्तरव्यवच्छेदः प्रत्ययार्थो वेदितव्यः। यथा च व्याचक्षते शाब्दाः—याव एव

---

(१) 'किञ्चिद्वस्तूत्पन्नं' ख०।

(क) अत्र 'सत' इति सावधारणम्। तथा च उत्पत्त्याविर्भावापरनामधेयं जन्म सत एव इति सिद्धान्तः कथमित्यर्थः।

न्यायवार्त्तिकम्

भेदानामप्यनुमानतो भेदोऽनुमेयः—यांश्चापि भवाननुपलभ्यमानभेदान् प्रत्ययान् स्वार्थं मन्यते तेष्वप्यनुमानतो भेदोऽनुमेयः। किमनुमानम्? षष्ठ्या भेदविषयत्वम्—सर्वा षष्ठी भेदविषये दृष्टेति। यथा चानर्थान्तरे षष्ठी नास्ति तथोक्तं गुणगुणिभाववाद इति।

तत् किमिदानीमनित्यतेत्ययं शब्दो निरभिधेय एव? नानभिधेयः अवध्यपेक्षानपेक्षाभेदात् सत्तैवोभयथा—योभयान्तपरिच्छिन्नवस्तुसत्ता सा अनित्यतेति। या तूभयन्तानवच्छिन्नवस्तुसत्ता सा नित्यता, यथा समवाय एकः सन् कार्येण विशिष्यमाणः (१)कारणत्वमभिधीयते कारणेन विशिष्यमाणः (२)कार्यत्वमिति च। कथमिति? कारणमित्ययं प्रत्ययो नानिमित्तकः कदाचिद्भावात्; (क)न च वस्तुनिमित्तोऽवस्तुप्रत्ययः व्यतिरेकित्वात्। न च सत्तातो वैलक्षण्यात्—सत्तातः सदिति स्यात्, अयं तु सत्ताप्रत्ययाद्विलक्षणस्तस्मान्न सत्तातः। इहविशेषणनिमित्तत्वाच्च सम्बन्धनिमित्तः—इह तन्तुषु पट इत्याधारविशिष्टः प्रत्यय उपजायते, न चासति सम्बन्धे इहप्रत्ययेन शक्यं भवितुम्; यतोऽयमिहप्रत्ययः स समवायः, कार्यसमवाये सति कारणमित्यभिधीयते। यस्य गुणस्य योगाद् यस्मिन्नर्थे शब्दनिवेशस्तदभिधाने त्वतलौ। कार्यसमवायस्य भावादेतद्भवतीति कार्यसमवायः कारणत्वम्। एतेन कार्यत्वं व्याख्यातम्—कार्यात्मलाभहेतुः समवायः कारणविशिष्टः कार्यत्वम्। यथा समवाय एवं सत्ताऽप्येका सती उभयान्तपरिच्छिन्न-

न्यायवार्त्तिकतात्पर्यटीका

यावक इति। तदिदमुक्तम्—अनुपलभ्यमानभेदानामप्यनुमानतो भेद इति। किमनुमानम्? षष्ठ्या भेदविषयत्वमिति त्वतलभिप्रायम्, नित्यत्वानित्यत्वयोः प्रकृतत्वात्। "तस्य भावस्त्वतलौ"विति त्वतलोः षष्ठीसमर्थादुत्पत्तेः, सर्वविषयं त्वनुमानमुक्तमिति।

अवध्यपेक्षानपेक्षेति, सत्तैवोभयान्तावध्यपेक्षा भवत्यनित्यता, सैव च तदनपेक्षा नित्यता। अवधिश्चोपलक्षणं न विशेषणम्, तच्च भिन्नकालमपि भवत्येव, यथा मृतायां मातरि देवदत्तायां देवदत्तापुत्रो यज्ञदत्त इति भूतपूर्वगत्या देवदत्ता स्वपुत्रमुपलक्षयति। यदा च कार्यत्वं समवायस्तदोभयान्तावच्छिन्ना सत्ता नित्यता यदा तु पूर्वान्तावच्छिन्ना सत्तैवोत्पत्तिस्तदाऽपरान्तावच्छिन्ना सत्ता अनित्यतेति न हेतुलक्षणव्याख्यानावसरोक्तेन (ख) विरोध इति। कारणमित्यभिधीयत इति समवायिकारणाभिप्रायम्, समस्तकारणव्यापकं तु लक्षणं कार्योत्पादस्य पुरस्तान्नियमेन सद्भाव इति द्रष्टव्यम्। कार्यात्मलाभहेतुः समवाय इति। कार्यस्याऽऽत्मलाभः

---

(१) 'कारणमभि-' ख०। (२) 'कार्यमिति' ख०।

(क) 'न चावस्तुनिमित्तो वस्तुप्रत्ययः' इति पाठः समीचीनः सम्भाव्यते।

(ख) २८८ पृ० वार्त्तिक-तात्पर्यटीके द्रष्टव्ये।

न्यायभाष्यम्

अनित्यः शब्द इत्युत्तरम्। कथम् ?—

(सू०)—आदिमत्त्वादैन्द्रियकत्वात् कृतकवदुपचाराच्च ॥१३॥

आदिर्योनिः कारणम् आदीयते अस्मादिति। कारणवदनित्यं दृष्टम्। संयोगविभागजश्च शब्दः कारणवत्त्वादनित्य इति। का पुनरियमर्थदेशना कारणवत्त्वादिति ? उत्पत्तिधर्मकत्वात्; अनित्यः शब्द इति—भूत्वा न भवति विनाशधर्मक इति।

न्यायवार्त्तिकम्

वस्तुसम्बन्धित्वेनानित्यतेत्युच्यते विपर्ययान्नित्यतेति। एतयाऽनित्यतया योगादनित्यः शब्द इति ॥ १२ ॥

आदिमत्त्वादैन्द्रियकत्वात् कृतकवदुपचाराच्च। आदिमत्त्वाद्—आदिः योनिः कारणमिति। कारणवत्त्वादनित्य इति सूत्रार्थः। किं पुनरिदं कारणवत्त्वं नाम ? निमित्तकारणभेदानुविधानम् उत्पत्तिधर्मकत्वम्, तदभिव्यङ्ग्येषु नास्ति। न हि किञ्चिदभिव्यज्यमानं निमित्तकारणभेदानुविधायि दृष्टमिति। संयोगविभागानन्तरमुपलब्धेः सन्देह इति चेत्—अथ मन्यसे संयोगविभागानन्तरमुपलभ्यते शब्दः, सा च तदनन्तरोपलब्धिर्व्यज्यमानस्यापि युक्ता, अतः सन्देहः किमयं संयोगविभागाभ्यां व्यज्यते अथ क्रियत इति।

न व्यज्यते ऐन्द्रियकत्वात्। किमिदमैन्द्रियकत्वम् ? इन्द्रियप्रत्यासत्तिग्राह्यम् ऐन्द्रियकमिति। ततः किम् ? यदीन्द्रियप्रत्यासत्तिग्राह्य ऐन्द्रियकस्ततो न व्यज्यते। न हि व्यज्यमानस्येन्द्रियेण प्रत्यासत्तिर्युक्ता। कथमिति ? श्रोत्रं तावन्न शब्ददेशमुपगच्छति अमूर्तत्वात्—यदमूर्तं तन्निष्क्रियं

न्यायवार्त्तिकतात्पर्यटीका

स्वकारणसंबन्धित्वं तस्य हेतुः समवायः, समवायो हि समवेतत्वं भवति। (क)समवायः कारणविशिष्टः कार्यत्वमिति ॥ १२ ॥

आदि—च (सू० १३)॥ निमित्तकारणभेदानुविधानमुत्पत्तिधर्मकत्वं गम्यगमकयोरभेदविवक्षया। निमित्तकारणानि भेरीदण्डसंयोगादयः, तद्भेदात् खलु शब्दो भिन्नो भवति। शङ्कते—संयोगविभागेति। यथा हि कारणभेदेन भेदो दृश्यते एवं व्यञ्जकभेदेनापि मणि-कृपाण-दर्पणादिव्यज्यमानस्य मुखस्य भेदो दृष्टः, तस्मात् संशय इति।

श्रोत्रं तावन्न शब्ददेशं (ख)गच्छत्यमूर्त्तत्वादिति। कर्णशष्कुल्यवच्छिन्नं हि नभः

वृत्तिः

वेदस्य प्रामाण्यमाप्तप्रामाण्यात् सिद्धम्, न चेदं युज्यते वेदस्य नित्यत्वादित्याशङ्कायां

(क) वार्त्तिकगतं 'समवाय'पदं विगृहीतम्। (ख) वार्त्तिकगतः 'उप'शब्दो न गृहीतः।

न्यायभाष्यम्

सांशयिकमेतत्—किम् उत्पत्तिकारणं संयोगविभागौ शब्दस्य, आहोस्विदभिव्यक्तिकारणमित्यत आह—ऐन्द्रियकत्वात्। इन्द्रियप्रत्यासत्तिग्राह्य ऐन्द्रियकः।

किमयं व्यञ्जकेन समानदेशोऽभिव्यज्यते रूपादिवत् अथ संयोगजाच्छब्दाच्छब्दसन्ताने सति श्रोत्रप्रत्यासन्नो गृह्यत इति ? संयोगनिवृत्तौ शब्दग्रहणात् न व्यञ्जकेन समानदेशस्य ग्रहणम्—दारुव्रश्चने दारुपरशुसंयोगनिवृत्तौ दूरस्थेन शब्दो गृह्यते। न

न्यायवार्त्तिकम्

यथा रूपादि, अमूर्तं चाऽऽकाशम्, तस्मान्निष्क्रियमिति। क्रियाकारणगुणसमवायात् क्रियावत्त्वमिति चेत्—अथ मन्यसे यत्र क्रियाकारणं गुणो वर्तते तत् क्रियावद् दृष्टं यथा लोष्टं यथा चाऽऽकाशम्, तस्मादेतदपि क्रियावदिति; न, अनेकान्तात्—क्रियाकारणं च गुणः आत्मनि, न क्रियावानात्मा इत्यनेकान्तः। विद्यमानस्यापि न (१)क्रियाहेतुत्वं महत्परिमाणप्रतिबन्धात्—विद्यमानोऽप्याकाशेऽभिघातो न क्रियाहेतुः, महत्परिमाणप्रतिबन्धात्। यदाकाशे वर्तते महत्त्वं तेनैकार्थसमवेतेन तद्वृत्तिरभिघातः प्रतिबध्यत इति। यथा लोष्टगुरुत्वं तदेकार्थवृत्तिना संयोगेनेति। संयोगप्रतिबन्धाद् गुरुत्वस्य सापेक्षत्वप्रसङ्ग इति चेत्—अथ मन्यसे यदि संयोगेन प्रतिबध्यमानं गुरुत्वं न क्रियामारभते तत्प्रतिबन्धापगमापेक्षमारभत इति, नन्वेवं गुरुत्वं सापेक्षं क्रियाकारणमिति प्राप्तम्, एवं च शास्त्रव्याघातः, निरपेक्षं गुरुत्वं कर्मकारणमिति हि शास्त्रम्। न, निरपेक्षस्यान्यथा व्याख्यानात्—नायं निरपेक्षस्यार्थो गुरुत्वं न किञ्चिदपेक्षत इति, अपि तु चरमभाविनिमित्तान्तरं

न्यायवार्त्तिकतात्पर्यटीका

श्रोत्रम्, न च कर्णशष्कुली मूर्ताऽपि सती वक्तृवक्त्रमुपसर्पति, प्रत्यक्षं हि कर्णशष्कुली श्रोत्रस्था गृह्यते (क) तस्माद् गच्छदपि कर्णशष्कुल्युपधानविरहान्न नभोमात्रं श्रोत्रम्। तस्मान्मा कर्णशष्कुली यासीत् तदुपकृतं तु नभो गच्छतीति यो मन्यते तं प्रत्येतदुक्तमिति द्रष्टव्यम्। क्रियाकारणगुणसमवायादिति नोदनाभिघातसमवायादित्यर्थः। नायं (ख)निरपेक्षार्थ इति। यद्यपि समवायिकारणं पतने कर्त्तव्ये गुरुत्वमपेक्षते तथाऽपि चरमभाविनिमित्तान्तरं नापेक्षत इति निरपेक्षशब्दस्यार्थः। यद्यपि प्रतिबन्धकापगमो भवति चरमभावी

वृत्तिः

वर्णानामनित्यत्वात् कथं तत्समुदायस्वरूपस्य वेदस्य नित्यत्वमित्याशयेन शब्दानित्यत्वप्रकरणमारभते। तत्र सिद्धान्तसूत्रम्—(आदिमत्त्वादिति)

---

(१) 'क्रियावत्त्व'' क०।

(क) तस्मादिति, कर्णाद् गच्छदपि नभोमात्र कर्णशष्कुलीरूपोपाधिविरहात् न श्रोत्रमित्यर्थः, अपिकारेण नभसो गमनमसम्भवीति सूचितम्। श्रोत्रस्य गतिमत्त्वपक्षस्तु प्राचीनसम्मतः वेदान्तपरिभाषाकृद्भिर्गृहीतः, "चक्षुःश्रोत्रे तु स्वत एव विषयदेशं गत्वा स्वस्व-विषयं गृह्णीतः, श्रोत्रस्यापि चक्षुरादिवत् परिच्छिन्नतया भेर्यादिदेशगमनसम्भवात्" इति। विस्तरस्तु श्लोकवार्त्तिके शाबरभाष्यादौ च द्रष्टव्यः। (ख) वार्त्तिके तु 'निरपेक्षस्यार्थ'' इति पाठः।

न्यायभाष्यम्

च व्यञ्जकाभावे व्यङ्ग्यग्रहणं भवति, तस्मान्न व्यञ्जकः संयोगः, उत्पादके तु संयोगे (१)संयोगजाच्छब्दाच्छब्दसन्ताने सति श्रोत्रप्रत्यासन्नस्य ग्रहणमिति युक्तं संयोगनिवृत्तौ शब्दस्य ग्रहणमिति।

न्यायवार्त्तिकम्

नापेक्षत इति निरपेक्षं गुरुत्वं कर्मकारणमिति नास्ति व्याघातः। तथा च शास्त्रम्—"संयोगाभावे गुरुत्वात् पतन"मिति। विषयाभावाच्च—न क्रियाकारण (२)समवायमात्रं क्रियावत्त्वे हेतुः, अपि तु क्रियाकारणगुणसमवाये सति मूर्त्तिः। यदि क्रियाविषयो मूर्त्तिर्भवति क्रियाकारणं गुणोऽप्रतिबद्धो भवति तदा क्रियोत्पद्यत इति। तस्मादक्रियावत्त्वादाकाशं न गच्छति, शब्दोऽपि न गच्छति निष्क्रियत्वादेव। न चाप्राप्तस्य ग्रहणमस्ति सर्वशब्दोपलब्धिप्रसङ्गात्। परिशेषात् तु सन्तानसिद्धिः। तत्राद्यः शब्दः संयोगविभागहेतुकः तस्माच्छब्दान्तराणि कदम्बगोलकन्यायेन सर्वदिक्कानि, तेभ्यः प्रत्येकमेकैकः शब्दो मन्दतरतमादिन्यायेनाऽऽश्रयाप्रतिबन्धमनुविधीयमानः प्रादुरस्ति, ततोऽन्त्यस्यातिमान्द्याच्छब्दान्तरोत्पत्तिशक्तिविघातो येन केनचित् प्रतिबन्धाद् भवतीति, अतः शब्दसन्तानोच्छेदः। तत्र यः कर्णशष्कुलीमन्तमाकाशदेशं प्राप्नोति स उपलभ्यते नेतर इति तस्मादैन्द्रियकत्वम्, तच्चान्यथा न युक्तमित्यतोऽनित्य इति।

एक एवेति चेत् न, सर्वैरुपलब्धिप्रसङ्गात्—अथ मन्यसे नैव शब्दान्तराणि मयाऽभ्युपगम्यन्ते, अपि त्वेक एवायं शब्दो वितत्याऽऽकाशमवतिष्ठते, स संयोगविभागाभ्यामभिव्यक्तः सन्नुपलभ्यते यथा

न्यायवार्त्तिकतात्पर्यटीका

तथाऽपि न निमित्तान्तरम्, प्रतिबन्धे हि सति गुरुत्वं न करोति कार्यमौत्सर्गिकम्, न पुनः प्रतिबन्धकापगमस्यापि तत्र निमित्तभावकल्पना युक्ता तदन्वयव्यतिरेकस्यान्यथासिद्धेरिति, भावरूपं वा चरमभाविनिमित्तान्तरं नापेक्षत इत्यनपेक्षार्थः। विषयाभावाच्चेति। क्रियोत्पादं प्रति योग्यता क्रियाविषयः, (क)तामाश्रित्य क्रिया भवति सा मूर्त्तिः, न चासावसर्वगतद्रव्यपरिमाणलक्षणा आत्माकाशादौ सर्वगते समस्ति तस्मान्नैते क्रियावन्त इत्यर्थः। ततोऽन्त्यस्यातिमान्द्यादिति। नान्त्यः शब्दान्तरमारभते, न केवलमसौ स्वकारणं शब्दं नाशयति किन्तु सोऽपि स्वकारणेन शब्देन नाश्यते, तदिदमनयोः (ख)कार्यकारणविरोधित्वम्। आद्यस्तु कार्येणैव नाश्यते मध्यानां त्वनियम इति।

जरन्मीमांसकमतमुत्थापयति—एक एवेति चेदिति। एक एव तेषां शब्दो नभोगुणो नभो

(१) 'संयोगजशब्दसम्भवे' टि०। (२) '-समवधानमात्रं' ख०।

(क) 'यामाश्रित्ये'ति पाठो युक्तः। (ख) एतेन वार्त्तिकेऽपि कार्यकारणविरोधित्वघटितः कोऽपि ग्रन्थभागोऽवासीदिति सम्भाव्यते।

न्यायवार्त्तिकम्

घटाद्य(१)पवरकावस्थितं प्रदीपसंयोगेनेति ; तच्च न, सर्वैरुपलब्धिप्रसङ्गात्—यद्येकः शब्दो विततत्यावस्थितः संयोगेनाभिव्यक्तः श्रोत्रवतोऽर्थे प्रत्ययं करोतीति मन्यसे तदा येन केनचिद् यत्र (२)तत्रावस्थितेन शब्दो व्यक्त इति सर्वैः श्रोत्रवद्भिरुपलभ्येत, न चोपलभ्यते ; तस्मात् कल्पनेयम्। एकदेशाभिव्यक्तिरिति चेत् न किमस्तादात्म्यातादात्म्यानुपपत्तेः—अथ मन्यसे सत्यं विततत्यावस्थितः, तस्य त्ववस्थितस्यैकदेशो निमित्तेनाभिव्यज्यत इति ; न, किमस्तादात्म्यातादात्म्यानुपपत्तेः—यांस्तानेकदेशान् शब्दस्य मन्यसे ते किं शब्दात्मका आहो नेति ? किञ्चातः ? यदि शब्दात्मकास्ततोऽनेके शब्दा इति व्याघातः, अथाशब्दात्मकाः, न तदा शब्दादर्थप्रत्यय इति प्राप्तम्। तेषां स्वभावश्च (क)वक्तव्यः। शब्दस्याऽऽकाशवृत्तित्वादेकदेशार्थानभिधानाच्च—एकदेश इति समासपदमेतत् एकश्चासौ देशश्चेति। तत्र देशशब्द आधारार्थः कारणार्थो वा ? तत्राऽऽधारार्थस्तावन्न युक्तः, शब्दस्याऽऽकाशवृत्तित्वात्—आकाशवृत्तिः शब्दस्तद्गुणत्वात्। तस्मादाकाशव्यतिरिक्तो नाऽऽधार इति। कारणार्थोऽपि नास्ति अकृतकत्वाभ्युपगमात्—अकृतकः शब्द इति स्वयं प्रतिपद्यमाना भवन्तो नार्हन्ति वक्तुं कारणमेकदेश इति। न चान्य एकदेशार्थः सम्भवतीति शून्यमभिधानमेकदेशः शब्दस्य व्यज्यते इति। एकदेशाभिव्यक्तौ चार्थप्रत्ययो न स्याद्वर्णवत्—वर्णाः सर्व एव व्यापका भवन्तीति एतस्मिन् पक्षे वर्णैकदेशव्यक्तिः, न च वर्णैकदेशः शक्यो निरूपयितुम्। न च

न्यायवार्त्तिकतात्पर्यटीका

विततत्यावस्थितः परिमाणवदित्यर्थः। शब्दसंस्कारपक्षं कक्षीकृत्य दूषणमाह—न सर्वैरुपलब्धिप्रसङ्गादिति। न किम इति प्रश्नस्येत्यर्थः। शब्दस्याऽऽकाशवृत्तित्वादिति। आकाशस्य सर्वगतत्वेन तत्र व्यक्तः सर्वत्रैव व्यक्त इति सर्वत्रैवोपलम्भस्तदवस्थ एवेत्यर्थः। अभ्युपेत्यैकदेशमाह—एकदेशाभिव्यक्तौ चार्थप्रत्ययो न स्यात्, (ख)वर्णसाध्यस्य कार्यस्यैकदेशेनाकरणात्। (ग)यथा नानावर्णे पदे एकवर्णाभिव्यक्तौ नार्थप्रत्यय इति। स्यादेतत्—एकदेश एव वर्णः, तथा च वर्णसाध्यं कार्यमेकदेशः शक्तः कर्त्तुमित्यत आह—सर्व एव व्यापका भवन्तीति एतस्मिन् पक्षे वर्णैकदेशव्यक्तिः अभ्युपगम्यते, तस्माद् व्यापकाद् वर्णादव्यापक एकदेशोऽन्य इत्यर्थः। नन्वस्त्वेकदेशत एवार्थप्रत्यय इत्यत आह(घ)—न च वर्णैकदेशः शक्यो

वृत्तिः

शब्दोऽनित्य इत्यादि पूरणीयम्। आदिमत्त्वात् सकारणकत्वात्। ननु न सकारण-

(१) '-पवरकाद्यव-' क०। (२) 'अकुवाव-' इति क०।

(क) 'वक्तव्य' इत्यत्र 'विमोक्तव्य' इति ख-पु-पाठः, तत्र तेषामिति कर्त्तरि षष्ठी। तथाच तैरेकदेशैः शब्दस्य स्वभावोऽपि परित्यक्तव्यस्तेषामशब्दात्मकत्वादित्यर्थः। स्वभावश्चेति चो हेतौ 'प्राप्त'मित्यन्तवाक्यार्थे चास्य सम्बन्ध इत्यूहनीयम्। (ख) अर्थप्रत्ययानुपपत्तौ बीजमाह 'वर्णे'ति। (ग) वार्त्तिकगतं 'वर्णवदि'ति व्याचष्टे यथेति। (घ) अत: परमादर्शपुस्तकयो 'एतस्मिन् पक्षे वर्णैकदेशव्यक्तिरभ्युपगम्यते' इति मुद्रितम्।

न्यायवार्त्तिकम्

निरूपितादपि तस्मादर्थप्रत्ययो भवति (क)वर्णानामर्थप्रत्यायनानभ्युपगमात्—वर्णा अपि तावदेकैकशोऽर्थप्रत्यायका न भवन्ति कुतस्तदेकदेशा इति।

एतेन बहुत्वं प्रत्युक्तम्। यथैकस्य (ख) व्यक्तौ दोष एवमनेकशब्दस्यापि व्यापित्वे दोषाः; कोलाहलश्च स्यात्—यदि चानेकशब्दा आकाशे वर्तन्ते युगपदिति (१)प्रतिपद्यसे एकशब्दाभिव्यञ्जकोपादाने समानदेशानां शब्दानां व्यक्तिरिति कोलाहलः स्यात्, यथा मल्लनटसमाजेषु (२) प्रयोगजझङ्कारातिशयावर्जितेषु नदत्सु भवति; तस्मान्नानेको व्यापक इति। नियमश्च न स्यात्—यदि चानेके शब्दा युगपदाकाशे वर्त्तन्ते इति—एवं च यत्किञ्चिद्व्यञ्जकमुपात्तं समानदेशान् सर्वानभिव्यनक्तीति यदा वीणा वाद्यते तदा रासभध्वनिरपि श्रूयेत। न हि समानेन्द्रियग्राह्याणां समानदेशानां व्यञ्जकेषु नियमो दृष्टः। यद् यस्य व्यञ्जकं तेन तस्य व्यक्तिरिति चेत् तन्नादृष्टत्वात्—अथ मन्यसेऽनेकशब्दसन्निपाते सति व्यञ्जकानि भिद्यन्ते, व्यञ्जकभेदानुविधायिन्यो व्यक्तयः प्रतिशब्दमुपजायन्त इति; तन्नादृष्टत्वात्—न हि समानदेशानामेकेन्द्रियग्राह्याणां व्यञ्जकेषु नियमो

न्यायवार्त्तिकतात्पर्यटीका

निरूपयितुम्। अल्पीयसा हि प्रयत्नेन वर्णमुच्चरितं मतिर्न गृह्णाति गृह्णती वा वर्णमेव गृह्णाति न तु तदेकदेशं कदाचिदपीत्यर्थः। निरूपणमभ्युपेत्याऽऽह—न च निरूपितादिति।

बहवस्तर्हि वर्णा व्यज्यन्तां तन्निरूपणाच्चार्थो गम्यत इत्यत आह—एतेनेति। यस्तु मन्यते न वस्तुतोऽस्त्येकदेशः शब्दस्य किं तु संस्कारस्याव्याप्यवृत्तित्वमेवैकदेशः भवतः पक्षे (ग) शब्दस्याव्याप्यवृत्तित्वमिव नभस एकदेश इति तं प्रति दोषान्तरमाह—कोलाहलश्च स्यादिति। यद्युच्येत कश्चिदेव ध्वनिः कञ्चिदेव शब्दं व्यनक्ति ततश्च न कोलाहल इति तत्राऽऽह—नियमश्च न स्यादिति। समानदेशानामपि रूपरसादीनां व्यञ्जकनियम इत्यत उक्तम्—समानेन्द्रियग्राह्याणामिति, तथाऽपि भिन्नदेशानां समानेन्द्रियग्राह्याणामपि न सहसा सर्वेषां व्यक्तिरित्यत उक्तम्—समानदेशानामिति। शङ्कते—यद् यस्य व्यञ्जकमिति। न हि व्यञ्जकानां व्यञ्जकत्वं व्यक्तेरन्यतः प्रतीयते सा च नियतेति व्यञ्जकानामपि नियमसिद्धिरित्यर्थः। परिहरति—तन्नादृष्टत्वात्।

वृत्तिः

कत्वं कण्ठताल्वाद्यभिघातादेर्व्यञ्जकत्वेनाप्युपपत्तेरत आह—ऐन्द्रियकत्वादिति। सामान्यवत्त्वे सति बहिरिन्द्रियजन्यलौकिकप्रत्यक्षविषयत्वादित्यर्थः।

---

(१) 'प्रतिपद्यन्ते' ख०। (२) 'प्रयोग (झङ्कार) कारणातिशया-' इति क-पुस्तके मुद्रितम्।

(क) 'वर्णानामर्थप्रत्यायकत्वानभ्युपगमात्' इति पाठः सम्यक्तया सम्भाव्यते। यथाश्रुते विवक्षिते कारणत्वे सम्बन्धसामान्याभिप्रायिकी षष्ठी। (ख) 'व्याप्ताविति सम्भाव्यते' इत्यादर्शपुस्तकशोधकाः। (ग) 'शब्दस्याव्याप्यवृत्तित्वमिव' इत्यादर्शपुस्तकयोः पाठः, मुद्रिताकारस्तु स्वयं शोधितः।

न्यायवार्त्तिकम्

दृष्टः। न हि प्रदीप एकेन्द्रियग्राह्यमनेकमर्थं युगपत् सन्निपतितं न प्रकाशयति। सामान्यवदेतत् स्यादिति चेत् नानभ्युपगमात्—अथ मन्यसेऽनेकार्थसन्निपाते सति सर्वाभिर्व्यक्तिभिः सामान्यानि सम्बध्यन्ते अनेकार्थसम्बन्धे सत्यपि सामान्यस्य केनचिदर्थेन किञ्चित्सामान्यं व्यज्यत इति, एवमनेकसन्निपाते सति किञ्चिद्व्यञ्जकं कञ्चिच्छब्दं व्यनक्तीति ; तन्न अनभ्युपगमात्—सामान्यमनेकेन भिन्नजातीयेनार्थेन सम्बध्यत इति नाभ्युपगम्यते अपि तु स्वविषयसर्वगतं सामान्यम्, गोत्वं गोष्वेव नाश्वादिषु, अश्वत्वमश्वेष्वेव न गवादिषु, तस्मादसन्नोऽयं दृष्टान्तः।

व्यञ्जकाभावे चोपलब्धेर्न व्यज्यते शब्दः—यदि च संयोगविभागाभ्यां व्यक्तः शब्द उपलभ्यत इति मन्यसे सोऽपि संयोगाभावे नोपलभ्येत, उपलभ्यते च दारुवश्चने दारुपरशुसंयोगनिवृत्ताविति। अभिघाताद्वायुरिति चेत, अत्रोक्तम्—अथ मन्यसे दारुपरश्वोरभिघाताद्वायुर्जायते, स वायुः सन्तानवृत्त्या वर्त्तते, सन्तानवृत्त्या वर्त्तमानः कर्णशष्कुलीमन्तमाकाशं प्राप्नोति, तत्प्राप्तौ तत्रस्थः शब्दो गृह्यत इति, अत्रोक्तम्—यथैकः शब्दः कर्णशष्कुलीमत्याकाशदेशे वर्तते तथा सर्व एव शब्दा वर्त्तन्त इति यत्किञ्चिद् व्यञ्जकमुपात्तं यस्य कस्यचिच्छब्दस्य व्यञ्जकं स्यादिति सर्वशब्दोपलब्धिप्रसङ्गः, नियमश्च न स्यात्।

न्यायवार्त्तिकतात्पर्यटीका

अन्येषामेव भूतानां व्यञ्जकानां व्यङ्ग्यानां चानियमो दृष्ट इहापि नियमं विघटयति। कार्याणां तु समानदेशानामपि समानेन्द्रियग्राह्याणामपि रूपादीनां संख्यादीनां च दृष्टः कारणनियम इति शब्दानामपि नियतकारणतयोत्पत्तिनियम उपपद्यत इति भावः। समस्तवस्त्वव्यवधानेन सामान्यानां सर्वसामान्यसङ्गतं समस्तं वस्त्विति मन्वानः शङ्कते—सामान्यवदिति। सर्वार्थाव्यवधानेऽपि किञ्चिदेव वस्तु केनचिदेव सामान्येन सम्बद्धं न सर्वं सर्वेणेत्याशयवान् निराकरोति—नानभ्युपगमादिति। यद्यप्येकदेशस्थानां समानेन्द्रियग्राह्याणां सत्त्वनरत्वब्राह्मणत्वानां स्वरूपभेदसंस्थानयोनिव्यङ्ग्यानां प्रतिनियतव्यञ्जकव्यङ्ग्यत्वे तथाऽपि समानदेशत्वाभावान्न व्यभिचारः, सत्त्वस्य पदार्थत्रयसमवायादधिकदेशतया नरत्वस्य ब्राह्मणवत् क्षत्रियादिषु सद्भावाद् ब्राह्मणत्वस्य क्षत्रियादिपरिहारात् कठादिष्वेव भावाद् न्यूनाधिकदेशतया न समानदेशत्वमिति। एतेन श्रोत्रसंस्कारेऽप्यनियमो बोद्धव्यः, यथोन्मीलनसंस्कृतमिन्द्रियं समानदेशान् स्वग्राह्यान् सकृदेव दर्शयति न तु किञ्चिदेवेति सर्वमवदातम्।

अपि च सर्वशब्दस्य ताल्वादिसंयोगव्यङ्ग्यत्वे तदुपरमे विदूरे (क) शब्देनोपलब्धव्यं न चोपलभ्यते, वायुसन्तानव्यङ्ग्यत्वे तु प्रागुक्तनियमाभाव एव दोष इति शङ्कोत्तराभ्यां दर्शयति—यदि चेति। अपि चायं नित्यः शब्दः प्रादेशिको वा स्याद् व्यापको वा? उभयथाऽपि दोष इति

(क) अत्र 'शब्दो नोपलब्धव्यः न च नोपलभ्यते' इति युक्ततया प्रतिभाति।

न्यायभाष्यम्

इतश्च शब्द उत्पद्यते नाभिव्यज्यते—कृतकवदुपचारात्। तीव्रं मन्दमिति कृतकमुपचर्यते, तीव्रं सुखं मन्दं सुखं तीव्रं दुःखं मन्दं दुःखमिति, उपचर्यते च तीव्रः शब्दो मन्दः शब्द इति।

न्यायवार्त्तिकम्

निमित्तसन्निधाने च सर्वत्रोपलब्धेर्न व्यज्यते—यत् खलु व्यज्यते तत् निमित्तसन्निधाने सति न सर्वत्र व्यज्यमानं दृष्टम्, यथा घटार्थिनो बिभ्राणाः प्रदीपं घटादिरहितानपवरकादीन् प्रविश्य न घटादीनुपलभन्त (१)इत्यभिव्यक्तिं घटादीनां प्रतिपद्यन्ते, न पुनस्ताल्वाद्यभिघातसन्निपाते सति क्वचिदपि शब्दान्न पश्यामः तस्मान्न व्यज्यत इति। सर्वत्र सन्तीति चेत् नोक्तोत्तरत्वात्—अथ मन्यसे यस्यैकदेशवृत्तयः शब्दास्तं प्रत्ययमुपालम्भः, अस्माकं तु सर्व एव व्यापकास्तस्मान्नैष दोष इति। न, उक्तोत्तरत्वात्—उक्तोत्तरमेतद्वाक्यं न पुनः प्रतिसमाधानं प्रयोजयतीति तस्मान्न व्यज्यत इति। नादोपलब्धौ च विप्रकृष्टदेशावस्थितेन नादसमानदेशशब्दानुपलब्धेर्न व्यञ्जको नादः। एतेन वायवीयाः संयोगविभागा व्यञ्जका इति प्रत्युक्तम्।

न्यायवार्त्तिकतात्पर्यटीका

शङ्कोत्तराभ्यां दर्शयति—निमित्तसन्निधाने चेति। स्यादेतत्—मा भूद्वायुसन्तानो व्यञ्जकः सन्ति खलु वायुगुणा नादास्तेऽस्य शब्दस्य व्यङ्क्तार इत्यत आह—नादोपलब्धौ चेति। न तावन्नादो नाम वायुगुणः कश्चिदुपलभ्यते, अभ्युपेत्यापि ब्रूमः नादोपलब्धावपि यत्र वायुस्तत्र तद्गुणोऽङ्गीकर्तव्यः, न च विप्रकृष्टेन पुरुषेण शब्दोपलब्धौ तत्र वायुरस्ति तद्गुणो वा नादः, वायुसन्तानगमनं चास्मिन् पक्षे नेष्यते, (क) तस्माद् विप्रकृष्टेन पुरुषेण शब्दोपलब्धेर्न व्यञ्जको नाद इति। स्यादेतत्—मा भूद्वायुसन्तानो मा च भूत्तद्गुणो नादः शब्दस्य व्यञ्जकः, वायवीयास्तु संयोगविभागा व्यञ्जका भवन्तीत्यत आह—एतेनेति।

यस्तु मन्यते—प्रत्यभिज्ञैव भगवती शब्दस्थेमसाधिनी, तदानुगुण्याय व्यापिनः शब्दस्य गुणस्य द्रव्यस्य वा प्रयत्नप्रेरिता वायवो यावद्वेगं प्रतिष्ठमानाः श्रोत्रं श्रोत्रावच्छिन्नशब्दविशेषं वा संस्कुर्वन्तो व्यञ्जका इति कल्प्यते ; न च समानदेशानां समानेन्द्रियग्राह्याणां नियतव्यञ्जकव्यङ्ग्यत्वं न दृष्टमितीमं प्रसङ्गं प्रत्यभिज्ञा मृषति, सोऽयमनया बाधितविषयो विलीयत इति तं प्रत्याह—कृतकवदुपचारात्। अत्र चोपचारेण प्रयोगेण तत्कारणं शब्दभेदप्रत्ययमुपलक्षयति। अस्ति हि

---

(१) 'इत्यभिव्यक्त्या घटादीन्न प्रतिपद्यन्ते' ख०।

(क) आदर्शपुस्तकयोः 'यस्मा'दिति पाठः।

न्यायवार्त्तिकतात्पर्यटीका

शुकसारिकामनुष्यवक्त्रप्रभवेषु गकारादिषु स्फुटतरा रूपभेदप्रत्ययाः पुंसाम्(क)। एवं स्त्रीपुंसप्रभवेषु स्त्रीपुंसभेदप्रभवेषु च। न चेयमौपाधिकी न तु स्वरूपत इति वाच्यम्। तथा हि औपाधिकत्वमानुभाविकं वा स्याद् यथा कुङ्कुमारुणा तरुणीति, उपपत्तिगोचरो वा, यथा कृपाणधारायां जले च प्रतिबिम्बहेतौ रोचिष्णुतायां दीर्घश्यामतायां मुखस्य। न तावदानुभाविकम्, विदितोपाधेः खलु तद्भवति, यथा विदितकुङ्कुमस्य कुङ्कुमारुणेति; शुकादिभेदमविदुषोऽपि च काण्डपटाद्यावृते शुकादौ शब्दभेदप्रत्ययो भवति यत एतदुन्नयति शुकोदीरिता मञ्जुतमा गाथेति। नाप्यौपाधिकत्वमुपपत्तिगोचरः। न हि शब्दस्वरूपसमवायिनो भेदस्यौपाधिकत्वे किंचिदस्ति प्रमाणं मुखस्येव मणि-दर्पण-कृपाणगतस्य। न खलु विरुद्धपरिमाणेषु दर्पणादिषु विरुद्धपरिमाणानां प्रतिबिम्बानामुत्पादः सम्भवति। शब्दानां तु संयोगविभागयोनीनां युक्तस्तद्भेदेन रूपभेदः।

स्यादेतत्—तीव्रमन्दत्वादयो धर्माः परं भिद्यन्ते न तु तदाश्रयः शब्दः। न ह्यन्यस्य भेदेनान्यो भेत्तुमर्हति अतिप्रसङ्गात्। न हि रूपरसादीनां युगपद्भाविनां वा क्रमभाविनां वा संयोगादीनां भेदे द्रव्यं भिद्यते। कथमेकस्यैव शब्दस्यापर्यायेण तीव्रमन्दत्वादिविरुद्धधर्मसंसर्ग इति चेत्; अत एवौपाधिकोऽस्तु मुखस्येवाभेदिनोऽपर्यायेण कृपाणादिषु दीर्घपरिमण्डलत्वादिः। अत्रोच्यते—न वयं धर्मभेदमात्रेण धर्मिणो भेदमाचक्ष्महे किं तु धर्मभेदमात्रप्रथा उत धर्मिभेदोऽपि प्रथत इति निपुणं निरूप्यताम्। अस्ति हि गौर्गौरिति प्रथानुगमेऽपि शुक्लकपिलकपोतिकासु गोषु धर्मिभेदावगाहिनी प्रथा; अस्ति च धर्ममात्रभेदावगाहिनी प्रथा धर्मिणमभिन्नमाकलयन्ती; यथा शालप्रांशुः पृथुलविशालवक्षाः प्रलम्बभुजो नीलोत्पलदलश्यामः सिंहास्यो नवाम्भोदध्वनिगम्भीरमधुरघोषश्चकोरेक्षणः क्षत्रिययुवेति। सेयं शुकसारिकामनुष्येषु युगपद्गकारानुच्चारयत्सु तीव्रमन्द्रानुनासिकादिगकारावगाहिनी प्रथा किमेकमेव क्षत्रिययुवानमिव गकारमनेकधर्मवन्तमालम्बते एको गकारो नानाधर्मेति, किं वा यथेयं शुक्ला गौरियं कपिला गौरिति तथा तीव्रोऽयं गकारो मन्दोऽयं गकारोऽनुनासिकोऽयमिति भवन्त एव विदांकुर्वन्तु। सेयं गोत्वमिव कपिलादिषु गोविशेषेषु गत्वं तीव्रमन्दादिशब्दभेदेष्वालम्बमाना प्रत्यभिज्ञा च भेदप्रथा चोपपत्स्यते। अपि च युगपत्तीव्रमन्दत्वादिलक्षणविरुद्धधर्मसंसर्गादपि गकाराणां परस्परतस्तपनखद्योतवद्भेदमनुमिमीमहे। न चायं विरुद्धधर्मसंसर्गो न गकारादिनिवेशी किं त्वौपाधिकः, उपाधयश्च भिद्यन्त एव न गकार इति सांप्रतम्; गकारसमवायिनः प्रतीयमानस्यासति बाधके औपाधिकत्वकल्पनायोगात्, प्रत्यभिज्ञानस्य च गत्वसामान्यालम्बनत्वेनोपपत्तेः। अपि चौपाधिकत्वपक्षे ताल्वादिसंयोगधर्मो वा तदभिघातप्रेरितध्वनिधर्मो वा तीव्रानुनासिकत्वादिः शब्दे समारोप्यत

(क) पुंसां स्फुटतरा रूपभेदप्रत्यया भवन्तीति सत्यमस्तीति अध्याहारेणान्वयो बोध्यः। 'स्फुटतरो रूपभेदप्रत्यय' इति 'रूपभेदप्रतीतिः' इति वा पाठः। 'प्रतीति'शब्दः विप्रकृष्टोऽपि उत्तरत्र 'इयम्' शब्ददर्शनाद् बुद्धिपथमारोहतीति बोध्यम्।

न्यायवार्त्तिकम्

कृतकवदुपचाराच्च—तीव्रं मन्दमिति कृतकमुपचर्यते तीव्रं सुखं मन्दं सुखम्(क) इति उपचर्यते च तीव्रः शब्दो मन्दः शब्द इति। अत्र च प्रयोगः—अनित्यः शब्दः (ख) तीव्रमन्दविषयत्वात् सुखदुःखवदिति। कृतकवदुपचारादित्यनेन सूत्रेण सर्वानित्यत्वसाधनधर्मसंग्रहः कृतकत्वग्रहणस्योदाहरणार्थत्वात्; यथा सामान्यविशेषवतोऽस्मदादिबाह्यकरणप्रत्यक्षत्वात्, उपलभ्यस्यानुपलब्धिकारणाभावे सत्यनुपलब्धेः, गुणस्य सतोऽस्मदादिबाह्यकरणप्रत्यक्षत्वात् इत्येवमादि। तीव्रशब्दस्य तीव्रार्थविषयत्वं न शब्दादिविषयत्वमिति चेत्—अथ मन्यसे तीव्रशब्देन तीव्रार्थोऽ-

न्यायवार्त्तिकतात्पर्यटीका

इत्यास्थेयम्। न चाऽऽरोप्यमजानतामारोपः संभवति। न च ध्वनीनां ताल्वादिसंयोगविभागानां वा धर्मः श्रोत्रेण शक्यो ग्रहीतुं तदन्यधर्मवत्। न चैते तदानीं प्रमाणान्तरेणोपनीयन्ते स्मृता वा येनाऽऽरोप्येरन्। न च ध्वनिभेदसंस्कारवशाच्छ्रोत्रस्यैतादृशः सामर्थ्यभेद आविर्भवति, यत आरोप्याग्रहेऽपि भ्रमो भवति। न च मण्डूकवसाक्ताक्षाणामिवानवगतास्मृतोरगाणामपि प्रथमाक्षसन्निपाताद् वंशेषूरगारोप इति सांप्रतं सर्वासामेव भ्रान्तीनां प्रमाणगृहीतारोप्यारोपविषयग्रहणपुरःसरत्वनियमात् तदनुसारेण मण्डूकवसाक्ताक्षाणामपि वंशेषूरगभ्रमो व्याख्येयः। वंशानां तावदस्ति भूयः सारूप्यमुरगेण, तेन चैते तन्मात्रेण रूपेण शक्नुवन्ति गृहीताः स्मारयितुमुरगम्। एवमपि यदन्येषां भ्रमो न भवति तत्र सर्पाकारव्यावृत्तवंशग्रहो हेतुः मण्डूकवसाऽञ्जनं च वंशाकारपिधानमात्रहेतुः। न च प्रथमाक्षसन्निपातादेव भ्रम इति प्रामाणिकं क्षणभेदस्य दुर्ज्ञानत्वात्। न चागृहीतसर्पस्य भवतीति (१)शक्यं वक्तुं तस्मिन् जन्मनि जन्मान्तरे वा सर्पग्रहसंभवात्। ध्वनिधर्मस्त्वनुनासिकत्वादिः(ग) अस्मिन्निव जन्मनि जन्मान्तरेऽप्यशक्यग्रह एव। तस्माद्वर्णसमवेतोऽनुनासिकत्वादिः प्रतीयमानो वर्णधर्म एव नौपाधिकः। तथा च युगपद्विरुद्धधर्मयोगात् परस्परमन्यत्वं गकारादीनामिति युक्तम्। तदनेनाभिसन्धिनोक्तम्—कृतकवदुपचारादिति।

तदेतद्वार्तिककारो व्याचष्टे—तीव्रं मन्दमिति कृतकमुपचर्यत इति। शब्दविषयत्वेन विरुद्धधर्ममुपलक्षयति। अपरानपि शब्दानित्यत्वहेतूनाह—कृतकवदुपचारादित्यनेनेति। सामान्यवत इत्येतावतैव जातिनिराकरणे सिद्धे विशेषग्रहणं साधर्म्यं सामान्यमिति भ्रमनिराकरणार्थम्, तद्धि प्रमेयत्व(घ)सत्त्वादिकं गुण इव जात्यादावप्यस्तीति। विशेषपदेन तु जातिग्रहणान्निवर्तितं भवति। उपलभ्यस्येति तूपरिष्टात् स्फुटीभविष्यतीति। शङ्कते—तीव्रशब्दस्येति। तीव्रत्वधर्मान्वयव्यतिरेकानुविधायिप्रवृत्तिस्तीव्रशब्दो न शब्दं धर्मिणमभिधातुमर्हतीति

---

(१) 'युक्तं शक्यं वक्तु'मिति पाठः क-ख-पुस्तकयोः।

(क) 'तीव्रं दुःखं मन्दं दुःख'मिति भाष्यांशोऽत्र परित्यक्तः। (ख) अत्र तीव्रमन्दशब्दविषयत्वादिति पाठः सम्भाव्यते। (ग) 'अस्मिन्नेव' इति क-ख-पुस्तकयोः पाठः प्रामादिकत्वबुद्ध्या शोधितः। (घ) सत्त्वमत्र कालसम्बन्धित्वरूपं न तु द्रव्यादित्रिकवृत्ति परसामान्यमिति बोध्यम्।

न्यायभाष्यम्

व्यञ्जकस्य तथाभावाद् ग्रहणस्य तीव्रमन्दता रूपवदिति चेद् न अभिभवोपपत्तेः—संयोगस्य व्यञ्जकस्य तीव्रमन्दतया शब्दग्रहणस्य तीव्रमन्दता भवति न तु शब्दो भिद्यते यथा प्रकाशस्य तीव्रमन्दतया रूपग्रहणस्येति, तच्च न, एवमभिभवोपपत्तेः—तीव्रो भेरीशब्दो मन्दं तन्त्रीशब्दमभिभवति (१)न मन्दः। न च शब्दग्रहणमभिभावकम्, शब्दश्च न भिद्यते (क)शब्दे तु भिद्यमाने युक्तोऽभिभवः। तस्मादुत्पद्यते शब्दो नाभिव्यज्यत इति।

न्यायवार्त्तिकम्

भिधीयते न शब्दः, न चान्यविषयः शब्दोऽन्यस्यार्थस्य प्रतिपादक इति ; न, शब्दशब्देन समानाधिकरणस्य तीव्रशब्दस्याभिधानात्—सत्यमयं तीव्रशब्दः केवल उच्चारितो द्रव्यगुणकर्मणां समानधर्मं प्रतिपादयति, (२)शब्दशब्दोऽप्युच्चरन्नेकधर्मयोगिणं शब्दमभिधत्ते। यदा पुनरेतौ (३)तीव्रशब्दशब्दौ विशेषणविशेष्यभावापन्नावभिधीयेते तदा तीव्रशब्देन धर्मान्तराणि व्यवच्छिद्यन्ते शब्दशब्देन धर्म्यन्तराणीति उभयशब्दप्रयोगात् शब्दो गम्यते। तस्मादुपपन्नं तीव्रशब्द-विषयत्वादनित्यः शब्द इति।

व्यञ्जकस्य तथाभावाद् ग्रहणस्य तीव्रमन्दता रूपवदिति चेत् नाभिभवोपपत्तेः। शेषं भाष्ये।

न्यायवार्त्तिकतात्पर्यटीका

यथोक्तमात्रस्याऽऽक्षेप इत्यर्थः। निराकरोति—न शब्दशब्देन समानाधिकरणस्येति। एतच्च व्यक्त्याकृतिजातयः पदार्थ इत्यत्र प्रतिपादयिष्यते।

शङ्कते—व्यञ्जकस्येति। स्वकारणात् खलु व्यञ्जकाच्छब्दज्ञानमुत्पन्नं तीव्रं मन्दं चेति। तेन तीव्रज्ञानज्ञेयः शब्दोऽपि तीव्र इव मन्दज्ञानज्ञेयः शब्दो मन्द इव भासते न त्वाजानतोऽस्य तीव्रत्वं मन्दत्वं वा येन भिद्यत इत्यर्थः। निराकरोति—नाभिभवेति। अन्यत् खल्वन्येन समानजातीयेनाभिभूयते न तु तदेव तेन। न हि मध्यन्दिनोल्काप्रकाशसम्बन्धी पटः पटुना सावित्रेण प्रकाशेन प्रकाशमानमात्मानमात्मनाऽभिभवति। एवं गकारोऽपि तीव्रध्वनिप्रकाश्यं गकारमात्मानमभिभवेत्, यदि त्वयं मन्दध्वनिप्रकाश्यो गकारस्तीव्रध्वनिप्रकाश्याद्गकारादन्यो भवति। ततो मध्यन्दिनोल्काप्रकाशः सवितृप्रकाशेन चाल्पत्वादभिभूयते इति युज्यते तदिदं शेषं भाष्ये उक्तमिति।

वृत्तिः

परे तु—ऐन्द्रियकत्वं लौकिकप्रत्यक्षविशेष्यत्वम्, सामान्यसमवाययोस्तु न तथात्वम्,

(१) 'न मन्दः' इति वि-टि-पुस्तकयोर्नास्ति। (२) 'शब्देन शब्दाद्युच्चरतानेक-' ख०। (३) 'तीव्रशब्दौ' ख०।

(क) एवंपदं विवृणोति शब्द इति।

न्यायभाष्यम्

अभिभवानुपपत्तिश्च व्यञ्जकसमानदेशस्याभिव्यक्तौ प्राप्त्यभावात्—व्यञ्जकेन समानदेशोऽभिव्यज्यते शब्द इत्येतस्मिन् पक्षे नोपपद्यतेऽभिभवः। न हि भेरीशब्देन तन्त्रीस्वनः प्राप्त इति।

न्यायवार्त्तिकम्

ग्रहणं निमित्तभेदानुविधायीति चेत् न, ग्रहणभेदस्यैकत्रादृष्टत्वात्—अथ मन्यसे न शब्दो भिद्यते, शब्दे त्वभिन्ने ग्रहणं निमित्तभेदानुविधायि भवति ग्रहणभेदाच्चाभिभव इति ; न, ग्रहणभेदस्यैकत्रादृष्टत्वात—यद्यभिन्नः शब्दः, ग्रहणभेदो न प्राप्नोति ; न ह्यभिन्ने ग्रहणभेदं विषये पश्यामः। अथाभिन्नेऽपि विषये ग्रहणानि भिद्यन्त इति मन्यसे नित्यं ग्रहणभेदः स्यात्, ततश्च भिन्नोऽभिन्न इति भिन्नाभिन्नप्रत्ययौ न स्याताम्। अभिभवानुपपत्तिश्च ग्रहणयोर्युगपदसम्भवात्—न हि ग्रहणे युगपद्भवतः, न चैकं ग्रहणमात्मन एवाभिभावकम्, न चायमभिभवो नास्ति, तस्माद्भिद्यते शब्दः।

अभिभवानुपपत्तिश्च व्यञ्जकसमानदेशस्याभिव्यक्तौ प्राप्त्यभावात्—व्यञ्जकेन समानदेशोऽभिव्यज्यत (क) इति एतस्मिन् पक्षे नोपपद्यतेऽभिभवः। कस्मात्? व्यञ्जकसमानदेशत्वात्—न हि (ख)व्यञ्जकसमानदेशेनाप्राप्तः शब्दोऽभिभवितुं शक्यः। अप्राप्तत्वात् (ग) नह्यप्राप्तमभिभावकं भवति।

न्यायवार्त्तिकतात्पर्यटीका

सत्यम्, अन्यदन्येनाभिभूयते ; तथाऽपि न गकारस्य नानात्वमपि तु तद्ग्रहणानाम्, तेषां चाभिभाव्याभिभावकभावो न गकारस्येत्यनेनाभिप्रायेण शङ्कते—ग्रहणमिति। निराकरोति—न ग्रहणभेदस्येति। अर्थभेदाधीननिरूपणो ग्रहणभेदो नार्थभेदमन्तरेण शक्यो निरूपयितुम्। (घ) न च भेदेनानिरूपितः शक्योऽभिभाव्याभिभावकभावेन प्रत्येतुमित्यर्थः। नित्यं ग्रहणभेदः स्यादिति, ग्रहणभेददर्शनाभ्युपगमे नियतमर्थभेदोऽभ्युपगन्तव्यः। तथा च सर्वमेव भिद्यत इति नाभिन्नं किंचिद्भवेत्। भेदोऽपि न स्यादभेदाश्रयत्वाद्भेदस्येत्यर्थः। अभिभवानुपपत्तिश्चेति, यस्मिन्नेव क्षणे पूर्वं ज्ञानमुत्तरेणोत्पद्याभिभवनीयं तदैव तेन विनाश्यते, न चासतोऽभिभव इत्यर्थः।

(क) 'अभिव्यज्यते शब्द इति' इति भाष्ये विशेषः।

(ख) अत्र 'व्यञ्जकसमानदेशत्वेन' इति समीचीनतया सम्भाव्यते। तथाच अनभिव्यक्तस्याभिभवस्वीकारानुपयोगात् अभिव्यक्तस्यैवाभिभवोऽङ्गीकर्त्तव्यः, अभिव्यक्तिस्तु शब्दस्य वीणादिदेश एव इति दूरदेशवर्त्तिना भेर्यादिना नाभिभव इत्याशयः।

(ग) प्राप्त्यभावादिति भाष्यं शब्दान्तरेण धृत्वा व्याचष्टे नहीति। अप्राप्तमिति कर्त्तरि क्तः, अभिभाव्यदेशेऽवर्त्तमानमपीत्यर्थः।

(घ) नच भेदेऽनिरूपिते शक्योऽभिभाव्याभिभावकभावः प्रत्येतुमिति पाठो युक्तः सम्भाव्यते।

न्यायभाष्यम्

अप्राप्तेऽभिभव इति चेत् शब्दमात्राभिभवप्रसङ्गः—अथ मन्येत असत्यां प्राप्ता-वभिभवो भवतीति, एवं सति यथा भेरीशब्दः कश्चित्तन्त्रीस्वनमभिभवति एवमन्तिकस्थो-पादानमिव दवीयःस्थो(१)पादानानपि तन्त्रीस्वनानभिभवेद् अप्राप्तेरविशेषात्। तत्र क्वचिदेव भेर्यां प्रणादितायां सर्वलोकेषु समानकालास्तन्त्रीस्वना न श्रूयेरन् इति। नानाभूतेषु शब्दसन्तानेषु सत्सु श्रोत्रप्रत्यासत्तिभावेन कस्यचिच्छब्दस्य तीव्रेण

न्यायवार्त्तिकम्

अथाप्राप्तमप्यभिभावकं भवतीति मन्यसे, वीणाशब्दानामश्रवणप्रसङ्गः—अप्राप्ताः शङ्ख-रासभादिशब्दा अभिभावका इति न कदाचिद्वीणादिशब्दाः श्रूयेरन्। सर्वत्र सन्तीति चेत् न, पूर्वदोषानुवृत्तेः—अथ मन्यसे (२) यो व्यञ्जकसमानदेशं शब्दमभ्युपैति तस्यैष दोषः, अस्माकं तु सर्व एव शब्दाः समानदेशाः, तस्माददोषोऽयमिति ; न, पूर्वदोषानतिवृत्तेः—समानदेशत्वे शब्दानां व्यञ्जकेषु नियमो नास्तीति यत्किञ्चिद् व्यञ्जक(३)मुपात्तं सर्वशब्दव्यक्तिहेतुरिति पूर्वदोषानतिवृत्तिरिति। (क)समानदेशत्वे च वीणावेणुशब्दानां शङ्खशब्देन वीणावेणुशब्दयोरभिभव इति वीणादिशब्दाश्रवणप्रसङ्गः। तस्माच्छब्दा एव भिद्यन्त इति। तेषां च भिन्नानां समान-देशत्वे सति ये कर्णशष्कुलीमत्याकाशदेशे युगपत् समवयन्ति तत्र यः पटुः शब्दः स इतरस्याभि-भावक इति। अभिभवश्च नाम मन्दस्य पटीयसा ग्रहणादग्रहणमिति।

न्यायवार्त्तिकतात्पर्यटीका

सांख्यमतेऽपि नाभिभव इत्याह—अभिभवेति। पराजितं सांख्यं दृष्ट्वा नास्माकमयमस्त्यनु-योग इति मन्वानो मीमांसकः पुनः शङ्कते—सर्वत्रेति। निराकरोति—नेति।

वृत्तिः

जातित्वादिना विशेष्यत्वसम्भवेऽपि जातित्वादेरप्रत्यक्षत्वान्न व्यभिचारः। मनस इन्द्रियत्वा-भावाच्च नाऽऽत्मनि व्यभिचारः, आत्मन ऐन्द्रियकत्वाभावाद्वेत्याहुः।

अप्रयोजकत्वमाशङ्क्याऽऽह—कृतकेति। कृतके घटादौ यथा उपचारो ज्ञानं तथैव कार्यत्वप्रकारकप्रत्यक्षविषयत्वादित्यर्थः। तथा च कार्यत्वेनानाहार्यसार्वलौकिकप्रत्यक्ष-बलादनित्यत्वमेव सिध्यति।

---

(१) ज-पुस्तके '-पादानमपि तन्त्रीस्वनमभि-' इति पाठः। (२) योऽभिव्यञ्जक-' क०। (३) '-मुपात्तं न सर्वशब्दस्य' ख०।

(क) सर्वशब्दानां समानदेशत्व दोषान्तरमाह समानेति।

न्यायभाष्यम्

मन्दस्याभिभवो युक्त इति। कः (१)पुनरयमभिभवो नाम? ग्राह्यसमानजातीयग्रहणकृतमग्रहणम् अभिभवः; यथोल्काप्रकाशस्य ग्रहणार्हस्याऽऽदित्यप्रकाशेनेति ॥१३॥

न्यायवार्त्तिकम्

यदि च सन्तानवृत्तिः शब्दः कर्णशष्कुलीमदाकाशदेशं प्राप्तश्च गृह्यते, दिग्देशप्रत्ययो न प्राप्नोति (क) पूर्वेण शब्द उत्तरेण शब्द इति। न हि विषयेषु प्रत्यासीदत्सु दिग्देशप्रत्ययो दृष्टः गन्धादिवदिति। न उपादाननिमित्तत्वाद्दिग्देशव्यपदेशस्य—योऽयं शब्देषु दिग्देशव्यपदेशः नायं शब्दनिमित्तः पूर्वापरादिभिन्नेभ्यो निमित्तेभ्य उपजायमानानामेकदेशग्रहणात् तुल्यो दिग्देशव्यपदेशः स्यात्; तस्मान्न शब्दनिमित्तः। कुतस्तर्ह्ययं भवतीति वाच्यम्, निमित्तभेदात्—यानि निमित्तानि शब्दकारणस्य संयोगस्यानुग्रहकारीणि दिग्देशवन्ति तेषां निमित्तानां भेदाद् दिग्देशप्रत्यया इति। य उपलभ्यमाननिमित्ताः शब्दास्तेषु तद् युक्तं येषां तु शब्दानां निमित्तानि नोपलभ्यन्ते तेषु दिग्देशप्रत्ययो न युक्तः? न न युक्तः, शब्दसन्तानस्य निमित्तभेदाभिमुख्येनाऽऽदौ प्राप्तेः—यः शब्दसन्तानो यस्मान्निमित्तादुपजायते स समन्तात् शब्दान्तराणि सन्तनोति। तत्र यः शब्दविशेष आदौ कर्णशष्कुलीमत आकाशदेशस्य तदभिमुखेन भागेन सम्बध्यते तन्निमित्तः पूर्वापरादिशब्दव्यपदेशः इति। यदा पुनराद्यशब्दपरिच्छेदो नास्ति तदा विपर्यय इति।

न्यायवार्त्तिकतात्पर्यटीका

सांख्यश्चोदयति—यदि संतानवृत्तिरिति। परिहरति—शब्दसंतानस्य निमित्तभेदाभिमुख्येनाऽऽदौ प्राप्तेरिति। निमित्तभेदो भेरी शङ्खतात्वादिश्च तदाभिमुख्येन यः कर्णशष्कुल्यवरुद्धस्य नभसः श्रोत्रस्य भागः स्थितस्तस्मिन्नादौ य उत्पन्नः शब्दस्तस्य प्राप्तेः पूर्वादिदिगवस्थितशङ्खादिजन्माऽयं शब्द इत्यनुमीयते। एतदुक्तं भवति—विशिष्टदिग्देशावस्थितशङ्खादिप्रभवशब्दसंतानजन्यस्य तस्य शब्दस्य कोऽपि धर्मभेदः श्रोत्रगोचरः, यस्मात्तस्य विशिष्टदिग्देशावस्थितशङ्खादिप्रभवत्वमनुमीयते; न चासौ सामान्यविशेषोऽव्यपदेश्यत्वान्नास्ति। न हीक्षुक्षीरगुडादीनां मधुरत्वावान्तरसामान्यभेदाः प्रत्यक्षवेदनीयाः शक्या अव्यपदेश्यतया प्रत्याख्यातुम्; अनुभवश्च समानः। तस्मादानुमानिकः शब्दे दिग्देशप्रत्यय इति। यः शब्दसंतान इति। संतनोतीति संतानः, आद्यः शब्दो यो जायते स संतनोतीति सम्बन्धः। यस्मात्तन्निमित्तादभिमुखेनेति योजना। आद्यशब्देति, तदभिमुखभागयुक्तः शब्द इति।

वृत्तिः

केचित्तु—उपचाराद्विनाशित्वात् कृतकवदिति दृष्टान्त इति।

---

(१) 'पुनरभिभवो' इति बि-टि।

(क) 'पूर्वेणे'ति एनप्रत्ययः। एवमुत्तरेणेत्यत्र।

(सू०)—न घटाभावसामान्यनित्यत्वान्नित्येष्वप्यनित्यवदुपचाराच्च ॥ १४ ॥

न्यायभाष्यम्

न खलु आदिमत्त्वादनित्यः शब्दः। कस्मात् ? व्यभिचारात्। आदिमतः खलु घटाभावस्य दृष्टं नित्यत्वम्। कथमादिमान् ? कारणविभागेभ्यो हि घटो न भवति। कथमस्य नित्यत्वम् ? योऽसौ कारणविभागेभ्यो न भवति न तस्याभावो भावेन कदाचिन्निवर्त्यत इति। यदप्यैन्द्रियकत्वात्, तदपि व्यभिचरति, ऐन्द्रियकं च सामान्यं नित्यं चेति। यदपि कृतकवदुपचारादिति, एतदपि व्यभिचरति ; नित्येष्वनित्यवदुपचारो दृष्टः—यथा हि भवति वृक्षस्य प्रदेशः कम्बलस्य प्रदेशः एवमाकाशस्य प्रदेशः आत्मनः प्रदेश इति भवतीति ॥ १४ ॥

न्यायवार्त्तिकम्

एके तु ब्रुवते—नैव शब्देषु दिग्देशप्रत्ययाः सन्ति। कुतः ? चक्षुर्विषयसिद्धौ दिग्देशाध्यवसायात्। तथाहि जात्यन्धानां पूर्वापरादिप्रत्ययाः शब्दे न सन्तीति। अपरे तु दिग्देशव्यपदेशेन चक्षुःश्रोत्रे अप्राप्यकारिणी इति ब्रुवते। तेषामुक्तमुत्तरं प्रत्यक्षसूत्रं वर्णयद्भिरिति ॥ १३ ॥

न घटाभावसामान्यनित्यत्वान्नित्येष्वप्यनित्यवदुपचाराच्च। सूत्रस्य पूर्वहेतूनामनैकान्तिकत्वज्ञापनमर्थः। शेषं भाष्ये ॥ १४ ॥

न्यायवार्त्तिकतात्पर्यटीका

तदेवं स्वमतमुक्त्वा परमतमाह—एके त्विति। परोक्षे वक्तरीति शेषः। यद्यपि जात्यन्धानामपि कथंचिदभिमुखपृष्ठपार्श्वतः शब्दविवेकः संभवति तथाऽपि पूर्वापरदिग्विभागो नास्तीत्यत उक्तम्—जात्यन्धानामिति ॥ १३ ॥

न घ—च (सू० १४) ॥ (क)

वृत्तिः

परे तु कृतकवदुपचारात्। कृतकसुखदुःखादिवद् व्यवहारात्। यथा हि सुखादौ तीव्रमन्दादिव्यवहारः शब्देऽप्येवम्, न तु नित्ये तथेत्याहुः ॥ १३ ॥

यथाश्रुते हेतूनां व्यभिचारमाशङ्कते—(न घटेति)

नोक्ता हेतवः घटाभावस्य घटध्वंसस्य नित्यत्वाद् अविनाशित्वाद् आदिमत्त्वं व्यभिचारि। ऐन्द्रियकत्वं सामान्ये व्यभिचारि, नित्येष्वप्यनित्यवदुपचारात्, यथा घटाकाशमुत्पन्नम्, अहं सुखी जात इत्यादि ॥ १४ ॥

(क) १४-सूत्रस्य तात्पर्यटीका नोपलभ्यते।

(सू०)—तत्त्वभाक्तयो(१)र्नानात्वस्य विभागादव्यभिचारः ॥१५॥

न्यायभाष्यम्

नित्यमित्यत्र किं तावत् तत्त्वम्? (२)अर्थान्तरस्यानुत्पत्तिधर्मकस्याऽऽत्महानानुपपत्तिर्नित्यत्वम्, तच्चाभावे नोपपद्यते। भाक्तं तु भवति (३)यत्तत्राऽऽत्मानमहासीद् यद् भूत्वा न भवति न जातु तत् पुनर्भवति, तत्र नित्य इव नित्यो घटाभाव इत्ययं पदार्थ इति। तत्र यथाजातीयकः शब्दो न तथाजातीयकं कार्यं किंचिन्नित्यं दृश्यत इत्यव्यभिचारः ॥ १५ ॥

न्यायवार्त्तिकम्

तत्त्वभाक्तयोर्नानात्वस्य विभागादव्यभिचारः। नित्यत्वमित्यत्र किं तावत् तत्त्वम्? उभयान्तापरिच्छिन्नवस्तुसत्ता(४)सम्बन्ध इति। विपर्ययादनित्यत्वम्, एतच्चाभावे नास्ति। भाक्तं तु तद्भवति नित्य इव नित्यो घटाभाव इति, न पुनर्नित्य एव कालद्वयाननुभवात्—प्रध्वंसाभावो न प्रागस्ति न घटकालेऽस्ति, प्रागभावो न घटकाले न प्रध्वंसकाल इति। कथं तर्हि नित्य इव नित्य इत्युच्यते? भक्त्या। का पुनरियं भक्तिः? प्रागभावस्य कारणाभावः प्रध्वंसाभावस्य विनाशाभावः। उभयं चैतन्नित्यविषयमिति, एतत्सामान्यान्नित्य इव नित्यो न पुनर्नित्य एवेति ॥ १९ ॥

न्यायवार्त्तिकतात्पर्यटीका

तत्त्व—रः (सू० १५) ॥ एतच्चाभावे नास्तीति। न सत्तासम्बन्धो (क)नोभयान्तावच्छिन्नत्वमित्यर्थः ॥ १९ ॥

वृत्तिः

प्रथमे व्यभिचारं परिहरति—(तत्त्वभाक्तयोरिति)

तत्त्वस्य पारमार्थिकस्य भाक्तस्य च नानात्वस्य भेदस्य विभागाद् विवेकात् न व्यभिचारः। ध्वंसे हि उत्पत्तिमत्त्वलक्षणम् आदिमत्त्वम्, त्रैकालिकत्वरूपनित्यत्वाभावरूपं चानित्यत्वमस्त्येव, अविनाशित्वान्नित्यत्वमौपचारिकम्, अतो न व्यभिचारः। आदिमत्त्वं प्रागभावावच्छिन्नसत्त्वं न चैतदभावे इति वाऽर्थः ॥ १५ ॥

---

(१) '-र्नानात्वविभागा-' इति ज-ल-ग-झा-सम्मतः पाठः। वि-फ-पुस्तकयोर्न्यायसूचीनिबन्धे च असमस्तपाठो गृहीतः। (२) 'आत्मान्तरस्य' ज-ल-ग०। (३) 'यत्तत्राऽऽत्मा न महानासीद्' इति ज०।
(४) क-ख-पुस्तकयोः-'संस्पर्श' इति मुद्रितम्, तत्र धृतं पाठान्तरं तु गृहीतम्।

(क) अत्र नोभयान्तापरिच्छिन्नत्वमिति सम्यक्तया सम्भाव्यते।

न्यायभाष्यम्

यदपि सामान्यनित्यत्वादिति इन्द्रियप्रत्यासत्तिग्राह्यमैन्द्रियकमिति—

(सू०)—सन्तानानुमानविशेषणात् ॥ १६ ॥

(१)नित्येष्वव्यभिचार इति प्रकृतम्। नेन्द्रियग्रहणसामर्थ्याच्छब्दस्यानित्यत्वम्। किं तर्हि? इन्द्रियप्रत्यासत्तिग्राह्यत्वात् सन्तानानुमानं तेनानित्यत्वमिति ॥ १६ ॥

यदपि नित्येष्वप्यनित्यवदुपचाराद् इति। न—

(सू०)—कारणद्रव्यस्य प्रदेशशब्देनाभिधानात् ॥ १७ ॥

(क)नित्येष्वप्यव्यभिचार इति। एवमाकाशप्रदेशः आत्मप्रदेश इति नात्राऽऽकाशात्मनोः कारणद्रव्यमभिधीयते यथा कृतकस्य। कथं ह्यविद्यमानमभिधीयते,

न्यायवार्त्तिकम्

इन्द्रियप्रत्यासत्तिग्राह्य ऐन्द्रियक इति—

सन्तानानुमानविशेषणात्। अव्यभिचारः। न वयमैन्द्रियकत्वादित्यनेनानित्यत्वं प्रतिपादयामः अपि तु शब्दस्याभिव्यक्तिं प्रतिषेधामः। न हि व्यज्यमानस्यैन्द्रियकत्वं युक्तमिति पुरस्तादुक्तम् ॥ १६ ॥

कारणद्रव्यस्य प्रदेशशब्देनाभिधानान्नित्येष्वप्यव्यभिचारः(ख)। न हि नित्यानां द्रव्याणां प्रदेशशब्देन कारणमुच्यते। आकाशस्य प्रदेश आत्मनः प्रदेश इति नाऽऽकाशात्मनोः कारणद्रव्यमभिधीयते यथा कृतकस्य। किमिति नाभिधीयते? अविद्यमानत्वात्—न हि विद्यमाना आकाशादेः प्रदेशा इति। कथं न विद्यन्ते? प्रमाणतोऽनुपलब्धेः—यद्याकाशादेः प्रदेशाः स्युः प्रमाणत उपलभ्येरन्निति। कथं प्रमाणतोऽनुपलब्धिः? विकल्पानुपपत्तेः—प्रदेशशब्देन कारणं वाऽभिधीयते आधारो वा? न कारणमकृतकत्वात्—यस्मादकृतकमाकाशमतो न कारणार्थः प्रदेश-

वृत्तिः

द्वितीये व्यभिचारमुद्धरति—(सन्तानेति)

सन्तानस्यानुमाने अनुमितिकरणे लिङ्गे विशेषणात्। सन्तानः सन्तन्यमानः एकधर्मावच्छिन्नत्वेन ज्ञायमानः। तेन सामान्यवत्त्वे सतीति विशेषणीयम् इति ॥ १६ ॥

---

(१) 'नित्ये व्यभिचारः' इति ज-ग०। 'नित्येष्वप्यव्यभिचारः' इति फ०।

(क) 'नित्येष्वप्यव्यभिचार इति' इत्यंशः ग-ज-ल-पुस्तकेषु सूत्रांशतया गृहीतः, फ-पुस्तके तु सर्वथा परित्यक्तः। झा-पुस्तके भाष्यतया धृतः। न्यायसूचीतात्पर्यपरिशुद्धिप्रभृतिषु सूत्रांशतया न गृहीतः। अस्माकं तु 'नित्येष्वप्यव्यभिचार इत्येव। आकाशप्रदेश' इत्यादिः पाठः सम्यक्तया प्रतिभाति। (ख) क-वार्त्तिक-पुस्तके '-प्यव्यभिचार (इति)' इत्येवं मुद्रितम्।

न्यायभाष्यम्

अविद्यमानता च प्रमाणतोऽनुपलब्धेः। किं तर्हि तत्राभिधीयते ? संयोगस्याव्याप्यवृत्तित्वं—परिच्छिन्नेन द्रव्येणाऽऽकाशस्य संयोगो नाऽऽकाशं व्याप्नोति अव्याप्य वर्त्तत इति, तदस्य कृतकेन द्रव्येण सामान्यम्। न ह्यामलकयोः संयोग आश्रयं व्याप्नोति। सामान्यकृता च भक्तिराकाशस्य प्रदेश इति। अनेनाऽऽत्मप्रदेशो व्याख्यातः। संयोगवच्च शब्दबुद्ध्यादीनाम् अव्याप्यवृत्तित्वमिति। परीक्षिता च तीव्रमन्दता शब्दतत्त्वं न भक्तिकृतेति।

न्यायवार्त्तिकम्

शब्देनोच्यते। नाऽऽधारोऽनाश्रितत्वात्—अनाश्रितमाकाशं तस्याऽऽधारार्थो न शक्यो वक्तुमिति। लोकविरोध इति चेत् नान्यथा तदुपपत्तेः—यद्याकाशं निष्प्रदेशं प्रतिपद्यसे ननु लोको विरुध्यते पूर्वभागेण व्याप्त आदित्य इति। न, अन्यथा तदुपपत्तेः—संयोगस्याव्याप्यवृत्तित्वे प्रदेशशब्देनाभिधीयमाने न लोकविरोधः, यस्माद् यत्संयोगस्याव्याप्यवृत्तित्वं तत्प्रदेशशब्देनाभिधीयते। एतच्च प्रदेशवता द्रव्येणाऽऽकाशस्य सामान्यम्। ये खलु परिच्छिन्ने (१)आमलकादिके भवतस्तयोर्यः संयोगो वर्तते स ते न व्याप्नोति प्रदेशवती च ते। आकाशसंयोगोऽपि नाऽऽकाशं व्याप्नोतीति प्रदेशवद्द्रव्यसामान्यात् प्रदेशवदाकाशमिति भाक्तः प्रयोगः। का पुनरियं भक्तिः ? अतथाभूतस्य तथाभाविभिः सामान्यम्; उभयेन भज्यत इति भक्तिः। एतस्मात् सामान्यादध्यारोपितप्रदेशवृत्तिः प्रदेशशब्दः—यस्मादाकाशस्य प्रदेशवद्भिर्द्रव्यैः सामान्यं संयोगस्याव्याप्यवृत्तित्वमस्त्यतः प्रदेशशब्दोऽप्याकाशे प्रयुज्यत इति। एवमेतत् न तत्त्वतः, कुत इति चेत् न प्रमाणतोऽनुपलब्धेः—अथ मन्यसे आकाशप्रदेशाः प्रदेशवद्द्रव्यसामान्यादाकाश उपचर्यन्ते न पुनस्तत्त्वतस्तदस्तीति (क) न (२) प्रमाणमस्ति; न प्रदेशस्य प्रमाणतोऽनुपलब्धेः—न ह्याकाशादेः प्रदेशप्रतिपादकं प्रत्यक्षादिप्रमाणं सम्भवतीति। स्वरूपेणानभिधानाच्च—यद्याकाशस्य प्रदेशाः

वृत्तिः

तृतीये व्यभिचारं वारयति—

(कारणद्रव्यस्य प्रदेशशब्देनाभिधानात् नित्येष्वप्यव्यभिचार इति)

आकाशे हेतुर्नास्त्येव। आकाशे प्रादेशिकत्वव्यवहारस्तु गौणः, प्रदेशशब्देन कारणद्रव्यस्य कारणवतो द्रव्यस्याभिधानात्। न ह्याकाशं तादृशम्, तादृशत्वे वा साध्यसत्त्वात् न व्यभिचारः। एवं सुखी जात इत्यादौ सुखाद्युत्पत्तिरेव विषय इति भावः ॥१७॥

(१) अतः परं क-वार्त्तिके 'अविप्रतिपन्न' इत्यधिकम्। (२) 'प्रमाणमस्तीति' ख०।

(क) 'न प्रमाणमस्तीति न तदस्ती'त्यस्य व्याख्यानं ग्रन्थेऽन्तर्भूतमिति सम्भाव्यते, सम्भावनाबीजं तु क-ख-पुस्तकयोर्धृतं सन्तीति पाठान्तरम्। तथाच न पुनस्तत्त्वतस्ते सन्तीति युक्तः पाठः। अगतिकतया च तत् पदं प्रमाणपरतया केनचिद् व्याख्यातम्।

न्यायवार्त्तिकम्

स्युः ते स्वरूपेण व्यपदिश्येरन् यथा पटस्य प्रदेशाः। के ? तन्तवः। न पुनराकाशस्य प्रदेशाः के इत्युक्ते स्वरूपेण व्यपदेष्टुं शक्या इति। किमोऽनुपपत्तिश्च पूर्ववत्—यांश्चाऽऽकाशप्रदेशान् भवान् मन्यते ते किमाकाशात्मका उत नेति ? किं चातः ? यद्याकाशात्मका अनेकमाकाशमिति प्राप्तम्। अथ न, तेषां स्वभावो वक्तव्यः—कथं च ते तस्य प्रदेशा इति वक्तव्यम्। अनाकाशात्मकाः सन्तः आकाशस्य प्रदेशा इति केनार्थेनाभिधीयन्ते ? तद् यथा तन्तवः पटस्य प्रदेशा इत्युक्ते कारणार्थ आधारार्थश्च गम्यते न पुनराकाशस्य प्रदेशेष्वेतदस्ति। प्रदेशाभावादनाधारः संयोग इति चेन्नानाधारः आकाशवृत्तित्वात्—अथ मनुषे यद्याकाशदेशा न सन्ति आकाशदेशाश्रयः संयोगोऽनाधारः। न अनाधारः आकाशवृत्तित्वात्—यस्मात् त्वयैवोच्यते आकाशाश्रय इति, तस्मान्नानाधार इति। समानदेशा इति चेत् नाबाधनात्—अथ मन्यसे मूर्त्तिमद्द्रव्यसंयोगा ये आकाशदेशे वर्तन्ते ते प्रदेशाभावात् सर्व एव समानदेशाः प्राप्नुवन्ति इति, एवं च समानदेशत्वे सति न किञ्चिद्बाध्यत इति। तदेवं प्रदेशवद्द्रव्यसामान्यादाकाशप्रदेश इति (क)भाक्तः प्रत्यय इति। निष्प्रदेशत्वात् सर्वेण सर्वशब्दोपलब्धिप्रसङ्ग इति चेत् न, उक्तोत्तरत्वात्—अथ मनुषे यदि निष्प्रदेशमाकाशं (ख) तेन तर्हि सर्व एव शब्दाः समानदेशा इति सर्वैः सर्वः शब्द उपलभ्येत, न तूपलभ्यते, तस्माद् अन्यान्यवृत्तयः शब्दाः सर्वैरग्रहणादङ्गुलिरूपादिवदिति ; एतच्च न, उक्तोत्तरत्वात्—उक्तोत्तरमेतत् ; यथा संयोगस्याव्याप्यवृत्तित्वं तथा शब्दस्यापीति।

गुणत्वाद् व्यापकमित्येके—एके गुणत्वाद्धेतोः शब्दसंयोगादि अङ्गुलिरूपवद् व्यापकं प्रतिपद्यन्ते। त एवं प्रष्टव्याः व्यापकत्वमिति कोऽर्थः ? (१)यद्याश्रयवृत्तित्वं व्यापकत्वं न किञ्चिद् बाध्यते। अथान्यत् तन्नास्ति। वयं तु व्याप्तिमङ्गुलिरूपस्याऽऽश्रयोपलब्ध्योपलब्धिं ब्रूमः, न पुनः शब्दादय आश्रयोपलब्धावुपलभ्यन्ते तस्मादङ्गुलिरूपवन्न व्यापका इति। समुदितस्थानानामेकसमुदाय्युपलब्ध्यनुपलब्धी व्याप्त्यव्याप्ती एकाश्रयाणामाश्रयोपलब्धाविति। अथ य आकाशे मूर्त्तिमतां संयोगास्तेषां

न्यायवार्त्तिकतात्पर्यटीका

ननु यद्यन्यद् व्यापकत्वं नास्ति कथं तर्हि भवद्भिः केषांचिद् व्यापकत्वमव्यापकत्वं च केषांचिदिष्यत इत्यत आह—वयं तु व्याप्तिमङ्गुलिरूपस्येति। यत्र यत्राऽऽश्रयोपलब्धिस्तत्र तत्र यद्वस्तूपलब्धियोग्यं सदुपलभ्यते तद् व्यापकम्, तेन बलाकाव्यापकमपि शौक्ल्यं मन्दमन्दालोके बलाकायामुपलभ्यमानायामपि नोपलभ्यते योग्यताभावात्। ईदृशं संयोगादीनां व्यापकत्वमशक्यं गुणत्वेन साधयितुमनुपलब्धिविरोधादित्याह—न पुनः शब्दादय इति, उपलब्धियोग्या इति शेषः। सर्ववस्तुविषयं च स्वाभिमतं व्यापकत्वाव्यापकत्वं संक्षिप्याऽऽह—समुदितस्थानानामिति। समुदितस्थाना हि सत्तादयो गोत्वादयश्च व्यापका एकसमुदाय्युपलम्भेऽप्युपलब्धेः,

(१) 'यद्याश्रयवृत्तित्वव्याप्तिः' क०।

(क) क-पुस्तके 'प्रत्ययः (प्रयोगः) इति' इति मुद्रितम्। (ख) तेनेति कुत्राप्येतीत्यनुसन्धेयम्।

न्यायवार्त्तिकम्

कांश्चित् केचित् कृतकान् प्रतिपद्यन्ते कांश्चिदकृतकानिति। तत्र कर्यद्रव्यसंयोगः कृतकः संयोगजत्वात् (क)उत्पद्यमानस्य कारणसम्बन्धिभिः कार्यस्य संयोगजः संयोग इति। (१)क्रियाजं तु केचित् नेच्छन्ति यावद्द्रव्यभावित्वात् संयोगस्य, अविभक्तस्य संयोगो नास्तीति नास्त्याकाशे क्रियाजः संयोग इति अण्वाकाश(२)संयोगमकृतकमिच्छन्ति। (३)तत्राण्वाकाशसंयोगस्य तावत् कृतकत्वेऽनुमानम् (ख)—आकाशेन कृतकसम्बन्धेन सम्बन्धी परमाणुर्मूर्त्तिमत्त्वादिभ्यो घटादिवदिति। कार्याकाशसंयोगो विप्रतिपत्तिविषयो न यावद्द्रव्यभावी अविनश्यदाधारत्वे क्रियावद्द्रव्यवृत्तित्वे सत्यप्राप्तिप्रतिद्वन्द्वित्वात् मूर्त्तिमदितरसंयोगवत्। तस्मात् कार्यद्रव्येणाऽऽकाशस्य संयोगजः संयोगः क्रियाजश्च, परमाणोस्तु क्रियाज इति। (ग) विप्रतिपत्तिविषया विभागिन आकाशादयः (४)क्रियावद्द्रव्यसंयोगित्वात् परमाणुवत्। यथा परमाणोः क्रियावद्द्रव्यसंयोगा अयावद्द्रव्यभाविनः, संयोगवच्छब्दबुद्ध्यादयश्चाऽऽत्मन्यव्यापकाः संयोगस्य चाव्याप्यवृत्तित्वमात्मनः प्रदेशार्थ इति व्याख्यातम्। (५)एकस्य चानेक-

न्यायवार्त्तिकतात्पर्यटीका

संयोगादयस्तु समुदितस्थाना अव्यापकाः, न ह्येते समुदायिन्येकस्मिन्निरूप्यन्ते अपि तु समुदितेष्वेव। एकाश्रयाणां रूपादीनां व्यापकानामव्यापकानां च शब्द-बुद्ध्यादीनामाश्रयोपलब्धावुपलब्ध्यनुपलब्धी व्याप्त्यव्याप्ती इति योजना। एकसमुदायीत्यत्रैकग्रहणमशेषसमुदायिनिवृत्त्यर्थम्, न त्वेको विवक्षितस्तद्ग्रहणं वा; तेन कतिपयावयवोपलब्धौ तदनुपलब्धौ चोपलभ्यमानोऽवयवी व्यापकत्वेनोक्तो भवति। मूर्त्तिमत्त्वादिभ्य इत्यादिग्रहणेन स्पर्शवत्त्वाव्यापित्वादीनि गृह्यन्ते। कार्याकाशसंयोगो विप्रतिपत्तिविषय इति। यदि कार्याकाशसंयोगमात्रं पक्षीक्रियते ततो विनश्यदाधारद्रव्यवर्तिनः (घ)संयोगस्येत्यस्त्यत एव यावद्द्रव्यभावित्वमित्यपसिद्धान्तः स्यादित्यत उक्तम्—विप्रतिपत्तिविषय इति। तेनैवानेकान्तिकं स्यादत उक्तम्—अविनश्यदाधारत्व इति। तथाऽपि पटस्य नीलीद्रव्यसंयोगेन यावद्द्रव्यभाविनाऽनैकान्तिकं स्यादित्यत उक्तम्—क्रियावद्द्रव्यवृत्तित्वे इति। विवक्षितपरस्परविभागहेतुक्रियावत्त्वमिह ग्राह्यम्। क्वचित् पठ्यते—विप्रतिपत्तिविषया विभागिन आकाशादयः क्रियावद्द्रव्यसंयोगित्वात् परमाणुवदिति। अत्र यथाकाशादयो विभागिन इति साध्येत

---

(१) 'क्रियाजन्यं तु' ख०। (२) '-संयोगं तु कृतकमिच्छन्तीति' ख०। (३) 'तत्रैवाऽऽकाश-' क०। (४) 'क्रियावद्द्रव्यसंयोगित्वाद् विभागित्वं संयोगवत्' इति क-पुस्तकधृतं पाठान्तरम्। (५) 'एकस्यानेक-' ख०।

(क) उत्पद्यमानस्येति। उत्पद्यमानस्य कार्यस्य घटादेर्यत् कारणं कपालादि तद्रूपैः सम्बन्धिभिः सह य आकाशसंयोगस्तज्जन्यो घटादेराकाशादिसंयोग इति योजना। (ख) 'आकाशेन सहेत्यर्थः'। (ग) विप्रतिपत्तीत्यादिः परमाणुवदित्यन्तो भागः असांवलिक इति तात्पर्यटीकायां क्वचित् पठ्यते' इति दर्शनात् परिज्ञायते। (घ) अत्र प्रामादिकः पाठः।

न्यायभाष्यम्

कस्मात् पुनः सूत्रकारस्यास्मिन्नर्थे सूत्रं न श्रूयते इति ? शीलमिदं भगवतः सूत्रकारस्य बहुष्वधिकरणेषु द्वौ पक्षौ न व्यवस्थापयति तत्र शास्त्रसिद्धान्तात् तत्त्वावधारणं प्रतिपत्तुमर्हतीति मन्यते। शास्त्रसिद्धान्तस्तु न्यायसमाख्यातमनुमतं बहुशाखमनुमानमिति ॥ १७ ॥

न्यायवार्त्तिकम्

(क)मूर्त्तिमत्प्रदेशवद्द्रव्यसम्बन्धित्वं प्रदेशार्थः। यद्वा यदाकाशस्यैकस्य सतः प्रदेशवताऽनेकेन सम्बन्धित्वं तत् प्रदेशवद्द्रव्यसामान्यम्, यथा घटादेः।

'कस्मात् पुनः सूत्रकारस्यास्मिन्नर्थे सूत्रं न श्रूयते' इति। कतमस्मिन्नर्थे? निष्प्रदेशमाकाशं निष्प्रदेश आत्मेति एतस्मिन्नर्थे। अर्थतोऽधिगतेर्न सूत्रम्—यस्मादयमर्थोऽर्थतोऽधिगम्यते ततो न सूत्रित इति। शब्दसन्तानप्रतिपादने वा न सूत्रमर्थतोऽधिगतेः।

शास्त्रसिद्धान्ताद्वा तदधिगतिः—शास्त्रसिद्धान्तस्तु न्यायसमाख्यातं बहुशाखमनुमानं तेनानुक्तमपि गम्यत इति न सूत्र्यते ॥ १७ ॥

न्यायवार्त्तिकतात्पर्यटीका

तत आत्मादिभिरपि विभागिनः स्युरित्यपसिद्धान्तः स्यादत उक्तम्—विप्रतिपत्तिविषया इति। ततो मूर्त्तेन (ख)विभागो न इत्यभिमतं लभ्यते। संयोगस्य चाव्याप्यवृत्तित्वमिति। प्रदेशवतोः खल्वामलकयोः संयोगः (१)अव्याप्यवृत्तिता संयोगस्याऽऽकाशादावपि प्रदेशवद्द्रव्यसामान्यम्, तेनाऽऽकाशादौ प्रदेशोपचार इत्युक्तम् (ग), संप्रति (२)सामान्यान्तरमुपचारबीजमाह—एकस्य चेति। यथा घट एकोऽनेकमूर्त्तिमद्द्रव्यसंयोगी प्रदेशवानेवमाकाशमित्यर्थः।

कतमस्मिन्नर्थ इति प्रश्नः। तस्यार्थः 'तत्त्वभाक्तयोर्नानात्वस्य विभागादव्यभिचारः' 'संतानानुमानविशेषणात्' 'कारणद्रव्यस्य प्रदेशशब्देनाभिधाना'दिति सूत्रैरेवानैकान्तिकत्वपरिहारादस्मिन्नर्थे सूत्रं न श्रूयते इत्ययुक्तमिति। उत्तरम्—निष्प्रदेशमाकाशमिति, न हि 'कारणद्रव्यस्य प्रदेशशब्देनाभिधाना'दिति सूत्रमाकाशादीनां निष्प्रदेशत्वं साक्षाद् ब्रूत इत्यर्थः। एवं स्थिते भाष्यकारीये प्रश्ने वार्तिककारः स्वमुत्तरमाह—अर्थतोऽधिगतेरिति। विषयान्तरं प्रश्नोत्तरयोराह—शब्दसंतानेति।

भाष्यकारीयमुत्तरमाह (घ)—द्वौ पक्षौ न व्यवस्थापयतीति। भाष्यस्यार्थः निष्प्रदेशत्वमात्मादीनां शब्दसंतानं च साक्षादाचक्षाणः सूत्रकारः पक्षं व्यवस्थापयेन्न तु तेनेदमभिहितमिति। अनुमानतरोश्च पञ्चानां रूपाणां चतुर्णां वा संपदः शाखा बहव इत्यर्थः ॥ १७ ॥

---

(१) 'व्याप्यवृत्तिता' इति ख०। (२) 'सामान्यान्तर उप-' क-ख०।

(क) अत्र मूर्त्तिमत्प्रदेशवदित्यनयोरेकं व्याख्यानमपरं व्याख्येयं प्रमादादुभयं ग्रन्थेऽन्तर्भावितमिति प्रतिभाति। (ख) 'विभागिनः' इति भवितुमर्हति। (ग) २९४पृ० वार्त्तिके द्रष्टव्यम्। (घ) 'आहे'ति भाष्यकार इति शेषः।

न्यायभाष्यम्

(१) अथापि खल्विदमस्ति इदं नास्तीति कुत एतत् प्रतिपत्तव्यमिति ? प्रमाणत उपलब्धेरनुपलब्धेश्चेति। अविद्यमानस्तर्हि शब्दः—

(सू०)—प्रागुच्चारणादनुपलब्धेरावरणाद्यनुपलब्धेश्च ॥१८॥

प्रागुच्चारणान्नास्ति शब्दः। कस्मात् ? अनुपलब्धेः। "सतोऽनुपलब्धिरावरणादिभ्यः" एतन्नोपपद्यते। कस्मात् ? आवरणादीनामनुपलब्धिकारणानामग्रहणात्—अनेनाऽऽवृतः शब्दो नोपलभ्यते असन्निकृष्टश्चेन्द्रिय(२)व्यवधानादित्येवमादि अनुपलब्धिकारणं न गृह्यत इति सोऽयमनुच्चारितो नास्तीति। उच्चारणमस्य व्यञ्जकं तदभावात् प्रागुच्चारणादनुपलब्धिरिति। किमिदमुच्चारणं नामेति ? विवक्षाजनितेन

न्यायवार्त्तिकम्

(क)अथापीदमस्ति इदं नास्तीति भाष्यम्। योऽयं पर्यनुयोगस्तस्य को विषय इति ? अनुपलभ्यमानास्तित्वम्—ये शब्दस्य नित्यत्वं कल्पयन्ति ते इदं पर्यनुयोज्याः इदमस्ति इदं नास्तीत्येतद् भवन्तः(३)कुतः प्रतिपद्यन्त इति। एवमनुयुक्ताः सन्तः प्रतिब्रुवते प्रमाणत उपलब्धेरनुपलब्धेश्चेति।

अविद्यमानस्तर्हि शब्दः ?—

प्रागुच्चारणादनुपलब्धेरावरणाद्यनुपलब्धेश्च इति। यच्चोभयपक्षसम्प्रतिपन्नं घटाद्यनित्यत्वेन, तेन चानुयोज्याः—यदिदमनित्यं घटादि भवद्भिः प्रतिपद्यते तत् कथमनित्यमिति। एवमनुयुक्ता यदि घटाद्यनित्यत्वन्यायं प्रतिपद्यन्ते स शब्देऽपीति सूत्रम्। सतोऽनुपलब्धिकारणाभावे कदाचिदनुपलब्धेरनित्यः शब्द इति सूत्रार्थः। शेषं भाष्ये।

व्यञ्जकाभावादग्रहणमिति चेत् नोक्तोत्तरत्वात्—अथ मन्यसे शब्दस्योच्चारणं व्यञ्जकं तस्याभावान्नोपलभ्यत इति असिद्धं विशेषणमनुपलब्धिकारणाभाव इति। किमिदमुच्चारणं नाम ?

न्यायवार्त्तिकतात्पर्यटीका

सतोऽनुपलब्धिकारणाभाव इति। प्राक्प्रध्वंसाभावाभ्यां व्यभिचारो मा भूदिति सत इत्युक्तम् ॥ १८ ॥

---

(१) 'तथाऽपि' इति फ०। (२) '-व्यवधानाद् वा इत्येव'—इति वि-टि-भा०। (३) 'कथं'।

(क) 'अथापि खल्वि'ति भाष्ये विशेषः।

न्यायभाष्यम्

प्रयत्नेन कोष्ठ्यस्य वायोः प्रेरितस्य कण्ठताल्वादिप्रतिघातः, यथास्थानं प्रतिघाताद्वर्णाभिव्यक्तिरिति। संयोगविशेषो वै प्रतिघातः, प्रतिषिद्धं च संयोगस्य व्यञ्जकत्वम्, तस्मान्न व्यञ्जकाभावादग्रहणम्, अपि त्वभावादेवेति। सोऽयमुच्चार्यमाणः श्रूयते श्रूयमाणश्चाभूत्वा भवतीति अनुमीयते। (१)ऊर्ध्वं चोच्चारणान्न श्रूयते स भूत्वा न भवति अभावान्न श्रूयत इति। कथम्? आवरणाद्यनुपलब्धेरित्युक्तम्। तस्मादुत्पत्तितिरोभावधर्मकः शब्द इति ॥ १८ ॥

एवं च सति तत्त्वं पांशुभि(२)रिवावाकिरन्निदमाह—

(सू०)—तदनुपलब्धेरनुपलम्भादावरणोपपत्तिः ॥१९॥

यद्यनुपलम्भादावरणं नास्ति, आवरणानुपलब्धिरपि तर्ह्यनुपलम्भात् नास्तीति तस्या अभावादप्रतिषिद्धमावरणमिति। कथं पुनर्जानीते भवान् नाऽऽवरणानुपलब्धिरुपलभ्यत

न्यायवार्त्तिकम्

विवक्षाजनितेन प्रयत्नेन कौष्ठ्यस्य वायोः प्रेरितस्य कण्ठादिस्थानाभिघातः। तन्न उक्तोत्तरत्वात्—वायुगतवेगापेक्षो(३) वायुना ताल्वादिसंयोगोऽभिघातः संयोगस्य व्यञ्जकत्वं प्राक् प्रतिषिद्धमिति ॥ १८ ॥

एवं च (क)सति तत्त्वं पांशुभिरवाकिरन्निदमाह। कोऽस्यार्थः? तत्त्व उक्ते जात्या प्रत्यवतिष्ठते, सा च जातिः—

वृत्तिः

न चोक्तहेतूनामप्रयोजकत्वम्, विपक्षबाधकसत्त्वादित्याह—(प्रागिति)

शब्दो यदि नित्यः स्यात् उच्चारणात् प्रागप्युपलभ्येत श्रोत्रसन्निकर्षसत्त्वात्, न चात्र प्रतिबन्धकमस्तीत्याह—आवरणेति। आवरणादेः प्रतिबन्धकस्यानुपलब्ध्याऽभावनिर्णयात् देशान्तरगमनं तु शब्दस्यामूर्त्तत्वात् न सम्भाव्यते। अतीन्द्रियानन्तप्रतिबन्धकत्वकल्पनामपेक्ष्य शब्दानित्यत्वकल्पनैव लघीयसीति भावः ॥ १८ ॥

---

(१) 'ऊर्द्ध्वं चोच्चारणं श्रूयते' इति ग०, 'ऊर्द्ध्वं चोच्चारणात् श्रूयते' इति ज०।

(२) '-रिवाकिरन्' इति ग-फ०।

(३) 'वेगापेक्षेण वायुना' इति आदर्श-पुस्तकधृतं पाठान्तरम्।

(क) क-ख-पुस्तकयोः 'सतीति' नास्ति पाठान्तररूपेण तु धृतम्; भाष्यानुसारितया चास्माभिस्तदेव गृहीतम्।

न्यायभाष्यम्

इति ? किमत्र ज्ञेयं प्रत्यात्मवेदनीयत्वात् समानम्—अयं खल्वावरणम् अनुपलभमानः प्रत्यात्ममेव संवेदयते नाऽऽवरणमुपलभ इति, यथा कुड्येनाऽऽवृतस्याऽऽवरणमुपलभमानः प्रत्यात्ममेव संवेदयते। सेयमावरणोपलब्धिवदावरणानुपलब्धिरपि संवेद्यैवेति। एवं च सत्यपहृतविषयमुत्तरवाक्यमस्तीति ॥ १९ ॥

न्यायवार्त्तिकम्

तदनुपलब्धेरनुपलम्भादावरणोपपत्तिः। कोऽस्य वाक्यस्यार्थः ? आवरणाद्यनुपलब्ध्याऽनेकान्त इत्यर्थः। यथावरणाद्यनुपलब्धिरनुपलभ्यमानाऽप्यस्ति तथावरणमित्यनेकान्तः। अथानुपलब्धिरनुपलभ्यमाना नास्ति ? तदभावादुपलब्धिरस्ति। न चाविद्यमानस्योपलब्धिरस्तीति सिद्धमावरणम्। कथं पुनर्भवान् जानीते नाऽऽवरणानुपलब्धिरुपलभ्यत इति ? किमत्र ज्ञेयं प्रत्यात्मवेदनीयत्वात्—(१)प्रत्यात्ममेवायमावरणानुपलब्धिमावरणोपलब्धिं च वेदयते। एवं च सत्यपहृतविषयमुत्तरवाक्यमिति। 'अपहृतविषय'मिति नास्योत्थानमस्तीति ॥ १९ ॥

न्यायवार्त्तिकतात्पर्यटीका

अत्र जातिवादिनः सूत्रद्वयम्—

तदनुपलब्धेरनुपलम्भादावरणोपपत्तिः।

(सू० १९) ॥ आवरणानुपलब्धेस्तावदुपलब्धिर्न संभवति अनुपलब्धिस्वरूपविरोधात्। तस्मादावरणानुपलब्धिरेव वक्तव्या। तथाचाऽऽवरणानुपलब्धेरभावे सत्यावरणोपलब्धिस्तया त्वावरणसद्भावः ज्ञानस्य निरालम्बनत्वायोगात्।

द्वितीयं सूत्रम्—अनुपलम्भादप्यनुपलब्धिसद्भावान्नाऽऽवरणानुपपत्तिरनुपलम्भात्।

(सू० २०) ॥ यदि पूर्वोक्तदोषभयादनुपलभ्यमानाऽप्यावरणानुपलब्धिरस्ति तथा सत्यनुपलब्धेरनैकान्तिकत्वान्नाऽऽवरणाभावोऽनुपलम्भादिति। तदिह द्वाभ्यां सूत्राभ्यामनैकान्तिकत्वं देशितम्। अस्यावतारभाष्यम्—एवं च सति तत्त्वमिति।

तदेतद्वार्तिककारो व्याचष्टे—एवं चेति। सूत्रयोस्तात्पर्यं प्रश्नपूर्वकमेकत्र दर्शयति—कोऽस्य वाक्यस्येति। अत्र सिद्धान्ती पृच्छति—कथं पुनरिति। जातिवाद्याह—किमत्र ज्ञेयं प्रत्यात्मवेदनीयत्वादिति। सिद्धान्त्याह—एवं सतीति। यद्यावरणानुपलब्धिरुपलभ्यते मानसेन प्रत्यक्षेण तदा नानैकान्तिकत्वं न चाऽऽवरणसद्भावः। उत्तरवाक्यमिति। जात्युत्तरवाक्यमित्यर्थः। नास्योन्मानमस्तीति। न सूत्रद्वयस्याप्युत्थानमस्तीत्यर्थः ॥ १९ ॥

---

(१) 'प्रत्यात्मवेदनीयामेवाय-' इति क०।

न्यायभाष्यम्

अभ्यनुज्ञावादेन तूच्यते जातिवादिना—

(सू०)—अनुपलम्भादप्यनुपलब्धिसद्भावान्नाऽऽवरणानुपपत्तिरनुपलम्भात् ॥ २० ॥

यथाऽनुपलभ्यमानाऽप्यावरणानुपलब्धिरस्ति एवमनुपलभ्यमानमप्यावरणमस्तीति यद्यभ्यनुजानाति भवान् (१) अनुपलभ्यमानावरणानुपलब्धिरस्तीति(१*) अभ्यनुज्ञाय च वदति नास्त्यावरणमनुपलम्भादिति (२), एतस्मिन्नप्यभ्यनुज्ञावादे प्रतिपत्तिनियमो नोपपद्यत इति ॥ २० ॥

न्यायवार्त्तिकम्

अभ्यनुज्ञावादेन तूच्यते—

अनुपलम्भादप्यनुपलब्धि(क)सद्भाववन्नाऽऽवरणानुपपत्तिरनुपलम्भात् इति । अस्य सूत्रस्य अनुपलब्धेरनैकान्तिकत्वमर्थः ॥ २० ॥

न्यायवार्त्तिकतात्पर्यटीका

ननु पूर्वेणैव सूत्रेणाऽऽवरणोपपत्तौ दर्शितायां कृतमनुपलम्भादित्यनेन सूत्रेणेत्यत आह— अभ्यनुज्ञावादेनेति ।

अनु—म्भात् (सू० २०) ॥ पूर्वसूत्रेण अनुपलब्धेरनुपलम्भादभाव उक्तः, इह त्वनुपलम्भादपि यद्यनुपलब्धेर्नाभावादिति । तदनेनाभ्यनुज्ञाया अनैकान्तिकत्वमुच्यत इति नापार्थकमेतत्सूत्रमित्यर्थः । सूत्रगतोऽपिरभ्युपगमांशमवद्योतयति । एतदेवाऽऽह भाष्यकारः—(ख)यद्यभ्यनुजानाति भवान् इति । तदनेन सूत्रद्वयेनानैकान्तिकत्वमुक्तमिति स्थितम् ॥ २० ॥

वृत्तिः

भ्रान्तस्य पूर्वपक्षपरं सूत्रद्वयम्—(तदनुपलब्धेरिति, अनुपलम्भादिति च)

यथा त्वयावरणस्यानुपलब्ध्याऽभाव इत्युच्यते, तथावरणानुपलब्धेरनुपलम्भात्तदभाव आवरणोपलब्धिरेव स्यात् । यदि वा आवरणानुपलब्धेरनुपलम्भेऽपि नाऽऽवरणानुपलब्धेरभावः तदावरणस्यानुपलम्भादपि नाऽऽवरणस्यानुपपत्तिरित्यर्थः ॥१९—२०॥

---

(१) 'अनुपलभ्यमानाऽप्यावरणानुपलब्धिरस्ति एवमनुपलभ्यमानमप्यावरणमस्तीति । यद्यभ्यनुजानाति न चानुपलभ्यमाना नावरणानुपलब्धिरस्तीति' ज० । (२) अतः परं ग-झा-ल-पुस्तकेषु 'एतत्' इत्यधिकम् ।

(क) यद्यपि 'अनुपलब्धिसद्भाववत्' इति वार्त्तिकधृत एव पाठो व्याख्यादर्शनेन भाष्यकारसम्मतः प्रतीयते तथाऽपि मूले आदर्शसकलपुस्तकानुसारितया न्यायसूचीनिबन्धगृहीततया च '-सद्भावात्' इति गृहीतम् ।

(ख) क-ख-पुस्तकयोः 'यद्यप्यनुजानाति' इति मुद्रितम् ।

(सू०)—अनुपलम्भात्मकत्वादनुपलब्धेरहेतुः ॥२१॥

न्यायभाष्यम्

यदुपलभ्यते तदस्ति, यन्नोपलभ्यते (१) तन्नास्ति, इति अनुपलम्भात्मकमसदिति व्यवस्थितम्। उपलब्ध्यभावश्चानुपलब्धिरिति सेयमभावत्वान्नोपलभ्यते(१*)। सच्च

न्यायवार्त्तिकम्

अनुपलम्भात्मकत्वादनुपलब्धेरहेतुः। अतथाजातीयेन प्रत्यवस्थानादनुत्तरमिति सूत्रार्थः। यथाजातीयकः शब्दोऽनित्यस्तथाजातीयकं किञ्चिन्नित्यं न दृष्टमिति। उक्तं चात्र। किमुक्तम् ? उभयान्तापरिच्छिन्नवस्तुसत्तासम्बन्धो नित्यतेति। तस्मादयथार्थप्रत्यवस्थानात् (क) न किञ्चिदेतत्।

न्यायवार्त्तिकतात्पर्यटीका

अस्योत्तरसूत्रम्—

अनु—तुः (सू० २१) ॥ जातिवादी अनुपलब्धेरनुपलब्धिर्नास्ति विरोधादिति मन्यते। तत्र विधिविषयप्रमाणगोचरताऽनुपलब्धौ विरुध्येत; (ख) न तु निषेधगोचरप्रमाणविषयताऽपि। ततश्चोपलब्धिं निषेधता प्रमाणेन मनसाऽनुपलब्धिग्रहणं न विरोधमावहति। तदयं सूत्रार्थः—अनुपलब्धेः आवरणानुपलब्धेः अनुपलम्भात्मकत्वाद् आवरणोपलब्धिनिषेधात्मकत्वात् 'तदनुपलब्धेरनुपलम्भा-' दित्ययमावरणोपपत्तौ न हेतुः, असिद्धत्वात्—निषेधविषयेणानुपलब्धेरनुपलम्भादिति।

तदेतद्भाष्यकारो व्याचष्टे—यदुपलभ्यत इति। यदुपलभ्यते विधिविषयेण प्रमाणेन तदस्ति, यन्नोपलभ्यते यन्निषेधविषयेण प्रमाणेनोपलभ्यते तन्नास्तीति। तस्मादनुपलम्भात्मक-निषेधविषयप्रमाणागम्यमसदिति स्थितम्।

उपलब्ध्यभावश्चानुपलब्धिः (ग)सेयमभावत्वान्नोपलभ्यते विधिविषयेण प्रमाणेन। शेषं सुगमम्।

अस्य वार्तिककारः परमतात्पर्यमाह—अतथाजातीयेनेति। अनुत्तरं जात्युत्तरमित्यर्थः। यथाजातीयक इति। उपलब्धस्य हि शब्दस्यासत्यनुपलब्धिकारणे प्रागूर्द्ध्वं चोच्चारणादनुपलभ्यमानस्यानित्यस्य सधर्मा नान्य आत्मादिर्दृष्टोऽनित्य इति। ननु प्रागूर्द्ध्वं चोच्चारणान्मा भूच्छब्द इति एतावताऽपि नित्यान्तरवैधर्म्येण कस्मान्न नित्यः शब्दः, न ह्यात्माकाशादयो नित्याः सर्वथा सर्वेषां सधर्माणः; मा भूदेषामभेद इत्यत आह—उक्तं चेति।

---

(१) अयमंशः टि-पुस्तके नास्ति।

(क) क-ख-वार्त्तिकपुस्तकयोः 'यत्किञ्चिदेतत्' इति प्रमादान्मुद्रितम्। (ख) 'ननु' इत्यादर्श-पुस्तक-पाठः प्रामादिकः। (ग) भाष्यगतम् 'इति' पदं त्यक्तम्।

न्यायभाष्यम्

खल्वावरणं तस्योपलब्ध्या भवितव्यं न चोपलभ्यते तस्मान्नास्तीति। (१)तत्र यदुक्तं नाऽऽवरणानुपपत्तिरनुपलम्भादित्ययुक्तमिति ॥ २१ ॥

अथ शब्दस्य नित्यत्वं प्रतिजानानः कस्माद्धेतोः प्रतिजानीते—

न्यायवार्त्तिकम्

अनित्यः शब्दो गुणत्वे सत्यस्मदादीन्द्रियविषयत्वाद् बुद्धिवत्। अव्यापकस्य व्यापकद्रव्यसमवायित्वे सति प्रत्यक्षत्वात् सुखवत्। आकाशनिष्प्रदेशत्वे हेतुः निष्प्रदेशमाकाशं व्यापकत्वात् आत्मवत्, द्रव्यस्य सतः (२) सर्वदाऽमूर्तत्वात् आत्मवदेव। व्यापकत्वादेवाकृतकत्वम्। (३)व्यापकत्वे च (क)द्रव्यव्यापकस्य सतः सर्वदाऽमूर्तत्वात्। एतेन दिक्कालौ व्याख्यातौ। एतावत्स्वसाधनास्थित्या व्यवस्थितम् अनित्यः शब्द इति ॥ २१ ॥

अथ शब्दस्य नित्यत्वं प्रतिजानान इति भाष्यम्। विप्रतिपत्तेः प्रमाणमूलत्वाद्धेतोः परिप्रश्नः।

न्यायवार्त्तिकतात्पर्यटीका

अनित्यत्वसाधनमाह—अनित्य इति। प्रत्यक्षत्वादित्युच्यमाने गोत्वादिभिर्व्यभिचारः स्यादत उक्तम्—(ख)व्यापकद्रव्ये समवाये सतीति। तथाऽप्यात्मसमवायिनैकत्वेन व्यभिचारः स्यादत उक्तम्—(ग) अव्यापकस्य असमवाये सतीति, तथाऽप्यात्मसमवायित्वस्येति। अमूर्त्तत्वादित्युच्यमाने घटादिभिः प्रदेशवद्भिः प्रथमे क्षणे व्यभिचारोऽत उक्तम्—सर्वदेति। तथाऽपि क्रियागुणादिभिर्व्यभिचारस्तेषामपि हि समवायिकारणं प्रदेश इत्यत उक्तम्—द्रव्यस्य सत इति ॥२१॥

तदेवं स्वपक्षसाधनमुक्त्वा विप्रतिपत्तिनिमित्तं परपक्षसाधनमुपन्यस्य निराकरोति—अथ शब्दस्येति।

वृत्तिः

सिद्धान्तसूत्रम्—(अनुपलम्भेति)

आवरणानुपलब्धेरनुपलम्भादावरणोपलब्धिरिति जात्युत्तरम्। 'अहेतुः' न मन्मतप्रतिषेधसाधनम्, अनुपलब्धेः आवरणानुपलब्धेः, अनुपलम्भात्मकत्वाद् उपलम्भाभावात्मकत्वात्, तस्य च मनसैव सुग्रहत्वात् तदनुपलब्धिरसिद्धेति भावः ॥ २१ ॥

---

(१) 'तत्र' ज-ल-ग०। (२) 'सदा' क-ख०। (३) 'व्यापकत्वं च' ख०।

(क) अत्र 'द्रव्यस्य सतः' इति सम्यक्। (ख) अत्र व्याख्यानव्याख्येययोरक्षरविसंवादो द्रष्टव्यः। (ग) क-ख-तात्पर्यपुस्तकयोः **'अव्यापकस्यासमवाये सतीति'** इति मुद्रितम्। 'असमवाये सती'त्यंशो वार्त्तिके न दृश्यते। 'तथाऽप्यात्मसमवायित्वेनेति समवाये सतीति' इत्येवं पाठकल्पनायां तु अर्थसङ्गतिर्भवतीति चिन्तनीयम्।

(सू०)—अस्पर्शत्वात् ॥ २२ ॥

न्यायभाष्यम्

अस्पर्शमाकाशं नित्यं दृष्टमिति तथा च शब्द इति ॥ २२ ॥

(क)सोऽयमुभयतः सव्यभिचारः—स्पर्शवांश्चाणुर्नित्यः, अस्पर्शं च कर्मानित्यं दृष्टम् ।

अस्पर्शत्वादित्येतस्य साध्यसाधर्म्येणोदाहरणम्—

(सू०)—न कर्मानित्यत्वात् ॥२३॥

(भा०) साध्यवैधर्म्येणोदाहरणम्—

(सू०)—(१)नाणुनित्यत्वात् ॥ २४ ॥

(भा०) उभयस्मिन्नुदाहरणे व्यभिचारान्न हेतुः ॥ २४ ॥

न्यायवार्त्तिकम्

विप्रतिपत्तिर्नाम द्वयोरेकविषया विरुद्धधर्मप्रतिपत्तिः । न च विप्रतिपत्तिः प्रमाणान्तरमन्तरेण युक्तेति नित्यत्वे प्रमाणं वक्तव्यमित्यत आह—

अस्पर्शत्वात् । नित्यः शब्दोऽस्पर्शत्वात् अनुपलब्धविपक्षैकदेशस्य प्रयोगः । (ख)आकाशवदिति ॥ २२ ॥

तस्य व्यभिचारदर्शनार्थं सूत्रम्—

न कर्मानित्यत्वात् । शेषमस्य भाष्ये ॥ २३ ॥

नाणुनित्यत्वात् ॥ २४ ॥(ग)

न्यायवार्त्तिकतात्पर्यटीका

अस्पर्शत्वात् (सू० २२) (घ) ॥ न क—त्वात् (सू० २३) (ङ) ॥

नाणु—त्वात् (सू० २४) ॥

अस्पर्शेन कर्मणैवोभयतो व्यभिचारे लब्धे नित्येनाणुना व्यभिचारोद्भावनं कृतकत्वानित्यत्ववत् समव्याप्तिकत्वनिराकरणार्थं द्रष्टव्यम् ॥ २४ ॥

वृत्तिः

सत्प्रतिपक्षमाशङ्कते—(अस्पर्शत्वात् इति)

शब्दो नित्यः अस्पर्शत्वाद् गगनवदिति भावः ॥ २२ ॥

न सत्प्रतिपक्षस्त्वदीयहेतोरनैकान्तिकत्वादित्याह—(न कर्मानित्यत्वात्)

अस्पर्शत्वं न शब्दनित्यत्वसाधकं कर्मणि व्यभिचारात् ॥ २३ ॥

---

(१) 'नाणुर्नित्यत्वात्' इति—वि० ।

(क) 'सोऽय'मित्यादिः 'उदाहरणम्' इत्यन्तो ग्रन्थः 'न कर्मे'त्यादित्रयोर्विंशसूत्रभाष्यमिति सम्भाव्यते, अत एव 'शेषमस्य भाष्ये' इति वार्त्तिकम् । मुद्रिताकारस्तु आदर्शपुस्तकानुसारी । (ख) आकाशवदित्यनेन भाष्यं व्याख्यातम् । वस्तुतः 'नित्यः शब्दोऽस्पर्शत्वात् आकाशवदिति अनुपलब्धविपक्षैकदेशस्य प्रयोगः' इत्याकारक एव ग्रन्थ इति सम्भाव्यते । (ग) अस्य वार्त्तिकं स्वातन्त्र्येण न दृश्यते । (घ-ङ) अनयोस्तात्पर्यटीका नोपलभ्यते ।

न्यायभाष्यम्

अयं तर्हि हेतुः—

(सू०)—सम्प्रदानात् ॥ २५ ॥

(भा०) सम्प्रदीयमानमवस्थितं दृष्टम्, सम्प्रदीयते च शब्द आचार्येणान्तेवासिने, तस्मादवस्थित इति ॥ २५ ॥

(सू०)—तदन्तरालानुपलब्धेरहेतुः ॥ २६ ॥

(भा०) येन सम्प्रदीयते यस्मै च, तयोरन्तरालेऽवस्थानमस्य केन लिङ्गेनोपलभ्यते। सम्प्रदीयमानो ह्यवस्थितः सम्प्रदातुरपैति सम्प्रदानं च प्राप्नोति इत्यवर्जनीयमेतत् ॥२६॥

न्यायवार्त्तिकम्

अयमन्यो हेतुः शब्दनित्यत्वे—

सम्प्रदानात्। न हि किञ्चिन्नित्यं सम्प्रदीयमानमित्यन्वयिनो दृष्टान्तस्याभावाद् विरुद्धः ॥ २५ ॥

अथायं प्रतिज्ञार्थः अवतिष्ठते शब्दः सम्प्रदानाद् घटादिवदिति। एवमपि नित्यत्वं न सिध्यति—

तदन्तरालानुपलब्धेरहेतुः। अवतिष्ठमानो हि दातृप्रतिग्रहीत्रोरन्तराले उपलभ्येतेति (क)इति विरोधः सूत्रार्थः ॥ २६ ॥

न्यायवार्त्तिकतात्पर्यटीका

अयं तर्हि हेतुः—

सम्प्रदानात् इति। संप्रदीयमानत्वादित्यर्थः ॥ २५ ॥

तद—तुः (सू० २६) ॥(ख)

वृत्तिः

अनैकान्तिकमपि साधकं स्याद् अत्राऽऽह—(नाणुनित्यत्वात् इति)

अनैकान्तिकस्य साधकत्वेऽणोः परमाणोर्नित्यत्वं न स्यात् रूपवत्त्वादिना तत्रानित्यत्वानुमानापत्तेरित्यर्थः ॥ २४ ॥

शङ्कते—(सम्प्रदानात् इति)

गुरुणा शिष्याय विद्यायाः सम्प्रदानात्; तथा च शब्दस्य प्राक् सत्त्वं सिद्धम्। तथा च—

तावत्कालं स्थिरं चैनं कः पश्चान्नाशयिष्यति ? (ग)

—इति न्यायान्नित्यत्वमर्थसिद्धमिति भावः ॥ २५ ॥

(क) एकम् 'इति' पदं सम्पातायातं सम्भाव्यते। (ख) २६श-सूत्रे तात्पर्यटीका नोपलभ्यते। (ग)'अनपेक्षत्व-सूत्रेण तच्चैतत् साधयिष्यते' इति द्वितीयार्द्धम् (श्लोकवार्त्तिकम्, शब्दनित्यत्वाधिकरणम्, ३६६ श्लोकः)।

(सू०)—अध्यापनादप्रतिषेधः ॥ २७ ॥

न्यायभाष्यम्

अध्यापनं लिङ्गम्, असति सम्प्रदानेऽध्यापनं न स्यादिति ॥ २७ ॥

(सू०)—उभयोः पक्षयोरन्यतरस्याध्यापनादप्रतिषेधः ॥२८॥

समानमध्यापनमुभयोः पक्षयोः संशयानिवृत्तेः, किमाचार्यस्थः शब्दोऽन्तेवासिन-

न्यायवार्त्तिकम्

अध्यापनादप्रतिषेधः । न विरोधोऽनुमानादुपलब्धेः । (क)न हि प्रत्यक्षतोऽनुपलब्धिरनुमानेनोपलब्धस्य सत्तां बाधते । किमनुमानम्? अध्यापनम् । किमिदमध्यापनं नाम? दीयमानस्य (ख)सम्प्रदानप्राप्तिः । दातृप्रतिग्रहीत्रोरन्तराले शब्दोऽस्त्यध्यापनात् शरादिवदिति ॥२७॥

न्यायवार्त्तिकतात्पर्यटीका

अध्या—धः (सू० २७) ॥ दातृप्रतिग्रहीत्रोरन्तराले शब्दोऽस्ति अध्यापनाद् गुरुणा शिष्याय दीयमानत्वाद् धनुर्वेदविदाचार्येण शिष्याय दीयमानेष्वादिवदिति ॥ २७ ॥

वृत्तिः

सिद्धान्तसूत्रम्—(तदन्तरेति)

शिष्ये उपसन्ने गुरुरध्यापयति, यदि च शब्दो नित्यः स्यात्तदा शिष्यागमनानन्तरमध्यापनात् पूर्वमपि शब्द उपलभ्येतेत्यनुपलब्ध्या च नास्ति शब्द इत्यतस्त्वदुक्तो न हेतुः ॥ २६ ॥

पूर्वपक्षसूत्रम्—(अध्यापनात् इति) ।

मदीयहेतोः प्रतिषेधो न युक्तः अध्यापनात् । यद्यन्तरालकाले शब्दो न स्यात् कथमध्यापनं घटेत? अनुपलब्धिस्तु शब्दस्य कण्ठताल्वाद्यभिघातरूपव्यञ्जकाभावादुपपद्यत इति भावः ।

आचार्यास्तु सूत्रद्वयमेवं व्याचक्षते—विभक्तिव्यत्यासाद् अहेतोस्तदन्तरालानुपलब्धिरर्थः । तथा च हेतोः स्वत्वस्याभावात् तदन्तरालस्य स्वत्वध्वंसस्यानुपलब्धिः, अतो न दानमित्यर्थः । प्रतिषेधो न युक्तः न हि दानं ममाभिप्रेतम्, किं त्वध्यापनम्, तच्च विद्यमानस्य शब्दस्यैवेति भावः ॥ २७ ॥

(क) 'न हि प्रत्यक्षतोऽनुपलब्धस्यानुमानेनोपलब्धिः सत्तां बाधते' इति क-ख-वार्त्तिकग्रन्थयोः प्रमादान्मुद्रितम् । अत एव वक्ष्यति भगवान् सूत्रकारः 'नानुमीयमानस्य प्रत्यक्षतोऽनुपलब्धिरभावहेतुः' (अ २, आ १, सू ३६) ।

(ख) 'सम्प्रदानं प्राप्तिः' इति क-ख-पुस्तकयोः प्रमादान्मुद्रितम् ।

न्यायभाष्यम्

मापद्यते तदध्यापनम्, आहोस्विन्नृत्योपदेशवद् गृहीतस्यानुकरणमध्यापनमिति। एवमध्यापनमलिङ्गं सम्प्रदानस्येति ॥ २८ ॥

अयं तर्हि हेतुः—

(सू०)—अभ्यासात् ॥ २९ ॥

अभ्यस्यमानमवस्थितं दृष्टम्। पञ्चकृत्वः पश्यतीति रूपमवस्थितं पुनः पुनर्दृश्यते। भवति (१)च शब्देऽभ्यासः—दशकृत्वोऽधीतोऽनुवाको विंशतिकृत्वोऽधीत इति। तस्मादवस्थितस्य पुनः पुनरुच्चारणमभ्यास इति ॥ २९ ॥

न्यायवार्त्तिकम्

उभयोः पक्षयोरन्यतरस्याध्यापनादप्रतिषेधः। न शब्दस्याध्यापनं प्रतिषिध्यते, (क)अपि तु नृत्योपदेशवदनित्यस्यैवाध्यापनमिति यत् पुनरेतद् 'दातृप्रतिग्रहीत्रोरन्तराले शब्दोऽस्ती'ति सिद्धसाधनमेतदिति। वयमपि ब्रूमो दात्रोच्चारितः शब्दः सन्तानवृत्त्या सम्प्रदानं प्राप्नोति। तस्मात् सम्प्रदानमवस्थाने न हेतुः ॥ २८ ॥

अयं तर्हि हेतुः—

अभ्यासात्। वीणादिवदिति। अनित्येष्वेव लङ्घनप्लावनादिष्वभ्यास इति विरुद्धः। अथावस्थानमभ्यासात् साध्येत तथाऽप्यनवस्थितेष्वेवाभ्यास इत्यनेकान्तः, अभ्यासस्वरूपानवधारणादसिद्धश्च। अभ्यासो (ख)ह्येकविषयोऽनेकज्ञानोत्पाद एकाकारविषयो वा। (ग)तत्रायमभ्यास एकविषय एकाकारविषयो वेति सन्दिग्धासिद्धः ॥ २९ ॥

न्यायवार्त्तिकतात्पर्यटीका

उभ—धः (सू० २८) ॥(घ)

वृत्तिः

सिद्धान्तसूत्रम्—(उभयोरिति)

अन्यतरस्य पक्षस्यानित्यत्वसाधकस्याध्यापनाद् यः प्रतिषेधः स न सम्भवति, उभयोः पक्षयोरध्यापनस्य समानत्वादिति शेषः। अध्यापनं हि गुरूच्चारणानूच्चारणं शिष्योच्चारणानुकूलोच्चारणं वा, तच्च स्थैर्यास्थैर्यपक्षयोस्तुल्यम्, न शब्दनित्यतायाः साहाय्यकं विधातुमलम्। न ह्यध्यापनं दानं येन स्वस्वत्वध्वंसपरस्वत्वापादनार्थं तस्य स्थैर्यमाशङ्कनीयम्। न वा दानं सम्भवति बहूनामेकदा स्वत्वविरोधात् परस्वदानासम्भवाच्च, अपि तु नृत्याध्यापनादाविवोपदेशमात्रमिति भावः ॥ २८ ॥

---

(१) 'च' इति वि-टि-पुस्तकयोर्नास्ति।

(क) 'अपि तु' इत्यनेन प्रक्रान्तोऽर्थः प्रतिषिध्यते इत्यत्र नान्वेति किन्तु अध्याहृतेन 'उच्यते' इत्यनेनेति बोध्यम्। (ख) अत्र एकविषयत्वम्—एकाकारविषयत्वं च ज्ञानपारतन्त्र्येण उत्पादेऽन्वित इति बोध्यम्। (ग) तत्रायमिति, 'अय'मित्यनेन शब्दपक्षकः अभ्यास उक्त इति बोध्यम्। (घ) २८श-सूत्रे तात्पर्यटीका नोपलभ्यते।

(सू०)—नान्यत्वेऽप्यभ्यासस्योपचारात् ॥ ३० ॥

न्यायभाष्यम्

(१)अनवस्थानेऽप्यभ्यासस्याभिधानं भवति द्विर्नृत्यतु भवान् त्रिर्नृत्यतु भवानिति, द्विरनृत्यत् त्रिरनृत्यद् द्विरग्निहोत्रं जुहोति द्विर्भुङ्क्ते ॥ ३० ॥

एवं व्यभिचारात् प्रतिषिद्धहेतावन्यशब्दस्य प्रयोगः प्रतिषिध्यते—

(सू०)—अन्यदन्यस्मादनन्यत्वादनन्यदित्यन्यताऽभावः ॥३१॥

यदिदमन्यदिति मन्यसे तत् स्वार्थेनानन्यत्वाद्(२) अन्यन्न भवति, एवमन्यताया अभावः। तत्र यदुक्तम् अन्यत्वेऽप्यभ्यासोपचारादिति एतदयुक्तमिति ॥ ३१ ॥

न्यायवार्त्तिकम्

नान्यत्वेऽप्यभ्यासस्योपचारात्। अभ्यासासिद्धावभ्यासोपचारविषयत्वेन साधनं तस्यानैकान्तिकत्वज्ञापनार्थं नान्यत्वेऽप्यभ्यासोपचारादिति ॥ ३० ॥

अन्यदन्यस्मादनन्यत्वादनन्यदित्यन्यताऽभावः। (क)एतत्सूत्रमन्यत्वप्रतिषेधार्थम्। यदिदमन्यदिति मन्यसे इदमन्यस्माद् अन्यद्वा स्याद् अनन्यद्वा। यद्यन्यत्, अनन्यन्न भवति यथा ब्राह्मणादन्यो न ब्राह्मण इति। अथानन्यत्, तथाऽप्यन्यन्न भवति अनन्यत्वात्; यदनन्यत् तत् कथमन्यद् भविष्यतीति ॥३१॥

न्यायवार्त्तिकतात्पर्यटीका

अभ्यासात् (सू० २९) (ख) ॥ यद्यन्यन्नाम जगति भवेत् ततोऽन्यत्वेऽप्यभ्यासोपचारादित्यनेनानैकान्तिकत्वमुद्भाव्येत तदेव नास्तीति वाक्छलेन प्रत्यवतिष्ठते—

नान्य—रात् (सू० ३०)(ग) ॥

अन्य—वः (सू० ३१) ॥ ३१ ॥

वृत्तिः

पूर्वपक्षसूत्रम्—(अभ्यासात् इति)

यद्धि स्थिरं तदभ्यस्यमानं दृष्टम्, यथा दशकृत्वो रूपं पश्यति, एवं शतकृत्वोऽनुवाकमधीत इत्यभ्यासात् स्थैर्यं शब्दस्येति भावः ॥ २९ ॥

उत्तरयति—(नान्यत्व इति)

पूर्वपक्षो न युक्तः। कुतः? अन्यत्वे भेदेऽपि शब्दानाम् अध्ययनाभ्यासस्य उपचारात् सम्भवात्। न ह्यभ्यासः स्थैर्यं साधयति, द्विर्जुहोति त्रिर्नृत्यतीत्यादौ भेदेऽप्यभ्यासदर्शनादिति भावः ॥ ३० ॥

---

(१) 'अन्यस्य चाप्यभ्यासाभिधानं' इति फ०। (२) स्वात्मनोऽनन्यत्वात्—इति पु० पा०।

(क) 'एतत् सूत्रमन्यत्वप्रतिषेधार्थ'मित्यंशः क-ख-पुस्तकयोः ३०श-सूत्रीयवार्त्तिके अन्तर्भावितः।

(ख-ग) २९-३०श-सूत्रयोस्तात्पर्यटीका नोपलभ्यते।

न्यायभाष्यम्

शब्दप्रयोगं प्रतिषेधतः शब्दान्तरप्रयोगः प्रतिषिध्यते—

(सू०)—तदभावे नास्त्यनन्यता तयोरितरेतरापेक्षसिद्धेः ॥३२॥

(१) अन्यस्मादनन्यतामुपपादयति भवान्, उपपाद्य चान्यत् प्रत्याचष्टे अनन्यदिति च शब्दमनुजानाति, प्रयुङ्क्ते चानन्यदित्येतत् समासपदम्, अन्यशब्दोऽयं प्रतिषेधेन सह (२)समस्यते। यदि चात्रोत्तरं पदं नास्ति कस्यायं प्रतिषेधेन सह समासः? तस्मात् तयो(३)रन्यानन्यशब्दयोरितरोऽनन्यशब्द इतरमन्यशब्दमपेक्षमाणः सिध्यतीति तत्र यदुक्तम् अन्यताया अभाव इति एतदयुक्तमिति ॥ ३२ ॥

न्यायवार्त्तिकम्

तदभावे नास्त्यनन्यता तयोरितरेतरापेक्षसिद्धेः। सूत्रस्यार्थोऽविरोधः। अनन्यत्वमभ्युपगतं तन्निवर्त्तत इति। कथं निवर्त्तते? प्रतिषेधस्यान्यविषयत्वात्; अन्याभावे अनन्यन्नास्तीति। न हि ब्राह्मणाभावेऽब्राह्मणः सिध्यति।

(क)अयं तर्हि हेतुः—प्रत्यभिज्ञानात्—तदभावे प्रत्यभिज्ञानं न दृष्टं मण्यादिषु, अस्ति च प्रत्यभिज्ञानं शब्दे, तस्मात् प्रत्यभिज्ञानाद् अवतिष्ठते शब्द इति। किमिदं प्रत्यभिज्ञानम्?

न्यायवार्त्तिकतात्पर्यटीका

तस्य परिहारसूत्रम्—

तद्—द्धेः (सू० ३२)॥ तयोरन्यानन्ययोर्मध्येऽनन्यस्यान्यापेक्षसिद्धेरित्यर्थः। (ख)न चान्यस्वरूपात्तदनन्यदिति परस्मादप्यनन्यद्भवितुमर्हति। न हि नीलमात्मनोऽनन्यदिति पीतादप्यनन्यदिति। अन्यदेव हि पीतान्नीलमिति परमार्थः।

वृत्तिः

अन्यतैव जगति नास्तीति कथमन्यत्वेऽप्यभ्यासोपपत्तिरिति तटस्थ आशङ्कते—(अन्यदिति)

यद्वस्त्वन्यस्मादन्यदुच्यते, तत् स्वस्मादनन्यत् अभिन्नम्, तत् कथमन्यत्? भेदाभेदयोर्विरोधादिति भावः। स्वाभेदस्याऽऽवश्यकत्वमिति हृदयम् ॥ ३१ ॥

समाधत्ते—(तदभाव इति)

'तदभावे'ऽन्यत्वस्याभावे 'अनन्यता'ऽपि नास्ति तयोर्भेदाभेदयोः सिद्धेः परस्पर-

---

(१) 'अन्यस्मादन्यता-' ल-ग-ज०, 'अन्यस्मान्यता-' वि-टि-भा०। (२) 'कल्पते' वि०। (३) '-रनन्यान्यशब्दयो-' ल-ग-ज०।

(क) उत्तरसूत्रभाष्यमेतद् द्रष्टव्यम्। (ख) "न च स्वरूपात् तदनन्यदिति" इति युक्तम्, अन्यस्वरूपादिति तु लिपिप्रमादः।

न्यायवार्त्तिकम्

तत्प्रत्ययविषयत्वम् । तत्प्रत्ययविषयत्वमन्यत्वेऽपीत्यनेकान्तः । अथ प्रत्यभिज्ञानं तत्प्रत्ययविषयत्याव्यभिचारः, न हि शब्दे कदाचित् तत्प्रत्ययविषयव्यभिचारोऽस्ति । यः पुनः सदृशे तत्प्रत्ययविषयः स विशेषदर्शनान्निवर्तते, अतो याऽसौ तत्प्रत्ययस्य शब्देऽव्यावृत्तिः तत् प्रत्यभिज्ञानमिति । न, तत्प्रत्ययस्याव्यावृत्तिरसिद्धा । अयं तावत् तत्प्रत्ययः पुरुषान्तरे निवर्त्तमानो दृष्टः । यत् पुनरेतद् विशेषदर्शनात् सदृशे तद्भावप्रत्ययो निवर्त्तत इति मन्यसे, एवमेतत्; शब्दे तु किं विशेषस्यादर्शनात् सदृशे तत्प्रत्यय उत तद्भावादेव तत्प्रत्यय इति सन्दिह्यते । अथ प्रत्यभिज्ञानं तद्भावाद् भवतीति पक्षस्तथाऽप्यन्यो हेतुर्वक्तव्यः । किं कारणम्? प्रत्यभिज्ञानस्य (१)पक्षविशेषणत्वेनोपयुक्तत्वात् । यत्पुनर्गोशब्दो गोशब्द इति प्रत्ययस्याव्यावृत्तिरस्तीति, न च गोशब्दस्य गोप्रत्ययकर्तृत्वव्यभिचारः इति, एतदपि सन्दिह्यते । कथम्? किं कारणसामान्याद् गोशब्दे गोप्रत्ययस्यानिवृत्तिराहो तद्भावादिति । एतेन तत्प्रत्ययकर्तृत्वं व्याख्यातम् । (२)युक्ता तु कारणसामान्याद्गोशब्दे गोशब्दप्रत्ययस्याव्यावृत्तिः । कथमिति? गोबुद्धौ गोबुद्धिप्रत्ययो न व्यावर्त्तते न चास्या गोशब्दबुद्धेस्तत्प्रत्ययकर्तृत्वं निवर्त्तते । तस्मात् तत्प्रत्ययहेतुत्वे प्रत्यभिज्ञानमहेतुः ।

न्यायवार्त्तिकतात्पर्यटीका

अयं तावत्प्रत्ययः पुरुषान्तरे निवर्त्तमानो दृष्ट इति । यदा खल्वेकस्य तत्प्रत्ययो भवति तदाऽवश्यं न पुरुषान्तरस्य, तस्मात् प्रत्ययाव्यावृत्तिरसिद्धैवेति । एवमेतदिति । सत्यं विशेषदर्शनं तत्प्रत्ययनिवृत्तिहेतुः, तदभावे तु विशेषादर्शनस्य न शक्यं संशयहेतुत्वं निवारयितुमित्यर्थः । यत्पुन(क)रेतद्गोशब्द इति । गोशब्दो गोशब्द इत्येकाकारः प्रत्ययो नैकमन्तरेण भवितुमर्हति । अथ भ्रान्तः कस्मान्न भवतीत्यत आह—न च गोशब्दस्येति । भ्रान्तत्वे हि ततो गोशब्दादर्थप्रत्ययो भ्रान्तः, यथा समारोपितधूमभावया मशकवर्त्या धूमध्वजानुमानम् । तस्मादभ्रान्तो गोशब्दैकत्वप्रत्ययः स्थायितामस्य सूचयतीत्यर्थः । दूषयति—एतदपीति । युक्ता तु कारणसामान्यात्तत्प्रत्ययस्याव्यावृत्तिरिति । गोशब्दबुद्धेः कारणमालम्बनं गोशब्दस्तस्य सामान्यं गत्वमोत्वं गोशब्दत्वमिति यावत्, तस्मात् तत्प्रत्ययस्य व्यावृत्तिर्युक्ता गोशब्दो गोशब्द इत्येवंरूपा । कथमिति प्रश्नः । गोबुद्धौ गोबुद्धिप्रत्ययो न व्यावर्तते जात्यभिप्राय-

वृत्तिः

सापेक्षत्वात् । वस्तुतस्तु तयोर्मध्ये इतरस्य एकतरस्य अनन्यत्वस्येतरापेक्षसिद्धेः (ख)इतरत्वस्य भेदस्य ज्ञानापेक्षा सिद्धिर्यस्य तादृशत्वादित्यर्थः ॥ ३२ ॥

---

(१) 'अपचविशेषण-' इति ख० । (२) 'युक्तं तु' इति क-ख० ।

(क) वार्त्तिके 'एतत्' इति नास्ति । (ख) तथाच सूत्रे उत्तरमितरपदं भावप्रधानमिति भावः ।

न्यायभाष्यम्

अस्तु तर्हीदानीं शब्दस्य नित्यत्वम्—

(सू०)—विनाशकारणानुपलब्धेः ॥३३॥

यदनित्यं तस्य विनाशः कारणाद् भवति यथा लोष्टस्य कारणद्रव्यविभागात्। शब्दश्चेदनित्यस्तस्य विनाशो यस्मात् कारणाद् भवति तदुपलभ्येत, न चोपलभ्यते तस्मान्नित्य इति ॥ ३३ ॥

न्यायवार्त्तिकम्

यश्चानुपलब्धविशेष एव निवर्त्तते तं प्रति तस्य वस्तुनः किं विशेषोऽस्ति नास्तीति भवन्त एव प्रष्टव्याः। यद्यस्ति विशेषः प्रत्ययाव्यावृत्तिरहेतुरनेकान्तात्। अथ नास्ति एकं वस्तु द्व्यात्मकमिति प्राप्तम्। विरोधादहेतुः प्रत्ययाव्यावृत्तिश्चाशेषपुरुषविषयतयाऽसिद्धा पुरुषमात्रविषयतयाऽनैकान्तिकीति ॥ ३२ ॥

अयं तर्हि हेतुः—

विनाशकारणानुपलब्धेः। यदनित्यं तस्य विनाशकारणमुपलभ्यते यथा लोष्टस्य कारणद्रव्यविभागः, न तु शब्दस्य तस्मान्नित्यः शब्द इति ॥ ३३ ॥

न्यायवार्त्तिकतात्पर्यटीका

मेकवचनं गोबुद्धाविति। यथा हि गोबुद्धिषु भिन्नास्वपि परस्परं गोबुद्धिर्गोबुद्धिरित्यनुगतावभासिनी प्रथा गोबुद्धित्वसामान्योपधाना स्वकारणभूता गोबुद्धीरालम्बते एवं गोशब्दो गोशब्द इति बुद्धिरपि गोशब्दत्वोपधाना गोशब्दव्यक्तीः, न पुनर्गोशब्दव्यक्तिमेकामनेकदेशकालव्यापिनीम्। न चास्या गोशब्दबुद्धेरिति। अत्रापि जातावेकवचनम्। गोशब्दो गोशब्द इति बुद्ध्यनुगतिः सामान्यनिबन्धना अनुगतित्वे सति गोशब्दबुद्धिसंबन्धित्वाद् गोशब्दबुद्धिर्गोशब्दबुद्धिरित्यनुगतबुद्धिवदिति।

भिन्नमभेदेन विद्वान् यश्चानुपलब्धविशेष एव निवर्तते तं प्रति तस्य वस्तुनः किं विशेषोऽस्ति नास्तीति भवन्त एव प्रष्टव्याः। उभयत्र दोषमाह—यद्यस्तीति। द्व्यात्मकमिति भिन्नमभिन्नमित्यर्थः। अशेषपुरुषविषयतयेति आधारतयेत्यर्थः ॥ ३२ ॥

विना—ब्धेः (सू० ३३) ॥

कारणद्रव्यविभाग इति। विभागेनासमवायिकारणसंयोगविनाशो लक्षितः तत्कार्यत्वात् ॥ ३३ ॥

वृत्तिः

शङ्कते—(विनाशेति)

शब्दो नित्य इत्यादिः ॥ ३३ ॥

(सू०)—अश्रवणकारणानुपलब्धेः सततश्रवणप्रसङ्गः ॥३४॥

न्यायभाष्यम्

यथा विनाशकारणानुपलब्धेरविनाशप्रसङ्ग एवमश्रवणकारणानुपलब्धेः सततं श्रवणप्रसङ्गः। व्यञ्जकाभावादश्रवणमिति चेत्? प्रतिषिद्धं व्यञ्जकम्। (१)अथ विद्यमानस्य (२)निर्निमित्तमश्रवणमिति (३)विद्यमानस्य निर्निमित्तो विनाश इति। समानश्च दृष्टविरोधो निमित्तमन्तरेण विनाशे चाश्रवणे चेति ॥ ३४ ॥

(सू०)—उपलभ्यमाने चानुपलब्धेरसत्त्वादनपदेशः ॥३५॥

अनुमानाच्चोपलभ्यमाने शब्दस्य विनाशकारणे विनाशकारणानुपलब्धेरसत्त्वादित्यनपदेशः, (४) यथा (क)यस्माद् विषाणी तस्मादश्व इति। किमनुमानमिति चेत्? सन्तानोपपत्तिः। उपपादितः शब्दसन्तानः संयोगविभागजाच्छब्दाच्छब्दान्तरं (५)ततोऽन्यस्ततोऽप्यन्यदिति। तत्र कार्यः शब्दः कारणशब्दं (६)निरुणद्धि

न्यायवार्त्तिकम्

अश्रवणकारणानुपलब्धेः सततश्रवणप्रसङ्ग इति। शेषं भाष्ये ॥ ३४ ॥

उपलभ्यमाने चानुपलब्धेरसत्त्वादनपदेशः। अनुमानेन शब्दस्य विनाशकारणमुपलभ्यते। यच्चानुमानेनोपलभ्यते न तन्नास्ति। किमनुमानम्? सन्तानोपपत्तिरिति। तस्मादनपदेशोऽयं विनाशकारणानुपलब्धेरिति।

यथा यस्माद्विषाणी तस्मादश्व इति। किं पुनरत्रासत् विषाणमाहोस्वित् (ख)विषाणसम्बन्ध इति? उभयमित्याह। यदा विषाणिनमर्थमश्वत्वेन साधयति तदा विषाणमस्त्येव न विषाणं प्रतिषिध्यते; अश्वविषाणसम्बन्धस्याभावादनुमानमसदिति युक्तमुक्तमसत्त्वादनपदेश इति।

न्यायवार्त्तिकतात्पर्यटीका

अश्र—ङ्गः (सू० ३४) (ग) ॥

उप—शः (सू० ३५) ॥ अनपदेशोऽहेतुरित्यर्थः। उभयमितीति। (७, घ) यदा क्रमेलकं विषाणित्वादश्वत्वेन साधयति तदाऽस्य न विषाणं नापि तत्सम्बन्धः यथा विषाणित्वं

---

(१) 'अथाविद्यमानस्य'—इति ग-ज०। (२) 'निर्निमित्तं श्रवणमिति'—इति वि०। (३) 'अविद्यमानस्य'—इति फ०। (४) 'यस्माद्विषाणी' इति ल-ग-ज०। (५) अत्र वि-टि-पुस्तकपाठो गृहीतः। 'ततोऽप्यन्यत्' इति ल-फ-ग-ज-झा०। (६) 'अभिरुणद्धि' इति ल०, 'विरुणद्धि' इति टि०। (७) 'यथा'—इति क०।

(क) 'यस्माद्विषाणी तस्मादश्वः' वै-सू० १६, आ० १, अ० २।

(ख) विषाणं शृङ्गं साधनभूतं तस्य सम्बन्धो व्याप्यतारूप इति विषाणसम्बन्धः साध्यधर्मविषाणयोर्व्याप्यव्यापकभाव इति तु फलितार्थः।

(ग) ३४श-सूत्रे तात्पर्यटीका नास्ति।

(घ) उभयस्यासत्त्वं दर्शयति यदेति। वार्त्तिके 'यदा विषाणिन'मित्यत्र विमतो मृगः अश्वो भवितुमर्हति विषाणित्वादित्यादिप्रयोगमभिप्रेत्य 'न विषाणं प्रतिषिध्यते' इत्यादिना हेतोर्विरुद्धत्वमुक्तम्,

न्यायभाष्यम्

प्रतिघातिद्रव्यसंयोगस्त्वन्त्यस्य शब्दस्य निरोधकः। दृष्टं हि तिरःप्रतिकुड्यमन्तिकस्थेनाप्यश्रवणं शब्दस्य श्रवणं दूरस्थेनाप्यसति व्यवधाने इति।

न्यायवार्त्तिकम्

कर्मत्ववदिति चेत् नाश्रयानित्यत्वात्—अथ मनुषे नित्यस्याप्युपलभ्यमानस्यात्यन्तमग्रहणं दृष्टम्—यथा (क)कर्मत्वस्येति ; तच्च न (ख)आश्रयस्यानित्यत्वात्। आश्रयस्य नित्यत्वादश्रवणकारणानुपपत्तिरिति ब्रूमः, कर्मत्वस्य पुनरग्रहणकारणमाश्रयानित्यत्वमस्ति तस्मादप्रसङ्ग इति।

न्यायवार्त्तिकतात्पर्यटीका

क्रमेलकेऽसिद्धं तथा अनुमानेन विनाशकारणोपलब्धौ तदनुपलब्धिरसिद्धेति। अश्वविषाणसम्बन्धस्याभावादिति। (ग)अश्वत्वविषाणत्वयोर्यतः कोऽपि संबन्धोऽश्वेषु सिद्धो नास्ति तस्माद्विरोधादनुमानमेतदशोभनमित्यर्थः। (घ)तस्माद् यथा विरुद्धाद्धेतोरनुमानमसदेवमसिद्धादपीत्यर्थः।

शङ्कते—कर्मत्ववदिति चेत्। निराकरोति—तच्च न आश्रयस्यानित्यत्वात्, कर्मत्वाश्रयः कर्म तस्यानित्यत्वादित्यर्थः। (ङ)शब्दस्य नित्यस्याश्रवणमनुपपन्नम् अश्रवणकारणानुपपत्तेरिति ब्रूमः। (च)तन्नाऽऽश्रयानित्यत्वादिति ग्रहणकवाक्यं विभजते—कर्मत्वस्य पुनरिति।

प्रतिघातिद्रव्यसंयोगस्त्वन्त्यस्य शब्दस्य निरोधक इति भाष्यम्। तस्यार्थः—प्रति-

वृत्तिः

अनुपलब्धिरप्रत्यक्षमज्ञानं वा ? आद्ये प्रतिबन्धिमाह—(अश्रवणेति)

यद्यप्रत्यक्षत्वादभावसिद्धिस्तदाऽश्रवणकारणस्याप्रत्यक्षत्वादश्रवणं न स्यादिति सततश्रवणप्रसङ्ग इत्यर्थः ॥ ३४ ॥

शब्दे नित्यत्वसाधकाविनाशित्वानुमाने तु अविनाशी शब्दः अनुपलभ्यमानविनाशकार[illegible]कत्वादिति प्रयोगः, तत्र हेतोरसिद्धत्वमिति दृष्टान्तदार्ष्टान्तिकयोर्वैषम्यात् निदर्शनान्तरेण तुल्यतां स्फुटयति क्रमेलकमिति। साध्यधर्मविशिष्टधर्मिण एव विधेयत्वमिति मते क्रमेलकमिति द्वितीयायाः साध्यतारूपविधेयत्वमर्थः। अश्वत्वेनेत्यत्र तृतीयाया अवच्छिन्नत्वमर्थः तथा च विमतः क्रमेलकः अश्वो भवितुमर्हति विषाणित्वादित्यादिरत्र प्रयोगः। अत्र हेतोर्विरुद्धत्वमिवासिद्धत्वमपि स्फुटमिति बोध्यम्।

(क) कर्मत्वस्याग्रहणं परमाण्वादिगत कर्मान्तर्भावेणेति बोध्यम्।

(ख) 'आश्रयानित्यत्वात्' इति क-ख०। अत्राऽऽदर्शवार्त्तिक-ग्रन्थे मुद्राप्रमादः सम्भाव्यते।

(ग) 'अश्वत्वविषाणित्वयो'रिति युक्तं सम्भाव्यते।

(घ) वार्त्तिके अश्वविषाणसम्बन्धस्येत्यादिकं प्रकृते दृष्टान्तविधयोपयुक्तमित्यभिप्रायेण फलितमाह तस्माद् यथेति। अत्र तस्मादिति लिपिप्रमादागतमिव सम्भाव्यते।

(ङ) आश्रयस्य नित्यत्वादिति वार्त्तिकस्य फलितार्थमाह शब्दस्येति।

(च) वार्त्तिके पूर्ववाक्ये तदिति नास्ति, उत्तरवाक्यं तु चकारेणाधिकमिति टीकाधृतपाठाद् विसंवादो द्रष्टव्यः।

न्यायभाष्यम्

घण्टायामभिहन्यमानायां तारस्तारतरो मन्दो मन्दतर इति श्रुतिभेदान्नानाशब्दसन्तानोऽविच्छेदेन श्रूयते। (१)तत्र नित्ये शब्दे घण्टास्थमन्यगतं वाऽवस्थितं

न्यायवार्त्तिकम्

"घण्टायामभिहन्यमानायां तारस्तारतरो मन्दो मन्दतर इति श्रुतिभेदान्नानाशब्दसन्तानो ह्यविच्छेदेन श्रूयते"। तत्रेदं चिन्त्यते—शब्दस्य व्यज्यमानस्य यद् व्यक्तिकारणं तत् किं घण्टास्थमाहोस्विदन्यवृत्तीति। यदि घण्टास्थम्, किमवस्थितमुत सन्तानवृत्तीति। अन्यवृत्तित्वेऽपि किमवस्थितमुत सन्तानवृत्ति। यदि घण्टास्थमवस्थितं च तदा श्रुतिभेदो न प्राप्नोति। अथ घण्टास्थं सन्तानवृत्ति च, युगपदनेकशब्दोपलब्धिप्रसङ्गः। यदि घण्टास्थेनावस्थितेन सन्तानवृत्तिना वाऽभिव्यक्तः तावानेव शब्द एकस्मिन् काले उपलभ्येत। घण्टास्थं चाभिव्यक्तिकारणं कथमन्यत्र

न्यायवार्त्तिकतात्पर्यटीका

घातिद्रव्यं कुड्यादि तत्संयोगो नभसः। एतदुक्तं भवति घनतरद्रव्यसंयुक्तं नभो न शब्दसमवायिकारणतां प्रतिपद्यते। ततश्च सन्नप्यसमवायिकारणं शब्दो न शब्दान्तरमारभते, तस्य च (क)स्वकारणं तत्कारणस्य तस्माद्विनाशो भवतीति द्रष्टव्यम्। एवमन्यत्रापीदृश एव शब्दविनाशहेतुरूहनीय इति।

इतश्च शब्दो नित्य इत्याह—घण्टायामभिहन्यमानायामिति। यदि घण्टास्थेन व्यञ्जकेनान्यवृत्तिना वाऽवस्थितेन संतानवृत्तिना वा नित्यः शब्दो व्यज्येत ततः तार-तारतर-तारतम-मन्द-मन्दतरादिश्रुतिभेदो न स्यात्। नित्यस्य च शब्दस्य न स्वाभाविको भेदो नाप्यौपाधिक इत्युपपादितमधस्तात्। यदि तु तारतमादयस्तावन्त एव शब्दा नित्याः ततस्तावन्त एव युगपदेव गम्येरन् विशेषाभावात् एको ह्येषां व्यञ्जकः स्थिर इति। अथ सन्तानवृत्तिस्तथाऽपि सर्व एव तत्सन्ततिपतिताः समर्था इत्याद्येनैव सर्वे व्यज्येरन् न तु समानदेशानां समानेन्द्रियग्राह्याणां व्यञ्जकनियमो युक्त इत्युपपादितमधस्तात्(ख)। कारणत्वे तु घण्टास्थस्य सन्तानवृत्तेर्युक्तं (ग)यत्तारतमादिभेदेन कारणभेदात् कार्यभेद इति तात्पर्यार्थः। युगपदनेकशब्दोपलब्धिप्रसङ्ग इति अनेकस्य तारतमादेः शब्दस्योपलब्धिप्रसङ्ग इत्यर्थः। घण्टास्थं चाभिव्यक्तिकारणं कथमन्यत्र वर्त्तमानम् इति श्रोत्रे वर्तमानमित्यर्थः। द्वितीयं कल्पमाशङ्क्य दूषयति

(१) 'तत्र' इति ज०।

(क) स्वकारणमिति विनाशकमित्यध्याहृतेनान्वयः। तस्य स्वकारणात् तत्कारणस्य च तस्माद्विनाश इति पाठस्तु सम्यक् प्रतिभाति। तस्मादिति कार्यभूतात् शब्दादित्यर्थः।

(ख) ५९८ पृ० ९म-पङ्क्तिर्द्रष्टव्या।

(ग) 'यत्तारतमादी'त्यत्र 'तत्तारतमादी'ति युक्तम्। तथाच घण्टास्थस्य सन्तानवृत्तेः संस्कारस्य कारणत्वे तु तस्य संस्कारस्यानेकत्वात् तारतमत्वादिकृतेन भेदेन शब्दस्यापि तारतमत्वादि युक्तमित्यर्थः।

न्यायभाष्यम्

(१)सन्तानवृत्ति वाऽभिव्यक्तिकारणं वाच्यम्, येन श्रुतिसन्तानो भवतीति (२)शब्दभेदे चासति श्रुतिभेद उपपादयितव्य इति। अनित्ये तु शब्दे घण्टास्थं सन्तानवृत्ति संयोगसहकारि निमित्तान्तरं संस्कारभूतं (३)पटु मन्दमनुवर्तते तस्यानुवृत्त्या शब्दसन्तानानुवृत्तिः, पटुमन्दभावाच्च तीव्रमन्दता शब्दस्य, तत्कृतश्च श्रुतिभेद इति॥ ३५ ॥

न्यायवार्त्तिकम्

वर्त्तमानं शब्दं व्यनक्तीति वाच्यम्। अथान्यगतमवस्थितं सन्तानवृत्ति वाऽभिव्यक्तिकारणं मनुषे तदैकस्यां घण्टायामभिहतायां शब्दान् व्यनक्ति न प्रत्यासन्नदेशवृत्तिषु घण्टान्तरेष्विति नियमहेतुर्वक्तव्यः। असति (४)च शब्दभेदे श्रुतीनां भेद उपपादयितव्यः। तारो मन्द इति नादोऽभिधीयत इति चेत् न शब्द(५)सामानाधिकरण्यस्य ग्रहणात्—शब्दसमानाधिकरणोऽयं तारमन्दशब्दः प्रवर्त्तते न नादसमानाधिकरणः तस्माच्छब्दोऽभिधीयत इति। न चासति शब्दविषयत्वे शब्दसामानाधिकरण्यं युक्तं नीलोत्पलादिवदिति। व्यामोहप्रत्ययः स इति चेत्; न, निमित्तानभिधानात्—अथ मन्यसे तारो मन्द इति शब्दसमानाधिकरणो व्यामोहप्रत्ययो भवति—यथा दीर्घः शब्दो महान् शब्द इति। न, विशेषहेत्वभावात्—व्यामोहप्रत्यय इति (६)न विशेषहेतुरस्ति। यदि चायं व्यामोहप्रत्ययो भवति व्यामोहप्रत्ययस्य निमित्तं वाच्यम्, यथा दीर्घः शब्द

न्यायवार्त्तिकतात्पर्यटीका

अथान्यगतमिति। घण्टासंबन्ध्येष शब्द इति हि तावल्लौकिकप्रत्ययः, सोऽयमन्यगते शब्दव्यञ्जके यथैकस्यां घण्टायां भवति तथा घण्टान्तरेष्वपि तत्प्रत्यासन्नेषु भवेदविशेषात्, तस्मादेकघण्टास्थत्वे नियमहेतुर्वक्तव्य इति। असति शब्दभेदे श्रुतीनामिति शब्दज्ञानानामित्यर्थः। नाद इति वायुधर्मोऽभिधीयत इति। शङ्कते—व्यामोहप्रत्यय इति। यथा हि वस्तुतः स्वच्छधवले स्फटिकमणौ लाक्षारसावसेकतिरस्कृतधवलिम्नि लोहितः स्फटिक इति प्रत्ययः, एवमभिव्यञ्जकवृत्तिस्तारत्वादिर्भ्रान्त्या शब्दे प्रतीयते इत्यर्थः। निराकरोति—न विशेषहेत्वभावादिति। न हि समीचीनात् प्रत्ययात् तारोऽयं शब्द इति प्रत्ययस्य कश्चिद्विशेषहेतुरस्ति बाधकप्रत्ययो येनैष

वृत्तिः

द्वितीये त्वाह—(अनुपलभ्येति)

अनुमानादिना 'उपलभ्यमाने' विनाशकारणे अनुपलब्धेरभावात् त्वदीयो हेतुः 'अनपदेशः' असाधकः असिद्धत्वात्, जन्यभावत्वेन विनाशकल्पनमिति भावः॥ ३५॥

---

(१) 'सन्ताननिवृत्तिरभिव्यक्तिकारणम्' इति ग-ज०। (२) 'शब्दभेदश्चासति' इति ग-ज०। (३) 'पटुमन्दमित्यनुवर्त्तते' इति ख-ग-ज०। (४) ख-पुस्तके 'च' इति नास्ति। (५) '-सामानाधिकरण्यग्रहणात्' इति ख। (६) 'न हेतुरस्ति' इति ख।

न्यायवार्त्तिकम्

इति (१)अविरतशब्दसन्तानश्रुतौ शब्दे दीर्घप्रत्ययो भवति। यानि खलु दीर्घाणि द्रव्याणि तेषामवयवोपचये सति ग्रहणसन्ततिविषयत्वम्, तत्सामान्यात् शब्दे दीर्घप्रत्ययः; न तु नित्यशब्दवादिनो व्यामोहप्रत्ययबीजमस्तीत्ययुक्तमेतत्।

तुल्यमेतदिति चेत्; न, तन्निमित्तस्य कदाचिद्भावात्। अथ मन्यसे (२)यस्याप्यनित्यः शब्दसन्तानः(२*) तेनापि घण्टास्थमवस्थितं सन्तानवृत्ति वाऽन्यस्थमवस्थितं सन्तानवृत्ति वोत्पत्तिकारणं वाच्यम्, घण्टास्थमुत्पत्तिकारणं कदाचिच्छब्दानुत्पादयति कदाचिन्नेति नित्यवत् प्रसङ्गः। न प्रसङ्गः कदाचिद्भावात्—शब्दानामुत्पत्तिकारणं घण्टावृत्ति तत् कदाचिद्भवति (३)कदाचिद्भावेऽपि सति सन्तानवृत्ति, तस्मान्निमित्तभेदानुविधायिनः शब्दाः कदाचिद्भवन्ति, सन्तानवृत्तित्वाच्च मन्दतर-मन्दतमादिभिन्नरूपानुविधायिनं शब्दमुत्पादयन्तीति। तच्च कारणं संस्कार इति।

न्यायवार्त्तिकतात्पर्यटीका

मिथ्याप्रत्ययः स्यादित्यर्थः। न च निर्बीजा भ्रान्तिरपि संभवितुमर्हति। दीर्घत्वादिभ्रमाणां तु शब्देऽस्ति बीजमित्याह—यदि चायमिति। 'यानि खलु दीर्घाणि' वंशप्रभृतीनि (क)तेषामवयवोपचयः समानजातीयोपचयः। इहाप्यविरतश्रुतौ शब्दसंताने (ख)विवृतकरणनिष्पन्ने समस्ति समानजातीयोपचय इति तत्साधर्म्याद् दीर्घत्वभ्रमः। एवं शब्दसंतान एव तारो महानित्युच्यते। (ग)तत्राप्यस्ति समानजातीयोपचयोऽस्ति च स्फुटतरत्वं महानपि स्फुटतरोऽयमपि तथेति (घ)महानित्युच्यते।

शङ्कते—तुल्यमिति चेत्। यथा ह्यनित्यवादे घण्टास्थमवस्थितं संतानवृत्ति न युगपत्तारमन्द्रानुत्पादयति किं तु क्रमेणैव एवं नित्यानपि शब्दान् क्रमेण व्यङ्क्ष्यतीत्यर्थः। निराकरोति—न तन्निमित्तस्य कदाचिद्भावात्। न तावन्नित्यवादिभिस्तारत्वादिधर्मभेदेन शब्दभेदोऽभ्युपेयते तथा चैकेनावस्थितेन घण्टास्थेन सन्तानवृत्तिना व्यज्यमान एकस्मिन् शब्दे (४)नित्ये श्रुतिभेदः कादाचित्को नोपपद्यते, शब्दे त्वनित्येऽन्यस्मिन्नन्यस्मिन् क्रियमाणे संतानवृत्तिना कारणेन

(१) 'अविरलसन्तान-' इति ख०। (२) 'यस्यानित्यः सन्तानः' इति ख०। (३) 'कदाचिद्भावे सति' इति ख०। (४) 'नित्यं' इति ख०।

(क) 'एषामवयवो वाऽपचयः' इति क-ख-पुस्तकयोः पाठः।

(ख) आदर्शपुस्तकयोः 'विवृतकारणनिष्पन्ने' इति प्रामादिकः पाठः। तत्र वर्णेष्वनावुत्पद्यमाने यदा स्थान-करण-प्रयत्नाः परस्परं स्पृशन्ति तदा सा स्पृष्टता। ईषद् यदा स्पृशन्ति तदा सा ईषत्स्पृष्टता, सामीप्येन यदा स्पृशन्ति सा संवृतता। दूरेण यदा स्पृशन्ति सा विवृतता एते चत्वार आभ्यन्तराः प्रयत्नाः। ...तत्र स्पृष्टकरणाः स्पर्शाः। कादयो मावसानाः स्पर्शाः। स्पृष्टता गुणः। करणं क्रतिरुच्चारणप्रकारः। स्पृष्टतानुगतं करणं येषां ते स्पृष्टकरणाः। एवमन्यत्रापि वेदितव्यम्। ईषत्स्पृष्टकरणा अन्तःस्थाः। अन्तःस्था यरलवाः। विवृतं करणमूष्मणां स्वराणां च। स्वराः सर्व एवाचः। ऊष्माणः शषसहाः। इति १।१।८म-सूत्रे न्यासः। (ग) तत्राऽपीति वंशप्रभृतावित्यर्थः। (घ) 'महानित्युच्यते' इत्यंशो मुद्राप्रमादादागत इति सम्भाव्यते।

न्यायभाष्यम्

न वै (१)निमित्तान्तरं संस्कार उपलभ्यते। अनुपलब्धेर्नास्तीति ?

(सू०)—पाणिनिमित्तप्रश्लेषाच्छब्दाभावे नानुपलब्धिः ॥३६॥

पाणिकर्मणा पाणिघण्टाप्रश्लेषो भवति तस्मिंश्च सति शब्दसन्तानो (२)नोत्पद्यते

न्यायवार्त्तिकम्

कुतस्तदुत्पत्तिः? पाणिसंश्लेषमपेक्षमाणात् कर्मणः। पाणिघण्टासंश्लेषात् पाणिगतवेगापेक्षाद् घण्टायां कर्म, तत्कर्म पाण्यभिघातमपेक्षमाणं विभागसमकालं संस्कारं करोति। (३)सा चलन्त्याध्यात्मिकं वायुमुपगृह्णाति। सा च वायुनाऽभिहता पुनः कर्म करोति, (क)ततश्च कर्मणा संस्कारः, संस्कारेण पुनः कर्म, पुनर्वायूपग्रह इत्येवमादिन्यायेन संस्कार उत्पद्यत इति। तत्रान्त्यस्यातिमान्द्याद् घण्टायां महाभूतसंक्षोभणशक्तेरभावस्ततो वायूपग्रहोच्छेदः ततः संस्कारक्षय इति ॥ ३९ ॥

न संस्कारोऽस्त्यनुपलब्धेरिति चेत्—अथ मन्यसे नैव संस्कारोऽस्त्यनुपलब्धेः, तच्चासत्—

पाणिनिमित्तप्रश्लेषाच्छब्दाभावे नानुपलब्धिः। उक्तार्थं सूत्रम्। यदि संस्कारं

न्यायवार्त्तिकतात्पर्यटीका

तद्भेदात् कार्यत्वात् कादाचित्कत्वाच्च श्रुतिभेदोपपत्तिरिति वैषम्यमित्यर्थः। तच्च कारणमिति, निमित्तकारणमित्यर्थः। पाणिसंश्लेषमपेक्षमाणादिति। स्पर्शवद्वेगवद्द्रव्यसंयोगाद् घण्टायां कर्म कर्मवद्घण्टाकाशसंयोगात्तादृशाच्छब्दश्चेत्येकः कालः। तत्कर्म पाण्यभिघातमपेक्षमाणं विभागसमकालं संस्कारं वेगाख्यं करोति। सा घण्टा चलन्त्याध्यात्मिकं वायुमुपगृह्णाति। घण्टातदवयवसंयुक्ता वायुपरमाणव एवाऽऽध्यात्मिको वायुः तदुपग्रहो घण्टायाः स्ववेगमपेक्षमाणाया वायुसंयोगाद्वायौ क्रियोत्पादकत्वम्, ततश्चानिलकर्मणो घण्टानिलसंयोगो वायुगतवेगापेक्षो घण्टायां कर्माऽऽरभते, तदिदमाह—सा च वायुनाऽभिहता पुनः कर्म करोति। तदेवं वायुघण्टासंयोगो घण्टावेगापेक्षो घण्टाकाशसंयोगश्च शब्दमारभत इति द्रष्टव्यम्। ततश्च कर्मणा संस्कारः, संस्कारेण पुनः कर्म, शब्दश्चेत्यपि द्रष्टव्यम्। सुगममन्यत् ॥३९॥

वृत्तिः

सिद्धान्तिनः सूत्रान्तरम्—(पाणीति)

शब्दायमाने कांस्यादौ पाणिरूपनिमित्तस्य प्रश्लेषात् संयोगात् शब्दाभावे उपलभ्यमाने शब्दाभावकारणस्य नानुपलब्धिरिति यथाश्रुतानुयायिनः।

---

(१) 'निर्निमित्तान्तरम्' इति ग-ज०। (२) 'नोपलभ्यते' ल-ग-ज-झा०। (३) 'सा चानन्त्याध्यात्मिकं' इति ख०।

(क) 'ततः कर्मणः संस्कारः' इति क-ख-वार्त्तिक-पुस्तकयोः पाठः।

न्यायभाष्यम्

(१)अतः श्रवणानुपपत्तिः। तत्र प्रतिघातिद्रव्यसंयोगः शब्दस्य निमित्तान्तरं संस्कारभूतं निरुणद्धीत्यनुमीयते; तस्य च निरोधाच्छब्दसन्तानो (२)नोत्पद्यते। अनुत्पत्तौ श्रुतिविच्छेदो यथा प्रतिघातिद्रव्यसंयोगादिषोः क्रियाहेतौ संस्कारे निरुद्धे गमनाभाव इति। कम्पसन्तानस्य स्पर्शनेन्द्रियग्राह्यस्य चोपरमः। (३)कांस्यपात्रादिषु पाणिसंश्लेषो लिङ्गं संस्कारसन्तानस्येति। तस्मान्निमित्तान्तरस्य संस्कारभूतस्य नानुपलब्धिरिति ॥ ३६ ॥

न्यायवार्त्तिकम्

शब्दोत्पत्तिनिमित्तं न प्रतिपद्यसे पाणिघण्टासंश्लेषाच्छब्दे सन्तानोच्छेदो न प्राप्नोति। अथ घण्टास्थः संस्कारः पाणिसंश्लेषान्निवर्तते तथाऽपि कथं शब्दसन्तानोच्छेद इति ? न ब्रूमो घण्टासंश्लेषः शब्दानुच्छिनत्तीति अपि तु पाणिघण्टासंश्लेषात् तद्वृत्तिसंस्कारः स्पर्शवद्द्रव्यसंयोगविरोधित्वान्निवर्त्तते निवृत्ते च कारणाभावात् कार्याभाव इति सन्तानोच्छेदः ॥ ३६ ॥

न्यायवार्त्तिकतात्पर्यटीका

पाणि—ब्धिः (सू० ३६) ॥ देशयति—अथ घण्टास्थ इति। न खलु कारणविनाशे कार्योच्छेदः, मा भूत् कुलालादिनिवृत्तावपि घटादिनिवृत्तिरित्यर्थः। परिहरति—न ब्रूम इति। यद्यपि निमित्तनिवृत्तावपि कार्यं निवर्त्तते यथा अपेक्षाबुद्धिनाशाद् द्वित्वादि ; तथाऽपि निमित्तनिवृत्तावपि तदनिवृत्तिमभ्युपगम्यैव परिहार इति मन्तव्यम् ॥ ३६ ॥

वृत्तिः

परे तु—पाणिरूपनिमित्तस्य प्रश्लेषः सम्बन्धो यत्र सः (क) पाणिजः शब्दः अर्थात् उत्तरशब्दः ततः शब्दाभावे शब्दध्वंसे सति न विनाशकारणानुपलब्धिरित्यर्थ इत्याहुः।

अन्ये तु—पूर्वसूत्रे शब्दस्य तावद्वेगात्मकः संस्कारविशेषो हेतुः, तस्य तीव्र-तीव्रतर-मन्द-मन्दतरत्वाच्छब्दोऽपि तादृशः, तत्र चोत्तरोत्तरशब्दानां पूर्वपूर्वशब्दनाशकत्वं कल्प्यत इत्यर्थः। ननु तादृशसंस्कार एव नास्तीत्यत्राऽऽह पाणीति। नानुपलब्धिः संस्कारस्येति शेषः। पाणेर्निमित्तस्य प्रश्लेषाद् घण्टादिसंयोगात् संस्काररूपकारणाभावद्वारा शब्दाभावे शब्दानुत्पत्तौ नानुपलम्भः संस्कारस्येत्यर्थ इत्याहुः ॥ ३६ ॥

---

(१) 'ततः' इति वि०। (२) 'नोपपद्यते' इति वि०। (३) 'कांस्य-' इति ज०।

(क) अत्र 'पाणिजशब्दजः शब्द' इति सम्यक्तया प्रतिभाति।

(सू०)—विनाशकारणानुपलब्धेश्चावस्थाने तन्नित्यत्वप्रसङ्गः (क) ॥३७॥

न्यायभाष्यम्

यदि यस्य विनाशकारणं नोपलभ्यते तदवतिष्ठते, अवस्थानाच्च तस्य नित्यत्वं प्रसज्यते ; एवं यानि खल्विमानि शब्दश्रवणानि शब्दाभिव्यक्तय इति मतम्, न तेषां विनाशकारणं भवतोपपाद्यते, अनुपपादनाद् (१)अवस्थानमवस्थानात् तेषां नित्यत्वं प्रसज्यत इति। (२)अथ नैवम्, न तर्हि(२*) विनाशकारणानुपलब्धेः शब्दस्यावस्थानान्नित्यत्वमिति ॥ ३७ ॥

(३)कम्पसमानाश्रयस्यानुनादस्य पाणिप्रश्लेषात् कम्पवत् कारणोपरमादभावः। (ख)वैयधिकरण्ये हि प्रतिघातिद्रव्यप्रश्लेषात् समानाधिकरणस्यैवोपरमः स्यादिति—

न्यायवार्त्तिकम्

विनाशकारणानुपलब्धेश्चावस्थाने तन्नित्यत्वप्रसङ्गः। यदिदमुच्यते विनाशकारणानुपलब्धेर्नित्यः शब्द इति, यदि यस्य विनाशकारणं नोपलभ्यते तन्नित्यं यानीमानि शब्दग्रहणानि तेषां न भवता विनाशकारणमुपपाद्यते अनुपपादनादवस्थानान्नित्यत्वमिति। अथानुपलब्धविनाशकारणान्यपि शब्दग्रहणानि अनित्यानि शब्दोऽप्येवमित्यनेकान्तः। अथानुमानतः शब्दग्रहणविनाशकारणानि गम्यन्ते (४)तत्समानं शब्द इति न किञ्चिद् बाधितं भवति ॥ ३७ ॥

व्यधिकरणत्वादयुक्तमिति चेत्—अथ मन्यसे व्यधिकरणः शब्दः कथमन्यवृत्तिना संश्लेषेण

न्यायवार्त्तिकतात्पर्यटीका

सिंहावलोकितन्यायेन पूर्वोक्तं हेतुं दूषयति—विनाशेति।

विना—ङ्गः (सू० ३७) ॥ प्रत्यक्षेण शब्दविनाशकारणानुपलब्धेश्चावस्थाने शब्दस्य शब्दोपलब्धेरपि नित्यत्वप्रसङ्गः ; न हि तस्या अपि विनाशकारणं प्रत्यक्षेणोपलभ्यत इति। तदनेन विनाशकारणानुपलब्धिरित्यस्यानैकान्तिकत्वमुद्भावितम् ॥ ३७ ॥

संप्रति सांख्यः प्रत्यवतिष्ठते—कम्पसमानाश्रयस्येति। अनुवृत्तो नादः शब्दोऽनुनाद इति। वैयधिकरण्ये हीति। (ग) द्रव्यप्रश्लेषात् समानाधिकरणस्यैव संस्कारस्योच्छेदः स्यात्, न

वृत्तिः

(विनाशकारणेति ॥ ३७ ॥) (घ)।

---

(१) 'अनवस्थानमनवस्थानात्' इति ज०। (२) 'अथ नैवं तर्हि' ल-ग-ज०। (३) 'कम्पसमानाश्रयस्य च नादस्य' इति ल-ग-ज०। (४) 'तत् प्रमाणं' इति ख०।

(क) तृतीयाध्याये द्वितीयाह्निके २३श-सूत्रमेतत्समानुपूर्वीकम्। (ख) वैयधिकरण्य इति। प्रतिघातिद्रव्यप्रश्लेषात् समानाधिकरणस्यैव शब्दस्योपरम इति नियमेन वैयधिकरण्ये शब्दस्य कम्पासामानाधिकरण्ये अर्थादाकाशवृत्तित्वे अभ्युपगम्यमाने तु न शब्दानामुपरमः स्यादित्यध्याहारेणार्थो बोद्धव्यः। (ग) 'प्रतिघातिद्रव्यप्रश्लेषात्' इत्यादिभाष्यमर्थतोऽत्र धृतम्। द्रव्यप्रश्लेषासमानाधिकरणस्येति क-ख-पुस्तकयोः पाठः।

(घ) अत्र 'विनाशकारण'त्यादि सूत्रं वृत्तिकृता न व्याख्यातमिति तन्मते अत्र इदं सूत्रं नास्तीति केचिन्मन्यन्ते। अस्माभिस्तु वृत्तिकृतो निषेधाभावेन व्याख्यानुपलब्धिमात्रं न साधकमिति मन्यमानैः सूत्रसंख्याह्रासो न कृतः।

(सू०)—अस्पर्शत्वादप्रतिषेधः ॥ ३८ ॥

न्यायभाष्यम्

यदिदं (क) नाऽऽकाशगुणः शब्द इति प्रतिषिध्यते अयमनुपपन्नः प्रतिषेधः, अस्पर्शत्वाच्छब्दाश्रयस्य। रूपादिसमानदेशस्याग्रहणे शब्दसन्तानोपपत्तेरस्पर्शव्यापिद्रव्याश्रयः शब्द इति ज्ञायते (१)न कम्पसमानाश्रय इति ॥ ३८ ॥

न्यायवार्त्तिकम्

निवर्त्यते। अथ व्यधिकरणोऽपि निवर्त्यते, सर्वघण्टाशब्दोच्छेदप्रसङ्गः। तस्मात् पाणिघण्टासंश्लेषसमानाधिकरणः शब्दः।

अस्पर्शत्वादप्रतिषेधः। अस्पर्शद्रव्याश्रयः शब्द इति सूत्रार्थः। कथमन्यत्र वर्तमानस्य पाणिघण्टासंश्लेषो निवर्तक इति ? नोक्तोत्तरत्वात्—उक्तोत्तरमेतत्, कारणाभावादन्यशब्दानुत्पादः। यस्तूत्पन्नः शब्दः स मन्दतरतमादिन्यायेनान्त्यस्यातिमान्द्याद् येन केनचिद्विरोधित्वात् क्षीयते।

योऽयं संस्कारः शब्दकारणत्वेन समधिगतः स किमेकोऽनेको वेति सन्दिह्यते। अनेकः संस्कार इति तत्त्वं शब्दभेदात्। कारणभेदे सति कार्यभेदो दृष्टः। यस्यैकः संस्कारः तस्यैषोः

न्यायवार्त्तिकतात्पर्यटीका

व्यधिकरणस्य शब्दस्य ; व्यधिकरणस्य तूच्छेदाभ्युपगमेऽतिप्रसङ्गः स्यात्। तस्मात् कम्पसंतानसंस्कारसमानाश्रयः शब्दोऽभ्युपगन्तव्यः। तदनेनाऽऽकाशाश्रयत्वं शब्दस्य प्रतिषिद्धम्। तदेतद् वार्त्तिककारो व्याचष्टे—व्यधिकरणत्वादयुक्तमिति। अस्योत्तरसूत्रम्—

अस्प—धः (सू० ३८ ॥ प्राप्यकारित्वमिन्द्रियाणां व्यवस्थितं प्राक्। घण्टाद्याश्रयः शब्दो न श्रोत्रं प्राप्नोति। एवं हि प्राप्नुयाद् यदि घण्टा कर्णशष्कुलीमागच्छेत्, कर्णशष्कुली वा घण्टाम् ; न चैतदुभयमस्ति। न चाऽऽहंकारिकमिन्द्रियं व्यापीत्युक्तम्। तस्माच्छब्दाधारो निःस्पर्शो (ख) व्यापी चाऽऽकाशः, तदाधारः शब्दः श्रोत्रमायाति सन्तानवृत्त्येति युक्तम् ; तथाच श्रवणमस्योपपन्नं नान्यथेति। तदेतद्वार्त्तिककृद्विभजते—अस्पर्शेति। येन केनचिदिति, मन्दतरेण वा मन्दतमेन वा कारणशब्देनेत्यर्थः।

अनेकः संस्कार इति तत्त्वं शब्दभेदादिति। एकस्य हि संस्कारस्य धर्मभेदकल्पनायां कल्पनागौरवप्रसङ्गः संस्कारस्तावदेको धर्मी धर्मभेदाश्चेति। तदिह धर्मभेदस्थानेऽस्तु संस्कार-

---

(१) 'न च कम्प-' इति ल-ज०।

(क) अत्रेदमाशङ्क्यते, कम्पसमानाश्रयस्यानुनादस्येति भाष्यग्रन्थः सांख्यानां प्रत्यवस्थानपरतया तात्पर्यटीकायां व्याख्यातः। तथा च "नाऽऽकाशगुणः शब्दः" इतिप्रतिषेधः सांख्यानामेव भवितुमर्हति। प्रकृतेर्महानिति सांख्यकारिकायां 'पञ्चभ्यः पञ्च भूतानि' इति व्याचक्षाणेन च टीकाकृता 'तत्र शब्दतन्मात्रादाकाशं शब्दगुणम्' इति वदता शब्दस्याऽऽकाशगुणत्वं सांख्यानां सम्मतमिति स्पष्टमवधार्यते। ततश्च 'नाऽऽकाशगुणः शब्दः' इति ग्रन्थस्याभुक्तवान्तत्वापत्तिरिति। अत्रोच्यते 'नाऽऽकाशगुणः शब्द' इत्यत्र शब्द इति श्रूयमाणशब्दपरम्। तादृशं हि शब्दमधिकृत्य नित्यानित्यत्वविचारः प्रारभ्यते। आकाशः शब्दगुणः इत्यादितत्त्वकौमुदीग्रन्थस्य च अनुपलभ्यमानसूक्ष्मशब्दानामेव आकाशगुणत्वं श्रूयमाणत्वं तु पार्थिवघटादिगतशब्दस्यैवेत्यभिप्रायः। तथा च नासङ्गतिरिति। (ख) 'व्यापी वाकाशः' इति क-ख-पुस्तकयोर्मुद्रितम्। शोधिताकारस्तु गृहीतः।

न्यायभाष्यम्

प्रतिद्रव्यं रूपादिभिः सह सन्निविष्टः शब्दः समानदेशो व्यज्यत इति नोपपद्यते। कथम्?—

(सू०)—विभक्त्यन्तरोपपत्तेश्च समासे ॥ ३९ ॥

सन्तानोपपत्तेश्चेति चार्थः। तद् व्याख्यातम्। यदि रूपादयः शब्दाश्च प्रतिद्रव्यं समस्ताः समुदितास्तस्मिन् समासे समुदाये यो यथाजातीयकः सन्निविष्टस्तस्य तथाजातीयस्यैव ग्रहणेन भवितव्यं शब्दे रूपादिवत्। तत्र योऽयं विभाग एकद्रव्ये नानारूपा भिन्नश्रुतयो विधर्माणः शब्दा अभिव्यज्यमानाः श्रूयन्ते यच्च (१)विभागान्तरं सरूपाः समानश्रुतयः सधर्माणः शब्दास्तीव्रमन्दधर्मतया भिन्नाः श्रूयन्ते तदुभयं नोपपद्यते, नाना-

न्यायवार्त्तिकम्

पातः प्राप्नोति अगत्वैव यावद्गन्तव्यमिति। अथाप्रतिबध्यमाने संस्कारे द्रव्यं गच्छति न कदाचित्पातः प्राप्नोति तस्मादनेकः संस्कारः॥ ३८॥

विभक्त्यन्तरोपपत्तेश्च समासे। नायं शब्दो गन्धादिभिः सह सन्निविष्टो व्यज्यते विभक्त्यन्तरोपपत्तेः। (क)विभागश्च विभागान्तरं चेति विभक्त्यन्तरम्। (२) विधर्माणश्च सरूपाश्च

न्यायवार्त्तिकतात्पर्यटीका

भेदः कृतमत्रैकेन धर्मिणा। न च संस्कारभेदेषु धर्मभेदाः कल्पनीयाः संस्कारभेदमात्रादेव कारणात् कार्यभेदोपपत्तौ तद्गतधर्मभेदकल्पनावैयर्थ्यादिति भावः। यस्य च वैशेषिकस्य एकः संस्कारस्तस्येषोः पातः प्राप्नोति। संस्कारस्य हीषोर्मूर्त्तद्रव्यसंयोगो विनाशकोऽविनाशको वा? विनाशकश्चेद् आद्येनैव मूर्त्तद्रव्यसंयोगेन तस्य विनाशाद् अगत्वैव यावद्गन्तव्यमिषोः पातप्रसङ्गः। द्वितीये तु कल्पे कृतकस्यापि संस्कारस्य विनाशकारणाभावेनाविनाशान्न कदाचिदपि पातः स्यात्। प्रयोगश्च इष्वादिवेगः क्षणिकः वेगत्वाद् घटादिगतवेगवदिति॥ ३८॥

विभ—से (सू० ३८)॥ सांख्यानां रूपरसगन्धस्पर्शशब्दसमुदायो वीणावेणुशङ्खादिद्रव्यम्, तत्र 'समासे' समुदाये स्थित एव व्यज्यत इति दर्शनम्; तस्मिन् समुदाये सांख्याभिमते विभक्त्यन्त-

वृत्तिः

ननु घण्टादिपाणिसंयोगस्य शब्दनिवर्त्तकत्वे घण्टाद्याश्रय एव शब्दः स्यादित्याशङ्कायामाह—(अस्पर्शत्वादप्रतिषेधः)।

उक्तः प्रतिषेधो न सम्भवति अस्पर्शत्वात्, शब्दाश्रयस्येति शेषः। शब्दो हि न स्पर्शवद्विशेषगुणः अग्निसंयोगासमवायिकारणकत्वाभाववदकारणगुणपूर्वककार्यत्वादित्याशयः॥ ३८॥

---

(१) 'विभागानन्तरम्' इति ग०। (२) 'प्रतिद्रव्यविधर्माणश्च' इति ख०।

(क) 'अत्र विभागश्च विभागान्तरं चेति' इति अर्थकथनमात्रम्, वाक्यं तु 'विभक्तिश्च विभक्तिश्च' इत्याकारकमेव। विजातीयविभागप्रतिपादनाभिप्रायेण च अन्तरपदमिति बोध्यम्।

न्यायभाष्यम्

भूतानामुत्पद्यमानानामयं धर्मो नैकस्य व्यज्यमानस्येति। अस्ति चायं विभागो विभागान्तरं च, तेन विभागोपपत्तेर्मन्यामहे न प्रतिद्रव्यं रूपादिभिः सह शब्दः सन्निविष्टो व्यज्यत इति ॥ ३९ ॥

द्विविधश्चायं शब्दो वर्णात्मको ध्वनिमात्रश्च। तत्र वर्णात्मनि तावत्—

(सू०)—विकारादेशोपदेशात् संशयः ॥ ४० ॥

दध्यत्रेति केचिद् इकार इत्वं हित्वा यत्वमापद्यत इति विकारं मन्यन्ते। केचिदिकारस्य प्रयोगे विषयकृते यदिकारः स्थानं जहाति तत्र यकारस्य प्रयोगं ब्रुवते। संहितायां विषये इकारो न प्रयुज्यते तस्य स्थाने यकारः प्रयुज्यते स आदेश इति उभयमिदमुपदिश्यते। तत्र न ज्ञायते किं तत्त्वमिति।

न्यायवार्त्तिकम्

शब्दा एकद्रव्याः श्रूयन्ते। समासः समुदायः। एतच्च स्पर्शवद्द्रव्यवृत्तिषु शब्देषु न प्राप्नोति गन्धादिवत्—यथा प्रतिद्रव्यमेको गन्ध एवं प्रतिद्रव्यमेकः शब्द इति। सन्तानोपपत्तेश्चेति चार्थः। यद्ययं गन्धादिभिः सह सन्निविष्टः स्यात् नान्यत्र वर्तमानः श्रोत्र उपलभ्येत। तस्मात् सन्तानवृत्तित्वादाकाशाश्रयः शब्द इति ॥ ३९ ॥

न्यायवार्त्तिकतात्पर्यटीका

रोपपत्तेश्च न व्यज्यते शब्दः। यदि समुदाये व्यज्येत शब्दः; विभक्तिश्च षड्ज-धैवत-गान्धारादिभेदेन, विभागान्तरं च षड्जजातीयस्यैव (क)तारमन्दादिरूपं नोपपद्यते। न हि तद्गतानां गन्धादीनामेकस्मिन्नेव द्रव्ये वीणादौ नानाजातीयानां च प्रतिक्षणं भेदो दृश्यते। तस्माद्विभक्त्यन्तरोत्पत्तेर्न समासे व्यज्यते शब्दः, अपि त्वाकाशगुणः क्रियत इति सांप्रतम्। सूत्रव्याख्ययैव भाष्यवार्त्तिके व्याख्याते ॥ ३९ ॥

तदेवं रूपादिसन्निविष्टः शब्दो व्यज्यत इति सांख्यमते दूषिते स एव सांख्यो वर्णेषु प्रकृतिविकारभावश्रुतेर्मृत्सुवर्णादिवत्परिणामिनित्या वर्णा इति यदि प्रत्यवतिष्ठते तत्र परीक्षामारभते—द्विविधश्चायं शब्द इति।

विका—यः (सू० ४०) ॥ विकारोपदेशोऽपि न ध्वनिमात्रे शब्देऽस्तीति न तस्य परिणामि-

वृत्तिः

एतदेव व्युत्पादयितुमाह—(विभक्त्येति)

'समासे' स्पर्शादिसमुदाये साहित्येन शब्दो वर्तते इति न युक्तम्, 'विभक्त्यन्तरस्य' विभागान्तरस्य तारमन्दादेः 'उपपत्तेः'। अयमर्थः—एकस्मिन्नेव शङ्खादौ तारमन्दादिनानाशब्दा जायन्ते, गन्धादयस्तु विनाऽग्निसंयोगं न परावर्तन्त इति भावः ॥ ३९ ॥

समाप्तं शब्दानित्यत्वप्रकरणम् ॥ २ ॥

(क) 'तारमन्द्रादिरूपम्' इति क-ख-तात्पर्यपुस्तकयोर्मुद्रितम्।

न्यायभाष्यम्

आदेशोपदेशस्तत्त्वम्। विकारोपदेशे ह्यन्वयस्याग्रहणाद् (१)विकारानुमानम्—सत्यन्वये (२)किञ्चिन्निवर्त्तते किञ्चिदुपजायत इति (३)शक्येत विकारोऽनुमातुम्। न चान्वयो गृह्यते तस्माद्विकारो नास्तीति।

भिन्नकरणयोश्च वर्णयोरप्रयोगे प्रयोगोपपत्तिः—विवृतकरण इकार ईषत्स्पृष्टकरणो यकारः, ताविमौ पृथक्करणाख्येन प्रयत्नेनोच्चारणीयौ, तयोरेकस्याप्रयोगे(४)ऽन्यस्य प्रयोग उपपन्न इति।

अविकारे चाविशेषः। यत्रेमाविकारयकारौ न विकारभूतौ—यतते, यच्छति, प्रायंस्त, इति, इकार इदमिति च, यत्र च विकारभूतौ (५,क)इष्ट्या दध्याहरेति, उभयत्र प्रयोक्तुरविशेषो यत्नः श्रोतुश्च श्रुतिरित्यादेशोपपत्तिः।

न्यायवार्त्तिकम्

विकारादेशोपदेशात् संशय इति, संशयकारणज्ञापनार्थं सूत्रम् ॥ ४० ॥

न्यायवार्त्तिकतात्पर्यटीका

नित्यतामापादयितुमर्हति केवलं वर्णात्मन्यापादयेद् यद्यसंदेहः स्यात्, अस्ति तु तत्रापि संदेहः। तथा हि 'इको यणचि' इत्यादिकं विकारोपदेशमाचक्षत एके अन्ये त्वादेशोपदेशम्। तत्र व्याख्यातृविप्रतिपत्तेः संशयः। तत्रापरीक्ष्य शक्यमवधारयितुमित्यर्थः। तत्र परीक्षायाम्।

आदेशोपदेशस्तत्त्वमित्यवधारयति—आदेशोपदेश इति। सुवर्णजातीयाः खल्ववयवा अन्यतमव्यूहपरित्यागेनान्यतमं व्यूहमापद्यमाना रुचक इति वा वर्द्धमान इति वा परिणमन्ते, अस्ति हि तेषु सर्वेषु सुवर्णजातीयानामवयवानामनुगमः, न तु यकारे इकारस्य वा तदारम्भकस्य वा अवयवस्यानुगममीक्षामहे। तस्माद्विकाराभावादादेशत्वमस्य निश्चिनुम इति।

उपपत्त्यन्तरं चाविकारे दर्शयति—भिन्नकरणयोश्चेति। यदि ह्रीकारविकारो यकारः स्याद् यकारप्रयोगायेकारमुपाददानास्तत्कारणं विवृतकरणं पूर्वमुपाददीरन्, तन्निरपेक्षास्तु यकारं प्रयोक्ष्यमाणा ईषत्स्पृष्टकरणमुपाददते; तस्मान्नेकारविकारो यकार इत्युत्पश्यामः।

उपपत्त्यन्तरमाह—अविकारे चेति। कारकज्ञापकयोर्हेत्वोरविशेषमाह—उभयत्रेति।

---

(१) 'विकारानुमानम्' इति ज-ग०। (२) 'किञ्चिन्निवर्त्तते' इति ल-पुस्तके नास्ति। (३) 'शक्यते' इति ल-भा०। (४) '-ऽन्यतरस्य' इति ल-ग-ज-भा०। (५) 'इष्टा व्याहरति' इति ल०, 'इष्टा दध्याहरेति, इदं व्याहरति'। इति ग-ज०।

(क) 'इष्ट्या' इति विकारद्वयस्य एकमुदाहरणम्। अत्र प्रथम इकारो 'य'कारस्य विकारः, द्वितीयो 'य'कारः इकारस्य विकारः। दध्याहरेति द्वितीयमेकविकारोदाहरणम्।

न्यायभाष्यम्

प्रयुज्यमानाग्रहणाच्च । न खलु इकारः प्रयुज्यमानो यकारतामापद्यमानो गृह्यते । किं तर्हि ? इकारस्य प्रयोगे यकारः प्रयुज्यते, तस्मादविकार इति ।

अविकारे च न शब्दान्वाख्यानलोपः । न विक्रियन्ते वर्णा इति । न चैतस्मिन् पक्षे शब्दान्वाख्यानस्यासम्भवो येन वर्णविकारं प्रतिपद्येमहीति ।

न खलु वर्णस्य वर्णान्तरं कार्यम्, न हि इकाराद् यकार उत्पद्यते यकाराद्वा इकारः । पृथक्स्थानप्रयत्नोत्पाद्या हीमे वर्णाः तेषामन्योऽन्यस्य स्थाने प्रयुज्यत इति युक्तम् । एतावच्चैतत् परिणामो (१)वा विकारः स्यात् कार्यकारणभावो वा । उभयं च नास्ति तस्मात् न सन्ति वर्णविकाराः ।

वर्णसमुदायविकारानुपपत्तिवच्च वर्णविकारानुपपत्तिः—'अस्तेर्भूः' 'ब्रुवो वचि'-रिति यथा वर्णसमुदायस्य धातुलक्षणस्य क्वचिद्विषये वर्णान्तरसमुदायो न परिणामो न कार्यं शब्दान्तरस्य स्थाने शब्दान्तरं प्रयुज्यते तथा वर्णस्य वर्णान्तरमिति ॥ ४० ॥

न्यायवार्त्तिकतात्पर्यटीका

उपपत्त्यन्तरमाह—प्रयुज्यमानेति । यथा हि क्षीरं कालविपाकापेक्षं दधि भवद् दृश्यते न तथेकारो यकारो भवन्नित्यर्थः ।

यदि न विकारः कथं तर्हि शब्दान्वाख्यानम् 'इको यणची'त्यत आह—अविकारे चेति । इकः प्रयोगप्रसङ्गे संहितायां यणः प्रयोगमाह तत्सूत्रम्, न पुनरिग्विकारं यणमित्यर्थः । ननु मा भूद्विकारः परिणामोऽर्थान्तरं तु भविष्यति ततो नित्या वर्णा भविष्यन्तीत्यत आह—एतावच्चैतदिति । परिणामो वा इत्यापाततः, कार्यकारणभावो वा इति परमार्थः । न जातु क्षीरं तदवयवा वा दधिरूपेण परिणमन्ते, न ह्यवयवा अवयविस्वभावाः ; तस्मात् कार्यकारणभाव एव तात्त्विक इति, स च वर्णेषु नास्ति इगनपेक्षस्य यणो निष्पत्तेः । तस्मादिक्प्रयोगप्रसङ्गे संहितायां यणः प्रयोग इत्यन्वाख्यानार्थ इति ।

इतश्चायमादेशोपदेश इत्याह—वर्णसमुदायेति । वर्णस्यैकस्य वास्तवत्वात् कदाचिद्विकार उपपद्यते (क) बुद्धिसमाहारमात्रस्य तु तत्समुदायस्य न विकारसंभवः । तस्मात्तत्राकामेनाप्यादेशोपदेशो वक्तव्यः । स वरं क्लृप्तत्वादेकस्मिन्नप्यस्तु वर्ण इति इत्यर्थः ॥ ४० ॥

वृत्तिः

प्रसङ्गाच्छब्दपरिणामवादं दूषयितुं संशयं दर्शयति—(विकारेति)

'इको यणचि' इत्यादिना इकारादेर्विकारो यकारादिरिति (२)केचित् साङ्ख्या व्याचक्षते । परे तु इकारे प्रयोक्तव्ये यकारः प्रयोक्तव्य इत्यादेशं समादिशन्ति ।

---

(१) 'वा' इति ल-ज-ग-झा-पुस्तकेषु नास्ति । (२) 'केचिद्' इति ल-पुस्तके नास्ति ।

(क) क-ख-पुस्तकयोः 'बुद्धिः समाहारमात्रस्ये'ति पाठः ।

न्यायभाष्यम्

इतश्च न सन्ति (१)वर्णविकाराः—

(सू०)—प्रकृतिविवृद्धौ विकारविवृद्धेः(क) ॥ ४१ ॥

प्रकृत्यनुविधानं विकारेषु दृष्टम्, यकारे ह्रस्वदीर्घानुविधानं नास्ति येन विकारत्वमनुमीयत इति ॥ ४१ ॥

न्यायवार्त्तिकम्

प्रकृतिविवृद्धौ विकारविवृद्धेरिति सूत्रम्। प्रकृत्यनुविधानादिति सूत्रार्थः, विकारे प्रकृत्यनुविधानं दृष्टमिति ॥ ४१ ॥

न्यायवार्त्तिकतात्पर्यटीका

इतश्च न प्रकृतिविकारभावः—

प्रकृ—द्धेः (सू० ४१) ॥ प्रकृतिविवृद्धाविति (ख)महद्भिः खलु तूलपिण्डैरारब्धः स्थूलः पिण्डोऽल्पश्चाऽऽरब्धो महानल्प इति दृष्टम्, तद्वदिहापि दीर्घेकारविकारस्य यकारस्य इकारविकाराद्भवितव्यं विशेषेण, न चास्ति विशेषः ; तस्मान्न प्रकृतिविकारभाव इत्यर्थः ॥ ४१ ॥

वृत्तिः

अतश्च वर्णा विकारिणो न वेति संशयः। विकारश्च स्वरूपस्य विनाशेऽविनाशे वा द्रव्यान्तरारम्भकत्वम्, यथा दुग्धादेर्दध्याद्यारम्भकत्वम्, बीजादेर्वृक्षाद्यारम्भकत्वं च, सुवर्णादेरपि लोहाभिघातजन्यावयवसंयोगनाशादवयविनो नाशे सत्येव(२) कुण्डलाद्यारम्भकत्वम्, कपालादेश्च स्वरूपाविनाशेन घटाद्यारम्भकत्वम् ॥ ४० ॥

तत्र विकारनिराकरणाय (३) सूत्रम्—(प्रकृतीति)

न वर्णा विकारिणः, तथा सति तत्प्रकृतेरुपादानत्वाभिमतस्य विवृद्ध्या विकारस्यापि विवृद्ध्यापत्तेः। महदल्पावयवारब्धावयविनो महदल्पत्ववद् ह्रस्वेकारारब्धयकारापेक्षया दीर्घेकारारब्धयकारस्य विवृद्धिः स्यादित्यर्थः। तस्मादादेशपक्षः श्रेयानिति भावः ॥ ४१ ॥

---

(१) 'विकाराः' ल-ग-भा०। (२) 'कुण्डलारम्भकत्वम्' इति भ०। (३) 'सूत्रम्' इति नास्ति भ०।

(क) न्यायसूचीनिबन्धे तु 'विकारविवृद्धेश्च' चकारान्तः सूत्रपाठः।

(ख) अत्र 'महद्भिः खलु पिण्डैरारब्धः स्थूलः पिण्डोऽल्पैश्चाऽऽरब्धोऽल्प' इति इत्येवं पाठो यथार्थः, मुद्रिताकारे तु स्थूलपदव्याख्यानं 'महान्' इति पदं प्रमादान्मूलेऽन्तर्भूतम् अस्थाने मुद्रितं च। तूलपदं पुनर्दृष्टान्तविधया स्पष्टार्थमित्यनुमीयते।

(सू०)—न्यूनसमाधिकोपलब्धेर्विकाराणामहेतुः ॥ ४२ ॥

न्यायभाष्यम्

द्रव्यविकारा न्यूनाः समाः अधिकाश्च गृह्यन्ते। तद्वदयं विकारो न्यूनः स्यादिति ॥ ४२ ॥

(सू०)—द्विविधस्यापि हेतोरभावादसाधनं दृष्टान्तः(क) ॥४३॥

अत्र नोदाहरणसाधर्म्याद्धेतुरस्ति न वैधर्म्यात्। अनुपसंहृतश्च हेतुना दृष्टान्तो न साधक इति।

प्रतिदृष्टान्ते चानियमः प्रसज्येत। यथाऽनडुहः स्थानेऽश्वो वोढुं नियुक्तो न तद्विकारो भवति एवमिवर्णस्य स्थाने यकारः प्रयुक्तो न विकार इति। न चात्र नियमहेतुरस्ति—दृष्टान्तः साधको न प्रतिदृष्टान्त इति ॥ ४३ ॥

न्यायवार्त्तिकम्

न्यूनसमाधिकोपलब्धेर्विकाराणामहेतुः। न्यूनसमाधिकोपलब्धेर्विकाराणाम् अहेतुरिति साधनपक्षे दृष्टान्तमात्रत्वादहेतुः ॥ ४२ ॥

द्विविधस्यापि हेतोरभावादसाधनं दृष्टान्तः (ख) ॥ ४३ ॥

न्यायवार्त्तिकतात्पर्यटीका

अस्याऽऽक्षेपसूत्रम्—

न्यून—तुः (सू० ४२) ॥ अल्पेन हि न्यग्रोधबीजेनाऽऽरब्धो न्यग्रोधतरुर्महान्, ततोऽतिमहता (ग) वा नारिकेलबीजेनाऽऽरब्धो नारिकेलतरुरल्पः, नारिकेलबीजैरेव (घ) परस्परापेक्षमाणसमैरारब्धः सम इति ॥ ४२ ॥

अस्य प्रत्याख्यानसूत्रम्—द्विविधस्यापि हेतोरिति।

द्विवि—न्तः (सू० ४३) ॥ यदि च न्यूनसमाधिकोपलब्धेरिति साधनं तदा द्विविधस्य हेतोरभावाद् दृष्टान्तमात्रस्य चासाधकत्वात् प्रतिदृष्टान्तस्य च संभवादित्येतद् दूषणम् ॥ ४३ ॥

वृत्तिः

आक्षिपति—(न्यूनेति)

उक्तो हेतुर्न युक्तः विकाराणां प्रकृत्यपेक्षया न्यूनत्वस्य समत्वस्याधिकत्वस्य चोपपत्तेर्दर्शनात्। यथा तूलकपरिमाणापेक्षया तद्विकारस्तन्तुरल्पपरिमाणः, यथा वा न्यग्रोधबीजादुत्कृष्टेन नारिकेलीबीजेन न्यग्रोधादल्पो नारिकेलीतरुर्जन्यते, कनकादिसमपरिमाणं कटकादि, यथा वा न्यूनाधिकनारिकेलीबीजाभ्यां समौ वृक्षौ, न्यूनपरिमाणाद् वटबीजाच्च महान् वटतरुरिति ॥ ४२ ॥

(द्विविधेति) ॥ ४३ ॥(ङ)

(क) वार्त्तिककृद्वृत्तिकृद्भ्यामिदं सूत्रं न व्याख्यातमिति तन्मते नेदं सूत्रमिति केचित्।

(ख) अयं भागः वार्त्तिकपुस्तकयोर्न मुद्रितः। (ग) 'वा'शब्दस्त्वर्थे।

(घ) अत्र 'परस्परपरिमाणसमै'रिति पाठे अर्थाधिगमः सूत्रोक्तसमोदाहरणं च भवति। नारिकेलबीजतरुस्थले कारणसाम्ये कार्यसाम्योदाहरणमयुक्तमुत्पश्यता वृत्तिकृता परिमाणमुपेत्य गुरुत्वसाम्यमादाय कनककटकोदाहरणमुपन्यस्तमिति बोध्यम्। (ङ) भागोऽयं सूत्रसंख्यार्थं योजितः।

न्यायभाष्यम्

द्रव्यविकारोदाहरणं च—

(सू०)—नातुल्यप्रकृतीनां विकारविकल्पात् ॥ ४४ ॥

अतुल्यानां द्रव्याणां प्रकृतिभावो(१)विकल्पते (२)विकाराश्च प्रकृतीरनुविधीयन्ते। न त्विवर्णमनुविधीयते यकारः। तस्मादनुदाहरणं द्रव्यविकार इति ॥ ४४ ॥

न्यायवार्त्तिकम्

नातुल्यप्रकृतीनां विकारविकल्पात्। दूषणपक्षे 'नातुल्यप्रकृतीनां विकारविकल्पात्' इत्यसम्बद्धम्; अतुल्यायाः प्रकृतेः (३) विकल्प्यन्ते विकाराः, ह्रस्वदीर्घानुविधानं तु यकारे(३*) नास्तीति ॥ ४४ ॥

न्यायवार्त्तिकतात्पर्यटीका

नातु—ल्पात् (सू० ४४)॥ यदि च न्यूनसमाधिकोपलब्धेरित्यनेनानैकान्तिकोद्भावनं प्रकृत्यनुविधानस्य क्रियते तदा दूषणपक्षे 'नातुल्यप्रकृतीनां विकारविकल्पा'दिति दूषणम् अनैकान्तिकदोषस्यासंबन्धत्वं नाम, न्यूनसमाधिकत्वे तु प्रकृत्यनुविधानं विकाराणामप्रच्युतम्। तथा हि अतुल्यायाः प्रकृतेर्विकारा (४) विकल्प्यन्ते प्रकृतिभेदमनुविधीयन्ते। न जातु न्यग्रोधबीजाद् नारिकेलपादपो भवति भवति च न्यग्रोधबीजात् न्यग्रोधपादप इति। एतदुक्तं भवति—प्रकृतिभेदानुविधानं विकारभेदानां ब्रूमो न पुनस्तद्वृद्धिह्रासाभ्यां तद्वृद्धिह्रासौ, येनानैकान्तिकत्वमुद्भाव्येत। तस्मादनैकान्तिकोद्भावनमसंबद्धमित्यर्थः।

न त्विवर्णमनुविधीयते यकार इति भाष्यम्, तस्यार्थो न त्विवर्णभेदमनुविधीयत इति। तस्मादनुदाहरणं न्यूनसमाधिकभावे द्रव्यविकार इति॥ ४४ ॥

वृत्तिः

समाधत्ते—(नातुल्येति)

नोक्तं समाधानं युक्तम्। 'अतुल्यप्रकृतीनां' भिन्नप्रकृतीनां हि विकाराणां विकल्पो वैलक्षण्यं मयाऽभिहितम्, न हि बीजादेर्ह्रासवृद्ध्यादिना वृक्षादेर्ह्रासवृद्ध्यादिकं प्रक्रान्तम्, मदुक्तवैलक्षण्यन्तु तत्राप्यस्ति, तथा च त्वदुक्तमुपचारच्छलम् इति भावः ॥ ४४ ॥

---

(१) 'अवकल्पते' इति ल-ग-भा०।

(२) 'विकारश्च प्रकृतीरनुविधीयते' ल-ग-ज०।

(३) 'विकल्पात् ते विकाराः ह्रस्वदीर्घानुविधानं तु एकारे' इति ख-वार्तिके मुद्रितम्।

(४) 'विकल्प्यन्ते' इति क०।

(सू०)—(१)द्रव्यविकारवैषम्यवद् वर्णविकारविकल्पः ॥४५॥

न्यायभाष्यम्

यथा द्रव्यभावेन तुल्यायाः प्रकृतेर्विकारवैषम्यम्, एवं वर्णभावेन तुल्यायाः प्रकृतेर्विकारविकल्प इति ॥ ४५ ॥

(सू०)—न विकारधर्मानुपपत्तेः ॥ ४६ ॥

अयं विकारधर्मो द्रव्यसामान्ये, यदात्मकं द्रव्यं मृद् वा सुवर्णं वा तस्याऽऽत्मनोऽन्वये पूर्वो व्यूहो निवर्त्तते, व्यूहान्तरं चोपजायते ; तं विकार(२)माचक्षते। न वर्णसामान्ये कश्चिच्छब्दात्माऽन्वयी य इत्वं जहाति यत्वं चाऽऽपद्यते। तत्र यथा सति द्रव्यभावे विकारवैषम्ये नानडुहोऽश्वो विकारो विकारधर्मानुपपत्तेः, एवमिवर्णस्य न यकारो विकारो विकारधर्मानुपपत्तेरिति ॥ ४६ ॥

न्यायवार्त्तिकम्

द्रव्यविकारवैषम्यवद्वर्णविकारविकल्पः। यथा द्रव्यभावेन तुल्यायाः प्रकृतेर्विकारो विकल्प्यते एवं वर्णभावेन तुल्यायाः प्रकृतेर्विकारविकल्पः स्यादिति ॥ ४५ ॥

न विकारधर्मानुपपत्तेः ॥ ४६ ॥ (क)

न्यायवार्त्तिकतात्पर्यटीका

अस्याऽऽक्षेपसूत्रम्—द्रव्यविकार इति।

द्रव्य—ल्पः (सू० ४५)॥ न प्रकृतिभेदमवश्यमनुविधीयन्ते विकाराः द्रव्यत्वेन तुल्यत्वेऽपि प्रकृतीनां (३)विकारवैषम्यदर्शनात्। एवं वर्णत्वेन तुल्यत्वेऽपि(३*) विकारवैषम्यम्। तथा च दीर्घह्रस्वाभ्यां वैषम्ये विकारवैषम्यं भविष्यति प्रकृतिसाम्य इव विकारवैषम्यम् इति भावः ॥ ४५ ॥

तत्र प्रत्याख्यानसूत्रम्—न विकारधर्मेति।

न वि—त्तेः (सू० ४६) ॥ यद्यपि प्रकृतेर्द्रव्यत्वमभेदस्तथाऽपि विकारभेदे प्रकृतिभेद

वृत्तिः

शङ्कते—(द्रव्येति)

द्रव्यत्वेन न्यग्रोधादिप्रकृतीनां तुल्यत्वेऽपि विकारवैषम्यं यथा एवमेव वर्णत्वेन तुल्ययोरपि ह्रस्वदीर्घयो(४)र्यो विकारो यकारः, तस्य(५)विकल्प ऐकरूप्यं नानुपपन्नमित्यर्थः ॥४५॥

समाधत्ते—(न विकारेति)

नात्र द्रव्यविकारतुल्यता। विकारसमो हि अयं धर्मो प्रकृत्यनुविधानं तद्भेदे भेद इति, प्रकृते च तदनुपपत्तिः, ह्रस्वत्वदीर्घत्वादिना प्रकृतिभेदेऽपि कार्यभेदाभावात् ॥ ४६ ॥

(१) 'द्रव्यविकारे वैषम्यवद्' इति ल-ग-भा०। (२) '-माचक्ष्महे' इति ज-भा०। (३) अयमंशः ख-पु० नास्ति। (४) 'यो' इति ल-पु० नास्ति। (५) 'अविकल्पः'—इति भ०।

(क) अस्य वार्त्तिकं नोपलभ्यते।

न्यायभाष्यम्

इतश्च न सन्ति वर्णविकाराः—

(सू०)—विकारप्राप्तानामपुनरापत्तेः ॥ ४७ ॥

अनुपपन्ना पुनरापत्तिः । कथम्? पुनरापत्तेरननुमानादिति । इकारो यकारत्वमापन्नः पुनरिकारो भवति, न पुनरिकारस्य स्थाने यकारस्य प्रयोगोऽप्रयोगश्चेत्यत्रानुमानं नास्ति ॥ ४७ ॥

अननुमानादिति न । इदं ह्यनुमानम्—

(सू०)—सुवर्णादीनां पुनरापत्तेरहेतुः ॥ ४८ ॥

सुवर्णं कुण्डलत्वं हित्वा रुचकत्वमापद्यते रुचकत्वं हित्वा पुनः कुण्डलत्वमापद्यते, एवमिकारो(१)ऽपि यकारत्वमापन्नः पुनरिकारो भवतीति ॥ ४८ ॥

न्यायवार्त्तिकम्

विकारप्राप्तानामपुनरापत्तेरिति । यदि विक्रियन्ते वर्णाः पुनरापत्तिर्न प्राप्नोति ॥ ४७ ॥

न्यायवार्त्तिकतात्पर्यटीका

एवोपयुज्यते न पुनः प्रकृतेरभेदः तद्विकाराणां तु यदभिन्नं रूपं द्रव्यत्वं तत्र तस्योपयोग इति स्थिते (क) अन्वयग्रहणं परिहार उक्तः ॥ ४६ ॥

इतश्च न सन्ति वर्णविकारा इत्याह—विकारेति ।

विका—त्तेः (सू० ४७) ॥ नो खलु क्षीरविकारो दधि पुनः क्षीरं दृष्टमित्यर्थः । अननुमानादिति प्रमाणाभावमुपलक्षयति ॥ ४७ ॥

वृत्तिः

इतश्च न विकार इत्याह—(विकारेति)

विकारप्राप्तस्य न पुनः प्रकृतिरूपता दृष्टा । न खलु दधि क्षीरतां पुनरापद्यते । इकारस्तु यकारतां प्राप्तः पुनरिकारतामापद्यते, दध्यत्र इत्युक्त्वा पुनरपि दधि अत्र इत्युच्यते एवेति भावः ॥ ४७ ॥

आक्षिपति—(सुवर्णेति)

उक्तो हेतुर्न युक्तः । सुवर्णादिकं हि कटकीभावं विहाय कुण्डलतामापन्नं पुनः कटकतामापद्यत एवेति भावः ॥ ४८ ॥

---

(१) 'यथि' इति ग० ।

(क) क-ख-तात्पर्यपुस्तकद्वये 'परिहारः अन्वय(स्याक्षेपसूत्र' द्रव्यविकार इति ।) ग्रहणं' इत्येवं मुद्रितम् । मुद्रिताकारस्तु शोधनादागतः ।

न्यायभाष्यम्

व्यभिचारादननुमानम् यथा पयो दधिभावमापन्नं पुनः (क) न पयो भवति किम् एवं वर्णानां न पुनरापत्तिः, अथ सुवर्णवत् पुनरापत्तिरिति सुवर्णोदाहरणोपपत्तिश्च—

(सू०)—(ख) न तद्विकाराणां सुवर्णभावाव्यतिरेकात् ॥४९॥

अवस्थितं सुवर्णं हीयमानेन धर्मेण (१)उपजायमानेन च धर्मि भवति, नैवं कश्चिच्छब्दात्मा हीयमानेन इत्वेनोपजायमानेन यत्वेन धर्मी गृह्यते, तस्मात् सुवर्णोदाहरणं नोपपद्यते इति।

न्यायवार्त्तिकम्

सुवर्णादीनां पुनरापत्तेरहेतुः। विकारप्राप्तानां पुनरापत्तिदर्शनादनेकान्त इति सूत्रार्थः ॥ ४८ ॥

न तद्विकाराणां सुवर्णभावाव्यतिरेकात्। सर्वावस्थं सुवर्णदर्शनम्, न पुनरिकारयकारयोर्धर्मयोः कश्चिद्वर्णात्मा व्यवस्थितो भवति य इत्वं हित्वा यत्वमापद्यत इति।

न्यायवार्त्तिकतात्पर्यटीका

अस्याऽऽक्षेपः सुवर्णादीनामिति सूत्रम्।

सुव--तुः (सू० ४८)॥ साधनपक्षे दूषणं व्यभिचारादिति। दूषणपक्षे दोषमाह—सुवर्णोदाहरणोपपत्तिश्चेति।

न तद्—कात् (सू० ४९) ॥ तथा हि ये सुवर्णजातीया अवयवा रुचकत्वमापन्नास्त एव

वृत्तिः

निराकरोति—(न तद्विकारेति)

सुवर्णविकारस्थले हि सुवर्णत्वादिना प्रकृतिता, न तु कटकत्वादिना, तत्रोभयमपि सुवर्णभावं न जहाति। यदि हि सुवर्णतामपहाय कटतामापन्नं पुनः सुवर्णतामापद्येत तदा व्यभिचारः (ग) शङ्क्येत, न चैवम्, प्रकृते तु इकारतां हित्वा यकारतां प्राप्तस्यापीकारतापत्तिरस्त्येवेति दोषो दुष्परिहर इति भावः ॥ ४९ ॥

---

(१) 'उपजायमानेन च' इति ग-पुस्तके नास्ति।

(क) 'पुनः पयो भवति किमेवं वर्णानां पुनरापत्तिः' इति क०, 'पुनः पयो भवति किमेवं वर्णानां न पुनरापत्तिः' इति ज-ल०, 'न पुनः पयो भवति किमेवं वर्णानां पुनरापत्तिः' इति वि०। झा-पुस्तकपाठस्तु गृहीतः।

(ख) नकारोऽयं ज-पुस्तके 'सुवर्णोदाहरणोपपत्तिश्च न' इति भाष्यान्तर्गततया पठ्यते। ग-पुस्तके सम्पूर्णमेव सूत्रं भाष्यतया गृहीतम्।

(ग) ल-पुस्तके 'शङ्क्यते' इति, भ-पुस्तके 'शक्यत' इति पाठौ न शतौ गृहीतौ।

न्यायभाष्यम्

वर्णत्वाव्यतिरेकाद्वर्णविकाराणामप्रतिषेधः(क)। वर्णविकारा अपि वर्णत्वं न व्यभिचरन्ति यथा सुवर्णविकारः सुवर्णत्वमिति।

सामान्यवतो धर्मयोगो न सामान्यस्य (ख)। कुण्डलरुचकौ सुवर्णस्य धर्मौ न सुवर्णत्वस्य, एवमिकारयकारौ कस्य वर्णात्मनो धर्मौ? (१)वर्णत्वं सामान्यं न तस्येमौ (२)धर्मौ (१*)भवितुमर्हतः। न च निवर्तमानो धर्म उपजायमानस्य प्रकृतिस्तत्र निवर्तमान इकारो न यकारस्योपजायमानस्य प्रकृतिरिति ॥ ४९ ॥

इतश्च वर्णविकारानुपपत्तिः—

(सू०)—नित्यत्वेऽविकारादनित्यत्वे चानवस्थानात् ॥ ५० ॥

नित्या वर्णा इत्येतस्मिन् पक्षे इकारयकारौ वर्णौ इत्युभयोर्नित्यत्वाद्विकारानुपपत्तिः, (३)नित्यत्वेऽविनाशित्वात् कः कस्य विकार इति। अथानित्या वर्णा इति

न्यायवार्त्तिकम्

वर्णत्वाव्यतिरेकाद्वर्णविकाराणामप्रतिषेधः। वर्णविकारा अपि न वर्णत्वं व्यभिचरन्तीति। अस्ति वर्णत्वं सामान्यमिति।

सामान्यवतो धर्मयोगो न पुनः सामान्यस्येति परिहारः ॥ ४९ ॥

न्यायवार्त्तिकतात्पर्यटीका

पूर्वव्यूहपरित्यागेन वर्धमानतामापन्नाः पुना रुचकत्वमापद्यन्ते तदवयवानां तत्र प्रत्यभिज्ञायमानत्वात्, न त्विहेकारो यकारानुगत इकारयकारानुगतो वाऽन्यः कश्चिद्धर्मी दृश्यते य इत्वं परित्यज्य यत्वमापद्यते। वर्णत्वं त्वनुगतमपि न धर्मि किं तु धर्म एव। न च निवर्तमान इकारो यकारस्य धर्मो भवितुमर्हति धर्मधर्मिणोः समानकालत्वादित्यर्थः ॥ ४९ ॥

नित्य—नात् (सू० ५०)॥ ननु दध्यत्रेति प्रयोगे कदेकारस्योत्पद्य निरोधः? तथा

वृत्तिः

अविकारे मूलयुक्तिमाह—(नित्यत्वे इति)

वर्णानां नित्यत्वे विकारासम्भवादनित्यत्वे चाचिरस्थायित्वेनेकारप्रत्यक्षानन्तरमिकारनाशाद्विकारानुपपत्तिरित्यर्थः ॥ ५० ॥

---

(१) 'वर्णत्वं वर्णधर्मयोगो न सामान्यस्येमौ धर्मौ' ग०।
(२) 'वर्णौ' इति ज०।
(३) 'अनित्यत्वे विनाशित्वात्' इति ज०।
(क) वाक्यमिदं ज-भा-पुस्तकयोः वार्त्तिके च सूत्ररूपेण मुद्रितम्।
(ख) वाक्यमिदं ज-भा-पुस्तकयोः वार्त्तिके च सूत्राकारेण मुद्रितम्।

न्यायभाष्यम्

पत्तः, एवमप्यनवस्थानं वर्णानाम्। किमिदमनवस्थानं वर्णानाम्? उत्पद्य निरोधः। उत्पद्य निरुद्धे इकारे यकार उत्पद्यते यकारे चोत्पद्य निरुद्धे इकार उत्पद्यते (१)इति कः कस्य विकारः? तदेतदवगृह्य सन्धाने सन्धाय चावग्रहे वेदितव्यमिति॥ ५०॥

नित्यपक्षे तु तावत् समाधिः—

(सू०)—नित्यानामतीन्द्रियत्वात्तद्धर्मविकल्पाच्च वर्णविकाराणामप्रतिषेधः॥ ५१॥

नित्या वर्णा न विक्रियन्त इति विप्रतिषेधः। यथा नित्यत्वे सति किञ्चिदतीन्द्रियं (२) किञ्चिदिन्द्रियग्राह्यम्, इन्द्रियग्राह्याश्च वर्णाः, एवं नित्यत्वे सति किञ्चिन्न विक्रियते, वर्णास्तु विक्रियन्त इति।

न्यायवार्त्तिकम्

इतश्च वर्णविकारानुपपत्तिः—

नित्यत्वेऽविकारादनित्यत्वे चानवस्थानात्। नित्या वर्णा इति न युक्तो विकारः व्याघातात्, अनित्या वर्णा इति न युक्तो विकारोऽनवस्थितानां विकारादर्शनात्॥ ९०॥

न्यायवार्त्तिकतात्पर्यटीका

दधि अत्रेति प्रयोगे कदा यकारस्योत्पद्य निरोध इत्यत आह—तदेतदवगृह्य संधान इति। अवग्रहोऽसंहिता दधि अत्रेत्युच्चार्य दध्यत्रेत्युच्चार्यते दध्यत्रेति वा संधाय दधि अत्रेत्यवगृह्यत इत्यर्थः॥ ९०॥

जातिवादी प्रत्यवतिष्ठते—नित्यपक्षे तावदिति।

नित्या—धः (सू० ५१)॥ यथा हि सत्यपि नित्यत्वे केचिदतीन्द्रियाः, यथा परमाण्वाकाशादयः; केचिदैन्द्रियकाः यथा गोत्वादयः, एवं सत्यपि नित्यत्वे परमाण्वाकाशादयो न प्रकृतिविकारभूताः वर्णास्तु प्रकृतिविकारभावमापत्स्यन्ते नित्या अपीत्यर्थः।

वृत्तिः

अत्र विकारवादी नित्यत्वमतमालम्ब्य परिहरति—(नित्यानामिति)

विकाराणां प्रतिषेधो न युक्तः नित्यानां 'धर्मविकल्पाद्' धर्मस्य नानाविधत्वात् अतीन्द्रियत्वात्, चकारेणैन्द्रियकत्वं समुच्चीयते। यथा हि नित्यानामाकाशादीनामतीन्द्रियत्वम्, ऐन्द्रियकत्वेऽपि गोत्वादीनां नित्यत्वमेवमन्येषां नित्यानामविकारित्वेऽपि वर्णानां विकारित्वं स्यादिति॥ ५१॥

---

(१) 'इति' शब्दः फ-झा-ग-पुस्तकेषु न दृश्यते।

(२) 'किञ्चिदिन्द्रियग्राह्यमिति' ग-फ-पुस्तकयोर्नास्ति।

न्यायभाष्यम्

विरोधादहेतुस्तद्धर्मविकल्पः। नित्यं नोपजायते नापैति अनुपजनापायधर्मकं (१)नित्यम् अनित्यं पुनरुपजनापाययुक्तम्, न चान्तरेणोपजनापायौ विकारः सम्भवति। तद् यदि वर्णा विक्रियन्ते, नित्यत्वमेषां निवर्तते। अथ नित्याः, विकारधर्मत्वमेषां निवर्तते। सोऽयं विरुद्धो हेत्वाभासो धर्मविकल्प इति ॥ ५१ ॥

अनित्यपक्षे समाधिः—

(सू०)—अनवस्थायित्वे च वर्णोपलब्धिवत्तद्विकारोपपत्तिः ॥५२॥

यथाऽनवस्थायिनां वर्णानां श्रवणं भवत्येवमेषां विकारो भवतीति।

असम्बन्धादसमर्था अर्थप्रतिपादिका वर्णोपलब्धिः न विकारेण (२)सम्बन्धाद-समर्था या गृह्यमाणा (३)वर्णविकार(४)मनुमापयेदिति। तत्र यादृगिदं यथा गन्ध-

न्यायवार्त्तिकम्

(क)नित्यानामप्यतीन्द्रियत्वात् तद्धर्मविकल्पाच्च वर्णविकाराणामप्रतिषेधः। नित्यानामप्यतीन्द्रियत्वदर्शनात् तद्धर्मविकल्पाच्च वर्णविकाराणामप्रतिषेध इति विकल्पसमा जातिः ॥ ५१ ॥

अनवस्थायित्वे च वर्णोपलब्धिवत् तद्विकारोपपत्तिः। अनवस्थायित्वे च वर्णोपलब्धिवद्विकारोपपत्तिरिति साधर्म्यसमा जातिः ॥ ५२ ॥

न्यायवार्त्तिकतात्पर्यटीका

सेयं विकल्पसमा जातिरित्याह—विरोधादिति। न खल्वैन्द्रियकत्वानैन्द्रियकत्वाभ्यामस्ति कश्चिन्नित्यत्वस्य विरोधः प्रकृतिविकारभावेन त्वस्ति। न हि संभवति कार्यं च नित्यं चेत्यर्थः ॥ ५१ ॥

अनित्यपक्षे जातिवाद्याह—अनवस्थायित्वे चेति।

अन—त्तिः (सू० ५२)॥ यथा सत्यप्यनवस्थायित्वे वर्णा इन्द्रियेण संबध्य स्वविषयं ज्ञानं जनयन्ति एवं विकारमपि करिष्यन्तीत्यर्थः।

सेयं साधर्म्यसमा जातिरित्याह—असंबन्धादिति। कतिपयक्षणावस्थानेन वर्णानां क्षणिकानामपि स्वविषयज्ञानहेतुभावो युज्यते। अवगृह्य चिरं स्थित्वा यदा संधीयते संधाय वा चिरं

वृत्तिः

अनित्यत्वमालम्ब्य स आह—(अनवेति)

अनवस्थायित्वेऽपि वर्णानां यथा प्रत्यक्षं भवत्येवं विकारोऽपि स्यादिति भावः ॥५२॥

---

(१) 'नित्य'मिति ज-पु० नास्ति। (२) 'सम्बद्धा अस-' इति वि०। (३) 'वर्णविकारमर्थम्' फ० भा०। (४) 'अनुत्पादयेदिति' इति ग०, 'अनुपपादयेद्' इति ज०।

(क) वार्त्तिकधृतसूत्रे अधिकः 'अपि' शब्दो दृश्यते।

न्यायभाष्यम्

गुणा पृथिव्येवं शब्दसुखादिगुणाऽपीति, तादृगेतद्भवतीति। न च वर्णोपलब्धिर्वर्णनिवृत्तौ (१)वर्णान्तरप्रयोगस्य निवर्तिका। योऽयमिवर्णनिवृत्तौ यकारस्य प्रयोगो यद्ययं वर्णोपलब्ध्या निवर्तते तदा तत्रोपलभ्यमान इवर्णो यत्वमापद्यते इति(२) गृह्येत। तस्माद्वर्णोपलब्धिरहेतुर्वर्णविकारस्येति ॥ ५२ ॥

(सू०)—विकारधर्मित्वे नित्यत्वाभावात् कालान्तरे विकारोपपत्तेश्चाप्रतिषेधः ॥५३॥

तद्धर्मविकल्पादिति न युक्तः प्रतिषेधः। न खलु विकारधर्मकं किञ्चिन्नित्यमुपलभ्यत इति वर्णोपलब्धिवदिति न युक्तः प्रतिषेधः। अवग्रहे हि दधि अत्रेति

न्यायवार्त्तिकम्

उभयोरप्युत्तरम्—

विकारधर्मित्वेन (क)नित्यत्वाभावात् कालान्तरे विकारोपपत्तेश्चाप्रतिषेधः। नित्या

न्यायवार्त्तिकतात्पर्यटीका

स्थित्वा यदा विगृह्यते तदा वर्णानामनित्यानां न तावन्तं कालमवस्थानमस्तीति नोपलब्धिहेतुत्वेन विकारकर्तृत्वं वर्णानां तुल्यम्। तस्मादसंबन्धादसमर्था वर्णोपलब्धिर्वर्णविकारप्रतिपादन इत्यर्थः। मा भूद्वर्णोपलब्धिर्वर्णविकारेण साक्षात्संबद्धा आदेशविरोधितया तु तन्निवृत्त्या पारिशेष्याद्विकारं साधयिष्यतीत्यत आह—न च वर्णोपलब्धिरिति ॥ ५२ ॥

तदेवं जात्युत्तरमुत्थितमेव मारितं कृत्वा भाष्यकारः अत्रैवार्थे सूत्रं पठति—विकारधर्मित्व इति।

विका—धः (सू० ५३) ॥

वृत्तिः

उभयत्रोत्तरयति—(विकारेति)

उक्तः प्रतिषेधो न युक्तः विकारधर्मित्वे नित्यत्वासम्भवात्, विकारो ह्यत्र स्वरूपपरित्यागेन रूपान्तरापत्तिः, तथात्वे च नित्यत्वविरोधात्। न हि घटादेः कपालाद्युपादेयत्ववत् प्रकृते सम्भवति, यकारकाले इकारानुपलब्धेः। अनित्यत्वपक्षेऽपि प्रतिषेधो न युक्तः प्रत्यक्षं हि वर्णस्य द्वितीयक्षणे युज्यते, विकारस्तु कालान्तरीयो न युज्यते दधीति शब्दानन्तरमत्रेत्यादिशब्देन तस्य नाशादिति भावः ॥ ५३ ॥

---

(१) 'वर्णान्तर प्रयोगस्य निवर्त्तिका' इति ग-पु०। निवर्त्तिका इत्यत्र 'निर्वर्त्तिका' इति शोधितं ल-पुस्तके। (२) 'गृह्यते' इति ल-ग-ज०।

(क) क-ख-वार्त्तिकग्रन्थयोः सूत्रस्य स्थूलाक्षरैः मुद्रणं तु 'विकारधर्मित्वे' इत्याकारेणैव।

न्यायभाष्यम्

(१)प्रयुज्य चिरं स्थित्वा ततः संहितायां प्रयुङ्क्ते दध्यत्रेति। चिरनिवृत्ते चायमिवर्णे यकारः प्रयुज्यमानः कस्य विकार इति प्रतीयते, कारणाभावात् कार्याभाव इति अनुयोगः प्रसज्यत इति ॥ ५३ ॥

इतश्च वर्णविकारानुपपत्तिः—

(सू०)—प्रकृत्यनियमात्(क) ॥५४॥

इकारस्थाने यकारः श्रूयते यकारस्थाने खल्विकारो विधीयते विध्यति (२)इति। तद् यदि स्यात् प्रकृतिविकारभावो वर्णानाम्, तस्य प्रकृतिनियमः स्यात्। दृष्टो विकारधर्मित्वे प्रकृतिनियम इति ॥ ५४ ॥

न्यायवार्त्तिकम्

विक्रियन्त इति व्याघातो दोषः। उपलभ्यमानस्य चेकारस्य यत्वानुपपत्तेः वर्णोपलब्धिवदित्यसम्बद्धम् ॥ ५३ ॥

इतश्च वर्णविकारानुपपत्तिः—

प्रकृत्यनियमात् इति (ख)। विकारे प्रकृतीनां नियमो दृष्टः। इकारयकारयोस्त्वनियमः; तस्मादनियमान्न विक्रियन्त इति ॥ ५४ ॥

न्यायवार्त्तिकतात्पर्यटीका

वार्तिकम्—उपलभ्यमानस्य चेकारस्य यत्वानुपपत्तेरिति। अवगृह्य चिरं स्थित्वा संधाय यदा यत्वं तदोपलभ्यमानतेकारस्य नास्तीत्यर्थः ॥ ५३ ॥

इतश्च वर्णविकारानुपपत्तिः—प्रकृत्यनियमादिति—

प्रकृ—मात् (सू० ५४) ॥ क्षीरजातीयस्य दधिजातीयो विकारो न पुनः कदाचिदपि दधिजातीयस्य क्षीरजातीया विकारा उपलभ्यन्ते। इह तु यथेकारजातीयस्य यकारजातीयो विकारो दध्यत्रेति दृश्यते एवं यकारजातीयस्यापि विकार इकारजातीयो दृश्यते यथा व्यधेः सति प्रसारणे यकारस्येकार इति। तस्मादनियमान्न प्रकृतिविकारभाव इत्यर्थः ॥ ५४ ॥

वृत्तिः

इतश्च विकारानुपपत्तिरित्याह—(प्रकृत्यनियमात्)

विकाराणां हि प्रकृतिनियमः, यथा क्षीरदध्नोः प्रकृतिविकारभावः, न तु वैपरीत्यम्, प्रकृते तु दध्यत्रेत्यादौ इकारो यकारप्रकृतिः, विध्यतीत्यादौ तु यकार इकारप्रकृतिरिति भावः ॥ ५४ ॥

---

(१) 'वियुज्य'—इति वि०। (२) 'इति' शब्दः ग-फ-ज-पुस्तकेषु नास्ति।

(क) अत्र फ-पुस्तकानुसारेण सूत्राकारो गृहीतः; पुस्तकान्तरेषु 'प्रकृत्यनियमाद् वर्णविकाराणाम्' इति सूत्राकारः, तत्परित्यागे बीजं न्यायसूचीनिबन्धविरोधः।

(ख) क-ख-वार्त्तिकपुस्तकयोः सूत्रं स्थूलाक्षरैः 'प्रकृत्यनियमाद्वर्णविकाराणाम्' इत्याकारेण मुद्रितम्। 'इति' पदं च 'दृष्टः' इत्यतः परं मुद्रितम्।

(सू०)—अनियमे नियमान्नानियमः ॥५५॥

न्यायभाष्यम्

योऽयं प्रकृतेरनियम उक्तः स नियतो यथाविषयं व्यवस्थितो नियतत्वान्नियम इति भवति, एवं सत्यनियमो नास्ति, तत्र यदुक्तं प्रकृत्यनियमादिति, एतदयुक्तमिति ॥५५॥

(सू०)—नियमानियमविरोधादनियमे नियमाच्चाप्रतिषेधः ॥५६॥

नियम इत्यत्रार्थाभ्यनुज्ञा, अनियम इति तस्य प्रतिषेधः। अनुज्ञातनिषिद्धयोश्च व्याघातादनर्थान्तरत्वं न भवति। अनियमश्च नियतत्वात्(१)नियमो न भवतीति नात्रार्थस्य तथाभावः प्रतिषिध्यते। किं तर्हि? तथाभूतस्यार्थस्य नियमशब्देनाभिधीयमानस्य नियतत्वान्नियमशब्द एवोपपद्यते। सोऽयं नियमादनियमे प्रतिषेधो न भवतीति ॥५६॥

न्यायवार्त्तिकम्

अनियमे नियमान्नानियमः। सूत्रार्थोऽनियमो नास्तीति ॥ ५५ ॥

नियमानियमविरोधादनियमे नियमाच्चाप्रतिषेधः। अनुज्ञातप्रतिषिद्धयो(क)रेकत्वानुपपत्तेरिति विरोधः सूत्रार्थः। तस्मादनुपलभ्यमानपृथग्धर्मिविशेषाणामादेश इति। यद्येते वर्णा विक्रियेरन् ततः पृथग्विकारलक्षणेभ्यो धर्म्युपलभ्येत, न तूपलभ्यते तस्मान्न विक्रियन्त इति ॥५६॥

न्यायवार्त्तिकतात्पर्यटीका

अत्र च्छलवादी प्रत्यवतिष्ठते—अनियमे नियमादिति।

अनि—मः (सू० ५५) ॥

तदेतस्य वाक्छलत्वमापादयति—नियमानियमविरोधादिति—

निय—धः (सू० ५६)॥ नियमानियमसामानाधिकरण्यं विरुध्यते न त्वाधाराधेयभाव इत्यर्थः ॥ ५६ ॥

वृत्तिः

अत्र च्छलवादी शङ्कते—(अनियम इति)

अनियमो य उक्तः स न युक्तः। कुतः? अनियतत्वस्य नियमादित्यर्थः ॥ ५५ ॥

समाधत्ते—(नियमेति)

अनियमे नियमाद् यस्त्वयाऽनियमप्रतिषेधः कृतः स न युक्तः। कुतः? (२)नियमानियमयोर्विरोधात्। अनियमो हि नियमाभावः तस्मिन् सति नियमासम्भवादिति भावः ॥ ५६ ॥

---

(१) 'नियमे' इति ख।

(२) 'नियमानियमविरोधात्' इति ख०।

(क) अत्र 'एकत्वानुपपत्ते'रि'ति पञ्चम्यर्थः कुत्रान्वेतीति चिन्त्यम्।

न्यायभाष्यम्

न चेयं वर्णविकारोपपत्तिः परिणामात् कार्यकारणभावाद्वा। किं तर्हि?

(सू०)—गुणान्तरापत्त्युपमर्द-ह्रास-वृद्धि-लेश-श्लेषेभ्यस्तु विकारोपपत्तेर्वर्णविकाराः(१) ॥५७॥

स्थान्यादेशभावादप्रयोगे प्रयोगो विकारशब्दार्थः, स भिद्यते। गुणान्तरापत्तिः उदात्तस्यानुदात्त इत्येवमादिः। उपमर्दो नाम एकरूपनिवृत्तौ रूपान्तरोपजनः। ह्रासो दीर्घस्य ह्रस्वः। वृद्धिर्ह्रस्वस्य दीर्घः, तयोर्वा प्लुतः। लेशो लाघवम्, स्त इत्यस्तेर्विकारः। श्लेष आगमः, प्रकृतेः प्रत्ययस्य वा। एत एव विशेषा विकारा इति। एत एवाऽऽदेशाः, एते चेद्विकारा उपपद्यन्ते तर्हि वर्णविकारा इति ॥ ५७ ॥

न्यायवार्त्तिकम्

अथ विक्रियन्ते, एवं विकारो भवति—

गुणान्तरापत्त्युपमर्दह्रासवृद्धिलेशश्लेषेभ्यस्तु विकारोपपत्तेर्वर्णविकारः(क)। गुणान्तरापत्त्युपमर्दह्रासवृद्धिलेशश्लेषेभ्यस्तु विकारोपपत्तेः सन्ति वर्णविकाराः। सूत्रार्थो गुणान्तरापत्त्यादेरादेश इति। अयं च विकारादेशोपदेशविचारो भाष्यकारेणैव सम्यग् निरूपित इति सूत्रार्थमात्रं निरूपितमिति ॥ ५७ ॥

इति वर्णानित्यत्ववादः।

न्यायवार्त्तिकतात्पर्यटीका

तदेवं प्रकृतिविकारभावं निराकृत्य विकारवचनव्यक्तिं शब्दानामादेशपक्षे समर्थयति—न चेयं वर्णविकारोपपत्तिरिति।

गुणा—राः (सू० ५७)॥ एकस्याप्रयोगे अन्यस्य प्रयोगो विकार इति सामान्यलक्षणम्। तस्य विशेषानाह—स भिद्यत इति। उपमर्दो नामेति, यथाऽस्तेर्भूरिति। लेशः—स्त इत्यत्रास्तेरकारलोपे सकारमात्रस्य लेशस्यैकदेशस्य व्यवस्थापनम्। श्लेष आगमः प्रकृतेः प्रत्ययस्य वा, अत्रापि केवलस्याप्रयोगे विशिष्टस्य प्रयोग इत्येतावता विकारसामान्यलक्षणं लक्षणीयम्। एतेन वार्तिकमपि व्याख्यातमेवेति ॥ ५७ ॥

वृत्तिः

तदेवं वर्णानां प्रकृतिविकारभावं निरस्य स्वपक्षे विकारव्यवहारमुपपादयति—(गुणान्तरापत्त्युपमर्द-ह्रास-वृद्धि-लेश-श्लेषेभ्यस्तु विकारोपपत्तेर्वर्णविकारः)

तुशब्दः पुनरर्थे। एतेभ्यः पुनर्वर्णविकारोपपत्तेः वर्णविकारस्य एकवर्ण(२)प्रयोगे

(१) 'वर्णविकारोपपत्तेर्वर्णविकारः' इति ज० भ०। (२) '-प्रयोगेण'।

(क) वृत्ती वार्त्तिके च 'वर्णविकार' इत्येकवचनान्तः पाठः।

(सू०)—ते विभक्त्यन्ताः पदम् ॥ ५८ ॥

न्यायवार्त्तिकतात्पर्यटीका

तदेवमुक्तेन क्रमेण वर्णानामनित्यतां प्रतिपाद्य शब्दप्रामाण्योपयोगि पदं निरूपयति—

ते वि—दम् (सू० ५८) ॥ एवं किल केचित् पश्यन्ति—न वर्णाः प्रतिपादयन्त्यर्थान् । ते हि प्रत्येकं वा अन्वयधियमादधीरन् नागदन्ता इव शिक्यालम्बनम्, मिलिता वा ग्रावाण इव पिठरधारणम् ? तत्र न तावत् पूर्वः कल्पः प्रत्येकमर्थप्रत्ययानुत्पादात् वर्णान्तरोच्चारणानर्थक्याच्च । नापि संहताः, एकवक्तृप्रयोगे क्रमनियमेन संघातानुपपत्तेः ; अनेककर्तृकप्रयोगेऽपि सत्यपि यौगपद्ये अर्थप्रत्ययानुत्पादनात् । नापि क्रमवत्पूर्ववर्णानुभवभावितसंस्कारसहितोऽन्त्यवर्णप्रत्ययोऽर्थप्रत्ययहेतुरिति सांप्रतम्, भावनापरनाम्नः संस्कारस्य स्वोत्पादकानुभवविषयस्मृतिजननादन्यत्र सामर्थ्यादर्शनात् । न हि गवानुभवजनितः संस्कारः करोति स्मृतिं तुरङ्गमे । अपि चेयमन्त्यवर्णश्रुतिः स्वार्थसंकेतस्मृत्यपेक्षा वाऽर्थप्रत्ययमादधीत अनपेक्षा वा ? तदपेक्षत्वे तत्काले अन्त्यवर्णश्रुतिरुपरता क्षणिकत्वेनेति कया संकेतस्मृतिरपेक्ष्यते अन्त्यवर्णश्रुतिसमये च संकेतस्मृतिरनागतेति किमन्त्यवर्णप्रत्ययोऽपेक्षेत । संकेतस्मृत्यनपेक्षत्वे अगृहीतसंकेतस्यापि प्रथमश्राविणोऽर्थप्रत्ययप्रसङ्गः । न हि चिरध्वस्तस्यानपेक्षितस्मृतेः संकेतग्रहस्यास्ति कश्चिदुपयोग इति । न च भावनाख्यसंस्कारसहितोऽन्त्यवर्णः प्रत्यायकोऽर्थस्य नाप्यन्य एव कश्चित् पूर्ववर्णानुभवजनितः संस्कारः प्रोक्षणादिभिरिव व्रीह्यादेरन्त्यवर्णप्रत्ययसहकारीति युक्तम्, अनेकादृष्टकल्पनाप्रसङ्गात् ; स एव तावददृष्टचरः कल्पनीयस्तस्य चानेकत्वमिति । सोऽयं वर्णेभ्योऽर्थप्रत्ययो भवन्ननुपपद्यमानः (क)तदतिरिक्तस्फोटानुभवमायतते । अस्ति हि भिन्नेष्वपि वर्णेषु वाक्यमिदमेकं पदमिति वा सर्वजनीनोऽनुभवः । न चासौ भिन्नवर्णालम्बनो भवितुमर्हति एकस्य नानात्वविरोधात् । तस्माद्वर्णातिरिक्तं पदं वाक्यं वा आलम्बते, तच्च प्रत्येकमेव ध्वनयोऽभिव्यञ्जयन्ति । केवलं पूर्वे ध्वनयः स्वरूपमाभासयन्ते चरमस्तु व्यक्तम् । न चेयमर्थे विधा संभविनी प्रत्यक्षज्ञाननियतत्वात् । व्यक्ताव्यक्तावभासितायाः पदे प्रत्यक्षे

वृत्तिः

वर्णान्तरप्रयोगस्य उपपत्तेः वर्णविकार इति व्यवह्रियते । तानेवाऽऽह—गुणान्तरेति । गुणान्तरापत्तिर्धर्मिणि सत्येव धर्मान्तरापत्तिः, यथोदात्तेऽनुदात्तत्वम् । उपमर्दो धर्मिनिवृत्तौ धर्म्यन्तरप्रयोगः यथाऽस्तेर्भूः । ह्रासो दीर्घस्य ह्रस्वत्वम्, वृद्धिः ह्रस्वस्य दीर्घत्वम्, लेशः अल्पत्वम्, यथाऽस्तेरकारलोपः ; श्लेष आगमः, एतैः कारणैर्विकारव्यवहार इति ॥५७॥

समाप्तं शब्दपरिणामप्रकरणम् ॥ ३ ॥

(क) 'तदतिरिक्तं स्फोटादनुभवम्' इति क-पुस्तके 'तदतिरिक्तं स्फोटानुभवम्' इति च ख-पुस्तके पाठः । मुद्रिताकारस्तु समीचीनत्वानुरोधेन कल्पितः ।

न्यायवार्त्तिकतात्पर्यटीका

उपपत्तिः, अर्थस्य तु पदगम्यस्याप्रत्यक्षस्य मानान्तरेण ग्रहणमस्तीति; अग्रहणं वा न तु स्फुटास्फुटत्वाभ्यां योगः। अपि च यस्मिन्ननुवर्तमाने यद्व्यावर्तते तत् तस्माद्भिद्यते, यथा सुवर्णावयवेष्वनुवर्तमानेषु कटकमुकुटादयः। अनुवर्तमानेषु तु वर्णेषु व्यावर्तन्ते पदभेदाः तस्मात् तेऽपि वर्णेभ्यो भिन्ना इति तान् प्रत्याह—ते विभक्त्यन्ताः पदम् त एव वर्णा एव पदम्, न तु तदतिरिक्तं स्फोटाख्यमित्यर्थः।

इदमत्राऽऽकूतम्—न तावद्वर्णातिरिक्तः पदात्मा कश्चिदुपलभ्यते प्रत्यक्षेण, पदमिति तु व्यपदेशस्तानेव वर्णान् बहूनप्येकस्मृतिसमारोहितया वा एकार्थधीहेतुतया वा अभिन्नकारकावस्थावत्तया वालम्बते भाक्तः। न चैवमन्योन्यसंश्रयः, नर्त्ते पदावधारणादर्थाधिगमो न चार्थाधिगममन्तरेण पदावधारणमिति; एकस्मृतिबुद्धिसमारोहिणां वर्णानामसत्यर्थवत्तयाऽवबोधे सुज्ञानत्वात्, तन्मात्रस्य च स्वार्थेन संकेतग्रहस्यापि सुकरत्वात्, तदुत्तरकालत्वाच्च पदमिति कारकशब्दप्रवृत्तेः। इतरथा सर्वेषु कारकशब्देषु दुर्वारमितरेतराश्रयत्वं कार्योपहितमर्यादत्वात् कारकाणाम्, तदनुपातित्वाच्च तच्छब्दानाम्। तस्माद् व्यपदेशमात्रानुरोधेन (क)नैकैकवर्णमात्रावभासिनीषु श्रोत्रजासु बुद्धिषु सदाहितवासनालब्धजन्मायां चानुभूतवर्णसंकलनात्मिकायां स्मृतिबुद्धावप्रथमानो वर्णविभागोपमर्देन न शक्यः पदात्मा प्रत्यक्ष इति वक्तुम्, नापि निर्भागस्य स्फुटास्फुटत्वे वा भागविपर्यासो वा युज्यते। नो खलु सर्वथाऽदृश्यमानो नाम स्फुटः नापि समारोपविषयः। न हि सामान्यात्मनाऽप्यगृहीता शुक्ती रजतत्वसमारोपविषयः। न च निर्भागे पदात्मनि गृहीते किंचिदस्यागृहीतमवशिष्यते यद्ग्रहणादव्यक्तत्वं वा समारोपो वा भवेत्। न च तदेव तदैव तेन गृहीतमगृहीतं च संभवति। तस्मान्न प्रत्यक्षस्य तदाभासस्य वा गोचरः पदात्मा, नाप्यनुमानस्यार्थप्रत्ययलिङ्गजन्मनः, परस्पराश्रयप्रसङ्गात्। न तावत् सत्तामात्रेण पदात्माऽर्थप्रत्ययमाधत्ते मा धान्नित्यत्वेन नित्यमेनम्। तस्मात् स्वज्ञानेन (ख) तच्च स्वज्ञानमर्थप्रत्ययात्। तथा च सत्यर्थप्रत्यये पदप्रत्ययः पदप्रत्यये च सत्यर्थप्रत्यय इति व्यक्तमन्योन्याश्रयत्वम्। न चेयमर्थधीर्वर्णेभ्यो नोदेतुमर्हति। ते हि पूर्वमनुभूताः प्रत्येकमनुभूतताक्रमोपसृष्टा एकबुद्धिसमारोहिणः शक्नुवन्त्यर्थधियमाधातुम्। न चाक्रमानुक्रमविपरीतक्रमाणामविशेषो वर्णानां पूर्वानुभवसन्निवेशानुसारित्वात् स्मृतेः, तत्सन्निवेशस्य च विशेषाद्विशेषोपपत्तिः। अभेदेऽपि च वर्णानां 'न हि' 'हि ने'त्यादौ पदभेद उपपत्स्यते विनाऽपि स्फोटकल्पनां क्रमभेदानुविधायित्वात् पदभेदस्य। अर्थप्रत्ययकारकत्वं च न वर्णमात्राणामपि तु क्रमन्यूनातिरिक्तत्वाद्युपहितानाम्। तत्तदुपधानं च तुल्यत्वेऽपि वर्णानामन्यदन्यदिति पदभेदसिद्धिः। तस्माद् दृष्टेभ्य एव वर्णेभ्यो दृष्टप्रकारानुपातिभ्योऽर्थप्रत्ययोत्पत्ति-

---

(क) अत्र 'एकैकवर्णमात्रावभासिनीषु' इति सम्यक् पाठः।

(ख) 'अर्थप्रत्ययमाधत्त' इति सम्बध्यते।

न्यायभाष्यम्

यथादर्शनं विकृता वर्णा विभक्त्यन्ताः पदसंज्ञा भवन्ति। विभक्तिर्द्वयी— नामिक्याख्यातिकी च, ब्राह्मणः पचतीत्युदाहरणम्।

न्यायवार्त्तिकम्

ते विभक्त्यन्ताः पदम्। ते वर्णा यथादर्शनं विकृता विभक्त्यन्ताः पदसंज्ञका भवन्ति। अर्थप्रत्ययस्तर्हि न प्राप्नोति? न न प्राप्नोति, अन्त्यवर्णप्रत्ययात् पूर्ववर्णप्रतिसन्धानप्रत्ययापेक्षादर्थप्रत्यय इति। विभक्तिर्द्वयी नामिकी चाऽऽख्यातिकी च। नामिकी स्वादयः, आख्यातिकी तिबादयः। तया विशिष्यमाणं पदं द्वेधा भवति नाम च आख्यातं च। अभिधेयस्य क्रियान्तरयोगाद् विशिष्यमाणरूपः शब्दो नाम, यथा ब्राह्मण इति क्रियाकारकसमुदायः कारकसंख्या-

न्यायवार्त्तिकतात्पर्यटीका

रुपपद्यमाना नादृष्टं स्फोटात्मानं दृश्यमानवर्णभेदापह्नवेन कल्पयितुमर्हतीति सिद्धं 'ते विभक्त्यन्ताः पद'मिति।

यथादर्शनं विकृता इति भाष्यम्। गुणान्तरापत्त्यादिभिरादेशरूपेण विकृताः 'यथादर्शनं' यथाप्रमाणम्, न तु प्रकृतिविकारभावेन; तस्य प्रमाणबाधितत्वादित्यर्थः।

वार्त्तिकम्—अर्थप्रत्ययस्तर्हि न प्राप्नोतीति, स्फोटवादिन उक्तोऽभिप्रायः। उत्तरम्— अन्त्यवर्णप्रत्ययादिति। वर्णेषु प्रत्ययो वर्णप्रत्ययः। अन्त्यश्चासौ वर्णप्रत्ययश्चेति अन्त्यवर्णप्रत्ययः सकलवर्णावगाहिनी स्मृतिः। सा च प्राचः प्रत्येकवर्णानुभवानपेक्ष्यान्त्या भवति। यद्येवमगृहीतसंकेतानामप्यसावस्तीति तेषामर्थप्रत्ययप्रसङ्गः स्यादित्यत आह—पूर्ववर्णप्रतिसन्धानप्रत्ययापेक्षादिति। संकेतग्रहणसमयः पूर्वः, तद्भाविनो वर्णाः पूर्वे, तेषां प्रतिसन्धानं यावतां यादृशानां यज्जातीयानां गृहीतः संकेतस्तादृशास्तावन्तस्तज्जातीया एवैत इत्येवमाकारम्, तदेव प्रत्ययस्तदपेक्षात्। न चासावगृहीतसंकेतानामस्तीति सन्नप्यन्त्यवर्णप्रत्ययो नार्थस्य प्रत्यायक इत्यर्थः। अभिधेयस्य क्रियान्तरयोगाद्विशिष्यमाणरूपः शब्दो नाम। अन्तरशब्दो विशेषवचनः क्रियाविशेषयोगाद्धेतोरित्यर्थः। एतदुक्तं भवति—यस्याभिधेयं क्रियाविशेषसम्बन्धेन विना न पर्यवस्यति तन्नाम। आख्यातार्थस्तु यद्यपि क्वचित् क्रिययाऽपि संबध्यते

वृत्तिः

शाब्दबोधे पदजन्यपदार्थोपस्थितेर्हेतुत्वात् तदुपपादनाय पदार्थे निरूपणीये पदमादौ निरूपयति—(ते विभक्त्येति)

ते वर्णा विभक्त्यन्ताः पदम्। बहुत्वमविवक्षितम्। विभक्तेश्च सत्त्वमनपेक्षितम्। विभक्तिश्च सुप्तिङ्रूपा। वस्तुतस्तु नेदं पदं शाब्दबोधोपयोगि, किन्तु इदमाकाङ्क्षास्वरूपम्।

न्यायभाष्यम्

उपसर्गनिपातास्तर्हि न पदसंज्ञाः लक्षणान्तरं वाच्यमिति ; (क)शिष्यते च खलु नामिक्या विभक्तेरव्ययाल्लोपः तयोः पदसंज्ञार्थमिति ॥ ५८ ॥

न्यायवार्त्तिकम्

विशिष्टः । क्रियाकालयोगाभिधायि क्रियाप्रधानमाख्यातम्—पचतीति यथा । यदि द्वयी विभक्तिरुपसर्गनिपातास्तर्हि न पदसंज्ञकाः ? (ख)न नाम्न्यन्तर्भावात्—उपसर्गनिपाता नाम्ना संगृहीताः, यस्मादाह अव्ययाल्लोप इति ; ते सुबन्तत्वात्तेनैव संगृहीता इति ।

न्यायवार्त्तिकतात्पर्यटीका

यथा 'अभिक्रामं जुहोति भुक्त्वा व्रजती'त्यादिषु, तथाऽपि जुहोति व्रजतीत्यादयो न क्रियासम्बन्धमन्तरेण न पर्यवस्यन्ति अपि तु तत्समभिव्याहृता अपि सम्बध्यन्ते । नामार्थस्तु न पूर्वापरीभूतप्रधानक्रियापदार्थमन्तरेण पर्यवस्यति । अत एवाऽऽहुः 'यत्रान्यत् क्रियापदं न श्रूयते तत्रास्तिर्भवन्तीपरः प्रयोक्तव्यः । तथा च ब्राह्मणेऽभिक्रामं भोक्तुं भुक्त्वेत्यादयश्च समुच्चयाद्यपेक्षाः क्रियाविशेषमन्तरेणापर्यवस्यन्तो नामत्वेन संगृहीता भवन्ति' । अस्योदाहरणमाह—यथा ब्राह्मण इति । अस्यार्थमाह—क्रियाकारकसमुदायः कारकसंख्याविशिष्टः । अत्र हि क्रियाशब्देन ब्राह्मणस्य भावो ब्राह्मणत्वमभिधीयते भावशब्दस्य क्रियार्थत्वात् । भविता च ब्राह्मणः कारकम् । तयोर्ब्राह्मणत्वब्राह्मणयोः समुदायः, स च कारकस्य भवितुर्ब्राह्मणस्यैकत्वसंख्यया विशिष्टो ब्राह्मण इत्येतस्मान्नामपदाद् गम्यत इत्यर्थः । आख्यातलक्षणमाह—क्रियाकालयोगाभिधायि क्रियाप्रधानमाख्यातं क्रियायाः कालयोगः पूर्वापरीभावः । कालयोगाद्धि सम्भवति तदभिधायि । तदनेन पाक इत्यादेर्नामपदाद् व्यवच्छिनत्ति । एवमपि भुक्त्वा भोक्तुमित्यादावपि नाम्नि प्रसङ्गः, अस्ति हि तत्रापि कालावधिपूर्वापरीभूतकर्मक्षणप्रचयप्रत्ययः ; अन्यथा ओदनमिति कर्मसंबन्धो न स्यादत उक्तं क्रियाप्रधानमिति । स्वनिष्ठा ह्याख्यातात् क्रिया प्रतीयते नान्यतन्त्रा, भोक्तुमित्यादौ तु क्रियान्तरमन्तरेण न (ग)पर्यवस्यन्तीति क्रिया गम्यते, व्रजतीत्यादौ तु न तथा ; तदिदं क्रियाप्राधान्यम् । तदनेन पचति पचेत पच्यते

(क) 'वाच्यमिति' इत्यन्तः पूर्वपक्षग्रन्थः, तत्प्रतिषेधकस्तु 'न'कारोऽत्र ग्रन्थकारशैलीसिद्धः, ततश्च 'न, शिष्यते च खलु' इति यथार्थः पाठः, आदर्शपुस्तकेषु तदनुपलम्भे च मुद्राप्रमाद एव हेतुरिति सम्भाव्यते ।

एतेन विभक्तिमन्तो विभक्तिलोपवन्तश्च वर्णाः पदमिति एतेषां सिद्धान्तः स्फुटमवभासते । नव्यनैयायिकास्तु शक्तिलक्षणान्यतरसम्बन्धेनार्थप्रत्यायकानामेव वर्णानां पदत्वमिति वदन्ति । तन्मते 'रामः' 'गाम्' 'पश्यति' इत्यादेः प्रत्येकं न पदत्वं किन्तु वाक्यत्वमिति वाक्यत्रयरूपस्यैतद्वर्णसमुदायस्य महावाक्यत्वमिति । जगदीशतर्कालङ्कारपादास्तु निपातशब्दाद् विभक्तिं नाङ्गीकुर्वन्ति (शब्दशक्तिप्रकाशिका-प्रकृतिलक्षणव्याख्या), ततश्च निपातानां पदसंज्ञायां ते भाष्यकारमतमेवानुसरन्तीति बोध्यम् ।

(ख) क-ख-वार्त्तिकपुस्तकयोः 'न नाम्न्यन्तर्भावात्' इति पाठः । समीचीनत्वानुरोधेन कल्पिताकारस्तु मुद्रितः । (ग) अत्र 'अर्थप्रत्ययः' इति कर्तृपदमध्याहार्यम्, तथाच पर्यवस्यतीति युक्तं सम्भाव्यते ।

न्यायभाष्यम्

पदेनार्थसम्प्रत्यय इति प्रयोजनम्, नामपदं चाधिकृत्य परीक्षा, गौरिति पदं खल्विदमुदाहरणं तदर्थं (क)—

न्यायवार्त्तिकम्

पदेन व्यवहार इति पदार्थश्चिन्त्यते। नामपदं चाधिकृत्य व्यवहार इति नामपदं चिन्त्यते। नाम्नश्चाधिकारो व्यापकत्वात्—यस्मान्नाम्ना (१)सर्वं पदं व्याप्यते(१*) तस्माद् गौरित्यस्य पदस्यार्थश्चिन्त्यते। न पदार्थाधिगतिर्विशेषेऽनवस्थानात्—न हि पदे उच्चरिते कश्चिद्विशेषो गम्यते तस्मात् पदमवाचकम्। न पदस्य विशेषाविषयत्वात्—क एवमाह पदेन विशेषो गम्यते, अपि तु सामान्यवर्त्ति पदं विशेषवर्त्ति वाक्यम्। न च सामान्याभिधानादनर्थकं भवितुमर्हतीति। न, सामान्यस्य व्यवहारविशेषाविषयत्वात्—सर्व उपदेष्टा विशेषप्रतिपत्त्यर्थं पदमुच्चारयति। न च सामान्ये प्रैषो न सम्प्रतिपत्तिः। तस्मात् पदमवाचकमेवेति ? न सामान्यविषयत्वे सति विशेषश्रुतेर्नियामकत्वात्—यदि पदमवाचकं स्यात् न च पदश्रवणात् सामान्यं गम्येत। यदवाचकं न ततः सामान्यं विशेषो वा गम्यते यथा अर्थात्, गम्यते च पदात् तत्सामान्यम्। सामान्यश्रुतेर्विशेषश्रुतिर्नियामिका भवति—यथा गौरिति सामान्याधिगतौ तिष्ठति गच्छतीति

न्यायवार्त्तिकतात्पर्यटीका

स्थीयत इत्यादि सर्वमाख्यातं संगृहीतं भवति। न क्वचिदपि नाम्नि प्रसङ्गः। यदप्यस्त्यादि नामाऽऽख्यातप्रतिरूपकं तत्रापि सन्नित्यस्यार्थे सिद्धरूपे तद्वर्त्तते न पुनः पूर्वापरीभूतक्रियार्थत्वमिति द्रष्टव्यम्।

यस्मान्नाम्ना सर्वं पदं व्याप्यत इति। बाहुल्यं व्याप्त्यर्थः। प्रायेण हि वाक्ये बहूनि नामपदानि आख्यातं पुनरेकमेवैकस्मिन् वाक्ये आख्यातभेदे वाक्यभेदादिति। अधिकरणमाक्षिपति—न पदार्थाधिगतिरिति। पदेन हि विशेषो वाऽभिधीयते सामान्यं वा ? तत्र विशेषाभिधानं तावद् दूषयति—विशेष इति। 'अनवस्थानम्' अनवधारणमिति। सामान्याभिधानमाशङ्क्याऽऽह—न पदस्येति। दूषयति—न सामान्यस्येति। व्यवहाराय हि वाक्यमुच्चारयन्ति वृद्धाः न तु व्यसनितया। न चास्ति सामान्यसाध्यः कश्चिद् व्यवहारः किं तु सर्वो व्यवहारो विशेषसाध्यः। न चास्य पदं वाचकम्, तद्वाक्यमेव वाक्यार्थस्य वाचकमिति न पदार्थचिन्तावसर इत्याक्षेपार्थः। समाधत्ते—न सामान्यविषयत्वे सतीति। न तावत्पदातिरिक्तमस्ति वाक्यं नामेत्युक्तमधस्तात्। न च वर्णमालैव पदार्थप्रतिपादनावान्तरव्यापारानपेक्षा वाक्यार्थबोधिनीति युक्तम्, अनपेक्षितसंकेतग्रहायास्तदवबोधने प्रथमश्राविणोऽविदितसंकेतस्य वाक्यार्थबोधप्रसङ्गः। (ख)यतः संकेतग्रहापेक्षत्वे वाक्यार्थेन सहाऽऽनन्त्यव्यभिचाराभ्यां वाक्यसंकेतग्रहासंभव इत्यकामेनापि पदानां स्वार्थे संकेतोऽभ्युपगन्तव्यः। तस्मात्

(१) 'सर्व एव पदार्थो व्याप्यते' इति ख०।

(क) 'तदर्थं' इत्यंशः ज-ग-ल-पुस्तकेषु सूत्रांशत्वेन गृहीतः। (ख) 'यतः' इत्यत्र 'ततः' इति युक्तम्। तस्या वर्णमालाया इति तदर्थः।

(सू०)—व्यक्त्याकृतिजातिसन्निधावुपचारात् संशयः ॥ ५६ ॥

न्यायभाष्यम्

अविनाभाववृत्तिः(१)सन्निधिः। अविनाभावेन वर्तमानासु व्यक्त्याकृतिजातिषु गौरिति प्रयुज्यते, तत्र न ज्ञायते किमन्यतमः पदार्थः(२)उतैतत् सर्वमिति ॥ ५६ ॥

न्यायवार्त्तिकम्

विशेषश्रुत्या विशेषो गम्यत इति। कथं पुनरियं विशेषश्रुतिस्तिष्ठति गच्छतीति? नैवेयं (३) केवला विशेषश्रुतिः किं तु पूर्वपदापेक्षया विशेषप्रत्ययहेतुत्वाद्विशेषश्रुतिरित्युच्यते। भवतु वा पदादेवोभयम्—एतस्मादेव वा गोशब्दादुभयं गम्यते क्रिया च तत्साधनं च प्रधानोपसर्जनभावस्यानियमेन यदाऽयं गोशब्दो गोत्वनिमित्तो गोत्वयोगाद् गौरिति तदा गोशब्दात् प्रधानं साधनं गौर्गम्यते क्रिया त्वङ्गभूता विशेषकत्वात्; यदा पुनः क्रियाप्रधानं पदं तदा गोर्भावो गोत्वमिति (क)तदा गौरङ्गभूता विशेषकत्वाद् गम्यते प्रधानं गोत्वमिति। तदेवं प्रधानोपसर्जनभावस्यानियमेन गोत्वमिति च पदे गौरिति चोभयं गम्यत इति ॥ ९८ ॥

तत्र प्रधानोपसर्जनभावमाश्रित्य तदर्थे—

व्यक्त्याकृतिजातिसन्निधावुपचारात् संशयः। अविनाभाववृत्तिश्च सन्निधिः। यस्मादयं

न्यायवार्त्तिकतात्पर्यटीका

पदानां सामान्यमर्थस्तत्प्रतिपादनावान्तरव्यापाराणां च यथा वाक्यार्थप्रतिपादकत्वं तथाऽस्माभिस्तत्त्वबिन्दौ निपुणतरमुपपादितम्। सेयं पदात् सामान्यप्रतीतिर्गौरिति वा अश्व इति वा सर्वगवीषु सर्वाश्वेषु वोपसर्पन्ती शुक्ल इति कृष्ण इति वा विशेषश्रुत्या नियम्यत इत्यर्थः। पृच्छति—कथं पुनरियमिति। तिष्ठति गच्छतीत्यादयोऽपि न पदत्वेन विशेषे वर्त्तितुमर्हन्ति संबन्धग्रहणासंभवात्। तस्मादेतेऽपि सामान्यवचना इति भावः। उत्तरम्—नैवेयमिति। तदेवं पदस्य सामान्यवाचकत्वनिश्चयादाकृतिव्यक्त्योश्च पदात् प्रतीतेर्वादिनां विप्रतिपत्तेर्भवति संशयः किं त्रितयमर्थ आहो अन्यतम इति। एवं तावत्सामान्यावगमाद्वाचकत्वं निश्चित्य चिन्तान्तरावतारो दर्शितः। संप्रति द्वितयावगमात् पदस्य वाचकत्वशङ्कैव नास्ति तस्माद् युक्तश्चिन्तान्तरावतार इत्याह—भवतु वेति। प्रतीतिसिद्धमनुजानाति—क्रिया च। तत्साधनं चेति, भविता गौरित्यर्थः ॥ ९८ ॥

व्यक्त्या—यः (सू० ५६) ॥ किमन्यतमः पदार्थ उतैतत्सर्वमिति भाष्यम्।

वृत्तिः

अथवा 'विभक्तिः' वृत्तिः 'अन्तः' सम्बन्धः तेन वृत्तिमत्त्वं पदत्वमिति। इत्थं च पदं निरूप्य तदर्थनिरूपणं सङ्गच्छते।

---

(१) 'सन्निधिरिति' ल०। (२) 'उत सर्वं इति' ल-ग ज-भा०। (३) 'केवलात्' इति ख०।

(क) इदं 'तदा'पदमधिकं मुद्रितमिति सम्भाव्यते।

न्यायभाष्यम्

शब्दस्य प्रयोगसामर्थ्यात् (१)पदार्थावधारणम्। तस्मात्—

(सू०)—याशब्द-समूह-त्याग-परिग्रह-सङ्ख्या(२)वृद्ध्यपचय-वर्ण-समासानुबन्धानां व्यक्तावुपचाराद् व्यक्तिः ॥ ६० ॥

व्यक्तिः पदार्थः। कस्मात्? याशब्दप्रभृतीनां व्यक्तावुपचारात्। उपचारः प्रयोगः। या गौस्तिष्ठति या गौर्निषण्णेति, नेदं वाक्यं जातेरभिधायकमभेदात्, (३)भेदात्तु

न्यायवार्त्तिकम्

योशब्दो व्यक्त्याकृतिजातिष्वविनाभावेन (४)वर्त्तमानासु प्रयुज्यते; अतो न ज्ञायते किं व्यक्तिः पदार्थ उताऽऽकृतिरुत जातिरिति ॥ ५९ ॥

याशब्दसमूहत्यागपरिग्रहसंख्यावृद्ध्युपचयवर्णसमासानुबन्धानां व्यक्तावुपचाराद्व्यक्तिः।

शब्दस्य प्रयोगसामर्थ्यात् पदार्थावधारणमिति प्रयोगप्रदर्शनार्थं याशब्दादिसूत्रम्। नामी याशब्दादयः(५) जातौ प्रयुज्यन्ते। कस्मात्? अभेदात्—एका जातिस्तस्या विशेषणमनर्थकम्, या गौस्तिष्ठतीति या गौर्निषण्णेति। एवं शेषेषु। आकृतेरप्यभिधायकमेतन्न भवति निष्क्रियत्वाद्

न्यायवार्त्तिकतात्पर्यटीका

तत्रान्यतमार्थमाह वार्त्तिककारः—किं व्यक्तिरिति ॥ ५९ ॥

याश—क्तिः (सू० ६०)॥ अत्र याशब्दादिप्रयोगसामर्थ्याद्व्यक्तिरेव पदार्थ इत्येके मन्यन्ते। स्यादेतत्—व्यक्तिवदाकृतिरपि भिद्यत इत्याकृतेरप्यभिधायकं कस्मान्न भवतीत्यत आह—आकृतेरपीति।

वृत्तिः

यत्तु प्रसङ्गात् पदार्थनिरूपणमिति तन्न, पदनिरूपणस्यासङ्गतत्वापत्तेः, एकसूत्रस्य प्रकरणत्वाभावाच्च ॥ ५८ ॥

तत्र पदे निरूपिते तद्वाच्यत्वं पदार्थत्वं निरूपितम्। तत्रापि धात्वाद्यर्थस्य निर्विवादत्वाद्गवादिपदार्थं निरूपयितुमाह—(तदर्थे व्यक्त्याकृतिजातिसन्निधावुपचारात् संशयः)।

व्यक्तिर्गवादिः, जातिः गोत्वादिः, आकृतिरवयवसंस्थानविशेषः, तेषां सन्निधिः सामीप्यं मिलनम्, तत्र सति उपचाराद् ज्ञानात्। तथा च त्रयाणां युगपत् प्रत्ययात् किमेतेषां प्रत्येकं पदार्थ उत समस्त इति संशय इत्यर्थः।

इदं भाष्यमिति केचित्। वस्तुतस्तु दुर्बोधादिस्वरसात् सूत्रमेव। तदर्थ इत्यंशस्तु भाष्यकृतः पूरणमिति प्रतिभाति ॥ ५९ ॥

(१) 'पदावधारणम्'—इति ग०। (२) '-वृद्ध्यपचय'—इति ज-ग०। (३) 'भेदात्तु' ज-पु० नास्ति। (४) 'वर्त्तमानात्' ख०। (५) अतः परं ख-पुस्तके 'इति' इत्यधिकम्।

न्यायभाष्यम्

द्रव्याभिधायकम्। (१)गवां समूह इति भेदाद् द्रव्याभिधानं न जातेरभेदात्(१*)। (२,क)वैद्याय गां ददातीति द्रव्यस्य त्यागो न जातेरमूर्त्तत्वात् (ख)प्रतिक्रमानुक्रमानुपपत्तेश्च। परिग्रहः स्वत्वेनाभिसम्बन्धः, कौण्डिन्यस्य गौर्ब्राह्मणस्य गौरिति; द्रव्याभिधाने द्रव्यभेदात् सम्बन्धभेद इत्युपपन्नम्, अभिन्ना तु जातिरिति। सङ्ख्या—दश गावो विंशतिर्गाव इति भिन्नं द्रव्यं सङ्ख्यायते, न जातिरभेदादिति। वृद्धिः कारणवतो द्रव्यस्यावयवोपचयः, अवर्धत गौरिति; निरवयवा तु जातिरिति। एतेनापचयो व्याख्यातः। वर्णः—शुक्ला गौः कपिला गौरिति; द्रव्यस्य गुणयोगो न सामान्यस्य। समासः—गोहितं गोसुखमिति, द्रव्यस्य सुखादियोगो न जातेरिति। अनुबन्धः—सरूपप्रजननसन्तानो गौर्गां जनयतीति, तदुत्पत्तिधर्मत्वाद् द्रव्ये युक्तं न जातौ विपर्ययादिति। द्रव्यं व्यक्तिरिति हि नार्थान्तरम्॥ ६०॥

न्यायवार्त्तिकम्

आकृतेः। न हि निष्क्रिया गच्छति तिष्ठति भवति चेति। एवं सर्वत्र। यस्य चानेन (३)विशेषणेन तिष्ठत्यादिना योगस्तं गोशब्दोऽभिधातुमर्हतीति। कुतः? विशेषणविशेष्यभावस्यैकविषयत्वात्। यदि गोशब्दस्य तिष्ठतिशब्दस्य चैकमभिधेयं भवति ततो गोशब्देन धर्म्यन्तराणि निराक्रियन्ते तिष्ठतिशब्देन च क्रियान्तराणीति विशेषणविशेष्यभावापन्नयोस्तिष्ठतिगोशब्दयोः सामानाधिकरण्यं युज्यते अन्यथा नेति।

'द्रव्यं व्यक्तिरिति हि नार्थान्तरं' (४)तिष्ठतिशब्दसन्निहितेन गोशब्देन व्यक्तिरभिधीयत इति॥ ६०॥

न्यायवार्त्तिकतात्पर्यटीका

(ग)गोत्वं च जातिरुपाधिर्भविष्यति, तेन नातिप्रसङ्गः; न चोपाधेरभिधानम्, अनभिहितस्यापि तच्छब्देनोपहितावच्छेदकत्वदर्शनात्; यथा गार्गिकया श्लाघत इत्यत्र श्लाघोपाधिविहितो वुञ् न श्लाघामाहेति भावः॥ ६०॥

वृत्तिः

तत्र व्यक्तिशक्तिवादिनो मतमाह—(याशब्देति)

पदार्थ इति शेषः; उक्तानाम् 'उपचाराद्' व्यवहारात्, अनुबन्धः प्रजननम्, यथा

---

(१) इदं ग-ल-पुस्तकयोर्न दृश्यते। (२) 'चैद्याय'—इति ल-ग-भा०। (३) 'विशिषेण' ख०। (४) 'तिष्ठतिशब्दसहितेन' इति ख०।

(क) वैद्यायेति वेदनिष्णातायेत्यर्थः। चैद्यायेति पाठे चेदिदेशवासिने इत्यर्थो बोध्यः। (ख) प्रतिक्रमो विश्लेषः, अनुक्रमः संश्लेषः। ताविमौ संयोगविभागौ, तयोरनुपपत्तिरिति भाव इति भाष्यचन्द्रे रघूत्तमः। (ग) नन्वेवं व्यक्तिमात्रं द्रव्यापरपर्यायं गोत्वरहितं गोपदार्थं इति प्राप्तम्, तथाचाश्वादिव्यक्तावपि गोपदार्थत्वापत्तिरित्याशङ्क्याऽऽह गोत्वमिति।

न्यायभाष्यम्

अस्य प्रतिषेधः—

(सू०)—न तदनवस्थानात् ॥ ६१ ॥

न व्यक्तिः पदार्थः। कस्मात्? अनवस्थानात्। याशब्दप्रभृतिभिर्यो विशेष्यते स (१)गोशब्दार्थो या गौस्तिष्ठति या गौर्निषण्णेति, न द्रव्यमात्रमविशिष्टं जात्या विनाऽभिधीयते। किं तर्हि? जातिविशिष्टम्। तस्मान्न व्यक्तिः पदार्थः। एवं समूहादिषु द्रष्टव्यम् ॥ ६१ ॥

यदि न व्यक्तिः पदार्थः कथं तर्हि व्यक्तावुपचार इति? निमित्तादतद्भावेऽपि तदुपचारः। दृश्यते खलु—

न्यायवार्त्तिकम्

तत्प्रतिषेधार्थम्—

न तदनवस्थानात् इति सूत्रम्। नानेन गोशब्देन व्यक्तिमात्रं शुद्धमुच्यते। यद्ययं व्यक्तिमात्राभिधायकोऽभविष्यत् तेन यस्यां कस्यांचिद् व्यक्तौ प्रत्ययोऽभविष्यदिति सूत्रार्थः ॥ ६१ ॥

'यदि व्यक्तिर्न पदार्थः कथं या गौस्तिष्ठतीत्यादिप्रयोगः? निमित्तादतद्भावेऽपि तदुपचारः'। क्व पुनर्निमित्तादतद्भावेऽपि तदुपचारो दृष्ट इति तस्योपपादनार्थं सहचरणादिसूत्रम्—

न्यायवार्त्तिकतात्पर्यटीका

न त—नात् (सू० ६१) ॥ तमिमं व्यक्त्यभिधाननियमवादिनमपाकरोति—नानेनेति ॥६१॥

(क)नाप्रतीत उपाधिरुपहितावच्छेदाय प्रभवति। न च गार्गिकयेत्यत्रोपाधिर्वुञाऽभिहितोऽपि न प्रतीयते श्लाघत इति पदान्तरेण तस्याभिधानात्। यत्र तु श्लाघत इति न प्रयुज्यते न तत्र वुञो भावाभिधायिनः साधुत्वमस्ति। सेयं व्यधिकरणे(ख)ऽनुपाधौ गतिः। समानाधिकरणे तु

वृत्तिः

गौर्गच्छतीत्यादिव्यवहारो व्यक्तावेव जात्याकृत्योरमूर्त्तत्वात्; एवं गवां समूहः, गां ददाति, गां प्रतिगृह्णाति, दश गावः, गौर्वर्धते, कृशा गौः, कपिला गौः, गोहितम्, गौः प्रसूता यादिव्यवहाराणां व्यक्तावेव सम्भवात्। समासः सम्यगासनम्, (२)सम्बन्धो वा इत्यर्थे, गौरास्ते गोर्मुखमित्युदाहरणीयम् ॥ ६० ॥

तद् दूषयति—(न तदिति)

न व्यक्तौ शक्तिर्व्यक्तिमात्रस्यानवस्थानात् अव्यवस्थानात् ॥ ६१ ॥

---

(१) 'गोशब्दस्यार्थो' इति वि०। (२) 'अनुबन्ध' इति नी-वि०।

(क) सिद्धान्तपथमभिसर्त्तुकामः 'यदि न व्यक्तिः पदार्थ' इति भाष्यं माषशब्देन पूरयितुं तव युक्तं इह नाप्रतीत इति। (ख) 'उपाधौ' इति युक्तम्।

(सू०)—सहचरण-स्थान-तादर्थ्य-वृत्त-मान-धारण-सामीप्य-योग-साधनाधिपत्येभ्यो ब्राह्मण-मञ्च-कट-राज-सक्तु-चन्दन-गङ्गा-शाटकान्न-पुरुषेष्वतद्भावेऽपि तदुपचारः ॥ ६२ ॥

न्यायभाष्यम्

अतद्भावेऽपि तदुपचार इति (१)अतच्छब्दस्य तेन शब्देन(२)अभिधानमिति। सहचरणाद्—यष्टिकां भोजयेति, यष्टिकासहचरितो ब्राह्मणोऽभिधीयत इति।

न्यायवार्त्तिकम्

सहचरणस्थानतादर्थ्यवृत्तमानधारणसामीप्ययोगसाधनाधिपत्येभ्यो ब्राह्मणमञ्च-कटराजसक्तुचन्दनगङ्गा(क)शकटान्नपुरुषेष्वतद्भावेऽपि तदुपचारः।

न्यायवार्त्तिकतात्पर्यटीका

पश्वादावुपाधौ प्रत्ययान्तशब्दवाच्यत्वमेव, यथा हतिहरिः श्वेति। अत्र हि हतिहरिरित्येतावतैव पशौ लब्धे तद्विशेषनियमार्थं श्वेति प्रयुज्यते। न च प्रयोगादेवोपाधेर्गम्यमानत्वादनभिधानं साम्प्रतम्, तदुपाध्यनभिधायिनस्तत्र प्रयोगनियमस्य पर्यनुयोज्यत्वात्; अननुयोज्यत्वे अनादेर्लोक-प्रयोगस्य सर्वेषामेव शब्दानामनभिधायकत्वप्रसङ्गः। प्रयोगनियमादेव हि तेभ्योऽप्यर्थोऽवगम्यते। अथाप्रतिपादकस्य प्रयोगनियमो नोपपद्यत इति यत्र प्रयोगस्तत्प्रतिपादकत्वमित्यभ्युपेयते

वृत्तिः

व्यक्तिमात्रस्य शक्यत्वे हि गवादिपदाद् यत्किञ्चिद्व्यक्तेरुपस्थितिः स्यादतो गोत्वविशिष्टा व्यक्तिर्वाच्या। तथा च नागृहीतविशेषणा बुद्धिर्विशेष्यमुपसंक्रामतीति न्यायात् जातावेव शक्तिरस्तु। कथं तर्हि व्यक्तिबोध इत्यग्रिमसूत्रम्—(सहचरणेति)

व्यक्तौ 'अतद्भावेऽपि' तत्पदाशक्यत्वेऽपि 'तदुपचारः' तच्छब्दव्यपदेशः, यथा सह-चरणादितो ब्राह्मणादौ यष्ट्यादिपदप्रयोगः। सहचरणात्—संयोगविशेषात् यष्टिं भोजयेत्यत्र यष्टिधरब्राह्मणे यष्टिशब्दप्रयोगः। एवम्, स्थानात्—मञ्चाः क्रोशन्तीति मञ्चस्थपुरुषे, तादर्थ्यात्—कटं करोतीति कटार्थकवीरणे, कटस्यासिद्धत्वेन कारकत्वायोगात्, (यमस्य) वृत्तात्—अनुशासनादितो राजनि यम इति, मानात्—आढकेन मिताः सक्तव आढकसक्तव इति, धारणात्—तुलया धृतं चन्दनं तुलाचन्दनमिति, सामीप्यात्—गङ्गायां गावश्चरन्तीति, (कृष्णद्रव्य)योगात्—कृष्णः शाटक इति—शकटेति पाठे कृष्णः शकट इत्युदाहरणीयम्, (प्राण)साधनात्—अन्नं प्राणा इति, आधिपत्यात्—राजैवास्य कुलमिति कुलाधिपतिः प्रतीयते। तथा च यथा गङ्गादिपदाद् गङ्गातीरत्वादिना बोधस्तथा गोपदादितो गोत्वविशिष्टस्य व्यक्तेर्लक्षणया बोधः। एतेन युगपद् वृत्तिद्वयविरोधः एकपदार्थयोः

---

(१) 'एतच्छब्दस्य' इति ग-ज०। (२) 'अभिधान इति'—इति ग०।

(क) 'शकटे'ति वार्त्तिकधृतपाठः।

न्यायभाष्यम्

स्थानात्—मञ्चाः क्रोशन्तीति मञ्चस्थाः पुरुषा अभिधीयन्ते। तादर्थ्यात्—कटार्थेषु वीरणेषु (१)व्युह्यमानेषु कटं करोतीति भवति। वृत्तात्—यमो राजा कुबेरो राजेति तद्वद्वर्त्तते इति। मानात्—आढकेन मिताः सक्तवः आढकसक्तव इति। धारणात्—तुलायां धृतं चन्दनं तुलाचन्दनमिति। सामीप्यात्—गङ्गायां गावश्चरन्तीति देशोऽभिधीयते सन्निकृष्टः। योगात्—कृष्णेन रागेण युक्तः शाटकः कृष्ण इत्यभिधीयते। साधनात्--अन्नं प्राणा इति। आधिपत्यात्--अयं पुरुषः कुलम् अयं गोत्रमिति। तत्रायं सहचरणाद् योगाद्वा जातिशब्दो व्यक्तौ प्रयुज्यत इति ॥ ६२ ॥

न्यायवार्त्तिकम्

अतद्भावेऽपि तदुपचार इति अतच्छब्दस्य तच्छब्देनाभिधानमुपचारः, यथा यष्टिकाशब्देन द्रव्यविशेषोऽभिधीयत इति यष्टिकाशब्दात्तु पुनः साहचर्याद् ब्राह्मणविशेषोऽभिधीयते, यथा यष्टिकाः प्रवेशयेति। एवं सर्वत्र। किं पुनरत्रोपचारबीजं यष्टिका ब्राह्मण इति? न ह्युपचारबीजमन्तरेणोपचारो लभ्यते। ननूक्तं साहचर्यमिति। साहचर्यं नाम यष्टिकया नित्यसम्बन्धः। यष्टिकासम्बन्धाच्च यष्टिकावानिति स्यान्न यष्टिकेति। यष्टिकावानिति चायं शब्दो मुख्य एवेति। तस्मादुपचारबीजमन्यद्वक्तव्यमिति। यष्टिकायां तावदयं यष्टिकाशब्दो जातिनिमित्तः, यष्टिकात्वं जातिः सा यष्टिकायां वर्त्तते तया यष्टिकात्वयुक्तया यष्टिकया ब्राह्मणस्य योगः, साहचर्यात् संयुक्तसमवेतां जातिं ब्राह्मणेऽध्यारोप्य ब्राह्मणं यष्टिकेत्याह। एवं शेषाण्युपचारबीजानि स्वयमुत्प्रेक्षणीयानीति ॥ ६२ ॥

न्यायवार्त्तिकतात्पर्यटीका

तदुपाधावपि समानम्। तथा च स्मरति भगवान् कात्यायनः—'तदन्तवाच्यः समानशब्दोऽय'मिति। 'समानशब्दः' समानाधिकरणशब्दः, य उपाधिरसौ प्रत्ययान्तशब्दवाच्य इत्यर्थः। तस्माद् व्यक्तिनियमे अप्रतीता जातिरशक्ता। न च गोशब्दादन्यदस्याः प्रत्यायकमस्तीति साऽपि तेन प्रत्यायनीयेति सिद्धं न व्यक्तिमात्रं पदार्थ इति।

सह—रः (सू ६२)॥ कटार्थेषु वीरणेषु व्युह्यमानेष्विति भाष्यम्। कटं करोतीति निर्वर्त्यस्य कटस्य कर्मत्वमनुपपन्नं कारकाधिकारीयत्वात् कर्मसंज्ञायाः, क्रियानिमित्तस्य च कारकत्वात्, असिद्धस्य च क्रियायाः पूर्वं निमित्तभावायोगात्। तस्मात् तादर्थ्यनिमित्तादेव

वृत्तिः

परस्परानन्वयश्च प्रयुक्तः। गोत्वत्वेन रूपेण शक्तिग्रहात् तथैवोपस्थितिरतो निष्प्रकारकपदार्थोपस्थितिरपि नास्तीति मन्तव्यम् ॥ ६२ ॥

---

(१) 'व्यूह्यमानेषु' इति ल-ग०।

न्यायभाष्यम्

यदि गौरित्यस्य पदस्य न व्यक्तिरर्थः, अस्तु तर्हि—

(सू०)—आकृतिस्तदपेक्षत्वात् सत्त्वव्यवस्थानसिद्धेः ॥ ६३ ॥

आकृतिः पदार्थः। कस्मात्? तदपेक्षत्वात् सत्त्वव्यवस्थानसिद्धेः। सत्त्वावयवानां तदवयवानां च नियतो व्यूह आकृतिः, तस्यां गृह्यमाणायां सत्त्वव्यवस्थानं सिध्यति अयं गौरयमश्व इति, नागृह्यमाणायाम्। यस्य ग्रहणात् सत्त्वव्यवस्थानं सिध्यति तं शब्दोऽभिधातुमर्हति सोऽस्यार्थ इति ॥ ६३ ॥

तदुपपद्यते यस्य जात्या योगस्तदत्र जातिविशिष्टमभिधीयते गौरिति। न

न्यायवार्त्तिकम्

यदि तर्हि गौरिति पदस्य न व्यक्तिरर्थः, अस्तु तर्हि—

आकृतिस्तदपेक्षत्वात् सत्त्वव्यवस्थानसिद्धेः। आकृतिः पदार्थः। कस्मात्? तदपेक्षत्वात् सत्त्वव्यवस्थानस्य। गौरश्वः पुरुष इत्येवमादि सत्त्वव्यवस्थानमाकृत्यपेक्षं सिध्यति। यदपेक्षा च सत्त्वव्यवस्थानसिद्धिः स गोशब्दस्य विषय इति। अत्रापि तदेवोपस्थितं न तदनवस्थानादिति। यस्य च जात्या योगः स गोशब्दस्य विषयो नाऽऽकृतिर्जात्ययोगात्। कस्य पुनर्जात्या

न्यायवार्त्तिकतात्पर्यटीका

कटशब्दः कटार्थेषु वीरणेषु व्युह्यमानेषु वर्तते। वीरणानां च वा रच्यमानानामस्ति कटक्रियापूर्वभावित्वेन निमित्तभाव इति ॥ ६२ ॥

यदि न जात्या विना व्यक्तिनियम इति जातिरभिधेया हन्त भोः साऽप्याकृत्या नियन्तव्येत्याकृतिरेवाभिधीयतामित्याह—यदि तर्हीति।

आकृ—द्धेः (सू० ६३) ॥

एतदपि दूषयति—अत्रापि तदेवोपस्थितं न तदनवस्थानादिति। संस्थानेनापि व्यज्यमाना जातिरेकार्थसमवायाद् व्यज्यते च व्यवस्थाप्यते च। सा तु व्यक्तिसंस्थानाभ्यां व्यावर्तमानाभ्यामनुवर्तमानाऽभिन्नबुद्ध्याऽवसीयते, तादृशी च व्यक्तिसंस्थानाभिधानानपेक्षेणापि पदेन शक्या

वृत्तिः

आकृतिरेव शक्येति मतमुपन्यस्यति—(आकृतिरिति)

आकृतिः पदार्थः। कुतः? सत्त्वस्य प्राणिनो गवादेः 'व्यवस्थानसिद्धेः' व्यवस्थितत्वसिद्धेः तदपेक्षत्वात् आकृत्यपेक्षत्वात्। अयमश्वो गौरयमित्यादिव्यवहारस्याऽऽकृत्यपेक्षत्वादाकृतिरेव शक्येत्यर्थः ॥ ६३ ॥

न्यायभाष्यम्

चावयवव्यूहस्य जात्या योगः। कस्य तर्हि? नियतावयवव्यूहस्य द्रव्यस्य। तस्मान्नाऽऽकृतिः पदार्थः।

अस्तु तर्हि जातिः पदार्थः—

(सू०)—व्यक्त्याकृतियुक्तेऽप्यप्रसङ्गात् प्रोक्षणादीनां मृद्गवके जातिः ॥ ६४ ॥

जातिः पदार्थः। कस्मात्? व्यक्त्याकृतियुक्तेऽपि मृद्गवके प्रोक्षणादीनामप्रसङ्गादिति। गां प्रोक्षय गामानय गां देहीति नैतानि मृद्गवके प्रयुज्यन्ते। कस्मात्? जाते-

न्यायवार्त्तिकम्

योगः? नियतावयवव्यूहस्यावयविनः—नियतोऽवयवव्यूहो यस्य भवति स नियतावयवव्यूहः; अन्यपदार्थेन बहुव्रीहिणाऽवयव्यभिधीयत इति ॥ ६३ ॥

अस्तु तर्हि जातिः पदार्थः—

(१) व्यक्त्याकृतियुक्तेऽप्यप्रसङ्गात् प्रोक्षणादीनां मृद्गवके जातिः। यस्मान्मृद्गवके व्यक्त्याकृती स्तः न च तत्र प्रोक्षणादीनि प्रयुज्यन्ते, न हि गामानय गां देहीति मृद्गवके

न्यायवार्त्तिकतात्पर्यटीका

बोधयितुम्, संस्थानं तु व्यक्तिवद् भिन्नम् आनन्त्यव्यभिचाराभ्यामशक्यसंकेतग्रहणं (२)जात्यभिधामनपेक्ष्य न शक्यं पदेन बोधयितुमिति न संस्थानापरनामाऽऽकृतिः पदार्थ इत्यर्थः। नापि जातिद्वारेण व्यक्तिवदाकृतिः पदार्थो जात्या सहासंबन्धादित्याह—कस्य च जात्या योग इति ॥ ६३ ॥

अस्तु तर्हि जातिरेव पदार्थः, तत्र हि सुकरः संकेतग्रहः व्यभिचाराभावाद् (३)व्यक्त्याकृत्योस्तु व्यभिचार इति(३*) जात्यभिधायिनो व्यक्तावाकृतौ चौपचारिकः प्रयोगो भविष्यतीत्यभिप्रायेणाऽऽह—अस्तु तर्हीति। शेषमस्यातिरोहितार्थम्।

व्यक्त्या—तिः (सू० ६४) ॥

वृत्तिः

फलतस्तद् दूषयति—(व्यक्त्येति)

मृद्गवके व्यक्त्याकृतियुक्तेऽपि प्रोक्षणादीनामप्रसङ्गाद् अप्रसज्जनाज्जातिः पदार्थः; इतरथा मृद्गवकस्यापि व्यक्तित्वाद् गवाकृतिमत्त्वाच्च(४)वैधं प्रोक्षणादिकं स्यादिति भावः ॥ ६४ ॥

---

(१) 'व्यक्त्याकृतियुक्तेष्वप्रसङ्गात्' इति क-ख-पुस्तकयोर्मुद्रितम्।

(२) 'जात्यभिधानमपेक्ष्य' इति ख०।

(३) क-ख-तात्पर्यपुस्तकयोः 'इति व्यक्त्याकृत्योस्तु व्यभिचारः' इति मुद्रितम्।

(४) 'वैधप्रोक्षणादिप्रसङ्गादिति' इति भ०।

न्यायभाष्यम्

रभावात्। अस्ति हि तत्र व्यक्तिः अस्त्याकृतिः यदभावात् तत्रासम्प्रत्ययः स पदार्थ इति ॥ ६४ ॥

न्यायवार्त्तिकम्

प्रैषसम्प्रतिपत्ती भवतः; यदभावात् तत्रासम्प्रत्ययः स गोशब्दस्यार्थः। कस्याभावात् तत्रासम्प्रत्ययः? जातेः।

अथ मृद्गवके कस्माद् गोत्वं न जातिः? यस्मान्मृद्गवको गौर्न भवति, यश्च गौर्न भवति न तत्र गोत्वं वर्त्तते यथाऽश्व इति। अथ मृद्गवकः कस्माद् गौर्न भवतीति? अत एव गौर्न भवति यस्मान्मृद्गवक इति। न चायं युक्तः प्रश्नो मृद्गवकः कस्माद् गौर्न भवतीति। किं कारणम्? प्रतिपत्तिबाधितत्वात्—भवानन्येनमर्थं प्रतिपद्यते नायं गौरिति, प्रतिपत्त्या च प्रश्नो बाध्यत इति। अथ मृद्गवके गोशब्दः कुतः? आकृतिसामान्यात् चित्रादिवदिति। सर्वगतेति चेत्—अथ मन्यसे सर्वगता जातिः सोत्पद्यमानेन यथा गवा सम्बध्यते तथा मृद्गवकेनापीति अस्ति मृद्गवके गोत्वम्। नानभ्युपगमात्—केन सर्वगतत्वं जातेरभ्युपगम्यते, अपि तु स्वविषये सर्वत्र वर्त्तत इति सर्वगतेत्युच्यते। कः पुनर्गोत्वस्य स्वो विषयः? यत्र गोत्वं वर्त्तते। क्व पुनर्गोत्वं वर्त्तते? यत्र गोत्वनिमित्तोऽनुवृत्तप्रत्ययो भवति। क्व पुनरनुवृत्तप्रत्ययं गोत्वं करोति? यत्तस्य साधनम्। कः पुनर्नित्ये गोत्वे गोः साधनार्थः? (क)यत्तेन व्यज्यते। न हि ककुदादिमदर्थव्यतिरेकेण गोत्वस्य (१)अभिव्यक्तिरस्ति।

न हि पिण्डेभ्योऽर्थान्तरं गोत्वं पिण्डान्तरालेष्वदर्शनादिति केचित्। न, विकल्पानुपपत्तेः—पिण्डान्तरालेष्वदर्शनादिति ब्रुवाणः पिण्डान्तरालं पर्यनुयोज्यः। किमिदं पिण्डान्तरालम्? किमाकाशम् आहो अभाव उत द्रव्यान्तरम्। यद्याकाशम्, न तत्र गोत्वम्; न ह्याकाशं गौरिति। एतेनाभावो द्रव्यान्तरं च व्याख्यातम्।

विशेषप्रत्ययानामनाकस्मिकत्वाच्च—अयं च पिण्डप्रत्ययव्यतिरेकभाक् प्रत्यय उपजायमानो निमित्तान्तराद् भवति, दृष्टा खलु पिण्डप्रत्ययव्यतिरेकभाजां प्रत्ययानां निमित्तान्तरादुत्पत्तिः, यथा वस्त्रचर्मकम्बलेषु नीलप्रत्यय इति। आकृतिसामान्यादिति चेत्—अथ मन्यसे सत्यमयमस्तु, पिण्डव्यतिरेकनिमित्तादनुवृत्तिप्रत्ययो भवति न पुनरस्य जातिर्निमित्तम्, अपि तु यच्छिरःपाणिपादाकृतिसामान्यं तस्मादनुवृत्तिप्रत्यय इति। न, पिण्डवदसाधारणत्वादाकृतेः—यथैव पिण्डाः पिण्डान्तरवृत्तयो न भवन्ति तथा आकृतिरपि एकपिण्डवर्त्तित्वात् पिण्डान्तरवर्त्तिनी न भवति। (ख)आकृतेः पिण्डान्तरवर्त्तित्वमभ्युपगम्यते, नास्मि विवादो नार्थ इति। अथ पिण्डव्यतिरिक्तं

(१) 'व्यक्तिरस्ति' इति ख०।

(क) 'येन तद्व्यज्यते' इति समीचीनतया प्रतिभाति।

(ख) अत्र पक्षान्तरसूचकोऽथशब्द ऊहनीयः।

न्यायवार्त्तिकम्

सामान्यं नाभ्युपगम्यते, तथाऽप्येकसामान्यनिराकरणात् समानप्रत्ययबीजमन्यद्वक्तव्यं स्यात्। न ह्यसति सामान्ये समानप्रत्ययं पश्याम इति। असत्यपि सामान्ये दृष्टः सामान्यप्रत्यय इति चेत्—अथ मन्यसे यथा सामान्येष्वसति सामान्यान्तरेऽनुवृत्तप्रत्ययो दृष्टः, गोत्वादिषु इदं सामान्यमिदं सामान्यमिति; तस्मादनैकान्तिकत्वादनुवृत्तिप्रत्ययोऽसाधनम् (१)अर्थान्तरप्रतिपादन इति? नानभ्युपगमात्—न मया गोत्वघटत्वाश्वत्वेषु निर्निमित्तः (२)सामान्यप्रत्ययोऽभ्युपगम्यते, तस्मादनुत्तरमेतत्। सूत्रव्याघात इति चेत्—यदि मन्यसे सामान्येष्वपि सामान्यमस्तीति ननु सूत्रव्याघातः "सामान्यविशेषेषु सामान्यविशेषाभावात् तत एव ज्ञानम्"(क) इति? न, सूत्रार्थापरिज्ञानात्—अयं सूत्रार्थो यथा द्रव्यमिति प्रत्ययो द्रव्यत्वविशेषणो द्रव्ये भवति न पुनः सामान्यविशेषेष्वेवमिति। न पुनरयं सूत्रार्थो निर्निमित्तोऽनुवृत्तिप्रत्यय इति। किंनिमित्तमिति चेत्—अथ मन्यसे गोत्वादिष्वनुवृत्तिप्रत्ययस्य किं निमित्तम्? यतः सामान्यमिति भवति। कुतः सामान्यमिति भवति? अनेकार्थसमवायात्—यथा गोत्वमनेकार्थसमवायि तथाऽश्वत्वादीत्यनेकार्थैस्तत्समवायस्य समानत्वाद् गोत्वादिष्वनुवृत्तिप्रत्यय इति। पाचकादिशब्दवदिति चेत्—अथ मन्यसे यथा पाचकादिशब्दा अनुवृत्तप्रत्ययाश्च भवन्ति, न च पाचकत्वं नाम सामान्यविशेषोऽस्ति तथा गवादिष्वनुवृत्तप्रत्यया इति? न, हेत्वर्थापरिज्ञानात्—विशेषप्रत्ययानामनाकस्मिकत्वादित्यस्य हेतोः पिण्डप्रत्ययव्यतिरिक्तस्य प्रत्ययस्य निमित्तान्तरादुत्पाद इत्ययमर्थः न पुनः सर्वोऽनुवृत्तिप्रत्ययः सामान्यादेव भवतीति। एवं सति पचनक्रियायां यत् प्रधानं साधनं तत्पाचकशब्देनोच्यते। तच्च प्राधान्यं पाचकान्तरेऽप्यस्तीति न दोषः।

यद्यनेकानुवृत्ति गोत्वं तत् किं प्रतिपिण्डं परिसमाप्त्या वर्त्तते अथैकदेशेनेति। किं चातः? यदि प्रतिपिण्डं परिसमाप्त्या वर्तते, पिण्डवदसाधारणत्वान्न सामान्यं भवितुमर्हति। अथैकदेशेन वर्तते, तथाऽपि नैकमनेकत्र वर्तते किन्त्वनेकमनेकत्रेति; तस्मात् प्रदेशाः सामान्यस्य वर्तन्त इति ये ते एकदेशाः सामान्यस्य पिण्डेषु प्रत्येकं वर्तन्ते ते किं सामान्यात्मका उत नेति। यदि सामान्यात्मका एकमेकत्र वर्तत इति प्राप्तम्, (ख)न चैकमनेकत्र वर्तमानं सामान्यमिति युक्तं वक्तुम्। अथासामान्यात्मकाः, शून्यमभिधानं सामान्यस्यैकदेशाः प्रत्येकं वर्तन्ते इति। तैरपि देशैः सामान्यं पूर्ववद्वर्तत इति पूर्ववत्प्रसङ्गः। न चान्या गतिरस्ति। तस्मान्नानेकवृत्ति सामान्यमिति। न, विकल्पानभ्युपगमात्—नायं विकल्पोऽस्ति गोत्वं प्रत्येकं पिण्डेषु (३)परिसमाप्य वर्तते अथ प्रदेशेन वर्तत इति, तस्माद्विकल्पानभ्युपगमादप्रश्नोऽयम्। कस्मात्?

---

(१) 'अर्थान्तरनिमित्तप्रतिपादने' इति ख-पुस्तकपाठः, क-पुस्तके तु 'अर्थान्तर (निमित्त) प्रति'—इत्येवं मुद्रितम्। (२) 'समानप्रत्ययः' इति क-ख-वार्त्तिकधृत-पाठान्तरम्। (३) क-पुस्तके 'परिसमाप्य(वर्त)ते' इत्येवं मुद्रितम्।

(क) "सामान्यविशेषेषु सामान्यविशेषाभावात् तदेव ज्ञानम्" इति वैशेषिकसूत्रम्—अ० ८, आ० १, सू० ५ (काशी-"चन्द्रप्रभाप्रेस" संस्करणम्)। (ख) 'न चैकमेकत्र' इति युक्तः पाठः।

न्यायवार्त्तिकम्

गोत्वस्यावयविसमुदायत्वानभ्युपगमात्—न गोत्वमवयवि न समुदायः, समुदायस्य भाग एकदेशशब्दः अवयविनश्चावयवे ; यदा न किञ्चित्परिहायाशेषमभिधीयते तदाऽवयविनोऽवयवानपेक्ष्य कृत्स्नशब्दः समुदाये च समुदायिनोऽपेक्ष्य । न च गोत्वमवयवी न समुदायः, तस्मान्न कृत्स्नैकदेशशब्दौ स्तः । न चेत् तत्रैतौ शब्दौ स्तः (क)तस्माद् गोत्वं किं कार्त्स्न्येन वर्तते उतैकदेशेनेति न युक्तः प्रश्नः । उक्तं (ख)चात्र एकमनेकत्र वर्तत इति प्रतिजानानो नानुयोक्तव्यः । कस्मात् ? उभयेन व्याघातादिति । कथं तर्हि गोत्वं गोषु वर्तते । आश्रयाश्रयिभावेन । कः पुनराश्रयाश्रयिभावः ? समवायः ; तत्र वृत्तिमत् गोत्वम्, वृत्तिः समवायः (ग)इतीहप्रत्ययहेतुत्वादित्युक्तम् । (१)गव्यगवि वृत्त्यभावादिति चेत्—अथ मन्यसे यदिदं गोत्वं गोष्वनुवृत्तिप्रत्ययकारणं तत् किं गवि वर्तते आहोस्विदगवि ; यदि तावद्गवि, प्राक् गोत्वयोगाद्गौरेवासाविति व्यर्थं गोत्वम् ; अथागवि, (घ) न ; अश्वाद्यपि गोत्वयोगाद्गौः प्राप्नोति । न चान्या गतिरस्ति । तस्मान्न गोत्वादनुवृत्तिप्रत्यय इति ? न, विकल्पानभ्युपगमात्—न गवि गोत्वम् नागवि, प्राग् गोत्वात् नासौ गौः नाप्यगौरिति । किं कारणम् ? उभावेतौ विशेष्यप्रत्ययौ न विशेषणसम्बन्धमन्तरेण भवतः । न च प्राग् गोत्वयोगाद्वस्तु विद्यते । न चाविद्यमानं गौरित्यगौरिति च शक्यं व्यपदेष्टुम् । यदैव वस्तु तदैव गोत्वेनाभिसम्बध्यत इत्यनास्पदो विकल्पः । एतेन सत्तासम्बन्धस्य सदसद्विकल्पो व्याख्यातः । न सतः सत्तासम्बन्धः नासतः । यदैव तद्वस्तु तदैव सत्तया सम्बद्धमिति सदसदाश्रयो दोषोऽनुपपन्न इति । तस्मादुपपन्ना जातिः, न चासौ मृद्भवक इति यदभावात् तत्रासम्प्रत्ययः स पदार्थ इति ॥ ६४ ॥

न्यायवार्त्तिकतात्पर्यटीका

एकमनेकत्र वर्त्तत इति प्रतिजानानो नानुयोक्तव्यः । उभयेन व्याघातादिति । यद्येकमनेकत्र वर्तमानं प्रतिव्यक्ति सर्वात्मना वर्तत इति (ङ) किं तु अनेकमनेकत्र वर्तत इति प्राप्तम्, एवं चानुयोगाधिकरणव्याघातः । अथैकमनेकत्र वर्तमानं प्रतिव्यक्त्येकदेशेन वर्त्तते तथाऽपि नैकमनेकत्र वर्तते किं त्वनेकमनेकत्रेति एकदेशानामनेकत्वादिति । सोऽयमुभयेन व्याघातः उक्तोऽवयविवादे ॥ ६४ ॥

---

(१) 'न गोत्वं गव्यगवि' इति ख-पु० । क-पुस्तके (न गोत्वं) इति मुद्रितम् ।

(क) तस्मादिति तदेत्यर्थः । (ख) उक्तमिदं ४७३ अङ्कितपत्रे । (ग) क-ख-पुस्तकयोः 'इतीहप्रत्ययः' इत्यत्र 'इति' पदमधिकं मुद्रितम् । (घ) अत्र 'न अश्वाद्यपि' इति ख-वार्त्तिकपाठो गृहीतः । अगवि गोत्वमिति पक्षं निराकरोति नेति । तत्र हेतुमाह अश्वाद्यपीति । प्राग् गोत्वयोगाद् गवादेरिव अश्वादेरपि गवान्यत्वाविशेषादिति भावः । क-वार्त्तिके '(न) अश्वाद्यपि' इति मुद्रितम् । नञ्शून्यपाठे अगवि गोत्वमिति पक्षे अतिप्रसङ्गमाह अश्वाद्यपीति । (ङ) 'किं त्वि'तिदर्शनेन 'तथाऽपि नैकमनेकत्र वर्त्तते' इति वार्त्तिकसमानार्थकः पूर्वग्रन्थोऽत्र प्रमादात् स्खलित इति सम्भाव्यते ।

(सू०)—नाऽऽकृतिव्यक्त्यपेक्षत्वाज्जात्यभिव्यक्तेः ॥ ६५ ॥

न्यायभाष्यम्

जातेरभिव्यक्तिराकृतिव्यक्ती अपेक्षते, नागृह्यमाणायामाकृतौ व्यक्तौ(१)च जातिमात्रं शुद्धं गृह्यते ; तस्मान्न जातिः पदार्थ इति ॥ ६५ ॥

न वै पदार्थेन न भवितुं शक्यम्, कः खल्विदानीं पदार्थ इति ?

(सू०)—व्यक्त्याकृतिजातयस्तु पदार्थः ॥ ६६ ॥

न्यायवार्त्तिकम्

नाऽऽकृतिव्यक्त्यपेक्षत्वाज्जात्यभिव्यक्तेः । 'जातेरभिव्यक्तिराकृतिव्यक्ती अपेक्षते ।' व्यक्त्याकृती इति प्राप्ते प्राधान्यादाकृतेः पूर्वनिपातः । किं पुनः प्राधान्यम् ? आकृतिविशेषणत्वं व्यक्तेः—यस्माद् व्यक्त्या विशेष्यमाणा आकृतिर्जातेर्लिङ्गं भवति तस्मात् प्रधानमाकृतिः । न चागृह्यमाणायामाकृतौ व्यक्तौ च जातिमात्रं शुद्धं शब्दाद् गम्यते, तस्मान्न जातिरेव पदार्थः ॥६५॥

न्यायवार्त्तिकतात्पर्यटीका

नाकृ—क्तेः (सू० ६५) (क) ।

तदेवमन्यतमाभिधाननियमं निराकृत्यानियमाभिधानं सिद्धान्तमाह—

व्यक्त्या—र्थः (सू० ६६) ॥ इदमत्राऽऽकूतम् । गोशब्दोच्चारणानन्तरं विदितसंगतेरेकपदे

वृत्तिः

केवलव्यक्त्याकृतिशक्तिपक्षं निराकृत्य केवलजातिशक्तिपक्षं निराकरोति—(नाऽऽकृतीति)

जातिमात्रं पदार्थः, 'जात्यभिव्यक्तेः' जातिशाब्दबोधस्य 'आकृतिव्यक्त्यपेक्षत्वाद्' आकृतिव्यक्तिविषयकत्वनियमात्, तयोरपि वाच्यत्वमावश्यकम् ; शक्तिं विना(२)तद्भानासम्भवात् । न च गोत्वप्रकारकताद‍ृशाकृतिविशिष्टशाब्दत्वस्य कार्यतावच्छेदकत्वात् तद्भानमिति वाच्यम्, तथा सति गवादिपदस्य घटत्वादावपि शक्तिप्रसङ्गः । तस्मात् पदं स्ववाच्यमेवोपस्थापयति ॥ ६५ ॥

इत्थं च त्रयाणामपि वाच्यत्वं सिद्धमित्याह—(व्यक्त्येति)

तुशब्द एकैकमात्रपदार्थत्वव्यवच्छेदाय । पदार्थ इत्येकवचनं तु तिसृष्वप्येकैव शक्तिरिति सूचनाय । विभिन्नशक्तौ कदाचित् कस्यचिदुपस्थितिः स्यात् । शक्तेस्तुल्य-

---

(१) 'च' इति ल-ग-ज-पुस्तकेषु नास्ति । (२) 'तज्ज्ञाना—' इति भ० ।

(क) ६५-म-सूत्रस्य तात्पर्यटीका नोपलभ्यते ।

न्यायभाष्यम्

तुशब्दो विशेषणार्थः। किं विशिष्यते? प्रधानाङ्गभावस्यानियमेन पदार्थत्वमिति। यदा हि भेदविवक्षा विशेषगतिश्च तदा व्यक्तिः प्रधानमङ्गं तु जात्याकृती। यदा तु भेदोऽविवक्षितः (१)सामान्यगतिश्च, तदा जातिः प्रधानमङ्गं तु व्यक्त्याकृती(२)। तदेतद् बहुलं प्रयोगेषु। आकृतेस्तु प्रधानभाव उत्प्रेक्षितव्यः॥ ६६॥

न्यायवार्त्तिकम्

न च वै (३)पदार्थेन न शक्यं भवितुम्। कस्तर्हि पदार्थः?

व्यक्त्याकृतिजातयस्तु पदार्थः। तुशब्दो विशेषणार्थः। किं विशिष्यते? प्रधानोपसर्जनभावस्यानियमेन पदार्थत्वम्। यदा भेदविवक्षा विशेषगतिश्च गौस्तिष्ठति गौर्निषण्णेति तदा व्यक्तिः पदार्थः, अङ्गं जात्याकृती; जातावाकृतौ च स्थानगमनादीनामभावाद् यत्र सम्भवः स पदार्थ इति। यदा पुनर्भेदो न विवक्षितः सामान्यावगतिश्च तदा जातिः पदार्थः, यथा गौर्न पदा स्प्रष्टव्येति। 'आकृतेश्च प्रधानभाव उत्प्रेक्षितव्य' इति, स्वयमुत्प्रेक्ष्य(४)इत्यर्थः। क्व पुनराकृतेः प्राधान्यं दृष्टम्? यथा पिष्टकमय्यो गावः क्रियन्तामिति। तदेतद् बहुलं प्रयोगेषु प्रधानोपसर्जनभावः स्वय(५)मुत्प्रेक्ष्य इति।

न्यायवार्त्तिकतात्पर्यटीका

व्यक्त्याकृतिजातिनिर्भासः प्रत्यय उदयमासादयति; न पुनर्यथा गङ्गायां घोषः प्रतिवसतीत्यत्र गौर्वाहीक इत्यत्र वा गङ्गात्वगोत्वावगमोत्तरकालं वाक्यार्थं तत्संबन्धानुपपत्तेस्तदविनाभावेन वा लक्ष्यमाणगुणयोगेन वा तीरं (क)वाहीको वाऽवगम्यते तथेहावगतिः। प्रयोगप्राचुर्यादत्यन्ताभ्यासेनातिशीघ्रतया सन्नपि प्रत्ययक्रमो न लक्ष्यते (ख)शीघ्रतरबाणहेतुकशतपत्रशतव्यतिभेदवदिति चेत्—न, असति बाधके बलवति प्रत्ययाभेदप्रथायामन्यथाकरणायोगात्। तथा च सति न क्वचिदप्यभेदोऽवतिष्ठेत, तथा च भेदोऽपि न स्याद् अभेदाश्रयत्वाद्भेदस्य। अपि च न रूपिशून्या रूपावगतिः, रूपं च द्रव्यस्य जातिः, तेन रूप्यमाणत्वाद् रूपि द्रव्यम्। न च येन यद्रूप्यते तदनवगमे तदवगमः, यथा नार्थमन्तरेण बुद्धेरुपलम्भनम्। तस्माज्जात्युपलम्भो द्रव्योपलम्भैकदेशो न द्रव्योपलम्भमन्तरेण केवलः संभवति। तस्मादेकोपलम्भगोचरत्वान्न जातिजातिमतोर्लक्ष्यलक्षणभावः। स चोपलम्भः शब्दज्ञानानन्तरं जायमानः शाब्दः। न च वाच्यम् एकोपलम्भगोचरत्वेऽपि जातिव्यक्त्योर्जातिरेव वाच्या न व्यक्तिः एकवाच्यत्वेऽप्युभयोपलम्भोपपत्तावुभयवाच्यत्वकल्पनानुपपत्तेरिति, कार्यव्यङ्ग्यं हि कारणानां सामर्थ्यं कार्य एव नाकार्ये, कार्यं चानुभवः, स चैक एवेति

(१) 'सामान्यगतिस्तदा' इति ज०। (२) अत्र 'स्त्रीकृते' इत्यधिकम् ज-पु०। (३) 'यथार्थेन' इति ख०। (४) 'इत्ययमर्थः' ख०। (५) '-मुत्प्रेक्ष्यत इति' ख०।

(क) वाहीको जर्त्तिकः (महाभा० कर्ण० २०० अ०) 'जाठ' इति प्रसिद्धा जातिः।

(ख) 'शीघ्रतरबाणहेतुकशतपत्रपत्रव्यतिभेदवत्' इति तु ग्रन्थान्तरसंवादी पाठः।

न्यायवार्त्तिकम्

न व्यक्त्याकृतिजातयः पदार्थ इति केचित्। कुतः? विकल्पानुपपत्तेः। सदित्येतदेव व्यापकत्वादुपादाय चिन्त्यते—सदित्यनेन पदेन पुनर्जातिरभिधीयते पिण्डो वा सम्बन्धो वा जातिमान् वा पदार्थः। तत्र न तावज्जातिरभिधीयते भेदार्थैरभिन्नविभक्तिकत्वात्—यद्ययं जातिवाचकः सच्छब्दो भवति सद्द्रव्यमिति भेदवाचिना द्रव्यशब्देन सह सामानाधिकरण्यं न प्राप्नोति। न हि भिन्नार्थवाचकानां सामानाधिकरण्यं पश्यामः। न हि गवाश्वमिति सामानाधिकरण्यं दृष्टम्। अथ द्रव्यादिवृत्तित्वात् सत्ताया एव द्रव्यादिशब्दैः सह सामानाधिकरण्यम्, तथाऽपि पारतन्त्र्यात् सत्ताया गुणत्वम्; गुणगुण्यभिधायिनोश्च शब्दयोः सामानाधिकरण्यं न दृष्टमिति यथा शङ्खस्य शौक्ल्यमिति। एतेन सम्बन्धो व्याख्यातः। सच्छब्दः पिण्डानां वाचको भविष्यतीति न युक्तं पिण्डानामानन्त्यात्। न ह्येकस्य शब्दस्यानेकद्रव्यगुणप्रपञ्चेन सम्बन्ध आख्यातुं शक्यः। न चानाख्याते शब्दार्थसम्बन्धे शब्दादर्थप्रतिपत्तिर्युक्ता (क) स्वरूपमात्रप्रतीतेः व्यभिचाराच्च। सच्छब्दश्रवणाच्च द्रव्यगुणकर्माणीति परिप्लवमाना बुद्धिरवतिष्ठते। न च यस्मादभिधानात् परिप्लवते बुद्धिस्तदभिधानमिति युक्तं वक्तुम्। तस्मात् सच्छब्दो

न्यायवार्त्तिकतात्पर्यटीका

न सामर्थ्यभेदकल्पना; (ख)तद्द्वारेण तु कर्मण्यप्युच्यते पदमर्थं समर्थमिति; कार्यं च द्वारमेकमिति विषयभेदेऽपि सामर्थ्यमेकमेवेति। अपि च पुरुषसंकेतापेक्षवृत्तीनां पदानां न किञ्चित्सामर्थ्यं नाम प्रमाणगोचरः, यदेकमनेकं वा स्यात्। एतेन निरूढलक्षणायां शब्दस्य जात्यभिधानोपक्षीणस्य न व्यक्तिसामर्थ्यं कल्पनीयम्, अन्यत्राव्यापृतस्य तत्रार्थस्यैव सामर्थ्यमिति यदाहुस्तदपि निरस्तम्। स खल्वर्थः प्रतीतो वा व्यक्तिं गमयेद् अप्रतीतो वा? अप्रतीतस्य गमकत्वे सर्वदैव व्यक्त्यवगतिप्रसङ्गः कारणस्य नित्यत्वात्, प्रतीतस्य गमकत्वे दुरुत्तरमात्माश्रयत्वम्। न हि जातिप्रत्ययादन्यो व्यक्तिप्रत्यय इत्युक्तम्। तस्मात् साधु पारमर्षसूत्रं—व्यक्त्याकृतिजातयस्तु पदार्थ इति।

संप्रत्यन्यापोहपदार्थवादिनमुत्थापयति—न व्यक्त्याकृतिजातयस्तु पदार्थ इति केचिदिति। अथ द्रव्यादिवृत्तित्वादिति। गवाश्वस्य तु नाऽऽश्रयाश्रयिभाव इति भावः।

वृत्तिः

त्वेऽपि व्यक्तेर्विशेष्यत्वात् प्राधान्यं तथैव शक्तिग्रहात्। न चाऽऽकृत्यादिसाधारणैकशक्यतावच्छेदकाभावान्न शक्त्यैक्यमिति वाच्यम्, तथा नियमे मानाभावात्। इदं गवादिपदमभिप्रेत्य, तेन पश्वादिपदस्य जात्यवाचकत्वेऽपि न क्षतिः। जातिपदं वा धर्मपरं तथैव लक्षणस्य वक्ष्यमाणत्वात्॥ ६६॥

(क) शब्दस्वरूपमात्रप्रतीतेः कारणत्वे अर्थप्रतिपत्तिरूपकार्यस्य अन्वयव्यभिचार इत्यर्थः।

(ख) 'तद्द्वारेण' कार्यभूतानुभवद्वारेण, 'कर्मणि' अनुभवविषयभूतेऽर्थे, तमधिकृत्योच्यते इत्यर्थः।

न्यायवार्त्तिकम्

(क)भेदानां न वाचक इति। जातिमन्मात्राभिधायकोऽपि सच्छब्दो न भवति। कस्मात्? अस्वतन्त्रत्वात्। न हि सच्छब्दात्तद्भेदा घटादयो गम्यन्त इति (ख)तद्वद्घटादिभेदानाक्षेपात् सामानाधिकरण्याभावः।

अथवा अस्वतन्त्रत्वादिति सच्छब्दः प्राधान्येन सत्तायां वर्त्तते, तत्र वर्त्तमानः (१)तद्वत्युपचर्यते; यच्च यत्र वर्त्तमानमन्यत्रोपचर्यते न तत्तस्याभिधायकं मञ्चशब्दवदिति। उक्तं चात्र। किमुक्तम्? तद्वतामानन्त्यात् न सच्छब्देनाभिधानं युक्तमिति। तद्वति च न गुणसारूप्यात् प्रत्ययसंक्रान्तिः—यथा स्वामिशब्दस्य भृत्ये, न गुणोपरागात्—यथा नीलः स्फटिक इति क्रमवृत्त्यभावाद् युगपदसम्भवाच्च अयथार्थज्ञानोत्पत्तिप्रसङ्गाच्च। तस्मान्न जातिमन्मात्राभिधायकोऽपि। असाधारणविशेषणविशेष्याभिधायको भविष्यतीति न युक्तम्,

न्यायवार्त्तिकतात्पर्यटीका

जातिमन्मात्राभिधायकोऽपि सच्छब्दो न भवति। कस्मात्? अस्वतन्त्रत्वादिति। जातिमन्तो घटपटादयः, न चैते घटादिशब्दादिव निरपेक्षात् सच्छब्दात् प्रतीयन्ते किंतु सच्छब्दाद् घटादिषु बुद्धिः परिप्लवते। घटादिशब्दापेक्षस्तु सच्छब्दो घटादिनिश्चयहेतुः। तस्माद् घटादिशब्दपरतन्त्रत्वान्न तद्वतो वाचक इत्यर्थः।

अथ वेति। यद् यत्र परतन्त्रं वर्तते तत्तस्य न वाचकं यथा गङ्गागवादिशब्दास्तीरवाहीकादेः, तथा च जातिशब्दा जातिमति, तस्मान्न जातिमद्वाचकाः, ते हि जातिमपेक्ष्य जातिमति वर्तन्त इति तादृशं पारतन्त्र्यमित्यर्थः। अथ जात्यनपेक्षं कस्मान्न तद्वति वर्तत इत्यत आह—**उक्तं चात्रेति।** अस्तु तर्ह्यौपचारिक एव तद्वति प्रत्यय इत्यत आह—**तद्वति चेति।** यथा आधिपत्यलक्षणो गुणः स्वामिनो जितकाशिनि भृत्येऽप्यस्तीति तत्र स्वामिशब्दः प्रवर्तते न तथा जातिगुणयोगो व्यक्तेरित्यर्थः। अपि च अन्यशब्दोऽन्यत्र वर्तमानः प्रथमं तावदन्यधियमुत्पादयति अथान्यत्र वर्तते यथा गोशब्दो गवि बुद्धिमुत्पाद्य वाहीके वर्तते। न चेह जातिशब्दो जातौ तद्व्यतिक्रमेण प्रवृत्तः। न चौपचारिकस्य वृत्तियौगपद्यमित्याह—**क्रमवृत्त्यभावाद् युगपदसंभवाच्च।** गुणोपरागं दूषयति—**अयथार्थज्ञानोत्पत्तिप्रसङ्गाच्च।** गुणोपरागाद् यथा नीलः स्फटिक इति ज्ञानमेवं सर्वमेव शाब्दं ज्ञानं विना बाधकमयथार्थमेव स्यादित्यर्थः। एकस्वलक्षणाभिधानं दूषयति—**असाधारणेति।** अशक्यसमयत्वाच्चेत्यपि द्रष्टव्यम्।

---

(१) 'तद्वदित्युप-' इति ख०।

(क) भेदानामिति पिण्डानामित्यर्थः।

(ख) तद्वदिति जातिमदित्यर्थः।

न्यायवार्त्तिकम्

अन्यत्र (१)प्रत्ययाभावप्रसङ्गात्। न चान्या गतिरस्ति। तस्मादन्यार्थापोहकृच्छ्रुतिरिति। (२)अन्यपदार्थान्तरापोहं (३)हित्वा स्वार्थं कुर्वती श्रुतिरभिधत्त इत्युच्यत इति।

अत्रास्माभिर्व्यक्त्याकृतिजातयः पदार्थ इति प्रधानोपसर्जनभावस्यानियमेन व्यवस्थापितम्, एकान्तवादिनश्चैते दोषा इति। न चैते दोषाः। कथमिति? यत्तावत्सत्ताशब्दः सत्ताया न वाचक इति, तन्न व्याघातात्—सत्ताशब्दो न सत्तावाचक इति व्याहतमुच्यते। कथं वा तदवाचकत्वे सति सत्ताशब्द इत्यभिधीयते। भवदभिप्रायेणाभिधीयत इति चेत्—अथ मन्यसे नैव नः सिद्धान्ते सत्तादिशब्दाः सन्ति, किं तु भवद्भिः सत्ताशब्दो द्रव्यगुणकर्मशब्दा इति च परिकल्प्य व्यवहारः क्रियते, ततोऽस्माभिरपि युष्मदभिप्रायानुविधानेन सत्ताशब्दा इति वाच उच्चार्यन्त इति; न व्याघातानिवृत्तेः—सदित्येवमादीनि पदानि लोकप्रसिद्धानि केष्वर्थेषु

न्यायवार्त्तिकतात्पर्यटीका

तदेवमन्यापोहवादिनमुत्थाप्य दूषयति—अत्रास्माभिरिति। व्यक्त्याकृतिजातयस्तिस्रोऽस्माकं पदार्थः, गुणप्रधानभावस्तु क्वचिदेव कस्यचित्। जातिमद्व्यक्त्यभिधाने द्विविधमप्यस्वातन्त्र्यं न संभवति शब्दानाम्। (क) न तावद् व्यक्तिज्ञाने जनयितव्ये तदर्थं जातिज्ञानं पूर्वमपेक्षन्ते शब्दा इति संभवति द्वयोरप्येकज्ञानवेद्यत्वनियमेन पौर्वापर्यायोगात्; नापि विशेषवाचकं पदं विना जातिशब्दानां बुद्धिपरिप्लवात् तद्विनिश्चयाय विशेषशब्दापेक्षयाऽस्वातन्त्र्यम्, स्वविषये जातिशब्दाद्बुद्धेरपरिप्लवात्। जातिमद्व्यक्तिमात्रमस्य हि विषयो न चात्र बुद्धिपरिप्लवः। (ख)व्यक्तिनियमस्तु विषय इति न तत्र बुद्धिपरिप्लवो दुष्यति। दूराद्धि आरोहपरिणाहवद्-द्रव्यमात्रं गोचरः प्रत्यक्षस्य, न तु स्थाणुः पुरुषो वा; न चात्र बुद्धिपरिप्लुतिः प्रत्यक्षक्षतिं कांचनाऽऽवहति। न चास्मिन् पक्षे जातिशब्दो व्यक्त्याकृत्योः परशब्दो येनौपचारिकः स्यात्। न च सामानाधिकरण्यं न कल्पते जातिव्यक्तिपदयोरेकार्थाभिधायिनोर्वैयधिकरण्यायोगात्। तस्मात् सर्वमवदातम्। एवमनेकान्तवादे परोक्तदोषाप्रसङ्गमभिधाय दूषणवाक्यं परोक्तं दूषयन् दोषाभावमाह—(ग)न चैते दोषा इति। सत्ताशब्द इति, सत्तायाः शब्द इति वा विग्रहः सत्तारूपः शब्द इति वा? तत्र पूर्वस्मिन् कल्पे सत्ताया न वाचकः सत्ताशब्द इति व्याघातः। उत्तरस्मिन् कल्पे 'न वाचकः सत्ताया' इत्यनेन व्याघातः, सत्ताया इत्यनेन शब्देन सत्तामभिधत्से अथ च तस्य वाचको न सत्ताशब्द इति ब्रूषे ततो व्याघातः। सत्ताशब्द इति चोपलक्षणार्थं सत्ताया न वाचक इति द्रष्टव्यम्। शङ्कते—भवदभिप्रायेणेति। निराकरोति—नेति। यद्य-

(१) 'प्रत्ययाभावप्रसङ्गाच्च' इति ख०। (२) 'अन्यशब्दार्थान्तरापोहं' इति क-ख-छतं पाठान्तरम्। (३) 'हित्वार्थं' इति ख०।

(क) अस्वातन्त्र्यद्वयासम्भवमेव दर्शयति—न तावदिति। (ख) 'व्यक्तिनियमस्तु न विषय' इति पाठः सम्यक् प्रतिभाति। (ग) 'न चैते' इति वार्त्तिके विशेषः।

न्यायवार्त्तिकम्

वर्तन्त इत्युभयोर्विचारः। वयं तु ब्रूमः सत्ताशब्दः सत्तायां वर्तते त्वं पुनर्ब्रवीषि सत्ताशब्दो न सत्तायामिति। एवं ब्रुवाणो मया विरोधेन प्रत्यवस्थीयसे विरोधोद्धारं चाकृत्वा त्वन्नयो मयाऽभिधीयत इति ब्रुवाणो न व्याघातमतिवर्तसे।

यच्चेदमुच्यते त्वया (१) त्वया परिकल्पिताः सत्तादिशब्दा इति ; तदपि न, परिकल्प्यविषयानभिधानात्—परिकल्प्यस्य च विषयोऽतथाभूतस्य तथाभाविभिः सामान्ये सत्यध्यारोपिततद्धर्मणः प्रधानार्थप्रतिपत्तिः, यथा स्थाणौ पुरुष इति। यदि चामी शब्दाः परिकल्पिता भवन्ति प्रधानमेषां वाच्यम्। न हि निष्प्रधानं परिकल्प्यम्। यत्पुनरेतत् (२)भेदोऽर्थैरभिन्नविभक्तिकत्वात् इति ; तन्न, (३)समानार्थापरिज्ञानात्—न ब्रूमः सत्ताशब्देन द्रव्यशब्दस्य सामानाधिकरण्यम्, अपि तु सत्तायाः प्रधानसाधनवाचिना सच्छब्देन द्रव्यगुणकर्माण्यभिधीयन्ते,(४) गुणकर्मशब्दैरपीतरेतरविशेषणविशेष्यभावापन्नैस्तान्येव ; एवं च सति युक्तं सामानाधिकरण्यमुभयोः सद्द्रव्यशब्दयोरेकविषयत्वात्। यदा पुनरयं सत्ताशब्दः सत्ताप्रधान एवाङ्गभूतं साधनमभिधत्ते न तदा सामानाधिकरण्यम्, द्रव्यस्य सत्तेति भवति। तस्मात् सामानाधिकरण्यानुपपत्तिरदोषः। विभक्तिभेदनियमाद् गुणगुण्यभिधायिनोः सामानाधिकरण्यासिद्धिः सद्द्रव्यशब्दयोरिति (५)तदनेन प्रत्युक्तम्।

न्यायवार्त्तिकतात्पर्यटीका

स्मदभिप्रायार्थं प्रतिपद्यसे अर्थप्रतीत्यधीनोऽभ्युपगम इति अभ्युपगमं ब्रूषे (क) तत्तथा च न निषेद्धुमर्हसीति भावः।

अथ निषेद्धुं प्रत्येमि न पुनरभ्युपैमीत्याशङ्क्याऽऽह—यच्चेदमिति। दूषयति—तदपि नेति। 'अतथाभूतस्य' अपुरुषभूतस्य स्थाणोः 'तथाभाविभिः' पुरुषैः सामान्ये सति अध्यारोपितः पुरुषत्वादिर्धर्मो यस्य स तथेत्युक्तः तस्य, 'प्रधानमर्थः' पुरुषः, तदाकारा प्रतीतिरित्यर्थः। सत्तायाः प्रधानसाधनवाचिनेति। प्रधानं साधनं व्यञ्जकतया भवितृ द्रव्यं तद्वाची खलु सच्छब्दः, सत्ताशब्दस्तु द्रव्योपसर्जनभाववाची न तस्य द्रव्यवाचिना सामानाधिकरण्यमित्यर्थः। सामानाधिकरण्यासिद्धिः सद्द्रव्यशब्दयोरिति, सिद्धिः प्रतीति सा भवन्मते न स्यादिति यदुक्तं कैश्चित् तद् अपि अनेन सामानाधिकरण्यव्यवस्थापनेन प्रत्युक्तम्।

---

(१) एकं 'त्वया' पदं ख-पुस्तके नास्ति। (२) 'भेदाऽर्थैकभिन्नविभक्तिकत्वात्' इति क-वार्तिकपाठः। ख-पुस्तकपाठो गृहीतः। (३) 'सामानाधिकरण्यार्थापरिज्ञानात्' क-ख-पुस्तकधृतं पाठान्तरम्। (४) अतः परं ख-पुस्तके 'इत्यत्र' इत्यधिकं मुद्रितम्। (५) क-ख-पुस्तकयोः 'एतदनेन' इति पाठः।

(क) अत्र 'तद्' इति मुद्राप्रमादागतं सम्भाव्यते।

न्यायवार्त्तिकम्

एतेन सम्बन्धो व्याख्यातः। कथमिति? न सच्छब्देन सम्बन्धोऽभिधीयते अपि तु (क)सम्बन्धिशब्देनैव, सम्बन्धश्च गुणः न सच्छब्दो गुणशब्दः, न च गुणशब्देनैव द्रव्यवाचिनः शब्दस्य सामानाधिकरण्यमस्तीति। यत्पुनरेतत् आनन्त्यान्न जातिशब्दो भेदानां वाचक इति। कश्चैवमाह जातिशब्दो भेदानां वाचक इति? (१)स्वयम्प्रक्लृप्तां वाचोयुक्तिं भवान् प्रतिषेधति। यदि तर्हि भेदानां न वाचकः कथं सच्छब्देन द्रव्यगुणकर्माण्यभिधीयन्ते? न चायं भोः सच्छब्दो जातिशब्दः अपि तु भेदशब्द एवायम्, भेदशब्देन च भेद एवाभिधीयते इति न किञ्चिद्बाध्यते। कथं न बाध्यते? यदा सच्छब्द एको भेदानामानन्त्यं तदवस्थमेव। न चैकस्यानेकेन सम्बन्धः शक्य आख्यातुम्। न चानाख्याते सम्बन्धे शब्दार्थप्रतिपत्तिर्युक्तेति? न केवलानामनभिधानात्—यो हि सच्छब्देनाविशेषणानि द्रव्यगुणकर्माण्यभिधीयन्त इत्यभिधत्ते तं प्रत्येष दोषः। अस्माकं तु द्रव्यगुणकर्माणि सत्ताविशेषणान्यभिधीयन्ते। यत्र यत्र सत्तां पश्यति तत्र तत्र सच्छब्दं प्रयुङ्क्ते। एका च सत्ता तत्प्रत्ययस्यानुवृत्तेः। तस्माद्भेदानामानन्त्यं न दोषः। कश्चायमेवम्भूतः साध्यसाधनभावः, शब्दं पक्षयसि आनन्त्यादिति वस्तुधर्मं हेतुत्वेनाभिधत्स इति। अथ भेदा एव जातिशब्दावाच्यत्वेन पक्षीक्रियन्ते (ख) तथाऽपि नान्वयी न व्यतिरेकी च दृष्टान्तोऽस्तीत्यहेतुरानन्त्यादिति। अथाप्येकदेशान् पक्षीकृत्याऽऽनन्त्यादिति हेतुः, एकदेशो दृष्टान्त इति; अयमपि न, विरोधात्। एवं च सति न कश्चित् पदार्थो वाच्यः न कश्चिच्छब्दो वाचक इति वाच्यवाचकभावनिवृत्तौ विशेषणमनर्थकम्, एते न वाच्या एते न वाचका इति।

न्यायवार्त्तिकतात्पर्यटीका

व्याख्यातः निराकार्यत्वेन। स्वयंप्रक्लृप्तां वाचोयुक्तिमिति, जातिशब्द इति सदादिशब्देषु स्वयंप्रक्लृप्ता या वचनव्यक्तिस्तां प्रतिषेधति, तत्र चास्माकं सिद्धसाधनमित्यर्थः। सच्छब्दो जातिशब्दः तस्य भेदवाचकत्वं नास्य संमतमिति मन्वानो देशयति—यदि तर्हीति। सुगमः परिहारः। तथाऽपि नान्वयी न व्यतिरेकी चेति। ये ये अनन्ता न ते जातिशब्दवाच्या इति न दृष्टान्तः—सर्वभेदपक्षीकरणात्। नापि यो जातिशब्दवाच्यो न तत्रानन्त्यं यथा गोत्वादिकमिति शक्यं वक्तुं जातेरेव भवन्मते व्योमारविन्दायमानत्वादिति भावः। शङ्कते—अथापीति। तथा सत्यन्वयी दृष्टान्तो (ग)लक्ष्यत इति भावः। निराकरोति—अयमपि नेति, विशेषणोपादानविरोधात्। न हि भेदमन्तरेण किञ्चिदस्ति वस्तुसद् यतो विशेषणं व्यावर्त्तयेदिति भावः।

---

(१) 'क्लृप्तां स्वयम् (युक्तां) वाचोयुक्ति'मित्येवं क-वार्त्तिके मुद्रितम्। 'स्वयं प्रयुक्तां' इति ख०।

(क) 'सम्बन्धशब्द मेव' इति युक्त' सम्भाव्यते। (ख) भेदा जातिशब्दावाच्या आनन्त्यादिति प्रयोग इति बोध्यम्। (ग) 'लभ्यते' इत्येव पाठो नवेति विभाव्यम्।

न्यायवार्त्तिकम्

यत्पुनरेतद् व्यभिचारादिति ; न, व्यभिचारविषयापरिज्ञानात्—व्यभिचारी हि नाम स ज्ञेयः यः स्वविषयतज्जातीयवृत्तित्वे सत्यन्यत्र वर्तते, न पुनरयं सच्छब्दः स्वविषयव्यतिरेकेणासति वर्तते। तस्मादस्थाने व्यभिचारदेशनेति। हेतुभावानभ्युपगमाच्च—केन चात्र हेतुरभिधीयते द्रव्यं गुणः कर्म सत्त्वादिति। तस्मादयुक्तमेतदपि। भेदवाचकत्वप्रतिषेधाद् द्रव्यसच्छब्दयोः सामानाधिकरण्यमिति न वक्तव्यं व्याघातात्—न च कश्चिच्छब्दो द्रव्यवाचकः द्रव्यसच्छब्दयोश्च सामानाधिकरण्यमिति व्याहतम्।

यत्पुनरेतत् तद्वतो नास्वतन्त्रत्वादिति, न किल सच्छब्देन तद्भेदा घटादयो गम्यन्ते, तद्वद्-घटादिभेदानाक्षेपात् सामानाधिकरण्याभाव इति ? तन्न उक्तोत्तरत्वात्—उक्तोत्तरमेतत्, सद्द्रव्यशब्दयोरेकविषयत्वात् सामानाधिकरण्यमिति। तद्वद्घटादिभेदानाक्षेप(१)इति चायुक्तं सच्छब्देन सत्तासाधनानां द्रव्यगुणकर्मणामाक्षेपात्। सत्ताशब्देन द्रव्यगुणकर्माणि नाऽऽक्षिप्यन्ते न पुनः(२)शब्देन (३)शक्यं वक्तुं सत्ताशब्देनापि गुणभूतानि गम्यन्त इति। सदिति चायं (४)अभिधानशब्दः, कस्तस्याभिधेयः ? (५)यो यस्मात् प्रतीयते स तस्यार्थ इति। कोऽस्यार्थः ? विभज्यते, सत्ता तद्योगोऽर्थान्तरमिति त्रयोऽर्थाः। तत्र प्रधानोपसर्जनभावविवक्षायां प्रधानं

न्यायवार्त्तिकतात्पर्यटीका

हेतुभावानभ्युपगमादिति। न शब्दोऽर्थप्रत्यायने लिङ्गं येन व्यभिचारेण दुष्यति। न च प्रत्यायकमात्रं व्यभिचारेण दुष्यति चक्षुरादीनामपि नीलादिव्यभिचारेण पीतादौ वर्तमानतया व्यभिचारिणामप्रत्यायकत्वप्रसङ्गात्। संकेतग्रहस्तु सत्यपि भेदानां व्यभिचारे (क)चैकैक-जातिक्रोडीकृतानां सुकर एवेति भावः। भेदवाचकत्वप्रतिषेधादिति। भेदवाचकत्वे निषिद्धे द्रव्यवाचकत्वं निषिद्धं भवति द्रव्यस्य भेदत्वात्। ततश्च द्रव्यशब्द इति व्याघात इत्यर्थः।

उक्तोत्तरमेतत् (ख)सच्छब्दद्रव्यशब्दयोरेकविषयत्वादिति। विशेषमात्रं विषयः सदादि-शब्दस्य न पुनर्नियतोऽयमेव नान्य इति भावः (ग)। सत्ताशब्देन द्रव्यगुणकर्माणि नाऽऽक्षिप्यन्त इति। सामानाधिकरण्ययोग्यतयेत्यर्थः तदन्तरेण तदनुपपत्तेः। आक्षेपमात्रं तु शक्यं वक्तुमित्याह—शक्यं वक्तुमिति। पृष्ट्वा सच्छब्दस्य गुणप्रधानभावेन त्रयोऽर्था इति

(१) 'इति वा युक्तम्' इति ख०। (२) 'सच्छब्देन' इति ख०। (३) 'शक्यते' इति क-ख-पुस्तकपाठः। (४) 'सच्छब्दः' ख०। (५) 'योऽस्मात्' ख०।

(क) अत्र च-शब्दार्थश्चिन्त्यः। (ख) वार्त्तिके 'सद्द्रव्यशब्दयो'रिति विशेषः। (ग) अतः परं 'विशेषशब्देन चामी सामानाधिकरण्येन नियम्यन्ते न तु प्राप्यन्ते' इति क-ख-पुस्तकयोः अधिकपाठतया धृतम्।

न्यायवार्त्तिकम्

साधनं गम्यते, अङ्गं सत्ता च संयोगश्च। किंकृतः प्रधानाङ्गभावः? अर्थकृतः—यदा सत्ता किञ्चित् कुरुते तदा सत्ता विशेषणं पदार्थमुपादाय किञ्चित् करोति तत्प्रधानम्। अङ्गं सत्ता प्रधानप्रत्ययहेतुत्वात्। यस्मात् सत्तया पदार्थो(१)विशेष्यते अङ्गहीने प्रत्ययनिवृत्तेः यत्र तदङ्गं सत्तादिकं नास्ति न तत्र सदिति प्रत्ययः। तदेवं तद्वद्घटादिभेदानाक्षेपादित्ययुक्तम्।

यत्पुनरेतत्-सच्छब्दः सत्तायां प्राधान्येन वर्त्तत इति तत्र वर्त्तमानः (२)तद्वत्युपचर्यत इति; तन्न, सच्छब्दविषयापरिज्ञानात्—न भवता सच्छब्दस्य विषयो व्यज्ञायि। क एवमाह सच्छब्दः सत्तायां प्राधान्येन वर्त्तत इति? यथा च सच्छब्दस्य द्रव्यगुणकर्माणि सत्तासाधनभावाद्विषय इति तथा चोक्तम्।

एतेन भेदानामानन्त्यं प्रत्युक्तम्, सच्छब्दस्य विषयः सत्तासाधनम्, विषयश्च सत्तासाधनभूत एक एवेति।

यत्पुनरेतत् तद्वति च न गुणसारूप्यात् प्रत्ययसङ्क्रान्तिर्यथा स्वामिशब्दस्य भृत्य इति। अस्यार्थः स्वाम्यनुकारित्वाद् भृत्ये स्वामिशब्द इति। एतत्तु न बुध्यामहे प्रत्ययानां संक्रान्तिरिति। यदि स्वामिप्रत्ययविषयत्वम्, तन्न प्रत्ययसङ्क्रान्तिः। न हि स्वामिप्रत्ययो भृत्ये भवति, केवलं गुरुतां प्रियतां वा सम्पश्यन् स्वामिशब्दं(३)गुणभूतं तत्र प्रयुङ्क्ते। (४)यथा च भृत्यः(५)स्वाम्यर्थकारित्वाद् भृत्यः स्वामीत्युपचर्यते न पुनरेवं सत्ताशब्दः कदाचिदपि द्रव्यादिषु वर्त्तत इति। यदा तु सतां भावः सत्तेति तदा सतां विशेषकत्वाद् गुणभूतानां सत्ताशब्देनाभिधानम्, विशेषकत्वमुपचारः। एतेनैव 'गुणोपरागाद् यथा नीलः स्फटिक इति' (क)एतत् प्रत्युक्तम्।

यत्पुनरेतत् क्रमवृत्त्यभावाद् युगपदसम्भवाच्चेति। अस्यार्थः। सत्ताशब्दः सत्तायां किल वर्त्तित्वात् तद्वति वर्त्तत इति। न चैवं पश्यामः। युगपदपि न सम्भवति—सत्ताप्रत्ययश्च द्रव्यप्रत्ययश्च

न्यायवार्त्तिकतात्पर्यटीका

सूत्रकारन्यायेनावधारयति—सदिति चायमिति। अर्थकृत इति। अर्थः कार्यं तत्कृतः। एतदुक्तं भवति—यस्य कार्येण संबन्धस्तत्प्रधानं यस्य कार्यसंबन्धावच्छेदकत्वं तदङ्गमिति। एतेनेति, अर्थत्रयाभिधानेन।

न हि स्वामिप्रत्ययो भृत्ये भवति, अपि तु तदर्थक्रियाकारितया स्वामिव्यपदेशमात्र-

---

(१) 'विशिष्यते' ख०। (२) '-तद्वदुप-' ख०। (३) 'युगपद्भूतं' ख०। (४) 'तथा' क०। (५) 'स्वाम्यनुकारित्वात्' ख०।

(क) 'एतत्' इति क-ख-पुस्तकयोः नास्ति, तद्भूतपाठान्तरे वर्त्तते इति।

न्यायवार्त्तिकम्

न युगपद् भवतः। एतदपि न, उक्तोत्तरत्वात्—उक्तोत्तरमेतत्। नात्र क्रमो न युगपत्प्रत्ययः सत्प्रत्ययस्य साधनविषयत्वात्। एतेनायथार्थज्ञानोत्पत्तिप्रसङ्गादिति प्रत्युक्तम्। एवं हि (१)कुहेतुप्रताननिरासाद् व्यवस्थितं व्यक्त्याकृतिजातयः पदार्थ इति।

न जातिशब्दो भेदानां वाचक इति च विशेषणानर्थक्यम्। न हि कश्चिच्छब्दो भवता भेदानां वाचकत्वेनाभ्युपगम्यते विशेषणं नाम(२)विशेष्ये सति सामान्यप्रतिपत्तौ च भवति, नास्य किञ्चिद्विशेष्यमस्ति। न च जातिशब्दस्य कश्चित्पदार्थो वाच्योऽभ्युपगम्यते। तस्माद्वि-शेषणानर्थक्यम्। विरोधाच्च—यदि चायं जातिशब्दो भेदानां वाचकोऽभविष्यदपि तर्हि जातिशब्द एव नाभविष्यत्(३)न ह्यन्यवाचकानां तच्छब्दत्वं सम्भवति। कथं वा भेदवाचकत्वे सति जातिशब्द इत्युच्यते। यच्चोच्यते न जातिशब्दो भेदानां वाचक इति तथा तत्। को हि स्वस्थात्मा जातिशब्दवाच्यान् भेदानभ्युपैति। यदि च जातिशब्दवाच्या भेदा न भवन्ति अन्यशब्दवाच्यास्तर्हि प्राप्नुवन्ति। अथान्यशब्दवाच्या अपि न भवन्ति ते न जातिशब्द-वाच्या नान्यशब्दवाच्या इत्युभयावाच्यत्वे किमस्य विशेषणस्य सामर्थ्यं न जातिशब्दो भेदानां वाचक इति। अत एवं वक्तव्यं न वाच्या भेदा (क)अवाचकाः शब्दा इति। अथ मन्यसे परमत-व्यपेक्षयैतदुच्यते न जातिशब्दो भेदानां वाचक इति, नानभ्युपगमात्। न हि कश्चित्तान्त्रिको-ऽस्ति यो जातिशब्दवाच्यान् भेदान् प्रतिपद्यते। जातेरप्यवाचकत्वे व्याघातो जातिशब्द इति। न हि यो यस्यावाचकः स तच्छब्द इति शक्यं वक्तुम्। न जातिशब्दो भेदानां वाचक इति

न्यायवार्त्तिकतात्पर्यटीका

मित्यर्थः। नात्र क्रमो न युगपत्प्रत्यय इति, भेदाधिष्ठाने क्रमयौगपद्ये नैकस्मिन् विशिष्टद्रव्य-प्रत्यये संभवत इति। एतेनेति शब्दस्य सत्ताविशिष्टद्रव्यवाचित्वाभिधानेन अयथार्थज्ञानोत्-पत्तिप्रसङ्गादिति प्रत्युक्तम्। परमार्थस्वच्छधवले हि स्फटिके नीलीद्रव्योपधानान्नीलप्रत्ययो भवतु भ्रान्तः तस्य परमार्थतो नीलगुणासमवायात् सत्तासमवायस्तु द्रव्यादीनां पारमार्थिक इति न द्रव्यादिषु सदिति प्रत्ययस्य मिथ्यात्वमित्यर्थः।

न हि कश्चिच्छब्द इति। स्वलक्षणानामशक्यसमयतया न कश्चिदपि शब्दो भवता तद्वाच-कत्वेनाभ्युपेयत इत्यर्थः। न च जातिशब्दस्येति, जातेरभावादिति भावः। न जातिशब्दो भेदानां वाचकः कस्य तर्हीति पूर्वं भेदान् प्रधानीकृत्योक्तं संप्रति तु जातिशब्दानित्येतावता अपौनरुक्त्यम्।

---

(१) 'कु हेतुप्रधाननिरासात्' ख०। (२) 'विशेष्ये च सति' ख०। (३) 'न ह्यन्यपदार्थ-वाचकानां' ख०।

(क) 'न वाचकाः शब्दाः' इति तु शोभनम्।

न्यायवार्त्तिकम्

कस्य तर्हि वाचकः ? भेदवाचकत्वप्रतिषेधादन्यवाचकत्वमायातम्। अथान्यवाचकत्वमपि नेष्यते व्यर्थं विशेषणं जातिशब्दो भेदानां न वाचक इति। सर्व एव शब्दा अर्थानां न वाचका इति युक्तं वक्तुम्।

अथावाचकाः शब्दा अवाच्या अर्था इति अयुक्तं चैतद् व्याघातात्—अवाचकाश्च शब्दा भवन्ति अवाचकत्वं च शब्दानां शब्देनैव प्रतिपाद्यत इत्यवाचकत्वे शब्दानां प्रतिज्ञाहेत्वोर्व्याघातः। 'न हि जातिशब्दो भेदानां वाचक' इति प्रतिज्ञा, हेतुः 'आनन्त्या'दिति, उभयं च वचनात्मकमित्युभयस्य (१)अवचनात्मकत्वाद् व्याघातः। शब्दांश्चावाचकान् प्रतिपद्यमानेन लोकप्रतिपादनोपायोऽन्यो वक्तव्यः। अन्यथाऽभ्युपगत इति चेत्—अथ मन्यसे न मया शब्दा अवाचका अभ्युपगम्यन्ते नाप्यर्था अवाच्याः अपि तु यो भवद्भिर्वाच्यवाचकन्यायोऽभ्युपगम्यते सोऽस्माभिर्निराक्रियते। अस्माकं तु शब्देनान्यापोहलक्षणा जातिरभिधीयत इति ? विशिष्य वक्तव्यम्—यद्यन्यथा शब्दा अर्थानामभिधायका भवन्ति (२)विशिष्य वक्तव्यम् अस्मत्प्रक्लृप्तजात्यादिव्यतिरेकेण जात्यादिशब्दा न जात्यादीनां वाचका इति। स्वरूपानभिधानाच्च—न च समानप्रत्ययकारणताव्यतिरेकेण जातेः स्वरूपं निर्देष्टुं शक्यम्। न चानुवृत्तिप्रत्ययः प्रत्याख्यातुं शक्यः। न च विशेषप्रत्ययेनाकस्माच्छक्यं भवितुम्, यतोऽयं प्रत्ययः सा जातिरिति नास्ति विवादः। (३)एष तावद् यथाश्रुति वाक्ये दोषः। अथ जातिशब्दावाच्यत्वेन भेदा(क)अपि पक्षीक्रियन्ते, एतस्मिन्नपि प्रतिज्ञार्थे यावन्त एते वाक्यदोषास्ते सर्वे प्रसज्यन्ते। एवमेकदेशपक्षीकरणेऽपि विशेषणविशेष्यभावानुपपत्तेः पूर्वदोषानुवृत्तिः।

यदपीदमुच्यते द्रव्यसच्छब्दयोः सामानाधिकरण्यमिति ; तदपि न,व्याघातात्। द्रव्यसच्छब्दयोश्च सामानाधिकरण्यम्, न च भेदवाचकाः शब्दा इति व्याहतम्। उपचारतो न व्याघात इति

न्यायवार्त्तिकतात्पर्यटीका

नास्ति विवाद इति। अन्यापोहजात्योर्लक्षणाभेदे नास्ति विवाद इत्यर्थः।

द्रव्यसच्छब्दयोस्तु(ख) सामानाधिकरण्यं न च भेदवाचकाः शब्दा इति व्याहतमिति। द्रव्यमिति हि विधिरूपमेवं सदित्यपि विधिरूपं तच्छब्दौ तयोर्वाचकौ तयोरन्यापोहार्थत्वं व्याहतम्, विधिशब्दौ चान्यापोहार्थाविति न संभवति। न च भेदानभिधायिनोः सामानाधिकरण्यमपि युज्यते। भिन्नाभ्यां हि निमित्ताभ्यामेकस्मिन्नर्थे भेदरूपे वर्तमानौ समानाधिकरणौ भवेतां

(१) 'अवाचकत्वाद्व्याघातः इति' क-ख-पुस्तकधृतं पाठान्तरं तु शोभनम्। (२) अत्र 'इति'पदं क-पुस्तके अधिकम्। (३) 'एतावद् यथा'—ख०।

(क) 'अपि'शब्दोऽवधारणे। क-ख-पुस्तकयोः 'अपी'त्यत्र 'एव'शब्दः पाठान्तरतया धृतः। (ख) वार्त्तिके 'तु' इत्यत्र 'च' इति पठितम्।

न्यायवार्त्तिकम्

चेत्—अथ मन्यसे द्रव्यसच्छब्दावेतौ उपचारतोऽभिधीयेते। कथमिति? द्रव्यशब्देनाद्रव्यव्युदासः सच्छब्देनासद्व्युदासः। तावेतावसदद्रव्यव्युदासरूपेण प्रवर्त्तमानौ एकमर्थं (१) ब्रूत इति

न्यायवार्त्तिकतात्पर्यटीका

भेदं चेन्नाभिधत्तो नैकत्र वर्तेयाताम्। अवर्त्तमानौ च भिन्नप्रवृत्तिनिमित्तपर्यवसितौ गौरश्व इतिवत् न समानाधिकरणौ भवितुमर्हतः। सोऽयमपरो व्याघातः भेदानभिधानं च सामानाधिकरण्यं चेति। तदनेन व्याघातद्वयमुक्तम्। तदेतद्व्याघातद्वयं निराचिकीर्षुराशङ्कते—उपचारतो न व्याघात इति चेत्। तदेतद्विभजते—द्रव्यसच्छब्दाविति। तदनेन प्रथमो व्याघातः परिहृतः। द्वितीयं व्याघातं शङ्किता परिहरति—तावेताविति। ब्रूतः प्रतिपादयतोऽध्यवस्यत इति यावत्।

एतदत्राऽऽकूतम्। (क) विकल्पयोनयो हि शब्दास्तदेवाभिनिविशन्ते यद्विकल्पानां गोचरः, कार्यकारणयोः सामानाधिकरण्येन प्रतिपत्तेः। चतुष्टयी चेयं विकल्पानां(ख) सदसद्धर्मिसद्धर्मावगाहिनां (ग)जातिः गौरीश्वरो नीलं नित्यमित्येवमादीनां न च विकल्पानां गोचरः, यो (घ)विकल्पते देशकालावस्थाभेदेनैकत्वेनानुसंधीयते तदेवेदमिति (२)स एव च(२*) शब्दगोचरः, तत्र शब्दानां शक्यसंकेतत्वात्। न च स्वलक्षणानि त्रैलोक्यविलक्षणान्येवमिति न विकल्पविषयः। न च सामान्यं नाम किंचिदस्ति यद्विषयः स्यात्। अत एव न तद्वन्ति स्वलक्षणान्यपि तेषां सामान्यानामभावे तद्वत्तायाः स्वलक्षणेष्वभावात्। अपि च—अस्तु सामान्यं वस्तुसत्, तथाऽपि नित्यत्वादनुपकार्यतया स्वलक्षणाधारत्वानुपपत्तिः। आधारत्वमपि हि करणत्वमेव। पतनधर्माणो हि बदरादयः कुण्डादिभिरपतनधर्माणः क्रियन्ते। न च नित्यं क्रियत इति नाधेयम्। तथा वृक्षत्वशिंशपात्वे स्वतन्त्रे एव सामान्ये स्वशब्दाभ्यामवगमिते न गौरश्व इतिवत् सामानाधिकरण्यं भजेताम्। अपि च भवतु नित्यस्याप्युपकार्यत्वेनाऽऽधेयत्वम्, तथाऽप्येतद्विकल्पनीयम्—

(१) 'ब्रवाते' इति क-ख-वार्त्तिकपाठः। (२) 'एव च स' ख।

(क) तथाच 'विकल्पयोनयः शब्दा विकल्पाः शब्दयोनयः।
कार्यकारणता तेषां नार्थं शब्दाः स्पृशन्त्यपि'॥
इति (रत्नाकरावतारिका)।

(ख) अत्र विकल्पानां चतुष्टयत्वोपपत्तये 'सदसद्धर्मिधर्मावगाहिनां' इति 'सदसद्धर्मिसदसद्धर्मावगाहिनाम्' इति वा पाठो युक्तः सम्भाव्यते। तत्र क्रमेणोदाहरणानि—गौरिति सन् धर्मी, ईश्वर इत्यसन् धर्मी नग्नभिक्षुभिस्तैरीश्वरानभ्युपगमात्; नीलमिति सन् धर्मः, नित्यमिति च असन् धर्मः सर्ववैनाशिकानां बौद्धानां मते नित्यवस्तुनो गगनारविन्ददलीकत्वादिति ध्येयम्।

(ग) 'जातिः' इति 'न च' इत्यतः परं द्रष्टव्यम्, तेन 'न च जातिः विकल्पानां गोचरः' इति सम्यक्तया प्रतिभाति।

(घ) 'विकल्पते' इत्यत्र 'विकल्प्यते' इति पाठः समीचीनतया सम्भाव्यते।

— न्यायवार्त्तिकतात्पर्यटीका

किं येन स्वभावेन तत् स्वलक्षणं वृक्षत्वमुपकरोति तेनैव शिंशपात्वमपि, अथ स्वभावान्तरेण। अथ हि स्वभावान्तरेण, स्वभावभेदादन्यत्स्वलक्षणं शिंशपात्वाधारोऽन्यच्च वृक्षत्वाधार इति पुनरपि गौरश्व इतिवत् सामानाधिकरण्याभाव एव। अथैकेन स्वभावेन स्वलक्षणं सर्वसामान्योपकारि, तथाऽपि स्वभावाभेदे तदुपकाराधीनस्वभावानां सामान्यानां च मध्ये एकसामान्यवतः स्वलक्षणस्य एकेन शब्देन विकल्पेन वा ग्रहणे सर्वेषां तदेकोपकारनिबद्धस्वभावानां सामान्यानां ग्रहणात् सद्द्रव्य-पार्थिव-वृक्ष-शिंशपाविकल्पानां शब्दानां च पर्यायत्वप्रसङ्गः। यथाह—

एकोपकारके ग्राह्ये नोपकारास्ततोऽपरे।
दृष्टे तस्मिन्नदृष्टा ये तद्ग्रहे सकलग्रहः॥ इति।

तस्मान्न सामान्यवद्भेदगोचरा विकल्पाः। स्वलक्षणभेदगोचरत्वनिषेधेन ज्ञानग्राह्याकारगोचरत्वमप्यपास्तम्। स्वाकारमबाह्यं बाह्यमध्यवस्यन् विकल्पः स्वाकारबाह्यविषय इति चेत्? यथाह—

स्वप्रतिभासेऽनर्थेऽर्थाध्यवसायेन प्रवृत्तिरिति।

अथ कोऽयमध्यवसायः? किं ग्रहणम् आहोस्वित् करणम् उत योजना अथ समारोपः। तत्र स्वप्रतिभासमनर्थमर्थं कथं गृह्णीयात् कुर्याद्वा विकल्पः। न हि पीतं नीलं शक्यं ग्रहीतुं कर्तु वा शिल्पिशतेनापि। नाप्यगृहीतेन स्वलक्षणेन स्वाकारं योजयितुमर्हति विकल्पः। न च स्वलक्षणं विकल्पगोचर इति चोपपादितम्। न च स्वाकारमनर्थमर्थ आरोपयति। न तावदगृहीतः स्वाकारः शक्य आरोपयितुमिति तद्ग्रहणमेषितव्यम्। तत्किं गृहीत्वा आरोपयति अथ यदैव गृह्णाति तदैवाऽऽरोपयति। न तावत् पूर्वः पक्षः, न हि विकल्पज्ञानं क्षणिकं क्रमवन्तौ ग्रहणसमारोपौ कर्तुमर्हति। उत्तरस्मिंस्तु पक्षे विकल्पस्वसंवेदनप्रत्यक्षाद्विकल्पाकारादहङ्कारास्पदादनहङ्कारास्पदं समारोप्यमाणो विकल्पो नास्वगोचरो न शक्योऽभिन्नः प्रतिपत्तुम्, नापि बाह्यस्वलक्षणैकत्वेन शक्यः प्रतिपत्तुं विकल्पज्ञानेन स्वलक्षणस्य बाह्यस्याप्रतिभासनात्। तस्मादेष विकल्पविषयो न ज्ञानं न ज्ञानाकारो नापि बाह्य इत्यलीक एवाऽऽस्थेयः। यथाह भदन्तधर्मोत्तरः—

बुद्ध्या कल्पिकया विविक्तमपरैर्यद्रूपमुल्लिख्यते
बुद्धिर्नो न बहिः— इति

तथाऽपि विकल्पज्ञानाद्बाह्याभिमुखी प्रवृत्तिस्तदर्थिनां न स्यात्। तस्मादलीकबाह्यमेषां विषयः। बाह्यभेदाग्रहश्चास्य बाह्यत्वं न पुनर्बाह्याभेदग्रहः, विकल्पगोचरे बाह्ये तदभेदग्रहस्याशक्यत्वात्। तस्मान्निर्विकल्पकपृष्ठभाविनो विकल्पाः तदुपनीतग्राह्यस्वलक्षणभेदं स्वग्राह्यालीकस्यागृह्णन्तः तदभिमुखं प्रवर्त्तयन्ति व्यवहर्तॄनर्थिनः, पारंपर्येण तत्संबन्धात् प्राप्तेन विसंवादयन्ति लोकम्। तेषां च विकल्पविषयाणां न तैरेव विकल्पैः परस्परतो भेदो गृह्यते, नापि विकल्पा-

न्तरैरिति भेदाग्रहादभेदमभिमन्यते पुरुषः, तदभेदाच्च अवमर्षाणामभेदः, तदभेदाच्च तद्धेतूनामविकल्पधियामभेदः, तदभेदाच्च स्वलक्षणानामविकल्पधीविषयाणामप्यभेदः। यथाह—

एकप्रत्यवमर्षस्य हेतुत्वाद् धीरभेदिनी।
एकधीहेतुभावेन व्यक्तीनामप्यभिन्नता॥ इति।

तत् सिद्धम् अलीकं बाह्यं विषयो विकल्पानां शब्दानां चेति। तच्चेदमन्यव्यावृत्तिरूपं भावाभावसाधारण्याच्च अत्यन्तविलक्षणानां सालक्षण्यापादनाच्च तादूप्यानुभवाच्च। तथा हि—यद्भावाभावसाधारणं तदन्यव्यावृत्तिरूपमेव, यथाऽमूर्त्तत्वम्। तत् खलु विज्ञाने च शशविषाणे च साधारणम्। तथा च विवादाध्यासिता विकल्पविषयाः घटपटादय इति स्वभावहेतुः। गौरस्ति गौर्नास्तीति हि भावाभावसाधारणो (१) गवादिर्विकल्पविषयो विधिरूपस्वलक्षणवद्भावासाधारण्ये नास्तीत्यनेन न (२) संबध्यते विरोधात्, अस्तीत्यनेनापि न संबध्यते पौनरुक्त्यात्। भावाभावसाधारणग्रहणं च नानिमित्तं नाप्यन्यनिमित्तम्। न हि विधिरूपविषयस्य तत्स्वरूपविषयस्य वा विधिधर्मापातिनस्तत्र निमित्तभावः संभवति। तस्मात् निमित्तवत्तया साधारणग्रहणं व्याप्तं विपक्षान्निमित्तवत्त्वस्य व्यापकस्यानुपलब्ध्या निवर्त्तमानमन्यव्यावृत्तिविषयत्वेन व्याप्यत इति प्रतिबन्धसिद्धिः। अपि चात्यन्ताविलक्षणानां सालक्षण्यम् अन्यव्यावृत्तिकृतमेव। यथा गवाश्वमहिषमातङ्गानामत्यन्तविलक्षणानामपि सिंहव्यावृत्त्या सालक्षण्यम्। तथा च बाह्यस्य स्वलक्षणस्य विधिरूपस्य परमार्थसतोऽपरमार्थसताऽत्यन्तविलक्षणेन सालक्षण्यमिति स्वभावहेतुः। बाह्यं हि विधिरूपमप्यगोव्यावृत्तम्, विकल्पविषयोऽपि चेदगोव्यावृत्तस्ततः सालक्षण्यम्, नान्यथा। तथा च सालक्षण्यमपि निमित्तवत्तया व्याप्तं तदनुपलब्ध्या विपक्षाद्व्यावर्तमानं स्वसाध्येन व्याप्यत इति प्रतिबन्धसिद्धिः। अपि चानुभूयत एव विकल्पविषयो व्यावृत्तिरूपः। तथा हि तदप्रतिभासने गां बधानेति देशितोऽश्वं बध्नीयाद् गोरश्वादभेदेनाप्रतिभासनात्। प्रतिभासे वा कथं नागोव्यावृत्तिप्रतिभासः? तस्मादन्यापोहगोचरौ शब्दविकल्पाविति। तदेतदुक्तं वार्तिककृता—तावेतावसद्द्रव्यव्युदासरूपेण प्रवर्तमानावेकमर्थं (क)ब्रूत इति। 'एकं' स्वलक्षणम् (ख)अध्यवस्यतः। अध्यवसायश्च स्वविषयस्य स्वलक्षणाद्भेदेनाग्रह इत्युक्तम्।

अत्रोच्यते। जातिस्तावदुपपादितसद्भावा (ग)तत एव तद्वती व्यक्तिरपि परमार्थसती। स्वाभाविकश्च सम्बन्धो व्यक्तेर्जात्या सह नोपकारमपेक्षते। अपि चानित्यस्याप्युपकार्यता

(१) 'गवादिविकल्प-' इति ख०। (२) 'सम्बध्येत' इति क०।

(क) 'ब्रूत' इत्यत्र आदर्शपुस्तकयोः 'अधिकुरुत' इति पाठो लिपिप्रमादकृत इति पूर्वोल्लिखितपाठ एव सन्निवेशितः। (ख) 'ब्रूत' इत्यत्रैव अन्वयिनं तदर्थमाह अध्यवस्यत इति। (ग) ५११तमपत्रं द्रष्टव्यम्।

न्यायवार्त्तिकतात्पर्यटीका

क्षणभङ्गभङ्ग उपपादयिष्यते। यथा चैकोपाधिग्रहेऽपि नोपाध्यन्तरविशिष्टग्रहस्तथोपपादितं प्रत्यक्षलक्षणावसरे। न चात्यन्तासतः (क)केनचिदसद्रूपस्य प्रथोपपद्यत इति सारूप्यनिमित्तां भ्रान्तिमुपपादयता वार्तिककृतोक्तम्। उपपादितं चास्माभिः। तस्माज्जातिमत्यो व्यक्तयो विकल्पानां शब्दानां च गोचरः, तासां तद्वृत्तीनां रूपमतज्जातीयव्यावृत्तमित्यर्थः। अतस्तदवगतेर्न गां बधानेति चोदितोऽश्वादीन् बध्नाति। न च शब्दार्थस्य जातेर्भावाभावसाधारण्यं नोपपद्यते। सा हि स्वरूपतो नित्याऽपि देशकालविकीर्णानन्तव्यक्त्याश्रयतया भावाभावसाधारणी भवति अस्तिनास्तिसम्बन्धयोग्या। वर्तमानव्यक्तिसम्बन्धिता हि जातेरस्तिता, अतीतानागतव्यक्तिसम्बन्धिता च नास्तितेति। सन्दिग्धव्यतिरेकित्वादनैकान्तिकं भावाभावसाधारण्यमन्यथासिद्धं चेति। जातिमती व्यक्तिर्विकल्पगोचरो नालीकमिति कस्य वस्तुना सह सादृश्यायान्यव्यावृत्तिरूपता आस्थीयते। अपि चालीकस्य समस्तसामर्थ्यविरहिणोऽत्यन्तविसदृशस्य समर्थेन स्वलक्षणेन विधिरूपेण किं सादृश्यम्? अन्यव्यावृत्तिरिति चेत्, नन्वन्यव्यावृत्तिर्भाविकी स्वलक्षणस्य स्वभावो वा अन्यो वा? न तत्स्वभावो विधिरूपेण विरोधात्, अविरोधे वा विधिनिषेधयोरेकत्वाद् विधिरूपतानिषेधेनालीकस्य स्वलक्षणसारूप्यायान्यव्यावृत्तिरूपतोपपादनमनर्थकम्। विधिरूपेणातुच्छेन तुच्छस्य सारूप्यमनुपपन्नमिति चेत्, हन्त भोः स्वलक्षणस्यास्ति किं तुच्छमपि रूपं येनालीकस्य तुच्छस्य सारूप्यं स्यात्। तथा सत्ययमेकस्य स्वलक्षणस्य तुच्छातुच्छविरुद्धस्वभावद्वयसमावेशमभ्युपगच्छन् श्लाघनीयप्रज्ञो देवानांप्रियः। न च स्वलक्षणादन्यव्यावृत्तिरलीकमन्यव्यावृत्तं स्वलक्षणेन सरूपयति तथा सति हस्तिमशकावपि रासभः सरूपयेत्। (ख)धर्मो न च स्वलक्षणधर्मो व्यावृत्तिर्भवद्भिरभ्युपेयते। स्यादेतत्—अध्यवसीयमानमपि स्वलक्षणं न परमार्थसत्, अपि तु तदपि कल्पितम्। तस्मात् तस्य विधिनिषेधरूपता न विरुध्येत। वस्तुनि हि विरुद्धधर्माध्यासो विरुध्यते नावस्तुनि, तेनास्य विधिरूपपरित्यागेन निषेधरूपतामुपादायालीकस्य सारूप्यमुपपद्यते। यथाह—

यच्च गृह्यते यच्चाध्यवसीयते ते द्वे अप्यन्यव्यावृत्ती न वस्तुन इति।

अथालीकस्य स्वलक्षणस्यालीकसादृश्ये किं सिध्यति? न तावत् तत्र प्रवृत्तिः, असतः प्रवृत्तिविषयत्वायोगात्। सतस्तु प्रवृत्तिविकल्पस्य न सादृश्यमसता, सादृश्ये वा वृथा अलीकस्वलक्षणाभ्युपगमः। अथ न वयमलीकं स्वलक्षणान्तरमातिष्ठामहे किं त्वलीकस्यैव दाहपाकादिकसामर्थ्यारोपम्; न तत्स्वलक्षणं तस्य सर्वतो व्यावृत्त्या अभिलापसंसर्गायोग्यत्वेन विकल्पज्ञानप्रतिभासाभावात्, अभिलापसंसर्गयोग्यस्य चान्व-

---

(क) 'अत्यन्तासतः' इत्यस्य विवरणम् 'असद्रूपस्य' इति।

(ख) 'धर्म' इति क्वचिन्न दृश्यते इति क-ख-तात्पर्यपुस्तकसम्पादकाः। पदमिदं प्रमादादापतितम्।

न्यायवार्त्तिकतात्पर्यटीका

यिनोऽस्वलक्षणत्वात्। तस्मात् स्वान्वयिनोऽन्यव्यावृत्तिरूपस्यासमर्थस्यापि सामर्थ्यं समारोप्य तत्तदर्थिनो व्यवहर्त्तृन् (क)प्रवर्तन्ते लोकविकल्पाः, पारंपर्येण सम्बन्धात् समर्थं वस्तु प्रापयन्तो न विसंवादयन्ति लोकमिति युक्तमुत्पश्यामः।

अथास्य अतदर्थक्रियासामर्थ्यारोपः किं दृष्टार्थक्रियास्वलक्षणसालक्षण्येन आहोस्विदनादिवासनावशात्? तत्र स्वलक्षणेन सर्वतो व्यावृत्तेन समर्थेन समस्तसामर्थ्यविरहिणोऽन्वयिनो न किंचिदस्ति सारूप्यम्, अन्यवृत्त्या तु सारूप्ये विधिरूपेणापि प्रसङ्गः तस्यास्ततो भेदाभावादित्युक्तम्। अनादिवासनावशात्तु तदारोपे प्रथमदर्शनेऽपि नालिकेरद्वीपागतस्य वह्नौ दाहपाकादिसामर्थ्यज्ञानप्रसङ्गः। वह्निस्वलक्षणाद्दाहपाकादिकारिणो भेदाग्रहादलीकस्य तद्रूपसमारोप इति चेत्, किं स्वलक्षणे गृह्यमाणे अथागृह्यमाणे। न तावद् गृह्यमाणे, तस्य विकल्पज्ञानगोचरत्वाभावादित्युक्तम्। तत्समयभावित्वविकल्पकं तत्त्वं गृह्णदपि न विकल्पे स्वविषयं निवेशयति तस्य ततोऽन्यत्वेन तद्वार्त्तानभिज्ञत्वात्। एवं विकल्पज्ञानमपि समनन्तरोत्पन्ननिर्विकल्पकव्यापारपारंपर्येऽपि न स्वलक्षणं गोचरयितुमर्हति तस्याभिलापसंसर्गयोग्यप्रतिभासविषयत्वादित्युक्तम्। समनन्तरप्रत्ययादविकल्पादुत्पत्तेस्तद्व्यापारपारम्पर्यादतद्गोचरोऽपि तद्गोचर इवाऽऽभासत इति चेत्, अनुभववासनाभावेषु भवेदपीयं गतिर्न तु परोक्षाभावावगाहिष्वविद्यावासनाप्रभवेषु संभवति। अपि चानुभववासनाप्रभवस्यापि तद्गोचरत्वाभिमानस्तस्मिन्नप्रथमाने तदुत्पत्तिमात्रान्न भवितुमर्हति। अगृह्यमाणे तु वह्निस्वलक्षणे ततो भेदाग्रहेण तद्रूपारोपे त्रैलोक्यरूपारोपप्रसङ्गो नियमहेतोरभावात्। नहि तदानीमगृह्यमाणतया त्रैलोक्याद्वह्निस्वलक्षणस्य कश्चिद्विशेषः, वह्निस्वलक्षणविषयनिर्विकल्पकप्रभवत्वेन तस्मिन्नियमे अविद्यावासनाप्रभवेषु प्रधानेश्वरादिविकल्पेषु तदभाव इति नियमो न स्यात्। न चाग्रहेण तदारोपसंभव इत्युक्तम्। तस्मादलीकस्य बाह्यत्वं विकल्पगोचर इति रिक्तं वचः।

अपि च ज्ञानाकारवत्स्वलक्षणवच्चालीकबाह्यत्वमपि न विकल्पगोचरो भवितुमर्हति। एतद्धि कल्पनाधीनम् उत्पन्नायां कल्पनायामुत्पन्नमिव विनष्टायां नष्टमिव विकल्पनाभेदे भिन्नमिव न शक्यमेकत्वेन प्रतिकर्त्तुम्। भेदानवमर्षादिति चेत् किमस्यानवमृष्टमपि तत्त्वम्? ओमिति चेत, न तर्हि कल्पितम्। ननु नास्य भेदोऽपि स्वाभाविकः। स्वाभाविको हि भेदाभेदाभ्यां युज्यते न त्वलीकम्। मा भूद्भेदोऽस्य स्वाभाविकः कल्पनाधीनं तु तदलीकं तद्भेदाद्भिन्नं प्रतिपत्तव्यम्, अन्यथा तदधीनत्वापत्तेः। इदमेव हि तस्य विकल्पितस्य कल्पनाधीनत्वं यत्कल्पनाभेदाभेदानुविधानं नाम, तदधीनत्वे तु कल्पितत्वानुपपत्तेरनलीकत्वप्रसङ्गात्। तन्मा नाम भूतामस्य स्वाभाविके नानात्वैकत्वे, न तु भिन्नकल्पनानुपाति शक्यमेकत्वेन प्रतिपत्तुमिति भिन्नं प्रतिपत्तव्यम्। तत्सिद्धं

(क) अत्र 'प्रवर्त्तयन्ति' इति पाठः सम्भाव्यते।

न्यायवार्त्तिकम्

समानाधिकरणावित्युच्यते मुख्यतस्तु न कश्चिद्विधानतः शब्दो वाचक इति ; न मुख्यासम्भवात्—मुख्यतः सद्द्रव्यशब्दप्रयोगे सति तेन सामान्यादतथाभूत उपचार इति युक्तम्, न त्वेवंवादिनां प्रधानमस्ति। न च प्रधानमन्तरेणोपचारः सम्भवति। (१)न चान्यापोहपक्ष उपचारो युक्तः उभयोः प्रधानशब्दत्वात्। यथा सिंहशब्दः सिंहे वर्तते असिंहरूपव्युदासेन तथा माणवकेऽपीति तुल्यवृत्तित्वात् कस्मादुपचार इति।

यत्पुनरेतत्—अन्यशब्दार्थापोहः शब्दार्थ इति, तदप्ययुक्तम् ; विधानशब्दार्थसम्भवे सत्याद्या प्रतिपत्तिः, यदि विधानशब्दार्थो भवति ततो विधीयमानशब्दार्थप्रतिपत्तौ सत्यां तस्यान्यत्र प्रतिषेध इत्युपपन्नः प्रतिषेधः, यस्य पुनर्विधीयमानः पदार्थो नास्ति तस्याऽऽद्यां प्रतिपत्तिमन्तरेण कथं प्रतिषेधः, यावच्चेतरं न प्रतिपद्यते तावदितरं न प्रतिषेधतीति। यथा गौरिति पदस्यार्थोऽगौर्न भवतीति, यावच्च गां न प्रतिपद्यते तावद् (२)गवि प्रतिपत्तिर्न युक्ता, यावच्च गां न प्रतिपद्यते तावदगवीत्युभयप्रतिपत्त्यभावः।

न्यायवार्त्तिकतात्पर्यटीका

विकल्पागोचरत्वमलीकग्राह्यस्य अभिलापसंसर्गायोग्यत्वात् सुखादिस्वलक्षणवदिति। अभिलापसंसर्गयोग्यं हि तत् तेनाशक्यसमयत्वात् सुखादिलक्षणवदिति। शक्यसमयतया खल्वभिलापसंसर्गायोग्यता व्याप्ता अन्यथाऽतिप्रसङ्गात्। साऽलीकग्राह्यतायाः प्रतिविकल्पं भिन्नाया व्यावर्त्तमानाऽभिलापसंसर्गयोग्यत्वमपि व्यावर्त्तयतीति प्रतिबन्धसिद्धिः। अपि चेदमलीकमगोव्यावृत्तिरूपं वा तद्धर्मो वा? अगोव्यावृत्तिरूपं चेत् न तदसिद्धं गवि शक्यं ग्रहीतुम्। अगौश्च गोनिषेधात्मेति गोसिद्धिमपेक्षत इति दुरुत्तरमितरेतराश्रयत्वम्। तद्धर्मत्वे वा गोत्वमेवास्तु भाविकं तद्धर्मो विधिरूपः कृतमलीकेनाविधिरूपेण। तद्धर्माणां तद्भाविकत्वसाधनं च निराकृतम्, तस्य च भावाभावसाधारण्यमुपपादितम्। तद् विस्तराद्बिभ्यतोऽपि बहुतरविस्तरे पतिताः स्म इत्यास्तामेतन्नास्तिकमानोपमर्दनमिति।

'उपचारतो न व्याघात इति चे'दिति शङ्कायाः परिहारवार्तिकम्—मुख्यासंभवादिति। सर्वत्र मुख्यपूर्वक उपचारो वा समारोपो वा दृष्टः, तव तु राद्धान्ते न विधिविषयः कश्चिदस्ति मुख्यः शब्दो वा विकल्पो वा सर्वस्य निवृत्तिगोचरत्वात्। न चाध्यवसेयो विधिः संभवतीत्युपपादितमधस्तादिति भावः। न चान्यापोहपक्ष उपचारो युक्तः उभयोः प्रधानशब्दत्वादिति। न हि सिंहत्वं नाम किंचिदस्ति सिंहव्यक्तिषु यन्माणवके न स्यात्, अपि तु प्रसह्यकारित्वादिव्युदासो माणवके नास्तीति सिंहव्यक्तिष्विव माणवकेऽपि सिंहशब्दो मुख्य एव स्यादित्यर्थः।

---

(१) 'न चान्यापोहवादे' इति क-ख-वार्त्तिकपाठः। (२) 'बहुप्रतिपत्तिः' इति ख।

न्यायवार्त्तिकम्

यश्चायमन्यापोहः अगौर्न भवतीति गोशब्दस्यार्थः, स किं भावोऽथाभाव इति? यदि भावः, किं गौरगौरिति? यदि गौः? नास्ति विवादः, अथागौर्गोशब्दस्यार्थः, अहो शब्दार्थकौशलम्। अभावस्तु न युक्तः प्रैषसम्प्रतिपत्त्योरविषयत्वात्—न हि गोशब्दश्रवणादभावे प्रैषो न वा सम्प्रतिपत्तिः। शब्दार्थश्च प्रतिपत्त्या प्रतीयते, न च गोशब्दादभावं कश्चित् प्रतिपद्यत इति।

अन्यापोहश्च शब्दार्थ इत्ययुक्तम् अव्यापकत्वात्—यत्र द्वैराश्यं भवति तत्रेतरप्रतिषेधात् तदितरः प्रतीयते, यथा गौरिति पदे गौः प्रतीयमानः अगौः प्रतिषिध्यमानः। न पुनः सर्वपद एतदस्ति, न ह्यसर्वं नाम किञ्चिदस्ति यत्सर्वपदेन निवर्त्येत। एकादिव्युदासाद् व्यापकमिति चेत्—अथ मन्यसे एकाद्यसर्वं तत् सर्वशब्देन निवर्त्यते, तन्न, स्वार्थापवाददोषप्रसङ्गात्। एवं सत्येकादिव्युदासेन प्रवर्तमानः सर्वशब्दः (१)अङ्गस्य प्रतिषेधादङ्गव्यतिरिक्तस्य चाङ्गिनोऽनभ्युपगमाद् अनर्थकः स्यात्। एवं सर्वे समुदायशब्दा एकदेशप्रतिषेधरूपेण प्रवर्तमानाः समुदायिव्यतिरिक्तसमुदायानभ्युपगमादनर्थकाः प्राप्नुवन्तीति। द्व्यादिशब्दानां च समुच्चयविषयत्वादेकादिप्रतिषेधे प्रतिषिध्यमानानामसमुच्चयाद् द्व्यादिशब्दानामनर्थकत्वम्।

क्रियारूपत्वाच्चापोहस्य (२)विषयो वक्तव्यः—अगौर्न भवतीति अयमपोहः किं गोविषयः (३) अथागोविषय इति। यदि गोविषयः, कथं गोर्गव्येवाभावः। अथागोविषय इति मन्यसे, कथमन्यविषयादपोहादन्यत्र प्रतिपत्तिः? न हि खदिरे छिद्यमाने पलाशे छिदा भवति। अथागोर्गवि प्रतिषेधः अगौर्गौर्न भवतीति, केन गोरगोत्वं प्रसक्तं यत् प्रतिषिध्यत इति। कथं वा गवि गोप्रतिपत्तिमन्तरेण प्रतिषेधः? नह्युत्तरपदार्थप्रतिपत्तिमन्तरेण प्रतिषेधं पश्यामः। उक्तं चात्र आद्या प्रतिपत्तिर्न प्राप्नोतीति। आदिप्रतिपत्तिं चान्तरेण न प्रतिषेध इति।

न्यायवार्त्तिकतात्पर्यटीका

किं गौरगौरिति अश्वादिरित्यर्थः। प्रैष्यप्रत्ययपूर्विका प्रैषस्य प्रैषविषये प्रवृत्तिः संप्रतिपत्तिः, अङ्गव्यतिरिक्तस्य चाङ्गिनः सेनावनबहुत्वसंख्यादीनां भवद्भिरभ्युपगमादित्यर्थः।

क्रियारूपत्वाच्चापोहस्य विषयो वक्तव्य इति, कर्म विषयः क्रियायास्तद्वक्तव्यमित्यर्थः। कथमन्यविषयादिति। कथमन्यविषयादपोहात् अगोविषयाद् गवि प्रतिपत्तिरिति। अथागोरिति। अस्ति हि काचित् क्रिया याऽन्यस्यान्यविषया, (क)यथा विज्ञानम् आत्मनोऽर्थः विषयं वेत्यर्थः। निराकरोति—केन गोरिति। क्रिया हि चेतनानां प्रयत्नपूर्वा भवति। अपोहलक्षणा च क्रिया निषेधरूपा, निषेधश्च प्राप्तिपूर्वकः। न हि गोरगोत्वं केनचित् प्रसञ्जितं यत्प्रेक्षावता व्यपोह्येतेत्यर्थः। (ख)कथं त्वागवीति, अगवीति पदेन योऽयं प्रतिषेधो नासौ

(१) 'अङ्गप्रति-' इति ख। (२) 'स्वविषयो' इति क। (३) 'वाऽगोविषयः' इति क।

(क) यथा 'विज्ञानमात्मनोऽर्थविषयमित्यर्थः' इति पाठः समीचीनतया सम्भाव्यते। (ख) वार्त्तिके 'कथं वा गवी'ति पाठः।

न्यायवार्त्तिकम्

इतश्च न युक्तोऽपोहः विकल्पानुपपत्तेः—योऽयमगोरपोहो गवि, स किं व्यतिरिक्त आहोस्विद् अव्यतिरिक्त इति। यदि व्यतिरिक्तः, किमाश्रितोऽनाश्रितो वेति। यद्याश्रितः, आश्रितत्वाद् गुण इति गोशब्देन गुणोऽभिधीयते न गौरिति, गौस्तिष्ठतीति सामानाधिकरण्यं न प्राप्तम्। अथानाश्रितः, केनार्थेन षष्ठी गोरपोह इति। अथाव्यतिरिक्तः, गौरेवासाविति न किञ्चित् कृतं भवतीति।

अयं चापोहः प्रतिवस्त्वेकोऽनेक इति वा वक्तव्यः। यद्येकोऽनेकगोसम्बन्धी, तदा गोत्वं तदिति। अथानेकः, ततः पिण्डवदानन्त्यादाख्यानानुपपत्तेरर्थप्रत्ययो न युक्तः।

इदं च तावत् प्रष्टव्यो जायते भवान् किमयमपोहो वाच्योऽथावाच्य इति। यदि वाच्योऽनैकान्तिकः शब्दार्थः अन्यापोहः (१)शब्दार्थ इति। अनवस्था वा—अथानपोहव्युदासरूपेणाभिधीयते अपोहस्तस्याप्यन्य इत्यनवस्था। अथावाच्यः, अन्यशब्दार्थापोहं करोतीति व्याहतम्। यदि च शब्दस्यापोहो नाभिधेयार्थः, अभिधेयार्थव्यतिरेकेण स्वार्थो वक्तव्यः। अथ स एवास्य स्वार्थः, तथाऽपि व्याहतम्। अन्यशब्दार्थापोहं स्वार्थं कुर्वती श्रुतिरभिधत्त इत्युच्यते इति तस्य वाक्यस्यायमर्थः तदानीं भवत्यन्यदनभिदधानोऽभिधत्त इति। अनेकमिति चास्य पदस्य द्व्यादिविषयत्वात् सामान्याधिगतौ विशेष आश्रयितव्यः, न ह्यसति विशेषाश्रयणे सामान्यशब्दाद्विशेषप्रतिपत्तिर्युक्तेति। नीलोत्पलशब्दयोश्च प्रधानत्वाद्विशेषणविशेष्यभावानुपपत्तौ

न्यायवार्त्तिकतात्पर्यटीका

गोप्रतिपत्तिमन्तरेण भवतीत्यर्थः। (क)आख्यानानुपपत्तेरर्थप्रत्ययो न युक्त इति। (ख)अपोहरूपोऽर्थप्रत्ययो न युक्त इत्यर्थः।

किमपोहो वाच्योऽथावाच्य इति, अपोहादिशब्देनेत्यर्थः। यदि वाच्य इति, स्वरूपेणैवापोहो वाच्यो न चापोहापोहेनेत्यर्थः। स्यादेतत्—यद्यन्यापोहेन शब्दो न वर्तते कथं तर्हि द्व्यादिविशेषेष्वनेकशब्द एकापोहेन वर्तते। न ह्यत्रानेकत्वं नाम गोत्वमिव किंचिदस्ति सामान्यमित्यत आह—अनेकमिति चास्य पदस्य द्व्यादिविषयत्वात् सामान्याधिगतौ एकत्ववर्जितसंख्यात्वसामान्याधिगतौ विशेष आश्रयितव्यः। संख्यात्वसामान्यमेवैकत्ववर्जितं तत्र द्व्यादिविशेषाधिगतिहेतुर्न पुनरन्यापोहमात्रमित्यर्थः। 'न ह्यसति' 'सामान्यशब्दाद्' एकत्ववर्जितसंख्यासामान्यवाचकादनेकशब्दाद् 'विशेषाश्रयणे' अन्यापोहमात्राद् (ग)विशेषाधिगतिरिति योजनीयम्। अब्राह्मणादिशब्दानामप्ययमेव गतिः, तत्रापि पुंस्त्वसामान्यमेव ब्राह्मणशब्दार्थ इति। नीलोत्पलशब्दयोश्च प्रधानत्वादिति। अनीलानुत्पलव्युदासौ हि प्रधानौ नीलोत्पल-

(१) 'शब्दस्यार्थः' ख।

(क) क-ख तात्पर्यपुस्तकयोः 'अध्यासानुपपत्तेः' इति मुद्रितम्। (ख) 'अपोहरूपार्थप्रत्ययः' इति समीचीनतया प्रतिभाति। (ग) 'विशेषप्रतिपत्ति'रिति वार्त्तिके विशेषः।

न्यायभाष्यम्

कथं पुनर्ज्ञायते नाना व्यक्त्याकृतिजातय इति ? लक्षणभेदात् । तत्र तावत्—

(सू०)—व्यक्तिर्गुणविशेषाश्रयो मूर्तिः ॥ ६७ ॥

न्यायवार्त्तिकम्

विशेषणस्य पूर्वनिपात इत्युभयोः प्रधानत्वान्न प्राप्तिः । एतेन राजपुरुषशब्दौ व्याख्यातौ । समानाधिकरणार्थश्चान्यापोहवादिना वाच्यः । यस्य चान्यापोहः शब्दार्थस्तेनानीलानुत्पल-व्युदासौ कथं समानाधिकरणाविति वक्तव्यम् । यस्य पुनर्विधीयमानः शब्दार्थस्तस्य जाति-गुणविशिष्टं नीलोत्पलशब्दाभ्यां द्रव्यमभिधीयते जातिगुणौ च द्रव्ये वर्त्तेते न पुनरनीलानुत्पलव्यु-दासौ, तस्मात् समानाधिकरणार्थो नास्तीति । तदेवमन्यापोहो यथा यथा विकल्प्यते तथा तथा प्रमाणवृत्तं बाधत इति ॥ ६६ ॥

'कथं पुनर्ज्ञायते नाना व्यक्त्याकृतिजातय इति' । अधिगतत्वात् प्रश्नानुपपत्तिरिति चेत्—अधिगता व्यक्त्याकृतिजातयो याशब्दादिसूत्रैः, अधिगतत्वात् (१)प्रश्नोऽनुपपन्नः । न, निमित्त-त्रैविध्ये सति तद्विशेषविषयज्ञापनार्थत्वात् प्रश्नस्य । गोशब्द उच्चरन् प्रधानोपसर्जनभावेन (२)निमित्तत्रयं प्रतिपादयतीति याशब्दादिसूत्राणामर्थः, एवं च सति तद्विशेषविषयज्ञापनार्थो युक्तः प्रश्नः—कतमा तत्र व्यक्तिः, कतमा आकृतिः, कतमा जातिरिति । व्यक्त्याकृतिजातीनां भेदो लक्षणभेदात् । किं पुनर्व्यक्तेर्लक्षणमस्ति व्यक्तिलक्षणप्रतिपादनार्थम् ?—

न्यायवार्त्तिकतात्पर्यटीका

शब्दाद्याहतुः । न ह्येतयोरस्ति विशेषणविशेष्यभावः परस्परासंबन्धादिति भावः । एतेन नीलोत्पलशब्दयोरस्मिन् सिद्धान्ते प्रधानार्थत्वेन व्युत्पादनेन राजपुरुषशब्दौ व्याख्यातौ प्रधानत्वेन । अत्राप्यराजापुरुषव्यवच्छेदयोर्नावच्छेद्यावच्छेदकभावः नापि स्वस्वामिभाव इत्यर्थः । (क)समानाधिकरणार्थश्चेति, शब्दविकल्पयोः परमार्थसद्वस्तुसंस्पर्शासंभवादित्यर्थः ॥६६॥

वृत्तिः

तत्र के व्यक्त्यादय इत्याकाङ्क्षायामाह—(व्यक्तिरिति)

यद्यपि जात्यादेरपि व्यक्तित्वात् प्रमेयत्वमेव व्यक्तित्वम्, तथाऽपि जात्याकृतिशक्ति-विषयव्यक्तेरिदं लक्षणम् । तथा च 'गुणविशेषः' जात्याकृतिसमानाधिकरणः गुणः सङ्ख्यादिभिन्नः तदाश्रयो मूर्त्तिर्व्यक्तिरिति समानार्थकमित्यर्थः ।

---

(१) 'प्रश्नार्थो-' इति ख० । (२) 'निमित्त एव' इति ख० ।

(क) 'समानाधिकरणयोश्चेति' इति क-ख-तात्पर्यग्रन्थयोर्मुद्रितम् । वार्त्तिकग्रन्थानुसारेण स्वेवं गृहीतम् ।

न्यायभाष्यम्

व्यज्यत इति व्यक्तिरिन्द्रियग्राह्येति न सर्वं द्रव्यं व्यक्तिः। यो गुणविशेषाणां स्पर्शान्तानां गुरुत्व-घनत्व-द्रवत्व-संस्काराणामव्यापिनः परिमाणस्याऽऽश्रयो यथासम्भवं तद् द्रव्यं मूर्त्तिः मूर्च्छितावयवत्वादिति ॥ ६७ ॥

न्यायवार्त्तिकम्

व्यक्तिर्गुणविशेषाश्रयो मूर्तिः इति सूत्रम्। तत्र 'व्यज्यत इति व्यक्तिरिन्द्रियग्राह्येति'। यद् द्रव्यम् उपलब्धिलक्षणप्राप्तानां स्पर्शान्तानां गुणानामाश्रयः (१)तत् मूर्च्छितावयवत्वात् मूर्तिरिति चोच्यते व्यक्तिरिति च। एतत्तु न बुद्ध्यामहे किमिदमवयविद्रव्यस्य लक्षणम्, आहो पदार्थत्वेन त्रयाणां प्रसक्तानां जात्याकृतिव्यवच्छेदकं व्यक्तिलक्षणमिति। वयं तु ब्रूमो नात्रावयवी व्यवच्छेद्योऽपि तु जात्याकृतिपदव्यतिरिक्तस्य व्यक्तिपदस्यार्थो वक्तव्य इति। सा च व्यक्तिः या न जातिर्नाऽऽकृतिस्तस्या अनेन सूत्रेण संग्रहः 'व्यक्तिर्गुणविशेषाश्रयो मूर्ति'रिति। गुणाश्च विशेषाश्च तदाश्रयश्च, अत्र तच्छब्दलोपाद् (क) गुणविशेषाश्रयशब्देन द्रव्यमुच्यते। कर्मापि

न्यायवार्त्तिकतात्पर्यटीका

व्यक्ति—र्तिः (सू० ६७) ॥ यत्र हि व्यक्त्याकृतिजातीनां समावेशः तत्र व्यक्तिनिर्द्धारणायेदं लक्षणम्। तेनाऽऽकाशाद्यनवरोधेऽपि न दोषस्तत्राऽऽकृतेरभावादिति भाष्यमतम्। यथाह भाष्यकारः—न सर्वं द्रव्यं व्यक्तिरिति। यद्यपि गुरुत्वादयः सामान्यगुणास्तथाऽपि गुणान्तरेभ्यो व्यावर्त्तमाना गुणविशेषा इत्युच्यन्ते। अव्यापिन इति सर्वगतस्य द्रव्यस्य परिमाणं व्यवच्छिनत्ति। मूर्च्छिताः परस्परं संयुक्ता अवयवा यस्य तन्मूर्च्छितावयवम्।

कथं पुनरित्यादिभाष्यमाक्षिपति वार्तिककारः—अधिगतत्वादिति। स्वरूपावगमपूर्वकत्वाद् वाक्यप्रतिपादनस्य स्वरूपावगमोऽपि तन्नान्तरीयकत्वात् सिद्ध इत्याक्षेपाभिप्रायः। निराकरोति—न निमित्तत्रैविध्ये सति तद्विशेषविषयज्ञापनार्थत्वात् प्रश्नस्य, शब्दप्रवृत्तिनिमित्तानां त्रैविध्ये सति तद्विशेष एव विषयः तज्ज्ञापनमर्थः प्रयोजनं यस्य स तथोक्तः। एतदुक्तं भवति—सिद्धं कृत्वा भेदमभिधेयत्वं त्रयाणां प्रतिपादितम्, संप्रति स एव भेदः प्रतिपाद्यत इति।

सूत्रमिति, बहूनामर्थानां सूचनादिति भावः। अत्र भाष्यव्याख्यानमुपन्यस्यति—व्यज्यत इति। दूषयति—एतत्तु नेति। व्यक्तिः पदार्थ इत्येतत् प्रकृतम्, तत्र यथाऽवयविनो व्यक्तेः पदार्थत्वम् एवमाकाशादीनां चोत्क्षेपणादीनां च, तत् तथा लक्षणं व्याख्येयं यथा सर्वं संगृह्यते अन्यथा सूत्रकारोऽकुशलः स्यात्। तदर्थमाह—वयं तु ब्रूम इति। अत्रेदं व्याख्यानम्। व्यक्तिरिति लक्ष्यनिर्देशः शेषं लक्षणम्। गुणविशेषा इति द्वेधा समासः, गुणश्च विशेषश्चेति

(१) 'मूर्तितावयवत्वात्' इति ख०।

(क) अत्र क-ख-वार्त्तिकयोः 'गुणविशेषा, आश्रयशब्देन' इति मुद्रितम्। औचित्यादेवं गृहीतम्।

(सू०)—आकृतिर्जातिलिङ्गाख्या ॥ ६८ ॥

न्यायभाष्यम्

यया जातिर्जातिलिङ्गानि च प्रख्यायन्ते तामाकृतिं विद्यात्। सा च (१) नान्या

न्यायवार्त्तिकम्

गुणविशेषशब्दाल्लभ्यते गुणेभ्यो विशेषाः गुणविशेषा इति। गुणविशेषग्रहणं किमर्थम्? गुणपदार्थेन सङ्गृहीताया आकृतेर्निराकरणार्थम्—आकृतिः संयोगविशेषः, सा च गुणग्रहणेन सङ्गृहीतेति तन्निराकरणार्थं गुणविशेषग्रहणम्। गुणविशेषा इत्यत्र द्विरूपो विग्रहः, गुणाश्च ते विशेषा इति च गुणेभ्यो विशेषा इति च। आश्रयशब्दसमानाधिकरणो मूर्तिशब्दो द्रव्ये (२)वर्तते (क)मूर्च्छंते इति मूर्तिशब्देन द्रव्यमुच्यते। एवं च प्रतिपदं लक्षणं सिध्यति। एवं च रूपाकाशाद्यवरोधः—यदि प्रतिपदमेतद् व्यक्तिलक्षणं भवति ततो रूपादयश्चाऽऽकाशादयश्च व्याप्यन्ते (३)अन्यथा तु लक्षणमव्यापकं स्यादिति। अथवा गुणविशेषाणामाश्रय इति गुणाश्च विशेषाश्च गुणविशेषाः तेषामाश्रयो द्रव्यं तत्र मूर्च्छत इति मूर्तिः ॥ ६७ ॥

आकृतिर्जातिलिङ्गाख्या। 'जातिर्जातिलिङ्गानि च प्रख्यायन्ते यया तामाकृतिं विद्यात्।

न्यायवार्त्तिकतात्पर्यटीका

प्रथमो विग्रहः, तेनाऽऽकृतिर्निराकृता संगृहीताश्च रूपादयो भवन्ति। तथाऽप्युत्क्षेपणादिव्यक्तेरसंग्रह इति द्वितीयो विग्रहः। गुणेभ्यो विशेषा गुणविशेषाः गुणेभ्यो व्यावृत्ता उत्क्षेपणादय इति यावत्। तथाऽपि न द्रव्यं संगृह्यत इत्यत आह—आश्रय इति। तच्छब्दाध्याहाराद् गुणविशेषाश्रयो द्रव्यमित्यर्थः। प्रतिपदमिति, गुण इति च विशेष इति च आश्रय इति चेति पदानि। अथ वा गुणविशेषाणामाश्रय इति, गुणा रूपादयः विशेषाः कर्माणि गुणेभ्य इत्यर्थात्, तेषामाश्रयश्चेति द्वन्द्व एव तेषामित्यर्थाद्गम्यते। तत्र (ख) मूर्च्छत इति मूर्च्छनं सम्बन्ध इह चासौ समवाय इति ॥ ६७ ॥

आकृ—ख्या (सू० ६८) ॥ जातिश्च जातिलिङ्गानि च जातिलिङ्गानि तान्याख्यायन्ते

वृत्तिः

परे तु गुणा रूपादयः, विशेषाः विशेषकाः उत्क्षेपणादयः, तेषामाश्रयो द्रव्यम्, तेन जात्याश्रयो व्यक्तिरित्याशयः। विशेषलक्षणमाह—मूर्त्तिरिति। मूर्त्तिः संस्थानविशेषः तद्वान् इत्याहुः। अत्र च मध्यमपदलोपी समास इत्याशयः।

अन्ये तु व्यक्तेर्लक्षणं मूर्तिरिति। सैव केत्यत आह—गुणविशेषाश्रय इति। गुणविशेषस्यावच्छिन्नपरिमाणस्याऽऽश्रय इत्यर्थ इत्याहुः ॥ ६७ ॥

आकृतिं लक्षयति—(आकृतिरिति)

---

(१) 'नानासत्त्वानां तदवयवानाम्'—इति ज०, 'नान्यसत्त्वावयवानां' इति ग०। (२) 'वर्तते' इति नास्ति ख०। (३) 'अन्यथा तु न' इति ख०।

(क) 'मूर्च्छा मोह उच्छ्राये' इति परस्मैपदिन आत्मनेपदमभियुक्तप्रयोगादिति बोध्यम्।

(ख) 'मूर्च्छित' इति क-ख-तात्पर्यपाठः।

न्यायभाष्यम्

सत्त्वावयवानां तदवयवानां च नियताद् व्यूहादिति। नियतावयवव्यूहाः खलु सत्त्वावयवा जातिलिङ्गम्, शिरसा पादेन गाम् (१) अनुमिन्वन्ति। नियते च सत्त्वावयवानां व्यूहे सति गोत्वं प्रख्यायत इति। अनाकृतिव्यङ्ग्यायां जातौ मृत्सुवर्णं रजतम् इत्येवमादिष्वाकृतिर्निवर्तते जहाति पदार्थत्वमिति ॥ ६८ ॥

न्यायवार्त्तिकम्

सा च नान्या सत्त्वावयवानां(क) नियताद् व्यूहात्' नियतव्यूहाः खल्ववयवा जातिमनुमापयन्ति शिरःपाण्यादिमदाकारसामान्येन गोत्वं व्यज्यते इति, (ख) शिरःपाण्यादीनां वाऽवयविशेषदर्शनेन। कदाचित् पुनरियमाकृतिः पदार्थत्वं जहाति। क्व पुनर्जहाति ? यत्राऽऽकृतिव्यङ्ग्या जातिर्न भवति यथा मृत्सुवर्णरजतमिति आकृतौ नियमो न जातौ। सर्वाकृति(२)र्जातिलिङ्गमिति न पुनः सर्वा जातिराकृत्या लिङ्ग्यते ॥ ६८ ॥

न्यायवार्त्तिकतात्पर्यटीका

यया सा आकृतिः। शिरःपाण्यादिव्यूह आकृतिर्जातिं मनुष्यत्वादिकमाचष्टे। शिरोनासिकाललाटचिबुकादीनां शिरोऽवयवानां व्यूहो मनुष्यत्वजातिलिङ्गं (ग) शिर आचष्टे। शिरसा पादेन गामनुमिन्वन्तीति भाष्यम्। यद्यपि गोत्वं प्रत्यक्षमेव नाऽऽकृतिव्यङ्ग्यं तथाऽपि विप्रतिपद्यमानं प्रत्युच्यते अनुमिन्वन्तीति न पुनः सर्वा जातिराकृत्या लिङ्ग्यत इति। मृत्सुवर्णरजतादिका हि रूपविशेषव्यङ्ग्या जातिर्नाऽऽकृतिव्यङ्ग्या; ब्राह्मणत्वादिजातिस्तु योनिव्यङ्ग्या, आज्यतैलादीनां जातिस्तु गन्धेन वा रसेन वा व्यज्यते। अत एव न सार्षपादीनां तैलत्वमस्ति तद्व्यञ्जकयोर्गन्धरसयोरभावात्, भाक्तस्तु तैलशब्दप्रयोगः। क्षीरजातिरपि रसव्यङ्ग्यैव, अत एवाऽऽमिक्षायाः क्षीरत्वं न तु वाजिनस्य (घ)तद्व्यञ्जकस्य रसभेदस्य वाजिनेऽभावाद् आमिक्षायां च भावादिति ॥ ६८ ॥

वृत्तिः

जातिलिङ्गमित्याख्या यस्याः, जातेर्गोत्वादेर्हि सास्नादिसंस्थानविशेषो लिङ्गम्, तस्य च (ङ) परम्परया द्रव्यवृत्तित्वम्।

---

(१) 'अनु-मिनन्ति' इति नि०।

(२) '-र्जातिं लिङ्गयति' इति ख०।

(क) अत्र भाष्यगतः 'तदवयवानां च' इत्यंशः, तथा 'व्यूहाद्' इत्यतः परम् इति पदं च परित्यक्तम्।

(ख) 'शिरःपाण्यादीनां वा वावयविशेषदर्शनेन' इति क-पुस्तक-पाठः। ख-पुस्तकपाठो गृहीतः। 'शिरःपाण्यादीनां चावयवविशेषाणां दर्शनेन शिर आदिः' इति पाठस्तु सम्यक् प्रतिभाति।

(ग) शिरोनासिकेत्यत्र शिरःपदं केशबहुलभागपरम्, अत्र तु कम्धराया ऊर्ध्वभागपरमिति बोध्यम्।

(घ) 'तप्ते पयसि दध्यानयति सा वैश्वदेव्यामिक्षा भवति वाजिभ्यो वाजिनम्' इति श्रुतिः।

(ङ) परम्परयेति स्वाश्रयसमवेतत्वादिनेत्यर्थः।

न्यायभाष्यम्

(सू०)—समानप्रसवात्मिका जातिः ॥ ६९ ॥

या समानां बुद्धिं प्रसूते भिन्नेष्वधिकरणेषु, यया बहूनीतरेतरतो न व्यावर्तन्ते यो अर्थोऽनेकत्र प्रत्ययानुवृत्तिनिमित्तं तत् सामान्यम्। यच्च (१)केषाञ्चिदभेदं कुतश्चिद् भेदं करोति तत् सामान्यविशेषो जातिरिति ॥ ६९ ॥

इति वात्स्यायनीये न्यायभाष्ये द्वितीयाध्यायस्य द्वितीयमाह्निकम् ॥

समाप्तश्चायं द्वितीयोऽध्यायः ॥ २ ॥

न्यायवार्त्तिकम्

समानप्रसवात्मिका जातिः। यया भिन्नान्यनेकानि वस्तूनि इतरेतरतोऽनुवृत्तिप्रत्यय-हेतुत्वेन व्यवतिष्ठन्ते सा जातिः। यथेमानि कुण्डानीत्यनुवर्तन्ते नेमानि कुण्डानीति व्यावर्तन्ते तदेकं सन्निमित्तमनुवृत्तिकारणं यत्सामान्यविशेषो जातिरिति। (२)तत् समानप्रत्ययोत्पत्तिकारणं जातिरिति जातौ नियमो न समानप्रत्ययोत्पत्तौ, जातिमन्तरेणापि दृष्टत्वात्—जातिमन्तरेणापि समानप्रत्ययो दृष्टः यथा पाचकादिषु, तस्माद् व्यवस्थितं व्यक्त्याकृतिजातयः पदार्थ इति। गवादि-ष्वनुवृत्तिप्रत्ययो दृष्टः पिण्डव्यतिरिक्तात् (३)लिङ्गाद्भवतीति विशेषवत्त्वान्नीलादिप्रत्ययवदिति।

न्यायवार्त्तिकतात्पर्यटीका

समा—तिः (सू० ६९) ॥ प्रसूत इति प्रसवः समानबुद्धेर्भिन्नेषु प्रसोत्री। या जातिः साऽवश्यं समानप्रत्ययं प्रसूते, न पुनर्या समानप्रत्ययं प्रसूते सा जातिः, पाचकादिषु व्यभिचारा-दिति। व्यक्त्याकृतिभ्यां भेदकत्वमात्रेण चैतल्लक्षणं न तु सर्वथा वेदितव्यम्।

यस्तु वैयात्यात् प्रत्यक्षेऽपि विप्रतिपद्यते तं प्रत्यनुमानान्याह—गवादिष्वनुवृत्तप्रत्यय इति।

वृत्तिः

जातिर्द्रव्यसमवायिकारणतावच्छेदिका लिङ्गं धर्मो यस्याः सेत्यर्थ इति कश्चित् ॥ ६८ ॥

जातिं लक्षयति—(समानेति)

समानः समानाकारकः प्रसवो बुद्धिजननम् आत्मा स्वरूपं यस्याः सा। तथा च समानाकारबुद्धिजननयोग्यत्वमर्थः।

---

(१) 'केषाञ्चिद्भेदम्'—इति ज०।

(२) 'तदिति' ख-पु० नास्ति।

(३) 'निमित्ताद्भवतीति'—क-ख-ध्र-पाठान्तरम्।

न्यायवार्त्तिकम्

गोतोऽर्थान्तरं गोत्वं भिन्नप्रत्ययविषयत्वाद् रूपस्पर्शप्रत्ययवदिति । गोतोऽर्थान्तरं गोत्वं व्यपदेश-शब्दविषयत्वात् चैत्राश्ववत्, गोर्गोत्वानुवृत्तिप्रत्यया भिन्ननिमित्ता (क)विशेषवत्त्वात् रूपादि-प्रत्ययवदिति ॥

संशयस्य प्रमाणानां विचारस्तद्व्यवस्थितिः ।
शब्दस्य तत्त्वं प्रामाण्यं पदार्थाश्चेह कीर्तिताः ॥ ६१ ॥

इति—औद्द्योतकरे न्यायवार्तिके द्वितीयाध्यायस्य द्वितीयमाह्निकम् ॥
समाप्तश्चात्र द्वितीयोऽध्यायः ॥ (ख)

न्यायवार्त्तिकतात्पर्यटीका

व्यपदेश इति सम्बन्धिना सम्बन्धान्तरस्य विशेषणम्, पुरुषो व्यपदिश्यते राज्ञ इत्यनेनेति । गोर्गोत्वानुवृत्तिप्रत्यया इति, पूर्वमनुवृत्तप्रत्ययमात्रं पक्षीकृतम्, इह तु गोर्गोत्वानुवृत्तिप्रत्यय इत्यपौनरुक्त्यम् ।

(ग)कीर्तिता इति, पदार्थलिङ्गं विवक्षितमनन्तरत्वात (घ)अन्यत्र यथालिङ्गं प्रत्यय इति (ङ)नपुंसकमनपुंसकेनेति नपुंसकत्वं नाऽऽशङ्कनीयमिति ॥ ६१ ॥

इति मिश्रश्रीवाचस्पतिविरचितायां न्यायवार्तिकतात्पर्यटीकायां
द्वितीयाध्यायस्य द्वितीयमाह्निकम् ।
द्वितीयोऽध्यायः समाप्तः ॥

वृत्तिः

समानाकारबुद्धिजननयोग्यधर्मविशेषो नित्यानेकसमवेतरूपोऽर्थ इत्यपि वदन्ति । इदं तु बोध्यम् । एवं सत्याकृत्यविषयको गवादिपदान्न शाब्दबोधः अनुभवबलेन

(क) 'विशेषवत्' इति क-ख-वार्त्तिक-पाठः । तत्र धृतं पाठान्तरं तु गृहीतम् ।

(ख) अत्र क-ख-वार्त्तिक-पुस्तक-सम्पादकैः तदीयादर्शपुस्तककाल एवमुल्लिखितः—

अत्र प्रथमादर्शपुस्तके लिपिकालो लिखकेन एवंरूपेण लिखितः । "इत्याचार्यश्रीउद्द्योतकरकृतौ द्वितीयोऽध्यायः समाप्तः ॥ शुभमस्तु ॥ संवत् १६०० शाके १४६५ विरोधकृतनामसंवत्सरे पुस्तक लिषितं वाराणसिमध्ये लिषायितं ब्राह्मण लिखितं धर्मदास कायस्थ ॥ मास माघवदी एकादशी ॥ श्रीविश्वेश्वर-स्थानात् ॥ स्रि-(श्री) साहि आलमराज्ये ॥ प्रवर्तमाने ॥"

(ग) ख-पुस्तके 'कीर्तित इति । यथा लिङ्गम्' इति । क-पुस्तके 'कीर्तिता इति यथालिङ्गम्' मुद्रितम् इति । क-पुस्तकधृतपाठान्तरं तु गृहीतम् ।

(घ) अन्यत्रेति व्यवहितस्थान इत्यर्थः ।

(ङ) नपुंसकमनपुंसकेनैकवच्चान्यतरस्याम्' इति (पा० १,२,६९ सू०) ।

वृत्तिः

तथैव कार्यकारणभावकल्पनात्, अन्यथा लाघवाद्गोपदस्य गोत्वविशिष्टे शक्तिरेव स्यादिति ॥ ६९ ॥

समाप्तं शब्दशक्तिपरीक्षाप्रकरणम्, विभागपरीक्षाद्वारकं साङ्गप्रमाणपरीक्षणं नाम द्वितीयाध्यायस्य द्वितीयमाह्निकं च ।

इति श्रीविश्वनाथन्यायपञ्चाननभट्टाचार्यकृतायां न्यायसूत्रवृत्तौ द्वितीयाध्यायवृत्तिः समाप्ता ॥

द्वितीयाध्याये १ आह्निके ६८ सूत्राणि । २ आह्निके च ६८ सूत्राणि(क) । मिलित्वा १३६ सूत्राणि ॥

(क) 'द्वितीयाध्याय' इत्यादिराह्निकाध्याय-सूत्र-संख्यागणनापरो भागः आदर्शपुस्तके वृत्तिशीर्षक उपलभ्यमानोऽपि 'इति श्रीविश्वनाथ-न्यायपञ्चानन-भट्टाचार्य-कृतायां न्यायसूत्र-वृत्तौ द्वितीयाध्याय-वृत्तिः समाप्ता' इत्यतः परं मुद्रिततया पुस्तकान्तरेऽनुपलब्धेश्च अन्यकृतमिदं योजनमिति निश्चीयते । तेन द्वितीयाह्निके न्याय-सूचीनिबन्धाद्यनुसारेण प्राप्तः सूत्रसंख्याङ्कः ६९ इत्येव निवेशितः । अत्र ६८-संख्याङ्कनिवेशस्तु 'विनाशकारणानुपलब्धेश्चावस्थाने तन्नित्यत्वप्रसङ्गः' (सू० ३७।२।२) इति तृतीयाध्यायद्वितीयाह्निकगत-२३९-सूत्रमेवात्र भाष्यकृता पठितमिति वृत्तिकाराभिप्रायावधारणेन, 'द्विविधस्यापि हेतोरभावादसाधनं दृष्टान्तः' (सू ४३) इत्यस्य सूत्रत्वेनापरिगणनया वा प्रसूत इति सर्वं चतुरस्रम् ।

न्यायदर्शनम्

—:०:—

तृतीयोऽध्यायः

प्रथमाह्निकम्

—:०:—

न्यायभाष्यम्

परीक्षितानि प्रमाणानि, प्रमेयमिदानीं परीक्ष्यते। तत्राऽऽत्मादीत्यात्मा विविच्यते, किं देहेन्द्रिय-मनो-बुद्धि-(१)वेदनासङ्घातमात्रमात्मा आहोस्वित् तद्व्यतिरिक्त इति।

न्यायवार्त्तिकम्

आनन्तर्यात् प्रमेयपरीक्षा। यद्विषयोऽहङ्कारः संसारं प्रतनोति यद्विषयं च तत्त्वज्ञानं संसार-निवृत्तिहेतुर्भवति तदानन्तर्यात् परीक्ष्यते। तत्राऽऽत्मादीत्यात्मा विचार्यते।

न्यायवार्त्तिकतात्पर्यटीका

अत्र भाष्ये परीक्षितानि प्रमाणानि प्रमेयमिदानीं परीक्ष्यत इति वृत्तानुकीर्तनं प्रमेय-परीक्षां वर्तिष्यमाणां प्रति वृत्तायाः प्रमाणपरीक्षाया हेतुभावं दर्शयितुम्। प्रमाणेन हि प्रमेयं परीक्ष्यते नान्येन। न च तदपरीक्षितं प्रमेयपरीक्षायै प्रभवति। तस्मात् प्रमाणपरीक्षा हेतुः हेतुमती प्रमेयपरीक्षेति। द्वादशविधं प्रमेयम्, तत् कस्मात् प्रथमत आत्मैव परीक्ष्यते न प्रमेयान्तर-मित्यत आह—तत्राऽऽत्मादीत्यात्मा (क)विचार्यत इति। आत्मैव हि प्रमेयेषु प्रथममुद्दिष्टो लक्षितश्चेति तदनुरोधादात्मैव प्रथमं परीक्ष्यते न प्रमेयान्तराणीति। अत्र च यद्यपि स्वरूपेणा-त्मन्येव परीक्षां प्रतिजानीते तथाऽपि लक्षणपरीक्षाद्वारेण लक्ष्यपरीक्षणाल्लक्षणपरीक्षैव द्रष्टव्या। यथा चेयमात्मलक्षणपरीक्षा तथोपरिष्टाद्दर्शयिष्यते।

तदेतद्वार्तिककारो व्याचष्टे—आनन्तर्यादिति। किं पुनः प्रयोजनं प्रमेयपरीक्षायाः? न हि निष्प्रयोजनं परीक्षन्ते प्रेक्षावन्त इत्यत आह—यद्विषयोऽहंकार इति। अहंकार इत्यात्मादि-विषयं मिथ्याज्ञानं निर्दिशति। शरीराद्यभेदेनाऽऽत्मदर्शनं खलु संसारं प्रवर्तयतीत्युक्तं द्वितीयसूत्रे। अनेन प्रमेयपरीक्षायाः प्रयोजनवत्त्वं दर्शितम्।

अत्र भाष्यकारेण (ख)विचारपूर्वरूपः संशयो दर्शितः। किं देहेन्द्रियमनोबुद्धिसंघातमात्र-

(१) '-वेदना'पदं वि-टि-पुस्तकयोर्नास्ति।

(क) भाष्ये 'विविच्यते' इति बहुपुस्तकानुसारितया गृहीतम्। (ख) पुंस्त्वमत्र प्रयत्नेनोपपादनीयम्।

न्यायभाष्यम्

कुतः(१) संशयः ? व्यपदेशस्योभयथा सिद्धेः । क्रियाकरणयोः कर्त्रा सम्बन्धस्याभिधानं

न्यायवार्त्तिकम्

किं पुनरस्य विचार्यम् ? किं शरीरेन्द्रियमनोबुद्धिव्यतिरिक्त आहो नेति । न, धर्म्यप्रसिद्धेः—व्यतिरेकाव्यतिरेकावात्मधर्मौ, सति धर्मिणि धर्मौ भवतीति धर्मी चात्राप्रसिद्धः, न चाप्रसिद्धे धर्मिणि धर्मयोर्विचारो युक्तः, तस्माद्धर्म्येव तावत्प्रतिपाद्यतामिति । न, (२)इच्छादिसूत्रादात्मप्रसिद्धेः(२*) इच्छादिसूत्र आत्मसद्भावः प्रतिपादितः ; प्रतिपादितत्वादनन्तरो विचारो युक्त इति । (क)अविप्रतिपत्तेश्च—न कश्चिद्वादी आत्मसद्भावे विप्रतिपद्यते, किन्तु विशेषे विप्रतिपद्यते ; शरीरमात्रमात्मा, बुद्ध्यादय आत्मा, सङ्घात आत्मा, व्यतिरिक्त आत्मेति । इयं च धर्मविशेषविप्रतिपत्तिरप्रतिपन्नात्मसत्त्वानां न युक्तेति युक्तो धर्मविचारः । असत्त्वप्रतिपादकप्रमाणासम्भवाच्च—न चाऽऽत्मासत्त्वप्रतिपादकं प्रमाणमस्तीत्यतश्च सद्भावे न विप्रतिपद्यत इति ।

न्यायवार्त्तिकतात्पर्यटीका

मात्मेति । संशयकारणं चोक्तं व्यपदेशस्येति । यद्यपि वृक्षप्रासादयोरवयविसमुदाययोरन्ययोरेवावयवेन समुदायिना च व्यपदेशस्तथाऽप्यवयव्यभावं समुदायं च समुदाय्यनतिरिक्तं मन्वानस्य परस्योदाहरणं द्रष्टव्यम् ।

तदेतद्वार्तिककार आक्षेप्तुं पृच्छति—किं पुनरस्येति । उत्तरम्—किं शरीरेति । आक्षिपति—नेति । समानधर्मणो धर्मिणो दर्शनात् संशयो न पुनरदर्शनादित्यर्थः । समाधत्ते—नेच्छादिसूत्रेति । इच्छादयो हि कार्यत्वाल्लिङ्गमात्मन इति दर्शितम् । तान्येव तु लिङ्गानि (३)दर्शयन्त्येषितारं (ख)परीक्षन्ते । किं देहेन्द्रियव्यतिरिक्त एषितैभ्यः सिध्यति आहोस्विदभिन्न इति युक्तो विचारः ।

अपि चायमात्मशब्दाभिधेयो धर्मी सर्वतन्त्रसिद्धः केवलमस्य शरीरेण सह भेदाभेदे वादिनां विवाद इत्याह—अविप्रतिपत्तेश्चेति । ननु चाऽऽत्मासत्त्वे परैः प्रमाणान्यजातत्वादीन्युपन्यस्तानि, तत्र कथं न तत्सत्त्वे विप्रतिपत्तिरत आह—असत्त्वप्रतिपादकप्रमाणाभावाच्चेति । वाद्येवासौ न भवति यो धर्मिणि विप्रतिपद्यते । न हि धर्मिणि विप्रतिपद्यमानस्यास्ति किंचित् प्रमाणं सर्वस्य तस्याऽऽश्रयासिद्धेरप्रमाणत्वात् । अभावस्य च भावाधीननिरूपणस्य (४)अत्यन्तासद्भावानिरूपणेनानिरूपणात्(४*) । तस्माद्धर्म्यभाववादी न लौकिको न परीक्षक इत्युन्मत्तवदुपेक्षणीय इति भावः ।

---

(१) अतः परं 'ते' इति ख-पुस्तके अधिकम् । (२) अयमंशः क-पु० नास्ति । (३) 'दर्शयन्त्येषितारं' इति ख-पुस्तक-पाठः, 'दर्शयत्येषितारं' इति क-ख-पु०पाठः । (४) 'अत्यन्तासद्भावानिरूपणात्' ख ।

(क) क-ख-वार्त्तिक-पुस्तकयोः 'च'कारशून्यः पाठः । (ख) 'परीक्ष्यन्ते' इति सम्यक् सम्भाव्यते ।

न्यायवार्त्तिकम्

न, नास्त्यजातत्वादित्येके—नास्त्यात्मा अजातत्वात् शशविषाणवदिति। तत्र नास्त्यात्मेति पदे तावद् व्याहन्येते, नास्तिशब्दसमानाधिकरणोऽयमात्मशब्दो नात्मनोऽसत्त्वं प्रतिपादयति। किं कारणम्? आत्मेति सत्त्वमभिधीयते, नास्तीति तस्य प्रतिषेधः; यच्च यत्र प्रतिषिध्यते तत्तस्मादन्यत्रास्ति, यथा नास्तिना समानाधिकरणो घटशब्दो न घटाभावं प्रतिपादयितुं शक्नोति, अपि तु देशकालविशेषे प्रतिषेधति। नास्ति घट इति देशविशेषे वा प्रतिषेधो गेहे नास्तीति, कालविशेषे वा प्रतिषेध इदानीं नास्तीति(क)प्राङ् नास्ति ऊर्ध्वं नास्तीति।

न्यायवार्त्तिकतात्पर्यटीका

धर्म्यसिद्धिवादिनां प्रमाणमुपन्यस्यति—न नास्तीति। निराकरोति—नास्त्यात्मेति। यत्पुनरपरे समादधुः—

अनादिवासनोद्भूतविकल्पपरिनिष्ठितः।
शब्दार्थस्त्रिविधो धर्मी भावाभावोभयाश्रयः॥

भावाश्रयो यथा नीलमिति अभावाश्रयो यथा शशविषाणमिति उभयाश्रयो यथाऽमूर्त्तमिति। अमूर्त्तं हि भवति विज्ञानं भवति च शशविषाणम्।

तस्मिन् बाह्यानुपादाने साध्येऽस्यानुपलम्भनम्।
तथा हेतुर्न तस्यैवाभावः शब्दप्रयोगतः॥ इति।

सोऽयमात्मविकल्पो बाह्योपादानो न भवतीति। यथा नीलविकल्पो बाह्यनीलोपादानः नैवमात्मविकल्पो बाह्योपादान इत्यर्थः।

तत्रैवं भवान् प्रष्टव्यो जायते किमात्मविकल्पस्य बाह्योपादानत्वमात्रं प्रतिषिध्यते किं बाह्यात्मोपादानत्वम्। पूर्वस्मिन् सिद्धसाधनम्, मा भूदात्मविकल्पो बाह्यनीलाद्युपादानः किं नः छिन्नम्। उत्तरस्मिंस्तु कल्पे क्वायं बाह्यात्मा सिद्धः यदुपादानत्वं विकल्पस्य प्रतिषिध्यते। सिद्धश्चेत् क्वापि नास्यात्यन्ताय प्रतिषेधः। असिद्धश्चेत् कथमप्रतीतस्य निषेधः। प्रतीतो विकल्पे बाह्ये निषिध्यते चैत्र इव गेहे चत्वरतले निषिध्यत इति चेत् एवमपि यत्र प्रतीतस्तत्र न निषिध्यते, यथा भवद्भिरेवोक्तं 'न तस्यैवाभावः शब्दप्रयोगत' इति। बाह्यश्चात्मा विकल्पेन नोपदर्शित इति प्रसक्त्यभावान्न शक्यो निषेद्धुम्। अप्रदर्शितोऽप्यध्यवसित इति प्रसक्त एवेति चेत् ननु विकल्पस्य कोऽयमध्यवसायो नाम? ग्रहणादतिरिक्तः ग्राह्यस्य स्वाकारस्य वा अलीकस्य वा बाह्याध्यारोप इति चेत्, न, बाह्याऽविषया विकल्पा बाह्यमारोपयन्तीति चित्रम्। न हि आरोपविषयारोप्ये अजानन् आरोपयितुमर्हतीत्यसकृदावेदितम्। अपि च अलीकं प्रतीयमानं यथा न निषेद्धुं शक्यं प्रतीयमानत्वादेवमस्य बाह्यत्वमपि। मिथ्यात्वात्प्रतिषिध्यत इति चेत्, तत्किमलीकमपि सत्यं यत्तदुल्लङ्घ्य बाह्यत्वं प्रतिषेद्धुमध्यवसितोऽसि?

(क) 'इति'-शब्दोऽयं लिपिप्रमादागतः सम्भाव्यते।

न्यायवार्त्तिकम्

सर्वश्चायं प्रतिषेधो नानभ्युपगतघटसत्त्वस्य युक्तः। तथा नास्त्यात्मेति किमयं देशविशेषे प्रतिषिध्यते अथ कालविशेष इति। यदि तावद्देशविशेषे (क)प्रतिषेधः स आत्मनि न युक्तः अदेशत्वादात्मनः। न च(१) देशविशेषप्रतिषेधादात्मा प्रतिषिद्धो भवति। अथायं भवतामभिप्रायः शरीरमात्मा न भवतीति, कस्य वा शरीरमात्मा यं प्रति प्रतिषेधः। शरीरे नास्त्यात्मेत्येवं(२) प्रतिषेध इति चेत्? कस्य वा शरीरे आत्मा यं प्रति प्रतिषेधः। क तर्ह्ययमात्मा? न कचिदात्मा। किमयं नास्त्येव? न नास्ति, विशेषप्रतिषेधात्। कथं वाचोयुक्तिः न च शरीरे, न चान्यत्र, न च

न्यायवार्त्तिकतात्पर्यटीका

बाह्यभेदग्रहस्तदध्यवसायो न प्रसञ्जक इति न निषेधगोचरः। न च ज्ञानाकार आत्मा परमार्थसन् बाह्यत्वेनाऽऽरोप्यमाणः प्रतिषिध्यत इति सांप्रतम्, विज्ञानमये हि सर्वथा बाह्यस्याग्रहे तत्समारोपासंभवात्। अत्यन्तासतश्च बाह्यस्य विज्ञानात्मनो ग्रहे तथाविधेनासता विज्ञानात्मना विज्ञानग्राह्येण किमपराद्धं येन तद्ग्राह्यो न स्यादिति विज्ञाननयो दत्तजलाञ्जलिः प्रसज्येत। न चायमात्मा पूर्वापरकालावस्थायी क्षणिकविकल्पाकारो भवितुमर्हति येन तदाकारो बाह्यत्वेन प्रतिषिध्यते। तस्मादन्यत्र दृष्टमन्यत्र समारोप्य प्रतिषिध्यत इति युक्तम्। स च समारोपः कचित् स्वकारणप्रभवः कचित् प्रतिषिध्यते यथेन्द्रियादिदोषादुत्पन्नरजतज्ञानस्य शुक्तिकायां नेदं रजतमिति। कचित् पुनराहार्यो यथा नेह चैत्र इति। तस्मादात्मनो देशकालान्तरे वस्तुनि विकल्पनम्, विज्ञाने चासंभवादत्यन्तासतो न समारोपः, तदभावादात्मन्येव नास्ति, अस्ति चेत् कथमत्यन्ताय निषेधः। तस्मादात्मा नास्तीति पदयोर्व्याघातः। यद्यप्यात्मा नास्तीति पदानि तथाऽपि नास्तीत्यस्यैकपद्यं विवक्षित्वा पदे इति द्विवचनोपपत्तिः। पद्यते गम्यतेऽनेनार्थ इति विवक्षित्वा पदसमुदायोऽपि पदमुच्यते।

यद्यपि घटादीनां देशान्तरादौ निषेधस्तथाऽपि आत्मनोऽत्यन्ताय भविष्यति। न हि प्रतिषेधान्तरधर्ममवश्यं प्रतिषेधान्तरमनुबध्नातीत्यत आह—सर्वश्चायमिति। उपपादितमेतदधस्ताद् यथा नानारोपितप्रतिषेधो यथा चाननुभूतमशक्यमारोपयितुमिति। न कचिदात्मन्यन्याधारत्वमुक्तं स्वातन्त्र्यादात्मनः, सामान्यादयस्तु पिण्डादिपरतन्त्रनिरूपणाः पिण्डाद्याधारा इति पृच्छति—किमयमिति। यन्न कचिदस्ति तदत्यन्तमसद् यथा शशविषाणं तथा चायं तस्मादत्यन्तमसन्निति भावः। उत्तरम्—न नास्तीति। न तावत् न कचिदस्तीति वाक्यमात्मानं स्वरूपेण निषेधति देशरूपविशेषप्रतिषेधात्। शङ्किता आह—कथं वाचोयुक्तिरिति।

(१) 'देशविशेषे प्रतिषेधा-' इति क-ख-पु०-धृतपाठान्तरम्।

(क) 'देशविशेषे प्रतिषिद्धः' इति क-ख-वार्त्तिकपाठः, तत्र धृतं पाठान्तरं तु गृहीतम्।

न्यायवार्त्तिकम्

नास्ति ? (१)एषा वाचोयुक्तिः यद् यथाभूतं तत्तथा निर्दिश्यते, न चायमात्मा क्वचिदपीति तस्मात्तथैव निर्देशः। न च कालविशेषप्रतिषेधोऽपि युक्तः आत्मनि त्रैकाल्यस्यानभिव्यक्तेः—न ह्यात्मनि त्रैकाल्यमभिव्यज्यते नित्यत्वात्। नित्य आत्मेत्येतदुपरिष्टात् 'पूर्वाभ्यस्त'सूत्रे प्रतिपादयिष्यामः। तस्मान्न कालविशेषप्रतिषेधोऽपि। (२)आत्मप्रतिषेधं च कुर्वाणेनाऽऽत्मशब्दस्य विषयो वक्तव्यः। न ह्येकं पदं निरर्थकं पश्यामः। अथापि शरीरादिविषयमात्मशब्दं प्रतिपद्येथाः एवमप्यनिवृत्तो व्याघातः। कथमिति ? नास्त्यात्मेति वाक्यस्य तदानीमयमर्थो भवति शरीरादयो न सन्तीति।

अथ यं भवन्त आत्मानं कल्पयन्ति स नास्तीति ? न वयमात्मानं कल्पयामः। कल्पना हि नामातथाभूतस्य तथाभाविभिः सामान्यात् तद्धर्मारोपेण तत्प्रत्ययविषयत्वम्। न चाऽऽत्मानमेवम्भूतं प्रतिपद्यामहे। यं भवन्त आत्मानं कल्पयन्तीति च ब्रुवाणो भवान् प्रष्टव्यो जायते कथं वयमात्मानं कल्पयाम इति। किं सत्त्वेनाथासत्त्वेन (क) वा। यदि सत्त्वेन, किमसतः सता साधर्म्यं येन कल्पनाविषय आत्मा। आत्मसामान्यं चानात्मनो ब्रुवता आत्माऽभ्युपगतो भवतीति, न ह्यसतः (३)सता सामान्यमस्तीति। अथ शरीरादिविषयमहङ्कारमात्मनि कल्प-

न्यायवार्त्तिकतात्पर्यटीका

उत्तरवाद्याह—एषा वाचोयुक्तिरिति। 'एषा' वक्ष्यमाणार्था। तदर्थमाह—यद् यथाभूतमिति। न हि पदार्थानां सत्ता (ख) देशवत्त्वेन व्याप्ता येन देशवत्त्वं निवर्त्तमानं तां निवर्त्तयेदिति भावः। न च कालविशेषप्रतिषेधोऽपीति। कालान्तरप्रतियोगी एकैकः कालः कालविशेषः, तत्प्रतिषेधोऽप्यात्मन्ययुक्तः। न हि यथा घटादिष्ववच्छेदार्थः कालः तथा नित्य आत्मनि। प्रध्वंसाभाववान् घटः खल्वासीत् न तथा आत्मा, प्रागभाववान् घटो भविष्यति न तथा आत्मा। अतीतप्रागभावोऽनागतप्रध्वंसः घटो वर्तमानः, न च तथा आत्मा। तस्मान्नास्यावच्छेदार्थेन त्रैकाल्यमुपावर्तते। अतीतानागतव्यपवृक्तवर्तमानक्रियाव्यङ्ग्यः कालोऽस्ति सदा नित्यानां यतः अस्त्यात्मा विद्यते व्योमेति। तस्मादवच्छेदकत्रैकाल्याप्राप्तेः न त्रैकाल्यप्रतिषेधः, अतीतानागतव्यपवृक्तक्रियाव्यङ्ग्यस्य च वर्तमानस्याशक्यनिषेधत्वाद् नाऽऽत्मनि कालप्रतिषेध इति स्थितम्। आत्मप्रतिषेधं चेति। आत्मेति हि पदं लोकसिद्धम्, पद्यते ह्यनेन कश्चिदर्थः ; येन न कश्चिदर्थः पद्यते तदपार्थकं भवितुमर्हति।

किमसतः सता साधर्म्यमिति। नहि भवतां सिद्धान्ते सर्वोपाख्यारहितमसत्प्रमेयमपीति भावः। अथ शरीरादेरात्मत्वं कल्पितं निषिध्यते शरीरादयो नाऽऽत्मन इति तत्राऽऽह—आत्मसामान्यं चेति। अथ शरीरादीति। अहङ्कारस्तावत्परमार्थतः शरीरादिविषयः

---

(१) क-ख-वार्त्तिकयोः 'एवैषा' इति पाठः। (२) क-ख-वार्त्तिक-पुस्तकयोः 'आत्मप्रतिषेधं' इति पाठः।
(३) 'सता साधर्म्यमस्तीति' क-ख-पुस्तकयोः धृतं पाठान्तरम्।
(क) अत्र 'वा'कारार्थश्चिन्त्यः। (ख) क-ख तात्पर्य-पुस्तकयोः 'देशबलेन' इति मुद्रितम्।

न्यायवार्त्तिकम्

यित्वा विपर्यस्यति, एवं शरीरादिव्यतिरिक्ताहङ्कारविषयसत्त्वाभ्युपगमादनिवृत्तो व्याघातः। अथ मन्यसे एकपदस्य तावश्यमर्थेन भवितव्यमिति यथा शून्यं तम इति, तन्न व्याघातानिवृत्तेः। शून्यशब्दस्य तावद्यमर्थः यस्य रक्षिता द्रव्यस्य न विद्यते तद् द्रव्यं श्वभ्यो हितत्वाच्छून्यमित्युच्यते। तमःशब्दस्याप्यनुपलब्धिलक्षणप्राप्तानि द्रव्यगुणकर्माणि विषयः, यत्र यत्रासन्निधिस्तेजसस्तत्र तत्र द्रव्यादि तमःशब्देनोच्यते। तमःशब्दश्चानर्थक इति ब्रुवाणः स्वसिद्धान्तं बाधते 'चतुर्णामुपादेयरूपत्वात्तमसः' इति। तस्मान्नानर्थकं पदमिति।

नास्त्यात्मेति चैवं ब्रुवाणः सिद्धान्तं बाधते। कथमिति? रूपं भदन्त नाहं (१)वेदना संस्कारो विज्ञानं भदन्त नाहमिति एवमेतद्भिक्षो रूपं न त्वं वेदना संस्कारो विज्ञानं वा न त्वमिति। त एते स्कन्धा रूपादयोऽहंविषयत्वेन प्रतिषिद्धाः(२)। विशेषप्रतिषेधश्चायं न सामान्यप्रतिषेधः, आत्मानं चानभ्युपगच्छता सामान्यमेव प्रतिषेद्धव्यम्, नाहं नैव त्वमसीति। अथैकशः प्रतिषेधेन समुदायविषयोऽहङ्कार इति, तथाऽपि रूपादिस्कन्धपञ्चकव्यतिरेकेण समुदायो वक्तव्योऽहङ्कारविषयः, तद्व्यतिरिक्तं च समुदायमहङ्कारविषयमभ्युप(३)गच्छता संज्ञा भिद्यते आत्मा समुदाय इति। अथाव्यतिरिक्तम्, एकप्रत्ययो न प्राप्नोत्यहमिति। न हि बहुषु (४) एकशब्दं पश्यामः। न च रूपादिस्कन्धा एकशः समुदिता वा आत्मा इत्यहङ्कारप्रत्ययोऽतस्मिंस्तदिति प्राप्तः। भवतु मिथ्याप्रत्ययः किन्नो बाध्यत इति? कथं न बाध्यते यदा सम्यक्प्रत्ययानुकारिणो मिथ्याप्रत्यया भवन्ति। न चाऽऽत्मानमनभ्युपगच्छता तथागतदर्शनमर्थवत्तायां व्यवस्थापयितुं शक्यम्। न चेदं वचनं नास्ति सर्वाभिसमयसूत्रेऽभिधानात्। तस्मात्

न्यायवार्त्तिकतात्पर्यटीका

स्थूलोऽहं गौरोऽहमिति प्रत्ययात्। तमिमम् आत्मनि कल्पयित्वा विपर्यस्यति तदनुरूपं व्यपदिशति व्यवहरति च। सोऽयं विपर्ययः प्रतिषिध्यते नास्त्यात्मेति। निराकरोति—एवं शरीरादीति। न ह्यहंकारसमारोपविषयसत्त्वमनभ्युपगच्छतः समारोप उपपद्यते। तस्मात् तत् प्रतिषेधतो व्याघात इत्यर्थः। चतुर्णामुपादानरूपत्वात् तमस इति। रूपरसगन्धस्पर्शाश्चत्वारो घटादिरूपेण परिणतास्तेषामुपादानरूपं (क)तम इति उपादीयत इत्युपादानम्। उपादेयरूपत्वादिति क्वचित् पाठः, स तु सुगमः। सोऽयं वात्सीपुत्राणां वैभाषिकाणां सिद्धान्तः, तेन विरोध इत्यर्थः। सुगममन्यत्।

(१) 'वेदना संज्ञा संस्कारो' इति क-ख-पुस्तकद्वयतपाठान्तरम्। (२) 'प्रसिद्धाः' इति क-ख-पु०-द्वयतपाठान्तरम्। (३) '-गच्छतः' इति क-ख-पुस्तकद्वयतपाठान्तरम्। (४) 'एकप्रत्ययं' इति क-ख-पुस्तक-द्वयतपाठान्तरम्।

(क) 'नभ' इति क-ख-तात्पर्यपाठः प्रामादिकः।

न्यायवार्त्तिकम्

नास्त्यात्मेति ब्रुवाणः सिद्धान्तं बाधत इति। तथा "भारं वो भिक्षवो देशयिष्यामि भारहारं च, भारः पञ्चस्कन्धा भारहारश्च पुद्गल इति। यश्चाऽऽत्मा नास्तीति स मिथ्यादृष्टिको भवतीति" सूत्रम्।

योऽप्ययं हेतुरजातत्वादिति अयमपि राश्यन्तरव्यवच्छेदहेतुत्वाद्विरुद्धः। जातमजातमिति च वस्तुधर्मावेतौ। किं पुनर्जातं किं चाजातमिति? यस्य कारणवतः सत्ता तज्जातम्। यस्याकारणवतः सत्ता तदजातम्। किं कारणम्? नञो जन्मप्रतिषेधविषयत्वात्—अयं खलु नञ् प्रवर्त्तमानो जन्मनः प्रतिषेधं करोति नास्य जन्म विद्यत इति। तदिदमजातमित्यात्मनः प्रतिषेधो न भवति यथाऽनुदकः कमण्डलुरिति। अथायं भावप्रतिषेध एवाजातमिति, तथाऽपि प्रतिज्ञाहेत्वोरेकत्वम्। अजातमिति चायं धर्मः, न च धर्मः स्वतन्त्रो युक्तोऽन्यत्र समवायात्, यत्तन्त्रोऽयं धर्मः स आत्मेति विरुद्धः। अथ धर्मोऽस्ति न धर्मीति, तथाऽप्यनिवृत्तो व्याघातः स्वतन्त्रस्य धर्मस्यादर्शनात्। कश्चायमर्थोऽजातत्वादिति? यदि चायमर्थो नास्य जन्मेति (क)ततोऽसिद्धं जन्मवानात्मा। किं पुनरात्मनो जन्म? निकायविशिष्टाभिः शरीरेन्द्रियबुद्धिवेदनाभिरपूर्वाभिरभिसम्बन्धः। अथाजातत्वमकारणकत्वम्, तथा न (१)कश्चिद् बाध्यते। विरुद्धश्च हेतुः अकारणकस्य नित्यत्वादसत्त्वं साधयतो नित्यतामापाद्यत इति विरुद्धो हेतुः। प्रतिज्ञाहेत्वोश्च विरोधः—प्रतिज्ञाया विषयो नास्त्यात्मेति, हेतोर्विषय आत्यन्तिकः सत्ताऽसम्बन्धः, तावेतौ प्रतिज्ञाहेतू असत्सद्विषयत्वाद्विरुद्धौ। एतेन निर्हेतुकत्वाजन्महेत्वनुपादानादकार्यत्वादकारणत्वादित्येवमादयस्तुल्यदोषा इति प्रत्युक्ताः।

यदपीदमुच्यते शशविषाणवदिति, अयमप्यसिद्धो दृष्टान्तः। कथमिति? शशविषाणशब्दस्य सम्बन्धविषयत्वात् सम्बन्धप्रतिषेधो न विषाणप्रतिषेधः। शशविषाणसम्बन्ध उदाहरणं भविष्यतीति? सोऽपि न युक्तः कदाचिद्विषाणेन शशस्य सम्बन्धोपपत्तेः। लोकविरोध इति चेत्—अथ मन्यसे यदि शशे विषाणमस्ति ननु लोको विरुध्यत इति? न विरुध्यते, कार्यकारणभावप्रतिषेधद्वारेण लौकिकप्रवृत्तेः—लोकस्तावत् कार्यं कारणं वा शशस्य विषाणं

न्यायवार्त्तिकतात्पर्यटीका

अथायं भावप्रतिषेध इति, न जन्ममात्रप्रतिषेधोऽपि तु आत्मनो भावः सत्ता प्रतिषिध्यत इत्यर्थः। स्वतन्त्रस्य धर्मस्य समवायादन्यस्य अदर्शनादिति। निकायो देवमनुष्यतिर्यगादीनामनौत्तराधर्येणावस्थितः संघातः तद्विशिष्टाभिरित्यर्थः।

(१) 'किञ्चिद्' इति क-ख-वार्त्तिकधृतपाठान्तरम्।

(क) तत इत्यादि। अत्र यथार्थः पाठ ऊहनीयः।

न्यायवार्त्तिकम्

नास्तीत्येवं प्रतिषेधति। यथा गोर्विषाणस्य च कार्यकारणभावो न चैवं शशस्य विषाणस्य च कार्यकारणभावः। न च कार्यकारणभावप्रतिषेधादसत्त्वम्। न हि यद् यस्य न कार्यं न कारणं तन्नास्ति यथा देवदत्तस्य घट इति। इदं च शशविषाणं नास्तीति ब्रुवाणः प्रष्टव्यः किमयं सामान्यप्रतिषेधोऽथ विशेषप्रतिषेध इति। यदि सामान्यप्रतिषेधः, तन्न युक्तमशक्यत्वात्—शशस्य विषाणं नास्ति इति गवादिविषाणान्यपि शशस्य न सन्तीति प्राप्तम्। एतच्चाशक्यम्। न हि तानि न सन्ति। अथ विशेषप्रतिषेधः—किञ्चिद्विषाणं शशस्य प्रतिषिध्यते यस्य शशो न कार्यम् (१)यच्च शशस्य न कारणमिति? सोऽयं कार्यकारणसम्बन्ध एव प्रतिषिध्यते। कार्यकारणसम्बन्धश्चान्यत्र दृष्ट इह प्रतिषिध्यते इति नात्यन्तासत्त्वप्रतिपादने दृष्टान्तो भवति। एतेन खपुष्पाद्यसत्त्वं व्याख्यातं वेदितव्यम्।

नास्त्यात्माऽनुपलब्धेरिति चेत्? अत्रापि प्रतिज्ञादिदोषो दृष्टान्तदोषश्च पूर्ववत्। यदनुपलब्धेरिति तदप्ययुक्तम्। अनुपलब्धिरसिद्धा प्रत्यक्षादिप्रमाणविषयत्वादात्मनः—प्रत्यक्षेण तावदात्मा उपलभ्यते। कथम्? लिङ्गलिङ्गिसम्बन्धस्मृत्यनपेक्षं विषयस्वभावभेदानुविधाय्यहमिति विज्ञानं रूपादिज्ञानवत् प्रत्यक्षम्। यच्चापि भवान् मुक्तसंशयं प्रत्यक्षं प्रतिपद्यते तस्य कुतः प्रत्यक्षत्वमित्यवश्यं भवता विज्ञानमेव लिङ्गादिसम्बन्धनिरपेक्षं स्वात्मसंवेद्यं प्रतिपत्तव्यम्। अथ मन्यसे अस्त्ययमहंप्रत्ययो न पुनरस्याऽऽत्मा विषयः, हन्त तर्हि निर्दिश्यतां विषयः। रूपादि-

न्यायवार्त्तिकतात्पर्यटीका

कार्यं कारणं वेति। यदि विषाणमवयवस्तदा कारणं यदि तु केशनखादितुल्यत्वेनानारम्भकत्वान्नावयवस्तदा कार्यम्, तस्मात् तत् प्रभवतीति। उक्तमप्यर्थं पुनर्विकल्पयन् पर्यनुयोगार्थमाह—इदं(क) शशविषाणं नास्तीति ब्रुवाण इति। सामान्यप्रतिषेधः विषाणसंबन्धमात्रप्रतिषेध इति। विशेषप्रतिषेधः कार्यकारणभावलक्षणसंबन्धप्रतिषेध इति।

विषयस्वभावभेदानुविधायीति। अहमिति विज्ञानं मानसं विषयस्य आत्मनो यः स्वभावभेदः कर्तृत्वभोक्तृत्वलक्षणः जानेऽहं भुञ्जे इत्यादिस्तदनुविधायि। एतदुक्तं भवति—न केवलमात्मस्वरूपमात्मज्ञानस्य विषयस्तथा सति परसमवेतक्रियाफलशालित्वाभावेनाऽऽत्मनः कर्मत्वाभावेनाकर्मतया तद्व्याप्यज्ञानस्यापि निवृत्तिप्रसङ्गात्। यदा तु धर्मवदात्मविषयं ज्ञानं भवति तदा धर्माणां परसमवेतक्रिया(२)फलशालितया तद्व्याप्तस्य (ख)ज्ञानस्यापि निवृत्तिरिति(२*)।

(१) 'तच्च' इति क-ख-वार्त्तिकपाठः तच्च धृतपाठान्तरं तु गृहीतम्। (२) '-फलभागितया कर्मत्वात् कर्माभावेन ज्ञानातेर्निवृत्तिरिति' इति व-पु० पाठः।

(क) वार्त्तिकगतः 'च'कारो न गृहीतः। (ख) 'ज्ञानस्यानिवृत्ति'रिति 'ज्ञानस्यापि निवृत्तिः' इति वा पाठः सम्भाव्यते।

न्यायवार्त्तिकम्

विषय इति चेत्—अथ मन्यसे रूपादय एवाहङ्कारस्य विषयः ; तथाचोक्तम्—अहङ्कारालम्बनोत्पत्तिनिमित्तत्वादात्मेत्युच्यते इति ; तन्न, असत्त्वात् प्रतिषेधाच्च—प्रतिषिद्धोऽहङ्कारो रूपादिषु 'रूपं नाहम् एवमेतद् भिक्षो रूपं न त्वम्' इति । तस्माद् रूपादयस्तावदहङ्कारस्य विषया न भवन्ति । न चायमहङ्कारो रूपादिषु कदाचिदपि दृष्टः । न हि भवति कदाचित् अहं रूपमहं वेदनादय इति । ननु भवत्यहं गौरोऽहं कृष्ण इति ; न भवतीति ब्रूमः । कथम् ? न ह्येतस्य द्रष्टुः यदेतन्मम रूपं गौरम् एतदहमिति प्रत्ययो भवति, केवलं मतुब्लोपं कृत्वा अहं गौर इति षष्ठ्यर्थं निर्दिशति । एवमेतन्न तत्त्वत इति कुत इति चेत्—अथ मन्यसे मतुब्लोपादयं(क) षष्ठ्यर्थव्यपदेशो न तत्त्वत (१)इति को हेतुरिति ? ममप्रत्ययसमानाधिकरणस्य निर्देशात्—यस्मिन्नर्थे ममप्रत्ययोऽस्य भवति तत्रैवायमहङ्कारोऽपीति ममप्रत्ययसामानाधिकरण्याद् गम्यते मतुब्लोप इति । ममप्रत्ययसमानाधिकरणश्चायमहंप्रत्ययोऽन्यत्वे दृष्टः उपकारकत्वात्—उपकारके वस्तुनि ममप्रत्ययसमानाधिकरणोऽहंप्रत्ययो दृष्टः योऽयं सोऽहमिति । उक्तं चात्र रूपादिस्कन्धेष्वहंप्रत्ययोऽतस्मिंस्तदिति प्रत्यय इति । तदेवमहंप्रत्ययविषयत्वादात्मा तावत् प्रत्यक्षः, अनुमानेनापि यथा आत्मोपलभ्यते तथोक्तमिच्छादिसूत्रे इति । आगमोऽप्यस्त्येव । तान्येतानि प्रमाणानि त्रीण्येकविषयतया प्रतिसन्धीयमानान्यात्मानं प्रतिपादयन्ति । न च प्रमाणान्तरं विप्रतिपत्तिहेतुरस्ति । तस्मादनुपलब्धेरित्यसिद्धो हेतुः ।

सन्दिग्धश्चानुपलब्धेस्त्रिकारणत्वात्—अनुपलब्धिकारणानि त्रीणि उपलब्धा उपलम्भनम् उपलभ्यमिति । तत्रेयमनुपलब्धिर्भवन्ती कस्याभावादिति सन्दिह्यते । यदि ब्रूषे उपलभ्यस्याभावा-

न्यायवार्त्तिकतात्पर्यटीका

जानातिश्चाऽऽत्मधर्मकर्मा आत्मानमपि गोचरयतीति सूक्तं विषयस्वभावभेदानुविधायीति । अहङ्कारालम्बनेति । आलम्ब्यते अनेनेत्यालम्बनं ज्ञानम् अहङ्कारेण च विषयिणा विषयमुपलक्षयति । देशयति—ननु भवत्यहं गौर इति । परिहरति—न भवतीति ब्रूम इति । न व्यपदेशमात्रं देहाद्यव्यतिरिक्तात्मसद्भावसाधनमस्माभिरुक्तं येनानैकान्तिकं भवेत्, अपि त्वनुभवः ; स च न शरीरादिष्विदमो विषयेष्वस्ति, अपि त्वसंभिन्नेदंविषयोऽहंप्रत्ययः शरीराद्यतिरिक्तविषय एवास्ति स चाऽऽत्मा, शरीरादयस्तु मतुब्लोपाद्भेदोपचाराद्वाऽहमा विषयीक्रियन्ते । ममाऽऽत्मेति तु व्यपदेशमात्रं न पुनः शरीरादिष्विव ममकारस्तत्र मुख्यो भेदेनाप्रतिभासनात् । राहोः शिर इतिवत्तु ममकार आत्मनि द्रष्टव्यः । अत एवाऽऽह—ममप्रत्ययेति, न पुनर्ममकारमात्रम् ; तस्मात् सर्वं रमणीयम् । विरुद्धा प्रतिपत्तिर्विप्रतिपत्तिर्बाधितेति यावत् ।

(१) 'इति इह' इति क-ख-वार्त्तिकधृतपाठान्तरम् ।

(क) क-ख-वार्त्तिकपुस्तकयोः 'षष्ठ्यर्थव्यपदेश' इति मुद्रितम् ।

न्यायवार्त्तिकम्

दिति, नन्वयं प्रतिज्ञार्थ एव। न च प्रतिज्ञा प्रतिज्ञां साधयतीत्यनुपलब्धिरहेतुः। या चेयमनुपलब्धिरात्मासत्त्वप्रतिपादनायोपादीयते तस्याः क आश्रयः? यद्यात्मानं प्रतिपद्यसे, व्याहतं भवति आश्रयश्च नास्ति चेति। अथानाश्रयः, कः साधनार्थः? न ह्यनाश्रयो धर्मः साध्यं साधयितुं शक्नोति। अथानुपलब्धिरपि नास्ति, कः साधनार्थोऽनुपलब्धेरिति? न ह्यसाधनं भवितुमर्हतीति। अथ कल्पितस्यानुपलब्धिर्धर्म इति, कथं कल्पितस्येति वाच्यम्—किं सत्त्वेन अथासत्त्वेन। यदि सत्त्वेन, नानुपलब्धिस्तस्य धर्मः। न हि स्थाणोः पुरुषत्वेन कल्पितस्य स्थाणुधर्माः प्रत्यवभासन्ते। अथासत्त्वेन कल्पितस्यानुपलब्धिर्धर्मः, सिध्यत्यनुपलब्धिर्धर्मो वृथा तु कल्पना। किं कारणम्? कल्पनाया अतथाभावात्—कल्पना हि नामातथाभावः, असत्त्वेन चाऽऽत्मा कल्पित इत्यसत्त्वेन नास्ति, असत्त्वेन चेन्नास्ति वृथा कल्पना। किमर्थं चायमात्मा असत्त्वेन कल्प्यते? यदि हेत्वर्थम् उपपन्नो हेतुर्यदर्थमुपात्तः स पुनरर्थो न सिध्यति, न हि यः पुरुषे स्थाणुधर्मानध्यारोप्य हेतुत्वेनापदिशेत् तस्यासौ स्थाणुः स्यादिति। तदेवमप्यनुपलब्धिरप्यहेतुः।

रूपादिस्कन्धवाचकशब्दविषयव्यतिरिक्तविषय आत्मशब्दः रूपादिशब्देभ्योऽन्यत्वे सत्येक-

न्यायवार्त्तिकतात्पर्यटीका

कः साधनार्थ इति कः साधनशब्दस्यार्थः। अथानुपलब्धिरपि नास्तीति। भावरूपो धर्मोऽसति विरुध्यते नासद्रूपः उभयोः समानशीलत्वादित्यर्थः। निराकरोति—कः साधनार्थोऽनुपलब्धेरिति। असत्यास्तुच्छाया अनुपलब्धेः कः साधनत्वरूपोऽर्थ इत्यर्थः। शङ्कते—अथ कल्पितस्येति। नानुपलब्धिस्तुच्छा किं तु तत्त्वान्तरं सत्; सा तु कल्पिताश्रयतया नाऽऽश्रयासिद्धेत्यर्थः। एतद्विकल्प्य निराकरोति—कथं कल्पितस्येति। न हि तात्त्विक्यनुपलब्धिः परमार्थसदाश्रया कल्पितसत्त्वस्य धर्मिणो धर्मो भवितुमर्हतीत्यर्थः। द्वितीयं कल्पमाशङ्कते—अथासत्त्वेनेति। निराकरोति—सिध्यत्यनुपलब्धिरिति। असत्त्वेन कल्पितस्य पारमार्थिकं सत्त्वमनुमन्तव्यम् असत्यसत्त्वकल्पनाया अयोगात्। तथा च भावाश्रयाऽनुपलब्धिस्तात्त्विकी सिध्यत्येव। यदर्थं त्वसौ तदेव पारमार्थिकम् असत्त्वमात्मनो न सिध्यति असत्त्वस्य काल्पनिकत्वाभ्युपगमाद्भवद्भिरित्यर्थः। अपि चायमसत्त्वेन सन्तमात्मानं कल्पयित्वाऽत्यन्तासत्त्वमनुपलब्धेरस्य साधयितुमध्यवसितः। (क)तच्चास्य सधर्मेण अनुपलब्ध्या न सिध्यति। न जातु स्थाणुधर्मेण कल्पितेन पुरुषे स्थाणुत्वं पारमार्थिकं शक्यं साधयितुमित्याह—किमर्थं चायमात्मेति।

रूपादिशब्देभ्योऽन्यत्वे सतीति। यदि हि पदत्वादित्युच्येत रूपादिशब्दैरनैकान्तिकं

(क) 'तच्चान्यमद्धर्मेण' इति व-पुस्तके अस्फुटः पाठः। 'तच्चास्य असधर्मेण' इति त्वत्र यथार्थः पाठो भवितुमर्हति।

न्यायवार्त्तिकम्

शब्दत्वाद् (१)घटशब्दवदिति। एतेनाहंप्रत्ययो व्याख्यातः। असिद्धो दृष्टान्त इति चेत्? अत्रोक्तम्—यथा गुणव्यतिरिक्तो गुणीति। तमःशब्दादिभिरनैकान्तिक इति चेत्—अथ मन्यसे यथा रूपादिशब्देभ्योऽन्यत्वे सत्येकपदत्वे च तमःशब्दस्यार्थान्तराविषयत्वम् एवमात्मशब्दस्यापीति, तन्न, विरोधात्—तमःशब्दो निर्विषय इति ब्रुवाणः सिद्धान्तं बाधते उपादायरूपत्वात्तमस इति। न चैतदस्माभिरभ्युपगम्यते तमःशब्दो निर्विषय इति। तमःशब्दस्य सविषयत्वे सूत्रव्याघातः(क) द्रव्यगुणकर्मनिष्पत्तिवैधर्म्यादभावस्तम इति? न सूत्रार्थापरिज्ञानात्—निराकृततेजःसम्बन्धीनि द्रव्यगुणकर्माणि तमःशब्देनाभिधीयन्ते तस्मान्न सूत्रव्याघातः।

अपरे तु जीवच्छरीरं निरात्मकत्वेन पक्षयित्वा सत्त्वादित्येवमादिकं हेतुं ब्रुवते; तन्न, विकल्पानुपपत्तेः। निरात्मकमिति कोऽर्थः। यदि तावदात्मनोऽनुपकारकमिति, न दृष्टान्तोऽस्ति। न हि किञ्चिदात्मनोऽनुपकारकमस्ति। अथाऽऽत्मप्रतिषेधः, (ख) आत्मा शरीरं न भवति। कस्याऽऽत्मा शरीरम्? उत्तरपदविषयत्वाच्च निसः किं सात्मकमिति वाच्यम्। न ह्यसत्युत्तरपदे

न्यायवार्त्तिकतात्पर्यटीका

स्यादत उक्तम्—रूपादिशब्देभ्योऽन्यत्वे सतीति। (२)यद्येकपदत्वादित्युच्येत रूपादिशब्दैरनैकान्तिकं स्यादत उक्तं रूपादिशब्देभ्योऽन्यत्वे सतीति(२*)। (ग)तथाऽपि रूपविज्ञानवेदनासंज्ञासंस्कारा इत्ययं शब्दो रूपादिवाचको यः शब्दो रूपं वेदना संज्ञा विज्ञानमित्यादिस्ततो(३)ऽन्योऽसमस्तादन्यः समस्त इति तेनानैकान्तिकत्वमत उक्तमेकेति। तेन रूपादिवाचकपदव्यतिरिक्तं यदेकपदं तद् रूपादिव्यतिरिक्तस्य वाचकम्, यथा घटादिपदम्; तथा चाऽऽत्मपदं तस्मात्तदपि तथेति। एतेनेति, आत्मशब्दसाध्यत्वेनैव असंभिन्नेदंप्रत्ययः अहंप्रत्ययो व्याख्यातः। शङ्कते—असिद्ध इति, घट इति रूपादय एवैकोदकाहरणावच्छिन्ना उच्यन्ते, न तु रूपाद्यतिरिक्तो घटो नाम कश्चिदस्तीत्यर्थः। निराकरोति—अत्रोक्तमिति। (घ)उपादायरूपत्वात्तमस इति, यथा दाय इति देयमुच्यते एवमुपादायेत्यनेनोपादेयमिति। सविषयत्वं सद्विषयत्वं सिद्धान्तिनोक्तमिति मन्वानश्चोदयति—तमःशब्दस्य सविषयत्व इति। यद्यप्यभावविषयत्वेऽपि न निर्विषयत्वं तथाऽपि देशकाभिमानमनुविदधानः परिहरति—न सूत्रार्थेति।

---

(१) 'घटादिवदि'ति क-ख-वार्त्तिकधृतपाठान्तरम्। (२) अयमंशः व-पु० नास्ति। (३) 'अन्य' इति व-पु० नास्ति।

(क) वैशेषिकदर्शनम् (सू१९, आ२, अ५, काशी, 'चन्द्रप्रभा प्रेस'संस्करणम्) क-ख-वार्त्तिकयोः '—वैधर्म्याद्भावस्तमः' इति मुद्रितम्। (ख) आत्मप्रतिषेध इत्यस्य अन्योन्याभावाभिप्रायतां स्फुटयितुमाह—आत्मेति। भवति इत्यतः परम् इति पदं योजनीयम्।' (ग) 'तथापि रूपादिवाचको यः शब्दो रूपं वेदना संज्ञा विज्ञानमित्यादिः ततोऽन्यः असमस्तादन्यः रूप-विज्ञान-वेदना-संज्ञा-संस्काराः इत्ययं शब्दः समस्त इति तेनानैकान्तिकत्वमत उक्तम् एकेति' इति पाठोऽत्र मुकल्पः, लिपिप्रमाद एव तु पदानां स्थानविपर्यये बीजमिति सम्भाव्यते। (घ) क-ख-तात्पर्यपुस्तकयोः 'उपादेयरूपत्वात्' इति मुद्रितम्।

न्यायवार्त्तिकम्

निरः प्रयोगं पश्यामः यथा निर्मशकमिति। अथ शरीरे आत्मा प्रतिषिध्यते, सिद्धं साधयति। कस्य वा शरीरे आत्मा विद्यते। अथ शरीरमात्मसम्बन्धि न भवतीति, पुनर्दृष्टान्तो नास्तीति। सर्वे चैते विशेषप्रतिषेधाः, विशेषप्रतिषेधाच्च सामान्यमभ्युपगम्यते। एवं च सति यत् प्रतिषेद्धव्यं तदनुज्ञातं भवति। अथाऽऽत्मशब्दोऽनित्यविषयो वर्णात्मकत्वात्, तथाऽपि नित्यशब्देनानैकान्तिकम्। शरीरादीनामात्मशब्दत्वात् सिद्धसाधनम्। अथ शरीरादिव्यतिरिक्तविषय आत्मशब्दोऽनित्यविषयः, तथाऽपि शरीरादिव्यतिरिक्तविषयाभ्युपगमे विरोधः: तदेवं यथा यथा आत्मासत्त्वं (१)विचार्यते तथा तथा न्यायं न सहत इति।

परार्थाश्चक्षुरादयः सङ्घातत्वात् शयनासनादिवदिति। सङ्घातान्तरार्था इति चेत्—अथ मन्यसे सत्यं सङ्घाताः परार्था भवन्ति, ते तु सङ्घातान्तरार्थाः यथा शयनादय इति? न, सङ्घातस्याभ्युपगमे विरोधात्। न हि रूपादिस्कन्धव्यतिरिक्तं सङ्घातं भवन्तः प्रतिपद्यन्ते। न चासति सङ्घातान्तरे सङ्घातानां सङ्घातान्तरार्थता भवति। अथ प्रतिपद्यते, व्याहतं भवति। अनिष्टप्रसङ्ग इति चेत्—अथ मन्यसे न मया सङ्घातान्तरं प्रतिपद्यते अपि त्वस्मिन् हेतौ सतीदमनिष्टं भवति परार्थस्य सङ्घातान्तराविनाभावित्वात्, यावत्परार्थं भवति तत्सर्वं सङ्घातान्तरार्थं दृष्टमिति? न विरोधात् अनभ्युपगमाच्च—न हि कश्चिद्व्यतिरिक्तात्मवादिनः सङ्घातः सङ्घातस्य (क)परार्थं करोति, तदुभयपक्षे संप्रतिपन्ने नानिष्टापादनं दृष्टमिति। विरोधाच्च—यदि विवक्षितार्थ-

न्यायवार्त्तिकतात्पर्यटीका

पुनर्दृष्टान्तो नास्तीति। पूर्वमात्मानुपकारकत्वे साध्ये दृष्टान्ताभाव उक्तः पुनरिहोच्यत इत्यर्थः। देशयति—अथाऽऽत्मशब्द इति। यो यो वर्णात्मकः स सर्वोऽनित्यविषयो यथा घटादिशब्दः; तथा चानित्यत्वे सति तद् विज्ञानमेव स्यात् नाऽऽत्मेति फलत आत्मप्रतिषेध इत्यर्थः। एतदपि दूषयति—तथाऽपीति। नित्यशब्दस्तावन्नित्यमाचष्टे अन्यथा न तत्प्रतिषेध इत्यर्थः। शङ्कते—अथेति। सिद्धसाधननिवृत्त्यर्थं शरीरादिव्यतिरिक्तविषय इति। निराकरोति—तथाऽपीति। रूपादिस्कन्धपञ्चकातिरिक्तं नास्तीति भवतां राद्धान्तस्तदतिरिक्ताभ्युपगमेन विरुध्यत इत्यर्थः।

यदि विवक्षितार्थव्यतिरेकेणेति। वादिनो हि (२)शरीरेन्द्रिय-बुद्धिवेदनासंघातस्य पारार्थ्यं विवक्षितम्, परार्थाश्चक्षुरादय इति ब्रुवतो न संघातपरार्थत्वं तच्चह पक्षधर्मताबलात् सिध्यदस्याभिप्रायेण व्याप्यते न तु साक्षाद्विवक्षितम्, तद्वदिहाभिप्रायव्याप्तं

(१) 'प्रतिज्ञायते' इति क-ख-वार्त्तिकपुस्तकपाठान्तरम्। (२) 'शरीरेन्द्रियमनोबुद्धि-' इति ख-पुस्तकपाठः।

(क) 'परस्यार्थं करोति' इति क-ख-वार्त्तिकपुस्तकशोधितपाठः।

न्यायभाष्यम्

व्यपदेशः । स द्विविधः, अवयवेन समुदायस्य—मूलैर्वृक्षस्तिष्ठति, स्तम्भैः प्रासादो ध्रियत इति। अन्येनान्यस्य व्यपदेशः—परशुना वृश्चति, प्रदीपेन पश्यति। अस्ति चायं व्यपदेशः चक्षुषा पश्यति मनसा विजानाति बुद्ध्या विचारयति शरीरेण सुखदुःखमनुभवतीति। तत्र नावधार्यते किमवयवेन समुदायस्य देहादिसङ्घातस्य, अथान्येनान्यस्य तद्व्यतिरिक्तस्य वेति ॥

न्यायवार्त्तिकम्

व्यतिरेकेणानुमानस्याविवक्षितमपि विषयः, नन्वेतस्यां कल्पनायां सर्वमनुमानं व्याहन्येत। कथमिति ? यदिष्टमनुमानत्वेन तदपि नानुमानं प्राप्नोति। यथा शब्दानित्यत्वे कृतकत्वम्। किं कारणम् ? यथेदं कृतकत्वमनित्यत्वेनाविनाभूतमनित्यत्वं साधयति एवं दुःखशून्यानात्मकत्वमपि साधयति दुःखशून्यानात्मकत्ववदश्रोत्रग्राह्यत्वमपि साधयिष्यति। ततश्च न श्रोत्रग्राह्यः शब्दः कृतकत्वाद् घटवदिति। अथानुमानेन बाध्यते अयं प्रतिज्ञार्थ इत्यतो न हेतुः, नन्वयमपि सङ्घातान्तरार्थश्चक्षुरादय इत्यागमेनानुमानेन च बाध्यते। यच्चापि भवान् सङ्घातान्तरं प्रतिपद्यते तत्राप्यनिवृत्तं सङ्घातत्वमिति तेनापि (क)सङ्घातान्तरार्थं भवितव्यमिति; एवं चानवस्था। न चैनां शक्तः कश्चित् प्रतिपादयितुमिति यत एषा निवर्त्तते तदसंहतम्। अथासंहतं नैवास्ति ? असंहतानभ्युपगमे सङ्घातानुपपत्तेर्व्याघातः—न हि कदाचिदसंहतप्रतिषेधे सङ्घातः सिध्यति। अथानुमानं नैवास्तीति परः प्रतिपद्यते ? स कथं न प्रतिपद्यत इति प्रष्टव्यः। यद्यनुमानबाधितत्वादनुमानं नास्ति, अतिन्यायः—अनुमानेन च बाध्यते अनुमानं च नास्तीति। अतीन्द्रियार्थाधिगतिश्च कथं—यद्यनुमानं नास्ति कथमतीन्द्रियार्थो गम्यते ? आगमादतीन्द्रियार्थाधिगतिर्भविष्यतीति न युक्तम् आगमव्यतिरिक्तविषयत्वात्। कस्मादनुमानस्याऽऽगमव्यतिरिक्तो विषयः ? यथा स्तनयित्नुशब्दस्य हेतौ, न हि तत्र प्रत्यक्षं नाऽऽगम इति।

तदेवमात्माऽस्तीति समधिगतम्। तस्मिन् व्यपदेशस्योभयथा सिद्धेः संशयः। कः पुनरयं व्यपदेशः ? क्रियाकरणयोः कर्त्रा सम्बन्धाभिधानं व्यपदेशः—दर्शनं क्रिया करणं चक्षुः, करणस्य क्रियायाः कर्त्रा सम्बन्धः चक्षुषा पश्यतीति। स चायं व्यपदेशो द्वेधा भवति अवयवेन

न्यायवार्त्तिकतात्पर्यटीका

विवक्षितमारोप्य (१)यद्यनन्वयविरोधौ दृश्येते ततः सर्वानुमानोच्छेदः। एतच्चेश्वरसिद्धौ निपुणतरमुपपादयिष्यते। अथानुमानेन बाध्यत इति। संघातत्वानुमानमेवाभिप्रेतविपरीतसंघातपरार्थत्वपक्षो व्यवस्थालक्षणानिष्टप्रसङ्गरूपतर्कसहायमस्य बाधकं ...दिसत्त्वानुमानं वेति।

(१) 'यद्यन्वयविरोधौ' इति ख०।

(क) 'सङ्घातान्तरार्थेन' इति भवितुमर्हति।

न्यायभाष्यम्

अन्येनायमन्यस्य व्यपदेशः। कस्मात् ?

दर्शनस्पर्शनाभ्यामेकार्थग्रहणात् ॥१॥

दर्शनेन कश्चिदर्थो गृहीतः स्पर्शनेनापि सोऽर्थो गृह्यते—यमहमद्राक्षं चक्षुषा तं स्पर्शनेनापि स्पृशामीति, यं चास्पार्क्षं स्पर्शनेन तं चक्षुषा पश्यामीति। एकविषयौ

न्यायवार्त्तिकम्

समुदायस्य, यथा मूलैर्वृक्षस्तिष्ठतीत्यत्र समुदायशब्देनावयवी वृक्षोऽभिधीयते इति। एकदेशेन चैकदेशान्तराणाम्—यद्भिन्नजातीयैरारभ्यते तत्र ह्येकदेशदर्शनादेकदेशान्तराणि प्रतिपद्यन्ते, तत्रापि च व्यपदेशः स्तम्भैः प्रासादो ध्रियत इति। अन्येन चान्यस्य व्यपदेशः परशुना वृश्चतीति, परशुः करणं वृश्चतिः क्रिया, ताभ्यां कर्त्तुरभिसम्बन्धः परशुना वृश्चतीति। अस्ति चायमिहापि व्यपदेशः चक्षुषा पश्यतीति। किमन्येनान्यस्य व्यपदेशः, अथवा अवयवेनाप्यवयविनः अथैकदेशेनैकदेशान्तराणामिति ? क्रियाकरणकर्मणां वा कर्त्रा सम्बन्धो व्यपदेशः, चक्षुषा वृक्षं पश्यतीति, क्रियाकरणकर्मणां कर्त्रा सम्बन्धः, अस्ति चायमिहापि व्यपदेशः शरीरेण सुखदुःखमनुभवति। तत्र न ज्ञायते किं तत्त्वमिति।

अन्येनायमन्यस्य व्यपदेश इति तत्त्वम्। कथम् ?

दर्शनस्पर्शनाभ्यामेकार्थग्रहणात्। दृश्यतेऽनेनेति दर्शनं चक्षुः, स्पृशत्यनेनाऽऽत्मा स्प्रष्टव्यमर्थमिति स्पर्शनं त्वगिन्द्रियमुच्यते। दर्शनेन दृष्टमर्थं स्पर्शनेन प्रत्यभिजानाति—यमद्राक्षं तं स्पृशामि यमस्प्राक्षं तं पश्यामीति एकविषयावेतौ प्रत्ययौ प्रतिसन्धीयेते। प्रतिसन्धानं च नाम स्मृत्या सहैकविषयत्वम्। दर्शनस्पर्शनप्रत्यययोर्घटादिविषयत्वादसम्बन्ध इति चेत्—अथ मन्यसे यावेतौ दर्शनस्पर्शनप्रत्ययौ तौ घटादिविषयौ न व्यतिरेकमात्मनो व्यधिकरणत्वाद् गमयत इति ? न सूत्रार्थापरिज्ञानात्—दर्शनस्पर्शनप्रत्ययावेककर्तृकाविति सूत्रार्थः। यदि चानुषक्तं गुणव्यतिरेकमप्येकविषयत्वेन साधयति न कश्चिद्दोषः। गुणव्यतिरेकोऽसिद्ध इति चेत् ? उक्तमेतद् यथा गुणव्यतिरिक्तो गुणीति। कार्यकारणभावात् प्रतिसन्धानमिति चेत् ? उक्तोत्तरमेतदिच्छादिसूत्र इति। अकार्यकारणभूतानां च (१)प्रतिसन्धानेऽनेकान्तः।

न्यायवार्त्तिकतात्पर्यटीका

एकदेशेन च एकदेशान्तराणामिति ब्रुवतो वार्तिककारस्य गृहप्रासादादयो नावयविनो विजातीयानामनारम्भकत्वादित्यभिमतम्।

दर्श—णात् (सू० १) ॥ अकार्यकारणभूतानां चेति। यथा हि कालाक्षी गामीक्षितवतः

(१) 'प्रतिसन्धानेनानेकान्तः'—क-ख-पुस्तपाठान्तरम्।

न्यायभाष्यम्

चेमौ प्रत्ययावेककर्तृकौ प्रतिसन्धीयेते, न च सङ्घातकर्तृकौ, नेन्द्रियेणैककर्तृकौ। तद्

न्यायवार्त्तिकम्

भावस्य भवित्रपेक्षत्वाद्वेति सूत्रार्थः—दृष्टिर्दर्शनं स्पृष्टिः स्पर्शनमिति भावरूपावेतौ प्रत्ययौ भवितारं प्रतिपादयतः। न हि भावमनाधारं पश्यामः। उत्पत्तिवत् कर्माधारो भविष्यतीति न युक्तम्, कर्मण्यसति दर्शनात्—असत्यपि कर्मणि स्मृतेर्भावो भवतीति। न च विनष्टं कर्म भावस्याऽऽधारो युक्तः। ततो यदाधारो भावः स आत्मा। दर्शनस्पर्शनग्रहणयो रूपादिविषयत्वान्न घटादिविषयत्वम्? न, रूपस्पर्शानुपलब्धौ तद्विशिष्टप्रत्ययदर्शनात्—यदाऽयमनुपलभ्यमानरूपादिकं वस्तूपलभते तदाऽस्य तद्विशिष्टः प्रत्यय उपजायते यथा नीलाद्युपरिस्थित-स्फटिके प्रत्ययो रूपाद्यनुपलब्धौ भवति, रात्रौ च बलाकायां शुक्लादिरूपाग्रहणात् पक्षिप्रत्ययः। तस्माद्रूपस्पर्शव्यतिरिक्ते घटप्रत्ययः। प्रतिसन्धानाच्च व्यतिरिक्तनिमित्तत्वम्—न हि नानाविषयौ प्रत्ययौ प्रतिसन्धीयेते, अस्ति च प्रतिसन्धानं यमद्राक्षं तं स्पृशामीति यमस्प्राक्षं तं पश्यामीति, तस्मादेकविषयत्वम्। सङ्घातकर्तृकौ दर्शनस्पर्शनविषयौ प्रत्ययौ भविष्यत इति न युक्तं सङ्घातस्य नानात्वाबाधनात्—सङ्घातः संहन्यमानतन्त्रो भवतीति संहन्यमानं चानेकम्। अनेकं च प्रतिसन्धानप्रत्ययकारणं न युक्तम्, नानाकर्तृकाणां नानाविषयाणां च प्रत्ययानामप्रतिसन्धानात्। एकेन्द्रियप्रत्ययाविति चेत्—अथ मन्यसे यदेवेन्द्रियं दर्शनप्रत्ययस्य कारणं

न्यायवार्त्तिकतात्पर्यटीका

स्वस्तिमत्यां गवि भवति प्रतिसंधानं न चैतयोरस्ति कार्यकारणभाव इत्यर्थः(क)। भाष्यम्—

वृत्तिः

तरुप्रभृतितुल्यता भवति यत्कृपामन्तरा
यदीयकरुणाकणात् तरति मोहजालं नरः।
विधाय हृदयाम्बुजे रुचिरवाक्प्रचाराय तां
नमामि परदेवतां सततमेव वाणीमहम् ॥ १ ॥

अथावसरतः प्रमेयेषु परीक्षणीयेषु प्रथमोद्दिष्टमात्मादिप्रमेयषट्कं तृतीये परीक्षणीयम्, तेनाऽऽत्मादिषट्कपरीक्षैवाध्यायार्थः। तत्राऽऽत्मादिचतुष्कपरीक्षा प्रथमाह्निकार्थः, तत्र च नव प्रकरणानि, तत्राऽऽदाविन्द्रियभेदप्रकरणम्। तत्रेन्द्रियं ज्ञानवन्न वेति संशये करणत्वेन सिद्धानामिन्द्रियाणां चैतन्यमस्तु लाघवात्, तथा चाऽऽत्मशब्दस्य नानार्थत्वादिन्द्रियाणामभौतिकत्वाद्वा न साङ्कर्यमितीन्द्रियचैतन्यवादिनः। तन्निराकरणाय सूत्रम्—(दर्शनेति)

(क) अतःपरं क-ख-तात्पर्यपुस्तकयोः 'स्वं चैतन्यं त्वात्मनः स्वातन्त्र्यात् सत्यव्यवस्थानाच् चक्षुरादिवदिति हेतुः, प्रमाणसंशयविपर्ययस्मृतिषु योऽनुस्यूत एक उपलभ्यते स चेतनः स्वातन्त्र्यात् सत्यव्यवस्थानात्। यस्त्वचेतनो

न्यायभाष्यम्

योऽसौ चक्षुषा त्वगिन्द्रियेण चैकार्थस्य (१)ग्रहीता भिन्ननिमित्तावनन्यकर्तृकौ प्रत्ययौ समानविषयौ प्रतिसन्दधाति सोऽर्थान्तरभूत आत्मा। कथं पुनर्नेन्द्रियेणैककर्तृकौ? इन्द्रियं खलु (२)स्वस्वविषयग्रहणमनन्यकर्तृकं प्रतिसन्धातुमर्हति नेन्द्रियान्तरस्य विषयान्तरग्रहणमिति। कथं न सङ्घातकर्तृकौ? एकः खल्वयं भिन्ननिमित्तौ स्वात्मकर्तृकौ प्रत्ययौ प्रतिसंहितौ वेदयते न सङ्घातः। कस्मात्? अनिवृत्तं हि सङ्घाते प्रत्येकं विषयान्तरग्रहणस्याप्रतिसन्धानमिन्द्रियान्तरेणेवेति ॥ १ ॥

न विषयव्यवस्थानात् ॥ २ ॥

न देहादिसङ्घातादन्यश्चेतनः। कस्मात्? विषयव्यवस्थानात्। व्यवस्थितविषयाणीन्द्रियाणि, चक्षुष्यसति रूपं न गृह्यते सति च गृह्यते। यच्च यस्मिन्नसति न

न्यायवार्त्तिकम्

तदेव स्पर्शनप्रत्ययस्यापीति? तन्नाविषयत्वात्—चक्षुः खलु स्वविषयं प्रतिसन्धातुमर्हतीति यमद्राक्षं स एवायमर्थ इति, न पुनः स्पर्शमिन्द्रियान्तरविषयत्वादिति। इन्द्रियान्तरवैयर्थ्यं वा एकैकमेवेन्द्रियमनेकविषयग्रहणं प्रतिसन्धत्ते इन्द्रियान्तरोत्पादो व्यर्थः ॥ १ ॥

न विषयव्यवस्थानात्। चेतनानीन्द्रियाणि विषयव्यवस्थानात्—विषयव्यवस्थानादित्यस्यायमर्थः करणविषयनियमादिति—सति चक्षुषि रूपग्रहणं भवत्यसति न भवति। यच्च

न्यायवार्त्तिकतात्पर्यटीका

भिन्ननिमित्ताविति, भिन्नमिन्द्रियं निमित्तं ययोः। अनन्यकर्तृकौ आत्मैककर्तृकौ समानविषयौ द्रव्यमेकं विषय इत्यर्थः ॥ १ ॥

पूर्वपक्षसूत्रम्—

न वि—नात् (सू० २)॥ यद्भावाभावानुविधायिनौ ज्ञानभावाभावौ तच्चेतनम्। इन्द्रिय-

वृत्तिः

एकस्यैव दर्शनस्पर्शनाभ्यामर्थस्य ग्रहणात्। दर्शनस्पर्शने ज्ञानविशेषौ। तृतीया च प्रकारे। तेन चाक्षुषस्पार्शनोभयवत्त्वेनैकस्य धर्मिणः प्रतिसन्धानादित्यर्थः। तथा च योऽहं घटमद्राक्षं सोऽहं स्पृशामीत्यनुभवादात्मेन्द्रियव्यतिरिक्त एक इति ॥ १ ॥

नासौ स्वातन्त्र्ये सत्यवस्थितो यथा चक्षुरादिरिति व्यतिरेकी हेतुः। यद्यव्यवस्थानादित्येतावन्मात्रमुच्येत ततो मनसाऽनैकान्तिकं स्यादत उक्तम्—स्वातन्त्र्ये सतीति। अथवा कृतमव्यवस्थानेन स्वातन्त्र्यमेव केवलमस्तु चैतन्यसाधनमित्याह—नाचेतन आत्मेति। आत्मेति प्रमाणसंशयविपर्ययस्मृतिष्वनुभूतमनुभूतम् उपलक्षयति। निराकृतमप्यर्थं प्रकारान्तरेण पुनरुपन्यस्य निराकरोति—पृथिव्यादिनित्यत्वसाधन इति' इति मुद्रितम्। तृतीयसूत्रीयवार्त्तिकव्याख्यानरूपतया च अंशोऽयं तत्रैव निवेशितः।

(१) 'संग्रहीता' इति ज०। (२) 'स्वं स्वं विषय-' इति ज०।

न्यायभाष्यम्

भवति सति भवति तस्य तदिति विज्ञायते। तस्माद् रूपग्रहणं चक्षुषः, चक्षू रूपं पश्यति। एवं (१)घ्राणादिष्वपीति। तानीन्द्रियाणीमानि स्वस्वविषयग्रहणाच्चेतनानि इन्द्रियाणां भावाभावयोर्विषयग्रहणस्य तथाभावात्। एवं सति किमन्येन चेतनेन ?

सन्दिग्धत्वादहेतुः—योऽयमिन्द्रियाणां भावाभावयोर्विषयग्रहणस्य तथाभावः, स (२) किं चेतनत्वात् आहोस्विच्चेतनोपकरणानां ग्रहणनिमित्तत्वादिति सन्दिह्यते। चेतनोपकरणत्वेऽपीन्द्रियाणां ग्रहणनिमित्तत्वाद् भवितुमर्हति॥ २॥

यच्चोक्तं विषयव्यवस्थानादिति—

न्यायवार्त्तिकम्

यस्मिन् सति भवति असति न भवति तस्य तत्। सति च चक्षुषि रूपग्रहणं भवति तस्माद् रूपग्रहणं चक्षुषः। एवं शेषेष्वपि।

एवं सति किमन्येन चेतनेनेति चेत् ? न, सन्दिग्धत्वादहेतुः—किमयमिन्द्रियाणां विषयनियमः चेतनत्वात् आहो चेतनोपकरणत्वादिति सन्दिह्यते। चेतनोपकरणत्वेऽपि सतीन्द्रियाणामेतद्भवितुमर्हति यथा प्रदीपस्य सद्भावे रूपग्रहणं भवत्यसति न भवति, न च रूपग्रहणं प्रदीपस्य। विपर्ययप्रसाधकश्चायं हेतुर्विषयव्यवस्थानादिति॥ २॥

विपर्ययसाधकत्वज्ञापनार्थं च—

न्यायवार्त्तिकतात्पर्यटीका

भावाभावानुविधायिनौताविति तदेव चेतनमिति भावः।

सिद्धान्तभाष्यम्—संदिग्धत्वादहेतुः। अनन्यथासिद्धावन्वयव्यतिरेकौ कारणत्वमात्रे प्रमाणं, न तु कर्ता न चेतनश्चेतनं करणमित्यत्रेत्यर्थः॥ २॥

विषयव्यवस्थानं च विरुद्धमिन्द्रियादीनामचैतन्यस्य साधनादित्याह—यच्चोक्तमिति।

वृत्तिः

अत्र शङ्कते—(न विषयव्यवस्थानात्)

चक्षुस्त्वगादीनां रूपस्पर्शादिनियतविषयत्वात् चक्षुरादेश्चाक्षुषादिसमवायित्वम्, इत्थं चाभेदप्रत्ययो भ्रान्त इति भावः॥ २॥

---

(१) 'घ्राणं जिघ्रति' इति ज-पुस्तकधृतं पाठान्तरम्।

(२) 'किमयम्' इति ल-का०।

न्यायभाष्यम्

(१) तद्व्यवस्थानादेवाऽऽत्मसद्भावादप्रतिषेधः ॥३॥

यदि खल्वेकमिन्द्रियमव्यवस्थितविषयं सर्वज्ञं सर्वविषयग्राहि चेतनं स्यात् कस्ततोऽन्यं चेतनमनुमातुं शक्नुयात् ? यस्मात्तु व्यवस्थितविषयाणीन्द्रियाणि तस्मात् तेभ्योऽन्यश्चेतनः सर्वज्ञः सर्वविषयग्राही(२) विषयव्यवस्थितिमतीतोऽनुमीयते । तत्रेदम् (३)अभिज्ञानमप्रत्याख्येयं चेतनवृत्तमुदाह्रियते । रूपदर्शी खल्वयं रसं गन्धं वा पूर्वगृहीतमनुमिनोति । (४)गन्धप्रतिसंवेदी च रूपरसावनुमिनोति । एवं विषयशेषेऽपि वाच्यम् । रूपं दृष्ट्वा गन्धं जिघ्रति, घ्रात्वा च गन्धं रूपं पश्यति । तदेवमनियतपर्यायं

न्यायवार्त्तिकम्

तद्व्यवस्थानादेवाऽऽत्मसद्भावादप्रतिषेधः इति सूत्रम् । यस्मादेवैतानीन्द्रियाणि व्यवस्थितविषयाण्यत एवाव्यवस्थितविषयेणान्येन भवितव्यम् । यदि हि किञ्चिदिन्द्रियमनेकार्थग्राह्य-

न्यायवार्त्तिकतात्पर्यटीका

तद्व्य—धः (सू० ३) ॥ "सर्वज्ञ" इत्यस्य विवरणं "सर्वविषयग्राही" सर्वेषामिन्द्रियाणां च ये विषयास्तद्ग्राही, इन्द्रियान्तराणि प्रमाणान्तराणि च पुनर्व्यवस्थितविषयाणि तेनार्वागपि सर्वज्ञ इति सिद्धम् । तत्रेदमभिज्ञानमिति । असाधारणं चिह्नमभिज्ञानमुच्यते, तच्चाप्रत्याख्येयमनुभवसिद्धत्वात् । चेतनवृत्तमभिज्ञानमप्रत्याख्येयमुदाह्रियत इति योजना । अनियत-

वृत्तिः

समाधत्ते—(तद्व्यवस्थानादेवाऽऽत्मसद्भावादप्रतिषेधः) ।

उक्तप्रतिषेधो न युक्तः उक्तविषयव्यवस्थानादेवाऽऽत्मसद्भावादतिरिक्तात्मकल्पनादित्यर्थः । अयं भावः—तत्तदिन्द्रियाणां तत्तद्विषयप्रत्यक्षं प्रति समवायित्वं वाच्यम्, नतु प्रत्यक्षत्वावच्छिन्नं प्रति, अनुमित्यादिजनकत्वे तु विनिगमकाभावः । तेन जन्यज्ञानत्वावच्छिन्नजनकतावच्छेदकमात्मत्वम्, चक्षुरादेरनित्यत्वादात्मनश्च नित्यताया वक्ष्यमाणत्वात् चक्षुरादिविनाशेऽपि स्मरणात्, चक्षुरहमित्याद्यप्रतीतेश्च नेन्द्रियात्मवादो युज्यत इति ॥ ३ ॥

समाप्तमिन्द्रियभेदप्रकरणम् ॥ १ ॥

(१) 'तद्व्यवस्थाना-' इति जि० । (२) 'विषयव्यवस्थितितो' इति फ-ज-जि-टि० । (३) 'प्रत्यभिज्ञानम्' इति ग० । (४) 'प्रतिवेदी' इति ग० ।

न्यायभाष्यम्

सर्वविषयग्रहणमेकचेतनाधिकरणमनन्यकर्तृकं प्रतिसन्धत्ते, प्रत्यक्षानुमानागमसंशयान् प्रत्ययांश्च नानाविषयान् स्वात्मकर्तृकान् (१)प्रतिसन्धाय वेदयते, (२)सर्वविषयं च शास्त्रं प्रतिपद्यते, अर्थमविषयभूतं श्रोत्रस्य क्रमभाविनो वर्णान् श्रुत्वा पदवाक्यभावेन(३) प्रतिसन्धाय शब्दार्थव्यवस्थां च बुध्यमानोऽनेकविषयमर्थजातमग्रहणीयमेकैकेनेन्द्रियेण गृह्णाति। सेयं सर्वज्ञस्य (४) ज्ञेयाव्यवस्थाऽनुपदं न शक्या परिक्रमितुम्। आकृतिमात्रं तूदाहृतम्। तत्र यदुक्तमिन्द्रियचैतन्ये सति किमन्येन चेतनेन तदयुक्तं भवति॥ ३॥

न्यायवार्त्तिकम्

व्यवस्थितविषयं स्यादिति कस्ततोऽन्यं चेतनमनुमातुं शक्नुयात्। चैतन्यं तु आत्मनः स्वातन्त्र्ये सत्यव्यवस्थानाच्चक्षुरादिवदिति, नाचेतन आत्मा अस्वातन्त्र्यप्रसङ्गाच्चक्षुरादिवदिति। अन्वयाभावादयुक्तमिति चेत्—अथ मन्यसे आत्मनश्चैतन्यसाधनस्याव्यवस्थानस्य नान्वयोऽस्ति, न चान्वयमन्तरेण हेतुः सिध्यतीति? न, विपर्ययसम्बन्धस्याव्यभिचारात्—नायमन्वयी हेतुरपि तु व्यतिरेकी हेतुः, तत्र च व्यतिरेकसम्बन्धाव्यभिचारः सामर्थ्यम्; यच्चाचेतनं

न्यायवार्त्तिकतात्पर्यटीका

पर्यायम् अनियतक्रममित्यर्थः। **(क) अनेकविषयमर्थजातमिति।** अनेकपदार्थो विषयो यस्यार्थजातस्य तत्तथोक्तम्। क्वचित्पाठोऽनेकविषयमर्थजातमिति स सुगम एव। **आकृतिमात्रं त्विति** सामान्यमात्रमित्यर्थः।

(ख) स्वं चैतन्यं त्वात्मनः स्वातन्त्र्ये सत्यव्यवस्थानाच्चक्षुरादिवदिति (ग)हेतुः, प्रमाणसंशयविपर्ययस्मृतिषु योऽनुस्यूत एक उपलभ्यते स चेतनः स्वातन्त्र्ये सत्यव्यवस्थानात्। यस्त्वचेतनो नासौ स्वातन्त्र्ये(घ) सत्यव्यवस्थितो यथा चक्षुरादिरिति व्यतिरेकी हेतुः। यद्यव्यवस्थानादित्येतावन्मात्रमुच्येत ततो मनसाऽनैकान्तिकं स्यादत उक्तम्—**स्वातन्त्र्ये सतीति।** अथ वा कृतमव्यवस्थानेन स्वातन्त्र्यमेव केवलमस्तु चैतन्यसाधनमित्याह—**नाचेतन आत्मेति।** आत्मेति प्रमाणसंशयविपर्ययस्मृतिष्वनुस्यूतमनुभूतम् उपलक्षयति। निराकृतमप्यर्थं प्रकारान्तरेण

---

(१) 'प्रतिसन्दधाति प्रतिसन्धाय' इति ल-ग-झा०। (२) 'सर्वार्थविषयम्' इति फ-ज०। (३) 'पदवाक्यभाव' इति ज०। (४) 'ज्ञेयाऽव्यवस्था' इति फ०।

(क) 'अनेकपदार्थविषयमर्थजातम्' इति पाठोऽत्र सम्भाव्यते, तथैव विग्रहवाक्यप्रदर्शनात्। एवं च भाष्ये तथा पाठान्तरमिह टीकाकृतोपलब्धमिति स्पष्टम्। यथाश्रुतन्तु 'क्वचित् पाठोऽनेकविषयम्' इत्युत्तरग्रन्थविरुद्धमिति चिन्त्यम्। (ख) इतः प्रभृति 'पृथिव्यादिनित्यत्वसाधन इति' इत्यन्तो ग्रन्थः क-ख-तात्पर्यपुस्तकयोः 'न चैतयोरस्ति कार्यकारणभाव इत्यर्थः' (पृ० ७११) इत्यतः परं मुद्रितः; तच्चायुक्तमिति इह गृहीतम्। एवं वार्त्तिकेऽनुपलब्धं 'स्वं' इति पदमपि प्रमादादागतमिति प्रतिभाति। (ग) 'हेतुः' इति पदमत्र प्रमादादागतं सम्भाव्यते। (घ) 'सत्यवस्थितः' इति क-ख-तात्पर्यमुद्रणं प्रामादिकम्।

न्यायभाष्यम्

इतश्च देहादिव्यतिरिक्त आत्मा, न देहादिसङ्घातमात्रम्—

शरीरदाहे पातकाभावात् ॥४॥

शरीरग्रहणेन शरीरेन्द्रिय-बुद्धि-वेदनासङ्घातः प्राणिभूतो गृह्यते। प्राणिभूतं शरीरं दहतः प्राणिहिंसाकृतपापं पातकमित्युच्यते; तस्याभावः, तत्फलेन कर्तुरसम्बन्धात् अकर्तुश्च सम्बन्धात्। शरीरेन्द्रिय-बुद्धि-वेदनाप्रबन्धे खल्वन्यः सङ्घात उत्पद्यते अन्यो

न्यायवार्त्तिकम्

तत्सर्वं व्यवस्थितविषयं दृष्टमिति। पृथिव्यादिनित्यत्वसाधने गन्धवत्त्वादिप्रसङ्ग इति चेत्—अथ मन्यसे यदि व्यतिरेकी हेतुर्भवत्यन्वयमन्तरेण अथ पृथिव्यादिनित्यत्वे साध्ये गन्धवत्त्वं कस्मान्न हेतुः? न हेतुरुभयव्यावृत्तेः—यस्माद्गन्धवत्त्वं नित्याच्चानित्याच्च व्यावर्त्तते, न पुनरव्यवस्थानमेवम्, तस्मादव्यवस्थानं हेतुर्न गन्धवत्त्वमिति ॥ ३ ॥

इतश्च शरीरादिव्यतिरिक्त आत्मा न शरीरादिसङ्घातमात्रम्—

शरीरदाहे पातकाभावात्। शरीरग्रहणेन शरीरेन्द्रियबुद्धिवेदनासङ्घातः प्राणिभूतो गृह्यते। शरीरं प्राणिभूतं दहतः प्राणिहिंसाकृतं पापं पातकमित्युच्यते; तस्याभावः अकर्त्तुः फलेन सम्बन्धः कर्त्तुश्चानभिसम्बन्ध इति। कस्मात्? अनभ्युपगतार्थान्तरात्मनोऽन्यः शरीरेन्द्रिय-बुद्धिवेदनासङ्घातः कर्त्ता अन्यश्च तत्फलसम्भोक्तेति। तदेवम् (क)अकृतकृताभ्यागमनाशदोष-प्रसङ्गः अनिष्टश्च। तस्मात् कर्त्ता भोक्ता च यः स आत्मेति।

न्यायवार्त्तिकतात्पर्यटीका

पुनरुपन्यस्य निराकरोति—पृथिव्यादिनित्यत्वसाधन इति। तदेतच्चेतनवृत्तं देहादिभ्यो व्यावर्त्तमानं तदतिरिक्तं चेतनं साधयतीति स्थितम् ॥ ३ ॥

नेच्छाद्याधारत्वं देहादीनामिति सूत्रान्तरमवतारयति भाष्यकारः—इतश्च देहादिव्यतिरिक्त आत्मा न देहादिसंघातमात्रमिति।

शरीर—वात् (सू० ४)॥ प्राणातिपाते पातकाभावप्रसङ्गादिति। अयं यद्यपि भूत-चैतनिकानां नानिष्टप्रसङ्गस्तथाऽपि शाक्यान् प्रति द्रष्टव्यः, ते हि प्राणातिपातकृतं पातक-मिच्छन्ति। एवं च न बुद्धिरात्मेति वक्तव्ये देहादिग्रहणं विचित्राभिसंधित्वात् पुंसाम्। यदि कश्चिद्भूतचैतनिकः प्राणातिपातकृतं (ख)पातकं नेच्छेत् तं प्रति दूषणं भवत्वेवमर्थमिति मन्तव्यम्।

वार्त्तिकम्—अकृतकृताभ्यागमनाशदोष इति। येनाकृतं कर्म प्राणातिपातः तस्य पातका-भ्यागमो येन च कृतं तस्य नाश इत्यर्थः। (ग)शास्त्रचोदितं फलमनुष्ठातरि इत्ययमुत्सर्गो यत्र

(क) क-ख-वार्त्तिकयोः 'अकृतकृताभ्यागमविनाश' इति मुद्रितम्। (ख) 'पातकं नेच्छेत्' इत्यत्र 'पातकमिच्छेत्' इति समीचीनतया प्रतिभाति। (ग) 'शास्त्रफलं प्रयोक्तरि तल्लक्षणत्वात् तस्मात् स्वयं प्रयोगे स्यात्' इति जैमिनिसूत्रम् (सू० १८, पाद० ७, अ० ३)।

न्यायभाष्यम्

निरुध्यते, उत्पादनिरोधसन्ततिभूतः प्रबन्धो नान्यत्वं बाधते देहादिसङ्घातस्यान्यत्वाधिष्ठानत्वात्। अन्यत्वाधिष्ठानो ह्यसौ प्रख्यायत इति। एवं (१)च सति यो देहादिसङ्घातः प्राणिभूतो हिंसां करोति नासौ हिंसाफलेन सम्बध्यते, यश्च सम्बध्यते न तेन हिंसा कृता। तदेवं सत्त्वभेदे कृतहानमकृताभ्यागमः प्रसज्यते। सति च सत्त्वोत्पादे सत्त्वनिरोधे चाकर्मनिमित्तः सत्त्वसर्गः प्राप्नोति, तत्र मुक्त्यर्थो ब्रह्मचर्यवासो न स्यात्। तद् यदि देहादिसङ्घातमात्रं सत्त्वं स्यात् शरीरदाहे पातकं न भवेत्, अनिष्टं चैतत्। तस्माद् देहादिसङ्घातव्यतिरिक्त आत्मा नित्य इति॥ ४॥

न्यायवार्त्तिकम्

तदिदं सूत्रं यस्याऽऽत्मा नास्ति तस्यायं दोष इति दोषप्रतिपादनार्थं न साधनार्थमिति। हेतुफलभावात् स्मृतिवत्कर्तृभोक्तृव्यवहारः—यथा हेतुफलभावेन व्यवस्थितायां सन्ततौ यस्यामेव भावनोपजायते तस्यामेव सन्ततौ स्मृतिर्भवतीति एवं यत्कायचित्तसन्तानप्रभवं कर्म तत्कायचित्तसन्तानप्रभवं फलमिति नास्त्यकृताभ्यागम-कृतनाशप्रसङ्गः। स कथं स्यादिति? यद्यन्यस्यां सन्ततौ कृतं कर्म अन्यस्यां सन्ततौ फलं दद्यात्, यदि च भवानेवमर्थं प्रतिपादयितुं शक्नोति य एव करोति स एव भुङ्क्ते इति। उभयञ्च नास्ति। तस्मादकृताभ्यागमादिरदोषः? नोक्तोत्तरत्वात्—न सन्तानो नानात्वं बाधते इत्युक्तोत्तरमेतत्। यत् पुनरेतत् एकस्मिन्नदर्शनादिति; अत्राप्युक्तम्—एकनिमित्तानां प्रत्ययानां प्रतिसन्धानादिति। शाल्यादिबीजवदिति चेत्—अथ मन्यसे यथा शालिबीजादङ्कुर उपजायते शालिबीजावमर्दोत्तरकालं नालकाण्डादिभावेन भूतानुग्रहवशाच्छालिबीजं प्रादुर्भवति, न च तत्रैकं निमित्तं किञ्चिदनुबद्धमस्ति, अथ च नियमः शालि-

न्यायवार्त्तिकतात्पर्यटीका

पुनः शास्त्रमन्यस्य फलमाह यथा श्राद्धे वैश्वानरीयेष्ट्यादौ तत्र भवतु पुत्रकृतस्य श्राद्धस्य पितृगामि फलं पितृकृताया वा जातेष्टेः पुत्रगामि फलमिति। भावना स्मृतिहेतुः संस्कारः। यत्कायेति। येन कायेनोपलक्षितः कश्चिच्चित्तसन्तानः स कायान्तरवर्त्यपि फलं भुङ्क्त इत्यर्थः। एकनिमित्तानां प्रत्ययानां प्रतिसंधानादिति। उक्तमेतद् यथा नर्तकीभ्रूलताभङ्गे एकस्मिन् बहूनां

वृत्तिः

ननु गौरोऽहं जानामीत्यादिप्रतीतेरस्तु शरीरमात्मेत्याशङ्क्य दूषयति—(शरीरदाहे पातकाभावात्)।

पातकाभावात् पातकादेरभावप्रसङ्गात्। तथा चोत्तरकालिकं दुःखादिकं न स्यादिति। यद्वा दाहो नाशः, तथा च शरीरनाशे कृते कर्तरि शरीरे विनष्टे पातकं न स्यादित्यर्थः।

---

(१) 'च'कारो फ-ग-ज- पु० नास्ति।

न्यायवार्त्तिकम्

बीजपूर्वादङ्कुराच्छालिबीजम्, एवं हेतुफलभावेन व्यवस्थितायां सन्ततावान्तरे चेतसि परिणामविशेषप्राप्तात् कर्मणः फलमिति; तन्न, बीजावयवानुवृत्तेः शालिबीजवदित्यसिद्धो दृष्टान्तः— तत्रापि ये बीजावयवास्ते पूर्वव्यूहपरित्यागेन व्यूहान्तरमापद्यन्ते व्यूहान्तरापत्तौ च पृथिवीधातुरब्धातुना संगृहीत आन्तरेण तेजसा पच्यमानो रसद्रव्यं निर्वर्त्तयति, स रसः पूर्वावयवसहितोऽङ्कुरादिभावमापद्यते तस्माद्बीजावयवानुवृत्तेरसिद्धमिदमुच्यते यथा शालिबीजाद्विनष्टादङ्कुर उत्पद्यते अथ च प्रतिसन्धानमिति। परमाण्ववस्थत्वाद्बीजावयवानां यथोक्तदोषापत्तिरिति चेत्—अथ मन्यसे (१)यस्यापि बीजावयवाः पूर्वव्यूहं परित्यजन्ति व्यूहान्तरं चाऽऽपद्यन्ते तस्यापि परमाण्ववस्थत्वाद्बीजस्य परमाणुमात्रं शिष्यत इति। (२) न च परमाणुष्वपरजातिभेदो विद्यते।(२*) न च यवबीजशालिबीजपरमाणूनां कश्चिद्विशेषः। यथाऽनुपजातविशेषाः परमाणवः कार्यकारणभावनियमात् तत्पूर्वकतया शाल्यङ्कुरमभिनिर्वर्त्तयन्ति तथा ममापि कार्यकारणभावान्नियम इति? नानभ्युपगमात्—परमाण्ववस्थानि बीजानि भवन्तीत्येतन्न प्रतिपद्यामहे सर्वावस्थोपलब्धेः। यस्माच्छाल्यादिबीजमुच्छूनावस्थामादिं कृत्वा यावदुपान्त्यं शालिबीजकार्यं तावन्न कदाचित् परमाण्ववस्थं भवति; यदि तु स्यात् कदाचिन्नोपलभ्येत। यदि तर्हि आ परमाणोर्विभागो नास्ति कल्पादावुत्पत्तिर्न स्यात् परमाण्ववस्थत्वाज्जगतः, परमाण्ववस्थे च जगति न शाल्यादिजातिव्यक्तिरस्तीति पुनरुत्पादे जातिव्यक्तिहेतवः परमाणव एवेत्यभ्युपगन्तव्यं यथा च कल्पादावेवं परमाण्ववस्थे बीजेऽपीति; नानेनैवोक्तोत्तरत्वात्—अनेनैव सर्वावस्थोपलब्धेरित्युक्तोत्तरमेतत्। सर्गादौ शालिजातिव्यक्तिहेतुरदृष्टविशेषः—येनादृष्टेन प्राणिनामुपभोगाय शाल्यादयो निर्वर्त्यन्ते तमदृष्टविशेषमपेक्षमाण ईश्वरस्तांस्तान् परमाणून् तथा तथा सङ्घातयति यथा यथा शाल्यादि-

न्यायवार्त्तिकतात्पर्यटीका

प्रतिसंधानमिति। सर्वावस्थोपलब्धेरिति। सर्वावस्थासु बीजावयवानामुपलब्धेः परमाण्ववस्थत्वे त्वनुपलम्भः स्यात्। तस्मान्न बीजावयवाः पच्यमानाः अङ्कुरोत्पत्तौ परमाण्ववस्था भवन्ति अपि त्ववयविन एव पच्यन्त इत्यर्थः। परमाण्ववस्था बीजावयवा न बीजत्वादिजातिविशेषवन्तमारब्धुमर्हन्तीत्युक्तं सिद्धान्तिनेति मत्वा (३)देशयति—यदि तर्हीति। परिहरति —नानेनैवोक्तोत्तरत्वादिति। प्रतिसंधानाय बीजत्वजातीयानवयवान् (क)लक्षितुमस्माभिर्बीजावयवानां परमाण्वन्तो विभागो निषिद्धः, कल्पादौ त्वारम्भे परमाणूनां न प्रतिसंधानमस्ति। न हि पूर्वसर्गे ये बीजमारेभिरे सांप्रतमपि त एवाऽऽरभन्ते नान्य इति प्रतिसंधानेनियमः अपि

(१) 'अथापि' इति क-ख-वार्त्तिकपाठः। तत्र धृतं पाठान्तरं तु गृहीतम्। (२) अयमंशः क-वार्त्तिके नास्ति। (३) 'दर्शयति' इति ख०।

(क) 'लक्षयितुम्' इति युक्तम्।

न्यायवार्त्तिकम्

जातिव्यक्तिरिति । एतेन घटादिपाको व्याख्यातः । नापरमाण्वन्तो (१)विनाशः सर्वावस्थोपलब्धेरिति । आ मध्यात् पाकानुपपत्तिरिति चेत्—अथ मन्यसे यदि कार्यकारणद्रव्ये पच्येते आ मध्यात् पाको न प्राप्नोति पाचकेन तेजसा अप्राप्तत्वात् । नाप्रतिबन्धात्—भवेदप्येष दोषो यदि तेजोऽनुप्रवेशमवयवी प्रतिबध्नाति, स तु न प्रतिबध्नाति, अप्रतिबद्धं तेजोऽनुप्रविशति इति । न प्रतिबध्नातीति न हेतुरस्तीति ? न नास्ति परिस्रवादिमतो घटस्योपलब्धेः—यस्मात् परिस्रवादिमतो घटस्य द्रवत्वप्रतिबन्धो न दृष्टः, अप्रतिबन्धेन द्रवत्वं परिस्रुतिं करोति तच्च प्रत्यक्षत उपलभ्यते । यदि चायमवयवानुप्रवेशो द्रव्यस्य विनाशकः स्यात्, न परिस्रवादिमान् घट उपलभ्येत, परिस्रवमाणत्वाद्भाजनगतानामपामवस्थानं न स्यात् । विनाशे च कार्यद्रव्याणां व्यवहिताव्यवहितयोस्तुल्यकालोपलब्धिप्रसङ्गः—यदि चानुप्रविश्य द्रव्यं द्रव्यान्तरं व्यतिभिनत्ति तेन चाक्षुषस्य रश्मेरनुप्रवेशात् स्फटिकादि विनष्टमिति व्यवहिते चाव्यवहिते च तुल्योपलब्धिः प्राप्नोति । तस्माच्छालिबीजमदृष्टान्तः ।

यस्य च पूर्वस्कन्धनिरोधसमकालानि स्कन्धान्तराणि प्रादुर्भवन्ति तस्य तेषां स्कन्धान्तराणां न कर्मनिमित्तः सर्गः प्राप्नोति । अकर्मनिमित्तेन सत्त्वसर्गेण शुभाशुभप्राप्त्यर्था क्रिया न प्राप्नोति । सुखी स्यामिति तत्क्रियेति चेत्—अथ मन्यसे स्वयं कर्माणि करोति कथमहं सुखी स्यां दुःखी न स्यामिति ? तन्न, अननुभूतत्वात्—येन सुखमनुभूतं सुखसाधनसम्बन्धानुस्मृतिश्च

न्यायवार्त्तिकतात्पर्यटीका

त्वन्येभ्योऽपि भवन्तीति भावः । पैलुकण्ठः शङ्कते—**आ मध्यात् पाकानुपपत्तिरिति चेत्** । परिहरति—**नाप्रतिबन्धादिति**, सान्तराण्येवावयविद्रव्याणीत्यर्थः । अथायमवयवानुप्रवेशो द्रव्यस्य विनाशकः कस्मान्न भवतीत्यत आह—**यदि चायमवयवानुप्रवेश** इति । भाजनगतानामपां भाजनविनाशे **अवस्थानम् एव न स्यात्** । सान्तरत्वे तु तावत्य एवापो भाजने स्यन्दन्ते यावन्तीभिर्बहिः शीतस्पर्शोपलब्धिर्भवति, मात्रया च तत्र कालपरिपाकवशादनवस्थानमपि ; विनाशे तु सहसाऽनवस्थानमपां भाजनगतानां भवेदित्यर्थः । व्यवहिते द्रव्ये स्फटिकभाजने न तुल्योपलब्धिरिति ।

शङ्कते—**सुखी स्यामिति तत्क्रियेति चेत्** । यद्यपि विशरारवः स्कन्धास्तथाऽप्यनाद्यविद्यावासनावशोऽयमेकमहंकारास्पद(२)सत्त्वमित्यभिमन्यमानः सुखी भवेयं दुःखी मा भूवमिति तृष्णक् प्रवर्त्तत इत्यर्थः । निराकरोति—**तन्नाननुभूतत्वादिति** । यथा च क्षणिकानां

(१) 'विभागः'—इति क-ख-वार्त्तिकधृत-पाठान्तरम् । (२) '-सत्वं(त्त्वं) ? नित्यम्' इति क-तात्पर्यधृतपाठान्तरम् ।

तदभावः सात्मकप्रदाहेऽपि तन्नित्यत्वात् ॥ ५ ॥

न्यायभाष्यम्

यस्यापि नित्येनाऽऽत्मना सात्मकं शरीरं दह्यते तस्यापि शरीरदाहे पातकं

न्यायवार्त्तिकम्

यस्य स तत्साधनमुपादत्ते, यस्य पुनः प्रतिक्षणं प्रध्वंसिनः संस्कारास्तस्य सुखसाधनसम्बन्धानुस्मृतेरभावात् सुखी स्यामिति क्रियानुपपत्तिः। मोक्षार्थश्च प्रयासो नोपपद्यते अयत्नसिद्धत्वात्—जातमात्र एवायं मुच्यत इति मुक्त्यर्थं ब्रह्मचर्यवासो व्यर्थः। परिपृच्छा च न प्राप्नोति—तथागतेन भिक्षवः परिपृच्छ्यन्ते 'कच्चिद् यूयं मया विनीता इति ? ते चाऽऽहुर्विनीताः स्म इति'। अतीतानागतवर्त्तमानानां चानुपकार्यत्वात्—ये तावदनागताः संस्कार्याः ते तावदसत्त्वान्नोपक्रियन्ते, येऽप्यतीतास्तेऽप्येवम्, ये तु वर्त्तमानास्तेषु संस्काराधानमशक्यं वर्त्तमानलक्षणस्यानुपकार्यत्वात्। न हि तस्यावस्थानकालोऽस्ति यस्मिन्नुपक्रिया स्यात्। संस्कार्यसंस्कारकयोः सहोत्पादाद् युक्तमिदमिति चेत्, न; संस्कार्यसंस्कारकयोः सहोत्पादे नियमानुपपत्तिरिति—इदं संस्कारकमिदं संस्कार्यमिति नियमो नोपपद्यते। अथ संस्कारकमपेक्षमाणं संस्कार्यं विलक्षणकार्यं करोति विलक्षणकार्योत्पादश्च संस्कार इत्युच्यते ? न, संस्कार्यानभिधानात्—इदं संस्कारकमिदं संस्कार्यमित्येतत् कथम् ? न हि यो यस्य विशेषं नाधत्ते स तत्संस्कारकः तत्संस्कार्यमिति च शक्यं व्यपदेष्टुम्। अथाप्युपदेशेन संस्काराणामनागतानामनुत्पत्तिः क्रियते ? न, अनागतानामनुत्पत्तेः सत्त्वात्। याऽसावनागतानामनुत्पत्तिः संस्काराणां नासौ कदाचिन्नास्तीति किं तस्याः क्रियते। तस्मान्मुक्त्यर्थो ब्रह्मचर्यवास इत्यनुपपन्नम्। तदेवमनभ्युपगतार्थान्तरात्मनो दोष इति ॥ ४ ॥

तदभावः सात्मकप्रदाहेऽपि तन्नित्यत्वात्। यस्याऽऽत्मा नित्यः तस्यापि हिंसाफले न प्राप्नुतः

न्यायवार्त्तिकतात्पर्यटीका

विज्ञानानां परस्परवार्त्तानभिज्ञतया न प्रतिसंधानक्षमत्वं तथोपपादितमस्माभिरात्मलक्षणावसर इति। न अनागतानामनुत्पत्तेः सत्त्वादिति। न च ब्रह्मचर्यादिपरिपाकसहितेन ज्ञानक्षणेनासमर्थो ज्ञानक्षणो जन्यते स च न ज्ञानान्तरं प्रसूत इत्यनागतानुत्पत्तिरसमर्थस्य च क्षणस्य स्वभावतो विनाश इति युक्तम् असमर्थक्षणोत्पादस्यैव सहकारिसापेक्षत्वानपेक्षत्वानुपपत्तेः। यथा चैतत्तथा क्षणभङ्गभङ्गावसरे उपपादयिष्यते ॥ ४ ॥

तद—त् (सू० ५)॥ वैनाशिको नैयायिकपक्षवत् सांख्यपक्षेऽपि हिंसातत्फलानुपपत्तिमापा-

वृत्तिः

यद्यपि भूतचैतन्यवादिना पातकादिकं नोपेयते, तथाऽपि तस्य प्रसाध्याङ्गकत्वादेकदेशिनः पूर्वपक्षित्वाद्वा न दोष इति भावः ॥ ४ ॥

न्यायभाष्यम्

न भवेद्दग्धुः। कस्मात्? नित्यत्वादात्मनः ; न जातु कश्चिन्नित्यं हिंसितुमर्हति। अथ हिंस्यते, नित्यत्वमस्य न भवति। सेयमेकस्मिन् पक्षे हिंसा निष्फला अन्यस्मिंस्त्वनुपपन्नेति ॥ ५ ॥

न्यायवार्त्तिकम्

हिंसा तावन्न प्राप्नोति नित्यत्वात्, फलमपि नाऽऽत्मनो युक्तम् अनुपकार्यत्वात्। अस्य चार्थस्य ज्ञापिकां कारिकामुदाहरन्ति—

वर्षातपाभ्यां किं व्योम्नश्चर्मण्यस्ति तयोर्भयम्।
चर्मोपमश्चेत् सोऽनित्यः खतुल्यश्चेदसत्फलः ॥

तदेवमेकस्मिन् मते हिंसा विफला अपरस्मिंस्तु पक्षेऽनुपपन्ना निष्फला चेति। इयं च हिंसा सांख्यपक्षे सम्भवति बुद्धेः परिणामित्वात्—कार्यकारणभावः परिणामित्वादुच्छिद्यते स एव च तत्फलानि भुङ्क्ते तत्फलस्य तत्र व्यक्तेः। न, पूर्वावस्थाऽपरित्यागात्—यथैवाऽऽत्मा पूर्वावस्थां न जहातीति तत्र फलं नेष्यते तथा बुद्धिरपि पूर्वावस्थां न जहाति नित्यत्वादिति। अथ मन्यसे पूर्वावस्थां जहातीति, नित्यत्वं विरुध्यते—पूर्वावस्थापरित्यागेन बुद्धिनित्यत्वं विरुध्यते। अथाऽव्यवस्था भिद्यत इति मन्यसे तथाऽप्यनिवृत्तो व्याघातः अवस्थाभ्योऽवस्थावतोऽनन्यत्वात्—न ह्यवस्थाभ्योऽवस्थावानन्य इति अवस्थाभेदेऽवस्थावान् भिद्यत इति। य एव बौद्धस्य प्रतिक्षणं ध्वंसिषु संस्कारेषु दोषः स एव प्रतिक्षणपरिणामिष्वपीति। ऋजुवक्रतावदिति चेत्—अथ मन्यसे ऋजुवक्रतादिभेदे यथाऽङ्गुलिद्रव्यं न भिद्यते न चाङ्गुलीतोऽन्ये ते, तथाऽवस्थाभेदे बुद्धेरभेद इति? न, अन्यत्वात्—अन्ये ऋजुवक्रते। युक्तं च (१) यदन्यभेदे अन्याभेद इति, न पुनरवस्थाभ्योऽत्रावस्थावतोऽन्यत्वम्, तस्मादसमो दृष्टान्तः। किं पुनर्वक्रत्वम् ऋजुत्वं वा? गुणः—आकुञ्चनजं वक्रत्वं प्रसारणजम् ऋजुत्वं गुणाश्च गुणिनोऽर्थान्तरमिति प्रतिपादितमेतत्।

न्यायवार्त्तिकतात्पर्यटीका

दयितुं हिंसां तत्फलसम्भवं पूर्वपक्षयति—(क) इयं तु हिंसेति। व्यक्तेरिति, सदेव कार्यं कारणेन व्यज्यते न त्वसत् क्रियत इत्यर्थः। परिहरति—नेति। त्रिविधोऽप्ययं धर्म-लक्षणावस्थापरिणामो नित्याद् धर्मिणो न भिद्यते इति परिणामानित्यत्वं धर्मिनित्यत्वेन विरुध्यते। अविरोधाय वा धर्मिणोऽनित्यत्वाभ्युपगमे वैनाशिकपक्षोक्तदोषप्रसङ्ग इत्यर्थः। गुण इति। ऋजुत्ववक्रत्वे खलु गुणौ प्रचयसंयोगविभागविशेषौ सत्येव द्रव्यारम्भकसंयोगे उदयव्ययवन्तावनुभूयेते इति।

(१) 'यदन्यभेदेनान्याभेद'—इति क-वार्तिकधृतपाठान्तरम्।
(क) 'इयं च' इति वार्त्तिके।

न्यायवार्त्तिकम्

बुद्धेरप्येवमिति चेत्—अथ मन्यसे बुद्धेरपि ये ते अवस्थे भिद्येते तयोर्भेदे बुद्धिर्न भिद्यत इति(१) तन्न सिद्धान्तविरोधात्—न भवतां पक्षे धर्मधर्मिणोर्भेद इति। भेदं चाभ्युपगच्छता सिद्धान्तस्त्यक्तो भवति। तस्माद् यथा आत्मनित्यत्वे सुखदुःखानुपभोगो दोष इति न तत्र सुखदुःखे कल्प्येते इति तथा बुद्धिनित्यत्वात् बुद्धावपि न कल्पनीये समानं नित्यत्वमिति। अथाऽऽत्मनो नित्यस्य पुण्यपापाभ्यां किं क्रियते ? सुखदुःखे। ताभ्यां किं क्रियते ? प्रत्ययः—ये सुखदुःखे आत्मनि, तद्विषयः प्रत्यय आत्मनि भवतीत्येतावत् क्रियते, स च प्रत्ययो भोगः। यत् पुनरेतद् वर्षातपाभ्यां किम् व्योम्न इति, यदेव चर्मणो वर्षातपाभ्यां क्रियते तद् व्योम्नः। अथ चर्मणः किम् ? सम्बन्धः—यथा चर्म वर्षातपाभ्यां सम्बध्यते तथा व्योमापि। वर्षातपसम्बन्धात् चर्मवदनित्यं व्योमेति चेत्—अथ मन्यसे यथा चर्म वर्षातपाभ्यां सम्बन्धाद्विक्रियते तथा व्योम वर्षातपसम्बन्धाद्विकरिष्यत (२) इति ? नानेकान्तात्—वर्षातपसम्बन्धी परमाणुरथ च नित्य इत्यनेकान्त इति। चर्मणश्चानित्यत्वं किं वर्षातपसम्बन्धादथ कारणविभागादथाऽऽश्रय-विनाशादिति ? वयं तु ब्रूमः कारणवतः तद्विभागाद् युक्तो विनाशः, न पुनराकाशस्य कारणमस्तीत्युभयाभाव इति। तद्वतां चावस्थानान्न सम्बन्धो नाशहेतुः—यदि चायं सम्बन्धो

न्यायवार्त्तिकतात्पर्यटीका

तदेतद् नैयायिकपक्षदूषणं सांख्यपक्षेऽप्यापाद्य नैयायिकं पृच्छति—अथाऽऽत्मनो नित्यस्येति। नैयायिक आह—सुखदुःखे इति। नित्यादात्मनो व्यतिरिक्ताभ्यां पुण्यपापाभ्यामात्मधर्माभ्या-मनित्याभ्यामात्मधर्मावेव सुखदुःखे जन्येते इत्यर्थः। एतदुक्तं भवति। नित्यस्यानित्यधर्मा-धानमेवोपकारो न तु नित्यस्वरूपकरणं येन तदनित्यं स्यात्। धर्मश्च धर्मिणो भिन्नो न तु धर्मिस्वभावः। यथा च भेदाविशेषे सत्यपि वह्निधूमयोरेव कार्यकारणभावो न वह्निक्रमेलकयो-र्वस्तुस्वभावनियमात् एवं भेदाविशेषेऽपि आत्मनः पुण्यपापयोरेव धर्मधर्मिभावो नाऽऽत्माकाशयोः पुण्याकाशयोर्वेति लेशमात्रमत्रोक्तं विस्तरस्तु क्षणभङ्गभङ्गे भविष्यतीति। नानेकान्तादिति वाद्यभिमतपरमाणनित्यत्वग्राहिप्रमाणदार्ढ्येनानैकान्तिकत्वमुक्तं न तु बौद्धराद्धान्ते नित्यः परमाणुरिति। अत एवापरितोषेणान्यथासिद्धिमाह—चर्मणश्चानित्यत्वमिति। तद्वतां च

वृत्तिः

तवापि तुल्यो दोष इत्याशङ्कते—(तदभावः सात्मकप्रदाहेऽपि तन्नित्यत्वात्।)

'तदभावः' पातकाभावः, सात्मकशरीरस्य प्रदाहेऽपि प्रसक्तः तन्नित्यत्वात् तस्य आत्मनो नित्यत्वात्।

---

(१) अतः परमादर्शपुस्तकयोः (अन्यावस्थातो बुद्धिः ?) इति कुण्डलितः पाठो वर्तते।

(२) 'इति चेत् ? न' इति क-ख०।

न्यायवार्त्तिकम्

नाशहेतुरभविष्यत् न तद्गतामवस्थानमभविष्यत्, अवतिष्ठन्ते तु भावाः यावन्न विनाशकारणसन्निपात इति।

अथ मन्यसे वर्षातपाभ्यां चर्मणः सङ्कोचविकाशौ भवतो न त्वाकाशस्येति, तन्न; विकल्पानुपपत्तेः। सङ्कोचविकाशौ चर्मण इति कोऽर्थः? किं तावदल्पत्वमहत्त्वे उत संयोगविभागाविति? तन्न तावत् सङ्कोचविकाशावल्पत्वमहत्त्वे; यावद्द्रव्यभावित्वात् परिमाणस्य; यावद्द्रव्यं हि परिमाणं तद्द्रव्ये सति न निवर्तते इति। अथ चर्मणः सङ्कोचविकाशौ संयोगविभागाविति? तदपि न युक्तमेकत्वात्—न ह्येकस्य संयोगविभागौ सम्भवत इति। कथं तर्हि इदमुच्यते चर्मणः सङ्कोचश्चर्मणो विकाश इति? चर्मकारणानामविनश्यत्कार्याणामवयवानामातपसम्बन्धात्परस्परेण याः प्राप्तयः आरब्धकार्याणां द्रव्यान्तरानारम्भिकास्ता इतरेतरोपश्लेषेणावयवेषु वर्तमानास्तदेकार्थसमवायिनि चर्मण्युपचर्यन्ते; तदपेक्षं चेदमुच्यते चर्मणः सङ्कोचो न पुनश्चर्म सङ्कुचतीति। एतेन तदवयवानामेवोदकसम्बन्धापेक्षाणामविनश्यत्कार्याणां परस्परतो विभागो विकाश इति। विक्रियायां च (१) दृष्टान्ताभावः—तदेव वस्त्वविनश्यद् विक्रियामापद्यत इति न दृष्टान्तोऽस्ति। विक्रिया तु पदार्थान्तरोत्पादः यथा पूर्वरूपादिनिवृत्तौ रूपान्तरोत्पादे विकृतो घट इति। यद्येवम्भूतो विकारः, आत्मन्यपि चकास्ति तत्रापि सुखनिवृत्तौ दुःखप्रादुर्भाव इति सुखप्रत्ययनिवृत्तौ दुःखप्रत्यय इति, तस्मान्नित्यस्याऽऽत्मनः सुखदुःखोपभोग इति सिद्धम् ॥ ५ ॥

न्यायवार्त्तिकतात्पर्यटीका

उपलादीनाम् अवस्थानादिति। नासति विनाशप्रत्यये विनाशेऽस्ति किञ्चित्प्रमाणम्। उपलादिषु चावयवविभागविनाशाभ्यां प्राग् न विनाशोऽनुभूयते क्षणभङ्गभङ्गश्च निषेत्स्यत इति भावः।

आरब्धकार्याणां द्रव्यान्तरानारम्भिका इति अवयव्यारम्भकात्संयोगाद्भेद उक्तः। विक्रियायां च दृष्टान्ताभाव इति, धर्मोत्पादमन्तरेणाविनश्यतो धर्मिस्वरूपस्य विक्रियायामित्यर्थः। शङ्कते—यद्येवमिति। 'यद्येवंभूतो विकारः' यादृशो घटादीनां श्यामतानिवृत्तौ लोहितोत्पादे विकारः तादृशो नाऽऽत्मन इति यदि शङ्कस इत्यर्थः। निराकरोति—आत्मन्यपीति। न बाह्येन्द्रियग्राह्य एव विकारोऽपि तु धर्मान्तरोत्पादमात्रम्, तच्चात्मन्यप्यस्तीति ॥ ५ ॥

वृत्तिः

नित्यत्वेन निर्विकारत्वम्, तेन जन्यधर्मानाश्रयत्वमभिमतम् इति केचित्।

तन्नित्यत्वात् शरीरनाशे शरीरविशिष्टात्मनाशस्य नियतत्वादित्यपि कश्चित्।

किञ्च सात्मकशरीरनाशेऽपि हन्तुः स्यात् पातकाभावः तस्यात्मनो नित्यत्वेन तन्नाशकत्वाभावात् ॥ ५ ॥

(१) 'दृष्टान्ताभावात्' इति क-ख-वार्त्तिक-पाठः

न कार्याश्रयकर्त्तृवधात् ॥ ६ ॥

न्यायभाष्यम्

न ब्रूमो नित्यस्य सत्त्वस्य वधो हिंसा, अपि त्वनुच्छित्तिधर्मकस्य सत्त्वस्य कार्याश्रयस्य शरीरस्य स्वविषयोपलब्धेश्च कर्त्तृणामिन्द्रियाणामुपघातः पीडा वैकल्यलक्षणः प्रबन्धोच्छेदो वा प्रमापणलक्षणो वा वधो हिंसेति। कार्यं तु सुखदुःखसंवेदनं

न्यायवार्त्तिकम्

नित्यत्वादात्मनो हिंसादोषोऽपरिहार्यः ? न अन्यथा तदुपपत्तेः—आत्मनित्यत्वेऽप्यन्यथा हिंसा भवति। अस्यार्थस्य ज्ञापनाय—

न कार्याश्रयकर्तृवधात् इति सूत्रम्। न ब्रूमो नित्यस्य सत्त्वस्य वधो हिंसेति, अपि तु अनुच्छित्तिधर्मकस्य सत्त्वस्य यच्छरीरं यानि च सुखसंवित्तिसाधनानि इन्द्रियाण्यसाधारणानि तेषां पीडा वैकल्यं वा प्रमापणं वा हिंसेति। कुत एतत् प्रतिपत्तव्यम् ? हिंसायाः फलोपभोगस्य च उभयपक्षसम्प्रतिपन्नत्वात्—हिंसाफलोपभोगश्चोभयपक्षसम्प्रतिपन्नः। सेयं हिंसा एकस्मिन् पक्षे सम्भवति। यस्य तावत् प्रतिक्षणध्वंसिनः संस्कारास्तस्य किं हिंस्यते निर्हेतुकत्वाद्विनाशस्य कस्य व्यापारोऽस्ति। अथ विलक्षणोत्पत्तिनिमित्तत्वेन व्यवतिष्ठमानः परो हिनस्तीत्युच्यते ? ननूपचारो भवति, न भवतः प्रधानमस्ति येन शरीरोत्पादक उपचर्यते। न समानत्वात्—भवतामपि पक्षे न प्रधानं हिंस्यत इति ? सत्यम्, ममापि कार्याश्रयकर्तृवधो हिंसेति तुल्यम्। अयं तु विशेषो यत एकस्मिन् पक्षे य एवायमात्मा

न्यायवार्त्तिकतात्पर्यटीका

न का—त् (सू० ६)॥ वैकल्यं वा प्रमापणं वेति, यथा शरीरमुपघ्नन् हिनस्त्येवं चक्षुराद्युत्पाटयन् हिनस्त्येवेति। पृच्छति—कुत एतदिति। स्वरूपतो हिंसासम्भवे भाक्ती हिंसा न युक्तेति वैनाशिकस्याभिसन्धिः। उत्तरम्—हिंसाफलोपभोगस्येति। वैनाशिकस्यापि विशरारूणां भावानां न स्वरूपहिंसा कारणजन्येति विलक्षणोत्पादो हिंसेति वक्तव्यं तत्र कारणव्यापारसम्भवात्, तथा च तत्रापि हिंसा भाक्तीति भाक्तत्वस्योभयत्राप्यविशेषाद् यस्मिन् पक्षे

वृत्तिः

परिहरति—(न कार्याश्रयकर्त्तृवधात्)

कार्याश्रयस्य चेष्टाश्रयस्य कर्त्तुः कृत्यवच्छेदकस्य शरीरस्यैव नाशः, न त्वात्मन इति न पातकाभावः। यद्वा न हन्तुः पातकाभावः कार्याश्रयकर्तृवधात् शरीरस्य नाशात्

न्यायभाष्यम्

तस्याऽऽयतनमधिष्ठानमाश्रयः शरीरम्, कार्याश्रयस्य शरीरस्य स्वविषयोपलब्धेश्च कर्त्तॄणामिन्द्रियाणां वधो हिंसा, न नित्यस्याऽऽत्मनः। तत्र यदुक्तम्—'तदभावः सात्मकप्रदाहेऽपि तन्नित्यत्वा'दित्येतदयुक्तम्। यस्य सत्त्वोच्छेदो हिंसा तस्य कृतहानमकृताभ्यागमश्चेति दोषः। एतावच्चैतत् स्यात्—सत्त्वोच्छेदो वा हिंसा, अनुच्छित्तिधमर्कस्य सत्त्वस्य कार्याश्रयकर्तृवधो वा ; न कल्पान्तरमस्ति। सत्त्वोच्छेदश्च प्रतिषिद्धः, तत्र किमन्यत् ? शेषं यथाभूतमिति।

अथ वा कार्याश्रयकर्तृवधादिति, कार्याश्रयो देहेन्द्रियबुद्धिसङ्घातः, नित्यस्याऽऽत्मनस्तत्र सुखदुःखप्रतिसंवेदनम्, तस्याधिष्ठानमाश्रयः तदायतनं तद् भवति न ततोऽन्यदिति स एव कर्त्ता। तन्निमित्ता हि सुखदुःखसंवेदनस्य निर्वृत्तिः न तमन्तरेणेति। तस्य वध उपघातः पीडा प्रमापणं वा हिंसा न नित्यत्वेनाऽऽत्मोच्छेदः। तत्र यदुक्तम्—'तदभावः सात्मकप्रदाहेऽपि तन्नित्यत्वात्' एतन्नेति ॥ ६ ॥

न्यायवार्त्तिकम्

शरीरादिसाधनः कर्म करोति स एव तत्फलमुपभुङ्क्ते इति अकृताभ्यागमदोषो नास्ति। भवतामकृताभ्यागमः कृतप्रणाशश्चेति परिशेषादात्मनित्यत्वे हिंसेति व्यवस्थितम्।

तत्र कार्याश्रयशब्देन शरीरमुच्यते तन्निमित्तत्वादुपभोगस्येति, कर्त्तॄणीन्द्रियाणि तत्साधनत्वात्। अथवा समानाधिकरणसमासाच्छरीरमेव कार्याश्रयकर्तृशब्दाभ्यामुच्यत इति कर्त्ता भोक्ता चाऽऽत्मा। किं पुनरिदं कर्तृत्वं भोक्तृत्वं वा किमिति ? ज्ञानचिकीर्षाप्रयत्नानां

न्यायवार्त्तिकतात्पर्यटीका

कृतहानमकृताभ्यागमदोषो नास्ति स पक्षोऽभ्युपेतव्यः। स च नित्यात्मपक्षः। तस्मात्पारिशेष्यात् तत्सिद्धिरिति।

वृत्तिः

ब्राह्मणत्वादेः शरीरवृत्तित्वात् तन्नाशादेव पापोत्पत्तिरिति भावः। वस्तुतस्तु (१)अपूर्वशरीरावच्छिन्नप्राणसंयोगात्मकोत्पत्तिवत् शरीरावच्छिन्नप्राणसंयोगध्वंसविशेषात्मक-

(१) 'पूर्वशरीर' इति भ०।

न्यायभाष्यम्

इतश्च देहादिव्यतिरिक्त आत्मा—

सव्यदृष्टस्येतरेण प्रत्यभिज्ञानात् ॥ ७ ॥

(१)पूर्वपरयोर्विज्ञानयोरेकविषये प्रतिसन्धिज्ञानं प्रत्यभिज्ञानम्—तमेवैतर्हि पश्यामि यमज्ञासिषं स एवायमर्थ इति सव्येन चक्षुषा दृष्टस्येतरेणापि चक्षुषा प्रत्यभिज्ञानाद्

न्यायवार्त्तिकम्

समवायः कर्तृत्वम्, सुखदुःखसंवित्समवायो भोक्तृत्वम्, एतत्तु न शरीरे, निमित्तत्वात् कर्तृ शरीरमुच्यते ॥ ६ ॥

इतश्च देहादिव्यतिरिक्त आत्मा—

सव्यदृष्टस्येतरेण प्रत्यभिज्ञानात्। सव्येन चक्षुषा दृष्टमितरेण प्रत्यभिजानातीति (क) सूत्रम्। तच्च प्रतिसन्धानं प्रत्यभिज्ञानम्, स्मृतिपूर्वकत्वात् प्रत्यभिज्ञानस्य। प्रतिसन्धानाच्चैककर्तृत्वं प्रत्ययानां सिध्यतीति।

न्यायवार्त्तिकतात्पर्यटीका

ज्ञानचिकीर्षाप्रयत्नानां समवायः कर्तृत्वमिति, उपायतद्व्यापाराणामनभिज्ञो हि चिकीर्षन्नपि न कर्ता, एवमभिज्ञोऽप्यचिकीर्षन्; तथा चिकीर्षन्नप्यलसतया अप्रयतमानो न कर्तेति। सुखदुःखसंवित्समवाय इति, स्वसुखदुःखेति द्रष्टव्यम्। अस्ति हि परकीयसुखदुःखसाक्षात्कारो योगिनां न चैते भोगिनः ॥ ६ ॥

इतश्च देहादिव्यतिरिक्त आत्मा कुतः ?

सव्य—त् (सू, ७) ॥ तत्र मानसमनुव्यवसायलक्षणं प्रत्यभिज्ञानं भाष्यकारो दर्शयति—तमेवैतर्हीति। व्यवसायं बाह्येन्द्रियजं प्रत्यभिज्ञानमाह—स एवायमर्थ इति। अस्यैव चानुव्यवसायः पूर्वः।

वृत्तिः

मरणमप्यात्मनः सम्भवति, अन्यथा शरीराविनाशिनो बन्धनमुखनिरोधादेर्हिंसात्वं न स्यात्। पातकानभ्युपगन्तृचार्वाकादिमते शरीरभेदसाधनं तु वक्ष्यमाणयुक्तिभिरिति ध्येयम् ॥ ६ ॥

समाप्तं देहभेदप्रकरणम् ॥ २ ॥

---

(१) 'पूर्वापरयोः' इति फ-ज०।

(क) 'सूत्रम्' सूत्रार्थः।

न्यायभाष्यम्

यमद्राक्षं तमेवैतर्हि पश्यामीति। इन्द्रियचैतन्ये तु नान्यदृष्टमन्यः प्रत्यभिजानातीति प्रत्यभिज्ञानुपपत्तिः। अस्ति त्विदं प्रत्यभिज्ञानम् तस्मादिन्द्रियव्यतिरिक्तश्चेतनः॥ ७॥

न्यायवार्त्तिकम्

सिद्धत्वादनारम्भ इति—दर्शनस्पर्शनाभ्यामेकार्थग्रहणादित्येतस्मिन् प्रकरणे सिद्ध आत्मव्यतिरेकः, सिद्धत्वादनारभ्यं प्रकरणमिति। इन्द्रियव्यतिरेकज्ञापनार्थमित्येके—एके इदं प्रकरणमिन्द्रियव्यतिरेकज्ञापनार्थं वर्णयन्ति। तन्न, तत एव सिद्धेः—पूर्वप्रकरणेनैव इन्द्रियशरीरव्यतिरेकः सिद्ध इति। समुच्चयार्थमित्यपरे—अपरे तु समुच्चयार्थं सव्यदृष्टस्येतरेण प्रत्यभिज्ञानादिति हेतुं ब्रुवते। युक्तोऽन्यः समुच्चयः, अयं तु न युक्तो विरोधात्। सव्यदृष्टस्येतरेण प्रत्यभिज्ञानादिति ब्रुवाणो युक्तिं बाधते। का पुनरियं युक्तिबाधा? अनेकत्वादिन्द्रियस्य युगपदधिष्ठानासम्भवः—अणु मनोऽनेकं चक्षुः, न चाणोर्मनसो युगपदनेकेन चक्षुषा सम्बन्धः सम्भवति। अथासम्बद्धमपि द्वितीयं चक्षुरर्थानालोचयति? एवं च सति द्वितीयचक्षुर्वदितरचक्षुरपि मनसाऽनधिष्ठितमेव प्रवर्त्तिष्यत इति व्यर्थं मनः प्राप्तम्। अनधिष्ठितं च प्रवर्त्तमानमिन्द्रियं करणत्वं बाधते, न च करणमनधिष्ठितं प्रवर्त्तमानं दृष्टमिति। समग्रासमग्रयोश्च तुल्योपलब्धि-

न्यायवार्त्तिकतात्पर्यटीका

(क)तदेतत्प्रकरणं वार्त्तिककारो दूषयति—सिद्धत्वादनारम्भ इति। युक्तोऽन्यः समुच्चयः शास्त्रे। अयमभिसन्धिः। काणस्तथा न पश्यति पिहितैकलोचनो वा यथाऽविकलेन्द्रियः। तत्र यदि सव्यदक्षिणाधिष्ठानभेदभिन्नं चक्षुः, न चैतद् द्वयमणुना मनसा युगपदधिष्ठातुं शक्यमित्यन्यतरदधिष्ठेयम्। तथा च सर्व एवैकैकेन चक्षुषा पश्यतीति (ख)पिहितैकलोचनेनातुल्योपलम्भः अविकलाक्षस्य स्यात्; न चैवमस्ति। एकत्वे तु तदुभाभ्यामधिष्ठानाभ्यां विनिर्यत् क्वचिदपि मनसा-

वृत्तिः

प्रसङ्गाच्चक्षुरद्वैतप्रकरणमारभते—(सव्यदृष्टस्येतरेण प्रत्यभिज्ञानात्)

वामेन चक्षुषा दृष्टस्य दक्षिणेन चक्षुषा प्रत्यभिज्ञानात् स्थिरात्मसिद्धिरिति केषाञ्चिन्मतम् तन्निराकरणाय चैतदुपन्यासः॥ ७॥

(क) क-ख-तात्पर्यपुस्तकयोः 'तदेतत् प्रकरणम्' इत्यतः पूर्वं 'तदेतच्चक्षुरैक्येनाक्षिपति—(७२८—७३१ पृः ता-टी० ३ पं) सूत्रार्थः' इत्यन्तो ग्रन्थभागो मुद्रितः। तच्चायुक्तमित्यस्माभिरत्रत्य सन्निवेशितम्।

(ख) 'पिहितैकलोचनेन तुल्य उपलम्भः' इति युक्तः पाठः।

नैकस्मिन्नासास्थिव्यवहिते द्वित्वाभिमानात् ॥ ८ ॥

न्यायभाष्यम्

(१)एकमिदं चक्षुर्मध्ये नासास्थिव्यवहितं तस्यान्तौ गृह्यमाणौ द्वित्वाभिमानं प्रयोजयतो मध्यव्यवहितस्य दीर्घस्येव ॥ ८ ॥

न्यायवार्त्तिकम्

प्रसङ्गः—न ह्यनधिष्ठितमिन्द्रियं प्रवर्त्तत इत्यणुत्वान्मनसा नित्यमेकमेव सम्बध्यत इति विकलाविकलयोस्तुल्योपलब्धिः प्राप्नोति । (क)प्रकरणविरोधश्चेन्द्रियपञ्चत्वादिति इन्द्रियपञ्चत्वप्रतिपादकं प्रकरणं विरुध्यते इति ॥ ७ ॥

यदि तर्ह्येकमिन्द्रियं द्वित्वोपलब्धिः कथम् ? द्वित्वोपलब्धिप्रतिपादनार्थम्—

नैकस्मिन्नासास्थिव्यवहिते द्वित्वाभिमानात् इति सूत्रम् । एकमिन्द्रियं द्रव्यं द्व्यधिष्ठानमभिन्नम् । कोऽधिष्ठानार्थः ? तैजसस्य चक्षुषः पार्थिवेन कृष्णसारेण उपकारविकारभेदानुविधानम्—यस्मात् कृष्णसार उपक्रियमाण उपक्रियते विक्रियमाणे विक्रियते तिष्ठति पश्यतीति, तस्मादस्य कृष्णसारमधिष्ठानमुच्यते । एतच्च व्याख्यातं शरीरसूत्रे । तस्यान्तौ गृह्यमाणौ द्वित्वाभिमानं प्रयोजयतः यथा दीर्घस्य द्रव्यस्य मध्ये व्यवहितस्यान्तावुपलभ्यमानौ द्वित्वाभिमानं प्रयोजयत इति ॥ ८ ॥

न्यायवार्त्तिकतात्पर्यटीका

ऽधिष्ठितमेवेत्यविकलाक्षस्य न विकलाक्षवदुपलम्भप्रसङ्गः । तस्मादेकमनेकाधिष्ठानं चक्षुरिति । (ख)प्रकरणविरोधश्चेन्द्रियपञ्चत्वादिति । न चैतदेकस्मिन् शरीरे जात्यभिप्रायं(ग)घ्राणादीनां व्यक्तीनां चतसृणां व्यक्त्यन्तरेण समभिव्याहारोपपत्तेर्न तु जात्या । न हि भवति ब्राह्मणयुधिष्ठिरावागताविति किन्तु ब्राह्मणराजन्याविति वा वशिष्ठयुधिष्ठिराविति वा ॥ ७ ॥

तदेतच्चक्षुरैक्येनाऽऽक्षिपति—

नैक—त् (सू० ८) (घ) ॥

वृत्तिः

एतद् दूषयति—(नैकस्मिन्नासास्थिव्यवहिते द्वित्वाभिमानात्) ।

मध्यस्थसेतुना तडागस्येव नासास्थिव्यवहितगोलकान्तरावच्छिन्नतया द्वैतप्रत्ययो भ्रम इत्यर्थः ॥ ८ ॥

---

(१) 'न । एकमिदं—' इति टि-पु-पाठः ।

(क) प्रकरणविरोधश्च इन्द्रियपञ्चकत्वात् इति क-ख-वार्त्तिक-पाठः । (ख) 'इन्द्रियार्थपञ्चत्वात्' इति सूत्रम् (सू० ५६ आ० १ अ० ३) । (ग) घ्राणादिसमभिव्याहारस्य घ्राणरसनेत्यादि (अ० १, आ० १, सू० १२) सूत्रे दृष्टत्वात्, क-ख-तात्पर्यपुस्तकयोर्मुद्रितः 'घ्राणादीनाम्' इति पाठः परित्यक्तः । (घ) अवतरणिकातिरिक्ता टीकाऽस्य नोपलभ्यते ।

एकविनाशे द्वितीयाविनाशान्नैकत्वम् ॥ ९ ॥

न्यायभाष्यम्

एकस्मिन्नुपहते चोद्धृते वा चक्षुषि द्वितीयमवतिष्ठते चक्षुः(१)विषयग्रहणलिङ्गम्, तस्मादेकस्य व्यवधानानुपपत्तिः ॥ ९ ॥

अवयवनाशेऽप्यवयव्युपलब्धेरहेतुः ॥ १० ॥

एकविनाशे द्वितीयाविनाशादित्यहेतुः। कस्मात्? वृक्षस्य हि कासुचिच्छाखासु छिन्नासूपलभ्यते एव वृक्षः ॥ १० ॥

न्यायवार्त्तिकम्

एकविनाशे द्वितीयाविनाशान्नैकत्वम्। एकस्मिन् विनष्टे (क) उद्धृते वा द्वितीयमवतिष्ठते विषयग्रहणे लिङ्गम्। न, अन्यथा तदुपपत्तेः—द्वितीयमवतिष्ठते इति नैतत् कस्यचित् प्रत्यक्षम्; प्रत्ययमात्रं तु विनष्टेऽप्येकस्मिन्नधिष्ठाने यदवतिष्ठते तेन भवति। न चाधिष्ठानमिन्द्रियम्, अपि तु यत् (२)तदनुविधायि तद् अनुविधत्त इति, यथा बहुवातायनस्य वेश्मन एकपिधानादितरेण ग्रहणमिति ॥ ९ ॥

अवयवनाशेऽप्यवयव्युपलब्धेरहेतुः। अपरे त्ववयवनाशेऽप्यवयव्युपलब्धेरहेतुरिति (३)परिहारं वर्णयन्ति ॥ १० ॥

न्यायवार्त्तिकतात्पर्यटीका

समाधत्ते—

एक—त्वम् (सू० ९) ॥ विनाशाविनाशलक्षणविरुद्धधर्माध्यासान्नानात्वमित्यर्थः।

विनष्टेऽप्येकस्मिन्नधिष्ठाने (ख)योऽविनष्टोऽवशिष्यते तेन प्रत्ययमात्रं (ग)काणस्येव भवति ॥ ९ ॥

आक्षेपमाह—

अव—तुः (सू० १०) (घ) ॥

वृत्तिः

आक्षिपति—(एकविनाशे द्वितीयाविनाशान्नैकत्वम्)

चक्षुरैक्ये एकचक्षुर्नाशेऽन्धत्वं स्यादिति भावः ॥ ९ ॥

---

(१) 'विषयग्रहणे लिङ्गम्' इति ग०, 'ग्रहणं लिङ्ग' इति वि०। (२) 'तदेकमनुविधत्त इति' इति आदर्शपुस्तकधृतपाठान्तरम्। (३) 'परिहारान्तरं' इति क-खपुस्तकधृतपाठान्तरम्।

(क) "उद्वृत्ते" इति क-ख-वार्त्तिकपाठः प्रामादिक इति बुद्ध्या शोधितः। (ख)वार्त्तिके 'यदवतिष्ठते' इति। (ग) क-ख-पुस्तकयोः 'कारणस्येव' इति प्रामादिकः पाठः।

(घ) १०म-सूत्रस्य अवतरणिकातिरिक्ता टीका नोपलभ्यते।

दृष्टान्तविरोधादप्रतिषेधः ॥ ११ ॥

न्यायभाष्यम्

न (१)कारणद्रव्यस्य विभागे कार्यद्रव्यमवतिष्ठते नित्यत्वप्रसङ्गात्। बहुष्ववयविषु यस्य कारणानि विभक्तानि तस्य विनाशः, येषां कारणान्यविभक्तानि तानि अवतिष्ठन्ते।

अथ वा दृश्यमानार्थविरोधो दृष्टान्तविरोधः। मृतस्य हि शिरःकपाले (क)द्वाववटौ नासास्थिव्यवहितौ चक्षुषः स्थाने भेदेन गृह्येते न चैतदेकस्मिन्नासास्थिव्यवहिते सम्भवति।

(२)अथ वा एकविनाशस्यानियमाद् द्वाविमावर्थौ, तौ च पृथगावरणोपघातौ

न्यायवार्त्तिकम्

तस्योत्तरम्—

दृष्टान्तविरोधादप्रतिषेध इति सूत्रम्। अस्यार्थः—न कारणद्रव्यविनाशे कार्यद्रव्यमवतिष्ठते। यदि नावतिष्ठते कथं कारणद्रव्यविनाशे कार्यमुपलभ्यत इति? क एवमाह उपलभ्यत

न्यायवार्त्तिकतात्पर्यटीका

समाधाता आह—

दृष्टा—धः (सू ११) ॥ तृतीयं व्याख्यानमाह—

अथ वा एकविनाशस्यानियमादिति। एकत्वे चक्षुषो विनाशनियमो न स्यात् सव्यस्यैव चक्षुषो न दक्षिणस्येति; एकत्वात् सव्यविनाशे दक्षिणस्यापि नाशप्रसङ्गात्। दृश्यते चायं नियमः। तस्माद् द्वावर्थौ पृथगावरणौ पृथगुपघातौ चेति। अपि च यदि चक्षुरेकं (ख)सव्येन नासावंशेनावपीडितम्, ततोऽङ्गुल्याऽवपीडितं यथैकं भिन्नमिवावभासयति अवपीडने निवर्त्तमाने भिन्नावभासौ तावर्थौ संदधातीति तथा नासावंशावपीडितं भिन्नमिव दर्शयेत् तन्निवृत्तौ संदध्या-

वृत्तिः

अत्रैकदेशी परिहरति—(अवयवनाशेऽप्यवयव्युपलब्धेरहेतुः)।

अवयवस्य शाखादेर्नाशेऽप्यवयविनो वृक्षस्य प्रत्यभिज्ञानात् नावयवनाशे सर्वत्रावयविनाशनियमः, तथा चैकनाशेऽपि नान्धत्वमिति ॥ १० ॥

एकदेशिमतस्य पूर्वोक्ताक्षेपस्य च समाधानाय सिद्धान्तिनः सूत्रम्—(दृष्टान्तविरोधादप्रतिषेधः)

उक्तः प्रतिषेधो न युक्तः दृष्टान्तस्य विरोधाद् अयुक्तत्वात्। न हि शाखाच्छेदे

---

(१) 'कारणद्रव्यं विभागे' इति ग०। (२) 'अथ च' इति ख-ग०।

(क) 'द्वाववटौ' इति द्वौ गर्त्ताविन्यर्थः। (ख) 'सव्येन' इत्यत्र 'मध्येन' इति पाठः सम्भाव्यते।

न्यायभाष्यम्

अनुमीयेते विभिन्नाविति। अवपीडनाच्चैकस्य चक्षुषो रश्मिविषयसन्निकर्षस्य भेदाद् दृश्यभेद इव गृह्यते ; तच्चैकत्वे विरुध्यते ; अवपीडननिवृत्तौ चाभिन्नप्रतिसन्धानमिति। तस्मादेकस्य व्यवधानानुपपत्तिः ॥ ११ ॥

अनुमीयते चायं (१)देहादिसङ्घातव्यतिरिक्तश्चेतन इति—

न्यायवार्त्तिकम्

इति, अपि तु बहुष्ववयविषु यस्य कारणानि विभक्तानि तद्विनष्टम्, यस्य न विभक्तानि तदुपलभ्यत इति। शेषं भाष्ये ॥ ११ ॥

अनुमीयते चायं देहादिव्यतिरिक्तश्चेतन आत्मा—

न्यायवार्त्तिकतात्पर्यटीका

दिवेत्याह—अवपीडनाच्चैकस्य चक्षुष इति। रश्मिभेदाद्विषयसन्निकर्षस्य भेद इत्यर्थः। अङ्गुल्यवपीडितेन चक्षुषा दृष्टान्तेन विरोधादित्यर्थः। एकविनाशेन (क)इतरविनाशो वा दृष्टान्तः, तेन विरोधादिति। स खलु दृश्यमानश्च एकान्तावधारणाद् (ख)अन्तश्चेति दृष्टान्त इति सूत्रार्थः।

न च नासावंशावपीडितेन सर्वेषां सर्वदा सर्वत्र द्विचन्द्रवद्विभ्रमप्रसङ्गः, आगन्तुकमवपीडनं भ्रमहेतुर्नौत्पत्तिकमिति कार्यदर्शनात् कल्प्यते ॥ ११ ॥

तदेवं प्रतिसन्धानद्वारेणात्मनि (२)प्रत्यक्षं प्रमाणयित्वा अनुमानमिदानीं प्रमाणयति—अनुमीयते चायमिति। विप्रतिपन्नं हि प्रति प्रतिसन्धानमुक्तं परमार्थतस्तु अनुभवानुसारमार्गोऽयमिति मन्तव्यम्।

वृत्तिः

वृक्षस्तिष्ठति, तथा सति वृक्षस्यानाशप्रसङ्गात्, अतोऽवस्थितावयवैस्तत्र खण्डवृक्षोत्पत्तेर्नैकदेशिमतं युक्तम्। एतेनैकनाशे द्वितीयाविनाशाद् भेदसाधनमपि प्रत्युक्तम्, चक्षुर्नाशेऽपि गोलकान्तरावच्छिन्नावयवैः खण्डचक्षुःसम्भवात्। इत्थं च लाघवाच्चक्षुरद्वैतमिति टीकास्वरससिद्धम्।

परे तु चक्षुर्द्वैतमेव सूत्रार्थं मन्यमाना व्याचक्षते। सिद्धान्तिनः सूत्रं सव्येति। शङ्कते—नैकस्मिन्निति। समाधत्ते—एकेति। शङ्कते—अवयवेति। निराकरोति—दृष्टान्तेति। शाखानाशे वृक्षनाशावश्यकत्वात् दृष्टान्तो न युक्तः। यद्वा दृष्टान्तस्य गोलकभेदस्य विरोधाद् अन्यथाऽनुपपन्नत्वात्। दृष्टं हि मृतस्य चक्षुरधिष्ठानगोलकद्वयं भेदेनैवोपलभ्यत इति वदन्ति ॥ ११ ॥

---

(१) 'देहादिव्यतिरिक्त' इति वि०। (२) 'प्रत्ययं' इति क०।

(क) 'इतराविनाशो वा' इति युक्तः पाठः। (ख) 'अतश्चेति' इति क-ख-तात्पर्यपाठः शोधितः।

इन्द्रियान्तरविकारात् ॥ १२ ॥

न्यायभाष्यम्

कस्यचिदम्लफलस्य (१)गृहीततद्रससाहचर्ये रूपे गन्धे वा केनचिदिन्द्रियेण गृह्यमाणे रसनस्येन्द्रियान्तरस्य विकारः रसानुस्मृतौ रसगर्धिप्रवर्तितो दन्तोदकसंप्लवभूतो गृह्यते। तस्येन्द्रियचैतन्येऽनुपपत्तिः, नान्यदृष्टमन्यः स्मरति ॥ १२ ॥

न्यायवार्त्तिकम्

इन्द्रियान्तरविकारात्। कस्यचिदम्लस्य फलस्य दृष्टसाहचर्ये रूपे गन्धे वा केनचिदिन्द्रियेण गृह्यमाणे रसनेन्द्रियविकारः। कः पुनर्विकारः? रसानुस्मृतौ रसगर्द्धिप्रवर्त्तितः, गर्द्धिः तृष्णा, रसतृष्णाप्रवर्त्तितो दन्तान्तरपरिस्रुताभिरद्भी रसनेन्द्रियस्य संप्लवः सम्बन्धो विकार इत्युच्यते। सा चेयं स्मृतिरिन्द्रियचैतन्ये न प्राप्नोति न च प्रतिक्षणध्वंसिषु संस्कारेषु, अन्यानुभूतस्यान्येनास्मरणादिति। इन्द्रियान्तरविकार इन्द्रियान्तरधर्मः, स कथं व्यधिकरणत्वाद्वात्मव्यतिरेकं प्रतिपादयति? नेन्द्रियान्तरविकार आत्मव्यतिरेकप्रतिपत्तिकारणम्, अपि तु स्मृतिः। न ह्येकमनुभवितारमन्तरेण स्मृतिः प्राप्नोति, स्मृतिश्च भावत्वाद्भवित्रपेक्षा उत्पत्तिवदिति न्यायः। न च स्मृतिमन्तरेणेन्द्रियविकारः सम्भवतीति प्रत्यक्ष इन्द्रियान्तरविकार उपादीयते अननुभूतरसस्येन्द्रियविकाराभावादिति व्यतिरेकहेतुः ॥ १२ ॥

न्यायवार्त्तिकतात्पर्यटीका

इन्द्रि—त् (सू० १२)॥ कस्यचिद् (क)अम्लस्य फलस्य चिरविल्वादेरनुभूतस्य तेन सहचरितं रूपं वा गन्धं वाऽनुभवति, अथ तत्सहचरितं रसमनुस्मरति, स्मृत्वा चेच्छति, इच्छातो रसनेन्द्रियविकारो दन्तोदकसंप्लवलक्षणः प्रवर्तते, तद्दर्शनाच्चास्येच्छाऽनुमीयते, इच्छया च स्मृतिः। सेयं स्मृतिरसत्यात्मनि सर्वेन्द्रियविषयवेदिनि न भवितुमर्हतीति ॥ १२ ॥

वृत्तिः

आत्मन इन्द्रियभेदे युक्त्यन्तरमाह—(इन्द्रियान्तरविकारात्)

चिरविल्वाद्यम्लद्रव्ये दृष्टे तद्रसस्मरणात् दन्तोदकसंप्लवरूपरसनेन्द्रियविकारादिन्द्रियव्यतिरिक्त आत्मा सिध्यति ॥ १२ ॥

---

(१) 'गृहीतसाहचर्ये' इति वि-ज०।

(क) 'अम्लचिरविल्वादेः' इति क-ख-तात्पर्यपाठः। 'चिरविल्वो नक्तमालः करजश्च करञ्जके' इत्यमरः।

न स्मृतेः स्मर्तव्यविषयत्वात् ॥ १३ ॥

न्यायभाष्यम्

स्मृतिर्नाम धर्मो निमित्तादुत्पद्यते, तस्याः स्मर्तव्यो विषयः, तत्कृत इन्द्रियान्तर-विकारो नाऽऽत्मकृत इति ॥ १३ ॥

तदात्मगुणसद्भावादप्रतिषेधः ॥ १४ ॥

तस्या आत्मगुणत्वे सति सद्भावादप्रतिषेध आत्मनः। यदि स्मृतिरात्मगुणः, एवं सति स्मृतिरुत्पद्यते नान्यदृष्टमन्यः स्मरतीति। इन्द्रियचैतन्ये तु नानाकर्तृकाणां विषयग्रहणानामप्रतिसन्धानम्, (१) प्रतिसन्धाने वा विषयव्यवस्थानुपपत्तिः। एकस्तु चेतनोऽनेकार्थदर्शी भिन्ननिमित्तः पूर्वदृष्टमर्थं स्मरतीति एकस्यानेकार्थदर्शिनो दर्शन-

न्यायवार्त्तिकम्

न स्मृतेः स्मर्तव्यविषयत्वात्। स्मृतिर्नाम धर्मः तस्याः स्मर्तव्योऽर्थो विषयः। सेयं स्मर्तव्यार्थसन्निधानादुपजायमानाऽपरिदृष्टसामर्थ्यं न स्मर्तारं प्रतिपादयिष्यति। न हि स्वकारण-सन्निधानादुत्पन्नोऽङ्कुरोऽपरिदृष्टसामर्थ्यं कुम्भादिकमर्थं प्रतिपादयति।

तदात्मगुणसद्भावादप्रतिषेधः। न स्मर्तव्यमात्रात् स्मृतिरुत्पद्यते, यदाऽयमतीतमर्थं स्मरति तदा स्मृतिरनाधारा प्राप्नोति। न चेयमनाधारा युक्ता गुणत्वात्। न हि कश्चिद् गुणो-

न्यायवार्त्तिकतात्पर्यटीका

अस्याऽऽक्षेपसूत्रम्—

न स्मृ—त् (सू० १३)॥ स्मृतिरात्मानं कारणत्वेनावगमयेत् विषयत्वेन वा। न तावत्कारणत्वेन तस्याः संस्कारकारणत्वात्। न विषयत्वेन स्मर्तव्यविषयत्वात्। स्मृताच्च तस्मादिन्द्रियान्तरविकारोत्पत्तिरित्यर्थः ॥ १३ ॥

समाधत्ते—

तदा—धः (सू १४) ॥

असत्यात्मनि स्मृत्यनुत्पत्तिं दर्शयित्वा स्मर्तव्यार्थविषयैव स्मृतिर्नाऽऽत्मविषयेति पूर्वपक्षिणो-

वृत्तिः

आक्षिपति—(न स्मृतेः स्मर्तव्यविषयत्वात्)

स्मृतिर्हि स्मर्तव्यविषयिणीति नियमः, तस्याश्च दर्शनादिना सामानाधिकरण्ये माना-भावात्, अस्तु वा विषयतयैव सामानाधिकरण्यमिति भावः ॥ १३ ॥

समाधत्ते—(तदात्मगुणसद्भावादप्रतिषेधः)

(१) 'अप्रतिसन्धाने' इति पा०।

न्यायभाष्यम्

प्रतिसन्धानात् स्मृतेरात्मगुणत्वे सति सद्भावः विपर्यये चानुपपत्तिः। स्मृत्याश्रयाः प्राणभृतां सर्वे व्यवहाराः। आत्मलिङ्गमुदाहरणमात्रमिन्द्रियान्तरविकार इति।

अपरिसङ्ख्यानाच्च स्मृतिविषयस्य—अपरिसङ्ख्याय च स्मृतिविषयमिदमुच्यते 'न स्मृतेः स्मर्तव्यविषयत्वा'दिति। येयं स्मृतिरगृह्यमाणेऽर्थे अज्ञासिषमहममुमर्थमिति, एतस्या ज्ञातृज्ञानविशिष्टः (१) पूर्वज्ञातोऽर्थो विषयो नार्थमात्रम्, ज्ञातवानहममुमर्थम्,

न्यायवार्त्तिकम्

ऽनाधारो दृष्ट इति। न चेयमिन्द्रिये सम्भवत्यननुभूतत्वात्। न विषये तस्यासत्त्वात्। न शरीरे, शरीरगुणानां प्रत्यक्षाणां स्वात्मपरात्मप्रत्यक्षत्वात्। न चेयमनाधारा गुणत्वादित्युक्तम्। न चेयं नास्ति। न चाऽऽत्मन्यसत्यस्याः सद्भावो युक्त इति। तेभ्योऽन्यस्य तदुत्पत्तौ सामर्थ्यमवगम्यते कथमित्यनेनैव प्रत्युक्तम्। अस्त्यात्मनः सामर्थ्यं स्मृतेराधारभावः। न चेयमनाधारा कार्यत्वात् सर्वं कार्यमाधारवत् क्षीरादि दृष्टमिति।

न्यायवार्त्तिकतात्पर्यटीका

ऽवधारणं खण्डयति—

अपरिसंख्यानाच्च स्मृतिविषयस्येति। मानसानुव्यवसायजनितसंस्कारकारणासु चतसृष्वपि स्मृतिषु नार्थमात्रं विषयोऽपि तु ज्ञानज्ञातृज्ञेयानि सर्व एव विषयाः। चतुर्षु वाक्येषु एकत्र ज्ञानं क्रिया कारकान्निष्कृष्टा यथा अमुष्मिन् मम ज्ञानमभूदिति अगृह्यमाणोऽप्यर्थः स्मृतिसन्निधापनादमुष्मिन्नित्युच्यते। कारकादनिष्कृष्टाऽप्येकत्र पूर्वापरीभूतभावनाप्रधाना ज्ञानक्रिया गम्यते अज्ञासिषमहममुमर्थमिति। अन्यत्र तु ज्ञानभावने कारकादनिष्कृष्टे कर्तृप्रधाने यथा

वृत्तिः

उक्तः प्रतिषेधो न युक्तः धर्मिग्राहकमानेन स्मृतेरात्मगुणत्वात् परिशेषेणाऽऽत्मगुणत्वसिद्धेरहं स्मरामीत्यनुभवाद् विषयनिष्ठकार्यकारणभावे चैत्रस्य ज्ञानान्मैत्रस्य स्मरणापत्तेरिति भावः ॥ १४ ॥

विषयाणां स्मर्तव्यानां स्मृतिसमवायित्वं स्यादित्याशङ्क्य समाधत्ते—

(अपरिसङ्ख्यानाच्च स्मृतिविषयस्य)

'अपरिसङ्ख्यानात् आनन्त्यात्'। तथा च लाघवादतिरिक्तात्मसिद्धिः। इदं न सूत्रं किन्तु भाष्यमिति केचित् ॥ १५ ॥ (क)

समाप्तं चक्षुरद्वैतप्रकरणम् ॥ २ ॥

---

(१) 'पूर्वज्ञातो विषयः' इति वि-टि०।

(क) वृत्तिकृताऽस्य सूत्रत्वस्वीकारात् इतः प्रभृति भाष्यादिसम्मतसूत्रसंख्यातो वृत्तिकृत्सम्मतसूत्रसंख्या भिद्यते।

न्यायभाष्यम्

असावर्थो मया ज्ञातः, अस्मिन्नर्थे मम ज्ञानमभूदिति चतुर्विध(१)मेतद्वाक्यं स्मृतिविषयज्ञापकं समानार्थम्। सर्वत्र खलु ज्ञाता ज्ञानं ज्ञेयं च गृह्यते। अथ प्रत्यक्षेऽर्थे या स्मृति(२)स्तया त्रीणि (२*) ज्ञानानि एकस्मिन्नर्थे प्रतिसन्धीयन्ते समानकर्तृकाणि, न नानाकर्तृकाणि नाकर्तृकाणि। किं तर्हि? एककर्तृकाणि। अद्राक्षममुमर्थं यमेवैतर्हि पश्यामि। अद्राक्षमिति दर्शनं दर्शनसंविच्च, न खल्वसंविदिते स्वे दर्शने स्यादेतदद्राक्षमिति। ते खल्वेते द्वे ज्ञाने, यमेवैतर्हि पश्यामीति (३)तृतीयं ज्ञानम्, एवमेकोऽर्थ-

न्यायवार्त्तिकम्

एतेन— "न तच्चक्षुषि नो रूपे नान्तराले तयोः स्थितम्।
न तदस्ति न तन्नास्ति यत्र तन्निष्ठितं भवेत्॥"

इति प्रत्युक्तम्। न तदस्ति न तन्नास्तीति व्याहतम्। न चानया कारिकया विज्ञानस्याऽऽ-

न्यायवार्त्तिकतात्पर्यटीका

ज्ञातवानहममुमर्थमिति। अन्यत्र ज्ञानभावने कारकादनिष्कृष्टे कर्मप्रधाने यथा असावर्थो मया ज्ञात इति। समानार्थमिति ज्ञानज्ञेयज्ञातृप्रकाशनं समानमित्यर्थः। एवं तावद्गृह्यमाणेऽर्थे स्मृतिः प्रदर्शिता। अथ प्रत्यक्षेऽर्थे स्मृतिः प्रदर्श्यते—अथ प्रत्यक्षेऽर्थ इति। स्मृतिरिति प्रत्यभिज्ञानमाह स्मृतिच्छायावाहित्वात्। अद्राक्षमिति पूर्वार्थमर्थदर्शनं परामृशति। तेनार्थदर्शनानुभवः कल्प्यतामनुभवकल्पना तु कुतस्त्येत्यत आह—न खल्वसंविदिते स्वे दर्शने इति। अपि त्वर्थदर्शनं तद्दर्शनं च संविदिते एवेत्यर्थः। कुत एतदित्यत आह—एतदद्राक्षमिति। यस्मादनुभवपुरःसरं यदत्राद्राक्षमिति भवति नूनं तत्रानुभवप्रथाऽप्यभूदिति कल्पनीयमित्यर्थः। इतोऽपि न शरीरगुणः स्मृतिः बाल्ये अनुभूतस्य वार्धके स्मरणात्। अन्यद्धि बालशरीरमन्यच्च वृद्धशरीरमिति। आस्तां तावत्प्रत्यभिज्ञानं सादृश्यमपि दुर्विज्ञानम्। न च परमाणूनां चैतन्यम्, ते हि प्रत्येकं वा चेतयेरन् मिलिता वा? पूर्वस्मिन् कल्पे अनेकचैतन्ये एकस्मिन् शरीरे नैकमित्यनियमो भवेत्। न हि नानाचेतनानामैकमत्यनियमो दृष्टः। मिलितानां तु चैतन्ये परमाणूनामावापोद्वापभेदेन मेलकस्य नानात्वात् स एवान्योपलब्धस्यान्येन स्मृत्यभावप्रसङ्गः। तस्मान्न शरीराधारा चेतनेति।

परेषां कारिकां दूषयति वार्त्तिककारः—एतेन न तच्चक्षुषि नो रूप इति प्रत्युक्तम् (क)आत्मनः पारिशेष्यात्सिद्धेः स्मृत्याधारत्वव्युत्पादनेनेत्यर्थः। यत्राधिकरणे तज्ज्ञानं निष्ठितं भवेन्न तदधिकरणमस्ति न च नास्तीति व्याहतम्। स्यादेतत्—नायं विशेषप्रतिषेधो न

(१) '-मपि तद् वाक्यं' इति टि०। (२) '-स्तयाऽपि' इति टि०। (३) 'तृतीयमिवार्थज्ञानमेकमेकः' इति वि०।

(क) प्रतिवादप्रकारमाह आत्मन इति। स्मृत्याधारत्वेति 'एतेन' इति वार्त्तिकव्याख्यानमिति बोध्यम्।

न्यायभाष्यम्

स्त्रिभि(१)र्ज्ञानैर्युज्यमानो नाकर्तृको न नानाकर्तृकः किं तर्हि ? एककर्तृक इति(१*)। सोऽयं स्मृतिविषयोऽपरिसङ्ख्यायमानो विद्यमानः प्रज्ञातोऽर्थः प्रतिषिध्यते—नास्त्यात्मा स्मृतेः स्मर्तव्यविषयत्वादिति। न चेदं स्मृतिमात्रं स्मर्तव्यमात्रविषयम् (२)वा इदं खलु ज्ञानप्रतिसन्धानवत् स्मृतिप्रतिसन्धानमेकस्य सर्वविषयत्वात्। एकोऽयं ज्ञाता सर्वविषयः स्वानि ज्ञानानि प्रतिसन्धत्ते अमुमर्थं ज्ञास्यामि अमुमर्थं विजानाम्यमुमर्थमज्ञासिषममुमर्थं जिज्ञासमानश्चिरमज्ञात्वाऽध्यवस्यत्यज्ञासिषमिति। एवं स्मृतिमपि त्रिकालविशिष्टां सुस्मूर्षाविशिष्टां च प्रतिसन्धत्ते। संस्कारसन्ततिमात्रे तु सत्त्वे उत्पद्योत्पद्य संस्कारास्तिरोभवन्ति। स नास्त्येकोऽपि संस्कारो यस्त्रिकालविशिष्टं ज्ञानं स्मृतिं चानुभवेत्। न चानुभवमन्तरेण ज्ञानस्य स्मृतेश्च प्रतिसन्धानमहं ममेति चोत्पद्यते देहान्तरवत्। अतोऽनुमीयते अस्त्येकः सर्वविषयः प्रतिदेहं स्वज्ञानप्रबन्धं स्मृतिप्रबन्धं च प्रतिसन्धत्ते इति,यस्य देहान्तरेषु वृत्तेरभावान्न प्रतिसन्धानं भवतीति ॥१४॥

न्यायवार्त्तिकम्

श्रयिभावः प्रतिषेद्धुं शक्यते। किं कारणम् ? विशेषप्रतिषेधात्—न तच्चक्षुषि नो रूप इत्यादिविशेषप्रतिषेधः। अथानाश्रितमेव विज्ञानम्, व्यर्थं वाक्यं 'न तच्चक्षुषि नो रूप' इति। कस्य वा चक्षुषि रूपे वा विज्ञानं वर्तते यं प्रति प्रतिषेधः ? अयं च विज्ञानस्याऽऽश्रयप्रतिषेधो विचार्यमाण आत्मसत्त्वं प्रतिपादयति। न हि विज्ञानस्याऽऽत्मसत्त्वमन्तरेण वाक्यमेतदर्थवत्तायां व्यवतिष्ठते।

अथवा एकस्यानेकविषयोपलब्धिप्रतिसन्धानमनेन सूत्रेणोपदर्श्यत इत्युक्तन्यायम्। शेषं भाष्य इति।

अपरिसंख्यानाच्च स्मृतिविषयस्य ॥ १४ ॥ (क)

(इत्यष्टभिः सूत्रैः प्रासङ्गिकं चक्षुरद्वैतप्रकरणम् ॥)

न्यायवार्त्तिकतात्पर्यटीका

चक्षुषि विज्ञानं न रूप इति, किन्तु ये चक्षुराद्याश्रयं विज्ञानं मन्यन्ते तन्मतं प्रतिषिध्यते। आधारवत्त्वं तु न प्रतिषिद्धमप्रसक्तत्वादित्यत आह—कस्य वेति। अपि चैषा कारिका आत्माभावविवक्षया प्रयुक्ता आत्मसत्त्वमेव प्रतिपादयन्ती विवक्षितविरुद्धेत्याह—अयं च विज्ञानस्येति।

तदेवं भाष्यमतेनेन्द्रियान्तरविकारादिति सूत्रं व्याख्याय वार्त्तिककारः स्वमतेन व्याचष्टे—अथ वा एकस्येति। उक्तमेव प्रतिसन्धानं पुनरिन्द्रियान्तरविकारद्वारेण दर्शयति सूत्रम्। यथा च प्रतिसंधानं देहेन्द्रियादिव्यतिरिक्तमात्मानं प्रतिपादयति तथाऽधस्तादेव विवृतमित्याह—उक्तन्यायमिति ॥ १४ ॥

---

(१) '-र्ज्ञानैरभिधमानो नाज्ञातकी न नानाज्ञातकः' इति वि०। (२) 'वा'-इति ग-ल-पुस्तकयोः नास्ति।

(क) क-ख-पुस्तकयोः स्थूलाक्षरैर्मुद्रितमपीदं वाक्यं वार्त्तिककृन्मतेऽपि न सूत्रमिति बोध्यम्।

(सू)—नाऽऽत्मप्रतिपत्तिहेतूनां मनसि सम्भवात् ॥ १५ ॥

न्यायभाष्यम्

न देहादिसङ्घातव्यतिरिक्त आत्मा। कस्मात्? आत्मप्रतिपत्तिहेतूनां मनसि सम्भवात्—'दर्शनस्पर्शनाभ्यामेकार्थग्रहणादि'त्येवमादीनामात्मप्रतिपादकानां हेतूनां मनसि सम्भवो यतः, मनो हि सर्वविषयमिति। तस्मान्न शरीरेन्द्रियमनोबुद्धि-सङ्घातव्यतिरिक्त आत्मेति ॥ १५ ॥

(सू)—ज्ञातुर्ज्ञानसाधनोपपत्तेः संज्ञाभेदमात्रम् ॥ १६ ॥

ज्ञातुः खलु ज्ञानसाधनान्युपपद्यन्ते—चक्षुषा पश्यति घ्राणेन जिघ्रति स्पर्शनेन स्पृशति, एवं मन्तुः सर्वविषयस्य मतिसाधनमन्तःकरणभूतं सर्वविषयं विद्यते येनायं मन्यत इति। एवं सति ज्ञातर्यात्मसंज्ञा न मृष्यते मनःसंज्ञाऽभ्यनुज्ञायते। मनसि च मनःसंज्ञा न मृष्यते मतिसाधनं त्वभ्यनुज्ञायते। तदिदं संज्ञाभेदमात्रं नार्थे विवाद इति।

न्यायवार्त्तिकम्

नाऽऽत्मप्रतिपत्तिहेतूनां मनसि सम्भवात्। य एते भवता आत्मप्रतिपादका हेतव उपदिष्टाः सर्व एते मनसि सम्भवन्ति। एवं च न मनोव्यतिरिक्त आत्मा सिध्यति ॥ १५ ॥

ज्ञातुर्ज्ञानसाधनोपपत्तेः संज्ञाभेदमात्रम्। यथा ज्ञातारमभ्युपगच्छता ज्ञानसाधनानि चक्षुरादीनि प्रतिपद्यन्ते तथा मन्तारं प्रतिपद्यमानेन मतिसाधनमभ्युपेयम्। यच्च तन्मतिसाधनं

न्यायवार्त्तिकतात्पर्यटीका

नाऽऽत्म—वात् (सू० १५) (क) ॥

ज्ञातु—त्रम् (सू० १६) ॥ 'मतिः' स्मृत्यनुमानादिज्ञानम्। यद्यपि चेदं प्रातिस्विक-संस्कारादिकारणकं तथाऽप्यवश्यमेतेनेन्द्रियजेन भवितव्यम्, ज्ञानत्वात्, रूपादिज्ञानवदिति;

वृत्तिः

ननु मनसो नित्यत्वादात्मत्वमस्त्वित्याशङ्कते—(नात्मप्रतिपत्तिहेतूनां मनसि सम्भवात्) नातिरिक्त आत्मा, आत्मसाधकमानानां मनसाऽर्थान्तरत्वमिति भावः ॥ १६ ॥

समाधत्ते—(ज्ञातुर्ज्ञानसाधनोपपत्तेः संज्ञाभेदमात्रम्)।

यदि मनसो ज्ञातृत्वं तदा व्यासङ्गाद्युपपादनाय करणान्तरमवश्यं वाच्यम्।

(क) १५श-सूत्रस्य तात्पर्यटीका नोपलभ्यते।

न्यायभाष्यम्

प्रत्याख्याने वा सर्वेन्द्रियविलोपप्रसङ्गः। अथ मन्तुः सर्वविषयस्य मतिसाधनं सर्वविषयं प्रत्याख्यायते नास्तीति, एवं रूपादिविषयग्रहणसाधनान्यपि न सन्ति इति (१) सर्वेन्द्रियविलोपः प्रसज्यत इति ॥ १६ ॥

(सू)—नियमश्च निरनुमानः ॥ १७ ॥

योऽयं नियम इष्यते रूपादिग्रहणसाधनान्यस्य सन्ति, मतिसाधनं सर्वविषयं नास्तीति, अयं नियमो निरनुमानः। नात्रानुमानमस्ति येन नियमं प्रतिपद्यामह इति।

रूपादिभ्यश्च विषयान्तरं सुखादयस्तदुपलब्धौ करणान्तरसद्भावः। यथा चक्षुषा गन्धो न गृह्यत इति करणान्तरं घ्राणम् एवं चक्षुर्घ्राणाभ्यां रसो न गृह्यत इति करणान्तरं रसनम्। एवं शेषेष्वपि। तथा चक्षुरादिभिः सुखादयो न गृह्यन्त इति

न्यायवार्त्तिकम्

तन्मन इति सञ्ज्ञाभेदमात्रम्। अथ मन्ता निःसाधनो मतिं करोति ? एवमयं ज्ञाता निःसाधनो ज्ञानं करिष्यतीति सर्वेन्द्रियविलोपप्रसङ्गः ॥ १६ ॥

नियमश्च निरनुमानः। योऽयं नियम आश्रीयते मतिरसाधना न पुनर्ज्ञप्तिरिति, नियमो निरनुमानः, ज्ञप्तिवत्तु मतेः ससाधनत्वेऽनुमानमस्ति। सुखादयश्च रूपादिभ्यो विषयान्तरमिति तद्विषयत्वादुपलब्धेः साधनेन भवितव्यम्; न हि किञ्चित् सविषयं ज्ञानमसाधनं दृष्टं रूपादिज्ञानवदिति। नियमश्च निरनुमानः सुखादिविज्ञानानि निःसाधनानि भवन्तु मा भूवन्

न्यायवार्त्तिकतात्पर्यटीका

तच्चेन्द्रियमसति चक्षुरादौ भावान्मतेश्चक्षुराद्यतिरिक्तं मन इत्युच्यते ॥ १६ ॥

निय—नः (सू० १७) ॥ ननु भवतु करणान्तरं मनः, तत्तु कथमिन्द्रियान्तरसहकारि

वृत्तिः

तथा चैको ज्ञाता, ज्ञानसाधनं चैकं सिद्धम्, मन आत्मा[illegible]स्त्विति संज्ञाभेदमात्रम्, किञ्च व्यासङ्गोपपादकतया मनसोऽणुत्वं सिद्धमात्मनश्च प्रत्यक्षोपपादकतया महत्त्वमिति भेद आवश्यक इति भावः ॥ १७ ॥

---

(१) 'सर्वेन्द्रियविषयलोपः' इति टि०।

न्यायभाष्यम्

(१)करणान्तरेण भवितव्यम्। तच्च ज्ञानायौगपद्यलिङ्गम्। यच्च सुखाद्युपलब्धौ करणं तच्च ज्ञानायौगपद्यलिङ्गं तस्येन्द्रियमिन्द्रियं प्रति सन्निधेरसन्निधेः (२)च न युगपज् ज्ञानान्युत्पद्यन्ते इति। तत्र यदुक्तम् 'आत्मप्रतिपत्तिहेतूनां मनसि सम्भवात्' इति तदयुक्तम् ॥ १७ ॥

न्यायवार्त्तिकम्

रूपादिविषयाणीति। यदि सर्वं विज्ञानं ससाधनमुच्यते मनस्यपि करणान्तरं प्राप्नोति विषयत्वात्, ओमित्युच्यते—अस्ति मनसि करणम्। किं पुनस्तत्? येन मनोऽधिगम्यते। केन च मनोऽधिगम्यते? अयुगपज्ज्ञानोत्पत्त्या। यस्य तु मनः प्रत्यक्षं भवति तस्य योगजधर्मानुगृहीत आत्ममनःसंयोगः करणम्, योगिधर्माणां चाचिन्त्यविषयत्वात् कथं ते मनो गृह्णन्तीत्यविचारणीयमेतत्। एतेनाऽऽत्मज्ञानं प्रत्युक्तम्, आत्ममनःसंयोगस्य (क)कारणभावादिति। एवं तावदात्मनोऽस्तित्वव्यतिरेकौ सिद्धौ, बहुत्वं चात एव, दर्शनस्पर्शनाभ्यामेकार्थग्रहणात् नान्यदृष्टमन्यः स्मरतीति शरीरदाहे पातकाभावादिति। सेयं सर्वा व्यवस्था शरीरिभेदे सति सम्भवतीति ॥१७॥

(इति त्रिभिः सूत्रैर्मनोव्यतिरिक्तात्मप्रकरणम्।)

न्यायवार्त्तिकतात्पर्यटीका

कथं चाणुपरिमाणमित्यत आह—तच्च ज्ञानायौगपद्यलिङ्गमिति।

वार्तिकम्—यदि सर्वं विज्ञानं ससाधनमुच्यते मनस्यपीति। न च तत्र मन एव करणमात्मनि वृत्तिविरोधादिति तदन्यस्य करणत्वे तज्ज्ञानायापीन्द्रियान्तरमुपासनीयमित्यनवस्था, अनिन्द्रियजत्वे तु मतावपि संस्काराद्येव कारणमस्तीति कृतं मनसेति भावः। परिहरति—ओमितीति। यथा कारणसत्तया कार्यं जनितं कारणं (ख) ज्ञापयति एवं मनःसत्तया मनोलिङ्गज्ञानं जनितं मनो ज्ञापयति। तच्च लिङ्गजं मनोज्ञानं मनःसत्ताहेतुकम्, न च स्वात्मनि वृत्तिविरोधः; न हि मनःसत्तायां मनः करणं मनोज्ञाने वा मनोज्ञानं करणं येन स्वात्मनि वृत्तिविरोधः स्यात्, केवलं वा मनः स्वज्ञाने करणं येनैकत्र कर्मकरणत्वे स्याताम्; अपि तु मनोज्ञाने लिङ्गज्ञानसहितं मनः करणम्, तत्स्वरूपं तु लिङ्गज्ञानसाहित्यादिति न स्वात्मनि वृत्तिविरोधः। नाप्येकस्यैव केवलस्य कर्मकरणभाव इति भावः। स्यादेतद् लिङ्गज्ञानसहितस्य मनसः करणत्वे मा भूदेकस्यैव कर्मकरणभावः स्वरूपेण कर्मत्वाद् लिङ्गज्ञानसाहित्येन च करणत्वात्; यदा तु योगिना प्रत्यक्षेण मनो गृह्यते तदा कथमेकस्य कर्मकरणभाव इत्यत आह—यस्य तु मनः प्रत्यक्षमिति ॥ १७ ॥

---

(१) 'कारणान्तरेण' इति वि०। (२) 'च' इति ल-ग-झा-पुस्तकेषु नास्ति।

(क) अत्र 'करणभावात्' इति पाठः सम्भाव्यते। (ख) क-ख-पुस्तकयोः 'ज्ञायते' इति मुद्रितम्।

न्यायभाष्यम्

किं पुनरयं देहादिसङ्घातादन्यो नित्यः उतानित्य इति। कुतः संशयः? उभयथा दृष्टत्वात् संशयः। विद्यमानमुभयथा भवति नित्यमनित्यं च। प्रतिपादिते च (१) आत्मसद्भावे संशयानिवृत्तेरिति।

न्यायवार्त्तिकम्

'किं पुनरयं देहादिसङ्घातादन्यो नित्यः (क) अथानित्य इति' एतस्मिन्नर्थे 'उभयथा दृष्टत्वा'-दिति संशयमुपपादयति। अनुपपन्नरूपश्चायं संशयः—आत्मास्तित्वव्यतिरेकहेतुभिः शरीरभेदेऽप्यभेद आत्मनि सिद्धः, सिद्धत्वात् प्रकरणमनारभ्यमिति। नानारभ्यम्। कथम्? जन्मप्रभृति यावत् प्रायणमेतस्मादेकः सिध्यति न पुनर्देहविनाशादूर्ध्वं भवतीत्येतत् सिध्यति एतस्यार्थस्य ज्ञापनार्थम्।

न्यायवार्त्तिकतात्पर्यटीका

शास्त्रार्थभूताभ्युदयनिःश्रेयसोपयोगिनं परलोकं परीचिक्षिषुः परीक्षाहेतुभूतं संशयमाह—किं पुनरयमिति।

अत्र वार्तिककारः संशयं दूषयन् प्रकरणान्तरारम्भमाक्षिपति—एतस्मिन्नर्थ इति। देहेन्द्रियबुद्धिवेदनाभ्यो व्यतिरिक्तत्वमात्मनो दर्शयता बाल्यकौमारयौवनवार्द्धकभेदेऽपि चैकात्मप्रतिसंधानमर्थादुपपादयता शरीरनाशादूर्ध्वमात्मसद्भावो दर्शितः। तावता च नः प्रयोजनं तत्किमवशिष्यते यत्र संशयो यत्कृते च प्रकरणोत्थानमित्यर्थः। समाधत्ते—नानारभ्यमिति। सिद्धेऽपि देहादिव्यतिरेके बाल्यादिषु चानुगमे किमयमात्मा आ शरीरोत्पत्तेरा च प्रायणाद् यावद्देहसंतानभावी आहोस्विदुपरतेऽपि देहादिसंतानेऽनुवर्तत एवेत्येष विमर्शोऽद्यापि न निराकृत इति तन्निरासायेदं प्रकरणमारभ्यत इत्यर्थः।

वृत्तिः

ननु रूपादिप्रत्यक्षं सकरणकमस्तु, न तु सुखादिप्रत्यक्षम्, एवं परमाण्वन्तरस्यातीन्द्रियत्वेऽपि मनसः प्रत्यक्षं स्यादत आह—(नियमश्च निरनुमानः)।

उक्तो नियमविशेषो निरनुमानः निष्प्रमाणको गौरवाद् वैपरीत्ये (ख) च विनिगमकाभावाच्चेति भावः॥ १८॥

समाप्तं मनोभेदप्रकरणम्॥ ४॥

(१) 'आत्मसम्भवे' इति वि०।

(क) भाष्ये 'अथ' इत्यत्र 'उते'ति विशेषः। (ख) चकारोऽयं प्रमादापतितः सम्भाव्यते।

न्यायभाष्यम्

आत्मसद्भावहेतुभिरेवास्य प्राग् देहभेदादवस्थानं सिद्धम् ऊर्द्ध्वमपि देहभेदादवतिष्ठते। कुतः ?

पूर्वाभ्यस्तस्मृत्यनुबन्धाज्जातस्य हर्षभयशोकसम्प्रतिपत्तेः ॥१८॥

जातः खल्वयं कुमारकोऽस्मिन् जन्मन्यगृहीतेषु हर्षभयशोकहेतुषु हर्षभयशोकान् प्रतिपद्यते लिङ्गानुमेयान्। ते च स्मृत्यनुबन्धादुत्पद्यन्ते नान्यथा। स्मृत्यनुबन्धश्च पूर्वाभ्यासमन्तरेण न भवति। पूर्वाभ्यासश्च पूर्वजन्मनि सति, नान्यथेति सिध्यत्येतत् अवतिष्ठतेऽयमूर्द्ध्वं शरीरभेदादिति ॥ १८ ॥

न्यायवार्त्तिकम्

पूर्वाभ्यस्तस्मृत्यनुबन्धाज्जातस्य हर्षभयशोकसम्प्रतिपत्तेरिति सूत्रम्। अस्यार्थः। जातः खल्वयं कुमारको विषयाधिगमासमर्थेषु इन्द्रियेषु हर्ष-भय-शोकान् प्रतिपद्यमानो दृष्टः स्मित-कम्प-रुदितानुमेयान्, ते च स्मृत्यनुबन्धादुत्पद्यन्ते। स्मृत्यनुबन्धश्च नान्तरेण पूर्वशरीरमिति। तत्र जन्म निकायविशिष्टाभिः शरीरेन्द्रियबुद्धिवेदनाभिः सम्बन्धः। अभिप्रेतविषयप्रार्थनाप्राप्तौ सुखानुभवो हर्षः। अनिष्टविषयसाधनोपनिपाते तज्जिहासोर्हानाशक्यता भयम्। इष्टविषयवियोगे सति तत्प्राप्त्यशक्यप्रार्थना शोकः। तदनुभवः सम्प्रतिपत्तिः। एकविषयानेकविज्ञानोत्पादोऽभ्यासः एकाकारविषयो वा। यथा शालयोऽनेनाभ्यस्ता इति।

न्यायवार्त्तिकतात्पर्यटीका

भाष्यम् देहभेदादिति। ल्यब्लोपे पञ्चमी। बाल्यकौमारयौवनवार्द्धकदेहभेदमभिसमीक्ष्य प्रतिसंधानादस्यावस्थानं सिद्धमित्यर्थः।

पूर्वा—त्तेः (सू० १८)॥ वार्त्तिकम्—अभिप्रेतविषयप्रार्थनाप्राप्ताविति। अभिप्रेतविषयप्राप्ताविति वक्तव्ये प्रार्थनाग्रहणम् इष्यमाणतमत्वं सूचयति। नेष्यमाणप्राप्तौ हर्षोऽपि त्विष्यमाणतमप्राप्तौ, तेनाभिप्रेतविषयस्य प्रार्थनायां सत्यां प्राप्तावित्यर्थः। हानाशक्यतेति विषयेण विषयिणीं बुद्धिमुपलक्षयति। अनिष्टो विषयो मरणादिस्तस्य साधनमहिव्याघ्रादिस्तस्योपनिपातः सन्निधानम्, तस्मिन्सति व्याघ्रादिजिहासोरशक्यहानमेतदिति बुद्धिर्भयं सा हि कस्यापि जनयति। इष्टविषयवियोगे सति तत्प्राप्त्यशक्यप्रार्थना शोकः। तस्यैव

वृत्तिः

एवं साधितेऽपि देहादिभिन्ने आत्मनि विना तन्नित्यतां न परलोकार्थिनः प्रवृत्तिरत आत्मनित्यताप्रतिपादनाय सूत्रम्—(पूर्वाभ्यस्तस्मृत्यनुबन्धाज्जातस्य हर्षभयशोकसम्प्रतिपत्तेः)।

जातस्य बालस्य एतज्जन्माननुभूतेष्वपि हर्षादिहेतुषु सत्सु हर्षादीनां सम्प्रतिपत्तिः उत्पत्तिः, तस्याः पूर्वपूर्वानुभवाधीनस्मृतिसम्बन्धादेव सम्भवात्। इत्थं चेदानीन्तन-

न्यायवार्त्तिकम्

प्रत्यक्षबुद्धिनिरोधे तदनुसन्धानविषयः प्रत्ययः स्मृतिः। तदनुगृहीतस्तदनुसन्धानविषयः प्रत्ययस्तद्भावविषयः प्रत्यभिज्ञानम्। अनुबन्धो—भावनाख्यः स्मृतिहेतुः संस्कारः। इष्टविषयानुस्मरणान्नयनादिप्रसादः स्मितम्। अनिष्टविषयानुस्मरणात् तत्साधनजिहासानुष्ठानलक्षणो हस्तादिविक्षेपवतोऽश्रुविमोचनसहितः शब्दविशेषो रुदितम्।

स्मितरुदिते व्यधिकरणत्वादसाधनम्—अथ मन्यसे स्मितरुदिते बाल्यावस्थायां भवतः, न च बाल्यावस्था आत्मनः, तस्माद् व्यधिकरणत्वादसाधनमिति? न, शोकादिमदात्मवतीति बाल्यावस्थायाः साध्यत्वात्—शोकादिमदात्मवती बाल्यावस्थेति साध्यं स्मितरुदितादिमत्त्वादिति। बाल्यावस्था वयोधर्मो यौवनावस्थावत्। एतेन स्मृतिसंस्कारानुभवपूर्वशरीरसम्बन्धवदात्मवत्त्वं व्याख्यातम्। कथमिति? यथा स्मितरुदितवत्त्वेन शोकादिमदात्मवती बाल्यावस्था साध्यते एवं शोकादिमदात्मवत्त्वेन स्मृतिमदात्मवती बाल्यावस्था साध्या, तथा स्मृतिमदात्मवत्त्वेन संस्कारवदात्मवती बाल्यावस्था साध्या, संस्कारवदात्मवत्त्वेन पूर्वानुभववदात्मवती, पूर्वानुभववदात्मवत्त्वेन पूर्वशरीरसम्बन्धवदात्मवती साध्या सर्वत्र पूर्वानुभववदात्मवत्त्वेन पूर्वशरीरसम्बन्धवदात्मवती साध्या। सर्वत्र (१) यौवनावस्था दृष्टान्तः। सा हि स्मितरुदितवती भवतीति शोकादिमदात्मवती चेति सर्वत्र वक्तव्यम्॥ १८॥

न्यायवार्त्तिकतात्पर्यटीका

पुरुषस्य यः प्राप्त्यशक्यः तत्र प्रार्थना शोकः। य इष्टो विषयः प्राप्तुमशक्यस्तत्र प्रार्थना इदं मे उपपद्यतां (क)भवत्विति इत्थंभूता चेयं प्रार्थना न स्वरूपेण शोक इत्यत आह—इष्टविषयवियोगे सतीति, अनर्हणेनेति यावत्। तदयमर्थः—इष्टवियोगे तत्प्राप्त्यशक्यताज्ञानं शोक इति। अनर्हणेन प्राप्त्यशक्यताज्ञानं शोचतः सूचयति। प्रत्यक्षबुद्धिनिरोध इति। प्रत्यक्षग्रहणेन ग्रहणमात्रमुपलक्षयति। तदनुगृहीतः स्मृत्यनुगृहीतः। तदनुसंधानविषय इति। अनुसंधीयत इत्यनुसंधानं स्मृते यदनुसंधेयं तद्विषय इत्यर्थः। तथाऽपि स्मृतिप्रत्यभिज्ञयोरविशेष इत्यत आह—वर्तमानस्य विषयस्य दृश्यस्य तद्भावविषय इति। दृष्टो हि निरालम्बनो बालः स्खलन्मातुरङ्कात्पतनस्यानिष्टसाधनत्वमनुस्मृत्येदं च पतनमिति परामृष्य तस्यानिष्टसाधनत्वमनुमाय रुदन्मातुर्मङ्गल्यमुरःसूत्रं विक्षिप्य हस्तौ वेपमान उपाददानः; तस्यानया चेष्टया भयशोकावनुमीयेते इत्यर्थः॥ १८॥

वृत्तिः

स्याऽऽत्मनः पूर्वपूर्वसिद्धौ तस्यानादित्वमनादेश्च भावस्य न नाश इति नित्यत्वसिद्धिरिति भावः॥ १९॥

(१) 'यौवनादिर्दृष्टान्तः'—इति क-ख-धृतपाठान्तरम्।

(क) 'भवतु' इति 'उपपद्यता'मित्यस्य विवरणं सम्भाव्यते।

(सू०)—पद्मादिषु प्रबोधसम्मीलनविकारवत्तद्विकारः ॥ १९ ॥

न्यायभाष्यम्

यथा पद्मादिष्वनित्येषु (१)प्रबोधः सम्मीलनं विकारो भवति एवमनित्यस्याऽऽत्मनो हर्षभयशोकसम्प्रतिपत्तिर्विकारः स्यात् ।

हेत्वभावादयुक्तम्—अनेन हेतुना पद्मादिषु प्रबोधसम्मीलनविकारवदनित्यस्याऽऽत्मनो हर्षादिसम्प्रतिपत्तिरिति नात्रोदाहरणसाधर्म्यात्साध्यसाधनं हेतु(२)र्न वैधर्म्यादस्ति, हेत्वभावात् असम्बद्धार्थकमपार्थकमुच्यते इति ।

न्यायवार्त्तिकम्

पद्मादिषु प्रबोधसम्मीलनविकारवत् तद्विकारः । अनित्येऽपि विकारदर्शनादनेकान्त इति सूत्रार्थः ।

कः पुनरयं प्रबोधः, किं च सम्मीलनमिति ? पद्मपत्रावयवविभागोऽविनश्यत्कार्यः प्रबोधः, पद्मपत्रावयवानामारब्धकार्याणां याः पुनः परस्परेण प्राप्तयः तत् सम्मीलनमिति । न विकल्पानुपपत्तेः—पद्मादिषु प्रबोधसम्मीलनविकारादिवत्तद्विकार इति किमयं दृष्टान्तः साधनपक्षे उतानैकान्तिकपक्ष इति ? यदि साधनपक्षे, हेतुमन्तरेण दृष्टान्तमात्रं न साधनमित्यसाधनं दृष्टान्तः । अथ दूषणम्, तत्किं दृष्टकारणप्रत्याख्यानम्, उत कारणान्तरोपपादनम्, अथाऽऽत्मन उत्पत्तिनिरोधकारणानुमानम्, अथाऽऽकस्मिकत्वमिति ? तद् यदि तावद् दृष्टकारणप्रत्याख्यानम्, तदयुक्तम्, दृष्टेन विशेषितत्वात्—यौवनाद्यवस्थासु स्मितरुदितवत्त्वं शोकादिमदात्मवत्वं च दृष्टमिति—दृष्टेन स्मितरुदितवत्त्वेन शोकादिमदात्मवत्त्वं बाल्यावस्थायां गम्यत इति न दोषः । अथ कारणान्तरोपपादनम् ? तदपि न युक्तम् अत एव—दृष्टेन विशेषितत्वादिति । अथाऽऽत्मन

न्यायवार्त्तिकतात्पर्यटीका

पद्मा—रः (सू० १९) ॥ दृष्टेन विशेषितत्वादिति । दृष्टशब्देन विशेषितो व्यवस्थापितः कार्यकारणभावो न शक्यो व्युदसितुमित्यर्थः । अथाऽऽत्मन उत्पत्तिनिरोधानुमानमिति । यद्विकारि तदुत्पत्तिनिरोधधर्मकं दृष्टम्, यथा पद्मम्; तथा चाऽऽत्मा, तस्मादनित्य इत्यर्थः । यदि धर्मोपजननमात्रं विकारः स आकाशादिष्वपीत्यनेकान्तः । धर्मधर्मिणोश्च भेदान्न धर्मोपजननापायौ धर्मिणि युज्येते इति नानित्यत्वानुमानं विकारात् । अस्माकं त्वात्मनित्यत्वेऽनुमानमस्तीत्याशयेन

वृत्तिः

अत्र शङ्कते—(पद्मादिषु प्रबोधसम्मीलनविकारवत् तद्विकारः) ।

---

(१) 'प्रबोधसम्मीलनं' ल-ज-भा० । (२) 'न च' इति फ० ।

न्यायभाष्यम्

दृष्टान्ताच्च हर्षादिनिमित्तस्यानिवृत्तिः—या चेयमासेवितेषु विषयेषु हर्षादिसम्प्रतिपत्तिः स्मृत्यनुबन्धकृता प्रत्यात्मं गृह्यते सेयं पद्मादिसम्मीलनदृष्टान्तेन न (१)निवर्तते। यथा चेयं न निवर्त्तते तथा जातस्यापीति। (२)क्रियाजातौ च पर्णविभागसंयोगौ प्रबोधसम्मीलने, क्रियाहेतुश्च (३) क्रियानुमेयः। एवं च सति किं दृष्टान्तेन प्रतिषिध्यते॥ १६॥

अथ निर्निमित्तः पद्मादिषु प्रबोधसम्मीलनविकार इति मतमेवमात्मनोऽपि हर्षादिसम्प्रतिपत्तिरिति। तच्च—

(सू०)—नोष्णशीतवर्षाकालनिमित्तत्वात् पञ्चात्मकविकाराणाम्॥ २०॥

उष्णादिषु सत्सु भावाद् असत्स्वभावात् तन्निमित्ताः पञ्चभूतानुग्रहेण निर्वृत्तानां पद्मादीनां प्रबोधसम्मीलनविकारा इति न निर्निमित्ताः। एवं हर्षादयोऽपि विकारा

न्यायवार्त्तिकम्

उत्पत्तिनिरोधकारणानुमानम्, तन्न युक्तं—द्रव्यस्य सतः सर्वदा अमूर्तत्वाद् अकारण आत्मा आकाशादिवदिति। आत्मानं च कृतकं प्रतिपद्यमानेन कारणमस्य वाच्यम्। कुतः? कार्यस्य (४) कारणवत्त्वात्, सर्वं कार्यं कारणवद् दृष्टमिति॥ १९॥

अथ पद्मादिप्रबोधसम्मीलनविकारोऽकस्माद्भवतीति? तत्—

नोष्णशीत(५)वर्षकालनिमित्तत्वात् पञ्चात्मकविकाराणाम्। नायमाकस्मिकः

न्यायवार्त्तिकतात्पर्यटीका

नित्यत्वानुमानमाह—तन्न युक्तमिति। सर्वदाऽमूर्तत्वादिति। घटादयोऽप्येकस्मिन् क्षणे भवन्त्यमूर्ताः, परिमाणविशेषो हि मूर्त्तिः, न च द्रव्यसमानकालोत्पत्तिर्गुणानामिति तन्निवृत्त्यर्थं सर्वदेत्युक्तम्॥ १९॥

वृत्तिः

बालस्य हर्षादयो मुखविकासाद्यनुमेयाः। न च तत्सम्भवः, पद्मादीनां प्रबोधादिवददृष्टविशेषाधीनक्रियावशादेव तदुपपत्तेरिति भावः॥ २०॥

---

(१) 'निवर्त्यते' इति ग०। (२) अत्र फ-पुस्तकपाठो गृहीतः।

'क्रियाजातश्च पर्णविभागः संयोगः प्रबोधसम्मीलने' इति ल०।

'क्रियाजातश्च पर्णविभागः संयोगप्रबोधसम्मीलने' इति ग०।

'क्रियाजातश्च पर्णविभागः संयोगप्रबोधः सम्मीलने' इति ज०।

'क्रियाजाताश्च पर्णसंयोगविभागाः' इति भा०।

(३) 'अनुमेयः' इति ज०। (४) 'कारणवत्त्वनियमात्' इति क-ख-धृतपाठान्तरम्। (५) 'वर्षाकाल'—इति क-ख-धृतपाठान्तरम्।

न्यायभाष्यम्

निमित्ताद् भवितुमर्हन्ति न निमित्तमन्तरेण । न चान्यत् पूर्वाभ्यस्तस्मृत्यनुबन्धान्निमित्तमस्तीति । न चोत्पत्तिनिरोधकारणानुमानमात्मनो दृष्टान्तात्, (१)न हर्षादीनां निमित्तमन्तरेणोत्पत्तिः, नोष्णादिवन्निमित्तान्तरोपादानं हर्षादीनाम्, तस्मादयुक्तमेतत् ॥ २० ॥

इतश्च नित्य आत्मा—

प्रेत्याऽऽहाराभ्यासकृतात् स्तन्याभिलाषात् ॥ २१ ॥

जातमात्रस्य वत्सस्य प्रवृत्तिलिङ्गः स्तन्याभिलाषो गृह्यते । स च नान्तरेणाऽऽहाराभ्यासम् । कया युक्त्या ? दृश्यते हि शरीरिणां क्षुधा पीड्यमानानामाहाराभ्यासकृतात् स्मरणानुबन्धादाहाराभिलाषः । (२)न च पूर्वशरीराभ्यासमन्तरेणासौ

न्यायवार्त्तिकम्

पद्मादिप्रबोधसम्मीलनविकार इति सूत्रार्थः । एवं च सति दृष्टान्तेन न किञ्चित् प्रतिषिध्यते । पञ्चात्मकविकाराणामिति, न (३)पञ्चात्मकानि पद्मानीति, अपि तु पञ्चानां भूतानामनुग्रहे सति भवन्तीति पञ्चात्मकानीत्युच्यन्ते । वस्तुतस्तु न पञ्चात्मकं किञ्चिदस्तीत्युपरिष्टाद् वक्ष्यामः ॥ २० ॥

प्रेत्याऽऽहाराभ्यासकृतात् स्तन्याभिलाषात् । जातमात्रस्य वत्सस्य प्रवृत्त्या स्तन्याभिलाषो गम्यते, तत्र (४) प्रवृत्त्युन्नेयः स्तन्याभिलाषः, तेन स्मृतिस्तया संस्कारस्तेनानुभवस्तेन

न्यायवार्त्तिकतात्पर्यटीका

नोष्ण—णाम् (सू० २०) ॥ पञ्चात्मकानां पद्मादीनां विकाराः पञ्चात्मकविकारा इति ॥ २० ॥

वृत्तिः

सिद्धान्तसूत्रम्—(नोष्णशीतवर्षाकालनिमित्तत्वात् पञ्चात्मकविकाराणाम्) ।

उक्तं न युक्तम्, यतः पञ्चात्मकानां पाञ्चभौतिकानां पद्मादीनां ये विकारास्तेषाम् उष्णकालादिनिमित्तत्वात् । मनुष्यादीनां तु हर्षादिनिमित्तका मुखविकासादय इति न तुल्यतेति भावः ॥ २१ ॥

---

(१) 'न' इति टि-पु० नास्ति । (२) 'न च पूर्वशरीरमन्तरेणासौ' इति ज-टि० ।

(३) 'पञ्चात्मककारणानि'—इति क-ख-पुस्तकयोर्मुद्रितम्, तत्र पाठान्तरतया धृत आकारस्तु गृहीतः । (४) 'प्रवृत्त्यनुमेयः'—इति क-ख-धृतपाठान्तरम् ।

न्यायभाष्यम्

जातमात्रस्योपपद्यते । तेनानुमीयते भूतपूर्वं शरीरं यत्रानेनाऽऽहारोऽभ्यस्त इति । स खल्वयमात्मा पूर्वशरीरात् प्रेत्य शरीरान्तरमापन्नः क्षुत्पीडितः पूर्वाभ्यस्तमाहारमनुस्मरन् स्तन्यमभिलषति । तस्मान्न देहभेदादात्मा भिद्यते भवत्येवोर्द्ध्वं देहभेदादिति ॥ २१ ॥

अयसोऽयस्कान्ताभिगमनवत्तदुपसर्पणम् ॥ २२ ॥

यथा खल्वयोऽभ्यासमन्तरेणायस्कान्तमुपसर्पति, एवमाहाराभ्यासमन्तरेण बालः स्तन्यमभिलषति ॥ २२ ॥

न्यायवार्त्तिकम्

पूर्वशरीरमिति पूर्ववत् प्रयोगः । किमर्थं पुनरिदं सूत्रमारभ्यते यदाऽयमर्थः पूर्वाभ्यस्तसूत्रेऽवगतः ? (१) सामान्यतोऽधिगतस्य विशेषज्ञापनार्थं सूत्रमित्यदोषः ॥ २१ ॥

प्रवृत्तिमात्रस्यानैकान्तिकत्वज्ञापनार्थम्—

अयसोऽयस्कान्ताभिगमनवत्तदुपसर्पणमिति सूत्रम् । न विकल्पानुपपत्तेः—किमिद-मयसोऽयस्कान्ताभिगमनं सनिमित्तमाहो निर्निमित्तमिति ?

न्यायवार्त्तिकतात्पर्यटीका

सामान्यतोऽधिगतस्य विशेषज्ञापनार्थमिति । हर्षादिना सामान्यत इच्छामात्र-मवगतं तद्विशेषस्तु स्तन्याभिलाषो रागश्चात्रोक्त इत्यर्थः ॥ २१ ॥

अय—णम् (सू० २२) ॥ न पूर्वाभ्यस्तस्मृत्यनुबन्ध एव प्रवृत्तिकारणम् अयसो-ऽयस्कान्तोपसर्पणे तदभावात् । यदि च बालकस्य पूर्वाभ्यस्तस्मृत्यनुबन्धो भवेत् (क)जात्यन्ध-बधिरादयस्तज्जन्मानुभूतान् गन्धस्पर्शान् जात्यन्तरानुभूतान् रूपस्पर्शादीनपि व्याचक्षीर-न्नित्यभिप्रायः । विकल्प्य दूषयति—किमिदमिति । यौवनाद्यवस्थायां चेतनस्य प्रवृत्तिः

वृत्तिः

आत्मनित्यत्वे हेत्वन्तरमाह—(प्रेत्याहाराभ्यासकृतात् स्तन्याभिलाषात्) ।

प्रेत्य मृत्वा । जातमात्रस्य यः स्तन्याभिलाषः स तावदाहाराभ्यासजनितः । जन्मान्तरीयाहारेष्टसाधनताधीजन्यजीवनादृष्टोद्बोधितसंस्काराधीनेष्टसाधनतास्मरणेन हि बालः स्तन्यपाने प्रवर्तते इत्यनादित्वमिति ॥ २२ ॥

शङ्कते—(अयसोऽयस्कान्ताभिगमनवत् तदुपसर्पणम्) ।

---

(१) 'सामान्यतो ज्ञातस्य'—इति क-खपुस्तपाठान्तरम् ।

(क) अत्र 'जात्यन्धबधिरादय एतज्जन्मानुभूतान् गन्धस्पर्शानिव जात्यन्तरानुभूतान् रूपशब्दादीनपि' इति पाठो युक्तः ।

न्यायभाष्यम्

किमिदमयसोऽयस्कान्ता(१)भिसर्पणं निर्निमित्तमथ निमित्तादिति ? निर्निमित्तं तावत्—

नान्यत्र प्रवृत्त्यभावात् ॥ २३ ॥

यदि निर्निमित्तम्, लोष्टादयोऽप्ययस्कान्तमुपसर्पेयुः। न जातु ॥ मि कारणमस्तीति। अथ निमित्तात्, तत्केनोपलभ्यते इति। क्रियालिङ्गः क्रियाहेतुः, क्रियानियमलिङ्गश्च क्रियाहेतुनियमः, तेनान्यत्र प्रवृत्त्यभावः, बालस्यापि नियतमुपसर्पणक्रियोपलभ्यते। न च स्तन्याभिलाषलिङ्गमन्यदाहाराभ्यासकृतात् स्मरणानुबन्धात्। निमित्तं

न्यायवार्त्तिकम्

यदि सनिमित्तम्, तत्केन गम्यते ? नियमेन अयांस्ययस्कान्तमेवोपसर्पन्ति न तु लोष्टादीन्, न च लोष्टादय उपसर्पन्ति, सोऽयं कार्यनियमात् कारणनियमो गम्यते। एतेनाऽऽकस्मिकत्वं प्रतिषिद्धम्। तदिदमयसामुपसर्पणं किं दृष्टकारणप्रत्याख्यानार्थमुपन्यस्तम्, अथवा कारणान्तरोपदर्शनार्थम्, अथाऽऽत्मन्युत्पत्तिनिरोधानुमानमिति पूर्ववत्प्रसङ्गः ॥ २२ ॥

आकस्मिकत्वप्रतिषेधार्थं च—

नान्यत्र प्रवृत्त्यभावात् इति सूत्रम् ॥ २३ ॥

न्यायवार्त्तिकतात्पर्यटीका

क्षीरादौ पूर्वाभ्यस्तस्मृत्यनुबन्धहेतुका प्रतीतेति बाल्यावस्थायामपि चेतनस्य तद्धेतुकैव भवितुमर्हति तेन हेतुना चेतनप्रवृत्तेः स्वाभाविकसंबन्धावगमाद् वह्निनेव धूमस्य। एवं व्यवस्थिते यत्र स्मृतेः कार्यं दृश्यते तन्मात्रविषयैव बालस्य स्मृतिरनुमीयते नान्यत्र। न च य एकं स्मरति तेनापरमपि स्मर्तव्यमिति कश्चिन्नियमहेतुरस्ति येन जात्यन्धबधिरादयो रूपादिभेदान् व्याचक्षीरन् अदृष्टपरिपाकोद्बोधितस्य संस्कारस्य (क)तन्नियमेन नियमोपपत्तेः। अद्यत्वेऽपि चानुभूतेषु कस्यचिदेव स्मरत्यात्मा न सर्वस्येति ॥ २२ ॥

नान्य—वात् (सू० २३)॥ भाष्यम्—न च स्तन्याभिलाषलिङ्गमन्यदिति। स्तन्याभिलाषो लिङ्गमस्य निमित्तान्तरस्य तत् तथोक्तम्। (ख)अन्यत्र लोष्टादौ, लोष्टादेरिति

वृत्तिः

यथाऽयस्कान्तसन्निहितस्यायसोऽयस्कान्ताभिमुखतया गमनं तथैव वत्सस्यापि स्तनोपसर्पणम्, न त्विष्टसाधनत्वज्ञानाधीनप्रवृत्तिजन्यचेष्टेयमित्यर्थः ॥ २३ ॥

(१) '-अभिगमनम्'—इति वि०।

(क) तन्नियमेनेति तन्नियामकत्वेनेत्यर्थः। (ख) तेनान्यत्र प्रवृत्त्यभाव इति भाष्यं पूर्वं व्याख्यातुमुचितमपि व्युत्क्रमाद् गृहीत्वा व्याचष्टे अन्यत्रेति।

न्यायभाष्यम्

दृष्टान्तेनोपपाद्यते, न चासति निमित्ते कस्यचिदुत्पत्तिः। न च दृष्टान्तो दृष्टमभिलाषहेतुं बाधते। तस्मादयसोऽयस्कान्ताभिगमनमदृष्टान्त इति।

अयसः खल्वपि नान्यत्र प्रवृत्तिर्भवति, न जात्वयो लोष्टमुपसर्पति, (१)किं कृतोऽस्य नियम इति ? (२)यदि कारणनियमात्, स च क्रियानियमलिङ्गः(२*)। एवं बालस्यापि नियतविषयोऽभिलाषः कारणनियमाद्भवितुमर्हति। तच्च कारणमभ्यस्तस्मरणमन्यद्वेति दृष्टेन विशिष्यते। दृष्टो हि शरीरिणामभ्यस्तस्मरणादाहाराभिलाष इति ॥ २३ ॥

इतश्च नित्य आत्मा। कस्मात् ?—

वीतरागजन्मादर्शनात् ॥२४॥

सरागो जायत इत्यर्थादापद्यते। अयं जायमानो रागानुबद्धो जायते, रागस्य पूर्वानुभूतविषयानुचिन्तनं योनिः, पूर्वानुभवश्च विषयाणामन्यस्मिन् जन्मनि

न्यायवार्त्तिकम्

नित्य आत्मा—

वीतरागजन्मादर्शनात्। न हि कश्चिज्जातमात्रो वीतरागो जायते, वीतरागाणां जन्मादर्शनात् सरागो जायते इति गम्यते। जन्म व्याख्यातम्। ततः किम् ? 'रागस्य पूर्वानुभूत-

न्यायवार्त्तिकतात्पर्यटीका

यावत्, षष्ठीसप्तम्योरभेदार्थत्वात्। एतदुक्तं भवति लोष्टादेरन्यस्यायस्कान्तप्रवृत्त्यभावाद् (क) अयसश्च सनिमित्तमुपसर्पणमिति पूर्वं व्याख्यातम्। संप्रति त्वन्यथा व्याचष्टे—अयसः खल्वपीति। निपातसमुदायः कल्पान्तरं द्योतयति ॥ २३ ॥

वीत—नात् (सू० २४)॥ पूर्वानुभूतविषयानुचिन्तनमिति। एकविषयः स्मृतिप्रवाहो विजातीयप्रत्ययासंभिन्नश्चिन्तनम्, तच्चानुभवस्य पश्चाद्भवतीत्यनुचिन्तनम्, न च तत् स्मृतिमन्तरेण भवति, न हि तत्र प्रवाहः प्रवाहिणं विनाऽस्ति। तदेव अनुचिन्तनं (ख)पूर्वानुभूतविषयप्रार्थनार्थः सङ्कल्पः, प्रार्थना सङ्कल्पः, स च पूर्वानुभूतविषय इत्यर्थः।

वृत्तिः

समाधत्ते—(नान्यत्र प्रवृत्त्यभावात्)।

स्तनपाने एव बालः प्रवर्त्तते न त्वन्यत्रेति नियमः कथं स्यात् ?

(१) 'किंकृतोऽस्यानियमः'—इति ज०। (२) 'यदि कारणनियमात् सर्वक्रियानियमलिङ्गः'—इति वि०, 'यदि कारणनियमाः सर्व-' इति ज०।

(क) अत्र प्रवृत्त्यभाव इति प्रथमान्तः 'इति'शब्दान्तो वा पाठः सम्भाव्यते। (ख) प्रसङ्गात् 'पूर्वानुभूतविषयप्रार्थना संकल्पः' (७४९ पत्राङ्कः) इति वार्त्तिकमत्रैव व्याचष्टे पूर्वैति।

न्यायभाष्यम्

शरीरमन्तरेण नोपपद्यते। सोऽयमात्मा पूर्वशरीरानुभूतान् विषयाननुस्मरन् तेषु तेषु रज्यते, तथा चायं द्वयोर्जन्मनोः (क)प्रतिसन्धिः। एवं पूर्वशरीरस्य पूर्वतरेण (१)पूर्वतरस्य पूर्वतमेनेत्यादिनाऽनादिश्चेतनस्य शरीरयोगः, अनादिश्च रागानुबन्ध इति सिद्धं नित्यत्वमिति ॥ २४॥

न्यायवार्त्तिकम्

विषयानुचिन्तनं योनिः'। न च विषयावगमासमर्थेषु इन्द्रियेषु रागः सम्भवति, न च स्मृतिमन्तरेण विषयानुचिन्तनं युक्तम् (ख)पूर्वानुभूतविषयप्रार्थना सङ्कल्पः। अदृष्टादिति चेत्—अथ मन्यसे न पूर्वशरीरयोगो रागादूम्यते अपि त्वदृष्टाद्राग इति? (२)नाभिप्रायापरिज्ञानात्—नैवमभिप्रायः कारणनियमेन रागः अपि तु पूर्वशरीरसम्बन्धप्रतिपादनं सूत्रार्थः। न चादृष्टाद्राग इति ब्रुवता तत्प्रतिषिध्यत इति किञ्चिदुक्तम् (ग) ॥ २४ ॥

न्यायवार्त्तिकतात्पर्यटीका

अथास्मिन्नेव जन्मनि इन्द्रियजो विषयानुभवोऽन्वयव्यतिरेकावधारितेष्टोपायतासहकारी कस्माद् रागहेतुर्न भवतीत्यत आह वार्त्तिककारः—न विषयावगमासमर्थेष्विति। तदनेन पूर्वानुभवश्च विषयाणामन्यस्मिन् जन्मनीति भाष्यं व्याख्यातम् ॥ २४ ॥

वृत्तिः

वस्तुतस्तु अन्यत्र अयसि प्रवृत्त्यभावात्, प्रवृत्तिर्हि चेष्टानुमिता लिङ्गं न तु क्रियामात्रम् अतो न व्यभिचार इति भावः ॥ २४ ॥

हेत्वन्तरमाह—(वीतरागजन्मादर्शनात्)।

वीतरागो रागशून्यः तावत् नोत्पद्यते अपि तु सरागः, तत्र च जन्मान्तरीयेष्टसाधनताज्ञानाधीनस्मरणं हेतुरिति। पूर्वं स्तन्याभिलाष उक्तः, सम्प्रति तु पतगादीनां कणादिभक्षणाभिलाषसाधारणं रागमात्रमित्यपौनरुक्त्यम् ॥ २५ ॥

---

(१) 'पूर्वतरशरीरस्य' इति क०। (२) 'नाभिप्रायाविज्ञानात्' इति क-ख-धृतपाठान्तरम्।

(क) 'प्रतिसन्धिस्तु पूर्वजन्मनिवृत्तौ पुनर्जन्म' इति भाष्यम्, ४ अ, १ आ, 'न प्रवृत्तिः...'इति सू०।

(ख) 'पूर्वानुभूतविषयप्रार्थना संकल्पः' इत्ययमंशोऽत्र नोपयुज्यते किन्तु २६श-सूत्रीय-वार्त्तिकात् प्रमादेन स्थानभ्रंशमापादित इति सम्भाव्यते। तात्पर्यव्याख्यानदर्शनेन तस्य युक्तत्वस्वीकारे तु 'तदेव पूर्वानुभूतविषयप्रार्थना संकल्पः' इति पाठोऽत्र भवितुमर्हति।

(ग) अतः परं 'तन्मयत्वाद्राग इति, विषयाभ्यासः खल्वयं भावनाहेतुस्तन्मयत्वमुच्यते। जातिविशेषाच्च रागविशेष इति। कर्म खल्विदं जातिविशेषस्य निर्वर्तकं तादर्थ्यात्ताच्छब्द्यं लभ्यते वीरणादिवत्' इत्यंशः आदर्शपुस्तकयोरुपलभ्यते स च भाष्यानुसारेण २६श-सूत्रीयवार्त्तिकेऽन्तर्भावितः।

न्यायभाष्यम्

कथं पुनर्ज्ञायते (१)पूर्वानुभूतविषयानुचिन्तनजनितो जातस्य रागः, न पुनः—

(सू०)—सगुणद्रव्योत्पत्तिवत्तदुत्पत्तिः ॥ २५ ॥

यथोत्पत्तिधर्मकस्य द्रव्यस्य गुणाः कारणत उत्पद्यन्ते तथोत्पत्तिधर्मकस्याऽऽत्मनो रागः (२) कुतश्चिदुत्पद्यते। अत्रायमुदितानुवादो निदर्शनार्थः ॥ २५ ॥

(सू०)—न, सङ्कल्पनिमित्तत्वाद्रागादीनाम् ॥ २६ ॥

न खलु सगुणद्रव्योत्पत्तिवदुत्पत्तिरात्मनो रागस्य च। कस्मात्? सङ्कल्पनिमित्तत्वाद्रागादीनाम्। अयं खलु प्राणिनां विषयानासेवमानानां सङ्कल्पजनितो रागो गृह्यते, सङ्कल्पश्च पूर्वानुभूतविषयानुचिन्तनयोनिः। तेनानुमीयते जातस्यापि पूर्वानुभूतार्थचिन्तनकृतो राग इति। (३) आत्मोत्पादाधिकरणात्तु रागोत्पत्तिर्भवन्ती सङ्कल्पादन्यस्मिन् रागकारणे सति वाच्या कार्यद्रव्यगुणवत्। न चाऽऽत्मोत्पादः सिद्धो

न्यायवार्त्तिकम्

सगुणद्रव्योत्पत्तिवत्तदुत्पत्तिरिति अनैकान्तिकपक्षे सूत्रम्। नोक्तोत्तरत्वात्—उक्तोत्तरमेतत् ॥ २५ ॥

न सङ्कल्पनिमित्तत्वाद्रागादीनामिति। (क)अत्रापि पूर्ववत् सङ्कल्पस्मृतिसंस्कार-

न्यायवार्त्तिकतात्पर्यटीका

सगु—त्तिः (सू० २५) ॥ अत्रायमुदितानुवाद इति भाष्यम्। तस्यार्थः उदितमिदं चोद्यम् अयस्कान्तदृष्टान्तेन चोद्येन, तथाऽपि तस्यानुवादो निदर्शनार्थः। पूर्वमयस्कान्तो निदर्शनमिदानीं तु घटादीनामुत्पद्यमानानां रूपादयो निदर्शनमिति तदर्थमित्यर्थः। चोद्यस्योदितानुवादत्वात् परिहारोऽप्युदितानुवाद एवेति ॥ २५ ॥ (ख)

न स—नाम् (सू० २६) ॥ ननु सगुणद्रव्योत्पत्तिवदिति साधनपक्षे मा भूत, अनैकान्तिकापादनपक्षे तु को दोष इत्यत आह वार्त्तिककारः—अनैकान्तिकपक्षे सूत्रम्। न, कस्मात्? (ग) उक्तोत्तरत्वात्—उक्तोत्तरमेतद् यत इति ॥ २६ ॥

वृत्तिः

शङ्कते—(सगुणद्रव्योत्पत्तिवत् तदुत्पत्तिः)।

द्रव्यस्य घटादेर्यथा सगुणस्य रूपादिविशिष्टस्योत्पत्तिः। यथा घटादिः स्वत एव रूपादिमान् भवति, तथैवाऽऽत्माऽपि स्वत एव सरागो भवतीत्यप्रयोजकत्वं त्वदीयहेतूनामिति भावः ॥ २६ ॥

---

(१) 'पूर्वविषयानुचिन्तन-'—ल-ग-ज-भा०। (२) 'कुतश्चिदुत्पद्यते' इति ल-पु० नास्ति। (३) 'आत्मोत्पादाधिकरणा तु' ल०,—'करणात्तु' भा०।

(क) ७४९-मपत्रे मुद्रितः 'पूर्वानुभूतविषयप्रार्थना संकल्पः' इति वार्त्तिकग्रन्थ इहोपयुज्यते। (ख) अतः परमादर्शपुस्तकयोः 'तन्मयत्वाद् रागः' इत्यादिः 'प्रायणाभिभूतेति भावः' इत्यन्तः सन्दर्भो मुद्रितो वर्तते, स तु प्रमादात् स्थानभ्रंशमापादित इति भाष्यानुसारेण सन्निवेशित इति बोध्यम्। (ग) अत्र 'नोक्तोत्तरत्वात्' इति क-ख-पुस्तकयोः प्रमादान्मुद्रितम्।

न्यायभाष्यम्

नापि सङ्कल्पादन्यद् रागकारणमस्ति। तस्माद्युक्तं सगुणद्रव्योत्पत्तिवत् तयोरुत्पत्तिरिति।

अथापि सङ्कल्पादन्यद् रागकारणं धर्माधर्मलक्षणमदृष्टमुपादीयते, तथाऽपि पूर्वशरीरयोगोऽप्रत्याख्येयः। तत्र हि तस्य निर्वृत्तिः नास्मिन् जन्मनि।

तन्मयत्वाद्राग इति। विषयाभ्यासः खल्वयं भावनाहेतुः तन्मयत्वमुच्यते इति। जातिविशेषाच्च रागविशेष इति। कर्म खल्विदं जाति(१)विशेषनिर्वर्तकं (२)तादर्थ्यात्ताच्छब्द्यं विज्ञायते। तस्मादनुपपन्नं सङ्कल्पादन्यद्रागकारणमिति ॥ २६ ॥

न्यायवार्त्तिकम्

पूर्वानुभवपूर्वशरीरवदात्मवत्त्वानि योज्यानीति। (क)'तन्मयत्वाद्राग इति' विषयाभ्यासः खल्वयं भावनाहेतुस्तन्मयत्वमुच्यते। 'जातिविशेषाच्च रागविशेष इति'। कर्म खल्विदं जातिविशेषस्य निर्वर्तकं तादर्थ्यात्ताच्छब्द्यं लभ्यते वीरणादिवत्। एवं चानादिः संसारोऽपवर्गान्तः सिध्यतीति व्यवस्थितमेतद् अस्त्यात्मा व्यतिरिक्तो नित्यश्चेति ॥ २६ ॥

(इति नवभिः सूत्रैर्नित्यत्वप्रकरणम्।)

न्यायवार्त्तिकतात्पर्यटीका

(ख)तन्मयत्वाद्राग इति। अभ्युपेत्यादृष्टकारणत्वं रागादीनां परिहृतं परमार्थतस्तु तन्मयत्वाद्राग इत्यर्थः। स्यादेतद् यदि पूर्वाभ्यस्तस्मृत्यनुबन्धाद् रागादीनामुत्पादो हन्त मनुष्यजन्मानन्तरं प्राप्तकरभभावस्य मनुष्यजन्मोचितानां भावानामानन्तर्यात्तदनुरूपा एव रागादयो भवेयुर्न करभभावानुरूपाः करभजातेरस्य विजातीयजन्मसहस्रव्यवहितत्वादत आह—जातिविशेषाच्चेति। कर्मणः संस्कारोद्बोधकत्वात् करभजात्यर्थेन कर्मणा जन्मसहस्रव्यवहिताऽपि करभभावनोद्बोध्यते नानन्तराऽपि मनुष्यभावना प्रायणाभिभूतेति भावः।

अपि च मनुष्यत्वेन तुल्यत्वेऽपि प्रज्ञामेधाप्रकर्षनिकर्षभेददर्शनात् प्राग्भवीयाभ्यासकल्पना। अद्यत्वेऽपि हि शास्त्राभ्यासस्तद्गोचरप्रज्ञामभिवर्धयन्नन्वयव्यतिरेकाभ्यामनुभूयते। सोऽयम् इहजन्मन्यकृतशास्त्राभ्यासस्य तद्विषयः प्रज्ञामेधातिशयः प्राग्भवीयाभ्यासातिशयं स्वकारणमवगमयति। जनस्य तिर्यगादिजातिशतव्यवधानपरिम्लानप्राग्भवीयसंस्कारस्य प्रज्ञामेधानिकर्ष इति

(१) '-विशेषनिवर्त्तकं' ज०। (२) 'तादर्थ्यात्ताच्छील्यं' टि०।

(क) इतः प्रभृति 'वीरणादिवत्' इत्यंशः आदर्शपुस्तकयोरिह नोपलभ्यते। तद्बीजं ७४९तमपत्रे गटिप्पन्यां द्रष्टव्यम्। (ख) इतः प्रभृति 'भावः' इत्यन्तो ग्रन्थः आदर्शतात्पर्यपुस्तकयोरिह नोपलभ्यते किन्तु (७५०म पत्रे) 'उदितानुवाद एवेति' इत्यनन्तरं मुद्रितः। तन्नायुक्तमिति भाष्यानुसारेण एतन्मूलभूतवार्त्तिकग्रन्थवदिह गृहीतः।

न्यायभाष्यम्

अनादिश्चेतनस्य शरीरयोग इत्युक्तम्, स्वकृतकर्मनिमित्तं चास्य शरीरं सुख-दुःखाधिष्ठानम्। तत् परीक्ष्यते—किं घ्राणादिवदेकप्रकृतिकमुत (१)नानाप्रकृतीति। कुतः संशयः? विप्रतिपत्तेः संशयः। पृथिव्यादीनि भूतानि सङ्ख्याविकल्पेन शरीरप्रकृति-रिति प्रतिजानत इति। किं तत्र तत्त्वम्?

न्यायवार्त्तिकम्

आत्मानन्तरं शरीरमवसरप्राप्तं परीक्ष्यते। (क)अथवा अनादिश्चेतनस्य शरीरयोग इति शरीरं परीक्ष्यते। तस्मिन् परीक्ष्यमाणे आत्माधिकारश्च परिसमाप्तो भवति। किं पुनरस्य परीक्ष्यम्? किं घ्राणादिवदेकप्रकृति अथ नानाप्रकृतीति? 'विप्रतिपत्तेः संशयः'। श्रूयते खल्वत्र विप्रतिपत्तिः।

न्यायवार्त्तिकतात्पर्यटीका

कल्पनीयम्। तस्मान्नित्यस्याऽऽत्मनः कर्माविद्यानिबन्धनोऽनादिरेषोऽनेकविधशरीरपरिग्रह-परित्यागप्रवाहोऽपवर्गान्त इति सिद्धम्॥ २६॥

आत्मानन्तरमुद्दिष्टं शरीरं परीचिक्षिषमाणोऽवान्तरसङ्गतिमाह भाष्यकारः—**अनादिश्चेतनस्य शरीरयोग इत्युक्तम्**। परीक्षोपयोगिनिर्वेदसाधनत्वमाह—**स्वकृतकर्मेति**। परीक्षापूर्वरूपं संशयमाह—**किं घ्राणादिवदिति**। एकद्वित्रिचतुःपञ्चप्रकृतिकतामास्थिषत शरीरस्य वादिनः, सोऽयं संख्याविकल्पः।

अत्र वार्तिककारः स्वातन्त्र्येण शरीरपरीक्षायां सङ्गतिमाह—**आत्मानन्तरमिति**। भाष्य-मतेन सङ्गतिमाह——**अथ वेति**। अवान्तरसङ्गतेस्तात्पर्यमाह—**तस्मिन् परीक्ष्यमाण इति**।

वृत्तिः

समाधत्ते—(न संकल्पनिमित्तत्वाद् रागादीनाम्)।

सङ्कल्पो ज्ञानम्, इष्टसाधनताज्ञानमिति यावत्, तन्निमित्तका हि रागादयः। तथा च इष्टसाधनताज्ञानत्वेनेच्छात्वादिना कार्यकारणभावात् प्रवृत्तित्वेन चेष्टात्वेन च कार्यकारण-भावान्नाप्रयोजकत्वमिति भावः॥ २७॥

समाप्तमनादिनिधनप्रकरणम्॥ ५॥

---

(१) '-प्रकृतिकम्'—इति क-खधृतपाठान्तरम्।

(क) भाष्ये आत्मनिरूपणानन्तरं शरीरनिरूपणे अवसरसङ्गतिरुक्ता वार्त्तिककृता तु प्रसङ्गस्य उपोद्घातस्य वा सङ्गतित्वमिह सम्भवतीति प्रतिपादनायोक्तम् अथवेति।

(सू०)—पार्थिवं गुणान्तरोपलब्धेः ॥ २७ ॥

न्यायभाष्यम्

तत्र मानुषं शरीरं पार्थिवम्। कस्मात्? गुणान्तरोपलब्धेः। गन्धवती पृथिवी गन्धवच्च शरीरम्। अबादीनामगन्धत्वात् तत्प्रकृत्यगन्धं स्यात्। न त्विदमबादिभिरसम्पृक्तया पृथिव्यारब्धं चेष्टेन्द्रियार्थाश्रयभावेन कल्पते इत्यतः पञ्चानां भूतानां संयोगे सति शरीरं भवति। भूतसंयोगो हि मिथः पञ्चानां न निषिद्ध इति। आप्य-तैजस-वायव्यानि लोकान्तरे शरीराणि तेष्वपि भूतसंयोगः पुरुषार्थतन्त्र इति। स्थाल्यादिद्रव्यनिष्पत्तावपि (१)निःसंशयो नाबादिसंयोगमन्तरेण निष्पत्तिरिति ॥ २७ ॥

न्यायवार्त्तिकम्

पार्थिवं गुणान्तरोपलब्धेः। 'मानुषं शरीरं पार्थिव'मिति। मानुषमिति (२)किमर्थं विशिष्यते? लोकान्तरशरीराणि न पार्थिवानीति युक्तं विशेषणम्। (क)गन्धवत्त्वात् परमाणुवत्—गन्धवान् परमाणुरेकात्मको दृष्टः गन्धवच्च शरीरम्, तस्मादेकात्मकमेकस्वभावमिति। 'न त्विदमबादिभिरसंपृक्तया पृथिव्यारब्धं चेष्टेन्द्रियार्थाश्रयभावेन कल्प्यत' इति भूतसंसर्गोऽविप्रतिषिद्धः ॥ २७ ॥

न्यायवार्त्तिकतात्पर्यटीका

पार्थि—ब्धेः (सू० २७) ॥ (ख)मानुषं शरीरं पार्थिवं गन्धवत्त्वात् पार्थिवपरमाणुवदिति। न कारणं कार्यस्याऽऽत्मा तत्कथमेकात्मकमित्यत आह—(ग)एकात्मकमित्येकस्वभावम्, स्वो भावो भवितॄणां जातिः एकजातीयसमवायिकारणत्वे हि तत् तदेकजातीयं स्याद् नान्यथेत्यर्थः।

परोक्तान् हेतूनन्यथासिद्धयिष्यन् प्रथमं तावत्सुहृद्भावेनाऽऽह—न त्विदमबादिभिरिति ॥२७॥

वृत्तिः

क्रमप्राप्ते शरीरपरीक्षणे मानुषादिशरीरं पाञ्चभौतिकमित्येके। तत्र सिद्धान्तसूत्रम्—(पार्थिवं गुणान्तरोपलब्धेः)।

---

(१) 'निःसंशया'—इति ल-ग-झा०। (२) 'किमिति' इति क-ख-धृतपाठान्तरम्।

(क) मानुषं शरीरमिति भाष्यगता प्रतिज्ञा। ततोऽपेक्षितस्य गुणान्तरोपलब्धेरिति हेतोः सोदाहरणं तात्पर्यमाह गन्धवत्त्वादिति। ततश्च नात्र वार्त्तिककृता स्वातन्त्र्येण न्यायः प्रयुज्यते किन्तु भाष्यमेव व्याख्यायते एतेन प्रतिज्ञानन्तरं हेतुकथनस्यैवौचित्येन तदन्तराले मानुषमिति किमर्थमित्यादिप्रश्नोत्तरग्रन्थोऽनुचित इति परास्तम्। (ख) भाष्यवार्त्तिकयोः प्राप्तं न्यायैकदेशं संगृह्याऽऽह मानुषमिति। पार्थिवपदं वार्त्तिकेऽनुक्तमपि तात्पर्यतो लब्धम्। (ग) वार्त्तिके 'इति'पदं न दृश्यते।

(सू०)—पार्थिवाप्यतैजसं तद्गुणोपलब्धेः ॥ २८ ॥

(सू०)—निःश्वासोच्छ्वासोपलब्धेश्चातुर्भौतिकम् ॥ २९ ॥

(सू०)—गन्धक्लेदपाकव्यूहावकाशदानेभ्यः पाञ्चभौतिकम् ॥३०॥

न्यायभाष्यम्

त इमे सन्दिग्धा हेतव इत्युपेक्षितवान् सूत्रकारः। कथं सन्दिग्धाः ? सति च प्रकृतिभावे भूतानां धर्मोपलब्धिरसति च संयोगाप्रतिषेधात् सन्निहितानामिति, यथा स्थाल्यामुदकतेजोवाय्वाकाशानामिति। तदिदमनेकभूतप्रकृति शरीरमगन्धमरस-

न्यायवार्त्तिकम्

एवं तर्हि—

(क) पार्थिवाप्यतैजसं तद्गुणोपलब्धेः।

निःश्वासोच्छ्वासोपलब्धेश्चातुर्भौतिकम्।

गन्ध-क्लेद-पाक-व्यूहावकाशदानेभ्यः पाञ्चभौतिकम्।

इति प्रत्युक्तम्, तत्र सन्निहितानां तद्गुणोपलब्धेरिति। 'तदिदमनेकभूतप्रकृति शरीरम् (ख)अगन्धमरसमरूपमस्पर्शं च प्रकृत्यनुविधानात् स्या'दिति भाष्यम्। तस्य व्याख्यानं—(१) पृथिव्युदकाभ्यामारभ्यमाणमगन्धं कारणगन्धस्यैकस्यानारम्भकत्वात्, (२) पृथिव्यनलाभ्या-

न्यायवार्त्तिकतात्पर्यटीका

पार्थि—ब्धेः (सू० २८) ॥

निःश्वा—कम् (सू० २९) ॥

गन्ध—कम् (सू० ३०) (क) ॥

परोक्तसाधनमन्यथासिद्धमुक्त्वा बाधकमुक्तं भाष्यकृता, तदनुभाष्य वार्तिककारो व्याचष्टे—(ग)तदिदमनेकभूतप्रकृतीति। पृथिव्युदकाभ्यामारभ्यमाणमगन्धं कारणगन्धस्यैकस्या-

वृत्तिः

मानुषादिशरीरं पार्थिवं पृथिवीसमवायिकारणकं गुणान्तरस्य गन्ध-नीलादिरूप-काठिन्यादेरुपलब्धेरिति ॥ २८ ॥

मतान्तराभिधानाय त्रिसूत्री—

(पार्थिवाप्यतैजसं तद्गुणोपलब्धेः)

(निःश्वासोच्छ्वासोपलब्धेश्चातुर्भौतिकम्)

(क) क-ख-वार्त्तिकयोः सूत्राकारेणामुद्रितमपि वाक्यत्रयं भाष्याद्यनुसारेण सूत्रतया ज्ञातमिति तथैव मुद्र्यते। (ख) भाष्ये 'अगन्धमरसम्' इति बहुमुद्रितग्रन्थानुसारेण मुद्रितम्। तेन क-ख-वार्त्तिकपुस्तकयोः 'अरसमगन्ध'मिति मुद्रणं प्रामादिकमिति बुद्ध्वा यथाभाष्यं सन्निवेशितम्। (ग) भूतपदं क-ख-तात्पर्य-पुस्तकयोर्न मुद्रितम्।

न्यायभाष्यम्

मरूपमस्पर्शं च प्रकृत्यनुविधानात् स्यात्, न त्विदमित्थम्भूतम्। तस्मात् 'पार्थिवं गुणान्तरोपलब्धेः' ॥ २८-२९-३० ॥

न्यायवार्त्तिकम्

मारभ्यमाणमगन्धमरसं च कारणगन्धरसयोः केवलयोरनारम्भकत्वात्, (३) पृथिव्यनिलाभ्यामगन्धमरसं चारूपं च वायोरगन्धरसरूपत्वात्, (४) पृथिव्याकाशाभ्यामगन्धमरसमरूपमस्पर्शं च आकाशे गन्धाद्यभावात्। सर्वत्र समानो न्यायः कारणगुणस्य केवलस्यानारम्भकत्वात्—(५)जलानलाभ्यामगन्धञ्चारसं च, (६) जलवायुभ्यामगन्धं चारसञ्चारूपं च, (७) जलाकाशाभ्यामगन्धमरसमरूपमस्पर्शं च, (८) तेजोऽनिलाभ्यामगन्धं चारसं चारूपञ्च, (९) अनलाकाशाभ्यामगन्धमरसमरूपमस्पर्शं च, (१०) (क) अनिलाकाशाभ्यामेवमेव, (११) भूजलानलैरगन्धमेव, (१२) भूजलानिलैरेवमेव, (१३) भूजलाकाशैरेवमेव, (१४) (ख) पृथिव्यनिलानलैरगन्धमरसं च, (१५) पृथिव्यनलाकाशैरेवमेव, (१६) पृथिव्यनिलाकाशैरगन्धमरसमरूपं च, (१७) (ग) जलानिलानलैरगन्धमरसं च, (१८) जलानलाकाशैरेवमेव, (१९) जलानिलाकाशैरगन्धं चारसं चारूपं च, (२०) (घ) अनलानिलाकाशैरेवमेव, (२१) पृथिव्युदकतेजोवायुभिरगन्धम्, (२२) पृथिव्युदक-

न्यायवार्त्तिकतात्पर्यटीका

नारम्भकत्वात्। अयमभिसन्धिः—पृथिव्याप्यपरमाणू तावन्नैकं द्व्यणुकमारब्धुमर्हतः तयो रूपरसस्पर्शवत्त्वेन तदारम्भसम्भवेऽपि गन्धवत्त्वाभावप्रसङ्गात् एवं पार्थिवाणुसमवेतस्य गन्धस्यैकत्वेनानारम्भकत्वात्। नापि पार्थिवपरमाणुद्वयमेकश्च पाथसीयः परमाणुरित्यणूनामारम्भकत्वे गन्धवत्त्वोपपत्तिरिति साम्प्रतम्, परमाणूनां बहूनामनारम्भकत्वात्। तथा हि त्रयः परमाणवो न कार्यद्रव्यमारभन्ते परमाणुत्वे सति बहुत्वसंख्यायुक्तत्वाद् घटोपगृहीतपरमाणुप्रचयवत्। आरम्भकत्वे तेषां घटोपगृहीतानां कपालशर्कराचूर्णक्रमो घटनाशे नोपलभ्येत। द्व्यणुके च विजातीयानारम्भकत्वे सिद्धे तेनैव दृष्टान्तेनान्यत्रापि विजातीयेनाऽऽरम्भो निषेध्यः। एतेन पार्थिवावयवानां महतां पाथसीयैरवयवैः शरीरारम्भः प्रत्युक्तः विजातीयानामनारम्भकत्वस्य दृष्टान्तधर्मिणि विनिश्चयादिति। तदनेन वार्त्तिककृता षड्विंशतिकल्पा निराकृता इति। यदि पुनरेकैकं कारणं

वृत्तिः

(गन्धक्लेदपाकव्यूहावकाशदानेभ्यः पाञ्चभौतिकम्)।

तद्गुणानां पृथिव्यप्तेजोगुणानां (ङ)गन्धस्नेहोष्णस्पर्शानामुपलब्धेः। एतावता

(क) एवं द्वाभ्यामारम्भे दशप्रकाराः। (ख-ग) उभयत्र अनलानिलयोः क्रमविपर्ययः प्रामादिकः। एवमुत्तरत्रापि। (घ) एवं त्रिभिरारम्भे दशप्रकाराः। (ङ) एतेन शरीरस्य त्रैभौतिकत्ववादिमते गन्ध-स्नेहोष्णस्पर्शा एव पृथिव्यादीनां गुणाः पार्थिवत्वाद्यनुमानसाधनमिति प्रतीयते। स्नेहो जलस्य औष्ण्यं च तैजसो लक्षणमिति वैशेषिकाः; तन्मते खरत्वं पृथिव्या लक्षणम्। तथाच क इमे त्रैभौतिकत्ववादिन इत्यनुसन्धेयम्। अन्ये तु गन्धरसरूपाण्येव यथाक्रमं पार्थिवत्वाद्यनुमानसाधनानि मन्यन्ते।

(सू०)—श्रुतिप्रामाण्याच्च ॥ ३१ ॥

न्यायभाष्यम्

'सूर्यं ते चक्षुर्गच्छता'दित्यत्र मन्त्रे 'पृथिवीं ते शरीर'मिति श्रूयते। तदिदं

न्यायवार्त्तिकम्

ज्वलनाकाशैरेवमेव, (२३) (क) अवनिजलानिलाकाशैरेवमेव, (२४) पृथिव्यनिलज्वलनाकाशैः (ख)अगन्धमरसं च, (२५) (ग) जलानिलानलाकाशैरेवमेव, (२६) पृथिव्युदकतेजोवाय्वाकाशैरगन्धम्, कारणगुणस्यैकस्यानारम्भकत्वादिति (घ)वाच्यम्, (१) एककारणकत्वे तु सततोत्पत्त्यनुत्पत्ती नित्यत्वप्रसङ्गश्चेत्युक्तम् ॥ २८-२९-३० ॥

श्रुतिप्रामाण्याच्च। सूर्यं ते चक्षुः स्पृणोमीत्यस्य मन्त्रस्यान्ते 'पृथिव्यां ते शरीर'मिति। सेयं स्मृतिः कारणात् कार्योत्पत्तिः। यदुक्तं भवति सूर्यश्चक्षुःकारणम्, पृथिवी शरीरस्येति, अन्त्येष्टिकाले मन्त्रः सूर्यं ते चक्षुर्गच्छतु पृथिवीं शरीरमिति। अस्यापि मन्त्रस्यार्थो यद् यस्मा-

न्यायवार्त्तिकतात्पर्यटीका

स्यात् ततः किं भवेदित्यत आह—(ङ)एककारणत्वे त्विति। नित्यं निरपेक्षमेकं कारणमिति सततोत्पत्तिः कार्यस्य भवेत्। कारणविनाशात्तद्विभागाद्वा द्रव्यं विनश्यति, न चैकस्य कारणस्य नित्यस्य विनाशोऽस्ति, न च विभागः तस्य सद्वितीयवस्त्वाश्रयत्वात्, एकस्य च द्वितीयाभावाद् विनाशकारणाभावात् कृतकनित्यत्वप्रसङ्गः, रूपमसहायमेकमवयविनि न रूपमारभत इति नीरूपोऽवयवी। तथा च रूपसंस्काराभावेनावयवी नोपलभ्येतेत्यर्थः ॥ २८-२९-३० ॥

वृत्तिः

त्रैभौतिकत्वे सिद्धे निःश्वासादितश्चातुर्भौतिकत्वम्, निःश्वासोच्छ्वासौ प्राणवायोर्व्या..विशेषौ। क्लेदो जलविशेषो जलविशिष्टपृथिवी वेति उभयथाऽपि जलमावश्यकम्। भुक्तान्नादेर्जठरानलैः पाकस्य तेजःसंयोगाधीनत्वात् तेजःसिद्धिः, व्यूहो निःश्वासादिः, अवकाशदानं छिद्रम्।

एतानि मतानि सूत्रकृता तुच्छत्वान्न दूषितानि। तथाहि एकस्मिन् शरीरे पृथिवीत्वादिनानाजातेः सङ्करापत्ते(२)रसम्भवात्, न वा नानोपादानकत्वं विजातीयानामनारम्भकत्वात्, तथात्वे वा जलाद्यारब्धस्य न पृथिवीत्वं व्यभिचारात्, न वा चित्रद्रव्यं गन्धवत्त्वविरोधात्। गन्धादीनामानाशमनपायाच्च पार्थिवत्वमित्युक्तप्रायम्।

---

(१) 'एककारणगुणत्वे' इति क-ख-धृतपाठान्तरम्। (२) '-रसम्भव' इति प्रथमान्तपाठस्तु युक्तः।

(क) क-ख-वार्त्तिकयोः 'अवनिजलाकाशै'रिति प्रामादिकः। (ख) 'अगन्धमरूपं च' इति क-ख-वार्त्तिकयोरन्यपाठः प्रामादिकः। तत्र धृतं पाठान्तरं तु गृहीतम्। (ग) एवं चतुर्भिरारम्भे पञ्च प्रकाराः। (घ) 'वाच्यम्' इत्यत्र 'समानम्' इति क-ख-पुस्तकधृतपाठान्तरम्। (ङ) वार्त्तिके 'एककारणकत्वे' इत्यचरमाते विशेषः।

न्यायभाष्यम्

प्रकृतौ विकारस्य प्रलयाभिधानमिति। 'सूर्यं ते चक्षुः स्पृणोमि' इत्यत्र मन्त्रान्तरे 'पृथिवीं ते शरीरं स्पृणोमी'ति श्रूयते। सेयं कारणाद् विकारस्य स्पृतिरभिधीयते इति। स्थाल्यादिषु च तुल्यजातीयानामेककार्यारम्भदर्शनाद् भिन्नजातीयानामेककार्यारम्भानुपपत्तिः ॥ ३१ ॥

अथेदानीमिन्द्रियाणि प्रमेयक्रमेण विचार्यन्ते—किमाव्यक्तिकान्याहोस्विद् भौतिका-

न्यायवार्त्तिकम्

द्यायातं तत्तस्मिन्नेव प्रलयं गच्छति। 'प्रकृतौ विकारस्य प्रलयाभिधानम्'। प्रलयशब्देन च कार्यशून्यं कारणमुच्यते न पुनः कार्यस्य कारणे (क)लयः प्रलयः। एवं चासदुत्पद्यते सन्निरुध्यते इत्ययमर्थ उक्तो भवति ॥ ३१ ॥

(इति शरीरपरीक्षाप्रकरणम्।)

अथेदानीमिन्द्रियाणि प्रमेयक्रमेण विचार्यन्ते—किमाव्यक्तिकानि आहङ्कारिकाणि आहो

न्यायवार्त्तिकतात्पर्यटीका

श्रुति—च (सू० ३१)॥ (ख)स्पृतिरुत्पत्तिरित्यर्थः। न्यायसिद्धमर्थं श्रुतिरुपोद्बलयति (ग)न पुनरस्य प्रापिका सांख्यराद्धान्तावलम्बनेनाप्यस्याः कथञ्चिदुपपत्तेः ॥ ३१ ॥

उद्देशक्रमानुरोधाच्छरीरानन्तरमिन्द्रियाणां परीक्षां प्रतिजानीते भाष्यकारः—अथेदानीमिन्द्रियाणि प्रमेयक्रमेणेति। तत्र परीक्षापूर्वरूपं संशयमाह—किमाव्यक्तिकानि आहोस्विद्भौति-

वृत्तिः

यद्वा पार्थिवत्वे कथं जलादिसम्बन्ध इत्याशङ्कायां जलादिनिमित्तवशात् त्रैभौतिकत्वादिव्यपदेश इत्याशयेन त्रिसूत्री ॥ २९-३०-३१ ॥

पार्थिवत्वे युक्त्यन्तरमाह—(श्रुतिप्रामाण्याच्च)

'सूर्यं ते चक्षुः स्पृणोमि' इति मन्त्रान्ते 'पृथिवीं ते शरीरम्' इत्यभिधानात् एवं प्रकृतौ विकारस्य लयाभिधाने 'सूर्यं ते चक्षुर्गच्छतात्' इति मन्त्रान्ते 'पृथिवीं ते शरीरम्' इति।

इमां चतुःसूत्रीं केचन भाष्यतया वर्णयन्ति, तन्न, तथा सत्येकसूत्रस्य प्रकरणत्वानुपपत्तेः।

अत एव चतुर्थं सूत्रमेवेत्यपरे।

अन्ये तूक्तयैवानुपपत्त्या 'आप्यतैजसवायव्यानि लोकान्तरशरीराणि, तेष्वपि भूतसंयोगः पुरुषार्थतन्त्र' इति भाष्यं सूत्रतया वर्णयन्ति। तदर्थस्तु आप्यादीनि लोकान्तरेषु वरुणलोकादिषु प्रसिद्धानि शरीराणि। जलादिरूपत्वे कथमुपभोगक्षमतेत्यत्र—तेष्वपीति।

(क) लयः अनभिव्यक्ततया अवस्थानम्। (ख) आदर्शपुस्तकयोः 'स्मृति'रिति मुद्राप्रमादकृतम्। (ग) 'न पुनरप्राप्तस्य' इति भवितुमर्हति।

न्यायभाष्यम्

नीति। कुतः संशयः ?—

(सू०)—कृष्णसारे सत्युपलम्भाद् व्यतिरिच्य चोपलम्भात् संशयः (क) ॥ ३२ ॥

कृष्णसारं भौतिकम्, तस्मिन्ननुपहते रूपोपलब्धिः उपहते चानुपलब्धिरिति। व्यतिरिच्य कृष्णसारमवस्थितस्य विषयस्य उपलम्भो न कृष्णसारप्राप्तस्य। न चाप्राप्यकारित्वमिन्द्रियाणाम्, तदिदमभौतिकत्वे विभुत्वात् सम्भवति। (ख)एवमुभयधर्मो-

न्यायवार्त्तिकम्

भौतिकानीति। संशयकारणप्रतिपादनार्थं सूत्रम्—

कृष्णसारे सत्युपलम्भाद् व्यतिरिच्य चोपलम्भात् संशयः। कृष्णसारं भौतिकं तस्मिन्ननुपहते विषयोपलब्धिः, कृष्णसारव्यतिरेकेण विप्रकृष्टदेशावस्थितस्य विषयस्योपलब्धिः,

न्यायवार्त्तिकतात्पर्यटीका

कानीति। उपलक्षणं चैतत्। यदाऽपि भौतिकानि तदाऽपि किं कृष्णसारं (ग) यदेतदुपलभ्यते तदेवेन्द्रियम् आहो तदधिष्ठानं तैजसमित्यपि संशयो द्रष्टव्यः। विप्रतिपत्तेः संशयः। तत्र पूर्वः सांख्यनैयायिकयोर्विप्रतिपत्तेः, उत्तरस्तु सौगतनैयायिकयोरिति। आव्यक्तिकत्वमाहङ्कारिकत्वं द्रष्टव्यम्, अहङ्काराद्धि(घ) बुद्धिविकाराद् (ङ)वैकारिकाद् (च)एकादशेन्द्रियाणि जायन्त इति हि सांख्याः, आव्यक्तिकत्वं त्वव्यक्तस्य मूलकारणत्वादुक्तम्। विप्रतिपत्तिबीजं पृच्छति—कुतः, संशय इति विप्रतिपत्तिमाह कारणे कार्योपचारात्। उत्तरम्—कृष्णसारे सतीति। (छ)वार्तिकम्—किमाव्यक्तिकानि तस्य व्याख्यानम् आहंकारिकाणीति।

वृत्तिः

भूतसंयोगः पृथिव्युपष्टम्भः, पुरुषार्थतन्त्रः उपभोगसम्पादकः ॥ ३२ ॥

समाप्तं शरीरपरीक्षाप्रकरणम् ॥ ६ ॥

(क) अत्र सर्वेष्विन्द्रियेषु परीक्षणीयेषु चक्षुर्मात्रमधिकृत्य संशयप्रदर्शनं तु प्राप्यकारित्वाप्राप्यकारित्वप्रतिहतत्वाप्रतिहतत्वादिभौतिकाभौतिकधर्मविशेषाणां तत्रैव स्फुटोपलम्भ इत्यभिप्रायेणेति बोध्यम्।

(ख) उभयधर्मोपलब्धेरित्यनेन समानधर्मज्ञानजन्योऽयं संशय इत्यापाततः प्रतीयते किन्तु यथाश्रुति सूत्रतो भौतिकाभौतिकसाधारणधर्मानुपस्थित्या तात्पर्यटीकायां तस्य विप्रतिपत्तिजन्यत्वमुक्तम्। अत एव वार्त्तिके संशयकारणप्रतिपादनार्थमिति।

(ग) 'यत्तदेतद्' इति क०।

(घ) हि-शब्दोऽवधारणे न तु हेतौ मात उत्तरस्य तस्य वैयर्थ्यम्।

(ङ) 'वैकारिकाणि' इति पाठः सम्भाव्यते।

(च) 'प्रकृतेर्महांस्ततोऽहङ्कारस्तस्माद् गणश्च षोडशकः' सांख्यकारिका।

(छ) अयमंशः क-ख-तात्पर्यपुस्तकयोः 'वक्ष्यति' (पृः ७६३) इति ग्रन्थानन्तरं मुद्रितः। तत्र प्रमादकृतमिति बुद्ध्या इह गृहीतः।

न्यायभाष्यम्

पलब्धेः संशयः ॥ ३२ ॥

न्यायवार्त्तिकम्

सेयं व्यतिरेकोपलब्धिरभौतिकधर्मः, तदेवमुभयधर्मोपलब्धेः संशय इति। कृष्णसारमेव चक्षुः, तस्मिन् सति भावाद्रूपग्रहणस्य—यस्मादिदं रूपग्रहणं सति कृष्णसारे भवति असति न भवति ; यच्च यस्मिन् सति भवत्यसति न भवति तस्य तदिति, यथा कार्यद्रव्यस्य रूपादय इति। न प्रदीपादिभिरनेकान्तात्—प्रदीपे सति रूपोपलब्धिर्भवति न च प्रदीपस्य रूपोपलब्धि-रित्यनेकान्तः। यस्य कृष्णसारं चक्षुः तस्य सन्निकृष्टविप्रकृष्टयोस्तुल्योपलब्धिप्रसङ्गः—कृष्णसारं न विषयं प्राप्नोति अप्राप्त्यविशेषात् सन्निकृष्टविप्रकृष्टयोस्तुल्योपलब्धिः प्राप्नोति। विषयी-भावादिति चेत्—अथ मन्यसे सन्निकृष्टोऽस्य विषयो भवति विप्रकृष्टो न विषयः एवं च न तुल्योपलब्धिरिति ? न उक्तोत्तरत्वात् प्रत्यक्षसूत्र इति ॥ ३२ ॥

न्यायवार्त्तिकतात्पर्यटीका

कृष्ण—यः (सू० ३३)॥ कृष्णसारे सत्युपलम्भात् कृष्णसारमेव चक्षुरिति बौद्धाः। व्यतिरिच्य चोपलम्भात् तदतिरिक्तम्, तच्चाऽऽहङ्कारिकम् अहङ्कारस्य विभुत्वेनाप्रतिघातात्, भौतिकत्वे काचाभ्रपटलादिभिर्भौतिकैः प्रतिघातप्रसङ्गादिति सांख्याः।

(क) न प्रदीपादिभिरनेकान्तादिति। वर्तिदेशस्थेन पिण्डितेन तेजसा प्रदीपेनानेकान्तात्। प्रभा हि विसारिणी तमर्थं प्राप्य प्रकाशयति न तु प्रदीप इत्यर्थः। विषयीभावादिति चेदिति। उत्पादविशेष एव स तादृक् चक्षुरर्थक्षणयोः यतोऽप्राप्तयोरपि विषयविषयिभावाद् वेद्यवेदकत्वम्, न चायं व्यवहितविप्रकृष्टयोरिति न तयोर्वेद्यवेदकभाव इत्यर्थः। निराकरोति—नोक्तोत्तरत्वात्

वृत्तिः

अथेन्द्रियं परीक्षणीयम्, तत्र लक्षणसूत्रोक्तं भौतिकत्वमिन्द्रियाणां परीक्षितुं संशयमाह—
(कृष्णसारे सत्युपलम्भाद् व्यतिरिच्य चोपलम्भात् संशयः)

कृष्णसारे चक्षुर्गोलके सति घटाद्युपलम्भाद् गोलकस्येन्द्रियत्वमिति बौद्धाः। व्यतिरिच्य विषयं प्राप्य उपलम्भात् उपलम्भजननाद् गोलकातिरिक्तानि इत्यपरे।

तत्र इन्द्रियाणि गोलकातिरिक्तानि न वेति संशयः। गोलकातिरिक्तानीति नैयायिकादयः, तत्राप्यभौतिकान्याहङ्कारिकाणीति साङ्ख्याः। भौतिकानीत्यपरे ॥ ३३ ॥

(क) 'न प्रदीपादिभिः' इत्यादिः 'इति भावः' इत्यन्तो ग्रन्थः (७६३पत्रे) 'वक्ष्यति' इत्यनन्तरं मुद्रितात् 'वार्त्तिकं किमाद्यन्त्रिकानि तस्य व्याख्यानमाहङ्कारिकाणीति' इति ग्रन्थात् परं मुद्रितः, व्याख्येयव्याख्यानयो-रेवं क्रमविपर्यये लिपिप्रमाद एव हेतुरिति बुद्ध्वा इह यथाक्रमं सन्निवेशितः।

न्यायभाष्यम्

अभौतिकानीत्याह। कस्मात् ?—

(सू०)—महदणुग्रहणात् ॥३३॥

महदिति महत्तरं महत्तमं चोपलभ्यते यथा न्यग्रोधपर्वतादि। अण्विति अणुतरमणुतमं च गृह्यते (१)यथा न्यग्रोधधानादि। तदुभयमुपलभ्यमानं चक्षुषो भौतिकत्वं बाधते। भौतिकं हि यावत्तावदेव व्याप्नोति। अभौतिकं तु विभुत्वात् सर्वव्यापकमिति ॥ ३३।

न्यायवार्त्तिकम्

अभौतिकानीत्यपरे—

महदणुग्रहणात्। (२)महदिति महत्तरं महत्तममुच्यते अण्विति अणुतरमणुतममिति तदिदमुभयं चक्षुष्युपलभ्यमानं भौतिकत्वं चक्षुषो बाधते। भौतिकं हि यावद्भवति तावदेव व्याप्नोति अभौतिकं तु व्यापकत्वात् सर्वसम्बद्धम्।

न भौतिकेषु प्रदीपादिषु दृष्टत्वात्—भौतिकाः प्रदीपादयो महदण्वोः प्रकाशका भवन्तीत्यनेकान्तः, प्रदीपाद्यनभ्युपगमे वा महदणुप्रकाशकत्वं चक्षुष एवेत्यसाधारणत्वादहेतुः भौतिकाभौतिकयोर्निवृत्तेः। ननु चाभौतिके ज्ञाने महदणुप्रकाशकत्वं दृष्टम्? न दृष्टम्—न हि बुद्ध्या

न्यायवार्त्तिकतात्पर्यटीका

स एवार्थो विप्रकृष्टो न विषयः सन्निकृष्टश्च विषय इत्येकस्य विषयीभावस्तदभावश्चायुक्तः क्षणभङ्गश्च निषेत्स्यत इति भावः ॥ ३२ ॥

तत्र सांख्यमुत्थाप्य बौद्धपक्षं दूषयति—अभौतिकानीति। कृष्णसाराधिकग्रहणे विवक्षिते (क) अर्थग्रहणं संपातायातं न तु तदत्र विवक्षितम् असाधकत्वादिति।

महदणुग्रहणात् (सू० ३३) ॥ धाना अङ्कुरः अभौतिकं तु व्यापकत्वादिति। तद्यथा विज्ञानाद्यभौतिकं महच्चाणु गृह्णातीत्यर्थः ॥ ३३ ॥

एकदेशिमतेन दूषणमाह—न भौतिकेषु प्रदीपादिष्विति। ननु बुद्धिर्यदि महदण्वोः

वृत्तिः

तत्र साङ्ख्यमतेन बौद्धमतमुदस्यन्नाह—(महदणुग्रहणात्)

गोलकं नेन्द्रियम् अप्राप्यकारित्वेऽतिप्रसङ्गात्। इत्थं च गोलकातिरिक्तं भौतिक-

---

(१) 'यथा' इति ग-ज-पुस्तकयोः नास्ति। (२) 'महदिति महत्तरमुच्यते अण्विति अणुतरमिति'—इति क-ख-पुस्तकधृतपाठान्तरम्।

(क) अर्थः न्यग्रोधपर्वतादिः।

न्यायवार्त्तिकम्

महदणुनी प्रकाश्येते, अपि तु प्रकाशो बुद्धिर्न प्रकाशनमिति, अवधारितस्यार्थस्य हानोपादानोपेक्षाबुद्धीनां साधनं बुद्धिरिति नाभौतिकं महदणुप्रकाशकमस्ति। ननु मनो विद्यते? सत्यं न पुनस्तद्भौतिकं नाप्यभौतिकमिति। एतेनाऽऽत्मा व्याख्यातः—न भौतिको नाभौतिक इति। यदि मनो नाभौतिकं यदुक्तं भौतिकानीन्द्रियाणि अभौतिकं मन इति तद् व्याहतम्? नाभौतिकार्थस्याभूतात्मकपर्यायत्वात्—अभौतिकं मन इति अभूतात्मकं मन इति यावदुक्तं भवति। मुख्यतस्तु मनो न भौतिकं नाभौतिकमिति। नेन्द्रियेऽपि समानत्वात्—इन्द्रियमभौतिकमिति यावदुक्तं भवति अभूतात्मकमिति? अभूतात्मकं व्यापकं चेन्द्रियं प्रतिपद्यमान इदं पर्यनुयोज्यः व्यवहितार्थग्रहणं कस्मान्न भवति? किं कारणम्—व्यापकत्वादिन्द्रियस्य न कुड्यादेरावरणसामर्थ्यमस्तीति। वृत्तिः प्रतिषिध्यत इति चेत्—अथ मन्यसे सत्यं व्यापकमिन्द्रियम्, तस्य तु पुरुषार्थहेतुना क्षोभ्यमाणस्य महाह्रदाद् बुद्बुदा इव निःसरन्त्यस्ताः कुड्यादिभिः (१)प्रतिषिध्यन्त इति? न वृत्तिव्यतिरेकेणेन्द्रियसत्त्वे प्रमाणाभावात्—येयं विषयग्रहणात्मिका वृत्तिः तां त्यक्त्वा तद्व्यतिरिक्तमिन्द्रियमिति किं प्रमाणम्? न चाप्रामाणिकोऽर्थः शक्यः प्रतिपत्तुम्। न च (२)प्रतिषिध्यमानाप्रतिषिध्यमानयोरेकत्वम्, एकत्वे वा आनर्थक्यं वृत्तिः प्रतिषिध्यते (क)निःसरतीति च। अव्यतिरेकाच्च तदुत्पत्तिविनाशधर्मकम्—यदि वृत्त्यव्यतिरेकीन्द्रियं यथा वृत्तेरुत्पादविनाशावेवमिन्द्रियस्यापि प्राप्नुतः। वृत्तेर्व्यक्तिर्नोत्पत्तिरिति चेत्—अथ मन्यसे न मया वृत्तेरुत्पत्तिरभ्युपगम्यते अपि तु व्यक्तिः न निरोधो विनाशोऽपि तु तिरोभाव इति? नोत्पत्तिविशेषत्वात्—व्यक्तिरुत्पत्तेर्विशेषः। कथमिति? नानुपजातविशेषस्य व्यक्तिरिति। अथानुपजातविशेषं व्यज्यत इति मन्यसे, नित्यं व्यक्तिः स्यात्। एतेन विनाशो व्याख्यातः। तिरोभाव इति विद्यमानं न किञ्चिन्निरुद्धम्, न ह्यनिवृत्तविशेषस्याग्रहणं भवति। न च सर्वनित्यवादिना ग्रहणाग्रहणे युक्ते—विशेषस्यानुपजननान्न ग्रहणं (ख)विशेषस्यानुपचयान्नाग्रहणमिति। नित्यं व्यापकञ्चेन्द्रियमभ्युपगच्छतः कारणार्थो हीयते—कारणं नाम यस्यानन्तरं यद्भवति, कारणञ्च नित्यं

न्यायवार्त्तिकतात्पर्यटीका

प्रकाशनं तत् किमिदानीं सर्वस्यैवाप्रकाशनमित्यत आह—अवधारितस्य (ग)त्वर्थस्येति। न च हानोपादानोपेक्षाबुद्ध्योऽण्व्यो महत्यो वेति भावः। पूर्वपक्ष्याह—नेन्द्रियेऽपि समानत्वादिति। तदेवमेकदेशिनोऽसाधारणत्वापादने पूर्वपक्षिणा दूषिते सिद्धान्त्याह—अभूतात्मकं व्यापकं चेति। सांख्यः शङ्कते—वृत्तिरिति। इन्द्रियाणां वृत्तयो ज्ञानहेतवः प्रतिषिध्यन्त इत्यर्थः।

---

(१) 'प्रतिबध्यन्त'—इति क-ख-धृतपाठान्तरम्। (२) 'प्रतिबध्यमानाप्रतिबध्यमानयोः'—इति क-ख-धृतपाठान्तरम्।

(क) 'निस्सरतीति' इति क-ख-वार्त्तिकमुद्रितपाठः शोधितः। (ख) 'विशेषस्यानपचयात्' इति युक्तम्। (ग) 'तु'कारो वार्त्तिके न दृश्यते।

न्यायभाष्यम्

न महदणुग्रहणमात्रादभौतिकत्वं विभुत्वं चेन्द्रियाणां शक्यं प्रतिपत्तुम्। इदं खलु—

(सू०)—रश्म्यर्थसन्निकर्षविशेषात्तद्ग्रहणम् ॥ ३४ ॥

तयोर्महदण्वोर्ग्रहणं चक्षूरश्मेरर्थस्य च सन्निकर्षविशेषाद् भवति यथा प्रदीपरश्मे-

न्यायवार्त्तिकम्

कार्यञ्च नित्यमिति किं कस्यानन्तरम्, कार्यकारणभावश्च कथं तयोर्नित्यत्वात्। कारकशब्दार्थश्च वाच्यः। ननु करोतीति कारकम्? सत्यं करोतीति कारकम्, न पुनर्नित्यवादिनः किञ्चित् कर्तव्यमस्ति, न चासति कर्तव्ये कारकार्थं पश्यामः। व्यक्तौ कारकार्थ इति चेत्, व्यक्तौ च तुल्यम्—व्यक्तिरपि व्यङ्ग्यवन्नित्येति व्यक्तावपि न कारकार्थोऽस्ति। युगपदनेकविज्ञानप्रसङ्गाच्च—यदि च वृत्तिर्वृत्तिमतो नान्या भवति वृत्तिमतोऽवस्थानाद् वृत्तीनामवस्थानमिति युगपदनेकविज्ञानप्रसङ्गः। वृत्त्यनेकत्वे चैकमिन्द्रियमनेकं प्राप्नोति वृत्तिभ्योऽनन्यत्वात्। अथ मा भूदिन्द्रियभेद इति, वृत्तीनां तर्ह्येकत्वं प्राप्नोति वृत्तिवृत्तिमतोरनन्यत्वात्। अथ मा भूदयं दोष इत्युभयं नेष्यते, भेदस्तर्हि वृत्तिवृत्तिमतोरिति। न चान्या गतिरस्ति। तस्मादयुक्तं व्यापकमिन्द्रियं नित्यं चेति ॥ ३३ ॥

महदणुग्रहणस्य चान्यथासिद्धेरहेतुः—योऽयं हेतु(१)र्महदणुग्रहणादभौतिकानीन्द्रियाणीति अयमन्यथासिद्धः, न महदणुग्रहणमात्रादभौतिकत्वं व्यापकत्वमिन्द्रियाणां शक्यं प्रतिपत्तुम्। कस्मात् इदम्?

रश्म्यर्थसन्निकर्षविशेषात् तद्ग्रहणम्। यस्माद् रश्म्यर्थसन्निकर्षविशेषान्महदणवो-

न्यायवार्त्तिकतात्पर्यटीका

युगपदनेक(क)ग्रहणप्रसङ्गाच्चेति। यद्यपि सांख्यीयराद्धान्ते दीर्घां शष्कुलीं भक्षयतो युगपदनेकज्ञानोत्पत्तिरभिमता तथाऽपि क्वचित् क्रमोऽपि दृश्यते स न स्यात्। वृत्तिमतोऽवस्थाने तदभिन्ना वृत्तिरप्यवतिष्ठत इति तन्मात्राधीनोत्पत्तीनां विज्ञानानां क्रमो न स्यादिति भावः। उभयं नेष्यत इति, 'वृत्तिभ्योऽनन्यत्वं वृत्तिमतो नेष्यते नापि वृत्तीनामनन्यत्वं वृत्तिमत इत्यर्थः ॥ ३३ ॥

वृत्तिः

मिति वाच्यम्, तदप्यसङ्गतम्, चक्षुषा हि न्यूनपरिमाणं महत्परिमाणं च गृह्यते, न च न्यूनेन महतो व्यापनं सम्भवति। न च अव्याप्य ग्रहणम्, अतोऽभौतिकानीन्द्रियाण्याहङ्कारिकाणीति ॥ ३४ ॥

---

(१) '-र्महदणवोर्ग्रहणात्'—इति क-ख-धृतपाठान्तरम्।

(क) वार्त्तिके—'विज्ञानप्रसङ्गा'दिति विशेषः।

न्यायभाष्यम्

रर्थस्य चेति। (१) रश्म्यर्थसन्निकर्षश्चाऽऽवरणलिङ्गः। चाक्षुषो हि रश्मिः कुड्यादिभिरावृतमर्थं न प्रकाशयति यथा प्रदीपरश्मिरिति ॥ ३४ ॥

न्यायवार्त्तिकम्

ग्रहणम्—चक्षूरश्मेरर्थस्य च सन्निकर्षविशेषान्महदण्वोर्ग्रहणं भवति। । तत्र सन्निकर्षमात्रात् सामान्यग्रहणं सन्निकर्षविशेषाद्विशेषग्रहणम्। कः पुनः सन्निकर्षस्य विशेषः? भूयोऽवयवसन्निकर्षानुग्रहः। यस्मादयं सन्निकर्षो विशेषप्रतिपत्तिहेतुर्भूयोऽवयवसंयोगैरनुगृह्यते सोऽयमवयवान्तरसंयोगापेक्षोऽवयवीन्द्रियसन्निकर्षः सन्निकर्षविशेष इत्युच्यते, स च रश्म्यर्थसन्निकर्षविशेषोऽणुमहतोस्तुल्यो भवतीत्यन्यथा महदण्वोर्ग्रहणं सिध्यति। रश्म्यर्थसन्निकर्षश्चाऽऽवरणलिङ्गः कुड्यादिव्यवहितानामप्रकाशरूपत्वात् अप्राप्यकारित्वे तु न कुड्यादेरावरणसामर्थ्यमस्तीत्यस्ति चाक्षुषो रश्मिः यथा प्रदीपरश्मिरिति ॥ ३४ ॥

न्यायवार्त्तिकतात्पर्यटीका

नैयायिकः सांख्यं दूषयति—

रश्म्य—णम् (सू० ३४) ॥ आहङ्कारिकत्वे चक्षुर्न प्रतिहन्यते यदि (क) तत् काचाभ्रपटलान्तरितप्रकाशवत् कुड्यान्तरितमपि प्रकाशयेत्। न चैवमस्ति। तस्मात् कृष्णसाराधिष्ठानं तेज एव भौतिकं प्राप्य गृह्णाति कुड्यान्तरितं त्वर्थमप्राप्तं न गृह्णाति। काचाभ्रपटलान्तरिते तु वक्ष्यति (ख)।

भूयोऽवयवसन्निकर्षानुग्रह इति। इन्द्रियावयवानामर्थावयवैः इन्द्रियावयवानामर्थेन अर्थावयवानामिन्द्रियेण इन्द्रियस्यार्थेनेति ॥ ३४ ॥

वृत्तिः

साङ्ख्यं निरस्यति—(रश्म्यर्थसन्निकर्षविशेषात् तद्ग्रहणम्)

रश्मिः गोलकावच्छिन्नं तेजः; तेनार्थस्य घटादेर्यः सन्निकर्षविशेषः संयोगविशेषस्तस्मात् तयोर्महदण्वोर्ग्रहणमुपपद्यते। भौतिकेऽपि प्रदीपादौ महदणुप्रकाशकत्वं दृष्टम्, अभौतिकत्वे तु पुरःपश्चाद्वर्तिनां सर्वेषामेव ग्रहणं स्यात् ॥ ३५ ॥

---

(१) 'रश्म्यर्थसन्निकर्षविशेषश्च' फ०।

(क) 'तदि'ति तथा अप्रतिहतमिति यावत्। 'काचाभ्रपटलान्तरितव'दिति पाठो युक्तः।

(ख) क-ख-तात्पर्यपुस्तकयोरतः परं 'वार्त्तिकं—किमाव्यक्तिकानि, तस्य व्याख्यानमाहंकारिकाणीति। न प्रदीपादिभिरनेकान्तादिति। वर्तिदेशस्थेन पिण्डितेन तेजसा प्रदीपेनानेकान्तात्। प्रभा हि विसारिणी तमर्थं प्राप्य प्रकाशयति न तु प्रदीप इत्यर्थः। विषयीभावादिति चेदिति। उत्पादविशेष एव स तादृक् चक्षुरर्थंचणयोर्यतोऽप्राप्तयोरपि विषयविषयिभावाद्वेद्यवेदकत्वम्, न चायं व्यवहितविप्रकृष्टयोरिति न तयोर्वेद्यवेदकभाव इत्यर्थः। निराकरोति—नोक्तोत्तरत्वात्। स एवार्थो विप्रकृष्टो न विषयः सन्निकृष्टश्च विषय इत्येकस्य विषयीभावस्तदभावश्चायुक्तः च गभङ्गश्च निषेत्स्यत इति भावः' इत्य ो ग्रन्थो मुद्रितः।

न्यायभाष्यम्

आवरणानुमेयत्वे सतीदमाह—

(सू०)—तदनुपलब्धेरहेतुः ॥ ३५ ॥

रूपस्पर्शवद्धि तेजः, महत्त्वादनेकद्रव्यवत्त्वाद् रूपवत्त्वाच्चोपलब्धिरिति प्रदीपवत् प्रत्यक्षत उपलभ्येत चाक्षुषो रश्मिर्यदि स्यादिति ॥ ३५ ॥

(सू०)—नानुमीयमानस्य प्रत्यक्षतोऽनुपलब्धिरभावहेतुः ॥३६॥

सन्निकर्ष(१)प्रतिषेधार्थेनाऽऽवरणेन लिङ्गे नानुमीयमानस्य रश्मेर्या प्रत्यक्षतोऽनुपलब्धिर्नासावभावं प्रतिपादयति यथा चन्द्रमसः परभागस्य पृथिव्याश्चाधोभागस्य ॥३६॥

न्यायवार्त्तिकम्

आवरणानुमेयत्वे सतीदमाह—

तदनुपलब्धेरहेतुः । न चाक्षुषो रश्मिर्विद्यत इति सूत्रार्थः । कथमिति ? उपलब्धिलक्षणप्राप्तत्वादनुमानानुपपत्तिः—यत् खलूपलब्धिलक्षणप्राप्तं नोपलभ्यते तन्नास्ति, यथा घटादि, घटादेर्महदनेकद्रव्यवत्त्वरूपवत्त्वानि सन्तीत्युपलभ्यन्ते घटादयः तथा महदनेकद्रव्यवत्त्वरूपवांश्चाक्षुषो रश्मिः कस्मात् प्रत्यक्षतो नोपलभ्यत इति—महत्त्वं तावत् (क)कारणमहत्त्व-बहुत्व-प्रचयेभ्यः, अनेकद्रव्यवत्त्वमपि कारणबहुत्वादेव, रूपस्पर्शवद्धि तेज इति नारूपं तत्—एवमशेषोपलब्धिकारणसन्निधाने सति (२)यन्नोपलभ्यते तेन गम्यते नास्तीति ॥ ३५ ॥

नानुमीयमानस्य प्रत्यक्षतोऽनुपलब्धिरभावहेतुः । यत् प्रत्यक्षतो नोपलभ्यते तदनुमानेनोपलभ्यमानं नास्तीत्ययुक्तं यथा चन्द्रमसः परभागः पृथिव्याश्चाधोभागः प्रत्यक्ष-

न्यायवार्त्तिकतात्पर्यटीका

तद—तुः (सू० ३६) तदनुपलब्धेरिति । नोपलब्धिलक्षणप्राप्तमनुपलभ्यमानं शक्यमनुमातुं नरविषाणादीनामप्यनुमानप्रसङ्गादित्यर्थः ॥ ३९ ॥

परिहारः—नानुमीयमानस्येति ।

नानु—तुः (सू० ३६) ॥ सत्यम् (ख) उपलब्धिलक्षणप्राप्तमनुपलभ्यमानं न शक्य-

वृत्तिः

तैजसे चक्षुष्यनुपलब्धिबाधं बौद्धः शङ्कते—(तदनुपलब्धेरहेतुः)

रश्म्यर्थसन्निकर्षो न हेतुर्गोलकातिरिक्तस्य रश्मेरनुपलब्धेः ॥ ३६ ॥

समाधत्ते—(नानुमीयमानस्य प्रत्यक्षतोऽनुपलब्धिरभावहेतुः)

---

(१) '-प्रतिषेधेना'—इति भा० । (२) 'येन नोपलभ्यते' इति क-ख-धृतपाठान्तरम् ।

(क) 'कारणबहुत्वात् कारणमहत्त्वात् प्रचयविशेषाच्च महत्' इति शारीरकभाष्यधृतपाठः (ब्रह्मसूत्रे २ अ, २ पा ११ सू०)। वैशेषिकसूत्रपाठस्तु 'कारणबहुत्वाच्च' इत्येतावन्मात्रम् (चन्द्रप्रभाप्रेससंस्करण० सू० ९, आ १, अ ७)। (ख) क-ख-तात्पर्यपुस्तकयोः 'अनुपलब्धि—' इति मुद्रितम् ।

(सू०)—द्रव्यगुणधर्मभेदाच्चोपलब्धिनियमः ॥ ३७ ॥

न्यायभाष्यम्

भिन्नः खल्वयं द्रव्यधर्मो गुणधर्मश्च, महदनेकद्रव्यवच्च (१)विषक्तावयवमाप्यं द्रव्यं प्रत्यक्षतो नोपलभ्यते स्पर्शस्तु शीतो गृह्यते। तस्य द्रव्यस्यानुबन्धाद् हेमन्तशिशिरौ

न्यायवार्त्तिकम्

लक्षणप्राप्तावपि न प्रत्यक्षत (क)उपलभ्यते अनुमानेन चोपलब्धेर्न तौ न स्तः। किं पुनरनुमानम्? अर्वाग्भागवदुभयप्रतिपत्तिः, तथा चाक्षुषस्य रश्मेः कुड्याद्यावरणमनुमानं सम्भवतीति ॥३६॥

अपरे तु 'महदनेकद्रव्यवत्त्वाद्रूपवत्त्वाच्चोपलब्धि'रित्युपलब्धौ नियमं वर्णयन्ति नोपलभ्यमान इति। किमुक्तं भवति? (ख) न युक्तो यत्र यत्र महदनेकद्रव्यवत्त्वरूपाणि सन्ति तत्तदुपलभ्यत इति, अपि तु यद् यदुपलभ्यते तत्र तत्र महदनेकद्रव्यवत्त्वरूपाणि सन्तीति। एवं तर्हि इदं सूत्रं नोपलब्धेः कारणप्रतिपादकं सत्स्वभावादिति—सत्सु महदनेकद्रव्यरूपेषु उपलब्धिर्न भवतीति नैतान्युपलब्धिकारणमिति—

न्यायवार्त्तिकतात्पर्यटीका

मनुमातुं न तु (ग)महत्त्वाद्येवोपलक्षणप्राप्तेरपि तु रूपविशेषोऽपि। न चासौ विशेष उद्भवसमाख्यातः कृष्णसाराधिष्ठानस्य चक्षुषोऽस्तीत्यर्थः ॥३६॥

आचार्यदेशीयानां मतमाह—अपरे त्विति। दूषयति—एवं तर्हीदमिति। यत्रोपलब्धिस्तत्रैतदिति सूत्रार्थः। ततो महत्त्वादिषु मध्ये यत्किंचिदेकं वक्तव्यं सूत्रकारेण यत्रोपलब्धिस्तत्रैतदित्येकस्मादेव सिद्धेरनेकोपादानवैयर्थ्यम्। तस्मात् संभावनायोग्यताभिधानपरं सूत्रम्।

वृत्तिः

रूपोपलब्धेः सकरणकत्वादिनाऽनुमीयमानस्य चक्षुषः प्रत्यक्षतोऽनुपलब्धिर्नाभावनिर्णायिकेत्यर्थः ॥ ३७ ॥

कथं तर्हि नोपलम्भ इत्यत आह—(द्रव्यगुणधर्मभेदाच्चोपलब्धिनियमः)

द्रव्यस्य धर्मभेदो महत्त्वादिः, गुणस्य धर्मभेद उद्भूतत्वम्, तदधीनत्वात् प्रत्यक्षस्य द्रव्यमात्रे उपलब्धेर्न नियमः। यत्रोद्भूतरूपमहत्त्वादिकं तस्य प्रत्यक्षम्, तदभावाच्चक्षुरादेरप्रत्यक्षम्।

---

(१) 'विभक्तावयवम्'—इति वि० टि०।

(क) 'उपलभ्येते' इति पाठः सम्भाव्यते। यथाश्रुतस्य सम्यक्त्वे तु प्रत्यक्षलक्षणप्राप्ताविति सप्तम्यन्तं पदं बोध्यम्। (ख) 'न युक्तो' इत्यत्र क-ख-पुस्तकधृतं 'न ब्रूमो' इति पाठान्तरं समीचीनतया सम्भाव्यते। (ग) 'महत्त्वाद्येव उपलब्धिलक्षणप्राप्तिहेतुः' इति 'महत्त्वाद्येवोपलब्धिलक्षण'मिति 'महत्त्वाद्येवोपलब्धिलक्षणप्राप्तिः' इति वा पाठः सम्भाव्यते।

न्यायभाष्यम्

(१) कल्प्येते तथाविधमेव च तैजसं द्रव्यमनुद्भूतरूपं सह रूपेण नोपलभ्यते, स्पर्शस्त्वस्योष्ण उपलभ्यते तस्य द्रव्यस्यानुबन्धाद् ग्रीष्मवसन्तौ (२)कल्प्येते ॥ ३७ ॥

यत्र त्वेषा भवति—

(सू०)—अनेकद्रव्यसमवायाद् रूपविशेषाच्च रूपोपलब्धिः (क) ॥ ३८ ॥

(३)तत्र रूपं च द्रव्यं च तदाश्रयः प्रत्यक्षत उपलभ्यते। रूपविशेषस्तु (४)यद्भावात् क्वचिद्रूपोपलब्धिः (५)यदभावाच्च द्रव्यस्य क्वचिदनुपलब्धिः (५*) स रूपधर्मोऽयमुद्भव समाख्यात इति। अनुद्भूतरूपश्चायं नायनो रश्मिः, तस्मात् प्रत्यक्षतो नोपलभ्यते

न्यायवार्त्तिकम्

द्रव्यगुणधर्मभेदाच्चोपलब्धिनियम इति। शेषं भाष्ये ॥ ३७ ॥

कस्मात् तर्हि चाक्षुषो रश्मिर्नोपलभ्यते इति? उपलब्धिकारणाभावादिति। नैतावदेवोपलब्धिकारणं यन्महदनेकद्रव्यरूपाणि, अपि तु रूपग्रहणाद्रूपविशेषोऽभिधीयते न रूपमात्रम्। एवं च सूत्रम्—

अनेकद्रव्यसमवायाद् रूपविशेषाच्च रूपोपलब्धिः। अनेकद्रव्येण समवायाद् रूपविशेषाच्च रूपोपलब्धिरिति। अत्र रूपविशेषग्रहणेन रूपधर्म उद्भवसमाख्योऽभिधीयते। न रूपत्वं रूपान्तराद्रूपं विशिनष्टि अपि तूद्भवो विशेषकत्वाद्विशेष इत्युच्यते यथा ब्राह्मणविशेष इति न ब्राह्मणत्वं ब्राह्मणविशेषः एवं समानजातीयविशेषकत्वं यत् तद् विशेष इत्युच्यते। उद्भवश्च कार्यगम्यः यस्याभावाद्विवक्तावयवमाप्यं द्रव्यं हेमन्ते न गृह्यते तैजसञ्च ग्रीष्मे, यस्य भावात् प्रदीपरश्मिरुपलभ्यते आदित्यरश्मिश्च, स उद्भवो नाम विशेषः, स तस्मिन्नायने रश्मौ, रूपविशेषो

न्यायवार्त्तिकतात्पर्यटीका

ननु यथाश्रुतं महत्त्वाद्युपलब्धिकारणमस्ति चाक्षुषस्य रश्मेरिति कस्मादयं नोपलभ्यत इत्यत आह—द्रव्यगुणधर्मेति।

द्रव्य—मः (स० ३७) (ख) ॥

अने—ब्धिः (सू० ३८) (ग) ॥

---

(१) 'कल्प्येते'—इति ल-ग-भा०। (२) 'कल्प्येते'—इति ल-ग-भा०। (३) 'यत्र' इति ल-ग-ज-भा-फ०। वि-पुस्तकपाठो गृहीतः। (४) 'यत्कृता' इति वि०। (५) 'तदभावाच्च तदनुपलब्धिः' इति वि०।

(क) इदं सूत्रं वैशेषिकदर्शनेऽपि (अ० ४, आ० १, सू० ८)। तत्र रूपविशेष उद्भूतत्वमनभिभूतत्वं रूपत्वञ्चेति शङ्करमिश्राः। (ख) ३७श-सूत्रे अवतरणिकातिरिक्ता टीका नास्ति। (ग) ३८श-सूत्रे तात्पर्यटीका नोपलभ्यते।

न्यायभाष्यम्

इति। दृष्टश्च तेजसो धर्मभेदः, उद्भूतरूपस्पर्शं प्रत्यक्षं तेजो यथा आदित्यरश्मयः। उद्भूतरूपमनुद्भूतस्पर्शं च प्रत्यक्षं यथा प्रदीपरश्मयः। उद्भूतस्पर्शमनुद्भूतरूपमप्रत्यक्षं यथाऽबादिसंयुक्तं तेजः। अनुद्भूतरूपस्पर्शोऽप्रत्यक्षश्चाक्षुषो रश्मिरिति ॥३८॥

(सू०)—कर्मकारितश्चेन्द्रियाणां व्यूहः पुरुषार्थतन्त्रः ॥ ३९ ॥

यथा चेतनस्यार्थो विषयोपलब्धिभूतः सुखदुःखोपलब्धिभूतश्च (१)कल्प्यते तथेन्द्रियाणि व्यूढानि, विषयप्राप्त्यर्थश्च रश्मेश्चाक्षुषस्य व्यूहः। रूपस्पर्शानभिव्यक्तिश्च व्यवहारप्रक्लृप्त्यर्था, द्रव्यविशेषे च प्रतीघातादावरणोपपत्तिर्व्यवहारार्था। सर्वद्रव्याणां विश्वरूपो व्यूह इन्द्रियवत् कर्मकारितः पुरुषार्थतन्त्रः। कर्म तु धर्माधर्मभूतं चेतनस्योपभोगार्थमिति।

न्यायवार्त्तिकम्

नास्तीत्यतश्चाक्षुषो रश्मिर्नोपलभ्यते। दृष्टश्च तेजसो धर्मभेदः। चतुर्विधश्च तेजो भवति—उद्भूतरूपस्पर्शं यथा आदित्यरश्मिः। उद्भूतरूपमनुद्भूतस्पर्शं यथा प्रदीपरश्मिः। उभयं च प्रत्यक्षं रूपस्योद्भूतत्वात्। उद्भूतस्पर्शमनुद्भूतरूपं यथा वारिस्थितं तेजः। अनुद्भूतरूपस्पर्शं यथा नायनं तेजः। उभयं चाप्रत्यक्षं रूपस्यानुद्भूतेः ॥ ३८ ॥

कर्मकारितश्चेन्द्रियाणां व्यूहः पुरुषार्थतन्त्रः। शेषं भाष्ये। रूपस्पर्शानभिव्यक्तिश्च व्यवहारप्रक्लृप्तार्था—यदि नायनो रश्मिरुद्भूतस्पर्शो भवेत् तेन दृश्यविशेषेऽनेकरश्मिसन्निधाने सति द्रव्यं (२)दह्येत, अनेकरश्मिसन्निपाते च सति व्यवहितत्वाद् द्रव्यस्यानुपलब्ध्या भवितव्यम्।

न्यायवार्त्तिकतात्पर्यटीका

कर्म—न्त्रः (सू० ३९)॥ अनेकरश्मिसन्निधाने स्पर्शस्योद्भूतौ सत्यां द्रव्यं दह्येत रूपोद्भूतौ सत्यां व्यवहितत्वात् आदौ निपतितेन चक्षुरन्तरेण द्रव्यस्यानुपलब्ध्या भवि-

वृत्तिः

चक्षुरादावुद्भूतरूपमेव न कुत इत्याशङ्कायां भाष्यम्—

(क)“कर्मकारितश्चेन्द्रियाणां व्यूहः पुरुषार्थतन्त्रः”।

अदृष्टविशेषाधीन इन्द्रियाणां व्यूहो रचनाविशेष उपभोगसाधनमिति। सूत्रमेवेदमिति केचित् ॥ ३८ ॥

---

(१) 'कल्पते' इति ल-ग-भा०। (२) क-वार्त्तिके 'गृह्येत' इति मुद्रितम्।

(क) 'अनेकद्रव्यसमवायाद् रूपविशेषाच्च रूपोपलब्धिः' इति सूत्रस्य वृत्त्यदर्शनेन विश्वनाथमते इदं काणादसूत्रमेव न तु न्यायसूत्रमिति सम्भाव्यते। तथा “कर्मकारित” इत्यादि सूत्रस्यापि भाष्यतया उल्लेखेन अतः परं वृत्तौ सूत्रसंख्याह्रासः।

न्यायभाष्यम्

अव्यभिचाराच्च प्रतीघातो भौतिकधर्मः (क)। यश्चाऽऽवरणोपलम्भादिन्द्रियस्य द्रव्यविशेषे प्रतिघातः स भौतिकधर्मो न भूतानि व्यभिचरति, नाभौतिकं प्रतिघातधर्मकं दृष्टमिति। अप्रतिघातस्तु (१)व्यभिचारी भौतिकाभौतिकयोः समानत्वादिति।

यदपि (२) मन्येत प्रतिघाताद्भौतिकानीन्द्रियाणि, अप्रतिघातादभौतिकानीति प्राप्तम्? दृष्टश्चाप्रतिघातः काचाभ्रपटलस्फटिकान्तरितोपलब्धेः। तन्न युक्तम्। कस्मात्? यस्माद्भौतिकमपि न प्रतिहन्यते, काचाभ्रपटलस्फटिकान्तरितप्रकाशात् प्रदीपरश्मीनाम्, स्थाल्यादिषु पाचकस्य तेजसो(३)ऽप्रतिघातः ॥ ३९ ॥

न्यायवार्त्तिकम्

अथ मन्यसे यथा आदित्यरश्मिसम्बद्धेऽर्थे नायनो रश्मिर्न व्यवधीयते एवं रश्म्यन्तरसन्निपातेऽपीति; तन्न व्यतिभिन्नार्थग्राहकत्वात्—व्यतिभिन्नादित्यरश्मिं तत्सम्बद्धेन द्रव्येण सम्बध्यते उद्भूतरूपस्पर्शवत्त्वे च चक्षुषो यस्य पूर्वं सन्निपतितं चक्षुस्तदितरेण (४)व्यवहितमपि नार्थं गृह्णीयात्। अथानेकरश्मिसन्निपाते सति समानजातीयद्रव्येभ्यो द्रव्यान्तरं रश्मिरुत्पद्यत इति? एवं सति समग्रासमग्रचक्षुषोस्तुल्योपलम्भः प्राप्नोति। न चैतदिष्टमनुपलब्धेरिति। व्यवहारक्लृप्त्यर्थं च नायनस्य रश्मेरनुद्भूतरूपस्पर्शवत्त्वमिति। सर्वद्रव्याणां विश्वरूपो व्यूहः पुरुषार्थकारित इति। कर्म च धर्माधर्मरूपं चेतनस्योपभोगार्थमिति।

(ख) 'अव्यभिचारी तु प्रतीघातो भौतिकधर्मः'। भौतिकं चक्षुः कुड्यादिभिः प्रतीघातदर्शनात् घटादिवदिति। अप्रतीघातादभौतिकमिति चेत्—अथ मन्यसे यदि प्रतीघाताद्भौतिकम् अप्रतीघातादभौतिकम्; दृष्टश्चाप्रतीघातः काचाभ्रपटलस्फटिकान्तरितोपलब्धेः? नानेकान्तात् प्रदीपरश्मिवत्—भौतिकस्याप्रतीघातः यथा प्रदीपरश्मेरिति, स्थाल्यादिषु च (ग) पाचकस्य तेजसोऽप्रतीघातादिति ॥ ३९ ॥

न्यायवार्त्तिकतात्पर्यटीका

तथ्यम्। शङ्कते—अथानेकेति। नानानयनावयवैरेकोऽसौ नयनावयव्यारभ्यत इत्यर्थः। निराकरोति—एवं सतीति। नानानयनावयवैरारब्ध एकोऽसो नयनावयवी समग्रासमग्रचक्षुःपुरुषसाधारण इत्युपलब्धिस्तुल्या स्यादित्यर्थः ॥ ३९ ॥

---

(१) 'व्यभिचारी' इति ज०। (२) 'मन्यते' इति ख-ग-झा०। (३) 'अप्रतीघातात्' फ०। (४) 'व्यवहितमिति' क-ख-धृतपाठान्तरम्।

(क) इदं वार्त्तिकपुस्तकयोः सूत्राकारेण मुद्रितम्। न्यायसूत्रोद्धारे तु 'अव्यभिचाराच्च' इत्येवं किञ्चित् सूत्रं पठितम्। न्यायसूचीनिबन्धादिषु अग्रहणाद् भाष्यरूपेणेदं गृहीतम्। (ख) भाष्ये 'अव्यभिचाराच्च' इति विशेषः। (ग) 'पाचकस्य तेजसः' इत्येतावदन्तं वार्त्तिकम्, 'चकारेण च 'अप्रतीघात' इत्यस्यानुषङ्गः, स एव च टिप्पणीरूपेण स्थितः, प्रमादाद् 'अप्रतीघातात्' इत्येवं मुद्रितम् इति सम्भाव्यते। यद्वा 'अप्रतीघात' इति प्रथमान्त एव पाठः।

न्यायभाष्यम्

उपपद्यते च (१)अनुपलब्धिः कारणभेदात्—

(सू०)—मध्यन्दिनोल्काप्रकाशानुपलब्धिवत्तदनुपलब्धिः ॥४०॥

यथा 'अनेकद्रव्येण समवायाद् रूपविशेषाच्चोपलब्धि'रिति सत्युपलब्धिकारणे (२)मध्यन्दिनोल्काप्रकाशो नोपलभ्यते आदित्यप्रकाशेनाभिभूतः, एवं महदनेकद्रव्यवत्त्वाद् रूपविशेषाच्चोपलब्धिरिति सत्युपलब्धिकारणे चाक्षुषो रश्मिर्नोपलभ्यते निमित्तान्तरतः। तच्च व्याख्यातम् (३)अनुद्भूतरूपस्पर्शस्य द्रव्यस्य प्रत्यक्षतोऽनुपलब्धिरिति ॥ ४० ॥

अत्यन्तानुपलब्धिश्चाभावकारणम्। यो हि ब्रवीति लोष्टप्रकाशो मध्यन्दिने आदित्यप्रकाशाभिभवान्नोपलभ्यते इति, तस्यैतत् स्यात् ?

न्यायवार्त्तिकम्

उपपद्यते चानुपलब्धिः कारणभेदात्—

मध्यन्दिनोल्काप्रकाशानुपलब्धिवत्तदनुपलब्धिः। यथोपलब्धिलक्षणप्राप्तस्य मध्यन्दिनोल्काप्रकाशस्य निमित्तादग्रहणमभिभवात् तथोपलब्धिलक्षणप्राप्तस्य चाक्षुषस्य रश्मेरग्रहणं निमित्ताद्रूपस्यानुद्भूतेरिति ॥ ४० ॥

(क) मध्यन्दिनोल्काप्रकाशो नोपलभ्यते इति ? आदित्यप्रकाशात्। आदित्यप्रकाशाभिभवादित्ययुक्तं सर्वरश्मिवत्त्वप्रसङ्गात्—एवं सति सर्वं लोष्टादि रश्मिवत् प्राप्नोति। अथ लोष्टादिरश्मयः कस्मान्नोपलभ्यन्ते (ख) इत्यनुयुक्तो ब्रूयाद् आदित्यरश्म्यभिभवादिति, अयुक्तं तत्। एतदुत्तरद्वारकं सूत्रम्—

न्यायवार्त्तिकतात्पर्यटीका

मध्य—ब्धिः (सू० ४०) (ग) ॥

वृत्तिः

महतो रूपवतोऽनुपलब्धौ दृष्टान्तमाह—(मध्यन्दिनोल्काप्रकाशानुपलब्धिवत्तदनुपलब्धिः)।

महतो रूपवतश्चोल्काप्रकाशस्य सौरालोकेनाभिभवात् मध्यन्दिनेऽनुपलब्धिवदनुद्भूतरूपवत्त्वाच्चक्षुषोऽप्यनुपलम्भः सम्भवतीति भावः ॥ ३९ ॥

नन्वेवं घटादावपि रश्मिः स्यात् सौरालोकेनाभिभवात् पुनरग्रह इत्यत्राऽऽह—

(१) 'अनुपलब्धेः' इति वि०। (२) 'माध्यन्दिनो-' इति ल०। (३) 'अनुद्भूतरूपस्य' इति वि०।

(क) अत्र 'कथम्' इति पदापेक्षायां स्फुटोऽर्थः।

(ख) 'इत्यनुक्तः' इति क-ख-वार्त्तिकमुद्रणं शोधितम्।

(ग) ४०श-सूत्रे तात्पर्यटीका नोपलभ्यते।

(सू०)—न, रात्रावप्यनुपलब्धेः ॥ ४१ ॥

न्यायभाष्यम्

अप्यनुमानतो(१)ऽनुपलब्धेरिति । एवमत्यन्तानुपलब्धेर्लोष्टप्रकाशो नास्ति, न त्वेवं चक्षुषो रश्मिरिति ॥ ४१ ॥

उपपन्नरूपा चेयम्—

(सू०)—बाह्यप्रकाशानुग्रहाद् विषयोपलब्धेरनभिव्यक्तितोऽनुपलब्धिः ॥ ४२ ॥

बाह्येन प्रकाशेनानुगृहीतं चक्षुः विषयग्राहकं तदभावेऽनुपलब्धिः । सति च

न्यायवार्त्तिकम्

न रात्रावप्यनुपलब्धेः । यदि लोष्टादिरश्मयः स्युः दिवा आदित्यप्रकाशाभिभवाच्च नोपलभ्यन्ते इति रात्रौ तर्ह्युपलभ्येरन् । रात्रावपि नोपलभ्यन्ते व्यञ्जकाभावादिति चेत् न हि यद् यस्याभिभावकं तत् तस्याभिव्यञ्जकमिति कथं न प्राप्नोति लोष्टादिरश्मीनामुपलम्भः । अनुमानतश्च नोपलभ्यते लोष्टरश्मिरित्यपिशब्दाद् गम्यते । तदेवं सर्वप्रमाणनिवृत्तेर्न विद्यते लोष्टरश्मिः, न पुनरेवं चाक्षुषो रश्मिर्निरनुमानः कुड्यादेरावरणस्य सामर्थ्यादिति ॥ ४१ ॥

न्यायवार्त्तिकतात्पर्यटीका

न रा—ब्धेः (सू० ४१) ॥ न हि यद् यस्याभिभावकं तत्तस्य व्यञ्जकमिति । (क)रात्रौ यद् लोष्टतेजसोऽभिभावकं दिवा कथं तदेवास्य व्यञ्जकं येन तदभावाद्रात्रौ लोष्टतेजो नोपलभ्येत इत्यर्थः । अपिशब्दाद्गम्यत इति, न रात्रावपीति सूत्रगतादित्यर्थः ॥ ४१ ॥

बाह्य—ब्धिः (स० ४२) ॥ सोऽयं चक्षुषो रश्मिः किमभावान्नोपलभ्यते किं वाऽनुद्भूतेरत्राऽऽह भाष्यकारः—उपपन्नरूपा चेयम् (ख)अनभिव्यक्तितोऽनुपलब्धिरिति योजना । अनभि-

वृत्तिः

(न, रात्रावप्यनुपलब्धेः)

नेत्यस्य घटादौ रश्मिरिति शेषः ॥ ४० ॥

नन्वनुद्भूतरूपवत्त्वाच्चक्षुषोऽनुपलब्धिर्न त्वभिभवादित्यत्र किं विनिगमकमिति तटस्थाशङ्कायामाह—(बाह्यप्रकाशानुग्रहाद्विषयोपलब्धेरनभिव्यक्तितोऽनुपलब्धिः)

अनभिव्यक्तितोऽनुद्भूतरूपवत्त्वाच्चक्षुषोऽनुपलब्धिः । कुतः ? बाह्यप्रकाशानुग्रहात् । सौरालोकादिसाहित्याद्विषयोपलब्धेः तस्योद्भूतरूपवत्त्वे बाह्यप्रकाशापेक्षा न स्यात् । अभिभूतत्वे च तत्साहित्येनापि प्रत्यक्षजननं न स्यादभिभूतस्य कार्याक्षमत्वादिति भावः ॥ ४१ ॥

---

(१) 'अनुपलब्धिरिति' वि ।

(क) अत्र 'दिवा यद् लोष्टतेजसोऽभिभावकं कथं रात्रौ तदेवास्य व्यञ्जकम्' इति योजना बोध्या । दिवा-रात्रिपदयोः स्थानविनिमयो मुद्राप्रमादकृत इति बोध्यम् ।

(ख) 'अनभिव्यक्तितोऽनुपलब्धिः' इति सूत्रांशेन 'उपपन्नरूपा चेयम्' इति भाष्यं योजितं बोध्यम् ।

न्यायभाष्यम्

प्रकाशानुग्रहे शीतस्पर्शोपलब्धौ च सत्यां तदाश्रयस्य द्रव्यस्य चक्षुषाऽग्रहणं रूपस्यानुद्भूतत्वात्, सेयं रूपानभिव्यक्तितो रूपाश्रयस्य द्रव्यस्यानुपलब्धिर्दृष्टा। तत्र यदुक्तं 'तदनुपलब्धेरहेतु'रिति एतदयुक्तम् ॥ ४२ ॥

कस्मात्पुनरभिभवोऽनुपलब्धिकारणं चाक्षुषस्य रश्मेर्नोच्यत इति?

(सू०)—अभिव्यक्तौ चाभिभवात् ॥ ४३ ॥

बाह्यप्रकाशानुग्रहनिरपेक्षतायां चेति चार्थः। यद्रूपमभिव्यक्तमुद्भूतं बाह्यप्रकाशानुग्रहं च नापेक्षते तद्विषयोऽभिभवः, विपर्ययेऽभिभवाभावात्। अनुद्भूतरूपत्वाच्चा-

न्यायवार्त्तिकम्

बाह्यप्रकाशानुग्रहाद् विषयोपलब्धेरनभिव्यक्तितोऽनुपलब्धिः। तस्य विद्यमानस्य बाह्यप्रकाशानुग्रहाद्विषयोपलब्धेरनभिव्यक्तितोऽनुपलब्धिः। दृष्टान्तस्थान एवैतत् सूत्रम्। किमुक्तं भवति? यत् खलु (१) बाह्यप्रकाशमपेक्षते तस्यानुपलब्धी रूपानभिव्यक्तित इति। अनुद्भूतेर्यथा (२) विषक्तावयवस्याऽऽप्यद्रव्यस्य रूपानुद्भूतेरग्रहणम् तथा चाक्षुषो रश्मिर्बाह्यप्रकाशानुग्रहमपेक्षते तस्मादस्यापि रूपस्यानुद्भूतेरग्रहणमिति ॥ ४२ ॥

कस्मात् पुनर्नायनस्य रश्मेरनुपलब्धेरभिभवो न कारणमुच्यते इति? नोच्यते—

अभिव्यक्तौ चाभिभवात्। यदुद्भूतरूपं बाह्यप्रकाशानुग्रहणं च नापेक्षते तदभिभूयते

न्यायवार्त्तिकतात्पर्यटीका

व्यक्तितः अनुद्भूतेरित्यर्थः। अत्र हेतुः बाह्यप्रकाशानुग्रहाद्विषयोपलब्धेः; विषयश्च स्वरूपमात्मनोऽन्यच्च। एतदुक्तं भवति—यदुपलब्धौ बाह्यप्रकाशमनुग्राहकमपेक्षते तस्यानुद्भूतेरेवानुपलब्धिर्न त्वभिभूतेः यथा हेमन्ते विषक्तावयवस्याऽऽप्यस्य द्रव्यस्य। आप्यं हि द्रव्यं विषक्तावयवं स्वविषयोपलब्धौ बाह्यप्रकाशानुग्रहमपेक्षमाणं दृष्टम्, चक्षुरपि च विषयोपलब्धौ बाह्यप्रकाशमपेक्षते निरालोके तस्याप्रवृत्तेः। तस्माद् विषयोपलब्धौ बाह्यप्रकाशापेक्षत्वात्तदनुद्भूत्या न प्रतीयते न पुनरभिभूत्येति सिद्धं प्रकृतम्।

तदेतद्वार्त्तिककारो व्याचष्टे—तस्य विद्यमानस्येति ॥ ४२ ॥

तमिमं विशेषं मध्यन्दिनोल्काप्रकाशादावविद्वान् पृच्छति—कस्मात्पुनर्नायनस्येति। अत्रोत्तरम्—

अभि—वात् (सू० ४३) ॥ (क)अभिभवनीयस्वरूपमाह—यदुद्भूतरूपमिति। तद्वैधर्म्यमनु-

(१) 'प्रकाशानुग्रहमपेक्षते'—इति-क-ख-धृतपाठान्तरम्।

(२) 'विषक्तावयवस्याप्यच द्रव्यस्य' इति ख।

(क) क-ख-तात्पर्यपुस्तकयोः 'अभिभवनीयस्य' रूपम् इति मुद्रणं शोधितम्।

न्यायभाष्यम्

नुपलभ्यमानं बाह्यप्रकाशानुग्रहाच्चोपलभ्यमानं नाभिभूयत इति। एवमुपपन्नम् अस्ति चाक्षुषो रश्मिरिति ॥ ४३ ॥

न्यायवार्त्तिकम्

यथा मध्यन्दिनोल्काप्रकाशः। अनुद्भूतरूपश्च नायनो रश्मिर्बाह्यप्रकाशानुग्रहणं चापेक्षते। यदनुद्भूतरूपं तन्नाभिभूयते यथा तदेव विषक्तावयवमाप्यं द्रव्यम्। यच्च बाह्यप्रकाशानुग्रहापेक्षम् उद्भूतरूपमपि तन्नाभिभूयते यथा घटादिद्रव्यमिति। सोऽयमुभयविषयोऽभिभवो नायनरश्मावनुपपन्न इति विप्रतिपत्तिविषयः कृष्णसारं (क)रश्मिमत् द्रव्यत्वे सति रूपोपलब्धौ नियतस्य साधनाङ्गस्य निमित्तत्वात् प्रदीपवदिति। अथवा रश्मिमच्चक्षुः द्रव्यत्वे सति नियतत्वे च सति स्फटिकादिव्यवहितार्थप्रकाशकत्वात् प्रदीपवत् ॥ ४३ ॥

न्यायवार्त्तिकतात्पर्यटीका

द्भूतरूपस्याऽऽह—अनुद्भूतरूपश्चेति। अनुद्भूतरूपस्याभिभवाभावे निदर्शनमाह—यदनुद्भूतरूपमिति। बाह्यप्रकाशानुग्रहापेक्षस्य चाभिभवाभावे निदर्शनमाह—यच्च बाह्यप्रकाशानुग्रहापेक्षमिति। कृष्णसारं रश्मिमदित्युच्यमाने प्रसन्नान्धस्यापि कृष्णसारं रश्मिमत्साध्येत तथा चापसिद्धान्त इत्यत आह—विप्रतिपत्तिविषय इति। तेन विप्रतिपत्तिविषयः कृष्णसारं रूपं च रश्मिमदिति साध्यनिर्देशः। उपलब्धौ निमित्तत्वादित्युच्यमाने गन्धादिभिरनैकान्तिकं स्यादत उक्तम्—रूपोपलब्धाविति रूपसाक्षात्कार इत्यर्थः। तथाऽपि सन्निकर्षादिभिरनैकान्तिकमत उक्तम्—द्रव्यत्वे सतीति। तथाऽपि मनसाऽनैकान्तिकमत उक्तम्—नियतस्य साधनाङ्गस्येति। असाधारणस्य साधनाङ्गत्वे सतीति। मनसस्तु साधारणस्य साधनाङ्गस्य रूपोपलब्धौ निमित्तत्वम्। साधनं समुदायस्तदङ्गमवयवः। अथ वे ।। द्रव्यत्वे सति नियतत्वे चार्थप्रकाशकत्वादित्युच्यमाने घ्राणादिभिरनैकान्तिकं स्यादत उक्तम्—स्फटिकादिव्यवहितेति ॥ ४३ ॥

वृत्तिः

ननु चक्षुषो नाभिभवः किं तु तद्रूपस्य, तस्य च प्रत्यक्षजनकत्वे मानाभावः, किं चाभिभवात् तस्य न प्रत्यक्षमितरप्रत्यक्षजनने च विरोधाभाव इत्याशङ्कायामाह—

(अभिव्यक्तौ चाभिभवात्)।

रूपस्य अभिव्यक्तौ प्रत्यक्षे उद्भूतत्वे इति यावत्। उद्भूतरूपस्य प्रत्यक्षाभावे ह्यभिभवकल्पना, न त्वेवं प्रकृते। सुवर्णादिवत् सर्वदाऽभिभावकद्रव्यान्तरकल्पने च गौरवमिति भावः ॥ ४२ ॥

(क) रश्मिमदित्यत्र 'रश्मिवत्' इति सम्भाव्यते, एवमुत्तरत्र, तथा तात्पर्यटीकायामपि।

(सू०)—नक्तञ्चरनयनरश्मिदर्शनाच्च ॥ ४४ ॥

न्यायभाष्यम्

दृश्यन्ते हि नक्तं नयनरश्मयो नक्तञ्चराणां वृषदंशप्रभृतीनाम्, तेन शेषस्यानुमानमिति। (१)जातिभेदवदिन्द्रियभेद इति चेत्? (२)धर्मभेदमात्रं चानुपपन्नमावरणस्य प्राप्तिप्रतिषेधार्थस्य दर्शनादिति ॥ ४४ ॥

न्यायवार्त्तिकम्

नक्तञ्चरनयनरश्मिदर्शनाच्च इति दृष्टान्तसूत्रम्। मानुषं चक्षू रश्मिमत् अप्राप्तिस्वभावत्वे सति रूपाद्युपलब्धिनिमित्तत्वात् नक्तञ्चरचक्षुर्वदिति। (क)जातिभेदवदिन्द्रियभेद इति चेत्—अथ मन्यसे यथा विडालत्वं जातिर्वृषदंशे वर्त्तते न मनुष्ये एवं रश्मिमद् विडालस्यैव चक्षुर्भविष्यति न मानुषस्येति? नावरणसामर्थ्यात्—सत्येतस्मिन् जातिभेदे यथा वृषदंशप्रभृतीनां कुड्यादिभी रश्मय आव्रियन्ते तथा मनुष्याणामपीति समानमेवेति। इतश्च भौतिकानीन्द्रियाणि प्रतिघातित्वात् (३) घटादिवदिति, भूतं श्रोत्रं द्रव्यत्वे सति बाह्यप्राप्तार्थप्रकाशकत्वात् घ्राणादिवदिति ॥ ४४ ॥

न्यायवार्त्तिकतात्पर्यटीका

नक्त—च्च (सू० ४४)॥ मानुषं चक्षू रश्मिमदिति। रूपाद्युपलब्धिनिमित्तत्वादिति सावधारणं रूपादीनामेवेति, तेन न मनसाऽनैकान्तः। तथाऽपि सन्निकर्षेणानैकान्त इत्यत उक्तम्—अप्राप्तिस्वभावत्व इति। इतश्च भौतिकानीन्द्रियाणि चक्षूरसनत्वग्घ्राणानीत्यर्थः। तथाऽपि श्रोत्रस्य रूपं न ज्ञायते कीदृशं तदित्यत आह—भूतं श्रोत्रम्। अर्थप्रकाशकत्वादित्युच्यमाने मनसाऽनैकान्तिकमत आह—प्राप्तेति। न हि रूपादिभिः सहास्ति मनसः प्राप्तिः तथाऽपि मनस्येवानैकान्तः, आन्तरं हि सुखादि मनः प्राप्य प्रकाशयत्यत आह—बाह्येति। तथाऽपि सन्निकर्षादृष्टादिभिरनैकान्तोऽत आह—द्रव्यत्वे सतीति।

शङ्काभाष्यम्—जातिभेदवदिन्द्रियभेद इति चेत्। निराकरोति—धर्मभेदमात्रं चानुपपन्नम्। वृषदंशनयनस्य रश्मिमत्त्वं मानुषनयनस्य तु न तत्त्वमिति योऽयं धर्मभेदः स एव मात्रम्, तच्चानुपपन्नम्। चोऽवधारणे भिन्नक्रमः। अनुपपन्नमेवेति योजना। कुतोऽनुपपन्नमित्यत्र हेतुमाह—आवरणस्येति। यथा हि धूमवत्त्वं पर्वते रसवत्यां चान्यत् तथाऽप्येष विशेषोऽस्याग्निमत्त्वानग्नित्वे प्रत्यप्रयोजकः। एवं विडालत्वमनुष्यत्वे अप्रयोजके इत्यर्थः ॥ ४४ ॥

---

(१) 'जातिभेदादिन्द्रिय'—टि०। (२) 'धर्ममात्रभेदे च' इति टि०। (३) 'घटवदितिवत्' इति क-ख-वार्त्तिकपुस्तकयोर्मुद्रितम्, तच्च तत्र धृतपाठान्तरं गृहीतम्।

(क) 'जातिभेदादिन्द्रियप्रभेदः' इति क-ख-वार्त्तिकपाठः शोधितः।

न्यायभाष्यम्

इन्द्रियार्थसन्निकर्षस्य ज्ञानकारणत्वानुपपत्तिः । कस्मात् ?

(सू०)—अप्राप्य ग्रहणं काचाभ्रपटलस्फटिकान्तरितोपलब्धेः ॥ ४५ ॥

तृणादि सर्पद् द्रव्यं काचे (क) अभ्रपटले वा प्रतिहतं दृष्टम्, (१)अव्यवहितेन सन्निकृष्यते व्याहन्यते वै प्राप्तिर्व्यवधानेनेति। यदि च रश्म्यर्थसन्निकर्षो ग्रहणहेतुः स्यात् न व्यवहितस्य सन्निकर्ष इत्यग्रहणं स्यात्। अस्ति चेयं काचाभ्रपटलस्फटिकान्तरितोपलब्धिः सा ज्ञापयति अप्राप्यकारीणीन्द्रियाणि(ख) अत एवाभौतिकानि, प्राप्यकारित्वं हि भौतिकधर्म इति ॥ ४५ ॥

न्यायवार्त्तिकम्

(ग) रश्म्यर्थसन्निकर्षग्रहणात्तद्ग्रहणमयुक्तम्, अन्यथाऽपि ग्रहणात्—

अप्राप्य ग्रहणं काचाभ्रपटलस्फटिकान्तरितोपलब्धेः। तृणादि सर्पद् द्रव्यं काचेऽभ्रपटले वा प्रतिहन्यते। यदि चाक्षुषो रश्मिः प्राप्तार्थप्रकाशकः स्यात् (घ) काचाभ्रपटलस्फटिकान्तरिते प्रकाशको न स्यात्। अस्ति तु। तस्मान्न प्राप्यकारि चक्षुरिति। अत एवाभौतिकं प्राप्यकारित्वं न—भौतिकधर्म इति ॥४५॥

न्यायवार्त्तिकतात्पर्यटीका

अप्रा—ब्धेः (सू० ४५) ॥ (ङ)

वृत्तिः

चक्षुषि प्रमाणान्तरमाह—(नक्तञ्चरनयनरश्मिदर्शनाच्च) ।

नक्तञ्चराणां वृषदंशादीनां गोलके रश्मिदर्शनात्। तद्दृष्टान्तेन परेषामपि रश्म्यनुमानमिति भावः। अन्यथा तमसि तस्य प्रत्यक्षं न स्यात् इति हृदयम् ॥ ४३ ॥

अप्राप्यकारित्वं चक्षुषः स्यादित्याशङ्कते—(अप्राप्यग्रहणं काचाभ्रपटलस्फटिकान्तरितोपलब्धेः) ।

---

(१) 'न व्यवहितेन' इति टि०।

(क) मेघावृतस्य चन्द्रादेरनुपलब्धेरभ्रपदमत्र तदाख्यया प्रसिद्धस्य धातुविशेषस्य बोधकमिति सम्भाव्यते, अत एव पटलपदमपि सार्थकम् भूर्ज्जत्वग्वत् तस्य संहतस्यैवोपलम्भादिति वदन्ति। (ख) चक्षुषोऽप्राप्यकारित्वपक्षसमर्थनं रत्नाकरावतारिकायां द्रष्टव्यम्। (ग) रश्म्यर्थसन्निकर्षविशेषात् तद्ग्रहणम्। (३४ सू० १ आ, ३अ) इति सूत्रम्। अत विशेषादित्यत्र ग्रहणादिति प्रमादाद् मुद्रितं सम्भाव्यते। (घ) 'काचाभ्रपटलेकान्तरिते' इति क-ख-पुस्तकयोः प्रमादान्मुद्रितम्। (ङ) ४५-तमसूत्रस्य तात्पर्यटीका नोपलभ्यते।

न्यायभाष्यम्

(सू०)—कुड्यान्तरितानुपलब्धेरप्रतिषेधः(क) ॥ ४६ ॥

अप्राप्यकारित्वे सतीन्द्रियाणां कुड्यान्तरितस्यानुपलब्धिर्न स्यात् ॥ ४६ ॥

प्राप्यकारित्वेऽपि तु काचाभ्रपटलस्फटिकान्तरितोपलब्धिर्न स्यात् ?

(सू०)—अप्रतीघातात्सन्निकर्षोपपत्तिः ॥ ४७ ॥

न च (१) काचोऽभ्रपटलं वा नयनरश्मिं विष्टभ्नाति सोऽप्रतिहन्यमानः सन्निकृष्यत इति ॥ ४७ ॥

न्यायवार्त्तिकम्

न

कुड्यान्तरितानुपलब्धेरप्रतिषेध इति । अप्राप्यकारित्वे इन्द्रियस्य न कुड्याद्यावरणसामर्थ्यमस्तीत्युक्तम् । शेषं भाष्ये ॥४६॥

अप्रतिघातात् सन्निकर्षोपपत्तिः । न काचोऽभ्रपटलं वा रश्मिं प्रतिबध्नाति, सोऽप्रतिहन्यमानो व्यतिभिद्यार्थेन सम्बध्यते ॥४७॥

न्यायवार्त्तिकतात्पर्यटीका

कुड्या—धः (सू० ४६) ॥ (ख)

अप्र—त्तिः (सू० ४७) ॥

सोऽप्रतिहन्यमान इति । स रश्मिः अप्रतिहन्यमानः काचेन काचं व्यतिभिद्यार्थेन संबध्यते काचान्तर्गतेन ॥ ४७ ॥

वृत्तिः

समाधत्ते—(कुड्यान्तरितानुपलब्धेरप्रतिषेधः) ।

परे तु उक्तसूत्रस्य पूर्वपक्षपरत्वं मन्यमानस्य भाष्यकारस्यावतरणिका 'अप्राप्यग्रहणम्' इति ।

वस्तुतः सिद्धान्तसूत्रमेव तत्, प्रदीपदृष्टान्तेन काचाद्यन्तरितप्रकाशकत्वेन तैजसत्वं सिध्यतीति ।

नन्वप्राप्यकारित्वमेव किं न स्यादत्राऽऽह—कुड्येति ।

उक्तस्य तैजसत्वस्य प्रतिषेधो गोलकात्मकत्वं न सम्भवति कुड्यान्तरितस्यानुपलब्धेरित्याहुः ॥ ४५ ॥

---

(१) 'काचाभ्रपटलम्' इति टि० ।

(क) ल-ज-पुस्तकयोः 'न कुड्यान्तरितानुपलब्धेरप्रतिषेधः' इति सूत्रपाठो दृश्यते । ग- पुस्तके 'न' इति 'भौतिकधर्मं इति' इति भाष्यतः परं मुद्रितम् । वा। तंकेऽपि सूत्रात् पूर्वं नकारो दृश्यते । फ-भा-वि-टि-पुस्तकेषु 'न'कारः सर्वथा परित्यक्तः । न्यायसूचीनिबन्धसम्मतपाठस्तु गृहीतः ।

(ख) ४६-तमसूत्रे तात्पर्यटीका नोपलभ्यते ।

न्यायभाष्यम्

यश्च मन्यते न भौतिकस्याप्रतिघात इति (१) तन्न-

(सू०)—(२)आदित्यरश्मेः स्फटिकान्तरितेऽपि दाह्येऽविघातात् ॥ ४८ ॥

(३)आदित्यरश्मेरविघातात् स्फटिकान्तरितेऽप्यविघातात्, दाहेऽविघातात्। अविघातादिति (४)च (५)पदाभिसम्बन्धाद् वाक्यभेद इति। (६)प्रतिवाक्यं चार्थभेद(६*) इति। आदित्यरश्मिः कुम्भादिषु न प्रतिहन्यते, अविघातात् कुम्भस्थमुदकं तपति। प्राप्तौ हि द्रव्यान्तरगुणस्य उष्णस्य स्पर्शस्य ग्रहणं तेन च शीतस्पर्शाभिभव इति। स्फटिकान्तरितेऽपि प्रकाशनीये प्रदीपरश्मीनामप्रतिघातः, अप्रतिघातात्प्राप्तस्य ग्रहणमिति। भर्जनकपालादिस्थं च द्रव्यमाग्नेयेन तेजसा दह्यते तत्राविघातात्प्राप्तिः, प्राप्तौ तु दाहो नाप्राप्यकारि तेज इति।

न्यायवार्त्तिकम्

(७) यच्च मन्येत न भौतिकस्यास्त्यप्रतीघात इति सर्वं हि भौतिकं प्रतीघातधर्मकमिति, तन्न—

आदित्यरश्मेः स्फटिकान्तरितेऽपि दाह्येऽविघातात्। न, आदित्यरश्मेरविघातात् स्फटिकान्तरितेऽप्यविघाताद् दाह्येऽप्यविघातात्। अविघातादिति पदाभिसम्बन्धाद्वाक्यभेदः। नैकं वाक्यमनेकार्थं प्रतिवाक्यं चार्थभेद इति। शेषं भाष्ये।

कोऽयमविघातः? अव्युह्यमानावयवद्रव्यानुप्रवेशः—यस्य द्रव्यस्यावयवा न व्युह्यन्ते

न्यायवार्त्तिकतात्पर्यटीका

आदि—तात् (सू० ४८)॥ वार्त्तिकम्—अव्युह्यमानावयवद्रव्यानुप्रवेश इति। यस्य

वृत्तिः

ननु कुड्यान्तरित इव काचान्तरितेऽपि सन्निकर्षो न सम्भवतीति कथं प्राप्यकारित्वमित्याशङ्कायामाह—(अप्रतिघातात् सन्निकर्षोपपत्तिः)।

काचादिना स्वच्छद्रव्येणाप्रतिघाताद् अप्रतिबन्धात् सन्निकर्ष उपपद्यत इति भावः ॥ ४६ ॥

तत्र दृष्टान्तमाह—(आदित्यरश्मेः स्फटिकान्तरितेऽपि दाह्येऽविघातात्)।

दाह्ये इति वस्तुमात्रोपलक्षणम्।

परे तु दाह्ये कपालादौ वह्न्यादेरविघातपरं तदित्याहुः ॥ ४७ ॥

---

(१) 'तन्न' इति टि-पु० नास्ति। (२) 'नाऽऽदित्यरश्मेः' इति वि-टि०। (३) 'नाऽऽदित्यरश्मे-' इति ग०। (४) 'च' इति फ-पुस्तके नास्ति। (५) 'पदादिसम्ब-' इति टि०। (६) 'यथावाक्यं चार्थभेदः प्रतिवाक्यं वाक्यार्थभेदः' इति ञ०। (७) 'यश्च' इति क०।

न्यायभाष्यम्

अविघातादिति च केवलं पदमुपादीयते, कोऽयमविघातो नाम? अव्युह्यमानावयवेन व्यवधायकेन द्रव्येण सर्वतो द्रव्यस्याविष्टम्भः क्रियाहेतोरप्रतिबन्धः (१) प्राप्तेरप्रतिषेध इति(१*)। दृष्टं हि कलशनिषक्तानामपां बहिः शीतस्पर्शस्य ग्रहणम्। न चेन्द्रियेणासन्निकृष्टस्य द्रव्यस्य स्पर्शोपलब्धिः। दृष्टौ च (२)प्रस्पन्दपरिस्रवौ। तत्र काचाभ्रपटलादिभिर्नयनरश्मेरप्रतिघाताद् विभिद्यार्थेन सह सन्निकर्षादुपपन्नं ग्रहणमिति ॥ ४८ ॥

न्यायवार्त्तिकम्

तस्यान्तरावयवैरव्युह्यमानस्य योऽभिसम्बन्धः सोऽविघात इति। अन्तर्व्यवस्थितस्य वा द्रव्यस्य (क) अव्युह्यमानावयवस्य बहिरवस्थितद्रव्यप्राप्तिः। दृष्टं कलशे निषक्तानामपां बहिः शीतस्पर्शग्रहणम्, न हि (३)गुणस्यास्वतन्त्रस्य (ख)गुणिनमन्तरेण बहिर्निर्गमनं युक्तमिति। तत्र (ग) परिस्पन्दः तिर्यग्गमनं परिस्रवः पात इति ॥ ४८ ॥

न्यायवार्त्तिकतात्पर्यटीका

द्रव्यस्य भर्जनकपालादेः अवयवा न व्युह्यन्ते पूर्वोत्पन्नद्रव्यारम्भकसंयोगनाशेन द्रव्यान्तरजनकसंयोगोत्पादनं व्यूहनं (घ)तन्न क्रियन्ते तस्य द्रव्यस्य भर्जनकपालादेः अव्युह्यमानस्य अवयवव्यूहनमवयविनोऽपीति अव्युह्यमानस्येत्युक्तम्। (ङ)तस्य भर्जनकपालादेः अन्तरावयवैर्योऽभिसंबन्धः वह्नेः (च) सोऽप्रतिघातः। एतदुक्तं भवति—सान्तरत्वादवयविद्रव्याणां तदविनाशेनाग्नेर्योऽनुप्रवेशः सोऽप्रतिघात इति। प्रवेशेऽप्रतिघातमुक्त्वा निःसरणेऽप्यविघातमाह—अन्तर्व्यवस्थितस्य वा द्रव्यस्य मधूदकादेः बहिरवस्थितहस्तादिप्राप्तिः। तस्य कीदृशस्य बहिरित्यत आह—अव्युह्यमानावयवस्य (छ) कलशादेः तस्य बहिरिति ॥ ४८ ॥

---

(१) अयमंशः टि-पु० नास्ति। (२) 'प्रस्यन्दपरिस्रवौ' इति ज-वि-टि०। (३) 'गुणस्य द्रव्यतन्त्रस्य' क-ख-धृतपाठान्तरम्।

(क) 'अव्युह्यमानावयवस्य' इत्यत्र 'वाऽव्युह्यमानावयवद्रव्यस्य' इति क-ख-वार्त्तिकपाठः। (ख) 'द्रव्याश्रय्यगुणवान् संयोगविभागेष्वकारणमनपेक्ष इति गुणलक्षणम्' इति काणादसूत्रेण (१।१।१६) गुणानां स्वातन्त्र्यं प्रतिषिद्धम्। (ग) भाष्ये 'प्रस्यन्द' इति बहुपुस्तकानुसारी पाठः। (घ) 'तदन्तो न क्रियन्ते' इत्येव पाठ इति प्रतिभाति। (ङ) 'तस्य भर्जनकपालादेः' इति पदद्वयमत्र 'अन्तरावयवैः' इत्यस्य सम्बन्धिवस्तुप्रदर्शनार्थं टीकाकृता उक्तमिति प्रतिभाति। (च) वार्त्तिके 'अविघातः' इति। (छ) 'शलाकादे'रिति क-ख-तात्पर्यमुद्रणं शोधितम्।

(सू०)—(१)नेतरेतरधर्मप्रसङ्गात् ॥ ४९ ॥

न्यायभाष्यम्

काचाभ्रपटलादिवद्वा कुड्यादिभिरप्रतिघातः, कुड्यादिवद्वा काचाभ्रपटलादिभिः प्रतिघात इति प्रसज्यते, नियमे कारणं वाच्यमिति ॥ ४९ ॥

(सू०)—आदर्शोदकयोः प्रसादस्वाभाव्याद्रूपोपलब्धिवत् तदुपलब्धिः ॥ ५० ॥

आदर्शोदकयोः प्रसादो रूपविशेषः स्वो धर्मो नियमदर्शनात्, प्रसादस्य वा स्वो धर्मो रूपोपलम्भनम्। यथा आदर्शप्रतिहतस्य परावृत्तस्य नयनरश्मेः स्वेन मुखेन सन्नि-

न्यायवार्त्तिकम्

नेतरेतरधर्मप्रसङ्गात्। इतरधर्म इतरत्र (२) प्रसज्यते इतरधर्मश्चेतरत्र। यद्यविघातः चक्षूरश्मेः स्फटिकादिभिः, कुड्यादिभिरपि प्राप्नोति; कुड्यादिभिर्वा प्रतीघातः, स्फटिकादिभिरपि प्राप्नोति ॥४९॥

नैष दोषः—

आदर्शोदकयोः प्रसादस्वाभाव्याद्रूपोपलब्धिवत् तदुपलब्धिः। आदर्शोदकयोः प्रसादो रूपविशेषः, स च स्वो भवति नियमात्। कः पुनरयं रूपविशेषः? (३)द्रव्यान्तरासंपृक्तद्रव्यसमवायः, तस्य वा रूपोपलम्भनसामर्थ्यं स्वो धर्मः, स च स्वभावतः, तस्य या विद्यमानता

न्यायवार्त्तिकतात्पर्यटीका

नेत—ङ्गात् (सू० ४९) ॥ (क)

आद्—ब्धिः (सू० ५०) ॥ द्रव्यान्तरासंपृक्तद्रव्यसमवायः स्वच्छतेत्यर्थः।

वृत्तिः

आक्षिपति—(नेतरेतरधर्मप्रसङ्गात्)

अप्रतिघातो न युक्तः, इतरस्य स्फटिकादेः इतरस्य कुड्यादेर्यो धर्मः प्रतिघातकत्वं तत्प्रसङ्गात्। स्फटिकादिकमपि कुड्यादिवत् प्रतिबन्धकं भवेदित्यर्थः ॥ ४८ ॥

समाधत्ते—(आदर्शोदकयोः प्रसादस्वाभाव्याद्रूपोपलब्धिवत् तदुपलब्धिः)

---

(१) 'नेतरेतरं धर्म-' इति टि०। (२) 'प्रयुज्यते'—इति ख०। (३) 'द्रव्यान्तरासंयुक्त'—इति क-ख०।

(क) ४९तम-सूत्रे तात्पर्यटीका नास्ति।

न्यायभाष्यम्

कर्षे सति स्वमुखोपलम्भनं प्रतिबिम्बग्रहणाख्यमादर्शरूपानुग्रहात् तन्निमित्तं भवति, आदर्शरूपोपघाते तदभावात्, कुड्यादिषु च प्रतिबिम्बग्रहणं न भवति एवं काचाभ्रपटलादिभिरविघातश्चक्षूरश्मेः कुड्यादिभिश्च प्रतिघातो द्रव्यस्वभावनियमादिति ॥५०॥

(सू०)—दृष्टानुमितानां (१)हि नियोगप्रतिषेधानुपपत्तिः ॥५१॥

प्रमाणस्य तत्त्वविषयत्वात्। न खलु भोः परीक्षमाणेन दृष्टानुमिता अर्थाः शक्या

न्यायवार्त्तिकम्

उदकादिषु तत् स्वाभाव्यम्। प्रसादस्वभावत्वाद् आदर्शोदकादिषु नयनरश्मिः प्रतिहन्यते, स च प्रतिहतः प्रतिनिवृत्तौ स्वमुखादिना सम्बध्यते, तस्य चाग्रसम्बन्धाद् यदभिमुखमग्रं तदभिमुखं मुखादि पश्यतीति यथा अग्रतोऽवस्थितस्य पुरुषस्येति। आदर्शमुखग्रहणमनुक्रमेण, तदप्याशुभावान्न विभाव्यते (२)आदर्शरूपानुग्रहात् तदनुरञ्जितः प्रत्ययः। शेषं भाष्ये ॥५०॥

दृष्टानुमितानां हि नियोगप्रतिषेधानुपपत्तिः। 'प्रमाणस्य तत्त्वविषयत्वात्'। दृष्टानुमिताः खल्विमे द्रव्यधर्मा यथाभूता भवन्ति तथाभूता एव प्रमाणेन प्रतिपाद्यन्ते, इमौ च भवता

न्यायवार्त्तिकतात्पर्यटीका

प्रसङ्गात् प्रतिबिम्बभ्रमोत्पादक्रममाह—(क)आदर्शादिष्विति। यदभिमुखमग्रमिति। द्रष्टुः पुरुषस्याभिमुखं नयनरश्मेः परावृत्तस्याग्रं तदभिमुखं मुखादि पश्यति। सारूप्यनिबन्धनत्वाद्विभ्रमाणां सारूप्यमिहाप्याह—यथाऽग्रतोऽवस्थितस्य पुरुषस्य मुखं लोचनरोचिरग्रसंबद्धमभिमुखम् एवमेतदिति। नन्वादर्शप्रतिहतश्चेद् नयनरश्मिः परावृत्तः कथं पश्चादभिमुखविभ्रमहेतुः? हन्त भोः पातमात्रादादर्शज्ञानेन भवितव्यं पश्चात् प्रतिबिम्बविभ्रमेण न चैवमस्ति यौगपद्यप्रतिभासादित्यत आह—आदर्शेति। कुतस्तर्हि मणिकृपाणादेर्दर्पणतलेषु नानानिर्भासः प्रतिबिम्बावभास इत्यत आह—आदर्शरूपानुग्रहादिति ॥५०॥

वृत्तिः

आदर्शे उदके च प्रसादस्वाभाव्यात् स्वच्छस्वभावत्वात् मुखादिरूपोपलब्धिर्न तु भित्त्यादौ। एवं स्फटिकाद्यन्तरितस्योपलब्धिर्न तु कुड्याद्यन्तरितस्येति स्वाभाव्यान्न दोषः।

एतेन वह्न्यादेर्घटादिनाऽप्रतिघातवच्चक्षुषोऽपि प्रतिघातो न स्यादिति प्रत्युक्तम्, वह्न्याद्यप्रतिबन्धेऽपि दीपालोकादेः प्रतिबन्धसम्भवादिति भावः ॥ ४९ ॥

चक्षुषस्तादृशत्वकल्पने किं मानमित्यत्राऽऽह—(दृष्टानुमितानां हि नियोगप्रतिषेधानुपपत्तिः)

(१) 'हि' इति ल-ग-ज-झा-पुस्तकेषु नास्ति। (२) 'आदर्शरूपानुग्रहणात्' इति क-ख०।

(क) वार्त्तिके 'आदर्शोदकादिषु' इति विशेषः।

न्यायभाष्यम्

नियोक्तुमेवं भवतेति, नापि प्रतिषेद्धुम् (१) एवं न भवतेति। न हीदमुपपद्यते रूपवद् गन्धोऽपि चाक्षुषो भवत्विति, गन्धवद्वा रूपं चाक्षुषं मा भूदिति, अग्निप्रतिपत्तिवत(१*) धूमेनोदकप्रतिपत्तिरपि भवत्विति, उदकाप्रतिपत्तिवद्वा धूमेनाग्निप्रतिपत्तिरपि मा भूदिति। किं कारणम्? यथा खल्वर्था भवन्ति य एषां स्वो भावः स्वो धर्म इति तथाभूताः प्रमाणेन प्रतिपद्यन्ते इति। (२)तथाभूतविषयकं हि प्रमाणमिति। इमौ खलु नियोगप्रतिषेधौ भवता देशितौ काचाभ्रपटलादिवद्वा कुड्यादिभिरप्रतिघातो भवतु कुड्यादिवद्वा काचाभ्रपटलादिभिरप्रतिघातो मा भूदिति। न, दृष्टानुमिताः खल्विमे द्रव्यधर्माः, प्रतिघाताप्रतिघातयोर्ह्युपलब्ध्यनुपलब्धी व्यवस्थापिके। व्यवहितानुपलब्ध्याऽनुमीयते कुड्यादिभिः प्रतिघातः, व्यवहितोपलब्ध्याऽनुमीयते काचाभ्रपटलादिभिरप्रतिघात इति॥ ५१॥

न्यायवार्त्तिकम्

नियोगप्रतिषेधौ देशितौ क्व विषये स्याताम्, न चैतद् युक्तम्। न हि यथा धूमेनाग्निप्रतिपत्तिस्तथोदकप्रतिपत्तिरपि भवत्विति, न चोदकप्रतिपत्तिर्धूमेन भवतीत्यग्निप्रतिपत्तिरपि (क) न युक्ता। अर्थान्नियुञ्जानो भवानुपेक्षणीयः। प्रतिघाताप्रतिघातयोः खलूपलब्ध्यनुपलब्धी व्यवस्थापिके—व्यवहितोपलब्ध्याऽनुमीयते स्फटिकादिभिरप्रतीघातः व्यवहितानुपलब्ध्या च कुड्यादिभिः प्रतीघात इति। यदि प्राप्यकारि चक्षुर्भवति अथ कस्मादञ्जनशलाकादि नोपलभ्यते? (३) नेन्द्रियेणासम्बन्धात्—इन्द्रियेण सम्बद्धा अर्था उपलभ्यन्ते न चाञ्जनशलाकादीन्द्रियेण सम्बद्धम् अधिष्ठानस्यानिन्द्रियत्वात्। रश्मिरिन्द्रियं नाधिष्ठानम्, न रश्मिना(ख)अञ्जनशलाका सम्बद्धेति॥ ५१॥

(इति इन्द्रियभौतिकत्वपरीक्षाप्रकरणम्।)

न्यायवार्त्तिकतात्पर्यटीका

दृष्टा—त्तिः (सू० ५१)॥ (ग)

वृत्तिः

हि यस्माद् दृष्टानामनुमितानां वा पदार्थानाम्, दृष्टेनानुमितानामिति वाऽर्थः, तेषामेवं भवतेति नियोगः, एवं मा भवतेति प्रतिषेधो वा नोपपद्यते, युक्त्यनुसारिणी हि कल्पनेति भावः॥ ५०॥

समाप्तमिन्द्रियपरीक्षाप्रकरणम्॥ ७॥

---

(१) अयमंशः टि-पु० नास्ति। (२) 'यथाभूताविषयकम्' इति वि०। (३) 'नेन्द्रियाणामसम्बन्धात्'—इति क-ख-धृतपाठान्तरम्।

(क) न युक्तेति अत्रापि न होति सम्बध्यते अथवा न युक्तेति काका युक्तैवेत्यर्थः। (ख) शलाकापदमत्र शलाकाकारेखाया लक्षकमिति बोध्यम्। (ग) ५१तम-सूत्रे तात्पर्यटीका नोपलभ्यते।

न्यायभाष्यम्

अथापि खल्वेकमिदमिन्द्रियं बहूनीन्द्रियाणि वा ? कुतः संशयः ?

(सू०)—स्थानान्यत्वे (१)नानात्वादवयविनानास्थानत्वाच्च संशयः ॥ ५२ ॥

बहूनि द्रव्याणि नानास्थानानि दृश्यन्ते, नानास्थानश्च सन्नेकोऽवयवी चेति। तेनेन्द्रियेषु भिन्नस्थानेषु संशय इति ॥ ५२ ॥

न्यायवार्त्तिकम्

एवं तावद् भौतिकानीन्द्रियाणीति समर्थितम्। किं पुनरेकमिन्द्रियम् आहो अनेकमिति ? एके तु—

स्थानान्यत्वे नानात्वादवयविनानास्थानत्वाच्च संशयः। एके तु स्थानान्यत्वे नानात्वं दृष्टं यथा बहूनां घटानामिति। एकस्य च नानास्थानत्वं यथाऽवयविन इति। अनुपपन्नरूपश्चायं संशयः। कथमिति ? यदि तावदेवं क्रियते स्थानान्यत्वे नानात्वैकत्वदर्शनादिति ? तदैकत्वे (२)स्थानान्यत्वस्यादर्शनान्न समानधर्मः। अथ नानास्थानत्वे सत्येका-

न्यायवार्त्तिकतात्पर्यटीका

संप्रति तेषामेवेन्द्रियाणामेकानेकत्वे परीचिक्षिषुः संदिग्धे—अथापि खल्वेकमिति। प्रश्नपूर्वकं सूत्रमवतारयति—कुतः संशयः।

स्थाना—यः (सू० ५२) ॥ तत्र केचिदिदं सूत्रं भाष्यमतानपेक्षं यथाश्रुति व्याचक्षते। तद्दूषणपुरःसरं भाष्यव्याख्यानं ग्रहीतुं यथाश्रुति व्याख्यानं परेषां सूत्रपाठपूर्वकमुपन्यस्यति—एके त्विति। दूषयति—अनुपपन्नरूपश्चायमिति। अत्र हि यथाश्रुति स्थानान्यत्व इति निमित्तसप्तम्या नानात्वस्य बीजं स्थानान्यत्वमुक्तं न त्वेकत्वस्येति। एकत्वस्य तु बीजं नानास्थानत्वं यथोक्तम्। अवयविनानास्थानत्वादिति, अवयवीत्येकत्वमुपलक्षयति। स्थानान्यत्वं च स्थानस्यान्यत्वमुच्यते, नानास्थानत्वं च नानास्थानानि यस्येत्यन्यपदार्थः स्थानान्यत्वादन्यः; न तु धर्मद्वयं साक्षात्संशयकारणमित्येकतरस्यैकानेकसाधारण्यं वाच्यम्। तत्र यदि तावदेवं क्रियते—संशयः स्थानान्यत्वे नानात्वैकत्वदर्शनादिति, तदा सूत्रार्थालोचनेन एकत्वे स्थानान्यत्वस्यादर्शनान्न समानधर्मः, सूत्र खल्वेकत्वे नानास्थानत्वमाह न स्थानान्यत्वम्। अनेकत्वमात्रे हि तदुक्तं सूत्रकारेण स्थानान्यत्वे नानात्वादिति। अथ नानास्थानत्वे सत्येकत्वानेकत्व-

वृत्तिः

दर्शनस्पर्शनाभ्यामित्यादिकमिन्द्रियनानात्वे युज्यते इत्युपोद्घातेनेन्द्रियनानात्वं परीक्षणीयम्, तत्र संशयमाह—(स्थानान्यत्वे नानात्वादवयविनानास्थानत्वाच्च संशयः)

(१) 'अवयविनानात्वात्' इति ज०। (२) 'स्थाननानात्वस्या'—इति क-ख-धृतपाठान्तरम्।

न्यायवार्त्तिकम्

नेकत्वदर्शनात् संशय इति, तदा द्रव्यं नानास्थानमनेकं न किञ्चिद् दृष्टमिति न समानधर्मत्वम् । यद् घटाद्यनेकं तन्न नानास्थानम् अपि तु (१) स्थानान्यत्वं तस्य, सोऽयं संशय उभयथाऽनुपपन्न इन्द्रियेषु । स्थानेषु तु युक्तः, किं नानास्थानानि उत नानास्थानम्? इन्द्रियेषु तु न स्थाननानात्वात् सम्भवति न च नानास्थानत्वादिति । शरीरव्यतिरेकित्वात् सत्त्वाच्च संशयः— शरीरव्यतिरिक्तमुभयथा दृष्टमेकमनेकं च यथाकाशं घटादि च । सच्चोभयथा दृष्टमेकमनेकं च । तदेवमुभयथेन्द्रियेषु शरीरव्यतिरेकः सत्त्वं च, तेन सन्दिह्यते ॥ ५२ ॥

न्यायवार्त्तिकतात्पर्यटीका

दर्शनात् संशय इति? एतद् दूषयति—तदा द्रव्यं नानास्थानमनेकं न किंचिद् दृष्टम् (क)। अवयविनानास्थानत्वादिति सूत्रं नानास्थानत्वेनैकत्वमाह न तु नानात्वमपि । यत् पुनर्घटाद्यनेकं न तन्नानास्थानमुक्तं सूत्रकृता, अपि तु स्थानान्यत्वं सूत्रकृतोक्तं स्थानान्यत्वे नानात्वादित्यनेन । दूषणमुपसंहरति—सोऽयं संशय उभयथाऽनुपपन्न इन्द्रियेषु (ख) यथाश्रुतसूत्रपरिग्रहेण । 'उभयथा' स्थानान्यत्वेन नानास्थानत्वेन चेत्यर्थः । तदेवं परव्याख्यानं दूषयित्वा भाष्यकारीयस्य व्याख्यानस्य युक्तत्वमाह—स्थानेषु तु युक्तः । स्थानेष्विति निमित्तसप्तमी । नानास्थानत्वनिमित्त इन्द्रियेष्वेकत्वानेकत्वसंशयो युक्तः । नानास्थानं खल्वेकमवयविद्रव्यं दृष्टमनेकं च भिन्नभाजनगतं फलमिति । इन्द्रियविषयं नानास्थानत्वनिमित्तकं संशयमाह—किं नानास्थानानि इन्द्रियाणि उत नानास्थानम् एकमिन्द्रियमिति । तदिदमुक्तं भाष्यकारेण— बहूनि द्रव्याणि नानास्थानानि दृश्यन्ते नानास्थानश्च सन्नेकोऽवयवी च (ग)। तेनेन्द्रियेषु भिन्नस्थानेषु संशय इति । सूत्रेऽपि स्थानान्यत्वे इत्यनेन नानास्थानत्वमेवोपलक्षणीयमित्यविरोधः । यथाश्रुतस्तु न सूत्रार्थ इत्याह—इन्द्रियेषु तु न स्थाननानात्वात् संभवति न च नानास्थानत्वादिति । किं त्विन्द्रियविषयो नानास्थानत्वादेव संशयो भाष्यकारीयः साधीयानित्यर्थः । तदेवं परोक्तं संशयबीजं दूषयित्वा भाष्यकारीयं संशयबीजं दर्शयित्वा वार्त्तिककारः स्वातन्त्र्येण संशयबीजमाह—शरीरव्यतिरेकित्वात् सत्त्वाच्च संशय इति ॥५२॥

वृत्तिः

स्थानान्यत्वे स्थानभेदे घटपटादीनां नानात्वदर्शनात् नानावयवस्थितस्यावयविन एकत्वदर्शनाच्च इन्द्रियाणां नानात्वमेकत्वं वेति संशयः ॥ ५१ ॥

---

(१) 'स्थाननानात्वं'—इति क-ख-पुस्तपाठान्तरम् ।

(क) अतः परं क-ख-तात्पर्यपुस्तकयोरुपलभ्यमानं 'सूत्रम्' इति लिपिप्रमादादागतमिति सम्भाव्यते ।

(ख) 'यथाश्रुतसूत्रपरिग्रहणे' इति समीचीनतया सम्भाव्यते ।

(ग) भाष्यगतः 'इति'शब्दो न गृहीतः ।

न्यायभाष्यम्

एकमिन्द्रियम्—

(सू०)—त्वगव्यतिरेकात् ॥ ५३ ॥

(१)त्वगेकमिन्द्रियमित्याह। कस्मात्? अव्यतिरेकात्। न त्वचा किञ्चिदिन्द्रियाधिष्ठानं न प्राप्तम्, न चासत्यां त्वचि किञ्चिद्विषयग्रहणं भवति, यया सर्वेन्द्रियस्थानानि व्याप्तानि यस्यां च सत्यां विषयग्रहणं भवति सा त्वगेकमिन्द्रियमिति (क)।

नेन्द्रियान्तरार्थानुपलब्धेः। स्पर्शोपलब्धिलक्षणायां सत्यां त्वचि गृह्यमाणे त्वगिन्द्रियेण स्पर्शे इन्द्रियान्तरार्था रूपादयो न गृह्यन्ते अन्धादिभिः। न स्पर्शग्राहकात् (२)इन्द्रियादिन्द्रियान्तरमस्तीति स्पर्शवदन्धादिभिर्गृह्येरन् रूपादयः, न च गृह्यन्ते तस्मान्नैकमिन्द्रियं त्वगिति।

न्यायवार्त्तिकम्

एकमिन्द्रियम्। किं पुनस्तत्?

त्वगव्यतिरेकात्। कः पुनरयमव्यतिरेकः? सर्वाधिष्ठानसम्बन्धः—(ख)नहि किञ्चिदिन्द्रियं न त्वचा प्राप्तम्। सति भावो वा—न ह्यसत्यां त्वचि किञ्चिदर्थग्रहणं भवति। तस्मात् त्वगेकमिन्द्रियम्।

'नेन्द्रियान्तरार्थानुपलब्धे'रिति लोकविरोधः—एकमिन्द्रियमिति ब्रुवाणो लोकं विरुणद्धि। विद्यमाने त्वगिन्द्रिये (ग) स्पर्शोपलब्धिप्रसङ्गः, इन्द्रियान्तरार्था रूपादयोऽन्धादिभिरुपलभ्येरन् न तूपलभ्यन्ते तस्मान्नैकमिन्द्रियमिति। यदप्यव्यतिरेकादिति, तदपि न अनेकान्तात्—अनेकेन

न्यायवार्त्तिकतात्पर्यटीका

पूर्वपक्षं गृह्णाति—

त्वग—कात् (सू० ५३)॥ कः (घ) पुनरव्यतिरेक इति, घटादिप्राप्तं चक्षुस्त्वचो व्यतिरिच्यत एवेति भावः। उत्तरम्—सर्वाधिष्ठानसंबन्ध इति। सौत्रस्याव्यतिरेकशब्दस्य व्याख्यानान्तरमाह—सति भावो वेति। तदनेन यस्यां च सत्यामिति भाष्यं व्याख्यातम्। वो विकल्पार्थः।

सिद्धान्तभाष्यम्—नेन्द्रियेति।

लोकविरोध इति। लोक्यते ज्ञायतेऽनेनेति लोकः प्रमाणम्, तद्विरोध इत्यर्थः। अनेकेन

---

(१) 'त्वगव्यतिरेकमिन्द्रियम्' इति टि०। (२) 'इन्द्रियात्' इति ज-पु० नास्ति।

(क) त्वङ्मात्रमिन्द्रियमिति प्राचीनसाङ्ख्यमतम्। तथाच 'परस्परविरुद्धश्चायं साङ्ख्यानामभ्युपगमः क्वचित् सप्तेन्द्रियाण्यनुक्रामन्ति' इति (२।२।१० सूत्र) शारीरकमीमांसाभाष्यव्याख्यायां भामती—'त्वङ्मात्रमेव हि बुद्धीन्द्रियमनेकरूपादिग्रहणसमर्थमेकम्' इति। (ख) 'नहि न किञ्चिद्' इति क-ख-वार्त्तिकमुद्रणं प्रामादिकमिति शोधितम्। (ग) 'स्पर्शोपलब्धिवत्' इति समीचीनतया प्रतिभाति। 'स्पर्शोपलब्धिप्रसङ्गे' इति सप्तम्यन्तपाठस्वीकारे स्पर्शोपलब्धिप्रसक्तौ सत्यां तत्तुल्यवित्तिवेद्यतया रूपादयोऽप्युपलभ्येरन्नित्यर्थो बोध्यः।
(घ) 'पुनरयमि'ति वार्त्तिके विशेषः।

न्यायभाष्यम्

त्वगवयवविशेषेण धूमोपलब्धिवत्तदुपलब्धिः। यथा त्वचोऽवयवविशेषः कश्चिच्चक्षुषि सन्निकृष्टो धूमस्पर्शं गृह्णाति नान्यः, एवं त्वचोऽवयवविशेषा रूपादिग्राहकास्तेषामुपघातादन्धादिभिर्न गृह्यन्ते रूपादय इति।

व्याहतत्वादहेतुः। त्वगव्यतिरेकादेकमिन्द्रियमित्युक्त्वा 'त्वगवयवविशेषेण धूमोपलब्धिवद्रूपाद्युपलब्धि'रित्युच्यते। एवं च सति नानाभूतानि विषयग्राहकाणि विषयव्यवस्थानात् तद्भावे विषयग्रहणस्य भावात्तदुपघाते चाभावात्, तथा च पूर्वो वाद उत्तरेण वादेन व्याहन्यत इति।

सन्दिग्धश्चाव्यतिरेकः। पृथिव्यादिभिरपि भूतैरिन्द्रियाधिष्ठानानि व्याप्तानि, न च (१) तेष्वसत्सु विषयग्रहणं भवतीति। तस्मान्न त्वगन्यद्वा सर्वविषयमेकमिन्द्रियमिति ॥ ५३ ॥

न्यायवार्त्तिकम्

चानिन्द्रियेण सर्वाणीन्द्रियाधिष्ठानानि पृथिव्यादिना प्राप्तानीत्यनेकान्तः।

अवयवोपघातादिति चेत्—अथ मन्येतैतत् त्वगवयवः कश्चिदुपहतो भवति तदुपघातादन्धादिभिर्नोपलभ्यन्ते रूपादय इति—यथा त्वगवयवविशेषेणैव धूमोपलब्धिः यश्चक्षुषि त्वगवयवविशेषस्तदुपघाताद (२) धूमस्पर्शानुपलब्धिरिति? न व्याघातात्—त्वगवयवविशेषेण धूमोपलब्धिवद्रूपाद्युपलब्धिरिति ब्रुवता यदुक्तमेकमिन्द्रियमिति तद् व्याहतं भवति। प्रागेकमिन्द्रियं त्वगित्युपगम्येदानीं त्वगवयवविशेषा रूपादिग्राहका इति ब्रुवाणः प्रतिषेध्यमभ्यनुजानाति, न ह्यवयव्यनतिरिक्ता अवयवा इति। यांश्चावयवान् रूपादिग्राहकान् त्वचो मन्यन्ते ते किमिन्द्रियात्मका उत नेति? किं चातः? यदीन्द्रियात्मका, नैकमिन्द्रियम्; अथेन्द्रियात्मका न भवन्ति, न तर्हीन्द्रियग्राह्या रूपादय इति ॥ ५३ ॥

न्यायवार्त्तिकतात्पर्यटीका

चानिन्द्रियेणेति। शरीरं पार्थिवं भूतान्तरसंपृक्तं च तद् इन्द्रियाधिष्ठानानि शरीरावयवभूतानि पृथिव्यादिना (३) प्राप्तानीत्यनेकान्तः।

न व्याघातादिति परदोषोद्भावनपरम्, न पुनस्त्वगवयवत्वमिन्द्रियान्तराणामभिमतमिति ॥५३॥

वृत्तिः

पूर्वपक्षसूत्रम्—(त्वगव्यतिरेकात्)

सर्वेष्विन्द्रियप्रदेशेष्वव्यतिरेकात् सत्त्वात् त्वगेवैकमिन्द्रियमस्तु ॥ ५२ ॥

---

(१) 'तेषु सत्सु' इति वि-टि०। (२) 'धूमस्यानुपलब्धिरिति'—इति क-ख-धृतपाठान्तरम्।
(३) 'व्याप्तानीति' क-ख०।

(सू०)—न युगपदर्थानुपलब्धेः ॥ ५४ ॥

न्यायभाष्यम्

आत्मा मनसा सम्बध्यते, मन इन्द्रियेण, इन्द्रियं सर्वार्थैः सन्निकृष्टमिति, आत्मेन्द्रियमनोऽर्थसन्निकर्षेभ्यो युगपद् ग्रहणानि स्युः। न च युगपद् रूपादयो गृह्यन्ते तस्मान्नैकमिन्द्रियं सर्वविषयमस्तीति। असाहचर्याच्च विषयग्रहणानां नैकमिन्द्रियं सर्वविषयकम्, साहचर्ये हि(१) विषयग्रहणानामन्धाद्यनुपपत्तिरिति ॥ ५४ ॥

न्यायवार्त्तिकम्

सूत्रेण चाभिसम्बन्धः—

न युगपदर्थानुपलब्धेः। यस्यैकमिन्द्रियं तस्य युगपदर्थानामुपलब्धिः प्रसज्यते। कथमिति? आत्मा मनसा सम्बध्यते मन इन्द्रियेण, इन्द्रियं सर्वार्थैः सन्निहितैरिति, आत्मेन्द्रियमनोऽर्थसन्निकर्षेभ्यो युगपदुपलब्धयः (क)प्रादुःष्युरिति।

नैकेन्द्रियग्राह्याणां युगपदुपलब्धिप्रसङ्गात्—यथैकेन्द्रियवादिनो युगपदनेकार्थसन्निधाने सति युगपदुपलब्धिदोषो भवति तथाऽनेकेन्द्रियवादिनोऽपि एकेन्द्रियग्राह्येषु युगपदुपलब्धिप्रसङ्गः। य एवात्र परीहारः स एव ममापि भविष्यतीति। अथायमदुष्टः पक्षः? अदेश्यं तर्ह्येतत् युगपदुपलब्धिप्रसङ्ग इति।

अत्र केचित् परिहारं वर्णयन्ति—बुभुत्साभेदान्न युगपदुपलब्धिरिति, ममाप्येवम्—यदि बुभुत्साभेदान्न युगपदुपलब्धिर्लभ्यते ममापि न बुभुत्साभेदो दण्डवारित इति। सत्यां च बुभुत्सायामयुगपदुपलब्धौ न्यायोऽन्योऽवधारणीय इति।

करणत्वादित्यन्ये—अन्ये तु ब्रुवते परिहारं करणत्वादिति, करणस्य किलायं धर्मः अधिष्ठितमप्यनेकां युगपत् क्रियां न शक्नोति कर्तुम्, अनधिष्ठितं च न प्रवर्तत इति; तुल्यम्(ख)—यस्याप्येकमिन्द्रियं तस्यापि करणत्वं न निवार्यत इति। तस्माद् युगपदर्थानुपलब्धिरित्य-

न्यायवार्त्तिकतात्पर्यटीका

एवं भाष्यकारीयसिद्धान्तमुक्त्वा सौत्रं सिद्धान्तमाह—सूत्रेण चाभिसंबन्धः सिद्धान्तस्य।

न यु—ब्धेः (सू० ५४) ॥ नैतदस्ति एकमिन्द्रियमिति। कस्मात्? युगपदर्थानुपलब्धेरिति। तदेतत्सूत्रं भाष्यदृष्ट्या व्याचष्टे वार्त्तिककारः—यस्यैकमिन्द्रियमिति।

तदेतद् व्याख्यानं दूषयति—नैकेन्द्रियग्राह्याणामिति।

वृत्तिः

उत्तरयति—(न युगपदर्थानुपलब्धेः)

---

(१) 'सर्वविषयसाहचर्ये च' इति वि०।

(क) क-ख-वार्त्तिकयोः 'प्रादुस्युरिति' इति मुद्रितम्। (ख) अत्र दूषणमाह 'तुल्य'मिति।

(सू०)—विप्रतिषेधाच्च न त्वगेका ॥ ५५ ॥(क)

न्यायभाष्यम्

न खलु त्वगेकमिन्द्रियं व्याघातात्—त्वचा रूपाण्यप्राप्तानि गृह्यन्त इति अप्राप्यकारित्वे स्पर्शादिष्वप्येवं प्रसङ्गः। स्पर्शादीनां च प्राप्तानां ग्रहणाद्रूपादीनां (१)प्राप्तानां ग्रहणमिति प्राप्तम्।

न्यायवार्त्तिकम्

दोषोऽयमिति। एवं ब्रुवाण एकेन्द्रियवादी विकल्प्य पर्यनुयोज्यः—यत्तदेकमिन्द्रियं सर्वार्थमिति मन्यसे तत् किं प्राप्यकारि आहो नेति। किं चातः? यदि प्राप्यकारि, किं तदिति वक्तव्यम्। यदि त्वक्, त्वचाऽप्राप्तानां रूपाणामग्रहणप्रसङ्गः। अथाप्राप्तं रूपं गृह्णाति, स्पर्शादिष्वप्येवं प्रसङ्गः। अथ सामिकारीन्द्रियम्—किञ्चित् प्राप्तं गृह्णाति किञ्चिचाप्राप्तम्; एवं सति करणधर्मातिक्रमः। भवतु करणधर्मातिक्रमः किन्नो बाध्यत इति? एतस्मिन् पक्षे न युगपदुपलब्धिप्रसङ्गादिति सूत्रम्। यथाऽनेकेन्द्रियवादिन एकेन्द्रियग्राह्येषु युगपदुपलब्धिप्रसङ्गे करणत्वादिति परिहारः, सोऽस्य न भवति करणधर्मातिक्रमात्। व्याहतं चैतत् करणं प्राप्यकार्यप्राप्यकारि चेति। असाहचर्याच्च न त्वक्—साहचर्यं नाम यस्यैकं विषयग्रहणं तस्य द्वितीयमपीत्यन्धबधिराद्यभावप्रसङ्गः ॥५४॥

विप्रतिषेधाच्च न त्वगेका। शेषं भाष्ये। एकोपघाते तद्विनाशे वा सर्वानुपलब्धिप्रसङ्गः—अथैकमिन्द्रियं भवति तद्विघाते विनाशे वा सर्वानुपलब्धिप्रसङ्गः। आवरणानु-

न्यायवार्त्तिकतात्पर्यटीका

भाष्यव्याख्यानं दूषयित्वा सूत्रमन्यथा व्याख्यातुं भूमिरचनां करोति—एवं ब्रुवाण एकेन्द्रियवादीति। सामि अर्धम्। एकमपीन्द्रियमर्धं प्राप्य गृह्णाति अप्राप्तं चार्धमेकदेश इति यावत्। करणधर्ममतिक्रामन्तं प्रति युगपदुपलब्धिप्रसङ्गो दूषणमित्यर्थः ॥ ५४ ॥

विप्र—का (सू० ५५) ॥ (ख)

वृत्तिः

युगपत् एकदा अर्थानां गन्धरूपादीनाम् अनुपलब्धेर्न त्वगेवैकमिन्द्रियम्। अन्यथा तस्या व्यापकत्वाचाक्षुषादिकाले घ्राणजादिकमपि स्यादिति भावः ॥ ५३ ॥

---

(१) 'अप्राप्तानामग्रहणम्'—इति ज-टि०।

(क) 'विप्रतिषेधाच्च न त्वगेका' इति सूत्रस्य वृत्त्यनुपलब्ध्या नास्य सूत्रत्वं वृत्तिकारसम्मतम् इति प्रतीयते।

(ख) ५५-तमसूत्रस्य तात्पर्यटीका नोपलभ्यते।

न्यायभाष्यम्

(१)प्राप्याप्राप्यकारित्वमिति चेत्? आवरणानुपपत्तेर्विषयमात्रस्य ग्रहणम्। अथापि मन्येत प्राप्ताः स्पर्शादयस्त्वचा गृह्यन्ते रूपाणि त्वप्राप्तानीति? एवं सति नास्त्यावरणम्, आवरणानुपपत्तेश्च रूपमात्रस्य ग्रहणं व्यवहितस्य (२)चाव्यवहितस्य चेति। दूरान्तिकानुविधानं च रूपोपलब्ध्यनुपलब्ध्योर्न स्यात्। अप्राप्तं त्वचा गृह्यते रूपमिति दूरे रूपस्याग्रहणमन्तिके च ग्रहणमित्येतन्न स्यादिति ॥ ५५ ॥

प्रतिषेधाच्च नानात्वसिद्धौ स्थापनाहेतुरप्युपादीयते—

(सू०)—इन्द्रियार्थपञ्चत्वात् ॥ ५६ ॥

अर्थः प्रयोजनम्, तत् पञ्चविधमिन्द्रियाणाम्, स्पर्शनेनेन्द्रियेण स्पर्शग्रहणे सति न

न्यायवार्त्तिकम्

पपत्तेः—यदि त्वगेकमिन्द्रियं भवति नाऽऽवरणस्य सामर्थ्यमस्तीति विप्रकृष्टावस्थितोपलब्धि-प्रसङ्गः। दूरान्तिकार्थानुविधानं चोपलब्ध्यनुपलब्ध्योर्न स्यात्—अप्राप्यकारित्वे त्वगिन्द्रिय-स्यान्तिके ग्रहणं दूरे चाग्रहणमित्येतन्न स्यात्॥ ५५ ॥

'प्रतिषेधाच्च नानात्वसिद्धौ स्थापनाहेतुरप्युपादीयते' प्रतिषेधान्नानात्वं (क)सिध्यतीति। तन्न बुध्यामहे—प्रतिषेधादेकत्वसाधनं न स्यात् नानात्वं कथं सिध्यतीति? नासाधना क्रियेति। एकत्वं च कथं प्रतिषेद्धुं शक्यते? प्रतिषेधात् एकत्वसाधनमनुमानं निवर्तते न पुनरेकत्व-मनेकत्वं वा निवर्तत इति। कथं तर्हि अयं ग्रन्थो ग्राह्यः? प्रतिषेधाच्चानन्तरं नानात्वसिद्धौ स्थापनाहेतुरप्युपादीयते इन्द्रियार्थपञ्चत्वात्।

न्यायवार्त्तिकतात्पर्यटीका

एकत्वप्रतिषेधादेव पारिशेष्यान्नानात्वं सेत्स्यतीत्यत आह—नासाधना क्रियेति। एकत्वं च कथमिति। न शक्यः पक्षो दूषयितुमित्युक्तम्। न च साधननिराकरणमात्रात्साध्यं निवर्तते मा भूद्धूमनिवृत्तौ वह्निनिवृत्तिरित्यर्थः। पृच्छति—कथं तर्हीति। उत्तरम्—प्रतिषेधाच्चानन्तरमिति। यद्यप्यनन्तरशब्दप्रयोगे पञ्चमी न स्मर्यते तथाऽप्यन्यशब्दस्याध्याहारेण पञ्चमी व्याख्येया। अनन्तरं प्रतिषेधादन्यः स्थापनाहेतुरिति योजना। अथ वेति। व्यतिरेकी

वृत्तिः

इन्द्रियाणां नानात्वे कार्यभेदमानमाह—(इन्द्रियार्थपञ्चत्वात्)

इन्द्रियार्थानाम् इन्द्रियग्राह्याणां रूपादीनाम्, पञ्चत्वात् पञ्चविधत्वात्। रूपादीनां

---

(१) 'प्राप्यकारित्वमिति चेत्'—इति ग०। (२) 'चाव्यवहितस्य' इति टि-पु० नास्ति।

(क) 'सिध्यतीत्येतन्न' इति पाठः सम्भाव्यते।

न्यायभाष्यम्

तेनैव रूपं गृह्यत इति रूपग्रहणप्रयोजनं चक्षुरनुमीयते। स्पर्शरूपग्रहणे च (१)ताभ्यामेव न गन्धो गृह्यत इति गन्धग्रहणप्रयोजनं (२)घ्राणमनुमीयते। त्रयाणां ग्रहणे न तैरेव रसो गृह्यते इति रसग्रहणप्रयोजनं रसनमनुमीयते। न च चतुर्णां ग्रहणे तैरेव शब्दः श्रूयते इति शब्दग्रहणप्रयोजनं श्रोत्रमनुमीयते। एवमिन्द्रियप्रयोजनस्यानितरेतरसाधनसाध्यत्वात्पञ्चैवेन्द्रियाणि ॥ ५६ ॥

न्यायवार्त्तिकम्

अथवा प्रतिषेधाच्च नानात्वसिद्धाविति प्रतिषेधहेतुना एकत्वप्रतिषेधे कृतेऽर्थान्नानात्वं सिध्यतीत्ययमर्थः। कतमः पुनरसौ प्रतिषेधहेतुः? युगपदर्थोपलब्धिप्रसङ्गादित्ययम्। अनेनैकत्वं प्रतिषिद्धम्।

(क) तदेवमवीतसिद्धौ वीतदर्शनार्थमिदमुच्यते—

इन्द्रियार्थपञ्चत्वात् इति सूत्रम्। अर्थः प्रयोजनमित्येवमादि भाष्ये। (३) इदं तु सूत्रं न कथञ्चन न्यायेन सम्बध्यते। कथमिति? विधीयमानोऽर्थः साध्यः पञ्चेन्द्रियाणीति, इन्द्रियार्थपञ्चत्वादित्यसम्बद्धम्। अथ प्रयोजनपञ्चत्वम्? तदप्येवमेव। अथ ग्रहणानि पक्षीक्रियन्ते? तत्राप्यैकान्तिको हेतुर्नास्तीति। एतेन विषया व्याख्याताः। इदं तु सूत्रमेवं स्यात्—रूप-रस-गन्ध-स्पर्श-शब्देषु नानासाधनक्रियः कर्ता एकविषयावसितौ विषयान्तरसिद्धौ करणान्तरापेक्षित्वात्—यस्य कर्तुरनेको विषयः तस्यान्यतमविषयावसाये विषयान्तरसिद्धौ करणान्तरापेक्षित्वं दृष्टम्, यथाऽनेकशिल्पपर्यवदातस्य पुरुषस्य (ख)क्रियावसायात् क्रियायां करणान्तरापेक्षित्वम्; तथा च रूपाद्यन्यतमविषयावसाये विषयान्तरसिद्धौ साधनान्तरापेक्षित्वमस्ति। तस्माद् रूपरसगन्ध-स्पर्श-शब्देषु नानासाधनक्रियः कर्ता ॥५६॥

न्यायवार्त्तिकतात्पर्यटीका

हेतुर्द्वयोर्विरुद्धयोरेकतरनिषेधेन (ग)एकतरं व्यवस्थापयति—यथा नैरात्म्यनिषेधेन जीवच्छरीरस्य सात्मकत्वमिति ॥ ५५ ॥

इन्द्रि—त्वात् (सू० ५६) ॥ सूत्रमाक्षिपति—इदं तु सूत्रमिति। एष न्यायो मया वाचो भङ्ग्या सूत्रित इत्यर्थः ॥ ५६ ॥

---

(१) 'ताभ्यामेव गन्धो' इति टि०। (२) 'प्रमाणमनु-' इति टि०। (३) क-ख-वार्त्तिकयोः 'इदं च' इति मुद्रितम्।

(क) अनुमानं प्रथमं तावद् द्विविधं वीतमवीतं च। "अन्वयमुखेन प्रवर्तमानं विधायकं वीतम्, व्यतिरेकमुखेन प्रवर्तमानं निषेधकमवीतम्, तत्रावीतं शेषवत्। वीतं च द्वेधा पूर्ववत् सामान्यतोदृष्टं च" इति। (तत्त्वकौमुदी, ५म-कारिकाव्याख्या)। (ख) 'क्रियावसायात् क्रियाया'मिति एकक्रियावसायादन्यक्रियायामित्यर्थः। (ग) 'एकतनो'मिति क-तात्पर्यपाठः। ख-तात्पर्ये तु 'एकत(नो') रं' इति मुद्रितम्।

(सू०)—न, तदर्थबहुत्वात्(१) ॥ ५७ ॥

न्यायभाष्यम्

न खल्विन्द्रियार्थपञ्चत्वात् पञ्चेन्द्रियाणीति सिध्यति। कस्मात्? तेषामर्थानां बहुत्वात्। बहवः खल्विमे इन्द्रियार्थाः, स्पर्शास्तावत् शीतोष्णा(२)नुष्णाशीता इति। रूपाणि शुक्लहरितादीनि। गन्धा इष्टानिष्टोपेक्षणीयाः। रसाः कटुकादयः, शब्दा वर्णात्मानो ध्वनिमात्राश्च भिन्नाः। तद् यस्येन्द्रियार्थपञ्चत्वात् पञ्चेन्द्रियाणि तस्येन्द्रियार्थबहुत्वाद् बहूनि इन्द्रियाणि प्रसज्यन्त इति ॥ ५७ ॥

(सू०)—गन्धत्वाद्यव्यतिरेकाद्गन्धादीनामप्रतिषेधः ॥ ५८ ॥

गन्धत्वादिभिः स्वसामान्यैः कृतव्यवस्थानां गन्धादीनां यानि गन्धादिग्रहणानि तान्यसमानसाधनसाध्यत्वाद् ग्राहकान्तराणि न प्रयोजयन्ति। अर्थसमूहोऽनुमान-

न्यायवार्त्तिकम्

न, तदर्थबहुत्वात्। अस्य यथाश्रुत्युत्थानम्, अस्य चार्थ इन्द्रियपञ्चत्वविरोधः।

न विरोधात्—अर्थबहुत्वादिन्द्रियबहुत्वमिति ब्रुवाणो यदभ्युपगतमेकमिन्द्रियमिति तद् बाधते। नासाधनात्—न मयाऽर्थबहुत्वादिन्द्रियबहुत्वं साध्यते यतो मे विरोधः स्यात्, अपि तु भवतेन्द्रियार्थपञ्चत्वात् पञ्चेन्द्रियाणीति यत्साधनमुक्तं तस्य मया विरोधो देश्यते—यदीन्द्रियार्थपञ्चत्वात् पञ्चेन्द्रियाणि भवन्ति, इन्द्रियार्थबहुत्वाद् बहूनीन्द्रियाणि प्रसज्यन्ते इति ॥५७॥

न्यायवार्त्तिकतात्पर्यटीका

पूर्वपक्षिणः सूत्रम्—

न, त—त्वात् (सू० ५७) ॥ पूर्वपक्षमाक्षिपति—न विरोधादिति। पूर्वपक्षिणः समाधानम् नासाधनादिति ॥ ५७ ॥

वृत्तिः

हि चक्षुराद्येकैकेन्द्रियमात्रग्राह्यत्वाद्वैलक्षण्यम्, तच्चैकेन्द्रियपक्षे न सम्भवति, अन्धादीनां रूपाद्युपलब्धिप्रसङ्गश्चेति भावः ॥ ५४ ॥

शङ्कते—(न, तदर्थबहुत्वात्)

इन्द्रियार्थानां नीलपीतादीनां बहुत्वाद् इन्द्रियाणां बहुतरत्वप्रसङ्गादिन्द्रियार्थपञ्चत्वादिन्द्रियभेदो न युक्तः ॥ ५५ ॥

---

(१) 'न तदर्थ बहुत्वात्' इति टि०।

(२) '-नुष्णशीता' इति ल-ज०।

न्यायभाष्यम्

मुक्तो नार्थैकदेशः। अर्थैकदेशं चाऽऽश्रित्य विषयपञ्चत्वमात्रं भवान् प्रतिषेधति तस्मादयुक्तोऽयं प्रतिषेध इति।

कथं पुनर्गन्धत्वादिभिः स्वसामान्यैः कृतव्यवस्था गन्धादय इति? स्पर्शः खल्वयं त्रिविधः शीत उष्णोऽनुष्णाशीतश्च स्पर्शत्वेन स्वसामान्येन संगृहीतः। गृह्यमाणे च शीतस्पर्शे नोष्णस्यानुष्णाशीतस्य वा स्पर्शस्य ग्रहणं ग्राहकान्तरं प्रयोजयति स्पर्शभेदानामेकसाधनसाध्यत्वाद् येनैव शीतस्पर्शो गृह्यते तेनैवेतरावपीति। एवं गन्धत्वेन गन्धानाम्, रूपत्वेन रूपाणाम्, रसत्वेन रसानाम्, शब्दत्वेन शब्दानामिति। गन्धादिग्रहणानि पुनरसमानसाधनसाध्यत्वाद् ग्राहकान्तराणां प्रयोजकानि। तस्मादुपपन्नमिन्द्रियार्थपञ्चत्वात् पञ्चेन्द्रियाणीति ॥ ५८ ॥

यदि सामान्यं सङ्ग्राहकम्, प्राप्तमिन्द्रियाणाम्—

(सू०)—विषयत्वाव्यतिरेकादेकत्वम् ॥ ५९ ॥

विषयत्वेन हि सामान्येन गन्धादयः सङ्गृहीता इति ॥ ५९ ॥

न्यायवार्त्तिकम्

अस्योद्धारकं सूत्रम्—

गन्धत्वाद्यव्यतिरेकाद् गन्धादीनामप्रतिषेधः। गन्धत्वादिभिः सामान्यैः कृतव्यवस्था गन्धादयः न स्वकरणव्यतिरेकेण करणान्तराणि प्रयोजयन्ति यावत्तु गन्धत्वं वर्तते तावतामेकसाधनसाध्यत्वात्; यः पुनरपरो जातिभेद इष्टानिष्टोपेक्षणीयत्वादिर्नासौ करणान्तरं प्रयोजयति एवं सर्वत्र। शेषं भाष्ये ॥५८॥

यदि सामान्यं संग्राहकं प्राप्तमिन्द्रियाणाम्—

विषयत्वाव्यतिरेकादेकत्वम्। अस्यार्थोऽविरोध एव। नोक्तोक्तरत्वात्—इन्द्रियार्थपञ्चत्वादित्यस्यार्थेनोक्तोत्तरमेतत् ॥ ५९ ॥

न्यायवार्त्तिकतात्पर्यटीका

सिद्धान्तः—

गन्ध—धः (सू० ५८) ॥(क)

विष—त्वम् (सू० ५९) ॥(ख)

वृत्तिः

समाधत्ते—(गन्धत्वाद्यव्यतिरेकाद् गन्धादीनामप्रतिषेधः)

उक्तः प्रतिषेधो न, गन्धादीनां सौरभादीनाम्, गन्धत्वाद्यव्यतिरेकाद् गन्धत्वादिसत्त्वात्। तथा च गुणविभाजकगन्धत्वावच्छिन्नग्राहकत्वमभिप्रेतम्, न त्ववान्तरधर्मावच्छिन्नग्राहकत्वमिति भावः ॥ ५६ ॥

(क-ख) ५८-५९-तमसूत्रयोः तात्पर्यटीका नोपलभ्यते।

(सू०)—न, बुद्धिलक्षणाधिष्ठान-गत्याकृति-जातिपञ्चत्वेभ्यः ॥६०॥

न्यायभाष्यम्

न खलु विषयत्वेन सामान्येन कृतव्यवस्था विषया ग्राहकान्तरनिरपेक्षा एकसाधनग्राह्या (१)अनुमीयन्ते, अनुमीयन्ते च पञ्च गन्धादयो गन्धत्वादिभिः स्वसामान्यैः कृतव्यवस्था इन्द्रियान्तरग्राह्याः, तस्मादसम्बद्धमेतत्। अयमेव चार्थोऽनूद्यते बुद्धिलक्षणपञ्चत्वादिति।

बुद्धय एव लक्षणानि विषयग्रहणलिङ्गत्वात् (२)इन्द्रियाणाम्, तदेतत् (२*)'इन्द्रियार्थपञ्चत्वात्' इत्येतस्मिन् सूत्रे कृतभाष्यमिति। तस्माद् बुद्धिलक्षणपञ्चत्वात्पञ्चेन्द्रियाणि।

न्यायवार्त्तिकम्

अस्य चार्थस्य ज्ञापनार्थम्—

न, बुद्धिलक्षणाधिष्ठानगत्याकृतिजातिपञ्चत्वेभ्यः इति सूत्रम्। तत्र बुद्धय एव लक्षणानीत्यस्यार्थो वर्णित इन्द्रियार्थपञ्चत्वादिति। नानेन्द्रियं भिन्नाधिष्ठानत्वात्—यस्याधिष्ठानं भिन्नं तदनेकं दृष्टम्, (क)यथा घटादि, अधिष्ठानभेदश्चेन्द्रियाणामस्ति तस्मान्नानेति। अधिष्ठान-

न्यायवार्त्तिकतात्पर्यटीका

न, बु—भ्यः (सू० ६०)॥ यस्याधिष्ठानं भिन्नमिति। भिन्नं नियतम्। एतदुक्तं भवति—रूपव्यञ्जकस्य कृष्णसारमेवाधिष्ठानं न कर्णशष्कुल्यादि। एवमन्यत्रापि द्रष्टव्यम्।

वृत्तिः

यदि गन्धत्वादिना सौरभादीनामैक्यं तदा विषयत्वेन गन्धरसादीनामप्यैक्यादिन्द्रियैक्यं स्यादिति शङ्कते—(विषयत्वाव्यतिरेकादेकत्वम्)

विषयत्वाव्यतिरेकाद् विषयत्वेनैक्यात् ॥ ५७ ॥

उत्तरयति—(न, बुद्धिलक्षणाधिष्ठानगत्याकृतिजातिपञ्चत्वेभ्यः)

इन्द्रियाणामैक्यं न। हेतुमाह—बुद्धीत्यादि। बुद्धेश्चाक्षुषादेर्यल्लक्षणं चाक्षुषत्वादि तत्पञ्चत्वेन तदवच्छिन्नकरणानां पञ्चत्वम्। एवमधिष्ठानं रूपादिर्विषयः, तत्पञ्चत्वात्। गतिर्दूरादौ गमनम्, इदं चक्षुरधिकृत्य।

यद्वा गतिः प्रकारः, तथा च प्रकाराणां पञ्चत्वात्, चक्षुर्हि गत्वा गृह्णाति, त्वग् देहावच्छेदेन, श्रोत्रं कर्णावच्छेदेनेत्यादिप्रकारभेदात्।

---

(१) इदं टि-पु० नास्ति। (२) अयमंशः टि-पु० नास्ति।

(क) 'यथा घटादिष्वधिष्ठानभेदः तथेन्द्रियाणामस्ति' इति क-ख-पुस्तकपाठः। तयोर्श्तं पाठान्तरं तु उपरिष्टात् गृहीतम्।

न्यायभाष्यम्

अधिष्ठानान्यपि खलु पञ्चेन्द्रियाणाम्, सर्वशरीराधिष्ठानं स्पर्शनं स्पर्शग्रहणलिङ्गम्, (१)कृष्णसाराधिष्ठानं चक्षुः बहिर्निःसृतं रूपग्रहणलिङ्गम्, नासाधिष्ठानं घ्राणम्, जिह्वाधिष्ठानं रसनम्, कर्णच्छिद्राधिष्ठानं श्रोत्रम्, गन्धरसरूपस्पर्शशब्दग्रहणलिङ्गत्वा(२)दिति।

गतिभेदादपीन्द्रियभेदः। कृष्णसारोपनिबद्धं चक्षुर्बहिर्निःसृत्य रूपाधिकरणानि द्रव्याणि प्राप्नोति। स्पर्शनादीनि त्विन्द्रियाणि विषया एवाऽऽश्रयोपसर्पणात्प्रत्यासीदन्ति। सन्तानवृत्त्या शब्दस्य श्रोत्रप्रत्यासत्तिरिति।

आकृतिः खलु परिमाणमियत्ता सा पञ्चधा। स्वस्थानमात्राणि घ्राणरसनस्पर्शनानि विषयग्रहणेनानुमेयानि। चक्षुः कृष्णसाराश्रयं बहिर्निःसृतं विषयव्यापि। श्रोत्रं नान्यदाकाशात्, तच्च विभु शब्दमात्रानुभवानुमेयं पुरुषसंस्कारोपग्रहणाच्चाधिष्ठाननियमेन शब्दस्य व्यञ्जकमिति।

न्यायवार्त्तिकम्

भेदोऽसिद्ध इति चेत्, न; अन्धबधिराद्यभावप्रसङ्गात्—यस्य पुनरधिष्ठानभेदः तस्य (क)भेदे एकाधिष्ठानविनाशेऽधिष्ठानान्तराश्रयस्यावस्थानमिति न दोषः। गतिभेदादित्यस्य भिन्नगतित्वादिति प्रयोगः, प्रसङ्गः पूर्ववत्।

आकृतिः परिमाणमियत्ता। स्वस्थानपरिमाणानि घ्राणरसनस्पर्शनानि। चक्षुर्बहिर्निःसृतं विषयव्यापि तन्महत्। श्रोत्रं त्वाकाशम्, तदधिष्ठाननियमेन प्रवर्तते, धर्माधर्मसंहितया इष्टानिष्टोपेक्षणीयशब्दसाधनभूतया कर्णशष्कुल्या य आकाशस्य सम्बन्धस्तत्सम्बन्धानुविधाय्याकाशम्, न विवरान्तरेणास्यादिना (३)शब्दमुपलक्षयति नान्यत्रेति (ख)तदुपकारप्रतिकारभेदाद्वोपक्रियते प्रतिक्रियते चेति, न च पुनराकाशं नित्यत्वादुपक्रियते न प्रतिक्रियत इति। प्रकृष्टाप्रकृष्टश्रोत्रभेदोऽप्यत एव।

न्यायवार्त्तिकतात्पर्यटीका

यस्य पुनः सिद्धान्तिनः (४)अधिष्ठानभेदः तथा च तदधिष्ठानस्येन्द्रियस्यापि भेदः तस्य एकाधिष्ठानविनाशेन तद्गतस्येन्द्रियस्य विनाशेऽपि अधिष्ठानान्तराश्रितस्य इन्द्रियान्तरस्य अवस्थानमिति न एकाधिष्ठाननाशे सर्वाधिष्ठाननाशात्सर्वेन्द्रियनाशलक्षणः तथैकाधिष्ठानावस्थाने सर्वेन्द्रियावस्थानलक्षणो दोष इति। इष्टानिष्टोपेक्षणीय इति। उपेक्षणीयस्यापि पुरुषार्थत्वं

---

(१) 'कृष्णताराधि-' ल-ग-भा०। (२) 'स्पर्शग्रहणाल्लिङ्गा'दिति —वि०। (३) 'शब्दमुपलम्भयति' इति क-ख-धृतपाठान्तरम्। (४) 'अधिष्ठानाभेदः' इति क-ख।

(क) अत्र 'भेदे' इति लिपिप्रमादादागतं सम्भाव्यते। 'भेदे एकाधिष्ठानविनाशेऽधिष्ठानान्तराश्रयस्येन्द्रियस्यावस्थानमिति' इति क-खधृतपाठान्तरम्। (ख) 'वा'शब्दोऽयमेवकारार्थ इति बोध्यम्।

न्यायभाष्यम्

जातिरिति योनिं प्रचक्षते। पञ्च खल्विन्द्रिययोनयः पृथिव्यादीनि भूतानि, तस्मात् प्रकृतिपञ्चत्वादपि पञ्चेन्द्रियाणीति सिद्धम् ॥ ६० ॥

कथं पुनर्ज्ञायते भूतप्रकृतीनीन्द्रियाणि नाव्यक्तप्रकृतीनीति ?

(सू०)—भूतगुणविशेषोपलब्धेस्तादात्म्यम् ॥ ६१ ॥

दृष्टो हि वाय्वादीनां भूतानां गुणविशेषाभिव्यक्तिनियमः। वायुः स्पर्शव्यञ्जकः, आपो रसव्यञ्जिकाः, तेजो रूपव्यञ्जकम्, पार्थिवं किञ्चिद् द्रव्यं कस्यचिद् द्रव्यस्य गन्धव्यञ्जकम्। अस्ति चायमिन्द्रियाणां भूतगुणविशेषोपलब्धिनियमः तेन भूतगुणविशेषोपलब्धेर्मन्यामहे भूतप्रकृतीनीन्द्रियाणि नाव्यक्तप्रकृतीनीति ॥ ६१ ॥

न्यायवार्त्तिकम्

जातिरिति योनिं प्रचक्षते। 'पञ्च खल्विमा इन्द्रिययोनयः पृथिव्यादीनि भूतानि' इन्द्रियाणां योनय इति योनिस्तादात्म्यं (क)न पुनस्तत्कार्यत्वमाकाशे सम्भवति नित्यत्वात् ॥ ६० ॥

'कथं पुनर्ज्ञायते भूतप्रकृतीनीन्द्रियाणि नाव्यक्तप्रकृतीनी'ति ? नोक्तोत्तरत्वात्—नाव्यक्तप्रकृतीनीन्द्रियाणीत्युक्तोत्तरमेतत्।

भूतगुणविशेषोपलब्धेस्तादात्म्यम्। भूतगुणविशेषो गन्ध-रस-रूप-स्पर्श-शब्दा विशेषकत्वाद्विशेषा इत्युच्यन्ते। यथा (१)गन्धवत्त्वादिना पृथिव्यबादिभ्यो भिद्यते रसादिभिरबादय इति। दृष्टो हि बाह्यानामुभयपक्षसम्प्रतिपन्नानां पृथिव्यादिभूतानां स्वगुणाभिव्यक्तिनियमः। अस्ति च घ्राणादिभिरपि गन्धाद्यभिव्यक्तिनियमः, तेन भूतगुणविशेषोपलब्धेर्भूतप्रकृतीनीन्द्रिया-

न्यायवार्त्तिकतात्पर्यटीका

भवति केनचित् प्रकारेण। यदि हि तत्र पुरुषः प्रवर्तते ततो निष्फले कर्मणि प्रवृत्तः पुरुषस्तप्येत। दुःखं कर्मेत्यनुभवो लोकस्य उपेक्षणीयत्वे तु तन्न तस्य भवति ॥ ६० ॥

वृत्तिः

आकृतिः गोलकानां संस्थानविशेषः। जातिः पृथिवीत्वादि। वस्तुतो जातिः धर्मः तेन श्रोत्रत्वसंग्रहः ॥५८॥

---

(१) 'गन्धवत्त्वेन' इति क-ख-धृतपाठान्तरम्।

(क) न पुनस्तत्कार्यत्वमिति भूतकार्यत्वमित्यर्थः। आकाश इति श्रोत्रात्मके इति शेषः।

न्यायवार्त्तिकम्

णीति। किं किमात्मकमिति? येन यद्गुणाभिव्यक्तिः। तत्र पार्थिवं घ्राणं गन्धाभिव्यक्तिहेतुत्वात् बाह्यपार्थिवद्रव्यवदिति। एवं शेषेष्वपि ॥ ६१ ॥

(इन्द्रियनानात्वप्रकरणम्)

न्यायवार्त्तिकतात्पर्यटीका

भूत—त्म्यम् (सू० ६१)॥ तत्र पार्थिवं घ्राणं रूप-रस-गन्ध-स्पर्शेषु नियमेन गन्धस्य व्यञ्जकत्वाद् बाह्यपार्थिववदिति, यथा हि मृगमदगन्धव्यञ्जकाः कुक्कुटोच्चारादयः पार्थिवा इत्यर्थः। न चातपेनानेकान्तः। न ह्यातपो गन्धव्यञ्जकोऽपि तु जलाभिभूतो गन्धो द्रव्याणां नोपलभ्यते केवलं जलमातपोऽपनयति न तु गन्धं द्रव्यस्याभिव्यनक्ति तस्मान्नानेकान्तः। एवं रसनमिन्द्रियमाप्यं गन्धादिषु मध्ये नियमेन रसस्य व्यञ्जकत्वाद् दन्तान्तरस्यन्दमानोदकबिन्दुवत्। न खलु विशुष्यदास्यो मोदकादिरसमनुभवति। एवं तैजसं चक्षुः गन्धादिषु मध्ये नियमेन रूपस्य व्यञ्जकत्वात् प्रदीपादिवत्। एवं वायवीयं त्वगिन्द्रियं गन्धादिषु मध्ये स्पर्शस्यैव व्यञ्जकत्वात् स्वेदोदबिन्दुशीतस्पर्शव्यञ्जकव्यजनपवनवत्। नियमग्रहणं मनोनिवृत्त्यर्थम्। गन्धादिषु मध्य इति चावधारणसिद्ध्यर्थम्, अन्यथा घ्राणादीनां गन्धत्वादिव्यञ्जकत्वेनावधारणं न स्यात्। तदेतदाह—एवं शेषेष्विति। एवं चेन्द्रियपञ्चत्वेन हस्तपाद-पायूपस्थ-वाचामिन्द्रियत्वनिषेधोऽपि सूचितः इन्द्रियलक्षणविरहात्। यच्छरीरसंयुक्तं (क)संस्कारकदोषव्यतिरिक्तं साक्षात्प्रतीतिसाधनं तदिन्द्रियमिति हीन्द्रियलक्षणम्, न चैतदस्ति हस्तादिषु। तज्ज्ञानेन्द्रियाणां लक्षणम्, इमानि कर्मेन्द्रियाणीति चेत् हन्तैषामिन्द्रियत्वलक्षणान्तरं वक्तव्यम्। शरीराश्रितमसाधारणकार्यकारीन्द्रियमिति लक्षणमिति चेत् वक्तव्यमेषामसाधारणं कार्यम्। उक्तं वचनादानविहरणोत्सर्गानन्दाः पञ्चानामिति। नन्वादानविहरणोत्सर्गास्तावद् वक्तृहस्तादिभिरपि शक्याः कर्तुम्। अपि चास्ति कण्ठहृदयामाशयपक्वाशयादीनां गिरणादितत्तदसाधारणं कार्यमिति तान्यपीन्द्रियाणि प्रसज्येरन्निति तस्माद्यत्किंचिदेतदपीति ॥ ६१ ॥

वृत्तिः

घ्राणादेः पृथिवीत्वादिमत्त्वे मानमाह—(भूतगुणविशेषोपलब्धेस्तादात्म्यम्)

भूतानां पृथिव्यादीनां ये गुणविशेषा गन्धादयः, तदुपलम्भकत्वात् कुङ्कुमगन्धाभिव्यञ्जकघृतादिदृष्टान्तेन पृथिवीत्वादिसाधनमिति भावः ॥ ५९ ॥

समाप्तमिन्द्रियनानात्वप्रकरणम् ॥ ८ ॥

(क) ख-पुस्तके 'संस्कार(क)दोष' इति मुद्रितम्।

न्यायभाष्यम्

गन्धादयः पृथिव्यादिगुणा (१)इत्युद्दिष्टम् उद्देशश्च पृथिव्यादीनामेकगुणत्वे चानेकगुणत्वे (२)च समान इत्यत आह—

(सू०)—गन्ध-रस-रूप-स्पर्श-शब्दानां स्पर्शपर्यन्ताः पृथिव्याः ॥६२॥

(सू०)—अप्-तेजो-वायूनां पूर्वं पूर्वमपोह्याऽऽकाशस्योत्तरः ॥६३॥

स्पर्शपर्यन्तानामिति विभक्तिविपरिणामः(क)। आकाशस्योत्तरः शब्दः स्पर्शपर्यन्तेभ्य

न्यायवार्त्तिकम्

गन्धादयः पृथिव्यादिगुणा इत्युद्दिष्टम्। उद्देशश्च नियोगविकल्पसमुच्चयैः समानः। तत्र नियोगः—एकैकगुणत्वम्, विकल्पः—कस्यचिदेकः कस्यचिद् द्वावित्येवमादिः, समुच्चयः—सर्वः सर्वत्र। अतो विशेषणार्थम्—

गन्ध-रस-रूप-स्पर्श-शब्दानां स्पर्शपर्यन्ताः पृथिव्याः।

अप्-तेजोवायूनां पूर्वं पूर्वमपोह्याऽऽकाशस्योत्तरः। नियमार्थे सूत्रे। चत्वारः पृथिव्याम्, एकैकशोऽपकर्ष उत्तरेषु स्पर्शपर्यन्तानामिति विभक्तिविपरिणामः। तेन किं कृतं भवति? स्पर्शपर्यन्तानां विनियुक्तानां य उत्तरः स आकाशस्येति आकाशस्योत्तरः शब्दः।

न्यायवार्त्तिकतात्पर्यटीका

क्रमप्राप्तमर्थलक्षणं परीचिक्षिषमाणोऽर्थलक्षणं (अ१, आ१, सू१४) स्मारयति—गन्धादयः पृथिव्यादिगुणा इत्युद्दिष्टमिति। लक्षितमिति वक्तव्ये संमुग्धाभिधानं सामान्यादुद्दिष्टमित्युक्तम्। तत्र परीक्षामुखं संशयमाह—उद्देशश्च नियोगेति। नियोगादीनां रूपमाह—तत्र नियोग इति। तदेवं विमृश्य नियोगसमुच्चयौ परित्यज्य विकल्पमालम्बते सूत्राभ्याम्—अतो विशेषणार्थमिति—

गन्ध—व्याः (सू० ६२)॥ अप्—रः (६३)। विशेषणार्थमिति सूत्रयोस्तात्पर्यमुक्तम्, तदेव स्फुटयति—नियमार्थे इति। उत्तरेष्वबादिष्वेकैकशोऽपकर्षो गन्धादीनां

वृत्तिः

क्रमप्राप्तार्थपरीक्षणाय सिद्धान्तसूत्रम्—(गन्ध-रस रूप-स्पर्शशब्दानां स्पर्शपर्यन्ताः पृथिव्याः अप्-तेजो-वायूनां पूर्वं पूर्वमपोह्याऽऽकाशस्योत्तरः) (ख)

---

(१) 'इत्यपदिष्टम्' इति ज-ग०। (२) 'च' इति ख-ग-ज-भा-फ-पुस्तकेषु नास्ति, वि-टि पुस्तकयोरुपलभ्यते।

(क) ६२तम-सूत्रात् स्पर्शपर्यन्तेति पदं षष्ठ्यन्ततया ६३तम-सूत्रे अनुवर्त्तनीयमिति भावः।

(ख) 'सिद्धान्तसूत्र'मित्येकवचननिर्देशेन स्वतन्त्रव्याख्यानादर्शनेन च 'गन्धरसरूपस्पर्शशब्दानां स्पर्शपर्यन्ताः पृथिव्या अप्-तेजोवायूनां पूर्वपूर्वमपोह्याऽऽकाशस्योत्तरः' इत्याकारकमेकमेव सूत्रं वृत्तिकृत्सम्मतमिति सम्भाव्यते। ततश्च वृत्तौ पुनः सूत्रसंख्याह्रासः। ज-पुस्तके तथैव मुद्रितम्।

न्यायभाष्यम्

इति। कथं (१)तर्हि तरब्निर्देशः? स्वतन्त्रविनियोगसामर्थ्यात्। तेनोत्तरशब्दस्य परार्थाभिधानं विज्ञायते। उद्देशसूत्रे (अ१, आ१, सू१४) हि स्पर्शपर्यन्तेभ्यः परः शब्द इति। (क) तन्त्रं वा स्पर्शस्य विवक्षितत्वात्—स्पर्शपर्यन्तेषु नियुक्तेषु (ख) योऽन्यस्तदुत्तरः शब्द इति॥ ६२-६३॥

न्यायवार्त्तिकम्

उत्तर इत्ययं तरब्निर्देशो न युक्तः द्वयोर्दृष्टत्वात् इह पुनः प्रकृष्टवाचित्वे सत्युत्तम इति स्यात्? (ग) नायं नस्तरब्निर्देशः, अपि तु पराभिधानमेतत्—यदुक्तं भवति पर इति तदुक्तं भवत्युत्तर इति। (घ)तन्त्रं वा स्पर्शस्य विवक्षितत्वात्—भवतु वा तरब्निर्देशः। ननूक्तमुत्तम इति प्राप्नोति? न स्पर्शस्य विवक्षितत्वात्—गन्धादिभ्यः परः स्पर्शः स्पर्शादयं पर इति यावदुक्तं भवति तावदुक्तं भवत्युत्तर इति॥ ६२-६३॥

न्यायवार्त्तिकतात्पर्यटीका

स्पर्शपर्यन्तानाम्। तथा हि चतुर्षु गन्धापकर्षः अप्स्वपकृष्टस्य गन्धस्य पुनरुद्भवो नास्तीति अद्भ्य उत्तरे तेजसि रसस्यापकर्षः। एवमपकृष्टयोश्च गन्धरसयोः पुनरुद्भवो नास्तीति तेजउत्तरे वायौ रूपापकर्ष इति। एवमपकृष्टानां गन्ध-रस-रूपाणां पुनरुद्भवो नास्तीति वायोरुत्तरस्मिन्नाकाशे स्पर्शस्यापकर्षः। तदिदमुक्तम्—एकैकश इति। अव्युत्पन्नोऽयमुत्तर-शब्दोऽनन्तरवचनः तेन बहूनां निर्धारणेऽप्युपपन्नार्थ इति। भवतु वा तरबनिर्देशः तथाऽपि न दोष इत्याह—भवत्विति। (ङ) क्वचित्पाठस्तन्त्रं वेति यथाभाष्यं स्फुटार्थ एव॥ ६२-६३॥

वृत्तिः

स्पर्शपर्यन्तेषु मध्ये पूर्वं पूर्वं त्यक्त्वा अप्तेजोवायूनां गुणा ज्ञातव्याः, उत्तरः शब्द आकाशस्य गुणः, तथा च स्पर्शपर्यन्ताः पृथिव्याः, रस-रूप-स्पर्शा जलस्य, रूप-स्पर्शौ तेजसः, स्पर्शो वायोः, शब्द आकाशस्य॥ ६०॥

---

(१) 'तर्हि' इति वि-टि पु० नास्ति।

(क) तन्त्रं वेति। 'एकयोक्त्या बोधनं तन्त्र'मिति भाष्यचन्द्रे रघूत्तमः। 'तरब् वा' इति तु युक्तः पाठः, तद्बीजं (ङ)टिप्पन्यां द्रष्टव्यम्। (ख) 'योऽन्यः' इति फ-पु० पाठः साधीयान्। (ग) 'नायं (नो) तरब् निर्देशः' इति क-वार्त्तिके, 'नायं नोत्तरब्निर्देशः' इति च ख-वार्त्तिके मुद्रितम्। समीचीनत्वानुरोधेन तु एवं गृहीतम्। (घ) 'तरब् वा' इति पाठो युक्तः। (ङ) भाष्य-वार्त्तिक-तात्पर्यटीकासु सर्वत्र 'तन्त्रं वा' इति गड्डलिकाप्रवाहन्यायेन लिपिकृत्प्रमादादागतम्। 'तरब् वा' इत्येव पाठः। अत्र टीकाकृतां 'क्वचित् पाठः' इत्युक्तेस्तु 'तरब् वा स्पर्शस्य विवक्षितत्वात्' इति भाष्यग्रन्थमधृत्वैव वार्त्तिककृता भवतु वा तरब्निर्देशः इत्युक्तम्, पुस्तकान्तरे तु तरब्वेत्यादिभाष्यमपि दृश्यत इत्यभिप्रायः। एवमेव 'स्फुटार्थः' इत्यपि सङ्गच्छते। तन्त्रं कुटुम्बकृत्ये स्यात् सिद्धान्ते चौषधोत्तमे। प्रधाने तन्तुवाये च शास्त्रभेदे परिच्छदे। श्रुतिशाखान्तरे हेतावुभयार्थप्रयोजके। 'इतिकर्त्तव्यतायां च' इति कोषानुसारेण सिद्धान्तार्थमाश्रित्य 'तरब्विधायकव्याकरण-सिद्धान्तो वा' इति व्याख्यया 'तन्त्रं वा' इति यथाश्रुतपरिरक्षणे तु 'स्फुटार्थः' इत्यसङ्गतमिति ध्येयम्।

(सू०)—न सर्वगुणानुपलब्धेः ॥ ६४ ॥

न्यायभाष्यम्

नायं गुणनियोगः साधुः । कस्मात्? यस्य भूतस्य ये गुणा न ते तदात्मकेनेन्द्रियेण सर्वे उपलभ्यन्ते । पार्थिवेन हि घ्राणेन स्पर्शपर्यन्ता न गृह्यन्ते (१)गन्ध एव एको गृह्यते(१*) एवं शेषेष्वपीति ॥ ६४ ॥

कथं तर्हीमे गुणा विनियोक्तव्या इति ?

(सू०)—(२)एकैकश्येनोत्तरोत्तरगुणसद्भावादुत्तरोत्तराणां तदनुपलब्धिः ॥ ६५ ॥

(क)गन्धादीनामेकैको यथाक्रमं पृथिव्यादीनामेकैकस्य गुणः, अतः 'तदनुपलब्धिः'

न्यायवार्त्तिकम्

न सर्वगुणानुपलब्धेः । नायं गुणेषु विनियोगः साधुः । कस्मात्? पार्थिवेन घ्राणेन पार्थिवानां गन्धादीनामुपलम्भप्रसङ्गात् । एवमाप्येन रसनेन त्रयाणाम्, तैजसेन चक्षुषा द्वयोरिति ॥ ६४ ॥

न्यायवार्त्तिकतात्पर्यटीका

पूर्वपक्षी नियोगपक्षमुत्थापयति—

न स—ब्धेः (सू० ६४)॥ पृथिव्यादिप्रकृतीनां घ्राणादीनां गन्धादिप्रतिव्यक्तिनियम एवमुपपद्यते यदि गन्धमात्रगुणा पृथिवी रसमात्रगुणा आप इत्यादि, न त्वन्यथा । अन्यथा तु पार्थिवेन घ्राणेन गन्धवद् रस-रूप-स्पर्शा अपि व्यज्येरन् अविशेषादित्यर्थः ॥ ६४ ॥

वृत्तिः

आक्षिपति—(न सर्वगुणानुपलब्धेः)

उक्तो गुणनियमो न युक्तः, पृथिव्यादिगुणत्वेनाभिमतानां सर्वेषां घ्राणादिग्राह्यत्वाभावान्न पार्थिवत्वादिकम्, घ्राणेन पृथिव्या रसाद्यग्रहणात् । बहिरिन्द्रियाणां स्वप्रकृतिवृत्तियोग्याशेषविशेषगुणग्राहकत्वनियमो भज्येतेति भावः ॥ ६१ ॥

---

(१) अयं भागः वि-पु० नास्ति । (२) 'एककश्येनोत्त-'—इति टि० । एकैकस्येवोत्त'—इति ज० ।

(क) आकाशादीनामेकैकगुणत्वमुक्तं महाभारते शान्तिपर्वणि मोक्षधर्मानुपर्वणि २४७तमे अध्याये—

शब्दः श्रोत्रं तथा खानि त्रयमाकाशसम्भवम् । प्राणश्चेष्टा तथा स्पर्श एते वायुगुणास्त्रयः ॥

रूपं चक्षुर्विपाकश्च त्रिधा ज्योतिर्विधीयते । रसोऽथ रसनं स्नेहो गुणास्त्वेते त्रयोऽम्भसः ॥

घ्रेयं घ्राणं शरीरं च भूमेरेते गुणास्त्रयः । एतेषामिन्द्रियग्रामैर्व्याख्यातः पाञ्चभौतिकः ॥

वायोः स्पर्शो रसोऽद्भ्यश्च ज्योतिषो रूपमुच्यते । आकाशप्रभवः शब्दो गन्धो भूमिगुणः स्मृतः ॥ इति ।

न्यायभाष्यम्

तेषां तयोः तस्य चानुपलब्धिः—घ्राणेन रस-रूप-स्पर्शानां रसनेन रूप-स्पर्शयोः चक्षुषा स्पर्शस्येति ।

कथं तर्ह्यनेकगुणानि भूतानि गृह्यन्त इति ?

(क)संसर्गाच्चानेकगुणग्रहणम् । अबादिसंसर्गाच्च पृथिव्यां रसादयो गृह्यन्ते एवं शेषेष्वपीति ॥ ६५ ॥

न्यायवार्त्तिकम्

कथं तर्हीमे गुणा विनियोक्तव्याः ?

एकैकश्येनोत्तरोत्तरगुणसद्भावादुत्तरोत्तराणां तदनुपलब्धिः । यस्मादेकैकगुणानि भूतानि (१) तस्मादेकगुणग्रहणमिति । एकैकश्येनेति सौत्रो निर्देशः ।

कथं तर्ह्यनेकगुणानि भूतानि गृह्यन्त इति । संसर्गात्त्वनेकगुणग्रहणमिति । संसृष्टाऽबादिभिः पृथिवी तस्माद् (२)अनेकगुणा गृह्यत इति । एवं शेषेषु ॥ ६९ ॥

न्यायवार्त्तिकतात्पर्यटीका

एकै—ब्धिः (सू० ६५) ॥ (ख)

वृत्तिः

इत्थं च पृथिव्यादावुपलभ्यमानानां रसादीनां का गतिरित्यत (ग)स्वमतमाह—

((३)एकैकश्येनोत्तरोत्तरगुणसद्भावादुत्तरोत्तराणां तदनुपलब्धिः)

उत्तरोत्तराणाम् अबादीनाम्, (४)एकैकश्येन एकैकक्रमेण, उत्तरोत्तरगुणसद्भावात् रसादिगुणसद्भावात्, तदनुपलब्धिः, तेषां रसादीनां घ्राणादिनाऽनुपलब्धिरित्यर्थः ॥६२॥

---

(१) 'तस्मादेकैकगुणग्रहणमिति' इति क-ख-धृतपाठान्तरम् । (२) 'अनेकगुणानि गृह्यन्ते' इति क-ख-धृतपाठान्तरम् । (३) 'एकैकस्यैवो-' इति भ० । (४) एकैकस्यैव इति भ० ।

(क) 'संसर्गाच्चानेकगुणग्रहणम्' इति वाक्यं ज-ग-पुस्तकयोः पारमर्षसूत्ररूपेण मुद्रितमपि न्यायसूचीनिबन्धे अगृहीतत्वाद् वृत्तिकारादिभिरव्याख्यातत्वाच्च भाष्यकारवाक्यतयैव गृहीतम् । यत्तु नेति त्रिसूचीं प्रत्याचष्टे इत्युत्तरभाष्यग्रन्थदर्शनेन 'न सर्वगुणोपलब्धेः' एकैकश्येनोत्तरोत्तरगुणसद्भावादुत्तरोत्तराणां तदनुपलब्धिः 'विष्टं ह्यपरं परेण' इति सूत्रत्रयस्यैव निरसनीयतया अन्तराले 'संसर्गाच्चानेकगुणग्रहणम्' इत्यस्य महर्षिसूत्रत्वस्वीकारे 'त्रिसूत्री'मित्यत्र चतुःसूत्रीमित्येव भाष्यकृता वक्तुमुचितं स्यादिति संसर्गाच्चानेकगुणग्रहणम् इत्येतद् भाष्यकृद्वाक्यमेवेति मतं तन्न शोभनं भूतानामेकैकविशिष्टगुणवाददूषणपरेण 'न पार्थिवाप्ययोः प्रत्यक्षत्वात्' इति सूत्रेण 'न सर्वगुणानुपलब्धेः' इति सूत्रोक्तापत्तेर्निरसितुमशक्यत्वात्, प्रत्युत तत्परित्यागेन निरसनीयसूत्रत्रयानुसन्धाने अगतिकतया 'संसर्गाच्चानेकगुणग्रहणम्' इत्यस्यैव महर्षिसूत्रत्वाभ्युपगमावश्यकत्वाच्च । 'न सर्वगुणानुपलब्धेः' इत्युक्तापत्तिश्च 'पूर्वं पूर्वं' इत्यादिसूत्रेण महर्षिणा स्वयमेव समाहितेति तदवतरणिकायां भाष्यकृता स्पष्टमुक्तं ततस्त्रिसूत्र्यां तदन्तर्भावोऽपि न भाष्यकारसम्मत इति सर्वं चतुरस्रम् ।

(ख) ६५तम-सूत्रे तात्पर्यटीका नोपलभ्यते ।

(ग) स्वमतमिति पूर्वपक्ष्येकदेशिमतमित्यर्थः एतन्मतस्य 'न पार्थिवाप्ययो'रित्यादिसिद्धान्तसूत्रेण निरसनीयत्वादिति बोध्यम् ।

न्यायभाष्यम्

नियमस्तर्हि न प्राप्नोति संसर्गस्यानियमात् (क)चतुर्गुणा पृथिवी त्रिगुणा आपो द्विगुणं तेज एकगुणो वायुरिति। नियमश्चोपपद्यते। कथम्?

(सू०)—विष्टं ह्यपरं परेण ॥ ६६ ॥

पृथिव्यादीनां पूर्वपूर्वम्(१)उत्तरेणोत्तरेण (२)विष्टमतः (३)संसर्गनियम इति। (ख)तच्चैतद् भूतसृष्टौ वेदितव्यं नैतर्हीति ॥ ६६ ॥

न्यायवार्त्तिकम्

संसर्गस्त्वप्रतिषिद्धो मिथः पञ्चानां चेति। नियमस्तर्हि न प्राप्नोति पृथिव्यां चत्वारो नेतरेषु संसर्गस्यानियमादिति? न न प्राप्नोति। (४) कस्मात्?—

विष्टं ह्यपरं परेण। विष्टमबादिना परेणापरम्, (ग)नापरेण पृथिव्यादिना परमबादि। विष्टत्वं संयोगविशेषः ॥ ६६ ॥

न्यायवार्त्तिकतात्पर्यटीका

विष्टं—ण (सू० ६६)॥ संसर्गस्य द्व्याश्रयत्वेऽपि न द्वये समानत्वम्, यथाऽग्निधूमयोः संबन्धोऽन्यथाऽग्नेः, स हि व्यापकः; धूमे धूमध्वजस्य भाव एव नाभावः। धूमस्तु व्याप्यः तस्य वह्नावेव भावो नान्यत्रेति। एवम् अपरं पृथिव्यादि परेण अबादिना विष्टं व्याप्तम् नाबादिमन्तरेणास्ति पृथिवी। तेन पृथिव्यामबादिगुणानां रसादीनां नियमेनोपलम्भो न त्वबादिषु पृथिवीगुणानाम्। एवमप्स्वनलादिगुणो व्याख्यातः। विष्टत्वं संयोगविशेषो व्याप्तिरित्यर्थः। भाष्यम्—तच्चैतद्भूतसृष्टाविति। भूतसृष्टिप्रतिपादकेषु पुराणेषु। नैतर्हीति। नेदानीमननुभवादित्यर्थः ॥ ६६ ॥

---

(१) 'उत्तरोत्तरेण' इति फ०। (२) 'आविष्टम्' इति वि०। (३) 'संसर्गान्नियमः' इति भा०, 'संसर्गनियमः' इति ज-ग०। (४) 'कथं यस्मात्' इति क-ख-पुस्तपाठान्तरम्।

(क) कीदृशो नियमः यस्याप्राप्तिराशङ्क्यते इत्याह चतुरित्यादि।

(ख) तच्चैतदिति। 'तत् पृथिव्यादीनां पूर्वपूर्वस्य उत्तरोत्तरेण वेषणम् अनुप्रवेश इति यावत् भूतसृष्टौ भूतानामाद्यसृष्टिकाल एव संवृत्तम्, नैतर्हि नेदानीं तथाऽननुभवादित्यपि व्याख्यानं सम्भवति। तात्पर्यटीकाकृता तु भूतसृष्टिप्रतिपादकेषु पुराणेष्विति व्याख्यातम्। तादृशपुराणवचनं तु यत्नेनानुसन्धेयम् ॥

(ग) नापरेणेति। एतेन—

द्विधा विधाय चैकैकं चतुर्धा प्रथमं पुनः।
स्वस्वेतरद्वितीयांशैर्योजनात् पञ्च पञ्च ते॥

इत्युक्तदिशा वेदान्तोक्तपञ्चीकरणमेव सूत्रकृता उपन्यस्तमिति भ्रमो दूरापेतः।

(सू०)—न पार्थिवाप्ययोः प्रत्यक्षत्वात् ॥ ६७ ॥

न्यायभाष्यम्

नेति (क) त्रिसूत्रीं प्रत्याचष्टे । कस्मात्? पार्थिवस्य द्रव्यस्याऽऽप्यस्य च प्रत्यक्षत्वात्। (१)महत्त्वानेकद्रव्यत्वाद् रूपाच्चोपलब्धिरिति तैजसमेव द्रव्यं प्रत्यक्षं स्यात् न पार्थिवमाप्यं वा रूपाभावात्। तैजसवत्तु पार्थिवाप्ययोः प्रत्यक्षत्वात् न संसर्गादनेकगुणग्रहणं भूतानामिति। (२)भूतान्तररूपकृतं च पार्थिवाप्ययोः प्रत्यक्षत्वं ब्रुवतः प्रत्यक्षो वायुः प्रसज्यते नियमे वा कारणमुच्यतामिति।

न्यायवार्त्तिकम्

न पार्थिवाप्ययोः (३)प्रत्यक्षत्वात् इति।

नेति त्रिसूत्रीमनन्तरोक्तामनेन प्रत्याचष्टे। यस्यैकैकगुणानि भूतानि तस्य तैजसमेव द्रव्यं

न्यायवार्त्तिकतात्पर्यटीका

सिद्धान्ती विकल्पबाधेतद् दूषयति—

न पा—त्वात् (सू० ६७)॥ त्रिविधं हि द्रव्यं चाक्षुषमिष्यते पार्थिवमाप्यं तैजसं च। तत्र रूपवत्त्वेन तैजसमेव चाक्षुषं स्याद् (ख) नेतरदरूपवत्त्वात्। न च रूपिद्रव्यसंसर्गाच्चाक्षुषत्वमरूपयोरपि पार्थिवाप्ययोरिति वाच्यं नभोनभस्वतोरपि चाक्षुषत्वप्रसङ्गात्। अस्ति हि रूपवता तेजसा तयोः संयोग इति।

वृत्तिः

तर्हि कथं पृथिव्यादौ रसादिग्रहणम्? तत्राऽऽह—(विष्टं ह्यपरं परेण)

अपरं पृथिव्यादि, परेण जलादिना, हि यस्मात्, विष्टं सम्बद्धम्। तथा च पृथिव्याद्यवच्छिन्नजलादिना रसनासंयोगाद्रसादिग्रह इति भावः ॥ ६३ ॥

सिद्धान्तसूत्रम्—(न पार्थिवाप्ययोः प्रत्यक्षत्वात्)

उक्तो गुणनियमो न युक्तः। कुतः? पार्थिवस्याऽऽप्यस्य च द्रव्यस्य प्रत्यक्षत्वाद् रूपस्पर्शसिद्धेः, तस्य रूपस्पर्शशून्यत्वे चक्षुषा त्वचा च ग्रहणं न स्यात्, रूपादेश्च क्वचित्साक्षात्सम्बन्धेन क्वचिच्च परम्परया हेतुत्वे गौरवमिति भावः ॥ ६४ ॥

---

(१) 'महत्त्वानेकद्रव्यवत्त्वाद्' फ०। (२) 'भूतान्तरकृतम्' क०। (३) 'प्रत्यक्षसिद्धत्वात्' इति क-ख-धृतपाठान्तरम्।

(क) नेति त्रिसूत्रीमिति, नेतीत्यादिना सूत्रद्वयेनेत्यर्थः, त्रिसूत्रीमिति 'न सर्वगुणानुपलब्धेरि'त्यादि सूत्रत्रयम्। तत्र अव्यवहितं सूत्रद्वयं 'न पार्थिवे'त्यादिसूत्रेण निराकृतम्, न सर्वगुणानुपलब्धेरित्येतत्तु परसूत्रेण निराकरिष्यते। व्यक्तीभविष्यति चेदं भाष्ये। ईदृशव्याख्यायां बीजं 'संसर्गाच्चानेकगुणग्रहणमित्यत्र' द्रष्टव्यम्। एवं वार्त्तिके 'अनेने'त्यस्यापि सूत्रद्वयेनेत्यर्थः कथञ्चित् करणीयः। वस्तुतः 'संसर्गाच्चानेकगुणग्रहण'मित्यस्य महर्षिसूत्रत्वाभ्युपगमो युक्तः, तथा च न काप्यनुपपत्तिः। तत्पक्षस्तु न्यायसूचीनिबन्धाप्रामाण्यभिया अस्माभिर्ग्रहीतुं न शक्यते इत्यसकृदावेद्यते।

(ख) 'नेतरद् रूपवत्त्वात्' इति क-ख-तात्पर्यमुद्रितः पाठः प्रामादिकः।

न्यायभाष्यम्

रसयोर्वा पार्थिवाप्ययोः प्रत्यक्षत्वात्—पार्थिवो रसः षड्विधः, आप्यो मधुर एव ; न चैतत्संसर्गाद्भवितुमर्हति। रूपयोर्वा पार्थिवाप्ययोः प्रत्यक्षत्वात् तैजसरूपानुगृहीतयोः, संसर्गे हि व्यञ्जकमेव रूपं न व्यङ्ग्यमस्तीति। एकानेकविधत्वे च पार्थिवाप्ययोः प्रत्यक्षत्वाद् रूपयोः। पार्थिवं हरित-लोहित-पीताद्यनेकविधं रूपम्, आप्यं तु शुक्लम-प्रकाशकम्, न चैतदेकगुणानां संसर्गे (१)सत्युपपद्यते इति। उदाहरणमात्रं चैतत्, अतः परं प्रपञ्चः।

स्पर्शयोर्वा पार्थिवतैजसयोः प्रत्यक्षत्वात्। पार्थिवोऽनुष्णाशीतः स्पर्शः, उष्ण-स्तैजसः प्रत्यक्षः, न चैतदेकगुणानामनुष्णाशीतस्पर्शेन वायुना संसर्गेणोपपद्यते इति।

अथवा पार्थिवाप्ययोर्द्रव्ययोर्व्यवस्थितगुणयोः प्रत्यक्षत्वात्। चतुर्गुणं पार्थिवं द्रव्यं त्रिगुणमाप्यं प्रत्यक्षम्, तेन तत्कारणमनुमीयते (२) तथाभूतमिति। तस्य कार्यं लिङ्गं कारणभावाद्धि कार्यभाव इति। एवं (क) तैजसवायव्ययोर्द्रव्ययोः प्रत्यक्षत्वाद् गुणव्यवस्थायाः तत्कारणे द्रव्ये व्यवस्थानुमानमिति।

दृष्टश्च विवेकः पार्थिवाप्ययोः प्रत्यक्षत्वात्। पार्थिवं द्रव्यमबादिभिर्वियुक्तं प्रत्यक्षतो

न्यायवार्त्तिकम्

रूपवत्त्वात् प्रत्यक्षं प्राप्नोति न पार्थिवमाप्यं वा अरूपत्वात्। अस्य सूत्रस्य विकल्पतोऽनेकः सूत्रार्थः कल्प्यत इति भाष्ये वर्णितम्॥ ६७॥

न्यायवार्त्तिकतात्पर्यटीका

अथ वा पार्थिवाप्यसंबन्धिनो रसभेदस्य रूपभेदस्य चैकानेकविधत्वेन प्रत्यक्षत्वादित्याह भाष्यकारः—रसयोर्वेत्यादिना उपपद्यत इत्यन्तेन।

पुनरस्यैव व्याख्यानान्तरमाह—स्पर्शयोरिति। पार्थिवाप्ययोरित्यस्योदाहरणमात्रार्थत्वात् पार्थिवतैजसयोरित्यपि व्याख्यानमुक्तम्।

व्याख्यानान्तरमाह—अथवेति। कार्यस्य व्यवस्थितगुणस्य दर्शनात् कारणमपि व्यवस्थितगुणमनुमीयते। न च सर्वत्र संसर्गो येनान्यस्य गुणोऽन्यत्रोपलभ्यते विवेकस्या-संसर्गस्य दर्शनात्।

व्याख्यानान्तरमाह—दृष्टश्चेति। चो विकल्पार्थः।

---

(१) 'सत्युपलभ्यते' इति ल-ग-ज-झा०। (२) 'तथागुणम्' इति झा०, 'तथागुणम्' इति त्रि०।

(क) तैजसवायव्ययोरिति तैजसे वायौ च तद्गुणयो रूपस्पर्शयोः प्रत्यक्षत्वादित्यर्थः। तेन न 'अनुद्भूतरूपस्पर्शस्य द्रव्यस्य प्रत्यक्षतोऽनुपलब्धिः' (अ० ३ आ० १ सू० ४० भाष्यम् पृ० ९६९) इति स्वोक्तेन न वा वैशेषिकमतेन विरोधः। तार्किकरक्षाकृद्दीधितिकारौ तु वायोस्त्वचा प्रत्यक्षमङ्गीकुरुतः। जगदीशप्रभृतयस्तु नव्याः प्राचीनं वायोरतीन्द्रियत्वमतमेव स्वीकुर्वन्ति।

न्यायभाष्यम्

गृह्यते, आप्यं च पराभ्याम्, तैजसं च वायुना, न चैकैकगुणं गृह्यत इति। निरनुमानं तु 'विष्टं ह्यपरं परेणे'त्येतदिति। नात्र लिङ्गमनुमापकं गृह्यत इति येनैतदेवं प्रतिपद्येमहि।

यच्चोक्तं विष्टं ह्यपरं परेणेति भूतसृष्टौ वेदितव्यं न साम्प्रतमिति नियमकारणाभावादयुक्तम्। दृष्टं च साम्प्रतमपरं परेण विष्टमिति, वायुना च विष्टं तेज इति। विष्टत्वं संयोगः, स च द्वयोः समानः, वायुना च विष्टत्वात् स्पर्शवत्तेजो न तु तेजसा विष्टत्वाद् रूपवान् वायुरिति नियमकारणं नास्तीति। दृष्टं च तैजसेन स्पर्शेन वायव्यस्य स्पर्शस्याभिभवादग्रहणमिति, न च तेनैव तस्याभिभव इति॥ ६७॥

तदेवं न्यायविरुद्धं प्रवादं प्रतिषिध्य 'न सर्वगुणानुपलब्धे'रिति चोदितं समाधीयते—

(सू०)—पूर्वपूर्वगुणोत्कर्षात् तत्तत् प्रधानम् (क)॥ ६८॥

तस्मान्न सर्वगुणोपलब्धिः, घ्राणादीनां पूर्वं पूर्वं गन्धादेर्गुणस्योत्कर्षात् तत्तत्प्रधानम्। का प्रधानता? विषयग्राहकत्वम्। को गुणोत्कर्षः? अभिव्यक्तौ समर्थत्वम्। यथा

न्यायवार्त्तिकम्

तदेवं न्यायविरुद्धं प्रवादं प्रतिषिध्य न सर्वगुणानुपलब्धेरिति यद् देशितं तत्समाधीयते—

पूर्वपूर्वगुणोत्कर्षात् तत्तत् प्रधानम्। तस्मान्न सर्वगुणोपलब्धिः—घ्राणादीना-

न्यायवार्त्तिकतात्पर्यटीका

नियोगस्तु निरनुमान इत्याह—निरनुमानं तु विष्टं ह्यपरं परेणेत्येतदिति।

(ख) यच्चोक्तं भूतसृष्टौ वेदितव्यं नैतर्हीति। तद् दूषयति—नियमकारणाभावादिति। नियमो गन्ध एव पृथिव्यामित्येवमादिः। तस्य कारणं प्रमाणं नास्ति तद्बाधकस्यैव प्रमाणस्योक्तत्वात्। तस्माद्भूतसृष्टिः कथंचिदुपचारतो व्याख्येयेति। विष्टत्वं संयोगः। स च द्वयोः समान इति, अन्यगुणो यदन्यत्रोपलभ्यते तत् किं संयोगाद् आहोस्विद् व्याप्तेः? यदि व्याप्तेः, नायोगोलके वह्निसंपृक्ते वह्निगुणा गृह्येरन् तयोर्व्याप्यव्यापकभावाभावात्, धूमे च गगनतलावलम्बिनि भूमिष्ठेन वह्निना व्याप्तेरग्नेर्गुणा गृह्येरन् तयोर्व्याप्यव्यापकभावात्; तस्मादन्यसंयोगो हेतुः, स चोभयोरविशिष्ट इति तेजसा संयुक्तस्य वायोरपि रूपवत्त्वेन चाक्षुषत्वप्रसङ्ग इति॥ ६७॥

पूर्व—नम् (सू० ६८)॥ प्रधानतापदार्थं व्याचष्टे भाष्यकारः—विषयग्राहकत्वम्. गन्धादिर्विषयः। तदेव विषयग्राहकत्वं कुतस्तत्राऽऽह—गुणोत्कर्षात् तदभिव्यक्तिसामर्थ्यात्।

(क) 'पूर्वं पूर्वं गुणोत्कर्षात्' फ-पुस्तके पाठः। तत्पाठग्रहणबीजं तत्रैव द्रष्टव्यम्।

(ख) भाष्ये अचरगतो विसंवादो न त्वर्थगतोऽपीति द्रष्टव्यम्।

न्यायभाष्यम्

बाह्यानां पार्थिवाप्यतैजसानां द्रव्याणां चतुर्गुण-त्रिगुण-द्विगुणानां न सर्वगुणव्यञ्जकत्वं गन्ध-रस-रूपोत्कर्षात्तु यथाक्रमं गन्ध-रस-रूपव्यञ्जकत्वम्, एवं घ्राण-रसन-चक्षुषां चतुर्गुणत्रिगुण-द्विगुणानां न सर्वगुणग्राहकत्वम्, गन्ध-रस-रूपोत्कर्षात्तु यथाक्रमं गन्ध-रस-रूपग्राहकत्वम्। तस्माद् घ्राणादिभिर्न सर्वेषां गुणानामुपलब्धिरिति।

यस्तु प्रतिजानीते गन्धगुणत्वाद् घ्राणं गन्धस्य ग्राहकमेवं रसनादिष्वपीति, तस्य यथागुणयोगं घ्राणादिभिर्गुणग्रहणं प्रसज्यत इति ॥ ६८ ॥

न्यायवार्त्तिकम्

मिन्द्रियाणां पूर्वं पूर्वमिन्द्रियं (१) परस्मात् प्रधानम्। का प्रधानता? चतुर्गुणत्वादिः। को गुणोत्कर्षः? स्वगुणाभिव्यक्तिसामर्थ्यम्—येन गुणेन यद्द्रव्यमुत्कृष्यते स तज्जातीयाभिव्यञ्जकत्वादुत्कृष्टो भवति, यथा बाह्यानां द्रव्याणामिति। अस्ति चेन्द्रियाणामपि स्वगुणाभिव्यक्ति-

न्यायवार्त्तिकतात्पर्यटीका

विषयग्राहकत्वं चेत्प्राधान्यम्, तत् सर्वेषामेवेन्द्रियाणां विषयग्राहकत्वादित्याशयवान् वार्त्तिककारो भाष्यकारीयं व्याख्यानममृष्यमाणः पृच्छति—का प्रधानता। स्वमतेनोत्तरमाह—चतुर्गुणत्वादिरिति। एतदुक्तं भवति—यस्माच्चतुर्गुणत्वेन पार्थिवं घ्राणं रसनादिभ्य आप्यादिभ्यः प्रधानं तस्मादस्यागन्धवत्त्वं नास्ति येन गन्धं न गृह्णीयात्। नन्वेवं रसवत्त्वादिकमप्यस्ति घ्राणस्येति रसादिकमपि गृह्णीयादत उक्तम्—गुणोत्कर्षादिति। सर्वेषां समवायाविशेषेऽपि गन्धस्यैव घ्राण उत्कर्ष इति गन्धमेव गृह्णाति, तेनागन्धवत्त्वनिषेधपरं प्राधान्याभिधानं न पुनर्गन्धग्रहणे गन्धवत्त्वं प्रयोजकमपि तु गन्धस्योत्कर्ष इति सिद्धम्। तत्रोत्कर्षपदार्थं पृच्छति वार्त्तिककारः—को गुणोत्कर्षः। उत्तरम्—स्वगुणाभिव्यक्तिसामर्थ्यम्, स्वो गुणो घ्राणस्य गन्धः तज्जातीयश्चन्दनादिसमवेतोऽपि गन्धः स्व इत्युच्यते; न पुनः स्वगुणमेवाभिव्यनक्ति घ्राणम्, घ्राणसमवेतस्य हि गन्धस्यादृष्टवशात्तादृशो निर्माणभेदो येन सजातीयं चन्दनादिसमवेतं गन्धमभिव्यनक्ति यथा मृगमदादिगन्धं पार्थिवद्रव्यान्तरसमवेतो गन्ध इति। अत एवाऽऽह—येन गुणेन यद् द्रव्यमुत्कृष्यते स तज्जातीयाभिव्यञ्जकत्वादुत्कृष्टो भवति। तस्मिन् द्रव्य इति

वृत्तिः

रसादेः पृथिव्यादिगुणत्वे घ्राणादिनाऽपि तद्ग्रहणप्रसङ्ग इत्यत्र नियामकमाह—(पूर्वपूर्वगुणोत्कर्षात्तत्तत्प्रधानम्)

पूर्वपूर्वं घ्राणादि तत्तत्प्रधानं गन्धादिप्रधानम्। प्राधान्ये वीजमाह—गुणोत्कर्षात्,

(१) 'परस्मात् परस्मात्' इति ख०।

न्यायभाष्यम्

किंकृतं पुनर्व्यवस्थानम्—किञ्चित् पार्थिवमिन्द्रियं न सर्वाणि, कानिचिदाप्य-तैजसवायव्यानि इन्द्रियाणि न सर्वाणीति ?

(सू०)—तद्व्यवस्थानं तु भूयस्त्वात् ॥ ६९ ॥

अर्थनिर्वृत्तिसमर्थस्य प्रविभक्तस्य द्रव्यस्य संसर्गः पुरुषसंस्कारकारितो भूयस्त्वम् । दृष्टो हि प्रकर्षे भूयस्त्वशब्दः, यथा प्रकृष्टो विषयो भूयानित्युच्यते । यथा पृथगर्थ-क्रियासमर्थानि पुरुषसंस्कारवशाद् विषौषधि-मणिप्रभृतीनि द्रव्याणि निर्वर्त्यन्ते, न सर्वं सर्वार्थम् ; एवं पृथग्विषयग्रहणसमर्थानि घ्राणादीनि निर्वर्त्यन्ते न सर्वविषयग्रहण-समर्थानीति ॥ ६९ ॥

न्यायवार्त्तिकम्

नियमः । तस्मान्न (१) सर्वगुणोपलब्धिः । यः पुनर्गन्धगुणत्वाद् घ्राणं गन्धग्राहकमिति प्रति-जानीते तस्य सर्वगुणोपलब्धिप्रसङ्गः ॥ ६८ ॥

कस्मात् पुनर्न सर्वं पार्थिवं घ्राणमिति ?

तद्व्यवस्थानं तु भूयस्त्वात् । व्यवस्थानियमज्ञापनार्थम् 'तद्व्यवस्थानं तु भूयस्त्वा-'दिति सूत्रम् । किं पुनरिदं भूयस्त्वम् ? अर्थनिर्वृत्तिसमर्थस्य प्रविभक्तस्य द्रव्यस्य संसर्गः पुरुष-संस्कारकारितो भूयस्त्वम्, दृष्टो हि (२)प्रकर्षे भूयस्त्वशब्दः, यथा लोके प्रकृष्टो विषयो भूयानित्युच्यते । यथा च पृथगर्थक्रियासमर्थानि पुरुषसंस्कारोपग्रहाद् विषौषधिमणिप्रभृतीनि द्रव्याणि निर्वर्त्यन्त इति ॥ ६९ ॥

न्यायवार्त्तिकतात्पर्यटीका

शेषः । यः पुनर्गन्धगुणत्वादिति, गन्धमात्रगुणत्वादेव घ्राणं गन्धस्य व्यञ्जकं न तु गन्धस्योत्-कर्षादित्यर्थः । तस्य वादिनः सर्वेषामेव पार्थिवानां गुणानामुपलब्धिप्रसङ्गः घ्राणग्राह्यत्व-प्रसङ्ग इत्यर्थः ॥ ६८ ॥

ननु भवतोऽपि कुतो व्यवस्थितिरिति सूत्रमवतारयितुं पृच्छति—कस्मात्पुनरिति—

तद्व्य—स्त्वात् (सू० ६९) ॥ अर्थनिर्वृत्तीति, अर्थः पुरुषार्थः । प्रविभक्तस्येति, इतरेभ्यो विशिष्टस्य । संस्कारकारित इति, अदृष्टकारित इति ॥ ६९ ॥

वृत्तिः

गुणस्य गन्धादेरुत्कर्षात् तद्व्यवस्थापकत्वात् । तथा च गन्धादिषु मध्ये स्वव्यव-स्थापकगुणस्यैव ग्राहकत्वं घ्राणादीनामिति ॥ ६५ ॥

---

(१) 'सर्वगुणोपलब्धिप्रसङ्गः' इति क-ख-धृतपाठान्तरम् ।
(२) 'भूयस्त्वं प्रकर्षशब्दः' इति क-ख-धृतपाठान्तरम् ।

न्यायभाष्यम्

स्वगुणान्नोपलभन्ते इन्द्रियाणि। कस्मादिति चेत्?

(सू०)—सगुणानामिन्द्रियभावात् ॥ ७० ॥

स्वान् गन्धादीन् नोपलभन्ते घ्राणादीनि। केन कारणेनेति चेत्? (१) स्वगुणैः सह घ्राणादीनामिन्द्रियभावात्। घ्राणं स्वेन गन्धेन समानार्थकारिणा सह बाह्यं गन्धं गृह्णाति तस्य स्वगन्धग्रहणं सहकारिवैकल्यान्न भवति, एवं शेषाणामपि ॥ ७० ॥

यदि पुनर्गन्धः सहकारी च स्याद् घ्राणस्य (२)ग्राह्यश्चेत्यत आह—

(सू०)—तेनैव तस्याग्रहणाच्च ॥ ७१ ॥

न्यायवार्त्तिकम्

स्वगुणान्नोपलभन्त इन्द्रियाणि। कस्मादिति चेत्—केन कारणेन स्वानि गन्धादीनि इन्द्रियाणि नोपलभन्त इति?

सगुणानामिन्द्रियभावात्। सह गुणेनेन्द्रियं भवति, निर्गुणं तु नेन्द्रियमतो न गृह्णाति ॥ ७० ॥

यदि पुनरिन्द्रियस्य सहकारी च गन्धः स्याद् ग्राह्यश्चेति?

तेनैव तस्याग्रहणाच्च। यदीन्द्रियं स्वगन्धं गृह्णीयात् ते, नासाविन्द्रियगन्धः। अथेन्द्रियगन्धः? नेन्द्रियग्राह्यः स्यात्। गन्धश्च गृह्णदिन्द्रियमात्मानं गृह्णीयात् आत्मा ह्यस्य

न्यायवार्त्तिकतात्पर्यटीका

सगु-वात् (सू० ७०)॥ (क)

शङ्कते—यदि पुनरिन्द्रियस्य गन्ध इति। निराकरोति—तेनैव तस्येति।

तेने—च्च (सू० ७१)॥ तदेतद्ग्रहणकवाक्यं सोपस्कारं व्याचष्टे—यदीन्द्रियं स्वगन्धं गृह्णीयात् ते तव दर्शने नासाविन्द्रियगन्धः। अथेन्द्रियगन्धः ततो नेन्द्रियग्राह्यः स्यात्।

वृत्तिः

ननु पृथिव्यन्तरस्यापि गन्धप्राधान्यात् किमिन्द्रियं किमनिन्द्रियमित्यतऽऽह—(तद्व्यवस्थानं तु भूयस्त्वात्)

भूयस्त्वात् जलाद्यविशिष्टपृथिव्याद्यारब्धत्वात् तद्व्यवस्थानं घ्राणादीन्द्रियत्वव्यवस्थितिः ॥ ६६ ॥

घ्राणादीनां गन्धादिगुणवत्त्वे मानमाह—(सगुणानामिन्द्रियभावात्)

सगुणानां गन्धादिविशिष्टानां घ्राणादीनाम्, इन्द्रियभावात् गन्धादिसाक्षात्कारकारणत्वात्, कुङ्कुमगन्धाभिव्यञ्जकघृतादौ तथैव दर्शनात् ॥ ६७ ॥

---

(१) 'सह गुणैर्घ्राणादीनाम्'—इति वि०। (२) 'ग्राह्यश्चेत्यत' इति ग०।

(क) ७०तम-सूत्रे तात्पर्यटीका नोपलभ्यते।

न्यायभाष्यम्

न (१)गुणोपलब्धिरिन्द्रियाणाम् । यो ब्रूते—यथा बाह्यं द्रव्यं चक्षुषा गृह्यते तथा तेनैव चक्षुषा तदेव चक्षुर्गृह्यतामिति, तादृगिदम् ; तुल्यो ह्युभयत्र (२)प्रतिपत्तिहेत्वभाव इति ॥ ७१ ॥

(सू०)—न शब्दगुणोपलब्धेः ॥ ७२ ॥

स्वगुणान्नोपलभन्त इन्द्रियाणीति एतन्न भवति । उपलभ्यते हि स्वगुणः शब्दः श्रोत्रेणेति ॥ ७२ ॥

न्यायवार्त्तिकम्

गन्ध इति । न चाऽऽत्मसाधनं करणमस्तीति दृष्टान्तविरोधः । न चैतत् प्रत्यक्षं यद् घ्राणगन्धो घ्राणग्राह्य इति । कस्मात् पुनरिदं न देश्यते घ्राणेन घ्राणं कस्मान्न गृह्यत इति ? न देश्यते-ऽदृष्टत्वात्—न दृष्टं घ्राणेन घ्राणस्य ग्रहणमित्यतो न देश्यत इति । तुल्यं घ्राणेन स्वस्य गन्धस्याग्रहणमिति एतदपि अदेशनीयम्—स्वगुणान्नोपलभन्त इन्द्रियाणि कस्मादिति ? तुल्यो ह्युभयत्र हेत्वभावः ॥ ७१ ॥

न शब्दगुणोपलब्धेः । स्वगुणान्नोपलभन्त इन्द्रियाणीत्येतदयुक्तम् । स्वगुण उपलभ्यते आकाशेन शब्द इति ॥ ७२ ॥

न्यायवार्त्तिकतात्पर्यटीका

कस्मान्नेन्द्रियग्राह्य इन्द्रियगन्ध इत्यत आह—गन्धं च गृह्णदिति । चो हेत्वर्थे । न चाऽऽत्म-साधनं करणमस्तीति मनस्तु लिङ्गवदात्मनि करणं न केवलमित्युक्तम् । तुल्यत्वमापादयितुं सिद्धान्ती पूर्वपक्षिणमनुयुङ्क्ते—कस्मात्पुनरिदं न (३)देश्यत इति । पूर्वपक्ष्याह—न (४)देश्यत इति । सिद्धान्तवाद्याह—तुल्यं घ्राणेन स्वस्य गन्धस्याग्रहणमिति । तुल्यतामेवाऽऽपादयति—एतदप्यदेशनीयमिति ॥ ७१ ॥

न श—ब्धेः (सू० ७२) ॥ (क)

वृत्तिः

इत्थं च गन्धादिसिद्धावप्रत्यक्षत्वादनुद्भूतत्वकल्पनमित्याशयेनाऽऽह—

(तेनैव तस्याग्रहणाच्च)

तेन इन्द्रियेण तस्य सगुणस्येन्द्रियस्य अग्रहणाद् अनुद्भूतत्वकल्पनमिति ॥ ६८ ॥

---

(१) 'स्वगुणोप-' फ० । (२) 'प्रतिपत्तिहेतुभावः' इति वि-टि० । (३-४) 'चोद्यते' इति क-ख० ।

(क) ७२तम-सूत्रे तात्पर्यटीका नोपलभ्यते ।

(सू०)—तदुपलब्धिरितरेतरद्रव्यगुणवैधर्म्यात् ॥ ७२ ॥

न्यायभाष्यम्

न शब्देन गुणेन सगुणमाकाशमिन्द्रियं भवति। न शब्दः शब्दस्य व्यञ्जकः, न च घ्राणादीनां स्वगुणग्रहणं प्रत्यक्षम्, नाप्यनुमीयते। अनुमीयते तु श्रोत्रेणाऽऽकाशेन शब्दस्य ग्रहणम्, शब्दगुणत्वं च आकाशस्येति। परिशेषश्चानुमानं वेदितव्यम्। आत्मा तावत् श्रोता न करणम्, मनसः श्रोत्रत्वे बधिरत्वाभावः, पृथिव्यादीनां घ्राणादिभावे

न्यायवार्त्तिकम्

न पुनः श्रोत्रं सशब्दमिन्द्रियमिति—यथेतराणि सगुणानीन्द्रियाणि नैवमाकाशमिति। कस्मात्? शब्दस्येतरगुणवैधर्म्यात्--आकाशस्येतरद्रव्यवैधर्म्यात्। अस्यार्थस्य ज्ञापनार्थम्—

तदुपलब्धिरितरेतरद्रव्यगुणवैधर्म्यात् इति सूत्रम्। न शब्दः शब्दस्य व्यञ्जको नाऽऽकाशं सगुणमिन्द्रियमिति। किं पुनरिदं श्रोत्रम्? आकाशं परिशेषात्। तत्राऽऽत्मा तावन्न श्रोत्रम्, कर्तृत्वात्—श्रोता आत्मा न श्रोत्रम्। मनः श्रोत्रं भविष्यतीत्यपि न, मनसः श्रोत्रत्वे बधिराद्यभावः। सर्वविषयत्वाच्च मनसः सर्वविषयं च श्रोत्रं प्राप्नोति। पृथिव्याद्यपि न श्रोत्रं घ्राणादिभावेन विनियोगात्—घ्राणादिविनियुक्ताः पृथिव्यादयः, श्रोत्रभावे च घ्राणादीनां तद्वैकल्ये शब्दानुपलब्धिप्रसङ्गः। त्वचः श्रोत्रभावे बधिराद्यभावः, सर्वोपघाते च प्रायणम्। दिक्कालयोः श्रोत्रभावे च शब्दस्यान्यगुणत्वादग्रहणप्रसङ्गः। तद्गुणत्वमेवेति चेत् नास्ति विवादः—यस्य शब्दो गुणस्तदाकाशम्, भवता संज्ञामात्रं भिद्यते तौ दिक्कालाविति। आकाश-

न्यायवार्त्तिकतात्पर्यटीका

तदु—र्म्यात् (सू० ७२)॥ तद्गुणत्वमेव शब्दगुणत्वमेव दिक्कालयोरिति चेद् नास्ति विवादः दिक्कालयोर्हि शब्दगुणत्वे सत्यसाधारणयोगित्वेन न परापरव्यतिकरकारणत्वं पृथिव्यादिवद्भवितुमर्हतीति। तथा च शब्दगुणं (१)परापरप्रत्ययकारणं चाऽऽकाशमेवेति नास्ति विवादः।

वृत्तिः

नन्विन्द्रियगुणानामप्रत्यक्षत्वनियमो नेत्याशङ्कते—(न शब्दगुणोपलब्धेः)

उक्तनियमो न युक्तः शब्दस्य श्रोत्रगुणस्योपलब्धेः ॥ ६९ ॥

समाधत्ते—(तदुपलब्धिरितरेतरद्रव्यगुणवैधर्म्यात्)

द्रव्यगुणानां रूपशब्दादीनां परस्परं वैधर्म्याच्छब्दस्योपलब्धिर्न चक्षूरूपादीनाम्,

(१) 'परापरप्रत्ययाकारणं' इति क०।

न्यायभाष्यम्

सामर्थ्यम्, श्रोत्रभावे चासामर्थ्यम्। अस्ति चेदं श्रोत्रम् आकाशं च शिष्यते, परिशेषादाकाशं श्रोत्रमिति ॥ ७३ ॥

इति श्रीवात्स्यायनीये न्यायभाष्ये तृतीयाध्यायस्याऽऽद्यमाह्निकम् ॥

न्यायवार्त्तिकम्

प्रत्याख्यानं वाऽन्यगुणत्वाच्छब्दस्य—यदि शब्दो दिक्कालगुणो भवति आकाशं तर्हि प्रत्याख्यातम्। न हि शब्दमन्तरेणाऽऽकाशास्तित्वे (१)लिङ्गमस्ति यथा दिक्कालयोः (२)परापरादि लिङ्गमिति। न च द्रव्यान्तरं शिष्यते। न च गुणानां श्रोत्रभावो युक्तः, न च कर्मणाम्, न च सामान्यविशेषसमवायानां सामर्थ्यानुपलब्धेः। न चेदं श्रोत्रं नास्ति शब्दोपलब्धिलिङ्गम्, शिष्यते चाऽऽकाशम्, तस्मादाकाशं श्रोत्रमिति ॥ ७३ ॥

(इति अर्थपरीक्षाप्रकरणम्)

इति औद्द्योतकरे न्यायवार्त्तिके तृतीयस्याध्यायस्याऽऽद्यमाह्निकम्।

न्यायवार्त्तिकतात्पर्यटीका

दिक्कालौ तु परापरव्यतिकरकारणे कल्पनीयौ ततो व्यतिरिक्तावित्यर्थः। अपि चाऽऽकाशमिच्छत आकाशप्रत्याख्यानं (क) वा सामर्थ्यानुपलब्धेरिति, रूपादिसाक्षात्कारे हि इन्द्रियाणामिन्द्रियत्वमेव स्वरूपसामर्थ्यं तच्चक्षुरादिद्रव्यस्य दृष्टं न गुणादीनामित्यर्थः ॥ ७३ ॥

इति मिश्रश्रीवाचस्पतिविरचितायां न्यायवार्त्तिकतात्पर्यटीकायां
तृतीयाध्यायस्य प्रथममाह्निकम् ॥

वृत्तिः

शब्दाश्रयस्य लाघवेनैक्यसिद्धेरिति भावः ॥ ७० ॥

समाप्तमर्थपरीक्षाप्रकरणम् ॥ ९ ॥

इति श्रीविश्वनाथन्यायपञ्चाननभट्टाचार्यकृतायां न्यायसूत्रवृत्तौ
आत्मादिप्रमेयचतुष्टयपरीक्षणं नाम तृतीयाध्यायस्याऽऽद्यमाह्निकम् ॥

---

(१) 'लिङ्गमिति' इति क-ख-धृतपाठान्तरम्। (२) 'परत्वापरत्वे' इति क-ख-धृतपाठान्तरम्।

(क) 'वा' इत्यत्र 'च' इति क-ख-तात्पर्यपुस्तकयोर्मुद्रितम्।

अथ तृतीयाध्यायस्य

द्वितीयमाह्निकम्

—:०:—

न्यायभाष्यम्

परीक्षितानीन्द्रियाण्यर्थाश्च, बुद्धेरिदानीं परीक्षाक्रमः, सा किमनित्या नित्या वेति। कुतः संशयः ?

(सू०)—कर्माकाशसाधर्म्यात् संशयः ॥ १ ॥

अस्पर्शवत्त्वं ताभ्यां समानो धर्म उपलभ्यते बुद्धौ, विशेषश्चोपजनापायधर्मवत्त्वम्, विपर्ययश्च यथास्वमनित्यनित्ययोस्तस्यां बुद्धौ नोपलभ्यते, तेन संशय इति ॥ १ ॥

(१)अनुपपन्नरूपः खल्वयं संशयः। सर्वशरीरिणां हि प्रत्यात्मवेदनीया अनित्या बुद्धिः

न्यायवार्त्तिकम्

परीक्षितानीन्द्रियाण्यर्थाश्च, बुद्धेरिदानीं परीक्षाक्रमः। सा किमनित्या नित्या वेति धर्मविचारः सत्त्वस्याधिगतत्वात्, तस्यां च संशयमुपपादयति—

कर्माकाशसाधर्म्यात् संशयः। उभाभ्यां साधर्म्यमस्पर्शवत्त्वम्, विशेषः (२) उपजननापायधर्मकत्वं विपर्ययश्च बुद्धौ नोपलभ्यते ततः संशयः ॥ १ ॥

अनुपपन्नरूपः खल्वयं संशयः सर्वशरीरिणां प्रत्यात्मवेदनीयत्वात्—सर्वशरीरिणां प्रत्यात्म-

न्यायवार्त्तिकतात्पर्यटीका

परीक्षितानीन्द्रियाण्यर्थाश्च, बुद्धेरिदानीं परीक्षाक्रमः। क्रमः स्थानम्। वृत्तवर्तिष्यमाणानुकीर्तनं हेतुहेतुमद्भावज्ञापनार्थम्। अर्थेन्द्रियपरीक्षा च बुद्धिपरीक्षणं प्रति यथोपयुज्यते तथा बुद्धिपरीक्षायामेव स्फुटीभविष्यति।

कर्मा—यः (सू० १) ॥ संशयमाक्षिपति—अनुपपन्नरूप इति। यद्युपलभ्यमानज्ञानविषयः संशयः, सोऽनुपपन्नः साङ्ख्यानामपि तदनित्यत्वस्याभ्युपगमात्; अथ साङ्ख्याभिमत-

वृत्तिः

अथ क्रमप्राप्ततया बुद्धेर्मनसश्च परीक्षा सप्तभिः प्रकरणैः तत्परीक्षैव चाऽऽह्निकार्थः।

परे तु शरीरावच्छेदव्याप्यभोगानुकूलसम्बन्धवत्प्रमेयपरीक्षा शरीरान्तर्वर्त्तिप्रमेयपरीक्षैवाऽऽह्निकार्थ इति, तदसत्, इन्द्रियपरीक्षायामतिव्याप्तेः।

---

(१) 'अनुपपन्नः' इति ग-ल-भा०।

(२) 'उपजनापायधर्मकत्वं' इति क-ख-घृतपाठान्तरम्।

न्यायभाष्यम्

सुखादिवत्। भवति च संवित्तिः—ज्ञास्यामि जानामि अज्ञासिषमिति। न चोपजनापायावन्तरेण त्रैकाल्यव्यक्तिः, ततश्च त्रैकाल्यव्यक्तेरनित्या बुद्धिरित्येतत् सिद्धम्। प्रमाणसिद्धं चेदं शास्त्रेऽप्युक्तम्—'इन्द्रियार्थसन्निकर्षोत्पन्नम्', 'युगपज् ज्ञानानुत्पत्तिर्मनसो लिङ्ग'मित्येवमादि। तस्मात् संशयप्रक्रियानुपपत्तिरिति।

दृष्टिप्रवादोपालम्भार्थन्तु प्रकरणम्। एवं हि पश्यन्तः प्रवदन्ति साङ्ख्याः—पुरुषस्यान्तःकरणभूता नित्या बुद्धिरिति। साधनं च प्रचक्षते—

न्यायवार्त्तिकम्

वेदनीयमेतत् (१)यदुतानित्या बुद्धिरिति। त्रैकाल्यव्यक्तेश्च—बुद्धौ त्रैकाल्यं व्यज्यमानं दृष्टम्—जानामि ज्ञास्याम्यज्ञासिषमिति। न चोपजननापायावन्तरेण त्रैकाल्यव्यक्तिः। न ह्यनुपजननापायधर्मेषु आकाशादिषु त्रैकाल्यं व्यज्यते। न च विशेषदर्शने सति युक्तः संशयः। तस्मात् संशयप्रक्रियानुपपत्तिरिति। शेषं भाष्ये।

दृष्टिप्रवादोपालम्भार्थं प्रकरणम्—न च बुद्धेरनित्यत्वं प्रतिपाद्यमपि तु परस्य दर्शनं निवर्त्तनीयमिति। एवं हि पश्यन्तः प्रवदन्ति साङ्ख्या नित्या बुद्धिरिति। साधनं च प्रचक्षते—

न्यायवार्त्तिकतात्पर्यटीका

महत्तत्त्वविषयः, तस्य सत्त्व एव विप्रतिपत्तिरिति कुतस्तद्गतधर्मविचारः, सति धर्मिणि धर्माश्चिन्त्यन्ते न सन्दिग्धसत्त्व इति भावः।

समाधत्ते—दृष्टिप्रवादेति। सांख्यानां हि दर्शने प्रवादो महदन्तःकरणं बुद्धिरिति 'तदुपालम्भार्थम्' दूषणार्थं प्रकरणमिति। अयमभिप्रायः—नेह नित्यानित्यविचारः, अपि त्वनया द्वारा वृत्तेरतिरिक्ता सांख्याभिमता बुद्धिर्निराक्रियते, सामान्यतो बुद्धिमात्रस्य नित्यानित्यत्वविचारेण। यदि हि नित्या बुद्धिः स्यात् ततो वृत्तिभ्य उदयव्ययवतीभ्योऽतिरिक्तं महत्तत्त्वमन्तःकरणं स्यात्। अथ तु नित्यत्वसाधनानि प्रतिसन्धानादीनि न बुद्धिनित्यत्वस्येशते ततो वृत्तय एव बुद्धयो न तु तदतिरिक्तं बुद्धितत्त्वं सिध्यतीति सिध्यति 'बुद्धिरुपलब्धिर्ज्ञानमित्यनर्थान्तरम्' इति बुद्धेर्लक्षणम्। तथा चास्य लक्षणे सङ्गतिः, इतरथा तु प्रधानतो नित्यानित्यत्वविचारो न लक्षणेन सङ्गच्छत इति।

वृत्तिः

तत्र च बुद्धिपरीक्षा पञ्चभिः प्रकरणैः। तत्राऽऽदौ बुद्ध्यनित्यताप्रकरणम्, तत्र संशयप्रदर्शनाय सूत्रम्—(कर्माकाशसाधर्म्यात् संशयः)

---

(१) 'यद्वता' इति क-ख-धृतपाठान्तरम्।

(सू०)—विषयप्रत्यभिज्ञानात् ॥ २ ॥

न्यायभाष्यम्

किं पुनरिदं प्रत्यभिज्ञानम्? यं पूर्वमज्ञासिषमर्थं तमिमं जानामीति ज्ञानयोः समानेऽर्थे प्रतिसन्धिज्ञानं प्रत्यभिज्ञानम्, एतच्चावस्थितताया बुद्धेरुपपन्नम्। नानात्वे तु बुद्धिभेदेषूत्पन्नापवर्गिषु प्रत्यभिज्ञानानुपपत्तिः नान्यज्ञातमन्यः प्रत्यभिजानातीति ॥ २ ॥

(सू०)—साध्यसमत्वादहेतुः ॥ ३ ॥

यथा खलु नित्यत्वं बुद्धेः साध्यमेवं प्रत्यभिज्ञानमपीति। किं कारणम्? चेतनधर्मस्य करणेऽनुपपत्तिः। पुरुषधर्मः खल्वयं ज्ञानं दर्शनमुपलब्धिर्बोधः प्रत्ययः

न्यायवार्त्तिकम्

विषयप्रत्यभिज्ञानात् इति। यं पूर्वमज्ञासिषं तमिमं जानामीति ज्ञानयोः समानेऽर्थे प्रतिसन्धानमवस्थितताया बुद्धेरुपपन्नम्—बुद्धिनानात्वे प्रत्यभिज्ञानानुपपत्तिः यथा पुरुषान्तरबुद्धिषु ॥ २ ॥

साध्यसमत्वादहेतुः। यथैव बुद्धेर्नित्यत्वं साध्यं तथैव बुद्धौ प्रत्यभिज्ञानमपि साध्यम्। कस्मात्? चेतनधर्मस्य करणेऽनुपपत्तेः—पुरुषधर्मः खल्वयं ज्ञानं दर्शनमुपलब्धिर्बोध इति। चेतनो हि पूर्वज्ञातमर्थं प्रत्यभिजानातीति तस्यैव तस्माद्धेतोर्नित्यत्वं युक्तम्।

न्यायवार्त्तिकतात्पर्यटीका

साधनं च प्रवक्ते—

वि—नात् (सू० २) इति॥ वृत्तिमान् किल विषयं प्रत्यभिजानन्नात्मानमपि प्रत्यभिजानाति। न च चेतनो वृत्तिमान् तस्य कूटस्थनित्यत्वात् अन्यथा पूर्वापरावस्थाभेदवान् न कूटस्थनित्यः स्यात्। परिणामिनित्या तु बुद्धिरुदयव्ययवदनेकवृत्तिमती युज्यत इति भावः ॥ २ ॥

सिद्धान्त्याह—

सा—तुः (सू० ३) इति ॥ वृत्तयो हि वृत्तिमतो भिन्नास्तेन (क)तासामनित्यत्वेऽपि न वृत्तिमान् कौटस्थ्याच्च्यवते। तथा च प्रत्यभिज्ञातात्मैव प्रत्यभिज्ञानान्नित्यः स्यान्न त्वन्तःकरणं बुद्धिसंज्ञकम्, न हि तत्प्रत्यभिज्ञाने प्रकाशत इत्यर्थः।

वृत्तिः

कर्मण आकाशस्य च साधर्म्यान्निःस्पर्शत्वाद् बुद्धिपदार्थे नित्यत्वसंशयः। बुद्धिपदं नित्यशक्तं न वेति संशयः पर्यवसन्नः ॥ १ ॥

(क) 'तासां नित्यत्वेऽपि' इति क-ख-पुस्तकयोर्मुद्रितम्।

न्यायभाष्यम्

अध्यवसाय इति। चेतनो हि पूर्वज्ञातमर्थं प्रत्यभिजानाति, तस्यैतस्माद्धेतोर्नित्यत्वं युक्तमिति। करणचैतन्याभ्युपगमे तु चेतनस्वरूपं वचनीयं नानिर्दिष्टस्वरूपमात्मान्तरं शक्यमस्तीति प्रतिपत्तुम्। ज्ञानं चेद् (१)बुद्धेरन्तःकरणस्याभ्युपगम्यते चेतनस्येदानीं किं स्वरूपं को धर्मः किं तत्त्वम्? ज्ञानेन च बुद्धौ वर्तमानेनायं चेतनः किं करोतीति?

चेतयते इति चेत् न, ज्ञानादर्थान्तरवचनम्—पुरुषश्चेतयते बुद्धिर्जानातीति नेदं ज्ञानादर्थान्तरमुच्यते, चेतयते जानीते बुध्यते पश्यति उपलभते इत्येकोऽयमर्थ इति। बुद्धिर्ज्ञापयतीति चेत् अद्धा—जानीते पुरुषो बुद्धिर्ज्ञापयतीति सत्यमेतत्। एवं चाभ्युपगमे ज्ञानं पुरुषस्येति सिद्धं भवति न बुद्धेरन्तःकरणस्येति।

न्यायवार्त्तिकम्

क्रियानाधारत्वाच्च करणस्य—न हि करणं क्रियाया आधारो भवति, उपलब्धिश्च क्रिया सा च न करणे वर्त्तितुमर्हतीति। स्वक्रियाधारत्वादयुक्तमिति चेत्—अथ मन्यसे सर्वं कारकं स्वक्रियाया आधारो भवतीत्यतोऽयुक्तं क्रियानाधार इति? सत्यम्, भवति स्वक्रियाधारः, न पुनः स्वक्रियातः करणव्यपदेशः। स्वक्रियासु सर्वं कारकं कर्तृ भवति, करणभावं चाऽऽश्रित्य बुद्धौ विचारः, तस्मादयुक्तमेतत्। सर्वकर्तृत्वप्रसङ्ग इति चेत्—यदि पुनः स्वक्रियानिमित्तकः कर्तृव्यपदेशः सर्वं कारकं कर्तृ प्राप्तम्? सत्यमेतत नाभ्युपगमा एव दोषत्वेन देश्यन्त इति। कर्तृकरणादिव्यपदेशश्च कथम्? प्रधानक्रियापेक्षः कर्तृकरणादिव्यपदेशः—यदर्थं (२)करणमुपादीयते सा प्रधानक्रिया, तस्यां च साधनभावे विवक्षिते भेदे वाऽविवक्षिते कारकमित्यनेन

न्यायवार्त्तिकतात्पर्यटीका

क्रियानाधारत्वाच्च करणस्येति। प्रधानक्रियानाधारः करणम्। प्रधानक्रिया चेयमुपलब्धिः स्वतो यदाधारा प्रतीयते स कर्त्ता, न करणम्। तथा च प्रत्यभिज्ञानाद्युपलब्ध्या तदाधारः कर्त्ता आत्मा सिध्यति नित्यो न तु करणमित्यर्थः। क्रियामात्राभिधानेन शङ्कते—स्वक्रियेति। प्रधानक्रियामालम्ब्य निराकरोति—सत्यं भवतीति। ननु यदि भेदविवक्षया कर्त्रादिशब्द-

वृत्तिः

तत्र बुद्धिनित्यत्वं साङ्ख्यः साधयति—(विषयप्रत्यभिज्ञानात्)

बुद्धिर्नित्येति शेषः। योऽहं घटमद्राक्षं सोऽहं घटं स्पृशामीति प्रत्यभिज्ञानमेकं वृत्तिमन्तं विषयीकरोति। न चाऽऽत्मा तथा तस्य जन्यधर्मानधिकरणस्य कूटस्थत्वात्, तस्माद् वृत्तिमती बुद्धिरेव, वृत्तिस्तु तस्याः परिणामः, बुद्धेरप्याविर्भावतिरोभावावेव न तूत्पादविनाशाविति ॥ २ ॥

---

(१) 'बुद्धे'रिति फ-पु० नास्ति। (२) 'कारकमुपा-' इति क-ख-धृतपाठान्तरम्।

न्यायभाष्यम्

प्रतिपुरुषं च शब्दान्तरव्यवस्थाप्रतिज्ञाने प्रतिषेधहेतुवचनम्। यश्च प्रतिजानीते—कश्चित्पुरुषश्चेतयते, कश्चिद् बुध्यते, कश्चिदुपलभते, कश्चित्पश्यतीति ; पुरुषान्तराणि खल्विमानि चेतनो बोद्धोपलब्धा द्रष्टेति नैकस्यैते धर्मा इति अत्र कः प्रतिषेधहेतुरिति ?

अर्थस्याभेद इति चेत् समानम्। अभिन्नार्था एते शब्दा इति तत्र व्यवस्थानुपपत्तिरित्येवं चेन्मन्यसे, समानं भवति—पुरुषश्चेतयते बुद्धिर्जानीते इत्यत्राप्यर्थो न भिद्यते तत्रोभयोश्चेतनत्वादन्यतरलोप इति। यदि पुनर्बुध्यतेऽनयेति बोधनं बुद्धिः मन

न्यायवार्त्तिकम्

शब्देनाभिलप्यन्ते कर्त्रादयः, यदा तु भेदो विवक्षितस्तदा कर्तृ-करण-कर्मशब्दवाच्यानीति। कारकशब्देनापि सामान्येनाभिधीयमानेषु कारकेषु यः स्वगतो विशेषः इतरेतरव्यावृत्तः सोऽभिधीयते अन्यस्याभावात्, प्रधानक्रियापेक्षं तु कारकाणां कर्त्राद्यभिधानमिति। तत्र यदितराप्रयोज्यमितरकारकप्रयोक्तृ च तत् कर्तृ, एवं शेषेषु कारकशब्दाः (१)पूर्ववद्वक्तव्याः। यद्यन्यकारकाप्रयोज्यत्वं कर्तृत्वं नन्वयमपि कारकोपादानेन प्रयुज्यते ? न प्रयुज्यते फलस्य प्रयोजकत्वात्—फलं कर्तारं प्रयोजयति, न कारकं करणादि, न च फलं कारकमिति तेषां तन्नान्तरीयकमुपादानम्। न हि करणादिकारकोपादानमन्तरेण क्रिया सम्भवतीति तन्नान्तरीयकत्वात् कारकाण्युपादीयन्त इति। तस्माच्चेतनधर्मः करणे न सम्भवतीति।

न्यायवार्त्तिकतात्पर्यटीका

प्रवृत्तिरभेदविवक्षायां च कारकशब्दप्रवृत्तिः कथं तर्हि कर्ता कारकं करणं कारकमित्यादि-सामानाधिकरण्यं भेदाभेदविवक्षयोर्विरुद्धार्थत्वादित्यत आह—कारकशब्देनापीति। नाभेदविवक्षा विशेषाणां किन्तु सामान्यविवक्षा, भिद्यत इति भेदः न भेदोऽभेद इति सामान्यस्याभिधानात्। तथा च सामान्यविवक्षया प्रवृत्तः शब्दस्तद्भेदाभिधानाद्भेदवाचिना सामानाधिकरण्यं प्रतिपद्यमान इतरेतरव्यावृत्ते विशेषेऽपादानादौ प्रवर्त्तते अन्यस्य कारकविशेषस्य कारकशब्देन सामानाधिकरण्यासंभवात्। पूर्ववदिति (क)द्वितीयाध्यायोक्तं कारकविशेषस्य लक्षणं स्मारयति। चोदयति—यद्यन्यकारकेति। कारकाणामुपादानेन खलु प्रवर्त्तितः कर्त्ता कारकाण्युपादत्ते, तस्मादितराप्रयोज्यत्वमस्यासिद्धमित्यर्थः। परिहरति—न प्रयुज्यते फलस्य प्रयोजकत्वादिति। नाप्रयुज्यमानं कर्त्तारं ब्रूमः अपि तु कारकाप्रयोज्यम्, न च फलं कारकमित्यर्थः।

---

(१) 'पूर्ववत् प्रयोक्तव्याः' इति क-ख-धृतपाठान्तरम्।

(क) द्वितीयाध्याये प्रथमाह्निके १६-श-सूत्रस्य भाष्य-वार्त्तिक-तात्पर्यटीका द्रष्टव्याः (४३४—४३८ पत्राङ्कः)।

न्यायभाष्यम्

एवोच्यते तच्च नित्यम्, (१)अस्त्वेतदेवम्, न तु मनसो विषयप्रत्यभिज्ञानान्नित्यत्वम्। दृष्टं हि करणभेदे ज्ञातुरेकत्वात् प्रत्यभिज्ञानं 'सव्यदृष्टस्येतरेण प्रत्यभिज्ञाना'दिति

न्यायवार्त्तिकम्

उपेत्य प्रत्यभिज्ञानमन्तःकरणे तस्यैकानेकव्यावृत्तेरसाधारणता। न हि प्रत्यभिज्ञानमेकत्वे दृष्टं न नानात्व इति (२)प्रत्यभिज्ञानस्वरूपावधारणे च सति विरुद्धः। यदा चेदं प्रत्यभिज्ञानं निरूप्यते तदा बुद्धिभेदं प्रतिपादयति। प्रत्यभिज्ञानं हि नामाद्यप्रत्यक्षनिरोधे द्वितीयदर्शने प्रागाहितसंस्काराभिव्यक्तौ स्मृतिपूर्वं तृतीयं दर्शनम्। न च बुद्ध्यभेदवादिनो द्वितीयमपि तावद्दर्शनमस्ति कुतस्तृतीयमिति। प्रत्ययभेद इति चेत्—अथ मन्यसे अवस्थितताया बुद्धेः प्रत्ययास्तिरोभवन्ति व्यज्यन्ते च, तत्राऽऽद्यदर्शनतिरोभावे प्रत्ययान्तराविर्भावे च प्रत्यभिज्ञानमिति? तन्न युक्तं तद्व्यतिरेकेण बुद्धिस्वभावानवधारणात्—यां तां प्रत्ययव्यतिरिक्तां बुद्धिं भवन्तः कल्पयन्ति तस्याः कः स्वभाव इति वक्तव्यम्। अस्माकं तु प्रत्ययमात्रं बुद्धिः—अर्थग्रहणं हि बुद्धिरिति। दर्शनदृष्टस्य स्पर्शनेन प्रत्यभिज्ञानान्नानात्वे प्रत्यभिज्ञानमिति विरुद्धः प्रदीपान्तरदृष्टस्य प्रदीपान्तरेणेति।

यदि बुद्धिरध्यवस्यति, अथ बुद्धौ वर्तमानेन ज्ञानेन चेतनः किं करोति? चेतयत इति? कश्चेतयते? यदि यस्याध्यवसायः स चेतयते विरुद्धमेतत्। अथाऽऽत्मा चेतयते? कथं बुद्धौ वर्तमानेन प्रत्ययेनाऽऽत्मा चेतयते? न ह्यन्यत्र वर्तमानया क्रियया अन्यस्य तद्वत्ता भवति। अथ पुरुष-

न्यायवार्त्तिकतात्पर्यटीका

उपेत्य प्रत्यभिज्ञानमन्तःकरणे तस्येति। प्रत्यक्षं चेत् प्रत्यभिज्ञानं नैकत्वे किं त्वनुमानम्, ततो यद् यत् प्रत्यभिज्ञायते तत्तदेकमिति न निदर्शनमस्ति; न हि तस्यैकत्वमन्यतो निश्चितमतः प्रत्यभिज्ञानात्। नाप्यनेकत्वं दृष्टम्, तथा चासाधारणतया हेत्वाभास इत्यर्थः। **प्रत्यभिज्ञानस्वरूपावधारणे च सति विरुद्धः** हेत्वाभासो बुद्ध्यनित्यत्वसाधनादिति। शेषं निगदेनैव व्याख्यातम्। चेतनाध्यवसायाभेदो बुद्धिलक्षणेऽस्माभिर्विचारितः॥ ३॥

वृत्तिः

परिहरति—(साध्यसमत्वादहेतुः)

साध्यसमत्वात् असिद्धत्वात् प्रतिसन्धातृत्वं न हेतुः, अहं जानामीत्यादिना आत्मन एव प्रतिसन्धातृत्वप्रत्ययात्। अनादिनिधनत्वमेव तस्य कौटस्थ्यम्, अन्यादृशं त्वसिद्धमिति भावः॥ ३॥

---

(१) 'अस्त्वेतदेवम्' ज-भा०।

(२) 'प्रत्यभिज्ञानेन स्वरूपा—' इति क-ख०।

न्यायभाष्यम्

चक्षुर्वत् प्रदीपवच्च; प्रदीपान्तरदृष्टस्य प्रदीपान्तरेण प्रत्यभिज्ञानमिति। तस्माज् ज्ञातुरयं नित्यत्वे हेतुरिति ॥ ३ ॥

यच्च मन्यते बुद्धेरवस्थिताया यथाविषयं वृत्तयो ज्ञानानि निश्चरन्ति वृत्तिश्च वृत्तिमतो नान्येति, तच्च—

(सू०)—न, युगपदग्रहणात् ॥४॥

वृत्तिवृत्तिमतोरनन्यत्वे वृत्तिमतोऽवस्थानाद् वृत्तीनामवस्थानमिति यानीमानि विषयग्रहणानि तान्यवतिष्ठन्त इति युगपद् विषयाणां ग्रहणं प्रसज्यत इति ॥ ४ ॥

न्यायवार्त्तिकम्

श्चेतयते बुद्धिर्जानीत इति ? नेदं ज्ञानादर्थान्तरमुच्यते, यावदुक्तं भवति चेतयते तावदुक्तं भवति (१)जानीत इति। बुद्धिर्ज्ञापयतीति चेत्—अथ मन्यसे बुद्धिर्ज्ञापयत्यात्मा जानीते इति ? अद्धा जानीते च पुरुषो बुद्धिर्ज्ञापयतीति। अध्यवसायचेतनयोश्च स्वभावभेदो वक्तव्यः। भवताऽप्येकत्वं वक्तव्यम्, देशकालस्वभावाभेदात्—यस्मादविदेशमविकालं च बुद्ध्याऽध्यवसितमात्माऽप्यध्यवस्यति। स्वभावाभेदोऽसिद्ध इति चेत्—अथ मन्यसे सत्यमभिन्नकालमभिन्नदेशं च बुद्ध्याऽध्यवसितमात्माऽप्यध्यवस्यति (२)न पुनरचेतनात्मैवाध्यवसाय इति ? न, प्रतिशरीरमनेकपुरुषप्रसङ्गाद् यद्यन्यश्चेतयिता अन्यश्चाध्यवसाता भवति, अन्यः प्रतिजानीते अन्यः पश्यत्यन्यः शृणोति मन्तेत्येवमादिषु पुरुषान्तराणि खल्विमानि द्रष्टा श्रोता मन्तेति, नैकस्यैते धर्मा इति। अत्र भवता किं वक्तव्यम् ? अभिन्नार्था एते शब्दा इत्येतद्वक्तव्यम्—अभिन्नार्थास्तदेते शब्दा भवन्ति, नन्वत्राप्यर्थो न भिद्यते चेतनोऽध्यवसाता मन्ता बोद्धेति तस्मादयुक्तमेतद् बुद्धिरध्यवस्यत्यात्मा चेतयत इति। यदि पुनरिदं प्रत्यभिज्ञानं मनसोऽनित्यत्वसाधकं स्यात् ? न युक्तमेवं भवितुं मनसो नित्यत्वाभ्युपगमात् अभ्युपगम्यते मनसो नित्यत्वमिति तत्र साधनमनर्थकम्। अनेकान्ताच्च न प्रत्यभिज्ञानात् करणैकत्वं सिध्यति दृष्टं करणभेदेऽपि प्रत्यभिज्ञानं ज्ञातुरेकत्वात् दर्शनदृष्टस्य स्पर्शनेन प्रत्यभिज्ञानात् प्रदीपदृष्टस्य प्रदीपान्तरेणेति ॥ ३ ॥

यत्त्विदं मन्यते बुद्धेरवस्थिताया यथाविषयं वृत्तयः प्रादुर्भवन्ति वृत्तिश्च वृत्तिमतो नान्येति तच्च—

न, युगपदग्रहणात्। वृत्तिमतोऽवस्थानाद् वृत्त्यवस्थानमिति सूत्रार्थः ॥ ४ ॥

न्यायवार्त्तिकतात्पर्यटीका

न, यु—णात् (सू० ४) ॥ वृत्तिमतोऽवस्थानाद्वृत्त्यवस्थानप्रसङ्ग इति सूत्रार्थः ॥ ४ ॥

---

(१) 'जानातीति' इति क-ख-धृतपाठान्तरम्।

(२) 'न पुनर्यैरचेतना'—इति क-ख-पुस्तके मुद्रितम्।

(सू०)—अप्रत्यभिज्ञाने च विनाशप्रसङ्गः ॥५॥

न्यायभाष्यम्

अतीते च प्रत्यभिज्ञाने वृत्तिमानप्यतीत इत्यन्तःकरणस्य विनाशः प्रसज्यते, विपर्यये च नानात्वमिति ॥ ५ ॥

अविभु चैकं मनः पर्यायेणेन्द्रियैः संयुज्यत इति—

(सू०)—क्रमवृत्तित्वादयुगपद् ग्रहणम् ॥ ६ ॥

इन्द्रियार्थानाम्, वृत्तिवृत्तिमतो(१)र्नानात्वमिति। एकत्वे च प्रादुर्भावतिरोभावयोरभाव इति ॥ ६ ॥

न्यायवार्त्तिकम्

अप्रत्यभिज्ञाने च विनाशप्रसङ्गः। वृत्तीनामपगमे वृत्तिमतोऽप्यपगम इति सूत्रार्थः ॥ ५ ॥

अविभु चैकं मनः पर्यायेणेन्द्रियैः सम्बध्यत इति—

क्रमवृत्तित्वादयुगपद् ग्रहणम्। वृत्तिवृत्तिमतोर्नानात्वादिति सूत्रार्थः। वृत्तिवृत्तिमतोरेकत्वे प्रादुर्भावतिरोभावयोरभाव इति ॥६॥

न्यायवार्त्तिकतात्पर्यटीका

अप्र—ङ्गः (सू० ५) ॥(क)

क्रम—णम् (सू० ६) ॥(ख)

वृत्तिः

बुद्धेरवस्थायिन्या यथाविषयं ज्ञानात्मिका वृत्तयो वृत्तिमदभिन्ना वह्नेरिव स्फुलिङ्गा निस्सरन्तीति साङ्ख्यमतं निरस्यति—(न युगपदग्रहणात्)

वृत्तिवृत्तिमतोरभेदे वृत्तिमदवस्थित्या वृत्तेरप्यवस्थितिर्वाच्या। तथा च सर्वपदार्थग्रहणं युगपत् स्यात्, न चैवम्; तस्मान्नाभेद इति ॥ ४ ॥

अथ वृत्तीनामनवस्थायित्वमुच्यते तत्राऽऽह—(अप्रत्यभिज्ञाने च विनाशप्रसङ्गः)

अप्रत्यभिज्ञाने प्रत्यभिज्ञानस्य अभावे विनाशे, वृत्तिमतोऽपि विनाशः स्यादतो न द्वयोरैक्यम् ॥ ५ ॥

अयुगपद्ग्रहणं स्वमते व्युत्पादयति—(क्रमवृत्तित्वादयुगपद् ग्रहणम् इति)

मनस इत्यादिः। मनसोऽणुत्वादिन्द्रियैः सह क्रमेण सम्बन्धाज् ज्ञानानां क्रमिकत्वम्, तथा च 'अविभु चैकं मनः पर्यायेणेन्द्रियैः सम्बध्यते' इत्यवतारभाष्यम्। तत्तदिन्द्रियमनःसंयोगे सति ज्ञानमुपपद्यते ॥ ६ ॥

---

(१) 'र्नानात्वादिति' इति फ०।

(क-ख) ५म-६ष्ठ-सूत्रयोस्तात्पर्यटीका नोपलभ्यते।

(सू०)—अप्रत्यभिज्ञानं च विषयान्तरव्यासङ्गात् ॥ ७ ॥

न्यायभाष्यम्

अप्रत्यभिज्ञानम् अनुपलब्धिः। अनुपलब्धिश्च कस्यचिदर्थस्य विषयान्तरव्यासक्ते मनस्युपपद्यते वृत्तिवृत्तिमतोर्नानात्वात्, एकत्वे हि अनर्थको व्यासङ्ग इति ॥ ७ ॥

(क)विभुत्वे चान्तःकरणस्य (१)पर्यायेणेन्द्रियैः संयोगः—

(सू०)—न, गत्यभावात् ॥ ८ ॥

प्राप्तानीन्द्रियाण्यन्तःकरणेनेति प्राप्त्यर्थस्य गमनस्याभावः। तत्र क्रमवृत्तित्वाभावादयुगपद् ग्रहणानुपपत्तिरिति।

न्यायवार्त्तिकम्

अप्रत्यभिज्ञानं च विषयान्तरव्यासङ्गात्। अप्रत्यभिज्ञानं च विषयान्तरव्यासङ्गादिति वृत्तिवृत्तिमतोर्भेदे सत्युपपद्यत इति, एकत्वे त्वनर्थको व्यासङ्ग इति ॥ ७ ॥

विभुत्वे चान्तःकरणस्य पर्यायेणेन्द्रियैः संयोगः—

न, गत्यभावात्। प्राप्तान्यन्तःकरणेनेन्द्रियाणीति सूत्रार्थः। व्यापित्वे च युगपदनेकेन्द्रियसम्बन्धाद् युगपद्ग्रहणप्रसङ्गश्च दोषः।

अणावपि मनस्येकेन्द्रियग्राह्येषु युगपदुपलब्धिप्रसङ्ग इति चेत्? करणत्वान्न युगपद्ग्रहणम्।

न्यायवार्त्तिकतात्पर्यटीका

अप्र—ङ्गात् (सू० ७) ॥ (ख)

वृत्तिः

तद्व्यतिरेके ज्ञानाभावं सम्पादयति—(अप्रत्यभिज्ञानं च विषयान्तरव्यासङ्गात्)

अप्रत्यभिज्ञानं तत्तदिन्द्रियजज्ञानाभावः विषयान्तरेण मनसः सम्बन्धादित्यर्थः ॥७॥

त्वन्मते चेदं नोपपद्यत इत्याह—(न, गत्यभावात्)

त्वन्मते मनसः क्रमेणेन्द्रियसम्बन्धो न, मनसो विभुत्वेन गत्यभावात्।

परे तु नकारो न सूत्रान्तर्गतः, किं तु 'विभुत्वे चान्तःकरणस्य पर्यायेणेन्द्रियैः संयोगो न' इति भाष्यावतरणिकायाम् इत्याहुः ॥ ८ ॥

---

(१) 'पर्यायेणेन्द्रियेण' इति फ०।

(क) 'वृत्तिरेवास्य विभुनः सङ्कोचविकासिनीत्याचार्यः' इति व्यासभाष्यम् (पातञ्जलसूत्रम् १०, कैवल्यपादः)। (ख) ७म-सूत्रे तात्पर्यटीका नोपलभ्यते।

न्यायभाष्यम्

गत्यभावाच्च प्रतिषिद्धं विभुनोऽन्तःकरणस्यायुगपद्ग्रहणं(क) न लिङ्गान्तरेणानुमीयते इति। यथा चक्षुषो गतिः प्रतिषिद्धा सन्निकृष्टविप्रकृष्टयोस्तुल्यकालग्रहणात् पाणिचन्द्रमसो(१)र्व्यवधानेन प्रतीघाते सोऽनुमीयत(१*) इति सोऽयं नान्तः-

न्यायवार्त्तिकम्

ममाप्येवं कस्मान्न परिहारः ? न (२)कारणभेदे दृष्टत्वात्—यानि (३) खलु भिन्नानि (४)कारणानि तान्येकेनैवाधिष्ठायकेनाधिष्ठितानि युगपत्प्रवर्तमानानि दृष्टानि। यथोभयहस्ताधिष्ठिते (ख)वास्यौ प्रवर्तेते तथेन्द्रियाणि व्यापकेनान्तःकरणेनाधिष्ठीयन्त इति युगपत्प्रवृत्तिः प्रसक्ता, तत्प्रसक्तौ च युगपद्ग्रहणप्रसङ्ग इति। 'गत्यभावाच्च विभुनोऽन्तःकरणस्य' प्राप्त्यर्थस्य गमनस्याभावात्। (ग)न वा युगपत्प्रत्ययोत्पत्तौ प्रमाणमस्ति येन प्रमाणेन (घ)प्रतिषिद्धमपि (ङ)प्रत्यययौगपद्यं प्रतिपद्येत। यथा (५) किञ्चित्प्रतिषिद्धमपि प्रतिपद्यते यथा चक्षुषो गतिः प्रतिषिद्धा केनचित् सन्निकर्षविप्रकर्षयोस्तुल्यकालग्रहणात्—यस्मात् सन्निकृष्टं पाणिं विप्रकृष्टं चन्द्रमसमेकस्मिन् काले चक्षुषा प्रतिपद्यते तस्मान्न गतिमच्चक्षुरिति विप्रतिषिद्धाऽपि सती

न्यायवार्त्तिकतात्पर्यटीका

न, ग—वात् (सू० ८)॥ आक्षेप्तुर्वचनम्—ममाप्येवं कस्मान्नेति।

समाधातुर्वचनम्—न कारणभेदे दृष्टत्वादिति। कारणभेदे हि सति एकस्य कर्तुर्युगपदनेकं कार्यं दृष्टम्। सांख्यानां चान्तःकरणं कर्तृ व्यापकं चेति सर्वव्यापकेनान्तःकरणेनाधिष्ठितानीन्द्रियाणि युगपदेव कार्याणि कुर्युः। अस्माकं त्वन्तःकरणस्य करणत्वादेकेन्द्रियग्राह्येऽपि न युगपत्कार्योत्पाद इति विशेषः।

गत्यभावाच्च प्रतिषिद्धं विभुनोऽन्तःकरणस्यायुगपद्ग्रहणं न लिङ्गान्तरेणानुमीयत इति भाष्यस्य, गत्यभावाच्च विभुनोऽन्तःकरणस्येति प्रतीकमनूद्य तस्यार्थमाह—प्राप्त्यर्थस्य गमनस्याभावादिति। न वा युगपत्प्रत्ययोत्पत्तौ प्रमाणमस्ति येन प्रमाणेन प्रतिषिद्धमपि (च)प्रत्यययौगपद्यं प्रतिपद्येत। तस्माद्विभुन्यन्तःकरणेऽवश्यंभावि प्रत्यययौगपद्यम्, न चैतद्दृष्टम्; तस्मादन्तःकरणमण्वित्यर्थः। ननु दीर्घां शष्कुलीं भक्षयतः पञ्चानामपि

(१) 'व्यवधानप्रतिघातेनानुमीयते' इति ज०। (२) 'कारणभेदे' इति ख०। (३) 'खल्वभिन्नानि' इति ख०। (४) 'करणानि' इति ख०। (५) 'कथञ्चित्' इति क-ख-धृतपाठान्तरम्।

(क) अयुगपद्ग्रहणमित्यस्य न क्रमिकज्ञानोत्पाद इत्यर्थस्तस्य सम्मतत्वेन प्रतिषिद्धत्वासम्भवात्, किन्तु क्रमेण प्रत्येकमिन्द्रियेषु सम्बन्ध इत्यर्थः। ग्रहणं प्राप्तिः संयोग इति यावत्। (ख) 'वासी' अस्त्रविशेषः। (ग) 'न चायुगपत्' इति क-ख-पु० प्रमादकृतम्। (घ) बृहदारण्यके 'कामः संकल्पो विचिकित्सा' इति प्रकृत्य पठ्यते 'अन्यत्रमना अभूवमिति नाश्रौषम् अन्यत्रमना अभूवमिति नाद्राक्षमि'ति। अनया श्रुत्या प्रत्यययौगपद्यं प्रतिषिद्धं द्रष्टव्यम्। (ङ) 'प्रत्ययायौगपद्यम्' इति क-ख पु० प्रमादान्मुद्रितम्। (च) 'प्रत्ययायौगपद्यम्' इति क-ख पु० प्रामादिकम्।

न्यायभाष्यम्

करणे विवादो न तस्य नित्यत्वे। सिद्धं हि मनोऽन्तःकरणं नित्यं चेति। क तर्हि विवादः? तस्य विभुत्वे, तच्च प्रमाणतोऽनुपलब्धेः प्रतिषिद्धमिति। एकं चान्तःकरणं नाना चैता ज्ञानात्मिका वृत्तयः, चक्षुर्विज्ञानं घ्राणविज्ञानं रूपविज्ञानं गन्धविज्ञानम्। एतच्च वृत्तिवृत्तिमतोरेकत्वेऽनुपपन्नमिति। (१)पुरुषो जानीते नान्तःकरणमिति(१*)। एतेन विषयान्तरव्यासङ्गः प्रत्युक्तः। विषयान्तरग्रहणलक्षणो विषयान्तरव्यासङ्गः पुरुषस्य नान्तःकरणस्येति, (२)केनचिदिन्द्रियेण(२*) सन्निधिः (३)केनचिदसन्निधिरित्ययं तु व्यासङ्गोऽनुज्ञायते मनस इति॥ ८॥

न्यायवार्त्तिकम्

गति(क)र्व्यवधानप्रतिघातेनानुमीयत इति। (ख) न च युगपत्प्रत्ययोत्पत्तौ प्रमाणमस्ति।

सोऽयं नान्तःकरणे विवादो न तस्य नित्यत्वे। कुतस्तर्हि विवादः? तस्य विभुत्वे। तच्च प्रमाणतोऽनुपलब्धेर्नास्ति। न ह्यन्तःकरणस्य विभुत्वप्रतिपादकं प्रमाणमस्ति, एकमन्तःकरणं नाना चेमाश्चक्षुर्विज्ञानाद्यात्मिका वृत्तय इति एतच्च वृत्तिवृत्तिमतोरेकत्वेऽनुपपन्नम्। यस्य पुनर्वृत्तिवृत्तिमतोर्नानात्वं तस्यान्तःकरणसाधनश्चक्षुरादिसाधनश्चाऽऽत्मा अर्थानुपलभत इति युक्तम्। 'एतेन विषयान्तरव्यासङ्गः प्रत्युक्तः पुरुषो जानीते नान्तःकरणमिति'। कः पुनरयं व्यासङ्गः?

न्यायवार्त्तिकतात्पर्यटीका

ज्ञानानां युगपदुत्पादो दृष्ट इति कोऽयं प्रसङ्गः अन्तःकरणस्य विभुत्वे युगपदुत्पादः प्रसज्येतेत्यत आह—न च युगपत्प्रत्ययोत्पत्ताविति। अतिशीघ्रतया युगपदुत्पादाभिमानो न तु तत्र यौगपद्यं भाविकमित्यर्थः।

पुरुषो जानीते नान्तःकरणमिति स्वमतसमाधानपरं भाष्यं व्याचष्टे—यस्य पुनर्वृत्तिवृत्तिमतोरिति। यदपि सांख्या आचख्युर्विषयान्तरव्यासक्तेऽन्तःकरणे चक्षुरादिसंबन्धस्याप्यज्ञानादन्तःकरणवृत्तिर्ज्ञानमिति तन्निराकरणपरं भाष्यम्—एतेन विषयान्तरव्यासङ्ग इति। तदनुभाष्य वार्त्तिककारो व्याचष्टे—एतेनेति। (ग)तत्रेति। नेत्यस्योपजीव्यमाह—पुरुषो जानीते नान्तःकरणमिति हेतुना विषयान्तरव्यासङ्गः अन्तःकरणस्य प्रत्युक्तः। व्यासक्तो हि स भवति यो जानीते। न चान्तःकरणं जानीते किन्तु पुरुष इति तस्येदृशव्यासङ्गो नान्तःकरणस्य,

(१) 'पुरुषो जानीते नान्तःकरणमिति' इति ज-पु० नास्ति। (२) 'केन क्वचिदिन्द्रियेण' इति ग०। (३) 'केन क्वचिदसन्निधिः' इति ग०।

(क) व्यवधानपदमत्र व्यवधायकद्रव्यपरं बोध्यम्। (ख) 'न चायुगपत्'—इति क-पुस्तके प्रमादान्मुद्रितम्। (ग) यथादर्शनमिदं मुद्रितम्। वार्त्तिके 'तत्र'पदस्यादर्शनात् 'तत्रैतेनेत्यस्योपजीव्यमाह' इति समीचीनः पाठः सम्भाव्यते।

न्यायभाष्यम्

एकमन्तःकरणं नाना वृत्तय इति। सत्यभेदे वृत्तेरिदमुच्यते—

(सू०)—स्फटिकान्यत्वाभिमानवत्तदन्यत्वाभिमानः ॥९॥

तस्यां वृत्तौ नानात्वाभिमानः, यथा (१)द्रव्यान्तरोपहिते स्फटिके अन्यत्वाभिमानो नीलो लोहित इति ; एवं विषयान्तरोपधानादिति।

न्यायवार्त्तिकम्

अभीष्टविषयोऽनेकविज्ञानोत्पादः, स च पुरुषस्य नान्तःकरणस्य। यः पुनरयं सन्निधानासन्निधानलक्षणोऽन्तःकरणस्य व्यासङ्गः सोऽनुज्ञात इति ॥ ८ ॥

एकमन्तःकरणं नाना वृत्तय इति नैतत् न्यायवित्सञ्ज्ञाणकः प्रतिपत्तुमर्हति यथैवान्तःकरणमेकं तथा वृत्तिरिति। दृष्टविरोध इति चेत्—अथ मन्यसे यदि चान्तःकरणान्न वृत्तिर्भिद्यते ननु दृष्टं विरुध्यते रूपं रसो गन्धः स्पर्श इति दृष्टः प्रत्ययभेदो न स्यात्? न न स्यात्, विषयभेदानुविधानात्—वृत्तिरभिन्नाऽपि विषयभेदमनुविधीयमाना भिन्नेव ख्याति यथोपधानभेदमनुविधीयमानं स्फटिकादिद्रव्यं भिन्नमिव प्रकाशते। अस्य चार्थस्य ज्ञापनार्थम्—

स्फटिकान्यत्वाभिमानवत् तदन्यत्वाभिमानः इति सूत्रम्। नानेकान्तात्—उभयथा खल्वयं नानात्वाभिमानो दृष्टः नानाभूतेषु, गन्धादिषु, अभिन्ने च स्फटिक इति।

न्यायवार्त्तिकतात्पर्यटीका

अन्यादृशस्त्वन्तःकरणस्य व्यासङ्गो न निषिध्यत इत्यर्थः ॥ ८ ॥

चोद्यभाष्यम्—एकमन्तःकरणं नाना वृत्तय इति, तद्व्याचष्टे—एकमन्तःकरणं नाना वृत्तय इति नैतदिति। सम्यगाचष्टे जानीते संख्याणकः सांख्यः। संख्या हि समीचीना बुद्धिस्तया वर्त्तत इति साङ्ख्यः। एतदुक्तं भवति—यद्यपि वृत्तयो नाना प्रतिभान्ति तथाऽपि भ्रान्तिरियमन्तःकरणादेकस्मादभिन्नानां नानात्वानुपपत्तेः। तस्मात् स्फटिकस्य यथैकस्यापि (क)तापिच्छजपा-कर्णिकारादिकुसुमोपधानभेदाद्भेद औपाधिक एवमन्तःकरणमणेरपि स्वच्छस्येन्द्रियप्रणाडिकया तत्तदर्थोपरक्तस्यौपाधिकं नानात्वम्, वृत्तिरिति च प्रत्यय इति ज्ञानमिति चाऽऽख्यायत इत्यर्थः। तदेतद् दूषयति—

स्फटि—नः (सू० ९)॥ नानेकान्तादिति। योऽपि वृत्तीनामौपाधिकभेदमाह—तेनाप्युपाधयोऽर्था आजानतो भिन्ना वक्तव्याः। तथा च भेदस्य द्विधा दर्शनादनेकान्तो दृष्टान्तो नैकार्थस्य साधकः।

---

(१) 'द्रव्यान्तरोपहितस्फटिकद्रव्ये' इति भा०।

(क) तापिच्छं तमालपुष्पम्, जपा रक्तवर्णा प्रसिद्धा, कर्णिकारम् आरग्वधतरुपुष्पम् सोन्दाल इति वङ्गेषु प्रसिद्धम्।

न्यायभाष्यम्

न हेत्वभावात्। स्फटिकान्यत्वाभिमानवदयं ज्ञानेषु नानात्वाभिमानो गौणो न पुनर्गन्धाद्यन्यत्वाभिमानवदिति हेतुर्नास्ति हेत्वभावादनुपपन्न इति। समानो हेत्वभाव इति चेत् न ज्ञानानां क्रमेणोपजनापायदर्शनात्—क्रमेण हीन्द्रियार्थेषु ज्ञानान्युपजायन्ते

न्यायवार्त्तिकम्

यथाश्रुति सूत्रे हेत्वभावो दृष्टान्तमात्रत्वात्—दृष्टान्तमात्रमेतत् नात्र हेतुरस्तीति। विकल्पानुपपत्तेश्च—योऽयं दृष्टान्तः स्फटिकवदिति, विकल्पोऽत्र—किमयं स्फटिक उपधानभेदेन भिद्यते उत न। किं चातः? यदि भिद्यते, न दृष्टान्तः। अथ न भिद्यते, नानात्वाभिमानः कथम्? यद्युपधानभेदात्, भिन्नमुपधानमिति कथं प्रतिपद्यसे? यदि प्रत्ययभेदात्, व्याघातः—अभिन्ना वृत्तिः प्रत्ययश्च भिन्न इति व्याघातः प्रत्ययपर्यायत्वाद् वृत्तेः। अथ भवतां वृत्तीनां भेदे किं प्रमाणम्? ज्ञानानां क्रमेणोपजनापायदर्शनम्—क्रमेण ज्ञानान्युपजायन्ते अपयन्ति चेति दृश्यते। एकानेकविषयत्वाच्च प्रत्ययनानात्वाभिमानस्य एकानेकविषयाधिगतिः कथम्? एकस्मिंश्च

न्यायवार्त्तिकतात्पर्यटीका

न हेत्वभावादिति भाष्यं व्याचष्टे—यथाश्रुति सूत्र इति। न केवलं साधनाभावः, बाधकं चात्रास्तीत्याह—विकल्पानुपपत्तेश्चेति। न परपक्षस्य प्रतिषेधमात्रेण स्वपक्षसिद्धिरस्तीत्याशयवान् पृच्छति—अथ भवतामिति। उत्तरम्—ज्ञानानां क्रमेणेति। स्यादेतत्—प्रत्ययनानात्वाभिमानो भविष्यति हेतुरेकत्वे वृत्तीनाम् (क)एकत्वं वृत्तीनां नानात्वाभिमानविषयत्वात् स्फटिकवदिति; तस्मान्न हेत्वभाव इति अत आह—एकानेकविषयत्वाच्च प्रत्ययनानात्वा-

वृत्तिः

वृत्तिवृत्तिमतोर्वस्तुतोऽभेदेऽपि भेदप्रत्ययप्रतिपादनाय शङ्कते—(स्फटिकान्यत्वाभिमानवत् तदन्यत्वाभिमानः)

यथा जपाकुसुमादिसन्निधानादेकस्यापि स्फटिकस्य तत्तद्रूपाभिमानस्तथा वृत्तिमदभिन्नाऽपि वृत्तिस्तत्तद्विषयसन्निकर्षवशान्नानेव प्रतिभासत इति॥ ९॥

दूषयति—(न हेत्वभावात्)

भ्रमत्वे साधकाभावान्नोक्तं युक्तमित्यर्थः।

केचित्तु "न हेत्वभावात्' इति भाष्यम्" इति टीकादर्शनान्नेदं सूत्रम्, किं तु तुच्छतया सूत्रकृताऽदूषणान्न्यूनतापरिहाराय भाष्यकृता तदुक्तमिति मन्यन्ते॥ ९ क॥ (ख)

समाप्तं बुद्ध्यनित्यताप्रकरणम्॥ १॥

(क) अत्र प्रयोगमाह—एकत्वमिति। (ख) वृत्तिकृन्मते 'न हेत्वभावा'दिति सूत्रम्। तस्य टीकादिसम्मतसूत्रसंख्यासंवादरक्षार्थम् अस्य '९ क' इति रूपेण निर्देशः।

न्यायभाष्यम्

चापयन्ति चेति दृश्यते। तस्माद् गन्धाद्यन्यत्वाभिमानवदयं ज्ञानेषु नानात्वाभिमान इति॥ ६॥

न्यायवार्त्तिकम्

विषये नानात्वाभिमानः स्फटिके (१)दृष्टः नानाभूतेषु च गन्धादिषु नानात्वाभिमानो दृष्टः तेन नानात्वाभिमानस्योभयथा दृष्टत्वादिदमेकमिदमनेकमिति न युक्तः प्रत्यय इति। यश्चायमभिन्ने स्फटिके भेदप्रत्ययः सोऽपि प्रत्ययभेदमन्तरेण न युक्तः। न हि प्रत्ययाभेद-वादिनः स्फटिके नीलादिप्रत्ययभेदो युक्त इति। स्फटिके नीलादिप्रत्ययोऽसम्बन्धान्न युक्तः, न हि नीलं द्रव्यं चक्षुःसन्निकृष्टमिति। अथ सन्निकृष्टम्, तदेव नीलं न स्फटिक इति स्फटिक-समानाधिकरणः स्फटिके नीलप्रत्ययो न युक्तः। न नैरन्तर्यदर्शनात्—नैरन्तर्येणावस्थिते स्फटिक-नीलद्रव्ये चक्षुषा सन्निकृष्येते तत्सन्निकर्षान्नीलगुणाध्यारोपेण स्फटिके मिथ्याप्रत्ययो नील इति यथा सान्तरेष्वन्तरालादर्शनात् संयुक्तप्रत्यय इति। यस्य च प्रत्ययो न भिद्यते तस्य त्रीणि प्रमाणानीति शास्त्रं व्याहन्यते। न हि प्रत्ययाभेदे प्रमाणभेदः सम्भवति। विषयभेदात् त्रित्वमिति चेत्—अथ मन्यसे विषयस्त्रेधा भिन्नस्तेनानुरञ्जितः प्रत्ययस्त्रेधैव भवति? तन्न युक्तम्, प्रमाणा-

न्यायवार्त्तिकतात्पर्यटीका

भिमानस्य एकानेकविषयाधिगतिः कथमिति। नानात्वाभिमानोऽपि दृष्टान्तवदसाधकः नैकान्तिकत्वात्। तदेवमन्तरा परकीयामाशङ्कां निराकृत्य पुनरपि वृत्तिभेदं साधयति—यश्चायमभिन्न इति। यद्यर्थोपधानभेदात् प्रत्ययेषु भेदो नाजानतस्तत एकस्मिन्नर्थे न प्रत्ययभेदः प्रत्ययोपधानभेदाभावादित्यर्थः। कश्चिद्देशयति—स्फटिक इति। परिहरति—न नैरन्तर्य-दर्शनादिति। नीलीद्रव्यलेपस्यापि सान्तरत्वं नीलः स्फटिक इति साक्षात्कारानुमेयमिति भावः। इतोऽपि प्रत्ययभेद इत्याह—(क)यस्य च प्रत्ययाभेद इति। प्रमाणस्य भेदः प्रत्ययलक्षण-कार्यभेदोन्नेयो नासति प्रत्ययभेदे भवितुमर्हति। शङ्कते—विषयभेदादिति। एतदुक्तं भवति—प्रातिस्विकोऽपि भेदो विषयाणां यदि प्रमाणभेदहेतुः हन्तैतस्याऽऽनन्त्येन प्रमाणानामनन्तो भेदः स्याद् न तु त्रित्वम्; तस्मादवान्तरसामान्यं विषयाणामास्थेयम्, न च तदपि स्वरूपमात्रनिष्ठं विषयाणां संभवति एकस्मिन्नपि प्रमाणानां (२)संप्लवात्। तस्मात् प्रत्ययभेदोपहितसामान्या विषयास्त्रित्वे व्यवतिष्ठमानाः प्रमाणमपि त्रित्वे व्यवस्थापयन्ति। सामग्रीत्रयान्वयव्यतिरेकानु-विधायिनश्च प्रत्ययास्त्रयो भवन्ति। तथा च त्रिविषयत्वात् प्रमाणानि त्रीणि। तदिदमुक्तम्—विषयभेदादिति। निराकरोति—तन्नेति। प्रमाणाभेदे सामग्रीत्रयाभेदे तदनुविधायिनां

(१) 'दृष्टान्त:'—इति क-ख-धृतपाठान्तरम्। (२) 'संभवादिति' क-तात्पर्यधृतपाठान्तरम्।

(क) 'यस्य च प्रत्ययो न भिद्यते' इति वार्त्तिकमत्रेतोऽत्र धृतमिति बोध्यम्।

न्यायभाष्यम्

स्फटिकान्यत्वाभिमानवदित्येतदमृष्यमाणः क्षणिकवाद्याह—

(सू०)—स्फटिकेऽप्यपरापरोत्पत्तेः क्षणिकत्वाद् व्यक्तीनामहेतुः ॥ १० ॥

न्यायवार्त्तिकम्

भेदे विषयभेदानधिगतेः—न हि प्रमाणभेदमन्तरेण विषयभेदोऽधिगन्तुं शक्यते इति। विषयतादात्म्यादिति चेत्—अथ मन्यसे विषय एवासौ तथा व्यवस्थितस्तादात्म्यात् तथा ख्यातीति? तन्न,(१)प्रमाणवैयर्थ्यात्—एवं सति व्यर्थं प्रमाणम्, न विषयभेदं प्रमाणभेदोऽवगमयति विषयस्तु तादात्म्यात् तथा व्यवतिष्ठते इति। यथाऽध्यवस्यति तथा चेतयत इति च व्याघातः अप्रकारवत्वात्—प्रकारवत्येतद्युक्तम्, अप्रकारे न युक्तम्। बुद्धिस्तं प्रत्ययमुपलभत इति च विरोधोऽधिकरणाधेययोरभेदात्—यः प्रत्ययः स बुद्धिर्धीरित्यधिकरणाधेययोरभेदः। एवं च सति बुद्धिस्तं प्रत्ययमुपलभत इति व्याहतम् ॥ ९ ॥

(इति बुद्ध्यनित्यताप्रकरणम्)

स्फटिकान्यत्वाभिमानवत् तदन्यत्वाभिमान इत्येतदमृष्यमाणः क्षणिकवाद्याह—

स्फटिकेऽप्यपरापरोत्पत्तेः क्षणिकत्वाद् व्यक्तीनामहेतुः। स्फटिकस्याभेदेनावस्थितस्या-

न्यायवार्त्तिकतात्पर्यटीका

प्रत्ययानामभेदात्। न हि प्रत्ययभेदमन्तरेण सामग्रीभेदः शक्यो विज्ञातुम्। तस्मात् प्रत्ययसामग्र्यभेदेऽपि विषयभेदानधिगतेर्न विषयभेदस्थित्वाधिगमो वा प्रत्ययभेदमन्तरेणेति। शङ्कते—विषयतादात्म्यादिति चेत्। प्रत्ययप्रत्येतव्ययोरभेदादुपपन्नः प्रत्ययभेद इत्यर्थः। निराकरोति—तन्नेति। अपि च प्रत्ययाभेदे प्रकारवत्त्वाभावाद् यथाऽध्यवस्यति बुद्धिः तथा चेतयते पुरुष इति व्याघातः। कुतः—अप्रकारवत्त्वात्। भिन्नो हि प्रकारवान् भवति नाभिन्न इत्यर्थः। अन्तःकरणस्य बुद्धेः प्रत्ययानामभेदे बुद्धिस्तं प्रत्ययमुपलभते इति विरोध इति ॥ ९ ॥

तदेवं स्वमतेन साङ्ख्यपक्षं दूषयित्वा बौद्धैर्यत्साङ्ख्यराद्धान्ते दूषणमुक्तं तद् दूषयितुं बौद्धमतमुपन्यस्यति—स्फटिकान्यत्वाभिमान (क) इतीदममृष्यमाणः क्षणिकवाद्याहेति।

स्फटि—तुः (सू० १०) ॥ यत् सत् तत्सर्वं क्षणिकं यथा शरीरं तथा च स्फटिक इति

(१) 'प्रमाणवैयर्थ्यप्रसङ्गात्' इति क-ख-धृतपाठान्तरम्।

(क) वार्त्तिके 'इदम्' इत्यत्र 'एतदि'ति विशेषः।

न्यायभाष्यम्

स्फटिकस्याभेदेनावस्थितस्योपधानभेदान्नानात्वाभिमान इत्ययमविद्यमानहेतुकः पक्षः। कस्मात्? स्फटिकेऽप्यपरापरोत्पत्तेः। स्फटिकेऽपि अन्या व्यक्तय उत्पद्यन्ते अन्या निरुध्यन्त इति। कथम्? क्षणिकत्वाद् व्यक्तीनाम्। क्षणश्चाल्पीयान् कालः क्षणस्थितिकाः क्षणिकाः। कथं पुनर्गम्यते क्षणिका व्यक्तय इति? उपचयापचयप्रबन्धदर्शनाच्छरीरादिषु। पक्तिनिर्वृत्तस्याऽऽहाररसस्य शरीरे रुधिरादिभावेनोपचयोऽपचयश्च प्रबन्धेन प्रवर्त्तते। उपचयाद् व्यक्तीनामुत्पादः, अपचयाद् व्यक्तिनिरोधः। एवं च सत्यवयवपरिणामभेदेन वृद्धिः शरीरस्य कालान्तरे गृह्यते इति सोऽयं (१)व्यक्तिविशेषधर्मो (१*) व्यक्तिमात्रे वेदितव्य इति ॥ १० ॥

न्यायवार्त्तिकम्

न्यत्वाभिमान इत्ययुक्तं क्षणिकत्वाद् व्यक्तीनाम्। क्षणिकत्वमुपचयापचयप्रबन्धदर्शनात्—यस्माच्छरीरादिषु पक्तिनिर्वृत्तं रसद्रव्यं प्रतिक्षणमुपचीयते चापचीयते च, उपचयाद् व्यक्तीनामुत्पादः अपचयाद् व्यक्तिनिरोधः, तौ चोत्पादनिरोधौ तस्य कालान्तरेण दृष्टौ, अतोऽवगम्यते प्रतिक्षणमुपचीयते चापचीयते च शरीरमिति। यस्य खलु प्रतिक्षणमुपचयापचयौ न दृष्टौ तस्य कालान्तरेणापि न भवतो यथा भूमेरपच्यमानायाः पाकजानामिति। पच्यमानभूमिपाकजवच्च प्रतिक्षणं विशेष इति। अस्य प्रयोगः—प्रतिक्षणं शरीरमन्यच्चान्यच्च भवति बाह्यप्रत्ययाभेदे सत्यन्ते विशेषदर्शनात् पच्यमानभूमिपाकजवत् अपच्यमानभूमिपाकजवच्चेति ॥ १० ॥

न्यायवार्त्तिकतात्पर्यटीका

जरन्तो बौद्धाः। शरीरस्य च कालपरिपाकवशेन स्थौल्यस्य ह्रासस्य च दर्शनात् प्रतिक्षणं सूक्ष्मः परिणतिभेदोऽनुमीयते स चान्तरा विनाश एवेति। यस्यापि स्फटिकादेस्तादृशं स्थौल्यं ह्रासो वा न दृश्यते तस्यापि सत्त्वेन शरीरवदेव प्रतिक्षणं विनाशोत्पादावनुमीयेते इति। स्यादेतत्—यदैवोपचयापचयौ शरीरस्य दृश्येते तदैवोत्पादविनाशौ भविष्यतः पूर्वं तु तत्प्रबन्धकल्पनायां किं प्रमाणमित्यत आह—यस्य खलु प्रतिक्षणमिति। अस्य प्रयोगः—प्रतिक्षणम् (क) अन्यच्चान्यच्चेति। पटस्य कुङ्कुमादिद्रव्यसंयोगे सत्यन्तेऽरुणिमलक्षणो विशेषो दृश्यते न चास्यारुणिमा प्रतिक्षणभावीत्यत उक्तम्—बाह्यप्रत्ययाभेदे सतीति। अभिन्नो हि शरीरोपचयहेतुः प्रतिदिनमुपयुज्यमानोऽन्नपानप्रचयो यथा पाकजोत्पत्तावौष्ण्यापेक्षो वह्निसंयोगः, बाह्यः प्रत्ययः कारणम्, पटे तु रागोत्पत्तौ कुङ्कुमद्रव्यसंयोगः सांप्रतिकी विशिष्ट इत्यर्थः ॥ १० ॥

---

(१) 'व्यक्तिविशेषधर्मः' इति ज-पु० नास्ति।

(क) वार्तिकगतं 'शरीर'मिति न गृहीतम्।

(सू०)—नियमहेत्वभावाद् यथादर्शनमभ्यनुज्ञा ॥ ११ ॥

न्यायभाष्यम्

(१)सर्वासु व्यक्तिषु उपचयापचयप्रबन्धः शरीरवदिति नायं नियमः। कस्मात्? हेत्वभावात्। नात्र प्रत्यक्षमनुमानं वा प्रतिपादकमस्तीति। (२)तस्माद् यथादर्शनमभ्यनुज्ञा। यत्र यत्रोपचयापचयप्रबन्धो दृश्यते, तत्र तत्र व्यक्तीनामपरापरोत्पत्ति-

न्यायवार्त्तिकम्

नियमहेत्वभावाद् यथादर्शनमभ्यनुज्ञा। तदिदमुपचयापचयप्रबन्धदर्शनं शरीरे दृष्टत्वाच्छरीरस्यान्यत्वं साधयतु, न पुनरनुपलभ्यमानोपचयापचयविशेषाणां स्फटिकादीनामेतस्मादन्यत्वं सिध्यतीत्यहेतुः। यत्रोपलब्धिस्तस्यान्यत्वमिति चेत्—अथ मन्यसे नैवास्माभिरुपचयापचयप्रबन्धदर्शनेन सर्वभावानां क्षणिकत्वं साध्यते अपि तु यत्र तदस्ति तस्मिन् क्षणिकत्वमिति? सत्यम्, यस्य यस्योपचयापचयप्रबन्ध उपलभ्यते तस्य तस्यान्यत्वमिति, न तु क्षणिकत्वम्, उपचयापचयप्रबन्धदर्शनं चान्यथाभवदहेतुः क्षणिकत्वे। कथमन्यथा (३)पूर्वावयवा आहारा-

न्यायवार्त्तिकतात्पर्यटीका

सिद्धान्तसूत्रम्—

निय—ज्ञा (सू० ११) ॥ तदेतद् व्याचष्टे—तदिदमुपचयापचयेति। न हि धूमदर्शनानुमितो वह्निः क्वचित् प्रवर्तत इत्यदृश्यमानेऽपि धूमे पर्वतत्वमात्रेण पर्वतान्तरेऽपि वह्निमनुमिन्वते अनुमातार इत्यर्थः। शङ्कते—यत्रोपलब्धिरिति। क्षणिकत्वं पूर्वापरभागविकलकालकलामात्रावस्थायित्वम्। न च तादृशं क्षणिकत्वं नैयायिकानां क्वचिदपि संमतमिति न सिद्धसाधनमित्यर्थः। निराकरोति—सत्यमिति। कस्मात् पुनरस्मदभिमतैव क्षणिकता न सिध्यत्युपचयापचयप्रबन्धदर्शनादित्यत आह—उपचयापचयप्रबन्धदर्शनं चान्यथाभवदिति। चो

वृत्तिः

स्फटिके नानात्वभ्रम इत्यसहमानः सौगतः शङ्कते—(स्फटिकेऽप्यपरापरोत्पत्तेः क्षणिकत्वाद् व्यक्तीनामहेतुः)

स्फटिकान्यत्वाभिमानवदित्यहेतुः। कुतः? स्फटिकेऽप्यपरापरोत्पत्तेः अत्यन्तविलक्षणस्फटिकोत्पत्तेः। तत्र मानमाह—व्यक्तीनां भावानां क्षणिकत्वात्। तत्साधनाय भाष्यम्—

'उपचयापचयप्रबन्धदर्शनाच्छरीरादिषु' प्रतिक्षणं शरीरेषूपचयापचयदर्शनान्नानात्वम्, न ह्येकस्मिन्नवयविनि परिमाणद्वयसमावेश इति भावः।

इदं सूत्रमेवेति केचित् ॥ १० ॥

---

(१) 'पदार्थानां सर्वासु' इति ज-पु० पा०।

(२) 'कस्मात्' इति टि०।

(३) 'पूर्वशरीरावयवाः'—इति क-ख-धृतपाठान्तरम्।

न्यायभाष्यम्

रुपचयापचयप्रबन्धदर्शनेनाभ्यनुज्ञायते, यथा शरीरादिषु। यत्र यत्र न दृश्यते तत्र तत्र प्रत्याख्यायते यथा ग्रावप्रभृतिषु। स्फटिकेऽप्युपचयापचयप्रबन्धो न दृश्यते, तस्माद्युक्तं स्फटिकेऽप्यपरापरोत्पत्तिरिति। यथा चार्कस्य कटुकिम्ना सर्वद्रव्याणां कटुकिमानमापादयेत् तादृगेतदिति ॥ ११ ॥

यश्चाशेषनिरोधेनापूर्वोत्पादं निरन्वयं द्रव्यसन्ताने (१)क्षणिकतां मन्यते तस्यैतत्—

(सू०)—नोत्पत्तिविनाशकारणोपलब्धेः ॥ १२ ॥

उत्पत्तिकारणं तावदुपलभ्यते अवयवोपचयो वल्मीकादीनाम्, विनाशकारणं चोप-

न्यायवार्त्तिकम्

वयवसहिताः पूर्वव्यूहपरित्यागेन व्यूहान्तरमापद्यमानाः शरीरान्तरमुत्पादयन्तीति युक्तो भेद इत्यहेतुरेषः। तुल्यं पक्षप्रतिज्ञानमिति चेत्—अथ मन्यसे (२)पूर्वाहारावयवोपचययोगे सति शरीरावयवाः शरीरान्तरमारभन्ते पूर्वव्यूहपरित्यागेन, न पुनः क्षणिकत्वादन्यज्जातमिति अत्र को हेतुरिति? नासाधनात्—न मयाहारोपचयापचययोगाच्छरीरस्यान्यता साध्यते, अपि तु भवता विशेषदर्शनाच्छरीरस्यान्यत्वमभ्यधायि ततश्च क्षणिकत्वमिति विशेषदर्शनं क्षणिकत्वसाधनम्, तदस्माभिर्विशेषदर्शनमन्यथाभवत् क्षणिकत्वे न साधनमित्येतावन्मात्रमुच्यते न साधनमभिधीयत इति ॥ ११ ॥

न्यायवार्त्तिकतात्पर्यटीका

हेत्वर्थः। शङ्कते—तुल्यमिति। निराकरोति—नासाधनादिति। एकान्तनिश्चयं विना न साधनं दूषणं तु सन्देहापादनेनापीति सोऽयं साधनदूषणयोर्विशेष इत्यर्थः ॥ ११ ॥

वृत्तिः

सिद्धान्तसूत्रम्—(नियमहेत्वभावाद् यथादर्शनमभ्यनुज्ञा)

पदार्थानां विनाशसामग्रीवैशिष्ट्यनियमे मानाभावात्। अभ्युपेत्याऽऽह यथादर्शनमिति। यदि कस्यचिद्विनाशसामग्रीवैशिष्ट्ये प्रमाणं स्यात् तदा क्षणिकत्वं तस्याभ्यनुज्ञायत एव, यथाऽन्त्यशब्द इति ॥ ११ ॥

---

(१) 'क्षणिकानाम्'-इति वि- टि०।

(२) 'पूर्वापरावयवोपचययोगे'—इति क-ख-धृतपाठान्तरम्।

न्यायभाष्यम्

लभ्यते घटादीनामवयवविभागः। यस्य त्वनपचितावयवं निरुध्यते अनुपचितावयवं चोत्पद्यते (१)तस्याशेषनिरोधे निरन्वये (२)वाऽपूर्वोत्पादे न कारणमुभयत्राप्युपलभ्यते इति ॥ १२ ॥

न्यायवार्त्तिकम्

अथावश्यं साधनं वक्तव्यम्, इदं ब्रूमः—

नोत्पत्तिविनाशकारणोपलब्धेः। उत्पत्तिकारणं विनाशकारणं चोपचयापचयौ वल्मीकघटादीनां दृष्टाविति तदुभयं क्षणिकत्वे न स्यात्। उपचय इति च वृद्धिः उपचितो गौरिति, अपचय इति ह्रासः अपचितो गौरिति, उभयं चैतदवस्थितवस्तुविषयम्। न ह्यपूर्वं जायमानं वर्धत इत्युच्यते, नापि विनश्यदपचितमित्युच्यते। उपचयापचयोत्पत्तिविनाशकारणोपलब्धेरिति (क) सूत्रार्थः।

अथवा कारणमित्याधारोऽभिधीयते कार्यमित्याधेयम्। न च क्षणिकत्वे आधाराधेयभावः सम्भवति न चाधाराधेयभावमन्तरेण कार्यकारणभावः, तस्मात् कार्यकारणभावोपलब्धेरक्षणिकत्वमिति। अस्य प्रयोगः—कार्यकारणे एककालानुभाविनी आधाराधेयभावात् क्षीरकुण्डवदिति। क्षीरं कुण्डे वर्तते तच्च कुण्डकालमनुभवति तथा च कार्यं कारणे वर्त्तते तस्मात् तदपि कारणकालमनुभवति। नाऽऽधाराधेयभावस्यासिद्धत्वादिति चेत्—अथ मन्यसे असिद्धः कार्यकारणयोराधाराधेयभावः कार्यस्यानाधारत्वात्; नैव हि नः किञ्चित् कार्यमाधारवद् दृष्टमिति? नानेकान्तात्—नायमेकान्तः सर्वं कार्यमनाधारमिति, यथोभयपक्षसम्प्रतिपत्त्या रूपं कार्यं चाऽऽधारवच्च।

न्यायवार्त्तिकतात्पर्यटीका

उत्तरसूत्रमवतारयति—अथावश्यं साधनं वक्तव्यमिति।

नोत्प—ब्धेः (सू० १२)॥ उत्पत्तिविनाशकारणं ज्ञापकम्, अवयवोपचयापचयौ न क्षणिकपक्षे युज्येते निरन्वयोत्पादविनाशयोरुपचयापचयप्रत्ययाभावादिति। उपचयापचयोत्पत्तिविनाशकारणोपलब्धेरिति। उपचयापचयौ च तावुत्पत्तिविनाशकारणे चेति कर्मधारयः।

उत्पत्तिविनाशकारणोपलब्धेरित्यस्य व्याख्यानान्तरमाह—अथ वा कारणमिति। समवायिकारणं हि कार्यात् पूर्वं च कार्यकाले चेति लोकसिद्धम्, तच्चैतत्क्षणिकत्वेऽनुपपन्नमित्यर्थः। एककालानुभाविनी, अनुभवः प्राप्तिः एककालप्राप्ते इत्यर्थः। भिन्नलोकमर्यादः शङ्कते—आधाराधेयभावस्येति। निराकरोति—नानेकान्तात्। भवतामपि राद्धान्ते रूपं सप्रतिघं कार्य-

(१) 'तस्याविशेषनिरोधे' इति वि०।

(२) 'वा पूर्वोत्पादे' इति ज०, 'चापूर्वोत्पादे' इति वि-टि०।

(क) उत्पत्तिविनाशेत्यादिसूत्रभागार्थः इति यावत्।

न्यायवार्त्तिकम्

(क)स्पर्शस्तदाश्रय इति च व्याघातः—यदि च रूपमनाश्रितं भवति स्पर्शस्तदाश्रय इति व्याहतम्। अनेन च रूपदृष्टान्तेन यावद् यावत् समानकालतया साध्यते सर्वं तदेककालानुभावि भवतीति सिद्धः कार्यकारणभावः क्षणिकेष्वपि। नाशोत्पादयोरेककालत्वात् तुलान्तयोरुन्नमनावनमनवदिति चेत्—अथ मन्यसे कार्यकारणभावः क्षणिकेष्वपि सम्भवतीति कारणविनाशसमकालं कार्यभावात्—यदा कारणं विनश्यति तदा कार्यमुत्पद्यते विनश्यच्च कारणमस्ति कारणविनाशेनाभिन्नकालः कार्योत्पादः यथा तुलान्तयोर्नामोन्नामाविति ? न हेत्वर्थापरिज्ञानात्—न ब्रूमः (१)क्षणिकत्वे कार्यकारणभावो नास्ति, अपि त्वाधाराधेयभावो भिन्नकालत्वात् कार्यकारणयोर्न युक्त इति। कार्यं चानाधारमिति न दृष्टान्तोऽस्ति, अस्मत्पक्षे तु कार्यमाधारवदित्यस्ति दृष्टान्तो रूपादिरिति। तुलाधारस्य च (२)व्यापारे नामोन्नाम (३)भावानभ्युपगमाद् (४)युगपद्भावानुपपत्तिरेकत्वात्—यदि तुलामधिकृत्य ब्रवीषि तदेकं कर्म भ्रमणाख्यम् एकत्वाद् युगपद्भावो न युक्तः ; न

न्यायवार्त्तिकतात्पर्यटीका

आधारवच्च(ख)। यदि तु रूपमप्यनाधारं मनुषे ततस्ते स्वसिद्धान्तव्याकोप इत्याह—स्पर्शस्तदाश्रय इति च व्याघात इति। सर्वं तदेककालानुभावि सिद्धं भवतीति। शङ्कते—सिद्धः कार्यकारणभावः क्षणिकेष्वपीति कार्यस्यानाधारत्वप्रसङ्गेन। न हि क्षणिकत्वे कार्यकारणभावो न सिध्यति। स तु सिद्धः क्षणिकत्वपक्षेऽपीति कारणविनाशसमकालत्वेन कार्योत्पादस्य कार्यकारणयोः समानकालत्वादित्यर्थः। निराकरोति—न हेत्वर्थापरिज्ञानादिति। एतावता प्रयासेन त्वया कार्यकारणभावः क्षणिकानां समर्थ्यते न चायमक्षणिकत्वे हेतुः अपि त्वाधाराधेयभावः स चाशक्यसाधनः। को नु खल्वयं कारणविनाशः—कारणाभावो वा विनाशकारणसान्निध्यं वा ? पूर्वस्मिन् पक्षे कार्यकारणयोः कुतः समानकालता, उत्तरस्मिन्नप्युत्पन्नस्य पश्चाद्विनाशकारणसान्निध्येऽपि कुतः सतः क्षणिकता। न चोत्पद्यमानताविनश्यत्तयोस्तुल्यकालत्वमनुभवविरोधात्; कार्यस्य च तदैवोत्पद्यमानत्वे कार्यकारणभावाभावः सव्यदक्षिणशृङ्गवदिति भावः। अपि च दृष्टान्तोऽपि साध्यविकल इत्याह—तुलाधारस्येति। ये अवयवकर्मणी

वृत्तिः

युक्त्यन्तरमाह—(नोत्पत्तिविनाशकारणोपलब्धेः)

न स्फटिकादेः क्षणिकत्वं, यत उत्पत्तिविनाशकारणान्युपलब्ध्या निर्णीतान्यवयवोपचयादीनि, न च स्फटिके विनाशकारणमुपलभ्यते येन पूर्वविनाशोऽपरोत्पत्तिश्च स्यादिति भावः ॥ १२ ॥

---

(१) 'क्षणिके'—इति क-ख-धृतपाठान्तरम्। (२) 'कर्मणः'—इति क-ख-धृतपाठान्तरम्। (३) '-भावेनानभ्युपगमात्'—इति क-ख-धृतपाठान्तरम्। (४) 'युगपद्भावानुत्पत्ति'—इति क-ख-धृतपाठान्तरम्।

(क) स्पर्शाः षट् सन्निपातजाः। पञ्च प्रतिघसंस्पर्शाः षष्ठोधिवचनाह्वयः॥ इति। (अभिधर्मकोशः ३।३०)। 'इन्द्रियविषयतद्विज्ञानसन्निपातावस्थाः स्पर्शाः' इत्यभिधर्मकोशस्य ३।२४सूत्रटीकायां राहुलः।

(ख) तदुक्तमाचार्यवसुबन्धुना 'सप्रतिघा दशरूपिणः' इति। तदेतद् व्याख्यातं राहुलेन 'आवरणप्रतिघातेन दश सप्रतिघा धातवः ते च रूपिण एवे'ति। अभिधर्मकोशः १।२९)।

(सू०)—क्षीर(१)विनाशे कारणानुपलब्धिवद्दध्युत्पत्तिवच्च (२)तदुपपत्तिः ॥ १३ ॥

न्यायभाष्यम्

यथाऽनुपलभ्यमानं क्षीरविनाशकारणं दध्युत्पत्तिकारणं चाभ्यनुज्ञायते तथा स्फटिके परापरासु व्यक्तिषु विनाशकारणमुत्पादककारणं चाभ्यनुज्ञेयमिति ॥ १३ ॥

न्यायवार्त्तिकम्

ह्येकं युगपद्भवतीति । अथावयवकर्मणी, तयोरपि कार्यकारणभावेनानभ्युपगमात् किं केन सम्बध्यते । अथ युगपद्भावमात्रं विवक्षितमिति ? युगपद्भावः कारणयौगपद्यात्—यावतामर्थानां कारणानि युगपद्भवन्ति तावतामेकस्मिन् काले भाव इति नामोन्नामावसम्बद्धौ, कारणयौगपद्यं तु—गुरुत्वप्रयत्नसंयोगा उन्नतेः, अवनतेरपि गुरुत्ववद्द्रव्यसंयोगानुगृहीतो रज्जुतुलासंयोगः । अथापि न कर्मार्थान्तरं संयोगं वा परः प्रतिपद्यते ? तस्याप्युक्तमुत्तरं संयोगोऽप्यर्थान्तरमिति संयोगकारणत्वेन च कर्माप्यर्थान्तरमिति । यथा च भावानामुत्पत्तिविनाशकारणमुपलभ्यते नैवं स्फटिकस्य, न चानुपलभ्यमानं शक्यमभ्यनुज्ञातुमिति ॥ १२ ॥

(३)क्षीरविनाशे कारणानुपलब्धिवद्दध्युत्पत्तिवच्च तदुपपत्तिः । यथा क्षीरस्य विनाशकारणमनुपलभ्यमानमभ्यनुज्ञायते दध्नश्चोत्पत्तिकारणमेवं (४)स्फटिकादिव्यक्तीनामनुपलभ्यमाने उत्पत्तिविनाशकारणे अभ्यनुज्ञेये इति ॥ १३ ॥

न्यायवार्त्तिकतात्पर्यटीका

(क)नामोन्नामौ न तयोः कार्यकारणभावः, यत्त्ववयविकर्म न तत्र यौगपद्यं नापि कार्यकारणभाव एकत्वादित्यर्थः । गुरुत्वप्रयत्नसंयोगा उन्नतेरिति । विधारकः प्रयत्नस्तुलाधारस्य तदपेक्षः संयोगः संयुक्तसंयोगः 'गुरुत्वं च तत्संयुक्तावयवान्तरवर्त्ति'कारणमुन्नतेस्तुलावयवस्य, अवनतेरपि द्रव्यं गुरुत्ववत्सुवर्णादि परिमीयमाणं तत्संयोगानुगृहीतो रज्जुतुलासंयोगः कारणम् ॥ १२ ॥

क्षीर—त्तिः (सू० १३, ख) ॥

वृत्तिः

आक्षिपति—(क्षीरविनाशे कारणानुपलब्धिवद्दध्युत्पत्तिवच्च तदुपपत्तिः)

दध्युत्पत्तिवद् दध्युत्पत्तिकारणानुपलब्धिवत् तदुपपत्तिः पूर्वस्फटिकविनाशकारणानुपलब्धेरुत्तरस्फटिकोत्पत्तिकारणानुपलब्धेश्चोपपत्तिः स्यादिति भावः ॥ १३ ॥

---

(१) '-विनाशकारणा-' इति टि० ।
(२) 'तदुत्पत्तिरिति' ल-ग-ज-भा० ।
(३) 'क्षीरविनाशकारणानुपलब्धिवद्दध्युत्पत्तिवच्च तदुत्पत्तिः'—इति क-ख-धृतपाठान्तरम्
(४) 'स्फटिकादीनां'—इति क-ख-धृतपाठान्तरम् ।
(क) क-ख-पुस्तकयोः 'नामोन्नामौ' इति प्रमादस्खलितम् ।
(ख १३श-सूत्रे तात्पर्यटीका नोपलभ्यते ।

(सू०)—लिङ्गतो ग्रहणान्नानुपलब्धिः ॥ १४ ॥

न्यायभाष्यम्

क्षीरविनाशलिङ्गं क्षीरविनाशकारणं दध्युत्पत्तिलिङ्गं दध्युत्पत्तिकारणं च गृह्यतेऽतो नानुपलब्धिः, विपर्ययस्तु स्फटिकादिषु द्रव्येषु (१)अपरापरोत्पत्तौ व्यक्तीनां न लिङ्गमस्तीत्यनुत्पत्तिरेवेति ॥ १४ ॥

न्यायवार्त्तिकम्

लिङ्गतो ग्रहणान्नानुपलब्धिः। यल्लिङ्गत उपलभ्यते न तन्नास्तीति। विपर्ययश्च स्फटिकादौ, न हि स्फटिकादिव्यक्तीनामपरापरोत्पत्तौ लिङ्गमस्तीति।

न नास्ति शीतोष्णस्पर्शभेदस्य नानात्वे (२)साधनत्वात्—शीतोष्णस्पर्शभेदो नानात्वे दृष्टो यथाऽग्नौ उदके च, अस्त्ययं शीतोष्णस्पर्शभेदः स्फटिके। सत्यमस्ति स तु निमित्तान्तराद्भवति। किं पुनर्निमित्तम्? (क)अप्तेजोऽवयवानुप्रवेशाच्छीतः तेजोऽवयवानुप्रवेशाच्चोष्ण इति। अप्तेजो-ऽवयवानुप्रवेशो न युक्तः अल्पतरबहुतरानुप्रवेशे हेत्वभावात्—हेमन्ते ह्याकाशे पर्युषितानां काष्ठ-भूम्यश्मलोहानां शैत्यस्योत्तरोत्तरो विशेषो दृष्टः; तथा पुनर्ग्रीष्मातपसन्तापितानां तेषामेवौष्ण्यस्य, न हि तेष्वल्पतरबहुतरप्रवेशे कारणं पश्यामः; तस्मात् स्वगतमहाभूतविशेषापेक्षाण्यासादित-बाह्यनिमित्तानि भूतान्येव तथा तथोत्पद्यन्त इति युक्तम्? न युक्तम्—न ह्यप्तेजोऽवयवानुप्रवेशेन

न्यायवार्त्तिकतात्पर्यटीका

लिङ्ग—ब्धिः (सू० १४) ॥ चोदयति—न नास्ति शीतोष्णस्पर्शभेदस्येति। परिहरति—स तु निमित्तान्तरादिति। पुनश्चोदयति—अप्तेजोऽवयवानुप्रवेशो न युक्त इति। स्वगता महाभूतविशेषाः तदवयवाः पृथिव्यादयः, ते हि परस्परतो विशिष्यन्त इति विशेषाः। परिहरति—न युक्तमिति। यदि प्रतिक्षणमन्यत्वमात्रेण विशेषस्ततः काष्ठक्षणानामपि भूम्यश्मलोहवद्विशेषोपलम्भः स्यात्। यथा हि काष्ठक्षणादकस्माल्लोहक्षणा भिद्यन्ते एवं काष्ठक्षणान्तराण्यपीति। तस्मात् पार्थिवत्वेऽपि स्वतो विशेषावास्थेयौ यतो भूम्यश्मादिभ्यो व्यावर्त्तन्ते न व्यावर्त्तन्ते च काष्ठक्षणान्तरेभ्यः काष्ठक्षणाः, तस्मादेव विशेषादक्षणिकत्वेऽपि काष्ठ-भूम्यश्म-लोहानामुपपन्न उत्तरोत्तरो विशेष इति वृथा क्षणिकत्वकल्पनेति।

वृत्तिः

सिद्धान्तसूत्रम्—(लिङ्गतो ग्रहणान्नानुपलब्धिः)

दध्नः क्षीरविनाशस्य च प्रत्यक्षसिद्धत्वात् तत्कारणं कल्प्यते, न त्वेवं स्फटिक-विनाशोत्पादावुपलभ्येते येन तत्कारणकल्पनम् ॥ १४ ॥

---

(१) 'अपरापरोत्पत्तीनाम्' इति ख-ग-भा०। (२) 'साधनात्'—इति क-ख-धृतपाठान्तरम्।

(क) 'अप्तेजोऽवयवानुप्रवेशाच्छीत' इत्यत्र 'अप्तेजोऽवयवानुप्रवेशः—अबवयवानुप्रवेशात् शीत' इत्येव समीचीनतया प्रतिभाति।

न्यायवार्त्तिकम्

भूतस्वभावो निवार्यत इति भूतस्वभावस्योभयपक्षसाम्यादसाधनं भूतस्वभाव इति। विरुद्धश्चायं (१)हेतुः—यद्यवयवानुप्रवेशं न प्रतिपद्यसे (क)खरस्नेहोष्णेरणात्मकानि भूतानीति व्याहन्यते। कथमिति? यत् कठिनं तदेकस्मिन् काले उष्णमपि भवतीति, यच्चोष्णं तत् कठिनं गच्छतीति, तदेकस्वभावकं वस्तु द्विस्वभावकं त्रिस्वभावकं च प्राप्नोति। यस्य पुनरवयवानुप्रवेशस्तस्यैष दोषो नास्ति अन्यत्रावस्थितस्य संयुक्तसमवेतस्य औष्ण्यस्य ग्रहणादिति। विरुद्धश्चायं हेतुः। कथम्? एकस्य (२) विशेषाभ्युपगमात्—एकं वस्त्वेकस्मिन् काले कठिनमुष्णं गच्छति चेति त्रिस्वभावकम्, ततश्च विशेषदर्शनादित्ययं हेतुः 'सिद्धान्तमभ्युपेत्य तद्विरोधी विरुद्धः' इति विरुद्धो भवति। अथ मन्यसे न विशेषमात्रं नानात्वं प्रतिपादयत्यपि तु विरोधी विशेषो नानात्वे साधनमिति? नाभिप्रायपरिज्ञानात्—वयमपि न ब्रूमो विशेषमात्रं नानात्वसाधनम्, अपि तु विरोधी विशेष इतरेतरव्यावृत्तो लक्षणत्वेनोपपन्नः, स विरुद्धः यद्यविरुद्धः स्यान्न लक्षणं स्यात्। एकवृत्तित्वे वा लक्षणत्रयस्य तत्तद्वस्तु किमभिधीयते? यदि तावत् पृथिवी, तन्न युक्तमौष्ण्यस्य दर्शनात्। अथ तेजः, तदपि न युक्तं काठिन्यदर्शनात्। एतेन वायुर्व्याख्यातः। सोऽयं

न्यायवार्त्तिकतात्पर्यटीका

असाधनं भूतस्वभावः क्षणिकत्वसिद्धावित्यर्थः। दूषणान्तरमाह—विरुद्धश्चायं हेतुः उत्तरोत्तरविशेषदर्शनादिति। भवतां किल भूतानामन्योन्यव्यावर्त्तकं लक्षणं खरस्नेहोष्णेरणात्मकानि भूतानीति। खरा पृथिवी स्नेह उदकम् उष्णं तेजः ईरणं समीरणो गतिमानिति यावत्। तथोत्पादे तु काष्ठ-भूम्यश्म-लोहानामङ्गीक्रियमाणे एकमेव खरोष्णे खरोष्णेरणात्मकं (ख) स्यादिति संकीर्णत्वाद्भूतलक्षणव्याघात इति। कठिनमिति खरां पृथिवीमुपलक्षयति। अस्मत्पक्षे तु न व्याघात इत्याह—यस्य पुनरिति। न केवलं पृथिव्यादिलक्षणेन विरुध्यते अपि तु शीतोष्णस्पर्शभेदेन नानात्वस्य साधनेन पूर्वोक्तेनापीत्याह—विरुद्धश्चायमिति। पृच्छति—कथम्। उत्तरम्—एकस्य विशेषाभ्युपगमात्। येनैव विशेषेण पूर्वस्मान्नानात्वमभ्युपगतं शीतोष्णादिना भेदेन तेनैव (ग) सम्प्रत्येकत्वाभ्युपगमादित्यर्थः। सिद्धान्तमभ्युपेत्येति पूर्वेण हेतुना योऽभ्युपगतोऽर्थः तद्विरोधितया विरुद्ध इत्यर्थः। शङ्कते—अथ मन्यसे न विशेषमात्रमिति। मा भूद्रूपं सप्रतिघमुपादानमिति रूपस्यैकस्य नानात्वमिति भावः। निराकरोति—नाभिप्रायेति। यस्त्ववयवानुप्रवेशे

---

(१) 'स्वभावहेतुः' इति क-ख-धृतपाठान्तरम्। (२) 'विशेषस्याभ्युपगमात्' इति ख०।

(क) तथाच वसुबन्धुः—

भूतानि पृथिवीधातुरप्तेजोवायुधातवः।
धृत्यादिकर्मसंसिद्धाः खरस्नेहोष्णेरणाः॥ (अभिधर्मकोशः १।१२)

ब्रह्मसूत्रशारीरकमीमांसाभाष्ये तट्टीकायां च (अ० २, आ० २, सू० १८) अयमर्थः स्पष्टः। (ख) वार्त्तिकगतत्रिस्वभावकञ्चेति चकार इहापि योजनीयः। (ग) क-ख-पुस्तकयोः 'सम्प्रत्येकत्वादित्यर्थः' इति मुद्रितम्।

न्यायवार्त्तिकम्

हेतुर्भूतलक्षणं बाधते नानात्वसाधनं वा न भवति। एतेन जले तापग्रहणं प्रत्युक्तम्। (क)तत्राप्यौष्ण्यस्निग्धतेरणता च युगपद्भवतीति, जलेऽग्निरूपग्रहणप्रसङ्गस्तु न युक्तोऽभिभवात्। तन्न, सिद्धान्तापरिज्ञानात्—नायं सिद्धान्तो जलरूपेणाग्निरूपमभिभूयत इति, अपि तु तेजसश्चातुर्विध्यात् तत्र न रूपग्रहणम्—चतुर्विधं तेज इत्येतत् (१)प्रसाधितमिन्द्रियप्रकरण (ख)इति।

या चेयं प्रतिज्ञा अन्यश्चान्यश्च स्फटिक इति, अस्याश्च कोऽर्थः? यदि तावदन्यत्वमात्रं तदा सिद्धसाधनं भवति (२)कुम्भादिभ्योऽन्यः स्फटिक इति। अथ स्फटिकान्तरादन्य इति, तदपि तादृगेव। अथ पूर्वस्फटिकादन्य इति, कतमोऽसौ पूर्वस्फटिको यतोऽयमन्य इति। व्यवच्छेद्यस्याशक्यत्वादनभिधानम्—यथोभयपक्षसम्प्रतिपन्ना रूपादयः (३)तेभ्योऽन्यानन्यविचारो घटादेर्युक्तः, न पुनरिह पूर्वस्फटिकान्तरमुभयपक्षसम्प्रतिपन्नं यतो वर्तमानमन्यत्वेन साध्यते। अथोभयपक्षसम्प्रतिपन्नं पूर्वस्फटिकान्तरम्? व्यर्थं साधनम्। अथ वर्तमानं स्फटिकमभ्युपगम्य यदतीतं स्फटिकान्तरं तदन्यदिति साध्यते? एवं सति शीतोष्णस्पर्शभेदो न तद्धर्मः वर्तमानस्फटिकधर्मत्वात्। वर्तमानाच्च स्फटिकादन्यदतीतमिति केनैतन्न प्रतिपन्नम्। अथ तदेवान्यदिति? व्याघातः तदेवान्यच्चेति। एवं यथा यथाऽन्यत्वं विचार्यते तथा तथा सिद्धसाधनं भवति सिद्धान्तं च बाधते।

न्यायवार्त्तिकतात्पर्यटीका

देशयेदुष्णजले वह्निस्पर्शवद्रूपग्रहोऽपि स्यादयोगोलक इवेति तं प्रत्येकदेशिमतेन परिहारमाह—जलेऽग्निरूपग्रहणप्रसङ्गस्त्विति। तद् दूषयति—तन्नेति। युक्तं मध्यन्दिने सवितृप्रकाशेनोल्वणेन मन्द उल्काप्रकाशोऽभिभूयते सजातीयत्वे सत्युल्वणत्वात्; तोयरूपं तु नोल्वणं न च सजातीयमभास्वरत्वात्, तेजस्तु भास्वरं तस्मान्नाभिभव इत्यर्थः। परमार्थपरिहारमाह—अपि तु तेजसश्चातुर्विध्यात्। किंचिदुद्भूतरूपस्पर्शं तेजो भवति यथा सवितृप्रकाशः शरदि दिवा, किंचिदनुद्भूतरूपस्पर्शं यथा चाक्षुषं तेजः, किञ्चिदुद्भूतरूपमनुद्भूतस्पर्शं च यथा प्रदीपप्रभायां तेजः, किञ्चिदनुद्भूतरूपमुद्भूतस्पर्शं यथा तोयगतं तेजः; यथा वा निशीथे निदाघसमये तेजः यतो मेदस्विनः स्विद्यन्तीति।

प्रतिज्ञार्थं यथासम्भवं विकल्प्य दूषयति—या चेयं प्रतिज्ञेति। अथ वर्तमानं स्फटिकमभ्युपगम्य यदतीतं स्फटिकान्तरं तत्पक्षीकृत्य वर्तमानात् तदन्यदिति साध्यते। निराकरोति—एवं सतीति। यदि लिङ्गं स्वसत्ताज्ञानाभ्यां गमकं तदा सत्यपि ज्ञाने अतीतधर्मस्य सत्ता नास्तीति न गमक इति भावः। यदि पुनः स्वज्ञानमात्रेण गमकं लिङ्गमुच्येत तदा दूषणान्तरमाह—वर्तमानाच्चेति।

---

(१) 'प्रतिपादितम्'—इति क-ख-धृतपाठान्तरम्। (२) 'स्तम्भादिभ्योऽन्यः'—इति क-ख-धृतपाठान्तरम्। (३) 'तेभ्योऽन्योनन्यविचार' इति ख०।

(क) पुनश्चोदयति तत्रापीति 'तत्राप्यौष्ण्य' स्निग्धता' इति पाठः सम्भाव्यते। (ख) ७६७ अङ्कितपत्रे भाष्यवार्त्तिके द्रष्टव्ये।

न्यायवार्त्तिकम्

अथायुगपत्कालप्रत्ययानामालम्बनं स्फटिको न भवतीति प्रतिज्ञार्थः? एतस्मिन्नपि प्रतिज्ञार्थे न दृष्टान्तोऽस्ति। प्रदीपो दृष्टान्तः—प्रदीपोऽयुगपत्कालप्रत्ययानामनालम्बनं सदादिधर्मा चेति विद्यते दृष्टान्तः? नासिद्धत्वात्। असिद्धमेतत् अयुगपत्कालप्रत्ययानालम्बनाः प्रदीपादयः तेषामनेकक्षणावस्थानात्—प्रदीपस्य तावत् स्वकारणसत्तासम्बन्धकालः सामान्याभिव्यक्तिकालः अवयवकर्मकालः तदनन्तरं विभागकालः तदनन्तरं तत्संयोगविनाशकालः ततो द्रव्यनाश इति। यथा प्रदीप एवं सर्वे भावाः स्वकारणसत्तासम्बन्धाभिव्यक्तितद्विरोध्याश्रयविनाशानुविधानेन विनश्यन्ति, अकारणस्य विनाशानभ्युपगमात्। न हि नः किञ्चिन्निष्कारणं विनश्यति। विनश्यदवस्थद्रव्यकर्मवदेतत् स्यात्? न कर्मणोऽभ्युपगमे विरोधात् अनभ्युपगमाच्च। विनाशहेत्वभावादिति चेत्—अथ मन्यसे न विनाशकारणमस्ति

न्यायवार्त्तिकतात्पर्यटीका

तद्विरोध्याश्रयविनाशानुविधानेन विनश्यन्तीति। विरोधीति गुणाभिप्रायम्। गुणो हि विरोधिना गुणान्तरेण नाश्यते आश्रयनाशेन चेति सर्वसाधारणम्। आश्रयग्रहणं चोपलक्षणम्, तेनासमवायिकारणनिमित्तकारणविनाशेनापि यथासम्भवमुन्नेतव्यमिति। शङ्कते—विनश्यदवस्थेति। मा भूत् प्रदीपो दृष्टान्तः, विनश्यदवस्थे तु द्रव्ये कर्मोत्पन्नमुत्पत्त्यनन्तरमेवापवृज्यते अत ईदृशं कर्म दृष्टान्तो भविष्यतीत्यर्थः। निराकरोति—न कर्मण इति। कर्मापलापनिबन्धनो ह्ययं क्षणिकवादस्तदभ्युपगमे न भवितुमर्हति। स्थिराद् द्रव्यादागन्तुककर्मसहितादेव कार्योत्पादोपपत्तेरिति। निराकरणान्तरमाह—अनभ्युपगमाच्चेति तादृशस्यापि कर्मणः क्षणिकत्वस्यास्माभिः। तथा हि द्रव्यस्य विनश्यत्ता कर्मोत्पाद इत्येकः कालः। अथ द्रव्यस्य विनाशः, न च कारणोत्पादसमये कार्योत्पाद इति द्रव्यविनाशानन्तरं कर्मनाश इति सिद्धं क्षणद्वयावस्थानं कर्मण इति। शङ्कते—विनाशहेत्वभावादिति चेत्। अयमभिसन्धिः—स्वकारणादयं भावो विनश्वरो जायतेऽविनश्वरो वा? विनश्वरश्चेद् विनाशं प्रति न हेतुमपेक्षेत। न हि नीलं स्वकारणादुत्पन्नं नीलत्वे हेतुमपेक्षते तस्यैव ताद्रूप्यात्। अविनश्वरश्चेत् तथाऽपि नास्य हेतुशतैरपि शक्यो विनाशः कर्तुम्। न हि नीलमुत्पन्नं पीतं शिल्पिशतेनापि शक्यं कर्तुम्। अपि चायं विनाशो भावस्य कारणैराधीयमानो भावाद्भिन्नोऽभिन्नो वा जायते। अभिन्नत्वे भाव एवासाविति विनष्टो भावः प्राग्वदुपलब्ध्यर्थक्रिये कुर्यात्। न च भावाभावयोः कारणभेदे सति सम्भवत्यभेदः। तन्तुसंयोगभेदेभ्यो हि पटो जायते तन्तुविभागाद्वा तन्तुविनाशाद्वा पटाभाव इति कारणभेदः। भावाद्भिन्नत्वे तु जायतामभावो भावस्य किमायातम्? न हि क्रमेलकोत्पादने पीलवो निवर्तन्ते। अभावेन भावस्तिरोधीयत इति चेत्, न; तिरोधानस्यापि भावादभेदे पूर्ववदुपलब्ध्यादिप्रसङ्गः। भेदेऽपि तिरोधानस्यान्यस्योत्पादे अन्यस्य

न्यायवार्त्तिकम्

तस्मादुत्पन्नमात्र एवायं भावो विनश्यतीति ? न विकल्पानुपपत्तेः—विनाशहेतुर्नास्तीति

न्यायवार्त्तिकतात्पर्यटीका

न किञ्चिदुत्पन्नं विनष्टं चेति भावतादवस्थ्यादुपलब्ध्यादिप्रसङ्गः। अपि च यद् येषां ध्रुवभावि न तत्र तेषां हेत्वन्तरापेक्षा यथा कृपाणस्यायोमयत्वे। ध्रुवभावी च कृतकानां भावानां नाश इति विरुद्धव्याप्तोपलब्धिः। ध्रुवभाविता हि प्रतिषिध्यमानहेत्वन्तरापेक्षत्वविरुद्धतन्निरपेक्षत्वव्याप्तोपलब्धा, सेह प्रतीयमाना निरपेक्षत्वमुपस्थापयन्ती हेत्वन्तरापेक्षतां प्रतिक्षिपति। ये हि हेत्वन्तरापेक्षा न ते ध्रुवभाविनो यथा वाससि रागादयः कुसुम्भादिसंयोगसापेक्षा नावश्यंभाविन इति। तस्मादभावस्य सर्वोपाख्यारहितस्य कल्पितस्य क्रियाऽनुपपन्नेति। अभावं करोतीति क्रियाया अभावेन सम्बन्धानुपपत्तेर्नञ्सम्बन्धो (१)भावं न करोतीति। यथाह—

'न तस्य किञ्चिद्भवति न भवत्येव केवलम्' इति।

तस्माद्विनाशकारणाभावादुत्पन्न एवाभावो विनश्यतीति सिद्धः क्षणभङ्ग इति। तदेतन्निराकरोति—न विकल्पानुपपत्तेः। अयमभिसन्धिः—यत्तावद्विकल्पितं स्वहेतुभ्यो भावा विनश्वरा अविनश्वरा वा जायन्त इति। तत्र ब्रूमः किं पुनरिदं विनश्वरत्वं भावानामभिमतमायुष्मतः किं विनाशस्वभावत्वम् आहो विनाशार्हत्वं नित्येभ्यो व्यावृत्तम्। न तावत्पूर्वः कल्पः परस्परपरिहारवतोर्भावतन्नाशयोस्तादात्म्यानुपपत्तेः। तादात्म्ये च विनाशवद्भावोऽपि द्वितीयादिक्षणेषु वर्ततेति साधु क्षणिकत्वं समर्थितमत्रभवता भावानां नित्यत्वमुपपादयता। भावसमये वा विनाशोऽपि भावात्माऽस्तीत्यत्यन्ताभावो भावस्य भवेदिति सुष्ठु वर्द्धितं तत्त्वं भावानाम्। न च भाव एकक्षणस्थितिधर्मा नाशो द्वितीयादिक्षणेष्विति साम्प्रतम् प्रथमद्वितीयक्षणावच्छेदलक्षणविरुद्धधर्मसंसर्गेण भेदात्। द्वितीयं तु कल्पमनुमन्यामहे। नन्वेवं विनाशार्हाश्चेद्भावाः स्वकारणादुत्पन्नाः हन्तोदयानन्तरमेवापवृज्येरन् ? नापवृज्यन्ते, विनाशार्हा अपि पटादयस्तन्तुविनाशाद्वा तन्तुविभागाद्वा स्वकारणाधीनजन्मनो विनङ्क्ष्यन्ति। न हि तण्डुलाः पचेलिमा इति विनैव दहनसलिलसंयोगप्रचयभेदं विक्लियन्ति। काष्ठानि वा भिदेलिमानीति कुठाराभिघातमन्तरेण दलन्ति। यो मन्यते त एव तण्डुलाः पचेलिमाः ये समर्थदहनोदकपिठरसहभुवः तदनन्तरं हि (क) पुलाकाः प्रादुर्भवन्ति, यदनन्तरं न प्रादुर्भवन्ति न ते पचेलिमा इति ; तस्योत्तरम् अक्षणिकार्थक्रियामुपपादयन्तो वक्ष्यामः। तस्माद्विनश्वराणामुत्पत्तेः (ख)स्वकारणान्न विनाशकारणापेक्षा

---

(१) 'भावेन' इति क-तात्पर्यपाठः।

(क) 'स्यात् पुलाकस्तुच्छधान्ये संक्षेपे भक्तसिक्थके' इत्यमरः।

(ख) 'स्वकारणान्यविनाशकारणापेक्षा' इति समीचीनतया सम्भाव्यते।

न्यायवार्त्तिकम्

ब्रुवाणः (१)पर्यनुयोक्तव्यः किमकारणत्वाद्विनाशो नास्ति उताकारणत्वान्नित्य इति। भवतां पक्षे अकारणं (२)द्विधा नित्यमसच्च, अस्माकं तु नित्यमेव। यद्यकारणत्वान्नित्यो विनाशः कार्यस्योत्पादो न प्राप्नोति उत्पन्नस्य च भावस्य विनाशेन सहावस्थानमिति च दोषः। ततश्च भावानामभावाविरोधादत्यन्तमवस्थानमिति। अथासन्विनाशः, एवमपि सर्वनित्यत्वं विनाशाभावात्। यदि चासन्विनाशः, विनश्यतीत्यसति विनाशे प्रत्ययो न प्राप्नोति ; नासत्यां गतौ गच्छतीति भवति। अथाविनाशित्वादकारणो विनाश इति मन्यसे ? विनाशो न विनश्यतीति कुत एतत्। विनष्टानां पुनरनुत्पत्तेरिति चेत्—अथ मन्यसे यदि विनाशो विनश्येत विनष्टः पुनरुत्पद्येत ? न युक्तमेतत्—न हि (३)विनाशाभावो (४)यतोऽस्य विनाशाद्भवेत् (४*) अपि तु कारणवान् भावस्तस्य यदा कारणं भवति तदोत्पाद इति। अपि च विनाशः कारणवांश्च

न्यायवार्त्तिकतात्पर्यटीका

भावानामिति युक्तम्। केवलं (५) भावादन्यदकारणं ब्रुवाणः पर्यनुयोज्यो भवान् किमकारणत्वान्नाशस्य नास्तित्वं रोचयते किं वा नित्यताम् ? तत्रोक्तं साक्षाद्दूषणं वार्त्तिककृता—भवतां शाक्यानां पक्षे अकारणं द्विधा, नित्यं व्योम शशविषाणादि वा तुच्छम्, अस्माकं तु नित्यमेव। भवदभिमतस्य तस्य तुच्छस्याभावस्यानङ्गीकारादस्मदभिमतस्य भवद्भिरनङ्गीकृतत्वेन नास्तीत्यध्यारोप्य राशिरेक उक्तः। उत्पन्नस्य विनाश इति सर्वजनीनं तद्विपरीतं भवत्पक्षे प्राप्नोति। नन्वस्तु भावाभावयोः सहावस्थानं को दोष इत्यत आह—ततश्च भावानामिति। शङ्कते—अथाविनाशित्वादिति। प्रयोजनक्षतिरियं यदकारणत्वे विनाशस्यैष दोष इति न तु दोषभयेन स्फुटतरप्रमाणबाधितं (क)कारणत्वं विनाशस्य शक्यमङ्गीकर्तुमिति भावः। गूढाभिसन्धिः सिद्धान्ती पृच्छति—विनाशो न विनश्यतीति कुत एतत्। चोदक आह—विनष्टानामिति। सिद्धान्ती बौद्धमतमालम्ब्याऽऽह—न हि विनाशाभाव इति। यस्य पटाभाव एव तुच्छस्तस्य तदभावे का कथा तस्य तुच्छादपि तुच्छतरत्वादिति भावः। स्वमतमास्थायाऽऽह—अपि च विनाशः कारणवांश्चेति। शेषं सुबोधम्। यदप्यकारणत्वे कारणमुक्तं भावाद्भिन्नश्चेदभावो जन्येत भावतादवस्थ्यमिति, तत्रोच्यते—नाभावस्योत्पादे भावस्यापरा निवृत्तिः किं स्वभावोत्पाद एव तन्निवृत्तिः। कथमन्यस्योत्पादेऽन्यस्य निवृत्तिः ? अत्र स्वभावभेदैरुत्तरं वाच्यं ये परस्परपरिहारावस्थितयः ते

(१) 'पर्यनुयोज्यः' इति क-खधृतपाठान्तरम्। (२) 'द्वेधा' इति क-ख०। (३) 'विनाशा-(भावा)भावो' इति क-पुस्तके मुद्रितम्। 'विनाशाभावाभावो' इति ख०। (४) 'यतो विनाशविनाशाद्भवेत्' इति क-ख-धृतपाठान्तरम्। (५) 'भावादन्यस्याकारणत्वं ब्रुवाणः' इति ख०।

(क) 'कारणवत्त्वं' इति पाठः सम्भाव्यते।

न्यायवार्त्तिकम्

न विनश्यत्यभावत्वात्, भावधर्म (१) एषः यत् कारणवत् तद्विनश्यतीति, अभावस्त्वकारणोऽपि विनश्यतीति यथा प्रागभावः; कारणवानपि न विनश्यति यथा प्रध्वंसाभावः। यदि कारणवान् विनाशो ननु जनकं विनाशकं प्राप्नोति—य एवाग्निसंयोगः पाकजानामुत्पादयिता स एव पाकजान्तरोत्पादे पूर्वपाकजानुच्छिनत्तीति जनकं विनाशकं प्राप्तम्? (२)नानवरोधात्—नेदं भवता काश्यपीयं दर्शनं व्यज्ञायि, न हि नो य एवाग्निसंयोगः पाकजानुत्पादयति स एवोच्छिनत्ति, अपि त्वग्निसंयोगान्तरं पूर्वरूपाद्युच्छिनत्ति (३)समनन्तरकालाद्रूपादीनारभते

न्यायवार्त्तिकतात्पर्यटीका

स्वहेतुभ्यो जायन्ते। न हि स्वतोऽन्यस्याङ्कुरस्य वह्निर्न (क)कारणमन्यत्वाविशेषाद्भस्मनोऽपि न कारणमिति। स्वभावभेदेन तु कार्यकारणभावनियमसमर्थनं परस्परपरिहारस्थितिनियमेऽपि तुल्यम्। यथा चोत्पादस्य पुरस्तादखिलसामर्थ्यरहितस्याङ्कुरप्रागभावस्योपकारं (ख)किञ्चिदकुर्वन्तोऽपि बीजादयोऽङ्कुरमारभन्ते तदुत्पादस्यैव तत्प्रागभावनिवृत्तिरूपत्वात् एवं तदभावहेतवोऽपि भावरूपे अकिंचित्करा अपि तदभावमादधति, न चेद्भावरूपे किञ्चित्कृतं (४)तदभावहेतुभिः अथ भावः(४*) प्रागिव स्वाभावसमये कस्मान्न स्वरूपोपलम्भार्थक्रिये करोति। (ग)अथोत्पादात् प्रागिवोत्पन्नोऽप्यङ्कुरः कस्मादुपलम्भार्थक्रिये करोति? उत्पत्तेः प्रागङ्कुरो नाऽऽसीत्तेन नाकार्षीदुत्पन्नस्त्वस्ति तस्मात्करोतीति चेत् हन्त भावोऽपि यदाऽऽसीत्तदाऽकार्षीत् तदानीं तु विनष्ट इति नास्ति तेन न करोति। यथा च भावोत्पाद एव तत्प्रागभावस्य नास्तिता एवमभावोत्पाद एव भावस्य नास्तिता। उपजनापायधर्मतया भावाभेदो विनाशस्य ततो न सदसद्रूपतया द्वैराश्यं विश्वस्येति चेत् कोऽयमुपजनः? यदि स्वकारणसमवायः सत्तासमवायो वा, सोऽभावे नास्ति। अथ स्वरूपप्रतिलम्भः, तथाऽपि तावन्मात्रस्य साम्येऽपि अवान्तरभेदेन द्वैराश्योपपत्तिः। तस्माद् यथा सत्त्वस्य साम्येऽपि द्रव्यगुणकर्माणि तेन तत्त्वेनान्योन्यं भिद्यन्ते एवं प्रमेयत्वाभिधेयत्वकारणवत्त्वेनाविशेषेऽपि सद्भिः सहासतां सत्तातद्विरहरूपभेदाद्भेद इति सिद्धम्। याऽपि ध्रुवभाविता विनाशस्य तत्र (५) ब्रूमः ध्रुवभावित्वेन विनाशस्य हेत्वन्तरानपेक्षत्वं ब्रुवाणो नाहेतुकत्वं वक्तुमर्हति हेत्वन्तरनिराकरणेन हेतुना निराकरणात्, विशेषनिषेधस्य शेषाभ्यनुज्ञाफलकत्वात्। अपि च ध्रुवभावित्वमसिद्धमनैकान्तिकं वा। इदं भवान् पृष्टो व्याचष्टां (घ)किं घटसंतानात्सभागात् कपालसंततिर्ध्रुवभाविनी न वा। न चेद् न विनाशोऽपि घटस्य ध्रुवभावी, न खलु विसभागक्षणोत्पादमन्तरेण घटविनाशमीक्षामहे

(१) 'एव'इति क-ख-धृतपाठान्तरम्। (२) 'नानवबोधात्' इति क-ख-धृतपाठान्तरं समीचीनं प्रतिभाति। (३) 'समनन्तरकालान् रूपादीनारभते' इति क-ख-धृतपाठान्तरम्। (४) 'तदभावहेतुभिरप्यभावः' इति क०। (५) 'क्रम' इति क०।

(क) 'कारणम्, इत्यन्यत्वाविशेषात्' इति पाठः सम्भाव्यते। (ख) किञ्चिदित्यव्ययम्, कञ्चिदिति वा पाठः। (ग) 'अथोत्पादात् प्रागप्युत्पन्नइवाङ्कुरः कस्मादुपलम्भार्थक्रिये न करोति' इत्येव पाठ इति प्रतिभाति। (घ)' न वा' इत्यन्ते दर्शनात् 'किं' शब्दोऽत्र प्रमादादागतः सम्भाव्यते।

न्यायवार्त्तिकम्

ततस्तान्यप्यन्यस्तान्यप्यन्य इत्येवं जनकस्य विनाशकत्वप्रसङ्गो नास्ति। अथ मन्यसे जनकसरूपमपि विनाशकं न भवति? न न भवति—दृष्टो झबादिसंयोगादङ्कुरस्योत्पादः स एवाबादिसंयोगस्तद्विनाशक इति। न हि दृष्टेऽनुपपन्नं नाम। यश्चाकारणविनाशे दोषः सोऽपरिहार्य इत्यत एवमुच्यते जनकसरूपं विनाशकमिति।

एवं तावदन्यत्वे साध्ये दोष उक्तः। ये तु क्षणिकत्वं साधयन्ति विशेषदर्शनाद्विनाशहेत्वभावाच्च, तान् प्रतीदमुच्यते—क्षणिकाः संस्कारा इति ब्रुवाणः क्षणिकशब्दार्थं प्रष्टव्यः किमुक्तं भवति क्षणिका इति। यदि विनाशिन इति? सिद्धसाधनम्। अथाऽऽशुविनाशिन इति? तदा विशेषणं सिद्धान्तविरोधि। अथोत्पन्नप्रध्वंसिन इति? एतदपि तादृगेव। उत्पन्नाः प्रध्वंसिन इति? सिद्धसाधनम्। अथोत्पन्नो विनष्ट इत्येकः कालः—उत्पत्तिविनाशावेककालाविति? तेन यथाऽनुत्पन्नस्योत्पत्तिरेवमनुत्पन्नस्य विनाश इति प्राप्तम्। अथोत्पन्नं विनश्यतीति? एतस्मिन्नपि पक्षे उत्पत्तिवद्विनाशः कारणवान्, यथोत्पत्तिः क्रियात्वात् कादाचित्कत्वात् सकारणा (१)तथा विनाशकारणमनुभवति(१*) ततो विनश्यतीति, अकारणे च विनाशे दोष उक्तः। यश्चायं मत्वर्थीयः (२)क्षणिक इति स कथम्? यदि निरुक्तन्यायेन क्षयः क्षण इति क्षणोऽस्यास्तीति क्षणिक इति? तन्न युक्तं कालभेदात्—यदा क्षयो न तदा क्षयीति भिन्नकालयोर्न मत्वर्थीयो दृष्टः। अथ पुनर्भाव एवानन्तरेण विनाशेन विशिष्यमाणः (३)क्षणिक इत्युच्यते तथाऽपि तेनैव तदेव तद्वन्न भवतीति न युक्तो मत्वर्थीयः। अथ क्षणावस्थितिकालाः क्षणिका इति—सर्वान्त्यं कालं क्षणत्वेन प्रतिपद्य तत्र येऽवतिष्ठन्ते ते क्षणिका इति? एतदपि न युक्तम्—

न्यायवार्त्तिकतात्पर्यटीका

मांसचक्षुषः तथा चासिद्धा ध्रुवभाविता विनाशस्य। अथ ध्रुवभाविनी, तस्यामेव तर्हि विसभागसंततौ ध्रुवभाविन्यां मुद्गरादिहेत्वपेक्षेत्यनैकान्तिकं ध्रुवभावित्वं नामपेक्षत्वव्याप्तमिति न हेत्वन्तरापेक्षित्वं निषेद्धुमर्हतीति। तदेतद् यश्चाकारणविनाशे दोषः स चापरिहार्य इत्यनेन वार्त्तिकेन सूचितम्।

एवं तावदन्यत्वे साध्ये दोष उक्त इति। यद्यपि क्षणिकत्वमपि पूर्वमुक्तं दूषितं च तथाऽपि क्षणिकाभिधानं तवान्यपरमन्यत्वमेव तु तत्र प्रधानम्, इदानीं तु क्षणिकत्वमेव प्रधानतया साध्यमित्येतावता प्रकरणभेद इति। विशेषणं सिद्धान्तविरोधीति। यद्यनाशुविनाशिनोऽपि केचन भावा भवेयुः ततो विशेषणमाशुविनाशिन इति कल्पेत तथा च सिद्धान्तविरोध इत्यर्थः। मत्वर्थीय इति। क्षणिक इति, "अत इनिठनौ"विति मत्वर्थीयष्ठन्, अनन्तरेण विनाशेन विशिष्यमाण इति, उपलक्ष्यमाणः। सर्वान्त्यं कालमिति, पूर्वापरभागविकलकालकलैका

(१) 'तथा विनाशिन इत्युत्पद्य विनाशकारणमनुभवति' इति क-ख-धृतपाठान्तरम्। 'तथा विनाश. इत्युपेत्य विनाशकारणमनुभवति' इति क्वचित् पाठ इति क-ख-वार्त्तिकसम्पादकाः। (२) 'क्षणिका' इति क-ख०। (३) 'क्षण इत्युच्यते' इति क-ख-धृतपाठान्तरम्।

न्यायवार्त्तिकम्

संज्ञामात्रत्वेन कालस्याभ्युपगमात्। पञ्च भिक्षवः संज्ञाभेदमात्रमिति शास्त्रम्। न हि संज्ञामात्रं वस्तुविशेषणत्वेन युक्तम्। क्षणिका इति च प्रतिज्ञां कृत्वा न दृष्टान्तोऽस्तीत्युक्तं प्रदीपादेरसिद्धत्वात्।

येऽपि हेतवोऽन्ते विशेषदर्शनादित्येवमादयस्तेऽप्यसिद्धाः अन्यथासिद्धा विरुद्धा वा भवन्तीति

न्यायवार्त्तिकतात्पर्यटीका

ज्योतिर्विद्यासिद्धा (१)सर्वान्त्यं कालमिति संज्ञामात्रं न तु वास्तवं वास्तवी च क्षणिकताऽभिमतेति।

पक्षवचनं दूषयित्वा हेतुं दूषयति—येऽपीति। अत्राऽऽदिग्रहणेन सत्त्वकृतकत्वादयः संगृहीता वेदितव्याः। तत्र यत् सत् तत् सर्वं क्षणिकं यथा घटः, संश्च विवादाध्यासितः शब्दादिरिति स्वभावहेतुः सत्तामात्रानुबन्धित्वात् क्षणिकत्वस्य। कथं पुनः सत्तामात्रानुबन्धसिद्धिः क्षणिकतायाः? उच्यते—सत्त्वं नामार्थक्रियाकारित्वं भावानां नान्यत्। न ह्यस्ति सम्भवः संश्च भावो न चार्थक्रियां करोतीति। तथा हि स सर्वज्ञस्य विज्ञानस्याऽऽलम्बनप्रत्ययो भवेन्न वा। न चेद् नास्ति, सर्वज्ञो वा न सर्वज्ञः, तस्यैवाज्ञानात्। आलम्बनप्रत्ययश्चेत् कथं नार्थक्रियां करोतीति। न च सत्तासामान्यं नास्ति किंचन नापि समवायो यतः सन्निस्युच्यते। तत्सद्भावे वा न भवतां सामान्यविशेषसमवायाः सन्तो भवेयुः तेषां सामान्याधारत्वानभ्युपगमात्। प्रमाणग्राह्यताऽपि प्रमाणविषयता प्रमाणं प्रत्यालम्बनप्रत्ययत्वमेव, तच्चार्थक्रियाकारित्वान्नान्यदिति सिद्धमर्थक्रियाकारित्वमेव सत्त्वमिति। तच्च क्रमाक्रमाभ्यां व्याप्तं तृतीयप्रकारविरहात्। तथा हि भावानां तासु तास्वर्थक्रियासु क्रमाक्रमौ परस्परपरिहारवन्तौ चकास्तः, तथा च क्रमाक्रमात्मकं प्रकारान्तरमपि यदीदृशाभ्यामेवानुभूतावसिताभ्यां क्रमाक्रमाभ्यां करम्बितमङ्गीक्रियते ततो दृश्यमानयोरपि क्रमाक्रमयोः परस्परसंकरप्रसङ्गः। करम्बितावेव हि क्रमाक्रमाविमावपीति दृश्यमानः क्रमोऽक्रमात्मकः अक्रमश्च क्रमात्मकः प्रतिभासेत। न च तथा प्रतिभासते। एतेन प्रत्यक्षमेव परस्परपरिहारवन्तौ क्रमाक्रमौ परिच्छिन्दत् सर्वत्रैवानयोः संकरं प्रतिक्षिपति। यदि क्वचिदप्यनयोस्तादात्म्यं भवेदिहापि तावेव क्रमाक्रमाविति संकीर्णौ गृह्येयाताम्। तस्मादनयोरिह संकरानुपलम्भ एव देशान्तरे कालान्तरे च संकरं निषेधति। तादात्म्यनिषेधे च दृश्यत्वविशेषणादनुपलब्धेः दृश्यमानस्तम्भतादात्म्येन स्वयमदृश्यानां पिशाचादीनां दृश्यानां च कुम्भादीनामविशेषेण प्रतिषेधात्। यथाह—विशेषणं चावाच्यमिति। अनेवंभूतक्रमयौगपद्यव्यतिरेकवती प्रकारान्तरे क्रमयौगपद्ये एव न भवतः न हि शब्दाभेदेन वस्तुनोऽप्यभेदः। मा भूद्गोशब्दसामानाधिकरण्येन वागादीनामपि विषाणित्वप्रसङ्गः।

स्यादेतत्—मा भूतां क्रमयौगपद्ये अस्त्वन्य एव क्रमाक्रमाभिधानः क्रमयौगपद्याभ्यामन्यः प्रकारो यमास्थाय भावाः स्थिरा अप्यर्थक्रियायामुपयोक्ष्यन्ते, न त्वेषां प्रकारान्तरवदर्थक्रियाऽपि

(१) 'सर्वान्तः कालम्' इति क०।

न्यायवार्त्तिकतात्पर्यटीका

पिशाचायमानैव ; तथा चेत् किं नः छिन्नम् ? दृश्यमानास्त्वनुभूतावसिताः परस्परव्यावृत्तक्रमयौगपद्यरूपप्रकारद्वयसमालिङ्गितरूपा अर्थक्रिया न प्रकारान्तराद्भवितुमीशते। न च प्रकारान्तरमपि। तथा हि यत्र यत्प्रकारप्रतिषेधेन यदितरप्रकारव्यवस्थानियमस्तत्र न प्रकारान्तरसंभवः यथा नीलप्रकारप्रतिषेधेनानीलप्रकारव्यवस्थायां पीते। अस्ति च तयोरन्यतरप्रकारनिषेधेऽन्यतरव्यवस्थानियमो निषिध्यमानप्रकारविषयीकृते सर्वत्र कार्यकारणे इति विरुद्धोपलब्धिः। निषिध्यमानप्रकारान्तरसंभवविरुद्धो हि द्वयोरन्यतरनिषेधेनान्यतरव्यवस्थानियम इति प्रकारान्तरासंभवाद्भावानामर्थक्रिया क्रमाक्रमाभ्यां व्याप्ता, तौ च स्थिरान्निवर्तमानावर्थक्रियामपि व्यावर्तयतः वृक्षतेव निवर्तमाना शिंशपात्वमाराद्दृश्यमानादेकशिलामयाद्भूभृत्कटकादिति प्रतिबन्धसिद्धिः। तथा हि न तावदक्षणिकः क्रमेणार्थक्रियां कर्तुमर्हति। स्वेन हि रूपेण भावा अर्थक्रियायामुपयुज्यमाना दृश्यन्ते। यद्वस्तु यत्कार्यान्वयव्यतिरेकानुविहितभावाभावं तद्वस्तु तत्कार्यप्रसवसमर्थम्, रूपं च तस्य कार्येणानुकृतान्वयव्यतिरेकमिति रूपमेव समर्थम्, तच्च द्वितीयादिक्षणेष्विव प्रथमेऽपि क्षणे सदिति द्वितीयादिक्षणजन्यं कार्यकलापं प्रथम एव क्षणे निष्पादयेत् समर्थस्य क्षेपायोगादिति नाक्षणिकस्य क्रमवद्व्यापारता प्रसज्यते। स्यादेतत्—समर्थोऽपि क्रमवत्सहकारियोगात् क्रमेण करोतीति ? तदयुक्तं विकल्पासहत्वात्। किमस्य सहकारिणः कंचिदुपकारमादधति न वा ? आदधाना वा भावाद्भिन्नमभिन्नं वा। तत्र भिन्नोपकाराधाने भावे सत्यनुत्पत्तेरुपकारे च सत्युत्पत्तेः एवं कार्यस्योपकार एव जनको न जनको भावः। न चोपकारसहकारी भाव एव कार्यस्य जनको नोपकारमात्रमिति वाच्यम् उपकारस्योपकारान्तरजनने अनवस्थानात्, अजनने तु सहकारिभावाभावात्। अभिन्नोपकाराधाने च भाव एव जनयेत् स च प्रागप्यासीदिति सहकारिवैयर्थ्यम्। अनुपकारकत्वे वा सहकारिणो न भावेनापेक्ष्येरन्नित्युत्पन्नमात्र एव भावः कार्यमुत्पादयेत् समर्थस्य क्षेपायोगात्, क्षेपे वा न पश्चादपि कुर्यादविशेषात्। यदि मन्येत अनुपकारका अपि भवन्ति सहकारिणो यतस्तैः सह भावः कार्यं करोति ; न च भावेन नापेक्ष्यन्ते तैर्विना कार्यस्यानुत्पत्तेरिति। ननु स्वरूपेण चेत् कार्यजनको भावः (क)न कस्मान्नेमानन्तरेण जनयति तेभ्यः प्रागपि स्वरूपसद्भावात्। सहकारिरूपेण वा जनकत्वे सहकारिण एव जनका न जनको भावः। न चोभयभावाभावानुविधानादर्थक्रियाभावाभावयोरेकस्माच्च व्यभिचारादुभयाधीनतेति सांप्रतम्, भावे सत्यनुत्पादात् कार्यस्य व्यभिचारेण चरमभाविनिमित्तसहकारिसमवधाने सति भावादेव सहकारिसमवधानस्यैव चरमभाविनोऽव्यभिचारेण कारणत्वावधारणात्। एतेनैतन्निरस्तं यदाहुरेके—

स्वहेतोर्विलम्बकारी भावो जात इति नोत्पन्नमात्रः करोतीति।

सा हि विलम्बकारिता अस्य स्वभावः सहकारिसमवधानकालेऽप्यस्ति न वा ? अस्ति

(क) अत्र एकं नञ्पदं प्रमादादापतितं सम्भाव्यते।

न्यायवार्त्तिकतात्पर्यटीका

चेत्तदाऽपि न कुर्यात्, नास्ति चेत् कथं स्वभावनाशे भावो न नष्टः। अथास्य विलम्बकारिता न स्वभावः, कथमुत्पन्नमात्रो न कार्यं कुर्यादिति। तस्मान्न क्रमेणार्थक्रिया भावानां नापि यौगपद्येन। तस्माद् यावत्कार्यं तेनाक्षणिकेन प्रथमे क्षणे संपादितं तावत्सर्वं द्वितीयादिक्षणेषु संपादयेत् तावत्कार्यसम्पादनस्वरूपस्य द्वितीयादिष्वपि क्षणेषु भावात्। न च सम्पादितं शक्यसम्पादनमिति यद् द्वितीयादिक्षणेषु सम्पादयति तत् प्रथमक्षणे सम्पादितादन्यदिति क्रमा एवाऽऽवर्त्तन्त इति तत्र चोक्तो दोषः। युगपत्कृतकृत्यस्य वा द्वितीयादिषु कर्त्तव्याभावान्नार्थ-क्रियासामर्थ्यमस्तीत्यसत्त्वेन क्षणिकत्वापत्तिः। तस्मादक्षणिके सत्त्वे व्यापकयोः क्रमाक्रमयोरनुप-लम्भाद् व्यापकानुपलब्ध्या निवर्त्तमानं सत्त्वमक्षणिकात् क्षणिकत्वेन व्याप्यत इति प्रतिबन्धसिद्धिः। नीलमेव चानुभूतावसितं समारोपिताक्षणिकभावमक्षणिकं तादृशनीलस्वरूपोप-लम्भ एव तत्राक्षणिके क्रमयौगपद्यानुपलम्भः, यथा भूतलस्वरूपोपलम्भ एव समारोपितदृश्यत्वस्य घटस्यानुपलम्भः। भूतलं च तथोत्पन्नं घटाभावः, न त्वभावो नाम कश्चिद्विग्रहवानस्ति यः प्रतिपत्तिगोचरः स्यात्, अपि तु व्यवहर्त्तव्यः परम्।

स्यादेतत्—क्षणिको भावोऽर्थक्रियाजनकस्वभावो न वा? न चेत् असन्नेव। तज्जनकस्वभावश्चेत् किमस्य सहकारिभिः? उत्पन्नमात्रमेव बीजमङ्कुरं जनयेत्। ननूत्पन्नो बीजक्षणः समर्थो जनयत्येवाङ्कुरम्। कुतः समर्थस्योत्पत्तिः? पूर्वस्माद्बीजक्षणात्। तर्हि तत्सन्तानवर्तिनां सर्वेषां बीजत्वाविशेषादङ्कुरजननसामर्थ्यमिति कुसुमानन्तरलब्धजन्ममात्रमेव बीजमङ्कुरं जनयेत्? मैवम्, पूर्वपूर्वक्षितिबीजपवनादिक्षणसमवधानोत्पन्नातिशयवदुत्तरोत्तरक्षणपरम्परालब्धजन्माऽन्त्यो बीजक्षणः समर्थः समर्थक्षित्यादिलक्षणसहभूरनपेक्ष एवाङ्कुरं जनयति। न चास्य क्षित्यादिसह-भुवस्तदनपेक्षस्यापि तैर्विना करणं तदेकसामग्र्यधीनस्य तदभावेऽभावात्। न वा सहकारिता क्षित्यादीनां हैरत्र सहाङ्कुरजननात्, तेषामपि कार्यात् पूर्वभावस्य नियमतोऽविशेषात् तन्मात्रत्वादेव च कारणतायाः। न वाऽनपेक्षाणामपि प्रत्येकं कार्यान्तरारम्भणं तन्मात्रस्य तेभ्य उपलब्धेस्तत्रैव सामर्थ्यनियमात्। न च कृतकरणतयेतरेषामक्रिया सहक्रियायां कृतमित्यसम्भवात्। न च स्वकारणलब्धसन्निधयो भावाः प्रेक्षावन्तः शक्यमिदमस्मास्वेकेनापि कर्तुं कृतं नः सर्वेषां सन्निधानेनेत्यालोच्य निवर्तितुमीशते। न च स्वकारणभेदमात्रं कार्यभेदहेतुः अपि तु सामग्रीभेदः, तस्मिन् सति कार्यभेदोपलब्धेः अभिन्ना भेदसामग्रीति न कार्यभेदप्रसङ्गः: परस्परसमवधानं चोपसर्पणप्रत्ययेभ्यः क्षित्यादीनामिति। न च क्षणिकस्यार्थक्रियाविरोधादसाधारणता हेतोः। न च साध्यधर्मिणि दृश्यमाने शब्दादौ व्याप्तिसाधनादेव साध्यसिद्धेरसाधनाङ्गं हेतुवचनम्। न खलु सर्वोपसंहारवती व्याप्तिर्दृश्यमात्रविषया भवितुमर्हति। शक्यं हि शङ्कितुं परेणादृश्यमानानां सत्त्वमक्षणिकाद् न व्यावर्तितं त्वयेति सत्त्वमनैकान्तिकं क्षणिकत्वसाधन इति। तस्माद् यद् दृश्यमदृश्यं वा तत्सर्वं क्षणिकमिति दर्शनीया व्याप्तिः। नन्वेवमपि

न्यायवार्त्तिकतात्पर्यटीका

शब्दादेर्विवादास्पदीभूतस्य व्याप्तिदर्शनबलादेव सिद्धा क्षणिकतेति तदवस्थमेवासाधनाङ्गत्वं हेतुवचनस्य ? नैवम्, असत्यपि शशविषाणादौ यत् सत् दृश्यमदृश्यं वा तत्सर्वं क्षणिकमिति (क)यथा सर्वोपसंहारवती व्याप्तिः, न च शशविषाणादयोऽपि भवन्ति क्षणिकाः, एवं सत्यपि विवादास्पदीभूते शब्दादौ व्याप्तिसिद्धावपि न सिध्यति क्षणिकता तेनावश्यं दर्शयितव्यमेतेषां क्षणिकत्वसाधनाय सत्त्वमिति नासाधनाङ्गता हेतुवचनस्येति ।

अत्रोच्यते । न सत्त्वं क्षणभङ्गसिद्धावङ्गमसाधारणत्वात् सन्दिग्धव्यतिरेकित्वाद्वा । तथा हि क्रमाक्रमाभ्यां व्याप्तं सत्त्वं तदनुपलम्भेनाक्षणिकाद् व्यावर्तत एवं तदेव सापेक्षत्वानपेक्षत्वाभ्यां व्याप्तं तदनुपलम्भेन क्षणिकादपि व्यावर्त्तते तस्माद् गन्धवत्त्ववदसाधारणं सदसाधनाङ्गम् । तथा हि (१)अन्त्यक्षणप्राप्तानि क्षितिपवनपाथस्तेजोबीजानि समर्थानि प्राग्भावनियतानि नियतचरमोत्पादानामवनिजलानलाङ्कुराणां कारणं भवद्भिरभ्युपेयन्ते । तान्यमूनि परस्परानपेक्षाणि वा जनयेयुः सापेक्षाणि वा ? ननु निरपेक्षाण्येवान्त्यक्षणप्राप्तानि क्षित्यादीन्युत्तरस्मिन् पुञ्जे जनयितव्य इत्युक्तम्, तत् किमनभ्युपगतविकल्पेन सापेक्षाणि निरपेक्षाणि चेति । तत्किमिदानीं समर्थबीजक्षणजनकोऽपि बीजक्षणोऽनपेक्ष एव । ओमिति चेत् । नन्वेवं सर्व एव बीजक्षणा निरपेक्षाः स्वकार्योपजन इति कृतं सहकारिभिः । ननूक्तं नैते प्रेक्षावन्तः किं तु स्वप्रत्ययाधीननियतसन्निधयो न व्यवधेरीशत इति । तत्किमयं कृषीबलोऽपि न प्रेक्षावान् ? प्रेक्षावान्, यतः प्रयत्नेन कुसूलादवतार्य बीजमावपति भूमौ परिकर्षितायां क्षित्यादिसहभुव एव बीजक्षणस्यातिशयोत्पादपरम्पराया अङ्कुरप्रसवसामर्थ्यात् कुशूलस्थात्तु सहस्रेणापि (ख)वर्षैरङ्कुरानुत्पादे तत्राऽऽवपतीति चेत् । अथ किमयं न स्वसन्तानमात्रप्रभवः समर्थो बीजक्षणः ? तथा चेत्कथं सन्तानान्तरं नापेक्षेत स्वकार्ये । नन्वपेक्षत एव, किन्तु स्वोत्पादे न पुनः स्वकार्ये; तत्र तस्यानपेक्षत्वमुपेयते न तु स्वोत्पादे । ननूत्पत्तावप्यस्य जागर्त्ति स्वसन्तानवर्त्ती पूर्व एव निरपेक्षः क्षणः, एवं तस्य पूर्वः पूर्वः क्षणः स्वसन्ततिपतित एवानपेक्षो जागर्त्युपजनन इति कुशूलनिहितबीज एव स्यात् कृती कृषीबलः, कृतमस्य कृषिकर्मणा दुःखबहुलेन । तस्मात् परस्परापेक्षाणामेवान्त्यक्षणप्राप्तानां कार्यजनकत्वमकामेनाप्युपेयम् । अपि चान्त्यक्षणप्राप्तं बीजमनपेक्ष्य अङ्कुरावनिपवनपाथस्तेजांसि जनयेत् किं येनैव रूपेणाङ्कुरं जनयति तेनैव तदितराण्यपि किं वा रूपान्तरेण । न तावत्तेनैव, क्षित्यादीनामङ्कुरस्वाभाव्यापत्तेः । न खलु भवतां कारणाभेदे भेदवत्कार्यं भवितुमर्हति कार्यभेदस्याऽऽकस्मिकत्वप्रसङ्गात् । यथोक्तं भवद्भिरेव—अयमेव हि भेदो भेदहेतुर्वा यद्विरुद्धधर्माध्यासः कारणभेदश्चेति । नापि सामग्रीभेदः तस्या अप्यभेदात्, अन्यथा सहभावनियमाभावात् । स्वकारणादासादितः कश्चिदेव स्वभाव-

(१) 'अन्तक्षण'—इति क-ख० ।

(क) 'यथा'पदं कुत्रान्वेतीत्यनुसन्धेयम् ।

(ख) 'वर्षैरङ्कुरानुत्पादेन तत्रावपति' इति युक्तः पाठः ।

न्यायवार्त्तिकतात्पर्यटीका

भेद एकस्तादृशो यस्मान्नानाकार्याणि जायन्ते। तस्मान्नाऽऽकस्मिकत्वं कार्यनानात्वस्य नाप्यति-प्रसङ्गः तादृशस्य तस्यासार्वत्रिकत्वात्। न च कार्यकारणयोरभेदो येन कारणभेदाभेदावनुपतेतां कार्यभेदाभेदौ। तस्माद् यथा (क)केभ्यः कश्चिदेव बहुभ्यः कार्यमेकं जायते तथैकस्मादेव कुतश्चिद्बहूनि जनयिष्यन्ते कार्याणीति चेत्। मुधैव तर्हि नानादेशवृत्तिरेकोऽवयविसामान्यसंयोगादिरर्थ-स्तपस्वी भवता आयासितः। न हि नानात्वेऽपि देशानां तदाश्रितः सामान्यादिरर्थो नाना भवितु-मर्हति तस्य तेभ्योऽभिन्नत्वात्। रूपान्तरेण बीजमङ्कुरादितरेषां क्षित्यादीनां जनकम्। तथा हि बीजमङ्कुरस्योपादानं तत्सारभागविक्रिययाऽङ्कुरस्योत्पत्तेः, क्षित्यादिषु तु जनयितव्येषु सहकारि; पूर्वे तु क्षित्यादयः क्षित्यादीनां यथास्वमुपादानानि तद्विक्रियया तदुत्पत्तिरिति चेत्, अथ सहकारितोपादानते किमेकं तत्त्वं नाना वा? एकं चेत्, कथं रूपान्तरेण जनकं, नानात्वे तयोर्बीजाद्भेदोऽभेदो वा? भेदे कथं बीजस्य जनकत्वं ताभ्यामेवाङ्कुरादीनामुत्पत्तेः। अभेदे वा कथं न भेदो बीजस्य भिन्नतादात्म्यात्। तयोर्वैकरूपत्वमेव तादात्म्यात्। तस्मादङ्कुराद्भिन्ने क्षित्यादौ जनयितव्ये तदुपादानं पूर्वमेव क्षित्यादिसमसमयभावि बीजेनापेक्ष्यते। एवं बीजमपि समसमय-भाव्येव सहकारिकारणं क्षित्यादिभिरपेक्ष्यते नान्यथा कार्यभेदसिद्धिरित्यनिच्छताऽप्यभ्युपेयम्। न चानुपकारकमपेक्षागोचर इति भवद्भिरेवोपपादितम्। न च क्षणिकस्योपकारकत्वसम्भवोऽन्यत्र जननात् तस्याभेद्यत्वात्। न च समसमयभाविनोर्जन्यजनकत्वमस्ति सव्येतरविषाणयोरिव। तस्मात् स्वसन्तानमात्रादेव कार्योत्पादप्रसङ्गात् कार्यभेदानुपपत्तेश्चानुपकारिण्यपेक्षाविरहाच्च क्षणिक-स्यापि सापेक्षस्यानपेक्षस्य वा नार्थक्रिया सम्भविनीत्यसाधारणसत्त्वं न क्षणभङ्गसिद्धावङ्गम्। अथ मा भूदसाधारणता सत्त्वस्येत्यनुपकारकेष्वपि कार्यकरणायापेक्षाऽभ्युपेयते तेषामपि कार्येणानुकृतान्वयव्यतिरेकत्वात्, न त्वनेन क्रमेणाक्षणिकोऽपि भावोऽनुपकारकानपि सहकारिणः क्रमवतः क्रमवत्तैव कार्येणानुकृतान्वयव्यतिरेकानपेक्षिष्यते। करिष्यते क्रमवत्सहकारिवशः क्रमेण कार्याणि। समर्थस्याप्यपेक्षणीयासन्निधेः कार्यक्षेप उपपत्स्यते। न चैतावता सह-कारिसमवधानादेवोत्पत्तिमतः कार्यसिद्धिः कृतमेषां रूपेणेति वाच्यं तत्सहितादेव तत उत्पत्तिदर्शनात्, रूपे सत्यप्यनुत्पादात्। (ख)समवधाने हेतुसत्युत्पादादेव कार्यस्वसमवधानमेव हेतुः न पुना रूपमपीति चेत् तत्किमिदानीं रासभादितुल्यता बीजरूपस्य? ओमिति चेत्, अथ कस्माद्गर्दभादीनन्तरेणेव बीजरूपं विनाऽपि नाङ्कुरो जायते? तत्समवधानस्य तत्कारणत्वा-दिति चेत्, तत्समवधाने कारणे कथं तन्निवेशि रूपमपि न कारणम्। न चावर्जनीयतया तन्निवेशः, समवधानमात्रस्य बीजरूपमन्तरेणापि तत्र तत्र भावात्। विशेषस्तु समवधाने रूपमेव बीजादीनाम्। तस्माद् यथोभयाधीननिरूपणा व्याप्तिरयोगव्यवच्छेदेन व्यापके निरूप्यते

(क) 'केभ्यः कश्चिदेव' इत्यत्र 'केभ्यश्चिदेव' इति पाठः सम्भाव्यते।

(ख) 'समवधाने सत्युत्पादादेव कार्यस्य समवधानमेव हेतुः' इति पाठः सम्भाव्यते।

न्यायवार्त्तिकम्

अहेतवः। उपेत्य वा विशेषवत्त्वं वर्तमानैकक्षणविशेषवत्त्वेनानैकान्तिकम्—उभयपक्षसम्प्रतिपत्त्या य एव क्षणो वर्तमानः स विशेषवान् भवत्येकश्चेत्यनेकान्तः। अन्ते विशेषदर्शनादिति च विशेषणानर्थक्यम्। अन्तार्थानभिधानात् कतमस्मिन्नन्ते विशेषदर्शनादिति च वक्तव्यम्।

न्यायवार्त्तिकतात्पर्यटीका

व्याप्ये भाव एव व्यापकस्य नाभाव इति व्याप्ये पुनरन्ययोगव्यवच्छेदेन व्यापक एव भावो व्याप्यस्य नान्यत्रेति एवं कार्यकारणभावोऽप्युभयाधीननिरूपणोऽपि कारणे अयोगव्यवच्छेदेन निरूप्यते, कार्योत्पादस्य पुरस्ताद्भाव एव कारणस्य नाभाव इति। कार्ये पुनरयोगव्यवच्छेदेन, कारण एव सति भावो नान्यस्मिन्निति अनुभवानुसारान्निश्चीयते, तथैव हि लौकिकपरीक्षकाणां सम्प्रतिपत्तेः। न च कारणतैव सत्ता किं तु स्वरूपं नीलादेरनुभूतावसितम्, तद्धि तेनैव रूपेण स्वाभावव्यवच्छिन्नं तासु तास्वर्थक्रियासूपयुज्यते न पुनरर्थक्रियाकारितैव स्वरूपं मा भूदनेकार्थक्रियाकारिणोऽपर्यायेण रूपभेदः। तस्माद् यद्यस्ति सर्वज्ञस्ततः स्वरूपेणैव सन् भावः तज्ज्ञानस्याऽऽलम्बनप्रत्ययो भविष्यति। अथ तु नास्ति तथाऽपि तद्रूपो जनित्वा आपाततोऽकिञ्चित्करोऽपि पश्चात्कुतश्चिन्निमित्तादासाद्य सहकारिप्रत्ययान् तासु तास्वर्थक्रियासूपयोक्ष्यते। तत्सिद्धमेतत् क्षणिकस्यापि क्रमाक्रमाभ्यां यथायोगमर्थक्रियोपपत्तेर्व्यापकानुपलब्धेरसिद्धेः सन्दिग्धव्यतिरेकमनैकान्तिकं सत्त्वं शाक्यानां क्षणिकत्वे साध्ये भावानाम्। अस्माकं त्वन्यथासिद्धमसिद्धप्रभेद एवेति। न च जनकत्वाजनकत्वलक्षणविरुद्धधर्मसंसर्गो नानात्वे हेतुर्भवितुमर्हति। जनकत्वं नाम न वस्तुस्वभावोऽपि तु तद्धर्मः। धर्मश्च धर्मिणो वस्तुतो भिद्यते। न चान्यस्य भेदोऽन्यस्य भेदायालमतिप्रसङ्गात्। अन्यत्वाविशेषे कथं तस्यैव धर्म इति चेत्। अत्र वस्तुस्वभावैरेवोत्तरं वाच्यम्। यथाऽन्यत्वाविशेषेऽपि कार्यं धूमो हुतभुज एव न बीजस्येत्युक्तम्। न च कृतकत्वमपि क्षणिकत्वे हेतुरन्यथासिद्धेः सहेतुके विनाशे तदुपपत्तेश्च। न चोत्पत्तिविनाशयोस्तादात्म्यं भावस्यात्यन्ताभावप्रसङ्गादित्युक्तम्। तदिदमुक्तं वार्त्तिककृता—तेऽप्यसिद्धा अन्यथासिद्धा विरुद्धा वा भवन्तीत्यहेतव इति। अन्त्यक्षणविशेषदर्शनं पूर्वक्षणधर्मत्वेनासिद्धत्वादसिद्धम्। सत्त्वकृतकत्वे अन्यथासिद्धे, विरुद्धत्वं च सर्वस्यैव हेतोः क्षणिकत्वे साध्ये। तथा हि सत्त्वं कृतकत्वं वा त्रैलोक्यव्यावृत्ततयाऽननुगतं देशतः कालतो वा न साधनं तस्याशक्याविनाभावज्ञानतया लिङ्गभावाभावात्, अन्वयमुखेन व्यतिरेकमुखेण वा अविनाभावग्रहस्यैकस्मिन् क्षणेऽशक्यत्वात्। तस्माद् देशकालानुगतं सत्त्वं कृतकत्वमन्यद्वा हेतूकर्तव्यम्। तच्च विधिरूपं वा भवत्वन्यव्यावृत्तिरूपं वा नानाकालमेकमक्षणिकं क्षणिकत्वेन साध्येन विरुध्यत इत्युक्तं—विरुद्धा वेति। अन्ते विशेषदर्शनादित्यस्य तु विरुद्धत्वमनन्तरं वक्ष्यति। उपेत्य विशेषवत्त्वे सिद्धस्यमनैकान्तिकत्वमाह—उपेत्य वेति। हेतोरसिद्धत्वविरुद्धत्वे दर्शयितुमाह—अन्ते विशेषेति।

न्यायवार्त्तिकम्

अथान्तो विनाशः, नैतस्मिन् विशेषदर्शनमस्ति। अथान्तिमं वस्त्वेवान्तशब्दवाच्यम्, एवं सत्येकस्मिन् विशेषदर्शनमिति विरुद्धो हेतुः।

योऽप्ययं हेतुर्दर्शनादर्शनादिति, अस्यार्थः—नीयमानस्य किल प्रदीपादेर्द्रव्यस्य देशान्तरे उत्पादो देशान्तरे निरोधः, तत्कृते दर्शनादर्शने स्तः। अतश्च—देवदत्तादेर्गच्छतो दर्शनादर्शनात् अतस्तस्यापि प्रतिक्षणमुत्पादविनाशाविति। नैतन्न्याय्यं देवदत्तादेर्दर्शनादर्शनयोरन्यनिमित्तत्वात्—(१)संयोगविभागकृते दर्शनादर्शने नोत्पादविनाशकृते, यस्मिन् देशे संयोगो विनष्टः तस्मिन् संयोगी न गृह्यते यस्मिन्नुत्पन्नस्तस्मिन् गृह्यत इति। (क)यद्योगाद्धि द्रव्ये इहबुद्धिर्भवति तद्भावाभावयोस्तद्वत्त्वादिति। अथ संयोगविभागौ न विद्येते? तस्यापि संयोगोऽर्थान्तरं भवतीति प्रतिपादितम्। एतेन विभागो व्याख्यातः। तदेवं संयोगविभागोत्पत्तेर्द्रव्यस्य दर्शनादर्शने भवतो नान्यथेति।

यत्पुनरेतत् प्रदीपस्य देशान्तर उत्पाद इति, एतदपि न बुध्यामहे। कथमिति? यत्ताधद्भवतां पक्षे (२)वस्तूत्पन्नं यत्र तत्रैव तद् ध्वंसते यदुत्पितत्सु तदनाहितसंस्कारमसत्त्वाद् देशान्तरे नोत्पत्तुमर्हतीति। अथानाहितसंस्कारस्यापि देशान्तरे उत्पादः? न किञ्चिद्वस्तु स्वभिन्नदेशमुत्पद्यते। अथ कारणं संस्कृतमिति? तदाधेयवशात् कार्यमपि तथाभूतमेवोत्पद्यत इति तुल्यं कार्येण—यथैव कार्ये संस्कार आधातुमशक्यः तथा कारणेऽपीति तुल्यम्। नित्यं भवतां

न्यायवार्त्तिकतात्पर्यटीका

दर्शनादर्शनलक्षणस्य हेतोरन्यथासिद्धतेत्याह—योऽप्ययं हेतुरिति।

भावाभावयोस्तद्वत्त्वादिति। संयोगभावाभावयोरिह बुद्धे(ख)र्भाववत्त्वादित्यर्थः।

प्रदीपस्य देशान्तरे उत्पाद इति, एतदपि न बुध्यामह इति। क्षणिकस्य प्रदीपस्य यदि सन्तानमात्रप्रभवत्वं निबद्धं देशान्तरे कार्योत्पादकत्वं ततः सर्व एव प्रदीपक्षणा देशान्तरे प्रदीपमुत्पादयेयुः न केचन प्रघनोदर एवेति। अथोपसर्पणप्रत्ययवशात् प्रघनोदरादन्यत्रापि कार्यमुत्पादयन्ति? ननूपसर्पणप्रत्ययः प्रदीपे कंचिदुपकारमाधत्ते न वा? न तावदाधत्ते क्षणस्याभेद्यत्वेनोपकृतानुपकृतत्वासंभवात्; अनाधाने च सहकारिभावाभावात्। अनुपकारकस्य सहकारित्वेऽतिप्रसङ्गादिति भवतामेव गिरः। न च विशिष्टप्रदीपक्षणजननमेवोपकारः सहकारिणां तस्य पूर्वस्मादेवोपादानादुपपत्तेः सहकार्यनपेक्षणात्। न खलु तस्येव तत्कारणस्याप्युपकारकाः सहकारिणो भवितुमर्हन्ति। एवं पूर्वेषामपि प्रदीपक्षणानां पूर्वपूर्वप्रदीपमात्रसामर्थ्यभुवा न सह-

(१) 'संयोगविनाशकृते'—इति क-ख-ध्रतपाठान्तरम्। (२) 'वस्तूपपन्नं'—इति क-ख-ध्रत-पाठान्तरम्।

(क) 'तद्योगात्' इति पाठः सम्भाव्यते। (ख) '-र्भावाभाववत्त्वात्' इति पाठः सम्भाव्यते।

न्यायवार्त्तिकम्

पक्षे भिन्नदेशेन कार्येणोत्पत्तव्यमभिन्नदेशेन वा। एतेनैवातुल्यपातो व्याख्यातः। अतुल्यपातात् क्षणिकत्वमिति न किलाऽऽकाशे पततो लोष्टादेः प्रतिबन्धकं किञ्चिदस्ति यदनुविधानेन लोष्टादिकं किञ्चिच्चिरेण पतति किञ्चिदाश्विति। तस्मात् क्षणिकत्वात् काश्चिदवस्थास्तादृश्य उत्पद्यन्ते यासां न भवत्यधःसन्तानोत्पत्तौ सामर्थ्यम्, पुनश्च तादृश्य उत्पद्यन्ते यासां भवतीति? एतदप्यन्यथा-सिद्धमेव, तुल्यानां गुरुत्ववतां द्रव्याणामेकस्य गुरुत्वप्रयत्नक्षेपाः कारणम्, एकस्य गुरुत्व-मात्रमेकस्य गुरुत्वप्रयत्नाविति। तदेवं कारणभेदानुविधायीनि गुरुत्ववन्ति द्रव्याणि चिराशु-पातानुविधानभाञ्जि भवन्तीत्यहेतुरतुल्यपातः। यदपीदम् इषोश्चापतनं भवेदिति, संस्कारै-कत्ववादिनो दोषः अयमपि संस्कारैकत्वानभ्युपगमेन प्रत्युक्तः। यथा चानेकः संस्कार इति तथोक्तं पाणिनिमित्तप्रश्लेषसूत्र (२।२।३६) इति। एकश्च संस्कारः यदा कदाचिन्निमित्तभेदात् पटूनि कर्माणि करोति कदाचिन्मन्दानीति गुरुत्ववद् द्रष्टव्यम्—यथैकं गुरुत्वं सहकारिसंयोगात् मन्दं पातं करोति तदेव प्रतिबन्धापगमे पटुं करोति। दृष्टो हि ग्राव्ण आकाशे मुक्तस्य पटुः पातो मन्दोऽपामिति तदेवमतुल्यपातोऽप्यहेतुः।

अथाक्षणिकत्वे किं प्रमाणम्? उक्तम्—आधाराधेयभावाद् एककालानुभाविनी कार्यकारणे (क)कुण्डे बदरवदिति। अतश्च—विप्रतिपन्ना अयुगपत्कालाः प्रत्यया एकविषयाः अभ्युत्थायितत्-प्रत्ययसामानाधिकरण्ये सति समानशब्दवाच्यत्वात् वर्तमानैकक्षणानेकपुरुषप्रत्ययवत्। यथा

न्यायवार्त्तिकतात्पर्यटीका

कारिणा किंचिदाधीयत इति सर्व एवैकस्मिन् (ख)प्रधाने कार्यं कुर्युः देशान्तरे वा। यदि पुनरनुप-कारिणोऽपि कार्यानुविहितभावाभावतया क्षणिकेन प्रदीपेन कार्यक्रियां प्रत्यपेक्ष्यन्ते तदक्षणिकपक्षे-ऽपि तुल्यमिति संक्षेपः। विपञ्चितं चैतदस्माभिर्ब्रह्मतत्त्वसमीक्षान्यायकणिकाभ्यामित्युपरम्यते। न किलाऽऽकाशे पततो लोष्टादेरिति। लोष्टश्येनादेस्तुल्यगुरुत्ववतां द्रव्याणामेकस्य गुरुत्व-प्रयत्नक्षेपाः कारणम्। तथा हि सौधस्योपरिस्थेन पुरुषेण भूमौ चरन्तं पारावतमुद्दिश्य यदाऽधः श्येनः क्षिप्यते तदा श्येनस्य पारावतजिघृक्षाजनितः प्रयत्नो गुरुत्वं च क्षेपश्चाऽऽशुतरपतनहेतवः। अक्षिप्तस्य तु गुरुत्वप्रयत्नावाशुपतनहेतू, अप्रयतमानस्य गुरुत्वमात्रं पतनहेतुरिति। औलूक्यमतेऽपि न दोष इत्यत आह—एकश्च संस्कार इति।

अयुगपत्कालाः प्रत्यया एकविषया इत्युच्यमाने घटपटादिप्रत्ययाः प्रदीपादिप्रत्ययाश्च क्रमवन्त एकविषयाः प्रसज्येरन्नित्यत आह—विप्रतिपन्ना इति। समानशब्दवाच्यत्वादिति अनेकान्तः, भवन्ति हि समानशब्दवाच्याः प्रत्ययाः अक्षोऽक्ष इति। न च समानविषयाः देवनादीनां तद्विषयाणां भेदादत आह—तत्प्रत्ययसामानाधिकरण्ये सतीति। तथाऽपि प्रदीपप्रत्ययै-

(क) 'कुण्डबदरम्' इति युक्तः पाठः। (ख) 'प्रघने' इति पाठः सम्भाव्यते। अलिन्द इत्यर्थः।

न्यायभाष्यम्

अत्र कश्चित्परिहारमाह—

(सू०)—न पयसः (१)परिणामगुणान्तरप्रादुर्भावात् ॥१५॥

पयसः परिणामो न विनाश इत्येक आह। परिणामश्चावस्थितस्य द्रव्यस्य पूर्वधर्मनिवृत्तौ धर्मान्तरोत्पत्तिरिति।

गुणान्तरप्रादुर्भाव इत्यपर आह। (२)सतो द्रव्यस्य पूर्वगुणनिवृत्तौ गुणान्तरमुत्पद्यत इति। स खल्वेकपक्षीभाव इव ॥ १५ ॥

न्यायवार्त्तिकम्

वर्तमानक्षणविषयाणामनेकपुरुषप्रत्ययानामव्युत्थायितत्प्रत्ययसामानाधिकरण्ये सति समानशब्दवाच्यानामेकविषयत्वं तथा चाव्युत्थायितत्प्रत्ययसमानाधिकरणाः समानशब्दवाच्याश्च विप्रतिपन्ना अयुगपत्कालाः प्रत्ययास्तेऽप्येकविषया इति। प्रत्यात्मं नानेककर्तृकाः प्रत्यया अप्रतिसन्धानप्रसङ्गाद् देवदत्तादिप्रत्ययवदिति। रूपरसगन्धस्पर्शप्रत्यया एकानेकनिमित्ताः मयेति प्रतिसन्धानात् कृतसमयानां बहूनां वर्तमानैकक्षणानेकविज्ञानवदिति। श्वस्तनाद्यतनविज्ञानान्येकसन्ततौ एकानेकनिमित्तानि मयेति प्रतिसन्धानात् पूर्ववत्। शास्त्रार्थप्रत्यया एकानेकनिमित्ताः प्रतिसन्धानात् पूर्ववत्। नानाविषयाणां च नानाकर्तृकाणां च प्रत्ययानामप्रतिसन्धानादिति पूर्ववदेव न्याय इति ॥ १४ ॥

न पयसः परिणामगुणान्तरप्रादुर्भावात्। नैवं क्षीरं विनश्यति नापि दध्युत्पद्यते, अपि त्ववस्थितस्य द्रव्यस्य पूर्वधर्मनिवृत्तौ धर्मान्तरमुत्पद्यत इत्येके वर्णयन्ति। अपरे त्ववस्थितस्य द्रव्यस्य गुणनिवृत्तौ गुणान्तरमुत्पद्यत इति। 'स खल्वयमेकपक्षीभाव इव' क

न्यायवार्त्तिकतात्पर्यटीका

रेवानेकान्त इत्यत आह—अव्युत्थायीति। व्युत्थातुं भ्रमितुं शीलमस्येति व्युत्थायि भ्रान्तमिति यावत्। अभ्रान्तत्वं चास्य क्षणिकत्वसाधननिराकरणेन द्रष्टव्यम्। अव्युत्थायितत्प्रत्ययसामानाधिकरण्येनैव सिद्धे समानशब्दवाच्यत्वं प्रपञ्चः ॥ १४ ॥

न प—वात् (सू० १५) ॥ भाष्यम्—गुणान्तरप्रादुर्भाव इति। द्रव्यं तावत्सदेव गुणोऽपि सन् केवलमनुद्भूत आसीत्। एकश्चोद्भूतो गुणः तत्र य उद्भूतस्तिरोभवति। पूर्वगुणस्य निवृत्तौ तिरोभूतौ गुणान्तरमुत्पद्यते तद्भवतीत्यर्थः ॥ १९ ॥

वृत्तिः

सौगतमते साङ्ख्यो दूषणमुपन्यस्यति—(न पयसः परिणामगुणान्तरप्रादुर्भावात्)

न क्षीरस्य नाशो दध्नश्चोत्पत्तिः, किं तु क्षीरस्य परिणामः परिणामशब्दार्थो

(१) 'परिणामः' इति टि०। (२) 'गुणान्तरप्रादुर्भावश्च सतो' इति ज-ल-भा०।

न्यायभाष्यम्

अत्र तु प्रतिषेधः—

(सू०)—व्यूहान्तराद् द्रव्यान्तरोत्पत्तिदर्शनं पूर्वद्रव्यनिवृत्तेरनुमानम् ॥ १६ ॥

संमूर्छनलक्षणादवयवव्यूहाद् द्रव्यान्तरे दध्नि उत्पन्ने गृह्यमाणे पूर्वं पयोद्रव्यमवयवविभागेभ्यो निवृत्तमित्यनुमीयते, यथा मृदवयवानां व्यूहान्तराद् द्रव्यान्तरे स्थाल्यामुत्पन्नायां पूर्वं (१)मृत्पिण्डद्रव्यं मृदवयवविभागेभ्यो निवर्त्तते इति। (२)मृद्वच्चावयवान्वयः पयोदध्नोर्नाशेषनिरोधे निरन्वयो द्रव्यान्तरोत्पादो घटत इति ॥ १६ ॥

न्यायवार्त्तिकम्

उपमानार्थः ? उभयत्र द्रव्यमवतिष्ठते, एकस्य तिरोभावाभिव्यक्ती एकस्य विनाशप्रादुर्भावावित्युपमानार्थः ॥ १५ ॥

उभयत्रोत्तरम्—

व्यूहान्तराद् द्रव्यान्तरोत्पत्तिदर्शनं पूर्वद्रव्यनिवृत्तेरनुमानम्। शेषं भाष्ये। यत्पुनरेतत्—एकस्य तिरोभावाभिव्यक्ती एकस्य विनाशप्रादुर्भावाविति, तन्न, पूर्वावस्थापरित्यागात्। यदि विनाशोत्पादौ निवृत्तिप्रादुर्भावौ अथाप्यभिव्यक्त्यनभिव्यक्ती, सर्वथा पूर्वावस्थां जहाति द्रव्यमिति। न ह्यनपवृत्तस्य पूर्वावस्थातोऽभिव्यक्त्यनभिव्यक्ती भवतो विनाशप्रादुर्भावौ वेति। तस्मादयुक्तमवस्थितस्य परिणाम इति ॥ १६ ॥

न्यायवार्त्तिकतात्पर्यटीका

व्यूहा—नम् (सू० १६) ॥ अत्र तु प्रतिषेध इति। क्षीरावयवा एव हि क्षीरविनाशे सत्युत्पन्नपाकजा विलक्षणं द्रव्यमुत्पादयन्ति। यदि तु सर्वं कार्यं सदेव कारणव्यापारात् प्रागपि, व्यर्थः कारणव्यापारः अभिव्यक्तेरपि कार्यायाः सत्त्वात्। असत्त्वे वा यथा सैव न सती क्रियते एवं कार्यान्तराण्यपीति। विपञ्चितं चैतदस्माभिर्न्यायकणिकायाम् ॥ १६ ॥

वृत्तिः

गुणान्तरप्रादुर्भावः। विद्यमानस्य क्षीरस्य पूर्वरसतिरोभावे अम्लरसात्मकगुणान्तरस्याऽऽविर्भावादित्यर्थः ॥ १५ ॥

एतन्निराकरोति सूत्रकारः—(व्यूहान्तराद् द्रव्यान्तरोत्पत्तिदर्शनं पूर्वद्रव्यनिवृत्तेरनुमानम्)

व्यूहान्तराद् रचनान्तराद् द्रव्यान्तरोत्पत्तिर्दृश्यते, तदेव च पूर्वद्रव्यनिवृत्त्यनुमितिं जनयति, मूर्तयोः समानदेशताविरोधादेकदा द्रव्यद्वयासमावेशात्। न पूर्वावयवसंयोगनाशो द्रव्यान्तरोत्पादश्चाऽनुभविक इति भावः ॥ १६ ॥

---

(१) 'मृत्पिण्डम्' इति वि०। (२) 'मृद्वद् वाऽवयवा-' इति ज०।

न्यायभाष्यम्

अभ्यनुज्ञाय च निष्कारणं क्षीरविनाशं दध्युत्पादं च प्रतिषेध (१)उच्यते—

(सू०)—क्वचिद्विनाशकारणानुपलब्धेः क्वचिच्चोपलब्धेरनेकान्तः ॥ १७ ॥

क्षीरदधिवन्निष्कारणौ विनाशोत्पादौ स्फटिकव्यक्तीनामिति नायमेकान्त इति। कस्मात्? हेत्वभावात्। नात्र हेतुरस्ति अकारणौ विनाशोत्पादौ स्फटिकादिव्यक्तीनां क्षीरदधिवत्, (२) न पुन(३)र्यथा (४)विनाशकारणभावात् कुम्भस्य विनाश (५)उत्पत्तिकारणभावा(४*)च्चोत्पत्तिः(५*) एवं स्फटिकादिव्यक्तीनां विनाशोत्पत्तिकारणभावाद्विनाशोत्पत्तिभाव इति।

न्यायवार्त्तिकम्

'अभ्यनुज्ञाय च निष्कारणं क्षीरविनाशं निष्कारणं च दध्युत्पादम्'।

क्वचिद्विनाशकारणानुपलब्धेः क्वचिच्चोपलब्धेरनेकान्तः। क्षीरदधिवन्निष्कारणौ विनाशोत्पादौ स्फटिकव्यक्तीनाम्, न पुनः कुम्भादिवत् सकारणाविति नात्र हेतुरस्तीति। निरधिष्ठानं च दृष्टान्तवचनम्। कोऽधिष्ठानार्थः? आश्रयार्थः। किमुक्तं भवति निरधिष्ठानमिति? धर्मी नास्तीति यावदुक्तं भवति। न हि स्फटिकस्योत्पादविनाशौ प्रतिक्षणमुपलभ्येते यत इयं चिन्ता भवेत् किमेतौ सकारणावाहोस्विदकारणाविति, यथाऽनभ्युपगतशब्दतत्त्वं प्रति कश्चिद् ब्रूयात् कृतकत्वादनित्यः शब्दस्तादृगेतदिति। धर्म्यसिद्धेश्च दृष्टान्ताभाव इति च समानम्। अभ्यनुज्ञाय च स्फटिकस्योत्पादविनाशौ योऽत्र साधकस्तस्याभ्यनुज्ञानादप्रतिषेधः। उभावेतौ

न्यायवार्त्तिकतात्पर्यटीका

क्वचित्—न्तः (सू० १७) ॥ अभ्यनुज्ञाय च निष्कारणमिति। विनाशोत्पादवत्त्वात् समानधर्मात् संशयः। दधिक्षीरयोर्विनाशोत्पादावकारणौ दृष्टौ कुम्भस्य चोत्पादविनाशौ सकारणकौ। तदिह स्फटिके विनाशोत्पादौ सकारणौ निष्कारणौ वेति सन्देहः। तद् यदि सकारणावेवेति प्रमाणतो निश्चीयते ततो विनाशकारणानुपलब्धेः स्फटिकस्य कुम्भवद्विनाशो नास्तीति निश्चीयते। तदिदमुक्तं भाष्यकारेण—न पुनर्यथा (६)विनाशकारणभावादिति।

---

(१) 'उच्यते इति' इति ज-ग-ल-भा०। (२) 'न' इति टि-पु० नास्ति। (३) 'यथा' इति ज-पु० नास्ति। (४) 'विनाशकारणाभावात् कुम्भस्य विनाश उत्पत्तिकारणाभावात्' इति ज०। (५) 'उत्पत्तिकारणाभावाच्चानुत्पत्तिः' इति ग०। (६) 'विनाशकारणाभावादिति' इति क-ख०।

न्यायभाष्यम्

निरधिष्ठानं च दृष्टान्तवचनम्। गृह्यमाणयोर्विनाशोत्पादयोः स्फटिकादिषु स्यादयमाश्रयवान् दृष्टान्तः क्षीरविनाशकारणानुपलब्धिवद्दध्युत्पत्तिवच्चेति, तौ तु न गृह्येते। तस्मान्निरधिष्ठानोऽयं दृष्टान्त इति।

अभ्यनुज्ञाय च स्फटिकस्योत्पादविनाशौ योऽत्र साधकस्तस्याभ्यनुज्ञानादप्रतिषेधः। कुम्भवन्न निष्कारणौ विनाशोत्पादौ स्फटिकादीनामित्यभ्यनुज्ञेयोऽयं दृष्टान्तः प्रतिषेद्धुमशक्यत्वात्। क्षीरदधिवत्तु निष्कारणौ विनाशोत्पादाविति शक्योऽयं प्रतिषेद्धुं कारणतो विनाशोत्पत्तिदर्शनात्। क्षीरदध्नोर्विनाशोत्पत्ती पश्यता तत्कारणमनुमेयं कार्यलिङ्गं हि कारणमिति॥ १७॥

न्यायवार्त्तिकम्

दृष्टान्तौ क्षीरदधिवत् कुम्भादिवच्च। तत्र किं कुम्भादिदृष्टान्तो भवत्वथ क्षीरदधिनी इति। तत्र कुम्भादिवदिति युक्तम्, कुम्भाद्युत्पत्तिविनाशकारणस्य दृष्टत्वात्। क्षीरदधिवत्तु न युक्तम् अनुमानतो ग्रहणादिति सिद्धमनित्या बुद्धिरिति। इतश्चानित्या बुद्धिः गुणत्वे सति प्रत्यक्षतया व्यापकद्रव्यसमवायात् शब्दवत्, जातिमत्वे सति अस्मदादिप्रत्यक्षत्वादाश्रितत्वात् शब्दवत्, करणभावे सत्ययोगिप्रत्यक्षत्वात् शब्दवदेव॥ १७॥

(इति क्षणभङ्गप्रकरणम्)

न्यायवार्त्तिकतात्पर्यटीका

निरधिष्ठानं चेति। धर्मिणमाश्रित्य तत्समानधर्मा दृष्टान्तो भवति। स्फटिकोत्पादविनाशौ च धर्मिणौ। तत्समानधर्मतया क्षीरदधिविनाशोत्पादयोर्दृष्टान्तत्वेन भवितव्यम्। न पुनः स्फटिकोत्पादविनाशौ धर्मिणौ गृह्येते। तस्मान्न तत्समानधर्मतया दृष्टान्तौ भवत इति। यदि तु द्रव्यसमवायादित्युच्येत ततस्तोयादिपरमाणुविसमवेतै रूपादिभिरनेकान्तः स्यादित्यत आह—व्यापकेति। तथाऽप्यात्मत्वसामान्येनानेकान्तोऽत आह—गुणत्वे सतीति। तथाऽप्यात्मपरिमाणेनानेकान्तोऽत आह—प्रत्यक्षतयेति। अस्मदादीनामिति शेषः। गुणत्वादिविशेषणयोगात् प्राग् व्यापकग्रहणस्योपयोगः। अस्मदादिप्रत्यक्षत्वादित्युच्यमाने सामान्यसमवायाभ्यामनेकान्तः स्यादत आह—जातिमत्त्वे सतीति। आश्रितत्वादित्यत्रापि जातिमत्त्वे सति प्रत्यक्षत्वे चेत्यनुषञ्जनीयम्। अनित्या बुद्धिः प्रत्यक्षत्वादित्युच्यमाने मनसा व्यभिचारोऽत आह—अयोगीति। तथाऽप्यात्मना व्यभिचारोऽत उक्तं—करणभावे सतीति। ज्ञानादिबुद्धौ बुद्धिः करणं भवति। शब्दश्च प्रत्यये करणम्। अत्रापि जातिमत्त्वे सतीत्यनुषञ्जनीयम्, तेन न गन्धत्वादिभिरनेकान्तः॥ १७॥

न्यायभाष्यम्

उपपन्नमनित्या बुद्धिरिति। इदं तु चिन्त्यते कस्येयं बुद्धिरात्मेन्द्रियमनोऽर्थानां गुण इति। (१) प्रसिद्धोऽपि खल्वयमर्थः परीक्ताशेषं प्रवर्त्तयामीति प्रक्रियते। सोऽयं बुद्धौ सन्निकर्षोत्पत्तेः संशयः विशेषस्याग्रहणादिति। तत्रायं विशेषः—

(सू०)—नेन्द्रियार्थयोस्तद्विनाशेऽपि ज्ञानावस्थानात्॥ १८॥

नेन्द्रियाणामर्थानां वा गुणो ज्ञानं तेषां (२) विनाशेऽपि ज्ञानस्य भावात्। भवति खल्विदमिन्द्रियेऽर्थे च विनष्टे ज्ञानम् अद्राक्षमिति। न च ज्ञातरि विनष्टे ज्ञानं भवितुमर्हति। अन्यत् खलु (३) वै तदिन्द्रियार्थसन्निकर्षजं ज्ञानं यदिन्द्रियार्थविनाशे न

न्यायवार्त्तिकम्

सा त्वियं बुद्धिः कस्य गुण इत्येतच्चिन्त्यते। न गुणभावासिद्धेः। अनित्यत्वे सत्यचाक्षुषप्रत्यक्षत्वाद् गुणभावः। सन्निकर्षोत्पत्तेः संशय इति। तत्रायं विशेषः—

नेन्द्रियार्थयोस्तद्विनाशेऽपि ज्ञानावस्थानात्। भवति खल्विन्द्रियेऽर्थे च विनष्टे ज्ञानमद्राक्षमिति। अद्राक्षमित्येतन्न इन्द्रियार्थसन्निकर्षात् स्मृतित्वात्—स्मृतिरेषा नेन्द्रियार्थसन्निकर्षाद्भवितुमर्हति? स्मृतावपि तुल्यं—यथैव ज्ञातारमन्तरेण ज्ञानं न भवत्येवमनुभवितरि

न्यायवार्त्तिकतात्पर्यटीका

चिन्तान्तरमवतारयति—इदं तु चिन्त्यत इति। नन्वात्मपरीक्षायामात्मगुणत्वं बुद्धेर्व्यवस्थापितं तत्कस्मात्पुनः परीक्ष्यत इत्यत आह भाष्यकारः—प्रसिद्धोऽपीति। यद्यप्ययमर्थः परीक्षितस्तथाऽप्यवान्तरविशेषपरिज्ञानार्थं पुनः परीक्ष्यत इत्यर्थः। चोदयति वार्त्तिककारः—न गुणेति। परिहरति—अनित्यत्वे सतीति। विमृश्य सिद्धान्तीयपक्षं गृह्णाति—सन्निकर्षोत्पत्तेरिति।

नेन्द्रि—नात् (सू० १८)॥ चोदयति—अद्राक्षमित्येतन्नेति। परिहरति—स्मृतावपीति॥ १८॥

वृत्तिः

दोषान्तराभिधानाय सिद्धान्तिनः सूत्रम्—(क्वचिद्विनाशकारणानुपलब्धेः क्वचिचोपलब्धेरनेकान्तः)

क्षीरदधिदृष्टान्तेन विनाशोत्पादावकारणकावेवेति न युक्तं घटादौ सकारणकत्वोपलब्धेर्व्यभिचारात्। वस्तुतः क्षीरविनाशेऽम्लद्रव्यसंयोगस्य हेतुत्वादम्लरसवत्परमाणुभिश्च दध्न आरम्भान्नाकारणकौ क्षीरविनाशदध्युत्पादाविति॥ १७॥

समाप्तं क्षणभङ्गप्रकरणम्॥ २॥

---

(१) 'प्रसिद्धोऽपि च' इति ज०। (२) 'विनाशे ज्ञानस्य' इति ल-ग-ज-भा०। (३) 'चैतद्-' ज०।

न्यायभाष्यम्

भवति। इदमन्यद्(१)आत्ममनःसन्निकर्षजम्, तस्य युक्तो भाव इति। स्मृतिः खल्वियमद्राक्षमिति पूर्वदृष्टविषया। न च विज्ञातरि नष्टे पूर्वोपलब्धेः स्मरणं युक्तम्, न चान्यदृष्टमन्यः स्मरति। न च मनसि ज्ञातर्यभ्युपगम्यमाने शक्यमिन्द्रियार्थयोर्ज्ञातृत्वं प्रतिपादयितुम् ॥ १८ ॥

अस्तु तर्हि मनोगुणो ज्ञानम्—

(सू०)—युगपज् ज्ञेयानुपलब्धेश्च न मनसः ॥ १९ ॥

युगपज्ज्ञेयानुपलब्धिरन्तःकरणस्य लिङ्गम्, तत्र युगपज्ज्ञेयानुपलब्ध्या यद् अनुमीयते अन्तःकरणम्, न तस्य गुणो ज्ञानम्। कस्य तर्हि ? ज्ञस्य वशित्वात्।

न्यायवार्त्तिकम्

नष्टे अनुभवितारमन्तरेण स्मृतिरयुक्तेति ॥ १८ ॥

अस्तु तर्हि मनोगुणो ज्ञानम्—

युगपज्ज्ञेयानुपलब्धेर्न मनसः। तत् खलु युगपज्ज्ञेयानुपलब्ध्या समधिगतं मनः, नातस्तस्य गुणो ज्ञानम्। विशेषणोपादानादन्तःकरणबहुत्वप्रसङ्ग इति चेत्—अथ मन्यसे यत् खलु युगपज्ज्ञेयानुपलब्ध्या समधिगतं मनो न तस्य गुणो ज्ञानमित्येवं ब्रुवाणेन बहून्यन्तःकरणानि प्रतिपन्नानि भवन्ति, न ह्यसत्यन्तःकरणबहुत्वे विशेषणमर्थवदिति ? न, सर्वस्येन्द्रियस्य मनननिमित्तत्वात्—सर्वमिन्द्रियं मनननिमित्तत्वान्मन इत्युच्यते। एवं च सति विशेषणं युक्तम्,

न्यायवार्त्तिकतात्पर्यटीका

देशयति—अस्तु तर्हीति।

युग—सः (सू० १९) ॥ परिहरति—युगपदिति। यत् करणत्वेनानुमितं तत् करणत्वमपोह्य न कर्तृ भवितुमर्हतीत्यर्थः। युगपज्ज्ञेयानुपलब्ध्या (क) यत्समधिगतमिति भाष्यमाक्षिपति—विशेषणोपादानादिति। समाधत्ते—न सर्वस्येति। पुनराक्षिपति—

वृत्तिः

बुद्धेरात्मगुणत्वं यद्यप्यात्मपरीक्षात एव सिद्धप्रायं तथाऽपि विशिष्य व्युत्पादनाय बुद्ध्यात्मगुणत्वप्रकरणम्। तत्र चेन्द्रियार्थसन्निकर्षाधीनत्वादिन्द्रियादिनिष्ठत्वमेवास्तु भेर्याकाशसंयोगाधीनशब्दस्याऽऽकाशनिष्ठत्ववदिति पूर्वपक्षे सैद्धान्तसूत्रम्—

(नेन्द्रियार्थयोस्तद्विनाशेऽपि ज्ञानावस्थानात्)

बुद्धिर्नेन्द्रियस्य न वाऽर्थस्य गुणस्तन्नाशेऽपि ज्ञानस्य स्मरणस्य अवस्थानात् उत्पत्तेः। न ह्यनुभवितुरभावे स्मरणमुपपद्यतेऽतिप्रसङ्गादिति भावः ॥ १८ ॥

(१) 'आत्ममनःसन्निकर्षे आत्ममनसोः सन्निकर्षजम्' इति वि०।

(क) अत्र टीकाकृता वार्त्तिकाक्षरसंवादी ईदृश एव भाष्यपाठः क्वचिदधिगतः अर्थमात्रं वा तस्य गृहीतमिति सुधीभिरनुसन्धेयम्।

न्यायभाष्यम्

वशी ज्ञाता वश्यं करणम्, ज्ञानगुणत्वे (१)च करणभावनिवृत्तिः। घ्राणादिसाधनस्य च ज्ञातुर्गन्धादिज्ञानभावादनुमीयते अन्तःकरणसाधनस्य सुखादिज्ञानं स्मृतिश्चेति। तत्र (२) यज् ज्ञानगुणं मनः स आत्मा, यत्तु सुखाद्युपलब्धिसाधनमन्तःकरणं मनस्तदिति संज्ञाभेदमात्रं नार्थभेद इति।

न्यायवार्त्तिकम्

युगपज्ज्ञेयानुपलब्ध्या यत् समधिगतं मनो न तस्य गुणो ज्ञानमिति। एवमपि विशेषणं व्यर्थम् अन्यस्यानभ्युपगमात्—यदि तस्यान्तःकरणस्य न भवत्यन्यस्य तर्हि साधनस्य ज्ञानं गुण इति प्राप्तम् अन्यस्यानभ्युपगमात्? अन्यस्योपपत्तेरप्रतिषेधः—अनवस्थितत्वात् प्रमाणप्रमेयभावस्य, यदाऽयं योगी पुरुषान्तरेण पुरुषान्तरं परिच्छिनत्ति तदा पुरुषान्तरपरिच्छेदे पुरुषान्तरं साधनमिति(क) तत्त्वज्ञानगुणं भवतीति युक्तं विशेषणमिति। तस्मान्न तस्य गुणो ज्ञानमिति। 'कस्य तर्हि? ज्ञस्य वशित्वात्—वशी ज्ञाता वश्यं करण'मिति।

न्यायवार्त्तिकतात्पर्यटीका

एवमपीति। विशिष्टस्य करणस्य ज्ञानगुणत्वनिषेधः करणान्तरस्य ज्ञानगुणत्वमापादयति, न चाऽऽत्मा करणमित्यर्थः। समाधत्ते—अन्यस्योपपत्तेरिति। एतदेव विवृणोति—अनवस्थितत्वादिति। प्रमातैव कदाचित्प्रमाणं कदाचित्प्रमेयमित्यर्थः। पुरुषान्तरेण पुरुषान्तरं परिच्छिनत्तीति। यादृशोऽयं पुरुषस्तादृशोऽयमपीति पुरुषान्तरेण प्रसिद्धेन पुरुषान्तरपरिच्छेद इति। पृच्छति—यदि न करणस्य कस्य तर्हीति। उत्तरम्—ज्ञस्य वशित्वात्, कर्तुः स्वातन्त्र्यादित्यर्थः कर्तृकरणादिसमवधाने हि चैतन्यं कर्तर्येव दृष्टं न करणादौ यथा मृद्दण्ड-चक्र-सलिल-सूत्र-कुलालसमवधाने कर्तुरेव कुलालस्य न तु मृदादीनामिति। वशी ज्ञाता वश्यं करणमिति भाष्यम्। तदनुपपन्नं ज्ञातुरपि क्वचिद्वश्यत्वदर्शनात्, यथा देवदत्तं कटं कारयति यज्ञदत्त इत्यत आह—

वृत्तिः

मनोगुणत्वं निरस्यति—(युगपज्ज्ञेयानुपलब्धेश्च न मनसः)

युगपज् ज्ञेयानुपलब्धेर्हेतोः सिद्धस्य मनसो न कर्तृत्वं धर्मिग्राहकमानेन करणत्वेनैव सिद्धेः। वस्तुतो युगपज् ज्ञेयानुपलब्धेरित्यनेन मनसोऽणुत्वं सूचितम्। तथा च तद्गतसुखाद्यप्रत्यक्षता स्यात्। एवं कायव्यूहे तत्तद्देहावच्छेदेन ज्ञानादिकं न स्यादिति ॥ १९ ॥

---

(१) 'वा करण-' ल-ग-भा०।

(२) 'यत्तु' इति वि०।

(क) 'वस्तु ज्ञानगुणम्' इति सम्यक् सम्भाव्यते।

न्यायभाष्यम्

(१)युगपज्ज्ञेयोपलब्धेश्च (२) योगिन इति वा चार्थः(२*)। योगी खलु ऋद्धौ प्रादुर्भूतायां विकरणधर्मा निर्माय सेन्द्रियाणि शरीरान्तराणि (३) तेषु युगपज् ज्ञेयान्युपलभते। तच्चैतद् विभौ ज्ञातर्युपपद्यते नाणौ मनसीति। विभुत्वे वा मनसो ज्ञानस्य नाऽऽत्मगुणत्वप्रतिषेधः। विभु च मनस्तदन्तःकरणभूतमिति तस्य सर्वेन्द्रियै-र्युगपत् संयोगाद् युगपज् ज्ञानान्युत्पद्येरन्निति ॥ १९ ॥

(सू०)—तदात्मगुणत्वेऽपि तुल्यम् ॥ २० ॥

विभुरात्मा सर्वेन्द्रियैः संयुक्त इति युगपज् ज्ञानोत्पत्तिप्रसङ्ग इति ॥ २० ॥

न्यायवार्त्तिकम्

न चायं ज्ञातरि नियमो ज्ञाता वश्येव वश्योऽपि भवतीति। अचेतने तु नियमः—अचेतनं तु सर्वं वश्यमिति। वश्यं मनोऽचेतनत्वात् घ्राणादिवदिति। ज्ञानगुणत्वे वा सञ्ज्ञाभेदमात्रम्—चित्तं चान्तःकरणं ज्ञानगुणं चेति संज्ञामात्रं भिद्यते। यथा च ज्ञातुर्ज्ञानसाधनमिन्द्रियमेवं मन्तुर्मतिसाधनेनावश्यं भवितव्यमिति। उभयोश्चेतनत्वे प्रत्ययव्यवस्थानुमानं न स्यात्। विभु चान्तःकरणं ज्ञानगुणमिति सर्वेन्द्रियैर्युगपदुपलब्धिप्रसङ्गः ॥ १९ ॥

न्यायवार्त्तिकतात्पर्यटीका

न चायं ज्ञातरीति। यदि तु कश्चिज् ज्ञानगुणं मन इच्छेत्, तं प्रति भाष्यं—ज्ञानगुणत्वे चेति। घ्राणादिसाधनस्येति भाष्यं व्याचष्टे—यथा च ज्ञातुरिति। तथा च मन्तुर्मतिसाधनं यत् तन्मनः करणम्। अथ तदपि कस्माच्चेतनं न भवतीत्यत आह—उभयोरिति। विभु चान्तःकरणं (४)ज्ञानगुणम् अन्तःकरणान्तररहितमिति शेषः। (क) विकरणधर्मेति भाष्यम्। विशिष्टं करणं धर्मो यस्य स विकरणधर्मा अस्मदादिकरणविलक्षणकरणः येन व्यवहितविप्रकृष्ट(५)सूक्ष्मादिवेदी भवतीत्यर्थः ॥ १९ ॥

वृत्तिः

शङ्कते—(तदात्मगुणत्वेऽपि तुल्यम्)

तस्या बुद्धेरात्मगुणत्वेऽपि ज्ञानयौगपद्यं तुल्यम्, आत्मनः सर्वेन्द्रियसंयोगात्। तथा च स दोषस्तदवस्थ एवेति कथं तया युक्त्या मनःसिद्धिरिति भावः ॥ २० ॥

---

(१) 'युगपज्ज्ञेयानुपलब्धेश्च' इति ख-ग-ज०। क-पुस्तकपाठो गृहीतः। (२) 'अयोगिन इति चार्थः'—इति ज०। (३) 'तेषु तेषु' इति ज०। 'तेषु तेषु च' इति वि०। (४) 'ज्ञानमन्तःकर-'—इति क-ख०। (५) 'सूक्ष्मादिदर्शी' इति ख०।

(क) "विकरणधर्मेति भाष्येऽपीति" इति ख-पुस्तकपाठः। इतः प्रभृति 'भवतीत्यर्थः' इत्यन्तो ग्रन्थः क-ख-तात्पर्यपुस्तकयोः "न प्रसङ्गः" इत्यं कविंशसूत्रीयतात्पर्यटीकाप्रतीकात् उत्तरं मुद्रितः इति।

(सू०)—इन्द्रियैर्मनसः सन्निकर्षाभावात्तदनुत्पत्तिः ॥२१॥

न्यायभाष्यम्

गन्धाद्युपलब्धेरिन्द्रियार्थसन्निकर्षवदिन्द्रियमनःसन्निकर्षोऽपि कारणम्, तस्य चायौगपद्यमणुत्वान्मनसः। अयौगपद्यादनुत्पत्तिर्युगपज् ज्ञानानामात्मगुणत्वेऽपीति ॥ २१ ॥

यदि पुनरात्मेन्द्रियार्थसन्निकर्षमात्राद् गन्धादिज्ञानम् (१) उत्पद्येत ?

(सू०)—नोत्पत्तिकारणानपदेशात् ॥ २२ ॥

आत्मेन्द्रियसन्निकर्षमात्राद् गन्धादिज्ञानमुत्पद्यते (२) इति, नात्रोत्पत्तिकारणमपदिश्यते येनैतत्प्रतिपद्येमहीति ॥ २२ ॥

न्यायवार्त्तिकम्

तदात्मगुणत्वेऽपि तुल्यम्। यस्याऽऽत्मा विभुश्च ज्ञानगुणश्च तस्यापि सर्वैन्द्रियैः सम्बन्धस्याप्रतिषेधाद् युगपदुपलब्धिप्रसङ्गः ॥ २० ॥

इन्द्रियैर्मनसः सन्निकर्षाभावात् तदनुत्पत्तिः। न प्रसङ्गः कारणान्तरभावात्—इन्द्रियार्थसन्निकर्षवदिन्द्रियमनःसन्निकर्षोऽपि कारणमिति। तस्यायौगपद्यमणुत्वान्मनस इति ॥२१॥

यदि पुनरात्मेन्द्रियार्थसन्निकर्षादेव ज्ञानमुत्पद्येत किं स्यात्—

नोत्पत्तिकारणानपदेशात्। अस्मादेवोत्पद्यतामिति न कारणमपदिश्यत इति सूत्रार्थः। आत्मेन्द्रियार्थसन्निकर्षात् (क) ज्ञानमुत्पद्यत इति। अयुगपदुत्पत्तौ वा न कारणान्तरमपदिश्यत

न्यायवार्त्तिकतात्पर्यटीका

अथ मनोऽन्तःकरणमपश्यंश्चोदयति—तदात्मगुणत्वेऽपीति।

तदा—ल्यम् (सू० २०)॥ (ख)

इन्द्रि—त्तिः (सू० २१)॥ परिहरति—न प्रसङ्ग इति ॥ २१ ॥

यदि पुनरित्यादि भाष्यं पूरयित्वा व्याचष्टे—यदि पुनरिति।

नोत्प—शात् (सू० २२)॥ नोत्पत्तीति। नात्र (ग) प्रमाणमपदिश्यते प्रत्युत बाधकं प्रमाणमस्तीत्यर्थः। व्याख्यानान्तरमाह—अयुगपदुत्पत्तौ वेति। व्याख्यानान्तर-

वृत्तिः

उत्तरयति—(इन्द्रियैर्मनसः सन्निकर्षाभावात्तदनुत्पत्तिः)

युगपन्नानेन्द्रियैः सह मनसः सन्निकर्षाभावान्न युगपन्नानाविषयोपलब्धिरिति भावः ॥ २१ ॥

---

(१) 'उत्पद्यते' इति ल-ग-ज-भा०। (२) 'इति' इति ल-ग-ज-पुस्तकेषु नास्ति।

(क) भाष्ये 'गन्धादिज्ञान'मिति विशेषः। (ख) २०श-सूत्रे अवतरणिकातिरिक्ता टीका नास्ति। (ग) तथाच सूत्रे भाष्ये च उत्पत्तिकारणमित्यनेन प्रमाणं विवक्षितमिति भावः। ईदृशव्याख्यायामस्वरस एव वार्त्तिककृतां कल्पान्तरारम्भे बीजमिति ध्येयम्।

(सू०)—विनाशकारणानुपलब्धेश्चावस्थाने तन्नित्यत्वप्रसङ्गः ॥२३॥

न्यायभाष्यम्

'तदात्मगुणत्वेऽपि तुल्य'मित्येतद्नेन समुच्चीयते। द्विविधो हि गुणनाशहेतुः, गुणानामाश्रयाभावो विरोधी च गुणः। नित्यत्वादात्मनोऽनुपपन्नः पूर्वः, विरोधी च बुद्धेर्गुणो न गृह्यते—तस्मादात्मगुणत्वे सति बुद्धेर्नित्यत्वप्रसङ्गः ॥ २३ ॥

न्यायवार्त्तिकम्

इति ; विदेहप्रत्ययानुत्पत्तौ वा। यदेन्द्रियमर्थेन बहिरवस्थितेन सम्बध्यते आत्मसम्बन्धोऽपि (१)तत्रास्तीति कस्माद्विदेहप्रत्ययो न भवतीति वक्तव्यम्। अन्तःकरणप्रत्याख्याने च केवलमात्मा स्मृत्यादिकारणमिति कस्मान्न युगपदुत्पत्तिः स्मृतीनाम्। यदा चेन्द्रियमात्मा चार्थेन (क)युगपत्सम्बद्धौ तदा किमिन्द्रियार्थसन्निकर्षः कारणम् उत आत्मार्थसन्निकर्षः उताऽऽत्मेन्द्रियार्थसन्निकर्ष इति कारणानपदेशः ॥ २२ ॥

विनाशकारणानुपलब्धेश्चावस्थाने तन्नित्यत्वप्रसङ्गः। 'तदात्मगुणत्वेऽपि तुल्यम् इत्येतदनेन समुच्चीयते'। यद्यात्मगुणो बुद्धिर्भवति विनाशकारणाभावान्नित्यत्वमस्याः प्रसज्येत। कथमिति ? गुणानां द्वौ विनाशहेतू आश्रयाभावो विरोधिगुणप्रादुर्भावश्च। तत्र नित्यत्वादात्मनोऽनुपपन्नः पूर्वः, विरोधी च गुणो नास्तीति नित्यत्वप्रसङ्गः ॥ २३ ॥

न्यायवार्त्तिकतात्पर्यटीका

माह—विदेहेति। शरीरवृत्तित्वे हि मनसः सर्वं ज्ञानं शरीरायतनस्याऽऽत्मनो भवेत्। यदा तु मन एव नास्ति तदेन्द्रियार्थसन्निकर्षस्याऽऽत्मनश्च शरीराद्बहिरपि भावाद् विदेहप्रत्ययोत्पादप्रसङ्ग इति। अन्तःकरणप्रत्याख्याने चेति। यद्यपि सर्वाण्यपि ज्ञानानि न युगपदुपजायन्ते तथाऽपि स्मृतीनामवश्यं युगपदुत्पादप्रसङ्ग इति पूर्वस्मादस्य विशेषः। व्याख्यानान्तरमाह—यदा चेन्द्रियमात्मा चार्थेन युगपत्सम्बद्धाविति। असति इन्द्रियमनःसन्निकर्षे व्यभिचारिणां कारणत्वकल्पनायां विनिगमनाहेतोरभावादिति भावः ॥ २२ ॥

विना—ङ्गः-(सू० २३) ॥ अत्र पूर्वपक्षसूत्रे चकारः पूर्वपूर्वपक्षसूत्रापेक्षयेत्याह—तदात्मगुणत्व इति। अतः परस्य निगद एव व्याख्यानम् ॥ २३ ॥

वृत्तिः

आक्षिपति—(नोत्पत्तिकारणानपदेशात्)

बुद्ध्युत्पत्तौ कारणस्यानपदेशात् अकथनात् नाऽऽत्मगुणो बुद्धिः, आत्ममनःसंयोगस्य कारणत्वे ज्ञानस्य सार्वदिकत्वप्रसङ्ग इति भावः ॥ २२ ॥

---

(१) 'तस्यास्तीति' इति क-ख-धृतपाठान्तरम्।

(क) अत्र नपुंसकत्वाभावः प्रय[illegible]नोपपादनीयः।

(सू०)—अनित्यत्वग्रहाद् बुद्धेर्बुद्ध्यन्तराद्विनाशः शब्दवत् ॥२४॥

न्यायभाष्यम्

अनित्या बुद्धिरिति सर्वशरीरिणां प्रत्यात्मवेदनीयमेतत्। गृह्यते च बुद्धिसन्तानः तत्र बुद्धेर्बुद्ध्यन्तरं विरोधी गुण इत्यनुमीयते यथा शब्दसन्ताने शब्दः शब्दान्तरविरोधीति ॥ २४ ॥

न्यायवार्त्तिकम्

अनित्यत्वग्रहणाद् बुद्धेर्बुद्ध्यन्तराद्विनाशः शब्दवत्। अनित्या बुद्धिरित्येतत् प्रतिपादितम्। तत्रास्या बुद्ध्यन्तराद्वा संस्काराद्वा विनाश इति प्रतिपत्तव्यम्। न द्वे सहेति चेत्—अथ मन्यसे न द्वे बुद्धी सह भवतो यतः परया पूर्वा निवर्त्यते? तच्च न, युगपदुत्पत्तिनिषेधात्—युगपदुत्पत्तिः प्रतिषिध्यते न सहभावः। न हि बुद्ध्योर्युगपद्भावे किञ्चिद्विरुध्यत इति। लब्धात्मकेन च कार्येण कारणविनाशाभ्युपगमात्—यदा च कार्यं लब्धात्मकं भवति तदा कारणं विनाशयति; शब्दवत्—यथा लब्धात्मकः कार्यः शब्दः कारणं शब्दं निर्मार्ष्टि तथा बुद्धिरपीति। अन्त्ययोर्न स्यादिति चेत्—अथ मन्यसे यदि पूर्वौ बुद्धिशब्दौ पराभ्यां विनाश्येते अन्त्ययोर्बुद्धिशब्दयोः (१) कथं विनाशकारणमिति, यथा चान्त्यौ बुद्धिशब्दौ विना निमित्ताद्विनश्यतः एवमन्यदपि कार्यमिति? न स्पर्शवद्द्रव्यसंयोगात् (२)न तदुत्पत्तिः स्पर्शवद्द्रव्यसंयोगेनान्त्यशब्दो विरुध्यते। ये कुड्यादिभिः कारणस्य संयोगास्त एकार्थसमवायिनं शब्दं प्रतिबध्नन्ति, अतोऽत्यन्तमश्रुतिः शब्दस्येति। अन्त्या बुद्धिस्थितिहेत्वभावाद्विनश्यतीति कालाद्वा संस्काराद्वा। कथं

न्यायवार्त्तिकतात्पर्यटीका

यदनन्तरमपवृज्यते पुरुषः सा अन्त्या बुद्धिः स्थितिहेत्वभावाद्विनश्यतीति। स्थितिहेतू धर्माधर्मौ तयोरभावादिति। अथ तयोरभावः कस्मादित्यत आह—कालात्। अन्त्यसुखदुःखोपभोगकालं प्राप्येत्यर्थः। अथ वा स्वजनितात् संस्कारादेवान्त्याया बुद्धेर्विनाश इत्याह—संस्काराद्वा। संस्कारस्य तु स्थितिहेत्वदृष्टाभावाद्विनाशो भवतीति भावः। पृच्छति—

वृत्तिः

बुद्धेरात्मगुणत्वे दोषमप्याह—(विनाशकारणानुपलब्धेश्चावस्थाने तन्नित्यत्वप्रसङ्गः)

बुद्धेरात्मन्यवस्थाने विनाशकारणस्य आश्रयनाशादेरनुपलब्धेः तस्या बुद्धेर्नित्यत्वप्रसङ्गः ॥ २३ ॥

उत्तरयति—(अनित्यत्वग्रहणाद् बुद्धेर्बुद्ध्यन्तराद्विनाशः शब्दवत्)

बुद्धेरनित्यत्वस्य ग्रहणाद् उत्पादनाशयोरानुभविकत्वात् तत्कारणे कल्पनीये आत्ममनोयोगादेरुत्पादकत्वमनन्तरोत्पन्नबुद्धेः संस्कारादेर्वा नाशकत्वं कल्प्यते, चरमबुद्धेस्तु अदृष्टनाशात् कालाद्वा नाशः। बुद्धेर्बुद्ध्यन्तरनाश्यत्वेऽनुरूपं दृष्टान्तमाह—शब्दवदिति। शब्दस्य यथा शब्दान्तरान्नाशश्चरमशब्दस्य निमित्तनाशनाश्यत्वं तथा प्रकृतेऽपीति भावः ॥ २४ ॥

---

(१) 'किम्' इति क-ख-वार्त्ति कपुस्तपाठान्तरम्। (२) 'तदनुपपत्तिः' इति क-खपुस्तपाठान्तरम्।

न्यायभाष्यम्

असङ्ख्येयेषु ज्ञानकारितेषु संस्कारेषु स्मृतिहेतुष्वात्मसमवेतेष्वात्ममनसोश्च सन्निकर्षे समाने स्मृतिहेतौ सति न कारणस्यायौगपद्यमस्तीति युगपत्स्मृतयः प्रादुर्भवेयुः यदि बुद्धिरात्मगुणः स्यादिति। तत्र कश्चित् सन्निकर्षस्यायौगपद्यमुपपादयिष्यन्नाह—

(सू०)—ज्ञानसमवेतात्मप्रदेशसन्निकर्षान्मनसः स्मृत्युत्पत्तेर्न युगपदुत्पत्तिः ॥ २५ ॥

ज्ञानसाधनः संस्कारो ज्ञानमित्युच्यते ज्ञानसंस्कृतैरात्मप्रदेशैः पर्यायेण मनः सन्निकृष्यते। आत्ममनःसन्निकर्षात् स्मृतयोऽपि पर्यायेण भवन्तीति ॥ २५ ॥

न्यायवार्त्तिकम्

कालात्? (१)यावन्त्यस्य जन्मनः स्थितिहेतू धर्माधर्मौ तयोरभावादन्त्या बुद्धिर्विनश्यतीति। कस्मात् पुनरेवमुच्यते न पुनरहेतुको विनाशोऽभ्युपगम्यत इति? नाभ्युपगम्यते उक्तदोषात्—निर्हेतुके विनाशे उक्तो दोषः क्षणभङ्गं निराकुर्वद्भिरिति। यदि कारणस्यायौगपद्याद् बुद्धीनामयुगपदुत्पत्तिः यत्र कारणस्य यौगपद्यमस्ति तत्र युगपदुत्पत्तिप्रसङ्गो यथा स्मृतिषु। अत्र तावदेकः परिहारः करणस्यैकक्रियानिर्वृत्तौ सामर्थ्यात्—न हि करणमेकस्मिन् कालेऽनेकां क्रियां निर्वर्तयितुं शक्तमिति। परिच्छेदत्वाच्च स्मृतीनां (क)ज्ञानवदयुगपदुत्पत्तिरिति ॥ २४ ॥

ज्ञानसमवेतात्मप्रदेशसन्निकर्षान्मनसः स्मृत्युत्पत्तेर्न युगपदुत्पत्तिः। अपरे तु कारणस्यायौगपद्यमुपपादयिष्यन्तः 'ज्ञानसमवेतात्मप्रदेशसन्निकर्षान्मनसः स्मृत्युत्पत्तेर्न युगपदुत्पत्ति'रित्याहुः ॥ २५ ॥

न्यायवार्त्तिकतात्पर्यटीका

कथं कालात्। उत्तरम्—(२) यावन्त्यस्य जन्मन इति, चरमस्य देहस्येत्यर्थः। देशयति—यदि कारणस्येति। अत्र तावदेकः परिहार इति। 'एकः' प्रधानः 'परिहारः', परिहारान्तरं त्वेकदेशिमतेनाप्रधानमित्यर्थः। अपि च न स्मृतयो युगपदुत्पद्यन्ते परिच्छेदत्वाद् गन्ध-रस-रूप-स्पर्श-शब्दज्ञानवदित्याह—परिच्छेदत्वाच्चेति ॥ २४ ॥

ज्ञान—त्तिः (सू० २५) ॥ एकदेशिपरिहारमाह—अपरे त्विति ॥ २५ ॥

---

(१) 'यावस्य' इति क०। (२) 'यावत्तस्य' इति क०।

(क) अत्र 'ज्ञानवद् युगपदुत्पत्तिः' इति क-ख-वार्त्तिकमुद्रणं प्रामादिकम्। व्यक्तमेतत् टीकायाम्।

(सू०)—नान्तःशरीरवृत्तित्वान्मनसः ॥ २६ ॥

न्यायभाष्यम्

सदेहस्याऽऽत्मनो मनसा संयोगो विपच्यमानकर्माशयसहितो जीवनमिष्यते। तत्रास्य प्राक् (१)प्रायणादन्तःशरीरे वर्तमानस्य मनसः शरीराद् बहिर्ज्ञानसंस्कृतैरात्मप्रदेशैः संयोगो नोपपद्यत इति ॥ २६ ॥

न्यायवार्त्तिकम्

एतत्तु न सम्यगिति प्रतिपादयितुमाह—

नान्तःशरीरवृत्तित्वान्मनसः। अन्तःशरीरे मनो वर्तते इति को वृत्त्यर्थः? न तावदाश्रयाश्रितभावः, न हि मनः क्वचिदाश्रितम्। नापि वृत्तिः स्वकार्यसामर्थ्यं बहिःकार्यदर्शनात्—मनसाऽधिष्ठितं चक्षुर्निःसृत्य (२) रूपादि ग्राहयति (क)चक्षुषोर्विसरावोर्मनसः कार्यं

न्यायवार्त्तिकतात्पर्यटीका

दूषयति—एतत्तु न सम्यगिति।

नान्तः—सः (सू० २६)॥ न हि मनः क्वचिदाश्रितमिति। न क्वचित्समवेतम्, संयोगमात्रं त्वतिप्रसक्तमित्यर्थः। नापि वृत्तिः स्वकार्यसामर्थ्यमिति। शरीर एव मनः

वृत्तिः

ननु बुद्धेरात्मगुणत्वे संस्कारात्ममनोयोगयोः सत्त्वात् स्मृतीनां यौगपद्यं स्यात्? अत्रैकदेशिनः परिहारमाशङ्कते—(ज्ञानसमवेतात्मप्रदेशसन्निकर्षान्मनसः स्मृत्युत्पत्तेर्न युगपदुत्पत्तिः)

ज्ञानं संस्कारकारणं समवेतं यदवच्छेदेन, तदवच्छेदेन मनःसन्निकर्षस्य स्मृत्युत्पादकत्वात्तस्य च क्रमिकत्वान्न स्मृतियौगपद्यमित्यर्थः। ज्ञायतेऽनेनेति व्युत्पत्त्या ज्ञानपदं संस्कारपरमित्यन्ये ॥ २५ ॥

तन्मतं दूषयति—(नान्तःशरीरवृत्तित्वान्मनसः)

उक्तं न युक्तम्, मनसः अन्तःशरीरवृत्तित्वात्। अन्तःशरीरे वृत्तिर्ज्ञानजनकीभूतो व्यापारो यस्य तत्त्वात्। शरीरातिरिक्तावच्छेदेनाऽऽत्ममनोयोगस्य ज्ञानाहेतुत्वाच्छरीरावच्छिन्नस्य हेतुत्वे तद्दोषतादवस्थ्यमिति भावः ॥ २६ ॥

---

(१) 'प्रापणात्' इति ज०। (२) 'रूपादिमदर्थं ग्राहयति' इति क-खधृतपाठान्तरम्।

(क) 'चक्षुषोर्वीसरावौं(?)र्मनसः' इति क-पुस्तके मुद्रितम्। ख-पाठो गृहीतः। विसरावौरिति बहिर्विसृत्वरयोरित्यर्थः। अत्र तालव्यादि'शॄ'धातोरेव 'आरु'प्रत्ययो व्याकरणानुशिष्टः। तथाच विशरावौरिति पाठो विशीर्णयोरित्यर्थः। खण्डचक्षुषोरिति तु फलितम्। कार्यमिति विधेयान्वयार्थं तदित्यध्याहार्यम्।

(सू०)—साध्यत्वादहेतुः ॥ २७ ॥

न्यायभाष्यम्

विपच्यमानकर्माशयमात्रं जीवनम्, एवं च सति साध्यमन्तःशरीरवृत्तित्वं मनस इति ॥ २७ ॥

(सू०)—स्मरतः शरीरधारणोपपत्तेरप्रतिषेधः ॥ २८ ॥

सुस्मूर्षया खल्वयं मनः प्रणिदधानश्चिरादपि कंचिदर्थं स्मरति, स्मरतश्च शरीरधारणं दृश्यते। आत्ममनःसन्निकर्षजश्च प्रयत्नो द्विविधः—धारकः प्रेरकश्च, निःसृते च शरीराद्बहिर्मनसि धारकस्य प्रयत्नस्याभावाद् गुरुत्वात् पतनं स्यात् शरीरस्य स्मरत इति ॥ २८ ॥

न्यायवार्त्तिकम्

तद्भावभावित्वात्। न चान्या वृत्तिः सम्भवति। तस्मान्नान्तःशरीरवृत्ति मन इति। अत्र ब्रूमः—नाऽऽश्रयाश्रितभावो मनसो वृत्तिर्नापि कार्यप्रतिलम्भः अपि तु नाशरीरस्य मनसः कार्यमिति मनसो वृत्त्यर्थः; न ह्यशरीरं मनः पुरुषस्यार्थं करोतीति ॥ २६ ॥

साध्यत्वादहेतुः। अशरीरं मनः पुरुषार्थासमर्थमिति साध्यमेतत् ॥ २७ ॥

स्मरतः शरीरधारणोपपत्तेरप्रतिषेधः। स्मरणशरीरधारणे युगपद्भवत इति दृष्टम्। दृष्टं च सर्वेण प्रतिपत्तव्यम्। चिरनिश्चरिते च मनसि स्मरतः शरीरधारणं न स्यात् ॥ २८ ॥

न्यायवार्त्तिकतात्पर्यटीका

स्वकार्यं करोति नान्यत्रेति शरीराश्रितं मन इत्युच्यत इत्येतदपि नास्ति इन्द्रियार्थसन्निकर्षस्य मनःकार्यस्य शरीराद्बहिर्भावादित्यर्थः। तमिममाक्षेपं समाधत्ते—अत्र ब्रूम इति। येनाऽऽत्मना यच्छरीरं कर्मोपार्जितं तत्संयुक्तस्य मनसो वैशेषिकज्ञानादिलक्षणकार्यकारित्वं न तदसंयुक्तस्येति शरीराश्रितत्वं मनसो नान्यदित्यर्थः ॥ २६ ॥

चोद्यम्—

साध्य—तुः (सू० २७) ॥(क)

परिहारः—

स्मर—धः (सू० २८) ॥(ख)

वृत्तिः

एकदेशी शङ्कते—(साध्यत्वादहेतुः)

शरीरावच्छिन्नात्ममनोयोगो न हेतुः साध्यत्वात् असिद्धत्वात्। मानाभावादिति भावः ॥ २७ ॥

(क-ख) २७-२८-श-सूत्रयोरवतरणिकातिरिक्ता टीका नोपलभ्यते।

(सू०)—न तदाशुगतित्वान्मनसः ॥ २६ ॥

न्यायभाष्यम्

आशुगति मनः तस्य बहिःशरीरात्मप्रदेशेन ज्ञानसंस्कृतेन सन्निकर्षः, प्रत्यागतस्य च प्रयत्नोत्पादनमुभयं युज्यत इति। उत्पाद्य वा धारकं प्रयत्नं शरीरान्निःसरणं मनसः, अतस्तत्रोपपन्नं धारणमिति ॥ २६ ॥

(सू०)—न स्मरणकालानियमात् ॥ ३० ॥

किञ्चित् क्षिप्रं स्मर्यते किञ्चिच्चिरेण। यदा चिरेण, तदा सुस्मूर्षया मनसि धार्यमाणे चिन्ताप्रबन्धे सति कस्यचिद् (१)अर्थस्य लिङ्गभूतस्य चिन्तनमाराधितं स्मृतिहेतुर्भवति। तत्रैतच्चिरनिश्चरिते मनसि नोपपद्यत इति।

शरीरसंयोगानपेक्षश्चाऽऽत्ममनःसंयोगो न स्मृतिहेतुः (२)शरीरस्य भोगायतनत्वात्।

न्यायवार्त्तिकम्

न तदाशुगतित्वान्मनसः। उभयं सिध्यति स्मरणं धारणं च ॥ २९ ॥

न स्मरणकालानियमात्। अनियतः स्मृतिकालः अतोऽयुक्तमेतत्। शरीरसंयोगानपेक्षं

न्यायवार्त्तिकतात्पर्यटीका

पुनश्चोद्यम्—

न त—सः (सू० २६) ॥(क)

परिहारः—

न स्म—मात् (सू० ३०)॥ भाष्यम्—चिन्ताप्रबन्धः स्मृतिप्रबन्धः। (ख)कस्यचिदेवार्थस्य लिङ्गभूतस्य चिह्नभूतस्यासाधारणस्येति यावत्। चिन्तनं स्मरणम्।

वृत्तिः

सिद्धान्तसूत्रम्—(स्मरतः शरीरधारणोपपत्तेरप्रतिषेधः)

उक्तः प्रतिषेधो न युक्तः स्मरतः शरीरधारणरूपाया उपपत्तेर्युक्तेः, अन्यथा मनसो बहिर्भावे शरीरावच्छिन्नात्ममनोयोगाभावेन प्रयत्नाभावे शरीरधारणं न स्यादिति भावः ॥ २८ ॥

पुनः शङ्कते—(न तदाशुगतित्वान्मनसः)

शरीराधारणं न, मनस आशुगतित्वाच्छीघ्रमेव शरीरे परावृत्तेः ॥ २९ ॥

दूषयति—(न स्मरणकालानियमात्)

मनसः शीघ्रमागमनं न युक्तं स्मरणे कालनियमाभावात्। कदाचिच्छीघ्रं स्मर्यते, कदाचित् प्रणिधानाद्विलम्बेनापीति।

---

(१) 'अन्यस्य' वि०, 'अर्थस्यालिङ्ग-' इति टि०। (२) 'शरीरस्योपभोगा-' इति फ०।

(क) २९श-सूत्रस्यावतरणिकातिरिक्ता टीका नास्ति। (ख) मुद्रितभाष्यपुस्तकेषु 'एव'कारो न दृश्यते।

न्यायभाष्यम्

उपभोगायतनं पुरुषस्य ज्ञातुः शरीरं न ततो निश्चरितस्य मनस आत्मसंयोगमात्रं ज्ञानसुखादीनाम् (क)उत्पत्तौ कल्पते, क्लृप्तौ (१)वा शरीरवैयर्थ्यमिति ॥ ३० ॥

(सू०)—आत्मप्रेरण-यदृच्छा-ज्ञताभिश्च न संयोगविशेषः ॥३१॥

आत्मप्रेरणेन वा मनसो बहिः शरीरात् संयोगविशेषः स्यात्, यदृच्छया वा, आकस्मिकतया ज्ञतया वा मनसः? सर्वथा चानुपपत्तिः। कथम्? स्मर्तव्यत्वात्, (ख)इच्छातः स्मरणाज् ज्ञानासम्भवाच्च। यदि तावदात्मा "अमुष्यार्थस्य स्मृतिहेतुः संस्कारः अमुष्मिन्नात्मदेशे समवेतस्तेन मनः संयुज्यतामिति" मनः प्रेरयति तदा स्मृत एवासावर्थो भवति न स्मर्तव्यः। न चाऽऽत्मप्रत्यक्ष आत्मप्रदेशः संस्कारो वा, तत्रानुपपन्नात्मप्रत्यक्षेण संवित्तिरिति। सुस्मूर्षया चायं मनः प्रणिदधानश्चिरादपि कञ्चिदर्थं स्मरति नाकस्मात्, ज्ञत्वं च मनसो नास्ति ज्ञानप्रतिषेधादिति ॥ ३१ ॥

न्यायवार्त्तिकम्

चाऽऽत्मनः संयोगं स्मृतिकारणं ब्रुवतः शरीरस्योपभोगायतनत्वं निवर्तते। ततस्तन्निवृत्तौ शरीरोत्पत्तिवैयर्थ्यमिति ॥ ३० ॥

आत्मप्रेरण-यदृच्छा-ज्ञताभिश्च न संयोगविशेषः। अपरे तु 'आत्मप्रेरण-यदृच्छा-ज्ञताभिश्च न संयोगविशेषः' इति परिहारं ब्रुवते ॥ ३१ ॥

न्यायवार्त्तिकतात्पर्यटीका

आराधितं सिद्धं विद्वतः स्मृतिहेतुर्भवतीति। इतश्च शरीरसंयोगापेक्षमेव मनः स्मृतिहेतुर्नेतरथेत्याह—शरीरसंयोगानपेक्ष इति ॥३०॥

शरीरान्नैव बहिर्मन इत्यत्रैकदेशिमतमुपन्यस्यति—

आत्म—षः (सू० ३१) ॥(ग)

वृत्तिः

न च प्रणिधानं शरीरान्तःस्थितमनस एव बहिर्निर्गमस्तु स्मरणाव्यवहितपूर्वमेवेति वाच्यं बहिर्निर्गमान्तःप्रवेशानुकूलक्रियाविभागादिकालकलापं यावच्छरीरधारणं न स्यादिति भावः ॥ ३० ॥

एकदेशिमतमन्य एकदेशी दूषयति—(आत्मप्रेरणयदृच्छाज्ञताभिश्च न संयोगविशेषः) बहिःप्रदेशविशेषे मनःसंयोगविशेषो न सम्भवति। स हि न स्मृत्यर्थमात्मप्रेरणेन,

---

(१) 'च' इति फ०।

(क) 'उत्पत्तौ' इति फ-पु० पाठः। तद्बीजं व० सा० प० प्रकाशितन्यायदर्शनस्य तृतीयखण्डे २४५पत्रे द्रष्टव्यम्। (ख) अत्र 'इच्छातः स्मरणज्ञानासम्भवाच्च' इति ल-ग-ज-भापुस्तकेषु पाठः। फ-पुस्तकपाठस्तु गृहीतः। तद्बीजं तत्रैव द्रष्टव्यम्।

(ग) ३१श-सूत्रे अवतरणिकातिरिक्ता टीका नोपलभ्यते।

न्यायभाष्यम्

एतच्च—

(सू०)—व्यासक्तमनसः पादव्यथनेन संयोगविशेषेण समानम् ॥ ३२ ॥

यदा खल्वयं व्यासक्तमनाः कचिद् (१)देशे शर्करया कण्टकेन वा पादव्यथनमाप्नोति तदा आत्ममनःसंयोगविशेष एषितव्यः, दृष्टं हि दुःखं दुःखवेदनं चेति। तत्रायं समानः प्रतिषेधः। यदृच्छया तु (२)न विशेषो नाऽऽकस्मिकी क्रिया नाऽऽकस्मिकः संयोग इति।

कर्मादृष्टमुपभोगार्थं क्रियाहेतुरिति चेत् समानम्। कर्मादृष्टं पुरुषस्थं पुरुषोपभोगार्थं मनसि क्रियाहेतुः एवं दुःखं दुःखसंवेदनं च (३)सिध्यतीत्येवं चेन्मन्यसे, समानम्—स्मृतिहेतावपि संयोगविशेषो भवितुमर्हति। तत्र यदुक्तम् 'आत्मप्रेरण-यदृच्छा-ज्ञताभिश्च न संयोगविशेषः' इत्ययमप्रतिषेध इति। पूर्वस्तु प्रतिषेधो 'नान्तःशरीरवृत्तित्वान्मनस' इति ॥ ३२ ॥

न्यायवार्त्तिकम्

व्यासक्तमनसः पादव्यथनेन संयोगविशेषेण समानम्। एतच्च व्यासक्तमनसः पादव्यथनेन संयोगविशेषेण समानं भवतीत्यपरिहारः।

कर्मादृष्टमुपभोगार्थं नियामकं भवतीति न युक्तं समानत्वात्। तस्मात् पूर्व एव परिहारो नान्तःशरीरवृत्तित्वान्मनस इति ॥ ३२ ॥

न्यायवार्त्तिकतात्पर्यटीका

दूषयति—

व्यास—नम् (सू० ३२) (क) ॥

वृत्तिः

तस्य स्मरणीयज्ञानपूर्वकतया प्रागेव स्मरणापत्तेः, नापि 'यदृच्छया' अकस्मात्, आकस्मिकत्वस्य निषेधात्; नापि मनसो 'ज्ञतया' ज्ञातृतया, मनसो ज्ञातृत्वानभ्युपगमात्।

प्रेरण-यदृच्छा-ज्ञताभिः प्रयत्नेच्छाज्ञानैरित्यर्थ इति कश्चित्, तन्न, प्रयत्नेनैव चरितार्थत्वापत्तेः ॥ ३१ ॥

एतन्निराकरोति—(व्यासक्तमनसः पादव्यथनेन संयोगविशेषेण समानम्)

नृत्यादिकं पश्यतः कण्टकादिना पादव्यथनेन मनःसंयोगो यथा जायते तथैव तदपि इति भावः। इतरथा तत्र मनःसंयोगेऽप्युक्तदोषाः स्युः। अदृष्टविशेषाधीनकर्मवशादसाविति चेत्? तुल्यं प्रकृतेऽपीति भावः ॥ ३२ ॥

---

(१) 'दृष्टे' इति ग०। (२) 'न' इति ज-पु० नास्ति। (३) 'सिध्यति च इत्येवं' इति ग०।

(क) ३२श-सूत्रे अवतरणिकातिरिक्ता टीका नास्ति।

न्यायभाष्यम्

कः खल्विदानीं कारणयौगपद्यसद्भावे युगपदस्मरणस्य हेतुरिति ?

(सू०)—प्रणिधानलिङ्गादिज्ञानानामयुगपद्भावाद् (१)युगपदस्मरणम् ॥ ३३ ॥

यथा खल्वात्ममनसोः सन्निकर्षः संस्कारश्च स्मृतिहेतुरेवं (२)प्रणिधानं (३)लिङ्गादिज्ञानानि (२*)तानि च न युगपद्भवन्ति तत्कृता स्मृतीनां युगपदनुत्पत्तिरिति। (क)प्रातिभवत्तु प्रणिधानाद्यनपेक्षे स्मार्ते यौगपद्यप्रसङ्गः। यत्खल्विदं (ख)प्रातिभमिव ज्ञानं प्रणिधानाद्यनपेक्षं स्मार्त्तमुत्पद्यते कदाचित्तस्य युगपदुत्पत्तिप्रसङ्गो (४)हेत्वभावात्। सतः स्मृतिहेतोरसंवेदनात् प्रातिभेन समानाभिमानः। बह्वर्थविषये वै

न्यायवार्त्तिकम्

यदि तर्हि ज्ञानसमवेतात्मसन्निकर्षायौगपद्यादिति परिहारो नेष्यते प्राप्तः स्मृतीनां युगपदुत्पादः कारणस्य यौगपद्यादिति।

प्रणिधानलिङ्गादिज्ञानानामयुगपद्भावाद् युगपदस्मरणम्। न अपेक्षाकारणस्यायुगपद्भावात्।

प्रातिभवत्तु प्रणिधानाद्यनपेक्षे स्मार्त्ते यौगपद्यप्रसङ्गः। यतः प्रणिधानाद्यात्ममनःसंयोगस्य सहकारि कारणं तन्न युगपद्भवतीत्ययुगपदुत्पत्तिः स्मृतीनाम्। यदि प्रणिधानाद्यपेक्षात्ममनःसंयोगो न युगपत्स्मृतिकारणं याः स्मृतयः (५)प्रणिधानादिसन्निधानमन्तरेण भवन्ति तासां यौगपद्यं स्यात्? नानभ्युपगमात्—न हि प्रणिधानाद्यनपेक्षं स्मार्तमस्ति, सतः स्मृतिहेतोरसंवेदनात् प्रातिभेन समानाभिमानोऽयमिति। प्रातिभं तर्हि युगपद्भवितुमर्हति न हि तस्यासन्निहितं

न्यायवार्त्तिकतात्पर्यटीका

प्रातिभवदिति। स्मृत्युत्पादस्य पुरस्तात् प्रणिधानादीनां स्मृतिकारणानामसंवेदनादात्मनः संयोगात् संस्कारापेक्षात् स्मृतीनां युगपदुत्पादप्रसङ्गः प्रातिभवदित्याक्षेपः। समाधानमाह—सतः स्मृतिहेतोरिति।

---

(१) 'अयुगपत् स्मरणम्' इति ल-ग-झा-पुस्तकेषु पाठः। (२) 'प्रणिधानलिङ्गादिज्ञानानि' इति फ०। (३) 'लिङ्गज्ञानानि' इति वि०। (४) 'हेतुभावात्' इति टि०। (५) 'प्रणिधानसन्निधानाद्यन्तरेण' इति क-ख-धृतपाठान्तरम्।

(क) न्यायसूचीनिबन्धादिष्वगृहीतत्वात् क्वचित् सूत्ररूपेण गृहीतोऽप्ययं भागो भाष्यमेवेति बोध्यम्।

(ख) प्रातिभमिति तारकापरपर्यायं ज्ञानमित्यर्थः। तथाच 'प्रातिभाद्वा सर्वम्' (पातञ्जलसूत्रम् ३३, विभूतिपादः) इति सूत्रे व्यासभाष्यम् 'प्रातिभं नाम तारकमि'त्यादि। व्याख्यातं चैतत् टीकाकृता—'प्रतिभा ऊहः, तद्भवं प्रातिभम्' इति। 'प्रातिभं स्वप्रतिभोत्थमनौपदेशिकं ज्ञानमि'ति योगवार्त्तिकम्।

न्यायभाष्यम्

चिन्ताप्रबन्धे कश्चिदेवार्थः कस्यचित् स्मृतिहेतुः, तस्यानुचिन्तनात् (१) तस्य स्मृतिर्भवति। न चायं स्मर्ता सर्वं स्मृतिहेतुं (२) संवेदयते एवं मे स्मृतिरुत्पन्नेति। असंवेदनात् प्रातिभमिव ज्ञानमिदं स्मार्तमिति (३)अभिमन्यते, न त्वस्ति प्रणिधानाद्यनपेक्षं स्मार्तमिति (३*)।

प्रातिभे कथमिति चेत् पुरुषकर्मविशेषादुपभोगवन्नियमः। प्रातिभमिदानीं ज्ञानं युगपत् कस्मान्नोत्पद्यते? यथोपभोगार्थं कर्म युगपदुपभोगं न करोति एवं पुरुषकर्मविशेषः प्रतिभाहेतुर्न युगपदनेकं प्रातिभं ज्ञानमुत्पादयति।

हेत्वभावादयुक्तमिति चेद् न करणस्य प्रत्ययपर्याये सामर्थ्यात्। 'उपभोगवन्नियम' इत्यस्ति दृष्टान्तो हेतुर्नास्तीति चेन्मन्यसे? न, करणस्य प्रत्ययपर्याये सामर्थ्यात्। नैकस्मिन् ज्ञेये युगपदनेकं ज्ञानमुत्पद्यते, न चानेकस्मिन्। तदिदं दृष्टेन

न्यायवार्त्तिकम्

कारणमिति? नोक्तोत्तरत्वात्—उक्तोत्तरमेतत्। न हि करणस्यानेकक्रियानिर्वृत्तिसामर्थ्यमस्ति। प्रातिभं चानेकं ज्ञानं भवदेकस्मिन्नर्थे भवेदथानेकस्मिन्? न तावदेकस्मिन्, वैयर्थ्यात्।

न्यायवार्त्तिकतात्पर्यटीका

अदृश्यमानमपि कारणम्, तत्क्रमश्च कार्योत्पादक्रमेणानुमीयत इति प्रातिभमपि पुरुषकर्मविशेषापेक्षादात्ममनःसन्निकर्षादुपजायमानं नाकारणं न चाक्रमवदिति प्रधानभूतामुपपत्तिमवतारयितुं पृच्छति भाष्यकारः—प्रातिभमिदानीमिति।

अत्रोत्तरमाविलं दत्त्वा शङ्कते—हेत्वभावादयुक्तमिति चेत्। उत्तरसारमाह—न करणस्येति। यद्यपि क्वचिद् व्रश्चनस्य युगपद्दारुद्वयसंयोगे युगपच्छिदाद्वयं भवति तथाऽपि व्रश्चनावयवभेदात् करणभेद उन्नेयः। अथ वा करणान्तराणि युगपत्कार्याणि कुर्वन्तु प्रत्ययकरणं तु क्रमेणैव प्रत्ययान् करोतीत्यत्र न व्यभिचारः। तदुक्तम्—प्रत्ययपर्याय इति। तस्मात् करणमेकं न क्वचिदपि युगपत्कार्यायालमिति। कर्त्ता पुनरेकोऽपि करणभेदे युगपद्बहूनि कार्याणि करोतीत्याह—

वृत्तिः

स्मरणायौगपद्यं स्वयमुपपादयति—(प्रणिधानलिङ्गादिज्ञानानामयुगपद्भावाद् युगपदस्मरणम्)

प्रणिधानं चित्तैकाग्र्यं सुस्मूर्षेति यावत्। लिङ्गज्ञानम् उद्बोधकम्। उद्बोधकानामानन्त्यादादिपदं ज्ञानात् परतो योजनीयम्, तस्य क्रमात् स्मरणक्रमः। यदि च युगपदुद्बोधकानि तदा तावद्विषयकस्मरणमिष्यत एव, यथा पदज्ञानादाविति मन्तव्यम्॥ ३३॥

(१) 'ज्ञस्य' इति टि०। (२) 'संवेदयेत्' इति वि०। (३) अयमंशः ज-पु० नास्ति।

न्यायभाष्यम्

प्रत्ययपर्यायेणानुमेयं (क)करणसामर्थ्यमित्थम्भूतमिति न ज्ञातुः (१)विकरणधर्मणो देहनानात्वे प्रत्यययौगपद्यादिति।

अयं च द्वितीयः प्रतिषेधः, (२)अवस्थितशरीरस्य चानेकज्ञानसमवायादेकप्रदेशे युगपदनेकार्थस्मरणं स्यात्। (३)क्वचिद्देशेऽवस्थितशरीरस्य ज्ञातुरिन्द्रियार्थप्रबन्धेन ज्ञानमनेकमेकस्मिन्नात्मप्रदेशे समवैति। तेन यदा मनः संयुज्यते तदा ज्ञातपूर्वस्यानेकस्य युगपत् स्मरणं (४)प्रसज्यते प्रदेशसंयोगपर्यायाभावादिति। आत्मप्रदेशानामद्रव्यान्तरत्वादेकार्थसमवायस्याविशेषे (५)सति स्मृतियौगपद्यप्रतिषेधानुपपत्तिः।

न्यायवार्त्तिकम्

नानेकस्मिन्, सामर्थ्याभावात्। न चायं नियमः प्रत्ययानां यौगपद्यं न भवतीति, ज्ञातुर्विकरणधर्मणो देहनानात्वे प्रत्ययानां यौगपद्यादिति। यदि च ज्ञानसमवेतात्मप्रदेशासन्निकर्षान्न स्मृतीनां युगपदुत्पत्तिः ये संस्कारा एकदेशास्तेष्ववस्थितशरीरस्यानेकज्ञानसमवायादेकदेशे युगपदनेकार्थस्मरणं स्यात, न चैतदस्तीति अतश्चापरीहार इति। अवस्थितशरीरस्य संस्काराः समानदेशा इत्ययुक्तम् आत्मप्रदेशानामद्रव्यान्तरत्वात्। एवं सति सर्वसंस्काराणां समानदेशत्वे प्रत्यययौगपद्यप्रसङ्गोऽपरिहार्यः।

न्यायवार्त्तिकतात्पर्यटीका

न ज्ञातुर्विकरणधर्मणो देहनानात्वे प्रत्यययौगपद्यादिति। विविधं करणं धर्मो यस्य स तथोक्तः। तद् व्याचष्टे वार्तिककारः—न चायं नियम इति। योगी खलु ऋद्धौ प्रादुर्भूतायां सेन्द्रियाणि शरीराणि तेषु तेषु लोकेषु निर्माय मुक्तात्मनामादाय मनांसि मोक्षाय त्वरमाणो युगपत्कर्मोपार्जितान् सुखदुःखभेदान्न द्विषन्न रक्तो भुङ्क्ते, तदस्यैकस्यापि करणभेदाद् युगपज् ज्ञानानि भवन्तीति।

अयं च द्वितीयः प्रतिषेधः ज्ञानसंस्कृतात्मप्रदेशभेदस्यायुगपज्ज्ञानोत्पादकस्य। अवस्थितेति। (ख)यत्राऽऽत्मप्रदेशोऽस्य ज्ञानानि नानाविषयाणि जातानि तत्संस्काराश्च तत्रैव अवस्थितशरीरस्य। तदनेन शरीरान्तर्गतस्य मनसस्तत्र प्रदेशे संयोग उपपादितः।

तदिदमाह वार्त्तिककारः—यदि च (ग)ज्ञानसमवेतात्मप्रदेशासन्निकर्षादिति। अतश्च अव्यापकत्वाद् अपरिहारः। आचार्यदेशीयानां तु स्मृतियौगपद्यप्रसङ्गमाह—अवस्थित-

---

(१) 'विकरणधर्मिणो' इति ज-वि०। (२) 'व्यवस्थित-' इति ग०। (३) 'क्वचिद्देवावस्थितशरीरस्य' इति ख-ग-ज-झा०। (४) 'प्रसज्येत' इति फ०। (५) 'सति' इति ज-ग-ख-झा-पु० नास्ति।

(क) 'करणस्य सामर्थ्यम्' इति फ-पु पाठो युक्तः। तद्बीजं तत्रैव द्रष्टव्यम्। (ख) 'यत्राऽऽत्मप्रदेशोऽस्य' इति युक्तम्। (ग) 'ज्ञानसमवेतात्मप्रदेशेन सन्निकर्षाद्' इति क-ख-तात्पर्यपाठः। वार्त्तिके उपलब्धाकारस्तु गृहीतः।

न्यायभाष्यम्

शब्दसन्ताने तु श्रोत्राधिष्ठानप्रत्यासत्त्या शब्दश्रवणवत् संस्कारप्रत्यासत्त्या मनसः स्मृत्युत्पत्तेर्न युगपदुत्पत्तिप्रसङ्गः। पूर्व एव तु प्रतिषेधो नानेकज्ञानसमवायादेकप्रदेशे युगपत् स्मृतिप्रसङ्ग इति ॥ ३३ ॥

(१) पुरुषधर्मो ज्ञानमन्तःकरणस्येच्छाद्वेषप्रयत्नसुखदुःखानि धर्मा इति कस्यचिद्दर्शनम् , तत् प्रतिषिध्यते—

न्यायवार्त्तिकम्

संस्कारप्रत्यासत्त्या स्मृतियौगपद्यं न भवतीति। का प्रत्यासत्तिः ? न हि संस्काराणां सन्निकृष्टविप्रकृष्टभावोऽस्ति समानदेशत्वात्। न ब्रूमः सन्निकृष्टता प्रत्यासत्तिरपि तु संस्कारस्य सहकारिकारणसमवधानं प्रत्यासत्तिः शब्दवत्—यथा शब्दाः सन्तानवर्तिनः (२)सर्व एवाऽऽकाशे समवयन्ति समानदेशत्वेऽपि यस्योपलब्धेः कारणानि सन्ति स उपलभ्यते नेतरे, तथा संस्कारेष्वपीति ॥ ३३ ॥

पुरुषस्य ज्ञानमिच्छादयोऽन्तःकरणस्येति कस्यचिद्दर्शनम्। तत् प्रतिषिध्यते—

न्यायवार्त्तिकतात्पर्यटीका

शरीरस्यैव(क) संस्काराः समानदेशा इत्ययुक्तम्। कुतः ? आत्मप्रदेशानामद्रव्यान्तरत्वात् , सर्वसंस्काराणां समानदेशत्वे प्रत्यययौगपद्यप्रसङ्गोऽपरिहार्यः। न ह्यात्मनो घटस्येव प्रदेशास्ततोऽन्ये संभवन्ति किं नामाऽऽत्मैव, स चैक एवेति सर्व एवाऽऽत्मवर्तिनः समानदेशा इत्यर्थः। तदिदमुक्तं भाष्यकारेण—आत्मप्रदेशानामद्रव्यान्तरत्वादेकार्थसमवायस्याविशेषे सति स्मृतियौगपद्यस्य प्रतिषेधानुपपत्तिरिति।

शब्दसंताने त्विति शङ्कानिराकरणभाष्यम्। तुशब्दः शङ्कां निराकरोति। तदेतद्भाष्यं वार्त्तिककारो व्याचष्टे—संस्कारप्रत्यासत्त्येति। पृच्छति—का प्रत्यासत्तिरिति। उत्तरम्—न ब्रूम इति। निष्प्रदेशत्वेऽप्यात्मनः संस्कारस्याव्याप्यवृत्तित्वमुपपादितं तेन शब्दवत् सहकारिकारणस्य सन्निधानासन्निधाने (ख) कल्पेते एवेत्यर्थः ॥ ३३ ॥

संप्रति बुद्धिरेव (ग) किमिच्छादिसमानाधिकरणा न वेति विचार्यते। तत्र सांख्यदर्शनवैनाशिकानां विप्रतिपत्तेः संशयः। तद्विप्रतिपत्तिमाह—पुरुषधर्मो ज्ञानमन्तःकरणस्य (घ)त्विति। पुरुषचैतन्यमेकमेव कूटस्थनित्यं सत् तत्तदर्थाकारपरिणतबुद्धितत्त्वप्रतिबिम्बविभ्रमवशाद्भिन्नमिवोपजनापायधर्मकं विज्ञानमिति च वृत्तिरिति चाऽऽख्यायते। इच्छाद्वेषादयस्तु वस्तुत उपजनापायधर्माणो अन्तःकरणस्येति दर्शनम्। तत्प्रतिषिध्यते—

---

(१) 'यत् पुरुषधर्मो' इति ल-ग-भा०। (२) 'सर्वत्र वाऽऽकाशे'—क-खधृतपाठान्तरम्।

(क) 'एव'शब्दो वार्त्तिके न दृश्यते। (ख) 'कल्पेते' इति स्मृतियौगपद्यायौगपद्ययोः प्रभवतः इत्यर्थः। 'कल्प्येते' इति पाठे तु स्पष्टोऽर्थः। (ग) 'वा'शब्दसत्त्वे न 'किम्'शब्दोऽत्र नातिप्रयोजनकः प्रमादागतो ना वेति चिन्त्यम्। (घ) 'तु'शब्दो भाष्ये नोपलभ्यते।

(सू०)—ज्ञस्येच्छाद्वेषनिमित्तत्वादारम्भनिवृत्त्योः ॥ ३४ ॥

न्यायभाष्यम्

अयं खलु जानाति तावदिदं मे सुखसाधनमिदं मे दुःखसाधनमिति (१)ज्ञात्वा स्वस्य सुखसाधनमाप्तुमिच्छति, दुःखसाधनं हातुमिच्छति, (२)प्राप्तीच्छाप्रयुक्तस्यास्य सुखसाधनावाप्तये समीहाविशेष आरम्भः, जिहासाप्रयुक्तस्य दुःखसाधनपरिवर्जनं निवृत्तिः, एवं ज्ञानेच्छा-प्रयत्न-द्वेष-सुख-दुःखानामेकेनाभिसम्बन्धः। एककर्तृकत्वं ज्ञानेच्छाप्रवृत्तीनां समानाश्रयत्वं च। तस्माज् ज्ञस्येच्छाद्वेषप्रयत्नसुखदुःखानि धर्मा नाचेतनस्येति। आरम्भनिवृत्त्योश्च प्रत्यगात्मनि दृष्टत्वात् परत्रानुमानं वेदितव्यमिति ॥ ३४ ॥

न्यायवार्त्तिकम्

ज्ञस्येच्छाद्वेषनिमित्तत्वादारम्भनिवृत्त्योः। ज्ञातुरेवेच्छादय इति सूत्रार्थः। यद्यन्तःकरणस्येच्छादयः स्युर्न प्रत्यक्षाः स्युः, न हीच्छादयोऽन्यत्र वर्तमाना अन्यस्य प्रत्यक्षा भवितुमर्हन्तीति। नित्यं चेच्छादयोऽप्रत्यक्षाः स्युः मनोगुणानामतीन्द्रियत्वात्। आरम्भनिवृत्त्योश्च प्रत्यगात्मनि दृष्टत्वात् परत्रानुमानम् ॥ ३४ ॥

न्यायवार्त्तिकतात्पर्यटीका

ज्ञस्ये—त्त्योः (सू० ३४) ॥ प्रति वृत्त्याऽञ्चतीति प्रत्यगात्मा तस्मिन्। एतदुक्तं भवति —ज्ञानसामानाधिकरण्येनोपलब्धेरन्यदीयानामिच्छादीनामन्यस्याप्रत्यक्षीकरणात् तत्करणे वा मैत्रगतानामपि चैत्रेण ग्रहणप्रसङ्गाद् अन्तःकरणवृत्तीनां गुणान्तराणां नित्याप्रत्यक्षत्वादात्माश्रिता एवेच्छादयो नान्तःकरणाश्रया इति ॥ ३४ ॥

वृत्तिः

नन्विच्छादीनां मनोधर्मत्वात् तेषां ज्ञानजन्यत्वात् सामानाधिकरण्येन च तत्र कार्यकारणभावात् कथं ज्ञानस्याऽऽत्मगुणत्वमित्याशङ्कायां सिद्धान्तसूत्रम्—(ज्ञस्येच्छाद्वेषनिमित्तत्वादारम्भनिवृत्त्योः)

ज्ञस्य ज्ञानवतः आत्मन इच्छादयः। हेतुमाह—आरम्भनिवृत्त्योरिच्छाद्वेषनिमित्तत्वादिति। प्रवृत्तिनिवृत्त्योरिच्छाद्वेषजन्यत्वात् तत्र च सामानाधिकरण्येन ज्ञानस्य हेतुत्वमिति भावः। यद्वा ज्ञस्य ज्ञानवतो याविच्छाद्वेषौ तन्निमित्तत्वादित्यर्थः। तथा च ज्ञानेच्छाप्रयत्नानां सामानाधिकरण्यं नासिद्धम् ॥ ३४ ॥

---

(१) 'ज्ञातम्' इति ल-ग-ज०।

(२) 'प्राप्तुमिच्छाप्रयुक्तस्यास्य' इति ग-ज-भा०।

न्यायभाष्यम्

अत्र भूतचैतनिक आह—

(सू०)—तल्लिङ्गत्वादिच्छाद्वेषयोः पार्थिवाद्येष्वप्रतिषेधः ॥ ३५ ॥

आरम्भनिवृत्तिलिङ्गाविच्छाद्वेषाविति यस्याऽऽरम्भनिवृत्ती तस्येच्छाद्वेषौ तस्य ज्ञानमिति प्राप्तं पार्थिवाप्यतैजसवायवीयानां शरीराणामारम्भनिवृत्तिदर्शनादिच्छाद्वेषज्ञानैर्योग इति चैतन्यम् ॥ ३५ ॥

(सू०)—परश्वादिष्वारम्भनिवृत्तिदर्शनात् ॥ ३६ ॥

शरीरे चैतन्यनिवृत्तिः। आरम्भनिवृत्तिदर्शनादिच्छाद्वेषज्ञानैर्योग इति प्राप्तं परश्वादेः करणस्याऽऽरम्भनिवृत्तिदर्शनाच्चैतन्यमिति। अथ शरीरस्येच्छादिभिर्योगः, परश्वादेस्तु करणस्याऽऽरम्भनिवृत्ती (१)व्यभिचरतः, न तर्ह्ययं हेतुः पार्थिवाप्यतैजसवायवीयानां शरीराणामारम्भनिवृत्तिदर्शनादिच्छाद्वेषज्ञानैर्योग इति।

न्यायवार्त्तिकम्

तल्लिङ्गत्वादिच्छाद्वेषयोः पार्थिवाद्येष्वप्रतिषेधः। प्रवृत्तिनिवृत्तिभ्यां सामानाधिकरण्यात् (२)शरीरादिष्वप्रसङ्ग इति सूत्रार्थः ॥ ३५ ॥

परश्वादिष्वारम्भनिवृत्तिदर्शनात्। परश्वादिष्वारम्भनिवृत्तिदर्शनादनेकान्तो वाक्यार्थः ॥ ३६ ॥

न्यायवार्त्तिकतात्पर्यटीका

अत्रान्तरे लब्धावकाशो भूतचैतनिकः प्रत्यवतिष्ठते—

तल्लि—धः (सू० ३५) ॥ यदि यस्याऽऽरम्भनिवृत्ती तस्येच्छाद्वेषौ यस्य चैतौ तस्य चैतन्यं हन्ताऽऽयातमनेन क्रमेण भूतचैतन्यमस्मदभिमतं भूतेष्वेव कायाकारपरिणतेषु आरम्भनिवृत्तिदर्शनादित्यर्थः ॥ ३५ ॥

पर—नात् (सू० ३६) ॥ परश्वादिष्वित्यस्य तात्पर्यमाह वार्त्तिककारः—परश्वादिष्विति।

वृत्तिः

नन्वस्तु तेषां सामानाधिकरण्यम्, परं तु तेषामधिकरणं कायाकारः पार्थिवादिपरमाणुपुञ्ज एवेति चार्वाकः शङ्कते—(तल्लिङ्गत्वादिच्छाद्वेषयोः पार्थिवाद्येष्वप्रतिषेधः)

पार्थिवाद्येषु देहेषु ज्ञानादेर्न प्रतिषेधः। कुतः ? 'इच्छाद्वेषयोस्तल्लिङ्गत्वाद्' आरम्भनिवृत्तिलिङ्गत्वात्, तयोः चेष्टाविशेषलिङ्गकत्वाच्चेष्टायाश्च शरीरे प्रत्यक्षसिद्धत्वादिति भावः ॥ ३५ ॥

---

(१) 'व्यभिचारतः' टि०। (२) 'शरीरादिषु प्रसङ्गः' इति क०।

न्यायभाष्यम्

अयं तर्ह्यन्योऽर्थः—तल्लिङ्गत्वादिच्छाद्वेषयोः पार्थिवाद्येष्वप्रतिषेधः। पृथिव्यादीनां भूतानामारम्भ(१)स्तावत् (२)त्रसस्थावरशरीरेषु तदवयवव्यूहलिङ्गः प्रवृत्तिविशेषः लोष्टादिषु (३)च लिङ्गाभावात् प्रवृत्तिविशेषाभावो निवृत्तिः। आरम्भनिवृत्तिलिङ्गाविच्छाद्वेषाविति पार्थिवाद्येष्वणुषु तद्दर्शनादिच्छाद्वेषयोगस्तद्योगाज् ज्ञानयोग इति सिद्धं भूतचैतन्यमिति।

कुम्भादिष्वनुपलब्धेरहेतुः। कुम्भादिमृदवयवानां व्यूहलिङ्गः प्रवृत्तिविशेष आरम्भः, सिकतादिषु प्रवृत्तिविशेषाभावो निवृत्तिः। न च मृत्सिकतानामारम्भनिवृत्तिदर्शनादिच्छाद्वेषप्रयत्नज्ञानैर्योगः। तस्मात् तल्लिङ्गत्वादिच्छाद्वेषयोरित्यहेतुरिति ॥ ३६ ॥

(सू०)—नियमानियमौ तु तद्विशेषकौ ॥ ३७ ॥

तयोरिच्छाद्वेषयोर्नियमानियमौ विशेषकौ भेदकौ। ज्ञस्येच्छाद्वेषनिमित्ते

न्यायवार्त्तिकम्

नियमानियमौ तु तद्विशेषकौ। प्रयुज्यमानभूतविषयत्वं प्रवृत्तिनिवृत्त्योर्नियमः—

न्यायवार्त्तिकतात्पर्यटीका

भूतचैतनिकस्तल्लिङ्गत्वादिति हेतुं स्वपक्षसिद्ध्यर्थमन्यथा व्याचष्टे—अयं तर्हीति। शरीरेष्ववयवव्यूहभेददर्शनाच्च (क) लोष्टादिषु शरीरारम्भकाणामणूनां प्रवृत्तिभेदोऽनुमीयते ततश्चेच्छाद्वेषौ ताभ्यां चैतन्यमिति। त्रसं जङ्गमं विशरारु अस्थिरं कृमिप्रभृतीनां शरीरम्, स्थावरं स्थिरं शरीरं देवमनुष्यादीनाम्; तद्धि चिरतरं (ख)वा म्रियते। तदेतद् दूषयति—कुम्भादिमृदवयवानामिति। कुम्भाद्यारम्भिकाणां मृदां व्यूहभेदादारम्भदर्शनाददर्शनाच्च सिकतानामारम्भनिवृत्त्योरनैकान्तत्वम् ॥ ३६ ॥

तदेवं भूतचैतन्यसाधनं दूषयित्वा तेभ्योऽन्यस्य चैतन्ये साधनमाह—

नियमानियमौ तु तद्विशेषकौ (सू० ३७)॥ तयोरिच्छाद्वेषयोर्नियमानियमौ

वृत्तिः

समाधित्सुः प्रतिबन्धिमाह—(परश्वादिष्वारम्भनिवृत्तिदर्शनात्)

आरम्भनिवृत्त्यनुमापकक्रियाविशेषदर्शनात् परश्वादिषु ज्ञानादिसिद्धिप्रसङ्गः। तस्मात् क्रियाविशेषाणां प्रयत्नादिजन्यत्वं सम्बन्धान्तरेण न तु समवायेन व्यभिचारादिति भावः ॥ ३६ ॥

---

(१) 'ताव'दिति झा-पु० नास्ति। (२) 'त्रस'पदं ग-पु० नास्ति। (३) 'च' इति फ-पु० नास्ति।

(क) लोष्टादिष्विति पञ्चम्यर्थे सप्तमी लोष्टादिभ्य इत्यर्थः। ख-तात्पर्ये तु लोष्टादिषु (श) शरीरा— इति मुद्रितम्। (ख) 'वा'शब्द एवार्थ चिरमित्यनुक्तसमुच्चये वा द्रष्टव्यः।

न्यायभाष्यम्

प्रवृत्तिनिवृत्ती न स्वाश्रये । किं तर्हि ? प्रयोज्याश्रये । तत्र प्रयुज्यमानेषु भूतेषु प्रवृत्तिनिवृत्ती स्तः न सर्वेष्वित्यनियमोपपत्तिः ।

यस्य तु (१)ज्ञत्वाद् भूतानामिच्छाद्वेषनिमित्ते आरम्भनिवृत्ती स्वाश्रये तस्य नियमः स्यात्, यथा भूतानां गुणान्तरनिमित्ता प्रवृत्तिर्गुणप्रतिबन्धाच्च निवृत्तिर्भूतमात्रे भवति नियमेन, एवं भूतमात्रे ज्ञानेच्छाद्वेषनिमित्ते प्रवृत्तिनिवृत्ती स्वाश्रये स्याताम्, (२)न तु भवतः तस्मात् प्रयोजकाश्रिता ज्ञानेच्छाद्वेषप्रयत्नाः, प्रयोज्याश्रये तु प्रवृत्तिनिवृत्ती इति सिद्धम् ।

न्यायवार्त्तिकम्

यानि भूतानि प्रयुज्यन्ते तेषु प्रवृत्तिनिवृत्ती भवतो न सर्वेष्विति । यदि पुनर्ज्ञत्वाद् भूतानां प्रवृत्तिनिवृत्ती स्यातां भूतमात्रे स्याताम्, यथा गुरुत्वादिभ्यः—यानि गुरुत्वादिमन्ति भूतानि तानि स्वगुणात् पतन्तीति, नियमश्च दृष्टः तस्मान्न भूतानि चेतनानीति ।

न्यायवार्त्तिकतात्पर्यटीका

विशेषकौ । अयमेव चेच्छाद्वेषयोर्विशेषो यद्भूताश्रयत्वमनयोर्व्यावर्त्य तदितराश्रयत्वव्यवस्थितिः । तत्रानियमं तावदाह—ज्ञस्येच्छाद्वेषनिमित्ते प्रवृत्तिनिवृत्ती स्पन्दास्पन्दौ,—न स्वाश्रये नेच्छाद्वेषयोराश्रये । किन्तर्हि ? प्रयोज्ये परश्वादौ आश्रये दृष्टे, तत्र प्रयुज्यमानेषु एव भूतेषु प्रवृत्तिनिवृत्ती स्यातां—न सर्वेषु प्रयोजकेष्वपि शरीरादिष्विति । सेयम् अनियमोपपत्तिः (क)सार्वत्रिकत्वमनियम इति । एतदुक्तं भवति—न शरीरमिच्छाज्ञानद्वेषाधारः इच्छादिजनितस्पन्दाधारत्वात् परश्वादिवदिति ।

तदेवमनियमं भेदकं व्याख्याय नियमं व्याचष्टे—यस्य तु चार्वाकस्य दर्शने ज्ञत्वाद् भूतानामिच्छाद्वेषनिमित्ते आरम्भनिवृत्ती स्वाश्रये शरीरादौ, तस्य चार्वाकस्य । यथा भूतानां गुरुत्वादिगुणान्तरनिमित्ता प्रवृत्तिः पतनादिलक्षणा, तस्यैव गुरुत्वादेर्गुणान्तरस्य प्रतिबन्ध आधारद्रव्यसंयोगेन, तस्मात् निवृत्तिः अपतनादिका सा भूतमात्रे भवति नियमेन व्याप्ता न तु शरीरोपगृहीतेषु, एवं भूतमात्रे ज्ञानेच्छाद्वेषनिमित्ते प्रवृत्तिनिवृत्ती स्वाश्रये स्याताम् । एतदुक्तं भवति—ये ये पृथिव्यादिधर्मास्ते ते यावत्पृथिव्यादिभाविनो दृष्टाः यथा गुरुत्वादयः, ज्ञानेच्छादयोऽपि चेत् पृथिव्यादिधर्मास्तैरप्यवश्यं यावत्पृथिव्यादिभाविभिर्भवितव्यं न तु घटादौ दृश्यन्ते, तस्मान्न पृथिव्यादिधर्मा ज्ञानादय इति । अत्र च भाष्यकृता सार्वत्रिकत्वप्रसङ्गविवक्षया नियमशब्दः प्रयुक्तः असार्वत्रिकत्वविवक्षया त्वनियमशब्दः । वार्त्तिककृता तु

(१) 'ज्ञानाद्' इति ज० । 'ज्ञत्वादभूताना'मिति वि० । (२) 'न तु भवतः' इति ज-पु० नास्ति ।
(क) अत्र 'असार्वत्रिकत्वमनियमः' इति युक्तम् ।

न्यायभाष्यम्

एकशरीरे तु ज्ञातृबहुत्वं निरनुमानम्। भूतचैतनिकस्यैकशरीरे बहूनि भूतानि ज्ञानेच्छाद्वेषप्रयत्नगुणानीति ज्ञातृबहुत्वं प्राप्तम्। ओमिति ब्रुवतः प्रमाणं नास्ति, यथा नानाशरीरेषु नाना ज्ञातारो बुद्ध्यादिगुणव्यवस्थानात्, एवमेकशरीरेऽपि बुद्ध्यादिव्यवस्थाऽनुमानं स्याज् ज्ञातृबहुत्वस्येति।

न्यायवार्त्तिकम्

एकशरीरे(क) च ज्ञातृबहुत्वं निरनुमानमिति—यस्य भूतानि चेतनानि तस्यैकशरीरे बहूनि भूतानीति बहवश्चेतनाः स्युः। भवन्तु बहवश्चेतनाः किन्नो बाध्यत इति चेत्? न, (१)बहुत्वे प्रत्ययव्यवस्था न भवेत्, (ख) अव्यवस्थानं तु पश्यामः प्रत्ययानां प्रतिसन्धानात्—सर्वः प्रत्ययः

न्यायवार्त्तिकतात्पर्यटीका

प्रयोज्य एवेत्यवधारणं विवक्षित्वा प्रादेशिके नियमशब्दः प्रयुक्तः। सार्वत्रिके तूक्तनियमरूपावधारणाभावादनियमशब्द इति विवक्षाभेदाश्रयादविरोध इति।

यस्तु नियमं मदशक्त्या व्यभिचारयेत्—यथा किल किण्वादयः परिणामविशेषवन्तो मदिराभावमापन्ना मदयन्ति एवं कायाकारेण परिणतानि पृथिव्यादीनि चेतयन्ते नान्यथा तेन घटादिष्वप्रसङ्ग इति तं प्रत्याह—एकशरीरे चेति। यथा मदिरावयवेषु प्रत्येकमेव मदशक्तिरस्ति न पुनः समुदायमात्रसमवायिनी एवं शरीरावयवेष्वपि प्रत्येकमेव चैतन्येन भवितव्यं न च वैयात्यात् कायसमुदायाश्रयमेव चैतन्यं नावयवाश्रयमिति शक्यमास्थातुं त्रिचतुरावयवच्छेदेऽपि चैतन्योपलम्भात्। तस्मादवयवानां प्रत्येकं चैतन्ये शरीर एकस्मिन् बहवश्चेतनाः स्युः। भवतु किं नो बाध्यत इति चेत्? न, विरुद्धाभिप्रायत्वेन स्वतन्त्राणां न किञ्चिदपि कार्यं जायेत। न च बहूनामेकाभिप्रायनियमो दृष्टः। काकतालीयन्यायेन स्यादेकाभिप्रायत्वं न पुनरस्य नियमो दृष्टचर इति प्रसिद्धत्वाद् दूषणमेतदुपेक्ष्य प्रत्ययव्यवस्था न भवेदिति दूषणमुक्तम्। एकस्मिन् शरीरे प्रत्ययानां परस्परप्रतिसन्धानं पश्यामो न शरीरान्तर इति व्यवस्था। सेयं यद्येकस्मिन् शरीरे एक एव चेतनो न चासौ शरीरान्तरे ततो भवेन्नान्यथेत्यर्थः। क्वचित्पाठः प्रत्ययव्यवस्था नानुमानं स्यादिति स सुगम एव।

वृत्तिः

स्वमते व्युत्पादयति—(नियमानियमौ तु तद्विशेषकौ)

तद्विशेषकौ तयोश्चेतनाचेतनयोर्विशेषकौ इतरव्यावर्तकौ। नियमानियमौ समवायेन जन्यतानियमतदभावौ, समवायेन ज्ञानेच्छादीनां चेतनधर्मत्वात् अवच्छेदकतया च शरीरे तेषां जन्यजनकभावः, परश्वादौ यत्नविषयतया क्रिया।

वस्तुतस्तु चेष्टैव परश्वादिक्रियाजनिका यत्नादेस्तद्धेतुत्वे मानाभावः ॥ ३७ ॥

---

(१) 'बहुत्वे प्रत्ययव्यवस्थानानुमानम्' इति क-पु० पाठः।

(क) भाष्ये 'तु'शब्दो विशेषः। (ख) 'व्यवस्थानं तु पश्याम:' इति पाठः सम्भाव्यते।

न्यायभाष्यम्

दृष्टश्च (१)अन्यगुणनिमित्तः प्रवृत्तिविशेषो भूतानां सोऽनुमानमन्यत्रापि। दृष्टः करणलक्षणेषु भूतेषु परश्वादिषु उपादानलक्षणेषु च मृत्प्रभृतिष्वन्यगुणनिमित्तः प्रवृत्तिविशेषः। सोऽनुमानमन्यत्रापि (२)त्रसस्थावरशरीरेषु। तदवयवव्यूहलिङ्गः प्रवृत्तिविशेषो भूतानामन्यगुणनिमित्त इति। स च गुणः प्रयत्नसमानाश्रयः संस्कारो धर्माधर्मसमाख्यातः सर्वार्थः पुरुषार्थाराधनाय प्रयोजको भूतानां प्रयत्नवदिति।

आत्मास्तित्वहेतुभिरात्मनित्यत्वहेतुभिश्च भूतचैतन्यप्रतिषेधः कृतो वेदितव्यः। 'नेन्द्रियार्थयोस्तद्विनाशेऽपि ज्ञानावस्थाना'दिति च समानः प्रतिषेध इति। क्रियामात्रं क्रियोपरममात्रं चाऽऽरम्भनिवृत्ती इत्यभिप्रेत्योक्तम् 'तल्लिङ्गत्वादिच्छाद्वेषयोः पार्थिवाद्येष्वप्रतिषेधः'। अन्यथा त्विमे आरम्भनिवृत्ती आख्याते, न च तथाविधे पृथिव्यादिषु दृश्येते। तस्मादयुक्तम् 'तल्लिङ्गत्वादिच्छाद्वेषयोः पार्थिवाद्येष्वप्रतिषेध' इति॥ ३७॥

न्यायवार्त्तिकम्

प्रतिसन्धीयमाने एकस्मिन् कार्यकारणसङ्घाते दृष्ट इति। अन्यथाभिधानाच्च—हिताहितप्राप्तिपरीहारार्थः परिस्पन्दः प्रवृत्तिनिवृत्ती, भवता तु क्रियामात्रं क्रियोपरमं चाऽऽश्रित्य तल्लिङ्गत्वादिच्छाद्वेषयोः पार्थिवाद्येष्वप्रतिषेध इत्युक्तम्॥ ३७॥

न्यायवार्त्तिकतात्पर्यटीका

नियमानियमाविति यदुक्तं तत्रानुमानमेव सूचयति भाष्यकारः—दृष्टश्चान्यगुणनिमित्तः प्रवृत्तिविशेष इति। हिताहितप्राप्तिपरिहारहेतुः परिस्पन्दः प्रवृत्तिविशेषः। सोऽयं प्रयोगः—त्रसस्थावरशरीरेषु प्रवृत्तिः स्वाश्रयव्यतिरिक्ताश्रयगुणनिमित्ता प्रवृत्तिविशेषत्वात् परश्वादिगतप्रवृत्तिविशेषवदिति। न केवलं शरीरस्य प्रवृत्तिविशेषोऽन्यगुणनिमित्तः भूतानामपि तदारम्भकाणां प्रवृत्तिविशेषोऽन्यगुणनिबन्धन एवेत्याह—तदवयवव्यूहलिङ्ग इति।

नेन्द्रियार्थयोर्विनाशेऽपि ज्ञानावस्थानादिति च समान इति। यथा हीन्द्रियार्थयोर्विनाशेऽपि ज्ञानावस्थानान्नेन्द्रियार्थयोर्गुणो ज्ञानमेवं बाल्यकौमारवार्द्धकावस्थासु शरीरविनाशेऽपि ज्ञानावस्थानान्न शरीरगुणो ज्ञानमित्यर्थः। अपि च 'ज्ञस्येच्छाद्वेषनिमित्तत्वादारम्भनिवृत्त्यो'रित्यत्राऽऽरम्भनिवृत्तिशब्देन न प्रवृत्तिनिमित्तमात्रमभिमतमस्माकमपि तु हिताहितप्राप्तिपरिहारार्थस्पन्दविशेषः। तमिमं प्रवृत्तिविशेषमज्ञात्वा त्वया प्रवृत्तिसामान्येम प्रत्यवस्थितमित्यप्रतिपत्तिस्ते निग्रहस्थानमित्याह भाष्यकारः—क्रियामात्रमिति। तद्वार्त्तिककारो व्याचष्टे अन्यथाऽभिधानाच्च अयुक्तमिति शेषः॥ ३७॥

(१) 'अन्यान्यगुणनिमित्तः' इति ज०। (२) 'स स्थावरशरीरेषु इति' ज०। 'त्रसतृस्थावरशरीरेषु' इति भा०। 'स त्रसस्थावरशरीरेष' इति ल०।

न्यायभाष्यम्

भूतेन्द्रियमनसां समानः प्रतिषेधः, मनस्तूदाहरणमात्रम् ।

(सू०)—यथोक्तहेतुत्वात् पारतन्त्र्यादकृताभ्यागमाच्च न मनसः ॥ ३८ ॥

'इच्छा-द्वेष-प्रयत्न-सुख-दुःख-ज्ञानान्यात्मनो लिङ्ग'मित्यतः प्रभृति यथोक्तं सङ्गृह्यते, तेन भूतेन्द्रियमनसां चैतन्यप्रतिषेधः ।

पारतन्त्र्यात्—परतन्त्राणि भूतेन्द्रियमनांसि धारण-प्रेरण-व्यूहनक्रियासु प्रयत्नवशात् प्रवर्त्तन्ते, चैतन्ये पुनः स्वतन्त्राणि स्युरिति ।

न्यायवार्त्तिकम्

यथाविधे च प्रवृत्तिनिवृत्ती (क)प्रयुज्यमानभूताधारस्ते न (१)तथाभूते भूतमात्रे भवत इति भूतेन्द्रियमनसां समानः प्रतिषेधः मनस्तूदाहरणमात्रम् ।

यथोक्तहेतुत्वात् पारतन्त्र्यादकृताभ्यागमाच्च न मनसः । यथोक्तहेतुत्वादिति—दर्शनस्पर्शनाभ्यामेकार्थग्रहणादित्येवमादीनां हेतूनामप्रतिषेधात् । पारतन्त्र्यादिति—परतन्त्राणि शरीरेन्द्रियमनांसि धारणप्रेरणव्यूहनक्रियासु प्रयत्नवशात् प्रवर्तन्ते चैतन्ये पुनः स्वतन्त्राणि

न्यायवार्त्तिकतात्पर्यटीका

स्यादेतत्—यथोक्तहेतुत्वादित्यादयो वक्ष्यमाणसूत्रगता हेतवो भूतेन्द्रियचैतन्यप्रतिषेधेऽपि समाना इति कस्मान्मनोमात्रे चैतन्यं प्रतिषिध्यते (२) 'न मनस' (२*) इति ? अत आह—भूतेन्द्रियमनसामिति ।

यथो—सः (सू० ३८) । यथोक्तहेतुत्वादिति व्याचष्टे—इच्छाद्वेषप्रयत्नसुखदुःखज्ञानान्यात्मनो लिङ्गमित्यतः आत्मलक्षणात् प्रभृति तल्लक्षणपरीक्षापर्यवसानं यावदुक्तं तत् संगृह्यते । अत्र च हेतुशब्देनेच्छादिसूत्रं सुसंगृहीतं भावप्रत्ययेन हेतुत्वविषया परीक्षोपलक्षिता । वार्त्तिकम्—यथोक्तहेतुत्वादिति दर्शनस्पर्शनाभ्यामेकार्थग्रहणादित्येवमादीनां हेतूनाम् उक्तहेतुत्वं तस्मादिति योजना । तदनेन भाष्यगतप्रभृतिपदार्थो विवृतः । नन्वेते यथोक्ता हेतवः परैः प्रतिषिद्धा इत्यत आह—अप्रतिषेधात् । वाङ्मात्रेण प्रतिषिद्धा न वस्तुत इत्यर्थः । धारण-प्रेरण-व्यूहनक्रियासु यथायोगं शरीरेन्द्रियाणि परतन्त्राणि भौतिकत्वाद् घटादिवदिति । मनश्च परतन्त्रं करणत्वाद् वास्यादिवदिति कस्यचित् प्रयत्नवशात् प्रवर्तन्ते चैतन्ये पुनः स्वतन्त्राणि स्युः । तथा च पारतन्त्र्यप्रसाधकानुमानविरोध इत्यर्थः ।

---

(१) 'तथाविधे' इति क-खपुस्तकपाठान्तरम् । (२) 'न भूतेन्द्रियमनसाम्' इति ख० ।

(क) अत्र यथार्थः पाठोऽनुसन्धेयः ।

न्यायभाष्यम्

अकृताभ्यागमाच्च—'प्रवृत्तिर्वाग्बुद्धिशरीरारम्भ' इति चैतन्ये भूतेन्द्रियमनसां परकृतं कर्म पुरुषेणोपभुज्यत इति स्यात्, अचैतन्ये तु तत्साधनस्य स्वकृतकर्मफलोपभोगः पुरुषस्येत्युपपद्यत इति ॥ ३८ ॥

न्यायवार्त्तिकम्

स्युः। अकृताभ्यागमाच्च—चेतनत्वाच्छरीरादीनां तैः कृतं कर्म पुरुषेण भुज्यत इति अकृतकृतागमनाशदोषप्रसङ्गः, अचेतनत्वे तु तत्साधनस्य स्वकृतकर्मफलोपभोग इति ॥ ३८ ॥

न्यायवार्त्तिकतात्पर्यटीका

यस्तु कश्चिदभ्युपेतवेदप्रामाण्यः पुरुषमचेतनं फलभागिनमभ्युपगम्य शरीरादीनां चैतन्यं रोचयते तं प्रति तेषामचैतन्ये हेतुमाह—अकृताभ्यागमाच्च। उपदेशफलं हि कर्त्तरि कर्त्रपेक्षितोपायताभिधानलक्षणत्वादुपदेशस्य। यथाह स्मात्र भगवान् जैमिनिः—शास्त्रफलं प्रयोक्तरि तल्लक्षणत्वादिति। उपपादितं चैतदस्माभिर्विधिर्विधायक इत्यत्रान्तरे(क)। स्वर्गकामो यजेतेति च कर्त्रभिप्रायफलावगमाद् अत्रैवाऽऽत्मनेपदस्मरणात् य एव कर्मणः कर्त्ता स एव तत्फलस्य भोक्तेति सर्वैरास्तिकपथानुसारिभिरभ्युपेयम्। शरीरादीनां चैतन्ये चेतनस्य स्वातन्त्र्यात् त एव कर्मणः कर्तारः न तेषां भस्मसाद्भूतानामामुष्मिकफलशालितासम्भव इत्यात्मनोऽचेतनस्य तद्भागिताऽभ्युपगन्तव्या। तथा च तैः शरीरादिभिः कृतं कर्म पुरुषेण भुज्यत इति शास्त्रप्रतिक्षिप्ताकृताभ्यागम-कृतनाशदोषप्रसङ्गः। अचैतन्ये तु शरीरादीनां देहाद्यतिरिक्तस्य च पुरुषस्य चैतन्ये पुरुषः स्वातन्त्र्यात् कर्ता तत्प्रयोज्यतया शरीरादीनि तत्साधनानीति तत्साधनस्य स्वकृतकर्मफलोपभोग इति न शास्त्रव्याकोपः नापि प्रेक्षावत्प्रवृत्तिविरोध इति भावः ॥ ३८ ॥

वृत्तिः

इच्छादीनां मनोगुणत्वाभावे युक्त्यन्तरमाह—(यथोक्तहेतुत्वात् पारतन्त्र्यादकृताभ्यागमाच्च न मनसः)

इच्छादय इति शेषः। 'यथोक्तहेतुत्वात्' ज्ञानेच्छादीनां सामानाधिकरण्येन कार्यकारणभावात्, 'पारतन्त्र्यात्' मनसश्चेतनसहकारित्वाद् इच्छादयो न तद्गुणाः।

वस्तुतस्तु इच्छादीनां पारतन्त्र्यात् पराधीनविषयताशालित्वात्। इच्छादीनां हि समानाधिकरणस्वजनकज्ञानविषयतैव विषयता, ज्ञानवैयधिकरण्ये च तन्न स्यादिति भावः। (ख)स्वकृतात् स्वयंकृतात् कर्मणः अभ्यागमो भोगः, स मनसो यत्नादिमत्त्वे न स्यात्, न

(क) ५५३ अङ्कितपत्रे द्रष्टव्यम्। (ख) एतेन सूत्रे 'स्वकृताभ्यागमाच्च' इति वृत्तिकारसम्मतः पाठोऽनुमीयते।

न्यायभाष्यम्

अथायं सिद्धोपसंग्रहः—

(सू०)—परिशेषाद् यथोक्तहेतूपपत्तेश्च ॥ ३९ ॥

आत्मगुणो ज्ञानमिति प्रकृतम्। परिशेषो नाम 'प्रसक्तप्रतिषेधे अन्यत्राप्रसङ्गाच्छिष्यमाणे सम्प्रत्ययः'। भूतेन्द्रियमनसां प्रतिषेधे द्रव्यान्तरं न प्रसज्यते शिष्यते चाऽऽत्मा तस्य गुणो ज्ञानमिति ज्ञायते।

यथोक्तहेतूपपत्तेश्चेति 'दर्शनस्पर्शनाभ्यामेकार्थग्रहणा'दित्येवमादीनामात्मप्रतिपत्तिहेतूनामप्रतिषेधादिति। परिशेषज्ञापनार्थं प्रकृतस्थापनादिज्ञानार्थं च यथोक्तहेतूपपत्तिवचनमिति।

अथ वा उपपत्तेश्चेति हेत्वन्तरमेवेदम्। नित्यः खल्वयमात्मा, यस्मादेकस्मिन् शरीरे धर्मं चरित्वा कायस्य भेदात् स्वर्गे देवेषूपपद्यते, अधर्मं चरित्वा देहभेदात् नरकेषूपपद्यते इति। उपपत्तिः शरीरान्तरप्राप्तिलक्षणा, सा सति सत्त्वे नित्ये चाऽऽश्रयवती, बुद्धिप्रबन्धमात्रे तु निरात्मके निराश्रया नोपपद्यत इति। एकसत्त्वाधिष्ठानश्चानेकशरीरयोगः संसार उपपद्यते, शरीरप्रबन्धोच्छेदश्चापवर्गो मुक्तिरित्युपपद्यते। बुद्धिसन्ततिमात्रे त्वेकसत्त्वानुपपत्तेर्न कश्चिद्दीर्घमध्वानं सन्धावति न कश्चिच्छरीरप्रबन्धाद्विमुच्यत इति संसारापवर्गानुपपत्तिरिति। बुद्धिसन्ततिमात्रे च सत्त्वभेदात् सर्वमिदं प्राणिव्यवहार-

न्यायवार्त्तिकम्

अथायं सिद्धोपसंग्रहः—

परिशेषाद् यथोक्तहेतूपपत्तेश्च। आत्मनो गुणो ज्ञानमिति प्रकृतम्। यथोक्तहेतूपपत्तेरिति आत्मप्रतिपादकानां हेतूनामप्रतिषेधात्। परिशेषादिति शरीरेन्द्रियमनसां प्रतिषेधादन्यस्य

न्यायवार्त्तिकतात्पर्यटीका

अथायं सिद्धोपसंग्रहः उपसंहार इत्यर्थः।

परि—श्च (सू० ३९) ॥ उपपत्तिपदार्थव्याख्यानम् अप्रतिषेधादिति। भाष्यम्—कायस्य

वृत्तिः

ह्यन्यकृतात् कर्मणो भोगः। न च भोगोऽपि मनसः भोक्तुर्बन्धमोक्षादिभागिन एवाऽऽत्मत्वात् तद्भिन्ने आत्मनि मानाभावात्। आत्मनः सुखादिसाक्षात्कारानुरोधात् महत्त्वं मनसश्च धर्मिग्राहकमानादणुत्वम्, अतोऽपि नैक्यम्।

न च मनसः परमाणुत्वाल्लाघवाच्च नित्यत्वं त्वन्मते, तथा चाऽऽत्ममनसोर्नित्यत्वात् सदा ज्ञानादिप्रसङ्गादनिर्मोक्षः स्यादतोऽन्तःकरणस्यानित्यत्वं तन्नाशश्च मोक्ष इति वाच्यम् अदृष्टाद्यभावेन नित्ययोरपि बन्ध्ययोरिव फलाजनकत्वात्।

न्यायभाष्यम्

जातमप्रतिसंहितमव्यावृत्तम् (१)अपरिनिष्ठं च स्यात्, ततः (२)स्मरणाभावात् नान्यदृष्टमन्यः स्मरतीति। स्मरणं च खलु पूर्वज्ञातस्य समानेन ज्ञात्रा ग्रहणम् अज्ञासिषममुमर्थं ज्ञेयमिति। सोऽयमेको ज्ञाता पूर्वज्ञातमर्थं गृह्णाति तच्चास्य ग्रहणं स्मरणमिति, तद् बुद्धिप्रबन्धमात्रे निरात्मके नोपपद्यते ॥ ३९ ॥

(सू०)—स्मरणं त्वात्मनो ज्ञस्वाभाव्यात् ॥ ४० ॥

उपपद्यते इति। आत्मन एव स्मरणं न बुद्धिसन्ततिमात्रस्येति। तुशब्दोऽवधारणे। कथम्? ज्ञस्वभावत्वात्। ज्ञ इति अस्य स्वभावः स्वो धर्मः। अयं खलु

न्यायवार्त्तिकम्

च शिष्यमाणस्यासम्भवात् आत्मनश्च शिष्यमाणत्वात् तस्य गुणो ज्ञानमिति। उपपत्तेरिति वा स्वतन्त्रो हेतुः आत्मनित्यत्व इति। कस्योपपत्तेः? संसारापवर्गयोरुपपत्तेरित्येवमादि भाष्ये ॥३९॥

स्मरणं त्वात्मनो ज्ञस्वाभाव्यात् ॥ ४० ॥ (क)

न्यायवार्त्तिकतात्पर्यटीका

भेदाद् विनाशादिति। अप्रतिसंहितमिति, पूर्वेद्युरर्धकृतानामपरेद्युः परिसमापना दृष्टा मयारब्धं मयैव परिसमापनीयमिति प्रतिसन्धाने, अप्रतिसन्धाने तु न परिसमापयेयुः। परिसमापने वा चैत्रारब्धमपि मैत्रः परिसमापयेत् यतः स्वयमारब्धात् परारब्धम् अव्यावृत्तम् अविशिष्टं स्वस्यापि परत्वाद् अपरिनिष्ठं च कर्मजातं स्यात्। तथा हि वैश्यस्तोमे वैश्य एवाधिकारी न ब्राह्मणराजन्यौ, एवं राजसूये राजैव न ब्राह्मणवैश्यौ, एवं सोमसाधनके यागे ब्राह्मण एवाधिकृतो न राजन्यवैश्यौ, शूद्रश्चानधिकृत एवेति परिनिष्ठा। सा बुद्धिसंततिमात्रे न स्यात्। कुतः? (ख)सलक्षणानां सर्वेषामेव त्रैलोक्यवैलक्षण्येन भेदात्, अन्यापोहसामान्यस्य च निवर्तितत्वादित्यर्थः। अप्रतिसंहितत्वे हेतुमाह—स्मरणाभावादिति ॥ ३९ ॥

स्मर—व्यात् (सू० ४०) ॥ त्रिकालव्यापिनी ज्ञानशक्तिरेव ज्ञस्वाभाव्यम्, तच्चाऽऽकाशादिभ्यो व्यावृत्तं त्रिकालव्यापि स्वरूपमेवाऽऽत्मनः ॥ ४० ॥

वृत्तिः

न च (ग)ज्ञानादिकं प्रक्रम्य 'इत्येतत् सर्वं मन एवे'ति श्रुतेर्मनस एव ज्ञानादिकम्, अभेदमुखेनोपादानोपादेयभावकथनादिति वाच्यम् 'अन्नं वै प्राणा' इत्यादौ निमित्तेऽपि अभेदोल्लेखदर्शनात् करणत्वमात्रे तात्पर्यादिति तत्त्वम् ॥ ३८ ॥

---

(१) 'अपरिनिष्ठितं' इति ग-ल-भा०। (२) 'स्मरणाभावः' इति ल-भा०।

(क) अस्य वार्त्तिकं न दृश्यते। (ख) "स्वलक्षणानाम्" इति सम्भाव्यते।

(ग) "कामः संकल्पो विचिकित्सा श्रद्धाऽश्रद्धा धृतिरधृतिर्ह्रीर्धीर्भीरित्येतत् सर्वं मन एव" इति बृहदारण्यकश्रुतौ कामः प्रक्रान्तः स चेच्छाविशेष इति ज्ञानप्रक्रमा श्रुतिरनुसन्धेया।

न्यायभाष्यम्

ज्ञास्यति जानाति अज्ञासीदिति त्रिकालविषयेणानेकेन ज्ञानेन सम्बध्यते, तच्चास्य त्रिकालविषयं ज्ञानं प्रत्यात्मवेदनीयं ज्ञास्यामि जानामि अज्ञासिषमिति वर्त्तते, तद् यस्यायं स्वो धर्मस्तस्य स्मरणं न बुद्धिप्रबन्धमात्रस्य निरात्मकस्येति ॥ ४० ॥

स्मृतिहेतूनामयौगपद्याद् युगपद्स्मरणमित्युक्तम् । अथ केभ्यः स्मृतिरुत्पद्यत इति ? स्मृतिः खलु—

(सू०)—प्रणिधान-निबन्धाभ्यास-लिङ्ग-लक्षण-सादृश्य-परिग्रहाश्रयाश्रित-सम्बन्धानन्तर्य-वियोगैककार्य-विरोधातिशय-प्राप्ति-व्यवधान-सुख-दुःखेच्छा-द्वेष-भयार्थित्व-क्रियाराग-धर्माधर्मनिमित्तेभ्यः ॥ ४१ ॥

सुस्मूर्षया मनसो धारणं प्रणिधानं सुस्मूर्षितलिङ्गचिन्तनं चार्थस्मृतिकारणम् । निबन्धः खल्वेकग्रन्थोपयमोऽर्थानाम्, एकग्रन्थोपयताः खल्वर्था अन्योन्यस्मृतिहेतव

न्यायवार्त्तिकम्

स्मृतिहेतूनामयौगपद्यादयुगपत् स्मरणमित्युक्तम् । अथ केभ्यः स्मृतिरुत्पद्यत इति ।

स्मृतिकारणानामयौगपद्यप्रतिपादनार्थं प्रणिधानादिसूत्रम्—

प्रणिधान-निबन्धाभ्यास-लिङ्ग-लक्षण-सादृश्य-परिग्रहाश्रयाश्रित-सम्बन्धानन्तर्य-वियोगैककार्य-विरोधातिशय-प्राप्ति-व्यवधान-सुख-दुःखेच्छा-द्वेष-भयार्थित्व-क्रिया-राग-धर्माधर्मनिमित्तेभ्यः ।

न्यायवार्त्तिकतात्पर्यटीका

स्मृतिहेतूनामयौगपद्यादित्येतत् सिंहावलोकितन्यायेन पृच्छत्यनन्तरसूत्रमवतारयितुं स्मृतिहेतूनामिति । तात्पर्याभिधानपुरःसरं सूत्रमवतारयति—स्मृतिकारणानामिति ।

प्रणि—भ्यः (सू० ४१) । भाष्यम्—सुस्मूर्षया मनसो धारणमिति । तेषु तेषु विषयेषु

वृत्तिः

आत्मगुणत्वमुपसंहरति—(परिशेषाद्यथोक्तहेतूपपत्तेश्च)

इच्छादिकमात्मगुण इत्यादिः । हेतुमाह—परिशेषात् शरीरादिहेतुनिरासाद् यथोक्तहेतूनां 'दर्शनस्पर्शनाभ्यामेकार्थग्रहणात्' इत्यादीनाम् उपपत्तेः उपपन्नत्वात् ॥ ३९ ॥

स्मृतेरात्मगुणत्वमर्थसिद्धमपि शिष्यबुद्धिवैशद्याय पृथग् व्युत्पादयति—(स्मरणं त्वात्मनो ज्ञस्वाभाव्यात्)

तुरप्यर्थे । ज्ञस्वाभाव्यात् ज्ञानवत्स्वाभाव्यात् । ज्ञानस्वावच्छिन्नवत्त्वं ह्यात्मनः

न्यायभाष्यम्

आनुपूर्व्येणेतरथा वा भवन्तीति। धारणाशास्त्रकृतो वा (१)प्रज्ञातेषु वस्तुषु स्मर्तव्यानाम् उपनिक्षेपो निबन्ध इति।

अभ्यासस्तु समाने विषये (२)ज्ञानानामभ्यावृत्तिः, अभ्यासजनितः संस्कार आत्मगुणोऽभ्यासशब्देनोच्यते, स च स्मृतिहेतुः समान इति।

लिङ्गं पुनः संयोगि समवाय्येकार्थसमवायि विरोधि चेति। (३)यथा धूमोऽग्नेः, गोविषाणम्, पाणिः पादस्य, रूपं स्पर्शस्य, अभूतं भूतस्येति।

लक्षणं पश्ववयवस्थं गोत्रस्य स्मृतिहेतुः, विदानामिदं गर्गाणामिदमिति। सादृश्यं चित्रगतं प्रतिरूपकं देवदत्तस्येत्येवमादि। परिग्रहात् स्वेन वा स्वामी स्वामिना वा स्वं स्मर्यते। आश्रयाद् ग्रामण्या तदधीनं संस्मरति। आश्रितात् तदधीनेन ग्रामण्यमिति। सम्बन्धाद् अन्तेवासिना (४)युक्तं गुरुं स्मरति, ऋत्विजा

न्यायवार्त्तिकम्

एवमुपपन्नमनित्या बुद्धिरिति ॥ ४१ ॥

इति बुद्धेरात्मगुणत्वप्रकरणम्।

न्यायवार्त्तिकतात्पर्यटीका

प्रसक्तस्य मनसस्ततो निवारणमित्यर्थः। सुस्मूर्षितलिङ्गानुचिन्तनं (क)वा साक्षाद्वा (५)धारणं तल्लिङ्गे वा प्रयत्न इत्यर्थः। निबन्धः खल्विति। यथा अत्रैव प्रमाणादयोऽर्था एकग्रन्थोपात्ता अन्योन्यस्मृतिहेतवः। (ख)आनुपूर्व्या वा। यथा प्रमाणपदार्थं स्मृत्वा प्रमेयं स्मरति। इतरथा वा। (ग)यथा निग्रहस्थानानां प्रमाणानां स्मृत्वा स्मरति। निबन्धस्य व्याख्यानान्तरमाह—धारणेति। धारणाशास्त्रं जैगीषव्यादिप्रोक्तं तत्कृतो ज्ञातेष्वेव वस्तुषु (६)नाडीचक्र-हृत्पुण्डरीक-कण्ठकूप-नासाग्र-तालु-ललाट-ब्रह्मरन्ध्रादिषु स्मर्तव्यानां बीज-रूप-संस्थानास्त्राभरण(७)भूतां च देवतानाम् उपनिक्षेपः समारोपः। तथा (८) च तत्र देवताः (घ)समारोपितास्तास्तत्तदवयव-

वृत्तिः

स्वभावः, स्मृतेश्च ज्ञानत्वावच्छिन्नत्वात्तद्धर्मत्वमर्थात् सिद्धम्। यद्वा ज्ञस्वाभाव्यात् स्मृतिहेतुज्ञानस्याऽऽत्मवृत्तित्वे सिद्धे स्मृतेरात्मवृत्तित्वमपि सिद्धम्।

परे तु ज्ञानस्याऽऽशुविनाशित्वात् कथं स्मृतिहेतुतेत्यत्राऽऽह—स्मरणमित्यादि। ज्ञानवतः स्वभावः संस्कारः तस्मादित्यर्थ इत्याहुः ॥ ४० ॥

---

(१) 'प्रज्ञातेषु स्मर्त्तव्यानां' वि०। (२) 'ज्ञानाभ्यावृत्तिः' इति वि०। (३) 'संयोगि यथा' इति ज-ग०। (४) 'युक्तम्' इति ज-टि-पु० नास्ति। (५) "तत्र धारणतल्लिङ्गे" क-तात्पर्यं मुद्रितम्। (६) नाडीचक्र-' इति क०। (७) '-भूतानां' इति क०। (८) 'च' इति ख-पु-नास्ति।

(क) एतेन भाष्ये 'च'शब्दो विकल्पार्थ इति प्रतिभाति। (ख) भाष्ये 'आनुपूर्व्येण-' इति पाठः। (ग) 'निग्रहस्थानानि स्मृत्वा प्रमाणानां स्मरति' इति पाठः सम्भाव्यते। (घ) 'समारोपितास्तत्तदवयव'—इति पाठः सम्भाव्यते।

न्यायभाष्यम्

याज्यमिति। आनन्तर्यादिति करणीयेष्वर्थेषु। वियोगाद् येन वियुज्यते तद्वियोगप्रतिसंवेदी भृशं स्मरति। एककार्यात् (१)कर्त्रन्तरदर्शनात् कर्त्रन्तरे स्मृतिः। विरोधात्, विजिगीषमाणयोरन्यतरदर्शनादन्यतरः स्मर्यते। अतिशयाद् येनातिशय उत्पादितः। प्राप्तेः यतो(२)ऽनेन किंचित् प्राप्तमाप्तव्यं वा भवति तमभीक्ष्णं स्मरति। व्यवधानात्

न्यायवार्त्तिकतात्पर्यटीका

ग्रहणात् स्मर्यन्त इत्यर्थः। अभ्यासजनितः संस्कार आत्मगुणः अत्र अभ्यासशब्देनोच्यते। तेन आदरप्रत्ययावपि संगृहीतौ भवतः तयोरप्यभ्यासवत्संस्काराधानद्वारेणैव स्मृतिहेतुत्वात्। अपि च स्मृतिकारणानां नासमावेशो विवक्षितः तेन संस्कारेण स्मृतिहेतूनां सर्वेषामेव प्रणिधानादीनां समावेश एव। निबन्धादिभिस्तु यथायोगं समावेशासमावेशावूहनीयाविति। अयमत उपलब्धं लिङ्गं पुनरिति। संयोगिन उदाहरणम् धूमोऽग्नेरिति। समवायिन उदाहरणम् कुड्यादिव्यवहिताया गोः अव्यवहितप्रत्यक्षं विषाणम्, गवा समस्ति विषाणसमवाय इति समवायि विषाणमुक्तम्; न तु तद्गवि समवायि गोरेव स्वावयवे विषाणादौ समवायात्। एकार्थसमवायीत्यस्य एकार्थस्य समवाय एकार्थसमवायः स यस्यास्ति स एकार्थसमवायीत्यर्थः। तदेतदुदाहरणम्—यथा पाणिः पादस्येति। एकस्य खल्ववयविनः समवायः पादे च पाणौ च, तौ पाणिपादावेकार्थसमवायवन्तौ तत्रैकेनैकार्थसमवायवता प्रत्यक्षेणाप्रत्यक्ष एकः स्मर्यत इति। यदा त्वेकस्मिन्नर्थे समवाय इत्यर्थस्तदा रूपं स्पर्शस्येत्युदाहरणम्। स्वाभाविकाविनाभावयुक्तं लिङ्गं साङ्केतिकं तु चिह्नमिति विशेषः। ग्रामणीः नायकः। यद्यपि सर्वत्र प्रणिधानादौ सम्बन्धः संप्लवते तथाऽपि प्रणिधानादिपरिहाण्या संबन्धान्तरे गोबलीवर्दन्यायेन संबन्धशब्दो वर्तते। न च संबन्धशब्देन सर्वसंग्रहादनर्थकमितरपदोपादानमिति वाच्यम् उक्तमत्र भाष्यकृता—अन्यत्र स्ववाक्यलाघवं नाऽऽद्रियते सूत्रकार इति, शिष्यधीप्रसादश्चैवं भवति विशिष्याभिधानादिति। आनन्तर्यादिति। ब्राह्मे हि मुहूर्ते प्रबोधानन्तरमुत्थानं ततो मूत्रं ततः शौचं ततो मुखप्रक्षालनदन्तधावनादीनि। वियोगादिति शोकमुपलक्षयति। ततोऽपि शोकविषयस्य स्मरति। एककार्यादिति, यथा सप्तदशावराणामृद्धिकामानामेकं सत्रं कार्यम्। तत्रैकं यजमानं दृष्ट्वा यजमानान्तरं स्मरति। अतिशयात् यथा ब्रह्मचारी उपनयनविद्याविनयातिशयोत्पादकमाचार्यं स्मरति। (क)प्राप्तेस्तु यथा प्रार्थकः यतोऽनेन मिष्टमन्नं प्राप्तं प्राप्तव्यं वा

(१) 'कर्त्रन्तरबोधनात्' इति। वि०। (२) 'येन' इति ज०।

(क) 'तु'शब्दो भाष्ये न दृश्यते।

न्यायभाष्यम्

कोशादिभिरसिप्रभृतीनि स्मर्यन्ते, सुखदुःखाभ्यां तद्धेतुः स्मर्यते। इच्छाद्वेषाभ्यां यमिच्छति यं च द्वेष्टि तं स्मरति। भयाद् यतो बिभेति। अर्थित्वाद् येनार्थी भोजनेनाऽऽच्छादनेन वा। क्रियया रथेन रथकारं स्मरति। रागाद् यस्यां स्त्रियां रक्तो भवति तामभीक्ष्णं स्मरति। धर्माज् जात्यन्तरस्मरणम् इह चाधीतश्रुतावधारण-मिति। अधर्मात् प्रागनुभूतदुःखसाधनं स्मरति। न चैतेषु निमित्तेषु युगपत् संवेदनानि भवन्तीति युगपदस्मरणमिति। निदर्शनं चेदं स्मृतिहेतूनां न परिसङ्ख्यान-मिति ॥ ४१ ॥

न्यायवार्त्तिकतात्पर्यटीका

तमभीक्ष्णं स्मरति। इच्छा स्नेहः, स तु भ्रात्रादिषु। द्वेषः प्रतिकूले दारादौ, ताभ्यामपि च तद्विषयं स्मरति। क्रियया कार्येणेत्यर्थः। धर्माद्—वेदाभ्यासजनितेन धर्मेण जातिं स्मरति (१)पूर्विकाम्। एवं जातमात्रस्य सुखादिसाधनस्मरणं धर्माधर्माभ्यां द्रष्टव्यम्। ननून्मादा-दयोऽपि स्मृतिहेतवो लोकसिद्धास्तत् किं तेऽपि नोक्ता इत्यत आह—निदर्शनमात्रं चेदं स्मृतिहेतूनामिति ॥ ४१ ॥

वृत्तिः

स्मृतियौगपद्यसमाधानाय प्रणिधानादीनामुद्बोधकानां क्रमो हेतुरुक्तः तत्र प्रणिधानादीनि दर्शयति—(प्रणिधान-निबन्धाभ्यास-लिङ्ग-लक्षण-सादृश्य-परिग्रहाश्रयाश्रित-सम्बन्धानन्तर्य-वियोगैककार्य-विरोधातिशय-प्राप्ति-व्यवधान-सुखदुःखेच्छा-द्वेष-भयार्थित्व-क्रिया-राग-धर्माधर्म-निमित्तेभ्यः)।

स्मरणमित्यनुवर्त्तते। निमित्तशब्दस्य द्वन्द्वात् परं श्रुतस्य प्रत्येकमभेदेनान्वयः। प्रणिधानं मनसो विषयान्तरसंचारवारणम्। निबन्धः एकग्रन्थोपनिबन्धनम्, यथा प्रमाणेन प्रमेयादिस्मरणम्। अभ्यासः संस्कारबाहुल्यम्। एतस्य यद्यपि नोद्बोधकत्वं तथाऽपि तादृशे शीघ्रमुद्बोधकसमवधानं स्यादित्याशयेन तदुपन्यासः। अभ्यासो दृढतरसंस्कार उद्बोधकत्वेनोक्त इति केचित्। लिङ्गं व्याप्यम्, व्यापकस्य स्मारकम्। लक्षणं यथा कपिध्वजादि अर्जुनादेः। सादृश्यं देहादेः। परिग्रहः स्वीकारस्तस्य स्वस्वामिभावोऽर्थः, तदेकतरेण तदन्यतर-स्मरणम्। आश्रयाश्रितौ राजादितत्परिजनौ परस्परस्मारकौ। सम्बन्धः गुरुशिष्य-भावादिः गोवृषन्यायात् पृथगुक्तः। आनन्तर्यं प्रोक्षणावघातादेः। वियोगो यथा दारादेः। एककार्याः अन्तेवासिप्रभृतयः परस्परस्मारकाः। विरोधादहिनकुलादेरन्य-तरेणापरस्मरणम्। अतिशयः संस्कार उपनयनादिराचार्यादिस्मारकः। प्राप्तिर्धनादे-

(१) 'इति पूर्विकाम्' इति क०।

न्यायभाष्यम्

अनित्यायां च बुद्धौ उत्पन्नापवर्गित्वात् कालान्तरावस्थानाच्च (१)अनित्यानां संशयः किमुत्पन्नापवर्गिणी बुद्धिः शब्दवत् आहोस्वित् कालान्तरावस्थायिनी कुम्भवदिति। उत्पन्नापवर्गिणीति पक्षः परिगृह्यते। कस्मात्?

(सू०)—कर्मानवस्थायिग्रहणात् ॥ ४२ ॥

कर्मणोऽनवस्थायिनो ग्रहणादिति। क्षिप्तस्येषोरापतनात् क्रियासन्तानो गृह्यते, प्रत्यर्थनियमाच्च बुद्धीनां (२)क्रियासन्तानवद् बुद्धिसन्तानोपपत्तिरिति(२*)। (३)अवस्थितग्रहणे च व्यवधीयमानस्य प्रत्यक्षानिवृत्तेः। अवस्थिते च कुम्भे गृह्यमाणे

न्यायवार्त्तिकम्

अनित्यायां च बुद्धावुत्पन्नापवर्गित्वात् कालान्तरा(४)वस्थितत्वाच्च संशयः उत्पन्नापवर्गिणी बुद्धिः शब्दवत् आहो (५)कालान्तरस्थायिनी कुम्भवदिति। उत्पन्नापवर्गिणीति युक्तम्। कः पुनरयमर्थः उत्पन्नापवर्गिणीति? अन्येभ्योऽपि विनाशिभ्य आशुतरं विनश्यतीति, न त्वयमर्थ उत्पत्त्यनन्तरं (६)ध्वंसत इति। कः पुनरत्र न्यायः? आशुतरविनाशिनी बुद्धिः जातिमत्त्वे सत्यस्मदादि(७)प्रत्यक्षत्वे सति व्यापकद्रव्याश्रितत्वात् (७*) शब्दवत् प्रतिक्षणमपूर्वोत्पत्तौ

न्यायवार्त्तिकतात्पर्यटीका

तदेवं सिंहावलोकितं समर्थ्य प्रकृतायामेव बुद्धौ विचारान्तरमारभते—अनित्यायां च बुद्धाविति। द्रव्याश्रितत्वादित्युच्यमानेऽपि चक्षुरादिगतै रूपादिभिर्व्यभिचारोऽत आह—व्यापकद्रव्याश्रितत्वादिति। तथाऽप्यात्मत्वादिभिरनेकान्तोऽत आह—जातिमत्त्वे सतीति। तथाऽपि विभुत्वेन परिमाणेनानेकान्तोऽत आह—अस्मदादिप्रत्यक्षत्वे सतीति। कर्मादिसन्तानविषया बुद्धय आशुतरविनाशिन्यः। अत्र यदि प्रकाशकत्वादित्युच्येत तत आत्मनाऽनेकान्त इत्यत आह—करणत्वे सतीति। तथाऽपि मनःश्रोत्रादिभिरनेकान्तोऽत आह—

वृत्तिः

दातारं स्मारयति। व्यवधानम् आवरणं यथा खड्गादेः कोशादिः। सुखदुःखयोरन्यतरेणापरस्य, ताभ्यां तत्प्रयोजकस्य वा स्मरणम्। इच्छाद्वेषौ यद्विषयतया गृहीतौ तस्य स्मारकौ। भयं मरणादेर्भयहेतोर्वा स्मारकम्। अर्थित्वं दातुः। शाखादेः क्रिया वाय्वादेः। रागात् प्रीतेः पुत्रादेः स्मरणम्। धर्माधर्माभ्यां जन्मान्तरानुभूतसुखदुःखसाधनयोः प्रागनुभूतसुखादेश्च स्मरणमिति। उक्तेषु च किञ्चित्स्वरूपसत् किञ्चिच्च ज्ञातमुद्बोधकम्, शिष्यव्युत्पादनाय चायं प्रपञ्चः ॥ ४१ ॥

समाप्तं बुद्ध्यात्मगुणत्वप्रकरणम् ॥ ३ ॥

---

(१) 'नित्यानाम्' इति ग०। (२) 'क्रियासन्तानोपपत्तिः' इति ल-भा०। 'क्रियासन्तानबुद्धिसन्तानोपपत्तिः' इति वि०। (३) 'अव्यवहितग्रहणे' इति त्रि०। (४) '-वस्थायित्वाच्च' इति क-ख-धृतपाठान्तरम्। (५) 'कालान्तरावस्थायिनी' इति क-ख-धृतपाठान्तरम्। (६) 'ध्वंस' इति क-ख-धृतपाठान्तरम्। (७) '-प्रत्यक्षतायां व्यापकद्रव्यसमवायात्' इति क-ख०।

न्यायभाष्यम्

सन्तानेनैव बुद्धिर्वर्तते (१)प्राग् व्यवधानात् तेन व्यवहिते प्रत्यक्षं ज्ञानं निवर्तते, कालान्तरावस्थाने तु बुद्धेर्दृश्यव्यवधानेऽपि प्रत्यक्षमवतिष्ठेतेति ।

स्मृतिश्चालिङ्गं बुद्ध्यवस्थाने संस्कारस्य बुद्धिजस्य स्मृतिहेतुत्वात् । यश्च मन्येत अवतिष्ठते बुद्धिः दृष्टा हि बुद्धिविषये स्मृतिः सा च बुद्धावनित्यायां कारणाभावान्न स्यादिति । तदिदमलिङ्गम् । कस्मात् ? बुद्धिजो हि संस्कारो गुणान्तरं स्मृतिहेतुर्न बुद्धिरिति ।

न्यायवार्त्तिकम्

(क)अयुगपदुत्पत्तौ करणत्वे सति प्रत्यर्थप्रकाशकत्वात्—यस्य प्रतिक्षणमपूर्वोत्पन्नपदार्थप्रकाशकत्वं करणत्वे सति तस्याऽऽशुतरविनाशित्वं दृष्टं यथा प्रदीपस्य (२)प्रतिक्षणमपूर्वोत्पन्नान् प्रध्वंसिनः पदार्थान् बुद्धिः प्रत्यर्थनियमेन प्रकाशयति तस्मादियमप्याशुतरविनाशिनीति । अथवा आशुतर-

न्यायवार्त्तिकतात्पर्यटीका

प्रत्यर्थेति । एका बुद्धिरेकविषया न विषयान्तरविषया एवमन्या अपि बुद्धयः स्वविषयमात्रे पर्यवसिताः न मनःश्रोत्रादि तथा नानाविषयत्वात्तस्येति । ननु प्रत्यर्थनियतत्वमव्यापकं युगपदनेकार्थसन्निकर्षे सति नानाविषया ह्येका बुद्धिरुपजायतेऽत आह—प्रतिक्षणं कर्मणोऽर्थस्य अपूर्वस्योत्पत्तौ सत्यां तत्कार्याया बुद्धेः अयुगपदुत्पत्तौ कारणक्रमानुविधानात् कार्यक्रमस्य प्रत्यक्षबुद्धेर्विषयकारणत्वात् । एकैकश्चासौ विषयः क्रमोत्पादवान् कारणमिति क्रमवतीनां सर्वासामेव सिद्धं प्रत्यर्थनियतत्वम् । नियमश्च तज्जातीयकर्मान्तरापेक्षया न तु द्रव्यापेक्षया तेन कर्मबुद्धेर्द्रव्यादिविषयत्वेऽपि प्रत्यर्थनियमाविरोधः । प्रत्यर्थनियतत्वविशेषणयोगाच्च प्रागात्मनाऽनैकान्तिकत्वशङ्कायां करणत्वं विशेषणमिति ।

प्रयोगान्तरमाह—अथवेति । सुखत्वादिभिरनैकान्तिकत्वं मा भूदत उक्तं गुणत्वे सतीति । रूपादिभिर्व्यभिचारनिवृत्त्यर्थमुक्तम् अबाह्येति ।

वृत्ति

बुद्धेर्बुद्ध्यन्तराद्विनाश उक्तः, स च तृतीयक्षणवर्तिध्वंसप्रतियोगित्वसिद्धौ स्यात्, अतो बुद्धेरुत्पन्नापवर्गित्वं व्युत्पादनीयम् । तत्र सिद्धान्तसूत्रम्—(कर्मानवस्थायिग्रहणात्)

शरीरादिकर्मधाराया अनवस्थायिन्याः प्रत्यक्षधाराऽपि वाच्या, न चाऽऽद्यबुद्धेरुत्तरग्राहकत्वं विरम्य व्यापाराभावात्, पूर्वपूर्वस्य च परतः परतोऽननुभवाद्विनाशसिद्धावाश्रयनाशादेरभावाद्विरोधिगुणस्यैव नाशकत्वमिति । कर्मवद् बुद्धेरनवस्थायित्वग्रहणादिति वाऽर्थः ॥ ४२ ॥

---

(१) 'प्रागव्यवधानात्' इति ग-भा० । (२) 'प्रतिक्षणमुत्पन्नान्' इति क-ख-धृतपाठान्तरम् ।

(क) क-ख-वार्त्तिकपुस्तकसम्पादकैः 'अयुगपदुत्पत्तावि'ति क्वचिदुपलब्धं टीकाकृता गृहीतत्वादस्माभिरिह निवेशितम् ।

न्यायवार्त्तिकम्

विनाशिनी बुद्धिः गुणत्वे सत्यबाह्यकरणप्रत्यक्षत्वात् सुखवदिति। अस्यार्थस्य ज्ञापनार्थम्—

कर्मानवस्थायिग्रहणात् इति सूत्रम्। यदि तर्ह्यनवस्थायिपदार्थेषु अनवस्थिता बुद्धिः अथ यदा (१) बुद्धिस्थितं कुम्भादिकमुपलभ्यते तदा किं कुम्भवत् कालान्तरावस्थायिनी उताऽऽशुविध्वंसिनीति? अवस्थितग्रहणेऽपि प्रत्यक्षनिवृत्तेः प्रध्वंसिनी—यदाऽप्यवस्थितं कुम्भादिकमुपलभते तदाऽपि सन्तानेनैव बुद्धयो निवर्तन्ते। कस्मात्? व्यवहिते प्रत्यक्षनिवृत्तेः—यदि कुम्भवत् कालान्तरावस्थायिनी बुद्धिरभविष्यत व्यवहितेऽपि प्रत्यक्षमवास्थास्यत; न त्ववतिष्ठते, तस्मान्न कालान्तरावस्थायिनीति। स्मृतेरवतिष्ठत इति चेत्—यदि बुद्धिर्ध्वंसिनी स्यात् स्मृतिर्न स्यात्, न हि बुद्धिभेदे स्मृतिं पश्याम इति, यथा पुरुषान्तरबुद्धिषु, अस्ति च स्मृतिः, तस्मादवतिष्ठते बुद्धिरिति? नात एवानवस्थानात्—न हि बुद्धाववस्थितायां स्मृतिः सम्भवति, स्मृतिर्नाम प्रत्यक्षबुद्धिनिरोधे तत्पूर्वको विषयप्रतिसन्धिः यथेदमद्राक्षमिति, एतच्च न प्रत्यक्षबुद्धाववस्थितायां युक्तमिति। अन्यतश्च तद्भावात् स्मृतिरलिङ्गमिति—येयं स्मृतिर्बुद्धावस्थानलिङ्गत्वेनाभ्युपगम्यते नेयं लिङ्गमन्यतस्तद्भावात्; अवतिष्ठते हि बुद्धिजः संस्कार इति ततः प्रणिधानादिनिमित्तापेक्षात् स्मृतिरिति।

न्यायवार्त्तिकतात्पर्यटीका

कर्मा—णात् (सू० ४२)॥ अवस्थितग्रहणेऽपि प्रत्यक्षनिवृत्तेर्ध्वंसिनीति। यद्यपि शक्यं वक्तुं स्पर्शादिबुद्धिरेकैव तावन्तं कालमवस्थिता व्यवधानादिनाऽर्थसन्निकर्षविनाशाद्विनङ्क्ष्यति निमित्तकारणविनाशोऽपि कार्यविनाशहेतुर्दृष्टः, अपेक्षाबुद्धिविनाशाद् द्वित्वविनाशवदिति, तथाऽपि क्षणिकत्वे हेत्वन्तरादेव सिद्धे बुद्धीनामभ्युच्चयमात्रतयैतद् द्रष्टव्यम्। तथा हि क्षणविध्वंसिवस्तुविषयबुद्धिक्षणिकत्वसमर्थनेनैव स्थायिवस्तुविषयबुद्धिक्षणिकत्वसमर्थनमपि सूचितम्। स्थिरगोचरा बुद्धयः क्षणिकाः बुद्धित्वात् कर्मादिबुद्धिवदिति। बुद्धिरेव स्मर्त्री ग्रहीत्री चेत्यात्मभावं बुद्धावारोप्य शङ्कते—स्मृतेरवतिष्ठत इति चेदिति। निराकरोति—नात एवेति। न हि बुद्धिः स्मर्त्री येन तदभावे स्मृतिर्नोत्पद्येत अपि त्वात्मा, स च नित्यः; बुद्धिसद्भावस्तु स्मृतिविरोधीत्यर्थः। अथ यदि बुद्धिर्नास्ति कुतस्तर्हि स्मृतिरुत्पद्यते? न ह्यकारणं कार्यं भवति। न चाऽऽत्ममात्रं कारणं, मा भूदात्मनो नित्यत्वेन स्मृत्युत्पादोऽपि नित्यः। तस्मात् स्मृत्युत्पादोऽपि लिङ्गं बुद्ध्यवस्थान इत्यत आह—अन्यतश्च तद्भावादिति। स्यादेतत्—बुद्धिजः संस्कारश्चेत् स्मृतिहेतुरथ यावत्संस्कारं स्मृतिः स्यादत आह—ततः प्रणिधानादिति। न संस्कारोऽस्ती-

(१) 'यदावस्थितं'—इति क-ख-धृतपाठान्तरम्।

न्यायभाष्यम्

हेत्वभावादयुक्तमिति चेत् ? बुद्ध्यवस्थानात् प्रत्यक्षत्वे स्मृत्यभावः। यावदवतिष्ठते बुद्धिस्तावदसौ बोद्धव्यार्थः प्रत्यक्षः प्रत्यक्षे च स्मृतिरनुपपन्नेति ॥ ४२ ॥

(सू०)—अव्यक्तग्रहणमनवस्थायित्वाद् विद्युत्सम्पाते रूपाव्यक्तग्रहणवत् ॥ ४३ ॥

यद्युत्पन्नापवर्गिणी बुद्धिः प्राप्तमव्यक्तं बोद्धव्यस्य ग्रहणम् , यथा विद्युत्सम्पाते वैद्युतस्य प्रकाशस्यानवस्थानादव्यक्तं रूपग्रहणमिति ; व्यक्तं तु द्रव्याणां ग्रहणं तस्मादयुक्तमेतदिति ॥ ४३ ॥

(सू०)—हेतूपादानात् प्रतिषेद्धव्याभ्यनुज्ञा ॥ ४४ ॥

उत्पन्नापवर्गिणी बुद्धिरिति प्रतिषेद्धव्यं तदेवाभ्यनुज्ञायते विद्युत्सम्पाते रूपाव्यक्तग्रहणवदिति।

न्यायवार्त्तिकम्

हेत्वभाव इति चेत्—अथ मन्यसे संस्कारात् स्मृतिर्न बुद्ध्यवस्थानादिति अत्र को हेतुः ? स्मृतिरेव—यद्यवतिष्ठते बुद्धिः स्मृतिर्न स्यादिति ॥ ४२ ॥

अव्यक्तग्रहणमनवस्थायित्वाद् विद्युत्सम्पाते रूपाव्यक्तग्रहणवत्। यद्यनवस्थायिनी बुद्धिरव्यक्तं व्यक्तस्य ग्रहणं प्राप्नोति यथा विद्युत्प्रकाशितानामव्यक्तग्रहणमिति ॥ ४३ ॥

हेतूपादानात् प्रतिषेद्धव्याभ्यनुज्ञा। न विरोधात्, अव्यक्तग्रहणादवस्थायिनी बुद्धिरिति

न्यायवार्त्तिकतात्पर्यटीका

त्येतावता स्मृतिरपि तु तत्प्रबोधात्। प्रबोधश्च कादाचित्कः कादाचित्कत्वात् प्रणिधानादेरित्यर्थः ॥ ४२ ॥

अव्य—वत् (सू० ४३) ॥ बुद्धिस्थैर्यवाद्याह—(१)यद्यनवस्थायिनीति ॥ ४३ ॥

हेतू—ज्ञा (सू० ४४) ॥ दूषयति—न विरोधादिति। बुद्धिमात्रस्य स्थायित्वं प्रतिज्ञाय विद्युत्संपातजाताया घटादिबुद्धेरनवस्थायित्वाभिधानं विरुद्धमित्यर्थः। अव्यक्त-

वृत्तिः

शङ्कते—(अव्यक्तग्रहणमनवस्थायित्वाद् विद्युत्सम्पाते रूपाव्यक्तग्रहणवत्)

बुद्धिर्यद्याशुविनाशिनी स्याद् योग्याशेषविशेषधर्मविशिष्टधर्मिग्राहिणी न स्याद् विद्युत्सम्पातकालीनवस्तुग्रहणवत् , न चैवम्, तस्मान्न तथेत्यर्थः ॥ ४३ ॥

---

(१) 'नावस्थायिनी' इति क०।

न्यायभाष्यम्

यत्राव्यक्तग्रहणं तत्रोत्पन्नापवर्गिणी बुद्धिरिति? (१)ग्रहणहेतुविकल्पाद् ग्रहणविकल्पो न बुद्धिविकल्पात्। यदिदं क्वचिदव्यक्तं (२)क्वचिद् व्यक्तं ग्रहणम् (३) अयं विकल्पो ग्रहणहेतुविकल्पात्, यत्रानवस्थितो ग्रहणहेतुः तत्राव्यक्तं ग्रहणं यत्रावस्थितस्तत्र व्यक्तम्, न तु बुद्धेरवस्थानानवस्थानाभ्यामिति। कस्मात्? अर्थग्रहणं हि बुद्धिः (४)यत् तदर्थग्रहणमव्यक्तं व्यक्तं वा (५)बुद्धिः सेति। विशेषाग्रहणे च सामान्यग्रहणमात्रम् (६)अव्यक्तग्रहणं (५*) तत्र विषयान्तरे बुद्ध्यन्तरानुत्पत्तिर्निमित्ताभावात्। यत्र समानधर्मयुक्तश्च धर्मी गृह्यते विशेषधर्मयुक्तश्च तद् व्यक्तं ग्रहणम्, यत्र तु विशेषेऽगृह्यमाणे सामान्यग्रहणमात्रं तदव्यक्तं ग्रहणम्। समानधर्मयोगाच्च विशिष्टधर्मयोगो विषयान्तरम्, तत्र (७) यद् ग्रहणं न भवति तद्ग्रहणनिमित्ताभावाद् न बुद्धेरनवस्थानादिति।

न्यायवार्त्तिकम्

ब्रुवाणोऽनवस्थायिनी बुद्धिरिति यत्प्रतिषेध्यं तदभ्यनुजानासि, तस्य चाभ्यनुज्ञानाद् यदुक्तं कालान्तरावस्थायिनी बुद्धिरिति तद् बाधितं भवति। अव्यक्तग्रहणस्य चान्यनिमित्तत्वात् नाव्यक्तग्रहणाद् बुद्ध्यनवस्थानं सिध्यति, यत्तद् व्यक्तमव्यक्तं च ग्रहणं न बुद्धेरवस्थानानवस्थानाभ्यामपि तु ग्रहणहेतोर्भेदादिति तदसम्भवाच्च। नाव्यक्तं नाम ग्रहणमस्ति। कस्मात्? अर्थग्रहणमात्रत्वाद् बुद्धेः—अर्थग्रहणमात्रं बुद्धिः, तच्चार्थग्रहणं सामान्यतो विशेषतश्च। यच्च सामान्यविषयं तत् सामान्यं प्रति व्यक्तम्। एवं विशेषविषयम् एवं तद्वद्विषयमिति। तदिदमव्यक्तग्रहणं देशितं

न्यायवार्त्तिकतात्पर्यटीका

ग्रहणस्यान्यथासिद्धत्वं चाऽऽह—अव्यक्तग्रहणस्येति। (८)धर्मिग्रहणहेतोर्भेदात्—अव्यक्तश्च यो धर्मिग्रहणे हेतुः सामान्यमात्रवन्तं धर्मिणं गृह्णाति तद्वशादव्यक्तग्रहणम्, यस्तु सामान्यविशेषवन्तं तद्वशाद् व्यक्तग्रहणमित्यर्थः। धर्मिणं त्वनाश्रित्य स्वे विषये ग्रहणानां तदसंभवाच्च व्यक्तत्वादित्यर्थः। धर्मिणमनाश्रित्येत्यविद्वान् शङ्कते—

(१) 'ग्रहणे हेतु-' इति ल-ग-भा०।
(२) 'क्वचिद् व्यक्तम्' इति ज० पु० नास्ति।
(३) 'अयं ग्रहण-' इति ग०।
(४) 'यच्च तदर्थ-' इति ग०।
(५) अयं भागः वि० पु० नास्ति।
(६) 'व्यक्तग्रहणम्' इति ग०।
(७) 'यत्तु' इति ल-ग-भा०।
(८) 'धर्मग्रहण-' इति क०।

न्यायभाष्यम्

यथाविषयं च ग्रहणं व्यक्तमेव प्रत्यर्थनियतत्वाच्च बुद्धीनाम्। सामान्यविषयं च ग्रहणं स्वविषयं (१)प्रति व्यक्तं विशेषविषयं च ग्रहणं स्वविषयं प्रति व्यक्तं प्रत्यर्थनियता हि बुद्धयः, तदिदमव्यक्तग्रहणं देशितं क्व विषये बुद्ध्यनवस्थानकारितं स्यादिति ?

धर्मिणस्तु धर्मभेदे बुद्धिनानात्वस्य भावाभावाभ्यां तदुपपत्तिः। धर्मिणः खल्वर्थस्य समानाश्च धर्मा विशिष्टाश्च, तेषु प्रत्यर्थनियता नानाबुद्धयः, ता उभय्यो यदि धर्मिणि वर्तन्ते तदा व्यक्तं ग्रहणं धर्मिणमभिप्रेत्य। यदा तु सामान्यग्रहणमात्रं तदाऽव्यक्तं ग्रहणमिति। एवं धर्मिणमभिप्रेत्य व्यक्ताव्यक्तयोर्ग्रहणयोरुपपत्तिरिति ॥ ४४ ॥

न्यायवार्त्तिकम्

(२)कथमेकस्मिन् विषये बुद्ध्यानवस्थानकारितं स्यात्। लोकविरोध इति चेत्—यदि तर्हि व्यक्ताव्यक्तग्रहणे न स्यातां योऽयं व्यवहारो (३)लोकेषु व्यक्तं पश्यामीति स कथम्? न अन्यथा तदुपपत्तेः—नायं सामान्यविशेषतद्वत्सु व्यक्ताव्यक्तग्रहणभेदोऽपि तु धर्मिणः सामान्यतोऽधिगतस्य विशेषत उपलिप्साद्वारकमव्यक्तग्रहणमिति। (४)अनैकान्तिकत्वाच्च—नायमेकान्तोऽस्ति यद्विषयग्रहणहेतोर्ग्राह्यस्य चानवस्थानं तत्राव्यक्तग्रहणम् ॥ ४४ ॥

न्यायवार्त्तिकतात्पर्यटीका

लोकविरोध इति चेदिति। धर्मिग्रहणमाश्रित्य निराकरोति—नान्यथेति। दोषान्तरमाह—अनैकान्तिकत्वाच्चेति। वार्त्तिकव्याख्यानेनैव भाष्यव्याख्या ॥ ४४ ॥

वृत्तिः

उत्तरयति—(हेतूपादानात् प्रतिषिद्धव्याभ्यनुज्ञा)।

प्रतिषिद्धव्यस्य बुद्धेराशुविनाशित्वस्याभ्यनुज्ञा त्वया कृता विद्युत्सम्पातदृष्टान्तरूपस्य हेतोः साधकस्योपादानात्, तथा चांशतो बाध इति भावः ॥ ४४ ॥

---

(१) 'प्रत्यव्यक्तम्' इति ज०।

(२) 'कतमस्मिन्' इति क-ख-धृतपाठान्तरम्।

(३) लोकेन व्यक्तं—इति क-ख-धृतपाठान्तरम्।

(४) 'अनेकान्ताच्च' इति क-ख०।

न्यायभाष्यम्

(१)न चेदमव्यक्तं ग्रहणं बुद्धेर्बोद्धव्यस्य वाऽनवस्थायित्वादुपपद्यते इति । इदं हि—

(सू०)—(क)न प्रदीपार्चिःसन्तत्यभिव्यक्तग्रहणवत्तद्ग्रहणम् ॥४५॥

अनवस्थायित्वेऽपि बुद्धेस्तेषां द्रव्याणां ग्रहणं व्यक्तं प्रतिपत्तव्यम् । कथम् ? प्रदीपार्चिःसन्तत्यभिव्यक्तग्रहणवत् । प्रदीपार्चिषां सन्तत्या वर्तमानानां ग्रहणानवस्थानं ग्राह्यानवस्थानं च प्रत्यर्थनियतत्वाद् (२) बुद्धीनां यावन्ति प्रदीपार्चींषि तावत्यो बुद्धय इति । दृश्यते चात्र व्यक्तं प्रदीपार्चिषां ग्रहणमिति ॥ ४५ ॥

न्यायवार्त्तिकम्

न प्रदीपार्चिषः सन्तत्यभिव्यक्तग्रहणवत् तद्ग्रहणम् । अनवस्थायित्वेऽपि यथा प्रदीपार्चिषां सन्तत्या वर्तमानानां ग्राह्यानवस्थानं ग्रहणानवस्थानं च भवति, भवति च व्यक्तं ग्रहणम् अर्चींषीति, यथाऽर्चिःषु तथाऽन्यत्रापीति व्यवस्थितं क्षणिका बुद्धिरिति ॥ ४५ ॥

(इति बुद्धेरुत्पन्नापवर्गित्वप्रकरणम् ।)

न्यायवार्त्तिकतात्पर्यटीका

न प्र—णम् (सू० ४५) (ख) ॥

शरीरेति । पूर्वं हि भूतेन्द्रियमनसां चैतन्यं साक्षान्निराकृतमुपक्षेपात् (ग) तु शरीरस्य संप्रति तु शरीरस्यैव साक्षाच्चैतन्यं निरस्यत इति तात्पर्यभेदादपुनरुक्तम् । वस्तुतस्तु पौनरुक्त्यपरिहारं भाष्यकारः प्रकारान्तरेण वक्ष्यति ।

वृत्तिः

अस्तु तर्हि तद्दृष्टान्तेनान्यासां बुद्धीनामनवस्थायित्वमित्यत्राऽऽह—(प्रदीपार्चिःसन्तत्यभिव्यक्तग्रहणवत्तद्ग्रहणम्) ।

यथा प्रदीपार्चिषां सन्तन्यमानानामनवस्थायित्वेऽप्यभिव्यक्तग्रहणं तथाऽन्यत्रापि स्यात् । विद्युत्सम्पातस्थले या बुद्धिरुत्पन्ना सा स्वविषये व्यक्तैवेति भावः ॥ ४५ ॥

समाप्तं बुद्धेरुत्पन्नापवर्गित्वप्रकरणम् ॥ ४ ॥

---

(१) 'न वेदं' इति ग० । (२) 'वा बुद्धीनाम्' इति ग० ।

(क) अयं 'नशब्दः' ल-ग-ज-भा-पुस्तकेषु 'इदं हि न' इत्येवं भाष्यगततया गृहीतः । फ-पुस्तकपाठस्तु गृहीतः । तद्बीजं ३०३ पत्रे तत्पुस्तक एव द्रष्टव्यम् ।

(ख) ४५तम-सूत्रे तात्पर्यटीका नोपलभ्यते ।

(ग) 'तु'शब्दोऽयं प्रमादागत इति प्रतिभाति ।

न्यायभाष्यम्

चेतना शरीरगुणः सति शरीरे भावादसति चाभावादिति—

(सू०)—द्रव्ये स्वगुणपरगुणोपलब्धेः संशयः ॥ ४६ ॥

सांशयिकः सति भावः, स्वगुणोऽप्सु द्रवत्वमुपलभ्यते, परगुणश्चोष्णता, तेनायं संशयः किं शरीरगुणश्चेतना शरीरे गृह्यते अथ द्रव्यान्तरगुण इति ॥ ४६ ॥

न शरीरगुणश्चेतना, कस्मात् ?

(सू०)—(१)यावद्द्रव्यभावित्वाद्रूपादीनाम् ॥ ४७ ॥

न रूपादिहीनं शरीरं गृह्यते चेतनाहीनन्तु गृह्यते यथोष्णताहीना आपः, तस्मान्न शरीरगुणश्चेतनेति ।

न्यायवार्त्तिकम्

शरीरगुणश्चेतना सति शरीरे भावादसति चाभावादिति । यच्च यस्मिन् सति भवति असति च न भवति तस्य तदिति विज्ञायते यथा रूपादय इति । न सति भावात् शरीरगुणत्वं चेतनायाः सिध्यति सति भावस्यान्यगुणत्वेऽपि दर्शनात् । न तावत् संयोगविभागसंस्काराः कर्मगुणाः अथ च सति कर्मणि भावोऽसति चाभाव इति । संयोगविभागशब्देषु च सत्सु शब्दो भवत्यथ च न तद्गुण इति । तद्गुणत्वं च तत्रोपलब्ध्या सिध्यति—यद् यत्र वर्तमानमुपलभ्यते रूपादिकं तत्तस्य गुण इति । अथ सति भावादित्यनेन शरीरे चेतनोपलब्धिं ब्रूयात् ? तस्याप्यसिद्धता-दोषः—न हि शरीरे चेतनोपलभ्यते, चेतनामात्रं तूपलभ्यते, तच्च सन्दिग्धं किं शरीरे उतान्यस्मिन् इति ।

द्रव्ये स्वगुणपरगुणोपलब्धेः संशयः । उपेत्य शरीरे चेतनोपलब्धिं किं शरीरगुणश्चेतना उत द्रव्यान्तरगुण इति द्रव्ये स्वगुणपरगुणोपलब्धेः संशय इत्युक्तार्थं सूत्रम् ॥ ४६ ॥

न्यायवार्त्तिकतात्पर्यटीका

तद्गुणत्वं तत्रोपलब्ध्या सिध्यति, अबाधितयेति शेषः ।

द्रव्ये—यः (सू० ४६) ॥ (क)

वृत्तिः

अथ बुद्धेः शरीरगुणत्वाभावप्रकरणम् । न च प्रागेव तत्सिद्धेरनारम्भणीयमेतत्, गौरोऽहं जानामीत्याद्यनुभवेन तत्साधकानामाभासीकरणादतो विशिष्य तद्व्युत्पादनाय संशयबीजमाह—(द्रव्ये स्वगुणपरगुणोपलब्धेः संशयः) ।

द्रव्ये चन्दनादौ स्वगुणस्य रूपादेः परगुणस्य शैत्यादेश्च ग्रहात् । एवं शरीरे रूपादेरौष्ण्यस्य च ग्रहाद् बुद्ध्यादिः शरीरगुणो न वेति संशयः ॥ ४६ ॥

---

(१) 'यावच्छरीरभावित्वात्' इति ल० ।

(क) ४६तम-सूत्रे अवतरणिकाव्याख्यातिरिक्ता टीका नास्ति ।

न्यायभाष्यम्

संस्कारवदिति चेन्न कारणानुच्छेदात्। यथाविधे द्रव्ये संस्कारः तथाविध एवोपरमो न, तत्र कारणोच्छेदादत्यन्तं संस्कारानुपपत्तिर्भवति। यथाविधे शरीरे चेतना गृह्यते तथाविधे एवात्यन्तोपरमश्चेतनाया गृह्यते। तस्मात् संस्कारवदित्यसमः समाधिः।

अथापि शरीरस्थं चेतनोत्पत्तिकारणं स्यात्? द्रव्यान्तरस्थं वा? उभयस्थं वा? तन्न, नियमहेत्वभावात्। शरीरस्थेन कदाचिच्चेतनोत्पद्यते कदाचिन्नेति नियमे हेतुर्नास्तीति। द्रव्यान्तरस्थेन च शरीर एव चेतनोत्पद्यते न लोष्टादिष्वित्यत्र (१) न (२)नियमे हेतुरस्तीति। (३)उभयस्थस्य निमित्तत्वे शरीरसमानजातीयद्रव्ये चेतना नोत्पद्यते शरीर एव चोत्पद्यते इति नियमे हेतुर्नास्तीति॥ ४७॥

न्यायवार्त्तिकम्

न शरीरगुणश्चेतना—

(४) यावद्द्रव्यभावित्वाद् रूपादीनाम्। दृष्टान्तसूत्रम्। वैधर्म्येण—ये शरीरगुणा भवन्ति ते यावच्छरीरं वर्तन्ते यथा रूपादयः, न तु यावच्छरीरं चेतना वर्तते तस्मान्न तद्गुण इति। साधर्म्येण वा न तद्गुण इति (५)यथाऽप्सूष्णतेति। संस्कारवदिति चेत्—अथ मन्यसे यथा संस्कारः शरीरगुणः न च यावच्छरीरं वर्तते तथा चेतनाऽपीति? न कारणानुच्छेदात्—संस्कारस्य न शरीरमात्रं कारणं तस्य नोदनादिकारणसन्निधाने तदभावे भावाभावौ युक्तौ, कारणसन्निधानवतोऽयुक्तमेतदिति। चेतनानिमित्तस्याप्यसन्निधानमिति चेत्—अथ मन्यसे यथैव संस्कारस्य कारणमसन्निहितमेवं चेतनाकारणमपीति? तदयुक्तं विकल्पानुपपत्तेः—यच्छरीरे चेतनोत्पत्तिकारणं तत्किं शरीरस्थमुत द्रव्यान्तरस्थम्? शरीरस्थमपि किं यावच्छरीरभावि उत नैमित्तिकमिति? यदि यावच्छरीरभावि, न कदाचिच्चेतनाहीनं शरीरमुपलभ्येत निमित्तस्य सन्निहितत्वात्। अथ नैमित्तिकम्, यच्छरीरे चेतनोत्पत्तेर्निमित्तस्य कारणं तत्रापि चेतनावत्प्रसङ्गः।

न्यायवार्त्तिकतात्पर्यटीका

याव—नाम् (सू० ४७)॥ न कारणानुच्छेदात्(क)चेतनायाः—शरीरमस्याः कारणम्, तच्चानुच्छिन्नम्; संस्कारस्य तु कारणस्योच्छेद इति द्रष्टव्यम्॥ ४७॥

वृत्तिः

तत्र सिद्धान्तसूत्रम्—(यावच्छरीरभावित्वाद् रूपादीनाम्)

'न शरीरगुणश्चेतना' इत्यादौ भाष्यकृतः पूरणम्, न शरीरविशेषगुण इत्यर्थः। अयं

(१) 'न' इति ग-उ० नास्ति। (२) 'नियमहेतु-' इति ल०। (३) 'उभयस्य' इति ल-ग-ज०, 'उभयतः' इति वि०। (४) 'यावच्छरीरभावित्वा-' इति क-ख-धृतपाठान्तरम्। (५) 'यथाप्स्वग्न्युष्णतेति' क-ख-धृतपाठान्तरम्।

(क) 'चेतनायाः' इति गृहीतभाष्यगतकारणपदार्थान्वयापेक्षया पूरितम्, भाष्यगतं वा टीकाकृतोपलब्धमिति बोध्यम्।

न्यायभाष्यम्

यच्च मन्येत सति श्यामादिगुणे द्रव्ये श्यामाद्युपरमो दृष्टः एवं चेतनोपरमः स्यादिति—

(सू०)—न, पाकजगुणान्तरोत्पत्तेः ॥ ४८ ॥

(१) नात्यन्तं रूपोपरमो द्रव्यस्य, श्यामे रूपे निवृत्ते पाकजं गुणान्तरं रक्तं रूपमुत्पद्यते, शरीरे तु चेतनामात्रोपरमोऽत्यन्तमिति ॥ ४८ ॥

न्यायवार्त्तिकम्

अथ द्रव्यान्तरस्थम्, द्रव्यान्तरवृत्ति निमित्तं शरीरे चेतनां करोति न द्रव्यान्तरेष्वित्यत्रापि नियमहेतुर्वक्तव्यः। द्रव्यान्तरस्थं च नित्यमनित्यं वा, अनित्यमपि कालान्तरावस्थायि (२)क्षणप्रध्वंसि वेति चेतनावत् प्रसङ्गः ॥ ४७ ॥

यच्च मन्यते श्यामादिगुणं च द्रव्यं भवति न च यावद्द्रव्यभाविनी श्यामतेति, तच्च (क) न।

न पाकजगुणान्तरोत्पत्तेः। (ख)नात्यन्तं (३)श्यामतोपरमे रूपान्तरोत्पत्तिः चेतनोपरमस्त्वत्यन्तमिति ॥ ४८ ॥

न्यायवार्त्तिकतात्पर्यटीका

तच्च—

न पाकजगुणान्तरोत्पत्तेः (सू० ४८) इति ॥ नात्यन्तिकः परमाणौ वा (ग)पिठरे वा रूपाभाव इत्यर्थः ॥ ४८ ॥

वृत्तिः

च तर्ककारः—बुद्ध्यादिकं शरीरविशेषगुणः स्याद् यावच्छरीरभावि स्याद् रूपादिवत्। तत्परिष्कार्यं चानुमानम्, बुद्ध्यादिकं न शरीरगुणः अयावद्द्रव्यभावित्वात् शब्दवत्, व्यतिरेके रूपवद्वा। अयावद्द्रव्यभावित्वं च आश्रयत्वाभिमतकालीननाशप्रतियोगित्वम् ॥ ४७ ॥

पिठरपाकमते व्यभिचारमाशङ्कते—(न पाकजगुणान्तरोत्पत्तेः)

शरीरे पाकाधीनरूपादिना व्यभिचारान्नोक्तं साधनं युक्तमित्यर्थः। परे तु सिद्धान्त-

---

(१) 'नात्यन्तरूपो-' ग०। (२) 'प्रतिक्षणं ध्वंसि वेति' इति क-ख-धृतपाठान्तरम्। (३) 'श्यामरूपोपरमे' इति क-ख-धृतपाठान्तरम्।

(क) 'न'शब्दोऽयं प्रमादान्मुद्रितः सूत्रस्थ'नञ्'पदान्वयार्थं वार्त्तिककृता तच्चेत्येतावन्मात्रमेव पूरितम्, अत एव टीकाकृताऽपि तच्चेत्येतावन्मात्रमेव धृतमिति ध्येयम्।

(ख) अत्र 'नात्यन्तं रूपोपरमः श्यामतोपरमे रूपान्तरोत्पत्तेः' इति पाठः समीचीनतया सम्भाव्यते।

(ग) "पिठरं स्थाली" इति कोषः। अवयविरूपार्थस्तु लक्षणालभ्य इति बोध्यम्।

न्यायभाष्यम्

अथापि—

(सू०)—प्रतिद्वन्द्विसिद्धेः पाकजानामप्रतिषेधः ॥ ४९ ॥

यावत्सु द्रव्येषु पूर्वगुणप्रतिद्वन्द्विसिद्धिस्तावत्सु पाकजोत्पत्तिर्दृश्यते पूर्वगुणैः सह पाकजानामवस्थानस्याग्रहणात्। न च शरीरे चेतनाप्रतिद्वन्द्विसिद्धौ सहानवस्थायि गुणान्तरं गृह्यते येनानुमीयेत तेन चेतनाया विरोधः। तस्मादप्रतिषिद्धा चेतना यावच्छरीरं वर्तेत, न तु वर्तते, तस्मान्न शरीरगुणश्चेतना इति ॥ ४९ ॥

न्यायवार्त्तिकम्

इतश्च—

प्रतिद्वन्द्विसिद्धेः पाकजानामप्रतिषेधः। यावत्सु द्रव्येषु पूर्वगुणप्रतिषेधस्तावत्सु प्रतिद्वन्द्विनो गुणान्तरस्य दर्शनम्—यथा श्यामनिवृत्तौ रक्तादीनामिति। न पुनः शरीरे चेतनाविपरीतं गुणान्तरमुपलभ्यते चेतनामात्रोपरमस्तु (१)अत्यन्तम् इति। अथ मन्यसे शरीरे-(२)ऽप्यचेतनत्वं नाम गुणान्तरमिति ; तन्न, स्वरूपतोऽनिर्देशात्—यत्तदचेतनत्वं नाम, किं तत् चेतनाविपरीतं धर्मभूतं वस्तु उत चेतनाविप्रतिषेधमात्रमिति ? यदि विपरीतम्, चेतनावत् संवेद्यं स्यात्। अथ चेतनाविप्रतिषेधमात्रम्, तन्न गुण इति ॥ ४९ ॥

न्यायवार्त्तिकतात्पर्यटीका

तदेवमात्यन्तिकानात्यन्तिकत्वं वैधर्म्यमुक्त्वा सप्रतिद्वन्द्वित्वासप्रतिद्वन्द्वित्वं वैधर्म्यान्तरमाह—इतश्च।

प्रति—धः (सू० ४९)॥ प्रतिद्वन्द्विसिद्धेः पाकजानां तद्व्यभिचारोद्भावनेन चैतन्यस्य यावच्छरीरभावित्वाप्रतिषेधः ॥ ४९ ॥

वृत्तिः

सूत्रमेवेदम्। तथाहि न पाकजरूपेण व्यभिचारः शङ्कनीयः, पाकजगुणान्तरस्य रूपान्तरस्योत्पत्तेः। तथा च स्वसमानाधिकरणस्वसमानजातीयासमानकालीनत्वं पूर्वोक्तहेतौ नाशप्रतियोगित्वे विशेषणीयमित्यर्थ इत्याहुः ॥ ४८ ॥

सिद्धान्तसूत्रम्—(प्रतिद्वन्द्विसिद्धेः पाकजानामप्रतिषेधः)

पाकजानां प्रतिद्वन्द्विनि पूर्वशरीरप्रतिरूपके शरीरान्तरे सिद्धेर्घटादौ पाकजरूपसम्भवेऽपि शरीरे न तत्सम्भवः शरीरावयवानां चर्मादीनामग्निसंयोगविशेषेण नाशावश्यकत्वात्।

परे तु—पाकजानां प्रतिद्वन्द्विनोऽग्निसंयोगात् सिद्धेः। तथा च तादृशाग्निसंयोगासमानाधिकरणत्वमर्थः। तेनाग्निसंयोगनाश्येऽग्निसंयोगजन्ये च न व्यभिचार इत्याहुः।

---

(१) 'अत्यन्तः' इति ख०।　(२) 'अचेतना नाम' इति क-ख-धृतपाठान्तरम्।

न्यायभाष्यम्

इतश्च न शरीरगुणश्चेतना—

(सू०)—शरीरव्यापित्वात् ॥ ५० ॥

शरीरं शरीरावयवाश्च सर्वे चेतनोत्पत्त्या व्याप्ता इति न क्वचिदनुत्पत्तिश्चेतनायाः, शरीरवच्छरीरावयवाश्चेतना इति प्राप्तं चेतनबहुत्वम् । तत्र यथा प्रतिशरीरं चेतनबहुत्वे सुखदुःखज्ञानानां व्यवस्था लिङ्गम् एवमेकशरीरे(१)ऽपि स्यात्, न तु भवति, तस्मान्न शरीरगुणश्चेतनेति ॥ ५० ॥

यदुक्तं न क्वचिच्छरीरावयवे चेतनाया अनुत्पत्तिरिति (२)सा—

(सू०)—(क) न केशनखादिष्वनुपलब्धेः ॥ ५१ ॥

केशेषु नखादिषु चानुत्पत्तिश्चेतनाया इति अनुपपन्नं शरीरव्यापित्वमिति ॥ ५१ ॥

न्यायवार्त्तिकम्

इतश्च न शरीरगुणश्चेतना—

शरीरव्यापित्वात् । शरीरवत् शरीरावयवाश्चेतनोत्पत्त्या व्याप्यन्ते । को व्याप्त्यर्थः ? न कश्चित् शरीरावयवश्चेतनाहीनो भवतीति । सर्वस्य चेतनानिमित्तत्वात् शरीरवच्छरीरावयवाश्चेतनाः प्राप्नुवन्ति । भवन्तु शरीरावयवाश्चेतनाः ? न प्रत्ययव्यवस्थाप्रसङ्गात्—शरीरवत् शरीरावयवाश्चेतना इति प्रत्ययव्यवस्थानं स्यात् ॥ ५० ॥

न्यायवार्त्तिकतात्पर्यटीका

शरी—त्वात् (सू० ५०) ॥ प्रत्ययव्यवस्थाप्रसङ्गात्—यथा देवदत्तस्य ज्ञानं न यज्ञदत्तः प्रतिसन्धत्ते किं तु देवदत्त एवेति व्यवस्था, एवमेकस्मिन् शरीरे अवयवान्तरज्ञानमवयविनो वा ज्ञानं न प्रतिसन्धत्ते इत्यर्थः ॥ ५० ॥

वृत्तिः

अन्ये तु—शरीरगुणत्वाभावे हेत्वन्तरमाह—प्रतिद्वन्द्वीति । पाकजानां पूर्वरूपादिकं प्रतिद्वन्द्वि विरोधि, एकस्मिन् रूपे विद्यमाने रूपान्तराभावात् ; प्रकृते त्वेकस्मिन् ज्ञाने सत्यपि द्वितीयक्षणे ज्ञानान्तरोत्पत्तेर्ज्ञानादिकं न शरीरविशेषगुण इत्यर्थ इत्याहुः ॥ ४९ ॥

हेत्वन्तरमाह—(शरीरव्यापित्वात्)

शरीरविशेषगुणानामिति शेषः । ज्ञानसुखादिकं तु न शरीरव्यापकम्, हृदयाद्यवच्छेदेन तदानुभविकत्वादिति भावः ॥ ५० ॥

---

(१) 'अपि'र्नास्ति वि० । (२) 'सः' -इति ग० ।

(क) 'न'कारोऽयं ल-ग-ज-पुस्तकेषु अवतरणिकाभाष्यान्तर्गततया मुद्रितः ।

न्यायभाष्यम्

(सू०)—त्वक्पर्यन्तत्वाच्छरीरस्य केशनखादिष्वप्रसङ्गः ॥५२॥

इन्द्रियाश्रयत्वं शरीरलक्षणम्, त्वक्पर्यन्तं जीवमनःसुखदुःखसंवित्त्यायतनभूतं शरीरम्, तस्मान्न केशादिषु चेतनोत्पद्यते। अर्थकारितस्तु शरीरोपनिबन्धः केशादीनामिति ॥ ५२ ॥

इतश्च न शरीरगुणश्चेतना—

(सू०)—शरीरगुणवैधर्म्यात् ॥ ५३ ॥

न्यायवार्त्तिकम्

न केशनखादिष्वनुपलब्धेः। न शरीरावयवाश्चेतनाः—'केशनखादिष्वनुपलब्धेः' इति दृष्टान्तसूत्रम् ॥ ५१ ॥

त्वक्पर्यन्तत्वाच्छरीरस्य केशनखादिष्वप्रसङ्गः। संयोगिद्रव्यं केशनखादयो न तु शरीरावयवा इति, तस्मान्नायं प्रसङ्ग इति ॥ ५२ ॥

न्यायवार्त्तिकतात्पर्यटीका

न के—ब्धेः (सू० ५१) ॥ दृष्टान्तसूत्रमिति। न करचरणादयश्चेतनाः शरीरावयवत्वात् केशनखादिवदिति दृष्टान्तार्थं सूत्रमित्यर्थः ॥ ५१ ॥

त्वक्—ङ्गः (सू० ५२) ॥ त्वक्पर्यन्तत्वादिति शरीरावयवत्वं केशनखादीनां हेतुरसिद्धः, इन्द्रियाश्रयत्वं शरीरलक्षणम्, तद् यत्र शरीरसमवेतं तेनेन्द्रियाश्रयेणावश्यं भवितव्यम्। त्वक्पर्यन्तश्चावयवसमूहस्तथा न तु केशनखादयस्तादृशा इति न शरीरावयवा इत्यर्थः ॥ ५२ ॥

वृत्तिः

दूषयति—(न केशनखादिष्वनुपलब्धेः)

शरीररूपादेराश्रयव्यापकत्वं न, शरीरस्य गौररूपस्पर्शादेः केशनखादावनुपलब्धेरित्यर्थः ॥ ५१ ॥

दूषयति—(त्वक्पर्यन्तत्वाच्छरीरस्य केशनखादिष्वप्रसङ्गः)

स्पष्टम्।

अन्ये तु—चेतना न शरीरगुणः शरीरव्यापित्वात्, शरीरे तदवयवेषु सर्वेष्वेकेन सम्बन्धेन सत्त्वात्, शरीरगुणस्तु न स्वावयववृत्तिः। शङ्कते—न केशेति। चैतन्यस्यानुपलब्धेः। समाधत्ते त्वगिति, इत्याहुः ॥ ५२ ॥

न्यायभाष्यम्

द्विविधः शरीरगुणः—अप्रत्यक्षश्च गुरुत्वम्, इन्द्रियग्राह्यश्च रूपादिः, विधान्तरं तु चेतना, (१)नाप्रत्यक्षा संवेद्यत्वात्, (क) नेन्द्रियग्राह्या मनोविषयत्वात्। तस्माद् द्रव्यान्तरगुण इति ॥ ५३ ॥

(सू०)—न रूपादीनामितरेतरवैधर्म्यात् ॥ ५४ ॥

यथा इतरेतरविधर्माणो रूपादयो न शरीरगुणत्वं जहत्येवं रूपादिवैधर्म्याच्चेतना शरीरगुणत्वं न हास्यतीति ॥ ५४ ॥

न्यायवार्त्तिकम्

इतश्च न शरीरगुणश्चेतना—

शरीरगुणवैधर्म्यात्। द्वये शरीरगुणा भवन्ति बाह्यकरणप्रत्यक्षा रूपादयोऽतीन्द्रियं च गुरुत्वम्, विधान्तरं तु चेतना न बाह्यकरणप्रत्यक्षा (ख) सुसंवेद्यत्वात्, नातीन्द्रिया मनोविषयत्वात, तस्मान्न शरीरगुण इति ॥ ९३ ॥

न रूपादीनामितरेतरवैधर्म्यात्। यथेतरेतरविधर्माणो रूपादयो न शरीरगुणत्वमतिवर्त्तन्ते तथा रूपादिवैधर्म्ये सति चेतना शरीरगुणत्वं न हास्यति ॥ ९४ ॥

न्यायवार्त्तिकतात्पर्यटीका

शरी—र्म्यात् (सू० ५३) ॥ (ग)

न रू—र्म्यात् (सू० ५४) ॥ (घ)

वृत्तिः

हेत्वन्तरमाह—(शरीरगुणवैधर्म्यात्)

बुद्धिर्न शरीरगुणः शरीरगुणवैधर्म्यात् बहिरिन्द्रियावेद्यत्वे सति मनसा वेद्यत्वात् ॥ ५३ ॥

आक्षिपति—(न रूपादीनामितरेतरवैधर्म्यात्)

नोक्तं युक्तं रूपादीनां परस्परवैधर्म्यात्। तथा च त्वद्रीत्या स्पर्शादीनां शरीरगुणत्वं न स्यादचाक्षुषत्वात्। तथा चोक्तमप्रयोजकमिति भावः ॥ ५४ ॥

---

(१) 'प्रत्यक्षा' इति ज० ।

(क) मनस इन्द्रियत्वस्य नैयायिकसम्मतत्वेन अनैन्द्रियपदं भाष्यकृता बहिरिन्द्रियमात्रतात्पर्येण प्रयुक्तमित्यवसीयते ।

(ख) 'स्वसंवेद्यत्वात्' इति पाठः प्रतिभाति । बाह्येन्द्रियजन्यप्रत्यक्षविषयो हि परेषामपि प्रत्यक्षयोग्यः, चेतना तु केवलं स्वाश्रयेणाऽऽत्मना गृह्यते इति भावः ।

(ग-घ) ५३-५४ तम-सूत्रयोस्तात्पर्यटीका नोपलभ्यते ।

(सू०)—ऐन्द्रियकत्वाद्रूपादीनामप्रतिषेधः ॥ ५५ ॥

न्यायभाष्यम्

(१)अप्रत्यक्षत्वाच्चेति। (२)यथेतरेतरविधर्माणो रूपादयो न द्वैविध्यमतिवर्तन्ते तथा रूपादिवैधर्म्याच्चेतना न द्वैविध्यमतिवर्तेत यदि शरीरगुणः स्यादिति। अतिवर्त्तते तु, तस्मान्न शरीरगुण इति।

भूतेन्द्रियमनसां ज्ञानप्रतिषेधात् सिद्धे सत्यारम्भो विशेषज्ञापनार्थः, बहुधा परीक्ष्यमाणं तत्त्वं सुनिश्चिततरं भवतीति ॥ ५५ ॥

न्यायवार्त्तिकम्

ऐन्द्रियकत्वाद् रूपादीनामप्रतिषेधः। द्वये शरीरगुणा भवन्तीत्युक्तः सूत्रार्थः। रूपादीनामितरेतरवैधर्म्यमननुसंहितं चाव्यावृत्तं चेति वैधर्म्यमात्रम् अन्वयव्यतिरेकि तु चेतनायाः शरीरगुणत्वसाधनं न भवतीति, तस्मादसममेतत्।

न्यायवार्त्तिकतात्पर्यटीका

ऐन्द्रि—धः (सू० ५५)॥ रूपादीनां (क)त्वितरेतरवैधर्म्यमननुसंहितं च शरीरगुणत्वेनानन्वितमित्यर्थः। न हि येषां चाक्षुषत्वरासनत्वादिरूपवैधर्म्ययोगस्ते न शरीरगुणा इति दृष्टम्। अव्यावृत्तं च शरीरगुणानां तादृशवैधर्म्यदर्शनात्। तस्मादशरीरगुणत्वान्वयव्यतिरेकाभावाद्वैधर्म्यमात्रमेतत्। बाह्यकरणप्रत्यक्षाप्रत्यक्षशरीरगुणवैधर्म्यं मानसप्रत्यक्षत्वम् अन्वयव्यतिरेकि तु चेतनायाः शरीरगुणत्वसाधनं न भवति अपि तु तदन्यगुणत्वसाधनमित्यर्थः (ख)विशेषप्रतिषेधस्य शेषाभ्यनुज्ञाहेतुत्वादिति।

वृत्तिः

समाधत्ते—(ऐन्द्रियकत्वाद् रूपादीनामप्रतिषेधः)

रूपादीनां न शरीरगुणत्वप्रतिषेधः। कुतः? ऐन्द्रियकत्वात् तत्तदिन्द्रियाग्राह्यत्वलक्षणतत्तद्गुणवैधर्म्येऽपि शरीरगुणत्वावच्छिन्नवैधर्म्यस्य बहिरिन्द्रियाग्राह्यत्वे सति ग्राह्यत्वस्याभावात्। बुद्धौ च तत्सत्त्वादिति भावः ॥ ५५ ॥

समाप्तं बुद्धेः शरीरगुणभेदप्रकरणम् ॥ ५ ॥

---

(१) 'प्रत्यक्षत्वात्' इति टि०।

(२) 'यथेतरविधर्माणो' इति वि०।

(क) 'तु' शब्दो वार्त्तिके नोपलभ्यते।

(ख) स्थूलाक्षरैरादर्शपुस्तकयोर्मुद्रितोऽप्ययमंशो भाष्ये वार्त्तिके वा नोपलभ्यते इति सूक्ष्माक्षरैर्मुद्रितम्।

न्यायभाष्यम्

परीक्षिता बुद्धिः, मनस इदानीं परीक्षाक्रमः। तत् किं प्रतिशरीरमेकमनेकमिति विचारे—

(सू०)—ज्ञानायौगपद्यादेकं मनः ॥ ५६ ॥

अस्ति (१) खलु वै ज्ञानायौगपद्यमेकैकस्येन्द्रियस्य यथाविषयम्, करणस्यैकप्रत्ययनिर्वृत्तौ सामर्थ्यात्, न तदेकत्वे मनसो लिङ्गम्। यत्तु खल्विदमिन्द्रियान्तराणां विषयान्तरेषु ज्ञानायौगपद्यमिति तल्लिङ्गम्। कस्मात्? सम्भवति खलु वै बहुषु मनःस्विन्द्रियमनःसंयोगयौगपद्यमिति ज्ञानयौगपद्यं स्यात्, न तु भवति। तस्माद्विषये प्रत्ययपर्यायादेकं मनः ॥ ५६ ॥

न्यायवार्त्तिकम्

ये हेतवोऽनेन (२)प्रकरणेन लभ्यन्ते तेषां प्रयोगः—न शरीरगुणश्चेतना निमित्तान्तराभावे विरोधिगुणादर्शने च सत्ययावद्द्रव्यभावित्वात् अप्सु औष्ण्यवदिति। शरीरव्यापित्वादिति तु न साधनम्, किन्तु शरीरे चेतनां ब्रुवतो दोषोऽनेकचेतनत्वप्रसङ्गः। न शरीरगुणश्चेतना बाह्यकरणाप्रत्यक्षत्वात् सुखादिवदिति। अथेदं प्रकरणं निर्णीतार्थं कस्मात् पुनरारभ्यमिति? बहुधा परीक्ष्यमाणं तत्त्वं निश्चिततरं भवतीत्यत आरभ्यत इति ॥ ५५ ॥

(इति बुद्धेः शरीरगुणव्यतिरेकप्रकरणम्)

परीक्षिता बुद्धिरिति मनोऽवसरप्राप्तं परीक्ष्यते। तत् प्रतिशरीरमेकमनेकमिति वा विचारे—

ज्ञानायौगपद्यादेकं मनः। अयुगपज्ज्ञानानि भवन्तीति प्रत्यक्षम् एतच्च मनस एकत्वं साधयति। कथमिति? यदि बहूनि मनांसि स्युः प्रतीन्द्रियं मनसः सम्बन्ध इति युगपदनेकार्थसन्निधाने युगपदनेकज्ञानानि भवेयुः। यस्त्वेकेन्द्रियग्राह्येष्वर्थेषु विज्ञानानामयुगपद्भावः तन्न मनस एकत्वे लिङ्गम् अन्यतस्तद्भावात् अन्यथा हि करणत्वात्तद्भवतीत्युक्तम् ॥ ५६ ॥

न्यायवार्त्तिकतात्पर्यटीका

ये हेतव इति बहुवचनं हेत्वेकदेशविवक्षया। न शरीरगुणश्चेतना अयावद्द्रव्यभावित्वादित्युच्यमाने संस्कारेणानेकान्त इत्यत उक्तम्—निमित्तान्तराभाव इति। तथाऽपि पाकजेन गुणेनानेकान्त इत्यत उक्तं—विरोधिगुणादर्शने चेति। शरीरव्यापित्वादिति न साधनमिति। प्रसङ्गो हि न साधनं हेतोरभावात्। यथाऽऽहुः—'अस्ति (३)प्रसङ्गो न प्रसङ्गसाधनमिति। बाह्यकरणाप्रत्यक्षत्वादिति। न च गुरुत्वादिभिरनेकान्तः तेषां खल्वप्रत्यक्षत्वमेव न तु बाह्यकरणप्रत्यक्षत्वमिति भावः ॥ ५५ ॥

ज्ञाना—नः (सू० ५६)॥ मनःस्वरूपपरीक्षायां भाष्यवार्त्तिके निगदेनैव व्याख्याते ॥५६॥

(१) 'खलु' इति नास्ति वि—टि०। (२) 'प्रकारेण' इति ख-पु०-धृतपाठान्तरम्। (३) 'प्रसङ्गाः' इति क०।

(सू०)—न युगपदनेकक्रियोपलब्धेः ॥ ५७ ॥

न्यायभाष्यम्

अयं खल्वध्यापकोऽधीते व्रजति कमण्डलुं धारयति पन्थानं पश्यति (१)शृणोत्यारण्यजान् शब्दान्(१*) (२)बिभ्यद् (३)व्याललिङ्गानि बुभुत्सते स्मरति च गन्तव्यं (क)स्थानीयमिति। क्रमस्याग्रहणाद् युगपदेताः क्रिया इति प्राप्तं मनसो बहुत्वमिति ॥ ५७ ॥

(सू०)—अलातचक्रदर्शनवत्तदुपलब्धिराशुसञ्चारात् ॥ ५८ ॥

आशुसञ्चाराद् (ख)अलातस्य भ्रमतो विद्यमानः क्रमो न गृह्यते। क्रमस्याग्रहणाद्-

न्यायवार्त्तिकम्

न युगपदनेकक्रियोपलब्धेः इति। शेषं भाष्ये ॥ ५७ ॥

न्यायवार्त्तिकतात्पर्यटीका

न यु—ब्धेः (सू० ५७) ॥ (ग) संस्त्यानं स्थानम् ॥ ५७ ॥

वृत्तिः

अथ क्रमप्राप्ता मनःपरीक्षा। तत्र प्रतिशरीरमेकं मनः चक्षुरादिसहकारितया मनःपञ्चकं वेति संशये मनःपञ्चकमेवोचितम्, तेन प्रत्येकसकलमनःसम्बन्धासम्बन्धाभ्यां व्यासङ्गयौगपद्ये उपपद्येते इति पूर्वपक्षे सिद्धान्तसूत्रम्—(ज्ञानायौगपद्यादेकं मनः)

प्रतिशरीरं मनोनानात्वे व्यासङ्गस्थलेऽपि यौगपद्यं स्यादतो न मनोनानात्वमिति भावः ॥ ५६ ॥

दीर्घशष्कुलीभक्षणादौ ज्ञानयौगपद्यान्नानात्वं स्यादित्याशङ्कते—(न, युगपदनेकक्रियोपलब्धेः)

न एकं मनः अनेकक्रियाणाम् अनेकज्ञानानामुपलब्धेरित्यर्थः ॥ ५७ ॥

---

(१) 'शृणोत्यारण्यजीवशब्दान्' इति टि०। (२) 'बिभेति' इति ल-ग-भा०। 'बिभर्ति' इति वि०।

(३) 'व्यालिङ्गानि' इति वि०।

(क) 'स्थानीयम्' इति ल-ज०। 'संस्त्यायनम्' इति ग०। 'स्थानीयम्' इति फ-भा०। 'संस्त्यायनम्' इति 'संस्थापनम्' इति ल-पु० पाठान्तरतया धृतम्। 'स्थानीय'मिति पाठे नगरमित्यर्थः।

(ख) 'अलातः' अङ्गारम्। ज्वलदलातभ्रमणं चाद्यापि अनार्दैकतसवेषु क्रियमाणं दृश्यते।

(ग) क-तात्पर्ये 'संस्त्यापनं स्थापनम्' इति ख-तात्पर्ये च 'संस्थापनं स्थानम्' इति मुद्रितम्। शब्दकल्पद्रुमे संस्त्यायशब्दस्य गृहं सन्निवेश इत्यर्थौ दृश्येते। तथाच संस्त्यानशब्दस्यापि तथाऽर्थौ भवितुमर्हतीति "संस्त्यानं स्थानम्" इति 'संस्त्यायः स्थानम्' इति वा पाठः। टीकाकृता स्वीयभाष्यग्रन्थे 'संस्त्यानम्' इति उपलब्धमिति सम्भाव्य टीकायामपि तथा मुद्रितमस्माभिः। 'संस्त्यापन'मिति पाठे तु णिजर्थश्चिन्त्यः।

न्यायभाष्यम्

विच्छेदबुद्ध्या चक्रवद् बुद्धिर्भवतीति(१)। तथा बुद्धीनां क्रियाणां चाऽऽशुवृत्तित्वाद् विद्यमानः क्रमो न गृह्यते क्रमस्याग्रहणाद् युगपत् क्रिया भवन्तीति अभिमानो भवति।

किं पुनः क्रमस्याग्रहणाद् युगपत् क्रियाभिमानः, अथ युगपद्भावादेव युगपदनेकक्रियोपलब्धिरिति नात्र विशेषप्रतिपत्तेः कारणमुच्यते (२) इति। उक्तमिन्द्रियान्तराणां विषयान्तरेषु पर्यायेण बुद्धयो भवन्तीति तच्चाप्रत्याख्येयमात्मप्रत्यक्षत्वात्। अथापि दृष्टश्रुतानर्थान् चिन्तयतः क्रमेण बुद्धयो वर्तन्ते न युगपदतेनानुमातव्यमिति। वर्णपदवाक्यबुद्धीनां तदर्थबुद्धीनां चाऽऽशुवृत्तित्वात् क्रमस्याग्रहणम्। कथम्? वाक्यस्थेषु खलु वर्णेषूच्चरत्सु प्रतिवर्णं तावच्छ्रवणं भवति, श्रुतं वर्णमेकमनेकं वा पदभावेन (३)स प्रतिसन्धत्ते, प्रतिसन्धाय पदं व्यवस्यति, पदव्यवसायेन स्मृत्या पदार्थं प्रतिपद्यते, पदसमूहप्रतिसन्धानाच्च वाक्यं व्यवस्यति, सम्बद्धांश्च पदार्थान् गृहीत्वा वाक्यार्थं प्रतिपद्यते। न चाऽऽसां क्रमेण वर्तमानानां बुद्धीनामाशुवृत्तित्वात् क्रमो गृह्यते, तदेतदनुमानमन्यत्र बुद्धिक्रियायौगपद्याभिमानस्येति। न चास्ति मुक्तसंशया युगपदुत्पत्तिर्बुद्धीनां यया (४)मनसां बहुत्वमेकशरीरेऽनुमीयेत इति॥ ५८॥

न्यायवार्त्तिकम्

अस्योत्तरद्वारकं सूत्रम्—

अलातचक्रदर्शनवत् तदुपलब्धिराशुसञ्चारात्। यथाऽलातस्य भ्रमतो विद्यमानः क्रमो नोपलभ्यते तथा बुद्धीनामाशुभावाद् विद्यमानः क्रमो नोपलभ्यते (५, क)न चास्त्युभयपक्षसम्प्रतिपन्ना युगपदुत्पत्तिर्यया बहुत्वं मनसः प्रतिपद्येमहीति॥ ५८॥

न्यायवार्त्तिकतात्पर्यटीका

अला—रात् (सू० ५८)॥ (ख)

वृत्तिः

समाधत्ते—(अलातचक्रदर्शनवत् तदुपलब्धिराशुसञ्चारात्)

क्रमिकेऽपि 'तदुपलब्धिः' यौगपद्योपलब्धिः आशुसञ्चारात् शीघ्रसञ्चारात्मकदोषात्, यथा अलातचक्रे वेगातिशयेन भ्राम्यमाणे क्रियासन्तानस्य भेदेनानुपलब्धिरिति॥ ५८॥

---

(१) 'इति' शब्दः ग-पु० नास्ति।

(२) 'इति' शब्दः ग०पु० नास्ति। (३) 'स' इति फ-ग-झा-पु० नास्ति। (४) 'मनसः' इति ग०।

(५) 'न चास्त्योभयपक्षसम्प्रतिपन्ना' इति क-खष्ठतपाठान्तरम्।

(क) सूत्रोक्तं पूर्वपक्षिणोऽभिमानं निरस्यति नेति।

(ख) ५८तम-सूत्रे तात्पर्यटीका नोपलभ्यते।

(सू०)—यथोक्तहेतुत्वाच्चाणु ॥ ५९ ॥

न्यायभाष्यम्

अणु मन एकं चेति धर्मसमुच्चयो ज्ञानायौगपद्यात्। महत्त्वे मनसः सर्वेन्द्रियसंयोगाद् युगपद्विषयग्रहणं स्यादिति ॥ ५९ ॥

मनसः खलु भोः सेन्द्रियस्य शरीरे वृत्तिलाभो नान्यत्र शरीरात्। ज्ञातुश्च पुरुषस्य शरीरायतना बुद्ध्यादयो विषयोपभोगो जिहासितहानमीप्सितावाप्तिश्च सर्वे च शरीराश्रया व्यवहाराः। तत्र खलु विप्रतिपत्तेः संशयः—किमयं पुरुषकर्मनिमित्तः शरीरसर्गः आहोस्विद् भूतमात्रादकर्मनिमित्त इति। श्रूयते खल्वत्र विप्रतिपत्तिरिति।

तत्रेदं तत्त्वम्—

(सू०)—पूर्वकृतफलानुबन्धात्तदुत्पत्तिः ॥ ६० ॥

पूर्वशरीरे या प्रवृत्तिर्वाग्बुद्धिशरीरारम्भलक्षणा तत्पूर्वकृतं कर्मोक्तम्. तस्य फलं

न्यायवार्त्तिकम्

(१) यथोक्तहेतुत्वाच्चाणु। य एवैकत्वे हेतुर्मनस उक्तोऽनेनैवाणु मनोऽवसातव्यमिति ॥ ५९ ॥

(इति मनःपरीक्षाप्रकरणम्।)

मनसः खलु भोः सेन्द्रियशरीरे वृत्तिः। शरीरे (२) विचार्यमाणे मन एव विचारितं भवत्यतः शरीरं पुनर्विचार्यते—किमयं शरीरसर्गः कर्मनिरपेक्षैर्भूतैरारभ्यते आहोस्वित् सापेक्षैरिति। विप्रतिपत्तेः संशयः—श्रूयते खल्वत्र विप्रतिपत्तिः।

तत्रेदं तत्त्वम्—

पूर्वकृतफलानुबन्धात् तदुत्पत्तिः। पूर्वशरीरे या प्रवृत्तिर्वाग्बुद्धिशरीरारम्भलक्षणा

न्यायवार्त्तिकतात्पर्यटीका

यथो—णु (सू० ५९) ॥ (क)

मनसि विचार्यमाणे कः संबन्धः शरीरोत्पत्तिनिमित्तविचारस्येत्यत आह—मनसः खल्विति। मन एवाधिकरणविचारेणापि परीक्ष्यत इति नासंबन्धः शरीरोत्पत्तिनिमित्तविचारस्य। परित ईक्षा परीक्षा सा च स्वरूपतश्च संबन्धितश्च, शरीरं च मनःसंबन्धि, तदधिकरणत्वान्मनसः। तस्मान्मनस एव परीक्षा या शरीरस्येत्यर्थः।

वृत्तिः

ननु यौगपद्योपपादकतया मनसो वैभवं स्यादत्राऽऽह—(यथोक्तहेतुत्वाच्चाणु)

(१) 'यथोक्तनिमित्तत्वाच्चाणु' इति क-खपुस्तपाठान्तरम्। (२) 'विचारिते' इति क-खपुस्तपाठान्तरम्।
(क) ५९तम-सूत्रे तात्पर्यटीका नोपलभ्यते।

न्यायभाष्यम्

तज्जनितौ धर्माधर्मौ। तत्फलस्यानुबन्ध आत्मसमवेतस्यावस्थानम्, तेन प्रयुक्तेभ्यो भूतेभ्यस्तस्योत्पत्तिः शरीरस्य, न स्वतन्त्रेभ्य इति। यदधिष्ठानोऽयमात्मा (१)अयमहमिति मन्यमानो यत्राभियुक्तो यत्रोपभोगतृष्णया विषयानुपलभमानो धर्माधर्मौ संस्करोति तदस्य शरीरम्, तेन संस्कारेण धर्माधर्मलक्षणेन भूतसहिते पतितेऽस्मिन् शरीरे (२)उत्तरं निष्पद्यते, निष्पन्नस्य चास्य पूर्वशरीरवत्पुरुषार्थक्रिया, पुरुषस्य च पूर्वशरीरवत्

न्यायवार्त्तिकम्

तत् पूर्वकृतम्, तस्य फलं—तज्जनितौ धर्माधर्मौ, तयोरनुबन्धः—आत्मसमवेतयोरवस्थानम्, विपाककालस्यानियमात्—अनियतो विपाककाल इहामुत्र जात्यन्तरे चेति। तेनावस्थितेन प्रयुक्तेभ्यो भूतेभ्यः तस्य शरीरस्योत्पत्तिर्न स्वतन्त्रेभ्यः। कस्मात् पुनः कर्म धर्माधर्मसंज्ञकमुत्पत्तिसमकालं फलं न ददाति? क एवमाह न ददातीति विपाककालस्यानियमात्—यदाऽशेषकारणसन्निधानं भवति, सन्निधानेऽपि यदा कारणान्यप्रतिबद्धानि भवन्ति तदा (३)ददात्येव; यदा पुनर्न ददाति तदा विपच्यमानकर्मातिशयप्रतिबन्धात्—यो विपच्यमानः कर्मातिशयो भवति यस्य (४)धर्माधर्मसमाख्या सोऽनुपभुक्तफलः तेन प्रतिबन्धाद् विद्यमानमपि कर्म फलं न ददाति। यानि वा प्राण्यन्तराणि तस्य कर्मणः समानोपभोगानि तेषां विपच्यमानैः

न्यायवार्त्तिकतात्पर्यटीका

पूर्व—त्तिः (सू० ६०)॥ उत्पत्तिसमकालमिति। सममिव समम्, उत्पत्त्यनन्तरमित्यर्थः। क एवमाह न ददातीति। यदि समग्रं भवति तत उत्पत्त्यनन्तरं दास्यत्येवेत्यर्थः। विपच्यमानः (क)कर्मातिशय इति, स्वफलं भोजयन्नित्यर्थः। यानि वा प्राण्यन्तराणि तस्य कर्मणः समानोपभोगानीति। तद् यथा किन्नरत्वनिर्वर्त्तनीयं कर्म स्त्रीपुंसभोग्यं स्त्रीपुंसयोरन्यतरकर्मप्रतिबन्धे फलं न ददातीति। यानि (ख) प्राण्यन्तराणि स्नेहविषया भ्रात्रादयः तस्य कर्मणो (५)भागीनीति कर्मफलानाम् (ग)अन्नाद्यश्वग्रामादीनां भागित्वात् कर्म-

वृत्तिः

मन इति शेषः। यथोक्तस्य ज्ञानायौगपद्यस्य हेतुत्वाद् मनोऽणुत्वसाधकत्वादित्यर्थः॥ ५९॥

समाप्तं मनःपरीक्षाप्रकरणम्॥ ६॥

अथ प्रसङ्गाच्छरीरस्य तत्तत्पुरुषादृष्टनिष्पाद्यताप्रकरणम्। अथवा एकत्रैव शरीरे मनसः सर्वैरात्मभिः सह संयोगात् सर्वत्रैव मनसा ज्ञानं जन्यतामतस्तत्तददृष्टजन्यताप्रति-

---

(१) 'यमह'मिति ज०। (२) 'शरीरान्तरम्' इति फ०। (३) 'ददात्यपि' इति क-ख-धृतपाठान्तरम्। (४) 'धर्माधर्मसमाख्यातोऽनुप'- इति ख०। (५) 'भोगीनि' इति क०।

(क) कर्माशय इति प्रमादान्मुद्रितम्, वार्त्तिके कर्मातिशयपदस्यैव दर्शनादिति बोध्यम्। (ख) वार्त्तिकगत'वा'शब्दो न गृहीतः। (ग) 'अन्नाद्याश्वग्रामादीनाम्' इति क-ख-पुस्तकयोर्मुद्रितम्। तस्य याथार्थ्यम् 'आद्य'शब्दप्रयोगस्वीकारेणोपपादनीयम्।

प्रवृत्तिरिति कर्मापेक्षेभ्यो भूतेभ्यः शरीरसर्गे सत्येतदुपपद्यते इति। दृष्टा च पुरुषगुणेन प्रयत्नेन प्रयुक्तेभ्यो भूतेभ्यः पुरुषार्थक्रियासमर्थानां द्रव्याणां रथप्रभृतीनामुत्पत्तिः। (१)तथाऽनुमातव्यं शरीरमपि पुरुषार्थक्रियासमर्थमुत्पद्यमानं पुरुषस्य गुणान्तरापेक्षेभ्यो भूतेभ्य उत्पद्यते इति ॥ ६० ॥

न्यायवार्त्तिकम्

कर्माशयैः प्रतिबन्धात् न सर्वदा फलम्। यानि वा प्राण्यन्तराणि कर्मभागीनि तस्य कर्मणस्तत्कर्मभिः प्रतिबन्धात् तस्य वा कर्मणः सहकारिधर्माधर्मलक्षणं निमित्तं नास्तीत्यतः फलस्यानारम्भः, तस्य वा सहकारिणः प्रतिबन्धात्, सत्त्वान्तरकर्मणां वा सहकारिणां प्रतिबन्धात् न सर्वदा फलं धर्माधर्मौ प्रयच्छत इति। दुर्विज्ञेया च कर्मगतिः सा न शक्या मनुष्यधर्मणाऽवधारयितुम्। आकृतिमात्रं तूक्तम्।

कः पुनरत्र न्यायः कर्मतन्त्राणि भूतानि शरीरमारभन्ते न निरपेक्षाणीति? अयं न्यायोऽभिधीयते—पुरुषविशेषगुणप्रेरितभूतपूर्वकं शरीरं कार्यत्वे सति पुरुषार्थक्रियासामर्थ्यात् यत् पुरुषार्थसमर्थं तत् पुरुषविशेषगुणप्रेरितभूतपूर्वकं दृष्टं यथा रथादि पुरुषविशेषगुणेन प्रयत्नेन प्रेरितैर्भूतैरारभ्यमाणं पुरुषार्थक्रियासमर्थं दृष्टं तथा च शरीरम्, तस्मादिदमपि सापेक्षैर्भूतैरारभ्यते

न्यायवार्त्तिकतात्पर्यटीका

(क)भागीनीत्युच्यन्ते तेषां प्राणिनां कर्मभिरभाग्यादिशब्दवाच्यैः प्रतिबन्धादिति। **तस्य वा कर्मणः सहकारि धर्माधर्मलक्षणं निमित्तं नास्तीति।** अयमर्थः। दुष्टानां सेवादिकर्मणां व्यभिचाराद् ग्रामादिलाभेऽदृष्टं कारणं कल्पनीयम्। यथाहुः 'तच्चैव तत्र कारणं शब्दश्च' इति, दृष्टं सेवादि (ख)च कारणम्, शब्दश्चेति विषयिणा तद्विषयमदृष्टमुपलक्षयति। ते च ग्रामादयस्तस्माददृष्टादुपजायमाना अन्तरा विघ्ननाशाय देवतानमस्कारादिजनितमपि धर्ममपेक्षन्ते (ग)तस्मात् प्राग्भवीयेण धर्मेण स्वफलनिर्वर्त्तनाय धर्मान्तरं सहकार्यपेक्ष्यते सहकारिणां च वैचित्र्यात् प्रतिबन्धापगमहेतोरपि सहकारित्वाविरोधः। तेन कर्मणः सहकारिनिमित्ताभावात् प्रतिबद्धमदृष्टं फलं न जनयतीत्यर्थः। **तस्य वा कर्मणः सहकारिणः** कारणस्य गरीयसा कर्मान्तरेण प्रतिबन्धात् **फलस्यानारम्भः।** एवं स्वकर्मणां सहकारिनिमित्ताभावप्रतिबन्धावुक्त्वा समानोपभोगसत्त्वान्तरकर्मणामपि सहकारिनिमित्ताभावप्रतिबन्धौ दर्शयति—**सत्त्वान्तरकर्मणां** (घ)**वेति।**

वृत्तिः

पादनप्रकरणम्। तत्र शरीरं तत्तत्पुरुषसमवेतादृष्टनिमित्तकं न वेति विप्रतिपत्तौ निषेधकोटिस्त्रेधा—अदृष्टाभावात्, तस्य शरीरहेतुत्वाभावात्, अदृष्टस्य पुरुषसमवायाभावाद्वा। तत्राऽऽद्यपक्षं निरस्यति—(पूर्वकृतफलानुबन्धात्तदुत्पत्तिः)

---

(१) 'तथा' इति ज० ग०।

(क) '-भोगीनि' इति क०। (ख) क-तात्पर्ये 'च'कारो न मुद्रितः। (ग) पूर्वोक्तमेव विवृणोति तस्मादिति। (घ) क-ख-पुस्तकयोः 'चेति' इति मुद्रितम्।

न्यायभाष्यम्

अत्र नास्तिक आह—

(सू०)—भूतेभ्यो मूर्त्युपादानवत्तदुपादानम् ॥ ६१ ॥

यथा कर्मनिरपेक्षेभ्यो भूतेभ्यो निर्वृत्ता मूर्तयः सिकता-शर्करा-पाषाण-गैरिकाञ्जन-प्रभृतयः पुरुषार्थकारित्वादुपादीयन्ते तथा कर्मनिरपेक्षेभ्यो भूतेभ्यः शरीरमुत्पन्नं पुरुषार्थकारित्वादुपादीयते इति ॥ ६१ ॥

(सू०)—न, साध्यसमत्वात् ॥ ६२ ॥

यथा शरीरोत्पत्तिरकर्मनिमित्ता साध्या तथा सिकता-शर्करा-पाषाण-गैरिकाञ्जन-प्रभृतीनामप्यकर्मनिमित्तः सर्गः साध्यः साध्यसमत्वादसाधनमिति भूतेभ्यो(१)मूर्त्युपादानवदिति चानेन (क)साध्यम् ॥ ६२ ॥

न्यायवार्त्तिकम्

सुखदुःखनिमित्तत्वाद् घटादिवदिति। इतश्च कार्यत्वाद् रथादिवत् (२)बाह्यकरणग्राह्यत्वे सति रूपादिमत्त्वाद् घटादिवदेव ॥ ६० ॥

अत्र नास्तिक एवमाह—

भूतेभ्यो मूर्त्युपादानवत् तदुपादानम्। यथा कर्मनिरपेक्षेभ्यो भूतेभ्यो निर्वर्त्या मूर्तयः सिकताशर्करागैरिकाञ्जनप्रभृतयः पुरुषार्थक्रियाकारित्वादुपादीयन्ते तथा शरीरसर्गोऽपीति पुरुषार्थ-क्रियासामर्थ्यादित्येतस्य हेतोरनैकान्तिकद्वारकं सूत्रम्। साधनपक्षे दृष्टान्तमात्रत्वादसिद्धम् ॥ ६१ ॥

न्यायवार्त्तिकतात्पर्यटीका

रूपादिमत्त्वादित्युच्यमाने परमाणुभिरनेकान्तः स्यादत आह—बाह्यकरणग्राह्यत्वे सतीति। इन्द्रियग्राह्यत्वे सतीत्येतावतैव सिद्धे इन्द्रियग्राह्यराशेर्बाह्यकरणग्राह्यं राश्यन्तरमित्येतावन्मात्र(३)विवक्षया बाह्यकरणग्राह्यत्वे सतीत्युक्तम् ॥ ६० ॥

भूते—नम् (सू० ६१) ॥ (ख)

वृत्तिः

पूर्वकृतस्य याग-दान-हिंसादेः फलस्य धर्माधर्मरूपस्य अनुबन्धात् सहकारिभावात् तस्य शरीरस्योत्पत्तिः ॥ ६० ॥

---

(१) 'मूर्त्त्युपादानवदिति' इति ख०, 'मूर्त्त्युपादानमिति' इति वि०, 'मूर्त्त्युपादानवत्तदिति' इति टि०।
(२) 'बाह्यकरणप्रत्यक्षत्वे सति' इति वा-खध्टतपाठान्तरम्। (३) '-विवक्षणे' इति ख०।
(क) साध्यमित्यत्र 'साम्यम्' इति ग-पुस्तकपाठः। तन्मते 'भूतेभ्यो मूर्त्त्युपादानवदिति चानेन साम्यम्' इत्येतत् उत्तरसूत्रावतरणिकारूपं सूत्रस्थेन 'न' इत्यनेन सम्बध्यते इति बोध्यम्।
(ख) ६१तम-सूत्रे तात्पर्यटीका नोपलभ्यते।

(सू०)—नोत्पत्तिनिमित्तत्वान्मातापित्रोः ॥ ६३ ॥

न्यायभाष्यम्

विषमश्चायमुपन्यासः। कस्मात्? निर्बीजा इमा मूर्तय उत्पद्यन्ते बीजपूर्विका तु शरीरोत्पत्तिः। मातापितृशब्देन लोहितरेतसी बीजभूते गृह्येते। तत्र सत्त्वस्य गर्भवासानुभवनीयं कर्म पित्रोश्च पुत्रफलानुभवनीये कर्मणी मातुर्गर्भाशये शरीरोत्पत्तिं भूतेभ्यः प्रयोजयन्तीत्युपपन्नं बीजानुविधानमिति ॥ ६३ ॥

न्यायवार्त्तिकम्

अथ पक्षः कर्मनिरपेक्षाणि भूतानि शरीरमारभन्ते पुरुषार्थक्रियासामर्थ्यात् सिकतादिवदिति? एतच्च—

न साध्यसमत्वात्। यथैव शरीरसर्गः कर्मनिरपेक्षैर्भूतैरारभ्यत इति साध्यं तथा सिकतादीनामकर्मनिमित्तः सर्गः साध्यत इति। सिकतादीनामपि कर्मनिमित्तः सर्ग इत्येतस्मादेव हेतोः सिध्यतीति। यथा चोभयपक्षसम्प्रतिपन्नो रथादिर्दृष्टान्तः पुरुषविशेषगुणप्रेरितभूतपूर्वकोऽस्ति न तथा अकर्मनिमित्तसर्गपक्षे दृष्टान्तोऽस्तीति ॥ ६२ ॥

नोत्पत्तिनिमित्तत्वान्मातापित्रोः। विषमश्चायमुपन्यासः भूतेभ्यो मूर्त्युपादानवदिति। मातापितृशब्देन लोहितरेतसी बीजभूते गृह्येते—तत्र पित्रोः पुत्रफलानुभवनीये कर्मणी सत्त्वस्य गर्भवासानुभवनीयं कर्म सह मातृगर्भाशये शरीरोत्पत्तिं प्रयोजयति। तत्र चोपपन्नं बीजानुविधानम्, बीजानुविधानाच्च यज्जातीयौ तस्य पितरौ तज्जातीयः सम्भवतीति ॥ ६३ ॥

न्यायवार्त्तिकतात्पर्यटीका

न सा—त्वात् (सू० ६२)॥ सिकतादिदृष्टान्तस्य साध्यसमतयैव पुरुषार्थक्रिया-(१)सामर्थ्यादित्यस्य हेतोरनैकान्तिकत्वोद्भावनमपि प्रत्युक्तम्। सिकतादीनामपि कथंचित् पुरुषार्थहेतुत्वात्तत्सर्गः पुरुषगुणपूर्वक इत्युक्तम् ॥ ६२ ॥

मा भूद्वा पुरुषगुणपूर्वकत्वं सिकतादिसर्गस्य तथाऽपि शरीरस्योत्पत्त्यादि परिभावयन्तः सिकतादिभ्यो वैषम्यं वीक्षमाणास्तद्विलक्षणकारणत्वमेव प्रतिपद्यामहे तथा च सिध्यति पुरुषगुणनिमित्ततेत्याह—विषमश्चायमुपन्यास इति।

नोत्—त्रोः (सू० ६३) ॥ ननु मातापितरौ न साक्षाच्छरीरोत्पत्तौ कारणमित्यत आह—मातापितृशब्देन लोहितरेतसी इति। अनुभवनीये इति भव्यगेयादिपाठात् कर्तरि कृत्यः ॥६३॥

वृत्तिः

आक्षिपति—(भूतेभ्यो मूर्त्युपादानवत्तदुपादानम्)

भूतेभ्य इति सावधारणम्। तथा च अदृष्टनिरपेक्षेभ्यो भूतेभ्यः परमाणुभ्यो मूर्त्तेः मृदादेः उपादानम् आरम्भो यथा तथैव तस्य शरीरस्य उपादानमारम्भः परमाणुभ्योऽदृष्टनिरपेक्षेभ्य इत्यर्थः ॥ ६१ ॥

(१) '-सामान्यादि' इति क०।

(सू०)—तथाहारस्य ॥ ६४ ॥

न्यायभाष्यम्

उत्पत्तिनिमित्तत्वादिति प्रकृतम्। भुक्तं पीतमाहारः तस्य पक्तिनिर्वृत्तं रसद्रव्यं मातृशरीरे (१)चोपचीयते बीजे गर्भाशयस्थे बीजसमानपाकम्, मात्रया चोपचयो बीजे यावद्व्यूहसमर्थः सञ्चय इति। सञ्चितं च (क, २)कललार्बुदमांसपेशी(२*, ३)कण्डरा-(४)शिरःपाण्यादिना च व्यूहेनेन्द्रियाधिष्ठानभेदेन व्युह्यते, व्यूहे च गर्भनाड्याऽवतारितं रसद्रव्यमुपचीयते यावत्प्रसवसमर्थमिति। न चायमन्नपानस्य स्थाल्यादिगतस्य कल्पत इति। एतस्मात् कारणात् कर्मनिमित्तत्वं शरीरस्य विज्ञायत इति ॥ ६४ ॥

न्यायवार्त्तिकम्

तथाहारस्य। उत्पत्तिनिमित्तत्वादिति प्रकृतम्। एतदपि सिकतादिभिर्वैधर्म्यमेवोच्यते। अशितपीतमाहारः तस्य पाकाद् रसद्रव्यं निर्वर्त्यते तन्मातृशरीरे उपचीयते, गर्भशरीरे चोपचितं कललादिभावेनोपचीयमानं कर्मसापेक्षभूतैः पाण्यादिभावमापद्यते। यदि पुनः कर्मनिरपेक्षाणि भूतानि स्युः स्थाल्यादिगतमिवान्नं पच्येत, न त्विदमस्ति तस्मात् सापेक्षाणीति ॥ ६४ ॥

न्यायवार्त्तिकतात्पर्यटीका

इतोऽपि वैषम्यमित्याह—

तथाऽऽहारस्य (सू० ६४) ॥ पूर्वसूत्रप्रतीकेन पूरयति—उत्पत्तिनिमित्तत्वादिति प्रकृतम्। कलल-कण्डर-मांसपेश्यादयो लोहितरेतसोः शरीरारम्भकयोः परिणामभेदाः ॥ ६४ ॥

वृत्तिः

समाधत्ते—(न साध्यसमत्वात्)

नोक्तं युक्तं दृष्टान्तस्य साध्यसमत्वात् पक्षसमत्वात्। मृदादेरप्यदृष्टसापेक्षपरमाणुभ्य एवोत्पत्तेरुपगमात् तदजन्यत्वस्य तत्रासिद्धेरिति भावः ॥ ६२ ॥

न मृदादिसाम्यमित्याह सूत्राभ्याम्—('नोत्पत्तिनिमित्तत्वान्मातापित्रोः' इति 'तथा आहारस्य' इति)

शरीरे न मृदादिसाम्यं मातापित्रोः कर्मणः शरीरोत्पत्तिनिमित्तत्वात्। पुत्रदर्शनादि-जन्यसुखानुभावकादृष्टस्य देवाराधनादिजन्यस्य पुत्रादिनिमित्तत्वात्। एवं मातापित्रो-राहारस्य शरीरोत्पत्तिनिमित्तत्वाददृष्टसहकारेणाऽऽहारस्य शुक्रशोणितादिद्वारा कललादि-जनकत्वात्।

आहारस्य पितामहपिण्डभोजनादेरदृष्टद्वारेण पुत्रजनकत्वादित्यर्थ इत्यन्ये ॥६३-६४॥

---

(१) 'चोपचिते' इति ख-ग-झा०। (२) 'अर्बुदमांसपेशीकलल' इति ख-ग०। (३) '-कण्डर-' इति ख-झा-ग०, 'कन्धर' इति टि०। (४) —'शिरःपाणिपादादिना' इति ज-त्रि०।

(क) 'ऋतुकाले संप्रयोगादेकरात्रोषितं कललं भवति, सप्तरात्रोषितं बुद्बुदं भवति' इति गर्भोपनिषद्। प्रथमे मासि संक्लेदभूतो धातुर्विमूर्च्छितः। मास्यर्बुदं द्वितीये तु तृतीयेऽङ्गेन्द्रियैर्युतः॥ इति याज्ञवल्क्यसंहिता।

(सू०)—प्राप्तौ चानियमात् ॥ ६५ ॥

न्यायभाष्यम्

न सर्वो दम्पत्योः संयोगो गर्भाधानहेतुर्दृश्यते तत्रासति कर्मणि न भवति सति च भवतीति (क)अनुपपन्नो नियमाभाव इति। कर्मनिरपेक्षेषु भूतेषु शरीरोत्पत्तिहेतुषु (१) नियमः स्यात् न ह्यत्र कारणाभाव इति ॥ ६५ ॥

न्यायवार्त्तिकम्

प्राप्तौ चानियमात्। कर्मनिरपेक्षाणि भूतानि शरीरमारभन्त इति सर्वो दम्पत्योः संयोगः पुत्रादिफलकः स्यात्। कर्मसापेक्षेषु भूतेषूपपन्नो नियमाभाव इति ॥ ६५ ॥

सर्वात्मभिः सम्बन्धात् साधारणविग्रहवत्त्वप्रसङ्गः नियमहेत्वभावादिति चेत्—अथ मन्यसे शरीरं सर्वात्मभिः सम्बध्यते संयोगजेन (ख) च संयोगेन क्रियाजेन वा, तत्र शरीरादिगतो न कश्चित्(ग)नियमहेतुरिति येन शरीरमेव तस्याऽऽत्मनो व्यवतिष्ठेत, न च पुरुषगतो विशेषः कश्चिद्

न्यायवार्त्तिकतात्पर्यटीका

प्राप्तौ—मात् (सू० ६५) ॥ दम्पत्योः संयोगः प्राप्तिः तस्यामनियमः शरीरोत्पादस्य तस्मात्। दृष्टस्य व्यभिचारादस्ति तददृष्टं यतः शरीरसर्ग इत्यर्थः।

पार्श्वस्थः शङ्कते—सर्वात्मभिरिति। ननु यदीयेनादृष्टेन यच्छरीरमुपात्तं तत्तस्यैव भोगायतनं नान्यस्येति नानियम इत्यत आह—न च पुरुषगत इति। आत्ममनःसन्निकर्षजौ हि धर्माधर्मौ सन्निकर्षश्च मनसः सर्वात्मभिः साधारण इति सर्वेषामेव धर्माधर्मौ न पुनः कस्यचिदेवासाधारणावित्यर्थः। अस्योत्तरम्—शरीरेति।

वृत्तिः

आहारस्यादृष्टसहकारित्वे विपक्षे बाधकमाह—(प्राप्तौ चानियमात्)

प्राप्तौ दम्पत्योः सम्प्रयोगे तु गर्भधारणस्य यतो न नियमस्ततोऽदृष्टस्य सहकारित्वमावश्यकमिति भावः ॥ ६५ ॥

---

(१) अनियमः—इति ज०।

(क) अत्र 'उपपन्नो नियमाभावः' इति पाठः सम्भाव्यते उत्तरग्रन्थे पूर्वपक्षिमते नियमस्य दम्पतिसंयोगे गर्भाधानव्याप्यत्वरूपस्याऽऽपाद्यतया सिद्धान्ते तदभावस्य उपपन्नताया एव वक्तुमुचितत्वात्। अत एव वार्त्तिके "कर्मसापेक्षेषु भूतेषूपपन्नो नियमाभावः" इति दृश्यते।

(ख) 'च' शब्दार्थश्चिन्त्यः।

(ग) 'नियमहेतुरस्ति' इति पाठः सम्भाव्यते।

न्यायभाष्यम्

अथापि—

(सू०)—शरीरोत्पत्तिनिमित्तवत्संयोगोत्पत्तिनिमित्तं कर्म ॥६६॥

(१)यथा खलु इदं शरीरं धातुप्राणसंवाहिनीनां नाडीनां शुक्रान्तानां धातूनां च स्नायुत्वगस्थिशिरापेशीकललकण्डराणां च (२)शिरोबाहूदराणां सक्थ्नां च (क)कोष्ठगानां वातपित्तकफानां च मुखहृदयामाशयपक्वाशयाधःस्रोतसां च परमदुःखसम्पादनीयेन (३)सन्निवेशेन (४)व्यूहनमशक्यं पृथिव्यादिभिः कर्मनिरपेक्षैरुत्पादयितुमिति कर्मनिमित्ता शरीरोत्पत्तिरिति विज्ञायते ; एवं च प्रत्यात्मनियतस्य निमित्तस्याभावान्निरतिशयैरात्मभिः सम्बन्धात् सर्वात्मनां च समानैः पृथिव्यादिभिरुत्पादितं शरीरं पृथिव्यादिगतस्य च नियमहेतोरभावात् सर्वात्मनां सुखदुःखसंवित्त्यायतनं समानं प्राप्तम् । यत्तु प्रत्यात्मं व्यवतिष्ठते तत्र शरीरोत्पत्तिनिमित्तं कर्म व्यवस्थाहेतुरिति विज्ञायते । परिपच्यमानो हि प्रत्यात्मनियतः कर्माशयो यस्मिन्नात्मनि वर्तते तस्यैवोपभोगायतनं शरीरमुत्पाद्य व्यवस्थापयति । तदेवं 'शरीरोत्पत्तिनिमित्तवत्संयोगनिमित्तं कर्मे'ति विज्ञायते । प्रत्यात्मव्यवस्थानं तु शरीरस्याऽऽत्मना संयोगं प्रचक्ष्महे इति ॥ ६६ ॥

न्यायवार्तिकम्

विद्यते येन शरीरमेकस्य पुरुषस्य उपभोगसाधनं भवेत्, अस्ति च नियमः, तस्माद् वक्तव्यो नियमहेतुरिति । अस्योत्तरद्वारकं सूत्रम्—

शरीरोत्पत्तिनिमित्तवत् संयोगोत्पत्तिनिमित्तं कर्म । येनैव कर्मणा शरीरमुत्पाद्यते तदेव संयोगं नियमयति अकर्मनिमित्ते तु शरीरसर्गे यथोक्तदोष इति ।

तत्स्थता कुत इति चेत्—अथ मन्यसे यदि कर्म नियामकं शरीरसर्गस्याथ कर्मणि कुतो नियम इति ? न, स्वसंयोगोत्पत्तिनियमात्—यो यस्याऽऽत्मनः संयोगः तस्माद् यत् कर्मोपजायते

न्यायवार्त्तिकतात्पर्यटीका

शरी--र्म (सू० ६६) ॥ उक्तेनैवाभिप्रायेण शङ्कते—तत्स्थता एकपुरुषस्थता कुत इति चेत् । उत्तरम्—न स्वसंयोगेति । पुनः पृच्छति—संयोगे कुतो नियम इति । यथै-

---

(१) 'तथा' इति टि० ।

(२) 'शिरोबाहूदरसक्थ्नां' इति केचिद् युक्तं मन्यन्ते ।

(३) 'कष्टसन्निवेशेन' इति ल० । (४) 'व्यूहितम्' इति फ० ।

(क) स्थानान्यामाग्निपक्वानां मूत्रस्य रुधिरस्य च ।

हृदुण्डुकः फुप्फुसश्च कोष्ठ इत्यभिधीयते ॥ इति, सुश्रुतः, चिकित्सितस्थानं २य अ;।

(सू०)—एतेनानियमः प्रत्युक्तः ॥ ६७ ॥

न्यायभाष्यम्

(क)योऽयमकर्मनिमित्ते शरीरसर्गे सत्यनियम इत्युच्यते, अयं शरीरोत्पत्ति-

न्यायवार्त्तिकम्

तत्तस्य भवतीति। संयोगे कुतो नियम इति—यथैव कर्मणि पर्यनुयोगो न व्यावर्तते तथा संयोगेऽपीति ? न, मनोनियमहेतुत्वात्—यस्याऽऽत्मनो यन्मनस्तेन यः संयोगो जन्यते स तस्य भवतीति। मनस्यपि तुल्यम्—मनसस्तर्हि सर्वात्मभिः सम्बन्धात् किं नियामकमिति ? कर्मैव—यन्मनो यदीयेन कर्मणा उपनिबद्धं तदीयं तद्भवतीति। सर्गादौ कथमिति चेत् सर्गादे-रनभ्युपगमाददेश्यम्। अनादिः संसारः पूर्वाभ्यस्तसूत्रे प्रतिपादितमेतत्। आदिमति संसार एष देश्यो नानादाविति ॥ ६६ ॥

न्यायवार्त्तिकतात्पर्यटीका

वैकेनाऽऽत्मना मनः संयुक्तमेवमात्मान्तरैरपि एवं यथैकेन मनसा स आत्मा संयुक्त एवं मनोऽन्तरै-रपीति नाऽऽत्ममनःसन्निकर्षेऽस्ति विशेष इत्यर्थः। उत्तरम्—न **मनोनियमहेतुत्वादिति**। अदृष्टनियमनिबन्धनो हि मनोनियमः मनोनियमनिबन्धनश्चादृष्टनियमः। अनादित्वाच्च बीजाङ्कुरवदन्योन्याश्रयो न क्षतिमावहतीत्यर्थः ॥ ६६ ॥

वृत्तिः

नन्वदृष्टनिरपेक्षैरेव भूतैः कैश्चित् स्वभावविशेषाच्छरीरं जन्यताम्, स्वभावानभ्युपगमे च शरीरस्य सर्वात्मसंयुक्तत्वात् साधारण्यापत्तिरत आह—(शरीरोत्पत्तिनिमित्तवत् संयोगोत्पत्तिनिमित्तं कर्म)

अयमर्थः—शरीरस्य सर्वात्मसंयुक्तत्वेऽपि संयोगविशेषोऽवच्छेदकतालक्षणो येनाऽऽत्मना सह तदीयं तच्छरीरम्। संयोगविशेष एव कुत इत्यत आह—संयोगेति। संयोग-विशेषोत्पत्तौ कर्म अदृष्टविशेषो निमित्तम्, यथा शरीरोत्पत्तावदृष्टविशेषो निमित्तमिति। संयोग-विशेषस्तदात्मज्ञानजननियामको जातिविशेष एव।

संयोगः शरीरावयवसंस्थानविशेष इति कश्चित् ॥ ६६ ॥

(क) 'योऽयमकर्मनिमित्ते शरीरसर्गे सत्यनियम इत्युच्यते' इत्यत्र "सोऽयमकर्मनिमित्ते शरीरसर्गे मते नियम इत्युच्यते" इति पाठान्तरं तत्रभवद्भिर्गङ्गाधरशास्त्रिभिः क्वचिदुपलब्धमिति तत्सम्पादित ग पुस्तक-दर्शनेन परिज्ञायते। तत्रेदं चिन्त्यते 'प्राप्तौ चानियमात्' इति ६५-तम-सूत्रभाष्ये कर्मनिरपेक्षशरीर-सृष्टिमते नियम एवापाद्यतयोक्तः। स च नियमस्तत्र दम्पतिसंयोग-गर्भाधानयोर्व्याप्यव्यापकभावरूप इति तत्र व्याख्यातोऽपि इह अन्यादृश इति उभयसूत्रभाष्यतात्पर्यटीकापर्यालोचनया स्फुटमवगम्यते। सूत्रस्य

न्यायभाष्यम्

निमित्तवत् संयोगोत्पत्तिनिमित्तं कर्मे'त्यनेन (१) प्रत्युक्तः। कस्तावदयं नियमः? यथैकस्याऽऽत्मनः शरीरं तथा सर्वेषामिति नियमः। (२)अन्यस्यान्यथाऽन्यस्यान्यथे-

न्यायवार्त्तिकम्

एतेनानियमः प्रत्युक्तः। कः पुनरयं नियमः? यथैकस्याऽऽत्मनः शरीरं तथा सर्वात्मना-मिति नियमः, अन्यस्यान्यथा अन्यस्यान्यथेत्यनियमो भेदो व्यावृत्तिदृष्टः शरीरभेदः प्राणिनामनेक-

न्यायवार्त्तिकतात्पर्यटीका

तदेवमात्मगुणनिबन्धने शरीरसर्गे व्यवस्था दर्शिता। ये तु मेनिरे न कर्मनिबन्धनः शरीरसर्गोऽपि तु प्रकृत्यादिनिबन्धनः। प्रकृतयो हि स्वयमेव धर्माधर्मरूपनिमित्तानपेक्षाः सत्त्वरजस्तमस्तया प्रवृत्तिशीलाः स्वं स्वं विकारमारभन्ते, प्रतिबन्धापगममात्रे तु धर्माधर्मा-वपेक्षन्ते, तद् यथा कृषीवलः केदारादपां पूर्णात् केदारान्तरमपूर्णमापिप्लावयिषुरपां सेतुमात्रं भिनत्ति, तास्तु निम्नाभिसर्पणस्वभावा अपहतसेतवः स्वयमेव केदारमाप्लावयन्ति, एवमाप्लावयन्ति प्रकृतयोऽपि विकारानिति। यथाऽऽहुः—

(क)'निमित्तमप्रयोजकं प्रकृतीनामावरणभेदस्तु ततः क्षेत्रिकवत्' इति।

तान् प्रत्याह—

एतेनानियमः प्रत्युक्तः (सू० ६७)॥ एतेन कर्मसापेक्षाणां भूतानां शरीरसर्गे अनियमा-

वृत्तिः

अथ शरीरं नादृष्टजन्यं प्रकृतेरारम्भस्वभावत्वादेव तदुपपत्तेः, प्रतिबन्धकपूर्वशरीराप-गमस्त्वदृष्टाधीनः, जलस्य निम्नानुसरणस्वभावस्येव बन्धापगमाधीनत्वमिति द्वितीयपक्षं साङ्ख्यसम्मतं निरस्यति—(एतेनानियमः प्रत्युक्तः)

च बह्वर्थसूचकत्वं युक्तमेव। तथाच कर्मनिरपेक्षशरीरसृष्टिमते प्रसज्यमानो नियमः 'शरीरोत्पत्ति'रित्यनेन 'प्रत्युक्तः' निरस्तः दत्तोत्तरो वेदितव्यः इति भाष्यस्य यथाश्रुतेऽर्थे स्वीकरणीये "सोऽयमकर्मनिमित्ते शरीरसर्गे सति नियम इत्युच्यते" इति पाठान्तरमेवात्र 'योऽयमकर्मनिमित्तशरीरसर्गमते नियम इत्युच्यते' इति संस्कृत्य ग्रहीतुं युक्तम्। यथामुद्रिते तु अकर्मनिमित्तशरीरसर्गवादिमते नियमाभावकथनमभुक्तमाम्नायते। एवञ्च 'प्रत्युक्त' इति पदमपि 'निरस्त' इत्यर्थे ग्रन्थकृत्स्वरसप्रयुज्यमानं सुसङ्गच्छते। अनया च दिशा "एतेन नियमः प्रत्युक्तः" इत्येव सूत्रपाठो युक्तः स्यादित्याकलय्यैव न्यायसूत्रविवरणकारै राधामोहनगोस्वामिपादैरनियमपदस्यात्र 'प्रत्युक्तः समाहित इत्यर्थः' इति व्याख्यातम्। स्वतन्त्रास्तु गड्डलिकाप्रवाहन्यायेन सर्वत्र लेखकप्रमादमा-कलयन्तः 'एतेन नियमः प्रत्युक्तः' इत्येव सूत्रपाठं तात्पर्यटीकायामपि व्यतिरेकमुखेण इत्यतः परम् 'अनियमः' इत्यत्र 'नियम' इति पाठं कल्पयितुमर्हन्ति। न चैवमुत्तरत्र अनियमपदव्याख्यानमसङ्गतं नियमनिराकरणेन सिद्धान्तस्यानियमस्य उत्सूत्रपदं प्रदर्शनादिति। 'प्रत्युक्त' इत्यस्य प्रतिपक्षसिद्धान्ततया उक्तः इति तु यथाश्रुते कथञ्चिदर्थः करणीयः।

(१) 'अनियमः प्रत्युक्तः' इति ख-ग०। (२) ज-पु० 'अन्यस्यान्यथा' इति सकृत् मुद्रितम्।

(क) पातञ्जलसूत्र' कैवल्यपादः, सू० ३।

न्यायभाष्यम्

ति (१) अनियमो भेदो व्यावृत्तिर्विशेष इति। दृष्टा च जन्मव्यावृत्तिरुच्चाभिजनो निकृष्टाभिजन इति, प्रशस्तं निन्दितमिति, व्याधिबहुलमरोगमिति, समग्रं विकलमिति, पीडाबहुलं सुखबहुलमिति, पुरुषातिशयलक्षणोपपन्नं विपरीतमिति, प्रशस्तलक्षणं निन्दितलक्षणमिति, पट्विन्द्रियं मृद्विन्द्रियमिति। सूक्ष्मश्च भेदोऽपरिमेयः। सोऽयं जन्मभेदः प्रत्यात्मनियतात् कर्मभेदादुपपद्यते, असति कर्मभेदे प्रत्यात्मनियते (२)निरतिशयत्वादात्मनां समानत्वाच्च पृथिव्यादीनां पृथिव्यादिगतस्य नियमहेतोरभावात् सर्वं सर्वात्मनां प्रसज्येत, न त्विदमित्थम्भूतं जन्म। (३)तस्मान्नाकर्मनिमित्ता शरीरोत्पत्तिरिति।

उपपन्नश्च तद्वियोगः कर्मक्षयोपपत्तेः। कर्मनिमित्ते शरीरसर्गे तेन शरीरेणाऽऽत्मनो वियोग (४) उपपन्नः। कस्मात्? कर्मक्षयोपपत्तेः। उपपद्यते खलु कर्मक्षयः सम्यग्दर्शनात् प्रक्षीणे मोहे वीतरागः पुनर्भवहेतुकर्म कायवाङ्मनोभिर्न करोति इत्युत्तरस्यानुपचयः पूर्वोपचितस्य विपाकप्रतिसंवेदनात् प्रक्षयः। एवं प्रसवहेतोरभावात् पतितेऽस्मिन् शरीरे पुनः (५)शरीरान्तरानुपपत्तेरप्रतिसन्धिः (क)। अकर्मनिमित्ते तु शरीरसर्गे भूतक्षयानुपपत्तेस्तद्वियोगानुपपत्तिरिति ॥ ६७ ॥

न्यायवार्त्तिकम्

रूपः स च कर्मनिरपेक्षैर्भूतैः शरीरारम्भे न युक्तः, कर्मणां भेदाच्छरीराणि भिद्यन्त इति युक्तम्।

उपपन्नश्च तद्वियोगः कर्मक्षयोपपत्तेः। द्वे शरीरस्य प्रकृती व्यक्ता चाव्यक्ता च। तत्राव्यक्तायाः कर्मसमाख्यातायाः प्रकृतेरुपभोगात् प्रक्षयः (६)प्रक्षीणे च कर्मणि विद्यमानानि भूतानि न शरीर-

न्यायवार्त्तिकतात्पर्यटीका

भिधानेन तन्निरपेक्षाणां व्यतिरेकमुखेन (ख)अनियमः प्रत्युक्तः। नियमो व्याप्तिः साधारणविग्रहवत्त्वं सर्वात्मनाम्, अनियमस्त्वव्याप्तिः कस्यचिदात्मनः किंचिच्छरीरं कस्यचित् किंचिदिति। प्रकृतिनिबन्धने हि शरीरसर्गे तस्या एकत्वात् सर्वात्मसाधारण्याच्च न शरीराणामसत्यसाधारण्यहेतुः। भूतग्रहणं तु प्रकृत्युपलक्षणार्थम्।

---

(१) 'नियमे'—इति ग०। (२) 'निरतिशयित्वात्' ख-ग-ज-भा०। (३) 'तस्मात् कर्मनिमित्ता' इति ज०। (४) 'उत्पन्नः' इति ग०। (५) 'शरीरान्तरानुत्पत्तिरि'ति वि०। (६) 'प्रक्षीयमाणे च' इति क ख-धृतपाठान्तरम्।

(क) प्रतिसन्धिः पुनर्जन्म तदभावोऽप्रतिसन्धिः। अत्यन्ताभावार्थे अव्ययीभावापवादत्वात् तत्पुरुष समास इति पुंस्त्वम्। अत एव वादिनामविवाद इति प्रयोगः पक्षधरमिश्रैः समर्थित इति शब्दशक्तिप्रकाशिकायामुक्तम्। (ख) अनियमाभिधानेन अनियमस्य प्रतिवक्तुमसम्भवात् अत्र 'नियमः' इति युक्तम्। भाष्यटिप्पन्यामन्यद् द्रष्टव्यम्।

(सू०)—तददृष्टकारितमिति चेत् पुनस्तत्प्रसङ्गोऽपवर्गे ॥६८॥

न्यायभाष्यम्

अदर्शनं खल्वदृष्टमित्युच्यते अदृष्टकारिता भूतेभ्यः शरीरोत्पत्तिः। न जात्वनुत्पन्ने शरीरे द्रष्टा निरायतनो दृश्यं पश्यति। तच्चास्य दृश्यं द्विविधं विषयश्च नानात्वं च (१)अव्यक्तात्मनः, तदर्थः शरीरसर्गः। तस्मिन्नवसिते चरितार्थानि भूतानि न (२) शरीरमुत्पादयन्तीत्युपपन्नः शरीरवियोग इति एवं चेन्मन्यसे, पुनस्तत्प्रसङ्गोऽपवर्गे—पुनः शरीरोत्पत्तिः प्रसज्यते इति। या चानुत्पन्ने शरीरे दर्शनानुत्पत्तिरदर्शनाभिमता या चापवर्गे शरीरनिवृत्तौ दर्शनानुत्पत्तिरदर्शनभूता नैतयोरदर्शनयोः कश्चिद्विशेष इत्यदर्शनस्यानिवृत्तेरपवर्गे पुनः शरीरोत्पत्तिप्रसङ्ग इति।

न्यायवार्त्तिकम्

मुत्पादयन्तीति उपपन्नोऽपवर्गः, कर्मनिरपेक्षेषु कस्य प्रक्षयान्मोक्ष्यमाणा अपवृज्येरन् भूतलक्षणायाः प्रकृतेरनुच्छेदात् ॥ ६७ ॥

तददृष्टकारितमिति चेत् पुनस्तत्प्रसङ्गोऽपवर्गे। अदृष्टकारितमिति चेत्—अथ मन्यसे अदृष्टकारिता शरीरोत्पत्तिः—अदृष्टशब्देनादर्शनमुच्यते अदर्शनमदृष्टमिति, सर्गादौ प्रधानं (क)पुरुषार्थेन हेतुना प्रवर्तते, तत्तु प्रवर्तमानं महदादिभावेन शरीरमुत्पादयति उत्पन्ने शरीरे द्रष्टा

न्यायवार्त्तिकतात्पर्यटीका

न केवलमकर्मनिमित्तशरीरसर्गे साधारणविग्रहवत्त्वं दोषः अपि तु मोक्षोऽपि न स्यादिति दर्शयितुं स्वपक्षे मोक्षमुपपादयति—उपपन्नश्चेति। सांख्यपक्षे तु न मोक्षः स्यादिति दर्शयति—कर्मनिरपेक्षेष्विति ॥ ६७ ॥

शङ्कते—तददृष्टकारितमिति चेत् इति।

तद्—र्गे (सू० ६८) ॥ उपभोग्यशब्दाद्यदर्शनं प्रकृतिपुरुषभेदादर्शनं वाऽदृष्टमुच्यते तत्कारितमित्यर्थः। निराकरोति—एतस्मिन्निति। यथा प्रागदर्शनमेवं निरोधसमाधेः पश्चादप्यदर्शनमित्यपवृक्तोऽपि पुनः संसरेदित्यर्थः।

वृत्तिः

एतेन अदृष्टहेतुकत्वव्यवस्थापनेन, अनियमस्तु आत्मनः कदाचिन्मानुषशरीरसम्बन्धः कदाचिदन्यादृशः, किञ्चिच्च शरीरं सकलावयवं किञ्चिच्च विकलावयवमित्यादिः, अदृष्टहेतुत्वानभ्युपगमे त्वयमनियमो न त्वसन्मते। किं चादृष्टनिरपेक्षप्रकृतिमात्रारब्धत्वे सर्वात्मसाधारण्यं शरीरस्य स्यादिति भावः।

अन्ये तु अदृष्टमप्यनियतं स्यादित्यत्राऽऽह—एतेनेति। तत्राप्यदृष्टान्तरमित्यनादित्वमेवेति भाव इत्याहुः ॥ ६७ ॥

---

(१) 'आत्मानात्मनोः' इति वि०। (२)' शरीरमुपपादयन्ती—' वि-टि।

(क) "पुरुषार्थ एव हेतुर्न केनचित् कार्यते करणम्" (सांख्यकारिका)।

न्यायभाष्यम्

(१)चरितार्थता विशेष इति चेत् न करणाकरणयोरारम्भदर्शनात् (१*)। चरितार्थानि भूतानि दर्शनावसानान्न शरीरान्तरमारभन्ते इत्ययं विशेष एवं चेदुच्यते ; न, करणाकरणयोरारम्भदर्शनात्—चरितार्थानां (२) भूतानां विषयोपलब्धिकरणात् पुनः पुनः शरीरारम्भो दृश्यते प्रकृतिपुरुषयोर्नानात्वदर्शनस्याकरणान्निरर्थकः शरीरारम्भः पुनः पुनर्दृश्यते। तस्मादकर्मनिमित्तायां भूतसृष्टौ न दर्शनार्था शरीरोत्पत्तिर्युक्ता, युक्ता तु कर्मनिमित्ते सर्गे दर्शनार्था शरीरोत्पत्तिः। कर्मविपाकसंवेदनं दर्शनमिति।

न्यायवार्त्तिकम्

इत्थं पश्यतीति। दृश्यं च द्वेधा विषयो(क) नानात्वं च प्रकृतिपुरुषयोः, दृष्टेन प्रधानं चरितार्थत्वान्न प्रवर्तत इति तदेवमदर्शनं शरीरसर्गहेतुस्तद्भावभावित्वादिति ? एतस्मिन् खल्वदर्शने पुनस्तत्प्रसङ्गोऽपवर्गे—या च प्राक् प्रवृत्तेर्दर्शननिवृत्तिरदर्शनाभिमता या चोत्तरकालं निवृत्ते सर्गे नैतयोरदर्शनयोः कश्चिद्विशेषः। अदर्शननिमित्ता चेत् शरीरोत्पत्तिर्भवति (ख) तेन यथा प्राक् नानात्वदर्शनात् प्रधानं (ग)पुरुषार्थं प्रवर्तते (घ)तथाऽपवृक्तेऽपि प्रवर्तेत, न चैवमभ्युपगम्यते, तस्मान्नादर्शनं शरीरसर्गे कारणमिति।

(३) चरितार्थता विशेषो भविष्यतीति (४)न युक्तं (४*) चरितार्थानामचरितार्थानां च भूतानां पुनरारम्भदर्शनात् आद्येन शरीरेण रूपाद्युपलब्धेः कृतत्वाद् द्वितीयादिशरीरं शब्दाद्युपलब्धिसाधनं न स्यात्, भवति च शब्दाद्युपलब्धिसाधनं द्वितीयादिशरीरम्, तेन गम्यते चरितार्था-

न्यायवार्त्तिकतात्पर्यटीका

शङ्कामुत्थाप्य दूषयति—चरितार्थतेति। ननु न शब्दाद्युपभोगं पुरुषार्थं ब्रूमो येन चरितार्थता स्यात्, अपि तु पुरुषभेददर्शनं तच्चाद्यापि न भवतीत्यारभते शरीरमिति देशयति—

वृत्तिः

आर्हतास्तु मनःपरमाणुगुणमदृष्टं मन्यन्ते, तथाहि पार्थिवाः परमाणवः सहिताः स्वादृष्टवशाच्छरीरमारभन्ते, मनश्च स्वादृष्टप्रयुक्तं शरीरमाविशति, तच्चादृष्टं स्वभावादेव पुद्गलस्य सुखदुःखे साधयतीति, तत्रोत्तरमाह—(तददृष्टकारितमिति चेत् पुनस्तत्प्रसङ्गोऽपवर्गे)

---

(१) अयं भागः टि-पु० नास्ति। (२) 'भूतानां' इति नास्ति वि०। (३) 'चरितार्थतया'—इति ख०। (४) 'न युक्तं न' इति ख०।

(क) भेद इत्यर्थः। (ख) तेनेति तदित्यर्थः। (ग) "पुरुषार्थार्थं" इति पाठः सम्भाव्यते। (ग) 'यथा' इति क-ख-वार्त्तिकपुस्तकयोः प्रमादकृतम्।

न्यायभाष्यम्

तददृष्टकारितमिति चेत् ? कस्यचिद्दर्शनम् अदृष्टं नाम परमाणूनां गुणविशेषः क्रियाहेतुस्तेन प्रेरिताः परमाणवः सम्मूर्च्छिताः शरीरमुत्पादयन्तीति (१) तन्मनः समाविशति स्वगुणेनादृष्टेन(२) प्रेरितं समनस्के शरीरे द्रष्टुरुपलब्धिर्भवतीति।

एतस्मिन् वै दर्शने गुणानुच्छेदात् पुनस्तत्प्रसङ्गोऽपवर्गे। अपवर्गे शरीरोत्पत्तिः परमाणुगुणस्यादृष्टस्यानुच्छेद्यत्वादिति ॥ ६८ ॥

न्यायवार्त्तिकम्

न्यपि भूतानि पुनः शरीरमारभन्त इति। पुरुषार्थेन च हेतुना पुनः शरीराण्यारभन्त इति ? पुरुषार्थश्च पुरुषप्रधाननानात्वदर्शनम्, तस्य चाकरणादनर्थकः शरीरारम्भो भवेदिति। दिदृक्षा-विशेषोऽदर्शनमिति चेत्—अथ मन्यसे नादर्शनं दर्शनाभावः किन्तु दिदृक्षा दर्शनमित्युच्यते सा चापवृक्ते प्रधाने दिदृक्षा न भवतीति ? न प्राक्प्रवृत्तेस्तदभावात्—यावत्प्रधानं महदादि-भावेन न परिणमते तावद्दिदृक्षा नास्ति कथं कारणं भविष्यति प्रवृत्तेरिति। सर्वशक्तिमत्त्वात् तदाऽप्यस्तीति चेत्—अथ मन्यसे सर्वाः कारणशक्तयः प्रधाने विद्यन्ते तदिदमात्मभूताभिः कारणशक्तिभिः सर्वशक्तिमत्प्रधानम्, सर्वशक्तिमत्त्वाच्च प्रागपि प्रवृत्तेः प्रधाने दिदृक्षाऽस्तीति ? न अपवर्गाभावप्रसङ्गात्—दिदृक्षावन्नानात्वदर्शनमप्यस्तीत्यपवर्गाभावः विद्यमाने च नानात्व-

न्यायवार्त्तिकतात्पर्यटीका

पुरुषार्थेन च हेतुनेति। चोऽवधारणे पुरुषार्थत्वेनैवेत्यर्थः। परिहरति—तस्य चाकरणादिति। चस्त्वर्थे (३)देश्यनिवृत्तौ। यदर्थं शरीराण्यारभते तन्न कृतमन्यत्तु कृतमिति किं केन संगतमित्यर्थः। शङ्कते—दिदृक्षाविशेष इति। दर्शनं हि नञा पर्युदस्तमतस्तन्मूलां दिदृक्षां ब्रूते, सा चापवर्गे नास्ति तस्मान्नापवृक्तः संसरतीत्यर्थः। निराकरोति—न प्रागिति। एतदुक्तं भवति—दिदृक्षा हि बुद्ध्याश्रया नासत्यां बुद्धावस्ति प्रकृतिपरिणामश्च बुद्धिः। तथा च सत्यां दिदृक्षायां बुद्धिः बुद्धौ सत्यां दिदृक्षेति परस्पराश्रयप्रसङ्गः। न चात्रानादिता परिहारः सृष्ट्यादौ द्वयोरभावात्। अस्माकं तु प्रलयसमये धर्माधर्मसंस्कृतोऽस्त्यात्मा मनश्चेति विशेषः। सत्कार्यमादाय शङ्कते—सर्वशक्तिमत्त्वादिति। निराकरोति—नापवर्गाभावप्रसङ्गादिति। शिष्टं विभजते—दिदृक्षावन्नानात्वदर्शनमप्यस्तीति। न तदर्थं प्रकृतेः प्रवृत्तिः तथा च न संसारस्तत्प्रध्वंसश्चापवर्गाभावान्नास्तीत्यपवर्गाभाव इत्यर्थः। एतदेव

---

(१) 'तत्र मनः' इति ख०। (२) 'प्रेरिते' इति ज०।

(३) 'देश्यति वृत्ती' इति क०।

न्यायवार्त्तिकम्

दर्शने प्रधानस्य प्रवृत्तिरयुक्ता—यदा च नानात्वदर्शनं तदाऽपि दिदृक्षा न व्यावर्तते, न हि सदात्मानं जहातीति वः पक्षः। दिदृक्षायां च सत्यां कुतोऽपवर्गः? दिदृक्षा-नानात्वदर्शने च विरुद्धे कथमेकस्मिन् काले भवतः। अज्ञानमदर्शनमिति च ब्रुवाणो विकल्पतः पर्यनुयोज्यः किं ज्ञानाभावोऽज्ञानमुत मिथ्याज्ञानमिति। किं चातः? यद्यभावः, अपवर्गो न प्राप्नोति प्राक् प्रवृत्तेरप्रवृत्ते च प्रधाने ज्ञानाभावस्य तुल्यत्वात्। अथ मिथ्याज्ञानम्, तन्न युक्तम्, प्राक् प्रवृत्तेस्तदभावात्। कथमभावः? (क)बुद्धिधर्मकत्वात्—अप्रवृत्ते च प्रधाने न(१)बुद्धिरिति कथं तद्धर्मोऽज्ञानं भविष्यतीति। सत्कार्यवादाभ्युपगमात् सर्वदाऽस्तीति ब्रुवाणो मोक्षं बाधते। कथम्? तत्त्वज्ञानस्य सर्वदा भावात् तत्त्वज्ञानमिथ्याज्ञानयोश्च सहानवस्थानात् प्रवृत्ते(२)स्तादर्थ्यमयुक्तम्। न हि भवतां पक्षे किञ्चिदसद्भवति सच्चाऽऽत्मानं जहातीति सर्वार्थानां सम्भवात् प्रधानं किमर्थं प्रवर्तत इति वक्तव्यम्। अथाभिव्यक्तिनिमित्तां प्रवृत्तिं प्रतिपद्येथाः? साऽप्यभिव्यक्तिः प्राक् प्रवृत्तेः सती (ख)आहो असतीति पूर्ववत्प्रसङ्गः। अथ प्रागनुपलब्धं (ग)पश्चादुपलभते? किमुपजातविशेषमुतानुपजातविशेषमिति। यदि विशेषोपजननात् पश्चादुपलभ्यते व्याहतं भवति। (घ)अनुपजातविशेषः कस्मात् प्राङ् नोपलभ्यत इति वक्तव्यम्। सत्कार्यवादाभ्युपगमे च स्फूर्जताऽपि न विशेषोपजनः शक्यः प्रतिपादयितुम्। न च विशेषोपजनप्रत्याख्याने वस्तुन उपलब्ध्यनुपलब्धिविषयत्वं शक्यमवगमयितुम्। कर्मनिमित्ते तु सर्गे दर्शनार्थं भूतानि शरीरं पुरुषगुणप्रेरितान्यारभन्त इति युक्तम्। न ह्यनुत्पन्ने शरीरे द्रष्टा निरायतनो दृश्यं पश्यतीति।

न्यायवार्त्तिकतात्पर्यटीका

स्फुटयति—विद्यमाने च नानात्वदर्शने तदर्थं प्रधानस्य प्रवृत्तिरयुक्ता, ततः संसाराभावात् तत्प्रध्वंसोऽपवर्गो न स्यादिति भावः। तमेवापवर्गाभावं तद्विरोधिसंसारसत्त्वेन दर्शयति—यदा च नानात्वदर्शनमिति। निदानानुच्छेदे निदानिनो नोच्छेद इत्यर्थः। पुनर्विकल्पं दर्शयति—अज्ञानमदर्शनमिति चेति। विवेकज्ञानाभावस्य तुल्यत्वादित्यर्थः। शेषमतिरोहितार्थमिति।

वृत्तिः

तत्तदात्मादृष्टोपग्रहं विनैव तत्तदात्मोपभोगाय परमाणवश्चेच्छरीरमारभन्ते, मुक्तेऽपि तदात्मनि तद्भोगाय शरीरमारभेरन्। अपवर्ग इत्युपलक्षणम्, संसारिणामपि नर-करि-तुरगादिशरीरोपग्रहे विनिगमकं न स्यादिति भावः॥ ६८॥

---

(१) 'बुद्धिरस्ति'—इति क-ख-पुस्तपाठान्तरम्।

(२) '-तादर्थ्यम्' इति क-ख०। 'तादात्म्यम्'—इति क-ख-पुस्तपाठान्तरम्।

(क) कुतसार्थोऽयं क-प्रत्यय इति बोध्यम्। (ख) "आहोऽसतीति" इति क-ख०। (ग) पश्चादुपलभ्यते" इति युक्तं मन्यते। (घ) अत्रापि यदीति सम्बध्यते।

(सू०)—मनःकर्मनिमित्तत्वाच्च (१)संयोगाव्युच्छेदः ॥६९॥

न्यायभाष्यम्

मनोगुणेनादृष्टेन समावेशिते मनसि (२) संयोगव्युच्छेदो न स्यात्, (३)तत्र किंकृतं शरीरादपसर्पणं मनस इति (४)? कर्माशयक्षये तु कर्माशयान्तराद्विपच्यमानादपसर्पणोपपत्तिरिति। अदृष्टादेवापसर्पणमिति चेत्—योऽदृष्टः शरीरोपसर्पणहेतुः स एवापसर्पणहेतुरपीति? न, एकस्य जीवनप्रायणहेतुत्वानुपपत्तेः—एवं च सति (५) एकमदृष्टं जीवनप्रायणयोर्हेतुरिति प्राप्तम्, नैतदुपपद्यते ॥ ६९ ॥

न्यायवार्त्तिकम्

अपरे त्वदृष्टं परमाणुगुणं वर्णयन्ति, तेषामपि पुनस्तत्प्रसङ्गोऽपवर्ग इति परमाणुगुणस्य शरीरोत्पत्तिनिमित्तत्वात् पुनस्तत्प्रसङ्गोऽपवर्ग इति ॥ ६८ ॥

मनःकर्मनिमित्तत्वाच्च संयोगाद्यनुच्छेदः। परमाणवः स्वगुणाददृष्टात् संहन्यन्ते संहताश्च द्व्यणुकादिप्रक्रमेण शरीरमुत्पादयन्ति तन्मनः स्वगुणाददृष्टादुपसर्पतीति। उपसर्पणहेतोरदृष्टस्य नित्यत्वात् किंकृतमपसर्पणमिति? कर्माशयक्षये कर्माशयादपसर्पणमिति युक्तं प्रायणम्। उभयहेतुर्मनोवृत्तिरदृष्टो भविष्यतीति न युक्तम् एकस्य जीवनप्रायणहेतुत्वानुपपत्तेः ॥ ६९ ॥

न्यायवार्त्तिकतात्पर्यटीका

अपरे तु आर्हता अदृष्टं परमाणुगुणं वर्णयन्ति। पार्थिवानामणूनां मनसश्च गुणोऽदृष्टं ते पार्थिवाद्या अणवः स्वादृष्टप्रयुक्ताः शरीरमारभन्ते मनश्च स्वगुणप्रयुक्तं तच्छरीरमाविशति। तच्च स्वकादेवादृष्टात् पुद्गलस्य सुखदुःखोपभोगं साधयति न तु पुद्गलस्य धर्मोऽदृष्टमिति सांख्यवत् तेषामपि पुनस्तत्प्रसङ्गोऽपवर्गे। एतदुपपादयति—परमाणुगुणस्येति ॥ ६८ ॥

अपि चास्मिन् दर्शने प्रायणं न स्यादित्याह—मनःकर्मनिमित्तत्वादिति।

मनः—दः (सू० ६९) ॥ अस्मद्दर्शने तूपपद्यते प्रायणमित्याह—वर्तमानशरीरारम्भककर्माशयक्षये तु भविष्यद्देहान्तरारम्भककर्माशयान्तरादपसर्पणं मनस इति युक्तं प्रायणम्। उभयहेतुरिति उपसर्पणापसर्पणहेतुरित्यर्थः ॥ ६९ ॥

---

(१) 'संयोगानुच्छेदः' इति ल-ग-ज-भा०। 'संयोगाद्यनुच्छेदः' इति न्यायवार्त्तिके, न्यायसूचीनिबन्धे, वि-पुस्तके च। 'संयोगव्युच्छेदः' इति टि०। (२) 'संयोगाद्यनुच्छेदः' इति त्रि०। (३) 'तत्र' इति फ-त्रि-टि-भा०। (४) अतः परं 'तदिदं दृष्टान्तस्य साध्यसमत्वमभिधीयते इति। अथवा नाकृताभ्यागमप्रसङ्गात् अणुश्यामता दृष्टान्ते'—इत्यधिकः ग-पु० पाठः। (५) 'एको दृष्टम्' इति ज-ग०। एकोऽदृष्टो—फ०।

(सू०)—नित्यत्वप्रसङ्गश्च प्रायणानुपपत्तेः ॥ ७० ॥

न्यायभाष्यम्

विपाकसंवेदनात् कर्माशयक्षये शरीरपातः प्रायणम् , कर्माशयान्तराच्च पुनर्जन्म। भूतमात्रात्तु कर्मनिरपेक्षाच्छरीरोत्पत्तौ कस्य क्षयाच्छरीरपातः प्रायणमिति ? प्रायणानुपपत्तेः खलु वै नित्यत्वप्रसङ्गं विद्मः। यादृच्छिके तु प्रायणे प्रायणभेदानुपपत्तिरिति ॥ ७० ॥

न्यायवार्त्तिकम्

नित्यत्वप्रसङ्गश्च प्रायणानुपपत्तेः। नित्यत्वप्रसङ्ग इति प्रायणानुपपत्तिं ब्रूमः तदिदमुक्तमुपसर्पणहेतोरदृष्टस्यानित्यत्वादपसर्पणहेतोश्चादृष्टस्याभावाद् यादृच्छिके तु प्रायणे प्रायणभेदो न स्यात् ॥ ७० ॥

न्यायवार्त्तिकतात्पर्यटीका

ननु भवतु (१) संयोगानुच्छेदः किं नो बाध्यत इत्यत आह शरीरस्य नित्यत्वप्रसङ्गश्च प्रायणानुपपत्तेः।

नित्य—त्तेः (सू० ७०)॥ (२)संयोगाव्युच्छेदादित्यर्थः। ननु सदकारणं नित्यमिति कथं सकारणं शरीरं नित्यं भवेदित्यत आह—नित्यत्वप्रसङ्ग इति प्रायणानुपपत्तिं ब्रूमः, विनाशानुपपत्तेरित्यर्थः। यादृच्छिके अकारणके प्रायणभेदो न स्यात्। दृष्टश्च प्रायणभेदः कश्चिद्गर्भस्थ एव प्रैति कश्चिज्जातमात्रः कश्चित्कुमारक इत्यादिरिति। अकारणस्य नित्यं सत्त्वमसत्त्वं वा स्यात् गगनवत्तत्कुसुमवदित्यर्थः ॥ ७० ॥

वृत्तिः

अदृष्टस्य मनोगुणत्वमपि दूषयति—(मनःकर्मनिमित्तत्वाच्च संयोगानुच्छेदः)

संयोगस्य शरीरारम्भकस्य ज्ञानादिजनकस्य च उच्छेदो न स्यात्। कुतः ? मनसो यत् कर्म अदृष्टं तन्निमित्तत्वात्, तस्य नित्यत्वात् तादृशसंयोगधारा नोच्छिद्येत। तस्यानित्यत्वेऽपि व्यधिकरणभोगस्य तन्नाशकत्वेऽतिप्रसङ्ग इति भावः ॥ ६९ ॥

संयोगानुच्छेदे का क्षतिरत आह—(नित्यत्वप्रसङ्गश्च प्रायणानुपपत्तेः)

तथा सति प्रायणस्य मरणस्यानुपपत्तेः शरीरादेर्नित्यत्वस्य अविनाशित्वस्य प्रसङ्गः ॥ ७० ॥

---

(१) 'संयोगाव्युच्छेदः'—इति क०।

(२) 'संयोगाव्युच्छेदात्' इति क०।

न्यायभाष्यम्

पुनस्तत्प्रसङ्गोऽपवर्ग इत्येतत्समाधित्सुराह—

(सू०)—अणुश्यामतानित्यत्ववदेतत् स्यात् ॥ ७१ ॥

यथा अणोः श्यामता नित्या अग्निसंयोगेन (१)प्रतिषिद्धा न पुनरुत्पद्यते एवमदृष्टकारितं शरीरमपवर्गे पुनर्नोत्पद्यत इति ॥ ७१ ॥

(सू०)—नाकृताभ्यागमप्रसङ्गात् ॥ ७२ ॥

नायमस्ति दृष्टान्तः। कस्मात्? अकृताभ्यागमप्रसङ्गात्। अकृतं प्रमाणतोऽनुपपन्नम्, तस्याभ्यागमोऽभ्युपपत्तिर्व्यवसायः, एतच्छ्रद्दधानेन प्रमाणतोऽनुपपन्नं मन्तव्यम्। तस्मान्नायं दृष्टान्तो न प्रत्यक्षं न चानुमानं किंचिदुच्यत इति। तदिदं दृष्टान्तस्य साध्यसमत्वमभिधीयत इति।

अथ वा नाकृताभ्यागमप्रसङ्गात्। अणुश्यामतादृष्टान्तेन(२)अकर्मनिमित्तां शरीरोत्पत्तिं समादधानस्याकृताभ्यागमप्रसङ्गः। अकृते सुखदुःखहेतौ कर्मणि पुरुषस्य सुखं दुःखमभ्यागच्छतीति प्रसज्येत। ओमिति ब्रुवतः प्रत्यक्षानुमानागमविरोधः।

न्यायवार्त्तिकम्

अणुश्यामतानित्यत्ववदेतत् स्यात्। अणुश्यामतानित्यत्ववदेतत् स्यादिति परिहारं वर्णयन्ति। यथा किलाणोः श्यामता नित्याऽथापि संयोगेन प्रतिषिध्यते एवमणुमनसोरदृष्टः सम्यग्ज्ञानेन प्रतिषिध्यते इति ॥ ७१ ॥

नाऽकृताभ्यागमप्रसङ्गात्। एतच्च न—अकृताभ्यागमप्रसङ्गादिति अनुपपन्नप्रमाणस्याभ्युप-

न्यायवार्त्तिकतात्पर्यटीका

अकारणत्वादित्यस्य हेतोरनैकान्तिकत्वेन प्रत्यवतिष्ठते—अणुश्यामतावत् इति।

अणु—त् (सू० ७१) ॥ ७१ ॥ (क)

नाकृ—त् (सू० ७२) ॥ निराकरोति—(ख) तच्च नेति। प्रमाणेनाविषयीकृतमकृतं प्रत्युत प्रत्यक्षागमविरुद्धमिति यावत्, तस्याभ्यागमोऽभ्युपगमस्तत्प्रसङ्गादित्यर्थः। न च परमाणुश्यामताऽप्यकारणा पार्थिवरूपत्वाल्लोहितादिरूपवदित्यनुमानेन तस्यापि पाकजत्वा-

वृत्तिः

आक्षिपति—(अणुश्यामतानित्यत्ववदेतत् स्यात्)

यथा परमाणोः श्यामता नित्याऽपि निवर्तते, तथा शरीरादिकमपि निवर्तते ; तथैव परमाणुनिष्ठं नित्यमप्यदृष्टं निवर्तते। तदभावात्तु नापवर्गे शरीरमिति ॥ ७१ ॥

---

(१) 'प्रतिबद्धा' इति फ० वि०। 'प्रतिविद्धा' इति ल०। (२) अकर्मनिमित्ता इति वि०।

(क) ७१तम सूत्रे अवतरणिकातिरिक्ता टीका नास्ति। (ख) 'एतच्च' इति वार्त्तिके पाठभेदः।

न्यायभाष्यम्

प्रत्यक्षविरोधस्तावत्—भिन्नमिदं सुखदुःखं प्रत्यात्मवेदनीयत्वात् प्रत्यक्षं सर्वशरीरिणाम्। को भेदः? तीव्रं मन्दं चिरमाशु नानाप्रकारमेकप्रकारमित्येवमादिर्विशेषः। न चास्ति प्रत्यात्मनियतः सुखदुःखहेतुविशेषः, न चासति हेतुविशेषे फलविशेषो दृश्यते। कर्मनिमित्ते तु सुखदुःखयोगे कर्मणां तीव्रमन्दतोपपत्तेः (१)कर्मसञ्चयानां चोत्कर्षापकर्षभावात् नानाविधैकविधभावाच्च कर्मणां सुखदुःखभेदोपपत्तिः। सोऽयं हेतुभेदाभावाद् दृष्टः सुखदुःखभेदो न स्यादिति प्रत्यक्षविरोधः।

तथा अनुमानविरोधः—दृष्टं हि पुरुषगुणव्यवस्थानात् सुखदुःखव्यवस्थानम्। यः खलु चेतनावान् साधननिर्वर्तनीयं सुखं बुद्ध्वा तदीप्सन् साधनावाप्तये प्रयतते स सुखेन युज्यते न विपरीतः। यश्च साधननिर्वर्तनीयं दुःखं बुद्ध्वा तज्जिहासुः साधनपरिवर्जनाय यतते स च दुःखेन त्यज्यते न विपरीतः। अस्ति चेदं यत्नमन्तरेण चेतनानां सुखदुःखव्यवस्थानं तेनापि चेतनगुणान्तरव्यवस्थाकृतेन भवितव्यमित्यनु-

न्यायवार्त्तिकम्

गमोऽकृताभ्यागम इति सूत्रार्थः। यथाश्रुति वा सूत्रार्थः अकृतस्य कर्मण उपभोगप्रसङ्गादिति। एतत्सविस्तरोक्तं भाष्य इति ॥ ७२ ॥

न्यायवार्त्तिकतात्पर्यटीका

भ्युपगमादिति भावः। यथाश्रुति वा सूत्रार्थः। अकृतस्य कर्मणः फलोपभोगप्रसङ्गादिति। यदा खलु परमाणुगुण एव नित्यः शरीराद्यारम्भकस्तदाऽसौ नित्यत्वान्न केनचित् क्रियते। तस्याकृतस्यैव फलं पुरुषैरुपभुज्यते ततश्चायमास्तिकानां विहितनिषिद्धप्रवृत्तिनिवृत्तिनिचयो-

वृत्तिः

सिद्धान्तसूत्रम्—(नाकृताभ्यागमप्रसङ्गात्)

अकृतस्य प्रमाणाविषयस्य अभ्यागमः स्वीकारस्तत्प्रसङ्गादित्यर्थः। न हि परमाणुनिष्ठादृष्टस्य कारणस्य सत्त्वे शरीरोच्छेदः स्यात्? एवमणुश्यामतानित्यत्वस्यापि प्रमाणागोचरस्य स्वीकारः स्यात्, तथा च दृष्टान्तासिद्धिः। न चानादेर्भावस्य नाशः सम्भवति जन्यभावत्वेन तद्धेतुत्वात्।

(१) 'कर्मसञ्चिचयानां' इति वि०।

न्यायभाष्यम्

मानम्। तदेतदकर्मनिमित्ते सुखदुःखयोगे विरुध्यते इति। तच्च गुणान्तरमसंवेद्यत्वाददृष्टं विपाककालानियमाच्चाव्यवस्थितम्। बुद्ध्यादयस्तु संवेद्याश्चापवर्गिणश्चेति।

अथागमविरोधः—बहु खल्विदमार्षमृषीणामुपदेशजातमनुष्ठानपरिवर्जनाश्रयम्, उपदेशफलं च शरीरिणां वर्णाश्रमविभागेणानुष्ठानलक्षणा प्रवृत्तिः, परिवर्जनलक्षणा निवृत्तिः। तच्चोभयमेतस्यां दृष्टौ "नास्ति कर्म सुचरितं दुश्चरितं वा? कर्मनिमित्तः पुरुषाणां सुखदुःखयोगः" इति विरुध्यते। सेयं पापिष्ठानां मिथ्यादृष्टिः—अकर्मनिमित्ता शरीरसृष्टिरकर्मनिमित्तः सुखदुःखयोग इति ॥ ७२ ॥

इति श्रीवात्स्यायनीये न्यायभाष्ये तृतीयाध्यायस्य द्वितीयमाह्निकम् ॥ २ ॥

समाप्तश्चायं तृतीयोऽध्यायः ॥ ३ ॥

न्यायवार्त्तिकम्

आत्मा शरीरं करणमर्थो बुद्धिर्मनस्तथा।
यद्यथा वस्तु तत्त्वेन तत् तथेहोपपादितम् ॥

(इति प्रासङ्गिकमदृष्टनिष्पाद्यत्वप्रकरणम्।)

इति औद्द्योतकरे न्यायसूत्रवार्त्तिके तृतीयाध्यायस्य द्वितीयमाह्निकम् ॥

तृतीयोऽध्यायः समाप्तः ॥

न्यायवार्त्तिकतात्पर्यटीका

ऽनर्थकः शास्त्रप्रणयनं चाप्यनर्थकं भवेदिति भावः। एतच्च अतिविस्तृतं भाष्ये तस्यार्थो निगदव्याख्यातः।

इति वाचस्पतिमिश्रविरचितायां न्यायवार्त्तिकतात्पर्यटीकायां

तृतीयोऽध्यायः समाप्तः ॥ शुभम्।

वृत्तिः

यद्वा नित्यादृष्टाच्छरीरसम्बन्धोपगमे अकृतात् स्वयमजनितात् कर्मणोऽभ्यागमः फलसम्बन्धः स्यात् , तथा च स्वाकृतत्वाविशेषात् किं शरीरं कस्य भविष्यतीत्यत्र नियामकाभाव इति भावः ॥ ७२ ॥

समाप्तं शरीरस्यादृष्टनिष्पाद्यताप्रकरणम् ॥ ७ ।

समाप्तं च तृतीयाध्यायस्य द्वितीयमाह्निकम् ॥

इति श्रीविश्वनाथन्यायपञ्चाननभट्टाचार्यकृतायां न्यायसूत्रवृत्तौ
तृतीयाध्यायवृत्तिः समाप्ता ॥

तृतीयाध्याये १ आह्निके ७३ सूत्राणि, २ आह्निके ७२ सूत्राणि
मिलित्वा १४५ सूत्राणि ।

न्यायदर्शनम्

अथ चतुर्थाध्यायस्याद्यमाह्निकम्

न्यायभाष्यम्

मनसो(१)ऽनन्तरं प्रवृत्तिः परीक्षितव्या। तत्र खलु यावद्धर्माधर्माश्रयशरीरादि परीक्षितम्, (२)सर्वा सा प्रवृत्तेः परीक्षेत्याह—

(सू०)—प्रवृत्तिर्यथोक्ता ॥ १ ॥

तथा परीक्षितेति ॥ १ ॥

अथ चतुर्थाध्यायस्याद्यमाह्निकम् ।

न्यायवार्त्तिकम्

मनसोऽनन्तरं प्रवृत्तिरवसरप्राप्ता परीक्षितव्येत्यत आह—

प्रवृत्तिर्यथोक्ता। प्रवृत्तिर्यथोक्ता तथा परीक्षितेत्यर्थः सूत्रस्य। किं पुनः प्रवृत्तेः परीक्षितमिति ? यावद्धर्माधर्माश्रयं परीक्षितं सर्वा प्रवृत्तेः परीक्षा। तत्र प्रवृत्तिर्द्वैधा भवति—कारणरूपा कार्यरूपा च। कारणरूपा—प्रवृत्तिर्वाग्बुद्धिशरीरारम्भ इति। कार्यरूपा—धर्माधर्मसमाख्या

न्यायवार्त्तिकतात्पर्यटीका

अथ मनःपरीक्षानन्तरमुद्देशलक्षणक्रमानुरोधेन प्रवृत्तिः परीक्षितुं युक्ता। सा कस्मान्न परीक्ष्यत इति शङ्कानिराकरणाय सूत्रमित्याह—मनसोऽनन्तरमिति।

प्रवृत्तिर्यथोक्ता (सू० १) ॥ अस्य शेषः,—तथा परीक्षिता। यथा लक्षिता तथा परीक्षितेत्यर्थः। पृच्छति—किं पुनरिति, प्रमेयमात्मादिमनोऽन्तं परीक्षितम्, न पुनः प्रवृत्तेः स्वरूपं वा कार्यं वा परीक्षितमिति भावः। उत्तरम्—यावद्धर्माधर्माश्रयमिति।

वृत्तिः

सूरकोटिविजयिप्रभाभरं योगिमानसचरं परं महः।
श्यामलं किमपि धाम कामदं कामकोटिकमनीयमाश्रये ॥ १ ॥

तृतीये तावदात्मादिप्रमेयषट्कं कारणरूपं परीक्षितम्, अथ कार्यरूपं प्रवृत्त्यादिप्रमेयषट्कमवसरतो हेतुहेतुमद्भावेन च परीक्षणीयम्।

---

(१) 'अनन्तरा' इति ल-ग-भा०।
(२) 'पूर्वा सा' ज०।

न्यायवार्त्तिकम्

दुःखादिसूत्रे वर्णिता । तत्र कारणरूपायाः प्रवृत्तेर्विंशतिधा भेदः(क) । कार्यरूपा तु प्रवृत्तिरेकद्रव्याऽभ्युदयस्य प्रतिनियमात्, अवस्थिता विपाककालस्य नियमात्, आत्मसमवायाद् गुणभूता, अनित्या प्रायणादिदर्शनात् । तदुक्तं विपच्यमानकर्माशयप्रक्षये प्रायणमिति । जन्मनः कारणं पूर्वकृतफलानुबन्धात् तदुत्पत्तिरिति । संसारापवर्गहेतुभूता तद्भावे संसारः तदभावेऽपवर्ग इत्येवमाद्युक्तम् ॥ १ ॥

न्यायवार्त्तिकतात्पर्यटीका

एकद्रव्येति एकस्मिन्नेवाऽऽत्मनि वर्तत इत्यर्थः । अवस्थिता न तु बुद्ध्यादिवदाशुतरविनाशिनीत्यर्थः । आत्मसमवायादिति । कार्यत्वे सतीति द्रष्टव्यं विशेषणम्, तेन न सामान्यविशेषाभ्यां व्यभिचारः । प्रायणादीति आदिशब्देन सुखादिक्षयोऽपवर्गश्च गृह्यते; संसारापवर्गहेतुभूता आत्मसद्भावासद्भावाभ्यामिति शेषः । एवमाद्युक्तमिति, आदिग्रहणेनाऽऽत्मसमवेता प्रवृत्तिर्न तु पृथिव्याद्याश्रयेति दर्शयति ॥ १ ॥

वृत्तिः

यद्यपि प्रथमाह्निके षट्कं परीक्षणीयम्, द्वितीयाह्निके तु तत्त्वज्ञानम्, तथाऽपि तस्यापवर्गहेतुत्वादुपोद्घातेन च परीक्षणीयत्वादपवर्गपरीक्षान्तःपातितया षट्कपरीक्षैवाध्यायार्थः । तत्र चोद्दिष्टधर्मवत्तया षट्कपरीक्षा प्रथमाह्निकार्थः ।

तत्र प्रथमाह्निके चतुर्दश प्रकरणानि, तत्र चोक्तरूपवत्तया प्रवृत्तिदोषयोः परीक्षा प्रथमप्रकरणार्थः । न चार्थभेदात् प्रकरणभेदः, यथा तथेति परस्परसाकाङ्क्षाभ्यामवयवाभ्यामुक्तरूपवत्त्वलक्षणैकार्थवत्त्वकथनात् ।

प्रवृत्तिपरीक्षायामाकाङ्क्षितायां सूत्रम्—(प्रवृत्तिर्यथोक्ता)

अत्र तथैवेति शेषं पूरयन्ति, तदयुक्तम्, तथा सत्यत्रैव यथाशब्दस्याऽऽकाङ्क्षाशान्तावग्रिमसूत्रस्थतथाशब्देऽपि यथाशब्दान्तरस्य पूरणीयतया प्रकरणभेदापत्तेः । तस्मादग्रिमसूत्रस्थ'तथा'शब्देनान्वयो युक्तः । प्रवृत्तिर्यथा उक्तलक्षणवती तथा दोषा अप्युक्तलक्षणवन्त इत्यग्रिमसूत्रसंवलितोऽर्थः । 'प्रवृत्तिर्वाग्बुद्धिशरीरारम्भः' इत्युक्तलक्षणसत्त्वात् (१) नासिद्धं लक्षणमिति भावः । प्रवृत्तिस्तु द्वयी कारणरूपा कार्यरूपा च, द्वे अप्यात्मसमवेते । तत्राऽऽद्या जन्यत्वेनाऽविशिष्टा विशिष्टा च यत्नत्वजातिमती मानसप्रत्यक्षसिद्धा, द्वितीया तु धर्माधर्मरूपा यागादेरगम्यागमनादेश्च चिरध्वस्तस्य व्यापारतया कर्मनाशा-जलस्पर्शादेः प्रायश्चित्तादेश्च नाश्यतया सिध्यतीति ॥ १ ॥

(क) ७६म-पत्रे भाष्यं द्रष्टव्यम् ।

(१) 'सिद्धं लक्षणमि'ति भ० ।

न्यायभाष्यम्

प्रवृत्त्यनन्तरास्तर्हि दोषाः परीक्ष्यन्तामित्यत आह—

(सू०)—तथा दोषाः ॥ २ ॥

(१)परीक्षिता इति। बुद्धिसमानाश्रयत्वादात्मगुणाः, प्रवृत्तिहेतुत्वात् पुनर्भवप्रतिसन्धानसामर्थ्याच्च संसारहेतवः, (२)संसारस्यानादित्वादनादिना प्रबन्धेन प्रवर्तन्ते, मिथ्याज्ञाननिवृत्तिस्तत्त्वज्ञानात् तन्निवृत्तौ रागद्वेषप्रबन्धोच्छेदेऽपवर्ग इति। प्रादुर्भाव(३)तिरोधानधर्मका इत्येवमाद्युक्तं दोषाणामिति ॥ २ ॥

न्यायवार्त्तिकम्

प्रवृत्तेरनन्तरास्तर्हि दोषा इत्यभिधीयन्तामित्यत आह—

तथा दोषाः। उक्ता इति। बुद्धिसमानाश्रयत्वादात्मगुणाः संसारस्यानादित्वात् अनादिना (४) प्रबन्धेन प्रवर्तन्ते, सम्यग्ज्ञानाच्च मिथ्याज्ञाननिवृत्तौ निवर्तन्त इत्युत्पादनिरोधधर्मकाः। कार्यत्वे सतीन्द्रियान्तरप्रत्यक्षत्वात् अचाक्षुषप्रत्यक्षत्वाच्च गुणाः ॥ २ ॥

(इति प्रवृत्तिदोषसामान्यपरीक्षाप्रकरणम्।)

न्यायवार्त्तिकतात्पर्यटीका

प्रवृत्तेरनन्तरास्तर्हि दोषाः परीक्ष्यन्तामित्यत आह—

तथा दोषाः (सू० २) ॥ उक्ता इति शेषः। प्रवृत्तितुल्यतया प्रवृत्तिपरीक्षयैव तावद्दोषाणां सत्त्वं परीक्षितमित्यर्थः। कार्यरूपप्रवृत्तितुल्यतामाह—बुद्धिसमानाश्रयत्वादिति। अभीष्टविषयानुचिन्तनप्रभवाः खल्विमे दोषा नार्थचिन्तनबुद्धिव्यधिकरणा भवितुमर्हन्ति, तथा सति चैत्रस्याभीष्टविषयानुचिन्तने मैत्रस्य रागः प्रवर्त्तेत। तस्माद् बुद्धिसमानाश्रयत्वादात्मगुणाः। आत्मगुणत्वाच्च कार्यप्रवृत्तितुल्यतया प्रवृत्तिपरीक्षयैव तावद्दोषाः परीक्षिता इत्यर्थः। इदं च प्रवृत्तितुल्यत्वमपरं दोषाणामित्याह—संसारस्यानादित्वादिति। एतच्चोक्तं वीतरागजन्मादर्शनादित्यनेन तथोद्देशपरीक्षापरेण द्वितीयसूत्रेण। यत्तेषां दोषाणां परीक्षितं तदाह—सम्यग्ज्ञानाच्चेति। स्यादेतत्—गुणत्वेन ह्यात्मगुणा इति सिध्यति, तदेव तु कुत इत्यत आह—कार्यत्वे सतीति। इन्द्रियान्तरं मन इति। मानसप्रत्यक्षैश्चात्मत्वसुखत्वादिभिरनैकान्तिकत्वं मा भूदत उक्तं कार्यत्वे सतीति विशेषणम्। अचाक्षुषप्रत्यक्षत्वादित्यत्रापि कार्यत्वे सतीति विशेषणमनुषञ्जनीयम् ॥ २ ॥

---

(१) 'तथा परीक्षिता' इति फ०।

(२) 'संसारवासनानादित्वादिति ल-पु०धृतपाठान्तरम्।

(३) '-निरोधधर्मकाः' इति वि० टि०।

(४) 'प्रवचनेन' इति ख०।

न्यायभाष्यम्

प्रवर्तनालक्षणा दोषा इत्युक्तम्, तथा चेमे मानेर्ष्यासूया-विचिकित्सा-मत्सरादयः, ते कस्मान्नोपसङ्ख्यायन्ते इत्यत आह—

(सू०)—तत्त्रैराश्यं रागद्वेषमोहार्थान्तरभावात् ॥ ३ ॥

तेषां दोषाणां त्रयो राशयस्त्रयः पक्षाः। (१)रागपक्षः—कामो मत्सरः स्पृहा तृष्णा लोभ इति। (२)द्वेषपक्षः—क्रोध ईर्ष्या असूया द्रोहोऽमर्ष इति। (३)मोहपक्षो

न्यायवार्त्तिकम्

प्रवर्तनालक्षणा दोषा इत्युक्तम्, तथा च मानादयः प्रवर्तयन्तीति लक्षणसाम्यात् तेऽप्युपसंख्येया इति ? नोपसंख्यायन्ते संगृहीतत्वात्। केन संग्रहः ? प्रवर्तनालक्षणा दोषा इत्यनेनैव।

तत्त्रैराश्यं रागद्वेषमोहार्थान्तरभावात्। तेषां तु संगृहीतानां—(४) रागद्वेषमोहार्थान्तरभावात्। "तेषां दोषाणां त्रयो राशयः त्रयः पक्षाः सम्भवन्ति। रागपक्षः—कामो मत्सरः स्पृहा तृष्णा लोभ इति। द्वेषपक्षः—क्रोधः ईर्ष्या असूया द्रोहोऽमर्ष इति। मोहपक्षः—मिथ्याज्ञानं विचिकित्सा मानः प्रमाद इति।"

न्यायवार्त्तिकतात्पर्यटीका

तदेवं बहु परीक्षितं दोषाणां, यत्तु किञ्चिद्दोषाणामपरीक्षितमस्ति तत् परीक्षितुमुपक्रमते—प्रवर्तनालक्षणा इत्युक्तं तथा च मानादय इति। रागद्वेषमोहा एव दोषाः, न च मानादयस्तेष्वन्तर्भवन्ति बुद्धिव्यपदेशभेदात्, प्रवर्तनालक्षणत्वं तु तेषामप्यस्ति, तस्मादतिव्यापकत्वान्न लक्षणमेतद् युक्तम्, युक्तत्वे वा लक्षणसूत्रे मानादयोऽपि दोषवत् पठनीया इति पूर्वपक्षः। सिद्धान्तवाद्याह—नोपसंख्यायन्ते संगृहीतत्वादिति। रागद्वेषमोहानां सामान्यत्रयाणां कामादयो विशेषाः तथा चोपपन्नो बुद्धिव्यपदेशभेदः संग्रहश्चेति भावः।

वृत्तिः

दोषपरीक्षायां प्रागतायामाह—(तथा दोषाः)

तथा दोषा अपि, प्रवर्त्तनालक्षणा इत्युक्तलक्षणवन्त एवेति नासिद्धिरिति भावः ॥२॥

समाप्तं प्रवृत्तिदोषसामान्यपरीक्षाप्रकरणम् ॥ १ ॥

अथ त्रैराश्येन विशेषेण दोषपरीक्षणाय तत्त्रैराश्यप्रकरणम्, तत्र सिद्धान्तसूत्रम्—(तत्त्रैराश्यं रागद्वेषमोहार्थान्तरभावात्)

---

(१) 'रागपक्षाः'—इति ज०।
(२) 'द्वेषपक्षाः' इति ज०।
(३) 'मोहपक्षाः' इति ज०।
(४) 'तत्-त्रैराश्यम्' इति क-पुस्तके अधिकम्।

न्यायभाष्यम्

मिथ्याज्ञानं विचिकित्सा मानः प्रमाद इति। त्रैराश्यान्नोपसङ्ख्यायन्ते इति। लक्षणस्य तर्ह्यभेदात्त्रित्वमनुपपन्नम्? नानुपपन्नम्, रागद्वेषमोहार्थान्तरभावात्॥

न्यायवार्त्तिकम्

'कामो' 'मत्सर' इत्यादि किं पर्यायवचनम् आहो अर्थान्तरभाव इति? किं चातः? यदि पर्यायवचनम्, त्रयो राशय इत्ययुक्तम्, न हि पर्यायशब्देषु राशित्वं सम्भवति। न हि "इन्द्र"-'शक्र'-'पुरन्दर'शब्दानां राश्यर्थः कश्चित् सम्भवति। अर्थान्तरभावे विशेषो वाच्य इति। अर्थान्तरभाव इति ब्रूमः। तत्र कामः स्त्रीगताभिलाषः, या स्त्रीगता प्रार्थना सा काम इति। एवं चाऽऽहुः नाकामयमानो मण्डयत इति। अक्षीयमाणवस्त्वपरित्यागेच्छा मत्सरः—(१)यद्वस्तु दीयमानमुपभुज्यमानं वा न क्षीयते तदपरित्यागेच्छा मत्सरः(१*), यथा राजकीयोदपानान्मोदकं पा इति। अस्ववस्त्वादानेच्छा स्पृहा—यद्वस्तु स्वं न भवति तस्य या आदानेच्छा सा स्पृहा। पुनर्भवप्रतिसन्धानहेतुभूता तृष्णा—या पुनर्भवप्रार्थना सा तृष्णा। प्रमाणविरुद्धपरद्रव्यापहारेच्छा लोभः—प्रमाणविरुद्धं परद्रव्यादानं कुर्वाणो लुब्ध इत्युच्यते। एषां च सामान्यं रागः, सामान्येन विशेषः संगृहीत इति।

शरीरेन्द्रियाधिष्ठानवकृत्यहेतुः क्रोधः—सञ्जाते यस्मिन् शरीरेन्द्रियाधिष्ठानानि विकृतानि भवन्ति स क्रोध इति। साधारणे वस्तुनि पराभिनिवेशप्रतिषेधेच्छा ईर्ष्या—यदपरिगृहीतं साधारणं वस्तु तस्मिन् यः पराभिनिवेशप्रतिषेधाभिप्रायः सा ईर्ष्या। परगुणाक्षमता असूया—या परगुणान् श्रुत्वा अक्षमतोपजायते सा असूया। परापकारेच्छा द्रोहः—अशक्तस्य (२) या परं प्रत्यपचिकीर्षा सा द्रोहः। (३)कृतापकारासहिष्णुता अमर्षः—(४)या कृतापकारस्य असहिष्णुता सोऽमर्षः (४*)। अस्य च द्वेषः सामान्यं तेन संग्रहः।

न्यायवार्त्तिकतात्पर्यटीका

तत्त्र—वात् (सू० ३)॥ अस्ववस्त्वादानेच्छा स्वामिदानपूर्विका स्पृहा। पुनर्भवप्रार्थना तृष्णा, हेतुभूता प्रवृत्तिद्वारेण पुनर्भवप्रतिसन्धानस्येति। प्रमाणविरुद्धेति अन्यायेनेत्यर्थः। परस्य ज्ञातेर्ममाप्येतदिति बुद्धिरभिनिवेशः तत्प्रतिषेधाभिप्रायो ज्ञानि-

वृत्तिः

तेषां दोषाणां त्रयो राशयस्त्रयः पक्षाः, न तु रागद्वेषमोहानामेकैकत्वं तेषामर्थान्तरभावात् अवान्तरभेदवत्त्वात्। तथा च भयशोकमानादीनामेष्वेवान्तर्भावान्न विभागन्यूनत्वम्। इच्छात्वद्वेषत्वमिथ्याज्ञानत्वरूपविरुद्धधर्मवत्त्वान्न विभागाधिक्यम्। इच्छात्वादिकं तु रागादावनुभवसिद्धम्।

तत्र रागपक्षः—कामो मत्सरः स्पृहा तृष्णा लोभो माया दम्भ इति। कामो रिरंसा, रतिश्च विजातीयः संयोगः। नारीगताभिलाष इति तु न युक्तम्, स्त्रियाः कामेऽव्याप्तेः।

---

(१) अयमंशः क-पुस्तके नास्ति। (२) 'या' इति ख-पुस्तके नास्ति। (३) 'क्रते'ति ख-पु० नास्ति। (४) अयमंशः ख-पुस्तके नास्ति।

न्यायभाष्यम्

(१)आसक्तिलक्षणो रागः, अमर्षलक्षणो द्वेषः, मिथ्याप्रतिपत्तिलक्षणो मोह इति। एतत् प्रत्यात्मवेदनीयं सर्वशरीरिणाम्—विजानात्ययं शरीरी रागमुत्पन्नम् 'अस्ति मेऽध्यात्मं रागधर्म' इति। विरागं च विजानाति—'नास्ति मेऽध्यात्मं रागधर्म' इति। एवमितरयोरपीति। मानेर्ष्याऽसूयाप्रभृतयस्तु त्रैराश्यमनुपतिता इति नोपसङ्ख्यायन्ते ॥३॥

न्यायवार्त्तिकम्

विपर्ययज्ञानं मिथ्याज्ञानम् अतस्मिंस्तदिति प्रत्यय इति। संशयो विचिकित्सा (२)किंस्विदिति। तथा विद्यमानाविद्यमानगुणाध्यारोपेणात्मोत्कर्षप्रत्ययो मानः (३)अहो अहमस्मि इति। शक्तस्य कर्तव्याकरणं प्रमादः—(४)यतः शक्तः स्वकर्तव्यं न करोति स प्रमाद इति। अस्य च सामान्यं मोहः तेन संग्रह इति। अतस्त्रैराश्यान्नोपसंख्यायन्त इति।

कुत एतत्? लोकतस्तदवगतेः—(५)लोकत एते कामादयः एवम्भूतेष्वभिप्रायेषु प्रयुज्यन्ते, नाभिप्रायमात्रे, न हि भिक्षां प्रार्थयमानः कामयत इत्येवं भवतीति। लक्षणस्य तर्हि अभेदात् त्रित्वमनुपपन्नमिति—एकं रागद्वेषमोहाः लक्षणाभेदात् रागभेदवदिति? नानुपपन्नं रागद्वेषमोहार्थान्तरभावात्—सत्यपि लक्षणस्याभेदे आन्तर्गणिकं भेदकं लक्षणमस्ति तदुपपत्तेस्त्रित्वम्, यथा रागलक्षणेन संगृहीतानां कामादीनामिति। न च सामान्यमेकत्वे कारणम्, (६)सामान्यस्यैवाभावः स्यात् यदि रागद्वेषमोहानामेकत्वं स्यात्; समानमेतल्लक्षणमित्येतदेव न स्यादिति न लोकस्य समानं भवतीति। किं पुनरान्तर्गणिकं लक्षणमिति? सक्तिलक्षणो रागः—यो विषयेष्वभिषङ्गः स रागः। अमर्षलक्षणो द्वेषः—असहिष्णुता दुःखस्य दुःखसाधनानां चेति द्वेषः। मिथ्याप्रतिपत्तिलक्षणो मोहः—यथावस्थितविषये अयथाभावप्रतिपत्तिर्या। एतच्च रागद्वेष-

न्यायवार्त्तिकतात्पर्यटीका

पिशाचस्येर्ष्येत्युच्यते। अमर्षलक्षणो द्वेष इति। ननु (७)कृतापकारस्य या असहिष्णुता सोऽमर्ष इति द्वेषस्यैव विशेष इत्युक्तम्, कथं द्वेषसामान्यमुच्यत इत्यत आह—असहिष्णुता दुःखस्य दुःखसाधनानां चेति। मिथ्याप्रतिपत्तिलक्षणो मोह इति। संशयो हि यथावस्थिते

वृत्तिः

मत्सरः स्वप्रयोजनप्रतिसन्धानं विना पराभिमतनिवारणेच्छा, यथा राजकीयादुदपानान्नोदकं पेयमित्यादि। एवं परगुणनिवारणेच्छाऽपि। स्पृहा धर्माविरोधेन प्राप्तीच्छा। तृष्णा इदं मे न क्षीयतामितीच्छा। उचितव्ययाकरणेनापि धनरक्षणेच्छारूपं कार्पण्यमपि तृष्णाभेद एव। धर्मविरोधेन परद्रव्येच्छा लोभः। परवञ्चनेच्छा माया। कपटेन धार्मिकत्वादिना स्वोत्कर्षख्यापनेच्छा दम्भः।

---

(१) 'सक्तिलक्षणः'—इति टि०। (२) 'कस्मादिति (?)' इति ख०। (३) 'अहोऽहमस्मि' इति क-पुस्तके मुद्रितम्, तत्र सन्धिश्चिन्त्यः, 'आहोऽहमस्मि' इति ख०। (४) 'यच्छक्तः' इति ख०। (५) 'लोके' इति क-खधृतपाठान्तरम्। (६) 'तथा च सामा-'—इति ख०। (७) 'अकृता'—इति क०।

(सू०)—नैकप्रत्यनीकभावात्(क) ॥ ४ ॥

न्यायभाष्यम्

नार्थान्तरं रागादयः। कस्मात्? एकप्रत्यनीकभावात्—तत्त्वज्ञानं सम्यङ्मतिरार्यप्रज्ञा सम्बोध इत्येकमिदं प्रत्यनीकं त्रयाणामिति ॥ ४ ॥

न्यायवार्त्तिकम्

मोहानां व्यवच्छेदकं लक्षणमात्मप्रत्यक्षमिति ॥ ३ ॥

नैकप्रत्यनीकत्वात्। एकं रागद्वेषमोहा एकप्रत्यनीकत्वात् विभागवदिति—यथा विभाग एकेनैव संयोगेन विरुध्यमान एको भवति तथा तत्त्वज्ञानेनैकेन विरुध्यन्ते रागादयस्तस्मादेकं रागादय इति ॥ ४ ॥

न्यायवार्त्तिकतात्पर्यटीका

पदार्थे अयथाभावप्रतिपत्तिर्भवति। व्यवस्थितं हि वस्तु अव्यवस्थिततया गृह्णाति संशयः एवं पण्डितमानिनो मीमांसकदुर्दुरूढस्याभिमान इति ॥ ३ ॥

नैक—त्वात् (सू० ४) ॥ आर्यप्रज्ञेति भाष्यम्। आरात् तत्त्वाद् याता आर्या। आर्या चासौ प्रज्ञा चेति आर्यप्रज्ञा सम्यग्बोधः संबोधः ॥ ४ ॥ (ख)

वृत्तिः

द्वेषपक्षः—क्रोध ईर्ष्या असूया द्रोहोऽमर्षोऽभिमान इति। क्रोधो नेत्रलौहित्यादिहेतुर्द्वेषविशेषः। ईर्ष्या साधारणे वस्तुनि परस्वत्वात् तद्ग्रहीतरि द्वेषः, यथा दुरन्तदायादानाम्। असूया परगुणादौ द्वेषः। द्रोहो नाशाय द्वेषः। हिंसा तु द्रोहजन्या। परे तु तां द्रोहं मन्यन्ते। अमर्षः कृतापराधेऽसमर्थस्य द्वेषः। अभिमानोऽपकारिण्यकिञ्चित्करस्याऽऽत्मनि द्वेषः।

मोहपक्षः—विपर्यय संशय तर्क-मान-प्रमाद-भय-शोकाः। विपर्ययो मिथ्याज्ञानापरपर्यायोऽयथार्थनिश्चयः। एकधर्मिकविरुद्धभावाभावज्ञानं संशयः, स एव विचिकित्सेत्युच्यते। व्याप्यारोपाद् व्यापकप्रसञ्जनं तर्कः। आत्मन्यविद्यमानगुणारोपेणोत्कर्षधीर्मानः। गुणवति निर्गुणत्वधीरूपं स्मयमपि मानेऽन्तर्भावयन्ति।

प्रमादः पूर्वं कर्त्तव्यतया निश्चितेऽप्यकर्त्तव्यताधीः, एवं वैपरीत्येऽपि। भयम् अनिष्टहेतूपनिपाते तत्परित्यागानर्हताज्ञानम्। शोक इष्टवियोगे तल्लाभानर्हताज्ञानम् ॥३॥

(क) "नैकप्रत्यनीकत्वात्" इति न्यायसूचीसम्मतः पाठः; वार्त्तिक-तात्पर्यटीकयोरपि तथैव दृश्यते।

(ख) आर्यप्रज्ञेत्यादिः "सम्बोधः" इत्यन्तो ग्रन्थः पूर्वमुद्रितीय-तात्पर्यटीकायां 'भावः' इत्यनन्तरं मुद्रितः तच्चायुक्तमिति इह सन्निवेशितः।

(सू०)—व्यभिचारादहेतुः ॥ ५ ॥

न्यायभाष्यम्

एकप्रत्यनीकाः पृथिव्यां श्यामादयोऽग्निसंयोगेनैकेन, एकयोनयश्च पाकजा इति ॥ ५ ॥

सति चार्थान्तरभावे—

(सू०)—तेषां मोहः पापीयान्नामूढस्येतरोत्पत्तेः ॥ ६ ॥

मोहः पापः, पापतरो वा (१)द्वावभिप्रेत्योक्तम्। कस्मात्? नामूढस्ये-

न्यायवार्त्तिकम्

व्यभिचारादहेतुः। एकप्रत्यनीकाश्च रूपादयः एकाग्निसंयोगविरोधिनः, न चैषामेकत्वमिति (२) अनैकान्तिकम्। एकयोनित्वादेकं रागादयः शब्दवदित्यप्यनेनैव प्रत्युक्तम्, एकयोनयो रूपादयो न चैषामेकत्वमिति ॥ ५ ॥

सति (३) चार्थान्तरत्वे—

तेषां मोहः पापीयान् नामूढस्येतरोत्पत्तेः। तेषां मोहः पापीयान्। पापतमः पापिष्ठ इति वा (क) प्राप्ते द्वौ द्वावभिप्रेत्य पापीयानित्युच्यते, रागमोहयोर्मोहः पापीयान् द्वेषमोहयोर्मोहः

न्यायवार्त्तिकतात्पर्यटीका

व्यभि—तुः (सू० ५) ॥ (ख) एकयोनयो हि रूपादयो न चैषामेकत्वम्। यदि पुनस्तत्र रूपादीनां परस्परभेदसिद्धये कश्चित्कारणभेद आस्थीयते स रागादिष्वपि समान इति भावः ॥ ५ ॥

नासति निदानोच्छेदे निदानिनामुच्छेद इति रागद्वेषयोर्निदानिनोरुच्छेदाय तन्निदानत्वं मोहस्य दर्शयति—सति चार्थान्तरत्व इति।

तेषां—त्तेः (सू० ६) ॥ तेषां मोहः पापीयान्। कुतः? नामूढस्येतरोत्पत्तेः।

वृत्तिः

शङ्कते—(नैकप्रत्यनीकभावात्)

रागादीनां भेदो न, एकप्रत्यनीकभावात् एकस्मिन् प्रत्यनीकभावो विरोधित्वं यस्य तत्तथा, तेनैकनाश्यत्वादित्यर्थः। एकं हि तत्त्वज्ञानमेषां विरोधि ॥ ४ ॥

समाधत्ते—(व्यभिचारादहेतुः)

एकविरोधित्वं भेदनिषेधे न हेतुर्व्यभिचारात्, एकाग्निसंयोगनाश्यत्वेऽपि रूपादीनां भेदात् ॥ ५ ॥

---

(१) 'द्वौ द्वावभि-' इति टि०। (२) 'अनैकान्तिकोऽयम्' इति ख०। (३) 'चार्थान्तरभावे' इति क-ख०।

(क) तथाच पाणिनीयसूत्रे—"अतिशायने तमबिष्ठनौ', 'द्विवचनविभज्योपपदे तरबीयसुनौ' (५।३।५५—५।३।५७) इति। (ख) एकयोनयो हीत्यादिः भाव इत्यन्तो ग्रन्थः क-ख तात्पर्यटीकापुस्तकयोः 'अभिमान इति' इति तृतीयसूत्रीय-टीकाग्रन्थात् परं मुद्रितः। तच्चायुक्तमिति इह मुद्रितः।

न्यायभाष्यम्

तरोत्पत्तेः—अमूढस्य रागद्वेषा नोत्पद्यन्ते मूढस्य तु यथासङ्कल्पमुत्पत्तिः, विषयेषु रञ्जनीयाः सङ्कल्पा रागहेतवः, कोपनीयाः सङ्कल्पा द्वेषहेतवः, उभये च सङ्कल्पा न मिथ्याप्रतिपत्तिलक्षणत्वान्मोहादन्ये, ताविमौ मोहयोनी रागद्वेषाविति। तत्त्वज्ञानाच्च मोहनिवृत्तौ रागद्वेषानुत्पत्तिरित्येकप्रत्यनीकभावोपपत्तिः। (१)एवं च कृत्वा तत्त्वज्ञानाद् "दुःखजन्मप्रवृत्तिदोषमिथ्याज्ञानानामुत्तरोत्तरापाये (क)तदनन्तराभावादपवर्ग" इति व्याख्यातमिति ॥ ६ ॥

न्यायवार्त्तिकम्

पापीयानिति। कस्मात्? नामूढस्येतरौ भवतः मूढः कुप्यति मूढो रज्यते मूढो मुह्यतीति। तत्त्वज्ञानाच्च मोहनिवृत्तौ रागादिनिवृत्तिरित्येकप्रत्यनीकता—यस्मात् तत्त्वज्ञाननिवृत्ते मोहे न रागद्वेषौ भवतः अत एकप्रत्यनीकता, न (२)पुनरेकत्वादिति। एवं च कृत्वा दुःखादीनामुत्तरोत्तरापाये तदनन्तराभावादपवर्ग इति सिध्यति ॥ ६ ॥

न्यायवार्त्तिकतात्पर्यटीका

अमूढस्येतरोत्पत्तिर्न भवति यत इत्यत्रार्थे 'नामूढस्येतरोत्पत्ते'रित्युक्तम्। मोहाद्विषयस्य सुखसाधनत्वानुस्मृतिः दुःखसाधनतानुस्मृतिश्च। सङ्कल्पाः रञ्जनीयाः कोपनीया इति कर्त्तरि कृत्यो भव्यगेयादिपाठात्।

वार्त्तिकम्—मूढो मुह्यतीति, मूढ इति मोहवासनावान्। भवतु निदानोच्छेदादुच्छेदो निदानिनः, निदानस्य कुत उच्छेद इत्यत आह—तत्त्वज्ञानाच्चेति। प्रतिपक्षाभ्यासान्निदानोच्छेद इत्यर्थः ॥ ६ ॥

वृत्तिः

किं च नैतेषामेकनिवर्त्यत्वं तत्त्वज्ञानस्य मोहनिवर्तकत्वात् तन्निवृत्त्या रागादिनिवृत्तेरित्याशयेनाह—(तेषां मोहः पापीयान्नामूढस्येतरोत्पत्तेः)

यद्यपि बहूनां निर्धारणे इष्ठनस्तमपो वा विधानात् पापतमः पापिष्ठ इति वा युक्तं तथाऽपि द्वौ द्वावधिकृत्य निर्धारणम्, द्वयोर्निर्धारणे ईयसुनो विधानात्। तेन रागमोहयोर्द्वेषमोहयोर्वा मोहः पापीयान् अनर्थमूलं बलवद्द्वेष्य इति यावत्। हेतुमाह—नामूढस्येति। मोहशून्यस्य रागद्वेषयोरभावादित्यर्थः।

न च तत्त्वज्ञानिनोऽपि हिताहितगोचरप्रवृत्तिनिवृत्ती रागद्वेषाधीने इति तत्र व्यभिचार इति वाच्यम्—धर्माधर्मप्रयोजकरागद्वेषयोर्दोषत्वेन विवक्षितत्वात्। एतदभिप्रायकमेवासक्तोऽद्विषंश्च मुक्त इत्यादिकमपीति भावः ॥ ६ ॥

(१) 'एकवच कृत्वा' इति टि०। (२) 'पुनरनेकत्वा'दिति ख०।

(क) 'तदनन्तरापायादि'ति सूत्रपाठः।

न्यायभाष्यम्

(क)प्राप्तस्तर्हि—

(सू०)—निमित्तनैमित्तिकभावादर्थान्तरभावो दोषेभ्यः ॥७॥

अन्यद्धि निमित्तमन्यच्च नैमित्तिकमिति दोषनिमित्तत्वाददोषो मोह इति ॥ ७ ॥

(सू०)—न दोषलक्षणावरोधान्मोहस्य ॥ ८ ॥

प्रवर्त्तनालक्षणा दोषा इत्यनेन दोषलक्षणेनावरुध्यते दोषेषु मोह इति ॥ ८ ॥

न्यायवार्त्तिकम्

निमित्तनैमित्तिकभावादर्थान्तरभावो दोषेभ्यः । प्राप्तस्तर्हि अदोषो मोहः दोषनिमित्तत्वाद्रूपादिवदिति ॥ ७ ॥

न दोषलक्षणावरोधान्मोहस्य । न दोषलक्षणावरोधात्—न कार्यकारणभावेन पदार्थानां तथाभावोऽतथाभावो वा सिध्यति, किन्तु लक्षणस्याभेदादिति दोषलक्षणं च मोहेऽस्तीति दोषो मोहः ॥ ८ ॥

न्यायवार्त्तिकतात्पर्यटीका

निमि—भ्यः (सू० ७) ॥ (ख)

दोषनिमित्तत्वादिति हेतोरप्रयोजकत्वमाह—न दोषलक्षणावरोधादिति ।

न दो—स्य (सू० ८) ॥ तथाभावः तज्जातीयत्वम् अतथाभावः अतज्जातीयत्वम् ॥ ८ ॥

वृत्तिः

शङ्कते—(प्राप्तस्तर्हि निमित्तनैमित्तिकभावादर्थान्तरभावो दोषेभ्यः)

दोषनिमित्तत्वान्मोहस्य दोषभिन्नत्वं स्यादभेदेन कार्यकारणभावाभावात् । दोषेभ्य इत्यान्तर्गणिकभेदाद्बहुवचनम् ।

प्राप्तस्तर्हीत्यंशस्तु न सूत्रं किं तु भाष्यकृतः पूरणमित्यपि वदन्ति ॥ ७ ॥

निराकरोति—(न दोषलक्षणसत्त्वान्मोहस्य) (ग)

मोहस्य दोषलक्षणसत्त्वाद्दोषत्वम्, व्यक्तिभेदाच्च हेतुहेतुमद्भावो न विरुध्यते इति भावः ॥ ८ ॥

(क) ज-पुस्तके 'प्राप्तस्तर्हि' इत्यंशः सूत्रेऽन्तर्भावितः ।

(ख) ७मसूत्रे तात्पर्यटीका नोपलभ्यते ।

(ग) 'अवरोधात्' इत्यत्र 'सत्त्वात्' इति वृत्तिकृन्मते विशेषः ।

(सू०)—निमित्तनैमित्तिकोपपत्तेश्च तुल्यजातीयानामप्रतिषेधः ॥ ९ ॥

न्यायभाष्यम्

द्रव्याणां गुणानां वाऽनेकविधविकल्पो निमित्तनैमित्तिकभावे तुल्यजातीयानां दृष्ट इति ॥ ९ ॥

दोषानन्तरं प्रेत्यभावः, तस्यासिद्धिरात्मनो नित्यत्वात्—न खलु नित्यं किंचिज्जायते म्रियते वा इति जन्ममरणयोर्नित्यत्वादात्मनोऽनुपपत्तिः, उभयं च प्रेत्यभाव इति तत्रायं (१)सिद्धानुवादः—

(सू०)—आत्मनित्यत्वे प्रेत्यभावसिद्धिः ॥ १० ॥

नित्योऽयमात्मा प्रैति पूर्वशरीरं जहाति म्रियते इति, प्रेत्य च पूर्वशरीरं हित्वा

न्यायवार्त्तिकम्

निमित्तनैमित्तिकोपपत्तेश्च तुल्यजातीयानामप्रतिषेधः । तुल्यजातीयानामनेकविधविकल्पो निमित्तनैमित्तिकभावो दृष्ट इति, यथा बुद्धिर्बुद्ध्यन्तरनिमित्तं बुद्धिजातीया चेति । तुर्यादयो द्रव्यस्य निमित्तं द्रव्यजातीयाः । नोदनाभिघातसंयुक्तसंयोगाः (२)संस्कारश्च (क)गुणा इति ॥ ९ ॥

(इति दोषत्रैराश्यप्रकरणम्) ।

परीक्षिता दोषा इति दोषानन्तरं प्रेत्यभावः तस्यासिद्धिरात्मनो नित्यत्वात्—नित्य आत्मा न जायते न म्रियते, उभयं च प्रेत्यभावः मृत्वा पुनर्जन्म । तत्रायं सिद्धार्थानुवादः—

आत्मनित्यत्वे प्रेत्यभावसिद्धिः । नित्यः सन् आत्मा प्रैति जायते चेति । किमुक्तं

न्यायवार्त्तिकतात्पर्यटीका

अनैकान्तिकत्वमाह—निमित्तनैमित्तिकोपपत्तेश्चेति ।

निमि—धः (सू० ९) ॥ (ख)

आत्म—द्धिः (सू० १०) ॥ उत्पादोच्छेदौ प्रेत्यभावः, न चात्मनो नित्यस्य तौ स्तः, तस्मादस्मिन् दर्शने न युक्तः प्रेत्यभावः । वैनाशिकानां तु सत्त्वोत्पादनिरोधाभ्यां युक्तः

वृत्तिः

अप्रयोजकत्वमुक्त्वाऽनैकान्तिकत्वमप्याह—(निमित्तनैमित्तिकोपपत्तेश्च तुल्यजातीयानामप्रतिषेधः)

एकजातीययोरपि द्रव्ययोर्गुणयोश्च निमित्तनैमित्तिकोपपत्तेर्हेतुहेतुमद्भावस्वीकारात् तुल्यजातीयत्वप्रतिषेधो न युक्त इति ॥ ९ ॥

समाप्तं दोषपरीक्षाप्रकरणम् ॥ २ ॥

(१) 'सिद्धार्थानुवादः' इति फ० । (२) 'संस्कारस्य' इति क० ।

(क) संस्कारश्चेति ख-पुस्तकपाठो गृहीतः । वेगाख्यसंस्कारस्य वेगजन्यत्वं प्रसिद्धम् । गुणजातीययोः संयोगसंस्कारयोर्हेतुहेतुमद्भावश्च क्रियाद्वारेणेति बोध्यम् ।

(ख) इमसूत्रे अवतरणिकाऽतिरिक्ता टीका नोपलभ्यते ।

न्यायभाष्यम्

भवति जायते शरीरान्तरमुपादत्त इति। तच्चैतदुभयं 'पुनरुत्पत्तिः प्रेत्यभावः' इत्यत्रोक्तं पूर्वशरीरं हित्वा शरीरान्तरोपादानं प्रेत्यभावः (सू० १९, आ० १ अ० १) इति तच्चैतन्नित्यत्वे सम्भवतीति। यस्य तु सत्त्वोत्पादः सत्त्वनिरोधः प्रेत्यभावः तस्य कृतहानमकृताभ्यागमश्च दोषः। उच्छेदहेतुवादे ऋष्युपदेशाश्चानर्थका इति ॥१०॥

न्यायवार्त्तिकम्

भवति म्रियत इति? पूर्वोत्पन्नाभिः शरीरेन्द्रियबुद्धिवेदनाभिर्वियुज्यत इति। किं चोक्तं जायत इति? अपूर्वोत्पन्नाभिर्निकायविशिष्टाभिः शरीरेन्द्रियबुद्धिवेदनाभिः सम्बध्यत इति। न पुनः जन्ममरणे (१) आत्मन्युत्पादनिरोधौ नित्यत्वात्—नित्य आत्मेति पूर्वाभ्यस्तसूत्रे प्रतिपादितम्। यस्य पुनरात्मन उत्पादनिरोधौ जन्ममरणे तस्याकृताभ्यागम-कृतनाशदोषप्रसङ्ग इत्युक्तं शरीरदाहे पातकाभावादिति सूत्रं वर्णयद्भिः ॥ १० ॥

न्यायवार्त्तिकतात्पर्यटीका

प्रेत्यभावः। प्रेत्येति ल्यब् मुखं व्यादाय स्वपितीतिवद् द्रष्टव्यः। तथा च भूत्वा प्रायणमिति भवनप्रायणयोः समानकर्तृकत्वमप्युपपन्नमिति पूर्वपक्षः। पूर्वाभ्यस्तसूत्रे आत्मनित्यत्वव्यवस्थापनात्, सत्त्वोत्पादोच्छेदे च कृतहानाकृताभ्यागमदोषेणाभ्युदयनिःश्रेयसार्थमप्रवृत्तिः ऋष्युपदेशानर्थक्यप्रसङ्गश्च। स्वदेहेन्द्रियबुद्धिसंवेदनासंबन्धोत्पादविनाशौ नित्यस्यात्मनो जन्मप्रायणे। तथाचोपपन्नः प्रेत्यभाव इति सिद्धान्तः ॥ १० ॥

वृत्तिः

क्रमप्राप्ततया प्रेत्यभावे परीक्षणीये प्रेत्यभावः शरीरस्य बुद्धेरात्मनो वेति संशये 'पुनरुत्पत्तिः प्रेत्यभावः' इति लक्षणसूत्राद्विनष्टस्योत्पादः प्रतीयते, न चासौ नित्यस्यात्मनः सम्भवतीति शरीरादेः स्यात्। न च मृतस्य शरीरादेरुत्पत्तिविरोधान्नेदं युक्तमिति वाच्यं प्रेत्यभाव इत्यस्य मुखं व्यादाय स्वपितीतिवद् व्यत्ययेन भूत्वा प्रायणमित्यर्थात्।

अत्र सिद्धान्तसूत्रम्—(आत्मनित्यत्वे प्रेत्यभावसिद्धिः)

आत्मनः पूर्वोक्तयुक्त्या नित्यत्वे प्रेत्यभावस्तस्य सिध्यति एकजातीयशरीराद्यसम्बन्धचरमसम्बन्धनाशयोरुत्पादप्रायणयोरात्मनः सम्भवात्। सम्बन्धस्त्ववच्छेद्यावच्छेदकभावलक्षणः, स च स्वरूपसम्बन्धविशेषोऽतिरिक्तो वेत्यन्यदेतत्।

लक्षणसूत्रे पुनरुत्पत्तिरित्यत्र पुनःपदं च प्रेत्यभावप्रवाहस्यानादित्वज्ञापनाय, तज्ज्ञानं च वैराग्ये उपयुज्यत इति ॥ १० ॥

---

(१) 'आत्मन उत्पादनिरोधौ' इति क-ख-धृतपाठान्तरम्।

न्यायभाष्यम्

कथमुत्पत्तिरिति चेत्—

(सू०)—व्यक्ताद् व्यक्तानां प्रत्यक्षप्रामाण्यात् ॥ ११ ॥

केन प्रकारेण किंधर्मकात् कारणाद् व्यक्तं शरीराद्युत्पद्यत इति? व्यक्ताद् भूतसमाख्यातात् पृथिव्यादितः परमसूक्ष्मान्नित्याद् व्यक्तं शरीरेन्द्रियविषयोपकरणाधारं प्रज्ञातं द्रव्यमुत्पद्यते। व्यक्तं च खल्विन्द्रियग्राह्यं तत्सामान्यात् कारणमपि व्यक्तम्। किं सामान्यम्? रूपादिगुणयोगः - रूपादिगुणयुक्तेभ्यः पृथि-

न्यायवार्त्तिकम्

कथमुत्पत्तिरिति चेत्—किंधर्मकात् कारणात् शरीरेन्द्रियमहाभूतादि व्यक्तमुत्पद्यत इति?

व्यक्ताद् व्यक्तानां प्रत्यक्षप्रामाण्यात्। किं पुनर्व्यक्तम्? उपलब्धिलक्षणप्राप्तं रूपादियुक्तं द्रव्यम्, तत्सामान्यात् परमाणुलक्षणमपि पृथिव्यादिकारणं व्यक्तमित्युच्यते। किं सामान्यम्? रूपादियोगः—(१)रूपादिसामान्यात् परमाणवो व्यक्ता इत्युच्यन्त इति। रूपादियुक्तेभ्यः परमाणुभ्यो घटादि गवादि व्यक्तमुत्पद्यत इति। कः पुनरत्र न्यायः? प्रत्यक्षप्रामाण्यात् (२)दृष्टा रूपादिमद्भ्यो (२*) रूपादिमतामुत्पत्तिरिति। नानेकान्तात्? नायमेकान्तो

न्यायवार्त्तिकतात्पर्यटीका

प्रेत्यभावविचारप्रस्तावेनेदमपरं विचारयति—येयं प्रेत्योत्पत्तिर्नाम सा कथमिति चेत्। अत्र हि प्रावादुकानां नानाविधा विप्रतिपत्तयः सन्ति। तत्राभिमतं तावत्पक्षं गृह्णाति—व्यक्तादिति।

व्यक्तात्—ण्यात् (सू० ११)॥ अग्रे विप्रतिपत्तीर्निवारयिष्यति। शरीरेन्द्रियविषयोपकरणाधारमिति एकवद्भावेन नपुंसकत्वम्। प्रत्यक्षगृहीतसंबन्धप्रभवमनुमानं प्रत्यक्षेऽप्युपदिशति—(क)प्रत्यक्षमूलकत्वादिति। ननु भवतु शरीरं पृथिव्यादि च व्यक्तं महत्त्वानेकद्रव्यवत्त्वरूपविशेषेभ्यः, तन्मूलकारणं परमाणवः कथं व्यक्ता इत्यत आह—तत्सामान्यादिति। रूपादिमत्सामग्रीपूर्वकं शरीरमित्यर्थः॥ ११ ॥

वृत्तिः

ननु प्रेत्यभाव उत्पत्तिनिरूप्यः, सा च न सजातीयाद् विजातीयाद्वा सम्भवति आद्यपृथिव्यादौ व्यभिचारात्, तन्नित्यत्वे मानाभावादतः प्रेत्यभावोऽसिद्ध इत्युपोद्घातात् प्रसङ्गाद्वोत्पत्तिप्रकारं दर्शयति—(व्यक्ताद् व्यक्तानां प्रत्यक्षप्रामाण्यात्)

---

(१) 'रूपादिसामान्ययोगात्'—इति क-खधृतपाठान्तरम्।

(२) अयमंशः ख-पु० नास्ति।

(क) 'प्रत्यक्षप्रामाण्यादि'ति तु मूले दृश्यते।

न्यायभाष्यम्

व्यादिभ्यो नित्येभ्यो रूपादिगुणयुक्तं शरीराद्युत्पद्यते। प्रत्यक्षप्रामाण्यात्—दृष्टो हि रूपादिगुणयुक्तेभ्यो मृत्प्रभृतिभ्यस्तथाभूतस्य द्रव्यस्योत्पादः, तेन चादृष्टस्यानुमानमिति। रूपादीनामन्वयदर्शनात् प्रकृतिविकारयोः, पृथिव्यादीनां (१)नित्यानामतीन्द्रियाणां कारणभावोऽनुमीयत इति ॥ ११ ॥

(सू०)—न घटाद् घटानिष्पत्तेः ॥ १२ ॥

इदमपि प्रत्यक्षम्—न खलु व्यक्ताद् घटाद् व्यक्तो घट उत्पद्यमानो दृश्यते इति, व्यक्ताद् व्यक्तस्यानुत्पत्तिदर्शनान्न व्यक्तं कारणमिति ॥ १२ ॥

न्यायवार्त्तिकम्

रूपादिमद्भ्यो रूपादिमदुत्पत्तिरिति अरूपादपि संयोगाद्रूपादिमदुत्पद्यमानं घटादि गवादि दृष्टमिति ? न सूत्रार्थापरिज्ञानात्—नायं सूत्रार्थो रूपादिमत एव रूपादिमदुत्पद्यत इति, अपि तु रूपादिमत्सामग्रीपूर्वकं गवादि व्यक्तमिति सूत्रार्थः। एवं च नानेकान्तोऽस्ति, न ह्यरूपायाः सामग्र्या रूपादिमत् कार्यमिति ॥ ११ ॥

न घटाद् घटानिष्पत्तेः। सजातीयात् सजातीयमुत्पद्यत इति मत्वा प्रतिषेधः। न सूत्रार्थापरिज्ञानादिति—न ब्रूमः सर्वं सर्वस्य कारणमिति, यश्च सर्वं सर्वस्य कारणत्वेनाभ्युपेयात् स एवं प्रत्यवस्थेयो न घटाद् घट उत्पद्यमानो दृष्ट इति ॥ १२ ॥

न्यायवार्त्तिकतात्पर्यटीका

न घ—त्तेः (सू० १२) ॥(क)।

वृत्तिः

'व्यक्तानाम्' उत्पत्तिरिति शेषः। (ख) व्यक्ताद् व्यक्तजातीयात् पृथिव्यादितो व्यक्तानां व्यक्तजातीयानां जन्यपृथिव्यादीनामुत्पत्तिः। इत्थं च पृथिव्यादेः पृथिव्यादितो रूपवदादितश्च रूपवदादीनामुत्पत्तेः प्रत्यक्षसिद्धत्वात् परमाणुरपि कल्प्यते त्रसरेणोरपकृष्टमहत्त्वेन सावयवावयवत्वसिद्धेः, तस्य लाघवान्नित्यत्वमिति भावः ॥ ११ ॥

अबुद्ध्वा शङ्कते—(न घटाद्घटानिष्पत्तेः)

विशेषकार्यकारणभावाभावे सामान्यतोऽपि न तथेति भावः ॥ १२ ॥

---

(१) नित्यानाम्—इति ज० पु० नास्ति।

(क) १२शसूत्रस्य तात्पर्यटीका नोपलभ्यते।

(ख) समुदायार्थमाह 'व्यक्तात्' इत्यादिना।

(सू०)—व्यक्ताद् घटनिष्पत्तेरप्रतिषेधः ॥ १३ ॥

न्यायभाष्यम्

न ब्रूमः सर्वं सर्वस्य कारणमिति, किन्तु यदुत्पद्यते व्यक्तं द्रव्यं तत् तथाभूतादेवोत्पद्यते इति। व्यक्तं च तन्मृद्द्रव्यं कपालसंज्ञकं यतो घट उत्पद्यते। न चैतन्निह्नुवानः क्वचिदभ्यनुज्ञां लब्धुमर्हतीति। तदेतत्तत्त्वम् ॥ १३ ॥

अतः परं प्रावादुकानां दृष्टयः प्रदर्श्यन्ते—

(सू०)—अभावाद्भावोत्पत्तिर्नानुपमृद्य प्रादुर्भावात् ॥ १४ ॥

न्यायवार्त्तिकम्

अपि तु—

व्यक्ताद् घटनिष्पत्तेरप्रतिषेधः। यदपि तद् घटादि व्यक्तमुत्पद्यते तदपि व्यक्तादेव कपालादेः; व्यक्ताच्चोत्पद्यमानं घटादि न किञ्चिद्बाधत इति। रूपादिमत्सामग्रीपूर्वकं शरीरादि व्यक्तं दर्शनस्पर्शनाभ्यामेकार्थग्रहणाद् घटवदिति। शब्दवद्वा वैधर्म्येण, तदेतत् तत्त्वम् ॥ १३ ॥

(इति प्रेत्यभावपरीक्षाप्रकरणम्)

अतः परं प्रावादुकानां दर्शनान्युपन्यस्य कानिचित् प्रतिषिध्यन्ते कानिचिदुपगम्यन्त इति। तत्र तावत्—

अभावाद् भावोत्पत्तिर्नानुपमृद्य प्रादुर्भावात्। अभावाद्भावो जायत इति कस्यचिद्दर्शनम्।

न्यायवार्त्तिकतात्पर्यटीका

व्यक्तात्—धः (सू० १३)॥(क)।

(ख)अतः परं प्रावादुकानां तैर्थिकानां च दर्शनान्युपन्यस्तानि कानिचित् प्रतिषिध्यन्ते तत्र कानिचिद् (ग)अभ्यनुज्ञायन्त इति। तत्र तावद् एके प्राहुः।

अभा—वात् (सू० १४)॥ अभावाद्भावोत्पत्तिः। कुतः ? नानुपमृद्य प्रादुर्भावो यतः तस्मादित्यर्थः।

वृत्तिः

विशेषतो व्यभिचारो न विरोधी, सामान्यतस्तु नास्त्येवेत्याशयवान् समाधत्ते—(व्यक्ताद् घटनिष्पत्तेरप्रतिषेधः)

सजातीयात् सजातीयोत्पत्तेर्न प्रतिषेधः, पृथिवीजातीयात् कपालादितो घटादिनिष्पत्तेः, उक्तापादनं चाप्रयोजकमिति भावः ॥ १३ ॥

समाप्तं प्रेत्यभावपरीक्षाप्रकरणम् ॥ ३ ॥

अथात्राष्टौ प्रकरणानि, प्रसङ्गाद् व्यक्तानामित्येतत्सिद्ध्यर्थमुपोद्घाताद्वा। तत्रादौ शून्यतोपादानप्रकरणम्।

तत्र पूर्वपक्षसूत्रम्—(अभावाद्भावोत्पत्तिर्नानुपमृद्य प्रादुर्भावात्)

(क) १३-शसूत्रस्य तात्पर्यटीका नोपलभ्यते। (ख) अत्र भाष्यवार्त्तिकतात्पर्यटीकानामक्षरविसंवादः स्पष्टः। टीकाकृतोपलब्धो वार्त्तिकग्रन्थ ईदृगाकार एवासीत् तस्यार्थमात्रपरिग्रहो वा कृत इति तु सुधीभिरवधानेन निर्णेयम्। (ग) वार्त्तिके 'उपगम्यन्ते' इत्यक्षरविसंवादः।

न्यायभाष्यम्

असतः सदुत्पद्यते(क) इत्ययं पक्षः। कस्मात्? उपमृद्य प्रादुर्भावात्। उपमृद्य बीजमङ्कुर उत्पद्यते नानुपमृद्य, न चेद् बीजोपमर्दोऽङ्कुरकारणम् अनुपमर्देऽपि बीजस्याङ्कुरोत्पत्तिः स्यादिति ॥ १४ ॥

अत्राभिधीयते—

(सू०)—व्याघातादप्रयोगः ॥ १५ ॥

उपमृद्य प्रादुर्भावादित्ययुक्तः प्रयोगो व्याघातात्। यदुपमृद्नाति न तदुपमृद्य प्रादुर्भवितुमर्हति विद्यमानत्वात्। यच्च प्रादुर्भवति न तेनाप्रादुर्भूतेनाविद्यमानेनोपमर्द इति ॥ १५ ॥

न्यायवार्त्तिकम्

तत्र न्यायं ब्रुवते—नानुपमृद्य प्रादुर्भावादिति, न किलाविनष्टे कारणे कार्यमुत्पद्यत इति। यथा बीजविनाशोत्तरकालमङ्कुरः प्रादुर्भवति। यदि बीजविनाशोऽङ्कुरकारणं नाभविष्यत्, अविनष्टेऽपि बीजेऽङ्कुरोऽभविष्यत्, न चैवमस्ति। तस्माद्बीजविनाशोऽङ्कुरकारणमिति ॥१४ ॥

व्याघातादप्रयोगः। उपमृद्य प्रादुर्भवतीति व्याघातः—यदुपमृद्नाति तदस्ति। न ह्यसदुपमर्दकारणमिति। यच्च प्रादुर्भवति तन्नास्ति न हि सदुत्पद्यत इति। तदिदमुपमृद्नाति प्रादुर्भवति चेति व्याहतमुच्यते। को व्याघातः? सहासम्भवः। यदुपमृद्नाति न जायते; अथ जायते, नोपमृद्नाति ॥१५॥

न्यायवार्त्तिकतात्पर्यटीका

विश्वं हि शून्यताया एव जायते। एवं किल श्रूयते—(क)असदेवेदमग्र आसीदिति। अत एवाद्याप्यसत एव जन्म दृश्यते न सतः। तत् कस्य हेतोः? अभावस्तस्य कारणमिति। उपलक्षणं चेदं नानुपमृद्य प्रादुर्भावादिति, असत उत्पादादित्यपि द्रष्टव्यम्। तस्मादसदुपादानं विश्वमिति सिद्धम् ॥ १४ ॥

तत्र सिद्धान्ती गूढाभिसन्धिराह—

व्याघा—गः (सू० १५) ॥ उपमृद्य प्रादुर्भवतीति व्याघात इति ॥ १५ ॥

वृत्तिः

अभावादुपादानात् कार्याणां भावानामुत्पत्तिः यतोऽङ्कुरादेर्बीजादिकमनुपमृद्य न प्रादुर्भावः, तथा च बीजादिविनाशोऽङ्कुराद्युपादानमिति ॥ १४ ॥

अत्रोत्तरम्—(व्याघातादप्रयोगः)

उपमृद्य प्रादुर्भवतीति न युक्तः प्रयोगो व्याघातात्, उपमर्दकस्य पूर्वमसत्त्वे उपमर्दकत्वायोगात्, सत्त्वे च परतः प्रादुर्भावायोगात् ॥ १५ ॥

(क) 'असतः सज्जायते' इति छान्दोग्यम् ६।२।१।

(सू०)—नातीतानागतयोः कारकशब्दप्रयोगात् ॥ १६ ॥

न्यायभाष्यम्

अतीते चानागते चाविद्यमाने कारकशब्दाः प्रयुज्यन्ते। पुत्रो जनिष्यते, जनिष्यमाणं पुत्रमभिनन्दति, पुत्रस्य जनिष्यमाणस्य नाम करोति, अभूत्कुम्भः, भिन्नं कुम्भमनुशोचति, भिन्नस्य कुम्भस्य कपालानि, अजाताः पुत्राः पितरं तापयन्तीति बहुलं भाक्ताः प्रयोगा दृश्यन्ते। का पुनरियं भक्तिः? आनन्तर्यं भक्तिः, आनन्तर्यसामर्थ्या-दुपमृद्य प्रादुर्भावार्थः, प्रादुर्भविष्यन्नङ्कुर उपमृद्नातीति भाक्तं कर्तृत्वमिति ॥ १६ ॥

न्यायवार्त्तिकम्

नातीतानागतयोः कारकशब्दप्रयोगात्। अतीतेऽनागते च कारकशब्दः प्रवर्तमानो दृष्टः—अतीते तावद् भिन्नं कुम्भमनुशोचति, भिन्नस्य कुम्भस्य कपालानि, अभूत् कुम्भ इति। अनागतेऽपि—पुत्रो जनिष्यते, जनिष्यमाणं पुत्रमभिनन्दति, जनिष्यमाणस्य पुत्रस्य नाम करोति, अजाताः पुत्राः स्थविरं तापयन्तीति बहुलं प्रयोगा भाक्ता इति। एवमयं प्रादुर्भविष्यन्नङ्कुर उपमृद्नातीत्युच्यते। कः पुनरुपमर्दार्थः? आनन्तर्यसामर्थ्यात् अनन्तरोत्पत्त्यर्थः, यस्माद् बीजोपमर्दादनन्तरमयं प्रादुर्भवतीति। अत्रोक्तं व्याघातादिति, नाजातेनोपमर्दो नोपमर्दासमर्थो जायत इति। यदपीदमुच्यते अतीतेऽनागते च कारकशब्दाः प्रयुज्यन्त इति, न प्रयोगो वार्यते,

न्यायवार्त्तिकतात्पर्यटीका

तदभिसन्धिमविद्वान् पूर्वपक्षी दूषयति।

न अतीतानागतयोः कारकशब्दप्रयोगात्। (सू० १६)॥ इति, उपमृद्य प्रादुर्भव-तीति भाक्त एव प्रयोगो न मुख्य इत्यर्थः। भिन्नस्य कुम्भस्य कपालानीति तु यद्यपि न साक्षात्कारकशब्दस्तथाऽपि षष्ठ्या संबन्धाभिधानात् तस्य क्रियागर्भत्वात् क्रियायाश्च कारक-नान्तरीयकत्वात् पारम्पर्येण कारकशब्दता द्रष्टव्या। का पुनर्भक्तिः? यथा योगाद्(क) उपसंगृह्णाति बीजमङ्कुर इति भवति प्रयोग इत्यर्थः।

पृच्छति—कः पुनरङ्कुरेण (ख) बीजोपमर्दार्थः। उत्तरम्—अनन्तरोत्पत्त्यर्थः। उपमर्द्योपमर्दकयोरप्यानन्तर्यम् (ग)अनयोरपीति एतत्सामान्यमित्यर्थः। पुनरपि गूढाभिसन्धिरेव सिद्धान्ती उक्तं स्मारयति—अत्रोक्तमिति। अभिप्रायमुद्घाटयति—यदपीदमुच्यत इति।

वृत्तिः

पूर्वपक्षी दूषयति—(नातीतानागतयोः कारकशब्दप्रयोगात्)

नायुक्तः प्रयागः, अतीतेऽनागते च कारकशब्दप्रयोगात् कर्तृकर्मादिबोधकशब्द-

---

(क) अत्र "उपमृद्नाति" इति पाठः सम्भाव्यते। (ख) अङ्कुरेण बीजेति च तात्पर्यकृता पूरितम्, तथैव वा पुस्तकान्तरपाठः। "कः पुनरङ्कुरेण बीजोपमर्दार्थः" इति ग्रन्थः "का पुनर्भक्तिः" इत्यतः पूर्वं क-ख-पुस्तकयोर्मुद्रितः। औचित्यादेवं सन्निवेशः कृतः। (ग) अनयोरिति उपमर्दप्रादुर्भावयोरित्यर्थः।

(सू०)—न विनष्टेभ्योऽनिष्पत्तेः ॥ १७ ॥

न्यायभाष्यम्

न विनष्टाद् बीजादङ्कुर उत्पद्यते इति तस्मान्नाभावाद् भावोत्पत्तिरिति ॥ १७ ॥

न्यायवार्त्तिकम्

अपि त्वसतः कारणादुत्पत्तिर्न युक्तेति। कारकशब्दानां च त्रैकालिकः प्रयोगः, तदुक्तं (क) प्रामाण्यसामान्यचिन्तायां वृक्षस्तिष्ठतीति यथा। यत्पुनरेतत् आनन्तर्यसामर्थ्यादुपमृद्य प्रादुर्भवतीतीत्युच्यत इति, न बीजनाशोऽङ्कुरकारणमपि तु (१)व्याहतव्यूहानां बीजावयवानां पूर्वव्यूहनिवृत्तौ व्यूहान्तरमुत्पद्यत इति व्यूहान्तरादङ्कुर आविर्भवतीति। न चाविनष्टे पूर्वव्यूहे व्यूहान्तरेण शक्यते भवितुमित्यानन्तर्यं प्रादुर्भावार्थः। एवं च बीजोपादानं युक्तमिति ॥१६॥

अस्य चार्थस्य ज्ञापनार्थं सूत्रम्—

न विनष्टेभ्योऽनिष्पत्तेः इति। न हि बीजविनाशोऽङ्कुरस्य कारणमपि तु बीजावयवाः पूर्वव्यूहपरित्यागेनेत्यर्थः सूत्रस्य ॥१७॥

न्यायवार्त्तिकतात्पर्यटीका

नौपचारिकं प्रयोगं व्यासेधामः कारकशब्दानाम्, किन्तु यथा भविष्यन्नङ्कुरः सम्प्रति असन् बीजमुपमृद्नाति, एवं बीजाभावोऽसन्नाङ्कुरं करोतीति ब्रूमः। तदिदमाह—अपि त्वसतः कारणादुत्पत्तिर्न युक्तेति। ननूक्तम् 'उपमृद्य प्रादुर्भावा'दित्यनेनानन्तर्यं बीजविनाशाङ्कुरोत्पादयोः सूचितं बीजविनाशानन्तर्याच्चाङ्कुरोत्पादस्य बीजविनाशकार्यत्वमित्यत आह—यत्पुनरेतदानन्तर्यसामर्थ्यादिति। अनन्यप्रयुक्तमानन्तर्यं कार्यकारणभावसाधनम् (२)इदं तु व्यूहानन्तर्यप्रयुक्तमिति नाभावस्य कारणत्वं गमयितुमर्हतीत्यर्थः। यदि व्यूहान्तरकार्योऽङ्कुरः अथ कस्मादविनष्टे पूर्वव्यूहे न भवतीत्यत आह—न चाविनष्टे इति। ननु यदि बीजावयवव्यूहान्तरमङ्कुरोत्पादहेतुर्न बीजं, कस्मादङ्कुरार्थिनः कृषीवला बीजमुपाददत इत्यत आह—एवं चेति। बीजावयवोपादाने अवर्जनीयतया बीजमागच्छदशक्यप्रत्याख्यानमित्यर्थः ॥ १६ ॥

तदेवमर्थं परिशोध्यात्रैवार्थे सूत्रं योजयति—अस्य चार्थस्येति।

न वि—त्तेः (सू० १७)॥ न विनष्टेभ्यो बीजेभ्योऽङ्कुरस्य अनिष्पत्तेः। बीजविनाश-

वृत्तिः

प्रयोगात्। यथा जनिष्यते पुत्रः, जनिष्यमाणं पुत्रमभिनन्दति, अभूत् कुम्भः, भिन्नं कुम्भमनुशोचति ॥ १६ ॥

(१) 'व्याहत'—इति क०। (२) 'इदं तत्तु व्यूहा'—इति क०।

(सू०)—क्रमनिर्देशादप्रतिषेधः ॥ १८ ॥

न्यायभाष्यम्

उपमर्दप्रादुर्भावयोः पौर्वापर्यनियमः क्रमः, स खल्वभावाद्भावोत्पत्तेर्हेतुर्निर्दिश्यते ; स च न प्रतिषिध्यते इति। व्याहतव्यूहानामवयवानां पूर्वव्यूहनिवृत्तौ व्यूहान्तराद् द्रव्यनिष्पत्तिर्नाभावात्। बीजावयवाः कुतश्चिन्निमित्तात् प्रादुर्भूतक्रियाः पूर्वव्यूहं जहति व्यूहान्तरं चापद्यन्ते व्यूहान्तरादङ्कुर उत्पद्यते। दृश्यन्ते खलु अवयवास्तत्संयोगाश्चाङ्कुरोत्पत्तिहेतवः। न चानिवृत्ते पूर्वव्यूहे बीजावयवानां शक्यं व्यूहान्तरेण भवितु-

न्यायवार्त्तिकम्

क्रमनिर्देशादप्रतिषेधः। पूर्वं बीजविनाशः पश्चादङ्कुरोत्पत्तिरिति सूत्रार्थः। अभावश्चेद् अङ्कुरोत्पादकारणं स्यात् सर्वं सर्वस्मादुत्पद्येत अभावस्य निर्विशेषत्वात्। न हि शालिबीजे विनष्टे

न्यायवार्त्तिकतात्पर्यटीका

श्चेदङ्कुरोत्पादहेतुरथ विनष्टे बीजे तदवयवेषु परस्परविच्छिन्नेष्वसति तेषां व्यूहान्तरे कस्मादङ्कुरो न भवति भवति तु सति तेषां व्यूहे ? तस्माद्विनष्टेभ्योऽङ्कुरानुत्पत्तेरसति व्यूहे न बीजनाशः कारणमिति सूत्रार्थः ॥ १७ ॥

क्रम—धः (सू० १८) ॥ क्रमनिर्देशादित्यस्य हेतोरस्मत्पक्षेऽप्यप्रतिषेधः, तत्राप्यानन्तर्यस्य तुल्यत्वात्। तथाऽपि विनिगमनायां को हेतुरित्यत आह—अभावश्चेदङ्कुरोत्पादकारणं स्यात्, अनुपाख्येय इति शेषः। न ह्यनन्वयविनष्टयोः शालि-यव-बीजयोः कश्चिद्विशेषोऽस्ति येनैकस्माच्छाल्यङ्कुरो नान्यस्मादिति। को नु खल्वभावानामस्त्याजानतो भेद इति। अपि च कारणानां शक्तिभेदात् कार्याणि भिन्नशक्तियुक्तानि। यदा तु कारणानामभेदस्तदा

वृत्तिः

नन्वास्तामौपचारिकः प्रयोगस्तथाऽपि किं बीजादेर्विनष्टस्योपादानत्वं मन्यसे, बीजादेर्विनाशस्य वा ? अन्त्येऽपि तस्योपादानत्वं निमित्तत्वं वा ? तत्राद्ये उत्तरम्— (न विनष्टेभ्योऽनिष्पत्तेः)

विनष्टानां बीजादीनामुपादानत्वायोगात्, अत एव न द्वितीयः, तत्र विनष्टे विनाशस्ततो नोत्पत्तिः, द्रव्यत्वस्य भावकार्यसमवायिकारणतावच्छेदकत्वात् ॥ १७ ॥

तृतीये त्वाह—(क्रमनिर्देशादप्रतिषेधः)

अभावस्य कारणत्वं न प्रतिषिध्यते प्रतिबन्धकाभावस्य हेतुत्वोपगमादित्याह क्रमेति। बीजे विनष्टेऽङ्कुरो जायते इति प्रत्ययाद् बीजस्य प्रतिबन्धकस्याभावः कारणम्, बीजे विनष्टे हि

न्यायभाष्यम्

मित्युपमर्दप्रादुर्भावयोः पौर्वापर्यनियमः क्रमः, तस्मान्नाभावाद् भावोत्पत्तिरिति। न चान्यद् बीजावयवेभ्योऽङ्कुरोत्पत्तिकारणमित्युपपद्यते बीजोपादाननियम इति ॥ १८ ॥

अथापर आह—

(सू०)—ईश्वरः कारणं पुरुषकर्माफल्यदर्शनात् ॥ १९ ॥

पुरुषोऽयं समीहमानो नावश्यं समीहाफलं प्राप्नोति तेनानुमीयते पराधीनं (१)पुरुषस्य कर्मफलाराधनमिति, यदधीनं स ईश्वरः। तस्मादीश्वरः कारणमिति ॥१९॥

न्यायवार्त्तिकम्

काचिदन्वयशक्तिरस्ति, अनन्वितं च कार्यं सर्वाभिः शक्तिभिरुत्पद्येत, अन्वितं तु दृष्टम्, तस्मान्नाभावः कारणमिति सूत्रार्थः ॥१८॥

(इति शून्यतोपादानप्रकरणम्)

अपर इदानीमाह—

ईश्वरः कारणं पुरुषकर्माफल्यदर्शनात्। पुरुषोऽयं समीहमानो नावश्यं समीहाफल-

न्यायवार्त्तिकतात्पर्यटीका

कुतस्तच्छक्तीनां भेदः तथा च कार्याणि भिन्नशक्तीनि न स्युरित्याह—अनन्वितं च कार्यं सर्वाभिरिति। यदप्यसत उत्पादादभावस्योपादानत्वं तदपि कार्याणां भिन्नत्वेन भिन्नशक्तिकत्वेन च प्रत्युक्तम् तत्प्रागभावानां स्वाभाविकभेदविरहात्। अपि च प्रागभावानामनादित्वेन कार्योत्पादस्याप्यनादित्वप्रसङ्गः। भावरूपकारणसहकारित्वं त्वभावस्य न निषिध्यते अस्मदभिमतस्योपाख्येयस्य। अत एव (क) पाकजादीनां रूपादीनां पूर्वरूपादिध्वंसनिमित्तत्वमभ्युपेयते। श्रुतिस्तु पूर्वपक्षाभिप्राया। तथा च सिद्धान्तश्रुत्यन्तरं—सदेव सोम्येदमग्र आसीदिति कथमसतः सजायेतेति (ख)। शून्यताविवर्तो विश्वप्रपञ्च इति तु दर्शनमसत्ख्यात्यनिर्वचनीयख्यातिनिराकरणेनापाकृतम्। अपि च सर्वशून्यत्वे ख्यातुरभावात् ख्यातेरभावः। तस्मान्न शून्यतोपादानस्तद्विवर्तो वा विश्वप्रपञ्च इति सिद्धम् ॥ १८ ॥

अथापर आह—

ईश्वरः कारणं पुरुषकर्माफल्यदर्शनात् (सू० १९) ॥ मा भूदयं नामरूपप्रपञ्चः

वृत्तिः

तदवयवैर्जलादिसिक्तभूम्यवयवसहितैरङ्कुर आरभ्यते, अभावमात्रस्य कारणत्वे च चूर्णीकृतादपि बीजादङ्कुरोत्पत्तिः स्यादभावस्य निर्विशेषत्वादिति भावः ॥ १८ ॥

समाप्तं शून्यतोपादाननिराकरणप्रकरणम् ॥ ४ ॥

---

(१) 'पुरुषकर्मफला-' इति ज०।

(क) अत्र "आदि"पदप्रयोजनं चिन्त्यम्। (ख) छान्दोग्ये ६ अ०।

न्यायवार्त्तिकम्

माप्नोति तेनावगम्यते पराधीनं पुरुषस्य (१) कर्मफलाराधनमिति—निरपेक्षश्चेत् पुरुषः कर्मफलभोगे समर्थः स्यात् न कस्यचिदफला क्रिया भवेत्। न कश्चिद् दुःखं कुर्यादिति। उभयं च दृष्टम्, तस्मादीश्वरः कारणमिति ॥१९॥

न्यायवार्त्तिकतात्पर्यटीका

शून्यतोपादानोऽपि तु ब्रह्मोपादानो भविष्यति। ब्रह्मैव हि प्रपञ्चरूपेण परिणमते मृत्तिकेव घटशरावोदञ्चनादिभावेन। न चैवं नित्यत्वव्याघातः। परिणामेऽपि तत्त्वाविघातात् तल्लक्षणत्वाच्च नित्यतायाः। यदाह(क) यस्मिंस्तत्त्वं न विहन्यते तदपि नित्यमित्येकं दर्शनम्। अपरं च ब्रह्मैवानिर्वचनीयानाद्यविद्योपधानान्नामरूपप्रपञ्चभेदेन विवर्त्तते मुखमिवैकमनेकमणिकृपाणादिभेदान्नैकविधप्रतिबिम्बभेदेनेति। तदेतद्दर्शनद्वयमनेन सूचितम्। ईश्वरो ब्रह्म ईशनायोगात्। चेतनाशक्तिः क्रियाशक्तिश्चेशना। सा चास्ति ब्रह्मणीति ब्रह्म ईश्वरः कारणं जगतः। श्रूयते हि (ख) तदैक्षत बहु स्यां प्रजायेयेत्यादि। सा चेयं श्रुतिश्चेतनस्य जगत्कारणतामाह। न चाभावो वा प्रधानं वा परमाणवो वा चेतयन्ते। ननु जीवा एव चेतनास्तत्कर्मनिमित्तो नामरूपप्रपञ्चो भविष्यति, कृतमत्र भगवतेश्वरेणेत्यत उक्तं पुरुषकर्माफल्यदर्शनादिति। पुरुषश्चेच्चेतयेन्नैवं निष्फलं कर्मारभेत। निष्फलं विद्वान् प्रवर्त्तमानः कथं चेतनो नाम? तस्मात्पुरुषकर्माफल्यदर्शनादीश्वरः कारणमित्यर्थः ॥ १९ ॥

वृत्तिः

मतान्तरमाह—(ईश्वरः कारणं पुरुषकर्माफल्यदर्शनात्)

अनेन ब्रह्मपरिणामवादो ब्रह्मविवर्त्तवादो वा दर्शित इति वदन्ति। तथाहि ब्रह्मैव नामरूपप्रपञ्चभेदेन विपरिणमते, मृत्तिकेवोदञ्चनादिभावेन। अत एव प्राकृतरूपस्य सत्त्वस्यापरित्यागः प्रपञ्चेषु, उदञ्चनादाविव मृत्तिकात्वस्येति परिणामवादः।

ब्रह्मैव चानाद्यनिर्वचनीयाविद्यावशान्नानारूपेण विवर्तते मुखमिव तत्तज्जलाद्यालम्बनभेदादिति विवर्तवादः।

ननु पुरुषकर्मैव कारणमस्तु, किमीश्वरस्य कारणत्वेनेत्यत आह—पुरुषेति। पुरुषकर्मणो हि वैफल्यमपि दृश्यते, अतः सहकार्यन्तरमवश्यं वाच्यम्, तथा चेश्वर एव यथा यथेच्छति तथा जगद्विपरिवर्तते इत्येवास्तु, किं पुरुषकर्मणेति भावः।

वस्तुतस्तु केवलेश्वरकारणतापरं प्रकरणं तदुपादानतापरत्वे तु न किमपि मानमाकलयाम इति ॥ १९ ॥

---

(१) 'कर्मफलावधानम्' इति ख०। '-फलाबाधन'मिति—क-खपुस्तपाठान्तरम्।

(क) महाभाष्यम् १।१।१। (ख) छा० ६।२।३।

(सू०)—न पुरुषकर्माभावे फलानिष्पत्तेः ॥ २० ॥

न्यायभाष्यम्

ईश्वराधीना चेत् फलनिष्पत्तिः स्याद् अपि तर्हि पुरुषस्य समीहामन्तरेण फलं निष्पद्येतेति ॥ २० ॥

न्यायवार्त्तिकम्

न पुरुषकर्माभावे फलानिष्पत्तेरिति । ईश्वरश्चेत् कारणं (१)भवेत् पुरुषकर्मान्तरेणापि (२) सुखदुःखोपभोगौ स्यातां ततश्च कर्मलोपोऽनिर्मोक्षश्च, ईश्वरस्यैकरूपत्वादेकरूपा क्रियेति । अथेश्वरः कारणभेदानुविधानेन कार्यं निर्वर्तयति, यदपेक्षते तन्न करोतीति प्राप्तम् । न हि कुलालो दण्डादि करोति । एवं कर्मसापेक्षश्चेदीश्वरो जगदुत्पत्तिकारणं स्यात् कर्मणि ईश्वरोऽनीश्वरः स्यात् ॥२०॥

न्यायवार्त्तिकतात्पर्यटीका

एतद्दर्शनद्वयमपाकरोति—

न पुरुषकर्माभावे फलानिष्पत्तेः (सू० २०) ॥ इदमत्राकूतम् । न तावन्मृत्तिकेव नामरूपप्रपञ्चरूपेण ब्रह्म परिणमते । तद्धि सर्वात्मना वा परिणमते एकदेशेन वा । तत्र सर्वात्मना परिणामे तत्त्वविघातादनित्यत्वम् । एकदेशेन परिणामे सावयवत्वात् तदेवानित्यत्वम् । अथ तत्त्वेनानुगतस्य परिणामः तच्च ब्रह्म । न तर्हि ब्रह्मणः परिणामः । न च निर्भागस्यैकस्य स्वसंवेदनप्रत्यक्षस्य विपरीतज्ञानगोचरत्वसम्भवः । सामान्यतो ग्रहे रूपविशेषाग्रहे च तदन्यरूपारोपेण विभ्रमो दृष्टः शुक्तिकादौ, न तु जातु शुक्तिरूपं विद्वान् रजतमिति विपर्यस्यति । न च निरंशे स्वसंवेदनप्रत्यक्षे ब्रह्मणि तत्स्वरूपाग्रहः सामान्यग्रहो वा भवति । तस्मादीश्वरो जगद्भेदेन विवर्तत इत्ययुक्तम् । निमित्तं तु स्यादीश्वरो जगतः । स चेदनपेक्ष एव जगत्कारणमित्युच्यते तत्रेदमुपतिष्ठते—न पुरुषकर्माभावे फलानिष्पत्तेरिति । अस्य व्यतिरेकमाह वार्तिककारः—ईश्वरश्चेत्कारणं भवेदिति । एकरूपं कार्यं स्यादित्याह—ईश्वरस्येति । कर्मणि ईश्वरोऽनीश्वरः स्यात्, तथा च तत्कारणानि नेश्वरेण प्रयुज्यन्त इत्यनेकान्तो वक्ष्यमाणो हेतुरित्यर्थः ॥ २० ॥

वृत्तिः

समाधत्ते—(पुरुषकर्माभावे फलानिष्पत्तेः)

(३)केवलं न ब्रह्मणः, परं तु ईश्वरस्यैव(३*) हेतुत्वे तदिच्छया अव्यतिरिक्ताया-

(१) 'स्यात्' इति क-ख० । (२) 'सुखदुःखोपभोगो भवेत्' इति क-खधृतपाठान्तरम् ।
(३) 'केवलब्रह्मण एव' इति भ० ।

(सू०)—तत्कारितत्वादहेतुः ॥ २१ ॥

न्यायभाष्यम्

पुरुषकारमीश्वरोऽनुगृह्णाति, फलाय पुरुषस्य यतमानस्येश्वरः फलं सम्पादयतीति। यदा न सम्पादयति तदा पुरुषकर्माफलं भवतीति। तस्मादीश्वरकारितत्वात् (१)अहेतुः पुरुषकर्माभावे फलानिष्पत्तेरिति।

गुणविशिष्टमात्मान्तरमीश्वरः। तस्य (२)आत्मकल्पात् कल्पान्तरानुपपत्तिः, अधर्म-मिथ्याज्ञान-प्रमादहान्या धर्म-ज्ञान-समाधिसम्पदा च विशिष्टमात्मान्तरमीश्वरः,

न्यायवार्त्तिकम्

तत्कारितत्वादहेतुः। न ब्रूमः कर्माद्यनपेक्ष ईश्वरः कारणमिति, अपि तु पुरुषकर्म ईश्वरोऽनुगृह्णाति। कोऽनुग्रहार्थः? यद् यथाभूतं यस्य (३) च यदा (४) विपाककालः तत्तथा तदा विनियुङ्क्त इति। यः पुनरीश्वरं कर्मानपेक्षं कारणत्वेन प्रतिपद्यते तस्यानिर्मोक्षत्वादिदोषः। सापेक्षे त्वीश्वरे यथोक्तो न दोषः। शेषं भाष्ये।

तत्कारितत्वादित्येवं ब्रुवता निमित्तकारणमीश्वर इत्युपगतं भवति। यच्च निमित्तं तदितरयोः समवायिकारणासमवायिकारणयोरनुग्राहकम्, यथा तूर्यादि तन्तूनां तत्संयोगानां चेति। ईश्वर-

न्यायवार्त्तिकतात्पर्यटीका

तदेवमीश्वरोपादानत्वं च ब्रह्मविवर्तत्वं च निरपेक्षेश्वरनिमित्तत्वं च निराकृत्याभिमतं पक्षं गृह्णाति—

तत्कारितत्वादहेतुः (सू० २१) ॥ परमाणूपादानस्य जगतः पुरुषकर्मापेक्ष ईश्वरो निमित्तकारणम्। यच्च तेनापेक्षणीयं पुरुषकर्म तदपीश्वरनिमित्तकमेव। न च यदपेक्ष्यते तस्यानिमित्तत्वमित्युपरिष्टात् प्रवेदयिष्यामः। तस्मादीश्वरकारितत्वात् पुरुषकारस्य तत्सहाय ईश्वरो निमित्तकारणं जगत इत्यस्य पक्षस्य निराकरणे पुरुषकर्माभावे फलानिष्पत्तेरित्यहेतुः, निरपेक्षेश्वरनिमित्तकत्वनिराकरणे हेतुरेवेत्यर्थः।

भाष्यम्—गुणविशिष्टमात्मान्तरमिति। गुणानीश्वरस्य ज्ञानादीनुपपादयिष्यति वार्तिक-

वृत्तिः

स्तद्विषयतायाश्चानभ्युपगमादभ्युपगमे द्वैतापत्तिरतः सर्वं सर्वदा स्यान्न स्याच्च कार्यवैचित्र्यमिति पुरुषकर्मणोऽपि सहकारिताऽऽवश्यकी, ब्रह्मण उपादानत्वं तु न सम्भवत्यसमवायिकारणत्वासम्भवात् तस्य कारणतामात्रं त्विष्यत एवेति भावः ॥ २० ॥

---

(१) 'पुरुषकारः फलस्याहेतुः' इति टि०। (२) 'आत्मकल्पान्तरानुपपत्तिः'—इति वि०। (३) 'च' इति नास्ति ख०। (४) 'परिपाककालः'—इति क-खधृतपाठान्तरम्।

न्यायभाष्यम्

तस्य च धर्मसमाधिफलमणिमाद्यष्टविधमैश्वर्यम्। सङ्कल्पानुविधायी चास्य धर्मः प्रत्यात्मवृत्तीन् धर्माधर्मसञ्चयान् पृथिव्यादीनि च भूतानि प्रवर्तयति। एवं च स्वकृताभ्यागमस्यालोपेन निर्माणप्राकाम्यमीश्वरस्य स्वकृतकर्मफलं वेदितव्यम्। आप्तकल्पश्चायम्—यथा पिताऽपत्यानां तथा पितृभूत ईश्वरो भूतानाम्। न चाऽऽत्मकल्पादन्यः कल्पः सम्भवति। न तावदस्य बुद्धिं विना कश्चिद्धर्मो लिङ्गभूतः शक्य उपपादयितुम्। आगमाच्च द्रष्टा बोद्धा सर्वज्ञाता ईश्वर इति। बुद्ध्यादिभिश्चात्म-

न्यायवार्त्तिकम्

श्च जगतो निमित्तं जगतः साक्षादुपादानकारणं किम्? उक्तं पृथिव्यादि परमसूक्ष्म परमाणुसंज्ञितं (१)द्रव्यमिति।

न्यायवार्त्तिकतात्पर्यटीका

कारः। आत्मकल्पादिति अत्रात्मप्रकारादात्मजातीयादिति यावत्। संसारवद्भ्य आत्मभ्यो विशेषमाह—अधर्मेति। नन्वस्य कर्मानुष्ठानाभावात् कुतो धर्मः, तथा चाणिमादिकमैश्वर्यं कार्यरूपं विनैव कर्मणेत्यकृताभ्यागमप्रसङ्ग इत्यत आह—सङ्कल्पानुविधायी चास्य धर्म इति। प्रवर्त्तयतु, किमेतावतेत्यत आह—एवं च स्वकृताभ्यागमस्यालोपेनेति। मा भूद् बाह्यानुष्ठानं सङ्कल्पलक्षणानुष्ठानजनितधर्मफलमस्यैश्वर्यं जगन्निर्माणफलमिति नाकृताभ्यागमप्रसङ्ग इत्यर्थः। स्यादेतत्। प्रयोजनं विना न प्रेक्षावतां प्रवृत्तिः। न च प्राप्तसकलप्राप्तव्यस्यास्ति प्रापणीयं किञ्चिदीश्वरस्य। तस्मात् कृतमस्य जगन्निर्माणेनेत्यत आह—आप्तकल्पश्चेति। मा भूदस्य भगवतः स्वार्थः, परानुग्रहार्थं जगन्निर्माणे प्रवर्त्स्यतीत्यर्थः। अत्रैव दृष्टान्तमाह—अयं यथा (क)पिताऽपत्यानाम्। अयं पिता स्वापत्यानां यथा पितेत्यर्थः। दार्ष्टान्तिके योजयति—तथा पितृभूत ईश्वर इति। नन्वात्मान्तराण्यनित्यज्ञानयोगीनि दृष्टानि तद्वैलक्षण्यादीश्वरो नात्मजातीयो भवितुमर्हतीत्यत आह—न चात्मकल्पादिति। यद्यप्यात्मान्तराण्यनित्यज्ञानयोगीनि अयं च नित्यज्ञानादियुक्तः, तथाऽप्यात्मजातीय एव, बुद्ध्यादिगुणयोगित्वात्; अन्यथा तोयादिपरमाणूनामतोयत्वादिप्रसङ्गो नित्यरूपादियोगात्; करकादिगतानां रूपादीनामनित्यत्वोपलब्धेरिति। यदि चायं बुद्ध्यादिगुणैर्नोपाख्यायेत प्रमाणाभावादनुपपन्न एव स्यादित्याह—बुद्ध्यादिभिश्चेति। स्यादेतद्—यदि कारुण्यादीश्वरो जगन्निर्माणे प्रवर्त्तते—हन्त भोः सुखिनमेव सृजेन्न तु दुःखिनम्। न च क्षेत्रज्ञगतधर्माधर्मसहकारितया निर्माणवैचित्र्यं धर्मस्य तदनधिष्ठितस्य स्वकार्याकरणेन कारुणिकेन तदधिष्ठानायोगात्।

---

(१) 'द्रव्य(व्यक्त)मिति' इति क०।

(क) 'पितुरपत्यानाम्' इति क-ख-तात्पर्यमुद्रणं प्रामादिकम्।

न्यायभाष्यम्

लिङ्गैर्निरुपाख्यमीश्वरं प्रत्यक्षानुमानागमविषयातीतं कः शक्त उपपादयितुम्। स्वकृताभ्यागमलोपेन(१)च प्रवर्तमानस्यास्य यदुक्तं प्रतिषेधजातमकर्मनिमित्ते शरीरसर्गे तत्सर्वं प्रसज्यते इति ॥ २१ ॥

न्यायवार्त्तिकम्

व्यक्तकारणाभ्युपगमे तु सति निमित्तविशेषविप्रतिपत्तौ ईश्वरप्रक्रिया, यस्मान्निमित्तकारणे विप्रतिपद्यन्ते—केचित् कालं केचिदीश्वरं केचित् प्रकृतिमिति। तदेवं निमित्तविशेषविप्रतिपत्तौ किं न्याय्यमिति? ईश्वर इति न्याय्यम्, तत्र हि प्रमाणानि अविघातेन प्रवर्तन्त इति। अस्तित्वासिद्धिरिति चेत्—अथ मन्यसे सिद्ध ईश्वरस्यास्तित्वे कारणान्तरनिराकरणं(क) निमित्तकारणाभावश्च (२) सिध्येत्, तत्तु असिद्धम्, तस्मादयुक्तमिति। न, अत एव (३) तदुपपत्तेः इति—येनैव न्यायेन ईश्वरस्य कारणत्वं सिध्यति तेनैवास्तित्वमिति, न ह्यविद्यमानं कारणमिति। कः पुनरीश्वरस्य कारणत्वे न्यायः? अयं न्यायोऽभिधीयते—प्रधानपरमाणुकर्माणि प्राक् प्रवृत्तेर्बुद्धिमत्कारणाधिष्ठितानि प्रवर्तन्ते अचेतनत्वात् वास्यादिवदिति—यथा वास्यादि बुद्धिमता तक्ष्णा अधिष्ठितमचेतनत्वात् प्रवर्तते तथा प्रधानपरमाणुकर्माणि अचेतनानि प्रवर्तन्ते, तस्मात् तान्यपि बुद्धिमत्कारणाधिष्ठितानीति।

तत्र प्रधानकारणिकास्तावत् पुरुषार्थमधिष्ठायकं प्रधानस्य वर्णयन्ति। पुरुषार्थेन प्रयुक्तं प्रधानं प्रवर्तते(ख), पुरुषार्थश्च द्वेधा भवति शब्दाद्युपलब्धिर्गुणपुरुषान्तरदर्शनं चेति, तदुभयं प्रधान-

न्यायवार्त्तिकतात्पर्यटीका

तस्मात् सुखिदुःख्यादिभेदेन जगद्वैचित्र्यदर्शनात् नानुकम्पाप्रयुक्त ईश्वरः करोतीत्यत आह—स्वकृताभ्यागमलोपेन प्रवर्तमानस्येति। अयमभिसन्धिः। कारुणिकोऽप्ययमात्मान्तरातिशयितमहिमाऽपि न वस्तूनां सामर्थ्यमन्यथा कर्त्तुं पारयति। तस्माद्धर्मेणोत्पत्तिमताऽपि नेश्वरप्रभावादपि नित्येन भवितुं युक्तम्। न च फलविरोधिना फलमप्रदाय विनंष्टुमपि शक्यम्। अतः क्षेत्रज्ञानां नियतिमलङ्घयता ईश्वरेण नाधर्मः शक्योऽनधिष्ठातुम्। तस्मात् कारुणिकोऽप्ययं वस्तुस्वभावमनुविधीयमानो धर्माधर्मसहकारी जगद्वैचित्र्यं विधत्ते। तदिदमुक्तम्—(ग)स्वकृताभ्यागमलोपेन प्रवर्त्तमानस्येति। पुरुषैर्यत्कर्म कृतं (घ) तत्फलाभ्यागमलोपेन प्रवर्तमानस्येत्यर्थः।

वार्त्तिके ईश्वरप्रक्रियेति। प्रक्रिया प्रकरणम्, ईश्वरनिमित्तत्वविचार इत्यर्थः।

---

(१) 'च' इति नास्ति फ०।

(२) 'साध्येत' इति क०।

(३) 'तदुत्पत्तेः' इति क०।

(क) 'निमित्तकारणभावश्च' इति युक्तम्।

(ख) 'पुरुषार्थ एव हेतुर्न केनचित् कार्यते करणम्' इति (सांख्यकारिका ३१)

(ग-घ)—'अभ्यागमालोपेन' इति क-खपुस्तकयोर्मुद्रणं प्रामादिकम्।

न्यायवार्त्तिकम्

प्रवृत्तेर्विना न भवतीति ? न, प्राक् प्रवृत्तेस्तदभावात्—यावत् प्रधानं महदादिभावेन न परिणमते तावन्न शब्दाद्युपलब्धिरस्ति न गुणपुरुषान्तरोपलब्धिरिति हेत्वभावात् प्रधान॰ प्रवृत्तिरयुक्ता। अथास्ति, नासदात्मानं लभते न सन्निरुध्यत इति ? एवं च सति विद्यमानः पुरुषार्थः प्रधानं प्रवर्तयतीति न (१) पुरुषार्थाय प्रधानस्य प्रवृत्तिः। न हि लोके यद् यस्य भवति स तदर्थं पुनर्यतत इति। सततं च प्रवृत्तिः प्राप्नोति कारणस्य संनिहितत्वादिति—पुरुषार्थः प्रवृत्तेः कारणमिति पुरुषार्थस्य नित्यत्वात् सततं प्रवृत्त्या भवितव्यमिति। अथ विद्यमानोऽपि न प्रवर्तयति, न तर्हि पुरुषार्थः कारणमिति, यस्याभावात् प्रधानं न प्रवर्त्तते यस्य च भावात् प्रवर्तते तत्कारणमिति। अथ विद्यमानः प्रतिबन्धान्न प्रवर्तयति ? प्रतिबन्धापगमस्याशक्यत्वात् सततमप्रवृत्तिः—यत्तत्र प्रतिबन्धकारणं पुरुषार्थस्य तस्यापगमः कर्तुमशक्यः, न सदात्मानं जहातीति प्रतिबन्धकस्य नित्यत्वान्नित्यमप्रवृत्त्या भवितव्यम्। यदा भवन्तः सत्त्वरजस्तमसां साम्यावस्थां प्रकृतिं वर्णयन्ति सा कुतो निवर्तत इति वक्तव्यम्। न चानिवृत्तायां साम्यावस्थायां वैषम्येण शक्यं भवितुम्। अथाङ्गाङ्गिभावस्यानियमाद्वैषम्यं भवति इति ? अत्रापि भवन्तं (२) पर्यनुयुञ्ज्महे—कथं साम्येनावस्थितमधिकं हीनं च भवति नापूर्वोपचयो विद्यते न पूर्वहानमस्तीति। यांश्च शब्दादीन् प्रागनुपलब्धस्वरूपान् पुरुष उपलभते बुद्धिरुपलम्भयति ते किमुपजातविशेषा उतानुपजातविशेषा इति ? यद्युपजातविशेषा उपलभ्यन्त इति, व्याहतं भवति नासदात्मानं लभत इति। अथानुपजातविशेषा एवोपलभ्यन्ते, तथाऽप्यनिवृत्तो व्याघातः प्रधानं पुरुषार्थः प्रवर्तयतीति। सोऽयं प्रधानवादो यावद् यावद् विचार्यते तावत्तावत् प्रमाणवृत्तं बाधत इति।

ये परमाणून् पुरुषकर्माधिष्ठितान् जगतः कारणत्वेन वर्णयन्ति तान् प्रतीदमुच्यते—परमाणवः प्रवर्तन्त इति सततं प्रवृत्त्या भवितव्यम्। अथ कालविशेषापेक्षाः प्रवर्तन्ते परमाणुभिः कालो व्याख्यातः—यथा (३)अचेतनत्वात् परमाणवो बुद्धिमन्तमधिष्ठातारमपेक्षन्ते तथा कालोऽपीति, न हि तत्राचेतनत्वं निवर्तत इति। (क) क्षीरादिवदचेतनस्यापि प्रवृत्तिरिति चेत्—यथा अपत्य-

न्यायवार्त्तिकतात्पर्यटीका

अथ विद्यमानः प्रतिबन्धान्न प्रवर्त्तयतीति। सुखाय पुरुषार्थेन प्रधाने प्रवर्तयितव्ये अधर्मः पुरुषार्थस्य प्रतिबन्धकः। एवं दुःखाय पुरुषार्थेन प्रधाने प्रवर्त्तयितव्ये धर्म इत्यर्थः।

---

(१) 'पुरुषार्था(य)' इति क-पुस्तके मुद्रितम्।

(२) 'पर्यनुयुङ्ग्महे' इति क०।

(३) 'अचेतनत्वात्' इति क-पुस्तके नास्ति।

(क) वत्सविवृद्धिनिमित्तं क्षीरस्य यथा प्रवृत्तिरज्ञस्य।
पुरुषविमोचनिमित्तं तथा प्रवृत्तिः प्रधानस्य॥ इति (सांख्यकारिका ५७)।

न्यायवार्त्तिकम्

भरणार्थं क्षीरादेरचेतनस्यापि प्रवृत्तिरेवं परमाणवोऽप्यचेतनाः पुरुषार्थं प्रवर्तिष्यन्त इति ? तन्न युक्तम्, साध्यसमत्वात्—यथैव परमाणवः स्वतन्त्राः प्रवर्तन्त इति साध्यं तथा क्षीराद्यचेतनं स्वतन्त्रं प्रवर्तत इति। यदि क्षीरादि स्वतन्त्रं प्रवर्तेत, मृतेष्वपि प्रवर्तेत ; न तु प्रवर्त्तते अतोऽवगम्यते बुद्धिमत्कारणाधिष्ठितं तदपि। न चायं हेतुः तस्मात् (१)निवर्तते, एवं यावद् यावदचेतनं प्रवर्तते (२) सर्वं तत् (३) चेतनाधिष्ठितमिति।

अयमपरो हेतुः बुद्धिमत्कारणाधिष्ठितं महाभूतादि (४)व्यक्तं सुखदुःखादिनिमित्तं भवति रूपादिमत्त्वात् तुर्यादिवदिति। धर्माधर्मौ बुद्धिमत्कारणाधिष्ठितौ पुरुषस्योपभोगं कुरुतः करणत्वाद् वास्यादिवदिति। आत्मैवाधिष्ठाता धर्माधर्मयोर्भविष्यतीति चेत् ? यस्य तौ धर्माधर्मौ स एवाधिष्ठाता भविष्यतीति न युक्तम्, प्राक् कार्यकरणोत्पत्तेः तदसम्भवात्—यावत् कार्यकरण-सङ्घातो नोपजायते पुरुषस्य तावदयमज्ञः उपसन्धाताऽपि उपलभ्यानपि तावद्रूपादीन्नोपलभते कुतोऽनुपलभ्यौ धर्माधर्मावुपलप्स्यत इति। यदि पुरुषः स्वतन्त्रः प्रवर्तते, न दुःखं कुर्यात् न हि कश्चिदात्मनो दुःखमिच्छतीति। यश्चाऽऽत्मनोऽङ्गोपघातं शिरश्छेदादि वा करोति (५) सोऽपि नष्टैकल्ये (६)प्रायणे वा हितबुद्धिः प्रवर्तते इति। यदि पुनर्धर्माधर्माभ्यामेवाधिष्ठिताः परमाणवः प्रवर्तेरन् ? न युक्तमेतदचेतनत्वात्—न हि किञ्चिदचेतनं स्वतन्त्रमधिष्ठायकं दृष्टमिति। (क)अभ्युपगम्यापि च धर्माधर्मयोः परमाणुप्रवृत्तिसामर्थ्यम् ? न करणस्य केवलस्य क्रियानिर्वृत्ताव-सामर्थ्यात्—न हि करणं केवलं क्रियां निर्वर्तयदुपलभ्यते। अथ (७)परमाण्वपेक्षाभ्यां धर्मा-धर्माभ्यां क्रियते ? तदपि न युक्तमदृष्टत्वात्—न हि (ख)कर्मकरणाभ्यां क्रियां जन्यमानां क्वचिदपि पश्याम इति। आत्मा कर्ता भविष्यतीति ? उक्तमेतदज्ञत्वादिति। अकारणोत्पत्ति-र्भविष्यतीति ? न युक्तमदृष्टत्वादिति। न चान्या गतिरस्ति। तस्माद् बुद्धिमत्कारणाधिष्ठिताः परमाणवः कर्माणि च प्रवर्तन्त इति।

क्रियानावेशादकारणमिति चेत्—अथ मन्यसे ये खलु कर्तारो भवन्ति ते क्रियाविष्टाः कुलालादय

न्यायवार्त्तिकतात्पर्यटीका

न चायं हेतुस्तस्मान्निवर्त्तत इति। अयमेवाचेतनत्वलक्षणो हेतुः क्षीरान्न निवर्त्तत इत्यर्थः।

परिस्पन्दः क्रिया, सा च मूर्त्यनुविधायिनी नामूर्ते सर्वगत ईश्वरे संभविनीति मन्वानः शङ्कते —क्रियानावेशादकारणमिति चेदिति। अपरिस्पन्दा अपि ज्ञानचिकीर्षाप्रयत्ना आख्यातपद-

---

(१) '-न्न प्रवर्त्तते'—इति क-खधृतपाठान्तरम्। (२) 'तावत् सर्वं' इति ख०। (३) 'बुद्धिमत्-कारणाधिष्ठितमिति'—इति क-खधृतपाठान्तरम्। (४) 'व्यक्तमिति' इति ख०। (५) 'सोऽपि'—इति क-खपुस्तकयोर्नास्ति। तत्सम्पादकैस्तु पुस्तकान्तरे तदुपलभ्यमस्माभिर्गृहीतम्। (६) 'प्रधाने'—क-ख-धृतपाठान्तरम्। (७) 'परमात्मापेक्षाभ्यां'—क-खधृतपाठान्तरम्।

(क) 'अपि'शब्द एवार्थः। तथा च धर्माधर्मयोः परमाणुक्रियोत्पत्तिसामर्थ्यमभ्युपगम्यैव उपपादयिष्यते इति प्रश्नार्थः। (ख) "कर्म" धर्माधर्मौ, "करणं" परमाणवः।

न्यायवार्त्तिकम्

इति, क्रियारहितश्चेश्वरः, तस्मादकारणमिति ? न विकल्पानुपपत्तेः—ईश्वरो निष्क्रिय इति कां क्रियामधिकृत्योच्यते ? द्वयी हि नः क्रिया उत्क्षेपणादिका—चाऽऽख्यातशब्दवाच्या च। यद्याख्यातशब्दवाच्यामधिकृत्योच्यते, तदाऽसिद्धो हेतुः स्वातन्त्र्याभ्युपगमात्—स्वातन्त्र्यं हि भगवति नित्यमस्ति। किं पुनः स्वातन्त्र्यम् ? अन्यकारकाप्रयोज्यत्वमितरकारकप्रयोक्तृत्वं च, तदुक्तं (क) कारकाणि वर्णयद्भिरिति। अथोत्क्षेपणादिकमधिकृत्योच्यते निष्क्रिय इति, तदाऽनेकान्तः,—क्रियावच्च कारणं दृष्टं निष्क्रियं चेति। कदाचिद् द्रव्याणि उपरतक्रियाणि द्रव्यमारभन्ते—संयोगात् निवृत्ते कर्मणि संयोगोपकरणानि द्रव्याणि द्रव्यमारभन्त इति निष्क्रियाणामारम्भः। यदा च युगपद् (१) अनेकानि द्रव्याणि संहन्यन्ते तदाऽसाधारणकार्यव्यावृत्तेभ्यः संयोगेभ्यः एकमेव द्रव्यमुत्पद्यते। एकावयवविभागे तु द्रव्यनिवृत्तौ शेषाणि द्रव्यान्तराणि (२)द्रव्यमारभन्त इति निष्क्रियाणामारम्भः। कानिचित् पुनः क्रियावन्त्यारभन्ते यदाऽन्यतरकर्मजात् संयोगान्निवृत्ते कर्मणि इतरस्मिन् द्रव्ये कर्मनिवृत्तिसमकालमेव द्रव्यमुत्पद्यते तदा क्रियावता द्रव्येणाऽऽरम्भात् क्रियावतामारम्भः, विरोधश्चोत्क्षेपणादिकायाः क्रियायाः अनभ्युपगमादिति।

न्यायवार्त्तिकतात्पर्यटीका

वाच्यतया भवन्ति क्रिया ईश्वर इत्यभिसंधिना परिहारः—न विकल्पानुपपत्तेः। यदा च युगपदनेकानि द्रव्याणि संहन्यन्ते तदाऽसाधारणकार्यव्यावृत्तेभ्यः संयोगेभ्य इति। 'असाधारणं कार्यम्' एकैकस्य तन्तुद्वयसंयोगस्य द्वितन्तुकम्, तस्माद् व्यावृत्तेभ्यः संयोगेभ्यः सह साधारणस्यैव कार्यस्य पटलक्षणस्योत्पादादित्यर्थः। न केवलमुत्पन्नक्रियेषु क्रियोपरतौ द्रव्योत्पादः क्वचिदनुत्पन्नक्रियेष्वपि द्रव्येष्ववस्थितसंयोगेभ्यः पूर्वद्रव्योपरतौ द्रव्यान्तरोत्पाद इत्याह—एकावयवविभागे त्विति। तुशब्देन पूर्वस्मादुत्पन्नोपरतक्रियाद् विशेषो दर्शितः। किमक्रियावतामेवारम्भः ? नेत्याह—कानिचित्पुनरिति। अन्यतरकर्मजान्नोदनात् संयोगान्निवृत्ते कर्मणि इतरस्मिन् द्रव्ये (३) कर्मनिवृत्तिसमकालमेव द्रव्यमुत्पद्यत इति।

वृत्तिः

नन्वेवं पुरुषव्यापारस्य फले व्यभिचारो न स्यादिति चेत्तत्राऽऽह—(तत्कारितत्वादहेतुः)

फलाभावस्य पुरुषकर्माभावकारितत्वात् पुरुषस्य कर्म्म अदृष्टं तदभावाधीनत्वात्, पुरुषकारः अहेतुः फलानुपधायकः।

---

(१) 'बहूनि' इति क-ख-वार्त्तिकपाठः। (२) 'द्रव्यमुत्पादयन्त' इति ख०। (३) 'कर्मनिवृत्तिसमकालमेव द्रव्यं चोत्पद्यत' इति क-ख०।

(क) ४३४-तमपत्रे वार्त्तिक-तात्पर्यटीके द्रष्टव्ये।

न्यायवार्त्तिकम्

न कारणमीश्वरः विकल्पानुपपत्तेः—कर्ता चेदीश्वरः, किं सापेक्षः करोति उत निरपेक्ष इति। किं चातः? यदि सापेक्षः, येन करोति तस्याकर्ता एवमन्यत्रापि प्रसङ्गः, तदपि साधनं येन करोति तस्याकर्तेति। अथायं किञ्चिदनपेक्ष्य करोति तद्वदन्यत्रापि प्रसङ्गः—अथायं सर्वमनपेक्ष्य करोति (१) एवमपि पुरुषकर्माफलं भवेत् अनिर्मोक्षश्च प्रसज्येत। यश्चाकर्मनिमित्ते सर्गे दोषः स इहापि प्रसज्यत इति? निरपेक्षकर्तृत्वस्यानभ्युपगमात् धर्माधर्मविफलत्वादिदोषो नास्ति न चाकर्मनिमित्ते सर्गे दोष इति। येन करोति (२) तस्याकर्तेति चेत्? नानेकान्तात्—नायमेकान्तोऽस्ति यो येन करोति स तन्न करोतीति, यथाऽनेकशिल्पपर्यवदातः पुरुषः करणान्तरोपादानो वास्यादि करोति, वास्याद्युपादानो दण्डादि करोति, तदुपादानो घटादि; न च पर्यायकर्तृत्वे सति अकर्तृत्वम्, तथेश्वरोऽपि धर्माधर्मोपादानः शरीरसुखदुःखादि, आत्ममनःसंयोगशुद्धाशुद्धाभिसन्धिसाधनश्च धर्माधर्मौ, सुखदुःखस्मृत्यपेक्षः तत्साधनाद्यपेक्षश्च शुद्धमशुद्धं चाभिसन्धिमिति। यदा करोति तदा साधनस्याकर्तेति चेत्—अथ मन्यसे यदाऽयं साध्यं (३) किञ्चिद् इष्टं निर्वर्तयति तदा येन साधयति तस्याकर्ता प्रसज्यत इति? नैतदेवम्—न ब्रूमः सर्वानर्थानयमेकस्मिन् काले करोतीति, अपि तु पर्यायेण, पर्यायकर्तृत्वे चायमदोषः। यदादौ करोति तस्यासाधनोत्पत्तिरिति चेत्—अथ मन्यसे यदि शरीरादिकर्तृत्वं धर्माधर्माद्यपेक्षस्य, अथ यदादौ करोति(४) कथं तत्? (क)आदेरनभ्युपगमाददेश्यमेतत्—अनादिः संसार इति, प्रतिपादितमेतत्, धर्माधर्मसाफल्यं चैवम्—यदि चानादिः संसारः सापेक्षश्च कर्ता, एवं प्राण्यन्तरसमवायिनां धर्माधर्माणां साफल्यम्।

अथायमीश्वरः कुर्वाणः किमर्थं करोति? लोके हि ये कर्तारो भवन्ति ते किञ्चिदुद्दिश्य प्रवर्त्तन्ते इदमाप्स्यामि इदं हास्यामि चेति, न पुनरीश्वरस्य हेयमस्ति दुःखाभावात्, नोपादेयं वशित्वात्। (ख)क्रीडार्थमित्येके—एके तावद् ब्रुवते क्रीडार्थमीश्वरः सृजतीति। नन्वेतदयुक्तम्, क्रीडा हि नाम रत्यर्थं भवति विना क्रीडया रतिमविन्दताम्, न च रत्यर्थी भगवान् दुःखाभावादिति। दुःखिनश्च सुखोपगमार्थं क्रीडन्ति। विभूतिख्यापनार्थमित्यपरे—जगतो वैश्वरूप्यं ख्यापनीयमित्यपरे मन्यन्ते। एतदपि तादृगेव—न हि विभूतिख्यापनेन कश्चिदतिशयो लभ्यते न चास्याख्यापनेन किञ्चिद्धीयत इति। किमर्थं तर्हि करोति? तत्स्वाभाव्यात् प्रवर्तत

(१) अतः परं 'तस्याकर्त्तेति' क-खवार्त्तिकसम्पादकैः क्वचिदुपलब्धम्।
(२) 'न तस्या' इति ख-वार्त्तिके प्रामादिकम्।
(३) 'यत्किञ्चित्' इति ख०।
(४) अतः परं 'तस्यासाधनात्'—इत्यधिकं क्वचित् क ख-वार्त्तिकसम्पादकैरुपलब्धम्।
(क) प्रतिपादनप्रकारः ७७, २२१, ७४१-पत्रेषु द्रष्टव्यः।
(ख) 'भोगार्थं सृष्टिरित्यन्ये, क्रीडार्थमिति चापरे। देवस्यैष स्वभावोऽयमाप्तकामस्य का स्पृहा॥' इति (माण्डूक्य-कारिका १.९)

न्यायवार्त्तिकम्

इत्यदुष्टम्—यथा भूम्यादीनि धारणादिक्रियां तत्स्वाभाव्यात् कुर्वन्ति तथेश्वरोऽपि तत्स्वाभाव्यात् प्रवर्तत इति प्रवृत्तिस्वभावकं तत्त्वमिति।

तत्स्वाभाव्यात् (१) सततप्रवृत्तिरिति चेत्—अथ मन्यसे यदि प्रवृत्तिस्वभावकं तत्त्वं प्रवृत्तिनिवृत्ती न प्राप्नुतः, न हि प्रवृत्तिस्वभावके तत्त्वे निवृत्तिर्युज्यत इति (२) क्रमेणोत्पत्तिर्न प्राप्नोति तत्त्वस्यैकरूपत्वात्, इदमिदानीं भवत्विदमिदानीं (३) न भवत्विति न युक्तम्—न ह्येकरूपात् कारणात् कार्यभेदं पश्याम इति? नैष दोषः बुद्धिमत्त्वेन विशेषणात्—बुद्धिमत्तत्त्वमिति प्रतिपादितम्; बुद्धिमत्तया च विशिष्यमाणं सापेक्षं च न सर्वदा प्रवर्त्तते न सर्वमेकस्मिन् काले उत्पादयति यस्य कारणसान्निध्यं तद्भवति यदसन्निहितकारणं तन्न भवति, न च सर्वस्य युगपत्कारणसान्निध्यमस्ति, अतः सर्वस्य युगपदुत्पादो न (४) प्रसक्तः; स खलु प्रवर्तमानो धर्माधर्मयोः परिपाककालमपेक्षते कारणान्तरोत्पादं तद्भागिनां च सत्त्वानां तत्र सन्निधानं तद्भागिसत्त्वधर्माधर्मपरिपाकं च तदप्रतिबन्धं चेति।

यत् तदीश्वरस्यैश्वर्यं किं तन्नित्यमनित्यमिति? यद्यनित्यं तस्य कारणं वाच्यं यस्य चानित्यमैश्वर्यं तस्य कारणभेदो भवति अणिमादेः, एवमन्येषामपीत्यनेक ईश्वरः प्रसज्यत इति। अथानेकत्वे किं बाध्यत इति? एकस्मिन् वस्तुनि (क) व्याहतकामयोरीश्वरयोः प्रवृत्तिर्न प्राप्नोति। अथैकमितरः अतिशेते, योऽतिशेते स ईश्वरः (५) नेतरः इति। अथ नित्यमैश्वर्यं, धर्मवैयर्थ्यं—न तद् धर्माद्भवतीति। नित्यमिति ब्रूमः। न च धर्मवैयर्थ्यं दोषस्तस्य, यो धर्म ईश्वरे नासौ तत्रैश्वर्यं करोति, किन्तु प्रत्यात्मवृत्तीन् धर्माधर्मसन्निचयाननुगृह्णाति, न चेश्वरे धर्मोऽस्तीत्यचोद्यमेतत्।

न्यायवार्त्तिकतात्पर्यटीका

तत्स्वाभाव्यात् प्रवर्त्तत इत्यदुष्टमिति, चेतनोऽप्ययं परानुग्रहस्वभावोऽपि वस्तुस्वभावमनुरुध्यमानः कर्माशयानुरोधेन जगद्वैचित्र्यं विधत्ते। न चावश्यं दुष्कृते पुंसां प्रवृत्तिं विहन्तीत्यर्थः। अद्यत्वेऽपि चेतनानां विचित्रस्वभावत्वं दृष्टं सदसन्मध्यमानां जनानाम्।

अथ नित्यमैश्वर्यं धर्मवैयर्थ्यं न तद् धर्माद्भवतीति। ततः (ख) ईश्वरस्यैश्वर्यं स्वकृतकर्मफलं वेदितव्यमित्ययुक्तं भाष्यमिति भावः। परिहरति—नित्यमिति ब्रूमः। तस्य हि ज्ञानक्रियाशक्ती नित्ये इति ऐश्वर्यं नित्यम्। अणिमादिकं त्वनित्यं तदभिप्रायं च भाष्यकारस्य धर्मफलत्वाभिधानम्। प्रत्यात्मवृत्तिधर्माधर्मसन्निचयाधिष्ठानं (ग) धृत्यात्मवृत्तिसंकल्पानु-

---

(१) 'सततं प्रवर्तत इति'—इति ख०। (२) 'क्रमेण चोत्पत्ति-' इति क-खधृतपाठान्तरम्। (३) 'मा भूदिति'—इति क-खधृतपाठान्तरम्। (४) 'युक्तः' इति ख०। (५) 'इतरो नेश्वर इति'—इति क-खधृतपाठान्तरम्।

(क) 'अव्याहतकामयो'रिति पाठो युक्तः। (ख) 'निर्माणप्राकाम्यमीश्वरस्य' इति भाष्यमत्र अक्षरविसंवादेन गृहीतम्। (ग) 'प्रत्यात्मवृत्ति—' इति पाठः सम्भाव्यते।

न्यायवार्त्तिकम्

तत्स्वभावानवधारणात् सन्देहः—ईश्वरः किं द्रव्यमाहो गुणादीनामन्यतम इति। द्रव्यं बुद्धिगुणत्वाद् द्रव्यान्तरवत्। बुद्धिमत्त्वात् तर्हि आत्मान्तरमिति? नात्मान्तरं गुणभेदात्—तद् यथा गुणभेदे सति पृथिव्यादयो नात्मानः तथा गुणभिन्न ईश्वरस्तस्मादसावपि नात्मान्तरमिति। कः पुनरेतस्य भेदः? (क)एके तावद् ब्रुवते—धर्म-ज्ञान-वैराग्यैश्वर्याण्यतिशयवन्ति तस्मिन्निति। नित्यत्वमतिशयः। एतत्तु न बुध्यामहे यथा बुद्धिमत्तायामीश्वरस्य प्रमाणसद्भावो न चैवं धर्मादिनित्यत्वे प्रमाणमस्ति, न चाप्रामाणिकं प्रतिपत्तुं शक्यम्, अतिशयस्तु बुद्धिनित्यत्वं गुणभेदः—तत्र हि नित्या बुद्धिः सङ्ख्यादयश्च सामान्यगुणाः, षड्गुण आकाशवदीश्वर इति। अथास्य बुद्धिनित्यत्वे किं प्रमाणमिति? नन्विदमेव—बुद्धिमत्कारणाधिष्ठिताः परमाणवः प्रवर्त्तन्त इति। बुद्धिमत्तायामेतत् साधनं सा पुनर्नित्येति कुतः? प्रत्यर्थनियतासम्भवात्—ये खलु प्रत्यर्थनियता बुद्धिभेदास्ते शरीरादिकारणसन्निधाने सति भवन्ति, (१) न त्वियं प्रत्यर्थनियता युगपदनेककार्योत्पत्तिदर्शनात् यथा स्थावरभेदस्यानेकस्य युगपदुत्पाद इति। स च (ख) प्रत्यर्थनियतबुद्धिभेदेष्वीश्वरस्य न युक्तः, संख्यापरिमाण-पृथक्त्व-संयोग-विभाग-बुद्धय एव तस्य गुणाः।

अथ बुद्धिमत्तयेश्वरस्य शरीरयोगमपि प्रतिपद्यते? तेनापि प्रतिपद्यमानेन शरीरादयो नित्या अनित्या वा अवश्यमेषितव्याः। यद्यनित्याः धर्माधर्मसद्भावोऽभ्युपेयः, तदभ्युपगमे च तत्तन्त्रत्वादीश्वरो नेश्वरः स्यात्। अथ नित्यान् शरीरादीन् कल्पयसि, एवमपि दृष्टविपरीतं

न्यायवार्त्तिकतात्पर्यटीका

विधायिन ईश्वरस्य धर्मस्य प्रयोजनमिति। अभ्युपेत्येश्वरधर्ममेतदुक्तं भाष्यकृता। परमार्थतस्तु नेश्वरस्य धर्मसद्भावे प्रमाणमस्ति नित्याभ्यामेव ज्ञानक्रियाशक्तिभ्यां सकलकार्योत्पादसिद्धेरित्याशयवानाह—**न चेश्वरे धर्मोऽस्तीति**।

बुद्धिमत्त्वात्तर्ह्यात्मान्तरमिति। आत्मान्तरं शरीर्यन्तरमभिप्रेतमिति। स च शरीरसंबन्धो वर्त्तमानः केषांचिद् यथा संसारिणां केषांचिदतीतो यथा मुक्तानां शुकप्रह्लादादीनाम्। तदनेनेश्वरेण बुद्धिमता सताऽवश्यं भाव्यं शरीरिणेति देश्यार्थः। **नात्मान्तरं** शरीर्यन्तरमित्यर्थः। कुतः **गुणभेदात्**। नित्याश्चेदस्य बुद्ध्यादयः कृतं शरीरग्रहणेन तदुत्पादार्थेनेति भावः। **नन्विदमेव बुद्धिमत्कारणाधिष्ठिताः परमाणवः प्रवर्त्तन्त इति** पक्षधर्मताबलात्तर्कसहायान्नित्यबुद्धिमत्त्वमस्य सिध्यतीत्यर्थः। **प्रत्यर्थनियमासंभवा**दित्यादिना तर्कः प्रमाणसहायो दर्शितः।

एवं तावद्गुणभेदेनाशरीरित्वमीश्वरस्य दर्शितं, न चैतस्य शरीरयोगो विकल्पमपि सहत

---

(१) 'न चेयं'—इति क-खधृतपाठान्तरम्।

(क) "ज्ञानं वैराग्यमैश्वर्यं तपः सत्यं क्षमा धृतिः। स्रष्टृत्वमात्मसंबोधो ह्यधिष्ठातृत्वमेव च। अव्ययानि दशैतानि नित्यं तिष्ठन्ति शङ्करे॥" योगभाष्य-टीका। (ख) 'प्रत्यर्थनियतबुद्धिभेदोऽपीश्वरस्य' इति पाठः सम्भाव्यते।

न्यायवार्त्तिकम्

कल्पितं भवति, दृष्टविपर्ययं प्रतिपद्यमानेन (१)बुद्धेर्नित्यत्वं प्रतिपत्तव्यम्। अथ सन्तानवर्त्तिनीमनेकां बुद्धिमीश्वरे प्रतिपद्यसे? एवमपि न युगपदुत्पादः स्थावरादीनां प्राप्नोति। अथ (२)ताः सन्तानवर्तिन्यः सर्वार्थाः (२*) बुद्धयो भवन्ति? एवमपि दृष्टविपरीतं कल्पितं भवति। एवं च कल्पयता बुद्धिनित्यत्वमेव प्रतिपत्तव्यम्। एतावच्चैतत् स्यात्—नित्या वा सन्तानवर्तिनी वा। सन्तानवर्तिनी न युक्ता। यदि गुणभेदाद्भेदः यदभिन्नगुणं तदेकं प्राप्नोति, यथा दिक्कालाविति? नानेकान्तात्—गुणभेदान्नानात्वं ब्रूमः, न पुनर्गुणाभेदादेकत्वमिति। तथा अभिन्नगुणानां घटादीनां नानात्वमिति, दिक्कालयोर्गुणाभेदेऽपि कार्यभेदान्नानात्वमिति। न च बुद्धिमत्तया विनेश्वरस्य जगदुत्पादो घटत इति। सा च बुद्धिः सर्वार्थाऽतीतानागतवर्तमानविषया प्रत्यक्षा, नानुमानिकी (३)नागमिकी—न तत्रानुमानं नागम इति। ज्ञाननित्यत्वाच्च न संस्कारः—नित्यं विज्ञानमीश्वरस्येति (क) न तत्र संस्कारो विद्यत इति संस्काराभावाद् बुद्धिनित्यत्वाच्च न स्मृतिः, स्मृत्यभावाच्च नानुमानम्, न दुःखमधर्मस्याभावात्। अत एव न वैराग्यमिति—दुःखाभावान्न विरज्यत इति। अत एव न द्वेषो दुःखाभावादिति। इच्छा तु विद्यतेऽक्लिष्टाऽव्याहता सर्वार्थेषु यथा बुद्धिरिति।

अथ किमयं बद्धो मुक्त इति? न बद्धो दुःखाभावादेव अबद्धत्वान्न मुक्त इति—बन्धवान् मुच्यत इति, न च भगवति बन्धनमस्तीति अतो न मुक्त इति। आत्मान्तराणामसम्बन्धादधिष्ठातृत्वमनुपपन्नमिति चेत्—अथ मन्यसे अर्थान्तरसमवायिनो ये धर्माधर्माः ते न साक्षादीश्वरेण सम्बध्यन्ते न पारम्पर्येण; न चाऽसम्बद्धमधिष्ठातुं शक्यते, न चानधिष्ठितयोर्धर्माधर्मयोः प्रवृत्तिर्युक्तेति? तन्न, अजसम्बन्धोपपत्तेः—अजः सम्बन्ध आत्मान्तराणामित्येके इच्छन्ति न चैतदिह प्रतिषिध्यत इति अप्रतिषेधादुपात्तः स इति। ते त्वजं सम्बन्धं प्रमाणतः प्रतिपादयन्ति—व्यापकैराकाशादिभिः सम्बद्ध ईश्वरः मूर्तिमद्द्रव्यसम्बन्धित्वाद् घटवदिति, यथा घटो हि मूर्तिमता घटादिना सम्बन्धित्वेन व्यापकैराकाशादिभिः सम्बध्यते तथेश्वरोऽपि मूर्तिमत्सम्बन्धीति, तस्मादयमपि व्यापकैराकाशादिभिः सम्बध्यत इति।

न्यायवार्त्तिकतात्पर्यटीका

इत्याह—अथ बुद्धिमत्तयेति। अतीतानागतवर्त्तमानविषया प्रत्यक्षेति साक्षात्कारवतीत्यर्थः; न पुनरक्षमाश्रिता नित्यत्वात्। उपलक्षणं चैतत् नानुमानिकी (ख) चेति नैन्द्रियकी नौपमानिकीत्यपि द्रष्टव्यम्। अक्लिष्टेति। क्लेशोऽविद्या तददूषितेत्यर्थः।

मूर्त्तिमद्द्रव्यसंबन्धित्वादिति संयोगित्वादित्यर्थः। तथा च न रूपादिभिर्व्यभिचारः।

(१) 'बुद्धेरेव'—इति क-खधृतपाठान्तरम्। (२) 'ताः सन्तानवर्त्तिन्योऽर्थाः'—इति ख०। (३) 'नागमिकी' इति क-पु-नास्ति।

(क) 'न तत्र संस्कार' इति, ज्ञानोपरमे सति तत्कार्योपपत्तये संस्कारः कल्प्यते, नित्यज्ञानाश्रये च भगवति नास्ति तत्कल्पकमिति भावः। (ख) अत्र 'च'कारार्थश्चिन्त्यः। वार्त्तिके तु चकारो नोपलभ्यते।

न्यायवार्त्तिकतात्पर्यटीका

एतावदभिप्रेतमाचार्य्यस्य—त्रयो हि खलु भावा जगति भवन्ति, प्रसिद्धचेतनकर्तृकाः यथा प्रासादा-ट्टाल-गोपुर-तोरणादयः। प्रसिद्धतद्विपर्ययाः यथा परमाण्वाकाशादयः। संदिग्धचेतनकर्तृकाः यथा तनु-तरु-महीधरादयः। तत्र प्रमेयत्वाद् वादिविप्रतिपत्तेर्वा साधकबाधकप्रमाणाभावे चेतन-कर्तृत्वे संशयः। न च प्रत्यक्षानुपलब्धिमात्रमत्र बाधकं भवितुमर्हति। स्वभावविप्रकर्षिणां सतामपि प्रत्यक्षानुपलब्धेः परमाण्वादीनाम्। तथा च विवादाध्यासितास्तनुतरुमहीधरादय उपादानाभिज्ञकर्तृका उत्पत्तिमत्त्वात् अचेतनोपादानत्वाद्वा, यदुत्पत्तिमदचेतनोपादानकं वा तत्सर्व-मुपादानाभिज्ञपूर्वकं यथा प्रासादादि, तथा च विवादाध्यासितास्तनुतरुमहीधरादयः, तस्मात्तथेति। न चैषामुत्पत्तिमत्त्वमसिद्धम्, सावयवत्वेन वा महत्त्वे सति क्रियावत्त्वेन (१) वा वस्त्रादिवत्त-त्सिद्धेः। न चैतावता वैनाशिकानां कर्मणा चेतनेन मीमांसकानां क्षेत्रज्ञेन चेतनेन चेतनकर्तृत्वसिद्धेः पृथिव्यादीनां सिद्धसाधनं चैतन्येऽपि तेषामुपादानानभिज्ञत्वात्। तज्ज्ञत्वे वा स एवास्माकमी-श्वरः। ईदृशमस्तु सिद्धसाधनं को हि क्लेशं विना न वाञ्छितसिद्धिमिच्छेत्। न च साध्यहीनो दृष्टान्तः, पटादीनामप्युपादानाभिज्ञकुविन्दादिकर्तृकत्वात्। अत एव न विरुद्धता हेतोः, एवं हि सा भवेत् यद्युपादानानभिज्ञकर्तृकाः पटादयो भवेयुः; न चैतत्परेषामपि संमतम्।

स्यादेतत्—अर्थाक्षिप्तस्य विशेषस्य शरीरादिमत्त्वादेः प्रमाणविरोधाद्विरुद्धता। यथा तृणादि-विकारकारित्वादग्निमद्धिममित्यत्र वह्निमत्त्वाक्षिप्ततृणादिविकारोपयुक्तवह्निगतोद्भूतोष्णस्पर्शविरुद्ध-शीतस्पर्शस्य प्रत्यक्षेणोपलम्भाद्बाधितो विरुद्धो हेतुः। तथा ह्यस्य क्षित्याद्युपादानविषयं ज्ञानमात्म-मनःसन्निकर्षादिकारणकं नासति तस्मिन् भवतीति तदनेनाक्षिप्तं तच्चात्र प्रमाणबाधितं तन्निवृत्तौ च ज्ञानमस्य निवर्तेत उष्णत्वोद्भूतिनिवृत्ताविव दाहको वह्निरवश्याय इति। न, अव्यापकनिवृत्ताव-व्याप्यनिवृत्तेरयोगात्। कारणं चेदव्यापकं कार्यस्य, हन्त हता तर्हि व्याप्यव्यापकसंकथा। भवेदेतद् यदि क्षित्याद्युपादानज्ञानमप्यस्य कार्यं स्यान्नित्यं तु तदभ्युपेयत इति न शरीरादिनिवृत्ता-वपि निवर्तितुमर्हति अव्यापकनिवृत्तेरव्याप्यस्यानिवृत्तेरिति। अन्यथा नाश्ववान् मैत्र इति गोमानपि न स्यात्। न च बुद्ध्यादीनामनित्यानां बहुलमुपलब्धेर्नित्या बुद्धिरसंभाविनीति साम्प्रतम्। न हि प्रत्यक्षाः पाथसीया हिमकरकादयस्तद्गता रूपादयोऽनित्या इति तदारम्भकैः परमाणुभिस्तद्गतैर्वा रूपादिभिस्तथा भवितव्यम्। (क)सदकारणतया तु नित्यतोभयत्रापि तुल्या।

वृत्तिः

नन्वीश्वर एव क इत्यत भाष्यम् 'गुणविशिष्टमात्मान्तरमीश्वरः'। गुणैर्नित्य-ज्ञानेच्छाप्रयत्नैः सामान्यगुणैश्च संयोगादिभिर्विशिष्टमात्मान्तरं जीवेभ्यो भिन्न आत्मा जगदाराध्यः सृष्ट्यादिकर्ता वेदद्वारा हितोपदेशको जगतः पितेति।

(१) 'वा' इति क-पु० नास्ति।
(क) 'सदकारणवन्नित्य'मिति वैशेषिकसूत्रम्।

न्यायवार्त्तिकतात्पर्यटीका

न च शरीरादिसद्भावेन ज्ञानस्य तत्र तत्रोपलम्भाच्छरीरादीनां ज्ञानं व्याप्यमिति युक्तम्, स्वाभाविकसंबन्धशालिता हि व्याप्यता, सा चोपाधिविरहे भवति। अस्ति च शरीरादिसद्भावे ज्ञानस्योपाधिः कार्यत्वम्। कार्यं ज्ञानं स्वकारणं शरीरादिं नातिवर्त्तते नित्यं तु तदतिवर्त्तमानमपि साहित्योपलम्भं न विरुणद्धि। तस्माद् यथाऽनित्यः शब्दः उत्पत्तिमत्त्वात् घटवदिति प्रयुक्ते कश्चित् साध्यदृष्टान्तयोर्धर्मवैचित्र्यात् प्रत्यवतिष्ठेत—'यदि घटसाधर्म्यादुत्पत्तिमत्त्वादनित्यः शब्दः, हन्त तस्मादेव रूपादिमता तेन भाव्यम्, न चेदयं घटसाधर्म्येण रूपादिमान् एवमनित्योऽपि मा भूदिति। एवं च प्रत्यवतिष्ठमान उत्कर्षसमजातिवादी पराजीयते, एवमेवंवाद्युत्कर्षसमजातिवादितया पराजेतव्यः साधर्म्यमात्रेणाप्रयोजकेन प्रत्यवस्थानात्, तस्य च सर्वानुमानेषु सुलभतया सर्वानुमानोच्छेदापादकत्वात्।

स्यादेतत्। उत्पत्तिमत्त्वमुपादानाद्यभिज्ञकर्तृपूर्वकत्वमात्रव्याप्तं घटादिषु दृष्टं तावन्मात्रमेव पृथिव्यादीनां गमयेद् नित्यसर्वविषयज्ञानवत्कर्तृत्वं तु कुतस्त्यम्। न हि तद् दृष्टान्तधर्मिणि दृष्टम्। अथ रूपाद्युपलब्धेः क्रियात्वेन चक्षुराद्यनुमानमपि कथम्? न हि च्छिदादयः क्रिया इन्द्रियादिसाधनाः तासां कुठारादिसाधनत्वात्। अथ दृष्टान्तधर्मिण्यदृष्टमपीन्द्रियसाधनत्वं पक्षधर्मताबलात् सिध्यति। रूपाद्युपलब्धिगतं हि क्रियात्वं तदेव करणं गमयेद् यदुपलब्धिनिर्वर्तनसमर्थं, न च कुठारादयः समर्था इति पक्षधर्मताबलात्कुठारादिविलक्षणमदृष्टचरमपि चक्षुराद्युपस्थापयतीति तदितरत्रापि समानम्। न ह्यपरिमेयानियतदिग्देशैन्द्रियकानैन्द्रियक-त्रस-स्थावरादिलक्षण-कार्योत्पादयौगपद्यमसति सर्वविषयज्ञाने तन्नित्यत्वे वा सेद्धुमर्हति। नो खल्वीदृशं परमेश्वरविज्ञानं कार्यशरीरादिकार्यं संभवति, शरीराद्युत्पत्तेः प्रागस्याचैतन्येन तत्प्राक्कालकार्यान्तरोत्पादायेश्वरान्तरकल्पनाप्रसङ्गात्। एवं तत्प्राक् तत्प्रागित्यनेकालौकिक(क)कल्पनया वरं बुद्धिनित्यत्वं कल्पितम्। एतेन शरीरेन्द्रियनित्यत्वकल्पनाऽपि प्रत्युक्ता। एतेन यदेके ब्रुवते—

सन्निवेशादिमत्त्वं बुद्धिमद्धेतु यद्यपि।
प्रसिध्येत्सन्निवेशादेरेककारणता कुतः॥

इति, तदपि परिहृतम्। तेषां प्रसिध्येत् सर्वज्ञनिराक्रियामनोरथो यदि पिशितचक्षुषः परमाणून् क्षेत्रज्ञान् तत्समवेतान् वा कर्माशयान् द्रष्टुमीशते, न चैतदस्ति। तस्मादतीन्द्रियार्थदर्शिनः अस्मदादिविलक्षणा बहवः कल्पनीयाः, तद्वरमेक एव तादृशः कल्पनालाघवायेति। न च कादाचित्कपरिपाकादृष्टवत्क्षेत्रज्ञपरमाणुसंयोगादेव तनुभुवनादिकार्योपपत्तेः कृतं चेतनकर्तृकत्वेनेति

वृत्तिः

परे तु प्रसङ्गादीश्वरप्रतिपादनायेयं त्रिसूत्री, तथाहि—ईश्वरः कारणम्, अर्थाज्जन्यजातस्य। अनुमानन्तु—क्षित्यादिकं सकर्तृकं कार्यत्वात् घटवदित्यूह्यम्।

(क) 'कल्पनायाः' इति पाठः सम्भाव्यते।

न्यायवार्त्तिकतात्पर्यटीका

वाच्यम्, उत्पत्तिमत्त्वस्योपादानाद्यभिज्ञकर्तृकत्वेनोपाधिविरहिणः स्वाभाविकप्रतिबन्धसिद्धेः। न च विज्ञानानामिन्द्रियमनसां ज्ञानोत्पादसाधनानामनधिष्ठानस्य च वत्सवृद्धिनिमित्तस्याप्यचेतनस्य क्षीरस्य स्वातन्त्र्येण प्रवृत्तेः वने विटपादीनां च विना प्रयत्नमुत्पादस्य दर्शनाद् व्यभिचार इति सांप्रतम्, सर्वेषामेव तेषां विवादास्पदीभूतत्वेन पक्षनिक्षेपात्। न च शशशृङ्गास्तितावदनुपलब्धिविरोधादपक्षधर्मता धर्मिणो दर्शनानर्हतया भगवतस्तद्विरोधानुपपत्तेः; अन्यथा सर्वानुमानोच्छेदप्रसङ्गात्; शृङ्गस्य तु शशशिरोवर्तिनो वत्सादिगतस्येव दर्शनार्हस्यानुपलब्धिनिराकृतस्य साधनानर्हत्वात्।

स्यादेतत्—नोत्पत्तिमात्रं स्वभावप्रतिबद्धं बुद्धिमद्धेतुत्वेन किं तु तद्विशेषः, यद्दृष्टेरक्रियादर्शिनोऽपि कृतबुद्धिरुत्पद्यते तस्य च दृष्टेः सोपजायते। (क) यद् बुद्धिमद्भावाभावं दृष्टं घटादि च तथा, न तूत्पत्तिमन्मात्रं तनुभुवनाद्यपि, तस्य सद्भावासद्भावानुविधानादर्शनात्। तदेतेन विशेषेणोपाधिना प्रयुक्तां बुद्धिमद्धेतुकत्वव्याप्तिमुपजीवदुत्पत्तिसामान्यं न तेन स्वभावप्रतिबद्धमिति न तद्गमयितुमर्हतीति। अन्यथा धूमप्रयुक्तां धूमध्वजव्याप्तिमुपजीव्य पाण्डुतादेः कुमुदकपोतकादिगतादपि (ख) धूमकेतुनानुमानप्रसङ्गादिति। अत्रोच्यते। इदमत्र निपुणतरं भवन्तो निरूपयन्तु किं बुद्धिमदन्वयव्यतिरेकानुविधानं विशेष आहो तद्दर्शनम्। यदि पूर्वपक्षः स बुद्धिमद्धेतुकत्वं तनुभुवनादीनामातिष्ठमानैरभ्युपेयत एव। न हि कारणं कार्याननुविहितभावाभावमन्यो वक्तुमर्हत्यह्रीकात्। अथ दर्शनं न तर्ह्यक्रियादर्शिनः कृतबुद्धिसंभवः। य एव हि पटोऽनेन बुद्धिमद्धेत्वन्वयव्यतिरेकानुविधायी दृष्टः, स एव तत्कार्यो न तु विपणिवर्ती। तज्जातीयस्य तदन्वयव्यतिरेकानुविधानदर्शनाददृष्टान्वयव्यतिरेकानुविधानमपि तज्जातीयं तथेति चेत् हन्तोत्पत्तिमद् घटादि बुद्धिमदन्वयव्यतिरेकानुविधायीत्यन्यदपि तज्जातीयं तनुभुवनादि तथा भवद् दण्डेन न पराणुद्यते। घटजातीयमुत्पत्तिमद् बुद्धिमत्पूर्वमिति चेत् ननु प्रासादादि न तद्धेतुकं भवेत् अघटजातीयत्वात्। अथ यज्जातीयं बुद्धिमदन्वयव्यतिरेकानुविधायि दृष्टं तज्जातीयमेवादृष्टान्वयव्यतिरेकमपि बुद्धिमद्धेतुकम्। तत्किमिदानीं कार्यजातीयं प्रासादादि बुद्धिमद्धेतुकं न दृष्टं येनोत्पत्तिमत्तनुभुवनादि तथा न स्यात्। न खलु तज्जातीयत्वे कश्चिद्विशेष

वृत्तिः

ननु जीवानामेव कर्तृत्वं स्यादत्राह—पुरुषेति। पुरुषकर्मणां वैफल्यं दृश्यते, तथा च विफले कर्मणि प्रवर्त्तमानत्वादज्ञत्वं जीवानां यत उपादानगोचरापरोक्षज्ञानादिमतो हि कर्तृत्वं, न क्षित्याद्युपादानगोचरमपरोक्षज्ञानं जीवानामिति भावः।

(क) 'यद् बुद्धिमद्भावानुविधायिभावाभावं' इति ख-पुस्तके मुद्रितम्। 'यद् बुद्धिमद्भावाभावानुविधायिभावाभावम्' इति तु समीचीनं सम्भाव्यते। एवं यच्छब्दाकाङ्क्षापूरकस्तच्छब्द उत्तरवाक्ये द्रष्टव्यः।

(ख) "धूमकेतनानुमान" इति समीचीनतया सम्भाव्यते।

न्यायवार्त्तिकतात्पर्यटीका

इति। यत्तु मृद्विकारत्वेन वल्मीकस्य घटादिवत्कुलालकार्यत्वं न भवति, तत्र कुम्भकारस्य प्रत्यक्षानुपलम्भविरोधात्; अदृश्यचेतनपूर्वकत्वं तु तस्योपेयत एव।

स्यादेतत्—नोत्पत्तिमात्रमुपादानाभिज्ञकर्तृकत्वेन व्याप्तम्, अपि तु यदस्मदादिशक्य-ज्ञानोपादानादि; न च तथा तनुभुवनाद्युत्पत्तिमदपि, तस्माद् व्याप्तिविरहान्न तत्पूर्वकमिति। तदयुक्तम्; उत्पत्तिमत्त्वतदुपादानाद्यभिज्ञकर्तृकत्वयोः प्रथममन्वयव्यतिरेकाभ्यां व्याप्तौ सिद्धाय तदुपादानादिशक्यज्ञानत्वकल्पनायाः कार्यज्ञानविषये व्यवस्थापनात्। व्याप्तिबलेन ज्ञानसामान्य-सिद्धौ पक्षधर्मताबलेन तन्नित्यत्वसिद्धिरित्युक्तम्। तेनोपाधेरनुस्रियमाणस्यानुपलब्धेः स्वभाव-प्रतिबद्धमुत्पत्तिमत्त्वं बुद्धिमद्धेतुकत्वेन। न च स्वभावप्रतिबद्धमुत्पत्तिमत्त्वं स्वसंबन्धिनमती-त्यापि वर्त्स्यतीति शक्यं शङ्कितुं तथा सति स्वभावहानिप्रसङ्गः।

स्यादेतत्—न सर्वज्ञपूर्वकाः क्षित्यादयः प्रमेयत्वसत्त्वादिभ्यः घटादिवदित्यनुमानानि सन्ति प्रतिपक्षसाधनानीति सत्प्रतिपक्षतया प्रकृतमनुमानाभासम्। अत्रोच्यते। किमनेन सर्वज्ञपूर्वकत्वं निषिध्यते उत ज्ञातृमात्रपूर्वकत्वं सर्वग्रहणमुपलक्षणार्थम्। यदि पूर्वः पक्षः, तदेकदेशदर्शिपूर्वकत्वं साधितं स्यात्। तथा चापसिद्धान्तः। न च शक्यमपि। न ह्यस्मदा-दिनाऽर्वाग्दर्शिना शक्याः पृथिव्यादयः कर्तुम्। ज्ञातृमात्रपूर्वकत्वे तु निषेध्ये घटादिभिर्व्यभिचारः। यच्चेश्वरो नाधिष्ठाता परमाण्वादीनामशरीरित्वाद् मुक्तात्मवत्। ऐश्वरं ज्ञानं न सर्वविषयम् अनित्यं च ज्ञानत्वाद् अस्मदादिज्ञानवदित्यनुमानं तत्पक्षधर्मतासिद्ध्यर्थमीश्वरसिद्धिं तद्बुद्धिमत्त्वं चापेक्षमाणं तत्साधकप्रमाणविरुद्धमात्मानमेव तावन्नाऽऽसादयितुमर्हति (क)प्रागेव तद्विरोद्धुम्। न ह्यागमानुमाने जगत्कर्तृत्वनित्यसर्वविषयबुद्धिमत्त्वव्यतिरेकेण केवलमीश्वरं साधयतः। तथा च ताभ्यां विरुद्धं भवदनुमानं नोत्पत्तुमर्हतीति सिद्धम्। बुद्धिवदिच्छाप्रयत्नावपि तस्य नित्यौ सकर्तृकत्वसाधनान्तर्गतौ वेदितव्यौ ज्ञानचिकीर्षाप्रयत्नसमवायलक्षणत्वात् कर्तृत्वस्य, तेषां च परस्पराविनाभावादन्यतरसिद्धावितरयोः सिद्धेः। तदेवमुत्पत्तिमत्त्वादेव पक्षधर्मता-सहायादेवंभूतेश्वरसिद्धिरित्युक्तम्।

भवतु वा तस्मादुपादानाद्यभिज्ञकर्तृकत्वमात्रसिद्धिः परिशेषानुमानात्तु व्यतिरेक-सिद्धेर्विशेषसिद्धिः। तथा हि तनुभुवनाद्यभिज्ञः कर्त्ता नानित्यासर्वविषय-बुद्धिमान्, तत्कर्तुस्तदुपादानाद्यनभिज्ञत्वप्रसङ्गात्, न ह्येवंविधस्तदुपादानाद्यभिज्ञो दृष्टः

वृत्तिः

नन्वदृष्टद्वारा जीवानां कर्तृत्वमस्त्वित्याशङ्कते—न पुरुषेति। फलस्य कार्यस्य कर्माभावेऽनिष्पत्तेः। तत्तत्पुरुषोपभोगसाधनत्वात् तत्कर्मजन्यत्वमिति स्फोरणाय पुरुषेति।

(क) 'प्रागेव' इति 'किमुत' इत्यर्थे निपातः इति गुरवः।

न्यायवार्त्तिकम्

स पुनरात्मेश्वरसम्बन्धः किं व्यापकोऽव्यापको वा इति अर्थाभावादव्याकरणीयः प्रश्नः। आत्मेश्वरसम्बन्धोऽस्तीत्येतदेव शक्यते वक्तुम्। स पुनरीश्वरात्मानौ व्याप्नोति न व्याप्नोतीति न व्याक्रियते। येऽप्यजं संयोगं नेच्छन्ति तेषामप्यणुमनःसंयोगोपपत्तेरस्ति सम्बन्धः—यानि प्रत्यात्म मनांसि तानि सर्वाणीश्वरसम्बद्धानीत्यतः सम्बद्धसम्बन्धोपपत्तेरात्मान्तराण्यधितिष्ठति यथाऽऽत्महस्तसंयोगप्रयत्नाभ्यां हस्ते कर्म भवति, उत्पन्नकर्मको हस्तः सन्दंशादिना सम्बध्यते, तत्सम्बन्धादयःपिण्डाद्यधितिष्ठति। यदि तर्हि सर्गादावीश्वरस्य कारणत्वेऽयं न्यायोऽभिहितः इदानीमीश्वरो न कारणमिति प्राप्तम्? इदानीमपि स एव न्यायः—मृतशरीरिणां यौ धर्माधर्मौ तौ बुद्धिमत्कारणाधिष्ठिताविति समानो न्यायः। बुद्धिमत्कारणाधिष्ठितानि स्वासु स्वासु धारणादिक्रियासु महाभूतानि वाय्वन्तानि प्रवर्तन्ते अचेतनत्वाद्वास्यादिवत्। एवं कार्यत्वात् तृणादीनि पक्षीकृत्य दर्शनस्पर्शनविपयत्वादिति वक्तव्यम्। एवं यत्र यत्र विप्रतिपत्तिः कार्यत्वं च तत्तदनेनैव न्यायेनानेन दृष्टान्तेन वास्यादिना पक्षयित्वा साधयितव्यम्। आगमाच्च—आगमादपि श्रूयते ईश्वरः कारणम्।

न्यायवार्त्तिकतात्पर्यटीका

यथाऽस्मदादिः, तदुपादानाद्यभिज्ञश्चायम्, तस्मात्तथेति। नो खलु परमाणुभेदान् प्रतिक्षेत्रज्ञसमवायिनश्च कर्माशयानन्यः शक्तो ज्ञातुमृते तादृशादीश्वरादिति प्रपञ्चितमधस्तात्। परपुरुषसमवेतावपि धर्माधर्मावधिष्ठातुं शक्नोति संबन्धात्। न हि साक्षात्संयोगसमवायावेव संबन्धौ संयुक्तसंयोगिसमवायस्यापि तद्भावात्। संयुक्ताः खल्वीश्वरेण परमाण्वादयः तैश्च क्षेत्रज्ञाः तत्समवेतौ धर्माधर्माविति। संयुक्तसमवायो वा क्षेत्रज्ञेनेश्वरस्य संयोगात् अजसंयोगस्याप्युपपादितत्वात्। धर्माधर्मौ परमाणून् वा स्वधर्मोपग्रहमन्तरेणापि चेश्वरः स्वकार्याभिमुखान् करिष्यति विषविद्याविदिव विषशकलं क्रियारम्भाभिमुखम्। एतेन चेतनोपादानत्वमपि व्याख्यातम्। वार्त्तिककृता तूपलक्षणतया चेतनत्वं हेतुरुक्तः। उत्पत्तिमत्त्वादयोऽपि हेतव ऊहनीयाः। इमं च न्यायमाम्नाय उपोद्धलयति—

"एतस्य वाऽक्षरस्य प्रशासने गार्गि (क) द्यावापृथिवी विधृते तिष्ठतः" (ख) "द्यावापृथिवी जनयन् देव एकः" "तदैक्षत बहु स्यां प्रजायेये"त्यादिः। स्मृतिश्च भवति—

वृत्तिः

समाधत्ते—तदिति। कर्मणोऽपि तत्कारितत्वात् ईश्वरकारितत्वात् अचेतनस्य चेतनाधिष्ठितस्यैव जनकत्वादिति भावः॥ २१॥

समाप्तमीश्वरोपादानताप्रकरणम्॥ ५॥

(क) "द्यावापृथिव्यौ" इत्यस्मदृष्टमुद्रितपुस्तकेषु पाठः।

(ख) "द्यावाभूमी" इत्यस्मत्पुस्तकपाठः।

अपर इदानीमाह—

(सू०)—अनिमित्ततो भावोत्पत्तिः कण्टकतैक्ष्ण्यादिदर्शनात् ॥२२॥

न्यायभाष्यम्

अनिमित्ता शरीराद्युत्पत्तिः (१) कस्मात्? कण्टकतैक्ष्ण्यादिदर्शनात्। कण्टकस्य

न्यायवार्त्तिकम्

अज्ञो जन्तुरनीशोऽयमात्मनः सुखदुःखयोः।
ईश्वरप्रेरितो गच्छेत् स्वर्गं वा श्वभ्रमेव वा॥

(महाभारतं वनपर्व ३०अ० २८ श्लो०)

यदा स देवो जागर्ति तदेदं चेष्टते जगत्।
यदा स्वपिति शान्तात्मा तदा सर्वं निमीलति॥

(मनुसंहिता १।५२) ॥ २१ ॥

इति ईश्वरोपादानताप्रकरणम्।

अपर इदानीमाह—

अनिमित्ततो भावोत्पत्तिः कण्टकतैक्ष्ण्यादिदर्शनात्। यथा कण्टकतक्ष्ण्यादि निर्निमित्तं च उपादानवच्च तथा शरीरादिसर्गोऽपि। तदिदं दृष्टान्तसूत्रम्। कः पुनरत्र न्यायः? अनिमित्ता

न्यायवार्त्तिकतात्पर्यटीका

अज्ञो जन्तुरनीशोऽयमात्मनः सुखदुःखयोः।
ईश्वरप्रेरितो गच्छेत् स्वर्गं वा श्वभ्रमेव वा॥

अकारणत्वेन चेश्वरज्ञाननित्यतां दर्शयति श्रुतिः—

"अपाणिपादो जवनो ग्रहीता पश्यत्यचक्षुः स शृणोत्यकर्णः। स वेत्ति विश्वं न हि तस्य वेत्ता तमाहुरग्र्यं पुरुषं पुराणम्" इत्यादिका। एतयैवाशरीरित्वं दर्शितं भवति। परिशिष्टं तु वार्त्तिककृता स्वयमेव प्रपञ्चितमित्युपरम्यते ॥ २१ ॥

कण्टकादीनां संस्थानविशेषवतां निमित्तादर्शनेनानिमित्ततां मन्वानस्तेनैव दृष्टान्तेन शरीरादीनामपि संस्थानभेदवतामनिमित्ततां मन्वानः पूर्वपक्षयति—अनिमित्तत इति।

अनि-नात् (सू० २२) ॥ अदृश्यमाननिमित्तानां शरीरकण्टकादीनां पक्षनिक्षेपात्

वृत्तिः

यदि च कार्याणामाकस्मिकत्वं तदा न परमाण्वादीनामुपादानत्वं न वेश्वरस्य निमित्तत्वमत आकस्मिकत्वनिराकरणमारभते।

तत्र पूर्वपक्षसूत्रम्—(अनिमित्तत इति)।

---

(१) 'कस्मात्' इति ज-ग-पु० नास्ति।

न्यायभाष्यम्

तैक्ष्ण्यम्, पर्वतधातूनां चित्रता, ग्राव्णां श्लक्ष्णता, निर्निमित्तं च (१) उपादानवच्च दृष्टं तथा शरीरादिसर्गोऽपीति ॥ २२ ॥

(सू०)— अनिमित्तनिमित्तत्वान्नानिमित्ततः ॥ २३ ॥

अनिमित्ततो भावोत्पत्तिरित्युच्यते यतश्चोत्पद्यते तन्निमित्तम्। अनिमित्तस्य निमित्तत्वान्नानिमित्ता भावोत्पत्तिरिति ॥ २३ ॥

न्यायवार्त्तिकम्

रचनाविशेषाः शरीरादयः संस्थानवत्त्वात् कण्टकादिवदिति । न, अनुपलब्धनिमित्तानामनुमानतो निमित्तोपलब्धिः—यस्य निमित्तं प्रत्यक्षतो नोपलभ्यते तस्यानुमानतः प्रत्येतव्यम्। कुतः ? निमित्तवद्द्रव्यसामान्यात्—यानि खलु निमित्तवन्ति द्रव्याणि संस्थानविशेषवन्ति तानि घटादीनि, संस्थानविशेषवच्च शरीरं कण्टकादयश्च, तस्मात् निमित्तवन्त इति। उक्तं चात्र। किमुक्तम् ? पूर्वकृतफलानुबन्धात् तदुत्पत्तिरिति (सू ६०।२।३)। न चोभयपक्षसम्प्रतिपन्नं संस्थान-विशेषवदनिमित्तं दृष्टमिति ॥ २२ ॥

अनिमित्तनिमित्तत्वान्नानिमित्ततः। अपरे तु अनिमित्तनिमित्तत्वान्नानिमित्तत इति परिहारं वर्णयन्ति। अनिमित्तमेव निमित्तम्, यतश्चोत्पत्तिस्तन्निमित्तमिति, अनिमित्तनिमित्तत्वात् नानिमित्तत उत्पत्तिरिति ॥ २३ ॥

न्यायवार्त्तिकतात्पर्यटीका

पक्षेण व्यभिचारानुद्भावनात्, उद्भावने वा सर्वानुमानोच्छेदप्रसङ्गात् सर्वत्र तस्य सुलभत्वात् उभयसिद्धेन निमित्तवत्पटादिदृष्टान्तेन संस्थानभेदवत्त्वात् कण्टकशरीरादीनामपि निमित्तवत्त्वमिति सिद्धान्तः ॥ २२ ॥

सिद्धान्त्येकदेशिमतमुद्भाव्य दूषयति—

अनि-तः (सू० २३) ॥ अपरे त्विति ॥ २३ ॥

वृत्तिः

अनिमित्तत इति प्रथमान्तात् (२)तसिः, अनिमित्ता भावोत्पत्तिरित्यर्थः। भावेति स्पष्टार्थम्। घटाद्युत्पत्तिर्न कारणनियम्या उत्पत्तित्वात् कण्टकतैक्ष्ण्याद्युत्पत्तिवत्। यद्वा घटादिकं न सकारणकं भावत्वात् कण्टकतैक्ष्ण्यादिवत्। तैक्ष्ण्यं संस्थानविशेषः। आदि-पदान्मयूरचित्रादिपरिग्रहः, तदकारणकमेवेत्याशयः ॥ २२ ॥

---

(१) 'उपादानं दृष्टम्' इति ल-ग-ज०।

(२) 'तसिल्' इति भ०।

(सू०)—निमित्तानिमित्तयोरर्थान्तरभावादप्रतिषेधः ॥ २४ ॥

न्यायभाष्यम्

अन्यद्धि निमित्तमन्यच्च निमित्तप्रत्याख्यानम्, न च प्रत्याख्यानमेव प्रत्याख्येयं ·

न्यायवार्त्तिकम्

एतच्च न—

निमित्तानिमित्तयोरर्थान्तरभावादप्रतिषेधः। अन्यद्धिनिमित्तमन्यच्च निमित्तप्रत्याख्यानमिति। न च प्रत्याख्यानमेव प्रत्याख्येयं भवति ; निमित्तमित्यर्थाभ्यनुज्ञा, अनिमित्तमिति तस्य प्रतिषेधः, अभ्यनुज्ञाप्रतिषेधयोश्चैकत्वमयुक्तमिति। स खल्वयं वादोऽकर्मनिमित्तः सत्त्वसर्ग इति एतस्मान्न भिद्यत इति। अभेदे तु तत्प्रतिषेधेनैव प्रतिषिद्धो बोद्धव्यः।

कण्टकादीनां चानिमित्तं जन्मेति ब्रुवाणः प्रष्टव्यः—किं कण्टकमात्रस्यानिमित्तं जन्म उत सर्वस्येति ? यदि कण्टकमात्रस्यानिमित्तं जन्म ? तच्छेषेण दृष्टान्तेन शक्यं प्रतिपादयितुं निमित्तवदिति। अथ सर्वमनिमित्तमित्ययं पक्षस्तथाऽपि व्याघातः प्रतिपाद्यप्रतिपादकन्यायस्याभ्युपगमात्—सर्वं चानिमित्तं प्रतिपादयसि चेति (क) व्याघातः। वाक्योपादानाच्च व्याघातः—

न्यायवार्त्तिकतात्पर्यटीका

निमि-धः (सू० २४)॥ स्वयं वार्त्तिककारः कण्टकादीनामनिमित्ततां विकल्प्य दूषयति—कण्टकादीनामनिमित्तं जन्मेति। प्रतिपाद्यप्रतिपादकन्यायस्येति। प्रतिपाद्यः पुरुषः कर्म प्रतिपादकश्च पुरुषः कर्ता, कर्तृकर्मणी च कारके, कारकं च क्रियाया निमित्तमिति प्रतिपाद्यप्रतिपादकविषयो न्यायः ; स चायमनिमित्तं शरीरादीनां जन्मेति प्रतिजानानेनानेनाभ्युपेयते। अन्यथा ते मूकतैव स्यादिति। तदिदमुक्तम्—सर्वं चानिमित्तं प्रतिपादयसि चेति व्याहतम्। न केवलं प्रतिपाद्यप्रतिपादकन्यायाभ्युपगमात् इतोऽपीत्याह—वाक्योपादानाच्चेति। प्रतिपादननिमित्तं वाक्यमुपादत्से अभिधत्से चानिमित्तं सर्वमिति

वृत्तिः

एकदेशी भ्रान्तो दूषयति—(अनिमित्तनिमित्तत्वान्नानिमित्ततः)।

अनिमित्तत इति हेतुपञ्चमीनिर्देशादनिमित्तस्यैव निमित्तत्वात् कथमनिमित्तत इति ॥ २३ ॥

दूषयति—(निमित्तेति)।

अनिमित्तस्य निमित्तस्य चार्थान्तरभावाद्भेदादुक्तः प्रतिषेधो न युक्तः, अनिमित्तस्य (१)निमित्तत्वासम्भवात् शरीरस्याकर्मनिमित्तत्वदूषणेनैव च दूषितप्रायमित्याशयेनात्र न दूषितमिति।

---

(१) 'निमित्तासम्भवात्' इति भ०।

(क) 'व्याहत'मिति टीकासम्मतः पाठः।

न्यायभाष्यम्

यथाऽनुदकः कमण्डलुरिति नोदकप्रतिषेध उदकं भवतीति। स खल्वयं वादोऽकर्मनिमित्तः शरीरादिसर्ग इत्येतस्मान्न भिद्यते, अभेदात्तत्प्रतिषेधेनैव प्रतिषिद्धो वेदितव्य इति॥ २४॥

न्यायवार्त्तिकम्

अनिमित्ततो भावोत्पत्तिः कण्टकतैक्ष्ण्यादिवदिति वाक्यं प्रतिपादकमुपादीयते, न च निमित्तमस्तीति व्याघातः। अनिमित्ततो भावोत्पत्तिरिति सनिमित्ता भावोत्पत्तिरिति च वाक्ये। यद्यनयोरर्थभेदं प्रतिपद्यसे, वाक्यभेदादर्थभेदप्रतिपत्तिरिति व्याहतं भवति अनिमित्ता भावोत्पत्तिरिति। अथ न वाक्यभेदेनार्थभेदं प्रतिपद्यसे, वाक्यविशेषोपादानं व्याहतम्; यत्किञ्चिद् वाक्यमुपादेयमिति। अनिमित्तां भावोत्पत्तिं प्रतिपद्यमानेन सर्वलोकव्यवहार उच्छिन्नो भवति। अनिमित्ता भावोत्पत्तिरिति च भावमात्रपक्षीकरणे न दृष्टान्तो भवति। अथ शरीराद्येकदेशं पक्षयसि? तथाऽप्यन्यतरधर्मासिद्धो दृष्टान्तः (१) संस्थानविशेषवत्त्वस्य (२) भावात् अनिमित्तत्वस्य चाभावादिति॥२४॥

इति आकस्मिकत्वप्रकरणम्।

न्यायवार्त्तिकतात्पर्यटीका

व्याघात इत्यर्थः। तथाऽप्यन्यतरधर्मासिद्ध इति। अन्यतरेण साध्यधर्मेणानिमित्तत्वाख्येनासिद्धोऽनिमित्तत्वस्यैवासिद्धेः। ननु प्रतिवादिनो वाङ्मात्रेण न सिद्धमसिद्धं भवत्यतिप्रसङ्गादित्यत आह—संस्थानविशेषवत्त्वस्य भावात्। पटादिदृष्टान्तेन कण्टकादीनां सनिमित्तकत्वस्य (क)प्रामाणिकत्वेन वाङ्मात्रादसिद्धेरिति।

कस्मात् पुनः पूर्वः पक्षः स्वयं सूत्रकारेण न निराकृत इत्यत आह भाष्यकारः—स खल्वयं वादोऽकर्मनिमित्त इति॥ २४॥

वृत्तिः

नव्यास्तु सूत्रद्वयमेवं व्याचक्षते। समाधत्ते—अनिमित्तेति। अनिमित्तस्य अनिमित्तत्वसाधकस्य। निमित्तत्वात् अनिमित्तत्वानुमितिजनकत्वाद् अनिमित्तत इति व्याहतम्। अनिमित्तत्वानुमितिजनकानभ्युपगमेऽनिमित्तत्वं न सिध्येदिति, कण्टकतैक्ष्ण्यादिकमपि नानिमित्तकम्, अदृष्टविशेषसहकृतैरणुभिस्तदुत्पादनादिति हृदयम्। दोषान्तरमाह—निमित्तेति। इदमत्र निमित्तमिदमनिमित्तमिति प्रतीत्याऽनयोर्भेदसिद्धेर्निमित्तप्रतिषेधो न युक्तः, इतरथा च सार्वलौकिकी प्रतीतिर्नोपपद्येतेति भावः॥ २४॥

समाप्तमाकस्मिकत्वप्रकरणम्॥ ६॥

(१) 'सन्तानविशेषवत्त्वस्य' इति क-खधृतपाठान्तरम्। (२) 'विद्यमानत्वात्' इति क-ख०।

(क) अत्र 'प्रामाणिकत्वे न वाङ्मात्रादसिद्धिरिति' इति पाठः समीचीनतया प्रतिभाति।

न्यायभाष्यम्

अन्ये तु मन्यन्ते(१)—

(सू०)—सर्वमनित्यमुत्पत्तिविनाशधर्मकत्वात् ॥ २५ ॥

किमनित्यं नाम? यस्य कदाचिद् भावस्तदनित्यम्। उत्पत्तिधर्मकमनुत्पन्नं नास्ति विनाशधर्मकं (२) च (क)विनष्टं नास्ति। किं पुनः सर्वम्? भौतिकं च शरीरादि

न्यायवार्त्तिकम्

अन्ये तु मन्यन्ते—

सर्वमनित्यमुत्पत्तिविनाशधर्मकत्वात्। किमनित्यं नाम? यस्य कदाचिद्भावस्तद-नित्यम्। उत्पत्तिधर्मकमनुत्पन्नं नास्ति विनाशधर्मकं च (ख)विनष्टं नास्ति। किं पुनः सर्वम्? भौतिकं शरीरादिकमभौतिकं च बुद्ध्यादि। तदुभयमुत्पत्तिविनाशधर्मकमिति विज्ञायत इति। तस्मात् सर्व-मनित्यमिति। सूत्रस्य दृष्टान्तार्थत्वात् तस्य सर्वान्तर्भावादुदाहरणाभावः। (३)सर्वमनित्यमिति ब्रूषे (३*) दृष्टान्ताभावः, सर्वस्य पक्षीकृतत्वात्; न साध्यमुदाहरणं युक्तम्। उत्पत्तिविनाशधर्म-

न्यायवार्त्तिकतात्पर्यटीका

अन्ये तु मन्यन्ते—

सर्वमनित्यमुत्पत्तिविनाशधर्मकत्वात् इति ॥ (सू० २५) ॥ हेतोर्गमकत्वं दर्शयितुं पृच्छति—किमनित्यमिति। उत्तरम् यस्य कदाचिद्भावः। हेत्वर्थं विवृणोति—उत्पत्तीति। यद् उत्पत्तिधर्मकमनुत्पन्नं नास्ति तद् उत्पन्नं चास्ति, विनाशधर्मकं च विनष्टं नास्ति अविनष्टं चास्ति। तस्मात् पूर्वापरयोः कालयोरभावान्मध्ये च भावात् सिद्धं कदाचिद्भावलक्षणम-नित्यत्वमुत्पत्तिविनाशधर्मकत्वादित्यर्थः। साध्यधर्मिरूपं पृच्छति—किं पुनरिति। उत्तरम्—भौतिकं चेति। अत्र तावत् स्वयं वार्त्तिककार उत्तरमाह—(क) सर्वमनित्यमिति—सूत्रस्य

वृत्तिः

सर्वस्यैवानित्यत्वे नात्मादेरपि नित्यत्वं स्यादतः सर्वानित्यत्वनिराकरणप्रकरणम्। तत्र प्रमेयत्वमनित्यत्वव्याप्यं न वेति संशये पूर्वपक्षसूत्रम्—(सर्वमिति)।

---

(१) 'अन्येऽनुमन्यन्ते'—इति ज०। (२) 'अविनष्टं नास्ति' इति ल-ग-ज०।

(३) 'सर्वमुत्पत्तिविनाशधर्मकत्वादिति ब्रूषे'—इति क-खधृतपाठान्तरम्।

(क) 'सर्वमनित्यमिति' इत्यंशोऽत्र वार्त्तिकोक्तसूत्रपदव्याख्यानार्थं सूत्रादाकृष्यैव टीकाकृता योजितः, न तु वार्त्तिके 'सूत्रस्य' इत्यतः पूर्वमुपलभ्यमानः 'सर्वमनित्य'मिति ग्रन्थोऽत्र धृतः, तद्वार्त्तिकग्रन्थस्य 'तस्मात्'-पदपूर्वकत्वेन पूर्वपक्षिण उपसंहारस्वरूपतया एवाभ्युपगन्तव्यतया उत्तरग्रन्थत्वाभावादिति ध्येयम्।

(क) विनाशादुत्तरकाले नास्तीत्यर्थः। (ख) 'अविनष्ट'मिति क-ख-वार्त्तिकपाठः। टीकानुसारेण 'विनष्ट'मिति पाठो गृहीतः।

न्यायभाष्यम्

अभौतिकं च बुद्ध्यादि, तदुभयमुत्पत्तिविनाशधर्मकं विज्ञायते, तस्मात्तत्सर्वमनित्यमिति ॥ २५ ॥

(सू०)—नानित्यतानित्यत्वात् ॥ २६ ॥

यदि तावत् सर्वस्यानित्यता नित्या, तन्नित्यत्वान्न सर्वमनित्यम्। अथानित्या तस्यामविद्यमानायां सर्वं नित्यमिति ॥ २६ ॥

न्यायवार्त्तिकम्

कत्वादिति चायं हेतुरव्यापकः—यदि सर्वं पक्षयित्वा उत्पत्तिविनाशधर्मकत्वमुपादत्से, परमाण्वाकाशादिषु तद्गुणेषु च केषुचित् सामान्यादिषु नोत्पत्तिविनाशधर्मकत्वमस्तीति हेतुरव्यापकः ॥२५॥

नानित्यतानित्यत्वात्। सर्वमनित्यमेवेति ब्रुवाणः प्रष्टव्यः—किं सर्वस्यानित्यता नित्या आहोस्विदनित्येति ? यद्यनित्यता नित्या, न तर्हि सर्वमनित्यम्। अथानित्या, अनित्यताया अभावात् सर्वमनित्यमिति व्याहतो हेतुः ॥ २६ ॥

न्यायवार्त्तिकतात्पर्यटीका

दृष्टान्तार्थत्वादिति। अर्थशब्दो निमित्तवचनः दृष्टान्तनिमित्तत्वात् सूत्रस्य प्रतिज्ञाहेतूपन्यासपरस्य। न दृष्टान्तं विना हेतुः प्रतिज्ञातार्थस्य गमको यत इत्यर्थः। एतदेव विभजते—सर्वमनित्यमिति। निराकरणान्तरमाह—उत्पत्तिविनाशधर्मकत्वादिति चायमिति ॥ २५॥

सिद्धान्त्येकदेशिमतमुपन्यस्य दूषयति—

नानित्यतानित्यत्वात् इति (सू० २६) ॥ (क)

वृत्तिः

अनित्यं विनाशि उत्पत्तिमतो विनाशधर्मकत्वात्। उत्पत्तिमत्त्वं चाकाशादेरपि मेयत्वात्सिद्धमिति भावः, तेन परमते तत्र नासिद्धिः।

यद्वा, उत्पत्तिविनाशधर्मकत्वात् उत्पत्तिविनाशधर्मकाणां मानसिद्धत्वात्तद्भिन्नमप्रमाणकमिति हृदयम्।

परे तु अनित्यत्वं कादाचित्कत्वम्, उत्पत्तिधर्मकत्वाद्विनाशधर्मकत्वादिति हेतुद्वये तात्पर्यमित्याहुः ॥ २५ ॥

दूषयति—(नानित्यतानित्यत्वात्)।

उत्पत्तिमत्त्वं न विनाशित्वसाधकम्, अनित्यताया ध्वंसस्य नित्यत्वात् अविनाशित्वात्, तत्र व्यभिचारात् ॥ २६ ॥

(क) २६ सूत्रे टीका नोपलभ्यते।

न्यायभाष्यम्

(सू०)—तदनित्यत्वमग्नेर्दाह्यं विनाश्यानुविनाशवत् ॥ २७ ॥

तस्या अनित्यताया अप्यनित्यत्वम् । कथम्? यथा अग्निर्दाह्यं विनाश्यानुविनश्यति एवं सर्वस्यानित्यता सर्वं विनाश्यानुविनश्यतीति ॥ २७ ॥

(सू०)—नित्यस्याप्रत्याख्यानं यथोपलब्धि व्यवस्थानात् ॥ २८ ॥

अयं खलु वादो नित्यं प्रत्याचष्टे, नित्यस्य च प्रत्याख्यान(१)मनुपपन्नम् । कस्मात्? यथोपलब्धि व्यवस्थानात् । यस्योत्पत्तिविनाशधर्मकत्वमुपलभ्यते प्रमाणतस्तदनित्यम्,

न्यायवार्त्तिकम्

तदनित्यत्वमग्नेर्दाह्यं विनाश्यानुविनाशवत् । यथाऽग्निर्दाह्यं विनाश्यानुविनश्यति एवमनित्यताऽपि सर्वं विनाश्यानुविनश्यति ॥ २७ ॥

नित्यस्याप्रत्याख्यानं यथोपलब्धि व्यवस्थानात् । अयं (क) च खलु वादः सर्वमनित्यमिति नित्यं (ख)प्रत्याचष्टे—नित्यस्य प्रत्याख्यानं न युक्तं यथोपलब्धि व्यवस्थानात् । यत्र यत्रायं हेतुरुपलभ्यते, तत्र तत्र हेतुसामर्थ्यादनित्यत्वं प्रतिपद्यामहे ; यत्र पुनरयं हेतुर्नास्ति, तेषामनित्यत्वं कथं प्रतिपत्तव्यम्? अथाकारणकमनित्यं प्रतिपद्यसे? व्याहतस्तर्हि हेतुः, उत्पत्तिविनाशधर्म-

न्यायवार्त्तिकतात्पर्यटीका

तद—वत् (सू० २७) ॥ (ग)

नित्य—नात् (सू० २८) ॥ परमसिद्धान्तं सूत्रोक्तमाह—अयं खल्विति—अथोच्यते न वयं सर्वमनित्यं साधयामोऽपि तु यस्य यस्यानित्यता नामास्ति धर्मः तत्सर्वमनित्यमिति । ततश्चाकाशादीनां नित्यत्वेऽपि नास्मत्पक्षक्षतिरिति । तदेतत्सिद्धसाधनेन दूषयति—

वृत्तिः

आक्षिपति—(तदनित्यत्वमिति) ।

तस्या अनित्यताया अप्यनित्यत्वं, यथाग्निर्दाह्यस्येन्धनादेर्विनाशानन्तरं स्वयमपि नश्यति, न तु दाह्योन्मज्जनम्, तथा घटादेरपि नाशो नश्यति, न तु घटाद्युन्मज्जनम् ।

ध्वंसध्वंसस्यापि प्रतियोगिध्वंसत्वात् ध्वंसप्रागभावानाधारकालस्य प्रतियोग्यधिकरणत्वमिति व्याप्तेरप्रयोजकत्वात् नोन्मज्जनमित्यन्ये ॥ २७ ॥

---

(१) '-सुपपन्नम्' इति वि० ।

(क) भाष्ये 'च'-शब्दो नास्ति । (ख) क-खवार्त्तिकपुस्तकयोः 'व्याचष्टे' इति मुद्रितम् ।

(ग) २७शसूत्रे टीका नोपलभ्यते ।

न्यायभाष्यम्

यस्य नोपलभ्यते तद्विपरीतम्। न च परमसूक्ष्माणां भूतानामाकाश-काल-दिगात्म-मनसां तद्गुणानां च केषाञ्चित्सामान्य-विशेष-समवायानां चोत्पत्तिविनाशधर्मकत्वं प्रमाणित उपलभ्यते, तस्मान्नित्यान्येतानीति॥ २८॥

न्यायवार्त्तिकम्

कत्वादिति। अनित्यमिति ब्रुवाणेनावश्यं नित्यमभ्युपेयं नञः प्रसज्यप्रतिषेधपर्युदासविषयत्वात्,—अयं खलु नञ् प्रवर्तमानः प्रसज्यप्रतिषेधे वर्तते पर्युदासे वा। तथा चोत्तरपदसिद्धिः, यदि नित्यं न भवतीत्यनित्यम्, तर्हि यदन्यत्र भवति तदन्यत्र प्रतिषिध्यत इति सिद्धमुत्तरपदम्। अथ नित्यादन्यदनित्यमिति, तथाऽप्युत्तरपदेन भवितव्यम्, नासत्युत्तरपदार्थे तस्मादन्यत्वं सिध्यतीति। अनित्यताभावाच्च सर्वमनित्यमिति न दोषः, अनित्यताया धर्मत्वेनाभ्युपगमात्—अनित्यत्वं नाम धर्मः, सोऽसति धर्मिणि न भवतीति; एवं च सति सर्वस्यानित्यत्वं न दोष इति। अथ पुनरुत्पत्तिविनाशधर्मकेणानित्येन सिद्धेन शेषं सन्दिह्यमानानित्यत्वं विपरीतनित्यत्वं च सत्त्वादनित्यमिति साधयेत् तस्याप्युत्तरपदसिद्ध्या नित्यत्वसिद्धिरिति प्रतिज्ञादोषाद्वाक्यं निवर्तत इति॥ २८॥

इति सर्वानित्यतानिराकरणप्रकरणम्।

न्यायवार्त्तिकतात्पर्यटीका

अनित्यताभावाच्च सर्वमनित्यमिति न दोष इति। यस्य सन् धर्मी स्वं तद्योगादनित्यं स्यात् स एव कदाचिन्नास्तीत्यत आह—अनित्यत्वं नाम धर्मः सोऽसति धर्मिणि न भवतीति। स्यादेतत्—उत्पत्तिविनाशधर्मकत्वावगतावनित्यतायोगाद् घटादि भवत्वनित्यं तेनैव दृष्टान्तेन सत्त्वादाकाशादयोऽपि भविष्यन्त्यनित्या इति देशयति—अथ पुनरिति। परिहरति—तस्याप्युत्तरपदसिद्ध्या तत्पदार्थस्य नित्यत्वस्य सिद्धेरिति॥ २८॥

वृत्तिः

समाधत्ते—(नित्यस्येति)।

नित्यस्य नित्यत्वविशिष्टस्य। नित्यत्वस्य न प्रत्याख्यानमिति फलितम्, यथोपलब्धि उपलब्ध्यनतिक्रमेण, तथा च धर्मिग्राहकमानेन लाघवसहकृतेनाकाशादेर्नित्यत्वव्यवस्थापनादिति (क)॥ २८॥

समाप्तं सर्वानित्यत्वनिराकरणप्रकरणम्॥ ७॥

(क) पञ्चम्यर्थो 'न प्रत्याख्यान'मित्यत्रान्वेति।

न्यायभाष्यम्

अयमन्य एकान्तः—

(सू०)—सर्वं नित्यं पञ्चभूतनित्यत्वात् ॥ २९ ॥

भूतमात्रमिदं सर्वं तानि च नित्यानि भूतोच्छेदानुपपत्तेरिति ॥ २९ ॥

(सू०)—नोत्पत्तिविनाशकारणोपलब्धेः ॥ ३० ॥

उत्पत्तिकारणं चोपलभ्यते(१) विनाशकारणं च, तत् सर्वनित्यत्वे व्याहन्यते इति ॥ ३० ॥

न्यायवार्त्तिकम्

अयमपर एकान्तः—

सर्वं नित्यं पञ्चभूतनित्यत्वात् । भूतमात्रमिदं सर्वं तानि च नित्यानि भूतोच्छेदानुपपत्तेः सर्वं नित्यमिति ॥ २९ ॥

नोत्पत्तिविनाशकारणोपलब्धेः । उत्पत्तिकारणं भावानामुपलभ्यते विनाशकारणं च । तदुभयं नित्यत्वे न स्यात्, न हि नित्यं नाम जायते विनश्यति वा ॥ ३० ॥

न्यायवार्त्तिकतात्पर्यटीका

अयमपर एकान्तः—

सर्वं—त्वात् (सू० २९) ॥ सर्वं नित्यम् । कस्मात् ? पञ्चभूतनित्यत्वात् । पञ्चभूतात्मकं खल्वेतद् गोघटादिकार्यमुपलभ्यते । व्यपदिशन्ति हि मृद् घटो मृच्छरीरमिति । भूतानि च नित्यानि तेषामुच्छेदस्य नैयायिकैरनभ्युपगमात् । तेन भूतानां गोघटादीनां नित्यतेति पूर्वः पक्षः ॥ २९ ॥

भूतेभ्यो भौतिकानि भिन्नानि । न हि परमसूक्ष्माः परमाणवो गोघटादयः, परमाणवस्तेषामतीन्द्रियत्वे सर्वाग्रहप्रसङ्गादित्युक्तं द्वितीयेऽध्याये । तस्माद् ग्रहणाग्रहणविरुद्धधर्माध्यासयोगादन्ये भौतिका भूतेभ्यः । तथा च तेषामुत्पत्तिविनाशकारणोपलब्धेर्न नित्यत्वं भूतनित्यत्वेऽपीति सिद्धान्तमाह—

नोत्पत्तिविनाशकारणोपलब्धेः इति ॥ (सू० ३०) ॥ (क)

वृत्तिः

सर्वनित्यत्वे न प्रेत्यभावादिसिद्धिरतस्तन्निराकरणप्रकरणम् । तत्राक्षेपसूत्रम्—(सर्वं नित्यं पञ्चभूतनित्यत्वात्) ।

---

(१) भूतानाम्—इति पु० पा० ।

(क) एतत्सूत्रसमानाकारकं सूत्रं तृतीयेऽध्याये द्वितीयाह्निकेऽपि । सूत्रस्यावतरणिकातिरिक्ता टीका नास्ति ।

न्यायभाष्यम्

(सू०)—तल्लक्षणावरोधादप्रतिषेधः ॥ ३१ ॥

यस्योत्पत्तिविनाशकारणमुपलभ्यते इति मन्यसे, न तद् भूतलक्षणहीनमर्थान्तरं गृह्यते, (१) भूतलक्षणावरोधाद् भूतमात्रमिदमित्ययुक्तोऽयं प्रतिषेध इति ॥ ३१ ॥

न्यायवार्त्तिकम्

(२)तल्लक्षणावरोधादप्रतिषेधः। यदिदमुत्पद्यते विनश्यतीति च मन्यसे, न तद् भूतलक्षणहीनं गृह्यते, (३)भूतलक्षणावरोधात् सर्वं नित्यमिति। (४)सर्वं नित्यं च ब्रुवाणो न किञ्चिज्जायते न विनश्यतीति (५)प्रतिपद्येत, तत्प्रतिपत्तौ च हिताहितप्राप्तिपरिहारार्थोऽस्य परिस्पन्दो व्यर्थ आपद्येत। सर्वस्य च पक्षीकरणाद् दृष्टान्ताभावः। वाक्योपादानं च व्याहतम्—यदिदं वाक्यं परप्रतिपादनायोपादीयते सर्वं नित्यं पञ्चभूतनित्यत्वादिति, अनेन वाक्येनायं किं करोति? किमसिद्धं साधयति, उत सिद्धं निवर्तयति? यदि तावदसिद्धं साधयति, केयं सिद्धिर्वाक्येन प्रतिपाद्यते? यदि विज्ञानं? व्याहतं भवति सर्वं—नित्यं विज्ञानं च जायत इति। अथ प्रतिपत्तिर्न क्रियते, का तर्हि सिद्धिः, यां प्रवर्तमानं साधनं करोति; अवश्यं कारकेणापूर्वं किञ्चिन्निष्पाद्यं तन्निष्पत्तेर्व्याघातः कारकत्वं वा निवर्तते, न हि नित्यस्य किञ्चित् कर्त्तव्यमस्ति। अथ सिद्धं निवर्तयतीति पक्ष आश्रीयते? एतस्मिन्नपि पक्षे नित्यं निवर्तते चेति व्याघातः। अथ तिरोभवतीति? तिरोभावेऽप्यवश्यमपूर्वोत्पत्तिः पूर्ववस्तुविनाशो वाऽभ्युपेय इति सर्वथा न व्याघातान्मुच्यसे, यत्प्रागनुपलब्धरूपं पश्चादुपलभ्यते तस्यावश्यमपूर्वोत्पत्तिर्वा पूर्ववस्तुविनाशो वाऽभ्युपेय इति तदभ्युपगमे च व्याघातः ॥ ३१ ॥

न्यायवार्त्तिकतात्पर्यटीका

भूतसारूप्येण तादात्म्यं मन्यमानः पुनरपि पूर्वपक्षवाद्याह—

तल्ल—धः (सू० ३१) ॥ तल्लक्षणावरोधाद् गोघटादीनां भूतनित्यत्वेन नित्यत्वाप्रतिषेधः ॥ ३१ ॥

वृत्तिः

सर्वं नित्यं भूतत्वान्मेयत्वाद्वा, तत्र दृष्टान्तप्रदर्शनाय पञ्चभूतनित्यत्वादित्युक्तम्, तेन परमाण्वाकाशदृष्टान्तता लभ्यते ॥ २९ ॥

समाधत्ते—(नोत्पत्तिविनाशकारणोपलब्धेः)।

सर्वनित्यत्वं न युक्तं घटादीनाम्, उत्पत्तिविनाशकारणानां कपालसंयोग-मुद्गरपातादीनाम् उपलब्धेस्तथा चोत्पादविनाशावावश्यकाविति ॥ ३० ॥

---

(१) 'भूतलक्षणाविरोधात्'। इति ख०। (२) 'तल्लक्षणावबोधात्'इति क-ख-धृतपाठान्तरम्।
(३) 'भूतलक्षणावबोधात्' इति क-खधृतपाठान्तरम्।
(४) 'सर्वं नित्यमिति च' इति क-ख०। तत्र धृतं पाठान्तरं गृहीतम्।
(५) 'प्रतिपद्यते' इति ख०।

न्यायभाष्यम्

(सू०)—नोत्पत्तितत्कारणोपलब्धेः ॥ ३२ ॥

कारणसमानगुणस्योत्पत्तिः कारणं (१) चोपलभ्यते। न चैतदुभयं नित्यविषयम्, न चोत्पत्तितत्कारणोपलब्धिः शक्या प्रत्याख्यातुम्, न चाविषया काचिदुपलब्धिः। उपलब्धिसामर्थ्यात् कारणेन समानगुणं कार्यमुत्पद्यते इत्यनुमीयते, स खलूपलब्धेर्विषय इति। एवं च तल्लक्षणावरोधोपपत्तिरिति।

उत्पत्तिविनाशकारणप्रयुक्तस्य ज्ञातुः प्रयत्नो दृष्ट इति। प्रसिद्धश्चावयवी तद्धर्मा। उत्पत्तिविनाशधर्मा चावयवी सिद्ध इति।

न्यायवार्त्तिकम्

यत्पुनरेतद् भूतलक्षणावरोधात् सर्वं नित्यमिति, नान्यथा तदुपपत्तेः-भूतलक्षणयोगोऽन्यथा सम्भवतीति।

नोत्पत्तितत्कारणोपलब्धेः। उत्पत्तिकारणोपलब्धेः कारणसमानगुणोत्पत्तिश्च दृश्यते कारणं च दृश्यते न चैतदुभयं नित्यविषयम्, न हि नित्यस्योत्पत्तिर्नापि नित्यस्य कारणमस्ति, अस्ति चैतदुभयम्, तस्मात् कारणसमानगुणं कार्यमुत्पद्यत इति कारणसमानगुणोत्पादे च कार्यभूतलक्षणावरोधः सिध्यतीति। विभक्तन्यायं चैतत् व्यक्ताद् व्यक्तानां प्रत्यक्षप्रामाण्यादित्येतस्मिन् सूत्रे (सू० ११।१।४)। अव्यापकश्चायं हेतुः पञ्चभूतनित्यत्वादिति। कथं? कर्मादीनामव्याप्तेः

न्यायवार्त्तिकतात्पर्यटीका

भूतसाम्यं गोघटादीनां भूतकार्यत्वेऽप्युपपद्यमानं न भूतात्मकत्वमवगमयतीत्याशयवानाह—

नोत्पत्तितत्कारणोपलब्धेः (सू० ३२) ॥ इति। अपि च यद्युत्पत्तिविनाशौ न भावानां वस्तुसन्तौ कथं प्रेक्षावतामभिमतोत्पत्तिकारणे अनभिमतविनाशकारणे च तदर्थिनां प्रवृत्तिरित्याह—उत्पत्तिविनाशकारणेति। अपि चाव्यापको हेतुरित्याह—

वृत्तिः

पुनः साङ्ख्य आह—(तल्लक्षणावरोधादप्रतिषेधः)।

उक्तः प्रतिषेधो न, नित्यस्य परमाण्वादेर्यल्लक्षणं भूतत्वादि घटादौ तदवरोधात् तत्सत्त्वात्। तथा चोत्पादादिप्रत्ययो भ्रान्त इति भावः ॥ ३१ ॥

दूषयति—(नोत्पत्तितत्कारणोपलब्धेः)।

अनित्यत्वनिषेधो न युक्तः, उत्पत्तेस्तत्कारणात्तत्प्रमापकादुपलब्धेः। तथा चोत्पाद-

(१) उत्पत्तिकारणम्—इति पु० पा०

न्यायभाष्यम्

शब्दकर्मबुद्ध्यादीनां चाव्याप्तिः। पञ्चभूतनित्यत्वात् तल्लक्षणावरोधाच्चेत्यनेन शब्द-कर्म-बुद्धि-सुख-दुःखेच्छा-द्वेष-प्रयत्नाश्च न व्याप्ताः तस्मादनेकान्तः।

स्वप्नविषयाभिमानवन्मिथ्योपलब्धिरिति चेत् भूतोपलब्धौ तुल्यम्। यथा स्वप्ने विषयाभिमान एवमुत्पत्तिकारणाभिमान इति। एवं चैतद् भूतोपलब्धौ तुल्यं (१)पृथिव्याद्युपलब्धिरपि स्वप्नविषयाभिमानवत् प्रसज्यते।

न्यायवार्त्तिकम्

कर्मबुद्धिशब्दादयः पञ्चभूतनित्यत्वादित्यनेन न व्याप्ता इति। ज्ञातुः प्रयत्नदर्शनाच्च व्याघातः—उत्पत्तिविनाशप्रयुक्तस्य ज्ञातुः प्रयत्नो दृष्टः, सर्वनित्यत्वे च न युक्तः। प्रसिद्धश्चावयवी तद्धर्मा—उत्पत्तिविनाशधर्मा चावयवी प्रतिपादितः, अतोऽयुक्तमेतत्। कथमव्यापकोऽनेकान्तः? पक्षस्यान्तद्वयेऽवस्थानात् पक्षो हि सर्वं नित्यमिति, तच्च सर्वं (२) भूतलक्षणयुक्तम्, अन्यथा च, तत्पक्षान्तद्वयेऽवस्थानात् न सर्वं भूतलक्षणयुक्तमित्यनेकान्तः।

स्वप्नविषयाभिमानवन्मिथ्योपलब्धिरिति चेत्—अथ मनुषे यदिदमुत्पद्यते विनश्यति चेति तन्न तत्त्वतोऽस्ति, असत्ये तस्मिन्नभिमानो भवति उत्पन्नं विनष्टमिति, यथा न स्वप्ने विषयाः सन्ति अथ च विषयाभिमानो भवतीति? न, प्रमाणाभावात्—यदिदं गवादि (३) घटाद्युत्पत्तिविनाशयुक्तमुपलभ्यते एतन्नास्तीति नासत्त्वप्रतिपादकं प्रमाणमभिधीयते, न चाप्रामाणिकं शक्यं

न्यायवार्त्तिकतात्पर्यटीका

शब्दकर्मबुद्ध्यादीनां चाव्याप्तिः। अव्यापकश्च (४) अनेकान्त उक्तः, पक्षो हि सर्वं नित्यमिति, तस्मिन् सत्त्वासत्त्वाभ्यामनेकान्तः न एकः सत्त्वासत्त्वलक्षणः अन्तोऽस्येत्यनेकान्त इति। तदेतद्वार्त्तिककारो वक्ष्यत्यर्थदृष्ट्या पक्षस्यान्तद्वयेऽवस्थानादिति। हेतोरन्तद्वये सत्त्वासत्त्वरूपे पक्षस्यावस्थानादिति योजना।

असति बाधके मिथ्यात्वकल्पनायामतिप्रसङ्ग इत्यमुमर्थं शङ्कानिराकरणाभ्यामाह—स्वप्नविषयेत्यादि। भाष्योक्तमर्थमुक्त्वा स्वयं वार्त्तिककार आह—(क) सर्वस्य चेति। यावद् येन प्रतिपाद्यत इति। प्रतिपादनेन क्रियत इत्यर्थः। शेषमतिरोहितार्थम्॥ ३२॥

---

(१) 'द्युपृथिव्या'—इति ख-ज०। (२) 'भूतलक्षणम्' इति ख०। 'भूतलक्षणयुक्तमुक्तम्' इति क-खधृतपाठान्तरम्। (३) 'घटाद्युत्पत्तिविनाशी युक्तमुपलभ्यते' इति ख०। 'घटादिव्यक्तमुपलभ्यत' इति क-ख-धृत-पाठान्तरम्। (४) 'अनेकान्त' इति क०।

(क) 'सर्वस्य च' इति 'यावद् येन प्रतिपाद्यते' इति च वार्त्तिकग्रन्थभागौ मुद्रितपुस्तकयोर्नोपलभ्येते।

न्यायभाष्यम्

पृथिव्याद्यभावे सर्वव्यवहारविलोप इति चेत् तदितरत्र समानम्—उत्पत्ति-विनाशकारणोपलब्धिविषयस्याप्यभावे सर्वव्यवहारविलोप इति, सोऽयं नित्यानामतीन्द्रियत्वादविषयत्वाच्चोत्पत्तिविनाशयोः स्वप्नविषयाभिमानवदित्यहेतुरिति ॥ ३२ ॥

अवस्थितस्योपादानस्य धर्ममात्रं निवर्तते धर्ममात्रमुपजायते स खलूत्पत्तिविना-

न्यायवार्त्तिकम्

प्रतिपत्तुम्। यथा च चित्तव्यतिरेकिणो विषयास्तथा (क) उपरिष्टाद्वक्ष्यामः। (१) यदि स्वप्नविषयाभिमानवदुत्पत्तिविनाशाभिमानः (१*) अथ भूतोपलब्धिरपि स्वप्नविषयाभिमानवत् प्रसज्यते। पृथिव्याद्यभावे सर्वव्यवहारविलोप इति चेत्—अथ मन्यसे यदि पृथिव्यादीनि भूतानि न सन्ति ननु पृथिव्याद्याश्रयो व्यवहार उच्छिद्यत इति? तदितरत्र समानम्—यदि व्यवहारोच्छेदभयाद् भूतानि प्रतिपद्यन्ते तत एवोत्पत्तिविनाशावपि प्रतिपद्यस्व। न ह्युत्पत्ति-विनाशावन्तरेण कश्चन व्यवहारः सिध्यतीति। नित्यानां द्रव्याणामतीन्द्रियत्वात् अविषयत्वाच्चोत्-पत्तिविनाशयोः—यन्नित्यं तदतीन्द्रियम्, अविषयश्चोत्पत्तिविनाशयोः; तेन स्वप्नविषयाभि-मानवत्तदभिमान इत्ययुक्तम्। उत्पत्तिविनाशाभिमान इति च ब्रुवतोत्पत्तिविनाशयोर्विषयो वक्तव्यः। न च सर्वनित्यवादिनामुत्पत्तिविनाशयोर्विषयोऽस्ति। विषयं च प्रत्याचक्षाणेन तदनुकारी विपर्ययप्रत्ययो हेय इति ॥ ३२ ॥

अपरे तु सर्वं नित्यमित्येतदन्यथा वर्णयन्ति—व्यवस्थितस्योपादानस्य धर्ममात्रं निवर्तते धर्ममात्रमाविर्भवति यच्च निवर्तते तन्निवृत्तमप्यस्तीति यच्चाविर्भवति तत्प्रागप्याविर्भावादस्ति।

न्यायवार्त्तिकतात्पर्यटीका

तदेवं सांख्यानां मतमपास्य स्वायंभुवानां मतमपाकर्तुमुपन्यस्यति—अपरे सर्वं नित्यमित्यन्यथा वर्णयन्ति। त्रिविधः खल्वयं धर्मिणः परिणामो धर्म-लक्षणावस्थारूपः। तद् यथा सुवर्णं धर्मि, तस्य परिणामो वर्धमानरुचकादिः धर्मस्य तु लक्षणपरिणामोऽनागतादिः। यदा खल्वयं सुवर्णकारो वर्धमानकं भङ्क्त्वा रुचकं रचयति तदा वर्धमानको वर्त्तमानलक्षणं हित्वा अतीतलक्षणमापद्यते, रुचकं त्वनागतलक्षणं हित्वा वर्त्तमानतामापद्यते; वर्त्तमानतापन्न एव तु

वृत्तिः

विनाशप्रतीतेः प्रामाणिकत्वान्न तन्निषेधः इतरथा कादाचित्कत्वप्रतीत्यनुपपत्तेः। न चाविर्भावात्तदुपपत्तिस्तस्यैवानित्यत्वे सर्वनित्यत्वव्याघातात्। विवेचयिष्यते चेदं स्पष्टतर-मुपरिष्टात् ॥ ३२ ॥

---

(१) 'यदि स्वप्नविषयाभिमानः' इति ख०।

(क) उपरिष्टादिति बाह्यार्थभङ्गनिराकरणप्रकरणे चतुर्थाध्यायद्वितीयाह्निके इत्यर्थः।

न्यायभाष्यम्

शयोर्विषयः। यच्चोपजायते तत्प्रागप्युपजननादस्ति, यच्च निवर्तते तन्निवृत्तमप्यस्तीति, एवं च सर्वस्य नित्यत्वमिति ?

न व्यवस्थानुपपत्तेः ॥ ३३ ॥

अयमुपजनः इयं निवृत्तिरिति(१) व्यवस्था नोपपद्यते, उपजातनिवृत्तयोर्विद्यमानत्वात्। अयं धर्म उपजातोऽयं निवृत्त इति सद्भावाविशेषादव्यवस्था, इदानीमुपजननिवृत्ती नेदानीमिति कालव्यवस्था नोपपद्यते सर्वदा विद्यमानत्वात् अस्य धर्मस्योप-

न्यायवार्त्तिकम्

न व्यवस्थानुपपत्तेरिति। शेषं भाष्ये। यच्च निवर्तते तन्निवृत्तमप्यस्तीति ब्रुवाणो भवान् प्रष्टव्यो भवति किमुक्तं भवति (२) निवृत्तमिति (२*) यदि ब्रूषे पूर्वमुपलब्धं पश्चान्नोपलभ्यत इति। अथ सतोऽनुपलब्धिः किंकृता ? यद्यावरणादिकृता, तदावरणाद्युपलभ्येत। उक्तं

न्यायवार्त्तिकतात्पर्यटीका

रुचको नवपुराणभावमापद्यमानोऽवस्थापरिणामवान् भवति। नवपुराणावस्थाश्च वर्त्तमानलक्षणाश्रया लक्षणपरिणामाः, सोऽयं त्रिविधः परिणामो धर्मिणः। धर्मलक्षणावस्थाश्च धर्मिणो भिन्नाश्चाभिन्नाश्च। तथा च ते धर्म्यभेदान्नित्याः भेदाच्चोत्पत्तिविनाशविषयत्वमित्युभयमुपपन्नम्। ननु यद्युपजनापायधर्मकत्वं धर्मिणां इन्तोत्पत्तेः प्राक् तेषामसत्त्वाद् विनाशाच्चोर्ध्वमसत्त्वात् कथं सर्वनित्यत्वसिद्धिरित्यत आह—यच्चोपजायते तत् प्रागप्युपजननादस्ति धर्मिरूपेणेति शेषः। तन्निवृत्तमप्यस्तीति, अत्रापि धर्मिरूपेणेति शेषः। निराकरोति—

न व्यवस्थानुपपत्तेः (सू० ३३)॥ उपजनापाययोः स्वरूपतः कालतो विशेषतः संबन्धितोऽनागतत्वादिव्यवस्थानुपपत्तिरित्यर्थः। एतदुक्तं भवति न तावद् भेदाभेदौ परस्परपरीहारव्यवस्थितधर्मावेकत्र समाविशतः। तस्मादुपजनापायव्यवस्थायै भेदं धर्मलक्षणावस्थानां धर्मिण इच्छता तेषामनित्यत्वमभ्युपेतव्यम्।

सांख्यवत्सत्कार्याभ्युपगमेन तु नित्यत्वव्यवस्थापने वार्त्तिककार आह—यच्च निवर्त्तते तन्निवृत्तमप्यस्तीति ब्रुवाण इति। सुगमम् ॥ ३३ ॥

वृत्तिः

उत्पादविनाशप्रत्ययस्य भ्रान्तत्वं स्यादित्याशङ्कयाह—(न व्यवस्थानुपपत्तेः)।

---

(१) अयं भागः वि-पु० नास्ति।

(२) इदं ख-वार्त्तिके नास्ति।

न्यायभाष्यम्

जननिवृत्ती नास्येति व्यवस्थानुपपत्तिः, उभयोरविशेषात्। अनागतोऽतीत इति च कालव्यवस्थानुपपत्तिः, वर्तमानस्य सद्भावलक्षणत्वात्। अविद्यमानस्यात्मलाभ उपजनो विद्यमानस्यात्महानं निवृत्तिरित्येतस्मिन् सति नैते दोषाः। तस्माद् यदुक्तं प्रागप्युपजनादस्ति निवृत्तं चास्ति तदयुक्तमिति ॥ ३३ ॥

अयमन्य एकान्तः—

सर्वं पृथग् भावलक्षणपृथक्त्वात् ॥ ३४ ॥

सर्वं नाना न कश्चिदेको भावो विद्यते। कस्मात्? भावलक्षणपृथक्त्वात्—भावस्य लक्षणमभिधानम्, येन लक्ष्यते भावः स समाख्याशब्दः, तस्य पृथग्विषयत्वात्।

न्यायवार्त्तिकम्

यात्र यत्पूर्वमनुपलब्धं पश्चादुपलभ्यते तस्यापूर्वविशेषोत्पादः पूर्वविशेषप्रच्यवोऽभ्युपेय इति, तदभ्युपगमे च व्याघातः। यच्चोक्तं यच्चाविर्भवति तत् प्रागप्याविर्भावादस्ति, तन्न व्याघातात्—आविर्भवति विद्यते चेति व्याहतम्। अथाविर्भावोऽभिव्यक्तिः, तथापि पूर्वदोषानिवृत्तिः अभिव्यक्तिरसती (१) भवतीति ॥ ३३ ॥

(इति सर्वनित्यत्वनिराकरणम्)

अयमपर एकान्तः—

सर्वं पृथग् भावलक्षणपृथक्त्वात्। भावस्य लक्षणं शब्दः लक्ष्यतेऽनेन भाव इति। सर्वो भावसमाख्याशब्दोऽनेकविषयः यथा कुम्भ इति भावसमाख्याशब्दोऽनेकस्मिन्नवयवसमूहे वर्तत

न्यायवार्त्तिकतात्पर्यटीका

अयम् अपि अन्य एकान्तो बौद्धानाम्—

सर्वं—क्त्वात् (सू० ३४)॥ सर्वं पृथक्, कस्मात्? भावलक्षणपृथक्त्वात्। न रूपाद्यतिरिक्तं द्रव्यं नाम किंचिदस्ति नाप्यवयवातिरिक्तः कश्चिदस्त्यवयवीति सौत्रान्तिका वैभाषिकाश्च प्रतिपेदिरे।

वृत्तिः

सार्वलौकिकप्रमात्वेन सिद्धस्यापि भ्रमत्वशङ्कायां प्रमाभ्रमव्यवहारविलोपः स्यात् इत्यर्थः ॥ ३३ ॥

समाप्तं सर्वनित्यत्वनिराकरणप्रकरणम् ॥ ८ ॥

अथ प्रसङ्गात्सर्वपृथक्त्वप्रकरणम्। तत्र पूर्वपक्षसूत्रम्—(सर्वं पृथग् भावलक्षण-पृथक्त्वात्)।

---

(१) 'भवति' इति क-पु० नास्ति।

न्यायभाष्यम्

सर्वो भावसमाख्याशब्दः समूहवाची, कुम्भ इति संज्ञाशब्दो गन्ध-रस-रूप-स्पर्शसमूहे बुध्न-पार्श्व-ग्रीवादिसमूहे च वर्त्तते, (१) निदर्शनमात्रं चेदमिति ॥ ३४ ॥

नानेकलक्षणैरेकभावनिष्पत्तेः ॥ ३५ ॥

(क) अनेकविधलक्षणैरिति (२) मध्यमपदलोपी समासः। गन्धादिभिश्च गुणैर्बुध्नादिभिश्चावयवैः सम्बद्ध एको भावो निष्पद्यते, गुणव्यतिरिक्तं च द्रव्यमवयवातिरिक्तश्चावयवीति। विभक्तन्यायं चैतदुभयमिति ॥ ३५ ॥

न्यायवार्त्तिकम्

इति। यथा कुम्भशब्दः एवमन्येऽपि शब्दा इति। अस्य प्रयोगः कुम्भशब्दोऽनेकविषयः एकपदत्वात् सेनाशब्दवदिति। पदश्रवणादनेकार्थावगतेः—यस्मात् पदश्रुतेरनेकोऽर्थोऽवगम्यते यथा सेनेति॥३४॥

नानेकलक्षणैरेकभावनिष्पत्तेः। अनेकलक्षणैरिति मध्यमपदलोपी समासोऽनेकविधलक्षणैरिति। गन्धादिभिश्च गुणैर्बुध्नादिभिश्चावयवैः सम्बद्ध एको भाव उत्पद्यते, अतः शब्दादेकावगतौ शेषोऽनुक्तोऽप्यवगम्यत इति। गुणव्यतिरिक्तो गुणीति अवयवव्यतिरिक्तश्चावयवीति विभक्त-

न्यायवार्त्तिकतात्पर्यटीका

(ख) वार्त्तिकम्—अस्य प्रयोग इति। कुम्भशब्दोऽनेकविषय इति पारमार्थिकानेकविषयः, काल्पनिकं तु कुम्भस्यैकत्वं न वार्यते। तथा चैकपदमित्येकपदे न व्यभिचारः, तस्यापि पारमार्थिकानेकविषयत्वादित्यर्थः ॥ ३४ ॥

तान्निराकरोति—

नानेकलक्षणैरेकभावनिष्पत्तेः (सू० ३५) ॥ अनेकविधैर्लक्षणैः सम्बद्धस्यैकस्य भावस्य घटादेरवयविनो निष्पत्तेरिति ॥ ३५ ॥

वृत्तिः

सर्वं वस्तु पृथक् नाना। लक्ष्यतेऽनेनेति लक्षणं समाख्या, तस्याः पृथक्त्वम् पृथगर्थकत्वम्। तथा च प्रयोगः—घटादिः समूहरूपः वाच्यत्वात् सेनावनादिवत्। अतीन्द्रिये गगनादौ मानाभावादात्मनः शरीरानतिरेकात् गुणकर्मणोराश्रयाभेदाद्विशेषसमवाययोर्मानाभावादभावस्य तुच्छत्वान्न व्यभिचारः।

यद्वा घटादिकं स्वस्मादपि पृथक् भावलक्षणानां गन्धरसादीनां तत्तदवयवानां च पृथक्त्वात् घटादेश्च तदभेदादिति भावः ॥ ३४ ॥

---

(१) 'निर्देशमात्रं' इति ल०। (२) 'मध्य-' इति फ०।

(क) 'अनेकलक्षणैः' इति पाठः फ-पुस्तके सूत्रपदानुसारेण शोधितः, आदर्शपुस्तकान्तरेषु दृष्टः 'अनेकविधलक्षणैः' इत्याकारस्तु सूत्रे लुप्तमध्यमपदप्रदर्शनार्थं भाष्यकारेणोक्त इति सम्भाव्यते। (ख) अयं वार्त्तिकग्रन्थः (९७५ पृ:) "समूहे भावशब्दप्रयोगादिति चेत्" इत्यतः परमादर्शपुस्तकयोर्मुद्रितः।

न्यायभाष्यम्

अथापि—

लक्षणव्यवस्थानादेवाप्रतिषेधः ॥ ३६ ॥

न कश्चिदेको भाव इत्ययुक्तः प्रतिषेधः। कस्मात्? लक्षणव्यवस्थानादेव। यदिह लक्षणं भावस्य संज्ञाशब्दभूतं तदेकस्मिन् व्यवस्थितं, यं कुम्भमद्राक्षं तं स्पृशामि (१)यमेवास्प्राक्षं तं पश्यामीति नाणुसमूहो गृह्यते इति। अणुसमूहे चागृह्यमाणे यद् गृह्यते तदेकमेवेति।

अथाप्येतदनूक्तम् नास्त्येको भावो यस्मात्समुदायः, एकानुपपत्तेर्नास्त्येव समूहः—नास्त्येको भावो (२)यस्मात्समूहे(२*) भावशब्दप्रयोगः; एकस्य चानुपपत्तेः

न्यायवार्त्तिकम्

न्यायमेतत् (क)। यत् पुनरेकपदत्वादनेकविषयः कुम्भादिशब्द इति? तन्न, दृष्टान्ताभावात्—न हि कश्चिच्छब्दोऽनेकविषयोऽस्ति, सेनादिशब्दानाम् (ख)अनेकविषयत्वेनासिद्धेः। यथा चैकविषयः

न्यायवार्त्तिकतात्पर्यटीका

अथापीति अपि चेत्यर्थः।

लक्ष—धः (सू० ३६)॥ अणुसमूहे चागृह्यमाण इति परमसूक्ष्मत्वेनातीन्द्रियत्वादित्यर्थः।

अथाप्येतदनूक्तमिति अपि च भावलक्षणपृथक्त्वादिति हेतुमुक्त्वा बौद्धेन पश्चादेतदुक्तम्। किं तदुक्तमित्यत आह—नास्त्येको भावो यस्मात् समुदाय इति। एतदनूक्तं दूषयति—एकानुपपत्तेर्नास्त्येव समूहः। अनूक्तं विवृणोति—नास्त्येको भावो यस्मात् समूहे भावशब्दप्रयोगः। अस्य दूषणं विवृणोति—एकस्यानुपपत्तेरिति। एतत् प्रपञ्चयति—

वृत्तिः

समाधत्ते—(नानेकलक्षणैरेकभावनिष्पत्तेः)

अनेकलक्षणैः अनेकस्वरूपै रूपरसादिभिस्तत्तदवयवैश्च विशिष्टस्यैव भावस्य निष्पत्तेः (३)उत्पत्तेरित्यर्थः। तथा चैकस्य धर्मिणः प्रत्यक्षादिप्रमाणसिद्धत्वात् तस्य च चाक्षुषत्वरासनत्वादिविरुद्धधर्माध्यस्तरूपरसाद्यात्मकत्वाभावादवयवानां च कारणत्वात् कार्यकारणयोरभेदासम्भवाच्च न तत्तदात्मकत्वं घटादेः सम्भवतीति भावः॥ ३५ ॥

(१) 'यं चास्प्राक्षम्' इति टि-फ-ज०।

(२) "एकस्यानुपपत्तेः समूहे" इति टि०।

(३) 'उत्पत्तेः' इति भ-पुस्तके नास्ति।

(क) २।१।३६ सूत्र-भाष्यादाविति शेषः। (ख) 'अनेकविषयत्वेन' इति अनेकविषयत्वेन रूपेणेत्यर्थः। सेनादिशब्दानामनेकविषयकत्वस्यासिद्धेरिति तु फलितार्थः।

न्यायभाष्यम्

समूहो नोपपद्यते एकसमुच्चयो हि समूह इति। व्याहतत्वादनुपपन्नं— नास्त्येको भाव इति यस्य प्रतिषेधः प्रतिज्ञायते, समूहे भावशब्दप्रयोगादिति हेतुं ब्रुवता स एवाभ्यनुज्ञायते, एकसमुच्चयो हि समूह इति। समूहे भावशब्दप्रयोगादिति च समूहमाश्रित्य प्रत्येकं (१)समूहिप्रतिषेधो नास्त्येको भाव इति। सोऽयमुभयतो व्याघाताद् यत्किञ्चनवाद इति ॥ ३६ ॥

न्यायवार्त्तिकम्

सेनादिशब्दस्तथोक्तमिति—सर्वस्य पक्षीकरणाद् दृष्टान्ताभावः। आधाराधेयभावेनानुषक्तानां रूपादीनामवयविनश्च ग्रहणादन्यथासिद्धः। नञः प्रसज्यप्रतिषेधपर्युदासविषयत्वेनावस्थानाच्च (२) विरुद्धः—अनेकमित्ययं नञः प्रयोगः, स चायं प्रसज्यप्रतिषेधपर्युदासविषयत्वेन प्रतिषेधात् प्रकल्प्यते। यदि तावत् प्रसज्यप्रतिषेध एको न भवतीति यदेकत्र प्रतिषिध्यते तदन्यत्र भवति एवं च व्याघातः। अथ पर्युदासपक्षः? एकस्मादन्यदनेकमिति एवमप्येकमभ्युपगतं भवति, न ह्यसत्येकस्मिन् तस्मादन्यदनेकं सिद्ध्यतीति ॥ ३५ ॥

इतश्च—

(३)लक्षणव्यवस्थानादेवाप्रतिषेधः ॥ ३६ ॥ (४)न हि कश्चिदेको भाव इत्ययुक्तः पक्षः(४*)। कस्मात्? लक्षण(५)व्यवस्थापनात्, न हि कुम्भ इत्युक्तेऽनेकोऽर्थोऽवगम्यते। कथं नावगम्यते? एकवचनान्तत्वात्—एकवचनान्त एष शब्दः कुम्भ इति। न च बहुष्वेक-वचनं युक्तम्। प्रैष-सम्प्रतिपत्त्योरेकविषयत्वात् कुम्भमानयेति प्रैष एकविषयो भवति। इतरोऽपि कुम्भशब्दात् प्रतिपद्यैकं कुम्भमानयति, ते एते प्रैषसम्प्रतिपत्ती एकविषये ज्ञापयतः कुम्भशब्दे-नैकोऽर्थोऽभिधीयत इति। यांस्तु रूपादीनवयवान् प्रतिपद्यसे स न शब्दार्थः, किन्त्वनुषङ्गः,

न्यायवार्त्तिकतात्पर्यटीका

एकसमुच्चयो हीति। नास्त्येको भाव इति यस्य भावस्यैकत्वप्रतिषेधः प्रतिज्ञायते, समूहे भाव-शब्दप्रयोग इति ब्रुवता स एवाभ्यनुज्ञायते। ननु समूहोऽभ्यनुज्ञायते न त्वेको भाव इत्यत आह—एकसमुच्चयो हि समूह इति। तदनेन प्रतिज्ञया हेतोर्व्याघात उक्तः। संप्रति—प्रतिज्ञाया हेतुना व्याघात इत्याह—समूहे भावशब्दप्रयोगादिति चेत्।

स्यादेतत्, घटादिशब्देभ्यो रूपादीनां बुध्नादीनां च बहूनामवगमात् कथमेकार्थतेत्यत आह—आधाराधेयभावेति। यदि नानार्थताऽपि भवति घटादिशब्दानां तथापि प्रत्येकमेकत्वं तदर्थानामशक्यापह्नवमिति न पूर्वपक्षिणोऽभिमतसिद्धिरिति। उपेत्य

(१) 'प्रतिषेधो' इति वि०। (२) 'विरूपः' इति—क ख-धृतपाठान्तरम्। (३) 'तल्लक्षण'—इति क-ख-वार्त्तिकपाठः। (४) 'इत्ययमयुक्तः प्रतिषेधः'—इति क ख-वार्त्तिकपाठः। (५) 'व्यवस्थानात्' —इति क-ख-धृतपाठान्तरम्।

न्यायवार्त्तिकम्

तन्नान्तरीयकत्वादिति । (क)समूहे भेदस्य चानवस्थानात् यत्रावस्थानं तदेक (ख)गवादिघटादि-द्रव्याणि समुदितानि प्रतिपद्यमानेन समूहोऽभ्युपेयते स चायं समूह इयन्ति द्रव्याणि एतानि (१)घटादिभावेनावस्थितानीति न (२)व्यवतिष्ठतेऽस्य भेदो(३)ऽल्पतरतमत्वेन, यत्तत् परमल्पं तदभेद्यं ततो निवर्तत इति । यतश्चायं भेदो निवर्तते तदेकम् । एकं च प्रत्याचक्षाणेनानेकमपि प्रत्याख्येयम् एक(४)समुच्चयत्वादनेकस्य । अथ मन्यसे यं तमभेद्यं परमाणं प्रतिपद्यसे स रूपादीनां समुदाय इति, चत्वारि वा द्रव्याणि पृथिव्यादीनि समुदितानि परमाणुरिति ? एतस्मिन् वै दर्शने ये रूपादयः समुदितास्ते परमाणुरिति, यत्परमाणौ रूपं स कस्य समुदाय इति वक्तव्यम् । एवं शेषेषु गुणेषु । चत्वारि द्रव्याणि समुदितानि परमाणुरिति ब्रुवाणेन चतुष्टस्य एकसमुच्चय-निमित्तत्वात् यदेकं पृथिव्यादि स कस्य समुदाय इति वक्तव्यम् । अथानन्तं समुदायं प्रतिपद्यसे अष्टौ द्रव्याणि समुदितानि परमाणुरिति शास्त्रं व्याहतं भवति कामेऽष्टद्रव्यको(५)ऽणुरशब्द इति । एकानुपपत्तौ नानेकोपपत्तिरित्येतद्धेयम् । यश्चायं हेतुः समूहे भावशब्दप्रयोगादिति उभयतो

न्यायवार्त्तिकतात्पर्यटीका

तूच्यते अनेकार्थत्वमप्यत्र न संभवतीति । समूहे भेदस्य चानवस्थानादिति । यदि (ग)समूहमात्रमेवं न त्वेकं किंचिदस्ति तथा सति घटलक्षणे समूहे भेद्यमाने नाल्पतरतमादिभेदः प्रतीयेत, घटादिकपालशर्कराचूर्णपरमाणूनां समूहत्वेनानन्तावयवत्वादयं महानयमल्पोऽल्पतर इति विभागो न स्यात् । तस्मादनेन तारतम्यं समर्थयमानेन क्वचित् समूहनिवृत्तिर्वाच्या । न चासावसमूहमेकमन्तरेणेत्येकोऽभ्युपेयत इत्यर्थः । उक्तमर्थमविद्वान् शङ्कते—अथ मन्यस इति । रूपादीनां समुदाय इति चत्वारि वा द्रव्याणीति चावान्तरदर्शनभेदविवक्षया द्रष्टव्यम् । उक्तार्थदर्शनेनोत्तरम्—एतस्मिन् वै दर्शन इति । अथानन्तं समुदायं प्रतिपद्यस इति निराकृतस्यापि पुनराशङ्का आगमविरोधमापादयितुम् । एकानुपपत्तौ नानेकोपपत्तिरिति । यत्तदनेकमुक्तमेतस्याज्यमिति । शेषं भाष्यव्याख्यया व्याख्यातम् ॥ ३६ ॥

वृत्तिः

हेतुमाह—(लक्षणव्यवस्थानादेवाप्रतिषेधः)

लक्षणस्यार्थाद्भावानां घटपटादीनां व्यवस्थानात् व्यवस्थितत्वाद् (६)एवाप्रतिषेधः ।

---

(१) 'गवादि'—इति क-ख-धृतपाठान्तरम् । (२) 'व्यवतिष्ठन्ते' इति क० । (३) 'अन्यतर'—इति क-ख-धृतपाठान्तरम् । (४) 'समुच्चयादनेकस्य' इति ख, 'समुदायाद-' इति क-ख-धृतपाठान्तरम् । (५) '-ऽणुशब्द'—इति क-ख-धृतपाठान्तरम् । (६) 'एकत्वाप्रति'—इति भ० ।

(क) 'समूहभेदस्य' इति मुद्रितपाठः । टीका-गृहीतः 'अनेकार्थत्वमप्यत्र न सम्भवती'त्यंशः मुद्रित-पुस्तकेऽनुपलभ्यमानः इतः पूर्वं भवितुमर्हति । (ख) 'गवादिघटादी'ति चेतनाचेतनभेदेन द्विविधमुदाहरण-मुपात्तम् । 'गवादी'ति पाठान्तरम्, प्रमादादुभयमपि मुद्रितमिति वा बोध्यम् । (ग) 'समूहमात्रमेव' इति पाठश्चेत् स्पष्टोऽर्थः ।

न्यायभाष्यम्

अयमपर एकान्तः—

सर्वमभावो भावेष्वितरेतराभावसिद्धेः ॥ ३७ ॥

यावद्भावजातं तत्सर्वमभावः। कस्मात्? भावेष्वितरेतराभावसिद्धेः। 'असन् गौरश्वात्मना' अनश्वो गौः 'असन्नश्वो गवात्मना अगौरश्वः' इत्यसत्प्रत्ययस्य (१)प्रतिषेधस्य च भावशब्देन सामानाधिकरण्यात् सर्वमभाव इति ॥ ३७ ॥

न्यायवार्त्तिकम्

व्याघातान्न किञ्चिदेतत्। कथमुभयतः? न कश्चिदेको भावः समूहे भावशब्दप्रयोगादिति प्रतिज्ञाहेत्वोर्व्याघातः। यस्मादेकार्थानुपपत्तौ न समूह उपपद्यत इति समूहं चाश्रित्यैकं प्रत्याचक्षाणेन समूह एव प्रत्याख्यातो भवतीति सोऽयमुभयतो व्याघातात् यत्किञ्चनवाद इति। शेषं भाष्ये ॥ ३६ ॥

(इति सर्वपृथक्त्वनिराकरणप्रकरणम्।)

अथायमपर एकान्तः—

सर्वमभावो भावेष्वितरेतराभावसिद्धेः (२)। यावद् भावजातं तत्सर्वमभावः। कस्मात्? भावेष्वितरेतराभावसिद्धेः। असत्प्रत्ययप्रतिषेधाभ्यां भावशब्दसामानाधिकरण्यात्

न्यायवार्त्तिकतात्पर्यटीका

संप्रति शून्यतावादिनमुत्थापयति—अयमपर एकान्तः।

सर्व—द्धेः (सू० ३७) ॥ सर्वमभाव इति प्रतिज्ञा। अत्र हेतुः—भावेष्वितरेतराभावसिद्धेरिति। सर्वमिदं प्रमाणप्रमेयप्रमातृप्रमितिरूपमभावस्तुच्छं भावेष्वितरेतराभावसिद्धेरिति। वार्त्तिककारो व्याचष्टे—असत्प्रत्ययभावप्रतिषेधाभ्यां भावशब्दसामानाधिकरण्यात्। प्रमाणादयः खल्वमी परस्परानात्मकतया असदिति प्रत्ययस्य नञश्च गोचरा

वृत्तिः

पृथक्त्वव्यवस्थापनं नेत्यर्थः। कपालसमवेतद्रव्यत्वादिकं हि घटादेर्लक्षणं कपाले घट इत्यादिप्रतीतिसिद्धम्। न चेदं समूहात्मकत्वे सम्भवति, एवं लक्षणस्य घटादिस्वरूपस्य यमहमद्राक्षं तमहं स्पृशामीति प्रत्यक्षेण व्यवस्थितत्वात् परमाणोश्चाप्रत्यक्षत्वान्न तत्सम्भवः। किं च समूहलक्षणव्यवस्थितेरेव नोक्तं युक्तम्। समूहो हि नानाव्यक्तिसमुदायः, स च नैकव्यक्तेरनभ्युपगमे सिध्यतीति भावः ॥ ३६ ॥

समाप्तं सर्वपृथक्त्वनिराकरणप्रकरणम् ॥ ९ ॥

(१) 'प्रतिषेधस्य' इति टि-पु० नास्ति।

(२) 'इतरेतरसिद्धेः—इति क-ख-धृतपाठान्तरम्।

न्यायभाष्यम्

प्रतिज्ञावाक्ये पदयोः प्रतिज्ञाहेत्वोश्च व्याघातादयुक्तम्। अनेकस्याशेषता सर्वशब्दस्यार्थो, भावप्रतिषेधश्चाभावशब्दस्यार्थः। पूर्वं सोपाख्यम् उत्तरं निरुपाख्यं तत्र

न्यायवार्त्तिकम्

सर्वमभावः अनुत्पन्नप्रध्वस्तपटवत्—सर्वो भावशब्दोऽसत्समानाधिकरणः प्रतिषेधसमानाधिकरणश्च प्रध्वस्तपटवत् यथा नास्ति पट इति। कथं नास्ति कदा च नास्तीति ? स्वात्मनाऽनुत्पद्यमानो ध्वस्तश्चेति। सोऽयं घटशब्दोऽसत्प्रत्ययसमानाधिकरणो घटस्यात्यन्तासत्त्वं प्रतिपादयति। तथा च सर्वे भावा असत्प्रत्ययसमानाधिकरणास्तस्मात् सर्वमभाव इति॥ ३७॥

प्रतिज्ञापदयोः प्रतिज्ञाहेत्वोश्च व्याघातः—सामानाधिकरण्यमभिन्नविभक्तिमत्त्वमेकविभक्त्युच्चारणमिति भावाभ्युपगमात् तच्छब्दाभ्युपगमाच्च विरुद्धः। 'यत्सर्वमिति मन्यसे तदभाव' इति ?

न्यायवार्त्तिकतात्पर्यटीका

इत्यनुभूयन्ते। अतस्तद्वाचिनां शब्दानां तत्सामानाधिकरण्यम्। ततः प्रमाणादयोऽसन्तः अनुत्पन्नप्रध्वस्तपटवत्। अपि चामी भावा नित्या अनित्या वा ? नित्यत्वे सर्वसामर्थ्यरहितत्वादसत्त्वम्। न हि नित्यं कचित्कार्य उपयुज्यते क्रमाक्रमानुपपत्तेरित्युक्तम्। अनित्यत्वे तु विनाशस्वभावाश्चेद् द्वितीयादिक्षण इव प्रथमक्षणेऽपि न स्युः। सत्त्वे वा नामी विनाशस्वभावाः। अतत्स्वभावत्वे वा क्षणान्तरेऽपि न विनश्येयुः। नो खलु नीलं स्वकारणादुपजातं जातु कारणसहस्रैरपि शक्यं पीतं कर्त्तुमिति विनाशस्वभावकत्वमकामेनापि अनित्यानामेषितव्यम्। तस्माद् भावानां शून्यतैव पारमार्थिकी कल्पनया त्ववस्तुसत्या सन्त इवावभासन्त इति युक्तमुत्पश्यामः। तथा च सर्वे भावा इति, सर्वे भावशब्दा इत्यर्थः। प्रयोगश्च सर्वे भावशब्दा असद्विषयाः असत्प्रत्ययप्रतिषेधाभ्यां सामानाधिकरण्यात्। अनुत्पन्नप्रध्वस्तपटशब्दवत्॥ ३७॥

अत्र तावदुत्सूत्रं भाष्योक्तं दूषणं वार्त्तिककार आह—प्रतिज्ञापदयोः प्रतिज्ञाहेत्वोश्च व्याघात इति। अभिन्नविभक्तिकत्वमभिन्नार्थकविभक्तिकत्वं न त्वभिन्नविभक्तिकत्वमेव भिन्न-

वृत्तिः

सर्वशून्यत्वेन कार्यकारणभावासम्भव इति तन्निराकरणप्रकरणमारभते। तत्र ज्ञानविषयत्वमभावत्वव्याप्यं न वेति संशये पूर्वपक्षसूत्रम्—(सर्वमभावो भावेष्वितरेतराभावसिद्धेः)

सर्वं विवादास्पदम् अभावः तुच्छम्। तत्र प्रत्यक्षमानमाह—भावेष्विति, भावत्वाभिमतेषु घटादिषु अभावत्वसिद्धेः घटः पटो नेत्यादिप्रतीत्या सर्वेषामभावत्वसिद्धेः॥ ३७॥

न्यायभाष्यम्

समुपाख्यायमानं कथं निरुपाख्यमभावः स्यादिति ? (१)न जात्वभावो निरुपाख्योऽनेकतयाऽशेषतया शक्यः प्रतिज्ञातुमिति। सर्वमेतदभाव इति(१*)चेत्—यदिदं सर्वमिति मन्यसे तदभाव इति ? एवं चेत् अनिवृत्तो व्याघातः, अनेकमशेषं चेति (२)नाभावे प्रत्ययेन शक्यं भवितुम्। अस्ति चायं प्रत्ययः सर्वमिति, तस्मान्नाभाव इति।

प्रतिज्ञाहेत्वोश्च व्याघातः—सर्वमभाव इति भावप्रतिषेधः प्रतिज्ञा, भावेष्वितरेतराभावसिद्धेरिति हेतुः। भावेष्वितरेतराभावमनुज्ञायाश्रित्य च (३)इतरेतराभावसिद्ध्या सर्वमभाव इत्युच्यते। यदि सर्वमभावो भावेष्वितरेतराभावसिद्धेरिति नोपपद्यते। अथ भावेष्वितरेतराभावसिद्धिः, सर्वमभाव इति नोपपद्यते।

न्यायवार्त्तिकम्

नासति तत्प्रत्ययेन भवितुं शक्यम्। न च भावप्रत्ययेनाभाव इति च भावः प्रतिषिध्यते, नासत्युत्तरपदार्थे नञः प्रयोग इति प्रसज्यप्रतिषेधपर्युदासाभ्यां पूर्ववत् प्रसङ्गः—यथाऽनेकपदेऽनित्यपदे चैवं सर्वपदेऽभावपदे च व्याघात ऊह्यः। शेषं भाष्ये।

सर्वासत्त्वे विभक्तिस्वभावावधारणं वक्तव्यम्—यदि च सर्वमभावो विभक्तिः किंस्वभाविकेति वक्तव्यमेतत्। असत्यां च विभक्तावभिन्नविभक्तिकत्वं सामानाधिकरण्यमिति व्याहतम्। असत्प्रत्ययप्रतिषेधसामानाधिकरण्यमिति ब्रूषे, सर्वमभाव इति च व्यावर्तयसि न ह्यसदधिकरणं भवति। अधिकरणं हि नाम यद्यत्र वर्तते, तच्चाभावे नास्तीति। सूत्रेण चाभिसम्बन्धः—

न्यायवार्त्तिकतात्पर्यटीका

विभक्तिकानामपि सामानाधिकरण्यात्। यथा चैत्रः पठतीति, यथा च न त्वां तृणाय मन्य इति। नासति तत्प्रत्ययेन भवितुमिति। न ह्यत्यन्तासन्निरुपाख्यं सर्वमिति वा भाव इति वा अभिधानस्य गोचरः। उपपादितं हि द्वितीयसूत्र एव यथाऽसद्वाऽनिर्वचनीयं वा न ख्यातिगोचरोऽपि तु सदेव सदन्तरात्मना। तथा च कुतोऽत्यन्तासतः कल्पनागोचरत्वमपीति। शेषं भाष्य इति प्रतिज्ञाहेत्वोर्व्याघातो भाष्ये प्रपञ्चित इति। उत्सूत्रमुक्त्वा भाष्यकारः सौत्रं दूषणं वक्तुमाह—सूत्रेण चाभिसंबन्धो दूषणस्य।

---

(१) अयं भागः वि० (B.) पु० नास्ति।

(२) 'नाभावप्रत्ययेन' इति ल-ग-ज०।

(३) 'इतरेतराभावसिद्धौ'—इति म० भा०।

न्यायभाष्यम्

सूत्रेण चाभिसम्बन्धः ।

न स्वभावसिद्धेर्भावानाम् ॥ ३८ ॥

न सर्वमभावः । कस्मात् ? स्वेन भावेन सद्भावाद्भावानाम् । स्वेन धर्मेण भावा भवन्तीति प्रतिज्ञायते । कश्च स्वो धर्मो भावानाम् ? द्रव्यगुणकर्मणां सदादिसामान्यम्, द्रव्याणां क्रियावदित्येवमादिर्विशेषः, स्पर्शपर्यन्ताः पृथिव्या इति च ; प्रत्येकं चानन्तो भेदः । सामान्यविशेषसमवायानां च विशिष्टा धर्मा गृह्यन्ते ।

न्यायवार्त्तिकम्

न स्वभावसिद्धेर्भावानाम् इति । स्वेन भावेन भावा भवन्तीति सूत्रार्थः । किं पुनरनेन सूत्रेण क्रियते ? पूर्वसूत्रविरोधश्चोच्यते । कथमिति ? भावेष्वितरेतराभावसिद्धेरित्यभावो भवताऽभिधीयते, तथा चाभिदधानः (१) स्वभावतो भावानभ्युपैषि, विशेषणवैयर्थ्यं च भावेष्वितरेतराभावसिद्धेरिति(२) सर्वासत्त्वे ह्येवमेव वक्तव्यम्, न सन्ति भावाः, न पुनरेवं वक्तुं युक्तम् इतरदितरन्न(३) भवतीति । इतरदिति(४) चायं विधानशब्दः, न च सर्वस्याभावे विधीयमानं वस्तु सम्भवति यदितरशब्दवाच्यं स्यादिति । इतरवाच्यतां चाभ्युपगम्येतरदितरन्न प्रतिषिध्यत इति स्वभावसिद्धिरभ्युपगता भवति ।

कश्च स्वो भावो भावानां द्रव्यादीनाम् ? सदादि सामान्यं क्रियावदादिर्विशेषः स्पर्शपर्यन्ताः पृथिव्याः प्रत्येकमनन्तो भेदः—सामान्यविशेषसमवायादीनां च सामान्यो वैशेषिकश्चान्तर्गणिकोऽनन्तो भेद इति । सोऽयमभावस्य निरुपाख्यत्वात् सम्प्रत्यायकः स्वभावभेदो न स्यात्, अस्ति त्वसौ, (५) तस्मान्न सर्वमभाव इति ।

न्यायवार्त्तिकतात्पर्यटीका

न स्वभावसिद्धेर्भावानाम् (सू० ३८) ॥ सर्वमभाव इति नास्ति । कस्मात् ? स्वभावसिद्धेर्भावानां स्वभावो धर्मो द्रव्यादीनां सदादिः । अथ वा स्वभावः स्वरूपं भावानां येनामी भावाः स्वभावाद् व्यावर्त्तन्ते । यद्वा, असन्निति प्रत्ययस्य गव्यश्वात्मनेति विशेषणात्, अगौरित्यस्य गां परिहृत्याऽश्वादिभिः संबन्धाद् गोभावसिद्धेरेवमश्वादिष्वपीति स्वभावसिद्धेर्भावानां नाभाव इत्यर्थः । न स्वभावसिद्धेरिति सूत्रमनूद्य वार्त्तिककारः स्वरूपमात्रेण व्याख्याय प्रश्नपूर्वकं तात्पर्यमस्य दर्शयति—पूर्वसूत्रस्येति । कश्च स्वो भाव इत्यादिना

(१) 'चाभिदधान'—इति क-ख-धृतपाठान्तरम् ।
(२) 'इतरेतरासिद्धेः'—इति क-ख-धृतपाठान्तरम् ।
(३) 'इतरदितरवन्न'—इति क-ख-धृतपाठान्तरम् ।
(४) 'इतरवदिति'—इति क-ख-धृतपाठान्तरम् ।
(५) 'अस्ति त्वयं'—इति क-ख-धृतपाठान्तरम् ।

न्यायभाष्यम्

सोऽयमभावस्य निरुपाख्यत्वात् सम्प्रत्यायकोऽर्थभेदो न स्यात्? अस्ति त्वयम्, तस्मान्न सर्वमभाव इति।

अथवा न स्वभावसिद्धेर्भावानामिति स्वरूपसिद्धेरिति। गौरिति प्रयुज्यमाने शब्दे जातिविशिष्टं द्रव्यं गृह्यते, नाभावमात्रम्। यदि च सर्वमभावः गौरित्यभावः प्रतीयेत, गोशब्देन चाभाव उच्येत। (१) यस्मात्तु गोशब्दप्रयोगे द्रव्यविशेषः प्रतीयते नाभावस्तस्मादयुक्तमिति।

अथ वा न स्वभावसिद्धेरिति। असन् गौरश्वात्मनेति गवात्मना कस्मान्नोच्यते? अवचनाद् गवात्मना गौरस्तीति स्वभावसिद्धिः, अनश्वोऽश्व इति वा गौरगौरिति वा कस्मान्नोच्यते? अवचनात् स्वेन रूपेण विद्यमानता द्रव्यस्येति विज्ञायते।

न्यायवार्त्तिकम्

अथवा स्वभावसिद्धेरिति गौरिति प्रयुज्यमाने नाभावः प्रतीयते किन्तु जातिविशिष्टं द्रव्यं, यदि च सर्वमभावः स्यात् गौरिति प्रयुक्तेऽभावो गम्येत, न स्वभावो गम्यते, तस्मान्न सर्वमभाव इति।

अथवा स्वभावसिद्धेरिति असन् अश्वो गवात्मना अनश्वो गौरगौर्गौरिति कस्मान्नोच्यते इति अवचनाद् गौरिति(२) अगौर्गौरित्युक्ते व्याहतं भवति। यदि व्याघातभयादगौर्गौरिति नोच्यते? हन्त तर्हि सिद्धो भावः। कथं तर्हि अयं प्रतिषेधोऽगौरश्व इति?। व्यतिरेक-

न्यायवार्त्तिकतात्पर्यटीका

सिद्धो भाव इत्यन्तेन सूत्रस्य व्याख्यानत्रयं भाष्यकारीयं वार्त्तिककारो दर्शयति। सामान्यो धर्मः समानो नित्यत्वादिरित्यर्थः। प्रश्नपूर्वकमसत्प्रत्ययप्रतिषेधसामानाधिकरण्यं भावस्योपपादयति —कथं तर्हीति। असच्छब्दः खल्वभावविशेषणं सदेवाभिधत्ते, एवमसत्प्रत्ययोऽप्यभावविशेषणं सदेवालम्बते, यथा शुक्लशब्दः शुक्लगुणविशिष्टे पटे वर्त्तते; तथा चासत्प्रत्ययाभिधानयोरुपपन्नं भाववाचिना पदेन सामानाधिकरण्यमित्यर्थः। भावश्च कश्चिन्नित्यः कश्चिदनित्यः, तत्र नित्यस्यार्थक्रिया-

वृत्तिः

सिद्धान्तसूत्रम्—(न स्वभावसिद्धेर्भावानाम्)

---

(१) 'तस्मात् तु' इति ग०।

(२) 'गौरस्तीति'—इति क ख-पुस्तकपाठान्तरम्।

न्यायभाष्यम्

(१) अव्यतिरेकप्रतिषेधे च भावेन (२) असत्प्रत्ययसामानाधिकरण्यम्(१*) भावे (३) संयोगादिसम्बन्धो व्यतिरेकः। अत्र अव्यतिरेकः अभेदाख्यसम्बन्धः (४) तत्प्रतिषेधे सदा च असत्प्रत्ययसामानाधिकरण्यम्, यथा न सन्ति कुण्डे बदराणीति। असन् गौरश्वात्मना अनश्वो गौरिति च गवाश्वयोरव्यतिरेकः प्रतिषिध्यते गवाश्वयोरेकत्वं नास्तीति। तस्मिन् प्रतिषिध्यमाने भावेन गवा सामानाधिकरण्यमसत्प्रत्ययस्य असन् गौरश्वात्मनेति, यथा न सन्ति कुण्डे बदराणीति कुण्डे बदरसंयोगे प्रतिषिध्यमाने सद्भिरसत्प्रत्ययस्य सामानाधिकरण्यमिति ॥ ३८ ॥

न्यायवार्त्तिकम्

प्रतिषेधे भावेनासत्प्रत्ययस्य सामानाधिकरण्यमिति—यथा न सन्ति कुण्डे बदराणीति कुण्डबदरयोः सम्बन्धः प्रतिषिध्यते न कुण्डे बदरसद्भावः ॥ ३८ ॥

न्यायवार्त्तिकतात्पर्यटीका

कारित्वमुपपादितं क्षणभङ्गभङ्ग एव। अनित्योऽपि न विनाशस्वभावो भावः, किं तु स्वकारणादयं सत्स्वभावो जातः, कारणान्तरात्तु विनश्यति। यत्तूक्तं नीलं शक्यं न पीतं कर्त्तुमिति, तत्र ब्रूमः—शक्य एव नीलः पटः पीतः कर्त्तुम्। आमश्यामो घटो वह्निसंयोगाद्रक्तः। अथ नीलत्वं न पीतत्वं शक्यं कर्त्तुं, ननु भावोऽपि नाभावः कर्त्तुं शक्य इति। यथैव कुम्भाधिकरणे श्यामरक्तत्वे पर्यायेण भवतः, एवं कपालाधिकरणौ कुम्भभावाभावावित्यदोषः ॥ ३८ ॥

वृत्तिः

भावानां पृथिव्यादीनां स्वभावस्य गन्धादेः सत्त्वादेश्च सिद्धेः। न हि तुच्छस्य गन्धरूपादिकं सत्त्वेन प्रतीतिर्वा सम्भवति ॥ ३८ ॥

---

(१) 'अव्यतिरेकप्रतिषेधे च भावानाम्' इति ल-ज०।

'अव्यतिरेके प्रतिषेधे च भावानाम्' इति ग०।

'अव्यतिरिक्तः प्रतिषेधे च भावानामसत्प्रत्ययसामानाधिकरण्यम्' इति टि०। फ-पु० पाठो गृहीतः।

(२) 'असत्प्रत्ययस्य सामा'—इति झा०।

(३) 'असंयोगादिसम्बन्धः'—इति ज० ग०।

(४) 'तत्प्रतिषेधे सदाऽसत्प्रत्ययसामानाधिकरण्यम्।' इति ल०। अयमंशः ग-झा-पु० नास्ति। असत्प्रत्ययसामानाधिकरण्यं यथा न सन्ति कुण्डे बदराणीति—इति ल-पुस्तक-धृतपाठान्तरम्।

'प्रत्ययसामानाधिकरण्यम्' इति ज०। फ-पु० पाठो गृहीतः।

न्यायभाष्यम्

न स्वभावसिद्धिरापेक्षिकत्वात् ॥ ३९ ॥

अपेक्षाकृतमापेक्षिकम्। ह्रस्वापेक्षाकृतं दीर्घं दीर्घापेक्षाकृतं ह्रस्वं, न स्वेनात्मनाऽवस्थितं किञ्चित्। कस्मात्? अपेक्षासामर्थ्यात्। तस्मान्न स्वभावसिद्धिर्भावानामिति ॥ ३९ ॥

व्याहतत्वादयुक्तम् ॥ ४० ॥

यदि ह्रस्वापेक्षाकृतं दीर्घं, (१)ह्रस्वमनापेक्षिकम्।(१*) किमिदानीमपेक्ष्य ह्रस्वमिति गृह्यते? अथ दीर्घापेक्षाकृतं ह्रस्वं, दीर्घमनापेक्षिकम्? एवमित-

न्यायवार्त्तिकम्

न स्वभावसिद्धिरापेक्षिकत्वात्। न स्वभावसिद्धिरापेक्षिकी, यतः न स्वेनात्मना किञ्चित् सिद्धमिति। यथा दीर्घत्वह्रस्वत्वे परापरे चेति ॥ ३९ ॥

व्याहतत्वादयुक्तम्। यदि ह्रस्वापेक्षाकृतं दीर्घं? ह्रस्वमनापेक्षिकम्। अथ दीर्घापेक्षाकृतं ह्रस्वं? दीर्घमनापेक्षिकं, परस्परापेक्षयोश्च यदपेक्षयेतरज्जायते तदनापेक्षिकमिति उभयो-

न्यायवार्त्तिकतात्पर्यटीका

स्वभावसिद्धेरिति यदुक्तं तदाक्षिपति शून्यतावादी—

न स्वभावसिद्धिरापेक्षिकत्वात् (सू० ३९)॥ सर्व एव हि भावा भिन्नस्वभावाः, भिन्नत्वं च तेषामन्यापेक्षम्। तथा हि नीलं भिन्नं पीतापेक्षया न तु स्वभावतः, एवं ह्रस्वत्वदीर्घत्वपरत्वापरत्वपितापुत्रत्वादयः परस्परापेक्षा द्रष्टव्याः। यच्च परापेक्षं तन्न स्वाभाविकं यथा जपाकुसुमापेक्षं स्फटिकस्य रक्तत्वमित्याक्षेपार्थः ॥ ३९ ॥

समाधत्ते—

व्याहतत्वादयुक्तम् (सू० ४०)॥ तद् व्याचष्टे यदीति। ननु यद्यनेन क्रमेणोभया-

वृत्तिः

पुनः शङ्कते—(न स्वभावसिद्धिरापेक्षिकत्वात्)

न हि सर्वेषां भावानामेकः स्वभावः सम्भवति आपेक्षिकत्वात् भिन्नत्वात्। भिन्नस्य (२)एकस्वभावत्वे स्वस्मादपि भेदापत्तेः।

यद्वा इतरसापेक्षत्वात्, एतदपेक्षयाऽयं नीलतरः एतदपेक्षया ह्रस्व इति (३)प्रतीतिः। यच्च सापेक्षं तदवस्तु, यथा जपासापेक्षं स्फटिकारुण्यम् ॥ ३९ ॥

(१) इदं ल-ग-ज-वि (B.)-पुस्तकेषु नास्ति।

(२) 'एक-' इति भ-पु० नास्ति।

(३) 'प्रतीतेः' इति भ०।

न्यायभाष्यम्

रेतराश्रययोरेकाभावे (१) अन्यतराभावादुभयाभाव (१*) इति (२) अपेक्षा-व्यवस्थाऽनुपपन्ना ।

स्वभावसिद्धावसत्यां समयोः परिमण्डलयोर्वा द्रव्ययोरापेक्षिके दीर्घत्वह्रस्वत्वे कस्मान्न भवतः ? अपेक्षायामनपेक्षायां च द्रव्ययोरभेदः । यावती द्रव्ये अपेक्षमाणे तावती एवानपेक्षमाणे नान्यतरत्र भेदः । आपेक्षिकत्वे तु सत्यन्यतरत्र विशेषोपजनः स्यादिति ।

न्यायवार्त्तिकम्

रभावः एकस्याभावादिति । अपेक्षायामनपेक्षायां च द्रव्ययोर्न भेदः यावती एव द्रव्येऽपेक्षमाणे तावती एव(३) अनपेक्षमाणे अपि न ह्यन्यतरत्र भेदः । अतिशयग्रहणं कथं यदि द्रव्ययोर्द्वयोर्भेदः अपेक्षमाणयोरनपेक्षमाणयोर्दीर्घह्रस्वप्रत्ययः तर्हि न प्राप्नोति ? न न प्राप्नोति द्वयोर्ग्रहणेऽतिशयस्य ग्रहणात्—द्वयोस्तावद् द्रव्ययोः प्रत्यर्थनियते द्वे ह्येव बुद्धी भवतः, अत एकस्मिन् विद्यमानमतिशयं गृह्णाति एकस्मिन् विद्यमानं च ह्रस्वत्वम्, सोऽयमुभयदर्शने प्रतिसन्धत्ते, प्रतिसन्धानप्रत्ययजा त्वस्य बुद्धिरुत्पद्यते अस्मादीर्घमदोऽस्माददो ह्रस्वमिति, न पुनर्वस्तुन उत्पादानुत्पादाविति । (४)स्वभावसिद्धौ चासत्यामपेक्षा न प्राप्नोति—यदि स्वभावसिद्धिमन्तरेणापेक्षा-

न्यायवार्त्तिकतात्पर्यटीका

भावो भवति भवतु सिद्धमेव नः समीहितमित्यत आह—अपेक्षायामनपेक्षायां चेति । परिमाणभेदो हि दीर्घत्वं ह्रस्वत्वं च स च भावानामौत्पत्तिकः केवलं तस्यातिशयानतिशयौ परस्परग्रहणाधीनौ । तथा हीक्षुयष्टेर्वेणुयष्टितो ह्रस्वत्वं पूर्वसंख्यायोगिहस्तपरिमितत्वमनतिशयः, वेणुयष्टेर्दीर्घत्वमतिशयः परसंख्यायोगिहस्तपरिमितत्वं तच्चेदं प्रतियोगिनिरूपणाधीननिरूपणम् । न तु प्रतियोग्यधीनोत्पत्तीति न वस्तुधर्मोऽयं परापरापेक्षः । भिन्नत्वं च भेदः, स च वस्तुविशेषणं नोत्पत्तौ वस्त्वन्तरमपेक्षते किं तु स्वनिरूपणे । एवं पितृत्वमपि व्यवस्थिता जनकशक्तिरेव, सा जन्यनिरूपणाधीननिरूपणा न तु तदधीनोत्पत्तिः । विपञ्चितं चैतदस्माभिर्ब्रह्मतत्त्वपरी(समी ?)क्षायाम् । परत्वापरत्वादयस्त्वपेक्षाबुद्धिनिमित्ततया परापेक्षोत्पत्तिका अपि लोकयात्रां वहन्तो न शक्याः प्रत्याख्यातुम् । न चैतावता तदधिकरणं भावो न निरपेक्ष इति सर्वमवदातम् । स्यादेतत् । अपेक्षामात्रमेव दीर्घत्वादयो भविष्यन्ति, कुतमेषां वस्तुस्वभावेनेत्यत आह—स्वभावसिद्धौ चासत्यामिति । अपेक्षासामर्थ्यम् अपेक्षाप्रयोजन-

---

(१) 'अन्यतराभाव' इति ग० ।

(२) 'दीर्घापेक्षा-' इति ख-ग-झा० ।

(३) 'द्रव्ये' इत्यधिकम्' इति क-ख-टिप्पणि: ।

(४) 'स्वभावसिद्धावसत्यां'—इति क-ख-धृतपाठान्तरम् ।

न्यायभाष्यम्

किमपेक्षासामर्थ्यमिति चेत्? द्वयोर्ग्रहणेऽतिशयग्रहणोपपत्तिः। द्वे द्रव्ये पश्यन्नेकत्र विद्यमानमतिशयं गृह्णाति तद्दीर्घमिति व्यवस्यति, यच्च हीनं गृह्णाति तद्ध्रस्वमिति व्यवस्यतीति। एतच्चापेक्षासामर्थ्यमिति ॥ ४० ॥

न्यायवार्त्तिकम्

भेदाद्दीर्घादिभेदा भवन्ति सर्वमपेक्ष्य सर्वस्य सर्वत्र तथाभूतः प्रत्ययः स्यात्, न च रूपरसगन्धस्पर्श-प्रत्ययेष्वपेक्षासामर्थ्यमस्ति। न च परिमण्डलौ परमाणू उपलभमान ईश्वरः परमाणुमपेक्ष्य परमाण्वन्तरे दीर्घह्रस्वादिप्रत्ययान् करोति, अतो नापेक्षाकृताः प्रत्यया इति।

सर्वमभाव इति सर्वथा चायं वादो व्याहतः। कुतो (क) व्याघातः? आदौ तावत् (१) प्रमाणोत्पत्त्यनुत्पत्ती सर्वमभाव इति ब्रुवाणः प्रमाणं पर्यनुयोज्यः। यदि ब्रूते? व्याहतं भवति। अथ नाभिधत्ते? अर्थोऽस्य न सिध्यति प्रमाणाभावात्। सर्वमभाव इति वाक्यं तस्य यद्यभिधेयमर्थं प्रतिपद्यते पूर्ववद् व्याघातः। अथ न प्रतिपद्यते? (२) वर्णोच्चारण-मात्रमनर्थकमिति। सर्वमभाव इति च वाक्यस्य(३) प्रतिपादयितारं प्रतिपत्तारं च यदि प्रतिपद्यते(४) पूर्ववद्व्याघातः। सर्वमभाव इति सर्वं भाव इति च वाक्ये, यद्यनयोरर्थभेदं प्रतिपद्यते? व्याहतं भवति। अथ न प्रतिपद्यते? विशेषोपादानं व्यर्थम्। सोऽयं सर्वा-भाववादो यावद्यावद्विचार्यते तावत्तावदुपपत्तिं न सहत इति ॥ ४० ॥

(सर्वशून्यतानिराकरणम्।)

न्यायवार्त्तिकतात्पर्यटीका

योगः। स्वयं वार्त्तिककारो दूषणान्याह—सर्वथा चायं व्याहत इति। निगद-व्याख्यातम् ॥ ४० ॥

वृत्तिः

समाधत्ते—(व्याहतत्वादयुक्तम्)

सापेक्षत्वस्य तुच्छत्वव्याप्तेर्व्याहतत्वादसिद्धत्वात्। न वा घटादेः सापेक्षत्वं सम्भवति। किं च सापेक्षत्वं सापेक्षं न वा? (५)आद्ये तस्य तुच्छत्वान्न साधकत्वम्। अन्त्ये तस्यैव सत्यत्वात् कुतः सर्वशून्यत्वमिति भावः ॥ ४० ॥

समाप्तं सर्वशून्यतानिराकरणप्रकरणम् ॥ १० ॥

---

(१) 'प्रमाणोपपत्त्यनुपपत्ती'—इति क-ख-धृतपाठान्तरम्।

(२) 'सर्वोच्चारण'—इति क-ख-धृतपाठान्तरम्।

(३) 'वाक्यार्थ'—इति क-ख-धृतपाठान्तरम्।

(४) '-पाद्यते'—इति क-ख-धृतपाठान्तरम्।

(५) 'आद्यस्य' इति ल०

न्यायभाष्यम्

अथेमे (१) सङ्ख्यैकान्तवादाः—

सर्वमेकं सदविशेषात् ।

न्यायवार्त्तिकतात्पर्यटीका

उत्तरसूत्रावतारपरं भाष्यम्—अथैते संख्यैकान्तवादाः संख्या एकान्तो येषु वादेषु ते तथोक्ताः । अथ शून्यतावादानन्तरं ते परीक्ष्यन्त इत्यर्थः । तत्र प्रथमं ब्रह्माद्वैतमुत्थापयति— सर्वमेकम् । कुतः ? सदविशेषात् ।

इदमस्याऽऽकूतम् । न तावदयं नामरूपप्रपञ्चः प्रकाशाद्भिन्नः सन् प्रकाशितुमर्हति, जडस्य स्वयंप्रकाशासंभवात् । न च प्रकाशयोगात् प्रकाशत इति युक्तम् । न खल्वान्तरेण प्रकाशेनास्य कश्चिद् योगः संभवति । विषयविषयिभावः संबन्ध इति चेन्न, तत्राकिंचित्करस्य विषयित्वासंभवात् । न चार्थे ज्ञानं फलं जनयतीति सांप्रतम् अतीतानागतयोरर्थयोस्तदसंभवात् ; न च न तयोर्विषयभावः । तस्माज् ज्ञानाद्भिन्नस्य नामरूपप्रपञ्चस्य न प्रकाशसंभव इति ज्ञानस्यैवायं विवर्त्त इति युक्तमुत्पश्यामः । न च प्रकाशात्मानो घटादय एवोदयव्ययधर्मिणः परस्परव्यावृत्ताः सन्त्विति सांप्रतं, तद्व्यावृत्तिग्रहे प्रमाणाभावात् । स हि यद् यतो व्यावर्त्तते तदुभयग्रहे गृह्यते । न च विज्ञानानि विलक्षणानि स्वरूपमात्रावस्थितानि परस्परवार्त्तानभिज्ञानि ज्ञानान्तरमपि ग्रहीतुमुत्सहन्ते प्रागेव स्वस्माद् व्यावर्तयितुम् । न च निषेध्यनिषेधाधिकरणग्रहणकारणको व्यावृत्तिग्रहः स्वकारणेन समसमयोत्पादो भवितुमर्हति, तादृशोः सव्येतरविषाणवत्कार्यकारणभावाभावात् । न चैकं विज्ञानं क्षणिकं निषेध्यनिषेधाधिकरणे गृहीत्वा पश्चान्निषेधं गृह्णातीति युक्तं, क्षणिकस्याक्रमस्य क्रमवद्व्यापारायोगात् । न चैकं विज्ञानं निषेध्यनिषेधाधिकरणे गृह्णाति अथ ज्ञानान्तरं निषेधतीति युक्तं चैत्रगृहीतेऽपि तस्मिन् मैत्रस्य निषेधज्ञानप्रसङ्गात् । न च ज्ञानस्वरूपग्रह एवास्य निषेधग्रह इति सांप्रतम् । एवं हि स भवेद् यदि स्वरूपतदन्यव्यावृत्त्योरेकत्वं भवेत् । तत्र व्यावृत्तिस्वभावो वा भावो भावस्वभावा वा व्यावृत्तिः । तत्र पूर्वस्मिन् कल्पे व्यावृत्तेस्तुच्छत्वात् तत्स्वभावा भावास्तुच्छाः स्युः । ततश्च वचोभङ्ग्यन्तरेण शून्यवादप्रसङ्गः । उत्तरस्मिंस्तु कल्पे विधिरूपो भाव एव व्यावृत्तिरिति विधिरूपतया च ते न व्यावर्त्तन्त इति न व्यावृत्ता भावाः परस्परं परमार्थतः ; तदिदमुक्तम्— सदविशेषादिति । अनाद्यनिर्वचनीयाविद्यानिबन्धनं तु भावानां भेदं न व्यासेधामः । न च ज्ञातुरपि ज्ञानेन्द्रियं ग्राहकमस्ति प्रमाणमुक्तादेव विशेषात् । तस्मान्न ज्ञेयानां परस्परतश्च ज्ञानाच्च भेदः । नापि ज्ञातुर्ज्ञानादस्ति भेदः, नापि ज्ञानानामन्योन्यस्य, तस्मात् प्रकाश एव स्वयं प्रकाशः कूटस्थनित्य आनन्दघनोऽनाद्यविद्योपदर्शितविविधविचित्रनामरूपप्रपञ्चो ब्रह्मेत्यद्वैतसिद्धिः । अत एव श्रुतयो भवन्ति—

(१) 'सङ्ख्यैकान्ता' इति ल·ग·ज·भा० ।

न्यायभाष्यम्

सर्वं द्वेधा नित्यानित्यभेदात्। सर्वं त्रेधा ज्ञाता ज्ञानं ज्ञेयमिति। सर्वं चतुर्द्धा प्रमाता प्रमाणं प्रमेयं प्रमितिरिति। एवं यथासम्भवमन्येऽपीति। तत्र परीक्षा—

न्यायवार्त्तिकम्

अथेमे संख्यैकान्तवादाः—सर्वमेकं सदविशेषादित्येवमादि भाष्ये। तेषां प्रतिषेधद्वारकं सूत्रम्—

न्यायवार्त्तिकतात्पर्यटीका

"एकमेवाद्वितीयं ब्रह्म नेह नानास्ति किंचन।
मृत्योः स मृत्युमाप्नोति य इह नानेव पश्यति॥"

इत्येवमादिकाः।

तदेवमैकान्तिकमेकत्वमुपन्यस्य द्वित्वमैकान्तिकमाह—सर्वं द्वेधा। कुतः? नित्यानित्यभेदात्। न हि नित्यानित्याभ्यामन्यो राशिरस्ति यमाश्रित्य पदार्थास्त्रित्वादिके व्यवतिष्ठेरन्निति। मतान्तरमाह—सर्वं त्रेधा। तदेव दर्शयति—ज्ञाता ज्ञेयं ज्ञानमिति। (क)ज्ञप्तिरपि ज्ञायमानत्वाज् ज्ञेयान्नातिरिच्यत इति भावः। मतान्तरमाह—सर्वं चतुर्धा। दर्शयति—प्रमाता प्रमाणं प्रमेयं प्रमितिरिति। यदि प्रमितिर्नाम तत्त्वं प्रमाणादिभिन्नं नाश्रीयते प्रमायाः प्रधानक्रियाया अभावात् कथं प्रमात्रादयः। कथं च प्रधानक्रियामन्तरेणैकवाक्यता स्यात् कारकवैचित्र्यं वा? प्रमायाः फलत्वावस्थाया उपरि प्रमेयव्यपदेशं न वारयामः। न चैतावता तत्त्वान्तरं न भवति। एवं यथासंभवमन्येऽपीति, प्रकृतिपुरुषाविति वा पञ्चस्कन्धा इति वा पशुपाशतदुच्छेदेश्वरा इति वेत्यादयः। तत्र परीक्षां संख्यैकान्तता निराकरणरूपान्तां दर्शयति सूत्रेण।

वृत्तिः

अथ सङ्ख्यैकान्तवादनिराकरणप्रकरणम्। तत्र भाष्यम्—"अथेमे सङ्ख्यैकान्तवादाः, सर्वमेकं सदविशेषात्, सर्वं द्वेधा नित्यानित्यभेदात्, सर्वं त्रेधा ज्ञाता ज्ञेयं ज्ञानमिति, सर्वं चतुर्धा प्रमाता प्रमाणं प्रमेयं प्रमितिरिति, एवं यथासम्भवमन्येऽपीति।" तत्र यथा नित्यत्वानित्यत्वलक्षणधर्माभ्यां द्वैधम्, तथा (१)सत्त्वेनैक्यमिति स्पष्टोऽर्थः।

परे त्वेवं व्याचक्षते—एकमित्यद्वैतवादः। तथा च ब्रह्मैवैकं निर्विशेषं सत्यं सर्वमन्यन्मिथ्या।

---

(१) 'सत्त्वेनैकम्' इति भ०।
(क) ज्ञप्तिरिति ज्ञानसाधनमुच्यते।

न्यायभाष्यम्

सङ्ख्यैकान्तासिद्धिः कारणानुपपत्त्युपपत्तिभ्याम् ॥ ४१ ॥

यदि साध्यसाधनयोर्नानात्वम्, एकान्तो न सिद्ध्यति व्यतिरेकात्। अथ

न्यायवार्त्तिकम्

संख्यैकान्तासिद्धिः कारणानुपपत्त्युपपत्तिभ्याम्। संख्यैकान्तानामसिद्धिः कारणस्य प्रतिज्ञातार्थव्यतिरेकात्–सर्वमेकमिति प्रतिज्ञां कृत्वा यदि प्रतिज्ञेयव्यतिरिक्तं साधनं ब्रवीति एकान्तो न सिध्यति तच्च साधनं प्रतिज्ञायाश्चार्थ इति द्वैतम्। एवं द्वैतादिष्वपीति। अथ

न्यायवार्त्तिकतात्पर्यटीका

संख्यैकान्तासिद्धिः कारणानुपपत्त्युपपत्तिभ्याम् (सू० ४१)। अनवयवेन सर्वं चेदेकं द्वेधा त्रेधा चतुर्धा चेति प्रतिज्ञार्थः, तदतिरिक्तं साधनं वाच्यम्। न हि साध्यमेव साधनं भवति। तथा च साधनस्य तदतिरेकान्न संख्यैकान्तसिद्धिः। न च किंचिदपि स्वसंवेदनमस्ति ज्ञानप्रदीपादीनामपि परसंवेद्यत्वात्। यथा च ज्ञानातिरिक्तोऽप्यर्थो विषयस्तथा विज्ञानवाद-निरासावसरे वक्ष्यते। न च विज्ञानादर्थस्य भेदोऽशक्यग्रहः। तथा हि नीलमुपलभ इत्य-नहङ्कारास्पदमश्वेतादिरूपं नीलं प्रत्यात्ममनुभवगोचरः एवं नीलादीनामपि परस्परम्। अन्यथा घटमानयेति देशितो नयने निमील्य शयीत; शयीथा इति देशिते तोयमाहरेत्, कस्यचित् कुतश्चित्कथंचिद्विवेचकाभावात्। न चानिर्वचनीयानाद्यविद्यानिबन्धनोऽयं भेदव्यवहार इति सांप्रतम्। अनिर्वचनीयख्यातेः पूर्वमेव निराकृतत्वात्। तस्मात्सर्वजनसंवेदनसिद्धोऽयं भेदप्रत्ययो न कारणमुखनिरीक्षणेन युक्तो निराकर्तुम्। अपि तु स्पष्टदृष्टात्कार्याद्भेदप्रत्यय-लक्षणात्तादृशं तत्कारणं कल्पनीयं यादृशेन तत्कारणेन प्रपञ्चप्रत्ययोऽप्रत्यूहमुत्पद्येत। तच्च प्रत्यक्षमेव। तथा हि तन्नीलं परिच्छिन्दत्पीतादिभ्योऽस्य भेदं परिच्छिनत्ति संयुक्तविशेषणता-लक्षणादिन्द्रियार्थसन्निकर्षात्। नीलं हि नीलमित्यनुभवन् पीतादिकं च पीतादिकमित्यनुभवन् स्मरन् वा शक्नोति निषेध्यनिषेधाधिकरणतया समाकलयितुं रूपमात्रेणागृहीतपरस्परभेदमपि।

वृत्तिः

यद्वा, सर्वं प्रपञ्चजातम् एकं द्वैतशून्यं सदविशेषात्, घटः सन् पटः सन्निति प्रतीतेः घटाभिन्नसदभिन्नपटस्य घटादभेदसिद्धेः। श्रुतिरपि 'एकमेवाद्वयं ब्रह्म नेह नानास्ति किंचन' इत्यादि। 'अन्येऽपि' इत्यनेन रूप-संज्ञा-संस्कार-वेदनानुभवाः पञ्च स्कन्धा इति सौत्रान्तिका इत्यादिसमुच्चयः।

एतेष्वाक्षेपेषु सिद्धान्तसूत्रम्—(सङ्ख्यैकान्तासिद्धिः कारणानुपपत्त्युपपत्तिभ्याम्)

न्यायभाष्यम्

साध्यसाधनयोरभेदः? एवमप्येकान्तो न सिध्यति साधनाभावात्, न हि (१) हेतुमन्तरेण कस्यचित्सिद्धिरिति ॥ ४१ ॥

न कारणावयवभावात् ॥ ४२ ॥

न सङ्ख्यैकान्तानामसिद्धिः कस्मात्? कारणस्यावयवभावात्। अवयवः कश्चित् साधनभूत इत्यव्यतिरेकः। एवं द्वैतादीनामपीति ॥ ४२ ॥

न्यायवार्त्तिकम्

प्रतिज्ञेयव्यतिरिक्तं साधनं नास्ति? एवमप्येकान्तोऽस्य (क) वा न सिध्यति साधनाभावात् न साध्यं साधनमिति ॥ ४१ ॥

न कारणावयवभावात्। कारणस्य साध्यावयवत्वादित्ययं(२) सूत्रार्थः। साध्यावयव

न्यायवार्त्तिकतात्पर्यटीका

न हि तत्र भेदेन प्रथत इत्यभेदेन प्रथेत। येनानयोर्नीलपीतयोर्गृहीतस्वरूपयोरवध्यवधिमद्भावो न स्यात्। तथा च तौ गृहीत्वा प्रत्यक्षेण शक्योऽनयोर्भेदो ग्रहीतुमित्यसांप्रतमेतत्।

अन्योन्यसंश्रयाद्भेदो न प्रमान्तरसाधनः।
तस्मिन्निदं नायमयमिति भेदं विना न धीः ॥

एतेन प्रमातुरपि प्रमाया भेदो व्याख्यातः। प्रमातारश्चानेकविधसुखदुःखोपभोगव्यवस्थानाद्बधिरान्धकाणादिकोविदजाल्मसंसारिमुक्तविभागोपपत्तेश्च भेदवन्तोऽनुमीयन्ते एकस्मिन्नपर्यायेण विरुद्धधर्मसंसर्गासंभवात्। कल्पनया कथंचित्संभाव्यमानोऽप्ययं गोमयपायसीयन्यायमावहति। तदेवं प्रत्यक्षविरोधादनुपपन्नार्थाः श्रुतय एकमेवाद्वितीयमित्याद्याः प्रथमां वृत्तिमुल्लङ्घ्य जघन्यामवलम्बन्ते 'यजमानः प्रस्तर आदित्यो वै यूप' इत्यादिवदिति। यदाह भगवान् जैमिनिः—गुणवादस्त्विति। तत्सिद्धिरिति चेति। तस्मान्नाद्वैतमिति ॥ ४१ ॥

साध्यात्साधनस्य भेदेन च संख्यान्तरैकान्ता (३)अप्यपहतार्था इत्युक्तम्। अत्र पूर्वपक्षवाद्याह—

न कारणावयवभावात् (सू० ४२) ॥ तद्व्याचष्टे—कारणस्य साध्यावयवभावात्।

वृत्तिः

सङ्ख्यैकान्ता न सिद्ध्यन्ति कारणस्य प्रमाणस्य अनुपपत्तेः, उपपत्तौ वा न सङ्ख्यैकान्तः साधनस्य साध्यातिरिक्तस्यापेक्षितत्वात् ॥ ४१ ॥

---

(१) 'तमन्तरेण'-इति ज-ग०। 'तदुत्तरेण' इति भा०। 'साधनमन्तरेण' इति फ०। (२) 'साध्यावयवत्वादि साधनं नास्ति एवं सत्येकान्तो ह्ययं'—इति क-ख-धृतपाठान्तरम्। (३) 'अप्यपाकृता-' इति क-तात्पर्यधृतपाठान्तरम्।

(क) अथ वा-शब्दार्थश्चिन्त्यः।

न्यायभाष्यम्

निरवयवत्वादहेतुः ॥ ४३ ॥

कारणस्यावयवभावादित्यहेतुः। कस्मात्? सर्वमेकमित्यनपवर्गेण प्रतिज्ञाय कस्यचिदेकत्वमुच्यते, तत्र व्यपवृक्तोऽवयवः साधनभूतो नोपपद्यते। एवं द्वैतादिष्वपीति।

न्यायवार्त्तिकम्

एव साधनम्, एवं च सति साध्यव्यतिरिक्तं साधनं नोक्तं भवति न चासाधना सिद्धिरिति ॥ ४२ ॥

निरवयवत्वादहेतुः। साध्यावयव एव कारणमित्ययमहेतुः निरवयवत्वात् प्रतिज्ञार्थस्य। सर्वमेकमित्येतस्मिन् प्रतिज्ञार्थे न किञ्चिदपवृज्यते अनपवर्गेण सर्वं पक्षीकृतमिति सर्वस्य निरवयवस्य पक्षीकरणान्न हेतुरस्ति, न च साध्यं हेतुर्भवितुमर्हतीति। आत्मनि च क्रिया विरुध्यते।

न्यायवार्त्तिकतात्पर्यटीका

एकस्य द्व्यादीनां वा कश्चिदेकदेशः साधनं तथा च न संख्यान्तरं न च साधनभाव इत्यर्थः ॥ ४२ ॥

निराकरोति—

निरवयवत्वादहेतुः (सू. ४३)॥ अवयवभावादिति यदि साध्यस्य कश्चिदवयवो भवेन्न संख्यैकान्तः स्यादिति सर्वमेकमित्येतस्मिन् प्रतिज्ञार्थे न किंचिद् अपवृज्यते व्यावर्त्तते यतस्तत्साधनं न स्यादित्यर्थः। अथ कस्मान्न साध्यमेव हेतुरित्यत आह—आत्मनि चेति।

वृत्तिः

आक्षिपति—(न कारणावयवभावात्)

न सङ्ख्यैकान्तस्यासिद्धिः कारणस्य प्रमाणस्य अवयवभावात् उक्तस्यैकदेशत्वादवयवावयविनोश्च (१)भेदाभावादिति भावः (१*) ॥ ४२ ॥

दूषयति—(निरवयवत्वादहेतुः)

उक्तो हेतुर्न युक्तः सर्वस्यैव पक्षत्वेनावशिष्टस्याभावात्, पक्षैकदेशस्य हेतुत्वासम्भवादिति भावः। श्रुतिस्तु ब्रह्मैक्यपरेति।

(१) 'भेदाभावः' इति भ०।

न्यायभाष्यम्

ते खल्विमे सङ्ख्यैकान्ता (१) यदि विशेषकारितस्यार्थभेदविस्तारस्य प्रत्याख्यानेन वर्त्तन्ते, प्रत्यक्षानुमानागमविरोधान्मिथ्यावादा भवन्ति। अथाभ्यनुज्ञानेन वर्त्तन्ते? समानधर्मकारितोऽर्थसंग्रहो विशेषकारितश्चार्थभेद इति एवमेकान्तत्वं जहतीति। ते खल्वेते (२) तत्त्वज्ञानप्रविवेकार्थमेकान्ताः परीक्षिता इति ॥ ४३ ॥

न्यायवार्त्तिकम्

यत्तत्प्रतिपाद्यं तदेव प्रतिपादकमिति न युक्तं, न कर्म करणं भवितुमर्हतीति। ते खल्विमे संख्यैकान्ता यदि विशेषकारितस्यार्थभेदस्य प्रत्याख्यानेन वर्तन्ते मिथ्यावादा भवन्ति प्रत्यक्षानुमानागमविरोधित्वात्—प्रत्यक्षोऽयं गवादिघटादिभेदः अनुमानतोऽपि गम्यते अन्यदन्येनानुमीयते, आगमतोऽपि गम्यते प्रतिपन्नः प्रतिपादयिता अप्रतिपन्नः प्रतिपाद्य(३) इति। अथाभ्यनुज्ञानेन वर्तन्ते? तथाप्येकान्तत्वं जहति। अथ सामान्यकारितोऽभेदः विशेषकारितश्च भेद इति प्रतिपद्यते? तथापि न किञ्चिद्बाध्यते। न च भेदमन्तरेण सामान्यं लब्धावकाशमिति।

न्यायवार्त्तिकतात्पर्यटीका

चो हेतौ। अपि चैते संख्यैकान्ताः प्रत्यक्षादिप्रमाणविरोधान्मिथ्यावादा इत्याह—ते खल्विमे संख्यैकान्ता इति। खलुशब्दः समुच्चये, वक्रकोटरपाण्यादिविशेषकारितो योऽर्थभेदः स्थाणुपुरुषादिः तत्प्रत्याख्यानेनेत्यर्थः। अथ विशेषकारितार्थभेदाभ्यनुज्ञानेन वर्तते तथाऽप्येकान्तत्वं जहति एकत्वादिसंख्याया अनैकान्तिकत्वमित्यर्थः। अथ सामान्यकारित इति संख्यामात्रमङ्गीक्रियते न पुनरस्या ऐकान्तिकत्वमित्यर्थः। तदस्माकमभिमतमेवेत्याह—तथाऽपि न किंचिद्बाध्यत इति। येऽप्याहुः सत्तासामान्यमेव तत्त्वं भेदास्तु काल्पनिका इति तान् प्रत्याह—न च भेदमन्तरेणेति। यथाहुः—

निर्विशेषं न सामान्यं भवेच्छशविषाणवद् इति।

वृत्तिः

एतच्च नास्मभ्यं रोचते, सत्त्वेनैक्यस्य नित्यानित्यभेदात् द्वैविध्यादेश्चाभ्युपगतत्वादनित्यस्याप्यनुमानस्य नित्यानित्यसाधकत्वे विरोधाभावात्। कथमितरथा षट्पदार्थी

---

(१) 'यदि'—इति ज-ग०-पु० नास्ति।

(२) 'तव ज्ञान'—इति वि० (B.)।

(३) 'प्रतिपद्यते' इति क-ख-धृतपाठान्तरम्।

न्यायभाष्यम्

प्रेत्यभावानन्तरं फलम्, तस्मिन्—

सद्यः कालान्तरे च फलनिष्पत्तेः संशयः ॥ ४४ ॥

पचति दोग्धीति सद्यः फलमोदनपयसी, कर्षति वपतीति कालान्तरे फलं

न्यायवार्त्तिकम्

(१)सामान्यं प्रतिपद्यमानेन भेदोऽभ्युपगन्तव्यः, (२)भेदं च प्रत्याचक्षाणेन सामान्यमपि प्रत्याख्येयम्। विशेषानाधारस्य सामान्यस्याविषयत्वात्। ते खल्विमे संख्यैकान्तास्तत्त्वज्ञानप्रविवेकाय परीक्षिता इति ॥ ४३ ॥

(इति संख्यैकान्तवादप्रकरणम्)

प्रेत्यभावानन्तरं फलमुद्दिष्टं, तस्मिन्—

सद्यः कालान्तरे च फलनिष्पत्तेः संशयः। काचित् क्रिया सद्यःफला, यथा पचति दोग्धीति, तस्याः सद्यः फलमोदनपयसी क्रियानन्तरं भवत इति, काचित् कालान्तरफला, यथा

न्यायवार्त्तिकतात्पर्यटीका

स्यादेतत् प्रेत्यभावपरीक्षायां क एषामवसरो यदेते एकान्तवादाः परीक्ष्यन्त इत्यत आह—त इति।

अद्वैतादिष्वेकान्तेषु प्रेत्यभावो न तात्त्विको भवेदपि तु काल्पनिकः। न केवलं प्रेत्यभावोऽपि तु षोडशापि पदार्थाः। तस्मादेतेषां यत्तत्त्वज्ञानं तस्य प्रविवेकार्थं ज्ञेयप्रविवेकेन ज्ञानप्रविवेक इति तदर्थमेते परीक्षिता इति तदनेन प्रबन्धेन प्रेत्यभावः परीक्षितः ॥ ४३ ॥

अथोद्देशक्रमानुरोधात् फलमिदानीं परीक्ष्यते। तत्राग्निहोत्रादीनां फलमनन्तरभावि कालान्तरभावि वेति संशयः। एतदुक्तं भवति। कर्मानन्तरं दुःखं च लोकपंक्त्यादि चोपलभ्यते, प्रशंसन्ति हि लौकिका धार्मिकोऽयं साधुतम इति, तत्किमेतावदेवास्य फलमस्तु अथामुष्मिकं स्वर्गादीति। किं प्राप्तं स्वर्गादिफलत्वे कर्मणः स्वरूपेणाकारणत्वाच्चिरनिवृत्ते तस्मिंस्तदुत्पत्तेः

वृत्तिः

सप्तपदार्थी च सिध्येदिति। तस्माद् द्वैतवादनिराकरणपरत्वे एव प्रकरणं सङ्गच्छत इति सङ्क्षेपः ॥ ४३ ॥

समाप्तं सङ्ख्यैकान्तवादनिराकरणप्रकरणम् ॥ ११ ॥

---

(१) 'सामान्यं च प्रतिपद्यमानेन'—इति क-ख-धृतपाठान्तरम्।

(२) 'भेदं वा'—इति क-ख-धृतपाठान्तरम्।

न्यायभाष्यम्

(१)शस्याधिगम इति। अस्ति चेयं क्रिया अग्निहोत्रं जुहुयात् स्वर्गकाम इति एतस्याः

न्यायवार्त्तिकम्

कृष्यति वपतीति, तस्याः कालान्तरे फलं न क्रियानन्तरं शस्याधिगम इति। अस्ति चेयं क्रिया

न्यायवार्त्तिकतात्पर्यटीका

अपूर्वकल्पनायां च प्रधानाङ्गापूर्वाणि भूयांसि कल्पनीयानि। न च तान्युत्पन्नमात्राणि जनयन्ति फलमिति तत्सहकार्यन्तराणि कल्पनीयानीत्यदृष्टकल्पनागौरवात् तदनन्तरदृष्टफलाबाधनाच्च नामुष्मिकं फलं स्वर्गादि, अपि त्वनन्तरदृश्यमानमेव। तत्रापि दुःखफलत्वे उपदेशव्याघाता-ल्लोकपङ्क्तिलाभख्यात्यादिकमेव फलं, तच्च सुखहेतुतया कथंचित्स्वर्गादिपदेनो(२)च्यते। दृष्टो हि सुखहेतौ स्वर्गपदप्रयोगो लोके यथा चन्दनं स्वर्गः सूक्ष्माणि वासांसि स्वर्ग इति प्राप्तम्। एवं प्राप्ते ब्रूमः— स्वर्गपदस्य तावदर्थवादतः,

यन्न दुःखेन संभिन्नं न च ग्रस्तमनन्तरम्।
अभिलाषोपनीतं च तत्सुखं स्वःपदास्पदम्॥

इति सुखं प्रति वाचकत्वमवधारितम्। न च तद्वाचकत्वेनैव चन्दनादौ तत्प्रयोगोपपत्तावनेकार्थत्व-कल्पना युक्ता। यदाहुरन्यायश्चानेकार्थत्वमिति। तस्मान्मुख्योऽयं स्वर्गशब्द उक्तभेदे सुखे। तथा च 'स्वर्गकाम' इत्यत्र मुख्यार्थसंभवे नोपचरितार्थता युक्ता। न चानेकादृष्टकल्पना-भयान्मुख्यार्थपरित्यागो न्याय्यः, प्रमाणसिद्धे नियोगपर्यनुयोगानुपपत्तेः। यथाऽऽहुः—

श्रुतसिद्ध्यर्थमश्रुतोपलब्धौ यत्नवता भवितव्यं न तु श्रुतशैथिल्यमादरणीयमिति। तथा—

प्रमाणवन्त्यदृष्टानि कल्प्यानि सुबहून्यपि।

न चानन्तरदृश्यमानं लोकपङ्क्त्यादि होमाद्यनुष्ठानफलमपि तु तदुपलम्भफलम्। अदाम्भिकानां

वृत्तिः

अथावसरतः फले परीक्षणीये संशयमाह—(सद्यः कालान्तरे च फलनिष्पत्तेः संशयः) पाकादिक्रियायाः सद्यःफलकत्वस्य, कृष्यादेः कालान्तरफलकत्वस्य दर्शनाद् अग्निहोत्रहवनादेर्हिंसादेर्वा फलं साद्यस्कं कालान्तरीयं वेति संशयः॥ ४४॥

---

(१) 'सस्याधिगमः' इति ल-ग-भा०।

(२) 'स्वर्गादिफलत्वेने'ति क-पुस्तकधृतपाठान्तरम्।

न्यायभाष्यम्

फले संशयः। न सद्यः कालान्तरोपभोग्यत्वात् (क)। स्वर्गः फलं श्रूयते, तच्च भिन्नेऽस्मिन्देहभेदादुत्पद्यते इति। न सद्यः ग्रामादिकामानामारम्भ(१)फलमिति ॥ ४४ ॥

न्यायवार्त्तिकम्

अग्निहोत्रं जुहुयादिति। तस्याः फले सन्देहः—किमियं सद्यस्तापादिफला उत कालान्तरफला। न सद्यः (२)कालान्तरोपभोग्यत्वात् (ख)। स्वर्गः फलं श्रूयते। (ग)देशितया च क्रियया नानर्थिकया शक्यं भवितुम्। न चायं तापादिकामोऽग्निहोत्रं जुहोति तेनावगम्यते तां हवनादिक्रियामपेक्षमाणादात्ममनःसम्बन्धात्, विशुद्धेनाभिसन्धिना अनुगृहीतादात्मनि धर्म उत्पद्यत इति। स च कालान्तरेऽप्रतिबध्यमानशक्तिः देशाद्यनुगृहीतः फलं ददाति। तच्च पतिते तस्मिन् देहे भवति देहान्तरापन्नस्यातो न सद्य इति ॥ ४४ ॥

न्यायवार्त्तिकतात्पर्यटीका

प्रच्छन्नमनुतिष्ठतामपि लोकपङ्क्त्यादेरभावात्। तस्मात् सूक्तं—न सद्यः कालान्तरोपभोग्यत्वादिति।

वार्त्तिकं—सद्यस्तापादिफलेति। अतद्गुणसंविज्ञानोऽयं बहुव्रीहिस्तापादीति। तेन लोकपंक्त्यादिकमुच्यते। स्वर्गः फलं श्रूयते इत्ययुक्तम्। स्वर्गकाम इति स्वर्गस्य पुरुषविशेषणत्वेन श्रवणादसाध्यत्वादत आह—देशितया च क्रियया नानर्थिकया भवितव्यम्। आप्तोपदेशः खल्वयमुपदेशस्य कर्मणोऽभिमतोपायतामाह। तत्र कर्मणोऽभिमतापेक्षायां पुरुषविशेषणस्याप्यपेक्षितत्वात्साध्यत्वमिति सिद्धम्। एवं हि लोकपङ्क्त्यादिरग्निहोत्राद्यनुष्ठानसाध्यो भवेद् यदि तत्कामस्य स्वर्गकामस्येवाग्निहोत्राद्यनुष्ठानं देश्येत। न चैतदस्तीत्याह—न च तापादिकाम इति। लोकपङ्क्त्यादिकाम इत्यर्थः। शेषमतिरोहितार्थम् ॥ ४४ ॥

वृत्तिः

तत्रैहिककीर्त्यादीनामेव फलत्वसम्भवे नादृष्टादिकल्पनमिति पूर्वपक्षे सिद्धान्तसूत्रम्—(न सद्यः कालान्तरोपभोग्यत्वात्) कालान्तरोपभोग्यत्वेन प्रतिपादनादित्यर्थः। स्वर्गो हि फलं श्रूयते, स च दुःखासम्भिन्नसुखम्, न चैहिकं सुखं तथा। एवं हिंसादेस्तत्तन्नरकोपभोगः फलं, श्रूयते चेह तत्सम्भव इति भावः ॥ ४५ ॥

---

(१) '-फलमपोति' इति क०। (२) 'न सद्यः फलम्—' इति क-खधृतपाठान्तरम्।

(क) बहुषु पुस्तकेषु वृत्तौ तात्पर्यपरिशुद्धौ च सूत्रत्वेन गृहीतमपि इदं न्यायसूचीनिबन्धे सूत्रत्वेन न गृहीतमिति भाष्येऽलम्भावितम्। एवं च वृत्तौ सूत्रसंख्याधिक्यम्।

(ख) वार्त्तिके सूत्ररूपेण मुद्रितमपीदं वाक्यं भाष्यरूपेणात्र मुद्राप्यते।

(ग) 'चोदितया' इति क-ख-वार्त्तिकयोर्मुद्रितम्।

न्यायभाष्यम्

कालान्तरेणानिष्पत्तिर्हेतुविनाशात् ॥ ४५ ॥

ध्वस्तायां प्रवृत्तौ प्रवृत्तेः फलं न कारणमन्तरेणोत्पत्तुमर्हति, न खलु वै विनष्टात्कारणात्किञ्चिदुत्पद्यते इति ॥ ४५ ॥

प्राङ् निष्पत्तेर्वृक्षफलवत् तत् स्यात् ॥ ४६ ॥

यथा फलार्थिना वृक्षमूले सेकादि परिकर्म क्रियते, तस्मिंश्च प्रध्वस्ते पृथिवीधातुरब्धातुना संगृहीत आन्तरेण तेजसा पच्यमानो रसद्रव्यं (१) निर्वर्तयति, स द्रव्यभूतो रसो वृक्षानुगतः पाकविशिष्टो व्यूहविशेषेण सन्निविशमानः पर्णादि फलं निर्वर्तयति, एवं परिषेकादि कर्म चार्थवत्। न च विनष्टात् फलनिष्पत्तिः। तथा प्रवृत्त्या संस्कारो धर्माधर्मलक्षणो जन्यते, स जातो निमित्तान्तरानुगृहीतः कालान्तरे फलं निष्पादयतीति। उक्तश्चैतत् 'पूर्वकृतफलानुबन्धात्तदुत्पत्ति'रिति ॥ ४६ ॥

न्यायवार्त्तिकम्

कालान्तरेणानिष्पत्तिर्हेतुविनाशात्(२)। व्यावृत्ते हवने व्यावृत्ते च पूर्वशरीरे देहान्तरे फलं श्रूयते, तन्न विनष्टात् कारणाद् युक्तमिति ॥ ४५ ॥

प्राङ् निष्पत्तेर्वृक्षफलवत् तत् स्यात्(३)। न ब्रूमो विनष्टात् कारणात् कार्यमुत्पद्यते, अपि तु अग्निहोत्रहवनादिलक्षणया क्रियया यथोक्तेन विधिना धर्मो जन्यत इत्युक्तम्, तस्मात् फलमिति, यथा फलार्थिना वृक्षस्य मूलसेकादिकर्म क्रियते; न च मूलसेकाद् विनष्टात् फलेन युक्तं भवितुम्, अपि तु मूलसेकादिकर्म कृतं भोक्तुः कर्मापेक्षं पृथिव्यादिधातुमनुगृह्णाति स

न्यायवार्त्तिकतात्पर्यटीका

काला—शात् (सू० ४५) (क) ॥

प्राङ्—स्यात् (सू० ४६) ॥

भाष्यम्—तथा प्रवृत्त्या संस्कारो धर्माधर्मलक्षणो जन्यत इति। नैष पुरुषसंस्कारः स्नानादिजन्य इव बोद्धव्योऽपि तु पुरुषधर्मतामात्रेण संस्कार इत्युच्यते; परमार्थतस्त्वयं धर्मः पुरुषाश्रयोऽपि कर्मणा फले जनयितव्ये तस्यावान्तरव्यापार इति ॥ ४६ ॥

---

(१) 'निवर्त्तयति' इति वि-टि०। (२) '-निष्पत्तेर्हेतुविनाशात्' इति क-ख-धृतपाठान्तरम्। (३) '-वृक्षफलवच्च स्यात्' इति क-ख-धृतपाठान्तरम्।

(क) सूत्रमिदं तात्पर्यकारेण न व्याख्यातम्।

न्यायभाष्यम्

तदिदं प्राङ् निष्पत्तेर्निष्पद्यमानम्—

(१) नासन्न सन्न सदसत् सदसतोर्वैधर्म्यात् ॥ ४७ ॥

प्राङ् निष्पत्तेर्निष्पत्तिधर्मकं नासत्, उपादाननियमात्। कस्यचिदुत्पत्तये किञ्चिदुपादेयं न (२) सर्वं सर्वस्येत्यसद्भावे नियमो नोपपद्यते इति। न सत्, प्रागुत्पत्तेर्विद्यमानस्योत्पत्तिरनुपपन्नेति। (३) न, सदसत् सदसतोर्वैधर्म्यात्

न्यायवार्त्तिकम्

उपगृहीत आन्तरेण तेजसा पच्यमानो रसद्रव्यमभिनिर्वर्तयति, तद्रसद्रव्यं वृक्षमाफलात् सद्य उपसर्पति, तस्मात् पर्णादिफलं निर्वर्तते। एवं च सति विनष्टात् मूलसेकात् फलनिर्वृत्तिः, न च मूलसेकादिवैयर्थ्यमिति ॥ ४६ ॥

तदिदं प्राङ्निष्पत्तेः—

नासन्न सन्न सदसत् सदसतोर्वैधर्म्यात्। प्राङ् निष्पत्तेरुत्पत्तिधर्मकं नासत् उपादान-नियमात्; (४) असत्त्वे समाने उपादाननियमो न प्राप्नोति। सदपि न भवति; (५)विद्यमानस्योत्पत्तिर्व्याहतेति, अस्ति चोत्पद्यते चेति व्याहतम्। न सदसत्, सदसतोर्वैधर्म्यात्

न्यायवार्त्तिकतात्पर्यटीका

इदमिदानीं चिन्त्यते किमेतत्फलमुत्पत्तेः प्रागसद्वा सद्वा सदसद्वाऽनुभयं वेति। अत्र समस्तपक्षाक्षेपेण फलाभावमभिधित्सुः पूर्वपक्षयति। तदिदं फलं निष्पत्तेः प्राक्। (क)

नास—र्म्यात् (सू० ४७)॥ नासन्न सन्न सदसत्। सदसत् कस्मान्न

वृत्तिः

शङ्कते—(कालान्तरेणानिष्पत्तिर्हेतुविनाशात्) कालान्तरेण तत्तत्कर्मणः फलं न सम्भवति हेतोस्तत्कर्मणो विनाशात् ॥ ४६ ॥

समाधत्ते—(प्राङ् निष्पत्तेर्वृक्षफलवत् तत् स्यात्) स्वर्गादिनिष्पत्तेः प्राक् तत् द्वारं स्यात्। दृष्टान्तमाह—वृक्षफलवत्। यथा मूलसेकादिनाशेऽपि तदधीनावयवोप-

---

(१) 'नासन्न सन्न सदसदसत्सतोर्वैधर्म्यात्' इति ज०। (२) 'सर्वम्' इति टि पु० नास्ति। (३) 'सदसत् न' इति ग-ज भा०। (४) 'असत्वेन समानेन'—इति क-खधृतपाठान्तरम्। 'असत्त्वसमाने' इति ख०। (५) 'विद्यमानस्योत्पादो व्याहन्यते'—इति क-खधृतपाठान्तरम्।

(क) अत्र भाष्यवार्त्तिकपदे व्युत्क्रम्य गृहीते, अन्वयश्चानयोः तात्पर्यपरिगृहीतसूत्रांशेनेति बोध्यम्।

न्यायभाष्यम्

सदित्यर्थाभ्यनुज्ञा, असदिति अर्थप्रतिषेधः, एतयोर्व्याघातो वैधर्म्यं व्याघाताद्व्यतिरेकानुपपत्तिरिति ॥ ४७ ॥

प्रागुत्पत्तेरुत्पत्तिधर्मकमसदित्यद्धा। कस्मात्? (क)

उत्पादव्ययदर्शनात् (ख) ॥ ४८ ॥

न्यायवार्त्तिकम्

सदित्यर्थाभ्यनुज्ञा, असदिति तस्य प्रतिषेधः, अभ्यनुज्ञाप्रतिषेधयोः सामानाधिकरण्यमनुपपन्नम्। तस्मान्न सदसदपि। नाप्युभयविपरीतं कार्यं युज्यते, तस्य स्वरूपानिर्देशादिति, न हि तस्य स्वरूपं शक्यं निर्देष्टुमिति ॥ ४७ ॥

प्रागुत्पत्तेरुत्पत्तिधर्मकमसदिति अद्धा—सत्यमिति। कस्मात्?

उत्पादव्ययदर्शनात्। वस्तुनः प्रागनुपलब्धरूपस्य पश्चादुपलब्धिर्या साऽसदुत्पादे सति युज्यते, विनाशश्चोपलब्धरूपस्य पुनरनुपलब्धिरिति। न चैतत् सर्वनित्यवादिनः सम्भवति। न हि सत्पक्ष उत्पादो न च विनाश इति। उत्पादविनाशौ च प्रत्याचक्षाणेन लोको हेयः।

न्यायवार्त्तिकतात्पर्यटीका

भवतीत्यत आह—सदसतोर्वैधर्म्यात्, परस्परविरुद्धधर्मत्वात्। धर्मः स्वभावः, विरोधादित्यर्थः। अथानुभयं कस्मान्न भवतीत्यत आह—नाप्युभयविपरीतमिति ॥ ४७ ॥

सिद्धान्त्याह—प्रागुत्पत्तेरुत्पत्तिधर्मकमसदित्यद्धा।

ननु नासदुत्पद्यते न सन्निरुध्यत इत्याचक्षते सांख्याः, तत्कथमेतदित्यत आह—

उत्पादव्ययदर्शनात् (सू ४८)। यथा नित्यस्वरूपायाश्चितिशक्तेर्नोत्पादो न च व्यय एवं फलस्यापि नित्यस्य तौ न स्यातामित्यर्थः। न हि सत्पक्ष इति सत्कार्यपक्ष

वृत्तिः

चर्यादिद्वारबलेन फलोत्पत्तिस्तथा प्रकृतेऽपि यागादिनाशेऽपि तज्जन्यादृष्टरूपद्वारसत्त्वान्न स्वर्गाद्युत्पत्तिविरोधः ॥ ४७ ॥

ननु कार्यकारणभाव एव न विचारसह इत्याशङ्कते—(नासन्न सन्न सदसत्

(क) ४८तमसूत्रस्य अवतरणिकाव्यतिरिक्तं भाष्यं नोपलभ्यते। न्यायसूचीनिबन्धसम्मतोऽयं सूत्रपाठः। वृत्तिकार-तात्पर्यपरिशुद्धिकारमते विशेषस्तु स्फुट एव।

(ख) "प्रागुत्पत्तेरुत्पत्तिधर्मकमसदित्यद्धा उत्पादव्ययदर्शनादि'त्येकमेव सूत्रमिति केचित्' इति क-ख-वार्त्तिकपुस्तकसम्पादकाः।

न्यायवार्त्तिकम्

अथ लोकोऽयं प्रवर्त्तमानः किमर्थं प्रवर्तते ? ननु चायं प्रवर्तते इदमाप्स्यामि इदं हास्यामीति ? सत्यमेवं प्रवर्तते न पुनः सत्कार्यवादिनः किञ्चिद्धेयमुपादेयं वा विद्यते। प्रतिज्ञादीनां चावयवानामुपादानं व्यर्थम् उत्पादव्ययप्रत्याख्यानात्—न किञ्चित् जायते न किञ्चिद् विनश्यतीति अवयवानामुपादानं व्यर्थं (१) यदि सत्कार्यप्रतिपत्त्यर्थं, प्रतिपत्तेर्विद्यमानत्वाद् व्यर्थमुपादानम्। न हि यद् यस्य लोके भवति स तदुपादानमुपादत्ते इति। अथाज्ञान(२)तिरोभावमात्रार्थमुपादानमिति, एतदपि तादृगेव। न हि अनुपजातविशेषस्याज्ञाननिवृत्तिर्युक्तेति। अथाभिव्यक्त्यर्थमुपादानमिति ? केयमभिव्यक्तिर्नाम ? या उपादानेन क्रियते ? यदि कार्यम् ? व्याहतम्। अथ कार्यधर्मः ? तथाप्यनिवृत्तो व्याघातः। अथोपलब्धिकार्यविषयाभिव्यक्तिः सा क्रियत इति ? न मुच्यसे (३)व्याघातात्। अथ कारणात्मनावस्थितस्य कार्यात्मनाऽवस्थानमभिव्यक्तिः, एवमप्यनिवृत्तो व्याघातः, कार्यात्मनावस्थानमसद्भवतीति। अथ कारणस्य संस्थानविशेषोऽभिव्यक्तिः ? संस्थानविशेषोऽभूत्वा भवतीति व्याघातः। अथास्ति, व्यर्थमुपादानम्। अथ कारणस्य स्वलक्षणपुष्टिरभिव्यक्तिः, न अपूर्वाभ्यागमाभावे स्वलक्षणपुष्टिशब्दार्थं पश्याम इति व्यर्थमुपादानम्। स्वलक्षणपुष्टिश्च पूर्वमभूत्वा पश्चाद् भवतीति (४)व्याघातान्न मुच्यसे(४)। एवं येन येन कल्पेनाभिव्यक्तिरभिधीयते तेन तेन सत्कार्यं बाधत इति ॥ ४८ ॥

न्यायवार्त्तिकतात्पर्यटीका

इत्यर्थः। न किंचिज्जायत इति। न प्रतिज्ञावाक्यात् किंचित्तत्त्वज्ञानं संभवति। किञ्चिच्च संदेहादि न विनश्यतीति अज्ञानतिरोभावः संशयविपर्ययतिरोभावः। कारणस्य हि प्रधानस्य लक्षणं महान् लक्ष्यते हि महता प्रधानमिति। एवं तस्याप्यहङ्कारस्तस्य पुष्टिः स्थूलतेत्यर्थः। पश्चाद्भवतीति केवलकारणावस्थायाः पश्चादिति ॥ ४८ ॥

वृत्तिः

सदसतोर्वैधर्म्यात्) प्राङ् निष्पत्तेरित्यनुवर्त्तते। फलमित्यध्याहर्तव्यम्। तथा चोत्पत्तेः प्राक् फलं नासत्, असत उत्पत्तौ शशशृङ्गादेरप्युत्पत्तिः स्यात्, स्याच्च सिकतादावपि तैलम्। न वा सत्, सत उत्पत्तिविरोधात्। अत एव न सदसत्, सदसतोः सत्त्वासत्त्वलक्षणवैधर्म्यात् ॥ ४८ ॥

---

(१) अतः परम् 'उत्पादव्ययवादिनः'—इति क्वचिदधिकम् इति क-खवार्त्तिकसम्पादकाः।

(२) '-तिरोभावार्थमुपा'—इति ख०।

(३) 'उपघातात्'—इति क-खधृतपाठान्तरम्।

(४) 'व्याघातः'—इति क-खधृतपाठान्तरम्।

न्यायभाष्यम्

यत्पुनरुक्तं प्रागुत्पत्तेः कार्यं नासदुपादाननियमादिति—

बुद्धिसिद्धं तु तदसत् ॥ ४९ ॥

इदमस्योत्पत्तये समर्थं न सर्वमिति प्रागुत्पत्तेर्नियतकारणं कार्यं बुद्धया

न्यायवार्त्तिकम्

यत्पुनरेतत् नासदुपादाननियमादिति ?

'बुद्धिसिद्धं तु तदसत्'। नायं सत्त्वादुपादाननियमोऽपि तु सामर्थ्यात्—इदमनेन (१) शक्यं निर्वर्त्तयितुं (१) नेदमनेनेत्येवं बुद्धिसिद्धं कार्यं कृत्वा यद् यस्योत्पत्तये समर्थं, तत् तस्योपादीयते ; न सर्वं सर्वस्य, न सर्वस्मात् सर्वमुत्पद्यमानं दृष्टमिति। अथोत्पत्तिनियमेन कार्यनियमेन कार्यकारणनियमं प्रतिपद्यते, तेनापि कार्यकारणशब्दयोरर्थो वाच्यः। किमुक्तं भवति कारणमिति ? किमुक्तं च भवति कार्यमिति ? ननु करोतीति कारणं क्रियत इति कार्यम्। यद्यभिव्यक्तिः ? पूर्ववत् प्रसङ्गः। अथ विद्यमानेष्वपि करोत्यर्थो दृष्ट इति मन्यसे, यथा केशान् कुरु पृष्ठं कुर्विति ; न तद्विद्यमानानां हि (२)रचनाविशेषः केशानामविद्यमानः क्रियते, पश्चात् पृष्ठस्यापि मलापगमोऽविद्यमान इति, न (३)विद्यमाने कारणार्थं जात्वपि पश्याम इति तस्मादसदेतत्।

न्यायवार्त्तिकतात्पर्यटीका

यच्चोक्तमुपादाननियमादिति तत्र यदि पुरुषस्योपादाननियमः पदार्थान् तन्तूनेवोपादत्ते न वीरणकटार्थो वीरणमिति ततस्तदुपादानानां तत्र तत्र कार्ये सामर्थ्यपरिज्ञानात् तच्च सामर्थ्यमानुमानिकं तदिदमुच्यते।

बुद्धिसिद्धं तु तदसत् (सू ४९) इति। तदसद्भावि कार्यमनेनैव कारणेन जन्यते नान्येनेत्यनुमानाद् बुद्धिसिद्धमेवेत्यर्थः। अथासत्कार्यपक्षे तन्तव एव पटस्योपादानं न वीरणादीत्ययं नियमो न स्यादिति ब्रूषे तदयुक्तम्। असत्त्वाविशेषेऽपि स्वकारणादुत्पन्नं किंचिदेव किंचित्कार्यं जनयितुं समर्थं नान्यदित्ययं स्वभावविशेषादुपपद्यत इति। अपि च सत्कार्यपक्षे प्रधानोपादानत्वाद्विश्वस्य तस्य चाभेदात् कारणात्मकत्वाच्च कार्यजातस्य सर्वं सर्वात्मकमितीदमिदं नेदमिदानीं नेदमिति नियमो न स्यात् कस्यचित् कुतश्चिद्विवेकहेतोरभावात्।

वृत्तिः

समाधत्ते—(प्रागुत्पत्तेरुत्पत्तिधर्मकमसदित्यद्धा उत्पादव्ययदर्शनात्) उत्पत्तिधर्मकम्, उत्पत्तिधर्मकत्वेनोपलभ्यमानं घटादिकमुत्पत्तेः प्रागसदिति अद्धा तत्त्वम्, उत्पादनाशयोः

(१) 'निर्णयितुं शक्यं'—इति क-खष्टतपाठान्तरम्।

(२) 'वचनाविशेषः' इति ख०।

(३) 'विद्यमानं' इति ख०।

न्यायभाष्यम्

सिद्धमुत्पत्तिनियमदर्शनात् । तस्मादुपादाननियमस्योपपत्तिः सति तु कार्ये प्रागुत्पत्तेरुत्पत्तिरेव नास्तीति ॥ ४९ ॥

न्यायवार्त्तिकम्

यदि ह्यसत् क्रियत इति, खरस्य विषाणं किं न क्रियत इति ? क एवमाह न क्रियत इति, यत् तत् खरस्य विषाणं तत क्रियत इति । अथ कस्मात् खरः विषाणस्य कारणं न भवतीति ? एतत् न जानीमः कस्मात् न भवतीति, न पुनः खरेण विषाणं क्रियमाणं दृष्टमित्यतोऽवसीयते । एतेन शशविषाणं व्याख्यातम् । न तदसत्त्वात् न क्रियते किं तु कारणाभावादिति । न चाऽसत्त्वमुत्पत्तौ हेतुः, अपि तु सतोऽनुत्पत्तेरसदुत्पद्यत इति । असत्त्वात् खरविषाणं नोत्पद्यत इति ब्रुवाणः स्वसिद्धान्तं बाधते । न हि भवत्पक्षे खरविषाणं नास्ति सत्त्वे चासत्त्वे च समाने यस्य कारणमस्ति तदुत्पद्यत इति । सत्कार्यवादिनश्चैवं सर्वलोकव्यवहार उच्छिद्यत इत्युक्तम् नापूर्वं जायते न पूर्वं विनश्यतीति । (१) अथासत्कार्ये किं प्रमाणम् ? न सत्त्वे न चासत्त्वेऽनुमानमस्ति धर्मिण्यविप्रतिपत्तेः ? क तर्हि विवादः ? यदुभयपक्षसम्प्रतिपन्नं तस्य धर्मेषु तदुभयपक्षसम्प्रतिपन्नाः तन्तवस्तान् प्रति पक्षा विभज्यन्ते । एके तावद् ब्रुवते—तन्तुमात्रं पट इति । अपरे तु तन्तवः संस्थानविशेषेणावस्थिता इति । अपरे तु तन्तव एव कार्यात्मना

न्यायवार्त्तिकतात्पर्यटीका

तस्मादस्ति रासभेऽपि विषाणमिति । तत्र तस्यासत्त्वं ब्रुवाणः स्वसिद्धान्तं बाधत इत्याह—असत्त्वाच्च खरविषाणं नोत्पद्यत इति ब्रुवाण इति । सत्त्वे चासत्त्वे च समाने यस्य कारणत्वमस्ति तदुत्पद्यत इति गुडजिह्निका । परमार्थतस्त्वसत्त्वे कारणसामर्थ्यनियमादुत्पत्तिनियमः कल्पते, सर्वात्मना सर्वस्य सत्त्वे तु न नियमहेतुरस्तीत्युक्तप्रायम् । देशयति—अथासत्कार्ये किं प्रमाणम् ? न ह्यनुमानमस्मिन्नर्थे प्रमाणं भवितुमर्हति आश्रयासिद्धेः । नापि प्रत्यक्षं, तेनाप्यसतः स्वातन्त्र्येणानिरूपणादिति भावः । विदिताभिप्राय उत्तरमाह—नासत्त्वे न सत्त्वेऽनुमानमस्ति । यथाऽस्माकमाश्रयासिद्धिदोषादसत्त्वे कार्यस्य नानुमानम् एवं भावेऽपि कार्यस्य सत्त्वे नानुमानमाश्रयासिद्धेरेव । कुतस्तर्ह्यनुमानमित्यत आह—धर्मिण्यविप्रतिपत्तेः अनुमानमस्तीति योजना । तथा सत्याश्रयोऽस्य सिध्यतीत्यर्थः । पुनः पृच्छति—क्वेति । यदि धर्मिण्यविप्रतिपत्तिः क तर्हि विवादः ? उत्तरं यदुभयेति । धर्म्यधिकरणान् सत्कार्यवादिनामेव वादान्विभजते—तान् प्रतीति । तन्तुमात्रं पट इति तन्तुभ्योऽभिन्न इत्यर्थः । कार्यात्मनेति । कार्यं कारणाद्भिन्नाभिन्नमित्यर्थः । असत्कार्य-

(१) 'असत्कार्यवादे'—इति क-पुस्तकपाठान्तरम् ।

न्यायवार्त्तिकम्

अवतिष्ठन्ते इति। अपरेषां (१) धर्मान्तराविर्भावतिरोभावाविति। अपरे तु (२) शक्तिविशिष्टास्तन्तवः पट इत्याहुः। तदेवं विभक्तेषु पक्षेषु तन्तुमात्रेषु तावद्व्यतिरेकः साधयितव्यः। स चोपपादित इति। येऽपि संस्थानविशेषेणावस्थितान् तन्तून् पट इति वर्णयन्ति, तान् प्रति साधनं—प्रागुपलब्धिकालात् संस्थानविशेषशून्याः तन्तवः तत्कारणत्वात् तुर्यादिवदिति। एतेन कार्यात्मनाऽवतिष्ठन्त इति व्याख्यातम्, तथा धर्मान्तराविर्भावतिरोभावाविति। अत एव शक्तिविशेषावस्थितास्तन्तव इति ब्रुवाणः किञ्चिदपि न बाधत इति तान् प्रति न साधनमुच्यत इति। य एवार्थो (३) बुद्धिसिद्धं तदसदिति स एवार्थः शक्तिविशेषावस्थितास्तन्तव इति सर्वेषु चैव पक्षेषु नापूर्वोत्पादमन्तरेण पटबुद्धिः सम्भवतीति व्याघातोऽनिवार्यः। विद्यमानाभिव्यक्त्यर्थास्तन्तवः तदर्थिना नियमेनोपादानात् खनित्रादिवत्? विद्यमानस्याभिव्यक्तिरसतीति अभिव्यक्तिवत् कार्येऽपि प्रसङ्गः, (४) एवं चोक्तोत्तरमेतत्। यत् पुनरेतदुपादाननियमादिति, उपादानं च कारणम्, न च सति कारणार्थं पश्याम इति पूर्ववत् प्रसङ्गः। यदपि खनित्रादिवदिति? न च खनित्राद्युदकार्थमुपादीयते, अपि तु आवरणविगमार्थम्। आवरणविगमश्च विभागः। स चाभूत्वा भवतीति असिद्धो दृष्टान्तः। अथ विभागं न प्रतिपद्येत? सोऽप्यप्रतिपन्नविभागो विभागप्रत्ययोत्पत्तिकारणं पर्यनुयोज्यः। अथाप्राप्तिमात्रात् विभागप्रत्ययं प्रतिपद्यते? साप्यप्राप्तिः किं प्राप्तेरभाव उत प्राप्तेरन्येति? किञ्चातः? यदि प्राप्तेरभावोऽप्राप्तिः, साऽप्राप्तिः कुतो भवतीति वक्तव्यम्। यद्धि प्राप्तिविरोधनिमित्तं तद्विभाग इति नाभावो विभागस्य।

न्यायवार्त्तिकतात्पर्यटीका

पक्षस्तु स्वाभिमतः स्फुटत्वादवान्तरप्रतिबन्धभावाच्च नोपन्यस्तः। उपपादित इति द्वितीयाध्याये। प्रागुपलब्धिकारणादिति। कारणव्यापारात् प्रागित्यर्थः। संस्थानविशेषशून्यतामात्रविवक्षया तुर्यादिदृष्टान्तो न तु प्रागभावो विवक्षितः। शक्तिविशेषावस्थिता इति। कारणव्यापारात् प्रागिति शेषः। अत्र सिद्धसाधनं वयमपि ब्रूमहे, स्वव्यापारात् पटोत्पत्तिनिमित्तात् प्राक् तन्तवः शक्तिविशेषावच्छिन्ना एवेति परेषां सत्कार्यसाधनमुपन्यस्यति। विद्यमानाभिव्यक्त्यर्थास्तन्तवस्तदर्थिना नियमेनोपादानात् खनित्रादिवत्। यथा हि—खनित्रं विद्यमानमेवोदकं मृदपनयनेन व्यनक्तीति। तदेतद् दूषयति—विद्यमानस्याभिव्यक्तिरसतीति व्यक्तिवत्कार्येऽपि प्रसङ्गः। यथा व्यक्तेरसत्या एवोत्पादस्तथा कार्यस्याप्यसत एवोत्पाद इत्यर्थः। खनित्रादिवदिति दृष्टान्तः साध्यविकल इत्याह—यदपीति। साऽप्राप्तिः कुतो भवतीति वक्तव्यमिति। प्राप्तिः खलु संयोगः, स च गुणः, गुणश्च द्रव्यविनाशाद्विनश्येद्

(१) 'धर्माधर्माविर्भाव'—इति ख०।

(२) 'शक्तिविशिष्टान् तन्तून् पट'—इति क-खधृतपाठान्तरम्।

(३) 'बुद्धिसिद्धः' इति ख०।

(४) 'सर्वं' इति ख०।

न्यायवार्त्तिकम्

यद् यत्र प्रतिषिध्यते तदन्यत्र भवतीत्युक्तम्। अप्राप्तिश्च द्वयी—असंश्लेषः संश्लिष्टानां विगमश्च। तत्र यः संश्लिष्टानां विगमः स विभाग इति। तं च खनित्रादीनि कुर्वन्ति। अथ प्राप्तेरन्याऽप्राप्तिः। सापि द्वयी, तत्रापि पूर्ववत् प्रसङ्गः। अथ भिन्नदेशोत्पत्तिं विभागं प्रतिपद्येत, भिन्नदेशे इमे उत्पन्ने इति विशेषणोपादानान्न भिन्नदेशोत्पत्तिर्विभाग इति उत्पन्ने उत्पन्नमिति भिन्नदेशतया भिन्नमिति विभागाद् विभक्तमिति। तान्येतानि (१) भिन्नप्रत्ययनिमित्तानि प्रत्ययभेदानुमेयानि। न हीमे पर्यायशब्दा भिन्नमुत्पन्नं विभक्तं चेति। भिन्नदेशोत्पत्तेश्च प्रतिषिद्धत्वान्न भिन्नदेशोत्पत्तिर्विभाग इति। क्षणिकत्वाद् विभागस्य विभागप्रत्ययोत्पत्तिर्न युक्तेति चेत्? न, सामान्याभिव्यक्तिसंयोगविनाशाभ्यामेव प्रत्ययोत्पत्तिकालानुभवात्—पूर्वं तावत् स्वकारणादुत्पन्नो विभागः सामान्यं व्यनक्ति सामान्याभिव्यक्त्युत्तरकालं (२) विभागप्रत्ययं करोति संयोगं च विनाशयति, संयोगविनाशोत्तरकालं (२*) संयोगाल्लब्धात्मकाद् (३) विनश्यतीति। तदेवमनेकक्षणानुभवादुत्पन्नमात्रो विभागो ध्वंसत इत्यसिद्धम्। तदेवं व्यवस्थितमेतदसदुत्पद्यत इति॥ ४९॥

न्यायवार्त्तिकतात्पर्यटीका

विरोधिगुणान्तराद्वा। तत्र तावदावरणद्रव्यमाव्रियमाणं वोदकं न विनष्टं, येन तयोः संयोगो विनश्येत्, ततस्तद्विरोधिगुणान्तरोत्पादो वक्तव्यः। स एव च संयोगविरोधी गुणो विभाग इत्युच्यत इत्यर्थः। प्राप्तेरभावोऽप्राप्तिरितिपक्षं दूषयित्वा पर्युदासपक्षमाशङ्क्य दूषयति—अथ प्राप्तेरिति। पुनः शङ्कते—अथ भिन्नदेशोत्पत्तिमिति। न च वयं संयोगं विभागं वा गुणमुपेमः। किं तु भिन्नदेशोत्पन्न एव द्रव्ये विभागो निरन्तरोत्पन्न एव संयोग इत्यर्थः। निराकरोति—भिन्नदेश इति। विशेषणोपादानान्न भिन्नदेशोत्पत्तिर्विभागः। कस्माद्? उत्पन्ने उत्पन्नमिति भिन्नदेशतया भिन्नमिति विशेषणं हि स्वानुरक्तं प्रत्ययं विशेष्ये जनयति, न त्वन्यानुरक्तम्। न खलु नीलं विशेषणमुत्पले रक्तप्रत्ययं जनयत्यभ्रान्तस्येत्यर्थः। अपि च क्षणभङ्गं भावानां व्यासेधद्भिरस्माभिर्भिन्नदेशोत्पत्तेः प्रतिषेधान्न भिन्नदेशोत्पत्तिर्विभागः। शङ्कते—क्षणिकत्वाद्विभागस्येति। उत्पद्य हीन्द्रियसन्निकर्षाद्विभागेन स्वविषयं ज्ञानं जनयितव्यम्। न चैतावन्तं कालमसावस्ति क्षणिकत्वेनोत्पन्नापवर्गित्वादित्यर्थः। निराकरोति—न सामान्याभिव्यक्तीति। एतद्विभजते—पूर्वं तावदुत्पन्नो विभागः सामान्यं व्यनक्तीति। स्वकारणसमवायः सत्तासमवायो वा उत्पत्तिः। तद्विशिष्ट उत्पन्न इत्युच्यते। येषां सामान्य-

---

(१) 'भेदप्रत्ययनिमित्तानि' इति ख०। 'प्रत्ययभेदनिमित्तानि'—इति क ख-धृतपाठान्तरम्।

(२) अयमंशः क-पु० नास्ति।

(३) 'संयोगाद् द्वयात्मकात्'—इति ख०।

न्यायभाष्यम्

आश्रयव्यतिरेकाद् वृक्षफलोत्पत्तिवदित्यहेतुः ॥ ५० ॥

मूलसेकादि परिकर्म फलं चोभयं वृक्षाश्रयम्, कर्म चेह शरीरे, फलं चामुत्र (१) इत्याश्रयव्यतिरेकादहेतुरिति ॥ ५० ॥

न्यायवार्त्तिकम्

आश्रयव्यतिरेकाद् वृक्षफलोत्पत्तिवदित्यहेतुः । यच्च मूलसेकादि कर्म यच्च पर्णादि फलं तदुभयं वृक्षाश्रयम् । कर्म त्विह कर्मफलं चान्यत्रेति आश्रयव्यतिरेकाद् वृक्षफलोत्पत्तिवदित्यसिद्धो दृष्टान्तः ॥ ५० ॥

न्यायवार्त्तिकतात्पर्यटीका

ग्रहपुरःसरं विशेषज्ञानं, तन्मते न सामान्यं व्यनक्ति, तदुत्तरकालं च स्वप्रत्ययं जनयतीत्युक्तम् । एतदुक्तं भवति न वयं बौद्धा इव पूर्वापरकालमात्रावस्थितिलक्षणां क्षणिकतां विभागादीनामाचक्ष्महे, किं त्वाशुतरविनाशलक्षणां, सा च द्वित्रादिक्षणस्थायिनां चिरस्थायिभ्यो घटादिभ्यो व्यावृत्तात्मा शक्या वक्तुमिति ॥ ४९ ॥

देहाद्यतिरिक्तमात्मानं नित्यं परलोकिनमसन्तं मन्यमान आह—

आश्रयव्यतिरेकाद् वृक्षफलोत्पत्तिवदित्यहेतुः (सू. ५०) । मूलसेकफलोत्पादयोरेकवृक्षाश्रयत्वम् । कर्मणस्तु होमादेराश्रयः शरीरम् । न चामुष्मिकस्य स्वर्गादेः शरीरमाश्रयः तस्मिन्नष्टेऽस्य भावात् । तस्मादाश्रयव्यतिरेकात् स्वर्गादेर्वृक्षफलोत्पत्तिवदित्ययं दृष्टान्तः स्वर्गफलत्वे होमस्याहेतुरित्यर्थः ॥ ५० ॥

वृत्तिः

प्रमितत्वात् । इदानीं पट उत्पन्न इदानीं पटो विनष्ट इति प्रत्ययात् ; सतस्तु नोत्पत्तिसम्भवः, उत्पन्नस्य पुनरुत्पादप्रसङ्गात् । यद्यपि नाशस्य न तत्र हेतुत्वं तथाऽप्यनुत्पन्नभावस्य नाशायोगादुत्पादसाधकत्वेन नाश उक्तः ॥ ४९ ॥

असत उत्पत्तौ नियमो न स्यादित्यत्राह—(बुद्धिसिद्धं तु तदसत्) तत् कार्यम् असत् प्रागभावप्रतियोगि, 'बुद्धिसिद्धम्' बुद्ध्या विषयीकृतम् । तथा हि इह तन्तुषु पटो भविष्यतीति ज्ञात्वा कुविन्दः प्रवर्त्तते, न तु पटोऽस्तीति ज्ञात्वा, तथा सति सिद्धत्वेन ज्ञाते इच्छाभावात् प्रवृत्त्यनुपपत्तेः । सिकतादौ तु (२)पटो भविष्यतीति न ज्ञायते, किन्तु

(१) 'उत्पत्त्याश्रय'—इति वि० ।

(२) 'तैलम्' इति ख० ।

न्यायभाष्यम्

प्रीतेरात्माश्रयत्वादप्रतिषेधः ॥ ५१ ॥

प्रीतिरात्मप्रत्यक्षत्वादात्माश्रया, तदाश्रयमेव कर्म धर्मसंज्ञितं, धर्मस्यात्मगुणत्वात् तस्मादाश्रयव्यतिरेकानुपपत्तिरिति ॥ ५१ ॥

न पुत्रपशुस्त्रीपरिच्छदहिरण्यान्नादिफलनिर्देशात् ॥ ५२ ॥

पुत्रादि फलं निर्दिश्यते न प्रीतिः, 'ग्रामकामो यजेत' 'पुत्रकामो यजेते'ति तत्र यदुक्तं प्रीतिः फलमित्येतदयुक्तमिति ॥ ५२ ॥

न्यायवार्त्तिकम्

प्रीतेरात्माश्रयत्वादप्रतिषेधः इति। आश्रयव्यतिरेकोऽसिद्ध इति सूत्रार्थः यत्रैव कर्म तत्रैव कर्मफलमिति ॥ ५१ ॥

न (क) पुत्रस्त्रीपशुपरिच्छदहिरण्यान्नादि(१)फलनिर्देशात्। पुत्रादिफलत्वेन निर्दिश्यते न पुत्राद्यात्मनि वर्त्तत इति ॥ ५२ ॥

न्यायवार्त्तिकतात्पर्यटीका

अस्त्यात्मा स्वर्गोपभोगसमर्थः शरीरादिव्यतिरिक्तः कर्त्तेत्युपपादितमित्याशयवानाह—

प्रीतेरात्माश्रयत्वादप्रतिषेधः (सू. ५१)। (ख) अस्तु स्वर्गाद्यात्माश्रयं, तथाप्यव्यापको हेतुः पुत्रादिफलेभ्यो निवृत्तेरिति। देशयति—

न पुत्रपशुस्त्रीपरिच्छदहिरण्यान्नादिफलनिर्देशात् (सू. ५२)। (ग) परिहरति—

वृत्तिः

मे भविष्यतीति ज्ञायते एव। कुत इति चेत्? अनुभवं पृच्छ। किञ्च त्वन्मतेऽपि कुतो न ज्ञायते? तत्र पटाभावादिति चेत् कथमिदं निरणायि? पटात् पूर्वं तन्तुसिकतयोस्तुल्यत्वात्। तन्तुत्वेनाश्रयतेति चेत्? तन्तुत्वेन कारणतेत्येव स्यात्, प्रवृत्त्यनुरोधात् ॥ ५० ॥

नन्वस्तु हेतुफलभावस्तथापि वृक्षफलवदिति दृष्टान्तवैषम्यान्नादृष्टसिद्धिरित्याशयेन शङ्कते—(आश्रयव्यतिरेकाद् (घ) वृक्षफलवदित्यहेतुः) प्राङ् निष्पत्तेर्वृक्षफलवदित्यहेतुः। कुतः? आश्रयव्यतिरेकात्, येन कायेन कर्म कृतं तस्य नाशात्। वृक्षस्थले तु (१) तस्य वृक्षस्य सत्त्वात् सलिलसेकादिकं परिकर्मोपयुज्यते इत्यभिमानः ॥ ५१ ॥

(१) '-न्नादिषु'—इति क-ख-धृत-पाठान्तरम्। (२) 'तस्य' इति ल-पु० नास्ति।

(क) वार्त्तिके मूलसूत्रतः पदानां क्रमविपर्ययो विशेषः। न्यायसूचीनिबन्धसम्मतः पाठो गृहीतः।

(ख) ५१-सूत्रे अवतरणिकातिरिक्ता टीका नास्ति।

(ग) ५२-सूत्रे अवतरणिकातिरिक्ता टीका नास्ति।

(घ) इमिकामते सूत्रे उत्पत्तिपदं नास्तीति द्रष्टव्यम्। अयमेव पाठः साधीयस्तया प्रतिभाति।

न्यायभाष्यम्

तत्सम्बन्धात् फलनिष्पत्तेस्तेषु फलवदुपचारः ॥ ५३ ॥

पुत्रादिसम्बन्धात् फलं प्रीतिलक्षणमुत्पद्यते इति पुत्रादिषु फलवदुपचारः, यथान्ने प्राणशब्दो 'अन्नं वै प्राणाः' इति ॥ ५३ ॥

न्यायवार्त्तिकम्

तत्सम्बन्धात् फलनिष्पत्तेस्तेषु फलवदुपचारः । पुत्रादिसम्बन्धात् फलं प्रीतिर्भवति, तत्कारणत्वात् पुत्रादि फलशब्देनाभिधीयते, यथान्नसाधनाः प्राणाः, अन्नं वं (१)प्राणा इति । उपचारश्च प्राणाभावात् लोकप्रयुक्तवाक्यानुविधानेन क्रियत इति ॥ ५३ ॥

(इति फलपरीक्षाप्रकरणम्)

न्यायवार्त्तिकतात्पर्यटीका

तत्संबन्धात्फलनिष्पत्तेस्तेषु फलवदुपचारः (सू. ५३)। स्वर्गोऽपि तावत् स्वर्गतया न काम्यते, किं तु भोग्यतया, एवं सति कैव कथा पुत्रादिषु। तेऽपि भोग्यतयैव काम्यन्ते, न तु स्वरूपं भोग्यमिति तत्साध्यं सुखं भोग्यम् । तस्मात् पुत्रादिसंबन्धात्तदुत्पत्तेः सुखोत्पत्तेः तेषु यथा फलशब्दप्रयोगस्तथा तेषु पुत्रादिष्वित्यर्थः। सूत्रार्थकथनेनैव भाष्यवार्त्तिके व्याख्याते ॥ ५३ ॥

वृत्तिः

समाधत्ते—(प्रीतेरात्माश्रयत्वादप्रतिषेधः) आश्रयव्यतिरेकादिति हेतुर्न युक्तः, प्रीतेः सुखस्य स्वर्गिशरीरावच्छेदेन जायमानस्यात्मवृत्तित्वाद् यागादिसामानाधिकरण्यादित्यर्थः ॥ ५२ ॥

क्वचित् सामानाधिकरण्यसम्भवेऽपि सर्वत्र न तथेति शङ्कते—(न पुत्रपशुस्त्रीपरिच्छदहिरण्यान्नादिफलनिर्देशात्) पुत्रादीनां (२)फलत्वेन निर्देशात्(२) सामानाधिकरण्यं न सम्भवतीति भावः ॥ ५३ ॥

---

(१) 'प्राणिनः प्राणा'—इति क-ख-धृतपाठान्तरम् ।

(२) 'फलनिर्देशात्' इति भ० ।

न्यायभाष्यम्

फलानन्तरं दुःखमुद्दिष्टम्, उक्तं च 'बाधनालक्षणं दुःख'मिति। तत् किमिदं प्रत्यात्मवेदनीयस्य सर्वजन्तुप्रत्यक्षस्य सुखस्य प्रत्याख्यानम्, आहोस्विदन्यः कल्प इति ?

अन्य इत्याह। कथम् ? न वै सर्वलोकसाक्षिकं सुखं शक्यं प्रत्याख्यातुम्। अयं तु जन्ममरणप्रबन्धानुभवनिमित्ताद् दुःखान्निर्विण्णस्य दुःखं जिहासतो दुःखसंज्ञा-

न्यायवार्त्तिकम्

फलानन्तरं दुःखमुद्दिष्टं (१) लक्षितं च—बाधनालक्षणं दुःखम् (क) इति। तत् किमिदं सर्वलोकसाक्षिकस्य सुखस्य (२) प्रत्याख्यानम् आहोस्विदन्यः कल्प इति। अन्य इत्याह। कथम् ? न वै सर्वलोकसाक्षिकं सुखं शक्यं प्रत्याख्यातुम्। अयन्तु जन्ममरणप्रबन्धानुभवनिमित्ताद् दुःखात् निर्विण्णस्य दुःखभावनोपदेशः। कथं नामायं सर्वं दुःखमिति भावयेत्

न्यायवार्त्तिकतात्पर्यटीका

फलानन्तरं दुःखपरीक्षणम्। तत्रेयं परीक्षा भवतु दुःखं बाधनालक्षणमनुभूयमानम्। यत्पुनरिदं सुखं प्रत्यात्ममनुकूलवेदनीयं तत्कथं दुःखमनुभवविरोधात्। शरीरेन्द्रियबुद्धयश्च यदि दुःखहेतुतया दुःखं, कस्मात् सुखहेतुतया सुखमेव न भवन्ति ? सेयमतिभीरुता सकललोकयात्राविरोधिनी। यथाऽऽहुः—न हि मृगाः सन्तीति शालयो नोप्यन्ते। न हि भिक्षवः सन्तीति स्थाल्यो नाधिश्रीयन्त इति।

तस्मान्मांसार्थीव कण्टकानुद्धृत्य मांसमश्नन्नानर्थं कण्टकजन्यमाप्नोतीत्येवं प्रेक्षावान् दुःखमुद्धृत्येन्द्रियादिसाधनं सुखं भोक्ष्यते। सन्ति च विविधदुःखपरिवर्जनहेतवो दृष्टाः परिदृष्टसामर्थ्या अन्वयव्यतिरेकाभ्यामित्यभिप्रायवान् पूर्वपक्षी गुडजिह्विकया संशयान इव पृच्छति—तत् किमिदमिति। सिद्धान्तिन उत्तरम्—अन्य इत्याह सूत्रकार इति। तेनैवाभिप्रायेण पूर्वपक्षी पृच्छति—कथम्। उत्तरम्—न वै सर्वलोकसाक्षिकमिति। अयं तु दुःखभावनोपदेशः किमर्थमित्यत आह भाष्यकारः—दुःखहानार्थः। किंभूतस्य दुःखहानमित्यत आह—जन्ममरणप्रबन्धस्य अनुभवः प्राप्तिः तन्निमित्ताद्, दुःखोपदेशपरिशीलनेन निर्विण्णस्य अलंप्रत्ययवतः, अत एव दुःखं जिहासत इति योजनीयम्। स्वाभिप्रायेण पूर्वपक्षी पृच्छति—

---

(१) 'उक्तं च' इति क-ख-धृतपाठान्तरम्।

(२) 'सर्वलोकक्स'—इति क-ख-धृतपाठान्तरम्।

(क) १ अ, १ आ, सू २१।

न्यायभाष्यम्

भावनोपदेशो दुःखहानार्थ इति। कया युक्त्या? सर्वे खलु सत्त्वनिकायाः सर्वाण्युत्पत्तिस्थानानि सर्वः पुनर्भवो बाधनानुषक्तो दुःखसाहचर्याद्बाधनालक्षणं दुःखमित्युक्तमृषिभिः, दुःखसंज्ञाभावनमुपदिश्यते अत्र च हेतुरुपादीयते—

विविधबाधनायोगाद् दुःखमेव जन्मोत्पत्तिः ॥ ५४ ॥

जन्म जायते इति शरीरेन्द्रियबुद्धयः शरीरादीनां (१) च संस्थानविशिष्टानां प्रादुर्भाव उत्पत्तिः। विविधा च बाधना, हीना मध्यमा उत्कृष्टा चेति। उत्कृष्टा नारकिणाम्, तिरश्चां तु मध्यमा, मनुष्याणां तु हीना, देवानां हीनतरा वीतरागाणां च। एवं सर्वमुत्पत्तिस्थानं विविधबाधनानुषक्तं पश्यतः सुखे तत्साधनेषु च शरीरेन्द्रिय-

न्यायवार्त्तिकम्

भावयंश्च विरज्येत विरक्तो मुच्यते इति। कथं पुनरयं सर्वं दुःखमिति भावयति? सर्वे सत्त्वनिकायाः सर्वः पुनर्भवः सर्वमुत्पत्तिस्थानं दुःखसाहचर्याद् दुःखमित्युक्तमृषिभिः।

दुःखभावनमुपदिश्यते, तत्र च हेतुरुपादीयते—

विविधबाधनायोगाद् दुःखमेव जन्मोत्पत्तिरिति। तत्र जायत इति जन्म शरीरेन्द्रियबुद्धयो व्यपदिश्यन्ते शरीरादीनां प्रादुर्भाव उत्पत्तिः, जन्मन उत्पत्तिः जन्मोत्पत्तिः।

न्यायवार्त्तिकतात्पर्यटीका

कया युक्त्या? उत्तरम्—सर्वे खलु सत्त्वनिकाया इति। उत्पत्तिः सुखदुःखहेतुभूता विषयसंपत्तिः, तस्याः संस्थानानि भुवनानि। आ सत्यलोकादा चावीचेरिति। एतदुक्तं भवति—यदि दुःखवर्जनेन शक्यते सुखमुपादातुं ततस्तादृशं सुखमनुकूलवेदनीयं कः प्रज्ञावान् प्रजह्यात्। न च तादृशमस्ति सुखं क्वचिदपि सर्वस्य दुःखाविनाभाविनः केवलस्योपादातुमशक्यत्वात्। न हि मधुविषसंपृक्तमन्नं विषमपहृत्य शक्यं मधुमात्रमुपादातुमिति। तस्मान्नेदं सुखस्य प्रत्याख्यानमपि तु सुख एव दुःखभावनमुपदिश्यते। अत्र हेतुरुपादीयते ऋषिणा—

विविधबाधनायोगाद् दुःखमेव जन्मोत्पत्तिः (सू. ५४)।

वृत्तिः

यद्यपि पुत्रादीनामैहिकफलत्वात् (२)तत्राश्रयव्यतिरेकभावाच्छङ्कैव न, तथाऽपि यत्र जन्मान्तरीयधनादिकमपि फलं स्यात् तत्रापि नानुपपत्तिरित्याशयेनाह—(तत्सम्बन्धात्

(१) 'च' इति फ-झा-ग पु० नास्ति।

(२) 'तत्रान्वयव्यति'—इति ल०।

न्यायभाष्यम्

बुद्धिषु दुःखसंज्ञा व्यवतिष्ठते। दुःखसंज्ञाव्यवस्थानात् सर्वलोकेष्वनभिरतिसंज्ञा भवति। अनभिरतिसंज्ञामुपासीनस्य सर्वलोकविषया तृष्णा विच्छिद्यते, तृष्णाप्रहाणात्सर्वदुःखाद्विमुच्यते इति। यथा विषयोगात्पयो विषमिति बुध्यमानो नोपादत्ते, अनुपाददानो मरणदुःखं नाप्नोति ॥ ५४ ॥

दुःखोद्देशस्तु न सुखस्य प्रत्याख्यानम्, कस्मात् ?

न सुखस्यान्तरालनिष्पत्तेः (१) ॥ ५५ ॥

न खल्वयं दुःखोद्देशः सुखस्य प्रत्याख्यानम्। कस्मात्? सुखस्यान्तरालनिष्पत्तेः। निष्पद्यते खलु बाधनान्तरालेषु सुखं प्रत्यात्मवेदनीयं शरीरिणां, तदशक्यं प्रत्याख्यातुमिति ॥ ५५ ॥

न्यायवार्त्तिकम्

विविधा च बाधना हीना मध्यमोत्कृष्टा चेति। शेषं भाष्ये। अनेनाभिप्रायेण (क)दुःखोपदेशो न सुखं (२)प्रत्याख्यातुम् ॥ ५४ ॥

न सुखस्याप्यन्तराल(३)निष्पत्तेः। यस्माद्बाधनान्तराले सुखमुत्पद्यमानं प्रत्यक्षदृष्टमिति ॥ ५५ ॥

न्यायवार्त्तिकतात्पर्यटीका

जन्मन उत्पत्तिः, सा दुःखमेव भावयितव्या विविधबाधनायोगादिति। ॥ ५४ ॥

कस्मात् पुनर्दुःखमेव स्वरूपतो न भवतीत्यत आह—

न सुखस्यान्तरालनिष्पत्तेः (सू० ५५)। न खल्वयं दुःखोद्देशो दुःखकथनं सुखस्य प्रत्याख्यानम् ॥ ५५ ॥

वृत्तिः

फलनिष्पत्तेस्तेषु फलवदुपचारः) तत्सम्बन्धात् पुत्रादिसम्बन्धात्, फलनिष्पत्तेः प्रीत्युत्पत्तेः, तेषु पुत्रादिषु फलवदुपचारः फलत्वेन व्यपदेशः, यथा 'अन्नं वै प्राणिनां प्राणा' इति ॥ ५४ ॥

समाप्तं फलपरीक्षाप्रकरणम् ॥ १२ ॥

(१) 'सुखस्याप्यन्तरालनिष्पत्तेः'—इति टि०।

(२) 'प्रत्याख्यातम्' इति ख०।

(३) -'निर्वृत्तेः'—इति क-ख-धृतपाठान्तरम्।

(क) क-वार्त्तिके 'दुःखो(द्दे)शो' इति मुद्रितम्।

न्यायभाष्यम्

अथापि—

बाधनाऽनिवृत्तेर्वेदयतः पर्येषणदोषादप्रतिषेधः ॥ ५६ ॥

सुखस्य, दुःखोद्देशेनेति प्रकरणात् पर्येषणं प्रार्थना विषयार्जनतृष्णा, पर्येषणस्य दोषो यदयं वेदयमानः प्रार्थयते (१) तच्चास्य प्रार्थितं न सम्पद्यते, सम्पद्य वा विपद्यते, न्यूनं वा सम्पद्यते, बहुप्रत्यनीकं वा सम्पद्यते इति एतस्मात्पर्येषणदोषान्नानाविधो मानसः सन्तापो भवति एवं वेदयतः पर्येषणदोषाद्बाधनाया अनिवृत्तिः। बाधनाऽनिवृत्तेर्दुःखसंज्ञाभावनमुपदिश्यते (२)। अनेन कारणेन दुःखं जन्म न तु सुखस्याभावादिति।

न्यायवार्त्तिकम्

इतश्च—

बाधनानिवृत्तेर्वेदयतः पर्येषणदोषादप्रतिषेधः। सुखस्य दुःखोद्देशेनेति प्रकरणात् यस्मादयं वेदयन् इदं मे सुखसाधनमिदं मे दुःखसाधनमिति सुखसाधनमाप्तुं दुःखसाधनं हातुं

न्यायवार्त्तिकतात्पर्यटीका

इतश्च दुःखसंज्ञाभावनं न सुखस्य प्रत्याख्यानं दुःखोद्देशेनेत्याह—

बाधनानिवृत्तेर्वेदयतः पर्येषणदोषादप्रतिषेधः (सू० ५६)। यस्मादिदं मे सुखसाधनमिति वेदयन् प्रार्थयते सुखसाधनम्। तच्च उक्ताद् बहुप्रकाराद्बाधनाहेतुरिति दुःखभाव-

वृत्तिः

अथ क्रमप्राप्तं दुःखं परीक्षणीयं, तत्र च 'बाधनालक्षणं दुःखम्' इत्युक्तम्, तदर्थस्तु— दुःखत्वजातिमत्त्वमित्युक्तं, तच्च शरीरादौ दुःखेऽव्याप्तमित्याशङ्क्याह—(विविधबाधनायोगाद् दुःखमेव जन्मोत्पत्तिः) जननयोगाद् जन्म शरीरादिकं, तदुत्पत्तिस्तत्सम्बन्धः विविधबाधनायोगाद् दुःखमिति व्यपदिश्यते, न तु वास्तवमेव तद् दुःखम्। तथा च विविधदुःखानुषक्ततया हेयत्वार्थं दुःखमिति भावनीयमुपदिश्यते ॥ ५५ ॥

ननु दुःखभावनेन किं सुखं प्रत्याख्यायते, न चैतत् शक्यमत आह—(न सुखस्यान्तरालनिष्पत्तेः) दुःखानां मध्ये सुखस्याप्युत्पत्तेस्तत्प्रत्याख्यानस्याशक्यत्वात् ॥ ५६ ॥

(१) 'तत्र'—इति ग-ज-झा-फ०।

(२) 'उद्दिश्यते'—इ त ग-ज-झा०

न्यायभाष्यम्

अथाप्येतदनूक्तम्—

"कामं कामयमानस्य यदा कामः (१) समृध्यति ।
अथैनमपरः कामः क्षिप्रमेव प्रबाधते ॥"

(२) "अपि चेदुदनेमि समन्ताद् (३) भूमिमिमां लभते सगवाश्वाम् । न स तेन धनेन धनैषी तृप्यति (४) किन्नु सुखं धनकामे ॥" इति ॥ ५६ ॥

न्यायवार्त्तिकम्

प्रयतते सुखसाधनानां प्राप्तये चास्य यतमानस्यानेकविधस्तापोऽनुपप्लवते । ततस्तापानुभवात् सर्वं दुःखमित्युच्यते, न (५) सुखस्याभावादिति । अयमेव चार्थो मुनिना श्लोकेन वर्णितः—

कामं कामयमानस्य यदा कामः समृध्यति ।
अथैनमपरः कामः क्षिप्रमेव प्रबाधते ॥ इत्येवमादि ॥ ५६ ॥

न्यायवार्त्तिकतात्पर्यटीका

नयोपदेशनमिति । कामं काम्यं कामयमानस्य यदा कामः समृध्यति संपन्नो भवति । अथानन्तरमेनं पुरुषमपरः काम इच्छा क्षिप्रं बाधते, स्वर्गादिप्राप्तावपि स्वाराज्यादि कामयते । एवं तत्प्राप्तौ प्राजापत्यादीति अस्येच्छा तदुपायप्रार्थनादिना दुःखेन प्रबाधत इत्यर्थः । समन्तादुदनेमि यथा भवति तथा भूमिं लभत इति योजना ॥ ५६ ॥

वृत्तिः

ननु सुखदुःखसम्बन्धाविशेषात् सुखभावनमेव किन्नेष्यत इत्यत्राह—(बाधनानिवृत्तेर्वेदयतः पर्येषणदोषादप्रतिषेधः) दुःखभावनस्य न प्रतिषेधः, वेदयतः सुखसाधनत्वं जानतः पर्येषणदोषात् पर्येषणे सुखार्थं प्रवर्त्तने दोषात् । सुखार्थं प्रवर्तमानो हि

(१) 'समृध्यते' इति ख-ग-भा० ।
(२) 'अपि चेदुदनेमिं समन्ताद्' इति ख-ज० ।
(३) 'भूमिमालभते'—इति ग० । 'भूमिं लभते' इति फ० ।
(४) 'किन्नु'—इति वि-टि-ज० ।
(५) 'सुखस्याविर्भावादिति'—इति क-ख-धृतपाठान्तरम् ।

न्यायभाष्यम्

दुःखविकल्पे सुखाभिमानाच्च ॥ ५७ ॥

दुःखसंज्ञाभावनोपदेशः क्रियते। अयं खलु सुखसंवेदने व्यवस्थितः सुखं परमपुरुषार्थं मन्यते, न सुखादन्यन्निःश्रेयसमस्ति सुखे प्राप्ते चरितार्थः कृतकरणीयो भवति। मिथ्यासङ्कल्पात्सुखे तत्साधनेषु च विषयेषु संरज्यते, संरक्तः सुखाय घटते, घटमानस्यास्य जन्मजराव्याधिप्रायणानिष्टसंयोगेष्टवियोगप्रार्थितानुपपत्तिनिमित्तमनेकविधं यावद् दुःखमुत्पद्यते, तं दुःखविकल्पं सुखमित्यभिमन्यते। सुखाङ्गभूतं दुःखम्, न दुःखम् (१) अनासाद्य शक्यं सुखमवाप्तुं, तादर्थ्यात्सुखमेवेदमिति सुखसंज्ञोपहतप्रज्ञो जायस्व म्रियस्व (२) चेति संधावतीति संसारं

न्यायवार्त्तिकम्

दुःखविकल्पे सुखाभिमानाच्च। यश्च सुखार्थं यतमानस्य दुःखविकल्पो भवति तं सुखाङ्गभावात् सुखमित्यभिमन्यमानः पुनस्तदुपादत्ते पुनः पुन (३) र्जायत (४) इति न संसारमतिवर्तते (४*) तस्याः सुखसंज्ञायाः प्रतिपक्ष उपदेशोऽयं (५) क्रियते सर्वं (५*) दुःखमिति।

न्यायवार्त्तिकतात्पर्यटीका

नन्वयं यद्यप्यन्तराले सुखान्यनुभवति, तथाऽपि दुःखसंभेदमाकलयन् अनुपदिष्टोऽपि स्वयमेव निवर्त्स्यति कृतमस्य दुःखभावनोपदेशेनेत्यत आह—

दुःखविकल्पे सुखाभिमानाच्च (सू. ५७)। शास्त्रशिष्टानां विवेकिनां खलु विविधबाधनानुषङ्गाद् अनवयवेन सुखमात्रं दुःखमेवेति विनिश्चयोऽक्षिपत्रकल्पा हि ते। तद् यथेषीकतूलसंपर्कादप्यक्षिपत्रं दूयते, न गात्रावयवान्तराणि, तथा मृदुचित्ततया विवेकिनो दूयन्ते, अविवेकिनस्तु प्रणयकलहकुपितकुरङ्गशावलोचनाङ्गनाऽलक्तकरसार्द्रपादपल्लवपातमपि शिरसि रहसि सुखमभिमन्यमाना घनपुलककञ्चुकाञ्चिततनवः सान्द्रानन्दाश्रुप्लुतनयना निर्वृण्वन्तीति तान् प्रत्ययमुपदेशोऽर्थवानित्यर्थः। जायस्व म्रियस्व चेति संधावतीति।

---

(१) 'अनापाद्य'—इति ल-ग-ज०।

(२) 'सन्धावेति' इति ल-ग-झा०।

(३) '-निवर्त्तते' इति ख०।

(४) 'न संसारमभिवर्तते'—इति क-ख-धृतपाठान्तरम्।

(५) 'क्रियत इति सर्वं' इति ख०।

न्यायभाष्यम्

नातिवर्त्तते। तदस्याः सुखसंज्ञायाः प्रतिपक्षो दुःखसंज्ञाभावनमुपदिश्यते, दुःखानुसङ्गाद् दुःखं जन्मेति, न सुखस्याभावात्।

यद्येवं कस्माद् दुःखं जन्मेति नोच्यते? सोऽयमेवं वाच्ये यदेवमाह दुःखमेव जन्मेति तेन सुखाभावं ज्ञापयतीति जन्म विनिग्रहार्थीयो वै खल्वयमेवशब्दः। कथम्? न दुःखं जन्म स्वरूपतः, किं तु दुःखोपचारात्; एवं सुखमपीति एतदनेनैव (१) निर्वर्त्यते न तु दुःखमेव जन्मेति ॥ ५७ ॥

न्यायवार्त्तिकम्

यद्येवं कस्माद् दुःखं जन्मेति नोच्यते? सोऽयमेवं वक्तव्ये यदाह दुःखमेवेति तेन सुखाभावं ज्ञापयति। यदपि तदन्तराले सुखमुपजायते तदपि दुःखमेव दुःखानुषङ्गात्, नाभावादिति। जन्मविनिग्रहार्थीयो वै खल्वयमेव शब्दः—जन्मनोऽनेन विनिग्रहं शास्ति सर्वं दुःखमिति भावयन् दुःखसाधनानि नोपादत्ते, अनुपाददानो विमुच्यते इति ॥ ५७ ॥

(इति दुःखपरीक्षाप्रकरणम्)

न्यायवार्त्तिकतात्पर्यटीका

पुनर्जायते पुनर्म्रियते जनित्वा म्रियते मृत्वा जायते तदिदं संधावनव्यापारप्रचय इत्यर्थः।

चोदयति—कस्माद् दुःखं जन्मेति नोच्यत इति। यदि दुःखभावनोपदेशो जन्मनि एवं सत्येवकारः किमर्थ इत्यर्थः। परिहरति—जन्मविनिग्रहार्थीय इति। विनिग्रहो विनिवृत्तिः स एवार्थः प्रवर्तत इति जन्मविनिग्रहार्थीयः। यथा च मत्वर्थीय इति। एतदुक्तं भवति—जन्म दुःखमेवेति भावयितव्यं नात्र मनागपि सुखबुद्धिः कर्तव्या (२) अनेकानर्थ-परंपरायाम् अपवर्गप्रत्यूहप्रसङ्गादिति ॥ ९७ ॥

वृत्तिः

अर्जनपालनादौ विविधाभिर्बाधनाभिरुपतप्यतेऽतो दुःखभावनं वैराग्यहेतुतयोप-दिश्यते ॥ ५७ ॥

---

(१) 'निवर्त्त्यते' इति ज०। 'वर्त्तते' इति ठि०।

(२) 'अनेकार्थपरम्परापातेन' इति क-तात्पर्यधृतपाठान्तरम्

न्यायभाष्यम्

(१) दुःखोद्देशानन्तरमपवर्गः, स प्रत्याख्यायते—

ऋणक्लेशप्रवृत्त्यनुबन्धादपवर्गाभावः ॥ ५८ ॥

ऋणानुबन्धान्नास्त्यपवर्गः—"जायमानो ह वै ब्राह्मणस्त्रिभि (२) ऋर्णै (३) ऋणवान् जायते, ब्रह्मचर्येण ऋषिभ्यो यज्ञेन देवेभ्यः प्रजया पितृभ्य" (क) इति ऋणानि, तेषामनुबन्धः स्वकर्मभिः सम्बन्धः, कर्मसम्बन्धवचनात् "जरामर्यं वा एतत्सत्रं यदग्निहोत्रं दर्शपूर्णमासौ चे"ति "जरया ह (४) वा एष तस्मात् (५) सत्राद्वि-मुच्यते मृत्युना ह वे"ति' ऋणानुबन्धादपवर्गानुष्ठानकालो नास्तीत्यपवर्गाभावः।

न्यायवार्त्तिकम्

दुःखोद्देशानन्तरमपवर्गः (६) स प्रत्याख्यायते—

ऋणक्लेशप्रवृत्त्यनुबन्धादपवर्गाभावः इत्यनेन सूत्रेण। ऋणानुबन्धान्नास्त्यपवर्गः। शेषं भाष्ये। अनुबन्धः सदा करणीयता, नायमृणानुबन्धात् कदाचित् मुच्यते जन्मप्रभृति यावत्

न्यायवार्त्तिकतात्पर्यटीका

दुःखोद्देशानन्तरमपवर्गः उद्दिष्टो लक्षितश्चेति शेषः। स प्रत्याख्यायते—

ऋणक्लेशप्रवृत्त्यनुबन्धादपवर्गाभावः (सू० ५८)। तद्व्याचष्टे भाष्यकारः। ऋणानुबन्धादिति। अस्ति हि—"ऋणानि त्रीण्यपाकृत्य मनो मोक्षे निवेशयेत्। अनपाकृत्य मोहेन मोक्षमिच्छन् व्रजत्यधः"॥ ऋणत्रयापाकरणेनैव वयःसमाप्तेर्मोक्षनिवेशक्षणो नास्तीत्यप-

वृत्तिः

ननु दुःखमनुभवतः स्वत एव निवृत्तिसम्भवात् दुःखभावनोपदेशो व्यर्थ इत्यत आह (दुःखविकल्पे सुखाभिमानाच्च)—दुःखस्य विविधः कल्पो यत्र तादृशे प्रतिषिद्ध-हिंसाभोजनमैथुनादौ प्रवृत्तिर्मा भूदित्ययमुपदेश इति भावः॥ ५८॥

समाप्तं दुःखपरीक्षाप्रकरणम्॥ १३॥

(१) 'दुःखोपदेशानन्तरम्' इति ल-ग-भा०।
(२) 'ऋणैः' इति नास्ति टि०।
(३) 'ऋणवान्' इति ल-ग-ज-भा०।
(४) 'वा' इति नास्ति ल-ग-ज-भा०।
(५) 'सत्राद्' इति नास्ति टि०।
(६) 'सम्प्रत्याख्यायते' इति ख०।

न्यायभाष्यम्

क्लेशानुबन्धान्नास्त्यपवर्गः क्लेशानुबद्ध (१) एवायं म्रियते, क्लेशानुबद्धश्च जायते, नास्य क्लेशानुबन्धविच्छेदो गृह्यते ।

प्रवृत्त्यनुबन्धान्नास्त्यपवर्गः—जन्म प्रभृत्ययं यावत्प्रायणं वाग्बुद्धिशरीरारम्भेणाविमुक्तो गृह्यते, तत्र यदुक्तं 'दुःखजन्मप्रवृत्तिदोषमिथ्याज्ञानानामुत्तरोत्तरापाये तदनन्तराभावादपवर्ग' इति, तदनुपपन्नमिति ॥ ५८ ॥

अत्राभिधीयते । यत्तावदृणानुबन्धादिति ऋणैरिव ऋणैरिति—

प्रधानशब्दानुपपत्तेर्गुणशब्देनानुवादो निन्दाप्रशंसोपपत्तेः ॥ ५९ ॥

ऋणैरिति नायं प्रधानशब्दः । यत्र खल्वेकः प्रत्यादेयं ददाति, द्वितीयश्च प्रतिदेयं गृह्णाति तत्रास्य दृष्टत्वात् प्रधानमृणशब्दः । न चैतदिहोपपद्यते, प्रधानशब्दा-

न्यायवार्त्तिकम्

प्रायणमिति । क्लेशानुबन्धादपवर्गो नास्ति—क्लेशानुबद्ध एवायं जायते, क्लेशानुबद्ध एवायं म्रियते इति । प्रवृत्त्यनुबन्धादपवर्गो नास्ति—न कर्म करोति ॥ ५८ ॥

यत्तावदृणानुबन्धादिति—

प्रधानशब्देनानुपपत्तेर्गुण(२)शब्देनानुवादो निन्दाप्रशंसोपपत्तेः इति ।

(क)ऋणेति नायं प्रधानशब्दः प्रत्यादेयदान-प्रतिदेयग्रहणासम्भवात् । यत्र खलु एकः

न्यायवार्त्तिकतात्पर्यटीका

वर्गाभाव इत्यर्थः । क्लेशानुबन्धान्नास्त्यपवर्गः । नानुच्छिन्ननिदानः संसारः शक्य उच्छेत्तुमित्यर्थः । प्रवृत्त्यनुबन्धादित्यस्यापीयमेव व्याख्या ॥ ५८ ॥

एवं पूर्वपक्षयित्वा सिद्धान्तमुपक्रमते—अत्राभिधीयते यत्तावदृणानुबन्धादिति । जायमान इत्यस्य प्रधानार्थतानुपपत्त्या गुणशब्दत्वं साधयितुं दृष्टान्तलाभाय ऋणशब्दस्य प्रथमं गुणशब्दत्वमाह—प्रधानशब्दानुपपत्तेरिति ।

प्रधा—त्तेः (सू० ५९) । तद्व्याचष्टे—ऋणैरिति । नायं प्रधानशब्द इति ।

---

(१) 'एवासौ' इति टि० ।

(२) '-शब्देनायमर्थवादो'—इति क-खधृतपाठान्तरम् ।

(क) क-ख-वार्त्तिकपुस्तकयोः 'ऋणेति' इत्ययमंशोऽधिक'तया पादटीकायां मुद्रापितः । भाष्ये 'ऋणै'रिति ।

न्यायभाष्यम्

नुपपत्तेः, गुणशब्देनायमनुवाद ऋणैरिव ऋणैरिति। (क) प्रयुक्तोपमं चैतद् (१) यथाऽग्निर्माणवक इति—अन्यत्र दृष्टश्चायमृणशब्द इह प्रयुज्यते, यथाऽग्निशब्दो माणवके। कथं गुणशब्देनानुवादः? निन्दाप्रशंसोपपत्तेः। कर्मलोपे ऋणीव ऋणादानान्निन्द्यते, कर्मानुष्ठाने च ऋणीव ऋणदानात्प्रशस्यते स एवोपमार्थ इति।

न्यायवार्त्तिकम्

प्रत्यादेयं ददाति इतरः प्रतिदेयं गृह्णाति तत्रायमृणशब्दः प्रधानं भवति, अन्यत्र भाक्त इति। तस्माद् गुणशब्देनायमनुवाद इति। यथा अग्निर्माणवक इति। तत्राग्निशब्दो दहनादिसमर्थे तेजोविशेषे वर्तते, स तत्र वर्तमानः तत्सामान्यादतथाभूते माणवके प्रयुज्यते 'अग्निर्माणवक' इति। न पुनरग्निशब्दो माणवकसमानाधिकरणो दहनादिसमर्थं माणवकं प्रतिपादयति, अपि तु येऽग्नेः पिङ्गलपाटलत्वादयो धर्माः तत्सम्बन्धिनं माणवकं प्रतिपादयति, तद्द्वारकश्च प्रयुज्यमानोऽयं शब्दो गुणोपकरणत्वाद् गौणो भवति। तथा च ऋणशब्दः। (२) अप्रयुक्तोपमञ्चेदं वाक्यम् 'ऋणवान् जायते' इति। उपमाऽत्र लुप्ता द्रष्टव्या, ऋणवानिव जायत इति क उपमानार्थः? अस्वातन्त्र्यम्; ऋणवान् यथा अस्वतन्त्रः एवमयं जायमानः कर्मसु अस्वतन्त्रो वर्तत इति। जायमान इति चायं गुणशब्द एव, न मुख्यः सम्भवति। न हि मातृतः कुमारे जायमाने लोहितपाणिपादास्येऽध्ययनादिकर्मोपपत्तिरिति अतो गृहस्थे जायमाने इति। किं पुनर्गृहस्थस्य जायमानेन कुमारेण

न्यायवार्त्तिकतात्पर्यटीका

ऋणवानिवास्वतन्त्रस्तेषु तेषु कर्मसु नाधिकारीति निन्दा। तदभावे तु स्वतन्त्र इति प्रशंसा। एवं जायमान इति गुणशब्दो न मुख्य इति। कस्मात् पुनर्न

वृत्तिः

अथ क्रमप्राप्ततयाऽपवर्गः परीक्षणीयः, तत्र च तदर्थकप्रवृत्तिकालाभावात्तदभाव इति पूर्वपक्षयति—(ऋणक्लेशप्रवृत्त्यनुबन्धादपवर्गाभावः) ऋणाद्यनुबन्धादपवर्गानुष्ठानकालाभावादपवर्गाभावः स्यात्। तथा च श्रूयते—"जायमानो ह वै ब्राह्मणस्त्रिभिर्ऋणैर्ऋणवान् जायते, ब्रह्मचर्येण ऋषिभ्यः, यज्ञेन देवेभ्यः, प्रजया पितृभ्यः" इति। ऋषिभ्यः ऋषिऋणेभ्यः ब्रह्मचर्येण मुच्यते। देवेभ्यो देवऋणेभ्यो यज्ञेन मुच्यते, प्रजयाऽपत्येन, पितृभ्यः पितृणेभ्यो मुच्यते। ऋणापाकरणेनैव जीवनापगमः, तथा च

---

(१) 'यथा' इति ज-पु० नास्ति।

(२) 'प्रयुक्तोपमं चेदम्' इति ख०।

(क) 'प्रयुक्तोपमम्' इति सकलादर्शपुस्तकानुसारेण मुद्रितम्। न्यायवार्त्तिके तु 'अप्रयुक्तोपमम्' इति दृश्यते। क-पुस्तके तु अप्रयुक्तोपममिति वार्त्तिकानुसारेण मुद्रितम्।

न्यायभाष्यम्

जायमान इति गुणशब्दो विपर्ययेऽनधिकारात् । जायमानो ह वै ब्राह्मण इति (१) च गुणशब्दो गृहस्थः सम्पद्यमानो जायमान इति ; यदायं गृहस्थो जायते तदा कर्मभिरधिक्रियते मातृतो (२) जायमानस्यानधिकारात् । यदा तु मातृतो जायते कुमारो न तदा कर्मभिरधिक्रियते अर्थिनः शक्तस्य चाधिकारात् । अर्थिनः कर्मभिरधिकारः (३) कर्मविधौ कामसंयोगस्मृतेः 'अग्निहोत्रं जुहुयात्स्वर्गकाम' इत्येवमादि । शक्तस्य च (३*) प्रवृत्तिसम्भवात् (४) शक्तस्य कर्मभिरधिकारः प्रवृत्तिसम्भवात् । (४*) शक्तः खलु विहिते कर्मणि प्रवर्त्तते नेतर इति । उभयाभावस्तु प्रधानशब्दार्थे । मातृतो जायमाने कुमारे उभयमर्थिता शक्तिश्च न भवतीति ।

न्यायवार्त्तिकम्

सामान्यम् ? क्रियासम्बन्धः अग्निहोत्रादिहवनक्रियासम्बन्धसामान्याद् गृहस्थो जायत इति । यथा मातृतः कुमारको जायमानः शरीरादिभिः सम्बध्यते एवमग्निहोत्रहवनादिक्रियासम्बन्धसामान्येन जायत इति । कस्मात् ? शक्तस्यार्थिनश्च कर्मभिरधिकारात्, शक्तश्चार्थी च कर्मभिरधिक्रियते । मातृतः कुमारके जायमाने न शक्तिः न चार्थितेति, उभयं तु गृहस्थे जायमाने, तस्माद् गृहस्थो जायमानोऽभिधीयत इति ।

न्यायवार्त्तिकतात्पर्यटीका

मुख्य इत्यत आह—मातृतो जातमात्रस्यैवानधिकारात् । कस्मादनधिकार इत्यत आह—अर्थिनः शक्तस्य चाधिकारात् । कस्मादर्थिन इत्यत आह—कर्मविधौ अग्निहोत्रं जुहुयात् स्वर्गकाम इत्यादौ कामसंयोगश्रुतेः । न च बालकः सुखदुःखप्राप्तिपरिहारकामोऽपि विवेकेन स्वर्गपुत्रपश्वन्नादि कामयत इति । शक्तस्य च प्रवृत्तीति । न ह्यशकनीयमर्थमशक्तं प्रति

वृत्तिः

श्रूयते 'तदेतत् सत्रं यदग्निहोत्रं दर्शपूर्णमासौ च, जरया ह वा एष तस्माद्विमुच्यते मृत्युना च' इति । ऋणापाकरणमन्तरेण च न तत्र प्रवृत्तिः । तथा च स्मर्यते—

"ऋणानि त्रीण्यपाकृत्य मनो मोक्षे निवेशयेत् ।
अनपाकृत्य मोक्षं तु सेवमानो व्रजत्यधः ॥" (क)

---

(१) 'च-शब्दो' ल-ग-ज-झा० ।

(२) 'जातमात्रस्या-' इति टि० ।

(३) अयमंशः टि-पु० नास्ति ।

(४) अयमंशः टि-पु० नास्ति ।

(क) मनुसं० ६ अः श्लोः ३५ ।

न्यायभाष्यम्

न भिद्यते च लौकिकाद्वाक्याद्वैदिकं वाक्यं प्रेक्षापूर्वकारिपुरुषप्रणीतत्वेन। तत्र (१) लौकिकस्तावदपरीक्षकोऽपि न जातमात्रं कुमारकमेवं ब्रूयादधीष्व यजस्व ब्रह्मचर्यं चरेति। कुत (२) एवम् ऋषिरुपपन्नानवद्यवादी उपदेशार्थेन प्रयुक्त उपदिशति ? न खलु वै (३) नर्त्तकोऽन्धेषु प्रवर्त्तते न (४) गायको बधिरेष्विति।

उपदिष्टार्थविज्ञानं चोपदेशविषयः। यश्चोपदिष्टमर्थं विजानाति तं प्रत्युपदेशः क्रियते, न चैतदस्ति जायमानकुमारक इति। गार्हस्थ्यलिङ्गं च मन्त्रब्राह्मणं कर्माभिवदति। यच्च मन्त्रब्राह्मणं कर्माभिवदति तत्पत्नीसम्बन्धादिना गार्हस्थ्यलिङ्गेनोपपन्नम्, तस्माद् (५) गृहस्थोऽयं जायमानोऽभिधीयते इति।

अर्थित्वस्य (६) चाविपरिणामे जरामर्यवादोपपत्तिः।

न्यायवार्त्तिकम्

अर्थित्वस्याविपरिणामे जरामर्यवादोपपत्तिः—यच्चेदं ब्राह्मणमाजरसं कर्मभिः सम्बन्धं शास्ति तदन्यथा सम्भवतीति अर्थित्वस्याविपरिणामे जरामर्यवादोपपत्तिः (७) यदार्थित्वाविपरिणामः (७*) यदार्थित्वं (८) विपरिणतं भवति (८*) तदानेन अग्निहोत्रं सन्न्यसनीयम्।

न्यायवार्त्तिकतात्पर्यटीका

वेद आप्तोपदेशरूपो विधातुमर्हति। न च बालकः शक्तोऽविद्वत्त्वादिना। अत एव तिर्यग्देवर्षिपङ्गुशूद्रत्र्यार्षेयागामनधिकारः सामर्थ्याभावात्। न केवलं वैदिकोऽयमीदृशो व्यवहारोऽपि तु लौकिकोऽपीत्याह—न भिद्यते चायं लौकिकात्। तद् व्याचष्टे—लौकिकस्तावदिति। उपपन्नानवद्यवादीति। उपपन्नं प्रमाणेन अनवद्यं पुनरुक्तदोषेण अनपेक्षितमुपदेष्टव्यं यन्न भवति तदित्यर्थः। न्यायप्राप्तमिममर्थं लिङ्गदर्शनमुपोद्बलयतीत्याह—गार्हस्थ्यलिङ्गं च मन्त्रब्राह्मणं कर्माभिवदतीति। गार्हस्थ्यस्य लिङ्गं पत्नी यस्मिन् कर्मणि तत्तथोक्तम्। "पत्न्यवेक्षितमाज्यं भवति" "पत्न्य उद्गायन्ति" "क्षौमे वसानावग्नी आदधीयाता"मित्येवमादि।

तदनेन गार्हस्थ्यात् पूर्वावस्था तावदृणानुबद्धा न भवतीत्युक्तम्। संप्रत्युत्तरावस्थापि न ऋणानुबद्धेत्याह—यदा चार्थिनोऽधिकारस्तदा अर्थित्वस्याविपरिणामे जरामर्यवादोपपत्तिः। तेन यदुक्तमृणापाकरणेन वयःपर्यवसानान्नास्ति मोक्षावसरस्तदपाकृतं भवति।

---

(१) 'लौकिकस्तु वेदपरीक्षकोऽपि' इति टि०। (२) 'एष ऋषिः' इति ख-ग-झा०। (३) 'निवर्त्तकोऽन्धेषु' इति टि०। (४) 'गायनो' इति फ-ज-ग०। (५) 'गृहस्थो जायमानो' इति टि०। (६) 'चापरिणामे'—इति वि-टि०। (७) 'यदार्थित्वविपरिणामः' इति ख०। (८) 'यदा त्वर्थित्वं विपरीतं भवति'—इति क-ख-घृतपाठान्तरम्।

न्यायभाष्यम्

यावच्चास्य फलेनार्थित्वं न विपरिणमते न निवर्तते तावदनेन कर्मानुष्ठेयमित्युपपद्यते जरामर्यवादस्तं प्रतीति। जरया ह वेत्यायुषस्तुरीयस्य चतुर्थस्य प्रव्रज्यायुक्तस्य वचनं 'जरया ह वा एष एतस्माद्विमुच्यते' इति। आयुषस्तुरीयं चतुर्थं प्रव्रज्यायुक्तं जरेत्युच्यते, तत्र हि प्रव्रज्या विधीयते; (१)अत्यन्तजरासंयोगे जरया ह वेत्यनर्थकम्। 'अशक्तो विमुच्यते' इत्येतदपि नोपपद्यते, स्वयमशक्तस्य बाह्यां शक्तिमाह—'अन्तेवासी वा जुहुयाद् ब्रह्मणा स परिक्रीतः, क्षीरहोता वा जहुयाद्धनेन स परिक्रीत' इति।

न्यायवार्त्तिकम्

आयुषस्तुरीयभागं प्रव्रज्यायुक्तमाह जरेति। यावज्जीवसंयोगे हि जरया ह वा इत्यनर्थकं (२)यस्मात् स्वयमशक्तस्य बाह्या शक्तिर्विहिता सत्यर्थित्वे अन्येन हवनं शास्ति। यदा पुनरर्थित्वं विपरिणतं तदा सन्न्यासो विधीयत इति। कस्मात् पुनरेतदेवमुच्यते सत्यर्थित्वे अग्निहोत्रहवनमिति? कर्मविधौ कामसंयोगश्रुतेः—यस्मात् सर्वस्मिन् कर्मणि कामविधिः श्रूयते स्वर्गकाम इति (३) यथोपदिष्टार्थः विद्वांश्चोपदेशविषयः, यश्चोपदिष्टमर्थं विजानाति तं प्रत्युपदेशः क्रियते न गायनो बधिरेषु प्रवर्तते न नर्त्तकोऽन्धेषु, न चोपदेशविज्ञानं बालकेष्वस्ति तस्मान्न तं (४)प्रत्युपदिश्यत इति। न भिद्यते च लौकिकात्—लौकिकोऽपि तावदपरीक्षको न जातमात्रं कुमारकमेवं ब्रूयाद् अधीष्व यजस्व ब्रह्मचर्यं चरेति। कुत एवमृषिरुपपन्नानवद्यवादी ब्रूयादिति।

न्यायवार्त्तिकतात्पर्यटीका

अविपरिणामपदार्थव्याख्यानं न निवर्तत इति। तुरीयस्येत्यस्य व्याख्यानं चतुर्थस्येति। प्रायेण पञ्चसप्ततिवर्षेष्वतिवाहितेषु अर्थतृष्णा तनूभवति। अत्यन्तसंयोगे तु जरया ह वेत्यनर्थकम्। मृत्युना वेत्यनेनैव सिद्धेरिति शेषः। यद्युच्यते अशक्ततोपलक्षणमेतज्जरया ह वा मृत्युना वेति, तेन कस्यानर्थक्यमित्यत आह—अशक्तो विमुच्यत इत्येतदपि नोपपद्यत इति।

वार्त्तिकम्—यावज्जीवसंयोगे हि जरया ह वेत्यनर्थकमिति। मृत्युना वेत्यनेनैव गतार्थत्वादित्यनुक्त्वा भाष्योक्ता द्वितीया युक्तिरभिहिता वार्त्तिककृता—यस्मात्स्वयमशक्तस्येत्यनेन।

---

(१) 'अत्यन्तसंयोगे' इति वि-टि०।

(२) 'यस्मादयमंश'—इति ख०।

(३) 'यथोपदिष्टार्थम्' इति ख०।

(४) 'प्रत्युपदेशः' इति ख०।

न्यायभाष्यम्

अथापि विहितं वानूद्येत कामाद्वार्थः परिकल्प्येत? विहितानुवचनं न्याय्यमिति। ऋणवानिवास्वतन्त्रो गृहस्थः कर्मसु प्रवर्त्तते इत्युपपन्नं वाक्यस्य

न्यायवार्त्तिकम्

अथापि विहितं वा अनूद्येत (१) कामाद्वा अर्थः कल्प्येतेति। विहितानुवचनं न्याय्यम्, तत्रानुपपन्नप्रमाणकस्यार्थस्याभिधानं कामतः प्रकल्प्येत। यो ह्यर्थः प्रमाणतो (२)न सम्भवति(२*) तस्य यदभिधानं तत्र कामतः प्रकल्पनं सम्भवति यथा जायमानः कुमारकः ऋणवान् भवतीति। उपपन्नप्रमाणकस्याभिधानमनुवचनम्, यथा जायमानशब्दो (३) गृहस्थवचन इति। कथमवगम्यते गृहस्थ इति? यज्ञसाधनत्वात्, यस्मात् यजमानो यज्ञाङ्गं भवति। साधने तु प्रयत्नव्यापारो दृष्टः न फले यथा पाकसाधनेषु काष्ठादिषु न पाके न लोष्टादिषु (४) असाधनेषु। शेषं भाष्ये॥ ५९॥

न्यायवार्त्तिकतात्पर्यटीका

यज्ञसाधनत्वादिति। यज्ञकर्तृत्वादित्यर्थः। एतदेव स्फुटयति। यस्माद्यजमानो यज्ञाङ्गं भवति। यथाऽऽह भगवान् जैमिनिः—'पुरुषश्च कर्मार्थत्वा'दिति।

स्यादेतत्। यद्यपि गृहस्थस्य यज्ञादिविधानान्तराणि सन्ति तथाऽपि जायमानस्त्रिभिर्ऋणैरिति वाक्यं बालस्यापि यज्ञादि विधास्यतीत्येतां शङ्कां विमर्शपूर्वमपाकरोति—अथापि विहितं वा अनूद्येत कामाद्वाऽर्थः प्रकल्प्येतेति। न तावज्जायमानो ह वै इति वाक्ये विधिविभक्तिरस्ति, तेन सिद्धानुवादः स्वरसतः प्रतीयते। यदि तु तस्यार्थस्य सिद्धिर्वाक्यान्तराद्वा प्रमाणान्तराद्वा कथमपि न कल्पेत, ततो 'वचनानि त्वपूर्वत्वा'दिति न्यायाद्विधित्वमस्य कल्प्येत; सन्ति तु शतशस्तदर्थविधायकानि वाक्यानि विभक्तिमन्तीति को जात्वस्य स्वेच्छामात्रेण विधित्वं कल्पयेत्? तस्माद्विहितानुवचनमेव न्याय्यमिति जायमानशब्दो जघन्यवृत्तिरिति युक्तमुत्पश्यामः। स्यादेतत्। जायमानशब्दोऽनुपचरितार्थः स्वभावतो मातुरुदराद्विभागमाह। स कथंचिदनुवादानुरोधेन जघन्यवृत्तिः कल्पनीयः। तद्वरं मुख्यार्थानुरोधेन विधानमेव

वृत्तिः

एवं क्लेशानुबन्धादपि, पुरुषो हि रागादिभिस्तत्तत्कर्माण्यारभमाणः क्लेशानुबद्ध एव दृश्यते, तत् कथमपवर्गः? एवं प्रवृत्त्यनुबन्धादपि, पुरुषो हि वाग्बुद्धिशरीरैस्तत्तत्कर्माणि आरभमाणो धर्माधर्मौ यावज्जीवमुपार्जयन् कथमपवृज्यतामिति॥ ५९॥

---

(१) 'कामार्थत्वादर्थः' इति क-ख-धृतपाठान्तरम्।

(२) 'यावदभिधानं न सम्भवति' इति ख०।

(३) 'गृहस्थ इति' इति ख०।

(४) 'साधनेषु' इति ख०।

न्यायभाष्यम्

सामर्थ्यम्। फलस्य (१) हि साधनानि प्रयत्नविषयो न फलं, तानि सम्पन्नानि फलाय (२) कल्पन्ते। विहितं च जायमानम्, विधीयते च (३)जायमानं, तेन यः सम्बद्ध्यते सोऽयं जायमान इति।

प्रत्यक्षविधानाभावादिति चेन्न, प्रतिषेधस्यापि प्रत्यक्षविधानाभावादिति। प्रत्यक्षतो विधीयते गार्हस्थ्यं ब्राह्मणेन, यदि चाश्रमान्तरमभविष्यत्तदपि (४)व्यधास्यत

न्यायवार्त्तिकतात्पर्यटीका

कल्प्यताम्। एवं सति श्रुतिरनुरोधिता भवति। अस्ति च बालकस्यापि फलोत्पादनयोग्यता, तदात्मनः फलं प्रति समवायिकारणत्वात्। तेन यद्यपि जातमात्रस्य फलसाधनानुष्ठानयोग्यता नास्ति, तथाऽपि फलोत्पादं प्रति योग्यताऽस्ति, फलेन च प्रयोजनं न तत्साधनेनेत्यत आह—फलस्य साधनानि हि प्रयत्नविषयो न फलमिति। अयमभिसंधिः—विधिर्हि स्वव्यापारे कर्तृतया पुरुषं नियुङ्क्ते, प्रयत्नश्चास्य व्यापारः संभवति विषये न शक्यो निवर्त्तयितुमिति स्वविषयमपेक्षते। न चास्य साक्षात्फलं विषयो भवितुमर्हति, उद्देश्यतामात्रेण तु भवेत्। नैतावता प्रयत्नोऽस्य निर्वृणोति यावदयं साक्षादभिनिर्वर्तनीयं न प्राप्नोति। तदुपायस्य साक्षादभिनिर्वर्त्तनीय इति फलोद्देशप्रवृत्तस्य पुरुषप्रयत्नस्य निर्वृणोति यावदुपायो विषयः। न च बालकस्य तदुपायमविदुषस्तत्र सामर्थ्यमस्ति। असमर्थश्चाकर्त्ता कथमात्मानं प्रयत्नेन व्याप्नुयात्। अव्याप्नुवंश्च कथमधिकारीति जायमानशब्दो जघन्यवृत्तिरेव न्याय्य इति सिद्धम्। विहितं च जायमानमिति ऋणवाक्यात् प्राक्, विधीयते च ऋणवाक्यादूर्ध्वमित्यर्थः।

यदुक्तं तत्र हि प्रव्रज्या विधीयत इति, तदमृष्यमाण आह—प्रत्यक्षविधानाभावादिति चेत्। शङ्कां निराकरोति—न प्रतिषेधस्यापि विधानाभावात्। शङ्कां विभजते—प्रत्यक्षत इति। परमाप्तो हि भगवानीश्वरोऽनुकम्पया भूतोपदेशाय प्रवृत्तो यद् गार्हस्थ्यमेवाश्रममुपदिशति ततोऽवगच्छामो न सन्त्याश्रमान्तराणि भूतेभ्यो हितानीत्यर्थः। अत

वृत्तिः

समाधत्ते—(प्रधानशब्दानुपपत्तेर्गुणशब्देनानुवादो निन्दाप्रशंसोपपत्तेः) जायमान इत्याद्यनुवादो (५)हि न प्रधानशब्दः, न हि जायमानः कर्मण्यधिक्रियते, तथा च

(१) 'हि' इति फ-पुः नास्ति। (२) 'कल्पयन्ते' इति ग०। (३) 'जायमानम्' इति भाः पुः नास्ति। (४) 'व्याधास्यत्' इति ल-ग-भा०। (५) 'हि प्रधान्' इति भ०।

न्यायभाष्यम्

प्रत्यक्षतः प्रत्यक्षविधानाभावान्नास्त्याश्रमान्तरमिति। न, प्रतिषेधस्यापि प्रत्यक्षतो विधानाभावात्। न प्रतिषेधोऽपि वै ब्राह्मणेन प्रत्यक्षतो विधीयते—न सन्त्याश्रमान्तराणि एक एव गृहस्थाश्रम इति प्रतिषेधस्य प्रत्यक्षतोऽश्रवणादयुक्तमेतदिति।

अधिकाराच्च विधानं विद्यान्तरवत्। यथा शास्त्रान्तराणि स्वे स्वेऽधिकारे प्रत्यक्षतो विधायकानि (१) नार्थान्तराभावाद् एवमिदं ब्राह्मणं गृहस्थशास्त्रं स्वेऽधिकारे प्रत्यक्षतो विधायकं नाश्रमान्तराणामभावादिति।

न्यायवार्त्तिकतात्पर्यटीका

एवाहुः ऐकाश्रम्यं त्वाचार्याः प्रत्यक्षविधानाद् गार्हस्थ्यस्येति। निराकरणं विभजते—न प्रतिषेधस्येति। स्मृतीतिहासपुराणानि तावदविवादं विदधति चातुराश्रम्यमुपलभ्यन्ते, यदि प्रत्यक्षया श्रुत्या प्रतिषिध्यन्ते ततस्तद्विरोधेनौदुम्बरीसर्ववेष्टनवत् तत्राप्रमाणानि स्युः। न च तत्प्रतिषेधः श्रुतेः साक्षादवगम्यते। तस्मात् स्मृत्यादिविहितं चातुराश्रम्यमप्रतिषिद्धं श्रुत्या न शक्यं परित्यक्तुमित्यर्थः।

न चाविधानेन तत्प्रतिषेधानुमानमित्याह—अधिकाराच्चेति। गार्हस्थ्योपदेशस्याधिकारात्तस्यैव विधानं नाश्रमान्तरस्य, न त्वाश्रमान्तराभावात्। न हि व्याकरणं शब्दं व्युत्पादयत् प्रमाणाद्यभावमाक्षिपति।

अपि च मा भूत् प्रत्यक्षविधानं, श्रुतौ ससाधनापवर्गाभिधानानि चातुराश्रम्याभिधानानि च प्रत्यक्षाण्युपलभ्यन्ते वचनानि, तान्यपूर्वत्वाद्विधानानि अपवर्गस्य ससाधनस्य चातुराश्रम्यस्य

वृत्तिः

भाष्यम्—'यदा तु मातृतो जायते कुमारको न तदा कर्मभिरधिक्रियते, अर्थिनः शक्तस्य चाधिकारात्' इति। 'जायमान' इत्यनेन को वा व्यावर्तनीयः? न ह्यजातस्य प्रसक्तिरस्ति, येनासौ व्यावर्त्तनीयः, तथा च भाष्यं—'जायमान इति गुणशब्दो विपर्ययेऽनधिकारात्' इति। तथा च जायमान इत्यनेनोपनीत उच्यते, तस्य ब्रह्मचर्यादावधिकारात्। अग्निहोत्रादौ च गृहस्थस्याधिकारः, 'क्षौमे(२)वसाना वाधीयताम्' इति श्रुतेः।

एवमृणशब्दोऽपि न मुख्यः, न ह्यत्र प्रत्यादेयं कश्चन ददाति; परन्तु ऋणापाकरणवदावश्यकत्वख्यापनाय तथोक्तम्। लाक्षणिकशब्दप्रयोगे बीजमाह—निन्दाप्रशंसोपपत्तेः। ऋणानपाकरणतदपाकरणाभ्यामिवाग्निहोत्राद्यकरणतत्करणाभ्यां निन्दाप्रशंसे उपपद्येते।

---

(१) 'मानान्तराभावात्' इति वि०।
(२) 'वसानौ वाधीयताम्' इति भ०।

न्यायभाष्यम्

ऋग्ब्राह्मणं चापवर्गाभिधाय्यभिधीयते। ऋचश्च ब्राह्मणानि चापवर्गाभिवादीनि भवन्ति। ऋचश्च तावत्—

"कर्मभिर्मृत्युमृषयो निषेदुः प्रजावन्तो (१) द्रविणमिच्छमानाः।
अथापरे ऋषयो मनीषिणः परं कर्मभ्योऽमृतत्वमानशुः॥"(२)

"न कर्मणा न प्रजया धनेन त्यागेनैके अमृतत्वमानशुः।
परेण नाकं निहितं गुहायां विभ्राजते यद् यतयो विशन्ति॥"(३)

"वेदाहमेतं पुरुषं महान्तमादित्यवर्णं तमसः परस्तात्।
तमेव विदित्वाऽतिमृत्युमेति नान्यः पन्था विद्यतेऽयनाय॥"(४)

अथ ब्राह्मणानि—

"त्रयो धर्मस्कन्धाः—यज्ञोऽध्ययनं दानमिति प्रथमस्तप एव द्वितीयो ब्रह्मचार्याचार्यकुलवासीति तृतीयोऽत्यन्तमात्मानमाचार्यकुलेऽवसादयन् सर्वे एवैते पुण्यलोका भवन्ति ब्रह्मसंस्थोऽमृतत्वमेति।"(५)

"एतमेव प्रव्राजिनो (६)लोकमिच्छन्तः प्रव्रजन्ती"ति।

न्यायवार्त्तिकतात्पर्यटीका

च भविष्यन्तीत्याह—ऋग् ब्राह्मणं चापवर्गाभिधाय्यभिधीयत इति। मृत्युमिति प्रेत्यभावमित्यर्थः। परं कर्मभ्य इति कर्मपरित्यागमपवर्गसाधनं सूचयति। अमृतत्वमिति चापवर्गो दर्शितः। सूचितं कर्मत्यागमपवर्गसाधनं श्रुत्यन्तरेण विशदयति। न कर्मणा न प्रजयेति। परेण नाकमिति। नाकमित्यविद्यामुपलक्षयति। अविद्यातः परमित्यर्थः। निहितं गुहायामिति लौकिकप्रमाणागोचरत्वं दर्शयति। तमसः परस्तादिति। अविद्या तमः तस्य परस्तात्। आदित्यवर्णमिति। नित्यप्रकाशमित्यर्थः। तदनेनेश्वरप्रणिधानस्यापवर्गोपायत्वमुक्तम्।

ऋच उदाहृत्य ब्राह्मणमुदाहरति—अथ ब्राह्मणानीति। 'यज्ञ' इत्यादिना गृहस्थाश्रमो दर्शितः, 'तप एवे'ति वानप्रस्थाश्रमः, ब्रह्मचारीति ब्रह्मचर्याश्रमः। एषामभ्युदयलक्षणं फलमाह—सर्वे एवैत इति। चतुर्थाश्रममाह—ब्रह्मसंस्थ इति। तथा क्रतुरिति। क्रतुः

(१) 'द्रविणमीहमानाः' इति क्वचिद् दृश्यते।
(२) वाजसनेय सं० ३१।१८।
(३) तैत्तिरीय-आरण्यके ३।१२।७।
(४) श्वेताश्वतरश्रुतौ ३।८।
(५) छान्दोग्योपनिषदि—(अ० २। ख० २३)।
(६) 'लोकमभीप्सन्तः' इति ल-ज-ग-भा०।

न्यायभाष्यम्

अथो खल्वाहुः काममय एवायं पुरुष इति स यथाकामो भवति (१) तत्क्रतुर्भवति (२) यत्क्रतुर्भवति (३) तत्कर्म कुरुते यत्कर्म कुरुते तदभिसंपद्यते।"

इति कर्मभिः संसरणमुक्त्वा प्रकृतमन्यदुपदिशन्ति 'इति नु कामयमानोऽथाकामयमानो योऽकामो निष्काम आत्मकाम आप्तकामो (४)भवति न तस्य प्राणा उत्क्रामन्ति (५) इहैव (६)समवलीयन्ते ब्रह्मैव सन् ब्रह्माप्येतीति'।

तत्र यदुक्तमृणानुबन्धादपवर्गाभाव इत्येतदयुक्तमिति। 'ये चत्वारः पथयो देवयाना' इति च चातुराश्रम्यश्रुतेरैकाश्रम्यानुपपत्तिः ॥ ५९ ॥

फलार्थिनश्चेदं ब्राह्मणं 'जरामर्यं वा एतत्सत्रं यदग्निहोत्रं दर्शपूर्णमासौ चे'ति कथम् ?

समारोपणादात्मन्यप्रतिषेधः ॥ ६० ॥

न्यायवार्त्तिकम्

कथं पुनरिदं गम्यते फलार्थिन एतद् ब्राह्मणं भवतीति ?—अधिकाराच्च विधानं विद्यान्तरवत्।

समारोपणादात्मन्यप्रतिषेधः। यस्मान्निवृत्ते फलार्थित्वे समारोपणं विधीयते ॥ ६० ॥

न्यायवार्त्तिकतात्पर्यटीका

संकल्पः। कामयमानो य आसीत् स एव अथाकामयमानो भवति। 'अकामयमानः' कामं परिहरन् तत्परिहारसिद्धौ। (क) सोऽकामयंस्तस्य व्याख्यानं—निष्काम इति। आत्मकाम इति कैवल्योपेतात्मकामः। तत्प्राप्त्या आप्तकामो भवति। न तस्य प्राणा इति। शाश्वतो भवतीत्यर्थः। प्रकृतमुपसंहरति—तत्र यदुक्तमिति। अपरामपि चातुराश्रम्याभिधायिनीं श्रुतिमाह—ये चत्वार इति ॥ ५९ ॥

इतश्च फलार्थिन एष जरामर्यवाद इत्याह—फलार्थिनश्चेति। पृष्ट्वा सूत्रं पठति—कथम्।
समारोपणादात्मन्यप्रतिषेधः (सू० ६०)॥ आत्मनि अग्नीनां समारोपणाद्

---

(१) 'तथाक्रतुः' इति ल-ग-ज-भा०।
(२) 'यथाक्रतुः' इति ल-ग-ज-भा०।
(३) अथ तथा-इति अधिकम् भा०।
(४) 'भवति' इति फ-पु नास्ति।
(५) अयमंशः क-पु नास्ति।
(६) 'समवनीयन्ते' इति ज०।
(क) 'योऽकामः तस्य' इति पाठः सम्भाव्यते।

न्यायभाष्यम्

'प्राजापत्यामिष्टिं निरूप्य तस्यां (१) सर्ववेदसं हुत्वा आत्मन्यग्नीन् समारोप्य ब्राह्मणः प्रव्रजे'दिति श्रूयते। तेन विजानीमः (२) प्रजावित्तलोकैषणाभ्यो व्युत्थितस्य निवृत्ते फलार्थित्वे समारोपणं विधीयते इति।

एवं च ब्राह्मणानि (क) 'सोऽन्यद् व्रतमुपाकरिष्यमाणो याज्ञवल्क्यो मैत्रेयीमिति होवाच प्रव्रजिष्यन्वा अरे अहमस्मात्स्थानादस्मि हन्त तेऽनया कात्यायन्या सहान्तं करवाणीति। अथाप्युक्तानुशासनासि मैत्रेयि एतावदरे खल्वमृतत्वमिति होक्त्वा याज्ञवल्क्यः प्रवव्राजेति' ॥ ६० ॥

न्यायवार्त्तिकतात्पर्यटीका

ऋणानुबन्धेनापवर्गस्य अप्रतिषेधः। तदनेन च्छलेन प्रत्यक्षविधानं प्रव्रज्याया अपि दर्शितम्। एषणाव्युत्थितस्य विपर्यस्तबुद्धेः अलमाभिरेषणाभिरनर्थहेतुभिरिति कृतबुद्धेः, अत एव निवृत्ते फलार्थित्वे समारोपणमात्मन्यग्नीनां विधीयत इति।

एवं ब्राह्मणानीति यदैषणाभ्यो व्युत्थितस्य प्रव्रज्याविधानं तदा तदभिधायीनि ब्राह्मणान्युपपन्नानीत्यर्थः ॥ ६० ॥

वृत्तिः

न चानुष्ठानकालाभावः 'जरया विमुच्यते' इत्युक्तेः। न च जरयाऽशक्तिरुपलभ्यते, 'अन्तेवासी वा जुहुयात् ब्रह्मणा हि स परिक्रीतः' इत्यादिनाऽशक्तस्याऽपि विधानात्। तस्मादायुषश्चतुर्थभागो जरेत्युच्यते, किं च जरामर्यवादः कामनाभिप्रायेण। तथा च भाष्यम्—अर्थित्वस्य चापरिणामे जरामर्यवादोपपत्तिः' इति। अर्थित्वं कामना, तदपरिणामे तदनाशे कर्मकरणाभिप्रायेण जरामर्यवाद उपपद्यते ॥ ६० ॥

ननु काम्यानां कामनाविरहेण त्यागसम्भवेऽपि नित्यानां कथं त्यागः? श्रूयते हि —'यावज्जीवमग्निहोत्रं जुहुयात्' इति। तत्राह—(समारोपणादात्मन्यप्रतिषेधः) अपवर्गप्रतिषेधो न युक्तः, अग्नीनामात्मनि समारोपणविधानात्। (३)तथा च श्रूयते—

(१) 'सार्ववेदसं' इति ल-ग-ज-भा०।

(२) 'प्रजावित्तलोकैषणायाश्च व्युत्थायाथ भिक्षाचर्यं चरन्तीति इति भ०।

(३) 'तथाच' इति नास्ति भ०।

(क) क-पुस्तके 'सोऽन्यद्' इत्यादि 'प्रवव्राजे'त्यन्तग्रन्थस्थाने अन्यद्वृत्तमुपाकरिष्यन् मैत्रेयीतिहोवाच याज्ञवल्क्यः प्रव्रजिष्यन् वा अरे अहमस्मात् स्थानादस्मि हन्त तेऽनया कात्यायन्याहन्तं करवाणी'ति।

अथापि 'इत्युक्तानुशासनाऽसि मैत्रेय्येतावदरे खल्वमृतत्वमितिहोक्त्वा याज्ञवल्क्यो विजहारे'ति'' इति पाठो गृहीतः। अयमेव साधीयान् सम्भाव्यते। तद्बीजन्तु तत्रैव (वङ्गीयसाहित्यपरिषत्प्रकाशित न्यायदर्शने चतुर्थखण्डे पत्राङ्कः २९५) द्रष्टव्यम्।

न्यायभाष्यम्

पात्रचयान्तानुपपत्तेश्च फलाभावः ॥ ६१ ॥

जरामर्यं च कर्मण्यविशेषेण कल्प्यमाने सर्वस्य पात्रचयान्तानि कर्माणीति प्रसज्यते, तत्रैषणाव्युत्थानं न श्रूयेत। "एतद्ध स्म वै तत्पूर्वे (१) ब्राह्मणा अनूचाना(१) विद्वांसः प्रजां न कामयन्ते किं प्रजया करिष्यामो येषां नोऽयमात्मायं लोक इति ते ह स्म पुत्रैषणायाश्च वित्तैषणायाश्च लोकैषणायाश्च व्युत्थायाथ भिक्षाचर्यं चरन्तीति"। एषणाभ्यश्च व्युत्थितस्य पात्रचयान्तानि कर्माणि नोपपद्यन्ते इति नाविशेषेण कर्तुः (२)प्रयोजकं फलं भवतीति।

न्यायवार्त्तिकम्

पात्रचयान्तानुपपत्तेश्च फलाभावः। यस्मान्निवृत्तेऽर्थित्वे प्रव्रजितानां पात्रचयान्तानि

न्यायवार्त्तिकतात्पर्यटीका

पात्रचयान्तानुपपत्तेश्च फलाभावः (सू० ६१)॥ प्रमृते खलु यजमाने यज्ञपात्राणि यजमानस्य शरीरे यथावयवं निधायान्त्येष्टिः क्रियते। तत्र जरामर्यं कर्मण्यविशेषेण कल्प्यमाने सर्वस्य पात्रचयान्तानि कर्माणीति प्रसज्येत, मरणपर्यन्तानि कर्माणीति प्रसज्येतेत्यर्थः। नन्विष्यत एव पात्रचयान्तत्वं कर्मणामित्यत आह—तत्रैषणाव्युत्थानमिति। तस्मान्नाविशेषेण कर्तुः प्रयोजकं फलं भवतीति। फलाभाव इत्यस्य सूत्रावयवस्याविशेषेण फलस्य कर्तृप्रयोजनकत्वाभाव इत्यर्थः। तदनेनैषणाव्युत्थानश्रुतिविरोधो दर्शितः।

तदेवं चातुराश्रम्यस्य श्रुतिरुक्ता। संप्रति स्मृत्यादयोऽपि चातुराश्रम्यस्योपदेशकाः

वृत्तिः

'प्राजापत्यामिष्टिं निरूप्य तस्यां (३)सार्ववेदसं हुत्वाऽऽत्मन्यग्नीन् समारोप्य ब्राह्मणः प्रव्रजेत्' इति। अत एव—'चत्वारः पथयो देवयाना' इति चातुराश्रम्यश्रुतिरपि सङ्गच्छते ॥ ६१ ॥

नन्वग्निहोत्रस्याप्रतिबन्धकत्वेऽपि तत्फलं स्वर्ग एवापवर्गप्रतिबन्धकः स्यादत्राह—(पात्रचयान्तानुपपत्तेश्च फलाभावः)।

(१) 'ब्राह्मणा अनूचाना' इति क-न-पु० नास्ति।

(२) 'प्रयोजकफलं' ल-ज-ग०।

(३) 'सर्ववेदसं दत्त्वाऽऽत्मन्यग्नीन्' इति भ०।

न्यायभाष्यम्

चातुराश्रम्यविधानाच्चेतिहास-पुराण-धर्मशास्त्रेष्वैकाश्रम्यानुपपत्तिः। तदप्रमाणमिति चेद् न, प्रमाणेन प्रामाण्याभ्यनुज्ञानात्—प्रमाणेन खलु ब्राह्मणेनेतिहासपुराणस्य प्रामाण्यमभ्यनुज्ञायते 'ते वा खल्वेते अथर्वाङ्गिरस एतदितिहासपुराणमभ्यवदन्नितिहासपुराणं पञ्चमं वेदानां वेद इति'। तस्मादयुक्तमेतदप्रामाण्यमिति। अप्रामाण्ये च धर्मशास्त्रस्य प्राणभृतां व्यवहारलोपाल्लोकोच्छेदप्रसङ्गः।

न्यायवार्त्तिकम्

कर्माणि न क्रियन्ते। यदि चेदं ब्राह्मणमविशेषेण प्रवर्तते तेन सर्वत्र पात्रचयान्तानि कर्माणि प्रसज्यन्त इति। शेषं भाष्ये॥ ६१॥

न्यायवार्त्तिकतात्पर्यटीका

सन्तीत्याह—चातुराश्रम्यविधानाच्चेति। शङ्कते—तदप्रमाणमिति चेत्। जगन्निर्मातुः परमकारुणिकस्य सर्वज्ञस्यात्रभवतः परमेश्वरस्यागमो भवतु प्रमाणमाप्तोक्तत्वात्। मनुव्यासादीनां त्वाप्तत्वानिश्चयात्कथं तत्प्रणीतानां प्रामाण्यनिश्चय इत्यर्थः। उत्तरं 'न प्रमाणेने'ति। स्यादेतत्। भवतु वेदेनाभ्यनुज्ञानादितिहासपुराणप्रामाण्यं, धर्मशास्त्राणां तु मन्वादिप्रणीतानां कुतः प्रामाण्यनिश्चय इत्यत आह—अप्रामाण्ये चेति। सर्वजनपरिग्रहात् तेषामपि प्रामाण्यमित्यर्थः। बुद्धादिस्मृतयस्तु वेदनिन्दितैर्म्लेच्छादिभिः परिगृहीता न

वृत्तिः

ज्ञानिनः फलस्य स्वर्गस्याभावः। अग्निहोत्रं हि पात्रचयान्तम्। पात्राणि अग्निहोत्रपात्राणि, तेषां चयः प्रेतस्य यजमानस्याङ्गेषु विन्यासः—(क)मुखे धृतपूर्णां स्रुचमिति क्रमेण, भिक्षोस्तदनुपपत्तेः, तेन तत्परित्यागात्; अग्निहोत्रफलाभावेऽपि ज्योतिष्टोमगङ्गास्नानादि(१)फलानां प्रतिबन्धकत्वं स्यादतो हेत्वन्तरसमुच्चयाय चकार उपन्यस्तः। तथा च प्रारब्धातिरिक्तकर्मणां ज्ञानादेव क्षय इत्याशयः।

---

(१) 'हिंसादिफलानां' इति भ०।

(क) 'शिरसि कपालानि इडां दक्षिणाग्नं च' इति लाट्यायनसूत्रम्। "आज्यपूर्णां दक्षिणायां स्रुचं मुखे स्थापयेत्। तथाग्रमाज्यपूर्णं स्रुवं नासिकायाम्। पादयोः प्रागग्रामधरारणिम्, तथाग्रामुत्तरारणिमुरसि। सव्यपार्श्वे दक्षिणाग्रं शूर्पम्, दक्षिणपार्श्वे दक्षिणाग्रं चमसम्, ऊरुद्वयमध्ये उलूखलं मूषलमधोमुखम्, तत्रैव च चमोविलीकं (?) च स्थापयेत्" इति कर्मप्रदीपः।

न्यायभाष्यम्

द्रष्टृप्रवक्तृसामाण्याच्चाप्रामान्यानुपपत्तिः । ये एव मन्त्रब्राह्मणस्य द्रष्टारः प्रवक्तारश्च, ते खल्वितिहासपुराणस्य धर्मशास्त्रस्य चेति ।

विषयव्यवस्थानाच्च यथाविषयं प्रामाण्यम् । अन्यो मन्त्रब्राह्मणस्य विषयोऽन्यश्चेतिहासपुराणधर्मशास्त्राणामिति । यज्ञो मन्त्रब्राह्मणस्य, लोकवृत्तमितिहासपुराणस्य, लोकव्यवहारव्यवस्थानं धर्मशास्त्रस्य विषयः । तत्रैकेन (१)न सर्वं व्यवस्थाप्यते इति यथाविषयमेतानि प्रमाणानीन्द्रियादिवदिति ॥ ६१ ॥

न्यायवार्त्तिकतात्पर्यटीका

त्वार्येरिति न ताः प्रमाणं भवितुमर्हन्तीत्यर्थः । द्रष्टृवक्तृसामान्याच्चाप्रामाण्यानुपपत्तिः । य एव वेदस्य द्रष्टारोऽनुष्ठातारश्च तदर्थस्य, त एवेतिहासादीनां प्रवक्तारः प्राचेतसकृष्णद्वैपायनमनुप्रभृतयः । अपि च वैदिकानि कर्माणि स्मार्तामितिकर्तव्यतामपेक्षन्ते, स्मार्तानि च वैदिकानि मन्त्रादीनीति । सर्वमेतदप्रामाण्ये धर्मशास्त्राणां नोपपद्यते । यद्यपि च मन्वादयोऽपि धर्मज्ञानवैराग्यैश्वर्यशालितया अनुभूयाप्युपदिशन्तीति संभवति, तथाऽपि वेदमूलकत्वमेवेतिहासपुराणादीनां युक्तम् । तथा हि—"वेदोऽखिलो धर्ममूलं स्मृतिशीले च तद्विदाम् । यः कश्चित् कस्यचिद्धर्मो मनुना परिकीर्तितः । स सर्वोऽभिहितो वेदे सर्वज्ञानमयो हि सः ॥" इत्यादिभिः स्ववचनप्रपञ्चैः आत्मा (२)बोद्धा वेद एवार्पितस्तैरिति । अथायमितिहासादिगोचरोऽर्थः कस्मात् प्रत्यक्षप्रतीतेन वेदेन नोच्यत इति तदनभिधानादवगच्छामो नूनमयमनभिमतो वेदानां कर्तुरिति निराकृतोऽप्ययं पुनर्निराक्रियते दार्ढ्यार्थं विषयव्यवस्थानाच्चेत्यनेन ॥ ६१ ॥

वृत्तिः

श्रूयते हि—

'तथा विद्वान् पुण्यपापे विधूय निरञ्जनः परमं साम्यमुपैति,' एवम् 'क्षीयन्ते चास्य कर्माणि तस्मिन् दृष्टे परावरे' । (मुण्डकोपनिषत्)

स्मर्यते च—

'ज्ञानाग्निः सर्वकर्माणि भस्मसात् कुरुतेऽर्जुन' इति ।

इत्थं च कामनाशून्यस्य प्रजानुत्पादोऽपि नापवर्गविरोधी । तथा च श्रूयते—'एतदु ह स्म वै पूर्वे ब्राह्मणा अनूचाना विद्वांसः प्रजां न कामयन्ते किं प्रजया करिष्यामो येषां

(१) 'न'—इति ज-ग पु० नास्ति ।

(२) 'बद्धा' इति ख० ।

न्यायभाष्यम्

यत्पुनरेतत् क्लेशानुबन्धस्याविच्छेदादिति—

सुषुप्तस्य स्वप्नादर्शने क्लेशाभावादपवर्गः ॥ ६२ ॥

यथा सुषुप्तस्य (१)खलु स्वप्नादर्शने रागानुबन्धः सुखदुःखानुबन्धश्च विच्छिद्यते तथापवर्गेऽपीति। एतच्च ब्रह्मविदो मुक्तस्यात्मनो रूपमुदाहरन्तीति ॥ ६२ ॥

न्यायवार्त्तिकम्

यत्पुनरेतत् क्लेशसन्ततेरविच्छेदादिति ?

सुषुप्तस्य स्वप्नादर्शने क्लेशाभावादपवर्गः। यथा सुषुप्तस्य स्वप्नादर्शने क्लेशानुबन्धो विच्छिद्यते सुखदुःखसाधनानुबन्धश्च तथा मुक्तस्यापीति, तच्च योगिनो मुक्तस्य रूपमुदाहरन्तीति ॥ ६२ ॥

न्यायवार्त्तिकतात्पर्यटीका

यदप्युक्तं क्लेशानुबन्धस्याविच्छेदादिति तद् दूषयति—

सुषुप्तस्य स्वप्नादर्शने क्लेशाभावादपवर्गः (सू. ६२)॥ तद् व्याचष्टे—सुषुप्तस्य खल्विति। लोकसिद्धतया सुषुप्तावस्थोदाहृता। महाप्रलयावस्थायामपि क्लेशमुक्ता एवात्मानः, केवलमसौ न लोकसिद्धेति नोदाहृता। एतावांस्तु मुक्तावस्थायां विशेषः—यदस्यां क्लेशवासनाऽपि नास्ति। सुषुप्तावस्थायां प्रलयावस्थायां च क्लेशविच्छेदेऽपि तद्वासनाऽस्तीति ॥६२ ॥

वृत्तिः

नोऽयमात्मा(क) लोक इति ते ह स्म पुत्रैषणायाश्च वित्तैषणायाश्च लोकैषणायाश्च व्युत्थाय भिक्षाचर्यं चरन्ति' इति।

अन्ये तु फलाभावः फलस्य मुमुक्षून् प्रति अग्निहोत्रादौ प्रयोजकत्वाभावः, तथा सति भिक्षूणामपि पात्रचयान्तं स्यादित्यर्थ इत्याहुः ॥ ६२ ॥

क्लेशानुबन्धं दूषयति—(सुषुप्तस्य स्वप्नादर्शने क्लेशाभावादपवर्गः।)

स्वप्नादर्शनकाले सुषुप्तस्य यथा हेत्वभावेन दुःखाभावस्तथाऽपवर्गेऽपि रागाद्यभावेन दुःखाभावः स्यात् ॥ ६३ ॥

---

(१) 'तु' इति वि०।

(क) 'अयं लोक' इति भाष्यधृतपाठो युक्तः।

न्यायभाष्यम्

यदपि प्रवृत्त्यनुबन्धादिति—

न प्रवृत्तिः प्रतिसन्धानाय हीनक्लेशस्य ॥ ६३ ॥

प्रक्षीणेषु रागद्वेषमोहेषु प्रवृत्तिर्न प्रतिसन्धानाय। प्रतिसन्धिस्तु पूर्वजन्मनिवृत्तौ पुनर्जन्म, तच्चादृष्टकारितं, तस्यां प्रहीणायां पूर्वजन्माभावे जन्मान्तराभावोऽप्रतिसन्धानमपवर्गः।

कर्मवैफल्यप्रसङ्ग इति चेद् न, कर्मविपाकप्रतिसंवेदनस्याप्रत्याख्यानात्। पूर्वजन्मनिवृत्तौ पुनर्जन्म न भवतीत्युच्यते, न तु कर्मविपाकप्रतिसंवेदनं प्रत्याख्यायते, सर्वाणि पूर्वकर्माणि ह्यन्ते जन्मनि विपच्यन्त इति ॥ ६३ ॥

न्यायवार्त्तिकम्

यदपि प्रवृत्त्यनुबन्धादिति—

न प्रवृत्तिः प्रतिसन्धानाय हीनक्लेशस्य। विद्यमाना प्रवृत्तिः क्लेशमन्तरेण प्रतिसन्धानाय न भवतीति धर्माधर्मकारणं न भवतीति यावदुक्तं स्यात्। प्रतिसन्धिस्तु पूर्वजन्मनिवृत्तौ पुनर्जन्म, तच्च तृष्णाकारितम्। एतच्चोक्तं 'वीतरागजन्मादर्शना'दिति सूत्रे। 'कर्मवैफल्यप्रसङ्ग इति चेत् न, कर्मविपाकप्रतिसंवेदनस्याप्रत्याख्यानात्'—न ब्रूमो विद्यमाने कर्मणि मुच्यत इति, अपि तु कर्माणि अन्ते जन्मनि विपच्यन्ते ॥ ६३ ॥

न्यायवार्त्तिकतात्पर्यटीका

यदपि प्रवृत्त्यनुबन्धादिति तत्राह—

न प्रवृत्तिः प्रतिसंधानाय हीनक्लेशस्य (सू ६३) देहिनः(क)। तद् व्याचष्टे—क्षीणेषु रागद्वेषमोहेषु सत्यपि न प्रवृत्तिः स्वप्रतिसंधानाय। उपपादितमिदमस्माभिर्यथा दोषतुषावनद्धाः कर्मतण्डुला जन्माङ्कुराय कल्पन्ते न केवला इत्यर्थः। शङ्कते—कर्मवैफल्येति। वैफल्ये शास्त्रस्य कर्मणां फलसाधनताप्रतिपादकस्याप्रामाण्यप्रसङ्ग इति भावः। निराकरोति—न कर्मविपाकेति। विपाकः फलं तस्य प्रतिसंवेदनं भोगः ॥ ६३ ॥

वृत्तिः

प्रवृत्त्यनुबन्धादपवर्गाभावं दूषयति—(न प्रवृत्तिः प्रतिसन्धानाय हीनक्लेशस्य)।

(क) सूत्रान्तिमपदेनास्यान्वयः।

न्यायभाष्यम्

न क्लेशसन्ततेः स्वाभाविकत्वात् ॥ ६४ ॥

नोपपद्यते क्लेशानुबन्धविच्छेदः, कस्मात् ? क्लेशसन्ततेः स्वाभाविकत्वात्। अनादिरियं क्लेशसन्ततिः, न चानादिः शक्य उच्छेत्तुमिति ॥ ६४ ॥

अत्र कश्चित् परीहारमाह—

प्रागुत्पत्तेरभावानित्यत्ववत्स्वाभाविकेऽप्यनित्यत्वम् ॥ ६५ ॥

यथाऽनादिः प्रागुत्पत्तेरभाव उत्पन्नेन भावेन निवर्त्यते, एवं स्वाभाविकी क्लेशसन्ततिरनित्येति ॥ ६५ ॥

न्यायवार्त्तिकम्

न क्लेशसन्ततेः स्वाभाविकत्वात्। नोपपद्येत क्लेशसन्ततेर्विच्छेदः। कुतः ? क्लेशसन्ततेः स्वाभाविकत्वात्—अनादिरियं क्लेशसन्ततिः स्वभावतः प्रवृत्ता, न चासावुच्छेत्तुं शक्येति ॥ ६४ ॥

प्रागुत्पत्तेरभावानित्यत्ववत्स्वाभाविकेऽप्यनित्यत्वम्। यथा प्रागुत्पत्तेरभावोऽनादिरथ च भावेन (१) निवर्त्यते एवमनादिः क्लेशसन्ततिरतत्त्वज्ञस्य तत्त्वज्ञानेन विरोत्स्यत इति ॥ ६५ ॥

न्यायवार्त्तिकतात्पर्यटीका

पूर्वपक्षवाद्याह—

न क्लेशसंततेः स्वाभाविकत्वात् (सू ६४)॥ सिद्धान्त्येकदेशी ब्रूते—

प्रागु—त्वम् (सू ६५)॥ दध्यादेरुत्पत्तेः प्राक् क्षीरादिषु योऽभावस्तस्यानित्यत्ववदिति योजना ॥ ६५ ॥

वृत्तिः

क्लिश्यन्तेऽनेनेति क्लेशो रागादिः, तद्विरहिणो या प्रवृत्तिः सा प्रतिसन्धानाय प्रतिबन्धाय न भवति, धर्माधर्मौ न जनयतीत्यर्थः ॥ ६४ ॥

क्लेशाभावमसहमानः शङ्कते—(न क्लेशसन्ततेः स्वाभाविकत्वात्)।
क्लेशसन्ततेरुच्छेदो न युक्तः स्वाभाविकत्वात् ॥ ६५ ॥

---

(१) 'विरुध्यति'—इति क-खघृतपाठान्तरम्।

न्यायभाष्यम्

अपर आह—

अणुश्यामताऽनित्यत्ववद्वा ॥ ६६ ॥

यथाऽनादिरणुश्यामता अथ चाग्निसंयोगादनित्या, तथा क्लेशसन्ततिरपीति। सतः खलु धर्मो नित्यत्वमनित्यत्वं च, (१) तत्त्वं भावे (२) अभावे भाक्तमिति। अनादिरणुश्यामतेति हेत्वभावादयुक्तम्। अनुत्पत्तिधर्मकमनित्यमिति नात्र हेतुरस्तीति ॥ ६६ ॥

न्यायवार्त्तिकम्

अणुश्यामताऽनित्त्ववद्वा यथा अणोः श्यामता अनादिश्च अनित्या च एवं क्लेशसन्ततिरपीति। सतः खलु धर्मो नित्यत्वमनित्यत्वं चेति नित्यानित्यत्वे अवधारयद्भिरुक्तं, तत्तु अभावे भाक्तमिति। का पुनरिह भक्तिः? नित्यमकारणम्, अकारणश्च प्रागभावः, अनित्यं भूत्वा न भवति। न च (३) प्रागभावो भावे सति(३) भवति एतत् सामान्यम्। यत्पुनरेतद् अनादिरणुश्यामतेति, हेत्वभावादयुक्तम्—अनुत्पत्तिधर्मकमनित्यं नात्र हेतुरस्ति इति ॥ ६६ ॥

न्यायवार्त्तिकतात्पर्यटीका

अपरस्त्वेकदेशी भावमेव दृष्टान्तयतीत्याह—

अणुश्यामताऽनित्यत्ववद्वा (सू ६६)॥ यदेतच्छ्यामं रूपं तदन्नस्येत्यागमः, पार्थिवानां परमाणूनां श्यामतामनादिमाह—अन्नपदेन मृदोऽभिधानादिति भावः।

अत्र प्रथममेकदेशिनं दूषयति—सतः खल्विति। द्वितीयमेकदेशिनं दूषयति—अनादिरणुश्यामतेति हेत्वभावान्न युक्तम्। अणुश्यामता कार्या पृथिवीरूपत्वात् लोहितादिवदिति प्रत्युतानित्यताहेतुरस्ति। पुरुषप्रयत्नजलोहितादिरूपवैलक्षण्येन त्वस्याप्रयत्नपूर्वकत्वमात्रेणानादित्वाभिधानमिति नागमविरोधः ॥ ६६ ॥

वृत्तिः

एकदेशी समाधत्ते—(प्रागुत्पत्तेरभावानित्यत्ववत् स्वाभाविकेऽप्यनित्यत्वम्। अणुश्यामतानित्यत्ववद् वा)।

प्रागुत्पत्तेरभावानित्यत्ववत् प्रागभावानित्यत्ववत् अनादेः परमाणुश्यामताया विनाशवद्वा तद्विनाशः ॥ ६६ ॥ ६७ ॥

---

(१) 'तत्त्वभावे भावे' इति ज०।

(२) 'अभावे'—इति नास्ति टि०।

(३) 'प्रागभावाभावे सति'—इति ख०।

न्यायभाष्यम्

अयं तु समाधिः—

न, सङ्कल्पनिमित्तत्वाच्च रागादीनाम् ॥ ६७ ॥

कर्मनिमित्तत्वादितरेतरनिमित्तत्वाच्चेति समुच्चयः। मिथ्यासङ्कल्पेभ्यो रञ्जनीय-कोपनीय-मोहनीयेभ्यो राग-द्वेष-मोहा उत्पद्यन्ते, कर्म च सत्त्वनिकायनिर्वर्तकं नैयमिकान् रागद्वेषमोहान्निर्वर्त्तयति, नियमदर्शनात्। दृश्यते हि कश्चित्सत्त्वनिकायो रागबहुलः (१)कश्चिद् द्वेषबहुलः (१) कश्चिन्मोहबहुल इति। इतरेतरनिमित्ता च रागादीनामुत्पत्तिः। मूढो रज्यति मूढः कुप्यति रक्तो मुह्यति कुपितो मुह्यति।

न्यायवार्त्तिकम्

अयं तु समाधिः—

न सङ्कल्पनिमित्तत्वाच्च रागादीनाम्। कर्मनिमित्तत्वादितरेतरनिमित्तत्वाच्चेति चार्थः। अनुभूतविषयप्रार्थना सङ्कल्प इत्युक्तम्। मिथ्यासङ्कल्पेभ्यो रञ्जनीयकोपनीय-मोहनीयेभ्यो रागादयः प्रादुर्भवन्ति। कर्म च निकायनिर्वर्तकं सङ्कल्पापेक्षं रागादीन् जनयति।

न्यायवार्त्तिकतात्पर्यटीका

तदेवमेकदेशिनौ दूषयित्वा परमसमाधिमाह—अयं तु समाधिः।

न संकल्पनिमित्तत्वाच्च रागादीनाम् (सू ६७) ॥ चकारमनुक्तसमुच्चयार्थं व्याचष्टे—कर्मनिमित्तत्वादितरेतरनिमित्तत्वाच्च। समुच्चयोऽनुक्तस्येति शेषः। तत्र संकल्पनिमित्त-त्वादिति विभजते—मिथ्यासंकल्पेभ्य इति। यद्यप्यनुभूतविषयप्रार्थना संकल्पः, तथाऽपि तस्य पूर्वभागोऽनुभवो ग्राह्यः प्रार्थनाया रागत्वात्। तेन मिथ्यानुभवः संकल्प इत्यर्थः। नन्वेकस्मान्मिथ्याज्ञानात् कुतः कार्यवैचित्र्यमित्यत आह—रञ्जनीयकोपनीयमोहनीयेभ्य इति। भव्यगेयादिषु पाठात्कर्त्तरि कृत्यः। मोहनीयः संकल्पो मिथ्याज्ञानसंस्कारः। कर्मनिमित्तत्वं रागादीनां विभजते—कर्म चेति। निकायेन जातिरुपलक्ष्यते। इतरेतरनिमित्तत्वं रागादीनामाह—इतरेतरेति। स्यादेतत्—भवन्त्वनित्याः क्लेशाः, तथाऽपि यदेषां निर्वर्त्तकं

वृत्तिः

अनित्यत्वं विनाशिभावत्वं, न च तत् प्रागभावे, न चाणुश्यामताऽनादिः, तथा च भाष्यम्—'अनादिरणुश्यामतेति हेत्वभावादयुक्तम्' इति। अतो मतद्वयमुपेक्ष्य सिद्धान्तमाह—(न सङ्कल्पनिमित्तत्वाच्च रागादीनाम्)।

---

(१) 'कश्चिद्द्वेषबहुलः' इति टि-पु० नास्ति।

न्यायभाष्यम्

सर्वमिथ्यासङ्कल्पानां तत्त्वज्ञानादनुत्पत्तिः कारणानुत्पत्तौ च कार्यानुत्पत्तेरिति रागादीनामत्यन्तमनुत्पत्तिरिति। अनादिश्च क्लेशसन्तति(१)रित्ययुक्तम्, सर्वे इमे खल्वाध्यात्मिका भावा अनादिना प्रबन्धेन प्रवर्त्तन्ते शरीरादयः, न जात्वत्र कश्चिदनुत्पन्नपूर्वः प्रथमत उत्पद्यतेऽन्यत्र तत्त्वज्ञानात्। न चैवं सत्यनुत्पत्तिधर्मकं किञ्चिद्-व्ययधर्मकं प्रतिज्ञायते इति। कर्म च सत्त्वनिकायनिर्वर्तकं तत्त्वज्ञानकृतान्मिथ्या-सङ्कल्पविघाताच्च रागाद्युत्पत्तिनिमित्तं भवति, सुखदुःख(२)संवित्तिः फलं तु भवतीति ॥ ६७ ॥

इति श्रीवात्स्यायनीये न्यायभाष्ये चतुर्थाध्यायस्याऽऽद्यमाह्निकम्।

न्यायवार्त्तिकम्

दृष्टो हि कश्चित् सत्त्वनिकायो रागबहुलो यथा पारावतादिः। कश्चित् क्रोधबहुलो यथा सर्पादिः। कश्चित् मोहबहुलो यथाऽजगरादिः। यदि कर्म रागादीन् निर्वर्तयेत् सर्वदा रागादिर्भवेदित्यनिर्मोक्ष-

न्यायवार्त्तिकतात्पर्यटीका

मिथ्याज्ञानं तस्य निवृत्तिहेतोरभावात् स एव क्लेशानुबन्धादपवर्गाभाव इत्यत आह—सर्वमिथ्या-संकल्पानामिति। अपि च अनादिः क्लेशसंततिरित्ययुक्तम्। कुतः? सर्व इमे आध्यात्मिका भावा इति। आत्मानमधिकृत्य प्रवर्त्तमानाः शरीरेन्द्रियादयो भवन्त्याध्यात्मिका इति। अथ यद्यनादीनामपि निवृत्तिः हन्तानुत्पत्तिधर्मकाणामपि निवृत्तिप्रसङ्ग इत्यत आह—न चैवं सत्यनुत्पत्तिधर्मकं किंचिदिति। रागादीनामुत्पत्तिधर्मकाणामेव व्ययधर्मकत्वाभ्युप-गमादित्यर्थः। ननु मा भूवन्मिथ्याज्ञाननिमित्ता रागादयो मिथ्याज्ञाननिवृत्तौ; ये पुनरमी कर्मनिमित्तास्तेषां कुतो निवृत्तिः? न च कर्मनिवृत्तौ रागादिनिवृत्तिः रागादिमतः कर्मनिवृत्ते-रभावात्, तस्मान्न मोक्ष इत्यत आह—कर्म च (क)निकायनिर्वर्त्तकं तत्त्वज्ञानकृतान्मिथ्याज्ञान-रूपसंकल्पविघातान्न रागाद्युत्पत्तिनिमित्तं भवति। सर्वरागादीनां मिथ्याज्ञानमेव निमित्तम्। कर्माणि तु निकायनियमेन रागादीन् प्रवर्तयन्तीति कर्मनिमित्तत्वमुक्तमिति भावः। ननु यथा रागादयः सत्यपि कर्मणि मिथ्याज्ञाननिवृत्त्या निवर्तन्ते एवं सत्यपि कर्मणि मिथ्याज्ञाननिवृत्त्या फलमपि मा भूदित्यत आह—सुखदुःखसंवित्तिः फलं तु भवतीति।

---

(१) 'इत्यप्युक्तम्'—ज-ज-झा०।

(२) —'संवित्तिफलं तु' इति ल-ग-ज-झा०।

(क) भाष्ये 'सत्त्वनिकाये'ति।

न्यायवार्त्तिकम्

प्रसङ्गः ? न (१)कारणवैकल्यात्—सङ्कल्पाद्यपेक्षं कर्म रागादिकारणम्, न निरपेक्षमिति। सुखादीनामपि तर्हि (२)कर्म कारणं न प्राप्तम् ? न, निरपेक्षत्वात् कर्म सुखादिषु कर्त्तव्येषु (३)सङ्कल्पं नापेक्षते अपि तु स्वकारणसन्निधानापेक्षं सुखादि करोति, यथोत्क्षेपणादिकर्म नोदनाद्यपेक्षं संस्कारं करोति अनपेक्षं तु संयोगविभागाविति। परस्परनिमित्तत्वं च रागादीनां दृष्टम्—रक्तो मुह्यति रक्तः कुप्यति कुपितो मुह्यति (४)रज्यते च, मूढः(४*) कुप्यति रज्यते चेति। यदपीदमुच्यते अनादिः क्लेशसन्ततिरिति, तन्न, अविशेषात्—यथानादिः क्लेशसन्ततिरेवमाध्यात्मिका भावाः सर्वेऽनादिना प्रबन्धेन प्रवर्तन्ते, न जातु अनुत्पन्नपूर्वं किञ्चिदुत्पद्यते। न चैवं किञ्चिदनुत्पत्ति-धर्मकं (५)व्ययधर्मकं प्रतिज्ञायते अनुत्पन्नपूर्वं तु तत्त्वज्ञानं केवलमुत्पद्यते नान्यः कश्चिदा-ध्यात्मिको भाव इति ॥ ६७ ॥

(इत्यपवर्गपरीक्षाप्रकरणम्।)

इति—औद्द्योतकरे न्यायवार्त्तिके चतुर्थस्याध्यायस्याद्यमाह्निकम्।

न्यायवार्त्तिकतात्पर्यटीका

(क)संकल्पाद्यपेक्षं कर्म रागादिकारणमिति। यज्जातीयस्य जन्मनो यत्कर्म कारणं तज्जन्मोचितामेव मिथ्याज्ञानवासनामभिव्यनक्तीति तद्द्वारेण रागादीनां कारणं भवति। चोदयति—सुखादीनामिति। यथा मिथ्याज्ञानसहायं कर्म रागादिहेतुः, एवं तत्सहायं फल-हेतुरिति चरमदेहस्य तत्त्वज्ञानवतः सदपि कर्म फलकारणं न स्यादित्यर्थः। परिहरति—न निरपेक्षत्वादिति। कर्माशयप्रपञ्चमुच्छेत्तुममूढोऽप्यसक्तोऽप्यद्विष्टोऽपि मूढ इव सक्त इव द्विष्ट इव तत्फलं भुङ्क्त इति रागाद्यनपेक्षं कर्म स्वफलं जनयति, तेनासौ फलोपभोगो न बन्धहेतुः; मूढादीनां बन्धहेतुफलोपभोगः, स च तादृशो रागादिसहायैः कर्मभिः क्रियते, न रागादिनिरपेक्षै-रित्यवदातम् ॥ ६७ ॥

इति मिश्र-श्रीवाचस्पतिविरचितायां न्यायवार्त्तिकतात्पर्यटीकायां
चतुर्थाध्यायस्याद्यमाह्निकम् ॥ १ ॥

वृत्तिः

नोक्तं युक्तम्। कुतः ? रागादीनां सङ्कल्पनिमित्तत्वात्। सङ्कल्पो मिथ्याज्ञानं निमित्तं येषां तथा च तत्त्वज्ञानेन मिथ्याज्ञाननिवृत्तौ रागादिनिवृत्तिर्युज्यत एवेति भावः ॥ ६८ ॥

समाप्तमपवर्गपरीक्षाप्रकरणम्।

इति श्रीविश्वनाथन्यायपञ्चाननभट्टाचार्यकृतायां न्यायसूत्रवृत्तौ चतुर्थाध्यायस्याऽऽद्यमाह्निकम्।

---

(१) 'कारणवैफल्यात्—इति क-खधृतपाठान्तरम्। (२) 'कर्मकारणकल' इति ख०। (३) 'संकल्पान्' इति ख०। (४) इदं क-पुस्तके नास्ति। (५) 'व्यक्तधर्मकं' इति क-खधृतपाठान्तरम्। (४*) इदं ख-पुस्तके नास्ति।

(क) इतः पूर्वमादर्शपुस्तकयोर्दृश्यमानः 'वार्त्तिकमित्यादिकमर्थवत्त्वा'दित्यन्तोऽ‍ंशः १०१८-१९ अङ्कित पत्रयोः सन्निवेशितः।

न्यायदर्शनम्

अथ चतुर्थाध्यायस्य द्वितीयमाह्निकम् ।

—:०:—

न्यायभाष्यम्

(१) किं नु खलु भोः यावन्तो विषयास्तावत्सु प्रत्येकं तत्त्वज्ञानमुत्पद्यते, अथ क्वचिदुत्पद्यत इति । कश्चात्र विशेषः ? न तावदेकैकत्र यावद्विषयमुत्पद्यते ज्ञेयानामानन्त्यात् । नापि क्वचिदुत्पद्यते, यत्र नोत्पद्यते तत्रानिवृत्तो मोह इति मोहशेषप्रसङ्गः । न चान्यविषयेण तत्त्वज्ञानेनान्यविषयो मोहः शक्यः प्रतिषेद्धुमिति ।

न्यायवार्त्तिकम्

तदिदं तत्त्वज्ञानमुत्पद्यमानं किं विषयमात्रे भवति आहोस्विद्विषयविशेष इति । विषयमात्रे तावदशक्यं तत्त्वज्ञानेन भवितुम् । कुतः ? विषयाणामानन्त्यात् । विषयविशेषेऽपि

न्यायवार्त्तिकतात्पर्यटीका

तदेवं संशयप्रमाणप्रमेयाणि परीक्षितानि । प्रयोजनादयोऽपि यत्र संशयस्तत्रैवमुत्तरोत्तरप्रसङ्ग (४१८ पृः) इत्यतिदेशेन परीक्षिता इति षोडशापि प्रमाणादयः परीक्षिताः । तेषां तत्त्वज्ञानं निःश्रेयसाधिगमहेतुरित्युक्तम् । तत्रापि प्रमेयतत्त्वज्ञानं साक्षान्निःश्रेयसहेतुरितरेषां तु तत्त्वज्ञानाङ्गतयेत्युक्तम् । इदमिहेदानीं परीक्ष्यते—किं प्रत्येकमात्मादीनां प्रमेयाणां तत्त्वज्ञानं निःश्रेयसाधिगमहेतुरुताहो कस्यचिदेषामेकदेशस्येति । तामिमां परीक्षामवतारयति भाष्यकारः—किं नु खलु भो यावन्तो विषयाः प्रमेयाणि तावत्सु प्रत्येकमिति । प्रतिप्राणभृन्नेदं यावन्त आत्मानः यावन्ति चेन्द्रियाणि चेत्यर्थः । पार्श्वस्थः पूर्वपक्षिणं पृच्छति—कश्चात्र विशेषः । पूर्वपक्षिण उत्तरं—न तावदेकैकत्रेति । समुदायैकदेशाभ्यामनुपपत्तेः प्रमाणादितत्त्वज्ञाना-

वृत्तिः

अथ शास्त्रस्य परमं प्रयोजनमपवर्गः, स चोद्दिष्टो लक्षितः परीक्षितोऽप्यकिञ्चित्करः कारणानिरूपणात् । नन्वभिहितमेव दुःखादिसूत्रे, कारणनाशक्रमेण दुःखाभावो-

---

(१) 'किन्न खलु' इति ज० ।

न्यायभाष्यम्

मिथ्याज्ञानं वै खलु मोहो न तत्त्वज्ञानस्यानुत्पत्तिमात्रम्। तच्च मिथ्याज्ञानं यत्र विषये प्रवर्त्तमानं संसारबीजं भवति स विषयस्तत्त्वतो ज्ञेय इति।

किं पुनस्तन्मिथ्याज्ञानम्? अनात्मन्यात्मग्रहः, अहमस्मीति मोहोऽहङ्कार इति। अनात्मानं खल्वहमस्मीति पश्यतो दृष्टिरहङ्कार इति। किं पुनस्तदर्थजातं यद्विषयोऽहङ्कारः? शरीरेन्द्रियमनोवेदनाबुद्धयः। कथं तद्विषयोऽहङ्कारः संसारबीजं

न्यायवार्त्तिकतात्पर्यटीका

निःश्रेयसाधिगम इत्ययुक्तमिति पूर्वः पक्षः। सिद्धान्तमाह—मिथ्याज्ञानं वै खलु मोह इति। वै-शब्दः (क)खलु पूर्वपक्षाक्षमायां, खलुशब्दो हेत्वर्थे। अयुक्तः पूर्वपक्षो यस्मान्मिथ्याज्ञानं मोह इति। न तत्त्वज्ञानमज्ञाननिवृत्तिमात्रेण निःश्रेयसोपयोगि, अपि तु संसारनिदानोच्छेदद्वारेण दृष्टेनैव। न च तत्त्वाज्ञानं संसारहेतुरपि तु मिथ्याज्ञानम्। तदुच्छिन्दद्विरोधितया तत्त्वज्ञानमपवर्ग हेतुरिति। भवत्वेतत्तथाऽपि पूर्वपक्षस्य किमायातमित्यत आह—तच्च मिथ्याज्ञानं यत्र विषये प्रवर्तमानमिति। स्वसंबन्धिनो ह्यात्मादयो विपर्ययेण परिच्छिन्नाः संसारहेतव इति तद्विषयमेव मिथ्याज्ञानमपनेयं नात्माद्यन्तरविषयं ज्ञानं, तेन तत्र मिथ्याज्ञानं मा निवर्तिष्ट निवर्ततां वा स्वात्मादिदृष्टान्तेन, न तु तस्य संसारनिवृत्तिं प्रत्युपयोगः। यस्य तूपयोगस्तत्र तत्त्वज्ञानं न दुष्करमिति। पृच्छति—किं पुनस्तन्मिथ्याज्ञानम्। सन्ति खलु वादिनां नाना विप्रतिपत्तयः। केचिदाहुः—विधूतविविधनामरूपप्रपञ्चोपप्लवविशुद्धचिदानन्द(१)घनाद्वैत-ब्रह्म-साक्षात्कारस्तत्त्वज्ञानमिति। अन्ये तु सत्त्वपुरुषान्यताख्यातिम्। धर्मपुद्गलनैरात्म्यज्ञानमित्यपरे। शरीरेन्द्रियाद्यनित्यव्यतिरिक्तनित्यात्मदर्शनमिति वृद्धाः। तदेवं विप्रतिपत्तेः प्रश्नः। उत्तरम्—अनात्मन्यात्मग्रहोऽहमस्मीति मोहोऽहङ्कारः। न तावदद्वतानन्दघनात्मज्ञानं तत्त्वज्ञानम्, भेदस्य प्रत्यक्षसिद्धस्यासति बाधकेऽपह्नोतुमशक्यत्वात्। न च प्रकाशानन्दावात्मधर्मावात्मातिरिक्तावात्मस्वभावौ भवितुमर्हतः। 'सत्यं विज्ञानमानन्दं ब्रह्मे'ति श्रुतिरानन्दचैतन्यशक्त्यभिप्राया। भेद एव च तद्वत्तया कथंचित् सामानाधिकरण्यमुपपद्यते। अभेदे त्वानन्दविज्ञानयोस्तत्पदयोः पर्यायतया सहप्रयोगानुपपत्तिः। न च प्रकृष्टप्रकाशः सवितेत्यत्र प्रकृष्टप्रकाशयोरभेदोऽप्रकाशस्यापि प्रकर्षसंभवात्, अप्रकृष्टस्यापि खद्योतादेः प्रकाशसंभवात्। तस्माद्यत्किंचिदेतत्। सत्त्वपुरुषान्यताख्यातिस्तु सत्त्वस्यैव प्रकृतेरसंभवादयुक्ता सत्कार्यवादमूलत्वात्प्रधानसद्भावस्य तन्निराकरणेनैव निराकरणम्। धर्मपुद्गलनैरात्म्ये तु क्षणभङ्गभङ्गे नित्यात्मसद्भावकथनेन निराकृते। तस्मात्सूक्तमनात्मन्यात्मग्रहोऽहमस्मीति मोहोऽहंकार इति। अतएव सर्वस्यैव-

(१) 'प्रकाशानन्दे'ति आदर्शधृतं पाठान्तरम्।

(क) 'खलु'शब्दोऽयं प्रमादादापतितः सम्भाव्यते।

न्यायभाष्यम्

भवति ? अयं खलु शरीराद्यर्थजातमहमस्मीति व्यवसितः तदुच्छेदेनात्मोच्छेदं मन्यमानोऽनुच्छेदतृष्णापरिप्लुतः पुनः पुनस्तदुपादत्ते, तदुपाददानो जन्ममरणाय यतते, तेनावियोगान्नात्यन्तं दुःखाद्विमुच्यते इति। यस्तु दुःखं दुःखायतनं दुःखानुषक्तं सुखं च सर्वमिदं दुःखमिति पश्यति स दुःखं परिजानाति। परिज्ञातं च दुःखं प्रहीणं भवत्यनुपादानात् सविषान्नवत्। एवं दोषान् कर्म च दुःखहेतुरिति पश्यति। (१) न चाप्रहीणेषु दोषेषु दुःखप्रबन्धोच्छेदेन शक्यं भवितुमिति दोषान् जहाति, प्रहीणेषु च दोषेषु न प्रवृत्तिः प्रतिसन्धानायेत्युक्तम्।

प्रेत्यभावफलदुःखानि च ज्ञेयानि व्यवस्थापयति कर्म च दोषांश्च प्रहेयान्। अपवर्गोऽधिगन्तव्यस्तस्याधिगमोपायस्तत्त्वज्ञानम्। एवं चतसृभिर्विधाभिः प्रमेयं विभक्तमासेवमानस्याभ्यस्यतो भावयतः सम्यग्दर्शनं यथाभूतावबोधस्तत्त्वज्ञानमुत्पद्यते।

एवं च—

दोषनिमित्तानां तत्त्वज्ञानादहङ्कारनिवृत्तिः ॥१॥

न्यायवार्त्तिकतात्पर्यटीका

मात्माशीः कृमेरपि—'मा न भूवं भूयास'मिति। सोऽयमीदृशोऽभिनिवेशः शरीरादीनामात्मत्वेनाध्यवस्यतो भवति नात्मतत्त्वविदुषः। स खल्वहिनिर्ल्वयनीमिवाहि(क)स्ततो व्यतिरिक्तं शरीरादि पश्यन्न तत्र स्निह्यति, स्नेहविरहान्न तप्यते नाप्यनुशोचतीति। अतत्त्वज्ञानवतः संसारं दर्शयित्वा तत्त्वज्ञानवतः संसारनिवृत्तिमाह—यस्तु दुःखमिति। तदेवमुक्तेन प्रकारेण मोहतत्त्वज्ञानयोः संसारापवर्गहेतुभावो यस्मात् तस्मान्मोक्षमाणैः प्रेत्यभाव-फल-दुःखानि च ज्ञेयानि व्यवस्थापयतीत्यादिपूर्वोपसंहारः। आसेवमानस्याभ्यस्यतो भावयत इति पर्यायकथनं भावनादार्ढ्योपदर्शनार्थम्।

अर्थगतिं परिशोधयितुमत्रार्थे सूत्रं पठति—

दोषनिमित्तानां तत्त्वज्ञानादहङ्कारनिवृत्तिः (सू. १)॥

वृत्तिः

ऽपवर्ग इतीति चेत्? सत्यम्, मिथ्याज्ञानापगमहेतुर्नाभिहितः। तत्त्वज्ञानं तत्र हेतुरिति चेत्? कस्य तत्त्वं ज्ञातव्यमित्यभिधानीयमित्याशयेन तत्त्वज्ञानपरीक्षा, सैव चाह्निकार्थः। तत्र च षट् प्रकरणानि आदौ तत्त्वज्ञानोत्पत्तिप्रकरणम्, अन्यानि च यथायथं वक्ष्यन्ते।

(१) 'न वा प्रहीणेषु' इति ज०।

(क) अहिनिर्ल्वयनी अहिनिर्मोकः।

न्यायभाष्यम्

शरीरादिदुःखान्तं प्रमेयं दोषनिमित्तं तद्विषयत्वान्मिथ्याज्ञानस्य। तदिदं तत्त्वज्ञानं तद्विषयमुत्पन्नमहङ्कारं निवर्त्तयति समानविषये तयोर्विरोधात्। एवं तत्त्वज्ञानाद् 'दुःखजन्मप्रवृत्तिदोषमिथ्याज्ञानानामुत्तरोत्तरापाये तदनन्तराभावादपवर्ग' इति। स चायं शास्त्रार्थसंग्रहोऽनूद्यते नापूर्वो विधीयते इति ॥ १ ॥

न्यायवार्त्तिकम्

तत्त्वज्ञानविषयत्वेन योऽवतिष्ठते स विभज्य वचनीयः। तत्र विषयान्तराणामात्मादिप्रमेयव्यतिरेकिणां निराकरणं प्रमेयविशेषविषयत्वात् सूत्रस्य—यत्तदात्मादिसूत्रं न तेन प्रमेयमात्रमभिधीयते, प्रमेयमात्राभिधाने हि आत्मादिग्रहणं व्यर्थम्, अपि तु प्रमेयविशेषः, यस्तत्त्वज्ञानविषयत्वेन व्यवतिष्ठमानः संसार(१)व्यवच्छेदहेतुर्भवति, यश्च मोहविषयत्वात् संसारं प्रतनोति स तत्त्वतो ज्ञेय इति। तस्मिन् अयं प्रश्नः—किं नु खलु भो यावन्तो विषयाः तावत्सु तत्त्वज्ञानं प्रत्येकमुत्पद्यते अथ क्वचिदुत्पद्यते इति ? न तावत् प्रत्येकम्, आत्मादेरानन्त्यात्। किमिदमानन्त्यम् ? इयत्ताप्रत्ययाविषयत्वम्। अथ क्वचिदुत्पद्यते ? यत्र नोत्पद्यते तत्त्वज्ञानं तत्रानिवृत्तो मोहः, यत्र मोहस्तत्र रागद्वेषाविति रागद्वेषमोहाश्च बन्धनमित्यनिर्मोक्षप्रसङ्गः। अथ मन्यसे अन्यविषयं मोहं निवर्तयति ? एवं च सत्यपवर्गः प्राणिमात्रे(२) प्राप्नोति। न हि कश्चित् प्राणी कस्यचिदर्थस्य तत्त्वं न वेति। न, मोहार्थापरिज्ञानात्—न तत्त्वज्ञानस्यानुत्पत्तिमात्रं मोहोऽपि तु मिथ्याज्ञानं मोहः, तच्च मिथ्याज्ञानं यस्मिन् विषये प्रवर्तमानं संसारबीजं भवति स विषयस्तत्त्वतो ज्ञेय इति। किं पुनस्तन्मिथ्याज्ञानम् ? अनात्मन्यात्मप्रत्यय इति। शेषं भाष्ये ॥

दोषनिमित्तानां तत्त्वज्ञानादहङ्कारनिवृत्तिः। शरीरादिदुःखान्तं प्रमेयं दोषनिमित्तं, तद्विषयत्वान्मिथ्याज्ञानस्य; तद्विषये तत्त्वज्ञानमुत्पन्नं तद्विषयमहङ्कारं निवर्तयति समाने विषये तयोर्विरोधात्। सर्वं चैतदुक्तं द्वितीयसूत्रे इति ॥ १ ॥

न्यायवार्त्तिकतात्पर्यटीका

शास्त्रार्थसंग्रहोऽनूद्यते शास्त्रतात्पर्यग्रहो द्वितीयसूत्रेणानूद्यत इत्यर्थः।

किं नु खलु भो इति भाष्यं, तदनुपपन्नम्, यतो न विषयमात्रज्ञानमपवर्गहेतुरपि तु प्रमेयतत्त्वज्ञानमित्यत आह वार्त्तिककारः—तत्र विषयान्तराणामिति। यावन्तो विषया इति न विषयमात्राभिप्रायमपि तु प्रमेयाभिप्रायमित्यर्थः। सुगममन्यद्वार्त्तिकम् ॥ १ ॥

(१) '—विच्छेदहेतुः' इति ख०।

(२) 'भवति'—इति क-ख-धृतपाठान्तरम्।

न्यायभाष्यम्

(१) प्रसङ्ख्यानानुपूर्वी तु खलु—

दोषनिमित्तं रूपादयो विषयाः सङ्कल्पकृताः ॥ २ ॥

कामविषया इन्द्रियार्था इति रूपादय उच्यन्ते। ते मिथ्या सङ्कल्प्यमाना राग-द्वेषमोहान् प्रवर्त्तयन्ति, तान्पूर्वं प्रसञ्चक्षीत। तांश्च प्रसञ्चक्षाणस्य रूपादिविषयो मिथ्यासङ्कल्पो निवर्तते। तन्निवृत्तावध्यात्मं शरीरादि प्रसञ्चक्षीत। तत्प्रसङ्ख्याना-

न्यायवार्त्तिकम्

दोषनिमित्तं रूपादयो विषयाः सङ्कल्पकृताः। कामा विषया इन्द्रियार्था रूपादय उच्यन्ते। तत्र ते विषया मिथ्या सङ्कल्प्यमाना रागादीन् जनयन्ति। कः पुनरेषां मिथ्या-सङ्कल्पः? असाधारणप्रत्ययोत्पत्तिनिमित्तत्वेन व्यवसायो 'ममैवैत' इति। तान् साधारणतया (२)प्रतिसञ्चक्षीत—नैते मम दैवचौराग्निदायादसाधारणा इति। एवमेतस्य (३)प्रतिसञ्चक्षाणस्य यो व्यवसायस्तद्विषयो मोहः स निवर्तत इति। तन्निवृत्तावध्यात्मं शरीरादीन् प्रतिसञ्चक्षीत।

न्यायवार्त्तिकतात्पर्यटीका

शरीरादिष्वनात्मस्वात्मबुद्धिर्निवर्तनीयेत्युक्तं, तत्र प्रथमं कस्मिन्नात्मबुद्धिर्निवर्तनीयेत्य-पेक्षायामाह—प्रसंख्यानानुपूर्व्या (क)तु खलु। प्रसंख्यानं समाधिजं तत्त्वज्ञानं, तच्च विषये सुकरमिति तत्रैव प्राथमिकस्य प्रथमं प्रयत्नो युक्तः॥

सूत्रम्—

दोषनिमित्तं रूपादयो विषयाः संकल्पकृताः (सू. २)॥ मिथ्याज्ञानं संकल्पस्तेन विषयीकृता इत्यर्थः। कामाः काम्याः ॥ २ ॥

वृत्तिः

तत्र सिद्धान्तसूत्रम्—(दोषनिमित्तानां तत्त्वज्ञानादहङ्कारनिवृत्तिः)।

अहङ्कारोऽहमित्यभिमानः, स च शरीरादिविषयको मिथ्याज्ञानमुच्यते, तच्च दोषनिमित्तानां शरीरादीनां तत्त्वस्यानात्मत्वस्य ज्ञानान्निवर्त्तते। आत्मत्वेन हि शरीरादौ मुह्यन् (४) रञ्जनीयेषु रज्यति कोपनीयेषु कुप्यति।

केचित्तु दोषनिमित्तानां रागादीनां तत्त्वज्ञानाद् बलवदनिष्टानुबन्धित्वज्ञानादह-ङ्कारस्य तदभिलाषस्य निवृत्तिरित्यर्थ इत्याहुः ॥ १ ॥

---

(१) 'प्रसङ्ख्यानानुपूर्व्या तु' इति ल-ग-ज०।
(२) 'प्रतिचक्षीत' इति ख०, 'प्रसञ्चक्षीत' इति ख-धृतपाठान्तरम्।
(३) 'प्रतिचक्षाणस्य' इति ख०, 'प्रसञ्चक्षाणस्य' इति क-ख-धृतपाठान्तरम्।
(४) 'रञ्जनीयत्वात्' इति भ०।
(क) अयं तृतीयान्तपाठः मुद्राप्रमादकृत इति केषाञ्चिदभिप्रायः।

न्यायभाष्यम्

वुध्यात्मविषयोऽहङ्कारो निवर्त्तते। सोऽयमध्यात्मं बहिश्च विविक्तचित्तो विहरन् मुक्त इत्युच्यते ॥ २ ॥

अतः परं काचित्संज्ञा हेया काचिद्भावयितव्येत्युपदिश्यते; नार्थनिराकरणमर्थोपादानं वा। कथमिति ?—

तन्निमित्तं त्ववयव्यभिमानः ॥ ३ ॥

तेषां दोषाणां निमित्तं त्ववयव्यभिमानः। सा च खलु स्त्रीसंज्ञा (१)सपरिष्कारा पुरुषस्य, पुरुषसंज्ञा च स्त्रियाः (२)सपरिष्कारा निमित्तसंज्ञा अनुव्यञ्जनसंज्ञा

न्यायवार्त्तिकम्

किं पुनः (क)प्रसंख्यानं ? शरीरादिषु नैते आत्मान इति व्यतिरेकदर्शनं प्रसंख्यानम्। सोऽयमध्यात्मं बहिश्च विविक्तचित्तो विहरन् मुक्त इत्युच्यते। एतच्च त आहुः—

"जीवन्नेव विद्वान् संहर्षायासाभ्यां मुच्यते" इति ॥ २ ॥

अतः परं काचित्संज्ञा भावयितव्या काचिद्धेया इत्युपदिश्यते। नार्थनिराकरणं नार्थोपादानं, किं तु यथाव्यवस्थित एव विषये किञ्चिद्भावनीयं किञ्चित् निराकरणीयमिति।

तन्निमित्तं त्ववयव्यभिमानः। तेषां दोषाणां निमित्तमवयव्यभिमानः। तत्रावयवीति संज्ञा भावनीया स्त्री-संज्ञा हेया सपरिष्कारा पुरुषस्य। परिष्कारो बन्धनम्। स्त्रियाः पुरुषसंज्ञा

न्यायवार्त्तिकतात्पर्यटीका

अन्ये खलु अवयविसंज्ञां निवर्तयन्तोऽवयविनमेव प्रत्याचक्षते तान् प्रत्याचक्षाण आह— अतः परं काचिदिति। सूत्रम्—

तन्निमित्तं त्ववयव्यभिमानः (सू. ३) ॥ निमित्तं दन्तत्वादि, तद्विशिष्टा विषयाः संज्ञाः, प्रियायाः कामुको दन्तोष्ठनासिकादीनवयवाननुभावयन् तस्यां सक्तो भवति। व्यञ्जनान्यवयविनोऽवयवास्तैः सहोपलम्भात्तेषामनुव्यञ्जनं तत्सादृश्यं तेन तदारोपः। तथा च स्त्रैणानां व्यवहारः—

वृत्तिः

ननु के तावदनुरञ्जनीया विषया येषु रज्यन् संसरतीत्यतो विवेकाय तानुपदिशति—(दोषनिमित्तं रूपादयो विषयाः सङ्कल्पकृताः)।

सङ्कल्पः समीचीनत्वेन भावनम्, तद्विषयीकृता रूपादयो दोषस्य रागादेर्निमित्तम्; सुन्दरोऽयमिति जानन् रज्यति, शत्रुरयमिति द्वेष्टि। ते रूपादयो हेयत्वेन भावनीयाः प्रथमम्, ततः शरीरात्मविवेकः ॥ २ ॥

(१) 'परिष्कारश्च' इति ख-ग-ज०। (२) .... (२*) अयमग्रः त्रि-पुस्तके नास्ति।

(क) अत्र 'प्रसंख्यान'पददर्शनेन पूर्वत्रापि स एवार्थो युक्त इति क-ख-धृतपाठान्तरमेव साधीयः प्रतिभाति।

न्यायभाष्यम्

च (२*)। निमित्तसंज्ञा—(१) रसनाश्रोत्रम्, दन्तोष्ठम्, चक्षुर्नासिकम्। अनुव्यञ्जनसंज्ञा—(२) इत्थं दण्डा इत्थमोष्ठाविति। सेयं संज्ञा कामं वर्धयति तदनुषक्तांश्च (३) दोषान् विवर्जनीयान्, वर्जनं त्वस्याः। भेदेनावयवसंज्ञा—केश-लोम-मांस-

न्यायवार्त्तिकम्

सपरिष्कारेति। तत्रापि च द्वे संज्ञे निमित्तसंज्ञा(४) अनुव्यञ्जनसंज्ञा च। निमित्तसंज्ञा दन्तौष्ठमिति, दन्तादिषु दन्तत्वादिनिबन्धना संज्ञा (५) अर्थव्यञ्जनसंज्ञा (च) इत्थं दन्ता

न्यायवार्त्तिकतात्पर्यटीका

द्रवत्कनकनिर्मलद्युतिरनङ्गलीलैकभूर्महेभकटविभ्रमस्तनभरालसाङ्गी यदि।
प्रिया न परिरभ्यते तुलितसिद्धसंजीविनी सहेमहि कुतोऽन्यथा विषमबाणबाणव्यथाम्॥
मदनसरितमेनां गाहमानो जनोऽयं जघनपुलिननाभीमण्डलावर्तरम्याम्।
मुखनलिनसनाथामुल्लसद्भ्रूलतोर्मिं चिरविरहहुताशायासमुज्झांचकार॥

विवेकिनस्त्वशुभसंज्ञां भावयन्तः प्राहुः—

मज्जामस्थ्नामथ प्लीह्नां यकृतां शकृतामपि।
पूर्णाः स्नायुशिरास्यूताः स्त्रियश्चर्मप्रसेविकाः॥

ऋषयोऽप्यूचुः—

स्थानाद्बीजादुपष्टम्भान्निष्यन्दान्निधनादपि।
कायमाधेयशौचत्वात्पण्डिता ह्यशुचिं विदुः॥

वृत्तिः

ननु सौन्दर्यादिकं पश्यतो रागादिर्ब्रह्मणोऽपि दुष्परिहरः, तदुक्तं 'चञ्चलं हि मनः कृष्ण प्रमाथि बलवद् दृढम्' इति। अतो रागादिनिवृत्त्युपायं दर्शयिष्यन्नाह—(तन्निमित्तं त्ववयव्यभिमानः)।

अवयविनि तरुण्यादिशरीरेऽभिमानः सपरिष्कारबुद्धिः, तन्निमित्तं रागादिनिमित्तम्। तथा च सा बुद्धिर्हेया, अत एव भाष्यादौ परिष्कारबुद्धि(क)रनुरञ्जनसंज्ञा, सा हेया, दोषदर्शनमशुभसंज्ञा सा भावनीयेति।

अनुरञ्जनसंज्ञा यथा—

"खेलत्खञ्जननयना परिणतबिम्बाधरा पृथुश्रोणी।
कमलमुकुलस्तनीयं पूर्णेन्दुमुखी सुखाय मे भविता॥" इति।

---

(१) 'रसनाश्रोत्रम्' इति ग-ज-पु० नास्ति। (२) अत्र 'इत्थं दन्ती' इति ख-ग-ज-झा० इत्थं दन्ता इति फ-पु० नास्ति। (३) 'दोषा विवर्जनीयाः' इति टि०। (४) 'अनु (अर्थ)व्यञ्जनसंज्ञा' इति क०। (५) 'अर्थव्यञ्जनसंज्ञा' इति ख०।

(क) भाष्यादावनुव्यञ्जनशब्द एव दृश्यते।

न्यायभाष्यम्

शोणितास्थि-स्नायु-शिरा-कफ-पित्तोच्चारादिसंज्ञा ; तामशुभसंज्ञेत्याचक्षते। तामस्य भावयतः कामरागः प्रहीयते।

सत्येव च द्विविधे विषये काचित्संज्ञा भावनीया काचित्परिवर्जनीयेत्युपदिश्यते, यथा विषसम्पृक्तेऽन्नेऽन्नसंज्ञोपादानाय विषसंज्ञा प्रहाणायेति ॥ ३ ॥

न्यायवार्त्तिकम्

इत्थमोघाविति इत्थमित्यध्यारोपेण निमित्तस्य। सेयमध्यारोपेण (१) भाव्यमाना संज्ञा मोहः। स च रागादिकारणमिति हेयः। न पुनरवयवी निराकार्यः प्रमाणतस्तथाभावादिति ॥ ३ ॥

न्यायवार्त्तिकतात्पर्यटीका

अशुभसंज्ञाभावनाप्रयोजनमाह—तामस्य भावयत इति। तत्किमिदानीमवयवानुव्यञ्जनसंज्ञयोर्विषयो नास्त्यशुभसंज्ञाविषय एव परमस्तीत्यत आह—सत्येव च द्विविधविषय इति। द्विविध एवासौ कामिनीलक्षणो विषयस्तथाऽपि रागादिप्रहाणार्थमवयवादिसंज्ञागोचरत्वं परित्यज्याशुभसंज्ञागोचरत्वमस्योपादीयते वैराग्योत्पादनायेत्यर्थः। अत्रैव दृष्टान्तमाह—यथा विषसंपृक्त इति। न हि विषमधुनी परमार्थतो न स्तः, अपि तु वैराग्याय विषसंज्ञा तत्रोपादीयत इत्यर्थः ॥ ३ ॥

वृत्तिः

अशुभसंज्ञा यथा—

"चर्मनिर्मितपेशीयं मांसासृक्पूयपूरिता।
अस्यां रज्यति यो मूढः पिशाचः कस्ततोऽधिकः ॥" इति।

स्वशरीरादावप्यशुभसंज्ञैव भावनीया। एवं कोपनीयेऽपि।

शुभसंज्ञा—

"मां द्वेष्ट्यसौ दुराचारो (१) दुष्टो निष्ठुरचेष्टितः।
कण्ठपीठं कुठारेण च्छित्वाऽस्य स्यां सुखी कदा ॥"

अशुभसंज्ञा तु—

"मांसासृक्कीकसमयो देहः किं मेऽपराध्यति।
एतस्मादपरः कर्ता कर्तनीयः कथं मया" इति ॥ ३ ॥

समाप्तं तत्त्वज्ञानोत्पत्तिप्रकरणम् ॥ १ ॥

---

(१) 'उच्यमाना' इति ख०।

(२) 'दृष्टादिषु यथेष्टतः' इति भ०।

न्यायभाष्यम्

अथेदानीमर्थं निराकरिष्यता(१)ऽवयविनिराकरणमुपपाद्यते—

विद्याऽविद्याद्वैविध्यात् संशयः ॥ ४ ॥

सदसतोरुपलम्भाद्विद्या द्विविधा, सदसतोरनुपलम्भादविद्याऽपि द्विविधा। उपलभ्यमानेऽवयविनि विद्याद्वैविध्यात् संशयः, अनुपलभ्यमाने चाविद्याद्वैविध्यात् संशयः। सोऽयमवयवी यद्युपलभ्यते अथापि नोपलभ्यते न कथञ्चन संशयान्मुच्यते इति ॥ ४ ॥

न्यायवार्त्तिकम्

अथेदानीमर्थं निराकरिष्यता अवयविन्युपपाद्यते(क)—

विद्याऽविद्याद्वैविध्यात् संशयः। सदसतोरुपलम्भात् द्विविधा विद्या। सदसतोरनुपलम्भात् अविद्याऽपि द्विविधैव। एवं चावयवी यद्युपलभ्यते अथ नोपलभ्यते न कथञ्चन

न्यायवार्त्तिकतात्पर्यटीका

तदेवं स्वमतेन प्रसंख्यानोपदेशमुक्त्वा पराभिमतप्रसंख्यानं निराकर्त्तुमुपन्यस्यति—अथेदानीमर्थं निराकरिष्यता विज्ञानवादिना अवयविनिराकरणमुपपाद्यते। अर्थविशेषे खल्ववयवानुव्यञ्जनसंज्ञे। तत्रार्थमात्रस्याभावात्कुतोऽवयवानुव्यञ्जनसंज्ञे ? तन्निकारणाय प्रथममवयवी निराक्रियते, पश्चात्परमाणुः। ततश्च ज्ञानमात्रमर्थरहितं सिद्धं भवतीत्यभिप्रायः।

तत्र संशयपूर्वकत्वादुपपादनस्य विचारस्य संशयं प्रथममाह—

विद्याऽविद्याद्वैविध्यात्संशयः (सू. ४)॥ उपलब्धिर्विद्या अनुपलब्धिश्चाविद्या, सच्चोपलभ्यते यथा तड़ागे तोयम्, असच्चोपलभ्यते यथा मरुमरीचिकायामुदकम्। सच्च नोपलभ्यते यथा चिरनिखातं भूमौ निध्यादि। असच्च नोपलभ्यते, यथा—भूतले दृश्यमाने

वृत्तिः

अत्र प्रसङ्गादवयविप्रकरणम्। वस्तुतस्तु शरीरे धर्मद्वयस्य सम्बन्धेऽप्येकं ध्येयमपरं हेयमिति निर्युक्तिकम्, अतोऽवयवी नास्ति किं तु परमाणुपुञ्ज इति तत्त्वं, तदेव मुमुक्षुभिर्भावनीयम्। परमाणुपुञ्ज इत्यप्यापाततः, परमाणोरप्यग्रे निराकरिष्यमाणत्वादिति सौगताशङ्कामपाकर्तुमयमारम्भः।

यद्यपि द्वितीयाध्याये व्यवस्थापित एवावयवी, तथाऽपि स्वयुक्तिदार्ढ्येन सौत्रान्तिकस्य वैभाषिकस्य चाल प्रत्यवस्थानमिति।

---

(१) 'अवयव्युपपाद्यते' इति ल-ग-ज-भा०।

(क) निराकरणमिति कर्मपदमूह्यम्।

तदसंशयः पूर्वहेतुप्रसिद्धत्वात् ॥ ५ ॥

न्यायभाष्यम्

तस्मिन्ननुपपन्नः संशयः। कस्मात्? पूर्वोक्तहेतूनामप्रतिषेधादस्ति द्रव्यान्तरारम्भ इति ॥ ५ ॥

न्यायवार्त्तिकम्

संशयात मुच्यते इति। तत्र तावदुक्तं न विद्याऽविद्याद्वैविध्यं संशयस्य कारणम्, उपलब्ध्यनुपलब्ध्योः पूर्वपदविशेषणत्वात् ॥ ४ ॥

तदसंशयः पूर्वहेतुप्रसिद्धत्वात्। तस्मिन्नवयविनि संशयो न युक्तः पूर्वोक्तानां हेतूनामप्रतिषेधात्। तत्र येऽवयविनोऽर्थान्तरभावे हेतव उद्दिष्टास्ते न शक्याः प्रतिषेद्धुमिति ॥ ५ ॥

न्यायवार्त्तिकतात्पर्यटीका

तत्तुल्योपलम्भनयोग्यतो घटादिः। तदेवं विद्याऽविद्याद्वैविध्यादवयविनि संशयः। यद्यवयव्युपलभ्यते तथाऽपि संशयः, अथ नोपलभ्यते तथाऽपि संशय इत्यर्थः ॥ ४ ॥

तत्र सिद्धान्ती वक्ष्यमाणमप्यवयविनिराकरणहेतुं निराकरिष्यामीत्याशयवानाह—

तदसंशयः पूर्वहेतुप्रसिद्धत्वात् (सू. ५) ॥ (क)अवयविनः।

वार्त्तिककारस्तु स्वयं संशयं निराकरोति—न विद्याऽविद्याद्वैविध्यं संशयस्य कारणमिति ॥ ५ ॥

वृत्तिः

तत्र संशयप्रदर्शनाय सूत्रम्—(विद्याऽविद्याद्वैविध्यात् संशयः)।

संशय इत्यस्य अवयविनीत्यादिः। अवयविनः प्रत्यक्षसिद्धत्वात्तदपलापो दुःशक इत्यत उक्तं—विद्येति। प्रमाभ्रमभेदेन ज्ञानद्वैविध्यात् ज्ञानत्वलक्षणसाधारणधर्मदर्शनाद् ज्ञानप्रामाण्यसंशयादवयविनि संशय इत्यर्थः ॥ ४ ॥

समाधत्ते—(तदसंशयः पूर्वहेतुप्रसिद्धत्वात्)।

तत्रावयविनि न संशयः पूर्वहेतुप्रसिद्धत्वात्, द्वितीयाध्यायोक्तयुक्तिभिरवयविनः प्रकर्षेण सिद्धत्वात् ॥ ५ ॥

(क) 'अवयविनः' इति तात्पर्यटीका सूत्रान्वयिनीति बोध्यम्।

वृत्त्यनुपपत्तेरपि (१)न संशयः ॥ ६ ॥

न्यायभाष्यम्

(२)वृत्त्यनुपपत्तेरपि तर्हि(२*) संशयानुपपत्तिर्नास्त्यवयवीति ॥ ६ ॥

तद्विभजते—

(क) कृत्स्नैकदेशावृत्तित्वादवयवानामवयव्यभावः ॥ ७ ॥

एकैकोऽवयवो न तावत् कृत्स्नेऽवयविनि वर्त्तते, तयोः परिमाणभेदादवयवान्तरसम्बन्धाभावप्रसङ्गाच्च । नाप्यवयव्येकदेशेन, न ह्यस्यान्ये अवयवा एकदेशभूताः सन्तीति ॥ ७ ॥

न्यायवार्त्तिकम्

वृत्त्यनुपपत्तेरपि तर्हि न संशयः । वृत्त्यनुपपत्तेरपि तर्हि संशयानुपपत्तिः नास्त्येव ह्यवयवीति ॥ ६ ॥

तद्विभजते—

कृत्स्नैकदेशावृत्तित्वादवयवानामवयव्यभावः । अवयवा अवयविनि वर्त्तेरन् अवयवी वा अवयवेषु । अवयवा अवयविनि वर्तमानाः कृत्स्नेन वर्तन्ते, एकदेशेन वा ? तत्र तावदवयवा

न्यायवार्त्तिकतात्पर्यटीका

पूर्वपक्षवाद्याह—वृत्त्यनुपपत्तेरिति ।

वृत्त्य-व्यः (सू० ६) ॥(क) कृत्स्नै-वः (सू० ७) ॥ वृक्षस्तिष्ठति शाखादिषु शाखादयो वा वृक्ष इति लौकिकीं प्रतिपत्तिमनुरुध्यमानो विकल्पयति वार्त्तिककारः—अवयवा

वृत्तिः

अवयविनि बाधकं शङ्कते—(वृत्त्यनुपपत्तेरपि (ख)तर्हि संशयानुपपत्तिः) ।

अपिरवधारणे । तर्हि संशयानुपपत्तिर्वृत्त्यनुपपत्तितोऽवयव्यभावादेव स्यादित्यर्थः ।

वृत्त्यनुपपत्तिं विवृणोति भाष्यकारः—"कृत्स्नैकदेशावृत्तित्वादवयवानामवयव्यभावः ।" अवयवी हि एकैकावयवे कार्त्स्न्येन एकदेशेन वा ? नाद्यः, विषमपरिमाणत्वात्, अन्त्येऽपि तेनैवावयवेनान्येन वा ? नाद्यः, स्वस्मिन् वृत्तिविरोधात् , नान्त्यः, अवयवान्तरस्यावयवान्तरावृत्तेः ।

---

(१) 'न संशयः' इति वि-टि-पु० नास्ति । 'तर्हि न संशयः' इति ल-ग-ज० । न्यायसूत्रोद्धारेऽप्येवम् ।

(२) अयमंशः ल-ग-भा-पुस्तकेषु नास्ति ।

(क) वृत्तिकृन्मते अस्य भाष्यसन्दर्भरूपतया पारमर्षसूत्रत्वाभावेन इतो सूत्रसंख्याह्रासः ।

(ख) सूत्रे तु पाठभेदो दृश्यते ।

न्यायभाष्यम्

अथावयवेष्वेवावयवी वर्त्तते—

(क) **तेषु चावृत्तेरवयव्यभावः ॥ ८ ॥**

न तावत्प्रत्यवयवं वर्त्तते, तयोः परिमाणभेदाद् द्रव्यस्य चैकद्रव्यत्वप्रसङ्गात् । (१) नाप्येकदेशैः सर्वेषु अन्यावयवाभावात् । तदेवं (२) न युक्तः संशयो नास्त्यवयवीति ॥ ८ ॥

न्यायवार्त्तिकम्

अवयविनि (ख)कृत्स्नेन न वर्तन्ते, अवयवावयविनोः परिमाणभेदात् । अल्पपरिमाणोऽवयवो महापरिमाणश्चावयवीति अल्पपरिमाणेन महापरिमाणस्याव्याप्तिः । एकद्रव्यश्चावयवः प्राप्नोति एकावयविवृत्तित्वात् । न चैकद्रव्यं द्रव्यमविनश्यदाधारमस्ति । नाप्यवयव्येकदेशेन वर्तते । न ह्यस्यान्येऽवयवाः एकदेशभूताः सन्ति । तस्मिन्नपि चैकदेशेन वर्त्तमानोऽवयवः किमेकदेशेन वर्तते कृत्स्नेन वेति पूर्ववत् प्रसङ्गः ॥ ७ ॥

अथावयवेषु अवयवी वर्तते ?

तेषु चावृत्तेरवयव्यभावः । न तावत् प्रत्यवयवं कृत्स्नो वर्तते तयोः परिमाणभेदात् अवयविनश्च एकद्रव्यताप्रसङ्गात् । एकावयववृत्तित्वादेकद्रव्योऽवयवी प्राप्नोति, एकद्रव्यश्चावयवी एकेन द्रव्येणारभ्यत इति सततोत्पत्तिप्रसङ्गः । किञ्च एकद्रव्यत्वात् द्व्यणुक(३)मेकस्मिन्

न्यायवार्त्तिकतात्पर्यटीका

अवयविनीति । एकद्रव्यश्चावयवः प्राप्नोति । कुतः ? एकावयविवृत्तित्वात् । भवतु को दोष इत्यत आह—न चैकद्रव्यं द्रव्यमविनश्यदाधारमस्ति । कृतकस्य नित्यत्वप्रसङ्गादिति शेषः । अवयव्येकदेशेनेति । अवयविनो य (ग)एकदेशास्तेनावयवोऽवयविनि वर्त्तत इत्यर्थः । न ह्यस्याऽवयविनोऽन्ये अवयवेषु एकदेशा अवयवाः सन्तीति ।

तेषु—वः (सू ८) ॥ एकेनावयवेनारभ्यत इति सततोत्पत्तिप्रसङ्गः । संयोगाय

वृत्तिः

तथाऽपि कथमवयव्यभाव इत्यत्र भाष्यम्—

"तेषु चावृत्तेरवयव्यभावः" । तेषु अवयवेषु पूर्वोक्तयुक्त्या वृत्तेरभावादवयवी नास्ति, न ह्यसाववृत्तिस्त्वयाऽभ्युपेयते इति भावः ।

सूत्रमेवेदमित्यपि वदन्ति ॥ ६ ॥

---

(१) 'नाप्येकदेशेन' इति ल-ग-भा-टि० । (२) 'न-इति वि-टि-ज-पु० नास्ति । 'युक्तः संशयः' इति टि० । (३) एकद्रव्ये यद् द्व्यणुकं—इत्यादर्शेषु तं पाठान्तरम् ।

(क) वृत्तिकृन्मते अस्यापि भाष्यान्तर्गतत्वमिति वृत्तौ सूत्रसंख्याभावः । (ख) 'कृत्स्ने न वर्त्तन्ते' इति क-पुस्तके मुद्राप्रमादः । (ग) 'एकदेशस्तेन' इत्येव युक्तं न वेति चिन्तनीयम् ।

पृथक् चावयवेभ्योऽवृत्तेः ॥ ९ ॥

न्यायभाष्यम्

(१) अवयव्यभाव इति वर्त्तते। न चायं पृथगवयवेभ्यो वर्त्तते अग्रहणात् नित्यत्वप्रसङ्गाच्च। तस्मान्नास्त्यवयवीति (१*) ॥ ९ ॥

न्यायवार्त्तिकम्

परमाणौ वर्तत इति कारणविभागविनाशाभावात् नित्यं प्राप्नोति। उत्पत्तिमच्च नित्यं चेति न दृष्टान्तोऽस्ति। अथाप्यवयवी एकदेशेन वर्तते, तथापि अवयविन आरम्भकावयवव्यतिरिक्तावयवाः प्राप्नुवन्ति, येऽवयवेषु वर्तन्त इति ॥ ८ ॥

पृथक् चावयवेभ्योऽवयव्यवृत्तेः(क)। नाप्यवयवव्यतिरेकेणान्यत्र वर्तते अग्रहणान्नित्यत्वप्रसङ्गाच्च। अवयवव्यतिरेकेणान्यत्र वर्तमान उपलभ्येत, नित्यश्च स्यादनाधारं द्रव्यं नित्यमिति ॥ ९ ॥

न्यायवार्त्तिकतात्पर्यटीका

किल चरमभाविने अवयवव्यापारस्तन्निमित्तानि चापेक्ष्यन्ते। एकद्रव्यस्योत्पत्तिं प्रति न संयोगापेक्षेति यावदवयवमवयव्युत्पद्येतेत्यवयव्यनवरुद्धो न कदाचिदवयवो दृश्येतेत्यर्थः ॥८॥

पृथक्—त्तेः (सू ९) ॥ अवयवव्यतिरेकेण वर्त्तमानोऽवयव्युपलभ्येत, न चास्याधारान्तरमुपलभ्यते, दृश्यमानश्चावयवो नाधिकरणमस्येति भवतैव वादिनाऽभ्युपगतमित्यभिप्रायेणाह—नित्यश्च स्यात् ॥ ९ ॥

वृत्तिः

नन्वास्तामवृत्तिरेवावयवीति शङ्कायां पूर्वपक्षिसूत्रम्—(पृथक् चावयवेभ्योऽवृत्तेः)।

अवयवेभ्यः पृथक् अवयवी नास्तीति शेषः। 'तेषु चावृत्तेः' इत्यस्य सूत्रत्वे 'अवयव्यभावः' इत्यनुवर्त्तते। कुतः? अवृत्तेः। वृत्त्यभावेऽवयविनो नित्यत्वप्रसङ्गः, न च नित्योऽवयव्युपलभ्यते, अतो नास्त्येवावयवीति भावः।

यद्वा, कृत्स्नैकदेशाभ्यामवयवी न वर्त्तते, किं तु स्वरूपेणैवेति शङ्कायां पूर्वपक्षिणः सूत्रं—पृथगिति। अवयवेभ्यः पृथगवयवी नास्ति, कुतः? अवृत्तेः अवृत्तित्वप्रसङ्गात्, तथा सति (२) नित्यत्वं स्यादिति भावः।

केचित्तु अवयवातिरिक्तोऽवयवी वर्ततामित्यत्र पूर्वपक्षिणः सूत्रं—पृथगिति। पूर्वोक्तयुक्त्याऽवयवेभ्यः पृथगप्यवृत्तेः ॥ ७ ॥

(१) भाष्यमिदं ख-ग-ज पुस्तकेषु नास्ति।
(२) 'नित्यं' इति भ०।
(क) वार्त्तिकधृतसूत्रे पाठभेदो द्रष्टव्यः।

न चावयव्यवयवाः ॥ १० ॥

न्यायभाष्यम्

(१) न चावयवानां धर्मोऽवयवी। कस्मात्? धर्ममात्रस्य धर्मिभिरवयवैः पूर्ववत् सम्बन्धानुपपत्तेः (१*)। (क) पृथक् चावयवेभ्यो धर्मिभ्यो धर्मस्याग्रहणादिति समानम् ॥ १० ॥

न्यायवार्त्तिकम्

न चावयव्यवयवाः। न चावयवानां धर्ममात्रमवयवी। कस्मात्? धर्मस्यावयविनो धर्मिभिरवयवैः पूर्ववत् सम्बन्धोऽनुपपन्नः। न चात्र धर्मिभ्योऽवयवेभ्योऽवयवी धर्मः पृथगुपलभ्यते नित्यत्वप्रसङ्गादिति च समानम्। अवयवी चैकदेशेन अवयवे वर्तत इति अवयवसमूहमात्रमवयवी प्राप्नोति। एकस्मिंश्चावयवे एकदेशेन वर्तमानोऽवयवी एकावयवोपलम्भात् एकदेशेनोपलब्धौ तत्स्थानेऽवयवी गृह्येत। न त्वेकतन्तुदर्शने पटोपलब्धिर्भवति। तदेवं मुक्तसंशयोऽभिधीयते नास्त्यवयवीति ॥ १० ॥

न्यायवार्त्तिकतात्पर्यटीका

यस्तु मन्यते—'अवयवानां धर्ममात्रमवयवी न त्ववयवेभ्योऽत्यन्तं भिन्नोऽभिन्नो वा, भिन्नत्वे गवाश्ववद्धर्मधर्मिभावानुपपत्तेः, अभेदेऽपि धर्मरूपवत्तदनुपपत्तेश्च। तस्मात्कथंचिद्भिन्नोऽभिन्नश्च कथंचिद्धर्ममात्रमवयवानामवयवी'ति, तं प्रत्याह—

न चावयव्यवयवाः (सू १०)॥ न तावद्भेदाभेदौ परस्पराभावात्मानावेकत्र समवेत इत्युक्तम्। नाप्यात्यन्तिकेऽभेदे धर्मधर्मिभावः। तस्माद् यथाऽऽत्यन्तिकभेदेऽपि केषांचिदेव कार्यकारणभावः, तथा केषांचिदेव धर्मधर्मिभाव इत्येषितव्यम्। तथा च दूषणमित्यर्थः। अवयवी चैकदेशेनावयवे वर्त्तत इति अवयवसमूहमात्रमवयवी प्राप्नोतीति। अस्यायमर्थः—अवयवे हि वर्त्तमानोऽवयवीत्युच्यते। अवयव्येकदेशाश्चेदवयवेषु वर्त्तन्ते, एकदेशा एव तर्ह्यवयविनः। ते च नानेत्यवयवसमूहमात्रमवयवी प्राप्नोति। एकस्मिंश्चावयवे एकदेशेन वर्त्तमानोऽवयवीति न तावदवयवी क्वचिदवयवे वर्त्तत इति तदेकदेशानां तत्र तत्रावयवे वृत्तेः तावन्मात्रेण चावयविनो ग्रहणमिति यत्रैवास्यैकदेशो वर्त्तते तत्रैव ग्रहीतव्यः। तथा चैकस्मिन् तन्तौ पटैकदेशो वर्त्तत इति तन्तावेकस्मिन् पटो दृश्येतेत्यर्थः ॥ १० ॥

वृत्तिः

नन्ववयवावयविनोस्तादात्म्यमेव सम्बन्धः स्यादत्राह—(न चावयव्यवयवाः)।

न हि तन्तुः पटः, स्तम्भो गृहमिति कश्चित् प्रत्येति, न वाऽभेदेनाऽऽधाराधेयभाव उपपद्यते ॥ ८ ॥

---

(१) अयमंशः ल-ग-ज-पुस्तकेषु नास्ति।

(क) इतः प्रभृति 'समानम्' इत्यन्तो ग्रन्थः ल-ग-ज-पुस्तकेषु नवमसूत्रभाष्यत्वेन गृहीतः।

न्यायभाष्यम्

एकस्मिन् भेदाभावाद् भेदशब्दप्रयोगानुपपत्तेरप्रश्नः ॥ ११ ॥

किं प्रत्यवयवं कृत्स्नोऽवयवी वर्त्तते अथैकदेशेनेति नोपपद्यते प्रश्नः। कस्मात्? एकस्मिन् भेदाभावाद् भेदशब्दप्रयोगानुपपत्तेः। कृत्स्नमित्यनेकस्याशेषाभिधानम्, एकदेश इति नानात्वे कस्यचिदभिधानम्। ताविमौ कृत्स्नैकदेशशब्दौ भेदविषयौ नैकस्मिन्नवयविन्युपपद्येते भेदाभावादिति ॥ ११ ॥

अन्यावयवाभावान्नैकदेशेन वर्त्तत इत्यहेतुः—

(१)अवयवान्तरभावेऽप्यवृत्तेरहेतुः—॥ १२ ॥

अवयवान्तराभावादिति। यद्यप्येकदेशोऽवयवान्तरभूतः स्यात् तथाप्यवयवेऽवय-

न्यायवार्त्तिकम्

यत्तावदवयवा अवयविनि वर्तन्त इति? तन्न, अनभ्युपगमात्—न कारणं कार्ये वर्त्ततेऽपि तु कारणे कार्यमिति। यत् पुनरेतदवयव्यवयवेषु वर्तमान एकदेशेन वर्तते कृत्स्नेन वा वर्तत इति, तन्न;—

एकस्मिन् भेदाभावाद् भेदशब्दप्रयोगानुपपत्तेरप्रश्नः। कृत्स्नमिति च एकदेश इति च भेदविषयावेतौ शब्दौ, न चैतावेकस्मिन्नुपपन्नौ। अनेकस्याशेषता कृत्स्नशब्दस्यार्थः, अशेषस्य कस्यचिदभिधानमेकदेशशब्दस्य, न चैतदिहोपपद्यते इति। तस्मान्नावयविनि कृत्स्नशब्दो नाप्येकदेशशब्द इति ॥ ११ ॥

(२)अवयवान्तरभावेऽप्यवृत्तेरहेतुः—अवयवान्तराभावादिति। यद्यवयवव्यतिरिक्तमवयवान्तरं प्रतिपद्येथाः, तथाप्यवयवोऽवयवे वर्तते नावयवीत्यहेतुः—अवयवान्तराभावात्

न्यायवार्त्तिकतात्पर्यटीका

सिद्धान्तवाद्याह—

एकस्मिन् भेदाभावाद् भेदशब्दप्रयोगानुपपत्तेरप्रश्नः (सू ११) ॥ (क)

(३)अवयवान्तरभावेऽप्यवृत्तेरहेतुः (सू १२) ॥ एकदेशेन चावयवी न स्वावयवेषु वर्त्तत इत्यत्र प्रतिज्ञार्थे अवयवान्तराभावादित्यहेतुः। कस्मात्? यद्यप्यवयवान्तरमवयविनो भवति तथाप्यवयवान्तराण्यवयविनोऽवयवान्तरेषु वर्त्तन्ते, किमायातमवयविवृत्तेरिति।

(१) 'अवयवान्तराभावेऽपी'ति ज-ग०। (२-३) 'अवयवान्तराभावेऽपि' इति क-ख०।

(क) एकादशसूत्रस्यावतारणातिरिक्ता टीका नास्ति।

न्यायभाष्यम्

वान्तरं वर्त्तेत नावयवीति (१)अन्योऽवयवीति(१*)। अन्यावयवभावेऽप्यवृत्तेरवयविनो नैकदेशेन वृत्तिरन्यावयवाभावादित्यहेतुः।

वृत्तिः कथमिति चेत्? एकस्यानेकत्राश्रयाश्रितसम्बन्धलक्षणा प्राप्तिः। आश्रयाश्रितभावः कथमिति चेत्? यस्य यतोऽन्यत्रात्मलाभानुपपत्तिः स आश्रयः। न कारणद्रव्येभ्योऽन्यत्र कार्यद्रव्यमात्मानं लभते विपर्ययस्तु कारणद्रव्येष्विति।

नित्येषु कथमिति चेत्, अनित्येषु दर्शनात् सिद्धम्, नित्येषु द्रव्येषु कथमाश्रयाश्रयिभाव इति चेत्? अनित्येषु द्रव्यगुणेषु दर्शनादाश्रयाश्रितभावस्य नित्येषु सिद्धिरिति।

न्यायवार्त्तिकम्

नैकदेशेन वर्तते इति। (२)एकं चानेकत्र वर्तते इति प्रतिजानानो नानुयोक्तव्यः, उभयेन व्याघातादित्युक्तम्। यद्यवयवी नैकदेशेन वर्तते न (क)कात्स्न्र्येन वर्तते अथ कथं वर्तत इति? वृत्तिरवयवेषु आश्रयाश्रयिभावः समवायाख्यः सम्बन्धः। स कथं भवतीति? यस्य यतोऽन्यत्रात्मलाभानुपपत्तिः (३)स तत्रैव वर्तत इति—न खलु कारणद्रव्येभ्योऽन्यत्र कार्यद्रव्यमात्मानं लभत इति। विपर्ययस्तु कारणद्रव्येषु,—न कारणानि कार्यद्रव्येषु आत्मानं लभन्त इति। कथं नित्येषु आश्रयाश्रयिभावः? अनित्येषु दर्शनात् सिद्धं नित्येषु,—यथाऽनित्यानि यत्रोपलभ्यन्ते तत्र वर्तन्ते तथा नित्यान्यपि यत्रोपलभ्यन्ते तत्र वर्तन्त इति। एतत् समानमनित्यानां नित्यैः।

न्यायवार्त्तिकतात्पर्यटीका

एकश्चानेकत्र वर्त्तत इति प्रतिजानानः किं कात्स्न्र्येन किमेकदेशेनेति नानुयोक्तव्यः। कस्मात्? उभयेन कात्स्न्र्येन एकदेशेन वा नानात्वैकार्थसमवायिना एकस्यावयविनो व्याघातात्। एतदुपजीव्याह—यद्यवयवी नैकदेशेन वर्त्तते न कात्स्न्र्येन, अथ कथं वर्त्तत इति।

वृत्तिः

सिद्धान्तसूत्रम्—(एकस्मिन् भेदाभावाद्भेदशब्दप्रयोगानुपपत्तेरप्रश्नः)।

अवयवी कात्स्न्र्येन वा एकदेशेन वा वर्त्तत इति प्रश्नो न युक्तः, एकस्मिन्नवयविनि भेदाभावाद्भेदनियतशब्दप्रयोगस्यायुक्तत्वात्। अनेकस्याशेषता हि कात्स्न्र्यं, समुदायिनां किञ्चित्त्वमेकदेशत्वं, न चैकस्य तत्सम्भव इति भावः॥ ९॥

---

(१) अयमंशः फ-ज-टि-पु० नास्ति। (२) 'एवं' इति ख०, 'कथं' इति क-ख-धृतपाठान्तरम्।
(३) 'तत्' इति ख०।
(क) 'कृत्स्नो' इति क-पुस्तके, 'कृत्स्ने' इति च ख-पुस्तके पाठः। तात्पर्यसम्मतः पाठोऽत्र गृहीतः।

न्यायवार्त्तिकम्

रूपान्तरानिर्देशादिति चेत्—अथ मन्यसे यदि व्यतिरिक्तोऽवयवी भवति तस्यावयव-रूपादिव्यतिरेकेणावयविनो रूपान्तरं निर्देष्टव्यम् यथाऽचित्रास्तन्तवः (१)पटं चित्रमारभन्त इति ? न, उपलभ्यमानरूपाद्याधारत्वात्—यदवयविनो रूपमुपलभ्यते तदस्य रूपं ब्रूमः। अवयवस्य, (२)कार्यकारणभावाभ्युपगमाच्चाऽविरुद्धः—अवयविनो रूपं निर्दिश्यतामिति ब्रुवाणेन अवयवावयविनौ तावदभ्युपगतौ तदभ्युपगमाच्च विरुद्धः एतावानेवायं विवाद इत्यभ्युपेतहानिः। उपेत्य (३)चित्रवादं ब्रूमः पटस्य चित्रं रूपमिति ।

न्यायवार्त्तिकतात्पर्यटीका

शङ्कते—रूपान्तरानिर्देशादिति चेत्। सोपहासं दृष्टान्तमाह—यथा अचित्रास्तन्तवः पटं चित्रमारभन्त इति। नैयायिकः किलाचित्रैस्तन्तुभिश्चित्रः पट आरभ्यत इत्यभ्युपेयते। तच्चैतदयुक्तम्। न तावच्चित्रं रूपमेकं पटसमवेतं स्ववचनविरोधात्। नाना हि चित्रमुच्यते, तत्कथमेकमिति। तेन यदुक्तं भवति (क)नानैकमिति तदुक्तं भवति चित्रमेकमिति। यदाहुः—

"चित्रं तदेकमिति चेदिदं चित्रतरं महदि"ति।

न च नीलपीतादय एव बहवोऽव्याप्यवृत्तयश्चित्रपदास्पदमिति सांप्रतम्, रूपादीनां व्याप्यवृत्तित्वात्। तेऽमी विवादाध्यासिता नीलपीतादयो व्यापनीया आश्रयवृत्तयो रूपजातीयत्वाच् शुक्लपटगतरूपवदिति। उपपन्न उपहासो यथा अचित्रास्तन्तवः पटं चित्रमारभन्त इति। निराकरोति—नोपलभ्यमानरूपाधारत्वात्। अवयविनो रूपं निर्दिश्यतामिति ब्रुवाणेनेति। अवयवोऽस्यास्तीत्यवयवी अवयवश्च कारणं तद्वानवयवी कार्यमिति कार्यकारणभावाभ्युपगमः कुतो भवति ? न च प्रसङ्गसाधनं नाम किंचिदस्ति प्रमाणम्। तर्कस्तु भवेत्। न चायं प्रमाणेनेतिकर्तव्यतां विना प्रमाणमर्थं साधयितुमर्हतीत्यर्थः। यदपि त्वयोपहासाभिप्रायेण पटरूपं चित्रं दृष्टान्तीकृतं तत्राभिप्रायस्तावत्तव यादृशस्तादृशो वा, वचनात्तावदयं दृष्टान्तः प्रतिभाति। दृष्टान्तश्च वादिप्रतिवादिनोरविवादविषय इति तत्साधनं व्यर्थम्। तथाऽपि उपेत्य चित्रवादं ब्रूमः त्वां प्रति चित्रं रूपं पटसंबन्धितया साधयामस्त्वदभिप्रायव्याजोपहासनिराकरणायेत्यर्थः। पटस्य चित्रं रूपमित्यनुभव एवात्राबाधितः प्रमाणमिति भावः।

बौद्धः स्वाभिप्रायमुद्घाटयति—

---

(१) 'पटमारभ-' इति क-ख-धृतपाठान्तरम्।

(२) 'कार्यकारणभावाच्च' इति ख०, 'कार्यकारणभावानभ्युपगमाच्च' इति क-ख-धृतपाठान्तरम्।

(३) 'चित्रविवादं' इति ख०।

(क) 'नानैक'मिति क-पुस्तके मुद्राप्रमादः।

न्यायवार्त्तिकम्

अनेकत्वप्रसङ्ग इति चेत्—अथ मन्यसे चित्रं रूपमवयविनोऽभ्युपगच्छताऽनेकरूपोऽवयव्यभ्युपगतो भवति। न चैकं द्रव्यमनेकरूपम्, (१)नाप्यनेकस्मिन्, एकमिति(१*)? (२)न, चित्रशब्दस्यैकानेकविषयत्वात्(२*)—चित्रशब्देनैकं चाभिधीयते अनेकं च, चित्रं रूपं, चित्राणि रूपाणीति। न, एकस्मिन्नदृष्टत्वात्—न हि एकस्मिन् चित्रं दृष्टमिति; न, अभ्युपेतहानेः;—एकं चित्रमित्यनभ्युपगच्छतानेकं चित्रमिति हेयम्, एकचित्रसमुच्चयो ह्यनेकं चित्रमिति। अथानेकमचित्रं चित्रमित्युच्यते? एवमप्यनिवृत्तो व्याघातः—अचित्रं चित्रमिति, यथाऽशुक्लं शुक्लमिति। अथाचित्राणि तन्तुरूपाणि संहत्य पटे (३)चित्रं रूपमुत्पादयन्तीति(३*) पक्ष आश्रीयते? एवं चैतस्मिन्न किञ्चिद् बाध्यते। (४)पुटान्तरे प्रसङ्गश्चित्रप्रत्ययस्य—यस्य पटस्य एकं चित्रं पार्श्वं द्वितीयमविचित्रं, तेन यथैकस्मिन् पार्श्वे तं पटं पश्यत(५)श्चित्रमिति बुद्धिर्भवति

न्यायवार्त्तिकतात्पर्यटीका

अनेकत्वप्रसङ्ग इति चेदिति। निराकरोति—न, चित्रशब्दस्यैकानेकविषयत्वात्। यदि नानैव चित्रमुच्येत ततः स्याद्विरोधः, किं त्वेकस्मिन्नपि चित्रपदं प्रयुज्यते। तस्मान्नैकत्वेनास्य विरोध इत्यर्थः। देशक आह—न, एकस्मिन्नदृष्टत्वात्। एकस्मिंश्चित्रग्राहिणोऽनुभवस्यादृष्टत्वात्। पुरुषविवक्षाधीनप्रवृत्तयस्तु शब्दाः क नाम दुर्लभा इति भावः। परिहरति—न, अभ्युपेतहानेरिति। न तावदनेकपदपर्यायश्चित्रशब्दोऽनेकं चित्रमित्यनेकपदेन सामानाधिकरण्यं प्रतिपत्तुमर्हति, पर्यायशब्दानां सहप्रयोगानुपपत्तेः। दृश्यते तु प्रयोगो'ऽनेकं चित्र'मिति। तस्माद्यथा शुक्लानि नाना, तथा चित्राणि नानेत्यभ्युपेतव्यम्। तथा चैकं शुक्लमनभ्युपगच्छतो यथा शुक्लनानात्वाभ्युपगमो हीयते, एवमेवैकं चित्रमनभ्युपगच्छतश्चित्रनानात्वाभ्युपगमो हीयत इत्यर्थः। शङ्कान्तरमाह—अथानेकमचित्रमिति। निराकरोति—एवमपीति। शङ्कते—अथाचित्राणीति। परिहरति—एवं च न किंचिदिति। इष्यत एवास्माभिर्यथाऽवयवसमवेतैः सितहरितलोहितादिभिरसमवायिकारणैरवयविनि चित्रं रूपमारभ्यत इति। देशयति—पुटान्तर इति।

वृत्तिः

इतश्च वृत्तिविकल्पो न युक्त इत्याह—(अवयवान्तरभावेऽप्यवृत्तेरहेतुः)।

अवयवी स्वावयवेषु नैकदेशेन वर्त्तते अवयवान्तराभावादिति यः परेषां हेतुः, स न युक्तः। कुतः? अवयवान्तरभावेऽप्यवृत्तेः, अवयवान्तरसत्त्वेऽपि तस्यैव परं वृत्तिरायाति, न त्ववयविनोऽपीति।

---

(१) 'नाप्येकस्मिन्ननेकम्'—इति क-ख-धृतपाठान्तरम्। (२) 'न चित्रशब्दस्यानेकैकविषयत्वात्' इति ख०। (३) 'चित्ररूपमारभन्ते' इति क-ख-धृतपाठान्तरम्। (४) 'पटान्तरे' इति ख०।

(५) 'चित्रपटबुद्धिर्भवति' इति क-ख-धृतपाठान्तरम्।

न्यायभाष्यम्

तस्माद्वयव्यभिमानः प्रतिषिद्ध्यते निःश्रेयसकामस्य, नावयवी, यथा रूपादिषु मिथ्यासङ्कल्पो न रूपादय इति ॥ १२ ॥

न्यायवार्त्तिकम्

एवं (१)पुटान्तरेऽपि चित्रपटबुद्ध्या भवितव्यम् ? भवतैवेदमुक्तम्—यस्य पटस्यैकं पार्श्वं चित्रं स तु पटो न चित्रः पार्श्वस्यापटत्वात्। चित्रप्रत्ययस्तत्र कस्मान्नेति चेत् ? चित्राचित्राभ्यां पार्श्वाभ्यां पट आरभ्यमाणश्चित्रः पट इति यथा (२)पुटान्तरे चित्रप्रत्यय एवं चित्रप्रत्ययः (३)पुटान्तरेऽपि प्रसक्तः ? न प्रसक्तः, एकस्य चित्ररूपस्यानारम्भकत्वात्—एकस्मिन् पार्श्वे चित्रं रूपं तत्कथमवयविनि रूपाद्यन्तरमारप्स्यत इति। एतावच्च शक्यं वक्तुम्—अवयवरूपाभ्यामवयविनि रूपान्तरमारभ्यत इति, तथोपलब्धेः। यद्ययमरूपोऽवयवी स्यात् नोपलभ्येत। (४)न तावदवयवरूपादवयविनो ग्रहणं युक्तम्(४*) वायोरप्युपलब्धिप्रसङ्गात्—यद्यन्यरूपादन्यस्योपलब्धिर्भवति वायोरप्युपलब्धिः प्राप्नोति, न चैतदस्ति। तस्मात् स्व-रूपादवयव्युपलभ्यते। उभयावयवदर्शनप्रतिसन्धानाच्चावयविनि रूपोपलब्धिर्भवति। न चैवं सत्यरूपोऽवयवीति—तस्मादवयव्यभिमानः प्रतिषिध्यते सपरिष्काररूपो नावयवीति, यथा रूपादिषु मिथ्यासंकल्पो न रूपादय इति। अयं चार्थो मुनिना श्लोकेन दर्शितः—

"इन्द्रियार्था ह्यनर्थाय यदि स्युरविकल्पिताः।
सर्वोऽनर्थेन युज्येत चरन्निन्द्रियगोचरः" ॥ इति ॥ १२ ॥

न्यायवार्त्तिकतात्पर्यटीका

पुटान्तरं पार्श्वान्तरम्। परिहरति—भवतैवेदमुक्तमिति। एकोऽपि गुण आरभत इति मत्वाशङ्कते—चित्रप्रत्ययस्तत्रेति। समाधत्ते—न प्रसक्त इति। ननु यच्चित्राचित्राभ्यामारब्धमवयविनो रूपं तदपि पीतादिवन्निर्दिश्यतां, न च शक्यं निर्देष्टुं तस्मान्नास्तीत्यत आह—एतावदिति। अनिर्वाच्यमप्यनुभूयमानमशक्यापह्नवम्। यथेक्षुक्षीरादीनां माधुर्यस्यान्तरं महदित्यर्थः। न तावदवयवरूपादवयविनो ग्रहणं युक्तमिति। न द्रव्यान्तररूपेण द्रव्यान्तरे चाक्षुषत्वं दृष्टम्। न खलु पृथिव्यादिरूपेण वायुश्चाक्षुष इत्यर्थः। प्रकृतमुपसंहरति—तस्मादिति। अविकल्पिता अविचारिता इत्यर्थः ॥ १२ ॥

---

(१) 'पटान्तरे'—इति ख०। (२) 'पटान्तरे'—इति ख०।

(३) 'पटान्तरे' इति ख०।

(४) 'न चावयवरूपाभ्यामन्यदवयविनो ग्रहणं युक्तम्' इति क-ख-धृतपाठान्तरम्।

न्यायभाष्यम्

सर्वाग्रहणमवयव्यसिद्धेरिति(१)प्रत्यवस्थितोऽप्येतदाह—

केशसमूहे तैमिरिकोपलब्धिवत्तदुपलब्धिः ॥ १३ ॥

यथैकैकः केशस्तैमिरिकेण नोपलभ्यते केशसमूहस्तूपलभ्यते, तथैकैकोऽणुर्नोपलभ्यते अणुसञ्चयस्तूपलभ्यते, तदिदमणुसमूहविषयं ग्रहणमिति ॥ १३ ॥

स्वविषयानतिक्रमेणेन्द्रियस्य पटुमन्दभावाद्विषयग्रहणस्य तथाभावो नाविषये प्रवृत्तिः ॥ १४ ॥

यथाविषयमिन्द्रियाणां पटुमन्दभावाद्विषयग्रहणानां पटुमन्दभावो भवति। चक्षुः खलु प्रकृष्यमाणं नाविषयं गन्धं गृह्णाति, निकृष्यमाणं च न स्वविषयात् प्रच्यवते। सोऽयं तैमिरिकः कश्चिच्चक्षुर्विषयं केशं न गृह्णाति, कश्चिद् गृह्णाति केशसमूहम्।

न्यायवार्त्तिकम्

सर्वाग्रहणमवयव्यसिद्धेः इति प्रत्यवस्थितो(२)ऽथेदमाह—

केशसमूहे तैमिरिकोपलब्धिवत्तदुपलब्धिः। यथा एकैकः [केशः ?] तैमिरिकेण नोपलभ्यते केशसमूहस्तूपलभ्यते, तथा एकैकशोऽणुर्नोपलभ्यते अणुसमूहस्तूपलभ्यत इति, तदिदमणुसमूहविषयं ग्रहणमिति ॥ १३ ॥

स्वविषयानतिक्रमेणेन्द्रियस्य पटुमन्दभावाद् विषयग्रहणस्य तथाभावो नाविषये प्रवृत्तिः। न हीन्द्रियं प्रकृष्यमाणं स्वविषयमतिक्रामति। न हि चक्षुः प्रकृष्यमाणं रसं गृह्णाति, नाप्यपकृष्यमाणं स्वविषयात् प्रच्यवते, अपि तु स्वविषय एवेन्द्रियस्य प्रकर्षाप्रकर्षापेक्षाणि पटुमन्दभावेन ग्रहणानि भवन्तीति। तत्र पटुग्रहणं—सामान्यविशेषतद्वतां ग्रहणमिति। (१)मन्दं तु ग्रहणं(१*) सामान्यमात्रालोचनमिति। सोऽयं तैमिरिकः कश्चित्

न्यायवार्त्तिकतात्पर्यटीका

सर्वाग्रहणमवयव्यसिद्धेरित्यत्र प्रत्यवस्थितः पूर्वपक्षी अथेदमाहेति—

केशसमूहे तैमिरिकोपलब्धिवत्तदुपलब्धेः (सू १३) ॥ इत्यादिसूत्रभाष्यवार्त्तिकानि पूर्वपक्षसिद्धान्तयोरतिरोहितार्थानि ॥ १३ ॥

स्ववि—त्तिः (सू १४) ॥ (क)

---

(१) 'प्रत्यवस्थितेऽपीदमाह'—इति वि०।...'प्येवमाह' टि०।...'प्येतदाह' इति ग० भा०।

(२) 'ऽप्येदमाह' इति ख०। (३) 'मन्दग्रहणं तु'—इति क-ख-धृतपाठान्तरम्।

(क) चतुर्दशसूत्रं टीकाकृता न व्याख्यातम्।

न्यायभाष्यम्

उभयं ह्यतैमिरिकेण चक्षुषा गृह्यते। परमाणवस्त्वतीन्द्रिया इन्द्रियाविषयभूता न केनचिदिन्द्रियेण गृह्यन्ते, समुदितास्तु गृह्यन्ते, इत्यविषये प्रवृत्तिरिन्द्रियस्य प्रसज्येत। न जात्वर्थान्तरमणुभ्यो गृह्यते इति। ते खल्विमे परमाणवः सन्निहिता गृह्यमाणा अतीन्द्रियत्वं जहति, वियुक्ताश्चागृह्यमाणा इन्द्रियविषयत्वं न लभन्ते इति। सोऽयं द्रव्यान्तरानुत्पत्तावतिमहान् व्याघात इत्युपपद्यते द्रव्यान्तरं यद् ग्रहणस्य विषय इति।

सञ्चयमात्रं विषय इति चेन्न, सञ्चयस्य संयोगभावात्तस्य चातीन्द्रियस्याग्रहणादयुक्तम्। सञ्चयः खल्वनेकस्य संयोगः, स च गृह्यमाणाश्रयो गृह्यते नातीन्द्रियाश्रयः, भवति हीदमनेन संयुक्तमिति। तस्मादयुक्तमेतदिति।

न्यायवार्त्तिकम्

चक्षुर्विषयं केशं न गृह्णाति, केशसमूहं च गृह्णाति, उभयं हि अतैमिरिकस्य चक्षुषो विषय इति। परमाणवस्त्वतीन्द्रिया दर्शनविषयत्वं न प्रतिपद्यन्ते। संहता ऐन्द्रियका असंहता अतीन्द्रिया इति महान् व्याघातः, अनुपजातविशेषाणां दर्शनविषयत्वानुपपत्तेः। तस्मादुत्पद्यतेऽवयवी यो दर्शनस्य विषय इति। (१)समुच्चयमात्रं दर्शनस्य विषय इति चेत्—अथ मन्यसे दर्शनस्य परमाणुसमुच्चयमात्रं विषयः, समुच्चिताः परमाणवो दर्शनस्य विषयतामुपयान्तीति? न, समुच्चयस्य

वृत्तिः

यद्वा, अवृत्तेर्वर्तनाभावस्य कृत्स्नैकदेशविकल्पो न हेतुः, कुतः? अवयवान्तरस्यावयविभिन्नस्यावयवस्य भावेऽपि सत्त्वेऽपि (क)सम्भवात्। घटत्वादिवत् स्वरूपेणैवावयविनो वृत्तेः सम्भवात्, वृत्तेः कार्त्स्न्यैकदेशान्तरनियमो घटत्वादौ व्यभिचार्यप्रयोजकश्चेति भावः॥ १०॥

'तदसंशयः पूर्वहेतुप्रसिद्धत्वात्' इत्यनेन सर्वाग्रहणमवयव्यसिद्धेः इति पूर्वोक्तयुक्तिः स्मारिता। पूर्वपक्षी तां दूषयितुमुपक्रमते—(केशसमूहे तैमिरिकोपलब्धिवत् तदुपलब्धिः)।

(२)यथा तैमिरिकस्य तिमिरग्रस्तचक्षुषो नैकः केशः प्रत्यक्षः, किं तु तत्समूहः, एवमेकः परमाणुरप्रत्यक्षः, तत्समूहरूपो घटादिः प्रत्यक्षः स्यात्॥ ११॥

---

(१) 'सञ्चयमात्रं'—इति ख०। (२) 'यथा'—इति ल-पु० नास्ति।

(क) सम्भवादिति कृत्स्नैकदेशविकल्पसम्भवादित्यर्थः।

न्यायभाष्यम्

गृह्यमाणस्य चेन्द्रियेण विषयस्याऽऽवरणाद्यनुपलब्धिकारणमुपलभ्यते। (१) तस्मान्नेन्द्रियदौर्बल्यादनुपलब्धिरणूनाम्, यथा नेन्द्रियदौर्बल्याच्चक्षुषाऽनुपलब्धिर्गन्धादीनामिति(१*) ॥ १४ ॥

अवयवावयविप्रसङ्गश्चैवमा प्रलयात् ॥ १५ ॥

यः खल्ववयविनोऽवयवेषु वृत्तिप्रतिषेधादभावः सोऽयमवयवस्यावयवेषु प्रसज्यमानः सर्वप्रलयाय वा कल्पेत, निरवयवाद्वा परमाणुतो निवर्त्तेत। उभयथा चोपलब्धिविषयस्याभावः, तदभावादुपलब्ध्यभावः। उपलब्ध्याश्रयश्चायं वृत्तिप्रतिषेधः, स आश्रयं व्याघ्नन् (२) आत्मघाताय कल्पत इति ॥ १५ ॥

न्यायवार्त्तिकम्

संयोगभावात्—समुच्चयोऽपि निरूप्यमाणः परमाणुसंयोगः, संयोगश्चोपलभ्यमानाश्रय उपलभ्यते—भवति हीदमनेन संयुक्तमिति। यत्र विषय उपलभ्यते तस्यानुपलब्धौ चावरणं कारणमुपलभ्यते, न तु परमाणव उपलब्धिलक्षणप्राप्ताः। तस्मान्न (३)तेषामावरणादेरग्रहणकारणा-(३*) दग्रहणमिति ॥ १४ ॥

अवयवावयवि(४)प्रसङ्गश्चैवमा प्रलयात्। यश्चावयविनोऽवयवे वृत्तिविकल्पादभाव उक्तः सोऽवयवस्यावयवेषु प्रसज्यमानः प्रलयाद्वा निवर्तेत, निरवयवाद् वा परमाणुतो निवर्तेत।

न्यायवार्त्तिकतात्पर्यटीका

अपि चायं वृत्तिविकल्प आश्रयव्याघातादयुक्त इत्याह—

अवयवावयविप्रसङ्गश्चैवमा प्रलयात् (सू १५) ॥ अत्र त्रयः पक्षाः संभवन्ति। योऽयमवयवेषु अवयविवृत्तिविकल्पानुपपत्त्या अवयविनोऽभावप्रसङ्ग आपाद्यते, स आ प्रलयाद्वा निवर्त्तते, आ परमाणोर्वा, न क्वचिदपि निवर्त्तते इति। तत्र प्रथमद्वितीयविकल्पावाश्रित्येदं सूत्रम्। यथैव वृत्तिविकल्पः स्थूले घटादाववयवेषु तदवयवेष्वपि तदभावात्प्रलये व्यवतिष्ठेत। न च तदा प्रलयः सर्वोपाख्याविरहितो दर्शनविषयः संभवतीति दर्शनविषयाभावादनाश्रयो विकल्प आत्मानमेव न लभते। उपलक्षणं चैतद् 'आ प्रलयादि'ति। आ परमाणोरित्यपि द्रष्टव्यम्। परमाणूनामप्यतीन्द्रियत्वेन दर्शनविषयत्वाभावादनाश्रयता विकल्पस्य तदवस्थैव। तदिदमुक्तं—निरवयवाद्वा परमाणुतो निवर्त्तेतेति।

---

(१) 'तस्मादयुक्तमेतत्'—इति वि०। (२) आत्मघाताय—इति ज०।

(३) 'तेषामनावरणादेरग्रहणकारणा'—इति क-ख-धृतपाठान्तरम्।

(४) -'प्रसङ्गश्चाप्रलयात्'—इति क-ख-धृतपाठान्तरम्।

न्यायभाष्यम्

अथापि—

न प्रलयोऽणुसद्भावात् ॥ १६ ॥

अवयवविभागमाश्रित्य वृत्तिप्रतिषेधाद्भावः प्रसज्यमानो निरवयवात्परमाणो-र्निवर्त्तते न सर्वप्रलयाय कल्पते, निरवयवत्वं(१)तु परमाणो(२)र्विभागैरल्पतरप्रसङ्गस्य यतो नाल्पीयस्तत्रावस्थानात्। लोष्टस्य खलु प्रविभज्यमानावयवस्याल्पतरमल्पतम-मुत्तरमुत्तरं भवति। स चायमल्पतरप्रसङ्गः यस्मान्नाल्पतरमस्ति यः परमोऽल्पस्तत्र निवर्त्तते, यतश्च नाल्पीयोऽस्ति तं परमाणुं प्रचक्ष्महे इति ॥ १६ ॥

न्यायवार्त्तिकम्

कथमिति ? यथाऽवयव्यवयवेषु वर्तमानः प्रत्येकं सर्वात्मना वा एकदेशेन वा वर्ततेत्युक्तम्, तथाऽवयवोऽवयवेषु वर्तमानस्तदवयवोऽप्यवयवेषु इत्येवं यावत् परमाणुरिति, *यावद्वा प्रलयो-ऽनिवृत्तिर्वेति(३)सर्वथोपलब्धिविषयो नास्ति। उपलब्धिविषयं चाश्रित्यायं वादः—किमवयव्ये-कदेशेन वर्त्तते उत सर्वात्मना वर्त्तत इति। सोऽयमाश्रयं(४)व्याघ्नन्नात्मघाताय कल्पत इति।

न प्रलयोऽणुसद्भावात्। न चास्ति प्रलयोऽणुसद्भावात्। अयं च खलु विभज्य-मानभेदस्तावद् वर्तते यावत् परमाणुरिति। परमाणुर्नाम विभागेऽल्पतरप्रसङ्गस्य 'यतो नाल्पीयस्तत्रावस्थानात्—लोष्टस्य विभज्यमानावयवस्याल्पतरमल्पतममुत्तरमुत्तरं भवति, स चायमल्पतरप्रसङ्गो यतो निवर्तते यतो नाल्पीयोऽस्ति तं परमाणुं(५)प्रचक्ष्महे इति।

न्यायवार्त्तिकतात्पर्यटीका

अथापीति, अपि चेत्यर्थः। अपि च प्रलयमभ्युपेत्येदमुक्तम् 'आ प्रलया'दिति। वस्तुतस्तु—

न प्रलयोऽणुसद्भावात् (सू १६) ॥ निरवयवत्वे प्रमाणमाह— निरवयवत्वं तु परमाणोरिति।

वृत्तिः

उत्तरयति—(स्वविषयानतिक्रमेणेन्द्रियस्य पटुमन्दभावाद्विषयग्रहणस्य तथाभावो नाविषये प्रवृत्तिः)।

इन्द्रियाणां पाटवे विषयग्रहणस्य पाटवं प्रकर्षः; इन्द्रियाणां मान्द्ये तद्ग्रहणस्य मान्द्यमपकर्षः। न तु पटुतरं चक्षुः शब्दं गृह्णाति—तदिदमुक्तं स्वविषयानतिक्रमेणेति। फलितार्थमाह—नाविषये प्रवृत्तिरिति। तथा च स्वाविषयं परमाणुं समूहत्वापन्नमपि कथं चक्षुर्गृह्णीयादिति भावः ॥ १२ ॥

(१) 'खलु'—इति ल-ग-भा०। 'तु खलु'—इति ज०। (२) 'विभागेऽल्पतर'—इति क०। (३) 'सर्वोपलब्धि'-। (४) 'व्याघ्नन्नात्मव्याघाताय'—इति ख०। (५) 'आचक्ष्महे'—इति क-ख-भूतपाठान्तरम्।

*अस्य व्याख्यानं परपृष्ठे टीकायां द्रष्टव्यम्।

न्यायभाष्यम्

परं वा त्रुटेः ॥ १७ ॥

अवयवविभागस्यानवस्थानाद् द्रव्याणामसङ्ख्येयत्वात्(१)त्रुटित्वनिवृत्तिरिति ॥ १७ ॥

न्यायवार्त्तिकम्

अथ न परमाण्वन्तो विभागः ? तेन—परं वा त्रुटेः । अवयवविभागस्याऽऽनन्त्यात् त्रुटिरमेयः प्राप्नोति, संख्यापरिमाणगुरुत्वैः । तावत्परिमाणस्त्रुटिः, इयदत्र गुरुत्वं वर्त्तते, इयन्तश्च परमाणवः संहतास्त्रुटिभावमापद्यन्त इति नावधारणं युक्तम् । किं कारणम् ? यथैवानेकपरमाणुसंघातो हिमवान् संख्यापरिमाणगुरुत्वैरमेयः, तथा त्रुटिरपि भेदस्यानन्त्यात् प्रसज्यते । अथ प्रलयान्तो विभागः ? सोऽपि न युज्यते, विभागस्य विभज्यमानहानानुपपत्तेः । न प्रलयान्तो विभागः, स चायं विभागो विभज्यमानाधारो(२)विभज्यमानश्च नास्ति विभागोऽस्तीति व्याघातः । विभज्यमानावयवं परमाणुं प्रतिपद्यमानेन सावयवः परमाणुः प्रतिपत्तव्यः । सावयवत्वे च परमाणुशब्दस्यार्थो वाच्यः—किमुक्तं भवति परमाणुरिति ? ये च परमाणोरवयवास्ते

न्यायवार्त्तिकतात्पर्यटीका

अथानन्त एवायमवयवावयविविभागः कस्मान्न भवतीत्यत आह—

परं वा त्रुटेः (सू १७)॥ त्रुटिस्त्रसरेणुरित्यनर्थान्तरम् । 'जालसूर्यमरीचिस्थं त्रसरेणू रजः स्मृतम् ।' यदि त्रुटेः परं द्वित्रिपदकेऽवयवविभागो न व्यवतिष्ठते ततोऽवयवविभागस्यानवस्थानाद् द्रव्याणामसंख्येयत्वात्त्रुटित्वनिवृत्तिः, त्रुटिरपि सुमेरुणा तुल्यपरिमाणः स्यात् । न खल्वनन्तावयवत्वे कश्चिद्विशेष इत्यर्थः ।

वार्त्तिकम्—यावद्वा प्रलयोऽनिवृत्तिर्वेति । प्रलयपरमाणुपक्षे विकल्पनिवृत्तिर्नास्ति दर्शनविषयस्तु नास्तीत्यनाश्रयो विकल्पः । अनन्तावयवत्वे सर्वस्य विकल्पाग्रात्वे दर्शनविषयाभाव इत्यनाश्रयो विकल्प इत्यर्थः ।

संख्योदाहरणम्—इयन्तश्च (क)ते परमाणवः संहतास्त्रुटिभावमापद्यन्त इति । सावयवत्वे तु परमाणुशब्दस्यार्थो वक्तव्यः—किमुक्तं भवति परमाणुरिति ? परमत्वविशिष्टो

---

(१) 'त्रुटिनि'—इति ज० । (२) 'विभज्यमानाधारश्च'—इति क-ख-धृतपाठान्तरम् ।

* लिपिप्रमादादवागतसारकापुटितोऽयं ग्रन्थभागः पञ्चदशसूत्रीयवार्त्तिकव्याख्यानतया इत उत्कृष्य षोडशसूत्रावतारणात् पूर्व्वमेव सन्निवेशयितुं युज्यत इति नाशङ्कनीयम्; यतो नायं लिपिप्रमादः, परन्तु 'वार्त्तिक'मिति नामग्राहं सन्दर्भोद्धारदर्शनात् 'अथापीती'त्यादि-(षोडशसप्तदशसूत्रीय)-भाष्यव्याख्यानानन्तर्य्यप्रतीत्या, तृतीयविकल्पाश्रय-सूत्र-व्याख्यानानन्तरमेव विकल्पत्रयसंग्राहक-निरुक्त-वार्त्तिक-व्याख्यानाभिप्रायेण टीकाकृत एवेदं विच्छिद्य व्याख्यानमिति प्रतिभाति । किञ्च, स्थानविघटने उत्तरग्रन्थे पुनर्वार्त्तिकमिति नामग्रहणापेक्षा स्यात् । (क) ते इति वार्त्तिके नोपलभ्यते ।

न्यायभाष्यम्

अथेदानीमानुपलम्भिकः सर्वं नास्तीति मन्यमान आह—

आकाशव्यतिभेदात् तदनुपपत्तिः ॥ १८ ॥

तस्याणोर्निरवयवस्य (१)नित्यस्यानुपपत्तिः। कस्मात्? आकाशव्यतिभेदात्। अन्तर्बहिश्चाणुराकाशेन समाविष्टो व्यतिभिन्नः, व्यतिभेदात्सावयवः, सावयवत्वादनित्य इति ॥ १८ ॥

न्यायवार्त्तिकम्

किं समानपरिमाणा उत भिन्नपरिमाणा इति? यदि समानपरिमाणाः, अवयवावयविभावो दुरुपपादः। न हि वयं समानपरिमाणानां क्वचिदवयवावयविभावं पश्यामः। अथ भिन्नपरिमाणाः, न परमाणुः प्रतिषिध्यते, कार्यमिदं परमाणुरिति कृत्वा प्रतिषिध्यते ॥ १५-१७ ॥

इति अवयवावयविप्रकरणम्।

अथेदानीमानुपलम्भिकः सर्वं नास्तीति मन्यमान आह—आकाशव्यतिभेदात्तदनुपपत्तिः। आकाशेन परमाणुर्व्यतिभिन्नः व्यतिभेदादनित्यो घटवदिति।

न्यायवार्त्तिकतात्पर्यटीका

अणुः परमाणुः यतः क्षोदीयो नापरमस्तीति यावत्। तस्मादपि चेत् क्षोदीयोऽन्यदस्ति नैष परमत्वविशिष्टोऽणुरित्यर्थः। अथ भिन्नपरिमाणाः परमाण्ववयवास्ततो न्यूनपरिमाणा इति यावत्। ततो न परमाणुः प्रतिषिध्यते परमाण्ववयवा एव परमाणवस्ते चानवयवत्वादकार्याः, त्वया च परमाण्वारब्धं कार्यं परमाणुरिति कृत्वा आरोप्य वृत्तिविकल्पेन प्रतिषिध्यत इति ॥ १५-१७ ॥

अथेदानीमानुपलम्भिकः तस्य व्याख्यानं सर्वं नास्तीति (क)मन्वान आह—

आका—त्तिः (सू० १८) ॥ आकाशव्यतिभेदात्तस्य परमाणोर्निरवयवस्यानुपपत्तिः। सावयवत्वे तु वृत्तिविकल्पात्तदभाव इति शून्यतैव तत्त्वं भावानाम्। अनाश्रितोऽपि विकल्पो यथालोकप्रतीति कल्पनामात्रनिर्मितस्तात्त्विकीं शून्यतां गमयति, मिथ्याज्ञानानामपि तत्त्वावगमहेतुत्वदर्शनात्। यथा दूराद्वनस्पतौ हस्तिप्रत्ययप्रवाहो वनस्पतितत्त्वप्रतिपत्तेर्हेतुः; यथा रेखागवयो वा गवयत्वप्रतिपत्तेरित्यादि बहूत्प्रेक्षितव्यमिति भावः।

वृत्तिः

दोषान्तराभिधानाय सूत्रम्—(अवयवावयविप्रसङ्गश्चैवमा प्रलयात्)।

एवमुक्तप्रकारेण वृत्तिविकल्पदोषोऽवयविन्यवयवे च प्रसक्त आ प्रलयात्। प्रलयोऽभावः, तथा च सर्वाभाव एव स्यान्न कस्यापि ग्रहणमिति साधूक्तं सर्वाग्रहणमवयव्यसिद्धेरिति।

(१) 'नियस्य'—अत्र ज-क-पु० नास्ति। (क) 'मन्यमान'—इति भाष्यवार्त्तिकपदमर्थतोऽत्र धृतम्।

न्यायभाष्यम्

आकाशासर्वगतत्वं वा ॥ १९ ॥

अथैतन्नेष्यते—परमाणोरन्तर्नास्त्याकाशमित्यसर्वगतत्वं प्रसज्यत इति ॥ १९ ॥

अन्तर्बहिश्च कार्यद्रव्यस्य कारणान्तरवचनादकार्ये तदभावः ॥२०॥

'अन्त'रिति पिहितं कारणान्तरैः कारणमुच्यते। 'बहि'रिति च व्यवधायकमव्यवहितं कारणमेवोच्यते। तदेतत्कार्यद्रव्यस्य सम्भवति, नाणोरकार्यत्वात्। अकार्ये

न्यायवार्त्तिकम्

आकाशासर्वगतत्वं वा। अथ परमाणोरन्तराकाशं नास्ति असर्वगतं तर्ह्याकाशं प्रसज्यतेऽन्तः परमाणूनामसम्बन्धात्।

आकाशव्यतिभेदादनित्यः परमाणुरित्यभिदधानो व्यतिभेदार्थं प्रष्टव्यः—किमुक्तं भवति आकाशव्यतिभेदादिति ? यदि परमाण्वाकाशसम्बन्धो व्यतिभेदः, तदाऽत्र न किञ्चिद् बाध्यते। न हि आकाशसम्बन्धात् परमाणोर्नित्यत्वमनित्यत्वं वा प्रसज्यत इति। अथ सम्बन्धमात्रमेवानित्यताकारणं ब्रूयात ? तथाप्याकाशग्रहणं व्यर्थम्—सम्बन्धमात्रस्यानित्यतासाधकत्वात्। न हि कृतकत्वस्य साधनभावे देवदत्तकृतकत्वादिति युक्तं वक्तुम्। संयोगमात्रं चोत्तरसूत्रेणानूद्यते चरितार्थं संयोगोपपत्तेरिति, तदेतदेव पुनरुच्यते इति। तस्मान्नायं व्यतिभेदार्थः। अथ परमाण्वन्तःसम्बन्धो व्यतिभेदः ? सोऽपि न युक्तः, अकार्यत्वात् परमाणोः।

[अन्तर्बहिश्च कार्यद्रव्यस्य कारणान्तरवचनादकार्ये तदभावः।] अन्तर्बहिरिति कार्यस्य कारणान्तरवचनम्, अकार्यश्च परमाणुस्तस्मान्नान्तर्बहिरिति। अथ परमाण्ववयवसम्बन्ध आकाशेन व्यतिभेदः ? एतदपि तादृगेव, परमाणोरकार्यत्वान्न तस्यावयवा इति। अथ परमाण्ववयवानां विभागो व्यतिभेदः ? सोऽप्यकार्यत्वेनैव प्रत्युक्तः। कार्यस्यावयवा विभज्यन्ते, अकार्यश्च परमाणुरिति। तस्मान्नावयवविभागः। उपेत्य परमाणोरवयवान् न तद्विभागस्याकाशं

न्यायवार्त्तिकतात्पर्यटीका

आका—वा (सू० १९) ॥ (क)

तदेतद्वार्त्तिककारो दूषयति—आकाशव्यतिभेदादनित्यः परमाणुरित्यभिदधानो व्यतिभेदार्थं प्रष्टव्य इति।

अन्त—वः (सू० २०) ॥

अन्तर्बहिरिति(ख)वचनं कार्यस्य कारणान्तरवचनमिति। 'कारणान्तरं' कारणविशेषः तस्य 'वचन'मित्यर्थः। उपेत्य परमाणोरवयवान्न तद्विभागस्याकाशं कारणमिति। आकाशव्यति-

(क) १९शसूत्रं टीकाकृता न व्याख्यातम्। (ख) 'वचन'मिति वार्त्तिके नोपलभ्यते'।

न्यायभाष्यम्

हि परमाणावन्तर्बहिरित्यस्याभावः। यत्र चास्य भावोऽणुकार्यं तत्, न परमाणुः, यतो हि नाल्पतरमस्ति स परमाणुरिति ॥ २० ॥

न्यायवार्त्तिकम्

कारणं, कर्मजो हि विभागः तस्याकाशमपि कारणमिति न न्यायोऽस्ति। आकाशं च विभागहेतुत्वेन प्रतिपद्यमानः सर्वभावानामनवस्थानं प्रतिपद्येत। न हि सन्निहिते विभागहेतावाकाशे भावानामवस्थानं युक्तम्। अथ सदप्याकाशं निमित्तान्तरमपेक्षते? तद्व्यतिरेकेणाकाशस्यापि तदुत्पत्तावस्ति सामर्थ्यमिति प्रमाणाभावः। अथान्तःसुषिरं व्यतिभेदः? एतदपि नास्ति, सर्वतोऽव्यवहितस्य यस्य मध्येऽवयवा न सन्ति तत्सुषिरम्, न च परमाणोरवयवाः सन्ति, कुतः सुषिरं व्यतिभेदः। न चान्या गतिरस्ति। तस्मादाकाशव्यतिभेदादिति शून्यमभिधानम्। यत् पुनरेतदाकाशमसर्वगतं प्रसज्यते अन्तःपरमाणुनाऽसम्बन्धादिति? न, सर्वगतार्थापरिज्ञानात्—नायं सर्वगतार्थो—यन्नास्ति, तेन सम्बन्ध इति ; अपि तु यन्मूर्तिमत् तेन सर्वेण (क)सम्बध्यते इति सर्वगतत्वार्थः। न च परमाणोर्मध्यमस्ति। तस्मान्न तेनासम्बन्धादाकाशमसर्वगतं प्रसज्यत इति ॥ १८-२० ॥

न्यायवार्त्तिकतात्पर्यटीका

भेदादित्याकाशहेतुकं व्यतिभेदं विभागमाह। न चाकाशं विभज्यमानयोर्द्रव्यान्तरयोर्विभागस्य कारणम्, अपि तु कर्मेत्यर्थः। सर्वतोऽव्यवहितस्य यस्य मध्ये अवयवा न सन्तीति, तत्सुषिरमिति। 'सर्वतोऽव्यवहितस्य' निरन्तरस्यावयविनः स्वावयवद्वारेण। एतदुक्तं भवति—यस्यावयवाः परितो निरन्तरमवस्थिता मध्ये च न सन्ति, तत्सुषिरमिति। यन्मूर्त्तिमत् तेन सर्वेण संबध्यते। मूर्त्तिमता सर्वेण संबद्धत्वं सर्वगतत्वं वदतो वार्त्तिककारस्याजसंयोगस्याभ्युपगमः प्रौढिवादतयेति लक्ष्यते ॥ १८-२० ॥

वृत्तिः

अस्तु सर्वाभाव इत्यत्राह—(न प्रलयोऽणुसद्भावात्)। आश्रयनाशाद्यभावेन परमाणोर्नाशाभावेन तत्सम्भवात्।

यद्वा, नन्ववयवावयविप्रवाहस्त्वया प्रलयपर्यन्तं स्वीकार्यः, प्रलये च निखिलपृथिव्यादिनाशात् पुनः सर्गो न स्यादित्याशयेन शङ्कते—अवयवेति। समाधत्ते—नेति। न सकलपृथिव्यादिनाशः परमाणुसद्भावादित्यर्थः ॥ १३-१४ ॥

(क) 'तेन सर्वेण सम्बध्यत'—इति क-ख-धृतपाठान्तरं टीकाकृता गृहीतमिति तदेवात्र सन्निवेशितम्। सम्बन्ध' इति तु क-ख-पुस्तकयोर्मुद्रितम्।

न्यायभाष्यम्

(१)शब्दसंयोगविभवाच्च सर्वगतम् ॥ २१ ॥

यत्र क्वचिदुत्पन्नाः शब्दा विभवन्त्याकाशे—तदाश्रया भवन्ति, मनोभिः परमाणुभिस्तत्कार्यैश्च संयोगा विभवन्त्याकाशे, नासंयुक्तमाकाशेन किञ्चिन्मूर्त्तद्रव्यमुपलभ्यते, तस्मान्नासर्वगतमिति ॥ २१ ॥

अव्यूहाविष्टम्भविभुत्वानि चाकाशधर्माः ॥ २२ ॥

(२)संसर्पता प्रतिघातिना द्रव्येण न व्युह्यते, यथा काष्ठेनोदकम्। कस्मात्? निरवयवत्वात्। (३)सर्पच्च प्रतिघाति न विष्टभ्नाति—नास्य क्रियाहेतुं गुणं प्रतिबध्नाति।

न्यायवार्त्तिकम्

(क)सर्वसंयोगशब्दविभवाच्च सर्वगतम्। यस्मात् सर्वमूर्तिमद्भिः संयोगा विभवन्ति आकाशे तदाश्रया भवन्ति, शब्दाश्च स्वकारणसन्निधानादुपजायमानाः सर्व एवाकाशमाश्रयन्त इति सर्वगतमाकाशम् ॥ २१ ॥

अव्यूहाविष्टम्भविभुत्वानि चाकाशधर्माः। सर्पता क्रियावता द्रव्येणाकाशं न व्युह्यते, सर्पतश्च क्रियावतो द्रव्यस्य क्रियाहेतुं गुणं न प्रतिबध्नाति। कस्मात्? अस्पर्शत्वात्।

न्यायवार्त्तिकतात्पर्यटीका

शब्द—तम् (सू० २१) ॥ (ख)

स्यादेतत्—आकाशं चेत्सर्वगतं ततो मूर्तिमतां द्रव्याणां तेन प्रतिबन्धाद्गतेरावरणं व्यूहान्तरापादनं च जलौघस्येव नावादिना भवेत्, न चास्ति, तस्मान्न सर्वगतमित्यत आह—

अव्यूहाविष्टम्भविभुत्वानि चाकाशधर्माः (सू० २२) ॥

यत एवाव्यूहाविष्टम्भावत एवाप्रत्यूहं विभुत्वमस्येत्यर्थः ॥ २२ ॥

वृत्तिः

परमाणुरेव क इत्यत्राह—(परं वा त्रुटेः)।

त्रुटेः परं यदतिसूक्ष्मं तत् परमाणुः। वाशब्दोऽवधारणे। अथवा त्रुटेरवयवस्तदवयवो वा परमाणुरिति विकल्पार्थो वाशब्दः। यद्वा, त्रुटेः परं सूक्ष्मं परमाणुः, त्रुटावेव वा विश्राम इति विकल्पोऽभिमतः ॥ १५ ॥

समाप्तमवयवावयविप्रकरणम्।

---

(१) 'सर्वसंयोगशब्दविभवाच्च'—इति ज०। 'शब्दसंयोगविभवाच्च सर्वगत'मिति न्यायसूचीनिबन्धे। विश्वनाथसम्मतोऽप्ययं पाठः। (२) 'संयताप्रतिघातिना'—इति ज०। (३) 'संसर्पच्च'—इति फ०।

(क) अत्र वार्त्तिकसम्मतसूत्रपाठोऽन्यविध इति द्रष्टव्यम्। (ख) २१शसूत्रं टीकाकृता न व्याख्यातम्।

न्यायभाष्यम्

कस्मात् ? अस्पर्शत्वात्। विपर्यये हि विष्टम्भो दृष्ट इति(१)स भवान् सावयवे स्पर्शवति द्रव्ये दृष्टं धर्मं विपरीते नाशङ्कितुमर्हति।

अण्ववयवस्याणुतरत्वप्रसङ्गादणुकार्यप्रतिषेधः। सावयवत्वे चाणोरण्ववयवोऽणुतर इति प्रसज्यते। कस्मात् ? कार्यकारणद्रव्ययोः परिमाणभेददर्शनात्। तस्मादण्ववयवस्याणुतरत्वम्, यस्तु सावयवोऽणुकार्यं तदिति। तस्मादणुकार्यमिदं प्रतिषिध्यते इति।

कारणविभागाच्च कार्यस्यानित्यत्वं, नाकाशव्यतिभेदात्। लोष्टस्यावयवविभागादनित्यत्वं, नाकाशसमावेशादिति ॥ २२ ॥

न्यायवार्त्तिकम्

यत् स्पर्शवद् भवति तद् व्युह्यते प्रतिबध्नाति च, न त्वेवंधर्मकमाकाशं तस्मादप्रतिघातीति। स भवान् सावयवे स्पर्शवति द्रव्ये दृष्टं धर्मं विपरीते नाशङ्कितुमर्हतीति। उक्तं चात्र—यदि परमाणुर्विभज्यते परमाणुर्न स्यात्। किं कारणम् ? विभागेऽल्पतरप्रसङ्गस्य यतो नाल्पीयस्तत्रावस्थानमिति। विनाशश्च परमाणोर्भवन् कारणविनाशाद्वा कल्प्येत, कारणविभागाद्वा। उभयं च नास्ति, परमाणोरकार्यत्वादित्युक्तम्। तस्मान्नाकाशव्यतिभेदादनित्यत्वमिति ॥ २२ ॥

वृत्तिः

अथ विश्वस्य शून्यत्वात् क्व परमाणुसम्भावनेति मतनिराकरणाय निरवयवप्रकरणम्। तत्र पूर्वपक्षसूत्रम्—(आकाशव्यतिभेदात्तदनुपपत्तिः)।

तस्य निरवयवस्याणोरनुपपत्तिः, कुतः ? आकाशव्यतिभेदात् अन्तर्बहिश्चाकाशसमावेशात्। तथा च सावयवः, ततश्चानित्य इति ॥ १६ ॥

अथ नाऽऽकाशव्यतिभेदस्तर्हि आकाशमसर्वगतं स्यादित्याह—(आकाशासर्वगतत्वं वा)। स्यादिति शेषः ॥ १७ ॥

समाधत्ते—(अन्तर्बहिश्च कार्यद्रव्यस्य कारणान्तरवचनादकार्ये तदभावः)। अन्तःशब्दो बहिःशब्दश्च कार्यद्रव्यस्यावयवविशेषवाची, न चाकार्येऽवयवसम्भव इत्यर्थः। बहिरिति दृष्टान्तार्थम् ॥ १८ ॥

आकाशस्यासर्वगतत्वं स्यादित्यत्राह—(शब्दसंयोगविभवाच्च सर्वगतम्)।

शब्दस्य संयोगस्य च यो विभवः, अथवा शब्दजनकसंयोगस्य यो विभवः सार्वत्रिकत्वं तस्मात् पुनः सर्वगतमाकाशमिति शेषः। सर्वदेशे शब्दोत्पत्त्या तज्जनकसंयोगानुमानात्सर्वमूर्तसंयोगित्वरूपं सर्वगतत्वं तस्य सिद्धम् ॥ १९ ॥

(१) 'स भवान्'—इति नास्ति ग० ल०। 'सावयव'—इति नास्ति फ०-ज०।

न्यायभाष्यम्

मूर्त्तिमतां च संस्थानोपपत्तेरवयवसद्भावः ॥ २३ ॥

परिच्छिन्नानां हि स्पर्शवतां संस्थानं त्रिकोणं चतुरस्रं समं परिमण्डलमित्युपपद्यते, यत्तत्संस्थानं सोऽवयवसन्निवेशः, परिमण्डलाश्चाणवस्तस्मात्सावयवा इति ॥२३॥

संयोगोपपत्तेश्च ॥ २४ ॥

मध्ये सन्नणुः पूर्वापराभ्याम् अणुभ्यां संयुक्तस्तयोर्व्यवधानं कुरुते। व्यवधानेनानुमीयते पूर्वभागेन पूर्वेणाणुना संयुज्यते, परभागेन परेणाणुना संयुज्यते, यौ तौ पूर्वापरौ भागौ तावस्यावयवौ, एवं सर्वतः संयुज्यमानस्य सर्वतो भागा अवयवा इति।

यत्ताव'न्मूर्तिमतां संस्थानोपपत्तेरवयवसद्भाव'इति ? अत्रोक्तम्। किमुक्तम् ? विभागेऽल्पतरप्रसङ्गस्य यतो नाल्पीयस्तत्र निवृत्तेरण्ववयवस्य चाणुतरत्वप्रसङ्गादणुकार्यप्रतिषेध इति।

न्यायवार्त्तिकम्

मूर्त्तिमतां च संस्थानोपपत्तेरवयवसद्भावः। सावयवाः परमाणवो मूर्त्तिमत्त्वादिति— संस्थानवत्त्वाच्च सावयवा इति। संस्थानवत् सावयवं दृष्टं घटादि, संस्थानवन्तश्च परमाणवः, तस्मात् सावयवा इति ॥ २३ ॥

न्यायवार्त्तिकतात्पर्यटीका

पुनः शून्यतावादी प्रत्यवतिष्ठते—

मूर्त्तिमतां च संस्थानोपपत्तेरवयवसद्भावः (सू० २३) ॥ वस्त्वर्थः सिद्धान्तं निवर्त्तयति। यद्यपि मूर्त्तिमतामिति संबन्धित्वमात्रेणोपात्तं सूत्रे, तथाऽपि हेतुपदतया वार्त्तिककारो व्याचष्टे—सावयवाः परमाणवो मूर्त्तिमत्त्वाद् घटादिवदिति। प्रयोगान्तरमाह—संस्थानवत्त्वादिति ॥ २३ ॥

वृत्तिः

नन्वाकाशस्य सर्वसंयोगित्वे व्यूहन-विष्टम्भौ स्यातामत आह—(अव्यूहाविष्टम्भविभुत्वानि चाऽऽकाशधर्माः)।

व्यूहः प्रतिहतस्य परावर्तनम्, विष्टम्भः उत्तरदेशगतिप्रतिबन्धः, आकाशे तयोरभावः, निःस्पर्शत्वात्। विभुत्वं सर्वगतत्वम्। (१) यद्यप्येते सूत्रे शून्यतावादिमते न सङ्गच्छेते आकाशादेस्तैरनभ्युपगमात्, तथाऽपि त्वन्मत इति पूरयित्वा व्याख्येये ॥ २० ॥

---

(१) 'यद्यते'—इति म०।

न्यायभाष्यम्

यत्पुनरेतत्संयोगोपपत्तेश्चेति ? स्पर्शवत्त्वाद्व्यवधानमाश्रयस्य चाव्याप्त्या भागभक्तिः। उक्तं चात्र स्पर्शवानणुः स्पर्शवतोरण्वोः प्रतिघाताद्व्यवधायको न सावयवत्वात्(१)। स्पर्शवत्त्वाच्च व्यवधाने सत्यणुसंयोगो नाश्रयं व्याप्नोतीति भागभक्तिर्भवति भागवानिवायमिति। उक्तं चात्र विभागेऽल्पतरप्रसङ्गस्य यतो नाल्पीयस्तत्रावस्थानात् तदवयवस्य चाणुतरत्वप्रसङ्गादणुकार्यप्रतिषेध इति ॥ २४ ॥

मूर्तिमतां च संस्थानोपपत्तेः संयोगोपपत्तेश्च परमाणूनां सावयवत्वमिति हेत्वोः—

अनवस्थाकारित्वादनवस्थानुपपत्तेश्चाप्रतिषेधः ॥ २५ ॥

यावन्मूर्त्तिमद् यावच्च संयुज्यते तत्सर्वं सावयवमित्यनवस्थाकारिणाविमौ हेतू, सा चानवस्था नोपपद्यते। सत्यामनवस्थायां (२)सत्यौ हेतू स्याताम्, तस्मादप्रतिषेधोऽयं निरवयवत्वस्येति।

न्यायवार्त्तिकम्

संयोगोपपत्तेश्च। अनवस्थाकारित्वादनवस्थानुपपत्तेश्चाप्रतिषेधः। सावयवत्वं संयोगित्वादिति सूत्रार्थः। नन्विदं सूत्रं संस्थानवत्त्वादित्यनेनैव चरितार्थं संयोगविशेषस्य संस्थानशब्देनाभिधानात्; (३)न चरितार्थं, अवयवसंयोगविशेषस्य (४)संस्थानत्वेनाभिधानात् संयोगमात्रं च संयोगशब्देनाभिधीयत इति न दोषः। तत्र मूर्तिर्नामा(५)व्यापिनो द्रव्यस्य षड्विधं परिमाणम्—अणु महद्दीर्घं ह्रस्वं परमह्रस्वं परमाण्विति। संस्थानं नाम प्रचयाख्यः संयोगः। संयोगोऽप्राप्तिपूर्विका प्राप्तिरिति। यत् तावत् मूर्तिमत्त्वात् सावयवा इति ?

न्यायवार्त्तिकतात्पर्यटीका

सूत्रान्तरमनुवृत्तिसहितं पठति—

संयोगोपपत्तेश्च (सू० २४) इति ॥ २४ ॥

अन—धः (सू० २५) ॥ पौनरुक्त्यं देशयति—नन्विदमिति। परिहरति—न चरितार्थमिति। मूर्त्तिर्नामाव्यापिनो द्रव्यस्य षड्विधं परिमाणमिति। परमह्रस्वत्व-परमाणुत्वे परमसूक्ष्म एव द्रव्ये व्यवतिष्ठते, व्यापि तु गृहीत्वा परममहत्त्वपरमदीर्घत्वाभ्यामष्टविधं परिमाणं भवति। परममहत्त्वपरमदीर्घत्वे च सर्वगतव्यापिनी इति न मूर्त्तिः। असर्वगतद्रव्यपरिमाणं मूर्त्तिरिति पारमर्षवचनात्। संस्थानं नाम प्रचयाख्यः संयोगो घटादिवृत्तिर्घटत्वादिजातिव्यक्तिहेतुरिति। 'संयोगः' संयोगमात्रं, न त्वप्राप्तिपूर्विका प्राप्तिरिति। तस्मादपौनरुक्त्यम्। तदेतच्छून्यतामतमपाकरोति—यत्तावन्मूर्त्तिमत्त्वादिति। शून्यतावादी प्रलयान्त-

---

(१) अतःपरं 'किन्तु स्पर्शवत्त्वात्'—इति ल०पु० अधिकम्। (२) 'अवस्थायाम्'—इति ज०। (३) 'न च'—इति ख०। (४) 'संस्थानवत्त्वेन'—इति ख०। (५) '...व्यापिद्रव्यस्य'—इति क-ख०।

न्यायभाष्यम्

विभागस्य च(१)विभज्यमानहानिर्नोपपद्यते तस्मात्प्रलयान्तता नोपपद्यते इति।

न्यायवार्त्तिकम्

तन्न, अनेकान्तात्—यः परमाणोरवयवः स मूर्तिमांश्च निरवयवश्चेत्यनेकान्तः। अथ मूर्तिमत्त्वात् तस्याप्यवयवाः सन्ति? एवं सति त्रुटिरमेयः प्राप्नोति, गुरुत्वसंख्यापरिमाणैरित्युक्तम् (क)। अथ तावन्मूर्तिमद्विभज्यते यावदन्त इति? अन्तो निरवयव (२)इति वाच्यम्। अथान्तो विभागः? स न युक्तः, विभागस्य विभज्यमानैर्विनाऽनुपपत्तेरिति।

न्यायवार्त्तिकतात्पर्यटीका

स्वाभिमानेनाह—अथ तावदिति। सिद्धान्त्याह—अन्तो निरवयव इति। प्रलयान्तत्वमधस्तान्निराकृतमिति भावः। नन्वधस्तान्निराकरणान्मा भूत्प्रलयान्तो विभागः, विभागान्तस्तु भविष्यति, किं परमाण्वन्तताग्रहेणेत्याशङ्कते—अथान्तो विभागः। निराकरोति—स न युक्त इति। नासति गुणिनि गुणोऽस्तीत्यर्थः। एतावन्तश्च कल्पाः सम्भविनः। तत्र प्रथमे कल्पे

वृत्तिः

पूर्वपक्षी युक्त्यन्तरमाशङ्कते—(मूर्त्तिमतां च संस्थानोपपत्तेरवयवसद्भावः)।

परमाणोरिति शेषः। हेतुमाह—संस्थानोपपत्तेः, संस्थानवत्त्वात्। परमाणुर्हि परिमण्डलाकारः। संस्थानवत्त्वे मानं भङ्ग्या वदति—मूर्तिमतामिति। मूर्त्तत्वात् संस्थानवत्त्वमित्यर्थः। चः पूर्वोक्तहेतुं समुच्चिनोति। मूर्त्तत्वस्य समुच्चयार्थो वा चकारः॥ २१॥

युक्त्यन्तरमाह—(संयोगोपपत्तेश्च)।

अवयवसद्भाव इत्यनुवर्त्तते। संयोगवत्त्वादिति हेत्वर्थः। संयोगवत्त्वात् कथं सावयवत्वमिति चेत्? इत्थम्, संयोगस्याव्याप्यवृत्तित्वात्, अव्याप्यवृत्तित्वं चावच्छेदकभेदं विना नोपपद्यते। अवच्छेदकश्चावयव इति। ननु परमाण्ववयवेऽप्ययं दोषः स्यात्, तथा चानवस्थितपरम्पराप्रसङ्ग इति चेत्? त्यज तर्हि परमाणुव्यसनं, स्वीकुरु शून्यतावादम्। निरवयवमाकाशादिकमपि नास्तीति भावः॥ २२॥

---

(१) विभज्यमानहानानुपपत्तेः प्रलयाभावः, विभागोऽस्ति विभज्यमानं नास्तीत्येवमसत्यनवस्था न स्यात्सोऽयं विभागो विभज्यमानहानेनापि पद्यते'—इति टि०।

(२) 'इत्युक्तम्'—इति घ-ख-धृतपाठान्तरम्।

(क) १७श-सूत्र-वार्त्तिके (१०५८ पृ० वा० पं० २)।

न्यायवार्त्तिकम्

एतावच्चैतत् स्यात्—परमाण्वन्तो विभागः प्रलयान्तो वा अनन्तो वा ? यदि परमाण्वन्तोऽने-कान्तः। व्याहतं भवति परमाणुर्मूर्तिमांश्च न च सावयव इति। कः पुनरत्र व्याघातः ? निरवयवं मूर्तिमन्तं च परमाणुं प्रतिपद्यसे, सावयव इति च ब्रवीषि। प्रतिपत्त्या व्याहन्यते। अनन्ते प्रलयान्ते च व्याघातः—त्रुटेरमेयत्वप्रसङ्गः, विभागस्य चानाधारत्वप्रसङ्गः। 'सावयवः' 'परमाणु'रिति च प्रतिज्ञापदे व्याहते। कथमिति ? सावयवशब्दस्यार्थः समानजातीयारब्धं समानजातीयाश्रितम् अवयवः तदाधार इति। सावयवः परमाणुरिति ब्रुवता कार्यविशेषः परमाणुरित्युक्तं भवति। कार्यविशेषः परमाणुश्चेति व्याहतम्। अथैकपरमाणुपूर्वकत्वं परमाणोः प्रतिपद्यसे, तथा च न परमाणुः सावयव इति नास्यावयवाः सन्ति, किं तु कृतकः परमाणुपूर्वक-त्वात्। एतच्च न, दृष्टान्ताभावात्—एकं कारणमिति न दृष्टान्तोऽस्ति, एकेन चारभ्यमाणस्य परमाणोर्न कारणसामग्र्यपेक्षणमस्तीति न प्रागभावो युक्तः। यस्य प्रागभावो नास्ति तस्य चोत्पादोऽपि न युक्तः। अथैकशब्दपूर्वकत्वे सति शब्दादीनां प्रागभावादि प्रतिपद्यते ? तदप्यसिद्धम्—नैकं कारणमस्ति आश्रयाद्यपेक्षः शब्दः शब्दान्तरं करोतीति।

प्रतिपद्यापि चैकपरमाणुपूर्वकत्वं परमाणोः कः सावयवार्थः ? कतमस्तत्रावयवः कतमस्तत्रावयवीति ? अथ कारणमेवावयव इति ? न कार्यपरमाणुकाले कारणपरमाणुरस्तीति सावयवार्थो वक्तव्यः। मूर्तिमत्त्वात् सावयवः परमाणुरिति ब्रुवाणो विकल्पतः पुनः पर्यनुयोज्यः

न्यायवार्त्तिकतात्पर्यटीका

अनैकान्तिकत्वव्याघातौ, द्वितीये विभागस्यानाधारत्वप्रसङ्गः, तृतीये त्रुटेरमेयत्वप्रसङ्ग इत्याह—एतावच्चैतत् कल्पजातं स्यादिति। परमाण्वन्ततां विभागस्य ब्रुवन्निरवयवं मूर्त्तिमन्तं परमाणुं प्रतिपद्यस इति। अनन्तत्वे तु त्रुटेरमेयत्वप्रसङ्गो व्याघातः। प्रलयान्तत्वे च विभागस्यानाधारत्वप्रसङ्गो व्याघातः। सावयवशब्दस्यार्थः समानजातीयावयवं न केवलं तदारब्धमपि तु तदाश्रितम्। तन्त्वाद्यारब्धं पटादिद्रव्यं तन्त्वाद्याश्रितं च। नन्वेवमपि कुतः सावयवत्वमित्यत आह—अवयवः तदाधारः तस्य समानजातीयारब्धस्य कार्यद्रव्यस्याधारः। (क)यस्मात्सावयवत्वं कार्यविशेषः तस्मात्सावयवाः परमाणव इत्यतिब्रुवता कार्यविशेषः परमाणुरित्युक्तं भवति। कार्यविशेषः परमाणुश्चेति व्याहतम्, आनन्त्ये तु त्रुटेरमेयत्वप्रसङ्गात्। (ख)सा खल्वनवयवस्य कल्पितस्य परमसूक्ष्मतया परमाण्वाख्या। तेन परमाणुरिति किमुक्तं भवति ?—अनवयवोऽकार्यश्चेति। सावयव इति किमुक्तं भवति ?—सावयवः कार्यश्चेति। प्रतिज्ञापदयोर्व्याघात इत्यर्थः। अथ मा भूत् त्रुटेरमेयत्वमित्येकपरमाणुपूर्वकत्वं परमाणोः प्रतिपद्यसे ? शेषमतिरोहितार्थम्।

(क) 'तस्मात्'—इति क-ख०। (ख) सा खल्वित्यादिग्रन्थो वार्त्तिकप्रतीक इव प्रतिभाति, न तु वार्त्तिके दृश्यते।

न्यायवार्त्तिकम्

केयं मूर्तिः ? यया मूर्त्या मूर्तिमान् परमाणुरिति । सत्यां च मूर्तौ किमर्थान्तरमनर्थान्तरं वा परमाणोर्मूर्तिरिति ? यदि रूपादिविशेषो मूर्तिर्न भवत्पक्षे तया मूर्त्या मूर्तिमान् कश्चन । न च रूपादिव्यतिरिक्तं प्रमाणेन परमाणुं प्रतिपद्यसे, सर्वापकर्षप्राप्ता रूपादय एव परमाणुः, न च रूपादिभी रूपादयो रूपादिमन्तः, न चानर्थान्तरभावे मतुब्व्युत्पादनं पश्यामः । ननु दृष्टोऽनर्थान्तरभावेऽपि मतुप्प्रत्ययो यथा हस्तिमती सेनेति ? न दृष्ट इति ब्रूमः । यथा च(१)सेना अर्थान्तरं तथोक्तमिति । असति चार्थान्तरभूते परमाणावसत्यां च मूर्तौ सावयवाः परमाणवो मूर्तिमत्त्वादिति वाक्यस्यार्थो रूपादयो रूपादिमन्तो रूपादिमत्त्वादिति । एतेन पटो मूर्तिमत्त्वात् सावयव इति प्रत्युक्तम् । न च रूपादिव्यतिरिक्तं पटं प्रतिपद्यसे, न मूर्तिमत्त्वम्, अथ च मूर्तिमत्त्वात् सावयवः पट इति च ब्रवीषि । व्यतिरेकाभ्युपगमे व्याघातः, अनभ्युपगमे नार्थः सिध्यतीति ? दृष्टान्तस्योभयधर्मसिद्धत्वात् न पटे सावयवत्वं मूर्तिमत्त्वार्थ इति । एतेन सावयवाः परमाणवः संयोगोपपत्तेरिति व्याख्यातम् । संयोगस्याभ्युपगमे व्याघातः अनभ्युपगमे परमाणुत्वादिति हेत्वर्थः । संस्थानविशेषवत्त्वं तु असिद्धम्—य एवार्थः सावयवत्वादिति, स एवार्थः संस्थानविशेषवत्त्वादिति । अथ संस्थानमसर्वगतद्रव्यपरिमाणं प्रतिपद्येथाः, एवं सति मूर्तिमत्त्वेन संस्थानवत्त्वं चरितार्थमिति पृथग् न वक्तव्यम्—'मूर्त्तिमत्त्वात्' 'संस्थानविशेषवत्त्वाच्चे'ति । उक्तं चात्र विभागेऽल्पतरप्रसङ्गस्य यतो नाल्पीयस्तत्रावस्थानात् अण्ववयवस्य चाणुतरत्वप्रसङ्गादणुकार्यप्रतिषेध इति ।

यत् पुनरेतत् संयोगोपपत्तेर्मध्ये सन्नणुः पूर्वापराभ्यां(२)सम्बध्यमानः सावयवः । अयमेव चार्थः कारिकया(३)गीयते—

"षट्केन युगपद्(४)योगात् परमाणोः षडंशता ।
षण्णां (क)समानदेशत्वात् पिण्डः स्यादणुमात्रकः ॥" इति ।

परमाणुर्युगपत् षड्भिः सम्बध्यमानः षडंशः प्राप्नोति, भिन्नदेशत्वात् सम्बन्धानाम् । अथ

वृत्तिः

समाधत्ते—(अनवस्थाकारित्वादनवस्थानुपपत्तेश्चाप्रतिषेधः) ।

पूर्वोक्तयुक्त्या परमाणोर्निरवयवत्वप्रतिषेधो न युक्तः, कुतः ? अनवस्थाकारित्वात् । प्रामाणिकीयमनवस्था स्यादत आह अनवस्थानुपपत्तेश्चेति । सर्वेषामनवस्थितावयवत्वे मेरुसर्षपयोस्तुल्यपरिमाणत्वापत्तिः, इत्थं च तत्संयोगावच्छेदका दिग्विभागाः, न तु शून्यता युक्ता निष्प्रमाणकत्वात् । प्रमाणसत्त्वे शून्यत्वविरोधात्, निष्प्रमाणकशून्यताभ्युपगमे किमपराद्धं पूर्णतयेति दिक् ॥ २३ ॥

समाप्तं निरवयवप्रकरणम् ॥

---

(१) 'सेनानर्थान्तरम्'—इति ख० 'सेना(न)र्थान्तरम्' इति क-पुस्तके मुद्रितम् । (२) 'संबध्यमानः'—इति क-ख-धृतपाठान्तरम् । (३) 'अभिधीयते'—इति क-ख-धृतपाठान्तरम् । (४) 'योगे'—इति ख० ।

(क) 'समानदेशत्वे' इति आदर्शपुस्तकयोर्मुद्राप्रमाद इति प्रतिभाति । "षण्णां समानदेशत्वादिति वाक्य"-मित्याद्युत्तरग्रन्थदर्शनात् (१०७०पृ: २पं०) आकरग्रन्थे (विज्ञप्तिमात्रतासिद्धौ विंशतिकाकारिकायां) वसुबन्धुव्याख्यानदर्शनाच्च—"समानदेशत्वा"दित्येव प्रकृतः पाठो निर्णीतः ।

न्यायवार्त्तिकम्

समानदेशाः सर्वे संयोगाः षण्णां परमाणूनां ? पिण्डः परमाणुमात्रकः प्राप्नोति । यदि द्वे द्वे द्रव्ये अधिकृत्याभिधीयते (१)ततोऽभिन्नदेशाः । अथ परमाणूनां (२)सम्बन्धिनं परमाणुमधिकृत्याभिधीयते ? ततोऽनेकः संयोगः समानदेश इति न किञ्चिद् बाध्यते ।

यत् पुनरेतत्—समानदेशाः परमाणव इति, तन्न, अनभ्युपगमात् । देशा एव तावत् परमाणौ न सन्तीति कुतः समानदेशा भविष्यन्ति । न च किञ्चिद् द्रव्यं समानदेशमस्तीत्यसिद्धो दृष्टान्तः । (३)ननु कार्यकारणे संयोगिसमानदेशे यथा घटः पटेन सम्बध्यते तन्तुना तदंशुना च (४)तन्त्वाश्रयेणेत्यादि ? एतदनभ्युपगमेन प्रत्युक्तम् । समानदेशास्तत्र संयोगा इति न

न्यायवार्त्तिकतात्पर्यटीका

यदि द्वे (५)द्रव्ये अधिकृत्याभिधीयत इति । मध्यस्य हि परमाणोरुपर्यधःपार्श्ववर्तिभिः परमाणुभिर्ये संयोगास्तत्र मध्यस्य पूर्वेण परमाणुना यः संयोगो नासौ मध्यपश्चिमपरमाण्वाश्रितः, एवं (६)मध्यमपरमाणुसंयोगो नैव मध्यमपूर्वपरमाण्वाश्रय इति । एवमन्यत्रापि द्रष्टव्यम् । षडपि भिन्नदेशा एवेति समानदेशत्वमसिद्धम् । अथ परमाणूनां संबन्धिनं परमाणुं मध्यम् अधिकृत्योच्यते तदाश्रिता हि संयोगाः षडपि भवन्तीति तत्राह—न किञ्चिद्बाध्यत इति ।

स्यादेतत्—संयोगसमानदेशत्वेन परमाणवोऽपि संयुक्ताः समानदेशा इति पिण्डस्याणुमात्रत्वप्रसङ्ग इति परोक्तमनुवदति—यत्पुनरेतदिति । तद् दूषयति—तन्नेति । यत्र यत्समवेतं स तस्य देशो यथा रूपादीनां द्रव्यम् । न च परमाणवः क्वचित्समवयन्ति, किं तु तत्संयोगाः । तेन देशवतां संयोगानामस्तु समानदेशता, न तु परमाणूनामदेशत्वादित्यर्थः । देशयति—ननु कार्यकारणे इति । यथेह कुण्डे बदरमिति यथा बदरं कुण्डदेश एवं तदवयवास्तदवयवाः । न च समवाय एव देशदेशित्वनिबन्धनमपि तु संयोगोऽपि । न हीह कुण्डे बदरमिह पटे शुक्लत्वमिति वा आधाराधारप्रत्ययो विशिष्यते । तस्माद्बहूनां द्रव्याणां समानदेशत्वदर्शनान्नासिद्धो दृष्टान्त इत्यर्थः । तद् दूषयति—एतदनभ्युपगमेन प्रत्युक्तम् । द्रव्याणामेकत्र समवायेन समानदेशतां व्यासेधामो न तु संयोगेन । समवायेन हि समानदेशता स्थौल्यपरिपन्थिनी, यथा गन्धरसरूपस्पर्शाः समानदेशा न स्थौल्यमारभन्ते । तत्कस्य हेतोः ? एषाममूर्त्तानां समानदेशसमवायात् । मूर्त्तास्तु स्पर्शवन्तः समवायेनासमानदेशाः परस्परसंयोगिनो यदि स्थौल्यमारभन्ते किं बाध्यते ? तस्मात्संयोगेन समानदेशता न प्रतिषिध्यते, समवायेन तु प्रतिषिध्यते, सा हि

---

(१) 'ततोऽपि देशाः'—इति ख० । (२) ततो भिन्नदेशा अथ परमाणूनां—इति क-पुस्तकधृतपाठान्तरम् । (३) 'ननु च'—इति क-ख० । (४) 'तत्स्वाश्रयेणेत्यादि'—इति ख० । (५) एकं 'द्वे'पदं टीकाकृता न गृहीतम् । (६) 'मध्यपश्चिमपरमाणुसंयोगो नैव मध्यपूर्वपरमाण्वाश्रयः' इति पाठः सम्भाव्यते ।

न्यायवार्त्तिकम्

कार्यकारणे, न च संयोगा अपि द्वे द्वे अधिकृत्येति। षण्णां समानदेशत्वादिति वाक्यं न (१)द्रव्यसमानदेशतायां व्यवतिष्ठते, न संयोगसमानदेशतायामिति।

यत् पुनरेतत्—

'दिग्देशभेदो यस्यास्ति तस्यैकत्वं न युज्यते'—

क एवमाह दिग्देशभेदोऽस्तीति, दिग्देशभेदाश्च दिशः संयोगाः। परिकल्पितांश्च दिग्देशभेदान् कल्पयित्वा परमाणोर्दिग्देशभेदोऽभ्युपगम्यते, (२)मुख्यतस्तु न दिग्देशभेदो नापि परमाणोर्भेदः, परमाणुर्दिशा सम्बध्यत इति—एतावन्मात्रं विद्यते, एतच्च न किञ्चिद् बाधते।

न्यायवार्त्तिकतात्पर्यटीका

स्थौल्यविरोधिनीति सिद्धम्। अभ्युपेत्यैवमुक्तं संयोगाः समानदेशा इति। परमार्थतस्तु कुण्डबदरसंयोगस्य कुण्डबदरे आश्रयः,(३)तदवयवकुण्डबदरसंयोगस्य कुण्डबदरावयवा इति सिद्धं संयोगानामपि भिन्नदेशत्वमित्याह—न च संयोगा अपीति। उपसंहरति—षण्णां समान-देशत्वादिति वाक्यमिति।

यत्पुनरुक्तं 'दिग्देशभेदो यस्यास्ति तस्यैकत्वं न (४)युज्यते' इति। परमाणोः किल भवद्-भिमतस्यैकस्य दिग्भागाः षट्, न चैकस्य दिग्भागेऽभेदोऽस्तीति षडेव परमाणवः। एतद् दूषयति—क एवमाह दिग्देशभेदो(क)ऽस्तीति। स्वरूपेणैका दिक् सर्वगता च, नास्या भेदोऽस्तीत्यर्थः। यद्येकैव दिक् क तर्हि परमाणावस्मादयं परमाणुः पूर्वोऽयं पश्चिम इत्यादयो बुद्धिव्यपदेशभेदा इत्यत आह—दिग्देशभेदाश्च दिशः संयोगाः। एकत्वेऽपि दिशः आदित्योदय-देशप्रत्यासन्नदेशसंयुक्तो यः स इतरस्माद्विप्रकृष्टदेशसंयोगात्परमाणोः पूर्वः, एवमादित्यास्तमयदेश-परमाणू अपेक्ष्य यः सूर्योदयास्तमयदेशविप्रकृष्टदेशसंयोगः स मध्यवर्ती। एवमेतयोर्यौ तिर्यग्देश-संबन्धिनौ मध्यस्य आर्जवेन व्यवस्थितौ पार्श्ववर्त्तिनौ तौ दक्षिणोत्तरौ परमाणू। एवं मध्यन्दिनवर्तिसूर्यसन्निकर्षविप्रकर्षावपेक्ष्य उपर्यधोभावो द्रष्टव्यः। संयुक्तसंयोगाल्पत्वभूयस्त्वे च प्रत्यासन्नदेशसंयुक्तो यः स इतरस्माद्विप्रकृष्टदेशसंयोगात्परमाणोः पश्चिमः, तौ च पूर्वपश्चिमौ सन्निकर्षविप्रकर्षौ, पूर्वसंख्यावच्छिन्नत्वं चाल्पत्वं परसंख्यावच्छिन्नत्वं च भूयस्त्वम्। तस्मादेक-स्यापि परमाणोः परमाण्वन्तरसंयोगा अव्याप्यवृत्तय एव भागाः। एवं दिशोऽप्येकस्या अपि संयोगा एव भागाः, सोऽयं परमाणोः षट्केन युगपद्योगो मूर्त्तत्वमात्रप्रयुक्तो न सावयवत्वप्रयुक्त इति न सावयवत्वं गमयितुमर्हतीति। तेन यदुच्यते प्रसङ्गसाधनं परैः—'यन्निरवयवं तन्न षट्केन संयुक्तं यथा विज्ञानं तथा च परमाणुरिति व्यापकविरुद्धोपलब्धि'रिति, तन्निरस्तम्, मूर्त्तत्वप्रयुक्तत्वेन

---

(१) 'द्रव्यं समान'—इति ख०। (२) 'मुख्यस्तु'—इति ख०। (३) 'तदवयव-कुण्डसंयोगस्य'—इति समीचीनतया सम्भाव्यते। (४) 'युक्तमिति'—इति क-ख०। (क) 'यस्यास्तीति'इति क० ख०। वार्त्तिके यस्येत्यदर्शनादर्थानुरोधाच्च 'यस्ये'ति सम्पातायातमिति कृत्वा निष्काशितम्।

न्यायभाष्यम्

अनवस्थायां च प्रत्यधिकरणं द्रव्यावयवानामानन्त्यात् परिमाणभेदानां गुरुत्वस्य चाग्रहणं समानपरिमाणत्वं चावयवावयविनोः परमाण्ववयवविभागादूर्ध्वमिति ॥ २५ ॥

न्यायवार्त्तिकम्

छायावृती तर्हि न प्राप्नुतः परमाणोरदेशत्वादिति ? न देशवत्त्वाच्छायावृती,—किं तर्हि ? मूर्तिमत्स्पर्शवत्त्वात् मूर्तिमत् स्पर्शविशिष्टं द्रव्यं द्रव्यान्तरमावृणोति। किमिदमावृणोति ? स्वसम्बन्धित्वेनेतरस्य सम्बन्धं प्रतिषेधतीति। छाया तु तेजःपरमाणोरावरणात्, मूर्तिमता परमाणुना तेजःपरमाणुराव्रियते यत्र चास्यावरणं तत्र छायेति विरलतेजःसम्बन्धीनि द्रव्यगुणकर्माणि छायेत्यभिधीयते सर्वतो व्यावृत्ततेजःसम्बन्धीनि तु तानि तमःसंज्ञकानीति। तदेवं छायावृत्योरन्यथासिद्धत्वादहेतुः। एतेन क्रियावत्त्वात् स्पर्शवत्त्वाद् द्रव्यान्तरारम्भकत्वात् क्रियाकारण(१)संस्काराश्रयत्वात् परत्वापरत्ववत्त्वादित्येवमादि प्रत्युक्तम्। कथमिति ? यथा मूर्तिमत्त्वात् सावयवा इत्येतस्मिन् वाक्ये प्रतिज्ञादोषा हेतुदोषाः, तथा सर्वेष्वेतेषु पक्षेषु परपक्षाभ्युपगतेषु हेतुषु यथासम्भवं विरुद्धासिद्धानैकान्तिकादिदोषभेदा वक्तव्या इति। शेषं भाष्ये।

ये तु क्रियावत्त्वादिभिः परमाणूनामनित्यत्वं साधयन्ति तैः क्रियावत्त्वं व्यञ्जकं वा कारकं वाऽवश्यमभ्युपगन्तव्यम। यदि क्रियावत्त्वमनित्यत्वस्य कारकं ? यदक्रियं तन्नित्यं प्राप्नोति। अथ जन्म क्रियेत्यभिधीयते ? तदाऽनित्याः परमाणवो जन्मवत्त्वादिति हेत्वर्थः; जन्मवत्त्वमसिद्धं परमाणूनामिति। अथ क्रियावत्त्वं व्यञ्जकमुच्यते ? व्यञ्जकत्वेऽप्यन्यतोऽनित्यत्वं परमाणूनां वक्तव्यम्। न ह्ययं व्यञ्जकस्य धर्मो यद्व्यङ्ग्यं वस्तु कुर्यात, अपि तु अन्यतो भूतं हेतुर्व्यनक्ति। न हि प्रदीपोऽसन्तमर्थं (२)प्रकाशयति। परसिद्धोत्क्षेपणादिक्रियाभ्युपगमे विरुद्धः। एतेन घटादिदृष्टान्तो व्याख्यातः। क्रियावत्त्वं च क्रियासमवायः, तदभ्युपगमे विरुद्धः

न्यायवार्त्तिकतात्पर्यटीका

षट्कसंयोगस्य सावयवत्वेन व्याप्तेरसिद्धेः। छायातपयोगोऽपि परमाणोरेकसंयोगस्याव्याप्यवृत्तित्वेनोपपन्नः।

नन्वनवस्था नोपपद्यत इत्युक्तं तत्कुत इत्यत आह भाष्यकारः—अनवस्थायां च प्रत्यधिकरणं द्रव्यावयवानामानन्त्यात्।

क्रियावत्त्वादीन् हेतून् सर्वथा विकल्प्य वार्त्तिककारो दूषयति—ये तु क्रियावत्त्वादीति। एतेन असिद्धत्वेन। न हि घटादिकमवयविनमनभ्युपगच्छतो घटादिरस्तीत्यर्थः।

---

(१) संस्कारप्रत्ययत्वात्—इति क-पुस्तकधृतपाठान्तरम्।

(२) 'जनयित्वा प्रकाशयति'—इति ख०।

न्यायभाष्यम्

यदिदं भवान् बुद्धीराश्रित्य बुद्धिविषयाः सन्तीति मन्यते मिथ्याबुद्धय एताः, यदि हि तत्त्वबुद्धयः स्युर्बुद्ध्या विवेचने क्रियमाणे याथात्म्यं बुद्धिविषयाणामुपलभ्येत—

बुद्ध्या विवेचनात्तु भावानां याथात्म्यानुपलब्धिस्तन्त्वपकर्षणे पटसद्भावानुपलब्धिवत् तदनुपलब्धिः (क) ॥ २६ ॥

न्यायवार्त्तिकम्

अनभ्युपगमेऽनित्यः परमाणुः परमाणुत्वादिति हेत्वर्थः। मतुपश्चार्थान्तरे दृष्टत्वाद् विरुद्धः, अनर्थान्तरे दृष्टान्ताभावः। एवं शेषाणि वाक्यानि विकल्प्य यथासम्भवं दोषा वक्तव्या इति। अथ परपक्षसिद्धानेतानभ्युपैति? यदि प्रमाणतोऽभ्युपैति कथं परपक्षसिद्धाः? अथ न प्रमाणतः? कथं स्वयमनुपलब्धो धर्मः परप्रतिपादनायोपादीयत इति ॥ २४-२५ ॥

इति निरवयवप्रकरणम्।

यदिदं भवान् बुद्धीराश्रित्य विषयाः सन्तीति मन्यते मिथ्याबुद्धय एताः। यदि हि तत्त्वबुद्धयः स्युः बुद्ध्या विवेचने क्रियमाणे बुद्धिविषयाणां याथात्म्यमुपलभ्येत।

बुद्ध्या विवेचनात् तु भावानां याथात्म्यानुपलब्धिस्तन्त्वपकर्षणे पटसद्भावानुपलब्धिवत् तदनुपलब्धिः। य एते बुद्धिविषया गवादयो घटादयश्च, नैते तत्त्वतः सन्ति, कस्मात्? बुद्ध्या विविच्यमानानां भेदशोऽग्रहणात्। यथाऽयं तन्तुरयं तन्तुरयं तन्तुरिति बुद्ध्या तन्तुषु विविच्यमानेषु न पटः कश्चिदस्ति यः पटबुद्धेः विषयः स्यात्, एवमंशुषु बुद्ध्या

न्यायवार्त्तिकतात्पर्यटीका

मतुपश्चार्थान्तरे दृष्टत्वाद्विरुद्ध इति। क्रियां परमाणोरर्थान्तरमनिच्छतो मतुप्प्रयोगो विरुद्ध इत्यर्थः ॥ २४—२५ ॥

विज्ञानवाद्याह—यदिदं भवान् बुद्धीरिति। यदि पटस्तन्तुभ्यो भिन्नो भवेत्तन्त्वतिरेकेण गौरिवाश्वातिरेकेणोपलभ्येत, न चोपलभ्यते, तस्मात्पट इति मिथ्याबुद्धिरियम्। तन्तुरित्यपि मिथ्याबुद्धिरंशुभ्यो भेदेनानुपलम्भात्। एवमंशुरित्यपि। तदनेन क्रमेण परमाणुष्वपि बुद्ध्या विविच्यमानेषु याथात्म्यानुपलब्धेर्न बाह्यवस्तु स्थूलं वा क्षोदीयो वास्तीति सर्वा एव बुद्धयः स्वाकारमबाह्यं बाह्यतया आलम्बमाना मिथ्याभूता इति।

बुद्ध्या—ब्धिः (सू० २६) ॥ ननु पटादयः सावयवा भवन्त्वेवं, परमाणूनां त्वनवयवत्वाद्

(क) अत्रार्थे लङ्कावतारसूत्रीयश्लोकसन्दर्भो माधवाचार्येणोद्धृतः—

"बुद्ध्या विविच्यमानानां स्वभावो नावधार्य्यते।
अतो निरभिलप्यास्ते निःस्वभावाश्च दर्शिताः ॥
इदं वस्तुबलायात यद् वदन्ति विपश्चितः।
यथा यथार्थाश्चिन्त्यन्ते विशीर्य्यन्ते तथा तथा" ॥ [सर्व्वदर्शनसंग्रहः] — band

न्यायभाष्यम्

यथाऽयं तन्तुरयं तन्तुरिति प्रत्येकं तन्तुषु विविच्यमानेषु नार्थान्तरं किञ्चिदुपलभ्यते—यत्पटबुद्धेर्विषयः स्यात्, याथात्म्यानुपलब्धेरसति विषये पटबुद्धिर्भवन्ती मिथ्याबुद्धिर्भवति, एवं सर्वत्रेति ॥ २६ ॥

व्याहतत्वादहेतुः ॥ २७ ॥

यदि बुद्ध्या विवेचनं भावानां न सर्वभावानां याथात्म्यानुपलब्धिः। अथ सर्वभावानां याथात्म्यानुपलब्धिर्न बुद्ध्या विवेचनम्। भावानां(१)बुद्ध्या विवेचनं

न्यायवार्त्तिकम्

विविच्यमानेषु, एवं तदवयवेषु तावद् यावत् परमाणुः, परमाणवोऽपि भागशो (२)विभज्यमानास्तावद् यावत् प्रलय इति। तदेवं सर्वस्यासत्त्वे गवादिबुद्धयो घटादिबुद्धयश्च मिथ्याबुद्धय इति ॥ २६ ॥

व्याहतत्वादहेतुः। बुद्ध्या विवेचनात् तु भावानां सर्वभावानुपपत्तिरित्ययुक्तम्।

न्यायवार्त्तिकतात्पर्यटीका

बुद्ध्या विवेचनाद्भावानां याथात्म्योपलब्धिरित्यत आह—परमाणवोऽपि भागशो विभज्यमानास्तावद् यावत्प्रलय इति ॥ २६ ॥

भवन्तु परमाणवोऽनवयवाः संयोगेभ्यस्तु षड्भ्यो बुद्ध्या विविच्यमानस्य याथात्म्यमुपलभ्यत इति। तदेतद् दूषयति—

व्याहतत्वादहेतुः (सू० २७) इति ॥ यस्य विविच्यमानस्य याथात्म्यानुपलब्धिस्तत् कुत-

वृत्तिः

ननु बाह्यार्थाभावात् कुतोऽवयवावयविव्यवस्थेति मतमपाकर्तुं बाह्यार्थभङ्गनिराकरणमारभते। प्रमेयत्वं ज्ञानत्वव्याप्यं न वेति संशयः। तत्र पूर्वपक्षसूत्रम्—(बुद्ध्या विवेचनात्तु भावानां याथात्म्यानुपलब्धिस्तन्त्वपकर्षणे पटसद्भावानुपलब्धिवत् तदनुपलब्धिः)।

तुः प्रकरणविच्छेदार्थः। भावानां बुद्ध्या विवेचनादभेदोल्लेखात् याथात्म्यस्य ज्ञानभेदलक्षणस्यानुपलब्धिरनुपपत्तिः। घट इति ज्ञानं मम जातमिति ह्यनुभूयते, तत्र घट इति ज्ञानमित्यनेन ज्ञानघटयोरभेद उल्लिख्यते ततो न ज्ञानातिरिक्तो विषयः। यथा पटे विविच्यमाने तन्तूनामेवापकर्षणादतिरिक्तं न वस्तु, एवं तन्तुरपि नांशुव्यतिरिक्त इति। घटत्वादिस्तु ज्ञानस्यैवाकारविशेष इति भावः ॥ २४ ॥

(१) 'बुद्ध्या विवेचनम्'—इति नास्ति ज-ग०। (२) 'विभज्यमाना'—इति क० ख०।

न्यायभाष्यम्

याथात्म्यानुपलब्धिश्चेति व्याहन्यते । तदुक्तम्—"अवयवावयविप्रसङ्गश्चैवमा प्रलया"-दिति ॥ २७ ॥

तदाश्रयत्वादपृथग्ग्रहणम् ॥ २८ ॥

कार्यद्रव्यं कारणद्रव्याश्रितं तत्कारणेभ्यः पृथङ् नोपलभ्यते, विपर्यये पृथग्ग्रहणात्,

न्यायवार्त्तिकम्

कस्मात् ? व्याघातात् । को व्याघातः ? सहासम्भवः । यदि बुद्ध्या विवेचनं भावानां न सर्वभावानुपपत्तिः । अथ सर्वभावानुपपत्तिर्न बुद्ध्या विवेचनं सर्वभावानामिति ।

सर्वभावानुपपत्तिरिति ब्रुवाणः प्रमाणं पर्यनुयोज्यः । यदि प्रमाणं ब्रवीति व्याहतं भवति । अथ न ब्रवीति अर्थोऽस्य न सिद्ध्यति प्रमाणाभावात् । अथाप्रामाणिकी सिद्धिः ? सर्वभावोपपत्तिः कस्मान्न सिद्ध्यति ? यश्च सर्वभावानामभावो भावेष्वितरेतरापेक्षसिद्धेरित्येतस्मिन् वादे दोष उक्तः, स इहापि द्रष्टव्य इति ॥ २७ ॥

यत् पुनरेतत्—यदि तन्तुव्यतिरिक्तं पटादिद्रव्यं स्यात् तन्तुषु बुद्ध्या विविच्यमानेषु पृथगुपलभ्येतेति ?

तदाश्रयत्वादपृथग्ग्रहणम् । कारणद्रव्याश्रितं कार्यं तस्मात् न पृथगुपलभ्यत इति ।

न्यायवार्त्तिकतात्पर्यटीका

दिचद्विवेचनीयम्, अवध्यभावे तदनुपपत्तेः । तथा च तेनावधिना क्वचिदवस्थातव्यम्, अनवस्थायां त्रुटेरमेयत्वप्रसङ्गादित्युक्तम् । तस्मात्परमाणुषु वा तत्संयोगेषु वा तेनावस्थातव्यम् । तथा च यतो विविच्यते भावः स एवास्यावधिर्याथात्म्येनोपलभ्यत इति बुद्ध्या विविच्यमानस्य सर्व-भावानुपपत्त्या व्याघात इति सिद्धम् । दूषणान्तरमाह—सर्वभावानुपपत्तिरिति । प्रमाणस्यापि भावात् तद्गतत्वेन तदनुपपत्तौ सर्वभावानुपपत्तिरित्यर्थः ॥ २७ ॥

तदाश्रयत्वादपृथग्ग्रहणम् (सू० २८) ॥ अपृथग्ग्रहणादिति ब्रुवाणः प्रष्टव्यो जायते किं (१) विलक्षणव्यवहाराभावः उत भेदाभावः (१*) उत तन्तुव्यतिरेकेण देशान्तरेऽनुपलम्भ इति ।

वृत्तिः

समाधत्ते—(व्याहतत्वादहेतुः) ।

उक्तो हेतुर्न युक्तः व्याहतत्वात् । नहि बुद्ध्या विवेचने पटस्य तन्तुरूपता सिद्ध्यति, 'तन्तुतः पट' इति हि प्रतीयते, न तु 'तन्तुः पट' इति । एवं पटेन प्रावरणं न तु तन्तुभिः । किं च तन्तुपटविवेचनादेव बाह्यार्थसिद्धिः । ज्ञानेन तु स्वस्मिन् पटाभेदो नोल्लिख्यते स्वाविषयकत्वात्, अनुव्यवसायेन तु पटविषयकत्वं व्यवसाये समुल्लिख्यते ॥ २५ ॥

---

(१) 'विलक्षणबुद्धिवेद्यत्वाभाव उत देशाभाव'—इति क॰तात्पर्यपुस्तपाठान्तरम् ।

न्यायभाष्यम्

यत्राश्रयाश्रितभावो नास्ति तत्र पृथग्ग्रहणमिति। बुद्ध्या विवेचनात्तु भावानां पृथग्ग्रहण-मतीन्द्रियेष्वणुषु, (१)यदिन्द्रियेण गृह्यते तदेतया बुद्ध्या विविच्यमानमन्यदिति ॥ २८ ॥

प्रमाणतश्चार्थप्रतिपत्तेः ॥ २९ ॥

बुद्ध्या विवेचनाद्भावानां याथात्म्योपलब्धिः, यदस्ति(२)यथा च(३)यन्नास्ति यथा च(२* तत्सर्वं प्रमाणत उपलब्ध्या सिध्यति, या च प्रमाणत उपलब्धिस्तद् बुद्ध्या विवेचनं भावानाम्, तेन सर्वशास्त्राणि सर्वकर्माणि सर्वे च शरीरिणां व्यवहारा व्याप्ताः। परीक्षमाणो हि बुद्ध्याऽध्यवस्यति इदमस्तीदं नास्तीति तत्र न सर्वभावानुपपत्तिः ॥२९॥

न्यायवार्त्तिकम्

विपर्यये हि पृथग्ग्रहणात्—यत्र कार्यकारणभाव आश्रयाश्रितभावश्च नास्ति तत्र पृथग्ग्रहणमिति ॥२८॥

प्रमाणतश्चार्थप्रतिपत्तेः। यदस्ति यथा च यन्नास्ति यथा च तत्सर्वं प्रमाणत उपलब्ध्या सिध्यतीति। शेषं भाष्ये ॥ २९ ॥

न्यायवार्त्तिकतात्पर्यटीका

न तावदाद्यः, तन्तवो हि भिन्नाभबुद्धिवेद्याः पटस्तु अभिन्नाभबुद्धिवेद्य इति। नापि द्वितीयः, तन्तूनामंशुदेशत्वात् पटस्य तन्तुदेशत्वात्। तस्मात्तन्तुभ्योऽन्यत्रादर्शनमपृथग्ग्रहणं, तच्च भेदेऽपि तदाश्रितत्वेनोपपद्यमानं नाभेदं गमयितुमर्हतीत्यर्थः। भाष्यं—बुद्ध्या विवेचनात्तु भावानां पृथग्ग्रहणमतीन्द्रियेष्वणुषु। यत्र खल्ववयवावयविनावैन्द्रियकौ तत्र पृथग्ग्रहणमविवेचकानामस्फुटतरमतीन्द्रियेभ्योऽणुभ्य आनुमानिकेभ्यः प्रत्यक्षदृश्यानां तदाश्रितानामवयविनां पृथग्ग्रहणमित्यतिस्फुटमित्यर्थः ॥ २८ ॥

संप्रत्यैन्द्रियकेऽप्यवयवेऽवयविनो विविच्यमानस्य याथात्म्येन पृथग्ग्रहणमाह—

प्रमाणतश्चार्थप्रतिपत्तेः (सू० २९) इति॥ यदस्ति पटादिकमवयवि द्रव्यं, यथा च स्वावयवसमवेतत्वेन गुणाधारतया च, यन्नास्ति शशविषाणादि, यथा च कार्यकारणभावेन, तत् सर्वं प्रमाणत उपलब्ध्या सिध्यति। सुगमं भाष्यम् ॥ २९ ॥

वृत्तिः

ननु तन्तुपटयोर्भेदे पार्थक्येन ग्रहणं स्यादित्यत्राह—(तदाश्रयत्वादपृथग्ग्रहणम्)।

पृथग् ग्रहणं यदि तन्त्वविषयकप्रत्यक्षविषयत्वं पटस्याऽऽपाद्यते, तत्रोत्तरं—तदाश्रयत्वादिति। पटो हि तन्त्वाश्रितस्तेन सामग्रीसत्त्वात् पटप्रत्यक्षस्य तन्तुविषयकत्वम्, यदि च भेदप्रत्यय आपाद्यते तदा भवत्येवेति भावः॥ २६ ॥

(१) 'यदिन्द्रियेण'—इति नास्ति टि०। (२) अयमंशः अ-पु० नास्ति। (३) 'यन्नास्ति'—इति भा०।

न्यायभाष्यम्

प्रमाणानुपपत्त्युपपत्तिभ्याम् ॥ ३० ॥

एवं च सति सर्वं नास्तीति नोपपद्यते, कस्मात् ? प्रमाणानुपपत्त्युपपत्तिभ्याम् । यदि सर्वं नास्तीति प्रमाणमुपपद्यते, सर्वं नास्तीत्येतद्व्याहन्यते । अथ प्रमाणं नोपपद्यते, सर्वं नास्तीत्यस्य कथं सिद्धिः ? अथ प्रमाणमन्तरेण सिद्धिः, सर्वमस्तीत्यस्य कथं न सिद्धिः ? ॥ ३० ॥

स्वप्नविषयाभिमानवदयं प्रमाणप्रमेयाभिमानः ॥ ३१ ॥

यथा स्वप्ने न विषयाः सन्त्यथ चाभिमानो भवति, एवं न प्रमाणानि प्रमेयाणि च सन्त्यथ च प्रमाणप्रमेयाभिमानो भवति ॥ ३१ ॥

मायागन्धर्वनगरमृगतृष्णिकावद्वा (क) ॥ ३२ ॥

न्यायवार्त्तिकम्

(क) प्रमाणानुपपत्त्युपपत्तिभ्याम् ।

स्वप्नविषयाभिमानवदयं प्रमाणप्रमेयाभिमानः ।

(ख) मायागन्धर्वनगरमृगतृष्णिकावद्वा । यथा स्वप्ने विषया न सन्ति अथ च विषयाभिमानः, एवं न प्रमाणानि न प्रमेयाणि सन्ति अथ च प्रमाणप्रमेयाभिमानः ॥ ३०-३२ ॥

न्यायवार्त्तिकतात्पर्यटीका

प्रमा⋯भ्यां (सू० ३०) ॥ (क) यदुक्तं प्रमाणोपपत्त्यनुपपत्तिभ्यां न सर्वभावानुपपत्तिरिति, तत्र प्रत्यवतिष्ठते विज्ञानवादी—

स्वप्नविषयाभिमानवदयं प्रमाणप्रमेयाभिमानः (सू० ३१) ॥ न खलु वास्तवः प्रमाणप्रमेयभावः, किं त्वनादिवासनानिबन्धनकल्पनाधीनः । यथा हि न स्वप्ने सन्ति विषया अथ च प्रतिभान्ति कल्पनामात्रेण, तथा च सांवृत्तेनापरमार्थसता प्रमाणप्रमेयभावेन बाह्यार्थशून्यता सिध्यति परमार्थसती प्रत्ययानां, दृष्टा मिथ्याप्रत्ययानामपि तत्त्वप्रतिपत्तिहेतुतेत्यावेदितं पुरस्तादित्यर्थः । तद् व्याचष्टे वार्तिककारः—यथा न स्वप्ने विषयाः सन्तीति ॥ ३०-३१ ॥

ननु स्वप्नप्रत्ययानामस्त्वेवंधर्मकत्वं, ये पुनरमी जाग्रत्प्रत्ययाः स्तम्भ इति वा कुम्भ इति वा किमायातं तेषामत्यन्तवैलक्षण्यादित्यत आह—मायागन्धर्वेति ।

माया—वा (सू० ३२) ॥ जाग्रत्प्रत्यया अप्येवंविधाः सहस्रशो दृश्यन्ते, न चैते स्तम्भकुम्भादिप्रत्ययास्ततो विलक्षणा इत्यर्थः ॥ ३२ ॥

(क) मायेत्यादिद्वात्रिंशसूत्रे भाष्यं नोपलभ्यते ।

न्यायभाष्यम्

हेत्वभावादसिद्धिः ॥ ३३ ॥

स्वप्नान्ते विषयाभिमानवत्प्रमाणप्रमेयाभिमानो न पुनर्जागरितान्ते विषयोपलब्धिवदित्यत्र हेतुर्नास्ति। हेत्वभावादसिद्धिः। स्वप्नान्ते चासन्तो विषया उपलभ्यन्ते इत्यत्रापि हेत्वभावः।

न्यायवार्त्तिकम्

हेत्वभावादसिद्धिः।

(क)स्मृतिसङ्कल्पवच्च स्वप्नविषयाभिमानः। मायागन्धर्वनगरमृगतृष्णिकावद्वेति न, प्रमाणाभावात्। स्वप्नान्तवदविद्यमानेषु विषयेषु अभिमान इत्यत्र न हेतुरुच्यत इति। स्वप्नान्ते चासन्तो विषया इति को हेतुरिति। ख्यातिरिति चेत्? अयं जाग्रदवस्थोपलब्धानां विषयाणां चित्तव्यतिरेकिणामसत्त्वे हेतुः ख्यातिः स्वप्नवदिति? न, दृष्टान्तस्य साध्यसमत्वात्—

न्यायवार्त्तिकतात्पर्यटीका

तदेतद्दूषयति—

हेत्वभावादसिद्धिः (सू० ३३)॥ तद् व्याचष्टे भाष्यकारः—स्वप्नान्ते विषयाभिमानवदिति। अन्तशब्दोऽवयववचनोऽप्याश्रितत्वमात्रेणावस्थायां प्रयुक्तः (ख)। तेन स्वप्नावस्थायां जागरितावस्थायामित्यर्थः। एतदुक्तं भवति—स्वप्नज्ञानस्यायाथार्थ्यमिच्छता बाधकमन्तरेण तदनुपपत्तेर्जाग्रत्प्रत्ययोऽस्य बाधको वक्तव्यः। न चासावसमीचीनस्तद्बाधितुमुत्सहत इति समीचीनत्वं जाग्रत्प्रत्ययस्याभ्युपगन्तव्यम्। तथा च जागरितान्ते विषयोपलब्धिवदित्यनुपपन्नम्।

वार्त्तिकम्—ख्यातिरिति चेत्। प्रत्ययत्वमेव स्वप्नोदाहरणसहितं प्रमाणप्रमेयाभिमान-

वृत्तिः

ननु ज्ञानस्योभयवादिसिद्धत्वात्तन्मात्रपदार्थकल्पने लाघवात्तदतिरिक्तपदार्थाभावसिद्धिः स्यादित्यत आह—(प्रमाणतश्चार्थप्रतिपत्तेः)।

पूर्वोक्तं हेतुं समुच्चिनोति चकारः। अर्थस्य घटादेः प्रतिपत्तेः प्रमाणाधीनत्वात्। तथा च प्रामाणिकेऽर्थे गौरवं न बाधकमिति भावः। अन्यथा ज्ञानमपि न सिध्येद् गौरवादिति शून्यतापत्तिः॥ २७॥

न वा बाह्यार्थाभावसाधनं सम्भवतीत्याह—(प्रमाणानुपपत्त्युपपत्तिभ्याम्)।

व्याघातात् न बाह्याभाव इति शेषः। बाह्यं नास्तीत्यत्र यदि प्रमाणमस्ति तदा प्रमाणस्य बाह्यस्य सत्त्वान्न बाह्याभावः। अथ प्रमाणं तत्र नोपपद्यते तदा निष्प्रमाणकत्वान्न तत्सिद्धिरित्यर्थः।

(क) एकार्थसाधकत्वात् एकत्रैव सूत्रद्वयव्याख्यानाभिप्रायेणाग्रिमं सूत्रमिदं वार्त्तिककृता अत्रैव धृतम्। टीकाकृतापि सूत्रमिदं न पृथग् व्याख्यातम्।

(ख) 'स्वप्नान्तं जागरितान्तं चोभौ येनानुपश्यति'—इति कठोपनिषदयुक्तम्।

न्यायभाष्यम्

प्रतिबोधेऽनुपलम्भादिति चेत्? प्रतिबोधविषयोपलम्भादप्रतिषेधः। यदि प्रतिबोधेऽनुपलम्भात् स्वप्ने विषया न सन्तीति, तर्हि य इमे प्रतिबुद्धेन विषया उपलभ्यन्ते उपलम्भात्सन्तीति। विपर्यये हि हेतुसामर्थ्यम्। (१)उपलम्भात् सद्भावे सत्यनुपलम्भादभावः सिद्ध्यति, उभयथा त्वभावे नानुपलम्भस्य सामर्थ्यमस्ति, यथा प्रदीपस्याभावाद्रूपस्यादर्शनमिति, तत्र भावेनाभावः समर्थ्यते इति।

न्यायवार्त्तिकम्

य एते स्वप्नावस्थायां विषयाः ख्यान्ति न ते चित्तव्यतिरिक्ता इत्यत्र को हेतुः? प्रतिबुद्धेनानुपलम्भान्न सन्तीति—अथ मन्यसे यस्मात् प्रतिबुद्धेन नोपलभ्यन्ते तस्मान्न सन्तीति? न, विशेषणोपादानात्—ये प्रतिबुद्धेनोपलभ्यन्ते ते सन्तीति प्राप्तम्। व्यर्थं वा विशेषणं प्रतिबुद्धेनानुपलम्भादिति। यदि चोपलभ्यमानं जाग्रदवस्थायां स्वप्नावस्थायां विषयमसन्तं मन्यसे अथ चित्तमस्तीत्यत्र को हेतुरिति। विपर्यये च सामर्थ्याभावादहेतुः जाग्रतोऽनुपलब्धेरिति। यद्युपलब्धिः सत्त्वसाधनं ततोऽनुपलब्धिरसत्त्वं साधयति, विपर्यये हि हेतोः सामर्थ्यं दृष्टमिति। न चित्तव्यतिरेकिणो विषया ग्राह्यत्वात् वेदनादिवदिति—यथा वेदनादिग्राह्यं न चित्तव्यतिरिक्तं

न्यायवार्त्तिकतात्पर्यटीका

मिथ्यात्वे हेतुरित्यर्थः। विपर्यये च सामर्थ्याभावादिति। पूर्वं प्रतिबुद्धेनेति विशेषणं विवक्षित्वोक्तम्। अधुना त्वनुपलब्धेरिति विवक्षित्वोच्यत इत्यपौनरुक्त्यम्। अत्र विज्ञानवादी स्वपक्षे प्रमाणमाह—न चित्तव्यतिरेकिणो विषयाः ग्राह्यत्वाद् (क)वेदनावदिति। इदमत्राकूतम्—विज्ञानस्य हि बाह्योऽर्थो ग्राह्यो भवन् निराकारस्य सत्तामात्रेण वा भवेत्, कारणत्वेन वा, एकसामग्र्यधीनत्वेन वा, ज्ञानाहितफलाधारत्वेन वा? न तावत्सत्तामात्रेणान्यस्यान्यो विषयः, सत्तामात्रस्य विषयान्तरेषु भावात्सर्वेऽर्थाः सर्वविषया इति सर्वसर्वज्ञतापत्तिः। न च

वृत्तिः

यद्वा, यदि घटादौ प्रमाणमस्ति, तदा तत एव बाह्यार्थसिद्धिः। अथ न प्रमाणं, तदा कथं घट इति ज्ञानस्य घटाकारत्वं मन्यसे, ज्ञानस्यैवानुत्पत्तेरिति ॥ २८ ॥

ननु प्रमाणप्रमेयव्यवहारो न पारमार्थिकः, परन्तु विज्ञानानि तत्तदाकाराणि वासनापरिपाकवशादेव स्वाप्नप्रत्ययवदैन्द्रजालिकप्रतीतिवच्चाऽऽविर्भवन्तीत्याशयेन शङ्कते सूत्राभ्याम्—(स्वप्नविषयाभिमानवदयं प्रमाणप्रमेयाभिमानः)।

(माया-गन्धर्वनगरमृगतृष्णिकावद्वा)। स्पष्टम् ॥ २९-३० ॥

(१) 'उपलम्भाभावे सत्यनुप'—इति ल-ग-ज०। (क) वार्त्तिके 'वेदनादिवद्'िति दृश्यते।

न्यायवार्त्तिकतात्पर्यटीका

सत्तामात्रमपि विषयत्वव्यवस्थापकम्, असतोऽपि विषयत्वात्। अत एव न कारणत्वेन विषयभावः। अपि च चक्षुरादयोऽपि विज्ञानस्य कारणमिति विषया रूपविज्ञानस्य प्रसज्येरन्। वर्त्तमानावभासि च विज्ञानं न भवेत्—क्षणिकत्वेनोत्पादकस्यार्थक्षणस्योत्पाद्यविज्ञानसमये विनिपातात्। एकसामग्र्यधीनत्वेन तु विषयत्वे वर्त्तमानावभासितोपपद्यते। सा तु नोपपद्यते असतोरप्यतीतानागतयोर्ग्रहणेऽव्यापकत्वादतिव्यापकत्वाच्च इन्द्रियादिक्षणस्यैकसामग्र्यधीनस्यालम्बनत्वप्रसङ्गात्। विज्ञानाहितफलाधार आलम्बनमिति चेत् किं पुनर्विज्ञानेनार्थे जन्यते? प्राकट्यं, न चैतदर्थधर्मोऽपि शुक्लादिवत्सर्वपुरुषसाधारणं; ज्ञानाहितस्यार्थधर्मस्यापि ज्ञानवन्तं प्रत्यसाधारणत्वदर्शनात्; यथा यस्यापेक्षाबुद्धिजनितं द्वित्वमर्थधर्मः सोऽपेक्षाबुद्धिमन्तमेव पुरुषं प्रत्यसाधारण इति? तन्न, अव्यापकत्वात्। सन्ति खल्वतीतानागतविषयाणि सहस्रशो विज्ञानानि शब्दानुमानजानि च, न चैतान्यर्थे फलमाधातुमुत्सहन्ते अर्थस्य तदानीमसंभवात्। न खल्वस्ति संभवः, असन्ननुत्पन्नरूपो धर्मी धर्मोऽस्याविनश्यन् प्रत्युत्पन्नरूप इति। स्वकारणादात्मानात्मप्रकाशनशक्तियुक्तमुत्पद्यते ज्ञानं तादृशं येन कश्चिदेवास्य विषयो न सर्वमिति चेत्? हन्त भोः शक्तेः शक्यनिष्ठत्वात्किमस्य शक्यमिति वक्तव्यम्। अर्थ इति चेन्न। न तावदयमस्य निर्वर्त्यः अर्थस्यैव ज्ञाननिर्वर्त्तकत्वात्। न चार्थाधारं फलमाधत्त इत्युक्तम्। न चासति शक्ये शक्तिसंभवः। तस्मादनाकारं विज्ञानं बाह्यं गोचरयतीति मनोरथमात्रम्।

अस्तु साकारमेव बाह्यगोचरम्। तथा हि नीलाद्याकारं ज्ञानं नीलादिगोचरम्। नीलमस्य स्वरूपं यतः। अत्रैवं वक्तव्यम्—किं सर्वात्मना सारूप्यभावाद् विषयभाव आहो कथंचित्सारूप्यभावात्? न तावदर्थस्य जडात्मनो ज्ञानेन प्रकाशात्मना सर्वथा सारूप्यं, सारूप्ये ज्ञानमपि जडं भवेदिति ज्ञानत्वहानिः। एकदेशेन च सारूप्ये तत् क नाम नास्तीति सर्वं ज्ञानं सर्वं वेदयेत्। अपि च नीलज्ञानात्समनन्तरप्रत्ययादुत्पन्नं ज्ञानं न तथा नीलार्थसरूपं यथा नीलज्ञानसरूपमिति समनन्तरप्रत्यय-तत्सारूप्याभ्यां विषयः स्यान्न चैतदस्ति तस्मान्न सारूप्यसमुत्पत्ती अपि विषयलक्षणम्। स्तामस्य सारूप्यसमुत्पत्ती मनस्कारेन्द्रियादिभिस्तथाऽपि यमध्यवस्यति सोऽस्य विषयः, अर्थं चाध्यवस्यतीति अर्थ एवास्य विषयो न मनस्कारादीति चेत्; अथ

वृत्तिः

(१)समाधत्ते—(हेत्वभावादसिद्धिः)।

बाह्याभावस्याऽसिद्धिः, हेत्वभावात् प्रमाणाभावात्।

अथ वा हेतोश्चक्षुरादेरनभ्युपगमे घटोऽयमित्यादिज्ञानानामसिद्धिरित्यर्थः। न च वासनावशात् स्यादिति वाच्यम्, वासनाया अतिरिक्तत्वे बाह्योपगमप्रसङ्गात्। वासनायाः सन्तन्यमानतया चाक्षुषादेरपि सन्तानापत्तिरिति दिक् ॥ ३१ ॥

---

(१) 'समाधत्ते'—इति ल-पु० नास्ति।

न्यायभाष्यम्

स्वप्नान्तविकल्पे च हेतुवचनम् । (१)स्वप्नविषयाभिमानवदिति ब्रुवता(२)स्वप्नान्तविकल्पे हेतुर्वाच्यः । कश्चित्स्वप्नो (३)भयोपसंहितः, कश्चित्प्रमोदोपसंहितः, कश्चिदुभयविपरीतः, कदाचित्स्वप्नमेव न पश्यतीति । निमित्तवतस्तु स्वप्नविषयाभिमानस्य निमित्तविकल्पाद्विकल्पोपपत्तिः ॥ ३३ ॥

न्यायवार्त्तिकतात्पर्यटीका

कोऽयमध्यवसायः ? न तावद् ग्रहणं, न खलु द्वावाकारौ गृह्येते नीलमित्यनुभवो न तु नीले इति । स्वाकारस्य बाह्यसमारोपोऽध्यवसाय इति चेत् । स किं गृह्यमाणे बाह्ये उतागृह्यमाणे । न तावद् गृह्यमाणे । न हि नीलद्वयं प्रकाशत इत्युक्तम् । न चारोपविषयमगृहीत्वाऽन्योऽन्यमारोपयितुमर्हतीति । न ह्यननुभवन् पुरोवर्ति शुक्लभास्वरं रजतमारोपयति तत्र । अपि चागृह्यमाणे बाह्ये प्रवृत्तिनियमो न भवेत् । इतरेषामगृह्यमाणत्वेनाविशेषात्तेष्वपि प्रवृत्तिप्रसङ्गात् । न च साकारज्ञाननये बाह्यसद्भावे प्रमाणमस्ति, अगृह्यमाणत्वात् । ननु नीलाद्याकारस्य कादाचित्कत्वमेव प्रमाणम् । तथाऽपि यद् यस्मिन्सत्यपि कदाचिद्भवेत् तत् तदितरापेक्षम् । यथा सत्यपि सोपाने विच्छिन्नगमनरचनप्रतिभासाः प्रत्ययाः संतानान्तरापेक्षास्तथा च सत्यप्यालयसंताने षडपि प्रवृत्तिप्रत्यया इति स्वभावहेतुः । वासनापरिपाकप्रत्ययकादाचित्कत्वात् कदाचिदुत्पाद इति चेत् ? नन्वेकसंतानपतितानामालयज्ञानानां तत्तत्प्रवृत्तिविज्ञानजननशक्तिर्वासना, तस्याश्च कार्यजननं प्रत्याभिमुख्यपरिपाकः, तस्य च प्रत्ययः स्वसंतानवर्त्ती पूर्वक्षणो हेतुः संतानान्तरापेक्षानभ्युपगमात् । तथा च सर्वे आलयसंताने पतिताः परिपाकहेतवः, न वा कश्चिदपि अविशेषात् । क्षणभेदाच्छक्तिभेदस्तस्य कादाचित्कत्वात्कार्यकादाचित्कत्वमिति चेत् ? नन्वेकस्यैव नीलविज्ञानजननसामर्थ्यं शक्तिप्रबोधजननसामर्थ्यं च क्षणान्तरस्य तन्न स्यात् । सत्त्वे वा कथं क्षणभेदात्सामर्थ्यभेद इत्यालयसंतानवर्त्तिनः सर्वे समर्था इति समर्थहेतुसद्भावे कार्यक्षेपानुपपत्तिः । स्वसन्तानमात्राधीनत्वे तु निषेध्यस्य कादाचित्कत्वस्य विरुद्धं सदातनत्वं, तस्योपलब्ध्या तु कादाचित्कत्वं निवर्त्तमानं हेत्वन्तरापेक्षत्वेन व्यवतिष्ठत इति प्रतिबन्धसिद्धिः । न च संतानान्तरनिमित्तानि प्रवृत्तिविज्ञानानि संतत्यधिकतराणामपि नित्यसन्निधानाद् विज्ञानानामदेशात्मकत्वेन दूरत्वानुपपत्तेर्व्यतिरिक्तस्यानभ्युपगमात् । नापि कालतो विप्रकर्षसंभवः अपूर्वसत्त्वप्रादुर्भावानभ्युपगमात् । तदिदमनुमानं सौत्रान्तिकानां बाह्याभ्युपगम इति ।

तदयुक्तम्, स्वसंतानमात्रनिमित्तत्वेऽपि नीलादिविज्ञानानां कादाचित्कत्वोपपत्तौ संदिग्धव्यतिरेकित्वेन हेतोरनैकान्तिकत्वात् । ननूक्तं न क्षणभेदः कार्यभेदहेतुरिति, कल्पितस्य सन्तानस्य

(१) 'स्वप्नविषयायाभि'—इति भा० । (२) 'स्वप्नान्त विकल्पे'—इति वि० ।
(३) 'भयादिसंहितः'—इति टि० ।

न्यायवार्त्तिकतात्पर्यटीका

सर्वसामर्थ्यविरहिणो भेदः कार्यभेदहेतुरिति न तु परमार्थसतः क्षणस्य कार्यभेदहेतुत्वमिति कोऽन्यो(१)भदन्तादृक्तुमर्हति। ननु यदि क्षणभेदः शक्तिभेदहेतुस्ततो भिन्नानां क्षणानां नैका शक्तिः स्यात्, तथा चैकेन केनचिन्नीलज्ञाने जनिते तन्नीलज्ञानं क्षणान्तरान्न स्यात्। यदि भिन्नानां नैकं सामर्थ्यम् अथ बाह्यार्थवादिनोऽपि कथं भिन्नानां नीलोत्पलसंतानानामेकनीलोत्पलाकारज्ञानधारासामर्थ्यम्। यदुच्यते अन्यदेव नीलविज्ञानं यन्नीलोत्पलसंतानान्तरात्। वयमपि ब्रूमहे—अन्यदेव नीलविज्ञानं यत् क्षणान्तरादिति। तस्मात्कश्चिदेव तादृशः स्वलक्षणभेदो जायते, यः कंचिदेव कार्यभेदं जनयति न कार्यान्तरमिति। तस्मात्साकारस्यापि ज्ञानस्यार्थो न गोचरो न चागोचरः शक्योऽनुमातुमिति। न च प्रत्यक्षवदनुमानमप्यर्थगोचरम्। तस्मात्साधूक्तं वार्त्तिककृता—न चित्तव्यतिरेकिणो विषयाः ग्राह्यत्वाद्वेदनावदिति (१०७८ पृ०)। नीलादयो हि विषया उभयवादिसिद्धास्तेषां चित्तभेदाभेदयोर्विप्रतिपत्तिः। तत्रैषां ग्राह्यत्वादित्ययं चित्तव्यतिरेकः परैरभ्युपगतः प्रतिषिध्यते। यावांश्च प्रतिषिध्यते सर्वोऽनुपलब्धेरिति हेतुर्विरुद्धव्याप्तोपलब्धिः, प्रतिषेध्यश्चित्तव्यतिरेकस्तद्विरुद्धस्तदव्यतिरेकस्तेन व्याप्तं ग्राह्यत्वं तस्योपलब्धिरेव तन्निषेध्यस्यानुपलब्धिरिति।

अत्र तावदेतद्वक्तव्यम्—ग्राह्यत्वस्याभेदेन व्याप्तौ सत्यां भेदं निवर्तयेत्, न त्वभेदेनास्य व्याप्तिः। तथाहि—यदेतन्नीलं स्थूलं विच्छिन्नमुपलभ्यते, तस्यास्य विच्छेदः स्थौल्यं च न ज्ञानस्यात्मा। नानादिग्देशव्यापिता हि स्थौल्यम्। न चैकमदिग्देशात्मकमनवयवि ज्ञानं नानादिग्देशव्यापि संभवति। यथाऽऽह—

तस्मान्नार्थेन विज्ञाने स्थूलाभासस्तदात्मनः।
एकत्र प्रतिषिद्धत्वाद्बहुष्वपि न संभवः॥ इति

एवमर्थविच्छेदोऽपि न ज्ञानात्मकः। तस्य तथात्वे परमार्थतोऽर्थाद्विच्छिन्नं ज्ञानं स्यात्। तस्मादयमपि न ज्ञानमित्यसन्नभ्युपगन्तव्यः। न च सदसतोरेकत्वमित्यनात्माऽपि विज्ञाने प्रकाशत इत्यनिच्छताऽपि स्वीकर्त्तव्यम्, तथा च सदपि प्रकाशिष्यते। नन्वनात्मन्यर्थेऽकिंचित्करं विज्ञानं कथमर्थप्रकाशकम्? अथाकिंचित्करं ज्ञानं स्थौल्ये कथमस्य प्रकाशकम्? स्वभावादिति चेत्, अत्राप्यसौ न दण्डवारितः। यद्धि यस्य स्वभावः तस्य नान्यापेक्षा, यथा लिङ्गस्य स्वसाध्यसंबन्धे। स्वभावतश्चार्थस्य ज्ञानमिति न तदीयत्वे अन्यदपेक्षते। असंबद्धत्वात्कथं ज्ञानमर्थस्येति चेत्, अथ संबन्ध एव संबन्धिनोः कथम्? संबन्धान्तरकल्पनायामनवस्था। तस्माद् यथा संबन्ध एव संबन्धान्तरमन्तरेण संबन्धिनोः, एवं ज्ञानमपि संबन्धान्तरमन्तरेणार्थस्येति समानम्। न चातिप्रसङ्गः। स्वकारणादुत्पन्नस्य कस्यचिद्विज्ञानस्य कश्चिदेव विषयो

(१) 'भेदं तावद'—इति क०।

न्यायवार्त्तिकम्

तथा विषया अपि। वेदना सुखदुःखे, चित्तं (१)विज्ञानमिति, सुखदुःखाभ्यां चान्यत् ज्ञानमित्यसिद्धो दृष्टान्तः, सुखदुःखे ग्राह्ये ग्रहणं (२)ज्ञानमिति ग्राह्यग्रहणभावादन्यत्वम्। अथाभिन्नं विज्ञानं (३)वेदनातस्तथापि ग्राह्यं च गृहीतिश्च एकमिति न दृष्टान्तोऽस्ति। न हि कर्म च क्रिया च एकं भवतीति। अथैकत्वं प्रमाणवृत्तमनपेक्ष्य प्रतिपद्येथाः? तथापि चत्वारः स्कन्धा इति

न्यायवार्त्तिकतात्पर्यटीका

नान्यः। न स्वभावाः पर्यनुयोगमर्हन्ति—एवं भवतैवं मा भवत एवं कस्मान्न भवतेति। अकिंचित्करस्य रूपविज्ञानस्य कथं रूपविषयतेति चेत्; किं रूपविज्ञानं प्रमाणं विवक्षित्वेदमुच्यते, आहो फलं विवक्षित्वा? यदि प्रमाणं, ततो न तदकिंचित्करं तत्र हानोपादानोपेक्षाप्रसवहेतुत्वात्। अथ फलं, तदयुक्तम्। क्व नाम फलं किंचित्करं? न हि गतिजन्या नगरप्राप्तिश्चैत्रस्य चैत्रनगरसंयोगसमवायाय किंचित्करोति। एवमर्थविषयत्वाय स्वाभाविकाय न ज्ञानेन किंचिदपरं जनयितव्यम्। अर्थप्रतिबन्धुत्वं ज्ञानस्यार्थविषयत्वम्। न हि ज्ञानमनुव्यसायज्ञानेन निरूप्यमाणमर्थनिरूपणं विना शक्यं निरूपयितुमित्युक्तम्। कर्मण्यसमवेतं कथं कर्मण इति चेत्, अथ फलसमवायः कर्मण्यसमवेतः कथं कर्मणः? तत्पारतन्त्र्यादिति चेत्, किमिदं पारतन्त्र्यम्? तन्निरूपणाधीननिरूपणत्वमिति चेत्, तदिहापि समानमन्यत्राभिनिवेशात्। तस्मादभेदेन ग्राह्य[त्व]स्याव्याप्यत्वाद् ग्राह्यत्वं विरुद्धव्याप्तं न भेदं निवर्तयितुमर्हतीति दूषणे स्थवीयसि सत्येव दूषणान्तरमाह वार्तिककारः—वेदना सुखदुःखे चित्तं विज्ञानमिति। अभ्युपेत्याह—अथाभिन्नं विज्ञानं वेदनात इति। यथाऽङ्गुल्यग्रं न तेनैवाङ्गुल्यग्रेण स्पृश्यते एवं ज्ञानं न तेनैव ज्ञानेन ग्रहीतुं शक्यते। ननु न गृहीतिर्ग्राह्या, न ह्यस्याः कर्मभावो विद्यते। क्रियाफलशालितया कर्म भवति, न चास्यामस्ति फलान्तरम्; अपि तु स्वयमाविर्भूतस्वभावा गृहीतिरपराधीनप्रकाशा ग्राह्येत्युच्यते। यदि चैषा स्वयं न प्रकाशेत नार्था अपि प्रकाशेरन्, तत्प्रकाशाधीनप्रकाशा हि ते। तथा हि यद् यत्प्रकाशाधीनप्रकाशं तत्तस्मिन् प्रकाशमाने प्रकाशते, यथा दण्डप्रकाशाधीनप्रकाशो दण्डिप्रकाशः, ज्ञानप्रकाशाधीनप्रकाशश्च विषय इति स्वभावहेतुः। न च ज्ञानादन्यत्स्वसंवेदनं न दृष्टमित्येतावता स्वसंवेदनं विज्ञानं न भवेदिति दर्शनादर्शनाभ्यां न हेतुर्गमकोऽपि तु स्वसाध्याविनाभावात्। स च विपर्यये बाधकप्रमाणप्रवृत्त्या सिध्यतीति कृतं दृष्टान्तेनेत्यत आह—न हि कर्म च क्रिया चैकं भवतीति (क)।

इदमत्राकूतम्। किं पुनरिदमर्थानां संवित्प्रकाशाधीनप्रकाशत्वं नाम? न हि संवित्प्रकाशेनार्थे प्रकाशान्तरं जन्यते। अपि च लिङ्गप्रकाशाधीनप्रकाशा हि लिङ्गिप्रकाशः, न च [लिङ्गी] लिङ्गे

(१) 'ज्ञानम्' इति—क०-ख०। (२) विज्ञानमिति—क०-ख०-धृतपाठान्तरम्। (३) वेदनाया'—इति क०-ख०। (क) 'न कर्म क्रिया चैकं भवतीति'—क०-ख०। समनन्तरमिदमत्राकूतमित्युपक्रम्य उपसंहारे निगमनरीत्या पुनरुद्धृतमन्दर्भदर्शनाद् द्वैरूप्यपरिहारः कृतः।

न्यायभाष्यम्

स्मृतिसङ्कल्पवच्च स्वप्नविषयाभिमानः ॥ ३४ ॥

पूर्वोपलब्ध(१)विषयः। (२)यथा स्मृतिश्च सङ्कल्पश्च पूर्वोपलब्धविषयौ(२*)न तस्य प्रत्याख्यानाय कल्पेते तथा स्वप्ने विषयग्रहणं पूर्वोपलब्धविषयं न तस्य प्रत्याख्यानाय

न्यायवार्त्तिकम्

शास्त्रव्याघातः। अथ चतुष्टं न प्रतिपद्यते दृष्टं विज्ञानमात्रमेवाभ्युपगम्यते? सोऽपि दृष्टं विज्ञानभेदमनुयोक्तव्यः—बाह्यस्याऽऽध्यात्मिकस्य च विज्ञानभेदहेतोरभावात्(३)कथं विज्ञानभेद इति। स्वप्नवद्विज्ञानभेदं यदि प्रतिपद्यते, सोऽपि दृष्टानुभूतानां भावानां भावनावशेन विज्ञानभेदं प्रतिपादयितव्यः। अथ (४)स्वप्नपक्षेऽपि भावनाभेदाद् विज्ञानभेदं प्रतिपद्येत? सोऽपि

न्यायवार्त्तिकतात्पर्यटीका

प्रकाशमाने प्रकाशते, किं तु लिङ्गप्रकाशे विनष्टे। यद्युच्येत न ज्ञानादतिरिक्तोऽर्थप्रकाशो ज्ञानप्रकाशश्च किं तु ज्ञानमेव स्वसंवेदनमर्थस्य स्वात्मनश्चेति। एवं तर्हि किमायातम्? न ह्यात्मैवात्मायत्तः। न च ज्ञानमेवात्मनः परस्य च प्रकाश इति सिद्धम्। अन्यो हि ज्ञान-प्रकाशो मानस ऐन्द्रियकश्चार्थप्रकाशः। न च प्रमाणज्ञानप्रकाशाधीनोऽर्थप्रकाशः किं तु प्रमाणज्ञानसत्ताधीनः, फलाधीनं तु न किंचिदित्यावेदितम्। तत्सिद्धमेतत्—विवादाध्यासितं विज्ञानं स्वप्रकाशाद्भिन्नं प्रकाशमानत्वात्; सत्त्वान्तरप्रकाशस्य सत्त्वान्तरप्रकाशवत्। तदनेनाभिसंधिनोक्तं न(५)हि कर्म च क्रिया चैकं भवतीति। एतेन 'सहोपलम्भनियमादभेदो नीलतद्धियो'रिति परास्तं वेदितव्यम्। अर्थज्ञानोपलम्भयोरेकोपलम्भतैव नास्ति कुतः पुनरस्य नियम इति। अथ यथाश्रुतः सहोपलम्भो हेतुरित्युच्यते ततो विरुद्धः, अभेदे सहार्थासंभवात्। कृतप्रपञ्चश्चायमर्थो न्यायकणिकायाम्, इह तु विस्तरभयान्न प्रपञ्चित इत्युपरम्यते।

सोऽपि दृष्टं विज्ञानभेदमनुयोक्तव्य इति। न संतानमात्रनिबन्धनो विज्ञानभेदो भवितु-मर्हति नीलपीतादिरूपः, नापि संतानान्तराधिपत्यसन्निधाननिबन्धनः, विज्ञानानामदेशात्मकानां स्वरूपेण देशविप्रकर्षायोगात्। नापि कालविप्रकर्षोऽपूर्वसत्त्वप्रादुर्भावाभावादिति भावः। शङ्कते—स्वप्नवद्विज्ञानभेदमिति। बाह्याभावेऽप्याध्यात्मिको विज्ञानभेदहेतुरस्तीति भावः। निराकरोति—सोऽपीति। स्वप्नज्ञानमपि पारंपर्येण बाह्यनिबन्धनमित्यर्थः। अबाह्यनिमित्त-कत्वं स्वप्नप्रत्ययस्याभ्युपेत्याह—अथ स्वप्नपक्षेऽपीति। वर्गः पक्षः। न चैकं विज्ञानं

(१) 'विषयम्'—इति टि०-'विषयः' इति वि०। (२) इदं टि०-पु० नास्ति।

(३) 'सोऽपि दृष्टविज्ञानहेतोरभावात्'—इति क०-ख० धृतपाठान्तरम्।

(४) 'स्वप्नपक्षे भावानां भावनावशात्'—इति ख०। (५) 'हि' इत्यत्र 'च' इति क०-ज०।

न्यायभाष्यम्

कल्पते इति। (१)एवं दृष्टविषयश्च स्वप्नान्तो जागरितान्तेन। (२)यः सुप्तः स्वप्नं पश्यति स एव जाग्रत्स्वप्नदर्शनानि प्रतिसन्धत्ते (३)इदमद्राक्षमिति। तत्र जाग्रद्बुद्धिवृत्ति-वशात् स्वप्नविषयाभिमानो मिथ्येति व्यवसायः। सति च प्रतिसन्धाने या जाग्रतो बुद्धिवृत्तिस्तद्वशादयं व्यवसायः स्वप्नविषयाभिमानो मिथ्येति।

न्यायवार्त्तिकम्

(४)भाव्यभावकवर्गयोर्भेदेन प्रत्यवस्थेयः, नाभिन्नं भाव्यं भावकं चेति। ये चैते स्वप्नादिप्रत्ययाः (५)पुरविमानोद्यानयानभेदानुविधायिनः ते मिथ्याप्रत्यया इति, मिथ्याप्रत्ययानां च जाग्रदवस्था-प्रत्ययसामान्याद्भावः। ममापि सर्व एव मिथ्याप्रत्यया भविष्यन्तीति ब्रुवाणः प्रधान-मनुयोक्तव्यः। न च निःप्रधानं विपर्ययप्रत्ययं पश्याम इति; चित्तव्यतिरेकिणं च विषयमप्रति-पद्यमानः साधनदूषणस्वभावं पर्यनुयोक्तव्यः। यदि बाह्यस्वभावकं? व्याघातः। अथ चित्तस्वभावकं? न चित्तेन परः प्रतिपाद्यते(६)इत्यर्थोऽस्य न सिद्ध्यति, न हीतरस्वप्नमना-ख्यातमितरो विजानातीति। अथ शब्दाकारं चित्तं प्रतिपद्यते? तेनापि शब्दाकारं चित्तमित्या-कारार्थो वक्तव्यः। आकारो हि नाम प्रधानवस्तुसामान्यादतस्मिंस्तदिति प्रत्ययः। न च भवत्पक्षे शब्दो विद्यत इति शब्दाकारं चित्तमिति निरभिधेयं वाक्यम्। चित्तव्यतिरिक्तं विषयमप्रतिपद्यमानो जाग्रत्स्वप्नावस्थयोर्भेदं पर्यनुयोज्यः—जाग्रदवस्थायां विषया न सन्ति स्वप्नावस्थायामपीति इयं स्वप्नावस्था इयं जाग्रदवस्थेति कुत एतत्? धर्माधर्म(७)व्यवस्था(८)च न प्राप्नोति; यथा स्वप्नावस्थायामगम्यागमनादधर्मोत्पत्तिर्न भवत्येवं जाग्रदवस्थायामपि न स्यात्। अथ(९)निद्रोपघातानुपघातौ भेदं जनयत इति प्रतिपद्येत? तदपि तादृगेव; (१०)निद्रोपघातश्चेतसो वैकृत्यहेतुरिति कथमवगम्यते? अथ विज्ञानस्य स्पष्टतामस्पष्टतां च भेदं प्रतिपद्येत?

न्यायवार्त्तिकतात्पर्यटीका

चिन्तनीयमपरं चिन्तकमिति वाच्यम्। व्यतिरिक्तालम्बनत्वानभ्युपगमादिति भावः। अभ्यु-पेत्य त्वबाह्यनिमित्तत्वं स्वप्नप्रत्ययानामेतदुक्तम्। बाह्यनिमित्तत्वमेव तु पारमार्थिकमित्याह— ये चैते स्वप्नप्रत्यया इति। ममापीति। अपिशब्दः संभावनायाम्। मम पक्षे संभाव्यत एतत् यत्सर्व एव प्रत्यया मिथ्या भवन्तीत्यर्थः। सुगममितरत्। मिथ्या निद्रा विषयमन्तरेण विज्ञानस्फुटता चावक्तव्येति। सामान्यविशेषतद्वतां ग्रहणं स्फुटता, सामान्यमात्रग्रहणमस्फुटता,

---

(१) 'एकदृष्ट'—इति टि०। (२) 'अयं'—इति टि०। (३) 'इयमद्राक्षम्'—इति टि०। (४) 'भाव्यभावकयोर्भेदेन'—इति क०-ख०। तत्र धृतं पाठान्तरमेवात्र गृहीतम्, 'वर्ग: पद'—इति पूर्व-पत्रीयान्तिमपंक्तौ टीकाकृद्व्याख्यानदर्शनात्। (५) 'सुरविमानोद्यानपानभेदा'—इति क०। (६) 'इत्यर्थो न'—इति ख०। (७) व्यवस्थानं न प्राप्नोति—इति क-ख धृतपाठान्तरम्। (८) 'च'—इति ख-पु० नास्ति। (९-१०) 'निद्रोपघा'—इति ख०।

न्यायभाष्यम्

उभयाविशेषे तु साधनानर्थक्यम्। (१)यस्य स्वप्नान्तजागरितान्तयोरविशेषस्तस्य स्वप्नविषयाभिमानवदिति साधनमनर्थकं तदाश्रयप्रत्याख्यानात्।

अतस्मिंस्तदिति च व्यवसायः प्रधानाश्रयः। अपुरुषे स्थाणौ पुरुष इति व्यवसायः, स प्रधानाश्रयः, न खलु पुरुषेऽनुपलब्धे पुरुष इत्यपुरुषे व्यवसायो भवति, एवं स्वप्नविषयस्य व्यवसायो हस्तिनमद्राक्षं पर्वतमद्राक्षमिति प्रधानाश्रयो भवितुमर्हति ॥ ३४ ॥

न्यायवार्त्तिकम्

विषयमन्तरेण ज्ञानस्य स्पष्टताऽस्पष्टता च वक्तव्या। असत्यर्थे विज्ञानभेदो दृष्ट इति चेत्—अथ मन्यसे यथा तुल्यकर्मविपाकोत्पन्नाः प्रेताः पूयपूर्णां नदीं पश्यन्ति, न तत्र नद्यस्ति, न पूयम्। न ह्येकं वस्त्वनेकाकारं भवितुमर्हति। दृष्टश्च विज्ञानभेदः, केचित् तामेव जलपूर्णां पश्यन्ति केचित् रुधिरपूर्णामित्यतोऽवसीयते(२)यथाऽध्यात्मे निमित्तापेक्षमसति बाह्ये निमित्ते विज्ञानमेव तथोत्पद्यते इति ? न, व्याघातात्—असति बाह्ये विज्ञानमेव तथेति प्रधाणः प्रष्टव्यो जायते कथं तथेति। यदि रुधिराकारं विज्ञानम् ? रुधिरं तर्हि वक्तव्यं किं रुधिरमिति। एवं जलाकारं नद्याकारं च वक्तव्यम्। पूयपूर्णां पश्यन्तीति च वाक्यस्य पदानि प्रत्येकं विचार्यमाणानि रूपादिस्कन्धाभावे निर्विषयाणि भवन्ति। देशादिनियमश्च न प्राप्नोति, एकस्मिन् देशे नदीं पूयपूर्णां पश्यन्ति न देशान्तरेषु। असत्यर्थे नियमहेतुर्वक्तव्यः। यस्य पुनर्विद्यमानं केनचिदाकारेण

न्यायवार्त्तिकतात्पर्यटीका

तच्चैतदसति विषये दुष्करं तदाकारोत्पत्तेरशक्यत्वादित्यर्थः। शङ्कते—असत्यर्थे विज्ञानभेदो दृष्ट इति चेत्। स्वप्न-माया-गन्धर्वनगर-मृगतृष्णादिविज्ञानेष्वनुवर्तमानेषु विषयेन्द्रियमनोदोषनिमित्तत्वमस्तु। ये पुनरमी प्रेतानां सर्वेषामनुवृत्तिमन्तः पूयपूर्णनदीप्रत्यया न ते बाह्यविषया दोषवशाद्भवितुमर्हन्ति दोषनिमित्तत्वाद्बहूनामनुवृत्तेरभावात्; अदुष्टेन्द्रियार्थसन्निकर्षजत्वे तु जलरुधिराकारविरोधात्। तस्मादनादिवासनावैचित्र्यलब्धजन्मतयाऽर्थनिरपेक्षा एव विचित्राकारा बुद्धय उदयन्ते व्ययन्ते चेति सांप्रतमिति शङ्कार्थः। न तत्र नद्यस्तीति स्वमतदार्ढ्येनोक्तम्। (३)न व्याघातादिति।

अयमभिसंधिः—जलरुधिरयो रसवीर्यविपाकादिभेदात् तोयरसवीर्यपरिपाकादिदर्शनान्नद्यास्तोयपूर्णत्वे सिद्ध्यते पूयपूर्णत्वनिश्चयः प्रेतानां मिथ्येति निश्चये तदनुवृत्तेर्दोषानुवृत्तिः कल्पनीया,

(१) 'यस्मात्'—इति टि०। (२) 'अध्यासे'—इति ख०।

(३) 'निराकरोति—न व्याघातादिति' इति क-तात्पर्यधृतपाठान्तरम्।

न्यायवार्त्तिकम्

व्यवस्थितं तस्य शेषो मिथ्याप्रत्यय इति युक्तम् । मिथ्याप्रत्ययाश्च भवन्तो(१)न प्रधानं बाधन्त इति पूयादिप्रत्ययानां प्रधानं वक्तव्यमिति । यथा पूयादिप्रत्ययानामेवं माया-गन्धर्वनगर-मृगतृष्णा-सलिलानामिति । 'कर्मणो वासनाऽन्यत्र फलमन्यत्र कल्प्यत' इति । अस्यार्थः—यत्रैव किल कर्म तत्रैव किल फलेन भवितव्यम्, यस्य तु चित्तव्यतिरेकिणो विषयास्तस्यान्यत्र कर्मान्यत्र फलमिति व्यधिकरणे कर्मफले भवत इति ? तन्न, अनभ्युपगमात्—न मया कर्मफले व्यधिकरणे अभ्युपगम्येते, आत्मनि कर्म तत्रैव फलमित्यदोषः । मदीयाच्चित्तात् अर्थान्तरं विषयाः सामान्यविशेषवत्त्वात् सन्तानान्तरचित्तवत् । प्रमाणगम्यत्वात् कार्यत्वादनित्यत्वात् धर्मपूर्वकत्वाच्चेति ॥ ३३-३४ ॥

न्यायवार्त्तिकतात्पर्यटीका

दोषश्च प्रेतशरीरनिर्वर्त्तकं कर्मैव । यथोक्तं तुल्यकर्मविपाकोत्पन्नाः प्रेता इति । कर्मणो वासनाऽन्यत्र फलमन्यत्र कल्प्यत इति । फलं पुत्रपश्वादि, तद् यदि विज्ञानं तदा यत्र ज्ञान-सन्ताने कर्मवासना तत्रैव पुत्राद्याकारं विज्ञानं फलमिति सामानाधिकरण्यमुपपद्यते । पुत्रपश्व-स्रादौ त्वर्थरूपे फले वैयधिकरण्यं स्यात्, तथा चातिप्रसङ्ग इति भावः । निराकरोति—तन्नानभ्युपगमादिति । न पुत्रादि स्वरूपेण फलमपि तु तन्निमित्ता प्रीतिः । तस्या एव चेतनेन काम्यमानत्वात् तल्लक्षणत्वाच्च फलस्येति भावः । मुक्तकेनार्थं साधयित्वा प्रयोगानाह—मदीयाच्चित्तादिति । यदि चित्तमात्रं पक्षीक्रियेत तदा दृष्टान्तो नास्तीत्यत उक्तं मदीया-च्चित्तादिति । मदीयाहंकारानास्पदत्वे सतीति विशेषणान्न स्वचित्तेन व्यभिचारः । आरोप-निराकरणार्थत्वाच्च हेतूनां नासमर्थविशेष्यतेति ॥ ३३-३४ ॥

वृत्तिः

नन्वसद्विषया अहेतुका अपि स्वाप्नप्रत्यया इव भावनाप्रत्यया इव परेऽपि प्रत्यया भवेयुरित्यत आह—(स्मृतिसङ्कल्पवच्च स्वप्नविषयाभिमानः) ।

पूर्वोपलब्धविषय इति शेषः । सङ्कल्पः उपनीतभानम् । अयमर्थः—यथा स्मृत्यादि पूर्वोपलब्धविषयकं तथा स्वाप्नप्रत्ययोऽपि न निर्विषयकः । न च स्वप्ने स्वमपि खादति, निजशिरःखण्डनमपि पश्यति, न त्विदं पूर्वोपलब्धमिति वाच्यम्, स्वस्य खादनस्य च निजशिरसः, खण्डनस्य च पूर्वोपलब्धत्वात्, संसर्गभानस्य च भ्रान्तत्वात्, न वाऽहेतुकत्वं स्मृत्यादिदृष्टान्तेन, संस्कारस्य स्मृतौ स्मृतेश्च विशिष्टबुद्धौ हेतुत्वस्याभि-मतत्वात् । तत्र भ्रमे दोषः कालविशेषोऽदृष्टविशेषोद्बोधो वेत्यन्यदेतत् ॥ ३२ ॥

(१) 'न प्रधानप्रत्ययं बाधन्त'—इति क-खधृतपाठान्तरम् ।

न्यायभाष्यम्

एवं च सति—

(१)मिथ्योपलब्धिविनाशस्तत्त्वज्ञानात् स्वप्नविषयाभिमान-प्रणाशवत् प्रतिबोधे ॥ ३५ ॥

स्थाणौ पुरुषोऽयमिति व्यवसायो मिथ्योपलब्धिः अतस्मिंस्तदिति ज्ञानम्, स्थाणौ स्थाणुरिति व्यवसायस्तत्त्वज्ञानम्। तत्त्वज्ञानेन च मिथ्योपलब्धिर्निवर्त्यते, नार्थः स्थाणुपुरुषसामान्यलक्षणः। यथा प्रतिबोधे या ज्ञानवृत्तिस्तया स्वप्नविषयाभिमानो निवर्त्यते नार्थो विषयसामान्यलक्षणः, तथा मायागन्धर्वनगरमृगतृष्णिकाणामपि या बुद्धयोऽतस्मिंस्तदिति व्यवसायास्तत्राप्यनेनैव कल्पेन मिथ्योपलब्धिविनाशस्तत्त्वज्ञानान्नार्थप्रतिषेध इति।

उपादानवच्च मायादिषु मिथ्याज्ञानम्। प्रज्ञापनीयसरूपं च द्रव्यमुपादाय साधनवानपरस्य मिथ्याध्यवसायं करोति सा माया, नीहारप्रभृतीनां नगरसरूपसन्निवेशे दूरान्नगरबुद्धिरुत्पद्यते विपर्यये तदभावात्, सूर्यमरीचिषु भौमेनोष्मणा संसृष्टेषु स्पन्दमानेषूदकबुद्धिर्भवति सामान्यग्रहणात्, अन्तिकस्थस्य विपर्यये तदभावात्।

न्यायवार्त्तिकम्

एवं च सति—

मिथ्योपलब्धिविनाशस्तत्त्वज्ञानात् स्वप्नविषयाभिमानप्रणाशवत् प्रतिबोधे।

स्थाणौ पुरुषाध्यवसायो मिथ्योपलब्धिः, तत्त्वज्ञानेन च मिथ्याध्यवसायः स निवर्तते,

न्यायवार्त्तिकतात्पर्यटीका

अपि च मिथ्योपलब्धीनां बाह्यानालम्बनत्वमास्थाय तत्त्वबुद्धीनां बाह्यानालम्बनत्वं साधनीयम्। तासां बाह्यानालम्बनत्वं बाधकाधीनम्। बाधकं चात्र समारोपितरजताद्यभिमानं निवर्त्तयति न तु पुरोऽवस्थितमर्थसामान्यं शुक्लभास्वरम्। तस्मान्न बाधकानुरोधादपि मिथ्याज्ञानं बाह्यानालम्बनमिति स्वप्नवदिति दृष्टान्तः साध्यविकल इत्याह—एवं(क)स[ती]ति।

वृत्तिः

ननु भ्रमस्यापि सद्विषयत्वे तत्प्रतिरोधः कथं स्यादित्याशङ्क्याह—(मिथ्योपलब्धिविनाशस्तत्त्वज्ञानात् स्वप्नविषयाभिमानप्रणाशवत् प्रतिबोधे)।

मिथ्योपलब्धेर्मायागन्धर्वनगरादिज्ञानस्य तत्त्वज्ञानादनारोपितवस्तुप्रत्ययाद्विनाशः प्रतिरोधः भ्रमत्वज्ञानं वा, एवं स्वाप्नप्रत्ययस्यापि। दर्पणमुखविभ्रमस्य तत्त्वज्ञानेनाप्रतिरोधेऽपि भ्रमत्वज्ञानं भवत्येवेति भावः ॥ ३३ ॥

---

(१) 'मिथ्योपलब्धेर्विनाशः'—इति-ग-पु०। (क) भाष्य-वार्त्तिकगत-'च'शब्दोऽत्र न गृहीतः।

न्यायभाष्यम्

क्वचित् कदाचित् कस्यचिच्च(१) भावान्नानिमित्तं मिथ्याज्ञानम्। दृष्टं च बुद्धिद्वैतं मायाप्रयोक्तुः परस्य च, दूरान्तिकस्थयोर्गन्धर्वनगरमृगतृष्णिकासु, सुप्तप्रतिबुद्धयोश्च स्वप्नविषये। तदेतत्सर्वस्याभावे निरुपाख्यतायां निरात्मकत्वे नोपपद्यते इति ॥ ३५ ॥

बुद्धेश्चैवं निमित्तसद्भावोपलम्भात् ॥ ३६ ॥

मिथ्याबुद्धेश्चार्थवदप्रतिषेधः। कस्मात्? निमित्तोपलम्भात्, सद्भावोपलम्भाच्च। उपलभ्यते(२)हि मिथ्याबुद्धिनिमित्तं मिथ्याबुद्धिश्च प्रत्यात्ममुत्पन्ना गृह्यते संवेद्यत्वात्, तस्मान्मिथ्याबुद्धिरप्यस्तीति ॥ ३६ ॥

न्यायवार्त्तिकम्

नार्थः स्थाणुपुरुषलक्षणः। न ह्यसौ स्थाणुर्न भवतीति यथा स्वप्नोपलब्धानां येऽध्यवसायाः ते जाग्रदवस्थोपलब्ध्या निवर्त्यन्ते, नार्थो विषयसामान्यलक्षण इति। शेषं भाष्ये ॥ ३५ ॥

बुद्धेश्चैवं निमित्तसद्भावोपलम्भात्। बुद्धेश्चैवं निमित्तसद्भावोपलम्भादप्रतिषेधः। मिथ्याबुद्धेर्निमित्तमस्ति। किं पुनस्तत? सामान्यदर्शनं विशेषादर्शनमविद्यमानविशेषाध्यारोप

न्यायवार्त्तिकतात्पर्यटीका

मिथ्याज्ञानस्य प्रधानाश्रयत्वे मिथ्योपलब्धेर्विनाशस्तत्त्वज्ञानाद्बाधकात् स्वप्नविषयाभिमान-प्रणाशवत् प्रतिषेधो न त्वर्थस्य सामान्यस्यापीति शेषः। शेषं भाष्ये। भाष्यं सुबोधम् ॥ ३५ ॥

यस्तु माध्यमिको मिथ्याबुद्धिदृष्टान्तेन बाह्यापह्नवं कृत्वा तेनैव दृष्टान्तेत विज्ञानाभावं कृत्वा विचारासहत्वं तत्त्वं भावानां व्यवस्थापयाम्बभूव तं प्रत्याह—

बुद्धेश्चैवं निमित्तसद्भावोपलम्भात् (सू ३६)॥ अर्थे हि निषिद्धे भवेदप्येतत्। तद्व्यवस्थापने तद्वदेवाप्रत्यूहं बुद्धिसद्भावोऽपि सिध्यति। न चैवंवादिनः प्रमाणमस्ति, असता च

वृत्तिः

माध्यमिकस्तु बाह्यासत्त्वं प्रसाध्य तद्दृष्टान्तेन बुद्धेरप्यसत्त्वं साधयति, तं प्रत्याह— (बुद्धेश्चैवं निमित्तसद्भावोपलम्भात्)।

एवं बाह्यवत् बुद्धेरपि न प्रतिषेधः निमित्तसद्भावोपलम्भात्, सहेतुकत्वस्य प्रमितत्वात्। न ह्यलीकं सहेतुकं सम्भवति, अहेतुकत्वे च कादाचित्कत्वव्याकोपः।

केचित्तु भ्रमस्य सद्विषयत्वे प्रमात्वं स्यादित्यत्राह—बुद्धेरिति। एवं(४)प्रमात्व-निमित्तस्य प्रकारस्य सद्भावः सत्त्वं यत्र, तथा च शुक्तिरजतयोः सत्यत्वेऽपि शुक्तौ रजतत्ववैशिष्ट्याभावान्न तद्बुद्धेः प्रमात्वमिति भाव इत्याहुः।

अत्र चोपलम्भपदमनतिप्रयोजनकम् ॥ ३४ ॥

(१) 'च'— इति टि-पु० नास्ति। (२) 'हि'—इति ल-ग-ज-भा० पु० नास्ति।

न्यायभाष्यम्

तत्त्वप्रधानभेदाच्च मिथ्याबुद्धेर्द्वैविध्योपपत्तिः ॥ ३७ ॥

तत्त्वं स्थाणुरिति, प्रधानं पुरुष इति। तत्त्वप्रधानयोरलोपाद् भेदात् स्थाणौ पुरुष इति(१)मिथ्याबुद्धिरुत्पद्यते सामान्यग्रहणात्। एवं पताकायां बलाकेति, लोष्टे कपोत इति(१*) (२)न तु समाने विषये मिथ्याबुद्धीनां समावेशः(३)सामान्यग्रहणव्यवस्थानात्। यस्य तु निरात्मकं निरुपाख्यं सर्वं तस्य समावेशः प्रसज्यते।

न्यायवार्त्तिकम्

इति। मिथ्याबुद्धिं प्रतिपद्यमानेन तस्या निमित्तं वक्तव्यम्। निमित्तं च प्रतिपद्यमानेनार्थोऽभ्युपेय इति॥ ३६ ॥

तत्त्वप्रधानभेदाच्च मिथ्याबुद्धेर्द्वैविध्योपपत्तिः। तत्त्वं स्थाणुरिति प्रधानं पुरुष इति तत्त्वप्रधानयोरलोपे मिथ्याबुद्धिर्भवतीति। शेषं भाष्ये ॥ ३७ ॥

इति बाह्यार्थभङ्गनिराकरणप्रकरणम्।

न्यायवार्त्तिकतात्पर्यटीका

प्रमाणेन विचारासहत्त्वं भावानां व्यवस्थापयन् श्लाघनीयप्रज्ञो देवानांप्रिय इति। न च कल्पनामात्रनिर्मित उपायस्तत्त्वज्ञानाय पर्याप्तः। न च वनस्पत्यादितत्त्वज्ञानस्य मिथ्याहस्तिज्ञानं निबन्धनमपि तु प्रणिहितमनस इन्द्रियार्थसन्निकर्षविशेषः। न चासौ मिथ्याज्ञानसमये आसीत्। न च मोहाभ्यासः समीचीनाय ज्ञानाय कल्पते, स हि मोहमेव द्रढयतीति सर्वमवदातम्। सोऽयं माध्यमिकोऽनुभूयमानां मिथ्याबुद्धिं नापह्नोतुमर्हति। तथा च मिथ्याबुद्धिं प्रतिपद्यमानेन तस्या निमित्तं वक्तव्यमित्युक्तम् ॥ ३६ ॥

तत्त्वप्रधानभेदाच्च मिथ्याबुद्धेर्द्वैविध्योपपत्तिः (सू ३७)॥ मिथ्याबुद्ध्या स्वनिमित्तं लक्ष्यते। तेन मिथ्याज्ञाननिमित्तस्य द्वैविध्यमित्यर्थः। यत्र स्थाणौ पुरुष इति ज्ञानं भवति तत्र तत्त्वं स्थाणुरिति, प्रधानं पुरुष इति, यः पूर्वं पुरुषोऽभूदित्यर्थः। एवं तावद्रूपबुद्धीः

वृत्तिः

न वा मिथ्याबुद्धिदृष्टान्तेन ज्ञानमात्रस्य असन्मात्रविषयकत्वं सद्विषयकत्वाभावो वा सम्भवतीत्याह—(तत्त्वप्रधानभेदाच्च मिथ्याबुद्धेर्द्वैविध्योपपत्तिः)।

तत्त्वं धर्मिस्वरूपं प्रधानम् आरोप्यं तथा च भ्रमे धर्म्यंशे प्रमात्वमारोप्यरजतत्वाद्यंशे च भ्रमत्वमिति दृष्टान्तासिद्धिरिति भावः।

केचित्तु भ्रमत्वप्रमात्वयोर्विरोधान्नैकत्र समावेश इत्यत आह—तत्त्वेति। तथा च विषयभेदान्न विरोध इति भाव इत्याहुः ॥ ३५ ॥

समाप्तं बाह्यार्थभङ्गनिराकरणप्रकरणम्।

---

(१) अयमंशः टि-पु० नास्ति। (२) तत्र समाने—इति का०। (३) 'सामान्यग्रहणाव्यवस्थाना'दिति ल-ग-अ०।

न्यायभाष्यम्

गन्धादौ च प्रमेये गन्धादिबुद्धयो मिथ्याभिमतास्तत्त्वप्रधानयोः सामान्यग्रहणस्य चाभावात्तत्त्वबुद्धय एव भवन्ति। तस्मादयुक्तमेतत्—प्रमाणप्रमेयबुद्धयो मिथ्येति ॥ ३७ ॥

दोषनिमित्तानां तत्त्वज्ञानादहङ्कारनिवृत्तिरित्युक्तम्। अथ(१)कथं तत्त्वज्ञानमुत्पद्यत इति ?

समाधिविशेषाभ्यासात् ॥ ३८ ॥

स तु प्रत्याहृतस्ये(२)न्द्रियेभ्यो मनसो धारकेण प्रयत्नेन धार्यमाणस्यात्मना

न्यायवार्त्तिकम्

दोषनिमित्तानां तत्त्वज्ञानादहङ्कारनिवृत्तिरित्युक्तम्। अथ तत्त्वज्ञानं कथमुत्पद्यत इति ? समाधिविशेषाभ्यासात्। शेषं भाष्ये।

व्यापकत्वादन्तःकरणस्य प्रत्याहारो न युक्त इति चेत्—अथ मन्यसे व्यापकमन्तःकरणं तत्कथं प्रत्याह्रियत इति चेत् ? न, उक्तोत्तरत्वात्—यथा न व्यापकमन्तःकरणं

न्यायवार्त्तिकतात्पर्यटीका

प्रतिपाद्य गन्धादिबुद्धीरपि प्रतिपादयति भाष्यकारः गन्धादौ प्रमेय इति। उपसंहरति—तस्मादयुक्तमेतदिति ॥ ३७ ॥

दोषनिमित्तानां तत्त्वज्ञानादहङ्कारनिवृत्तिरित्युक्तम्, अथ तत्त्वज्ञानं कथमुत्पद्यत इति। न तावदागमत उपपत्तितो वा तत्त्वज्ञानमहङ्कारनिवृत्तिं कर्तुमुत्सहते दोषनिमित्तेषूत्पन्नज्ञानानामपि पूर्ववदहङ्कारदोषानुवृत्तेः। साक्षात्कारस्तूपायाभावादयुक्त इति। अस्योत्तरं सूत्रम्—

* समाधिविशेषाभ्यासात् (सू ३८)॥ समाधिपदं व्याचष्टे भाष्यकारः—स तु प्रत्याहृतस्येन्द्रियेभ्यो मनस इति। अनेन विक्षेपं निवर्त्तयति। इन्द्रियेभ्यः प्रतीपमाहृतस्य मनसः क्वचित् हृत्पुण्डरीकप्रदेशे आत्मनो निजौकसि धारकेण प्रयत्नेन धार्यमाण-

वृत्तिः

ननु शास्त्राधीनं तत्त्वज्ञानं क्षणिकमतस्तन्नाशे मिथ्याज्ञानं स्यादेव। न हि तादृशं किञ्चिदेव ज्ञानं दृढभूमिसवासनमिथ्याज्ञानसमुन्मूलनक्षमम्, अतस्तत्त्वज्ञानविवृद्धिप्रकरणमारभते। तत्त्वज्ञानविवृद्धिस्तत्त्वज्ञानवासना, ततश्चाऽऽत्यन्तिको मिथ्याज्ञाननाशः, तत्र तत्त्वज्ञानविवृद्धौ हेतुमाह—(समाधिविशेषाभ्यासात्)।

समाधिश्चित्तस्याभिमतविषयनिष्ठत्वम्, तस्य प्रकर्षो विषयान्तरानभिष्वङ्गलक्षणस्तस्याभ्यासात् पौनःपुन्यात् तत्त्वज्ञानविवृद्धिः, तदेव च निदिध्यासनमामनन्ति। तत्त्वज्ञानविवृद्धया च मिथ्याज्ञानवासनातिरोभावः। तथा च योगसूत्रम्—"तज्जः संस्कारोऽन्यसंस्कारप्रतिबन्धी" (समाधिपादः, सू५०) प्रतिबन्धः कार्याक्षमतासम्पादनं विनाशो वा ॥३८॥

---

(१) 'कस्य'—इति टि०। (२) इन्द्रियार्थेभ्यः—इति ग-ख-धृतपाठान्तरम्।

* आदर्शपुस्तकयोः "समाधितत्त्वाभ्यासा"दिति पाठो दृश्यते। भाष्यसमत्या न्यायसूचीनिबन्धसंवादेन च "विशेषाभ्यासा"दित्येव पाठः प्रकृत इति निश्चित्य स एवात्र निवेशितः।

न्यायभाष्यम्

संयोगस्तत्त्वबुभुत्साविशिष्टः। सति हि तस्मिन्निन्द्रियार्थेषु बुद्धयो नोत्पद्यन्ते, तदभ्यासवशात्तत्त्वबुद्धिरुत्पद्यते ॥ ३८ ॥

यदुक्तं सति हि तस्मिन् इन्द्रियार्थेषु बुद्धयो नोत्पद्यन्ते इत्येतत्(१)—

नार्थविशेषप्राबल्यात् ॥ ३९ ॥

अनिच्छतोऽपि बुद्ध्युत्पत्तेर्नैतद् युक्तम्। कस्मात्? अर्थविशेषप्राबल्यात्। अबुभुत्समानस्यापि बुद्ध्युत्पत्तिर्दृष्टा यथा स्तनयित्नुशब्दप्रभृतिषु; तत्र समाधिविशेषो नोपपद्यते ॥ ३९ ॥

क्षुदादिभिः प्रवर्त्तनाच्च ॥ ४० ॥

न्यायवार्त्तिकम्

तथोक्तमधस्तात्। (२)अणुत्वात् स्वाङ्गगतीक्षणानुपपत्तिरिति चेत्—अथ मन्यसे यस्याप्यन्तःकरणमणु तस्यापि(३)स्वाङ्गगतिवीक्षणं न प्राप्नोति युगपद्धस्ते चक्षुषि चाऽसन्निधानात्? न, शरीरात्ममनःसंयोगयौगपद्यात् प्रयत्नदर्शनयोर्युगपदुत्पत्तेः। स्वात्मशरीरसम्बन्धश्चात्ममनःसम्बन्धश्च युगपद् भवति। तत्रात्ममनःशरीरसम्बन्धात् स्वाङ्गगतिः, आत्ममनःसम्बन्धाच्चक्षुषः प्रेरणम्। तथा स्वाङ्गगतिः प्रयत्नाद्भवतीति दर्शनं चक्षूरश्मेरर्थस्य च सन्निधानादिति। न चात्मनः प्रदेशाः सन्तीत्यचोद्यम्, प्रदेशवति चात्मनि अन्येनात्मप्रदेशेन मनः सम्बध्यते अन्येन शरीरमिति स्वाङ्गगतीक्षणादिदोषः। यस्य पुनर्निष्प्रदेश एवासौ तस्यैष दोषो न भवतीति शरीरसम्बन्धेनात्ममनःसम्बन्ध इति ॥ ३८ ॥

नार्थविशेषप्राबल्यात्। नोपपद्यते समाधिविशेषाभ्यासः अबुभुत्समानस्यापि बुद्ध्युत्पत्तेः, यथा स्तनयित्नोः शब्दप्रभृतिषु इति ॥ ३९ ॥

न्यायवार्त्तिकतात्पर्यटीका

स्यात्मना संयोगोऽयम्। स खलु सुप्तावस्थायामस्तीत्यत उक्तं—तत्त्वबुभुत्साविशिष्ट इति। तदभ्यासश्च तद्विषयप्रयत्नोत्पादपौनःपुन्यं, तस्माद् (क)आदरनैरन्तर्यदीर्घकालविशिष्टात् तत्त्वबुद्धिरुत्पद्यते ॥ ३८ ॥

नार्थ—ल्यात् (सू ३९) ॥

क्षुदा-च्च (सू ४०) ॥

एतदाक्षेपसूत्रमवतारयति—यदुक्तं सति हि तस्मिन्निति। इन्द्रियविषयैरपहृतमनसो न धारणा। तथा च तदभ्यासाभावान्न तत्त्वसाक्षात्कार इति सूत्रार्थः(ख) ॥ ४० ॥

---

(१) एतदिति सूत्रस्थनञा अन्वेति। (२) 'अल्पत्वात्'—इति क-खधृतपाठान्तरम्। (३) 'स्वाङ्गगतेरीक्षणं'—इति क-खधृतपाठान्तरम्। (क) तथाच भगवान् पतञ्जलिः—"स तु दीर्घकालनैरन्तर्यसत्कारासेवितो दृढभूमिः" (१।१४) (ख) सूत्रद्वयमेकत्र व्याख्यातम्। तथाच सूत्रार्थं इति सूत्रयोरर्थ इत्यर्थः।

न्यायभाष्यम्

क्षुत्पिपासाभ्यां शीतोष्णाभ्यां व्याधिभिश्चानिच्छतोऽपि बुद्धयः प्रवर्त्तन्ते तस्मादेकाग्र्यानुपपत्तिरिति ॥ ४० ॥

अस्त्वेतत् (१)समाधिं विहाय व्युत्थानं व्युत्थाननिमित्तं समाधिप्रत्यनीकं च, सति त्वेतस्मिन्—

पूर्वकृतफलानुबन्धात्तदुत्पत्तिः ॥ ४१ ॥

न्यायवार्त्तिकम्

(२)क्षुदादिभिः प्रवर्तनाच्च। क्षुत्पिपासाभ्यां(३)चानिच्छतोपि बुद्धय उत्पद्यन्ते इति न युक्तः समाधिविशेषः ॥ ४० ॥

पूर्वकृतफलानुबन्धात् तदुत्पत्तिः। पूर्वकृतः—पूर्वशरीराभ्यस्तः समाधिविशेषः, तस्य

न्यायवार्त्तिकतात्पर्यटीका

समाधानसूत्रमवतारयति—अस्त्वेतत्समाधिव्युत्थाननिमित्तमिति। सूत्रम्—

पूर्वकृतफलानुबन्धात्तदुत्पत्तिः (सू ४१)॥ पूर्वकृतः समाधिः तस्य फलं संस्कारः

वृत्तिः

ननु रागादिभिः प्रतिबन्धात् समाधिरेव (४)नोदीयतामित्याक्षिपति सूत्राभ्याम्—(नार्थविशेषप्राबल्यात्)। (क्षुदादिभिः प्रवर्तनाच्च)।

अर्थविशेषस्य तनयवनितादिरागस्य प्राबल्याच्चिरकालानुबन्धात् तदनुसन्धानमवर्जनीयमिति तदभावः। स्याच्च घनगर्जितादिज्ञानेन प्रतिबन्धः, एवं क्षुत्तृष्णाभयादिभिः प्रतिरुद्धस्तदुपशमाय प्रयतेत ॥ ३७-३८ ॥

परिहरति —(पूर्वकृतफलानुबन्धात्तदुत्पत्तिः)।

जन्मान्तरकृतसमाधिजन्यसंस्कारवशात् समाधिसिद्धिरित्यर्थः। अत एव च "अनेकजन्मसंसिद्धः"(५) इत्यादि सङ्गच्छते।

वयं तु—पूर्वकृतस्य प्रथमतः कृतस्येश्वराराधनस्य फलं धर्मविशेषस्तत्सम्बन्धादित्यर्थः। तथा च योगसूत्रम्- "समाधिसिद्धिरीश्वरप्रणिधानात्" (साधनपादः, सू४५) सूत्रान्तरं च तत्रैव—"ततः प्रत्यक्चेतनाधिगमोऽप्यन्तरायाभावश्च" (समाधिपादः सू२९) ततः—ईश्वरप्रणिधानाद्विषयप्रातिकूल्येन चित्तावस्थानं प्रत्यूहाभावश्चेत्यर्थः ॥ ३९ ॥

---

(१) 'समाधिव्युत्थाननिमित्तम्'—इति ज०। पाठोऽयं टीकाकृत्सम्मत इति टीकाद्धृतसन्दर्भदर्शनादवगम्यते। तथापि नानाभाष्यादर्शादर्शनादुपेक्षितः। (२) "क्षुधादिभिः प्रवर्तनाच्च' इति क्वचित्"—इति क०ख-पुस्तकसम्पादकाः। (३) 'चानिच्छतोऽपि बुद्धय एव'—इति ख०। (४) 'नोदेतीत्या'—इति म०। (५) "अनेकजन्मसंसिद्धस्ततो याति परां गतिम्"—भगवद्गीता (६।४५)।

न्यायभाष्यम्

पूर्वकृतो जन्मान्तरोपचितस्तत्त्वज्ञानहेतुर्धर्मप्रविवेकः फलानुबन्धो योगाभ्याससामर्थ्यं, निष्फले ह्यभ्यासे (१)नाभ्यासमाद्रियेरन्। दृष्टं हि लौकिकेषु कर्मस्वभ्याससामर्थ्यम् ॥ ४१ ॥

प्रत्यनीकपरिहारार्थं च—

(२)अरण्यगुहापुलिनादिषु योगाभ्यासोपदेशः ॥ ४२ ॥

योगाभ्यासजनितो धर्मो जन्मान्तरेऽप्यनुवर्तते। प्रचयकाष्ठागते तत्त्वज्ञानहेतौ धर्मे प्रकृष्टायां समाधिभावनायां तत्त्वज्ञानमुत्पद्यते इति। दृष्टश्च (३)समाधिनाऽर्थविशेषप्राबल्याभिभवः (४)'नाहमेतदश्रौषं नाहमेतदज्ञासिषमन्यत्र मे मनोऽभूदि'त्याह लौकिक इति ॥ ४२ ॥

न्यायवार्त्तिकम्

फलं धर्मः तत्कृतः पुनः समाधिविशेष इति। समाधिविशेषाच्च बाह्यविषयाभिभवः। लौकिकस्यापि तावत्समाधिविशेषावस्थितस्य बाह्यविषयोपनिपाते बुद्धयो नोत्पद्यन्ते किं पुनर्योगिन इति।

न्यायवार्त्तिकतात्पर्यटीका

तस्यानुबन्धः स्थेमा तस्मादिति सूत्रार्थः। तद् व्याचष्टे भाष्यकारः—पूर्वकृत इति। प्रविविच्यते विशिष्यतेऽनेनेति प्रविवेकः*प्रकृष्टः संस्कारः स त्वात्मधर्म इति। कस्मात्पुनरदृश्यमानः संस्कारः कल्प्यत इत्यत आह—निष्फले हीति। प्रयत्नविशेषा हि विशरारवो बहवोऽपि परस्परमसहभवन्तो न तत्त्वसाक्षात्काराय पर्याप्ता इति तज्जनिताः संस्काराः कल्प्यन्ते, तेषां स्थेम्ना संभवति संभूयकारितेत्यर्थः ॥ ४१ ॥

अर-शः (सू ४२) ॥ प्रचयकाष्ठा प्रचयावधिः यतः परमपरः प्रचयो नास्ति। तत्सहकारिशालितया प्रकृष्टायां समाधिभावनायां समाधिप्रयत्नः समाधिभावना तस्यामित्यर्थः ॥ ४२ ॥

वृत्तिः

योगाभ्यासस्थानमुपदिशति—(अरण्यगुहापुलिनादिषु योगाभ्यासोपदेशः)।

तत्र स्थिरचित्तता स्यादिति भावः। इद न सूत्रं, किं तु भाष्यमिति केचित् ॥४०॥

---

(१) 'नाभ्यास आद्रियेरन्'—इति ज०। (२) सूत्रमिदं वार्त्तिककृता टीकाकृता च न व्याख्यातम्। अस्य च सूत्रत्वे विवादो वृत्तौ व्यक्तः। न्यायसूचीनिबन्धे न्यायसूत्रोद्धारे च सूत्रत्वेनैवेदं गृहीतम्। वृत्तिकृता च तदेवाश्रितम्। अतएव सूत्रत्वेनास्य सन्निवेशो विहितः। (३) 'समाधिनार्थं'—इति ज०। (४) 'अन्यत्रमना अभूवमिति नाश्रौषम्'—इति बृहदारण्यकम्। *"अत उत्तरं 'धर्मश्चासौ प्रविवेकश्चेति धर्मप्रविवेक' इत्यधिकः पाठः पु० २।" इति क-पुस्तक-संपादकाः।

न्यायभाष्यम्

यद्यर्थविशेषप्राबल्यादनिच्छतोऽपि बुद्ध्युत्पत्तिरनुज्ञायते—

अपवर्गेऽप्येवं प्रसङ्गः ॥ ४३ ॥

मुक्तस्यापि बाह्यार्थसामर्थ्याद् बुद्धय उत्पद्येरन्निति ॥ ४३ ॥

न, निष्पन्नावश्यम्भावित्वात् ॥ ४४ ॥

कर्मवशा(१)न्निष्पन्ने शरीरे चेष्टेन्द्रियार्थाश्रये निमित्तभावादवश्यम्भावी बुद्धीनामुत्पादः। न च प्रबलोऽपि सन् बाह्योऽर्थ आत्मनो बुद्ध्युत्पादे समर्थो भवति(२)तस्येन्द्रियेण संयोगाद् बुद्ध्युत्पादे सामर्थ्यं दृष्टमिति ॥ ४४ ॥

न्यायवार्त्तिकम्

यदि बाह्यविषयोपनिपाते अर्थज्ञानानि प्रादुर्भवन्ति —अपवर्गेऽप्येवं प्रसङ्गः। (३)मुक्तस्यापवर्गे बाह्यविषयविशेषोपनिपातो विद्यत इति बुद्ध्युत्पादप्रसङ्गः ॥ ४१-४३ ॥

न, निष्पन्नावश्यम्भावित्वात्। सति शरीरे बाह्यविषयो ज्ञानोत्पत्तिकारणम्, नान्यथेति सूत्रार्थः ॥ ४४ ॥

न्यायवार्त्तिकतात्पर्यटीका

पूर्वपक्षवाद्याह—यद्यर्थविशेषप्राबल्यादिति।

अप-ङ्गः (सू ४३) ॥ स खल्वयमीदृशो बाह्यार्थस्य महिमा यत इन्द्रियाद्यनपेक्षादेवात्मनो बुद्धिर्जनयिष्यत इत्यभिमानः पूर्वपक्षिणः ॥ ४३ ॥

सिद्धान्तसूत्रम्—

न, निष्पन्नावश्यंभावित्वात् (सू ४४) ॥ व्याख्यातम्। न खलु तण्डुला अत्यन्तं फलीकृता अपि पिठरोदकदहनसंयोगप्रचयमन्तरेण पुलाका भवन्तीति भावः ॥ ४४ ॥

वृत्तिः

तटस्थः शङ्कते—(अपवर्गेऽप्येवं प्रसङ्गः)।

एवं प्रसङ्गः अर्थविशेषप्राबल्याद्विषयावभासप्रसङ्गः ॥ ४१ ॥

समाधत्ते—(न, निष्पन्नावश्यम्भावित्वात्)।

निष्पन्नस्य (४)उत्पन्नस्य शरीरादेः अवश्यम्भावित्वात् कारणत्वात्, ज्ञानादिष्विति शेषः ॥ ४२ ॥

---

(१) 'निष्पन्नशरीरे—इति ज०। (२) 'तदेन्द्रियेण'—इति टि०। (३) 'मुक्तस्यापवर्गे विषयोपनिपातो' —इति ख०। (४) 'उत्पन्नस्ये'ति भ०-पु० नास्ति

न्यायभाष्यम्

तदभावश्चापवर्गः ॥ ४५ ॥

तस्य बुद्धिनिमित्ताश्रयस्य शरीरेन्द्रियस्य धर्माधर्माभावादभावोऽपवर्गः। तत्र यदुक्तमपवर्गेऽप्येवं प्रसङ्ग इति, तदयुक्तम्। तस्मात्सर्वदुःखविमोक्षोऽपवर्गः। यस्मात्सर्वदुःखबीजं (१)सर्वदुःखायतनं चापवर्गे विच्छिद्यते तस्मात्सर्वेण दुःखेन विमुक्तिरपवर्गः। न निर्बीजं निरायतनं च दुःखमुत्पद्यत इति ॥ ४५ ॥

तदर्थं यमनियमाभ्यामात्मसंस्कारो योगाच्चा-*ध्यात्मविध्युपायैः ॥ ४६ ॥

तस्यापवर्गस्याधिगमाय यमनियमाभ्यामात्मसंस्कारः। यमः समानमाश्रमिणां धर्मसाधनम्, नियमस्तु विशिष्टम्(२)। आत्मसंस्कारः पुनरधर्महानं धर्मोपचयश्च। योगशास्त्राच्चाध्यात्मविधिः प्रतिपत्तव्यः। स पुनस्तपः प्राणायामः प्रत्याहारो (३)ध्यानं धारणेति। इन्द्रियविषयेषु प्रसंख्यानाभ्यासो रागद्वेषप्रहाणार्थः(४)। उपायस्तु योगाचारविधानमिति ॥ ४६ ॥

न्यायवार्त्तिकम्

तदभावश्चापवर्गः। तस्य शरीरादेरुपलब्धिकारणस्याभावोऽपवर्ग इति। तस्मात् (५)सर्वदुःखमोक्षोऽपवर्ग इति—यस्मात् सर्वं दुःखबीजं दुःखं चापवर्गे विच्छिद्यते तस्मात् सर्वदुःखेन विमुक्तिरपवर्गः ॥ ४५ ॥

तदर्थं यमनियमाभ्यामात्मसंस्कारो योगाच्चाध्यात्मविध्युपायैः—

तस्यापवर्गस्याधिगमाय(६)यमनियमाभ्यामात्मसंस्कारः ॥ ४६ ॥

न्यायवार्त्तिकतात्पर्यटीका

तद-र्गः (सू ४५) ॥ किं समाधिविशेष एव तत्त्वज्ञानसाधनम्? नैवम्, किं तु—तदर्थं यमनियमाभ्यामात्मसंस्कारो योगाच्चाध्यात्मविध्युपायैः (सू ४६) ॥ समानमाश्रमिणां धर्मसाधनम्—अहिंसा सत्यमस्तेयं ब्रह्मचर्यमपरिग्रह इति यमः। नियम इति—यस्याश्रमिणोऽसाधारणो धर्मोपायः। योग इति विषयेण योगशास्त्रं पातञ्जलं लक्षयति। योगाचारः—एकाकिता आहारविशेषः एकत्रानवस्थानमित्यादि यतिधर्मोक्तम्। एतेऽपि तत्त्वज्ञानक्रमोत्पादक्रमेणापवर्गसाधनमित्यर्थः ॥ ४६ ॥

वृत्तिः

ननु किमेतावतेत्यत आह—(तदभावश्चापवर्गः)।

तस्य शरीरादेरभावः, तदारम्भकधर्माधर्मविरहादिति भावः ॥ ४३ ॥

(१) 'सर्वदुःखाय तेन'—इति टि०। (२) 'विशिष्ट'—इति ल० ग०। (३) 'धारणा ध्यानमिति'—इति फ०। (४) 'ग्रहणार्थ'—इति ल० ग० ज०। (५) 'सुखदुःखमोक्षो'—इति क-खधृतपाठान्तरम्। (६) 'यमनियमाभ्यासंस्कारः'—इति क-खधृतपाठान्तरम्।

* 'अध्यात्मविधी'त्यत्र 'आत्मविधी'ति वृत्तिकृतपाठः।

वृत्तिः

ननु समाधिमात्रादेव निष्प्रत्यूहोऽपवर्गः स्यात्, साधनान्तरं वाऽपेक्षणीयमत आह—

यद्वा, समाधिसाधनान्याह—

(तदर्थं यमनियमाभ्यामात्मसंस्कारो योगाच्चात्मविध्युपायैः) ।

तदर्थमपवर्गार्थमिति भाष्यादौ । तदर्थं समाध्यर्थमिति वा । यमानाह योगसूत्रं—"अहिंसा-सत्यास्तेयब्रह्मचर्यापरिग्रहा यमाः ।" नियमानाह—"शौच-सन्तोष-तपःस्वाध्यायेश्वरप्रणिधानानि नियमाः (साधनपादः सू ३०–३२) ।" स्वाध्यायोऽभिमतमन्त्रजपः ।

निषिद्धानाचरणतत्तदाश्रमविहिताचरणे यमनियमावित्यन्ये ।

आत्मसंस्कार आत्मनोऽपवर्गाधिगमक्षमता । ननु यमनियमावेव साधने, उताऽऽहो अन्यदस्तीत्यत आह—योगादिति । आत्मविधिः आत्मसाक्षात्कारविधायकवाक्यम्, "आत्मा वा अरे द्रष्टव्यः" 'आत्मानं चेद्विजानीयात्' इत्यादि । योगादिति प्रतिपाद्यत्वं पञ्चम्यर्थः । तथा च योगशास्त्रोक्तात्मतत्त्वाधिगमसाधनैश्चात्मसंस्कारः कर्तव्य इत्यर्थः । तथा च योगसूत्रम्—'योगाङ्गानुष्ठानादशुद्धिक्षये ज्ञानदीप्तिरा विवेकख्यातेः' (साधनपादः सू २८) । तदर्थश्च—योगाङ्गानां यमनियमादीनाम् अनुष्ठानाच्चित्तस्याशुद्धेरविद्यारूपस्य क्षये सति ज्ञानस्य दीप्तिः प्रकर्षः, स च विवेकख्यातिपर्यन्तो जायते । सा च सत्त्वपुरुषान्यतासाक्षात्कारः । अस्मन्मते तु देहादिभिन्नात्मसाक्षात्कारः । स च नेदानीमविद्याप्रतिबन्धाद्देहात्मनोर्मनश्चक्षुराद्ययोग्यत्वाच्च, भवति चासौ योगजधर्मात् । योगाङ्गानि तत्रोक्तानि 'यमनियमासनप्राणायामप्रत्याहारधारणाध्यानसमाधयोऽष्टावङ्गानि ।' आसनं पद्मासनादि कुशासनादि च 'चैलाजिनकुशोत्तरमिति' भगवद्वचनात् । प्राणायाममाह योगसूत्रम्—"तस्मिन् सति श्वासप्रश्वासयोर्गतिविच्छेदः प्राणायामः ।" (साधनपादः सू० ४९) तस्मिन्—आसनस्थैर्ये । प्राणवायोरेव निर्गमप्रवेशरूपक्रियाविशेषात् श्वासप्रश्वासव्यपदेशः । बहिरिन्द्रियाणां स्वस्वविषयवैमुख्येनावस्थानं प्रत्याहारः । धारणामाह योगसूत्रम्—"देशबन्धश्चित्तस्य धारणा" (विभूतिपादः सू० १) । देशे नाभिचक्रादौ चित्तस्य बन्धो विषयान्तरवैमुख्येनावस्थानम् । ध्यानमाह—"तत्प्रत्ययैकतानता ध्यानम्" (विभूतिपादः सू० २) । धारणैव धारावाहिकी ध्यानमित्यर्थः । समाधिमाह—"तदेवार्थमात्रनिर्भासं स्वरूपशून्यमिव समाधिः" (विभूतिपादः सू० ३) । अर्थस्य धर्मो ज्ञानस्वरूपं च यदि ध्याने न भासते तदा समाधिरित्यर्थः । सूत्रान्तरम्—"त्रयमन्तरङ्गं पूर्वेभ्यः" (विभूतिपादः सू० ७) । चरमत्रयं साक्षादुपकारकमित्यर्थः ॥ ४४ ॥

न्यायभाष्यम्

ज्ञानग्रहणाभ्यासस्त(१)द्विद्यैश्च सह संवादः ॥ ४७ ॥

तदर्थमिति प्रकृतम्। ज्ञायतेऽनेनेति ज्ञानमात्मविद्याशास्त्रं तस्य ग्रहणमध्ययनधारणे, अभ्यासः सततक्रियाध्ययनश्रवणचिन्तनानि। तद्विद्यैश्च सह संवाद इति प्रज्ञापरिपाकार्थम्, परिपाकस्तु संशयच्छेदनमविज्ञातार्थबोधोऽध्यवसिताभ्यनुज्ञानमिति। (२)समयावादः संवादः ॥ ४७ ॥

तद्विद्यैश्च सह संवाद इत्यविभक्तार्थं वचनं विभज्यते—

तं शिष्यगुरुसब्रह्मचारिविशिष्टश्रेयोऽर्थिभिरनसूयिभिरभ्युपेयात् ॥ ४८ ॥

एतन्निगदेनैव नीतार्थमिति ॥ ४८ ॥

न्यायवार्त्तिकम्

ज्ञानग्रहणाभ्यासस्तद्विद्यैश्च सह संवादः। ज्ञानग्रहणं शास्त्रग्रहणं, तद्विद्याः—(३)यत्नमुपायं बुद्ध्यन्त इति तद्विद्या इत्यविभक्तार्थं वचनम् ॥ ४७ ॥

तं शिष्य-गुरु-सब्रह्मचारि-विशिष्ट···इत्येवमादि सूत्रम्। एतत् तु निगदेनैव नीतार्थम् ॥ ४८ ॥

न्यायवार्त्तिकतात्पर्यटीका

ननु यद्येते तत्त्वज्ञानोत्पादक्रमेणापवर्गोपायः, कृतं तर्ह्यान्वीक्षिक्येत्यत आह—

ज्ञानग्रहणाभ्यासस्तद्विद्यैश्च सह संवादः (सू ४७) ॥ तद्व्याचष्टे तदर्थमिति प्रकृतम्। आत्मविद्या आन्वीक्षिकी। अभ्यासः सततक्रिया प्रयत्न इत्यर्थः। प्रयोजनमाह—प्रज्ञापरिपाकार्थम्। परिपाकस्तु संशयच्छेदनम्। किं देहाद्यतिरिक्त आत्मा उत नेति संशयः। तस्य च्छेदनं लोकस्य तत्त्वज्ञानमात्मनि तदवरोधः। अध्यवसितं प्रमाणेन, तस्य अभ्यनुज्ञानं तर्केण ॥ ४७ ॥

तं-यात् (सू ४८) ॥ सब्रह्मचारी सहाध्यायी। गुरुशिष्यसहाध्यायिभ्योऽन्यः शास्त्रेणानुशिष्टः(४)शिष्टश्रेयोऽर्थिनः श्रेयसि मोक्षलक्षणे श्राद्धाः। तेषामपवर्गे श्रद्धादर्शनादस्ति तदुपायाभ्यासः प्राग्भवीय इत्यनुमीयते। तेन तेषामपि प्राग्भवीयसंस्कारवशात्प्रतिभोपासनीयेति। अभ्युपेयात् अभिमुखमुपेत्य जानीयात् गुर्वादिभिः सहेत्यर्थः। नीतार्थम् गतार्थम् ॥ ४८ ॥

(१) 'तद्विद्यैश्च'—इति टि०। (२) 'समीपवादः'—इति-ग-वि-टि०। 'समायवादः'—इति ल-भा०। फ-पुस्तकपाठो गृहीतः। 'समये'त्यव्ययं समीपवाचि। (३) 'ये तमुपायं'—इति पाठः सम्भाव्यते। (४) 'शिष्टश्रेयोऽर्थिनः' इत्यत्र 'विशिष्टः, श्रेयोऽर्थिनः' इति सम्यक्तया प्रतिभाति।

न्यायभाष्यम्

(१)यदि च मन्येत पक्षप्रतिपक्षपरिग्रहः प्रतिकूलः परस्येति—

(२)प्रतिपक्षहीनमपि वा प्रयोजनार्थमर्थित्वे ॥ ४९ ॥

तमभ्युपेयादिति वर्तते। परतः प्रज्ञामुपादित्समानस्तत्त्वबुभुत्साप्रकाशनेन स्वपक्षमनवस्थापयन् स्वदर्शनं परिशोधयेदिति। अन्योन्यप्रत्यनीकानि च प्रावादुकानां दर्शनानि ॥ ४९ ॥

न्यायवार्त्तिकम्

प्रतिपक्षहीनमपि वा प्रयोजनार्थमर्थित्वे। तमभ्युपेयादिति वर्तते ॥ ४९ ॥

न्यायवार्त्तिकतात्पर्यटीका

तदनेन गुर्वादिभिर्वादं कृत्वा तत्त्वनिर्णय उक्तः। यदि च मन्येत पक्षप्रतिपक्षपरिग्रहः प्रतिकूलः परस्य गुर्वादेस्तस्मान्न वादोऽप्युचित इति, तत्रेदं सूत्रमुपतिष्ठते—

प्रतिपक्षहीनमपि वा प्रयोजनार्थमर्थित्वे (सू ४९) ॥ व्याचष्टे—तमभ्युपेयादिति वर्त्तते। परतो गुर्वादेः प्रज्ञामुपादित्समानस्तत्त्वबुभुत्साप्रकाशनेन आत्मनः शरीरादिभ्यो भेदं बुभुत्स इत्यभिदधानः स्वपक्षमनवस्थापयन् स्वदर्शनं गुर्वादिकृताद्विचारात्पूर्वपक्षोच्छेदेन सिद्धान्तव्यवस्थापनलक्षणात् स्वदर्शनं परिशोधयेत्। अन्योन्यप्रत्यनीकानि च प्रावादुकानां दर्शनानि अयुक्तपरित्यागेन युक्तपरिग्रहणेन च परिशोधयेदिति संबध्यते ॥ ४९ ॥

वृत्तिः

नन्वेवं किमान्वीक्षिक्येत्यत आह—(ज्ञानग्रहणाभ्यासस्तद्विद्यैश्च सह संवादः)।

तदर्थमित्यनुवर्तते। ज्ञायतेऽनेनेति ज्ञानं शास्त्रं प्रकृतम्, तस्य ग्रहणमध्ययनधारणे, तत्र अभ्यासो दृढतरसंस्कारः, तद्विद्यैस्तदभियुक्तैः संवादः स्वानुभवदार्ढ्याय। न हि योगाङ्गज्ञानाय तत्सापेक्षत्वेन प्रकृतशास्त्रवैफल्यं ध्येयस्वरूपवैलक्षण्यात् ॥ ४५ ॥

संवादप्रकारं दर्शयितुमाह—(तं शिष्यगुरुसब्रह्मचारिविशिष्टश्रेयोऽर्थिभिरनसूयिभिरभ्युपेयात्)।

तम् तद्विद्यम्, सब्रह्मचारी सहाध्यायी, विशिष्टः प्रकृष्टज्ञानवान्, श्रेयोऽर्थी मुमुक्षुः। विशिष्टः पूर्वोक्तभिन्न इत्यर्थ इति कश्चित्। विजिगीषुव्यावृत्त्यर्थम् अनसूयिभिरिति ॥४६॥

---

(१) 'यदिदं'—इति ज-ग-ज-भा०। (२) 'प्रतिपचहान—' इति टि०।

न्यायभाष्यम्

स्वपक्षरागेण चैके न्यायमतिवर्तन्ते, तत्र—

तत्त्वाध्यवसायसंरक्षणार्थं जल्पवितण्डे बीजप्ररोहसंरक्षणार्थं कण्टकशाखावरणवत् ॥ ५० ।

अनुत्पन्नतत्त्वज्ञानानामप्रहीणदोषाणां तदर्थं घटमानानामेतदिति ॥ ५० ॥

विद्यानिर्वेदादिभिश्च परेण (१)अवज्ञायमानस्य—

ताभ्यां विगृह्य कथनम् ॥ ५१ ॥

न्यायवार्त्तिकम्

तत्त्वाध्यवसायसंरक्षणार्थं जल्पवितण्डे बीजप्ररोहसंरक्षणार्थं कण्टकशाखावरणवत् इति । अनुत्पन्नतत्त्वज्ञानेनैतत् कर्तव्यमिति सूत्रार्थः ॥ ५० ॥

विद्यानिर्वेदादिभिश्च परेणावज्ञायमानस्य—

ताभ्यां विगृह्य कथनम् । ताभ्यां जल्पवितण्डाभ्यां विगृह्येति विजिगीषया न तत्त्व-

न्यायवार्त्तिकतात्पर्यटीका

ननु यत्र वादस्यैव दशेयमीदृशी, तत्त्वनिर्णये दत्तजलाञ्जली तर्हि जल्पवितण्डे इत्यत आह—स्वपक्षरागेण चैके न्यायमतिवर्त्तन्ते। तत्र—

तत्त्वाध्यवसायसंरक्षणार्थं जल्पवितण्डे बीजप्ररोहसंरक्षणार्थं कण्टकशाखावरणवत् (सू ५०)—इति सूत्रम् । तद् व्याचष्टे—अनुत्पन्नतत्त्वज्ञानानामिति ॥ ५० ॥

न केवलं तदर्थं घटमानानां जल्पवितण्डे, अपि तु विद्यानिर्वेदादिभिश्च परेणावज्ञायमानस्य ;—

ताभ्यां विगृह्य कथनम् (सू ५१) ॥ इति सूत्रम्। यस्तु स्वदर्शनविलसितमिथ्याज्ञानावलेपदुर्विदग्धतया सद्विद्यावैराग्याद्वा लाभपूजाख्यात्यर्थितया कुहेतुभिरीश्वराणां जनाधाराणां पुरतो वेदब्राह्मणपरलोकादिदूषणप्रवृत्तस्तं प्रति वादी समीचीनदूषणमप्रतिभयाऽपश्यन् जल्पवितण्डे

वृत्तिः

संवादप्रकारमाह—(प्रतिपक्षहीनमपि वा प्रयोजनार्थमर्थित्वे) ।

वाशब्दो निश्चयार्थः । अर्थित्वे तत्त्वबुभुत्सायां सत्यां प्रयोजनार्थं तत्त्वनिर्णयार्थं प्रतिपक्षहीनं प्रतिकूलपक्षहीनं यथा स्यात् तथा अभ्युपेयात् । तथा च भाष्यम्—"स्वपक्ष(क)मनवस्थाप्य स्वदर्शनं परिशोधयेदिति ।" तत्त्वनिर्णिनीषुतया न पक्षपात इति भावः ॥ ४७ ॥

समाप्तं तत्त्वज्ञानविवृद्धिप्रकरणम् ।

---

(१) 'अविज्ञायमानस्य'—इति ज० वि० । (क) भाष्ये 'अनवस्थापयन्'—इति बहुपुस्तकसंवादाद् गृहीतम् ।

न्यायभाष्यम्

विगृह्येति विजिगीषया, न तत्त्वबुभुत्सयेति। तदेतद्विद्यापालनार्थं न लाभपूजाख्यात्यर्थमिति ॥ ५१ ॥

इति श्रीवात्स्यायनीये न्यायभाष्ये चतुर्थोऽध्यायः समाप्तः ॥ ४ ॥

न्यायवार्त्तिकम्

बुभुत्सयेति। विद्यापालनार्थं चैतत्, न लाभपूजाख्यात्यर्थमिति ॥ ५१ ॥

प्रवृत्तिदोषसम्बद्धः प्रेत्यभावः प्रपञ्चितः।
फलं दुःखं विमुक्तिश्च तदुपायश्च कीर्त्तिताः ॥

इति—औद्द्योतकरे न्यायसूत्रवार्त्तिके चतुर्थाध्यायस्य द्वितीयमाह्निकम् ॥ चतुर्थोऽध्यायः समाप्तः ॥

न्यायवार्त्तिकतात्पर्यटीका

अवतार्य विगृह्य जल्पवितण्डाभ्यां तत्त्वकथनं करोति विद्यापरिपालनाय। मा भूदीश्वराणां मतिविभ्रमेण तच्चरितमनुवर्तिनीनां प्रजानां धर्मविप्लव इति। इदमपि प्रयोजनं जल्पवितण्डयोः। न तु लाभख्यात्यादि दृष्टम्। न हि परहितप्रवृत्तः परमकारुणिको मुनिर्दृष्टार्थं परपांसुलोपायमुपदिशतीति।

शङ्कावार्त्तिकम्—(१)व्यापकत्वादन्तःकरणस्येति। अस्य वक्ष्यमाणोऽभिसंधिः। निराकरोति—नोक्तोत्तरत्वात्। सांख्यं दूषयद्भिरित्यर्थः। शङ्किता स्वाभिप्रायमुद्घाटयति—स्वाङ्गगतीक्षणेति। यावद्धस्तावच्छिन्ने आत्मप्रदेशे प्रयत्नो न जायते न तावत्तत्र कर्म, न च तत्रात्ममनःसन्निकर्षं विना प्रयत्नः। न च मनस इन्द्रियसंयोगं विनेक्षणम्। न चाणुना मनसा इन्द्रियेण हस्तेन चापर्यायेण (२)संभवः। तस्माद् व्यापकं मन इति शङ्कार्थः। निराकरोति—न शरीरात्ममनःसंयोगयौगपद्यात् प्रयत्नदर्शनयोर्युगपदुत्पत्तेः। तत्रात्मशरीरसंबन्धात् स्वाङ्गगतिरिति। पाणिचालनेच्छापेक्षेणात्ममनःसंयोगेन पाणिं चालयामीत्येवमाकारः प्रयत्नो जायते, तत्र प्रयत्नवदात्ममनःसंयोगात्पाणौ क्रिया जायते। यद्यप्यात्मनः सर्वाङ्गे संयोगो न विशिष्यते तथाऽपीच्छाविशेषादुत्पन्नः प्रयत्नविशेषः पाणावेव कर्म करोति, नान्यत्र। प्रयत्नवदात्मसंयोगाच्चक्षुषः प्रेरणम्। यद्यपि चानयोः प्रयत्नयोर्न युगपदुत्पादः, तथाऽपि तदत्यन्तसौक्ष्म्यात्कालभेदो न लक्ष्यते। नन्वेकस्मिन्नात्मप्रदेशे वर्त्तमानः संयोगो वा प्रयत्नो वा कथं देशान्तरे असंयोगिन्यप्रयत्नवति कार्यमारभत इत्यत आह—न चात्मनः प्रदेशाः सन्तीति। परिशिष्टं वार्त्तिकं भाष्यव्याख्यया व्याख्यातम् ॥ ३८-५१ ॥

इति मिश्रश्रीवाचस्पतिविरचितायां न्यायवार्त्तिकतात्पर्यटीकायां चतुर्थोऽध्यायः समाप्तः।

---

(१) 'व्यापकत्वा'दितीदं ३८शसूत्रीयं वार्त्तिकम् (१०९० पृ०)। ततः प्रभृत्यध्यायसमाप्तिपर्यन्तं टीकाकृता भाष्यस्यैव व्याख्यातत्वादिदमन्ते व्याख्यातमिति प्रतिभाति। क-पुस्तकसम्पादकैरप्येवमुक्तम्।
(२) 'सम्बन्धसम्भवः' इति 'सम्बन्धः' इति वा पाठः समीचीनः।

न्यायदर्शनम्

अथ पञ्चमाध्यायस्याद्यमाह्निकम्

न्यायभाष्यम्

साधर्म्यवैधर्म्याभ्यां प्रत्यवस्थानस्य विकल्पाज्जातिबहुत्वमिति सङ्क्षेपेणोक्तं, (१, २, २०सू) तद्विस्तरेण विभज्यते—(१)ताः खल्विमा जातयः स्थापनाहेतौ प्रयुक्ते चतुर्विंशतिः प्रतिषेधहेतवः—

साधर्म्य-वैधर्म्योत्कर्षापकर्ष-वर्ण्यावर्ण्य-विकल्प-साध्य-प्राप्त्य-प्राप्ति-प्रसङ्ग-प्रतिदृष्टान्तानुत्पत्ति-संशय-(२)प्रकरणाहेत्वर्थापत्त्य-विशेषोपपत्त्युपलब्ध्यनुप(३)लब्ध्यनित्यानित्यकार्यसमाः ॥ १ ॥

न्यायवार्त्तिकम्

जातेः संक्षेपेणोक्ताया विस्तरो वक्तव्य इतीदमारभ्यते साधर्म्यादिसूत्रम्—

साधर्म्यवैधर्म्योत्कर्षापकर्षवर्ण्यावर्ण्यविकल्पसाध्यप्राप्त्यप्राप्तिप्रसङ्गप्रतिदृष्टान्तानुत्पत्तिसंशयप्रकरणाहेत्वर्थापत्त्यविशेषोपपत्त्युपलब्ध्यनुपलब्धिनित्यानित्यकार्यसमाः ।

न्यायवार्त्तिकतात्पर्यटीका

अथ प्रमाणादयः पदार्था उद्दिष्टा (४)लक्षिताः परीक्षिताश्च(४*)तत्किमपरमवशिष्यते यदर्थं पञ्चमोऽध्याय आरभ्यत इत्यत आह—साधर्म्यवैधर्म्याभ्यां प्रत्यवस्थानस्य विकल्पाज्जातिबहुत्वमिति भाष्यम् । तस्यार्थमाह वार्त्तिककारः—जातेः संक्षेपेणोक्ताया इत्यादि । यद्यपि जातिनिग्रहस्थानभेदा जातिनिग्रहस्थानसामान्यलक्षणानन्तरं प्रथमेऽध्याये युक्ता लक्षयितुं, तथाऽप्येषां बहुत्वात्प्रमेयपरीक्षायां विलम्बो मा भूद, अपेक्षिता चासौ शिष्यैः ; संशयादिपरीक्षां तु विना प्रमेयपरीक्षा न शक्यते, तस्मान्मुनिः शिष्यानुरोधेन परीक्षां तावद्वर्त्तयांबभूव । तदनन्तरमवशिष्टं जातिनिग्रहस्थानविशेषलक्षणं वर्त्तयति । जल्पवितण्डापरीक्षा चानन्तरं प्रवृत्ता, तदङ्गं च जातिनिग्रहस्थाने इत्यवान्तरसंगतिरस्तीति सर्वमवदातम् ।

वृत्तिः

तद्विद्यैः सह संवाद इत्यत्र त्रयीबाह्यैः सह संवादः कर्त्तव्य इति भ्रमो मा भूदिति तत्त्वज्ञानपरिपालनप्रकरणमारभते—(तत्त्वाध्यवसायसंरक्षणार्थं जल्पवितण्डे बीजप्ररोहसंरक्षणार्थं कण्टकशाखावरणवत्) ।

तत्त्वाध्यवसायस्य तत्त्वनिर्णयस्य संरक्षणं परोक्तदूषणास्कन्दनेनाप्रामाण्यशङ्काविघटनम्, तदर्थं जल्पवितण्डे पूर्वमुक्ते इति शेषः ॥ ४८ ॥

---

(१) 'तत्'—इति टि० । (२) 'प्रकरणहेत्वर्था'—इति ज-ग-भा० । (३) '—लब्धि-नित्यानित्यकार्य'—इति ज-म-ख-भा० । पाठोऽयं वार्त्तिकादिष्वतोऽपि वक्ष्यमाणलक्षणक्रमविरोधात् फ-पुस्तकानुसारेण संशोध्य परिगृहीतः । (४) 'लक्षिताश्च'—इति ख० ।

न्यायभाष्यम्

साधर्म्येण प्रत्यवस्थानमविशिष्यमाणं स्थापनाहेतुतः साधर्म्यसमः। अविशेषं तत्र तत्रोदाहरिष्यामः। एवं वैधर्म्यसमप्रभृतयोऽपि निर्वक्तव्याः॥ १॥

न्यायवार्त्तिकम्

तत्र जातिर्नाम स्थापनाहेतौ प्रयुक्ते यः प्रतिरोधासमर्थो हेतुः।

जातेः प्रयोगप्रतिषेधादसदुत्तरत्वाच्चारम्भो न युक्तः,(१)छलजातिनिग्रहस्थानानां स्ववाक्ये परिवर्जनमिति प्रतिषिद्धा जातिः, न च जातिः सदुत्तरमतश्च जातेः प्रयोगो न युक्तः? न, आरम्भप्रयोजनस्योक्तत्वात्, उक्तं जातेरारम्भप्रयोजनं स्वयं च सुकरः प्रयोग इति। साधुसाधननिराकरणार्थं (२)च प्रयोगः—यदा तु वादी परस्य साधनं साध्विति मन्यते लाभपूजाख्याति-

न्यायवार्त्तिकतात्पर्यटीका

साध-माः (सू १)॥ विशेषोपयोगि सामान्यलक्षणमाह—तत्र जातिर्नामेति। प्रतिषेधबुद्ध्या प्रयुक्त इति शेषः।

आह्निकारम्भमाक्षिपति—जातेः प्रयोगप्रतिषेधादिति। परिवर्जनं तु सामान्यज्ञानादपि भवन्न विशेषज्ञानमपेक्षत इति भावः। समाधत्ते—न आरम्भप्रयोजनस्योक्तत्वात्। एतदेव स्मारयति—स्वयं च सुकरः प्रयोग इति, प्राश्निकैः कतमा जातिरित्युक्ते स्वयं च सुकरः प्रयोग इति। अथ वा सद्विद्याविद्विषा अधिक्षिप्ते तत्त्वे अह्नाय तन्निरासहेतावस्फुरति साक्षिणां पुरत एकान्तपराजयाद्वरं संदेहोऽप्यस्तु कथंचित्परपराजयो वेति बुद्ध्या पांशुभिरिवावकिरन् जातिं प्रयुङ्क्ते। तेन हि लोके तत्त्वमवस्थापितं भवति। अन्यथाऽसन्मार्गप्रवृत्तो लोकः स्यात्। न च नखचपेटादिभिर्विद्याविद्वेषिणो निराकरणे तदुत्थापितकुहेतुनिराकरणधीरस्ति लौकिकानाम्। तस्मान्न नखचपेटादय उपदेष्टव्याः शास्त्रकृतेत्यभिप्रायवानाह—साधुसाधननिराकरणार्थं चेति। अतत्त्वविषयत्वेन परमार्थतोऽसाध्वपि साधनमह्नाय दूषणस्याप्रतिभासनात्साध्वित्युक्तम्। लाभपूजाख्यातिकामश्चेत्यन्वाचये चकारः। प्रसिद्धं तावत्तत्त्वपरिपालनं प्रयोजनं, तस्मिन् सत्येतदप्यन्वाचीयत इत्यर्थः।

वृत्तिः

ननु ताभ्यां किं कार्यमित्यत आह—(ताभ्यां विगृह्य कथनम्)।

अयमर्थः—त्रयीबाह्यैस्तद्दर्शनाभ्यासाहित(३)कुतर्कजालैरपरैर्वा यदि स्वपक्ष आक्षिप्यते तदा, ताभ्यां जल्पवितण्डाभ्याम्। सावधारणं चैतत्। त्रय्यन्तःपातिनामाक्षेपे तु वादजल्पवितण्डाभिर्यथेच्छं कथयेत् इति भावः।

वस्तुतस्तु मुमुक्षोर्न तादृशैः सह संवादो वीतरागत्वात्, न हि शास्त्रपरिपालनमपि तदुद्देश्यम्, न वा तदुपेक्षयैव शास्त्रं गच्छति। किं तु शास्त्रमभ्यस्येतेति तत्त्वमिति ॥४९॥

समाप्तं तत्त्वज्ञानपरिपालनप्रकरणम्। समाप्तं च चतुर्थाध्यायस्य द्वितीयमाह्निकम्।

इति श्रीन्यायपञ्चाननविश्वनाथभट्टाचार्यकृतायां न्यायसूत्रवृत्तौ

चतुर्थाध्यायवृत्तिः समाप्ता।

---

(१) १, १, १सू भाष्यं द्रष्टव्यम्। (२) 'वा' इति—क-ख०। (३) 'कुज्ञानैरपरैः'—इति भ०।

न्यायवार्त्तिकम्

कामश्च भवति तदा जातिं प्रयुङ्क्ते ; कदाचिदयं जात्युत्तरेणाकुलीकृतो नोत्तरं प्रतिपद्येत, उत्तराप्रतिपत्त्या च निगृह्यते । अनभिधाने (च)जातेरेकान्तजयः परस्येत्यैकान्तिकात् पराजयाद्वरमस्तु सन्देह इति युक्तो जातेः प्रयोगः ।

असाधुसाधननिराकरणार्थमित्यन्ये—एके तु जातेः प्रयोगं मन्यन्ते असाधुसाधननिराकरणार्थम्, एवं चाहुः—असाधौ तु साधने प्रयुक्ते य आसां प्रयोगः सोऽनभिज्ञतया साधनदोषस्य, तद्दोषप्रदर्शनार्थं वा प्रसङ्गव्याजेनेति । एतत्तु न युक्तं प्रयोजनाभावात्—यदि तावदसाध्वेतत् साधनमिति प्रतिपद्यते य एवास्य दोषो बुद्धः स एव वक्तव्यो न जात्यभिधानेन प्रयोजनमस्ति । अथ न बुध्यते, किमिति जातिं(१)प्रयुङ्क्ते ? न ह्यनवबुध्यमानः शक्नोति प्रयोक्तुम् । (२)अथानवबुध्यमानोऽपि प्रयुङ्क्ते यत्किञ्चिद् ब्रूयात् नियमो न स्यात् । एतेनानैकान्तिके पञ्चानां प्रयोगः प्रत्युक्तः—य आहुरनैकान्तिके साधने परेण प्रयुक्ते पञ्च जातयः प्रयोक्तव्या इति, तदप्यनेनैव प्रत्युक्तम् । कथमिति ? बुद्ध्वा तदेव वक्तव्यमबुद्ध्वा अज्ञानमिति । एतेन युक्तायुक्तयोः पूर्वापरभावः प्रत्युक्तः । अयुक्ते साधने अयुक्तमुत्तरं युक्ते युक्तमिति । युक्तं च नाम (यत्) प्रतिज्ञादिदोषोद्भावनं नासौ जातिः, उत्तरमेव तदिति जातिलक्षणापरिज्ञानादयुक्तमेतदपीति ।

न्यायवार्त्तिकतात्पर्यटीका

मतान्तरं निराकर्त्तुमुपन्यस्यति—असाधुसाधनेति । तत्त्वविषयमपि साधनमसाध्विति विदितवान् वादकाले चाप्रतिभयाऽसाधुत्वोपपादनं न स्फुरति । असाध्वेतदिति स्मरन्नेवासौ जातिं प्रयुङ्क्ते, तदिदमुक्तम्—अनभिज्ञतया साधनदोषस्येति । अथ वा जानन्नपि जातिं प्रयुङ्क्ते—तस्य साधनस्य दोषप्रदर्शनार्थं प्रसङ्गव्याजेन मदीयं तावद्दूषणाभासम् एवं त्वदीयमपि साधनाभासं यदि त्वत्साधनं सम्यक् तदा मदीयमपि सम्यक् स्यादिति प्रसङ्गः, तद्व्याजेन साधनं दूषयतीत्यर्थः । तदेतत्परमतं दूषयति—एतत्त्विति । जात्यभिधाने हि पर्यनुयोज्योपेक्षणं निरनुयोज्यानुयोगश्चेति द्वयं निग्रहस्थानं तस्माद् बुद्ध्वेत्युक्तम् । अथ न बुध्यते तत् किमिति जातिं प्रयुञ्जीतेति । यो हि सभादर्शनमात्रात्पूर्वाभ्यस्तमपि विस्मरति तस्य क्वैव कथा अननुसंहितपूर्वजात्युद्भावनस्येति भावः । एतेन बुद्ध्वाऽबुद्ध्वा वेति विकल्पासंभवेन अनैकान्तिके साधने प्रयुक्ते पञ्चानां साधर्म्यसम-वैधर्म्यसम-विकल्पसम-साध्यसम-संशयसमानां जातीनां प्रयोगः प्रत्युक्तः । पूर्वापरभाव इति । पूर्वस्य युक्तस्य साधनस्य युक्तमुत्तरम् । अपरस्यायुक्तस्य साधनस्यायुक्तमुत्तरमिति ।

ननु साधर्म्यसमादीत्युच्यते, न च वस्तुतः साधर्म्यसमादीनां साम्यमस्ति स्थापनया,

(१) 'प्रयुञ्जीत'—इति टीकासम्मतः पाठः ।

(२) 'अथानुक्त्य'—इति ख० ।

न्यायवार्त्तिकम्

समीकरणार्थं प्रयोगः समः, साधर्म्यमेव समं वैधर्म्यमेव सममिति समार्थः समीकरणार्थः प्रयोगो द्रष्टव्यः। समीक्रियतां परपक्षो मा वा कारि अयं तु समीकरणार्थं प्रवर्तते यथा लोके कुटुम्बार्थं घटत इति। विशेषहेत्वभावो वा समार्थः, न भवता विशेषहेतुः कश्चिदपदिश्यत इति। एवमर्थमुररीकृत्य प्रवर्तते यथाभूतं भवतः साधनं तथाभूतं ममापीति। न च सर्वापदेशव्याप्तिरव्यापकत्वात्। न हि सर्वापदेशे सर्वा जातयः प्रवर्तन्ते, न हि वैधर्म्येण स्थापनायामुत्कर्षापकर्षवर्ण्यावर्ण्यविकल्पसमाः प्रयोक्तुं शक्यन्त इति। न च वादिप्रतिवादिनोस्तुल्यता समार्थः, जातेरसदुत्तरत्वात्---नियमेनैव जातिवाद्यसद्वादी भवति, वादिनां तु सदसद्वादित्वे अनियम इति ॥१॥

न्यायवार्त्तिकतात्पर्यटीका

तथा सत्यजातित्वप्रसङ्गादित्यत आह—समीकरणार्थं प्रयोग इति। आभिमानिकसाम्यं न वास्तवमित्यर्थः। साधर्म्यमेव समं यस्मिन् प्रयोग इति शेषः। तदिदमुक्तं समार्थः साधर्म्यसमार्थः, समीकरणार्थः प्रयोगो द्रष्टव्य इति। एवं वैधर्म्यमेव सममित्यत्र विग्रहे स्वरूपेण साम्यमुक्त्वा विशेषहेत्वभावेन साम्यमाह—विशेषहेत्वभावो वेति। ये त्वाहुः सर्वेष्वेवापदेशेषु सर्वासामेव जातीनां प्रयोग इति, तान् प्रत्याह—सर्वापदेशव्याप्तिः सर्वजातिप्रयोगस्य। अपदेशो हेतुवचनम्। ये पुनः साधर्म्यसम इत्यादौ समशब्दस्तस्य साधनवादिजातिवादिनोस्तुल्यार्थत्वाद् यादृशो वादी तादृशः प्रतिवाद्यपि साधर्म्येण द्वौ समाविति मन्यन्ते, तान् प्रत्याह—न च वादिप्रतिवादिनोस्तुल्यता समार्थः, प्रतिवादी जातिवादी विवक्षितः ॥ १ ॥

वृत्तिः

नत्वा शङ्करचरणं शरणं दीनस्य दुर्गमे तरणम्।
सम्प्रति निरूपयामः पञ्चममध्यायमतिगहनम् ॥

अथ जातिनिग्रहस्थानयोरुद्दिष्टयोर्लक्षितयोर्बहुत्वं तद्विकल्पाज्जातिनिग्रहस्थानबहुत्वमित्यनेन सूचितम्, बलवच्छिष्यजिज्ञासानुसारिप्रमाणादिपरीक्षयाऽन्तरितं सम्प्रत्यवसरतः प्रपञ्चनीयम्। तत्र जातिपरीक्षासहितजातिनिग्रहस्थानविशेषलक्षणमध्यायार्थः। जातिपरीक्षासहितजातिविशेषलक्षणं प्रथमाह्निकार्थः। सप्तदश चात्र प्रकरणानि, तत्रादौ सत्प्रतिपक्षदेशनाभासप्रकरणम्, अन्यानि च यथास्थानं वक्ष्यन्ते।

तत्र च विशेषलक्षणार्थं जातिं विभजते—(साधर्म्यवैधर्म्योत्कर्षापकर्षवर्ण्यावर्ण्यविकल्प-साध्यप्राप्त्यप्राप्ति-प्रसङ्गप्रतिदृष्टान्तानुत्पत्तिसंशय-प्रकरणाहेत्वर्थापत्त्य-विशेषोपपत्त्युपलब्ध्यनुपलब्धिनित्यानित्यकार्यसमाः)।

अत्र च साधर्म्यादीनां कार्यान्तानां द्वन्द्वे तैः समा इत्यर्थात् साधर्म्यसमादयश्चतुर्विंशतिर्जातय इत्यर्थः। अत्र च जातेर्विशेष्यत्वात् स्त्रीलिङ्गं समाशब्दं मन्यन्ते। भाष्य-

न्यायभाष्यम्

लक्षणं तु—

साधर्म्यवैधर्म्याभ्यामुपसंहारे तद्धर्मविपर्ययोपपत्तेः साधर्म्यवैधर्म्यसमौ ॥ २ ॥

साधर्म्येणोपसंहारे साध्यधर्मविपर्ययोपपत्तेः साधर्म्येणैव प्रत्यवस्थानमविशिष्यमाणं स्थापनाहेतुतः साधर्म्यसमः प्रतिषेधः। निदर्शनम् (१)क्रियावानात्मा, द्रव्यस्य क्रियाहेतुगुणयोगात्। द्रव्यं लोष्टः क्रियाहेतुगुणयुक्तः क्रियावान्, तथा चात्मा, तस्मात्क्रियावानिति। एवमुपसंहृते परः साधर्म्येणैव प्रत्यवतिष्ठते- निष्क्रिय आत्मा विभुनो द्रव्यस्य निष्क्रियत्वाद्, विभु(२)चाकाशं निष्क्रियं(३)च, तथा चात्मा, तस्मा-

न्यायवार्त्तिकम्

साधर्म्यवैधर्म्याभ्यामुपसंहारे तद्धर्मविपर्ययोपपत्तेः साधर्म्यवैधर्म्यसमौ। प्रतिषेधाविति। साधर्म्येणोपसंहारे तद्विपरीतसाधर्म्येण प्रत्यवस्थानं, वैधर्म्येणोपसंहारे(४)तद्विपरीतेन

न्यायवार्त्तिकतात्पर्यटीका

साध—मौ (सू २)॥ प्रतिषेधाविति सूत्रपूरणेन पुंलिङ्गं समर्थयते, अन्यथा जातेः प्रकृतत्वात्सामानाधिकरण्येन साधर्म्यवैधर्म्यसमे इति स्यात्। तद्धर्मविपर्ययोपपत्तेः कृते साध्यविपर्ययोपपत्त्यर्थमित्यर्थः। भाष्यं—निदर्शनं क्रियावानात्मा द्रव्यस्य क्रियाहेतुगुण-योगादिति। अस्ति खल्वात्मनः क्रियाहेतुर्गुणः प्रयत्नोऽदृष्टं वा, लोष्टस्यापि क्रियाहेतुर्गुणः स्पर्शवद्वेगवद्द्रव्यसंयोग इति। एवमुपसंहृते परः साधर्म्येणैव प्रत्यवतिष्ठते निष्क्रिय आत्मा विभुत्वादाकाशवदिति। अत्र च साधनमाभासमुत्तरं च न जातिः। विभुत्वस्याक्रियत्वेन

वृत्तिः

वार्त्तिकादौ समशब्दः। (५)अग्रिमसूत्रेषु तु समशब्दो निर्विवाद एव। तत्र जाति-शब्दस्य स्त्रीलिङ्गतया यद्यपि नान्वयस्तथाऽपि प्रतिषेधो विशेष्य इति भाष्यादयः।

वयं तु तद्विकल्पादिति सूत्रस्थविकल्पस्यैव विशेष्यत्वं, विविधः कल्पः प्रकारो विकल्पः। तथा चैते साधर्म्यसमादयो जातिविकल्पाः। एवमग्रिमसूत्रेष्वपि। इत्थं च जातेर्विशेष्यत्वे साधर्म्यसमेत्यपीति ब्रूमः।

समीकरणार्थं प्रयोगः सम इति वार्त्तिकम्। यद्यपि नैतावता समीकरणं, तथाऽपि समीकरणोद्देश्यकत्वमस्त्येव।

अथवा साधर्म्यमेव समं यत्र स साधर्म्यसमः। एकत्र व्याप्तेराधिक्येऽपि साधर्म्यं सममेवेति भावः॥ १ ॥

(१) 'क्रियैव वात्मा'—इति टि०। (२-३) 'च' द्वयं नास्ति टि०। (४) 'तद्विपरीतसाध'—इति ख०। (५) 'अग्रिमसते'—इति ल०।

न्यायभाष्यम्

न्निष्क्रिय इति। न चास्ति विशेषहेतुः क्रियावत्साधर्म्यात् क्रियावता भवितव्यं, न पुनरक्रियसाधर्म्याद् निष्क्रियेणेति। विशेषहेत्वभावात्साधर्म्यसमः(१)प्रतिषेधो भवति।

अथ वैधर्म्यसमः—क्रियाहेतुगुणयुक्तो लोष्टः परिच्छिन्नो दृष्टो न च तथाऽऽत्मा, तस्मान्न लोष्टवत् क्रियावानिति। न चास्ति विशेषहेतुः (२)क्रियावत्साधर्म्यात् क्रियावता भवितव्यं न पुनः क्रियावद्वैधर्म्यादक्रियेणेति, विशेषहेत्वभावाद्वैधर्म्यसमः।

वैधर्म्येण (३)चोपसंहारः—निष्क्रिय आत्मा विभुत्वात्, क्रियावद् द्रव्यमविभु दृष्टं यथा लोष्टः, न च तथाऽऽत्मा, (४)तस्मान्निष्क्रिय इति। वैधर्म्येण प्रत्यवस्थानम्—निष्क्रियं द्रव्यमाकाशं क्रियाहेतुगुणरहितं दृष्टम्, न(५) च तथाऽऽत्मा, तस्मान्न निष्क्रिय इति। न चास्ति विशेषहेतुः क्रियावद्वैधर्म्यान्निष्क्रियेण भवितव्यं न पुनरक्रियवैधर्म्यात् क्रियावतेति विशेषहेत्वभावाद्वैधर्म्यसमः।

न्यायवार्त्तिकम्

साधर्म्येण प्रत्यवस्थानं साधर्म्यसमः। यथा—अनित्यः शब्द उत्पत्तिधर्मकत्वात्। उत्पत्तिधर्मकं कुम्भाद्यनित्यं दृष्टम्। यद्यनित्यघटसाधर्म्यादनित्यः, नित्येनाप्याकाशेन साधर्म्यममूर्तत्वमस्तीति नित्यः प्राप्तः इति। एतस्मिन्नेव हेतावाकाशवैधर्म्यादित्युक्ते यदि नित्याकाशवैधर्म्यादनित्यः, नित्यसाधर्म्यमप्याकाशेनामूर्तत्वम्(६)अस्त्यतो नित्यः प्राप्तः। अथ मन्यसे सत्यस्मिन् साधर्म्ये न नित्यः? न तर्हि वक्तव्यमनित्यघटसाधर्म्यान्नित्याकाशवैधर्म्याद्वानित्य इति। सेयं जातिर्विशेषहेत्वभावं दर्शयति। विशेषहेत्वभावाच्चानैकान्तिकदेशनाभासा इति। एवं वैधर्म्येणोक्ते हेतौ तद्विपरीतवैधर्म्येण प्रत्यवस्थानं साधर्म्येणोक्ते हेतौ तद्विपरीतवैधर्म्येण प्रत्यवस्थानं वैधर्म्यसमः। यथा—तस्मिन्नेव हेतावाकाशवैधर्म्यादनित्य इत्युक्ते यदि नित्याकाशवैधर्म्यादनित्यः अनित्येनापि घटेनास्य वैधर्म्यममूर्तत्वमतो नित्यः प्राप्तः। तस्मिन्नेव हेतौ घटसाधर्म्यादित्युक्ते यद्यनित्यघटसाधर्म्यादनित्यः वैधर्म्यमप्यस्यास्त्यमूर्तत्वमतो नित्यः प्राप्तः।

न्यायवार्त्तिकतात्पर्यटीका

स्वभावतः प्रतिबन्धात्। तेनैतदुपेक्ष्य वार्त्तिककार उदाहरणान्तरमाह—यथा अनित्यः शब्द उत्पत्तिधर्मकत्वात्। इदं तु सम्यक् साधनमुत्तरं त्वाभासमिति। साधर्म्योक्ते साधर्म्यसमः, वैधर्म्योक्ते वैधर्म्यसमः। एवं साधर्म्योक्ते वैधर्म्यसमः वैधर्म्योक्ते साधर्म्यसम इति ॥ २ ॥

---

(१) 'अत्र प्रतिषेधः'—इति टि०। (२) 'क्रियावत्साधर्म्येण'—इति टि०। (३) 'चोपसंहारे'—इति ज-म-ल-भा०। (४) 'तस्मात् न लोष्टवत् क्रियावानिति'—इति टि०। (५) 'च'—इति नास्ति ज-ल-भा०। (६) 'अस्तीति'—इति ख०।

न्यायभाष्यम्

(१)अथ साधर्म्यसमः—(१*)क्रियावान् लोष्टः क्रियाहेतुगुणयुक्तो दृष्टः, तथा चाऽऽत्मा, तस्मात् क्रियावानिति। न चास्ति विशेषहेतुः क्रियावद्वैधर्म्यान्निष्क्रियो न पुनः क्रियावत्साधर्म्यात् क्रियावानिति विशेषहेत्वभावात्साधर्म्यसमः ॥ २ ॥

अनयोरुत्तरम्—

गोत्वाद्गोसिद्धिवत्तत्सिद्धिः ॥ ३ ॥

(२)साधर्म्यमात्रेण वैधर्म्यमात्रेण च(२*)साध्यसाधने प्रतिज्ञायमाने स्याद्व्यवस्था,

न्यायवार्त्तिकम्

अथ मन्यसे (३)सत्येतस्मिन् वैधर्म्ये न नित्यः(४)न तर्ह्ययमेकान्तोऽनित्यघटसाधर्म्यान्नित्या-काशवैधर्म्याच्चानित्य इति। सोऽयं विशेषहेत्वभावः ॥ २ ॥

अनयोरुत्तरम्—

(५)गोत्वाद् गोसिद्धिवत् तत्सिद्धिः। गवाश्वसाधर्म्ये सत्त्वादौ समाने, वैधर्म्ये चैकशफत्वादौ, साधर्म्यात् सत्त्वाद्गौरश्वो न भवति; (६)न च वैधर्म्यादेकशफत्वादेरगौर्गौर्भवति।

न्यायवार्त्तिकतात्पर्यटीका

कथं पुनरियं जातिः? अथ प्रकरणसमोद्भावनं सम्यगुत्तरमेव कस्मान्न भवतीत्यत आह—अनयोश्च साधर्म्यवैधर्म्यसमयोः उत्तरम्—

गोत्वाद्गोसिद्धिवत्तत्सिद्धिः (सू ३) ॥ भवेदेवं यद्यन्वयव्यतिरेकमात्राद्धेतोर्गमकत्वं स्यात्, ततो विशेषग्रहणाभावात्प्रकरणसमत्वं भवेत्। न त्वेवं भवति, स्वाभाविकसंबन्धभाजो

वृत्तिः

साधर्म्यवैधर्म्यसमौ लक्षयति—(साधर्म्यवैधर्म्याभ्यामुपसंहारे तद्धर्मविपर्ययोपपत्तेः साधर्म्यवैधर्म्यसमौ)।

'उपसंहारे' साध्यस्योपसंहरणे वादिना कृते, 'तद्धर्मस्य' साध्यरूपधर्मस्य यो विपर्ययो व्यतिरेकस्तस्य साधर्म्यवैधर्म्याभ्यां केवलाभ्यां व्याप्त्यनपेक्षाभ्यां यदुपपादनं ततो हेतोः साधर्म्यवैधर्म्यसमौ उच्येते।

तदयमर्थः—वादिना अन्वयेन व्यतिरेकेण वा साध्ये साधिते प्रतिवादिनः साधर्म्य-मात्रप्रवृत्तहेतुना तदभावापादनं साधर्म्यसमा, वैधर्म्यमात्रप्रवृत्तहेतुना तदभावापादनं वैधर्म्यसमा।

---

(१) अयमंशः—ज-पु० नास्ति। (२) 'साधर्म्यमात्रे वैधर्म्यमात्रे च'—इति फ०। यद्यपि फ-पुस्तके अस्यैव पाठस्य युक्तत्वमवधारितम्, तथापि अस्य आदर्शेष्वदर्शनात् तृतीयान्तपाठस्यापि कथञ्चिद् गतिसम्भवाच्च स एव परिगृहीतः। (३) 'सत्यप्यस्मिन्'—इति क-खधृतपाठान्तरम्। (४) 'प्राप्तः'—इत्यधिकम् इति क-खधृत-पाठान्तरम्। (५) 'गोत्वाद्गोर्गोसिद्धिवत्'—इति ख-पुस्तके। (६) 'न वैधर्म्यात्'—इति ख०।

न्यायभाष्यम्

सा तु धर्मविशेषे नोपपद्यते, गोसाधर्म्याद् गोत्वाज्जातिविशेषाद्गौः सिध्यति, न तु सास्नादिसम्बन्धात्। अश्वादिवैधर्म्याद्गोत्वादेव(१)गौः सिध्यति, न गुणादिभेदात्। तच्चैतत् (२)कृतव्याख्यानमवयवप्रकरणे। प्रमाणानामभिसम्बन्धाच्चैकार्थकारित्वं समानं वाक्ये इति। हेत्वाभासाश्रया खल्वियमव्यवस्थेति ॥ ३ ॥

न्यायवार्त्तिकम्

किं कारणम्? एकस्यानन्वयादेकस्य चाव्यावृत्तेः। यदन्वयव्यतिरेकि साधर्म्यं तस्माद्व्यवस्था, गोत्वं च तथा, तस्माद्गोत्वादेव गौः सिध्यति, तथेहाप्यमूर्त्तत्वमुभयव्यतिरेकि उभयान्वयि च, तस्मान्नित्यत्वमनित्यत्वं च(३) न शक्यं प्रतिपत्तुम्, अपि त्वन्वयव्यतिरेकसम्पन्नादुत्पत्तिधर्मकत्वा(४)दनित्य इति। अतो यद् ब्रवीषि विशेषहेत्वभावादिति अयं(५)विशेषहेतुः इति ॥३॥

इति सत्प्रतिपक्षदेशनाभासप्रकरणम्।

न्यायवार्त्तिकतात्पर्यटीका

गमकत्वात्। स्वभावसंबद्धं च कृतकत्वमनित्यत्वेन, न त्वमूर्त्तत्वस्य नित्यत्वेन स्वाभाविकः संबन्धः, बुद्धिकर्मादौ व्यभिचारात्। तस्माद् गृह्यमाणविशेषत्वान्न प्रकरणसमः। यथा गोत्वाद्गौः सिध्यति स्वाभाविकप्रतिबन्धात् न तु सास्नादिसंबन्धादिति भाष्यम्। सास्नादीत्यतद्गुणसंविज्ञानो बहुव्रीहिः। तेन व्यभिचारिणः शृङ्गादयो गृह्यन्ते।

वार्त्तिकम्—एकस्यानन्वयादेकस्य (६)अव्यावृत्तेः। एकस्य सत्त्वस्य गवाऽनन्वयाद्, अश्वादौ व्यभिचारादनन्वयः। एकस्यैकशफत्वादेर्वैधर्म्यस्य गोष्वेवाव्यावृत्तेः महिषादावपि व्यावृत्तेरित्यर्थः ॥ ३ ॥

वृत्तिः

तत्र साधर्म्यसमा यथा—शब्दोऽनित्यः कृतकत्वाद् घटवत्, व्यतिरेकेण वा व्योमवदित्युपसंहृते ; नैतदेवम्, यद्यनित्यघटसाधर्म्यात् नित्याऽऽकाशवैधर्म्याद्वा अनित्यः स्यात्, नित्याकाशसाधर्म्यादमूर्त्तत्वान्नित्यः स्यात्, विशेषो वा वक्तव्यः।

वैधर्म्यसमा यथा—शब्दोऽनित्यः कृतकत्वाद् घटवत् आकाशवद्वेति स्थापनायाम्, अनित्यघटवैधर्म्यादमूर्त्तत्वान्नित्यः स्यात्, विशेषो वा वक्तव्य इति।

अत्र (७)साधर्म्यमात्रं वैधर्म्यमात्रं(७*) वा गमकतौपयिकमित्यभिमानात्, सत्प्रतिपक्षदेशनाभासे चेमे। अनैकान्तिकदेशनाभासेति वार्त्तिके त्वनैकान्तिकपदं योगात् सत्प्रतिपक्षपरम्, एकान्ततः साध्यसाधकत्वाभावात् ॥ २ ॥

---

(१) 'न गौः'—इति ज-ग०, 'च गौः'—इति भा०। (२) 'कृतव्यवस्थान'मिति—ज०। (३) 'नित्यमनित्यं च'—इति क-खधृतपाठान्तरम्। (४) 'उत्पत्तिमत्त्वा'—इति क-खधृतपाठान्तरम्। (५) 'विशेष इति'—इति ख०। (६) अत्र वार्त्तिकगत'च'-शब्दस्त्यक्तः। (७) 'साधर्म्यत्वमात्रं वैधर्म्यत्वमात्रं'—इति भ०।

न्यायभाष्यम्

साध्यदृष्टान्तयोर्धर्मविकल्पादुभयसाध्यत्वाच्चोत्कर्षापकर्ष-वर्ण्यावर्ण्य-विकल्प-साध्यसमाः ॥ ४ ॥

दृष्टान्तधर्मं साध्ये(१)समासञ्जयत उत्कर्षसमः । यदि क्रियाहेतुगुणयोगाल्लोष्टवत् (२)क्रियावानात्मा, लोष्टवदेव स्पर्शवानपि प्राप्नोति । अथ न स्पर्शवान्, लोष्टवत् क्रियावानपि न प्राप्नोति, विपर्यये वा विशेषो वक्तव्य इति ।

(३)साध्ये धर्माभावं दृष्टान्तात् प्रसञ्जयतोऽ(४)पकर्षसमः । लोष्टः खलु क्रियावान-

न्यायवार्त्तिकम्

साध्यदृष्टान्तयोर्धर्मविकल्पादुभयसाध्यत्वाच्चोत्कर्षापकर्षवर्ण्यावर्ण्यविकल्पसाध्यसमाः । अविद्यमानधर्माध्यारोप उत्कर्षः, विद्यमानधर्मापचयोऽपकर्षः, वर्ण्यः साध्यः, अवर्ण्यः असाध्यः, विकल्पो विशेषः, एतेषां धर्माणामुद्भावनार्थाः प्रयोगा उत्कर्षसमाद्या जातयः । साध्यसाधनधर्मयो-स्तुल्यतया प्रत्यवस्थानं साध्यसमेत्युच्यते । यथा—तस्मिन्नेव हेतौ घटसाधर्म्या(५)दित्युक्ते यदि

न्यायवार्त्तिकतात्पर्यटीका

साध्यदृष्टान्तयोर्धर्मविकल्पादुभयसाध्यत्वाच्चोत्कर्षापकर्षवर्ण्यावर्ण्यविकल्पसाध्य-समाः (सू ४) ॥ उभयसाध्यत्वात्साध्यसमः । पञ्चानां जातीनां साध्यदृष्टान्तयोर्धर्म-विकल्पादित्यनेन पञ्चैव लक्षणानि सूचितानि । तानि च जातिसमाख्याभिर्मिथो विशिष्यन्ते । अनित्यः शब्दः कृतकत्वाद् घटवदित्युक्ते यदैवं प्रतिवादी प्रसङ्गेन प्रत्यवतिष्ठते—यदि घटसाधर्म्यात् कृतकत्वादनित्यः शब्दः, तस्मादेव घटसाधर्म्याद्रूपादिमताऽपि शब्देन भवितव्यम् । न चेद्रूपादि-मान्मा भूत्तथाऽनित्योऽपि । न चास्ति विशेषहेतुः कृतकत्वादनित्येन भवितव्यं न पुना-

वृत्तिः

अनयोरसदुत्तरत्वे बीजमाह—(गोत्वाद् गोसिद्धिवत्तत्सिद्धिः) ।

गोत्वात् गोसिद्धिर्गोव्यवहार इति सम्प्रदायः ।

वयं तु गोत्वाद्गवेतरासमवेतत्वे सति गोसमवेतात् सास्नादितः; एतेन व्याप्तिपक्ष-धर्मते दर्शिते । गोर्गोत्वस्य तादात्म्येन गोरेव वा सिद्धि(६)र्यथा, तथैव कृतकत्वादपि व्याप्तिपक्षधर्मतासहितादनित्यत्वसिद्धिः, न तु व्याप्तिपक्षधर्मतारहितात् साधर्म्यादिमात्रात्, तथा सति अदूषकसाधर्म्यात् प्रमेयत्वादितस्त्वद्वचनमप्यदूषकं स्यादित्ययं विशेषः ॥ ३ ॥

इति सत्प्रतिपक्षदेशनाभासप्रकरणम् ॥

(१) 'समासजन्'—इति ल-टि० समासञ्जत—इति ज-ग०, 'समासजतः'—इति भा० । (२) 'क्रियावानेवात्मा'—इति ज० । (३) 'साधर्म्य'—इति वि० । (४) 'प्रसजतः'—इति ज-ल-भा०, 'प्रसञ्जतः'—इति ग० । 'प्रसजता'—इति टि० । (५)—'दिति कृते' इति—ख० । (६) 'र्यथा'—इति भ० ।

न्यायभाष्यम्

विभुर्दृष्टः, काममात्माऽपि क्रियावानविभुरस्तु, विपर्यये वा विशेषो वक्तव्य इति।

ख्यापनीयो वर्ण्यो विपर्ययादवर्ण्यः। तावेतौ साध्यदृष्टान्तधर्मौ (१)विपर्यस्यतो वर्ण्यावर्ण्यसमौ (२)भवतः।

साधनधर्मयुक्ते दृष्टान्ते धर्मान्तरविकल्पात्साध्यधर्मविकल्पं (३)प्रसञ्जयतो विकल्पसमः। क्रियाहेतुगुणयुक्तं किञ्चिद् गुरु यथा लोष्टः, किंचिल्लघु यथा वायुः, एवं क्रियाहेतुगुणयुक्तं किञ्चित्क्रियावत्स्यात् यथा लोष्टः, किञ्चिदक्रियं यथाऽऽत्मा, विशेषो वा वाच्य इति।

हेत्वाद्यवयवसामर्थ्ययोगी धर्मः साध्यः, तं दृष्टान्ते (४)प्रसञ्जयतः साध्यसमः। यदि यथा लोष्टस्तथाऽऽत्मा, प्राप्तस्तर्हि यथाऽऽत्मा तथा लोष्ट इति। साध्यश्चायमात्मा क्रियावानिति कामं लोष्टोऽपि साध्यः। अथ नैवम् ,(५)न तर्हि यथा लोष्टः तथाऽऽत्मा ॥४॥

न्यायवार्त्तिकम्

यथा घटस्तथा शब्दस्तदा घटो रूपादिमान् शब्दोऽप्येवं प्रसक्त इत्युत्कर्षसमः। शब्दो(६)वाऽरूप इति घटोऽप्येवं प्रसक्त इत्यपकर्षसमः। घटोऽनित्य इत्यवर्ण्यः शब्दोऽप्येवं, शब्दो वा वर्ण्य इति घटोऽप्येवमिति वर्ण्यावर्ण्यसमौ। सत्येतस्मिन् उत्पत्तिधर्मकत्वे विभागजः शब्दो न विभागजो घटः विभागजाविभागज(७)विकल्पवत् च(८)*नित्यानित्यविकल्प इति विकल्पसमः। घटो वा अनित्य इत्यत्र को हेतुरयमपि साध्यवज्ज्ञापयितव्य इति साध्यवत् प्रत्यवस्थानात् साध्यसमः ॥४॥

न्यायवार्त्तिकतात्पर्यटीका

रूपादिमतेति। सोऽयं साध्यदृष्टान्तयोर्धर्मविकल्पाद्वैचित्र्याद् यत्रोत्कर्षं प्रसञ्जयति स उत्कर्षसमः। एवं तदेव साध्यदृष्टान्तयोर्धर्मवैचित्र्यमपकर्षेण विशिष्यमाणमपकर्षसमस्य लक्षणम्। साध्यदृष्टान्तयोर्धर्मवैचित्र्यात्स्वरूपेण साध्यासाधनत्वप्रसञ्जनने वर्ण्यावर्ण्यसमौ। साध्यदृष्टान्तधर्मविकल्पहेतुकवर्ण्यत्वनिबन्धनं तु हेत्वाद्यवयवयोगित्वप्रसञ्जनं साध्यसमः। अत एवोभयसाध्यत्वादिति साध्यत्वं हेतुमाह साध्यसमस्य सूत्रकारः। भाष्यकारोऽपि हेत्वाद्यवयवसामर्थ्ययोगीति ब्रुवाणस्तत्प्रसञ्जनं साध्यसमं मन्यते। तदेतद्वार्त्तिककृदाह—घटो वाऽनित्य इत्यत्र को हेतुरिति। न च यदि समाख्याभेदेन विशिष्यमाणं लक्षणपदं भिन्नार्थं तर्हि समाख्यापदान्येव लक्षणानि सन्तु, कृतं लक्षणपदेनेति वाच्यम् ; लक्षणपदसहितानामेव तेषां लक्ष्यभेदप्रतिपादकत्वादिति ॥ ४ ॥

---

(१) 'विपर्यस्यतौ' इति—ज०। (२) 'प्रतिषेधौ भवतः'—इति टि०। (३-४) 'प्रसजतः'—इति ज-ल-भा-टि०। (५) 'न'—इति नास्ति ग०। (६) 'वा' इति—ख-पु० नास्ति। (७) —'विकल्पे च' इति—ख०। (८) 'विकल्पे च'—पा० ६ पु० इति क-पुस्तकसम्पादकाः।

वृत्तिः

क्रमप्राप्तं जातिषट्कं निरूपयति—(साध्यदृष्टान्तयोर्धर्मविकल्पादुभयसाध्यत्वाच्चोत्कर्षापकर्षवर्ण्यावर्ण्यविकल्पसाध्यसमाः) ।

उत्कर्षेण सम उत्कर्षसमः, एवमपकर्षसमोऽपि । वर्ण्यावर्ण्यसाध्येति भावप्रधानो निर्देशः । वर्ण्यत्वादिना समो वर्ण्यसमादिः । अविद्यमानधर्मारोप उत्कर्षः, विद्यमानधर्मापचयः अपकर्षः । वर्ण्यत्वं वर्णनीयत्वम्, तच्च सन्दिग्धसाध्यकत्वादि ; तदभावोऽवर्ण्यत्वम् । विकल्पो (१)वैविध्यम्, साध्यत्वं पञ्चावयवसाधनीयत्वम् । साध्यदृष्टान्तयोर्धर्मविकल्पादिति पञ्चानामुत्थानबीजम्, उभयसाध्यत्वादिति षष्ठस्य ।

तद्व्यमर्थः—साध्यते अत्रेति साध्यं पक्षः, तथा च साध्यदृष्टान्तयोरित्यस्य(२)पक्षदृष्टान्तान्यतरस्मिन्नित्यर्थः । धर्मविकल्पो धर्मस्य वैचित्र्यं तच्च क्वचित् सत्त्वं क्वचिदसत्त्वम् । प्रकृते साध्यसाधनान्यतररूपस्य धर्मस्य विकल्पात् सत्त्वाद् योऽविद्यमानधर्मारोपः स उत्कर्षसमः । व्याप्तिमपुरस्कृत्य पक्षदृष्टान्तान्यतरस्मिन् साध्यसाधनान्यतरेणाऽविद्यमानधर्मप्रसञ्जनमुत्कर्षसम इति फलितार्थः । यथा शब्दोऽनित्यः कृतकत्वादिति स्थापनायाम्—अनित्यत्वं कृतकत्वं च घटे रूपसहचरितमतः शब्दोऽपि रूपवान् स्यात्, तथा च विवक्षितविपरीतसाधनाद्विशेषविरुद्धो हेतुस्तद्देशनाभासा चेयम् । एवं श्रावणशब्दसाधर्म्यात् कृतकत्वाद् घटोऽपि श्रावणः स्यादविशेषात् ।

वस्तुतस्तु घटे श्रावणत्वापादनेऽर्थान्तरमत उक्तलक्षणे दृष्टान्तपदं साध्यपदं च न देयम् ।

अपकर्षसमायां तु धर्मविकल्पः धर्मस्य सहचरितधर्मस्य विकल्पोऽसत्त्वं, ततः अपकर्षः साध्यसाधनान्यतरस्याभावप्रसञ्जनम्, तथा च पक्षदृष्टान्तान्यतरस्मिन् व्याप्तिमपुरस्कृत्य सहचरितधर्माभावेन हेतुसाध्यान्यतराभावप्रसञ्जनमपकर्षसमा, यथा शब्दोऽनित्यः कृतकत्वादित्यत्र यद्यनित्यत्वसहचरितघटधर्मात् कृतकत्वादनित्यः शब्दस्तदा कृतकत्वानित्यत्वसहचरितघटधर्मरूपवत्त्वव्यावृत्त्या शब्दे कृतकत्वस्यानित्यत्वस्य च व्यावृत्तिः स्यात्, आद्येऽसिद्धिदेशना, द्वितीये(३)बाधदेशना, एवं(३*) शब्दे कृतकत्वसहचरितश्रावणत्वस्य, संयोगादावनित्यत्वकृतकत्वसहचरितगुणत्वस्य च व्यावृत्त्या घटेऽनित्यत्वं कृतकत्वं च व्यावर्तेतेति दृष्टान्ते साध्यसाधन(४)वैकल्यदेशनाभासाऽपीयम् ।

यत्तु वार्तिके शब्दो नीरूप इतिवद् घटोऽपि नीरूपः स्यादित्यपकर्ष इति, तदसत्, घटे नीरूपत्वापादनस्यार्थान्तरत्वात् ; आचार्यस्वरसोऽप्येवम् ।

(१) 'द्वैविध्यम्' इति—भ० । (२) 'पक्षदृष्टान्तान्यतरस्मिन्' । (३) 'एवं बाधदेशना'—इति भ० ।
(४) '—वैकल्यादेश—' इति भ० ।

वृत्तिः

यत्तु वैधर्म्यसमाया अत्रैवान्तर्भावः स्यादिति, तन्न। उपधेयसङ्करेऽप्युपाधेरसङ्करात्।

वर्ण्यसमायां तु साध्यः सिद्ध्यभाववान् सन्दिग्धसाध्यकादिर्वा, तस्य धर्मः सन्दिग्धसाध्यकादिवृत्तिर्हेतुस्तस्य विकल्पात् सत्त्वात् दृष्टान्ते वर्ण्यत्वस्य सन्दिग्धसाध्यकत्वस्याऽऽपादनं वर्ण्यसमा। तदयमर्थः—पक्षवृत्तिर्हेतुर्हि गमकः, पक्षश्च सन्दिग्धसाध्यकः, तथा च सन्दिग्धसाध्यकवृत्तिर्हेतुस्त्वया दृष्टान्तेऽपि स्वीकार्यः, तथा च दृष्टान्तस्यापि सन्दिग्धसाध्यकत्वात् सपक्षवृत्तित्वानिश्चयादसाधारणो हेतुः, तद्देशनाभासा चेयम्। हेतुः सन्दिग्धसाध्यकवृत्तिर्यदि न दृष्टान्ते, तदा गमकहेत्वभावात् साधनविकलो दृष्टान्तः स्यादिति भावः।

अवर्ण्यसमायां तु दृष्टान्ते सिद्धसाध्यके यो धर्मो हेतुस्तस्य सत्त्वात् पक्षे शब्दादावसन्दिग्धसाध्यकत्वापादनमवर्ण्यसमा। दृष्टान्ते हेतोर्यादृशत्वं तादृशो हेतुरेव गमक इत्यभिमानेनैवमापादनम्। दृष्टान्ते यो हेतुः सिद्धसाध्यकवृत्तिः स चेन्न पक्षे, तदा गमकहेत्वभावात् स्वरूपासिद्धिः स्यादतस्तादृशो हेतुरवश्यं पक्षत्वाभिमते स्वीकार्यः, तथा च सन्दिग्धसाध्यकत्वलक्षणपक्षत्वाभावादाश्रयासिद्धिः। असिद्धिदेशनाभासा चेयम्।

विकल्पसमायां तु पक्षे दृष्टान्ते च यो धर्म्मस्तस्य विकल्पो विरुद्धः कल्पो व्यभिचारित्वम्। उपलक्षणं चैतत्, अन्यवृत्तिधर्मस्यापि बोध्यम्। व्यभिचारोऽपि हेतोर्धर्मान्तरं प्रति, धर्मान्तरस्य साध्यं प्रति, धर्मान्तरस्य धर्मान्तरं प्रति वा। तथा च कस्यचिद् धर्मस्य क्वचिद् व्यभिचारदर्शनेन धर्मत्वाविशेषात्प्रकृतहेतोः प्रकृतसाध्यं प्रति व्यभिचारापादनं विकल्पसमा। यथा—शब्दोऽनित्यः कृतकत्वादित्यत्र कृतकत्वस्य गुरुत्वव्यभिचारदर्शनाद् गुरुत्वस्यानित्यत्वव्यभिचारदर्शनादनित्यत्वस्य मूर्त्तत्वव्यभिचारदर्शनाद् धर्मत्वाविशेषात् कृतकत्वमप्यनित्यत्वं व्यभिचरेदिति। अनैकान्तिकदेशनाभासा चेयम्।

पक्षदृष्टान्तादेः प्रकृतसाध्यतुल्यतापादनं साध्यसमा। तत्रायमाशयः—एतत्प्रयोगसाध्यस्यैवानुमितिविषयत्वम्, तथा च पक्षादेरनुमितिविषयत्वात् साध्यवदेतत्प्रयोगसाध्यत्वम्, अतः साध्यसमा, तथा हि—पक्षादेः पूर्वं सिद्धत्वे एतत्प्रयोगसाध्यत्वाभावान्नानुमितिविषयत्वं, पूर्वमसिद्धत्वे पक्षादेरज्ञानादाश्रयासिद्ध्यादयः, तद्देशनाभासा चेयम्।

सूत्रार्थस्तु—उभयसाध्यत्वात्, उभयं पक्षदृष्टान्तौ, तद्धर्मो हेत्वादि(१)श्च, तत्साध्यत्वं तदधीनानुमितिविषयत्वं साध्यस्येव पक्षादेरपीति तुल्यतापादनमिति। लिङ्गोपहितभानमते लिङ्गस्याप्यनुमितिविषयत्वात् साध्यसमत्वं, हेतोश्च साध्यत्वे हेतुमान् दृष्टान्तोऽपि साध्य इत्याशयः॥ ४॥

(१) 'च'—इति नास्ति भ०।

न्यायभाष्यम्

एतेषामुत्तरम्—

किञ्चित्साधर्म्यादुपसंहारसिद्धेर्वैधर्म्यादप्रतिषेधः ॥ ५ ॥

अलभ्यः सिद्धस्य निह्नवः। सिद्धं च किञ्चित्साधर्म्यादुपमानं यथा गौस्तथा गवय

न्यायवार्त्तिकम्

किञ्चित्साधर्म्यादुपसंहारसिद्धेर्वैधर्म्यादप्रतिषेधः। न, हेत्वर्थापरिज्ञानादिति सूत्रार्थः। न ब्रूमो यावन्तो घटधर्मास्ते सर्वे एव शब्दे सम्भवन्तीति, अपि तु यो यस्य साधको धर्म उपपद्यते स तत्साधनं तत्रोपसंह्रियते। तथाच-शब्देन शब्दे चोत्पत्तिधर्मकत्वं धर्म उपसंह्रियते। एवं यथोक्तमसम्बद्धम्। यथा गौस्तथा गवय इत्युक्ते न गोधर्माः सर्व एव गवये, न गवयधर्माः सर्व एव गवि प्राप्नुवन्ति। अपि तु यदितरस्येतरेण सम्बध्यते तावन्मात्रमेवोपसंह्रियते, अशेषधर्मोपसंहारे तु यथा तथेत्येव न स्यात्, स एवासाविति स्यात्, तथेहापीत्ययमदोषः। यत्पुनरेतद् विभागजाविभागजविकल्पवन्नित्यानित्यविकल्प इति? यथोत्पत्तिधर्मकत्वमन्वय-व्यतिरेकि, नैवं विभागजत्वम्। न हि किञ्चिद्विभागाज्जायमानं यथोक्तविशेषणं नित्यमनित्यं वा दृष्टमित्येतदप्यनुत्तरम् ॥ ५ ॥

न्यायवार्त्तिकतात्पर्यटीका

आसां षण्णां जातीनां प्रत्याख्यानम्—

किंचित्साधर्म्यादुपसंहारसिद्धेर्वैधर्म्यादप्रतिषेधः (सू ५)॥ यस्य धर्मिणः साध्य-धर्मेण स्वाभाविकसंबन्धः साधको धर्म उपपद्यत उपपन्नो भवति स धर्मस्तस्य साध्यधर्मस्य साधनं साध्यधर्मिण्युपसंह्रियते। तथाच-शब्देनेति उपनयपदेनेत्यर्थः। यत्पुनरेतद्विभाग-जाविभागजविकल्पवन्नित्यानित्यविकल्प इति, तत्राह—यथोत्पत्तिधर्मकत्वमन्वयव्यतिरेकि, नैवं विभागजत्वम्। अयमर्थः—विकल्पसममुत्तरं वदता हि यथा सत्युत्पत्तिमत्त्वे घटो न विभागजः शब्दस्तु विभागज इति व्यवस्थितो विकल्पः, एवं(१)सति उत्पत्तिमत्त्वे सत्यपि विभाग-जत्वच्छब्दोऽपि नित्यो भविष्यति घटस्त्वनित्य इत्युक्तम्। तत्र तावदुत्पत्तिधर्मकत्वं यथा सत्यनित्यत्वे घटादौ दृष्टम्, आकाशादिषु चासत्यनित्यत्वे न दृष्टं, तेनानित्यत्वेन स्वभाव(२)प्रति-बद्धमवधारितं, नैवमुत्पत्तिधर्मकत्वस्य विभागजत्वेनाविभागजत्वेन वा स्वाभाविकसंबन्धो गृहीतो येनोत्पत्तिमत्किंचिद्विभागजं किंचिदविभागजं न भवेत्। तस्माद्विकल्पसमं जात्युत्तरं वदताऽतिनिर्बन्धेन विभागजत्वेन शब्दस्य नित्यत्वं वक्तव्यम्। तत्रेदमुपतिष्ठते—यथोत्पत्तिधर्म-कत्वमन्वयव्यतिरेकि अनित्यत्वं प्रति नैवं विभागजत्वं शब्दनित्यत्वं प्रत्यन्वयव्यतिरेकीति। तदुभयसाधारणमित्यर्थः। असाधारण्यमाह—न हि किंचिद्विभागाज्जायमानं नित्यमनित्यं वा दृष्टम्। ननु विभागजो विभागोऽनित्यो दृष्ट इत्यत आह—यथोक्तविशेषणमिति।

(१) अनर्थं 'सति'—इति पदं प्रमादान्मुद्रितं सम्भाव्यते। (२) —'प्रतिबन्धमव'—इति क०।

न्यायभाष्यम्

इति। तत्र न लभ्यो गोगवययोर्धर्मविकल्पश्चोदयितुम्। एवं साधके धर्मे दृष्टान्तादिसामर्थ्ययुक्ते न लभ्यः साध्यदृष्टान्तयोर्धर्मविकल्पाद्वैधर्म्यात्प्रतिषेधो वक्तुमिति ॥ ५ ॥

साध्यातिदेशाच्च दृष्टान्तोपपत्तेः ॥ ६ ॥

यत्र लौकिकपरीक्षकाणां बुद्धिसाम्यं तेनाविपरीतोऽर्थोऽतिदिश्यते प्रज्ञापनार्थम्। एवं साध्यातिदेशाद् दृष्टान्ते उपपद्यमाने साध्यत्वमनुपपन्नमिति ॥ ६ ॥

न्यायवार्त्तिकम्

साध्यातिदेशाच्च दृष्टान्तोपपत्तेः। दृष्टान्तः साध्य इति ब्रुवता भवता न दृष्टान्तलक्षणं व्यज्ञायि। दृष्टान्तो हि नामाविहतयोर्दर्शनयोर्विषयः। तथा च साध्यत्वमनुपपन्नम्। अथ दर्शनं विहन्यते, नासौ दृष्टान्तो लक्षणाभावादिति।

यत्त्वत्रोक्तं जातीनां पौनरुक्त्यं प्रसज्यत इति, न पौनरुक्त्यमर्थभेदात्—यथा चोत्कर्षसमादीनां

न्यायवार्त्तिकतात्पर्यटीका

कारणमात्रविभागपूर्वकः शब्दो विभागजस्तु विभागः कारणाकारणविभागपूर्वक इति सिद्धं कारणमात्रविभागपूर्वकत्वमसाधारण्यमित्यर्थः ॥ ५ ॥

षण्णां जातीनां प्रत्याख्यानमुक्त्वा वर्ण्यावर्ण्यसाध्यसमानामपरं प्रत्याख्यानमाह—

साध्यातिदेशाच्च दृष्टान्तोपपत्तेः (सू ६) ॥ इति। तद्व्याचष्टे—दृष्टान्तः साध्य इति ब्रुवतेति। चतुर्दशविधजातिवादिनामिह दूषणमुपन्यस्यति—यत्त्वत्रोक्तं जातीनां पौनरुक्त्यमिति। लक्षणभेदाभेदाभ्यां किल लक्ष्यभेदाभेदौ लक्षणं चेदमेकमिति न षड् जातयः, तस्मा-

वृत्तिः

एतासामसदुत्तरत्वे बीजमाह—(किञ्चित्साधर्म्यादुपसंहारसिद्धेर्वैधर्म्यादप्रतिषेधः)।

किञ्चित्साधर्म्यात् साधर्म्यविशेषात् व्याप्तिसहितादुपसंहारसिद्धेः साध्यसिद्धेर्वैधर्म्यादेतद्विपरीतात् व्याप्तिनिरपेक्षात् साधर्म्यमात्राद्भवता कृतः प्रतिषेधो न सम्भवतीत्यर्थः। अन्यथा प्रमेयत्वरूपासाधकसाधर्म्यात् त्वद्दूषणमप्यसम्यक् स्यादिति भावः। तथा चाऽयं क्रमः—अनित्यत्वव्याप्यात् कृतकत्वाच्छब्देऽनित्यत्वमुपसंहरामो न तु कृतकत्वं रूपस्यापि व्याप्यं, येन ततो रूपमप्यापादनीयं शब्दे। एवम् अनित्यत्वं न रूपव्याप्यं येन रूपाभावादनित्यत्वाभावः शब्दे स्यात्।

एवं वर्ण्यसमेऽपि, किञ्चित्साधर्म्याद्व्याप्यतावच्छेदकावच्छिन्नाद्धेतोः साध्यसिद्धिः। तादृशहेतुमत्त्वं च दृष्टान्तताप्रयोजकं न तु पक्षे यावद्विशेषणावच्छिन्नो हेतुस्तावदवच्छिन्नहेतुमत्त्वम्। अन्यथा त्वयाऽपि (१)दूषणे यो दृष्टान्तीकर्त्तव्यः सोऽपि न स्यात्।

(१) 'दूषणो'—इति भ०।

न्यायवार्त्तिकम्

भिन्नोऽर्थस्तथोक्तम्। प्रयोगभेददर्शनाच्च—प्रयोगश्च भिन्न उत्कर्षसमादीनामिति। आनन्त्यमिति चेत्—अथ मन्यसे यदि प्रयोगभेदाद्भेदो न चतुर्विंशतिर्जातय इति प्राप्तम्? न, अनवधारणात्—नेदमवधार्यते चतुर्विंशतिर्जातय इति, किन्तूदाहरणानां भेदः। कथमवगम्यते? तथा हि प्रकरणसमैका चतुर्द्धा भिन्नेति। अथ सामान्यतोऽभिन्ना जातय इत्यभेदं ब्रूयात्, तस्याप्यभ्युपगतं चतुर्दशत्वं निवर्तते। अथ कुतश्चिद्भेदाद्भेदः, अदेश्यं तर्हि उत्कर्षसमाद्या न विकल्पसमातो भिद्यन्त इति। यथा केनचिद्भेदेन चतुर्दशत्वं तथा केनचिद्भेदेन चतुर्विंशतित्वम्। अविशेषसमा त्वियं जातिः उत्कर्षसमादीनामेकत्वं किञ्चित्साधर्म्यादिति। अस्या जातेरुक्तमुत्तरम्॥ ६॥

इति साध्यदृष्टान्तधर्मविकल्पप्रभवोत्कर्षसमादिजातिषट्कप्रकरणम्।

न्यायवार्त्तिकतात्पर्यटीका

द्विकल्पसमायामेवोत्कर्षसमादीनामन्तर्भाव इत्यर्थः। दूषयति—न पौनरुक्त्यं तत्तल्लक्ष्यपदसहितानि पञ्च लक्षणानि उभयसाध्यत्वाच्चेत्यनेन सह लक्षणानि षडिति। न केवलं लक्ष्यभेदात्, प्रयोगभेददर्शनाच्च। शङ्कते—यदि लक्ष्यभेदाज्जातिभेदस्तत आनन्त्यमिति चेत्। निराकरोति—नानवधारणादिति। न लक्ष्याणामवधारणमस्त्येषामानन्त्यात्। लक्षणोपग्रहेण चतुर्विंशतिर्जातय इत्यर्थः। लक्ष्याणां लक्षणाभेदेऽपि भेदे निदर्शनमाह—तथा हि प्रकरणसमैकेति। सुगममितरत्॥ ६॥

वृत्तिः

एवमवर्ण्यसमेऽपि व्याप्यतावच्छेदकावच्छिन्नस्य दृष्टान्तदृष्टस्य पक्षे सत्त्वात् साध्यसिद्धिः, न तु दृष्टान्तवृत्तियावद्धर्मावच्छिन्नस्य पक्षे सत्त्वम्।

एवं विकल्पसमेऽपि, प्रकृतसाध्यव्याप्यात् प्रकृतहेतोः साध्यसिद्धिस्तद्वैधर्म्याद्यत्किञ्चिद्व्यभिचारात् कृतः प्रतिषेधो न सम्भवति। न हि यत्किञ्चिद्व्यभिचारादेव प्रकृतहेतोः प्रकृतसाध्यासाधकत्वमतिप्रसङ्गात्।

एवं साध्यसमेऽपि, व्याप्याद्धेतोः सिद्धे पक्षे साध्यसिद्धिः, न तु पक्षदृष्टान्तादयोऽप्यनेन साध्यन्ते, तथा सति क्वचिदपि साध्यसिद्धिर्न स्यात्, त्वदीयं दूषणमपि विलीयेत॥ ५॥

वर्ण्यावर्ण्यसाध्यसमासु समाध्यन्तरमप्याह—(साध्यातिदेशाच्च दृष्टान्तोपपत्तेः)।

दृष्टान्तोपपत्तिः साध्यातिदेशात्, दृष्टान्ते हि साध्यमतिदिश्यते, तावतैव दृष्टान्तत्वमुपपद्यते न त्वशेषो धर्मः, पक्षदृष्टान्तयोरभेदापत्तेः। पक्षादेरपि साध्यसमत्वमेतेन प्रत्युक्तम्। दृष्टोऽन्तो दृष्टान्तः पक्षः, तस्माद्वह्निमानित्यतः पक्षोत्कीर्तनात्। तथा च साध्यस्यातिदेशात्साधनात्पक्ष इत्युच्यते, न तु पक्षोऽपि साध्यतेऽतिप्रसङ्गादिति भावः॥ ६॥

समाप्तं जातिषट्कप्रकरणम्।

न्यायभाष्यम्

प्राप्य साध्यमप्राप्य वा हेतोः प्राप्त्याऽविशिष्टत्वाद-प्राप्त्याऽसाधकत्वाच्च प्राप्त्यप्राप्तिसमौ ॥ ७ ॥

हेतुः प्राप्य वा (१)साध्यं साधयेदप्राप्य वा ? (२)न तावत्प्राप्य(२*)प्राप्त्यामविशिष्टत्वादसाधकः। द्वयोर्विद्यमानयोः प्राप्तौ सत्यां किं कस्य साधकं साध्यं वा ?

अप्राप्य (३)साधकं न भवति, नाप्राप्तः प्रदीपः प्रकाशयतीति। प्राप्त्या प्रत्यवस्थानं प्राप्तिसमः, अप्राप्त्या प्रत्यवस्थानमप्राप्तिसमः ॥ ७ ॥

न्यायवार्त्तिकम्

प्राप्य साध्यमप्राप्य वा हेतोः प्राप्त्याऽविशिष्टत्वादप्राप्त्या(४)ऽसाधकत्वाच्च प्राप्त्यप्राप्तिसमौ। तस्मिन्नेव हेतौ घटसाधर्म्यादिति कृते यदि तावदयं हेतुः साध्यं सम्प्राप्नोति प्राप्त्या अविशिष्टः। कोऽविशेषार्थः ? उभयोर्विद्यमानता—नाविद्यमानः सम्प्राप्यत इति हेतोः साधनार्थो हीयते। अथ न प्राप्यते, अप्राप्तेनाहेतुना अविशिष्टत्वादहेतुर्भवति। न ह्यग्निरप्राप्तो दहति। (५)प्राप्त्या प्रत्यवस्थानं प्राप्तिसमः, अप्राप्त्या प्रत्यवस्थानमप्राप्तिसमः। अनयो(६)र्भेदेनोपदेशो विवक्षातः—भेदविवक्षायां प्राप्त्यप्राप्तिसमाविति। अभेदविवक्षायामेकमेवोत्तरम्—यथा वृक्षा वनमिति।

जातिलक्षणाभावान्नैवेयं जातिरिति चेत्—अथ मन्यसे यज्जातेर्लक्षणं तदस्या नास्ति, साधर्म्यवैधर्म्याभ्यां प्रत्यवस्थानमिति हि तत्, न च लक्षणेनासम्बद्धा जातिरिति शक्यं वक्तुम्, न हि गोलक्षणहीनोऽश्वो गौरिति ? न, सूत्रार्थापरिज्ञानात्—साधर्म्यवैधर्म्याभ्यां प्रत्यवस्थानं

न्यायवार्त्तिकतात्पर्यटीका

प्राप्य—समौ (सू ७) ॥ प्राप्त्यप्राप्तिसमाविति लक्ष्यपदम्। शेषं लक्षणम्। असत् साध्यते न तु सत्। प्राप्तं च सत्, असतः प्राप्त्यसंभवात्। तस्मान्न साध्यम्। अपि च येन यस्य प्राप्तिस्तेन तस्यैक्यमेव, यथा गङ्गा सागरं प्राप्ता सागरेणाभिन्ना, तद्वदेव अभिन्ने चेत्साध्यसाधने, नास्ति साध्यसाधनभावः, तस्य भेदाधिष्ठानत्वादित्यपि द्रष्टव्यम्। अप्राप्तिसमस्तु स्फुट एवेति। ननु प्राप्त्यप्राप्तिसमयोर्मिलितयोः साधनप्रतिषेधस्यैकत्वात् कथं प्राप्त्यप्राप्तिसमौ भिन्नावित्यत आह—अनयोर्भेदोपदेशो विवक्षात इति। साधनप्रतिषेधस्यैकत्वेऽपि प्राप्य वा अप्राप्य वेति विकल्पभेदाद्भेदविवक्षेत्यर्थः। अभेदविवक्षायां त्वेकमेवोत्तरम्। यथा वृक्षाणां बहुत्वं विवक्षित्वा बहुवचनप्रयोगो वृक्षा इति, तद्बहुत्वसंख्याया एकत्वं विवक्षित्वैकवचनम् एकं वनमिति।

उदाहरणेन साधर्म्यवैधर्म्याभ्यां प्रत्यवस्थानमिति जातिसामान्यलक्षणं मन्वानो देशयति—जातिलक्षणाभावादिति। परिहरति—न, सूत्रार्थापरिज्ञानादिति। सूत्रे नोदाहरण-

---

(१) 'साध्य'मिति नास्ति टि० पु०। (२) इदं नास्ति टि० पु०। (३) 'साधकत्वं'—इति टि०। (४)—'दप्राप्त्या वा' इति—ख०। (५) 'अप्राप्तेन हेतुना' इति—ख०। (६) 'भेदेनोपन्यासो' इति—क-ख०।

न्यायभाष्यम्

अनयोरुत्तरम्—

घटादिनिष्पत्तिदर्शनात् पीड़ने चाभिचारादप्रतिषेधः ॥ ८ ॥

उभयथा खल्वयुक्तः प्रतिषेधः, (१)कर्तृकरणाधिकरणानि(१*) प्राप्य (२)मृदं घटादिकार्यं निष्पादयन्ति, अभिचाराच्च पीडने सति दृष्टमप्राप्य साधकत्वमिति ॥ ८ ॥

न्यायवार्त्तिकम्

जातिरित्यस्य सूत्रस्यार्थो न व्यज्ञायीत्यनुत्तरमेतत्। एतेन त्रैकाल्यसमाधाः प्रत्युक्ताः, सूत्रार्थापरिज्ञानात् ॥ ७ ॥

घटादिनिष्पत्तिदर्शनात् पीड़ने चाभिचारादप्रतिषेधः। मृत्पिण्डप्राप्तानां दण्डादीनां नाविशेषो न च साध्यसाधनभावनिवृत्तिः—न हि मृत्पिण्डप्राप्तो दण्डः साधनत्वं जहाति, नापीतरत् साध्यत्वं जहाति। अथ मन्यसे घटस्तत्र साध्यस्तस्य चाविद्यमानस्य किं साधनम्? नाविद्यमानस्य साधनमपि तु मृत्पिण्डो घटीक्रियत इति। किमिदं घटीक्रियत इति? मृदवयवाः पूर्वव्यूहपरित्यागेन व्यूहान्तरमापद्यन्ते, व्यूहान्तराच्च घटोत्पत्तिः। पीड़ने चाभिचारादप्राप्त्यापि साधकत्वं दृष्टम्। कोऽप्राप्त्यर्थः? परस्परोपश्लेषमन्तरेण साधकत्वम्। अन्यथा तूद्देशेनायं

न्यायवार्त्तिकतात्पर्यटीका

साधर्म्यं विवक्षितमपि तु (३)येन केनचित्साधर्म्यं विवक्षितम्। अत्र च (३*)येन केनचिद्विद्य-मानेनासाध्येन साधर्म्यम्, अप्राप्तेन वा हेतुना साधर्म्यमिति न सामान्यलक्षणायोग इति ॥ ७ ॥

प्रत्याख्यानम्—

घ–धः (सू ८) ॥ घटादिनिष्पत्तिदर्शनादिति सूत्रम्। तद्व्याचष्टे (४)मृत्पिण्डप्राप्तानां दण्डादीनां न गङ्गासागरवद् अविशेषः। मृदवयवाः पूर्वव्यूहपरित्यागेनेति। साध्यं कर्म तच्च मृदवयवास्ते च सिद्धा एवेत्यव्यभिचारः। घटस्तु फलं न साध्य इति भावः। कोऽप्राप्त्यर्थ इति। अप्राप्तस्य साधकत्वेऽतिप्रसङ्ग इति भावः। उत्तरं—परस्परोपश्लेषमन्तरेण

वृत्तिः

क्रमप्राप्तौ प्राप्त्यप्राप्तिसमौ लक्षयति—(प्राप्य साध्यमप्राप्य वा हेतोः प्राप्त्याऽविशिष्ट-त्वादप्राप्त्याऽसाधकत्वाच्च प्राप्त्यप्राप्तिसमौ)।

हेतोरिति साधकत्वमिति शेषः। प्राप्तिपक्षे दोषमाह—प्राप्त्याऽविशिष्टत्वादिति। द्वयोरपि प्राप्तत्वाविशेषात् किं कस्य साधकम्? अप्राप्तिपक्षे दोषमाह—अप्राप्त्येति। अप्राप्तस्य साधकत्वेऽतिप्रसङ्गात्। साधकत्वं चात्र कारकज्ञापकसाधारणम्, एवं च कारकज्ञापकलक्षणं साधनं कार्यज्ञाप्यलक्षणेन साध्येन सम्बद्धं तत्साधकं चेत्, तदा सत्त्वाविशेषान्न कार्यकारणभावः, तत्सम्बन्धस्य प्रागेव ज्ञातत्वान्न ज्ञाप्यज्ञापकभावः।

(१) 'कर्तृकरणानि'—इति टि०। (२) 'मृद'—इति वि०। (३*) अयमंशः ख-पुस्तके नास्ति। (४) 'मृत्प्राप्तानां' क०।

न्यायभाष्यम्

दृष्टान्तस्य (१)कारणानपदेशात् प्रत्यवस्थानाच्च प्रतिदृष्टान्तेन प्रसङ्गप्रतिदृष्टान्तसमौ ॥ ९ ॥

साधनस्यापि साधनं वक्तव्यमिति (२)प्रसङ्गेन प्रत्यवस्थानं प्रसङ्गसमः(३)प्रतिषेधः। क्रियाहेतुगुणयोगी क्रियावान् लोष्ट इति हेतुर्नापदिश्यते, न च हेतुमन्तरेण (४)सिद्धिरस्तीति।

न्यायवार्त्तिकम्

प्राप्त एव, नियमात्। इयं च जातिः सर्वहेत्वपवादद्वारिका, यदि ज्ञापको हेतुरपदिश्यते तथापि, (५)यदि कारकस्तथापीति। सा चेयं कार्यकारणत्वापवादद्वारेण प्रवर्तमाना व्याहता भवति। को व्याघातः? उत्तरस्यानुत्थानम्। कथमिति? यदिदमुत्तरं प्राप्यार्थं कारणत्वापवादद्वारेण साधयेदप्राप्य वेति, तस्यापि प्रतिषेध्यं प्राप्य वाऽप्राप्य वेति समो दोषः॥ ८ ॥

इति प्राप्त्यप्राप्तियुगलद्वाद्विविकल्पोपक्रमजातिद्वयप्रकरणम्।

न्यायवार्त्तिकतात्पर्यटीका

साधकत्वमिति। अन्यथा तूद्देशेनासौ प्राप्त एव। यदुद्देशेनाभिचारः श्येनादिना क्रियते तस्यैव प्रत्यवायो भवति, नान्यस्येति नियमः। अत्रापि (६)संयुक्तसंयोगादिः संबन्ध उपेयः। तस्यापि(६*) हेतुत्वं क्रियां प्रति दृष्टम्। यथा पङ्काख्यायां भुवि। सुगममन्यत्॥ ८ ॥

दृष्टान्तस्य कारणानपदेशात्प्रत्यवस्थानाच्च प्रतिदृष्टान्तेन प्रसङ्गप्रतिदृष्टान्तसमौ (सू ९)॥ दृष्टान्तस्य कारणं प्रमाणं तस्यानपदेशात्प्रसङ्गसमः। साध्यसमो हि दृष्टान्ते साध्यवद्धेत्वाद्यवयवं प्रसञ्जयति—पञ्चावयवप्रयोगसाध्यतां (क)दृष्टान्तगतस्यानित्यत्वस्य प्रसञ्जयतीत्यर्थः; प्रसङ्गसमस्तु दृष्टान्तगतस्यानित्यत्वस्य प्रमाणमात्रसाध्यतामित्यपौनरुक्त्यम्। भाष्यम्—साधनस्यापि। दृष्टान्तगतस्यानित्यत्वस्य साधनं प्रमाणं वाच्यमिति।

वृत्तिः

वस्तुतो ज्ञापकत्वं ज्ञप्तिजनकत्वं तदपि तावतैव प्रत्युक्तम्।

प्राप्तयोर्न जन्यजनकभावः प्राप्तत्वेन लवणोदकयोरिवाभेदादित्याशय इत्यन्ये।

तथा च प्राप्त्याऽविशेषादनिष्टापादनेन प्रत्यवस्थानं प्राप्तिसमा। यदि चाप्राप्तं लिङ्गं साध्यबुद्धिं जनयति, साध्याभावबुद्धिमेव किं न जनयेत्? अप्राप्तत्वाविशेषात्। तथा चाप्राप्त्या साधकत्वादनिष्टापादनमप्राप्तिसमा। प्रतिकूलतर्कदेशनाभासे चेमे॥ ७ ॥

---

(१) 'करणानपदेशात्'—इति ज०। (२) इदं टि० पु० नास्ति। (३) 'प्रतिषेध'—इति फ० पु० नास्ति। (४) 'कस्यचित् सिद्धि'—इति टि०। (५) यदीत्यत्र 'अथापि' इति—ख०। (६*) अयमंशः ख-पु० नास्ति। (क) 'दृष्टान्तस्य गतस्य'—इति क-ख-पुस्तकयोः प्रामादिकम्।

न्यायभाष्यम्

प्रतिदृष्टान्तेन प्रत्यवस्थानं प्रतिदृष्टान्तसमः। क्रियावानात्मा क्रियाहेतुगुणयोगाद् लोष्टवदित्युक्ते प्रतिदृष्टान्त उपादीयते—क्रियाहेतुगुणयुक्तमाकाशं निष्क्रियं दृष्टमिति। कः पुनराकाशस्य क्रियाहेतुर्गुणः? वायुना संयोगः संस्कारापेक्षः, वायुवनस्पतिसंयोगवदिति ॥ ९ ॥

न्यायवार्त्तिकम्

दृष्टान्तस्य कारणानपदेशात् प्रत्यवस्थानाच्च प्रतिदृष्टान्तेन प्रसङ्गप्रतिदृष्टान्तसमौ। यथा तस्मिन्नेव हेतौ घटादिसाधर्म्येण कृते इत्थं—घट एव तावदनित्य इत्यत्र को हेतुरिति प्रसङ्गसमः। प्रतिदृष्टान्तसमस्य यदेव भाष्य उदाहरणं तदेव द्रष्टव्यमिति। वाय्वाकाशसंयोगस्याकारणत्वादयुक्तमिति चेत्—अथ मन्यसे न वाय्वाकाशसंयोगः क्रियाकारणं त्रिष्वपि कालेष्वसम्भवात्? न वाय्वाकाशसंयोगेनाकाशे क्रिया कृता, न करोति, न करिष्यतीति; यच्च त्रिष्वपि कालेष्वकारणं तदकारणम्—यथा घटो घटान्तरस्य? न, तत्समानधर्मोपपत्तेः—न ब्रूमो वाय्वाकाशसंयोग एव कारणमपि तु तथाभूतो धर्मोऽन्यत्र दृष्टो यथा वायुवनस्पतिसंयोग इति। यस्त्वसौ तथाभूतः क्रियां न करोति, तन्नाकारणत्वादपि तु (१)प्रतिबन्धात्। केनास्य प्रतिबन्धः?

न्यायवार्त्तिकतात्पर्यटीका

वार्त्तिकं—घट एव तावदनित्य इत्यत्र को हेतुरिति। अत्र किं प्रमाणमित्यर्थः। भाष्यं—प्रतिदृष्टान्त (२)उपादीयते। क्रियाहेतुगुणयुक्तमाकाशमक्रियं दृष्टं तस्मादनेन प्रतिदृष्टान्तेन कस्मात् क्रियाहेतुगुणयोगो निष्क्रियत्वमेव न साधयत्यात्मन इति शेषः। यदि पुनरियमनैकान्तिकदेशना स्यात्— क्रियाहेतुगुणयुक्तस्याप्यक्रियत्वं दृष्टं यथाऽऽकाशस्येति, तदेतत् सदुत्तरं स्यात्। न त्वेवमेतदिति जातिः। शङ्कते—(३)वाय्वाकाशसंयोगस्येति। निराकरोति—न, (४)तत्समानधर्मोपपत्तेः। तत्समानधर्मणो धर्मिणः क्रियावत्त्वोपपत्तेः। यदि तथाभूत एव आकाशे कस्मान्न करोतीत्यत आह—यस्त्वसाविति। यस्तु मन्यते कार्योत्पादैक्यव्यङ्ग्यमेव

वृत्तिः

अनयोरसदुत्तरत्वे बीजमाह—(घटादिनिष्पत्तिदर्शनात् पीडने चाभिचारादप्रतिषेधः)। दण्डादितो घटादिनिष्पत्तेर्दर्शनात् सर्वलोकप्रत्यक्षसिद्धत्वात्। अभिचारात् श्येनादितः शत्रुपीडने च व्यभिचारान्न त्वदुक्तः प्रतिषेधः सम्भवति। न हि कारणं दण्डादि प्रागेव घटादिना सम्बद्धम्, अपि तु मृदादिना। श्येनादिरप्युद्देश्यतया पीडां जनयति, अन्यथा लोकवेदसिद्धकार्यकारणभावोच्छेदे त्वदुक्तो हेतुरप्यसाधकः स्यादिति ॥ ८ ॥

इति प्राप्त्यप्राप्तिसमजातिद्वयप्रकरणम्।

---

(१) 'प्रतिबन्धकात्'—इति क०। (२) 'उदाक्रियत'—इति क०-ख०। (३) 'काशाकाश'—इति क०। (४) 'तत्समानोपपत्तेः'—इति क०।

न्यायभाष्यम्

अनयोरुत्तरम्—

(१)प्रदीपोपादानप्रसङ्ग(२)विनिवृत्तिवत्तद्विनिवृत्तिः ॥ १० ॥

इदं तावदयं पृष्टो वक्तुमर्हति, अथ के प्रदीपमुपाददते, किमर्थं वेति? दिदृक्षमाणा दृश्यदर्शनार्थमिति। अथ प्रदीपं दिदृक्षमाणाः प्रदीपान्तरं कस्मान्नोपाददते? अन्तरेणापि प्रदीपान्तरं दृश्यते प्रदीपः, तत्र प्रदीपदर्शनार्थं प्रदीपोपादानं निरर्थकम्। अथ दृष्टान्तः किमर्थमुच्यत इति? अप्रज्ञातस्य ज्ञापनार्थमिति। अथ दृष्टान्ते कारणापदेशः किमर्थं (३)देश्यते? यदि प्रज्ञापनार्थं, प्रज्ञातो दृष्टान्तः। स खलु "लौकिकपरीक्षकाणां यस्मिन्नर्थे बुद्धिसाम्यं स दृष्टान्त" इति। तत्प्रज्ञापनार्थः कारणापदेशो निरर्थक इति प्रसङ्गसमस्योत्तरम् ॥ १० ॥

न्यायवार्त्तिकम्

महत्परिमाणेन। यथा मन्दवातवेगेन नुन्नानां लोष्टादीनामिति।

यदि च क्रियां दृष्ट्वा क्रियाकरणमिति मन्यसे, सर्वं कारणं क्रियानुमेयं भवतः प्राप्तं, ततश्चोपादानं कारणस्य न प्राप्नोति, किमिदं करिष्यत्याहो न करिष्यतीति। यस्य पुनः साधर्म्यादुपादानं तस्य युक्तम्। यदि च तत्सदृशं न कारणमिति मन्यसे? अनैकान्तिको हेतुर्न प्राप्नोति, न हि यच्छब्देऽमूर्तत्वं तद् (४)आकाशादाविति। अनुमानं चान्यत्र दृष्टस्यान्यत्र सादृश्यादेव प्रवर्तते, न हि ये धूमधर्मा एकस्मिन् धूमे, त एव धूमान्तरेष्वपीति ॥ ९ ॥

प्रदीपोपादानप्रसङ्गविनिवृत्तिवत् तद्विनिवृत्तिः। इदं तावदयं प्रष्टव्यः—के प्रदीपमुपाददते किमर्थं चेति? दिदृक्षमाणा दृश्यदर्शनार्थमिति? अथ प्रदीपोपलब्ध्यर्थं कस्मान्न प्रदीपोपादानं कुर्वते? अन्तरेण प्रदीपो दृश्यते प्रदीपान्तरमिति। अथ दृष्टान्तः किमर्थमुपादीयते? अज्ञातस्य प्रज्ञापनार्थम्। अथ दृष्टान्तेऽपि दृष्टान्तः किमर्थं देश्यते? यदि प्रज्ञापनार्थं, नाप्रज्ञातो दृष्टान्त इति। (५)यत्पुनराकाशदृष्टान्तवदिति(५) ॥ १० ॥

न्यायवार्त्तिकतात्पर्यटीका

कारणं न दृष्टकार्यकारणसाधर्म्यव्यङ्ग्यमपीति, तस्य दूषणान्याह—यदि चेति ॥ ९ ॥

प्र—त्तिः (सू १०) ॥ यदि प्रज्ञापनार्थम्, उत्तरं—नाप्रज्ञातो दृष्टान्तः। तत्र लौकिकपरीक्षकाणां बुद्धिसाम्यादिति शेषः ॥ १० ॥

---

(१) 'प्रदीपादाने'ति—ज०। (२) —'निवृत्तिवत्'—इति ल-ग-ज०। (३) 'दृश्यते'—इति ज-ग-ल०। 'चोद्यते'—इति टि०। (४) 'आकाशादीनामिति'—इति क०। (५) एतदन्तर्गतो ग्रन्थः २ पु० नास्ति—इति क-पुस्तकसम्पादकाः।

न्यायभाष्यम्

अथ प्रतिदृष्टान्तसमस्योत्तरम्—

प्रतिदृष्टान्तहेतुत्वे च नाहेतुर्दृष्टान्तः ॥ ११ ॥

प्रतिदृष्टान्तं ब्रुवता न विशेषहेतुरपदिश्यते,—अनेन प्रकारेण प्रतिदृष्टान्तः साधको न दृष्टान्त इति। एवं प्रतिदृष्टान्तहेतुत्वे नाहेतुर्दृष्टान्त इत्युपपद्यते। स च (१)कथमहेतुर्न स्यात्? यद्यप्रतिषिद्धः साधकः स्यादिति ॥ ११ ॥

न्यायवार्त्तिकम्

प्रतिदृष्टान्तहेतुत्वे च नाहेतुर्दृष्टान्तः—अभ्युपगमात्; प्रतिदृष्टान्तस्य च हेतुभावं प्रतिपद्यमानेन दृष्टान्तस्यापि हेतुभावोऽभ्युपगन्तव्यः। हेतुभावश्च साधकत्वम्। स च (२)कथमहेतुर्न

न्यायवार्त्तिकतात्पर्यटीका

प्र—न्तः (सू ११)॥ स च कथमहेतुर्न स्यादिति। कथं हेतुः स्यादिति। अभ्युपगमादिति। मदीयस्य च दृष्टान्तस्याभ्युपगमान्न त्वदीयो दृष्टान्त इत्यर्थः। अथैवं

वृत्तिः

क्रमप्राप्ते प्रसङ्गप्रतिदृष्टान्तसमे जाती लक्षयति—(दृष्टान्तस्य कारणानपदेशात् प्रत्यवस्थानाच्च प्रतिदृष्टान्तेन प्रसङ्गप्रतिदृष्टान्तसमौ)।

दृष्टान्तस्य कारणानपदेशात् प्रत्यवस्थानं प्रसङ्गसमः। कारणं प्रमाणम्, तदनपदेशोऽनभिधानम्, अभिधानं चानतिप्रयोजनकम्, तथा च दृष्टान्तस्य साध्यवत्त्वे प्रमाणाभावात् प्रत्यवस्थानमर्थः। यद्यपीदं सदुत्तरमेव, तथाऽपि दृष्टान्ते प्रमाणं वाच्यम्, तत्रापि प्रमाणान्तरमित्यनवस्थया प्रत्यवस्थाने तात्पर्यम्। तदुक्तमाचार्यैः(क)"अनवस्थाभासः प्रसङ्गसमः" इति। एतन्मते तु हेतोर्हेत्वन्तरमित्यनवस्थाऽपि प्रसङ्गसम एव, पूर्वमते तु हेत्वनवस्थादिकं वक्ष्यमाणाकृतिगणेष्वन्तर्भूतमिति विशेषः। अनवस्थादेशनाभासा चेयम्(ख)।

प्रतिदृष्टान्तेन प्रत्यवस्थानात् प्रतिदृष्टान्तसमः प्रत्येतव्यः। सावधारणं चेदम्, तेन प्रतिदृष्टान्तमात्रबलेन व्याप्तिमपुरस्कृत्य प्रत्यवस्थानमर्थः, तेन साधर्म्यसमाव्युदासः। यदि घटदृष्टान्तबलेनानित्यः शब्दस्तदाऽऽकाशदृष्टान्तबलेन नित्य एव स्यात्, नित्यः किं न स्यादिति बाधः प्रतिरोधो वाऽऽपादनीयः। हेतुरनङ्गं, दृष्टान्तमात्रबलादेव साध्यसिद्धिरित्यभिमानः(ग)। बाधप्रतिरोधान्यतरदेशनाभासा चेयम् ॥ ९ ॥

---

(१) 'कथं हेतु'रिति—ख०। (२) 'कथं हेतुः'—इति क०। (क) "अनवस्थाभासप्रसङ्गः प्रसङ्गसमः"—इति न्यायपरिशिष्टे (२९पृ०) उदयनः। (ख) "सा चापाततोऽनवस्थालक्षणप्रतिकूलतर्कदेशनाभासा; हेतुपर्य्यन्तचिन्तायां पक्षेऽप्रसिद्धविशेषणविशेष्योभयत्वेन, हेतौ स्वरूपासिद्धत्वेन, दृष्टान्ते साध्यसाधनोभयविकलत्वाप्रसिद्धाश्रयत्वेन तद्देशनाभासा।" इत्याचार्य्याः। (न्यायपरिशिष्टम् ३०पृ०)। (ग) दृष्टान्तमात्रेण साध्यसिद्धेरवास्तवत्वादभिमान इत्युक्तम्। व्यक्तं चैतत् प्रत्युत्तरसूत्रे। "तदस्य हेतोरप्रधानत्वेन अनङ्गत्वाभिमानो द्वारं, दूष्यो दृष्टान्तः, बाधप्रतिरोधावारोप्यौ, तद्देशनाभासा चेयम्।" (न्यायपरिशिष्टम् ३२पृ०)

न्यायभाष्यम्

प्रागुत्पत्तेः कारणाभावादनुत्पत्तिसमः ॥ १२ ॥

अनित्यः शब्दः प्रयत्नानन्तरीयकत्वाद् घटवदित्युक्ते अपर आह—प्रागुत्पत्तेरनुत्पन्ने शब्दे प्रयत्नानन्तरीयकत्वमनित्यत्वकारणं नास्ति, तदभावात् नित्यत्वं प्राप्तं, नित्यस्य चोत्पत्तिर्नास्ति। अनुत्पत्त्या प्रत्यवस्थानमनुत्पत्तिसमः ॥ १२ ॥

न्यायवार्त्तिकम्

स्यात् ? यद्यप्रतिषिद्धः साधकः स्यात, अप्रतिषिद्धश्चायम्। साधकप्रयोगानुपपत्तेश्च ; यदि तावदेव प्रयुङ्क्ते—यथा भवदीयो दृष्टान्तस्तथा मदीय इति, अभ्युपगमान्न प्रतिदृष्टान्तः। अथैवं प्रयुङ्क्ते—यथा मदीयो न दृष्टान्तस्तथा त्वदीय इति, तथापि व्याघातान्न प्रतिदृष्टान्त इति ॥ ११ ॥

इति युगनद्धवाहिप्रसङ्गप्रतिदृष्टान्तसमजातिद्वयप्रकरणम्।

प्रागुत्पत्तेः कारणाभावादनुत्पत्तिसमः। यथा अनित्यः शब्द उत्पत्तिधर्मकत्वात् घटवदिति कृते यदि ब्रूयात्—प्रागुत्पत्तेरुत्पत्तिधर्मकत्वं नास्ति, तदभावादनुत्पत्तिधर्मकः, अनुत्पत्तिधर्मकत्वाच्च नित्यः, इति अनुत्पत्त्या प्रत्यवस्थानमनुत्पत्तिसमः ॥ १२ ॥

न्यायवार्त्तिकतात्पर्यटीका

प्रयुङ्क्ते यथा मदीयो न दृष्टान्तस्तथा त्वदीय इति, तथापि व्याघातान्न दृष्टान्तः, मदीयस्यादृष्टान्तत्वे साध्ये प्रतिदृष्टान्तेन हि तेन मदीयस्यादृष्टान्तता साध्या, स चेन्न दृष्टान्तः मदीयस्यादृष्टान्तता साध्येति व्याहतमित्यर्थः ॥ ११ ॥

प्रागुत्पत्तेः कारणाभावादनुत्पत्तिसमः (सू १२) ॥ उदाहरणपुरःसरं भाष्यकारो व्याचष्टे—अनित्यः शब्दः प्रयत्नानन्तरीयकत्वाद् घटवदित्युक्त इति। तदभावात् कारणाभावात् अनित्यत्वस्य कार्यस्याभावे नित्यत्वं प्राप्तम्, नित्यत्वानित्यत्वाभ्यां राश्यन्तराभावादिति ॥१२॥

वृत्तिः

प्रसङ्गसमे प्रत्युत्तरमाह—(प्रदीपोपादानप्रसङ्गनिवृत्तिवत्तद्विनिवृत्तिः)।

दृष्टान्तो हि निदर्शनस्थानत्वेन साध्यनिश्चयार्थमपेक्ष्यते, न तु दृष्टान्तदृष्टान्ताद्यनवस्थितपरम्परा लोकसिद्धा युक्तिसिद्धा वा। अन्यथा घटादिप्रत्यक्षाय प्रदीप इव प्रदीपप्रत्ययार्थमनवस्थितप्रदीपपरम्परा प्रसज्येत, त्वदीयसाधनमपि व्याहन्येत ॥ १० ॥

प्रतिदृष्टान्तसमे प्रत्युत्तरमाह—(प्रतिदृष्टान्तहेतुत्वे च नाहेतुर्दृष्टान्तः)

अत्रायमुत्तरक्रमः—प्रतिदृष्टान्तस्त्वया किमर्थमुपादीयते ? मदीयहेतोर्बाधार्थं सत्प्रतिपक्षितत्वार्थं वा ? नाद्यः, यतः प्रतिदृष्टान्तस्य हेतुत्वे स्वार्थसाधकत्वे मदीयो दृष्टान्तो नाहेतुः नासाधकः, तथा च तुल्यबलत्वान्न बाधः। न वा द्वितीयोऽपि, यतः प्रतिदृष्टान्तस्य स्वार्थसाधकत्वे उच्यमाने नाहेतुर्दृष्टान्तः, मदीयो दृष्टान्तस्तु सहेतुकत्वादधिकबलः।

वस्तुतो हेतुं विना दृष्टान्तमात्रेण न सत्प्रतिपक्षसम्भावना, तदभावव्याप्यवत्ताज्ञानाभावात्। हेतूपादाने तु सदुत्तरत्वमेवेति भावः ॥ ११ ॥

इति प्रसङ्गप्रतिदृष्टान्तसमप्रकरणम्।

न्यायभाष्यम्

अस्योत्तरम्—

तथाभावादुत्पन्नस्य कारणोपपत्तेर्न कारणप्रतिषेधः ॥ १३ ॥

तथाभावादुत्पन्नस्येति । उत्पन्नः खल्वयं शब्द इति भवति । प्रागुत्पत्तेः शब्द एव नास्ति, उत्पन्नस्य शब्दभावाच्छब्दस्य सतः प्रयत्नानन्तरीयकत्वम् (१)अनित्यत्वकारणमुपपद्यते, कारणोपपत्तेरयुक्तोऽयं दोषः 'प्रागुत्पत्तेः कारणाभावा'दिति ॥ १३ ॥

न्यायवार्त्तिकम्

तथाभावादुत्पन्नस्य कारणोपपत्तेर्न कारणप्रतिषेधः । यथैव प्रागुत्पत्तेरुत्पत्तिधर्मकत्वं नास्ति तथा शब्दोऽपीति, उत्पन्नः सन् 'शब्द' इति भवति उत्पन्नः सन्नु'त्पत्तिधर्मक' इति भवति, तथाऽनित्य इति । उत्पन्ने उत्पत्तिधर्मकत्वमस्तीति न कारणप्रतिषेधः, अनुत्पन्नस्य चातथाभावात् । न चायमनुत्पन्नः 'शब्द' इति वा 'उत्पत्तिधर्मक' इति वा(२)'नित्य' इति वा(३*) 'अनित्य' इति वा व्यपदेष्टं शक्यत इति । ज्ञापकश्चायं हेतुर्न कारकः, ज्ञापके च कारकवत् प्रत्यवस्थानमसम्बद्धम् ।

न्यायवार्त्तिकतात्पर्यटीका

तस्य प्रत्याख्यानम्—

तथा भावादुत्पन्नस्य कारणोपपत्तेर्न कारणप्रतिषेधः (सू १३) ॥ नित्यत्वेन हि शब्दस्य धर्मेणानुत्पत्त्या प्रत्यवस्थेयम्, (३)न चानुत्पन्नः 'शब्द' इति 'नित्य' इति 'चानुत्पत्तिधर्मक' इति च संभवति । उत्पन्नस्तूत्पत्तिधर्मा च शब्दश्चानित्यश्चेति नानुत्पत्त्या शक्यं प्रत्यवस्थातुमित्यर्थः । कारणोपपत्तेरिति प्रयत्नानन्तरीयकत्वस्य(४)ज्ञापकस्योपपत्तेर्न कारणस्य प्रयत्नानन्तरीयकत्वस्य(४*)प्रतिषेध इत्यर्थः । यदुक्तं कारणाभावादनित्यत्वस्य कार्यस्याभावे नित्यत्वं प्राप्तमिति, तत्राह वार्तिककारः—ज्ञापकश्चायं हेतुर्न कारक इति । कारको हि हेतुर्निवर्तमानः स्वकार्यं निवर्तयति न तु ज्ञापकस्तदभावेऽपि भूमौ चिरनिखातानां निध्यादीनामनिवृत्तेरिति ।

वृत्तिः

क्रमप्राप्तमनुत्पत्तिसमं लक्षयति—(प्रागुत्पत्तेः कारणाभावादनुत्पत्तिसमः) ।

प्रागुत्पत्तेरिति साधनाङ्गस्येति शेषः । कारणाभावात् हेत्वभावात् । तथा च (क)साधनाङ्गपक्षहेतुदृष्टान्तानामुत्पत्तेः प्राक् हेत्वभाव इत्यनुत्पत्त्या प्रत्यवस्थानमनुत्पत्तिसमः । यथा घटो रूपवान् गन्धात् पटवदित्युक्ते घटोत्पत्तेर्गन्धोत्पत्तेश्च पूर्वं हेत्वभावादसिद्धिः, पटे च गन्धोत्पत्तेः पूर्वं हेत्वभावेन दृष्टान्तासिद्धिः, एवमाद्यक्षणे रूपाभावाद् बाधश्च, अनुत्पत्त्या प्रत्यवस्थानस्यैव तत्रापि सत्त्वात् । उत्पत्तेः पूर्वं हेत्वाद्यभावेन प्रत्यवस्थानस्यैव लक्षणत्वात् । जातित्वे सतीति च विशेषणीयम् । तेनोत्पत्तिकालावच्छिन्नो घटो गन्धवानित्यत्र बाधेन प्रत्यवस्थाने नातिव्याप्तिः । असिद्ध्यादिदेशनाभासा चेयम् ॥ १२ ॥

---

(१) 'अनित्यकारणम्'—इति ज० । (२) अयं भागः ख-पु० नास्ति । (३) 'न वानुत्'—इति क० । (४) अयं भागः ख-पु० नास्ति । (क) "यस्य कस्यचित् साधनाङ्गस्योत्पत्तेः प्राक् कारणस्य हेतोरभावात् प्रत्यवस्थानमनुत्पत्तिसमः । एवं धर्मि-लिङ्ग-साध्य-दृष्टान्त-तज्ज्ञानानामनुत्पत्तिर्व्याख्येया ।" इत्युदयनः । "उपलक्षणत्वेन धर्म्यादिविशेषणानुत्पत्तिरपि द्रष्टव्या" इति परिशिष्टप्रकाशे वर्द्धमानः (२५पृ०) ।

न्यायवार्त्तिकम्

न कारकज्ञापकयोर्भेदोऽस्ति कारकत्वादिति चेत् ? न, कारकज्ञापकयोः क्रियाज्ञप्तिहेतुत्वात् । योऽप्ययं ज्ञापकः सोऽपि किञ्चित् कुर्वन् ज्ञापक इत्युच्यते(१)कारकोऽपीति । नैष दोषः कारकस्य क्रियाहेतुत्वात्, ज्ञप्तिहेतुत्वाद् ज्ञापकस्येति । तत्रैको वस्तु निष्पादयति, एकस्तु विद्यमाने वस्तुनि ज्ञप्तिं करोति । (२)प्राक् चोत्पत्तेरुत्पत्तिधर्मकत्वस्याभावादनुत्पत्तिधर्मकः शब्द इति ब्रुवाणः शब्दमभ्युपैति, नासतोऽनुत्पत्तिधर्मकत्वं धर्म इति । ततश्च विशेषणमनर्थकं प्रागुत्पत्तेरिति ।

अपरे तु प्रागुत्पत्तेः कारणाभावादित्युक्ते अर्थापत्तिसमैवेयमिति, प्रागुत्पत्तेः प्रयत्नानन्तरीयकत्वस्याभावादर्थादप्रयत्ननान्तरीयकोऽप्रयत्ननान्तरीयकत्वाच्च नित्य इति कृते उत्तरं(३)ब्रुवते—नायं नियमोऽप्रयत्नानन्तरीयकं(४)नित्यमिति । त्रयी हि तस्य गतिः,—किञ्चिन्नित्यमाकाशादि, किञ्चिदनित्यं विद्युदादि, किञ्चिदसदेव आकाशकुसुमादि ।

एतत्तु न युक्तमुत्पश्यामः । कथमिति ? यत्तावद् असद्(५)अप्रयत्ननान्तरीयकमिति न युक्तं प्रयत्नानन्तरीयकत्वस्य जन्मविशेषणत्वात् यस्य न(६)प्रयत्नानन्तरीयकं जन्म तदप्रयत्नानन्तरीयकं, न चाभावो विद्यते अतो न तस्य जन्म । यच्चासत् किं तस्य विशेष्यमस्ति । एतेन नित्यं प्रत्युक्तम् । न हि नित्यमप्रयत्नानन्तरीयकमिति शक्यं वक्तुम् । जातिलक्षणाभावान्नेयं जातिरिति चेन्न ; अनुत्पन्नैरहेतुभिः साम्यात्—योऽनुत्पन्नः स न हेतुः, तद् यथा अनुत्पन्नास्तन्तवो न पटस्य कारणमिति ॥१३॥

इत्यनुत्पत्तिसमप्रकरणम् ।

न्यायवार्त्तिकतात्पर्यटीका

ततश्च विशेषणमनर्थकं प्रागुत्पत्तेरिति । प्रागसतो हि सत्तासंबन्ध उत्पत्तिः, प्रागपि चेदसावभ्युपगतः प्रागिति विशेषणमनर्थकम् ; उत्पत्तेरभावे सदैवानुत्पत्तिधर्मकत्वादित्यर्थः ।

अपरे तु प्रागुत्पत्तेः कारणाभावादित्युक्ते अर्थापत्तिसमैवेयं जातिरिति मत्वाऽस्या उत्तरमाहुः । यदैवमुच्येत प्रयत्नानन्तरीयकत्वादनित्यः शब्द इति तदार्थादप्रयत्नानन्तरीयकत्वे नित्यत्वमुक्तं भवतीत्यर्थात् आपत्तितः प्रतिपक्षसिद्धेरर्थापत्तिसमैवेयं जातिरित्यभिमानः । एवं कृते त एवास्यां जातावुत्तरं ब्रुवते—नायं नियम इति । तदेतत्परेषां मतं दूषयति—एतत्त्विति । शङ्कते—जातिलक्षणाभावान्नेयं जातिरिति चेत् । साधर्म्यवैधर्म्याभ्यां प्रत्यवस्थानं जातिः, न चानुत्पत्तिसमायाः साधर्म्यं वैधर्म्यं वाऽस्ति केनचिदित्यर्थः । निराकरोति—नानुत्पन्नैरहेतुभिः(क)सारूप्यादिति । यथाऽनुत्पन्नास्तन्तवो न पटस्य कारणं तथा शब्दोत्पत्तेः प्रागनुत्पन्नं प्रयत्नानन्तरीयकत्वं नानित्यत्वस्य कारणमिति साधर्म्येण प्रत्यवस्थानमित्यस्ति सामान्यलक्षणमित्यर्थः । एतावता चार्थापत्तिसमाया अनुत्पत्तिसमातो भेदो दर्शितः ; इहानुत्पन्नैरहेतुभिः साम्येन कार्यप्रतिषेधात्, अर्थापत्तिसमायां वाक्यार्थविपरीतारोपेण प्रतिषेधादिति ॥ १३ ॥

---

(१) 'कारकत्वादिति'—इति क-पुस्तकधृतपाठान्तरम् । (२) 'प्राक् चोत्पत्ति'—इति क० । (३) 'ब्रूयात्'—इति क० । (४) 'प्रागुत्पन्नः-इत्यधिकम् ६ पु०'—इति क-पादटीका । (५) 'अप्रयत्नानान्तरी'—इति ख० । (६) 'प्रयत्नानन्तरं'—इति ख० । (क) वार्त्तिके 'साम्यादि'त्यक्षरविसंवादः ।

न्यायभाष्यम्

सामान्यदृष्टान्तयोरैन्द्रियकत्वे समाने(१)नित्यानित्य-साधर्म्यात्संशयसमः ॥ १४ ॥

अनित्यः शब्दः प्रयत्नानन्तरीयकत्वाद् घटवदित्युक्ते हेतौ संशयेन प्रत्यवतिष्ठते—सति प्रयत्नानन्तरीयकत्वे अस्त्येवास्य नित्येन सामान्येन साधर्म्यमैन्द्रियकत्वम्, अस्ति च घटेनानित्येन, अतो नित्यानित्यसाधर्म्यादनिवृत्तः संशय इति ॥ १४ ॥

न्यायवार्त्तिकम्

सामान्यदृष्टान्तयोरैन्द्रियकत्वे समाने नित्यानित्यसाधर्म्यात् संशयसमः । उदाहरणं भाष्ये । संशयसमा(२)साधर्म्यसमातो न भिद्यते इति चेत्—अथ मन्यसे यथा साधर्म्यसमोदाहरणं साधर्म्यात् प्रवर्तते तथा संशयसमापीति, अतोऽभेदान्न जात्यन्तरमिति ? न, उभयैकसाधर्म्य-भेदात्— उभयसाधर्म्यात संशयसमः, एकसाधर्म्यात् साधर्म्यसम इति विशेषः ॥ १४ ॥

न्यायवार्त्तिकतात्पर्यटीका

सामान्यदृष्टान्तयोरैन्द्रियकत्वे समाने नित्यानित्यसाधर्म्यात्संशयसमः (सू १४) ॥ दृष्टान्तः प्रयत्नानन्तरीयकत्वस्य हेतोर्घट इति । यथा हि विशेषदर्शनं निश्चयस्य कारणमस्तीति निश्चयोत्पत्तिरेवं साधर्म्यदर्शनमात्रमस्ति संशयस्य कारणमिति संशयेनापि भवितव्यमित्यर्थः (३) । सूत्रार्थप्रयोजनमाक्षेपसमाधानाभ्यां स्फुटीकरोति—संशयसमा साधर्म्यसमाया इति ॥ १४ ॥

वृत्तिः

अत्रोत्तरमाह—(तथाभावादुत्पन्नस्य कारणोपपत्तेर्न कारणप्रतिषेधः) ।

उत्पन्नस्य तथाभावात् घटाद्यात्मकत्वात् तत्र कारणस्य हेतोरुपपत्तेः सत्त्वात् कथं कारणप्रतिषेधः ? अयमाशयः—पक्षे हेत्वभावोऽसिद्धिः, न त्वनुत्पन्ने हेत्वभावः सम्भवति, अधिकरणाभावात् । न हि हेत्वभावमात्रमसिद्धिः, त्वदीयहेतोरपि क्वचिदभावसत्त्वात् ।

एतेन दृष्टान्तासिद्धिर्व्याख्याता, यदा कदाचित् हेतुसत्त्वेनैव दृष्टान्तत्वोपपत्तेः । एवं हेत्वादीनां यदा कदाचित् पक्षे सत्त्वादेव हेत्वादिभावो न तु सार्वकालिकी तदपेक्षेति ॥१३॥

इति अनुत्पत्तिसमप्रकरणम् ।

क्रमप्राप्तं संशयसमं लक्षयति—(सामान्यदृष्टान्तयोरैन्द्रियकत्वे समाने नित्यानित्य-साधर्म्यात् संशयसमः) ।

नित्यानित्यसाधर्म्यादिति संशयकारणोपलक्षणम्, तेन समानधर्मदर्शनादियत्किञ्चित्-संशयकारणबलात् संशयेन प्रत्यवस्थानं संशयसमः । अधिकं तूदाहरणपरम् । तथा हि—

(१) "नित्यानित्यशब्दौ सपक्ष-विपक्षावुपलक्षयतः, साधर्म्यपदं च संशयहेतुम् । ततश्च—साध्य-तदभावयोः संशयकारणादित्यर्थः"—इति वरदराजः। (२) 'साध्यसमातो'—इति क०। (३) संशयहेतुविरहे सति निर्णायकत्वमित्यभिमानः। तत्त्वन्तु—निर्णायकाभावे संशयहेतुतः संशय इति। निर्णायकं च विशेषदर्शनमिति व्यक्तमिदमुत्तरसूत्रे।

न्यायभाष्यम्

अस्योत्तरम्—

(१)साधर्म्यात्संशये न संशयो वैधर्म्यादुभयथा वा(१*) (२)संशयेऽत्यन्तसंशयप्रसङ्गो (३)नित्यत्वानभ्युपगमाच्च सामान्यस्याप्रतिषेधः ॥ १५ ॥

विशेषाद्वैधर्म्यादवधार्यमाणेऽर्थे पुरुष इति, न स्थाणुपुरुषसाधर्म्यात्संशयोऽवकाशं लभते। एवं वैधर्म्याद्विशेषात् प्रयत्नानन्तरीयकत्वादवधार्यमाणे शब्दस्यानित्यत्वे नित्यानित्यसाधर्म्यात्संशयोऽवकाशं न लभते। यदि वै लभेत, ततः स्थाणुपुरुषसाधर्म्यानुच्छेदादत्यन्तं संशयः स्यात्। गृह्यमाणे च विशेषे (४)नित्यं साधर्म्यं संशयहेतुरिति नाभ्युपगम्यते। न हि गृह्यमाणे पुरुषस्य विशेषे स्थाणुपुरुषसाधर्म्यं संशयहेतुर्भवति ॥१५॥

न्यायवार्त्तिकम्

साधर्म्यात् संशये न संशयो वैधर्म्यादुभयथा वा संशयेऽत्यन्तसंशयप्रसङ्गो नित्यत्वानभ्युपगमाच्च सामान्यस्याप्रतिषेधः। साधर्म्यात् साधर्म्यदर्शनात् संशयः, वैधर्म्याद्विशेषदर्शनान्न संशयः, उभयथा तु संशये सामान्यविशेषदर्शने सति संशयेऽत्यन्तसंशयप्रसङ्गः; नित्यं सामान्यं संशयं करोतीति तु न प्रतिपद्यामहे, सति सामान्ये विशेषदर्शनाद्व्यावृत्तेरिति ॥१५॥

इति संशयसमप्रकरणम्।

न्यायवार्त्तिकतात्पर्यटीका

अस्य प्रत्याख्यानसूत्रम्—

साधर्म्यात्संशये न संशयो वैधर्म्यादुभयथा वा संशये अत्यन्तसंशयप्रसङ्गो नित्यत्वानभ्युपगमाच्च सामान्यस्याप्रतिषेधः (सू १५)॥ न सामान्यदर्शनमात्रं संशयस्य कारणमपि तु विशेषादर्शनसहितं, विशेषदर्शने तु तद्रहितं न कारणमिति सूत्रार्थः(क)। उभयथा वेति। साधर्म्यविशेषदर्शनाभ्यामित्यर्थः। नित्यत्वानभ्युपगमाच्च सामान्यस्येति। नित्यं संशयकारणत्वानभ्युपगमात्साधर्म्यस्येत्यर्थः ॥ १५ ॥

वृत्तिः

'शब्दोऽनित्यः कार्यत्वाद् घटवदि'त्युक्ते सामान्ये गोत्वादौ दृष्टान्ते घटे चैन्द्रियकत्वं तुल्यं, तथा च यथा कार्यत्वात् निर्णायकादनित्यत्वं निर्णीयते, तथा ऐन्द्रियकत्वात् संशयकारणादनित्यत्वं सन्दिह्यताम्। एवं शब्दत्वाद्यसाधारणधर्मदर्शनादपि संशयो बोध्यः। तथा च हेतुज्ञानेऽप्रामाण्यशङ्काधानद्वारा साध्यसंशयात् सत्प्रतिपक्षदेशनाभासेयम् ॥ १४ ॥

---

(१) 'विशेषाद वैधर्म्यादुभयथा वा'—इति टि०। (२) संशयः—इति ज०। (३) —'नित्यत्वान्नाभ्युपग'—इति ज०। (४) 'नित्यसाधर्म्यं'—इति ज-ग०। (क) "तदिदं युक्ताङ्गहीनत्वं, विशेषादर्शनस्य संशयकारणस्य युक्तस्यैवानपेक्षणात्; अयुक्ताङ्गाधिकत्वं वा, साधर्म्यादि[-रूपसंशयहेतु-]विरहस्यायुक्तस्यैव निर्णयाङ्गत्वेन स्वीकारा"दित्याचार्याः।

न्यायभाष्यम्

उभयसाधर्म्यात् प्रक्रियासिद्धेः प्रकरणसमः ॥ १६ ॥

उभयेन नित्येन चानित्येन च साधर्म्यात्पक्षप्रतिपक्षयोः प्रवृत्तिः प्रक्रिया। अनित्यः शब्दः प्रयत्नानन्तरीयकत्वाद् घटवदित्येकः पक्षं प्रवर्त्तयति, द्वितीयश्च नित्यसाधर्म्यात् (१)प्रतिपक्षं प्रवर्त्तयति—नित्यः शब्दः श्रावणत्वात् शब्दत्ववदिति(१*)। एवं च सति प्रयत्नानन्तरीयकत्वादिति हेतुरनित्यसाधर्म्येण (२)उच्यमानो न प्रकरणमतिवर्त्तते, प्रकरणानतिवृत्तेर्निर्णया(३)नतिवर्तनम्। समानं चैतन्नित्यसाधर्म्येणोच्यमाने हेतौ(२*)। तदिदं प्रकरणानतिवृत्त्या प्रत्यवस्थानं प्रकरणसमः। समानं चैतद्वैधर्म्येऽपि, उभयवैधर्म्यात् प्रक्रियासिद्धेः प्रकरणसम इति॥ १६ ॥

न्यायवार्त्तिकम्

उभयसाधर्म्यात् प्रक्रियासिद्धेः प्रकरणसमः। उदाहरणं भाष्ये। संशयसमसाधर्म्यसमाभ्यां प्रकरणसमा न भिद्यते। कथमिति? तत्रापि साधर्म्यमिहापीति? न, उभयपक्षसाधर्म्याद् भेदसिद्धेः—उभावत्र वादिप्रतिवादिनौ पक्षपरिग्रहेण नित्यानित्यत्वे साधयतः, न चैवं साधर्म्यसम-संशयसमयोरिति ॥ १६ ॥

न्यायवार्त्तिकतात्पर्यटीका

उभयसाधर्म्यात्प्रक्रियासिद्धेः प्रकरणसमः (सू १६)॥ उपलक्षणं चैतद् उभयसाधर्म्यादिति। उभयवैधर्म्यादित्यपि द्रष्टव्यम्। एतद्व्याचष्टे भाष्यकारः—उभयेन नित्येन चानित्येन चेति। द्वितीयश्च नित्यसाधर्म्यात्प्रतिपक्षं प्रवर्तयति—'नित्यः शब्दः श्रावणत्वाच्छब्दत्वव'दिति। अथ द्वितीयसाधनप्रवृत्तौ प्रथमस्य साधनस्य किं भवतीत्यत आह—एवं च सति प्रयत्नानन्तरीयकत्वादिति हेतुरनित्यसाधर्म्येणोच्यमानो न प्रकरणमतिवर्तते। माऽतिवर्त्तिष्ट प्रकरणं को दोष इत्यत आह—प्रकरणानतिवृत्तेर्निर्णयानतिवर्त्तनम्। निर्णयानिष्पत्तिरित्यर्थः। एवमनित्यसाधनवादिनं प्रत्युत्तरं दर्शयित्वा नित्यसाधनवादिनं प्रत्याह—समानं चैतन्नित्यसाधर्म्येणोच्यमान इति। तदेवं साधर्म्येण प्रकरणसमद्वयमुक्तम्। तथा वैधर्म्येण प्रकरणसमद्वयं नित्यानित्यसाधनवादिनावेव प्रत्याह—समानं चैतदिति। उभयवैधर्म्यादिति, नित्याकाशवैधर्म्यात्कृतकत्वादनित्यघटवैधर्म्याच्चास्पर्शवत्त्वादिति। तदेवं प्रकरणसमचतुष्टयम्।

पूर्वपक्षवार्त्तिकं—संशयसमासाधर्म्यसमाभ्यामिति। परिहरति—नोभयपक्षसाधर्म्यात (क)तद्भेदोपपत्तिरिति। प्रकरणसमे हि स्वपक्षनिश्चयेन मया वादिपक्षसाधनं दूषणीयमिति बुद्ध्या प्रवर्त्तते। साधर्म्यसमसंशयसमयोस्तु वादिसाधनेन साम्यमात्रापादनेन तद्दूषणं, न तु प्रतिपक्षनिश्चयेनेति विशेषः। इह तु साम्यमात्रापादनं न साधनेन, किं तु दूषणैरित्येतावता समार्थः प्रयोगः सम इति बोद्धव्यम्॥ १६ ॥

(१) इदं ज-ग-ल-झा-पुस्तकेषु न दृश्यते। फ-पुस्तकपाठो गृहीतः। (२) 'उच्यमानेन हेतौ'—इति ज०-ग०। (३) —'निर्वर्त्तनम्'—इति फ०। (क) 'भेदासिद्धे'रिति वार्त्तिकपाठः।

न्यायभाष्यम्

अस्योत्तरम्—

प्रतिपक्षात्प्रकरणसिद्धेः(१)प्रतिषेधानुपपत्तिः प्रतिपक्षोपपत्तेः ॥१७॥

उभयसाधर्म्यात् प्रक्रियासिद्धिं ब्रुवता प्रतिपक्षात्प्रक्रियासिद्धिरुक्ता भवति। यद्युभयसाधर्म्यं, तत्र एकतरः प्रतिपक्ष इत्येवं सत्युपपन्नः प्रतिपक्षो भवति। प्रतिपक्षोपपत्तेरनुपपन्नः प्रतिषेधः, (२)यदि (३)प्रतिपक्षोपपत्तिः प्रतिषेधो नोपपद्यते, अथ प्रतिषेधोपपत्तिः प्रतिपक्षो नोपपद्यते(३*), प्रतिपक्षोपपत्तिः प्रतिषेधोपपत्तिश्चेति विप्रतिषिद्धमिति। तत्त्वानवधारणाच्च प्रक्रियासिद्धिर्विपर्यये प्रकरणावसानात्, तत्त्वावधारणे ह्यवसितं प्रकरणं भवतीति ॥ १७ ॥

न्यायवार्त्तिकम्

प्रतिपक्षात् प्रकरणसिद्धेः प्रतिषेधानुपपत्तिः प्रतिपक्षोपपत्तेः। विरुद्धाव्यभिचार्येव उक्तोत्तर इति। प्रकरणोत्थानं च न प्रतिपक्षादिति ब्रूमः, किन्तु(४)तत्त्वादर्शनात्; तदुक्तं—प्रकरणसमे हेत्वाभास इति ॥ १७ ॥

इति प्रकरणसमप्रकरणम्।

न्यायवार्त्तिकतात्पर्यटीका

अस्य प्रत्याख्यानम्—

प्रतिपक्षात्प्रकरणसिद्धेः प्रतिषेधानुपपत्तिः प्रतिपक्षोपपत्तेः (सू १७)॥ द्वयोः साधनयोस्तदानीमगृह्यमाणविशेषयोः कोऽयमभिमानः प्रतिवादिनो यन्मया स्वपक्षसाधनेनैव वादिनः साधनं दूषणीयमिति। समानबलयोश्चेदयमात्मीयात्साधनात्स्वपक्षसिद्धिमिच्छति, अतोऽनिच्छन्नपि वादिनोऽपि साधनात (५)सिद्धिमभ्युपगमयितव्यः। अन्यथा स्वसाधनात्साध्यसिद्धिमुपजीव्य प्रतिपक्षसाधनं दूषयति, न तु तस्मात्प्रतिपक्षसिद्धिमभ्युपगच्छतीति व्यक्तमियं राजकुलस्थितिरिति। एवं व्यवस्थिते सूत्रभाष्ये योजयितव्ये—प्रतिपक्षात्प्रतिपक्षसाधनात्प्रकरणस्य प्रक्रियमाणस्य साध्यस्येति यावत्, सिद्धेः, समानात् स्वसाधनात् प्रतिषेधस्य प्रतिवादिसाधनस्य स्वसाध्यसिद्धिद्वारेण परकीयसाधनप्रतिषेधस्यानुपपत्तिः। कस्मात्प्रतिषेधानुपपत्तिरित्यत उक्तं—प्रतिपक्षोपपत्तेः। फलतः परकीयसाधनस्य समानात्स्वसाधनात्प्रक्रियासिद्धिं स्वसाध्यसिद्धिं ब्रुवता प्रतिपक्षात्प्रक्रियासिद्धिरुक्ता भवति प्रतिवादिना। (क)नन्वेवं प्रकरणसमाह्वयो हेत्वाभासो नोद्भावनीयः प्रतिवादिना, जात्युत्तरप्रसङ्गादित्यत आह—तत्त्वानवधारणाच्च प्रक्रियासिद्धिः। स्वसाध्यनिर्णयेन परसाध्यविघटनबुद्ध्या प्रतिवादिना साधनं प्रयुज्यमानं प्रकरणसमजात्युत्तरं भवति। सत्प्रतिपक्षतया वादिनः साधनमनिश्चायकं करोमीति बुद्ध्या प्रतिपक्षसाधनं प्रयुञ्जानो न जातिवादी, सदुत्तरवादित्वात्। सत्प्रतिपक्षताया हेतुदोषस्यानैकान्तिकादिवदुपपादितत्वात्। तत्त्वानवधारणादित्यनेन प्रकरणसमोदाहरणं दर्शितम्।

वार्त्तिकम्—विरुद्धाव्यभिचार्येव उक्तोत्तर इति। तुल्यबलयोरेकतरस्मात्स्वसाध्यसिद्धिमभ्युपगच्छतोर्द्वयोरपि फलतो व्यभिचारः सिध्यति। न च विरुद्धाव्यभिचारी संभवति। अव्यभिचारो ह्यविनाभावः, स च पञ्चरूपसंपत्तिश्चतूरूपसंपत्तिर्वा, न विरुद्धाव्यभिचारिणि साऽस्तीत्यर्थः ॥१७॥

(१) 'प्रतिषेधानुत्पत्तिः'—इति टि०। (२) 'यतः'—इति ज-ग-ल०। (३) अयमंशः ल-ग-ज-भा-पुस्तकेषु नास्ति। फ-पुस्तकपाठो गृहीतः। (४) 'तथादर्शनात्'—इति क-धृतपाठान्तरम्। (५) 'सिद्धम'—इति क०। (क) सत्प्रतिपक्षोद्भावनस्य जात्युत्तरत्वं निरसितुं ततोऽस्य भेदं दर्शयितुं चाशङ्कते—नन्विति।

न्यायभाष्यम्

(१)त्रैकाल्यासिद्धेर्हेतोरहेतुसमः ॥ १८ ॥

(२)हेतुः साधनम्, तत्साध्यात् पूर्वं पश्चात्सह वा भवेत्। यदि पूर्वं साधनम्, असति साध्ये कस्य साधनम्? अथ पश्चाद्, असति साधने कस्येदं साध्यम्? अथ युगपत्साध्यसाधने, द्वयोर्विद्यमानयोः किं कस्य साधनं किं कस्य साध्यमिति हेतुरहेतुना न विशिष्यते। (३)अहेतुना साधर्म्यात्(३*) प्रत्यवस्थानमहेतुसमः॥ १८॥

न्यायवार्त्तिकम्

त्रैकाल्यासिद्धेर्हेतोरहेतुसमः। अहेतुसाम्यात् प्रत्यवस्थानमहेतुसम इति ॥ १८ ॥

न्यायवार्त्तिकतात्पर्यटीका

त्रैकाल्यासिद्धेर्हेतोरहेतुसमः (सू १८)॥ सूत्रभाष्यवार्तिकानि प्रमाणसामान्यपरीक्षाव्याख्यानेन व्याख्यातानि ॥ १८ ॥

वृत्तिः

अत्रोत्तरम्—(साधर्म्यात्संशये न संशयो वैधर्म्यादुभयथा वा संशयेऽत्यन्तसंशयप्रसङ्गो नित्यत्वानभ्युपगमाच्च सामान्यस्याप्रतिषेधः)।

साधर्म्यात् साधर्म्यदर्शनात् संशये आपाद्यमानेऽपि न संशयः, वैधर्म्याद् वैधर्म्यदर्शनात्। यदि च कार्यत्वरूपविशेषदर्शनेऽपि संशयस्तदाऽत्यन्तसंशयप्रसङ्गः संशयानुच्छेदप्रसङ्गः। न च तथाऽभ्युपगन्तुं शक्यमित्याह—नित्यत्वेति। सामान्यस्य समानधर्मदर्शनस्य नित्यत्वानभ्युपगमान्नित्यसंशयजनकत्वानभ्युपगमात्। तथा सति त्वदीयो हेतुरपि न परपक्षप्रतिषेधकः स्यादिति भावः।

सामान्यस्य गोत्वादेः नित्यत्वानभ्युपगमात् नित्यत्वानभ्युपगमप्रसङ्गात्, तत्रापि साधारणधर्मप्रमेयत्वादिना संशय एव स्यादिति केचित् ॥ १५ ॥

इति संशयसमप्रकरणम्।

क्रमप्राप्तं प्रकरणसमं लक्षयति—(उभयसाधर्म्यात् प्रक्रियासिद्धेः प्रकरणसमः)।

उभयसाधर्म्यात् अन्वयसहचाराद् व्यतिरेकसहचाराद्वा प्रक्रिया प्रकर्षेण क्रिया साधनं, विपरीतसाधनमिति फलितार्थः; तत्सिद्धेस्तस्य पूर्वमेव सिद्धेः। तथा चाधिकबलत्वेनाऽऽरोपितप्रमाणान्तरेण (क)बाधेन प्रत्यवस्थानं प्रकरणसमः; यथा—शब्दोऽनित्यः कृतकत्वादित्युक्ते, नैतदेवं श्रावणत्वेन नित्यत्वसाधकेन बाधात्। बाधदेशनाभासा चेयम् ॥ १६ ॥

---

(१) 'त्रैकाल्यानुपपत्ते'रिति न्यायसूचीनिबन्धे। (२) 'अहेतुसमः हेतु'—इति ग-पु० अधिकम्। 'अहेतुसाम्यात्'—इति टि०। (क) आचार्यास्तु—"अभ्युपगततदनधिकबलत्वेन प्रमाणान्तरेण हेतोर्बाधाभिधानं प्रकरणसम इति सूत्रार्थं" इत्याहुः। "तुल्यत्वमभ्युपेत्यैव परहेतोः स्वहेतुना। बाधेन प्रत्यवस्थानं प्रक्रियासम इष्यते ॥ २० ॥ अनभ्युपगताधिकबलेन प्रतिप्रमाणेन परकीयहेतोर्बाधाभिप्रायेण प्रत्यवस्थानं प्रकरणसमा जाति"रिति वरदराजः। टीकाकृतापि 'समानबलत्व'मुक्तं (११३८पृ०) वक्ष्यते च (११२९पृ०)। अत्र च युक्ताङ्गहीनत्वं दुष्टत्वमूलं, बाधं प्रत्यधिकबलवत्त्वस्य युक्तस्यैवानपेक्षणात्।

* द्रष्टव्यम्—इतः प्राक् एकोनत्रिंशत्पत्रेषु पत्राङ्कमुद्रणे प्रमादो जातः।

न्यायभाष्यम्

अस्योत्तरम्—

न हेतुतः साध्यसिद्धेस्त्रैकाल्यासिद्धिः ॥ १९ ॥

न त्रैकाल्यासिद्धिः। कस्मात्? हेतुतः साध्यसिद्धेः। निर्वर्तनीयस्य निर्वृत्तिर्विज्ञेयस्य विज्ञानमुभयं कारणतो दृश्यते, सोऽयं महान्प्रत्यक्षविषय उदाहरणमिति। यत्तु खलूक्तमसति साध्ये कस्य साधनमिति? यत्तु निर्वर्त्यते यच्च विज्ञाप्यते तस्येति ॥१९॥

(१)प्रतिषेधानुपपत्तेश्च प्रतिषेद्धव्याप्रतिषेधः ॥ २० ॥

पूर्वं पश्चाद् युगपद्वा प्रतिषेध इति नोपपद्यते, प्रतिषेधानुपपत्तेः स्थापनाहेतुः सिद्ध इति ॥ २० ॥

न्यायवार्त्तिकम्

न हेतुतः साध्यसिद्धेस्त्रैकाल्यासिद्धिः। विरोधः सूत्रार्थः। नोत्पद्यमानमहेतुत उपपद्यते, नापि ज्ञाप्यमानमहेतुना ज्ञाप्यते इति ॥ १९ ॥

प्रतिषेधानुपपत्तेश्च प्रतिषेद्धव्याप्रतिषेधः। विरोध उत्तरदोष इति। यस्त्रिष्वपि कालेषु न साधयति स न प्रतिषेधेऽपि हेतुरिति समानो दोषः। उक्तोत्तरत्वाच्च—'प्रत्यक्षादीनामप्रामाण्यं त्रैकाल्यासिद्धे'(२।१।८सू०)रित्यत्रोक्तोत्तरमेतदिति ॥ २० ॥

इति अहेतुसमप्रकरणम्।

न्यायवार्त्तिकतात्पर्यटीका

न हेतुतः—सिद्धिः (सू १९) ॥ (क)

प्रतिषेधा—षेधः (सू २०) ॥ (ख)

वृत्तिः

अत्रोत्तरमाह—(प्रतिपक्षात् प्रकरणसिद्धेः प्रतिषेधानुपपत्तिः प्रतिपक्षोपपत्तेः)।

प्रतिपक्षाद्विपरीतसाध्यसाधकत्वेनाभिमताच्छ्रावणत्वादितः प्रकरणसिद्धिद्वारा मदीयसाध्यस्य यः प्रतिषेधस्त्वया क्रियते तस्यानुपपत्तिः। कुतः? प्रतिपक्षोपपत्तेः, त्वत्पक्षापेक्षया प्रतिपक्षस्य मदीयपक्षस्योपपत्तेः साधनात्। अयमाशयः—श्रावणत्वेन पूर्वं नित्यत्वस्य साधनाद् यो बाध उच्यते स नोपपद्यते, पूर्वं साधितस्य बलवत्त्वाभावात्, कदाचित् कृतकत्वेनानित्यत्वस्याऽपि पूर्वं साधनादिति त्वत्पक्षप्रतिषेधोऽपि स्यात् ॥ १७ ॥

इति प्रकरणसमप्रकरणम्।

---

(१) 'प्रतिषेधानुपपत्तेः प्रति'—इति ल-ग-ज०। (क-ख) एतत् सूत्रद्वयमपि प्रमाणसामान्यपरीक्षाव्याख्यानेन द्वितीयाध्याये व्याख्यातमिति टीकाकृता न व्याख्यातम्।

न्यायभाष्यम्

अर्थापत्तितः प्रतिपक्षसिद्धेरर्थापत्तिसमः ॥ २१ ॥

अनित्यः शब्दः(१)प्रयत्नानन्तरीयकत्वाद् घटवदिति स्थापिते पक्षे अर्थापत्त्या प्रतिपक्षं साधयतोऽर्थापत्तिसमः। यदि(१*)प्रयत्नानन्तरीयकत्वादनित्यसाधर्म्याद-नित्यः शब्द इति, अर्थादापद्यते नित्यसाधर्म्यान्नित्य इति, (२)अस्ति चास्य(२*) (३)नित्येन साधर्म्यम्(३*)अस्पर्शत्वमिति ॥ २१ ॥

न्यायवार्त्तिकम्

अर्थापत्तितः प्रतिपक्षसिद्धेरर्थापत्तिसमः। उदाहरणं भाष्ये ॥ २१ ॥

न्यायवार्त्तिकतात्पर्यटीका

अर्थापत्तितः प्रतिपक्षसिद्धेरर्थापत्तिसमः (सू २१)॥ उदाहरणपुरःसरं सूत्रं योजयति—अनित्यः शब्द इति। अनित्यसाधर्म्यादनित्यं शब्दं ब्रुवाणो भवाननक्षरं नित्य-साधर्म्यान्नित्यत्वं शब्दस्य ब्रूत इत्यर्थः। न साधर्म्यसमादौ वाद्यभिप्रायवर्णनमित्यतो भेदः ॥२१॥

वृत्तिः

क्रमप्राप्तमहेतुसमं लक्षयति—(त्रैकाल्यासिद्धेर्हेतोरहेतुसमः)।

त्रैकाल्यं कार्यकालतत्पूर्वापरकालाः, तेन हेतोरसिद्धेः हेतुत्वासिद्धेः। अयमर्थः—दण्डादिकं घटादेर्न पूर्ववर्त्तितया कारणं तदानीं घटादेरभावात् कस्य कारणं स्यात्? अतएव न घटाद्युत्तरकालवर्त्तितयाऽपि, न वा समानकालवर्त्तितया, तुल्यकालवर्त्तिनोः सव्येतरविषाणयोरिवाविनिगमनापत्तेः। तथा च कालसम्बन्धखण्डनेनाहेतुतया प्रत्यवस्थान-महेतुसमः। कारणमात्रखण्डनेन ज्ञप्तिहेतोरपि खण्डनान्न तदसङ्ग्रहः(क)। प्रतिकूलतर्क-देशनाभासा चेयम् ॥ १८ ॥

अत्रोत्तरमाह—(न हेतुतः साध्यसिद्धेस्त्रैकाल्यासिद्धिः)।

त्रैकाल्यासिद्धिस्त्रैकाल्येन याऽसिद्धिरुक्ता सा न। कुत? हेतुतः साध्यसिद्धे-स्त्वयाऽप्युपगमात् ॥ १९ ॥

पूर्ववर्त्तितामात्रेणैव हेतुतासम्भवात्, अन्यथा त्वदीयहेतोरपि साध्यं न सिद्ध्येदित्याह—(प्रतिषेधानुपपत्तेश्च प्रतिषेद्धव्याप्रतिषेधः)।

हेतुफलभावखण्डने प्रतिषेधस्याप्यनुपपत्तेः प्रतिषेद्धव्यस्य परकीयहेतोर्न प्रतिषेध इत्यर्थः ॥ २० ॥

इति अहेतुसमप्रकरणम्।

---

(१) अयमंशः टि-पु० नास्ति। (२) 'अस्ति त्वस्य'—इति ज-ग-ल०। (३) 'नित्यसाधर्म्यम्'—इति टि०। (क) "कृतिज्ञप्तिसाधारणीयं जातिः।" "इयं प्रतिकूलतर्कदेशनाभासा;—पूर्वभावे हि तदसाधनत्वप्रसङ्गः, पश्चाद्भावे हि तदसाध्यत्वप्रसङ्गः, सहभावे साध्यसाधनभावाभावप्रसङ्ग इति प्रतिकूल-तर्काभावोक्ति-पर्य्यवसानात्" इत्याचार्य्याः।

न्यायभाष्यम्

अस्योत्तरम्—

अनुक्तस्यार्थापत्तेः पक्षहानेरुपपत्तिरनुक्तत्वाद(१)नैकान्तिकत्वा(१*)च्चार्थापत्तेः ॥ २२ ॥

अनुपपाद्य सामर्थ्यमनुक्तमर्थादापद्यते इति ब्रुवतः पक्षहानेरुपपत्तिरनुक्तत्वात्, अनित्यपक्षसिद्धावर्थादापन्नं नित्यपक्षस्य हानिरिति। अनैकान्तिकत्वाच्चार्थापत्तेः।

न्यायवार्त्तिकम्

अनुक्तस्यार्थापत्तेः पक्षहानेरुपपत्तिरनुक्तत्वादनैकान्तिकत्वाच्चार्थापत्तेः। अनुपपाद्य सामर्थ्यमर्थादापद्यत इति ब्रुवाणः पक्षं द्यापयति। किं कारणम्? सामर्थ्यस्यानुक्तत्वात्। एवं च पक्षहानेरुपपत्तिः। अनैकान्तिकत्वाच्चार्थापत्तेः पूर्वसूत्रव्याघातः—यदुक्तं—नानैकान्तिकत्व-'मनर्थापत्तावर्थापत्त्यभिमाना'दिति, (२।२।४ सूत्रे) तद्व्याहन्यते। नास्ति व्याघातः,

न्यायवार्त्तिकतात्पर्यटीका

अस्य प्रत्यादेशसूत्रम्—

अनुक्तस्यार्थापत्तेः पक्षहानेरुपपत्तिरनुक्तत्वादनैकान्तिकत्वाच्चार्थापत्तेः (सू २२) ॥ तद्व्याचष्टे—अनुपपाद्य सामर्थ्यमिति। तदेव खल्वनुक्तं वचनाल्लभ्यते यत्कल्पनमन्तरेण वचनार्थो न घटते, यथा पीनो देवदत्तो दिवा न भुङ्क्त इत्युक्ते रात्रौ भुङ्क्त इति; यथा वा यागेन स्वर्गं भावयेदित्युक्तेऽन्तराऽपूर्वं कृत्वेति, वाक्यार्थोपपादने तस्य सामर्थ्यात्। न त्वव्यभिचारिणः साधर्म्यात्साध्ये साध्यमानेऽर्थादुक्तं भवति व्यभिचारिणाऽपि साधर्म्येण साधयितव्यमिति, तस्य वाक्यार्थोपपादनेऽसामर्थ्यात, तदन्तरेण वाक्यार्थोपपत्तेः। यदि पुनरनुपलब्धसामर्थ्यमनुक्तमपि गम्येत, ततस्त्वया नित्यत्वापादने शब्दस्योच्यमानेऽनुच्यमानमनित्यत्वं प्रत्येतव्यम्। तथा च भवदभिमतस्य नित्यत्वस्य व्यावृत्तिः। तदिदमाह—अनित्यपक्षस्य अनुक्तस्य सिद्धावर्थादापन्नं

वृत्तिः

क्रमप्राप्तमर्थापत्तिसमं लक्षयति—(अर्थापत्तितः प्रतिपक्षसिद्धेरर्थापत्तिसमः)।

(क)अर्थापत्तिरर्थापत्त्याभासः। तथा चार्थापत्त्याभासेन प्रतिपक्षसाधनाय प्रत्यवस्थानमर्थापत्तिसमः। अयमाशयः—अर्थापत्तिर्हि उक्तेनानुक्तमाक्षिपति, तथा च शब्दोऽनित्य इत्युक्तेऽर्थादापद्यतेऽन्यन्नित्यं, तथा च दृष्टान्तासिद्धिर्विरोधश्च। कृतकत्वादनित्य इत्युक्तेऽर्थादापन्नमन्यस्माद्धेतोर्नित्य इति बाधः सत्प्रतिपक्षो वा, अनुमानादनित्य इत्युक्ते प्रत्यक्षान्नित्य इति च बाधः। विशेषविधेः शेषनिषेधफलकत्वमित्यभिमानः। सर्वदोषदेशनाभासा चेयम् ॥ २१ ॥

---

(१) —'दनैकत्वा'—इति टि०। (क) अर्थापत्तेः प्रमाणान्तःपातित्वेन तया प्रत्यवस्थानं न जातिरपि तु सदुत्तरमेवेत्यत आह—'अर्थापत्त्याभास' इति। अतएवाह वरदराजः—"उक्तविपरीताक्षेपशक्तिरर्थापत्तिः, ततस्तदाभासो लक्ष्यत" इति। आपाद्यापादकयोर्व्याप्तिविरहेऽपि यदि भ्रमात् कश्चिदर्थान्तरं प्रतिपद्यते, तदा तस्य अनर्थापत्तावर्थापत्त्यभिमानात् अर्थापत्त्याभासो भवति। यथा—'नीलो घट' इति वाक्यात् यदि कश्चित् सर्वमन्यदनीलमिति प्रतिपद्यते, तत्रार्थापत्त्याभासः।

न्यायभाष्यम्

उभयपक्षसमा चेयमर्थापत्तिः। यदि नित्यसाधर्म्यादस्पर्शत्वादाकाशवच्च नित्यः शब्दः अर्थादापन्नमनित्यसाधर्म्यात् प्रयत्नानन्तरीयकत्वादनित्य इति। न चेयं विपर्यय मात्रादेकान्तेनार्थापत्तिः। न खलु वै घनस्य (१)ग्राव्णः पतनमित्यर्थादापद्यते—द्रवाणामपां पतनाभाव इति ॥ २२ ॥

एकधर्मोपपत्ते(२)रविशेषे सर्वाविशेषप्रसङ्गात्(२*)सद्भावो-पपत्तेरविशेषसमः(क) ॥ २३ ॥

एको धर्मः प्रयत्नानन्तरीयकत्वं शब्दघटयोरुपपद्यत इत्यविशेषे उभयोरनित्यत्वे,

न्यायवार्त्तिकम्

सन्निधिविशिष्टाया अनैकान्तिकत्वाभ्युपगमात्—येयं सूत्रेणोपात्ता साऽनैकान्तिकी, नार्थापत्ति-मात्रं, यथानुमानं व्यभिचारि यत् तदप्रमाणं नेतरदिति; तथेहापीति ॥ २२ ॥

इति अर्थापत्तिसमप्रकरणम्।

एकधर्मोपपत्तेरविशेषे सर्वाविशेषप्रसङ्गात् सद्भावोपपत्तेरविशेषसमः। उदाहरणं भाष्ये। साधर्म्यसमातो न भिद्यते अविशेषसमः। कस्मात्?—साधर्म्यमात्रात् प्रवृत्तेर-

न्यायवार्त्तिकतात्पर्यटीका

नित्यपक्षस्य हानिरिति। विपर्ययेणापि प्रत्यवस्थानसंभवात्। अनैकान्तिकत्वमाह—उभयपक्षसमा चेयमिति। व्यभिचाराच्चानैकान्तिकत्वमाह—न चेयं विपर्ययमात्रादिति। न हि भोजननिषेधादेवाभोजनविपरीतं सर्वत्र कल्पते। घनत्वं हि ग्राव्णः पतनानुकूलगुरुत्वातिशय-सूचनार्थं, न त्वितरेषां पतनं वारयति। वार्त्तिकं सुबोधम् ॥ २२ ॥

एकधर्मोपपत्तेरविशेषे सर्वाविशेषप्रसङ्गात्सद्भावोपपत्तेरविशेषसमः (सू २३) ॥ यदि घटसाधर्म्यात्प्रयत्नानन्तरीयकत्वाद् घटेनाविशेषोऽनित्यत्वाख्यः शब्दस्य, सत्त्वात्साधर्म्यात् सर्वेषां सर्वाविशेषप्रसङ्गः, न त्वेवम्; यथा प्रयत्नानन्तरीयकत्वादपि साधर्म्यान्न शब्दघटयोर-

वृत्तिः

अत्रोत्तरम्—(अनुक्तस्यार्थापत्तेः पक्षहानेरुपपत्तिरनुक्तत्वादनैकान्तिकत्वाच्चार्थापत्तेः)।

किमुक्तेन अनुक्तं यत्किञ्चिदेवार्थादापद्यते? उक्तोपपादकं वा? आद्ये त्वत्पक्षहानि-रप्यापद्यतां, त्वयाऽनुक्तत्वात्। अन्त्ये एतस्या अर्थापत्तेरनैकान्तिकत्वम्, ऐकान्तिकत्वम् एकपक्षसाधकत्वं बलं तन्नास्ति, न हि अनित्य इत्यस्योपपादकं नित्यत्वमिति। न हि विशेषविधिमात्रं शेषनिषेधफलकमपि तु सति तात्पर्ये क्वचित्। न हि नीलो घट इत्युक्ते सर्वमन्यदनीलमिति क्वचित् प्रतिपद्यते ॥ २२ ॥

इति अर्थापत्तिसमप्रकरणम्।

---

(१) 'ग्राव्णां'—इति ग०। (२) —'रविशेषप्रसङ्गात्'—इति टि०। (क) "अविशेषस्तु एकलिङ्गधर्मस्यानेकाकारधर्मवत्त्वं वे" त्याचार्याः।

न्यायभाष्यम्

सर्वस्याविशेषः प्रसज्यते। (१)कथम्? सद्भावोपपत्तेः(१*)। एको धर्मः सद्भावः सर्वस्योपपद्यते, सद्भावोपपत्तेः सर्वाविशेषप्रसङ्गात् प्रत्यवस्थानमविशेषसमः ॥ २३ ॥

अस्योत्तरम्—

क्वचित्तद्धर्मो(२)पपत्तेः क्वचिच्चानुपपत्तेः(२*)प्रतिषेधाभावः ॥२४॥

यथा साध्यदृष्टान्तयो(३)रेकधर्मस्य प्रयत्नानन्तरीयकत्वस्योपपत्तेरनित्यत्वं धर्मान्तर(४)मविशेषः, नैवं(४*)सर्वभावानां सद्भावोपपत्तिनिमित्तं धर्मान्तरमस्ति, येनाविशेषः स्यात्।

अथ मतमनित्यत्वमेव धर्मान्तरं (५)सद्भावोपपत्तिनिमित्तं भावानां सर्वत्र स्यादिति, एवं खलु वै कल्प्यमाने अनित्याः सर्वे भावाः(६)सद्भावोपपत्तेरिति पक्षः प्राप्नोति। तत्र (७)प्रतिज्ञार्थव्यतिरिक्तमन्यदुदाहरणं(७*)नास्ति, अनुदाहरणश्च हेतुर्नास्तीति। प्रति-

न्यायवार्त्तिकम्

विशेषादिति चेत्? न, एकसमस्तभेदाद्भेदः—एकसाधर्म्यात् साधर्म्यसमा, समस्तसाधर्म्याद्विशेषसमेति ॥ २३ ॥

क्वचित् तद्धर्मोपपत्तेः क्वचिच्चानुपपत्तेः प्रतिषेधाभावः। क्वचित् साधर्म्यमुपलभ्यते क्वचिन्नेति सूत्रार्थः। अभ्युपगमाच्च विरोधः—सर्वभावानामनित्यत्वं प्रसञ्जयता अभ्यनुज्ञातं

न्यायवार्त्तिकतात्पर्यटीका

नित्यत्वमविशेष इति प्रतिषेधोऽविशेषसमः। अविशेष इत्यस्य विवरणमुभयोरनित्यत्व इति। देश्यं वार्त्तिकं—साधर्म्यसमातो न भिद्यत इति। परिहारवार्त्तिकं—नैकसमस्तेति ॥ २३ ॥

अस्य प्रत्यादेशसूत्रम्—

(८)क्वचित्तद्धर्मोपपत्तेः क्वचिच्चानुपपत्तेः प्रतिषेधाभावः (सू २४)॥ क्वचित्साधर्म्ये प्रयत्नानन्तरीयकत्वादौ सति शब्दादेर्घटादिना सह तद्धर्मस्य घटधर्मस्यानित्यत्वस्योपपत्तेः, क्वचित्साधर्म्ये शब्दस्य भावमात्रेण सह सत्त्वादौ भावमात्रधर्मस्यानुपपत्तेः प्रतिषेधाभाव इति योजना। एतदुक्तं भवति—अविनाभावसंपन्नं साधर्म्यं गमकं न तु साधर्म्यमात्रमिति। सद्भावोपपत्तिनिमित्तमिति सद्भावव्यापकमित्यर्थः। अत्रान्तरे वैनाशिकः सत्ताव्यापकमनित्यत्वं मन्वानो देशयति—अथ मतमनित्यत्वमेव धर्मान्तरमिति। निराकरोति—एवं खलु

(१) अयं भागः—टि० पु० नास्ति। (२) 'क्वचिद्धर्मानुपपत्तेः क्वचिच्चोपपत्तेः'—इति ज-ग-ल-झा०। 'क्वचिद्धर्मोपपत्तेः क्वचिच्चानुपपत्तेः—इति टि०। (३)—'रेकस्य धर्मस्य'—इति टि०। (४)—'मविशेषेण एवं'—इति ज०। '-मविशेषेण नैवं'—इति ल०। (५) 'सद्भावोपपत्तिरनिमित्तत्वं'—इति टि०। (६) 'सर्वसद्भावो'—इति टि०। (७) 'प्रतिज्ञातार्थातिरिक्तमुदाहरणम्'—इति टि०। (८) 'क्वचित्तद्धर्मानुपपत्तेः क्वचिच्चोपपत्तेः'—इति क-ख०। न्यायपरिशिष्टे, तार्किकरक्षायाम्, अन्वीक्षानयतत्त्वबोधेऽपीदृक् पाठः परिगृहीतः। तथापि टीकाकृद्व्याख्यानदर्शनात् वार्त्तिकादिस्वरसाच्च व्युत्क्रम्य परिगृहीतोऽयं पाठः।

न्यायभाष्यम्

श्चैकदेशस्य चोदाहरणत्वमनुपपन्नम्, न हि(१)साध्यमुदाहरणं भवति। (२)सतश्च नित्यानित्यभावात् (३)अनित्यत्वानुपपत्तिः। तस्मात् सद्भावोपपत्तेः सर्वाविशेष प्रसङ्ग इति निरभिधेयमेतद्वाक्यमिति। सर्वभावानां सद्भावोपपत्तेरनित्यत्वमिति ब्रुवताऽनुज्ञातं (४)शब्दस्यानित्यत्वं, तत्रानुपपन्नः(४*) प्रतिषेध इति ॥ २४ ॥

न्यायवार्त्तिकम्

शब्दस्यानित्यत्वं, व्यर्थं वा(५)सर्वभावग्रहणमिति। उक्तश्च विशेषोऽन्वयव्यतिरेकसम्पन्नो हेतुर्नोत्तर इति ॥ २४ ॥

इति अविशेषसमप्रकरणम्।

न्यायवार्त्तिकतात्पर्यटीका

वै कल्प्यमान इति। पूर्वपक्षोत्तरपक्षनिर्वाहस्तृतीये प्रपञ्चितः। अपि च—सन्तः केचन प्रमाणावधृतनित्यत्वाः, यथाऽऽकाशदिगात्मपरमाणवः; केचित्प्रमाणविनिश्चितानित्यभावाः, यथा घटादयः; तस्मात्सत्त्वमनैकान्तिकत्वादसाधकमित्याह—सतश्च नित्यानित्यभावादिति। अपि च यत्प्रतिषेधाय प्रसङ्गसाधनं तदेव प्रतिषेध्यं साधयति, न तु निषेधतीत्याह—सर्वभावानां सद्भावोपपत्तेरिति।

वार्तिकं—क्वचित्साधर्म्यमुपलभ्यत इति। व्याप्यतयेति शेषः। अथ शब्दवर्जमुच्यत इति तत्राह—व्यर्थं वा सर्वभावग्रहणम्। उक्तश्च विशेषोऽन्वयव्यतिरेकसंपन्नो हेतुरिति—प्रयत्नानन्तरीयकत्वं, न तु उत्तरः—सद्भावोपपत्तेरित्यन्वयव्यतिरेकसंपन्न इति ॥ २४ ॥

वृत्तिः

अविशेषसमं लक्षयति—(एकधर्मोपपत्तेरविशेषे सर्वाविशेषप्रसङ्गात्सद्भावोपपत्तेरविशेषसमः)।

एकस्य धर्मस्य कृतकत्वादेः शब्दे घटे चोपपत्तेः सत्त्वात् यदि शब्दघटयोरनित्यत्वेनाविशेष उच्यते, तदा सर्वेषामविशेषप्रसङ्गः। कुतः? सद्भावोपपत्तेः, सतः सन्मात्रस्य ये भावा धर्माः सत्त्वप्रमेयत्वादयस्तेषामुपपत्तेः सत्त्वात्। तथा च सर्वेषामभेदे पक्षाद्यविभागः, सर्वेषामेकजातीयत्वेऽवान्तरजात्युच्छेदः, सर्वेषामनित्यत्वे जात्यादिविलय इत्यादि। तथा च सन्मात्रवृत्तिधर्मेणाविशेषापादनमविशेषसमेति फलितम्। अत्र चाविशेषसम इति लक्ष्यनिर्देशः, सद्भावोपपत्तेः सर्वाविशेषप्रसङ्गादिति लक्षणं, शेषं व्युत्पादकम्। प्रतिकूलतर्कदेशनाभासा चेयम्(क) ॥ २३ ॥

---

(१) 'साध्यैकदेशः उदा'—इति टि०। (२) 'ततश्च'—इति ज-ग०। 'तच'—इति टि०। (३) 'सद्भावादनित्यत्वा'—इति टि०। (४) 'शब्दस्यानित्यत्वान्नानुपपन्नः'—इति टि०। (५) 'सर्वभावग्रहणमिति'—इति क०।
(क) असाधकत्वदेशनाभासेयमित्याचार्याः।

न्यायभाष्यम्

उभयकारणोपपत्तेरुपपत्तिसमः ॥ २५ ॥

यद्यनित्यत्वकारणमुपपद्यते शब्दस्येत्यनित्यः(१)शब्दो नित्यत्वकारणमप्युपपद्यते-ऽस्यास्पर्शत्वमिति नित्यत्वमप्युपपद्यते। उभयस्यानित्यत्वस्य नित्यत्वस्य च कारणोपपत्त्या प्रत्यवस्थानमुपपत्तिसमः ॥ २५ ॥

अस्योत्तरम्—

उपपत्तिकारणाभ्यनुज्ञानादप्रतिषेधः ॥ २६ ॥

(२)उभयकारणोपपत्तेरिति ब्रुवता नानित्यत्वकारणोपपत्तेरनित्यत्वं प्रतिषिध्यते, (३)यदि प्रतिषिध्यते नोभयकारणोपपत्तिः(३*)स्यात्। उभयकारणोपपत्तिवचनाद-नित्यत्वकारणोपपत्तिरभ्यनुज्ञायते, अभ्यनुज्ञानादनुपपन्नः प्रतिषेधः।

न्यायवार्त्तिकम्

उभयकारणोपपत्तेरुपपत्तिसमः। उदाहरणं भाष्ये। उपपत्तिसमा प्रकरणसमातो न भिद्यत इति?—तत्रापि नित्यानित्यकारणोपपत्तिरिहापीति? न, नित्यानित्यकारणस्यैकत्रोपपत्तेः—नित्यकारणं चानित्यकारणं चैकत्रोपपद्यत इत्युपपत्तिसमः, नित्यानित्यपक्षाभ्यां प्रत्यवस्थानात् प्रकरणसम इति भेदः ॥ २५ ॥

उपपत्तिकारणाभ्यनुज्ञानादप्रतिषेधः। विरोधः सूत्रार्थः। (४)नित्यत्वकारणमप्यस्योप-

न्यायवार्त्तिकतात्पर्यटीका

उभयकारणोपपत्तेरुपपत्तिसमः (सू २५) ॥ यद्यनित्यत्वकारणं प्रयत्नानन्तरीय-कत्वमुपपद्यते, तदस्ति शब्दस्येत्यनित्यः शब्द इति। प्रकरणसमायां जातौ पक्षप्रतिपक्षसाधनयोः समानबलत्वेऽपि प्रतिवादी स्वसाधनात्स्वपक्षसिद्ध्या वादिसाधनदूषणे प्रवर्त्तते, उपपत्तिसमायां तु स्वसाधनेनैवेति विशेषः ॥ २५ ॥

अस्य प्रत्यादेशसूत्रम्—

उपपत्तिकारणाभ्यनुज्ञानादप्रतिषेधः (सू २६) ॥ वाद्यभिमतस्य साधनस्योपपत्तौ

वृत्तिः

अत्रोत्तरमाह—(क्वचित्तद्धर्मोपपत्तेः क्वचिच्चानुपपत्तेः प्रतिषेधाभावः)।

तद्धर्मस्तस्य हेतोः धर्मो व्याप्त्यादिस्तस्य क्वचित् कृतकत्वादावुपपत्तेः सत्त्वात्, क्वचित्सत्त्वादौ अनुपपत्तेः अभावात्, त्वदुक्तस्य प्रतिषेधस्याभावोऽसम्भव इत्यर्थः ॥ २४ ॥

इति अविशेषसमप्रकरणम्।

---

(१) 'शब्दानित्यत्व'—इति टि०। (२) 'प्रतिषेध उभय'—इति टि०। (३) 'यदि प्रतिषिध्येत नैवं कारणोपपत्तिः'—इति टि०। (४) 'नित्यानित्यकारण'—इति क-धृतपाठान्तरम्।

न्यायभाष्यम्

व्याघातात्प्रतिषेध इति चेत्, समानो व्याघातः। एकस्य नित्यत्वानित्यत्वप्रसङ्गं व्याहतं ब्रुवतोक्तः प्रतिषेध इति चेत्? स्वपक्षपरपक्षयोः समानो व्याघातः, स च नैकतरस्य साधक इति ॥ २६ ॥

निर्दिष्टकारणाभावेऽप्युपलम्भादुपलब्धिसमः ॥ २७ ॥

(१)निर्दिष्टस्य प्रयत्नानन्तरीयकत्वस्यानित्यत्वकारणस्याभावेऽपि(क)वायुनोदनाद्

न्यायवार्त्तिकम्

पद्यते इति ब्रुवताऽभ्यनुज्ञातम् अनित्यत्वकारणमिति, तथा च विरोधादुत्तरपक्षोत्थानं न युक्तम् ॥२६॥

इति उपपत्तिसमप्रकरणम्।

निर्दिष्टकारणाभावेऽप्युपलम्भादुपलब्धिसमः। उदाहरणं भाष्ये। सर्वसाध्यारोपेणा-

न्यायवार्त्तिकतात्पर्यटीका

यत्कारणं, तस्य प्रतिवादिनाऽभ्यनुज्ञानादिति भावः। प्रकरणसमप्रत्याख्यानवदस्यापि प्रत्याख्यानं द्रष्टव्यम्। सुगमे भाष्यवार्त्तिके ॥ २६ ॥

निर्दिष्टकारणाभावेऽप्युपलम्भादुपलब्धिसमः (सू २७) ॥ अनित्यत्वकारणस्येति। ज्ञापकस्येत्यर्थः। ननु यद्वृत्तयोगप्राथम्ययोः साधनधर्मो विषयो न तु साध्यधर्मः, स हि तद्वृत्तयोगस्य विषयः; एवं प्रयुज्यते—यो यः प्रयत्नानन्तरीयकः स सर्वोऽनित्यः, अनेन हि प्रयत्नानन्तरीयकत्वमनित्यादन्यतो व्यावर्तितम्, अनित्यत्वं त्वनियतम्। *स यद्य-प्रयत्नानन्तरीयके शब्देऽन्यत्र वा भवेत्, कः प्रयत्नानन्तरीयकत्वस्यानित्यत्वनियमविरोधः? एवं हि स भवेद् यदि नित्योऽपि प्रयत्नानन्तरीयको दृश्येत, न त्वेवमस्ति। तस्मादुपलब्धिसमाया

वृत्तिः

उपपत्तिसमं लक्षयति—(उभयकारणोपपत्तेरुपपत्तिसमः)।

उभयं पक्षप्रतिपक्षौ, तयोः कारणस्य प्रमाणस्य उपपत्तेः सत्त्वात्। तथा च व्याप्तिम-पुरस्कृत्य यत्किञ्चिद्धर्मेण परपक्षदृष्टान्तेन स्वपक्षसाधनेन प्रत्यवस्थानमुपपत्तिसमः(ख)। यथा शब्दोऽनित्यः कृतकत्वादित्युक्ते,—यथा त्वत्पक्षेऽनित्यत्वे प्रमाणमस्ति, तथा मत्पक्षोऽपि सप्रमाणकः, (ग)त्वत्पक्षमत्पक्षान्यतरत्वात् त्वत्पक्षवत्। तथा च बाधः प्रतिरोधो वा। तद्देशनाभासा चेयम् ॥ २५ ॥

अत्रोत्तरमाह—(उपपत्तिकारणाभ्यनुज्ञानादप्रतिषेधः)।

अयं त्वदुक्तः प्रतिषेधो न सम्भवति। कुतः? मत्पक्षे उपपत्तिकारणस्य मत्पक्षसाधकप्रमाणस्य

---

(१) 'निर्दिष्टप्रयत्नेऽनन्त'—इति ज०। (क) नोदनाख्यसंयोगस्य शब्दाहेतुत्वेऽपि शाखाभङ्गे तस्य हेतुत्वं न विरुध्यते। प्रयोजकत्वं वा पञ्चम्यर्थः। (ख) "अस्मत्पक्षेऽपि किमपि प्रमाणमुपपत्स्यते। त्वत्पक्षवदिति प्राभिरुपपत्तिसमो मतः॥"—इति तार्किकरक्षा। (ग) "...वादिप्रतिवादिनोरन्यतरोक्तत्वात्, त्वत्पक्षमत्-पक्षयोरन्यतरत्वात्, प्रकृतसन्देहविषयत्वात्, विप्रतिपत्तिविषयत्वाद्वा त्वत्पक्षवत्। तथा च बाधः प्रतिरोधो वा।"—तार्किकरक्षा। * सः—अनित्यत्वाख्यः साध्यधर्मः।

न्यायभाष्यम्

वृक्षशाखाभङ्गजस्य शब्दस्यानित्यत्वमुपलभ्यते। निर्दिष्टस्य (१)साधनस्याभावेऽपि (२)साध्यधर्मोपलब्ध्या प्रत्यवस्थानमुपलब्धिसमः ॥ २७ ॥

न्यायवार्त्तिकम्

व्यापकत्वं साधनस्येत्युपलब्धिसमार्थः। सर्वमनित्यं सामान्यविशेषवतोऽस्मदादिबाह्यकरणप्रत्यक्षत्वेनाध्यारोप्याव्यापकत्वं हेतोः, न ह्ययं हेतुः सर्वस्मिन्ननित्ये द्व्यणुकादौ विद्यत इति। श्रूयमाण(३)प्रतिज्ञार्थाव्यापकत्वं वा(४)हेतोः। यथाऽनित्यः शब्दः शब्दान्तरोत्पादकत्वादिति, न शब्दान्तरोत्पादकत्वेन सर्वः शब्दो व्याप्यते। न ह्यन्त्यः शब्दः शब्दान्तरं करोति ॥ २७ ॥

न्यायवार्त्तिकतात्पर्यटीका

उत्थानमेव नास्ति, बीजाभावादित्यत आह वार्त्तिककारः—**सर्वसाध्यारोपेणाव्यापकत्वं साधनस्येत्युपलब्धिसमार्थः**। यद्यपि वर्णात्मकः शब्दोऽनित्यत्वेन साध्यतया विवक्षितः प्रकरणात्,—'अनित्यः शब्दः प्रयत्नानन्तरीयकत्वाद् घटव'दिति, तथाऽपि शब्दमात्रमनेन पक्षीकृतमित्यारोप्य भागासिद्धत्वारोपणं साधनस्येत्युपलब्धिसमार्थः। समारोपमेवोदाहरणान्तरेण दर्शयति—**सर्वमनित्यमिति**। 'शब्दोऽनित्य' इति प्रतिज्ञायामपि सर्वमनित्यमित्यारोप्येति योजना। भाष्यकारोदाहरणापरितोषश्चोदाहरणान्तरप्रदर्शनबीजम्। यस्त्वनित्यः शब्द इति प्रतिज्ञायां सर्वानित्यत्वारोपो निर्बीज इति न तुष्यति, तं प्रत्याह—**श्रूयमाणे**ति। यद्यप्यनित्यः शब्द इति श्रूयते, तथाऽपि सामर्थ्यादाद्य इति विवक्षितः। **शब्दान्तरोत्पादकत्वं** सजातीयोत्पादकत्वमिति। एवं च नायोगव्यवच्छेदेन शब्दानित्यत्वं हेतुरव्यापकत्वात्, नाप्यन्ययोगव्यवच्छेदेन, हेत्वन्तरस्य विद्यमानत्वादिति जातिवादिनोऽभिसंधिरिति ॥ २७ ॥

वृत्तिः

त्वयाऽभ्यनुज्ञानात्, त्वया हि मत्पक्षस्य दृष्टान्तीकरणेन सप्रमाणकत्वमनुज्ञातम्, अतः कथं तत्प्रतिषेधः शक्यते कर्त्तुम्? अनुज्ञातस्यापि प्रतिषेधे स्वपक्ष एव किं न प्रतिषिध्यते ॥२६॥

इति उपपत्तिसमप्रकरणम्।

उपलब्धिसमं लक्षयति—(निर्दिष्टकारणाभावेऽप्युपलम्भादुपलब्धिसमः)।

(क)वादिना निर्दिष्टस्य कारणस्य साधनस्याऽभावेऽपि साध्यस्योपलम्भात् प्रत्यवस्थानमुपलब्धिसम इत्यर्थः। तथा हि पर्वतो वह्निमान् धूमादित्यादिकं वह्न्यवधारणार्थमुच्यते, न च तत् सम्भवति, धूमं विना आलोकादितोऽपि वह्निसिद्धेः। तथा च न तस्य साधकत्वमिति प्रतिकूलतर्कः, न वा धूमाद्वह्निमानेवेत्यवधारणं द्रव्यत्वादेरपि धूमेन साधनात्, न वा पर्वत एव वह्निमानेवेत्यादिकमवधारयितुं शक्यते, महानसादेरपि वह्निमत्त्वात्, अन्यथा दृष्टान्तासिद्धिः स्यात्। एवं वह्निशून्यपर्वतस्यापि सत्त्वाद्बाध इत्यादि। तद्देशनाभासा चेयम् ॥ २७ ॥

---

(१) 'साधनधर्मकारणस्या'—इति टि०। (२) 'साध्यधर्मस्योप'—इति टि०। (३) 'प्रतिज्ञातार्थ'—इति क-धृतपाठान्तरम्। (४) 'हेतोः'—इति ख० पु० नास्ति। (क) "वादिना निर्दिष्टस्य प्रमित्यङ्गस्य व्यापारवतोऽभावेऽपि साध्यस्योपलम्भात् प्रत्यवस्थानमुपलब्धिसम इति सूत्रार्थ" इत्याचार्याः। (—न्यायपरिशिष्टम्)।

न्यायभाष्यम्

अस्योत्तरम्—

कारणान्तरादपि तद्धर्मोपपत्तेरप्रतिषेधः ॥ २८ ॥

प्रयत्नानन्तरीयकत्वादिति ब्रुवता कारणत उत्पत्तिरभिधीयते, (१)न कार्यस्य कारणनियमः। यदि च कारणान्तराद(२)प्युत्पद्यमानस्य शब्दस्य तदनित्यत्वमुपपद्यते, किमत्र प्रतिषिध्यत इति ॥ २८ ॥

न्यायवार्त्तिकम्

कारणान्तरादपि तद्धर्मोपपत्तेरप्रतिषेधः। अनित्यः शब्द इति ब्रुवता न साध्यान्तराणां कारणान्तरं प्रतिषिध्यते, न साध्यस्य कारणान्तरमिति।

अपरे तु परिहारान्तरं ब्रुवते—यदेव प्रयत्नानन्तरीयकं तदेव तस्मादनित्यमिति। एतत्तु नाविवादात्—यः प्रयत्नानन्तरीयकत्वं प्रतिपद्यते न तं प्रति किञ्चित् साध्यते,

न्यायवार्त्तिकतात्पर्यटीका

अस्य प्रत्याख्यानसूत्रम्—

कारणान्तरादपि तद्धर्मोपपत्तेरप्रतिषेधः (सू २८)॥ तद्व्याचष्टे—प्रयत्नानन्तरीयकत्वादिति ब्रुवतेति। कारणतः प्रयत्नाच्छब्दस्योत्पत्तिनियमो विधीयते वर्णानामनित्यत्वं साधयितुम्, न तु कार्यस्य कारणनियमः,—प्रयत्नादेव सर्वः शब्दो जायते न तु वायुसंयोगाद्वृक्षभङ्गादिति नियम उच्यते, येनाव्यापकत्वं हेतोः स्यादिति। (क)सूत्रार्थस्तु—'कारणान्तरादपि' ज्ञापकान्तरादपि 'तद्धर्मोपपत्तेः' साध्यधर्मोपपत्तेरप्रतिषेध इति।

एतदेव वार्त्तिककारो व्याचष्टे—अनित्यः शब्द इति ब्रुवता, प्रयत्नानन्तरीयकत्वेनेति शेषः। साध्यान्तराणां झञ्झाभङ्गजशब्दानां कारणमनित्यत्वज्ञापकं न प्रतिषिध्यते। यद्यपक्षीकृतानामपि कारणान्तरादनित्यत्वं भवति, कामं भवत्वित्यर्थः। नापि शब्दस्य साध्यस्यानित्यत्वे कारणान्तरं प्रत्ययभेदभेदित्वादि प्रतिषिध्यते।

एकदेशिमतमाह—अपरे तु(ख)परिहारं ब्रुवते यदेव प्रयत्नानन्तरीयकमिति। तदेतद् दूषयति—एतत्तु नाविवादादिति। अयमभिसंधिः—प्रयत्नानन्तरीयकत्वं हि कोष्ठ्यस्य वायोः क्रियायाः, सा हि प्रयत्नवदात्मसंयोगाज्जायते। वायोः पुनरुरःस्थानादिषु संयोगविभागादयो न प्रयत्नानन्तरीयकाः, प्रागेव तु शब्दः। यदा चाद्यशब्दस्येयं गतिस्तदा कैव कथा प्रयत्नानन्तरीयकत्वेऽन्त्यस्य श्रवणविवरसमवायिनः श्रूयमाणस्य शब्दस्य। तस्माद् यः प्रयत्नानन्तरीयकत्वं शब्दस्य विना प्रमाणेन प्रतिपद्यते, न तं प्रति किंचित्साध्यते प्रमाणेन। प्रमाणानधीनस्य प्रतिभासमात्रेण प्रमेयसिद्धेः सर्वत्र सुलभत्वादिति। तदनेनापरितोषबीजमुक्तम्। अभ्युपेत्य

(१) 'तेन'—इति टि०। (२) —'प्युपपद्यमानस्य'—इति ज-ग-ल०। (क) "…सूत्रार्थस्तु—कारणान्तरादपि प्रयोजकान्तरादपि तद्धर्मस्य साध्यादेस्तथादर्शनबलेनोपपत्तेर्न प्रतिरोध इति।" इति परिशिष्टप्रकाशे वर्द्धमानः। (ख) वार्त्तिके 'परिहारान्तर'मित्यक्षरविसंवादः।

न्यायभाष्यम्

न प्रागुच्चारणाद्विद्यमानस्य (१)शब्दस्यानुपलब्धिः, (२)कस्मात् ? आवरणाद्यनुपलब्धेः। यथा विद्यमानस्योदकादेरर्थस्याऽऽवरणादेरनुपलब्धिः(२*) नैवं शब्दस्याग्रहणकारणेनाऽऽवरणादिनाऽनुपलब्धिः। (३)गृह्येत चैतदस्याग्रहणकारणमुदकादिवत्, न गृह्यते। तस्मादुदकादिविपरीतः शब्दोऽनुपलभ्यमान इति।

तदनुपलब्धेरनुपलम्भादभावसिद्धौ तद्विपरीतोपपत्तेरनुपलब्धिसमः ॥ २९ ॥

तेषामावरणादीना(४)मनुपलब्धिर्नोपलभ्यते(४*)। अनुपलम्भान्नास्तीत्यभावोऽस्याः सिध्यति। अभावसिद्धौ हेत्वभावात्तद्विपरीतमस्तित्वमावरणादीनामवधार्यते। तद्विपरीतोपपत्तेर्यत्प्रतिज्ञातं "न प्रागुच्चारणाद्विद्यमानस्य शब्दस्यानुपलब्धिरित्ये"तन्न सिध्यति। सोऽयं हेतु'रावरणाद्यनुपलब्धे'रित्यावरणादिषु चाऽऽवरणाद्यनुपलब्धौ च समयानुपलब्ध्या प्रत्यवस्थितोऽनुपलब्धिसमो भवति ॥ २९ ॥

न्यायवार्त्तिकम्

यदा तु प्रयत्नानन्तरीयकत्वं वस्तुविशेषणं तदाऽन्यो हेतुर्वक्तव्यः। जातिलक्षणाभावान्नेयं जातिः ? न, अहेतुसामान्याज्जातिः ॥ २८ ॥

इत्युपलब्धिसमप्रकरणम्।

तदनुपलब्धेरनुपलम्भादभावसिद्धौ तद्विपरीतोपपत्तेरनुपलब्धिसमः। उदाहरणं भाष्ये। न, उक्तोत्तरत्वात्—द्वितीयाध्याये उक्तोत्तरमेतत् ॥ २९ ॥

न्यायवार्त्तिकतात्पर्यटीका

शब्दस्य प्रयत्नानन्तरीयकत्वमाह—यदा तु प्रयत्नानन्तरीयकत्वमिति। देशयति—जातीति। परिहरति—नेति ॥ २८ ॥

अनुपलब्धिसमस्य प्रतिषेधस्य लक्षणं दर्शयितुं तत्प्रतिषेध्यं तावदाह भाष्यकारः—न प्रागुच्चारणाद्विद्यमानस्यानुपलब्धिरिति(क)। तस्मादुदकादिवदावरणादिरस्यानुपलम्भकारणं भवतीत्यतआह—गृह्येत चैतदस्याग्रहणकारणमिति। प्रतिषेध्यमुक्त्वा प्रतिषेधस्य जातेर्लक्षणमाह—

तदनुपलब्धेरनुपलम्भादभावसिद्धौ तद्विपरीतोपपत्तेरनुपलब्धिसमः (सू २९) ॥ व्याचष्टे—तेषामावरणादीनामनुपलब्धिर्नोपपद्यते। उपलभ्यमानत्वे उपलब्धिरूपतया अनुपलब्धित्वानुपपत्तेः। तथा चानुपलब्धेरनुपलम्भादनुपलब्धिर्नास्तीत्यावरणाद्युपलब्धिसिद्धिरिति। आवरण इवावरणानुपलब्धिरप्यनुपलब्धिसमेत्यर्थः ॥ २९ ॥

---

(१) 'शब्दस्योपलब्धिरिति'—वि०। (२) इदं वि० पु० नास्ति। (३) 'गृह्यते'—इति ग०। (४) —'मनुपलम्भः'—इति टि०। (क) भाष्ये 'विद्यमानस्य शब्दस्ये'ति विशेषः।

न्यायभाष्यम्

अस्योत्तरम्—

अनुपलम्भात्मकत्वादनुपलब्धेरहेतुः ॥ ३० ॥

आवरणा(१)द्यनुपलब्धिर्नास्ति, अनुपलम्भादि(२)त्यहेतुः। कस्मात्? अनुपलम्भात्मकत्वादनुपलब्धेः। उपलम्भाभावमात्रत्वादनुपलब्धेः। यदस्ति तदुपलब्धेर्विषयः, उपलब्ध्या तदस्तीति(३)प्रतिज्ञायते। यन्नास्ति तदनुपलब्धेर्विषयः, (४)अनुपलभ्यमानं नास्तीति (५)प्रतिज्ञायते। सोऽयमावरणाद्यनुपलब्धेः (६)अनुपलम्भ उपलब्ध्यभावेऽनुपलब्धौ(६*) स्वविषये प्रवर्त्तमानो न (७)स्वविषयं प्रतिषेधति।

न्यायवार्त्तिकतात्पर्यटीका

अस्य प्रत्यादेशसूत्रम्—

अनुपलम्भात्मकत्वादनुपलब्धेरहेतुः (सू ३०)॥ आवरणाद्यनुपलब्धिरावरणादीनामभावं गमयति, न त्वात्मनोऽभावमावरणाद्युपलब्धिरूपम्। न ह्यसावनुपलब्धिरप्यात्मनः, येनात्माभावं गमयेत्। उपलब्धिरप्युपलभ्यविषया, नात्मविषया, किं पुनरनुपलब्धिः। तस्मादनुपलब्धिरुपलभ्याभावहेतुः, न हेतुरात्माभावस्य। तथा सति सैव न स्यादिति न स्यादुपलभ्याभावोऽपीत्यावरणं तदुपलब्धिश्च स्यादिति। तदिदमाह भाष्यकारः—अनुपलम्भादित्ययमहेतुरिति, कस्मात्? अनुपलम्भात्मकत्वादनुपलब्धेः।

एतद्व्याचष्टे—उपलम्भाभावमात्रत्वादिति। मात्रग्रहणेन जातिवाद्यभिमतात्माभावरूपतां व्यवच्छिनत्ति। नन्वियमनुपलब्धिर्भवतूपलम्भाभावो मा च भूदुपलभ्यस्य, किमायातमावरणाद्यभावस्येत्यत आह—यदस्ति तदुपलब्धेर्विषयः, उपलब्ध्या तदस्तीति विज्ञायते। न पुनरनुपलब्धेरनुपलम्भात्मतया तत्प्रतिज्ञेयमिति भावः। अनुपलब्धेः प्रज्ञेयमाह—यन्नास्ति (क)सोऽनुपलब्धेरिति। ननु ज्ञायतां किमेतावताऽपीत्यत आह—सोऽयमावरणाद्यनुपलब्धेरनुपलम्भ इति। त्वया हि जातिवादिना आवरणाद्यनुपलब्धेरनुपलम्भेनावरणोपलम्भमावरणं च प्रसञ्जयताऽनुपलम्भस्य स्वविषयालोपेन प्रत्यवस्थेयम्। एवं चेद् वरमस्यावरणतदुपलम्भौ विषयौ एवमनेन भावाभावबुद्धिव्यपदेशव्यवहाराः सकललोकयात्रावाहिनोऽनुकूलिता भवन्ति। तदिदमुक्तं—सोऽयमावरणाद्यनुपलब्धेरनुपलम्भ आवरणोपलम्भनिषेधविषयं प्रमाणमुपलब्ध्यभावेऽनुपलब्धौ स्वविषये प्रवर्त्तमानो न स्वविषयमनुपलब्धिं प्रतिषेधति अपि तूपलब्धिमेव।

(१) —'द्युपलब्धिः'—इति ग०। (२) —'त्ययमहेतुः'—इति टि०। (३) 'प्रज्ञायते'—इति टि०। (४) 'अनुपलभ्या अनुप'—इति टि०। (५) 'प्रज्ञायते'—इति टि०। (६) 'अनुपलम्भाभावोऽनुपलब्धौ'—इति ज-ग०। 'अनुपलम्भोऽनुपलब्धौ'—इति ल०। (७) 'स्वं विषयं'—इति फ-झा-ग०।

(क) "तदनुपलब्धे"रिति भाष्ये अक्षरविसंवादः।

न्यायभाष्यम्

अप्रतिषिद्धा चाऽऽवरणाद्यनुपलब्धिर्हेतुत्वाय कल्पते। (१)आवरणादीनि तु विद्यमानत्वादुपलब्धेर्विषयाः, तेषामुपलब्ध्या भवितव्यम्। यत्तानि नोपलभ्यन्ते(१*), तदुपलब्धेः स्वविषयप्रतिपादिकाया अभावाद् (२)अनुपलम्भा(३)दनुपलब्धेर्विषयो गम्यते—न सन्त्यावरणादीनि शब्दस्याग्रहण(४)कारणानीति(२*)। अनुपलम्भात्त्वनुपलब्धिः सिध्यति, विषयः स तस्येति॥ ३०॥

न्यायवार्त्तिकतात्पर्यटीका

जातिवादिनस्तु निषेध्येत, तथा च सर्वलोकव्यवहारः समुच्छिद्येतेति भावः। अप्रतिषिद्धा चावरणाद्यनुपलब्धिः आवरणादीनामभावं प्रति हेतुत्वाय कल्पते। ननु च नानुपलम्भमात्रमभावग्रहहेतुः, मा भूच्चन्द्रमसः परभागे हरिणसदसद्भावसंशय इत्यत आह—आवरणादीनि त्विति। (५)उपलभ्यं वोपलब्धिर्वा नानुपलम्भमात्रान्नास्तीति सिध्यति,अपि तु दर्शनयोग्यं सदिति नातिप्रसङ्ग इत्यर्थः। ननूपलब्धेः स्वविषयस्य प्रतिपादिकाया अभावादावरणादयो मा नामोपलभ्यन्ताम्, अभावस्तु तेषां कुतस्त्य इत्यत आह—अनुपलम्भात् प्रतिषेधकात्प्रमाणादनुपलब्धेर्यो विषयः उपलभ्याभावः, स गम्यते—न सन्त्यावरणादीनि शब्दस्याग्रहकारणानीति। तत्किमिदानीं साक्षादेवोपलम्भनिषेधकं प्रमाणमुपलभ्याभावं गमयति? नेत्याह—अनुपलम्भात्तु उपलब्धिनिषेधकात्प्रमाणादनुपलब्धिरावरणस्य सिध्यति। कस्मादित्यत आह—विषयः स तस्य उपलब्धिनिषेधकस्य प्रमाणस्यानुपलब्धिः, ततश्चावरणाद्यभाव इति द्रष्टव्यम्॥ ३०॥

वृत्तिः

अत्रोत्तरमाह—(कारणान्तरादपि तद्धर्मोपपत्तेरप्रतिषेधः)।

कारणान्तरात् साधनान्तरादालोकादितोऽपि तस्य धर्मस्य साध्यस्योपलब्धेस्त्वदुक्तः प्रतिषेधो न सम्भवति। अयमाशयः—न हि वयमवधारणार्थं वह्निमान् धूमादित्यादिकं प्रयुञ्ज्महे, अपि तु सन्दिग्धस्य वह्नेः सिद्ध्यर्थम्। अन्यथा त्वदुक्तमसाधकतासाधनमपि न स्यादसाधकतासाधकान्तरस्यापि सत्त्वात्॥ २८॥

इति उपलब्धिसमप्रकरणम्।

अनुपलब्धिसमं लक्षयति—(तदनुपलब्धेरनुपलम्भादभावसिद्धौ तद्विपरीतोपपत्तेरनुपलब्धिसमः)।

यद्यपि चेयं द्वितीयाध्याये दर्शिता दूषिता च, तथाऽप्यनुपलब्धिसमा जातिरेवमिति तत्रानुक्तेरत्र क्रमप्राप्ताऽभिधीयते। तत्राऽयं क्रमः—नैयायिकैस्तावच्छब्दानित्यत्वमेवं

(१) इदं टि-पु० नास्ति। (२) इदं वि-पु० नास्ति। (३) —'दभावोऽनुप'—इति टि०। (४) —'कारणादीनीति'—इति टि०। (५) 'उपलभ्ययोर्वोप'—इति क०।

न्यायभाष्यम्

ज्ञानविकल्पानां च भावाभावसंवेदनादध्यात्मम् ॥३१॥

अहेतुरिति वर्त्तते। शरीरे(१)शरीरे ज्ञानविकल्पानां भावाभावौ संवेदनीयौ। अस्ति मे संशयज्ञानं नास्ति मे संशयज्ञानमिति। एवं प्रत्यक्षानुमानागमस्मृतिज्ञानेषु। सेयमावरणाद्यनुपलब्धिरुपलब्ध्यभावः स्वसंवेद्यः— नास्ति मे शब्दस्याऽऽवरणाद्युपलब्धिरिति, नोपलभ्यन्ते शब्दस्याग्रहणकारणान्यावरणादीनीति। तत्र यदुक्तं तदनुपलब्धेरनुपलम्भादभावसिद्धिरिति, एतन्नोपपद्यते ॥ ३१ ॥

न्यायवार्त्तिकम्

अनुपलम्भात्मकत्वादनुपलब्धेरहेतुः। ज्ञानविकल्पानां च भावाभावसंवेदनादध्यात्मम्। आवरणाद्यसम्भवे (२)सत्त्वाभ्युपगमे च सत्यनुपलब्धेरिति प्रयोगः। एवं च सति न हेत्वन्तरं नानैकान्तिकं विपक्षावृत्तित्वात्। आवरणाद्यसम्भवे सत्त्वाभ्युपगमे विपर्ययस्याव्यभिचारान्नार्थापत्तिसमेति ॥ ३०-३१ ॥

इति अनुपलब्धिसमप्रकरणम्।

न्यायवार्त्तिकतात्पर्यटीका

न केवलं निषेधविषयप्रमाणगम्यताऽनुपलब्धेरुपपत्तिगम्या, अपि तु सर्वजनप्रत्यात्मवेदनीयेत्याह सूत्रकारः—

ज्ञानविकल्पानां च भावाभावसंवेदनादध्यात्मम् (सू ३१) ॥ व्याचष्टे—अहेतुरिति वर्तते। शरीरे शरीर इति। प्रागुच्चारणाच् शब्दस्यानुपलब्धेरसत्त्वे साध्यमानेऽनैकान्तिकत्वं स्यात्, यदि तु पश्चाद्विशिष्येत—'आवरणाद्यसंभवे सती'ति, ततो हेत्वन्तरं नाम निग्रहस्थानं स्यादित्याशङ्क्य वार्तिककार आह—आवरणाद्यसंभवे सत्त्वाभ्युपगमे च सत्यनुपलब्धेरिति प्रयोगः। सत्त्वाभ्युपगमे चेत्यस्योपादानप्रयोजनमाह—आवरणाद्यसंभवे सत्त्वाभ्युपगमे विपर्ययस्याव्यभिचारान्नार्थापत्तिसमः। अयमर्थः— यद्यावरणाद्यसंभवे सत्यनुपलब्धेरित्युच्यमाने कश्चिदर्थापत्तिसमया जात्या प्रत्यवतिष्ठते—(३)आवरणाद्यसंभवे सत्यनुपलब्धेरित्युच्यमाने अर्थादापतितमावरणादिसंभवे सत्युपलब्धेरिति। यदा तु सत्त्वाद्यभ्युपगम इति(४)विषयविपर्ययः सूच्यते, तदा आवरणाद्यसंभवे सत्यनुपलब्धेरसत्त्वमित्यस्य विपर्यय एवं प्रयोक्तव्यः—सत्त्वोपगमे चावरणाद्यसंभवे सत्युपलभ्येतेति। अस्य विपर्ययस्याव्यभिचारान्नार्थापत्तिसम इत्यर्थः ॥ ३१ ॥

वृत्तिः

साध्यते,—यदि शब्दो नित्यः स्यादुच्चारणात् प्राक् कुतो नोपलभ्यते ? न हि घटाद्यावरणकुड्यादिवच्छब्दस्याऽऽवरणमस्ति, तदनुपलब्धेरिति। तत्रैवं जातिवादी प्रत्यवतिष्ठते—

(१) 'शरीरिणां'—इति ज-ग-ल-भा०। (२) —'ऽसत्त्वाभ्युपगमे'—इति ख०। (३) 'आवरणासम्भवे'—इति क०। (४) 'विपर्ययः'—इति क०।

न्यायभाष्यम्

साधर्म्यात्तुल्यधर्मोपपत्तेः सर्वानित्यत्वप्रसङ्गादनित्यसमः ॥ ३२ ॥

अनित्येन घटेन साधर्म्यादनित्यः शब्द इति ब्रुवतोऽस्ति घटेनानित्येन सर्वभावानां साधर्म्यमिति सर्वस्यानित्यत्वमनिष्टं (१)सम्पद्यते। सोऽयमनित्यत्वेन प्रत्यवस्थानादनित्यसम इति ॥ ३२ ॥

न्यायवार्त्तिकम्

साधर्म्यात् तुल्यधर्मोपपत्तेः सर्वानित्यत्वप्रसङ्गादनित्यसमः। **सर्वमनित्यं प्राप्नोतीत्युदाहरणं भाष्ये। अविशेषसमातोऽनित्यसमा न भिद्यते, तत्रापि सर्वाविशेष इहापीति? भिद्यते,—तत्र सर्वाविशेष इह सर्वानित्यत्वमिति(क) ॥ ३२ ॥**

न्यायवार्त्तिकतात्पर्यटीका

साधर्म्यात्तुल्यधर्मोपपत्तेः सर्वानित्यत्वप्रसङ्गादनित्यसमः (सू ३२)॥ **अस्ति घटेनानित्येन सर्वभावानां सत्त्वं साधर्म्यमिति।**

वृत्तिः

यद्यावरणानुपलब्धेरावरणाभावः सिध्यति, तदाऽऽवरणानुपलब्धेरप्यनुपलम्भादावरणानुपलब्धेरप्यभावः सिध्येत्। तथा च (२)अनुपलब्धिप्रमाणक आवरणाभावो न स्यादपि त्वावरणोपपत्तिरेव स्यादिति शब्दनित्यत्वे नोक्तं बाधकं युक्तम्।

नन्वनुपलब्धेरनुपलब्ध्यन्तरानपेक्षणात् कथमेवमिति चेत्? इत्थम्। अनुपलब्धेरनुपलब्ध्यन्तरानपेक्षणे स्वयमेव स्वस्मिन्ननुपलब्धिरूपेति वाच्यम्, तथा च तयैवानुपलब्ध्याऽनुपलब्धत्वसम्भवात्तदभावसिद्धेः, स्वात्मन्यनुपलब्धिरूपत्वाभावेऽनुपलब्धित्वमेव न स्यात्। अनुपलब्धेरनुपलब्ध्यन्तरापेक्षणेऽनवस्था स्पष्टैव। इत्थं चैवंरूपेण प्रत्यवस्थानमनुपलब्धिसम इत्यर्थः। प्रतिकूलतर्कदेशनाभासा चेयम् ॥ २९ ॥

अत्रोत्तरमाह—(अनुपलम्भात्मकत्वादनुपलब्धेरहेतुः)।

अनुपलब्धिः स्वात्मन्यनुपलब्धिरिति कोऽर्थः? स्वयमनुलब्धिरूपेति चेत्? भवत्येव। स्वविषयिण्यनुपलब्धिरिति चेत्? नेदं प्रसक्तम्, अनुपलब्धेरनुलम्भात्मकत्वात् उपलम्भाभावात्मकत्वात्, अभावस्य च निर्विषयकत्वात्। स्वात्मन्यनुपलब्धित्वाभावेऽनुपलब्धित्वमेव कथमस्या इति चेत्? कतमो विरोधः? न हि घटः स्वविषयो न भवतीति नायं घटः। आवरणाभावः कथमनुपलब्धिविषय इति चेत्? क एवमाह? किं त्वनुपलब्धिसहकृतेन्द्रियग्राह्यत्वादनुपलब्धिग्राह्य इत्युपचर्यते। अतस्तदनुपलब्धेरनुपलम्भादित्यादिकमहेतुः। अन्यथा त्वत्साधनमपि दोषानुपलब्धेरनुपलम्भात् सदोषमेव स्यादिति ॥ ३० ॥

---

(१) 'प्रसज्यते'—इति टि०। (२) 'आवरणानुपलब्धि'—इति भ०। (क) अविशेषसमाय पक्षादेरविशेषमात्रापादनात्, इह तु विपक्षस्य सपक्षत्वापादनाद् विशेषः। —इत्युदयनः।

न्यायभाष्यम्

अस्योत्तरम्—

साधर्म्यादसिद्धेः(१)प्रतिषेधासिद्धिः(२)प्रतिषेध्यसाधर्म्यात् ॥३३॥

प्रतिज्ञाद्यवयवयुक्तं वाक्यं(३)पक्षनिवर्तकं प्रतिपक्षलक्षणं प्रतिषेधः। तस्य पक्षेण प्रतिषेध्येन(४)साधर्म्यं प्रतिज्ञादियोगः। तद् यद्यनित्यसाधर्म्या(५)दनित्यत्वस्यासिद्धिः, साधर्म्यादसिद्धेः प्रतिषेधस्याप्यसिद्धिः, (६)प्रतिषेध्येन साधर्म्यादिति ॥ ३३ ॥

दृष्टान्ते च साध्यसाधनभावेन प्रज्ञातस्य धर्मस्य हेतुत्वात्तस्य चोभयथा(७)भावान्नाविशेषः ॥ ३४ ॥

दृष्टान्ते यः खलु धर्मः साध्यसाधनभावेन प्रज्ञायते, स हेतुत्वेनाभिधीयते। स

न्यायवार्त्तिकम्

साधर्म्यादसिद्धेः प्रतिषेधासिद्धिः प्रतिषेध्यसाधर्म्यात्(८)।

दृष्टान्ते च साध्यसाधनभावेन प्रज्ञातस्य धर्मस्य हेतुत्वात् तस्य चोभयथाभावान्नाविशेषः। प्रतिषेध्येन पक्षेण प्रतिषेधस्य प्रतिज्ञादियोगः सामान्यम्, तद् यदि (वादि)प्रतिषेध्यस्यानित्यत्वस्यासिद्धिर्घटादिसाधर्म्यात्,—ननु प्रतिषेधस्याप्यसिद्धिः, प्रतिषेध्येन प्रतिज्ञादियोगसामान्यादिति। नेयं साधर्म्यमात्रात् स्थापना, अपि तु दृष्टान्ते विशिष्टमन्वयव्यतिरेकिणं धर्म-

न्यायवार्त्तिकतात्पर्यटीका

अस्य प्रत्याख्यानसूत्रम्—

साधर्म्यादसिद्धेः प्रतिषेधासिद्धिः प्रतिषेध्यसाधर्म्याच्च(क) (सू ३३)॥

तदिदं जातिवादिना साम्यमापाद्य परमार्थप्रतिषेधमाह—

दृष्टान्ते च साध्यसाधनभावेन प्रज्ञातस्य धर्मस्य हेतुत्वात्तस्य चोभयथा

वृत्तिः

नन्वनुपलब्धेः स्वस्मिन्ननुपलब्धित्वाभावेऽनुपलब्धिरपि केन सिध्येदत आह—(ज्ञानविकल्पानां च भावाभावसंवेदनादध्यात्मम्)।

अध्यात्मम् आत्मन्यधि, ज्ञानविकल्पानां ज्ञानविशेषाणां भावाभावयोर्मनसा संवेदनात्, 'घटं साक्षात्करोमि', 'न साक्षात्करोमि', 'वह्निमनुमिनोमि', 'नानुमिनोमी'त्येवं ज्ञानविशेषतदभावानां मनसैव सुग्रहत्वादिति भावः ॥ ३१ ॥

इति अनुपलब्धिसमप्रकरणम्।

---

(१) 'प्रतिषेध्यसिद्धिः'—इति ग०। (२) 'प्रतिषेध्यसाधर्म्याच्च'—इति ज-ग-ल०। (३) 'पक्षनिवर्तकम्'—इति ज-ग-ल०। (४) 'सामर्थ्यं'—इति टि०। (५) —'दनित्यस्यासि'—इति टि०। —'दनित्यस्य सि'—इति वि०। (६) 'प्रतिषेधो न'—इति टि०। (७) 'भावान्न विशेषः'—इति टि०। (८) —'सामर्थ्या'दिति क-ख०। क-पुस्तकगतपाठान्तरं गृहीतम्। (क) अत्र 'च'कारोऽधिकः, टीकायां सूत्रस्यास्य व्याख्यानं नोपलभ्यते।

न्यायभाष्यम्

चोभयथा भवति,—केनचित्समानः, कुतश्चिद्विशिष्टः। सामान्यात्साधर्म्यं विशेषाच्च वैधर्म्यम्। एवं साधर्म्यविशेषो हेतुः, नाविशेषेण साधर्म्यमात्रं वैधर्म्यमात्रं वा। (१)साधर्म्यमात्रं वैधर्म्यमात्रं चाऽऽश्रित्य भवानाह—"साधर्म्यात्तुल्यधर्मोपपत्तेः सर्वानित्यत्वप्रसङ्गादनित्यसम"इति, एतदयुक्तमिति। अविशेषसमप्रतिषेधे च यदुक्तं तदपि वेदितव्यम् ॥ ३४ ॥

न्यायवार्त्तिकम्

मुपलभ्य तत्सामर्थ्यात्। न च प्रतिपक्षस्यैवंभूतो धर्म उपपद्यते, तस्मात् प्रतिषेधो नोपपद्यते इति। उक्तं चात्र "क्वचित् तद्धर्मानुपपत्तेः क्वचिच्चोपपत्तेः प्रतिषेधाभाव" इति। यच्चाविशेषसम उत्तरं तदिहापि द्रष्टव्यम्। नासाधनादिति चेत्—अथ मन्यसे न मया सर्वस्यानित्यत्वप्रसङ्गेन सर्वस्यानित्यत्वं साध्यते, अपि त्वेवं ब्रुवाणस्य सर्वस्यानित्यत्वं प्राप्नोतीति प्रसङ्गः क्रियते ? न, विशेषहेतूपपत्तेः—न मया साध्यसाधर्म्यमात्रेण साधनमुच्यते इत्यतो न सर्वानित्यत्वप्रसङ्गः। सर्वानित्यत्वसाधने प्रमाणाभावाच्च—न सर्वानित्यत्वप्रसाधकं प्रमाणमस्तीति। अथ सर्वमनित्यं सत्त्वादिति साधयेत् ? तस्यापि नान्वयो न व्यतिरेकः ॥३३-३४॥

इति अनित्यसमप्रकरणम्।

न्यायवार्त्तिकतात्पर्यटीका

भावाच्चाविशेषः (सू ३४)॥ साधर्म्यमात्रं चाश्रित्य साध्याविनाभावरहितमिति। देश्यवार्त्तिकम्—(क)अविशेषसमात इति। परिहरति—भिद्यत इति। यच्चाविशेषसम उत्तरमिति। सर्वानित्यत्वं हि प्रसञ्जयता न शब्दानित्यत्वं निषिद्धं भवतीति तत्रोक्तमित्यर्थः। अत्र शङ्कते—नासाधनादिति। परिहरति—न, विशेषहेतूपपत्तेरिति। सुगममन्यत् ॥३२-३४॥

वृत्तिः

अनित्यसमं लक्षयति - (साधर्म्यात्तुल्यधर्मोपपत्तेः सर्वानित्यत्वप्रसङ्गादनित्यसमः)।

यदि दृष्टान्तघटसाधर्म्यात् कृतकत्वात् तेन सह तुल्यधर्मतोपपद्यते इत्यतः शब्देऽनित्यत्वं साध्यते, तदा सर्वस्यैवानित्यत्वं स्यात्, सत्त्वादिरूपसाधर्म्यसम्भवात्। न चेदमर्थान्तरग्रस्तमिति वाच्यम्, सर्वस्यानित्यत्वे व्यतिरेकाग्रहादनुमानदूषणे तात्पर्यात्; परस्यान्वयव्यतिरेकिण एवानुमानत्वादित्याशयः। तथा च व्याप्तिमपुरस्कृत्य यत्किञ्चिद्दृष्टान्तसाधर्म्येण सर्वस्य(ख)साध्यवत्त्वापादनमनित्यसमा। साध्यपदादविशेषसमातो व्यवच्छेदः, तत्र सर्वाविशेष एवापाद्यते न तु सर्वस्य साध्यवत्त्वम्।

---

(१) इदं टि-पु० नास्ति। (क) इदं ३२शसूत्रीयं वार्त्तिकम्, टीकाकृता एतत्पर्यन्तं भाष्यं व्याख्याय वार्त्तिकव्याख्यानमारभ्यते। (ख) साध्यवत्त्वापादनमिति। अतएवाचार्याः—"अन्वर्थसंज्ञा तु साध्यधर्मसमेती"त्याहुः।

न्यायभाष्यम्

नित्यमनित्यभावादनित्ये नित्यत्वोपपत्तेर्नित्यसमः ॥ ३५ ॥

अनित्यः शब्द (१)इति प्रतिज्ञायते। तदनित्यत्वं किं शब्दे नित्यमथानित्यम् ? यदि तावत्सर्वदा भवति ? धर्मस्य सदा भावाद्धर्मिणोऽपि सदा भाव इति नित्यः शब्द इति(१*)। अथ न सर्वदा भवति ? अनित्यत्वस्याभावान्नित्यः शब्दः। एवं नित्यत्वेन प्रत्यवस्थानान्नित्यसमः ॥ ३५ ॥

न्यायवार्त्तिकम्

नित्यमनित्यभावादनित्ये नित्यत्वोपपत्तेर्नित्यसमः। अनित्यः शब्द इत्येतस्यां प्रतिज्ञायां प्रतिज्ञादिदोषोद्भावनद्वारिका जातिः—अनित्यः शब्द इत्यभिदधान एव भवान् शब्दस्य नित्यत्वं प्रतिजानीते। कथमिति ? यदनित्यत्वं तत् किं शब्दे नित्यमस्ति उत कदाचिद्भवतीति ? यदि नित्यं (क)धर्मनित्यत्वाद्धर्मिणोऽपि नित्यत्वम्। अथानित्यमनित्यत्वस्याभावान्नित्यः शब्द इति ॥ ३५ ॥

न्यायवार्त्तिकतात्पर्यटीका

नित्यमनित्यभावादनित्ये नित्यत्वोपपत्तेर्नित्यसमः (सू ३५) ॥ धर्मस्य सर्वदा भावाद्धर्मिणोऽपि सर्वदा भावः। न ह्यस्ति संभवः—(ख)सामान्यसमवायातिरिक्तधर्मा नित्याः, धर्मी वानित्य इति ॥ ३५ ॥

वृत्तिः

यत्तु अनित्यत्वेन समाऽनित्यसमेति भावप्रधानो निर्देशस्तथा च अन्वर्थलब्धमेव लक्षणमिति, तन्न ; वह्निमान् धूमादित्यादौ महानससाधर्म्यात् सत्त्वात् सर्वस्य वह्निमत्त्वं स्यादित्यस्या जात्यन्तरत्वापत्तेः।

आचार्य्यास्तु—साधर्म्यं वैधर्म्यस्याप्युपलक्षकम्, यथाऽऽकाशवैधर्म्यात् कृतकत्वाच्छब्दोऽनित्यस्तथाऽऽकाशवैधर्म्यादाकाशभिन्नत्वादितः सर्वमेवानित्यं स्याद्, इत्थं च लक्षणे यत्किञ्चिद्धर्मेणेत्येव वाच्यम्, इत्याहुः(ग)।

अत्र च वैधर्म्यस्य विपक्षावृत्तित्वान्न सर्वस्य साध्यवत्त्वापादनं किं त्वात्मादीनामप्यनित्यत्वं स्यादिति, तत्र चार्थान्तरमित्यवधेयम्। प्रतिकूलतर्कदेशनाभासा चेयम् ॥ ३२ ॥

अत्रोत्तरमाह—(साधर्म्यादसिद्धेः प्रतिषेधासिद्धिः प्रतिषेध्यसाधर्म्यात्*)।

यदि यत्किञ्चित्साधर्म्यात् सर्वस्य साध्यवत्त्वमापादयतस्तव साधर्म्यस्यासाधकत्वमभि-

---

(१) इदं टि-पु० नास्ति। (क) "अथानित्यता नित्यैव, तथापि धर्मस्य नित्यत्वात् तस्य च निराश्रयस्यानुपपत्तेः तदाश्रयभूतः शब्दोऽपि नित्यो भवेत्।" —इति न्यायकलिकायां (पृ०२०) जयन्तभट्टपादाः। (ख) घटत्वादेर्नित्यत्वेऽपि घटादिरूपो धर्मी अनित्यः सम्भवत्येवेति मनसिकृत्याह 'सामान्यसमवायातिरिक्ते'ति। (ग) न्यायपरिशिष्टे (६३पृ०) द्रष्टव्यम्। * अत्रापि 'च'-कारोऽधिकः क्वचिद् दृश्यते। स च हस्तिकृदसम्मत इति मत्या परित्यक्तः।

न्यायभाष्यम्

अस्योत्तरम्—

प्रतिषेध्ये नित्यमनित्यभावादनित्येऽनित्यत्वोपपत्तेः प्रतिषेधाभावः ॥ ३६ ॥

प्रतिषेध्ये शब्दे नित्यमनित्यत्वस्य भावादित्युच्यमानेऽनुज्ञातं शब्दस्यानित्यत्वम्, (१)अनित्यत्वोपपत्तेश्च 'नानित्यः शब्द' इति प्रतिषेधो नोपपद्यते। अथ नाभ्युपगम्यते, नित्यमनित्यत्वस्य भावादिति हेतुर्न भवतीति हेत्वभावात्प्रतिषेधानुपपत्तिरिति।

न्यायवार्त्तिकम्

प्रतिषेध्ये नित्यमनित्यभावादनित्येऽनित्यत्वोपपत्तेः प्रतिषेधाभावः। प्रतिषेध्ये नित्यमनित्यत्वमिति ब्रुवताऽभ्यनुज्ञातमनित्यत्वम्। अभ्यनुज्ञानाच्चासमर्थः प्रतिषेध इति। अथ नाभ्यनुज्ञायते ? नित्यमनित्यभावान्नित्यः शब्द इति हेतुर्नोपपद्यते, हेत्वनुपपत्तेरनर्थकः

न्यायवार्त्तिकतात्पर्यटीका

अस्य प्रत्यादेशसूत्रम्—

प्रतिषेध्ये नित्यमनित्यभावादनित्येऽनित्यत्वोपपत्तेः प्रतिषेधाभावः (सू ३६)॥ नित्यमनित्यभावादिति हेतोरभ्युपगमेऽनभ्युपगमे च दोष इत्यर्थः। उत्पन्नस्य निरोधाद्-

वृत्तिः

मतं, तदा त्वत्कृतप्रतिषेधस्याऽप्यसिद्धिः, तस्यापि प्रतिषेध्यसाधर्म्येण प्रवृत्तत्वात्। त्वया ह्येवं साध्यते—कृतकत्वं न साधकं दृष्टान्तसाधर्म्यरूपत्वात्, सत्त्वादिवत्, अयं च त्वदीयो हेतुः त्वत्प्रतिषेध्येन मदीयहेतुना कृतकत्वेन सत्त्वेन च सह साधर्म्यरूपस्तथा चायमपि न साधकः स्यात् ॥ ३३ ॥

यदि च साधर्म्यमात्रं न साधकमपि तु व्याप्तिसहितमित्यभिमतं, तदा कृतकत्वे तदस्ति, न तु सत्त्वे इति विशेष इत्याह—(दृष्टान्ते च साध्यसाधनभावेन प्रज्ञातस्य धर्मस्य हेतुत्वात् तस्य चोभयथाभावान्नाविशेषः)।

साध्यसाधनभावेन व्याप्यव्यापकभावेन दृष्टान्ते प्रज्ञातस्य प्रमितस्य धर्मस्य कृतकत्वस्य हेतुत्वात् साधकत्वात् तस्य हेतुत्वस्य उभयथा अन्वयेन व्यतिरेकेण च भावात् मदीयहेतौ सत्त्वात्, 'सत्त्वादिनाऽविशेष' इति यदुक्तं तन्न भवति ॥ ३४ ॥

इति अनित्यसमप्रकरणम्।

नित्यसमं लक्षयति—(नित्यमनित्यभावादनित्ये नित्यत्वोपपत्तेर्नित्यसमः)। अनित्यस्य भावः अनित्यत्वं, तस्य नित्यं सर्वकालं स्वीकारे अनित्ये शब्दे नित्यत्वं

(१) 'अनित्येऽनित्यत्वोप'—इति ल०।

न्यायभाष्यम्

उत्पन्नस्य निरोधादभावः शब्दस्यानित्यत्वं, तत्र परिप्रश्नानुपपत्तिः। (१)योऽयं परिप्रश्नः—(२)तदनित्यत्वं किं शब्दे सर्वदा भवति अथ (३)नेति, अयमनुपपन्नः। कस्मात्? उत्पन्नस्य यो निरोधादभावः शब्दस्य तदनित्यत्वम्(४); (५)एवं च सत्यधिकरणाधेयविभागो व्याघातान्नास्तीति। नित्यानित्यत्वविरोधाच्च। नित्यत्वमनित्यत्वं च

न्यायवार्त्तिकम्

प्रतिषेधः। प्रश्नानुपपत्तिश्च; पृथग्धर्मत्वेनानित्यत्वस्यानभ्युपगमात्। अपि चानात्यन्तिकसत्तायोगोऽनित्यत्वमित्युक्ते न युक्तः प्रश्नः—किमयमत्यन्तं भवति उत नात्यन्तमिति। आत्यन्तिका-

न्यायवार्त्तिकतात्पर्यटीका

भावः शब्दस्यानित्यत्वम्। तत्र च परिप्रश्नानुपपत्तिः। यदि(६)हि निरोधकादभावोऽनित्यत्वं तथाऽपि प्रश्नानुपपत्तिः। अथाप्यस्मन्मते समवायः, तथाऽपि तदनुपपत्तिः। अनित्यत्वं हि शब्दस्यापरान्तावच्छिन्नसत्तासमवायः। न चासौ शब्दाधेयस्तस्य स्वतन्त्रत्वादेवेत्यर्थः।

वार्त्तिकम्—पृथग्धर्मत्वेनानित्यत्वस्यानभ्युपगमादिति। अनात्यन्तिकसत्तासमवायो ह्यनित्यता, न चासौ समवायात्पृथग्धर्मो न च समवायोऽपि धर्मोऽनाश्रितत्वात्, पारतन्त्र्येण तु निरूपणात् कथंचिद्धर्मीत्युच्यत इति। अपि चानात्यन्तिकसत्तायोगोऽनित्यतेत्युक्ते न युक्तः प्रश्न इति। न हि घटमानयेति प्रेषितः परिवृत्य पृच्छति—किं घट आनेतव्य उत पट इति,

वृत्तिः

स्यादित्यापादनं नित्यसमा(क)। अयमाशयः—अनित्यत्वस्य नित्यत्वास्वीकारेऽनित्यत्वाभावदशायां तस्यानित्यत्वं न स्यात्—तस्यापि नित्यत्वापत्तिः। न हि दण्डाभावदशायां दण्डीत्युच्यते। अतोऽनित्यत्वं नित्यमेवास्तीत्यभ्युपगन्तव्यम्; तथा च शब्दस्यापि नित्यत्वापत्तिः। तेन बाधः सत्प्रतिपक्षो वा, तद्देशनाभासा चेयम्।

एवमनित्यत्वं यदि नित्यं? कथं शब्दस्यानित्यतां कुर्यात्? न हि रक्तं महारजनं पटस्य नीलतां सम्पादयति। अथानित्यम्? तदा तदभावदशायामनित्यत्वं न स्यादित्यादिकमूह्यम्। एतदनुसारेण लक्षणमपि कार्यम्, इत्याचार्याः(७)।

वयं तु—अनित्यस्य भावो धर्मस्तस्य नित्यमभ्युपगमेऽनित्यत्वेनाभ्युपगतस्य नित्यत्वं स्यात्, यथा—क्षितिः सकर्तृकेत्यत्र अनित्यक्षितेर्धर्मः सकर्तृकत्वं त्वया क्षितौ नित्यमुपेयते न वा, न चेत्? तदा साध्याभावादंशतो बाधः, अथ क्षितौ नित्यमेव सकर्तृकत्वम् (८)उपेयते? तदा क्षितेर्नित्यत्वं स्यादिति(८*) सकर्तृकत्वं विरुद्धम्। तद्देशनाभासा चेयमिति ब्रूमः॥ ३५॥

---

(१) —'सोऽयं प्रश्नः'—इति ज-ग-ल-झा-फ०। टि-पु०पाठो गृहीतः। (२) 'तदा नित्यत्वं'—इति ज० वि०। (३) 'नेत्यनुपपन्नः'—इति ज-ग-ल झा-फ०। (४) 'इति' इत्यधिकं—टि०। (५) 'अत'—इति टि०। (६) 'हि' इति नास्ति क०। (क) ''विवक्षितधर्मस्य तदतद्रूपताविकल्पानुपपत्त्या धर्मिणस्तद्विशिष्टत्वखण्डनं नित्यसमा। इयञ्च संज्ञा…गौणी…अन्वर्था तूपरञ्जकधर्मस्य समेति।''—न्यायपरिशिष्टम्। (७) न्यायपरिशिष्टं (६६-६७पृ०) द्रष्टव्यम्। (८) अयमंशः भ-पु० नास्ति।

न्यायभाष्यम्

एकस्य धर्मिणो धर्माविति विरुध्येते, न सम्भवतः। तत्र यदुक्तं—नित्यमनित्यत्वस्य भावान्नित्य (१)एव, तदवर्तमानार्थमुक्तमिति(१*) ॥ ३६ ॥

प्रयत्नकार्यानेकत्वात्कार्यसमः ॥ ३७ ॥

प्रयत्नानन्तरीयकत्वादनित्यः शब्द इति। यस्य प्रयत्नानन्तरमात्मलाभः तत्खल्वभूत्वा भवति, यथा घटादिकार्यम्; अनित्यमिति च भूत्वा न भवतीत्येतद्विज्ञायते।

न्यायवार्त्तिकम्

नात्यन्तिकभावयोगश्चैकस्य न युक्तः। अनित्यता नित्येति ब्रुवता एकस्यात्यन्तिकसत्तायोगोऽनात्यन्तिकयोगश्चाभ्यनुज्ञायते, स चायं विरोधान्न युक्त इति। प्रतिषेध्यदोषोद्भावनाद् युक्त इति चेत्—अथ मन्यसे न मयैकस्य नित्यत्वमनित्यत्वं चाभ्युपगम्यते, अपि त्वनित्यः शब्द इति ब्रुवाणस्य भवतः स एव दोष इति? न, विकल्पानुपपत्तेः—नायं पक्षदोषो न साधनदोषः, पक्षदोषस्तावदयं न भवति, पक्षस्य तादवस्थ्यात्; न साधनस्य, प्रतिज्ञादिदोषाणामनुद्भावनात्, विरोधस्य चोक्तोत्तरत्वादिति ॥ ३६ ॥

इति नित्यसमप्रकरणम्।

प्रयत्नकार्यानेकत्वात् कार्यसमः। अनित्यः शब्दः प्रयत्नानन्तरीयकत्वादित्युक्ते जातिः कार्यसमा प्रयुज्यते—(क)प्रयत्नकार्यमनेकधा दृष्टमिति,—किञ्चित् प्रयत्नानन्तरं व्यज्यते, किञ्चित् प्रयत्नानन्तरमुत्पद्यते, प्रयत्नानन्तरमुपलब्धेर्हेतुत्वाध्यारोपेणानैकान्तिकदेशनात् कार्यसमः। 'कार्यः

न्यायवार्त्तिकतात्पर्यटीका

तादृशमेतदित्यर्थः। अपि चानित्यता नित्याऽनित्या वेति विकल्पो नावतरति, विरोधादित्यत आह—आत्यन्तिकानात्यन्तिकभावयोगश्चैकस्येति। शङ्कते—प्रतिषेध्येति। एवमभ्युपगच्छतोऽयं दोष इत्येतत्परमेतत्, न तु स्वपक्षोपवर्णनपरमेतदिति शङ्कार्थः। निराकरोति—न, विकल्पानुपपत्तेरिति। विरोधस्य चोक्तोत्तरत्वादिति। परिप्रश्नानुपपत्तेरित्युत्तरं विरोधस्योक्तमित्यर्थः ॥ ३६ ॥

प्रयत्नकार्यानेकत्वात्कार्यसमः (सू ३७)॥ उदाहरणपूर्वकमस्यार्थं व्याचष्टे—प्रयत्नानन्तरीयकत्वादनित्यः शब्द इति। कार्यत्वानित्यत्वे च परस्परासंकीर्णे प्रथम एवाध्याये

---

(१) 'इति एतद्विद्यमा(ना)र्थमयुक्तमिति'—इति टि०। (क) "प्रयत्नकार्यस्य वैरूप्यं दृष्टम्—किञ्चिदसदेव प्रयत्नेन निर्वर्त्यते, यथा घटादि; किञ्चित् सदेवावरणापनयनादिना प्रयत्नेनाभिव्यज्यते, यथा मृदन्तरितमुदकादि।". —न्यायकलिका (२१४०)।

न्यायभाष्यम्

एवमवस्थिते प्रयत्नकार्यानेकत्वादिति प्रतिषेध उच्यते। प्रयत्नानन्तरमात्मलाभश्च दृष्टो घटादीनाम्, व्यवधानापोहाच्चाभिव्यक्तिर्व्यवहितानाम्। तत्किं प्रयत्नानन्तरमात्मलाभः शब्दस्याहोऽभिव्यक्तिरिति विशेषो नास्ति। कार्याविशेषेण प्रत्यवस्थानं कार्यसमः ॥३७॥

न्यायवार्त्तिकम्

शब्दः प्रयत्नानन्तरमुपलब्धे'रिति हेतुमनैकान्तिकं चोदयति। प्रयत्नानन्तरमुपलभ्यमानं कार्यमकार्यं च दृष्टमिति। अथ प्रयत्नानन्तरं जन्म हेत्वर्थः, तथाप्यसिद्धदेशनेति ॥ ३७ ॥

न्यायवार्त्तिकतात्पर्यटीका

दर्शिते। उदाहृत्य जातिमवतारयति—एवमवस्थिते प्रयत्नकार्यानेकत्वादिति प्रतिषेध उच्यत इति। प्रयत्नानन्तरीयकत्वं—प्रयत्नानन्तरोत्पादो वा स्यात्, प्रयत्नानन्तरोपलम्भो वा। न तावत्पूर्वः कल्पोऽसिद्धत्वात्। तस्मात्प्रयत्नानन्तरोपलम्भ आस्थेयः। तत्र कार्यसमं प्रतिषेधमाह—प्रयत्नानन्तरम् उपलभ्यमानानां प्रयत्नानन्तरम् आत्मलाभश्च दृष्टो यथा घटादीनां, व्यवधानापोहाच्चाभिव्यक्तिर्व्यवहितानां मूलककीलकादीनम्। तत्किं प्रयत्नानन्तरमात्मलाभः शब्दस्याहोस्विदभिव्यक्तिरिति विशेषो नास्ति। तदेवं कार्याविशेषेण प्रत्यवस्थानं कार्यसमः।

(क)येन तु कार्यसमा जातिरन्यथैवोक्ता, तद् यथा—अनित्यः शब्दः कृतकत्वाद् घटवदित्युक्ते अन्यद् मृत्पिण्डादिकार्यत्वं घटस्य, अन्यच्च विवक्षाप्रयत्नवायुप्रेरणाभिघातकार्यत्वं शब्दस्य; तस्माच्छब्दकृतकत्वस्य घटादिकृतकत्वाद्भेदान्न साधनं कृतकत्वमनित्यत्वस्येति। सेयं कार्यान्यत्वेन प्रत्यवस्थानात्कार्यसमेति। तदाह—

'कार्यत्वान्यत्वलेशेन यत्साध्यासिद्धिदर्शनम्।

तत्कार्यसम'मिति भदन्तेनोक्तम्। कीर्तिरप्याह—

साध्येनानुगमात्कार्यसामान्येनापि साधने।
संबन्धिभेदाद्भेदोक्तिर्दोषः कार्यसमो मतः ॥ इति—(ख)

तदनेन यदीश्वरसाधननिराकरणायोक्तम्—'तनुगिरिसागरादीनामन्यत्कार्यत्वम्, अन्यच्च प्रासादाट्टालगोपुरादीना'मिति, तदपि जात्युत्तरमेवेत्युक्तं भवति। न च प्रत्यक्षदृश्यमानं बुद्धिमदन्वयव्यतिरेकानुविधानं सौधादीनामिव तनुभुवनादीनां नास्तीत्येतावता भेदेन कार्यभेदे शब्दमात्राभेद इति साम्प्रतम्, अभूत्वा भावलक्षणस्य कृतकत्वस्य संस्थानवत्त्वस्य वा वस्तुन एवाभेदात्। तस्मादेतदप्ययुक्तम्— वस्तुभेदे प्रवृत्तेऽपि शब्दसाम्यादभेदिनः।
न युक्ताऽनुमितिः पाण्डुद्रव्यादिव हुताशने ॥

न चेयं जातिरुत्कर्षापकर्षसमाभ्यां भिद्यते, साध्यदृष्टान्तयोर्धर्मविकल्पेन प्रवर्तमानत्वात्। तस्मात्सूत्रकारोक्त एव कार्यसमोऽसंकीर्ण इति युक्तमुत्पश्यामः ॥ ३७ ॥

(क) अत्र यच्छब्दसापेक्षस्तच्छब्दो नान्वेषणीयः, 'तदनेने'ति वक्ष्यमाणेदंशब्देन निराकाङ्क्षतासम्पत्तेः।
(ख) अस्य वर्द्धमानकृता व्याख्या—"साध्येन सिषाधयिषितधर्मेण सपक्षानुगमाद्धेतोः कार्यत्वसामान्यहेतुतयोपन्यस्तपक्षादेः सम्बन्धिनो भेदेन कार्यत्वहेतोर्भेदापादनं कार्यसम इति।"

न्यायभाष्यम्

अस्योत्तरम्—

कार्यान्यत्वे(क)प्रयत्नाहेतुत्वमनुपलब्धिकारणोपपत्तेः ॥ ३८ ॥

सति कार्यान्यत्वे अनुपलब्धिकारणोपपत्तेः प्रयत्नस्याहेतुत्वं (१)शब्दस्याभिव्यक्तौ। यत्र प्रयत्नानन्तरमभिव्यक्तिस्तत्रानुप(२)लब्धिकारणं व्यवधानमुपपद्यते,व्यवधानापोहाच्च

न्यायवार्त्तिकम्

कार्यान्यत्वे प्रयत्नाहेतुत्वमनुपलब्धिकारणोपपत्तेः। यत् खलु प्रयत्नेन व्यज्यते तत्रानुपलब्धिकारणमुपपद्यते, न तु शब्दस्यानुपलब्धिकारणं किञ्चिदस्ति, तस्मान्न व्यज्यते इति।

न्यायवार्त्तिकतात्पर्यटीका

अस्य प्रत्यादेशसूत्रम्—

कार्यान्यत्वे प्रयत्नाहेतुत्वमनुपलब्धिकारणोपपत्तेः (सू ३८) ॥ (३)'कार्य'-स्योत्पत्तिलक्षणस्या'न्यत्वे'ऽभिव्यक्तिलक्षणात्कार्यात, 'प्रयत्न'स्याभिव्यक्तिं प्र'त्यहेतुत्वम्' (४)। कस्मादभिव्यक्तिं प्रति हेतुत्वं(४*) न भवतीत्यत आह—'अनुपलब्धिकारण'स्यावरणादे'रुपपत्ते'-रभिव्यक्तिहेतुत्वं स्यात्, एवं तु नास्तीति व्यतिरेकपरं द्रष्टव्यम्। सति कार्यान्यत्व इति भाष्यं सूत्रवद् योजनीयम्। यत्र प्रयत्नानन्तरमित्यत्र यत्रतत्रयोर्व्यत्यासः,—तत्र प्रयत्नानन्तरमभिव्यक्तिर्यत्रानुपलब्धिकारणं व्यवधानमुपपद्यत इति। कस्मादनुपलब्धि-कारणोपपत्तेः प्रयत्नाभिव्यङ्ग्यत्वमित्यत आह—(ख)व्यवधानायोगाच्चेति। चो हेत्वर्थे।

वृत्तिः

अत्रोत्तरमाह—(प्रतिषेध्ये नित्यमनित्यभावादनित्येऽनित्यत्वोपपत्तेः प्रतिषेधाभावः)। प्रतिषेध्ये मत्पक्षे शब्दे सर्वदा अनित्यभावात् अनित्यत्वात् अनित्ये शब्देऽनित्यत्व-मुपपद्यते। न हि सम्भवति अनित्यत्वं नित्यमस्ति,—अथ च तन्नित्यमिति, व्याघातात्। न च नित्यमिति सर्वकालमित्यर्थः, तथा च शब्दस्यानित्यत्वे कथं सर्वकालमनित्यत्वसम्बन्ध इति वाच्यम्, सर्वकालमित्यस्य यावत्सत्त्वमित्यर्थात्। अतस्त्वत्कृतः प्रतिषेधो न सम्भवति। मतान्तरे तु अनित्यत्वेऽनित्यत्वोपपत्तेर्हेतोस्त्वया यः प्रतिषेधः कृतः स न सम्भवतीत्यर्थः ॥३६॥

इति नित्यसमप्रकरणम्।

कार्यसमं लक्षयति—(प्रयत्नकार्यानेकत्वात्कार्यसमः)।

प्रयत्नकार्यस्य प्रयत्नेन सम्पादनीयस्य, अनेकत्वात् अनेकविधत्वात्। अयमर्थः—शब्दोऽनित्यः प्रयत्नानन्तरीयकत्वादित्युक्ते प्रयत्नानन्तरीयकत्वं प्रयत्नकार्ये घटादौ प्रयत्ना-नन्तरोपलभ्यमाने कीलकादावपि दृष्टम्। तत्र द्वितीयं न तज्जन्यत्वसाधकम्, आद्यं तु असिद्धम्।

---

(१) 'शब्दस्याभिव्यक्तौ'—इति ज-ग-ल०। (२) —'लब्धिः कारणम्'—इति ज०। (३) 'कार्य्यस्योत्पत्तिनं लक्षणस्यान्यत्वे'—इति क० ख०। (४) अयमंशो नास्ति क० ख०। (क) प्रथमस्यापि शब्दस्य कोष्ठवायुनोदनादिव्यवहितत्वेन प्रयत्नानन्तर्य्याभावात् "प्रयत्नशब्देन तत्कार्य्यौ पारम्पर्य्येण ताल्वादिसंयोग-विभागौ गृह्येते" इत्याहुराचार्य्याः (न्यायपरिशिष्टे ७२पृ०)। (ख) 'व्यवधानापोहाच्चे'ति भाष्ये।

न्यायभाष्यम्

प्रयत्नानन्तरभाविनोऽर्थस्योपलब्धिलक्षणाऽभिव्यक्तिर्भवतीति, (१)न तु(१*) शब्दस्यानुपलब्धिकारणं किञ्चिदुपपद्यते, यस्य प्रयत्नानन्तरमपोहाच्छब्दस्योपलब्धिलक्षणाऽभिव्यक्तिर्भवतीति, तस्मादुत्पद्यते शब्दो नाभिव्यज्यते इति ॥ ३८ ॥

न्यायवार्त्तिकम्

संशयसमातो न भिद्यत इति चेत् ? उभयसाधर्म्यात् संशयसमः, अयं तु न तथा, तस्माद्भिद्यत इति। अथ साधर्म्यसमातो न भिद्यत इति चेत् ? न, हेत्वध्यारोपणात्—साधर्म्यसमा न हेत्वध्यारोपेण प्रवर्तते, इयं त्वन्यथाभिहिते हेतौ अन्यथाकारं प्रवर्तते ॥ ३८ ॥

इति कार्यसमप्रकरणम्।

न्यायवार्त्तिकतात्पर्यटीका

प्रयत्नानन्तरभाविन इति विषयेण विषयिणमुपलक्षयति, प्रयत्नानन्तरभाविन इत्यर्थः। अनुपलब्धिकारणोपपत्तेरित्यस्य व्यतिरेकप्रधानतामाह—न तु शब्दस्यानुपलब्धीति।

देशयवार्त्तिकं—संशयसमात इति। परिहरति—उभयसाधर्म्यादिति। विशेषानुपलब्धौ सत्यामुभयसाधर्म्यात्संशयसमः, इदं तु विशेषोपलब्धिमविवक्षित्वेति विशेषः। तदिदमुक्तम्—अयं तु न तथेति। देशयति—साधर्म्यसमात इति। निराकरोति—न, हेत्वध्यारोपणादिति। प्रयत्नानन्तरीयकत्वादित्ययं प्रयत्नानन्तरमुपलब्धेरित्यध्यारोप्य प्रतिषिध्यते। साधर्म्यसमे तु नारोपणमित्यर्थः ॥ ३८ ॥

वृत्तिः

तथा च सामान्यत उक्ते हेतावनभिमतविशेषनिराकरणेन प्रत्यवस्थानं कार्यसमा। असिद्धिदेशनाभासा चेयम्।

अथवा प्रयत्नकार्याणां प्रयत्नकर्तव्यानां कर्तव्यप्रयत्नानामिति यावत्, तादृशानाम् अनेकविधत्वादुक्तान्यस्वव्याघातकमुत्तरं कार्यसमा। तथा चास्या आकृतिगणत्वात् सूत्रानुपदर्शितानामपि परिग्रहः। यथा—त्वत्पक्षे किञ्चिद् दूषणं भविष्यतीति शङ्का पिशाचीसमा, कार्यकारणभावस्योपकारनियतत्वेऽनवस्थेत्यनुपकारसमा इत्यादि(क) ॥ ३७ ॥

अत्रोत्तरम्—(कार्यान्यत्वे प्रयत्नाहेतुत्वमनुपलब्धिकारणोपपत्तेः)।

शब्दस्य कार्यान्यत्वे अकार्यत्वे प्रयत्नस्य कर्त्तृप्रयत्नस्य अहेतुत्वम् अकारणत्वम्। इदं च तदा स्यात्, यद्यनुपलब्धिकारणमावरणादिकमुपपद्यते, न च तच्छब्देऽस्तीत्यर्थः।

आकृतिगणपक्षे तु कार्याणां जातीनामन्यत्वे नानाविधत्वे इदमुत्तरं प्रयत्नस्य त्वदीयदूषणप्रयत्नस्य अहेतुत्वम् असाधकतासाधकत्वाभावः, उपलब्धेः कारणस्य प्रमाणस्य निर्दोषवाक्यस्य या उपपत्तिर्निर्दोषवाक्याधीनोपपादनं तदभावात्, तद्वाक्यस्य स्वपक्षव्याघातकत्वादित्यर्थः ॥ ३८ ॥

इति कार्यसमप्रकरणम्।

---

(१) 'ननु'—इति वि०। (क) "उद्भावनविषयविकल्पभेदेन जातीनामानन्त्येऽपि असंकीर्णोदाहरणविवक्षया चतुर्विंशतिर्जातिभेदाः प्रदर्शिताः"—इति न्यायकलिकायां जयन्तभट्टाः।

न्यायभाष्यम्

हेतोश्चेदनैकान्तिकत्वमुपपाद्यते अनैकान्तिकत्वादसाधकः स्याद् इति। यदि चानैकान्तिकत्वादसाधकत्वम्—

प्रतिषेधेऽपि समानो दोषः ॥ ३९ ॥

प्रतिषेधोऽप्यनैकान्तिकः, किञ्चित्प्रतिषेधति किंचिन्नेति अनैकान्तिकत्वादसाधक इति। अथवा शब्दस्यानित्यत्वपक्षे प्रयत्नानन्तरमुत्पादो नाभिव्यक्तिरिति विशेषहेत्वभावः, नित्यत्वपक्षेऽपि प्रयत्नानन्तरमभिव्यक्तिर्नोत्पाद इति विशेषहेत्वभावः। सोऽयमुभयपक्षसमो विशेषहेत्वभाव इत्युभयमप्यनैकान्तिकमिति ॥ ३९ ॥

न्यायवार्त्तिकम्

एवं जातयो व्यवस्थिताः। अथेदानीं षट्पक्षीमुपन्यस्यन्निदमाह—

प्रतिषेधे विप्रतिषेधेऽपि समानो दोषः। प्रथम पक्षवादी जातिवादिनमुत्तरं ब्रवीति—यद्यनैकान्तिकत्वादहेतुः प्रतिषेधोऽप्यनैकान्तिकः, कस्यचिदप्रतिषेधात् कस्यचित्प्रतिषेधादिति। विशेषहेत्वभावो वा अविशेषः। शेषं भाष्ये ॥ ३९ ॥

न्यायवार्त्तिकतात्पर्यटीका

तदेवं जात्युत्तरवादिनं प्रति साधनवादिना सर्वत्रैव सम्यक् समाधानं स्वसाधनस्य वक्तव्यम्। एवं सति तत्त्वनिर्णये कथापर्यवसानं भवति। यदि पुनर्वाद्यपि जातिवादिनं प्रति साधनाभासेन प्रत्यवतिष्ठते, ततः षट्पक्ष्यां सत्यां न तत्त्वनिर्णयावसाना कथा भवेदिति शिष्यहितः सूत्रकारः समाधानाभासवादिनं प्रति षट्पक्षीमवतारयति—

प्रतिषेधेऽपि समानो दोषः (सू ३९) ॥

तदेतत्सूत्रावतारपरं भाष्यं—हेतोश्चेदनैकान्तिकत्वमुपपाद्यते(१)प्रतिवादिनाऽनैकान्तिकत्वादसाधकः स्यादिति। यदि चानैकान्तिकत्वादसाधकं वादिनो वचनं—प्रतिषेधेऽपि समानो दोषः। योऽयं प्रयत्नकार्यानेकत्वादिति प्रतिषेधो जातिवादिनः, सोऽप्यनैकान्तिकः। एवं ह्यैकान्तिकः स्याद् यदि सर्वमेव प्रतिषेधेत्, यतस्तु किंचित्प्रतिषेधति किंचिच्च न, तस्मादयमनैकान्तिकः, अतोऽसाधक इत्यर्थः।

व्याख्यान्तरमाह—अथवा शब्दस्येति। नित्यपक्षेऽभिव्यक्तिर्नोत्पादः, एवमनित्यपक्षे उत्पादो नाभिव्यक्तिरित्ययं विशेषो न सिध्यत्ययं प्रतिषेधेऽपि समानो दोष इत्यर्थः ॥ ३९ ॥

वृत्तिः

एवं तावज्जातिवादिनं प्रति सर्वत्र सदुत्तरेणैवोद्धारः कार्य इत्यभिहितम्। तदेवाभिमतं, तेन(क)निर्णयविजयफलकत्वं कथायां सम्पद्यते, असदुत्तरोद्भावने तु बन्ध्ययोः संयोगवन्नाभिमतफलसिद्धिरिति व्युत्पादयितुं कथाभासरूपां षट्पक्षीं शिष्यशिक्षायै प्रदर्शयति—(प्रतिषेधेऽपि समानो दोषः)।

---

(१) 'प्रतिवादिने'—इति ख०। (क) "एवं तावत् परेण जातौ प्रयुक्तायां वादिना सदुत्तरेणैवोद्धारः कर्त्तव्यः; एवं हि वादे तत्त्वनिर्णयः, जल्पवितण्डयोश्च जयपराजयव्यवस्था स्यात्, अन्यथा तु षण्ढमैथुनवन्नैकमपीति"—न्यायपरिशिष्टम् (७३पृ०)।

न्यायभाष्यम्

सर्वत्रैवम् ॥ ४० ॥

सर्वेषु साधर्म्यप्रभृतिषु (१)प्रतिषेधहेतुषु यत्र (२)यत्राविशेषो (३)दृश्यते तत्रोभयोः पक्षयोः समः प्रसज्यत इति(१*) ॥ ४० ॥

(४)प्रतिषेधविप्रतिषेधे प्रतिषेधदोषवद्दोषः ॥ ४१ ॥

योऽयं प्रतिषेधेऽपि समानो दोषोऽनैकान्तिकत्वमापाद्यते सोऽयं प्रतिषेधस्य

न्यायवार्त्तिकम्

सर्वत्रैवम् । सर्वासु जातिष्वेषा प्रयुक्तिरिति सूत्रार्थः ॥ ४० ॥

प्रतिषेधविप्रतिषेधे प्रतिषेधदोषवद्दोषः । तृतीयः पक्षो विप्रतिषेधः । एतस्मिन्

न्यायवार्त्तिकतात्पर्यटीका

न केवलमस्यां जातावयं समाधानाभासो वादिनः, अपि तु सर्वत्रैव जाताविति शिष्यान् शिक्षयति सूत्रकारः—

सर्वत्रैवम् (सू ४०) ॥ (क)

अस्मिन् समाधाने प्रयुक्ते वादिना पुनर्जातिवादी प्रत्यवतिष्ठते—

प्रतिषेधविप्रतिषेधे प्रतिषेधदोषवद्दोषः (सू ४१) ॥ प्रतिषेधो जातिवादिनस्तस्य

वृत्तिः

प्रयत्नानन्तरीयकत्वं न शब्देऽनित्यत्वं साधयति अनैकान्तिकत्वादिति यो दोषः स त्वत्पक्षेऽपि तुल्यः, प्रयत्नाभिव्यङ्ग्यत्वस्याप्यसाधकत्वात् ।

अथ वा अनैकान्तिकत्वादसाधक इति त्वया यः प्रतिषेधः कृतस्तत्राप्ययं दोषः समानः, न ह्यनैकान्तिकत्वं सर्वस्यैवासाधकत्वं साधयति, स्वस्यैवासाधकत्वासाधनत्वात् ॥ ३९ ॥

सेयं मतानुज्ञा किं कार्यसमायामेव ? नेत्याह—(सर्वत्रैवम्) ।

एवंविधमसदुत्तरं सर्वत्रैव जातौ सम्भवतीत्यर्थः । यथा शब्दोऽनित्यः शब्दत्वादित्यत्र नित्याकाशसाधर्म्यादमूर्तत्वान्नित्यः स्यादिति साधर्म्यसमायाम्, आकाशसाधर्म्यान्नित्यत्वे आकाशवच्छब्दे परममहत्त्वं स्यादित्युत्कर्षसमा । एवमन्यत्राप्यूह्यम् ।

यद्यप्ययमतिदेशः षट्पक्ष्यनन्तरमेव कर्तुमुचितस्तथाऽपि त्रिपक्ष्यादिकमपि सूचयितुमत्रैवोक्तः । (५)उभयाज्ञत्वबोधफला हि षट्पक्षी, त्रिपक्ष्यादावपि तत्फलकत्वं तुल्यमिति भावः । तर्हि त्रिपक्ष्यामेव मध्यस्थेन पर्यनुयोज्योपेक्षणस्योद्भावने कथासमाप्तौ कुतः षट्पक्षीति चेन्न ; पुंसां स्फुरणवैचित्र्येण तत्सम्भवात्(ख) ॥ ४० ॥

---

(१) इदं वि-पु० नास्ति । (२) 'यत्र विशेषः'—इति ज० । (३) 'चोद्यते'—इति टि० । (४) 'विप्रतिषेधे प्रतिषेधदोषवद्दोषः'—इति वि० । (क) ४०शसूत्रस्य अवतरणिकातिरिक्ता तात्पर्यटीका नोपलभ्यते । (५) 'उभयासुज्ञत्वबोधफला'—इति भ० । (ख) स्फुरणवैचित्र्यं च मृदमध्यातिमात्रप्रज्ञत्वेनेत्याशयः । अत्र "तदशिष्यमसभ्यत्वप्रसङ्गा"दित्याद्युदयनकृतोऽधिक्षेपो द्रष्टव्यः । [न्यायपरिशिष्टे—७६पृ०]

न्यायभाष्यम्

(१)विप्रतिषेधेऽपि समानः। तत्रानित्यः शब्दः प्रयत्नानन्तरीयकत्वादिति साधनवादिनः स्थापना प्रथमः पक्षः। 'प्रयत्नकार्यानेकत्वात् कार्यसम' इति दूषणवादिनः प्रतिषेधहेतुना द्वितीयः पक्षः। स च प्रतिषेध इत्युच्यते। (२)तस्यास्य (३)प्रतिषेधेऽपि समानो दोष इति तृतीयः पक्षो विप्रतिषेध उच्यते(२*)। तस्मिन् प्रतिषेधविप्रतिषेधेऽपि समानो दोषोऽनैकान्तिकत्वं चतुर्थः पक्षः॥ ४१॥

प्रतिषेधं सदोषमभ्युपेत्य प्रतिषेधविप्रतिषेधे समानो दोषप्रसङ्गो मतानुज्ञा॥ ४२॥

प्रतिषेधं द्वितीयं पक्षं सदोषमभ्युपेत्य तदुद्धारमकृत्वाऽनुज्ञाय प्रतिषेधविप्रतिषेधे तृतीयपक्षे समानमनैकान्तिकत्वमिति समानं दूषणं (४)प्रसञ्जयतो दूषणवादिनो मतानुज्ञा प्रसज्यत इति पञ्चमः पक्षः॥ ४२॥

न्यायवार्त्तिकम्

विप्रतिषेधे समानमनैकान्तिकत्वं दोष इति चतुर्थः पक्षः॥ ४१॥

प्रतिषेधं सदोषमभ्युपेत्य प्रतिषेधविप्रतिषेधे समानो दोषप्रसङ्गो मतानुज्ञा। प्रतिषेधं द्वितीयपक्षं सदोषमभ्युपेत्य तृतीयपक्षेऽपि प्रतिषेधतुल्यदोषतामासञ्जयन् विप्रतिषेधेऽपि समानो दोष इति ब्रुवन् (५)मतमनुजानाति, सेयं मतानुज्ञा भवतीति पञ्चमः पक्षः॥ ४२॥

न्यायवार्त्तिकतात्पर्यटीका

विप्रतिषेधो मूलसाधनवादिनः, तस्मिंस्तुल्यो दोष इति जातिवादिनः प्रत्यवस्थानमित्यर्थः॥४१॥

अथ पञ्चमं पक्षं साधनवादिनश्चतुर्थपक्षवादिनं प्रति मतानुज्ञापादनमाह—

प्रतिषेधं सदोषमभ्युपेत्य प्रतिषेधविप्रतिषेधे समानो दोषप्रसङ्गो मतानुज्ञा (सू ४२)॥ (क)

वृत्तिः

(प्रतिषेधविप्रतिषेधे प्रतिषेधदोषवद्दोषः)।

तुल्यबलविरोधो विप्रतिषेधः। तथा च प्रतिषेधस्य यो विप्रतिषेधस्तत्र प्रतिषेधवद्दोष इत्यर्थः। तथाहि—शब्दोऽनित्यः प्रयत्नानन्तरीयकत्वादिति स्थापनावादिनः प्रथमः पक्षः। प्रयत्नकार्यानेकत्वात्कार्यसम इति प्रतिवादिनो द्वितीयः पक्षः प्रतिषेधः। प्रतिषेधेऽप्यनैकान्तिकत्वं तुल्यमिति वादिनस्तृतीयः पक्षो विप्रतिषेधः। तत्रापि तथैवानैकान्तिकत्वं तत्समानदोषोद्भावनं वा चतुर्थः पक्षः॥ ४१॥

---

(१) 'प्रतिषिद्ध'—इति ज-ग-ल-भा-फ०। टि-पु० पाठो गृहीतः। (२) इ वि-पु० नास्ति। (३) 'प्रतिषेधस्य प्रति'—इति टि०। (४) 'प्रसञ्जतः'—इति म०। 'प्रसजतः'—इति ल०। (५) 'तमनुजानाति'—इति क-ख-पुस्तकपाठान्तरम्। (क) ४२शसूत्रे तात्पर्यटीका नोपलभ्यते।

न्यायभाष्यम्

(क)स्वपक्षलक्षणापेक्षोपपत्त्युपसंहारे हेतुनिर्देशे परपक्षदोषाभ्युपगमात् (१)समानो दोषः ॥ ४३ ॥

स्थापनापक्षे (२)प्रयत्नकार्यानेकत्वादिति दोषः स्थापनाहेतुवादिनः स्वपक्षलक्षणो भवति। कस्मात्? स्वपक्षसमुत्थत्वात्। सोऽयं स्वपक्षलक्षणं दोषमपेक्षमाणोऽनुद्धृत्यानुज्ञाय प्रतिषेधेऽपि समानो दोष इत्युपपद्यमानं दोषं परपक्षे उपसंहरति। इत्थं चानैकान्तिकः प्रतिषेध इति हेतुं निर्दिशति। तत्र स्वपक्षलक्षणापेक्षयोपपद्यमानदोषोपसंहारे हेतुनिर्देशे च सत्यनेन (३)परपक्षदोषोऽभ्युपगतो भवति। कथं कृत्वा? यः परेण प्रयत्नकार्यानेकत्वादित्यादिनाऽनैकान्तिकदोष उक्तः, तमनुद्धृत्य प्रतिषेधेऽपि समानो दोष इत्याह। एवं स्थापनां सदोषामभ्युपेत्य प्रतिषेधेऽपि समानं दोषं

न्यायवार्त्तिकम्

स्वपक्षलक्षणापेक्षोपपत्त्युपसंहारे हेतुनिर्देशे परपक्षदोषाभ्युपगमात् समानो दोषः। स्वपक्षसमुत्थानं दोषमभ्युपेत्य परपक्षेऽपि प्रसञ्जयन् स्वपक्षदोषमनुजानातीति तुल्या मतानुज्ञा।

न्यायवार्त्तिकतात्पर्यटीका

सेयं मतानुज्ञा तृतीये पक्षे पञ्चमपक्षवादिनोऽपि साधनवादिन इति जातिवादी षष्ठपक्षस्थित आह—

स्वपक्षलक्षणापेक्षोपपत्त्युपसंहारे हेतुनिर्देशे परपक्षदोषाभ्युपगमात्समानो दोषः (सू ४३)॥ स्वपक्षेण लक्ष्यते तदुत्थानत्वाज्जातिः, स्वपक्षलक्षणा अनैकान्तिकत्वोद्भावनलक्षणा, तामभ्युपेत्य अनुद्धृत्य प्रतिषेधेऽपि जातिलक्षणे समानोऽनैकान्तिकत्वदोष इत्युपपद्यमानं स्वपक्षेऽपि दोषं परपक्षे जातिवादिपक्षे साधनवाद्युपसंहरति। तत्र चानैकान्तिकं हेतुं ब्रूते। तदेवं स्वपक्षलक्षणापेक्षोपपत्त्युपसंहारे हेतुनिर्देशे परपक्षे यत्स्वयं दूषणं दत्तं तस्याभ्युपगमाद्वादिनोऽपि समानो

वृत्तिः

पञ्चमं पक्षमाह—(प्रतिषेधं सदोषमभ्युपेत्य प्रतिषेधविप्रतिषेधे समानो दोषप्रसङ्गो मतानुज्ञा)।

प्रतिषेधं द्वितीयं पक्षं सदोषमभ्युपेत्य तत्र मदुक्तं दोषमनुद्धृत्य प्रतिषेधविप्रतिषेधे मदीयपक्षे तृतीयं समानं दोषं प्रसञ्जयतस्तव मतानुज्ञानामकं निग्रहस्थानमित्यर्थः ॥ ४२ ॥

---

(१) 'समानदोष'—इति ज-ग-ल०। (२) 'प्रयत्नकार्यत्वानेकत्वा'दिति—ग०। (३) 'परपक्षोऽभ्यु'—इति ज-ग-ल०। (क) "स्वशब्देन वादी निर्दिश्यते। तस्य पक्षः स्थापना, तं लक्ष्यीकृत्य प्रवृत्तो द्वितीयः पक्षः स्वपक्षलक्षणः, तस्यापेक्षा अभ्युपगमः" इति वरदराजः। आचार्यास्तु—"वादिनः स्वपक्षः स्थापना, तल्लक्षणो द्वितीयः पक्षो जात्युत्तरं…तस्यापेक्षा उपेक्षा अनुद्धार इति यावत्। ततः परपक्षेऽपि उपपत्त्युपसंहारः परापादितदोषोपसंहारः—'प्रतिषेधेऽपि समानो दोष' इति, 'इत्थ'मिति हेतुनिर्देशश्च, तस्मिन्नुपपत्त्युपसंहारे हेतुनिर्देशे तवापि समानो मतानुज्ञादोष इत्यर्थः" इति विवृतुः।

न्यायभाष्यम्

(१)प्रसञ्जयतः परपक्षाभ्युपगमात् समानो दोषो भवति। यथा परस्य प्रतिषेधं सदोषमभ्युपेत्य (२)प्रतिषेधविप्रतिषेधेऽपि समानो दोषप्रसङ्गो मतानुज्ञा प्रसज्यत इति, तथाऽस्यापि स्थापनां सदोषामभ्युपेत्य(२*)प्रतिषेधेऽपि समानं दोषं (३)प्रसञ्जयतो मतानुज्ञा प्रसज्यत इति। स खल्वयं षष्ठः पक्षः।

तत्र खलु स्थापनाहेतुवादिनः प्रथम-तृतीय-पञ्चमपक्षाः, प्रतिषेधहेतुवादिनः द्वितीय-चतुर्थ-षष्ठपक्षाः। तेषां साध्वसाधुतायां मीमांस्यमानायां चतुर्थषष्ठयोरर्थाविशेषात् पुनरुक्तदोषप्रसङ्गः। चतुर्थपक्षे समानदोषत्वं परस्योच्यते—'प्रतिषेधविप्रतिषेधे प्रतिषेधदोषवद्दोष' इति। षष्ठेऽपि 'परपक्षदोषाभ्युपगमात् समानो दोष' इति समानदोषत्वमेवोच्यते, नार्थविशेषः कश्चिदस्ति। समानस्तृतीयपञ्चमयोः पुनरुक्तदोषप्रसङ्गः, तृतीयपक्षेऽपि 'प्रतिषेधेऽपि समानो दोष' इति समानत्वमभ्युपगम्यते। पञ्चमपक्षेऽपि 'प्रतिषेधविप्रतिषेधे समानो दोषप्रसङ्गो'ऽभ्युपगम्यते, नार्थविशेषः कश्चिदुच्यत इति। तत्र पञ्चमषष्ठपक्षयोरर्थाविशेषात् पुनरुक्तदोषप्रसङ्गः, तृतीयचतुर्थयोर्मतानुज्ञा, प्रथमद्वितीययोर्विशेषहेत्वभाव इति षट्पक्ष्यामुभयोरसिद्धिः।

(४)कदा षट्पक्षी ? (५)यदा 'प्रतिषेधेऽपि समानो दोष' इत्येवं प्रवर्त्तते। तदोभयोः पक्षयोरसिद्धिः। यदा तु 'कार्यान्यत्वे प्रयत्नाहेतुत्वमनुपलब्धिकारणोपपत्ते'रित्यनेन

न्यायवार्त्तिकम्

शेषं भाष्ये। अत्र खलु स्थापनाहेतुवादिनः प्रथमतृतीयपञ्चमाः पक्षाः। प्रतिषेधहेतुवादिनो द्वितीयचतुर्थषष्ठाः पक्षाः। तेषां साध्वसाधुतायां मीमांस्यमानायां चतुर्थषष्ठयोरर्थाविशेषात् न पुनरुक्तदोषप्रसङ्गः। समानः तृतीयपञ्चमयोः पुनरुक्तदोषः। तत्र पञ्चमषष्ठयोः पुनरुक्तदोषः, तृतीयचतुर्थयोर्मतानुज्ञादोषः, प्रथमद्वितीययोर्विशेषहेत्वभाव इति षट्पक्ष्यामुभयोरसिद्धिः, (६)अयुक्त-

न्यायवार्त्तिकतात्पर्यटीका

दोष इति जातिवादिनो वचनं षष्ठे पक्षे स्थितस्य। तदेवं विस्तीर्य संकलय्याह—तत्र खलु स्थापनाहेतुवादिन इति। सेयं षट्पक्षी समानदोषापादनेनानिर्णायकत्वात्पौनरुक्त्याच्च न तत्त्वनिर्णयाय पर्याप्ता। तस्मात्समाधानाभासेन जातिवादिनं प्रति न प्रत्यवस्थेयं, किं तु सम्यक् साधनेन। तथा च षट्पक्षी उपहता नावतरति, तत्त्वनिर्णयपर्यवसाना च कथा भवति। यदि त्वस्य कदाचित्सम्यक्साधनवादिनोऽपि प्रतिभाक्षयात् समाधानं न स्फुरति, ततोऽत्यन्तपराजयाद्वरं संशयोऽपीति न्यायेन समाधानाभासेनापि प्रत्यवस्थेयमेवेत्याशयवानाह—तेषां साध्व-

(१) 'प्रसञ्जतः'—इति ग०। 'प्रसजतः'—इति ल०। (२) अयं भागः वि० टि० पु० नास्ति। (३) 'प्रसञ्जतः'—इति ग०। 'प्रसजत'—इति ल०। (४) 'यदा'—इति टि०। (५) इदं टि० पु० नास्ति। (६) 'अयुक्तत्ववादित्वात्'—इति ख०।

न्यायभाष्यम्

तृतीयपक्षो युज्यते, तदा विशेषहेतुवचनात् 'प्रयत्नानन्तरमात्मलाभः शब्दस्य, नाभिव्यक्ति'रिति सिद्धः प्रथमपक्षो न षट्पक्षी प्रवर्तत इति ॥ ४३ ॥

इति श्रीवात्स्यायनीये न्यायभाष्ये

पञ्चमाध्यायस्याद्यमाह्निकम् ।

न्यायवार्त्तिकम्

वादित्वात् । यदाऽनुपलब्धिकारणाभावे सति प्रयत्नानन्तरमुपलब्धेरिति विशेषहेतुरुच्यते, तदा न षट्पक्षी प्रवर्तते । एतास्तु जातयो न तत्त्वविवेकमुपकुर्वन्तीति भेदमात्रमासामुक्तमिति ॥ ४३ ॥

इति षट्पक्षीरूपकथाभासप्रकरणम् ।

इति औद्द्योतकरे न्यायवार्त्तिके पञ्चमस्याध्यायस्याद्यमाह्निकम् ।

न्यायवार्त्तिकतात्पर्यटीका

साधुतायामिति । भाष्यव्याख्यया वार्त्तिकमपि व्याख्यातम् । एतास्तु जातयो न तत्त्वविवेकमुपकुर्वन्ति प्रयुज्यमानतया, निराकरणीयतया त्वासामप्युपकार इति ॥ ४३ ॥

इति मिश्रश्रीवाचस्पतिविरचितायां न्यायवार्त्तिकतात्पर्यटीकायां

पञ्चमस्याध्यायस्याद्यमाह्निकम् ।

वृत्तिः

षष्ठं पक्षमाह—(स्वपक्षलक्षणापेक्षोपपत्त्युपसंहारे हेतुनिर्देशे परपक्षदोषाभ्युपगमात्समानो दोषः) ।

स्वपक्षः स्थापनारूपः प्रथमः पक्षः, तं लक्ष्यीकृत्य प्रवृत्तो द्वितीयः पक्षः स्वपक्षलक्षणः, तस्यापेक्षा(क)समादरः, तत्र दोषानुद्भावनमिति फलितार्थः । तथा च मदीयपक्षे दोषमनुद्भाव्यैव स्वपक्षोपपादनं कर्तुं यस्त्वया हेतुर्निर्दिष्टः, 'प्रतिषेधेऽपि समानो दोष' इति वदतः तवापि मतानुज्ञा वृत्तैवेत्यर्थः । तदेवं षट्पक्ष्यामुभयोरप्ययुक्तवादित्वादर्थासिद्धिः । यदि तु स्थापनावादी जातिवादिनं सदुत्तरेणैव दूषयति तदा षट्पक्षी न प्रवर्तत इति ॥४३॥

इति षट्पक्षीरूपकथाभासप्रकरणम् ।

इति श्रीविश्वनाथन्यायपञ्चाननभट्टाचार्यकृतायां न्यायसूत्रवृत्तौ

पञ्चमाध्यायस्याऽऽद्यमाह्निकम् ।

(क) 'अपेक्षा अभ्युपगम'—इति वरदराजः । 'अपेक्षा उपेक्षा'—इति उदयनः । उभयोरप्यनुज्ञारे तात्पर्यम् । भाष्यकृतापि ''अपेक्षमाणोऽनुज्ञात्यानुज्ञायि''त्युक्तम् (११५७पृ० द्र०) ।

न्यायदर्शनम्

पञ्चमाध्यायस्य द्वितीयमाह्निकम्

न्यायभाष्यम्

विप्रतिपत्त्यप्रतिपत्त्योर्विकल्पान्निग्रहस्थानबहुत्वमिति सङ्क्षेपेणोक्तं, तदिदानीं विभजनीयम्। निग्रहस्थानानि (१)खलु पराजयवस्तून्य(२)पराधाधिकरणानि

न्यायवार्त्तिकम्

विप्रतिपत्त्यप्रतिपत्त्योर्विकल्पान्निग्रहस्थानबहुत्वमिति सङ्क्षेपेणोक्तम्। तदिदानीं विभजनीयम्। निग्रहस्थानानि तु पराजयवस्तूनि अपराधाधिकरणानि। सामान्यतो द्वे निग्रहस्थाने। कर्तृकर्मकरणानां (३)कस्य ?

तत्रैके वर्णयन्ति पक्षस्येति। एवं चाहुः—दूषणानि न्यूनतावयवोत्तरदोषाक्षेपभावोद्भावनानि, एभिर्ह्यसौ परपक्षो दूष्यत इति। एतत्तु न सम्यक्, कर्मणस्तादवस्थ्यात्—न हि दूषणाभिधानेन कर्मणोऽन्यथात्वं भवति, यथाभूत एवार्थो दूष्यमाणस्तथाभूत एवादूष्यमाणोऽपि। न, करणस्य विषयान्तरेऽसामर्थ्यात्—साधनमपि प्रतिज्ञादिकं न दूष्यते विषयान्तरेऽसामर्थ्यात्। न हि किञ्चित्साधनं यद्विषयान्तरे समर्थं स्यात् सर्वं साधनं स्वविषये समर्थमिति। तस्मादसमर्थयोः कर्मकरणयोरुपादानात् कर्तुर्निग्रह इति। यत् कर्म क्रियार्थमुपादीयमानमभीष्टक्रियां न

न्यायवार्त्तिकतात्पर्यटीका

विप्रतिपत्त्यप्रतिपत्त्योर्विकल्पाद् वैचित्र्यात् निग्रहस्थानबहुत्वमिति संक्षेपेणोक्तं, तदिदानीं विभजनीयम्। तत्र य एवमाहुः—सर्वोऽयं साधनदूषणप्रकारो बुद्ध्यारूढो न वास्तव इति, तान् प्रत्याह—पराजयवस्तूनीति। पराजयो वसत्येष्विति पराजयस्थानानीत्यर्थः। काल्पनिकत्वे कल्पनायाः सर्वत्र सुलभत्वात्साधनदूषणव्यवस्था न स्यादिति भावः। निग्रहस्थानानि पर्यायान्तरेण स्पष्टयति—अपराधेति। य आहु'रसाधनाङ्गवचनमदोषोद्भावनं द्वयोर्निग्रहस्थानमन्यत्तु न युक्त'मिति(क), तान् प्रत्याह—सामान्यतो द्वे निग्रहस्थाने। सामान्यविवक्षायां प्रतिज्ञाहान्यादयो द्वाविंशतिरपि न भिद्यन्ते। (४)तत्तु 'असाधनाङ्गवचनमदोषोद्भावन'मिति भवद्भिः संगृहीतमृषिणा च 'विप्रतिपत्त्यप्रतिपत्ति'भ्यामिति न कश्चिद्विशेषः। अत्र विचारयति—कर्तृकर्मकरणानामिति।

तत्रैके वर्णयन्ति—पक्षस्येति। यथा पक्षोद्देशेन साधनं प्रवर्तमानं पक्षस्य, एवं तदुद्देशेन दूषणानि प्रवर्तमानानि पक्षस्यैवेति। एवं चाहुर्दूषणानीति। न्यूनतादयो हि सर्वे पक्षोद्देशेन प्रवर्तमानाः पक्षस्यैवेत्यर्थः। दूषयति—एतत्तु न सम्यगिति। पक्षोद्देशेन प्रवृत्तेः पक्षविषयतां नापजानीमः, साक्षात्तु तद्विषयतां निराकुर्मः, तस्य वस्तुसतस्तादवस्थ्यात्। एवं साधनमपि यत्रासमर्थं तत्र प्रयुज्यमानं न स्वतो दुष्यति, यत्र तु समर्थं तत्साधयत्येव, तस्मात् कर्तुरेव दोष इत्याह—तस्मादसमर्थयोरिति। न केवलं स्वातन्त्र्यात्कर्तुर्निग्रहोऽपि तु

---

(१) इदं टि० पु० नास्ति। (२) '-पराधाधिकरणानि'—इति टि०। (३) 'तस्य'—इति क०। (४) 'तत्त्वकर्त्तृसा'—इति क०। (क) "असाधनाङ्गवचनमदोषोद्भावनं द्वयोः। निग्रहस्थानमन्यत्तु न युक्तमिति नेष्यते॥" इति—वादन्यायग्रन्थे धर्मकीर्त्तिः। अस्य व्याख्या—"इष्टस्यार्थस्य सिद्धिः साधनं, तस्य निर्वर्त्तकमङ्गं, तस्य अवचनं तस्य अङ्गस्य अनुच्चारणं वादिनोर्निग्रहाधिकरणम्"।

न्यायवार्त्तिकम्

निर्वर्तयति, तदिदमसमर्थं, यथा सिकता घटादिकरण इति । यत् (१)च करणं क्रियार्थमुपादीयमानं क्रियां न निर्वर्तयति तदसमर्थं, यथा तुर्यादि घटे । स्वविषये तूभयं समर्थम् । तदन्यविषयस्य च कर्मणोऽन्यविषयस्य च करणस्यान्यथा (२)उपादानात् कर्तुरज्ञानम् । अज्ञानं पुनरप्रतिपत्तिर्विप्रतिपत्तिर्वेति कर्ता निगृह्यते, न कर्मकरणे, पारतन्त्र्यात् । तस्मात् स्वतन्त्रस्य कर्तुर्निग्रह इति । विप्रतिपत्त्यप्रतिपत्त्योश्च पुरुषधर्मत्वात् पुरुषस्येति—विप्रतिपत्त्यप्रतिपत्ती च पुरुषस्य वचनद्वारेण गम्येते, तस्मात् प्रतिज्ञादिदोषा इति(३)भक्तिः । कानिचिन्निग्रहस्थानान्यज्ञानादीनि पुरुषधर्मा एव ।

द्वैविध्यानुपपत्तिरनेकाभिधानादिति चेत्—अनेकं निग्रहस्थानं प्रतिज्ञाहान्यादिसूत्रे पठ्यते, तस्माद् द्वे निग्रहस्थाने इत्ययुक्तम् ? न, सामान्यभेदविस्तरस्य विवक्षातः प्रवृत्तेः—(क)सामान्यमधिकृत्य निग्रहस्थाने द्वे, भेदविस्तरविवक्षायां तु द्वाविंशतिधा भेदः । उदाहरणमात्रत्वाच्च भेदस्याऽऽनन्त्यमिति ।

न्यायवार्त्तिकतात्पर्यटीका

तदाधारत्वाद्विप्रतिपत्त्यप्रतिपत्त्योरित्याह—विप्रतिपत्त्यप्रतिपत्त्योश्चेति । ननु वाक्ये न्यूनतादयो दोषा न पुरुषाश्रया इत्यत आह—विप्रतिपत्त्यप्रतिपत्ती चेति । न स्वरूपेण वाक्यं दुष्टं तस्य तादवस्थ्यादित्युक्तं किं तु पुरुषस्य विप्रतिपत्त्यप्रतिपत्तिभ्यां तथा प्रतिभाति, तेन वाक्यगतन्यूनतादिदर्शनात् पुरुषे विप्रतिपत्त्यप्रतिपत्ती प्रतीयेते, तेन द्वारेण पुरुषो निगृह्यते, न तु वाक्यम्; एतावता च प्रतिज्ञादोष इत्युच्यते । नायमपि नियमो यद्वाक्यद्वारेण पुरुषो निगृह्यते अज्ञानादिषु तदभावादित्याह—कानिचिन्निग्रहस्थानानीति ।

शङ्कते—द्वैविध्यानुपपत्तिरिति । सामान्यं विवक्ष्यते विशेषो वा ? सामान्यविवक्षायां निग्रहस्थानमित्येवास्तु, तस्य सर्वत्राविशेषात्कुतो द्वैविध्यम् ? विशेषविवक्षायां प्रतिज्ञाहान्यादीनि बहूनीत्ययुक्तं द्वैविध्याभिधानमुभयथाऽपीत्यर्थः । निराकरोति—न, सामान्यभेदविस्तरस्य विवक्षातः प्रवृत्तेरिति । सामान्यविवक्षायामपि निग्रहस्थानमिति नोक्तम्, उद्देशादविशेषप्रसङ्गात् । तस्माल्लक्षणं प्रणयताऽन्यथा तदसंभवादवान्तरसामान्यद्वैविध्यविवक्षया सामान्यं लक्षितम् । भेदानां तु विस्तरविवक्षया प्रतिज्ञाहान्यादयोऽपि प्रपञ्चिता इत्यर्थः । आन्तर्गणिकानां तु भेदानामानन्त्यमित्याह—उदाहरणमात्रत्वाच्चेति । द्वाविंशतिसंख्यावच्छिन्नो भेद उदाहरणमात्रम् । आन्तर्गणिकभेदविवक्षायां त्वानन्त्यमित्यर्थः ।

---

(१) 'च'—इति ख०-पु० नास्ति । (२) -'उपपादनात्'—इति क-ख-धृतपाठान्तरम् । (३) 'शक्तिः'—इति क-ख-धृतपाठान्तरम् । (क) "विप्रतिपत्तिरप्रतिपत्तिश्च निग्रहस्थानम् । निग्रहः पराजयः, तस्य स्थानमाश्रयः कारणमित्यर्थः । किञ्च पराजयकारणम् ? विप्रतिपत्तिरप्रतिपत्तिश्च । विपरीता कुत्सिता गर्हणीया प्रतिपत्तिः—साधनाभासे साधनबुद्धिः, दूषणाभासे दूषणबुद्धिः । अप्रतिपत्तिस्तु—आरम्भविषयेऽनारम्भः । आरम्भस्य विषयः—साधनस्य स्थापनं दूषणस्योद्धरणं, तयोरकरणमप्रतिपत्तिः । द्विधा हि वादी पराजीयते, यथा—वक्तव्यमप्रतिपद्यमानो विपरीतं वा प्रतिपद्यमान इति । विप्रतिपत्त्यप्रतिपत्तिभेदात् द्वाविंशतिर्निग्रहस्थानानि । तत्रानुभाषणमज्ञानमप्रतिभा विक्षेपः पर्यनुयोज्योपेक्षणमिति अप्रतिपत्तिविकाराः, शेषास्तु विप्रतिपत्तिभेदाः ।"—इति न्यायकलिकायां जयन्तभट्टाः ।

न्यायभाष्यम्

प्रायेण प्रतिज्ञाद्यवयवाश्रयाणि तत्त्ववादिनमतत्त्ववादिनं चाभिसंप्लवन्ते। तेषां विभागः—

प्रतिज्ञाहानिः प्रतिज्ञान्तरं प्रतिज्ञाविरोधः प्रतिज्ञासन्न्यासो हेत्वन्तरमर्थान्तरं निरर्थकमविज्ञातार्थमपार्थकमप्राप्तकालं न्यूनमधिकं पुनरुक्तमननुभाषणमज्ञानमप्रतिभा विक्षेपो मतानुज्ञा पर्यनुयोज्योपेक्षणं निरनुयोज्यानुयोगोऽपसिद्धान्तो हेत्वाभासाश्च (१)निग्रहस्थानानि(क) ॥ १ ॥

न्यायवार्त्तिकम्

'प्रायेण प्रतिज्ञाद्यवयवाश्रयाणी'ति भाष्यम्। वक्तृविषयकत्वात् प्रतिज्ञाद्यवयवाश्रयत्वमनुपपन्नमिति चेत्—अथ मन्यसे विप्रतिपत्तिरप्रतिपत्तिश्च निग्रहस्थानमित्यभिधाने प्रतिज्ञाद्यवयवाश्रितत्वे कः प्रसङ्ग इति? न, क्रियावचनदोषद्वारेण कर्तृवक्तृणामज्ञत्वोपपत्तेः। क्रियाद्वारेण कर्ता दूष्यते वचनद्वारेण वक्तेति न प्रतिज्ञाद्याश्रयत्वमनुपपन्नम्। न चाधाराधेयभाव आश्रयाश्रयिभावो विवक्षितः, किं तु प्रतिज्ञादिमुखेनोद्भावनमिति।

'तत्त्ववादिनमतत्त्ववादिनं चाभिसंप्लवन्त' इति भाष्यम्। तत्त्ववादिनो निग्रहस्थानानुपपत्तिः, प्रतिपादकत्वात्—तत्त्वं ब्रवीतीति प्रतिपादयति, प्रतिपादयंश्च निगृह्यत इति न युक्तम्? न, परापदिष्टदूषणदोषानवबोधद्वारेण तदुपपत्तेः—तत्त्ववादी प्रथमपक्षे द्वितीयपक्षवादिना(२) यो दूषणाभास उक्तस्तस्य तत्त्वानवबोधान्निगृह्यते तत्त्वमभिदधानोऽपि; तत्र वस्तु निर्णीतं, निर्णीते च वस्तुनि दूषणाभासस्याप्रतिपत्त्या निगृह्यत इति। तत्रोदाहरणभेदप्रदर्शनार्थं प्रतिज्ञाहान्यादिसूत्रम्—

प्रतिज्ञाहानिः प्रतिज्ञान्तरं प्रतिज्ञाविरोधः प्रतिज्ञासंन्यासो हेत्वन्तरमर्थान्तरं निरर्थकमविज्ञातार्थमपार्थकमप्राप्तकालं न्यूनमधिकं पुनरुक्तमननुभाषणमज्ञानमप्रतिभा विक्षेपो मतानुज्ञा पर्यनुयोज्योपेक्षणं निरनुयोज्यानुयोगोऽपसिद्धान्तो हेत्वाभासाश्च निग्रहस्थानानि ॥ १ ॥

न्यायवार्त्तिकतात्पर्यटीका

भाष्यमनुभाष्याक्षिपति—प्रायेण प्रतिज्ञेति। समाधत्ते—क्रियावचनदोषद्वारेणेति। वचनदोषद्वारेणेत्येतावन्मात्रे वक्तव्ये क्रियादोषाभिधानं दृष्टान्तार्थम्। नन्वाश्रयार्थोऽप्ययुक्तः पुरुषाश्रयत्वादित्यत आह—न चाधाराधेयभाव इति।

अपरमपि भाष्यमनुभाष्याक्षिपति—तत्त्ववादिनमतत्त्ववादिनं चेति। समाधत्ते—न, परापदिष्टेति। सम्यक्साधने जात्युत्तरे दत्ते तस्य जातित्वमनुद्भावयंस्तत्त्ववाद्यपि निगृह्यत इत्यर्थः ॥१॥

(१) 'इति निग्रह'—इति टि०। (२) 'च यो दू'—इति ख०। क वार्त्तिके '(च) यो'—इति मुद्रितम्।
(क) अस्य अवतरणिकातिरिक्तं भाष्यं नोपलभ्यते, वार्त्तिक-तात्पर्ये अपि सुतरां तथैव।

न्यायभाष्यम्

तानीमानि द्वाविंशतिधा विभज्य, लक्ष्यन्ते—

प्रतिदृष्टान्तधर्माभ्यनुज्ञा स्वदृष्टान्ते प्रतिज्ञाहानिः ॥ २ ॥

साध्यधर्मप्रत्यनीकेन धर्मेण प्रत्यवस्थिते प्रतिदृष्टान्तधर्मं स्वदृष्टान्तेऽभ्यनुजानन् प्रतिज्ञां जहातीति प्रतिज्ञाहानिः। निदर्शनम्—'ऐन्द्रियकत्वादनित्यः शब्दो घटवदि'ति कृते अपर आह—दृष्टमैन्द्रियकत्वं सामान्ये नित्ये, कस्मान्न तथा शब्द इति

न्यायवार्त्तिकम्

लक्षणं (१)तु—

प्रतिदृष्टान्तधर्माभ्यनुज्ञा स्वदृष्टान्ते प्रतिज्ञाहानिः—प्रतिदृष्टान्तस्य यो धर्मस्तं यदा स्वपक्षे दृष्टान्तेऽभ्यनुजानाति तदा निगृहीतो वेदितव्यः। यथाऽनित्यः शब्द ऐन्द्रियकत्वात घटवदित्येकः। सामान्यमैन्द्रियकं दृष्टं नित्यं, कस्मान्न तथा शब्द इति द्वितीयः।

न्यायवार्त्तिकतात्पर्यटीका

लक्षणं तु—

प्रतिदृष्टान्तधर्माभ्यनुज्ञा स्वदृष्टान्ते प्रतिज्ञाहानिः (सू २)॥ तदेतत्सूत्रं भाष्यमतेन तावद् व्याचष्टे—प्रतिदृष्टान्तस्य यो धर्मस्तं यदा स्वदृष्टान्तेऽभ्यनुजानातीति।

वृत्तिः

अथेदानीं निग्रहस्थानविशेषलक्षणाभिधानम्, तदेव चाऽऽह्निकार्थः। अत्र च सप्त प्रकरणानि, तत्रादौ प्रतिज्ञाहेत्वन्यतराश्रितनिग्रहस्थानपञ्चकविशेषलक्षणप्रकरणम्। अन्यानि च यथास्थानं वक्ष्यन्ते।

तत्र विशेषलक्षणार्थमादौ विभजते—(प्रतिज्ञाहानिः प्रतिज्ञान्तरं प्रतिज्ञाविरोधः प्रतिज्ञासन्न्यासः हेत्वन्तरमर्थान्तरं निरर्थकमविज्ञातार्थमपार्थकमप्राप्तकालं न्यूनमधिकं पुनरुक्तमननुभाषणमज्ञानमप्रतिभा विक्षेपो मतानुज्ञा पर्यनुयोज्योपेक्षणं निरनुयोज्यानुयोगोऽपसिद्धान्तो हेत्वाभासाश्च निग्रहस्थानानि)।

अत्र चः त्वर्थे। तेन एतानि तु निग्रहस्थानानि, न पुनरपस्मारादिनाऽननुभाषणादिकं, न वा झटिति संवरणेन तिरोहिता च वाणीत्यर्थो लभ्यत इति प्राञ्चः(क)।

नव्यास्तु—चकारोऽनुक्तसमुच्चये, तेन दृष्टान्ते साधनवैकल्यादीनां परिग्रहः॥ १॥

---

(१) 'च'—इति क०-ख०। (क) "चस्त्वर्थः, तेनैतेषामेव कथाबाह्यानां, कथायामपि अपस्मारोन्मादादिवशापन्नानां झटिति संवरणेन तिरोहितावसराणां पुरःस्फूर्त्तिकानधिकतोद्भावितानां च व्यवच्छेदः।" इत्युदयनाचार्याः। "न चानुक्तप्रत्यक्षाद्याभाससमुच्चयार्थश्चकार इति वाच्यम्, दृष्टान्ताद्याभाससंग्रहार्थमन्त्यसूत्रे चकारस्यैव दर्शितत्वेन अत्रापि तदर्थाकल्पनात्।"—इति परिशिष्टप्रकाशे वर्द्धमानः।

न्यायभाष्यम्

प्रत्यवस्थिते इदमाह—यद्यैन्द्रियकं सामान्यं नित्यं कामं (१)घटो नित्योऽस्त्विति।

न्यायवार्त्तिकम्

यदि सामान्यमैन्द्रियकं नित्यमिति घटोऽप्येवमस्त्विति तृतीयः। अनेन किल प्रतिदृष्टान्तधर्मं स्वदृष्टान्तेऽभ्यनुजानाति, अभ्यनुज्ञानाच्च दृष्टान्तं जहन्निगमनान्तमेव पक्षं जहातीति प्रतिज्ञाहानिरित्युच्यते।

एतत्तु न बुद्ध्यामहे कथमत्र प्रतिज्ञा हीयते इति। हेतोरनैकान्तिकत्वं सामान्यदृष्टान्तेन परेण चोद्यते, तस्यानैकान्तिकदोषोद्धारमनुक्त्वा स्वदृष्टान्ते नित्यतां प्रतिपद्यते, नित्यताप्रतिपत्तेश्चासिद्धता दृष्टान्तदोषो भवति। सोऽयं दृष्टान्तदोषेण साधनदोषेण वा निग्रहो न प्रतिज्ञाहानिः। दृष्टान्तं च जहत् प्रतिज्ञामपि जहातीत्युपचारेण निग्रहस्थानम्। न च प्रधानासम्भवे उपचारो लभ्यते इति प्रतिज्ञाहानेर्मुख्यो विषयो वक्तव्यः।

कथं तर्हीदं सूत्रं प्रतिदृष्टान्तधर्माभ्यनुज्ञा स्वदृष्टान्ते प्रतिज्ञाहानिरिति? दृष्टश्चासावन्ते व्यवस्थित इति दृष्टान्तः, स्वश्चासौ दृष्टान्तश्चेति स्वदृष्टान्तशब्देन (२)पक्ष एवाभिधीयते,

न्यायवार्त्तिकतात्पर्यटीका

तदेतद्भाष्यव्याख्यानमुपन्यस्य वार्त्तिककारो दूषयति—एतत्तु न बुध्यामहे कथमत्र प्रतिज्ञा हीयत इति। अनित्यः शब्द ऐन्द्रियकत्वाद् घटवदिति साधने प्रयुक्ते प्रतिवादिना चानैकान्तिकत्वे सामान्येनोद्भाविते तृतीयस्थानपतितो वाद्याह—अस्तु तर्हि सामान्यवद् घटादिर्नित्य इति। तथा सत्यैन्द्रियकत्वमनैकान्तिकं न भवति, नित्यमात्रगामित्वाद् घटादीनामपि नित्यताभ्युपगमादित्याशयेन यद्यपि, तथाऽपि साक्षादनैकान्तिकदोषोद्धारमक्षरारूढमनुक्त्वा स्वदृष्टान्ते नित्यतां प्रतिपद्यते, नित्यताप्रतिपत्तेश्चासिद्धता(३)दृष्टान्ते दोषो भवति—साध्यविकलतेत्यर्थः। सोऽयं दृष्टान्तदोषेण हेतुदोषेण वा विरुद्धत्वेन घटादीनामपि नित्यत्वाभ्युपगमेनैन्द्रियकत्वस्य हेतोः साध्यानित्यत्वविरुद्धेन नित्यत्वेन व्याप्तत्वाद् निग्रहो वादिनो न प्रतिज्ञाहानिः। न खल्वनेन 'अस्तु शब्दो नित्य' इति प्रतिज्ञा परित्यक्ता, किं 'त्वस्तु घटोऽपि नित्य' इत्युक्तम्। यदि दृष्टान्तपरित्यागेन प्रतिज्ञातार्थस्याऽसिद्धेः प्रतिज्ञाहानिरित्युच्यते, ततः सर्व एव दोषः प्रतिज्ञा(४)हानिः, सर्वस्मादेव दोषात्प्रतिज्ञाहानेरुपपत्तेः। तस्मात्कथंचिद् दृष्टान्तपरित्यागेन प्रतिज्ञाहानिरुपचरितव्या, न चासौ प्रधानं प्रतिज्ञाहानिं विना भवितुमर्हतीत्याह—दृष्टान्तं च जहदिति।

(क)तदेवं भाष्यकारीयं व्याख्यानं दूषयित्वा स्वमतेन व्याचिख्यासुः पृच्छति—कथं तर्हीति। दृष्टश्चासावन्ते निगमने व्यवस्थित इति दृष्टान्तः। दृष्टान्तप्रतिदृष्टान्तौ पक्षप्रतिपक्षावुच्येते।

(१) 'घटोऽपि'—इति टि०। (२) 'सपक्ष'—इति ख०। (३) 'दृष्टान्तदोषः'—इति वार्त्तिके। (४) —'हानिं विना सर्वथा'—इति क०। (क) अत्र भाष्यवार्त्तिकयोस्तात्पर्याविष्करणमुखेन सामञ्जस्यं सम्पादितमाचार्यैः—"उपलक्षकलक्षणपदव्याख्यानपरं भाष्यम्, उपलक्षकलक्ष्यपदव्याख्यानपरं च वार्त्तिकम्। मुख्यार्थद्वारमपहाय उपलक्षकत्वायोगात्। किं पुनरत्रोपलक्ष्यते? प्रतिज्ञापदेन निर्वाह्यनिर्देशः। विवादे हि यद् यथा निर्दिश्यते, तत् तथा निर्वाह्यते, तेन यो यथा साध्यत्वादिना निर्दिष्टस्तस्य तथा निर्वाहमपश्यतस्तत्परित्यागः प्रतिज्ञाहानिरिति सूत्रार्थः"—इत्यादि। (न्यायपरिशिष्टम् ८१पृ० द्र०)।

न्यायभाष्यम्

स खल्वयं साधकस्य दृष्टान्तस्य नित्यत्वं प्रसञ्जयन्निगमनान्तमेव पक्षं जहाति, पक्षं जहत्प्रतिज्ञां जहातीत्युच्यते, प्रतिज्ञाश्रयत्वात्पक्षस्येति ॥ २ ॥

न्यायवार्त्तिकम्

प्रतिदृष्टान्तशब्देन च प्रतिपक्षः—प्रतिपक्षश्चासौ दृष्टान्तश्चेति। एतदुक्तं भवति—परपक्षस्य यो धर्मस्तं स्वपक्ष एवानुजानातीति; यथाऽनित्यः शब्द ऐन्द्रियकत्वात् इति, द्वितीयपक्षवादिनि सामान्येन प्रत्यवस्थिते इदमाह—यदि सामान्यमैन्द्रियकं नित्यं दृष्टमिति शब्दोऽप्येवं भवत्विति, एषा प्रतिज्ञाहानिः। प्रागनेन प्रतिज्ञात'मनित्यः शब्द' इति, सामान्येन अनैकान्तिकत्वेन प्रत्यवस्थित इदमाह(१)'नित्य' इति(१*), प्राक् प्रमाणावधारितार्थपरित्यागाद्विप्रतिपत्तितो निग्रह-स्थानमिति। प्रसङ्गविधानादिति चेत्? अथ मन्यसे नासौ पश्चादपि शब्दस्य नित्यतां प्रतिजानीते, किंतु प्रसङ्गं करोति—यदि सामान्यमैन्द्रियकं नित्यं दृष्टं शब्दोऽप्येवं भवत्विति प्रसङ्गं विधत्ते? (२)तच्च न, अतएव तत्प्राप्तेः। यत एवासौ हेतुदोषोद्धारे कर्तव्ये प्रसञ्जयत्यत एव निगृह्यत इति।

न्यायवार्त्तिकतात्पर्यटीका

एतदुक्तं भवति—प्रतिदृष्टान्तस्य प्रतिपक्षस्य सामान्यस्य यो धर्मो नित्यत्वं तं स्वपक्षे शब्देऽभ्य-नुजानाति। उदाहरणमाह—यथाऽनित्यः शब्द ऐन्द्रियकत्वादिति, द्वितीयपक्षवादिनि सामान्येन प्रत्यवस्थित इदमाह तृतीयपक्षे स्थितो वादी—यदि सामान्यमैन्द्रियकं नित्यं(क) शब्दोऽप्येवं भवत्विति, (३)एषा प्रतिज्ञाहानिः। अत्र च अनैकान्तिकत्वेन प्रत्यवस्थित इत्युपलक्षणम्। येन केन चित्प्रकारेण स्वप्रतिज्ञातार्थानिर्वाहं पश्यन् प्रतिज्ञार्थं जहत्प्रतिज्ञाहानिमाप्नोतीति परमार्थः। यदप्युच्यते—स्वयमेव घट[?शब्द]मनित्यमैन्द्रियकमुदाहृत्य घटस्यैन्द्रियकत्वं पश्यन् कथमनुन्मत्तः सन् सामान्यस्य नित्यस्यैन्द्रियकत्वदर्शनमात्राच्छब्दे नित्यत्वमभ्युपगच्छेत्? किं तूभयत्र दर्शनात्संशयितः स्यात्(क)। तत्र सर्वं नित्यमिति सांख्यीय-राद्धान्तावष्टम्भेनापि स्वपक्षनिर्वाहं पश्यतोऽनैकान्तिकत्वोद्धाराय प्रेक्षावतोऽपि प्रवृत्तिसंभवात्। न चात्यन्तिकं प्रेक्षावत्त्वमिह ग्राह्यम्, तादृशस्य निग्रहाधिकरणत्वानुपपत्तेः। तस्माद्यथा जडं प्रति विचारो नास्त्येवं प्रामाणिकमपि प्रति निग्रहावतारो नास्तीति मध्यमो जनो निग्राह्यः, तस्य च संभवन्त्येवं प्रमादा इति। शङ्कते—प्रसङ्गविधानादिति चेत्। निराकरोति—तच्च न, अत एव तत्प्राप्तेः। हेतुदोषमुद्दिधीर्षुः प्रसञ्जयन्नभ्युपगच्छत्येव, न हि सांख्यीयं राद्धान्तमनभ्युपगच्छन्ननैकान्तिकत्वमुद्धर्तुमर्हतीति भावः।

---

(१) 'नित्यः शब्द इति'—कं०ग०छ०धृतपाठान्तरम्। (२) 'यच्च'—इति ग०। (क) 'दृष्टमिति'—इति वार्त्तिक-भागो न गृहीतः। (३) 'एषा'—इति ख० पु० नास्ति। (क) अनुरूपः सन्दर्भो वादभाष्ये (७७८०) द्रष्टव्यः।

न्यायवार्त्तिकम्

हेतुदोषेण चरितार्थत्वान्न प्रतिज्ञाहानिर्निग्रहस्थानमित्यन्ये—अन्ये तु वर्णयन्ति नैवेदं निग्रहस्थानं युक्तं हेतुदोषेण चरितार्थत्वात्। यस्मा'दैन्द्रियकत्वादि'त्यस्य हेतोरनैकान्तिकत्वं दोषस्तेनायं निगृहीत इति। न, अनैकान्तिकत्वदोषपरिहारेण विप्रतिपत्तेस्तदुपपत्तेः—तस्यैवानैकान्तिकत्वस्य परिहारं कुर्वाणोऽयं निगृह्यत इत्यतोऽनैकान्तिकत्वं न निग्रहस्थानमिति ॥ २ ॥

न्यायवार्त्तिकतात्पर्यटीका

तदनेन परमतं निराकृतप्रायमपि साक्षान्निराकर्त्तुमुपन्यस्यति—हेतुदोषेण अनैकान्तिकत्वलक्षणेन चरितार्थत्वान्न प्रतिज्ञाहानिर्निग्रहस्थानमित्यन्ये।

यदाह कीर्तिः—"तस्मादैन्द्रियकत्वस्य नित्यानित्यपक्षवृत्तेर्व्यभिचारादसाधनाङ्गस्योपादानान्निग्रहो, न प्रतिपक्षधर्मस्याभ्यनुज्ञानादि"ति(क)। निराकरोति—न, अनैकान्तिकत्वदोषपरिहारेण विप्रतिपत्तेस्तदुपपत्तेः। यदा हि सांख्यपक्षावलम्बनेन शब्दनित्यत्वमभ्युपैति तदा प्रतिज्ञाहानिः, न विरुद्धो हेतुर्नाप्यनैकान्तिको विपक्षाभावात्; केवलं प्रतिज्ञातार्थहानमेवास्य पराजयस्थानम्। 'विप्रतिपत्तेः' स्वसाध्यविरुद्धप्रतिपत्तेरिति सर्वमवदातम् ॥ २ ॥

वृत्तिः

तत्र क्रमेण प्रतिज्ञाहान्यादीनां लक्षणेषु वक्तव्येषु प्रथमोद्दिष्टां प्रतिज्ञाहानिं लक्षयति—(प्रतिदृष्टान्तधर्माऽभ्यनुज्ञा स्वदृष्टान्ते प्रतिज्ञाहानिः)।

प्रतिकूलो दृष्टान्तो यत्र स प्रतिदृष्टान्तः परपक्षः, स्वः स्वीयो दृष्टान्तो यत्र स स्वदृष्टान्तः स्वपक्षः, तथा च स्वपक्षे परपक्षधर्माभ्यनुज्ञा प्रतिज्ञाहानिः। स्वयं विशिष्याभिहितपरित्याग इति फलितार्थः। सिद्धान्तस्तु स्वयं विशिष्य नाभिधीयत इति नापसिद्धान्तसाङ्कर्य्यम्। सेयं(ख)पक्षहेतुदृष्टान्तसाध्यतदन्यहानिभेदात् पञ्चधा भवति। यथा 'शब्दोऽनित्यः कृतकत्वा'दित्युक्ते, प्रत्यभिज्ञया बाधितविषयोऽयमित्युत्तरिते, 'अस्तु तर्हि घट एव पक्ष' इति। एवं तत्रैव 'ऐन्द्रियकत्वादि'तिहेतोरनैकान्तिकत्वमिति प्रत्युक्ते 'अस्तु कृतकत्वादिति हेतु'रिति। एवं 'पर्वतो वह्निमान् धूमादयोगोलकवदि'त्युक्ते, दृष्टान्तः साधनविकल इति प्रत्युक्ते, 'अस्तु तर्हि महानसवदि'ति। एवम् अत्रैव सिद्धसाधनेन प्रत्युक्ते, 'अस्तु तर्हि इन्धनवानि'ति। अन्यहानिस्तु विशेषणहान्यादिः, यथा तत्रैव 'नीलधूमादि'त्युक्तेऽसमर्थविशेषणत्वेन प्रत्युक्ते, 'अस्तु तर्हि धूमादिति हेतु'रित्यादि ॥ २ ॥

(क) धर्मकीर्त्ते'र्वादन्याये' न्यायमतखण्डनं (७७पृ०) द्रष्टव्यम्। वार्त्तिककृता तु "अन्ये" इत्यनेन धर्मकीर्त्तिर्न लक्षितः, किन्तु तत्सम्प्रदायप्रवर्त्तकाः प्राचीनाः; अर्वाचीनेन धर्मकीर्त्तिना स्वग्रन्थे वार्त्तिकसन्दर्भोद्धारात्। (ख) "स्वीकृत्यास्वीकारः प्रतिज्ञाहानिः। तौ च स्वीकारास्वीकारौ पक्ष-साध्य-हेतु-दृष्टान्ततद्विशेषणानां यथासम्भवमिह विवक्षितौ।"—इति परिशिष्टप्रकाशे वर्द्धमानः।

न्यायभाष्यम्

प्रतिज्ञातार्थप्रतिषेधे धर्मविकल्पात्तदर्थनिर्देशः प्रतिज्ञान्तरम् ॥३॥

प्रतिज्ञातार्थोऽनित्यः शब्द ऐन्द्रियकत्वाद् घटवदित्युक्ते योऽस्य प्रतिषेधः प्रतिदृष्टान्तेन (१)हेतुव्यभिचारः—सामान्यमैन्द्रियकं नित्यमिति, तस्मिंश्च प्रतिज्ञातार्थप्रतिषेधे, "धर्मविकल्पादि"ति दृष्टान्तप्रतिदृष्टान्तयोः साधर्म्ययोगे धर्मभेदात् सामान्यमैन्द्रियकं सर्वगतमैन्द्रियकस्त्वसर्वगतो घट इति धर्मविकल्पात्, "तदर्थनिर्देश" इति साध्यसिद्ध्यर्थम्। कथम्? यथा घटोऽसर्वगत एवं शब्दोऽप्यसर्वगतो घटवदेवानित्य इति।

न्यायवार्त्तिकम्

प्रतिज्ञातार्थप्रतिषेधे धर्मविकल्पात् तदर्थनिर्देशः प्रतिज्ञान्तरम्। उदाहरणं पूर्ववत्। सर्वगतासर्वगतविकल्पेन प्रतिज्ञान्तरं करोति—'असर्वगतोऽनित्यः शब्द' इति।

न्यायवार्त्तिकतात्पर्यटीका

प्रतिज्ञातार्थप्रतिषेधे धर्मविकल्पात्तदर्थनिर्देशः प्रतिज्ञान्तरम् (सू ३)॥ एतद्व्याचष्टे प्रतिज्ञातो मीमांसकं प्रति वैशेषिकेण अनित्यः शब्द इति, तस्य साधनमैन्द्रियकत्वाद् घटवदिति, एवमुक्तस्य प्रतिषेधो मीमांसकेन क्रियते प्रतिदृष्टान्तेन (२)हेतुव्यभिचारः। तमाह—सामान्यमैन्द्रियकं नित्यमिति। तस्मिन् प्रतिषेधे मीमांसकेन कृते धर्मविकल्पात्तथा निर्देश इति यावन्नोच्यते तावदर्थोक्त एव 'धर्मविकल्पा'दित्यनूद्य व्याचष्टे—दृष्टान्तप्रतिदृष्टान्तयोर्घटसामान्ययोः साधर्म्यमैन्द्रियकत्वं तद्योगे तद्धर्मभेदात् सामान्यमैन्द्रियकं सर्वगतमैन्द्रियकस्त्वसर्वगतो घट इति धर्मविकल्पात्तदर्थं प्रतिज्ञातार्थसिद्ध्यर्थं शब्दस्यासर्वगतत्वं मीमांसकानां प्रतिपादयितुं निर्देशः, तस्य हि शब्दस्यासर्वगतत्वमसिद्धम्। प्रश्नपूर्वकं निर्देशस्वरूपमाह—कथम्? यथा घटोऽसर्वगतोऽनित्य इति, एवं शब्दोऽप्यसर्वगतोऽनित्य इति। इदं हि प्रतिज्ञावाक्यम्, 'अनित्यः शब्द' इतिव'दसर्वगतः शब्द' इति मीमांसकं विप्रतिपन्नं प्रति निर्देशात्, न तु कृतकत्वादितिवदुदाहरणसाधर्म्यादस्य(३)हेतुलक्षणमस्ति; 'साध्यनिर्देशः प्रतिज्ञे'ति तु प्रतिज्ञालक्षणयोगात्प्रतिज्ञान्तरमेव। यद्यप्यस्य मनसि वर्त्तते असर्वगतत्वं साधयित्वा मया असर्वगतत्वे सतीति ऐन्द्रियकत्वं हेतुर्विशेषणीय इति, तथाप्येतदनेन न कृतं, किं त्वसर्वगतः शब्दो घटवदित्युक्त्वैव विरतः; परार्थानुमाने च वचनगता गुणदोषा विचार्यन्ते, न तु वचनानपेक्षं वस्तु।

वृत्तिः

प्रतिज्ञान्तरं लक्षयति—(प्रतिज्ञातार्थप्रतिषेधे धर्मविकल्पात् तदर्थनिर्देशः प्रतिज्ञान्तरम्)। प्रतिज्ञातस्यार्थस्य प्रतिषेधे कृते तद्दूषणोद्दिधीर्षया धर्मस्य धर्मान्तरस्य विशिष्टः कल्पो विकल्पः, तस्माद्विशेषणान्तरविशिष्टतया प्रतिज्ञातार्थस्य कथनमिति फलितार्थः(क)। 'प्रतिषेध'

---

(१) 'हेतु'पदं टि-पु० नास्ति। (२) 'हेतुर्व्यभिचार:'—इति क०। (३) 'हेतुलक्षण'—इति क०। (क) प्रतिज्ञातार्थे दूषिते तत्प्रतिचिकीर्षया विशेषणान्तरप्रक्षेपेण पुनस्तद्वचनं प्रतिज्ञान्तरमिति सूत्रार्थ. इत्याचार्याः।

न्यायभाष्यम्

तत्रानित्यः शब्द इति पूर्वा प्रतिज्ञा,(१)असर्वगत इति द्वितीया प्रतिज्ञा प्रतिज्ञान्तरम्। तत्कथं निग्रहस्थानमिति ? न प्रतिज्ञायाः साधनं प्रतिज्ञान्तरम्, किं तु हेतुदृष्टान्तौ साधनं प्रतिज्ञायाः, तदेतद्साधनोपादानमनर्थकमिति। आनर्थक्यान्निग्रहस्थानमिति ॥३॥

न्यायवार्त्तिकम्

तत्रानित्यः शब्द इति पूर्वा प्रतिज्ञा सामान्येनैन्द्रियकेण प्रतिहता, 'असर्वगतोऽनित्यः शब्द' इति प्रतिज्ञान्तरम्। तत् कथं निग्रहस्थानम् ? साधनसामर्थ्यापरिज्ञानात्—अपरिज्ञाय साधनसामर्थ्यं कुर्वतोऽसर्वगतोऽनित्यः शब्द इति प्रतिज्ञा। न च प्रतिज्ञा प्रतिज्ञान्तरं साधयति, साधनसामर्थ्यापरिज्ञानात्। तदेतत्प्रतिज्ञान्तरम्। तदिदमप्रतिपत्तितो विप्रतिपत्तितो वा निग्रहस्थानमिति ॥ ३ ॥

न्यायवार्त्तिकतात्पर्यटीका

तदिदमाह—असर्वगतः शब्द इति द्वितीया प्रतिज्ञा हेतुरहिता। अस्य प्रश्नपूर्वकं निग्रहस्थानत्वमाह—तत्कथमिति। अनर्थकं निष्प्रयोजनमिष्टार्थसिद्धेरभावादिति।

वार्त्तिकं—तत्रानित्यः शब्द इति (क)प्रतिज्ञा प्रथमा। अस्यां सामान्येनैन्द्रियकेण हेतोरनैकान्तिकत्वात्प्रतिहतो वादी प्रतिवादिना 'असर्वगतः शब्दोऽनित्य' इति प्रतिज्ञान्तरं पूर्वप्रतिज्ञासिद्ध्यर्थं करोतीत्यनुषज्यते। पृच्छति—कथमिति। उत्तरम्—साधनसामर्थ्यापरिज्ञानात्। 'अनित्यः शब्द ऐन्द्रियकत्वाद् घटवदि'त्येतावदुक्त्वा निराकाङ्क्षो वादी न त्वसर्वगतत्वे सतीति साधनं विशेषितवान्, (२)न चाविशिष्टं साधनमत्रार्थेऽसमर्थं विशिष्टं तु समर्थं तस्य सामर्थ्यमपरिज्ञायाविशिष्टे तदारोप्याविशिष्टसाधनं प्रयुक्तवान्। तत्र निराकाङ्क्षो वादी सव्यभिचारहेतुप्रयोगादेव पराजीयते, न तु प्रतिज्ञान्तरप्रयोगात्। यदि तु वादिन्यपर्यवसित-वाद एव मध्ये प्रतिवादिना हेतोरनैकान्तिकत्वे उद्भाविते तमेव हेतुमसर्वगतत्वे सतीति विशेष्टुं मीमांसकं प्रति शब्दस्यासर्वगतत्वं प्रतिजानीते, 'असर्वगतः शब्द' इति प्रतिज्ञाय च न हेतुं ब्रवीति, तदानैकान्तिकत्वोद्धाराय प्रतिज्ञान्तरकरणान्नानैकान्तिकत्वेन पराजीयते, अपि तु प्रतिज्ञान्तरादेव, न हि प्रतिज्ञा प्रतिज्ञान्तरं साधयितुमर्हतीति। सोऽयं प्रतिज्ञामात्रस्यासाधकत्वा-प्रतिपत्त्याऽसाधकस्यैव वा साधकत्वप्रतिपत्त्या पराजीयते। तदेतदाह—न च प्रतिज्ञा प्रतिज्ञान्तरं साधयति। तेन प्रतिज्ञा यत्रार्थे समर्था तदपरिज्ञानात्पञ्चावयवसाध्ये च सामर्थ्यारोपणा'दपरि-ज्ञानादि'ति श्लिष्टनिर्देशः; प्रसज्यप्रतिषेधपर्युदासौ विवक्षितौ; तेनाज्ञानाद्विपरीतज्ञानाच्च प्रतिज्ञान्तरं निग्रहस्थानमिति।

(ख)यत्पुनरुच्यते परैः, "अत्यन्तासंबद्धमेतद्—यत्प्रतिज्ञा प्रतिज्ञासाधनायेति, यो हि प्राक् प्रतिज्ञामुक्त्वा हेतूदाहरणादिकं वक्तुं जानाति स कथंचिदनुक्रमं साधनस्य

(१) 'असर्वगतशब्द इति'—इति टि०। (२) 'नत्रा'—इति क०। (क) 'पूर्वा प्रतिज्ञे'ति वार्त्तिक-सन्दर्भोऽर्थतोऽत्र गृहीतः। (ख) धर्मकीर्त्तेर्वचनं दूषयितुमुपन्यस्यति—'यत् पुन'रिति। वादन्याये "अत्यन्तासम्बद्धश्चेदं प्रतिज्ञा प्रतिज्ञासाधनायेति"—इत्यादिसन्दर्भो द्रष्टव्यः (७८पृ०)।

न्यायभाष्यम्

प्रतिज्ञाहेत्वोर्विरोधः प्रतिज्ञाविरोधः ॥ ४ ॥

गुणव्यतिरिक्तं द्रव्यमिति प्रतिज्ञा, 'रूपादितोऽर्थान्तरस्यानुपलब्धे'रिति हेतुः।

न्यायवार्त्तिकम्

प्रतिज्ञाहेत्वोर्विरोधः प्रतिज्ञाविरोधः। यत्र प्रतिज्ञा हेतुना विरुध्यते हेतुश्च प्रतिज्ञया, स

न्यायवार्त्तिकतात्पर्यटीका

जानात्येव, जानन् कथमविकलान्तःकरणः प्रतिज्ञामेव प्रतिज्ञासाधनायोपाददीते''ति। तत्र ब्रूमः—नायं प्रतिज्ञया प्रतिज्ञा साधनीयेति बुद्धया प्रवृत्तः, किं त्वसर्वगतत्वं शब्दस्य मीमांसकं प्रति साधयित्वा तेनैन्द्रियकत्वं विशिष्यानैकान्तिकत्वमुद्धरणीयमिति मनोरथेन प्रवृत्तः प्रतिज्ञां कृतवान्—असर्वगतः शब्द इति। अथास्य प्रतिवाद्यवष्टम्भात्परिषद्दर्शनाद्वा स्तम्भितत्वे (क)साधनाप्रतिभया तूष्णींभवतः प्रेक्षावतोऽपि प्रतिज्ञान्तरं भवति निग्रहस्थानम्। अयं च विकलान्तःकरणस्य निग्रहो भवद्भिरप्युक्त एव 'तदभ्युपगम्याप्रतिभया तूष्णींभावादि'ति(ख) वदद्भिः। सोऽयमीदृशोऽसत्प्रलापो भवद्भिः शास्त्रे निबन्धनीयो न त्वस्माभिरिति व्यक्तमियं राजकुलस्थितिरिति सर्वं चतुरस्रम् ॥ ३ ॥

प्रतिज्ञाहेत्वोर्विरोधः प्रतिज्ञाविरोधः (सू ४) ॥ अत्र 'प्रतिज्ञाहेत्वो'रिति प्रतियोगिद्वयमात्रोपलक्षणपरम्। तेन दृष्टान्तादयोऽपि प्रतियोगिन उन्नेयाः। एतदुक्तं भवति—येषां वाक्यगतानां पदार्थानां मिथो व्याघातः प्रतीयते, प्रमाणान्तरं च विरोधकं, स विरोधो नाम निग्रहस्थानम्; लक्ष्यस्थितस्य प्रतिज्ञाग्रहणस्याप्युपलक्षणार्थत्वात्। न चैवं (ग)भाण्डालेख्यन्यायः, एकदेशेनाव्यापकेन समुदायसंग्रहे स हि भवति, न तु व्यापकेन संग्रहे, * व्यापकं चानवयवेन इदं प्रतियोगिमिथुनयोर्विरोधः, अतो यथाश्रुति तावत्सूत्रं व्याचष्टे वार्तिककारः—यत्र प्रतिज्ञा

वृत्तिः

इत्यनेन झटिति संवरणे विलम्बेनापि स्वयं दूषणं विभाव्य विशेषणे न दोष इत्युक्तम्। प्रतिज्ञातार्थस्येत्युपलक्षणं, हेत्वतिरिक्तार्थस्येति तत्त्वम्। तेन उदाहरणान्तरमुपनयान्तरं निगमनान्तरं च प्रतिज्ञान्तरत्वेन सङ्गृहीतं भवति। इदं च पक्षसाध्यविशेषणभेदात् प्रत्येकं द्विविधं, यथा शब्दो नित्य इत्युक्ते ध्वनौ बाधेन परेण प्रत्युक्ते वर्णात्मकः शब्दः पक्ष इति प्रतिज्ञान्तरम्। न चेदमर्थान्तरं प्रकृतोपयोगात्, न चेयं प्रतिज्ञाहानिः, पूर्वोक्तस्यापरित्यागात्। एवं पर्वतो वह्निमान् सुरभिमलिनधूमवत्त्वादित्युक्ते असमर्थविशेषणत्वेन च परेण प्रत्युक्ते 'कृष्णागुरुप्रभववह्निमानि'त्यत्र। एवं तादृशवह्नौ साध्ये 'यः सुरभिमलिनधूमवान् स वह्निमानि'त्युदाहरणे न्यूनत्वेन प्रत्युक्ते 'स तादृशवह्निमानि'त्यत्र। एवमन्यदप्यूह्यम् ॥३॥

(क) "सभाक्षोभेण स्तम्भितत्वादवचने [-साधनावचने इत्यर्थः] 'न्यून' स्यादिति चेन्न; पूर्वोपक्रान्तस्य हेत्वादेर्विद्यमानत्वेन न्यूनत्वानवकाशात्''—इति न्यायपरिशिष्टे (८६पृ०) उदयनः। ननु तथापि अनैकान्तिकदोषस्यैव पूर्वमुक्तत्वेन तेनैव निगृहीते वादिनि कथं पुनः प्रतिज्ञान्तरमुद्भाव्यत इति चेन्न, तदनुद्भावने पूर्वदोषो वादिना परिहृत इति बुद्ध्या विरतः प्रतिवादीति सभ्यानां बुद्धिः स्यात्, तथाचाप्रतिभया प्रतिवादी निगृह्येत। पूर्वदोष एव पुनरुद्भाव्यतामिति चेत्,—तदपि न शक्यं प्रतिज्ञान्तरमनुद्भाव्येति व्यक्तं तत्रैव। (ख) सन्दर्भोऽयमन्विष्यापि वादन्याये नोपलब्धोऽस्माभिः, वादन्यायस्येति तु प्रतिभाति। ग्रन्थान्तरीयो वा वादन्यायसंवादी सन्दर्भः पूर्वोऽपि।

* अत्रायं पाठो न संगच्छते। "-ऽव्यापकेनानवयवेन इह प्रतियोगि……" इत्येवं पाठो वा, पतितो वा कश्चनांश इति सुधीभिर्निरूपणीयम्।

(ग) "यदप्युक्तं—एतेन प्रतिज्ञाय दृष्टान्तविरोधादयोऽपि वक्तव्याः भाण्डालेख्यन्यायेने''ति

न्यायभाष्यम्

सोऽयं प्रतिज्ञाहेत्वोर्विरोधः। कथम्? यदि गुणव्यतिरिक्तं द्रव्यं, रूपादिभ्योऽर्थान्तरस्यानुपलब्धिर्नोपपद्यते। अथ रूपादिभ्योऽर्थान्तरस्यानुपलब्धिः, गुणव्यतिरिक्तं द्रव्यमिति

न्यायवार्त्तिकम्

प्रतिज्ञाविरोधो नाम निग्रहस्थानम्—यथा गुणव्यतिरिक्तं द्रव्यं भेदेनाग्रहणादिति। एतेनैव प्रतिज्ञाविरोधोऽप्युक्तः—यत्र प्रतिज्ञा स्ववचनेन विरुध्यते, यथा—श्रमणा गर्भिणी*। हेतुविरोधोऽपि—यत्र प्रतिज्ञा हेतुना विरुध्यते, यथा—सर्वं पृथक् समूहे भावशब्दप्रयोगादिति।

न्यायवार्त्तिकतात्पर्यटीका

हेतुना विरुध्यत इति। द्वयोर्विरोधे यस्य प्रमाणान्तरानुग्रहस्तेन तद्बाध्यत इति तेन तद्विरुध्यत इत्युच्यते। यत्र प्रतिज्ञया हेतुर्विरुध्यते तदुदाहरति—यथा गुणव्यतिरिक्तं द्रव्यं भेदेनाग्रहणादिति। अत्र हि भेदेनाग्रहणादित्यनेन ग्रहणप्रतिषेधेन ग्राह्याभाव उपलक्ष्यते। तेनैवं हेत्वर्थो भवति—गुणव्यतिरिक्तं द्रव्यमव्यतिरेकादिति। सोऽयं प्रतिज्ञाहेतुपदयोर्व्याप्तिस्मरणानपेक्ष एव परस्परव्याघातोऽस्तिनास्तिपदयोरिव(क)। न चैवंविधः शब्दे नित्यत्वकृतकत्वयोर्येन कृतकत्ववद्विरुद्धोऽयं हेत्वाभासः स्यात्। तत्र हि कृतकत्वस्य नित्यत्वेन व्याप्तिस्मरणापेक्ष एव विरोधः प्रतीयते, न त्वयं तथा, अस्तिनास्तिवत्स्वभावविरोधात्। यद्यप्ययमसिद्धोऽपि हेतुस्तथाऽप्यस्यासिद्धिर्बाधकं प्रमाणान्तरमनुसृत्य प्रतिपत्तव्या, प्रतिज्ञाविरोधस्तूच्चारणमात्रादेव प्रथमत एव गम्यत इति। तेनैव दूषितेनासिद्धिः पश्चात्तनी न दूषणत्वाय कल्पते, भस्मीकृते दहनवत्। प्रतिज्ञाहेतुविरोधमात्रेण च निग्रहसिद्धेः सुहृद्भावमात्रेण प्रतिज्ञाया बलवत्तास्मरणम्, प्रतिज्ञायाश्चात्र बलवत्त्वे प्रमाणान्तरानुग्रहात्। तथा हि दर्शनस्पर्शनाभ्यामेकार्थप्रतिसंधानाद्रूपादिव्यतिरिक्तं द्रव्यं सिध्यतीति तदनुगृहीता प्रतिज्ञैव हेत्वर्थं बाधत इति। एतेनैवेति, लक्षणेन। श्रमणा गर्भिणीति, श्रमणा ब्रह्मचारिणी नान्तर्वत्नी भवितुमर्हति, जितेन्द्रियस्योपस्थसंयमो हि ब्रह्मचर्यम्। (ख)न चासाधनाङ्गस्य प्रतिज्ञाया वचनादेव निगृहीत इति कृतं विरोधोद्भावनेन, निष्पादितक्रिये कर्मणि अविशेषाभिधायिनो दूषणस्य दूषणन्यायातिपातादिति सांप्रतम्; प्रतिज्ञायाः साधनाङ्गत्वस्य प्रथम एवाध्याये दर्शितत्वात्। हेतुविरोधोऽपि यत्र हेतुना प्रमाणान्तरेणानुगृहीतेन प्रतिज्ञा बाध्यते, यथा सर्वं पृथगिति प्रतिज्ञा, न किंचिदेकमित्यर्थः। हेतुः—'समूहे भावशब्दप्रयोगा'दिति, एकसमुच्चये घटादिप्रयोगादित्यर्थः। नास्त्येकमेकसमुच्चयश्चेति वचने मिथो विरुध्येते, विनैव व्याप्त्यनुस्मरणमिति। न च सर्वनास्तित्ववादिनो नैकसमुच्चयोऽस्तीति वक्तव्यम्, असति हेतौ साध्यसिद्धेरयोगात्। न च कल्पितस्य हेतोः साधनाङ्गतेति तत्र तत्र

वादन्याये (९०पृ०) धर्मकीर्त्तिः। तत्र च भण्डालेख्यन्याय इत्थं व्याख्यातो बौद्धाचार्यशान्तरक्षितेन—"यथा हि भण्डाः प्राकृतान् विस्मापयन्तश्चित्रलक्षणोपेतकपिशालभञ्जिकादिप्रतिच्छन्दकमालिख्य विचित्रशिल्पकलाकौशलशालिनोऽतिदिशन्ति 'एवंप्रकाराण्यपि अस्मत्कौशलनिर्मितान्येकतालमात्रेण हस्त्यादिरूपकस्थानानि प्रतिपत्तव्यानी'ति; तथाजातीयकमेतदुद्द्योतकरस्ये"ति। इह तु आदर्शद्वयानुसारेण 'भाण्डालेख्यन्याय'इति मुद्रितम्।

(क) 'पदयोरेव'—इति क-ख-पुस्तकयोः प्रमादान्मुद्रितम्। (ख) 'न वा सा—'इति क-पुस्तके प्रमादः। "तदेतदेव निग्रहाधिकरणमसाधनाङ्गभूतायाः प्रतिज्ञायाः साधनवाक्ये प्रयोगो, न विरोधः" इति धर्मकीर्त्तिवचनमेतेन निराकृतम् (वादन्याय—८२पृ० द्र०)। * धर्मकीर्त्तिसमुद्धृतसन्दर्भदर्शनात् तदीयखण्डनदर्शनाच्च—"श्रमणा गर्भिणी"त्यस्यानन्तरं "नास्त्यात्मेति वे"त्युदाहरणान्तरमासीद् वार्त्तिककृतामिति निःसंशयं शक्यमप्रतिपत्तुम्। उदयनाचार्येण च न्यायपरिशिष्टे—"साध्यधर्मिनिषेधाद् वा, यथा नास्त्यात्मेती"त्युदाहृतम्। परन्त्वस्मदवलम्बितयोरादर्शयोरदर्शनात् टीकाकृतामव्याख्यानाच्च न शक्यते मुद्रापयितुम्।

न्यायभाष्यम्

नोपपद्यते। गुणव्यतिरिक्तं च द्रव्यं रूपादिभ्यश्चार्थान्तरस्यानुपलब्धिरिति विरुध्यते—व्याहन्यते न सम्भवतीति ॥ ४ ॥

न्यायवार्त्तिकम्

एतेन प्रतिज्ञया दृष्टान्तविरोधोऽपि वक्तव्यः—हेतोश्च दृष्टान्तादिभिर्विरोधः, (१)प्रमाणविरोधश्च प्रतिज्ञाहेत्वोर्वक्तव्यः। परपक्षसिद्धेन गोत्वादिनाऽनैकान्तिकदेशनाद्विरोधः—यः *परपक्षसिद्धेन गोत्वादिना व्यभिचारयति तद्विरुद्धमुत्तरं वेदितव्यम्। स्वपक्षानपेक्षं च तथा—यश्च[? श्च] स्वपक्षानपेक्षं हेतुं प्रयुङ्क्ते—अनित्यः शब्द ऐन्द्रियकत्वादिति, स प्रसिद्धस्य गोत्वादेर्नित्यत्वविरोधाद्विरुद्धः। उभयपक्षसम्प्रतिपन्नस्त्वनैकान्तिकः—यदुभयपक्षसम्प्रतिपन्नं वस्तु, तथात्वेन

न्यायवार्त्तिकतात्पर्यटीका

निवेदितम्। अत्र चैकसमुच्चयस्य प्रमाणानुग्रहान्नैकं किंचिदिति प्रतिज्ञा हेतुना बाध्यते। एतेन लक्षणेन प्रतिज्ञया दृष्टान्तविरोधोऽपि वक्तव्यः—यथा अनित्यः शब्दः प्रमेयत्वात्। यत्प्रमेयं तन्नित्यं यथाऽऽकाशमिति साधर्म्यदृष्टान्तः। यद्यप्यत्र वस्तुतो हेतुरनैकान्तिकस्तथाऽपि दृष्टान्तस्य प्रतिज्ञाविरोधेनैव निगृह्यते, विरोधस्य वाक्ये प्रथममवगतेः;—अनित्यं घटाद्युन्नीयानैकान्तिकत्व-(२)प्रतिपत्तेस्तज्जघन्यत्वादिति(क)। हेतोश्च दृष्टान्तादिभिर्विरोध एतेन वक्तव्य इत्यनुषज्यते। यथा—नित्यः शब्द ऐन्द्रियकत्वादनैन्द्रियकद्व्यणुकवदिति। अत्राप्यैन्द्रियकत्वानैन्द्रियकत्वयोः शब्दतो विरोधः प्रतीयते, साधनवैकल्यं तु वस्तुस्वभावालोचनयेति विशेषः। एवमुपनयेन विरोधोऽनैन्द्रियकश्च शब्द इति। अत्रापि वस्तुस्वभावालोचनयाऽनैन्द्रियकत्वासिद्धिः प्रतीयते, शब्दतस्तु विरोध इति। प्रमाणविरोधश्च प्रतिज्ञाहेत्वोर्वक्तव्यः। यद्यपि बाधितविषयं हेत्वाभासान्तर्गतं तथापीहाप्यस्तीति विरोधहेत्वाभासयोरत्र निग्रहस्थानयोः समावेशोऽस्तु; न क्वचिद्विषये समावेशादानर्थक्यम्, विषयान्तरे समावेशाभावादर्थवत्त्वात्। दर्शितं चानन्तरमेव भिन्नविषयत्वमिति। तदेवं साधनवादिनो विरोधं निग्रहस्थानमभिधायोत्तरवादिनोऽपि निग्रहस्थानमनेनैव संगृहीतमित्याह—परपक्षसिद्धेन गोत्वादिनेति। यदा हि बौद्धेन प्राभाकरं प्रति साध्यते अनित्यः शब्दः श्रावणत्वादिति—यद्यनित्यत्वं न भवेच्छ्रावणत्वं न स्यादिति; प्राभाकरोऽनैकान्तिकत्वमुद्भावयति श्रावणं शब्दत्वं नित्यं चेति; तदाऽस्यानैकान्तिकत्वोद्भावनं स्वकीयं शब्दत्वनिराकरणविरुद्धमिति। परपक्षसिद्धं गोत्वाद्यपीदृश एव विषये विरुद्धं द्रष्टव्यम्। सिद्धान्तविरुद्धं च साधनं विरुद्धमित्याह—स्वपक्षानपेक्षं च। ननु यद्यनैकान्तिकोद्भावनमपि विरुद्धं कस्तर्ह्यनैकान्तिकत्वापादनस्य विषय इत्यत आह—उभयपक्षसंप्रतिपन्नस्त्विति।

---

(१) 'प्रमाणावि'—इति ख०। (२) 'नित्यप्रतिपत्ते'रिति क०। (क) "यद्यपि च विरोधे अवश्यं हेत्वाभासानुप्रवेशः, तथापि तस्य जघन्यप्रतीतित्वात् तमुपेत्य विरोध एवोद्भाव्यः, सांप्रत्यायकत्वेनोपेक्षानर्हत्वात्।" इति न्यायपरिशिष्टे उदयनः। "संप्रत्ययो झटिति प्रत्ययः।···विरोधे यद्यप्यनैकान्तिकादयस्तथापि तत्प्रतीत्युद्भावनयोरेतत्प्रतीत्युद्भावनोपजीवकत्वेन जघन्यत्वादस्य च प्राथमिकत्वादयमेव प्रथमोद्भाव्य इति भाव"—इति वर्द्धमानः (९०पृ०)। वृत्तिकृतस्तु असंकीर्णस्थलमपि दर्शितवन्तः (परपत्रे द्रष्टव्यम्)।

* 'परपक्ष'शब्दोऽत्र उत्तरवादिपक्षपरः, न तु विरोधिपक्षपरः, तेन उत्तरवादिमात्रसिद्धेनेत्यर्थः। विरोधिपक्षपरत्वे व्यभिचारोद्भावकस्य परपक्षो वादिपक्ष एव स्यात्; तथात्वे 'परपक्षासिद्धेने'ति पाठो युज्येत। धर्मकीर्तिस्तु "परपक्षं स्वसिद्धेने'ति पाठमुक्तवान्। उत्तरत्र 'स्वपक्षानपेक्ष'पददर्शनात् इह 'पर'शब्दस्य स्वेतरपरतया 'परपक्षासिद्धेने'ति पाठ एव समीचीनो मन्यते।

न्यायभाष्यम्

पक्षप्रतिषेधे प्रतिज्ञातार्थापनयनं प्रतिज्ञासन्न्यासः ॥ ५ ॥

अनित्यः शब्द ऐन्द्रियकत्वाद् (१)इत्युक्ते परो ब्रूयात्सामान्यमैन्द्रियकं न चानित्यम्,

न्यायवार्त्तिकम्

तेनानैकान्तिकदेशनेति। दृष्टान्ताभासाश्च कस्मान्निग्रहस्थानेषु नोक्ताः? हेत्वाभासपूर्वकत्वाद् दृष्टान्ताभासानां तदभिधानेनैवोक्ता वेदितव्या इति ॥ ४ ॥

पक्षप्रतिषेधे प्रतिज्ञातार्थापनयनं प्रतिज्ञासंन्यासः। यः प्रतिज्ञातमर्थं प्रतिषेधे कृते परित्यजति स प्रतिज्ञासंन्यासो वेदितव्यः। उदाहरणं पूर्ववत्। सामान्येनानैकान्तिकत्वे

न्यायवार्त्तिकतात्पर्यटीका

देशयति—दृष्टान्ताभासा इति। अवयवान्तरं हि प्रतिज्ञाहेत्वादिभ्य उदाहरणं, तेन हेत्वाभासोक्त्या तस्य संग्रहः। पारम्पर्येण तूदाहरणाभासस्य हेतुदूषकत्वेन सर्वमेव हेतुदूषकमिति भावः। परिहरति—हेत्वाभासपूर्वकत्वादिति। हेत्वाभासा इत्यत्र हेतुशब्दः स्वार्थमपरित्यज्य दृष्टान्तमुपलक्षयति। उपलक्षणे हेतुरुक्तः। हेत्वाभासपूर्वकत्वाद्धेत्वाभासप्रधानकत्वाद् दृष्टान्ताभासेनापि हेतुरेव दूष्यते यतः। न चैतावता प्रतिज्ञादिदोषोपलक्षणप्रसङ्गः। न हि यत्र यत्र निमित्तमस्ति तत्सर्वमुपलक्षणीयं, किं तु यदुपलक्ष्यते तत्रावश्यं निमित्तं वक्तव्यम्। न च सूत्रकारस्य सर्वत्र लाघवादरो दृढ इत्युक्तम्। तस्मात्सर्वं रमणीयम् ॥ ४ ॥

पक्षप्रतिषेधे प्रतिज्ञातार्थापनयनं प्रतिज्ञासंन्यासः (सू ५) ॥ ऐन्द्रियकत्वस्य हेतोरनैकान्तिकत्वोद्भावनेन शब्दानित्यत्वपक्षे प्रतिक्षिप्ते वादी प्रतिवादिनं ब्रूयादनैकान्तिकत्वमुद्दिधीर्षुः—कः पुनराहानित्यः शब्द इति। यद्यहमनित्यः शब्द इति प्रतिज्ञातमपह्नोतुं शक्नोमि तदा न

वृत्तिः

प्रतिज्ञाविरोधं लक्षयति—(प्रतिज्ञाहेत्वोर्विरोधः प्रतिज्ञाविरोधः)।

अत्र च प्रतिज्ञाहेतुपदे कथाकालीनवाक्यपरे। तथा च कथायां स्ववचनार्थविरोधः प्रतिज्ञाविरोधः। यद्यपि काञ्चनमयः पर्वतो वह्निमान्, पर्वतः काञ्चनमयवह्निमान्, ह्रदो वह्निमान् ह्रदत्वात्, पर्वतो वह्निमान् काञ्चनमयधूमादित्यादौ हेत्वाभासान्तरसाङ्कर्य्यं, तथाऽप्युपमेयसंकरेऽप्युपाधेरसांकर्यान्न दोषः। न चासङ्कीर्णस्थलाभावः, पर्वतो वह्निमान् धूमात् यो यो धूमवान् स निरग्निरित्युदाहरणे निरग्निश्चायमित्युपनये(क) च तत्सत्त्वात्। एवं निगमनेऽपि बोध्यम् ॥ ४ ॥

(क) अस्योपनयत्वं तु तदभिप्रायेण प्रयोगात्, वस्तुतस्तु निगमनत्वमेवास्य युज्यते। "एवंविधानां च परमतप्रतिषेधाभिप्रायदुरवलेपाद्वा, दृष्टान्ताभासतरलतया वा प्रमादाद्वा सभाक्षोभाद्वा उक्तिसंभवः।" [उदयनः]

(१) 'घटवदित्युक्ते'—इति टि०।

न्यायभाष्यम्

एवं शब्दोऽप्यैन्द्रियको न चानित्य इति । एवं प्रतिषिद्धे पक्षे (१)यदि ब्रूयात्—'कः पुनराह अनित्यः शब्द' इति, सोऽयं प्रतिज्ञातार्थनिह्नवः प्रतिज्ञासन्न्यास इति ॥ ५ ॥

अविशेषोक्ते हेतौ प्रतिषिद्धे विशेषमिच्छतो हेत्वन्तरम् ॥ ६ ॥

निदर्शनम्—एकप्रकृतीदं व्यक्तमिति प्रतिज्ञा । कस्माद्धेतोः ? एकप्रकृतीनां विकाराणां परिमाणात् । मृत्पूर्वकाणां शरावादीनां दृष्टं परिमाणं, यावान्प्रकृतेर्व्यूहो भवति तावान्विकार इति । दृष्टं च प्रतिविकारं परिमाणम् । अस्ति चेदं परिमाणम् प्रतिव्यक्तं तदेकप्रकृतीनां विकाराणां परिमाणात् पश्यामो (२)व्यक्तमिदमेकप्रकृतीति ।

न्यायवार्त्तिकम्

हेतोः कृते ब्रूयात्—कश्चैवमाहानित्यः शब्द इति ? एतत्साधनसामर्थ्यापरिच्छेदात्(३) विप्रतिपत्तितो निग्रहस्थानमिति ॥ ५ ॥

अविशेषोक्ते हेतौ प्रतिषिद्धे विशेषमिच्छतो हेत्वन्तरम् । उदाहरणं भाष्ये ।

न्यायवार्त्तिकतात्पर्यटीका

सामान्येन नित्येन मे हेतुरनैकान्तिको भवतीति बुद्ध्याऽपह्नुते, सोऽयमेवंवादी न शक्योऽनैकान्तिकत्वेन जेतुम्, अपह्नवस्यापह्नवत्वावेदनेऽनैकान्तिकत्वोद्धारात् । तस्मादनैकान्तिकस्यानैकान्तिकत्वस्थापनायापह्नवस्यापह्नवत्वमुद्भावनीयम् । तत्र किमपह्नवत्वमुद्भाव्यानैकान्तिकत्वं व्यवस्थाप्य निगृह्यताम्, उतापह्नवादेवेति संशये अपह्नवत्वोद्भावनेनैव पूर्वापरपराहतेर्निगृह्यते, नानैकान्तिकत्वेन, तत्पूर्वकत्वादनैकान्तिकत्वस्थापनस्य । तस्माद् यदुक्तं कीर्त्तिना—(क)"किमिदानीं हेत्वाभासादुत्तरप्रतिज्ञासंन्यासापेक्षया तस्य प्रतिवादिनो हेत्वाभास एवाद्यं निग्रहस्थान"मिति, तदपास्तम् ; प्रतिज्ञासन्यासस्यैव पूर्वभावित्वात् । यदपि तेनोक्तं (ख)"पक्षप्रतिषेधे तूष्णींभवतस्तूष्णींभावो नाम निग्रहस्थानं प्रलपतश्च प्रलपितं नामेत्याद्यपि वाच्यं स्यादि"ति, तदप्यसांप्रतम् । न हि तूष्णींभावेन प्रलपितादिभिर्वा शक्यमनैकान्तिकत्वमुद्धर्तुं, यथा प्रतिज्ञार्थापह्नवेन । न चैते हेत्वाभासोद्भावनस्य पुरस्तात्तनाः । तस्मादेतदप्यनिरूपिताभिधानाद् यत्किञ्चिदिति ॥ ५ ॥

अविशेषोक्ते हेतौ प्रतिषिद्धे विशेषमिच्छतो हेत्वन्तरम् (सू ६)॥ व्याख्यातुं निदर्शनमाह—निदर्शनमेकप्रकृतीदं व्यक्तं भूतभौतिकेन्द्रियम् एकप्रकृतीनां विकाराणां परिमाणात् । तद् यथा एकमृत्पूर्वा घटशरावोदञ्चनादयः परिमिता दृष्टाः, यावान् प्रकृतेर्व्यूहः संस्थानं तावान्विकार इति । न चैतदुदाहरणं साधनविकलमित्याह दृष्टं चेति । उपनयमाह—अस्ति चेदमिति । निगमनमाह—तदेकप्रकृतीनामिति । अस्य परिमितत्वस्य

(१) 'यदि'—इति टि० पु० नास्ति । (२) 'व्यक्तिमिदनेकप्रकृतीति'—इति ग० । (३) 'परिज्ञानात्'—इति क्वचित् । (क-ख) मुद्रितवादन्यायग्रन्थे (६६-६७पृ०) स्वल्पभेदेनेदं सन्दर्भद्वयं दृश्यते । 'प्रलपतश्च प्रलपितं नामे'त्यत्र 'प्रपलायमानस्य प्रपलायितं नामे'ति विशेषो द्रष्टव्यः ।

न्यायभाष्यम्

(१)अस्य व्यभिचारेण(१*) प्रत्यवस्थानम्—नानाप्रकृतीनामेकप्रकृतीनां च विकाराणां दृष्टं परिमाणमिति। एवं प्रत्यवस्थिते आह—एकप्रकृतिसमन्वये सति शरावादिविकाराणां परिमाणदर्शनात्। सुखदुःखमोहसमन्वितं हीदं व्यक्तं(२)परिमितं गृह्यते,—(३)तत्र प्रकृत्यन्तररूपसमन्वयाभावे सत्येकप्रकृतित्वमिति। तदिदमविशेषोक्ते हेतौ प्रतिषिद्धे विशेषं ब्रुवतो हेत्वन्तरं भवति। सति च हेत्वन्तरभावे पूर्वस्य हेतोरसाधकत्वान्निग्रहस्थानम्। हेत्वन्तरवचने सति यदि हेत्वर्थनिदर्शनो

न्यायवार्त्तिकतात्पर्यटीका

हेतोर्व्यभिचारेण प्रत्यवस्थानं प्रतिवादिनः। नानाप्रकृतीनां घटरुचकादीनामेकप्रकृतीनां च घटशरावादीनां दृष्टं परिमाणमिति। एवं प्रत्यवस्थिते प्रतिवादिनि वादी पश्चात्परिमितत्वं हेतुं विशिनष्टि—एकप्रकृतिसमन्वये सति शरावादिविकाराणां परिमाणदर्शनादिति ; प्रकृतिः स्वभावः, एकस्वभावसमन्वये सतीत्यर्थः। एकप्रकृतिसमन्वयं स्फुटयति—सुखदुःखमोहसमन्वितं हीदं सर्वं व्यक्तं परिमितं गृह्यते। तथा हि—मैत्रदारेषु नर्मदायां मैत्रस्य सुखबुद्धिर्भवति, तत्सपत्नीनां च दुःखबुद्धिः, चैत्रस्य तामविन्दतो रणरणकवतो मोहो विषादः। नर्मदया भावान्तराणि व्याख्यातानि। तदेवं यत्रैकस्वभावसमन्वये सति परिमाणं तत्रैकप्रकृतित्वमेव, तद् यथा एकमृत्पिण्डस्वभावेषु घटशरावोदञ्चनादिषु। घटरुचकादयस्तु नैकस्वभावाः, मार्दसौवर्णादीनां स्वभावानां भेदात्। निर्दिश्यात्र सूत्रं योजयति—तदिदमविशेषोक्ते हेतौ प्रतिषिद्ध इति। अस्य निग्रहस्थानत्वमाह—सति च हेत्वन्तरभाव इति। अपि च यदि हेत्वन्तरवचने विश्वमेकप्रकृति साध्यते तदा निदर्शनं नास्ति, सर्वस्य पक्षे निक्षेपात् ; अथ निदर्शनसिद्ध्यर्थं किंचित्पक्षाद्व्यतिरिच्यते, ततस्तेनैवानैकान्तिकत्वम् ; अन्विताना परिमितानां भिन्नप्रकृतिकत्वादित्याह—हेत्वन्तरवचने सति (४)यदि हेत्वर्थनिदर्शन इति।

वृत्तिः

प्रतिज्ञासन्न्यासं लक्षयति—(पक्षप्रतिषेधे प्रतिज्ञातार्थापनयनं प्रतिज्ञासन्न्यासः)। पक्षस्य स्वाभिहितस्य परेण प्रतिषेधे कृते सति तत्परिजिहीर्षया प्रतिज्ञातार्थस्यापनयनमपलाप इत्यर्थः(क)। यथा 'शब्दोऽनित्य ऐन्द्रियकत्वा'दित्युक्ते सामान्ये व्यभिचारेण परेण प्रत्युक्ते, 'क एवमाह शब्दोऽनित्य' इति ॥ ५ ॥

---

(१) 'अव्यभिचारेण'—इति टि०। (२) 'परमिदम्'—इति ग०। (३) 'तत्र'—इति टि०। (४) 'यदो'ति न स्ति क०। (क) "सोऽयं चतुःप्रकारः—'क एवमाहे'ति वा, 'परपक्षोऽयं मयोक्त' इति वा, स्वोक्त एव 'त्वयेदमुक्त'मिति वा, परोक्तमेव 'मयेदमुक्त'मिति वा। …अनुवादप्रोज्ज्वलं दूषणोपारूढं नापलपेदिति रहस्यम्।'—न्यायपरिशिष्टम्।

दृष्टान्त उपादीयते, नेदं व्यक्तमेकप्रकृति भवति, प्रकृत्यन्तरोपादानात्। अथ नोपादीयते, दृष्टान्ते हेत्वर्थस्यानिदर्शितस्य (१)साधकभावानुपपत्तेरानर्थक्याद्धेतोरनिवृत्तं निग्रहस्थानमिति ॥ ६ ॥

न्यायवार्त्तिकम्

साधनान्तरोपादाने पूर्वस्यासामर्थ्यख्यापनान्निग्रहस्थानमिति, सामर्थ्ये वा हेत्वन्तरं व्यर्थमिति ॥ ६ ॥

इति प्रतिज्ञाहेत्वन्यतराश्रितनिग्रहस्थानपञ्चकविशेषलक्षणप्रकरणम्।

न्यायवार्त्तिकतात्पर्यटीका

हेतुः साधनम्, अर्थः साध्यः, तौ हेत्वर्थौ; निदर्शयति व्याप्यव्यापकभावेनेति निदर्शनः, हेत्वर्थयोर्निदर्शनो हेत्वर्थनिदर्शनो दृष्टान्तः। स यद्युपादीयते, ततो नेदं व्यक्तमेकप्रकृति भवति, दृष्टान्तस्य प्रकृत्यन्तरोपादानात्।

वार्त्तिकं—साधनान्तरोपादाने पूर्वस्येति। दत्तोत्तरावसर एव वादिनि यदि प्रतिवादी हेत्वर्थं व्यभिचारयति, वादी च तृतीयपदके स्थितो हेतुं विशेषयति, तदा साधनान्तरोपादानान्निगृह्यतामुतानैकान्तिकसाधनोपादानात्? न तावदनैकान्तिकसाधनादस्य निग्रहो हेतुविशेषणेन समाहितत्वादिति। तस्माद्धेत्वन्तरवचनादेव निगृह्यते, पूर्वस्य वस्तुतोऽसमर्थस्यासामर्थ्यख्यापनात्, सामर्थ्ये वा हेत्वन्तरानर्थक्यमिति सूक्तम् ॥ ६ ॥

वृत्तिः

हेत्वन्तरं लक्षयति—(अविशेषोक्ते हेतौ प्रतिषिद्धे विशेषमिच्छतो हेत्वन्तरम्)। अत्र च 'हेता'वित्यनेन न हेत्ववयवांशो विवक्षितः, अपि तु साधकांशः, स च हेत्ववयवस्थ उदाहरणादिस्थो वा। 'अविशेषोक्ते' इति पूर्वोक्त इत्यर्थः। 'विशेषमिच्छत' इति साभिप्रायं, तेन परोक्तदूषणोद्दिधीर्षया तत्रैव हेतौ विशेषणान्तरप्रक्षेपोऽन्यहेतुकरणं वा द्वयमपि हेत्वन्तरम्। तथा च परोक्तदूषणोद्दिधीर्षया पूर्वोक्तहेतुतावच्छेदकातिरिक्तहेतुतावच्छेदकविशिष्टवचनं हेत्वन्तरम्।

हेतौ विशेषणदान एव हेत्वन्तरमिति प्राञ्चः(क)। पूर्वोक्तत्वं हेत्ववयवे, उदाहरणादौ वा, यथा—'शब्दोऽनित्यः बाह्येन्द्रियप्रत्यक्षत्वादि'त्युक्ते सामान्येऽनैकान्तिकत्वेन च प्रत्युक्ते 'सामान्यवत्त्वे सती'ति विशेषणम्। एवं विशिष्टहेतुमुक्त्वा यद् 'बाह्येन्द्रियप्रत्यक्षं तदनित्य'मित्युदाहरणे न्यूनत्वेन प्रत्युक्ते विशिष्टहेतौ। एवमुपनयविशेषणेऽपि ॥ ६ ॥

समाप्तं प्रतिज्ञाहेत्वन्यतराश्रितनिग्रहस्थानपञ्चकविशेषलक्षणप्रकरणम्।

(१) 'साधकभावादनुप'—इति टि०। (क) "प्रथममविशिष्टं साधनभागमभिधाय [परकृतप्रतिषेधोद्दिधीर्षया] पुनर्विशेषणवत्तद्वचनं हेत्वन्तरमित्यर्थः" इत्याचार्याः (न्यायपरिशिष्टे)।

न्यायभाष्यम्

प्रकृतादर्थादप्रतिसम्बद्धार्थमर्थान्तरम् ॥ ७ ॥

यथोक्तलक्षणे पक्षप्रतिपक्षपरिग्रहे हेतुतः साध्यसिद्धौ प्रकृतायां ब्रूयात्—नित्यः शब्दोऽस्पर्शत्वादिति हेतुः। हेतुर्नाम हिनोते (१)र्धातोस्तुनि प्रत्यये कृदन्तं पदम्। पदं च नामाख्यातोपसर्गनिपाताः। अभिधेयस्य क्रियान्तरयोगाद्विशिष्यमाणरूपः शब्दो 'नाम'। क्रियाकारकसमुदायः (२)कारकसङ्ख्याविशिष्टक्रियाकालयोगाभिधाय्याख्यातम्, धात्वर्थमात्रं च कालाभिधानविशिष्टम्। (३)प्रयोगेष्वर्थादभिद्यमान-

न्यायवार्त्तिकम्

प्रकृतादर्थादप्रतिसम्बद्धार्थमर्थान्तरम्। उदाहरणं भाष्ये।

न्यायवार्त्तिकतात्पर्यटीका

प्रकृतादर्थादप्रतिसंबद्धार्थमर्थान्तरम् (सू ७)॥ व्याचष्टे—यथोक्तलक्षणे पक्षप्रतिपक्षपरिग्रहे सति (४)वादे, जल्पे, वितण्डायामित्यर्थः। हेतुतः साध्यसिद्धौ प्रकृतायां वादी साधनं ब्रूयाद् नित्यः शब्दोऽस्पर्शत्वादिति। अत्रान्तरे सुखादिभिर्व्यभिचारेण हेतोरसामर्थ्यं पश्यन् तत्प्रच्छादनार्थं प्रसक्तानुप्रसक्तया तं तमर्थमुपन्यस्यन्नर्थान्तरेण निगृह्यते। अभिधेयस्य क्रियान्तरयोगात् क्रियाविशेषस्य योगाद्विशिष्यमाणरूपो भिद्यमानरूपः शब्दो नामेति, यथा—वृक्षस्तिष्ठति, वृक्षं छिनत्ति, वृक्षेण चन्द्रमसं पश्यति, वृक्षायोदकमासिञ्चतीत्यादि। तदेवमभिधेयस्य क्रियाविशेषयोगाद्विशिष्यमाणरूपः शब्दो नामेति। आख्यातस्वरूपमाह—क्रियाकारकसमुदाय इति। विषयेण विषयिणमुपलक्षयति। पचति पच्यत इत्येवमादयः शब्दाः क्रियां कारकं कर्तारं कर्म वाभिवदन्ति। तदेतल्लक्षणमसिद्धमतिव्यापकं च। न हि कर्ता कर्म वा आख्यातेनाभिधीयते, क्रियाक्षेपेणैव तयोः प्रतिलम्भात्; अनन्यलभ्यस्य च शब्दार्थत्वात्। कर्तृकर्मणोश्च कारकान्तरेभ्यो भावनायामभ्यर्हिततमत्वेन तत्संख्याभिधाननियमादसिद्धं कारकाभिधानम्; अतिव्यापकं च, पाचकः पाक्य इत्यादेर्नाम्नोऽपि क्रियाकारकसमुदायाभिधायित्वात्। तदस्मिन् लक्षणेऽपरितुष्यन् लक्षणान्तरद्वयेनाख्यातपदान्युपसंगृह्णाति—कारकसंख्याविशिष्टक्रियाकालयोगाभिधाय्याख्यातम्। 'पचति' 'पच्यते' इत्यादौ कर्तुः कर्मणो वा संख्यया कालेन वर्तमानादिना विशिष्टा क्रिया प्रतीयते। कालश्च क्वचिदस्तीत्येतावतोक्तो न तु विवक्षितो लक्षणे, 'पचेत' 'यजेते'त्येवमादौ तद्योगाप्रतीतेः। अनेन लक्षणेन 'स्थीयते सुप्यते' इत्यादीनामाख्यातानामसंग्रहः, कारकतत्संख्ययोरप्रतीतेः। तत्संग्रहाय द्वितीयं लक्षणमाह—धात्वर्थमात्रं च कालाभिधानविशिष्टम्। अभिधीयत इत्यभिधानम्। प्रयोगेष्विति। नाम्नो वाऽऽख्यातस्य वा तदर्थाद-

(१) 'धातोः'—इति क-पु० नास्ति। (२) 'कारकसंख्याविशिष्टः'।—इति फ०। 'कारकः संख्याविशिष्टक्रियाकाल'—इति ग०। टीकासम्मतपाठो गृहीतः। फ-पुस्तके सयुक्तिकमन्यथा व्याख्यातोऽयमंश इति द्रष्टव्यम्। (३) 'योगेष्वर्था'—इति ज०। (४) 'वादिजल्पे'—इति क०।

न्यायभाष्यम्

रूपा निपाताः। उपसृज्यमानाः क्रियावद्योतका उपसर्गा इत्येवमादि। तदर्थान्तरं वेदितव्यमिति ॥ ७ ॥

वर्णक्रमनिर्देशवन्निरर्थकम् ॥ ८ ॥

यथाऽनित्यः शब्दः—(१)कचटतपाः, जबगडदशत्वात्, झभञ्घढधषवदिति—

न्यायवार्त्तिकम्

अभ्युपगतार्थासङ्गतत्वान्निग्रहस्थानं, यदभ्युपगतं तत्सम्बद्धमन्यदसम्बद्धमुच्यत इति ॥ ७ ॥

वर्णक्रमनिर्देशवन्निरर्थकम्। उदाहरणं भाष्ये।

न्यायवार्त्तिकतात्पर्यटीका

भिद्यमानरूपा निपाताः। यथा समुच्चयविकल्पादिनामपदैः समुच्चयादयः समुच्चेतव्यान्नामार्थादाख्यातार्थाद्वा भेदेनोच्यन्ते, तत्र षष्ठीप्रयोगात्,—तेषां समुच्चयो विकल्पो वेति; नैवं चादयः स्वार्थान् नामार्थादाख्यातार्थाद्वा भेदेनाभिदधति। रूप्यन्ते प्रतिपाद्यन्ते रूपाणि; 'अर्थात्' नामार्थादाख्यातार्थाद्वाऽभिद्यमानं 'रूपं' प्रतिपाद्यमानं येषां निपातानां ते तथोक्ताः। उपसृज्यमानाः समीपे प्राक् प्रयुज्यमानाः। क्रियावद्योतका उपसर्गाः, अवद्योतनं चोपलक्षणम्। अधिकार्था विपरीतार्थाश्चोपसर्गा गृह्यन्ते। यथाऽभ्यागच्छति प्रतिष्ठत इत्यादिषु। तदस्य निग्रहस्थानत्वं वार्तिककार उपपादयति—अभ्युपगतेति। यथा च साधनवादिनोऽर्थान्तरं निग्रहस्थानमेवमुत्तरवादिनोऽपि द्रष्टव्यम् ॥ ७ ॥

वर्णक्रमनिर्देशवन्निरर्थकम् (सू ८) ॥ वर्णक्रमनिर्देशवदिति वतिः(क)। अत्र यदा द्राविडः स्वभाषया तद्भाषानभिज्ञमार्यं प्रति शब्दनित्यत्वं प्रतिपादयति तदा तन्निरर्थकं निग्रहस्थानम्। स खल्वार्यभाषां जानन्नसामर्थ्यप्रच्छादनाय तद्भाषानभिज्ञतया वा स्वभाषया साधनं प्रयुक्तवान्; सोऽयं पूर्वस्मिन्कल्पे विप्रतिपत्त्या निगृह्यते उत्तरस्मिंस्त्वप्रतिपत्त्या। वस्तुतः साधनसामर्थ्येऽपि मूकवदार्यप्रतिपादकशब्दाप्रतीतेस्तत्प्रतिपादनारम्भवैयर्थ्यात्। अत्रैव दृष्टान्तमात्रतया वतिना अत्र वर्णक्रमो दर्शितो न पुनरेतदुदाहरणं निग्रहस्थानस्य, येन कपोलवादित्रादावपि प्रसङ्गः(ख)। यथा हि द्राविडस्यार्थभेदविवक्षोत्थापितं वचनं, नैवं वर्णक्रमनिर्देशः कपोलवादित्रं वा।

वृत्तिः

अर्थान्तरं लक्षयति—(प्रकृतादर्थादप्रतिसम्बद्धार्थमर्थान्तरम्)। प्रकृतात् प्रकृतोपयुक्तात्, ल्यब्लोपे पञ्चमी। तेन प्रकृतोपयुक्तमर्थमुपेक्ष्यासम्बद्धार्थाभिधानम् अर्थान्तरम्, प्रकृतानाकाङ्क्षिताभिधानमिति फलितार्थः। यथा—'शब्दोऽनित्यः कृतकत्वा'दित्युक्त्वा 'शब्दो गुणः, स चाऽऽकाशस्ये'त्यादि ॥ ७ ॥

---

(१) 'कचटतपानां'—इति फ०। 'कचटतपानां'—इति टि०। (क) 'वति'रिति। तुल्यार्थोऽत्र वतिप्रत्ययः, न तु मतुबिति भावः। यदि मतुप् स्यात्, तदा एकाक्षरनिरर्थकाव्याप्तिर्घटादिपदातिव्याप्तिश्च स्यात्, कस्याप्युक्तनिर्देशवत्त्वादित्येवं वर्द्धमानेनोक्तम्। (ख) "अपिचान्यदिदमुच्यते—'वर्णक्रमनिर्देशो निग्रहस्थान'मिति। कपोलवादित्रं कचटतकमित्येवमादीनामपि वाच्यत्वात्"—इति वादन्याये धर्मकीर्त्तिः (१००पृ०)।

न्यायभाष्यम्

एवम्प्रकारं निरर्थकम्। अभिधानाभिधेयभावानुपपत्तौ अर्थगतेरभावाद् वर्णा (१)एव क्रमेण निर्दिश्यन्त इति ॥ ८ ॥

परिषत्प्रतिवादिभ्यां त्रिरभिहितमप्यविज्ञातमविज्ञातार्थम् ॥ ९ ॥

यद्वाक्यं परिषदा प्रतिवादिना च त्रिरभिहितमपि न विज्ञायते श्लिष्टशब्दम-

न्यायवार्त्तिकम्

साधनानुपादानादज्ञानम् ; एवं ब्रुवन्न साधनं साध्यं जानीत इति न साध्यं न साधनं चोपादत्त इति निगृह्यते ॥ ८ ॥

परिषत्प्रतिवादिभ्यां त्रिरभिहितमप्यविज्ञातमविज्ञातार्थम्। उदाहरणं भाष्ये।

न्यायवार्त्तिकतात्पर्यटीका

अप्रतिपादकत्वसामान्याद्वर्णक्रमनिर्देशवदिति दृष्टान्तः। अत एवाह भाष्यकारः—एवंप्रकारमिति, न पुनरिदमेवेत्यर्थः।

वार्त्तिकम्—उदाहरणं भाष्य इति। एवंप्रकारोदाहरणमित्यर्थः। साधनानुपादानादिति। परप्रतिपादकं पञ्चावयवं वाक्यं साधनं, तत्तेन नोपात्तं, तस्य स्वसमयेन प्रतिपादकत्वेऽप्यर्थान् प्रत्यप्रतिपादकत्वादित्यर्थः ॥ ८ ॥

परिषत्प्रतिवादिभ्यां त्रिरभिहितमप्यविज्ञातमविज्ञातार्थम् (सू ९) ॥ यद्वाक्यं परिषदा प्रतिवादिना च न विज्ञायते समानसंकेतेन वादिना त्रिरभिहितम्। यावद्भिर्वारैः परिषत्प्रतिवादिनोरर्थप्रत्ययो भवति, स च प्रायेण त्रिभिरिति त्रिरभिहितमित्युक्तम्। ननु समानसंकेतेन वादिना त्रिरभिहितमविज्ञातार्थं चेति न संभवति। संभवे वा परिषत्प्रतिवादिनौ जडौ। न च जडानवबोधे प्रतिपादकस्य कश्चिदपराधः। न हि बधिरो गीतं न श्रृणोतीति गायनस्य कश्चिदपराध इत्यत आह—श्लिष्टशब्दम्, असति प्रकरणादौ नियामके, यथा—श्वेतो धावतीति(क)।

वृत्तिः

निरर्थकं लक्षयति—(वर्णक्रमनिर्देशवन्निरर्थकम्)। वर्णानां क्रमेण निर्देशो 'जबगडदशि'त्यादिप्रयोगः, तत्तुल्यो निर्देशो निरर्थकं निग्रहस्थानम्। अवाचकपदप्रयोग इति फलितार्थः(ख)। वाचकत्वं शक्त्या निरूढलक्षणया शास्त्रपरिभाषया वा बोध्यम्। समयबन्धव्यतिरेकेणेति विशेषणीयम्। तेन यत्रापभ्रंशेन विचारः कर्त्तव्य इति समयबन्धः, तत्रापभ्रंशे न दोषः। झटिति संवरणे तु न दोषः इत्युक्तप्रायम्। अस्य च सम्भवः प्रमादादित इत्यवधेयम् ॥ ८ ॥

---

(१) 'एवं'—इति भा-टि०। (क) प्रकरणाद्यभावे श्वेतो धावतीत्युक्ते किं श्वा इतो धावतीत्यर्थः, श्वित्रो वा, इति सन्देहादर्थाविज्ञानमिति भावः। (ख) "वतिना अवाचकप्रयोगमुपमिनोति, तेन अवाचकप्रयोगो निरर्थकमित्यर्थः।"—इति न्यायपरिशिष्टे उदयनः (९६पृ०)।

न्यायभाष्यम्

प्रतीतप्रयोगमतिद्रुतोच्चरितमित्येवमादिना कारणेन, (१)तदविज्ञातमविज्ञातार्थम्(१*) असामर्थ्यसंवरणाय प्रयुक्तमिति निग्रहस्थानमिति ॥ ९ ॥

पौर्वापर्यायोगादप्रतिसम्बद्धार्थमपार्थकम् ॥ १० ॥

यत्रानेकस्य पदस्य वाक्यस्य वा पौर्वापर्येणान्वययोगो नास्तीत्यसम्बद्धार्थत्वं गृह्यते, (२)तत् समुदायार्थस्यापायादपार्थकम्। (क)यथा—दश दाडिमानि, षडपूपाः ;

न्यायवार्त्तिकम्

असामर्थ्यख्यापनान्निग्रहस्थानम्। असामर्थ्यं चाज्ञानमिति ॥ ९ ॥

पौर्वापर्यायोगादप्रतिसम्बद्धार्थमपार्थकम्। यथा (३)दशदाडिमादिवाक्यम्(३*)।

न्यायवार्त्तिकतात्पर्यटीका

अप्रतीतप्रयोगं 'जर्भरीतुर्फरीतु' इति। अतिद्रुतोच्चारितमित्येवमादिना कारणेन, तदविज्ञातार्थम्। अस्य निग्रहस्थानत्वमाह—असामर्थ्येति। वार्त्तिकं भाष्यव्याख्यया गतार्थम् ॥ ९ ॥

पौर्वापर्यायोगादप्रतिसंबद्धार्थमपार्थकम् (सू १०) ॥ यत्रानेकस्य पदस्याश्लिष्टस्य प्रतीतयोगस्याद्रुतोच्चारितस्य वाक्यस्य (४)वानेकस्य पौर्वापर्येणा[न्वय]योगः संबन्धो नास्तीति तस्मादसंबद्धार्थता गृह्यते, तदपार्थकं (ख)निष्प्रयोजनं निग्रहस्थानम्। कस्मात्? समुदायार्थस्य वाक्यार्थस्य [महावाक्यार्थस्य] वाऽपायात्। वाक्यमहावाक्यार्थप्रत्यायनप्रयोजनो हि पदानां वाक्यानां वा प्रयोगः, असति तस्मिन्नपार्थकमित्यर्थः। वाक्यस्य पौर्वापर्यासंबन्धे उदाहरणमाह—यथा दश दाड़िमानि षड़पूपा इति। पदानां पौर्वापर्यासंबन्धे उदाहरणमाह—

वृत्तिः

अविज्ञातार्थं लक्षयति—(परिषत्प्रतिवादिभ्यां त्रिरभिहितमप्यविज्ञातमविज्ञातार्थम्)। त्रिरभिहितं वादिनेति शेषः। त्रिरभिधानं च (५)अनवधानादितोऽबोधनिरासाय। परिषत्प्रतिवाद्यन्यतरेण विज्ञाने तु नाऽविज्ञातार्थमिति भावः। तथा च अवहिताविकलव्युत्पन्नपरिषत्प्रतिवादिबोधानुकूलोपस्थित्यजनकवाचकवाक्यप्रयोगोऽविज्ञातार्थमिति। वाचकेत्यनेन निरर्थकापार्थकव्युदासः। अत्र च पराज्ञानापादनेन मम जयो भविष्यतीति भ्रमादुक्तिसम्भवः। न च यथाकथञ्चित् परो जेतव्य इत्यज्ञानापादनं न्याय्यमेवेति वाच्यम्, तथा सति भङ्गकाले परमदुर्बोधयत्किञ्चिदभिधानेनैव सर्वत्र जयसम्भवात्।

(१) 'तदविज्ञातार्थम्'—इति क०। (२) 'तत्समुदायः'—इति ज०। (३) 'दश दाडिमा इति वाक्यम्'—इति क-ख-धृतपाठान्तरम्। (४) 'वा'—इति क० ख०। (५) 'अनवधानादिना'—इति भ०।

(क) महाभाष्येऽपि वृद्धिरादैच्सूत्रे संज्ञासूत्रत्वसाधनाधिकरणे "इतरथा ह्यसंप्रत्ययो यथा लोके" इतिवार्त्तिकव्याख्यानप्रसङ्गेन "दश दाडिमानी"त्यादि वाक्यमुदाहृतम्। परं तत्र पाठभेदः सुमहान्—"लोके ह्यर्थवन्ति चानर्थकानि च वाक्यानि दृश्यन्ते।......अनर्थकानि—दश दाडिमानि षडपूपाः कुण्डमजाजिनं पललपिण्डः अधरोरुकमेतत् कुमार्याः स्फैयकृतस्य पिता प्रतिशीन"—इति (१४०पृ०)। (ख) 'निग्रहस्थानं निष्प्रयोजन'मिति पाठः पदयोः पौर्वापर्यं विघटय्य संशोधितः। पूर्वोत्तरपंक्त्योः[ ]वेष्टनमध्यगतमंशद्वयं पतितमिति मत्वा पूरितम्।

न्यायभाष्यम्

कुण्डम्, अजाजिनम्, पललपिण्डः, (१)अथ रौरुकमेतत्, कुमार्य्याः पाय्यं तस्याः पिता (२)अप्रतिशीन इति ॥ १० ॥

न्यायवार्त्तिकम्

निरर्थकापार्थकयोरभेद इति चेत् ? अथ मन्यसे निरर्थकादपार्थकं न भिद्यते, तत्राप्यर्थो न गम्यत इहापीति ? भिद्यत इति ब्रूमः। कथं ? तत्र हि वर्णमात्रमिह तु पदान्यसम्बद्धानि : तत् कथं निग्रहस्थानम् ? वाक्यादृते न विशेषावगतिरिति साधनसामर्थ्यापरिज्ञानान्निग्रहस्थानम् ॥१०॥

इति प्रकृतोपयोगिवाक्यार्थप्रतिपत्तिफलशून्यनिग्रहस्थानचतुष्कप्रकरणम् ।

न्यायवार्त्तिकतात्पर्यटीका

कुण्डमजाजिनम् इति। रौरुकं रुरुसंबन्धि। पाय्यं पाययितव्यम्। अप्रतिशीनो वृद्धः।

वार्त्तिककारः शङ्कते—निरर्थकापार्थकयोरिति। परप्रत्यायनप्रयोजनं हि वचनोच्चारणं, तत्र निरर्थकेनेवापार्थकेनापि न परः प्रतिपाद्यत इति उभयोरभेदः। न च वर्णक्रममात्रमेकत्रान्यत्र च पदानीत्येतावता भेदेनोपादानं युक्तम्। एकत्र वाक्योपादानमन्यत्र पदोपादानमित्यपार्थकयोरप्य-वान्तरभेदेन भेदोपादानप्रसङ्गादिति शङ्कार्थः। निराकरोति—भिद्यत इति। पृच्छति—कथम् ? उत्तरम्—तत्र अनर्थके वर्णमात्रम् अभिधेयशून्यम्, इह तु अपार्थके पदानि पद्यते गम्यतेऽभिधेयमेभिरिति पदानि वाक्यानि चाभिधेयवन्ति असंबद्धानि। निरभिधेय-निष्प्रयोजनयोर्निरर्थकापार्थकयोर्महान्विशेषः। न त्वीदृशो वाक्यपदयोर्निष्प्रयोजनयोर्विशेषो येनावान्तरभेदमाद्रियामहे। परप्रत्यायनप्रयोजनाभावमात्रविवक्षया त्वविशेषे सर्वनिग्रहस्थाना-विशेषः, सर्वत्र परप्रत्यायनाभावात्, भावे वा निग्रहस्थानानुपपत्तेः ॥ १० ॥

वृत्तिः

एतस्य त्रेधा सम्भवः, असाधारणतन्त्रमात्रप्रसिद्धम्, यथा पञ्चस्कन्धादयो बौद्धानाम्। तत्र रूपादयः पञ्चेन्द्रियाणि च रूपस्कन्धः, सविकल्पकं संज्ञास्कन्धः, रागद्वेषाभिनिवेशाः संस्कारस्कन्धः, सुखदुःखे वेदनास्कन्धः, निर्विकल्पकं ज्ञानस्कन्धः। द्वितीयमतिप्रसक्तयोग-मनपेक्षितरूढिकं, यथा—'कश्यपतनयाधृतिहेतुरयं (क)त्रिनयनतनययानसमाननामधेयवान् तत्केतुमस्त्वा'दित्यादि। तृतीयं श्लिष्टं, यथा—श्वेतो धावतीत्यादि। एवम् अतिद्रुतो-च्चरितादिकमपीति भाष्यम्। अत्र नाऽऽद्यस्य सम्भवः, उभयतन्त्राभिज्ञयोरेव विचार-सम्भवादिति चेत् ? सत्यम्; तथाऽपि यत्र नैयायिकमीकांसकयोर्विचारे अन्यतरो बौद्धतन्त्रादि-परिभाषया वदति, तत्र निग्रह इत्याशयः। तत्रापि चेद् यया कयाचित्परिभाषयोच्यतामिति परः प्रौढ्या वदति, न तत्राऽऽद्यस्योपादानमिति ; उत्तरयोस्तु न सर्वथैवेति ॥ ९ ॥

---

(१) 'अथ रौरुक'—इति ग०। 'अथ कौतुक'—इति टि०। (२) 'अप्रतिशील:'—इति भा०।

(क) अत्र 'त्रिनयनसमाननामधेयवानि'ति सर्वपुस्तकेषु प्रचलितपाठः संशोधितः। "कश्यपतनया पृथिवी, तद्धृति-हेतुः पर्वतः, त्रिनयनतनयः कार्त्तिकेयः, तस्य यानं शिखी मयूरस्तत्समाननामधेयवान् वह्निमानित्यर्थः"—इति परिशिष्टप्रकाशे वर्द्धमानः। वह्नेर्धूमकेतुतया तत्केतुशब्देन धूमः प्रतीयते। वादिविनोदेऽपीदमुदाहरणं वर्त्तते।

न्यायभाष्यम्

अवयवविपर्यासवचनमप्राप्तकालम् ॥ ११ ॥

प्रतिज्ञादीनामवयवानां यथालक्षणमर्थवशात् क्रमः, तत्रावयवविपर्यासेन वचनमप्राप्तकाल(१)मसम्बद्धार्थं निग्रहस्थानमिति ॥ ११ ॥

न्यायवार्त्तिकम्

अवयवविपर्यासवचनमप्राप्तकालम्। अवयवानां विपर्यासेनाभिधानं निग्रहस्थानम्। (क)नैवमपि सिद्धेरित्येके—एके तु ब्रुवते नैतन्निग्रहस्थानमेवमपि सिद्धेरिति ; समयानभ्युपगमाच्च—

न्यायवार्त्तिकतात्पर्यटीका

अवयवविपर्यासवचनमप्राप्तकालम् (सू ११)॥ व्याचष्टे—प्रतिज्ञादीनामवयवानां यथालक्षणमर्थवशात् क्रमः लक्षणानतिक्रमेण क्रमः। उक्तमेतदस्माभिः प्रथमाध्याये—यदपेक्षिताभिधायिनो वचनात्परे प्रतिपद्यन्ते, नान्यस्य। तत्र प्रथमं साध्यनिर्देशोऽपेक्षितः परैर्न तु साधननिर्देशः ; तत्र यद्ययं प्रथमं साधनमेव प्रयुञ्जीत कथमपेक्षितं ब्रूयात् ? अनपेक्षिताभिधायी च कथं प्रतिपादको नाम ? तदेवं सर्वाण्येव हेतुवचनादीनि (२)क्रमवन्ति, नाक्रमाणि प्रतिपादयितुमर्हन्तीति ; विपरीतक्रमेभ्योऽप्यर्थक्रमानुसरणादेवार्थप्रतिपत्तेः। सोऽयं प्रतिज्ञादीनामर्थ एतादृशो य एषां क्रममन्तरेण न शक्यो ज्ञातुमिति(ख)। अवयवविपर्यासे स्वाकाङ्क्षाभावात् तत्पूर्वकत्वाच्च पदार्थसंबन्धस्यासंबन्धं निग्रहस्थानमित्यर्थः।

वार्त्तिकं—नैवमपि सिद्धेरित्येके। यथाऽऽहुरत्रापि न कश्चित् क्रमनियम इष्टार्थसिद्धेरुभयत्राविशेषात्। यद्युच्येत अर्थशब्दवदयमस्माकं समयो यदनेन क्रमविशेषेणार्थः प्रत्येतव्यो नान्येनेति, अतस्तथैव प्रतीयते न क्रमान्तरेणेत्यत आह—समयानभ्युपगमाच्च। पदेष्वेव

वृत्तिः

अपार्थकं लक्षयति—(पौर्वापर्यायोगादप्रतिसम्बद्धार्थमपार्थकम्)। पौर्वापर्यं कार्यकारणभावस्तस्यायोगात् असम्भवात्, शाब्दबोधजनकाकाङ्क्षाज्ञानाद्यभावादिति फलितार्थः। अप्रतिसम्बद्धः असंबद्धः, अर्थः प्रयोजनं शाब्दबोधरूपं यत्र। यद्यपि दश दाडिमानि, षडपूपाः, कुण्डम्, अजाजिनम्(३)पललपिण्डम् इत्यादाववान्तरवाक्यादर्थबोधसत्त्वादव्याप्तिरतिव्याप्तिश्च निरर्थके, तथाऽप्यभिमतवाक्यार्थबोधानुकूलाकाङ्क्षादिशून्यबोधजनकपदत्वं तत्। अविज्ञातार्थे तु स्वस्य बोधो भवत्येवेति नातिव्याप्तिः। उदाहरणं तु अयोग्यानासन्नानाकाङ्क्षवाक्यम् ॥ १० ॥

समाप्तमभिमतवाक्यार्थाप्रतिपादकनिग्रहस्थानचतुष्टयप्रकरणम्।

---

(१) —'मसम्बद्धं'—इति टि०। —'मसम्बन्धार्थकालं'—इति ज०। (२) 'अपि' इत्यधिकं ख०। (३) इदं—ल-पु० नास्ति। (क) इतः प्रभृति 'कस्यायं समय इति' इत्येतत्पर्य्यन्तमेकीयमतव्याख्यानं 'एवमपि सिद्धेः' 'समयानभ्युपगमाच्च' 'प्रयोगाच्चे'ति तदीयहेतुत्रयोपन्यासपुरःसरं विधाय तदनन्तरं तत् हेतुत्रयमनुभाष्य तन्मतदूषणं वार्त्तिकाकृत एतत्सूत्रसमाप्तिपर्य्यन्तम्। अधिक्षेपश्चायं दिङ्नागस्येति सम्भाव्यते। (ख) "अनुमानवाक्ये त्वार्थः क्रमो बलादापतति, स्वप्रतिपत्त्यनुसारेण परप्रतिपत्तेरुत्पादनात्, स्वप्रतिपत्तौ च धर्मिदर्शन-तद्गतहेतुधर्मावधारण-प्रतिबन्धस्मरण-परामर्शज्ञान-साध्यनिश्चयानां क्रमेण दर्शनात्"—न्यायमञ्जरी।

न्यायवार्त्तिकम्

न च वयमेवं समय प्रतीच्छाम इति; प्रयोगाच्च—प्रयुक्तश्चावयवव्यत्ययः सर्वशास्त्रेष्विति कस्यायं समय इति। (१)यत्ताव'न्नैवमपि सिद्धे'रिति, प्रयोगापेतशब्दवदेतत्स्यात्—यथा गौरित्यस्य(२)पदस्यार्थे (क)गावीति प्रयुज्यमानं पदं ककुदादिमन्तमर्थं प्रतिपादयतीति।

न्यायवार्त्तिकतात्पर्यटीका

समयपूर्वकः प्रत्ययो न वाक्येषु, अभिनवकविरचिततत्समयानपेक्षादेव वाक्यादर्थप्रतीतेः। स्यादेतद्—वाक्येष्वपि क्रमनियमो दृष्टः, यथा पाचयांबभूवेति न पुनर्बभूव पाचयामिति, अत आह—प्रयोगाच्चेति। तत्र लौकिकः प्रयोगो नियत इह त्ववयवव्यत्ययस्यापि दृष्टः प्रयोग इत्यर्थः। तदेतद्दूषयति—यत्तावन्नैवमपि सिद्धेरिति। तत्रोत्तरं—(३)प्रयोगापेतशब्दवदेतत् स्यात्। एतदेव विवृणोति—यथा (४)गौरित्यस्यैव पदस्यार्थे गावीति प्रयुज्यमानं पदं ककुदादिमन्तमर्थं प्रत्याययति। यद्यपि शब्दानामर्थप्रत्यायनं न स्वाभाविकं तथाऽपि परमेश्वरसंकेतपूर्वकमद्य यावदनुवर्त्तते, अतएव साधवोऽर्थभेदे शब्दभेदा येषां पारमेश्वरसंकेतः, तदसंकेतात्तु प्रवर्त्तमाना अप्यर्थेऽसाधवः शब्दा अपभ्रंशा भवन्ति। तदपेक्षाश्च 'साधुभिर्भाषितव्य'-मित्यादयो विधयो धर्मेषु, निन्दार्थवादाश्च—'मन्त्रो हीनः स्वरतो वर्णत' इत्यादयः। वेदानां च प्रामाण्यं प्रतिपादितं द्वितीयेऽध्याये। न चायमर्थो ये ये साधवस्ते सर्वे धर्महेतव इति, किं तु धर्मानुष्ठाने तदनुरूपभाषणे प्राप्ते साधुभिरेवेति नियम्यते। तदेवं व्यवस्थिते अविशेषेण 'गो'-'गाव्या'दिशब्दा आर्येण प्रयुज्यमाना दृश्यन्ते, तत्रैते किमविशेषेणैव साधव उत कश्चिदेकः साधुः, तत्पूर्विकेतरेभ्यः प्रतीतिः। तत्रैकशब्दस्य साधुत्वकल्पनायामितरस्मात् तन्मूलतयार्थप्रतिपत्त्युपपत्तौ न सर्वत्र साधुत्वकल्पना युक्ता। यथाऽऽह स्मात्रभवान् जैमिनिः—'अन्यायश्चानेकशब्दत्व'मिति (१।३।२६)। तत्रापि कतमस्यासाधुत्वमेकस्यैतेष्विति जिज्ञासायां 'तत्र तत्त्वमभियोगविशेषात्स्या'दिति (१।३।२७)। योऽभियुक्ततमैरिन्द्रपाणिनि-प्रभृतिभिः साधुत्वेनाविगानतः स्मर्यते स साधुरितरोऽसाधुरिति निश्चीयते। तेन यद्यपि लौकिका गाव्यादिशब्देभ्य एव गवाद्यर्थमधिगच्छन्तीति दृष्टार्थमात्रव्यवहारिणः प्रतिपत्तिस्तथाऽपि परीक्षकाणां विचारयतामेवं विचारक्रमो यद् वृद्धतमेन गोशब्दे प्रयोक्तव्ये प्रमादाद्गावीशब्दः प्रयुक्तः, ततश्च वृद्धतरेण (ख)गोशब्दमुन्नीय गोत्वं प्रतीतम्। यथाऽऽहुः—

अम्बाम्बेति यदा बालः शिक्षमाणः प्रभाषते।
अव्यक्तं तद्विदां तेन व्यक्ते भवति निर्णयः॥
एवं साधौ प्रयोक्तव्ये योऽपभ्रंशः प्रयुज्यते।
तेन साधुव्यवहितः कश्चिदर्थोऽभिधीयते॥ [वाक्यपदीये १।१५३]

---

(१) 'तत्तावन्नैवमपि'—इति ख०। (२) 'शब्दस्यार्थे'—इति क-ख-धृतपाठान्तरम्। (३) 'प्रयोगोपेत-शब्दवत्'—इति क-ख०। (४) 'गौरित्यस्मिन्नर्थे एव पदस्यार्थे'—इति क०। (क) 'गावी'ति गोशब्दस्यापभ्रंशः। तदुक्तं महाभाष्ये—"एकैकस्य शब्दस्य बहवोऽपभ्रंशाः, तद् यथा—'गो'शब्दस्य गावी-गोणी-गोता-गोपोतलिकेत्य-वमादयोऽपभ्रंशाः"—इति (१।१।१)। (ख) उक्तं च कुमारिलेन श्लोकवार्त्तिके शब्दनित्यताधिकरणे—

"गोशब्देऽवस्थितेऽस्माकं तदशक्तिजकारिता।
गाव्यादेरपि गोबुद्धिर्मूलशब्दानुसारिणी"॥ २७६॥ इति।

न्यायवार्त्तिकम्

न च शब्दान्वाख्यानं व्यर्थम्। अनेन शब्देन गोशब्दमेवासौ प्रतिपद्यते, गोशब्दात् ककुदादिमन्तमर्थम्(क)। तथा प्रतिज्ञाद्यवयव(१)विपर्यासेनानुपूर्वी प्रतिपद्यते, आनुपूर्व्या चार्थमिति। एतत् कथम्? पूर्वं तावत् कर्मोपादीयते ततः करणम्, मृत्पिण्डाद्युदाहरणम् अनेकधा लोक इति। यत्पुनरेतत् 'समयानभ्युपगमात्' इति? नायं समयोऽपि त्वर्थस्यानुपूर्वी,

न्यायवार्त्तिकतात्पर्यटीका

पार्श्वस्थश्चातोऽनेन मूलशब्दमुन्नीयार्थः प्रतीत इत्यगृहीत्वैव, गावीशब्दादेवायममुमर्थं प्रतीतवानिति तमेव गोत्वस्य वाचकमवगम्यान्येषां वृद्धो बभूव। ततः प्रभृत्यननुस्मृतमूलशब्दानामर्थ वाचकत्वभ्रमोऽपभ्रंशे वर्तते, न वृद्धतरस्योभयवेदिनो मूलशब्दानुसारिणी पदार्थप्रतिपत्ति-रिदानींतनानां त्वपभ्रंशादेव। अत एवान्वाख्यानमपि प्रयोजनवत्, असत्यस्मिन् वाचकापभ्रंशविभागज्ञानाभावात् 'साधुभिर्भाषितव्य'मिति नियमविधे'र्न म्लेच्छितवै' 'नापभाषितवै' इति निषेधस्य च विषयसंशयेन दुरधिगमत्वेन धर्मानुष्ठानस्याशक्यत्वप्रसङ्गात्। यत्रार्थे यस्य शब्दस्य भगवतेश्वरेण संकेतः कृतः स तत्र साधुरसाधुरन्यत्र, यथा य एवाश्वशब्दो दरिद्रे साधुः स एवासाधुर्वाजिनि प्रयुज्यमानः ; यथा नकुलदंष्ट्राग्रस्पृष्टा या काचिदोषधिरसौ सर्पविषं हन्ति, एवमीश्वरेण कृतसंकेतः शब्दः साधुर्धर्म उपयुज्यते नान्य इति। यववराहादिशब्दानामार्यम्लेच्छयोरर्थविवादे वैदिकाद्वाक्यशेषादार्यसंमतोऽर्थो ग्रहीतव्यो न म्लेच्छसंमतः, तत्र वैदिकवाक्यशेषविरोधात्। येषां तु शब्दानामार्येषु(२)न दृष्टचरः प्रयोगः, केवलैर्म्लेच्छैरेवार्थभेदे प्रयुज्यन्ते, यथा पिक-नेम-तामरसादयः, वेदे तु प्रयुक्तास्तेषां म्लेच्छव्यवहारादेवार्थोऽवधारणीयः, तत्र तेषामभियोगादिति आर्यव्यवहारापरिपन्थित्वाच्चेति। तदेवं व्यवस्थिते न्यायमीमांसापरिशीलनविकलानां बाह्यतराः प्रलापा उपेक्षणीयाः। तस्मात्सूक्तं—प्रयोगापेतशब्दवदिति। न च शब्दान्वाख्यानं व्यर्थमिति चेति। प्रतिज्ञादीनां क्रमनियमकारणं प्रश्नपूर्वकं दर्शयति—तदेतत्कथं? पूर्वं तावदिति। द्वितीयं देश्यमनुभाष्य परिहरति—यत्पुनरेतत्समयानभ्युपगमादिति।

वृत्तिः

अप्राप्तकाल लक्षयति—(अवयवविपर्यासवचनमप्राप्तकालम्)। अवयवस्य कथैकदेशस्य, विपर्यासो वैपरीत्यम्। तथा च समयबन्धविषयीभूतकथाक्रमविपरीतक्रमेणाभिधानं पर्यवसन्नम्(ख)। तत्राऽयं क्रमः—वादिना साधनमुक्त्वा सामान्यतो हेत्वाभासा उद्धरणीया

---

(१) 'विपर्ययेण'—इति व-ख-धृतपाठान्तरम्। (२) 'मर्थेषु'—क०। (क) अत्रोक्तं बौद्धाचार्यधर्मकीर्त्तिना—"यः खलूभयं वेत्ति शब्दमपशब्दं च स एवं प्रतिपद्यते। यस्तु 'नक्क'शब्दं 'नुक्क'शब्दमेव वा वेत्ति, न 'नासा'शब्दं, स कथमपशब्दाच्छब्दं प्रतिपद्येत ततोऽर्थं प्रतिपद्येत। दृष्टा चानुभयवेदिनोऽपि प्रतीतिरिति न परम्परयापि प्रतीतिरर्थेऽसमर्थस्य शब्देऽपि प्रतीतिजननासामर्थ्याच्च। अपशब्दश्चेच्छब्दे प्रतीतिं जनयेदर्थ एव किं न जनयति?...शब्दादर्थमप्रतिपद्यमाना अपशब्दैरेव ज्ञानं व्युत्पद्यमाना लोके दृश्यन्ते इति व्यर्थं शब्दानुशासनम्" इत्यादि। सर्वमेतद् दूषितं वाचस्पतिना "ततः प्रभृत्यननुस्मृतमूलशब्दाना"मित्यादिना (टीका पं २) "तदेवं व्यवस्थिते न्यायमीमांसापरिशीलनविकलानां बाह्यतराः प्रलापा उपेक्षणीयाः" इत्यन्तेन। (ख) "यद्यपि व्युत्क्रमेणाप्यर्थप्रतीतिस्तथापि शास्त्रप्रकारादृतक्रमविशिष्टस्यैवार्थप्रत्यायकत्वेनाभ्युपगतत्वात् तदुल्लङ्घने निग्रह इत्यभिसन्धिः। तेन स्वसिद्धान्ताभ्युपगतकथाभिधानक्रमव्युत्क्रमेण कथाभिधानमप्राप्तकाल"मिति वर्द्धमानः।

न्यायवार्त्तिकम्

सोऽयमर्थस्यानुपूर्वीमन्वाचक्षाणो नाभ्याख्येय इति। यत्पुनरेतत्—'प्रयोगादि'ति ? न, निग्रहस्थानविषयापरिज्ञानात्—शास्त्रे वाक्यान्यर्थसंग्रहार्थमुपादीयन्ते, संगृहीतं त्वर्थं वाक्येन प्रतिपादयिता प्रयोगकाले प्रतिज्ञादिकयाऽऽनुपूर्व्या प्रतिपादयतीति ॥ ११ ॥

न्यायवार्त्तिकतात्पर्यटीका

सोऽयमर्थस्यानुपूर्वीं प्रतीतिबलप्रवृत्तामन्वाचक्षाणो नाभ्याख्येय इति, नोपालभ्यः। शास्त्रे वाक्यान्यर्थसंग्रहार्थमुपादीयन्त इति। न हि शास्त्रे (क)'कृत्स्नासदिवादरभूतदिवे'त्यर्थसंग्रहो यथा कथंचित् क्रियत इति वादेऽपि तथा क्रियतामिति युक्तं, वादादिषु पक्षप्रतिपक्षवद्वक्तोरपि परीक्ष्यमाणत्वात्, परीक्षितस्य च शास्त्रितत्वात् ॥ ११ ॥

वृत्तिः

इत्येकः पादः, प्रतिवादिनश्च तत्रोपालम्भो द्वितीयः पादः, प्रतिवादिनः स्वपक्षसाधनं तत्र हेत्वाभासोद्धरणं चेति तृतीयः पादः, जयपराजयव्यवस्था चतुर्थः पादः। एवं प्रतिज्ञाहेत्वादीनां क्रमः। तत्र सभाक्षोभव्यामोहादिना व्यत्यस्ताभिधानमप्राप्तकालमिति ॥ ११ ॥

(क) "कृत्स्नासदिवादरभूतदिवे'त्यर्थसंग्रहो यथाकथंचित् क्रियत"इति दृश्यते ; परन्तु कुतेदं वाक्यं कश्च तस्यार्थ इति नावधृतम्। उदयनाचार्यकृततात्पर्यपरिशुद्धावपि तस्य नार्थो विवृतो न च ग्रन्थस्थलं प्रदर्शितम्। पाठभेदाश्चात्र नानाविधा दृश्यन्ते। कलिकातापुस्तके 'कृत्टरासदिवादरभादि'ति पाठः। विशुद्धानन्दसरस्वतीस्वामिवरपुस्तके 'कृत्टनासदिवादरभूतदिवे'ति। काशीसंस्कृतपाठशालापुस्तके 'कृत्स्नासदिवादरभूतदिवे'ति। एवं स्थिते महामहोपाध्यायसुधाकरपण्डिताः—"ज्यौतिषशास्त्रे चतुर्दशी रविवासरे विरुद्धेत्युक्तं, तदनुसारेण 'कृत्या सदिवाकरभूतदिवे'ति पाठः। कृत्या घातिकेत्यर्थः। 'सूर्ये विशाखा भरणी ज्येष्ठा मैत्री मघा तथा। चतुर्दशी द्वादशी च विरुद्धा सप्तमी तथे'ति शीघ्रबोधे दर्शनादि"त्याहुः।

महामहोपाध्यायशिवकुमारमिश्राः 'कृत्स्नासदिवादरभूतदिवे'ति पाठमभिप्रयन्ति। व्याचक्षते च— "विज्ञानमात्रसत्त्वस्थापनाप्रस्तावे कथं विज्ञानमात्रस्य सत्त्वं बाह्यार्थस्य चासत्त्वं भवतोपपाद्यत इत्यनुयुक्तो विज्ञानमात्रसत्त्ववादी सङ्क्षेपतो दृष्टान्तद्वयेन सिद्धान्तद्वयोपपादनप्रकारं स्वकीयं दर्शयति—कृत्स्नेत्यादिना। अत्र कृत्स्नासत् इव आदरभूतत् इवेति च्छेदः। अयमर्थः—अहम् बाह्यार्थाऽसत्त्वोपपादने कृत्स्नासत् इव अस्मि, कृत्स्नम् असत् यस्य स कृत्स्नासत् शून्यवादी, स इवेत्यर्थः। यथा शून्यवादिना सर्वासत्त्वमुपपाद्यते प्रातीतिकत्वमुपपादयता, तथैवाऽहं बाह्यासत्त्वमुपपादयामीति यावत्। विज्ञानसत्त्वोपपादने तु 'आदरभूतत्' इव भवामि, आदरभूः स्वीकारविषयः, तत् कृत्स्नम् यस्य स आदरभूतत्, सर्वसत्त्ववादी नैयायिक इत्यर्थः। यथा नैयायिकेन बाह्यान्तरोभयसत्त्वमुपपाद्यतेऽनुभवबलमालम्ब्य, तथैव मया विज्ञानसत्त्वमुपपाद्यत इत्याशयः" इति।

विशुद्धानन्दसरस्वतीस्वामिनस्तु किमपि व्याख्यानमारचयन्तः'कर्तरि नासदिवादरोऽभूत्तदिवे'ति पाठं युक्तमाहुः।

अनिरीक्ष्यैतद्वाक्यपूर्वोत्तरग्रन्थसंदर्भं न निर्धारयाम्यस्य वाक्यस्य पाठं तात्पर्यं चेति क-पुस्तकसम्पादकाः।

उदयनकृते न्यायपरिशिष्टे "एवञ्च व्यतिक्रमेणाप्यर्थप्रतीतिः 'कृत्टरासदिवा'दिवद् द्रष्टव्ये"ति पाठो दृश्यते। 'कृत्स्नासदिवादिवदि'त्यस्यैवायं लिपिकरप्रमादकृतोऽन्यथाभाव इति वा, ग्रन्थद्वयेऽप्येकत्रैव लिपिप्रमादशङ्काया अनौचित्यात् उदयनसम्मत एवैष पाठ इति वा, उदयनाचार्यात् पूर्वत एव तात्पर्यपंक्तौ कृतपदोऽयं प्रमाद इति वा तत्त्वतोऽत्र विनिर्णयन्तु विपश्चिमज्ञाना विद्वांसः। वर्द्धमानोपाध्यायैस्तु तत्रोपजोषमास्थितम्।

परन्तु तार्किकरक्षायां वरदराजेन "अर्थप्रतीतिसम्भावनामात्रेण प्रयोगाङ्गीकारे 'कृतवासदिवादरभूतदिवे'-त्यादीनामपि प्रयोगप्रसङ्गात्।" इत्युक्तम्। तत्र च ज्ञानपूर्णेन लघुदीपिकाटीकायां (खृष्टीयैकादशशताब्द्यां ?) "कृतवासेत्यादेरर्थो मया यथावन्न तत्त्वतो ज्ञायत" इत्युक्तम्। एवं स्थिते अलमस्माकमत्रातिसाहसेनेति विरमामः। तथापि सुधाकरपण्डितानां मतमेवात्र न्याय्यः प्रतिभातीति विवक्तीव हृदयम् ; किन्तु कस्तत्रोदयनोक्तो व्यतिक्रमः ?

न्यायभाष्यम्

हीनमन्यतमेनाप्यवयवेन न्यूनम् ॥ १२ ॥

प्रतिज्ञादीनामवयवानामन्यतमेनाप्यवयवेन हीनं न्यूनं निग्रहस्थानम्, साधनाभावे साध्यासिद्धिरिति ॥ १२ ॥

न्यायवार्त्तिकम्

हीनमन्यतमेनाप्यवयवेन न्यूनम् । यस्मिन् वाक्ये प्रतिज्ञादीनामन्यतमोऽवयवो न भवति तद्वाक्यं न्यूनं वेदितव्यम् । तत् कथं निग्रहस्थानम् ? न साधनाभावे साध्यसिद्धिरिति ।

एके तु प्रतिज्ञान्यूनं नास्तीत्याचक्षते । एतत् तु न युक्तम् । (१)प्रतिज्ञामन्तरेण(२)प्रयोगी विकल्पतः पर्यनुयोज्यः । यः प्रतिज्ञान्यूनवाक्यं ब्रूते किमयं निगृह्यते अथ नेति ? यदि निगृह्यते ? कतमत् निग्रहस्थानमिति ? न हि हेत्वाभासादयोऽत्र सन्तीति । न च हेत्वादि-दोषाः सन्तीति, निग्रहं चाभ्युपैति, तस्मात् प्रतिज्ञान्यूनमेवेति । अथ न निग्रहः ? न्यूनं वाक्यमर्थं साधयतीति साधनाभावे सिद्धिरभ्युपगता भवति । यत्तु ब्रवीषि 'सिद्धान्तपरिग्रह एव प्रतिज्ञा'(क), एतदपि न बुद्ध्यामहे ; कर्मण उपादानं प्रतिज्ञा, सामान्यविशेषवतोऽवधारितस्य वस्तुनः परिग्रहः सिद्धान्त इति ॥ १२ ॥

न्यायवार्त्तिकतात्पर्यटीका

हीनमन्यतमेनाप्यवयवेन न्यूनम् (सू १२)॥ प्रतिज्ञादीनां पञ्चावयवानां मिलितानां साधनत्वमुपपादितम् । न्यूनत्वे साधनत्वं नास्ति, तदभावे न साध्यसिद्धिः । न हि सामग्री-निष्पाद्यं कार्यं सामग्र्येकदेशाद्भवतीत्यर्थः । परेषां मतमुपन्यस्यति—एके त्विति । एके तु प्रतिज्ञान्यूनं नाम निग्रहस्थानं नास्तीति ब्रुवते । दूषयति—एतत्तु न युक्तमिति । किं प्रतिज्ञा-न्यूनं निग्रहस्थानान्तरं न भवति, अथ निग्रहस्थानमेव न भवति । एतदेवाह किमसौ निगृह्यते न वेति । प्रथमकल्पे दोषमाह—यदीति । द्वितीयकल्पे दोषमाह—अथ न निग्रह इति । प्रतिज्ञायाः साधनाङ्गत्वमुक्तमित्यर्थः । यच्च ब्रवीषि दिङ्नाग ! सिद्धान्तपरिग्रह एवेति । एतत्तु दूषयति—एतदपीति । सिद्धसाध्यार्थयोः सिद्धान्तप्रतिज्ञयोर्महान् भेद इत्यर्थः ॥ १२ ॥

वृत्तिः

न्यूनं लक्षयति—(हीनमन्यतमेनाऽप्यवयवेन न्यूनम्) । अवयवेन स्वशास्त्रसिद्धेन, तेन सौगतस्य द्व्यवयवाभिधानेऽपि न न्यूनत्वम् । नन्ववयवहीनत्वं अवयवत्वावच्छिन्ना-भावः, तथा चाकथनमेव स्यादत आह—अन्यतमेनापीति । तथा च यत्किञ्चिदवयव-शून्यावयवाभिधानं फलितम् । न चायमपसिद्धान्तः, सिद्धान्तविरुद्धानभ्युपगमात्, अपि तु सभाक्षोभादिनाऽनभिधानात् ॥ १२ ॥

---

(१) 'प्रतिज्ञामाश्रित्य'—इति क० । (२) 'प्रयोगे'—इति ख० । (क) —दिङ्नागस्येयमुक्तिरिति व्यक्तं तात्पर्ये ।

न्यायभाष्यम्

हेतूदाहरणाधिकमधिकम् ॥ १३ ॥

एकेन कृतत्वाद् अन्यतरस्यानर्थक्यमिति, तदेतन्नियमाभ्युपगमे वेदितव्यमिति ॥१३॥

न्यायवार्त्तिकम्

हेतूदाहरणाधिकमधिकम्। यस्मिन् वाक्ये हेतू द्वौ दृष्टान्तौ द्वौ तद्वाक्यमधिकं निग्रहस्थानमाधिक्यात्।

तच्च न, दार्ढ्यादित्येके—एके तु ब्रुवते नेदं निग्रहस्थानं दार्ढ्यात्। दार्ढ्यं हि ज्ञाप्यस्य भूयोभिर्ज्ञापकैर्दृष्टं यथा धूमालोकाभ्यामग्नेरिति। न, दार्ढ्यार्थानभिधानात्—भूयोभिर्ज्ञापकैर्दार्ढ्यं भवतीति न दार्ढ्यार्थोऽभिधीयते, किं ब्रवीषि दार्ढ्यादिति? सुतरां प्रतिपत्तिर्दार्ढ्यमिति? तदपि तादृगेव, किमुक्तं भवति सुतरामिति? अथ ब्रवीषि द्वे अपि ज्ञापके? सत्यं द्वे अपि ज्ञापके। एकेनैवाऽभिधानात् व्यर्थमभिधानं द्वितीयस्य, प्रकाशिते दीपान्तरोपादानवदिति। अनवस्था वा, प्रकाशितेऽपि साधनान्तरोपादानादिति ॥ १३ ॥

इति स्वसिद्धान्तानुरूपप्रयोगाभासनिग्रहस्थानप्रकरणम्।

न्यायवार्त्तिकतात्पर्यटीका

हेतूदाहरणाधिकमधिकम् (सू १३) ॥ तदेतन्नियमाभ्युपगम इति भाष्यम्। यत्र कथमेतत्साध्यं सिध्यतीति जिज्ञासा, तत्रैकेनैव साधनेन साध्यसिद्धेः साधनान्तराभिधानमनर्थकमिति, निष्पादितक्रिये कर्मणि अविशेषाभिधायिनः साधनस्य साधनन्यायातिपातात्। यत्र तु प्रतिवादिनः परिषदो वा जिज्ञासा भवति—कति साधनानि संभवन्त्यस्मिन्साध्य इति, तत्र यावन्ति साधनानि तावन्ति सर्वाण्येव वाच्यानि, अन्यतराभिधाने निग्रहप्रसङ्गादिति।

नाधिकं निग्रहस्थानमिति य आहुस्तन्मतमुपन्यस्यति—तच्च न, दार्ढ्यादिति। दूषयति—न, दार्ढ्यार्थेति। यदि निश्चयो दार्ढ्यं तदेकस्मादेव प्रमाणाद्भवति, अनिश्चायकस्याप्रमाणत्वात्। अथ स्फुटत्वं, तदपि चेन्निश्चयः स दत्तोत्तरः। अथ सामान्यविशेषवत्तां ग्रहणं, न तदनुमानसहस्रैरपि, तेषां सामान्यवद्द्रव्यमात्रविषयत्वात्। शङ्कते—अथ ब्रवीषि द्वे अपि ज्ञापके इति। नास्माकमनधिगतार्थगन्तृत्वं प्रमाणत्वं, येनैकेनाधिगते प्रमाणान्तरमप्रमाणं स्यात्। अपि तु गन्तृमात्रं प्रमाणं, तच्च द्वितीयस्याप्यविशिष्टमिति शङ्कार्थः। निराकरोति—सत्यं द्वे अपि ज्ञापके इति। पुरुषोऽत्रापराध्यते यो ज्ञातमर्थमजिज्ञासितं ज्ञापयति, न तु प्रमाणम्; तद्धि सामर्थ्येन मेये प्रवर्तत एव। यदि जिज्ञासायां सत्यां प्रवर्तते प्रतिपादयति ज्ञेयं नास्य कश्चिदपराध इति। न हि धान्येष्वलूनेषु दात्रमप्रश्नं भवति। तस्मादनपेक्षितकरणादनवस्थाप्रसङ्गाच्च पुरुषस्य निग्रह इति स्थितम् (क) ॥ १३ ॥

(क) नैतन्निग्रहस्थानमप्रतिपत्तिविप्रतिपत्त्योरसूचकत्वादिति चेन्न; परिषत्प्रतिवादिजिज्ञासामनुरुध्य कथाप्रवृत्तेस्तां कथाङ्गभूतां जिज्ञासामबुद्ध्वा अन्यथा वा बुद्ध्वा प्रवर्त्तमानस्य अप्रतिपत्तिविप्रतिपत्त्योरुन्नीयमानत्वात्।

न्यायभाष्यम्

शब्दार्थयोः पुनर्वचनं पुनरुक्तमन्यत्रानुवादात् ॥ १४ ॥

(१)अन्यत्रानुवादात्(१*) शब्दपुनरुक्तमर्थपुनरुक्तं वा, नित्यः शब्दो नित्यः शब्द इति शब्दपुनरुक्तम्। अर्थपुनरुक्तम्—अनित्यः शब्दो निरोधधर्मको ध्वनिरिति।

अनुवादे त्वपुनरुक्तं शब्दाभ्यासादर्थविशेषोपपत्तेः। यथा हेत्वपदेशात् प्रतिज्ञायाः पुनर्वचनं निगमनमिति ॥ १४ ॥

अर्थादापन्नस्य स्वशब्देन पुनर्वचनम् ॥ १५ ॥

पुनरुक्तमिति प्रकृतम्। निदर्शनम्—उत्पत्तिधर्मकत्वादनित्यमित्युक्त्वा अर्थादा-

न्यायवार्त्तिकम्

शब्दार्थयोः पुनर्वचनं पुनरुक्तमन्यत्रानुवादात्। शब्दपुनरुक्तं अनित्यः शब्दोऽनित्यः शब्द इति। अर्थपुनरुक्तं अनित्यः शब्दो निरोधधर्मको ध्वान इति। अनुवादे त्वपुनरुक्तमर्थविशेषोपपत्तेः।

(क)नाबाधनादित्येके—एके तु ब्रुवते नेदं निग्रहस्थानमबाधनात्। न हि परीक्षाविधेः पुनर्ब्रुवता किञ्चिद् बाध्यते ; परप्रतिपादनार्थं च वाक्यप्रयोगः, पुनरभिधानेन सुतरामर्थं प्रतिपद्यत

न्यायवार्त्तिकतात्पर्यटीका

शब्दार्थयोः पुनर्वचनं पुनरुक्तमन्यत्रानुवादात् (सू १४) ॥

अर्थादापन्नस्य स्वशब्देन पुनर्वचनं पुनरुक्तम् (सू १५) ॥ तदनेन सूत्रद्वयेन पुनरुक्तमेकमेव निग्रहस्थानं कथंचिदवान्तरभेदविवक्षया त्रिविधमुक्तं प्रपञ्चार्थम्। तदेव पुनरुक्तं क्वचिच्छब्दाभ्यासात्, क्वचित्पर्यायान्तरात्, क्वचिदर्थादिति। आक्षिपति—नाबाधनादिति।

वृत्तिः

अधिकं लक्षयति—(हेतूदाहरणाधिकमधिकम्)। हेतूदाहरणेत्युपलक्षणम्। दूषणाद्याधिक्यमपि बोध्यम्। तथा च कृतकर्त्तव्यापुनरुक्ताभिधानमिति फलितम्(ख)। अनुवादस्तु न कृतकर्त्तव्यः साभिप्रायत्वात्। प्रतिज्ञाधिक्यं च पुनरुक्तम्। धूमादालोकात् महानसवच्चत्वरवदित्यादिकं तु विना समयबन्धं दार्ढ्यादिभ्रमादुक्तमधिकम्। यथा महानसं महानसवदिति तु नाधिकं, किं तु पुनरुक्तम् ॥ १३ ॥

समाप्तं स्वसिद्धान्तानुरूपप्रयोगाभासनिग्रहस्थानत्रिकप्रकरणम्।

पुनरुक्तं लक्षयति—(शब्दार्थयोः पुनर्वचनं पुनरुक्तमन्यत्रानुवादात्)। पुनर्वचनं पुनरुक्तम्। तस्य विभागार्थं शब्दार्थयोरिति। तेन शब्दपुनरुक्तमर्थपुनरुक्तं च लभ्यते। अनुवादेऽतिव्याप्तिवारणायान्यत्रानुवादादिति, अनुवादादन्यत्वे सतीत्यर्थः।

(१) इदं टि-पु० नास्ति। (क) इदं वार्त्तिकपुस्तकयोः सूत्ररूपेण मुद्रितम्। न्यायसूचीनिबन्धविरोधादस्माभिर्न तथा गृह्यते। (ख) अन्वितमुपयुक्तमपुनरुक्तं कृतकर्त्तव्यमभिधीयमानमधिकमिह ग्राह्यम्। तेनापार्थकादिव्यवच्छेदः, अधिकानुवाददूषणाधिकयोश्च संग्रहः इति न्यायपरिशिष्टे उदयनः (१०५पृ०)। "अन्वितत्वेनापार्थकादुपयुक्तत्वेनार्थान्तरादस्य भेदः"—इति वादिविनोदे शङ्करमिश्राः।

न्यायभाष्यम्

पन्नस्य योऽभिधायकः शब्दस्तेन स्वशब्देन ब्रूयाद् अनुत्पत्तिधर्मकं(१)नित्यमिति, तच्च पुनरुक्तं वेदितव्यम्। अर्थसम्प्रत्ययार्थे शब्दप्रयोगे प्रतीतः सोऽर्थोऽर्थापत्त्येति ॥ १५

न्यायवार्त्तिकम्

इति न निग्रहस्थानं, प्रतिपादकत्वात्। सत्यं प्रतिपादयति; प्रतिपादितार्थप्रतिपादकत्वात् वैयर्थ्यं स्यात्, वैयर्थ्यान्निग्रहस्थानं साधनविषयापरिज्ञानात्। न चायं शिष्यो न गुरुस्तस्मान्नायं पुनः प्रतिपाद्यत इति ॥ १४ ॥

अर्थादापन्नस्य स्वशब्देन पुनर्वचनं पुनरुक्तम्। पूर्ववन्निग्रहस्थानमिति ॥ १५ ॥

इति पुनरुक्तनिग्रहस्थानप्रकरणम्।

न्यायवार्त्तिकतात्पर्यटीका

समाधत्ते—सत्यमिति। जल्पवितण्डयोर्वक्तुर्नैपुण्यं चिन्त्यते। पुनरुक्तप्रयोगे त्वनिपुणः स्याद् अनपेक्षिताभिधानात्साधनस्य विषयः साध्योऽर्थो न सिद्धः, तस्यापरिज्ञानान्निगृह्यते। वैयर्थ्यं चानर्थक्यं विरुद्धप्रयोजनत्वं वाभिमतम्। तथा हि पुनरुक्तप्रयोगे तत्प्रयोजनानुसरणसमाकुलचित्तः प्रथमाभिधानादापाततः प्रतीतमप्यर्थमप्रतीतमिव मन्यमानो न निश्चेतुमर्हतीति। ततश्च प्रतिपादनाय प्रवृत्तो न प्रतिपादयितेति विरुद्धप्रयोजनवत्त्ववैयर्थ्यं स्यादित्युपपन्नं निग्रहस्थानमिति ॥ १५ ॥

वृत्तिः

निष्प्रयोजनं पुनरभिधानं हि पुनरुक्तम्। अनुवादस्तु व्याख्यारूपः सप्रयोजनक एवेति भावः। तथा च समानार्थकसमानानुपूर्वीकशब्दप्रयोगः शब्दपुनरुक्तम्(क)। समानार्थकभिन्नानुपूर्वीकशब्दस्य निष्प्रयोजनं पुनरभिधानमर्थपुनरुक्तम्। आद्यं यथा—'घटो घट' इति, द्वितीयं यथा—'घटः कलश' इति। एतस्य प्रमादादिना सम्भवः ॥१४॥

पुनरुक्तप्रभेदान्तरमाह—(अर्थादापन्नस्य स्वशब्देन पुनरभिधानम्)। पुनरुक्तमित्यनुवर्तते। यस्मिन्नुक्ते यस्यार्थस्यौत्सर्गिकी प्रतिपत्तिर्भवति तस्य तेन रूपेण पुनरभिधानं पुनरुक्तम्। इदमेव च अर्थपुनरुक्तमिति गीयते। यथा वह्निरुष्ण इति पूर्वपदाक्षिप्तोक्तिरियम्, उष्णो वह्निरिति उत्तरपदाक्षिप्तोक्तिः, एवं वहिरस्ति गेहे नास्तीति विध्याक्षिप्तोक्तिः, जीवन् गेहे नास्ति बहिरस्तीति निषेधाक्षिप्तोक्तिः, पुनरुक्त(२)वैचित्र्यं चेदं भाष्यादिसम्मतम्।

अन्ये तु शब्दपुनरुक्तं द्विविधं, तस्यैव शब्दस्य पुनरभिधानं, पर्यायेणाऽभिधानम्। अन्यत्पुनरर्थपुनरुक्तमित्याहुः ॥ १५ ॥

इति पुनरुक्तप्रकरणम्।

(१) 'अनित्यम्'—इति टि०। (२) —'वैविध्य'मिति—भ०। (क) नार्थपुनरुक्तादन्यच्छब्दपुनरुक्तं, शब्दसाम्येऽप्यर्थभेददर्शनात्, पृथङ्निर्देशस्तु शक्त्यातिशयचिख्यापयिषया 'सकृच्छब्दः प्रयोक्तव्य' इति प्रतिज्ञास्थला-भिप्रायेण; अर्थपुनरुक्तमपि कृतनियमस्यैव दोषः, अतएव वादे नेदं निग्रहस्थानम्;—इति न्यायमञ्जरीकृतः।

न्यायभाष्यम्

विज्ञातस्य परिषदा, त्रिरभिहितस्याप्यप्रत्युच्चारण-मननुभाषणम् ॥ १६ ॥

(१)विज्ञातस्य वाक्यार्थस्य(१*) परिषदा, (२)प्रतिवादिना त्रिरभिहितस्य यदप्रत्युच्चारणं तदननुभाषणं नाम निग्रहस्थानमिति। अप्रत्युच्चारयन् (३)किमाश्रयं परपक्षप्रतिषेधं ब्रूयात् ॥ १६ ॥

न्यायवार्त्तिकम्

विज्ञातस्य परिषदा, त्रिरभिहितस्याप्यप्रत्युच्चारणमननुभाषणम्। शेषं भाष्ये।

उत्तरेणावस्थानात् नेदं निग्रहस्थानमिति केचित्। उत्तरेणावस्थानात्—उत्तरेण गुणदोषवता (४)मूढत्वामूढत्वं गम्यत इति किं पुनरुच्चरितेनास्ति? अस्ति हि उत्तरे कश्चित्समर्थो दृश्यते न प्रत्युच्चारणे, नासौ तावता निग्रहस्थानमर्हति। यश्चारभ्य स्वपक्षं न निर्वाहयेत् तस्य स्यात् खलीकारमात्रमिति। नोत्तरविषयापरिज्ञानात्—यद्ययं न प्रत्युच्चारयति? निर्विषयमुत्तरं प्रसज्यते। अथोत्तरं ब्रवीति? कथं नोच्चारयति? तदिदं व्याहतमुच्यते—नोच्चारयत्युत्तरं च ब्रवीतीति।

न्यायवार्त्तिकतात्पर्यटीका

विज्ञातस्य परिषदा, त्रिरभिहितस्याप्यप्रत्युच्चारणमननुभाषणम् (सू १६)॥ व्याचष्टे—विज्ञातस्य वाक्यार्थस्येति। निग्रहस्थानत्वेऽस्योपपत्तिमाह—अप्रत्युच्चारयन् किमाश्रयं प्रतिषेधं ब्रूयादिति।

वार्त्तिकं—नेदं निग्रहस्थानमिति केचित्। उत्तरेण उत्तरगुणदोषनिरूपणेन, प्रतिवादिनो मूढत्वामूढत्वावस्थापनात्। एतद्विभजते—उत्तरेण गुणदोषवतेतीति। तस्मात्किं पुनरुच्चारितेनोच्चारणेनास्ति प्रयोजनमिति शेषः। 'अस्ति हि कश्चिदि'ति क्वचित्पाठः। तत्रास्ति हीति निपातद्वयं वाक्यावतारे द्रष्टव्यम्। पुंसां विचित्रस्वभावत्वात् कश्चिदुत्तरे समर्थो न प्रत्युच्चारणे, नासौ सदुत्तरमभिदधानः तावताऽननुभाषणमात्रेण निग्रहमर्हति। ननु यद्यननुभाषणं न निग्रहस्थानं तदाऽनुभाषितुमुपक्रम्य सर्वमननुभाषमाणो न निगृह्येतेत्यत आह—यस्त्वारभ्य न निर्वाहयेत् सदुत्तरं तु ब्रूयात् तस्य स्यात् खलीकारमात्रम् असामर्थ्यकृतं, न तु तत्त्ववादित्वविहतिरित्यर्थः। तमेतं भदन्ताक्षेपं समाधत्ते—नोत्तरविषयापरिज्ञानादिति। दूष्यविषयं हि दूषणम्, असति दूष्याभिधाने न शक्यं वक्तुम्। न खलु प्रतिज्ञाहेतूदाहरणोपनयनिगमनदोषास्तत्स्वरूपमनभिधाय शक्या दोषत्वेनावस्थापयितुमित्यनुच्चारयन्न दोषमभिधातुमर्हतीति। तदिदमुक्तं—तदिदं व्याहतमुच्यते नोच्चारयति उत्तरं च ब्रवीतीति। स्यादेतद्—न प्रतिवादिना सर्वं दूषणीयम्, अन्यतमावयवदूषणेनैव साधनस्य दूषितत्वेन दोषान्तराभिधान-

(१) 'विज्ञातार्थस्य वाक्यस्य'—इति टि०। (२) 'वादिना'—इति फ०। 'प्रतिवादिना' इत्यस्य 'अप्रत्युच्चारण'मित्यत्रान्वयसम्भवात् बहुपुस्तकसंवादी पाठो नोपेक्षितः। (३) 'नियमाश्रयं'—इति टि०। (४) 'अमूढत्वं गम्यते'—इति क-ख-धृतपाठान्तरम्।

न्यायवार्त्तिकम्

अप्रतिज्ञानाच्च—नेदं प्रतिज्ञायते पूर्वमुच्चारयितव्यं पश्चादुत्तरमभिधेयमपि तु यथाकथञ्चिदुत्तरं वक्तव्यम्। उत्तरं चाश्रयाभावे न युक्त(१)मिति युक्तमप्रत्युच्चारणं निग्रहस्थानमिति ॥ १६ ॥

न्यायवार्त्तिकतात्पर्यटीका

वैयर्थ्यात्। न खलु मृतो मृत्युना रक्षितो मारयितुं शक्यः, एवं दूषितमपि दूषयितुम्। तस्मात्सत्यपि दूष्यबाहुल्येऽन्यतमं दूष्यम्। तथा च सर्वानुभाषणे सर्वस्यादूष्यत्वाद् यद्दूषणीयं तत्पुनरनुवाद्यमिति सर्वानुवादे द्विरनुवादोऽदूष्यानुवादश्चेति दूषकनिग्रहस्थानद्वयम्। तस्मादनुभाषणमेव निग्रहस्थानमिति विपरीतमापतितमित्यत आह—अप्रतिज्ञानाच्चेति। एतद्विभजते—न चेदं प्रतिज्ञायते—(२)पूर्वमेकग्रन्थेन सर्वमुच्चारयितव्यं, पश्चादुत्तरं यद्दूष्यं तदनुवादेनाभिधेयं; येन दूष्यानुवादो द्विरनुवादश्च दोषौ स्याताम्; अपि तु यथाकथंचिदुत्तरं वक्तव्यम्। उत्तरवादपरस्योत्तरमाश्रयाभावे न युक्तमिति तदाश्रयमात्रमनुवदितव्यं तदन्तरेणाशक्याभिधानत्वादुत्तरस्येति। तस्माद् युक्तं तन्मात्रस्याप्रत्युच्चारणमननुभाषणं न सर्वस्याप्रत्युच्चारणमननुभाषणमित्यर्थः। नन्वप्रतिभाया निग्रहस्थानत्वविधानेनाननुभाषणस्यापि विदितं, तस्य तद्विशेषत्वात्। न खलु नानुभाषत इत्येतावतैव निगृह्यते अपि त्वननुभाषमाणो दूष्यं न बुध्यते, अबुध्यमानश्च तत्रोत्तरं न प्रतिपद्यते, ततोऽप्रतिभया निगृह्यते। तदेवमननुभाषणमप्रतिभाविशेष इति अप्रतिभाया विहितं निग्रहस्थानत्वं तद्विशेषेऽपि विहितं भवति। यथा गवि सास्नादिमत्त्वं विहितं शाबलेयेऽपि विहितं भवति, न पुनस्तत्र सास्नादिमत्त्वविधानाय पृथग् यत्नान्तरमारभन्ते। अत्र ब्रूमः—न तावदुत्तराप्रतिपत्तिसामान्यविशेषोऽननुभाषणं पुंसां सामर्थ्यवैचित्र्यात्। कश्चिद् दूष्यं दूषणं च विदन्नपि नानुभाषितुं पारयति, बहुवचनकुण्ठत्वात्। तस्मादसत्यामप्रतिभायामननुभाषणसंभवान्नाप्रतिभाया विशेषोऽननुभाषणमिति। कश्चिद् दूषणविषयं वेदानुभाषते च, उत्तरप्रतिपत्तिविकलस्तु स्यात्सोऽयमप्रतिभया निगृह्यते, नाननुभाषणेन, तत्र सामर्थ्यात्। कश्चित्पुनर्दूष्यमेव न जानाति, सोऽज्ञानेन निगृह्यते, न चाज्ञानेऽननुभाषणमवश्यंभावि, धारणावतोऽर्थानिरूपणे वाग्युदीरिताक्षरस्वरूपमात्रपाठसंभवेनानुभाषणोपपत्तेः। अप्रतिभा त्ववश्यं भवेत्। न ह्यस्ति संभवो दूष्यं न वेदास्य दूषणं तु वेदेति। तथाऽपि स्वरूपतस्तावद्भेदः। न हि यदेव दूषणविषयमज्ञानमप्रतिभा तदेव दूष्यविषयमज्ञानम्। तस्मात्सत्यप्यननुभाषणाप्रतिभाज्ञानानामुत्तरानभिधानफलत्वे तुल्ये अवान्तरभेदविवक्षया भेदेनोपन्यासः। त्रिरभिहितस्येति। त्रिरभिधानमेवमप्यप्रतिपद्यमानस्यातिजडतया न वादेऽधिकार इत्यभिसंधिमत इति ॥ १६ ॥

(१) उत्तरं चाश्रयाभावेन युक्तम्—इति क-ख-धृतपाठान्तरम्।

(२) पूर्वमेवाग्रन्थेन'—इति क०।

न्यायभाष्यम्

अविज्ञातं चाज्ञानम् ॥ १७ ॥

(१)विज्ञातार्थस्य परिषदा, (२)प्रतिवादिना त्रिरभिहितस्य (३)यदविज्ञातं तदज्ञानं (४)नाम (५)निग्रहस्थानमिति। (६)अयं खल्वविज्ञाय कस्य प्रतिषेधं ब्रूयादिति ॥१७॥

उत्तरस्याप्रतिपत्तिरप्रतिभा ॥ १८ ॥

(७)परपक्षप्रतिषेध उत्तरम्, तद् (८)यदा न प्रतिपद्यते तदा निगृहीतो भवति ॥१८॥

न्यायवार्त्तिकम्

अविज्ञातं चाज्ञानम्। स्फुटं भाष्ये। अप्रतिपत्तितो निग्रहस्थानम् ॥ १७ ॥

उत्तरस्याप्रतिपत्तिरप्रतिभा। (क)श्लोकपाठादिभिरवज्ञां दर्शयन्नोत्तरं प्रतिपद्यत इति, तदप्रतिभा नाम निग्रहस्थानं (९)मूढत्वादिति ॥ १८ ॥

न्यायवार्त्तिकतात्पर्यटीका

अविज्ञातं चाज्ञानम् (सू १७) ॥ तद्व्याचष्टे—विज्ञातार्थस्य परिषदेति। निग्रहस्थानसामान्यलक्षणमत्र योजयति वार्त्तिककारः—अप्रतिपत्तितो निग्रहस्थानमिति ॥ १७ ॥

उत्तरस्याप्रतिपत्तिरप्रतिभा (सू १८) ॥ तद्व्याचष्टे—परपक्षेति। वार्त्तिकं—श्लोकपाठादिभिरवज्ञां दर्शयन्निति। अर्थान्तरे हि निग्रहस्थाने प्रसक्तानुप्रसक्तं तत्सिद्ध्यर्थताव्याजेनावतारयता न प्रकृतावज्ञानं क्रियते, इह त्ववज्ञानम्, एतावता भेदेनोपन्यास इति। इयं चाप्रतिभा सम्यक्साधनोपन्यासे द्रष्टव्या। साधनाभासोपन्यासे तु पर्यनुयोज्योपेक्षणम् ॥ १८ ॥

वृत्तिः

अननुभाषणं लक्षयति—(विज्ञातस्य परिषदा त्रिरभिहितस्याप्यप्रत्युच्चारणमननुभाषणम्)। परिषदा विज्ञातस्य विशिष्य बुद्धार्थस्य वादिना त्रिरभिहितस्य। तथा च प्रथमवचनेऽननुभाषणे वादिना वारत्रयं वाच्यमिति दर्शितम्। तथा च त्रिरभिधानेऽपि यत्राऽनुभाषणविरोधी व्यापारः तत्राऽननुभाषणं निग्रहस्थानमित्यर्थः।

अज्ञानसाङ्कर्य्यनिरासाय अज्ञानमनाविष्कुर्वतेति, विक्षेपसाङ्कर्यनिरासाय कथामविच्छिन्दतेति च विशेषणीयम् इत्याचार्याः(ख)। न चाऽप्रतिभासाङ्कर्यम्, उत्तरप्रतिपत्तावपि

---

(१) 'विज्ञातस्य' फ०। (२) 'वादिना'—इति फ०। अत्रापि पूर्ववद्गतिसम्भवात् बहुपुस्तकसम्मतपाठो नोपेक्षितः। अथवा एवमाशयः—वादप्रवृत्तौ द्वावेव वादिनौ ; प्रतिवादित्वं च प्रतिपक्षापेक्षया द्वयोरेव। एवं चात्र अभिधाता अविज्ञातुः प्रतिवाद्येव। (३) 'यदविज्ञानं' ल-ग-ज-झा०। (४) 'नामे'ति नास्ति ल-ग-ज-झा०। (५) 'न निग्रह'—इति टि०। (६) 'अर्थं'—इति टि०। (७) प्रतिषेधे—इति ग०। (८) 'येन'—इति टि०। (९) 'रूढत्वात्'—इति पाठसूचना क्वचित्। (क) श्लोकपाठादिभिरिति। "हृत्पुण्डरीकविकसत्सकलानवद्यविद्यावदातवदनः क्व जनोऽस्मदादिः। क्वायं वटुः कतिपयाक्षरलेशलिप्तजिह्वान्वितः कथमनेन सहाभिदध्मः॥ दानार्द्रगन्धगजकुम्भकपाटभेदिभीमस्फुरन्नखशिखाशिखरः क्व सिंहः। क्वामी समीरणविधूतपुराणपर्णपातोद्भवद्भयविलोलदृशः कुरङ्गाः॥"—इत्येवं विकत्थमान इत्यर्थः। आदिपदग्राह्याः केशविन्यासादयः; केशविन्यासाकाश-सूचन-राजवार्त्तावतारणादावप्यप्रतिभया निग्राह्य इत्येवमाचार्योपदेशात्। "स्वीयसन्देहाविष्करणमप्रतिभेति मणिकारः"—इति वादिविनोदे शङ्करमिश्राः। (ख) उदयनकृतं न्यायपरिशिष्टं (११० पृ०) द्रष्टव्यम।

न्यायभाष्यम्

कार्यव्यासङ्गात्कथाविच्छेदो विक्षेपः ॥ १९ ॥

यत्र कर्त्तव्यं व्यासज्य कथां(१)व्यवच्छिनत्ति—इदं मे करणीयं (२)विद्यते, तस्मिन् (३)अवसिते पश्चात्(४)कथयामीति, विक्षेपो नाम निग्रहस्थानम्। एकनिग्रहावसानायां कथायां स्वयमेव कथान्तरं प्रतिपद्यत इति ॥ १९ ॥

न्यायवार्त्तिकम्

कार्यव्यासङ्गात् कथाविच्छेदो विक्षेपः। यत्र कर्त्तव्यं कार्यं व्यासज्य कथां विच्छिनत्ति स विक्षेपो विज्ञेयः। यथा रसालया मया भुक्तं प्रतिश्यायकणो मे कण्ठं क्षिणोतीत्येवमादि। तत् कथं निग्रहस्थानम्? अज्ञाननिगूहनार्थं तु प्रत्युक्तमज्ञानमेव परिहारेणाविष्करोति ॥ १९ ॥

इति उत्तरविरोधिनिग्रहस्थानचतुष्कप्रकरणम्।

न्यायवार्त्तिकतात्पर्यटीका

कार्य(५)व्यासङ्गात्कथाविच्छेदो विक्षेपः (सू १९) ॥ साधनस्य दूषणस्य चोपन्यासमभ्युपगम्य तदवस्थः प्रतीयमान एव प्रतिवादिनो दार्ढ्यं सभ्यानां वा कठोरत्वमवगम्याकस्मात्कार्यं व्यासज्याभ्युपगतां कथां व्यवच्छिनत्ति, तत्र विक्षेपो नाम निग्रहस्थानम्। तदनेनाप्रतिभया तूष्णींभावोऽपि संगृहीतो वेदितव्यः। कार्यव्यासङ्गस्याभ्युपगतकथाविच्छेदमात्रोपलक्षणत्वात्। न चेदमर्थान्तरं तत्र प्रकृतमेव साधयामीति व्याजेन प्रसक्तानुप्रसक्तावतारेण कथाविच्छेदाभावात्, इह तु कथाविच्छेदात्। न चास्य हेत्वाभासेष्वन्तर्भावः(क)। न हि विक्षेपस्यान्यतमलिङ्गधर्मानुविधानं नापि प्रकृतसाध्यसिद्धये प्रयोगो येन हेत्वाभासः स्यात्। न च वादिनो विक्षेपो हेत्वाभासः, अनन्तरं कथामभ्युपेत्यैव हेतुमनभिधायापसरणात्। यदि चायं सम्यञ्चं हेतुमभिधाय तत्समर्थनासमर्थोऽपसरेत किमेतावता न निगृह्येत, हेत्वाभासेन वा निगृह्येत, किं तु व्यासङ्गादेव। अनर्थकापार्थकाभ्यां तु भेदोऽस्य स्फुट एव। न ह्यत्रासमानसंकेतः प्रतिपादको येनानर्थकः स्यात्। नापीह पदानि वाक्यानि वा पौर्वापर्येणासंबन्धानि, येनापार्थकः स्यात्। न चावज्ञानं, येनाप्रतिभा भवेत्। तस्माद्विक्षेपः पृथङ् निग्रहस्थानमिति सिद्धम् ॥ १९ ॥

वृत्तिः

सभाक्षोभादिनाऽननुभाषणसम्भवात्। तदिदं चतुर्धा—एकदेशानुवादाद्विपरीतानुवादात्, केवलदूषणोक्त्या, स्तम्भेन चेति। सर्वनामपदेनाऽनुवादात् पञ्चमम्—इत्याचार्याः। क्वचिदज्ञानाप्रतिभाननुभाषणसाङ्कर्ये यन्निश्चेतुं शक्यते तदेवोद्भाव्यम् ॥ १६ ॥

अज्ञानं लक्षयति—(अविज्ञातं चाज्ञानम्)। भावे क्तः। चकारश्च 'परिषदा विज्ञातस्य' इत्याद्यनुकर्षणार्थः। तथा च परिषदा विज्ञातस्य वादिना त्रिरभिहितस्याऽप्यविज्ञातमित्यर्थः। इदं च 'किं वदसि बुध्यत एव ने'त्याद्याविष्करणेन ज्ञातुं शक्यत इति ॥१७॥

(१) 'विच्छिनत्ति'—इति टि०। (२) 'परिहीयते'—इति टि०। (३) 'अवसिद्यते'—इति टि०। (४) 'कथयिष्यामीति'—इति ज०। (५) आदर्शद्वयमुद्रितोऽपि "प्रसङ्गा"दितिपाठः टीकाकृद्व्याख्यानदर्शनात् संशोध्य भाष्यवार्त्तिकसंवादी विहितः। (क) "यत्तु हेत्वाभासेष्वन्तर्भावमस्य कीर्त्तिरकीर्त्तयत्तदतीव सुभाषितम्; क्व हेत्वाभासः! क्व कार्यव्यासङ्गः!! सम्यधारणैव रमणीयेयम्।"—इति न्यायमञ्जर्यां जयन्तभट्टाः। कीर्त्तिसन्दर्भश्च वादन्याये द्रष्टव्यः।

न्यायभाष्यम्

(१)स्वपक्षे दोषाभ्युपगमात्(२)परपक्षे दोषप्रसङ्गो मतानुज्ञा ॥२०॥

यः परेण चोदितं दोषं स्वपक्षेऽभ्युपगम्यानुद्धृत्य वदति—भवत्पक्षेऽपि(३)समानो

न्यायवार्त्तिकम्

स्वपक्षे दोषाभ्युपगमात् परपक्षे दोषप्रसङ्गो मतानुज्ञा । यः परेण चोदितं दोषमनुद्धृत्य भवतोऽप्ययं दोष इति ब्रवीति सा मतानुज्ञा परमतं(४)स्वमतेऽनुजानाति । उदाहरणं—भवांश्चौरः पुरुषत्वादिति, स तं प्रतिब्रूयात् भवानपीति, सोऽभ्युपगम्य दोषं परपक्षेऽभ्यनुजानातीति

न्यायवार्त्तिकतात्पर्यटीका

स्वपक्षदोषाभ्युपगमात् परपक्षे दोषप्रसङ्गो मतानुज्ञा (सू २०) ॥ व्याचष्टे—यः परेण देशितं दोषं स्वपक्षेऽभ्युपगम्य । कथं ज्ञायते अभ्युपगम्यत इत्यत आह—अनुद्धृत्येति । अनभ्युपमेऽसावुद्धरेदिति भावः ।

वृत्तिः

अप्रतिभां लक्षयति—(उत्तरस्याप्रतिपत्तिरप्रतिभा) । उत्तरार्हेण परोक्तं बुद्ध्वाऽपि यत्रोत्तरसमये उत्तरं न प्रतिपद्यते तत्राऽप्रतिभा निग्रहस्थानम् । न चाऽत्राऽननुभाषणस्यावश्यकत्वात् तदेव दूषणमस्त्विति वाच्यम्; परोक्ताननुवादे हि तत्, यत्र परोक्तमनूद्याऽपि नोत्तरं प्रतिपद्यते तत्राऽसाङ्कर्यात् । खसूचन-श्लोकपाठाद्युन्नेया चेयम् ॥ १८ ॥

विक्षेपं लक्षयति—(कार्यव्यासङ्गात् कथाविच्छेदो विक्षेपः) । कार्यव्यासङ्गात् कार्यव्यासङ्गमुद्भाव्येत्यर्थः, ल्यब्लोपे पञ्चमी । कार्यव्यासङ्गश्चासम्भवत्कालान्तरकत्वेनाऽऽरोपितः, तेन तादृशकथाविच्छेदो विक्षेपः । तेन राजपुरुषादिभिराकारणे गृहजनादिभिर्वाऽऽवश्यककार्यार्थमाकारणे, स्वगृहदाहादिकं पश्यतो गमने, (५)वास्तवशिरोरोगादिना प्रतिबन्धे वा न विक्षेपः । ननु कार्यव्यासङ्गोद्भावनं कुतः ? सभाक्षोभादिना चेत्, अननुभाषणमेव, उत्तराप्रतिपत्त्या चेदप्रतिभैवेति चेन्न ; उत्तरावसराभावात् ।

वस्तुतस्तु उत्तरस्फूर्तावपि तद्दूषणसम्भावनया विक्षेपसम्भवात्, यथा क्षितिः सकर्तृका कार्यत्वादित्युक्ते अत्राङ्कुरे व्यभिचारस्तावन्मयोद्भाव्यस्तत्र चेदयं पक्षसमत्वं ब्रूयात्तदा मे किमुत्तरमतोऽत्र महार्णवलिखितं मया च विचारितं किञ्चित् कार्यमुद्भाव्य गृहे गत्वा दृश्यते इत्येवं विक्षेपसम्भवात् ॥ १९ ॥

इति उत्तरविरोधिनिग्रहस्थानचतुष्कप्रकरणम् ।

---

(१) 'स्वपक्ष'—इति ल० ग० ज० झा० टीकादर्शमुद्रितोऽप्ययं पाठः। भाष्य-स्वरसात् वृत्ति-वार्त्तिक-संवादी फ-पुस्तकपाठो गृहीतः। (२) 'परपक्षदोषप्रसङ्ग:'—इति ज०। (३) 'अयं समानः'—इति टि०। (४) 'स्वमतत्वेनानु'—इति क-ख-धृतपाठान्तरम्। (५) 'वा शिरोरोगा'—इति भ०।

न्यायभाष्यम्

दोष इति, स स्वपक्षे दोषाभ्युपगमात्परपक्षे (१)दोषं (२)प्रसञ्जयन् परमतमनुजानातीति मतानुज्ञां नाम निग्रहस्थानमापद्यत इति ॥ २० ॥

न्यायवार्त्तिकम्

निगृहीतो वेदितव्यः। (३)अनभ्युपगच्छता न पुरुषत्वं चौर्यहेतुरिति वक्तव्यम्, किन्तु परस्वेनानतिसृष्टेन सम्बन्धः, तदुत्तरापरिज्ञानान्निगृह्यत इति।

प्रसङ्गविधानान्न निग्रहस्थानमित्यन्ये—अपरे तु ब्रुवते नैतन्निग्रहस्थानं प्रसङ्गविधानात्—नैवायं पश्चादपि तं दोषं प्रतिपद्यते, अपि तु प्रसङ्गं करोति,—यदि पुरुषत्वाच्चौरो भवति भवानपि पुरुषस्तस्माच्चौर इति। एतत्तु नात एव,—यत एवायमुत्तरे वक्तव्ये प्रसङ्गं करोति, तत एवोत्तरापरिज्ञानान्निगृह्यत इति ॥ २० ॥

न्यायवार्त्तिकतात्पर्यटीका

वार्त्तिकं—किं तु परस्वेनानतिसृष्टेनादत्तेनेत्यर्थः। प्रसङ्गविधानान्न निग्रहस्थानमित्यन्य इति। यदि पुरुषत्वाच्चोरोऽहं ततो भवानपि चोरः स्यात। न च भवत एवमिष्टम्। तस्मात्त्वयैवानैकान्तिकत्वान्नायं हेतुरिति प्रसङ्गविपर्ययः। तस्मान्नात्मनश्चोरत्वमनेनाभ्युपगतमिति मतानुज्ञा, नासौ निग्रहस्थानमित्यर्थः। निराकरोति—एतत्तु न। कस्मात्? अत एव। कुतः? (क)यत एवासौ उत्तरे कर्तव्ये प्रसङ्गं करोति अत एव निगृह्यते। यदि हि वादी प्रतिवादिनं ब्रूयात्—सत्यमहं चोर एवेति, तदा किमनैकान्तिकत्वं शक्नुयात्कर्तुम्? तस्मात्पुरुषत्वं न चोरत्वहेतुः, अपि तु परस्वेनादत्तेन संबन्ध इत्युत्तरे कर्तव्ये यदुत्तराभासमाह, तेन ज्ञापयति—नूनमयं सम्यगुत्तरं न जानाति, सम्यगुत्तराज्ञानान्निगृह्यते। तच्चोत्तरापरिज्ञानं मतानुज्ञाद्वारेणोद्भाव्यमानं मतानुज्ञेत्युच्यते ॥ २० ॥

वृत्तिः

मतानुज्ञां लक्षयति—(स्वपक्षे दोषाभ्युपगमात् परपक्षे दोषप्रसङ्गो मतानुज्ञा)। दोषाभ्युपगमाद्दोषमनुद्धृत्येत्यर्थः। यथा शब्दो नित्यः श्रावणत्वादित्युक्ते ध्वनावनैकान्तिकत्वेन हेत्वाभासोऽयमित्युक्तौ शब्दोऽनित्यः कृतकत्वादिति साधिते ध्वनेरपि पक्षसमत्वान्न दोष इत्युक्तौ ; असिद्धत्वात् तवाऽपि हेत्वाभासोऽयमित्युक्तौ। सोऽयं मतानुज्ञया निगृहीतः स्यात्, 'अप्रतिषिद्धमनुमतं भवति' इति स्वपक्षे दोषाभ्युपगमात् ॥ २० ॥

---

(१) 'तं दोषं'—इति टि०। (२) 'प्रसजन्'—इति टि०। (३) 'अनभ्युपगतौ'—इति क-ख-धृतपाठान्तरम्। (क) वार्त्तिके अक्षरवैषम्यं व्यक्तम्। एवमन्यत्रापि द्रष्टव्यम्।

न्यायभाष्यम्

निग्रहस्थानप्राप्तस्यानिग्रहः पर्यनुयोज्योपेक्षणम् ॥ २१ ॥

पर्यनुयोज्यो नाम (१)निग्रहोपपत्त्या चोदनीयः, तस्योपेक्षणं निग्रहस्थानं प्राप्तोऽसीत्यननुयोगः। (२)एतच्च कस्य(२*)पराजय इत्यनुयुक्तया परिषदा वचनीयम्, न खलु निग्रहं प्राप्तः स्वकौपीनं विवृणुयादिति ॥ २१ ॥

न्यायवार्त्तिकम्

निग्रहस्थानप्राप्तस्यानिग्रहः पर्यनुयोज्योपेक्षणम्। यो निग्रहस्थानप्राप्तं न निगृह्णाति स निगृहीतो भवति, निग्रहस्थानप्राप्तस्यापरिज्ञानात्। नान्यवचनादित्यन्ये—अन्ये ब्रुवते, नेदं निग्रहस्थानम् अन्योत्तरस्याभिधानात्—यस्मादसौ निग्रहस्थानप्राप्तं न निगृह्णाति ब्रुवन्नन्यदुत्तर-

न्यायवार्त्तिकतात्पर्यटीका

निग्रहस्थानप्राप्तस्यानिग्रहः पर्यनुयोज्योपेक्षणम् (सू २१) ॥ व्याचष्टे—पर्यनुयोज्यो नामेति। निग्रहस्योपपत्तिः प्रमाणतः सिद्धिस्तयेत्यर्थः। एतत्तु न तावद्वादिनोद्भावनीयं, न ह्यसौ स्वस्वसाधनावद्यमनुन्मत्त उद्भावयति; नापि प्रतिवादिना, न ह्यनुन्मत्त आत्मानमात्मना निगृह्णाति। अपि तु पर्यनुयोज्यं जानानः कस्मादुपेक्षते। तस्मात्सभापतिना वादिप्रतिवादिभ्यामनुयुक्तया वा परिषदा तन्निग्रहस्थानमुद्भावनीयम्। अत्र च तत्त्वनिर्णयावसाने वादे द्वयोरपि निग्रहात्परिषदेव विजयते, जल्पवितण्डयोश्च तत्त्वानपेक्षं पुरुषसामर्थ्यपरीक्षणप्रवृत्तयोः प्रतिवादी निगृह्यते; साधनाभासवादिनाऽपि वादिना स्फुरता प्रतिवादी स्तम्भितो (३)यतः। सम्यक्साधनोपन्यासे विहिते प्रतिवादिन उत्तराप्रतिपत्तिरप्रतिभा, साधनाभासोपन्यासे च उत्तराप्रतिपत्तिः पर्यनुयोज्योपेक्षणमिति विशेषः।

वार्त्तिकं—नान्यवचनादित्येके। यत्र प्रतिवादी तूष्णीं भवति तत्र तूष्णींभावेनैव वादिन उत्तरानर्हतां दर्शयन्नस्य साधनाभासवादितां सूचयति। यत्रास्य दोषोद्भावनं सम्यग्दोषमनुक्त्वा करोति, तत्राप्यसौ दुष्टमुत्तरं ददत्तत्साधनदोषमेव सूचयति। उपदिशन्ति हि वृद्धाः—दुष्टे हि साधने दुष्टोत्तरं देयमिति। तस्मादवचनेऽन्यवचने वा न पर्यनुयोज्योपेक्षणं निग्रहस्थानमुभयथा-

वृत्तिः

पर्यनुयोज्योपेक्षणं लक्षयति—(निग्रहस्थानप्राप्तस्यानिग्रहः पर्य्यनुयोज्योपेक्षणम्)। निग्रहस्थानं प्राप्तवतोऽनिग्रहः निग्रहस्थानानुद्भावनमित्यर्थः। यत्र त्वनेकनिग्रहस्थानपाते (४)ह्येकतरोद्भावनं, तत्र न पर्यनुयोज्योपेक्षणम्, अवसरे निग्रहस्थानोद्भावनत्वावच्छिन्ना-

(१) 'निग्रहस्थानोपपत्त्या'—इति फ०। (२) 'एतच्च एकस्य' वि०। 'एतच्च निग्रहस्थानं निम्नकस्य'—इति टि०। (३) 'यतः सम्यक्साधनोपन्यासो विहितः।' इत्येवं क-ख-मुद्रितपाठः संशोधितः। (४) 'हि'—इति भ-पु० नास्ति।

न्यायभाष्यम्

अनिग्रहस्थाने निग्रहस्थानाभियोगो निरनुयोज्यानुयोगः ॥२२॥

निग्रहस्थानलक्षणस्य मिथ्याऽध्यवसायादनिग्रहस्थाने निगृहीतोऽसीति परं ब्रुवन् निरनुयोज्यानुयोगान्निगृहीतो वेदितव्य इति ॥ २२ ॥

न्यायवार्त्तिकम्

मभिधत्त इति। तच्च नात एव—यत एवासौ निग्रहस्थाने वक्तव्ये अन्यदभिधत्तेऽत एव निगृह्यते, जानानो ह्यसौ किमर्थमन्यद् ब्रवीति ॥ २१ ॥

अनिग्रहस्थाने निग्रहस्थानाभियोगो निरनुयोज्यानुयोगः। अनिग्रहस्थान एवाभिधत्ते निगृहीतोऽसीति, एतन्निग्रहस्थानापरिज्ञानान्निग्रहस्थानमिति ॥ २२ ॥

इति दोषनिरूप्यमतानुज्ञादिनिग्रहस्थानत्रिकप्रकरणम् ॥

न्यायवार्त्तिकतात्पर्यटीका

ऽप्यनुपेक्षणादित्यर्थः। दूषयति—तच्च नेति। साधनस्य हि सम्यञ्चं दोषं जानन् तमेव ब्रूयात्। सोऽयं प्राप्तावसरोऽब्रुवन् विब्रुवन् वा नूनं न सम्यञ्चं दोषं जानाति। निश्चितप्रमाणभावस्य पुरुषस्येङ्गितादिभिरभिप्रायः सूच्यते, न त्वनिश्चितप्रमाणभावस्य। यथाऽऽहुः—

श्रुतिस्मृत्यतिरेकेण युक्तजल्पाकभाषितम्।
तद्यथाश्रति दुष्टं चेद् दुष्टमेवावधार्यताम् ॥

इति छष्ठूक्तं जानानोऽप्ययं किमर्थमन्यद् ब्रवीतीति ॥ २१ ॥

अनिग्रहस्थाने निग्रहस्थानाभियोगो निरनुयोज्यानुयोगः (सू २२)॥ न चायमप्रतिभातो न भिद्यते। सा ह्युत्तराप्रतिपत्तिरियं त्वनुत्तरस्यैवोत्तरत्वेन विप्रतिपत्तिरिति महान् विशेषः। अनेनैव सर्वा जातयो निग्रहस्थानत्वेन संगृहीता भवन्ति। न च हेत्वाभासानामितो न भेदः, ते हि वादिनो निग्रहस्थानमयं तु प्रतिवादिन इति महान्विशेषः। अत एव भवतामपि गाथा—

असाधनाङ्गवचनमदोषोद्भावनं (१)द्वयोः।
निग्रहस्थानमन्यत्तु न युक्तमिति नेष्यते ॥ इति। (क)

अप्रतिभाया एव प्रसज्यप्रतिषेधात्मिकाया अस्या निरनुयोज्यानुयोगस्य भेदं दर्शयति भाष्यकारः—निग्रहस्थानलक्षणस्य मिथ्याध्यवसायात्समारोपादित्यर्थः। सुगमं वार्त्तिकम् ॥ २२ ॥

वृत्तिः

भावस्यैव तत्त्वात्। ननु वादिना कथमिदमुद्भाव्यं स्वकौपीनविवरणस्यायुक्तत्वादिति चेत्? सत्यम्, मध्यस्थैनैवेदमुद्भाव्यं, वादे च स्वयमुद्भावनेऽप्यदोषः ॥ २१ ॥

(१) 'तयोः'—इति ख०। (क) गाथेयं धर्मकीर्त्तिवादन्याये प्रारम्भ एव द्रष्टव्या।

न्यायभाष्यम्

*सिद्धान्तमभ्युपेत्यानियमात् कथाप्रसङ्गोऽपसिद्धान्तः ॥ २३ ॥

कस्यचिदर्थस्य तथाभावं प्रतिज्ञाय प्रतिज्ञातार्थविपर्ययाद् अनियमात् कथां प्रसञ्जयतोऽपसिद्धान्तो वेदितव्यः। यथा न सदात्मानं जहाति, न सतो विनाशो, नासदात्मानं लभते, नासदुत्पद्यत इति सिद्धान्तमभ्युपेत्य स्वपक्षं (१)व्यवस्थापयति—एकप्रकृतीदं व्यक्तं (२)विकाराणामन्वयदर्शनात्। मृदन्वितानां शरावादीनां दृष्टमेकप्रकृतित्वम्, तथा चायं व्यक्तभेदः सुखदुःखमोहान्वितो दृश्यते। तस्मात्सभन्वयदर्शनात् सुखादिभिरेकप्रकृतीदं (३)विश्वमिति। एवमुक्तवाननुयुज्यते—अथ (४)प्रकृतिर्विकार इति कथं लक्षितव्यमिति। यस्यावस्थितस्य धर्मान्तरनिवृत्तौ धर्मान्तरं प्रवर्तते, सा प्रकृतिः। (५)यद् धर्मान्तरं प्रवर्तते(६)निवर्त्तते वा(६*) स विकार इति। सोऽयं प्रतिज्ञातार्थविपर्यासादनियमात् कथां प्रसञ्जयति। प्रतिज्ञातं खल्वनेन—नासदाविर्भवति,

न्यायवार्त्तिकम्

सिद्धान्तमभ्युपेत्यानियमात् कथाप्रसङ्गोऽपसिद्धान्तः। अस्योदाहरणं स्फुटं भाष्ये।

न्यायवार्त्तिकतात्पर्यटीका

सिद्धान्तमभ्युपेत्यानियमात्कथाप्रसङ्गोऽपसिद्धान्तः (सू २३)॥ 'अभ्युपेत्ये'त्यस्य व्याख्यानं—कस्यचिदर्थस्य तथाभावं प्रतिज्ञायेति। प्रतिज्ञातार्थविपर्ययादिति—अभ्युपेतार्थविपर्ययात्, सिद्धान्तविपर्ययादित्यर्थः। तदेत'दनियमादि'त्यस्य व्याख्यानम्। तत्र सांख्यीयं सिद्धान्तमाह—यथा न सदिति। तस्य पर्यायान्तरेण कथनं—न सत इति। 'नासदात्मान'-मित्यस्य पर्यायान्तरेण विवरणं 'नासदुत्पद्यत' इति। सोऽयं सिद्धान्तः सांख्यानां, तमभ्युपेत्य तद्विपर्ययात्कथाप्रसङ्गमाह—स्वपक्षं व्यवस्थापयति। पक्षावस्थानं दर्शयति ;—एका प्रकृतिर्व्यक्तस्योपलभ्यमानस्यार्थजातस्य युक्तेति प्रतिज्ञा। 'विकाराणा'मिति 'व्यक्त'स्यैवानुवादः, अन्वयदर्शनादिति हेतुः। मृदन्वितानामिति साधर्म्योदाहरणम्। तथाऽयं व्यक्तभेदः सुखदुःखमोहसमन्वितो गृह्यते इत्युपनयः। निगमनमाह—तस्मात्समन्वयदर्शनाद्विश्वव्यक्तस्य, कैरित्यपेक्षायामुत्तरं—सुखादिभिरिति। एकप्रकृतिः सर्वो विकार इति सेयं कथा। सिद्धान्तमभ्युपेत्यैवमुक्तवान् सांख्यो नैयायिकेन पर्यनुयुज्यते दूषणाय पृच्छयते—अथ प्रकृतिर्विकार इति कथं लक्षितव्यमिति। स एवं नैयायिकेन पृष्टः सांख्य उत्तरमाह—यस्यावस्थितस्य मृदादेर्धर्मान्तरनिवृत्तौ शरावविनाशे (क)यद्धर्मान्तरं मणिकादि प्रवर्तते असदेव जायते सा प्रकृतिर्मृदादि। यद्धर्मान्तरं निवर्तते प्रवर्त्तते वा, स विकार इति। एतस्मिन्नुदाहरणेऽपसिद्धान्तं योजयति—सोऽयं प्रतिज्ञातार्थस्य सिद्धान्तार्थस्य वादी विपर्ययादनियमात्कथां प्रसञ्जयति। प्रतिज्ञातः सिद्धान्तः खल्वनेन—नासदाविर्भवतीति उत्पद्यते, न संस्तिरोभवतीति

(१) 'अवस्थापयति'—इति फ०। (२) 'विकाराणां समन्वय'—इति फ०। (३) 'शरीरम्'—इति जं-ग-ल०। 'व्यक्तम्'—इति टि०। (४) 'प्रकृतिविकारः'—इति ज०। (५) 'यच्च'—इति ज-ग-ल०। (६) इदं—ज-ग-ल-पु० नास्ति। (क) अत्र यदिति प्रमादादधिकं सन्निविष्टमिति प्रतिभाति।

* मुद्रितन्यायपरिशिष्टे 'सिद्धान्तमभ्युपेत्ये'तिसूत्रपाठो दृश्यते। व्याख्यानं तु तत्रोदयनस्य—"अभ्युपगतसिद्धान्तातिक्रमेण साधनदूषणयोरभिधानमपसिद्धान्त इत्यर्थ" इति।

न्यायभाष्यम्

न सत्तिरोभवतीति। सदसतोश्च तिरोभावाविर्भावमन्तरेण न कस्यचित् प्रवृत्तिः प्रवृत्त्युपरमश्च भवति। मृदि खल्ववस्थितायां भविष्यति शरावादिलक्षणं धर्मान्तरमिति प्रवृत्तिर्भवति, अभूदिति च प्रवृत्त्युपरमः। तदेतन्मृद्धर्माणामपि न स्यात्। एवं प्रत्यवस्थितो यदि सतश्चात्महानमसतश्चात्मलाभमभ्युपैति, (१)तदस्यापसिद्धान्तो निग्रहस्थानं भवति। अथ नाभ्युपैति, पक्षोऽस्य न सिध्यति ॥ २३ ॥

न्यायवार्त्तिकम्

प्रतिज्ञातार्थव्यतिरेकेणाभ्युपगतार्थपरित्यागान्निगृह्यत इति ॥ २३ ॥

न्यायवार्त्तिकतात्पर्यटीका

न विनश्यतीति। तथाऽपि कस्मादनेन सिद्धान्तो बाध्यते, अथ सिद्धान्तेनैव कस्मान्न बाध्यत इत्यत आह—सदसतोश्चेति। इदं हि लौकिकं प्रमाणसिद्धं सिद्धान्तस्त्वभ्युपगममात्रसिद्धोऽप्रामाणिकः, तस्मादनेन सिद्धान्तो बलवता बाध्यते। तदेतन्मृद्धर्माणामपि न स्यादिति, न केवलं प्रेक्षावतां कर्तृणामपि तु सद्धर्माणामप्युत्पादविनाशौ प्रवृत्त्युपरमौ दृश्यमानौ न स्यातामित्यर्थः। एवं प्रत्यवस्थितः सांख्यो नैयायिकेन पृष्टो यद्यसत आत्मलाभं सतश्चात्महानमभ्युपैति, ततोऽस्यापसिद्धान्तो भवति। अथ नाभ्युपैति, पक्षोऽस्य न सिद्ध्यति। विकारो ह्यनेन पक्षीकृत एकप्रकृतित्वेन, तत्र (२)विकारलक्षणाभावेन(२*) विकाराणामनिरूपणात् तदभावे न प्रतिज्ञार्थो न च हेत्वर्थः, आश्रयासिद्धत्वात्।

नन्वेवं प्रतिज्ञातार्थविरोधित्वात्सतो निरोधस्यासतश्चोत्पादस्य हेत्वाभास एव निग्रहस्थानं भवेत्, प्रतिज्ञाविरोधो वेत्याशङ्क्य वार्त्तिककार आह—प्रतिज्ञातार्थव्यतिरेकेणेति। न ह्यत्रैकप्रकृतयो विकाराः एकप्रकृतिकत्वादित्ययं हेतुः साध्यविरुद्धेन व्याप्त उद्भावितो येन विरुद्धो भवेत्। नाप्येकप्रकृतिकत्वं विकाराणां शब्दतो विरुद्धं समन्वयेन हेतुना, येन प्रतिज्ञाविरोधो भवेत्। वैभवमात्रेण च 'प्रतिज्ञाहेत्वोर्विरोध' (५।२।४ सू०) इत्यत्रोक्तं वार्त्तिककृता—(क)स्वसिद्धान्तस्य गोत्वादेर्नित्यत्वविरोधाद्विरोध इति। अपि च तत्र बलवता

वृत्तिः

निरनुयोज्यानुयोगं लक्षयति—(अनिग्रहस्थाने निग्रहस्थानाभियोगो निरनुयोज्यानुयोगः); अवसरे यथार्थनिग्रहस्थानोद्भावनातिरिक्तं यन्निग्रहस्थानोद्भावनं तदित्यर्थः। एतेनानवसरे निग्रहस्थानोद्भावने एकनिग्रहस्थाने निग्रहस्थानान्तरोद्भावने च नाऽव्याप्तिः।

(१) 'तदास्याप'—इति फ०। 'तस्याप'—इति टि०। (२) अयमंशो नास्ति ख०। (क) ११७१ पत्रे "स प्रसिद्धस्य गोत्वादे"रिति वार्त्तिके यथादर्शं मुद्रितम्। परं तु धर्मकीर्त्त्युद्धृततत्रत्य-सन्दर्भदर्शनात् तात्पर्यधृततत्सन्दर्भदर्शनाच्च तत्रत्यवार्त्तिके 'प्रसिद्धस्ये'त्यत्र 'स्वसिद्धस्ये'ति प्रकृतः पाठः प्रतिभाति।

न्यायभाष्यम्

हेत्वाभासाश्च यथोक्ताः ॥ २४ ॥

हेत्वाभासाश्च निग्रहस्थानानि। किं पुनर्लक्षणान्तरयोगाद् (१)हेत्वाभासा निग्रहस्थानत्वमापन्नाः यथा प्रमाणानि प्रमेयत्वमित्यत आह—यथोक्ता इति। हेत्वाभासलक्षणेनैव निग्रहस्थानभाव इति।

न्यायवार्त्तिकम्

हेत्वाभासाश्च यथोक्ताः। यथैव विभक्ता लक्षणेन, तथैव तेषां निग्रहस्थानभाव इति।

न्यायवार्त्तिकतात्पर्यटीका

सिद्धान्तेनानैकान्तिकदेशना बाध्यते, इह तु सिद्धान्त एव बाध्यते दुर्बल इत्युदाहरणपौनरुक्त्यमपि नास्ति। तस्माद्यत्र प्रतिज्ञार्थेन विरोधः तत्र विरुद्धो हेत्वाभासः प्रतिज्ञाविरोधो वा। इह तु प्रतिज्ञार्थव्यतिरेकेणाभ्युपगमान्तरेण विरोध इति पुरुषस्य पूर्वापरविरुद्धार्थाभिधायिनोऽसामर्थ्यान्निग्रहस्थानं जल्पवितण्डयोरिति सिद्धम् ॥ २३ ॥

हेत्वाभासाश्च यथोक्ताः (सू २४) ॥ व्याचष्टे—हेत्वाभासाश्चेति। यद्यनुक्तमपि किंचिदवशिष्यते निग्रहस्थानं त'च्च'कारेण समुच्चेयम्। 'यथोक्ता' इतिसूत्रावयवनिराकरणीयामाशङ्कामाह—किं पुनर्लक्षणान्तरयोगाद्धेत्वाभासा निग्रहस्थानतामापद्यन्ते(क) यथा प्रमाणानि प्रमेयत्वं, तेषामेव प्रत्यक्षादीनामुपलब्धिसाधनत्वेन लक्ष्यमाणानां प्रमाणत्वं, प्रमाव्याप्यतया प्रमेयत्वं, लक्षणान्तरेण प्रमाणानि प्रमेयत्वमापद्यन्ते—इति शङ्कायाः संभवादत आह भगवान् सूत्रकारः—यथोक्ता इति।

वृत्तिः

सोऽयं चतुर्धा—छलं जातिराभासोऽनवसरग्रहणं च। आभासो व्यभिचारादावसिद्ध्याद्युद्भावनम्। अनवसरग्रहणं चाऽकाले एवोद्भावनं, यथा—त्यक्ष्यसि चेत् प्रतिज्ञाहानिर्विशेषयसि चेद्धेत्वन्तरम्। एवमवसरमतीत्य कथनमपि, यथा—उच्यमानग्राह्यस्यापशब्दादेः परिसमाप्तौ, एवमनुक्तग्राह्याज्ञानाद्यननुभाषणावसरेऽनुद्भाव्य बोधाविष्करणानुभाषणप्रवृत्ते वादिनि तदुद्भावनमित्यादिकमूह्यम् ॥ २२ ॥

समाप्तं दोषनिरूप्यनिग्रहस्थानत्रिकप्रकरणम्।

अपसिद्धान्तं लक्षयति—(सिद्धान्तमभ्युपेत्यानियमात् कथाप्रसङ्गोऽपसिद्धान्तः)। सिद्धान्तं—स्वशास्त्रकाराभ्युपगतमर्थं स्वीकृत्यानियमात् तन्नियमप्रच्यवात् कथाप्रसङ्ग इति। (२)तथा च कथायां स्वीकृतसिद्धान्तप्रच्यवोऽपसिद्धान्तः(२*)। तथा च साङ्ख्यमतेनाहं वदिष्यामीत्यभ्युपेत्याऽऽरब्धायां कथायाम् आविर्भावस्याऽऽविर्भावाभ्युपगमेऽनवस्थेति दूषणोद्धारायाऽऽविर्भावस्याऽसत उत्पत्तिं यद्यभ्युपैति, तदाऽपसिद्धान्तः। यस्त्वेकदेशिमतेन कथामारभते तस्य शास्त्रकाराभ्युपगमविरोधो नापसिद्धान्त इति बोधयितुमभ्युपेत्येत्युक्तम्। सौगतास्त्वपसिद्धान्तं दूषणं न मन्यन्त इत्यन्यदेतत् ॥ २३ ॥

---

(१) 'हेत्वाभासाश्च'—इति ग०। (२) इदं—ल-पु० नास्ति। (क) भाष्ये अक्षरविसंवादी द्रष्टव्यः।

न्यायभाष्यम्

त इमे प्रमाणादयः पदार्था उद्दिष्टा लक्षिताः परीक्षिताश्चेति ॥ २४ ॥

(१)योऽक्षपादमृषिं न्यायः प्रत्यभाद्वदतां वरम् ।
तस्य वात्स्यायन इदं भाष्यजातमवर्तयत् ॥

इति श्रीवात्स्यायनीये न्यायभाष्ये पञ्चमोऽध्यायः ।

न्यायवार्त्तिकम्

त इमे प्रमाणादय उद्दिष्टाः प्रथमसूत्रे, लक्षिताः प्रथमेऽध्याये, परीक्षिताः शेषेष्विति त्रिविधा तत्त्वस्य परिसमाप्तिरुक्ता वेदितव्येति ॥ २४ ॥

इति कथकान्योक्तिनिरूप्यनिग्रहस्थानद्वयप्रकरणम् ॥

जातीनां सप्रपञ्चानां निग्रहस्थानलक्षणम् ।
शास्त्रस्य चोपसंहारः पञ्चमे परिकीर्तितः ॥
यदक्षपादप्रतिभो भाष्यं वात्स्यायनो जगौ ।
अकारि महतस्तस्य भारद्वाजेन वार्त्तिकम् ॥

इति श्रीपरमर्षि-भारद्वाज-पाशुपताचार्यश्रीमदुद्द्योतकरकृतौ न्यायवार्त्तिके पञ्चमोऽध्यायः समाप्तः ।

——(:*:)——

न्यायवार्त्तिकतात्पर्यटीका

सकलशास्त्रार्थमुपसंहरति—त इमे प्रमाणादय उद्दिष्टा लक्षिताः परीक्षिताश्चेति । 'इति' शास्त्रपरिसमाप्तौ ।

वार्त्तिककारः संगृह्णाति—जातीनां सप्रपञ्चानामिति । निग्रहस्थानलक्षणमिति समासेन जातीनामपि प्रतिवादिनिग्रहस्थानेऽस्ति निवेश इति सूचयति । शास्त्रस्य चोपसंहार इति, 'त इमे प्रमाणादय उद्दिष्टा' इत्यनेन कृत इत्यर्थः ॥ २४ ॥

वृत्तिः

क्रमप्राप्ते हेत्वाभासलक्षणे वक्तव्ये तदकथने बीजमाह—(हेत्वाभासाश्च यथोक्ताः) । चः पुनरर्थे । हेत्वाभासाः पुनर्यथा येन रूपेण पूर्वमुक्तास्तेनैव रूपेण तेषां निग्रहस्थानत्वमिति न लक्षणान्तरमपेक्षितमिति ।

अत्र 'च'कारस्य दृष्टान्ते साधनवैकल्यादिसमुच्चायकत्वमिति केचित् । तन्न ; यथोक्ता इत्यस्याऽनन्वयापत्तेरिति ॥ २४ ॥

इति कथकान्योक्तिनिरूप्यनिग्रहस्थानद्वयप्रकरणम् ।

समाप्तं निग्रहस्थानविशेषलक्षणम् ।

---

(१) नास्त्ययं श्लोकः—ज-पुस्तके ।

न्यायवार्त्तिकतात्पर्यटीका

यदलम्भि किमपि पुण्यं दुस्तरकुनिबन्धपङ्कमग्नानाम् ।
उद्द्योतकरगवीनामतिजरतीनां समुद्धरणात् ॥ १ ॥
संसारजलधिसेतौ वृषकेतौ सकलदुःखशमहेतौ ।
तस्य फलमखिलमर्पितमेतेन प्रीयतामीशः ॥ २ ॥
तत्त्वज्ञानप्रसवसुरभिर्गूढबह्वर्थजाता
सेयं मोक्षामृतमयफला सूक्तिमञ्जुप्रवाला ।
प्रत्यक्षाप्तागममयमहान्यायमूला मनोज्ञा
टीकावीरुद्भवतु कृतिनां नन्दिनी षट्पदानाम् ॥ ३ ॥
क्रूराः कृतोऽञ्जलिरयं बलिरेष दत्तः
कायो मया प्रहरतात्र यथाभिलाषम् ।
अभ्यर्थये वितथवाङ्मयपांशुवर्षै-
र्मा माऽऽविलीकुरुत कीर्त्तिनदीः परेषाम् ॥ ४ ॥

इति मिश्रश्रीवाचस्पतिविरचितायां न्यायवार्त्तिकतात्पर्यटीकायां पञ्चमोऽध्यायः समाप्तः ।

वृत्तिः

एषा मुनिप्रवरगोतमसूत्रवृत्तिः
श्रीविश्वनाथकृतिना सुगमाऽल्पवर्णा ।
श्रीकृष्णचन्द्रचरणाऽम्बुजचञ्चरीक-
श्रीमच्छिरोमणिवचःप्रचयैरकारि ॥ १ ॥
(१)रसबाणतिथौ शकेन्द्रकाले
बहुले कामतिथौ शुचौ सिताहे ।
अकरोन्मुनिसूत्रवृत्तिमेतां
ननु वृन्दाविपिने(२)स विश्वनाथः ॥ २ ॥
कठिनार्थपदां कृतिं ममैतां
मृदुनि त्वच्चरणे समर्पयामि ।
अपराधमिमं प्रभो क्षमेथा
ननु नारायण देव दीनबन्धो ॥ ३ ॥

इति श्रीमन्महामहोपाध्यायश्रीमद्विद्यानिवासभट्टाचार्यात्मजश्रीविश्वनाथभट्टाचार्यकृतायां न्यायसूत्रवृत्तौ पञ्चमोऽध्यायः समाप्तः ।

समाप्तेयं सूत्रवृत्तिः ।

(१) इतः श्लोकद्वयं—भ-पुस्तके नास्ति। (२) 'स एष'—इति ख० ।

चतुर्थाध्याये १ आह्निके ६७ सूत्राणि, २ आह्निके ५१ सूत्राणि, मिलित्वा ११८ सूत्राणि।
पञ्चमाध्याये १ आह्निके ४३ सूत्राणि, २ आह्निके २४ सूत्राणि, मिलित्वा ६७ सूत्राणि॥

पूर्वसूरिवरयोः कृतिशेषे
शेष एष मिलितो मम यत्नः।
भेजिरे हि भृगुपादमहिम्ना
केशवोरसि रजांसि प्रतिष्ठाम्॥

तारानाथामरेन्द्राभ्यां यदारब्धमपूरितम्।
श्रीहेमन्तकुमारेण तत् पूरितमबुद्धिना॥

प्रष्ठयोर्वर्त्मनि क्षुण्णे प्रवृत्तेनाल्पमेधसा।
पूर्वसंस्कर्त्तृवरयोः करयोः कृतिरर्पिता॥

इति भाष्य-वार्त्तिक-तात्पर्य्य-वृत्त्युपेत-न्यायदर्शनसंस्करणं सम्पूर्णम्॥